परम पूज्य तपश्चर्या-चक्रवर्ती पट्टाधीशाचार्यश्री

सुविधिसागर जी महाराज

के

50 वें जन्मदिवस के पावन अवसर पर

सुविधि-परिवार के द्वारा आयोजित

जिनवाणी-महोत्सव

सहस्रग्रन्थसंग्रह

* जन्मदिवस 19-03-1971 * मुनिदीक्षा-11-05-1989 * आचार्यपद- 20-06-2004

पट्टाधीशपद- 24-12-2010 (20-06-2004 को की गई उद्घोषणा के अनुसार)

परम पूज्य आचार्यश्री सन्मतिसागर जी महाराज के द्वारा की गई उद्घोषणा:-

हमारी समाधि के पश्चात् आपको इस संघ के संचालकपद पर नियुक्त करते हैं।

(अंकलीकर वाणी-जुलाई 2004) (अक्षयज्योति-अक्तूबर 2004)

वाचस्पत्यम्

भाग – 06

लेखक

श्री तारानाथ भट्टाचार्य

प्रकाशक

चौखम्बा संस्कृत सीरीज

वाराणसी (उत्तरप्रदेश)

(परम्परानायक)

परम पूज्य चारित्र–चक्रवर्ती,
आचार्यश्री आदिसागर जी महाराज
(अंकलीकर)

(द्वितीय पट्टाधीश)

परम पूज्य तीर्थभक्त–शिरोमणि,
आचार्यश्री महावीरकीर्ति जी महाराज

(तृतीय पट्टाधीश)

परम पूज्य सिद्धान्त–चक्रवर्ती,
आचार्यश्री सन्मतिसागर जी महाराज

(चतुर्थ पट्टाधीश)

परम पूज्य तपश्चर्या–चक्रवर्ती, आचार्यश्री सुविधिसागर जी महाराज

दिगम्बर साधु निरन्तर पगविहार करते रहते हैं। ग्रन्थभण्डार को साथ में रख कर विहार करना अशक्यप्रायः होता है। फलतः उनको ग्रन्थों के सन्दर्भ देखने में असुविधा होती है। उनकी सुविधा के लिये इस कोश का निर्माण किया गया है। इस कोश के निर्माण में किसी भी प्रकार का व्यापारिक हेतु नहीं है।

आर्थिक दृष्टि से सम्पन्न श्रावकबन्धुओं से निवेदन है कि वे ग्रन्थ का विक्रय कर अध्ययन करने की परम्परा को कायम रखें।

मुखपृष्ठ पर हमने ग्रन्थकर्त्ता, अनुवादक, सम्पादक, प्रकाशक आदि के नाम दिये हैं। किसी संस्थान का कर्तुत्व हमने लुप्त नहीं किया है।

इस कोश के लिये आवश्यक ग्रन्थ हमें अनेक स्रोतों से प्राप्त हुये हैं। हम उन सभी का आभार मानते हैं।

सुविधि–परिवार

वाचस्पत्यम्

(बृहत् संस्कृताभिधानम्)

षष्ठो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१
मुद्रक : विद्याविलास प्रेस, वाराणसी-१

The
Chowkhamba Sanskrit Series Office,
P. O. Box 8, Varanasi-1
(INDIA)
1962
Phone : 3145

PK
925
137
V. 6.
920665

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 94

VACHASPATYAM

(A Comprehensive Sanskrit Dictionary)

COMPILED BY

SRI TARANATHA TARKAVACHASPATI

Professor of Grammar and Philosophy
Govt. Sanskrit College, Calcutta.

VOL. VI

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1 (India) Phone : 3145
1962

LIBRARY
AUG 17 1964
UNIVERSITY OF TORONTO

920665

पूर्णमुख पु॰ जनमेजयसर्पसत्रे दग्धनागभेदे भा॰ आ॰५७अ॰।

पूर्णयोग पु॰ बाहुयुद्धभेदे तत्प्रकारः भा॰स॰२२अ॰उक्तो यथा "ततस्तौ नरशार्दूलौ बाहुशस्त्रौ समीयतुः। वीरौ परमसंहृष्टावन्योऽन्यजयकाङ्क्षिणौ। करग्रहणपूर्वं तु कृत्वा पादाभिवन्दनम्। कक्षैः कक्षां विधुन्वानावास्फोटं तत्र चक्रतुः। स्कन्धे दोर्भ्यां समाहत्य निहत्य च मुहुर्मुहुः। अङ्गमङ्गैः समाश्लिष्य पुनरास्फालनं विभो!। चित्रहस्तादिकं कृत्वा कक्षाबन्धं च चक्रतुः। गलगण्डाभिघातेन सस्फुलिङ्गेन चाशनिम्। बाहुपाशादिकं कृत्वा पादाहतशिरावुभौ। उरोहस्तं ततश्चक्रे पूर्णकुम्भौ प्रयुज्य तु। करसंपीडनं कृत्वा गर्जन्तौ वारणाविव। नर्दन्तौ मेघसङ्काशौ बाहुप्रहरणावुभौ। तलेनाहन्यमानौ तु अन्योऽन्यं कृतवीक्षणौ। सिंहाविव सुसंक्रुद्धावाकृष्याकृष्य युध्यताम्। अङ्गेनाङ्गं समापीड्य बाहुभ्यामुभयोरपि। आवृत्य बाहुभिश्चापि उदरं च प्रचक्रतुः। उभौ कट्यां सुपार्श्वे तु तक्षवन्तौ च शिक्षितौ। अधोहस्तं स्वकण्ठे तूदरस्योरसि चाक्षिपत्। सर्वातिक्रान्तमर्यादं पृष्ठभङ्गं च चक्रतुः। सम्पूर्णमूर्च्छं बाहुभ्यां पूर्णकुम्भं प्रचक्रतुः। तृणपीडं यथाकामं पूर्णयोगं समुष्टिकम्। एवमादीनि युद्धानि प्रकुर्वन्तौ परस्परम्" मू॰। "कक्षैर्दोर्मूलैः कक्षां प्रकोष्ठगतां रज्जुं धुन्वानौ यत्र यत्र कक्षे आस्फोटं चक्रतुः बाहुमूलास्फालनेनाङ्गदवस्त्ररज्जुशेषं कम्पयन्तावित्यर्थः। चित्रहस्तादिकं हस्तस्यातिवेगेनाकुञ्चनप्रसारणोपर्य्यधश्चालनसहीकरणानि चित्रहस्ताः। आदिपदात् पादस्याप्याकुञ्चनादि। कक्षाबन्धं परस्परकक्षायां हस्तौ कृत्वा बन्धनम् गले गण्डेन भालदेशेनाभिघातस्तेन पाषाणसदृशाङ्गत्वात्तयोरभिघातेन विस्फुलिङ्गोत्पत्त्याऽशनिं वज्रमिव ससृजतुरित्यर्थः। बाहुपाशादिकं चरणपाशादिग्रन्थार्थः। पादाभ्यामाहताः शिराः स्नायवो याभ्यां तौ दृढप्रहारेण नाडीपर्य्यन्तमपि वेदनावन्तावित्यर्थः। उरोहस्तमुरसि चपेटाप्रहारं पूर्णकुम्भौ पटिताङ्गुलिभ्यां हस्ताभ्यां परशिरसः पीडनं पूर्णकुम्भः द्वित्वं परस्परं द्वावपि चक्रतुरिति वक्तुम्। तलेन चपेटया, आवृत्य जत्रुदेशे पृष्ठं कृत्वा बाहुभिर्बाहुभ्यां द्वावपि मिथ उदरमादाय प्रचक्रतुः प्रचिक्षिपतुः कृ विक्षेपेऽस्य रूपम्। एवं कट्यां सुपार्श्वे च प्रचक्रतुः। तक्षवन्तौ तक्षस्तनूकरणं गात्रसङ्कोच इत्यर्थः तद्वन्तौ। अधोहस्तमुदरस्याधःस्थं कृत्वा हस्ताभ्यामुदरमावेष्ट्य स्वकण्ठे स्वोरसि च कण्ठोरःसमीपे आनीयाक्षिपदास्फालितवान्। पृष्ठस्य भूमिस्पर्शेन जातं भङ्गं पराभवं बाहुभ्यामुदरादीनि पीडने सम्पूर्णमूर्च्छम्" नीलकण्ठः।

पूर्णवैनाशिक पु॰ सर्ववैनाशिके सर्वशून्यत्ववादिनि बौद्धभेदे सर्ववैनाशिकोऽप्यत्र।

पूर्णहोम पु॰ पूर्णो होमः। पूर्णाहुतौ।

पूर्णा स्त्री "नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात्" ज्यो॰त॰उक्ते पक्षयोः पञ्चमीदशमीपञ्चदशीरूपे तिथिभेदे

पूर्णाङ्गद पु॰ नागभेदे भा॰ आ॰ ५७ अ॰।

पूर्णान(ल)क न॰। वर्द्धापनायाम् पूर्णपात्रे मेदि॰ पूर्णपात्रशब्दे दृश्यम्। [कारे विहङ्गभेदे च।

पूर्णानन्द पु॰ पूर्ण आनन्दो यत्र। १परमेश्वरे २तन्त्रप्रकरण-

पूर्णाभिषेक पु॰ कर्म॰। तन्त्रोक्ते कौलाभिषेकभेदे।

पूर्णायुस् पु॰ १प्राधेये गन्धर्वभेदे भा॰आ॰६५अ॰। पूर्णमायुरस्य। २शतायुष्के कर्म॰। ३शतवर्षमिते जीवनकाले न॰।

पूर्णावतार पु॰ कर्म॰। १नृसिंहे २रामे ३श्रीकृष्णे च तेषां भगवतः संपूर्णावतारत्वात् तथात्वं अन्येषान्तु कलावतारत्वम्। "पूर्णो नृसिंहो रामश्च श्वेतद्वीपविराड् विभुः। परिपूर्णतमः कृष्णो वैकुण्ठे गोकुले स्वयम्। वैकुण्ठे कमलाकान्तो रूपभेदाच्चतुर्भुजः। गोलोके गोकुले राधाकान्तोऽयं द्विभुजः स्वयम्" ब्रह्मवै॰जन्मख॰२८अ॰ उक्तेस्तेषां तथात्वम्।

पूर्णाशा स्त्री नदीभेदे भा॰ भी॰ ९ अ॰।

पूर्णाहुति स्त्री पूर्णा आहुतिः। होमसमाप्तौ होम्यायामाहुतौ शत॰ब्रा॰ २२।१।

पूर्णि स्त्री पॄ—णिङ्। पूर्त्तौ पूर्णिमा।

पूर्णिका स्त्री नासाच्छिन्नीनामकखगे त्रिका॰।

पूर्णिमा स्त्री पूर्णिं पूर्त्तिं मिमीते मा—क। १पौर्णमास्यां तिथौ मरीचेः कलायां पत्न्यां जाते २कन्याभेदे "भार्य्या मरीचेस्तु कला सुषुवे कर्दमात्मजा। कश्यपं पूर्णिकाञ्चैव ययोरापूरितं जगत्। पूर्णिकाऽसूत विरजं विश्वगञ्च परन्तप!।" भाग॰४।१।१२ तत्तिथिस्वरूपं द्वैधे खण्डभेदस्य कर्मभेदे ग्राह्यतादिकं च कालमा॰ न्युक्तमपि यथा। "तत्र शुक्लायां पञ्चदश्यां चन्द्रमण्डलं स्वकलाभिः सर्वात्मना पूर्य्यते सेयं मण्डलपरिपूर्त्तिः पूर्णिमेत्यनेन नाम्ना ज्ञायते। तदुक्तं ब्रह्माण्डमत्स्यपुराणयोः "कालद्वये व्यतिक्रान्ते दिवापूर्णौ परस्परम्। चन्द्रादित्यौ प॰

राह्णे तु पूर्णत्वात् पूर्णिमा स्मृता” इति। अह्नः परो भागः पराह्णः सूर्य्यास्तमयकाल इत्यर्थः। तत्र यथादित्यः संपूर्णमण्डलः सन्नस्तमेति तथोत्तरक्षणे चन्द्रः सम्पूर्णमण्डलः सन्नुदेतीति। दृष्टान्तदार्ष्टान्तिकभावस्य विवक्षितत्वाद् द्वयोरादित्यचन्द्रयोरुपन्यासः। यथा मण्डलपूर्णत्वविवक्षया पूर्णिमाशब्दः प्रयुज्यते तथा मासपूर्णत्वविवक्षया पौर्णमासीशब्दः प्रयुज्यते। तदुक्तं भविष्योत्तरे “पौर्णमासी महाराज! सोमस्य दयिता तिथिः। पूर्णो मासो भवेद् यस्मात् पौर्णमासी ततः स्मृता” इति। पूर्णिमामावास्ययोर्विस्तरेण मासान्तत्वं मासप्रस्तावे दर्शितम्। अतएव पौर्णमास्यामत्यन्तविप्रकर्षे सत्यनभिभूतत्वाच्चन्द्रमण्डलः सम्पूर्णो दृश्यते। तावेतौ सन्निकर्षविप्रकर्षौ गोभिल आह “यः परो विप्रकर्षः सूर्य्याचन्द्रमसोः सा पौर्णमासी। यः परः सन्निकर्षः सामावास्येति”। तदेवं पर्व्वाभिधायाः पञ्चदश्याः पूर्णिमादिनामनिर्वचनेन स्वभावविशेषो दर्शितो भवति। ते च पूर्णमास्यामावास्ये प्रत्येकं द्विविधे। तच्च पुराणे दर्शितम् “राका चानुमतिश्चैव पौर्णमासी द्विधा स्मृता। सिनीवाली कुहूश्चैवममावास्या द्विधैव तु” इति। एतासां चतसृणां स्वरूपं काठकशाखायां विस्पष्टं श्रूयते “या पूर्व्वा पौर्णमासी सानुमतिर्योत्तरा सा राका। या पूर्व्वाऽमावास्या सा सिनीवाली योत्तरा सा कुहूः” इति। वृद्धवशिष्ठोऽपि “राका चानुमतिश्चैव पौर्णमासीद्वयं विदुः। राका संपूर्णचन्द्रा स्यात् कलोनाऽनुमतिर्मता। पौर्णमासी दिवा दृष्टे शशिन्यनुमतिः स्मृता। रात्रिदृष्टे पुनस्तस्मिन् सैव राकेति कीर्त्तिता”। मत्स्यब्रह्माण्डपुराणयोः “यस्मात्तामनुमन्यन्ते पितरो दैवतैः सह। तस्मादनुमतिर्नाम पूर्णिमा प्रथमा स्मृता। अत्यर्थं राजते यस्मात् पौर्णमास्यां निशाकरः। रञ्जनाच्चैव चन्द्रस्य राकेति कवयो विदुः” इति। “अथ पञ्चदशी निर्णीयते। सा द्विविधा पौर्णमास्यमावास्या च। तत्र पौर्णमास्यां परस्परविरुद्धानि वाक्यान्युपलभ्यन्ते। तत्र परविद्धाया ग्राह्यत्वं विष्णुधर्म्मोत्तरे “एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्द्दशी। अमावास्या तृतीया च उपोष्याः स्युः परान्विताः”। परविद्धानिषेधः पूर्व्वविद्धाविधिश्च ब्रह्मपुराणपद्मपुराणयोः “प्रतिपत्सद्वितीया स्याद् द्वितीया प्रतिपद्युता। चतुर्थीसंयुता या च सा तृतीया फलप्रदा। पञ्चमी च प्रकर्त्तव्या षष्ठ्या युक्ता तु नारद। षष्ठी च सप्तमीयुक्ता ...” “षष्ठ्येकादश्यमावास्या पूर्व्वविद्धा तथाऽष्टमी। पूर्णिमा परविद्धा च नोपोष्यं तिथिपञ्चकम्। पूर्व्वविद्धा तु कर्त्तव्या सप्तमी व्रतिभिर्नरैः। पौर्णमासी, नदीपारपराया निम्नगाकूला” इति। पूर्व्वविद्धाप्युदाहृता च युग्मवाक्ये। “चतुर्दश्या च पूर्णिमेति”। एवं परस्परविरोधे सति या व्यवस्था सा ब्रह्मवैवर्त्ते दर्शिता “पूर्व्वविद्धा न कर्त्तव्या अमावास्या च पूर्णिमा। वर्ज्जयित्वा मुनिश्रेष्ठ! सावित्रीव्रतमुत्तमम्” इति। सावित्री राजकन्या तया चीर्णं व्रतं सावित्रीव्रतम्। तच्च भविष्योत्तरपुराणे दर्शितम् “कथयामि कुलस्त्रीणां महिम्नो वर्द्धनं परम्। यथा चीर्णं व्रतं पूर्व्वं सावित्र्या राजकन्यया” इति। एतच्च पौर्णमास्याममावास्यायां च विहितम्। तस्मिन् व्रते पूर्व्वविद्धा ग्राह्या। व्रतान्तरे पूर्व्वविद्धा न कर्त्तव्या किन्तु परविद्धैव कर्त्तव्येति परस्परविरुद्धस्य शास्त्रद्वयस्य व्यवस्था। यदा तु चतुर्द्दश्यष्टादशनाडिका भवति तदा सावित्रीव्रतमपि तत्र परित्याज्यम्। “भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति” स्मृतेः। योऽयं पौर्णमासीनिर्णयः स एवामावास्यायामप्यवगन्तव्यः। तत्रापि सावित्रीव्रतं पूर्व्वदिने कर्त्तव्यं व्रतान्तराण्युत्तरदिने। अस्यां च व्यवस्थायां ब्रह्मवैवर्त्तवचनं पूर्व्वमुदाहृतम्। स्कन्दपुराणेऽपि “भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत्। वर्ज्जयित्वा तु सावित्रीव्रतं तु शिखिवाहन!” इति। एवं च सति युग्मशास्त्रं सावित्रीव्रतव्यतिरिक्तेषु व्रतेषु द्रष्टव्यम्। प्रचेता अपि “नागविद्धा तु या षष्ठी सप्तम्या च युताष्टमी। दशम्येकादशीविद्धा त्रयोदश्या चतुर्दशी। भूतविद्धाप्यमावास्या न ग्राह्या मुनिपुङ्गवैः। उत्तरोत्तरविद्धास्ताः कर्त्तव्याः काठकी श्रुतिः” इति। पद्मपुराणेऽपि “षष्ठ्यष्टमी तथा दर्शः कृष्णपक्षे त्रयोदशी। एताः परयुताः कार्य्याः पराः पूर्व्वेण संयुताः” इति। यत्तु नारदीयपुराणे “दर्शं च पौर्णमासं च पितुः सांवत्सरं दिनम्। पूर्व्वविद्धमकुर्व्वाणो नरकं प्रतिपद्यते” इति तत् सावित्रीव्रतविषयं श्राद्धविषयं वा। अमावास्यायामिव पौर्णमास्यामपि श्राद्धं विहितम् तथाच पितामहः “अमावास्याव्यतीपातपौर्णमास्यष्टकासु च। विद्वान् श्राद्धमकुर्व्वाणः प्रायश्चित्तीयते हि सः” इति। अमावास्याश्राद्धस्य च पार्व्वणरूपत्वमपराह्णस्य तत्कर्म्मकालत्वं कुतपस्य प्रारम्भकालत्वमित्येतत्त्रितयं प्रतिपत्प्रकरणे प्रत्याब्दिकनिर्णये प्रपञ्चितम्”।

“सा चतुर्द्दश्योयुता ग्राह्या युग्मात्। यमः “पश्चात्ते को

तमि स्नायात् तेन नायाति यमपुरम्” विष्णुः “इयन्ते सहितौ यस्यां दिवि चन्द्रबृहस्पती। पौर्णमासी तु महती ज्ञेया संवत्सरे तु सा। तस्यां स्नानोपवासाभ्यामक्षयं परिकीर्त्तितम्”। सहितौ मासमंज्ञानिमित्तकृत्तिकादिनक्षत्रगतौ महाकार्त्तिक्यादिदर्शनात्। तथा च राजमार्त्तण्डः “माससंज्ञे यदा ऋक्षे चन्द्रः सम्पूर्णमण्डलः। गुरुणा याति संयोगं सा तिथिर्महती स्मृता”। स्कान्दमात्स्ययोः “पौर्णमासीषु चैतासु मासर्क्षसहितासु च। एतासु स्नानदानाभ्यां फलं दशगुणं स्मृतम्” ति॰त॰ स्मृतम्।

पूर्णेन्दु पु॰ कर्म॰। पञ्चदशभिः कलाभिः पूर्णे चन्द्रे।

पूर्णोत्कट पु॰ पु॰ प्राच्ये देशभेदे मार्क॰५८अ॰। [दृश्यम्।

पूर्णोपमा स्त्री उपमालङ्काराभेदे अलङ्कारशब्दे ३८६ पृ॰

पूर्त्त त्रि॰ पूर—क्त नि॰। १पूरिते २छन्ने विश्वः। पृ—पालने कर्मणि क्त।३पालिते। भावे क्त। ४पालने न॰५खातादिकर्मणि न॰ अमरः। जातुकर्ण्यः “वापी कूपतडागादिदेवतायतनानि च। अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते”। आरामः पुष्पफलोपायहेतुर्भूभागः। “अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम्। आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते। ग्रहोपरागे यद्दानं पूर्त्तमित्यभिधीयते। इष्टापूर्त्तं द्विजातीनां धर्मः सामान्य उच्यते। अधिकारी भवेच्छूद्रः पूर्त्ते धर्मे न वैदिके”। वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति” रत्नाकरः। एवं स्त्रीणामपि पूर्त्ताधिकारः। यथा नारीमधिकृत्य बृहस्पतिः “पितृश्वशुरदेवेभ्यो भर्त्तुः स्त्रीधनमात्मवान्। पूजयेत् कव्यपूर्त्ताभ्यां दत्तामायाविधीन् स्त्रियः”। एतेन “जलाशयोत्सर्गे गौरवतरत्वाच्छूद्रमन्त्रवर्ज्जपाठकर्त्तृकमन्त्रपाठः तत्सामान्यतया स्त्रीशूद्रयोरनधिकारेण तद्वति यागेऽप्यनधिकारः विशेषोपदेशविरहादिति” द्वैतनिर्णयोक्तं निरस्तम्। अतएव तयोर्जलाशयोत्सर्गादिप्रभृतावेदी होमादिसमाचारः। अत्र होमो यज्ञो न साक्षात् ब्राह्मणद्वारा करणीयः। “श्रौतस्मार्त्तक्रियाहेतोर्वृणुयादृत्विजः स्वयम्” इति याज्ञवल्क्योक्तेः “ऋत्विग्वादे नियुक्तौ च समौ संपरिकीर्त्तितौ। यत्ते स्नाप्नुयात् पुण्यं हानिं

वादेऽथ वा जयम्” इति बृहस्पत्युक्तेः। वैदिकेतर मन्त्रपाठे शूद्रादेरप्यधिकारः। “वेदमन्त्रवर्ज्जं शूद्रस्येति” छन्दोगाह्निकाचारचिन्तामणिधृतस्मृतौ वेदेतिविशेषणात्। “शूद्रोऽप्येवंविधः प्रोक्तो विना मन्त्रेण संस्कृतः। न केनचित् समसृजत् छन्दसा तं प्रजापतिः” इति समसृतौ छन्दसा वेदेन इत्युक्तेश्च। तं शूद्रम्। पञ्चयज्ञाद्यनुष्ठानेषु वैदिकेतरमन्त्रोऽपि निषिद्धः। शूद्रमधिकृत्य “नमस्कारेण मन्त्रेण पञ्चयज्ञान् न हापयेत्” इति याज्ञवल्कीयेन “ब्राह्मणविप्रामेव मन्त्रवत् स्नानमिष्यते। तूष्णीमेव हि शूद्रस्य सनमस्कारकं मतम्” इति योगियाज्ञवल्कीयेन स्नानमधिकृत्य “अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः। अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते” इति वराहपुराणीयेन च नमस्कारेणेति तूष्णीमिति मन्त्रवर्जित इत्यभिधानात्”।

पूर्त्ति स्त्री पृ—भावे क्तिन्। १पूरणे “इन्तिः पूर्तिश्च पूरणे” अ॰त॰उक्ते २गुणने च। [ङीप्।

पूर्त्तिन् त्रि॰ पूर्त्तमनेन इष्टा॰ इनि। कृतपूरणे। स्त्रियां

पूर्द्वार न॰ ६त॰। पुरस्य द्वारे गोपुरे अमरः। [अपूर्धीत्।

पूर्धि याच्ञायां भ्वा॰प॰सक॰सेट्. निघण्टुः। पूर्धयति

पूर्ब निमन्त्रणे सक॰ निवासे अक॰ चु॰उभ॰ सेट्। पूर्बयति ते अपुपूर्बत् त। ओष्ठ्यान्तोऽयम्।

पूर्य त्रि॰ पृ—क्यप् पूर—ण्यत् वा। १पूरणीये २परिपाल्ये च

पूर्ब निवासे अक॰ निमन्त्रणे सक॰ भ्वा॰ प॰ सेट। अन्त्यस्थान्तोऽयम्। पूर्वति अपूर्वीत्।

पूर्ब(र्व) त्रि॰पूर्ब(र्व)—अच्।१प्रथमे आद्ये यस्यां दिशि येषां सूर्यस्य प्रथमं दृष्टिः तेषां तस्यां २दिशि स्त्री तदुपलक्षिते ३देशे यस्य यदपेक्षया प्रथमं जन्मादि तस्य ४तादृशकाले ५तदुपलक्षिते च। तत्र दिग्देशकालव्यवस्थावाचित्वे सर्वनामकार्य्यं पूर्वस्मै इत्यादि जसि ङिङस्योस्तु वा पूर्वे पूर्वाः पूर्वस्मात् पूर्वात् पूर्वे पूर्वस्मिन्। स्त्रियां तु न विभाषा पूर्वस्यै पूर्वस्याम् इत्यादि। सर्वनामत्वेन वृत्तिमात्रेऽस्य पुंवद्भावः। पूर्वस्यां स्थितं पूर्वस्थितम्। पूर्वस्या रूपं पूर्वरूपम् इत्यादि।

पूर्ब(र्व)कर्म्मन् न॰ कर्म॰। प्रथमे कर्मणि “कर्म त्रिविधं पूर्वकर्मप्रधानकर्म पश्चात्कर्मेति” सुश्रुतः। पूर्वभागे।

पूर्ब(र्व)काय पु॰ पूर्वं(र्वं) कायस्य एकदेशित॰। कायस्य

पूर्ब(र्व)कालिक त्रि॰ पूर्वः(र्वः)कालः साधनतयाऽस्त्यस्य ठन्। पूर्व(र्व)कालसाध्ये “दर्शनं पूर्ब(र्व)कालिकम्”

भा॰ शौ॰ दच॰। पूर्व(र्व)काले भवः ठञि वृद्धिः। पौर्व्व(र्व)कालिक इत्येव तत्रार्थे त्रि॰ स्त्रियां ङीप् इति भेदः।

पूर्व(र्व)कृत् पु॰ पूर्वां(र्वां) करोति कृ—क्विप् वृत्तौ पुंवत्। १पूर्व(र्व)दिगधिपतौ आदित्ये २तदधिपे इन्द्रे च यजु॰ १०२६। ३पूर्व(र्व)कारकमात्रे त्रि॰।

पूर्व(र्व)कोटि स्त्री विप्रतिपत्तौ पूर्वोपात्ते विषये पूर्वपक्षे

पूर्व(र्व)गङ्गा स्त्री नित्यक॰। नर्मदानद्यां हेम॰।

पूर्व(र्व)चित्ति स्त्री॰चित—भावे क्तिन् पूर्व(र्व) चित्तिः स्मरणं यस्य। १पूर्वानुभवविषये यजु॰१२।११।१२।४२। २अप्सरोभेदे स्त्री हरिवं॰ १२अ॰।

पूर्व(र्व)ज पु॰ पूर्वस्मिन् काले जायते जन—ड। १ज्येष्ठभ्रातरि रघुः १०।२६। २ज्येष्ठभगिन्यां स्त्री अमरः। ३पूर्वकालजातमात्रे त्रि॰। "ज्येष्ठामूलीयमिच्छन्ति माषमाषाढ़पूर्व(र्व)जम्"। ४चन्द्रलोकस्थे दिव्यपितृगणे "अथ पूर्व(र्व)जाः पितरश्चन्द्रगोलस्था न्यस्तशस्त्राः स्वधाभुजः। कव्यवालादयस्ते च" त्रिका॰। ५पितामहादौ "स पूर्व(र्व)जानां कपिलेन रोषात्" रघुः। [त्रिका॰

पूर्व(र्व)जिन पु॰ कर्म॰। प्राचीने जिनभेदे मञ्जुघोषप्रभृतौ

पूर्व(र्व)दक्षिणा स्त्री पूर्व(र्व)स्या दक्षिणस्याश्चान्तराला दिक् "दिङ्नामान्यन्तराले" पा॰ स॰। पूर्वदक्षिणयोर्दिशोरन्तरालायां दिशि १अग्निकोणे २तद्दिक्स्थे देशे च मार्क॰ पु॰ ५८ अ॰।

पूर्व(र्व)दिक्पति पु॰ कर्म॰६त॰। इन्द्रे हेम॰। पूर्व(र्व)दिशो यादयोऽप्यत्र। २मेषसिंहादिराशिषु। "प्रागादिककुभां नाथा यथासंख्यं प्रदक्षिणम्। मेषाद्या राशयो ज्ञेया स्त्रिरावृत्तिपरिभ्रमात्" ज्यो॰त॰।

पूर्व(र्व)दिग्बल न॰ दिग्बलशब्दे ३५७२ पृ॰ उक्ते सूर्यादिग्रहाणां कालभेदे पूर्वस्यां दिशिभवे बलभेदे

पूर्व(र्व)दिग्वदन न॰ पूर्वादिशि वदनमस्य। दिग्वदनशब्दे ३५७५ पृ॰ उक्ते मेषसिंहधनूरूपराशित्रिके

पूर्व(र्व)दिश् स्त्री कर्म॰। प्राच्यां दिशि यस्यां दिशि येषां सूर्यस्य प्रथमदृष्टिः तेषां सा दिक्प्राची। तज्ज्ञानोपायश्च दिग्ज्ञानशब्दे ३५७४ पृ॰ दृश्यः।

पूर्व(र्व)दिष्ट त्रि॰ पूर्वं(र्वं) दिष्टं भाग्यं साधनत्वेनास्त्यस्य अच्। पूर्वभाग्यानुरूपेण जाते १दुःखादौ "दैवैर्मर्त्यस्य बत्प्रोक्तं पूर्व(र्व)दिष्टं हि तत् स्मृतम्" भाग॰ ६।१७ श्लो॰। पूर्वं(र्वं) दिष्टम्। २पूर्वविहिते त्रि॰।

पूर्व(र्व)देव पु॰ पूर्वे(र्वे) देवाः। १असुरे अमरः। तेषां प्रथमं देवत्वेन जायमानत्वेऽपि अन्यायाचरणात् ततो भ्रष्टानां दैत्यभावं प्राप्तिरिति पौराणिकी कथानुसन्धेया। कर्म॰। पूर्वतनयोः देवयोः २नरनारायणयोः द्वि॰ व॰। भा॰ उ॰ ४८ अ॰।

पूर्व(र्व)देवता स्त्री कर्म॰। अनादिदेवभावेषु पितृषु "अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः। न्यस्तशस्त्रा महाभागाः पितरः पूर्व(र्व)देवताः" मनुः। तदधिकं पितृशब्दे दृश्यम्।

पूर्व(र्व)देश पु॰ पूर्व(र्व)वर्त्ती देशः। जम्बुद्वीपस्थे देशभेदे स च देशः वृ॰ सं॰ १४ अ॰ कूर्मविभागे दर्शितः।

पूर्व(र्व)नदी स्त्री कर्म॰। कूर्मविभागे उक्तायां पूर्वदिक्स्थायां नद्याम् ततो नद्यन्तत्वात् ढक् उत्तरपदवृद्धिः पूर्वनादेय तत्र—भवे त्रि॰।

पूर्व(र्व)पक्ष पु॰ कर्म॰। १शुक्लपक्षे अमरः। शास्त्रीयसंशयनिरासार्थप्रश्ने २फक्किकायाम्। ३सिद्धान्तविरुद्धकोटौ "विमतो विषयश्चैव पूर्वपक्षस्तथोत्तरम्" इत्युक्ताधिकरणावयवभेदे व्यवहारे प्रतिज्ञापरपर्य्याये भाषापत्ररूपे ४प्रथमावयवभेदे। तल्लक्षणादिकं वीरमि॰ उक्तं यथा "पूर्वपक्षः स्मृतः पादो द्वितीयश्चोत्तरस्तथा। क्रियापादस्तृतीयस्तु चतुर्थो निर्णयस्तथा" इति वृहस्पतिवचनस्य निर्णयफलकपरामर्शरूपप्रत्यावलितपरमेव निर्णयपदमुपचारादित्याह "इतरथा पूर्वोदाहृततद्वचनविरोधः स्यात्। तत्र प्रतिज्ञावादी कः स्यादित्यपेक्षिते नारदः "राज्ञे कुर्य्यात् पूर्वमावेदनं यस्तस्य ज्ञेयः पूर्ववादो विधिज्ञैः" इति पूर्ववादः प्रतिज्ञा। पूर्ववादकस्यैव प्रतिज्ञावादित्वस्यापवादमाह स एव "यस्य वाभ्यधिका पीड़ा कार्य्यं वाभ्यधिकम्भवेत्। तस्यार्थिवादो दातव्यो न यः पूर्वं निवेदयेत्"। अर्थिवादः प्रतिज्ञा। वृहस्पतिः "अहंपूर्वि(र्वि)कया यातावर्थिप्रत्यर्थिनौ यदा। वादो वर्णानुपूर्व्येण ग्राह्यः पीड़ामवेक्ष्य चेति"। मनुरपि "अर्थानर्थावुभौ बुद्ध्वा धर्माधर्मौ च केवलौ। वर्णक्रमेण सर्वाणि पश्येत् कार्य्याणि कार्य्यिणाम्"। ब्राह्मणादीनां युगपद्धर्माधिकरणं प्राप्तानां वर्णानुक्रमेण ब्राह्मणस्यादौ ततः क्षत्रियस्येत्येवमादिक्रमेण चतुर्ष्वप्युव्यवहारः प्रवर्त्तनीयो राज्ञा पीड़ाधिक्यकार्य्यगौरवं चेदर्थिप्रत्यर्थिनोरन्यतरस्य तदा न पूर्वावेदनक्रमो नापि वर्णक्रमः। यदा तु सर्वं सवर्णास्तदा आवेदनक्रमः। युगपदावेदने समानवर्णत्वे समानपीड़त्वे च सभ्यव्यवस्थापतीक्ष्येति

निर्गलितोऽर्थः । प्रतिज्ञालक्षणमाह याज्ञवल्क्यः "प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना । समामासतदर्द्धाहर्नामजात्यादिचिह्नितम्" । अर्थ्यत इत्यर्थः साध्यः सोऽस्यास्तीत्यर्थी तद्विपरीतः प्रत्यर्थी तस्याग्रतः पुरतो लेख्यं लेखनीयं सभ्येन सभापतिना यथावेदितं पूर्वावेदनमनतिक्रम्य येन प्रकारेणावेदनसमये स्ववचनं लेखितं तथैव प्रत्यर्थिसमक्षमपि न पुनरन्यथा । तथा सत्यन्यवादित्वेन भङ्गप्रसङ्गात् । अन्यवादीत्यादि हीनलक्षणे वक्ष्यति । प्रागेवार्थिना स्वप्रतिज्ञातार्थस्य लिखितत्वादधुना लेखनमनर्थकमित्याशङ्कानिरासायाह समामासेति । संवत्सरमासपक्षतिथिवारार्थिप्रत्यर्थिनाम-तदीयजातिभिरादिशब्दोपात्तैश्च द्रव्यसङ्ख्यातज्जाति-गणपरिमाणादिस्थानवेलाक्षमालिङ्गादिभिर्यथोपयोगं चिह्नितमिति आर्थ्यमाणमावेदनकाले लिखितमधुनोपयुक्तार्थसहितं लिख्यत इति नानर्थक्यमिति भावः । आदिशब्दोपात्तान्यपि च कात्यायन आह "निवेश्य कालं वर्षं च मासं पक्षं तिथिं तथा । वेलां प्रदेशं विषयं स्थानं जात्याकृती वयः । साध्यं प्रमाणं द्रव्यञ्च सङ्ख्या नाम तथात्मनः । राज्ञां च क्रमशो नाम निवासं साध्यनाम च । क्रमात् पितॄणां नामानि पीडामाहर्तृदायकौ । क्षमालिङ्गानि चान्यानि पक्षं सङ्कल्प्य कीर्त्तयेत्" । कालो धनप्रयोगादिकालः । वर्षं प्रभवविभवकालीनम् एवं मासपक्षतिथयोऽपि सन्ध्यावन्दनादिक्रियोपलक्षितः कालो वेला । प्रदेशः क्षेत्रादिस्थलविशेषः । विषयोऽन्तर्वेद्यादिविषयः स्थानं विवादास्पदीभूतगृहादिग्रामादि आकृतिरवयवसंस्थानविशेषः वयस्तारुण्यादि प्रमाणं निवर्त्तनप्रस्थादि । आत्मनो राज्ञां च क्षेत्रादिभोगकालीनानां वस्तुवचनं तदीयपित्रादिप्राप्त्यर्थं निवासो निकटस्थगृहादिः । पितरोऽर्थिप्रत्यर्थिनोः । पीडा प्रतिभूप्रभृतीनां धनिकादिकृता । आहर्त्ता प्रतिग्रहादिविषयवस्तूनि आनेता दायको दातृविक्रेत्रादिः । क्षमालिङ्गान्यात्मीयधनादेः परोपभोगाद्यपराधसहनचिह्नानि । अन्यत् सुबोधम् । संग्रहकारोऽपि "धर्मतद्धर्मसंयुक्तं परिपूर्णमनाकुलम् । साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च । प्रसिद्धमविरुद्धञ्च निश्चितं साधनक्षमम् । संक्षिप्तं निखिलार्थं च देशकालाविरोधि च । वर्षर्त्तुमासपक्षाहर्वेलादेशप्रदेशवत् । स्थानावसथसाध्याख्याजात्याकारवयोयुतम् । साध्यप्रमाणं सङ्ख्यावदात्मप्रत्यर्थिनाम च । परात्मपूर्वजानेकराजनामभिरङ्कितम् । क्षमालिङ्गात्मपीडावत् कथिताहर्त्तृदायकम् । यदावेद्यते राज्ञे तद्भाषेत्यभिधीयते" इति । अर्थवत् प्रयोजनवत् । धर्मसंयुक्तम् अल्पाक्षरप्रभूतार्थत्वादिगुणयुक्तम् । परिपूर्णमध्याहाराद्यनपेक्षम् । अनाकुलमसन्दिग्धाक्षरम् । साध्यवत् साधनीयार्थयुतम् । वाचकपदम् गौणलाक्षणिकपदरहितम् । प्रकृतार्थाविरोधि प्रागावेदितार्थेन सह संवादि । प्रसिद्धं लोकप्रसिद्धमनतिक्रान्तम् अविरुद्धं पुरराष्ट्रप्राड्विवाकराजाद्यविरुद्धम् । पूर्वापराविरुद्धं व्यवहारिकधर्माविरुद्धञ्च । निश्चितं संशयरहितम् । साधनक्षमम् साधनार्हम् । संक्षिप्तं शब्दाडम्बरशून्यम् । निखिलार्थं निरवशेषवक्तव्यार्थप्रतिपादकम् । देशकालाविरोधि मध्यदेशीयमनुष्याणाम् शरत्कालीनयागाद्यं मदीयमपहृतमित्यादिदेशकालविरोधविधुरम् । परात्मनोः प्रतिवादिवादिनोर्ये पूर्वजाः पित्रादयस्तथा अनेके राजानः क्षेत्रादिभुक्तिकालीनास्ते नामाभिरङ्कितं युक्तम् । क्षमार्थत्वादीनि देशकालविरोधित्वमर्थिप्रत्यर्थिनामाशून्यत्वं चेति सर्वत्र भाषायामवश्यम्भावीनि तैर्विना साध्यनिर्देशासिद्धेः । वर्षादीनि तु यत्र यावन्त्युपयुज्यन्ते तत्र तावन्त्येव निवेशनीयानि सर्वाणि न सर्वत्र अदृष्टार्थत्वप्रसङ्गात् । तत्र वर्षादीनां कालानां दृष्टधनवृद्ध्यादिविवादेन प्रतिपक्षक्रयादिपौर्वापर्यवादे चोपयोगः । देशप्रदेशस्थानानामाहर्तृदायकयोरात्मादिपूर्वजराजादिनाम्नां च स्थावरक्षेत्रादिविवादेषु । साध्याख्याजात्याकारवयसां चौर्यादिदास्यविक्रयादिविवादेषु । प्रमाणसङ्ख्ययोर्मेयतुलितादिद्रव्यविवादे चौर्यादिविवादे च क्षमालिङ्गानामुपेक्षितपरोपभुज्यमानभूम्यादिविवादे । आत्मपीडाया अधिकप्रतिभ्वादिविवादे एवमन्यदप्यूह्यम् । अतएवानुवादाह कात्यायनः "देशश्चैव तथा स्थानं सन्निवेशस्तथैव च । जातिः संज्ञाधिवासश्च प्रमाणं क्षेत्रनाम च । पितृपैतामहश्चैव पूर्वराजानुकीर्त्तनम् । स्थावरेषु विवादेषु दशैतानि निवेशयेत्" इति । एतेषां तत्रोपयोगित्वात् । हारीतोऽपि "आसनं शयनं यानन्ताम्रं कांस्यमयोमयम् । धान्यमश्ममयं यच्च द्विपदञ्च चतुष्पदम् । सवित्तमुक्ताप्रवालानि हीरका रूप्यकाञ्चनम् । यदि द्रव्यसमूहः स्यात् संख्या कार्या तदैव तु । यस्मिन् देशे च यद्द्रव्यं येन मानेन मीयते । तेन तस्य सदा सङ्ख्या कर्त्तव्या व्यवहारिभिः" इति ॥

मानसंख्याधाराभावानामन्योऽन्योपलक्षणम्। अत्रैतावद्विवक्षितं यत्र यावदुपयुज्यते तत्र तावन्निवेश्यं भाषापत्रे, अन्यथा साध्यनिर्देशस्यापूर्णत्वात् पक्षाभासतापत्तेरधिकनिवेशेऽदृष्टार्थतापत्तेरिति। कात्यायनोऽप्येवमाह “देशकालविहीनश्च द्रव्यसंख्याविवर्जितः। क्रियामानविहीनश्च पक्षो नादेय इष्यते” क्रिया प्रमाणम्। मान साध्यपरिमाणम्।” यद्यपि पूर्वोक्तपक्षलक्षणरहितानां पक्षाभासत्वमर्थसिद्धं तथापि नारदादिभिः स्पष्टार्थं प्रपञ्चितम्। तत्र नारदः “अन्यार्थमर्थहीनञ्च प्रमाणागमवर्जितम्। लेख्यहीनाधिकं भ्रष्टं भाषादोषा उदाहृताः”। एतान् स एव विवृतवान्। “अर्थे साधारणेऽप्येको सम्बन्धोऽप्यनियुक्तकः। लेखयेद्यस्तु भाषार्थमन्यार्थं तं विदुर्बुधाः”। गणकार्य्यमेको वा यदसम्बन्धो तदनियुक्तो वा लेखयेद्यस्तां भाषायामित्यर्थः। “मह्यमहार्यमिति द्वेषात् क्रोधाद्वापि वदेत्तु यः। साध्यं च मोचयेत् पश्चादर्थहीनान्तु तां विदुः”। उक्तं साध्यं वादिना यस्मात्त्यज्यते सा भाषाऽर्थहीनेत्यर्थः। “गणिते लिखिते मेये तथा क्षेत्रगृहादिषु। यत्र संख्या न निर्दिष्टा सा प्रमाणविवर्जिता”। संख्यानं संख्येति व्युत्पत्त्या संख्याशब्देन गणनतोलनमानानां परिग्रहः। “विद्यया प्राप्तमर्थं वा क्रीतं क्रमागतम्। नत्वेवं लिख्यते यत्र सा भाषा स्यादनागमा। समामासस्तथा पक्षस्तिथिर्वारस्तथैव च। यत्रैतानि न लिख्यन्ते लेख्यहीनान्तु तां विदुः”। अवश्यं यद्यत्र पूर्वोक्तरीत्या लेख्यं तद्रहिता लेख्यहीनेत्यर्थः। “लेखयित्वा तु तां भाषामनिर्दिष्टे तथोत्तरे। निर्दिशेद्वादिनः पूर्वमधिकां तां विनिर्दिशेत्”। वादिन इति प्रमाणोपलक्षणम्। व्युत्क्रमादनाधिक्यन्तेनाप्राप्तकालता फलिता। “यत्र स्यात्तु यथापूर्वं निर्दिष्टं पूर्ववादिना। सन्दिग्धमेव लेख्येन भ्रष्टां भाषान्तु तां विदुः” उभयं पूर्वमिति पाठे पक्षद्वयमपि प्रतिज्ञावादिनैव निर्दिष्टं स्यादित्यर्थः”। प्रसङ्गात् पक्षाभासोऽपि तत्र निर्णीतोऽत्र प्रदर्श्यते। तत्र कात्यायनः “अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम्। असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्”। अप्रसिद्धमाह बृहस्पतिः “न केनचित् कृतो यस्तु सोऽप्रसिद्ध उदाहृतः”। यथा फलवन्ध्याखेलमपहृतमिति मदीयं शशविषाणं गृहीत्वा न प्रयच्छतीत्याद्यप्रसिद्धमित्याह विज्ञानेश्वरः। बृहस्पतिना त्विदमसाध्योदाहरणत्वेन तत्र वक्ष्यते। निराबाधमिदपद्य मम मन्दिरे दीप्यमानदीपप्रकाशेनायं स्वमन्दिरे व्यवहरतीतिप्रभृति निरर्थमभिधेयहीनं मदीयं कचटतपञ्चवर्गद्वयं वा गृहीत्वा न ददातीत्यादि विज्ञानयोगी। बृहस्पतिवचनात्त्वन्यथा निरर्थकपदार्थः प्रतीयते यथाह “स्वल्पापराधः स्वल्पार्थो निरर्थक इति स्मृतः” इति। एतस्योदाहरणं स्मृतिचन्द्रिकायाम् ‘अहमनेन सचिन्तमीक्षितः। मामकी शिखाऽनेनापहृतेत्यादि निष्प्रयोजनं यथायं देवदत्तोऽस्मद्गृहसन्निधौ सुस्वरमधीते इत्यादि मिताक्षरास्मृतिचन्द्रिकयोरुदाहृतम्। बृहस्पतिना तद्वैव लक्षितम्। “कार्य्यबाधाविहीनस्तु विज्ञेयो निष्प्रयोजनः” इति। स एव प्रकारान्तरेणापि निरर्थनिष्प्रयोजनौ लक्षितवान् “कुसीदाद्यैः पदैर्हीनो व्यवहारो निरर्थकः। वाक्पारुष्यादिभिश्चैव विज्ञेयो निष्प्रयोजनः”। कुसीदमृणदानं तत्प्रभृतिभिश्चतुर्दशभिरर्थविषयव्यवहारैर्हीनो निरर्थकः। वाक्पारुष्यादिभिर्हिंसात्मकैश्चतुर्भिर्हीनो निष्प्रयोजनः इत्यर्थः। अष्टादशपदाविषयः पक्षो दुष्ट इत्याशयः। असाध्यविरुद्धावाह स एव “समानेन प्रदातव्यं शशशृङ्गकृतं धनुः। असम्भाव्यमसाध्यन्तं पक्षमाहुर्मनीषिणः। स्वल्पमावेदिते पक्षे प्राड्विवाकेऽथ राजनि। पुरराष्ट्रे विरोधः स्याद्विरुद्धः सोऽभिधीयते” इति। मिताक्षरायामसाध्यविरुद्धावन्योक्तौ “देवदत्तेनाहं सभ्रूभङ्गमुपहसित इत्याद्यसाध्यं साधनासम्भवात् अल्पकालत्वाच्च साक्ष्यादिसम्भवो लिखितं दूरतोऽस्तत्वाच्च दिव्यमिति। मूकेनाहं शप्त इत्यादि विरुद्धमिति”। पुरराष्ट्रादिविरुद्धमपि विरुद्धपदेन व्याख्यातं राज्ञा विवर्जित इत्यादिस्मृत्यन्तरञ्च तदर्थतयोदाहृतत्वाच्च पूर्वमस्माभिरनादेयव्यवहारनिरूपणे लिखितम्। अन्येऽपि पक्षाभासाः स्मृतिचन्द्रिकोदाहृतवचनोक्ता ज्ञेयाः। यथा “भिन्नक्रमो व्युत्क्रमार्थः प्रकीर्णार्थो निरर्थकः। अतीतकालो विहितः पक्षो नादेय इष्यते। यथास्थानानिवेशेन नैव पक्षार्थकल्पना। गम्यते तेन पक्षः स भिन्नक्रम उदाहृतः”। अन्यस्थानस्थनिवेशो भिन्नक्रम इति यावत्। व्युत्क्रमार्थो अर्थविहितान्वयेनार्थबोधकः। प्रकीर्णार्थोऽसंहितार्थः। “पूर्वमर्थं परित्यज्य तद्गुणो यत्र लिख्यते। निरर्थकः स वै पक्षो भूतसाधनवर्जितः। अनुकालमतिक्रान्तं द्रव्यं यत्र हि लिख्यते। अतीत-

वादः पक्षोऽसौ प्रमाणे सत्यपि स्मृतः। यस्मिन् पक्षे द्विधा साध्यं भिन्नकालविमर्शनम्। विद्यते क्रियाभेदः स पक्षोऽदिष्ट उच्यते”। मूलसाधनं मूलभूतं साधनं तेन वर्जितः। भूतकालः साध्यकालः। अन्यानपि पक्षाभासानाह स एव “अन्याक्षरनिवेशेन अन्यार्थगमनेन च। आकुलन्तु भवेद्वाक्यं क्रिया चैवाकुला भवेत्। साधनं सह साध्येन निर्दिष्टं यत्र लेखयेत्। उक्तक्रमविहीनत्वात् सोऽपि पक्षो न सिध्यतीति। विरुद्धाविरुद्धश्च द्वावप्यर्थौ निवेशितौ। एकस्मिन् यत्र दृश्येते तं पक्षं दूरतस्त्यजेत्। परस्परविरुद्धानि यः पदानि निवेशयेत्। विरुद्धपदसङ्कीर्णा भाषा तस्य न सिध्यतीति”। यत्तु “पुरराष्ट्रविरुद्धश्च यश्च राज्ञा विवर्जितः। अनेकपदसङ्कीर्णः पूर्वपक्षो न सिद्ध्यतीति” स्मरणात् तस्यायमर्थः। राज्ञा विवर्जितो राजत्यक्तशुल्कादिविषयकर्णादानादिपदमिश्रितस्तु क्रियाभेदेन युगपच्च सिद्ध्यतीति मदीया रूपका दृश्यन्तोऽनया छलेनैव गृहीताः सुवर्णञ्च मया निक्षेपीकृतमयमिदं मदीयक्षेत्रमपहरतीत्यनेकपदविषयस्यापि पक्षस्य क्रमेणास्मनुग्राह्येयत्वे तत्त्वनिर्णयाभावप्रसङ्गेन युक्तिविरोधात्। 'वस्तुप्रतिज्ञं यत्कार्यं व्यवहारेषु निश्चितम्। कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सयेति” कात्यायनवचनविरोधाच्च। तस्मादयुगपत् पक्षाभासतेत्येव रमणीयम्। अनेकवस्तुसङ्कीर्णस्यापक्षत्वन्त्वतत्पदसम्बद्धम्। हिरण्यरूपकवासांसि वानेन मत्तो हठा गृहीतान्यस्य हस्ते मया विक्षिप्तान्यनेनापहृतानि चेत्येकस्मिन्नपि पदे युगपदपीडयपक्षोपन्यासस्यादुष्टत्वात्। साध्यञ्च विधिमुखेन प्रतिषेधमुखेन वा पक्षनिक्षेपणीयमित्याह कात्यायनः “न्यायं संयच्छते कर्तुमन्यायं वा करोत्ययम्। न लेखयति यस्त्वेवं तस्य पक्षो न सिद्ध्यति”। न्यायं समित्यनेन मयैतावद्धनमादाय न ददातीत्यादि प्रतिषेधमुखताऽपि दर्शिता। अन्यायं चेत्यनेन, ममेदमपहरतीत्यादि विधिमुखता प्रदर्शिता। बृहस्पतिरपि “प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्। निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः” इति। प्रतिज्ञादोषैः प्रतिज्ञासत्याभासादिभिर्मुक्तं रहितम्। ते च दर्शिताः प्राक्। साध्यं साधनार्हम्। सत्कारणान्वितं स्फुटदोषरहितहेतुसहितम्। निश्चितं सन्देहाजनकवाक्यरचनायुक्तं न तु अवमेय॰ निश्चितं विप्रतिपत्त्यावर्णनिश्चयाभावात्। लोकसिद्धं व्यवहारिकधर्माविरुद्धम्। अतएव मनुः “सत्या न भाषा भवति यद्यपि स्यात् प्रतिष्ठिता। बहिश्चेद्भाष्यते धर्मान्नियताद्व्यवहारिकात्”। प्रतिष्ठिता प्रसिद्धत्वादिदोषनिर्मुक्ता। भाषा प्रतिज्ञा व्यावहारिकधर्माद्बहिर्विरुद्धा च सत्या ग्राह्या न भवति राजादीनामित्यर्थः। भवदेवस्तु “यत्र स्मृतमात्र एव सति लोकानां सम्प्रत्ययस्तल्लोकसिद्धं तेन निर्धनकृतो लक्षादिसङ्ख्यधनाक्षेपो न पक्ष इति व्याचष्टे तद्बाधकरूपप्रतिज्ञादोषग्रन्थेनैव तादृशपक्षस्य निराकरणात्। प्रतिज्ञादोषनिर्मुक्तमित्यनेनैव गतार्थम्”। ततः गहा॰ भवार्थे छ। पूर्वपक्षीय तद्भवे त्रि॰।

पूर्व(र्व)पद न॰ कर्म॰। पूर्ववर्त्तिनि विभक्त्यन्ते पदे “पूर्वपदात् संज्ञायामगः” पा॰। २पूर्वशब्दे स्थाने च। पूर्वपदमधीते “पूर्वोत्तरपदात्” वार्त्ति॰ इकन्। पूर्वपदिक तद्वेत्तरि तदध्यायिनि च।

पूर्व(र्व)पर्वत पु॰ नित्यक॰। उदयाचले अमरः।

पूर्व(र्व)पाञ्चालक त्रि॰ पूर्वस्मिन् पञ्चाले भवः वुञ् उत्तरपदवृद्धिः। पूर्वपञ्चालभवे। पूर्वं पञ्चालानाम् एकदेशिस॰ तत्र भवः अपि तु नोत्तरपदवृद्धिः। पौर्वपञ्चाल इत्येव सि॰ कौ॰।

पूर्व(र्व)पाटलिपुत्रक त्रि॰ पूर्वपाटलिपुत्रे भवः वुञ् न पूर्वपदवृद्धिः। पूर्वपाटलिपुत्रनगरभवे। [पा॰४।८।४

पूर्व(र्व)पाद पु॰पूर्वं पादस्य एकदेशिस॰। अग्रचरणे कात्या॰

पूर्व(र्व)पालिन् पु॰पूर्वं देशं दिशं वा पालयति पालि–णिनि। १पौरस्त्यदेशपतिनृपभेदे २पूर्वदिगीशे इन्द्रे च। [१अ॰।

पूर्व(र्व)पितामह पु॰पूर्वः पितामहात्। प्रपितामहे भा॰वि॰

पूर्व(र्व)पीठिका स्त्री कर्म॰। कथाप्रस्तावतरणिकाभेदे।

पूर्व(र्व)पुरुष पु॰ कर्म॰। पित्रादित्रिके पुरुषे।

पूर्व(र्व)पूर्व(र्व) त्रि॰ पूर्व+वीप्सायां द्वित्वम्। वीप्सार्थक पूर्वशब्दार्थे। [अश्लेषाशब्दे तदीशादि दृश्यम्।

पूर्व(र्व)फल्गुनी स्त्री अश्विन्यादिषु एकादशे नक्षत्रे।

पूर्व(र्व)फल्गुनीभव पु॰ पूर्व(र्व)फल्गुन्यां भवति भू–अच्। बृहस्पतौ शब्दमाला।

पूर्व(र्व)भ(भा)द्रपदा स्त्री भद्रस्य वृषस्येव पदं चरणमस्य तत्सदृशं वा कर्म॰। अश्विन्यादिषु पञ्चविंशतितमनक्षत्रे तत्स्वरूपादिकं अश्लेषाशब्दे उक्तम्।

पूर्व(र्व)भाव पु॰ पूर्वो भावः। १पूर्ववर्त्तित्वे कारणत्वे “येन सह पूर्वभावः कारणसाद्गुण्य वा यस्य” आश्व॰ श्रौ॰।

२पूर्ववर्त्तिनि भावे पदार्थधर्मभेदे ३शृङ्गाररसस्य पूर्वरागापरपर्य्याये ४भावभेदे ।

पूर्व(र्व)भाविन् त्रि॰ पूर्वं भवति भू–णिनि । १कारणे २पूर्ववर्त्तिनि पदार्थमात्रे च सां॰सू॰ ७५ ।

पूर्व(र्व)यक्ष पु॰ नित्यक॰ । मणिभद्रादौ जिनोत्तमे त्रिका॰

पूर्व(र्व)रङ्ग पु॰ पूर्वं रज्यतेऽस्मिन् रञ्ज–आधारे घञ् । "यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये । कुशीलवाः प्रकुर्वन्ति पूर्व(र्व)रङ्गः स उच्यते" दशरूपकोक्ते नान्दीपाठादौ ।

पूर्व(र्व)राग पु॰ पूर्वो रागः । नायकयोर्मेलनात् पूर्वजाते अनुरागभेदे "श्रवणाद्दर्शनाद्वापि मिथःसंरूढरागयोः । दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते । श्रवणन्तु भवेत्तत्र दूतवन्दिसखीमुखात् । इन्द्रजाले च चित्रे च साक्षात् स्वप्ने च दर्शनम् । अभिलाषचिन्तास्मृतिगुणकथनोद्वेगसंप्रलापाश्च । उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशाः । अभिलाषः स्पृहा चिन्ता प्राप्त्युपायादिचिन्तनम् । उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि । अलक्ष्यवाक् प्रलापः स्यात् चेतसो भ्रमणाद्भृशम् । व्याधिस्तु दीर्घनिःश्वासः पाण्डुताकृशतादयः । जडता हीनचेष्टत्वमङ्गानां मनसस्तथा । रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते । जातप्रायन्तु तद्वाच्यं चेतसा चापि काङ्क्षितम् । "वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरतः" । "आदौ वाच्यः स्त्रिया रागः पुंसः पश्चात्तदिङ्गितैः । नीलीकुसुम्भमञ्जिष्ठाः पूर्वरागोऽपि च त्रिधा । न चातिशोभते यन्नापैति प्रेम मनोगतम् । तन्नीलीरागमाख्यान्ति यथा श्रीरामसीतयोः । कुसुम्भरागं तं प्राहुर्यदपैति च शोभते । मञ्जिष्ठारागमाहुस्तं यन्नापैत्यतिशोभते" सा॰ द॰ ।

पूर्व(र्व)रात्र पु॰ पूर्वं रात्रेः एकदेशिस॰ अच्समा॰ रात्रान्तत्वात् पुंस्त्वम् । रात्रेः पूर्वभागे ।

पूर्व(र्व)रूप न॰ कर्म॰ । अर्थालङ्कारभेदे अलङ्कारशब्दे ४००पृ॰ दृश्यम् । भविष्यद्रोगस्य प्राग्जातरूपे तस्य लक्षणविशेषो भाविरोगलक्षणं चोक्तं यथा

"प्राग्रूपं येन लक्ष्यते । उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः । लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम् । द्विविधं हि पूर्वरूपं भवति सामान्यं विशिष्टञ्च सामान्यं येन दोषदूष्यसंमूर्च्छनावस्थाजनितेन भाविज्वरादि व्याधिमात्रं प्रतीयते न तु वातादिजनितत्वादिविशेषः । यथा "श्रमोऽरतिर्विवर्णत्वमिति" । तथा वाक्शुद्धशाक्यप्रद्वेषादि । सामान्याभिप्रायेणैव तन्त्रान्तरे यथा "व्याधेर्जातिर्बुभूषा च पूर्वरूपेण लक्ष्यते । भावः किमात्मकस्तस्य लक्ष्यते लक्षणेन तु" इति । तथाह पराशरः "पूर्वरूपं नाम येन भाविव्याधिविशेषो लक्ष्यते न तु दोषविशेषः" इति । विशिष्टं यथा ज्वरादौ चिह्नान्येव वातादिजान्यव्यक्तानि । यदुक्तं तत्रैव "अव्यक्तं लक्षणं तेषां पूर्वरूपमिति स्मृतिः" । तथाह सुश्रुतः "सामान्यतो विशेषात्तु जृम्भात्यर्थं समीरणात् । पित्तान्नयनयोर्दाहः कफादन्नाभिनन्दनमिति" । हारीतेनाप्युक्तम् "इति पूर्वरूपमष्टानां ज्वराणां सामान्यतो विशेषात्तु जृम्भाङ्गमर्दभूयिष्ठं हृदयोद्वेगि वातजमिति" । प्राग्रूपं येन लक्ष्यते इत्यस्यार्थमाह रक्षितः "येन श्रमादिना उत्पित्सुः सामग्रीसाकल्यादुत्पादेच्छुरामयो रोगः दोषविशेषेण वातादिजन्यासाधारणवेपथ्वादिना अनधिष्ठितोऽसम्बद्धो लक्ष्यते ज्ञायते तत् प्राग्रूपमिति" । लिङ्गमव्यक्तमल्पत्वादित्यस्यार्थमाह स एव "प्राग्रूपमित्यनेन पूर्वोक्तेन सम्बन्धि लिङ्गं लक्षणम् अव्यक्तं नात्यभिव्यक्तं तत्र हेतुरल्पत्वात् नत्वावरणादियोगादव्यक्तत्वमित्यर्थः । अन्ये तु पूर्वरूपलक्षणमाहुः "स्थानसंश्रयिणः क्रुद्धा भाविव्याधिप्रबोधनम् । दोषाः कुर्वन्ति यल्लिङ्गं पूर्वरूपं तदुच्यते" इति । संक्षेपतस्तु लक्षणं भाविव्याधिबोधकमेव लिङ्गं पूर्वरूपम्" इति माधवकरविजयरक्षितौ ।

पूर्व(र्व)वत् अव्य॰ पूर्वस्येव पूर्वेण तुल्यं वा क्रियार्हति । १पूर्वेण तुल्यक्रियान्वितभेदे पूर्वस्य २तुल्ये च । पूर्वं कारणं विषयतयाऽस्त्यस्य मतुप् मस्य वः । ३कारणेन कार्य्यानुमाने न॰ । "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टञ्च" गौत॰ सू॰ । "पूर्वं कारणं तद्वत् कारणलिङ्गकम् यथा मेघोन्नतिविशेषेण कार्य्यानुमानमिति" गौत॰ वृत्तिः । "तत्रैकं दृष्टस्वलक्षणसामान्यविषयं यत् तत् पूर्ववत्, पूर्वं प्रसिद्धं दृष्टस्वलक्षणसामान्यमिति यावत् तदस्य विषयत्वेनास्त्यनुमानज्ञानस्येति पूर्ववत् यथा धूमाद्वह्नित्वसामान्यविशेषः पर्वतेऽनुमीयते तस्य च वह्नित्वसामान्यविशेषस्य स्वलक्षणो वह्निविशेषो दृष्टो रसवत्याम्" सां॰त॰कौ॰ ।

पूर्व(र्व)वयस् त्रि॰ पूर्वं वयः कालावस्थाभेदोऽस्य । १बाल्यावस्थान्विते । कर्म॰ । २बाल्यावस्थायाम् न॰ । वेदे वा॰ अच्समा॰ । पूर्ववयस बाल्यवयसि न॰ । शत॰ब्रा॰१२।२।२।३।

पूर्व(र्व)वर्त्तिन् त्रि॰ पूर्वं वर्त्तते वृत–णिनि। अन्यथासिद्धिशून्ये १प्रागवर्त्तिनि कारणे २प्राग्वर्त्तिमात्रे च त्रि॰।

पूर्व(र्व)वाद पु॰ पूर्वो वादः। व्यवहारे प्रथमावेदने पक्षभाषाऽपरपर्य्याये पूर्वपक्षवादे। "पूर्ववादं परित्यज्य योऽन्यमालम्बते पुनः। पदसंक्रमणात् ज्ञेयो हीनवादी स वै नरः" मिताक्षरा।

पूर्व(र्व)वादिन् त्रि॰ पूर्वं वदति वद–णिनि। पूर्ववादकारके व्यवहारे प्रथमावेदनकर्त्तरि अर्थिनि। "मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेत्"। "मिथ्योत्तरे पूर्ववादी कारणे प्रतिवादिनि च" मिता॰।

पूर्व(र्व)वार्षिक त्रि॰पूर्वं वर्षाणाम् एकदेशिस॰ ततः "कालात् ठञ्" पा॰ ठञ् "अवयवादृतोः" पा॰ उत्तरपदवृद्धिः। वर्षाणां पूर्वभागभवे अवयवादित्युक्तेः पूर्वासु वर्षासु भवः इत्यर्थे ठञि पूर्वपदवृद्धिः पौर्ववर्षिक इत्येव सि॰ कौ॰।

पूर्व(र्व)वाह् पु॰ पूर्वे वयसि वहति वह–ण्वि ७त॰। पूर्ववयसि वाहके शत॰ब्रा॰ २,१ ४ १७।

पूर्व(र्व)वृत्त न॰पूर्वं वृत्तम्। कर्म॰। प्राचीने वृत्ते इतिहासे।

पूर्व(र्व)शारद त्रि॰ पूर्वं शरदः एकदेशिस॰। तत्र भवः ऋत्वण् "अवयवादृतोः" पा॰ उत्तरपदवृद्धिः। शरदः पूर्वभवे।

पूर्व(र्व)शैल पु॰ कर्म॰। उदयाचले जटा॰। पूर्वाचलादयोऽप्यत्र।

पूर्व(र्व)शक्थ न॰ पूर्वं शक्थ्नः एकदेशिस॰अच्समा॰। शक्थ्नः पूर्वभागे। [दयोऽप्यत्र।

पूर्व(र्व)समुद्र पु॰ कर्म॰। पूर्ववर्त्तिनि समुद्रे पूर्वसागरा-

पूर्व(र्व)सर त्रि॰ पूर्वः सन् सरति कर्त्तरि उप पदे एव सृ+ट उप॰ स॰। पूर्वभूयगामिनि स्त्रियां ङीप्। अन्यत्र पूर्वं सरतीति वाक्ये अण् पूर्वसार अग्रगामिनि त्रि॰।

पूर्वा(र्वा)तिथि पु॰ गोत्रप्रवरर्षिभेदे।

पूर्वा(र्वा)दि पु॰ पूर्वः आदिर्यस्य। व्यवस्थायामसंज्ञायां सर्वनामकर्मनिमित्ते १शब्दगणे.स च यथा "पूर्व पर अवर दक्षिण उत्तर अपर अध–अन्तर। "पूर्वादिभ्यो नवभ्यो वा" पा॰ पूर्वे पूर्वा इत्यादि। पूर्वा आदिर्यस्याः ।२पूर्वादिककुभि स्त्री

पूर्वा(र्वा)निल: पु॰ कर्म॰। पूर्वदिक्स्थवायौ तद्गुणाश्च "पूर्वस्तु मधुरो वातः स्निग्धः कटुरसान्वितः। गुरुर्विदाहजननो वातदः पित्तनाशनः" राजनि॰। "प्राग्वातो मधुरः क्षारो वह्निमान्द्यकरो गुरुः। वैरस्यगौरवोष्णाणि करोत्यप्रशोषधीषु च। भग्नोत्पिष्टक्षताद्येषु रागश्वयथुदाहकृत्। सन्निपातज्वरश्वासत्वग्दोषार्शो विषक्रिमीन्। कोपयेदामवातञ्च घनसंघातकारणम्" राजवल्लभः।

पूर्वा(र्वा)नुयोग पु॰ दृष्टिवादभेदे "प्रतिकर्मसूत्रपूर्वानुयोग पूर्वगतचूलिकाः। पञ्च स्युर्दृष्टिवादभेदाः" हेम॰।

पूर्वा(र्वा)पर त्रि॰द्वन्द्व॰। पूर्वस्मिन् अपरस्मिन् च देशे तयोर्भावः ष्यञ्। पौर्वापर्य्यं तद्भावे न॰। क्वचिन्न पूर्वपदवृद्धिः। पूर्वापर्य्यं तत्रार्थे न॰।

पूर्वा(र्वा)पहाना स्त्री पूर्वमपहीयते अप–हा–कर्मणि ल्युट् अजा॰ टाप्। पूर्वापहानकर्मणि अजादिगणः।

पूर्वा(र्वा)र्द्ध त्रि॰ पूर्वार्द्धे भवः पक्षे यत्। पूर्वार्द्धभवे। पक्षे ठञ्। पौर्वा(र्वा)र्द्धिक तत्रार्थे त्रि॰।

पूर्वा(र्वा)षाढ़ा स्त्री कर्म॰। अश्विन्यादिषु विंशे नक्षत्रे तत्स्वरूपादिकमश्लेषाशब्दे उक्तम्।

पूर्वा(र्वा)ह्ण पु॰ पूर्वमह्नः एकदेशिस॰ टच्समा॰ अह्नादेशः "रात्राह्नाह्नान्ताः पुंसि" पा॰ पुंस्त्वम्। दिनस्य पूर्वभागे पूर्वाह्णस्य त्रिधा विभक्तदिनस्य प्रथमभागः। "पूर्वाह्णो वै देवानां मध्याह्नो मनुष्याणामिति" श्रुतिः। अह्नः प्रथमप्रहरद्वयकालश्च। "आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परम्" स्कन्दपु॰। "आवर्त्तनात् पश्चिमदिग्वर्त्तिच्छायायाः परिवर्त्तनम्"। अतएव "अश्वत्थं वन्दयेन्नित्यं पूर्वाह्णे प्रहरद्वये" मल॰त॰।

पूर्वा(र्वा)ह्ण(ह्णे)तन त्रि॰ पूर्वाह्णे काले भवः ट्यु तुट् च "कालतनेति" सप्तम्या अलुक्। ।पूर्वाह्णभवे स्त्रियां ङीप्। पूर्वाह्णः सोढोऽस्य इति विग्रहे तु पूर्वाह्णतन इत्येव। २पूर्वाह्णसहनकर्त्तरि त्रि॰।

पूर्वा(र्वा)ह्णिक त्रि॰ पूर्वाह्णः साधनतयाऽस्त्यस्य ठन् पूर्वाह्णसाध्ये कर्मणि। "दैवं पूर्वाह्णिकं कुर्य्यादपराह्णे तु पैतृकम्" भा॰ आ॰ २१ अ॰।

पूर्वि(र्वि)न् त्रि॰पूर्वं कृतमनेन "पूर्वादिनिः"पा॰इनि। १पूर्वक्रियाकारके। वेदे तु "पूर्वैः कृतमिनयौ च" पा॰ इन। पूर्विण पूर्वैः कृते "आयान्तु नः पितरः सोम्यासो गम्भीरेभिः पथिभिः पूर्विणेभिः" पितृावाहनमन्त्रः। छान्दसी रूपसिद्धिः। [स्मिन् दिने इत्यर्थे।

पूर्वे(र्वे)द्युस् अव्य॰ पूर्वस्मिन् अहनि पूर्व(र्व)+एद्युस्। पूर्व-

पूर्वे(र्वे)षुकामशमी स्त्री कर्म॰। पूर्वदेशवर्त्ति नगरीभेदे अन्तोदात्ततास्य। पूर्वेषुकामशम्यां भवः अण् उत्तरपदवृद्धिः पूर्वैषुकामशम तद्भवे त्रि॰। [ईशानकोणे विदिशि।

पूर्वो(र्वो)त्तरा स्त्री पूर्वस्याः उत्तरस्याश्चान्तराला दिक् बं॰व॰।

पूर्व्य (र्व्व) त्रि॰ पूर्वैः कृतम् "पूर्वैः कृतमिनयौ" पा॰ पक्षे य । पूर्वैः कृते पुराणे निघण्टुः ।

पूल संहतौ (राशीकरणे) वा चु॰ उभ॰ पक्षे भ्वा॰पर॰सक॰ सेट् । पूलयति ते पूलति । अपूपुलत् त अपूलीत् ।

पूलक पु॰ पूल-ण्वुल् । १तृणादिस्तूपे २धान्यतृणादिमुष्टौ कात्या॰श्रौ॰ २०।३।३० ।

पूलाक पु॰ पुलाक+पृषो॰ । तुच्छधान्ये । तस्य विकारः अवयवो वा पलाशा॰ अञ् । पौलाक तदवयवे तस्य विकारे च त्रि॰ ।

पूलास त्रि॰ पूल-राशीकरणे घञ् तमस्यति अस-क्षेपे अण् । तृणादिस्तूपविक्षेपके तेन निर्वृत्तम् सङ्कला॰ अण् । पौलास तन्निर्वृत्ते त्रि॰ ।

पूलासककुण्ड न॰ कुण्डस्य पूलासकः राजद॰ परनि॰ । कुण्डस्य तृणादेर्निरासके ।

पूलिका स्त्री पूरिका+रस्य लः । पूपभेदे हेमच॰ ।

पूष वृद्धौ अक॰भ्वा॰पर॰सेट् । पूषति अपूषीत् । पुपूष ।

पूष पु॰ पूष-वृद्धौ क । ब्रह्मदारुवृक्षे (तुत) अमरः ।

पूषक पु॰ पूष-ण्वुल् । ब्रह्मदारुवृक्षे राजनि॰ ।

पूषणा स्त्री पूष-ल्यु । कुमारानुचरमातृभेदे मा॰शा॰४७अ॰ । पूष्णः पृथिव्याः इदम् अण् वेदे न वृद्धिः नोपधा लोपः । पार्थिवे पदार्थे त्रि॰ ऋ॰१०।५।५।

पूषदन्तहर पु॰ पूष्णः सूर्य्यभेदस्य दन्तं हरति हृ-अच् । दक्षयज्ञकाले पूष्णो दन्तोत्पाटके शिवांशे वीरभद्रे अदन्तशब्दे ११२ पृ॰ दृश्यम् ।

पूषध्र पु॰ वैवस्वतमनोः पुत्रभेदे । मार्कपु॰ १११ अ॰ ।

पूषन् पु॰ पूष-कनिन् । १सूर्य्ये आदित्यभेदे भा॰ आ॰६५अ॰ शौ तु पूष्णि पूषणि पूषि । २पृथिव्यां स्त्री निघण्टुः । पूषणा शब्देदृश्यम् । अयमन्तोदात्तः । स्वार्थे क । तत्रार्थे । पूषा अस्त्यस्य मतुप् वेदे तुट् णत्वम् । पूषण्वत् सूर्य्य-युक्ते पृथिवीयुक्ते च त्रि॰। ऋ॰१।८२।६।भा॰ [नटाध॰ ।

पूषभासा स्त्री पूषेव भासते भास-अच् । इन्द्रनगर्य्यां

पूषराति पु॰ पूषा तदाख्यो देवो रातिर्दाता यस्य । सूर्य्यदेये वस्तुनि ऋ॰ १।२३।८ ।

पूषात्मज पु॰ ६त॰ । १मेघे २इन्द्रे देवे च । "आदित्याज्जायते वृष्टिरित्युक्तेर्वृष्ट्यधिपमेघस्य आदित्याज्जायमानत्वात् तथात्वम् । "वृष्टिम् पूषात्मजो यथा" भा॰ व॰२॰ अ॰ । तत्र पूषात्मजेति पाठान्तरं वृष्ट्यधिपस्य मेघस्य सूर्य्याज्जातत्वात् तथात्वम् ।

पूषासुहृत् पु॰ ६त॰ । शिवे तदंशे वीरभद्रेण पूषदन्तोत्पाटनात् तथात्वम् । अदन्तशब्दे दृश्यम् ।

पृ व्यापारे तु॰आत्म॰अक॰ अनिट् प्रायेणायम् व्याङ्पूर्वः । व्याप्रियते व्यापृत । व्यापप्रिये । व्याप्रियते । व्यापृतः व्यापारः । [अपारीत् । पपार ।

पृ प्रीतौ अक॰ प्रीणने सक॰ स्वा॰ पर॰ अनिट् । पृणोति

पृ पालने पूरणे च जुहो॰ पर॰ सक॰अनिट् वा दीर्घे सेट् । पिपर्त्ति पिपृतः पिप्रति । अपारीत्-अपारीत् । पपार पप्रतुः पपरतुः । पूर्णः ।

पृ पूर्त्तौ चु॰ उभ॰ सक॰ सेट् । पारयति ते-अपीपरत्-त ।

पृक्का स्त्री पृच-कन् न्यङ्क्वा॰ कुत्वम् । (पिड्डिङ्) शाक-भेदे रत्नमाला ।

पृक्त त्रि॰ पृच-क्त । १सम्बन्धे २धने न॰ हेमच॰ ।

पक्ति स्त्री पृच-भावे क्तिन् । १सम्पर्के २स्पर्शे च अमरः ।

पृक्षस् पु॰ पृच-बा॰ असि सुट् च । अन्ने निघण्टुः । ऋ॰ १।७।१० ।

पृक्षे अव्य॰ पृच-बा॰ क्से । संग्रामे निघण्टुः ऋ॰ १।६३।२

पृक्षुध् स्त्री प्र+क्षुध्-क्विप् वेदे बा॰ प्रस्य सम्प्रधारणम् । प्रकृष्टक्षुधाश्राम् ऋ॰ १।१४१।४। [ईदित् । पृक्णः ।

पृच सम्पर्के अदा॰आत्म॰अक॰सेट् । पृक्ते अपर्चिष्ट । पपृचे

पृच संयमने सक॰ सम्पर्के अक॰चु॰उभ॰पक्षे भ्वा॰पर॰सेट् । पर्चयति-ते पर्चति । अपीपृचत्-त अपपर्चत्-त अप-र्चीत् । [कथनाय प्रेरणे अमरः ।

पृच्छा स्त्री प्रच्छ-अङ् संप्रसारणम् । प्रश्ने १ज्ञातुमिच्छया

पृच्छ्य त्रि॰ प्रच्छ-बा॰ कर्मणि क्यप् सम्प्र॰ । जिज्ञास्ये ।

पृज सम्पर्के, अदा॰ आ॰ अक॰ सेट् । पृक्ते अपर्जिष्ट । ईदित् पृग्णः ।

पृड हर्षे तु॰पर॰अक॰सेट् । पृडति । अपर्डीत् पपर्ड ।

पृण तर्पणे तु॰पर॰सक॰सेट् । पृणति अपर्णीत् । पपर्ण ।

पृत् स्त्री पृ-पालने क्विप् । सेनायाम् ऋ॰ २।२७।१५ ।

पृतना स्त्री पृ-तनन्-किच्च ।१सेनायाम् २सङ्ख्याविशेषान्वित-रथहस्त्यश्वादिसैन्यभेदे च (रथाः २४३ गजाः २४३ अश्वाः ७२९ पदातयः १२१५)। अमरः। अनीकिनी-शब्दे १६९ पृ॰ रथादिसंख्या दृश्या। ३संग्रामे ४मनुष्ये च निघण्टुः ।

पृतनाज्य न॰ संग्रामे निघण्टुः । "पृतनानामजनाद्वा पृत-नाज्यं जयनाद्वा" निरु॰ ६।२४ ।

पृतनासाह् पु॰ पृतनां सहते सह-ण्वि । इन्द्रे त्रिका॰ ।

अस्य झलि पदान्ते च तस्य षत्वम्। पृतनाषाट् अन्यत्र न षत्वम् पृतनासाहम् इत्यादि।

पृत्सुध पु॰ पृत्सु धीयते धा-कर्मणि घञर्थे क अलुक्स॰। १संग्रामे निघण्टौ पाठान्तरम्।

पृथ प्रक्षेपे चुरा॰उभ॰सक॰सेट्। पार्थयति-ते अपीपृथत् त अपपर्थत्-त। [अमरः।

पृथक् अव्य॰पृथ-बा॰कक् ि। १भिन्ने २नानारूपे ३विनार्थे च।

पृथक्त्व न॰ पृथक् इत्यस्य भावः त्व। वैशेषिकोक्ते पृथक्त्व-बुद्धिसम्पादके गुणभेदे। तत्परीक्षा च कणा॰ सू॰ वृत्त्योर्दर्शिता यथा "तथा पृथक्त्वम्" सू॰। "एक-त्ववत्यतयैकपृथक्त्वमपि साधयितुमाह अपोद्धार व्यवहारस्तावदस्ति इदमस्मात् पृथगन्यदर्थान्तरमित्याकारः अपकृष्यावधिमपेक्ष्य य उद्धारो निर्द्धारणं सह्यपोद्धारः तत्र च न रूपादि तन्त्रं व्यभिचारादवश्यनिरूप्यत्वाच्च। नन्वन्योन्याभाव एव पृथक्त्वम् इदमस्मात् पृथगन्य-दर्थान्तरमितिवद्भिन्नमिति प्रतीतेरन्योन्याभावावलम्बन-त्वात्, न, पृथगादिशब्दानां पर्य्यायत्वेऽपि नान्योन्याभावा-र्थत्वं तत्र पञ्चमीप्रयोगानुपपत्तेः इदमस्मात् पृथक् इद-मिदं न भवतीति प्रतीत्योर्भिन्नविषयत्वात्, न चान्योन्या-भाववानर्थः पृथक्त्वम् अघटः पट इत्यत्रापि पञ्चमी प्रयोगापत्तेः। ननु पृथगिति विशिष्ट इति प्रतीत्यो-रेकाकारत्वाद्वैशिष्ट्यमेव पृथक्त्वमिति चेन्न नैतस्य दण्ड-वैशिष्ट्यदशायां नैतात् पृथगयं नैत्र इत्यपि प्रतीत्या-पत्तेः। एवं शब्दविशिष्टे व्योम्नि बुद्धिविशिष्टे चात्मनि पृथक्त्वव्यवहारापत्तेः। अतएव वैधर्म्यमपि न पृथक्त्वं पाकरक्ते घटे श्यामाद्घटात् पृथगयं घट इति व्यव-हारापत्तेः तद्विरोधिधर्मवत्त्वमेव हि तद्वैधर्म्यं तच्च श्यामानन्तरं रक्ततादशायामपि। न च सामान्यमेव पृ-थक्त्वं सामान्यस्यावश्यनिरूप्यत्वात् जातिसङ्करप्रसङ्गाच्च। सन्मात्रवृत्तित्वे सत्तया, द्रव्यमात्रवृत्तित्वे द्रव्यत्वेनान्यूना-नतिरिक्तवृत्तित्वापत्तेः" वृत्तिः। "एकत्वैकपृथक्त्वयोरेक त्वैकपृथक्त्वाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः" क॰सू॰। "नन्वेकमेकत्वं रूपादिभ्यः पृथक्पृथक्त्वमिति व्यव-हारादेकत्वेऽप्येकत्वं पृथक्त्वेऽपि पृथक्त्वमेवं तत्र तत्रा-पीत्यत आह यथाऽणुत्वमहत्त्वे नाणुत्वमहत्त्ववती तद्व्यवहारस्तत्र भाक्तस्तथैकत्वैकपृथक्त्वे नैकत्वैकपृथक्-त्ववती तद्व्यवहारस्तत्र भाक्त इत्यर्थः। कर्मभिः कर्माणि गुणैर्गुणाः इत्यपि दृष्टान्तद्वयं पूर्वदृष्टान्तस्तत्रैवैक-वाक्यतापन्नमेवात्र भासते यथा कर्माणि न कर्मवन्ति गुणाश्च न गुणवन्तस्तथैकत्वैकपृथक्त्वे न तद्वती इत्यर्थः" वृत्तिः।

पृथक्त्वचा स्त्री पृथक् त्वचा यस्याः। मूर्व्वायाम्। रत्नमा॰

पृथक्पर्णी स्त्री पृथक् पर्णान्यस्याः ङीप्। (चाकुलिया) क्षुपभेदे अमरः।

पृथक्क्षेत्र पु॰ पृथक् भिन्नं क्षेत्रमुत्पत्तिस्थानमस्य। एकस्मात् पितुर्विभिन्नमातृजाते पुत्रे मिता॰। [१भेदे २विशेषे।

पृथगात्मता स्त्री पृथक् आत्मा स्वरूपं यस्य तस्य भावः तल्।

पृथगात्मिका स्त्री पृथक् आत्मा स्वरूपं यस्याः कप् नलोपे कापि अत इत्त्वम्। व्यक्तौ। व्यक्तित्वेनैकरूपाणामपि व्य-क्तीनां महानणीयस्त्वादिरूपेण तेषां स्वरूपभेदात् तथात्वम्।

पृथग्जन पु॰ पृथक् भिन्नो जनो महाजनो यस्मात्। १नीचे २मूर्खे ३पामरे च अमरः। [अमरः।

पृथग्विध त्रि॰ पृथक् भिन्ना विधा यस्य। नानारूपे

पृथग्बीज पु॰पृथक् बीजान्यस्य। भल्लातकवृक्षे (भेला) राजनि॰

पृथा स्त्री कुन्तिभोजकन्यायाम् कुन्त्याम् जटाधरः।

पृथाज पु॰ पृथायां जायते जन-ड ७त॰। १युधिष्ठिरादौ कुन्तीपुत्रे २अर्जुनवृक्षे राजनि॰।

पृथापति पु॰ ६त॰। पाण्डुराजे त्रिका॰।

पृथिका स्त्री पृप्रथ घञर्थे-क स्वार्थे क शतपद्याम् अत इत्त्वम्। शतपद्याम् शब्दमाला।

पृथिन् पु॰ प्रथ-बा॰ किनि संप्र॰। वेनपुत्रे पृथुनामके नृपे "पृथी ह वै वैन्यो मनुष्याणां प्रथमोऽभिषिषिचे" शत॰ब्रा॰५।३ ५।४ "पृथी यद्वां वैन्यः" ऋ॰८।९।१० "लोकेऽस्य पृथुसंज्ञा"।

पृथ(थि)(वि)वी स्त्री प्रथते विस्तारमेति प्रथ-षिवन् (षवन्) वा नि॰ संप्रसारणं षित्त्वात् ङीष् पृषो॰ वा ह्रस्वः। धरायाम् क्षितौ तद्गुणादिकं यथा।

"रूपद्रवत्वप्रत्यक्षयोगि स्यात् प्रथमत्रिकम्। गुरुणी द्वे रसवती द्वयोर्नैमित्तिकोद्रवः। स्पर्शादयोऽष्टौ वेगश्च द्रव्यत्वञ्च गुरुत्वकम्। रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश। स्नेहहीना गन्धयुता क्षितावेते चतुर्दश"। "तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता। षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मतः। स्पर्शस्तु तस्या वि-ज्ञेयो ह्यनुष्णाशीतपाकजः। नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा। अनित्या तु तदन्या स्यात् सैवा-वयवयोगिनी। सा च त्रिधा भवेद्देह इन्द्रियं विषय-स्तथा। योनिजादिर्भवेद्देह इन्द्रियं घ्राणलक्षणम्।

विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः” भाषाप०। तस्या अध्यात्मादिभेदा यथा “पृथिवी पञ्चमं भूतं घ्राणश्चाध्यात्ममुच्यते। अधिभूतं तथा गन्धो वायुस्तत्राधिदैवतम्” भा०आश्व० ४२अ०। तस्या उत्पत्तिकारणं यथा “श्रूयतां वसुधाजन्म सर्वमङ्गलकारणम्। विघ्नविघ्नकरं पापनाशनं पुण्यवर्द्धनम्। अहो केचिद्वदन्तीति मधुकैटभमेदसा। बभूव वसुधा जन्म तद्विरुद्धमतं शृणु। ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा। आवां जहि न यत्रोर्वी पाथसा संवृतेति च। तयोर्जीवनकाले च प्रत्यक्षा साऽभवत् स्फुटम्। ततो बभूव मेदश्च मरणस्यान्तरन्तयोः। मेदिनीति च विख्यातेत्युक्ता यैस्तन्मतं शृणु। जलौघा कृता पूर्वं वर्द्धिता मेदसा यतः। कथयामि च तज्जन्म सार्थकं सर्वसम्मतम्। पुरा श्रुतं यत् श्रुत्युक्तं धर्मवक्त्राच्च पुष्करे। महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम्। मलो बभूव कालेन सर्वाङ्गव्यापको ध्रुवम्। स च प्रविष्टः सर्वेषां तल्लोम्नां विवरेषु च। कालेन महता तस्माद्बभूव वसुधा मुने!। प्रत्येकं प्रतिलोम्नाञ्च कूपेषु सा स्थिरा स्थिता। आविर्भूता तिरोभूता सा जले च पुनःपुनः। आविर्भूता सृष्टिकाले तज्जलोपर्य्यवस्थिता। प्रलये च तिरोभूता जलाभ्यन्तरस्थिता। प्रतिविश्वेषु वसुधा शैलकाननसंयुता। सप्तसागरसंयुक्ता सप्तद्वीपयुता सती। हिमाद्रिमेरुसंयुक्ता ग्रहचन्द्रार्कसंयुता। ब्रह्मविष्णुशिवाद्यैश्च सुरैर्लोकैस्तदाज्ञया। पुण्यतीर्थसमायुक्ता पुण्यभारतसंयुता। पातालसप्त तदधस्तदूर्द्धं ब्रह्मलोककः। ब्रह्मलोकश्च तत्रैव सर्वविश्वञ्च तत्र वै। एवं सर्वाणि विश्वानि पृथिव्यां निर्मितानि च। ऊर्द्ध्वं गोलोकवैकुण्ठौ नित्यौ विश्वपरौ च तौ। नश्वराणि च विश्वानि सर्वाणि कृत्रिमाणि च। प्रलये प्राकृते ब्रह्मन्! ब्रह्मणश्च निपातने। महाविराडादिसृष्टौ सृष्टेः कृष्णेन चात्मना। नित्यैः स्थिता च प्रलये काष्ठाकाशेश्वरैः सह। क्षित्यधिष्ठातृदेवी सा वाराहे पूजिता सुरैः। मुनिभिर्मनुभिर्विप्रैर्गन्धर्वादिभिरेव च। विष्णोर्वराहरूपस्य पत्नी सा श्रुतिसम्मता। तत्पुत्रो मङ्गलो ज्ञेयो घटेशो मङ्गलात्मजः। भवनं यत्र सर्वेषां भूमिस्तेन कीर्त्तिता। वसुरत्नं या दधाति वसुधा सा वसुन्धरा। हरेरूरौ च या जाता सा चोर्वी परिकीर्त्तिता। धरा धरित्री धरणी सर्वेषां धारणात्तु या। इज्याय यागाधाराञ्च क्षौणी क्षीणा लये च या। महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता। काश्यपी कश्यपस्येयमचला स्थिररूपतः। विश्वम्भरा तद्भरणादनन्तानन्तरूपतः। पृथिवी पृथुकन्यात्वाद्विस्तृतत्वात् महामुने!” ब्रह्मवै०प्र०ख०७अ०।

तस्याः सर्वसहत्वेऽपि केषाञ्चित् भारासहनकथा यथा “कृष्णभक्तिविहीना ये ये च तद्भक्तनिन्दकाः। तेषां महापातकिनामशक्ता भारवाहने। स्वधर्माचारहीना ये नित्यकृत्यविवर्जिताः। श्रद्धाहीनाश्च वेदेषु तेषां भारेण पीड़िता। पितृमातृगुरुस्त्रीणां पोषणं पुत्रपोष्ययोः। ये न कुर्वन्ति तेषाञ्च न शक्ता भारवाहने। ये मिथ्यावादिनस्तात! दयासत्यविहीनकाः। निन्दका गुरुदाराणां तेषां भारेण पीड़िता। मित्रद्रोही कृतघ्नश्च मिथ्यासाक्ष्यप्रदायकः। विश्वासघ्नः स्थाप्यहारी तेषां भारेण पीड़िता। कल्याणयुक्तनामानि हरेर्नामैकमङ्गलम्। कुर्वन्ति विक्रयं ये वै तेषां भारेण पीड़िता। जीवघाती गुरुद्रोही ग्रामयाजी च लुब्धकः। शवदाही शूद्रभोजी तेषां भारेण पीड़िता। पूजायज्ञोपवासादिव्रतानि नियमानि च। ये ये मूढा विहन्तारस्तेषां भारेण पीड़िता। सदा द्विषन्ति ये पापा गोविप्रसुरवैष्णवान्। हरिं हरिकथां भक्तिं तेषां भारेण पीड़िता। शङ्खादीनाञ्च भारेण पीड़िताऽहं यथा विधे!। ततोऽधिकेन दैत्यानां तेषां भारेण पीड़िता” ब्रह्मवै०पु० जन्मख० ४ अ०।

पृथिवीक्षित् पु० क्षि–ऐश्वर्य्ये क्विप् ६त०। भूमीशे नृपे।

पृथिवीञ्जय पु० पृथिवीं जयति जि–वा० खच् मुम् च। दानवभेदे हरिवं० २१२ अ०।

पृथिवीतीर्थ न० तीर्थभेदे भा० वन० ८३ अ०।

पृथिवीपति पु० ६त०। १भूमिपतौ राजनि २ऋषभनामौषधौ च मेदि०। ३यमे हेम०। पृथिवीनाथादयोऽपि राजनि।

पृथिवीपाल पु० पृथिवीं पालयति पालि–अण् उप०स०। भूमिपाले। ण्वुल्। पृथिवीपालक तत्रार्थे पु०।

पृथिवीभुज् पु० पृथिवीं भुनक्ति अत्ति भुज अदने क्विप्। भूपाले च। पृथिवीभुजोऽपि तत्रार्थे।

पृथिवीरुह पु० पृथिव्यां रोहति रुह–क। भूमिरुहे वृक्षे।

पृथिवीशक्र पु० पृथिव्यां शक्र इव। राजनि हेमच०। पृथिवीन्द्रभूमीन्द्रादयोऽप्यत्र।

पृथु त्रि० प्रथ–कु सम्प्र० । १विस्तीर्णे स्त्रियां गुणवचनोदन्तत्वात् ङीप् । २आदिराजे वेनपुत्रे सूर्य्यवंश्ये नृपभेदे पु० तदुत्पत्तिकथा भाग० ४।१५ अ० ।

अथ तस्य (वेनस्य) पुनर्विप्रैरपुत्रस्य महीपतेः । बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत । तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः । ऊचुः परमसन्तुष्टा विदित्वा भगवत्कलाम् । एष विष्णोर्भगवतः कला भुवनपालिनी । इयञ्च लक्ष्मीसंभूतिः पुरुषस्यानपायिनी । अत्र यः प्रथमो राज्ञां पुमान् प्रथयिता यशः । पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः” । तेन च भगवदवतारेण पृथिवी समीकृता नानौषधीश्च मथिता दुहितृत्वेन कल्पिता च । तत्कथा उत्तरत्राध्याये दृश्या ४।१८ अ० ।

“एवं पृथ्वादयः पृथ्वीं दुदुहुः स्वसमात्मनः । दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह ! । ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः । दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः । चूर्णयन् स्वधनुःकोट्या गिरिकूटानि राजराट् । भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः” ३महादेवे भा० आनु० ८ अ० । चतुर्थमन्वन्तरे काव्ये ४सप्तर्षिभेदे हरिवं० ७अ० । काकुत्स्थे अनेनसः पुत्रे ५नृपभेदे १७अ० । अजमीढवंश्ये पारपुत्रस्य ६पुत्रभेदे हरिवं० २० अ० । क्रोष्टुवंश्ये चित्ररथ पुत्रे ७नृपभेदे १५ अ० । ८दानवभेदे २६अ० । ९अग्नौ मेदि० । १०कृष्णजीरके पु० अमरः ११त्वक्पत्र्यां १२हिङ्गुपत्र्याञ्च स्त्री मेदि०१३अहिफेने शब्दरत्ना० १४महति त्रि० शब्दर० १५विष्णौ पु० । “प्राणदः प्रणवः पृथुः” विष्णुस० ।

पृथुक पु० पृथु कं जलं पेयत्वेनास्त्यस्य अच् । १चिपिटके अमरः । तस्य चर्वणे बहुजलयोगापात् तस्य तथात्वम् । अस्य क्लीवत्वमपि “द्विःस्विन्नञ्च पृथुकं शुद्धं देयविशेषकं” ब्रह्मवै०ख०२१अ० । पृथु कं शिरोऽस्य । २बालके पुंस्त्री० मेदि० । ३हिङ्गुपत्र्यां स्त्री शब्दरत्ना० ।

पृथुकीय त्रि० पृथुकाय हितं अपूपा०छ । पृथुकहिते । पक्षे यत् पृथुक्य तत्रार्थे त्रि० ।

पृथुकीर्त्ति स्त्री शूरात्मजायाम् वसुदेवभगिनीभेदे “पृथुकीर्त्त्यां तु संजज्ञे तनयो वृद्धशर्मणः । करूषाधिपतिर्वीरो दन्तवक्त्रो महाबलः” । हरिवं० २७ अ० पृथुः कीर्त्तिरस्य । २इहद्यशस्के त्रि० ।

पृथुकोल पु० कर्म० । राजबदरे राजनि० ।

पृथुग्रीव पु० १राक्षसभेदे रामा०ल०अ० । २विस्तीर्णग्रीवे त्रि० ।

पृथुच्छद पु० पृथु छदोऽस्य । १हरिदर्भे राजनि० । २इहत्पत्रयुक्ते त्रि० ।

पृथुपत्र पु० पृथूनि पत्राण्यस्य । रक्तलशुने राजनि० ।

पृथुपलाशिका स्त्री पृथूनि पलाशान्यस्याः कप् कापि अत इत्वम् । शठ्याम् राजनि० ।

पृथुरुक्म पु० क्रोष्टुवंश्ये रुक्मकवचपुत्रभेदे हरिवं० ३७अ० ।

पृथुरोमन् पु० पृथूनि रोमाणि रोमस्थानीयशल्कान्यस्य । १मत्स्ये अमरः । २इहल्लोमयुक्ते त्रि० स्त्रियां वा डाप् ।

पृथुल त्रि० पृथु+स्वार्थे लच् पृथुः प्रत्वमस्त्यस्य सिध्मा० लच् वा । १स्थूले अमरः । २हिङ्गुपत्र्यां स्त्री जटाध० ।

पृथुलाक्ष त्रि० पृथुले अक्षिणी यस्य षच्समा० । १इहन्नेत्रयुक्ते २पुरुवंश्ये चतुरङ्गपुत्रभेदे पु० हरिवं० ३१ अ० ।

पृथुवक्त्र त्रि० पृथु वक्त्रमस्य । १इहन्मुखयुक्ते । २कुमारानुचरमातृभेदे स्त्री भा० श० ४७ अ० ।

पृथुशिम्ब पु० पृथ्वी शिम्बा यस्य । श्योनाकभेदे राजनि० ।

पृथुशेखर पु० पृथु शेखरं यस्य । पर्वते त्रिका० ।

पृथुश्रव(स्) त्रि० पृथु श्रवः कर्णोऽस्य । १इहत्कर्णे अदन्तः २कुमारानुचरभेदे भा० श० ४६ अ० । सान्तस्तु । २शशबिन्दुनृपपुत्रभेदे पु० हरिवं०३६अ० ।

पृथुसेन पु० अनुवंश्ये रुचिरनृपपुत्रभेदे हरिवं० २० अ० ।

पृथुस्कन्ध पुंस्त्री पृथुः स्कन्धोऽस्य । शूकरे राजनि० स्त्रियां जातित्वात् ङीष् ।

पृथूदक न० तीर्थभेदे भा० व० ८३ अ० ।

तच्च सरस्वतीप्रदेशस्थितम् यथोक्तम् “जातिस्मरो रुषङ्गुस्तु गङ्गाद्वारे तदास्थितः । अन्तकालं ततो दृष्ट्वा पुत्रान् वचनमब्रवीत् । इह श्रेयो न पश्यामि नयध्वं मां पृथूदकम् । विज्ञाय तस्य तद्भावं रुषङ्गोस्ते तपोधनाः । तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम् । स तैः पुत्रैः समानीतः सरस्वत्यां समीपतः । स्तुत्वा तीर्थगुणान् सर्वान् प्राहेदमृषिसत्तमः । सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम् । पृथूदके जप्यपरो नैनं श्वो मरणं लभेत् । तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्मिता” वामनपु० ३८ अ० ।

पृथूदर पुंस्त्री० पृथु उदरं यस्य । १मेषे स्त्रियां जातित्वात् ङीष् । २इहत्कुक्षौ त्रि० हारा० । स्त्रियां स्वाङ्गत्वात् वा ङीष् ।

पृथ्वादि पु० “पृथ्वादिभ्य इमनिच् वा” पा० भावे इमनिच् प्रत्ययनिमित्ते शब्दगणे स च पा०ग० उक्तो यथा

"पृथु मृदु महत् पटु तनु लघु बहु साधु आशु उरु गुरु बहुल खण्ड दण्ड चण्ड अकिञ्चन होड़ पाक वत्स मन्द स्वादु ह्रस्व दीर्घ प्रिय वृष ऋजु क्षिप्र क्षुद्र अणु"।

पृथ्वी स्त्री पृथुत्वगुणयुक्ता स्त्री ङीप्। १पृथुत्वयुक्तायां स्त्रियां २भूमौ ३हिङ्गुपत्र्यां ४कृष्णजीरके च। ५स्थूलैलायाम् ६पुनर्नवायाम् मेदि०। ७इत्तार्कन्मातृभेदे हेम० स्वार्थे क। पृथ्वीका। इदृदेलायाम् हिङ्गुपत्र्यां कृष्णजीरके च। तत्र पृथिव्याः पृथुराजेन दुहितृत्वस्य कल्पनात् पुंयोगे ङीष्। "दुहितृत्वमनुप्राप्ता देवी पृथ्वी तथोच्यते" अग्निपु०। "असौ जसयलावगुरुचयतिश्च पृथ्वी गुरुः" वृ० र० उक्ते दसप्तदशाक्षरपादके छन्दोभेदे।

पृथ्वीकुरवक पु० पृथ्व्यां भूमौ कुरवक इव शुभ्रत्वात्। श्वेतमन्दारके राजनि०। [२गणेशे हेमच०।

पृथ्वीगर्भ पु० पृथ्वीव लम्बमानो गर्भ उदरमस्य। १लम्बोदरे

पृथ्वीज त्रि० पृथ्व्यां जायते जन–ड ७त०। १भूमिजाते २गडलवणे न० राजनि०।

पृथ्वीधर पु० पृथ्वीं धरति धृ–अच्। महीधरे पर्वते।

पृदाकु पु० स्पर्द–वा० आकु सम्प्रसारणे सलोपश्च। सर्पे अमरः १वृश्चिके २व्याघ्रे ३चित्रके मेदि०। ४गजे ५वृक्षे च। संक्षिप्तसारोणादिवृत्तिः। [८।१७।१५।

पृदाकुसानु पु० पृदाकुः गज इव सानुः समुन्नतः। इन्द्रे ऋ०

पृथन्य पु० स्पृश–भावे क्यु पृषो० सलोपः पृशनं स्पर्शः तत्र साधु यत्। स्पर्शसाध्ये ऋ० १।७१।५ आत्मनः पृशनमिच्छति क्यच् उ, पृशनायु तदिच्छौ ऋ० १।८४।११।

पृश्नि त्रि० स्पृश–प्रच्छ–वा नि किच्च पृषो० सलोपः। १स्वल्पे २दुर्बलास्थियुक्ते ३खर्वे च अमरः। ४रश्मौ श्रीकृष्णस्य जन्मान्तरे मातृभूतायां देवकीरूपेण द्वापरे प्रादुर्भूतायां ५वसुदेवपत्न्याञ्च स्त्री। "त्वमेव पूर्वसर्गे भूः पृश्निः स्वायम्भुवे सति। तदायं सुतपा नाम प्रजापतिरकल्मषः। अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः। तयोर्वां पुनरेवाहमदित्यामास कश्यपात्। उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः। तृतीयेऽस्मिन् भवेऽहं वै तेनैव वपुषा हि वाम्। जातो भूयस्तयोरेव" भाग०१०।३ अ०। देवकीं प्रति वासुदेववाक्यम्। ५साधरणे त्रि० निघण्टुः ६सवितुःपत्नीभेदे स्त्री भाग० ६।१८।१। ७ऋषिभेदे पु०भा० द्रो० १६१अ०। युधाजित्पृपस्य माद्र्यां जाते नृपतिभेदे अग्निपु०। [शब्दमाला।

पृश्निका स्त्री पृश्नि स्वल्पं कं जलमत्र। कुम्भिकायां (पाना)

पृश्निगर्भ पृश्नेः सुतपःप्रजापतिपत्न्याः गर्भः साधनत्वेना-स्त्यस्य अच्। नारायणे पृश्निशब्दे दृश्यम्।

पृश्निगु त्रि० पृश्नियोनानावर्णत्वात् साधरणा गावो रश्मयोऽस्य। नानावर्णदीप्तिके ऋ० १।११२।७। वेदे क्वचित् "गोस्त्रियोरुपसर्जनस्येति न ह्रस्वः" ऋ० ७।।८।।१०। उदा० दृश्यम्। [विष्णुक्रान्तायां लतायाम् अमरः।

पृश्निपर्णी स्त्री पृश्नि स्वल्पं पर्णमस्याः ङीप्। (चाकुलिया)

पृश्निभद्र पु० ७त०। पृश्निगर्भजाते नारायणांशभेदे।

पृश्निमातृ पु० पृश्निः नानावर्णा भूमिर्मातेव जन्मभूमिर्यस्य समासान्तविधेरनित्यत्वात् न कप्। नानावर्णभूमिः जाते ऋ० १।२३।१७।

पृश्निशृङ्ग पु० पृश्नि स्वल्पं शृङ्गमग्रमस्य। गणेशे त्रिका०। तस्य मुखे गजमुखत्वेन शृङ्गाकारत्वात् तथात्वम्। पृश्निः शृङ्गमिवास्य उत्पत्तिस्थानत्वेन। पृश्निगर्भजाते २विष्णौ शब्दमाला। [(पाना) शब्दमाला।

पृश्नी स्त्री पृश्नि+कृदिकारान्तत्वात् वा ङीप्। कुम्भिकायां

पृष सेके भ्वा०पा०सक०सेट्। पर्षति अपर्षीत्। पपर्ष।

पृषत् न० पृष–अति कित् (कार्ये) तेन पृषन्ति। १विन्दौ अमरः। २सेकयुक्ते त्रि०। अस्य विन्दौ बहुत्वमिच्छन्त्येके।

पृषत पुंस्त्री० पृष–अतच् कित्। १शुभ्रविन्दुमति मृगभेदे स्त्रियां जातित्वात् ङीष्। २विन्दौ पु० अमरः। ३वायुवाहने मृगे पुंस्त्री निघण्टुः। "पृषत्यो मरुताम्" इत्यत्र स्त्रीत्वमविवक्षितम्। भरद्वाजसुते ४नृपभेदे पु० मा० आ० १२ अ०।

पृषतांपति पु० ६त० अलुक्स०। वायौ जटा०।

पृषताश्व पु० पृषतो मृगभेदोऽश्व इव गतिसाधनं यस्य। वायौ अमरः।

पृषत्क पु० पृषन्ति विन्दव इव को वायुरत्र। वाणे अमरः।

पृषदंश पु० पृषात् विन्दौ अंशोऽस्य। वायौ ततः उत्करा० भवादौ अञ्। पार्षदंश तद्भवादौ त्रि०। [वायौ अमरः

पृषदश्व पु० पृषन् मृगभेदोऽश्व इव वाहकत्वात् यस्य।

पृषदाज्य न० पृषद्युक्तं दधिविन्दुयुक्तं दधिसेकयुक्तं वा आज्यम् शाक०त०। दधिमिश्रे घृते अमरः।

पृषद्वल पु० पृषन्ति बलमस्य। वायोरश्वे शब्दमाला।

पृषध्र पु० वैवस्वतमनोःपुत्रभेदे हरिवं० १० अ०। [१५६अ०

पृषद्ध्रु पु० द्वापरयुगीये युधिष्ठिरपक्षस्थे नृपभेदे भा०द्रो०

पृषन्ति पु० पृष–वा भि। विन्दौ। "पयः पृषन्तिभिः स्पृष्टा

यान्ति वाताः शनैः शनैः” जाम्बवतीविजयपद्यम्।

पृषभाषा स्त्री पृष–सेके क ताहशी भाषा यस्याः। अमरावत्यामिन्द्रनगर्य्याम् शब्दमाला०।

पृषाकरा स्त्री पृषदिवाचरते आ+कृ–कर्मणि अच् पृषो०। क्षुद्रशिलायाम् (बाट्खारा) शब्दच०।

पृषातक न० पृषन्तं पृषदाज्यं तकते हसति तक-अच्। पृषो०। दधियुक्तघृते हेमच०।

पृषोदर त्रि० पृषदिवोदरं यस्य पृषो० तलोपः। १खल्वोदरे पृषन्ति उदरे यस्य। २वायौ पु०।

पृषोदरादि “पृषोदरादीनि यथोपदिष्टम्” पा० विहित लोपादिनिमित्ते शब्दगणे स च गणः पा० ग० सू० उक्तो यथा “पृषोदर पृषोत्थान बलाहक जीमूत श्मशान उलूखल पिशाच वृषी मयूर”। “वर्णागमो वर्णविपर्य्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्”। एतच्च समासविषयकमेवेति नियमो न प्राचीनकारिकायां हंससिंहादिशब्दानामपि पृषोदरादित्वात् सिद्धत्वोक्तेः। अस्यार्थः सि० कौ० मनोरमादौ यथा

“पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः। पृषत् उदरम् पृषोदरम्। तलोपः। वारिवाहको बलाहकः। पूर्वपदस्य वः उत्तरपदादेश्च लत्वम्। “भवेद्वर्णागमात् हंसः सिंहो वर्णविपर्ययात्। गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्”। दिक्शब्देभ्यस्तीरस्य तारभावो वा। दक्षिणतारम् दक्षिणतीरम्। उत्तरतारम् उत्तरतीरम्। दुरो दाशनाशदभध्येषूत्त्वमुत्तरपदादेष्टुत्वञ्च। दुःखेन दाश्यते दूडाशः। एवं दुःखेन नाश्यते दूणाशः दुःखेन दभ्यते दूडभः। खल् तिभ्यः। दभेर्नलोपो निपात्यते। दुष्टं ध्यायतीति दूढ्यः। आतश्चेति कः। स्वुवन्तोऽस्यां सीदन्तीति वृषी। स्वुवच्छब्दस्य वृ आदेशः। सदेरधिकरणे डट्। आकृतिगणोऽयम्”। हन्तेः पश्चाद्वर्चि सुमागमे हंस इति हिंसेस्तु पश्चाद्वर्चि हकारसकारयोः स्थानव्यत्ययात् सिंह इति गूढोत्मेत्यत्र आकारविकृत्या उकारादेशः पृषोदरमित्यत्र तकारवर्णलोपः इत्येवं रीत्या सर्वत्र बोध्यम्। एतन्मूलकमेव “लुम्पेदवश्यमः कृत्ये तुम् काममनसोरपि। समो वा हिततयोर्मांसस्य पचियुजघञोरिति”। अन्तमिति शेषः कृत्यप्रत्ययान्ते उत्तरपदे अवश्यमृशब्दस्यान्त्यमकारं लुम्पेत्। अवश्यसेव्यः। तथा कामशब्दमनःशब्दयोः परतः तुमृशब्दस्यान्तम्। हन्तुकामः गन्तुमनाः। तुमिति षष्ठ्यर्थे प्रथमा। हिततशब्दयोः परतः समोऽन्त्यं मकारम् वा लुम्पेत्। सहितः संहितः सततः सन्ततः। युजघञपरपचिधातौ परे मांसशब्दान्त्याकारं लुम्पेत्। मांसपचनः मांसपचनः मांसपाकः मांसपाक इत्यादि।”

पृष्ट त्रि० पृषु सेके प्रच्छ–वा क्त। १सिक्ते–यजु०२३।८। २जिज्ञासिते “नापृष्टः कस्यचित् ब्रूयात्” मनुः।

पृष्टहायन पु० नित्यक०। १धान्यभेदे २गजे पुंस्त्री मेदि०। स्त्रियां जातित्वात् ङीष्।

पृष्टि स्त्री पृष+सेके भावे क्तिन्। सेके शत०ब्रा० ७।५।१।१२। २।१।१५। प्रच्छ–क्तिन्। २जिज्ञासायाञ्च। पृष–कर्त्तरि क्तिच् दीर्घः। ३पार्श्वस्थे स्त्री ऋ०१०।८।१० पृष्टीः पार्श्वस्थान् भा०। ४पृष्ठदेशे यजु० २।८। “पृष्टीः पृष्ठदेशः” वेददीप०। पृष्टिवह पृष्ट्यावहः। पृष्ठवहे अथ० १८।४।१०

पृष्ठ न०पृष–स्पृश–वा थक् नि०। तनोः पश्चाद्भागे अमरः। निरुक्ते ४।२“पृष्टं संस्पृष्टमङ्गैः”इत्युक्तं युक्तञ्चैतत् पृषधातोस्तु तद्रूपसिद्धेः निपातनादुपपत्तेः अतः स्पृशधातोरेव निपा०। २स्तोत्रविशेषे स च सा०सं० भाष्ये उक्तो यथा “एकस्मिन् सूक्ते विद्यमानानां तिसृणामृचां ब्राह्मणोक्तविधानेन सप्तदशधाभ्यासः सप्तदशस्तोमः तादृशेषु स्तोत्रेषु पृष्ठशब्दः श्रूयते “सप्तदशानि पृष्ठानि इति” तानि पृष्ठानि विश्वजिति चोदकप्राप्तत्वात् सर्वपृष्ठशब्देनानूद्यन्ते इत्येकः पक्षः। रथन्तर पृष्ठ वृहत्पृष्ठयोर्ज्योतिष्टोमे विकल्पितयोरिहापि चोदकेन विकल्पप्राप्तौ सर्वशब्देन समुच्चयो विधीयते। तथा सत्यनुवादकृतं वैयर्थ्यं न भविष्यति इति द्वितीयः। सर्वत्वं बहुषु मुख्यं न तु द्वयोः। तस्मादनेन सर्वपृष्ठशब्देन षट्संख्यकानि पृष्ठान्यतिदिश्यन्ते षडहे प्रतिदिनमेकैकं पृष्ठं विहितम्। तानि च पृष्ठानि षट् रथन्तरवृहद्वैरूपवैराजशाक्वररैवतसामभिः निष्पाद्यानि”।

पृष्ठगोप पु० पृष्ठं गोपायति गुप–वा अयाभावे ण्वुल्। पृष्ठदेशरक्षके योधभेदे भा० व्या० २०१ अ०।

पृष्ठग्रन्थि त्रि० पृष्ठे ग्रन्थिर्यस्य। (कुजो) कुब्जे हेमच०।

पृष्ठचक्षुस् पु० पृष्ठे पश्चाद्भागे चक्षुः दृष्टिः तद्व्यापारोऽस्य। पश्चाद्दृष्टियुक्ते भल्लूके शब्दार्थक०।

पृष्ठज त्रि० पृष्ठे पश्चात् जायते जन–ड। पश्चाद् जाते भा० व्या० ६२ अ०।

पृष्ठजाह त्रि॰ पृष्ठस्य मूलं कर्म्मा॰ मूले जाहच्। पृष्ठमूले।

पृष्ठतल्पन न॰ तल्पमिवाचरति तल्प+क्विप् नामधातुः भावे ल्युट्। पृष्ठस्य तल्पनं तल्पवदाचरणम्। (पिठे शोओया) प्रवेष्टे त्रिका॰।

पृष्ठतस् अव्य॰ पृष्ठ+तसिल्। पश्चाद्भागे इत्यर्थे।

पृष्ठदृष्टि पु॰ पृष्ठे दृष्टिस्तद्व्यापारोऽस्य। भल्लूके राजनि॰।

पृष्ठमर्म्मन् न॰ ७त॰। सुश्रुतोक्ते पृष्ठस्थमर्म्मभेदे स च तत्रोक्तो यथा

"अत ऊर्द्ध्वं पृष्ठमर्म्माण्यनुव्याख्यास्यामः। तत्र पृष्ठवंशमुभयतः प्रतिश्रोणीकाण्डमस्थिनी कटीकतरुणे नाम मर्म्मणी तत्र शोणितक्षयात् पाण्डुर्विवर्णो हीनरूपश्च म्रियते। पार्श्वजघनबहिर्भागे पृष्ठवंशमुभयतो नातिनिम्ने कुकुन्दरे नाम मर्म्मणी तत्र स्पर्शाज्ञानमधःकाये चेष्टोपघातश्च। श्रोणीकाण्डयोरुपर्य्याशयाच्छादनौ पार्श्वान्तरप्रतिबद्धौ नितम्बौ नाम तत्राधःकायशोषो दौर्ब्बल्याच्च मरणम्। अधःपार्श्वान्तरप्रतिबद्धौ जघनपार्श्वमध्ययोस्तिर्य्यगूर्द्ध्वञ्च जघनात् पार्श्वसन्धी नाम तत्र लोहितपूर्णकोष्ठतया म्रियते। स्तनमूलादुभयतः पृष्ठवंशस्य बृहती नाम तत्र शोणितातिप्रवृत्तिनिमित्तैरुपद्रवैर्म्रियते। पृष्ठोपरि पृष्ठवंशमुभयतस्त्रिकसम्बद्धे अंसफलके नाम तत्र बाह्वोः स्वापः शोषो वा। बाहुमूर्द्धग्रीवामध्येऽंसपीठस्कन्धनिबन्धनावंसौ नाम तत्र स्तब्धबाहुता। एवमेतानि चतुर्दश पृष्ठमर्म्माणि व्याख्यातानि"।

पृष्ठमांस न॰ पृष्ठस्य मांसम्। पश्वादीनां पृष्ठस्थे मांसे। तस्याभक्ष्यता मार्क॰पु॰ उक्ता यथा "पृष्ठमांसं वृथामांसं गर्भमांसं च पुत्रक!। न भक्षयीत सततं प्रत्यक्षलवणानि च"।

पृष्ठमांसाद् त्रि॰ पृष्ठे परोक्षे मांसाद इव। १परोक्षे गःत्वेन वाक्याभिधायिनि पुरुषे दोषोद्घोषके त्रिका॰। "कृष्टत्वा विभवान्वेषोल्यतः कृष्टत्येति समाकर्णात् वाक्याभिधानेऽन्वये तथार्थत्वम्। पृष्ठमांसादनशब्दे दृश्यम्। पश्वादेः २पृष्ठमांसभक्षके त्रि॰।

पृष्ठमांसादन न॰ पृष्ठे पराक्षे मांसादनमिव। "पृष्ठमांसादनं तत् यत् परोक्षे दोषकीर्त्तनम्" हेमच॰ उक्तेऽर्थे २पश्वादीनां पृष्ठमांसस्य भक्षणे च।

पृष्ठयज्वन् पु॰ पृष्ठैः रथन्तरादिभिरिष्टवान् यज–वंनिप्। रथन्तरादिभिः षड्भिःस्तोत्रसमूहैरिष्टवति ऋ॰ ५ ५४ १

पृष्ठयान न॰ पृष्ठेन यानं गमनम्। (पिठे याओया) पृष्ठेन गमने। तच्च अर्शोरोगे निदानं सुश्रुते उक्तं अर्शःशब्दे दृश्यम्।

पृष्ठवंश पु॰ ६त॰। (पिटेर दाँडा) पृष्ठास्थि हेमच॰। "चतुर्विंशतिः पृष्ठवंशे" सुश्रुतोक्तेः तत्र चतुर्विंशतिरस्थीनि। पृष्ठमर्म्मन्शब्दे दृश्यम्।

पृष्ठवास्तु न॰ ७त॰। बलिदानः पृष्ठभागस्थे वास्तुनि "पृष्ठवास्तुनि कुर्वीत बलिं सर्वात्मभूतये" मनुः। "अट्टो परिष्टहं पृष्ठवास्तु" २कुल्लूकभट्टोक्तेऽर्थे च।

पृष्ठवाह् त्रि॰ पृष्ठं पश्चाद्भागं वहति वह–ण्वि। १पश्चाद्भागवाहके हरिवं॰ १६६ स्लो॰। भत्वे वाहूठ्। पृष्ठौहः। स्त्रियां ङीप्। पृष्ठं युगपार्श्वं वहति वह–ण्वि। २युगपार्श्ववाहकवृषे [वृषे हेमच॰।

पृष्ठवाह्य पु॰ पृष्ठेन वाह्यं वहनं यस्य। पृष्ठेन भारवाहके।

पृष्ठशय त्रि॰ पृष्ठे शेते पृष्ठरूपाधिकरणोपपदे कर्त्तरि अच्। पृष्ठे शायिनि उत्तानशये।

पृष्ठशृङ्ग पुंस्त्री पृष्ठे शृङ्गमस्य। वनच्छागे हेमच॰। स्त्रियां जातित्वात् ङीष्। [मेदि॰।

पृष्ठशृङ्गिन् पु॰ ७त॰। १महिषे २नपुंसके ३भीमसेने च

पृष्ठमुख पु॰ पृष्ठे मुखमस्य कलुकस॰। कुमारानुचरभेदे भा॰श॰४६अ॰।

पृष्ठोदय पु॰ पृष्ठेनोदयो यस्य। ज्योतिषोक्ते पृष्ठेनोदययुक्ते राशिभेदे "अजो गोपतियुग्मञ्च कर्किधन्विमृगास्तथा। निशासंज्ञाः स्मृतास्ते ते शेषाश्चान्ये दिनात्मकाः। निशासंज्ञा विमिथुनाः स्मृताः पृष्ठोदयास्तथा। शेषाः शीर्षोदया ज्ञेते मीनस्तूभयसंज्ञकः"।

पृष्ठ्य न॰ पृष्ठानां स्तोत्रभेदानां समूहः "पृष्ठस्योपसंख्यानम्" वार्त्ति॰ समूहे यत्। १स्तोत्रसमूहे। पृष्ठे भवः यत्। २पृष्ठभवे त्रि॰। "सोमयागेषु छन्दोगैः क्रियमाणः पृष्ठ्यादिसंज्ञिका स्तुतिः स्तोमः" सि॰कौ॰। पृष्ठेन वहति यत्। ३पृष्ठेन भारवाहके अश्वे (बेटोघोड़ा) अमरः,

पृष्ठ्यस्तोम पु॰ पृष्ठ्यस्तोमः साधनतयाऽस्त्यस्य अच्। सामवेदप्रसिद्धेषु षट्सु क्रतुभेदेषु "पृष्ठ्यस्तोमास्त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशाः" कात्या॰श्रौ॰२२.६ २६ "पृष्ठस्तोमसंज्ञकाः षट् क्रतवो भवन्ति त्रिवृदादयः" कर्कः।

पृष्णि पु॰ पृष्णि+पृषो॰। नानावर्णयुक्ते भरतः २पार्ष्णिभागे स्त्री उणादि॰।

पॄ पालने पूर्त्तौ च क्र्या॰ स्वा॰ पर॰ सक॰ सेट् श्नाप्रत्यये परे

ह्रस्वः। पृ्षाति अपारीत् । पपार पपरतुः पपतुः ।

पृ पूर्त्तौ चु० उभ० सक० सेट् । पारयति-ते अपीपरत् त ।

पेचक पु०स्त्री पच-वुन् अतपत्वं। (पेँचा) १उलूके स्त्रियां जातित्वात् ङीष्। २गजपुच्छमूलोपान्ते ३युदाच्छादक-मांसपिण्डभेदे पु० अमरः। ४पर्य्यङ्के ५यूके पु० विश्वः। ६मेघे शब्दर०। [शब्दरत्ना० स्त्रियां ङीष्।

पेचकिन् पु० पेचकः पुच्छमूलोपान्तोऽस्त्यस्य इनि। गजे

पेचिल पुंस्त्री० पच+बा० इलच् अतपत्वं। गजे त्रिका०। स्त्रियां जातित्वात् ङीष्।

पेचु न० पचि-उन् अत एत्वम्। पेचुल्यां त्रिका०। [त्रिका०।

पेचुली स्त्री पच-उलच् अतएत् गौरा० ङीष्। शाकभेदे।

पेट पु० पिट-अच्। १प्रहस्ते राजनि०। २संहतिकारके त्रि०

पेटक पु०न० पिट-ण्वुल्। पुस्तकादीनां स्थापनार्थे वेत्रादि-निर्मिते १पदार्थे २कदम्बके ३समूहे च मेदि०। ४वंशादि-निर्मिते समुद्गकाकारे (पेटारा) पदार्थे पु० अमरः।

पेटाक पु० पेटक+पृषो०। पेटके द्विरूपकोषः।

पेटिका स्त्री पिट-ण्वुल् कापि अत इत्वम्। (टेपारि) क्षुपभेदे रत्नमाला।

पेटी स्त्री पिट-अच् स्वल्पार्थे ङीप्। क्षुद्रपेटके अमरः।

पेडा स्त्री पेट+पृषो०। वृहत्पेटिकायां भरतः।

पेढाल पु० अवसर्पिण्यां जिनोत्तमभेदे हेमच०।

पेल गतौ पेषे च सक० क्षेपे अक० भ्वा० पर० सेट्। पेषति अपेषीत्। ऋदित् चङि न ह्रस्वः अपिपेषत् त।

पेत्व न० पा-पाने कर्मणि इत्वन्। १अमृते २घृते च उज्ज्वल०

पेदु पु० राजभेदे ऋ० १।११६।१० भा०।

पेय त्रि०पा-पाने कर्मणि यत्। १पातव्ये २जले मेदि०।३दुग्धे शब्दच०। ४अष्टविधान्नान्तर्गते तरलयवागवादौ अन्नभेदे "भोज्यं पेयंतथा चूष्यं लेह्यं खाद्यञ्च चर्व्वणम्। निष्पेयञ्चैव भक्ष्यं स्यादन्नमष्टविधं स्मृतम्" राजनि०। ५सिक्थ युक्तपेयद्रव्ये स्त्री। "पेया स्वेदाग्निजननी वातवर्चो-ऽनुलोमनी। क्षुत्तृष्णाग्लानिदौर्बल्यकुक्षिरोगविनाशिनी" राजव०। ६आपायां मेदि०।

पेयूष पु०न० पीय-सौ० ऊषन् बाहुलकात् पक्षे गुणः। १अमृते २नवघृते। "सप्तरात्रप्रसूतायाः क्षीरं पेयूष-मुच्यते" हारा० उक्ते आसप्तरात्राभ्यन्तरकालीने ३दुग्धे च।

पेरज न० उपरत्नभेदे राजनि०। पिरोजशब्दे दृश्यम्।

पेरा स्त्री पि-बा० रे। वाद्यभेदे भक्तिः १७।७।

पेरु पु०पीयते रसान् पी-रु। १आदित्ये २वह्नौ च उज्ज्वल०। पुर-उ स्नग्व्यादेराकृतिगणत्वात् नि०। ३समुद्रे त्रिका०

पेरुक पु० राजभेदे ऋ० ६।६३।९

पेरोज न० उपरत्नभेदे (पीरोजा) राजनि०। तच्च द्विविधं पीताभं हरिताभञ्च। तस्य गुणाः "पेरजं तुकषायं स्यात्-मधुरं दीपनं परम्। स्थावरं जङ्गमञ्चैव संयोगाच्च यथा-विषम्। तत्सर्वं नाशयेत् शीघ्रं शूलं भूतादिदोषजम्। पाठान्तरं यथा "पेरजं तुकषायं स्यान्मधुरं दीपनं द्वयोः। स्थावरादिविषघ्नं स्याद्धरितञ्चापरं स्मृतं। पीताभं नाशयेच्छीघ्रं शूलं तिमिरभूतजम्" राजनि०।

पेल कम्पे अक०गतौ सक० भ्वा०पर०सेट्। पेलति अपेलीत्। ऋदित् चङि न ह्रस्वः अपिपेलत् त। निघण्टौ अयं गतिकर्मतया चुरादित्वेन पठितः। तेन पेलयति ते

पेल न० पेल-अच्। पुंचिह्ने अण्डभेदे (अण्डकोष) हेमच०।

पेलव त्रि० पेल-घञ् पेलं वाति वा-क। १कोमले त्रिका० २कृशे हेमच०। ३विरले अमरः।

पेलि पु०पेल-इन्। गन्तरि हृत०। तत्परं शाकयाः न क्लीबत्वम्। आद्युदात्तता चास्य।

पेव सेवने भ्वा०सक०आत्म०सेट्। पेवते अपेविष्ट। ऋदित् चङि न ह्रस्वः। अपिपेवत् त। ओष्ठान्त्यतयाऽयं धातुपाठे पठितस्तेनोभयरूपता।

पेश पु० पिश-अच्। रूपे निघण्टुः पेशलशब्दे दृश्यम्।

पेश ल)(स)ल त्रि० पिश(ष)(स)-अलच्। १सुन्दरे २दक्षे ३कोमले च अमरः। मूर्द्धन्यदन्त्यमध्योऽप्यत्रार्थेषु भरतः। ४धूर्त्ते शब्दर०। पेशोरूपमस्त्यस्य सिध्मा०लच्। ५विष्णौ पु०। "अक्रूरः पेशलो दक्षः" विष्णुस०

पेशस् न० पिश-असुन्। १रूपे २हिरण्ये च निघण्टुः। ३कोषे च।

पेशस्कार त्रि०पेशो रूपान्तरं करोति स्वगृहीतकीटस्य कृ-अण् उप०स०। स्वरूपकरे कीटभेदे स्त्रियां ङीप्। यजु०३०।८।

पेशस्कृत् त्रि० पेशो रूपान्तरं स्वगृहीतकीटस्य करोति कृ-क्विप्। कीटभेदे (काँचपोका) "कीटः पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः। याति तत्सात्मतां राजन्! पूर्वरूपमसंत्यजन्" भाग० ११।९।२४

पेशि(शी) स्त्री पिश-इन् वा ङीप्। १वज्रे २मांसपिण्डे च उणादि०। दीर्घान्तः ३अण्डे अमरः। ४सुपक्वकणिकायां ५मांस्यां ६खड्गपिधाने (खाप) ७मांसपिण्ड्यां च मेदि०। ८नदीभेदे ९पिशाचीभेदे ७राक्षसीभेदे शब्दरत्ना०। दशमी-

वेदनवर्मवदे कोषे च "बिन्दुर्मांसादयोऽवस्थाः शुक्रशोणितसम्भवाः। यासामेव निपातेन कललं नाम जायते। कललात् बुद्बुदोत्पत्तिः पेशी च बुद्बुदात् स्मृता। पेश्याः त्वङ्मतिनिर्वृत्तिः" भा० शा० २१२अ०। ८वाद्यभेदे "तथा भेर्य्यश्च पेश्यश्च क्रकचा गोविषाणिकाः" भा० भी० ४४अ०।

पेशीकोष पु० ६त०। अण्डकोषे हेमच०।

पेष सेवने निश्चये च भ्वा० आ० सक० सेट्। पेषते अपेषिष्ट पिपेषे ऋदित् चङि न ह्रस्वः। अपिपेषत् त।

पेषण न० पिष–भावे ल्युट्। १अवयवविभागेन चूर्णने। आधारे ल्युट्। २खले औषधादिमर्दनपात्रभेदे (तेकाटा-खिल) ३हस्तभेदे पु० शब्दच०।

पेषणि(णी) स्त्री पिष–करणे ल्युट्। (शिल) ख्याते हरिद्रादेश्चूर्णनसाधने शिलामये द्रव्यभेदे वा ङीप्।

पेषाक पु० पिष–आकन्। पेषणशाला उणा०।

पेषि पु० पिष-इन्। वज्रे उज्ज्वलदत्तः।

पेस गतौ भ्वा० पर० सक० सेट्। पेसति अपेसीत् पिपेस। ऋदित् चङि न ह्रस्वः। अपिपेसत् त। [१८। भा०

पेसुक त्रि० पिस–बा० उक। अभिवर्द्धनशीले शत० ब्रा० १।७।२

पेस्वर त्रि० पिस–शीलार्थे वरच्। गतिशीले।

पै शोषे भ्वा० पर० सक० अनिट्। पायति अपासीत् पपौ।

पैङ्ग पु० ऋषिभेदे भा० स० ४अ०।

पैङ्गराज पु० पक्षिभेदे यजु० २४।२४ मा०।

पैङ्गल पु० ब० व०। पिङ्गलस्यापत्यं गर्गा० यञ्। पैङ्गल्य तस्य छात्राः कण्वा० अण् यलोपः। पिङ्गलस्यापत्यस्य छात्रेषु। [फक्। तन्नामकर्षेरपत्ये।

पैङ्गरा(ला)यन पुंस्त्री० पिङ्गर(ल)स्यर्षेः गोत्रापत्यम् नडा०

पैङ्गलोदायनि पुंस्त्री० पैङ्गलोदायनस्यापत्यम् इञ्। प्राच्यभवे तन्नामकर्षिगोत्रापत्ये ततः यूनि फक् तस्य पैला० लुक्। तदीये यून्यपत्ये। [गोत्रापत्ये।

पैङ्गल्य पुंस्त्री० पिङ्गलस्य गोत्रापत्यं गर्गा० यञ्। पिङ्गलर्षे-

पैङ्गि पुंस्त्री० पिङ्गस्यापत्यमिञ्। पिङ्गस्यर्षेः पुत्रे स्त्रियां ङीप्। "पैङ्गीपुत्रात् पैङ्गीपुत्रः" शत० ब्रा० १४।९।४।१०।

पैङ्गिन् पु० पिङ्गेनर्षिणा प्रोक्तः कल्पः इनि। पिङ्गर्षिप्रोक्ते कल्पशास्त्रे। [प्रवरर्षिभेदः।

पैङ्ग्य पु० पिङ्ग बा० अपत्ये यञ्। पैङ्गर्षिपुत्रे स च गोत्र-

पैयवन पु० पीयवनस्यापत्यमृष्यण्। पैयवने नृपे मनुः ८।११० मैयवन इति पाठान्तरम्।

पैष्णूष पु० पिष्ण–अन स्वार्थे अण्। कर्णे श्रोत्रे हेमच०।

पैठर त्रि० पिठरे संस्कृतं पक्वम्। स्थालीपक्वमांसादौ अमरः।

पैठिक पु० असुरभेदे हरिवं० १६१ अ०। [प्रवरा०।

पैठिनसि पु० १उपस्मृतिकारके २ऋषिभेदे ३गोत्रर्षिभेदे च

पैण्डायन पुंस्त्री पिण्डर्षेर्गोत्रापत्यम् नडा० फक्। पिण्डर्षिगोत्रापत्ये।

पैण्डिक्य(न्य) पिण्डं परपिण्डं भक्ष्यतयाऽस्त्यस्य ठन् इनि वा पिण्डिक पिण्डिन् वा तस्य भावः पुरोहिता० यक् ष्यञ् वा। परपिण्डोपजीवित्वे भिक्षोपजीवने त्रिका०।

पैण्ड्र त्रि० पिण्ड्यां भवः कुर्वा० ण्य। पिण्डीभवे।

पैतरावण पु० गोत्रप्रवरर्षिभेदे प्रवरा०।

पैतृक त्रि० पितृत आगतं पितुरिदं वा ठञ्। १पितृतः प्राप्ते २पितृसम्बन्धिनि च। पैतृकभूमिमाहात्म्यं ब्रह्मवै० जन्मख० १०२ अ० दर्शितं यथा "वासुदेव! न यास्यामि भूमिं तां, पैतृकीं पुनः। सर्वतीर्थपरा शुद्धा दैवे कर्मणि पैतृके। पारक्ये भूमिदेशे च पितॄणां निर्वपेत्तु यः। तद्भूमिस्वामिपितृभिः श्राद्धकर्म निहन्यते। पितॄणां निष्फलं श्राद्धं देवानामपि पूजनम्। किञ्चित्फलप्रदश्चैव सम्पूर्णं पैतृके स्थले। पुत्रपौत्रकलत्रेभ्यः प्राणेभ्यः प्रेयसी सदा। दुर्लभा पैतृकी भूमिः पितृमातृगरीयसी। तत्सर्वाश्च पवित्राश्च दैवे कर्मणि पैतृके। क्रीतस्य तदते दानं परदत्तमशुद्धकम्। म्रियते पैतृकभूम्यां तीर्थतुल्यफलं लभेत्। गङ्गाजलसमं पूतं पितृखातोदकं हरे!। पितॄणां तर्पणं तत्र पवित्रं देवपूजनम्। पैतृकी जन्मभूमिश्चेत् फलं तद्द्विगुणं लभेत्। पैतृकभूमितुल्या न दानभूमिः सतामपि"।

पैतृमत्य त्रि० पितृमत्यां अनूढायां कन्यायां भवः कुर्वा० ण्य। कन्यायां भवे कानीने। [पितृस्वसुरपत्ये।

पैतृष्वसेय पुंस्त्री पितुः स्वसुरपत्यम् ढक् अन्त्यलोपः षत्वम्।

पैतृष्वस्रीय पुंस्त्री० पितुः स्वसुरपत्यम् छण्। पितृस्वसुरपत्ये

पैत्त त्रि० पित्तात् आगतः अण्। धातुविशेषपित्तकृते ज्वरादौ।

पैत्तिक त्रि० पित्तेन निर्वृत्तः ठञ्। धातुविशेषपित्तकृते व्याधौ।

पैत्र त्रि० पितुरिदम् अण्। १पितृसम्बन्धिनि श्राद्धादौ। अङ्गुष्ठतर्जन्योर्मध्यस्थाने २पितृतीर्थे न०। ३पितृसम्बन्धिदिने च तन्मानं च कल्पद्रुमशब्दे ५७६पृ० उक्तं दृश्यम्।

पैद्व पुंस्त्री अश्वे निघण्टुः। ऋ० ९।८८।४। स्त्रियां जातित्वात् ङीष्।

पैनद्धक त्रि॰ पिनद्ध+चतुरर्थ्यां वराहा॰कक्। पिनद्धसमीपादौ।

पैप्पलाद पु॰ब॰व॰। पिप्पलादेन ऋषिणा प्रोक्तमधीयते अण्। १पिप्पलर्षिप्रोक्ताध्यायिषु तदर्थस्य २वेत्तृषु च कार्त्तकौज॰ सौभेन वह्ह द्वन्द्वे पूर्वं प्रकृतिस्वरः।

पैप्पलादि पुंस्त्री पिप्पलादस्यर्षेरपत्यम् इञ्। पिप्पलादर्षेरपत्ये स च गोत्रप्रवरर्षिभेदः प्रवराध्यायः स्त्रियां ङीप्।

पैल(लेय) पुंस्त्री॰ पीलाया अपत्यं "पीलाया वा" पा॰ अण् पक्षे ढक्। पीलाया अपत्ये स्त्रियां ङीप्। यून्यपत्ये तु "अनोह्रग्वः" पा॰ फिञ् तस्य पैलादि॰ लुक्। तस्य युन्यपत्येऽपि। तथा च पैलः पिता पुत्रश्च।

पैलगर्ग पु॰ कर्म॰। ऋषिभेदे तदाश्रमस्य च तीर्थत्वम् भा॰ उ॰ १८७ अ॰।

पैलव त्रि॰ पीलौ दीयते कार्य्यं वा व्युष्टा॰ अण्। पीलौ १दीयमाने २कार्य्ये च। व्युष्टा॰ गणे पीलुमूलेति बहूनामित्येके समस्तमित्यन्ये। इदमर्थेऽण्। पीलुसम्बन्धिनि त्रि॰ मनुः २।४०। [जलादिभवे।

पैलुवहक त्रि॰पीलुवहे भवः वह्वान्तत्वात् वुञ्। पीलुवह-

पैलादि "पैलादिभ्यश्च"पा॰ युवप्रत्ययलुग्निमित्ते शब्दगणे स च यथा: "पैल शालङ्कि सात्यकि सात्यकामि राहवि रावणि औदञ्चि औदव्रजि औदमेधि औदमज्जि औदभृज्जि दैवस्थानि पैङ्गलोदायनि राहक्षति भौलिङ्गि राणि औदन्यि औद्वाहमानि औज्जिहानि औदशुद्धि (तद्राजा चाणः) (आकृतिगणोऽयम्)। तद्राजसंज्ञकात् परस्य युवप्रत्ययस्य लुगित्यर्थः।

पैशाच पु॰ पिशाचेन निर्वृत्तः अण्। "सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति। स पापिष्ठो विवाहानां पैशाचः" मनूक्ते १विवाहभेदे २पिशाचकृते३तत्सम्बन्धिनि च त्रि॰। स्त्रियां ङीप् "पैशाचीं योनिमापन्नाः"पुरा॰। "यत्राकृष्य ददाति दृष्ट्वा वा क्रोशति अस्तत्कृतं पैशाचमिति" हारीतोक्ते ४दानभेदे स्वार्थे अण्। ५पिशाचशब्दार्थे पु॰ पर्श्वा॰अण्। ६आयुधजीविसङ्घभेदे। बहुषु तस्य लुक्।

पैशुन(न्य) न॰ पिशुनस्य भावः युवा॰अण् ब्राह्मणा ष्यञ् वा। पिशुनत्वे

पैष्ट त्रि॰पिष्टस्येदम्। अण् १पिष्टसम्बन्धिनि स्त्रियां ङीप् सा च २सुराभेदे। "पैष्टी कटूष्णतीक्ष्णा स्वादीमद्गौड़ीसमा परा। वातहृत् कफकृत्पीनतृप्तिसम्मोहनी च सा" राजनि॰।

पैसुकायन पु॰ गोत्रप्रवरर्षिभेदे प्रवराध्यायः।

पो त्रि॰ पवते पुनाति वा पु-पू-वा विच् १शुद्धे २शोधके च।

पोगण्ड पु॰ पौः शुद्धो गण्डः एकदेशो यस्य। १विकलाङ्गे २न्यूनाधिकाङ्गे। स्वार्थे अण्। "पौगण्डः पञ्चमाद्वर्षादर्वाक् च दशमाद्वतः" इत्युक्तवयस्के बालके पु॰हला॰।

पोट पु॰ पुट-स्लेषे घञ्। १संश्लेषे-आधारे घञ्। २वेश्मभूमौ जटा॰।

पोटगल पु॰ पोटेन संश्लेषमात्रेण गलति गल-अच्। १नले २काशे च अमरः। ३मत्स्यभेदे पुंस्त्री मेदि॰ स्त्रियां ङीप्।

पोटलक न॰ पोटेन लीयते ली-ड स्वार्थे क। (पुँटलि) ख्याते संश्लिष्टवस्त्रादौ कात्या॰ श्रौ॰ ७।८।४। कर्कः। तत्रार्थे स्त्री काषि अत इत्वम् पोटलिका। [अमरः।

पोटा स्त्री पु॰ पुट-अच्। पुरुषलक्षणयुक्तायां स्त्रियाम्।

पोट्टलिका स्त्री पोटलिका+पृषो॰ (पुँटलि) ख्याते पदार्थे पोट्टलीत्यपि तत्रार्थे "गुडूच्यं त्रिफलाक्वाथे गुडूच्याः क्वाथ एव वा। दोलायन्त्रे पुरः पाच्यः पोट्टल्या वस्त्रबद्धया" वैद्यक॰।

पोट्टिल पु॰ अवसर्पिण्यां जिनोत्तमभेदे हेमच॰।

पोड्ड पु॰ पुड-उम्। कपालास्थिन राजनि॰।

पोत पुंस्त्री पू-तन्। १बालके २वहित्रे च अमरः। ३गृहस्थानभेदे (पोँता) ४वस्त्रे च मेदि॰। ५दशवर्षीयगजे हेमच॰। ६गृहस्थाने नौकाभेदे (जाहाज) ततः समूहे पाशा॰ य। पोत्या पोतसमूहे स्त्री।

पोतक पु॰पोत इव कायति कै-क स्वार्थे क वा।१पोतपदार्थे २नागभेदे भा॰उ॰।०२अ॰। गौरा॰ ङीप्। ३पूतिकाख्याके स्त्री ४श्योनाके च स्त्री राजनि॰।

पोतज पु॰ पोतः सन् जायते जन-ड। शिशुभूततया जायमाने गजाश्वादौ हेमच॰। [गौरा॰ ङीष्।

पोतन त्रि॰ पू-तन। १पवित्रे २पवित्रताकारके च स्त्रियां

पोतप्लव पु॰ पोतेन प्लवते प्लु-अच्। नौकया तारके ह॰सं॰ ।०।१०। [अमरः।

पोतवणिज् पु॰ पोते वणिक्। नौकया वाणिज्यकारके

पोतरक्ष पु॰ पोतं रक्षति अण् उप॰स॰। (हालि) ख्याते पदार्थे नौनिपातके शब्दमा॰।

पोतनकप्रिय त्रि॰ बुद्धभेदे त्रिका॰।

पोतवाह पु॰ पोतं नावं वहति वह-अण् उप॰स॰। नौकावाहके (दाँडि) अमरः।

पोताच्छादन न॰ पोतश्चेवाच्छादनम्। वस्त्रकुटीरे हारा॰।

पोताधान पु॰ पोतानां शिशूनामण्डजातमत्स्यानामाधानम् । क्षुद्रमत्स्यसङ्घे (पोनारझाँक) अमरः । [राजनि॰ ।

पोतास पु॰ पोत इवाशति अश–दीप्तौ अच् । कर्पूरभेदे

पो(पौ)तिमत्स्यक पु॰ नृपभेदे भा॰ उ॰ २अ॰ ।

पोतिका स्त्री पूतिका+पृषो॰ । पूतिकायां १शाकभेदे भरतः २शतपुष्पायां ३मूलपोत्यां च राजनि॰ ।

पोतु पु॰ पु–तुन् । मानभाण्डशोधके हेमच॰ ।

पोतृ पु॰ पुनाति पु–तृन् । ऋत्विग्भेदे अच्छावाकशब्दे ८५ पृ॰ दृश्यम् । होत्रादिशब्देन द्वन्द्वे ऋत आत् । पोताहोतारौ ।

पोत्र न॰ पू–ष्ट्र । १वज्रे २शूकरमुखाग्रे ३लाङ्गलमुखाग्रे, ४वहित्रे च मेदि॰ । [स्त्रियां जातित्वात् ङीष् ।

पोत्रायुध पुंस्त्री पोत्रमायुधमिवास्य । शूकरे राजनि॰ ।

पोत्रिन् पु॰ पोत्रमस्त्यस्य इनि । शूकरे अमरः । पोत्रयुक्ते त्रि॰ । स्त्रियां ङीप् । [शक्तिभेदे त्रिका॰ ।

पोत्रिरथा स्त्री पोत्री रथ इव गतिसाधनमस्याः । जिन-

पोत्रीय त्रि॰ पोतुः॰ कर्म छ । पोतृकर्त्तव्ये कर्मणि । कात्या॰ श्रौ॰ २४।४।४२ ।

पोथकी स्त्री "कण्डूरावान्विता गुर्व्वी रक्तसर्षपसन्निभाः । पिड़काश्च रुजावत्यः पोथक्य इति संज्ञिताः" सुश्रुतोक्ते पिड़काभेदे । [स्त्री गौरा॰ङीन ।

पोल त्रि॰ पुल–ज्वला॰ण । १महत्त्वयुक्ते । २पिष्टकभेदे

पोलिका स्त्री पूरिकाभेदे लताशब्दे २१८१ पृ॰ दृश्यम् ।

पोलिन्द पु॰ पोतस्यालिन्द इव पृषो॰। नौकांशभेदे त्रिका॰।

पोषयितृ त्रि॰ पुष–णिच्–तृच् । १पोषके २काकपोष्ये पिके च उज्ज्वल॰ ।

पोषुक त्रि॰ पुष–बा॰ उक । पोषणकरणशीले "तमनुपोषं पोषुको भवति" षड्विंशब्रा॰ । [पके त्रि॰ शब्दच॰ ।

पोट्ट पु॰ पुष–तृच् । (काँटा करमजा) १करञ्जभेदे । २पो-

पोष्य त्रि॰पुष–कर्मणि ण्यत् । १पोषणीये । आवश्यके ण्यत् । २अवश्यपोष्ये । अवश्यपोष्यश्च दर्शितो यथा "भरणं पोष्यवर्गस्य दृष्टादृष्टफलोदयम् । प्रत्यवायोऽप्य-भरणे कर्त्तव्यन्तत् प्रयत्नतः । माता पिता गुरुः पत्नी त्वपत्यानि समाश्रिताः । अभ्यागतोऽतिथिश्चाग्निः पोष्य-वर्गा अमी नव" काशी॰ख॰ ४५ अ॰ । "ज्ञातिर्बन्धु-जनः क्षीणस्तथाऽनाथः समाश्रितः । अन्येऽप्यधनयुक्ताश्च पोष्यवर्गं उदाहृतः" दक्षसं॰ ।

पोष्यपुत्र पु॰ कर्म॰ । पालनादिना पुत्रत्वमाप्ते "अधुना कृत्तिकादीनां षण्णां यः पोष्यपुत्रकः । तन्नाम चक्रुस्ताः प्रेम्णा कार्त्तिकश्चेति कौतुकात्" ब्रह्म॰वै॰गण॰ख॰१४अ॰। अधुना दत्तकपुत्रस्य पोष्यपुत्रत्वं व्यवह्रियते तद्विधानं दत्तकशब्दे ३४२८पृ॰ दृश्यम् ।

पौंश्चलेय पुंस्त्री पुंश्चली+अपत्ये ढक् । पुंश्चल्या अपत्ये

पौंश्चल्य न॰ पुंश्चल+भावे ष्यञ् । १असतीत्वे परपुरुष-गामित्वे २पुंस्त्रियोर्मिथोव्यभिचारे च मनुः ६।१५ ।

पौंसायन पु॰ सौत्रामण्यां याजके दुष्टरीतौ राजभेदे शत॰ब्रा॰ १२।६।३।२

पौंस्न न॰ पुंसो भावः स्नञ् । पुंस्त्वे ।

पौंस्य न॰ पुंस अभिमर्दने यत् तत्र साधु वा॰ ष्यञ् । १बले निघ॰ । २संग्रामे च निघण्टुः ऋ॰१।१८०।१० ।

पौगण्ड न॰ पौगण्डस्य भावः । १पञ्चमावधिदशमवर्षान्ता-वस्थाभेदे पोगण्डशब्दे दृश्यम । स्वार्थे अण् । २तद-वस्थायुते त्रि॰ ।

पौञ्जिष्ठ पुंस्त्री अन्त्यजातिभेदे यजु॰ ३०।१८। वेददी॰ ।

पौटायन पुंस्त्री पुटायनर्षेरपत्यम् अण् । पूटायनर्षेः गोत्रापत्ये । [गोत्रस्त्रियाम् ।

पौणिका स्त्री पुणगोत्रस्य स्त्री अण् स्त्रियां ष्यङ् । पुण-

पौण्डरीक न॰ पुण्डरीकमिव शर्करा॰ अण् । पुण्डरीक-तरौ प्रपौण्डरीके राजनि॰ ।

पौण्डर्य न॰पुण्डर्यमेव स्वार्थे अण् । पुण्डर्ये भरतः ।

पौण्ड्र पु॰ १देशभेदे स च वृ॰स॰१४॰ पूर्वस्यामुक्तः मा॰भी॰९अ॰ सोऽस्य अभिजनः तस्य राजा वा अण् । २तद्देशवासिनि ३पि-त्रादिक्रमेण तद्देशवासिनि च । "पौण्ड्रश्च वज्रिनां वरः" हरिवं॰९१अ॰। स च कृष्णेन निहतः "पाण्ड्रं पौण्ड्रं कलिङ्गञ्च मातृस्वस्रैव जनार्दनः। अयान संहितान् सर्वान्" हरिवं॰ १६१ अ॰ । "वसुदेवस्य सुतनूपत्नीजाते ४पुत्रभेदे । "सुतनूश्च नराची च शौरेरास्तां परिग्रहः । पौण्ड्रश्च कपिलश्चैव वसुदेवस्य तौ सुतौ । नराच्यां कपिलो जज्ञे पौण्ड्रश्च सुतनूसुतः । तयोर्न्तृपोऽभवत् पौण्ड्रः कपिलश्च वनं ययौ" हरिवं॰१६२ अ॰ । ५भीम-सेनशङ्खे ६इक्षुभेदे पु॰ शब्दमा॰ । ७क्रियालोपेन वृष॰ लत्वप्राप्ते क्षत्रियभेदे मनुः १०।४४ स्वार्थे क । तत्रार्थे इक्षुभेदे (पुंड़ि) ।

पौण्ड्रनागर पु॰ पौण्ड्रनगरे भवः अण् तस्य प्राच्यदेशत्वे-ऽपि नगरान्तत्वेन उत्तरपदवृद्धिः । पौण्ड्रनगरभवे ।

पौण्ड्रमात्स्यक पु॰ राजभेदे भा॰ आ॰ २७ अ॰।

पौण्ड्रवर्द्धन पु०(वेहार) ख्याते देशभेदे शब्दर० तत्र पौण्ड्रेक्षु प्राचुर्यात् तथात्वम्। [२गोत्रप्रवरर्षिभेदे प्रवराध्यायः।

पौण्ड्रिक पु० पुण्ड्र+स्वार्थे ठञ्। १इक्षुभेदे शब्दमा०।

पौण्य त्रि० पुण्येषु श्रौतस्मार्तकर्मसु साधु अण्। पूर्त्तकर्मकारके काव्या० २२।२।५।

पौतव न० पोतव-पृषो०। परिमाणे हेमच०।

पौतिक त्रि० पूतिकेन दुर्गन्धिना निर्वृत्तम् सङ्कला० अण्। पूतिकद्रव्यनिर्वृत्ते।

पौतिमाष पु० ब०व०। पूतिमाषस्यर्षेः गोत्रापत्यं गर्गा० यञ्। तस्य छात्राः कण्वा० अण् यलोपः। पौतिमाषच्छात्रेषु।

पौत्रक न० पोतुरिदं ठञ्। ऋत्विग्भेदपोतृसम्बन्धिनि।

पौत्तिक न० पुत्तिकाभिर्मधुमक्षिकाभेदैर्निर्वृत्तम् ठञ्। मधुनि रत्नमा०।

पौत्र पुंस्त्री पुत्रस्यापत्यं शिवा०अण्। पुत्रस्य पुत्रे नप्तरि "पौत्रेणानन्त्यमश्नुते" इति स्मृतिः। स्त्रियां ङीप्।

पौदन्य पु० अश्मकन्दपनगरे भा० आ० १७७ अ०।

पौनःपुनिक त्रि०पुनःपुनर्भवः ठञ् टिलोपः। पुनःपुनर्भवे।

पौनःपुन्य न० पुनः पुनरेव स्वार्थे चतुर्वर्णा० ष्यञ् टिलोपश्च। १पुनःपुनरित्यर्थे भावे ष्यञ्। २आभीक्ष्ण्ये

पौनरुक्त न० पुनरुक्तस्य भाव उद्गयना०अण्। पुनर्वारोक्तौ

पौनरुक्तिक न० पुनरुक्तमर्थं वेत्ति तत्पदं वाऽधीते उक्था० ठक्। १पुनरुक्तार्थाभिज्ञे २पुनरुक्तपदाध्येतरि च।

पौनर्भव पुंस्त्री पुनर्भू+विदा० अपत्ये अञ्। पुनर्भ्वपत्ये १द्वादशपुत्रमध्ये पुत्रभेदे "पत्या या च परित्यक्ता विधवा वा स्वयेच्छया। उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते" मनुः। २तथाविधकन्यायां स्त्री स्वार्थे अण्। तत्रार्थे "सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः। वाचादत्ता मनोदत्ता कृतकौतुकमङ्गला। उदकस्पर्शिता या च या च पाणिगृहीतिका। अग्निं परिगता या च पुनर्भूप्रभवा च। इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्" काश्यपोक्ते सप्तविधे ३कन्याभेदे च। आर्षत्वात् ङीबभावः। अजादेराकृतिगणत्वात् वा टाप् इत्यन्ये। पुनर्भुवं विन्दति अण्। ४पुनर्भूवेदके भर्त्तरि। "सा चेदक्षतयोनिः स्यात् गतप्रत्यागताऽपि वा। पौनर्भवेन भर्त्रा सा पुनःसंस्कारमर्हति" मनुः।

पौर त्रि० पुरे वसति शैषिकोऽण्। १पुरवासिनि २रोहिषतृणे न०(रामकर्पूर) अमरः। पूरः पूरक एव स्वार्थे अण्। ३उदरपूरके त्रि०ऋ०२।११।११भा०। पुरोभवः पुरस्+अण् टिलोपः। ४पूर्वदिग्देशकालभवे "पौरा बुधगुरुरविजा नित्यम्" वृ०सं० १७ अ०।

पौरक न० पौर इव कायति कै-क। गृहबाह्योद्याने हेम०।

पौरकुत्सी स्त्री पुरकुत्सस्यापत्यं स्त्री इञ् ङीप्। गाधिराजमातरि हरिवं० २७ अ०। [समीपादौ।

पौरगीय त्रि० पुरग+कृशाश्वा० चतुरर्थ्यां छण्। पुरगत०

पौरण पु० "पूरणवारिधापयन्तानां वैश्वामित्रदेवरातपौरणेति आश्व०श्रौ०१२।१४।५ उक्ते गोत्रप्रवरर्षिभेदे। पूरण+स्वार्थे अण्। २पूरणे स्त्रियां ङीप्। "पौरणीं भूषणक्रियाम्" हरिवं० ९८अ०।

पौरन्दर त्रि० पुरन्दरस्येदम् पुरन्दरो देवताऽस्य वा अण्। १शक्रसम्बन्धिनि २ज्येष्ठानक्षत्रे च वृ०सं०१५अ०।

पौरव पुंस्त्री० पु(पू)रोर्गोत्रापत्यमण्। १ययातिपुत्रभेदस्य पु(पू)रोरपत्ये २तत्सम्बन्धिनि च। ३उत्तोच्यदेशभेदे वृ० सं०१४अ०। मार्क०पु०५८ अ० तस्य पूर्वोत्तरदिक्स्थत्वमुक्तं यथा "त्रिनेत्राः पौरवाश्चैव गन्धर्वाश्च द्विजोत्तम!। पूर्वोत्तरन्तु कूर्मस्य पादमेते व्यवस्थिताः" सोऽभिजनोऽस्य तस्य राजा वा अण्। पित्रादिक्रमेण ४तद्देशवासिनि ५तद्भूपे च। [भक्तियुक्ते सि०कौ०।

पौरवीय त्रि० पौरवो राजा भक्तिरस्य छ। पौरवनृप-

पौरश्चरणिक त्रि०पुरश्चरणस्य व्याख्यानस्तत्र भवो वा ठञ्। १पुरश्चरणप्रतिपादकग्रन्थव्याख्यानग्रन्थे २तत्र भवे च।

पौरस्त्य त्रि०पुरस्+भवार्थे त्यक्। १पुरोभवे २प्रथमे च अमरः

पौरागीव त्रि० पुराग+कृशाश्वा० चतुरर्थ्यां छण्। पूर्वकालगतस्यादूरदेशादौ। [१अ०।

पौराण त्रि० पुराणे पठितः अण्। पुराणपठिते भा० आ०

पौराणिक त्रि० पुराणं वेत्त्यधीते वा "आख्यानाख्यायिकेतिहासपुराणेभ्यश्च" वार्त्ति० ठक्। १पुराणार्थाभिज्ञे २तदध्येतरि च। पुराणे पठिता ठक्। ३तत्र पठिते त्रि० स्त्रियां ङीप्।

पौरिक पु० दाक्षिणात्ये देशभेदे मार्कपु० ५७ अ०।

पौरुकुत्स पु० गोत्रप्रवरर्षिभेदे प्रवराध्यायः।

पौरुष न० पुरुषस्य भावः कर्म वा युवा० अण्। १पुरुषत्वे २विक्रमे ३उद्यमे च। पुरुषस्येदम् अण्। ४ऊर्द्धविस्तृतबाहुपाणिकमनुष्यपरिमाणे अमरः। "जलेऽपि मानेऽपि च पौरुषाधिकम्" नैष०। स्वार्थे अण्। ४पुरुषवद्धार्थे शत०ब्रा० १४।७।१।१२।

पौरुषांशकिन् पु० ब०व०। पुरुषांशकेन ऋषिणा प्रोक्त-

मधीयते शौनका० णिनि। पुरुषांशकर्षिणा प्रोक्ताध्येतृषु।

पौरुषेय पु० पुरुषस्य वधादि “पुरुषाद्वधविकारसमूहतेन कृतेषु” पा० ठञ्। पुरुषस्य १वधे २विकारे ३समूहे ४तेन कृते च।

पौरेय त्रि० पुरस्यादूरदेशादि सख्या० ढञ्। नगरसमीपादौ

पौरोगव पु० पुरोऽग्रे पाचनवस्तुषु गौर्नेत्रं यस्य पुरोगुः ततः स्वार्थे प्रज्ञा० अण्। पाकशालाध्यक्षे अमरः।

पौरोहित त्रि० पुरोहितस्य धर्म्यम् महिष्या० अण्। पुरोहितस्य धर्म्ये। [कर्मभेदे आश्व०श्रौ०२।१८।६।

पौर्णदर्व न० पूर्णया दर्व्या निष्पाद्यं कर्म अण्। वैदिके

पौर्णमास पु० पौर्णमास्यां भवः सन्धिवेला० अण्। १पौर्णमासीविहिते यागे “दर्शपौर्णमासाभ्यां यजेत” श्रुतिः स च द्विविधः यावज्जीवकालिकः पञ्चदशीप्रतिपत्सन्धिकाले कर्त्तव्यश्च। तत्कालादिविधानं कात्या० श्रौ० २।१ कण्डिकादौ दृश्यम्। पूर्णो माश्चन्द्रमास्तस्येयम् अण् पूर्णो मासो यस्यां वर्त्तते “पूर्णमासादण् वक्तव्यः” वा० अण् वा। २शुक्लपक्षीयपञ्चदशकलाक्रियायां तदुपलक्षितकालरूपायां वा ३तिथौ स्त्री ३तदुत्तरप्रतिपदि च “द्वे ह वै पौर्णमास्यौ पूर्वा उत्तरा च तत्र पञ्चदशी पूर्वा प्रतिपदुत्तरा” इति श्रुतेः तत्र पञ्चदशी मुख्या प्रतिपद्गौणी इत्यर्थः।

पौर्णमासिक त्रि० पूर्णमास्यां भवः कालाट् ठञ्। पौर्णमासभवे यागादौ वा० यत्। पौर्णमास्य तत्रार्थे।

पौर्णमी स्त्री पूर्णतया चन्द्रो मीयतेऽत्र मा--आधारे घञर्थे क स्वार्थे अण् ङीप्। पूर्णिमातिथौ त्रिका०। [२।१७८

पौर्त्तिक त्रि० पूर्त्ताय साधु ठक्। पूर्त्तसाधने कर्मणि मनु०

पौर्य पुंस्त्री० पुरस्यापत्यं कुर्वा० ण्य। पुरनामकस्य नृपस्यापत्ये

पौर्वनगरेय त्रि० पूर्वनगर्यां भवः नद्या० ढक्। पूर्वनगरीभवे

पौर्वपदिक त्रि० पूर्वपदं गृह्णाति ठञ्। पूर्वपदग्राहके।

पौर्वातिथ पु० गोत्रप्रवरर्षिभेदे आश्व० श्रौ० १२।१४।११

पौर्वापर्य न० पूर्वापरयोर्भावः ष्यञ्। पूर्वापरत्वे।

पौर्वाह्ण(ह्णि क)ह्णेत्र त्रि० पूर्वाह्णे भवः यत् अञ् ठञ् वा पूर्वाह्णभवे। [च। पूर्वाह्णेतन तत्रार्थे त्रि०।

पौर्वाह्णिक त्रि० पूर्वाह्णे भवः ठञ्। पूर्वाह्णभवे पक्षे ट्यु तुट्

पौर्विक त्रि० पूर्वस्मिन् काले भवः ठञ्। पूर्वकालभवे स्त्रियां ङीप्। “जातिं स्मरति पौर्विकीम्” मनुः ४।१४८।

पौलस्त्य पुंस्त्री० पुलस्त्यस्यापत्यं गर्गा० यञ्। पुलस्त्यस्यापत्ये १कुवेरे २रावणादौ च मेदि०। स्त्रियां ङीप् यलोपः। पौलस्ती शूर्पणखायाम्। [विकारे।

पौलाक त्रि० पुलाकस्य विकारः पलाशा० अञ्। पुलाक-

पौलि पु०पुल--इन् वा० वृद्धिश्च। १ईषद्दग्धे आरब्धपाकावस्थे कलायादौ अमरः। स्वार्थे क। तत्रार्थे हेमच०।

पौलुषि पु० पुलुषवंश्ये सत्ययज्ञे ऋषिभेदे शत०ब्रा०१०।६।१।१

पौलोमी स्त्री पुलोम्नोऽपत्यम् अण् अनोलोपः। पुलोमजायां शच्यां हेमच०।

पौष पु० पुष्येण युक्ता पौर्णमासी पुष्य--अण् यलोपः ङीप् पौषी सा यत्र मासे अर्द्धमासे वर्षे वा पुनरण्। १पुष्यनक्षत्रयुक्तपौर्णमासीयुक्ते १मासे २पक्षे ३जैवे वर्षभेदे कार्त्तिकशब्दे १९४९पृ० दृश्यम्। “मीनादिस्थो रविर्येषामारम्भः प्रथमक्षणे” इत्यादिरीत्या धनुःस्थरव्यारब्धः शुक्लप्रतिपदादिदर्शान्तात्मको मुख्यचान्द्रपौषः कृष्णपक्षादिपौर्णमास्यन्तः गौणः पौषः, धनूराशिस्थरविकः सौरः पौष इति भेदः तेनान्यत्र भक्तिः।

पौष्कर न०पुष्करस्याकारोऽस्त्यस्य मूले प्रज्ञा०अण्। १पुष्करमूले राजनि० पुष्करस्येदम् अण्। २पुष्करसम्बन्धिनि त्रि० विष्णोः पद्मतया प्रादुर्भावयुते ३पाद्मे कल्पे पु०।

पौष्करमूल न०स्वार्थे अण्। पुष्करमूले सुगन्धिद्रव्यभेदे भरतः

पौष्करिणी स्त्री पुष्कराणां समूहः अण् स्वार्थे अण् वा ततोऽस्त्यर्थे इनि ङीप्। पुष्करिण्यां शब्दच०।

पौष्करेयक न० पुष्करे जातादि कत्र्या० ढकञ्। पुष्करे जातादौ स्त्रियां ङीप्।

पौष्कल त्रि० पुष्कलेन निर्वृत्तम् सङ्कला० अण्। १पुष्कलनिर्वृत्ते २साममेदे न० “उष्णिहि शर्फं ककुभि पौष्कलम्” सामसं०भा०धृता श्रुतिः “तस्य गीतं पवस्व मधुमत्तम” इति प्रगाथे (उत्तरा० १प्र०१६) तस्मिन् पूर्वा ककुप् उत्तरा पङ्क्तिः। तत्र (ककुभि) पौष्कलं साम। (तच्च) ऊहगा०१प्र--१६ दर्शितम्।

पौष्कलावत पु० दिवोदासधन्वन्तरिं प्रति आयुर्वेदज्ञानार्थं प्रश्नकारके सुश्रुतसहाध्यायिभेदे सुश्रुते १।१अ० दृश्यम्।

पौष्कलेयक त्रि० पुष्कले जातादि कत्र्या०ढकञ्। पुष्कले जातादौ स्त्रियां ङीप्।

पौष्टिक त्रि० पुष्ट्यै हितम् ठक्। पुष्टिसाधने कर्मभेदे “पुष्टिर्धनजनादीनां वृद्धिरित्यभिधीयते। तद्धेतुभूतं यत् कर्म पौष्टिकं तदिहोच्यते” इति दुर्गभञ्जनः।

पौष्टी स्त्री पुरोर्वंशस्य स्त्रीभेदे भा० आ० ९४ अ०।

पौष्ण त्रि॰ पूषा देवताऽस्य तस्येदं वा अण् अणन्तत्वात् उप-धालोपः। १पूषदेवताके चर्वादौ २रेवतीनक्षत्रे न॰ ३पूष-सम्बन्धिनि त्रि॰ स्त्रियां ङीप्।

पौष्प न॰ पुष्पेण निर्वृत्तः तस्येदं वा अण्। १पुष्पसाध्ये २मद्यभेदे स्त्री। ३कुसुमसम्बन्धिमात्रे त्रि॰ स्त्रियां ङीप्। ४पाटलिपुत्रनगर्य्यां स्त्री ङीप् शब्दरत्ना॰।

पौष्य पु॰करवीरपुराधिपे पूष्णः पुत्रे १नृपभेदे तत्कथा"पुष्णः पुत्रोऽभवत् पौष्यः सर्वशास्त्रार्थपारगः" कालिकापु॰। उतङ्केनर्षिणा गुरुदक्षिणार्थं याचिते तस्मै कुण्डलदातरि २नृपभेदे भा॰आ॰३अ॰। तदधिकृत्य कृतो ग्रन्थः अण्। भा॰ आ॰ पर्वान्तर्गते ३पर्वभेदे न॰।

प्याट् अव्य॰ प्याय–बा॰ डाटि। सम्बोधने अमरः।

प्याय वृद्धौ भ्वा॰आ॰अक॰सेट्। प्यायते, अप्यायि–अप्यायिष्ट इदित् ओदिच्च पीनः।

प्यायस्थूण पु॰ गोत्रप्रवरर्षिभेदे।

प्युक्ष्ण न॰ अपि–उक्ष–बा॰ नक् अपेरल्लोपः। १स्नायुनि २अजगरसर्पे कर्मणि च कात्या॰श्रौ॰ १५।३।२१ कर्कः।

प्युष उत्सर्गे चु॰उभ॰सक॰सेट्। प्योषयति ते। अपुप्युषत् त-

प्युष विभागे दाहे च दि॰ पर॰ सक॰ सेट्। प्युष्यते इरित् अप्युषत् अप्योषीत् पुप्योष। [अप्योषीत् पुप्योष।

प्युस विभागे दिवा॰पर॰सक॰सेट्। प्युस्यते इरित् अप्युसत्

प्यै वृद्धौ भ्वा॰आ॰अक॰अनिट्। प्यायते अप्यास्त।

प्र अव्य॰प्रथ–ड। १आरम्भे २गतौ ३उत्कर्षे ४प्राथम्ये ५सर्वतोभावे ६उत्पत्तौ, ७ख्यातौ ८व्यवहारे च पुरुषोत्तमः। अस्य क्रियायोगे उपसर्गत्वम्। गतित्वञ्च। अस्यार्थभेदोदाहरणानि गणरत्नटी॰ उक्तानि यथा

"प्र आदिकर्मदीर्घशब्दशम्भवतृप्तिवियोगशुद्धिशक्तीच्छाशान्तिपूजाप्रदर्शनेषु" प्रयातः। प्रबालमूषिकः प्रभुर्देशस्य। प्रवदन्ति दायादाः। हिमवतो गङ्गा प्रभवति। प्रभुक्तमन्नम्। प्रोषितः। प्रसन्नं जलम्। प्रशक्तः। प्रार्थयते। प्रशान्तोऽग्निः। प्राञ्जलि। प्रबालम्। प्रलोकयति"।

प्रउग न॰ प्राग्युगम् पृषो॰। १प्रागवर्त्तिनि युगे ईषान्तरे कात्या॰ ७।९।५। कर्कः। तत्र चीयमानस्याग्नेः प्रउगचित्संज्ञा कात्या॰ १६।५।९। २शस्त्रविशेषे प्रउगसूक्तमध्यथायै"यजु॰१५।११। "प्रउगं शंसति निष्केवल्यं शंसति" शा॰स॰भाष्यधृता श्रुतिः"प्रउगनिष्केवल्यशब्दौ शस्त्रविशेषनामनी"इत्युक्त्वा "अप्रगीतमन्त्रसाध्या स्तुतिः शस्त्रमिति भाष्ये शस्त्रशब्दार्थमाह भाष्यकृत्।

प्रकङ्कत पु॰ १प्रकृष्टविषे २प्रकृष्टगमने सर्पभेदे ऋ॰ १।१९१।७।

प्रकट त्रि॰ प्र+कट–अच्। स्पष्टे।

प्रकटित त्रि॰ प्र+कट–क्त। प्रकाशिते हेमच॰।

प्रकण्व पु॰ प्रकृष्टाः कण्वा यत्र। ऋषिभिन्नत्वात् न सुट्। देशभेदे सि॰कौ॰। ऋषौ तु सुट् प्रस्कण्व इत्येव।

प्रकम्पन पु॰ प्र+कपि–णिच्–युच्। १वायौ "प्रकम्पनेनानुचकम्पिरे सुराः" माघः। २नरकभेदे च शब्दरत्ना॰। ३प्रकम्पनकारके त्रि॰।

प्रकर पु॰ प्र+कॄ–भावे अप्। १समूहे २अतिक्षेपे च। कर्मणि अप्। ३प्रकीर्णे पुष्पादौ त्रि॰। ४अगुरुचन्दने न॰ मेदि॰

प्रकरण न॰ प्र+कृ–ल्युट्। १प्रस्तावे २अभिनेयनायकादिके दृश्यकाव्यभेदे हेमच॰। ३ग्रन्थसन्धौ ४एकार्थप्रतिपादकग्रन्थांशे च त्रिका॰। नाटकादिनी दश दृश्यकाव्यरूपकाणि विभज्य सा॰द॰ तल्लक्षणमुक्तं यथा

"भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्। शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथ वा वणिक्। सापायधर्मकामार्थपरो धीरप्रशान्तकः"। विप्रनायकं यथा मृच्छकटिकम्। अमात्यनायकं मालतीमाधवम्। वणिङ्नायकं पुष्पभूषितम्। "नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्। तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः। कितवद्यूतकारादिविटचेटकसङ्कुलः"। कुलस्त्री पुष्पभूषिते। वेश्या तरङ्गदत्ते द्वे अपि मृच्छकटिके। अस्य नाटकप्रकृतित्वात् शेषं नाटकवत्"। कर्त्तव्यस्य इतिकर्त्तव्यताकाङ्क्षस्य वचनं प्रकरणम् इति शवरभाष्योक्ते५ऽर्थे च "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्" जै॰ ३।३।१४। तत्र विनियोगसाधने तस्य श्रुतिलिङ्गवाक्यबाध्यत्वं स्थानसमाख्यायोर्बाधकत्वञ्च स्थितम्"। "श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहतानि। सा प्रक्रिया या कथमित्यपेक्षा स्थानं क्रमो योगबलं समाख्या" पार्थसारथिमिश्रः। शास्त्रसिद्धान्तप्रतिपादके ६ग्रन्थभेदे "अस्य च च वेदान्तप्रकरणत्वात्" वेदान्तसा॰।

प्रकरणसम पु॰गौतमोक्ते सत्प्रतिपक्षापरपर्य्याये १हेत्वाभासभेदे "यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः"गौ॰सू॰। "क्रमप्राप्तं प्रकरणसमं लक्षयति। स हेतुः स्वपक्षस्य परपक्षाभावस्य वा निर्णयार्थमपदिष्टः प्रयुक्तः प्रकरणसम उच्यते स क इत्याकाङ्क्षायामाह यस्मात् प्रकरणचिन्तेति करणं "पक्षप्रतिपक्षाविति"भाष्य

साध्यतदभाववत्त्वाविति तदर्थस्तथा च निर्णयार्थं हेतुर्न निर्णयं जनयितुमशक्तस्तुल्यबलेन परेण प्रतिबन्धात् किन्तु धर्मिणः साध्यवत्त्वं तदभाववत्त्वं वेति चिन्तां जिज्ञासां प्रवर्त्तयति स प्रकरणसमः। यद्वा प्रकृष्टं करणं लिङ्गं परामर्शो वा को हेतुरनयोः साधकः एतयोः कः परामर्शः प्रमेति वा यत्र जिज्ञासा भवतीत्यर्थः। यथादित्यादि वस्तुस्थितिमात्रं लक्षणन्तु तुल्यबलविरोधिपरामर्शकालीनपक्षमर्शविषयत्वं स्वसाध्यपरामर्शकालीनतुल्यबलविरोधिपरामर्शो वा। विरोधिपरामर्शस्य च हेतुनिष्ठत्वमेकज्ञानविषयत्वसम्बन्धेन अन्यथा हेतोर्दुष्टत्वं न स्यात्। अयञ्च दशाविशेषे दोषः इत्यतः सद्धेतोरपि विरोधिपरामर्शकाले दुष्टत्वमिष्टमेवेत्यवधेयम्" वृत्तिः।

२जातिरूपासदुत्तरभेदे गौ० ५।१।१६।८८ सू०। "उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः" सू० "उभयसाधर्म्यात् अन्वयसहचाराद्व्यतिरेकसहचाराद्वा प्रक्रिया प्रकर्षेण क्रिया साधनं विपरीतसाधनमिति फलितार्थः तत्सिद्धेस्तस्य पूर्वमेव सिद्धेः तथाचाधिबलत्वेनारोपितप्रमाणान्तरेण बाधेन प्रत्यवस्थानं प्रकरणसमः यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते नैतदेवं श्रावणत्वेन नित्यत्वसाधकेन बाधात् दोषादेशनाभासा चेयम्। वृ०। "प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः" सू०। अस्योत्तरमाह प्रतिपक्षाद्विपरीतसाध्यसाधकत्वेनाभिमताच्छ्रावणत्वादितः प्रकरणसिद्धिद्वारा मदीयसाध्यस्य यः प्रतिषेधः त्वया क्रियते तस्यानुपपत्तिः कुतः प्रतिपक्षोपपत्तेः त्वत्पक्षापेक्षया प्रतिपक्षस्य मदीयपक्षस्योपपत्तेः साधनात्। अयमाशयः श्रावणत्वेन पूर्वं नित्यत्वस्य साधनाद्द्वयो बाध उच्यते स नोपपद्यते पूर्वं साधितस्य बलवत्त्वाभावात् कदाचित् कृतकत्वेनानित्यत्वस्यापि पूर्वं साधनादिति त्वत्पक्षप्रतिषेधोऽपि स्यात्" वृत्तिः।

प्रकरणी स्त्री० नाटिकाभेदे "नाटिकैव प्रकरणी सार्थवाहादिनायका। समानवंशजा नेतुर्भवेद्यत्र च नायिका" सा० द०

प्रकरी स्त्री १नाट्याङ्गभेदे २चत्वरभूमौ च शब्दरत्ना०।

प्रकर्ष पु० प्र+कृष–घञ्। १उत्कर्षे २प्रकृष्टतया कर्षणे च।

प्रकर्षण न० प्र+कृष–ल्युट्। १उत्कर्षे २आकर्षणे च।

प्रकलाविद् पु० प्रकृष्टां कलां वेत्ति विद्–क्विप् पृषो० ह्रस्वः। १वणिग्जने निरु० ६।६। २अभिज्ञातरि त्रि० ऋ० ७।१८।१५ भा०

प्रकाण्ड पु० प्रकृष्टः काण्डः प्रा० त०। १वृक्षस्य मूलादारभ्य शाखान्ते भागे। २प्रशस्ते न०। ३विटपे पु० मेदि०।

प्रकाण्डर पु० प्रकाण्ड+अस्त्यर्थे वा० र। वृक्षे शब्दच०।

प्रकाम त्रि० प्रगतः कामम् प्रा० स०। १यथेष्टे अमरः। प्रा० ब०। २प्रकृष्टकामके त्रि०। ३देवभेदे पु० यजु० ३०।१२।

प्रकामम् अव्य० प्र+कम–णमुल्। कामार्थे अनुमतौ च अमरः।

प्रकामोद्य पु० देवभेदे यजु० ३०।६

प्रकार पु० प्र+कृ+घञ्। १भेदे २सादृश्ये च अमरः। ३विशिष्टज्ञाने विशेषणतया भासमाने पदार्थे "स्वव्यधिकरणप्रकारावच्छिन्ना या या विषयता तद्विनिरूपकत्वस्य सर्वांशे भ्रमभिन्नत्वमिति" गदाधरः।

प्रकारता स्त्री प्रकारस्य भावः तल्। १विषयताभेदे ज्ञायमानविशेषणप्रतियोगिकसंसर्गावच्छिन्नविषयत्वे।

प्रकालन त्रि० प्रकालयति प्र+कालि ल्यु। १हिंसके २सर्पभेदे पु० भा० आ० ७५ अ०। भावे ल्युट्। ३मारणे न०।

प्रकाश पु० प्र+काश–घञ्। १आतपे २विकाशे च। कर्त्तरि अच्। ३विकाशयुक्ते त्रि० अमरः। प्रकाशश्च सत्त्वज्ञानतेजःसाधारणः यथोक्तम् "जड़प्रकाशायोगात् प्रकाशः" सां० सू० "वैशेषिका आहुः। प्रागप्रकाशरूपस्य जड़स्यात्मनो मनःसंयोगाज्ज्ञानाख्यप्रकाशो जायत इति तन्न। लोके जड़स्याप्रकाशस्य लोष्टादेः प्रकाशोत्पत्त्यदर्शनेन तदयोगात्। अतः सूर्यादिवत् प्रकाशस्वरूप एव पुरुषः इत्यर्थः। तथा च श्रुतिः "यथा प्रकाशतमसोः सम्बन्धो नोपपद्यते। तद्वदैक्यं न सम्बन्धः प्रपञ्चपरमात्मनोः"। इति। "यथा दीपः प्रकाशात्मा ह्रस्वो वा यदि वा महान्। ज्ञानात्मानं तथा विद्यात् पुरुषं सर्वजन्तुषु" इति च। प्रकाशत्वं च तेजःसत्त्वचैतन्येष्वनुगतमखण्डोपाधिरनुगतव्यवहारादिति। ननु प्रकाशस्वरूपत्वेऽपि तेजोवद्धर्मधर्मिभावोऽस्ति न वा तत्राह सां० प्र० भा० "निर्गुणत्वाच्च चिद्धर्मा" सू० "पुरुषस्य प्रकाशरूपत्वे सिद्धे तत्सम्बन्धमात्रेणान्यव्यवहारोपपत्तौ प्रकाशात्मकधर्मकल्पनागौरवमित्यपि बोध्यम्। तेजसस्तु प्रकाशाख्यरूपविशेषाग्रहेऽपि स्पर्शपुरस्कारेण ग्रहात् प्रकाशतेजसोर्भेदः सिद्ध्यति। आत्मनस्तु ज्ञानाख्यप्रकाशाग्रहकाले ग्रहणं नास्तीत्यतो लाघवाद्धर्मधर्मिभावशून्यं प्रकाशरूपमेवात्मद्रव्यं कल्प्यते। तस्य च न गुणत्वम् संयोगादिमत्त्वात् अनाश्रितत्वाच्चेति। तथा च स्मर्यते "ज्ञानं नैवात्मनो धर्मो न गुणो वा कथञ्चन। ज्ञानस्वरूप एवात्मा नित्यः

पूर्णः यदा शिवः” शां॰प्र॰भा॰। वैवस्वतमनोः २पुत्रभेदे हरिवं॰७अ॰।

प्रकाशक त्रि॰ प्रकाशयति प्र+काश-णिच् ण्वुल्। १प्रकाशकारके सूर्य्यादौ सांख्यमतसिद्धे २सत्त्वगुणे च “तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्” गीता।

प्रकाशकज्ञातृ पु॰ प्रकाशकस्य पूर्वं ज्ञाता। कुक्कुटे शब्दच॰। तस्य प्रथमं प्रकाशकसूर्य्यज्ञातृत्वात्तथात्वम्।

प्रकाशन त्रि॰ प्रकाशयति प्र+काश-णिच्-ल्यु। १प्रकाशकारके २विष्णौ पु॰। “नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः” विष्णुस॰।

प्रकाशात्मन् पु॰ प्रकाश आत्मा स्वरूपमस्य। १विष्णौ “प्रकाशात्मा प्रतापनः” विष्णुस॰। २व्यक्तस्वभावे त्रि॰।

प्रकाशित त्रि॰प्र+काश+णिच्-कर्मणि क्त। १प्रकटिते हेम॰ प्र+काश-कर्त्तरि क्त। २प्रकाशयुते त्रि॰। भावे क्त। ३प्रकाशे न॰।

प्रकाश्य त्रि॰ प्र+काशि-कर्मणि यत्। १प्रकाशनीये २प्रायोग्यर्थसुरादौ नवके न॰ काशी॰ १० अ॰। नवनवकशब्दे ३९८८ पृ॰ दृश्यम्।

प्रकीर्ण न॰ प्र+कॄ-कर्मणि क्त। १चामरे जटा॰। २ग्रन्थविच्छेदे त्रिका॰। ३विक्षिप्ते ४मिश्रिते विभिन्नजातीये त्रि॰। ५पूतिकरञ्जे पु॰ राजनि॰। भावे क्त। भिन्नजातीयानां ६मिश्रणे ७विक्षेपे ८विस्तारे च न॰। स्वार्थे क। तत्रार्थे। अनुक्तप्रायश्चित्तविशेषे पातकविशेषे पातकशब्दे ४२९९ पृ॰ विष्णुवाक्यम् दृश्यम्। “अनुक्तं तत्प्रकीर्णकम्” अनुक्तमहत्त्वनिष्कृतिकं पापं प्रकीर्णकमित्यर्थः। “अनुक्तनिष्कृतीनां तु पापानामपनुत्तये। शक्तिञ्चावेक्ष्य पापञ्च प्रायश्चित्तं प्रकल्पयेत्” विश्वामित्रः “प्रकीर्णपातके ज्ञात्वा गुरुत्वमथ लाघवम्। प्रायश्चित्तं बुधः कुर्य्याद् ब्राह्मणानुमतः सदा” विष्णुः। “क्रयविक्रयदुष्टभोजनप्रतिग्रहेषु अनादिष्टप्रायश्चित्तेषु चान्द्रायणं प्राजापत्यं वा” शङ्खलिखितौ। भट्टिकाव्ये नानाजातीयप्रत्ययोदाहरणबोधककाण्डं प्रकीर्णकाण्डम्। संज्ञायां कन्। तुरङ्गे पुंस्त्री॰ स्त्रियां जातित्वात् ङीष्।

प्रकीर्य्य पु॰ प्रकीर्य्यतेऽसौ प्र+कॄ-क्यप्। (नाटाकरञ्जा) १करञ्जभेदे अमरः। २पूतकरञ्जे (रीठाकरञ्जा) राजनि॰। ३विक्षेप्ये ४व्याप्ये च त्रि॰।

प्रकुञ्च पु॰ “प्रकुञ्चः षोड़शी बिल्वं पलमेवात्र कीर्त्यते” भावप्र॰ उक्ते पलरूपे मानभेदे। “चूर्णप्रकुञ्चम्” इत्यादि सुश्रुतः

प्रकुल न॰ प्र+कुल-कर्त्तरि क। प्रशस्तदेहे त्रिकाण्डशेषः।

प्रकूष्माण्डी स्त्री दुर्गायां हेमच॰।

प्रकृत त्रि॰ प्र+कृ-क्त। १अधिकृते २आरब्धे ३प्रकरणप्राप्ते च। ४ऋषिभेदे पु॰। प्रकृतस्यर्षेर्गोत्रापत्यम् अश्वा॰ फञ्। प्राकृतायन तद्गोत्रापत्ये पुंस्त्री॰।

प्रकृति स्त्री प्र+कृ-कर्त्तरि क्तिच् भावादौ क्तिन् वा। १स्वभावे २योनौ ३लिङ्गे ४स्वाम्यमात्यादौ राज्याङ्गे अमरः। ५शिल्पिनि हेम॰। ६शक्तौ ७योषिति शब्दर॰। ८परमात्मनि धरणिः। १०आकाशादिभूतपञ्चके ११करणे १२गुह्ये १३जन्तौ च १४एकविंशत्यक्षरपादके छन्दोभेदे। १५मातरि १६प्रत्ययनिमित्ते शब्दभेदे तल्लक्षणं शब्द॰प्र॰ उक्तं यथा “स्वोपस्थाप्ययदर्थस्य बोधने यस्य निश्चयः। स्वत्वेन हेतुरथ वा प्रकृतिः सा तदर्थिका। तत्त्वेन यन्निश्चयत्वेन स्वोपस्थाप्ययादृशार्थस्यान्वयबोधं प्रति स्वाव्यवहितोत्तरत्वसंसर्गेण यादृशशब्दवत्तानिश्चयत्वेन हेतुत्वं तादृश एव शब्दस्तथाविधार्थे प्रकृतिरिति तु फलितार्थः। वङ्गगुड़ो द्राक्षेत्यादौ वङ्गजाद्यर्थस्यान्वयबोधं प्रति गुड़ादिपदधर्मिकवङ्गजादिनिश्चयत्वेन न हेतुत्वमपि तु सुबादिधर्मिकवङ्गगुड़ादिपदनिश्चयत्वेन अन्यथा केवलादपि वङ्गगुड़ादिशब्दात् द्राक्षादौ वङ्गजाद्यर्थस्यान्वयबोधापत्तेरिति न तत्र प्रसङ्गः”। “निरुक्ता प्रकृतिर्द्वेधा नामधातुप्रभेदतः। यत् प्रातिपदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते। निरुक्ता न तु सांख्यानामिव जगदुपादानभूता। यच्च पाणिनिप्रभृतिभिः प्रातिपदिकं प्रकृतिरित्युक्तं तदपि नाम्नो नातिरिच्यते नातो विभागन्यूनता”। वैयाकरणमते तल्लक्षणन्तु शब्दार्थरत्नेऽस्माभिरुक्तं यथा “एवं प्रकृतिप्रत्ययादिसमुदायरूपपदस्वरूपे तद्विभागे च दर्शिते इदानीं तदवयवरूपप्रकृतिप्रत्ययस्वरूपविभागौ प्रदर्श्येते। तत्र प्रकृतिर्नाम स्वार्थावबोधहेतुः प्रत्ययविधानावधिभूतः शब्दविशेषः सर्वेषामेव च प्रत्ययानां प्रकृतिं निमित्तीकृत्यैव विधानात्। प्रत्ययानाञ्च प्रत्यायकत्वरूपेणैव निवेशः न तु वक्ष्यमाणप्रत्ययत्वेन तेन नान्योन्याश्रयः। अवधित्वञ्च पूर्वापरत्वरूपं ग्राह्यं तेन वङ्गजादेर्निमित्तग्रहणे नातिप्रसङ्गः। वस्तुतस्तु सिद्धान्ते वृत्तिशब्दानां समुदायशक्तिस्वीकारात् तद्धितादीनां निरर्थकत्वाच्च तत्र प्रकृतिप्रत्ययादिविभागः। अत एव भाष्ये “तावेव सम्भिन्नौ यो गतः परो सैव प्रकृतिराद्येति” सम्भिन्नानामर्थरेव प्रत्ययस्वभिन्नत्वम्।

ततोविधानावधेः यौ परौ तावेव सुप्तिङौ या च तयोराद्या विधानावधिभूता सैव प्रकृतिरिति तदर्थः। एतदभिप्रायेणैव हरिणा "यः शब्दः स्वेतरस्यार्थे स्वार्थस्यान्वयबोधने। यदपेक्षस्तयोः पूर्वा प्रकृतिः प्रत्ययः परः" इति प्रकृत्यादिलक्षणमुक्तम्। अत्र च पूर्वत्वं बोधकशब्दविधानावधित्वमेव बोध्यं भाष्यैकवाक्यत्वात् नत्वेतत्कारिकोपात्तपूर्वापरत्वं तथासति पचतीत्यादौ तिङादेरेव धात्वर्थे स्वार्थप्रकारकान्वयबोधजनकत्वस्वीकारात् तत्रातिव्याप्तिः। एवञ्च निरुक्तपूर्वत्वरूपलक्षणेनैव प्रसङ्गातिप्रसङ्गादिवारणसम्भवे प्रकृतिप्रत्यययोरर्थबोधकत्वसाकाङ्क्षत्वद्योतनायैव यः शब्द इत्यादिकथनं बोध्यमेवञ्च यस्यार्थे इत्यत्र विशेष्यतया विशेषणतया वान्वयबोधने इत्यर्थः तेन सिद्धान्ते तिङर्थप्रकारकान्वयबोधेऽपि न क्षतिः। तथा च तदर्थान्वितस्वार्थबोधने तदपेक्षत्वे सति तद्विधानावधिभूतत्वं तत्प्रकृतित्वमिति फलितम्। एवञ्चावयवशक्तिस्वीकारेऽपि बहुलादावतिप्रसङ्गादिशङ्कापि नोदेति बहुलादेः प्रकृतिविधानावधित्वाभावात् अवधित्वस्य पूर्वापरत्वरूपस्य निदेशाच्च। अत एतत्पक्षे भाष्ये सुप्तिङ्शब्दौ प्रत्ययान्तरस्याप्युपलक्षकाविति द्रष्टव्यम् तथा शेखरकारेणापि प्रत्ययविधानुद्देश्यतावच्छेदकाक्रान्तत्वमेव प्रकृतित्वमित्यभिदधे पूर्वस्मिन्नसुन एव उद्देश्यत्वसम्भवात् पूर्वत्वमर्थायातं बहुलादेरपि उप उद्देश्यत्वान्न किञ्चिद्दूषणमावहतीति। एवञ्च प्रकरोति प्रत्ययं बोधयतीति व्युत्पत्तिमत्त्वात् प्रकृतिशब्दो योगरूढ इति बोध्यम्"। १७उपादानकारणे "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" शा०सू० "सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी" हरिका०। १८उपदिष्टकर्माङ्गके कर्मभेदे। तदेतत् ताण्ड्यब्रा०भा०निर्णीतं यथा "ननु का प्रकृतिः का विकृतिरिति चेत् उच्यते यत्र कर्त्तव्यं सर्वं प्रकर्षेण कर्मान्तरमनपेक्ष्योपदिश्यते सा प्रकृतिः यत्र विशेषरूपमेव कर्त्तव्यं श्रुत्योपदिश्यते इतरत् सर्वं कर्मान्तरादतिदिश्यते सा विकृतिः। सर्वातिदेशः प्रत्यक्षवचनाद्वा साम्याद्वा लिङ्गाद्वाऽवगन्तव्यः। तत् सर्वं सप्तमाष्टमाध्यायाभ्यां बहुधा विचारितम्। प्रकृतिश्च द्विविधा मूलप्रकृतिरवान्तरप्रकृतिश्चेति। सर्वात्मना कर्मान्तरानपेक्षा मूलप्रकृतिः कतिपयेष्वङ्गेषु कर्मान्तरं चापेक्षते यस्य कैश्चित् कर्मभिरपेक्षणीया भवति सैवावान्तरप्रकृतिः। तत्र तिस्रो मूलप्रकृतयः ताषाञ्चाक्षा·स्य प्रथमपादे तृतीयाधिकरणस्य द्वितीयवर्णके विचारिताः। "दर्शाग्निहोत्रसोमानां मूलप्रकृतिता न हि। अस्ति वा नालौकिकत्वादियत्तानवधारणात्। लोकवत् सन्निपत्यारादुपकारिद्वयश्रुतेः। इयत्तायानिश्चितत्वान्मूलप्रकृतिता स्थिता। अलौकिकत्वेनैतावद्भिरङ्गैः सम्पूर्ण उपकार इति निश्चेतुमशक्यत्वात् दर्शादीनां नास्ति मूलप्रकृतित्वमिति चेत् मैवं लौकिकसदृशत्वात्। यथा लोके भुजिक्रियायामोदनः करणं तस्य सन्निपत्योपकारिणः शाकसूपादयः, आरादुपकारिणः पीठप्रदीपादयः। तथा भावनायां यागः करणम् अवघातादयः सन्निपातिनः, प्रयाजादयः आरादुपकारिणः। अतो नात्यन्तिकमलौकिकत्वम्। इयत्ता लौकिके यथा प्रत्यक्षेण निश्चीयते तथा श्रौते श्रुत्या निश्चीयतां तस्माद्दर्शाग्निहोत्रसोमानां मूलप्रकृतित्वमस्ति"।

१९सत्त्वरजस्तमसां साम्यावस्थायां साम्यावस्थोपलक्षिते सत्त्वादिगुणे। "सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम्। साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता। केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः। एतदेव प्रजासृष्टिं करोति विकरोति च" मात्स्ये ४अ०।

"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः" सा०सू०। "तेषां सत्त्वादिद्रव्याणां या साम्यावस्थाऽन्यूनानतिरिक्तावस्थान्यूनाधिकभावेनासंहतावस्थेति यावत् अकार्यावस्थेति निष्कर्षः। अकार्यावस्थोपलक्षितं गुणसामान्यं प्रकृतिरित्यर्थः। यथाश्रुते वैषम्यावस्थायां प्रकृतिनाशप्रसङ्गात् "सत्त्वं रजस्तम इति एषैव प्रकृतिः सदा। एषैव संसृतिर्जन्तोरस्याः पारे परं पदम्" इत्यादि स्मृतिभिर्गुणमात्रस्यैव प्रकृतित्ववचनाच्च। सत्त्वादीनामनुगमाय सामान्येति। पुरुषव्यावर्त्तनाय गुणेति। महदादिव्यावर्त्तनाय चोपलक्षितान्तमिति। महदादयोऽपि हि कार्यसत्त्वादिरूपाः पुरुषोपकरणतया गुणाश्च भवन्तीति। तदस्य प्रकृतेः स्वरूपमेवोक्तम्। अस्या विशेषस्तु पश्चाद्वक्ष्यते" प्र०भा०। "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृति र्न विकृतिः पुरुषः" सां०का०। "संक्षेपतो हि शास्त्रार्थस्य चतस्रो विधाः। कश्चिदर्थः प्रकृतिरेव, कश्चित् विकृतिरेव, कश्चित् प्रकृतिविकृतिः कश्चिदनुभयरूप इति। तत्र का प्रकृतिरेवेत्यत उक्तम् मूलप्रकृतिरविकृतिरिति प्रकरोतीति प्रकृतिः प्रधानं सत्त्वरज·

समत्वं साम्यावस्था सा अविकृतिः। प्रकृतिरेवेत्यर्थः कस्मादित्यत उक्तम् मूलेति मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः विश्वस्य कार्य्यसंघातस्य सा मूलं नत्वस्या मूलान्तरमस्तीति भावः। कतमाः पुनः प्रकृतिविकृतयः कियत्यश्चेत्यत उक्तम् महदाद्याः प्रकृतिविकृतयः सप्तेति प्रकृतयश्च ता विकृतयश्च ता इति। तथा हि महत्तत्त्वमहङ्कारस्य प्रकृतिर्विकृतिश्च मूलप्रकृतेः। एवमहङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणाञ्च प्रकृतिर्विकृतयश्च महतः। एवं पञ्चतन्मात्राणि भूतानामाकाशादीनां प्रकृतयो विकृतयश्चाहङ्कारस्य। अथ विकृतिरेव कियती चेत्यत उक्तं षोड़शकस्तु विकार इति। षोडशसंख्यापरिमितो गणः षोडशकः तुशब्दोऽवधारणे भिन्नक्रमश्च पञ्चमहाभूतान्येकादशेन्द्रियाणि चेति षोड़शको गणो विकार एव "न प्रकृतिरिति। यद्यपि च पृथिव्यादीनामपि गोघटवृक्षादयो विकाराः एवं तद्विकारभेदानां दध्यङ्कुरादयस्तथापि गवादयो बीजादयो वा न पृथिव्यादिभ्यस्तत्त्वान्तरं तत्त्वान्तरोपादानत्वञ्च प्रकृतित्वमिहाभिप्रेतमिति न दोषः सर्वेषां गोघटादीनां स्थूलतेन्द्रियग्राह्यता च समेति न तत्त्वान्तरत्वम्। अनुभयरूपमुक्तं तदाह न प्रकृतिर्न विकृतिः पुरुषः" इति त॰कौ॰। शब्दस्पर्शविहीनं तद्रूपादिभिरसंयुतम्। त्रिगुणं तत् जगद्योनिः" स्मृतिः। तदनुमापकाः कार्य्यभेदाः तद्धर्माश्च सा॰सू॰ भाष्याद्युक्ता यथा "ततः प्रकृतेः" सा॰ सू॰ "ततो महत्तत्त्वात् कार्य्यात् कारणतया प्रकृतेरनुमानेन बोध इत्यर्थः। अन्तःकरणसामान्यस्यापि कार्य्यत्वं तावदेकदा पञ्चेन्द्रियज्ञानानुत्पत्त्या मध्यमपरिमाणतया देहादिवदेव सिद्धं श्रुतिस्मृतिप्रमाण्याच्च। तस्य च प्रकृतिकार्य्यत्वेऽयं प्रयोगः। सुखदुःखमोहधर्मिणी बुद्धिः सुखदुःखमोहधर्मकद्रव्यजन्या कार्य्यत्वे सति सुखदुःखमोहात्मकत्वात् कान्तादिवदिति कारणगुणानुसारेणैव कार्य्यगुणौचित्यं चात्रानुकूलस्तर्कः श्रुतिस्मृतयोऽपीतिमन्तव्यम् भा॰ "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्" सू॰ कारणानुमापकत्वाल्लयगमनाद्वाऽत्र लिङ्गं कार्य्यजातम् न तु महत्तत्त्वमात्रमत्र विवक्षितं हेतुमत्त्वादीनामखिलकार्य्यसाधारण्यात्। "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्। सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" इति कारिकायामप्यत एव व्यक्ताख्यं सर्वं कार्य्यमेव लिङ्गमित्युक्तम्। तथा च तल्लिङ्गं हेतुमत्त्वादिधर्मकमिति वाक्यार्थः। तत्र हेतुमत्त्वं कारणवत्त्वम् अनित्यत्वं विनाशिता प्रधानस्य या व्यापिता पूर्वोक्ता तद्वैपरीत्यमव्यापित्वम्। सक्रियत्वमध्यवसायादिरूपनियतकार्य्यकारित्वम्। प्रधानस्य तु सर्वक्रियासाधारण्येन कारणत्वान्न कार्य्यैकदेशमात्रकारित्वम्। न च क्रिया कर्मैव वक्तुं शक्यते प्रकृतिक्षोभात् सृष्टिश्रवणेन प्रकृतेरपि कर्मवत्तया सक्रियत्वापत्तेरिति। अनेकत्वं सर्गभेदेन भिन्नत्वम्। सर्गद्वयासाधारण्यमिति यावत्। न पुनः सजातीयानेकव्यक्तिकत्वम् प्रकृतावतिव्याप्तेः प्रकृतेरपि सत्त्वाद्यनेकरूपत्वात् "सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वात्" इत्यागामिसूत्रादिति। आश्रितत्वं सावयवेष्विति" सा॰प्र॰भा॰। एतद्विपरीतत्वमेव तद्धर्मत्वम्।

२॰प्रकृत्यंशदेवीपञ्चकरूपशक्तिभेदे "गणेशजननी दुर्गा१ राधा२ लक्ष्मीः३ सरस्वती४। सावित्री५ च सृष्टिविधौ प्रकृतिः पञ्चमी स्मृता"। प्रकृतिशब्दनिरुक्तिर्यथा "प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः। सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्त्तिता। गुणे प्रकृष्टे सत्त्वे च प्रशब्दो वर्त्तते श्रुतौ। मध्यमे रजसि कृश्च तिशब्दस्तामसः स्मृतः। त्रिगुणात्मस्वरूपा या सर्वशक्तिसमन्विता। प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते। प्रथमे वर्त्तते प्रश्च कृतिश्च सृष्टिवाचकः। सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्त्तिता"। तस्या आविर्भूतिः स्वरूपञ्च यथा "योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः। पुमांश्च दक्षिणार्द्धाङ्गात् वामाङ्गात् प्रकृतिः स्मृता। सा च ब्रह्मस्वरूपा च यथा नित्या सनातनी। यथात्मा च यथाशक्तिर्यथाग्नौ दाहिका स्मृता। अत एव हि योगीन्द्रः स्त्रीपुंभेदं न मन्यते। सर्वं ब्रह्ममयं ब्रह्मन्! शश्वत् पश्यति नारद!। स्वेच्छामयं स्वेच्छया च श्रीकृष्णस्य सिसृक्षया। साविर्बभूव सहसा मूलप्रकृतिरीश्वरी। तथा ज्ञेया पञ्चविधा सृष्टिकर्मणि भेदतः। सर्वाः प्रकृतिसम्भूता उत्तमाधममध्यमाः। सत्त्वांशाश्चोत्तमा ज्ञेयाः सुशीलाश्च पतिव्रताः। मध्यमा राजसांशाश्च ताश्च भोग्याः प्रकीर्त्तिताः। सुखसम्भोगवश्याश्च स्वकार्य्ये तत्पराः सदा। अधमास्तामसांशाश्च अज्ञातकुलसम्भवाः। दुर्मुखाः कुलटा धूर्त्ताः स्वतन्त्राः कलहप्रियाः। पृथिव्यां कुलटा याश्च स्वर्गे चाप्सरसां गणाः। प्रकृतेस्तामसांशास्ताः पुंश्चल्यः परिकीर्त्तिताः। एवं निगदितं सर्वं प्रकृतेः परिकीर्त्तितम्"।

इति स्त्रीमात्रस्य प्रकृत्यंशतया प्रकृतिवाचकशब्दस्यैव प्राक्कीर्त्तनत्वं निर्णीतं यथा "आदौ राधां समुच्चार्य्य पश्चात् कृष्णं विदुर्बुधाः। निमित्तमस्य मां भक्त वद भक्तजनप्रिय !" श्रीनारायण उवाच "निमित्तमस्य त्रिविधं कथयामि निशामय। जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता। गरीयसीति जगतां माता शतगुणैः पितुः। राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः। कृष्णराधेशगौरीति लोके न च कदा श्रुतः। प्रसीद रोहिणीचन्द्र ! गृहाणार्घ्यमिदं मम। गृहाणार्घ्यं मया दत्तं संज्ञया सह भास्कर !। प्रसीद कमलाकान्त ! गृहाण मम पूजनम्। इति दृष्टं सामवेदे कौथुमे मुनिसत्तम !। राशब्दोच्चारणादेव स्फीतो भवति माधवः। धाशब्दोच्चारतः पश्चाद्धावत्येव ससम्भ्रमः। आदौ पुरुषमुच्चार्य्य पश्चात् प्रकृतिमुच्चरेत्। स भवेन्मातृगामी च वेदातिक्रमणे मुने !" ब्रह्मवैपु० जन्म० ख० ५१ अ०।

प्रकृतिज त्रि० प्रकृत्या जायते जन–ड। १स्वभावजे। प्रकृतिरूपेण जायते जन–ड। प्रकृतिस्वभावरूपे सांख्यमतसिद्धे सत्त्वादिगुणे "गुणाः प्रकृतिजाः मताः" गीता।

प्रकृतिधर्म्म पु० ६त०। सांख्यमतसिद्धे प्रकृतिधर्मभेदे स च प्रकृतिशब्दे हेतुमदनित्यादिविपरीतधर्मरूपेण दर्शितः। उच्यते तु "अत ऊर्द्ध्वं प्रकृतिपुरुषयोः साधर्म्यवैधर्म्ये व्याख्यास्यामः। तद्यथा "उभावप्यनादी उभावप्यनन्तौ उभावप्यलिङ्गौ उभावपि नित्यौ उभावप्यपरौ उभौ च सर्वगताविति। एका तु प्रकृतिरचेतना त्रिगुणा बीजधर्मिणी प्रसवधर्मिण्यमध्यस्थधर्मिणी चेति। बहवस्तु पुरुषाश्चेतनावन्तोऽगुणा अबीजधर्म्मिणोऽप्रसवधर्मिणो मध्यस्थधर्म्मिणश्चेति"।

प्रकृतिमण्डल न० ६त०। १राज्याङ्गेषु स्वाम्यमात्यादिषु २प्रजासमुदाये च रघुः ८।२ श्लोकव्या० मल्लिनाथः।

प्रकृतिवत् अव्य० प्रकृत्या तुल्यम् प्रकृति+वति। व्याकरणप्रसिद्धे आदिश्यमानस्य प्रकृतिभूतस्थानितुल्यकार्य्ये।

प्रकृत्यादि पु० प्रकृतिशब्द आदिर्यस्य। सर्वविभक्तप्रत्ययात् तृतीयानिमित्ते शब्दगणे स च गणः "प्रकृति प्राय गोत्र सम विषम द्विद्रोण पञ्चक साहस्र"। प्रकृत्या प्रायेण याज्ञिकः इत्यादि। आकृतिगणोऽयम्। तेन नाम्ना सुतीक्ष्णश्चरितेन दान्तः" भट्टिः इत्यादि।

प्रकृष्ट त्रि० प्र+कृष–क्त। उत्कर्षयुक्ते हेमच०।

प्रकृष्य त्रि० प्र+कृष–कर्मणि क्यप्। भूमिसंलग्नतया कर्षणीये "उलूखलबुध्नो यूपः प्रकृष्यः" कात्या०श्रौ० २४।२।२७। प्रकृष्य देशान्तरनयनेन प्रकर्षणीयः भूमिसंलग्नतया प्रेरणीयो न तु उत्पाठनेनेति तदर्थः।

प्रकॢप्ति स्त्री प्र+कॢप–भावे क्तिन्। उपकॢप्तौ विद्यमानतायां कात्या० १।८।२२

प्रकेत त्रि० प्र+कित-णिच्–अच्। १प्रकर्षेण ज्ञापके ऋ० १।११३।१भा०। प्रकर्षेण कं सुखमीयतेऽनेन प्र–ई-बा० करणे क्त। २प्रकृष्टसुखसाधने यजु० १५।६ वेददीपः।

प्रकोथ पु० प्र+कुथ–पतितत्वे भावे घञ्। १प्रकृष्टपतने २संशोथे च "शीघ्रं स्तनौ हि मृदुमांसतयोपनद्धः सर्वं प्रकोथमुपयात्यवदीर्य्यते च" सुश्रुतः।

प्रकोष्ठ पु० प्रगतः कोष्ठं प्रा०स०। कूर्परस्याधोभागस्थे मणिबन्धपर्य्यन्ते १हस्तावयवे २गृहद्वारपिण्डे च अमरः। गृहाभ्यन्तरप्रदेशभेदे मुकुटः।

प्रख(ष)र पु० प्रखर+पृषो० प्र+खर अच् वा। १अश्वत्राणे शब्दमाला तत्र द्विधा पाठः। २कुक्कुरे ३अश्वतरे च ४अत्यन्ततीव्रे त्रि० मेदि०।

प्रक्रम पु० प्र+क्रम–भावे घञ्। १उपक्रमे अमरः २प्रथमारम्भे ३अवसरे मेदि० भग्नप्रक्रमः काव्यदोषभेदः। भावे ल्युट्। प्रक्रमण "तत्रार्थे प्रकर्षेण क्रमणे न०।

प्रक्रान्त त्रि० प्र+क्रम–क्त। १आरब्धे २प्रकरणप्राप्ते

प्रक्रिया स्त्री प्र+कृ–भावे श। १प्रकरणे "सा प्रक्रिया या कथमित्यपेक्षा" पार्थसारथिमिश्रः। २अधिकारे नृपादीनां चामरव्यजनच्छत्रधारणादिव्यापारे च ३शब्दप्रयोगसाधनावस्थायाम् ४पक्षप्रतिपक्षयोः प्रवृत्तौ गोतमसू० ५।१।१६ शबरभा०। [युक्ते त्रि०।

प्रक्लिन्न त्रि० प्र+क्लिद–कर्त्तरि क्त। १तृप्ते जटा० २बहुक्लेद-

प्रक्व(क्वा)ण पु० प्र+क्वण–भावे घञ् अप् वा। वीणादेः क्वणिते शब्दे अमरः।

प्रक्षाल त्रि० प्रक्षालयति क्षालि-अच्। शोधके प्रायश्चित्ते न० "परिष्टिका वैचसिकास्तथा प्रक्षालकास्तथैव च" (यतयः) भा० आश्व० ९२अ०। "अप्रक्षालाः (निष्पापतया) शोधकहीनाः" नीलकण्ठः। अत्र मुद्रितपुस्तके "परिष्टिका वैद्यसिकास्तथा प्रक्षालास्तथैव च" इत्यपपाठः

प्रक्षेप पु० प्र+क्षिप–भावे घञ्। १अर्पणे २बहुद्रव्यमध्ये अपरस्यांशनिवेशने च।

प्रक्ष्वेडन पु० प्र+क्ष्विड–ल्यु। नाराचास्त्रे हेमच०।

प्रख्या स्त्री प्र+ख्या-भावे अङ्। १विख्यातौ २उपमायां च

उत्तरपदस्थः बहु० । उपमायुक्ते यथा वज्रप्रख्यः इत्यादि

प्रख्यात त्रि० प्र+ख्या—क्त । विख्याते सुप्रसिद्धे ।

प्रख्यातवप्तृक पु० प्रख्यातो वप्ता जनयिता यस्य कप् । विख्यातपितृके आमुष्यायणे हेमच० ।

प्रख्यास् पु०प्र+चक्ष- असि 'बहुलं शिञ्च' इत्युक्तेर्न शित् तेन ख्यादेशः । प्रजापतौ उज्ज्वल० ।

प्रगण्ड पु० गडि—वदनैकदेशे अच् प्रकृष्टो गण्डः अत्ययः प्रा०स० । १कूर्परोपरिकक्षपर्य्यन्तभागे अमरः । दुर्गप्राकारभित्तौ २शूराणां निवेशनस्थाने च स्त्री गौरा० ङीष् । "सञ्चारो यत्र लोकानां दूरादेवावबुध्यते । प्रगण्डी सा च विज्ञेया बहिःप्राकारसंस्थिता । प्रणिधिस्तत्र यत्नेन कर्त्तव्यो भूतिमिच्छता । स एवाकाशरचीति ह्युच्यते शस्त्रकोविदैः" भा०टी०धृतवाक्यम् । "प्रगण्डीः कारयेत् सम्यगाकाशजननीस्तथा" भा० शा० ६९ अ० । "प्रगण्डीर्दुर्गप्राकारभित्तौ शूराणामुपवेशनस्थानानि । आकाशजननीस्तत्रैवैकस्यां भित्तौ तत्रत्यानां रक्षणभूतायां बाह्यार्थदर्शनार्थानि क्षुद्रच्छिद्राणि यद्द्वारा आग्नेयास्त्रगुलिकाः प्रक्षिप्यन्ते" नीलकण्ठः ।

प्रगतजानु(क) त्रि० प्रगते परस्परमसंश्लिष्टे जानुनी यस्य वा कप् । असंहतजानुके प्रज्ञौ यस्य जानुनोर्मध्ये महदन्तरालं तस्मिन् अमरः । युक्ते त्रि० ।

प्रगन्ध पु० प्रकृष्टो गन्धोऽस्य । १पर्पटे राजनि० । २प्रकृष्टगन्ध-

प्रगल्भ त्रि० प्र+गल्भ—अच् । १प्रत्युत्पन्नमतौ २प्रतिभान्विते च अमरः । ३नायिकाभेदे स्त्री तल्लक्षणादि नायिकाशब्दे ४०४२ पृ० दृश्यम् ।

प्रगल्भता स्त्री प्रगल्भस्य भावः तल् । १धौर्त्ये २उत्साहे च हेमच० । "निःशङ्कता प्रयोगेषु बुधैरुक्ता प्रगल्भता" उज्ज्वलमण्युक्ते प्रयोगेषु ३निःशङ्कत्वे च ४प्रतिभान्वितत्वे च ।

प्रगाढ़ त्रि० प्रकर्षेण गाढ़म् गाह—क्त । १अत्यन्तभये २कृच्छ्रे च अमरः । ३दृढ़े भरतः ।

प्रगातृ त्रि० प्र+गै तृच् । उत्तमगायके शब्दरत्ना० ।

प्रगाथ पु० प्र+ग्रन्थ—बा० आधारे घञ् 'छन्दसः प्रगाथेषु' निर्देशात् नि०नरयोर्लोपे उपधादीर्घः । वेदे द्वे ऋचौ यत्र तिस्रः क्रियन्ते १तत्रार्थे त्रितरस्तु सामसंहिताभाष्ये दृश्यः । दिङ्मात्रं ततः समाहृत्येहोच्यते । "काकुभः प्रगाथः" इत्यत्र प्रगाथशब्दार्थपर्य्यालोचनेनापि प्रथनं गम्यते प्रकर्षेण ग्रथनं यत्र स प्रगाथः प्रकर्षो नाम आ-

म्नातादृक्पाठादाधिक्यम्, तच्च पूर्वोक्तरीत्या पादाभ्यासपुरःसरत्वगन्तरसम्पादनेनोपजायते । तत्रोत्पत्तिककुभौ पठितव्ये किन्तर्हि प्रग्रथेन द्वे उत्तरे ककुभौ सम्पाद्य तासु तिसृषु रथन्तरं गातव्यम् । रौधसनामकं किञ्चित् साम तथा यौधाजयनामकमपरम् तयोः साम्नोर्बृहतीच्छन्दस्कत्वाच्च आश्रय इति उत्तरायन्थे तु तस्य सामद्वयस्याश्रय एकः प्रगाथः आम्नातः तस्मिंश्च प्रगाथे पुनानः सोमेत्यस्यादिक प्रथमा सा च बृहती "दुहान ऊधर्दिव्यमिति" द्वितीया सा तु विष्टारपङ्क्तिः तामेतां विष्टारपङ्क्तिमपनीय तस्याः स्थाने उत्पत्तिबृहत्यौ द्वे ऋचौ आनेतव्ये इति पूर्वपक्षः । बृहतीविष्टारपङ्क्त्योः प्रग्रथनविशेषेण द्वे बृहत्यावुत्तरे सम्पादनीये इति राद्धान्तः । प्रगाथत्वेन ध्येये २मन्त्रे च यजु०१९।२४वेददी०

प्रगुण त्रि० प्रस्तुतो गुणो यत्र प्रकृष्टो गुणो यस्य वा प्रा०ब० १ऋजुतावति २दक्षे च अमरः । प्रकृष्टगुणोऽप्यत्र ।

प्रगृह्य न० प्र+ग्रह—क्यप् । व्याकरणोक्ते स्वरसन्धिराहित्ययोग्ये १पदभेदे २स्मृतौ ३वाक्ये च अमरः ।

प्रगे अव्य० प्रगीयतेऽत्र प्र+गै—के । अतिप्रातःकाले अमरः । तत्र भवः ट्यु तुट् च । प्रगेतन प्रातर्भवे त्रि० राजनि०

प्रगेनिशा त्रि०प्रगे प्रातःकाले निशेव स्वापहेतुर्यस्य । प्रातःकालशायिनि । "उत्तूर्य्यशायिनस्तावत् सर्वे चासन् प्रगेनिशाः" भा०शा० २२८अ० ।

प्रग्रथन न० प्रकर्षेण ग्रथने । प्रगाथशब्दे दृश्यम् ।

प्रग्रह पु०प्र+ग्रह कर्मकरणादौ यथे अप् । १तुलासूत्रे २हयादिसंयमनरज्ज्वो ३बन्द्यां च अमरः । ४नियमने ५भुजे ६सुवर्णोल्लखे मेदि० । ७कर्णिकारवृक्षे राजनि० । प्र+ग्रह—कर्त्तरि अच् । ८विष्णौ "प्रग्रहो निग्रहो व्यग्रः" विष्णुस० "भक्तैरुपाहृतं पत्रपुष्पादिकं प्रगृह्णातीति प्रग्रहः" भा० । [२हयादिसंयमनदामनि च अमरः ।

प्रग्राह पु० प्र+ग्रह—कर्मकरणादौ वा घञ् । १तुलासूत्रे

प्रग्रीव पु०न०प्रकृष्टा ग्रीवा यस्य । १गृहादौ प्रान्तधार्य्यदारुपङ्क्तौ २वातायने सुभूतिः ३चण्डग्रीव्यके गोवर्द्धनः । ४प्रकृष्टग्रीवान्विते त्रि० ।

प्रघटाविद् पु०प्रकृष्टा घटा आडम्बरः तां वेत्ति विद—क्विप् । शास्त्रगण्डे शास्त्राभिज्ञे त्रिका० ।

प्रघट्टक पु० प्र+घट्ट—ण्वुल् । एकार्थप्रतिपादनार्थग्रन्थावयवभेदे सां०प्र०भाष्ये दृश्यम् ।

प्रघ(घा)ण(न) पु० प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते

हन–कर्मणि घञ् अप् वा णत्वम् । १अलिन्दे अमरः । २प्रकोष्ठे सि॰कौ॰। अवन्तः ३ताम्रकुम्भे ४लोहमुद्गरे च मेदि॰ । मुकुटमतेऽयमयत्वमध्यः ।

प्रघस पु॰ प्र+अद–अप् घसादेशः । १प्रकृष्टभक्षणे २राक्षसभेदे पु॰ भा॰ व॰ २८४अ॰ ३असुरे ४दैत्ये च त्रिका॰ कुमारानुचरमातृभेदे स्त्री भा॰श॰ ४७अ॰ ।

प्रघात न॰ प्रहन्यतेऽत्र हन-आधारे घञ् । १युद्धे हेमच॰ भावे घञ् । २प्रहनने पु॰ ।

प्रघास पु॰ प्र+घस–कर्मणि घञ् । प्रकर्षेण भक्षणीये हविरादौ वरुणप्रघासचातुर्मास्ययागभेदः । प्रघासोऽस्यास्ति भूम्ना इनि । प्रघासिन् मरुत्सु "प्रघासिनोहवामहे मरुतश्च" यजु॰ ३।४४ वेददीपे दृश्यम् ।

प्र(प्रा)घुण पु॰ प्र(+आ+वा) घुण–क । अतिथौ हेमच॰ ।

प्रघूर्ण पु॰ प्र+घूर्ण–अच् । अतिथौ हेमच॰ ।

प्रघोष पु॰ प्र+घुष–भावे घञ् । १प्रकृष्टघोषणे स्वार्थे कन् । २अव्यक्तशब्दे ध्वनौ जटा॰ ।

प्रचक्र न॰ प्रगतश्चक्रं प्रा॰ स॰ । स्वचक्रात् परचक्रं प्रति चलिते सैन्ये अमरः ।

प्रचक्षस् पु॰प्र+चक्ष–असि न ख्यादेशः । बृहस्पतौ उणादि॰

प्रचण्ड त्रि॰ प्रकर्षेण चण्डः प्रा॰स॰ । १दुर्द्धर्षे २दुर्वहे ३दुरन्ते ४प्रतापान्विते च ५श्वेतकरवीरे पु॰मेदि॰ ६दुर्गाया नायिकाभेदे स्त्री "उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका" कालिकापु॰। ७श्वेतदुर्वायां स्त्री राजनि॰।

प्रचण्डमूर्त्ति पु॰ प्रचण्डा मूर्त्तिरस्य । १वरुणवृक्षे २भयानकदेहे त्रि॰ शब्दच॰ ।

प्रच(चा)य पु॰ प्र+चि–"हस्तादाने चेरस्तेये" पा॰हस्तादाने अस्तेये घञ् अन्यत्र "एरच्" पा॰ अच् । तत्र अजन्तः यष्ट्यादिना हस्तागम्यानां पुष्पाणां १चयने २समूहे शब्दच॰ ३उपचये ४शिथिलसंयोगभेदे परिमाणशब्दे ७२५॰पृ॰ दृश्यम् "संख्यातः परिमाणाच्च प्रचयादपि जायते । प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते । परिमाणं तूलकादौ नाशस्त्वाश्रयनाशतः" भाषा॰ हस्तादाने तु घञ् । हस्तेन पुष्पप्रचाय इत्येव चौर्य्ये तु अच् । प्रचय इत्येव चौर्य्येण हस्तेन पुष्पादेश्चयने । [धरणिः ।

प्रचर पु॰ प्र+चर+गोचरप्रचरौ नि॰ आधारेऽप् । मार्गे

प्रचल त्रि॰ प्र+चल–अच् । प्रकृष्टचलनयुक्ते चञ्चले ।

प्रचलक पु॰ प्र+चल+वा वुन् । कीटभेदे सुश्रुतः कीटशब्दे २०५८पृ॰ दृश्यम् ।

प्रचलाक पु॰ प्र+चल–वा॰ आकन् । १शराघाते २मयूरशिखण्डे ३भुजङ्गमे पुंस्त्री॰ मेदि॰ स्त्रियां ङीप् ।

प्रचलाकिन् पु॰ प्रचलाक +मत्वर्थे इनि । मयूरे त्रिका॰ ।

प्रचलाय नामधातुः प्रचल+भृशा॰ अभूततद्भावे क्यङ् आ॰ अक॰सेट् । प्रचलायते अप्रचलायिष्ट प्राचलायिष्ट इत्यन्ये

प्रचलायित त्रि॰ प्रचलाय+नामधातुः कर्त्तरि क्त । निद्रादिना घूर्णिते अमरः ।

प्रचायिका स्त्री प्र+चि+भावे ण्वुच् । १परिपाट्या पुष्पादेश्चयने । प्र+चि–ण्वुल् टाप् कापि अत इत्वम् । प्रचयनकर्त्र्यां २स्त्रियां स्त्री ।

प्रचार पु॰ प्र+चर–भावे घञ् । १प्रसरणे २गतौ ३प्रकाशे च । ततः तारका॰ इतच् । प्रचारित सञ्जातप्रचारे त्रि॰ । प्रकाशिते च ।

प्रचाल पु॰ प्रकृष्टचालः । यूपस्य कटकभेदे । शा॰श्रौ॰६।१ अ॰।

प्रचिकीर्षु त्रि॰प्र+कृ–सन्+उ । प्रतीकारेच्छौ भाग॰४।१८।१०

प्रचित त्रि॰ प्र+कर्मणि क्त । १कृतप्रचयने पुष्पादौ स्वार्थे क तत्रार्थे । २प्रचयस्वरयुक्ते त्रि॰। संज्ञायां कन् । दण्डकभेदे "प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः" वृ॰र॰ । [सुश्रुतः ।

प्रचीबल न॰ प्रचेयं बलं यत्र पृषो॰। वीरणे (वेणार मूल)

प्रचीर पु॰ वत्सप्रीत्नपस्य १सुनन्दागर्भजाते २पुत्रे नृपभेदे मार्कपु॰ ११८ अ॰ । [२वक्कुले अमरः ।

प्रचुर त्रि॰ प्र+चुर–क प्रगतश्चुराया वा प्रा॰त॰ । १चौरे

प्रचुरपुरुष पु॰ प्र+चुर–क नित्यक॰ । चौरे त्रिका॰ ।

प्रचेतसी स्त्री प्रकर्षेण चेतयति मूर्च्छितं चित–णिच्–असच् गौरा॰ङीष् । कट्फले राजनि॰ तच्चूर्णस्य हि मूर्च्छानाशकता वैद्यकप्रसिद्धेति तस्यास्तथात्वम् ।

प्रचेतस् पु॰ प्र+चित–असुन् । १वरुणे अमरः । २मुनिभेदे ३प्रकृष्टहृदये त्रि॰मेदि॰ । ४अनुवंश्ये नृपभेदे हरिवं॰ ३२ अ॰ । ५प्राचीनबर्हिषः सामुद्रीभार्य्यायां जातेषु पुत्रेषु राजभेदेषु ब॰व॰ । हरिवं॰२अ॰ । ६प्रकृष्टज्ञानयुक्ते ऋ॰ २।२३।२ भा॰ ।

प्रचेतृ त्रि॰प्र+चि–तृच् । १प्रचयनकर्त्तरि २सारथौ पु॰हेमच॰

प्रचेतुन त्रि॰ प्र+चित–उन । प्रकृष्टज्ञानयुक्ते ऋ॰१।२१।६

प्रचेल न॰ प्र+चिल–चेल–वा अच् । पीतकाष्ठे शब्दच॰ ।

प्रचेलक पुंस्त्री॰ प्र+चेल–गतौ ण्वुल् । १घोटके शब्दमा॰ । स्त्रियां जातित्वात् ङीष् । २प्रकृष्टगतियुक्ते त्रि॰ स्त्रियां टाप् ।

प्रचोदक त्रि० प्र+चुद–प्रेरणे ण्वुल् । १प्रेरके स्त्रियां टापि अत इत्त्वम् । प्रचोदिका । सा च दुःसहस्य नियोजिताख्यायां कन्यायां जाते २कन्याभेदे मार्कपु० ५१अ० ।

प्रचोदनी स्त्री प्रचोद्यते अपसार्यते रोगोऽनया चुद–णिच् ल्युट् ङीप् । १कण्टकारिकायाम् अमरः । भावे ल्युट् । २प्रेरणे न० ।

प्रच्छ जिज्ञासायां तु०पर०द्विक०अनिट् । पृच्छति अप्राक्षीत् । पप्रच्छ । द्विकर्मकत्वेन दुहादि०गौणे कर्मणि लकारादि । पृच्छ्यते शिष्येण गुरुः धर्मं, जिज्ञासाविषयकज्ञानानुकूलव्यापारः कथं धर्म आचरितव्य इत्यभिलापादिः पृच्छेरर्थः, ज्ञानविषयत्वेन धर्मस्य, तज्ज्ञानाश्रयत्वाच्च गुरोः कर्मत्वम् ।

प्रच्छद् न० प्रच्छादयति प्र+छादि–क्विप् ह्रस्वः । "अन्नं वा प्रच्छदन्नं प्रच्छद् इति श्रुतेः" यजु०१५।६ वेददीपे दृश्यम् । [आच्छादने वस्त्रादौ ।

प्रच्छद पु०प्रच्छाद्यतेऽनेन प्र+छद–णिच्–करणे घ ह्रस्वः ।

प्रच्छदपट पु०प्रच्छाद्यतेऽनेन प्र+छद-णिच्–घ ह्रस्वः कर्म० । (पाछुडि) प्रावरणवस्त्रे अमरः ।

प्रच्छना स्त्री प्रच्छ+बा० ल्यु । आमन्त्रणे जटा० ।

प्रच्छन्न न० प्र+छद-क्त । १गुप्तद्वारे २अन्तर्द्वारे । ३आच्छन्ने त्रि० अमरः ।

प्रच्छर्दन न० प्र+छर्द-भावे ल्युट् । १वमने २कोष्ठस्य वायोर्नासिकापुटाभ्यां निःसारणप्रयत्नभेदे रेचने "प्रच्छर्दनविधारणाभ्यां वा प्राणस्य" पात० सूत्रे भाष्यं दृश्यम् । कुम्भकशब्दे २११४ पृ० दृश्यम् ।

प्रच्छर्दिका स्त्री प्र+छर्द–रोगाख्यायां ण्वुल्" पा० ण्वुल् तदन्तः स्त्री । १वमनरोगे अमरः । कर्त्तरि ण्वुल् । २प्रच्छर्दके वमनकारके त्रि०स्त्रियां टाप् कापि अत इत्त्वम् ।

प्रच्छादन न० प्रच्छाद्यतेऽनेन छद–णिच्-ल्युट् । १उत्तरीयवस्त्रे हेमच० भावे ल्युट् । २आच्छादने "नवोदके नवान्ने च गृहप्रच्छादने तथा" स्मृतिः ।

प्रच्छान न०प्र+छो–भावे ल्युट् । १प्रकृष्टच्छेदने २सुश्रुतोक्ते रक्तविस्रावणभेदे "तत्र द्विविधं रक्तविस्रावणं सिराव्यधनञ्च" सुश्रुतः ।

प्रच्छिल त्रि० प्रच्छ बा० इलच् । निर्जले जलशून्ये हेमच०

प्रच्यव पु० प्र+च्यु–अच् । १प्रच्युतियुते । भावे अप् । २प्रचरणे स्वभावचरणे "प्रकृतेः स्वभावप्रच्यव" इति सां० प्र०भाष्यम् । भावे ल्युट् । प्रच्यवन चरणे न० ।

प्रज पु० प्रविश्य जायायां जायते जन–ड । पत्यौ भरतः

प्रजङ्घ पु० प्रकृष्टा जङ्घाऽस्य । राक्षसभेदे रामा०लं०।८स०।

प्रजग्ध त्रि० प्र+घस–क्षाने क्त द्वित्वम् उपधालोपः । प्रखादिते शत०ब्रा० ५।१।१।१५

प्रजन पु० प्र+जन–घञ् न वृद्धिः । १प्रजनने । प्रजायतेऽनेन करणे घञ् । गोऽव्यादिषु २पुङ्गवादीनामभिगमने गर्भग्रहणार्थमैथुने ३उपसरे (पालदेओया) अमरः ।

प्रजनन न० प्रजायतेऽत्र प्र+जन–आधारे ल्युट् । १योनौ भावे ल्युट् । २जन्मनि मेदि० करणे ल्युट् । ३उपसरे विश्वः । जनयति जनि–ल्यु । ४जनके त्रि० यजु०१६।४८

प्रजनिका स्त्री प्रजनयति प्र+जनि–ण्वुल् । मातरि जटा० ।

प्रजनिष्णु त्रि०प्र+जन–इष्णुच् । जनने शत०ब्रा०६।४।१७

प्रजनुक त्रि० प्र+जन बा० उक । प्रजननशीले हेमच० ।

प्रजनू स्त्री प्र+जन–बा० ऊ । प्रजनने तैत्ति०३।११।४२

प्रजय पु०प्र+जि–अच् । प्रकृष्टजये याथादि०अन्तोदात्तताख्य ।

प्रजल्प पु०प्र+जल्प–भावे घञ् । "असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया । प्रियस्य कौशलोद्गारः प्रजल्पः स तु कथ्यते" उज्ज्वलमणिलक्षिते १वाक्यभेदे २प्रकृष्टकथाभेदे च ।

प्रजविन् त्रि० प्र+जु–इनि । प्रकृष्टवेगयुक्ते अमरः ।

प्रजहित पु० १पुराणे २गार्हपत्ये वह्नौ ताण्ड्य० ब्रा० १।४।१० भाष्यधृतवाक्यं दृश्यम् ।

प्रजा स्त्री प्र+जन–ड । १सन्ततौ २जने च अमरः "नञ्दुःसुभ्यः परस्य बहु०असिच्समा० । अप्रजाः दुःप्रजाः । ३जनने च

प्रजागर पु० प्र+जागृ–अप् । प्रकर्षेण जागरणे १निद्राक्षये हला० । कर्त्तरि अच् । २विष्णौ "पुष्पहासः प्रजागरः" विष्णुस० "नित्यं प्रबुद्धत्वात् प्रजागर्त्तीति प्रजागरः" भा० प्रजागरयति णिच्–अच् । ३अप्सरोभेदे स्त्री भा०व०४२अ० ।

प्रजाता स्त्री प्रजातं प्रजननं गर्भमोचनमस्त्यस्याः अर्श आद्यच् । १प्रसूतायां स्त्रियाम् हला० । प्र+जन-क्त । प्रकर्षेण २जाते त्रि० । ३अश्वभेदे पु० "बडवायां कृतरेतस्कन्दनः प्रजात इत्युच्यते" कात्या०श्रौ०२०१।२०भाष्यम्

प्रजातन्तु पु० प्रजायाः प्रजननस्य तन्तुरिव । सन्ताने तैत्तिरीय० ।

प्रजाति स्त्री प्र+जन-क्तिन् । १प्रजायां २प्रजनने च ३पौत्रोत्पत्तौ "प्रजा च स्वाध्यायप्रवचने च प्रजनश्च स्वाध्यायप्रवचने च प्रजातिश्च स्वाध्यायप्रवचने च" तैत्तिरीय० "तत्र प्रजा स्वदेहत्पाद्या प्रजननं प्रजननकाले भार्या

गमनं प्रजातिः पौत्रोत्पत्तिः” भा० । ४पुत्रादिवृद्धौ शत० ब्रा०७ २ १ ४६। ५ प्रांशुनृपपुत्रभेदे पु० मार्क०पु०११८अ०

प्रजादा स्त्री प्रजां तद्धेतुगर्भं ददाति सेवनात् दा--क। गर्भदात्र्यामोषध्यां राजनि० ।

प्रजादान न० ६त० । १प्रजाया दाने २आदाने च । प्रजातः जन्मतः दानं शुद्धिरस्य । ३रजते न० शब्दच० ।

प्रजानाथ पु० ६त०। लोकनाथे नृपे प्रजाधीशादयोऽप्यत्र ।

प्रजाप पु० प्रजां पाति पा--क। नृपे हेमच० ।

प्रजापति पु० ६त०। १चतुर्मुखे ब्रह्मणि अमरः । २दक्षादौ ३नृपे च मेदि० । ४जामातरि ५सूर्य्ये ६वह्नौ ७त्वष्टरि हेमच०। प्रजापतयश्च बहुविधाः यथोक्तम् “आत्मार्थे चासृजत् पुत्रान् लोककर्त्तॄन् पितामहः। विश्वे प्रजानां पतयो येभ्यो लोका विनिःसृताः। विश्वेशं प्रथमं नाम महातपसमात्मजम् । सर्वोत्तमपदं पुण्यं नाम्ना धर्मं स सृष्टवान् । दक्षं मरीचिमत्रिञ्च पुलस्त्यं पुलहं क्रतुम् । वशिष्ठं गौतमञ्चैव भृगुमङ्गिरसं मनुम्। अथर्वभूता इत्येते ख्याताश्चैव महर्षयः । त्रयोदश सुता येषां वंशास्तु संप्रतिष्ठिताः” हरिवं० २०४अ० “ससर्ज सृष्टिं तद्रूपं स्रष्टुमिच्छन् प्रजापतीन् । मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम् । वशिष्ठञ्च महातेजाः सोऽसृजत् सप्त मानसान् । सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः” हरिवं० १अ० । एकविंशतिः प्रजापतयो यथा “ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्धर्मस्तथा यमः । मरीचिरङ्गिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः । वशिष्ठः परमेष्ठी च विवस्वान् सोम एव च । कर्दमश्चापि यः प्रोक्तः क्रोधोऽर्वाक् क्रीत एव च । एकविंशतिरुत्पन्ना ते प्रजापतयः स्मृताः” महाभारते मोक्षधर्मः । अन्येऽपि प्रजापतयः पुराणादौ प्रसिद्धा यथा “शंयुः प्रजापतिः” श्रुतिः । ८विष्णौ पु० “पद्मनाभः प्रजापतिः” विष्णुस० । ९यज्ञे निघण्टुः । १०स्वनामख्याते कीटभेदे ।

प्रजापतिहृदय न० सामभेदे “प्रजापतेर्हृदयं गायति” शत०ब्रा० ९।१।२।४० “प्रजासु च प्रजापतौ च गायति प्रजापतेर्हृदयमिति किञ्चित् साम तदप्यत्र गायेत् । प्रजापतेर्हृदयं गायत्यादि सामवत् कस्यांचिदृचि न गीयते अपि तु केवलं प्रजाशब्दे प्रजापतिशब्दे च गीयते” भा० ।

प्रजावत् पुंस्त्री० प्रजाऽस्त्यस्य मतुप् मस्य वः । १सन्तानयुक्ते स्त्रियां ङीप् । ङीवन्तः । २भ्रातृजायायाम् स्त्री अमरः । ३प्रकृतियुक्ते नृपे पु० [यके यजु० १९।४८

प्रजासनि त्रि० प्रजां सनोति ददाति सन--इन् । सन्तानदा-

प्रजाहित त्रि० प्रजायै हितम् । सन्तानजनयोर्हितकारके जले न० शब्दमाला ।

प्रजिन पु० प्र+ज्या-बा० नक् संप्र० । वायौ शब्दमा०।

प्रजेश पु० ६त० । नृपे प्रजेश्वरादयोऽप्यत्र त्रिका०।

प्रज्ञ त्रि० प्रजानाति प्र+ज्ञा कर्त्तरि क । १प्रज्ञायुते प्रज्ञ एव प्रज्ञादि० स्वार्थे अण् । प्राज्ञ तत्रार्थे त्रि० भावे अङ्। २बुद्धौ स्त्री । प्रज्ञा अस्त्यस्य प्रज्ञा० ण । प्राज्ञ प्रज्ञायुते त्रि० ।

प्रज्ञप्ति स्त्री प्र+ज्ञपि--भावे क्तिन् । १बुद्धौ हेमच० “ऋतम्भरा तत्र प्रज्ञा” पात०सू० “तस्य सप्तधा प्रान्तभूमिः प्रज्ञा” पात०सू०। २सङ्केते ३देवीभेदे च त्रिका०।

प्रज्ञाकाय पु० प्रज्ञा काय इव यस्य । मञ्जुघोषे त्रिका०।

प्रज्ञाचक्षुस् पु० प्रज्ञैव चक्षुरस्य । धृतराष्ट्रे शब्दर०।

प्रज्ञादि पु० स्वार्थेऽण्प्रत्ययनिमित्ते १शब्दगणे स च गणः “प्रज्ञ वणिज् उशिज् उष्णिज् प्रत्यक्ष विद्वस् विदन् षोडन् विद्या मनस् (श्रोत्र शरीरे) (जुह्वत् कृष्णमृगे) चिकीर्षत् चोर शत्रु योध चक्षुस् वसु एनस् मरुत् क्रुञ्च सत्वत् दशार्ह वयस् व्याकृत असुर रक्षस् पिशाच अशनि कर्षापण देवता बन्धु ।। अस्त्यर्थे णप्रत्ययनिमित्ते २शब्दगणे च । स च गणः प्रज्ञा श्रद्धा (अर्च्चाः) (वृत्तेश्च वार्त्तः)” वार्त्ति० ।

प्रज्ञान न० प्र+ज्ञा--भावे ल्युट् । १बुद्धौ । करणे ल्युट् । २चिह्ने अमरः । प्रज्ञानमस्त्यस्य अच् । ३पण्डिते हैम-पकोषः

प्रज्ञाल त्रि० प्रज्ञाऽस्त्यस्य सिध्मा० लच् । बुद्धियुते त्रि०।

प्रज्ञिन् त्रि०प्रज्ञाऽस्त्यस्य इनि । पण्डिते हैमपको०पक्षे मतुप् मस्य वः । प्रज्ञावत् तत्रार्थे उभयतः स्त्रियां ङीप् ।

प्रज्ञिल त्रि० प्रज्ञा+अस्त्यर्थे पिच्छा० इल । बुद्धियुते

प्रज्ञु त्रि० प्रगते विरले जानुनी यस्य जानुनोर्ज्ञुः । विरल-जानुके जने अमरः ।

प्रडीन न०प्र+डी--क्त । खगगतिभेदे खगगतिशब्दे दृश्यम् ।

प्रण त्रि० पुराभवः प्र+“नश्च पुराणात् प्रात्” ५।४।२० वार्त्ति० न । पुराणे प्राचीने चकारात् पक्षे त्न प्रत्न+ख प्रीण तत्रार्थे त्रि० ।

प्रणख पु०प्रकृष्टः नखः पूर्वपदात् णत्वम् । नखाग्रे “आप्रणखात् सर्व एव सुवर्णः” छान्दो०। [२विनययुते च ।

प्रणत त्रि॰ प्र+नम-कर्त्तरि क्त। कृतप्रणामे त्रिका॰। प्रह्वे

प्रणति स्त्री प्र+नम–भावे क्तिन्। प्रणामे करशिरःसंयोगादिरूपे स्वापकर्षबोधकव्यापारे।

प्रणदन पु॰ प्र+नद–भावे ल्युट्। प्रणादे अमरः।

प्रणपात् त्रि॰ प्रकर्षेण नपात् नभ्राडित्यादिना नञः प्रकृतिभावः पूर्वपदात् णत्वम्। प्रकर्षेण न पातयितरि ऋ॰ ८।१७।१३ [३विश्वासे ४निर्बन्धे च मेदि॰।

प्रणय पु॰ प्र+नी–अच्। १प्रेम्णि अमरः २प्रार्थनायां

प्रणयन न॰ प्र+नी-भावे ल्युट्। १प्रकर्षेण नयने २करणे च ३अग्नेः संस्कारभेदकरणे कात्या॰श्रौ॰ ६।१०।१४।

प्रणयनीय त्रि॰प्र+नी कर्मणि अनीयर्। १प्रकर्षेण नेतव्ये २संस्कार्य्ये वह्नौ च प्रणयनस्य वह्निसंस्कारस्येदम् छ। ३वह्निसंस्कारसम्बन्धिनि इध्मकाष्ठादौ कात्या॰१।३।२०

प्रणयिन् त्रि॰ प्रणयोऽस्त्यस्य इन्। सुखा॰ गणे पाठात् “नैकाचरात् कृतोजातेरिति” निषेधस्याप्रवृत्तेः इनि। १प्रणययुते २स्वामिनि पु॰ हेमच॰। ३भार्य्यायां स्त्री ङीप्।

प्रणव पु॰ प्रकर्षेण नूयतेऽनेन प्र-नू-अप्। १ओङ्कारे वेदादौ गाथे शब्दभेदे अमरः। १५५८ पृष्ठादौ दृश्यम्। उद्गात्रादीनां गानारम्भात् प्राक् यजमानेन ओमित्युक्त्वा गेये २सामावयवभेदे च। प्रणूयते प्र+णू–कर्मणि अप्, प्रणववाच्यत्वाद्वा। ३परमेश्वरे पु॰ “प्राणदः प्रणवः पृथुः” “प्राणदः प्रणवः पणः” विष्णुस॰। द्विधा व्युत्पत्तियोगात् द्वे नामनी। [णत्वम्। प्रनतनासिके

प्रणस त्रि॰ प्रगता नासिका यस्य नसादेशः अच्समा॰

प्रणाडी स्त्री प्रणाली+लस्य डः। १प्रणालीशब्दार्थे २द्वारमात्रे च “तस्यां स्थितौ व्यपिशनायं धनं प्रणाड्या प्रतिपद्य निष्पद्यति” दायभागः।

प्रणाद पु॰ प्र+नद-घञ्। अनुरागजे शीत्कृतादौ १शब्दे अमरः। “अनुरागकृते शब्दे प्रणादः शीत्कृतो न्वपाविति शब्दार्णवः। २तारशब्दे ३कर्णामये च मेदि॰। कर्णामयश्च कर्णनादः “कर्णस्रोतःस्थिते वाते शृणोति विविधान् स्वरान्। भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते” सुश्रुतः।

प्रणाम पु॰प्र+नम-भावे घञ्। णत्वम्। १स्वापकर्षबोधकव्यापारे करशिरःसंयोगादौ “पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा। वचसा मनसा चैव प्रणामोऽष्टाङ्ग उच्यते” इत्युक्ते २अष्टाङ्गव्यापारभेदे च प्रणामस्य चतुर्थी भिवादनम् षष्टाङ्ग पञ्चाङ्गः करशिरःसंयोगश्च। तत्राभिवादनशब्दे अभिवादनलक्षणं दृश्यम्। अष्टाङ्गलक्षणमुक्तं तृतीयो यथा “बाहुभ्याञ्चैव जानुभ्यां शिरसा वचसा दृशा। पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवरः स्मृतः”। नतिविशेषस्तु तामसे “त्रिकोणाकारा सैव नतिः शम्भोः समीरिता। दक्षिणाद्वायवीं गत्वा दिशं तस्याश्च शाम्भवीम्। ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत्” एकहस्तप्रणामनिषेधो यथा “एकहस्तप्रणामश्च एका चापि प्रदक्षिणा। अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम्” इति तन्त्रसारः। स च कायिकवाचिकमानसभेदेन प्रत्येकं त्रिविधः यथा “कायिको वाग्भवश्चैव मानसस्त्रिविधः स्मृतः। नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः। प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ। जानुभ्यामवनीं गत्वा शिरसाऽऽस्पृश्य मेदिनीम्। क्रियते यो नमस्कार उत्तमः कायिकस्तु सः। जानुभ्यां क्षितिमस्पृष्ट्वा शिरसाऽऽस्पृश्य मेदिनीम्। क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः। पुटीकृत्य करौ शीर्षे दीयते यद्यथा तथा। अस्पृष्ट्वा जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते। यः स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः। क्रियते भक्तियुक्तो वा वाचिकस्तूत्तमः स्मृतः। पौराणिकैर्वैदिकैर्वा मन्त्रैर्या क्रियते नतिः। मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा। स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ॥ इष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं पुनः। मननं मानसं प्रोक्तमुत्तमाधममध्यमम्। त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः। कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः। अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः। प्रणाम इति विज्ञेयः सर्वं प्रतिपादितः” कालिकापु॰ ७०अ॰। शूद्रसत्कृतपूजितदेवताप्रणामनिषेधो यथा “यः शूद्रेणार्च्चितं लिङ्गं विष्णुं वा प्रणमेद्यदि। निष्कृतिस्तस्य नास्त्येव प्रायश्चित्तायुतैरपि” इति कर्मलोचनम्। “नमेत् यः शूद्रसंस्कृतम्” इत्यादि च।

प्रणाय्य त्रि॰ प्र+नी–ण्यत् “प्रणाय्योऽसम्मतौ” पा॰नि॰। १चौरे २प्रीत्यर्हे ३विरक्ते च सि॰कौ॰, ४अभिलाषवर्जिते मेदि॰। ५साधौ त्रिका॰ ६प्रिये च। असम्मतिभिन्ने तु प्रणेय इत्येव।

प्रणाली स्त्री प्र+नल-घञ् गौरा॰ङीष् णत्वम्। १जलवहनमार्गे (पयनाला) अमरः २परम्परयाञ्च। प्रणालोऽप्यत्र पु॰।

प्रणिधान न॰ प्रणिधीयते प्र+नि+धा-ल्युट्। १प्रयत्ने २स-

भिनिवेशे ३योगशास्त्रोक्ते चिन्तनविशेषरूपे समाधिभेदे ४भक्तिविशेषे च "ईश्वरप्रणिधानाद्वा" पात० "प्रणिधानात् भक्तिविशेषात्" भाष्यम्। ५अर्पणे ६कर्मणां फलत्यागे च "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" पात० "ईश्वरप्रणिधानं सर्वक्रियाणां तस्मिन् परमगुरावर्पणं फलसन्न्यासो वा" भा० ७मनसो विषयान्तरसञ्चाराभावरूपे ऐकाग्र्ये च गीत० १।२।२६ स्वतन्त्रि:।

प्रणिधि पु० प्रणिधीयते प्र+नि+धा-कि। १गुप्तचरे अमरः। २अनुचरे च। भावे कि।३याचने ४अवधाने च मेदि०। काश्यपस्य कङ्कस्य ५पुत्रभेदे भा०व० २१८अ०।

प्रणिपात पु० प्र+नि+पत-घञ्। प्रणामे हेमच० "तद्विद्धि प्रणिपातेनेति" गीता। [हिते च मेदि०।

प्रणिहित त्रि० प्र+नि+धा—क्त। १प्राप्ते २स्थापिते ३समा-

प्रणी त्रि० प्रणयति प्र+नी-क्विप्। १कारके २ईश्वरे च "सायन्तनीं तिथिप्रण्यः" भट्टिः।

प्रणीत त्रि०प्र+नी-कर्मणि क्त। पाकेन रूपरसान्यथाभावापादिते १पदार्थे २क्षिप्ते ३निवेशिते ४विहिते च हेमच०। ५वह्नौ संस्कृताग्नौ पु०अमरः। ६यज्ञपात्रभेदे स्त्री मेदि० अग्निपदसान्निध्ये ७मन्त्रसंस्कृतमात्रे "यथाध्वरे वह्निरभिप्रणीतः" भट्टिः। ८मन्त्रसंस्कृतासु अप्सु स्त्री ब०व०। तदाधारपात्रे तु उपचारात् प्रणीताशब्दवाच्यता। "प्रणीतानाम आपो मन्त्रसंस्कृता आहवनीयस्योत्तरतो निहिताः" आश्व०श्रौ०१।१।५ नारा०। "तदापः प्रणयंस्तस्मादापः प्रणीतास्तत्प्रणीतानां प्रणीतात्वम्" शत० ब्रा० १।१।१।८।

प्रणीय त्रि० प्र+नी-कर्मणि वेदे क्यप्। यस्य मन्त्रेण संस्कारः कृतस्तस्मिन्। लोके तु प्रणेय इत्येव।

प्रणूत त्रि० प्र+णू—स्तुतौ कर्मणि क्त। स्तुते अमरः।

प्रणेय त्रि० प्र+नी-यत्। १वश्ये अधीने २लतलौकिकसंस्कारे च हेमच० ३प्रापणीये।

प्रतक्वन् पु० प्र+तक—गतौ वनिप्। प्रकर्षेण गतियुक्ते "नभोऽस्ति प्रतक्वा" ता०ब्रा०१।४।२२ "प्रकर्षेण प्रतक्वा स्वावयवैः पांशुभिः सर्वान् धिष्ण्यान् प्रति गन्ता तकतिर्गतिकर्मा" भा०।

प्रतति स्त्री प्र+तन—भावे क्तिन्। १विस्तारे। कर्त्तरि क्तिच् वा ङीप्। २वल्ल्यां च अमरः।

प्रतद्वसु पु० प्रतत् प्राप्तं वसु धनं येन। १प्राप्तवसुके २विस्तीर्णधने च ऋ० ८।१३।२७।

प्रतन त्रि० प्र+"नश्च पुराणात् प्रात्" वार्त्ति० चकारात् त्नप् तट् च। पुरातने अमरः।

प्रतनु त्रि० प्रकृष्टस्तनुः प्रा०स०। १अतिस्वल्पे २अतिसूक्ष्मे च

प्रतमा(रा)म् अव्य०प्र+आमु तरप् तमप् वा। अत्यन्तप्रकर्षे

प्रतर पु० प्र+तॄ-भावे अप्। प्रकर्षेण १तरणे आधारे अप्। २प्रतरणाधारे गोप्रतरशब्दे दृश्यम्। [प्रतर्क तर्कार्थे।

प्रतर्कण न० प्र+तर्क-भावे ल्युट्। वितर्के शब्दर०। घञ्।

प्रतर्द्दन न० प्र+तर्द—भावे ल्युट्। १ताडने। कर्त्तरि ल्यु। २ताडके त्रि० ३दिवोदासपुत्रभेदे पु० हरिवं० २६अ०। ४इन्द्रोपदेश्यभेदे प्रतर्दनं प्रति इन्द्रेण ब्रह्मविद्योपदिष्टेति वेदान्ते प्रसिद्धम्।

प्रतल न० न० प्रकृष्टं तलम्। १पातालभेदे मेदि०। प्रकृष्टं तलमस्य। २विस्तृताङ्गुलिके पाणौ चपेटे पु० अमरः।

प्रतान पु० प्र+तन—घञ्। १विस्तारे २ऋषिभेदे च तस्य गोत्रापत्यम् इञ्। प्रातानि तद्गोत्रापत्ये बहुत्वे तु तस्य उपका० लुक्। प्रताना इत्येव। ३तन्तुयुक्ते अलाबूत्रपुषादौ। "गुच्छगुल्मन्तु विविधं तथैव तृणजातयः। बीजकाण्डरुहाण्येव प्रताना वल्ल्य एव वा" मनुः। "प्रतानास्तन्तुयुक्तास्त्रपुषालाबुप्रभृतयः" कुल्लू०।

प्रतानिन् त्रि० प्र+तन—णिनि। १विस्तीर्णे २विस्तृतलतायाम् स्त्री ङीप् अमरः।

प्रताप पु० प्र+तप—घञ्। १कोषदण्डजाते नृपादेः तेजसि अमरः। २तापे ३अर्कवृक्षे च राजनि०।

प्रतापन पु० प्रतापयति तप—णिच्—ल्यु। १नरकविशेषे २तापके त्रि० शब्दरत्ना०। भावे ल्युट्। ३पीडने शब्दर०। कर्त्तरि ल्यु। ४विष्णौ पु०। "प्रकाशात्मा प्रतापनः" विष्णु स० "सूर्यप्रभृतिभिर्विश्वं प्रतापयतीति प्रतापनः" भा०

प्रतापवत् त्रि० प्रताप+अस्त्यर्थे मतुप् मस्य वः। १प्रतापयुक्ते २स्कन्दानुचरगणभेदे पु० भा० श० ४६ अ०।

प्रतापस पु० तपसि साधु अण् प्रकृष्टस्तापसः प्रा०स०। १प्रकृष्टतापसे २शुक्लार्कवृक्षे च अमरः।

प्रतास् अव्य० प्र+तम बा० णिव—स्वरादि। ग्लानौ मनोरमा।

प्रतारक त्रि० प्र+तॄ—णिच्—ण्वुल्। १वञ्चके २धूर्त्ते च।

प्रतारण न० प्र+तॄ—णिच्—भावे ल्युट्। १वञ्चने अन्यपदार्थस्य अन्यथारूपेण ज्ञापने। युच्। प्रतारणाऽपि तत्रार्थे स्त्री। "प्रतारणासमर्थस्य विद्यया किं प्रयोजनम्" उद्भटः।

प्रतारित त्रि० प्र+तॄ—णिच्—क्त। १वञ्चिते त्रिका०।

प्रति अव्य० प्रथ-डति । १व्याप्तौ २लक्षणे ३कश्चित्प्रकारमापन्नस्य कथने ४भागे ५प्रतिदाने ६प्रतिनिधीकरणे मेदि० ७स्तोके ८चेपे ९निश्चये १०व्यावृत्तौ ११आभिमुख्ये १२स्वभावे च शब्दर० । अस्य निपातत्वेऽपि क्रियायोगे उपसर्गत्वम् गतित्वञ्च । अस्यार्थभेदोदाहरणादि गणरत्नमहोदधिटी० उक्तं यथा “प्रति सादृश्यादानहिंसाक्रीडतिप्रतिनिधिव्याध्याभिमुख्यव्याप्तिवारणेषु । प्रतिदेवता । प्रतिगृह्णाति । प्रतिहन्ति प्रतिस्नानम् । अभिमन्युरर्जुनतः प्रति । प्रतिश्यायः । प्रतिरूढं गतः । प्रतिकीर्णम् पांशुभिः । प्रतिषिद्धः” । तत्र लक्षणेत्थम्भूताख्यानभागवीप्सायामस्य कर्मप्रवचनीयसंज्ञा तद्योगे द्वितीया परिशब्दे उदा० दृश्यम् । प्रतिनिधिप्रतिदानयोः कर्मप्रवचनीयसंज्ञा तद्योगे पञ्चमी । प्रद्युम्नः कृष्णात्प्रति प्रतिनिधिरित्यर्थः । तिलेभ्यः प्रतियच्छति माषान्, माषान् गृहीत्वा प्रतिरूपतया तिलान् ददातीत्यर्थः । मात्रार्थेऽस्याव्ययीभावे परनिपातः । शाकप्रति शाकस्य लेश इत्यर्थः । कर्मप्रवचनीयत्वे नोपसर्गसंज्ञा तेन वृक्षं वृक्षं प्रतिषिञ्चतीत्यादौ न षत्वं तथा गतिसंज्ञापि न, तेन गतिर्गतावितिनिघातो न ।“प्रतेरंश्वादयस्तत्पुरुषे पा० प्रतेः परस्यांश्वादेः अन्तोदात्तता अंश्वादिशब्दे २७पृ० दृश्यम् ।

प्रतिक त्रि०कार्षापणेन क्रीतः टिठन् (इकार उच्चारणार्थः) प्रतिरादेशश्च । कार्षापणेन क्रीते स्त्रियां टित्त्वात् ङीप् । ततः पुरोहिता० भावे यक् । प्रातिक्य तद्भावे न० ।

प्रतिकण्ठ अव्य० वीप्सार्थे समीप्ये वा अव्ययीभावः । १कण्ठे कण्ठे इत्याद्यर्थे २कण्ठसामीप्ये च । प्रतिकण्ठं गृह्णाति ठक् । प्रातिकण्ठिक कण्ठसमीपग्राहिणि ।

प्रतिकर पु० प्रति+कॄ-विक्षेपे भावे अप् । १विस्तीर्णतायां २विक्षेपे च । [प्रतीकारकर्त्तरि ।

प्रतिकर्त्तृ त्रि० प्रति+कृ-तृच् । कृतस्यापकारस्य प्रत्यपकारके

प्रतिकर्म्मन् न० प्रति+कृ-मनिन् । १विद्यमानस्य गुणान्तराधाने २कृत्रिमभूषायां प्रसाधने अमरः ।

प्रतिकर्ष पु० प्रति+कृष-भावे घञ् । १समाकर्षणे अन्वयार्थं पूर्व्वोपात्तस्य पदादेर्ग्रहणे कात्या० १५।८।१० कर्कः ।

प्रतिक(ष्क)श प्रति+कश-गतिशासनयोः अच् सुट् नि० । उड्मध्यः । १सहाये २पुरोगे च सि०कौ० । ३वार्त्ताहरे मेदि० । प्रतिगतः कशाम् प्रा०स० । प्रतेः न कश्चित् प्रत्युपसर्गत्वम् किन्तु गमेरेवोपसर्गत्वमतो न सुट् । ४कशाघातप्राप्तेऽश्वे सि०कौ० । [२तद्गतौ च ।

प्रतिकष्ट न० प्रतिरूपं कष्टं प्रा०त० । १कर्मानुरूपकष्टे

प्रतिकाम अव्य० कामं कामं प्रति अव्ययी० । प्रत्येककामे

प्रतिकाय पु०प्रति+चि-घञ् कादेशः । १प्रतिरूपके २शरव्ये लक्ष्ये च जटा० ।

प्रति(ती)कार पु० प्रति+कृ-घञ् वा दीर्घः । १वैरनिर्यातने कृतस्यापकारस्य तुल्यरूपापकारकरणेन २शोधने ३रोगादेश्चिकित्सायाञ्च शब्दरत्ना० ।

प्रति(ती)काश पु० प्रतिरूपः काशः प्र+काश-घञ् वा प्रा०स० दीर्घः । तुल्यत्वे अस्य निभा० नित्यस० । अमरटीकायां रमानाथेनायं दन्त्यान्ततया पठितः ।

प्रतिकितव पु०प्रतिकूलः कितवः प्रा०त० । द्यूतकारस्य प्रतिकूले द्यूतकारे येन सह द्यूतप्रवृत्तिस्तस्मिन् ।

प्रतिकूप पु० प्रतिरूपः कूपः प्रा०त० । परिखायां हारा० ।

प्रतिकूल त्रि० प्रतिरूपं कूलं पक्षोऽस्य प्रा०ब० । १अननुकूले विरुद्धपक्षावलम्बिनि प्रतीपे अमरः प्रा०त० । २विपरीताचरणे न० ।

प्रतिकृति स्त्री प्र+कृ-कर्मादौ क्तिन् । १प्रतिमायां २सादृश्ये ३प्रतिनिधौ अमरः । ४प्रतिकारे मेदि० ।

प्रतिकृष्ट त्रि० प्रति+कृष-क्त । १गर्ह्ये २द्विराकृष्टे ३कृष्टक्षेत्रादौ च मेदि० । [प्रति कोपे च

प्रतिकोप पु०प्रतिरूपः कोपः । १रोगस्यानुरूपे कोपे २विग्रहं

प्रतिक्रिया स्त्री प्रति+कृ-भावे श । प्रति(ती)कारे

प्रतिक्षण अव्य०क्षणं क्षणं व्याप्य व्याप्तौ अव्ययी० । आभीक्ष्ण्ये

प्रतिक्षय पु० प्रति+क्षि-ऐश्वर्ये अच् । रक्षके शब्दर०

प्रतिक्षिप्त त्रि० प्रति+क्षिप-कर्मणि क्त । १प्रेषिते २वारिते मेदि० । ३बाधिते ४तिरस्कृते च अमरः । “आहूय प्रेषितो यस्तु प्रतिक्षिप्तः स उच्यते” इत्युक्ते ५आहूयप्रेषिते कृष्णदासः । [२तिरस्कारे च ।

प्रतिक्षेप पु० प्रति+क्षिप-भावे घञ् । १निरासे मेदि० ।

प्रतिखुर पु० सुश्रुते एकीयमतोक्ते मूढगर्भभेदे “निःसृतहस्तपादशिरःकायसङ्गी प्रतिखुरः” इति तत्र वर्णितम् ।

प्रतिख्याति स्त्री प्रति+ख्या-भावे क्तिन् । १विख्यातौ २प्रतिख्यातौ अमरः ।

प्रतिगत न० प्रति+गम-भावे क्त । “गतागतप्रतिगतसम्पातांश्च पक्षिणाम” जटाधरोक्ते १खगगतिभेदे २परावृत्यगमने च । कर्त्तरि क्त । ३परावृत्ते त्रि० ।

प्रतिगर पु०प्रतिगीर्य्यते प्रत्युच्चार्य्यते प्रति+गॄ-भावे अप् । वैदि-

कमन्त्रभेदस्य उच्चारणभेदे। तस्य प्रकार आश्व॰श्रौ॰५।६।४ सूत्रादौ वृत्तौ च दर्शितो यथा "शस्त्रस्वरः प्रतिगर ओथामो दैवेति" सू॰ "शस्त्रस्य स्वर इव स्वरो यस्य स शस्त्रस्वरः। उत्तरपदलोपोऽत्र द्रष्टव्यः। शस्त्रतुल्यस्वर इत्यर्थः। अशनस्वरस्याविधेयत्वादन्योऽपि यो विशिष्टः स्वरो विहितः शस्त्रस्य तस्य प्रापणार्थं वचनम्। ओथामोदैव इत्ययं प्रतिगरसंज्ञो भवति प्रतिगीर्यते प्रत्युच्चार्यते इति प्रतिगरः। वक्ष्यमाणविशेषविशिष्टतया सकृदेव विधातुं शक्योऽपि सामान्यस्य पृथग्विधानं प्रतिगरशब्दव्यवहारेऽपि सामान्येनास्य ग्रहणार्थम्" नारा॰ वृ॰ "शंसामो दैवेत्याहावे" सू॰ "प्रतिगरो भवतीति शेषः। यः पुनरयं प्रतिगरोऽपरो विधीयते तज्ज्ञापयति। प्रतिगरान्तरमध्यर्द्धिन्याहावेऽयं निमज्जते। तेन शस्त्रमध्येऽयमेव स्यात् शस्त्रादावयं ब्राह्मणोक्तः शंसामोदैवमिति वा" ना॰वृ॰। "प्लुतादिः प्रणवेऽप्लुतादिरवसाने" सू॰। "व्यवहितस्येमौ विशेषविधौ। अनन्तरस्य प्रणवावसानरूपेण विषयभेदासम्भवात्" वृ॰। "प्रणवे प्रणव आहावोत्तरे" सू॰। "प्लुतादेरयमपवादः। आहावोत्तरे प्रणवे प्रणव एव प्रतिगरो भवति"। "अवसाने च" सू॰। प्रणवः प्रतिगरो भवतीति शेषः। शस्त्रान्तरे शस्त्रमध्ये चावसानेऽयं विधिर्भवति" वृत्तिः। "प्रणवान्तो वा" सू॰। विषयद्वयेऽयं विकल्पः यत्र यत्र चान्तःशस्त्रं प्रणवेनावस्यति। प्रणवान्त एव तत्र प्रतिगरः" वृत्तिः। "शस्त्रान्ते तु प्रणवः" वृ॰।

प्रतिग्रह पु॰ प्रति+ग्रह–अप्। १स्वीकारे २यथाशास्त्रदत्तद्रव्यस्य ग्रहणे ३सैन्यपृष्ठे ४पतद्ग्रहे च मेदि॰। प्रतिग्रहशब्दार्थश्च दत्तद्रव्यस्वीकारः। तत्र दानस्येव स्वस्वत्वध्वंसमिव परस्वत्वोत्पत्तिं प्रति हेतुता प्रतिग्रहस्य तु यथेष्टविनियोगार्हत्वप्रयोजकस्वत्वं प्रति कारणता यथोक्तं दायभागे

"दृष्टश्च लोकेऽपि दाने हि चेतनोद्देशविशिष्टत्यागादेव दातृव्यापारात् सम्प्रदानस्य द्रव्ये स्वामित्वम्। न च स्वीकरणात् स्वत्वं स्वकर्तुरेव दातृत्वापत्तेः परस्वत्वापत्तिफलेन हि दानरूपता तच्च फलं सम्प्रदानाधीनं यथा देवतोद्देशेन द्रव्यत्यागं कुर्वन्नपि यजमानो न होता किन्तु तस्यैव त्यागस्य होमाभिधाननिमित्तं प्रक्षेपं कुर्वन् ऋत्विगेव होतेत्युच्यते तद्वदत्रापि स्यात्। किञ्च मनसा पात्रमुद्दिश्येत्यादिशास्त्रे स्वीकारात् प्रागेव दानपदं दृष्टम्। ननु ग्रहणं स्वीकारः अभूततद्भावे च्विप्रयोगात् अस्वं स्वं कुर्वन् व्यापारः स्वीकारो भवति कथं तत् प्रागेव स्वत्वम्। उच्यते उत्पन्नमपि स्वत्वं सम्प्रदानव्यापारेण ममेदमिति ज्ञानेन यथेष्टव्यवहारार्हं क्रियत इति स्वीकारशब्दार्थः। याजनाध्यापनसाहचर्याच्च प्रतिग्रहस्य स्वत्वमजनयतोऽपि अर्जनरूपता न विरुद्धा याजनादौ दक्षिणादानादेव स्वत्वात्" मूलम्। व्याख्यातमेतत् श्रीकृष्णेन यथा

"ननु त्यागात् केवलं स्वत्वनाशः सम्प्रदानस्वत्वं तु ममेदमिति भावितस्वत्वावगाहितत्स्वीकारादेवेति मतं निराकरोति नचेति। स्वीकर्तुरेवेत्येवकारेण त्यक्तुर्व्यवच्छेदः। इदमुपपादयति परस्वत्वापत्तिफलेन हीति। अत्रायमाशयः धात्वर्थतावच्छेदकफलानुकूलव्यापारवत एव तज्जातीयव्यपदेश्यत्वं यथा धात्वर्थतावच्छेदकोत्तरदेशसंयोगानुकूलव्यापारवति चैत्रे गन्तेति व्यवहारः। स्वीकारस्य स्वत्वहेतुत्वे धात्वर्थतावच्छेदकपरस्वत्वानुकूलस्वीकाररूपव्यापारवतः स्वीकर्तुरेव दातृपदव्यपदेश्यत्वापत्तिरिति पूर्वस्वत्वध्वंसरूपफलस्य न तद्व्यपदेशनियामकता तथात्वे उपेक्षितुरपि दातृपदव्यपदेश्यत्वापत्तेरिति। केचित्तु स्वीकारस्य स्वत्वहेतुत्वे परस्वत्वफलोपहितत्यागात्मकदाने सर्वांशे एकस्यापि कर्तृत्वासम्भवात् स्वांशमादायैव दातृत्वव्यवहारे कर्त्तव्ये प्रधानीभूतफलांशानुकूलव्यापारवत्त्वेन दातृव्यवहारः स्यादिति व्याचक्षुः। दृष्टान्तेनेदं द्रढयति यथा होतेति। होमाभिधाननिमित्तमिति। विशिष्टदेशावच्छिन्नप्रक्षेपोपहितत्यागस्य होमत्वात् प्रक्षेपस्य तदभिधाननिमित्तत्वमित्यर्थः। तेन जुधात्वर्थतावच्छेदकप्रक्षेपानुकूलव्यापारवति ऋत्विजि होतेति व्यपदेशो यथा तथेत्यर्थः। त्यागस्य स्वत्वहेतुत्वं स्फुटमेव शास्त्रं प्रमाणयति किञ्चेति। आदिना भूमौ तोयं विनिःक्षिपेदित्युत्तरप्रतीकपरिग्रहः। शास्त्रे शास्त्रबोधितत्यागे। दानपदं दृष्टमिति। "विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते" इति तद्वचनस्योत्तरार्द्धे दानपदं प्रयुक्तमित्यर्थः। तथाच निरन्तरयोरेव स्वस्वत्वध्वंसपरस्वत्वोत्पत्तिफलयोर्ददातिधात्वर्थतावच्छेदकत्वात् दानस्य परस्वत्वहेतुता शास्त्रसिद्धैवेति भावः। स्वीकारात् प्रागेव स्वत्वे ग्रहणस्य स्वीकारपदार्थत्वासम्भवमाशङ्कते नन्विति। स्वीकारशब्दार्थ इति। तथाच स्वपदस्य यथेष्टविनियोगार्हत्वविशिष्टे लक्षणेति भावः। ननु याज-

ध्यापनप्रतिग्रहैर्ब्राह्मणो धनमार्जयेदित्यत्र राजसूयेन यजेतेत्यादिवत् याजनाद्यात्मकैर्धनमर्जयेदित्यन्वयात् प्रतिग्रहस्यार्जनरूपता सिद्धा। प्रतिग्रहस्य स्वत्वाहेतुत्वे च तदिदं स्वत्वहेतुव्यापारस्यैवार्जनत्वादत आह याजनेति। अर्जनरूपता अर्जनपदव्यपदेशः। अविरोधमुपपादयति याजनादाविति तथा च याजनादीनां स्वत्वाहेतुत्वेन तदन्वयानुरोधवत् अर्जयेदित्यत्रार्जनत्वं न स्वत्वजनकत्वं किन्तु स्वत्वप्रयोजकत्वमेव तच्च प्रतिग्रहेऽप्यक्षतं दत्ते स्वत्वयं प्रतिगृह्णातीत्यवधारण एव तदुद्देशेन दातुस्त्यागात् तत्स्वत्वोदयात् प्रतिग्रहं विना तदज्ञाने तद्व्यतिरेकाच्चेति भावः"।

"न च दानस्य स्वत्वहेतुत्वे प्रमाणाभावः "सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः। प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च" इत्यादिमन्वादिवचनैस्तस्य स्वत्वहेतुत्वाप्रतिपादनादिति वाच्यं ब्राह्मणाय त्यक्तायां गवि गौरियं ब्राह्मणस्य न तु ममेत्यादिसार्वजनीनप्रतीतेरेव तत्र प्रमाणत्वात् प्रदानं स्वाम्यकारणमितिवचनाच्च अत एव पितृद्रव्यं पात्रमुद्दिश्य त्यक्तधने स्वीकारमन्तरेणैव पात्रस्य मरणस्वत्वे पितृदायत्वेन तद्धनं पुत्रादिभिर्विभज्य गृह्यते अन्यथा तैरिव उदासीनैरपि तद्धनस्वीकरणस्य कुशलादेरिवोपादाने यथेष्टनियोगे च प्रत्यवायो न स्यात्। नन्वेवं दानादेव स्वत्वसिद्धेर्दत्तवस्तुनि स्वीकारो व्यर्थ इति चेन्न "लब्ध्वा चाष्टगुणं फलमित्यादि"श्रुतेः प्रतिग्रहीतरि द्रव्यदानस्य फलविशेषं प्रति हेतुत्वेन तादृशफलसम्पत्त्यर्थमेव प्रतिग्रहस्योपयोगात् याजनाध्यापनप्रतिग्रहैर्द्विजो धनमर्जयेदित्यादिश्रुत्या प्रायुक्तत्या च प्रतिग्रहस्यापि स्वत्वहेतुत्वबोधनाच्च स्वत्वजनकव्यापारस्यैवार्जनपदार्थत्वात्" शब्दशक्तिप्र०। अधिकं दानशब्दे दृश्यम्।

द्रव्यभेदेऽनिग्रहे दोषस्तु अपात्रशब्दे उक्तस्तत्र

अयाचितस्य विषयभेदे प्रतिग्रहे न दोषः यथा

"अयाचितोपपन्ने तु नास्ति दोषः प्रतिग्रहे। अमृतं तं विदुर्देवास्तस्मात्तन्नैव निर्णुदेत्। गुरुभृत्यांश्चोज्जिहीर्षुरर्चिष्यन् देवतातिथीन्। सर्वतः प्रतिगृह्णीयात् न तु तृप्येत् स्वयं ततः। साधुतः प्रतिगृह्णीयादथ वाऽसाधुतो द्विजः। गुणवानल्पदोषश्च निर्गुणो हि निमज्जति। एवं तस्करवृत्त्या वा कृत्वाभरणमात्मनः। कुर्याद्विशुद्धिं परतः प्रायश्चित्तं द्विजोत्तमः"। गारुडे २१५ अ०। अधिकम् अग्रे दर्शयिष्यमाणे शु०तत्त्ववचने दृश्यम्। तीर्थप्रतिग्रहनिषेधो यथा "स्वकार्ये पितृकार्ये वा देवताभ्यर्चनेऽपि वा। निष्फलं तस्य तत्तीर्थं यावत् तद्धनमश्नुते। अतस्तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु च" कौर्मे ३३अ०। राजादितः प्रतिग्रहनिषेधो यथा "न राज्ञः प्रतिगृह्णीयाच्छूद्रपतितादपि। न चान्यस्मादशक्तश्च निन्दितात् वर्जयेद्बुधः" कौर्मे १५अ०। आपदि गर्हितप्रतिग्रहस्यादोषः छन्दपरा० "प्रोक्तप्रतिग्रहाभावे प्राप्तायां छन्दसापदि। विप्रोऽश्नन् प्रतिगृह्णन् वा यतस्ततोऽपि नाघभाक्। गुर्वर्थं दीपोष्णवर्णार्थं दैवाद्यर्थञ्च सर्वशः। प्रत्यादद्याद्द्विजो यस्तु भृत्यर्थमात्मनोऽपि च। दधिक्षीराज्यमांसानि गन्धपुष्पाम्बुमत्स्यकान्। शय्यां मांसासनं शाकं प्रत्याख्येयं न कर्हिचित्। अपि दुष्कृतकर्मभ्यः समादद्यादयाचितम्। पतितेभ्यस्तथाऽन्येभ्यः प्रतिग्राह्यमसंशयम्"। प्रतिग्रहीतुः शक्तस्य तत्त्यागे तत्रैव स्थानान्तरे स्वर्ग उक्तो यथा "शक्तः प्रतिग्रहीतुं यो वेदवृत्तः सुसंयतः। लभ्यमानं न गृह्णाति स्वर्गस्तस्य सुनिश्चितम्। प्रतिग्रहस्थं वाभि याचितं यो न यच्छति। तत्कोटिगुणितपापो मृतो दासत्वमृच्छति"। दाता च न स्मरेद्दानं प्रतिग्राही न याचते। तावुभौ नरकं यातो दाता चैव प्रतिग्रही। वदन्ति कवयः केचिद्दानप्रतिग्रहौ प्रति। प्रत्यक्षं सिद्धमेवेह दातृयाचकयोर्बलम्। दातृहस्तो भवेदूर्द्ध्वमधस्तिष्ठेत् प्रतिग्रही। बहुनं प्रतिगृह्णीयात् प्रतिग्राही व्रजत्यधः।" तस्य प्रकारमाह शु०त० विष्णुधर्मोत्तरे "भूमेः प्रतिग्रहं कुर्याद्भूमेः कृत्वा प्रदक्षिणम्"। प्रदक्षिणं न सर्वस्या भूमेः किन्तु तत्क्षणस्य प्रदक्षिणावर्त्तनमात्रं, भूमेरसन्निधाने तामुद्दिश्य प्रदक्षिणम्। "करे गृह्य तथा कन्यां दासदासौ द्विजोत्तमाः!। कर्णन्तु हृदि विन्यस्य धर्मो ज्ञेयः प्रतिग्रहे" "आरुह्य च गजश्चोक्तः कर्णे चाश्वस्य कीर्त्तितः। तथा चैकशफानान्तु सर्वेषामविशेषतः। प्रतिगृह्णीत गां पुच्छे पुच्छे कृष्णाजिनं तथा। आरण्याः पशवश्चान्ये ग्राह्याः पुच्छे विचक्षणैः। प्रतिग्रहमथोद्दिश्य आरुह्य च तथाऽऽचरेत्। बीजानां मुष्टिमादाय रत्नान्यादाय सर्वशः। वस्त्रं दशान्तमादद्यात् परिधाय तथा पुनः। आरुह्योपानहौ यानमारुह्यैव च पादुके। ईशायान्तु रथं ग्राह्यं छत्रं दण्डं च धारयेत्। आयुधानि समादाय तथाऽऽभूष्य विभूषणम्। वर्मध्वजौ तथा स्पृष्ट्वा प्रविशन् च तथा गृहम्। अवतीर्य च सर्वाणि जला

स्थानानि वै द्विजाः। द्रव्याण्यन्यान्यथादाय सदा यो ब्राह्मणः पठेत्। प्रतिग्रहीता सावित्रीं सर्वत्रैव प्रकीर्त्तयेत्। ततस्तु सार्द्धं द्रव्येण तस्य द्रव्यस्य दैवतम्" भूमिर्विष्णुदेवताकेत्यादि कीर्त्तयेदित्यर्थः। "समापयेत्ततः पश्चात् कामस्तुत्या प्रतिग्रहम्। विधिं धर्ममथो ज्ञात्वा यस्तु कुर्य्यात् प्रतिग्रहम्। दात्रा सह तरत्येव नानादुर्गाण्यसौ द्विजः"। ब्रह्मपुराणे "ब्राह्मणः प्रतिगृह्णीयाद्वृत्त्यर्थं साधुतस्तथा। अव्यक्तमपि मातङ्गतिलक्रोडांश्च वर्जयेत्। कृष्णाजिनहयग्राही न भूयः पुरुषो भवेत्। शय्यालङ्कारवस्त्रादि प्रतिगृह्य मृतस्य च। नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा"। तथा "ब्रह्महत्या सुरापानमपि स्तेयं तरिष्यति। आतुराद् यद्गृहीतन्तु तत्कथं वै तरिष्यति" एतदादिद्रव्यदानं ग्रहीतुर्दोषजनकम्। अनिष्कृते विद्यारहितत्वेनासमर्थाय च दातुरपि दोषजनकमाह दक्षः "न केवलं हि तद्याति शेषमस्य च नश्यति"। तत् द्रव्यं शेषं द्रव्यस्य अतएव याज्ञवल्क्यः "विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः। गृह्णन् प्रदातारमधोनयत्यात्मानमेव च"। अधो नरकम्। एतद्दानप्रतिग्रहणोत्तरं तपोजपादिभिरात्मतारणक्षमाय स्वेच्छया प्रतिग्रहीत्रे दानं न दोषायेत्याह विष्णुः "एतानि यदि गृह्णाति स्वेच्छयाभ्यर्थितो न तु। तस्मै दाने न दोषोऽस्ति यस्त्वात्मानन्तु तारयेत्"। तारणप्रकारमाह हारीतः "अश्ववाजीभशादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत् पञ्चमध्यमे द्वयोत्तमे द्वादशरात्रं पयोव्रतं शतसहस्रं महत्प्रतिग्रहेष्विति" अष्टसहस्रमष्टाधिकसहस्रम् असत्प्रतिग्रहेषु उभयतोमुख्यादिप्रतिग्रहेषु तथाचादिपुराणे "किं करिष्यत्यसौ मूढो गृह्णात्युभयतोमुखीम्। सहस्रं वारुणाः पाशाः क्षुरधाराऽग्निसन्निभाः। पूर्णे वर्षसहस्रे तु पाश एकः प्रमुच्यते"। अत एव देवलः "प्रतिग्रहसमर्थो हि कृत्वा विप्रो यथाविधि। निस्तारयति दातारमात्मानञ्च स्वतेजसा"। स्कान्दे "वेदाङ्गपारगो विप्रो यदि कुर्य्यात् प्रतिग्रहम्। न स पापेन लिप्येत पद्मपत्रमिवाम्भसा" एवं "तीर्थे न प्रतिगृह्णीयात् पुण्येष्वायतनेषु च। निमित्तेषु च सर्वेषु न प्रमत्तो भवेन्नरः" इति महाभारतवचनम्। प्रतिग्रहीतृदोषजनके गङ्गातीरादिदेशग्रहणादिकाले दानेऽपि बोध्यम्। किन्त्विदानीन्तथाविधपात्राभावात् "मनसा पात्रमुद्दिश्य" इत्यादि प्रागुक्तवचनात्तद्देशकालयोरुत्सृज्य देशान्तरे कालान्तरे च प्रतिपादनाचारः सर्वथा समीचीनः। गङ्गावाक्यावल्यामेवम्। याज्ञवल्क्यः "प्रतिग्रहसमर्थोऽपि नादत्ते यः प्रतिग्रहम्। ये लोका दानशीलानां स तानाप्नोति पुष्कलान्"। अपवादमाह स एव "कुशाः शाकं पयो मत्स्या गन्धाः पुष्पं दधि क्षितिः। मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च"। चकाराद्गृहादि "शय्यां गृहान् कुशान् गन्धानपः पुष्पं मणीन् दधि। मत्स्यान् धानाः पयो मांसं शाकञ्चैव न निर्णुदेत्" इति वचनात्। मणीन् विषादिनिवारकान्। तथा "एधोदकं फलं मूलमन्नमभ्युद्यतञ्च यत्। सर्वतः प्रतिगृह्णीयात् मध्वथाभयदक्षिणाम्"। अभयदक्षिणाम् अभयदानं अभयप्रद इति वक्ष्यमाणवचनात्। अभ्युद्यतम् अभ्यर्थ्य दत्तम्। किमिति प्रत्याख्येयम् इत्याह। तथा च मनुः "अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः। अन्यत्र कुलटाषण्डपतितेभ्यस्तथा द्विषः" एतद्वचनं याज्ञवल्क्यस्येति मिताक्षराकुल्लूकभट्टमाधवाचार्य्याः। मनोरिति शूलपाणिः। भरद्वाजः "अयाचितोपपन्ने तु नास्ति दोषः प्रतिग्रहे। अमृतं तद्विदुर्देवास्तस्मात्तं नैव निर्णुदेत्"। अपवादान्तरमाह स एव "देवातिथ्यर्चनकृते गुरुभृत्यार्थमेव च। सर्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थमेव च" भृत्या भरणीयाः भार्य्यापुत्रादयः। तथा च मनुः "वृद्धौ च मातापितरौ साध्वी भार्य्या सुतः शिशुः। अप्यकार्य्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत्"। आत्मवृत्त्यर्थं जीवनमात्रम्। "न तु तृप्येत् स्वयं ततः" इति मनूक्तेः। प्रयोगसारे "प्रतिग्रहं न गृह्णीयादात्मभोगोपलिप्सया। देवतातिथिपूजार्थं धनं यत्नादुपार्जयेत्"। अङ्गिराः "कुटुम्बार्थं द्विजः शूद्रात् प्रतिगृह्णीत याचितम्। क्रत्वर्थमात्मने चैव न हि याचेत कर्हिचित्"। अत एव यज्ञार्थं याचकत्वे निन्दामाह याज्ञवल्क्यः "चाण्डालो जायते यज्ञकरणाच्छूद्रभिक्षितात्" शूद्रस्यापि अयाचितदातृत्वमाह नृसिंहपुराणम् "अयाचितप्रदाता च कृषिं वृत्त्यर्थमाश्रयेत्। पुराणं शृणुयान्नित्यं नरसिंहस्य पूजनम्"

प्रतिग्रहीतृ त्रि॰ प्रति+ग्रह-तृच्। प्रतिग्रहकर्त्तरि प्रतिग्रहीतृधर्मश्च दानशब्दे ३५॰ उक्ता दृश्याः।

प्रतिग्राह त्रि॰ प्रति+ग्रह-कर्त्तरि ण। १प्रतिग्रहकारके २पतद्ग्रहे (पिकदानी) पु॰ अमरः।

प्रतिघ पु॰ प्रति+हन-ड न्यङ्क्वा॰ कुत्वम्। १प्रतिघाते रोदुः

२कोपे अमरः। कामप्रतिघातेन तस्य जातत्वात्तथात्वम्। ३मूर्च्छायां शब्दर०।

प्रतिघात पु० प्रति+हन–णिच् भावे अप्। १मारणे २क्रतश्चित् विघाते च। ल्युट् प्रतिघातन तत्रार्थे न० अमरः।

प्रतिघ्न न० प्रति+हन–घञर्थे क। अङ्गे शब्दच०।

प्रतिचक्ष्य त्रि० प्रति+चक्ष–ण्यत् वा ख्यादेशाभावः। प्रकर्षेण द्रष्टव्ये ऋ०१।११२।११भा०।

प्रतिच्छन्दस् त्रि० छन्दोऽभिप्रायः प्रतिगतश्छन्दः अत्या०स०। १अभिप्रायानुरूपे २प्रतिरूपे ३अनुरोधे च त्रिका०। वेदश्छन्दः साकल्ये अव्ययी०। ४प्रतिवेदमित्यर्थे अव्य०।

प्रतिच्छन्दक त्रि० प्रति+छन्द–ण्वुल्। प्रतिनिधौ ६।१८० श्लोके कुल्लूकभट्टः।

प्रतिच्छाया स्त्री प्रतिरूपा छायायाः प्रा०स०। प्रतिरूपायां १प्रतिमायां २सादृश्ये च अमरः। [हेमच०।

प्रतिजङ्घा स्त्री प्रतिगता जङ्घाम् अत्या०स०। अपजङ्घायाम्

प्रतिजन अव्य० वीप्सायाम् अव्ययी०। जनं जनं प्रतीत्यर्थे तस्य अंशा० अन्तोदात्तता। तत्र साधु प्रतिजना० खञ्। प्रातिजनीन प्रत्येकजनसाधौ त्रि०।

प्रतिजनादि "प्रतिजनादिभ्यः खञ्" पा० उक्ते खञ्प्रत्ययनिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा "प्रतिजन इदंयुग. संयुग समयुग परयुग परकुल परस्यकुल अमुष्यकुल सर्वजन विश्वजन महाजन पञ्चजन"

प्रतिजन्य न० प्रतिकूलं जन्यं युद्धं यस्य, प्रतिजने विपक्षजनपदे भवः यत् वा। १प्रतियुद्धे २प्रतिपक्षजनपदभवे च ऋ०४।५।७ भा०।

प्रतिजल्पक पु० "दूताजहन्मभावेऽस्मिन् प्राप्तिर्नोऽर्हत्यनुव्रतम्। दूतसम्मानेनोक्तं यत्र स प्रतिजल्पकः" उज्ज्वलमण्युक्तलक्षणे दूतवाक्यभेदे।

प्रतिजागर पु० जागरस्य प्रतिनिधिः। १प्रत्यवेक्षणाय स्टहवेक्षस्वेति नियोगे अमरटी० रायमुकुटः। ल्युट्। प्रतिजागरण तत्रार्थे न० मार्क०पु० ६६अ०।

प्रतिजिह्वा स्त्री प्रतिरूपा जिह्वा प्रा०स०। तालुमूलस्थे जिह्वाकारे मांसपिण्डे (आलजिव) स्वार्थे क। तत्रार्थे त्रिका०।

प्रतिज्ञा स्त्री प्रति+ज्ञा–भावे "आतश्चोपसर्गे" पा० अङ्। १कर्त्तव्यत्वप्रकारकज्ञानानुकूलव्यापारे स च करिष्यामीत्यादिवाक्यरूपः "साध्यनिर्देशः प्रतिज्ञा" गौ०सू०उक्ते साध्यवत्त्वेन पक्षनिर्देशरूपे २पञ्चाङ्गन्यायावयवभेदे "यथा पर्वतो वह्निमान् इत्यादिवाक्यम्. तत्र भाष्यम् "प्रज्ञापनीयेन धर्मेण विशिष्टस्य परिग्रहवचनम् साध्यनिर्देशः प्रतिज्ञा यथा शब्दोऽनित्य इति"। अवयवग्रन्थे अनुमानचिन्तामण्यादिदीधितौ विस्तारः। व्यवहारे पक्षाभिधायके ३पूर्वपक्षभाषाद्यपरपर्य्याये वाक्ये यथा ममेदं द्रव्यमनेन गृहीतं न ददातीत्यादि। पूर्वपक्षशब्दे ४४०३पृ० दृश्यम्। ४अङ्गीकारे अमरः भावे ल्युट्। प्रतिज्ञानं तत्रार्थे न०।

प्रतिज्ञात त्रि० प्रति+ज्ञा–क्त। प्रागुक्तप्रतिज्ञाविषये "ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्" इति स्मृतिः।

प्रतिज्ञान्तर न० अन्या प्रतिज्ञा मयू०स०। "प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम्" गौ०सू० उक्ते निग्रहस्थानभेदे विवृतं चेदं वृत्तौ "प्रतिज्ञान्तरं लक्षयति। प्रतिज्ञातस्यार्थस्य प्रतिषेधे कृते तद्दूषणोद्दिधीर्षया धर्मस्य धर्मान्तरस्य विशिष्टः कल्पो विकल्पः तस्माद्विशेषणान्तरविशिष्टतया प्रतिज्ञातार्थस्य कथनमिति फलितार्थः। प्रतिषेध इत्यनेन झटितिसंवरणे विवक्षितेनापि स्वयं दूषणं विभाव्य विशेषणे न दोष इत्युक्तं, प्रतिज्ञातार्थस्येत्युपलक्षणम् हेत्वतिरिक्तार्थस्येति तच्च तेन उदाहरणान्तरमुपनयान्तरञ्च प्रतिज्ञान्तरत्वेन संगृहीतं भवति। इदञ्च पक्षसाध्यविशेषणभेदात् प्रत्येकं द्विविध यथा शब्दोऽनित्य इत्युक्ते ध्वनौ बाधेन परेण प्रत्युक्ते वर्णात्मकः शब्दः पक्ष इति प्रतिज्ञान्तरं, न चेदमर्थान्तर प्रकृतोपयोगात् न चेयं प्रतिज्ञाहानिः पूर्वोक्तस्यापरित्यागात् एवं पर्वतो वह्निमान् सुरभिमलिनधूमवत्त्वादित्युक्ते असमर्थविशेषणत्वेन च परेण प्रत्युक्ते कृष्णागुरुप्रभववह्निमानित्यत्र, एवं तादृशवह्नौ साध्ये यः सुरभिमलिनधूमवान् स वह्निमानित्युदाहरणे न्यूनत्वेन प्रत्युक्ते स तादृशवह्निमानित्यत्र, एवमन्यदप्यूह्यम्।

प्रतिज्ञापत्र न० प्रतिज्ञासूचकं पत्रम् शा०त०। भाषापत्रभेदे।

प्रतिज्ञाविरोध न० "प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः" गौ० सू० उक्ते निग्रहस्थानभेदे विवृतश्चेदं वृत्तौ "प्रतिज्ञाविरोधं लक्षयति अत्र च प्रतिज्ञाहेतुपदे कथाकालीनवाक्यपरे तथा च कथायां स्ववचनार्थविरोधः प्रतिज्ञाविरोधः यद्यपि काञ्चनमयः पर्वतो 'वह्निमान् पर्वतः काञ्चनमयवह्निमान् ह्रदो वह्निमान् ह्रदत्वात् पर्वतो वह्निमान् काञ्चनमयधूमादित्यादौ हेत्वाभासान्तरसाङ्कर्यं तथाप्युपाधेयसङ्करेऽप्युपाधेरसाङ्कर्यान्न दोषः। न चाव्याप्त्यसम्भवाभावः पर्वतो न वह्निमान् धूमात् यो

-यो धूमवान् स निरग्निरित्युदाहरणे निरग्निश्चायमित्युपनये तत्सत्त्वात् एवं निगमनेऽपि बोध्यम् ।

प्रतिज्ञासन्न्यास न० “पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः” गौ०सू०उक्ते निग्रहस्थानभेदे विवृतञ्चेदं वृत्तौ “प्रतिज्ञासन्न्यासं लक्षयति । पक्षस्य स्वाभिहितस्य परेण प्रतिषेधे कृते सति तत्परिजिहीर्षया प्रतिज्ञातार्थस्यापनयनमपलाप इत्यर्थः यथा शब्दोऽनित्य ऐन्द्रियकत्वादित्युक्ते सामान्ये व्यभिचारेण परेण प्रत्युक्ते क एवमाह शब्दोऽनित्य इति ।

प्रतिज्ञाहानि न० “प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः” गौ०सू० उक्ते निग्रहस्थानभेदे विवृतञ्चेदं वृत्तौ “प्रतिज्ञाहानिं लक्षयति प्रतिकूलो दृष्टान्तो यत्र स प्रतिदृष्टान्तः परपक्षः स्वः स्वीयः दृष्टान्तो यत्र स स्वदृष्टान्तः स्वपक्षः तथा च स्वपक्षे परपक्षधर्माभ्यनुज्ञा प्रतिज्ञाहानिः स्वयं विशिष्याभिहितपरित्याग इति फलितार्थः अपसिद्धान्तस्तु स्वयं विशिष्य नाभिधीयते इति नापसिद्धान्तसाङ्कर्यं सेयं पक्षहेतुदृष्टान्तसाध्यतदन्यहानिभेदात् पञ्चधा भवति यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते प्रत्यभिज्ञया बाधितविषयोऽयमित्युच्चरिते अस्तु तर्हि घट एव पक्ष इति, एवं तत्रैव ऐन्द्रियकत्वादिति हेतोरनैकान्तिकत्वमिति प्रत्युक्ते अस्तु कृतकत्वादिति हेतुरिति, एवं पर्वतो वह्निमान् धूमादयोगोलकवदित्युक्ते दृष्टान्तः साधनविकल इति प्रत्युक्ते अस्तु तर्हि महानसवदिति, एवम् अत्रैव सिद्धसाधने च प्रत्युक्ते अस्तु तर्हि इन्धनवानिति अन्यहानिस्तु विशेषणहान्यादिः यथा तत्रैव नीलधूमादित्युक्तेऽसमर्थविशेषणत्वेन प्रत्युक्ते अस्तु तर्हि धूमादिति हेतुरित्यादि ।

प्रतितन्त्र न० प्रतिकूलं तन्त्रं शास्त्रम् प्रा०स०। स्वमतविरुद्धे शास्त्रे तन्त्रस्येतरेतराभिमतसम्बद्धस्यार्थस्योपदेशः शास्त्रमिति ।

प्रतितन्त्रसिद्धान्त पु० “समानतन्त्रसिद्धः परतन्त्रसिद्धः प्रतितन्त्रसिद्धान्तः” गौ०सू०उक्ते सिद्धान्तभेदे विवृतं चेदं वृत्तौ “प्रतितन्त्रसिद्धान्तं लक्षयति । समानशब्द एकार्थस्तथैकतन्त्रसिद्ध इत्यर्थः स्वतन्त्रसिद्ध इति पर्य्यवसितोऽर्थः तथा च वादिप्रतिवाद्येकतरमात्राभ्युपगतस्तदेकतरस्य प्रतितन्त्रसिद्धान्त इति फलितार्थः । यथा मीमांसकानां शब्दनित्यत्वम् । उदाहृतं च भाष्ये यथा नासत आत्मलाभः न सत आत्महानं निरतिशयाः चेतनाः देहेन्द्रियमनःसु विषयेषु तत्तत्कारणेषु च विशेष इति सांख्यानाम् । पुरुषकर्मनिमित्तो भूतसर्गः कर्महेतवो दोषाः प्रवृत्तिश्च स्वगुणविशिष्टाश्चेतनाः असदुत्पद्यते उत्पन्नं निरुध्यते इति योगानाम्” ।

प्रतितर पु० प्रतितीर्य्यतेऽनेन प्रति+तॄ–करणे अप् । तरणसाधने नौकाचालनदण्डादौ सुश्रुतः ।

प्रतिताल पु० संगीतदा० उक्ते तालभेदे तल्लक्षणभेदादिकं तत्रोक्तं यथा “कान्तारः समराख्यश्च वैकुण्ठो वाञ्छितस्तथा । कथिताः शङ्करेणैव चत्वारः प्रतितालकाः । कान्तारः प्रतितालस्तु चन्द्रक्रीडे द्रुतद्वयम् । दशाक्षरपदेनाद्यं शृङ्गारे वर्त्तते रसे ।१ लघुद्रुतौ लघुश्चान्ते प्लुतनाम उदाहृतः । रुद्रसंख्याक्षरपदः समरो वीरके रसे” ।२ “द्रुतत्रयस्तु वैकुण्ठे प्रतिताले समीरिताः । अर्कसंख्याक्षरैः पादो हास्ये त्रिपुटतालके” ।३ “वाञ्छितस्तृतीय ताले लघुरेको द्रुतस्तथा । त्रयोदशाक्षरैर्युक्तो रसेऽद्भुते प्रकीर्त्तितः” ।

प्रतितालो स्त्री प्रतिगता तालं गौरा० ङीष् । (चावि) तालकोद्घाटके यन्त्रभेदे हेमच० ।

प्रतितूणी स्त्री सुश्रुतोक्ते वातरोगभेदे “आहत्य वायुः सकफो धमनीः शब्दवाहिनीः । नरान् करोत्यक्रियकान् मूकमिन्मिणगद्गदान् । अधःका वेदना याति वर्चोमूत्राशयोत्थिता । भिन्दतीव गुदोपस्थं सा तूणीत्यभिधीयते । गुदोपस्थोत्थिता सैव प्रतिलोमविसर्पिणी । वेगैः पक्वाशयं याति प्रतितूणी तु सा स्मृता” । तूणीशब्दोऽपि तत्र लक्षितवातरोगभेदे स्त्री ।

प्रतिदान न० प्रतिरूपं तुल्यरूपं दानम् प्रा०स० । विनिमये १तुल्यरूपदाने न्यस्तस्य द्रव्यस्य २प्रत्यर्पणे च अमरः ।

प्रतिदारण न० प्रति–दॄ+णिच्–आधारे ल्युट् । युद्धे शब्दमाला भावे ल्युट् । भेदने ।

प्रतिदिवन् पु० प्रतिदीव्यति दिव–कनिन् । प्रत्यहं १दीप्तिशीले सूर्य्ये त्रिका० अस्य भत्वेऽल्लोपे दीर्घविधौ पर्निमित्तलोपरूपाजादेशस्य स्थानिवत्त्वाभावात् दीर्घः । प्रतिदीव्नः प्रतिदीव्नेत्यादि । शब्दरत्ना० प्रतिदीवन् इति शब्दान्तरं कृतं तत्र प्रमो०। तत्रार्थे । [२१०१ पृ० दृश्यम् ।

प्रतिदृष्टान्तसम पु० गौ०सू० उक्ते जात्युत्तरभेदे जातिशब्दे

प्रतिद्वन्द्व न० प्रतिरूपं द्वन्द्वम् प्रा०स०। तुल्ययुद्धे मार्क०१८अ०।

प्रतिद्वन्द्विन् त्रि०प्रतिद्वन्द्वमस्त्यस्य इनि । १तुल्यरूपे येन सह द्वन्द्वं युद्धं क्रियते २तस्मिंश्च ।

प्रतिधर्त्तृ त्रि० प्रति+धृ-तृच्। निराकारके यजु० १५।१० वेददी०

प्रतिधा स्त्री प्रति+धा-भावे क्विप्। प्रतिविधाने भावे ल्युट्। प्रतिधान निराकरणे न०।

प्रतिधि पु० पु० प्रतिरूपं धीयते प्रति-धा कर्मणि कि। प्रातःसवनान्ते पाठ्ये १स्तोमभेदे ताण्ड्य०ब्रा० भा० २तैरश्चीनगतकाष्ठे च० १८ ८५ ८ भा०। ३पाने यजु० १८ वेददी०। [आवपाने शब्दे प्रतिपद् हेम०।

प्रतिध्वनि पु० प्रतिरूपोध्वनिः प्रा० स०। शब्दानुसारेण

प्रतिध्वान पु० प्रति+ध्वन-घञ्। प्रतिशब्दे अमरः।

प्रतिनन्दन न० प्रति+नन्द-भावे ल्युट्। आशीर्वादादिना सम्भावने। [हेम०।

प्रतिनप्तृ पु० प्रतिनिहितो नप्ता पौत्रः प्रा०स०। प्रपौत्रे

प्रतिनव त्रि० प्रतिगतो नवं नूतनत्वम् अत्या०स०। नूतने जटा०

प्रतिनाद पु० प्रतिरूपो नादः प्रा०स०। प्रतिध्वनौ

प्रतिनायक पु० प्रतिकूलो नायकः प्रा०स०। वीररसादौ प्रतिकूले नायके नायकस्य यं प्रति कोपादि तस्मिन् "धीरोद्धतः पापकारी व्यसनी प्रतिनायकः" सा०द०। यथा रामस्य रावण इत्यादि।

प्रतिनिधि पु० प्रतिरूपं निधीयते तुल्यरूपतया स्थाप्यते प्रति+नि+धा-कि। १प्रतिरूपे तुल्यरूपे अमरः। वैदिककर्मोक्तद्रव्यादीनां मुख्यानामलाभे २तुल्यरूपतयान्यस्मिन् निधीयमाने। कुत्र प्रतिनिधिर्भवति कुत्र वा न भवति तद्वर्णं विशेषवर्जितं कात्या०श्रौ०१ ४ कण्डिकायां व्यवस्थापितं तच्च संक्षिप्तार्थस्तु कात्यायनशब्दे १८६५ पृष्ठादौ दर्शितः। तदनुसारेण स्मार्त्तादिकर्मस्वपि व्यवस्था प्रदर्श्यते तत्र एकादशीतत्त्वे उक्तं यथा स्कन्दपुराणम् "पुत्रञ्च विनियोगेत भगिनीं भ्रातरं तथा। एषामभाव एवान्यं ब्राह्मणं विनियोजयेत्"। गरुडपुराणम् "भार्य्या भर्त्तृव्रतं कुर्य्याद्भार्य्यायाश्च पतिस्तथा। असामर्थ्ये द्वयोस्ताभ्यां व्रतभङ्गो न जायते"। वराहपुराणे "पितृमातृपतिभ्रातृश्वश्रुगुर्वादिभूभुजाम्। परार्थमुपोषिता स्वयञ्च फलभाक् भवेत्"। अत्रैव विषये कात्यायनः "दक्षिणा यात्र कर्त्तव्या गुरुणा वि-हिता च वा" नन्वत्र प्रतिनिधौ कर्मेषु अर्थं इत्यादिमन्त्रस्वफलं कुत्रान्वेतु इति चेत् प्रधान एव। तथा च शारीरकभाष्ये श्रुतिः "यां वै काञ्चन यज्ञ आशिषमाशासते यजमानायैव तामाशासते इति होवाच" इति। ब्राह्मणसर्वत्र यजमानायैवेत्यत्र यजमानस्येति पाठः। छन्दोगानां "यां वै काञ्चन ऋत्विग आशिषमाशासते सा यजमानस्यैवेति"। अत्र ऋत्विग्यजमानपदे प्रतिनिधिप्रधानपरे आकाङ्क्षितत्वात्। अतएव प्रतिनिधिपुत्रादिना "आयान्तु नः पितरः" इत्यादिरनूह एव पठ्यते वाक्यस्य काल्पनिकत्वाच्च तथेति। कालमाधवीये "काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि सः। काम्येऽप्युपक्रमादूर्द्ध्वमन्ये प्रतिनिधिं विदुः" यथा नित्यं नैमित्तिकञ्च प्रतिनिधिनाप्युपक्रम्य कारयेत् काम्ये तु असामर्थ्यं परीक्ष्य स्वयमेवोपक्रम्य कुर्य्यात्। असामर्थ्ये उपक्रमादूर्द्ध्वं प्रतिनिधिनापि कारयेत्। एतच्च श्रौतकाम्यपरं स्मार्त्तकाम्यन्तु अन्यद्वाराप्युपक्रम्य कार्य्यम्। तथा च पराशरभाष्ये शातातपः "श्रौतं कर्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत्। अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः"। अन्तत उपक्रमात् परतः। एतच्च काम्येऽपि प्रतिनिधिविधायकं नैमित्तिकमात्रपरत्वे श्रौतस्मार्त्तभेदोपादानं व्यर्थं स्यात् तयोरविशेषादेव प्रतिनिधिलाभात्। अत एव भारतपाठादौ तथा समाचारः। [illegible] "नाभावस्य प्रतिनिधिरभावान्तरमिष्यते"। अस्यार्थः अभावस्याप्यभावान्तरमभावस्य प्रतिनिधिर्नेष्यते। भावस्तु कदाचिद्यथोपवासादौ ब्राह्मणभोजनादीति। "नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्। श्रौतक्रियायामभोज्यं यद्द्रव्यं हि तदशेषतः। ग्राह्यं प्रतिनिधित्वेन होमकार्य्ये न कुत्रचित्। द्रव्यं वैकल्पिकं किञ्चिद् यत्र सङ्कल्पितं भवेत्। तदभावे सदृग्ग्राह्यं न तु वैकल्पिकान्तरम्। उपात्ते तु प्रतिनिधौ मुख्यार्थो लभ्यते यदि। तत्र मुख्यमनादृत्य गौणेनैव समापयेत्। संस्कारायाभयोग्योऽपि मुख्य एव हि लभ्यते। न तु संस्कारयोग्योऽन्यो गृह्यते प्रतिरूपकः। मुख्ये कार्य्यासमर्थे तु लब्धेऽप्येतस्य नादरः। प्रतिरूपकमादाय कर्म्मैवोपजायते। कार्य्यैरूपैस्तथा पत्रैः क्षीरैः पुष्पैस्तथा फलैः। गन्धै रसैः सदृग्ग्राह्यं पूर्व्वालाभे परं परम्। प्राथम्यान्तु भवेद्ग्राम्यमारण्यानामरण्यजम्। व्रीह्यलाभे तु गोधूमास्तथा रेणुयवादयः। हविष्ये गोघृतं ग्राह्यं तदभावेऽपि माहिषम्। आजं वा तदभावे तु साक्षात्तैलं प्रयुज्यते। तैलाभावे ग्रहीतव्यं तैलजं तिलसम्भवम्"। तैलजं तैलघट्टं तिलकल्कम् तिलपिष्टादि। "तदभावे तु सङ्गोहं कौसुम्भं सर्षपोद्भवम् [illegible]स्तथा ग्राह्यः पूर्व्वाभावे

घृतः परः । तदभावे गवादीनां क्रमात् क्षीरं विधीयते । तदभावे दधि प्रोक्तमलाभे तिल इष्यते । यत्र तुल्यं दधि क्षीरं तत्रापि तद्वाभतः । अजादेः क्षीरदध्यादि तदभावेऽपि गोघृतम् । मुख्यालाभेऽथ वा प्राज्ञः कार्य्यं-कारणसन्ततौ" । अत एव घृताभावे पूर्वं दधि ततः पयः । तथा "सर्वत्र गौणकालेषु कर्मचोदितमाचरेत् । प्रायश्चित्तं व्याहृतिभिर्हुत्वा कर्म समाचरेत्" । मत्स्यसूक्ते "घृतं न लभ्यते यत्र शुष्कक्षीरेण होमयेत् । क्षीरस्य च दधि ज्ञेयं मधुनश्च गुड़ो भवेत्" । आयुर्वेदेऽपि "मधु यत्र न लभ्येत तत्र जीर्णो गुड़ो भवेत्" । काण्डमूलपर्णपुष्पफलप्ररोहरसगन्धादीनां सादृश्येन प्रतिनिधिं कुर्य्यात् । यवाभावे यवप्रतिनिधिर्भवतीति" काण्डं नालं प्ररोहोऽङ्कुरः । यवालाभे यव इति कल्पतरुः अवयव इति नारायणोपाध्यायः । शान्तिदीपिकायां नारदीयपञ्चरात्रम् "अभावे चैव धातूनां हरितालं विधीयते । बीजानामप्यभावे तु यव एकः प्रशस्यते । ओषधीनामभावे तु सहदेवी प्रशस्यते । रत्नानामप्यभावे तु मुक्ताफलमनुत्तमम् । लौहानामप्यभावे तु हेमपात्रं प्रकल्पयेत्" । लौहानां तैजसपात्राणाम् । न्यायप्राप्तप्रतिनिधिमधिकृत्य जैमिनिः "न देवताग्निशब्दक्रियाणामिति" ; अस्यार्थः देवताया अग्नेश्च आहवनीयादेः शब्दस्य मन्त्रस्य क्रियाया प्रयाजाद्यदृष्टार्थकर्मणश्चादृष्टमात्रार्थकत्वेनारादुपकारकत्वान्न प्रतिनिधिः, व्रीह्यादीनान्तु सन्निपत्योपकारकाणां पुरोडाशसाधनं दृष्टमेव प्रयोजनमिति तत्र प्रतिनिधिरुचित इत्युक्तम् । परिशिष्टम् "मुख्यकाले तु मुख्यञ्चेत् साधनं नैव लभ्यते । तत्कालद्रव्ययोः कस्य गौणता मुख्यतापि वा" । तत्र भरद्वाजः "मुख्यकालमुपाश्रित्य गौणमप्यस्तु साधनम् । न मुख्यद्रव्यलाभेन गौणकालप्रतीक्षणम् । गौणेषु तेषु कालेषु कर्म चोदितमारभेत् । प्रायश्चित्तप्रकरणप्रोक्तां निष्कृतिमाचरेत्" । उत्तरमतं सिद्धान्तमिति केचित् । तदभिप्रायकं मीमांसाषष्ठाध्यायसूत्रम् । "पौर्वापर्य्येऽपि पूर्वदौर्बल्यं प्रकृतिवदिति" । ज्योतिष्टोमेऽन्योन्यं सम्बध्य यज्ञशालातो बहिर्निर्गच्छतामृत्विजां विच्छेदनिमित्तं प्रायश्चित्तं श्रूयते यद्युद्गाता विच्छिन्द्याददक्षिणेन यजेत यदि प्रतिहर्त्ता सर्वस्वदक्षिणेनेति" । तत्र उद्गातृप्रतिहर्त्रोःक्रमेण विच्छेदे द्विरुक्तप्रायश्चित्तयोः उभयथासम्भवात् । किं पूर्वं कार्य्यम् उत वा परमिति संशये हि अनुपजातविरोधात् पूर्वमिति पूर्वपक्षे राद्धान्तः पौर्वापर्य्ये सति निमित्तयोः पूर्वस्यैव निमित्तस्य दौर्बल्यम् । उत्तरस्य पूर्वनिरपेक्षस्य तद्बाधकतया उदितत्वात् पूर्वोदयकाले उत्तरस्याप्राप्तत्वेन पूर्वेण बाध्यत्वायोगात् । उक्तं हि "पूर्वं परमजातत्वादबाधित्वैव जायते । परस्यानन्यथोत्पादादुक्तबाधेन सम्भवः" इति प्रकृतिवदिति यथा हि प्रकृतौ ज्ञातोपकाराः कुशाः प्रथममतिदेशेन विकृतावुपकाराकाङ्क्षिण्यां प्राप्ताः कल्प्योपकारतया चरमभाविभिरपि शरैर्निरपेक्षैर्बाध्यन्ते तद्वदिति । अत एव शारीरकभाष्यटीकायां वाचस्पतिमिश्राः "ज्येष्ठत्वञ्चानपेक्षितस्य बाध्यत्वे हेतुर्न बाधकत्वे रजतज्ञानस्य ज्यायसः शुक्तिज्ञानेन कनीयसा बाधदर्शनात् तदनपबाधने तद्बाधात्मनस्तस्योत्पत्तेरनुपपत्तेः तथाच "पूर्वापरबलीयस्त्वं तत्र नाम प्रतीयताम् । अन्योन्यनिरपेक्षाणां यत्र जन्मधियां भवेत्" इति । यदि च पूर्ववचनस्य पूर्वपक्षत्वे वैयर्थ्यं स्यात् अत उभयवचनार्थौ विवक्षणीयौ तदा विषयभेदेन व्यवस्थापनीयौ । तथाहि यत्राष्टकाश्राद्धादौ कालान्तराभावस्तत्र तत्कालानुरोधादिष्टद्रव्यालाभेऽपि प्रतिनिहितद्रव्यमादाय मुख्यकाल एव तत्करणं न तु वचनानुपात्तस्वेच्छाकल्प्यगौणकालप्रतीक्षणम् । तथाच छन्दोगपरिशिष्टम् "स्थालीपाकं पशुस्थाने कुर्य्याद् यद्यानुकल्पिकम् । श्रपयेत्तं सवत्सायास्तरुण्या गोः पयस्यनु" इत्यादि । यत्राब्दिकश्राद्धादौ कृष्णैकादश्यादिगौणकालोऽस्ति तत्र मृताहादावशौचाद्यभावे तदनुरोधेन उपवासादिरूपं प्रायश्चित्तं कृत्वा गौणकाले तत् कर्त्तव्यम् । तथाच लघुहारीतः "एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम् । अभावे पाकपात्राणां तदह्नः समुपोषणम्" । तथाच छन्दोगपरिशिष्टम् "संस्कारा अतिपत्येरन् स्वकालाच्चेत् कथञ्चन । हुत्वैतदेव कुर्वीत ये तूपनयनादधः" । यत्र तु विनिगमकवचनाभावस्तत्र यद्यपि क्रियायाः प्राधान्यात् कालो द्रव्यं द्वयमपि गुणभूतमेव तथाप्युभयोपसंहारासामर्थ्ये द्रव्यादरः कालस्य सूर्य्यादिक्रियाघटितस्य कर्त्रधीनत्वाभावादर्जनीयत्वसिद्धेः असन्निधिकत्वान्निमित्तत्वमात्रेण बहिरङ्गत्वात् । कालस्य निमित्तत्वं व्यक्तं भविष्ये "अतः कालं प्रवक्ष्यामि निमित्तं कर्मणामिह" । द्रव्यस्य तु यागस्वरूपनिर्वाहकत्वेनाभ्यर्हितत्वात् कर्मणः कारकत्वेनान्तरङ्गत्वाच्च । कुशादि-

प्रतिनिध्यभावे तु ब्रह्मवैवर्त्ते: "उपवासासमर्थश्चेदेकं विप्रन्तु भोजयेत्। तावद्धनानि वा दद्याद् यद्भक्ताद्द्विगुणं भवेत्। सहस्रसम्मितां देवीं जपेद्वा प्राणसंयमान्। कुर्य्याद्द्वादशसंख्याकान् यथाशक्ति व्रते नरः"। देवीं गायत्रीम्। अत्र चान्द्रायणादौ परिसंख्या। काश्यपपञ्चरात्रे "मच्छयने मदुत्थाने मत्पार्श्वपरिवर्त्तने। फलमूलजलाहारी हृदि शल्यं समार्पयेत्। अत्र यो दीक्षितः कश्चिद्वैष्णवो भक्तितत्परः। निर्निमित्तमदीक्षायां न च वृद्धव्याधिपीड़ितः। अन्नं वा यदि भुञ्जीत मूलं फलमथापि वा। अपराधमहं तस्य न क्षमामि सुकश्यप!। क्षिपामि नरके घोरे हृच्छल्यं मम जायते"। निमित्तं प्रारब्धचान्द्रायणादिव्रतविरोध इत्यादि, दीक्षायां चरुप्राशनस्य विहितत्वाददीक्षायामित्युक्तम्। वृद्धव्याधिना पीड़ितः सर्वमेतत्प्रदर्शनमात्रं शक्तौ निर्विरोध इत्यर्थः। अन्नादिकमप्युपलक्षणमिति जीमूतवाहनः। अत्र निमित्तं प्रारब्धचान्द्रायणादीति यदुक्तं तस्य चान्द्रायणादौ भोजनस्यावश्यकत्वाभावात् किन्तु निमित्तं रविवारादुपवासपारणं जलपानरूपं दीक्षायामपि चरुप्राशनं प्राणरूपम् अन्यथा "पुरोडाशोऽपि सोमो वा संप्राप्ते हरिवासरे। अभक्ष्येण समः प्रोक्तः किं पुनश्चाशनक्रिया" इति नारदीयं विरुध्येत। तदुप्राशनस्य भोजनरूपतामाह कालादर्शे स्मृतिः "पितृमाघ्रेयं तच्चैव प्राशितं भवति" इति पितृयज्ञुपलक्षणम् आकाङ्क्षाया अविशिष्टत्वात्। तेनैकादश्यां तदुभयोर्जलपारणं चरुशेषप्राशनञ्च कृत्वा उपवासः कार्य्यः"।

आरब्धकार्त्तिकादिस्नाने तु व्याधादिनाऽसामर्थ्ये पुत्रादिभिः प्रतिनिधिना कारयितव्यं नानुकल्पविधिना नित्यस्नान एव तद्विधानादिति" इति मल० त०। स्वयं करणाऽसामर्थ्ये अन्यद्वारा कारयितव्यं यथा दक्षः "स्वयं होमे फलं यत्तु तदन्येन न जायते। ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः। एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि" विट्पतिर्जामाता। एवञ्च ऋत्विगादीतरत्र फलन्यूनता। अत्राशौचाशङ्कया बोधनदिनात् पूर्वं शुचितत्कालजीवित्वरूपाधिकाराभावेऽपि यद्वरणादिकं क्रियते तत्कर्म्मकाले तस्य नारदोक्तस्वयंप्रवर्त्तनवत् प्रवर्त्तनाय न तु तदानीं प्रतिनिधीयते अथ वा "निःक्षिप्ताग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा। प्रवसेत् कार्य्यवान् विप्रो वृथैव न चिरं वसेत्" इति छन्दोगपरिशिष्ट-वदन्यत्रापि प्रतिनिधीयते एवं वरणं विनापि कश्चिदृर्त्विक् प्रवर्त्तते तथापि तत्कर्म्मसिद्धिः। दक्षिणा च तस्मै शुक्तिकाले दातव्येति तथा च नारदः "ऋत्विक् च त्रिविधो दृष्टः पूर्वजुष्टः स्वयं कृतः। यदृच्छया वा यः कुर्य्यादार्त्विज्यं प्रीतिपूर्वकम्" यदृच्छया स्वेच्छया" ति० त०। परार्थस्नाने स्वयमशक्तौ कुशमयप्रतिमूर्त्तिस्नानेऽपि फलविशेषः प्रा० त० उक्तो यथा "प्रतिकृतिं कुशमयीं कृत्वा तीर्थवारिषु मज्जयेत्। यमुद्दिश्य निमज्जेत सोऽष्टभागं फलं लभेत्। मातरं पितरं वापि भ्रातरं सुहृदं गुरुम्। यमुद्दिश्य निमज्जेत द्वादशांशं फलं लभेत्"। "अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा। पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः" दत्तकमी०।

प्रतिनियम पु० प्रत्येकं नियमः। १एकमेकं प्रति नियमे २व्यवस्थायाम् "प्रतिनियमादयुगपत्प्रवृत्तेश्च पुरुषबहुत्वं सिद्धम्" सा० का०।

प्रतिनिर्देश्य त्रि० प्रति+निर्—दिश-कर्मणि ण्यत्। प्रथमनिर्दिष्टस्य पुनर्गुणान्तरविधानार्थं बुभुत्सितार्थप्रतिपादनार्थं च निर्देशविषये यथा "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" अत्र ताम्रतयोदितस्य पुनस्ताम्रगुणविशिष्टतयास्तत्वकीर्त्तनाय पुनर्निर्देशः। तत्र च कथितपदता न काव्यदोषः तदुक्तं काव्यप्रकाशे

"उद्देश्यप्रतिनिर्देश्यव्यतिरिक्तो विषय एकपदप्रयोगनिषेधस्य, इहतु विषये प्रत्युत तस्यैव पदस्य सर्वनाम्नो वा प्रयोगं विना दोषः। तथा हि "उदेति सविता ताम्रस्ताम्र एवास्तमेति च। सम्पत्तौ च विपत्तौ च महतामेकरूपता"। अत्र रक्त एवास्तमेतीति यदि क्रियते तदा पदान्तरप्रतिपादितः स एवार्थोऽर्थान्तरतयेव प्रतिभासमानः प्रतीतिं स्थगयति"। "तद्वतीति उद्देश्यप्रतिनिर्देश्यत्ववतीत्यर्थः दोष इति आपाततोऽर्थान्तरतावभासरूप इत्यर्थः। अयं भावः "न सोऽस्ति प्रत्ययो लोके यत्र शब्दो न भासते" इति नियमाच्छब्देनोपस्थाप्यमानोऽर्थः शब्दविशिष्ट एव भासते अतः शब्दभेदेनोपादाने तच्छब्दविशिष्टेऽर्थे भासमाने विभिन्नशब्दरूपविशेषणभेदाद्भेदावभास इति। सर्वनाम्नापि पूर्वोपात्तशब्दविशिष्टभासनाच्च भेदावभास इत्याह सर्वनाम्नो वेति" नागेशः।

प्रतिनिवर्त्तन न० प्रति+निर्—वृत—भावे ल्युट्। १अभीष्टवस्तुतः निवृत्तौ णिच्—ल्युट्। २निवारणे

प्रतिन्याय अव्य० प्रति+नि+अय इ—वा घञ्। न्यायो

युक्तिभेदो वा अक्रमे अनतिक्रमे वा अव्ययी० वा । १यथागतं प्रत्यागमने "पुनः प्रतिन्यायं यथा योन्या द्रवति" इ०उ० "प्रतिन्यायम् यथागतम् नि+अयो न्यायः । अयनमायो निगमनं पुनः पूर्वगमनवैपरीत्येन यदागमनं स प्रतिन्यायः यथागतं पुनरागच्छतीत्यर्थः" भाष्यम् । २युक्तिमनतिक्रम्येत्यर्थे च ।

प्रति(ती)प पु० प्रति–पाति+पा–क वा दीर्घः । शान्तनुराज पितरि भा०आ० ९४अ० । कुरुवंश्यः मरुराजा० ।

प्रतिपक्ष पु० प्रतिकूलः पक्षः प्रा०स० । १विरुद्धपक्षे "विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः" गौत०सू० । निर्णयशब्दे ४५९१ पृ० अस्यार्थो दृश्यः । प्रतिकूलः पक्षो यस्य प्रा०ब० । २शत्रौ ३सदृशे च त्रि० । ४व्यवहारे प्रतिवादिनि विपक्षे च ।

प्रतिपक्षित पु० प्रतिपक्षो जातोऽस्य तारका० इतच् । १सत्प्रतिपक्षरूपदोषयुक्ते हेतौ हेत्वाभासभेदे "अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः । कालात्ययोपदिष्टश्च हेत्वाभासाश्च पञ्चधा" भाषा० । "सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः । अत्र तु हेतुरेवेति विशेषः । साध्याभावसाधक एव साध्यसाधकत्वं न सम्भवत इत्यर्थक्रि-विशेषोपस्थापकत्वाच्च विशेषः । सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः । अगृहीताप्रामाण्यकतया साध्यव्याप्यवत्त्वेनोपस्थितिकालीनायाः साध्याभावव्याप्यवत्त्वेनोपस्थितेर्विषयतया द्रष्टव्ये । अत्र च परस्पराभावव्याप्यवत्ताज्ञानात् परस्परानुमितिप्रतिबन्धः फलम् । अत्र केचित् यथा घटाभावव्याप्यवत्ताज्ञाने विद्यमानेऽपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते । यथा च शङ्खेऽपि पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने पित्तादिदोषेण पीतः शङ्ख इति धीर्जायते एवं कोटिद्वयव्याप्यवत्तादर्शने कोटिद्वयप्रत्यक्षरूपः संशयो भवति तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवत्येव तत्र चैककोटिव्याप्यदर्शनं तत्ताधिकबलतया द्वितीयकोटिभानप्रतिबन्धकः संशयः कथमन्येन चाधिकबलवत्वभावः कल्प्यते इति वदन्ति । तत्र तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषस्य शाब्दबोधादेरनुदयात् लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे तस्य प्रतिबन्धकता वाच्यत्वात् । न तूपनीतभानविशेषे शाब्दबोधे च पृथक् प्रतिबन्धकता गौरवात् । तथा च प्रतिबन्धकसत्त्वात् कथमनुमितिः । न हि लौकिकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापि विशेषणीयम् अत्र कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्र प्रामाण्यग्रहानात् संशयो नान्यथाऽगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वादिति" सि०मु० ।

प्रतिपथ पु० प्रतिरूपः पथः प्रा०स० । १तत्स्वरूपे पथे मूल्ये अथ० २।१५।४ ।

प्रतिपत्ति स्त्री प्रति+पद–क्तिन् । १प्रवृत्तौ २प्रागल्भ्ये ३गौरवे ४प्राप्तौ ५पदप्राप्तौ ६कर्त्तव्यताज्ञाने च मेदि० । "विषादलुप्तप्रतिपत्तिविस्मितम्" इति रघुः । मीमांसकमते ७फलशून्यकर्माङ्गभेदे यथा श्राद्धादौ दत्तद्रव्यस्य कुशमयब्राह्मणपक्षे जलादौ निक्षेपः । पूजितप्रतिमादेश्च जलादौ निक्षेपः । ८ज्ञापनमात्रे च कात्या०श्रौ० ।

प्रतिपत्तिपटह पु० वाद्यभेदे (नागरा) हारा० ।

प्रतिपत्तूर्य्य न० डमड्वाद्ये (दगडकाडा) त्रिका० ।

प्रतिपन्नफला स्त्री प्रतिपन्नं फलं यस्याः । क्षुद्रकारवेल्ले (खोटकला) राजनि० ।

प्रतिपद् स्त्री प्रतिपद्यते उपक्रम्यते पक्षोमासो वाऽनया प्रति+पद–करणे क्विप् । पक्षयोः प्रथमायां १तिथौ तिथिशब्दे तत्स्वरूपं २२९१पृ० दर्शितं कर्मभेदे तत्कालव्यवस्था च २२९२ पृ० दर्शिता । २डमड्वाद्ये त्रिका० । भावे सम्प० क्विप् । ३द्वारे ४उपक्रमे शब्दमा० तच्छब्दस्योपक्रमार्थत्वकल्पं यथा

"तत्र प्रतिपच्छब्द उपक्रमे वर्तते । चान्द्रः पक्षो मासो वा प्रतिपद्यते प्रारभ्यते यस्यां तिथौ सा तिथिः प्रतिपत् । प्रारम्भवाचित्वं प्रतिपच्छब्दस्य मन्त्रब्राह्मणानुवाक्यखण्डेषु प्रयोगादवगम्यते तथा च श्रुतिः "आत्मारथं वयोतय इदं वचोऽमृतमस्य इति मरुत्वतीयस्य प्रतिपदनुचराविति" । अयमर्थः मरुत्वतीयं नाम शस्त्र-शस्त्रम् । तस्यात्मारथमित्ययं मन्त्रः प्रतिपत् प्रथमपाठ्यः । इदं वचोऽमृतमस्य इत्ययं मन्त्रोऽनुचरः पश्चात्पाठ्य इति । तथा तैत्तिरीया आश्वमेधब्राह्मणे आमनन्ति "पवस्व वाजसातय इत्यनुष्टुप् प्रतिपद्भवतीति" तथा त एव दर्शपूर्णमासब्राह्मणे पठन्ति "सामिधेनीरनुवक्ष्यन् तान्याहुतीः पुरस्ताज्जुहुयात् मुखत एव प्रतिपदं कुरुतः" इति ।

तत्तिथौ भक्ष्यभेदा यथोक्तं वराहपु०

"देवानामथ यक्षाणां गन्धर्वाणां तथा । आदौ प्रतिपदो येन त्वमुत्पन्नोऽसि भारत" । तस्मात् प्रातिपद

संभविष्यन्ति देवताः। अतस्तं प्रतिपन्नाम शिशिरेषा भविष्यति"। ४बहिष्पवमानस्तोत्रस्य प्रथमस्तुतौ ताण्ड्य०ब्रा० ४।२।१५ यथा "कृणन्ते वाजसातये सोमाः सहस्रपाजस इति सहस्रवती प्रतिपत्कार्य्या"। "प्रतिपद्यते प्रक्रम्यते बहिष्पवमानस्तोत्रे एषा प्रतिपत् वा सहस्रवती सहस्रशब्दोपेता एषा कार्य्या" भा०। वा ङाप् तत्रार्थे

प्रतिपन्न त्रि० प्रति+पद–क्त। १अवगते अमरः २स्वीकृते मेदि० "प्रतिपन्नं हि विचेतनैरपि" कुमारः। ३विक्रान्ते च हेमच० आचिता० अस्य गतिपूर्वकत्वेऽपि नान्तोदात्तता। [राजनि०।

प्रतिपर्णशिफा स्त्री प्रतिपर्णं शिफाऽस्याः। द्रवन्तीवृक्षे

प्रतिपाण पु० प्रति+पण–घञ्। प्रतिरूपदेवने

प्रतिपादक त्रि० प्रति+पद–णिच्–ण्वुल्। बोधके।

प्रतिपादन न० प्रति+पद–णिच्-भावे ल्युट्। १दाने २बोधने ३प्रतिपत्तौ च मेदि०।

प्रतिपाद्य त्रि० प्रति+पद–णिच् कर्मणि यत्। बोधनीये

प्रतिपूजन न० प्रतिरूपं पूजनं प्रा०स०। केनचित् पूजने कृते तदनुरूपे तेन पूजकस्य १पूजने २आभिमुख्येन पूजने च।

प्रतिप्रदान न० प्रति+प्र+दा–भावे ल्युट्। १प्रतिदाने २प्रत्यर्पणे च।

प्रतिप्रसव पु० प्रति+प्र+सू–अप्। १निषिद्धस्य पुनःप्राप्तिसम्पादनायाम्। साकल्येऽव्ययी०। २प्रसवसाकल्ये प्रतिजन्मनीत्यर्थे। [भेदे अच्छावाकशब्दे ८५पृ० दृश्यम्।

प्रतिप्रस्थातृ पु० प्रति+प्र+स्था–तृच्। सोमयागीये ऋत्विग्-

प्रतिप्रस्थान न० प्रतिकूलं प्रस्थानम् प्रा०स०। १विरुद्धपथाश्रयणे प्रतिकूलं प्रस्थानं यस्य प्रा०ब०। २तद्वति त्रि० ३निधात्रे यजु०१८।१९ वेददी०।

प्रतिप्रहार पु० प्रतिरूपः प्रहारः प्रा०स०। १कृतप्रहारानुरूपप्रहारे २प्रतिघातभेदे च।

प्रतिप्रैष पु०प्रतिरूपः प्रैषः प्रा०स०। नियोजितेन नियोक्तारं प्रति पुनःप्रेषणे कात्या० २५।१०।२ कर्कः।

प्रतिफल त्रि० प्रतिफलति प्रति+फल–अच्। १प्रतिबिम्बे येन यत्कर्म कृतं २तस्यानुरूपप्रतीकारे। साकल्ये अव्ययी०। ३फलसाकल्ये अव्य०।

प्रतिफलन न०प्रति+फल–भावे ल्युट्। प्रतिबिम्बने सादृश्ये

प्रतिफुल्लक त्रि० प्रति+फुल्ल-विकासे ण्वुल्। प्रफुल्ले शब्दच०

प्रतिबद्ध त्रि०प्रति+बन्ध–कर्मणि क्त। १प्रतिरुद्धे २साकल्येन सम्बद्धे व्यापके च प्रतिबन्धशब्दे दृश्यम्।

प्रतिबन्ध पु०प्रति+बन्ध–भावे घञ्। १प्रतिरोधे २साकल्येन सम्बन्धे व्याप्तौ च "प्रतिबन्धदृशः प्रतिबद्धज्ञानमनुमानम्" सां०सू० "प्रतिबन्धो व्याप्तिर्व्याप्तिदर्शनाद्व्यापकज्ञानमनुमानम्" प्र०भा०।

प्रतिबन्धक त्रि० प्रतिबध्नाति प्रति+बन्ध+ण्वुल्। १प्रतिरोधके। स्त्रियां टाप् कापि अत इत्त्वम्। "बलवद्दुष्टहेतूत्थमतिः स्यात् प्रतिबन्धिका" भाषा०। २विरुद्धे शब्दच० प्रतिबन्धकत्वञ्च कारणीभूताभावप्रतियोगित्वम् तच्च मण्याद्यभावत्वेन न तु प्रतिबन्धकाभावत्वेनेति नान्योन्याश्रयः। एवं प्रतिबन्धकाभावकूट एव कारणं तेन मन्त्रसद्भावे मण्याद्यभावेऽपि न कार्य्यमिति" अनुमा० चि०अतिरिक्तशक्तिनिरासे। तच्च पञ्चधा भवति यथा तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयत्वेन प्रतिबन्धकत्वम्१। तदभावव्याप्यवत्तानिश्चयत्वेन२ तदभावावच्छेदकतया गृहीतधर्मवत्तानिश्चयत्वेन३। तदसमानाधिकरणधर्मवत्तानिश्चयत्वेन४। तद्व्यापकतावच्छेदकतया गृहीतधर्मावच्छिन्नाभाववत्तानिश्चयत्वेन५ चेति। तत्राद्यं यथा ह्रदो वह्निमानिति बुद्धिं प्रति ह्रदो न वह्निमानिति निश्चयस्य प्रतिबन्धकत्वम्। द्वितीयं ह्रदो वह्न्यभावव्याप्यवानिति निश्चयस्य। तृतीयं जलवान्वह्न्यभाववानिति निश्चयविशिष्टस्य जलवान् ह्रदः इति निश्चयस्य। चतुर्थं वह्न्यसमानाधिकरणजलवान् ह्रद इति निश्चयस्य। पञ्चमं ह्रदो धूमवानिति बुद्धिं प्रति धूमव्यापकतावच्छेदकतया गृहीतं यद्वह्नित्वं तादृशवह्नित्वावच्छिन्नाभाववान् ह्रद इति निश्चयस्येति। कार्य्यमात्रं प्रति तु कामिनीजिज्ञासायाः स्वातन्त्र्येण प्रतिबन्धकत्वम्। क्वचित् मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वम् यथा दाहं प्रति मणेः प्रतिबन्धकत्वम् इति।

प्रतिबन्धि(न्धी) प्रति+बन्ध–इन् वा ङीप्। प्रकृतैकपक्षे प्रदत्तं पुरुषबुद्ध्या प्रकृतकल्पान्तरापादने प्रतिवादिमतेऽनिष्टान्तरप्रसञ्जकवाक्ये तत्रार्थे प्रतिबन्धीशब्दोऽपि तन्मूलं मृग्यम्। [मादौ भा० उ० १२०अ०।

प्रतिबन्धु पु० प्रतिरूपो बन्धुः प्रा०स०। बन्धुतुल्ये दौहि-

प्रतिबल पु०प्रतिकूलं बलं यस्य। १शत्रौ "प्रतिबलजलधेरिति" वेणी०। प्रतिरूपं बलं यस्य। २तुल्यबले त्रि० "यो मे प्रतिबलो लोके" इति चण्डी। प्रतिगतं बलम् प्रा०स०। २सामर्थ्ये न० त्रिका०।

प्रतिबाहु पु० प्रतिगतो बाहुम् अत्या०स०। बाहोरग्रे ह०वं०

५।८।२५ श्वफल्कस्य २पुत्रभेदे अक्रूरभ्रातरि भाग० ६।२४।१८

प्रतिबुद्ध त्रि० प्रति+बुध–कर्त्तरि क्त । १जागरिते । कर्मणि क्त । २ज्ञाते च ।

प्रतिबोध पु० प्रति+बुध–भावे घञ् । १जागरणे २ज्ञाने च कर्त्तरि अच् । ३जागरिते ४ज्ञायिनि च त्रि० । तस्यापत्यम् विदा० अञ् । प्रातिबोध तदपत्ये यूनि तु हरिता० फक् । प्रातिबोधायन तद्गोत्रे यून्यपत्ये पुंस्त्री० ।

प्रतिबोधिन् त्रि० प्रति+बुध–भविष्यति गम्या० णिनि । भाविप्रतिबोधयुते गम्यादि० द्वितीयात०। ग्रामप्रतिबोधी

प्रतिभट पु० प्रतिकूलो भटः प्रा० स०। प्रतियोधे येन सह युध्यते तस्मिन् ।

प्रतिभय त्रि० प्रतिगतं भयमस्मात् निरा० स०। १भयहेतौ भयङ्करे अमरः । प्रतिगतं भयम् प्रा० स० । २भये न० ।

प्रतिभा स्त्री प्रति+भा–भावे अङ् । १बुद्धौ २प्रत्युत्पन्नबुद्धौ च हेम० "प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता" रुद्रः ३दीप्तौ च । [पदार्थे ४प्रदीप्तियुते च ।

प्रतिभात त्रि० प्रति+भा–कर्त्तरि क्त । १ज्ञानेभासमाने

प्रतिभान्वित त्रि० ३त० । प्रतिभायुक्ते प्रगल्भे अमरः ।

प्रतिभामुख त्रि० प्रतिभान्वितं मुखं मुखव्यापारोऽस्य । प्रतिभान्विते हेमच० । [अच् । २प्रकाशमाने च ।

प्रतिभास पु० प्रति+भास–भावे घञ् । १प्रकाशे कर्त्तरि

प्रतिभू पु० प्रतिरूपो भवति प्रति+भू–क्विप् । (जामिन) ख्याते पदार्थे स्त्री । दर्शनप्रतिभूशब्दे ३४७५ पृष्ठादौ दृश्यम् । [२भेदने च ।

प्रतिभेदन न० प्रति+भिद्–भावे ल्युट् । १नेत्रादेरुत्पाटने

प्रतिमण्डल त्रि० प्रतिरूपं मण्डलं प्रा० स० । सूर्य्यादिमण्डलस्य १परिधौ परिवेषे हरिवं० २०६ अ० । अव्ययी० । २प्रत्येकमण्डले अव्य० ।

प्रतिमल्ल पु० प्रतिकूलो मल्लः प्रा० त०। प्रतियोधे

प्रतिमा स्त्री प्रति+मा–भावे अङ् । १सादृश्ये । करणे अङ् । २मृदादिनिर्मितदेवतादिमूर्त्तौ तन्मानादि देवता० प्रतिमाशब्दे २६८५ पृष्ठादौ दृश्यम् । ३सदृशतौ ४गजदन्तबन्धे हेमच० उत्तरपदस्थः । ५सदृशार्थे त्रि० हेमच० । यथा देवप्रतिमः ।

प्रतिमान न० प्रतिमीयतेऽनेन प्रति+मि-मा-वा ल्युट् । १प्रतिबिम्बे २प्रतिमायां ३गजकुम्भस्याधोभागे ४तद्दन्तयोर्मध्यस्थाने च अमरः ।

प्रतिमार्गक पु० सौभपुरे शाल्वराजपुरे त्रिका० ।

प्रतिमित्र पु० १नृपभेदे भा० द्रो० १०२ अ०। अव्ययी० । २प्रत्येकमित्रे अव्य० । [अमरः ।

प्रतिमुक्त त्रि० प्रति+मुच–क्त । १परिहिते २परित्यक्ते च

प्रतिमुख न० सा० द० उक्ते नाटकाङ्गसन्धिभेदे यथा "यथासङ्ख्यमवस्थाभिरभियोगात्तु पञ्चभिः । पञ्चधैवेतिवृत्तस्य भागाः स्युः पञ्च सन्धयः" इत्युपक्रमे तल्लक्षणमाह "अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति" । एकेन प्रयोजनेनान्वितानां कथाङ्गानामवान्तरैकप्रयोजनसम्बन्धः सन्धिः । तद्भेदानाह "मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः । इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते"। तत्र प्रतिमुखाङ्गलक्षणं भेदोदाहरणादि यथा "विलासः परिसर्पश्च विधूतं तापनं तथा । नर्म नर्मद्युतिश्चैव तथा प्रगमनं पुनः । विरोधश्च प्रतिमुखे तथा स्यात् पर्युपासनम् । पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि" । तत्र "समीहा रतिभोगार्था विलास इति कथ्यते" । रतिलक्षणस्य भावस्य यो हेतुभूतो भोगोऽस्य विषयः प्रमदा पुरुषो वा तदर्था समीहा विलासः यथा शाकुन्तले "कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि । अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते" । "दृष्टनष्टानुसरणं परिसर्पश्च कथ्यते" यथा शाकुन्तले राजा । भवितव्यमत्र तया । तथा हि "अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात् । द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा" । "कृतस्यानुनयस्यादौ विधूतं त्वपरिग्रहः" यथा तत्रैव "अलं वो अन्तेउरविरहपज्जुस्सुएण राएसिणा उवरुद्धेण"। केचित्तु "विधूतं स्यादरतिरिति" वदन्ति । उपायादर्शनं यत्तु तापनं नाम तद्भवेत् यथा रत्नावल्यां सागरिका "दुल्लहजणाणुराओ लज्जा गुरुई परवसो अप्पा । पियसहि ! विसमं पेम्मं मरणं सरणं णवरि एक्कं" । "परिहासवचो नर्म—यथा रत्नवल्याम् सुसङ्गता । "सहि जस्स किदे तुमं आअदा सो अयं दे पुरदो चिट्ठदि । सागरिका साभ्यसूयम्। कस्स किदे अहं आअदा । सुसं । अइ अण्णसङ्किदे णं चित्तफलअस्स" । —धृतिस्तु परिहासजा" । "नर्मद्युतिः—यथा तत्रैव । सुसङ्गता "सहि अदक्खिणा दाणिं सि तुमं जा एवं भट्टिणा हत्थावलम्बिदावि कोवं ण मुञ्चसि" । साग । सभ्रूभङ्गमीषद्विहस्य "सुसङ्गदे दाणिं सि कीदिसुं ण विरमसि"। केचित्तु "दोषस्याच्छादनं हास्यं नर्मद्युतिरिति" वदन्ति ।—प्रग-

मनं वाक्यं स्यादुत्तरोत्तरम्”। यथा विक्रमोर्वश्याम् उर्वशी “जअदु जअदु महाराओ। राजा। मया नाम जितं यस्य त्वया जय उदीर्यते इत्यादि”। “विरोधो व्यसनप्राप्तिः—यथा चण्डकौशिके राजा “नूनमसमीक्ष्यकारिणा मयान्धेनेव स्फुरच्छिखाकलापो ज्वलनः पद्भ्यां समाक्रान्तः”—कृतस्यानुनयः पुनः” “स्यात्पर्युपासनं—रत्नावल्याम् विदू “भो मा कुप्प एसा हि कदलीघरन्तरं गदेत्यादि” —पुष्पं विशेषवचनं मतम्”। यथा तत्रैव राजा “हस्ते गृहीत्वा सर्वं नाटयति” विदू “भो वअस्स एसा अवरेव्व सिरी तए आसादिदा” राजा। वयस्य सत्यम् “श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः। कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रवः”। “प्रत्यक्षनिष्ठुरं वज्रं—यथा तत्रैव राजा “कथमिह कोऽहं त्वया ज्ञातः” सुसं। न केवलं तुमं चित्तफलअस्स ता जाव गदुअ देवीए णिवेदइस्सं। —उपन्यासः प्रसादनम्”। यथा तत्रैव सुसं। भट्टा अलं सङ्काए मएवि भट्टिणीए पसादेण कीलिदं ज्जेव एदिणा ता किं कण्णाभरणेण। अदोवि मे गरुअरो पसादो एसो जं तए अहं एत्थ आलिहिदात्ति कुविदा मे पिअसही सागरिका एसा ज्जेव पसादी दुअ”। केचित्तु “उपपत्तिकृतो योऽर्थ उपन्यासः स कीर्त्तितः” इति वदन्ति उदाहरन्ति च। तत्रैव “अदिसुहरा कक्खु सा गब्भदासीति। “चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते” यथा वीरचरिते तृतीयेऽङ्के “परिषदियमृषीणामेष वीरो युधाजित् सममृषिभिरमात्यैर्लोमपादश्च वृद्धः। अयमविरतयज्ञो ब्रह्मवादी पुराणः प्रभुरपि जनकानामद्रुहो याजकास्ते”। [प्रतिमायाम्।

प्रतिमूर्त्ति स्त्री प्रतिरूपा मूर्त्तिः प्रा॰स॰। देवादिमूर्त्तिसदृशि-

प्रतियत्न पु॰ प्रति+यत–नङ्। १वाञ्छायाम् २उपग्रहे ३निग्रहादौ ४वन्द्याम् अमरटीकायां भरतमुकुटादयः। सतो गुणान्तराधानरूपे ५संस्कारे मेदि॰ ६ग्रहणे ७प्रतिग्रहे च त्रिका॰। प्रतिरूपो यत्नो यस्य प्राब॰। ८प्रतियत्नयुक्ते त्रि॰। ९रचनायां जटाधरः।

प्रतियातना स्त्री प्रति+यात्यतेऽनया चु॰ यत–युच्। १प्रतिमायाम् मा॰स॰। २तुल्यरूपयातनायाम् अमरः।

प्रतियायिन् त्रि॰ प्रति+या–भविष्यति गम्या॰णिनि। भावियानयुते भा॰उ॰ ५७७१श्लो॰। [म्बन्धे च।

प्रतियोग पु॰ प्रति+युज–भावे घञ्। १विरोधे २विरुद्धस-

प्रतियोगिन् त्रि॰ प्रतिरूपं युज्यते प्रति+युज–घिनुण्। १प्रतिकूलसम्बन्धिनि। यथा अभावस्य प्रतिकूलसम्बन्धित्वात् घटादिस्तस्य प्रतियोगी। २विरुद्धपक्षे “विशिष्टबुद्धिनियामकसंसर्गस्य ३सम्बन्धिभेदे यथा संयोगेन घटवद्भूतलमित्यादौ संयोगस्य घटः प्रतियोगी भूतलमनुयोगि। चन्द्रवन्मुखमित्यादौ सादृश्यस्य चन्द्रः प्रतियोगी मुखमनुयोगि। तत्र विशिष्टबुद्धौ प्रकारतया भासमानं संसर्गस्य प्रतियोगि विशेष्यतया भासमानं संसर्गस्यानुयोगीति भेदः। तस्य भावः त्व प्रतियोगित्व न॰ तल् प्रतियोगिता स्त्री तद्भावे। सा च “अभावविरहात्मत्वं वस्तुनः प्रतियोगिता” इत्याचार्योक्ता। स्वरूपसम्बन्धविशेषरूपा दीधितिकारः। यथा घटो नास्तीत्यादौ घटेऽभावप्रतियोगिता। यथा वा घटवद्भूतलमित्यादौ घटे भूतलानुयोगिकसंयोगसम्बन्धप्रतियोगिता। अखण्डोपाधिर्धर्मविशेष इति सम्प्रदायः। विशिष्टवैद्यत्वमित्यन्ये यथा चन्द्रवन्मुखमित्यादौ चन्द्रस्य सादृश्यप्रतियोगित्वम्। अन्वयित्वमित्यपरे। यथा चैत्रस्य पुत्र इत्यादौ षष्ठ्यर्थस्य चैत्रे प्रतियोगित्वम्। घटाभावादिबुद्धेर्विशिष्टवैशिष्ट्यावगाहिबुद्धितया अभावबुद्धिः विशेषणविशेषणसंसर्गावगाहिनी विशिष्टबुद्धित्वात् संयोगेन घटवद्भूतलमित्यादिबुद्धिवत् इत्यनुमानेन अभावे घटादिविशिष्टबुद्धौ सम्बन्धतया अतिरिक्तप्रतियोगितासिद्धिरिति नव्यनैयायिकाः। श्रीहर्ष खण्डनादौ तस्य स्वरूपसम्बन्धविशेषरूपत्वेन प्रतियोगिस्वरूपत्वमनुयोगिस्वरूपत्वं वा स्वीकार्य्यं तेनैवोपपत्तौ नातिरिक्तपदार्थकल्पनेति स्थितम् विस्तरभयान्नोक्तम्।

प्रतियोगितावच्छेदक त्रि॰ ६त॰। येन रूपेण यस्याभावादौ प्रतियोगिता १तादृशे धर्मे यथा घटाभावे घटस्य घटत्वरूपेण प्रतियोगिता अतस्तत्र घटत्वं प्रतियोगितावच्छेदकं तच्च क्वचित् एकं क्वचिदनेकं तत्र वह्निर्नास्तीत्यत्र वह्नित्वमेकं महानसीयवह्निर्नास्तीत्यादौ महानसीयत्वं वह्नित्वञ्चेत्यादिकमनेकमित्याकरे दृश्यम्। येन सम्बन्धेन प्रतियोगितायाः अभावांशे भानं २तादृशसम्बन्धे च यथा संयोगेन घटो नास्तीत्यादौ संयोगेन घटस्याभावांशे प्रतियोगिताभानं तत्र संयोगसम्बन्धः प्रतियोगितावच्छेदकसम्बन्ध एवमन्यत्राप्यूह्यम्।

प्रतिर जठरे चिरकालावस्थाने ऋ॰ ८।४८।१०।

प्रतिरथ पु॰ प्रतिकूलो रथो यस्य प्रा॰ब॰। १प्रतियोधे अनाधृष्यवंश्ये तंसुभ्रातरि नृपभेदे हरिवं॰३२अ॰। यदु-

वंश्ये २वज्रनाभपुत्रे हरिवं० १६२अ०। अव्ययी०। ३प्रत्येकरणे अव्य०।

प्रतिरम्भ पु० प्रतिबन्ध+लभ्य रः। प्रतिबन्धे हिन्दुकोषः।

प्रतिरव पु०प्रतिरवन्ति प्रति+रु-कर्त्तरि अच्। १प्राणेषु यजु० १८।१५ "प्राणा वै प्रतिरवाः" शत०ब्रा० १४ २ २ २४ भावे अप् प्रतिकूलो रवः प्रा०स०। २प्रतिकूलशब्दे मदीयं धनं न मोक्तव्यमनेन मदीयं धनं बलाद्भुज्यते इत्यादि लोकेषु उद्घोषणं प्रतिरवः।

प्रतिरूप न०प्रतिकृतं रूपम् प्रा०स०। १तत्स्वरूपे प्रतिमायाम् त्रिका०। २दानवभेदे पु० भा०आ०२८७अ०। ३मेरुपार्श्वस्थे शैलभेदे स्त्री भाग० ५।२।२२ प्रतिकृतं रूपं येन प्रा०ब०। ४तत्स्वरूपयुते त्रि० "रूपं रूपं प्रतिरूपो बभूव" श्रुतिः [प्रतिबिम्बे जटा०।

प्रतिरूपक न० प्रतिकृतं रूपं बिम्बस्य येन प्रा०ब० कप्।

प्रतिरोध पु० प्रति+रुध-भावे घञ्। १निरोधे। स्वार्थे क। २प्रतिबन्धे ३तिरस्कारे भरतः। कर्त्तरि अच्। ४प्रकृत साध्यानुमितिनिरोधके सत्प्रतिपक्षदोषदुष्टे हेतौ "पक्ष-साध्यसाधनाप्रसिद्धिस्वरूपासिद्धिबाधप्रतिरोधानां निरासः" दीधिति०। भावे घञ्। ५हठचौर्य्ये।

प्रतिरोधक पु०प्रति+रुध-ण्वुल्। १प्रतिबन्धके (डाकायित) २हठचौरे हेमच०। तस्य रोधनेन स्तेयकर्तृत्वात् तथात्वम्।

प्रतिरोधिन् त्रि० प्रति+रुध-णिनि। १प्रतिबन्धके २प्रतिरुध्य हठहारिणि चौरे अमरः। [लम्भ" नैष०।

प्रतिलम्भ पु० प्रति+लभ-घञ् मुम्। लाभे "कथमदः प्रति-

प्रतिलोम त्रि० प्रतिगतं लोम आनुकूल्यमस्मात् प्रा०ब० अच् समा०। वामे विपरीते हेमच०।

प्रतिलोमज पुंस्त्री० प्रतिलोमात् जातः जन-ड। उत्तमवर्णस्त्रियाम् अधमवर्णात् जाते सङ्कीर्णवर्णे ते च मनुनोक्ता १०।२५ षट्। तथा याज्ञ० "ब्राह्मण्यां क्षत्रियात् सूतो१ वैश्याद्वैदेहक२स्तथा। शूद्राज्जातस्तु चण्डालः३ सर्वधर्मबहिष्कृतः। क्षत्रिया मागधं४ वैश्याच्छूद्रात् क्षत्तार५मेव च। शूद्रादायोगवं६ वैश्या जनयामास वै सुतम्"। विष्णुना नामान्तरं हस्तिपेनोक्ता यथा "तत्र वैश्यापुत्रः शूद्रेणायोगवः१। पुक्कसमागधौ२।३ क्षत्रियापुत्रौ वैश्यशूद्राभ्याम्। चाण्डालवैदेहकसूताश्च ४।५।६ ब्राह्मणीपुत्राः शूद्रविट्क्षत्रियैः सङ्करसङ्करास्त्वसंख्येयाः। रङ्गावतरणमायोगवानाम्। व्याधता पुक्कसानाम्। स्तुतिक्रिया मागधानाम्। वध्यघातित्वं चाण्डालानाम्। स्त्रीरक्षा तज्जीवनञ्च वैदेहकानाम् अश्वसारथ्यं सूतानाम्। चाण्डालानां बहिर्ग्रामनिवसनं मृतचेलधारणमिति विशेषः"। कर्त्तरि क्त। प्रतिलोमजातोऽप्यत्र।

प्रतिवचन न०प्रतिरूपं वचनम् प्रा०स०। १प्रतिवाक्ये २उत्तरे ३विरुद्धवाक्ये च त्रिका०। प्रतिकथादयोऽप्यत्र स्त्री।

प्रतिवसथ पु० प्रति+वस-आधारे अथ। ग्रामे संवसथे हेमच०।

प्रतिवस्तु न० प्रतिरूपम् वस्तु प्रा०स०। तत्स्वरूपे वस्तुनि।

प्रतिवस्तूपमा स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ४००पृ०दृश्यम्

प्रतिवात त्रि० प्रतिगतो वातो यतः प्रा०ब०। यस्मात् प्रदेशात् वायुः आगच्छति तस्मिन् देशे "प्रतिवातेऽनुवाते च" मनुः। अव्ययी०। २वाताभिमुखे अव्य०।

प्रतिवाद पु० प्रति+वद-भावे घञ्। वादिप्रयुक्तन्यायविरुद्धन्यायवाक्यप्रयोगे प्रतिवादिन्शब्दे दृश्यम्।

प्रतिवादिन् त्रि० प्रतिकूलं वदति वद-णिनि। १वादिप्रयुक्तन्यायवाक्यविरुद्धवाक्यवादिनि यथा पर्वतो वह्निमान् धूमादित्यादौ साध्यविषये वादिना प्रयुक्ते येन पर्वतो न वह्निमान् पाषाणमयत्वात् इत्यादि वाक्यं प्रयुज्यते तस्मिन्। व्यवहारे २प्रत्यर्थिनि (आसामी) "कारणे प्रतिवादिनि" याज्ञ०।

प्रतिवारण त्रि० प्रति+वारि-कर्त्तरि ल्यु। १निवारके २दैत्यभेदे पु०भाग०५।१८।२८ भावे ल्युट्। ३निवारणे न

प्रतिवार्त्ता स्त्री प्रा०स०। प्रत्युत्तरस्थानीये वृत्तान्तभेदे

प्रतिवासिन् त्रि० प्रत्यासन्नं वसति प्रति+वस-णिनि। (पड़सि) गृहासन्नवासिनि स्त्रियां ङीप्।

प्रतिवाह पु० श्वफल्कपुत्रभेदे अक्रूरानुजे हरिवं० ३२अ०।

प्रतिविधान न०प्रति+वि+धा-ल्युट्। १प्रतीकारे २प्रकृतस्योपपादनाद्यर्थमुपायावलम्बने च। [६१अ०।

प्रतिविन्ध्य पु० १युधिष्ठिरस्य पुत्रे २क्षत्रियभेदे च भा०आ०

प्रतिबिम्ब प्रति+आचारे क्विप् नामधातुः पर०सक० सेट्। प्रतिबिम्बति अप्रतिबिम्बीत्। प्रत्यबिम्बीत् इत्यपरे।

प्रतिबिम्ब पु०न०बी+गतौ उणा०नि०दन् नुट् च बिम्बं प्रतिरूपं बिम्बम् प्रा०स०। बिम्बानुरूपे प्रतिच्छायायुक्ते पदार्थे। तस्य बिम्बात् भेदोऽभेदो वेति संशये विवरणप्रमेयसंग्रहे निरणायि यथा

"ननु जीवस्याहङ्कारस्थप्रतिबिम्बत्वे बिम्बाद्भेदः स्यात् दर्पणगतमुखप्रतिबिम्बवत् तत्र हि ग्रीवास्थदर्पणस्थयो

मुखयोरन्योन्याभिमुखत्वेन भेदोऽनुभूयते, नैवं मदीयमिदं मुखमित्यैक्यप्रत्यभिज्ञया भेदानुभवस्य बाधात्। न च प्रत्यभिज्ञैवेतरेण बाध्येति वाच्यं सति भेदे प्रतिबिम्बासम्भवात् किं प्रतिबिम्बोनाम मुखलाञ्छितमुद्रा? उत दर्पणावयवा एव बिम्बस्य सन्निधिवशात्तथा परिणमन्ते? नाद्यः दर्पणस्य मुखस्य चेतरस्मादल्पत्वात् यत्र तु प्रौढदर्पणे प्रौढं मुखमुपलभ्यते तत्रापि तस्य न मुद्रात्वम् दर्पणमुखयोः संयोगाभावात्। न द्वितीयः निमित्तकारणस्य बिम्बस्यापायेऽपि तस्यावस्थानप्रसङ्गात् न हि तथाऽवतिष्ठते। तेनैव पुरुषेण दर्पणे तिर्यङ्निरीक्षिते पुरुषान्तरेण सम्यगवलोकिते वा तन्मुखानुपलम्भात्। न चैवं मन्तव्यं क्वचिन्निमित्तापाये कार्य्यमप्यपैति हस्तसंयोगजन्यस्य कटप्रसारणस्य हस्तसंयोगापायेऽपायदर्शनात्। न तत्र निमित्तापायात् कार्य्यापायः चिरकालसंवेष्टनाहितेन संस्कारेण संवेष्टनलक्षणविरुद्धकार्य्योत्पादात् अन्यथा चिरकालप्रसारणेन संवेष्टनसंस्कारे विनाशितेऽपि हस्तापाये प्रसारणमपेयात् न चैवमपैति। इह तु चिरकालबिम्बसन्निधानेऽप्युत्पन्ने बिम्बापाये प्रतिबिम्बोऽपि गच्छत्येवेति न बिम्बः परिणामस्य निमित्तम्। अथ मन्यसे चिरकालस्थितोऽपि कमलविकासः सवितृकिरणस्य निमित्तस्यापायेऽप्यपगच्छतीति। तन्न तत्रापि प्रार्थमिकमुकुलत्वहेतुभिः पार्थिवैरात्यैश्च कमलावयवैः पुनरपि रात्रौ मुकुलत्वे विरुद्धकार्य्ये जनिते विकासापायात् अन्यथा तादृशावयवरहिते म्लाने कमलेऽपि रात्रौ विकासोऽपगच्छेत्। आदर्शे तु मुखाकारपरिणते पुनः केन हेतुना समतलाकारपरिणामः स्यात् तदवयवानां कारुकर्मव्यतिरेकेणाकिञ्चित्करत्वात्। अतएव बिम्बसन्निधिमात्रेण नादर्शावयवा मुखाकारेण परिणमेरन् अन्यथा दर्पणद्रव्ये प्रतिमामुखे कर्त्तव्ये सति लौकिका बिम्बमेव सन्निधापयेयुः न तु कांस्यकारमपेक्षेरन्। दर्पणद्रव्यस्यान्याकारपरिणामे कारुकर्मापेक्षायामपि प्रतिबिम्बपरिणामे पुनःस्वरूपपरिणामे वा न तदपेक्षेति चेत् एवमपि न मुखप्रतिबिम्बाकारपरिणामो युक्तिसहः चक्षुर्नासिकादिनिम्नोन्नतभागस्य स्पर्शेनानुपलम्भात् समतलमेव हि पाणिना स्पृश्यते। समतलेन व्यवहितं मुखमिति चेत् तर्हि चाक्षुषमपि न स्यात्। तत एतत् सिद्धं विमतः आदर्शोमुखव्यतिरिक्तन्तरङ्गाङ्कितस्वजन्मकारणशून्यत्वात् यथा विषाणजन्मकारणशून्यं विषाणरहितं शशमस्तकमिति। ननु तर्हि शुक्तिरजतवन्मिथ्यात्वापत्तेर्न बिम्बैकत्वसिद्धिः प्रत्यभिज्ञा तु व्यभिचारिणी मिथ्यारजतेऽपि मदीयमिदं रजतमिति तद्दर्शनादिति चेत् विषमो दृष्टान्तः नेदं रजतमिति हि तत्र रजतस्वरूपबाधया रजताभिज्ञाया भ्रमत्वे तत्प्रत्यभिज्ञाया अपि भ्रमत्वमुचितम् अत्र न तथा नेदं मुखमिति स्वरूपबाधः किन्तु नात्र मुखमिति देशसम्बन्धमात्रबाधे सति उत्पन्ना मदीयमेव मुखमिति प्रत्यभिज्ञा कथं भ्रमः स्यात्। न च मुखावयवानामचाक्षुषत्वात् कथं प्रत्यभिज्ञानमिति वाच्यं नासाग्रादिकतिपयावयवदर्शनादपि घटादिवदवयविनश्चाक्षुषत्वोपपत्तेः। यः पुनर्दर्पणापगमे प्रतिबिम्बापगमः नासौ स्वरूपबाधः दर्पणेऽपि तत्प्रसङ्गात्, ननु तत्त्वमसिवाक्येन जीवरूपः प्रतिबिम्बो बाध्यते यथा स्थाणुरसौ न पुरुष इति बाधायां सामानाधिकरण्यदर्शनात् संसार्य्यविनाशे च मोक्षानुपपत्तेः सोऽयं देवदत्त इति वदैक्यपरत्वेनापि सामानाधिकरण्यसम्भवात् विरुद्धांशबाधमात्रेण मोक्षोपपत्तेः तत्त्वतस्य जीवस्य बाधे मोक्षस्यापुरुषार्थत्वात्। यस्तु मन्यते प्रतिबिम्ब एव नास्ति दर्पणप्रतिफलिता नेत्ररश्मयः परावृत्य बिम्बमेव दर्पणादविविक्तं गृह्णन्तीति स्पष्टं प्रत्यङ्मुखत्वाद्यनुभवेनासौ निराकरणीयः। कथं तर्हि मूर्त्तद्रव्यस्य मुखस्यैकस्य भिन्नदेशद्वये युगपत् कात्स्न्र्येन वृत्तिः, दर्पणदेशवृत्तेर्मायाकृतत्वादिति ब्रूमः। न हि मायायामसम्भावनीयं नाम स्वशिरश्छेदादिकमपि स्वप्ने माया दर्शयति। नन्वेवमपि जलमध्येऽधोमुखस्य वृक्षप्रतिबिम्बस्य तीरस्थवृक्षेणैक्ये सति तीरस्थवृक्षोऽधिष्ठानं तत्र च मायया जलगतत्वमधोमुखत्वञ्चाध्यस्तमिति वक्तव्यं न चात्राध्यासहेतुरस्ति अधिष्ठानस्य साकल्येन प्रतीतेः तत्कथमसावध्यासः, उच्यते किमत्र तत्त्वावरणाभावादध्यासाभावः? किं वा दोषाभावात्? उतोपादानाभावात्? आहो स्विदध्यासविरोधिनोऽधिष्ठानतत्त्वज्ञानस्य सद्भावात्? नाद्यः चैतन्यावरणस्यैवाध्यासोपादानतया जड़पृथगावरणानुपयोगात्। एतेन तृतीयोऽपि निरस्तः। न द्वितीयः सोपाधिकभ्रमेषूपाधेरेव दोषत्वात्। न चतुर्थः निरुपाधिकभ्रमस्यैवाधिष्ठानतत्त्वज्ञानविरोधित्वात्। तर्हि सोपाधिकभ्रमस्य कर्त्तृत्वादेः नात्मतत्त्वज्ञानान्निवृत्तिः किन्तु अहङ्कारोपाध्यपगमादिति चेत् बाढं पारमार्थिकदर्पणाद्युपाधेस्तत्कृतभ्रमस्य च ज्ञानादनिवृत्तावप्यज्ञान-

श्योपाधेरहङ्कारस्य निरुपाधिकभ्रमरूपस्यात्मतत्त्वज्ञानादिवृत्तौ कर्तृत्वादेर्हानाच्छिद्रसिद्धिर्यात् सिध्यति। ननु कथं तत्त्वज्ञानं जीवोऽनात्मतादात्म्यं जानाति न विरुद्धात्मतामात्मनोऽवगन्तुमलं प्रतिबिम्बत्वात् दर्पणगतप्रतिबिम्बवदिति चेत् न अचेतनत्वस्योपाधित्वात्। यस्तु लोकायतः शरीरस्यैव चैतन्यं मन्यते तं प्रति दर्पणगतजाड्येन प्रतिदत्तत्वात् प्रतिबिम्बस्याचेतनत्वं सुसम्पादं चेतनत्वे तु बिम्बचेष्टया विनापि स्वयं चेष्टेत जीवस्य तु प्रतिबिम्बत्वेऽपि नोपाधिजाड्येन प्रतिबन्ध इत्यनुभवसिद्धं, यद्यपि लोके बिम्बभूतस्यैव देवदत्तस्य भ्रमनिवर्त्तकतत्त्वज्ञानाश्रयत्वम् दृष्टम्। तथापि न तत्र बिम्बत्वं प्रयोजकं किन्तु भ्रमाश्रयत्वं जीवश्च भ्रमाश्रयः अविद्यायाश्चिन्मात्राश्रयत्वेऽपि जीवपक्षपातित्वेन भ्रमोत्पादनात्। ननु ब्रह्म स्वस्य जीवैक्यं न जानाति चेत् असर्वज्ञं स्यात् जानाति चेत् जीवगतभ्रमं स्वगतत्वेन पश्येदिति चेत् न स्वमुखतत्प्रतिबिम्बयोरैक्यं जानतापि देवदत्तेन स्वमुखे प्रतिबिम्बगतास्वत्वमलिनत्वाद्यदर्शनात्। न च जीवस्य प्रतिबिम्बत्वे मानाभावः श्रुतिस्मृतिसूत्रभ्यस्तत्सिद्धेः "रूपं रूपं प्रतिरूपो बभूवेति" श्रुतिः "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" इति स्मृतिः। "अतएव चोपमा जलसूर्यकादिवदिति"सूत्रम्। न चामूर्त्तस्य ब्रह्मणः प्रतिबिम्बासम्भवः अमूर्त्तस्याप्याकाशस्य साभ्रनक्षत्रचन्द्रादिविशिष्टस्य जले प्रतिबिम्बभावदर्शनात्। जलान्तराकाश एवाभ्रादिप्रतिबिम्बाधार इति चेत् न जानुमात्रेऽपि जले दूरविशालाकाशदर्शनात्। जीवो घटाकाशवदुपाध्यवच्छिन्नो न प्रतिबिम्ब इति चेत् न तथा सति जीवोपाधिमध्ये ब्रह्मणोऽपि सत्त्वे चैतन्यं तत्र द्विगुणं स्यात् न चैवमाकाशस्य घटे द्वैगुण्यं दृष्टं ब्रह्मणस्तत्रासत्त्वे च सर्वगतत्वनियन्तृत्वादिहानिः। उभयावगतविभूताकारस्यैव सर्वगतत्वनियन्तृत्वादि न ब्रह्मण इति चेत् न "य आत्मानमन्तरो यमतीति" श्रुतौ प्रकरणलभ्यस्य ब्रह्मण एव जीवमध्ये नियन्तृत्वेनावस्थानश्रवणात्। अतः शास्त्रे सर्वत्र घटाकाशदृष्टान्तोऽसङ्गत्वसाधको न जीवत्वसाधकः। प्रतिबिम्बपक्षे तु द्विगुणीकृत्य वृत्तिर्न दोषाय जलमध्ये स्वाभाविकाकाशस्याभावाच्च प्रतिबिम्बताकाशाकाशयोश्च दृष्टेः। तस्मादहङ्कारोपाधिकतो ब्रह्मप्रतिबिम्बो जीवः"

प्रतिबिम्बन न० प्रतिबिम्ब+नामधातुः भावे ल्युट्। अनुकरणे "दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्" सा०द०

प्रतिबिम्बवाद पु० ६ त०। जीवस्य ईश्वरप्रतिबिम्बतास्थापनार्थे वादे। द्विधा हि वेदान्तिमते जीवेश्वरयोर्विभागकल्पना प्रतिबिम्बभावेन तत्तदवच्छिन्नभावेन च। तत्राद्यः पक्षः विवरणानुसारिभिर्मन्यते द्वितीयः पक्षोऽन्यैर्मन्यते तदेतत् सिद्धान्तलेशे प्रदर्शितं यथा

विवरणानुसारिणस्त्वाहुः। "विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणोभेदमसन्तं कः करिष्यतीति" स्मृत्या एकस्यैवाज्ञानस्य जीवेश्वरविभागोपाधित्वप्रतिपादनाद्बिम्बप्रतिबिम्बभावेन जीवेश्वरयोर्विभागः। नोभयोरपि प्रतिबिम्बभावेन उपाधिद्वयमन्तरेणोभयोः प्रतिबिम्बत्वायोगात्। तत्रापि प्रतिबिम्बो जीवः बिम्बस्थानीय ईश्वरः। तथा सत्येव लौकिकबिम्बप्रतिबिम्बदृष्टान्तेन स्वातन्त्र्यमीश्वरस्य तत्पारतन्त्र्यं जीवस्य च युज्यते। "प्रतिबिम्बगताः पश्यन् ऋजुवक्रादिविक्रियाः। पुमान् क्रीडेत् यथा ब्रह्म तथा जीवस्थविक्रियाः" इति कल्पतरूक्त्या "लोकवत्तु लीलाकैवल्यमिति" सूत्रमपि संगच्छते। अज्ञानप्रतिबिम्बे तस्य जीवस्यान्तःकरणरूपोऽज्ञानपरिणामभेदोविशेषाभिव्यक्तिस्थानम् सर्वतः प्रसृतस्य सवितृप्रकाशस्य दर्पण इव। अतस्तस्य तदुपाधिकत्वव्यवहारोऽपि न तावताऽज्ञानोपाधिपरित्यागः। अन्तःकरणोपाधिपरिच्छिन्नस्यैव चैतन्यस्य जीवत्वे योगिनः कायव्यूहाधिष्ठानानुपपत्तेः। न च योगप्रभावाद्योगिनोऽन्तःकरणं कायव्यूहाभिव्यक्तियोग्यं वैपुल्यं प्राप्नोतीति तदवच्छिन्नस्य कायव्यूहाधिष्ठानत्वं युज्यत इति वाच्यम्। "प्रदीपवदावेशस्तथा हि दर्शयतीति" शास्त्रोपान्त्याधिकरणभाष्यादिषु कायव्यूहे प्रतिदेहमन्तःकरणस्य चक्षुरादिवच्छिन्नस्यैव योगप्रभावात् सृष्टेरुपवर्णनात्। प्रतिबिम्बे बिम्बाभेदमात्रस्याध्यस्तत्वेन स्वरूपेण तस्य सत्यत्वात् न प्रतिबिम्बरूपजीवस्य मुक्त्यन्वयासम्भव इति न तदतिरेकेण मुक्त्यन्वयावच्छिन्नरूपं जीवान्तरं वा प्रतिबिम्बजीवातिरिक्तं जीवेश्वरविलक्षणं कूटस्थसंज्ञितं चैतन्यान्तरं कल्पनीयम् "अविनाशी वाऽरे अयमात्मेति" श्रुतिः जीवस्य तदुपाधिनिवृत्तौ प्रतिबिम्बभावापगमेऽपि स्वरूपं न विनश्यतीत्येतत्परं, न तदतिरिक्तकूटस्थनामकचैतन्यान्तरपरम्। जीवोपाधिनाऽन्तःकरणादिनावच्छिन्नं चैतन्यं बिम्बभूत ईश्वर एव "यो विज्ञाने तिष्ठन्नित्यादि" श्रुतौ ईश्वरस्यैव जीवस्थानेन तदन्तर्विभावेन

विकारान्तरस्यानश्रवणादिति"। अतः परमतखण्डनात् अत्र दर्शितः प्रसङ्गात् पूर्वमनुक्तमत्रालोच्यते "अन्ये तु रूपानुपहितप्रतिबिम्बो न युक्तः सुतरां नीरूपे गगन प्रतिबिम्बोदाहरणमप्ययुक्तं गगनाभोगव्यापिनि सवितृकरमण्डले सलिले प्रतिबिम्बित गगनप्रतिबिम्बत्वव्यवहारस्य भ्रममात्रमूलत्वात्। ध्वनौ वर्णप्रतिबिम्बत्ववादोऽप्ययुक्तः व्यञ्जकतया सन्निधानमात्रेण ध्वनिधर्माणामुदात्तादिस्वराणां वर्णेष्वारोपोपपत्तेर्ध्वनेर्वर्णप्रतिबिम्बत्वग्राहित्वकल्पनाया निःप्रमाणकत्वात्। प्रतिध्वनिरपि न पूर्वशब्दप्रतिबिम्बः पञ्चीकरणप्रक्रियया पटहपयोनिधिप्रभृतिशब्दानां क्षितिसलिलादिशब्दत्वेन प्रतिध्वनेरेवाकाशशब्दत्वेन तस्यान्यशब्दप्रतिबिम्बत्वायोगात्। वर्णरूपप्रतिशब्दोऽपि न पूर्ववर्णप्रतिबिम्बः वर्णाभिव्यञ्जकध्वनिनिमित्तकप्रतिध्वनेर्मूलध्वनिवदेव वर्णाभिव्यञ्जकत्वेनोपपत्तेः तस्माद्घटाकाशवदन्तःकरणावच्छिन्नं चैतन्यं जीवः तदनवच्छिन्नमीश्वरः। न चैवमन्तःकरणान्तर्वर्त्तिनश्चैतन्यस्य तत्तदन्तःकरणोपाधिभिः सर्वात्मना जीवभावेनावच्छेदात्तदवच्छेदरहितचैतन्यरूपस्येश्वरस्यात्राणुदुर्बहिरेव सत्त्वं स्यादिति "यो विज्ञाने तिष्ठन्नित्यादावन्तर्यामिभावेन विकारान्तरवस्थानश्रवणं विरुध्यते। प्रतिबिम्बपक्षे तु जलगतस्वाभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनादेकत्र द्विगुणीकृत्य वृत्तिरुपपद्यत इति वाच्यम्। यतः प्रतिबिम्बपक्षेऽपि उपाध्यन्तर्गतस्यैव चैतन्यस्य तत्र प्रतिबिम्बो वाच्यः। न तु जलचन्द्रन्यायेन तद्रूपप्रतिबिम्बं तदन्तर्गतभागस्य तत्र प्रतिबिम्बासम्भवात्। न हि मेघावच्छिन्नस्याकाशस्यालोकस्य वा जले प्रतिबिम्बवज्जलान्तर्गतस्यापि तत्र प्रतिबिम्बो दृश्यते। न वा सुखादीनां बहिःस्थितिसमय इव जलान्तर्निमज्जनेऽपि प्रतिबिम्बोऽस्ति। अतो जलप्रतिबिम्बं प्रति मेघाकाशादेरिवान्तःकरणाद्युपाधिप्रतिबिम्बं प्रति तदन्तर्गतस्यैव बिम्बत्वं स्यादिति बिम्बभूतस्य विकारान्तरवस्थानायोगात् ईश्वरेऽन्तर्यामिब्राह्मणाम्नातस्याभावस्तुल्यः। एतेनावच्छिन्नस्य जीवत्वे कर्तृभोक्तृसमययोस्तत्र तत्रान्तःकरणावच्छेद्यचैतन्यप्रदेशस्य भिन्नत्वात् कृतहानाकृताभ्यागमप्रसङ्ग इति निरस्तम्। प्रतिबिम्बपक्षेऽपि स्वान्तर्गतस्य सर्वसन्निहितस्य चैतन्यप्रदेशस्यान्तःकरणे प्रतिबिम्बस्य वक्तव्यतया तत्र तत्रान्तःकरणस्य गमने बिम्बभेदात् तत्प्रतिबिम्बस्यापि भेदावश्यम्भावेन दोषतौल्यात्। न चान्तःकरणप्रतिबिम्बो जीव इतिपक्षे दोषतौल्येऽप्यविद्याप्रतिबिम्बो जीवस्तस्य च तत्र गतिद्वारमन्तःकरणं जलाशयव्यापिनो महामेघमण्डलप्रतिबिम्बस्य तदुपरि विस्तृतस्फीतालोक इव तत्र विशेषाभिव्यक्तिहेतुरिति पक्षे नायं दोषः। अन्तःकरणवदविद्याया गत्यभावेन प्रतिबिम्बभेदानापत्तेरिति वाच्यम्। तथैवावच्छेदपक्षेऽप्यविद्यावच्छिन्नो जीव इत्यभ्युपगमसम्भवात् तत्राप्येकस्य जीवस्य कस्मिंश्चित्प्रदेशे कर्तृत्वं प्रदेशान्तरे भोक्तृत्वमित्येवं कृतहानाकृताभ्यागमदोषापत्त्युत्तये वस्तुतो जीवैक्यस्य शरणीकरणीयत्वेन तन्न्यायादन्तःकरणोपाधिपक्षेऽपि वस्तुतश्चैतन्यैक्यस्य तदवच्छेदकोपाध्यैक्यस्य च तत्राभ्युपगमेन दोषनिराकरणसम्भवात्। न चावच्छेदपक्षे "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा"। "अतएव चोपमा जलसूर्यकादिवदिति" श्रुतिसूत्राभ्यां विरोधः। "अम्बुवदग्रहणात्तु न तथात्वम्" इत्युदाहृत सूत्रानन्तरसूत्रेण यथा सूर्यस्य रूपवतः प्रतिबिम्बोदययोग्यता ततो विप्रकृष्टदेशं रूपवज्जलं गृह्यते नैवं सर्वगतस्यात्मनः प्रतिबिम्बोदययोग्यं किञ्चिदस्ति ततो विप्रकृष्टमिति प्रतिबिम्बासम्भवमुक्त्वा "वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवमिति" तदनन्तरसूत्रेण यथा जलप्रतिबिम्बितः सूर्यो जलवृद्धौ वर्द्धत इव जलह्रासे ह्रसतीव जलचलने चलतीवेति तस्याध्यासकतदुपाधिवृद्धिह्रासादिभाक्त्वमित्येवं दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यादविरोध इति स्वयं सूत्रकृतैवावच्छेदपक्षे तयोस्तात्पर्यकथनात्। "घटसंवृतमाकाशं नीयमाने यथा घटे। घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः"। "अंशो नाना व्यपदेशादिति" श्रुतिसूत्राभ्यामवच्छेदपक्षस्यैव परिग्रहाच्च। तस्मात् सर्वगतस्य चैतन्यस्यान्तःकरणादिनावच्छेदोऽवश्यं भावीत्यावश्यकत्वादवच्छेदो जीव इति पक्षं रोचयन्ते"।

प्रतिबिम्बित त्रि॰ प्रतिबिम्ब+तार॰ इतच्। जातप्रतिबिम्बे दर्पणादौ—प्रतिफलिते प्रतिच्छायापन्ने मुखादौ।

प्रतिविषा स्त्री प्रतिषिद्धं विषं यया प्रा॰ब॰। अतिविषायाम् (आतइच्) अमरः।

प्रतिविष्णुक पु॰ प्रतिकूलो विष्णुर्यस्य प्रतिविष्णुः मुचुकुन्दस्तस्मात् कायति शब्दायते कै—शब्दे क। मुचुकुन्दवृक्षे राजनि॰।

प्रतिवेश पु० प्रत्यासन्नो वेशः प्रा०स० । प्रत्यासन्ने प्रतिवासि-गृहे शब्दरत्ना० । प्रति+विश–आधारे घञ् वा दीर्घः । तत्रार्थे ।

प्रतिवेशिन् त्रि० प्रत्यासन्नं विशति प्रति+विश–णिनि । प्रत्यासन्नगृहवासिनि स्त्रियां ङीप् "दृष्टिं हि प्रतिवेशिनि ! क्षणमिहाप्यस्मद्गृहे दास्यसि" सा०द० ।

प्रतिव्यूह पु० प्रतिरूपः व्यूहः प्रा०स० । बलविन्यासस्य प्रतिरूपे व्यूहे भा०भी० ५० अ० ।

प्रतिशब्द पु० प्रतिरूपः शब्दः प्रा०स० । प्रतिध्वनौ शब्दानुरूपे शब्दजन्ये शब्दभेदे । प्रतिबिम्बवादशब्दे दृश्यम् ।

प्रतिशयन न० प्रति+शी–भावे ल्युट् । प्रतिस्वापे अभीष्टलाभाय प्रत्यादेशाशया देवोद्देशेन स्नानभोजनादिवर्जनपूर्वकस्वापे (हत्यादेयोवा) दृश्यकु० ५ अ० ।

प्रतिशयित त्रि० प्रति+शी+क्त । प्रतिशयनकारिणि [ख्याते च त्रिका० ।

प्रतिशासन न० प्रति+शास–भावे ल्युट् । भृत्यादेर्निकटस्य नियोगे अमरः ।

प्रतिशिष्ट त्रि० प्रति+शास–कर्मणि क्त । १प्रेषिते २प्रत्या-

प्रतिश्या स्त्री प्रति+श्यै–बा० करणे अङ् । प्रतिश्याये पीनसे रोगभेदे शब्दच० ।

प्रतिश्याय पु० प्रति+श्यै–करणे घञ् । पीनसे रोगभेदे तल्लक्षणादि सुश्रुतोक्तं यथा

"अथातः प्रतिश्यायप्रतिषेधं व्याख्यास्यामः । नारीप्रसङ्गः शिरसोऽभितापो धूमो रजः शीतमतिप्रतापः । सन्धारणं मूत्रपुरीषयोश्च सद्यः प्रतिश्यायनिदानमुक्तम् । चयङ्गता मूर्द्धनि मारुतादयः पृथक्समस्ताश्च तथैव शोणितम् । प्रकोप्यमाना विविधैः प्रकोपणैर्नृणां प्रतिश्यायकरा भवन्ति हि । शिरोगुरुत्वं क्षवथोः प्रवर्त्तनं तथाङ्गमर्दः परिहृष्टरोमता । उपद्रवाश्चाप्यपरे पृथग्विधा नृणां प्रतिश्यायपुरःसराः स्मृताः । आनद्धा पिहिता नासा तनुस्रावप्रवर्त्तिनी । गलताल्वोष्ठशोषश्च निस्तोदः शङ्खयोस्तथा । स्वरोपघातश्च भवेत्प्रतिश्यायेऽनिलात्मके । उष्णः सपीतकः स्रावो घ्राणात् स्रवति पैत्तिके । कृशोऽतिपाण्डुः सन्तप्तो भवेत्तृष्णाभिपीडितः । सधूमं सहसा वह्निं वमतीव च मानवः । कफः कफकृते घ्राणाच्छुक्लः शीतः स्रवेन्मुहुः । शुक्लावभासः शूनाक्षो भवेद्गुरुशिरोमुखः । शिरोगलौष्ठतालूनां कण्डूयनमतीव च । भूत्वा भूत्वा प्रतिश्यायो योऽकस्माद्विनिवर्त्तते ! सम्पक्वो वाप्यपक्वो वा स सर्वप्रभवः स्मृतः । लिङ्गानि चैव सर्वेषां पीनसानां च सर्वजे । रक्तजे तु प्रतिश्याये रक्तास्रावः प्रवर्त्तते । ताम्राक्षश्च भवेज्जन्तुरुरोघातप्रपीडितः । दुर्गन्धोच्छ्वासवदनस्तथा गन्धान्न वेत्ति च । मूर्च्छन्ति चात्र क्रिमयः श्वेताः स्निग्धास्तथाऽणवः । क्रिमिमूर्द्धविकारेण समानं चास्य लक्षणम् । प्रक्लिद्यति पुनर्नासा पुनश्च परिशुष्यति । मुहुरानह्यते चापि मुहुर्विव्रियते तथा । निश्वासोच्छ्वासदौर्गन्ध्यं तथा गन्धान्न वेत्ति च । एवं दुष्टं प्रतिश्यायं जानीयात्कृच्छ्रसाधनम् । सर्व एव प्रतिश्याया नरस्याप्रतिकारिणः । कालेन रोगजनना जायन्ते दुष्टपीनसाः । बाधिर्यमान्ध्यमघ्रात्वं घोरांश्च नयनामयान् । कासाग्निसादशोफांश्च वृद्धाः कुर्वन्ति पीनसाः" ।

प्रतिश्रय पु० प्रतिश्रीयते प्रति+श्रि–आधारे अच् । १यज्ञगृहे जटा० २सभायां ३आश्रये च मेदि० ४गृहे हेमच० ।

प्रतिश्रव पु० प्रति+श्रु–भावे अप् । स्वीकारे अमरः ।

प्रतिश्रवण न० प्रति+श्रु–भावे ल्युट् । १अङ्गीकारे । प्रतिगतः श्रवणं कर्णम् अत्या०स० । २श्रवणानुगते त्रि० अस्य तत्पुरुषे अंश्वा० अन्तोदात्तता प्रतिगतं श्रवणं येन प्रा०ब० । तु न । [न्दपभेदे भा०आ० ९५अ० ।

प्रतिश्रवस् पु० १गोत्रप्रवरर्षिभेदे । २परिक्षित्पुत्रभीमसेनात्मजे

प्रतिश्रुत् स्त्री प्रतिरूपं श्रूयते श्रु–सम्प० बा०कर्मणि क्विप् । प्रतिशब्दे प्रतिध्वनौ अमरः ।

प्रतिश्रुत्का स्त्री देवताभेदे यजु०२४।१२। २।१८ [नौ च ।

प्रतिश्रुति स्त्री प्रति+श्रु–भावे क्तिन् । १अङ्गीकारे २प्रतिध्व-

प्रतिषिद्ध त्रि० प्रति+सिध–कर्मणि क्त । निषिद्धे

प्रतिषेध पु० प्रति+सिध–भावे घञ् । १निषेधे 'मा कुरु इत्यादिना निवारणे "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता" मीमांसकका० । २अर्थालङ्कारभेदे अर्थालङ्कारशब्दे ४०० दृश्यम् । ३दूषणाभिधाने च । ल्युट् । प्रतिषेधन तत्रैव न०

प्रतिषेधोपमा स्त्री "न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम् । कलङ्किनो जडस्येति प्रतिषेधोपमैव सा । काव्याद० उक्ते अर्थालङ्कारभेदे सादृश्यप्रतिषेधेन अधिकवैचित्र्य प्रकटनात् तथात्वमस्याः ।

प्रतिष्क पु० प्रति+स्कन्द–बा०ड षत्वम् । दूते शब्दर० । [जटा० ।

प्रतिष्कष पु० प्रति+कष–अच् या०सुट् षत्वम् । चर्मरज्ज्वौ

प्रतिष्कस पु० प्रति+कस–अच् बा० सुट् षत्वम् । चरे शब्दर०

प्रतिष्टम्भ पु० प्रति+स्तम्भ–भावे घञ् षत्वम् । १प्रतिबन्धे अमरः २क्रियाराहित्यापादने 'बाहुप्रतिष्टम्भविवृद्धमन्युः" रघुः

प्रतिष्टुति स्त्री प्रति+स्तु–क्तिन्। प्रतिवाक्यीकृत्य स्तुतौ ऋ० ८।१६।२

प्रतिष्ठ त्रि० प्रतिष्ठा अस्त्यस्य अच् प्रति+स्था–क वा। १ख्यातियुक्ते २जैनभेदे पु० हेमच० ३कुमारानुचरमातृभेदे स्त्री भा० श० ४७अ०। ४चतुरक्षरपादके वर्णवृत्तभेदे स्त्री वृ० र०।

प्रतिष्ठा स्त्री प्रति+स्था-भावाधारादौ अङ्। १स्थितौ २स्थाने ३गौरवे ४यागादिसमाप्तौ कर्त्तव्ये कर्मभेदे मेदि०। देवादीनां पूज्यतादिप्रयोजके ५संस्कारभेदे देवताप्रतिष्ठाशब्दे तद्वि वरणं दृश्यम्। ६स्थैर्ये ७भूमौ स्त्री निघण्टुः पात० सू० स्थैर्यभेदे फलभेद उक्तो यथा

"अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः" सू०। "सर्वप्राणिनां भवति" भा० "सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्" सू० "धार्मिको भव इति भवति धार्मिकः, स्वर्गं प्राप्नुहीति स्वर्गं प्राप्नोति अमोघास्य वाग्भवति" भा० "अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्" सू० "सर्वदिक्स्थान्यस्योपतिष्ठन्ते रत्नानि" भा० "ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः" सू० "यस्य लाभादप्रतिघान् गुणानुत्कर्षयति सिद्धश्च विनेयेषु ज्ञानमाधातुं समर्थो भवति इति" भा०। ८आश्रये "ब्रह्म पुच्छं प्रतिष्ठा" श्रुतिः।

प्रतिष्ठान न० प्रति+स्था–भावे ल्युट्। १व्रतादेः समाप्तौ कर्त्तव्ये कर्मभेदे देवादीनां पूज्यताप्रयोजके २संस्कारभेदे ३विख्यातौ च। आधारे ल्युट्। (विठौर) ख्याते ४नगरभेदे "गङ्गायमुनयोर्मध्ये प्रयागं जघनं स्मृतम्। प्रयागं जघनस्थानमुपस्थमृषयो विदुः। प्रयागं सप्रतिष्ठानं कम्बलाश्वतरौ तथा। तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः" भा० व० ८५अ०। "प्रतिष्ठाने नरपतिर्ययातिः प्रत्युपस्थितः" भा० उ० ११२०अ०।

"एवंप्रभावो राजासीदैलस्तु पुरुषोत्तम!। देशे पुण्यतमे चैव महर्षिभिरभिष्टुते। राज्यं स कारयामास प्रयागे पृथिवीपतिः। उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः" हरिवं० २६अ०। ५स्थाने च

प्रतिष्ठित त्रि० प्रतिष्ठा जाताऽस्य तारका० इतच्। १जातप्रतिष्ठे देवादौ २विख्यातियुक्ते च। ३विष्णौ पु० "आत्मवान् प्रतिष्ठितः" विष्णुस०।

प्रतिष्णिका स्त्री प्रति+स्ना–क स्वार्थे क कापि अत इत्त्वम् मुग्धबो० षत्वम्। प्रतिस्नानकर्त्र्यां स्त्रियाम्।

प्रतिसङ्क्रम पु० प्रतिरूपः संक्रमः प्रा० स०। १प्रतिच्छायायाम् प्रा० ब०। २प्रतिसंक्रान्ते प्रतिच्छायापन्ने त्रि०। ३सञ्चारे च "चितिशक्तिरपरिणामिन्यप्रतिसंक्रमा दर्शितविषया शुद्धाऽनन्ता चेति" पात० भा०। "प्रतिसंक्रमः सञ्चारः" विवरणम्।

प्रतिसंख्या स्त्री प्रति+सम्+ख्या–भावे अङ्। १प्रसंख्याने २सांख्यादिसिद्धे ज्ञानभेदे च तस्य पञ्चविंशतिसंख्यान्विततत्त्वनिरूपणात् तदीयज्ञानस्य संख्यानियतत्वेन तथात्वम्।

प्रतिसंख्यानिरोध पु० प्रतिसङ्ख्यापूर्वको निरोधः शा० त०। बुद्धिपूर्वके भावानां नाशे बौद्धमतसिद्धे पदार्थभेदे अप्रतिसंख्यानिरोधशब्दे ५६१४० दृश्यम्।

प्रतिसञ्चर पु० प्रतिसञ्चरन्ति क्रियाशून्यतया विलीयन्तेऽस्मिन् प्रति+सम्+चर-आधारे अप्। १प्रलयभेदे "यदा तु प्रकृतौ याति लयं विश्वमिदं जगत्। तदोच्यते प्राकृतोऽयं विद्वद्भिः प्रतिसञ्चरः" मार्क० पु० ४६अ०। २सञ्चारान्तरे च।

प्रतिसन्देश पु० प्रतिरूपः सन्देशः प्रा० स०। सन्देशानुरूपे प्रत्युत्तररूपतया वाचिकरूपवाक्यभेदे।

प्रतिसन्धान न० प्रति+सम्+धा–भावे ल्युट्। १अनुसन्धाने अनुचिन्तने ज्ञानभेदे नष्टस्य द्रव्यस्योपलब्धिहेतुव्यापारे २अन्वेषणे च।

प्रतिसन्धि प्र० प्रतीपः सन्धिः प्रा० स०। १वियोगे २उपरमे "अदृष्टतोऽत्तुपायाच्च प्रतिसन्धिश्च कर्मणः" भा० शा० २०६अ० टी० नील० प्रति+सम्+धा–कि। ३प्रतिसन्धाने च वीप्सायाम् अव्ययी०। ४सन्धौ सन्धौ इत्यर्थे।

प्रतिसन्धेय त्रि० प्रति+सम्–धा-कर्मणि यत्। प्रतीकार्य्ये भा० उ० ६५अ०।

प्रतिसम त्रि० प्रतिकूलः समः। विपक्षे

प्रतिसमन्त त्रि० प्रतिगतं समन्तात् येन प्रा० ब० पृषो०। प्रा० प्रत्यन्तात्त्वार्थे शत० ब्रा० २।७।१।१२ भा०।

प्रतिसमासन न० प्रति+सम्+आ+अस-क्षेपे भावे ल्युट्। निरसने निवारणे भा० व० १६२१ श्लो०।

प्रतिसर पु० प्रति+सृ-अच्। १सैन्यपश्चाद्भागे २हस्तसूत्रे च त्रिका०। ३मन्त्रभेदे ४माल्ये व्रणशुद्धौ च मेदि०। ६भूषणे ७रक्षाबन्धनसूत्रे पु० न० अमरः। ८नियोज्ये त्रि० मेदि० स्त्रीत्वमपि। "प्रतिसरया तुरगाणां भल्लातकशालिकुष्ठसिद्धार्थं कण्ठेषु निबध्नीयात्" वृ० सं० ४२अ०।

प्रतिसर्ग पु० प्रतिरूपः प्रतिकूलो वा सर्गः। १ब्रह्मणः सृष्टितुल्यायां मरीच्यादिसृष्टौ २प्रलये च "आदिसर्गस्तु यः सूत! कथितो विस्तरेण च। प्रतिसर्गश्च ये येषामधिपास्तान् वदस्व नः" इति प्रश्ने प्रतिसर्ग उक्तः कालिकापु०

"प्रतिसर्गे तु मृत्पिण्डं हेमपिण्डं वा घटकुण्डलमुकुटादयो विशन्तोऽव्यक्तीभवन्ति तत्कारणरूपमेवाभिव्यक्तं कार्य्यमपेक्ष्याव्यक्तम् भवति । एवं पृथिव्यादयस्तन्मात्राणि विशन्तः स्वापेक्षया तन्मात्राण्यव्यक्तयन्ति एवं तन्मात्राण्यहङ्कारं विशन्ति अहङ्कारमव्यक्तयन्ति एवमहङ्कारो महान्तमाविशन्महान्तमव्यक्तयति महान् प्रकृतिं स्वकारणं विशन् प्रकृतिमव्यक्तयति प्रकृतेस्तु न क्वचिन्निवेश इति सा सर्वकार्य्याणामव्यक्तमेव" सा०त०कौ०

प्रतिसर्य्य पु० प्रतिसरे भवः यत् । रुद्रभेदे यजु०१६।२१

प्रतिसव्य न० प्रतिगतं सव्यं वामं येन प्रा०ब० । १प्रतिकूले २विरुद्धाचारिणि च जटा० ।

प्रतिसान्त्वानिक पु० सान्त्वनं प्रयोजनमस्य ठक् प्रतिरूपः सान्त्वानिकः प्रा०स० । मागधे स्तुतिपाठके शब्दरत्ना० ।

प्रतिसाम सामसामयाम् अव्ययी० अच् समा० । प्रत्येकसामनि

प्रतिसारण त्रि० प्रतिसारयति प्रति+सृ-णिच् ल्यु । १अपसारके २दूरीकारके । भावे ल्युट् । ३दूरीकरणे । करणे ल्युट् । सुश्रुतोक्ते ४अग्निकार्यभेदे । वलयविन्दुविलेखा प्रतिसारणानीति दहनविशेषाः । व्रणचिकित्साङ्गे ५उपक्रमभेदे "मासादूर्द्ध्वं ततस्तेन व्रणमालेपयेद्व्रणम् । कुक्कुटाण्डकपालानि कतकं मधुकं समम् । तथा समुद्रमण्डूकीं मणिचूर्णञ्च दापयेत् । गुटिकामूत्रपिष्टास्ता व्रणानां प्रतिसारणम्" सुश्रुतः । प्रतिसारणं व्रणस्य स्वस्थानात् स्थानान्तरनयनम् इत्यर्थः "दन्तजिह्वामुखानां यत्नाग्ंकलकावलेहकैः । शनैर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् । देयस्तं मुखरोगेभ्यः सुखयोगं तथा हयाम् । वह्निं दन्तपीडासु निहन्ति प्रतिसारणम् । हीने जाड्यकफोत्क्लेशावरसंज्ञानमेव च । अतियोगात् मुखे पाकः शोषस्तृष्णा वमिः क्रमः" भावप्र० उक्ते ४दन्तघर्षणभेदे ।

प्रतिसारणीय त्रि० प्रति+सृ-णिच्-कर्मणि अनीयर् । स्थानान्तरनयनीये सुश्रुतोक्ते क्षारपाकविधिभेदे
"स द्विविधः प्रतिसारणीयः पानीयश्च । तत्र प्रतिसारणीयः कुष्ठकिटिभदद्रुकिलासमण्डलभगन्दरार्बुददुष्टव्रणनाडीचर्मकीलतिलकालकन्यच्छव्यङ्गमशकबाह्यविद्रधिकृमिविषार्शःसूपदिश्यते" ।

प्रतिसारिन् त्रि० प्रतीपं सरति सृ-णिच-णिनि । १प्रतीपगामिनि २नीचगामिनि स्त्रियां ङीप् । भा०व० ५१अ० ।

प्रतिसीरा स्त्री प्रतिसिनोति सीयते वा प्रति+सि-रक् दीर्घश्च । जवनिकायाम् (परदा) अमरकोषः ।

प्रतिसूर्य्य पुंस्त्री० प्रतिरूपः सूर्य्यः प्रा०स० । १कृकलासे त्रिका० । २द्वितीयसूर्यप्रादुर्भावरूपे आन्तरीक्षोत्पातभेदे च । स्वार्थे क । तल्लक्षणं तच्छुभाशुभफलञ्च वृ०सं०३७अ० यथा "प्रतिसूर्य्यकः प्रशस्तो दिवसकृदृतुवर्णसप्रभः स्निग्धः । वैदूर्य्यनिभः स्वच्छः शुक्लश्च क्षेमसौभिक्षः । पीतो व्याधिं जनयत्यशोकरूपश्च शस्त्रकोपाय । प्रतिसूर्य्याणां माला दस्युभयातङ्कनृपहन्त्री । दिवसकृतः प्रतिसूर्य्यो जलकृदुदग्दक्षिणे स्थितोऽनिलकृत् । उभयस्थः सलिलभयं नृपमुपरि निहन्त्यधो जनहा" ।

प्रतिसृष्ट त्रि० प्रति+सृज-कर्मणि क्त । १प्रेरिते २प्रत्याख्याते च मेदि० । ३मत्ते धरणिः । [४प्रेषवर्ज्याम् राजनि० ।

प्रतिसोमा स्त्री प्रतिरूपा सोमः सोमवल्ली यस्याः प्रा०ब० । म०

प्रतिस्कन्ध पु० १कुमारानुचरभेदे भा०श० ४६अ० । २नियमसन्ध्यङ्गभेदे पु० "परिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते । स्कन्धोपनेयं तं प्राहुः सन्धिं सन्धिविदो जनाः" कामन्द० ।

प्रतिस्त्री स्त्री प्रतिरूपा स्त्री प्रा०स० । १परनार्य्याम् अभिमुखे अव्य० । २स्त्रिया अभिमुख्ये अव्य० । "उपमन्त्रयते स हिङ्कारो ज्ञपयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रतिस्त्रि सह शेते स प्रतिहारः कालं गच्छति तन्निधनं पारं गच्छति तन्निधनमेतद् वामदेव्यं मिथुने प्रोतम्" छा०उ० । "प्रतिस्त्रिशयनम् स्त्रियोऽभिमुखभावेन शयनम् । सहशयनमेकपर्य्यङ्के शयनम्" भा० ।

प्रतिस्पर्द्धा स्त्री प्रति+स्पर्द्ध-भावे अङ् । प्रतिरूपस्पर्द्धायां प्रतिकक्षायाम् शब्दरत्ना० ।

प्रतिस्वप्न पु० प्रतिरूपः स्वप्नः । प्रतिकृते

प्रतिस्रोतस् न० प्रतीपं स्रोतः प्रा०स० । स्रोतसोगमनप्रतिकूले

प्रतिस्वर पु० प्रति+स्वृ-शब्दोपतापयोः भावे आधारे वा अप् । १प्रतिशब्दे २उपतापाधारे आदित्यात् अग्नेश्च स्मादनसाधने शुष्कगोमयादौ च । तत्प्रकारः निरुक्ते उक्तः यथा "उदीचि प्रथमसमाहत आदित्ये कंसं वा मणिं वा परिमृज्य प्रतिस्वरे यत्र शुष्कगोमयं संस्पर्शयन्धारयति तत्प्रदीप्यते सोऽयमेव संपद्यते" । प्रतिस्वरे उपतापाधारे सूर्यकिरणसम्पर्कस्थाने इत्यर्थः ।

प्रतिहत त्रि० प्रति+हन-क्त । १द्विष्टे २रुद्धे ३निरस्ते ४प्रतिस्खलिते च मेदि० । भावे क्त । ५निराशे न० अमरः ।

प्रतिहति स्त्री प्रति+हन-भावे क्तिन् । १प्रतिघाते आहत-

परावृत्तौ २रोधे च। तस्य कामप्रतिहृत्या जायमानत्वात् तथात्वम्।

प्रतिहर्त्तृ त्रि॰ प्रति+हृ–तृच्। १पुनराहरणकर्त्तरि २ऋत्विग्भेदे पु॰ अच्छावाकशब्दे ८५ पृ॰ दृश्यम्। स च प्रतिहृपसामभेदगाता प्रतिहारशब्दे दृश्यम्।

प्रतिहर्षण न॰ प्रतिरूपं हर्षणम् प्रा॰स॰। १हर्षणानुरूपे हर्षे णिच्–ल्युट्। २प्रतिरूपसन्तोषसम्पादने च।

प्रतिहस्तक पु॰ प्रतिरूपः हस्तो यस्य प्रा॰ब॰ कप्। हस्तसाध्यक्रियाप्रतिरूपक्रियाकारिणि प्रतिनिधौ हेमो॰।

प्रति(ती)हार पु॰ प्रत्येकं हरति स्वामिपार्श्वमानयति अण् वा दीर्घः। १द्वारपाले अमरः। स्त्रियां ङीप् गौरा॰ङीष् वा। आधारे घञ्। तदधिष्ठानस्थाने २द्वारे च शब्दर॰। प्रतिरूपं हरति हृ–अण् उपस॰। ३मायाकारे भरतः। सामस्तृतीयभागे उद्गात्रा गेये ४सामावयवभेदे उद्गीथशब्दे ११७॰पृ॰दृश्यम्। तस्य देवता च अन्नं यथोक्तं छा॰उ॰ "अथ हैनं प्रतिहर्त्तोपससाद प्रतिहर्त्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान् प्रतिहरिष्यसि मूर्द्धा ते विपतिष्यतीति मा भगवानवोचत् कतमा सा देवतेति। अन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान् प्रत्यहरिष्यो मूर्द्धा ते व्यपतिष्यत्तथोक्तस्य मयेति"।

प्रतिहारक पु॰प्रति+हृ–ण्वुल्। १मायाकारे भरतः २स्थानान्तरप्रापके त्रि॰ ३प्रतिहाररूपसामावयवगातरि पु॰।

प्रति(ती)हास पु॰प्रतिरूपः हासः प्रा॰स॰ वा दीर्घः। १येन हासः कृतः तं प्रति हासे प्रा॰ब॰। २तत्कारके त्रि॰। ३करवीरवृक्षे पु॰ अमरः।

प्रतिह्वर पु॰ प्रति+ह्वृ–आधारे अप्। समीपे ऋ॰७।६६।१४

प्रतीक पु॰प्रति+कन् नि॰ दीर्घः। १अवयवे अमरः। २प्रतिरूपे ३विलोमे च मेदि॰ प्रतीकोपासनं च ब्रह्मप्रतीकानामादित्यादीनां ब्रह्मदृष्ट्युपासनं तच्च शा॰ सू॰ भा॰ दर्शितं यथा

"न प्रतीके न हि सः" सू॰ "मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्म" (छा॰ ३।१८) इति, तथा "आदित्यो ब्रह्मेत्यादेशः,(छा॰३।१९) स यो नाम ब्रह्मेत्युपास्ते" (छा॰।७।५) इत्येवमादिषु प्रतीकोपासनेषु संशयः, किमेष्वात्मग्रहः कर्त्तव्यो न वेति। किं तावत् प्राप्तमेतेष्वात्मग्रह एव युक्तः, कस्मात्, ब्रह्मणः श्रुतिष्वात्मत्वेन प्रसिद्धत्वात्। प्रतीकानामपि ब्रह्मविकारत्वात् ब्रह्मत्वे सत्यात्मत्वोपपत्तेरित्येवं प्राप्ते ब्रूमः। न प्रतीकेष्वात्ममतिं बध्नीयात्, न हि स उपासकः प्रतीकानि व्यस्तान्यात्मत्वेनाकलयेत्। यत्पुनर्ब्रह्मविकारत्वात् प्रतीकानां ब्रह्मत्वं ततश्चात्मत्वमिति। तदसत् प्रतीकाभावप्रसङ्गात्। विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्वमेवाश्रितं भवति, स्वरूपोपमर्दे च नामादीनां कुतः प्रतीकत्वमात्मग्रहो वा। न च ब्रह्मण आत्मत्वात् ब्रह्मदृष्ट्युपदेशेष्वात्मदृष्टिः कल्प्या, कर्तृत्वाद्यनिराकरणात्, कर्तृत्वादिसर्वसंसारधर्मनिराकरणेन हि ब्रह्मण आत्मत्वोपदेशस्तदनिराकरणेन चोपासनविधानम्, अतश्चोपासकस्य प्रतीकैः समत्वादात्मग्रहो नोपपद्यते, न हि रुचकस्वस्तिकयोरितरेतरात्मत्वमस्ति, सुवर्णात्मनैव तु ब्रह्मात्मत्वेनैकत्वे प्रतीकाभावप्रसङ्गमवोचाम। अतो न प्रतीकेष्वात्मदृष्टिः क्रियते" भा॰ "ब्रह्मदृष्टिरुत्कर्षात्" सू॰ "तेष्वेवोदाहरणेषु अन्यः संशयः, किमादित्यादिदृष्टयो ब्रह्मण्यध्यसितव्याः किं वा ब्रह्मदृष्टिरादित्यादिष्विति। कुतः संशयः, सामानाधिकरण्ये कारणानवधारणात्। अत्र हि ब्रह्मशब्दस्यादित्यादिशब्दैः सामानाधिकरण्यमुपलभ्यते, "आदित्यो ब्रह्म प्राणो ब्रह्म विद्युद्ब्रह्म" इत्यादिसमानविभक्तिनिर्देशात्। न चात्राञ्जसं सामानाधिकरण्यमवकल्पते अर्थान्तरवचनत्वात् ब्रह्मादित्यादिशब्दानां, न हि भवति गौरश्व इति सामानाधिकरण्यम्। ननु प्रकृतिविकारभावात् ब्रह्मादित्यादीनां मृच्छरावादिवत् सामानाधिकरण्यं स्यात्, नेत्युच्यते, विकारप्रविलयो ह्येवं प्रकृतिसामानाधिकरण्यात् स्यात्, ततश्च प्रतीकाभावप्रसङ्गमवोचाम, परमात्मवाक्यञ्चेदन्तदानीं स्यात्, ततश्चोपासनाधिकारो बाध्येत, परिमितविकारोपासनस्य व्यर्थम्। तस्मात् ब्राह्मणोऽग्निर्वैश्वानर इत्यादिवदन्यतरत्रान्यतरदृष्ट्यध्यासे सति क्व किंदृष्टिरध्यस्यतामिति संशयः तत्रानियमः, नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्तम्। अथ वाऽऽदित्यादिदृष्टय एव ब्रह्मणि कर्त्तव्या इत्येवं प्राप्तम्। एवं हि आदित्यादिदृष्टिभिर्ब्रह्मोपासनस्य फलवदिति शास्त्रमर्यादा। तस्मात् न ब्रह्मदृष्टिरादित्यादिष्वित्येवं प्राप्ते ब्रूमः। ब्रह्मदृष्टिरेवादित्यादिषु स्यादिति। कस्मात् उत्कर्षात्, एवमुत्कर्षेणादित्यादयो दृष्टा भवन्त्युत्कृष्टदृष्टेस्तेष्वध्यासात्। तथा च

लौकिको न्यायोऽनुगतो भवति, उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यसितव्येति लौकिको न्यायः। यथा राजदृष्टिः क्षत्तरि, स चानुगन्तव्यो विपर्यये प्रत्यवायप्रसङ्गात्। न हि क्षत्तृदृष्टिपरिगृहीतो राजा निकर्षं नीयमानः श्रेयसे स्यात्। ननु शास्त्रप्रामाण्यादनाशङ्कनीयोऽत्र प्रत्यवायप्रसङ्गः, न च लौकिकेन न्यायेन शास्त्रीया दृष्टिर्नियन्तुं युक्तेति। अत्रोच्यते, निर्धारिते शास्त्रार्थे एतदेवं स्यात्, सन्दिग्धे तु तस्मिन् तन्निर्णयं प्रति लौकिकोऽपि न्याय आश्रीयमाणो न विरुध्यते, तेन चोत्कृष्टदृष्ट्यध्यासे शास्त्रार्थेऽवधार्यमाणे निकृष्टदृष्टिमध्यस्य प्रत्यवेयादिति श्लिष्यते। प्राथम्याच्चादित्यादिशब्दानां मुख्यार्थत्वमविरोधात् ग्रहीतव्यम्। तैः स्वार्थवृत्तिभिरवरुद्धायां बुद्धौ पश्चादवतरतो ब्रह्मशब्दस्य मुख्यवृत्त्या सामानाधिकरण्यासम्भवात् ब्रह्मदृष्टिविधानार्थतैवावतिष्ठते। इतिपरत्वादपि ब्रह्मशब्दस्यैष एवार्थो न्याय्यः। तथा हि ब्रह्मेत्यादेशः ब्रह्मेत्युपासीत ब्रह्मेत्युपास्त इति च सर्वत्रेतिपरं ब्रह्मशब्दमुच्चारयति शुद्धांस्त्वादित्यादिशब्दान्। अतश्च यथा शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्तिवचन एव शुक्तिकाशब्दः रजतशब्दस्तु रजतप्रतीतिलक्षणार्थः प्रतीत्यैव हि केवलं रजतमिति न तु तत्र रजतमस्ति, एवमत्राप्यादित्यादीन् ब्रह्मेति प्रतीयादिति गम्यते। वाक्यशेषोऽपि च द्वितीयानिर्देशेनादित्यादीनेवोपास्तिक्रियया व्याप्यमानान् दर्शयति "स य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते" (छा०,३।१९). "यो वाचं ब्रह्मेत्युपास्ते" (छा०७।५।१) "यः सङ्कल्पं ब्रह्मेत्युपास्ते" (छा०७।५।२) इति। यत्तूक्तं ब्रह्मोपासनमेवात्रादरणीयं फलवत्त्वायेति, तदयुक्तं उक्तेन न्यायेनादित्यादीनामेवोपास्यत्वावगमात्। फलन्त्वतिथ्याद्युपासन इवादित्याद्युपासनेऽपि ब्रह्मैव दास्यति सर्वाध्यक्षत्वात्। वर्णितञ्चैतत्, "फलमत उपपत्तेः" इत्यत्र (वे०सू०।३।२।३८)। ईदृशञ्चात्र ब्रह्मण उपास्यत्वं यत्प्रतीकेषु तद्दृष्ट्यध्यारोपणं प्रतिमादिष्विव विष्ण्वादीनाम्"।

तत्फलविशेषोऽपि तत्र निर्णीतो यथा

"अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽदोषात् तत्क्रतुश्च" सू० "स्थितमेतत् कार्यविषया गतिर्न परविषयेति। इदमिदानीं सन्दिह्यते, किं सर्वान् विकारालम्बनानविशेषेणैवामानवः पुरुषः प्रापयति ब्रह्मलोकम् उत कांश्चिदेवेति। किं तावत् प्राप्तं सर्वेषामेवैषां विदुषामन्यत्र परस्मात् ब्रह्मणो गतिः स्यात्। तथा हि "अनियमः सर्वासाम्" इत्यत्राविशेषेणैषा विद्यान्तरेष्ववतारितेत्येवं प्राप्ते प्रत्याह "अप्रतीकालम्बनानिति। प्रतीकालम्बनान् वर्जयित्वा सर्वानन्यान् विकारालम्बनान्नयति ब्रह्मलोकमिति बादरायण आचार्यो मन्यते। न ह्येवमुभयथाभावाभ्युपगमे कश्चित् दोषोऽस्ति। अनियमन्यायस्य प्रतीकव्यतिरिक्तेष्वप्युपासनेषूपपत्तेः। तत्क्रतुश्चास्योभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः। यो हि ब्रह्मक्रतुः स ब्राह्ममैश्वर्यमासीदेदिति श्लिष्यते "तं यथा यथोपासते तदेव भवन्ति" इति श्रुतेः। न तु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति प्रतीकप्रधानत्वादुपासनस्य। नन्वब्रह्मक्रतुमानपि ब्रह्म गच्छतीति श्रूयते यथा पञ्चाग्निविद्यायाम् "स एतान् ब्रह्म गमयति" इति। भवतु यत्रैवमपवाद उपलभ्यते, तदभावे त्वौत्सर्गिकेण तत्क्रतुन्यायेन ब्रह्मक्रतूनामेव तत्प्राप्तिर्नेतरेषामिति मन्यते" भा० "विशेषञ्च दर्शयति" सू० "नामादिषु प्रतीकोपासनेषु पूर्वस्मात् पूर्वस्मात् फलविशेषमुत्तरस्मिन्नुत्तरस्मिन्नुपासने दर्शयति 'यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति' "वाग्वाव नाम्नो भूयसी यावद्वाचो गतं तत्रास्य यथा कामचारो भवति" "मनो वाव वाचो भूयः" इत्यादिना। स चायं फलविशेषः प्रतीकतन्त्रत्वादुपासनानामुपपद्यते, ब्रह्मतन्त्रत्वे तु ब्रह्मणोऽविशिष्टत्वात् कथं फलविशेषः स्यात्। तस्मान्न प्रतीकालम्बनानामितरैस्तुल्यफलत्वमिति" भा०। वत्सन्धस्य ४पुत्रभेदे भाग० ९।२।१३

प्रती(ति)कार पु० प्रति+कृ घञ् दीर्घः। १कृतापकारस्य प्रत्यपकारे वैरनिर्यातने अमरः २रोगनिवारणोपाये चिकित्सायाम् शब्दमा०। [अमरः। अस्य नित्यसमासः। मेघप्रतीकाशः।

प्रती(ति)काश पु० प्रति+काश-अच् वा दीर्घः। उपमायाम्

प्रतीकाश्व पु० भानुमतस्य पुत्रभेदे भाग० ९।१२।६

प्रतीक्षा स्त्री प्रति+ईक्ष-भावे अङ्। अपेक्षायाम्। भावे ल्युट्। प्रतीक्षण तत्रार्थे न०।

प्रतीक्ष्य त्रि० प्रति+ईक्ष-कर्मणि ण्यत्। १पूज्ये २अपेक्षणीये च "प्रतीक्ष्यं तत् प्रतीक्ष्यायै पितृष्वस्रे प्रतिश्रुतम्" इति माघः।

प्रती(ति)घात पु० प्रति+हन-भावे घञ् वा दीर्घः। प्रतिघाते

प्रतीची स्त्री प्रत्यच्+स्त्रियां ङीप् अल्लोपे दीर्घः। पश्चिमायां दिशि यदपेक्षया सूर्य्योऽस्ताचलसन्निहितः या दिक् सा तदपेक्षया तस्य प्रतीची कथा० उप० वृत्तिः।

प्रतीचीन त्रि॰ प्रतीचि भवः प्रत्यच्+ख अल्लोपे दीर्घः। १प्रत्यग्भवे २पश्चिमदिग्भवे च। स्वार्थे ख। ३प्रतीचि पदार्थे हेमच॰। शत॰ब्रा॰ ५।२।४।२० प्रतीचीनफलम्।

प्रतीच्य त्रि॰ प्रतीचि भवः प्रत्यच्—भवार्थे यत्। १प्रत्यग्भवे २पुलस्त्यमातरि स्त्री भा॰उ॰११६अ॰। ३अन्तर्हिते त्रि॰ निघण्टुः। [मनुः ४।१६।४ श्लो॰।

प्रतीच्छक त्रि॰ प्रतिगता इच्छा यस्य प्रा॰ब॰ कप्। ग्राहके

प्रतीत त्रि॰ प्रति+इण—क्त। १ख्याते २ज्ञाते अमरः। ३हृष्टे ४सादरे च राजनि॰। ५विश्वदेवगणभेदे पु॰भा॰अनु॰८१अ॰

प्रतीति स्त्री प्रति—इण—भावे क्तिन्। १ज्ञाने २ख्यातौ ३आदरे ४हर्षे च।

प्रतीतोद पु॰ "ऊर्द्ध्वं यावन्मात्राक्षरमभ्यासवत् तस्य द्यच्चरान् पदादीन् प्रतीतोदा इत्याचक्षते" इत्युक्तेऽर्थे।

प्रतीन्धक पु॰ विदेहदेशे रामा॰ अयो॰ ७१।८ श्लो॰।

प्रतीप त्रि॰ प्रतिगता आपोऽत्र अच्समा॰ नि॰ प्रतिप+पृषो॰ वा। १प्रतिकूले चन्द्रवंश्ये २नृपभेदे पु॰ हेमच॰। प्रतिपशब्दे दृश्यम्। ३अलङ्कारभेदे अलङ्कारशब्दे ३८८पृ॰ दृश्यम्। क्तान्ते परेऽन्तोदात्ततास्य वा परनिपातः प्रतीपकृतः कृतप्रतीप इति वा। स्वार्थे क। ४तत्रार्थे। ५हर्य्यश्वन्टपपुत्रयदोः पुत्रे भाग॰ ६।१२।१२ तत्र प्रतिपक इति पाठान्तरम् तत्रार्थे। ततः सुखा॰ अस्त्यर्थे इनि। प्रतीपकिन् तद्युते त्रि॰ स्त्रियां ङीप्। सुखादिपाठात् ततः ठन्मतुपौ न स्तः।

प्रतीपदर्शिन् त्रि॰प्रतीपं वामं पश्यति दृश—णिनि। १प्रतिकूलदर्शके स्त्रियां ङीप्। सा च २स्त्रियाम् अमरः।

प्रतीपाश्व पु॰ राजभेदे विष्णुपु॰।

प्रतीर न॰ प्रतीर्य्यते प्र+तीर—क। १तटे तीरे अमरः। २भौत्यमनुपुत्रभेदे मार्क॰पु॰ १००अ॰।

प्रतीवाप पु॰ प्रति+वप—घञ् दीर्घः। १गलितस्वर्णादेरयचूर्णने अमरः। २पेयौषधिभेदे औषधविशेषसंयोगभेदे च "तत्र वीरतर्वादिसिद्धं जलमूषकादि प्रतीवापं पाययेत्" सुश्रुतः। [भाग॰ ५।१५।२

प्रतीह पु॰ भरतवंश्ये सुवर्चलाया जाते परमेष्ठिनः पुत्रभेदे

प्रतुद पु॰ प्र+तुद-क। खगभेदे "हारीतो धवलः पाण्डुचित्रपक्षो हृहच्छुकः। पारावतः खञ्जरीटः पिकाद्याः प्रतुदाः स्मृताः"। "प्रतुदा भक्षयन्त्येते तुण्डेन प्रतुद्यातः" "प्रतुदा मधुराः पित्तकफघ्नास्तुवरा हिमाः। लघवो बद्धवर्चस्का किञ्चिद्वातकराः स्मृताः" भावप्र॰।

प्रतूर्त्त त्रि॰प्र+तूर-वेगे क्त। १प्रकृष्टवेगान्विते भावे क्त। २प्रकृष्टवेगे न॰। ततो गोपदादि॰मत्वर्थे वुन्। प्रतूर्त्तक तद्युते त्रि॰

प्रतूलिका स्त्री प्रकृष्टं तूलमत्र कप् कापि अतइत्त्वम् (तोषक) शय्याभेदे काशी॰७अ॰। {निदण्डे (चावुक) अमरः।

प्रतोद पु॰ प्रतुद्यतेऽनेन प्र+तुद—करणे घञ्। अश्वादिताड़-

प्रतोली स्त्री प्र+तुल—अच् गौरा॰ङीष्। १रथ्यायाम् २पुराभ्यन्तरवर्त्मनि अमरः ३अट्टादौ निर्मिते ३पथि च भरतः।

प्रतोष पु॰प्र+तुष—भावे घञ्। १सन्तोषे प्रकृष्टस्तोषोऽस्य प्रा॰ब॰ २सन्तोषयुते त्रि॰। ३स्वायम्भुवमनोः पुत्रभेदे पु॰ भाग॰ ४।१।७ श्लो॰। [पुराणनामसु निघण्टुः।

प्रत्न त्रि॰ पुराणार्थे प्र+भवार्थे त्न। १पुरातने अमरः।

प्रत्यंशु त्रि॰प्रतिगतोंऽशुम् अत्या॰स॰। १प्राप्तांशुके। तत्पुरुषे अंशा॰ अन्तोदात्ततास्य। प्रतिगतोंऽशुर्येन प्रा॰ब॰। २प्रतिगतांशुके त्रि॰ तत्पुरुषे इत्युक्तेः बहुव्रीहौ नान्तोदात्तता।

प्रत्यक्चेतन पु॰प्रतीपं विपरीतमञ्चति जानाति प्रति+अन्च॰ क्विप् कर्म॰। १सांख्यमतसिद्धे पुरुषे। "ततः प्रत्यक्चेतनाधिगमः अन्तरायाभावश्च" योगसू॰ भाष्यम्। प्रत्येकम् अञ्चति अश्नुते कर्म॰। सर्वज्ञे २अन्तरात्मनि परमेश्वरे तदभिन्ने ३जीवे च प्रत्यक्शब्दे दृश्यम्। [अमरः

प्रत्यक्पर्णी स्त्री प्रत्यञ्चि पर्णान्यस्याः ङीप्। १अपामार्गे

प्रत्यक्पुष्पी स्त्री प्रत्यक् पुष्पमस्याः ङीप्। अपामार्गे अमरः

प्रत्यक्श्रेणी स्त्री प्रतीची श्रेणीव अस्याः समासान्तविधेरनित्यत्वात् न कप्। १दन्तीवृक्षे २मूषिकपर्ण्याञ्च अमरः।

प्रत्यक्ष अव्य॰ अक्ष्णः लक्षणम् "लक्षणेनाभिप्रती" पा॰ लक्षणार्थे प्रतिनाऽव्ययी॰ शरदा॰ अच्समा॰ अक्षिशब्देन इन्द्रियमात्रम उच्यते। १इन्द्रियलक्षणे ततोऽस्त्यर्थे अच्। २इन्द्रियसन्निकर्षजन्ये ज्ञाने न॰। इन्द्रियाणाञ्च ज्ञानमात्रं प्रत्येव सन्निकर्षद्वारा हेतुत्वात् तथार्थत्वम्। ततः अस्त्यर्थे पुनः अर्श आद्यच्। ३प्रत्यक्षविषये त्रि॰। प्रत्यक्षत्वं च ज्ञानत्वव्याप्यजातिविशेषः तल्लक्षणन्तु इन्द्रियार्थसन्निकर्षोत्पन्नज्ञानत्वमिति नैयायिकाः। अधिकमपरोक्षशब्दे २३५ पृ॰ दृष्टशब्दे च ३६७२ पृ॰ दृश्यम्। वेदान्तमते तल्लक्षणन्तु "तत्तदिन्द्रिययोग्यवर्त्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम्। स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति वर्त्तमानयोग्यत्वं विषयस्य प्रत्यक्षत्वम्" वेदा॰प॰। तच्च लौकिकालौकिकभेदात् द्विधा।

प्रत्यक्षदर्शन त्रि॰ प्रत्यक्षेण पश्यति दृश–ल्यु। साक्षिणि साक्षाद्दर्शिनि शब्दमाला। णिनि। प्रत्यक्षदर्शिन् तत्रार्थे त्रि॰ स्त्रियां ङीप्।

प्रत्यक्षलवण न॰ प्रत्यक्षं पृथक्तयोपलभ्यमानं लवणम्। पाकनिष्पत्त्युत्तरं व्यञ्जनादौ दीयमानलवणे। तस्य श्राद्धे वर्ज्यतोक्ता यथा श्रा॰त॰ ब्रह्मपु॰ “शिवाः कृताश्च ये भक्ताः प्रत्यक्षलवणीकृताः” श्राद्धे तस्य वर्ज्यतयोक्तेः “शिवाः कृताः सिद्ध्युत्तरकालं प्रत्यक्षलवणप्रक्षेपकृताः” श्रा॰त॰ रघु॰। तत्रैव विष्णुना श्राद्धवर्ज्येषु “आरनालस्यैव नियासाः प्रत्यक्षलवणानि च” इत्युक्तम्। शु॰त॰ ब्रह्मपु॰ “सैन्धवं लवणं चैव यच्च सामुद्रकं भवेत्। पवित्रे परमे ह्येते प्रत्यक्षेऽपि च नित्यशः”। “पृथक्तयोपलभ्यमानं लवणं प्रत्यक्षलवणं न तु व्यञ्जनादिसंस्कारकं संस्कारप्रत्यक्षयोर्भेदात्” शु॰त॰रघु॰। वस्तुतः सैन्धवादेरपि प्रत्यक्षलवणत्वेऽभक्ष्यता आर्द्रकादियोगे प्रतिप्रसवः न तु सिद्ध्युत्तरकालप्रक्षेपेऽपि प्रतिप्रसवः। अतः सिद्ध्युत्तरकालं लवणमात्रस्यैव प्रक्षेपे सर्वत्र भक्षणे दाने च निषेधः इति बोध्यम्।

प्रत्यक्षवादिन् पु॰ प्रत्यक्षमेव प्रमाणतया वदति वद–णिनि। चार्वाके चार्वाकशब्दे २८२१पृ॰ दृश्यम्।

प्रत्यक्षिन् त्रि॰ प्रत्यक्षमस्त्यस्य इनि। १साक्षाद्द्रष्टरि व्यक्तं द्रष्टार्थे त्रिका॰ स्त्रियां ङीप्।

प्रत्यक्स्रोतस् पु॰ प्रत्यक् प्रतीचीगामि स्रोतो यस्य। १पश्चिमदिग्वाहिनि नदे “प्राक्स्रोतसो नद्यः प्रत्यक्स्रोतसो नद्या नर्मदां विना” माघ ४।६६श्लो॰ व्याख्यायां मल्लिनाथधृतवाक्यम्। २नर्मदायां स्त्री भा॰ व॰ ८८अ॰। प्रतीचि प्रत्यगात्मनि स्रोतश्चित्तप्रवाहोऽस्य। प्रत्यगात्मैकावलम्बिचित्तवृत्तियुते ३यतिभेदे पु॰।

प्रत्यगात्मन् प्रतीचो जीवस्यात्मा स्वरूपम्। १परमेश्वरे ब्रह्मचैतन्ये भागव॰३।२४।४५ श्रीधरः। “कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्” कठो॰ भाष्ये तु अन्यथोक्तं यथा “प्रत्यक् चासावात्मा चेति प्रत्यगात्मा प्रतीच्येवात्मशब्दो रूढो लोके नान्यस्मिन् व्युत्पत्तिपक्षेऽपि तत्रैवात्मशब्दो वर्त्तते। “यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्त्यते” इत्यात्मशब्दव्युत्पत्तिस्मरणात्। तं प्रत्यगात्मानं स्वस्वभावमैक्षत्पश्यतीत्यर्थः” “स्वस्वभावं स्वस्वरूपमित्यर्थः” आनन्दगिरिः।

प्रत्यगाशापति पु॰ ६त॰। पश्चिमदिक्पाले वरुणे हलायुधः

प्रत्यगुदच् स्त्री प्रतीच्या उदीच्याश्च अन्तराला दिक् ब॰व॰। पश्चिमोत्तरदिशोरन्तरालायां विदिशि वायुकोणे आश्व॰ श्रौ॰ २।६।४।

प्रत्यग्र त्रि॰ प्रतिगतमग्रमयनम् अत्या॰स॰। १नूतने २शोधिते च अमरः। उपरिचरनृपवंश्ये ३कुरुपुत्रे नृपभेदे पु॰ भाग॰ ८।२२।४

प्रत्यग्रथ पु॰ अहिच्छत्रदेशे हेमच॰। तत्र भवः तस्य राजा वा “साल्वावयवप्रत्यग्रथकालकूटाश्मकादिञ्” पा॰ इञ्। प्रात्यग्रथि तत्र भवे तद्भूपे च।

प्रत्यग्रह पु॰ चेदिदेशराजे नृपभेदे भा॰आ॰ ६३अ॰।

प्रत्यङ्ग न॰प्रतिगतमङ्गम् अत्या॰स॰। अङ्गानुगताङ्गभेदे अङ्गस्याङ्गभेदे कर्णादौ “ललाटान्यन्तराधिसक्थिबाहुशिरांसि तदवयवाः प्रत्यङ्गानि” सुश्रुतः। अङ्गशब्दे ७०पृ॰ दृश्यम्। [भेदे हरिवं॰ ३अ॰।

प्रत्यङ्गिरस् पु॰ चाक्षुषमन्वन्तरे आङ्गिरसे एकस्मिन् ऋषि-

प्रत्यङ्गिरा स्त्री देवीभेदे “अथ प्रत्यङ्गिरां वक्ष्ये परकृत्यानिबर्हिणीम्” इत्यादिना मन्त्रमहोदधौ २०तरङ्गे तत्प्रयोग उक्तः।

प्रत्यङ्मुख त्रि॰ प्रत्यङ् मुखं यस्य। पश्चिमाभिमुखे “श्रियं प्रत्यङ्मुखो भुङ्क्ते” मनुना तन्मुखभोजने श्रीलाभः फलमुक्तम्। कर्मविशेषे सायंसन्ध्यावन्दने च तन्मुखता विहिता स्मृतौ दृश्या।

प्रत्यच्(ञ्च्) पु॰ प्रत्यञ्चति अन्च–क्विप् विच् वा। १स्वात्मनि प्रत्यगात्मशब्दे दृश्यम्।२पश्चिमे देशे ३काले च ४पश्चिमायां दिशि स्त्री ङीप् भत्वे अलोपे दीर्घः प्रतीची। एवं शसादावचि प्रतीचः प्रतीचेत्यादि। विचि तु नलोपाभावात् न तथा प्रत्यञ्चः प्रत्यञ्चा इति। ततः सप्तम्यर्थे अस्ति तस्य लोपः। प्रत्यक् ५सप्तम्यर्थवृत्तौ पश्चिमदिग्देशकालादौ अव्य॰। [सुश्रुतः।

प्रत्यञ्जन न॰ प्रतिरूपमनुरूपमञ्जनं प्रा॰स॰। अनुरूपाञ्जने

प्रत्यनन्तर त्रि॰ प्रतिप्राप्तमनन्तरम् अत्या॰स॰। प्रत्यासन्ने सन्निकृष्टे मनुः १०.८०।

प्रत्यनीक पु॰प्रतिकूलमनीकं यस्य प्रा॰ब॰। १रिपौ २विघ्ने हेम॰ उपचारात् ३प्रतिवादिनि ४अलङ्कारभेदे न॰ अलङ्कारशब्दे ४०१ पृ॰ दृश्यम्।

प्रत्यनुमान न॰ प्रतिरूपमनुमानं प्रा॰त॰। प्रतीपानुमाने यथा पर्वतो वह्निमान् धूमादिति वादिनोक्ते पर्वतो वह्न्यभा-

वशात् पाषाणमयत्वादिति" प्रतिवादिनः प्रतिपक्षानुमानम् ।

प्रत्यन्त पु० प्रतिगतोऽन्तम् अत्या०स० । १म्लेच्छदेशे २सन्निकृष्टे त्रि० अमरः ।

प्रत्यन्तपर्वत पु० प्रत्यन्तः सन्निकृष्टः पर्वतः । वृहत्पर्वतसमीपस्थे पर्वते हेमच० ।

प्रत्यभिज्ञा स्त्री प्रतिगता अभिज्ञाम् अत्या०स० । १अभिज्ञातुल्ये तज्जन्यसंस्कारसहकारेण जनिते प्रत्यक्षभेदे यथा सोऽयं देवदत्त इत्यादि । तत्स्वरूपादिकं विवरणप्रमेयसंग्रहे निर्णीतं यथा

"ननु केयं प्रत्यभिज्ञा नाम न तावदेकस्यातीतवर्त्तमानकालद्वयसम्बन्धविषयं प्रत्यक्षज्ञानं प्रत्यभिज्ञा, प्रत्यक्षज्ञानस्य वर्त्तमानमात्रार्थग्राहित्वात् । पूर्वानुभवसंस्कारसहितादिदानीन्तनवस्तुप्रमितिकारणाज्जातस्य तस्य तथात्वमिति चेत् एवमप्यात्मनि सोऽहमिति प्रत्यभिज्ञा न सिध्येत् नित्ये स्वयंप्रकाशे तस्मिन् संस्कारस्य जन्यज्ञानस्य वाऽसम्भवात् । नापि स्वरूपज्ञानमेव प्रत्यभिज्ञा तस्य प्रदीपप्रभावत् वर्त्तमानार्थप्रकाशिनः पूर्वापरपरामर्शात्मकत्वायोगात्, अस्मन्मते तु सोऽहमित्याकारद्वयोपप्लुतं ज्ञानद्वयमेतच्च प्रत्यभिज्ञा । तस्मादनया दुर्निरूपया प्रत्यभिज्ञया कथमैक्यसिद्धिः । उच्यते । केवले चिदात्मनि जन्यज्ञानतत्संस्कारयोरसम्भवेऽप्यन्तःकरणविशिष्टे तत्सम्भवादुक्ता प्रत्यभिज्ञा किं न स्यात् । न च विशिष्टस्य प्रत्यभिज्ञाविषयत्वे तस्यैव प्रत्यभिज्ञातृत्वमपीति कर्मकर्त्तृविरोधः शङ्कनीयः, सर्ववादिनां देहव्यतिरिक्ताद्यनुमानविषयतयात्मनि कर्मकर्त्तृभावस्य संप्रतिपन्नत्वात् । अथ मतं नानुमानादौ विषयस्य कर्मकारकत्वम् अतीतादेरनुमाने विषयस्याविद्यमानस्य ज्ञानजनकत्वायोगात् विषयत्वन्त्वविद्यमानस्यापि कथञ्चित् सम्भविष्यति ज्ञानस्य तदाकारत्वात् अतोऽनुमानादौ कर्त्तृत्वमेवात्मनः, प्रत्यक्षे तु विषयस्य ज्ञानजनकतया कर्मकारकत्वम् अतो विरोधस्तदवस्थ इति नैवम् अन्तःकरणविशिष्टतयैवात्मनः प्रत्यभिज्ञातृत्वं पूर्वापरकालविशिष्टतया च प्रत्यभिज्ञेयत्वमित्युपाधिभेदेनाविरोधात् । किमेतावता प्रयासेन प्रत्यभिज्ञैव मा भूदिति चेत् न, सोऽहमिति प्रत्यभिज्ञायाः स्वानुभवसिद्धत्वात् अविसंवादित्वेन च भ्रान्तित्वायोगात् । यदुक्तं सोऽहमित्याकारद्वयोपप्लुतं ज्ञानद्वयमिति तदसत् तथ सति विज्ञानं क्षणिकमित्यत्रापि ज्ञानद्वयप्रसङ्गेन विज्ञानस्य क्षणिकत्वासिद्धिप्रसङ्गात् । विज्ञानमात्रवादिनां क्षणिकत्वादिधर्मा अवाच्या एवेति चेत् तर्हि स्थायित्वादिधर्मा एव वाच्या उपादीयन्तां सोऽहमित्याद्यनुभवानुसारित्वात् । यत्तु प्राभाकरा मन्यन्ते सोऽहमितिप्रत्यभिज्ञायां 'विषयत्वेनाश्रयेनात्मा सिद्ध्यति किं तर्हि सोऽयं घट इत्यादिप्रत्यभिज्ञाश्रयत्वेनेति, तदयुक्तं पूर्वापरकालविशिष्टस्य क्षणमात्रवृत्तिप्रत्यभिज्ञाश्रयत्वासम्भवेन प्रत्यभिज्ञया स्थायित्वासिद्धिप्रसङ्गात् । अथ मतं मम संवेदनं जातमिति इदानीमनुभूयमाना पूर्वकालीना घटादिसंवित् स्वाश्रयं तदानीन्तनमात्मानं साधयति स्मृतिश्च स्वाश्रयमिदानीन्तनमात्मानं साधयति ततश्च स्थाय्यात्मसिद्धिः न पुनरप्रामाणिकं सोऽहमित्यात्मविषयकं प्रत्यभिज्ञानं किञ्चित् कल्पनीयमिति चेत् नैतत् सारम् स्मृतिपूर्वानुभवौ ह्यभिज्ञाद्वयवत्तत्कालीनमात्मानं यद्यपि साधयतः तथाप्येकस्यात्मनः कालद्वयसम्बन्धो न केनापि सिध्यति । संविद्द्वयमेव सम्बन्धस्यापि साधकमिति चेत् तर्हि तथैव घटादिष्वपि स्थायित्वसिद्धौ तत्सिद्धये प्रत्यभिज्ञा नापेक्ष्येत । दार्ढ्याय प्रत्यभिज्ञेति चेत् एवमपि प्रकृते संविद्द्वयं किं साक्षात्सम्बन्धस्य साधकमुत प्रत्यभिज्ञामुत्पाद्य, आद्ये न तावदेकैकं तत्साधकम् एकैकस्य कालद्वयविशिष्टात्मन्यनाश्रितत्वात् नापि संभूय तत्साधकम्, अतीतानुभवस्य वर्त्तमानस्मृतेश्च यौगपद्यायोगात् । द्वितीये स्थाय्यात्मविषयं सोऽहमिति प्रत्यभिज्ञानं त्वयैवाङ्गीकृतं स्यात् । न च वाच्यं क्वचिदपि न ज्ञानविषयत्वमात्मनस्तत्कथं प्रत्यभिज्ञाविषयत्वमिति । मम संवेदनं जातमिति स्मृतिज्ञानविषयत्वात् यद्यप्यनेन स्मृतिज्ञानेन स्वोत्पत्तिकालीन आत्मा स्वाश्रयत्वेनैव प्रकाश्यते न विषयत्वेन तथापि स्मर्य्यमाणसंवेदनाश्रयभूतस्तत्संवेदनकालीन आत्मा विषयीक्रियत एव । अथोच्यते स्मृत्या संवेदनमेव विषयीक्रियते तच्च संवेदनं स्मृतं सत् स्वाश्रयमात्मानमाश्रयतयैव प्रत्याययिष्यतीति तदसत् स्मृतिकाले संवेदनस्याविद्यमानस्य स्वाश्रयसाधकत्वायोगात् । स्वयंप्रकाशमानं हि संवेदनमाश्रयं साधयति न तु स्मृतिविषयतया परप्रकाश्यम् अन्यथा धर्मादीनामपि परतः सिद्धानां स्वाश्रयात्मसाधकत्वप्रसङ्गात् । तस्मादतीतकालीन आत्मा स्मृतिविषय एवेत्यभ्युपेयम् । तथा च सोऽहमिति प्रत्यभिज्ञाप्यात्मानं विषयीकरिष्यतीति प्राभाकरैरप्यात्मविषयप्रत्यभिज्ञयैव संविदात्मना क्षणिकत्वं निराकरणीयम्" ।

प्रत्यभिज्ञादर्शन न० प्रत्यभिज्ञायाः दर्शनम् शास्त्रम् । माहे-

श्वरशास्त्रभेदे तन्मतं च सर्वदर्शनसंग्रहे दर्शितं यथा "अन्यापेक्षाविहीनानां जडानां कारणत्वं दुष्प्रतीत्य- परितुष्यन्तो मतान्तरमन्विष्यन्तः परमेश्वरेच्छावशादेव जगन्निर्माणं परिघुष्यन्तः स्वसंवेदनोपपत्त्यागमसिद्धप्रत्यगात्मतादात्म्यो, नानाविधमानमेयादिभेदाभेदशाली परमेश्वरोऽनन्यमुखप्रेक्षित्वलक्षणस्वातन्त्र्यभाक् स्वात्मदर्पणे भावान् प्रतिबिम्बवदवभासयेदिति भणन्तो बाह्याभ्यन्तरचर्य्याप्राणायामादिक्लेशप्रयासकलावैधुर्य्येण सर्वसुलभमभिनवं प्रत्यभिज्ञामात्रं परापरसिद्ध्युपायमभ्युपगच्छन्तः परे माहेश्वराः प्रत्यभिज्ञाशास्त्रमभ्यस्यन्ति। तस्येयत्तापि न्यरूपि परीक्षकैः "सूत्रं वृत्तिर्विवृतिर्लघ्वी बृहतीत्युभे विमर्शिन्यौ। प्रकरणविवरणपञ्चकमिति शास्त्रं प्रत्यभिज्ञायाः" तत्रेदं प्रथमं सूत्रम्। "कथञ्चिदासाद्य महेश्वरस्य दास्यं जनस्याप्युपकारमिच्छन्। समस्तसम्पत्समवाप्तिहेतुं तत्प्रत्यभिज्ञामुपपादयामि" इति। कथञ्चिदिति परमेश्वराभिन्नगुरुचरणारविन्दयुगलसमाराधनेन परमेश्वरघटितेनैवेत्यर्थः आसाद्येति आ समन्तात् परिपूर्णतया सादयित्वा स्वात्मोपभोग्यतां निरर्गलां गमयित्वा तदनेन विदितवेद्यत्वेन परार्थशास्त्रकरणेऽधिकारो दर्शितः अन्यथा प्रतारणमेव प्रसजेत्। मायोत्तीर्णा अपि महामायाधिकृता विष्णुविरिञ्च्याद्या यदीयैश्वर्य्यलेशेनेश्वरीभूताः स भगवाननवच्छिन्नप्रकाशानन्दस्वातन्त्र्यपरमार्थो महेश्वरः तस्य दास्यं दीयतेऽस्मै स्वामिना सर्वं यथाभिलषितमिति दासः परमेश्वरस्वरूपस्वातन्त्र्यपात्रमित्यर्थः। जनशब्देनाधिकारिविषयनियमाभावः प्रादर्शि। यस्य यस्य हीदं स्वरूपकथनं तस्य तस्य महाफलं भवति प्रधानस्यैव परमार्थफलत्वात्। तथोपदिष्टं शिवदृष्टौ परमगुरुभिर्भगवत्सोमानन्दनाथपादैः "एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः। ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना। करणेन नास्ति कृत्यं क्वापि भावनया सकृत्। ज्ञाते सुवर्णे करणं भावनां वा परित्यजेत्" इति। अपिशब्देन स्वात्मनस्तदभिन्नतामाविष्कुर्वता पूर्णत्वेन स्वात्मनि परार्थसम्पत्त्यतिरिक्तप्रयोजनान्तरावकाशश्च पराकृतः। परार्थश्च प्रयोजनं भवत्येव तल्लक्षणयोगात् न ह्ययं दैवशापः स्वार्थ एव प्रयोजनं न परार्थ इति। अत एवोक्तमक्षपादेन "यमर्थमधिकृत्य प्रवर्त्तते तत्प्रयोजनम्" इति। उपशब्दः सामीप्यार्थः तेन जनस्य परमेश्वरसमीपताकरणमात्रं फलम् अत एवाह समस्तेति परमेश्वरतालाभे हि सर्वाः सम्पदस्तन्निष्यन्दमय्यः सम्पन्ना एव रोहणाचललाभे रत्नसम्पद इव। एवं परमेश्वरतालाभे किमन्यत् प्रार्थनीयम्। तदुक्तमुत्पलाचार्य्यैः "भक्तिलक्ष्मीसमृद्धानां किमन्यदुपयाचितम्। एतया वा दरिद्राणां किमन्यदुपयाचितम्" इति। इत्थं षष्ठीसमासपक्षे प्रयोजनं निर्दिष्टम्। बहुव्रीहिपक्षे-तूपायः समस्तस्य बाह्याभ्यन्तरस्य नित्यसुखादेर्या सम्पत्सिद्धिः तथात्वप्रकाशः तस्याः समवाप्तिर्यस्याः प्रत्यभिज्ञायाः हेतोः सा तथोक्ता तस्य महेश्वरस्य प्रत्यभिज्ञा प्रतिसन्धानाभिमुख्येन ज्ञानम्। लोके हि स एवायं चैत्र इति प्रतिसन्धानेनाभिमुखीभूते वस्तुनि ज्ञानं प्रत्यभिज्ञेति व्यवह्रियते इहापि प्रसिद्धपुराणसिद्धागमानुमानादिज्ञातपरिपूर्णशक्तिके परमेश्वरे सति स्वात्मन्यभिमुखीभूते तच्छक्तिप्रतिसन्धानेन ज्ञानमुदेति नूनं स एवेश्वरोऽहमिति। तामेतां प्रत्यभिज्ञामुपपादयामि उपपद्यः सम्भवतीति तत्समर्थाचरणेन प्रयोजनव्यापारेण सम्पादयामीत्यर्थः। यदीश्वरस्वभाव एवात्मा प्रकाशते तर्हि किमनेन प्रत्यभिज्ञाप्रदर्शनप्रयासेनेति चेत् तत्रायं समाधिः स्वप्रकाशतया सततमवभासमानेऽप्यात्मनि मायावशात् भागेन न प्रकाशते पूर्णतावभाससिद्धये दृक्क्रियात्मकशक्त्याविष्करणेन प्रत्यभिज्ञा प्रदर्श्यते। तथा च प्रयोगः अयमात्मा परमेश्वरो भवितुमर्हति ज्ञानक्रियाशक्तिमत्त्वात् यो यावति ज्ञाता कर्त्ता च स तावतीश्वरः प्रसिद्धेश्वरवत् राजवद्वा आत्मा च विश्वज्ञाता कर्त्ता च तस्मादीश्वरोऽयमिति अवयवपञ्चकस्याश्रयणं मायावादेन नैयायिकमतस्य कक्षीकारात्। तदुक्तमुदयकरसूनुना "कर्त्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे। अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः। किन्तु मोहवशादस्मिन् दृष्टेऽप्यनुपलक्षिते। शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते"। तथा हि "सर्वेषामिह भूतानां प्रतिष्ठा जीवदाश्रया। ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतम्। तत्र ज्ञानं स्वतः सिद्धं क्रिया कायाश्रिता सती। परैरप्युपलक्ष्येत तयाऽन्यज्ज्ञानमुच्यते" इति। "या चैषां प्रतिभा तत्तत्पदार्थक्रमरूषिता। अक्रमानन्दचिद्रूपः प्रमाता स महेश्वरः" इति च। सोमानन्दनाथपादैरपि "सदा शिवात्मना वेत्ति सदा वेत्ति मदात्मना" इत्यादि। ज्ञानाधिकारपरिसमाप्तावपि "तदैक्येन विना नास्ति संविदां लोकपद्धतिः। प्रकाशैक्यात्तदेकत्वं

मातैकः स इति स्थितः। स एवार्थस्वयत्वेन नियतेन महेश्वरः। विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः" इति। विवृतं चाभिनवगुप्ताचार्य्यैः "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति" श्रुत्या प्रकाशचिद्रूपमहिम्ना सर्वस्य भावजातस्य भासकत्वमभ्युपेयते ततश्च विषयप्रकाशस्य नीलप्रकाशः पीतप्रकाश इति विषयोपरागभेदाद्भेदः। वस्तुतस्तु देशकालाकारसङ्कोचवैकल्यादभेद एव स एव चैतन्यरूपः प्रकाशः प्रमातेत्युच्यते। तथा च पठितं शिवसूत्रेषु "चैतन्यमात्मेति"। तस्य चिद्रूपत्वमनवच्छिन्नविमर्शत्वमनन्योन्मुखमानन्दैकघनत्वं माहेश्वर्य्यमिति पर्य्यायः स एव ह्ययं भावात्मा विमर्शः शुद्धे पारमार्थिक्यौ ज्ञानक्रिये तत्र प्रकाशरूपता ज्ञानं, स्वतो जगन्निर्मातृत्वं क्रिया। तच्च निरूपितं क्रियाधिकारे "एष चानन्तशक्तित्वादेवमाभासयत्यमून्। भावानिच्छावशादेषा क्रिया निर्मातृताऽस्य तु"। उपसंहारेऽपि "इत्थं तथा घटपटाद्याकारजगदात्मना। तिष्ठासोरेवमिच्छैव हेतुकर्तृकृता क्रियेति। तस्मिन् सतीदमस्तीति कार्य्यकारणतापि या। अप्यपेक्षाविहीनानां जडानां नोपपद्यते" इति न्यायेन यतो जडस्य न कारणता न वा अनीश्वरस्य चेतनस्यापि तथात्वेन तेन जगद्गतजन्मस्थित्यादिभावविकारतत्तद्दिक्रियासहस्ररूपेण स्वातन्त्र्यमिच्छाः स्वतन्त्रस्य भगवतो महेश्वरस्यैवोत्तरोत्तरमच्छस्वभावा क्रिया विश्वकर्तृत्वं बोध्यते इति। इच्छामात्रेण जगन्निर्माणमित्यत्र दृष्टान्तोऽपि स्पष्टं निर्दिष्टः "योगिनामपि मृद्बीजं विनैवेच्छावशेन यत्। घटादि जायते तत्तत् स्थिरस्वार्थक्रियाकरम्" इति। यदि घटादिकं प्रति मृदादेः परमार्थतः कारणं स्यात्तर्हि कथं योगीच्छामात्रेण घटादिजन्म स्यात्। अथोच्येत अन्य एव मृद्बीजादिजन्या घटाङ्कुराद्यो योगीच्छाजन्यास्त्वन्या एवेति तत्रापि बोध्यसे सामग्रीभेदात्तावत् कार्य्यभेद इति सर्वजनप्रसिद्धम्। ये तु वर्णयन्ति नोपादानं विना घटाद्युत्पत्तिरिति योगी त्विच्छया परमाणून् व्यापारयन् सङ्घटयतीति तेऽपि बोधनीयाः। यदि परिदृष्टकार्य्यकारणभावविपर्य्ययो न लभ्येत तर्हि घटे मृत्पिण्डचक्रादि देहे स्त्रीपुरुषसंयोगादि सर्वमपेक्ष्येत तथा च योगीच्छासमनन्तरसञ्जातघटदेहादिसम्भवो दुःसमर्थ एव स्यात्। चेतन एव तु तथा भाति भगवान् भूरिभगो महादेवो नियतिमनुवर्त्तमानो घनतरस्वातन्त्र्य इति पक्षे न काचिदनुपपत्तिः। अत एवोक्तं वसुगुप्ताचार्य्यैः "निरुपादानसम्भारमभित्तावेव तन्वते। जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने" इति। ननु प्रत्यगात्मनः परमेश्वराभिन्नत्वे संसारसम्बन्धः कथं भवेदिति चेत्तत्रोक्तमागमाधिकारे "एष प्रमाता मायान्धः संसारी कर्मबन्धनः। विद्यादिज्ञापितैश्वर्य्यश्चिद्घनो मुक्त उच्यते" इति। ननु प्रमेयस्य प्रमातृभिन्नत्वे बद्धमुक्तयोः प्रमेयं प्रति को विशेषः? अत्राप्युत्तरमुक्तं तत्त्वार्थसंग्रहाधिकारे "मेयं साधारणं मुक्तः स्वात्माभेदेन मन्यते। महेश्वरो यथा बद्धः पुनरत्यन्तभेदवत्" इति। अस्यात्मनः परमेश्वरत्वं स्वाभाविकं चेत्तर्हि प्रत्यभिज्ञाप्रार्थनया न हि बीजमप्रत्यभिज्ञातं सति सहकारिसाकल्ये अङ्कुरं नोत्पादयति। तस्मात् कस्मादात्मप्रत्यभिज्ञाने निर्बन्ध इति चेदुच्यते। शृणु तावदिदं रहस्यं द्विविधा ह्यर्थक्रिया बाह्याङ्कुरादिका प्रमातृविश्रान्तिचमत्कारसारा प्रीत्यादिरूपा च तत्राद्या प्रत्यभिज्ञानं नापेक्षते द्वितीया तु तदपेक्षत एव। इहाप्यहमीश्वर इत्येवम्भूतचमत्कारसारा परापरसिद्धिलक्षणजीवन्मुक्तिमहाविभूतिरूपाऽर्थक्रियेति स्वरूपप्रत्यभिज्ञानमपेक्षणीयम्। ननु प्रमातृविश्रान्तिसारार्थक्रिया प्रत्यभिज्ञानेन विना दृष्टा सती तस्मिन् दृष्टेति क इष्टम्। अत्रोच्यते नायकगुणगणसंश्रवणप्रवृद्धानुरागा काचन कामिनी मदनविह्वला विरहक्लेशमसहमाना मदनलेखावलम्बेन स्वावस्थानिवेदनानि विधत्ते तथा वेगात्तस्मिन्निकटमटत्यपि तस्मिन्नवलोकितेऽपि तदवलोकनं तदीयगुणपरामर्शाभावे जनसाधारणत्वं प्राप्ते हृदयङ्गमभावं न लभते। यदा तु दूतीवचनात्तदीयगुणपरामर्शं करोति तदा तत्क्षणमेव पूर्णभावमत्येति। एवं स्वात्मनि विश्वेश्वरात्मना भासमानेऽपि तन्निभालनं तदीयगुणपरामर्शविरहसमयं पूर्णं भावं न सम्पादयति यदा तु गुरुवचनादिना सर्वज्ञत्वसर्वकर्तृत्वादिलक्षणपरमेश्वरोत्कर्षपरामर्शो जायते तदा तत्क्षणमेव पूर्णात्मलाभः। तदुक्तं चतुर्थे विमर्शे "तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा। लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो नैवायं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता" इति। अभिनवगुप्तादिभिराचार्य्यैर्विहितप्रतानोऽप्ययमर्थः संग्रहप्रक्रमभावेदस्माभिर्विस्तरभिया न प्रतानित इति सर्वं शिवम्।

प्रत्यभियोग पु० प्रतिरूपोऽभियोगः प्रा०स०। अभियुक्तेन प्रतिवादिना अभियोगिनं प्रति अभियोगान्तरकरणे।

प्रत्यभिवाद पु० प्रति+अभि+वद–णिच्-घञ्। अभिवादकस्य तत्प्रतिरूपे आशीर्वचनादौ। भावे ल्युट्। प्रत्यभिवादन मप्यर्थे न०। तत्प्रकारः मनुना कुल्लूकभट्टेन च दर्शितो यथा "आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने। अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः। यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम्। नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः" "अभिवादने कृते प्रत्यभिवादयिता अभिवादको विप्रादिः आयुष्मान् भव सौम्येति वाच्यः। अस्य चाभिवादकस्य यन्नाम तस्यान्ते योऽकारादिः स्वरो नाम्नामकारान्तत्वनियमाभावात् स प्लुतः कार्यः स्वरापेक्षयैवाकारान्तत्वं व्यञ्जनान्तेऽपि नाम्नि सम्भवति स्वरान्तस्य च व्यञ्जनान्ते नाम्नोऽसम्भवात् आह पूर्वाक्षर इति। पूर्वनामगतमक्षरं संश्लिष्टं यस्य स पूर्वाक्षरः तेन नामाक्षरं पदस्य चाकारादिः स्वरः प्लुतः कार्यः। एतच्च वाक्यस्य टेः प्लुत उदात्तः इत्यस्यानुवृत्तौ "प्रत्यभिवादेऽशूद्रे" इति प्लुतं स्मरन् पाणिनिः स्फुटमुक्तवान्। व्याख्यातञ्च वृत्तिकृता वामनेन टेरिति किं व्यञ्जनान्तस्यैव टेः प्लुतो यथा स्यादिति। तस्मादीदृशं प्रत्यभिवादनवाक्यम् आयुष्मान् भव सौम्य! शुभशर्मन्३। एवं क्षत्रियस्य बलवर्मन्३ एवं वैश्यस्य वसुभूते३" "प्लुतो राजन्यविशां वेति कात्यायनवचनात् क्षत्रियवैश्ययोः पक्षे प्लुतो न भवति। शूद्रस्य प्लुतो न कार्यः अशूद्रे इति पाणिनिवचनात्। "स्त्रियामपि निषेध" इति कात्यायनवचनात् स्त्रियामपि प्रत्यभिवादनवाक्ये न प्लुतः"।

प्रत्यभिस्कन्दन न० प्रति+अभि+स्कन्द–भावे ल्युट्। प्रत्यभियोगे त्रिका०।

प्रत्यय पु० प्रति+इण–भावकरणादौ अच्। १अधीने २शपथे ३ज्ञाने ४विश्वासे प्रामाण्येन निश्चये ५हेतौ ६छिद्रे ७शब्दभेदे अमरः। ८आचारे ९ख्याते मेदि०। १०निघ्ने ११स्वादुनि हेमच० १२यज्ञकारिकारणे त्रिका०। शब्दभेदप्रत्ययलक्षणन्तु शब्दश० प्रका० उक्तं यथा "वाचकात् यथा निर्वक्ति "इतरार्थानवच्छिन्ने स्वार्थे यो बोधकाक्षमः। तिङर्थस्य निभाद्यन्यः स वा प्रत्यय उच्यते"। यः शब्दः शब्दान्तरार्थाविशेषिते वाच्यस्वार्थे धर्मिणि तिङर्थान्वयबोधने अक्षमोऽयोग्यः स वा निभादिशब्देभ्यो भिन्नत्वाद्यर्थे प्रत्यय इत्यर्थः। चैत्रोऽस्तीत्यादावर्थान्तरानवच्छिन्ने स्वार्थे नाम्नां तिङर्थान्वयबोधकत्वम्। एवं यजेत स्थीयेतेत्यादौ यजादिधातूनाम्। पचतीत्यादौ तिङां पाचकोऽस्तीत्यादौ कृतां कामयितुरित्यादौ च तद्धितानाम् प्रकृत्यर्थावच्छिन्ने एव स्वार्थे कृत्यादौ तिङर्थस्य वर्त्तमानत्वादेर्बोधकत्वं न तु तदनवच्छिन्ने इति न तेष्वप्रसङ्गः। निभनिपातादिकस्तु शब्दान्तरार्थानवच्छिन्ने घटपटत्वादिस्वार्थे तिङर्थोद्यान्वयं प्रति अक्षमायोग्योऽपि निभादिरेवेति न तत्र प्रसङ्गः"।

वैयाकरणमते तु यथाभिलषणं शब्दार्थरत्ने उक्तं यथा "प्रत्ययस्तु प्रकृतिमवधीकृत्य विधीयमानः स्वार्थबोधकः शब्दविशेषः प्रकृतिशब्ददर्शितभाष्योक्तेः। "स्वीयमर्थं प्रत्याययतीति" प्रत्ययलक्षणे भाष्योक्त्या च तथैवावगम्यते। अवधिश्च पूर्वापररूपो ग्राह्यः तेन वहुचि नाप्रसङ्गः तस्यापि प्रकृत्यवधिकत्वेन विधीयमानत्वात्। सिद्धान्ते तु वृत्तिघटकानां समुदायशक्तिस्वीकारेण बहुजादेर्निरर्थकतया सुब्ध्यप्रत्ययत्वाभावादेव पूर्वत्वरूपावधित्वप्रवेशेऽपि न क्षतिः। अतएव प्रकृतिशब्दोक्तहरिकारिकायां "प्रत्ययः पर" इत्यनेन परत्वेन विधीयमानस्य प्रत्ययत्वमुक्तं तस्य च सुब्ध्यत्वद्योतनार्थं स्वार्थकत्वसाकाङ्क्षत्वकथनाय च इतरद् विशेषणम् तथा च तदर्थान्वितस्वार्थबोधने तदपेक्षत्वे सति तदवधिकत्वेन विधीयमानत्वं तत्प्रत्ययत्वमिति फलितोऽर्थः। अन्वितत्वञ्च विशेष्यतया विशेषणतया वा ग्राह्यं तेन तिङां धात्वर्थविशेष्यकान्वयस्य बोधकत्वेऽपि न क्षतिः। यदि चावयवशक्तिस्वीकारस्तदा परपदेनावधिमात्रं ग्रहणीयम् अवधिश्च पूर्वापरान्यतरएव निवेशनीयः। एवञ्च प्रत्ययनिमित्तकप्रकृत्यङ्गकार्यविशेषे विकरणागमादीनां प्रत्ययत्वस्वीकारेण परत्वमात्रं प्रत्ययत्वमिति बोध्यम्। अथवा प्रत्यय इत्यधिकृत्य पञ्चमाध्यायसमाप्तेर्विधीयमानत्वं पारिभाषिकप्रत्ययत्वं तत्रैव अर्थबोधकत्वे सतीति विशेषणे सुब्ध्यप्रत्ययत्वसामान्यलक्षणं पर्यवस्यति तत्तत्प्रत्ययत्वन्तु क्रमेण। स्वार्थिकप्रत्ययानामपि प्रकृत्यर्थानुवादितया स्वार्थबोधकत्वमतएवाभिहितं वाक्यपदीये "स्वार्थिकाः प्रत्ययाः केचित् प्रकृत्यर्थानुवादिनः" इति। एतदनुरोधेनैव शेखरादौ अस्वप्रकृत्यन्यतरप्रत्यायकत्वं प्रत्ययानामुक्तम्। विकरणादयः पुनः सर्वथा निरर्थकाः तेषां द्योतकत्वाद्यनङ्गीकारात् तद्व्यतिरेकेणापि लडादौ धातुमात्रादेवार्थप्रतीतेर्दर्शनात्। उक्तञ्च वाक्यपदीये "यत्र वाऽव्यभिचारेण तयोः शक्तिप्रकल्पनम्। नियमस्तत्र

नियमो न त्वेवं यवनृपवादिष्विति"। यत्र ययोरव्यभिचारेणान्वयव्यतिरेकाभ्यां, नियमः अर्थप्रतीतिनियमस्तयोः प्रकृतिप्रत्यययोः शक्तिकल्पनम्। यत्र चैवं न नियमस्तत्र यवनृपवादिषु नेत्यस्यादृत्या शक्तिकल्पनं नेत्यर्थः"। १२विष्णौ पु० "प्रत्ययः सर्वदर्शनः" विष्णुस०। तस्य ज्ञानरूपत्वात् तथात्वम् भाष्ये दृश्यम्। प्रत्ययश्च बुद्धिरात्मगुण इति नैयायिकाः। महत्तत्त्वधर्म इति सांख्याः। "एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टीनाम्" सां०का०। "प्रतीयतेऽनेनेति प्रत्ययो बुद्धिस्तस्य सर्गः तत्र विपर्ययोऽज्ञानमविद्या च बुद्धिधर्मः अशक्तिरपि करणवैकल्यहेतुका बुद्धिधर्म एव तुष्टिसिद्धी अपि वक्ष्यमाणे बुद्धिधर्मावेव, तत्र विपर्ययाशक्तितुष्टिषु यथायोगं सप्तानां धर्मादीनां ज्ञानवर्जमन्तर्भावः सिद्धौ च ज्ञानस्येति" त०कौ०। कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति न्यायात् सर्गपदं सृज्यमानपरं तथा चाविद्यादेर्बुद्धिधर्मत्वात् तत्सृष्टत्वम्।

प्रत्ययकारिन् त्रि०प्रत्ययं करोति कृ—णिनि। १विश्वासकारके स्वमतत्त्वसूचके २मुद्राभेदे(मोहर)त्रिका०। [च अमरः

प्रत्ययित त्रि० प्रति+अय—क्त। १आप्ते २विश्वस्ते ३प्रतिगते

प्रत्यरा स्त्री प्रतिनिहिताः अराः प्रा०स०। अराद्याढ्र्याय उपनिहिते कीलके "शतार्धारं विंशतिप्रत्यराभिः" श्वेताश्व०उ० "पूर्वोक्तानामराणां दाढ्र्याय ये प्रतिविधीयन्ते कीलकास्ते प्रत्यरा इत्युच्यन्ते" भाष्ये उक्तम्।

प्रत्यरि पु०प्रति+ऋ—इन्। १शत्रौ २जन्मतारातः पञ्चमचतुर्दशत्रयोविंशतितारके "जन्म सम्पद्विपत् क्षेमं प्रत्यरिः साधको वधः। मित्रं परममित्रं च जन्मादीनि त्रिधा पुनः" ज्यो०त०। "तारा पुनः पापाख्या त्रिविधा पञ्चचतुर्दशत्रयोविंशतिस्त्रियुता। सिद्धिफला वृद्धिकरी विनाशसंज्ञा क्रमात् कथिता" ज्यो०त०। तेन तृतीयस्यैव विशेषत आवश्यककार्यादौ निषेधात् त्याज्यता आद्ययोर्द्वयोस्तु प्रतिप्रसवः इति द्रष्टव्यम् "प्रत्यरौ लवणं दद्यादिति" दानमपि तृतीयप्रत्यरावेवेति विवेचनीयम्।

प्रत्यर्थिन् त्रि० प्रत्यर्थयते प्रति+अर्थ—पीडने णिनि। १शत्रौ अमरः। प्रतिकूलमर्थयते णिनि, प्रतिपक्षः अर्थिनः प्रा० स० वा। व्यवहारे २प्रतिवादिनि शब्दर०। "प्रत्यर्थिनोऽग्रतो लेख्यं प्रतिज्ञातार्थसाधनम्" याज्ञ०।

प्रत्यर्पण न० प्रति+ऋ—णिच्-पुक्-ल्युट्। प्रतिदाने गृहीतस्य धनादेः पुनर्दाने प्रतिसमर्पणे।

प्रत्यवनेजन न० प्रतिरूपमवनेजनम् प्रा०स०। श्राद्धाङ्गे प्रथमजलादिदानरूपानुरूपे पिण्डोपरि क्रियमाणे पुनरवनेजने तच्च छन्दोगेतरपरं यथोक्तम् "छन्दोगानान्तु पिण्डपात्रप्रक्षालनेन पूर्ववदवनेजनम्। यथा छन्दोगपरिशिष्टं "तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत्" अत्राप्यवनेजयेदिति श्रुतेर्द्वितीयावनेजनेऽपि अवनेनिक्ष्वेति वक्तव्यं न तु प्रत्यवनेनिक्ष्वेति" श्रा०त० रघु०।

प्रत्यवमर्श पु० प्रति+अव—मृश—भावे घञ्। अनुसन्धाने "स्मृतिः प्रत्यवमर्शश्च तेषां जात्यन्तरेऽभवत्" हरिवं०२१अ०

प्रत्यवमर्ष पु० प्रति+अव+मृष—क्षान्तौ भावे घञ्। सहने "स्वल्पसङ्करः सपरिहारः सप्रत्यवमर्षः" पञ्चशिखाचार्यः। "स्वल्पसङ्करः ज्योतिष्टोमादिजन्मनः प्रधानापूर्वस्य स्वल्पेन पशुहिंसादिजन्मनाऽनर्थहेतुना अपूर्वेण सङ्करः, सपरिहारः कियतापि प्रायश्चित्तेन परिहर्त्तुं शक्यः। अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्मविपाकसमये च पच्यते तथापि यावदसावनर्थं सूते तावत् स प्रत्यवमर्षः प्रत्यवमर्षेण सहिष्णुतया सह वर्त्तत इति मृष्यन्ते हि पुण्यसम्भारोपनीतस्वर्गसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकाम्" त०कौ०। भावे ल्युट्। प्रत्यवमर्षण तत्रार्थे न०।

प्रत्यवर त्रि० प्रतिरूपोऽवरः प्रा०स०। अतिनिकृष्टे "प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि। प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः" मनुः।

प्रत्यवरोह पु० प्रति+अव+रुह—घञ्। (नामा) अवरोहे ल्युट्। प्रत्यवरोहण तत्रार्थे न०।

प्रत्यवसान न० प्रति+अव+सो—क्त। भोजने हेमच०।

प्रत्यवसित त्रि० प्रति+अव+सो—कर्मणि क्त। भुक्ते अमरः।

प्रत्यवस्कन्द पु० प्रति+अव+स्कन्द—करणे घञ्। व्यवहारे उत्तरभेदे उत्तरशब्दे १०६०पृ० दृश्यम्। करणे ल्युट्। प्रत्यवस्कन्दन तत्रार्थे न०।

प्रत्यवस्था स्त्री प्रति+अव+स्था—भावे अङ्। १प्रतिपक्षतया व्यवस्थाने। भावे ल्युट्। प्रत्यवस्थान तत्रार्थे न०। "साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानम्" गौ०त०

प्रत्यवस्थातृ त्रि० प्रति+अव+स्था—तृच्। १प्रतिपक्षतया अवस्थातरि प्रतिवादिनि। २शत्रौ हेम०।

प्रत्यवहार पु०प्रति+अव-हृ—भावे घञ्। १संहारे रघुः ४।४४ २युद्धार्थमुद्युक्तानां सैन्यानां युद्धात् निवारणे भा०व० २८३अ०।

प्रत्यवाय पु॰ प्रति+अव+इण–करणे अच्। १पापे “अननु- ष्ठितं तथा चान्ये प्रत्यवायस्य मन्यते” जावालिः। भावे अच्। २वैपरीत्याचरणे मनुः ४।२४५।

प्रत्यवेक्षण न॰ प्रति+अव+ईक्ष–भावे ल्युट्। पूर्वापरालो- चने २एतावत्कृतमेतावत् न कृतमित्यर्थानुसन्धाने च। प्रति+अव+ईक्ष–भावे अ। प्रत्यवेक्षा तत्रार्थे स्त्री रघुः १७।५२।

प्रत्यश्मन् पु॰ प्रतिरूपः अश्मा प्रा॰स॰। गैरिके हेम॰।

प्रत्यष्ठीला स्त्री सुश्रुतोक्ते अष्ठीलातुल्ये रोगभेदे “अष्ठीला- वद्घनं ग्रन्थिमूर्द्ध्वमायतमुन्नतम्। वाताष्ठीलां विजानी- याद्बहिर्मार्गावरोधिनीम्। एतामेव रुजायुक्तां वात- विण्मूत्ररोधिनीम्। प्रत्यष्ठीलामिति वदेज्जठरे तिर्य्यगु- त्थिताम्”।

प्रत्याकार प्रतिकृत आकारः खड्गाकारो येन प्रा॰ब॰। खड्गकोषे त्रिका॰।

प्रत्याख्यात त्रि॰ प्रति+आ+ख्या–कर्मणि क्त। १निराकृते २दूरीकृते अमरः।

प्रत्याख्यान न॰ प्रति+आ+ख्या–भावे ल्युट्। निराकरणे अमरः। [(फिरे आसा) हरिवं॰ १२५अ॰।

प्रत्यागति स्त्री प्रति+आ+गम–भावे क्तिन्। प्रत्यागमने

प्रत्यागम पु॰ प्रति+आ+गम–भावे अप्। (फिरे आसा) तस्मात् गतस्तस्मिन् पुनरागमने “तीर्थात् प्रत्यागमेऽपि च” प्रा॰त॰। भावे ल्युट्। प्रत्यागमन तत्रार्थे न॰।

प्रत्यादिष्ट त्रि॰ प्रति+आ+दिश–कर्मणि क्त। निरस्ते अमरः

प्रत्यादेश पु॰प्रति+आ+दिश–भावे घञ्। १निराकरणे अमरः भक्तान् प्रति आदेशः। २भक्तान् प्रति अभीष्टसिद्ध्यर्थं देवतादेशे च।

प्रत्याधान न॰ प्रतिपत्त्या धीयते प्रति+आ+धा–कर्मणि ल्युट्। १मस्तके “यो ह वै शिरः साधानं प्रत्याधानम्” शत॰ब्रा॰ १४।५।२।१ भाष्यम्। “मस्तकस्य सर्वदेहेभ्यः- यवेषु आधीयमानत्वात् तथात्वम्। भावे ल्युट् प्रा॰स॰। २द्वितीयाधाने न॰।

प्रत्याध्मान पु॰ वातव्याधिभेदे। तस्य लक्षणमाह “वि- मुक्तपार्श्वहृदयं तदेवामाशयोत्थितम्। प्रत्याध्मानं वि- जानीयात् कफव्याकुलितानिलम्”। [illegible] पार्श्वे हृदये च [illegible] कफव्याकु- लितानिलं रूपेणावरुद्धवातम्” भावप्र॰।

प्रत्यापत्ति स्त्री प्रति+आ+पद–भावे क्तिन्। वैराग्ये या॰ धा॰ २६१ श॰ नीलकण्ठः। २पुनरागमने च।

प्रत्याम्नान त्रि॰ प्रतिरूपतया आम्नायते प्रति+आ+म्ना– कर्मणि ल्युट्। प्रतिनिधौ “यजमानकर्त्तृत्वेन विधी- यन्ते प्रत्याम्नानाय ऋत्विजो निवर्त्तन्ते” कात्या॰ श्रौ॰ १।६।१२ पद्धतौ।

प्रत्याम्नाय पु॰ प्रतिरूपतया आम्नायते प्रति+आ+म्ना– कर्मणि घञ्। प्रतिनिधित्वेन विधीयमाने।

प्रत्यायक त्रि॰प्रति+इ–ण्वुल्। १विश्वासकारके २बोधके च।

प्रत्यायन न॰ प्रति+आ+इ–णिच् “णौ गमिरबोधने” पा॰ उक्तेः न गमादेशः भावे ल्युट्। १बोधने २विश्वासज- नने भा॰अनु॰२४४८ श्लो॰।

प्रत्यारम्भ पु॰ प्रतिरूप आरम्भः प्रा॰स॰। आरम्भ इव पश्च तु आरम्भे मलपहशब्दे २५६२ पृ॰दृश्यम्।

प्रत्यालीढ न॰ धन्विनां युद्धाद्येवस्थितिभेदे आलीढविपरी- तरूपतया स्थितौ आलीढशब्दे ८२४ पृ॰ दृश्यम्।

प्रत्यावर्त्तन न॰ प्रति+आ+वृत–णिच्–वा भावे ल्युट्। १प्रतिनिवृत्तौ २प्रतिनिवारणे च।

प्रत्याशा स्त्री किञ्चित् वस्तु प्रति+आशा प्रा॰स॰। किञ्चि- द्वस्तु प्रति वाञ्छायाम्।

प्रत्याश्राव पु॰ प्रति+आ+श्रु–णिच्–अच्। १उद्दिश्य श्रावणे कर्मणि अच्। २अस्तुश्रौषडिति मन्त्रे यजु॰१८।२४वेददी॰

प्रत्याश्रावण न॰ प्रति+आ+श्रु–णिच् भावे ल्युट्। अग्नीध्र- कर्तृके अध्वर्युं प्रति मन्त्रविशेषस्य आमन्त्रणे शत॰ब्रा॰ १२।२।१८ भाष्ये दृश्यम्। [नार्थमाश्रावने।

प्रत्याश्वासन न॰प्रति+आ+श्वस–णिच्–भावे ल्युट्। सान्त्व-

प्रत्यासत्ति स्त्री प्रति+आ–सद–भावे क्तिन्। १नैकट्ये न्या- यमते २अलौकिकप्रत्यक्षजनके सम्बन्धमात्रे “आसत्तिरा- श्रयाणान्तु” भाषा॰ “आसत्तिः प्रत्यासत्तिः” सि॰मु॰।

प्रत्यासन्न त्रि॰ प्रति+आ+सद–क्त। १अतिनिकटस्थे जटा॰ २सम्बद्धे च।

प्रत्यास(सा)र पु॰ प्रति+आ+सृ–आधारे घञ् अप् वा। अजन्तः १सैन्यपश्चाद्भागे घञन्तः तत्रार्थे अमरः। यत्र व्यूहस्य पश्चाद्व्यूहान्तरं क्रियते २तत्रार्थे भरतः।

प्रत्यास्वर पु॰प्रत्यास्वरति प्रति+आ+स्वृ–अच्। १प्रत्यागते अस्तमयात् पुनः २प्रत्यागते आदित्ये च “स्वर इतीमं (प्राणम्) आचक्षते स्वर इति प्रत्यास्वर इति अमुम् (आदित्यम्) छा॰उ॰। “किञ्च स्वर इतीमं प्राणमाचक्षते कथयन्ति तथा स्वर इति प्रत्यास्वर इति अमुं सवितार- म्। यस्मात् प्राणः स्वरत्येव न पुनर्मृतः प्रत्यागच्छति।

कविता लक्षयित्वा पुनरप्यन्यश्चन्यत्र प्रत्यावर्त्तते । अतः प्रत्याहारोऽस्मादुयतो नामतश्च समानमितरेतरं प्राणादिभ्यो" भा० । [विषयेभ्यो निवारणे ।

प्रत्याहरण न० प्रति+आ+हृ–भावे ल्युट् । १चित्तेन्द्रियादेः

प्रत्याहार पु० प्रति+आ+हृ–भावे घञ् । चित्तेन्द्रियादेः विषयेभ्यो निवारणे योगाङ्गभेदे तल्लक्षणं च अष्टाङ्गयोगशब्दे ५२४पृ० उक्तं तत्कालसमानञ्च "प्राणायामाहृतं तेन प्रत्याहार उदाहृतः" काशीख०४१अ० उक्तम् । "स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः" पात०सू० "स्वविषयसम्प्रयोगाभावे चित्तस्वरूपानुकार इवेति चित्तनिरोधे चित्तवन्निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवदुपायान्तरमपेक्षन्ते । यथा मधुकरराजं मक्षिका उत्पतन्तमनूत्पतन्ति निविशमानमनुविशन्ति तथेन्द्रियाणि चित्तनिरोधे निरुद्धानीत्येष प्रत्याहारः" भा० । "ततः परमा वश्यतेन्द्रियाणाम्" पात०सू० "शब्दादिष्वव्यसनमिन्द्रियजय इति केचित् सक्तिर्व्यसनं व्यस्यत्येनं श्रेयस इति अविरुद्धा प्रतिपत्तिर्न्याय्या शब्दादिसम्प्रयोगः स्वेच्छयेत्यन्ये रागद्वेषाभावे सुखदुःखशून्यं शब्दादिज्ञानमिन्द्रियजय इति केचित् चित्तैकाग्र्यादप्रतिपत्तिरेवेति जैगीषव्यः । ततश्च परमा त्वियं वश्यता यच्चित्तनिरोधे निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवत् प्रयत्नकृतमुपायान्तरमपेक्षन्ते योगिनः इति" भा० ।

अत्र चित्तस्यैव प्रत्याहारेऽन्येन्द्रियस्य प्रत्याहारोऽर्थसिद्ध इति बोध्यम् तत्फलञ्च । मनुना उक्तम् "प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान्" । प्रत्याह्रियन्ते संक्षिप्य गृह्यन्ते वर्णा अनेन प्रति+आ+हृ–करणे घञ् । "आदिरन्त्येन सहेता" पा०सूत्रेण २ततसंज्ञायां च यथा "अण् इति अ इ उ" इति वर्णानां ग्रहणम् एवं सुप् तिङ्प्रभृतिष्वपि स्वादीनां तिबादीनाञ्च ग्रहणमिति । "प्रत्याहारैश्चितां न ग्रहणमिति" तेन अच् प्रत्याहारे अकारस्य न ग्रहणम् बोध्यम् । भावे घञ् । ३उपादाने पु० अमरः । [वाक्येन २निराकृते च ।

प्रत्युक्त त्रि० प्रति+वच–कर्मणि क्त । १उत्तरिते प्रतिवा-

प्रत्युक्ति स्त्री प्रति+वच–भावे क्तिन् । प्रतिवाक्यकथने शब्दर० ।

प्रत्युज्जीवन न० प्रति+उद्+जीव–भावे ल्युट् । पुनर्जीवने मरणोत्तरं पुनर्जीवने । "रसविच्छेदहेतुत्वात् मरणं नैव वर्ण्यते । वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरतः" सा०द० । यथा कादम्बरीपत्ने तद्वर्णनम् ।

प्रत्युत अव्य० प्रति–उत द्व० । १स्वपक्षस्थापनाय परपक्षनिराकरणाय वा उक्तस्य तद्वैपरीत्यभावे २वैपरीत्यमात्रे च "न दोषः पुनरुक्तोऽपि प्रत्युतेयमलङ्क्रिया" काव्याद० ।

प्रत्युत्क्रम पु० प्रति+उद्+क्रम–घञ् न वृद्धिः । १युद्धार्थोद्योगे २प्रधानप्रयोजनोद्देशेनाप्रधानारम्भे च अमरः । क्तिन् । प्रत्युत्क्रान्ति तत्रार्थे स्त्री क्षीरस्वामी ।

प्रत्युत्तर न० प्रतिरूपमुत्तरस्य प्रा०स० । उत्तरस्योत्तरवाक्ये वादिनोपन्यस्तपक्षस्य तद्विरुद्धपक्षप्रतिपादके वाक्ये ।

प्रत्युत्थान न० प्रति+उद्+स्था–ल्युट् । अभ्युत्थाने आगतस्य सम्माननार्थमासनादुत्थितौ "प्रत्युत्थानाभिवादाभ्यां पुनस्तत्प्रतिपद्यते" मनुः ।

प्रत्युत्पन्नमति त्रि० प्रत्युत्पन्ना तत्कालोचिता मतिर्यस्य । १तत्कालोचितबुद्धौ हेमच० । २प्रतिभान्विते जटा० । अनागतविधातृशब्दे १५४पृ० दृश्यम् ।

प्रत्युदाहरण न० प्रतिकूलमुदाहरणं प्रा०स० । उदाहरणस्य वैपरीत्येन उदाहरणे । "अन्तर्वत्पतिवतोर्नुक्" पा० सू० इत्तौ अन्तर्वत्नी पतिवत्नीत्युदाहृत्य "प्रत्युदाहरणन्तु अन्तरस्त्यस्यां शालायां घटः । पतिमती पृथिवी" सि०कौ० ।

प्रत्युद्गम पु० प्रति+उद्+गम–घञ् न वृद्धिः । १प्रत्युत्थाने (आगाड़ियाओया) प्रतिगमने २च भावे ल्युट् । प्रत्युद्गमन तत्रार्थे न० ।

प्रत्युद्गमनीय न० प्रति+उद्+गम–अनीयर् । १धौतवस्त्रयुग्मे अमरः "गृहीतप्रत्युद्गमनीयवस्त्रा" इति कुमारे पाठान्तरं प्रत्युद्गमनीयवस्त्रेति न रुहत्वम् । २अभ्युत्थानयोग्ये पूजनीये च त्रि० ।

प्रत्युन्नमन न० प्रतिकूलमुन्नमनं प्रा०स० । उन्नमनप्रतिकूले अवनमने । "अङ्गुल्याऽवपीडिते प्रत्युन्नमनम्" सुश्रुत० व्रणचिकित्साङ्गक्रियोक्तौ ।

प्रत्युपकार पु० प्रतिरूपः उपकारः प्रा०स० । १कृतोपकारेण कृते उपकारकस्य उपकारानुरूपे हिताचरणे ।

प्रत्युपदेश पु० प्रतिरूपः उपदेशः प्रा०स० । १उपदेशकस्य प्राप्तोपदेशेन कृते शिक्षाभेदे कुमा० १।२४

प्रत्युपहार पु० प्रतिरूप उपहारः प्रा०स० । अनुरूपे उपहारे उपढौकनीये द्रव्ये ।

प्रत्युरस अव्य० उरसि विभक्त्यर्थेऽव्ययी० । "प्रत्युरसः समीपस्थात्" पा० अच् समा० । उरसीत्यर्थे । सप्तमीस्थादित्युक्तेः लक्षणाद्यर्थे मतेर्न अच् । प्रत्युरम् इत्येव ।

प्रत्युलूक पु० प्रतिकूल उलूकस्य प्रा०स० । १काके भाग०१।

१४।१४। "प्रत्युलूकः काकः" श्रीधरः। प्रतिरूपः उलूको यस्य कप्। प्रत्युलूकक उलूकाकृतिरूपे पक्षिभेदे "उलूका प्रत्युलूककान्" हरिवं॰ २अ॰।

प्रत्युष पु॰प्रति+उष–दाहे आधारस्य कर्त्तृत्वविवक्षायां क। प्रातःकाले शब्दरत्ना॰।

प्रत्युषस् न॰प्रति+उष–आधारे असुन्। प्रातःकाले अमरः। "याति व्यक्तिं पुरस्तादरुणकिसलये प्रत्युषः पारिजातः" सूर्य्यशतकम्।

प्रत्यूष पु॰ प्रत्यूषति रुजति कामुकान् प्र+ऊष–रुजायां क। १प्रभाते अमरः "प्रत्यूषपवनासारे" हरिवं॰ ८१अ॰। अष्टवसुमध्ये २वसुभेदे च जटा॰। धरशब्दे ३८४७पृ॰ दृश्यम्। ३सूर्य्ये शब्दर॰।

प्रत्यूषस् न॰ प्रति+ऊष–रुजायाम् असुन् ऊषि वा। प्रभाते अमरः "स्नानमभ्यधिकं कार्य्यं प्रत्यूषस्यात्मनो जले" हरिवं॰ १४अ॰। [प्रतिबन्धकत्वात्तथात्वम्।

प्रत्यूह पु॰ प्रति+ऊह–घञ्। विघ्ने अमरः तस्य ऊहां प्रति

प्रत्यृच अव्य॰ऋचमृचं प्रति वीप्सायाम् अव्ययी॰अच् समा॰। एकैकस्यामृचि आश्व॰ ६।४

प्रत्येक अव्य॰ एकमेकं प्रति वीप्सायामव्ययी॰। एकैकस्मिन् वीप्सायुते एकशब्दार्थे।

प्रत्येकबुद्ध पु॰ बुद्धभेदे त्रिका॰।

प्रत्वक्षस त्रि॰ प्र+त्वक्ष–तनूकरणे असुन्। प्रकर्षेण तनूकार्के यत्नुधातिनि ऋ॰ १,८।११ भा॰।

प्रथ ख्यातौ भ्वा॰आ॰अक॰ सेट्। प्रथते अप्रथिष्ट घटा॰णिच् प्रथयति। भावे अङ् प्रथा। [ति अपप्रथत् त।

प्रथ ख्यातौ अद॰विक्षेपे सक॰चुरा॰उभ॰सेट् घटा॰। प्रथयति-

प्रथम त्रि॰ प्रथ–अमच्। १प्रधाने २आद्ये च अमरः। अस्य वा सर्वनामतास्य प्रथमे प्रथमाः। तस्य भावः ष्यञ्। प्राथम्य आद्यत्वे प्राधान्ये च न॰।

प्रथमज त्रि॰प्रथमं जायते जन–ड। १पूर्वजाते २प्रथमगर्भजाते पुंस्त्री॰ यजु॰१६।२६ जन–क्त। प्रथमजात तत्रार्थे त्रि॰

प्रथमवयसिन् त्रि॰ प्रथमवयोऽस्त्यस्य वा॰ इनि साम्नत्वात् न पटत्वम्। प्रथमवयोयुक्ते शत॰ब्रा॰ १२।११७।८स्त्रियां ङीप्।

प्रथमविन्ना स्त्री प्रथमं विन्ना विन्ना लब्धा। प्रथमपरिणीतायां स्त्रियां महिष्यां कात्या॰ १६।१।२।१५

प्रथमसाहस पु॰ "पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः" विष्णु॰ उक्ते सार्द्धशतपणद्वयरूपे दण्डभेदे

प्रथमाङ्गुलि पुंस्त्री॰ कर्म॰। अङ्गुष्ठे "मध्यमं मध्यमाभ्यं प्रथमाङ्गुलियोगतः" प्रथमाङ्गुलिरङ्गुलिः तन्त्रसारः

प्रथमाश्रम पु॰न॰कर्म॰। ब्रह्मचर्य्याश्रमे "शरीरवत्या प्रथमाश्रमो यथा" कुमा॰।

प्रथा स्त्री प्रथ–घटा॰ भावे अङ्। ख्यातौ अमरः।

प्रथित त्रि॰ प्रथ–क्त। १ख्याते अमरः। २स्वारोचिषमनोः पुत्रभेदे पु॰ हरिवं॰ ७अ॰। ३विष्णौ पु॰ "अच्युतः प्रथितः प्राणः" विष्णुस॰।

प्रथिमन् पु॰ पृथोर्भावः पृथु+इमनिच् प्रथादेशः। पृथुत्वे स्थूलत्वे। अतिशयेन पृथुः इमनिच्। अतिशयेन पृथुत्वयुते

प्रथिमिनी स्त्री प्रथिमाऽस्त्यस्याः "संज्ञायां मन्माभ्याम्" पा॰ इनि टिलोपः। पृथुत्वयुतस्त्रीभेदे। असंज्ञायां तु मतुप् मस्य वः। प्रथिमवत् इत्येव स्त्रियां ङीप्।

प्रथिवी स्त्री पृथिवी+पृषो॰। पृथिव्यां भा॰वि॰४४अ॰।

प्रथिष्ठ त्रि॰ अतिशयेन पृथु–इष्ठन् प्रथादेशः। पृथुतरे। तत्रार्थे ईयसुन् प्रथीयस् पृथुतमे स्त्रियां ङीप्।

प्रथु पु॰ प्रथते प्रथ–उन्। विष्णौ "प्राग्दः प्रथवः पद्मः" विष्णुस॰।

प्रथुक पु॰ प्रथ–बा॰ उक। पृथुके चिपिटके रायमुकुटः।

प्रदक्षिण न॰ प्रगतो दक्षिणाम् अत्या॰स॰। दक्षिणपार्श्वोन्नते देवेभ्यः स्वदक्षिणदर्शनेन प्रणामभेदे तच्च प्रणामफलादिकं यथा "प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः। दक्षिणं दर्शयन् पार्श्वं मनसापि च दक्षिणः। सकृत्त्रिर्वा वेष्टयेत्तु देव्याः प्रीतिः प्रजायते। स च प्रदक्षिणो ज्ञेयः सर्वदेवौघतुष्टिदः। अष्टोत्तरशतं यस्तु देव्याः कुर्य्यात् प्रदक्षिणम्। सर्वान् कामान् समासाद्य पश्चान्मोक्षमवाप्नुयात्। मनसापि च यो दद्याद्देव्यै भक्त्या प्रदक्षिणम्। प्रदक्षिणाद्यमष्टके नरकाणि न पश्यति" कालिकापु॰ ७०अ॰। "एकं देव्यां रवौ सप्त त्रीणि कुर्य्याद्विनायके। चत्वारि केशवे कुर्य्यात् शिवे चार्द्धं प्रदक्षिणम्" कर्मलोचनम्। "दक्षिणाद्वायवीं गत्वा दिशं तस्माच्च शाम्भवीम्। ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत्। अर्द्धचन्द्रं महेशस्य पृष्ठतश्च समीरितम्। शिवप्रदक्षिणे मन्त्री अर्द्धचन्द्रक्रमेण तु। सव्यापसव्ययेणैव सोमसूत्रं न लङ्घयेत्"। सोमसूत्रं अभिषेकजलनिःसरणस्थानम्। "प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः। दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणः। त्रिधा च वेष्टयेत् सम्यक् देवतायाः प्रदक्षिणम्" तन्त्रसारः।

प्रदक्षिणित् न॰ प्रदक्षिण+इष्णो॰। प्रदक्षिणशब्दार्थे ऋ॰२।४२।१। भाष्ये दृश्यम्। [प्रदत्ते प्रकर्षेण दत्ते।

प्रदत्त त्रि॰ प्र+दा—कर्मणि क्त वा तादेशाभावे दद्भावः।

प्रदर पु॰ प्र+दृ—भावादौ अप्। १भङ्गे दारणसाधने २बाणे अमरः। ३विदारे ४स्त्रीणां योनिरोगभेदे मेदि॰ तन्नि-दानकर्म च भृगुभारतोक्तं कर्मविपाकशब्दे १७६८ पृ॰ दर्शितम्। स च असृग्दराख्यः स्त्रीणां योनिरोगभेदः। तल्लक्षणादि माधवनिदाने उक्तं यथा

"विरुद्धमद्याध्यशनादजीर्णाद्गर्भप्रपातादतिमैथुनाच्च। यानाध्वशोकादतिकर्षणाच्च भाराभिघाताच्छयनाद्दिवा च। असृग्दरं भवेत् सर्वं साङ्गमर्दं सवेदनम्। तस्यातिवृद्धौ दौर्बल्यं भ्रमो मूर्च्छा मदस्तृषा। दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः"। स च चतुर्विधो यथा "तं श्लेष्मपित्तानिलसन्निपातैश्चतुःप्रकारं प्रवदन्ति वैद्याः। आमं सपिच्छाप्रतिमं सपाण्डु पुलाकतोयप्रतिमं कफात्तु। सपीतनीलासितरक्तमुष्णं पित्तार्त्तियुक्तं भृशवेगि पित्तात्। रूक्षारुणं फेनिलमल्पमल्पं वातार्त्ति वातात् पिशितोदकाभम्। सक्षौद्रसर्पिर्हरितालवर्णं मज्जप्रकाशं कुणपं त्रिदोषात्। तच्चाप्यसाध्यं प्रवदन्ति तज्ज्ञा न तत्र कुर्वीत भिषक् चिकित्साम्"।

प्रदल पु॰ प्रकर्षेण दलति प्र+दल-अच्। बाणे जटा॰

प्रदव पु॰ दुनोति दु-अच् "दुन्योरनुपसर्गे" पा॰ अनुपसर्गे दुन्योः ण च। १प्रकृष्टतापके। भावे अप्। २प्रकृष्टतापे पु॰

प्रदव्य पु॰ प्रदवाय हितं वा॰ यत्। १दावाग्नौ कात्या॰श्रौ॰ २५।४।२२ कर्कः। [२प्रकृष्टदायके त्रि॰।

प्रदा स्त्री प्र+दा—भावे अङ्। प्रकृष्टदाने। कर्त्तरि क।

प्रदान न॰ प्र+दा—भावे ल्युट्। प्रकृष्टदाने "प्रदानं स्वाम्यकारणम्" मनुः।

प्रदि त्रि॰ प्र+दा—"उपसर्गे घोः कि" पा॰ कि। प्रदानकर्त्तरि

प्रदिग्ध त्रि॰ प्र+दिह—कर्मणि क्त। १लिप्ते २अर्जनविशेषयुते मांसे न॰ "मांसं बहुघृतैर्दिग्धं विह्ना चोष्णाम्बुना सह। क्षीराद्यैः समायुक्तं परिशुष्कं तदुच्यते। तदेव घृत ठक्कोडं प्रदिग्धं परिभाषितम्" [illegible]

प्रदिव् [illegible] दीव्यति प्र+दिव-क्विप्। १[illegible] [illegible] ऋ॰ २।[illegible] २पूर्वदिने २।७०।१। [illegible] [illegible]।

प्रदिश् स्त्री दिशोर्मध्यगतं [illegible] दिक् भा॰ब॰। विदिशि दि [illegible] दिशि जटा॰

प्रदीप पु॰ प्र+दीप—अच्। दीपे अमरः। दीपशब्दे ३६०९ पृ॰ दृश्यम्। तत्र हितः अपूपा॰ छ। प्रदीपीय तद्धिते त्रि॰ पक्षे यत्। प्रदीप्य तत्रार्थे

प्रदीपन पु॰ प्रदीप्यते प्र+दीप—ल्यु। १स्थावरे २विषभेदे तल्लक्षणं राजनि॰ उक्तं यथा "वर्णतो लोहितो यः स्यात् दीप्तिमान् दहनप्रभः। महादाहकरः पूर्वैः कथितः स प्रदीपनः"। णिच्—ल्यु। ३प्रकाशके त्रि॰।

प्रदुह् त्रि॰ प्र+दुह—सत्सूद्विषेत्यादिना क्विप् पा॰ प्रकर्षेण दोग्धरि पदत्वेऽस्य हस्य घत्वे दस्य धः। प्रधुक् प्रधुग्भ्यामित्यादि। [न्यग्रोधमिते देशे २भित्तौ च मेदि॰।

प्रदेश पु॰ प्रा॰स॰। १एकदेशमात्रे राजनि॰ २स्थाने तर्ज्ज-

प्रदेशन न॰ प्र+दिश--भावादौ ल्युट्। १उपदेशे कर्मणि ल्युट्। २राजादेरुपढौकने उपहारे(भेटि) द्रव्ये अमरः

प्रदेश(शि)नी स्त्री प्रदिश्यतेऽनया प्र+दिश-करणे ल्युट् ङीप्। तर्जन्यां तया हि वस्तु निर्दिश्यते। प्रदेशः अङ्गुष्ठादिमध्यस्थानमस्त्यस्य इनि ङीप्। अत्रैव अमरः।

प्रदेह पु॰ प्र+दिह—भावे घञ्। १प्रलेपे व्रणाद्युपशमार्थं द्रव्यविशेषस्य व्रणादौ २लेपन सुश्रुतः।

प्रदोष पु॰ प्रक्रान्ता दोषा रात्रिरत्र काले प्रा॰ब॰। रात्रेः प्रथमभागभेदे तिथिभेदस्य प्रदोषेऽनध्यायः ति॰त॰उक्तो यथा "सारस्वतादिप्रदोषमाह स्मृतिः "त्रयोदश्याश्चतुर्थ्याश्च सप्तम्या द्वादशीतिथेः। प्रदोषेऽध्ययनं धीमान् न कुर्वीत यथाक्रमम्। सारस्वतो माधवतः सौरश्च वैष्णवस्तथा" प्रदोषशब्दोऽत्र प्रथमप्रहर इति हेमाद्रिः। रात्रिपर इति निर्णयामृतकृत्। तथा व्रतभेदे रात्रिप्रथमयामपरता हेमाद्रौ व्रत॰उक्ता "त्रयोदश्यां तथा रात्रौ सोपहारं त्रिलोचनम्। दृष्ट्वेशं प्रथमे यामे मुच्यते सर्वपातकैः"। इदं प्रदोषव्रतमिति हेमाद्रिः। शिवरात्रिव्रते तु "प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी" हेमाद्रि॰ स्मृतिः। तत्रैव व्रतः "प्रदोषोऽस्तमयादूर्द्ध्वं घटिकाद्वयमिष्यते"। घटिकाद्वयम् "त्रयोदश्यस्तगे सूर्ये चतसृष्वपि नाडिषु। भूतविद्धा तु सा तत्र शिवरात्रिव्रतं चरेत्" नि॰त॰ वायुपु॰ वाक्यैकवाक्यत्वात्। तथा च प्रदोषशब्दस्य रात्रिमात्रं रात्रेः प्रथमयामः प्रथमदण्डचतुष्टयं चार्थः कर्मभेदे तस्य ग्राह्यता। तत्रानध्याये शर्वरीमात्रपरता प्रदोषव्रते प्रथमयामपरता शिवरात्रिव्रतादौ दण्डचतुष्टयपरतेति विवेकः। "प्रदोषो रजनीमुखम्" इत्यमरोक्तिः रात्रेः प्रथमप्रहरप्रथमदण्डचतुष्ट-

यपरत्वाभिप्रायेण रात्रिमात्रे भक्तत्रेति बोध्यम् ।

प्रदोषक त्रि॰ प्रदोषे भवः कालात् ठञं बाधित्वा पूर्वाह्णे त्यादिना वुन् । प्रदोषकालभवे ।

प्रद्युम्न पु॰ प्रकृष्टं द्युम्नं बलं यस्य । १कन्दर्पे अमरः । स च वासुदेवस्य रुक्मिण्यां जातः हरिवं॰ ११८अ॰ । सनत्कुमारांशजातश्च भा॰ आ॰ ६७अ॰ । २वैष्णवागमोक्ते चतुर्व्यूहात्मकविष्णोरंशभेदे च अनिरुद्धशब्दे १६२पृ॰ चतुर्व्यूहशब्दे २८७९ पृ॰ च दृश्यम् । मनोर्नड्वलायां जाते ३पुत्रभेदे पु॰ भाग॰ ४।१३।१४

प्रद्यो त्रि॰ प्रकृष्टा द्यौर्दिनं यस्य । प्रकृष्टदिने क्लीबत्वे ह्रस्वः प्रद्यु तस्य क्लीब एव ह्रस्वत्वेने गन्तत्वेऽपि भाषितपुंस्कत्वाभावात् टाद्यचि न पुंवत् प्रद्युना इत्यादि सि॰कौ॰सुबो॰ प्रद्युकाप्रद्युनेत्युदाहृतं तच्चिन्त्यम् । [भा॰स॰ १९अ॰ ।

प्रद्योत पु॰ प्र+द्युत–अच् । १रश्मौ हेमा॰ । २यक्षभेदे पु॰

प्रद्योतन पु॰ प्र+द्युत–"अनुदात्तेतश्च हलादेः" पा॰ युच् । १सूर्ये हेमा॰ । २द्योतनशीले त्रि॰ । भावे ल्युट् । ३दीप्तौ न॰ ।

प्रद्रव पु॰ प्रकृष्टो द्रवः प्रा॰स॰ । पलायने अमरः ।

प्रद्राणक त्रि॰ प्र+द्रा–कुत्सितायां गतौ क्त स्वार्थे क । कुत्सितां गतिं प्राप्ते अन्त्यावस्थां प्राप्ते "उपस्थितं चाक्रायण इभ्यग्रामे प्रद्राणकउवाच" छा॰उ॰ "प्रद्राणकः कुत्सितां गतिं गतोऽन्त्यावस्थां प्राप्त इत्यर्थः" भा॰ ।

प्रद्राव पु॰ प्र+"ग्रहवृदृनिश्चिगमश्च" पा॰ अपं बाधित्वा घञ् । पलायने अमरः । घाथादि॰ अन्तोदात्तताच ।

प्रद्राविन् त्रि॰ प्र+द्रु–ताच्छील्ये णिनि । पलायनशीले ।

प्रद्वार न॰ प्रगतं द्वारं प्रा॰स॰ । द्वारप्रान्तभागे

प्रधन न॰ प्र+धा॰ क्यु । १युद्धे अमरः । प्रकृष्टं धनमस्य । २प्रकृष्टधनयुक्ते त्रि॰ । निघण्टौ संग्रामनामसु सङ्गमे इत्यत्र प्रधने" पाठान्तरम् । एदन्तमव्ययं तत्रार्थे ।

प्रधमन न॰ प्र+ध्मा॰ धम–ध्माने भावे ल्युट् । सुश्रुतोक्त॰ व्यापारभेदे सुश्रुतः ।

प्रधा स्त्री प्र+धा–भावे अङ् । १निधाने २दक्षसुतायां कश्यपपत्नीभेदे भा॰आ॰६५अ॰ । प्रधाया अपत्यं ढञ् । प्राधेय तदपत्ये पुंस्त्री॰ । "प्राधेयास्तपसांगणाः" मार्क॰ तत्कन्याश्च अलम्बुषादयोऽप्सरसः भा॰आ॰ ६५अ॰।

प्रधान न॰ प्र+धा–ल्युट् । सांख्यमतसिद्धायाम् सत्त्वरजस्तमोरूपगुणत्रयात्मिकायां १प्रकृतौ प्रकृतिशब्दे दृश्यम्। तत्त्वार्थे २कुटिलत्वे ३परमात्मनि ४प्रमत्ते ५बुद्धिवे च । ६सेनापत्यध्यक्षे पु॰ ७श्रेष्ठे त्रि॰ अमरः "सेनाध्यक्षः प्रधानः स्यात्" अस्य पुंस्त्वमिति बोपालितः ।

प्रधानधातु पु॰ कर्म॰ । चरमधातौ वीर्ये शुक्रे त्रिका॰। शुक्रस्य चरमधातुत्वम् अहङ्कारशब्दे ५५८पृ॰ उक्तं दृश्यम्

प्रधि पुं॰ प्रधीयन्ते काष्ठान्यत्र प्र+धा-आधारे कि । चक्रावयवकाष्ठाधिष्ठानस्थाने रथनाभौ अमरः ।

प्रधी त्रि॰ प्रकृष्टा धीर्यस्य । १प्रकृष्टबुद्धियुक्ते प्रा॰स॰। २प्रकृष्टायां बुद्धौ स्त्री । प्रकृष्टं ध्यायति ध्यै–कर्त्तरि क्विप् । ३प्रकृष्टध्यानकर्त्तरि त्रि॰। तत्र तृतीयार्थे गतिपूर्वकत्वात् यण् प्रध्यः प्रध्या इत्यादि आद्ययोस्तु प्रशब्दस्य अधातुप्रत्येशोपसर्गत्वात् न यण् किन्तु इयङ् । प्रधियः इत्यादीत्यन्ये सि॰कौ॰ तु "वृत्तिकारादीनां मते लक्ष्मीवद्रूपम् पदान्तरं विनाऽपि स्त्रियां वर्त्तमानत्वं नित्यस्त्रीत्वमिति स्वीकारात् लिङ्गान्तरानभिधायकं तदिति कैयटमते-पुंवद्रूपम् प्रकृष्टा धीरिति विग्रहे तु लक्ष्मीवत् अमि शसि च प्रध्यं प्रध्य इति विशेषः" इत्युक्तम् ।

प्रधूपित त्रि॰ प्र+धूप-क्त । सन्तापिते "व्यसनप्रधूपिताम्" इति कुमारः । ज्योतिषोक्तायां २सूर्यगन्तव्यायां दिशि स्त्री । तत्र प्रधूमिता इति पाठान्तरम् । [तावस्थायाञ्च ।

प्रध्वंस पु॰ प्र+ध्वन्स–भावे घञ् । १नाशे सांख्यमते २अतीप्रध्वस्त त्रि॰ प्र+ध्वन्स-क्त । १नाशप्रतियोगिनि २अतीते च ३मन्त्रभेदे पु॰ "एकोनविंशत्यर्णो वा यो मन्त्रस्तारसंयुतः । हृल्लेखाङ्कुशबीजाढ्यं प्रध्वस्तं तं प्रचक्षते" तन्त्रसा॰ ।

प्रनप्तृ पु॰प्रगतो नप्तारं अनन्तरतया अत्या॰स॰। पौत्रसुते प्रपौत्रे उज्ज्वलद॰ । [प्रकर्षेण नर्द्दनकर्त्तरि ।

प्रनर्दक त्रि॰प्र+नर्द–ण्वुल् णोपदेशत्वाभावात् न णत्वम् ।

प्रनष्ट त्रि॰प्र+नश–क्त षान्तत्वाभावात् न णत्वम् । नाशप्रतियोगिनि "प्रनष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत्" मनुः ।

प्रना(णा)यक त्रि॰प्रकृष्टो नायकोऽस्य प्रशब्दस्य नयतिं प्रति उपसर्गत्वाभावात् न णत्वम् । प्रकृष्टनायकयुक्ते । प्र+नी–ण्वुलि तु णत्वम् । प्रणायककारके इति भेदः ।

प्रपक्ष पु॰प्रगतः पक्षम् अत्या॰स॰ पक्षाग्रे भा॰द्रो॰ २०अ॰।

प्रपञ्च पु॰ प्र+पचि–आधारे घञ् । १विस्तारे २वैपरीत्ये ३प्रतारणे । कर्त्तरि पचा॰अच् । ४संसारे च अमरः । तत्र वैपरीत्यं भ्रमो माया वेति स्वामी ।

प्रपञ्चित प्र+पन्च–णिच्-कर्मणि क्त । १विस्तारिते २प्रतारिते भ्रान्तिज्ञानविषयतया ३सम्पादिते च भाग॰ १०।१४अ॰

प्रपतन न॰ प्रपतत्यस्मात् प्र+पत–भीमा॰ अपादाने ल्युट्। १पतनापादाने तटादौ। भावे ल्युट्। प्रकर्षेण २पाते तत्प्रयोजनमस्य छ। प्रपतनीय प्रपातसाधने त्रि॰।

प्रपथ पु॰ प्रकृष्टः पन्थाः प्रकृष्टः पन्था यत्र वा अच्समा॰। १प्रकृष्टमार्गे २तद्युक्ते त्रि॰ ऋ॰१।१६६।८ [स्त्री राजनि॰।

प्रपथ्य त्रि॰ प्रकृष्टं पथ्यं प्रा॰स॰। १अत्यन्तहिते २हरीतक्यां

प्रपद न॰ प्रारब्धं पदम् प्रा॰स॰। पादस्याग्रभागे अमरः। प्रपदं व्याप्नोति ख। प्रपदीन पादाग्रव्यापके त्रि॰ आप्रपदीनशब्दे माघः ३।१२ उदा॰दृश्यम्। [इति चण्डी।

प्रपन्न त्रि॰प्र+पद-क्त। शरणागते "प्रपन्नार्त्तिहरे! देवि!"

प्रपन्नाड पु॰ प्रपन्नान् अलति भूषयति अल-अण् उप॰स॰ लस्य डः। १चक्रमर्दे रत्नमा॰। तस्य दद्रुरोगिभिः सेवने तेषां रोगनिवारणेन भूषकत्वात्तथात्वम्।

प्रपा स्त्री प्रपीयतेऽस्यां प्र+पा–घञर्थे क। पानीयशालायाम्। पानीयशालिकाशब्दे ४२०६ पृ॰ दृश्यम्।

प्रपाठक पु॰प्रकृष्टः पाठोऽत्र कप्। १वेदस्याध्यायांशभेदे २श्रौतग्रन्थांशभेदे च। [तत्त्वे राजनि॰।

प्रपाणि पु॰ प्रकृष्टः पाणिः प्रा॰स॰। करस्याधोभागे पाणि-

प्रपात पु॰ प्रपतत्यस्मात् पत-अपा॰घञ्। १तटरहिते २निरवलम्बे ३पर्वतस्थानभेदे अमरः। ४निर्झरे ५कूले च मेदि॰ यस्मात् पतने अवस्थानाय क्रियाभेदो न भवति ६तादृशे स्थाने। भावे घञ्। ७अवस्कन्दे हेमच॰।

प्रपानक न॰ प्रकृष्टं पानमस्य कप्। खण्डमरिचादिमिश्रिते पानीयद्रव्यभेदे "प्रपानकरसन्यायाच्चर्व्यमाणो रसो भवेत्" यथा खण्डमरिचादीनां सम्मेलनादपूर्व इव कश्चिदास्वादः प्रपानकरसे सञ्जायते विभावादिसम्मेलनादिहापि तथेत्यर्थः" सा॰द॰। रसतासशब्दे २०८४पृ॰दृश्यम्।

प्रपापूरणीय त्रि॰ प्रपापूरणं प्रयोजनमस्य "छप्रकरणे विधिपूरिपतिरहिप्रकृतेरनात्" वार्त्ति॰ छ। प्रपापूरणप्रयोजनके। [शब्दमाला।

प्रपावन न॰ प्रपेव कामपूरकं वनम्। कामारण्ये वनभेदे

प्रपितामह पु॰ प्रगतः पितामहं कार्य्यत्वेन अत्या॰स॰। १पितामहपितरि अमरः। तस्य पत्नी ङीप् २प्रपितामही तत्पत्न्यां स्त्री "स्वेन भर्त्त्रा सह श्राद्धं माता भुङ्क्ते स्वधामयम्। पितामही च स्वेनैव स्वेनैव प्रपितामही" दायभागधृतवचनम्। पितामहस्य प्रजापतिजनकस्य चतुर्मुखब्रह्मणः जनके ३परब्रह्मणि "भूर्भुवः स्वस्स्रष्टारः स पिता प्रपितामहः" विष्णुस॰। "यो वै ब्रह्माणं विदधाति पूर्वम्" श्रुतेस्तस्य पितामहब्रह्मस्रष्टृत्वात्तथात्वम्। "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः। अप एव ससर्जादौ तासु बीजमवासृजत्। तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः" मनुना सर्वपितामहस्यापि तेन सृष्टत्वात्तस्य तथात्वम्।

प्रपित्वे अव्य॰ उत्तरायणे निघण्टुः।

प्रपुन्नाड(ट) पु॰ पुमांसं नाटयति नडयति नड–भ्रंशे नट-अवस्यन्दने वा अण् प्रकृष्टः पुन्नाडः (पुन्नाटः) प्रा॰स॰। १चक्रमर्दे (चाकुन्दा) वृक्षे। डस्य लत्वे प्रपुन्नालोऽप्यत्र। २दद्रुमर्दने अमरः। पृषो॰ प्रपुनाड (प्रपुन्नड) इत्येतावपि तदर्थे अमरे पाठान्तरम्।

प्रपूरिका स्त्री प्रकर्षेण पूर्य्यते कण्टकैः पूर–कर्मणि घञ् स्वार्थे क टाप् कापि अत इत्त्वम्। १कण्टकार्य्याम् हेमचन्द्रः २प्रकर्षेण पूरके त्रि॰।

प्रपूर्वग पु॰ प्रकृष्टः पूर्वगः पूर्ववर्त्ती प्रा॰स॰। सृष्टेः प्राग्वर्त्तिनि १परमेश्वरे "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतेः तस्य तथात्वम्। तद्रूपेण ध्येये २अश्विनीकुमारद्वये द्वि॰व॰। भा॰आ॰३अ॰ अश्विनीकुमारस्तुतिः।

प्रपौण्डरीक पु॰ पुण्डरीक+स्वार्थेऽण् प्रकृष्टं तादृशं पुष्पं यस्य। गजमनुष्याणां चक्षुर्हितकारके शालपर्णीतुल्यपत्रके क्षुपभेदे अमरः।

प्रपौण्डरीकाद्य न॰ "प्रपौण्डरीकमधुकपिप्पलीचन्दनोत्पलैः। सिद्धं धात्रीरसे तैलं नस्येनाभ्यञ्जनेन वा। सर्वान्मूर्द्धगदान् हन्ति पलितानि च शीलितम्" चक्रपाणिदत्तोक्ते तैलभेदे।

प्रपौत्र पुं॰स्त्री॰प्रगतः कारणतया पौत्रम् अत्या॰स॰। पौत्रस्य १पुत्रे तत्कन्यायां स्त्री ङीप्।

प्रफर्वी स्त्री प्रकृष्टं पर्व नितम्बस्थानं यस्याः स्त्रिया ङीप् पृषो॰। प्रशस्तनितम्बायां स्त्रियां ऋ॰१०।८५।१२ भा॰। फर्वति गतिकर्मा इति वेददीपः। २प्रकृष्टगतियुक्ते त्रि॰ यजु॰१२। ७६ वेददीपः।

प्रफुल्त(ल्ल) त्रि॰ प्र+फल–क्त आदित्त्वात् इटोऽभावे उत इत्त्वम् प्र+फुल्ल–विकाशे अच् वा (लद्वययुतः)। विकाशयुते अमरः। "लोध्रद्रुमं सानुमतः प्रफुल्त(ल्ल)म्" रघुटीकायां मल्लिनाथेन द्विधापाठः समर्थितः। [त्रिका॰।

प्रबन्ध पु॰ प्र+बन्ध–भावे घञ्। १सन्दर्भे ग्रन्थादेः २रचने च

प्रबन्धन न० प्र+बन्ध–भावे ल्युट्। प्रकर्षेण ग्रन्थने बन्धने

प्रबन्धकल्पना स्त्री ६त०। "प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः" इत्युक्तलक्षणायामल्पसत्यायां बहुमिथ्याकथायाम् अमरः। [अमरः।

प्रब(व)र्ह त्रि० प्र+बर्ह स्तुतौ (वृह) वृद्धौ वा अच्। प्रधाने

प्रबल त्रि० प्रकृष्टं बलमस्य। १प्रकृष्टबलयुते। प्रकृष्टं बलति बल–धान्यावरोधे अच्। २पल्लवे शब्दमाला ३प्रसारिण्यां लतायां स्त्री राजनि०।

प्रबल्हिका स्त्री प्रबल्ह-आच्छादने ण्वुल्। प्रहेलिकायाम् अम० अयमोण्यादिः इन्। प्रबल्हि वा ङीप् प्रबल्ही च तत्रार्थे।

प्रवाल न० प्र+बल–धान्यावरोधे ज्वलादि० ण। १किसलये नवपल्लवे २वीणादण्डे च अमरः। ३रत्नभेदे पु० किं रत्नं कस्य ग्रहस्य प्रीतिकारित्वेन दोषहरं भवतीति प्रश्ने तदुत्तरमाह ज्यो० रत्नमालायां "माणिक्यन्तरणेः सुजातममलं, मुक्ताफलं शीतगोर्माहेयस्य तु विद्रुमो निगदितः, सौम्यस्य गारुत्मतम्। देवेज्यस्य च पुष्पराग मसुराचार्य्यस्य वज्रं, शनेर्नीलं निर्मलमन्ययोर्निगदिते गोमेदवैदूर्य्यके"। "पुंसि क्लीबे प्रवालः स्यात् पुमानेव तु विद्रुमः" भावप्र० अस्यार्थेऽस्य पुंनपुंसकत्वमुक्तं रत्नानां गुणास्तत्रोक्ता यथा "रत्नानि कथितानि सुमधुराणि सराणि च। चक्षुष्याणि च शीतानि विषघ्नानि धृतानि च। मङ्गल्यानि मनोज्ञानि ग्रहदोषहराणि च"। युक्तिकल्पतरौ तस्योत्पत्त्यादिकं भेदादिकञ्चोक्तं यथा "दूत उवाच आदाय शेषस्तस्यान्त्रं यमायाकम्बलादिषु। चिक्षेप तत्र जायन्ते विद्रुमाः सुमहागुणाः। तत्र प्रधानं शशलोहिताभं गुञ्जाजवापुष्पनिभं प्रदिष्टम्। सनीलकं देवकरोमकञ्च स्थानानि तेषु प्रभवं सरागम्। अन्यत्र जातञ्च न तत् प्रधानं मूल्यं भवेच्छिल्पिविशेषयोगात्। प्रसन्नं कोमलं स्निग्धं सुरागं विद्रुमं हि तत्। धनधान्यकरं लोके विषार्त्तिभयनाशनम्। परीक्षा पुलकेनोक्ता रुधिराख्यस्य वैमणेः। स्फटिकस्य विद्रुमस्य रत्नज्ञानाय शौनक!" इति गारुडे ८०अ०। "सतथागरमध्ये तु जायते वल्लरी तु या। विद्रुमा नाम रत्नाख्या दुर्लभा वलहारिणी। पाषाणं प्रभजन्त्येषा प्रयत्नात् कर्षिता सती। विद्रुमं नाम यद्रत्नमामनन्ति मनीषिणः। ब्रह्मादिजाति भेदेन तच्चतुर्विधमुच्यते। अरुणं शशरक्ताभं कोमलं स्निग्धमेव च। प्रवालं विप्रजातिः स्यात् सुखवेध्यं मनोरमम्। जवाबन्धूकसिन्दूरदाडिमीकुसुमप्रभम्। कठिनं स्निग्धदुर्वेधं क्षत्रजातिः तदुच्यते। पलाशकुसुमाभं तथा पाटलसन्निभम्। वैश्यजातिर्भवेत् स्निग्धं वर्णाढ्यं मन्दकान्तिभम्। विद्रुमं शूद्रजातिः स्याद्दृढं तु वेध्यं तथैव च। रक्तता स्निग्धता दार्ढ्यं चिरद्युति सुवर्णता। प्रवालानां गुणाः प्रोक्ता धनधान्यकराः पराः। हिमाद्रौ यत्तु संजातं तद्रक्तमतिनिष्ठुरम्। तत्र विप्रो भवेच्छिन्नकलुषोऽतिमधुरः स्थितः। तस्य धारणमात्रेण विषवेगः प्रशाम्यति। विवर्णता तु खरता प्रवाले दूषणद्वयम्। रेखा काकपदी बिन्दुर्यथा वज्रेषु दोषकृत्"। तथा प्रवाले सर्वत्र वर्जनीयं विचक्षणैः। रेखा हन्याद्यशो, लक्ष्मीमावर्त्तः कुलनाशनः। पङ्कतो रोगकृत् ख्यातो बिन्दुर्धनविनाशकृत्। त्रासः संजनयेत् त्रासं नीलिका मृत्युकारिणी। मूल्यं शुद्धप्रवालस्य रूप्यद्विगुणमुच्यते। धारणेऽस्यापि नियमो जातिभेदेन पूर्ववत्"। तथा हि "विरूपजातिं विषमं विवर्णं खरप्रवालं प्रवहन्ति ये वै। ते मृत्युमेवात्मनि वै वहन्ति सत्यं वदन्त्येव कृती मुनीन्द्राः"। तस्य शुभाशुभलक्षणे राजनि० उक्ते यथा "शुद्धं दृढं घनं वृत्तं स्निग्धं गात्रसुरङ्गकम्। समं गुरु सिराहीनं प्रवालं धारयेत् शुभम्। गौरं रूक्षजलाक्रान्तं रक्तकृष्णं सकोटरम्। रूक्षकृष्णं लघु श्वेतं प्रवालमशुभं त्यजेत्"।

प्रवालक पु० यक्षभेदे भा०स० १०अ०।

प्रवालफल न० प्रवाल इव रक्तं फलमस्य। रक्तचन्दने भावप्र० तत्फलस्य प्रवालतुल्यरक्तत्वात् तथात्वम्।

प्रवालाश्मन्तक पु० प्रवाल इवाश्मन्तकः रक्तत्वात्। रक्ताश्मन्तकवृक्षे सुश्रुतः। [राजनि०।

प्रवालिक पु० प्रवालो नवपल्लवोऽस्त्यस्य भूम्ना ठन्। जीवशाके

प्रवाहु पु० प्रगतो बाहुम् अत्या०स०। बाहुमूले सु०सं०५८अ०।

प्रवाहुक अव्य० प्रकृष्टो बाहुरत्र कप् स्वरादि०। १समकाले २ऊर्द्धार्थे च मनोरमा। पृषो० प्रवाहुक प्रवाहुक् पाठान्तरम् तत्रार्थे अव्य० "प्रवाहुग् जुहोति" तैत्ति०२।६।१।

प्रबुद्ध त्रि० प्र+बुध–कर्त्तरि क्त। १प्रबोधयुते २पण्डिते ३प्रफुल्ले पुष्पादौ च हेमच०। ४जागरिते व्यापारिते ५भागवतधर्मप्रधाने ऋषभदेवपुत्रभेदे पु० भाग०५।४।११

प्रबोध पु० प्र+बुध–भावाधारादौ घञ्। १निद्रापगमे तस्य प्रकृष्टज्ञानाधारत्वात् तथात्वम्। २यथार्थज्ञाने च।

प्रबोधन न० प्र+बुध–भावे ल्युट्। १यथार्थज्ञाने २निद्रा·

पगमे। प्र+बुध–णिच्–भावे ल्युट्। ३प्रकृष्टबोधने ४उद्दीपने ५पूर्वगन्धस्य न्यूनतायां पुनः सौगन्ध्योत्पादनाय व्यापारभेदे अमरः।

प्रबोधनी स्त्री प्रबोध्यते हरिरत्र प्र+बुध-णिच्-आधारे ल्युट् ङीप्। कार्त्तिकशुक्लैकादश्याम् तत्र शयितस्य हरेरुत्थापनानुकूलव्यापारस्याचरणात्तस्यास्तथात्वम्। उत्थानैकादशीशब्दे तस्याः स्वरूपभेदस्य माहात्म्यं दर्शितम्। तन्माहात्म्यं च पद्मपु०उ०ख०१२६अ० उक्तं यथा "ब्रह्मोवाच प्रबोधन्यास्तु माहात्म्यं पापघ्नं पुण्यवर्द्धनम्। मुक्तिदं शुद्धबुद्धीनां शृणुष्व मुनिसत्तम!। तावद्गर्जन्ति तीर्थानि पुण्यान्यायतनानि च। यावत् प्रबोधनी विष्णोस्तिथिर्नायाति कार्त्तिके। अश्वमेधसहस्राणि वाजपेयशतानि च। एकेनैवोपवासेन प्रबोधन्यां भवन्ति हि। मेरुमन्दरतुल्यानि पापानि सुबहून्यपि। भस्मसात् कुरुते मर्त्यो हरिबोधन्युपासनात्। पूर्वजन्मसहस्रेषु यत्पापं समुपार्जितम्। जागरणं प्रबोधन्यां दहते तूलराशिवत्। उपवासं प्रबोधन्यां यः करोति समाहितः। विधिवन्मुनिश्रेष्ठ! यथोक्तं लभते फलम्। यानि कानि च तीर्थानि त्रैलोक्ये संवसन्ति वै। तानि तस्य गृहे सम्यक् कृता येन प्रबोधनी। किं तस्य बहुभिः पुण्यैः सुरलोकसुखप्रदैः। ऊर्जे सन्तोषिता येन संपूर्णा हरिबोधनी। बोधनीं समुपोष्यैव मुक्तिभागी भवेन्नरः। प्रबोधन्यां नरश्रेष्ठ! न पुनर्गर्भमाविशेत्। स्नानं दानं जपो होमः समुद्दिश्य जनार्दनम्। नरैर्यत् क्रियते चोर्जे प्रबोधन्यां तदक्षयम्। येऽर्चयन्ति नरास्तस्यां भक्त्या विष्णुं जगत्पतिम्। उषित्वा बोधनीं ते तु प्रभवेयुर्दिवौकसः। महाव्रतमिदं पुत्र! महापापौघनाशनम्। प्रबोधन्यां मुने! विष्णोर्विधिवत् समुपोषणम्। स ज्ञानी च स योगी च स तपस्वी जितेन्द्रियः। स्वर्गमोक्षौ च तस्यास्तां य उपास्ते प्रबोधनीम्। यत्तु जन्मकृतं पापं स्वल्पं वा यदि वा बहु। करोति भस्मसाद्विष्णुः प्रबोधन्यां प्रपूजितः। हरिपूजा विधातव्या कार्त्तिके बोधवासरे। गीतशास्त्रविनोदेन प्रबोधन्यान्तु जागरात्। चन्द्रसूर्य्योपरागे च यत् फलं परिकीर्त्तितम्। तस्मात् सहस्रगुणितं प्रबोधन्यां हि जागरात्। स्नानं दानं जपो होमः स्वाध्यायश्चार्चनं हरेः, एतत्सर्वं कोटिगुणितं प्रबोधन्यां हि जागरात्"। जन्मप्रभृति यत्पुण्यं नरेणोपार्जितं भुवि। वृथा भवति तत्सर्वं न कृत्वा बोधवासरम्"। "प्रबोधन्यास्तु माहात्म्यं पापघ्नं पुण्यवर्द्धनम्। मुक्तिदं ज्ञानबुद्धीनां शृणु त्वं मुनिसत्तम!। तावद्गर्जति विप्रेन्द्र! गङ्गाभागीरथी क्षितौ। यावन्नायाति पापघ्नी कार्त्तिके हरिबोधनी। तावद्गर्जन्ति तीर्थानि आसमुद्रसरांसि च। यावत् प्रबोधनी विष्णोस्तिथिर्नायाति कार्त्तिके। वाजपेयसहस्राणि अश्वमेधशतानि च। एकेनैवोपवासेन प्रबोधन्यां लभेन्नरः। दुर्लभञ्चैव दुष्प्राप्यं त्रैलोक्ये सचराचरे। तदपि प्रार्थितं विप्र! ददाति हरिबोधनी। ऐश्वर्यं सन्ततिं प्रज्ञां राज्यञ्च सुखसम्पदः। ददात्युपोषिता विप्र! हेलया हरिबोधनी। मेरुमन्दरतुल्यानि पापान्यत्युर्जितान्यपि। एकेनैवोपवासेन दहते हरिबोधनी। पृथिव्यां यानि दानानि दत्त्वा यत् फलमाप्नुते। एकेनैवोपवासेन ददाति हरिबोधनी" हरि०वि०।

प्रभञ्जन न० प्रभनक्ति तरुवादीन् प्र+भन्ज–युच्। वायौ अमरः। [लतायां स्त्री राजनि०।

प्रभद्र पु० प्रकृष्टं भद्रमस्मात् ५ब०। १निम्बवृक्षे २प्रसारिण्यां

प्रभद्रक न० "भवति नजौ भजौ रसहितौ प्रभद्रकम्" वृ०र० उक्ते पञ्चदशाक्षरपादके छन्दोभेदे।

प्रभर्मन् पु० भृ–भावे कर्त्तरि वा मनिन् प्रकृष्टं भर्म भरणं प्रकृष्टो भर्म्मा भर्त्ता ऋत्विक् वा यस्मिन्। १यज्ञे ऋ०८। ८२।१ भाष्ये दृश्यम्। प्र+भृ-भावे मनिन्। २प्रकर्षेण भरणे सम्पादने न० ऋ० १।७९।७

प्रभव पु० प्रभवत्यस्मात् "भुवः प्रभवः" पा० भूकर्त्तुरपादाने वाच्ये अप्। १प्रथमप्रकाशस्थाने २अन्यतः सिद्धस्य प्रथमोपलम्भस्थाने हेमच० ३मूले ४मुनिभेदे ५जन्महेतौ। भावे अप्। ६जन्मनि। करणे अप्। ७पराक्रमे मेदि०। ८षष्टिवत्सरमध्ये वत्सरभेदे तत्फलमुक्तं ज्यो०त० भविष्यपु० "बहुतोयास्तथा मेघा बहुशस्या च मेदिनी। बहुक्षीरास्तथा गावो व्याधिरोगविवर्जिताः। प्रशान्ताः पार्थिवाश्चैव प्रभवे परिकीर्त्तिताः"। ९विष्णौ पु० "संभवो भावनो भर्त्ता प्रभवः प्रभुरीश्वरः" विष्णुस०

प्रभवादि पु० प्रभव आदिर्येषाम्। प्रभवप्रभृतिषष्टिसंवत्सरेषु स च गुरुमध्यभोगात् गणनीयः। "ज्योतिर्विद् हृद्य मध्यात् प्रभवादेश सम्भवम्। उचुरुद्वत् समाद्यादि वर्षाणामपि सम्भवम्" ज्यो०त०। ते च ज्यो०त० फलसहिताः दर्शिता तच्छब्दे तद्वाक्यमुक्तं गम्यते च तदानयनस्य

ज्यो०त०“शकेन्द्रकालः पृथगाकृति २२ घ्नः शशाङ्कनन्दाश्वियुगैः ४२९१ समेतः। शराद्रिवस्विन्दु१८७५हृतः स लब्धः षष्ट्याप्तशिष्टाः प्रभवादयोऽब्दाः। सर्ववर्जन्तु यच्छेषं सूर्य्यैः१२ संपूर्य्य खोर्मिभिः६०”(भक्तम्)। प्रभवादिवर्षाणां उपक्रम्य “आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता। तृतीया रुद्रदैवत्या श्रेष्ठा मध्याधमा भवेत्”। इ०सं०द०अन्यथोक्तं गुरुवर्षशब्दे २६२८पृष्ठादावुक्तम्।

प्रभविष्णु त्रि० प्र+भू–शीलार्थे इष्णुच्। १प्रभावशीले २विष्णौ पु० भा०अनु० ७१अ०।

प्रभा स्त्री प्र+भा-भावे अङ्। १दीप्तौ राजनि०। प्र+भा–क। २प्रदीप्तियुते त्रि०३कुवेरपूर्य्यां स्त्री हेमच०। ४दुर्गायां स्त्री “प्रभा प्रभानशीलत्वात् ज्योत्स्ना चन्द्रार्कभासिनी”देवीपु० तन्नामनिरुक्तौ। ५सूर्य्यपत्नीभेदे “विवस्वान् कश्यपात् पूर्वमदित्यामभवत् पुरा। तस्य पत्नीत्रय तद्वत् संज्ञा राज्ञी प्रभा तथा। रैवतस्य सुता राज्ञी रैवन्तं सुषुवे सुतम्। प्रभा प्रभावं सुषुवे त्वाष्ट्री संज्ञा तथा मनुम्” मत्स्यपु० ११अ०। ६स्वर्भानोः कन्याभेदे नहुषमातरि हरिवं० ३अ०। ७अप्सरोभेदे भा०अनु० १४२५ श्लो० ८गोपीभेदे “दृष्टस्त्वं प्रभया गोप्या युक्तो वृन्दावने वने। प्रभा देहं परित्यज्य जगाम सूर्य्यमण्डलम्” ब्रह्मवै०प्र० ख० ९अ०।

प्रभाकर पु० प्रभां करोति कृ-ट। १सूर्य्ये २वह्नौ ३चन्द्रे ४समुद्रे च शब्दर०। ५अर्कवृक्षे अमरः। ६मीमांसकभेदे स च गुरुत्वेन प्रसिद्धः। अत्रिवंश्ये ७मुनिभेदे हरिवं० ३१अ०। ८कुशद्वीपस्थे वर्षभेदे भा०भी० १२अ०। अष्टममन्वन्तरे ९देवगणभेदे मार्क०पु० ८०अ०।

प्रभाकीट पु० प्रभान्वितः कीटः शा०त०। खद्योते राजनि०।

प्रभाञ्जन पु० शोभाञ्जने त्रिका०।

प्रभात न०प्र+भा–भावे क्त प्रकृष्टं भातमत्र वा। १प्रातःकाले अमरः। प्र+भा कर्त्तरि क्त। २प्रभायुक्ते त्रि० ३वसुभेदे पु०। प्रभास इत्यत्र प्रभात इति मिता० पाठः। धरशब्दे ३८४७पृ०दृश्यम्। प्रभातकाले दृश्या उक्ता राजवल्लभेन “वैद्यः पुरोहितो मन्त्री दैवज्ञोऽथ चतुर्थकः। प्रभातकाले द्रष्टव्यो नित्यं स्वश्रियमिच्छता” छन्दोगपरि० तत्र दृश्यादृश्यान्याह यथा “श्रोत्रियं सुभगाङ्गामग्निं गाञ्चाग्निचितन्तथा। प्रातरुत्थाय यः पश्येदापद्भ्यः स विमुच्यते। पापिष्ठं दुर्भगां मद्यं नग्नमुत्कृत्तनासिकम्। प्रातरुत्थाय यः पश्येत्तत् कलेरुपलक्षणम्”।

प्रभातकाले स्मरणीयाः काशीखण्डे ३५अ० दर्शिता यथा “स्वहितं चिन्तयेत् प्राज्ञस्तस्मिंश्चोत्थाय सर्वदा। गजास्यं संस्मरेदादौ तत ईशं सहाम्बया। श्रीकान्तं श्रीसमेतं तु ब्रह्माणं कमलोद्भवम्। इन्द्रादीन् सकलान् देवान् वशिष्ठादीन् मुनीनपि। गङ्गाद्याः सरितः सर्वाः श्रीशैलाद्याखिलान् गिरीन्। क्षीरोदादीन् समुद्रांश्च मानसादिसरांसि च। वनानि नन्दनादीनि धेनूः कामदुघादिकाः। कल्पवृक्षादिवृक्षांश्च धातून् काञ्चनमुख्यतः। दिव्यस्त्रीरुर्वशीमुख्या गरुडादीन् पतत्त्रिणः। नागांश्च शेषप्रमुखान् गजानैरावतादिकान्। अश्वानुच्चैःश्रवोमुख्यान् कौस्तुभादीन् मणीन् शुभान्। स्मरेदरुन्धतीमुख्याः पतिव्रतवतीर्वधूः। नैमिषादीन्यरण्यानि पुरीः काशीपुरीमुखाः। विश्वेशादीनि लिङ्गानि वेदान्तकप्रमुखानपि। गायत्रीप्रमुखान् मन्त्रान् योगिनः सनकादिकान्। प्रणवादिमहाबीजं नारदादींश्च वैष्णवान्। शिवभक्तांश्च बाणादीन् प्रह्लादादीन् दृढव्रतान्। वदान्यांश्च दधीच्यादीन् हरिश्चन्द्रादिभूपतीन्। जननीचरणौ स्मृत्वा सर्वतीर्थोत्तमोत्तमौ। पितरं च गुरुञ्चापि हृदि ध्यात्वा प्रसन्नधीः। ततश्चावश्यकं कर्त्तुं नैरृतं दिशमाश्रयेत्”। “प्रभातायां तु शर्व्वर्य्याम्” भार०नानास्थाने।

प्रभातीर्थ तीर्थभेदे शिवपु०।

प्रभातोर पु० नागभेदे भा०आ० ३५अ०।

प्रभाव पु० प्र+भू–घञ्। राज्ञां कोषदण्डजाते १तेजसि अमरः २तेजसि ३सामर्थ्ये हेमच० ४विक्रमे ५शक्तौ ६उद्भवे च मेदि०। ७स्वारोचिषमनोः पुत्रभेदे मार्क०पु० ६६अ०। ८वसुभेदे प्रभास इत्यत्र पाठान्तरम् ९प्रभागर्भजाते सूर्य्यपुत्रभेदे प्रभाशब्दे दृश्यम्।

प्रभावज न० प्रभावात् जायते जन–ड। प्रभुशक्तिभेदे कोषदण्डाभ्यां साध्ये तेजसि।

प्रभावत् त्रि०प्रभा+अस्त्यर्थे मतुप् मस्य वः। १दीप्तियुक्ते स्त्रियां ङीप्। सा च वज्रनाभासुरस्य २कन्याभेदे। प्रद्युम्नेन तस्याहरणकथा च हरिवं० १५२अध्यायादौ दृश्या। ३तापसीभेदे भा०व०२८४अ०। ४कुमारानुचरमातृभेदे भा० श० ४७अ०। ५अङ्गारस्य चित्ररथस्य भार्य्यायाम् भा० अनु० ४२अ०। ६मरुत्तन्तपस्य पत्न्यां विदर्भराजदुहितरि मार्क० १२२अ०। ७मणिनामकोनविंशहस्ताहन्मातरि ८गणानां वीणायाञ्च स्त्री हेमच०। ९त्रयोदशाक्षरपादके छन्दोभेदे “यस्यां प्रिये प्रथमकमक्षरद्वयं तुर्य्यन्तथा गुरु-

भवनं दयान्तिमम् । सान्त्यं भवेद्यतिरपि चेद्युगपत्त्रहैः सा कथितास्ततरुचिरे ! प्रभावती" इति श्रुतबोधः ।

प्रभाष पु० प्र+भाष–अच् । १अष्टवसुमध्ये वसुभेदे २प्रकृष्टकथके त्रि० जटा० । शरशब्दे ४८१७पृ० दृश्यम् । तत्र षान्तत्वेन पाठः जटाधरसम्मतः ।

प्रभास त्रि०प्रभासते प्र+भास–अच् । १प्रकृष्टदीप्तियुते २जैनगणाधिपभेदे पु० हेमच० । ३कुमारानुचरगणभेदे पु०भा० श०४६अ० । ४ऋषिभेदे पु० भा०शां० १६६अ० । ५वसुभेदे पु० हरिवं० ३अ० सान्ततया पाठः । अष्टममन्वन्तरे ६देवगणभेदे पु० मार्क०पु०८०अ० । ७सोमतीर्थभेदे त्रिका० "पुण्यं प्रभासं समुपाजगाम यत्रोडुराट् यक्ष्मणा क्लिश्यमानः" इत्युपक्रमे एवं तु तीर्थप्रवरं पृथिव्यां प्रभासनात्तस्य तु सः प्रभासः" इत्यादिना तत्तीर्थोत्पत्तिमाहात्म्यादिकथा भा०श०३६अ० आदौ दृश्या ।

प्रभासन्त पु० प्र+भास–बा० झ । १परमेश्वरे २रुद्रे च हरिवं० १२१अ० ।

[त्वात् चरत्मदे २गजे पु० अमरः ।

प्रभिन्न त्रि० प्र+भिद्–क्त । १प्रकृष्टभेदयुक्ते प्रभिन्नकटादिस्रव-

प्रभु त्रि०प्र+भू–डु । १स्वामिनि २कार्य्यसम्पादनशक्तियुते "निग्रहानुग्रहे शक्तः प्रभुरित्यभिधीयते" इत्युक्ते ३निग्रहानुग्रहसमर्थे ४विष्णौ पु० "प्रभवः प्रभुरीश्वरः" विष्णुसं० "कामः कामप्रदः प्रभुः" तत्रैव नामान्तरं तत्र प्रकर्षेण भवनात् प्रभुरितीति भाष्योक्तेः "सर्वासु क्रियासु सामर्थ्यातिशयात् प्रभुः" भाष्योक्तेश्च व्युत्पत्तिभेदात् नामद्वयम् । ५अष्टममन्वन्तरे देवगणभेदे मार्क०पु० ८०अ० ।

प्रभुत्वाक्षेप पु० अर्थालङ्कारभेदे "धनञ्च बहु लभ्यं ते सुखं क्षेमञ्च वर्त्मनि । न च मे प्राणसन्देहस्तथापि प्रिय ! मा स्म गाः । इत्याचक्षाणया हेतून् प्रिययात्रानुबन्धिनः । प्रभुत्वेनैव रुद्धस्तत् प्रभुत्वाक्षेप उच्यते" । "हे प्रिय ! ते विदेशगमने इति अध्याहार्य्यं बहुधनं सुखञ्च तथा वर्त्मनि पथि क्षेमं कुशलञ्च लभ्यम् । अत्र च मे प्राणसन्देहः न तव शीघ्रप्रत्यागमनस्य बहुधनलाभस्य च सम्भवादिति भावः । तथापि मास्म गाः मा गच्छ अत्र प्रियतमायाः प्रियस्य विदेशगमनस्य अनुबन्धिनः पोषकान् हेतून् आचक्षाणया कीर्त्तयन्त्या कयाचित् स्वाधीनपतिकयेति शेषः प्रभुत्वेन स्वाधीनतया एव पतिः रुद्धः विदेशगमनात् निवर्त्तितः तस्मात् एषः प्रभुत्वाक्षेप उच्यते" प्रेम० टीका ।

प्रभुभक्त त्रि० ७त० । १स्वाम्यनुरक्ते । "बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः । प्रभुभक्तश्च शूरश्च ज्ञातव्याः षड्गुणाः शुनः" चाणक्यः । कुलीने उत्तमे २घोटके पु० शब्दच० ।

प्रभूत त्रि० प्र+भू–क्त । १प्रचुरे अमरः २उद्गते मेदि० ३भूते ४उन्नते च शब्दर० । ततः गोषदा०अस्त्यर्थे वुन् । प्रभूतक प्रचुरत्वादियुक्ते त्रि०प्रभूतमाह "आहौ प्रभूतमादिभ्यः" वार्त्ति० ठक् । प्राभूतिक प्रचुरवक्तरि त्रि० । द्वितीयान्तात् प्रभूतशब्दात् आहौ परे धातुनिर्देशे इक ठक् । एवम् आदिपदात् पर्य्याप्तमाह पार्य्याप्तिक तद्वक्तरि त्रि० ।

प्रभूति स्त्री प्र+भू–भावे क्तिन् नित्तकारादिप्रत्यये परे पश्य गतेः प्रकृतिस्वरः । प्रकर्षेण भवने ।

प्रभूवन् त्रि० प्र+भू–क्वनिप् । सामर्थ्ययुते स्त्रियां ङीप् "वनोर च" पा० नस्य रः । प्रभूवरी यजु०२१।२१

प्रभूष्णु त्रि० प्र+भू–ग्स्नु । १प्रभावशीले २क्षमे समर्थे

प्रभृति अव्य० प्र+भृ-क्तिच् । तदारभ्येत्यर्थे । बहु०समासे उत्तरपदस्थः । तदादिके त्रि० अमरः ;

प्रभृथ त्रि० प्र+भृ–बा० थक् । प्रकृष्टभरणे ऋ०१।१५२।१२

प्रभेद पु० प्रभिद्यतेऽनेन प्र+भिद्–घञ् । १प्रकारे विशेषे । भावे घञ् । २भेदे अमरः ।

प्रभेश्वर पु० तीर्थभेदे शिवपु० ।

प्रभ्रंशथु पु० "प्रध्मायते नासिकयैव यस्य सान्द्रो विदग्धो लवणः कफस्तु । प्राक्सञ्चितो मूर्ध्नि च पित्ततप्तं प्रभ्रंशथुं व्याधिमुदाहरन्ति" सुश्रुतोक्ते नासागतरोगभेदे ।

प्रभ्रष्ट त्रि० प्र+भ्रन्श–क्त । भ्रंशयुक्ते संज्ञायां कन् । शिखावलम्बिमाल्ये चूडातोलम्बमानमाल्ये अमरः ।

प्रमगन्द पु० हे शुल्क्यादिलक्षणहीनयुतोयौ मामेव गमिष्यतीति बुद्ध्या परेषामर्थं ददातीति मगन्दो वार्द्धुषिकः निरु० प्रगतो मगन्दं कारणतया ष्ट्या०स० । वार्द्धुषिकपुत्रे ऋ० ३।५३।१४ भा० ।

प्रमण(न)स् त्रि० प्रकृष्टं मनोऽस्य संज्ञात्वे णत्वम् अन्यत्राणत्वम् । १हर्षयुते अमरः । २सुमनस्के च ।

प्रमति पु० प्रतीचीश्वरजनमेजयस्य पुरोहिते कश्यपवंश्ये १ऋषिभेदे मार्क०पु०१,८अ० । २च्यवनर्षेः पुत्रभेदे भा०आ० ५अ० । रुद्रसदर्शिवंशे वागिन्द्रर्षेः ३पुत्रे ऋषिभेदे भा०अनु०२०अ० । नृगस्य पुत्रे ४नृपभेदे । तद्वंश्ये वत्सप्रीतेः ५पुत्रे नृपभेदे भाग० ६।२।१६ । ६प्रकृष्टमतियुक्ते त्रि० ।

प्रमत्त त्रि० प्र+मद्–क्त । १अनवधानतायुक्ते प्रमादयुक्ते कर्त्तव्येऽकर्त्तव्यताज्ञानेन अकर्त्तव्ये वा कर्त्तव्यताधिया तत्रावधानशून्ये "मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं

जडम् । प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्म्मवित्” भाग० १।७अ० “मत्तं मद्यादिना, प्रमत्तमनवहितम् उन्मत्तं पइवातादिना जड़म् अनुद्यमम् । प्रपन्नं शरणागतम्, विरथं भग्नरथम्” श्रीधरस्वामी । “सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति” मनुः । “सन्ध्या पूजाविहीनश्च प्रमत्तः परिकीर्त्तितः” ब्रह्मवै०पु० ७अ० उक्ते २सन्ध्यादिहीने च ।

प्रमत्तगीत न० प्रमत्तेन गीतम् तत्र “इत्थम्भूतेन क्रतमिति च” पा० क्तान्तस्योत्तरपदमन्तोदात्तम् । प्रमत्तेन गीते ।

प्रमथ पु० प्रमथ्नाति प्र+मथ–अच् । १धृतराष्ट्रपुत्रभेदे भा० आ०११७अ० । २घोटके ३शिवपारिषदभेदे च शब्दरत्ना० तत्स्वरूपसंख्यादि यथा

“नानारूपधरा ये वै जटाचन्द्रार्द्धमण्डिताः । ते सर्वे-ऽष्टगुणैश्वर्य्ययुक्ता ध्यानपरायणाः । योगिनो मदमात्सर्य्य दम्भाहङ्कारवर्जिताः । क्षीणपापा महाभागाः शम्भोः प्रीतिकराः पराः । न ते परिग्रहं रागं काङ्क्षन्ति च कदाचन । संसारविमुखाः सर्वे यतयो योगतत्पराः । ध्यानावस्थं महादेवं परिवार्य्य धृतव्रताः । कृत्वा परिषदं स्थिता तिष्ठन्ति विगतक्लमाः । यदैव परमं ज्योतिः चिन्तयत्यम्बिकापतिः । तदैव ते पारिषदाः सर्वे सेवन्ति तम् । ते षोड़श समाख्याताः कोटयो वै धृतव्रताः । सिंहव्याघ्रादिवाहन्याः अणिमादिसमायुताः । अपरे कामिनः शम्भोः शुभम्मर्षिवाः स्मृताः । विचित्ररूपाभरणा जटाचन्द्रार्द्धमण्डिताः । हरस्य तुल्याः रूपेण विमदा वृषभध्वजाः । उमासदृशरूपाभिः प्रमदाभिः समागताः । विचित्रमाल्याभरणा दिव्यस्रग्गन्धभूषणाः । उमाहरायं क्रीड़न्तमनुगच्छन्ति भूषिताः । शृङ्गारवेशाभरणा अष्टौ ते कोटयो गणाः । अर्द्धनारीनराख्यं तु अर्द्धनारीश्वरं हरम् । अनुयान्ति महाभागास्तुल्यरूपा हरस्य ये । उमासहायो हि यदा रमते स तदा हरः । अर्द्धनारीशरीरास्तु द्वारपाला भवन्ति ते । आकाशमार्गे गच्छन्तमनुगच्छन्ति नित्यशः । ध्यानस्थं परिचर्य्यन्ति सविचारादिभिरीश्वरम । नानाशस्त्रधराः शम्भोर्मताश्च प्रमथाः स्मृताः । प्रमथ्नन्ति च युद्धेषु युध्यमानान्महाबलान् । ते च महाबलाः शूराः संख्याता बहुकोटयः । अपरे गायनाकारमहत्तूपस्थाविभिः । नृत्यन्ति वाद्यं कुर्वन्तो गायन्ति मधुरस्वरम् । नानारूपधरास्ते वै संख्यया कोटयश्चवाः । सततं चातुर्दश्यां विचरन्तं महेश्वरम् । सर्वे मायाविनः शूराः सर्वे शास्त्रार्थपारगाः । सर्वे सर्वत्र सर्वज्ञाः सर्वे सर्वत्रगाः सदा । अङ्गुलीद् सर्वभुवनं मत्त्याऽऽयान्ति पुनःपुनः । अणिमाद्यष्टकैश्वर्य्ययुक्तास्ते वै महाबलाः । अपरे रुद्रनामानो जटाचन्द्रार्द्धमण्डिताः । देवेन्द्रस्य नियोगेन वर्त्तन्ते त्रिदिवे सदा । तेषां संख्या चैककोटिस्ते सर्वे बलवत्तमाः । कुर्वन्ति हि सदा सेवां हरस्य सततं गणाः । विध्वंसयन्ति पापिष्ठान् धर्म्मिष्ठान् पालयन्ति च । अनुगृह्णन्ति सततं धृतपाशुपतव्रतान् । विघ्नांश्च सततं घ्नन्ति योगिनां प्रयतात्मनाम् । षट्त्रिंशत् कोटयश्चैते हरस्य सकला गणाः” कालिकापु० २८अ० । तेषामुत्पत्ति कथा तत्रैवाध्याये दृश्या । ४हरीतक्यां स्त्री मेदि० ।

प्रमथन न० प्र+मथ–भावे ल्युट् । १वधे २क्रोधने ३पिलोडने च अमरः ।

प्रमथाधिप पु० ६त० । शिवे अमरः प्रमथपत्यादयोऽप्यत्र ।

प्रमथित न० प्रकर्षेण मथितम् । १निर्जलतक्रे राजनि० । २प्रकर्षेण मथिते त्रि० ।

प्रमद पु०प्र+मद–अप् । १हर्षे अमरः । प्रमाद्यत्यनेन करणे अप् । २धुस्तूरफले न० शब्दच० । कर्त्तरि अच् । ३प्रमत्ते त्रि० मेदि० । ४दैत्यभेदे पु० हरिवं० १अ० । तृतीयमन्वन्तरे वाशिष्ठे ५सप्तर्षिभेदे पु० ।

प्रमदक पु० “प्रमदको योऽयमेव लोकोऽस्ति न परः” इति मन्यतेरिति निरु० ६।१२ उक्ते परलोकासत्त्ववादिनि नास्तिकभेदे ।

प्रमदकानन न०प्रमद्यतेऽनेन प्र+मद–करणे घञ् । पा०स० ६त० “ह्रस्वापोः संज्ञाच्छन्दसो” पा० ह्रस्वो वा । प्रमदावने राज्ञामन्तःपुरोचिते उद्याने भरतः प्रमदावनादयोऽप्यत्र अमरः ।

प्रमदा स्त्री प्रमाद्यत्यनया प्र+मद–करणे अप् । १उत्तमयोषिति अमरः । “नजभजजा गुरुश्च भवति प्रमदा” वृ०र० उक्ते एकादशाक्षरपादके २वर्णवृत्तभेदे ।

प्रमदाकानन न० प्रमदोचितं काननं वन शा०त० । १राज्ञामन्तःपुरोचितवने भरत० । २प्रमदावन तत्रार्थे शब्दरत्ना० ।

प्रमद्वरा स्त्री शुनकपितामहरु रुरोर्भार्य्यायां भा०आ० ५अ० ।

प्रमन्यु पु० प्रियव्रतवंश्ये वीरव्रतस्य भोजायां भार्य्यायां जाते पुत्रे नृपभेदे भाग० ५।१५।१५

प्रमय पु० प्र+मी–वधे भावे अच् । वधे हेमच० ।

प्रमयु त्रि० प्र+मी–वधे कर्त्तरि उन । हिंसके ऋग०८।१।१६।

प्रमर्दन त्रि० प्रमृद्नाति+प्र+मृद-ल्यु । १प्रकर्षेण मर्दके २दैत्यभेदे पु० हरिवं० १६४अ० । ३विष्णौ पु० "लोहिताक्षः प्रमर्दनः" विष्णुसं० । तत्र प्रतर्दन इति पाठान्तरं तत्रार्थे "प्रमर्दे सर्वभूतानां नाशकत्वात्" भाष्योक्तेस्तस्य तथात्वम् । "वधित ! मङ्गानुधित ! प्रमर्दन" भा०शा० २४अ०विष्णुस्तुतौ ।

प्रमा स्त्री प्र+मा–भावे अङ् । १यथार्थज्ञाने भ्रमभिन्ने ज्ञाने तल्लक्षणं तदुत्पत्तौ गुणाश्च भाषा० उक्ता यथा "दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् । प्रत्यक्षे तु विशेष्येण विशेषणवता समम् । सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः । पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत् । शाब्दबोधे योग्यतायास्तात्पर्यस्याथ वा प्रमा । गुणः स्याद्भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा । अथ वा तत्प्रकारं यत् ज्ञानं तद्विशेष्यकम्" भाषा० । दोषशब्दे ३७६६पृ० भ्रमकारणं दर्शितम् तथा च तद्वति तत्प्रकारकज्ञानत्वं प्रमात्वं प्रामाण्यापरपर्य्यायम् तच्च मतभेदेन स्वतोग्राह्यं परतोग्राह्यञ्च तच्च परतोग्राह्यशब्दे ४२२४पृ० उक्तम् । तस्य विस्तरः स्वतोग्राह्यशब्दे वक्ष्यते । तत्र न्यायमते "प्रमात्वं न स्वतोग्राह्यं संशयानुपपत्तितः" भाषा० व्याकृतञ्च सि०मु० यथा "मीमांसका हि प्रमात्वं स्वतोग्राह्यमिति वदन्ति । तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशरूपत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यते इति । भट्टानां मते तु ज्ञानमतीन्द्रियम् । ज्ञानजन्या ज्ञातता प्रत्यक्षा । तया च ज्ञानमनुमीयते । मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते । सर्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते । विषयनिरूप्यं हि ज्ञानम् । अतो ज्ञानवित्तिवेद्यो विषयः । तन्मतं दूषयति । न स्वतोग्राह्यमिति । संशयेति । यदि ज्ञानप्रामाण्यं स्वतोग्राह्यं स्यात् तदाऽभ्यासदशोत्पन्नज्ञाने तत्संशयो न स्यात् । तत्र हि यदि ज्ञानं ज्ञातं तदा प्रामाण्यं ज्ञातमेवेति कथं संशयः । यदि तु ज्ञानं न ज्ञातं तदा धर्मिज्ञानाभावात् कथं संशयः । तस्माज्ज्ञानप्रामाण्यमनुमेयम् । तथा हि
५८ ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवं यथाऽप्रमा । इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात् । एवम् इदं जलज्ञानं प्रमा स्नेहवति जलत्वप्रकारकज्ञानत्वात् । न च हेतुज्ञानं कथं जातमिति वाच्यम् । पृथिवीत्वप्रकारकत्वस्य स्वतोग्राह्यत्वात् तत्र गन्धवद्विशेष्यकत्वस्यापि सुग्रहत्वात् । तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं परं न गृह्यते संशयानुरोधात् । न च प्रमात्वस्य साध्यस्य प्रसिद्धिः कथमिति वाच्यम् इदंज्ञानप्रमात्वस्य स्वतोग्राह्यत्वात् । न च प्रकारभेदेन प्रामाण्यभेदात् घटत्ववति घटत्वप्रकारकत्वादेः कथं प्रसिद्धिरिति वाच्यम् घटत्वप्रकारकत्वस्य स्वविशेष्यकत्वस्य च स्वतोग्राह्यत्वात् । घटस्य च पूर्वमुपस्थितत्वात् घटविशेष्यकं घटत्वप्रकारकमिति ज्ञाने प्रामाण्यस्य बाधकाभावः । अनुव्यवसायपरन्तु प्रामाण्यं न गृह्यते । तत्र संशयसामग्रीसत्त्वे संशयस्यैवोपपत्तेः । किन्त्वभ्यासदशायां त्वतोयानुव्यवसायादिना प्रामाण्यस्य स्वत एव ग्रहसम्भवात् प्रथमानुव्यवसायपरं न तद्ग्राहकत्वमिति कल्प्यते संशयानुरोधात् । अथ प्रामाण्यानुमितौ प्रामाण्यग्रहे न तस्य विषयनिश्चयरूपत्वार्थं तत्र प्रामाण्यग्रहो वाच्यः सोऽप्यनुमित्यन्तरेणेति फलमुखी कारणमुखी वा नानवस्थेति चेन्न अगृहीतप्रामाण्यकस्यैव निश्चयरूपत्वात् । यत्र च प्रामाण्यसंशयस्तत्रैव परं प्रामाण्यानुमितेरपेक्षया यावदाश्रयं प्रामाण्यानुमितिरिष्यत एव सर्वत्र तु न संशयः क्वचित् कोट्यनुपस्थितेः क्वचिद्विशेषदर्शनादितः क्वचिद्विषयान्तरसञ्चारादिति सङ्क्षेपः । ननु सर्वेषां ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद्विशेष्यकत्वं विशेषणं व्यर्थम् । न च रङ्गे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात् तव मते भ्रमस्याभावादिति वाच्यम् । तत्र हि दोषाधीनस्य पुरोवर्त्तिनि स्वतन्त्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात् । सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात् तदेव कारणम् । अस्तु वा तत्रापि भेदाग्रह एव कारणमिति । न चाऽन्यथाख्यातिः सम्भवति रजतप्रत्यक्षकारणस्य रजतसन्निकर्षस्याभावात् रङ्गे रजतबुद्धेरनुपपत्तेरिति चेन्न सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वात् अन्यत्रापि तत्कल्पनात् । न च भेदाग्रहप्रवृत्तौ तु भेदाग्रह एव कारणमिति वाच्यम् बाधकात् प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् । इत्थञ्च रङ्गे रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणाप्रत्यासत्तिकल्पनेऽपि न क्षतिः । फलमुखगौरवस्यादोषत्वात् । किञ्च यत्र रङ्गरजतयोरिमे रजते इति ज्ञानं जातं न कारणबाधोऽपि । अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्तिनिवृत्ती स्याताम् । रङ्गे रङ्ग-

भेदग्रहे रजते रजतभेदाग्रहेऽन्यथाख्यातिभयात्। त्वन्मते रङ्गे रङ्गभेदाग्रहस्य रजते रजतभेदाग्रहस्य च सत्त्वात् किञ्चानुमितिं प्रति भेदाग्रहस्य हेतुत्वे जलह्रदे वह्निव्याप्यधूमवदभेदाग्रहात् अनुमितिर्निर्बाधा। यदि च विशिष्टज्ञानं कारणं तदाऽयोगोलके वह्निव्याप्यधूमज्ञानमनुमित्यनुरोधादापतितम्। इत्थम् अन्यथाख्यातौ प्रत्यक्षमेव प्रमाणम्। रङ्गं रजततया जानामीत्यनुभवादिति सङ्क्षेपः"।

वेदान्तिमते तस्य स्वतोग्राह्यता वेदान्तपरिभाषायां व्यवस्थापिता यथा "एवमुक्तानां प्रमाणानां प्रामाण्यं स्वतएव उत्पद्यते ज्ञायते च तथा हि स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनुकूलं तद्वति तत्प्रकारकज्ञानत्वं प्रामाण्यं तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं न त्वधिकं गुणमपेक्षते प्रमामात्रेऽनुगतगुणाभावात्। नापि प्रत्यक्षप्रमायां भूयोऽवयवेन्द्रियसन्निकर्षः, रूपादिप्रत्यक्षे आत्मप्रत्यक्षे च तदभावात् सत्यपि तस्मिन् पीतः शङ्ख इति प्रत्यक्षस्य भ्रमत्वाच्च। अतएव न सल्लिङ्गपरामर्शादिकमपि अनुमित्यादिप्रमायां गुणः असल्लिङ्गपरामर्शादिस्थलेऽपि विषयाबाधेनानुमित्यादेः प्रमात्वात्। न चैवमप्रमापि प्रमा स्यात् ज्ञानसामान्यसामग्र्या अविशेषादिति वाच्यं दोषाभावस्यापि हेतुत्वाङ्गीकारात्। न चैवं परतस्त्वम् "आगन्तुकभावकारणापेक्षायामेव परतस्त्वात्" ज्ञायते च प्रामाण्यं स्वतः, स्वतोग्राह्यत्वञ्च दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम्। स्वाश्रयो वृत्तिज्ञानं तद्ग्राहक साक्षिज्ञानं तेनापि वृत्तिज्ञाने गृह्यमाणे तद्गतं प्रामाण्यमपि गृह्यते। न चैवं प्रामाण्यसंशयानुपपत्तिः तत्र संशयानुरोधेन दोषस्यापि सत्त्वेन दोषाभावघटितस्वाश्रयग्राहकाभावेन तत्र प्रामाण्यस्याग्रहात्। यद्वा यावत्स्वाश्रयग्राहकग्राह्ययोग्यत्वं स्वतस्त्वं संशयस्थले प्रामाण्यस्योक्तयोग्यतासत्त्वेऽपि दोषवशेनाग्रहात् न संशयानुपपत्तिः। अप्रामाण्यन्तु न ज्ञानसामान्यसामग्री प्रयोज्यं प्रमायामप्यप्रामाण्यापत्तेः किन्तु दोषप्रयोज्यं नाप्यप्रामाण्यं यावत्स्वाश्रयग्राहकग्राह्यम् अप्रामाण्यघटकतदभाववत्त्वादेर्वृत्तिज्ञानानुपनीतत्वेन साक्षिणा ग्रहीतुमशक्यत्वात् किन्तु विसंवादिप्रवृत्त्यादिलिङ्गकानुमित्यादिविषय इति परत एवाप्रामाण्यमुत्पद्यते ज्ञायते चेति"। अधिकं प्रमाणशब्दे दृश्यम्।

प्रमाण न॰ प्र+मा–भावे करणे वा ल्युट्। १प्रमारूपज्ञाने २विष्णौ "प्रमाणं प्राणनिलयः" विष्णु स॰। प्रमाणं "प्रज्ञानं ब्रह्मेति" श्रुतेस्तस्य ज्ञानरूपत्वात् तथात्वम् "प्रमाणं बीजमव्ययम्" विष्णु स॰ प्रत्यक्षादिप्रमाणरूपत्वात्तस्य तथात्वं व्युत्पत्तिद्वययोगात् नामद्वयम्। ३सत्यवादिनि ४इयत्तायां परिच्छेदे ५हेतौ ६प्रमातरि च मेदि॰। ७प्रमितिकरणे चकरादौ "यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता स येनार्थं प्रमिणोति तत्प्रमाणम्" वात्स्या॰ "तच्च साधनाश्रयव्यतिरिक्तत्वे सति प्रमाव्याप्तं प्रमाणमिति" सर्वद॰अक्षपाददर्शने। "तद्वति तत्प्रकारकत्वरूपप्रकर्षविशिष्टज्ञानकरणत्वम्" गौ॰वृ॰। "अनुभवत्वव्याप्यजात्यवच्छिन्नप्रमावृत्तिकार्य्यतानिरूपितकारणताशालित्वे सति व्यापारवत्त्वम् तत्त्वम्" तर्कप्रकाशे शितिकण्ठः। प्रमाणत्वं च अनधिगतार्थकानुभवकारणत्वम्। तच्च गृहीतग्राहीतरानुभवकारणत्वम्। स्वसमानाधिकरणस्वाव्यवहितपूर्ववर्त्तिस्वसमानाकारनिश्चयविषयविषयकेतरतद्वद्विशेष्यकतत्प्रकारकानुभवकारणत्वमिति यावत् न्यायकुसुमाञ्जलिटी॰। "यज्जातीयविशिष्टज्ञानत्वावच्छेदेन समानाकारनिश्चयोत्तरत्वं तज्जातीयान्ययथार्थज्ञानस्यैवागृहीतग्राहित्वेन प्रमात्वात् अतएव धारावाहिप्रत्यक्षव्यक्तीनां समानाकारग्रहोत्तरवर्त्तित्वेऽपि न तासां प्रमात्वहानिः हानिस्तु समानाकारानुभवसमुत्थानां स्मृतीनामिति" शब्द॰प्र॰। न्यायनये चत्वारि प्रमाणानि। प्रत्यक्षम्। अनुमानम्। उपमानम्। शब्दः गौ॰सू॰ प्रकारान्तरेण प्रमाणं द्विविधम् "शब्दोपजीवि शब्दानुपजीवि" कुसुमाञ्जलि॰। प्रत्यक्षमेकमेव प्रमाणमिति चार्वाकाः सङ्गिरन्ते। प्रत्यक्षमनुमानं चेति द्वे प्रमाणे इति वैशेषिका बौद्धा आर्हताश्च। प्रत्यक्षं शब्दश्चेति द्वे प्रमाणे इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्याः। प्रत्यक्षमनुमानमाप्तवचनमिति त्रीणि प्रमाणानीति सांख्या वेदान्तिनश्च। प्रत्यक्षानुमानोपमानानि त्रीणीति नैयायिकैकदेशिनः। प्रत्यक्षानुमानोपमानशब्दा अर्थापत्तिश्चेति पञ्च प्रमाणानीति प्राभाकराः। प्रत्यक्षानुमानोपमानशब्दा अर्थापत्तिरनुपलब्धिश्चेति षट्प्रमाणानीत्यपरे भाट्टवेदान्तिभेदाश्च। सम्भवैतिह्ये अतिरिक्ते प्रमाणे इति पौराणिकाः। चेष्टाप्यतिरिक्तं प्रमाणमिति तान्त्रिकाः। तत्र सांख्यपातञ्जलवेदान्तिमते अन्तःकरणवृत्तीनां पौरुषेयचित्तवृत्तिप्रकाशरूपबोधे करणत्वम् अन्तःकरणवृत्तिषु च ज्ञानत्वारोपेण तत्करणत्वमिन्द्रियाणामिति

भेदः । यथोक्तं सां॰प्र॰भा॰ "प्रमाता चेतनः शुद्धः प्रमाणं वृत्तिरेव नः । प्रमाऽर्थाकारवृत्तीनां चेतने प्रतिबिम्बनम् । प्रतिबिम्बितवृत्तीनां विषयो मेय उच्यते । साक्षाद्दर्शनरूपं च साक्षित्वं वक्ष्यति स्वयम् । अतः स्यात् कारणाभावाद्वृत्तेः साक्ष्येव चेतनः । विष्ण्वादेः सर्वसाक्षित्वं नोण लिङ्गाद्यभावतः" । "प्रमाणविपर्य्ययविकल्पनिद्राः स्मृतयः" पात॰सू॰ "इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात् तद्विषयसामान्यविशेषात्मनोऽर्थस्य विशेषावधारणं प्रधाना वृत्तिः प्रत्यक्षं प्रमाणं, फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः" भाष्यम् "अनधिगततत्त्वबोधः पौरुषेयो व्यवहारहेतुः प्रमा तत्करणं प्रमाणम् । ननु पुरुषवर्त्ती बोधः कथं चित्तगतायावृत्तेः फलं न हि खदिरगोचरव्यापारेण परशुना पलाशे छिदा क्रियते इत्यत आह अविशिष्ट इति । न हि पुरुषगतो बोधो जन्यते अपि तु चैतन्यमेव बुद्धिदर्पणप्रतिबिम्बितं बुद्धिवृत्त्या अर्थाकारया तदाकारतामापाद्यमानं फलम् । तच्च तथाभूतं बुद्धेरविशिष्टं बुद्ध्यात्मिका वृत्तिः वृत्तिश्च बुद्ध्यात्मिकेति सामानाधिकरण्यादुयुक्तः प्रमाणफलभाव इत्यर्थः" विव॰ । प्रमाणस्य भावः ष्यञ् प्रामाण्य न॰ तल् प्रमाणता स्त्री त्व प्रमाणत्व न॰ प्रमाणभावे प्रमितिकरणत्वे प्रमात्वे च । उद्देश्यविधेयभावेनान्वयस्थले प्रमाणशब्दस्य प्रमाकरणपरत्वे क्वचिदेकवचनता यथा "वेदाः प्रमाणं स्मृतयः प्रमाणम्" इत्यादौ । क्वचित्तु बहुवचनता यथा "प्रत्यक्षानुमानोपमानागमाः प्रमाणानि" गौ॰सू॰ । तत्र पूर्वत्र शास्त्रत्वरूपप्रमात्वजातेरेकत्वात् एकवचनत्वम् । उत्तरत्र प्रत्यक्षत्वादिजातिचतुष्टयकरणानां बहुत्वात् बहुवचनता इति प्रथमाव्युत्पादे गदाधरेण प्रपञ्चितम् तत्र दृश्यम् । सामान्यत्वात् क्लीवतैवास्य । क्वचित्तु विशेषपरत्वे स्त्रीत्वपरता यथा प्रमाणी । स्त्री प्रमाणी यस्य ब॰व्री॰ "अप् पूरणीप्रमाण्योः" पा॰अप्समा॰ न कप् । स्त्रीप्रमाण इत्येव सि॰कौ॰ । ८परिमाणभेदे च । "प्रमाणे मात्रजदघ्नसज्दघ्नचः" पा॰ वृत्तौ दृश्यम् ।

प्रमाणबाधितार्थक पु॰ प्रमाणेन बाधितोऽर्थो यस्य कप् । तर्कभेदे तर्कशब्दे ३२५५ पृ॰ दृश्यम् ।

प्रमाणिक त्रि॰ प्रमाणं सिद्धिहेतुतयाऽस्त्यस्य ठन् । प्रमाणसिद्धे "प्रमाणिका जरौ लगौ" वृ॰र॰ उक्ते अष्टाक्षरपादके २छन्दोभेदे स्त्री । ३परिमाणभेदयुते मध्यमाङ्गुलकूर्परान्तरमितपरिमाणयुते हस्ते हेमच॰ ।

प्रमातामह पु॰ प्रगतो मातामहं कार्य्यत्वेन अत्या॰स॰ । १मातामहस्य पितरि अमरः । तस्य पत्नी ङीष् । प्रमातामही २तत्पत्न्यां स्त्री ।

प्रमातृ त्रि॰ प्रमिमीते प्र+मि–तृच् । प्रमाज्ञानकर्त्तरि । न्यायनये "यस्य प्रमाजिज्ञासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता" वात्स्या॰ । सांख्यमते शुद्धचेतनो वृत्तिसाक्षी च । प्रमाणशब्दे तद्वाक्यम दृश्यम् । वेदान्तिमते "मेयातीतो विशुद्धो मुनिभिरभिहितो मोहसंक्रान्तमूर्त्तिः साक्षी संवित् प्रमा तत्प्रतिफलितवपुर्गीयतेऽसौ प्रमाता" इत्युक्तदिशा अन्तःकरणवृत्तिप्रतिबिम्बितं तदवच्छिन्नं वा चैतन्यमेव प्रमाता ।

प्रमाथ पु॰प्र+मथ-भावे घञ् । १बलाद्धरणे २प्रपीडने च । बा॰ कर्त्तरि ण । ३कुमारानुचरभेदे भा॰ श॰ ४६ अ॰ । स्वार्थे अण् । ४शिवपारिषद्प्रमथगणे पु॰हरिवं॰१८१अ॰ ५धृतराष्ट्रपुत्रभेदे पु॰ भा॰द्रो॰ १५७ अ॰ ।

प्रमाथिन् त्रि॰ प्रमथ्नाति प्र+मथ–णिनि । १बलाद्धारके २पीडके च । "इन्द्रियाणि प्रमाथीनि" गीता । स्त्रियां ङीप् । सा च ३अप्सरोभेदे भा॰आ॰ १२४ अ॰ । ४राक्षसभेदे पु॰ भा॰ व॰ २८४ अ॰

प्रमाद पु॰ प्र+मद–घञ् । १कर्त्तव्ये अकर्त्तव्यत्वधिया ततो निवृत्तौ अकर्त्तव्ये कर्त्तव्यत्वधिया तत्र प्रवृत्तौ वा अनवधानतायाम् अमरः । अनवधानताशब्दे १५२पृ॰ दृश्यम् । स च तमोगुणकार्य्यः तमस्शब्दे ३२३५ पृ॰ दृश्यम् । तस्य तमोरूपत्वात्तत्कार्य्यत्वं बोध्यम् ।

प्रमादवत् पु॰ प्रमादोऽस्त्यस्य मतुप् मस्य वः । १प्रमादयुते २असमीक्ष्यकारिणि जटा॰ ।

प्रमादिन् त्रि॰ प्रमादः नित्ययोगे इनि न तु अस्त्यर्थे एकाक्षरत्वात् तस्य निषेधात् । नित्यप्रमादयुक्ते "एकः प्रमादी स कथं न हन्यते" श्रीधरधृतवाक्यम् ।

प्रमापण न॰ प्र+मीञ्–हिंसायां स्वार्थे णिच्–आत्वे पुक् ल्युट् । मारणे अमरः ।

प्रमायुक त्रि॰प्र +मी–ताच्छील्ये उकञ् । प्रमरणशीले "नास्य प्रियं प्रमायुकं भवति" छा॰उ॰ । "प्रमायुकं मरणशीलम्" भा॰ ।

प्रमित त्रि॰ प्र+मि–मी वा क्त । १ज्ञाते २यथाभावधारिते च जटा॰ । ३परिमिते ।

प्रमिताक्षरा स्त्री प्रमितानि परिमितानि अक्षराणि यस्याम् । सिद्धान्तशिरोमणि–व्याख्यानरूपायां टीकायाम् १तत्त्वचिन्तामणिटीकाभेदे– "प्रमिताक्षरा सजसै-

मुदिता” छ०र० उक्ते द्वादशाक्षरपादके १वर्णवृत्तभेदे ।

प्रमिति स्त्री प्र+मि–मा–वा क्तिन् । प्रमाज्ञाने अमरः ।

प्रमीढ त्रि० प्र+मिह–क्त । १मूत्रिते २घने च मेदि० ।

प्रमीत त्रि० प्र+मीञ्–हिंसायां क्त । १मृते “प्रमीतौ पितरौ यस्य” इति स्मृतिः । २यज्ञार्थे हतपशौ पु० अमरः ।

प्रमीला स्त्री प्र+मील–भावे अ । तन्द्राम् अमरः ।

प्रमुख न० प्रकृष्टं मुखमारम्भः । १तदादित्व त्रिका० प्रकृष्टं मुखमस्य । २प्रथमे ३प्रधाने अमरः ४मान्ये ५श्रेष्ठे च त्रि० मेदि० ६पुन्नागवृक्षे पु० शब्दरत्ना० ७समूहे पु० शब्दच० । बहु० । उत्तरपदस्थः । तदादिके त्रि० ।

प्रमुच पु० १ऋषिभेदे भा०शा० २०८अ० । प्रमुच्यति प्र+मुच–क । २प्रकर्षेण मोक्तरि त्रि० ।

प्रमुचु ऋषिभेदे भा०अनु० १५०अ० ।

प्रमुद् त्रि० प्रकृष्टा मुद् यस्य । १हृष्टे २हर्षयुक्ते अमरः । ३देवभेदे पु० यजु० १०।१०। भा०व० । ४प्रकृष्टहर्षे स्त्री ।

प्रमुदित त्रि० प्र+मुद–कर्त्तरि क्त । १हृष्टे २हर्षयुक्ते अमरः ।

प्रमुदितवदना स्त्री “प्रमुदितवदना भवेन्नौ च रौ” छ०र० उक्ते द्वादशाक्षरपादके छन्दोभेदे । [मृगे स्थाने

प्रमृग अव्य० प्रकृष्टा मृगा यत्र तिष्ठ० अव्ययी० । प्रकृष्टमृग-

प्रमृत न० प्रकृष्टं मृतं प्राणिहिंसितं यत्र । मनूक्ते कर्षणरूपे जीवनोपायभेदे “मृतन्तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतम्” मनुः । “कर्षणस्य भूमिगतप्रचुरप्राणिमरणनिमित्तत्वात् बहुदुःखफलकं प्रकर्षेण मृतमिव प्रमृतम्” कुल्लू० ।

प्रमेय त्रि० प्र+मा–कर्मणि यत् । १प्रमाज्ञानविषये पदार्थे २परिच्छेद्ये ३अवधार्ये च । तत्र वेदान्ते शुद्धचैतन्यं प्रमेयम् अन्यस्याध्यासमूलकत्वेन व्यावहारिकप्रमाज्ञानविषयत्वेऽपि न परमार्थप्रमेयत्वम् । न्यायमते “आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्” गौ०सू० उक्ताः आत्मादयः । प्रमेयत्वं च केवलान्वयि सर्वेषामीश्वरज्ञानरूपप्रमाविषयत्वात् ।

प्रमेह पु० प्र+मिह–आधारे करणे वा घञ् । रोगभेदे तल्लक्षणभेदादिकं भावप्र० उक्तं यथा

“आस्यासुखं स्वप्नसुखं दधीनि ग्राम्यौदकानूपरसः पयांसि । नवान्नपानं गुडवैकृतं च प्रमेहहेतुः कफकृच्च सर्वम् । मेदश्च मांसञ्च शरीरजञ्च क्लेदं कफो बस्तिगतं प्रदूष्य । करोति मेहान् समुदीर्णमुष्णैस्तानेव पित्तं परिदूष्य चापि । क्षीणेषु दोषेष्ववकृष्य धातून् संदूष्य मेहान् कुरुतेऽनिलश्च । साध्याः कफोत्था दश पित्तजाः षट् याप्या न साध्याः पवनाच्चतुष्काः । समक्रियत्वाद्विषमक्रियत्वान्महात्ययत्वाच्च यथाक्रमन्ते । कफश्च पित्तं पवनश्च दोषा मेदोऽस्रशुक्राम्बुवसालसीकाः । मज्जारसौजःपिशितञ्च दूष्याः प्रमेहिणां विंशतिरेव मेहाः । दन्तादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः । दाहश्चिक्कणता देहे तृट्स्वाद्वास्यञ्च जायते । सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता । दोषदूष्याविशेषेऽपि तत्संयोगविशेषतः । मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते । अच्छं बहुतरं शीतं निर्गन्धमुदकोपमम् । मेहत्युदकमेहेन किञ्चिच्चाविलपिच्छिलम् । इक्षोरसमिवात्यर्थं मधुरञ्चेक्षुमेहतः । सान्द्री भवेत् पर्युषितं सान्द्रमेहेन मेहति । सुरामेहि सुरातुल्यमुपर्यच्छमधोघनम् । संहृष्टरोमा पिष्टेन पिष्टवद्बहुलं सितम् । शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति । मूर्त्ताणून् सिकतामेही सिकतारूपिणो मलान् । शीतमेही सुबहुशो मधुरं भृशशीतलम् । शनैःशनैः शनैर्मेही मन्दं मन्दं प्रमेहति । लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् । गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत् । नीलमेहेन नीलाभं कालमेही मसीनिभम् । हारिद्रमेही कटुकं हरिद्रासन्निभं दहत् । विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम् । विस्रमुष्णं सलवणं रक्ताभं रक्तमेहिनः । वसामेही वसामिश्रं वसाभं मूत्रयेन्मुहुः । मज्जानं मज्जमिश्रं वा मज्जमेही मुहुर्मुहुः । कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद् बुधः । हस्ती मत्त इवाजस्रं मूत्रवेगविवर्जितम् । सलसीकं विबद्धञ्च हस्तिमेही प्रमेहति । अविपाकोऽरुचिश्छर्दिर्निद्रा कासः सपीनसः । उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् । बस्तिमेहनयोस्तोदो मुष्कावदारणं ज्वरः । दाहस्तृष्णाम्लिकामूर्च्छाविड्भेदः पित्तजन्मनाम् । वातजानामुदावर्त्तकम्पहृद्ग्रहलोलताः । शूलमुन्निद्रता शोषः श्वासः कासश्च जायते । यथोक्तोपद्रवाविष्टमतिप्रस्रुतमेव च । पिडकापीडितं गाढं प्रमेहो हन्ति मानवम् । मूर्च्छाच्छर्दिज्वरश्वासकासशोषगौरवैः । उपद्रवैरुपेतो यः प्रमेही दुःप्रतिक्रियः । रक्तः प्रवर्त्तते यस्मात् नास्ति नाडि विशोधयेत् । सर्वान् शरीरदोषांश्च न प्रमेहस्ततः क्रियः । जातः प्रमेही मधुमेहिनो वा न साध्यरोगः स हि बीजदोषात् । ये चापि केचित् कुलजा विकाराः भवन्ति तां-

ऽपि तदन्यथाख्यान् । सर्व एव प्रमेहास्तु कालेनाप्रतिकारिणः । मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति च । मधुमेहो मधुनिभो जायते स किल द्विधा । क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथ वा । आवृतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयन् । क्षीणःक्षीणात् क्षणात् पूर्णो भजते कृच्छ्रसाध्यताम् । मधुरं यच्च सर्वेषु प्रायो मध्विव मेहति । सर्वेऽपि मधुमेहाख्यं माधुर्याच्च तनोरतः । शराविकाकच्छपिका जालिनी विनताऽलजी । मसूरिका सर्षपिका पुत्रिणी सविदारिका । विद्रधिश्चेति पिडकाः प्रमेहोपेक्षया दश" ।

तद्रोगनिमित्तकर्मभेद शा॰ त॰ उक्तः । कर्मविपाकशब्दे १०७६ पृ॰ दृश्यम् । तत्र मधुमेहस्यैव महारोगभेदरूपता "मधुमेहभगन्दरौ" इत्युक्तेः ।

प्रमेहिन् पु॰ प्र+मिह–णिनि । प्रमेहरोगयुते ।

प्रमोचनी स्त्री प्रकर्षेण मुच्यते निस्त्वचीक्रियते भोजनार्थम् मुच–कर्मणि ल्युट् ङीप् । १गोडुम्बायाम् (गोमुक) जटा॰ २प्रमोचनसाधने त्रि॰ । भावे ल्युट् । ३प्रकर्षेण मोचने न॰ ।

प्रमोद पु॰ प्र+मुद–हर्षे भावे घञ् । १हर्षे प्रियलाभनिमित्ते प्रकृष्टहर्षे आनन्दशब्दे ७१७पृ॰ तैत्ति॰उ॰ भाष्यवाक्यं दृश्यम् । प्रकृष्टो मोदोऽस्य प्रा॰ब॰। २प्रमोदयुते त्रि॰ ३नागभेदे पु॰ भा॰आ॰५७अ॰। ४स्कन्दानुचरभेदे पु॰ भा॰श॰ ४६अ॰। सा॰त॰कौ॰ उक्ते ५तुष्टिसिद्धिभेदे "तिस्रश्च तुष्टयः सिद्धयः प्रमोदमुदितमोदमानाः" । तत्राध्यात्मिकदुःखविघातस्य सर्वोत्कर्षेण हृष्टत्वात् प्रमोदत्वं बोध्यम् । आधिभौतिकदुःखविघातस्य मोदाधारत्वात् मुदितत्वम् आधिदैविकदुःखविघातस्य मोदमानत्वं मोदस्य मानं भानं यत्रेति व्युत्पत्त्येति विवेकः ।

प्रमोदन त्रि॰ प्रमोदयति प्र+मुद–णिच्–ल्यु । १हर्षकारके २विष्णौ पु॰ "जिताभित्रः प्रमोदनः" विष्णुस॰ । भावे ल्युट् । ३हर्षसम्पादने न॰ । [२कुबेरे पु॰ शब्दमाला ।

प्रमोदित त्रि॰प्रमोदो जातोऽस्य तार॰ इतच् । १जातप्रमोदे

प्रमोदिन् त्रि॰ प्रमोदयति प्र+मुद–णिच्–णिनि । १प्रहर्षजनके । स्त्रियां ङीप् । सा च २जिङ्गिनीवृक्षे भावप्र॰।

प्रमोहन न॰ प्रमुह्यतेऽनेन प्र+मुह–करणे ल्युट्, प्रमोहयति प्र+मुह+णिच्–ल्यु वा । १प्रमोहसाधने प्रमोहकारके २अस्त्रभेदे च मदनप्रयोगे विपक्षस्य प्रमोहो जायते तस्मिन्नस्त्रे । भा॰भी॰७७अ॰। ३प्रमोहकारकमात्रे त्रि॰ ।

प्रम्लोचन्ती स्त्री प्रम्लोचति नरं प्रति आत्मानं दर्शयति प्र+म्लुच–शतृ–ङीप् । अप्सरोभेदे यजु॰ १५।१७

प्रम्लोचा स्त्री प्रम्लोचति नरं प्रत्यात्मानं दर्शयति प्र+म्लुच–अच् । अप्सरोभेदे गरुडपु॰ ८०अ॰ ।

प्रयज्यु त्रि॰ प्र+यज "यजिमनिशुन्धिजनिदसिभ्यो युच्" उणा॰ युच् निरनुनासिकत्वात् अनादेशो न । अध्वर्यौ उज्ज्व॰ ऋ॰ १।१२८।६

प्रयत त्रि॰प्र+यम–कर्त्तरि क्त । १पवित्रे संयते अमरः । प्र+यत–अच् । २प्रयत्नविशिष्टे त्रि॰ । प्रपूर्वक यमेर्दानार्थकात् कर्मणि क्त । ३दत्ते च । "प्रयतदक्षिणम्" ऋ॰ १२१।१५

प्रयत्न पु॰ प्र+यत–भावे नङ् । प्रयासे । स च न्यायमते त्रिविधः यथा "प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम । एवं प्रयत्नवैविध्यं तान्त्रिकैः परिदर्शितम् । चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा । उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् । निवृत्तिस्तु भवेद्द्वेषात् द्विष्टसाधनताधियः । यत्नो जीवनयोनिस्तु सर्वदाऽतीन्द्रियो भवेत् । शरीरे प्राणसञ्चारे कारणं तत्प्रकीर्त्तितम्" भाषा॰ 'प्रयत्नस्तु फलावाप्त्यै व्यापारोऽतित्वरान्वितः" सा॰द॰ उक्ते २फलार्थिभिः प्रारब्धस्य कर्मणोऽवस्थापञ्चकान्तर्गतेऽवस्थाभेदे मतोऽस्त्यर्थे मतुप् मस्य वः । प्रयत्नवत् तद्युक्ते त्रि॰ स्त्रिका॰ स्त्रियां ङीप् ।

प्रयत्नशैथिल्य न॰। स्वाभाविकप्रयत्नस्योपरमपूर्वकप्रयत्नभेदे तच्च योगाङ्गासनसिद्धिकारणं यथोक्तं "प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्" पा॰सू॰ "भवतीति शेषः प्रयत्नोपरमात् सिद्ध्यत्यासनं येन नाङ्गमेजयो भवति अनन्ते वा समापन्नं चित्तमासनं निर्वर्त्तयतीति" भा॰ "सांसिद्धिको हि प्रयत्नः शरीरधारको न योगाङ्गस्योपदेष्टव्यासनस्य कारणं तस्य तत्कारणत्वे उपदेशवैयर्थ्यात् स्वरसत एव तत्सिद्धेः तस्मादुपदेष्टव्यस्यासनस्यायमसाधकः विरोधी च स्वाभाविकः प्रयत्नः । तस्य च यादृच्छिकासनहेतुतयासननियमोपहन्तृत्वात् । तस्मादुपदिष्टनियमासनमभ्यस्यता स्वाभाविकप्रयत्नशैथिल्यात्मा प्रयत्न आस्थेयो नान्यथोपदिष्टमासनं सिध्यतीति स्वाभाविकप्रयत्नशैथिल्यमासनसिद्धिहेतुः अनन्ते वा नागनायके स्थिरतरफणासहस्रविधृतविश्वम्भरामण्डले समापन्नं चित्तमासनं निर्वर्त्तयतीति" विव॰ [१।५।१।१५ भाष्यम् ।

प्रयन्तृ त्रि॰प्र+यम–तृच् प्रकर्षेण १नेतरि २दातरि च ऋ॰

प्रयस् न॰प्रयस्यतेऽत्र प्र+यस–आधारे क्विप् । अन्ने निघण्टुः पय इत्यत्र प्रय इति पाठान्तरं ऋ॰१।४५।८ उदा॰।

प्रयस्त त्रि॰प्र+यस–आधारे क्त । १प्रयासेन कृते घृतचतुर्जातकादिना द्रव्येण प्रयत्नसंस्कृते २व्यञ्जने न॰ अमरः।

प्रयाग पु॰ प्रकृष्टो यागो यागफलं यस्य यस्मात् वा । गङ्गायमुनयोः सङ्गमजाते १तीर्थभेदे २शतक्रतौ इन्द्रे च । ३यज्ञे अश्वमेधाङ्गत्वात्तस्य यज्ञसाधनत्वात् तथात्वम् । कर्म॰। ४प्रकृष्टे यज्ञे अमरः। तत्र तीर्थभेदे पुंन॰ पुराणे तथा प्रयोगात् । मन्माहात्म्यञ्च मत्स्यपु॰१०२अध्यायादिके १०७अध्यायान्ते उक्तम् एवमन्यान्यपुराणेऽप्युक्तम् । ततो दिङ्मात्रं पुराणसमुच्चये दर्शितमत्र प्रदर्श्यते।

"एतत् प्रजापतेः क्षेत्रं त्रिषु लोकेषु विश्रुतम् । न शक्यं कथितुं राजन् ! फलं वर्षशतैरपि । संक्षेपेण तु वक्ष्यामि तस्य तीर्थस्य यत् फलम् । षष्टिर्वीरसहस्राणि तत्र रक्षन्ति जाह्नवीम् । यमुनां रक्षति सदा सविता सप्तवाहनः । तं वटं रक्षति शिवः शूलपाणिर्महेश्वरः । स्थानं रक्षन्ति वै देवाः सर्वपापहरं शुभम् । प्रयागं स्मरमाणस्य यान्ति पापानि संक्षयम् । दर्शनात्तस्य तीर्थस्य सर्वपापैः प्रमुच्यते । मृत्तिकालभनाद्वापि नरः पापात् प्रमुच्यते । पञ्च कुण्डानि राजेन्द्र ! येषां मध्ये तु जाह्नवी । प्रयागस्य प्रवेशाद्वै पापं नश्यति तत्क्षणात् । मनसा चिन्तितान् कामान् सर्वान् प्राप्नोति पुष्कलान् । ततो गत्वा प्रयागन्तु सर्वदेवाभिरक्षितम् । ब्रह्मचारी शुचिर्भूत्वा पितॄन् देवांश्च तर्पयेत् । तपनस्य सुता देवी त्रिषु लोकेषु विश्रुता । समागता महाभाग ! यमुना यत्र निर्मला । तत्रोपस्पृश्य राजेन्द्र ! स्वर्गलोकमुपाश्नुते । व्याधितो यदि वा दीनः क्रुद्धो वापि भवेन्नरः । गङ्गायमुनमासाद्य यस्तु प्राणान् परित्यजेत् । दीप्तकाञ्चनसङ्काशैर्विमानैः सूर्यवर्चसैः । गन्धर्वाप्सरसां मध्ये स्वर्गे तिष्ठति मानवः" ।

"देशस्थो यदि वाऽरण्ये विदेशे यदि वा गृहे । प्रयागं स्मरमाणोऽपि यस्तु प्राणान् परित्यजेत् । ब्रह्मलोकमवाप्नोति वदन्ति मुनिपुङ्गवाः । सर्वकामफला वृक्षा मही यत्र हिरण्मयी । ऋषीमहर्षयाकले रम्ये मन्दाकिन्यास्तटे शुभे । मोदते ऋषिभिः सार्द्धं स्वर्गे तेनेह कर्मणा । सिद्धचारणगन्धर्वैः पूज्यते दिवि दैवतैः । ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् । ततः शुभानि कर्माणि चिन्तयानः पुनःपुनः । गुणवान् वित्तसम्पन्नो भवतीह न संशयः । स्वर्णशृङ्गीं रूप्यखुरां चेलकण्ठीं पयस्विनीम् । प्रयागे श्रोत्रियं साधुं ग्राहयित्वा यथाविधि । स्वर्गे च तत्फलं भुङ्क्ते प्रदाता पद्मकोटिषु । पुत्रान् दारांस्तथा भृत्यान् गौरेका प्रतितारयेत् । ऐश्वर्यलोभमोहाद्वा गच्छेद्यानेन यो नरः । निष्फलं तस्य तत्तीर्थं तस्माद्यानन्तु वर्जयेत् । तत्र दानं प्रदातव्यं यथाविभवसम्भवम् । तेन तीर्थफलञ्चैव वर्द्धते नात्र संशयः । स्वर्गे तिष्ठति राजेन्द्र ! यावदाहूतसंप्लवम् । वटमूलं समासाद्य यस्तु प्राणान् परित्यजेत् । सर्वलोकानतिक्रम्य रुद्रलोकं स गच्छति । तत्र ते द्वादशादित्यास्तपन्ते रुद्रमाश्रिताः । निर्दहन्ति जगत्सर्वं वटमूलं न दह्यते । नष्टचन्द्रार्कपवनं यदा चैकार्णवं जगत् । स्वपते तत्र वै विष्णुर्यजमानः पुनःपुनः । देवदानवगन्धर्वा ऋषयः सिद्धचारणाः । सदा सेवन्ति तत्तीर्थं गङ्गायमुनसङ्गमम् । ततः पुण्यतमं नास्ति त्रिषु लोकेषु भारत ! । श्रवणात्तस्य तीर्थस्य नामसङ्कीर्त्तनादपि । मृत्तिकालभनाद्वापि नरः पापात् प्रमुच्यते । तुल्यं फलमवाप्नोति राजसूयाश्वमेधयोः । न देववचनात्तात न लोकवचनादपि । मतिरुत्क्रमणीया ते प्रयागमरणं प्रति । दश तीर्थसहस्राणि षष्टिःकोट्यस्तथापराः । तेषां सान्निध्यमत्रैव माघे वै कुरुनन्दन ! । या गतिर्योगयुक्तस्य सत्यस्थस्य च धीमतः । सा गतिस्त्यजतः प्राणान् गङ्गायमुनसङ्गमे । कम्बलाश्वतरौ नागौ विपुले यमुनातटे । तत्र स्नात्वा च पीत्वा च सर्वपापैः प्रमुच्यते । तत्र गत्वा च संस्थानं महादेवस्य धीमतः । नरस्तारयते पूर्वान् पुरुषानेकविंशतिम् । कृत्वाभिषेकन्तु नरो ह्यश्वमेधफलं लभेत् । स्वर्गलोकमवाप्नोति यावदाहूतसंप्लवम् । पूर्वपार्श्वे च गङ्गायास्त्रिषु लोकेषु विश्रुतम् । कूपश्चैव तु साहस्रं प्रतिष्ठानञ्च नामतः । तत्र स्नात्वा विशुद्धात्मा अश्वमेधफलं लभेत् । उत्तरेण प्रतिष्ठानाद्भागीरथ्यास्तु पूर्वतः । हंसप्रपतनं नाम तीर्थं त्रैलोक्यविश्रुतम् । अश्वमेधमवाप्नोति स्नानमात्रेण भारत ! । यावच्चन्द्रश्च सूर्यश्च तावत्स्वर्गे महीयते । उर्वशीपुलिने रम्ये विपुले हंसपाण्डुरे । परित्यजति यः प्राणान् शृणु तस्यापि यत् फलम् । षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च । मोदते पितृभिः सार्द्धं स्वर्गलोके नरोत्तमः । ततः स्वर्गात् परिभ्रष्टः क्षोणकर्मा द्विजद्रुतः । उर्वशीकर्षयोमान्

कन्यानां दिव्यतेजसाम्॥ मध्ये नारीसहस्राणां बह्वीनाञ्च पतिर्भवेत्। दशग्रामसहस्राणां भर्त्ता भवति भूमिपः। काञ्चीनूपुरशब्देन सुप्तोऽसौ प्रतिबुध्यते। अथ सन्ध्यावटे रम्ये ब्रह्मचारी जितेन्द्रियः। उपासीत शुचिः सन्ध्यां ब्रह्मलोकमवाप्नुयात्। कोटितीर्थं समासाद्य यस्तु प्राणान् परित्यजेत्। कोटिवर्षसहस्राणि स्वर्गलोके महीयते। ततः स्वर्गात् परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः। सुवर्णमणिमुक्ताढ्ये कुले जायेत रूपवान्। ततो भागीरथीं गत्वा वासुकेरुत्तरेण तु। दशाश्वमेधिकं नाम तत्र तीर्थं परं भवेत्। कृताभिषेकन्तु नरो ह्यश्वमेधं फलं लभेत्। धनाढ्यो रूपवान् दक्षो दाता भवति धार्म्मिकः। चतुर्वेदेषु यत् पुण्यं सत्यवादिषु यत्फलम्। अहिंसायाञ्च यो धर्म्मो गमनादेव तत् फलम्। तथैव मानसं नाम गङ्गाया दक्षिणे तटे। त्रिरात्रमुषितः स्नात्वा सर्व्वान् कामानवाप्नुयात्। पृथिव्याः ससमुद्रायाः महाभागः पतिर्भवेत्। षष्टिस्तीर्थसहस्राणि षष्टिस्तीर्थशतानि च। माघे मासि गमिष्यन्ति गङ्गायमुनसङ्गमम्। गवां शतसहस्रस्य सम्यग्दत्तस्य यत् फलम्। प्रयागे माघमासे वै त्र्यहं स्नातस्य तत् फलम्। गङ्गायमुनयोर्म्मध्ये योऽग्नौ स्वाङ्गं परित्यजेत्। अहीनाङ्गोऽप्यरोगश्च पञ्चेन्द्रियसमन्वितः। यावन्ति रोमकूपाणि तस्याङ्गेषु च धीमतः। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। जलप्रवेशं यः कुर्य्यात् सङ्गमे लोकविश्रुते। राहुग्रस्तो यथा सोमो विमुक्तः सर्व्वपातकैः। सोमलोकमवाप्नोति सोमेन सह मोदते। षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च। स्वर्गलोकमवाप्नोति ऋषिगन्धर्व्वसेवितः। परिभ्रष्टश्च राजेन्द्र! समृद्धे जायते कुले। अधःशिरास्तु यो ज्वालामूर्द्ध्वपादः पिबेन्नरः। शतं वर्षसहस्राणां स्वर्गलोके महीयते। परिभ्रष्टश्च राजेन्द्र! अग्निहोत्री भवेन्नरः। यस्तु देहं कर्त्तित्वा शकुनिभ्यः प्रयच्छति। विहगैरुपभुक्तस्य शृणु तस्यापि यत् फलम्। शतं वर्षसहस्राणि सोमलोके महीयते। तस्मादपि परिभ्रष्टो राजा भवति धार्म्मिकः। यामुने चोत्तरे कूले प्रयागस्य च दक्षिणे। ऋणप्रमोचनं नाम तत्तीर्थं परमं स्मृतम्। एकरात्रोषितः स्नात्वा ऋणैः सर्व्वैर्विमुच्यते। अश्वमेधफलं तस्माद्गच्छतस्तु पदे पदे। पुरुषांस्तारयेद्राजन्! दश पूर्व्वान् दशापरान्। अतीतान् पुरुषान् सप्त भविष्यांश्च चतुर्द्दश। नरस्तारयते सर्व्वान् यस्तु प्राणान् परित्यजेत्। अज्ञानान्धाः पुरुषाः पापोपहतचेतसः। न प्राप्नुवन्ति तत् स्थानं प्रयागं देवरक्षितम्। स्नानेन तु यस्येह तीर्थयात्रादिकं भवेत्। सर्व्वकामसमृद्धन्तु स्वर्गलोके महीयते। अग्नितीर्थमिति ख्यातं यमुनादक्षिणे तटे। उत्तरेण तु वक्ष्यामि आदित्यस्य महात्मनः। तीर्थं निरुदकं नाम यत्र देवाः सवासवाः। उपासते सदा सन्ध्यां नित्यकालं युधिष्ठिर!। गङ्गा च यमुना चैव उभे तुल्यफले स्मृते। केवलं ज्येष्ठभावेन गङ्गा सर्व्वत्र पूज्यते। नैमिषं पुष्करञ्चैव गोमतीं सिन्धुसागरम्। गया च धेनुकञ्चैव गङ्गासागरमेव च। एते चान्ये च बहवो ये च पुण्याः शिलोच्चयाः। दश कोटिसहस्राणि षष्टिकोट्यस्तथा पराः। प्रयागे संस्थिता नित्यमेवमाहुर्म्मनीषिणः। कुरुक्षेत्रसमा गङ्गा यत्र तत्रावगाहिता। तस्माद्दशगुणा प्रोक्ता यत्र विन्ध्येन सङ्गता। तस्माच्छतगुणा प्रोक्ता काश्यामुत्तरवाहिनी। काश्याः शतगुणा प्रोक्ता गङ्गायमुनसङ्गमे। सहस्रगुणिता चापि भवेत् पश्चिमवाहिनी। सा राजन्! दर्शनादेव ब्रह्महत्यापहारिणी। पश्चिमाभिमुखी गङ्गा कालिन्द्या सह सङ्गता। हन्ति कल्पकृतं पापं सा माघे नृप! दुर्लभा। अमृतं कथ्यते राजन्! सा वेणी परिकीर्त्तिता। तस्यां माघे मुहूर्त्तन्तु देवानामपि दुर्लभम्। षष्टिस्तीर्थसहस्राणि षष्टिस्तीर्थशतानि च। माघे मासि गमिष्यन्ति गङ्गायमुनसङ्गमम्। ब्रह्मविष्णुमहादेवरुद्रादित्यमरुद्गणाः। गन्धर्व्वा लोकपालाश्च यक्षकिन्नरगुह्यकाः। अणिमादिगुणैः सिद्धा ये चान्ये तत्त्वदर्शिनः। ब्रह्माणी पार्व्वती लक्ष्मीः शची मेधावती रतिः। सर्व्वास्ता देवपत्न्यश्च तथा नागाङ्गना नृप!। घृताची मेनका रम्भा उर्व्वशी च तिलोत्तमा। गणाश्चाप्सरसां तद्वत् पितृणाञ्च गणाश्च ये। स्नातुमायान्ति ते सर्व्वे माघे वेण्यां नराधिप!। कृते युगे स्वरूपेण कलौ प्रच्छन्नरूपिणः। सर्व्वतीर्थानि कृष्णानि पापिनां सङ्गदोषतः। भवन्ति शुक्लवर्णानि प्रयागे माघमज्जनात्। स्वर्णभारसहस्रेण कुरुक्षेत्रे रविग्रहे। यत् फलं लभते माघे वेण्यां तच्च दिने दिने। यत्तीव्रतपोभिश्च न तत् प्राप्नोति मानवः। यत् फलं समवाप्नोति वेण्यां स्नानान्न संशयः। प्रयागे माघमासे तु यस्त्र्यहं स्नाति मानवः। पापं त्यक्त्वा दिवं याति जीर्णां त्वचमिवोरगः। प्रयागे माघमासे तु त्र्यहं स्नातस्य यद्भवेत्।

नाश्वमेधशतेनैव तत् फलं लभते भुवि । तत्र स्नानफलं माघे पुरा काञ्चनमालिने । राक्षसाय ददौ भूप ! तेन मुक्तः स पातकात् । योगाभ्यासेन यत् पुण्यं संवत्सरशतेन च । गवां कोटिप्रदानस्य सम्यग्दत्तस्य यत् फलम् । प्रयागे माघमासे तु त्र्यहं स्नातस्य तत् फलम् । किं गयापिण्डदानेन काश्यां वा मरणेन किम् । किं कुरुक्षेत्रदानेन प्रयागे वपनं यदि । प्रयागे वपनं कुर्यात् गयायां पिण्डपातनम् । दानं दद्यात् कुरुक्षेत्रे वाराणस्यां तनुं त्यजेत् । सितासितेषु ये स्नान्ति माघे मासि युधिष्ठिर ! । न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि । स्वल्पं स्वल्पतरं पापं यदा यस्य नराधिप ! । प्रयागं स्मरमाणस्य सर्वमायाति संक्षयम् । दर्शनात्तस्य तीर्थस्य नामसंकीर्त्तनादपि । मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते । प्रयागस्य प्रवेशात्तु पापं नश्यति तत्क्षणात् । कीर्त्तनान्मुच्यते पापाद्दृष्ट्वा भद्राणि पश्यति । अवगाह्य च पीत्वा च पुनात्यासप्तमं कुलम् । गङ्गायमुनयोर्मध्ये स्नातो मुच्येत किल्बिषात् । मनसा चिन्तितान् कामांस्तांस्तान् प्राप्नोति पुष्कलान् । प्रयागन्तु ततो गत्वा सर्वदेवाभिरक्षितम् । ब्रह्मचारी भवेन्मासं पितॄन् देवांश्च तर्पयेत् । ईप्सितान् लभते कामान् यत्र कुत्रापि जायते । तत्राभिषेकं यः कुर्यात् सङ्गमे संशितव्रतः । स प्राप्नोति फलं तुल्यं राजसूयाश्वमेधयोः । पञ्चयोजनविस्तीर्णं प्रयागस्य च मण्डलम् । प्रवेशादस्य भूमौ तु अश्वमेधः पदे पदे । प्रयागमनुगच्छेद्वा वसते वापि यो नरः । सर्वपापविशुद्धात्मा विष्णुलोके महीयते । मकरस्थे रवौ माघे गोविन्दाच्युत ! माधव ! । स्नानेनानेन मे देव ! यथोक्तफलदो भव । तत्र दानं प्रदातव्यं यथाविभवविस्तरम् । तेन तीर्थफलञ्चैव वर्द्धते नात्र संशयः । स्वर्गे तिष्ठति राजेन्द्र ! यावदाभूतसंप्लवम् । योजनानां सहस्रेषु गङ्गां यः स्मरते नरः । अपि दुष्कृतकर्म्माऽपि लभते परमां गतिम् । स्नातास्तु ये माकारभास्करोदये तीर्थे प्रयागे सुरसिन्धुसङ्गमे । तेषां यमद्वारमपाकरोति भृङ्गावली कुञ्जरकर्णताडिता" मत्स्यपु० ।

तत्र मुण्डनविधिर्यथा "गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृते । आधाने सोमपाने च वपनं सप्तसु स्मृतम्" इति स्मृतिसमुच्चयलिखितवचनं प्रयागातिरिक्तविषयकतया विधायकम् । भास्करक्षेत्रं प्रयागः अपि च प्रयागमधिकृत्य "केशानां यावती संख्या छिन्नानां स्त्रीजले । तावद्वर्षसहस्राणि स्वर्गलोके महीयते" । प्रयागे स्त्रीणामपि मुण्डनं न तु केशानां सकलच्छेदनमात्रं यथा "केशमूलान्युपाश्रित्य सर्वपापानि देहिनाम् । तिष्ठन्ति तीर्थस्नानेन तस्मात्तान्यत्र वापयेत् । प्रयागे मुण्डनाकरणे दोषोऽपि "गङ्गायां भास्करक्षेत्रे मुण्डनं यो न कारयेत् । स कोटिकुलसंयुक्त आकल्पं रौरवे वसेत्" इति प्रा०त० ।

प्रयागभय पु० प्रयागात् प्रकृष्टयागकर्त्तृजनात् बिभेति अपदच्युतिशङ्कया भी—अच् । इन्द्रे शब्दमाला ।

प्रयागसेतु पु० त्रिस्थलीसेतुपर्व्वांशे प्रयागमाहात्म्यादिप्रतिपादके ग्रन्थे ।

प्रयाज पु० प्र+यज—घञ् यज्ञाङ्गत्वात् न कुत्वम् । दर्शपौर्णमासाद्यङ्गे यागभेदे । प्रयाजाश्च पञ्च "समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीत्येवं रूपाः श्रुत्युक्ताः । "पञ्च प्रयाजान्" कात्या० श्रौ० ३।२।१।१७। आपस्तम्बोऽपि "पञ्च प्रयाजान् प्राचः प्रतिदिशं वा, समिधः पुरस्तात्, तनूनपातं दक्षिणतः, इडः पश्चात्, बर्हिरुत्तरतः, स्वाहाकारं मध्ये" तत्कर्मस्थानमाह । कर्मभेदे तेषां मध्ये कस्यचिदावृत्त्या षट्सप्तनवैकादशसंख्याऽपि कात्या० श्रौ० उक्ता दृश्या । विस्तरभयात् नोक्ता । प्रयाजादयश्चारादुपकारकाः यथोक्तं लौगाक्षिः "द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म त्वारादुपकारकम् यथा प्रयाजादि । आरादुपकारकञ्च परमापूर्वोत्पत्तावेवोपयुज्यते । सन्निपत्योपकारकन्तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपेऽप्युपयुज्यते । इदमेव प्राकृतविकृतेषूच्यत" ।

प्रयाजवत् पु० प्रयाज+अस्त्यर्थे मतुप् मस्य वः । प्रयाजरूपकर्मभेदपञ्चकयुते प्रधानयागे दर्शादौ ।

प्रयाण न० प्र+या—भावे ल्युट् । प्रस्थाने पुरादितो बहिर्गमने हेमच० । राज्ञां प्रयाणे वर्णनीयपदार्थाः कविकल्पलतायामुक्ता यथा "भेरीशब्दः भूमिकम्पः सैन्यधूलिप्रसरणं करभः हयः (द्रव्यवाहनार्थं) ध्वजः छत्रं वणिक् शकटमित्यादयः । स्वार्थे क । तत्रार्थे हेमच० ।

प्रयात त्रि० प्र+या—कर्त्तरि क्त । १प्रकर्षेण गन्तरि कर्म्मणि क्त । २प्रयातेऽग्रप्राप्ते ३भृगौ ४उच्चदेशे ५सौप्तिके च पु० हेम० ।

प्रयाम पु० प्र+यम—घञ् । महार्घतावशात् धान्यादौ १जनानामादरातिशये अमरः । २कायदैर्घ्ये ३दुर्भिक्षे ४मूल्याधिक्यपरिच्छेदने भरतः ।

प्रयास पु० प्र+यस—भावे घञ् । १प्रयत्ने २परिश्रमे ३क्लेशे ४

हेमच०। प्रयस्यतेऽनेन करणे घञ्। ४अविद्यादिषु पञ्चसु क्लेशदायकेषु। [युते ऋ० ८।१९।२७

प्रयियु त्रि०प्र+या—बा०कु द्वित्वे अभ्यासस्यात इत्त्वम्। प्रयाण

प्रयुक्त त्रि०प्र+युज—क्त। १प्रकर्षेण संयोगयुते २प्रेरिते ३प्रयोज्ये परम्परया कार्ये च। तस्य भावः प्रयुक्तत्व तद्भावे न०। स च स्वरूपसम्बन्धभेदः कारणाभावेन कार्य्याभाव इत्यादिप्रतीतिसिद्धः गौ०सू०।

तदुक्तं गौ०सू० १।१।२। वृत्तौ प्रयोज्यत्वं प्रयोजकत्वं वा पञ्चम्यर्थः दण्डाभावात् घटाभाव इतिवत् स्वरूपसम्बन्धविशेष एव तत्"।

प्रयुक्ति स्त्री प्र+युज—भावे क्तिन्। १प्रयोगे २शब्दोच्चारणभेदे "अवस्य राजमातङ्गा इति न स्युः प्रयुक्तयः" व्या० कारिका ३प्रेरणे प्रा०स०। ४प्रकृष्टायां युक्तौ च।

प्रयुत न० १दशलक्षसंख्यायां २तत्संख्याते च "लक्षप्रयुतकोटयः" क्रमशः इति लीला०। ३प्रकर्षेण युते त्रि०।

प्रयुति स्त्री प्र+यु—भावे क्तिन्। १प्रकर्षेण योगे २प्रयोगे ऋ० १०।२७।१२

प्रयुतेश्वर पु० तीर्थभेदे स्कन्दपु०।

प्रयोक्तृ त्रि० प्र+युज—तृच्। १प्रयोगकर्त्तरि २ऋणदानादौ धनप्रयोगकर्त्तरि उत्तमर्णे ३प्रयोजकमात्रे च अमरः।

प्रयोग पु० प्र+युज—भावकर्मकरणेषु यथायथं घञ् कुत्वम्। १अनुष्ठाने २शब्दादीनामुच्चारणभेदे ३वशीकरणाद्युपाये कामेणे कर्मणि। ४घोटके च मेदि०। प्रयोगैनिर्वृत्तः ठञ्। अनुशति० द्विपदवृद्धिः। प्रायौगिक प्रयोगसाध्ये त्रि० स्त्रियां ङीप्। तत्र वाक्योच्चारणं च अनुमानारूपपञ्चावयववाक्योच्चारणं यथा "अत्रायं प्रयोगः पर्वतो वह्निमान् धूमादित्यादि" यथायोगं समभिव्याहृतत्वेनोच्चारणं प्रयोग इति याज्ञिकाः। यज्ञादिक्रियाकलापेतिकर्त्तव्यताबोधकानां वस्तुद्वयप्रतिपादके पद्धत्यपरपर्य्याये ग्रन्थे इति याज्ञिकाः। भूतप्रेताद्युच्चाटनादिसाधने मन्त्रोच्चारणभेदे तान्त्रिकाः। ५शस्त्रादिमोचने योधाः। ६नायकयोर्मिलने क्रियाभेदे इत्यालङ्कारिकाः।

प्रयोगविधि पु०प्रयोगज्ञापकोविधिः ष०त०। प्रयोगस्याविलम्बज्ञापके विधिभेदे तल्लक्षणादि मीमांसा० उक्तं यथा "प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। स चाङ्गवाक्यैकवाक्यतापन्नः प्रधानविधिरेव। स हि साङ्गप्रधानमनुष्ठापयन् विलम्बे प्रमाणाभावादविलम्बापरपर्य्यायं प्रयोगप्राशुभावं विधत्ते। न च तद्विलम्बेऽपि प्रमाणाभाव इति वाच्यं विलम्बे ह्यङ्गप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तिः विलम्बेन क्रियमाणयोः पदार्थयोः इदमनेन सह कृतमिति साहित्यव्यवहाराभावात्। स चाविलम्बो नियते क्रमे आश्रियमाणे भवति। अन्यथा हि किमेतदनन्तरमेतत् कर्त्तव्यमेतदनन्तरं वेति प्रयोगविक्षेपापत्तेः। अतः प्रयोगविधिरेव स्वविधेय प्रयोगप्राशु[illegible]र्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते। अतएवाङ्गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्षणम्। तत्र क्रमोनाम विततिविशेषः पौर्वापर्य्यरूपो वा। तत्र षट् प्रमाणानि। श्रुत्यर्थपठनस्थानमुख्यप्रवृत्त्याख्यानि। क्रमज्ञापकहेतवश्च क्रमशब्दे २२९० पृष्ठादावुक्ताः।

प्रयोगातिशय पु० सा०द० नाटकाङ्गप्रस्तावनाभेदे "यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते। तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा"। यथा कुन्दमालायाम् "नेपथ्ये इतोऽवतरत्वार्य्या। सूत्रधारः। कोऽयं खलु आर्य्याह्वानेन साहायकं मे सम्पादयति। विलोक्य। कष्टमतिकरुणं वर्त्तते। लङ्केश्वरस्य भवने सुचिरं स्थितेति रामेण लोकपरिवादभयाकुलेन। निर्वासितां जनपदादपि गर्भगुर्वीं सीतां वनाय परिकर्षति लक्ष्मणोऽयम्"। अत्र नृत्यप्रयोगार्थं स्वभार्य्याह्वानमिच्छता सूत्रधारेण सीतां वनाय परिकर्षति लक्ष्मणोऽयमिति सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयान एव प्रयोगः प्रयोजितः"।

प्रयोगार्थ पु०प्रयोगस्यायम् "अर्थेन सह नित्यसमासोविभक्त्यलोपश्च" वार्त्ति०स०प्रयोगोऽर्थः प्रयोजनमस्य वा। प्रधानप्रयोगानुष्ठानानुकूले व्यापारभेदे प्रत्युत्क्रमे अमरः।

प्रयोगिन् त्रि० प्र+युज—घिनुण्। प्रयोगकर्त्तरि।

प्रयोग्य त्रि०प्रयुज्यते प्रयुज—कर्मणि ण्यत्। १प्रयोज्ये २अश्वे च "यथा प्रयोग्य आचरणे(रथे)नियुक्तः" छा०उ०भाष्यम्।

प्रयोजक त्रि०कार्य्यादौ भृत्यादीन् प्रयुनक्ति प्र+युज—ण्वुल्। नियुक्तस्य भृत्यादेः १प्रेरके व्याकरणोक्ते हेतुसंज्ञे २कर्त्तरि च। "तत्प्रयोजकोहेतुश्च" पा० तस्य स्वतन्त्रसंज्ञा विहिता। प्रयोजकस्य हन्तृत्वं प्रा०वि० निर्णीतं यथा "नरान्तरव्यापाराव्यवधानेन वधनिष्पादकः कर्त्ता, यः कर्त्तारं कारयति स प्रयोजकः। सोऽपि द्विविधः एकः स्वतोऽप्रवृत्तं पदातिं वेतनादिना वधार्थं प्रवर्त्तयति अपरः स्वतः प्रवृत्तमेव मन्त्रोपायोपदेशादिना प्रोत्साहयति"।

तस्य मूलञ्च आपस्तम्बवाक्यं यथा "प्रयोजयिता अनुमन्ता कर्त्ता चेति सर्वे स्वर्गनरकफलभोक्तारो यो भूय आरभते तस्मिन् फले विशेषः"। तस्य भावः त्व प्रयोजकत्व न॰ तद्भावे तस्य स्वरूपसम्बन्धभेदः तच्चिकीर्षान्यथासिद्धिभिन्नान्यथासिद्धिशून्यत्वे सति कार्य्याव्यवहित पूर्ववर्त्तित्वम्"।

प्रयोजन न॰ प्रयुज्यतेऽनेन प्र+युज–करणे ल्युट्। यमधिकृत्य प्रवर्त्तते १तस्मिन् प्रवृत्त्यङ्गेच्छाविषये यमर्थमाप्तव्यं हातव्यं वा अवसाय तदाप्तिहानोपायमनुतिष्ठति प्रयोजनं तद्वेदितव्यम्। प्रवृत्तिहेतुत्वात् इममर्थमाप्स्यामि हास्यामि वेति व्यवसायोऽर्थस्याधिकारः। एवं व्यवसीयमानोऽर्थोऽधिक्रियते इति" वात्स्या॰१।१।२४। करणे ल्युट्। २हेतौ। कर्मणि ल्युट्। ३कार्य्ये च मेदि॰। प्रयोजनञ्च द्विविधं मुख्यं गौणं च। तत्र अन्येच्छानधीनेच्छाविषयत्वं मुख्यप्रयोजनत्वम् अन्येच्छाधीनेच्छाविषयत्वं गौणप्रयोजनत्वम्। तत्राद्यम् दुःखाभावः सुखञ्च द्वितीयं तदुपकारिशयनभोजनादि। तस्य मुख्यप्रयोजनेच्छयैव जन्याया इच्छायाविषयत्वात् तथात्वम्। "येन प्रयुक्तः प्रवर्त्तते तत्प्रयोजनम्। यमर्थमभीप्सन् जिहासन् वा कर्मारभते तेनानेन सर्वे प्राणिनः सर्वाणि कर्माणि सर्वाश्च विद्याव्याप्ताः। तदाश्रयश्च न्यायः प्रवर्त्तते" वात्स्या॰ १।१।१

प्रयोज्य त्रि॰प्र+युज–ण्यत्। प्रयोक्तुं शक्ये १भृत्यादौ २मूलधने न॰ "प्रयोज्यस्यास्तु कर्तृत्वं गत्यादेर्विधितोचिता" इत्युक्ते ३णिजन्तधातुप्रकृत्यर्थकर्त्तरि च। तस्य भावः त्व प्रयोज्यत्व स्वरूपसम्बन्धभेदे न॰ प्रयुक्तशब्दे दृश्यम्।

प्ररथ अव्य॰ प्रगतो रथो यत्र तिष्ठद्गु॰ अव्ययी॰। प्रगतरथयुक्ते देशे। [ऋ॰ ।।१०।१५।

प्ररिच्वन् त्रि॰ प्र+रिच–क्वनिप्। प्रकर्षेण विरेचनकर्त्तरि

प्ररुज त्रि॰ प्र+रुज–क। १प्रकृष्टरोगकारके २देवसैन्याधिपभेदे पु॰ भा॰श्ला॰२२अ॰ ३राक्षसभेदे पु॰ भा॰व॰२८४अ॰।

प्ररुह त्रि॰ प्र+रुह–क। प्ररोहणकर्त्तरि अङ्कुरादौ

प्ररूढ त्रि॰ प्र+रुह–क्त। १प्ररोहणकर्त्तरि २संजाते वृक्षादौ ३बद्धमूले च ४जटरे न॰ मेदि॰। ५जाते ६प्रवृद्धे त्रि॰ शब्दमा॰।

प्ररोचन न॰ प्र+रुच–णिच्–भावे ल्युट्। १रुचिसम्पादने यथाऽर्थवादादीनां विध्यर्थानुष्ठाने प्ररोचनायां प्रवृत्तिः। युच् प्ररोचना तत्रार्थे स्त्री। सा च २रूपकायनाङ्गभेदे। "तस्याः प्ररोचना वीथी तथा प्रहसना मुखे। अङ्गान्यत्रोन्मुखीकारः प्रशंसातः प्ररोचना" सा॰द॰ यथा "श्रीहर्षोनिपुणः कविरित्यादि" रत्नावल्याम्। ३नाटकाङ्गविमर्षाङ्गभेदे स्त्री "प्ररोचना विमर्षे स्यात्" विमर्षाङ्गोपक्रमे "प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी" इति तत्र लक्षिता यथा वेणीसंहारे पाञ्चालकः अहं देवेन चक्रपाणिना सहित इत्युपक्रमे कृतं सन्देहेन पूर्य्यन्तां सलिलेनेत्यादि।

प्ररोह पु॰ प्र+रुह–अच् १अङ्कुरे "प्लक्षप्ररोह इव सौधतलं बिभेद" इति रघुः। २आरोहे च हेमच॰। भावे घञ्। ३उत्पत्तौ पु॰। भावे ल्युट्। प्ररोहण उत्पत्तौ न॰

प्रलपन न॰ प्र+लप–भावे ल्युट्। १प्रलापे २अनर्थकवाक्ये सा॰ द॰ १८८ कारिकायां दृश्यम्। भावे क्त। प्रलपित तत्रार्थे न॰। "प्रलपितमिदं केनापि" मिता॰ कायत

प्रलम्ब त्रि॰ प्रलम्बते प्र+लम्ब–अच्। १प्रलम्बमाने २दनुपुत्रे असुरभेदे पु॰ अग्निपु॰। ३लपुटे (शपा) ४पयोधरे ५लताङ्कुरे ६गायायां ७हारभेदे मेदि॰। भावे घञ्। ८प्रलम्बने

प्रलम्बघ्न पु॰ प्रलम्बमसुरं हन्ति हन–क। १बलरामे अमरः तेन तस्य हननकथा हरिवं॰ ७१अ॰ दृश्या। प्रलम्बभिदादयोऽप्यत्र।

प्रलम्बाण्ड पु॰ प्रलम्बः अण्डोऽस्य। दीर्घाण्डकोषयुते हेम॰।

प्रलम्भ पु॰प्र+लभ–घञ् मुम्। प्रकर्षेण लाभे। भावे ल्युट्। प्रलम्भन तत्रार्थे भाग॰ ५।२५।११।

प्रलय पु॰ प्रलीयतेऽस्मिन् प्र+ली–आधारे अच्। भूतादिलयाधारे कालभेदे स च चतुर्विधः नित्यनैमित्तिकप्राकृतात्यन्तिकभेदात् यथोक्तं कूर्मपु॰ ४२।४२ अ॰

कूर्म उवाच नित्यं नैमित्तिकश्चैव प्राकृतात्यन्तिकौ तथा। चतुर्धायं पुराणेऽस्मिन् प्रोच्यते प्रतिसञ्चरः"। नित्यो यथा "योऽयं संदृश्यते नूनं नित्यं लोके क्षयान्त्विह। नित्यं संकीर्त्त्यते नाम्ना मुनिभिः प्रतिसञ्चरः" नैमित्तिको यथा "ब्राह्मो नैमित्तिको नाम कल्पान्ते यो भविष्यति। त्रैलोक्यस्यास्य कथितः प्रतिसर्गो मनीषिभिः" प्राकृतो यथा "महदाद्यं विशेषान्तं यदा संयाति संक्षयम्। प्राकृतः प्रतिसर्गोऽयं प्रोच्यते कालचिन्तकैः" आत्यन्तिको यथा "ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि। प्रलयः प्रतिसर्गोऽयं कालचिन्तापरैर्द्विजैः। आत्यन्तिकश्च कथितः प्रलयो लयसाधनः" नैमित्तिकप्रलयविस्तारो यथा तत्रैव "नैमित्तिकमिदानीं

कीर्त्तयिष्ये समासतः । चतुर्युगसहस्रान्ते सम्प्राप्ते प्रतिसञ्चरे । आत्मसंस्थाः प्रजाः कर्त्तुं प्रतिपेदे प्रजापतिः । ततोभवत्यनावृष्टिस्तीव्रा सा शतवार्षिकी । भूतक्षयकरी घोरा सर्व्वभूतभयङ्करी । ततो यान्यल्पसाराणि सत्त्वानि पृथिवीतले । तानि चाग्रे प्रलीयन्ते भूमित्वमुपयान्ति च । सप्तरश्मिरथो भूत्वा समुत्तिष्ठन् दिवाकरः । असह्यरश्मिर्भवति पिबन्नम्भो गभस्तिभिः । तस्य ते रश्मयः सप्त पिबन्त्यम्बु महार्णवे । तेनाहारेण ते सूर्य्या दीप्ताः सप्त भवन्ति हि । ततस्ते रश्मयः सप्त सूर्य्या भूत्वा चतुर्दिशम् । चतुर्लोकमिदं कृत्स्नं दहन्ति शिखिनो यथा । व्याप्नुवन्तश्च ते विप्रास्तूर्द्ध्वाधश्च रश्मिभिः । दीप्यन्ते भास्कराः सप्त दहन्तोऽग्निप्रतापिनः । ते सूर्य्या वारिणा दीप्ता बहुसाहस्ररश्मयः । खं समावृत्य तिष्ठन्ति निर्द्दहन्तो वसुन्धराम् । ततस्तेषां प्रतापेन दह्यमाना वसुन्धरा । साद्रिनद्यर्णवद्वीपा निःस्नेहा समपद्यत । दीप्ताभिः सन्तताभिश्च ज्वालाभिश्च समावृतः । अधश्चोर्द्ध्वञ्च तिर्य्यक् च समावृत्य समन्ततः । सूर्य्याग्निना प्रदग्धानां संसृष्टानां परस्परम् । एकत्वमुपजातानामेकज्वालो भवेत् प्रभुः । सर्व्वलोकप्रणाशश्च सोऽग्निर्भूत्वा तु कुण्डली । चतुर्लोकमिदं कृत्स्नं निर्द्दहत्यात्मतेजसा । ततः प्रलीने सर्व्वस्मिन् जङ्गमे स्थावरे तथा । निर्व्वृक्षा निस्तृणा भूमिः कूर्म्मपृष्ठे प्रकाशते । अम्बरीषमिवाभाति सर्व्वमापूरितं जगत् । सर्व्वमेव तदार्च्चिर्भिः पूर्णं जाज्वल्यते नभः । पाताले यानि सत्त्वानि महोदधिगतानि तु । ततस्तानि प्रलीयन्ते भूमित्वमुपयान्ति वै । द्वीपांश्च पर्व्वतांश्चैव वर्षाण्यथ महोदधीन् । तान् सर्व्वान् भस्मसात् कृत्वा सप्तात्मा पावकः प्रभुः । समुद्रेभ्यो नदीभ्यश्च पातालेभ्यश्च सर्व्वशः । पिबन्नपः समिद्धोऽग्निः पृथिवीमाश्रितोऽज्वलत् । ततः संवर्त्तकः शैलानतिक्रम्य महांस्तथा । लोकान् दहति दीप्तात्मा रुद्रतेजोविजृम्भितः । स दग्ध्वा पृथिवीं देवो रसातलमशोषयत् । अधस्तात् पृथिवीं दग्ध्वा दिवमूर्द्ध्वं दहिष्यति । योजनानां शतानीह सहस्राण्ययुतानि च । उत्तिष्ठन्ति शिखास्तस्य वायुः संवर्त्तकस्य च । गन्धर्व्वांश्च पिशाचांश्च सयक्षोरगराक्षसान् । तदा दहत्यसौ दीप्तः कालरुद्रप्रचोदितः । भूर्लोकञ्च भुवर्लोकं स्वर्लोकञ्च तथा महः । दहेदशेषं कालाग्निः कालो विश्वतनुः स्वयम् । व्याप्तेषु तेषु लोकेषु तिर्य्यगूर्द्ध्वमथाग्निना । तत् तेजः समनुप्राप्य कृत्स्नं जगदिदं शनैः । अयोगुडनिभं सर्व्वं तदेकं प्रकाशते । ततो गजकुलोन्नादास्तडिद्भिः समलङ्कृताः । उत्तिष्ठन्ति तदा व्योम्नि घोराः संवर्त्तका घनाः । केचिन्नीलोत्पलश्यामाः केचित् कुमुदसन्निभाः । धूम्रवर्णास्तथा केचित्तथा पीताः पयोधराः । केचिद्रक्ताभवर्णाश्च लाक्षारसनिभास्तथा । शङ्खकुन्दनिभाश्चान्ये जात्यञ्जननिभाः परे । मनःशिलानिभास्त्वन्ये कपोतसदृशाः परे । केचित् हरिद्राभवर्णाभास्तथान्ये क्षीरसन्निभाः । तथा कर्व्वूरवर्णाभा भिन्नाञ्जननिभास्तथा । इन्द्रगोपनिभाः केचिद्धरितालनिभास्तथा । काकाण्डकनिभाः केचिदुत्तिष्ठन्ति घना दिवि । केचित् पर्व्वतसङ्काशाः केचिद्गजकुलोपमाः । कूटागारनिभाश्चान्ये केचिन्मीनकुलोद्वहाः । बहुरूपा घोररूपा घोरस्वरनिनादिनः । तदा जलधराः सर्व्वे पूरयन्ति नभस्तलम् । ततस्ते जलदा घोरा वारिणा भास्करात्मजाः । सप्तधा संवृतात्मानस्तमग्निं शमयन्त्युत । ततस्ते जलदा वर्षं वर्षन्तीह हिमौघवत् । सुघोरमशिवं सर्व्वं नाशयन्ति च पावकम् । प्रवृत्तेन तदात्यर्थमम्भसा पूर्य्यते किल । अद्भिस्तेजोऽभिभूतत्वात्तदाग्निः प्रविशत्यपः । नष्टे चाग्नौ वर्षशतैः पयोदाः क्षयसम्भवाः । प्लावयन्तोऽथ भुवनं महाजलपरिस्रवैः । धाराभिः पूरयन्तीदं चोद्यमानाः स्वयम्भुवा । अत्यन्तः सलिलौघैश्च वेला इव महोदधेः । साद्रिद्वीपा तथा पृथ्वी जलैः संछाद्यते शनैः । आदित्यरश्मिभिः पीतं जलमभ्रेषु तिष्ठति । पुनः पतति तद्भूमौ पूर्य्यन्ते तेन चार्णवाः । ततः समुद्राः स्वां वेलामतिक्रान्तास्तु कृत्स्नशः । पर्व्वताश्च विलीयन्ते मही चाप्सु निमज्जति । तस्मिन् काले घोरे नष्टे स्थावरजङ्गमे । योगनिद्रां समास्थाय शेते देवः प्रजापतिः । चतुर्युगसहस्रान्तं कल्पमाहुर्महर्षयः । वाराहो वर्त्तते कल्पो यस्य विस्तार ईरितः । असंख्यातास्तथा कल्पा ब्रह्मविष्णुशिवात्मकाः । कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः । सात्त्विकेष्वथ कल्पेषु माहात्म्यमखिलं हरेः । तामसेषु शिवस्योक्तं राजसेषु प्रजापतेः । योऽयं प्रवर्त्तते कल्पो वाराहः सात्त्विको मतः । अन्ये च सात्त्विकाः कल्पा मम तेषु परिग्रहः । ध्यानं तपस्तथा ज्ञानं लब्ध्वा तेष्वेव योगिनः । आराध्य गिरिशं यस्मात् यान्ति तत् परमं

पदम्। सोऽहं सत्त्वं समाधाय मायी मायामयं स्वयम्। एकार्णवे जगत्यस्मिन् योगनिद्रां व्रजामि तु। मां पश्यन्ति महात्मानः सुप्तं काले महर्षयः। जनलोके वर्त्तमानास्तपसा योगचक्षुषा। अहं पुराणपुरुषो भूर्भुवःप्रभवो विभुः। सहस्रचरणः श्रीमान् सहस्राक्षः सहस्रपात्। मन्त्रोऽग्निर्ब्राह्मणा गावः कुशाश्च समिधो ह्यहम्। प्रोक्षणी च स्रुवश्चैव सोमो घृतमथोऽस्म्यहम्। संवर्तको महानात्मा पवित्रं परमं यशः। वेदवेद्यः प्रभुर्गोप्ता गोपतिर्ब्रह्मणो मुखम्। अनन्तस्तारको योगी गतिर्गतिमतांवरः। हंसः प्राणोऽथ कपिलो विश्वमूर्त्तिः सनातनः। क्षेत्रज्ञः प्रकृतिः कालो जगद्बीजमथामृतम्। माता पिता महादेवो मत्तो ह्यन्यन्न विद्यते। आदित्यवर्णो भुवनस्य गोप्ता नारायणः पुरुषो योगमूर्त्तिः। मां पश्यन्ति यतयो योगनिष्ठा ज्ञात्वात्मानममृतत्वं व्रजन्ति”। प्राकृतप्रलयविस्तारो यथा तत्रैव “कूर्म उवाच अतःपरं प्रवक्ष्यामि प्रतिसर्गमनुत्तमम्। प्राकृतं च समासेन शृणुध्वं गदतो मम। गते परार्द्धद्वितये काले लोकप्रकाशकः। कालाग्निर्भस्मसात् कर्त्तुं करोति निखिलं मतिम्। स्वात्मन्यात्मानमावेश्य भूत्वा देवो महेश्वरः। दहेदशेषं ब्रह्माण्डं सदेवासुरमानुषम्। तमाविश्य महादेवो भगवान्नीललोहितः। करोति लोकसंहारं भीषणं लोकमाश्रितः। प्रविश्य मण्डलं सौरं कृत्वाऽसौ बहुधा पुनः। निर्दहत्यखिलं लोकं सप्तसप्तिस्वरूपधृक्। स दग्ध्वा सकलं सत्त्वं मस्त्रं ब्रह्म शिरो महत्। देवतानां शरीरेषु क्षिपत्यखिलदाहकः। दग्धेष्वशेषदेवेषु देवी गिरिवरात्मजा। एका सा साक्षिणः शम्भोस्तिष्ठते वैदिकी श्रुतिः। शिरःकपालैर्देवानां कृतस्रग्वरभूषणः। आदित्यचन्द्रादिगणैः पूरयन् व्योममण्डलम्। सहस्रहस्तचरणः सहस्राचिर्महाभुजः। दंष्ट्राकरालवदनः प्रदीप्तानललोचनः। त्रिशूली कृत्तिवसनो योगमैश्वरमास्थितः। पीत्वा तत् परमानन्दं प्रभूतममृतं स्वकम्। करोति ताण्डवं देवीमालोक्य परमेश्वरः। पीत्वा नृत्यामृतं देवी भर्त्तुः परममङ्गला। योगमास्थाय देवस्य देहमायाति शूलिनः। स त्यक्त्वा ताण्डवरसं स्वेच्छयैव पिनाकधृक्। याति स्वभावं भगवान् दग्ध्वा ब्रह्माण्डमण्डलम्। संस्थितेष्वथ देवेषु ब्रह्मविष्णुपिनाकिषु। गुणैरशेषैः पृथिवी विलयं याति वारिषु। स वारितत्त्वं सगुणं ग्रसते हव्यवाहनः।

तैजसं गुणसंयुक्तं वायौ संयाति संक्षयम्। आकाशे सगुणो वायुः प्रलयं याति सत्तमाः!। भूतादौ च तथाऽऽकाशं लीयते गुणसंयुतम्। इन्द्रियाणि च सर्वाणि तैजसे यान्ति संक्षयम्। वैकारिके देवगणाः प्रलयं यान्ति सत्तमाः!। वैकारिकस्तैजसश्च भूतादिश्चेति सत्तमाः!। त्रिविधोऽयमहङ्कारो महति प्रलयं व्रजेत्। महान्तमेभिः सहितं ब्रह्माणममितौजसम्। अव्यक्तं जगतो योनिः संहरेदेकमव्ययम्। एवं संहृत्य भूतानि तत्त्वानि च महेश्वरः। वियोजयत्यथान्योन्यं प्रधानं पुरुषं परम्। प्रधानपुंसोरजयोरेष संहार ईरितः। महेश्वरेच्छाजनितो न स्वयं विद्यते लयः। गुणसाम्यं तदव्यक्तं प्रकृतिः परिगीयते। प्रधानं जगतो योनिर्मायातत्त्वमचेतनम्। कूटस्थश्चिन्मयो ह्यात्मा केवलः पञ्चविंशकः। गीयते मुनिभिः साक्षी महानेकः पितामहः। एवं संहारकरणी शक्तिर्माहेश्वरी ध्रुवा। प्रधानाद्यं विशेषान्तं दहेद्रुद्र इति श्रुतिः। योगिनामथ सर्वेषां ज्ञानविन्यस्तचेतसाम्। आत्यन्तिकञ्चैव लयं विदधातीह शङ्करः”। आत्यन्तिकप्रलयविस्तारो यथा विष्णुपु० पराशर उवाच “आध्यात्मिकादि मैत्रेय ज्ञात्वा तापत्रयं बुधः। उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम्। आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा। शारीरो बहुभिर्भेदैर्भिद्यते श्रूयताञ्च सः। शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः। गुल्मार्शःश्वयथुश्वासच्छर्द्यादिभिरनेकधा। तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः। भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि। कामक्रोधभयद्वेषलोभमोहविषादजः। शोकासूयावमानेर्ष्यामात्सर्यादिभवस्तथा। मानसोऽपि द्विजश्रेष्ठ! तापो भवति नेकधा। इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः। मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः। सरीसृपाद्यैश्च नृणां जन्यते चाधिभौतिकः। शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः। तापो द्विजवरश्रेष्ठ! कथ्यते चाधिदैविकः। तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितैः। गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः। निरस्तातिशयाह्लादसुखभावैकलक्षणा। भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता। तस्मात् तत्प्राप्तये यत्नः कर्त्तव्यः पण्डितैर्नरैः। तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म चोक्तं महामुने!। आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते। शब्दब्रह्मागममयं परं ब्रह्म विवेकजम्। अन्धन्तम इवा-

ज्ञानं दीपवच्चेन्द्रियोद्भवम्। यथा सूर्य्यस्तथा ज्ञानं यद्विप्रर्षे! विवेकजम्। मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम!। तदेतच्छ्रूयतामत्र साधु ते गदतो मम। द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति। द्वे विद्ये वेदितव्ये वै इति चाथर्व्वणी श्रुतिः। परया त्वक्षरप्राप्तिरृग्वेदादिमयाऽपरा। यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम्। अनिर्द्देश्यमरूपञ्च पाणिपादाद्यसंयुतम्। विभुं सर्व्वगतं नित्यं भूतयोनिमकारणम्। व्याप्यव्याप्यं यतः सर्व्वं तं वै पश्यन्ति सूरयः। तद्ब्रह्म तत्परं धाम तद्ध्येयं मोक्षकाङ्क्षिणाम्। श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्। तदेव भगवद्वाच्यं स्वरूपं परमात्मनः। वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः। एवं निगदितार्थस्य सतत्त्वं तस्य तत्त्वतः। ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम्। अशब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज!। पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः। शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते। मैत्रेय! भगवच्छब्दः सर्व्वकारणकारणे। सर्व्वाणि तत्र भूतानि वसन्ति परमात्मनि। भूतेषु च स सर्व्वात्मा वासुदेवस्ततः स्मृतः। खाण्डिक्यः जनकायाह पृष्टः केशिध्वजः पुरा। नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः। भूतेषु वसते सोऽन्तर्व्वसन्त्यत्र च तानि यत्। धाता विधाता जगतां वासुदेवस्ततः प्रभुः। स सर्व्वभूतप्रकृतिविकारगुणांश्च दोषांश्च मुने! व्यतीतः। अतीतसर्व्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तरालम्। समस्तकल्याणगुणात्मको हि स्वशक्तिलेशावृतभूतवर्गः। इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ। तेजोबलैश्वर्य्यसमन्वितश्च सुवीर्य्यशक्त्यादिगुणैकराशिः। परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे। स ईश्वरो व्यष्टिसमष्टिरूपो व्यक्तस्वरूपः प्रकटस्वरूपः। सर्व्वेश्वरः सर्व्वदृक् सर्व्ववेत्ता समस्तशक्तिः परमेश्वराख्यः। स ज्ञायते येन तदस्तदोषं शुद्धं परं निर्म्मलमेकरूपम्। संदृश्यते वाप्यवगम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तम्” विष्णुपु०। “नारद उवाच। कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम्। दिनमेकं युग[illegible] तस्य या चैकसप्ततिः। मन्वन्तरन्तु तज्ज्ञेयं ते च तत्र चतुर्दश। स कल्पो नाम वै चोक्तस्तदन्ते प्रलयश्च यः। स महाप्रलयो राजेन्द्र! यत्र तेऽप्यु-जावनः। त्रयो लोकास्तदा राजन्! लीयन्ते तद्विचिन्ततः॥ नैमित्तिको लयो नाम दैनन्दिन इतीर्य्यते। एवं दिनप्रमाणेन ब्रह्मणः शतवार्षिकम्। आयुः पूर्व्वपरार्द्धं तु परार्द्धं द्वे प्रकीर्त्तिते। द्विपरार्द्धे व्यतीते तु ब्रह्मणो जगदात्मनः। तदा प्रकृतयः सप्त प्रलयं यान्ति भूमिप! लयः प्राकृतिको ह्येष लीने ब्रह्मणि भूपते!॥ ब्रह्माण्डकोषोऽपि सकलः प्रलयं याति सर्व्वशः। पूर्व्वरूपन्तु वक्ष्यामि प्रलयस्यास्य भूपते!॥ शतवर्षाणि भूमौ हि पर्ज्जन्यो नैव वर्षति। दुर्भिक्षे निर्ज्जने लोके प्रजाः सर्व्वाः क्षुधार्द्दिताः। परस्परं भक्ष्यमाणाः क्षयं यास्यन्ति भूमिप!॥ समुद्रे च धरण्याञ्च देहेषु च लतासु च। देहे च यो रसस्तं हि रविर्हरति रश्मिभिः। ततः संवर्त्तको नाम ज्वालामाली हुताशनः। सङ्कर्षणमुखोत्पन्नो दहत्यनिलसारथिः। सर्व्वं ब्रह्माण्डभाण्डं वै तत्कालक्षोभगर्जितः। एवं दग्धं महाराज! वज्रार्काभ्यां समन्ततः। दग्ध्वा गोमयपिण्डाभं ब्रह्माण्डं सारवर्जितम्। प्रचण्डः पवनो राजंस्ततो वर्षशतं पुनः। संवर्त्तको नाम महान् ब्रह्माण्डं चालयिष्यति। ततो मेघा महाघोरा नानाकारा अनेकशः। शतं वर्षाणि वर्षन्ति गर्ज्जन्ति च महास्वनाः। एकोदकं ततो विश्वं निर्गुणं निर्व्विकारकम्। भूमेर्गन्धगुणं राजन्! पिबन्त्यापः समन्ततः। गुणनाशात् क्षयं पृथ्वी प्रलयं प्राप्स्यते तदा। तेजस्त्वपां रसगुणं सगन्धं पिबते बलात्। ततः प्रलयमायान्ति राजन्नापोऽपि तत्क्षणात्। तेजसस्तु ततो रूपं रसगन्धसमन्वितम्। वायुर्हरति स्पर्शात्मा, तेजः प्रलयमृच्छति। आकाशस्तु ततो वायोः स्पर्शं परगुणैः सह। समादत्ते महाराज! अम्बरेऽथ प्रलीयते॥ आकाशस्य गुणं शब्दं गुणैरन्यैः समन्वितम्। अहङ्कारः समादत्ते नभस्तस्मिन् प्रलीयते। तैजसेष्विन्द्रियाण्याशु देवा वैकारिकास्तथा। अहङ्कारे प्रलीयन्ते जगदेतच्चराचरम्। अहङ्कारं भक्षयन्ति ततः सत्त्वादयो गुणाः। ग्रसते तान् महाराज! आद्या प्रकृतिरुच्यते। न तस्याः कालदोषेण परिणामो नरर्षभ!। आद्यन्तरहिता सा हि नित्यं कारणमव्ययम्। शक्तिर्भगवतः सा हि तदेकपरमा च सा। इत्युक्तः प्रलयो राजन्! विश्वस्यास्य महामते!। यथोत्पत्तिक्रमेणास्य व्युत्क्रमेण लयस्तथा” क च प्रलयो न्यायादिमते द्विविधः खण्डप्रलयो महा-

प्रलयश्च तत्र जन्यद्रव्यानधिकरणकालत्वं खण्डप्रलयत्वं जन्यभावानधिकरणकालत्वं महाप्रलयत्वं महाप्रलयश्च न प्रमाणसिद्ध इति नव्यनैयायिकाः। तत्र नैमित्तिकप्रलयकालश्च कल्पतुल्यः “यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्। यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते” इति मनुना हिरण्यगर्भस्य निद्रासमये तत्प्रलयस्योक्तेः “शर्वरी तस्य तावती” इति तत्कालस्य च कल्पतुल्यकालत्वमुक्तम्। एतदभिप्रायेण अमरे “प्रलयो नष्टचेष्टता” इत्युक्तम् नैमित्तिकप्रलयकाले सर्वभूतानां चेष्टाशून्यत्वात्। “प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः” सा०द० उक्ते २सात्त्विकभावभेदे।

प्रलव पु० प्र+लू—भावे अप्। १प्रकर्षेण छेदने वाचा० अन्तोदात्ततास्य। प्रलूयते। कर्मणि अप्। २खण्डभेदे २लेशे च कात्या० श्रौ० २६।१।१० (तृणप्रलवान्) तृणलेशान्।

प्रलवित्र न० प्रलूयतेऽनेन प्र+लू+करणे इत्र। छेदनसाधने खड्गादौ वाचा० अन्तोदात्ततास्य।

प्रलाप पु० प्र+लप—भावे घञ्। १अनर्थकवाक्ये २निष्प्रयोजने उन्मत्तादिवाक्ये च अमरः। ३रोगाणामुपसर्गभेदे “मूर्च्छा मांसक्षयो मोहः प्रलापो मरणमिति क्षये” सुश्रुते सन्निपातोक्तौ। [राजनि०।

प्रलापहन् पु० प्रलापं हन्ति हन—क्विप्। कुलत्थजातेऽन्ने

प्रलापिन् त्रि० प्र+लप-ताच्छील्ये घिनुण्। प्रलपनशीले

प्रलीन त्रि० प्र+ली—कर्त्तरि क्त। १प्रलयं प्राप्ते २चेष्टाशून्ये च। तस्य भावः तल्। प्रलीनता चेष्टानाशे इन्द्रियस्वापे च।

प्रलेप पु० प्र+लिप—भावे घञ्। व्रणादिशोधनार्थे द्रव्यविशेषेण लेपनविशेषे। सुश्रुते आलेपोपक्रमे “स त्रिविधः प्रलेपः प्रदेह आलेपश्चेति। तेषामन्तरं, प्रलेपः शीतस्तनुरविशोषी विशोषी च। प्रदेहस्तूष्णः शीतो वा बहलोऽबहुरविशोषी च। रक्तपित्तप्रसादनकृदालेपः” इति आलेपनभेदलक्षणान्युक्तानि तत्र द्रव्यभेदास्तत्रोक्ता दृश्याः

प्रलेपक त्रि० प्र+लिप—ण्वुल्। १प्रलेपकर्त्तरि स्त्रियां टाप् कापि अत इत्त्वम् प्रलेपिका तस्या धर्म्यम् अण्। प्रालेपिकम्। २प्रलेपिकाधर्मे त्रि०। सुश्रुतोक्ते ३ज्वरभेदे पु० “तथा प्रलेपको ज्ञेयः शोषिणां प्राणनाशनः। दुश्चिकित्स्यतमो मन्द सुकष्टो धातुशोषकृत्” प्रलेपकं वातबलास कफ ज्वरादिकत्वेन वदन्ति तज्ज्ञाः” सुश्रुते तल्लक्षणमुक्तम्।

प्रलेह पु० प्रलिह्यतेऽसौ प्र+लिह—कर्मणि घञ्। व्यञ्जनभेदे (कोरमा) पाकराजेश्वरः।

प्रलोलुप त्रि० प्रा०स०। १अत्यन्तलोलुपे गरुडवंश्ये कुन्तिपुत्रे २पक्षिभेदे पु० मार्क०पु० ७अ०।

प्रवक त्रि० प्रु+गतौ साधुकारित्वे द्योत्ये वुन्। भूवोणतिसूते तत्र साधुकारिणि तत्त्वबोधिनी।

प्रवक्तृ त्रि०प्रवक्ति प्र+वच—तृच्। प्रकर्षेण वक्तरि १अर्थानुसन्धानपूर्वकवेदादिशासके २तदर्थोपदेशके च मनुः ३।१८६ याज्ञ० २।२५२

प्रवग पुंस्त्री० प्लवग+अस्य रः। खगे अमरटीका। एवं प्रवङ्ग प्रवङ्गमावपि रस्य लत्वे तत्रार्थे। सर्वत्र जातित्वात् स्त्रियां ङीष्।

प्रवचन न०प्रोच्यते प्र+वच—कर्मणि ल्युट्। १वेदाङ्गे शास्त्रे भावे ल्युट्। २अर्थानुसन्धानपूर्वकवचने च “नायमात्मा प्रवचनेन लभ्यः” कठोप०। अस्य तित्त्वः परस्य गोत्रा-कृत्त्वायाम् उदात्तता।

प्रवचनीय त्रि० प्र+वच—कर्मणि अनीयर्। प्रकर्षेण अर्थानुसन्धानेन १वाच्ये। “भव्य गेयेत्यादि” पा० कर्त्तरि अनीयर्। प्रवक्तरि कर्मप्रवचनीयाः तच्छब्दे दृश्यम्।

प्र(प्रा)वट पु०प्र+वा०अट—स्वार्थे अच् वा। यवे जटाधरः।

प्र(व)वण पु०प्र+प्(व)ण—अच्। १चतुष्पथे अमरः २निम्नस्थाने ३तटे ४नम्रे मेदिनिः। ५आयते ६प्रगुणे ७उदरे शब्दर०। ८क्रुते ९लिप्त्ये त्रि० विश्वः १०क्षीणे च त्रि० धरणिः। ११आसक्ते त्रि० हेमच०।

प्रवत् त्रि० प्रवणे वाति वा—बा० डति। १प्रवणदेशे निम्नस्थाने गन्तरि ऋ०७।५०।४ अनोऽर्थे बहुप् मस्य कः नान्तत्वात् न पदत्वम्। प्रवस्वत तद्युते त्रि०। पा० १।१ ८१।२भाष्यम्। स्त्रियां ङीप्। सोपसृष्टे धात्वर्थे वर्त्तमानात् प्रोपसर्गात् वति। २प्रकृष्टगमनादौ च।

प्रवत्स्यत्पतिका स्त्री प्रवत्स्यन्पतिर्यस्याः। यस्याः पतिः परदेशं गमिष्यति तादृश्यां स्त्रियां रसमञ्जरी। तत्र तल्लक्षणभेदादिकमुक्तं यथा “यस्याः पतिर्भविष्यति देशान्तरं यास्यत्येव सा प्रवत्स्यत्पतिका। अस्याश्चेष्टा कातरवचनमातरमेचनमनविघ्नोपदर्शनमिर्वेदसन्तापसम्मोहनिश्वासवाष्पादयः। सा च मुग्धामध्याप्रौढापरकीया धारणीभेदात् पञ्चविधा तदुदाहरणानि तत्र दृश्यानि।

प्रवत्ताम् त्रि० धा—भावे बा० अनिन् प्रवत् प्रकृष्टगतियुक्तः धामा गतिर्यस्य। प्रकृष्टगमनेन शीघ्रयायिनि ऋ० १।१

१८।२ भाष्ये दृश्यम् । तत्र टास्थाने "सुपांसुलोपः" इत्यादिना पा० याट् । अतो नोपधालोप इति बोध्यम् ।

प्रवयन न० प्र+वय–गतौ भावे ल्युट् । १प्रकर्षेण २गमने करणे ल्युट् । ३प्रतोदे हेमच० । [२पुराणे निघण्टुः

प्रवयस् त्रि० प्रकृष्टं वयोऽस्य । १वृद्धे स्थविरे हेमच० ।

प्रवय्या स्त्री प्र+वि–यत् "भय्यप्रवय्ये छन्दसि" पा०नि०। प्रकर्षेण गतियुतायां स्त्रियां स्त्रियामेवास्य निपातः पुंसि कर्मणि तु यत् प्रवेय इति सि०कौ०।

प्रवर पु० प्र+वृ–अप् । १सन्ततौ २गोत्रे गोत्रप्रवर्तकमुनिव्यावर्त्तके ३मुनिभेदे च । ४श्रेष्ठे त्रि० ५अगुरुचन्दने न० । मेदि० । गोत्रभेदे गोत्रप्रवर्तकमुनिगणाश्च आर्षशब्दे ८१४पृ० दृश्याः । तदधिकं प्रवराध्यायादौ दृश्यम् ।

प्रवरललित न० "यमौनः सो रोगः प्रवरललितं नाम बोध्यम्" वृ०र० टीकोक्ते षोडशाक्षरपादके छन्दोभेदे ।

प्रवरवाहन पु० द्वि०व० । प्रवरं वाहनं ययोः । अश्विनीकुमारयोः हेमच० ।

प्रवर्ग पु० प्रवृज्यतेऽसौ प्र+वृज–घञ् । १विष्णौ हरिवं० ४२ अ० । २प्रवर्ग्ये महावीरे हेमच० । तत्र प्रवर्ग्यं इत्येव पाठो न्याय्यः ।

प्रवर्ग्य पु० प्र+वृज-कर्मणि ण्यत् कुत्वम् । १महावीरे तत्प्रकारः कात्या० श्रौ० २६अ० प्रवर्ग्याध्याये दृश्यम् । अस्त्यर्थे मतुप् । प्रवर्ग्यवत् । २तद्युते ३यज्ञभेदे पु० शत०ब्रा० २ ४ ४ १

प्रवर्त्तक त्रि० प्रवर्तयति प्र+वृत–णिच्-ण्वुल् । प्रवृत्तिजनके "बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यताविषयकं ज्ञानम् इष्टसाधनताविषयकं कृतिसाध्यताज्ञानं वा प्रवर्तकमिति जरन्नैयायिकाः । यथा वा स्वविशेषणवत्ताप्रतिसन्धानजन्यं कार्यताज्ञानं प्रवर्तकमिति गुरवः । "चोदनेति क्रियायाः प्रवर्तकं वचनम्" चोदनासूत्रे शवरभाष्यम् "क्रियाया नियोगस्य ज्ञानद्वारा प्रवर्तकं वाक्यं चोदनेत्यर्थः ।

प्रवर्त्तना स्त्री प्र+वृत–णिच्–युच् । प्रवृत्तिजनकव्यापारे विध्यादौ "अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि" इति भर्तृहरिः । भावे ल्युट् तत्रार्थे आरम्भे च न० ।

प्रवलाकिन् पु० १भुजङ्गे २चित्रमेखलके च विश्वः ।

प्रवसु पु० इलिनपपुत्रे दुष्मन्तभ्रातरि नृपभेदे भा०आ०९४अ०।

प्रवह पु०प्र+वह–अच् । "वहत्यावह ज्योतींषि वहति प्रवहस्तेन कीर्तितः" इत्युक्ते १वायुभेदे । भावे अप् । २नगराद्बहिर्गमने

प्रवहण न० प्र+वह–करणे ल्युट् । १मनुष्यवाह्ये २वस्त्राच्छादिते स्त्रीवाहने कर्णीरथे (महापाफ) अमरः ।

प्रवह्लि स्त्री प्रवल्ह्–इ–पृषो०अल्लस्यादि०वर्णव्यत्यासश्च । प्रहेलिकायां भरतः वा ङीप् तत्रार्थे स्वार्थे क । तत्रार्थे अम०

प्रवा पु० प्रकर्षेण वाति गच्छति वा–क्विप् । अश्वे यजु०१५।६ वेददी० ।

प्रवाच् त्रि० प्रकृष्टा वाक् यस्य । युक्तियुक्तवाक्यवक्तरि जटा०।

प्रवाणी स्त्री प्र+वे–ल्युट् ङीप् । १तन्तुवायशलाकायाम् (माकु) निष्क्रान्ता प्रवाण्याः निरा०स० गौणत्वे प्रवाणिशब्दस्य ह्रस्वे सम्भवति भरतेन यत् वाणिशब्दस्यापि ह्रस्वान्तत्वं कल्पितं तच्चिन्त्यम् ।

प्रवात त्रि० प्रकृष्टो वातो यत्र । १सुखसेव्यवातयुक्तदेशादौ प्र+वा–क्त । २निम्ने प्रवणे च प्रवातेजसशब्दे दृश्यम् ।

प्रवाल त्रि० प्रकर्षेण वाति प्र+वा–वल | १प्रकृष्टगतियुते २प्राणे पु० "प्राणो वै प्रवान्" शत०ब्रा० १ ४२ २

प्रवातेजस् त्रि०प्रवातं प्रवणं तेज ओजो यस्य । प्रवाततेजसि निरु० ६।८ [लोकवादे २परस्परकथोपकथने च ।

प्रवाद पु०प्र+वद–घञ् । १परम्परागतवाक्ये लोकेषु २प्रसिद्धे

प्रवादिन् त्रि० प्र+वद–ताच्छील्ये णिनि । परस्परकथनकारके स्त्रियां ङीप् ।

प्रवार पु० प्र+वृ–आच्छादने करणे घञ् । आच्छादने वस्त्रे विभाषेत्यनुवर्तमानात् अपि प्रवर तत्रार्थे सि०कौ० ।

प्रवारण न०प्र+वृ–णिच्-ल्युट् । १काम्ये दाने २काम्यस्य उत्तमवस्तुनो दाने च अमरः । ३प्रकर्षेण वारणे मेदि०। ४महादाने त्रिका०तस्य उत्तमवस्तुनो दानरूपत्वात्तथात्वम्

प्रवास पु० प्रस्थितस्य वासः । गृहात् प्रस्थितस्य भिन्नदेशे वासे चिरप्रवासगतस्य पुनरनागतस्य वार्त्ताद्यश्रवणे कालविशेषे तस्य प्रेतत्वावधारणमुक्तं नि०त० "सन्देहे त्वाह यमः "गतस्य न भवेत् वार्त्ता यावत् द्वादशवार्षिकी । प्रेतावधारणात्तस्य कर्त्तव्यं सुतबान्धवैः । यन्मासि यद्दृश्यतस्तन्मासि तदहःक्रिया । दिनाज्ञाने कृष्णस्य आषाढस्याथ वा कुहूः" । नि०सि० वृद्धमनुः "प्रोषितस्य तथा कालो गतश्चेद्द्वादशाब्दिकः । प्राप्ते त्रयोदशे वर्षे प्रेतकार्याणि कारयेत्" । बृहस्पतिः "यस्य न न श्रूयते वार्त्ता यावद्द्वादश वत्सरान् । कुशपुत्तकदाहेन तस्य स्यादवधारणा" । भविष्ये "पितरि प्रोषिते यस्य न वार्त्ता नैव चागमः । ऊर्द्ध्वं पञ्चदशाद्वर्षात् कृत्वा तत्प्रतिरूपकम् । कुर्यात्तस्य तु संस्कारं यथोक्तविधिना

ततः। तदादीन्येव सर्वाणि प्रेतकर्माणि कारयेत्”। द्वादशाब्दप्रतीक्षा पितृभिन्नविषयेति मदनरत्ने उक्तम्। गृह्यकारिकायान्तु “तस्य पूर्ववयस्कस्य विंशत्यब्दोर्ध्वं ततः क्रिया। ऊर्द्ध्वं पञ्चदशाब्दात्तु मध्यमे वयसि स्मृता। द्वादशाब्दात्परादूर्ध्वमुत्तरे वयसि स्मृता। चान्द्रायणत्रयं कृत्वा त्रिंशत् कृच्छ्राणि वा सुतैः। कुशैः प्रतिकृतिं दग्ध्वा कार्य्याः शौचादिकाः क्रियाः” इत्युक्तम् पराशरः “देशान्तरगतो नष्टस्तिथिर्न ज्ञायते यदि। कृष्णाष्टमी ह्यमावास्या कृष्णा चैकादशी च या। उदकं पिण्डदानं च तत्र श्राद्धं तु कारयेत्”। इदं पाखण्डाने” प्रवासादागतेन गुर्वादेः पादयोर्ग्रहणपूर्वकम् प्रणामो विहितः यथा “विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्। गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन्। मातृष्वसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा। सम्पूज्या गुरुपत्नीव समास्ता गुरुभार्य्यया। भ्रातृभार्य्योपसंग्राह्या सवर्णाऽहन्यहन्यपि। विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः। पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्य्यपि। मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी” कौर्मपु० १२ अ०

प्रवासन न० प्र+वस–णिच्–भावे ल्युट्। १विदेशवासने “सीताप्रवासनपटोः करुणा कुतस्ते” उत्तरचरितम्। २वधे अमरः। ३निर्वासने पुरात् बहिर्यापने।

प्रवासिन् त्रि० प्र+वस-णिनि। १विदेशवासिनि हेमच०। “प्रवासी सुखमायाति” षट्पञ्चाशिका। स्त्रियां ङीप्

प्रवास्य त्रि० प्र+वस–णिच्–कर्मणि यत्। पुरान्निर्वास्ये मनुः ८।२८४

प्रवाह पु० प्र+वह–घञ्। १प्रवृत्तौ २जलादिस्रोतसि मेदि० ३व्यवहारे विश्वः ४उत्तमाश्वे नानार्थरत्ना०। ५सन्ततौ कालेन देशेन वा विच्छेदाभावे “प्रवाहरूपेणानादि”

प्रवाहक त्रि० प्र+वह–ण्वुल्। १प्रकर्षेण वोढरि २राक्षसे पुंस्त्री० शब्दमाला।

प्रवाहण पु० १जैवले ऋषिभेदे शत०ब्रा० १४।९।१।१ तस्यापत्यं शुभ्रा० ढक् पूर्वपदस्य वा वृद्धिः। प्रावाहणेय प्रवाहणेय तदपत्ये पुंस्त्री० ततोऽपत्ये इञ् प्रावाहणेयि प्रवाहणेयि प्रवाहणेयस्यापत्ये पुंस्त्री०। प्रवाहयति प्र+वह–णिच्–ल्यु। २प्रवाहयितरि “विभुरसि प्रवाहणः” यजु० ५।३१

प्रवाहिका स्त्री प्र+वह–रोगाख्यायाम् ण्वुल्। ग्रहणीरोगे अमरः ग्रहणीशब्दे २७५१ पृ० दृश्यम्। ततः अपनयने तसि। प्रवाहिकातः कुरु प्रवाहिकायाः प्रतीकारं कुर्वित्यर्थः सि०कौ०।

प्रवाहिन् त्रि० प्र+वह–णिनि। १प्रवाहयुते त्रि०। प्रवाह+पुष्करा०देशे इनि ङीप्। २प्रवाहिणी प्रवाहयुतदेशे स्त्री

प्रवाही स्त्री प्र+वह–णिच्–अच् गौरा० ङीष्। बालुकायां राजनि०।

प्रवाह्य पु० प्रवाहे भवः यत्। १रुद्रभेदे यजु० १६।४१। प्र+वह–कर्मणि ण्यत्। २प्रकर्षेण वाह्ये च। [अमरः

प्रविख्याति स्त्री प्र+वि+ख्या–भावे क्तिन्। ख्यातिप्रसिद्धौ

प्रविदारण न० प्रविदारयत्यत्र प्र+वि+दृ-णिच्-आधारे ल्युट्। १युद्धे अमरः। भावे ल्युट्। २अवदारणे मेदि०। कर्मणि ल्युट्। ३आकीर्णे त्रि० शब्दर०। कर्त्तरि ल्यु ४प्रविदारणकारके त्रि०।

प्रविवर न० प्रकृष्टं विवरं छिद्रमस्य। १पीतकाष्ठे शब्दच०। २प्रकृष्टच्छिद्रयुते त्रि०। [श्लेषयुते च अमरः।

प्रविश्लेष त्रि० प्रकर्षेण विश्लेषो यस्य। १विधुरे २परमवि-

प्रविषा स्त्री प्रकृतं विषं यया। अतिविषाक्षुपे (अतइच्) अमरः।

प्रविष्ट त्रि० प्र+विश–कर्त्तरि क्त। १कृतप्रवेशे २पैप्पलादिकौशिकयोर्मातरि स्त्री हरिवं० १९१ अ०।

प्रवीण त्रि० वीणया प्रगायति प्र+वीणा+णिच्–अच्। १निपुणे वीणया गायकस्य नैपुण्यप्रसिद्धेः तत्तुल्यनैपुण्यवत्त्वात्तथात्वम्। भौत्यस्य मनोः २पुत्रभेदे पु० हरिवं० ७ अ०।

प्रवीर पु० प्रा०स०। १प्रकृष्टवीरे २सुभटे ३उत्तमे त्रि० धरणिः ४हर्य्यश्वस्य पुत्रभेदे पु० विष्णुपु०। ५पूरोः पौष्ट्र्यां भार्य्यायां जाते पुत्रभेदे पु० भा०आ० ९४ अ०। रैवस्य उपदानव्यां जाते ६पुत्रभेदे पु० हरिवं० ३२ अ०। ७पुरुवंश्ये प्रचिन्वतः पुत्रे नृपभेदे पु० हरिवं० ३१ अ०।

प्रवीरबाहु पु० राक्षसभेदे रामा० ३।२५ स०।

प्रव्रजनीय पु० प्र+व्रज–कर्मणि अनीयर्। १प्रवर्ग्ये २महावीरे कात्या० २६।७।१४ [वेददीपः।

प्रवृत् न० प्रवृणोति भूतानि प्र+वृ–क्विप्। जले यजु० १५।९

प्रवृत्तहोम पु० होमभेदे कात्या०श्रौ० ९।८।१६८

प्रवृत्त त्रि० प्र+वृत–कर्त्तरि क्त। १कृतप्रवृत्तिके प्रवृत्तियुते २आरब्धे च “प्रवृत्तमन्यथा कुर्य्यात् यदि मोहात् कथञ्चन” छन्दोगप०। ३प्रवर्त्तितव्यधर्मभेदे। भावे क्त। ४प्रवृत्तौ न०।

प्रवृत्तक न० “यदा समावेशयुक्तौ पूर्व्वयोर्भवति ततप्रवृत्त-

कम्” वृ०र० उक्ते वैतालीयप्रकरणीये मात्रावृत्तभेदे।

प्रवृत्तचक्र पु० प्रवृत्तं स्वाज्ञानुसारेण चक्रं राष्ट्रादि यस्य। राष्ट्रादिष्वप्रतिहताज्ञे “प्रवृत्तचक्रतां चैव वाणिज्यं प्रभुतां तथा” याज्ञ० व्या० मिताक्षरा।

प्रवृत्ति स्त्री प्र+वृत-क्तिन्। १प्रवाहे २वार्त्तायाम् ३अवन्त्यादिदेशे मेदि० ४हस्तिमदे हेमच०। ५न्यायोक्ते चिकीर्षाकृतिसाध्यताज्ञानाधीने ६प्रयत्नभेदे च प्रयत्नशब्दे दृश्यम्। “चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा। उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं मतम्” भाषा०।

“दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः” गौत०सू० “एतस्मान्मिथ्याज्ञानादनुकूलेषु रागः प्रतिकूलेषु द्वेषः रागद्वेषाधिकाराच्चासत्येर्ष्यामायालोभादयो दोषा भवन्ति। दोषैः प्रयुक्तः शरीरेण प्रवर्त्तमानो हिंसास्तेयप्रतिषिद्धमैथुनान्याचरति वाचाऽनृतपरुषसूचनासम्बद्धानि, मनसा परद्रोहं परद्रव्याभीप्सां नास्तिक्यञ्चेति सेयं पापात्मिकाऽधर्माय अथ शुभा शरीरेण दानं परित्राणं परिचरणञ्च। वाचा सत्यं हितं प्रियं स्वाध्यायञ्चेति मनसा दयामस्पृहां श्रद्धाञ्चेति सेयं धर्माय। अत्र प्रवृत्तिसाधनौ धर्माधर्मौ प्रवृत्तिशब्देनोक्तौ। यथा अन्नसाधनाः प्राणाः। अन्नं वै प्राणिनः प्राणा इति। सेयं कुत्सितस्याभिपूजितस्य च जन्मनः कारणम्” भाष्यम्। “प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः” गौ० सू० “प्रवृत्तिदोषजनितोऽर्थः फलम्” गौ०सू० “प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम्” कणा०। “प्रत्यगात्मनीति स्वात्मनीत्यर्थः इच्छाद्वेषजनिते प्रवृत्तिनिवृत्ती प्रयत्नविशेषौ ताभ्याञ्च हिताहितप्राप्तिपरिहारफलके शरीरकर्मणी चेष्टालक्षणे जन्येते तथा च परशरीरे चेष्टां दृष्ट्वा इयं चेष्टा प्रयत्नजन्या चेष्टात्वात् मदीयचेष्टावत् स च प्रयत्न आत्मजन्य आत्मनिष्ठो वा प्रयत्नत्वात् मदीयप्रयत्नवदिति परात्मनोऽनुमानम्” उप०वृ०। “इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्ति” कौ०सू० “विहितकर्मणि रागनिबन्धना निषिद्धे कर्मणि हिंसादौ द्वेषनिबन्धना प्रवृत्तिः। तत्र रागनिबन्धना यागादौ प्रवृत्तिर्धर्मं प्रसूते द्वेषनिबन्धना हिंसादौ प्रवृत्तिरधर्मम्। तावेतौ रागद्वेषौ संसारमनुवर्त्तयतः” वातृव्या०। प्रवृत्तिस्तु द्वयी। कारणरूपा कार्य्यरूपा च। तत्राद्या यत्नत्वजातिमती प्रत्यक्षसिद्धा। द्वितीया तु धर्माधर्मरूपा यागादेरग्न्यागमनादेश्च चिरध्वस्तस्य व्यापारतया कर्मनाशाजलस्पर्शादेः प्रायश्चित्तादेश्च नाशकतया सिध्यतीति। (गौ०वृ० ४।१) भट्टमते प्रवृत्तिर्द्वेधा। स्वेच्छाधीना परप्रेरणाजन्या। तत्राद्यायां प्रवर्त्तनाया अनुपयोगोऽपि द्वितीयप्रवृत्तौ सा प्रयोजिका। यथा आचार्य्यप्रेरणयेदं करोमीति” दि०क०। ७शब्दानामर्थबोधनशक्तिभेदे “प्रवृत्तिराशीच्छब्दानां चरितार्था चतुष्टयी” कुमा०। ८स्वस्वविषये इन्द्रियादीनां सञ्चारे च। [भिक्षौ ९चरभेदे पु० त्रिका०।

प्रवृत्तिज्ञ त्रि०प्रवृत्तिं वृत्तान्तं जानाति ज्ञा—क। १वृत्तान्ता०

प्रवृत्तिनिमित्त न० ६त०। १शब्दानां बोधनाशक्तेर्निमित्ते शक्यतावच्छेदके। यथा घटशब्दस्य प्रवृत्तिनिमित्तं घटत्वमेव शुक्लादिशब्दस्य शुक्लत्वं पाचकादेः पाकः देवदत्तादेः तत्तत्पिण्डादि। “सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च” काव्यप्र०।

प्रवृद्ध त्रि० प्र+वृध—क्त। १वृद्धियुक्ते २प्रौढे च हेमच०।

प्रवृद्धादि न० उत्तरपदस्यान्तोदात्तत्वनिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा “प्रवृद्ध प्रयुत अवहित अनवहित खट्वारूढ कविशस्त आकृतिगणः”।

प्रवेक त्रि० प्र+विच—कर्मणि घञ्। प्रधाने अमरः।

प्रवेट पु० प्र+वी—ट। यवे त्रिका०।

प्रवेणि(णी) स्त्री प्र+वेण—इन् वा ङीप्। १गजस्कन्धस्थे कुथे चित्रकम्बले २वेण्यां जलादिप्रवाहे च मेदि०।

प्रवेल पु० प्र+वेल—अच्। पीतमुद्गे (सोनामुग) हेमच०।

प्रवेश पु० प्र+विश—घञ्। अन्तर्गमने हेमच०।

प्रवेशक त्रि० प्रविशति प्र+विश—ण्वुल्। १प्रवेष्टरि ना०द० उक्ते अर्थोपक्षेपके २रूपकाङ्गभेदे “अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ” इत्युपक्रमे “प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः। अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा”। अङ्कद्वयान्तरित्युक्तेः प्रथमाङ्के चरमाङ्के चास्य प्रतिषेधः। यथा वेण्यामश्वत्थामाङ्के राक्षसमिथुनप्रयोजितः” एवमन्यत्रापि।

प्रवेशन न० प्रविश्यतेऽनेन प्र+विश—करणे ल्युट्। १प्रधानद्वारे २सिंहद्वारे च। भावे ल्युट्। ३प्रवेशे हेमच०। प्र+विश+णिच्—ल्युट्। ४प्रवेशसम्पादने। प्रवेशनं प्रयोजनमस्य ठक्। प्रवेशनीय प्रवेशनसाधने त्रि०।

प्रवेष्ट पु० प्र+वेष्ट—अच्। १बाहौ अमरः २बाहुनीचभागे शब्दच० ३हस्तिदन्तमांसे हारा०। ४गजपृष्ठस्थाने त्रिका०स्वार्थे प्रायस्ये क। प्रवेष्टक दक्षिणबाहौ “प्रविश्य

प्रकोष्ठेन निमित्तं सूचयित्वा” श०कु० “प्रकोष्ठेन दक्षिणबाहुना तद्स्पन्देन निमित्तं स्त्रीलाभरूपशुभसूचकं शकुनं सूचयित्वा “वामेतरभुजस्पन्दोवरस्त्रीसूचकः” शाकुनोक्तेः तद्वस्य स्त्रीलाभसूचकत्वम्।

प्रव्यक्त त्रि० प्रकर्षेण व्यक्तः। स्फुटे अमरः।

प्रव्याध पु० प्रकृष्टो व्याधो यत्र। वर्त्ताधिक्येन विप्रशरस्य पतनं यत्र तादृशे स्थाने शत०ब्रा० ५।१।५।१२। कात्या०१४।३।१६

प्रव्रजन न० प्राश्य गृहादि व्रजनम्। गृहस्थाश्रमं पुत्रादीन् च परित्यज्य व्रजने सन्न्यासे।

प्रव्रजित पु० प्र+व्रज–क्त। १सन्न्यासिनि त्रिका० २मांस्यां ३मुण्डीर्यां ४तापस्याञ्च स्त्री ५बुद्धभिक्षुकीभेदे मेदि०। परनिपाते प्रव्रजिताशब्दस्य पाठात् कुमारप्रव्रजिता पुंसि तु न प्रव्रजितकुमार इत्येव।

प्रव्रज्या स्त्री प्राश्य पुत्रादीन् व्रज्या व्रज–भावे क्यप्। पुत्रादीन् परित्यज्य गमने सन्न्यासाश्रमे।

प्रव्रज्यावसित पु० प्रव्रज्यातोऽवसितः। सन्न्यासच्युते “प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजोत्तमाः। निर्वासं कारयेद्विप्रं दासत्वं क्षत्रवैश्ययोः” कात्यायनवचनम्। तत्प्रायश्चित्तञ्च प्रा०त० भाष्यधृतस्मृतौ “वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रं चरित्वा महाकक्षं वर्द्धयेत् भिक्षुर्वानप्रस्थवत् सोमवृद्धिवर्जम्”। कृतप्रायश्चित्तानामपि तेषामव्यवहार्य्यता यथोक्तम्

“बहिष्कृत्योभयथापि स्मृतेराचाराच्च” शा० सू०। यद्यूर्द्ध्वरेतसां स्वाश्रमेभ्यः प्रच्यवनं महापातकं यदि वोपपातकमुभयथापि शिष्टैस्ते बहिः कर्त्तव्याः “आरूढपतितं विप्रं मण्डलाच्च विनिःसृतम्। उद्बद्धं कृमिदष्टञ्च स्पृष्ट्वा चान्द्रायणं चरेत्” इति चैवमादिनिन्दातिशयस्मृतिभ्यः शिष्टाचाराच्च। न हि यज्ञाध्ययनविवाहादीनि तैः सहाचरन्ति शिष्टाः” भाष्यम्।

प्रव्राज पु० प्र+व्रज–आधारे घञ्। १अत्यन्तनिम्ने देशे ऋ० ७।६०।७ भा०। भावे घञ्। २सन्न्यासे च।

प्रशंसन न० प्र+शन्स–भावे ल्युट्। गुणकीर्त्तनेन स्तुतौ। युच्। प्रशंसनाऽप्यत्र स्त्री।

प्रशंसा स्त्री प्र+शन्स–भावे अ। गुणाविष्कारेण स्तुतौ हेम०

प्रशंसोपमा स्त्री काव्यादर्शोक्ते अर्थालङ्कारभेदे यथा

“ब्रह्मणोऽप्युद्भवः पद्मश्चन्द्रः शम्भुशिरोधृतः। तौ तुल्यौ त्वन्मुखेनेति सा प्रशंसोपमोच्यते”। तौ पद्मचन्द्रौ त्वन्मुखेन तुल्यौ इति पद्मचन्द्रयोः प्रशंसितयोरपि त्वन्मुखसादृश्येन प्रशंसातिशयात् मुखस्य च समधिकोत्कर्षव्यञ्जनात् प्रशंसोपमा उच्यते।

प्रशत्वन् पु० प्र+शद–क्वनिप् तुट् च। १समुद्रे उज्ज्वल० स्त्रियां ङीप् वनोर च। प्रशत्वरी २नद्यां उज्ज्वल०।

प्रशम पु० प्र+शम–घञ् न वृद्धिः। १शान्तौ २निवृत्तौ च। प्रशाम्यति प्र+शम–अच् गौरा०ङीष्। ३अप्सरोभेदे स्त्री भा०अनु० १९अ०। ४रन्तिदेवस्य पुत्रे प्र० भाग० ८।२४।२५

प्रशमन न० प्र+शम–णिच्–ल्युट्। १वधे २शान्तताकरणे च “तव्यप्रशमनस्यास्यम्” रघु “सर्वाबाधाप्रशमनम्” चण्डी शम–भावे ल्युट्। ३शान्तौ हेमच०। [शब्दच०।

प्रशस्त त्रि० प्र+शन्स–क्त। १प्रशंसनीये २श्रेष्ठे ३क्षेमे च

प्रशस्ताद्रि पु० वृ०सं० १४अ० उक्ते मध्यदेशस्थे गिरिभेदे।

प्रशस्ति स्त्री प्र+शन्स–भावे क्तिन्। १प्रशंसायाम् २स्तुतौ ऋ० १।७४।२

प्रशस्य त्रि० प्र+शन्स–कर्मणि क्यप्। १प्रशंसनीये। तस्य इष्ठेयसुनोः परतः श्रादेशः अतिशयेन प्रशस्यः श्रेष्ठः श्रेयान् भावे क्यप्। २प्रशंसने न०।

प्रशाखा स्त्री प्रगता शाखाम् अत्या०स०। अप्रशाखायाम् भा०कर्ण० १०६८ श्लोक०।

प्रशान् अव्य० प्र+शो बा० अनि स्वरादि०। सामर्थ्ये

प्रशासन न० प्र+शास–भावे ल्युट्। शिष्यादीनामिष्टादिबोधनाय कर्त्तव्यताबोधकवाक्योच्चारणे “कालस्यैव प्रशासनमभूत्” का०उ०।

प्रशास्तृ पु० प्र+शास– उणा० सू० तृन संज्ञायां अनिट् च। शस्त्ररूपशंसनकर्त्तरि ऋत्विग्भेदे अशंज्ञायान्तु तृच्–इट्। प्रशासितृ। प्रशासनकर्त्तरि राजादौ।

प्रशास्त्र त्रि० प्रशास्तुरिदम् अण् संज्ञापूर्वविधेरनित्यत्वात् न वृद्धिः। शस्त्ररूपशंसनकर्त्तृ सम्बन्धिनि।

प्रशिष्य पु० प्रगतः शिष्यमध्यापकत्वेन अत्या०स०। शिष्यस्य शिष्ये “शिष्यप्रशिष्यैरुपगीयमानमवेहि तन्मण्डनमिश्रधाम” शङ्करदिग्विजयः

प्रश्न पु० प्रच्छ–भावे नङ्। जिज्ञासायाम् ज्ञातुमिच्छया १कथनाय प्रेरणे अमरः। अविज्ञातार्थज्ञानार्थमिच्छाप्रयोज्यवाक्ये “अविज्ञातप्रवचनं प्रश्न इत्यभिधीयते”। जिज्ञासाशब्देन तत्प्रयोज्यकथानुकूलव्यापारोच्यते को भवान्? किमेतस्य वचनम्? इत्यादि। २उपनिषद्भेदे पु० दैवज्ञं प्रति भाविशुभाशुभज्ञानाय दैवज्ञस्य वचनानुकूल व्यापारे तदुत्तरज्ञापकशास्त्रञ्च प्रश्नमनोरमादि।

प्रश्नदूती स्त्री प्रश्नस्य दूतीव । प्रहेलिकायाम् त्रिका० ।

प्रश्नविवाक पु० कृतान् प्रश्नान् विवक्ति उत्तरयति वि+वच–कर्त्तरि संज्ञायां घञ् । प्रश्नोत्तरदायके ज्योतिर्विद्भेदे "मर्यादायै प्रश्नविवाकम्" यजु० ३०।१० वेददी० ।

प्रश्नव्याकरण पु० प्रश्नान् शिष्यकृतप्रश्नान् व्याकरोति उत्तरयति वि–व्या+कृ–ल्यु कृत० । १जैनभेदे हेमच० । भावे ल्युट् । २पृष्टार्थोत्तरदापने न० ।

प्रश्नि पु० १ऋषिभेदे भा०शा०२६अ० । प्रच्छ–बा०नि वा ङीप् । २कुम्भिपाकायां (पाना) त्रिका० ।

प्रश्नोपनिषद् प्रश्नाधिकारेण प्रवृत्ता उपनिषत् । आथर्वोपनिषद्भेदे "भगवन् ! कुतो वा इमाः प्रजाः प्रजायन्ते" इत्यादि षट्प्रश्नाधिकारेण तस्याः प्रवृत्तेस्तथात्वम् ।

प्रश्रय पु० प्र+श्रि–करणे अच् । प्रणये अमरः ।

प्रश्रित त्रि० प्र+श्रि–क्त । १विनीते अमरः शान्तिदेवस्य २पुत्रभेदे पु० भाग० ६ २४ २५

प्रश्लथ त्रि० प्रकृष्टः श्लथ प्रा०स० । प्रकृष्टे शिथिले त्रिका० ।

प्रश्लिष्ट त्रि० प्र+श्लिष–क्त । सम्बन्धे युक्तियुक्ते आश्लिता० नात्यालोटात्तता ।

प्रश्वास पु० प्र+श्वस–भावे घञ् । कोष्ठस्य वायोर्बहिर्निःसारणे "श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" पा०त० सू० भाष्यम् । कुम्भकशब्दे २११४पृ० दृश्यम् ।

प्रष्ट त्रि० प्रच्छ–तृच् । प्रश्नकारके स्त्रियां ङीप् ।

प्रष्टि पु० प्रच्छ–कर्त्तरि बा० ति । वाहनत्रयमध्यवर्त्तिनि स्वगभेदे ऋ० १।३९।६

प्रष्ठ त्रि० प्र+स्था क "प्रष्ठोऽग्रगामिनि" पा० षत्वम् । १अग्रगामिनि । २श्रेष्ठे च अमरः । तस्य पत्नी ङीष् । ३तत्पत्न्यां स्त्री । गौरा०ङीष् । ४शालपर्ण्यौषधौ स्त्री राजनि० ।

प्रष्ठवाह् त्रि०प्रष्ठं वहति वह–ण्वि । १युगप्रान्ते प्रथमयोजिते दम्ये गवादौ अमरः युगपार्श्वे योजिते गवादिके शिक्षार्थं यं प्रथमं वाहयति तस्मिन् । भत्वे वाह ऊट् प्रष्ठौहः प्रष्ठौहा इत्यादि । स्त्रियां ङीप् प्रष्ठौही तथाविधस्त्रियाम् २प्रथमगर्भिण्यां गवि धरणिः ।

प्रस प्रसवे ततौ च सक०दिवा० आ० सेट् । प्रस्यते अप्रसिष्ट । मित् घटादि णिच् प्रसयति ते ।

प्रसक्त त्रि० प्र+सन्ज–क्त । १प्रसङ्गविषये "प्रसक्तं हि प्रतिषिध्यते" मीमांस० । २नित्ये नित्यतायुक्ते त्रि०जटा० ।

प्रसक्ति स्त्री प्र+सन्ज–भावे क्तिन् । १प्रसङ्गे २आपत्तौ ३अनुमितौ दीधितिः । ४व्याप्तौ च "अतिप्रसक्तिरन्यधर्मत्वे" सा०द० । अतिव्याप्तिस्तदर्थः । [१०] भाष्ये दृश्यम् ।

प्रसङ्गिन् पु० प्र+सन्ज–बा० घिनुण् । प्रसङ्गशीले ऋ०८।१२।

प्रसंख्यान न० प्र+सम्+ख्या–भावे ल्युट् । १सम्यग्ज्ञाने "हरः प्रसंख्यानपरो बभूव" कुमा० । प्रा०स० । २प्रकर्षेण संख्यायुते त्रि० भा० व० १२१अ० ।

प्रसङ्ग पु० प्र+सन्ज–भावे घञ् । १प्रकृष्टसङ्गे २व्याप्तिरूपे सम्बन्धे यथाऽतिप्रसङ्गः अप्रसङ्ग इत्यादौ ३सङ्गतिभेदे "सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा । निर्वाहकैककार्य्यत्वे षोढ़ा सङ्गतिरिष्यते" । तत्र "प्रसङ्गत्वम् स्मृतत्वे सत्युपेक्षानर्हत्वं तच्च स्मृतिविषयतापन्नत्वे सति द्वेषविषयतानापन्नत्वम्" अनुमितौ गदाधरः । ४अनुरक्तत्वे ५प्रस्तावे ६मैथुनासक्तौ ७प्राप्तौ च "कृताकृतप्रसङ्गि नित्यं तद्विपरीतमनित्यम्" व्या०परिभाषा । तत्र प्रसङ्गः प्राप्तिरेव "शब्दान्तरम् प्राप्नुवन् विधिरनित्यो भवति शब्दान्तरात् प्राप्नुवतः शब्दान्तरेऽप्राप्नुवतश्च लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः" नागेशः । क्वचित् कृताकृतप्रसङ्गमात्रेणापि नित्यता" व्या० परिभाषा । प्रसङ्गशब्देन प्राप्तिरेव ग्राह्यता । अन्योद्देशेन प्रवृत्तौ अन्यस्यापि टविशौ तत्र यथान्यस्य सिद्धिस्तथा तदुदाहरणादिकञ्च प्रा०त० उक्तं यथा "अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः प्रसङ्गः यथा पश्वर्थमनुष्ठितेन प्रयाजादिना पशुतन्त्रमध्यपातिनः पुरोडाशस्यापि उपकारः सिध्यति । यथा वा "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति वाजिभ्यो वाजिनम्" इत्यत्रामिक्षार्थं प्रवृत्तौ अनुद्देश्यवाजिनस्यापि सिद्धिः" । यथा वा काम्ययागनिष्पत्त्यर्थमनुष्ठितैराग्नेयादिभिर्नित्ययागादिसिद्धिरिति मिताक्षरोक्तम् यथा दण्डनिपातप्रायश्चित्तेनैव गुरुणा तदन्तरीयकावगोरणप्रायश्चित्तमपि सम्पद्यत इति प्रायश्चित्तविवेकोक्तम् । तथा ब्राह्मणवधोद्देशेन द्वादशवार्षिके कृते च क्षत्रियवधनिमित्तकत्रैवार्षिकप्रायश्चित्तस्य सिद्धिः । एवञ्च तन्त्रप्रसङ्गयोरनावृत्तेनैव कर्मणा नानादृष्टफलसिद्धौ नावश्यमेव हेतुः । नन्ववगोरणक्षत्रियवधप्रायश्चित्तयोः कथं प्रसङ्गेन सिद्धिः सङ्कल्पादेरभावात्, तयोः सङ्कल्पादिः कुत इति चेत् प्रायश्चित्तत्वात् तथात्वेऽपि कथं सङ्कल्प इति चेत् काम्यत्वात्" । "एवञ्च काम्यस्य सर्वशक्त्यधिकरणे सर्वाङ्गोपेतस्यैव फलवत्त्वाभिधानात् तस्यापि प्रसङ्गविषयत्वे काम्ये हि काम्याभिलापसंकल्पितकुश-तिलजलत्यागरूपः सङ्कल्पः प्रत्यर्थं प्रति प्रकृतानुक

इत्युक्तेन 'प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत्। प्रायश्चित्तमुपासीनो वाग्यतस्त्रिषवनं स्पृशेत्' इति लिखितवचने प्रत्येकं नियतं कालमिति तत्तद्व्रतकालसंख्याम् आत्मनो व्रतम् आत्मसम्बन्धित्वेन आत्मकर्तृत्वेन इति यावत्। तेनामुकव्रतमहं करिष्ये इति चादिशेदुल्लेखं कुर्यात् इत्यनेन प्राप्तस्य सङ्कल्पस्य बाधः" इत्याशङ्क्य तत्र समाहितं यथा "प्रायश्चित्तस्य नित्यत्वेनाङ्गवैकल्येऽपि फलसिद्धिः"। अत्रेदं बोध्यम् प्रसङ्गशब्देन व्याप्तिरेवोच्यते तथा चोद्दिष्टकर्मणा व्याप्तस्य यत्र सिद्धिस्तत्रैवास्य प्रवृत्तिः। उद्दिष्टकर्मणः व्याप्यत्वञ्च देशकालकर्त्रादीनां प्रयोगानुबन्धिनां वैधहेतुभूतानामैक्ये भवति अतस्तन्त्रवदत्रापि कालदेशाद्यन्तर्भावेनैव व्याप्यता"।

प्रसङ्गसम पु॰ स्थापनाहेतुप्रयोगे प्रतिषेधहेतूपन्यासात् उत्तरभेदे 'दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ' गौ॰५।१।९ "साधनस्यापि साधनं वक्तव्यमिति प्रसङ्गे प्रत्यवस्थानं प्रसङ्गसमः प्रतिषेधः क्रियाहेतुगुणयोगी क्रियावाल्लोष्ट इति हेतुर्नोपदिश्यते। न च हेतुमन्तरेण सिद्धिरस्तीति। दृष्टान्तस्य कारणं प्रमाणं तदनपदेशोऽनभिधानम् अभिधानं चानतिप्रयोजनकं तथा च दृष्टान्तस्य साध्यवत्त्वे प्रमाणाभावात् प्रत्यवस्थानमर्थः। यद्यपीदं सदुत्तरमेव तथापि दृष्टान्ते प्रमाणं वाच्यं तत्रापि प्रमाणान्तरमित्यनवस्थया प्रत्यवस्थाने तात्पर्यं तदुक्तमाचार्यैरनवस्थाभासप्रसङ्गः प्रसङ्गसम इति एतन्मते हेतोर्हेत्वन्तरमित्यनवस्थाऽपि प्रसङ्गसम एव पूर्वमते तु हेत्वनवस्थादिकं वक्ष्यमाणाकृतिगणेष्वन्तर्भूतमिति विशेषः। अनवस्थादेशनाभासा चेयं प्रतिदृष्टान्तसमः प्रत्येतव्यः" वृत्तिः। अस्योत्तरं तत्रोक्तम्। 'प्रदीपादानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः" गौ॰सू॰ "इदं तावदयं पृष्टो वक्तुमर्हति अथ के प्रदीपमुपाददते किमर्थं वेति दिदृक्षमाणाः दृश्यदर्शनार्थमिति। अथ प्रदीपं दिदृक्षमाणाः प्रदीपान्तरं कस्मान्नोपाददते अन्तरेणापि प्रदीपान्तरं दृश्यते प्रदीपः तत्र प्रदीपदर्शनार्थं प्रदीपोपादानं निरर्थकम्। अथ दृष्टान्तः स किमर्थमुच्यत इति। अप्रज्ञातस्य ज्ञापनार्थमिति अथ दृष्टान्ते कारणापदेशः किमर्थं दृश्यते यदि प्रज्ञापनार्थम् प्रज्ञातो दृष्टान्तः स खलु लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्त इति तत्प्रज्ञापनार्थः कारणापदेशो निरर्थक इति प्रसङ्गसमस्योत्तरम्"। प्रसङ्गसमे प्रत्युत्तरमाह। दृष्टान्तो हि निदर्शनस्थानत्वेन साध्यनिश्चयार्थमपेक्ष्यते न तु दृष्टान्तदृष्टान्ताद्यनवस्थितपरम्परा लोकसिद्धा युक्तिसिद्धा वा अन्यथा घटादिप्रत्यक्षार्थं प्रदीप इव प्रदीपप्रत्ययार्थमनवस्थितप्रदीपपरम्परा प्रसज्येत तदीयसाधनमपि व्याहन्येत" वात्स्या॰।

प्रसज्य पु॰ भीमो भीमसेनवत् प्रसज्यप्रतिषेधस्यान्त्यलोपः। प्रसज्यप्रतिषेधे अत्यन्ताभावे अत्र रोगीति निन्दाश्रयणात् प्रसज्यता' मल्लि॰ रघु॰।

प्रसज्यप्रतिषेध पु॰ प्रसज्य प्रसक्तिं सम्पाद्यारोप्येति यावत् प्रतिषेधः। अत्यन्ताभावे 'प्रसक्तं हि प्रतिषिध्यते' इति न्यायेन आरोपितप्रसङ्गस्यैव निषेधः तेन वायौ रूपं नास्तीत्यादावपि वायौ रूपारोपं कृत्वैव निषेधो नञा बोध्यते इति विवेकः। कलञ्जाधिकरणशब्दे १७७७पृ॰ नञ्शब्दे ३१४२ पृष्ठादौ मतभेदेन नञः पर्युदासप्रसज्यप्रतिषेधपरता दृश्या। "अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्" शाब्दिकाः। न कलञ्जं भक्षयेदित्यत्र भक्षणनिष्ठसाधनत्वविशिष्टेष्टसाधनत्वरूपस्य विध्यर्थस्याभावो नञा बोध्यते तेन विधेरप्राधान्यं नञर्थाभावस्य च प्राधान्यं तेन तत्र क्रियापदान्वयिनञ्प्रसज्यप्रतिषेधार्थकः। गुरुमते तु कलञ्जभक्षणाभावविषयकं कार्यमिति बोधेन अभावविशेष्यकबोधेऽपि प्रतिषेधस्य प्राधान्यात् तथात्वं तथा च तन्मते क्वचित् विधेरप्राधान्येन क्वचिच्च प्रतिषेधस्य प्राधान्येन इति व्यस्तमेव प्रसज्यप्रतिषेधप्रबोधकप्रयोजकमिति बोध्यम्।

प्रसत्ति स्त्री प्र+सद–क्तिन्। १नैर्मल्ये २प्रसन्नतायाम् जटा॰

प्रसत्वन् पु॰प्र+सद-वनिप्। १धर्मे २प्रजापतौ च सं॰उणा॰। ३प्रतिपत्तौ स्त्री ङीप् वनोर च। [धन्यो च।

प्रसन्धि पु॰ १मनुपुत्रभेदे भा॰आश्व॰४अ॰। मा॰त॰। २प्रकृष्ट-

प्रसन्न त्रि॰ प्र+सद--कर्मणि क्त। १निर्मले २सन्तुष्टे ३कतानुपद्मभेदे अमरः। ४सुरायां स्त्री मेदि॰ "प्रसन्ना गुल्मवातार्शोविबन्धानाहनाशिनी। शूलप्रवाहिकाटोपकफवातार्शसां हिता" राजवल्लभः। तस्य भावः तल् प्रसन्नता स्त्री त्व प्रसन्नत्व न॰ नञ्भावे प्रसादे नैर्मल्ये च।

प्रसन्नात्मन् त्रि॰प्रसन्नो निर्मल आत्मा यस्य। १प्रसन्नान्तःकरणे २विष्णौ पु॰ "सुप्रसादः प्रसन्नात्मा" विष्णुस॰। तत्स्वरूपस्य विदोषत्वात्तथात्वम्।

प्रमदेरा स्त्री कर्म्म०। मदिराभेदे भरतः।

प्रसभ क्रि०प्रगता सभा सभाधिकारोऽस्मात् प्रा०ब०। बलात्कारे अमरः "प्रसभोद्धृतारिः" रघुः।

प्रसयन न०प्र+सि–बन्धने करणे ल्युट्। बन्धनसाधने १तन्तौ २जाले च "प्रसितिः प्रसयनात् तन्तुर्वा जालं वा" निरु० ६।१२।

प्रसर पु० प्र+सृ–भावाधारादौ यथायथम् अप् कर्त्तरि अच् वा। तन्तुविटपादेः प्रकर्षेण १सर्पणे प्रकर्षेण २सरणे अमरः ३वेगे ४प्रणये च मेदि०। ५समूहे शब्दर० ६युद्धे विश्वः। ७नाराचास्त्रे ८विसर्पणकर्त्तरि त्रि०।

प्रसरण न० प्र+सृ–भावे ल्युट्। १सैन्यादेः सर्वतो गमने तृणाद्याहरणार्थं सैन्यानामितस्ततो गतौ २आसारे अमरः। अनि प्रसरणि तथार्थे स्त्री रामाश्रमः वा ङीप्

प्रसर्पण न० प्र+सृप–ल्युट्। सैन्यानां सर्वतोव्याप्तौ अस्य स्त्रीत्वस्तु तत्र ङीप्। [काले हेमच०।

प्र(श)सल्ल पु० प्र+सल–अच् पृषो० सस्य (सोवा) हेमन्त-

प्रसलवि अव्य० प्रदक्षिणे शत०ब्रा० २।६।११।१५ भाष्यम्।

प्रसव पु०प्र+सू–भावादौ अप्। १गर्भमोचने २उत्पत्तौ ३कार्य्ये ४फले ५कुसुमे ६अपत्ये च मेदि० नारीणां गर्भमुक्तिकालश्च भावप्र० उक्तो यथा

"नवमे दशमे मासि नारी गर्भं प्रसूयते। एकादशे द्वादशे वा ततोऽन्यत्र विकारतः"। वैकृतं यथा "गर्ग उवाच "अकालप्रसवा नार्य्यः कालातीताः प्रजास्तथा। विकृतप्रसवाश्चैव युग्मप्रसवनास्तथा। अमानुषा अवस्थाश्च नजातव्यञ्जनास्तथा। हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः। पशवः पक्षिणश्चैव तथैव च सरीसृपाः। विनाशं तस्य देशस्य नृपस्य च विनिर्दिशेत्। निर्वासयेत्तां नृपतिः स्वराष्ट्रात् स्त्रियश्च, पूज्याश्च ततो द्विजेन्द्राः। किमिच्छिकैर्ब्राह्मणतर्पणैश्च लोके ततः शान्तिमुपैति पापम्" मात्स्ये २०८अ०। "भानौ सिंहगते चैव यस्य गौः सम्प्रसूयते। मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः। अत्र शान्तिं प्रवक्ष्यामि येन सम्पद्यते शुभम्। प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत्। ततो होमं प्रकुर्वीत घृताक्तैराजसर्षपैः। आहुतीनां घृताक्तानामयुतं जुहुयात्ततः" नारदः। "प्रसवविकारे स्त्रीणां द्वित्रिचतुःप्रभृति सम्प्रसूतौ वा। हीनातिरिक्तकाले च देशकुलसङ्क्षयो भवति। वडवोष्ट्रमहिषगोहस्तिनीषु यमलोद्भवे मरणमेषाम्। षण्मासात् सूतिफलं शान्तौ श्लोकौ च गर्गोक्तौ "नार्य्यः परस्य विषये त्यक्तव्यास्ता हितार्थिना। तर्पयेच्च द्विजान् कामैः शान्तिं चैवात्र कारयेत्। चतुष्पदाः स्वयूथेभ्यस्त्यक्तव्याः परभूमिषु। नगरं स्वामिनं यूथमन्यथा हि विनाशयेत्" वृ०सं० ४६अ०। सुखप्रसवप्रकारः ज्यो० त० उक्तो यथा "अस्ति गोदावरीतीरे जम्भला नाम राक्षसी। तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत्"। "पञ्च रेखाः समुल्लिख्य तिर्य्यगूर्द्ध्वं क्रमेण हि। पदानि१६ षड्दशापाद्य त्वेकमाद्ये शनौ७ त्वयम्। नवमे सप्त दद्यात्तु वाणं५ पञ्चदशे तथा। द्वितीयेऽष्टावष्टमे षट् दिशो१०ऽधो षोडशे श्रुति४म्। एकादिना समं देयमिच्छावाद्विलिकोणके। तदा द्वात्रिंशदादिः स्यात् चतुःकोष्ठेषु सर्वतः। दर्शनाद्धारणात्तासां शुभं स्यादेषु कर्मसु। द्वात्रिंशत् प्रसवे नार्य्याश्चतुस्त्रिंशद्गमे नृणाम्। भूतारिष्टे तु पञ्चाशद् मृतापत्यासु वै शतम्। द्वासप्ततिस्तु वन्ध्यायां चतुःषष्टीरणाध्वनि। विषे विंशो धान्यकोटेष्वष्टाविंशतिरेव च। चतुरष्टौ१२ च बालानां रोदने परिकीर्त्तिता"। स्थानविशेषादिसम्बन्धभेदानां विकृतप्रसवसूचकताभेदः वृ०जा० उक्तो यथा

"उदयस्थेऽपि वा मन्दे कुजे वास्तं७ समागते। स्थिते वाऽन्तःक्षपानाथे शशाङ्कसुतशुक्रयोः। शशाङ्के पापलग्ने वा वृश्चिकेश(कुज)त्रिभागगे। शुभैःस्वाय२।११।स्थितैर्जातः सर्पस्तद्वेष्टितोऽपि वा। चतुष्पदे गते भानौ शेषैर्वीर्य्यसमन्वितैः। द्वितनुस्थैश्च यमलौ भवतः कोशवेष्टितौ। छागसिंहवृषैर्लग्ने तत्स्थे सौरेऽथ वा कुजे। राश्यंशसदृशे गात्रे जायते नालवेष्टितः"।

स्थानभेदे प्रसवसूचकयोगः वृ०जा० उक्तो यथा

"पूर्णे शशिनि स्वराशिगे सौम्ये लग्नगते शुभे सुखे। लग्नः जलजेऽस्तगेऽपि वा चन्द्रे पोतगता प्रसूयते। आप्योदयमाप्यगः शशी सम्पूर्णः समवेक्षतेऽथ वा। मेषूरण बन्धुलग्नः ग स्यात् सूतिः सलिले न संशयः। उदयोडुपयोर्व्यय१२स्थिते गुप्तौ पापनिरीक्षिते यमे। अलिकर्किधुते विलग्नगे सौरे शीतकरेक्षितेऽवटे। मन्देऽब्जगते विलग्नगे बुधसूर्य्येन्दु निरीक्षिते क्रमात्। क्रीडाभवने सुरालये सोषरभूमिषु च प्रसूयते। नृलग्नगं प्रेक्ष्य कुजः श्मशाने रम्ये सितेन्दू गुरुरग्निहोत्रे। रविर्नरेन्द्रामरगोकुलेषु शिल्पालये ज्ञः प्रसवं करोति। राश्यंशसमानगोचरे मार्गे जन्म चरे स्थिरे गृहे। स्वर्क्षांशगते स्वमन्दिरे

बलयोगात् फलमंशकर्क्षयोः। आरार्कजयोस्त्रिकोणगे चन्द्रेऽस्ते च विसृज्यतेऽम्बया। दृष्टेऽमरराजमन्त्रिणा दीर्घायुः सुखभाक् च स स्मृतः। पापेक्षिते तुहिनगावुदये कुजेऽस्ते त्यक्तो विनश्यति कुजार्कजयोस्तथाये। सौम्येऽपि पश्यति तथाविधहस्तमेति सौम्येतरेषु परहस्तगतोऽप्यनायुः। पितृमातृगृहेषु तद्बलात्तरुशालादिषु नीचगैः शुभैः। यदि नैकगतौ तु वीक्षितौ लग्नेन्दू विजने प्रसूयते। मन्दर्क्षांशे शशिनि हिबुके मन्ददृष्टेऽब्जगे वा तद्युक्ते वा तमसि शयने नीचसंस्थैश्च भूमौ। यद्वद्राशिर्व्रजति हरिजं गर्भमोक्षस्तु तद्वत् पापैश्चन्द्रात् स्मरसुखगतैः क्लेशमाहुर्जनन्याः"। अथ सूतिकागृहमानम् "अष्टहस्तायतञ्चारु चतुर्हस्तविशालकम्। प्राचीद्वारमुदग्द्वारं विदध्यात् सूतिकागृहम्"। आसन्नप्रसवायालक्षणमाह "याते हि शिथिले कुक्षौ मुक्ते हृदयबन्धने। सशूले जघने नारी विज्ञेया प्रसवोत्सुका। आसन्नप्रसवायास्तु कटीपृष्ठन्तु सव्यथम्। भवेन्मुहुः प्रवृत्तिश्च मूत्रस्य च मलस्य च"। अथासन्नप्रसवाया उपचारः "तैलेनाभ्यक्तगात्राणां संस्नातामुष्णवारिणा। यवागूं पाययेत् कोष्णां मात्रया घृतसंयुताम्। कृतोपधाने मृदुभिर्विस्तीर्णे शयने शनैः। आभुग्नसक्थि चोत्ताना नारी तिष्ठेद्व्यथान्विता"। (आभुग्नसक्थि आसङ्कोचितोरुः) अथ धात्री "चतस्रोऽपहृनीयाश्च श्रावणे कुशला हिताः। दक्षाः परिचरे युक्ताः सम्यक् छिन्ननखाः स्त्रियः"। अथ तत्कृत्यम् "अपत्यमार्गं तैलेन समभ्यज्य समन्ततः। एका तु तां च सुभगे! प्रवाहस्वेति तां वदेत्। अव्यथा मा प्रवाहिष्ठाः प्रवाहेथा व्यथा यदि। प्रवाहेथाः शनैः पूर्वं प्रवाहस्व ततःपरम्। ततो गृहन्तरं गर्भे योनिद्वारमुपागते। अपरासहितो गर्भो यावत् पतति भूतले"। अथारहितायाः प्रवाहणाद्दोषमाह "मूकं वा बधिरं कुब्जं श्वासकासक्षयान्वितम्। सूते समस्ततनुं बालमकाले च प्रवाहणात्" भावप्र०। नवममासादिप्रसवकालश्च नारीणामन्यजन्तूनां मासभेदादन्यत्र द्रष्टव्यः

प्रसवक पु० प्रसवेन पुष्पादिना कायति कै—क। पियालवृक्षे शब्दमाला। [[illegible] (टे) स्वनरः।

प्रसवबन्धन न० बन्ध—करणे ल्युट् प्रसवस्य पुष्पादेः बन्धनम्।

प्रसवस्थली स्त्री० ६त०। प्रसवस्य स्थलीव वा। १उत्पत्तिस्थाने २मातरि च।

प्रसवितृ पु० प्रसूते उत्पादयति प्र+सू—सूतेः उत्पादनात् जनकव्यापारार्थत्वात् तृच्। १पितरि मल्लिनाथः निरु० ६।१३।। प्रसूतौ २मातरि स्त्री ङीप्।

प्रसविन् त्रि० प्र+सू—शीलार्थे इनि। प्रसवशीले।

प्रसव्य त्रि० प्रगतं सव्यं वामत्वम्। १प्रतिकूले अमरः। कर्मणि यत्। २प्रसवनीये त्रि०।

प्रसह त्रि० सहति प्र+सह—अच्। १प्रकर्षेण सोढरि प्रसह्य बलात्कारेण भक्षयतीति प्रसहः। बलात्कारेण भक्षके २खगभेदे "काकौ गृध्र उलूकश्च चिल्लश्च शशघातकः। चाषो भासश्च कुररः इत्याद्याः प्रसहाः स्मृताः" शशघातकः (बाज) इति लोके "प्रसहाः कीर्त्तिता एते प्रसह्याछिद्य भक्षणात्। प्रसहाः खलु वीर्य्योष्णमांसं भक्षयन्ति ये। ते शोषभस्मकोन्मादैः शुक्रक्षीणा भवन्ति हि" भावप्र०।

प्रसहन त्रि० प्रगतं सहनं यस्य। १क्षमारहिते २हिंस्रपशुभेदे पुंस्त्री० "शार्दूलसिंहशरभर्क्षतरक्षुव्याघ्रा अन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते। ते कीर्त्तिताः प्रसहनाः पवनं तदीयसर्गःप्रमेहजठरामयनाशकारि" राजनि०। भावे ल्युट्। ३आलिङ्गने प्रकर्षेण ४क्षमायां च।

प्रसह्य अव्य० प्र+सह—ल्यप्। १हठादित्यर्थे अमरः "प्रसह्य तेजोभिरसंख्यतां गतैः" माघः। प्र+सह—कर्मणि शक्यार्थे यत्। प्रकर्षेण २सोढुं शक्ये त्रि०। [शचौरे त्रिका०।

प्रसह्यचौर पु० प्रसह्य बलात्कारेण चौरः। (डाकाइत) प्रका-

प्रसह्यहरण न० प्रसह्य बलात्कारेण हरणम्। १क्षत्रियेण कन्यायाः बलाद्धरणे भा० आ० २१९अ०। २हठेन हरणे (डाकाइति) प्रसह्यहरणं च साहसभेदः। [२१४२।

प्रसह्वन् त्रि० प्र+सह—वनिप्। प्रसहनकर्त्तरि खमे काव्या०।

प्रसातिका स्त्री० सो—क्तिन् प्रगता सातिरस्याः कप् प्रा०ब०। अणुधान्ये सूक्ष्मधान्ये रत्नमाला।

प्रसाद पु० प्र+सद—भावे घञ्। १नैर्मल्ये २अनुग्रहे ३काव्यगुणभेदे ४स्वास्थ्ये ५प्रसत्तौ ६देवनैवेद्ये ७गुरुजनभुक्तावशिष्टे च अमरः। काव्यगुणभेदश्च रसस्यैव धर्मभेदः शब्दानां तथात्वमुपचारात् यथोक्तं सा०द० "रसस्याङ्गित्वमाप्तस्य धर्माः शौर्य्यादयो यथा"। गुणाः यथा आत्मनोऽङ्गित्वमाप्तस्यात्मन उत्कर्षहेतुत्वात् शौर्य्यादयो गुणशब्दवाच्याः तथा काव्येऽङ्गित्वमाप्तस्य रसस्य धर्माः। स्वरूपविशेषाः माधुर्य्यादयोऽपि स्वसम्बन्धिपदसन्दर्भस्य काव्यव्यपदेशस्यौपाधिकाद्गुणपदभाज इत्यर्थः"। यथा चैषां

रचनात्मक धर्मत्वं तथा दर्शितम् । “एवं माधुर्य्यमो-जोऽथ प्रसाद इति ते त्रिधा” इत्युपक्रमे “चित्तं व्या-प्नोति यः क्षिप्रं शुष्केन्धनमिवानलः । स प्रसादः सम-स्तेषु रसेषु रचनासु च” । व्याप्नोति आविष्करोति । “शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः” यथा “सूचीमुखेन सकृदेव कृतव्रण ! त्वं मुक्ताकलाप ! लुठसि स्तनयोः प्रियायाः । बाणैः स्मरस्य शतशो विनिकृत्तमर्मा स्वप्नेऽपि तां कथमहं न विलोकयामि” सा०द० “प्रसादवत् प्रसिद्धार्थमिन्दोरिन्दीवरद्युति । लक्ष्म लक्ष्मीं तनोतीति प्रतीतिं सुभगं वचः” काव्यादर्शः । धर्मस्य पत्न्यां मूर्त्तौ जाते २पुत्रभेदे भाग० ४।१।२८।

प्रसादना स्त्री प्र+सद–णिच्-युच् । १सेवायां हेमच० । भावे ल्युट् । २प्रसादन तत्रार्थे न० “मैत्रीकरुणामुदितो-पेक्षाणां सुखिदुःखिपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसा-दनम्” पा०सू० । चित्तप्रसादनशब्दे २९१४ पृ० दृश्यम् ।

प्रसादपट्ट पु० प्रसादसूचकः पट्टः शा०त० । अनुग्रहसूचके ह०सं०६०अ० उक्ते पट्टभेदे पट्टशब्दे ४२०१पृ० दृश्यम् ।

प्रसाधक त्रि० प्रसाधयति प्र+साधि–ण्वुल् । १भूषके स्त्रियां कापि अत इत्त्वम् । २अलङ्कर्त्र्यां ३सैरिन्ध्र्यां स्त्री भावप्र० राज्ञां प्रसाधनार्थं ४सेवकभेदे पु० “सूदव्यञ्जन-कारास्तथा व्यञ्जकास्तथा । प्रसाधका भोजकाश गात्र-संवाहका अपि । अवतान्त्व कुरुतगन्धमूकपदादयः” कामन्द० ।

प्रसाधन न० प्र+सिध–णिच्–साधादेशः ल्युट् । १अलङ्कारभू-षणे वेशे । करणे ल्युट् । २कङ्कतिकायाम् स्त्री ङीप् अमरः । ३निष्पादने ४सिद्धौ च मेदि० ।

प्रसाधित त्रि०प्र+साधि–क्त । १अलङ्कृते २निष्पादिते च ।

प्रसारण न० प्र+सृ–णिच्-ल्युट् । १विस्तारकरणे २क्रिया-भेदे च भाषा० कर्णेनुशब्दे १७२०पृ०दृश्यम् । विप्रकृष्टदेश-संयोगहेतुक्रिया प्रसारणम् । करणे ल्युट् ङीप् । (गन्ध भादाल) ३लताभेदे स्त्री० राजवल्लभः ।

प्रसारिन् त्रि० प्र+सृ–णिनि । १विस्तारयुते स्त्रियां ङीप् । सा च २गन्धप्रसारणलतायां स्त्री राजनि० ।

प्रसित त्रि० प्र+सो–क्त । १आसक्ते अमरः तद्योगे विषयाधारे अनुशासनपर्व्वात् आसक्त्यर्थपरत्वे तृती सप्तम्यौ “हरिणा हरौ वा प्रसित इति तत्त्वबो० मा०व० । २प्रकटरूपे त्रि० ३पूवे न० शब्दच० । तस्य प्रकटरूपत्वात् तथात्वम् ।

प्रसिति स्त्री प्र+सि–बन्धने करणे क्तिन् । बन्धनसाधने १निगडादौ अमरः । २तन्तौ ३जाले च प्रचयनशब्दे निरु० ।

प्रसिद्ध त्रि० प्र+सिध–क्त । १भूषिते २ख्याते च मेदि० ।

प्रसिद्धि स्त्री प्र+सिध–भावे–क्तिन् । १ख्यातौ २शृङ्गारे त्रिका० ३भूषणे च ।

प्रसुम्न पु० १उत्तरदेशसमीपस्थे देशे २तद्भूपे च भा०स०२८अ० ।

प्रसू स्त्री प्र+सू–क्विप् । १मातरि अमरः २घोटक्यां च ३कदल्यां ४वीरुधि च मेदि० । स्वार्थे क । प्रसूका वाजिन्यां राजनि० ।

प्रसूत त्रि० प्र+सू–कर्म्मणि क्त । १जनप्रसवे कर्त्तरि क्त । २संजाते ३प्रकटरूपे त्रि० । ४कुसुमे न० मेदि० ५जाता-पत्यायां स्त्रियां स्त्री अमरः । चाक्षुषमन्वन्तरे देवगण-भेदे पु० मार्क०पु० ७६अ० ।

प्रसूति स्त्री+सू-क्तिन् क्तिच् वा । १प्रसवे अमरः २उद्भवे ३तनये ४दुहितरि च मेदि० ५मातरि । स्वार्थे क । प्रसूतिका जातप्रसवायां स्त्रियाम् अमरः ।

प्रसूतिज न० प्रसूतेः उद्भवादारभ्य जायते जन–ड । १दुःखे अमरः । २प्रसवजातमात्रे त्रि० ।

प्रसून न० प्र+सू–क्त ओदित्त्वात् तस्य नः । १कुसुमे २फले च अमरः । ३जाते त्रि०मेदि० । [मन्मथादयोऽप्यत्र ।

प्रसूनेषु पु० प्रसूनमिषुर्यस्य । पुष्पशरे कामे त्रिका० प्रसू०

प्रसृत न० प्र+सृ–क्त । १पलद्वये शब्दमा० २अर्द्धाञ्जलौ न० । कर्त्तरि क्त । ३प्रसरणयुते त्रि० अमरः । ४विहिते ५वेगिते त्रि० मेदि० । ६गते त्रि० त्रिका० ७नियुक्ते त्रि० हला० । ८जङ्घायां स्त्री मेदि० ।

प्रसृतज पु० १कुण्डगोलकरूपे पुत्रभेदे “आत्मा पुत्रश्च विज्ञे-यस्तस्यानन्तरजश्च यः । निरुक्तजश्च विज्ञेयः सुतः प्रसृतजस्तथा” भा०अनु० ४९अ० । “निरुक्तजः स्वेनैव ऽन्योरेतःसेकार्थमुक्तस्तज्जः (क्षेत्रजः) प्रसृतोऽनिरुक्तो यो लोकात् परक्षेत्रे रेतः सिञ्चति तज्जः प्रसृतजः” (कुण्डगोलकरूपः) नीलक० ।

प्रसृति स्त्री प्र+सृ–क्तिन् । प्रसृते अर्द्धाञ्जलिमाने रायमु० ।

प्रसृष्ट त्रि० प्र+सृज–क्त । १प्रकर्षेण सृष्टे “तथैवानुनिपा-तेन प्रसृष्टाभिसवेन च” भा०वि० । २अ० स्थाने “अङ्गुल्यः प्रसृता यास्तु ताः प्रसृष्टा उदीरिताः” नीलकण्ठोक्तायां ३प्रसृताङ्गुलौ स्त्री ।

प्रसेक पु०प्र+सिच–भावे घञ् । १आसेचने २च्युतौ च मेदि०

प्रसेकिन् पु० प्र+सिच–बा० घिनुण् । १प्रसेचनशीले प्रसेकयुक्ते २व्रणभेदे चषाख्ये रोगभेदे पु० सुश्रुतः "मांसपिण्डवदुन्नताः प्रसेकिनोऽन्तःपूयवेदनावन्तोऽल्पाऽपानवदुन्नतौष्ठाः" (व्रणभेदाः)।

प्रसेदिका स्त्री क्षुद्रारामे हेमच० ।

प्रसेन पु० १यदुभिन्नपौत्रे सत्राजित्‌भ्रातरि क्षत्रियभेदे हरिवं० ३८अ० "सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः" स्यमन्तकोपाख्यानम् । [पसिद्धप्रज्ञा।

प्रसेनजित् पु० नृपभेदे भा०स० ८अ० । हरिवं०१२अ० तदु-

प्रसेव पु० प्र+सिव–कर्म्मणि घञ् । १वीणाङ्गे २स्यूते २ग्रथिते च मेदि०। प्र+सेव–भावे घञ् । ३प्रकृष्टसेवने पु०।

प्रसेवक पु० प्र+सिव–ण्वुल् । वीणाप्रान्तवद्धे १काष्ठे वीणादण्डाधः शब्दगाम्भीर्य्यार्थम् अलाबुमयं भाण्डं यच्चर्म्मादिना आच्छाद्य दीयते तस्मिन् पदार्थे अमरः । २स्यूतचर्म्मपात्रे (थोकड़ा) ३प्रकृष्टस्यूतिकारके त्रि० ।

प्रस्कण्व पु० प्रगतः कण्वं कारणत्वेन नि० सुट् । कण्वपुत्रे ऋषिभेदे स च बहूनां वेदमन्त्राणां द्रष्टृत्वात् ऋषिः ।

प्रस्कन्दन न० प्र+स्कन्द–भावे ल्युट् । १आस्कन्दने "अग्निप्रस्कन्दनपरः" भा०आ० ८४अ० । अपादाने ल्युट् । आस्कन्दनापादाने यत आस्कन्दनं क्रियते२तस्मिन् । भावे ल्युट् । ३विरेके रत्नमा० तत्रार्थे प्रस्यन्दनमित्येव न्याय्यः पाठः स्यन्दतेर्धातोरर्थानुगमात् तत्रार्थे प्रस्कन्दनमिति पाठस्तु लिपिकरप्रमादात् । कर्त्तरि ल्यु। ४महादेवे भा० अ० १७अ० ।

प्रस्कुन्द पु०प्रगतः कुन्दम् चक्रम् अत्वा०स० पारस्करा०सुट् । कुन्दाख्यचक्राकारवेदिकायाम् "प्रस्कुन्देन प्रतिष्ठन्ते" भा०उ०७२श्लो०। "प्रस्कन्देनेति पाठे प्रध्वमयिष्ययेत्यर्थः"। नीलकण्ठः ।

प्रस्तर पु०प्र+स्तृ–अप् । १पाषाणे (पातर) २पल्लवादिरचिते शयनीये शब्दर० ३मणौ मेदि० ४दर्भमुष्टौ "अध्वर्युः प्रस्तरं प्रहरति" ताण्ड्य०ब्रा० ६ ७ १६ "प्रस्तरो दर्भमुष्टिः" भाष्यम् । तं प्रशंसति "यजमानो वै प्रस्तरः" १७ । "प्रस्तरस्य हविरासादनादिद्वारा यागसाधनत्वात् यजमानोऽपि यज्ञसाधनमिति यागसाधनत्वसाम्यात् प्रस्तरो यजमानत्वेन स्तूयते" भा० ।

प्रस्तरिणी स्त्री प्रस्तरस्तदाकारोऽस्त्यस्य इनि ङीप् । गोजिह्विकायां राजनि० ।

प्रस्तरेष्ठा पु०प्रस्तरे तिष्ठति स्था–क्विप् अलुक्स०षत्वम् अलुक्स०। विश्वदेवभेदे दक्षु० २।१७।

प्रस्तार पु० प्र+स्तृ–घञ् । १तृणप्रधानवने हेमच० । २पल्लवादिरचितशयनीये शब्दर० । ३शय्यामात्रे हारा० । प्रस्तार्य्यन्ते विस्तार्य्यन्ते गुरुलघुरूपतया वर्णा मात्रा वा अनेन प्र+स्तृ–णिच् करणे अच् । ४लघुगुरुवर्णज्ञापनक्रियाभेदे तत्प्रकारश्च वृ०र० उक्तो यथा "पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः । यथोपरि तथा शेषं भूयः कुर्य्यादमुं विधिम् । ऊने दद्याद्गुरूनेव यावत् सर्वलघुर्भवेत् । प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः" । "प्रस्तारणीयवृत्तादीनां सर्वगुरुके पादे पाद इत्युपलक्षणं वर्णानामपि । प्रथमपङ्क्तौ लिखिते आद्यात् प्रथमगुरोरारभ्येत्यर्थः । द्वितीयपङ्क्तौ अधः तस्यैव अधस्तात्पङ्क्तौ प्रथमं लघुं न्यस्य यथा उपरि अर्द्धस्थपङ्क्तौ अपरे वर्णादयः सन्निविष्टास्तथा तस्य दक्षिणपार्श्वेषु गुर्वादयो लेख्याः । तृतीयपङ्क्तौ तु प्रथमाया गुरुपङ्क्तेरधस्तात् लघुं न्यस्य शेषान् उपरिस्थद्वितीयपङ्क्तिस्थान् गुर्वादीन् न्यसेत् एवञ्च तृतीयपङ्क्तौ आद्यस्थानस्य न्यूनता तत्र किं देयमित्याकाङ्क्षायामाह, ऊने प्रस्तार्य्यसंस्थाने न्यूने सति वामभागे गुरून् दद्यात् एवं भूयो भूयः कुर्य्यात् यावत् सर्वलघुः पादो भवेत्, तावदेवं कुर्य्यादित्यर्थः । त्र्यक्षरप्रस्तारे लघुगुर्वोः अलुवक्रतया तदाकारेणोदाहरणम्

प्रथमः भेदः ऽऽऽ मगणः द्वितीयो भेदः ।ऽऽ यगणः

तृतीयो भेदः ऽ।ऽ रगणः चतुर्थो भेदः ।।ऽ सगणः

पञ्चमो भेदः ऽऽ। तगणः षष्ठो भेदः ।ऽ। जगणः

सप्तमो भेदः ऽ।। भगणः अष्टमो भेदः ।।। नगण

मात्राप्रस्तारे विशेषस्तु पिङ्गलादौ द्रष्टव्यः ।

मात्रावृत्तप्रस्तारेऽयं विशेषः ऊने गुर्वादिक्रमेण वर्णा देयाः । मात्राद्वये अवशेषे एको गुरुः त्रिमात्रावशेषे एको गुरुः तद्वामे एको लघुरेव देयः इत्यमात्रसंख्यया न्यूनमात्राद्वारा संख्यापूरणार्थं गुरुलघुदानमिति बोध्यम् ।

प्रस्तारपङ्क्ति स्त्री छन्दोभेदे छन्दःशब्दे २९७८पृ०दृश्यम्।

प्रस्तार्य्यर्म्म न० "समन्तादिस्तृतः श्यावो रक्तो वा मांससदः । सन्निपातेन दोषाणां प्रस्तार्य्यर्म्म तदुच्यते" वैद्यकोक्ते नेत्ररोगभेदे ।

प्रस्ताव पु० प्र+स्तु– "प्रे द्रुस्तुस्रुवः" पा० भावकरणादौ घञ् । १प्रकरणे २अवसरे अमरः । ३प्रकृष्टे भाव-

दीक्षित ४प्रकरणे वाच्यप्र० । ५सामावयवभेदे स च प्रस्तोतृनामकेन ऋत्विजा गेयः साम्नः प्रथमो भागः । प्रस्तोतव्या देवता प्रस्तावमन्वायत्ता छा० उ० । तस्य देवता च अन्नरूपः प्राणस्तत्रैवोक्तः ।

प्रस्तावना स्त्री प्र+स्तु–णिच्–युच् । १आरम्भे जटा० "आर्य्यबालचरितप्रस्तावनाडिण्डिमः" वीरच० । प्रस्तावयति प्र+स्तु–णिच्–ल्यु । नाटकाङ्गे आरम्भार्थके आमुखे स्त्री तल्लक्षणभेदादिकं सा० द० उक्तं तच्च आमुखशब्दे ७६६ पृष्ठादौ दृश्यम् ।

प्रस्तिर न० प्र+स्तृ वा० क भावे दूषणे रफरत्वं च । पल्लवादिरचिते शयनीये शब्दर० । [१संहते २ध्वनिते च ।

प्रस्तीत(म) त्रि० प्र+स्त्यै–क्त तस्य मीत्वं सम्प्रसारणञ्च ।

प्रस्तुत त्रि० प्र+स्तु–कर्म्मणि क्त । १प्रकरणप्राप्ते २प्रारब्धे ३उपस्थिते ४उद्यते ५प्रतिपन्ने ६प्रकर्षेण स्तुते च ।

प्रस्तृत त्रि० प्र+स्तृ–क्त । १अन्तरिते त्रिका० । २प्रकर्षेण विस्तारिते त्रि० ।

प्रस्तोतृ त्रि० प्रकृष्टं स्तौति प्र+स्तु–तृच् । १प्रकर्षेण स्तोतरि २साम्नः प्रथमभागगायके ऋत्विग्भेदे पु० अध्वरशब्दे ८६४ पृ० दृश्यम् । प्रस्तोतुर्हितं तच्छेदं वा छ । प्रस्तोत्रीय तत्साध्ये सामप्रथमभागे तत्सम्बन्धिनि च त्रि० ।

प्रस्थ त्रि० प्र+स्था–क । १प्रकर्षेण स्थितियुते २गन्तरि च प्रपूर्वकतिष्ठतेर्गत्यर्थत्वात् । ३आढकचतुर्थांशरूपे परिमाणभेदे पु० आढकशब्दे ६५५ पृ० दृश्यम् । ४द्विशरावपरिमाणे वैद्यकम् । आधारे यजुर्वे क । ५पर्वतसमभूभागे स्थितियोग्यस्थाने सानौ पु० न० । ६उन्मितवस्तुनि मेदिनिः ७विस्तारे च "दीर्घप्रस्थे समानस्तु न कुर्य्यान्मन्दिरं बुधः" ब्रह्मवै० पु० ज० ख० १०२अ० । प्रस्थं पचति पच–खश् मुम् । प्रस्थम्पच प्रस्थमितपाचके त्रि० ।

प्रस्थपुष्प पु० प्रस्थमिव पुष्पमस्य । १मरुवके अमरः २अल्पपत्रतुलस्यां ३जम्बीरभेदे त्रिका० ।

प्रस्थल उत्तरदेशावस्थायिनि देशभेदे भा० भी० ७५अ० ।

प्रस्थान प्र+स्था–भावे ल्युट् । १जिगीषोर्यात्रागमने २गमनमात्रे च प्रस्थानं गमनं तयाऽस्यत ठञ् । प्रस्थानप्रतिपादके ग्रन्थे यथा युधिष्ठिरादीनां महाप्रस्थानप्रतिपादकः भारतान्तर्गतपर्वभेदः ।

कार्य्यवशात् यात्रादिने स्वयंगमनासम्भवे छत्रभेदानां विप्रादिभेदे प्रस्थापनमाह ज्यो० चि० पी० यथा वशिष्ठः "तस्मिन् मुहूर्त्ते स्वयमप्रयाणे प्रयोजनापेक्षितया च दैवात् । तत्रैव तन्निर्गमनं च कार्य्यं श्रीवांशानाशादि तदुच्यमानम् राजमार्त्तण्डः । "प्रस्थाने ब्राह्मणादीनां यज्ञसूत्रमथाऽऽयुधम् । मध्वामलकफलं चैवं प्रशस्तं हरिकारणम्" वशिष्ठः "श्वेतातपत्रध्वजचामराश्वविभूषणोष्णीषगजाम्बराणि । आन्दोलिका रत्नरथाश्ववारान् शय्यासनाद्यं मनसोऽभीष्टम्" इति नारदोऽपि "अप्रयाणे स्वयं कार्य्यमपेक्ष्य भूपतिस्तथा । कुर्य्यान्निर्गमनं छत्रध्वजशस्त्रसंयुतमिति" "गेहाद्गेहान्तरमपि गमस्तर्हि यात्रेति गर्गः सीम्नः सीमान्तरमपि भृगुर्बाणविक्षेपमात्रम् । प्रस्थानं स्यादिति कथयतेऽथो भरद्वाज एवं यात्रा कार्य्या बहिरिह पुरात् स्याद्वसिष्ठो ब्रवीति" । "प्रस्थानमत्र धनुषां हि शतानि पञ्च केचिज्जगुस्तदयुतं कथयन्ति चान्ये । संप्रस्थितो यदि मन्दिरतः प्रयातो गन्तव्यदिक्षु तदपि प्रयतेन कार्य्यम्" । "प्रस्थाने भूमिपालो दशदिवसमभिव्याप्य नैकत्र तिष्ठेत् सामन्तः सप्तरात्रं तदितरमनुजः पञ्चरात्रं तथैव । ऊर्द्ध्वं गच्छेच्छुभाहेऽप्यथ गमनदिनात् सप्तरात्राणि पूर्वं चायत्नो तद्दिनेऽसौ रिपुविजयमनामैथुनं नैव कुर्य्यात्" ज्यो० चि० । श्रीपतिरपि "वसिष्ठ चैकत्र दश क्षितीशो दिनान्यथो सप्त च मण्डलीकः । यः प्राकृतः सोऽपि न पञ्चरात्रं भद्रेण यात्रा परतः प्रयोज्या" । राजमार्त्तण्डः "प्राच्यामहानि मुनयः प्रवदन्ति सप्त याम्यामतीव शुभदानि दिनानि पञ्च । त्रीण्येव पश्चिमदिशि क्षितिनायकानां प्रस्थानकेषु दिवसद्वयमुत्तरस्याम्" प्रस्थानप्रकारमाह गुरुः "पूर्वं दक्षिणमुद्धृत्य पादं यायान्नराधिपः । द्वात्रिंशतं पदं गत्वा यानमारुह्य संव्रजेत्" । करणे ल्युट् । ३मार्गे ४उपदेशोपाये च यथा श्रुतिस्मृतिन्यायप्रदर्शकम् उपनिषद्गीताशारीरकसूत्ररूपम्भाष्यरूपं प्रस्थानत्रयम् । यथा वा भाष्यटीकायां पञ्चपादिकाभामतीदर्शितप्रस्थानत्रयम् ।

प्रस्थापित त्रि० प्र+स्था–णिच्–पुक् कर्म्मणि क्त । १प्रेरिते हेमच० । २प्रकर्षेण स्थापिते त्रि० ।

प्रस्थायिन् त्रि० प्र+स्था–गम्या० भविष्यति णिनि । १भाविगमनकर्त्तरि । "प्रे स्थः" उणा० इनि णिच्च । २गन्तुमनसि उज्ज्वलदत्तः । [भावप्र० ।

प्रस्थिका स्त्री प्रस्थसदाकारोऽस्त्यस्याः ठन् । अम्बष्ठालतायां

प्रस्नुषा स्त्री स्नुषायाः स्नुषा हेमो० । [मप्रवध्वाम् ।

"स्नुषाश्च प्रस्नुषाश्चैव दृष्टराघ्रश्च विह्वलाः" भा०भ०

६०अ० । नीलकण्ठः । [लङ्कादौ काम्या०श्रौ० २०।२।१२।

प्रस्थेय त्रि० प्रस्थातुमर्हति प्र+स्था–अर्हार्थे यत् । स्थानार्हे

प्रस्पन्दन न० प्र+स्पन्द–भावे ल्युट् । प्रकर्षेण स्पन्दने चलनक्रियाभेदे तच्च कुत्रते देहे वायुलक्षणतया उक्तम् “तत्र प्रस्पन्दनोद्वहनपूरणविवेकधारणलक्षणो वायुः पञ्चधा प्रविभक्तः शरीरं धारयति” ।

प्रस्फुट त्रि० प्र+स्फुट–क्त । १प्रफुल्ले विकसिते पुष्पादौ शब्दरत्ना०। २व्यक्ते स्पष्टे च ।

प्रस्फोटन न० प्रस्फुट्यते अनेन प्र+स्फुट–करणे ल्युट् । १शूर्पे (कुला) ख्याते अमरः । भावे ल्युट् । २ताडने ३प्रकाशे च मेदि० ।

प्रस्यन्द पु०प्र+स्यन्द–भावे घञ् । १प्रकर्षेण क्षरणे “हृदभिहितो भावो द्रव्यवत् प्रकाशते” उक्तेः २स्यन्दाने छ- तादौ कर्त्तरि अच् । ३प्रक्षरणकर्त्तरि त्रि० “प्रस्यन्दमाध्वीकमूः” कुवल० ।

प्रस्रवण न०प्र+स्रु–भावे ल्युट् । १गलितस्नेहेन जलादिक्षरणे २स्वेदे च । आधारे ल्युट् । यत्र स्थाने जलधारा निपत्य सङ्कीभवति तादृशे ३स्थाने उत्से क्षीरस्वामी । स्रप् । प्रस्रव तत्रार्थे हेमच० । माल्यवति पर्वते पु० हेमच० ।

प्रस्राव पु०प्र+स्रु–भावे घञ् । १प्रकर्षेण क्षरणे हृदभिहितभावस्थूलद्रव्यपरत्वेन २मूत्रे अमरः ।

प्र(स्वा)स्वन पु० प्र+स्वन–भावे अप् पक्षे घञ् । उच्चैःशब्दे

प्रस्वादस् त्रि० प्र+स्वद–णिच्–असुन् । प्रकर्षेण स्वादयितरि ऋ० १०।११।६६

प्रस्वाप पु० प्रस्वाप्यते शत्रुरनेन प्र+स्वप–णिच्–करणे घञ् । शत्रोः प्रस्वापनसाधने अस्त्रभेदे भा० उद्यो० १८४अ० । करणे ल्युट् । प्रस्वापन तथाविधार्थे भा०व० ४१अ० ।

प्रस्वापिनी स्त्री सत्यभामायाः भगिन्यां कृष्णभार्याभेदे हरिवं० १८अ० । [१९८अ० उक्तम् ।

प्रस्वेद पु०प्र+स्विद–भावे घञ् । अत्यन्तस्वेदे तस्योर्ध्व महद्वपु०

प्रहत त्रि० प्र+हन–क्त । १विततै २क्षुण्णे च शब्दरत्ना० ।

प्रहनेमि पु० प्रहन्ति प्र+हन–ड तादृशो नेमिरिवास्य बहु- ब्रीहि । चन्द्रे त्रिका० । [दिवसस्याष्टमे भागे अमरः ।

प्रहर पु०प्रह्रियते यामिकडक्कादिरस्मिन् प्र+हृ आधारे अप् ।

प्रहरकुटुम्बी स्त्री कुटुम्बिनीवृक्षे राजनि० ।

प्रहरण न० प्रह्रियतेऽनेन हृ–करणे ल्युट् । १अस्त्रे २कवीरिके च अमरः । आधारे ल्युट् । ३युद्धे । भावे ल्युट् । ४प्रहारे ५हरणे च ।

प्रहरणकलिका स्त्री “ननभनलघुगैः प्रहरणकलिका” वृ०र० उक्ते चतुर्दशाक्षरपादके छन्दोभेदे ।

प्रहरिन् पु० प्रहरोऽधिकारकालत्वेनास्त्यस्य इनि । १यामिके २प्रहरकालाधिकृते ३सैन्यभेदे ।

प्रहर्षण त्रि० प्रहर्षयति प्र+हृष–णिच्–ल्यु । १प्रकर्षेण हर्षकारके २बुधग्रहे पु० त्रिका० करणे ल्युट् । ३प्रहर्षसाधने त्रि० । स्त्रियां ङीप् । सा च ४हरिद्रायां हारा० “म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षणीयम्” वृ०र० उक्ते त्रयोदशाक्षरपादके छन्दोभेदे च ।

प्रहस पु० राक्षसभेदे रामा०उ० ३६अ० ।

प्रहसन न०प्र+हस–भावे आधारे वा ल्युट् । १प्रकर्षेण हासे परिहासे २दृश्यकाव्यरूपकभेदे मेदि० । ३आक्षेपे हेमच० रूपकभेदस्य लक्षणम् सा०द० यथा “भाणवत् सन्धिसन्ध्यङ्गलास्याङ्गाङ्कैर्विनिर्मितम् । भवेत् प्रहसनं वृत्तं निन्द्यानां कविकल्पितम् । अत्र नाऽऽरभटी नापि विष्कम्भकप्रवेशकौ । अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा” । तत्र “तपस्विभगवद्विप्रभृतिष्वत्र नायकः । एको यत्र भवेद्धृष्टो हास्यं तच्छुद्धमुच्यते” यथा कन्दर्पकेलिः ।

प्रहसन्ती स्त्री प्र+हस–शतृ ङीप् । १यूथ्यां त्रिका० २वासन्तीलतायां राजनि० । शा०स० । ३महदङ्गारधान्याम् ।

प्रहस्त पु० प्रततो हस्तो यत्र । १विस्तृताङ्गुलिपाणौ चपेटे अमरः । रावणसैन्याधिपे २राक्षसभेदे भा०व० २७४अ० ।

प्रहाणि प्र+हा–नि भावम् । अपचये ।

प्रहार पु० प्र+हृ–भावे घञ् । आघाते ।

प्रहारण न० प्र+हृ–णिच्–ल्यु । काम्यदाने शारदसुन्दरी ।

प्रहारवल्ली स्त्री प्रहारस्य वेदनोपशमनाय वल्ली शब्दच० । मांसरोहिण्याम् भावप्र० । [रामा०आर० ३।।१८

प्रहारिन् त्रि०प्र+हृ–णिनि । १प्रहारकर्त्तरि पु०२राक्षसभेदे

प्रहास पु० प्रकृष्टो हासोऽत्र । १शिवे त्रिका० २नटे ३शिवस्योपतीर्थे जटा० । शा०व० ४प्रहासे पु०शब्दर० ५नागभेदे पु० भा० आ० ५७अ० ।

प्रहासिन् त्रि० प्रकृष्टं हासयति हसति वा हासि–हस–वा णिनि । १परस्य हासके भाण्डे (भांड) २कर्णधारके ३विदूषके पु० हेमच० ।

प्रहि पु०प्रह्रियते अत्र प्र+हृ–आधारे डि किच्च । कूपे अमरः

प्रहित त्रि०प्र+हि–क्त । १प्रेरिते २क्षिप्ते ३सूपे न०शब्दच०

प्रहुत न० प्र+हु–भावे क्त। भूतयज्ञे जटा०। "अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च। ब्राह्म्यं हुतं प्राशितञ्च पञ्च यज्ञान् प्रचक्षते" इत्युपक्रम्य "प्रहुतो भौतिको बलिः" मनुनाऽस्य पारिभाषिकत्वमुक्तम्। आर्षं प्रयुक्तम् "देवानभाजयत् हुतञ्च प्रहुतञ्च यद्देवेभ्यो जुहुति प्रजुहुति" इ०उ०

"ये द्वे अर्द्धे मृहा देवानभाजयत् ये ते द्वे इत्युच्यते हुतञ्च प्रहुतञ्च। हुतमित्यग्नौ हवनम्। प्रहुतं हुत्वा बलिहरणम्। यस्मादुद्वे एते अर्द्धे हुतप्रहुते देवानभाजयत्। तस्मादेतर्ह्यपि गृहिणः काले देवेभ्यो जुहुति देवेभ्य इदमस्माभिर्दीयमानमिति मन्वानाः एव जुहुति प्रजुहुति च हुत्वा बलिहरणञ्च कुर्वते इत्यर्थः" भा०।

प्रहृत न० प्र+हृ–भावे क्त। १प्रहारे २आघाते। कर्मणि क्त। ३कृतप्रहारे त्रि० ४ऋषिभेदे पु०। तस्यापत्यम् ऋष्या० फञ्। प्राहृतायन तदपत्ये पुंस्त्री०।

प्रहेय(ल)क न० पिष्टकभेदे हारा०।

प्रहेलिका स्त्री प्र+हेल–ण्वुल् संज्ञायां वन्। दुर्विज्ञेयार्थप्रश्ने (हेँयालि) अमरः। तल्लक्षणादि विदग्धमु०उक्तं यथा "व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात्। यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका। सा द्विधार्थी च शाब्दी च विख्याता प्रश्नपाशने। आर्थी स्यादर्थविज्ञानात् शाब्दी शब्दस्य भङ्गतः" आर्थी यथा "तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः। गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः" (ईषद्गलजलपूर्णकुम्भः उत्तरम्) शाब्दी यथा "सदारिमध्यापि न वैरियुक्ता नितान्तरक्ताप्यसितैव नित्यम्। यथोक्तवादिन्यपि नैव दूती का नाम कान्तेति निवेदयन्ती" (शारिका उत्तरम्) काव्यादर्शे तु "प्रहेलिकाप्रकाराणां पुनरुद्दिश्यते गतिः। क्रीडागोष्ठीविनोदेषु तज्ज्ञैराकीर्णमन्त्रणे। परव्यामोहने चापि सोपयोगाः प्रहेलिकाः। आहुः समागतां१ नाम गूढार्थां पदसन्धिना। वञ्चिता२ऽन्यत्र रूढेन यत्र शब्देन वञ्चना। व्युत्क्रान्ता३ऽतिव्यवहितप्रयोगान्मोहकारिणी। सा स्यात् प्रमुषिता४ यस्यां दुर्बोधार्था पदावली। समानरूपा५ गौणार्थारोपितैर्ग्रथिता पदैः। परुषा६ लक्षणास्तित्वमात्रव्युत्पादितश्रुतिः। संख्याता७ नाम संख्यानं यत्र व्यामोहकारणम्। अन्यथा भासते यत्र वाक्यार्थः सा प्रकल्पिता८। सा नामान्तरिता९ नाम यस्यां नामार्थकल्पना। निभृता१० निभृतान्यार्था तुल्यधर्मस्पृशा गिरा। समानशब्दो११पन्यस्तशब्दपर्यायसाधिता। संमूढा१२ नाम या साक्षान्निर्दिष्टार्थापि मूढये। योगमालिका नाम या स्यात् सा परिहारिका१३। एकच्छन्ना१४ऽऽश्रितं व्यक्तं यस्यामाश्रयगोपनम्। सा भवेदुभयच्छन्ना१५ यस्यामुभयगोपनम्। सङ्कीर्णा१६ नाम सा यस्यां नानालक्षणसङ्करः। एताः षोडश निर्दिष्टाः पूर्वाचार्य्यैः प्रहेलिकाः। दुष्टप्रहेलिकाश्चान्यास्तैरधीताश्चतुर्दश"। एताः समागताप्रभृतयः षोडश प्रहेलिकाः पूर्वाचार्य्यैः निर्दिष्टाः अदुष्टत्वेन कथिता इत्यर्थः, तैः पूर्वाचार्य्यैरेव अन्याः चतुर्दश दुष्टाः प्रहेलिकाः च्युताक्षरादिकाः अधीताः पठिताः सदोषत्वेन कीर्त्तिता इत्यर्थः"। एतासामुदाहरणानि तत्र दृश्यानि। तासाञ्चतुर्दश सरस्वतीकण्ठा० दृश्याः। "रसस्यान्तर्गडुभूतत्वात् नालङ्कारः प्रहेलिका" सा०द०।

प्रहोषिन् त्रि० प्र+हु–वा० इनि नुमागमश्च। प्रकर्षेण हवनकर्त्तरि ऋ० ८२।४

प्रह्ला(ह्रा)द पु० १हिरण्यकशिपोः पुत्रभेदे भा०आ० ६५अ०। तच्चरितं भाग० ७.५ अध्यायादौ दृश्यम्। तस्य पूर्वजन्मकथा पाद्मे भूमि०५अ० २नागभेदे भा०आ०३५अ०। ह्लद–भावे घञ्। ३प्रमोदे विश्वः ह्लद–भावे घञ्। ४शब्दे धरणिः। [ह्लद०। २आयत्ते हेमच०।

प्रह्व त्रि० प्र+ह्वा स्वागे वन् नि० आलोपः। १नम्रे अम०।

प्रह्वलीका स्त्री प्रह्वलिका+पृषो०। प्रहेलिकायां हारा०।

प्रा पूर्त्तौ अदा० प०सक० अनिट्। प्राति अप्रासीत् प्रप्रौ कविकल्पद्रुमे प्रा इति पाठः तस्यार्थे।

प्रांशु त्रि० प्रकृष्टा अंशवोऽस्य। १उच्चे उन्नते अमरः। वैवस्वतमनोः २पुत्रभेदे पु० हरिवं०१०अ०। वत्सप्रीत्यपत्य-उदक्षिपायां जाते ३पुत्रभेदे पु० मार्क०पु० ११८अ०।

प्राकर पु० द्युतिमतः पुत्रभेदे मार्क०पु० ५३अ०।

प्राकरणिक त्रि० प्रकरणं प्राप्त ठक्। प्रकरणप्राप्ते।

प्राकर्षिक त्रि० प्रकर्षं नित्यमर्हति छेदा० ठञ्। नित्यप्रकर्षार्हे।

प्राकषिक पु० प्र+आ+कष–षिकन्। १स्त्रीणां नर्त्तके २परदारोपजीविनि च उज्ज्वलद०।

प्राकाम्य न० प्रकामस्य भावः ष्यञ्। १अष्टविधैश्वर्य्यमध्ये इच्छानभिघातरूपे १ऐश्वर्य्ये २कान्त्यव्याहतगतौ च हेमच० "प्राकाम्यं ते विभूतिषु" कुमारः। अणिमन्शब्दे ८६ पृ० ऐश्वर्य्यशब्दे १५३८ पृ० दृश्यम्।

प्राकार पु० प्रकीर्य्यते प्र+कॄ–आधारे घञ् दीर्घः। प्रस्तरादि-

रचिते वेष्टनाकारे प्राचीरादौ "ऊर्द्ध्वं विंशतिहस्तेभ्यः प्राकारं न शुभावहम्। प्रस्थे हस्तद्वयात् पूर्व्वं दैर्घे हस्तत्रयं तथा। अट्टालिकां सुभद्रं द्वारं प्राकारस्य अट्टस्य च। न मध्यदेशे कर्त्तव्यं किञ्चिन्नाधिदैं शुभम्" ब्रह्मवै० पु० ११२अ० तन्मानाद्युक्तम्। अस्य क्लीवत्वमार्षम्। भावे घञ्। २सर्वतो विस्तारे पु०।

प्राकारमर्द्दिन् त्रि० प्राकारं मृद्नाति मृद्-णिनि ६त०। प्राकारभेदके। ततः बाह्वा० अपत्ये इञ् संयोगोपधेनन्तत्वात् न टिलोपः। प्राकारमर्द्दिनि तदपत्ये पुंस्त्री०।

प्राकारीय त्रि० प्राकारायायम् छ। १प्राकारप्रकृतौ इष्टकादौ। प्राकार आसामिष्टकानां स्यात् प्राकारोऽस्मिन् वा स्यात् छ। २सम्भवत्प्राकारायामिष्टकायाम् ३सम्भवत्प्राकारे देशे च।

प्राकृत त्रि० प्रकृष्टमकृतमपकार्य्यं यस्य। १नीचे। प्रकृतेरयम् अण्। २प्रकृतिसम्बन्धिनि। प्रकृत्या स्वभावेन निर्वृत्तः अण्। ३स्वभावसिद्धे "बभूव प्राकृतः शिशुः" भाग० १०। प्रकृतेः संस्कृतशब्दात् आगतः अण्। ४नाटकादौ प्रसिद्धे अपभ्रंशशब्दभेदे अमरः। प्राकृतभाषाः संस्कृतशब्दप्रकृतिकत्वात् तथात्वं प्राकृतलक्षणादौ वररुच्यादिप्रणीते ग्रन्थेऽस्य विस्तरो दृश्यः। स्वभावतः सिद्धयोः ५मित्रामित्रयोः। स्वदेशानन्तरदेशवर्त्ती नृपः प्राकृतः शत्रुः सन्निकृष्टविषयस्याहित्यस्वभावात्तस्य तथात्वम् तत्रानन्तरविषयस्थो नृपः प्राकृतं मित्रं मध्यवर्त्तिनृपविषयस्य उभयोः जिहीर्षासम्भवात् तथात्वम्। "स्यातामभित्रौ मित्रे च सहजप्राकृतावपि" माघ २यसर्गश्लोकव्याख्याने मल्लिनाथः।

प्राकृतज्वर पु० "वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात्" ज्वराधिकारे माधवोक्ते ज्वरभेदे।

प्राकृतप्रलय कर्म०। प्रलयभेदे प्रलयशब्दे दृश्यम्।

प्राकृतमित्र न० कर्म०। स्वभावसिद्धे मित्रे विषयानन्तरस्य नृपस्य प्राकृतशत्रोः अव्यवहितोत्तरविषयस्थे नृपे।

प्राकृतशत्रु पु० कर्म०। विषयानन्तरवर्त्तिनि नृपे। [सिद्धे

प्राकृतिक त्रि० प्रकृत्या निर्वृत्तः ठञ्। प्रकृतिसाध्ये स्वभाव-

प्राक्छाय त्रि०प्राक् पूर्व्ववर्त्तिनी छाया यत्र दिने। हस्तिनः हस्तनक्षत्रस्य पूर्व्ववर्त्तिछायायुते दिने "प्राक्छाये कुञ्जरस्य च" मनुः। कुञ्जरच्छायशब्दे २०६८पृ० दृश्यम्।

प्राक्तन त्रि० प्राचि काले देशे प्राच्यां दिशि वा भवः ट्यु, तुट् च। प्रागभवे "प्रपेदिरे प्राक्तनजन्मविद्याः" कुमा०। स्त्रियां ङीप्। २पूर्व्ववर्त्तिनि कारणे च।

प्राक्तनकर्म्म न० प्राक्तनं कारणं कर्म यस्य। कर्म्मरूपकारणहेतुके अदृष्टे १पापे २पुण्ये च जटा०।

प्राक्पद पु० कर्म०। पूर्व्ववर्त्तिनि पदे।

प्राक्पुष्पा स्त्री प्राक् पुष्पं यस्याः अजा० टाप्। प्राग्वर्त्ति पुष्पान्वितलतायाम्। (काँटाल) जटाधरः।

प्राक्फल पु० प्राक्फलमस्य। पुष्पं विना फलयुते पनसे

प्राक्फल्गुनी स्त्री कर्म०। पूर्व्वफल्गुनीनक्षत्रे तत्र भवः ठञ्। प्राक्फल्गुनिक वृहस्पतौ। [वृहस्पतौ हारा०।

प्राक्फल्गुनीभव पु० प्राक्फल्गुन्यां भवति भू-अच्।

प्राक्फाल्गुन पु०प्राक्फाल्गुन्यां भवः अण्। वृहस्पतौ शब्दच०

प्राक्शृङ्गवत् पु० ऋषिभेदे भा०अ०५२अ०। [सन्ध्यायाम्।

प्राक्सन्ध्या स्त्री कर्म०। पूर्व्वसंध्यायां सूर्य्योदयासन्नायां

प्राक्सवन न० प्राक्कालिकं सवनम्। सक्तिवे प्रथमसवने।

प्राक्सौमिक त्रि०सोमात् सोमयागात् प्राक् अव्ययी० प्राक्सोमं तत्र भवः ठञ् उत्तरपदवृद्धिः। सोमयागात् प्राक्कर्त्तव्ये अग्निहोत्रदर्शपौर्णमासपशुयागचातुर्मास्ययागरूपे १क्रियाकलापे २इष्टौ स्त्री ङीप्। "प्राक्सौमिकीः क्रियाः कुर्य्यात् यस्यान्नं वार्षिकं भवेत्" याज्ञ० वाक्यव्याख्यायां मिता० दृश्यम्।

प्राक्स्रोतस् स्त्री प्राग्वाहि स्रोतोऽस्याः। १नद्यां "प्राक्स्रोतसो नद्यः प्रत्यक्स्रोतसो नदा नर्म्मदां विनेत्याहुः" मल्लि० धृतवाक्यम्।

प्रागग्र त्रि० प्राक् अग्रं यस्य। पूर्व्वाभिमुखे।

प्रागद्य त्रि० प्रगदिनोऽदूरदेशादि प्रगद्या० चतुरर्थ्यां ञ्य। प्रगदिनोऽदूरदेशादौ।

प्रागभाव पु० प्राग्वर्त्ती अभावः। इह कपाले घटो भविष्यतीत्यादिप्रतीतिसिद्धे संसर्गाभावभेदे "प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च। एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते" भाषा०। तल्लक्षणन्तु ध्वंसप्रतियोगित्वे सत्यभावत्वम्। स च उपादानदेशः एव वर्त्तते नान्यत्र। तस्य च सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं नास्ति किन्तु तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वम्। स च प्रतियोगिजनकः इति न्यायमते। सांख्यादिमते भावस्यानागतावस्थैव प्रागभावपदवाच्येति भेदः।

प्रागल्भ्य न० प्रगल्भस्य भावः ष्यञ्। १प्रगल्भतायां "प्रागल्भ्यहीनस्य नरस्य विद्या शस्त्रं यथा कापुरुषस्य हस्ते"

ज्यो० त०। "निःसाध्वसत्वं प्रागल्भ्यम्" सा० द०उक्ते १भयशून्यत्वरूपे स्त्रीणां सात्त्विकभावभेदे च।

प्रागुदीची स्त्री प्राच्या उदीच्या चान्तराला दिक् श०म०। पूर्वोत्तरदिशोरन्तरालायां दिशि विदिशि ईशानकोणे।

प्राग्ज्योतिष पु० कामरूपदेशे हेमच०। तत्र पूर्वं नरकासुरस्य पुरी आसीत् यथा कालिका० ३७अ० "करतोया नदी यावत् पूर्वभागावधिश्रिता। यावल्ललितकान्तास्ति तावद्देशं पुरं तव। तत्र देवी महामाया योगनिद्रा जगत्प्रसूः। कामाख्यारूपमास्थाय सदा तिष्ठति शोभना। तत्रास्ति नदराजोऽयं लौहित्यो ब्रह्मणः सुतः। तत्रैव दश दिक्पालाः स्वे स्वे पीठे व्यवस्थिताः। तत्र चायं महादेवो ब्रह्मा वाऽहञ्च(हरिश्च)सर्वदा। चन्द्रः सूर्यश्च सततं वसेत् तत्रैव पुत्रक!। सर्वे क्रीड़ार्थमायाता रहस्यदेशमुत्तमम्; तत्र श्रीः सर्वतो भद्रा भोग्यमत्र सदा वस। अत्रैव हि स्थितो ब्रह्मा प्राङ् नक्षत्रं ससर्ज ह। ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा। अत्र त्वं वस भद्रन्ते अभिषिक्तो मया स्वयम्"। नरकं प्रति भगवदुक्तिः। द्वापरे तत्र भगदत्तो नृप आसीत् यथोक्तम् "नैरेव सहितः सर्वैः प्राग्ज्योतिषमुपाद्रवत्। यत्र राजा महानासीद्भगदत्तो विशाम्पतेः!" भा०स०२९अ०।

प्राग्भक्त न० सुश्रुतोक्ते भक्तभक्षणात् प्राक्कालरूपे औषधसेवनकालभेदे "अत ऊर्ध्वं दशौषधकालान्वक्ष्यामः। तत्र निर्भक्तं१ प्राग्भक्तं२अधोभक्तं३ मध्येभक्तं४अन्तराभक्तं५ सभक्तं६ सामुद्गं७ मुहुर्मुहुर्ग्रासं (सभक्तमभक्तं वा) ८।९ ग्रासान्तरा१०श्चेति दशौषधकालाः" इत्युपक्रमे "प्राग्भक्तं नाम यत्तु प्राग्भक्तस्योपयुज्यते। शीघ्रं विपाकमुपयाति बलं न हिंस्यादन्नावृतं न च मुखाद्विनिरेति। प्राग्भक्तसेवितमथौ बलमादधाति दद्याच्च वृद्धशिशुभीरुवराङ्गनाभ्यः"।

प्राग्भार पु०प्रकृष्टो भारः प्रा०स०। १उत्कर्षे २परभागे "मांसमस्थिपक्व प्राग्भारः" प्रबोधचन्द्रोदयः। ३पर्वताग्रभागे त्रिका०। प्राग्भाव तत्रार्थे त्रिका० पाठान्तरम्। स च प्राग्वत्तित्वे च। [अमरः।

प्राग्रहर त्रि० प्राग्र्ये प्रकृष्टाग्रे ह्रियतेऽसौ हृ—अच्। श्रेष्ठे

प्राग्वाट न० प्राग्र्ये अटति अट—अण्। अवनदर्भि (पातसाहर) त्रिका०।

प्राग्र्य त्रि० प्रकर्षेणाग्रे भवः यत्। श्रेष्ठे अमरः।

प्राग्वंश पु० प्राक् वंशः सपत्नीकयजमानादिसदनायोऽत्र। हविर्गेहात् पूर्वभागस्थे यजमानादिस्थित्यर्थे गृहे अमरः। २विष्णौ च "प्राग्वंशो वंशवर्द्धनः" विष्णुस०। "अन्यस्य वंशः पश्चात्यः अस्य तु वंशः प्रपञ्चः प्रागेव न पश्चात्यः" भा०।

प्राग्वचन न०प्रागुक्तं वचनम्। मन्वादिभिः पूर्वमुक्ते वचने। "यथोक्तमेतद्वचनं प्रागेव मनुना पुरा। प्रागिदं वचनं प्रोक्तमतः प्राग्वचनं विदुः" भा० शा० १२१अ०।

प्राग्वत् अव्य० प्रागिव वति। पूर्वदेशकालतुल्ये। [हेमच०।

प्राघात पु० प्राहन्यतेऽत्र प्र+आ+हन—आधारे घञ्। युद्धे

प्राचार पु० प्र+चर—चरणे भावे घञ् दीर्घः। यज्ञादौ यज्ञे उपरि ह्रतादेःचरणे अमरः।

प्राघुण पु० प्र+आ—घुण—क। अतिथौ त्रिका०।

प्राघुणिक पु० प्रघुण+स्वार्थे ठक्। अतिथौ [तिथौ हेमच०

प्राघूर्णिक पु० प्र+आ+घूर्ण—भावे घञ् तत्र साधु ठञ्। अ-

प्राङ्ग न०प्रहतं प्रकृष्टं वाङ्गमस्य प्रा०ब०। १पणववाद्ये शब्दर० २प्रकृष्टदेहयुते त्रि० स्त्रियां स्वाङ्गत्वात् ङीष्।

प्राङ्गण न० प्रकृष्टमङ्गनं पूर्वं० अत्वम्। १गृहभूमौ शब्दर० (उठान) २अजिरे ३पणववाद्ये च हेमच० "अभद्रं सूर्यवेधं प्राङ्गणस्य तथैव च" ब्रह्म०वै०ज०ख०१०२अ०उक्तेः तस्य सूर्यविद्धत्वमशुभम्। पूर्वपश्चिमायतत्वे हि तस्य सूर्यविद्धत्वं दक्षिणोत्तरायतत्वे च चन्द्रविद्धत्वमिति भेदः।

प्राङ्न्याय पु० "आचारेणावसन्नोऽपि पुनर्लेखयते यदि। सोऽभिधेयो जितः पूर्वं प्राङ्न्यायस्तु स उच्यते" इत्युक्ते व्यवहारविषये उत्तरभेदे १०९० पृ० दृश्यम्।

प्राङ्मुख त्रि० प्राक् पूर्वदिक्स्थं मुखमस्य। पूर्वदिङ्मुखे स्त्रियां ङीप्। यत्र विशेषो नोक्तः तत्र प्राङ्मुखत्वं आश्वलायनगृह्यसूत्रादौ दृश्यम्।

प्राच् अव्य० प्राचि सप्तम्यर्थे असि तस्य लुक्। प्राचीत्यर्थे।

प्राच् त्रि०प्र+अन्च—क्विप्। पूर्वे १देशे २काले च ३दिशि स्त्री ङीप्। ४पूज्यपूजकयोरन्तरालदिशि स्त्री "यत्रैव भानुस्तु वियत्युदेति प्राचीति तां वेदविदो वदन्ति। तथा पुरः पूजकपूज्ययोश्च सदागमज्ञा प्रवदन्ति तन्त्रे" ति०त० धृतवाक्यम्। एतच्च "शिवपूजाव्यतिरिक्तविषयम्" वाचस्पतिमिश्राः। हलन्तत्वात् वा टाप्। "प्राचाजिह्वम्" ऋ० १।१४०।२। "प्राचामन्युः" ऋ०८।६।१९ "प्राची वै देवी दिक् पुरस्ताद्धि देवाः, प्रत्यञ्चो मनुष्यास्तामुपावृत्ताः तथाचेभ्यः प्राङ्तिष्ठन् जुहोति" शत० ३।१।१।६

प्राच पु०प्र+आ+चक—भ्रान्तौ वा०क। १प्रकर्षेण रचके "प्राचो-

ज्यते" ताण्ड्यब्रा० १।८२स्तू० । प्र+अनुच-अञ्चार्थे भावे घञ् । २प्रकृष्टगमने प्राचैःशब्दे ऋ॰भाष्ये दृश्यम् ।

प्राचिका स्त्री प्राचिनोति मधु प्र+आ+चि–ड स्वार्थे कापि अत इत्वम् । वनमक्षिकायाम् अमरः ।

प्राचिन्वत् पु० राजभेदे "जनमेजयः खल्वनन्ता नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान्नाम । यः प्राचीं दिशं जिगाय यावत् सूर्योदयात् ततस्तस्य प्राचिन्वत्त्वम्" भा० आ० ८५ अ० ।

प्राचीन त्रि० प्राच्+भवार्थे ख । १पूर्वदिग्देशादौ भवे । २वनतिक्तायाम् (आकनादि) अमरः ३राजायाञ्च स्त्री गौरा० टाप् ।

प्राचीनगर्भ पु० ऋषिभेदे भा०शा० ३५१अ० ।

प्राचीनपनस पु० नित्यकर्म० । बिल्वे त्रिका० ।

प्राचीनबर्हिस् पु० । १इन्द्रे २नृपभेदे च हेमच० । "ऋषिवंशे वहत्यश्चो ब्रह्मयोनिः सनातनः । प्राचीनबर्हिर्भगवान् तस्मात् प्रचेतसो दश" भा०आ० २०८अ०। "प्राचीनबर्हिर्भगवान् महानासीत् प्रजापतिः । हविर्धानात् द्विजश्रेष्ठ ! येन संवर्हिताः प्रजाः । प्राचीनाग्राः कुशास्तस्य पृथिव्यां विश्रुता मुने ! । प्राचीनबर्हिर्भगवान् ख्यातो भुवि महायशाः" वह्निपु० उक्ते ३हविर्धानिः पुत्रे भा० अनु० १३७ अ० ।

प्राचीनयोग पु० प्राचीनो योगोऽस्य । ऋषिभेदे तस्य गोत्रापत्यं गर्गा०यञ् । प्राचीनयोग्य तद्गोत्रापत्ये पुंस्त्री०

प्राचीनयोगिनीपुत्र यजुर्वेदवंश्ये ऋषिभेदे शत०ब्रा० १४।८।४।२२।

प्राचीनामलक न० नित्यकर्म० । पानीयामलके अमरः ।

प्राचीनावीत न० "सव्यं बाहुं समुद्धृत्य दक्षिणे तु धृतं द्विजाः ! । प्राचीनावीतमित्युक्तं पैत्र्ये कर्मणि योजयेत्" इत्युक्ते श्राद्धादौ कर्त्तव्ये वामकरे बहिष्कृते सति दक्षिणस्कन्धार्पिते यज्ञसूत्रादौ ।

प्राचीनावीतिन् पु० प्राचीनावीतमस्त्यस्य इनि । तद्युते "उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः । सव्ये प्राचीनावीती निवीती कण्ठसज्जने" मनुः । गोभिलः "दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येऽंसे प्रतिष्ठापयति दक्षिणं कक्षमन्वलम्बं भवति एवं यज्ञोपवीती भवति । सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽंसे प्रतिष्ठापयति सव्यं कक्षमन्वलम्बं भवत्येवं प्राचीनावीती भवति" ।

प्राचीपति पु० ६त० । इन्द्रे त्रिका० ।

प्राचीर न० प्राचीयते प्र+आ–चि–क्रन् दीर्घश्च । सर्वतो वेष्टनाकारे इष्टकादिनिर्मिते आवरणे (पाँचिर) अमरः अस्य पुरस्य तन्मानादि च युक्तिकल्पतरावुक्तं यथा "गजैरभेद्यामनुजैरलङ्घ्याः प्राचीरसंस्था नृपतेर्भवन्ति । राजदण्डोन्नताः सर्वे प्राचीराः पृथिवीभुजः । विंशतिस्ते तु पश्चात्ये पार्श्वयोः पञ्च पञ्च च । पश्चात् पञ्च च विज्ञेयाः प्राचीराः पृथिवीभुजः । सर्वप्रान्ते त्वावरणो नाम प्राचीर उच्यते । प्रतिप्राकारसंस्थानं द्वारं नातिसमुच्छ्रितम्" । "राजच्छत्रान्तरे पञ्च राजद्वारे महीपतेः । राजदण्डत्रये सार्द्धे जयद्वारे प्रतिष्ठिताः । अद्वारे राजदण्डार्द्धं प्राचीराः पृथिवीपतेः । एवं व्यवस्थिते स्थाने मध्यमे तद्धि तिष्ठति । राजच्छत्रद्वयं सार्द्धमायामे जयवस्तुनि । परिखाहे पञ्च राजदण्डास्तिष्ठन्ति मध्यतः । राजपट्टाभिधानेन स्थानमेतन्निगद्यते । अस्मिन् गृहं नृपः कृत्वा सुचिरं सुखमश्नुते"

प्राचेतस पु० प्रचेतस्+अपत्यादौ अण् । १वाल्मीकिमुनौ २प्राचीनबर्हिषो नृपस्य पुत्रे ३वरुणस्य पुत्रे च ।

प्राचैस् न० प्र+आ+चि–बा०डैसि । प्राचीने ऋ०१।८३।२भाष्यम् । तत्र च पक्षान्तरे प्राचैरित्यत्र प्राचशब्दस्तृतीयाबहुवचनान्त इत्युक्त्वा प्राचैः प्राञ्चैरित्युक्तम् ।

प्राच्य त्रि० प्राचि भवः यत् । १शरावत्या नद्याः प्राग्दक्षिणे देशे अमरः । प्राच्यां दिशि प्राचि देशे काले वा २भवे त्रि० । "प्राच्यैर्होलका कर्त्तव्या" दायभा० ।

प्राच्यवाट न० प्राच्यो वाटो यस्य । प्राग्देशस्थे दशरूपा० ।

प्राच्यवृत्ति स्त्री "पूर्वेण युतोऽथ पञ्चमः प्राच्यवृत्तिरुदितेह युग्मयोः" इ०र०उक्ते १छन्दोभेदे । कर्म० । २प्राचीनायां वृत्तौ स्त्री ब०स० । ३तयावृत्तियुते त्रि० ।

प्राच्यसप्तसम त्रि० सप्त समाः प्रमाणमस्य मात्रच् तस्य द्विगुत्वात् लुक् कर्म० । प्राचीने सप्तसमे "द्विगो प्रमाणे" पा० तस्य प्रकृतिस्वरः ।

प्राच्यायन पुंस्त्री० प्राच्यस्य गोत्रापत्यम् अश्वा० फञ् । प्राच्यस्य गोत्रापत्ये । [प्राड्विवेकः ।

प्राच्छ् त्रि० पृच्छति प्रच्छ–क्विप् निपा० दीर्घश्च । जिज्ञासके

प्राजक पु० प्र+अज–ण्वुल् वीभावाभावः । सारथौ "वक्राय वर्त्तते युग्यं वैगुण्यात् प्राजकस्य च" मनुः ।

प्राजन न०प्र+अज–करणे ल्युट् व्यभावः । तोदने पश्वादेश्चालनदण्डे (पाचनी) अमरः । [प्राजयाकृत्य प्रजया कृत्वा वा ।

प्राजया अव्य० प्राजनक्रियायाम् साक्षा० वा गतिसंज्ञा ।

प्राजहिता अव्य० हस्तिक्रियायाम् शाखा० वा गतिसंज्ञा। प्राजहितात्य प्राजहिता कृत्वा वा।

प्राजहित पु० गार्हपत्येऽग्नौ कात्या०श्रौ० ८।६।१२

प्राजापत त्रि०प्रजापतेः धर्म्यं महिष्या०अण्। प्रजापतेर्धर्म्ये

प्राजापत्य पु० प्रजापतिर्देवताऽस्य यक्। १अष्टविवाहमध्ये विवाहभेदे "ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः" मनुना अष्ट विवाहानुद्दिश्य "सहोभौ चरतां धर्ममिति वाचानुभाष्य च। कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः" इति लक्षित "त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम्। त्र्यहं परञ्च नाश्नीयात् प्राजापत्यमिति स्मृतम्" इति स्मृत्युक्ते द्वादशाहसाध्ये २व्रतभेदे न०। ३प्रजापत्यधिदेवताके चर्वादौ त्रि०। ४प्रव्रज्याश्रमाङ्गे सर्वस्वदक्षिणकेष्टिभेदे स्त्री "प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम्। आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्" याज्ञ०। ५रोहिणीनक्षत्रे न० ६प्रयागतीर्थे न० त्रिका० ७जैनभेदे पु० हेमच०। [जायाया धर्म्ये।

प्राजावत त्रि० प्रजावत्या धर्म्यं महिष्या० अण्। भ्रातृ-

प्राजिन् पु०प्र+अज–णिनि व्यभावः। पक्षिभेदे मेदि० अमरः

प्राजिट पु० प्र+अज–तृच् वीभावाभावः। सारथौ।

प्राजेश न०प्रजेशो देवताऽस्य अण्। १रोहिणीनक्षत्रे २प्रजापतिदेवताके चर्वादौ त्रि०। प्राजेश्वरादयोऽप्युभयत्र।

प्राज्ञ पु०प्रकर्षेण जानाति प्र–ज्ञा–क स्वार्थे अण्। १पण्डिते अमरः २राजपुत्रे राजनि०। प्रज्ञाऽस्त्यस्य अण्। ३बुद्धिमति ४दक्षे च त्रि०। प्रज्ञा+स्वार्थे ण। ५बुद्धौ स्त्री टाप् प्राज्ञस्य पत्नी ङीप्। प्राज्ञी ७प्राज्ञपत्न्यां स्त्री। ७कल्किनो ज्येष्ठभ्रातरि पु० कल्किपु० २अ०। प्रकर्षेण अज्ञः। वेदान्तसारोक्ते व्यष्ट्युपहितचैतन्ये एकाज्ञानमात्रभासके जीवचैतन्ये पु० "एतदुपहितचैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते। एकाज्ञानावभासकत्वादस्य प्राज्ञत्वम् अस्पष्टोपाधितयाऽनतिप्रकाशकत्वम्" वेदान्तसारः। प्रज्ञ+स्वार्थे अण् स्त्रियां ङीप्। प्राज्ञी ८सूर्यपत्न्याम् स्त्री। [त्रि० हेमच०।

प्राज्य न०प्रकृष्टमाज्यं प्र+अन्‌ज–क्यप् वा। १प्रकृष्टे २प्रचुरे

प्राञ्च् त्रि० प्र+अन्‌च्+क्विन्। पूर्वदेशकालवर्त्तिनि। अत्रेर्नलोपाभावात् भत्वे प्राञ्चः प्राञ्चा इत्येव।

प्राञ्जल त्रि० प्र+अन्‌ज–अलच्। १सरले २सबोधे च जटा०।

प्राञ्जलि त्रि० प्रबद्धोऽञ्जलिर्येन प्रा०ब०। ३बद्धाञ्जलिपुटे प्रा०ब०। २बद्धाञ्जलौ पु०।

प्राञ्जलिन् त्रि० प्राञ्जलिरस्त्यस्य व्रीह्या० इनि। बद्धाञ्जलियुक्ते स्त्रियां ङीप्।

प्राडाहत पु० ६त०। प्रश्नकारकेणाहते तस्यापत्यमिञ् प्राडाहति तदपत्ये ततः यूनि फक् तौल्व० न लुक। प्राडाहतायन तदीये यून्यपत्ये पु स्त्री०।

प्राड्वि(वा)वेक पु० अर्थिप्रत्यर्थिनौ पृच्छति प्रच्छ–क्विप् प्राट्, तयोर्वाक्यं विरुद्धाविरुद्धतया विवेचयति वक्ति वा वि+विच–वि+वच–वा संज्ञायां घञ् कर्म०। व्यवहारदर्शनाय राजनियुक्ते १विचारके स्वयं विचारक २न्यपसहाये च तल्लक्षणादिकं वीरमि० उक्तं यथा "विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च। प्रियपूर्वं प्रागवदति प्राड्विवाकस्ततः स्मृतः" बृहस्पतिः। व्यासोऽपि "विवादानुगतं पृष्ट्वा ससभ्यस्तत् प्रयत्नतः। विचारयति येनासौ प्राड्विवेकस्ततः स्मृतः" गौतमेन तु बृहस्पतिवद्योगार्थः प्राड्विवाकशब्दस्य दर्शितः। "प्राड्विवाको वादिप्रतिवादिनौ पृच्छतीति प्राट् ताभ्यामुक्तं सभ्यैः सह विविच्य वक्तीति प्राड्विवाकः" इति बृहस्पतिना। विचारयतीत्यभिधानाद्विविनक्ति इति विवेकशब्दस्य व्युत्पत्तिरुक्ता। विविच्य वक्तीति विवाक इति। इति गौतमेन। नारदहारीतौ "यथा शल्यं भिषक्कायादुद्धरेद्यत्नयुक्तितः। प्राड्विवाकस्तथा शल्यमुद्धरेद्व्यवहारतः" इति। शल्यञ्च धर्मस्याधर्ममिश्रणम्। यथा च मनुः "विद्धो धर्मो ह्यधर्मेण सभां यत्रोपतिष्ठते। शल्यञ्चास्य निकृन्तन्ति विद्धास्तत्र सभासद" इति। अयञ्च राज्ञा स्वयंव्यवहारदर्शने क्रियमाणेऽस्य सहायः "सप्राड्विवाकः" इति स्मरणात्। यदा तु राजा कार्य्यान्तरव्यग्रतया स्वास्थ्याभावेन वा स्वयं व्यवहारदर्शनासमर्थस्तदा तत्प्रतिनिधिः। "यदा स्वयं न कुर्य्यात् तु नृपतिः कार्य्यदर्शनम्। तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं कार्य्यदर्शने। सोऽस्य कार्य्याणि सम्पश्येत्सभ्यैरेव त्रिभिर्वृतः। सभामेव प्रविश्याग्र्यामासीनः स्थित एव स" इति मनुवचनात्। सभ्यग्रहणादमात्यादिनिवृत्तिः त्रिग्रहणात् संख्यान्तरनिवृत्तिः। अस अध्यासामिति स्मृतिचन्द्रिकाकारः। तत्र दृष्टार्थप्रसङ्गादयुक्तमित्युपलक्षणत्वमेव न्याय्यम्। "अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु। सभ्यैः स ह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्" इति याज्ञवल्क्यवचनात्। "यदा न कुर्यान्नृपतिः स्वयं कार्यविनिर्णयम्। तदा तत्र

नियुञ्जीत ब्राह्मणं शास्त्रपारगम्। दान्तं कुलीनं मध्यस्थमनुद्वेगकरं स्थिरम्। परत्रभीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितम्" इति कात्यायनवचनाच्च। शास्त्रपारगं बहुशास्त्राभियोगशालिनम्। यथाह स एव "एकं शास्त्रमधीयानो न विद्यात् कार्यनिर्णयम्। तस्माद्बह्वागमः कार्य्यो विवादेषूत्तमो नृपैः"। एवंविधब्राह्मणालाभे क्षत्रियं वैश्यं वा प्रतिनिदधीत न शूद्रम्। तथा च स एव "यत्र विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत्। वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्" मनुः "जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः। धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथञ्चन। यस्य राज्ञस्तु कुरुते शूद्रो धर्मविवेचनम्। तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः"। व्यासः "द्विजान् विहाय यः पश्येत् कार्य्याणि वृषलैः सह। तस्य प्रक्षुभ्यते राष्ट्रं बलं कोशश्च नश्यति"। इदं वचनं स्मृतिचन्द्रिकायाममात्यादिस्थानेऽपि शूद्रं वर्जयेत् किमुत धर्मनिर्णय इत्येवंपरमुक्तम्, दोषातिशयकीर्त्तनात्। कल्पतर्वादिषु तु प्रकरणाद्व्यवहारदर्शन एव शूद्रवर्जकत्वेन लिखितम्। अयञ्च प्रतिषेधोऽदृष्टार्थ एव राष्ट्रक्षोभादेरदृष्टद्वारकफलस्यैव सङ्कीर्त्तनात्। वचनान्तरेण तु शूद्रस्य धर्मज्ञानेऽपि वेदाविरोधप्रतिसन्धानविरहात् तत्प्रतिसन्धानस्य च सम्यग्निर्णयोपायत्वात् त्याग इति युक्तिरप्युक्ता। सा वणिगादिष्वतिप्रसक्तेत्यन्वाचयमात्रम्। एते च सर्वे व्यवहारसम्बद्धाः प्रतिषेधा अभिषिक्तक्षत्रियाधिकारिकास्तत्स्थानापन्नान्याधिकारिकाश्च। प्राड्विवाकादयस्त्वर्थार्थितया ऋत्विक्स्थानीयाः। अप्राड्विवाक इत्यादिना तेषां गुणभावावगमान्नियोगोक्तेश्च। "राजाभिषेकसंयुक्तो ब्राह्मणो वा बहुश्रुतः। धर्मासनगतः पश्येद्व्यवहाराननुल्बणः" इति प्रजापतिवचनात्। अत्र राजशब्दोऽवयुत्यधिकारणन्यायेन क्षत्रियजातिवचनः। अभिषेकसंयुक्त इति वचनात् स्मृत्यन्तरेऽप्यभिषिक्तक्षत्रियं प्रकृत्य तदभिधानाच्चानभिषिक्तक्षत्रियस्य नाधिकारः। अतश्च तत्प्रयुक्तशुभाशुभफलयोस्तद्गामितैव। प्राड्विवाकादीनान्तु प्राक्प्रदर्शितेभ्यो न्यायेनापि तं यान्तमित्यादि वाक्येभ्यो राज्ञोऽनिवारणे परं दृष्टादृष्टदोषभागिता। अनियुक्तानान्तु न तत्रापीत्यादि मिताक्षरादौ व्यक्तम्। ब्राह्मणो वेत्यनुकल्पत्वाभिप्रायको वाशब्दो न ...धिकारपरः। अनुल्बणोऽनुद्धतः"।

प्राण् पु० प्राणिति प्र+अन–क्विप् पदान्तत्वेऽपि णत्वम्। प्राणे

प्राण पु० प्र+अण–करणे घञ्। १ब्रह्मणि त्रिका० "अतएव प्राणः" शा०सू०१।२।१२ अतएव तल्लिङ्गात् प्राणशब्देन ब्रह्मैव तथा हि "सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते" इति छान्दो०उ०। सर्वभूतोत्पत्तिप्रलयहेतुरूपलिङ्गात् ब्रह्मण एव प्राणशब्दवाच्यता १।१।१२ सूत्रभाष्ये दृश्यम्। २पञ्चवृत्तिके देहस्थे वायौ ३बोले काव्यजीवने ४रसे ५अनिले ६बले च ७पूरिते त्रि० मेदि०। ८सूक्ष्मदेहसमष्ट्युपहितचैतन्ये पु० वेदान्तसा०। ९प्राणोपाधिके जीवे "प्राणोह माता प्राणः पितेति" श्रुतिः। भावे घञ्। १०जीवने च नासाग्रवर्त्तिनि प्राणनवति ११वायौ 'तस्य कर्म नासाग्रतो बहिर्गतिः' श्रीधरस्वामी। देहस्थः पञ्चवृत्तिकः वायुश्च प्राणापानसमानोदानव्यानरूपः तत्रार्थे ब०व०। तेषां स्वरूपादि शा०ति०व्या० योगार्णवे उक्तं यथा "इन्द्रनीलप्रतीकाशं प्राणरूपं प्रकीर्त्तितम्। आस्यनासिकयोर्मध्ये हृन्मध्ये नाभिमध्यगे। प्राणालय इति प्राहुः पादाङ्गुष्ठेऽपि केचन। अपानयत्यपानोऽयमाहारं च मलार्पितम्। शुक्रं मूत्रं तथोत्सर्गमपानस्तेन मारुतः। इन्द्रगोपप्रतीकाशः सन्ध्याजलदसन्निभः। स च मेढ्रे च पायौ च ऊरुवङ्क्षणजानुषु। जङ्घोदरे कृकाट्यां च नाभिमूले च तिष्ठति। व्यानो व्यानयते चान्नं सर्वव्याधिप्रकोपनः। महारजनसम्प्रख्यो हानोपादानकारकः। स चाक्षिकर्णयोर्मध्ये कट्यां गुल्फयोरपि। प्रोथस्थाने स्फिगुद्देशे तिष्ठत्यत्र निरन्तरम्। स्पन्दयत्यधरं वक्त्रं गात्रनेत्रप्रकोपनः। उद्वेजयति मर्माणि उदानो नाम मारुतः। विद्युत्पाकसवर्णः स्यादुत्क्रामणकारकः। पादयोर्हस्तयोश्चापि तत्सन्धिषु च वर्त्तते। पीतं भक्षितमाघ्रातं रक्तपित्तकफानिलान्। समं नयति गात्राणि समानो नाम मारुतः। गोक्षीरसदृशाकारः सर्वदेहे व्यवस्थितः"। स च सांख्यमते इन्द्रियाणां सामान्यकरणवृत्तिरूपः न तु वायुविकारः यथोक्तं सां०सू० प्र०भा०

"सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च" सू०। "प्राणादिरूपाः पञ्च वायुवत्सञ्चारात् वायवो ये प्रसिद्धास्ते सामान्या साधारणी करणस्यान्तःकरणत्रयस्य वृत्तिः परिणामभेदा इत्यर्थः। तदेतत् कारिकयोक्तम्। "स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या। सामान्यकर-

वृत्तिः प्राणाद्या वायवः पञ्च”। इति अत्र कश्चित् प्राणाद्या वायुविशेषा एव ते चान्तःकरणवृत्त्या जीवनयोनिप्रयत्नरूपया व्याप्रियन्त इति मत्वा प्राणाद्यान्तःकरणवृत्तिरित्यभेदनिर्देश इत्याह। तन्न। “न वायुक्रिये पृथगुपदेशादिति” वेदान्तसूत्रेण प्राणस्य वायुत्ववायुपरिणामत्वयोः स्फुटं प्रतिषेधादत्रापि तदेकवाक्यतौचित्यात् मनोधर्मस्य कामादेः प्राणशोभकतया सामानाधिकरण्येनैवौचित्याच्च। वायुप्राणयोः पृथगुपदेश श्रुतयस्तु “एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी” इत्याद्याः। अतएव लिङ्गशरीरमध्ये प्राणानामगणनेऽपि न न्यूनता बुद्धेरेव क्रियाशक्त्या सूत्रात्मप्राणादिनामकत्वादिति। अन्तःकरणपरिणामेऽपि वायुतुल्यसञ्चारविशेषाद्वायुदेवताधिष्ठितत्वाच्च वायुव्यवहारोपपत्तिरिति” प्र०भा०। १२इन्द्रियस्थाने “सप्त शिरसि प्राणाः प्राणाः इन्द्रियाणि” ताण्ड्यब्रा० ११।५।२ “सप्त शीर्षण्याः प्राणाः मुखं नासिके चक्षुषी इन्द्रियाधिष्ठानत्वात्” भा०। १३प्राणे पद्मशब्दे २७४६पृ० मू०। १४देहस्यच्छिद्रे च

तत्र प्राणोत्पत्तिमभिधाय तस्य गौणमुख्यभावः संख्याविशेषावधारणम् इन्द्रियसामान्यवृत्तितो भेदादिकञ्च शा०सू०भा० २।४ पादे समर्थितं यथा

“सप्त गतेर्विशेषितत्वाच्च” सू० “उत्पत्तिविषयः श्रुतिविप्रतिषेधः प्राणानां परिहृतः, संख्याविषय इदानीं परिह्रियते। तत्र मुख्यं प्राणमुपरिष्टाद्वक्ष्यति। सम्प्रति तु कतीतरे प्राणा इति सम्प्रधारयति। श्रुतिविप्रतिपत्तेश्चात्र विशयः। क्वचित् सप्त प्राणाः सङ्कीर्त्यन्ते “सप्त प्राणाः प्रभवन्ति तस्मात्” इति। क्वचिदष्टौ प्राणा ग्रहत्वेन गुणेन सङ्कीर्त्यन्ते “अष्टौ ग्रहा अष्टावतिग्रहाः” इति, क्वचिन्नव “सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ” इति। क्वचिद्दश “नव वै पुरुषे प्राणा नाभिर्दशमी” इति। क्वचिदेकादश “दशेमे पुरुषे प्राणा आत्मैकादशः” इति। क्वचिद्द्वादश “सर्वेषां स्पर्शानां त्वगेकायनम्” इत्यत्र। क्वचित्त्रयोदश “चक्षुश्च द्रष्टव्यञ्च” इत्यत्र। एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः। किं तावत् प्राप्तं सप्तैव प्राणा इति। कुतः गतेः, यतस्तावन्तोऽवगम्यन्ते “सप्त प्राणा प्रभवन्ति तस्मात्” इत्येवंविधासु श्रुतिषु। विशेषिताश्चैते “सप्त वै शीर्षण्याः प्राणाः” इत्यत्र। ननु “गुहाशया निहिताः सप्त सप्त” इति वीप्सा श्रूयते, सा सप्तभ्योऽतिरिक्तान् प्राणान् गमयतीति। नैष दोषः, पुरुषभेदाभिप्रायेयं वीप्सा प्रतिपुरुषं सप्त सप्त प्राणा इति न तत्त्वभेदाभिप्राया सप्त सप्तान्येऽन्ये प्राणा इति। नन्वष्टत्वादिकापि संख्या प्राणेषूदाहृता कथं सप्तैव स्युः। सत्यमुदाहृता विरोधात्त्वन्यतमा संख्याध्यवसातव्या, तत्र स्तोककल्पनोपरोधात् सप्तसंख्याध्यवसानं वृत्तिभेदापेक्षञ्च सङ्ख्यान्तरश्रवणमिति गम्यते। अत्रोच्यते” भा० “हस्तादयस्तु स्थितेऽतो नैवम्” सू० “हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः श्रूयन्ते, “हस्तौ वै ग्रहः स कर्मणातिग्रहेण गृहीतः, हस्ताभ्यां हि कर्म करोति” इत्येवमाद्यासु श्रुतिषु। एवं स्थिते च (अष्टादिसंख्यत्वे) सप्तत्वमन्तर्भावाच्छक्यते सम्भावयितुम्। हीनाधिकसङ्ख्याविप्रतिपत्तौ ह्यधिका सङ्ख्या संग्राह्या भवति, तस्यां हि हीनान्तर्भवति, न तु हीनायामधिका। अतश्च नैवं मन्तव्यं स्तोककल्पनानुरोधात् सप्तैव प्राणाः स्युरिति। उत्तरसङ्ख्यानुरोधात्त्वेकादशैव ते प्राणाः स्युः। तथा चोदाहृता श्रुतिः “दशेमे पुरुषे प्राणा आत्मैकादशः” इति। आत्मशब्देन चात्रान्तःकरणं परिगृह्यते करणाधिकारात्। नन्वेकादशत्वादप्यधिके द्वादशत्वत्रयोदशत्वे उदाहृते, न त्वेकादशभ्यः कार्यजातेभ्योऽधिकं कार्यजातमस्ति यदर्थम् अधिकं करणं कल्प्येत। शब्दस्पर्शरूपरसगन्धविषयाः पञ्च बुद्धिभेदास्तदर्थानि पञ्च बुद्धीन्द्रियाणि, वचनादानविहरणोत्सर्गानन्दाः पञ्च कर्मभेदास्तदर्थानि च पञ्च कर्मेन्द्रियाणि, सर्वार्थविषयं त्रैकाल्यवृत्ति मन एकमनेकवृत्तिकं तदेव वृत्तिभेदात् क्वचिद्भिन्नवद्व्यपदिश्यते “मनो बुद्धिरहङ्कारश्चित्तञ्च” इति। तथा च श्रुतिः कामाद्या नानाविधा वृत्तीरनुक्रम्याह “एतत् सर्वं मन एव” इति। अपि च सप्तैव शीर्षण्यान् प्राणानभिमन्यमानस्य चत्वार एव प्राणा अभिमताः स्युः स्थानभेदाद्ध्येते चत्वारः सन्तः सप्त गण्यन्ते, “द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके एका वाक्” इति। न च तावतामेव वृत्तिभेदा इतरे प्राणा इति शक्यते वक्तुं, हस्तादिवृत्तीनामत्यन्तविजातीयत्वात्। तथा “नव वै पुरुषे प्राणा नाभिर्दशमी” इत्यत्रापि देहच्छिद्रभेदाभिप्रायेणैव दश प्राणा उच्यन्ते, न प्राणतत्त्वभेदाभिप्रायेण “ना-

भिद्यमौ" इति वचनात्। न हि नाभिर्नाम कश्चित् प्राणः प्रसिद्धोऽस्ति, मुख्यस्य तु प्राणस्य भवति, नाभिरपि एकं विशेषायतनमित्यतो नाभिर्दशमीत्युच्यते। क्वचिदुपासनार्थं कतिचित् प्राणा गण्यन्ते, क्वचित् प्रदर्शनार्थम्। तदेवं विचित्रे प्राणेयत्ताम्नाने सति क्व किं परमाम्नानमिति विवेक्तव्यम्। कार्यजातवशात्त्वेकादशत्वाम्नानं प्राणविषयं प्रमाणमिति स्थितम्। इयमपरा सूत्रद्वययोजना। सप्तैव प्राणाः स्युः यतः सप्तानामेव गतिः श्रूयते "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इत्यत्र। ननु सर्वशब्दोऽप्यत्र पठ्यते कथं सप्तानामेव गतिः प्रतिज्ञायत इति, विशेषितत्वादित्याह। सप्तैव हि प्राणाश्चक्षुरादयः त्वक्पर्य्यन्ताः विशेषिताः इह प्रकृताः, "स यत्रैष चाक्षुषः पुरुषः पराङ् पर्य्यावर्त्तते अथारूपज्ञो भवति एकीभवति न पश्यतीत्याहुरित्येवमादिनानुक्रमणेन। प्रकृतगामी च सर्वशब्दो भवति। यथा सर्वे ब्राह्मणा भोजिता इति ये निमन्त्रिताः प्रकृता ब्राह्मणास्त एव सर्वशब्देनोच्यन्ते नान्ये, एवमिहापि ये प्रकृताः सप्त प्राणास्त एव सर्वशब्देनोच्यन्ते नान्ये इति। नन्वत्र विज्ञानमष्टममनुक्रान्तं कथं सप्तानामेवानुक्रमणं नैष दोषः। मनोविज्ञानयोस्तत्त्वाभेदाद्वृत्तिभेदेऽपि सप्तत्वोपपत्तेः। तस्मात् सप्तैव प्राणा इत्येवं प्राप्ते ब्रूमः। हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः प्रतीयन्ते "हस्तो वै ग्रहः" इत्यादिश्रुतिषु। ग्रहत्वञ्च बन्धनभावो गृह्यते बध्यते क्षेत्रज्ञोऽनेन ग्रहसंज्ञकेन बन्धनेनेति। स च क्षेत्रज्ञो नैकस्मिन्नेव शरीरे बध्यते शरीरान्तरेष्वपि तुल्यत्वाद्बन्धनस्य। तस्माच्छरीरान्तरसञ्चारीदं ग्रहसंज्ञकं बन्धनमित्यर्थादुक्तं भवति। तथा च स्मृतिः "पुर्य्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते। तेन बद्धस्य वै बन्धो मोक्षो मुक्तस्य तेन च" इति। प्राङ्मोक्षाद्ग्रहसंज्ञकेनानेन बन्धनेनावियोगं दर्शयति। आथर्वणे च विषयेन्द्रियानुक्रमणे "चक्षुश्च द्रष्टव्यञ्च" इत्यत्र तुल्यवद्धस्तादीनीन्द्रियाणि सविषयाण्यनुक्रामति "हस्तौ चादातव्यञ्च उपस्थश्चानन्दयितव्यञ्च पायुश्च विसर्जयितव्यञ्च पादौ च गन्तव्यञ्च" इति। तथा "दशेमे पुरुषे प्राणा आत्मैकादशः ते यदास्माच्छरीरान्मर्त्त्यादुत्क्रामन्त्यथ रोदयन्ति" इत्येकादशानां प्राणानामुत्क्रान्तिं दर्शयति। सर्वशब्दोऽपि च प्राणशब्देन सम्बध्यमानो-ऽशेषान् प्राणानभिदधानो न प्रकरणवशेन सप्तस्वेव व्यवस्थापयितुं शक्यते, प्रकरणाच्छब्दस्य च बलीयस्त्वात्। सर्वे ब्राह्मणा भोजिता इत्यत्रापि सर्वेषामेव अवनिवर्त्तिनां ब्राह्मणानां ग्रहणं न्याय्यं सर्वशब्दसामर्थ्यात्। सर्वभोजनासम्भवात् तु तत्र निमन्त्रितमात्रविषया सर्वशब्दस्य वृत्तिराश्रिता, इह तु न किञ्चित् सर्वशब्दार्थसङ्कोचकारणमस्ति, तस्मात् सर्वशब्देनात्राशेषाणां प्राणानां परिग्रहप्रदर्शनार्थं सप्तानामनुक्रमणमित्यनवद्यम्। तस्मादेकादशैव प्राणाः शब्दतः कार्य्यतश्चेति सिद्धम्" भा० "अणवश्च" सू० "अधुना प्राणानामेव स्वभावान्तरमभ्युच्चिनोति। अणवश्चैते प्रकृताः प्राणाः प्रतिपत्तव्याः। अणुत्वञ्चैषां सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं, कृत्स्नदेहव्यापिकार्य्यानुपपत्तिप्रसङ्गात्। सूक्ष्मा एते प्राणाः स्थूलाश्चेत् स्युः मरणकाले शरीरान्निर्गच्छन्तो बिलादहिरिवोपलभ्येरन् म्रियमाणस्य पार्श्वस्थैः। परिच्छिन्नाश्चैते प्राणाः सर्वगताश्चेत् स्युः उत्क्रान्तिगत्यागतिश्रुतिव्याकोपः स्यात्, तद्गुणसारत्वञ्च जीवस्य न सिध्येत्। सर्वगतानामपि वृत्तिलाभः शरीरदेशे स्यादिति चेत्, न, वृत्तिमात्रस्य करणत्वोपपत्तेः। यदेव ह्युपलब्धिसाधनं वृत्तिः अन्यद्वा तस्यैव नः करणत्वं तेन संज्ञामात्रे विवाद इति करणानां व्यापित्वकल्पना निरर्थिका। तस्मात् सूक्ष्माः परिच्छिन्नाश्चैते प्राणा इत्यध्यवस्यामः" भा० "श्रेष्ठश्च" सू० "मुख्यश्च प्राणः इतरप्राणवद्ब्रह्मविकार इत्यतिदिशति। नन्वविशेषेणैव सर्वप्राणानां ब्रह्मविकारत्वमाख्यातम्, "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इति, सेन्द्रियमनोव्यतिरेकेणापि प्राणस्योत्पत्तिश्रवणात्, "स प्राणमसृजत" इत्यादिश्रवणेभ्यश्च। किमर्थः पुनरतिदेशः, अधिकाशङ्कापाकरणार्थः। नासदासीये हि ब्रह्मप्रधाने सूक्ते मन्त्रवर्णो भवति, "न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परं किञ्च नाम" इति। आनीदिति प्राणकर्म्मोपादानात् प्रागुत्पत्तेः सन्तमिव प्राणं सूचयति। तस्मात् अजः प्राण इति जायते कस्यचिन्मतिः, तामतिदेशेनापनुदति। आनीच्छब्दोऽपि न प्रागुत्पत्तेः प्राणसद्भावं सूचयति। अवातमिति विशेषणात् "अप्राणो ह्यमना शुभ्रः" इति च मूलप्रकृतेः प्राणादिसमस्तविशेषरहितत्वस्य दर्शितत्वात्। तस्मात् कारणसद्भावप्रदर्शनार्थ एवायमानीच्छब्द इति। श्रेष्ठ इति च मुख्यं प्राणमभि-

दर्शयति, "प्राणो वाव ज्येष्ठः श्रेष्ठश्च" इति श्रुतिनिर्देशात् भा० "ज्येष्ठश्च प्राणः" सू० "शुक्रनिषेककालादारभ्य तस्य वृत्तिलाभात्, न चेत् तस्य तदानीं वृत्तिलाभः स्यात् योनौ निषिक्तं शुक्रं पूयेत न सम्भवेद्वा, श्रोत्रादीनान्तु कर्णशष्कुल्यादिस्थानविभागनिष्पत्तौ वृत्तिलाभात् ज्येष्ठत्वम्" भा० "श्रेष्ठश्च प्राणः गुणाधिक्यात्" सू० "न वै शक्ष्यामस्त्वदृते जीवितुम्" इति श्रुतेश्च भा० । "न वायुक्रिये पृथगुपदेशात्" सू० "स पुनर्मुख्यः प्राणः किंस्वरूप इतीदानीं जिज्ञास्यते । तत्र प्राप्तं तावत् श्रुतेर्वायुः प्राण इति, एवं हि श्रूयते, "यः प्राणः स एष वायुः पञ्चविधः प्राणोऽपानो व्यान उदानः समानः" इति । अथ वा तन्त्रान्तरीयाभिप्रायात् समस्तकरणवृत्तिः प्राण इति प्राप्तं, एवं हि तन्त्रान्तरीया आचक्षते । "सामान्या करणवृत्तिः प्राणाद्या वायवः पञ्च" इति । अत्रोच्यते । न वायुः प्राणः नापि करणव्यापारः कुतः पृथगुपदेशात् । वायोस्तावत् प्राणस्य पृथगुपदेशो भवति, "प्राण एव ब्रह्मणश्चतुर्थः पादः, स वायुना ज्योतिषा भाति च तपति च" इति । न हि वायुरेव सन् वायोः पृथगुपदिश्यते तथा करणवृत्तेरपि पृथगुपदेशो भवति, वागादीनि करणान्यनुक्रम्य तत्र तत्र पृथक्प्राणस्यानुक्रमणात् । न हि करणव्यापार एव सन् करणेभ्यः पृथगुपदिश्येत । तथा "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुः" इत्येवमादयोऽपि वायोः करणेभ्यश्च प्राणस्य पृथगुपदेशा अनुसर्त्तव्याः । न च समस्तानां करणानामेका वृत्तिः सम्भवति, प्रत्येकमेकैकवृत्तित्वात्, समुदायस्य चाकारकत्वात् । ननु पञ्जरचालनन्यायेन एतद्भविष्यति यथैकपञ्जरवर्त्तिन एकादश पक्षिणः प्रत्येकं प्रतिनियतव्यापाराः सन्तः सम्भूयैकं पञ्जरं चालयन्ति एवमेकशरीरवर्त्तिनः एकादश प्राणाः प्रत्येकं नियतवृत्तयः सन्तः सम्भूयैकां प्राणाख्यां वृत्तिं प्रतिपत्स्यन्ते इति । नेत्युच्यते, युक्तम् तत्र प्रत्येकवर्त्तिभिरवान्तरव्यापारैः पञ्जरचालनानुरूपैरेवोपेताः पक्षिणः सम्भूयैकं पञ्जरं चालयेयुरिति तथा दृष्टत्वात् । इह तु श्रवणाद्यवान्तरव्यापारोपेताः प्राणा न सम्भूय प्राण्युरिति युक्तं, प्रमाणाभावात् अत्यन्तविजातीयत्वाच्च श्रवणादिभ्यः प्राणनस्य । तथा प्राणस्य श्रेष्ठत्वाद्युद्घोषणं गुणभावोपगमश्च तं प्रति वागादीनां न करणवृत्तिमात्रे प्राणेऽवकल्पते, तस्मादन्यो वायुक्रियाभ्यां प्राणः"

कथं तर्हीयं श्रुतिः, "यः प्राणः स वायुः" इति. उच्यते । वायुरेवायमध्यात्ममापन्नः पञ्चव्यूहो विशेषात्मनावतिष्ठमानः प्राणो नाम भण्यते न तत्त्वान्तरं नापि वायुमात्रं, अतश्चोभे अपि भेदाभेदश्रुती न विरुध्येते । स्यादेतत्, प्राणोऽपि तर्हि जीववदस्मिन् शरीरे स्वातन्त्र्यं प्राप्नोति, श्रेष्ठत्वात् गुणभावोपगमाच्च तं प्रति वागादीनामिन्द्रियाणाम् । तथा हि अनेकविधा विभूतिः प्राणस्य श्राव्यते "सुप्तेषु वागादिषु प्राण एको जागर्त्ति प्राण एको मृत्युनाऽनाप्तः प्राणः संवर्गो वागादीन् संवृङ्क्ते प्राण इतरान् प्राणान् रक्षति मातेव पुत्रान्" इति । तस्मात् प्राणस्यापि जीववत् स्वातन्त्र्यप्रसङ्गः, तं परिहरति" भा० "चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः" सू० "तुशब्दः प्राणस्य स्वातन्त्र्यं व्यावर्त्तयति । यथा चक्षुरादीनि राजप्रकृतिवत् जीवस्य कर्त्तृत्वं भोक्तृत्वं च प्रत्युपकरणानि न स्वतन्त्राणि तथा मुख्योऽपि प्राणो राजमन्त्रिवत् जीवस्य सर्वार्थत्वेन उपकरणभूतो न स्वतन्त्रः । कुतः तत्सहशिष्ट्यादिभ्यः तैश्चक्षुरादिभिः सहैव प्राणः शिष्यते, प्राणसंवादादिषु समानधर्मणाञ्च सह शासनं युक्तं बृहद्रथन्तरादिवत् । आदिशब्देन संहतत्वाचेतनत्वादीन् प्राणस्य स्वातन्त्र्यनिराकरणहेतून् दर्शयति । स्यादेतत् यदि चक्षुरादिवत् प्राणस्य जीवं प्रति करणभावोऽभ्युपगम्येत विषयान्तरं रूपादिवत् तस्य प्रसज्येत रूपालोचनाद्याभिर्वृत्तिभिर्यथा चक्षुरादीनां जीवं प्रति करणभावो भवति । अपि चैकादशैव कार्यजातानि रूपालोचनादीनि परिगणितानि यदर्थमेकादश प्राणाः संगृहीताः न तु द्वादशमपरं कार्यजातमवगम्यते यदर्थमयं द्वादशः प्राणः प्रतिज्ञायेत इति । अत उत्तरं पठति" भा० "अकरणत्वाच्च न दोषस्तथा हि दर्शयति" सू० "न तावद्विषयान्तरप्रसङ्गो दोषः अकरणत्वात् प्राणस्य । न हि चक्षुरादिवत् प्राणस्य विषयपरिच्छेदेन करणत्वमभ्युपगम्यते । न चास्यैतावता कार्याभाव एव । कस्मात्, तथा हि श्रुतिः प्राणान्तरेष्वसम्भाव्यमानं मुख्यप्राणस्य वैशेषिकं कार्यं दर्शयति । प्राणसंवादादिषु "अथ ह प्राणा अहं श्रेयसि व्यूदिरे" इत्युपक्रम्य "यस्मिन् व उत्क्रान्ते इदं शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठः" इति चोपन्यस्य प्रत्येकं वागाद्युत्क्रमणेन तद्वृत्तिमात्रहीनं यथापूर्वं जीवनं मुख्यप्राणस्य वैशेषिकं कार्यं दर्शयित्वा

प्राणोत्क्रमिषायां वागादिश्रैथिल्यापत्तिं शरीरपातप्रसङ्गञ्च दर्शयन्ती श्रुतिः प्राणनिमित्तां शरीरेन्द्रियस्थितिं दर्शयति। "तान् वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि" इति च। एतमेवार्थं श्रुतिराह। "प्राणेन रक्षन्नवरं कुलायं" इति च। सुप्तेषु चक्षुरादिषु प्राणनिमित्तां शरीररक्षां दर्शयति। "यस्मात् कस्माच्चाङ्गात् प्राण उत्क्रामति तदेव तच्छुष्यति तेन यदश्नाति यत् पिबति तेनेतरान् प्राणानवति" इति च प्राणनिमित्तां शरीरेन्द्रियपुष्टिं दर्शयति। "कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि? कस्मिन्? वा प्रतिष्ठितेऽहं प्रतिष्ठास्यामीति स प्राणमसृजत" इति प्राणनिमित्ते एव जीवस्योत्क्रान्तिप्रतिष्ठे दर्शयति" भा०। "पञ्चवृत्तिर्मनोवद्व्यपदिश्यते" सू०। "इतश्चास्ति मुख्यप्राणस्य वैशेषिकं कार्यं यत्कारणं पञ्चवृत्तिरयं व्यपदिश्यते श्रुतिषु "प्राणोऽपानो व्यान उदानः समानः" इति। वृत्तिभेदश्चायं कार्य्यभेदापेक्षः। प्राणः प्राग्वृत्तिरुच्छ्वासादिकर्मा, अपानोऽवाग्वृत्तिर्निश्वासादिकर्मा, व्यानः तयोः सन्धौ वर्त्तमानो वीर्य्यवत्कर्महेतुः, उदानः ऊर्ध्ववृत्तिरुत्क्रान्त्यादिहेतुः, समानः समं सर्वेष्वङ्गेषु योऽन्नरसान् नयति इति। एवं पञ्चवृत्तिः प्राणः मनोवत् यथा मनसः पञ्च वृत्तयः एवं प्राणस्यापीत्यर्थः। श्रोत्रादिनिमित्ताः शब्दादिविषयाः मनसः पञ्च वृत्तयः प्रसिद्धाः। न तु कामः सङ्कल्प इत्याद्याः परिपठिताः परिगृह्येरन्, पञ्चसङ्ख्यातिरेकात्। नन्वत्रापि श्रोत्रादिनिरपेक्षा भूतभविष्यदादिविषयाऽपरा मनसो वृत्तिरस्तीति समानः पञ्चसङ्ख्यातिरेकः। एवं तर्हि परमतमप्रतिषिद्धमनुमतं भवतीति न्यायादिहापि योगशास्त्रप्रसिद्धा मनसः पञ्च वृत्तयः परिगृह्यन्ते प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयो नाम। बहुवृत्तित्वमात्रेण वा मनः प्राणस्य निदर्शनमिति द्रष्टव्यम्। जीवोपकरणत्वमपि प्राणस्य पञ्चवृत्तित्वान्मनोवदिति योजयितव्यम्" भा०। "अणुश्च" सू०। "अणुश्चायं मुख्यः प्राणः प्रत्येतव्यः इतरप्राणवत्। अणुत्वञ्चेहापि सौक्ष्म्यपरिच्छेदो न परमाणुतुल्यत्वं, पञ्चभिर्वृत्तिभिः कृत्स्नशरीरव्यापित्वात्। सूक्ष्मः, प्राण उत्क्रान्तौ पार्श्वस्थेनानुपलभ्यमानत्वात्, परिच्छिन्न उत्क्रान्तिगत्यागतिश्रुतिभ्यः। ननु विभुत्वमपि प्राणस्य समाम्नायते, "समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण" इत्येवमादिषु प्रदेशेषु। तदुच्यते, आधिदैविकेन समष्टिव्यष्टिरूपेण हैरण्यगर्भेण प्राणात्मना एतद्विभुत्वमाम्नायते नाध्यात्मिकेन। अपि च समः प्लुषिणेत्यादिना साम्यवचनेन प्रतिप्राणिवर्त्तिनः प्राणस्य परिच्छेद एव प्रदर्श्यते तस्माददोषः" भा०। "ज्योतिराद्यधिष्ठानन्तु तदामननात्" सू०। "ते पुनः प्रकृताः प्राणाः किं स्वमहिम्नैव स्वस्मै स्वस्मै कार्य्याय प्रभवन्ति आहोस्विद्देवताधिष्ठानाः प्रभवन्तीति विचार्य्यते। तत्र प्राप्तं तावद्यथा, स्वकार्य्यशक्तियोगात् स्वमहिम्नैव प्राणाः प्रवर्त्तेरन्निति। अपि च देवताधिष्ठितानां प्राणानां प्रवृत्तावभ्युपगम्यमानायां तासामेवाधिष्ठात्रीणां देवतानां भोक्तृत्वप्रसङ्गात् शारीरस्य भोक्तृत्वं प्रलीयेत, अतः स्वमहिम्नैवैषां प्रवृत्तिरिति, एवं प्राप्ते इदमुच्यते। ज्योतिराद्यधिष्ठानन्त्विति। तुशब्देन पूर्वपक्षो व्यावर्त्त्यते। ज्योतिरादिभिरग्न्याद्यभिमानिनीभिर्देवताभिरधिष्ठितं वागादिकरणजातं स्वकार्य्येषु प्रवर्त्तत इति प्रतिजानीते। हेतुञ्च व्याचष्टे तदामननादिति। तथा ह्यामनन्ति "अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादि"। अग्नेश्चायं वाग्भावो मुखप्रवेशश्च देवतात्मनोऽधिष्ठातृत्वमङ्गीकृत्योच्यते। नहि देवतासम्बन्धं प्रत्याख्यायाग्नेर्वाचि मुखे वा कश्चिद्विशेषः सम्बन्धो दृश्यते। तथा "वायुः प्राणो भूत्वा नासिके प्राविशत्" इत्येवमाद्यपि योजयितव्यम्। तथान्यत्रापि "वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च" इत्येवमादिना वागादीनामग्न्यादिज्योतिष्ट्ववचनेनैतमेवार्थं द्रढयति। "स वै वाचमेव प्रथममत्यवहत् सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत्" इति च। एवमादिना वागादीनामग्न्यादिभावापत्तिवचनेनैतमेवार्थं द्योतयति। सर्वत्र चाध्यात्माधिदैवतविभागेन वागाद्यग्न्याद्यनुक्रमणमनयैव प्रत्यासत्त्या भवति। स्मृतावपि "वागध्यात्ममिति प्राहुः ब्राह्मणास्तत्त्वदर्शिनः। वक्तव्यमधिभूतन्तु वह्निस्तत्राधिदैवतम्" इत्यादिना वागादीनामग्न्यादिदेवताधिष्ठितत्वं सप्रपञ्चं प्रदर्शितम्। यदुक्तं स्वकार्य्यशक्तियोगात् स्वमहिम्नैव प्राणाः प्रवर्त्तेरन्निति तदयुक्तम् शक्तानामपि शकटादीनामनडुहाद्यधिष्ठितानां प्रवृत्तिदर्शनात्। उभयथोपपत्तौ चागमाद्देवताधिष्ठितत्वमेव निश्चीयते। यदप्युक्तं देवतानामेवाधिष्ठात्रीणां भोक्तृत्वप्रसङ्गो न शारीरस्य जीवस्येति

तत् परिच्छिद्यते" भा०। "प्राणवता शब्दात्" सू०। "सतीष्वपि प्राणानामधिष्ठात्रीषु देवतासु प्राणवता कार्यकरणसङ्घातस्वामिना शारीरेणैवैषां प्राणानां सम्बन्धः श्रुतेरवगम्यते। तथा हि श्रुतिः "अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणम्" इत्येवंजातीयका शारीरेणैव प्राणानां सम्बन्धं श्रावयति। अपि चानेकत्वात् प्रतिकरणमधिष्ठात्रीणां देवतानां न भोक्तृत्वमेकस्मिन् शरीरेऽवकल्पते। एको ह्ययमस्मिन् शरीरे शारीरो भोक्ता प्रतिसन्धानादिसम्भवादवगम्यते" भा०। "तस्य च नित्यत्वात्" सू०। "तस्य च शारीरस्यास्मिन् शरीरे भोक्तृत्वेन नित्यत्वं पुण्यपापोपलेपसम्भवात सुखदुःखोपभोगसम्भवाच्च न देवतानाम्। ता हि परस्मिन्नैश्वर्ये पदेऽवतिष्ठमाना न हीनेऽस्मिञ्छरीरे भोक्तृत्वं प्रतिलब्धुमर्हन्ति। श्रुतिश्च भवति "पुण्यमेवामुं गच्छति न ह वै देवान् पापं गच्छति इति शारीरेणैव च नित्यः प्राणानां सम्बन्धः" भा०। "उत्क्रान्त्यादिषु तदनुवृत्तिदर्शनात्" सू०। "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इत्यादिश्रुतिभ्यः। तस्मात् सतीष्वपि करणानां नियन्त्रीषु देवतासु न शारीरस्य भोक्तृत्वमपगच्छति, करणपक्षस्यैव हि देवता न भोक्तृपक्षस्येति" भा०। "त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्" सू०। "मुख्यश्चैकः इतरे चैकादश प्राणा अनुक्रान्ताः, तत्रेदमपरं सन्दिह्यते किं मुख्यस्यैव प्राणस्य वृत्तिभेदा इतरे प्राणा आहोस्वित् तत्त्वान्तराणीति। किन्तावत् प्राप्तं मुख्यस्यैवेतरे वृत्तिभेदा इति। कुतः श्रुतेः। तथा हि श्रुतिर्मुख्यमितरांश्च प्राणान् सन्निधाप्य मुख्यात्मतामितरेषां ख्यापयति "हन्तास्यैव सर्वे रूपमसामेति तत्र तस्यैव सर्वे रूपमभवन्" इति। प्राणैकशब्दत्वाच्चैकत्वाध्यवसायः, इतरथा ह्यन्याय्यमनेकार्थत्वं प्राणशब्दस्य प्रसज्येत एकत्र वा मुख्यत्वमितरत्र वा लाक्षणिकत्वमापद्येत। तस्मात् यथैकस्यैव प्राणस्य प्राणाद्याः पञ्च वृत्तयः एवं वागाद्या अप्येकादशेत्येवं प्राप्ते ब्रूमः। तत्त्वान्तराण्येव प्राणाद्वागादीनीति कुतः व्यपदेशभेदात्। कोऽयं व्यपदेशभेदः, ते प्रकृताः, प्राणाः श्रेष्ठं वर्जयित्वाऽवशिष्टा एकादशेन्द्रियाणीत्युच्यन्ते श्रुतावेवं व्यपदेशभेददर्शनात्। "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इत्येवंजातीयकेषु श्रुतिप्रदेशेषु पृथक् प्राणो व्यपदिश्यते पृथक् चेन्द्रियाणि। ननु मनसोऽप्येवं वर्जनम् इन्द्रियत्वेन प्राणवत् स्यात् "मनः सर्वेन्द्रियाणि च" इति पृथक् व्यपदेशभेददर्शनात्। सत्यमेतत् स्मृतौ तु एकादशेन्द्रियाणीति मनोऽपीन्द्रियत्वेन श्रोत्रादिवत् संगृह्यते, प्राणस्य त्विन्द्रियत्वं न श्रुतौ स्मृतौ वा प्रसिद्धमस्ति। व्यपदेशभेदश्चायं तत्त्वभेदपक्षे उपपद्यते। तत्त्वैकत्वे तु स एवैकः सन् प्राण इन्द्रियव्यपदेशं लभते न लभते च इति विप्रतिषिद्धं, तस्मात्तत्त्वान्तरभूता मुख्यादितरे। कुतश्च तत्त्वान्तरभूता मुख्यादितरे" भा०। "भेदश्रुतेः" सू०। "भेदेन च वागादिभ्यः प्राणः सर्वत्र श्रूयते "ते ह वाचमूचुः" इत्युपक्रम्य वागादीनसुरपाप्मविध्वस्तानुपन्यस्योपसंहृत्य वागादिप्रकरणम्, "अथ हेममासन्यं प्राणमूचुः" इत्यसुरविध्वंसिनो मुख्यस्य प्राणस्य पृथगुपक्रमात्, तथा "मनो वाचं प्राणं तान्यात्मनेऽकुरुत" इत्येवमाद्या अपि भेदश्रुतय उदाहर्तव्याः। तस्मादपि तत्त्वान्तरभूता मुख्यादितरे। कुतश्च तत्त्वान्तरभूता मुख्यादितरे" भा०। "वैलक्षण्याच्च" सू०। "वैलक्षण्यञ्च भवति मुख्यप्राणस्येतरेषाञ्च सुप्तेषु वागादिषु मुख्य एको जागर्त्ति "स एव चैको मृत्युनाऽनाप्तः। आप्तास्त्वितरे" तस्यैव प्राणस्यावस्थित्युत्क्रान्तिभ्यां देहधारणपातनहेतुत्वं नेन्द्रियाणां विषयालोचनहेतुत्वञ्चेन्द्रियाणाम्। न प्राणस्येत्येवंजातीयको भूयान् लक्षणभेदः प्राणेन्द्रियाणाम्। तस्मादप्येषां तत्त्वान्तरभावसिद्धिः। यदुक्तं "तत्र तस्यैव सर्वे रूपमभवन्" इति श्रुतेः प्राण एवेन्द्रियाणीति तदयुक्तम् तत्रापि पौर्वापर्यालोचनाद्भेदप्रतीतेः। तथा हि "वदिष्याम्येवाहमिति वाग्दध्रे" इति वागादीनीन्द्रियाण्यनुक्रम्य "तानि मृत्युः श्रमो भूत्वोपयेमे तस्माच्छ्राम्यत्येव वाक्" इति च श्रमरूपेण मृत्युना ग्रस्तत्वं वागादीनामभिधाय "अथेममेव नाप्नोत् योऽयं मध्यमः प्राणः" इति पृथक्प्राणं मृत्युनानभिभूतमनुक्रामति। "अयं वै नः श्रेष्ठः" इति च श्रेष्ठतामस्यावधारयति। तस्मात्तदविरोधेन वागादिषु परिस्पन्दलाभस्य प्राणायत्तत्वं तद्रूपभवनं वागादीनामिति मन्तव्यं न तु तादात्म्यम्। अत एव प्राणशब्दस्येन्द्रियेषु लाक्षणिकत्वसिद्धिः। तथा च श्रुतिः "तत्र तस्यैव सर्वे रूपमभवन् तस्मादेते एतेनाख्यायन्ते प्राणाः" इति मुख्यप्राणविषयस्यैव प्राणशब्दस्य इन्द्रियेषु लाक्षणिकीं वृत्तिं दर्शयति। तस्मा-

सत्त्वान्तराणि प्राणादुत्क्रामादीन्द्रियाणीति” शाङ्करभा०। अतएव वेदान्तसारादौ आकाशादिपञ्चतन्मात्राणां समस्तानां रजोऽंशेभ्यः पञ्चवृत्तिकप्राणस्योत्पत्तिमङ्गीचकार तेनापि इन्द्रियेभ्यस्तस्य पृथक्त्वं गम्यते। १५देहस्थे दशवृत्तिके वायुभेदे प्राणकर्मन्शब्दे दृश्यम्। १६ धातुः पुत्रभेदे पु० “भार्य्ये धातृविधात्रोस्ते तयोर्जातौ सुता वुभौ। प्राणश्चैव मृकण्डुश्च” मार्क०५२अ०। वैवस्वतमन्वन्तरे १७सप्तर्षिभेदे पु० हरिवं० ७अ०। धराख्यवसोः १८पुत्रभेदे पु० हरिवं० ३अ०। १९विष्णौ पु० “ईशानः प्राणदः प्राणः” विष्णुस०। ‘प्राणस्य प्राणः’ इति श्रुतेस्तस्य तथात्वम्। प्राणयति प्राणः “अच्युतः प्रथितः प्राणः” विष्णुस०। “सूत्रात्मना प्राणयति चेष्टयति प्रजाः प्राणः” भा० व्युत्पत्तिद्वययोगात् नामद्वयम्।

प्राणस्य जलेनैवोपचयस्य करणात् जलमयत्वम् यथोक्तं छा० उ० “आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः” इत्युक्त्वा “अन्नमयं हि सोम्य! मन आपोमयः प्राणस्तेजोमयी वाक्” इति च संक्षिप्योक्त्वा तत्समर्थितं यथा “यथा दध्नः सोम्य! मथ्यमानस्य योऽणिमा ऊर्द्ध्वः समुदीषति तत्सर्पिर्भवति” इति दृष्टान्तीकृत्य “एवमेव खलु अपां सोम्य! पीयमानानां योऽणिमा स ऊर्द्ध्वः समुदीषति स प्राणो भवतीति” छा०उ०। “यथायं दृष्टान्तः एवमेव खलु सोम्यान्नादेरशस्य भुज्यमानस्यौदर्य्येणाग्निना वायुसहितेन खजेनेव मथ्यमानस्य योऽणिमा स ऊर्द्ध्वः समुदीषति तन्मनो भवति मनोऽवयवैः सह समूय उपचिनोति तद्वत् तथाऽपां सोम्य! पीयमानानां योऽणिमा स प्राण इत्यादि” भाष्यम्। २०मूलाधारस्थे वायौ च “मूलाधारोद्गतः प्राणः” शा०ति०। [इवे। स्वार्थे क। २बोले च मेदि०।

प्राणक पु० प्राणेन कायति कै–क। १जीवमात्रे २जीवक-

प्राणकर त्रि० प्राणं बलं करोति कृ–ट। बलकारके “सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम्। घृतमुष्णोदकं चैव सद्यः प्राणकराणि षट्” चाणक्य०।

प्राणकर्मन् न० ६त०। प्राणानां दशानां कर्मभेदे तानि च कर्माणि “सर्वाणीन्द्रियकर्माणि, प्राणकर्माणि चापरे” गीता भाष्य टी० आनन्दगिरिणोक्तानि यथा “प्राणानाञ्च दशानां कर्माणि, प्राणस्य बहिर्गमनम् अपानस्याधोगमनं व्यानस्य व्यायामाकुञ्चनप्रसरणादीनि समानस्याशितपीतादीनां समन्नयनं उदानस्योर्द्ध्वनयनम् “उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः। कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे। न जहाति मृतञ्चापि सर्वव्यापी धनञ्जयः” इत्येवं रूपाणि।

प्राणग्रह पु० “प्राणो वै ग्रहः” तैत्ति० उक्ते घ्राणाख्ये इन्द्रिये ग्रहशब्दे २७४६ पृ० दृश्यम्। तत्र प्राणशब्देन घ्राणमुच्यते इति भाष्ये समर्थितम्।

प्राणजीवन त्रि०प्राणं जीवयति जीवि–ल्यु। १प्राणस्थापके २प्राणपोषके विष्णौ पु० “प्राणभृत्प्राणजीवनः” विष्णुस० “प्राणयति प्राणिनो जीवान् जीवयति प्राणजीवनः “न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ” मन्त्रवर्णात्” भाष्य

प्राणतज पु० कल्पभवे वैमानिकभेदे हेमच०। प्राणतज इत्येव साधुःपाठः। [उज्ज्वल०।

प्राणथ पु० प्र+अन–अथ। १प्राणशब्दार्थे २बलवति च उ-

प्राणद न० प्राणं प्राणनं बलं वा ददाति पुष्णाति द्यति वा दा दो–वा–क। १जले तस्य यथा प्राणोपकारकत्वं तथा प्राणशब्दे छा०उ०वाक्ये दर्शितम्। २रक्ते च हेमच०। ३जीवकवृक्षे पु० राजनि० ४हरीतक्याम् ५ऋद्धिवृक्षे च स्त्री राजनि०। ६प्राणदातृमात्रे त्रि० “किमाश्चर्य्यं शारदेये प्राणदा यमदूतिका” तद्भटः। ७विष्णौ पु० तस्य प्रलये सर्वप्राणच्छेदकत्वात्तद्दातृत्वमिति नामद्वयम् प्राणशब्दे उदा० दृश्यम्।

प्राणदा स्त्री चक्रदत्तोक्ते गुटिकाभेदे “मनागरोमशरहरिद्दारकं गुडेन या मोदकमत्युदारकम्। अर्शोऽग्निदुर्नामकरोगदारकं करोति हृष्टं सहसैव दारकम्। चूर्णे चूर्णसमो ज्ञेयो मोदके द्विगुणो गुडः। त्रिपलं शृङ्गवेरस्य चतुष्कं मरिचस्य च। पिप्पल्याः कुडवार्द्धञ्च चव्यायाः पलमेव च। तालीशपत्रस्य पलं पलार्द्धं केशरस्य च। द्वे पले पिप्पलीमूलादर्द्धकर्षञ्च पत्रकात्। सूक्ष्मैलाकर्षमेकन्तु कर्षं त्वचमृणालयोः। गुडात् पलानि द्वात्रिंशच्चूर्णमेकत्र कारयेत्। चक्रप्राणाख्या गुडिका प्राणदेति च सा स्मृता”। [ल्युट्। २जले पु० शब्दच०।

प्राणन न० प्र+अन–भावे ल्युट्। १जीवने जटा०। करणे

प्राणनाथ पु० ६त०। पत्यौ शब्दरत्ना०। प्राणपत्यादयोऽप्यत्र

प्राणनिग्रह पु०प्राणो निगृह्यतेऽनेन नि+ग्रह–करणे अप्। प्राणायामे प्राणनिरोधादयोऽप्यत्र।

प्राणन्त पु० प्र+अन–करणे झ। १वायौ उणादिको० २रसा-

श्वने ब्रह्मभेदे १सुधायां ४हिक्कायाञ्च स्त्री उणादि० ।

प्राणप्रद त्रि० प्राणं बलं प्रददाति प्र+दा—क । १बलदायके २ऋद्धिनामकौषधौ स्त्री रत्नमा० ।

प्राणभक्ष पु० प्राणेन प्राणेन भक्षः ३त० । प्राणेनाघ्राण-मात्रे कात्या० १०।२६ कर्कः । [शब्दच० ।

प्राणभास्वत् पु० प्राणेन वायुना भासते उद्दीप्तः । समुद्रे

प्राणभृत् त्रि० प्राणं बिभर्त्ति भृ—क्विप् ६त० । १प्राणिनि जीवे जन्तुमात्रे २प्राणपोषके त्रि० ३विष्णौ पु० "प्राणभृत् प्राणजीवनः" विष्णुस० ।

प्राणमय पु० प्राण+प्राचुर्य्ये मयट् । "कर्मेन्द्रियैः पञ्चभिरञ्चितोऽसौ प्राणो भवेत् प्राणमयस्तु कोषः" विवेकचू० उक्ते जीवस्वरूपावरके कोषभेदे "नैवात्मापि प्राणमयो वायुविकारो गन्ताऽऽगन्ता वायुवदन्तर्बहिरेष । यस्मात् किञ्चित् क्वापि न वेत्तीष्टमनिष्टं स्वं वाऽन्यं वा किञ्चन नित्यं परतन्त्रः" तस्य तस्यात्मनोभेदे वेदान्तः ।

प्राणयम पु० प्राणो यम्यतेऽनेन यम—करणे घञ् अवृद्धिः । प्राणायामे हेमच० प्राणरोधप्राणनियमप्राणसंयमादयो-ऽप्यत्र ।

प्राणयात्रा स्त्री ६त० । प्राणस्य श्वासप्रश्वासादिके १व्यापारे उपचारात् तत्साधने २भोजनादौ । भोजनेन हि देहे प्राणयात्रानिर्वाहोऽन्यथा मरणेनोत्क्रान्तिः प्राणस्य भोजनं विना स्थित्यभावात् । प्राणयात्राऽस्त्यस्य प्रयोजनत्वेन ठञ् । प्राणयात्रिक प्राणधारणभोजनयुक्ते विशिष्टभोगपरे मनुः ६।५७

प्राणयोनि पु० ६त० । १परमेश्वरे जगत्प्राणे २वायौ च ।

प्राणवत् त्रि० प्राण+मतुप् मस्य वः । प्राणिनि जीवे जन्तुमात्रे

प्राणशरीर पु० प्राणः शरीरं स्वरूपं यस्य । प्राणात्मत्वेन ध्येये परमेश्वरे "स क्रतुं कुर्वीत मनोमयः प्राणशरीरः" छा० उ० "प्राणो विज्ञानात्मा क्रियाज्ञानशक्तिद्वययुतः "यो वै प्राणः सा प्रज्ञा या प्रज्ञा स प्राण" इति-श्रुतेः" स शरीरं यस्य सः" भाष्यम् ।

प्राणसंवाद पु० ६त० । प्राणानामिन्द्रियाणां तुल्यमानस्य च अहं श्रेष्ठत्वविषयक विवादे । स च छा० उ० 'अथ ह प्राणा अहं श्रेयसि व्यूदिरेऽहं श्रेयानस्म्यहं श्रेयानस्मीत्युपक्रमे दर्शितः ।

प्राणसंशय पु० ६त० । १प्राणस्य स्थित्यस्थितिसन्देहे उपचारात् २मरणफलकव्यापारभेदे च ।

प्राणसद्मन् न० ६त० । प्राणायतने देहे ।

प्राणसम पु० ६त० । १प्राणतुल्ये प्रिये २पत्यौ ३पत्न्यां स्त्री ।

प्राणहर त्रि० प्राणं हरति देहात् देहान्तरं प्रापयति बलं वा हरति हृ—अच् । १प्राणस्य देहात् देहान्तरप्रापके २बलनाशके । "शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि । प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट्" चाणक्यः । ३विषादौ च याज्ञ० २।२२७ ।

प्राणहारक त्रि० प्राणं हरति हृ—ण्वुल् । १देहात् प्राणस्य हारके २नाशके ३वत्सनाभविषे न० राजनि० ।

प्राणाग्निहोत्र न० प्राणरूपेऽग्नौ होत्रम् । १वैश्वानरविदः प्राणानां पञ्चाहुतिरूपेऽग्निहोत्रात्मके भोजने । तच्च यथा कर्त्तव्यता तथा छा० उ० "तद्यद्भक्तं प्रथममागच्छेत् तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात् प्राणाय स्वाहेति" इत्युपक्रम्य दर्शितम् । तच्च प्राणाहुतिशब्दे दृश्यम् । तत्प्रतिपादके २कृष्णयजुर्वेदीयोपनिषद्भेदे च ।

प्राणात्यय पु० ६त० । १प्राणधारणाऽसम्भावनायाम् । ब०व० । २तदुपलक्षिते काले च "प्राणात्यये च संप्राप्ते योऽन्नमत्ति यतस्ततः । न स पापेन लिप्येत पद्मपत्रमिवाम्भसा" स्मृतिः "सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्" शा० सू० ।

प्राणाधिनाथ पु० ६त० । पत्यौ हला० ।

प्राणान्त पु० ६त० । मरणे । प्राणान्तः प्रयोजनमस्य ठञ् । प्राणान्तिक । मरणफलके प्रायश्चित्तादौ ।

प्राणापान पु० द्व० द्वि०व० । प्राणे अपाने च १वायौ "प्राणापानान्तरे देवी वाग्वै नित्यं प्रतिष्ठिता" मञ्जूषाधृतवाक्यम् । २अश्विनीकुमारयो० "तस्यां त्वाष्ट्र्यामश्वरूपायां मार्त्तण्ड-स्तीव्रतेजसा । बीजं निर्वापयामास तज्जलं तद्द्विधाऽपतत् । तत्र प्राणस्त्वपानश्च योनौ चात्मजितौ पुरा । वरदानेन च पुनर्मूर्त्तिमन्तौ बभूवतुः । तौ त्वाष्ट्र्यामश्वरूपिण्यां जातौ येन नरोत्तमौ । ततस्तावश्विनौ देवौ कीर्त्त्येते रविनन्दनौ" वराहपु० ।

प्राणायतन न० ६त० "अक्षिणी कर्णरन्ध्रे च पायूपस्थास्यनासिकाः । नवच्छिद्राणि तान्येव प्राणस्यायतनानि तु" याज्ञ० उक्ते प्राणस्य छिद्ररूपस्थानभेदे

प्राणायन पुंस्त्री० प्राणस्यापत्यं नडा० फक् । प्राणस्यापत्ये

प्राणायाम पु० प्राण आयम्यतेऽनेन आ+यम—करणे घञ् । प्राणवायोर्गतिविच्छेदकारकव्यापारभेदे तद्विधिस्तन्त्रसारोक्तो यथा "तत्र प्राणायामेऽङ्गुलिनियमो ज्ञानार्णवे "भूतशुद्धिं ततः कुर्य्यात् प्राणायामक्रमेण च । कनि-

ष्ठानामिकाङ्गुष्ठैर्नासापुटधारणम्। प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना"। प्राणायामो द्विविधः सगर्भो निगर्भश्च। तथा च "सगर्भो मन्त्रजापेन निगर्भो मात्रया भवेत्"। मात्रा च "वामजानुनि तद्धस्तभ्रामणं यावता भवेत्। कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः"। तत्र च मूलमन्त्रस्य बीजस्य प्रणवस्य वा षोडशवारादिजपेन वामनासापुटादिना वायुपूरकादिकं कुर्य्यात्। तथा च कालीहृदये "प्राणायामत्रयं कुर्य्यात् मूलेन प्रणवेन वा। अथ वा मन्त्रबीजेन यथोक्तविधिना सुधीः"। यथा तस्य षोडशवारजपेन वायुं रेचयेत्। तस्य चतुःषष्टिवारजपेन वायुं कुम्भयेत्। तस्य द्वात्रिंशद्वारजपेन वायुं रेचयेत्। पुनर्दक्षिणेनापूर्य्य उभाभ्यां कुम्भयित्वा वामेन रेचयेत्। पुनर्वामेनापूर्य्य उभाभ्यां कुम्भयित्वा दक्षिणेन रेचयेत्। त्रिपुरासारसमुच्चये "विपरीतमतो विदधीत बुधः पुनरेव वा तद्विपरीतमिति"। यौगिके तु मात्रानियमः। तथा च गौतमीये "मन्त्रप्राणायामः प्रोक्तो यौगिकं कथयामि ते। पूरयेद्वामया विद्वान् मात्राषोड़शसंख्यया" इत्यादि। यद्वा चतुःषोड़शद्वात्रिंशद्वारजपेन पूरकादिकं कुर्य्यात्। तथा च तन्त्रान्तरे "पूरयेत् षोड़शभिर्वायुं धारयेत्तु चतुर्गुणैः। रेचयेत् कुम्भकार्द्धेन चाशक्त्या तत्तुरीयकम्। तदशक्तौ तदर्द्धमेव प्राणस्य संयमः। अस्य नित्यतामाह "प्राणायामं विना मन्त्रपूजने न हि योग्यता" अन्याङ्गप्राणायामस्वरूपफलादिकं प्रायश्चित्ततत्त्वे दर्शितं यथा मत्स्याग्निपुराणे "गायत्रीं प्रति ब्रह्मवाक्यम् "कुर्वन्तोऽपीह पापानि ये त्वां ध्यायन्ति पावनि!। उभे सन्ध्ये न तेषां हि विद्यते स विपातकम्। त्रिः पठेदायतप्राणः प्राणायामेन यो द्विजः। वर्त्तते न स लिप्येत पातकैरुपपातकैः"। वृद्धविष्णुः "प्राणायामान् द्विजः कुर्य्यात् सर्वपापापनुत्तये। दह्यन्ते सर्वपापानि प्राणायामैर्द्विजस्य तु"। विष्णुधर्मोत्तराग्निपुराणयोः "सर्वदोषहरः प्रोक्तः प्राणायामो द्विजन्मनाम्। ततस्त्वभ्यधिकं नास्ति पापप्रणाशकारणम्"। अत्रिः "कर्म्मणा मनसा वाचा यदह्ना पापं कृतञ्च यत्। आसीनः पश्चिमां सन्ध्यां प्राणायामैर्व्यपोहति"। अत्रिस्तु "प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिस्त्रिभिः। अहोरात्रकृतात् पापान्मुच्यते नात्र संशयः"। वशिष्ठः "प्राणायामान् धारयेत् त्रीन् यथाविधि सुयन्त्रितः। अहोरात्रकृतं पापं तत्क्षणादेव नश्यति"। दक्षापस्तम्बः "पूर्वोक्तेषु चैतेषु तथान्येष्वपि सर्वशः। प्राणायामास्त्रयोऽभ्यस्ताः सूर्य्यस्योदयनं प्रति। जायन्ते तद्विनाशाय तमसामिव भास्करः। सूर्य्यस्योदयनं प्राप्य निर्म्मला धूतकल्मषाः। भवन्ति भास्कराकारा विधूमा इव पावकाः"। योगियाज्ञवल्क्यः "यदह्ना कुरुते पापं कर्म्मणा मनसापि वा। त्रिसन्ध्याभ्याचरणात् प्राणायामैर्व्यपोहति"। बृहस्पतिः "प्राणायामैर्दहेद्दोषान् मनोवाग्देहसम्भवान्"। प्राणायामानुवृत्तौ बोधायनः "एतदाद्यं तपः श्रेष्ठमेतद्धर्म्मस्य लक्षणम्। सर्वदोषोपघातार्थमेतदेव विशिष्यते"। अत्रिवशिष्ठौ "आवर्त्तयेत् सदा युक्तः प्राणायामान् पुनःपुनः। आकेशाग्रान्नखाग्राच्च तपस्तप्यत उत्तमम्"। विष्णुधर्मोत्तराग्निपुराणयोः "आकेशाग्रान्नखाग्राच्च तपस्तप्येत सुदारुणम्। आत्मानं शोधयत्येव प्राणायामः पुनःपुनः। दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः। तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात्। प्राणायामैर्दहेद्दोषान् प्राणायामः परं तपः"। वृद्धयमः "यथा हि शैलधातूनां धमतां धम्यते मलः। इन्द्रियाणां तथा दोषान् प्राणायामेन निर्दहेत्"। बृहस्पतिः "धम्यमानं यथा ज्योतिर्धातूनां संस्कृतं मलम्। तथेन्द्रियकृतो दोषः प्राणायामेन दह्यते"। योगियाज्ञवल्क्यः "यथा पर्वतधातूनां दोषान् दहति पावकः। एवमन्तर्गतश्चैनः प्राणायामेन दह्यते"। अत्रिवशिष्ठौ "निरोधाज्जायते वायुर्वायोरग्निः प्रजायते। अग्नेरापो भजायन्त तैरन्तः शुध्यते त्रिभिः"। विष्णुधर्मोत्तराग्निपुराणयोः "निरोधाज्जायते वायुस्तस्मादग्निस्ततो जलम्। त्रिभिः शरीरं सकलं प्राणायामैर्विशुध्यति"। योगियाज्ञवल्क्यः "तथा निरोधसंयोगात् देवतात्मयचिन्तनात्। अग्नेर्वायोरपां योगादात्मा शुध्यति वै त्रिभिः"। मनुः "प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत् कृताः। व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः" विष्णुधर्मोत्तरमत्स्यपुराणे "प्राणसंधारणं मासं कुशाग्रेणाम्बुबिन्दुना। यः कुर्य्यात्तत्समो राजन्! प्राणायामस्तु तत्समः"। वृद्धविष्णुः "सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह। त्रिः पठेदायतप्राणः प्राणायामः स उच्यते। गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकाम्। प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः"। योगियाज्ञवल्क्यः "भूर्भुवः स्वर्महर्जनस्तपःसत्यं तथैव च। प्रत्योङ्कारसमायुक्तं तद्वत्सवितुर्वरेण्यम्।

ओमापोज्योतिरित्येतच्छिरः पश्चात् प्रयोजयेत् । एवं मन्त्रप्रयोगस्तु प्राणायामविधाने । त्रिरावर्त्तनयोगेन प्राणायामस्तु शब्दितः"। योगियाज्ञवल्क्यः "षोडशाक्षरकं ब्रह्म गायत्र्यास्तच्छिरः स्मृतम् । ओमापोज्योतिरित्येष मन्त्रो यस्तु पठीयते । तस्य प्रजापतिरृषिर्यजुश्छन्दस्तथा विना । ब्रह्माग्निवायुसूर्य्याश्च देवताः समुदाहृताः । प्राणसंयमने चैव विनियोग उदाहृतः । गायत्रीशिरसा सार्द्धमेवं श्रुतिनिदर्शनम् । प्रणवव्याहृतियुतां गायत्रीं शिरसा सह । त्रिःपठेदायतप्राणः प्राणायामः स उच्यते । आदाय रोधसंसर्गं वायोस्त्रिस्त्रिः समभ्यसेत् । ब्रह्माणं केशवं शम्भुं ध्यायेद्देवानस्तु क्रमात् । रक्तं प्रजापतिं ध्यायेत् विष्णुं नीलोत्पलप्रभम् । शङ्करं त्र्यम्बकं श्वेतं ध्यायन्मुच्येत बन्धनात् । पूरके ब्रह्मसायुज्यं कुम्भके ब्रह्मणोऽन्तिकम् । रेचकेनाद्वितीयन्तु प्राप्नुयादैश्वरं पदम्" अथ प्राणायामविधिः तत्र व्यासपद्यम् "आदौ छन्द ऋषिदेवताविनियोगाश्चिन्त्यन्ते "गायत्रीं शिरसा सार्द्धं सप्तव्याहृतिपूर्व्विकाम् । प्राणायामेन त्रिरावर्त्तयेत् ततः शनैः प्रश्वसेच्च प्राणायामैर्दग्धदोषोऽयं यत् श्रेयः तत् सकलं भवति"। व्यासः "गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च । त्रिष्टुप् च जगती चेति छन्दांस्याहुरनुक्रमात् । अग्निवाय्वर्कवरुणा बृहस्पतिशतक्रतू । विश्वेदेवाः व्याहृतीनां दैवतानि यथाक्रमम् । विनियोगः स्मृतस्तासां प्राणायामे महर्षिभिः"। योगियाज्ञवल्क्यः "व्याहृतीनाञ्च सर्व्वासामार्षञ्चैव प्रजापतिः । सप्त छन्दांसि प्रोक्तानि छादनानि तु सर्व्वशः । गायत्र्युष्णिगनुष्टुप् च बृहती त्रिष्टुबेव च । पङ्क्तिश्च जगती चैव सप्त छन्दांसि तानि वै । अग्निर्वायुस्तथादित्यो बृहस्पतिराप एव च । इन्द्रश्च विश्वदेवाश्च देवताः समुदाहृताः । अनाम्नातेषु नित्येषु प्रायश्चित्तेषु सर्व्वदा । प्राणायामप्रयोगे च विनियोग उदाहृतः"। बृहस्पतिः "बद्धासनं नियम्याङ्गं कृत्वा ब्रह्माञ्जलिं तथा । संनिमीलितदृङ्मौनी प्राणायामं समभ्यसेत्"। विष्णुधर्म्मोत्तरे "सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते । आदाय रोधनोत्सर्गं समधा त्रिः समभ्यसेत् । ब्रह्माणं केशवं शम्भुं ध्यायन्मुच्येत बन्धनात् । रक्तं पितामहं ध्यायेद्विष्णुं नीलोत्पलप्रभम् । श्वेतं त्र्यम्बकञ्चैव संसारार्णवतारणम्"। योगियाज्ञवल्क्यः "वामस्थितं नासपुटेन वायुमाकृष्य तेनैव शनैः समस्तम् । नाडीश्च सर्वाः प्रतिपूरयेत् स पूरको नाम महानिरोधः । न रेचकोनैव च पूरको वा नासापथचारी स्थित एव वायुः । सुनिश्चलं धारयति क्रमेण कुम्भाख्यमेतं प्रवदन्ति तज्ज्ञाः । निष्क्रम्य नासाविवरादशेषं प्राणं बहिः शून्यमिवानिलेन । निरुध्य संतिष्ठति चोर्द्ध्ववायुः स रेचको नाम महानिरोधः । नासिकयाऽऽकृष्टोच्छ्वासं ध्मात पूरक उच्यते । कुम्भो निश्चलनिश्वासो रिच्यमानस्तु रेचकः"। योगियाज्ञवल्क्यः "प्राणेनाभ्यसयानेन वेगवायुं समुत्सृजेत् । येन सन्धमनेश्च निश्वासेन च चालयेत् । शनैर्नासापुटे वायुमुत्सृजेन्न तु वेगतः"। "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि" पात० सू० तत्र योगाङ्गतोक्ता । तस्य च योगाङ्गप्राणायामस्य लक्षणादिः पात०सू०भा० विवरणेनोक्तं यथा "तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" सू० । "सत्यासनजये बाह्यस्य वायोराचमनं श्वासः । कोष्ठ्यस्य वायोर्निःसारणं प्रश्वासः, तयोर्गतिविच्छेद उभयाभावः प्राणायामः" भा० । स तु "बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मः" सू० । "यत्र प्रश्वासपूर्व्वको गत्यभावः स बाह्यः यत्र श्वासपूर्व्वको गत्यभावः स आभ्यन्तरः तृतीयस्तम्भवृत्तिर्यत्रोभयाभावः सकृत्प्रयत्नाद्भवति यथा तप्ते न्यस्तमुपले जलं सर्व्वतः सङ्कोचमापद्यते । तथा द्वयोर्युगपद्गत्यभाव इति त्रयोऽप्येते देशेन परिदृष्टाः इयानस्य विषयो देश इति । कालेन परिदृष्टाः क्षणानामियत्तावधारणेनावच्छिन्ना इत्यर्थः । सङ्ख्याभिः परिदृष्टाः, एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातस्तद्वन्निगृहीतस्यैतावद्भिः द्वितीय उद्घातः एवं तृतीयः एवं मृदुरेवं मध्य एवं तीव्र इति सङ्ख्यापरिदृष्टः स खल्वयमेवमभ्यस्तो दीर्घसूक्ष्मः" भा० "बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः" सू०। "देशकालसङ्ख्याभिर्बाह्यविषयः परिदृष्ट आक्षिप्तः तथाभ्यन्तरविषयः परिदृष्ट आक्षिप्त उभयथा दीर्घसूक्ष्मः तत्पूर्व्वको भूमिजयात् क्रमेणोभयोर्गत्यभावश्चतुर्थः प्राणायामः । तृतीयस्तु विषयानालोचितो गत्यभावः सकृदारब्ध एव देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मश्चतुर्थस्तु श्वासप्रश्वासयोर्विषयावधारणात् क्रमेण भूमिजयादुभयाक्षेपपूर्व्वको गत्यभावश्चतुर्थः प्राणायामः इत्ययं विशेष इति" भा० । "ततः क्षीयते प्रकाशावरणम्" सू० । "प्राणायामानभ्यस्यतोऽस्य

योगिनः क्षीयते विवेकज्ञानावरणीयं यत्तदाचक्षते महामोहमयेन इन्द्रजालेन प्रकाशशीलं सत्त्वमावृत्य तदेवाकार्ये नियुङ्क्ते इति तदस्य प्रकाशावरणं कर्म संसारनिबन्धनं प्राणायामाभ्यासात् दुर्बलं भवति प्रतिक्षणं च क्षीयते। तथा चोक्तम् "तपो न परं प्राणायामात्ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति"। किञ्च धारणासु च योग्यता मनसः प्राणायामाभ्यासादेव। "प्रच्छर्दनविधारणाभ्यां वा प्राणस्येति" वचनात्" भा०।

"प्राणायामविशेषत्रयलक्षणपरं सूत्रमवतारयति स त्विति। वृत्तिशब्दः प्रत्येकं संबध्यते। रेचकमाह यत्र प्रश्वासेति। पूरकमाह यत्र श्वासेति। कुम्भकमाह तृतीय इति। तदेव स्फुटयति यत्रोभयोः श्वासप्रश्वासयोः सकृदेव विधारकात् प्रयत्नादभावो भवति न पुनः पूर्ववदापूरणप्रयत्नौघप्रविधारकः प्रयत्नो नापि रेचकप्रयत्नौघविधारणप्रयत्नोऽपेक्ष्यते किन्तु यथा तप्ते उपले निहितं जलं परिशुष्यत् सर्वतः सङ्कोचमापद्यते एवमयमपि मारुतो वहनशीलो बलवद्विधारकप्रयत्ननिरुद्धक्रियः शरीर एव सूक्ष्मीभूतोऽवतिष्ठते न तु रेचयति येन रेचकः इति। इयानस्य देशो विषयः प्रादेशवितस्तिहस्तादिपरिमितो निवाते प्रदेशे ईषिकातूलादिक्रियानुमितो बाह्य एवमान्तरोऽप्यापादतलमामस्तकं पिपीलिकास्पर्शसदृशेनानुमितः। स्पर्शननिमेषक्रियावच्छिन्नस्य कालस्य चतुर्थो भागः क्षणस्तेषामियत्तावधारणेनावच्छिन्नः स्वजानुमण्डलं पाणिना त्रिः परामृश्य छोटिकावच्छिन्नः कालो मात्रा ताभिः षट्त्रिंशन्मात्राभिः परिमितः प्रथम उद्घातो मन्दः। स एव द्विगुणीकृतो द्वितीयो मध्यमः स एव त्रिगुणीकृतस्तृतीयस्तीव्र इतीमं संख्यापरिदृष्टं प्राणायाममाह संख्याभिरिति। स्वस्थस्य हि पुंसः श्वासप्रश्वासक्रियावच्छिन्नेन कालेन यथोक्तछोटिकाकालः समानः प्रथमोद्घातकर्मतां नीतः उद्घातो विजितो वशीकृतो निरुद्धीतः क्षणानामियत्ताकालो विवक्षितः श्वासप्रश्वासेयत्ता संख्येति कथञ्चिद्भेदः। स खल्वयं प्रत्यहमभ्यस्तो दिवसपक्षमासादिक्रमेण देशकालप्रचयव्यापितया दीर्घः परमनैपुण्यं समधिगमनीयः तथा च सूक्ष्मो न तु मन्दतया" विवृतिः। योगाङ्गप्राणायामविधिः दत्तात्रेयसंहितायामुक्तो यथा "तस्मिन् मठे समास्तीर्य आसनं विष्टरादिकम्। तत्रोपविश्य मेधावी पद्मासनसमन्वितः। समकायः प्राञ्जलिश्च प्रणम्य चेष्टदेवताम्। ततो दक्षिणहस्तस्याङ्गुष्ठेन तु पिङ्गलाम्। निरुध्य पूरयेद्वायुमिडया तु शनैः शनैः। यथाशक्त्यविरोधेन ततः कुर्याच्च कुम्भकम्। ततस्त्यजेत् पिङ्गलया शनैरेव न वेगतः। पुनःपिङ्गलयाऽऽपूर्य पूरयेदुदरं शनैः। धारयित्वा यथाशक्ति रेचयेन्मारुतं शनैः। यया त्यजेत्तयाऽऽपूर्य धारयेदविरोधतः। एवं प्रातः समासीनः कुर्याद्विंशतिकुम्भकान्। कुम्भकः सहितो नाम सर्वपापविवर्जितः। मध्याह्नेऽपि तथा कुर्यात् पुनर्विंशतिकुम्भकान्। एवं सायं प्रकुर्वीत पुनर्विंशतिकुम्भकान्। कुर्वीत रेककुम्भाभ्यां सहितान् प्रतिवासरम्। कुर्यादेवं चतुर्वारमनालस्यो दिने दिने। एव मासत्रयं कुर्यान्नाडीशुद्धिस्ततो भवेत्"। पहलामले त्रयोदशपटले "प्राणायामस्त्रिधा प्रोक्तो रेचकुम्भकपूरकैः। सहितः केवलश्चेति कुम्भको द्विविधो मतः। रेचपूरकयुक्तो यः स वै सहितकुम्भकः। यावत् केवलसिद्धिः स्यात् सहितं तावदभ्यसेत्। रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणम्। प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः। गुरूपदिष्टमार्गेण प्राणायामं समाचरेत्। यावद्वायुः स्थितो देहे तावज्जीवितमुच्यते। मरणं तस्य निष्क्रान्तिस्ततो वायुं निबन्धयेत्। मलाकुलासु नाडीषु मारुतो नैव मध्यगः। कथं स्यात् निर्मलीभावः कायशुद्धिः कथं भवेत्। शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलम्। तदैव जायते योगी प्राणसंग्रहणे क्षमः। प्राणायामं ततः कुर्यान्नित्यं सात्त्विकया धिया। तथा सुषुम्णापार्श्वस्था मलाः शोषं प्रयान्ति हि। बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत्। धारयित्वा यथाशक्ति पुनः सूर्येण रेचयेत्। प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः। विधिवत् कुम्भकं कृत्वा पुनश्चन्द्रेण रेचयेत्। येन त्यजेत्तेनैव पूरयेदविरोधतः। रेचयेत्तु ततोऽन्येन रेचयेन्न वेगतः" चन्द्रेण वामनासया सूर्येण दक्षिणनासया। "प्राणं चेदिडया पिबेन्नियमितं भूयोऽन्यया रेचयेत् पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेद्वामया। सूर्याचन्द्रमसोरनेन विधिना बिम्बद्वयं ध्यायतः शुद्धा नाडिगणा भवन्ति यमिना मासत्रयादूर्द्ध्वतः। प्रातर्मध्यन्दिने सायं मध्यरात्रे च कुम्भकान्। चतुरशीतिपर्यन्तं चतुर्वारं समभ्यसेत्। प्राणायामे महान् धर्मो योगिनो मोक्षदायिनि। प्राणायामे दिवारात्रौ देवताः परि-

त्यजेत् । अधमे द्वादशी मात्रा मध्यमे द्विगुणा स्मृता । उत्तमे त्रिगुणा ज्ञेया प्राणायामस्य निर्णये । कनीयसि भवेत् स्वेदः कम्पो भवति मध्यमे । उत्तिष्ठत्युत्तमे प्राणी बद्धपद्मासनो मुहुः । स्वेदेन श्रमजातेन गात्रमार्जनमाचरेत् । दृढ़ता लघुता दीप्तिस्तेन गात्रस्य जायते । यदा तु नाडीशुद्धिः स्यात्तदा चिह्नानि बाह्यतः । जायन्ते योगिनो देहे तानि वक्ष्याम्यशेषतः । शरीरलघुता दीप्तिर्जठराग्निविवर्द्धनम् । कृशत्वञ्च शरीरस्य तस्य जायेत निश्चितम् । पूर्वोक्तकाले कुर्वीत परमाभ्यासमेव च । ततःपरं यथेष्टन्तु शक्तिः स्याद् वायुधारणे । यथेष्टधारणाद्वायोः सिद्धिः कुम्भस्य केवला । केवले कुम्भके सिद्धे रेचपूरकवर्जिते । न तस्य दुर्लभं किञ्चित् त्रिषु लोकेषु विद्यते" । [हेमच० ।

प्राणावाय न० प्राणेनावैति अव+इ अण् । क्रियाविशाले

प्राणासन न० "एतत् प्राणासनं नाम सर्वसिद्धिप्रदायकम् । वायुं मूले समारोप्य ध्यात्वाऽऽकुञ्चय प्रधारयेत् । केवलं पादमेकञ्च स्कन्धे चारोप्य यत्नतः । एकपादेन गगने तिष्ठेत् स दण्डवत् प्रभो ! । प्राणासनमेतद्धि सर्वेषां पूरकाश्रयम्" । कृत्वा स्कन्धयोर्वपुः समारोप्याथ वायुभिः । तदाश्रितो भवेत् मर्त्यः प्राणापानसमागमम् । प्राणासनयोगेन कृत्वा योगेश्वरो भुवि" रुद्रयामलोक्ते पूजाङ्गे आसनभेदे ।

प्राणाहुति स्त्री प्राणरूपेभ्योऽग्निभ्य आहुतिः । भोजनात् प्राक् अवश्यकर्त्तव्ये प्राणरूपाग्न्युद्देश्यकाहुतौ तत्प्रकारश्च आह्नि०त० दर्शितो यथा

छन्दोगपरिशिष्टे "प्राणेभ्यस्त्वथ पञ्चभ्यः स्वाहा प्रणवसंयुताः । पञ्चाहुतीस्तु जुहुयात् प्रणयाग्निनिभेषु च" । प्राणाहुतिमुद्रामाह शौनकः "तर्जनीमध्यमाङ्गुष्ठैर्लग्ना प्राणाहुतिर्भवेत् । मध्यमानामिकाङ्गुष्ठैरपाने जुहुयात्ततः । कनिष्ठानामिकाङ्गुष्ठैर्व्याने च जुहुयाद्धविः । तर्जनीन्तु बहिष्कृत्य उदाने जुहुयात्ततः । समाने सर्वहस्तेन समुदायाहुतिर्भवेत्" । स्मृत्यर्थसारे "प्राणाहुतौ ऋताभावे पश्चात् भुञ्जीत नो ऋतम्" अत्र पाठक्रमेण प्राणापानव्यानोदानसमानरूपेभ्य आहुतिरुक्ता । वैश्वानरविद्यस्तु छान्दो०उ०अन्यक्रम उक्तो यथा "तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं,स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहेति प्राणस्तृप्यति" । "अथ यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्यति" । "अथ यां तृतीयां जुहुयात्ता जुहुयादपानाय स्वाहेत्यपानस्तृप्यति" । "अथ यां चतुर्थीं जुहुयात्तां जुहुयात् समानाय स्वाहेति समानस्तृप्यति" । "अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति" ।

प्राणिद्यूत न० ६त० । समाह्वयाख्ये विवादपदभेदे अमरः । द्यूतशब्दे २७७१ पृ० दृश्यम् "एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये" याज्ञ० द्यूतधर्मोऽतिदिष्टः । [माल्ये ।

प्राणिन् नित्यम् त्रि०प्राणोऽस्त्यस्य इनि । जीवे चेतने जन्तु-

प्राणिमातृ स्त्री प्राणिनो मातेव । गर्भदात्रीक्षुपे राजनि० ।

प्राणिहित त्रि० ६त० । १प्राणिनो हितसाधने २पादुकायां स्त्री त्रिका० । [प्राणीत्य तन्नार्थे पाठान्तरम् ।

प्राणीत्य न० प्रणीतस्य प्रयुक्तस्य भावः ष्यञ् । ऋणे त्रिका०

प्राणेश पु० ६त० । १पत्यौ जटा० । २भार्य्यायां स्त्री हेमच० । ३वायौ पु० त्रिका० । प्राणेश्वरादयोऽप्यत्र ।

प्राण्यङ्ग न० ६त० । प्राणिनोऽङ्गे अवयवे हस्तपादादौ तत्र उपसर्जने "अङ्गं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् । अतत्स्थं तत्र दृष्टञ्च तेन तद्वत् तथा युतम्" इत्युक्तलक्षणस्वाङ्गरूपकत्वे असंयोगोपधत्वे ङीष् । तत्र क्रोडादिबह्वचो नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाणाम् पुच्छस्य च विशेषोक्तेः संयोगोपधत्वेऽपि ङीष् स्यात् ।

प्रातःकृत्य न० ७त० । शास्त्रविहिते प्रातःकर्त्तव्ये कर्मणि तच्च आचारशब्दे ६२२५ दर्शितम् । एवमन्यत्रापि यथायथं नानाशास्त्रे उक्तं दृश्यम् ।

प्रातःकाल पु० कर्म० । १प्रभातकाले "प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु" स्मृतिपरिभाषिते सूर्य्योदयावधि मुहूर्त्तत्रयमिते २काले च ।

प्रातःसन्ध्या स्त्री सन्ध्या भवः यत् सन्ध्या ७त० । १गतरात्रेरनन्तरं मुहूर्त्तात्मके भाविसूर्य्योदयस्य मध्यवर्त्तिनि २दण्डचतुष्टयात्मके वा काले "त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् । नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" ति०त० । सन्ध्या च ब्रह्मणो मनोजाता कन्या सा च वशिष्ठोपदेशेन तपः कृत्वा पूर्वप्रतिज्ञातस्वाम्नो शरीरत्यागस्य सम्पादनार्थं विष्णुवरेण पुरोडाशमयं देहमवाप्य मेधातिथियज्ञाग्नौ शरीरं जुहाव । तस्याः पूर्वार्द्धं प्रातःसन्ध्या । ३तस्याश्च तत्क्रिया कालिकापु० २२अ० यथा "तदा विष्णोः प्रसादेन सा विवेश विधेः कृता । वह्निस्थायाः शरीरं तद्गन्धा सूर्यं स मण्डले । सूक्ष्मं प्रवेश-

मास विष्णोरेवाज्ञया पुनः । द्वयोर्द्विधा विभज्याथ तच्छरीरं तदा रवे । स्थाने संस्थापयामास प्रीतये पितृदेवयोः । यदर्द्धभागस्तस्यास्तु शरीरस्य द्विजोत्तमाः ! । प्रातःसन्ध्याभवत् सा तु अहोरात्रान्तमध्यगा । यः शेषभागस्तस्यास्तु अहोरात्रान्तमध्यगः । स सायमभवत् सन्ध्या पितृप्रीतिप्रिया सदा । सूर्य्योदयाच्च प्रथमं यदा स्यादरुणोदयः । प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी । अस्तं गते ततः सूर्य्ये शोणपद्मनिभा सदा । उदेति सायंसन्ध्यापि पितॄणां मोदकारिणी" । उभौ काले उपास्या सन्ध्या ७त० । पूर्वसन्ध्याकाले उपास्यायां गायत्रीप्रतिपाद्यपरमेश्वररूपायां देवतायाञ्च यथोक्तं भरद्वाजस्मृतौ ७अ० यथा

"गायन्तं त्रायते यस्मात् गायत्रीति स्मृता ततः । प्राणा गया इति प्रोक्तास्त्रायते तानथापि वा । गायत्रीति भवेन्नाम केवलं त्रायतीति वा । व्याप्नुयात् प्राणिजिह्वासु सदा वाक्प्रवर्त्तनात् । सरस्वतीति नाम्ना च समाख्याता महर्षिभिः । सवितृप्रकाशकरणात् सावित्रीत्यभिधा भवेत् । जगतः प्रसवित्रीति हेतुनानेन वापि च । तस्मादियं सदोपास्या निशादिवसयोर्द्विजैः । गायत्री सन्धिवेलायां सैव सन्ध्येति कीर्त्तिता । यो जपेदनं ज्ञात्वा नश्यन्त्यंहांसि तत्क्षणात् । ऋषिश्छन्दो देवताश्च जपेत्तावान्विताः क्रमात् । ज्ञात्वा पदानि शुभाथ तुरीयं पादमव्ययम् । ब्रह्मणा याति तत्साम्य पदं ज्ञात्वा तुरीयकम् । या गायत्री त्रिचरणा सा त्रिमूर्त्तिस्वरूपिणी । उपास्यानन्तरं विप्रैस्त्रिसन्ध्यासु त्रिमूर्त्तिषु । तुरीयपादमेतस्या ज्ञात्वा योपास्तिमाचरेत् । स रत्नपूर्णां पृथिवीं स्वल्पचो दोषभाग्भवेत् । ब्रह्मकेशवरुद्रादिदेवताभिरुपासिता । सन्ध्यान्तां कोन सेवेत विप्रः स्यादभिलाषुकः । प्रातः सतारकां सन्ध्यां सायं सन्ध्यां सभास्कराम् । स्नानकर्मणि तन्मध्यामुपासीत यथाविधि । प्रातरेवमुपास्यैव प्रकुर्य्यात् हवनं जपम् । स्नानस्थानान्तरं कुर्य्यात् तर्पणञ्च महाक्रतून् । सायं सन्ध्यामुपासीत होमं कुर्व्वीत शासनात् । सन्ध्योपासनहीनो यो न योग्यः सर्व्वकर्मसु । तस्मादुपास्य विधिना सन्ध्यामन्याःक्रियाश्चरेत् । नोपासयेद्द्विजः सन्ध्यां योऽसौ शूद्रत्वमाप्नुयात् । कर्म्माण्यन्यानि संत्यज्य सन्ध्यां यः केवलं द्विजः । उपास्ते, सर्व्वपुण्यानि कृतवान् स भवेद्ध्रुवम् । सन्ध्योपास्तिं विना विप्रः पुण्यान्यन्यानि चाचरेत् । यस्तस्य तानि पापानि भवन्त्येव न संशयः । नाशयेत् जन्मजनितं पापं दशजपादतु । पुराकृतं शतजपात् त्वसन्ध्यास्तु द्विजन्मनः । कृतं युगेऽपि चैकस्मिन् सहस्रेण जपेन तु । सहस्रता अपतस्त्वाप्नायत्नीं सर्व्वदा जपेत् । समस्तसप्ततन्तुभ्यो जपयज्ञः परं स्मृतः । हिंसया ते प्रवर्त्तन्ते जपयज्ञो न हिंसया । यावन्तः कर्म्मयज्ञाश्च दानानि च तपांसि च । ते सर्व्वे जपयज्ञस्य कलां नार्हन्ति षोडशीम् । जपेन देवता नित्यं स्तूयमाना प्रसीदति । प्रसन्ना विपुलान् भोगान् दद्यान्मुक्तिञ्च शाश्वतीम् । यक्षराक्षसवेतालप्रेतभूतपिशाचकाः । जपाश्रयं द्विजं दृष्ट्वा दूरन्ते यान्ति भीतितः । तस्माज्जपः सदा श्रेष्ठः सर्व्वस्मात् पुण्यसाधनात् । इत्येवं सर्व्वथा ज्ञात्वा विप्रो जपपरो भवेत् । एवं जपपरः सन्ध्यां भक्त्योपासीत यो द्विजः । नियमेन सदा गच्छेदपि स्वं नात्र संशयः । तस्माज्जितेन्द्रियो नित्यं सन्ध्योपास्तिं समाचरेत् । स सर्व्वलोकान् जित्वाऽथ विप्रः स्ववशमानयेत् । तदन्ते ब्रह्मभावेन यावदाभूतसंप्लवम् । ताश्चित्यो निरातङ्को भवेदत्र न संशयः । एवं सन्ध्याविधिं सर्व्वं यो विप्रोऽध्यापयेत् द्विजः । अध्यापको यथावस्थः श्रोता चैकाग्रमानसः । स सर्व्वपापनिर्म्मुक्तः सर्व्वविद्याविशारदः । अथ धान्यधनोपेतो जीवेद्वर्षशतं सुखी । एतद्विधानं योऽधीत्य श्रावयेत् ब्राह्मणोत्तमान् । प्रीतिपूर्व्वं प्रयत्नेन ब्राह्मणो नियमेन च । अज्ञानेन प्रमादेन दुरितं यत् समुत्थितम् । तस्य तत् सकलं नाशं व्रजेदत्र न संशयः । याः सन्ध्योपास्तयस्तस्तो यस्य स्नानं विधीयते । पर्व्वणि श्रावणी यस्य तत् सर्व्वं पूर्णतामियात् । कामान्मोहाच्च लोभाच्च सन्ध्यां नातिक्रमेद् द्विजः । सन्ध्यातिक्रमणाद्विप्रो ब्राह्मण्याच्च्यवते यतः । अनागतां तु ये पूर्व्वामनतीताञ्च पश्चिमाम् । सन्ध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः ? । सायं प्रातः सदा सन्ध्यां ये न विप्रा उपासते । कामन्तान् धार्म्मिको राजा शूद्रकर्म्मसु योजयेत् । विधानमेतन्नो देयं रहस्यं यस्य कस्यचित् । वेदाध्यायाभिजाताय प्रदेयं स द्विजन्मने" । ब्राह्मणस० योगियाज्ञवल्क्यः "अतःपरं प्रवक्ष्यामि सन्ध्योपासनमुत्तमम् । अहोरात्रकृतैः पापैर्य्यामुपास्य प्रमुच्यते" । तथा "यावन्तोऽस्यां पृथिव्यां हि विकर्म्मस्थास्तु वै द्विजाः । तेषां वै पावनार्थाय सन्ध्यां सृष्टां स्वयम्भुवा । या सन्ध्या सा तु गायत्री

द्विधा भूता प्रतिष्ठिता"। तथा "सा सत्यं कर्म विप्राणामहोरात्रकृतस्य तु। पापापमुक्तये यस्मात् तस्मान्नित्यं समाचरेत्" यमः "सन्ध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्"। शातातपः "अनृतं मद्यगन्धञ्च दिवामैथुनमेव च। पुनाति वृषलस्यान्नं बहिः सन्ध्या ह्युपासिता"। याज्ञवल्क्यः "निशायां वा दिवा वापि यदज्ञानकृतं भवेत्। त्रिकालसन्ध्याचरणात् तत्सर्वं विप्रणश्यति"। देवलः "सायं प्रातः सदा सन्ध्यामुपासीत शुचिर्बहिः"। विष्णुपु० "सर्वकालमुपस्थानं सन्ध्यायां पार्थिवेष्यते। अन्यत्र सूतकाशौचविभ्रमातुरभीतितः"। योगियाज्ञवल्क्यः "सर्वावस्थोऽपि यो विप्रः सन्ध्योपासनतत्परः। ब्राह्मण्यान्न स हीयेत अन्यलक्ष्मगतोऽपि सन्। सन्ध्या तूपासिता येन तेन विष्णुरुपासितः। दीर्घमायुः स विन्देत सर्वपापैः प्रमुच्यते"। तथा "सायं प्रातस्तु यः सन्ध्यां सम्यक् चापर्युपासते। जपन्नेव पावनीं देवीं सावित्रीं लोकमातरम्। स तया पावितो देव्या ब्राह्मणो धूतकिल्बिषः। न सीदेत् प्रतिगृह्णानोऽपि पृथ्वीं ससागराम्"। कूर्मपुराणे मुनय ऊचुः "कथं मुने! दिवं याति ब्राह्मणो धूतकिल्बिषः। अनन्यको हि नो ब्रूहि यदुक्तं वह्निना पुरा" सूत उवाच "सायं प्रातश्च यः सन्ध्यामुपास्तेऽनुसमाहितः। जपते पावनीं देवीं गायत्रीं वेदमातरम्। तया स भावितो देव्या ब्राह्मणः धूतकिल्बिषः। न सीदेत् प्रतिगृह्णानः पृथिवीञ्च ससागराम्। ये चान्ये दारुणाः केचिद्ग्रहाः सूर्य्यादयो दिवि। ते चास्य सौम्यतां यान्ति शिवाः शिवतरास्तथा। यत्र तत्र गतश्चैनं दारुणाः पिशिताशनाः। घोररूपा महाकायाः प्रभवन्ति न राक्षसाः। यावन्तश्च पृथिव्यां हि चीर्णवेदव्रता द्विजाः। अचीर्णव्रतवेदा वा विकर्मपथमाश्रिताः। तेषान्तु पावनार्थाय गायत्री नित्यमेव हि। द्वे सन्ध्ये ह्युपतिष्ठेत तदर्थं महाव्रतम्"। तथा "द्वे सन्ध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः। यत्तस्य दुष्कृति नास्ति पूर्वतः परतोऽपि वा। एवं किल्बिषयुक्तो हि विनिर्दहति पातकम्। उभे सन्ध्ये ह्युपासीत तस्मान्नित्यं द्विजोत्तमः"। तथा "सन्ध्या येन न विज्ञाता सन्ध्या नैवाप्युपासिता। जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते"। मनुः "न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम्। स साधुभिर्बहिष्कार्यः सर्वस्माद् द्विजकर्मणः"। व्यासः "बहिः सन्ध्या दशगुणा गोष्ठप्रस्रवणादिषु। स्नाते तीर्थे दशगुणा साहस्री जाह्नवीजले"। बहिरिति अनाच्छादितस्थाने प्राङ्गणादौ। शातातपः "गृहेषु प्राकृती सन्ध्या गोष्ठे शतगुणा स्मृता। नदीषु शतसाहस्रा अनन्ता शिवसन्निधौ"। गृहेषु गृहवीथ्यादौ। योगियाज्ञवल्क्यः "सन्ध्यां सन्ध्यामुपासीत नास्तगे नोद्गते रवौ। सन्ध्यात्रयन्तु कर्त्तव्यं द्विजेनात्मविदा सदा"। संवर्त्तः "प्रातःसन्ध्यां सनक्षत्रामुपासीत यथाविधि। सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्कराम्"। नरसिंहपुराणे "पूर्वां सन्ध्यां सनक्षत्रामुपक्रम्य यथाविधि। गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनम्"। मनुः "ऋषयो दीर्घसन्ध्यत्वात् दीर्घमायुरवाप्नुयुः। प्रज्ञां यशश्च कीर्त्तिञ्च ब्रह्मवर्चसमेव च। उपास्ते यस्तु नो सन्ध्यां ब्राह्मणो हि विशेषतः। स जीवन्नेव शूद्रः स्यान्मृतः श्वा चाभिधीयते"। तथा "सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। यदन्यत् कुरुते किञ्चित् न तस्य फलभाग् भवेत्"। यमः "अनागतान्तु ये पूर्वामतीतां चापि पश्चिमाम्। ये विप्रा नानुतिष्ठन्ति सन्ध्यां ते वृषलाः स्मृताः"। छन्दोगपरिशिष्टे कात्यायनः "सन्ध्यां होमाद्यकर्त्ता स्नानदानस्य यः सदा। तं दोषा नोपसर्पन्ति वैनतेयमिवोरगाः" तथा "एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम्। यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते"। कूर्मपुराणे "न तिष्ठति तु यः पूर्वां नोपास्ते यस्तु पश्चिमाम्। स शूद्रेण समो लोके सर्वधर्मविवर्जितः"। सत्यव्रते सन्ध्यायन्दनाकरणे प्रायश्चित्तमाह। व्यासः "आदित्योऽभ्युदियाद्यस्य सन्ध्योपासनमकुर्वतः। स्नात्वा प्राणांस्त्रिरायम्य गायत्र्यष्टशतं जपेत्" पारिजाते तु "कालातिक्रमणे चैव चतुर्थ्यार्घ्यं प्रदापयेत्" इत्युक्तम्। मलमासतत्त्वे तु "कालातीता वृथा सन्ध्या वन्ध्यस्त्रीमैथुने यथा। गायत्रीं दशधा जप्त्वा पुनःसन्ध्यां समाचरेत्" काशीखण्डोक्तं प्रायश्चित्तान्तरमुक्तम्। अत्र यथाचारं व्यवस्था। सङ्गवपर्य्यन्तप्रातः सन्ध्याया गौणकालः आप्रदोषावसानं सायंसन्ध्यायाः इति मदनः। "उदयास्तमयादूर्द्ध्वं यावत् स्याद्घटिकात्रयम्। तावत् सन्ध्यामुपासीत प्रायश्चित्तमतःपरम्" इति स्कान्दे विशेष उक्तः। मध्याह्ने तु दक्षः "आध्यर्द्धयामादावाद्धं सन्ध्या माध्याह्निकीष्यते। अर्घ्यप्रदानतः पूर्वमुदयास्तमयेऽपि वा। गायत्र्यष्टशतं जप्यं प्रायश्चित्तं द्विजा-

तिभिः” इति। गौणकालेऽप्यसम्भवे यमः “दिवोदितानि कर्माणि प्रमादादकृतानि चेत्। शर्वर्य्याः प्रथमे यामे तावत् कुर्य्याद्यथाक्रमम्”। अत्र मुख्यकालानुरोधात् सायंसन्ध्योपासनं पूर्वं कृत्वा “आगन्तूनामन्ते निवेशः” इति न्यायेनातीतकालं कर्म पश्चात् कार्य्यमिति न्यायतः प्राप्तं तस्य निषेधार्थं यथाक्रममिति वचनमिति। “दिवोदितानि कर्माणि प्रागुक्तान्तराणि च। दिवोदितानि कृत्वैव विदध्यादुत्तराणि तु” मदनपारिजाते वसिष्ठोक्तेः। सूतके विशेषः सूतके इत्यनुवृत्तौ “अवगाहं ब्रह्मयज्ञं वीरजप्यञ्च वर्जयेत्” इति “स्नानं सन्ध्यां त्यजन् विप्रः सप्ताहाच्छूद्रतां व्रजेत्। तस्मात् स्नानञ्च सन्ध्याञ्च सूतकेऽपि न सन्त्यजेत्। सूतके मृतके चैव सन्ध्याकर्म समाचरेत्। मनसोच्चारयेन्मन्त्रान् प्राणायाममृते द्विजः” इत्यनयोरविरोधाय न मानससन्ध्यानिषेध इति कल्प्यम्। किन्तु प्राणायाममन्त्रा मनसापि नोच्चार्य्या इत्यर्थः। पैठिनसिस्तु “सूतके सावित्र्याञ्जलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्य्यं ध्यायन्नमस्कुर्य्यात्” इत्यर्घ्यदानान्तां सन्ध्यामाह। अन्ये तु उच्चार्य्य वाचा गायत्रीं दद्यादर्घ्याञ्जलीनपि। अष्टाविंशतिकृत्वोऽत्र गायत्रीं मनसा जपेत्” इति गायत्रीजपमप्याहुः। “सूतके कर्मणान्त्यागः सन्ध्यादीनां विधीयते” इति यद्यपि सन्ध्यायानिवृत्तिः श्रूयते तथाप्यञ्जलिप्रक्षेपादिकं कार्य्यम्। “सूतके सावित्र्या चाञ्जलिमञ्जलिप्य प्रदक्षिणं कृत्वा सूर्य्यं ध्यायन्नमस्कुर्य्यादिति” पैठिनसिस्मरणात् इति मिताक्षरा सन्ध्यादीनामप्यपवादमाहापरार्के पुलस्त्यः “सन्ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्। न त्यजेत् सूतके वापि त्यजन् गच्छेदधो द्विजः। सूतके मृतके चैव सन्ध्याकर्म समाचरेत्। मनसोच्चारयेन्मन्त्रान् प्राणायाममृते द्विजः” ?। यत्तु चन्द्रिकायां जाबालः “सन्ध्यां पञ्च महायज्ञान् नैत्यिकं स्मृतिकर्म च। तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया” यच्च संवर्त्तः “सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते” यच्च विष्णु पु० “सर्वकामसमृद्ध्या तु सन्ध्ययोः पार्थिवेष्यते। अन्यत्र सूतकाशौचविभ्रमातुरभीतितः” इति। तत् संपूर्णसन्ध्यानिषेधपरम्। “अप्यन्ता मानसी सन्ध्या कुशवारिविवर्जिता” इति शुद्धिदीपे व्यासोक्तेः। पैठीनसिस्त्वत्र मन्त्रोच्चारणमप्याह” सूतके सावित्र्याञ्जलिं प्रक्षिप्य सूर्य्यं ध्यायन्नमस्कुर्य्यात्”। प्रयोगपारिजाते भरद्वाजोऽपि “सूतके मृतके कुर्य्यात् प्राणायाममन्त्रकम्। तथा मार्जनमन्त्रांस्तु मनसोच्चार्य मार्जयेत्। गायत्रीं सम्यगुच्चार्य्य सूर्य्यार्घ्यं निवेदयेत्। मार्जनं तु न वा कार्य्यमुपस्थानं न चैव हि”। इत्येवं मिताक्षरापारिजातादौ अशौचे सन्ध्याकरणविशेषस्योक्तेः गौड़ानां तदनाचरणमनाचार एव तस्य शीतत्वेन स्मृत्या बाधानुचितत्वादपि मिताक्षराद्युक्तं युक्तमिति द्रष्टव्यम्।

प्रातःसवन न० सवनं यज्ञाङ्गकर्मभेदः सोमाभिषवादि प्रातःकर्त्तव्यम् सवनम्। प्रातःकर्त्तव्ये यज्ञाङ्गकर्मभेदे। अच् प्रातःसव तत्रार्थे पु०।

प्रातःस्नान ७त०। प्रातःकर्त्तव्ये जलावगाहनादिरूपे स्नाने तस्य कर्माङ्गताद्युक्तं गरुड़पु० “उषः काले तु संप्राप्ते कृत्वा चावश्यकं बुधः। स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि। प्रातःस्नानेन पूयन्ते येऽपि पापकृतो जनाः। तस्मात् सर्वप्रयत्नेन प्रातःस्नानं समाचरेत्। प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टशुभं हि तत्। सुखसुप्तस्य सततं लालाद्याः संस्रवन्ति हि। अतो नैवाचरेत् कर्माण्यकृत्वा स्नानमादितः। अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिन्तितम्। प्रातःस्नानेन पापानि धूयन्ते नात्र संशयः। न च स्नानं विना पुंसां प्राशस्त्यं कर्म संस्मृतम्। होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत्। अशक्तावशिरस्कन्तु स्नानमस्य विधीयते”।

प्रातःस्मरणीय त्रि० ७त०। प्रातःकीर्त्तनीये देवादौ पुण्यचरिते। प्रभातशब्दे ४४७५ पृ० दृश्यम्।

प्रातर् अव्य० प्र+अत–अर। १प्रभाते अमरः “प्रातःकाले मुहूर्त्तां स्त्रीनि”ति स्मृत्युक्ते २सूर्य्योदयावधित्रिमुहूर्त्तकाले च

प्रातर त्रि०प्रकृष्ट आतरो यत्र। प्रकृष्टातरणपतरणयुक्ते देशे ततः कृशाश्वा० चतुरर्थ्यां छण्। प्रातरीय तत्सादूरदेशादौ त्रि०।

प्रातरचक पु० सर्पभेदे भा०आ० ५७अ०।

प्रातरनुवाक पु० प्रातःपाठ्ये अनुवाके वेदांशभेदे यत्रे “प्रातरनुवाकं चापदुपासीत” कात्या० श्रौ० ९।१।१८ “पुरा प्रातरनुवाकस्य” का०उ० “प्रातरनुवाकस्य प्रारम्भात्” भा० “अप्रगीतमृग्जातं शस्त्रं यत प्रातःकाले शस्यते प्रातरनुवाकस्तस्येति यावत्” आनन्द०। [त्रिका०

प्रातराश पु० अश+भावे घञ् ७त०। प्रातःकालिके भोजने

प्रातर्गेय पु० प्रातर्गेयमस्य। १स्तुतिपाठके त्रिका० २प्रातःकाले गातव्ये सामादौ च त्रि०।

प्रातर्दिन न॰ कर्म॰ । पूर्ववर्त्तिनि दिवसे त्रिकाण्डशेषः ।

प्रातर्भोक्तृ पु॰ ७त॰ । काके शब्दच॰ ।

प्रातर्भोजन न॰ ७त॰ । प्रातराशे जटाध॰ ।

प्रातस्तरा(मा)म् अव्य॰ प्रातर्+तरप् तमप् वा आमु । अत्यन्तप्रातःकाले "प्रातस्तरां पतत्रिभ्यः" भट्टिः ।

प्रातस्त्रिवर्गा स्त्री प्रातः प्रातःस्नानेन त्रिवर्गो यस्याः । गङ्गायां भा॰अनु॰ २६अ॰ ।

प्राति स्त्री प्रा+भावे क्तिन् । १पूर्त्तौ २लाभे च मेदि॰ ।

प्रातिकण्ठिक त्रि॰ प्रतिकण्ठं गृह्णाति प्रतिकण्ठ+ठक् । प्रतिकण्ठग्राहके ।

प्रातिका स्त्री प्र+अत–ण्वुल् टाप् । जवापुष्पे राजनि॰ ।

प्रातिकामिन् दुर्य्योधनस्य दूतभेदे भा॰भी॰ ६५अ॰ ।

प्रातिकूलिक त्रि॰प्रतिकूलं वर्त्तते प्रतिकूल+ठञ् । प्रतिकूलं वर्त्तमाने स्त्रियां ङीप् "तां प्रातिकूलिकीं मत्वा" भट्टिः

प्रातिक्य न॰ प्रतिकस्य भावः पुरोहिता॰ यक् । प्रतिकभावे

प्रातिजनीन त्रि॰ प्रतिजनं साधु प्रतिजना॰ खञ् । प्रतिजनं साधौ । कात्या॰श्रौ॰२५।१२।४

प्रातिनिधिक पु॰ प्रतिनिधि+स्वार्थे ठक् । प्रतिनिधौ

प्रातिपथिक त्रि॰प्रतिपथमेति ठञ् । प्रतिपथं गन्तरि स्त्रियां ङीप् । [तिथौ भवे ।

प्रातिपद त्रि॰ प्रतिपदि भवः सन्धिवेला॰ अण् । प्रतिपदि-

प्रातिपदिक त्रि॰ प्रतिपदायां तिथौ भवः "कालाट् ठञ्" पा॰ठञ् । १प्रतिपदायां तिथौ भवे २तत्राविर्भूते वह्नौ पु॰ "आदौ प्रतिपदा येन त्वमुत्पन्नोऽसि पावक ! । त्वत्पदात् प्रातिपदिकं संभविष्यन्ति देवताः" वराहपु॰ । ३नाम्नि शब्दभेदे "यत् प्रातिपदिकं नाम तन्नाम्नो नातिरिच्यते" शब्दच॰। तल्लक्षणन्तु "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" "कृत्तद्धितसमासाश्च" पा॰व्याख्याते चैते सरलायामस्माभिः "अधातुरप्रत्यय इति प्रसज्यनिर्देशस्तु परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरित्यभिधानात् । एतत्सूत्रे परसूत्रे चार्थवत्त्वमेतत्सूत्रफलीभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थबोधजनकत्वम् अन्यथाऽधातुरिति पर्युदासेन व्याख्यानाद्धाऽर्थवत्त्वे सादृश्यग्रहणेन सिद्धे उत्तरसूत्रे कृदादीनामनर्थकानामसिद्धेर्थार्थवत्त्वग्रहणं व्यर्थं स्यात् । अहन्निति धातौ कार्ये इत्यादि प्रत्ययान्ते च एतत्साध्यविभक्त्यनपेक्षत्वेऽपि तदितरानपेक्षत्वत्वेऽपि अधातुरप्रत्यय इति तत्पर्युदासः । एकदेशवर्णेऽर्थबोधजनकत्वाभावाच्चातिप्रसङ्गः । अत्र प्रत्ययपदं प्रत्ययप्रत्ययान्तपरं तन्त्रावृत्त्येकशेषैरुभयग्रहणादित्याह (प्रत्ययं प्रत्ययान्तस्येति) सि॰कौ॰)। अतएव भाष्ये "न लोके केवलेन प्रत्ययेनार्थोऽवगम्यते केन तर्हि सप्रकृतिकेन" इत्युक्तम् हरिणाप्युक्तम् । "धात्वादीनां विशुद्धानां लौकिकार्थो न विद्यते । कृत्तद्धितानामर्थश्च केवलानामलौकिकः । प्राग्विभक्तेस्तदन्तस्य तथैवार्थो न विद्यते" इति । भू सत्तायामित्यादौ कर्मण्यणित्यादौ चार्थकथनन्तु अलौकिकार्थकथनमात्रं प्रक्रियादशायामिति वेदितव्यम् "ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले । देवदत्तादयो वाक्ये तथैव स्युर्निरर्थकाः" इत्युक्तेरखण्डवाक्यस्यापि बोधकत्वात्तस्यापि प्रातिपदिकत्वापत्त्या तदुत्तरं स्वादिप्रसङ्ग इति तन्निवारणायेदं नियमसूत्रमित्याह "पूर्वसूत्रे चेति" सि॰कौ॰। प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणमिति न्यायादेव प्रत्ययान्तत्वलाभात् कृत्तद्धितादीनामपि प्रत्ययत्वात् पूर्वसूत्रेण संज्ञासिद्धेरिति भावः । पदमिति स्वातन्त्र्येण प्रयोगार्हमर्थवदित्यर्थः । अनुकरणस्य शब्दमात्रपरतया न प्रातिपदिकत्वमनुकरणस्यानितिपरस्य प्रयोगासत्त्वेऽपि इतिपरस्य पृथक् प्रयोगार्हत्वादिति गविस्त्वयमाहेत्यादौ न प्रसङ्गः" हरिणाप्युक्तम् । अतएव "गवित्याह भू सत्तायामितीदृशम् । न प्रातिपदिकं नापि पदं साधु तु तत् स्मृतम्" । प्रातिपदिकार्थो द्योत्ये प्रथमैव । तदर्थश्च नामार्थाः "स्वार्थो द्रव्यञ्च लिङ्गञ्च संख्या कर्मादिरेव च । अमी पञ्चैव नामार्थास्त्रयः केषाञ्चिदग्रिमाः" इत्युक्ताः । तत्र अलिङ्गा, नियतलिङ्गाश्च प्रातिपदिकार्थे प्रथमाया उदाहरणम्" सि॰ कौ॰ ।

प्रातिपीय पु॰ १नृपभेदे भा॰द्रो॰१५७अ॰। २गोत्रप्रवरर्षिभेदे च प्रवराध्यायः ।

प्रातिपेय पु॰ नृपभेदे भा॰स॰ ६८अ॰ ।

प्रातिभ त्रि॰ प्रतिभाऽस्त्यस्य प्रज्ञा॰ अण् । १प्रतिभान्विते योगिनां योगविघ्नकारके २उपसर्गभेदे मार्कण्डेयपु॰ ४०अ॰ यथा "प्रातिभः श्रावणो दैवो भ्रमावर्त्तौ तथापरौ । पञ्चैते योगिनां योगविघ्नाय कटुकोदयाः । वेदार्थाः काव्यशास्त्रार्थाः विद्याः शिल्पान्यशेषतः । प्रतिभान्ति यदस्येति प्रातिभः१ स तु योगिनः । शब्दार्थानखिलान् वेत्ति शब्दं गृह्णाति चैव यत् । योजनानां सहस्रेभ्यः श्रावणः२ सोऽभिधीयते । समन्ताद्वीक्षते चाष्टौ स यदा देवतोपमः । उपसर्गन्तमप्याहुर्दैवंशुम्भत्तवद् बुधाः । भ्राम्यते यन्निरालम्बं मनो दोषेण योगिनः । समस्ता-

चारविभ्रंशाद् भ्रमः४ स परिकीर्त्तितः। आवर्त्त इव तोयस्य ज्ञानावर्त्तो यदाकुलः। नाशयेच्चित्तमावर्त्तं५ उपसर्गः स उच्यते। एतेनाभिहितयोगास्तु सकला देवयोनयः। उपसर्गैर्महाघोरैरावर्त्तन्ते पुनःपुनः"।

प्रातिभाव्य न० प्रतिभुवो भावः ष्यञ् द्विपदवृद्धिः। (जामिनि) १प्रतिभूभावे प्रतिभूत्वेन देये २धने च मनुः ८।१५९ दर्शनप्रतिभूशब्दे २४७५ पृ० दृश्यम्।

प्रातिभासिक त्रि० प्रतिभासादागतः ठक्। प्रतिभासाधीनसत्त्ववति मिथ्यारजतादौ वेदान्तमते हि सत्त्वं त्रिविधं पारमार्थिकं व्यवहारिकं प्रातिभासिकं च तत्र ब्रह्मणः सत्त्वं पारमार्थिकं त्रिकालाबाध्यत्वात्, घटादीनां सत्त्वं व्यवहारिकं व्यवहारकालेऽबाध्यत्वात्, शुक्तौ रजतादेः सत्त्वं प्रातिभासिकम् अधिष्ठानज्ञानबाध्यत्वात् प्रतिभासकालमात्रसत्त्वाच्चेति वेदान्तपरिभाषायां स्थितम्।

प्रातिशाख्य त्रि० प्रतिशाखं भवः परिमुखा० ञ्य। प्रतिशाखं भवे व्याकरणभेदे न०।

प्रातिश्रुत्क पु० प्रतिश्रुति तच्छब्दे भवः ठञ्। प्रतिश्रवणवेलायां भवे पुरुषे "यत्र वायं श्रौत्रः प्रातिश्रुत्कः पुरुषः" शु० उ०। [२प्रतिव्यक्तिभवे च।

प्रातिस्विक त्रि०प्रतिस्वं भवः ठक्। १असाधारणधर्मे त्रिका०।

प्रातिहर्त्र न० प्रतिहर्त्तुर्भावः कर्म वा उद्गात्रा० अञ्। प्रतिहर्त्तृरूपस्य ऋत्विग्भेदस्य कर्मणि १प्रतिहरणे २तद्भावे च।

प्रातिहारक पु० प्रतिहारक एव स्वार्थे अण्। प्रतिहारकशब्दार्थे अमरः। [कारके अमरः।

प्रातिहारिक त्रि० प्रतिहारः प्रयोजनमस्य ठक्। माया-

प्रातीतिक त्रि०प्रतीत्या निर्वृत्तः ठञ्। प्रातिभासिके पदार्थे

प्रातीप प्रतीपस्यायम् अण्। प्रतीपनृपस्यापत्ये शान्तनौ नृपे त्रिका०। [कुहकाचारिणि।

प्रातीपिक त्रि० प्रतीपं वर्त्तते ठञ्। प्रतीपं वर्त्तमाने प्रति-

प्रात्रद पु० ऋषिभेदे शत०ब्रा० १४।८।१।२

प्रात्ययिक त्रि० प्रत्ययाय स्थितः ठक्। प्रतिभूभेदे "दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा" याज्ञ०। दर्शनप्रतिभूशब्दे २४७८ पृ०दृश्यम्।

प्राथमकल्पिक त्रि० प्रथमकल्पे भवः ठक्। १प्रथमारम्भोचिते वेदाध्ययनादौ। प्रथमं कल्पमधीते कल्पान्तत्वात् ठक्। २प्रथमकल्परूपविद्यापन्नाध्यायिनि अमरः।

प्राथमिक त्रि० प्रथमे भवः ठञ्। १प्रथमभवे स्त्रियां ङीप्। प्रथममधीते प्रथम+ठक्। वेदादेः २प्रथमाध्येतरि च।

प्रादि पु० उपसर्गसंज्ञार्थं पा०उक्ते शब्दभेदे स च गणः पा० ग०उक्तो यथा "प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत्(द्) अभि प्रति परि उप" इते प्रादयः। निस् दुस् सान्तौ "निसस्तपतावनासेवने इति (८।३।१२०) सूत्रे निस इति निर्द्देशात् निष्कृतं दुष्कृतमित्युदाहृत्य "इदुदुपधस्य यो विसर्जनीयः" इति भाष्योक्तेश्च। निरः कुषः इति (७।२।४६) "दुरोरधिकरणे" इति च निर्द्देशात् रान्तावपि मनो०। उदिति दान्तोऽपि "उदोऽनूर्द्ध्वचेष्टायामिति"।
"उपसर्गाः क्रियायोगे" पा० "गतिश्च" पा० प्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः" सि०कौ०।

प्रादुराक्षि पु० गोत्रप्रवर्त्तकर्षिभेदे प्रवराध्यायः।

प्रादुर्भाव पु० प्रादुस्+भू—भावे घञ्। आविर्भावे प्रथमप्रकाशे

प्रादुस् अव्य० प्र+अद्—उसि। प्राकाश्ये अमरः। अस्य क्रियायोगे गतिसंज्ञा प्रादुष्कृत्य प्रादुर्भूय। स्वार्थे वुन् न द्वि० बोधः प्रादुष्क प्रादुर्भावे न० उज्ज्वलदत्तः।

प्रादेश पु० प्र+दिश—घञ् दीर्घः। १तर्जनीसहितविस्तृताङ्गुष्ठे अमरः २देशमात्रे मेदि० "अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते" इत्युक्ते ३परिमाणभेदे च देवीपु०।

प्रादेशन न० प्र+आ+दिश—ल्युट्। दाने अमरः।

प्रादेशिक त्रि० प्रदेशे भवः ठक्। प्रदेशभवे [स्त्रियां ङीप्।

प्रादोष(षि)क त्रि० प्रदोषे भवः वा अण्ठञौ। प्रदोषभवे

प्रादोहनि पु०स्त्री प्रदोहनस्यापत्यम् इञ्। तदपत्ये। ततः यूनि फञ् तौल्व० तस्य न लुक्। प्रादोहनायनि तदीये यून्यपत्ये पुंस्त्री०। [करणे भाग०३।८।२१।

प्राधनिक त्रि० प्रधनं संग्रामः प्रयोजनमस्य ठक्। युद्धोप-

प्राधा स्त्री प्रधैव स्वार्थे अण्। दक्षकन्याभेदे काश्यपकलत्रभेदे हरिवं०२२६अ०। तस्याः अपत्यं ढक्। प्राधेय तदपत्ये पुंस्त्री० तदपत्यानि च देवगन्धर्वादयः भा०आ०६५ अ०। अग्निपुराणे प्राधेया इत्येव पाठः शब्दकल्पद्रुमे प्राधेय शब्दकल्पनं लिपिकरप्रमादकृतपाठदर्शनात् इति बोध्यम्।

प्राधानिक त्रि० प्रधान+स्वार्थे ठक् तस्येदं ठक् वा। १प्रधानशब्दार्थे २प्रधानसम्बन्धिनि च "प्राधानिकरहस्य" इत्यादि देवीमाहात्म्यव्याख्यायां गुप्तवत्यां स्थितम्।

प्राधान्य न० प्रधानस्य भावः ष्यञ्। त्वतले। भावे त्वप्रधानत्व न० तल् प्रधानता स्त्री तत्रार्थे। "अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता" शाब्दिककारिका।

प्राध्व त्रि॰ प्रकृष्टोऽध्वा अच्समा॰। १दूरपथे २प्रह्वे नम्रे ३बद्धे च हेमच॰ व॰ची॰। ४बहुदूरगामिनि रथादौ च।

प्राध्वम् अव्य॰ प्र+आ+ध्वन–डमि.। १आनुकूल्ये २बन्धने ३नम्रतायाञ्च अमरः।

प्रान्त पु॰ प्रकृष्टोऽन्तः। १शेषसीमायाम् हेमच॰। २ऋषिभेदे पु॰। ततः गोत्रापत्ये कण्वा॰ फञ्। प्रान्तायन तदपत्ये पुंस्त्री॰। [शब्दार्थक॰।

प्रान्तदुर्ग न॰ प्रान्ते दुर्गं न्तृपाश्रयस्थानभेदः। दुर्गभेदे

प्रान्तर न॰ प्रकृष्टमन्तरं व्यवधानं यत्र। १दूरगम्ये पथि। १२वृक्षादिच्छायाशून्ये पथि ३वने ४कोटरे च मेदि॰।

प्रान्तशून्य पु॰ प्रान्ते शून्यमस्य। छायादिरहिते पथि शब्दर॰

प्रापणिक पु॰ प्र+आ+पण–"प्राङि पणिश्चः" उणा॰ किकन्। पण्यविक्रेतरि उज्ज्वलद॰।

प्राप्त त्रि॰प्र+आप–कर्मणि कर्त्तरि वा क्त। १लब्धे २आसादिते ३भूते अमरः। ४उपस्थिते च।

प्राप्तकाल पु॰ प्राप्तः कालोऽस्य। करणयोग्ये काले १।१। १२२ पा॰ सूत्रे दृश्यम्।

प्राप्तपञ्चत्व त्रि॰ प्राप्तं पञ्चत्वं मरणं येन। मृते अमरः। मरणे देहस्य पञ्चभूतात्मकताप्राप्तेस्तस्य तथात्वम्। प्रेतशब्दे दृश्यम्। [हमाद्रौ शब्दरत्ना॰।

प्राप्तभार पु॰ प्राप्तः भारः तद्वहनकालोऽस्य। भारसह·

प्राप्तरूप त्रि॰ प्राप्तं रूपं येन। १मनोहरे २पण्डिते अमरः। ३बुधवति च।

प्राप्ति स्त्री प्र+आप–भावे क्तिन्। १उदये २धनादिवृद्धौ ३लाभे च अमरः। ४प्रापणे ५संहतौ शब्दरत्ना॰ अणिमाद्यष्टविधैश्वर्य्यमध्ये ६ऐश्वर्य्यभेदे ऐश्वर्य्यशब्दे दृश्यम्। बार्हद्रथजरासन्धपत्नीभेदे ७अंशकलत्रभेदे भा॰स॰ १४८॰। हरिवं॰ ८१अ॰ "अप्राप्तस्यैव या प्राप्तिः सैव संयोग उच्यते" भाषा॰ उक्ते ८संयोगस्वरूपे द्रव्यगुणभेदे च। सा॰द॰उक्ते ९सन्ध्यङ्गभेदे "युक्तिः प्राप्तिः समाधानमिति" सन्ध्यङ्गान्युद्दिश्य "संप्रधारणा चार्थानां युक्तिः, प्राप्तिः सुखागमः" लक्षिता। कामस्य भार्य्याभेदे भा॰ आ॰ २६७॰। गीत॰ता॰ उक्ते ८सङ्गमभेदे।

प्राप्तिसम न॰ गौ॰उक्ते जात्युत्तरभेदे "प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्या विशिष्टत्वात् प्राप्तिसमः" सू॰। "हेतुः प्राप्य वा साध्यं साधयेदप्राप्य वा?। न तावत् प्राप्य। प्राप्त्यामविशिष्टत्वादसाधकः द्वयोर्विद्यमानयोः प्राप्तौ सत्यां किं कस्य साधकं साध्यं वा?। अप्राप्यसाधकं न भवति। नाप्राप्तः प्रदीपः प्रकाशयतीति। प्राप्त्या प्रत्यवस्थानं प्राप्तिसमः" वात्स्या॰ "प्राप्त्या विशेषादनिष्टापादनेन प्रत्यवस्थानम्" गौ॰वृ॰ ५।७ यथा आत्मा च क्रियः क्रियाहेतुगुणवत्त्वादित्यादौ क्रियाहेतुगुणवत्त्वेनैव किमिति क्रियावत्त्वं साध्यते। किमिति क्रियावत्त्वेन तादृशगुणवत्त्वं न? उभयोरविशेषादिति"।

प्राप्त्याशा स्त्री ६त॰। १आभिलाषायाम् २प्रारब्धकार्य्यस्यावस्थाभेदे "अवस्थाः पञ्च कार्य्यस्य प्रारब्धस्य फलार्थिभिः। आरम्भो यत्न प्रत्याशा नियताप्ति फलागमा" इत्युद्दिश्य "उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवा" इति सा॰द॰ लक्षिता।

प्राप्य त्रि॰ प्र+आप–ण्यत्। १गम्ये २लभ्ये च ३व्याकरणोक्ते "क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते। दर्शनादनुमानाद्वा तत्प्राप्यमिह कथ्यते" इत्युक्ते ४कर्मभेदे कर्मन्शब्दे १७२०पृ॰ दृश्यम्। प्र+आप–ल्यप्। लब्ध्वेत्यर्थे अव्य॰।

प्राप्यकारिन् त्रि॰ प्राप्य विषयदेशं गत्वा करोति विषयप्रकाशम् कृ–णिनि। विषयदेशं गत्वा विषयप्रकाशकारके चक्षुरादौ इन्द्रिये। तत्र न्यायमते चक्षुष एव प्राप्यकारिता नान्यस्य। वेदान्तमते श्रवणस्यापीति भेदः।

प्राबोधिक पु॰ प्रबोधाय हितं ठक्। १उषःकाले शब्दमा॰ प्रबोधः प्रबोधनं तत्र नियुक्तः तत्प्रयोजनमस्य वा ठञ्। २मागधे प्रातःस्तुतिपाठकभेदे।

प्राभञ्जन न॰ प्रभञ्जनो देवताऽस्य अण्। स्वातिनक्षत्रे तस्य तद्देवताकत्वात् तथात्वम्। तस्यापत्यम् इञ्। प्राभञ्जनि हनूमति "आयूंषि सख्युर्निर्भिद्य प्राभञ्जनिरमोचयत्" भट्टि॰।

प्राभव न॰ प्रभोर्भावः अण्। १प्रभुत्वे २श्रेष्ठत्वे च।

प्राभवत्य न॰ प्रभवतो भावः ष्यञ्। विभुत्वे मनुः ८।४१२

प्राभाकर न॰ प्रभाकरस्य इदम् तन्मतं वेत्ति वा अण्। १मीमांसकभेदप्रभाकरसम्बन्धिनि २तन्मतज्ञे च।

प्राभृत न॰प्र+आ+भृ–कर्मणि क्त। उपढौकनद्रव्ये अमरः। स्वार्थे क। २प्राभृतक तत्रार्थे हारा॰।

प्रामधि पु॰ पौलस्त्ये सप्तर्षिमध्ये ऋषिभेदे हरिवं॰ ७अ॰।

प्रामाणिक त्रि॰ प्रमाणेन निर्वृत्तः सिद्धः ठञ्। १प्रत्यक्षादिप्रमाणसिद्धे २शास्त्रसिद्धे च स्त्रियां ङीप्। ३हैतुके ४मर्य्यादाभिज्ञे ५शास्त्रज्ञे ६परिच्छेदके ७प्रमाणकर्त्तरि च।

प्रामाण्य न॰ प्रमाणस्य भावः। तद्वति तत्प्रकारकत्वरूपे

ज्ञानधर्मभेदे तत्र न्यायमते परतोग्राह्यं मीमांसकादिमते स्वतः, अप्रामाण्यग्राहकयोग्याद्या वा ग्राह्यमिति भेदः। प्रमात्वशब्दे दृश्यम्। [इञ्चे शब्दच०। भावे ष्यञ्। २प्रमादे न०।

प्रामाद्य पु०प्रमाद्यत्यनेन प्र+मद बा० करणे ण्यत्। १वासक-

प्रामीत्य न० प्र+मी—भावे क्तिन् तत्र साधु ष्यञ्। १ऋणे सिद्धा०पाठान्तरम्। प्रमीतस्य भावः ष्यञ्। २मरणे न०।

प्राय पु० प्र+अय—इण्—वा अच्—अण् वा। १मृत्यौ २अनशनमृत्यौ ३बाहुल्ये च मेदि० "प्रायेण सामग्र्यविधौ गुणानाम्" कुमारः। ततः प्रज्ञाद्या०। सर्वविभक्त्यन्तात् तृतीया प्रायेण गाम्यः सि०कौ०।

प्रायण न०प्र+अय-भावे ल्युट्। १देहत्यागेन स्थानान्तरगमने मनुः ६।२२१ श्लो० उदा०। २प्रारम्भे च "सैषा त्रिवृत्प्रायणा" ताण्ड्य०ब्रा० २।१५।२ "त्रिवृत् स्तोमस्तवकः प्रायणे प्रारम्भे यस्याः" भा०।

प्रायणीय त्रि० प्रायणं आरम्भदिनं तत्र विहितः छ। १प्रारम्भदिने २गवामयनप्रथमाहादौ च विहिते अतिरात्रे यागभेदे च "प्रायणीयेऽद्य सुत्यामेके" कात्या० श्रौ० १२।६।२६ 'प्रायणीयोऽतिरात्र एवाह साध्यः" देवनाथः। ताण्ड्य० ब्रा०४।२।१।२ भाष्ये द्वितीयाहस्यैव प्रायणीयसंज्ञा तन्निरुक्तिश्च दर्शिता यथा "प्रायणीयमेतदहर्भवति" मू०। "एतद्वक्ष्यमाणमहः प्रायणीयं प्रकर्षेण यान्ति गच्छन्ति स्वर्गमनेनेति व्युत्पत्तेः। एतत्संज्ञं गवामयनस्य द्वितीयमहस्तदेवं भवति। यद्यपि सूत्रान्तरे प्रथमविहितस्यातिरात्रस्यैव प्रायणीय इति संज्ञा प्रसिद्धा तथापि प्रथमोत्तमयोरतिरात्रयोः सर्वत्र साधारणत्वादस्यैवाह्नो गवामयने असाधारणं प्राथम्यमिति कृत्वा एतदादिकं गवामयनस्वरूपमित्यस्मिन् द्वितीयेऽहनि प्रायणीयशब्दोऽत्र प्रयुज्यते। उक्तमहर्नामनिर्वचनद्वारा प्रशंसति" भा० "प्रायणीयेन वा अग्रा देवाः स्वर्गं लोकं प्रायन् यत् प्रायंस्तत् प्रायणीयस्य प्रायणीयत्वम्" मू० "पुरा देवाः प्रायणीयेन प्रायणीयाख्येन अहसा स्वर्गं लोकं प्रायन् प्राप्ताः यद्यस्मात् प्रायन् स्वर्गं प्रागमन् तस्मादस्याह्नः प्रायणीयत्वं प्रायणीयसाधारणत्वात् प्रायणीयमिति नाम सम्पन्नम्" भा०। तदहः कर्त्तव्यत्वादतिरात्रस्य प्रायणीयसंज्ञेति बोध्यम्।

प्रायश्चित्त न० पापक्षयमात्रसाधनत्वेन विधिबोधिते कर्मभेदे तल्लक्षणं प्रा०वि०

अङ्गिराः "प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते। तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्। निश्चयसंयुक्तं पापक्षयसाधनत्वेन निश्चितमित्यर्थः। तथा हारीतः "प्रयतत्वादुपचितमशुभं नाशयतीति प्रायश्चित्तम्"। एतेन पापक्षयमात्रसाधनं कर्म प्रायश्चित्तमिति तल्लक्षणम्। मात्रशब्दात् ब्रह्मपुरणाश्वमेधादिव्यावृत्तिः। तत्र पापविशेषस्यैव कामाकामकृतस्य शक्तिविशेषस्य ततो नाशः मतभेदेन अव्यवहार्य्यशब्दे ४७०।७१दर्शितः। "प्रायश्चित्तैरपैत्येनो यदज्ञानं कृतं भवेत्। कामतो व्यवहार्य्यस्तु वचनादिह जायते" याज्ञ० वचनस्य प्रा०वि० व्याख्यानं मतभेदेन दर्शितं यथा

"कामत इति अज्ञानकृतपापप्रायश्चित्तेन कामकृतपापापगमो न भवति। किन्तु व्यवहार्य्यतामात्रम्। ननु सति पापे कथं व्यवहार्य्यतामात्रम् अत आह वचनादिति। अयमभिप्रायः अत्र प्रायश्चित्तानुष्ठानेनार्द्धपापक्षयात् सम्भाषणस्पर्शनदर्शनादिषु व्यवहारो न दुष्टः न तु भोजनपरिणयनव्यवहारोऽपि वचनादेव यथा कृतप्रायश्चित्तादिष्वचिनमहापापशेषसद्भावे व्यवहार्य्यतेति। अथ वा अकारप्रश्लेषाद्दृश्यपोक्तेन प्रायश्चित्तेन कामतोऽपि पापक्षयो भवत्येव किन्त्वव्यवहार्य्यः पापाभावेऽपि वचनात्। अत एव मनुः "चरितव्रतानपि धर्मतः। शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत्"। याज्ञवल्क्यः "शरणागतबालस्त्रीहिंसकान् संवसेन्न तु। चीर्णव्रतानपि सदा कृतघ्नसहितानिमान्। कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचित्" इति मनुवचनं त्वज्ञानकृतमहापापे बोद्धव्यमिति। भवदेवस्तु सर्वत्र "स्नतः शुद्धिमवाप्नुयादिति" दर्शनादव्यवहार्य्यतावचनं निन्दार्थमित्याह। जिमूतस्तु पापकर्म्मणा हि द्वयं जन्यते शरीरगतमप्रायत्यमात्मगतञ्च पापं तत्र स्पर्शादौ वैदिककर्मणि चानर्हत्वलक्षणं तेनात्र कामनाकृते केवलशरीरदोषः प्रायश्चित्तेनापनीयते जन्मान्तरकृतदुरितस्येवात्मनः शरीरान्तरस्य व्यवहाराधिकारित्वम् आत्मगतञ्च पापं भोगादेव क्षीयते" तत्र कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् इति मनुवचनाद्दृष्टश्रुतिविरोधाच्च"। मिताक्षरामतन्तु अव्यवहार्य्यशब्दे दर्शितम्। प्रायश्चित्तस्य काम्यत्वं नैमित्तिकत्वं नित्यत्वञ्च तथाह जाबालः "काम्यानां सफलार्थञ्च दोषघातार्थमेव च। अतः काम्यं नैमित्तिकञ्च प्रायश्चित्तमिति स्थितिः। चरितव्रततो नित्यं प्रायश्चित्तं विशुद्धये। निन्द्यैश्च सम्भाषैर्न्तु आयान्त्यनिष्कृतैनसः"। ज्ञानाज्ञानकृत-

कामतोः प्रायश्चित्तभेदो यथा अङ्गिराः "अकामतः कृते पापे प्रायश्चित्तं, न कामतः। स्यात्त्वकामकृते यत्तु द्विगुणं बुद्धिपूर्वके"। प्रायश्चित्ताकथने दोषो यथा "आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः। जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः। अनर्हितैरनाहूतैरदृष्टैश्चैव संवदि। प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः। व्यासतो मार्गमाणस्य बलियारेः प्रभाविनः। अन्तरा ब्राह्मणं कृत्वा व्रतमेतत् समादिशेत्" हारीतः "यथावयो यथाकालं यथाप्राणञ्च ब्राह्मणे। प्रायश्चित्तं प्रदातव्यं ब्राह्मणैर्धर्मपाठकैः। तस्मात् कृच्छ्रमथार्द्धं पादं वापि (पादमेव नातो न्यूनम्) विधानतः। ज्ञात्वा बलाबलं कालं प्रायश्चित्तं प्रकल्पयेत्। अशक्तावनुग्रहमाह पराशरः। "दुर्बलेऽनुग्रहः कार्य्यस्तथा वै बालवृद्धयोः। अतोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रहो भवेत्"। स्नेहादिनानुग्रहे दोषो यथा "स्नेहाद्वा यदि वा लोभात् मोहादज्ञानतोऽपि वा। कुर्वन्त्यनुग्रहं ये तु तत् पापं तेषु गच्छति। शास्त्रीयप्रायश्चित्तमुदाहृत्य पश्चादनुग्रहः कार्य्य इत्याहाङ्गिराः "कृत्वा पूर्वमुदाहारं यथोक्तं धर्मवक्तृभिः। पश्चात् कार्य्यानुसारेण यन्त्रा कुर्य्यात्त्वनुग्रहम्"। वयस्त्वादिभेदात् प्रायश्चित्तं यथा "अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च"। पापनिष्क्रमणोपायानाह मनुः "ख्यापनेनानुतापेन तपसाऽध्ययनेन च। पापकृन्मुच्यते पापात्तथा दानेन चापदि"। आपदीत्यनेन अध्ययनतपसोर्दानमनुकल्प इत्युक्तम्। एतद्धिंसाव्यतिरिक्तविषयम्। हिंसायान्तु दानं मुख्यम्। यथा भविष्ये "हिंसात्मकानां सर्वेषां कीर्त्तितानां मनीषिभिः। प्रायश्चित्तकदम्बानां दानं प्रथममुच्यते"। तथा मनुः "दानेन वधनिर्णेकं सर्पादीनामशक्नुवन्। एकैकशश्चरेत् कृच्छ्रं द्विजः पापापनुत्तये"। समान्यप्रायश्चित्तान्याह संवर्त्तः "हिरण्यदानं गोदानं भूमिदानं तथैव च। नाशयन्त्याशु पापानि महापातकजान्यपि"। यमः "शोषणेन शरीरस्य तपसाऽध्ययनेन च। पापकृन्मुच्यते पापात् दानेन च दमेन च"। मनुः "कृत्वा पापं हि सन्तप्य तस्मात् पापात् प्रमुच्यते। नैतत् कुर्य्यां पुनरिति निवृत्त्या पूयते नरः"। विष्णुपुराणम् "प्रायश्चित्तान्यशेषाणि तपःकर्म्मात्मकानि वै। यानि तेषामशेषाणां कृष्णानुस्मरणं परम्"। यमः "गवाह्निकं देवपूजा वैराग्यं परिवर्ज्जनः। नाशयन्त्याशु पापानि महापातकजान्यपि"। गोतमः "हिरण्यं गौर्वासोऽश्वो भूमिस्तिला घृतमन्नमिति देयानि"। एतान्येवानादेशे विकल्पेन क्रियेरन् एनसि लघुनि लघूनि गुरुणि गुरूणि"। विष्णुपुराणम् "एवं विषयभेदाद्वै व्यवस्थाप्यानि पुत्रक!। प्रायश्चित्तानि सर्वाणि गुरूणि च लघूनि च। अन्यथा हि महाबाहो! लघूनामुपदेशतः। गुरूणामुपदेशो हि निष्प्रयोजनतां व्रजेत्"। महाभारते "यद्यकार्य्यशतं कृत्वा कृतं गङ्गाभिषेचनम्। सर्वं दहति गङ्गाम्भस्तूलराशिमिवानलः"। शुद्धिकारणानि व्रतान्याह विश्वामित्रः "कृच्छ्रचान्द्रायणादीनि शुद्ध्यभ्युदयकारणम्। प्रकाशे वा रहस्ये वा संशयेऽनुक्ते स्फुटे। प्राजापत्यं सान्तपनं शिशुकृच्छ्रं पराककः। अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यकृच्छ्रोऽतिकृच्छ्रकः। महासान्तपनः शुद्धौ तप्तकृच्छ्रस्तु पावनः। जलोपवास कृच्छ्रञ्च ब्रह्मकूर्चस्तु शोधकः। एते समस्ता व्यस्ता वा प्रत्येकमेकशोऽपि वा। पातकादिषु सर्वेषु पापकेषु प्रयत्नतः। कार्य्याश्चान्द्रायणैर्युक्ताः केवला वा विशुद्धये। शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा। यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति। उपवासस्त्रिरात्रं वा मासं पक्षं तदर्द्धकम्। षड्द्वादशाहादि कार्य्यं शुद्धिफलार्थिना। उपपातकयुक्तानामनादिष्टेषु चैव हि। प्रकाशे च रहस्ये च अभिसन्ध्याद्यपेक्षया। जातिशक्तिगुणान् दृष्ट्वा सकृद्बुद्धिकृतं तथा। अनुबन्धादिकं दृष्ट्वा सर्वं कार्य्यं यथाक्रमम्"। प्रकाशकृते पापे व्रतानि मुख्यानि रहस्यकृते जपादीनि यथा प्राजापत्यादीन्यभिधाय मनुः "एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः। अनाविष्कृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत्"। देवलः "प्रकाशे उक्तं यत्किञ्चित् त्रिंशभागो रहस्यके। त्रिंशभागः षड्भागः कल्प्यो जात्याद्यपेक्षया" प्रा॰ वि॰। क्वचिद्विषयभेदे प्रायश्चित्ताभावः यथोक्तं प्रा॰त॰

अथ गोवधाद्यपवादः। पराशरः "धूर्य्येषु वहमानेषु दण्डेनाभिहतस्य च। काष्ठेन लेष्टुना वापि पाषाणेन तु ताडितः। मूर्च्छितः पतितश्चैव मृतो वा सद्य एव च। एवं मृतानां धुर्य्याणां प्रवक्ष्यामि यथाविधि। उत्थितस्तु पदं गच्छेत् पञ्च सप्त दशाथ वा। ग्रासं वा यदि गृह्णाति तोयं वा पिबति स्वयम्। पूर्व्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते" यदि व्याधिग्रस्तानां दृष्टानां

श्रृङ्गयोजनमात्रेण स्वल्पतरदण्डाघातेन वा मूर्च्छया पतनं भवति अनन्तरं गमनं ग्रासादौ कृते मरणं भवति तदा गमनग्रासग्रहणतोयपानैस्तदानीन्तनमरणे हेत्वभावं निश्चित्य पूर्वव्याधिविनष्टत्वं ज्ञायते। यदि तु पूर्वव्याधिरहित एव प्रहारजनितव्याधिना ग्रासादि कृत्वापि म्रियते तदा प्रायश्चित्तमस्त्येव। संवर्त्तः “यन्त्रणे गोश्चिकित्सायां मूढगर्भविमोचने। यत्ने कृते विपत्तिः स्यात् प्रायश्चित्तं न विद्यते। औषधं स्नेहमाहारान् दद्याद् गोब्राह्मणेषु च। प्राणिनां प्राणहत्त्वर्थं प्रायश्चित्तं न विद्यते। दाहच्छेदशिराभेदप्रयत्नैरुपकुर्वताम्। द्विजानां गोहितार्थं वा प्रायश्चित्तं न विद्यते” मूढगर्भः अन्तर्मृतगर्भः मुह वैचित्त्ये इत्यनेन तथार्थत्वात्। याज्ञवल्क्यः “क्रियमाणोपकारे तु मृते विप्रे न पातकम्। विपाके गोवृषाणाञ्च भेषजाग्निक्रियासु च”। विशेषमाहाङ्गिराः “शृङ्गभङ्गेऽस्थिभङ्गे च चर्मनिर्मोचनेऽपि वा। दशरात्रं चरेत् कृच्छ्रं सुस्था सा यदि गौर्भवेत्”। द्विजानां गवाञ्च हितार्थमित्यर्थः। अत्र प्राणरक्षार्थमाहारादिदानैर्मरणे दोषाभावस्य वाचनिकत्वात् गललग्नान्न मरणे नात्मघातादि। एवं “गोपालको गवां गोष्ठे धूमं यस्तु न कारयेत्। मक्षिकालीननरके मक्षिकाभिः स भक्ष्यते” इति देवीपुराणानुसारादग्निं प्रज्वाल्य तत्रैव स्थितस्य दैवात्तदग्निना मरणे दोषाभावः। तत्रास्थितस्य तु अपालननिमित्तगोवधजन्यदोषः। मिताक्षरायां पराशरः “कूपे खाते च धर्मार्थे गृहदाहे च ये मृताः। ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते” इदन्तु बन्धनरहितस्य पशोः कदाचित् दाहादिना मृतविषयम्। इतरत्रापस्तम्बोक्तम् “कान्तारेष्वथ वा दुर्गे गृहदाहावटादिषु। यदि तत्र विपत्तिः स्यात् पाद एको विधीयते”, इति ज्ञेयम्। एतद्वचनं यमस्येति भवदेवभट्टः। चिकित्सायां पापाभावो यथावदुपचारे बोध्यः। न पुनः सन्निपाताभिभूतस्योदकपानादिना। अतएव मनुः “चिकित्सकानां सर्वेषां मिथ्याप्रचरतां दमः”। काश्यपोऽप्यत्र प्रायश्चित्तमाह “दोग्ध्री दमनातिदोहातिवाहपाशदामघण्टाभरणयोजनात् तैलपानौषधविनियोगाद्व्यापन्नानां प्रायश्चित्तं ब्राह्मणेभ्यो विनिवेद्य सशिखवपनं कृत्वा प्राजापत्यकृच्छ्रमाचरेत्। चीर्णान्ते गां दक्षिणां ब्राह्मणाय दद्यात् प्रेतं तिष्ठेत् वेति”।

प्रायश्चित्तपूर्वाङ्गकृत्यम्। शङ्खलिखितौ “वाप्य केशनखान् पूर्वं स्नातं प्राश्य नदीर्निशि। प्रत्येकं नियतं काञ्चमात्मनो व्रतमादिशेत्। प्रायश्चित्तमुपासीनो वाग्यतस्त्रिषवनं स्पृशेत्”। केशधारणेच्छायां द्विगुणव्रतादिकमाह हारीतः “राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः। केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत्। केशानां धारणार्थं तु द्विगुणं व्रतमाचरेत्। द्विगुणे तु व्रते चीर्णे द्विगुणा दक्षिणा भवेत्। विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम्। ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः”। सधवास्त्रीणां विशेषमाह भवदेवभट्टधृतं वचनम्। “वपनं नैव नारीणां नानुव्रज्या जपादिकम्। न गोष्ठे शयनं तासां न च दध्याद्गवाजिनम्। सर्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम्। सर्वत्रैवं हि नारीणां शिरसो मुण्डनं स्मृतम्”। पापभेदेषु प्रायश्चित्तभेदाः प्रायश्चित्तविवेविवेकादौ द्रष्टव्याः विस्तरभयान्नोक्ताः। तस्येदं छ। प्रायश्चित्तीय तदाचरणे न०।

प्रायश्चित्ति स्त्री प्रायः (अव्ययम्)। तपश्चिचित्तिः चित—भावे क्तिन् सुट्०। प्रायश्चित्तशब्दार्थे

प्रायश्चित्तिन् त्रि०प्रायश्चित्तं कर्त्तव्यत्वेनास्त्यस्य इनि। प्रायश्चित्तार्हे स्त्रियां ङीप्। “प्रायश्चित्ती भवेत् पूतस्तत् पापं तेषु गच्छति” प्रा०त०। ठन् प्रायश्चित्तिक तत्रार्थे

प्रायस् अव्य० प्र+अय—असि। १बाहुल्ये २तपसि व्रतादौ च “प्रायः पयोधरसमुन्नतिरत्र हेतुः” उद्भटः। “प्रायो नाम तपः प्रोक्तम्” स्मृतिः।

प्रायाणिक त्रि० प्रयाणाय हितं ठक्। यात्रिकद्रव्ये यक्ष्चामरादौ प्रायाणिकादयोऽप्यत्र।

प्रायिक त्रि० प्रायेण भवः ठक्। प्रायभवे। [शब्दच०।

प्रायुद्धेषिन् पु०प्रायुधि प्रशस्तयुद्धार्थं द्वेषते द्वेष—णिनि। अश्वे

प्रायोग पु० प्रयुज्यते शकटादौ प्र+युज—कर्मणि घञ् कुत्वम् दीर्घः। शकटादौ नियोगार्हे वृषे ऋ० १०।१०६।२ भा०।

प्रायोगिक त्रि० प्रयोगं नित्यमर्हति छेदा० ठञ्। नित्यप्रयोगार्हे।

प्रायोज्य न० प्र+आ+युज—णिच्—कर्मणि यत्। प्रयोजनीये “प्रायोज्यं न विभज्येत” कात्या०स्मृ०। “प्रायोज्यम् प्रयोजनार्हं यथा पण्डितस्य पुस्तकादि न तन्मूर्खैर्विभजनीयमिति” दायभागः।

प्रायोपविष्ट त्रि० प्रायाय अनशनव्रताय उपविष्टः उप+

विश–क्त । अनशनेन मरणायोद्युक्ते भा॰आश्व॰८॰अ॰।

प्रायोपवेश पु॰ प्रायाय अनशनमृत्यये उपवेशः स्थितिः । सङ्कल्पपूर्वकम् सकलकार्य्यत्यागेन अनशनमरणार्थमुद्यमे भा॰व॰ २५० श्लो॰। भावे ल्युट् । प्रायोपवेशन तत्रार्थे न॰। भा॰व॰ १५१२८ श्लो॰।

प्रायोपेत त्रि॰ जीवो भीमसेन वत् प्रायः प्रायोपवेशः तेन उपेतः । प्रायोपवेशनयुते भा॰सौ॰ १६अ॰ ।

प्रारब्ध न॰ प्र+आ+रभ–आरम्भे क्त प्रकृष्टमारब्धं स्वकार्य्यं जननाय कृतारम्भं येन ! १देहाद्यारम्भके २अदृष्टभेदे तस्य च भोगेनैव क्षय इति शास्त्रे प्रसिद्धम् । "अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् । नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" शास्त्रेण प्रारब्धकर्मणो भोगं विना नाशाभावस्योक्तेः "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरु-तेऽर्जुन !" गीतायां ज्ञानस्य सर्वकर्मनाशकत्वोक्तिः प्रार-ब्धकर्मातिरिक्तविषयेत्याकरे द्रष्टव्यम् । २कृतारम्भे त्रि॰ ।

प्रारब्धि स्त्री प्र+आ+रभ–करणे क्तिच् । १गजबन्धनदामनि त्रिका॰ । भावे क्त । २आरम्भे ।

प्रारम्भण न॰प्र+आ+रभ–ल्युट् नुम् । प्रकर्षेणारम्भे । प्रार-म्भणं प्रयोजनमस्य अनुप्र॰ठ । प्रारम्भणीय तत्प्रयोजनके त्रि॰। प्र+आ+रभ–भावे घञ् नुम् । प्रारम्भ प्रकर्षेण आरम्भे पु॰ [स्त्रियां टाप् ।

प्रारोह त्रि॰ प्ररोहः शीलमस्य छत्रा॰ ण । प्ररोहणशीले

प्रार्णे न॰प्रकृष्टमृणं इद्धिः । १प्रकृष्टे ऋणे प्रा॰व॰। २तद्युते त्रि॰

प्रार्थना स्त्री प्र+अर्थ–युच् । १याच्ञायां २हिंसायाञ्च । ३गर्भाङ्गभेदे सा॰द॰ "संपद्यथानुमानञ्च प्रार्थना क्षिप्ति-रेव च" गर्भाङ्गान्युद्दिश्य "रतिहर्षोत्सवानान्तु प्रार्थनं प्रार्थना भवेत्" इति लक्षिता । ल्युट् । प्रार्थन याचने हिंसने च न॰ । ४मुद्राभेदे "प्रसृताङ्गुलिकौ हस्तौ मिथःश्लिष्टौ च सम्मुखे । कुर्य्यात् स्वहृदये सेयं मुद्रा स्यात् प्रार्थनाभिधा" तन्त्रसा॰ ।

प्रार्थनीय त्रि॰ प्र+अर्थ–कर्मणि अनीयर् । १याचनीये अर्थयतेर्याचनार्थत्वेन द्विकर्मकत्वात् गौणे कर्मणि अनी-यर् । यतोवाच्यते २तस्मिन् तत्राविवक्षायां मुख्ये याचनाकर्मणि इति बोध्यम् । ३द्वापरयुगे शब्दर॰ ।

प्रार्थित त्रि॰ प्र+अर्थ+क्त । १याचिते २अभिहिते मेदि॰ ३शत्रुसंरुद्धे च त्रिका॰ ।

प्रालम्ब न॰ प्रकर्षेणालम्बते प्र+आ+लम्ब–अच् । १ऋजुतया कण्ठात् लम्बमाने माल्यादौ अमरः । २प्रकर्षेण लम्ब-मानमात्रे त्रि॰। संज्ञायां कन् अत इत्वम् । प्रालम्बिका स्वर्णादिरचितकण्ठिकायां स्वर्णहारभेदे स्त्री अमरः ।

प्रालेय न॰प्रकर्षेण लीयते प्र+आ–ली–यत् । आत्वे एत्वम्, प्रलयाय हितम् अण् नि॰ एत्वम् वा । हिमे अमरः ।

प्रालेयांशु पु॰ प्रालेयमंशौ यस्य । १चन्द्रे हला॰। तन्नामना-मके २कर्पूरे च । प्रालेयकरादयोऽप्युभयत्र पु॰ ।

प्रावट पु॰ प्र+अव–अटन् । यवे जटा॰ ।

प्रावण न॰ प्र+आ+वन संभक्तौ करणे घ । प्रनिरित्यादिं णत्वम् । खनित्रे । प्रकर्षेणावन्यते संश्लिष्यते च्छदनेन ऋ॰१।२२।४भाष्ये इत्युक्तम् । धनं समासे अन्तोदात्ततास्य

प्रावणि स्त्री प्र+अव–अनि ।"हिनुमीनानि लोट्" पा ८।४। १५।१६। हिनुमीनानीति छित्त्वा उज्ज्वलदत्तेन पठित्वा तत्र णत्वमुक्तम् । प्रकृष्टावनौ तस्यायमाशयः "हीनुमीना आनि लोट्" सूत्रद्वये मन्वग्रपरेण हिनुमानीति जायते हिनुमीना अनि इत्येषां णत्वम् । योगविभागाञ्च आनि लोट् इत्यस्यापीति ।

प्रावर पु॰ प्र+आ+वृ–करणे अप् । १प्राचीरे शब्दरत्ना॰। २देशभेदे भा॰भी॰ १२अ॰ । [२उत्तरीयवस्त्रे हेमच॰ ।

प्रावरण न॰ प्र+आ+वृ–करणे ल्युट् । १आच्छादनवस्त्रे

प्रावार पु॰प्र+आ+वृ–करणे घञ् । १उत्तरीयवस्त्रे अमरः भावे घञ् । २प्रकर्षेण आवरणे पु॰।

प्रावारकर्ण पु॰ उलूकभेदे भा॰ व॰ १९८अ॰ ।

प्रावारकीट पु॰ ७त॰ । कीटभेदे जटाधरः ।

प्रावास त्रि॰ प्रवासे दीयते कार्य्यं वा व्युष्टा॰ अण् । १प्र-वासे दीयमाने २तत्र कार्य्ये च ।

प्रावासिक त्रि॰ प्रवासाय प्रभवति सन्तापा॰ ठञ् । १प्रवास-साधने । प्रवासे साधु गुडा॰ ठञ् । प्रवासे साधौ च ।

प्रावृट्काल पु॰कर्म॰। ६त॰वा । वर्षाकाले प्रावृट्समयादयो-ऽप्यत्र ।

प्रावृट्कालवहा स्त्री ७त॰। नदीभेदे मार्कण्डेयपु॰६७अ॰।

प्रावृडत्यय पु॰६त॰। १वर्षातिक्रमे वर्षापगमे श॰च॰। २शरत्-काले राजनि॰ । [प्रकर्षेण २आवृतमात्रे त्रि॰।

प्रावृत न॰ प्र+आ+वृ–कर्मणि क्त । १प्रकर्षेण आवृते वस्त्रे

प्रावृति स्त्री प्र+आ+वृ–करणे क्तिन् । प्राचीरे शब्दर॰ ।

प्रावृत्तिक पु॰ प्रवृत्तौ तद्धरणे हितः ठक् । प्रवृत्तिवाहके दूतभेदे हरिवं॰ १०४अ॰ ।

प्रावृष्(षा) स्त्री प्रवर्षत्यत्र प्र+वृष–आधारे क्विप् दीर्घः ह-लन्तत्वात् वा टाप् । वर्षाकाले स च श्रावणभाद्रात्मकः

"त्वमिव नभसस्य वार्षिकाहन्" रघु०। इन्द्रशब्दे १४११ पृ० तस्य सौरचान्द्रत्वविवेकस्य दृश्यः।

प्रावृषायणी स्त्री प्रावृषा अयनं यस्याः गौरा० ङीष्। कपिकच्छ्वाम् (आलकुषी) अमरः।

प्रावृषिक पुंस्त्री प्रावृषि कायति शब्दायते कै-क अलुक् स०। १मयूरे शब्दच०। स्त्रियां जातित्वात् ङीष्। प्रावृषि भवः ठञ्। २वर्षाकालभवे त्रि० स्त्रियां ङीप्।

प्रावृषिज पु० प्रावृषि जायते जन-ड अलुक् स०। १झञ्झानिले त्रिका०। २वर्षाकालजाते त्रि० "जे विभाषा" वा अलुक् स०। तेन प्रावृड्ज तत्रार्थे त्रि०।

प्रावृषीण त्रि० प्रावृषि भवः बा० ख। वर्षाकालभवे भा०७। १०२।७ भारत्।

प्रावृषेण्य त्रि० प्रावृषि भवः एण्य। १वर्षाकालजाते २कदम्बवृक्षे पु० मेदि०। ३कुटजवृक्षे ४धाराकदम्बे च पु० राजनि०। ५कपिकच्छ्वाम् ६रक्तपुनर्नवायां स्त्री राजनि०। प्रावृषि दीयते कार्यं वा एण्य। ७वर्षाकाले देये करादौ ८तत्र कार्ये च त्रि०। ९प्राचुर्ये न० शब्दर०।

प्रावृषेय पु० १देशभेदे भा०भी०९अ०। प्रावृषायां भवः ढक्। २वर्षाकालभवे त्रि० स्त्रियां ङीप्।

प्रावृष्य पु० प्रावृषि भवः बा० यत्। १धाराकदम्बे २कुटजे ३विकङ्कतवृक्षे च राजनि०।

प्रावेशन त्रि० प्रवेशने दीयते कार्यं वा अध्या० अण्। १प्रवेशने दीयमाने २तत्कार्ये च। [ङीप्।

प्रावेशिक त्रि० प्रवेशाय साधुः ठञ्। प्रवेशसाधने स्त्रियां

प्राशन न० प्र+अश-भावे ल्युट्। णत्वादिः प्रकर्षेण भोजने अन्नप्राशनम्।

प्राशास्त्र न० प्रशास्तुर्भावः कर्म वा उद्गा० अञ्। प्रशास्तृर्त्विजः कर्मणि १यज्ञसंसने २तद्भावे च।

प्राशित त्रि० प्र+अश-भोजन कर्मणि क्त। १भक्षिते। भावे क्त। २भक्षणे न० ३पितृयज्ञे तर्पणे जटा० "प्राशितं पितृतर्पणम्" मनुना तत्रार्थे परिभाषितत्वात्।

प्राशित्र न० यज्ञिये यवमात्रं पिप्पलमात्रं वाऽवत्ते ब्रह्मोद्देश्यके भागे शिष्टार्थभेदे "शिष्टात् प्राशित्रमवदानम्" कात्या० ११।७। "मित्रस्य त्वा चक्षुषा प्रतीक्ष इति प्राशित्रं प्रतीक्षते" ११।१५ "प्राशित्रमवदीयमानमालिप्यमानं च प्राशित्रं ब्रह्मणो भागः यवमात्रं पिप्पलमात्रं वाऽवत्तः" कर्कः "स यत् प्राशित्रमवद्यति" इत्युपक्रमे। "अथास्मै ब्रह्मभागं पर्याहरन्ति। ब्रह्मा वै यज्ञस्य दक्षिणत आसीनोऽभिगोप्ता स एतं भागं प्रतिविदाम आस यत् प्राशित्रं तदस्मै पर्याहार्षुस्तत् प्राशीदिव यमस्मै ब्रह्मभागं पर्याहरन्ति तेन भागी स यदतत्र मर्दंसितं यज्ञस्य तदभिगोपायति तस्माद्वा अस्मै ब्रह्मभागं पर्याहरन्ति" शत०ब्रा० १।७।४।१८

प्राशित्रहरण प्राशित्रं ह्रियतेऽनेन हृ-करणे ल्युट्। प्राशित्रहव्यभागहरणसाधने गोकर्णाकृतिपात्रभेदे शत० ब्रा० १।३।१।६ भाष्यम्।

प्राश्य पु० प्र+अश-भोजने ण्यत्। भक्ष्ये प्राशने हितः यत्। प्राशव्य प्रकृष्टभक्ष्यहिते ऋ० ८।२१।६ भा०। प्रा०व०। २प्रकृष्टभोज्ये निघण्टुः। [यजु०२४।२७

प्राशृङ्ग त्रि० प्रकृष्टं शृङ्गमस्य वेदे दीर्घः। प्रकृष्टशृङ्गयुक्ते

प्राश्निक पु० प्रश्नाय तदुत्तरदानाय साधु ठक्। १सभ्ये त्रिका० २प्रश्नोत्तरदानाय साधौ त्रि०।

प्राश्नीपुत्र पु० यजुर्वेदवंशस्थे ऋषिभेदे शत०ब्रा० १४।९।४।३१

प्राष्टवर्ण पु० प्रकर्षेण अष्टः प्राप्तो वर्णः। पृश्निवर्णे नानावर्णे निरु० १०।३९

प्रास पु० प्रास्यते प्र+अस-क्षेपे कर्मणि घञ्। कुन्तास्त्रे अमरः। कुन्तशब्दे २००१८ पृ० दृश्यम्।

प्रासक पु० प्रास+संज्ञायां कन्। पाशके हेमच० तस्य देवनैः क्षिप्यमाणत्वात् तथात्वम्। स्वार्थे क। २प्रासास्त्रे पु०

प्रासङ्ग पु० प्र+सन्ज-कर्मणि घञ् दीर्घः। दम्यवृषाणां स्कन्धे शिक्षार्थमासज्यमाने युगभेदे अमरः। तं वहति यत्। प्रासङ्ग्य तद्वाहके दम्यवृषे अमरः।

प्रासङ्गिक त्रि० प्रसङ्गादागतः ठञ्। प्रसङ्गागते स्त्रियां ङीप्।

प्रासाद पु० प्रसीदत्यस्मिन् प्र+सद-आधारे घञ् दीर्घः। देवनृपयोर्गृहे अमरः देवगृहशब्दे १६७८ पृ० दृश्यम्

प्रासादकुक्कुट पुंस्त्री० प्रासादे कुक्कुट इव। पारावते त्रिका० स्त्रियां जातित्वात् ङीष्।

प्रासिक पु० प्रासः प्रहरणमस्य ठक्। कुन्तेन योद्धरि अमरः

प्रास्तारिक त्रि० प्रस्तारे व्यवहरति ठक्। प्रस्तारे व्यवहारिणि। [श्रादौ अङ्गुल्यादिः स्त्रियां ङीप्।

प्रास्थानिक त्रि० प्रस्थाने साधु ठञ्। यात्रिके मङ्गल-

प्रास्थिक त्रि० प्रस्थस्य वापः ठञ्। १प्रस्थमितधान्यवपनाधार क्षेत्रे २भूमौ स्त्री ङीप्। प्रस्थं सम्भवति (अस्मिन् समावेशयति) अवहरति पचति वा ठञ्। प्रस्थमितधान्यादेः आधारे ३समावेशके ४अवहारके ५पाचके च त्रि० स्त्रियां ङीप्। प्रस्थः परिमाणमस्य ठञ्। ६प्रस्थपरिमाणयुक्ते

धान्यराश्यादौ त्रि० प्रस्थेन क्रीतम् ठञ् । ७प्रस्थेन क्रीते त्रि० स्त्रियां ङीप् । प्रस्थस्य निमित्तं संयोग उत्पातो वा ठञ् । प्रस्थस्य ८निमित्ते ९संयोगे १०उत्पाते वा ।

प्राह्ण पु० प्रकर्षेण आह्नेति यद्वोऽल्प । अत्योपदेशे शब्दमा०।

प्राह्ण पु० प्रारब्धोऽह्नः प्रा०स०अचत्समा० अह्नादेशः णत्वञ्च । त्रिधाविभक्तदिनस्य पूर्वभागे १पूर्वाह्णे अमरः । प्रकृष्टम० ह्र्यत्र तिष्ठद्गु० अव्ययी० । २प्रकृष्टदिनयुते अव्य० ।

प्राह्णेतन त्रि०प्राह्णे भवः ट्यु तुट् च निपातनात् णत्वम् । पूर्वाह्णभवे स्त्रियां ङीप् ।

प्राह्णेतरा(मा)म् अव्य० अतिशयेन प्राह्णे तरप् तमप् वा आमु अकालेत्यादिना सप्तम्या अलुक् । अत्यन्तप्रातःकाले इत्यर्थे ।

प्रिय त्रि० प्रीणाति प्री-तर्पणे क । १भर्त्तरि पत्यौ अमरः २भार्य्यायां स्त्री । ३प्रियके मृगभेदे पु०स्त्री जटा०४ऋद्धिनामौषधौ ५हृद्ये त्रि० मेदि०। ६जीवकौषधौ राजनि०।

प्रियवद त्रि०प्रियं वदति वद-खच् मुम् । १प्रियकरवादिनि मधुरभाषिणि । २खेचरे ३गन्धर्वभेदे पु० शब्दमा० वदेरन्तःस्थादित्वात् प्रियम्वदेति मधुरशब्दवत्त्वं प्रामादिकमेव । "भुवि भवेऽसमजरैः प्रियंवदा" इ०र० उक्ते द्वादशाक्षरपादके ४छन्दोभेदे स्त्री । ५यक्षान्तर्गतगन्धर्वीभेदे स्त्री यजु० २४प्र० ।

प्रियक पु० प्रिय+स्वार्थे क संज्ञायां कन् वा । १पीतशालके (पियाशाल) २नीपे ३चित्रमृगे ४भ्रमरे ५प्रियङ्गौ ६कुङ्कुमे मेदि० ७धाराकदम्बे ८असनवृक्षे राजनि० । ९स्कन्दानुचरभेदे भा०श० ४६अ० । मत्वार्थे विदा० अञ् । प्रैयक पित्र्यगोत्रापत्ये पुंस्त्री०।

प्रियकृत् त्रि० प्रियं करोति कृ-क्विप् तुक् । १प्रियकारिणि २विष्णौ पु० "प्रियकृत् प्रीतिवर्द्धनः" विष्णुस० ।

प्रियङ्कर त्रि० प्रियं करोति कृ-खच् मुम् । १प्रियकारिणि २श्वेतकण्टकार्य्यां ३ऋद्ध्यौषध्याम् ४अश्वगन्धायाञ्च स्त्री राजनि० गौरा० ङीप् ।

प्रियङ्करण त्रि० अप्रियं प्रियं करोत्यनेन कृ-करणे ख्युन् । अप्रियस्य प्रियतासम्पादके साधने ।

प्रियङ्गु स्त्री प्रिय+गम-डु नि०मुम् च । १राजिकायां शब्दमा० अमरः "प्रियङ्गुः शीतला तिक्ता तुवरानिलपित्तहृत् । रक्तातिसारदौर्गन्ध्यस्वेददाहज्वरापहा । गुल्मतृड्विषमोहघ्नी तद्वदेवाम्रबीजका । तत्फलं मधुरं रूक्षं कषायं शीतलं गुरु । विबन्धाध्मानबलकृत् संग्राहि

कफपित्तजित्" भावप्र०। "प्रियङ्गुकलिकारम्" इति बुधप्रणाममन्त्रः । २राजिकायां राजनि० ३पिप्पल्याम् ४कङ्गौ (काङ्गनी) धान्ये मेदि० ५कटुकायां धरणिः । [शब्दच० ।

प्रियजन पु०कर्म०। १हृद्ये जने । २प्रौढभावानुविद्धे जन्य-

प्रियजीव पु०प्रियो जीवो यस्मात् । श्योनाकवृक्षे राजनि०।

प्रियतम पु० अतिशयेन प्रियः तमप् । १मयूरशिखावृक्षे २अतिप्रिये त्रि० शब्दच० ।

प्रियता स्त्री प्रियस्य भावः तल् । १स्नेहे २प्रेमणि अमरः । त्व । प्रियत्व तदर्थे न० शब्दर०।

प्रियतोषण त्रि० प्रियं तोषयति तुष-णिच ल्यु । १प्रियसन्तोषकारके "नारीपादौ स्वहस्तेन धारयेत् जघनोपरि । स्तनापीडकरः कामी कामयेत् प्रियतोषणः" रतिमञ्जर्य्युक्ते २रतिबन्धभेदे ।

प्रियदत्ता स्त्री दीयमानपृथिव्याम् "नामास्याः प्रियदत्तेति गुह्यं देव्याः सनातनम् । दाने वाऽप्यथ वाऽऽदाने नामास्याः प्रथमं प्रियम् । य एतां विदुषे दद्यात् पृथिवीं पृथिवीपतिः । पृथिव्यामेतदिष्टं स राजा राज्यमितो व्रजेत्" भा०अनु० ६२अ० ।

प्रियदर्शन पु० प्रियं दर्शनमस्य । १क्षीरिकावृक्षे २शुकपक्षे च जटा० ३हृद्ये त्रि० । [हेमच० ।

प्रियप्रायस् न० प्रियस्य प्रायः बाहुल्यं यत्र । प्रियवाक्ये

प्रियप्रेप्सु त्रि० ७त० । इष्टार्थोद्युक्ते जटा० । [प्रिये त्रि०।

प्रियमधु पु०प्रियं मधु मद्यं यस्य । १बलरामे हेमच० २मद्य-

प्रियमाल्यानुलेपन त्रि० प्रियं माल्यमनुलेपनं च यस्य । १माल्यानुलेपनप्रिये २स्कन्दानुचरभेदे पु०भा०श० ४६अ०।

प्रियमेध पु० १अजमीढस्य पुत्रभेदे "अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः" भाग० ९।२१।१७श्लो० । २यज्ञोपेते ऋषिभेदे ऋ० १।४५।४ भा० ।

प्रियम्भविष्णु त्रि०अप्रियः प्रियो भवति भू-कर्त्तरि खिष्णुच् । अप्रिये प्रिये भवितरि । खुकञ् प्रियम्भावुक तदर्थे त्रि०।

प्रियरूप त्रि०प्रियं रूपमस्य । १हृद्यरूपे । तस्य भावः मनोज्ञा० वुञ् । प्रैयरूपक तस्य भावे न०। कर्म०। २हृद्ये रूपे न०।

प्रियवचन त्रि०प्रियं वचनं वैद्यकवचनं वा यस्य । १प्रियवादिनि वैद्यकोक्तवाक्ये भक्तिमति २रोगिणि राजनि० । कर्म०। ३हृद्ये वाक्ये न० ।

प्रियवर्णी स्त्री प्रियो वर्णो यस्याः गौरा० ङीष् । प्रियङ्गौ जटाधरः । [लतायाञ्च ।

प्रियवल्ली स्त्री नित्यकर्म० । १प्रियङ्गौ राजनि० २फलिन्याख्य

प्रियवादिन् त्रि॰ प्रियं वदति वद–णिनि । प्रियवाक्यभाषके स्त्रियां ङीप् "भार्य्या चाप्रियवादिनी" चाणक्यः ।

प्रियव्रत त्रि॰ प्रियं व्रतमस्य । १व्रतप्रिये स्वायम्भुवमनोः २पुत्रभेदे पु॰ हरिवं॰ २अ॰ । [१।६।१२।

प्रियश्रवस् पु॰ प्रियं श्रवः श्रवणं यस्य । परमेश्वरे भाग॰

प्रियसख पु॰ कर्म॰ ६त॰ वा, टच्समा॰ । १इष्टे सख्यौ २प्रियस्य सख्यौ च । स्त्रियां ङीप् । ३खदिरे शब्दच॰।

प्रियसङ्गमन त्रि॰ प्रिययोः सङ्गमनं यत्र । १प्रिययोर्मेलनस्थाने २कश्यपादित्योर्मेलनस्थाने देशभेदे पु॰ "यत्रादितिः कश्यपश्च महात्मानौ दृढव्रतौ । प्रियसङ्गमनं नाम तं देशं मुनयोऽवदन्" हरिवं॰ १२४अ॰ ।

प्रियसत्य न॰ कर्म॰। १तथ्ये अथ च प्रिये सुनृतवाक्ये हेमच॰ प्रियं सत्यं यस्य । २सत्यप्रिये त्रि॰ ।

प्रियसन्देश पु॰ प्रियं सन्दिशति सम्+दिश–अण् उप॰स॰। १चम्पकवृक्षे भावे घञ् ६त॰ । २प्रियसंवादे शब्दच॰ ।

प्रियसाल(क) पु॰ कर्म॰ स्वार्थे क वा। असनवृक्षे (पियासाल) राजनि॰ ।

प्रियादि विशेष्यवाचिनि समानाधिकरणस्त्रीलिङ्गशब्दे परे ब॰व्री॰ पूर्वस्य पुंवद्भावे पर्य्युदस्ते शब्दगणे स च गणः पा॰ग॰सू॰ उक्तो यथा "प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वा स्वसा कान्ता क्षान्ता समा चपला दुहिता वामना तनया" । सुन्दरी प्रिया यस्य । सुन्दरी प्रिय इत्यादि ।

प्रियाम्बु पु॰ प्रियं पितॄणां प्रियमम्बु मूले सिक्तं जलमस्य । १आम्रवृक्षे राजनि॰ । २जलप्रिये त्रि॰ ।

प्रियार्ह त्रि॰ प्रियमर्हति अर्ह–अण् उप॰स॰। १प्रियवाक्यादियोग्ये २विष्णौ पु॰ "अभिप्रायः प्रियार्होऽर्हः" विष्णु स॰।

प्रियाल पु॰ प्रियान् अलति पर्य्याप्नोति अल–अच् । प्रियसाले (पियासाल) २द्राक्षायां स्त्री राजनि॰ भावप्र॰ पियाल इत्येव पाठः "पियालस्तु खरस्कन्धश्चारो बहुलवल्कलः । राजादनस्तापसेष्टः सन्नकद्रुर्धनुष्पटः । चारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु । स्निग्धं सरं मरुत्पित्तदाहज्वरतृषापहम् । पियालमज्जा मधुरो वृष्यः पित्तानिलापहः । हृद्योऽतिदुर्जरः स्निग्धो विष्टम्भी चामवर्द्धनः" भावप्र॰ ।

प्रियोदित न॰ कर्म॰ । चाटुवाक्ये शब्दरत्ना॰ ।

प्री तर्पणे भ्वा॰उभ॰सक॰अनिट् । प्रयति ते अप्रैषीत् अप्रेष्ट पिप्राय पिप्रिये

प्री प्रीतौ कान्तौ (इच्छायाम्) सक॰ दिवा॰ आत्म॰ अनिट् । प्रीयते अप्रेष्ट पिप्रिये ।

प्री तर्पणे सक॰ कान्तौ तृप्तौ अक॰ क्र्या॰उभ॰अनिट् । प्रीणाति प्रीणीते अप्रैषीत् अप्रेष्ट पिप्राय पिप्रिये । प्रीतः । णिच् नुक् । प्रीणयति ते । [अत्रापि नुक् प्रीणयतीत्येके ।

प्री तर्पणे सक॰ चु॰उभ॰अनिट् । प्राययति ते अपिप्रयत् त ।

प्रीण त्रि॰ प्री–णिच् कर्त्तरि अच् । १प्रीणनकारके करणे अच् । २नर्मणि मेदि॰ । पुरणार्थप्रणाद्यात् भवार्थे ख । ३पुराणे त्रि॰ त्रिका॰ ।

प्रीणन न॰ प्री–णिच्–नुक्–ल्युट् । तर्पणे अमरः ।

प्रीणस पु॰ प्रीणि–बा॰ असच् । गण्डके राजनि॰ ।

प्रीत त्रि॰ प्री–कर्त्तरि क्त । हृष्टे अमरः ।

प्रीति स्त्री प्री–भावे क्तिन् । १हर्षे २आमोदे ३तृप्तौ च । ४विष्कुम्भादियोगेषु द्वितीययोगे । ५कामस्य पत्नीभेदे रत्याः सपत्न्यां "वेश्याऽनङ्गवती नाम विभूतिद्वादशीव्रतम् । समाप्य माघमासस्य द्वादश्यां लवणाचलम् । निवेदयन्ती गुरवे शय्याञ्चोपस्करान्विताम् । अलङ्कृत्य हृषीकेशं सौवर्णामरपादपम् । स चानङ्गवती वेश्या कामदेवस्य साम्प्रतम् । पत्नी, सपत्नी संजाता रत्याः प्रीतिरिति श्रुता" मात्स्ये ९२अ॰ ।

प्रीतिजुष त्रि॰ प्रीतिं जुषते जुष–क । १प्रीतिभाजि २अनिरुद्धपत्न्यामुषायां स्त्री शब्दरत्ना॰ "विश्वकेतुः प्रीतिजुषा सुतः" त्रिका॰ नवपुत्रोक्तौ । [प्रद्युम्निनि पु॰ हेमच॰ ।

प्रीतिद त्रि॰ प्रीतिं ददाति दा–क । प्रीतिदायके (भाँड़)

प्रीतिदत्त त्रि॰ ३त॰। १प्रीत्या दत्ते २स्त्रीधनभेदे न॰ यथाह मिता॰ कात्यायनः "प्रीत्या दत्तं तु यत्किञ्चित् श्वश्र्वा वा श्वशुरेण वा । पादवन्दनिकं चैव प्रीतिदत्तं तदुच्यते" । भर्तृप्रीतदत्तस्थावरे तु विशेषः दाय॰ उक्तो यथा "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृते तत् । सा यथा काम॰ मश्नीयात् दद्याद्वा स्थावरादृते" ।

प्रीतिदाय पु॰ प्रीत्या दीयते दा–कर्मणि घञ् । प्रीत्या दत्ते "श्वशुरात् प्रीतिदायं तु प्राप्य सा प्रीतमानसा" भा॰आश्व॰ ८६ अ॰ ।

प्रीतिभोज्य न॰ प्रीत्या भोज्यम् । प्रीत्यैव भोज्ये अन्नादौ "चलानि प्रीतिभोज्यानि आपद्भोज्यानि वा पुनः । न च संप्रीयसे राजन् ! न चैवापद्गता वयम्" भा॰उ॰ ९१ अ॰ । "संप्रीतिभोज्यान्यन्नानि" इति टीकाधृतपुस्तके पाठः ।

प्रीतिवर्द्धन त्रि॰ प्रीतिं वर्द्धयति वृध–णिच्–ल्यु । १सन्तोष-

वर्द्धके २विष्णौ पु० "प्रियकृत् प्रीतिवर्द्धनः" विष्णुस० ।

प्रु गतौ भ्वा० आत्म०सक० अनिट् । प्रवते अप्रोष्ट पुप्रुवे ।

प्रुट मर्द्दने भ्वा० पर०सक० सेट् । प्रोटति अप्रोटीत् पुप्रोट । अयं धातुपाठे पठितः ।

प्रुष भस्मीकरणे भ्वा० पर० सक० सेट् । प्रोषति अप्रोषीत् पुप्रोष । उदित् क्त्वा वेट् । प्रुषित्वा प्रुष्ट्वा प्रुष्टः ।

प्रुष स्नेहे पूर्त्तौ च सक० क्लेदे अक० क्र्या० पर०सेट् । प्रुष्णाति अप्रोषीत् पुप्रोष ।

प्रुष्ट त्रि० प्रुष–क्त । दग्धे । [बिन्दौ सि०कौ० ।

प्रुष्व पु० प्रुष–क्वन् । १ऋतौ २सूर्य्ये च उज्ज्वल० । ३जल-

प्रेक्षा स्त्री प्र+ईक्ष–भावे अङ् । १विषयशुभाशुभपर्य्यालोचनायां २बुद्धिपूर्वककर्मकरणे ततः प्रेक्षादि० चतुरर्थ्याम् इनि । प्रेक्षिन् आलोचनानिर्वृत्तादौ । अस्मिन्शब्दे परे घोषादि० पूर्वपदमुदात्तम । [प्रेक्षान्तःस्थादयोऽप्यत्र ।

प्रेक्षागार न० ६त० । राज्ञां मन्त्रणार्थगृहे हरिवं० ८५अ०

प्रेक्षादि चातुरर्थ्यामिनि प्रत्ययनिमित्ते शब्दगणः स च गणः पा०ग० उक्तो यथा "प्रेक्षा हलका बन्धुका ध्रुवका क्षिपका न्यग्रोध इक्कट कङ्कट सङ्कट कटकूप धुक धूक पुट मह परिवाप यवाष ध्रुवका गर्त्त कूपक हिरण्य" ।

प्रेक्षावत् त्रि० प्रेक्षा अस्त्यर्थे मतुप् मस्य वः । समीक्ष्यकारिणि ।

प्रेक्षण न० प्र+ईक्ष–ल्युट् णत्वम् । १प्रकर्षेण दर्शने २दृश्यरूपकान्तर्गते ३रूपकभेदे तल्लक्षणं सा०द० उक्तं यथा "गर्भावमर्षरहितं प्रेक्षणं हीननायकम् । असूत्रधारमेकाङ्कमविष्कम्भप्रवेशकम् । नियुद्धसम्फोटयुतं सर्ववृत्तिसमाश्रितम् । नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना" ।

प्रेङ्खा स्त्री प्र+इखि वा० आधारे अङ् । १दोलायाम् अमरः भावे अङ् । २परिभ्रमणे ३स्वार्थकगतौ अश्वगतौ इति पाठान्तरम् । ४गृहभेदे मेदि० ५नृत्ये च भरतः ।

प्रेङ्खित त्रि० प्र+इखि–क्त । कम्पिते अमरः ।

प्रेङ्खोल दोलने अद०चुरा०उभ०सक० सेट् । प्रेङ्खोलयति ते अपिप्रेङ्खोलत् त । प्रस्योपसर्गत्वमपीच्छन्तीत्यन्ये तेन प्रापिङ्खोलत् त इत्येवरूपम् ।

प्रेण गतिप्रेरणाश्लेषणेषु भ्वा०पर० सक० सेट् माधवः । प्रेणति अप्रेणीत् ऋदित् अपिप्रेणत् त ।

प्रेणि त्रि० प्रेण–इन् । प्रेरके ऋ० १।११२।१० भा०।

प्रेत त्रि० प्र–इ–क्त । १मृते अमरः । २नरकस्थे जीवभेदे ३पिशाचभेदे आतिवाहिकदेहोत्तरं ४आयमानदेहभेदे मृते और्द्धदेहिकक्रियाऽभावे तद्रूपप्राप्तिकथा पाद्मोत्त०ख० १६अ० यथा "ततो बहुतिथे काले स राजा पञ्चतागतः । वैदिकेन विधानेन न लेभे चौर्द्धदेहिकम् । विष्णुप्रद्वेषमात्रेण पुण्यानां सन्निवर्त्तितम् । भुक्त्वा च यातनां याम्यां निस्तीर्णनरको नृपः । अनया गिरिराजन्तु पिशाचोऽभूत्तदा महान्" । तस्य रूपं यथा "देवद्युतिरवीयानः शुश्राव रुदवसानम् । अथागत्य ततस्तत्र तं पिशाचं ददर्श सः । विकरालमुखं दीनं पिङ्गलनयनं भृशम् । ऊर्द्धमूर्द्धजकृष्णाङ्गं यमदूतमिवापरम् । प्रलम्बजिह्वं लम्बोष्ठं दीर्घजङ्घं शिराकुलम् । दीर्घाङ्घ्रिं शुष्कतुण्डञ्च गर्त्ताक्षं शुष्कपञ्जरम्" ।

और्द्धदेहिककरणेऽपि केषाञ्चित् कर्मविशेषेण प्रेतत्वप्राप्तिस्तत्रोक्ता यथा "हरिर्जुह्वति नाम्नो ये गोविन्दं नार्चयन्ति ये । अधन्ते नात्मविद्यां सुतीर्थविमुखाश्च ये । सुवर्णं वस्त्रताम्बूलं रत्नमन्नं फलं जलम् । आर्त्तेभ्यो न प्रयच्छन्ति सर्वेषु कृतदारकाः । ब्रह्मस्वञ्च स्त्रीधनानि लोभादेव हरन्ति ये । बलेन छद्मनाऽपि धूर्त्ताश्च परवञ्चकाः । नास्तिकाः कुहकाश्चौरा ये चान्ये वक्रवृत्तयः । बालवृद्धातुरस्त्रीषु निर्दयाः सत्यवर्जिताः । अग्निदा गरदा ये च ये चान्ये कूटसाक्षिणः । अगम्यागामिनः सर्वे ये चान्ये ग्रामयाजिनः । व्याधाचरणसम्पन्ना वर्णादिधर्मवर्जिताः । ये चोपदेवदनुजरक्षोयक्षादिसेविनः । सर्वदा मादकद्रव्यपानमत्ता हरिद्विषः । देवतोद्दिष्टपतितव्यपात्रान्नभोजिनः । असत्कर्मरता नित्यं सर्वपातकपापिनः । पाषण्डधर्माचरणाः पुरोधोवृत्तिजीविनः । पितृमातृस्वसापत्न्यसुदारत्यागिनश्च ये । ये कदर्य्याश्च लुब्धाश्च नास्तिका धर्मदूषकाः । त्यजन्ति स्वामिनं युद्धे त्यजन्ति शरणागतम् । गवां भूमेश्च हर्त्तारो ये चान्ये रत्नदूषकाः । महापातकेषु सर्वेषु प्रतिग्रहरताश्च ये । परद्रोहरता ये च तथा ये शाखिहिंसकाः । परापवादिनः पापा देवतागुरुनिन्दकाः । कुप्रतिग्राहिणः सर्वे सम्भवन्ति पुनःपुनः । प्रेतराक्षसपैशाच्यतिर्य्यग्वृक्षयोनिषु । न तेषां सुखलेशोऽस्ति इह लोके परत्र च" । पाद्मोत्तरखण्डे १८अ० । पञ्चप्रेतोपाख्यानं तत्रैव यथा "ब्राह्मण उवाच प्रेतानां वाम जातीनां युष्माकं सम्भवः कथम् । किं नु कारणमुद्दिश्य यूयमीदृशनामकाः" । प्रेता ऊचुः "अहं स्वादु सदा भुक्त्वा दद्यां पर्युषितं

सदा । एतत्कारणमुद्दिश्य नाम पर्य्युषितं मम । सूचिता बहवोऽनेन विप्राद्या ह्यन्नकाङ्क्षिणः । एतत्कारणमुद्दिश्य सूचीमुखश्चमिमं विदुः । शीघ्रं गच्छति विप्रेण याचितः क्षुधितेन वै । पश्चाद्भुङ्क्ते द्विजः शिष्टमेव शीघ्रकश्च उच्यते । स्थाल्योपरि सदा भुङ्क्ते स्वादु द्विजभयेन हि । द्विजाय कुत्सितं दत्त्वा एष रोहकश्च उच्यते । मौनेनापि स्थितो नित्यं याचितो विलिखन्महीम् । अस्माकमपि पापिष्ठो लेखकोऽयं नाम एष वै । मेढ्रेण लेखको याति रोहकः पार्श्वतःशिराः । शीघ्रकः पङ्गुतां प्राप्तः सूची सूचीमुखोऽभवत्"। प्रेताहारस्तत्रोक्तो यथा "द्विज उवाच "ये जीवा भुवि तिष्ठन्ति सर्वे आहारमूलकाः । युष्माकमपि चाहारं श्रोतुमिच्छामि तत्त्वतः" प्रेता ऊचुः "शृणु आहारमस्माकं सर्वसत्त्वविगर्हितम् । श्लेष्ममूत्रपुरीषेण योषितान्तु मलेन च । गृहाणि त्यक्तशौचानि प्रेता भुञ्जन्ति तत्र वै । स्त्रीभिर्जग्धानि जीर्णानि संकीर्णोपहतानि च । मलेनात्तजुगुप्सानि प्रेता भुञ्जन्ति तत्र वै । भयलज्जाविहीनानि पतितैः सेवितानि च । अन्योन्यदस्युमुक्तानि प्रेता भुञ्जन्ति तत्र वै । कलहान्वितशोकानि त्यक्तगोभानि मस्तकैः । सशब्दानि भाण्डानि प्रेता भुञ्जन्ति तत्र वै । बलिमन्त्रविहीनानि दिवाऽदृष्टानि यानि तु । नियमव्रतहीनानि प्रेता भुञ्जन्ति तत्र वै । गुरवो नैव पूज्यन्ते स्त्रीजितानि गृहाणि च । सक्रोधान्यपवित्राणि प्रेता भुञ्जन्ति तत्र वै । भुञ्जन्ति भिन्नभाण्डेषु मर्यादारहितेषु च । अन्योन्योच्छिष्टयुक्तेषु तत्र प्रेतास्तु भुञ्जते । सकेशमाक्षिकोच्छिष्टं पूति पर्युषितं तथा । सक्रोधस्य सशोकस्य तत्र प्रेतेषु भोजनम् । सनग्नं भोजनं यत्र नोत्तरीयं सदासनम् । सोष्णीषं साम्बरीकञ्च तत्र प्रेतेषु भोजनम् । सर्वपाकं महापाकं सोत्क्षिप्तं पतितं तथा । दुर्भुक्तं शौण्डिकञ्चैव तत्र प्रेतेषु भोजनम् । सौतिकं मृतकञ्चैव राजकं कलुषीकृतम् । निर्दीपं लम्बमाने यद्भुक्तं प्रैतिकन्तु तत् । एतत्ते कथितं सर्वं यत् प्रेतेष्वेव भोजनम् । निवर्त्तनाः प्रेतजात्या वै शृण्वामस्त्वां द्विजोत्तम" । प्रेतत्वाभावकारणं यथा "न प्रेतो जायते येन येन चैवेह जायते । एतत्सर्वं समासेन ब्रूहि वदतां वर !" ब्राह्मण उवाच "एकरात्रं त्रिरात्रं वा कृच्छ्रं चान्द्रायणादिकम् । व्रतेष्वभ्युषितो यस्तु न प्रेतो जायते नरः । मिष्टान्नपानदाता च सततं श्रद्धयान्वितः । देवपूजापरो नित्यं न प्रेतो जायते नरः । निरग्निरेकपक्षाग्निर्निरग्निर्वाप्युपासकः । सर्वभूतदयापन्नो न प्रेतो जायते नरः । तुल्यमानापमानश्च तुल्यः काञ्चनलोष्टयोः । तुल्यः शत्रौ च मित्रे च न प्रेतो जायते नरः । देवतातिथिपूजासु गुरुजातिषु नित्यशः । वेदशास्त्ररतो नित्यं न प्रेतो जायते नरः । जितक्रोधो मदैश्वर्य्यतृष्णासङ्गविवर्जितः । क्षमाऽक्रोधसुशीलश्च न प्रेतो जायते नरः । देवतातिथिपूजासु पर्वतांश्च नदीस्तथा । पश्येद्देवालयांश्चैव न प्रेतो जायते नरः"। प्रेतत्वकारणं यथा "शूद्रान्नं यो द्विजो भुङ्क्ते यः क्रामति द्विजोत्तमम् । वृत्तिहा द्विजदेवेषु स प्रेतो जायते नरः । मातरं पितरं वृद्धं ज्ञातिं साधुजनं तथा । लोभात्त्यजति यः स्निग्धं स प्रेतो जायते नरः । अयाज्ययाजकश्चैव याज्यञ्च परिवर्जयेत् । शूद्रानुपहृतानां च स प्रेतो जायते नरः । कुज्योतिषी कुविद्यस्तु कुजनेषु कुदेशकः । मूढसेवाकरो राज्ञां स प्रेतो जायते नरः । वेश्यायापहृतो यः सेवकस्त्वपरिग्रहः । तावुभावपि जायेते प्रेतौ कालान्त विंशदौ । द्विजानुमन्त्रितो भुङ्क्ते शूद्रान्नं वा द्विजस्य तु । शूद्रेणैव द्विजः प्रेतो निरयानुपगच्छति । गीतवाद्यरतो नित्यं मद्यपस्त्रीनिषेवणात् । द्यूतमांसप्रियो यस्तु स प्रेतो जायते नरः । वृथारेता वृथामांसो वृथावादो वृथामतिः । निन्दको द्विजदेवानां स प्रेतो जायते नरः । वृद्धं बालं गुरुं विप्रं योऽवमन्य भुनक्ति वै । कन्यां ददाति शुल्केन स प्रेतो जायते नरः । न्यासापहर्त्ता मित्रध्रुक् परपाकरतस्तथा । विश्वस्तघाती कूटश्च स प्रेतो जायते नरः । निर्दोषान् सुहृदो नारीस्त्यजेद् कामाद् घाति यः । धनमीहेत यस्तेषां स प्रेतो जायते नरः । कृत्स्नशरण्यानानि मतशय्यासनादि यः । कृष्णाजिनञ्च गृह्णाति अनापद्गतो द्विजः । तपोभयसुवर्णश्राद्धं सर्वेषां मेदिनीं द्विजः । गुरुश्लेषस्य यद्दानं चाण्डालात् पतितात्तथा । नास्तिकेऽपि नवश्राद्धे भुञ्जन् प्रेतान्नभुङ्मतः । ब्रह्महा गोवधी स्तेयी सुरापो गुरुतल्पगः । भूमिकन्यापहर्त्ता यः स प्रेतो जायते नरः । भानानासुकृत्कृत्येषु वर्णसङ्करदस्तथा । योनिसङ्करकर्त्ताऽपि स प्रेतो जायते नरः । विक्रीणाति विषं शस्त्रं तिलानां लवणस्य तु । गव्यं क्षीरघृतं मोहात् विक्रयात् प्रेततां व्रजेत् । कूटपाशेन तोलेन क्रयं क्री-

याति विक्रयात्। मद्यतक्रपयोदश्च स प्रेतो जायते नरः। क्षीरक्षो मद्यपाने तु नगयाननुधावति। नित्यनैमित्तिकेऽदाता स प्रेतो जायते नरः” अग्निपु०। मनुष्याणाञ्च दाहादिक्रियया ऽतिवाहिकदेहानन्तरं प्रेतदेहो भवति यथाह विष्णुधर्मोत्तरे

“तत्क्षणादेव गृह्णाति शरीरमातिवाहिकम्। आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव!। केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्। प्रेतपिण्डैस्ततो दत्तैर्देहमाप्नोति भार्गव!। भोगदेहमिति प्रोक्तं क्रमादेव न संशयः। प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम्। श्मशानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते। तत्रास्य यातना घोराः शीतवातातपोद्भवाः। ततः सपिण्डीकरणे बान्धवैः स कृते नरः। पूर्णे संवत्सरे देहमतोऽन्यं प्रतिपद्यते। ततः स नरके याति स्वर्गे वा स्वेन कर्मणा” शु०त०। ५प्राप्तपितृलोके “अत ऊर्द्ध्वं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात्” गोभिलः “प्रेतलोकं परित्यज्य आगता ये महालये” ति०त०।

प्रेतकर्म्मन् न० ६त०। १मृतोद्देशेन कर्त्तव्ये दाहादिसपिण्डनान्तकर्म्मणि मा०द्रो०५२अ०। प्रेतकार्य्यादयोऽप्यत्र। २प्राप्तपितृलोकोद्देश्यककार्य्ये श्राद्धादौ च “अकृत्वा प्रेतकार्य्याणि प्रेतस्य धनहारकः। वर्णानां यद्वधे प्रोक्तं तद्व्रतं नियतश्चरेत्” दाय०त० वचनम्।

प्रेतगृह न० प्रेतस्य मृतस्य गृहमिव। मृतस्य शरीराधारे श्मशाने हेमच०। प्रेतावासादयोऽप्यत्र।

प्रेततर्पण न० ६त०। मृतोद्देशेन वर्षपर्य्यन्तं प्रेतशब्दोल्लेखेन कर्त्तव्ये तर्पणविशेषे तद्विधानं शु०ति० यथा

मिश्राचार्य्यपृथ्वीधरधृतविष्णुसूत्रम् “अतः सर्वे शवस्पर्शिनो गत्वा पितृपदस्थाने प्रेतपदोल्लेखेन द्वितीयान्तं तर्पयेयुः पितृशब्दोच्चारेण पितृहा भवति”। शातातपः “प्रेतान्तनामगोत्राभ्यामुत्सृजेदुपतिष्ठताम्” इति प्रेतान्तेति तत्पुरुषः न बहुव्रीहिः सर्वजघन्यत्वात् तेन प्रेतान्तनाम-गोत्रस्येति समासः एतद्वचनात्तिलापिण्डदाने उपतिष्ठतामिति पितृदयितावामप्युक्तम्। एतेन प्रेतकार्ये समन्त्रार्थकपदप्रयोगो मैथिलोक्तो हेयः। एतेनामुकगोत्रमुकदेवशर्म्माणं तर्पयामीति मामगानां प्रयोगः। अत्र प्रेततर्पणे सतिलाञ्जलिरिति विशेषोपादानात् रव्यादिवारेऽपि तिलैरेव तर्पणं प्रतीयते। व्यक्तमाह कल्पतरुजातधृता स्मृतिः “अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च। उपाकर्म्मणि चोत्सर्गे युगादौ मृतवासरे। सूर्य्यशुक्रादिवारे च न दोषस्तिलतर्पणे”। तथा “तीर्थे तिथिविशेषे च कार्य्यं प्रेते च सर्वदा”। तिथिविशेषे अमावस्याद्यग्रहरादौ। अत्र दक्षिणाकुशसहितमध्यमादिना वामहस्ते तिलदानं “वामहस्ते तिलान् दत्त्वा जलमध्ये तु तर्पयेत्। दक्षहस्तन्तु कर्त्तव्यं न मुद्रां तत्र दर्शयेत्” इति विद्याकरधृतवचने वामहस्त इति सप्तम्यन्तश्रवणात् “तिलान् संमिश्रयेज्जले” इति तिलाधिकरणतुपक्रम्याभिधानाच्च। “सव्येन च तिलाः ग्राह्याः” इत्यत्रापि वामहस्ते स्थाप्या इत्यर्थः। सव्येनेति स्थाल्या पचतीतिवदधिकरणे तृतीया “विवक्षातो हि कारकाणि भवन्ती”त्युक्तेः। मुद्रा कनिष्ठतर्जन्यात्मकयोगरूपा तिलग्रहणायेति शेषः”।

प्रेतधूम पु० ६त०। चिताधूमे मनुः ४।६९। [नदीभेदे शब्दच०।

प्रेतनदी स्त्री प्रेतगम्या नदी। यमद्वारस्थे वैतरणीनामके

प्रेतनिर्हारक पु० प्रेतं निर्हरति गृहात् श्मशानभूमिं निर्+हृ-ण्वुल्। शवहारके “प्रेतनिर्हारकाश्चैव वर्जनीयाः प्रयत्नतः” तस्य अपाङ्क्तेयता मनुनोक्ता। तच्च कुल्लू० धनग्रहणपूर्वकहरणपरतया व्याख्यातं यथा “प्रेतनिर्हारको धनग्रहणेन न तु धर्मार्थम्। “एतद्वै परमन्तपो यत् प्रेतमरण्यं हरन्ती”ति श्रुत्या विहितत्वात्”

प्रेतपक्ष पु० प्रेतानां पितॄणां प्रियः पक्षः शा०त०। गौणाश्विनकृष्णपक्षे अत्र मृतयोः पित्रोः पार्वणविधिना नैपुरुषिकं श्राद्धं करणीयं यथाह श्रा०त० शङ्खः

“सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते। तत्र तत्र त्रयं कुर्य्यात् वर्जयित्वा मृताहनि। अमावस्यां क्षयो यस्य प्रेतपक्षेऽथ वा पुनः। सपिण्डीकरणादूर्द्ध्वं तस्योक्तः पार्वणो विधिः”। त्रयं सम्प्रदानानां त्रयं कुर्य्यात् त्रिभ्यो दद्यादित्यर्थः। मृताहपर्युदस्तनिर्देशवत्त्वस्य प्रतिप्रसवमाह अमावस्यामिति प्रेतपक्षोऽत्र पितृपक्षः आश्वयुककृष्णपक्ष इति यावत् न तु कृष्णपक्षमात्रं कृष्णपक्षसामान्यपरत्वेऽमावास्यापदवैयर्थ्यापत्तेः पितृपक्षं विशेषयति हेमाद्रिमाधवाचार्य्यधृतं नागरखण्डम् “नभो वाऽथ नभस्यो वा मलमासो यदा भवेत्। सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः”। अत्र श्रावणभाद्रयोरन्यतरस्य मलमासत्वे आषाढ़ीमवधिं कृत्वा सप्तमपक्षस्य पितृपक्षत्वात् अत्र मृतस्यैव प्रेतपक्षमृतत्वं न तु मलमासभाद्रकृष्णपक्षे मृतस्य। ततश्च तत्र मृतस्य

अपोऽन्तरेऽप्ययुक्तत्वाच्चेऽपि "तच्छ्राद्धकरणे न पार्व्वणं किन्त्वेकोद्दिष्टमिति । अत्र पार्व्वणो विधिः पार्व्वणेतिकर्त्तव्यताकैकोद्दिष्टविधिरिति मध्यमव्याख्यानपर्य्यन्ततया । तत्र पूर्ववचनोक्तत्रैपुरुषिकस्य मृताहे पर्व्वदत्तस्य पार्व्वणोविधिरित्यनेन प्रतिप्रसवात् । तस्मात् यदेकोद्दिष्टं त्रैपुरुषिकं न तु षाट्पौरुषिकं "अर्घ्यसमन्वितं सुक्त्वा तथाद्यं श्राद्धभोजनम् । प्रत्याब्दिकन्तु शेषेषु पिण्डाः स्युः षडिति स्थितिः" इति छन्दोगपरिशिष्टवचनेन प्रत्याब्दिकव्यतिरेकेण षट्संख्यानियमात् एवममावस्यादिमरणनिमित्तेन मातुरपि प्रत्याब्दिकं पार्व्वणविधिनैव "अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये । तेषामपि च देयं स्यादेकोद्दिष्टं न पार्व्वणम्" इति आपस्तम्बवचने अपुत्रा इति विशेषणोपादानात् सपुत्राणां पार्व्वणाभ्यनुज्ञानात् । एतच्च मातामहत्रयदैवतं कार्य्यम् । "मात्रे पितामह्यै प्रपितामह्यै पूर्ववत् ब्राह्मणान् भोजयित्वा" इत्यष्टकायां तथादर्शनात् अमावास्यादिनिमित्तत्वेन पार्व्वणविधिना छन्दोगैरपि मातामहादित्रिकाणां श्राद्धं कर्त्तव्यम् "न योषिद्भ्यः पृथग् दद्यादवसानदिनादृते" । इति छन्दोगपरिशिष्टवचने विशेषतः प्रतिप्रसवात् । एवं सपिण्डीकरणेऽपि । एतच्च मृताहपार्व्वणं मातापित्रोरेव । तथा च हेमाद्रिधृतकात्यायनवचनम् "सपिण्डीकरणादूर्द्ध्वं पित्रोरेव हि पार्व्वणम् । पितृव्यभ्रातृमातॄणामेकोद्दिष्टं सदैव तु" । मातृपदं सपत्नीमातृपरम् । सपत्नीमातरित्यत्र मातृपदस्य राजदन्तादित्वात् परनिपातः तत्र वाक्ये मातृसपत्नीति न प्रयोज्यं किन्तु सपत्नीमातरित्यादिकम् । एवं साग्निकौरसक्षेत्रजाभ्यां मृताहे पार्व्वणं कर्त्तव्यम् "औरसक्षेत्रजौ पुत्रौ विधिना पार्व्वणेन तु । प्रत्यब्दमितरे कुर्य्युरेकोद्दिष्टं सुता दश" इति जाबालवचनस्य "यत्र यत्र प्रदातव्यं सपिण्डीकरणात् परम् । पार्व्वणेन विधानेन देयमग्निमता सदा" इति मत्स्यपुराणवचनस्य चैकवाक्यत्वात् । उशना च "प्रत्यब्दं दर्शवच्छ्राद्धं साग्निः कुर्व्वीत वै द्विजः । एकोद्दिष्टं सदा कुर्य्यान्निरग्निः श्राद्धदः सुतः" । अत्र नि० सि० विशेषमाह

वृद्धपराशरः "संग्रामे संस्थितानाञ्च प्रेतपक्षे यथि-चये । तेषां पार्व्वणमेवोक्तं क्षयाहेऽपि च सत्तमैः" । "चन्द्रपातादिसंयुगेषु यः प्रेतपक्षे मृतवान् सपिण्डः । सपिण्डितानामपि श्राद्धदिनानि भवन्ति तेषामिह पार्व्वणानि" । तथा "भ्रातुर्ज्येष्ठस्य कुर्व्वीत ज्येष्ठो भ्रातानुजस्य च । दैवहीनं तु तत्कुर्य्यादिति धर्म्मविदब्रवीत्" । दैवहीनमेकोद्दिष्टम् ज्येष्ठो भ्रातानाद्यगर्भजः तथा च तत्रैव शातातपः "अनाद्यगर्भो ज्येष्ठोऽपि भ्राता सद्भिर्निगद्यते । ऋते सपिण्डनात्तस्य नैव पार्व्वणमाचरेत्" । आद्यगर्भे तु पार्व्वणमेकोद्दिष्टं वेत्यर्थः । मातुस्तु हेमाद्रौ कात्यायनः "प्रत्यब्दं यो यथा कुर्य्यात् पुत्रः पित्रे सदा द्विजः । तथैव मातुः कर्त्तव्यं पार्व्वणं वान्यदेव वा" । यत्तु तेनैवोक्तम् "सपिण्डीकरणादूर्द्ध्वं पित्रोरेव हि पार्व्वणम् । पितृव्यभ्रातृमातॄणामेकोद्दिष्टं सदैव तु" इति तत् सापत्नमातृपरम् । यत्तु वृद्धपराशरः "अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत् । स एवास्य तु कुर्व्वीत पिण्डदानादिकक्रियाम् । पार्व्वणं तेन कार्य्यं स्यात् पुत्रवद्भ्रातृजेन तु । पितृस्थाने तु तं कृत्वा शेषं पूर्व्ववदाचरेत्" इति तत्पितृवद्दैवाचारवद्व्यवस्थितमिति पृथ्वीचन्द्रः । श्राद्धदीपकलिकायां चतुर्विंशतिमते तु "पितृव्यभ्रातृमातॄणां ज्येष्ठानां पार्व्वणं भवेत् । एकोद्दिष्टं कनिष्ठानां दम्पत्योः पार्व्वणं मिथः । अपुत्रस्य पितृव्यस्य भ्रातुश्चैवापजन्मनः । मातामहस्य तत्पत्न्याः श्राद्धं पार्व्वणवद्भवेत्" इत्युक्तं तत्पत्न्याः कर्तृत्वेऽपि पार्व्वणमेव "भर्त्रभावे स्वयं पत्न्याः स्वभर्तॄणाममन्त्रकम् । सपिण्डीकरणं कुर्य्युस्ततः पार्व्वणमेव च" इति गौतमीयस्मृतेः । "ततः पत्न्यपि कुर्व्वीत सापिण्ड्यं पार्व्वणं तथेति" अमन्त्रकं चेति निर्णयामृते उक्तम् । अन्ये त्वेतत्पाक्षिकपार्व्वणपरमाहुः अतएव "भर्त्तुः श्राद्धं तु या नारी मोहात्पार्व्वणमाचरेत् । न तेन तृप्यते भर्त्ता स्वयं तु नरकं व्रजेत्" इति वचनं क्षयाहे पाक्षिकैकोद्दिष्टप्रशंसार्थं न पार्व्वणनिषेधार्थमित्युक्तं निर्णयसिन्धौ भट्टचरणैः । आभर्त्तृप्रभृतिमिश्च इत्यनेन विरोधाच्च अपुत्राणाम् आह हेमाद्रावापस्तम्बः "अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये । तेषामपि च देयं स्यादेकोद्दिष्टं न पार्व्वणम् । मित्रबन्धुसपिण्डेभ्यः स्त्रीकुमारीभ्य एव च । दद्यादै मासिकं श्राद्धं सांवत्सरमतोऽन्यथा" । पारिजाते तु अन्यथा पार्व्वणमित्युक्ता सर्व्वत्र पार्व्वणमित्युक्तम् एकोद्दिष्टवाक्यानि तु तीर्थमहालयपराणीत्युक्तम् । पृथ्वीचन्द्रोदये वृद्धगार्ग्यः "मातुः सहोदरा या च पितुः सहभवा च या । तयोश्चैव कुर्व्वीत पार्व्वणं पिण्डनादृते" प्रचेताः "सपिण्डीकरणादूर्द्ध्वं-

मेकोद्दिष्टं विधीयते। अपुत्राणां च सर्वेषामपत्नीनां तथैव च"। अपत्नीनां ब्रह्मचर्य्यादीनाम्। मार्कण्डेयपुराणे "प्रतिसंवत्सरं कार्य्यमेकोद्दिष्टं नरैः स्त्रियाः। मृताहनि यथान्यायं नृणां यद्वदिहोदितम्"। स्त्रिया-मिति श्रवणात् गोविप्रहतपापकृतादीनां सपिण्ड-नाभावेऽपि सांवत्सरमेकोद्दिष्टं कार्य्यमेवेति शूलपाणिः। अत्रिवृद्धवसिष्ठौ "सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते। तत्र भगिन्यै पुत्राय स्वामिने मातुलाय च। पितृव्यगुरवे श्राद्धमेकोद्दिष्टं न पार्वणम्"। यत्तु जातूकर्ण्यः "पितृव्यभ्रातृमातॄणामपुत्राणां तथैव च। मातामहस्यापुत्रस्य श्राद्धादि पितृवद्भवेत्" इति तदाव-श्यकत्वार्थं न तु पार्वणार्थमिति हेमाद्रिः। युक्तञ्चैवम् "मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः। तेषां तु पितृवच्छ्राद्धं कुर्य्युर्दुहितृसूनवः" इति पुलस्त्योक्तेः प्रमातामहस्य पार्वणमेव तत्साहचर्य्यात् पितृव्यादौ तथा "पितृव्यभ्रातृमातॄणामेकोद्दिष्टं न पार्वणमिति" यमाद्यो-पक्रमे पुलस्त्योक्ते च विकल्पः। केचित्त्वापस्तम्बादिवा-क्यानि "व्युत्क्रमाच्च प्रमीतानां नैव कार्य्या सपिण्डता" इत्यस्य पितृव्यादिपरत्वादकृतसपिण्डनपितृव्यादिपराणी-त्याहुः। माता सपत्नीमाता। एकोद्दिष्टं तु कनिष्ठपर-मिति पृथ्वीचन्द्रोदयेऽप्येवम्। विशेषस्त्वधिकारिनिर्णये प्रागुक्तः। केचित्तु पुत्राभावेऽपि पितामहपार्वणस्याव-श्यकत्वम् "पुत्राभावे च तत्पुत्रः पत्नी भ्राता तथा पिता। पित्रभावेऽपि सपिण्डाः कुर्य्युस्तस्यौर्द्ध्वदेहिकम्" इति मार्कण्डेयपुराणादिवाक्यैस्तस्य "पौत्रेणैकादशाहादि कर्त्तव्यं श्राद्धषोडशमिति" कातीये विशेषोक्तेः।

प्रेतपक्षे श्राद्धकालादिनिरूपणम् श्रा०वि० यथा

ब्रह्मपुराणे "आश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्य्याद्दिने-दिने। त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव वा। न सन्ति पितरश्चेति कृत्वा मनसि यो नरः। श्राद्धं न कुरुते तत्र तस्य रक्तं पिबन्ति ते। यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः। तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा"। दिने दिने इति वीप्सया पक्ष-श्राद्धार्थं तत्र पञ्चदश श्राद्धानि दातव्यानि। ननु तिथि-ह्रासादेकस्मिंश्च पक्षे चतुर्दशस्वादर्शं चतुर्दश श्राद्धानि आपद्यन्ते। एवं तिथिवृद्धौ षोडश स्युः। न पञ्च-दशतिथ्यात्मकत्वाच्चान्द्रपक्षस्य दिने दिने पञ्चदशतिथि-ष्विष्टं तथा च एकस्मिन् दिने श्राद्धयोग्यतिथिद्वय-लाभे श्राद्धद्वयम् अहोरात्रद्वये न श्राद्धवृत्तिः। तथा च विष्णुधर्मोत्तरप्रथमकाण्डम् "तिथिनैकेन दिवसश्चान्द्र-मासेन कीर्त्तितः। अहोरात्रेण चैकेन सावनो दिवसः स्मृतः"। त्रिभागहीनं पक्षं वा इति षष्ठ्यादिकल्प उक्तः त्रिभागमित्येकादश्यादिकल्प उक्तः अर्द्धमेवेति त्रयो-दश्यादिकल्पः। न तु अर्द्धमिति पञ्चार्द्धमिति व्याख्यानं कल्पतरूक्तं युक्तम् उत्तरोत्तरलघुकालोपदेशात् सन्नि-धानाच्च त्रिभागार्द्धप्रतीतेः। त्रिभागहीनत्रिभागपदयो-रपि पञ्चम्यादिविशेषणं कल्पतरोर्न युक्तमेव पक्षापेक्षया पञ्चम्यादेस्त्रिभागहीनादिपदार्थत्वानुपपत्तेरसङ्गतत्वात्। गौतमोक्तपञ्चम्यादिकल्पस्य सामान्योपक्रमाच्चास्य युक्तपर-त्वम्। अतएव विष्णुधर्मोत्तरप्रथमकाण्डम् "उत्त-रायणात् श्राद्धे श्रेष्ठं दक्षिणायनम्। चातुर्मास्यञ्च तत्रापि प्रसुप्ते केशवे हितम्। प्रौष्ठपद्याः परः पक्ष-स्तत्रापि च विशेषतः। पञ्चम्यूर्द्ध्वञ्च तत्रापि दश-म्यूर्द्ध्वं ततोऽप्यति। मघायुक्ता च तत्रापि शस्ता राजं-स्त्रयोदशी"। पञ्चम्यूर्द्ध्वं दशम्यूर्द्ध्वमित्यनेन षष्ठ्याद्येकादश्या-दिकल्पावुक्तौ। न सन्त्यनेनाकरणे प्रत्यवायदर्शनं नित्यत्वज्ञापनार्थं तत्र च पक्षश्राद्धादिकल्पानां विषम-शिष्टत्वेनैच्छिकविकल्पाऽसम्भवादेकादश्या तिस्रो देयाः षड्देया इतिवत् फलभूमा कल्पनीयः। एतेषामेव क-ल्पानां दर्शितत्वादाश्विने कृष्णपक्षे एकस्मिन्नपि दिने श्राद्धं कर्त्तव्यमिति पक्षश्चिन्तनीयः सामान्यमासविहितन्तु श्राद्धम्। अत्र संशयः प्रौष्ठपद्यूर्द्ध्वं यः कृष्णपक्षः स पौर्णमास्यन्तमासव्यवस्थयाऽश्वयुक्कृष्णपक्षो भवति स यदा कन्योपक्रमः कन्यासमाप्यश्च तदा तत्र पक्षश्राद्धमविवाद-मेव यदा सिंहोपक्रमः कन्यासमाप्यश्च समस्त एव वा सिंहसमाप्यः तदा कीदृशः शास्त्रार्थः। अत्र शिष्टन-म्मतयः ब्रह्मपुराणादिवचनैरेवात्र व्यवस्थां द्रष्टव्या-माहुः। यथा ब्रह्मपुराणम् "यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः। तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा"। तथा भविष्यपुराणे "कन्यां गते सवितरि पितृराजानुशासनात्। तावत् प्रेतपुरी शून्या यावद्वृश्चिकदर्शनम्। ततो वृश्चिक आयाते निराशाः पितरो गताः। पुनः स्वभवनं यान्ति शापं दत्त्वा सुदा-रुणम्। हंसे वर्षासु कन्यास्थे शाकेनापि गृहे वसन्। पञ्चम्या उत्तरे दद्यादुभयोर्वंशयोर्हितम्। सूर्ये कन्या-स्थिते श्राद्धं यो न कुर्य्याद्गृहाश्रमी। कुतस्तस्य धनं

पुत्राः पितृभिःश्राद्धपीडनात्”। इमे स्वर्ग्ये इति । कृष्ण-
मिव मध्यं पितृमातृकुलस्य दशवर्षं परिशोध्यम् इत्यर्थः
एवमादिवचनैः कन्यासम्बन्धेनैव श्राद्धप्रतिपादनात् एत-
स्यापि वचनस्य तदेकवाक्यतया सौराश्विनपरत्वम् । सौर-
परत्वे कृष्णा स्यादिति चेन्न पौर्णमास्यन्तेऽपि तथात्वात् ।
अतः सिंहोपक्रमे कृष्णपक्षे कन्यासम्बन्धिन्येव भागे
श्राद्धं स्यात् न सिंहसम्बन्धिनि अत पक्षश्राद्धं तत्र
निवर्त्तत एव त्रिभागहीनमित्यादयः पक्षास्तत्र यथा-
सम्भवं योजनीयाः । कन्यासम्बन्धिन्यपरपक्षे श्राद्ध-
विधानात् उपक्रमे सिंहसम्बन्धेऽपि पक्षस्य कन्यासम्ब-
न्धोऽस्त्येवेति चेन्न एकस्य पक्षावयविनः पञ्चदशतिथ्या-
त्मकस्याभावात् अत एव पञ्चदशब्राह्मणसमुदायमध्ये
एकस्य पुरुषोत्तमस्पर्शे न सर्वेषां पुण्यभागिता एतन्मूलमे-
वेदं वचनं “कृत्तिकादिभरण्यन्तं वारा वा रविसङ्क्रमाः ।
नैते संयोगमात्रेण पुनन्ति सकलां तिथिम्” । एकस्य
तिथ्यवयविनोऽभावादित्यर्थः इतरथा तु पूर्वदिने रात्रौ
चतुर्थीभौमवारयोगे बुधवारेऽपि भौमयुक्तचतुर्थी-
विहितस्नानदानाद्यापत्तेः । यदा समस्त एवापरपक्षः
सिंहार्के निपतेत् तदा तं पक्षं विहाय कन्यागतापर-
पक्ष एव श्राद्धम् । अन्येषां पञ्चमपक्षविरोधः । तथा
कार्ष्णाजिनिः “शक्रध्वजनिपाताद्यो यः स्यात् पक्षस्तु
पञ्चमः । स विज्ञेयोऽपरः पक्षः श्राद्धं तत्र विधीयते ।
पुत्रमायुर्धनं धान्यं भूतिमारोग्यमेव च । प्राप्नोति पञ्चमे
दत्त्वा श्राद्धं कामांस्तथा परान् । एतानेव हि हिंसन्ति
पञ्चमं यो व्यतिक्रमेत् । तस्मान्नातिक्रमेद्विद्वान् पञ्चमे
पैतृकं विधिम्”। तथा जातूकर्ण्यः “आषाढीमवधिं कृत्वा
यः स्यात् पक्षस्तु पञ्चमः । तत्र श्राद्धं प्रकुर्वीत कन्यां
गच्छतु वा न वा”। जाबालः “अगतेऽपि रवौ कन्यां
श्राद्धं कुर्वीत यत्नतः । आषाढ्याः पञ्चमः पक्षः प्रशस्तः
पितृकर्मणि”। उच्यते एतेषां वचनानां भोजदेवप्रभृतिभि-
रलिखितत्वेन प्रामाण्याभावात् प्रत्युत पुत्रादिफलसम्ब-
न्धावगमात् काम्यं तद्विधिरिति । कन्यागतस्य च नित्यत्वं
प्रागेव दर्शितम् । न च काम्याधिकारनित्याधिकारयो-
रेकशास्त्रार्थत्वं यावज्जीवाधिकरणविरोधात् । तद्यदि
फलार्थितया कन्यासम्बन्धरहित एव श्राद्धं तत्
तथापि कन्यायामवश्यं कर्त्तव्यम् । वस्तुतस्तु श्राद्धभेदे
विधिगौरवापत्तेः कन्यागतश्राद्ध एव फलार्थितया पञ्चम-
पक्षाश्रयणफलविधिः तदा ... केवलपक्षे श्राद्ध-
मवश्यकृतमेव “कन्यां गच्छतु वा नवेति” पञ्चमपक्षस्तुत्यर्थं
न तु कन्यासम्बन्धाभावेऽपि श्राद्धविधानपरं प्राप्ते कन्या-
गतश्राद्धे गुणफलविधित्वात् तदुक्तं ब्रह्मपुराणे
“पौर्णमास्यन्तमासेनैव समस्ततिथिकल्पाभिधानात् अश्वयुक्
शब्दस्यापि पौर्णमास्यान्तपरत्वात् न सौराश्विनपरत्वम्
“आश्वयुज्यां तु कृष्णायां त्रयोदश्यां मघासु च” इति
ब्रह्मपुराण एव अश्वयुक्शब्दस्यापि पौर्णमास्यन्तपरत्वावधा-
रणाच्च पौर्णमास्यन्ताश्विन एव मघा त्रयोदशी भवति न
दर्शान्ते, कृष्णा च सौरेऽप्यविशिष्टा । अतएव न तुल्य-
त्वाय दर्शान्तपरतापि क्रमनातृपद्यानुपपत्त्या अक्षय्याया
धान्यमस्त्यधिकरणे दर्शितत्वात् । इदन्तु उच्यते उक्तयुक्तेः
पौर्णमास्यान्ताश्विनपरत्वे कन्यानिरपेक्षपञ्चमपक्षे पक्षश्रा-
द्धादिकस्य नित्यतयाऽवगम्यत्वे न कन्याविशिष्टा निरपेक्ष-
श्रुतेः अत एव न गुणफलविधिः। अत एव कन्यासम्बन्धा-
नुद्देशेनैव प्रौष्ठपद्यूर्ध्वं पञ्चमपक्षे कृष्णपक्षश्राद्धादिकं दर्श-
यति विष्णुधर्मोत्तरप्रथमकाण्डम् “उत्तरादयनात् श्राद्धे
श्रेष्ठं स्यात् दक्षिणायनम् । चातुर्मास्यं तत्रापि
प्रसुप्ते केशवे हितम् । प्रौष्ठपद्याः परः पक्षस्तत्रापि च
विशेषतः । पञ्चम्यूर्द्ध्वं तु तत्रापि दशम्यूर्द्ध्वमतोऽप्यति ।
मघा युक्ता च तत्रापि शस्ता राजंस्त्रयोदशी । तत्राक्षय्यं
भवेत् श्राद्धं मधुना पायसेन तु । सर्वस्वेनापि कर्त्तव्यं
श्राद्धमत्र नराधिप ! । पराक्रभोजी त्वपचः श्राद्धमत्र
तु कारयेत्” । यानि च कन्याविषयाणि वचनानि
तानि पञ्चमपक्षानपेक्षश्राद्धान्तरविधायकान्येव । अन्यथा
प्रौष्ठपद्यूर्द्ध्वपञ्चमपक्षस्यापि कन्यागतस्यापि श्राद्धस्य
नित्यत्वेनावगम्यमानस्य तन्मात्रेण विशेषेण पृथक्करणम् ।
यदा न कन्यासत्त्वं तदा कन्यायामपि नित्यत्वात् कर्त्त-
व्यमेव परन्तु पक्षश्राद्धादिकल्पेषु प्रमाणाभावात् सकृ-
त्कृते कृतः शास्त्रार्थ इति न्यायात् सकृदेव श्राद्धं कर्त्त-
व्यम् । अधिमासपाते तत्र श्राद्धं न कर्त्तव्यं यथा लघु-
हारीतः “सपिण्डीकरणादूर्द्ध्वं यत्किञ्चित् श्राद्धिकं भ-
वेत् । इष्टं वाप्यथ वा पूर्त्तं तन्न कुर्यान्मलिम्लुचे” ।
एतदधिमासदोषेणाषाढादिना च तत्र श्राद्धाकरणे तु-
लायां कर्त्तव्यतामाह ब्रह्मपुराणे “यावच्च कन्यातुलयोः
क्रमादास्ते दिवाकरः । तावत् श्राद्धस्य कालः स्यात्
शून्यं प्रेतपुरं तदा”। अत्र कन्यातुलयोर्दिवाकरावस्थितेः
क्रमादेव प्राप्तत्वात् क्रमात् ग्रहणम् आह । तादृशस्य
द्वयस्य श्राद्धकालस्याभावेनैवार्थः ।

यस्य वा मृततिथिस्तस्य प्रेतपक्षे तत्सजातीयतिथिः परेऽपि मृततस्य तु पौष्ठपद्येव पार्वणश्राद्धकाल इति देशाद्विप्रवृत्तिव्यवस्थेति पाश्चात्त्यदर्शिव्याख्यानां तथाचारः। प्रा०वि० तन्मूलवचनानाममूलकत्वमुक्तमतोऽवचनानां न तथाचार इति बोध्यम्। अधिकमपरपक्षशब्दे २११ पृ० दृश्यम्। [वाद्यभेदे त्रिका०।

प्रेतपटह प्रेतस्य प्रेतत्वसूचकः पटहः। मरणकालवादनीये

प्रेतपति पु० ६त०। यमराजे

प्रेतपर्वत पु० प्रेतोद्धारणार्थः पर्वतः। गयातीर्थस्थे स्वनामख्याते पर्वते वायुपु० गयाम०।

प्रेतपिण्ड पु० प्रेताय देयः पिण्डः। पूरकपिण्डे तस्य प्रेतस्य पिण्डरूपदेहविशेषपूरकत्वात् पूरकसंज्ञा यथोक्तं ब्रह्मपु० "शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा। द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः। गलांसभुजवक्षांसि तृतीयेन तथा क्रमात्। चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च। जानुजङ्घे तथा पादौ पञ्चमेन तु सर्वदा। सर्वमर्माणि षष्ठेन सप्तमेन तु नाड्यः। दन्तलोमाद्यष्टमेन वीर्यं च नवमेन तु। दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः"।

प्रेतपुर न० ६त०। यमालये "शून्यं प्रेतपुरं भवेत्" ब्रह्मपु०

प्रेतमेध पु० ६त०। पितृदेवत्ये श्राद्धरूपे यज्ञे।

प्रेतराक्षसी स्त्री प्रेतस्य भूतभेदस्य राक्षसीव दूरतोऽपसर्पणकारित्वात्। तुलस्यां रत्नमाला।

प्रेतराज पु० ६त० टच्समा०। यमे तस्य मृतस्य शुभाशुभफलविभजनेन शासनात् तथात्वम्।

प्रेतलोक पु० ६त०। यमलोके "प्रेतलोकं परित्यज्य आगता ये महालये" उल्काद्दानमन्त्रः।

प्रेतवन न० प्रेतानां मृतानां वननिवाधारत्वात्। श्मशाने हेमच०। प्रेतकाननादयोऽप्यत्र।

प्रेतवाहित त्रि० ३त०। भूताविष्टे त्रिका०।

प्रेतशिला स्त्री गयातीर्थस्थे प्रेतोद्धारणार्थे गृध्रकूटपर्वतादिस्थे शिलाभेदे वायुपु० गयाम०। गरुडपु० ८६ अ० तन्माहात्म्यादि यथा "येयं प्रेतशिला ख्याता गयायां सा त्रिधा स्थिता। प्रभासे प्रेतकुण्डे च गयासुरशिरस्यपि। धर्मेण धारिता भूमौ सर्वदेवमयी शिला। प्रेतत्वं ये गता स्तेषां पित्राद्या बान्धवादयः। तेषामुद्धरणायेव यतः प्रेतशिला ततः। अतोऽत्र ऋषयो भूपा राजपत्न्यादयः सदा। तस्यां शिलायां श्राद्धादिकर्त्तारो ब्रह्मलोकगाः। गयासुरस्य यन्मुण्डं तस्य पृष्ठे शिला यतः। मुण्डपृष्ठो गिरिस्तस्मात् सर्वदेवमयो ह्ययम्। मुण्डपृष्ठस्य पादेषु यतो ब्रह्मसरोमुखाः। अरविन्दवनन्तेषु तेन चैवोपलक्षितः। अरविन्दगिरिर्नाम क्रौञ्चपादाङ्कितो यतः। तस्माद्‌गिरिः क्रौञ्चपादः पितॄणां ब्रह्मलोकदः। गदाधरादयो देवा आद्या आदौ व्यवस्थिताः। शिलारूपेण च व्यक्तास्तस्माद्देवमयी शिला। गयाशिरश्छादयित्वा गुरुत्वादास्थिता शिला। स्नात्वा प्रेतशिलादौ तु वरुणाम्बुस्रुतेन च। पिण्डं दद्यादिमैर्मन्त्रैरावाह्य च पितॄन् परान्"।

प्रेतशुद्धि स्त्री प्रेते सति कालविशेषे शुद्धिः। विप्रादीनां मृतानां मरणनिमित्ताशौचापगमे शुद्धौ "प्रेतशुद्धिं प्रवक्ष्यामि" मनुनोपक्रम्याशौचरूपतद्विरोधिनो दर्शनेन तदपगमे शुद्धिः प्रतिपादिता।

प्रेतशौच न० प्रेते सति शौचम् ६त०। प्रेते सति तन्निमित्ताशौचापगमे १शौचे २प्रेतसंस्कारभेदे च तत्प्रकारः गरुडपु० १०६ अ० उक्तो यथा
"प्रेतशौचं प्रवक्ष्यामि तच्छृणुध्वं यतव्रताः!। ऊनद्विवर्षं निखनेन्न कुर्यादुदकन्ततः। आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्वृतः। यमसूक्तं तथा जप्यं जपद्भिर्लौकिकाग्निना। स दग्धव्य उपेतश्चेदाहिताग्न्याद्यर्थवत्। सप्तमाद्दशमाद्वापि ज्ञातयो ह्युपयन्त्यपः। अप नः शोशुचदघमनेन पितृदिङ्मुखाः। एवं मातामहाचार्यप्रेतानाञ्चोदकक्रिया। कामोदकाः सखिपुत्रस्वस्रीयश्वशुरर्त्विजः। नामगोत्रेण ह्युदकं सकृत् सिञ्चन्ति वाग्यताः। पाषण्डपतितस्तेना न कुर्युरुदकक्रियाम्। न ब्रह्मचारिणो व्रात्या योषितः कामगास्तथा। सुरापास्त्वात्मघातिनो नाशौचोदकभाजनाः। अतो न रोदितव्यं हि त्वनित्या जीवसंसृतिः। क्रिया कार्य्या यथाशक्ति ततो गच्छेद् गृहान् प्रति। विदश्य निम्बपत्राणि नियता द्वारि वेश्मनः। आचम्याथाग्निमुदकं गोमयं गौरसर्षपान्। प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः। प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि। इच्छतां तत्क्षणाच्छुद्धिः परेषां स्नानसंयमात्। क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक् पृथक्। पिण्डयज्ञावृता देयं प्रेतायान्नं दिनत्रयम्। जलमेकाहमाकाशे स्थाप्यं क्षीरञ्च मृण्मये। वैतानोपासनाः कार्य्याः क्रियाश्च श्रुतिचोदिताः"।

प्रेतश्राद्ध न० प्रेतोद्देश्यकं श्राद्धम्। प्रेतोद्देश्यके आद्यश्राद्धादसपिण्डीकरणान्तश्राद्धे तस्य गौणकालादि ति०त० उक्तम् यथा “मासेऽन्यस्मिन् तिथौ तस्मिन् तदा दद्याद्विचक्षणः”। तथा श्रा०त० दर्शितं यथा. “षोडशश्राद्धानां यत्पतितं कृष्णैकादश्यां तत्कर्त्तव्यम्। तथा च लघुहारीतः “श्राद्धविघ्ने समुत्पन्ने सुताशौचविदिते तथा। एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः”। विशेषत इत्यमावस्यापेक्षया तस्यामपि विघ्नादौ विधानात्। यथा हेमाद्रिधृतं षट्त्रिंशन्मतम् “मासिके चाब्दिके त्वक्ति संप्राप्ते सूतसूतके। वदन्ति शुद्धौ तत्कार्यं दर्शे चापि विचक्षणैः”। राजमार्त्तण्डे “श्राद्धविघ्ने समुत्पन्ने अन्तरा मृतसूतके। एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः। श्राद्धविघ्ने समुत्पन्ने मृतस्याविदिते तथा। अमावस्यां प्रकुर्वीत वदन्त्येके मनीषिणः”। अत्र मृतसूतकोपदानात् व्याघ्रपादवचनेऽशौचपदमेतत्परम्। यत्त्वन्तरा मृतसूतकेऽप्येकादश्यां श्राद्धविधानं तत् “देये पितॄणां श्राद्धे तु अशौचं जायते यदि। तदशौचे व्यतीते तु तेषां श्राद्धं विधीयते। शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते। सा तिथिस्तस्य कर्त्तव्या न त्वन्या वै कदाचन” इति व्याघ्रपादवचनविरोधात् अशौचान्तदिने मलमासादिरूपविघ्नान्तरेण तदकरणे। अतएव श्राद्धविवेके अपाटवाद्यशौचाभ्यामपि पतितमेकोद्दिष्टमेकादश्यामशौचान्ते च मलमासे न कर्त्तव्यं किन्तु मलमासाव्यवहितकृष्णैकादश्यामेवेत्युक्तम्”।

प्रेति पु० प्रकर्षेण इतिर्गमनं देहेऽस्य। १अन्ने यजु० १५।६ वेददी०। प्र+इ–भावे क्तिन्। २मरणे स्त्री ऋ०१।२२।४॥

प्रेतीषणि त्रि० प्राप्तगमने ऋ० ६।१।८

प्रेत्य अव्य० प्र+इ–ल्यप्। १लोकान्तरे अमरः “प्रेत्य संज्ञा नास्ति” श्रुतिः। २मृत्वेत्यर्थे प्रकर्षेण देहत्यागेन अन्यदेहं गत्वेत्यर्थे च। प्रेत्यजातिः प्रेत्यभावः।

प्रेत्यजाति स्त्री प्रेत्य मृत्वा जातिर्जन्म। मृत्वा जन्मनि।

प्रेत्यभाव पु० प्रेत्य मृत्वा भावः। मरणोत्तरं पुनर्जन्मनि। “पुनरुत्पत्तिः प्रेत्यभावः” गौ०सू० १।१।१९ “उत्पन्नस्य क्वचित् सत्त्वनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभावः। उत्पन्नस्य सम्बद्धस्य सम्बन्धस्तु देहेन्द्रियमनोबुद्धिवेदनाभिः पुनरुत्पत्तिः पुनर्देहादिभिः सम्बन्धः पुनरित्यभ्यासाभिधानम् यत्र क्वचित् प्राणभृन्निकाये वर्त्तमानः पूर्वोपात्तान् देहादीन् जहाति तत् प्रैति यत् ततोऽन्यत्र देहादीनन्यानुपादत्ते तद्भवति प्रेत्यभावो मृत्वा पुनर्जन्म सोऽयं जन्ममरणप्रबन्धाभ्यासोऽनादिरपवर्गान्तः प्रेत्यभावो वेदितव्य इति” वात्स्या०। प्रवाहरूपेणानादिसम्बन्धः संसारः प्रेत्यभावः यथोक्तं कणा० सू० उप०वृ० “इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिः” “तत्संयोगो विभागः”सू० “इदानीं धर्माधर्मयोः प्रयोजनं प्रेत्यभावमाह। ताभ्यां धर्माधर्माभ्यां संयोगोजन्म अपूर्वाभिः शरीरेन्द्रियवेदनाभिः सम्बन्धः संयोग इहोच्यते विभागस्तु शरीरमनोविभागो मरणम् तथा चायं जन्ममरणप्रबन्धः संसारः प्रेत्यभावापरनामा धर्माधर्माभ्यामित्यर्थः अस्यैव च प्रेत्यभावस्याजरञ्जरीभाव इति वैदिकी संज्ञा”। “जातस्य च ध्रुवोमृत्युर्ध्रुवं जन्म मृतस्य च” गीतायां च जन्ममरणप्रवाहस्य ध्रुवत्वमुक्तम्।

प्रेत्वन् पु० प्र+इ–क्वनिप्। १इन्द्रे २वाते मेदि०।

प्रेमन् पु०न०प्रियस्य भाव इमनिच् प्रादेशः एकाच्कत्वात् न टिलोपः। १सौहार्दे २स्नेहे ३हर्षे मेदि०(वायौ इन्द्रे) शब्दस्तोमोक्तिः प्रामादिकी। “यद्भावबन्धनं यूनोः स प्रेमा परिकीर्त्तितः” उज्ज्वलमणयुक्ते ४भावबन्धभेदे पु०

प्रेमपातन न० प्रेम्णा स्नेहेन पातनं यस्य। १नेत्रजले २तदुपलक्षिते लोचने शब्दच०।

प्रेमबन्ध पु० ६त०। गाढानुरागे।

प्रेमभक्ति स्त्री प्रेम्णा भक्तिः। श्रीकृष्णे प्रेम्णा स्नेहेन भक्तौ तल्लक्षणं नारदपञ्चरात्रे उक्तं यथा “अनन्यममता विष्णौ ममता प्रेमसङ्गता। भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैरिति”। प्रेमभक्तेश्च माहात्म्यं भक्तिमाहात्म्यतः परम्। सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम्”। तच्चिह्नानि भाग०७स्क० उक्तानि यथा “निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि। यदाऽतिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति रौति नृत्यति च। यदा ग्रहग्रस्त इव क्वचिद्धसति क्रन्दते ध्यायति वन्दते जनः। मुहुः श्वसन् वक्ति हरे! जगत्पते! नारायणेत्यात्ममतिर्गतत्रपः। तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः। निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम्”।

प्रेमिन् त्रि० प्रेमास्त्यस्य ब्रीह्या० इनि टिलोपः। प्रेमयुते

प्रेयस् त्रि० अतिशयेन प्रियः प्रिय+ईयसुन् प्रादेशः एकाच्कत्वात् न टिलोपः। १प्रियतमे स्त्रियां ङीप् “प्रेयस्यपि मोक्षिता” प्रबोधच०। २पत्यौ पु० ३भार्यायां स्त्री हेम०।

प्रेरक त्रि० प्र+ईर–ण्वुल्। प्रयोजके प्रवृत्त्यनुकूलव्यापार-साधके।

प्रेरण न० प्र+ईर–णिच्–ल्युट्। प्रेषणे निक्षेपणे श्वाद्यादेः कार्य्यादौ नियोगे। णिच्–युच्। प्रेरणाप्यत्र स्त्री।

प्रेर्वन् पु० प्र+ईर–वनिप् नुट् च। १सागरे २नद्यां स्त्री ङीप् वनोर च। प्रेर्वरी उज्ज्वलद०।

प्रेष गतौ भ्वा०पर० सक० सेट्। प्रेषति अप्रेषीत्। ऋदित् चङि न ह्रस्वः। अपिप्रेषत् त।

प्रे(प्रै)ष पु० प्र+इष–घञ् वृद्धिः ईष–वा घञ् गुणः। १प्रेषणे २पीडने च जटा०।

प्रेषण न० प्र+इष–ल्युट्। प्रेरणे नियोगे। णिच्–युच्। प्रेषणाऽप्यत्र स्त्री। प्रेषणेन जीवति वेतना० ठक्। प्रैषणिक तदुपजीविनि त्रि०। प्रेषणं नित्यमर्हति छेदा० ठक्। प्रैषणिक नित्यप्रेषणार्हे त्रि०।

प्रेष्ठ त्रि०अतिशयेन प्रियः प्रिय+इष्ठन् प्रादेशः एकाच्कत्वात् न टिलोपः। १प्रियतमे अमरः। स्त्रियां टाप्। सा च २प्रियतमायां ३जङ्घायाञ्च शब्दच०।

प्रे(प्रै)ष्य त्रि०प्र+इष–कर्मणि ण्यत् वृद्धिः ईष–वा ण्यत् गुणः। १प्रेरणीये नियोज्ये २दासे अमरः। भावे यत्। ३प्रेरणे न०। तत्करोति कृ–ट। प्रेष्यकर नियोगकारके "यन्तुः प्रेष्यकराङ्कयः" भा०द्रो० २२अ०।

प्रेङ्खिकटा स्त्री प्रेङ्खि कट इत्युच्यते यस्यां क्रियायाम् मयू० स०। कटसम्बोधनक प्रगमनार्थक्रियानियोगे।

प्रेङ्खिकर्दमा स्त्री प्रेङ्खिकर्दम इत्युच्यते यस्यां क्रियायाम् मयू०स०। कर्दमसम्बोधनकप्रगमननियोगे। एवं प्रेङ्खि-द्वितीया प्रेङ्खिवाणिजा एतावपि शब्दौ मयू० समा०। द्वितयवाणिजसम्बोधनकप्रगमननियोगक्रिययोः। [प्रेङ्खे

प्रैय न० प्रियस्य भावः पृथ्वा० इमनिचाऽभावे अण्। प्रियत्वे

प्रैयव्रत त्रि० प्रियव्रतस्येदम् अण्। प्रियव्रतसम्बन्धिनि ठैव स्वतमनोः पुत्रभेदे अपत्ये तु इञ् प्रैयव्रति तत्रार्थे पु०

प्रैष पु० प्र+इष घञ् वा परस्पाभावः। १क्लेशे २मर्दने ३उन्मादे ४प्रेरणे च मेदि०।

प्रोक्त न० प्र+वच–गौणे कर्मणि, तद्वाविवक्षायां मुख्ये वा कर्मणि क्त। १कथिते यं प्रति किञ्चित् वस्तु कथ्यते तस्मिन् २वचेर्मुख्यकर्मणि पदार्थे च।

प्रोक्षण न० प्र+उक्ष–भावे ल्युट्। १यज्ञार्थे पशुहनने अमरः। २वधे ३सेचने च मेदि०। ४उत्तानहस्तेन जलादेः सेचने अधःपुच्छशब्दे २१२४पृ० दृश्यम्। प्रोक्ष्यतेऽनया करणे ल्युट् ङीप्। ५प्रोक्षणसाधनेषु अप्सु। स्त्री "अवस्तरे प्रोक्षणीर्निधाय" कात्या० श्रौ० २।२४० "याभिरद्भिर्हविषः पुरोडाशानाञ्च प्रोक्षणं क्रतं ताः प्रोक्षण्यः" कर्कः। उपचारात् ७तदाधारपात्रञ्च स्त्री।

प्रोक्षित त्रि० प्र+उक्ष–कर्मणि क्त। १सिक्ते २निहते मेदि० यज्ञार्थं संस्कृते ३पश्वादौ च "भक्षयेत् प्रोक्षितं मांसम्" इति स्मृतिः "आरण्याः सर्वदैवत्याः प्रोक्षिताः सर्वशो मृगाः। अगस्त्येन पुरा राजन्! मृगया येन पूज्यते" ति०त०।

प्रोज्जासन न० प्र+उद्+जस–णिच्–ल्युट्। मारणे हेमच०।

प्रोञ्छन न० प्र+उञ्छ–ल्युट्। मार्जने (पोँछा)।

प्रोज्झित त्रि० प्र+उज्झ–कर्मणि क्त। प्रकर्षेण त्यक्ते "धर्मः प्रोज्झितकैतवोऽत्र" भाग०१।१।२ श्लो० "अत्र प्रशब्देन मोक्षाभिसन्धिरपि निरस्तः" श्रीधरः।

प्रौ(प्रौ)ढ त्रि० प्र+वह–क्त वा वृद्धिः। १वृद्धे अमरः २प्रगल्भे हेमच० ३निपुणे राजनि०। ४प्रकर्षेण ऊढे च। स्त्रियां टाप्। सा च ५नायिकाभेदे नायिकाशब्दे ४०४२ पृ० दृश्यम्। "त्रिंशद्वर्षादूर्ध्वं पञ्च पञ्चाशद्वर्षपर्यन्तं प्रौढावस्था यथा" "आ षोडशात् भवेद्बाला तरुणी त्रिंशता मता। पञ्चपञ्चाशता प्रौढा भवेद् वृद्धा ततःपरम्"। अस्या वश्यताकारणं यथा "अलङ्कारादिभिर्बाला तरुणी रतियोगतः। प्रेमदानादिभिः प्रौढा वृद्धा च दृढताडनात्"। तस्या रमणे दोषो यथा "बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी। प्रौढा करोति वृद्धत्वं वृद्धा मरणदा भवेत्" इति। अत्र त्रिंशद्वर्षयुक्ते ऽमन्त्रे "षोडशार्णो युग प्रौढवर्णत्रिंशल्लिपिर्मनुः" तन्त्रसा०। "अर्थवद् ग्रहणेनार्थकस्येति" परिभाषया ऊढेः पृथग्ग्रहणाद्वा क्त वति न वृद्धिः किन्तु यथाह तत्र प्रोढवान् इत्येव।

प्रौ(प्रौ)ढपाद त्रि०प्रौढः पादो यस्य। आसनारोपितपादादिके "आसनारूढपादस्तु जानुनोर्जङ्घयोस्तथा। कृतावसक्थिको यस्तु प्रौढपादः स उच्यते। स्नानमाचमनं होमं भोजनं देवतार्चनम्। प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम्" इति छन्दोगप०। "अनेकधाहो दारुणिषु भूमिसमे इष्टकाञ्च संकीर्णीभूता" इति बोधायनवचनात्तथाविधे आरूढपादोऽपि न कुर्य्यात्" आ०त०।

प्रौ(प्रौ)ढि स्त्री प्र+वह–क्तिन् वा वृद्धिः। १सामर्थ्ये २सामर्थ्यहेतुके क्रियासु योग्यताध्यवसाये ३उद्योगे च प्रौढिवादः।

प्रोष्ठ पु० प्र+अठि–गतौ अच् पृषो०। पतद्भल्ले हारा०।

प्रोत त्रि॰ प्र+वे–स्यूतौ क्त सम्प्रसारणम्। १प्रकर्षेण स्यूते २ग्रथिते वस्त्रे न॰ जटा॰। भावे क्त। ३सीवने न॰।

प्रोतोत्सादन न॰ प्रोतं सत् उत्सादयति उत्+सादि–ल्यु। १वस्त्रकुट्टिमे २छत्रे च त्रिका॰।

प्रोत्फल पु॰ प्रकर्षेण उत्फलति प्र+उद्–फल–अच्। सिं-हलाङ्गूलाकारपुष्पवति वृक्षभेदे शब्दमाला।

प्रोत्फुल्ल त्रि॰ प्र+उत्+फुल्ल–विकाशे अच्। विकसिते।

प्रोत्साहन न॰ प्रकर्षेण उत्साहनम्। प्रवृत्तस्य कर्त्तव्ये कर्मणि १प्रकर्षेण यत्नसम्पादने सा॰द॰उक्ते २नाट्यालङ्का-रभेदे। प्रोत्साहनस्य इत्यादिना तान्युद्दिश्य "प्रोत्सा-हनं स्यादुत्साहगिरा कर्मणि योजनम्" इति लक्षि-तम्। यथा "बालराजिवराक्षेयं स्तौति किं विचिन्तित् पश्य। तज्जगच्छ्रितयं त्रातुं तात! ताड़य ताड़काम्"।

प्रोथ परिपूर्णतायाम् सामर्थ्ये च भ्वा॰उभ॰अक॰सेट्। प्रो-थति ते अप्रोथीत् अप्रोथिष्ट पुप्रोथ थे। ऋदित् चङि न ह्रस्वः। अपुप्रोथत् त।

प्रोथ पु॰न॰ पु+थक्। १प्रस्थिते "हयानन्तरकालस्थ प्रियं प्रोथमनुव्रजेत्"। २अश्वनासिकायाम् अमरः। ३कट्यां पु॰ मेदि॰ ४गाटके पु॰ त्रिका॰। ५स्त्रीगर्भे पु॰ विश्वः ६गर्त्ते ७भीषणे ८स्फिग्देशे ९अश्वमुखे च संक्षिप्तसारः १०पथिके त्रि॰ ११प्रथिते त्रि॰ त्रिका॰ १२स्थापिते त्रि॰ सि॰कौ॰।

प्रोथथ पु॰ प्रोथ–बा॰ अथ। मुखशब्दे ऋ॰ १०।९४।६भा॰।

प्रोष पु॰ प्रुष–दाहे भावे घञ्। सन्तापे राजनि॰।

प्रोषक पु॰ देशभेदे भा॰ भी॰ ९अ॰।

प्रोषित त्रि॰ प्र+वस–क्त इट्। प्रवासं गते विदेशं गते। "आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा" काशीख॰ पतिव्रतालक्षणम्।

प्रोषितभर्तृका स्त्री प्रोषितः भर्त्ता यस्याः कप्। यस्याः पतिः विदेशं गतस्तस्यां स्त्रियाम् "नानाकार्य्यवशाद् यस्यादूरदेशं गतः पतिः। सा मनोभवदुःखार्त्ता भवेत् प्रोषितभर्तृका" सा॰द॰।

प्रो(प्रौ)ष्ठ पु॰प्रकृष्ट ओष्ठोऽस्य वा वृद्धिः। (पुँटि) मत्स्यभेदे रायमुकुटः। स्त्रियां ङीष्। २देशभेदे भा॰भी॰ ९अ॰। ३गवि च पुंस्त्री॰ सि॰कौ॰। प्रोष्ठपदशब्दे दृश्यम्।

प्रो(प्रौ)ष्ठपदा स्त्री प्रो(प्रौ)ष्ठो गौस्तस्येव पदं यस्याः। नक्षत्रविशेषे। तद्युक्ता पौर्णमासी अण् सा यत्र मासे पुनरण् वा न वृद्धिः। १चान्द्रभाद्रमासे अमरः। प्रोष्ठ-पदासु जातः अण् उत्तरपदवृद्धिः। प्रोष्ठपाद तज्जे २भाद्रजाते। "जे प्रोष्ठपदानाम्" पा॰ उक्तेः भवादौ नोत्तरपदवृद्धिः प्रौष्ठपद इत्येव।

२अश्विन्यादिषु पञ्चविंशषड्विंशनक्षत्रयोः स्त्री ब॰ब॰ पूर्वोत्तरभाद्रपदयोः प्रत्येकं द्वित्वेन चतुष्कत्वात् बहुत्वम्। प्रोष्ठपदाभियुक्ता पौर्णमासी अण्। प्रौष्ठपदी चान्द्र-३भाद्रपौर्णमास्यां स्त्री ङीप् "प्रौष्ठपद्यामतीतायाम्"। प्रेतशब्दे दृश्यम्।

प्रोष्य अव्य॰ प्र+वस-ल्यप्। विदेशं गत्वेत्यर्थे तत्र पापीयसा सह मयू॰ समा॰ प्रोष्यपापीयस्। विदेशं गत्वा पापव-त्तरे त्रि॰स्त्रियां ङीप्। "राघवः प्रोष्यपापीयान्" भट्टिः

प्रो(प्रौ)ह पु॰ प्र+ऊह–क वा वृद्धिः। प्रकृष्टवाहके

प्रोहकटा पु॰ प्रोह कट इत्युच्यते यस्यां क्रियायाम् मयूर॰ समा॰। कटसम्बोधनकप्रकृष्टोहार्थनिर्देशक्रि-यायाम्। एवं प्रोहकर्दमा इत्यपि तत्र पाठान्तरे कर्द-मसम्प्रदानकोहनिर्देशक्रियायाम्।

प्रोह्यपदि अव्य॰ प्रोह्यौ पादौ यत्र प्रहरणे द्विदण्ड्या॰ स॰इच् समा॰ पद्भावः। प्रकर्षेण द्वाभ्यां पादाभ्यां प्रहरणे

प्रौढमनोरमा प्रौढ़ानां प्रगल्भानां मनोरमयति रम॰ णिच् अण्। भट्टोजिदीक्षितकृतायाम् सिद्धान्तकौमुदी-व्याख्यायाम्। [२निपुणे च धरणिः।

प्रौण त्रि॰ प्र+ओणृ–अपसारके अच्। १प्रकर्षेण अपसारके

प्रौष्ठिक त्रि॰ प्रोष्ठोऽस्त्यस्य ठन्। प्रकृष्टोष्ठयुते ततः शिवा॰ अपत्ये अण् प्रौष्ठिक तदपत्ये। [भाष्यम्।

प्लक पु॰प्र+कै–क रस्य लः। स्तोत्रामधोऽङ्गभेदे ऋ॰८।२१।१८

प्लक्ष भक्षणे भ्वा॰उभ॰सक॰ सेट्। प्लक्षति ते अप्लक्षीत् अप्ल-क्षिष्ट पप्लक्ष क्षे। प्लक्षः।

प्लक्ष पु॰ प्लक्ष्यते कीटैः प्लक्ष–कर्मणि घञ्। (पाकुड़) १वृक्षे अमरः। प्लक्षसमीपस्थानात् २निःसृतायां सरस्वत्यां च भा॰व॰ ८४अ॰। तस्याः प्लक्षप्रस्रवणात् जातत्वात् तथात्वम् "प्रभवश्च सरस्वत्याः प्लक्षप्रस्रवणं मतम्" भा॰व॰ ५०अ॰। ३प्लक्षद्वीपचिह्निते द्वीपभेदे पु॰ "प्लक्षो जम्बूप्रमाणो द्वीपः ख्यातिकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रता-त्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्तवर्ष-नामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। शिवं यवस सुभद्रं शान्तं क्षेममृतमभयमिति वर्षा-णि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः मणिकूटो

वज्रकूटः शतशृङ्ग इध्मजिह्वो ज्योतिष्मान् सुवर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा नृम्णाऽऽङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः। यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ्गोर्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसन्दर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्य्यमात्मानं यजन्ते" भाग० ५।२०। "क्षारोदेन यथा द्वीपो जम्बुसंज्ञोऽभिवेष्टितः। संवेष्ट्य क्षारमुदधिं प्लक्षद्वीपस्तथा स्थितः। जम्बुद्वीपस्य विस्तारः शतसाहस्रसम्मितः। स एव द्विगुणो ब्रह्मन्! प्लक्षद्वीपोऽप्युदाहृतः। सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै। ज्येष्ठः शान्तभयो नाम शैशिरस्तदनन्तरः। सुखोदयस्तथानन्दः शिवः क्षेमक एव च। ध्रुवश्च सप्तमस्तेषां प्लक्षद्वीपेश्वरा इमे। पूर्वं शान्तभयं वर्षं शिशिरं सुखदं तथा। आनन्दश्च शिवश्चैव क्षेमकः ध्रुवएव च। मर्य्यादाकारकास्तेषां तथान्ये वर्षपर्वताः। सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम!। गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा। सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः। वर्षाचलेषु रम्येषु सर्वेष्वेतेषु चानघाः। वसन्ति देवगन्धर्वसहिताः सततं प्रजाः। तेषु पुण्याः जनपदाश्चिराच्च म्रियते जनः। नाधयो व्याधयो वापि सर्वकालसुखं हि तत्। तेषां नद्यश्च सप्तैव वर्षाणान्तु समुद्रगाः। नामतस्ताः प्रवक्ष्यामि श्रुताः पापं हरन्ति याः। अनुतप्ता शिखा चैव विपापा त्रिदिवा क्रमुः। अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः। एते शैलास्तथा नद्यः प्रधानाः कथितास्तव। क्षुद्रनद्यस्तथा शैलास्तत्र सन्ति सहस्रशः। ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते। अपसर्पिणी न तेषां वै न चैवोत्सर्पिणी प्रजा। न तत्रास्ति युगावस्था तेषु स्थानेषु सप्तसु। त्रेतायुगसमः कालः सर्वदैव महामुने!" विष्णुपु०। कल्पभेदान्नामभेदः। तदुत्तरं वनस्य पत्तनम् प्लक्षवणम्। प्लक्षस्यादूरदेशादि अ नडा० कुक्च्। प्लक्षकीय तत्समीपादौ त्रि०।

प्लक्षजाता स्त्री प्लक्षात् तत्समीपस्थप्रस्रवणात् जाता। सरस्वत्यां नद्यां भा०आ० १७०अ०। [२६अ०।

प्लक्षतीर्थ न०प्लक्षसमीपस्थं तीर्थं शाक०त०। तीर्थभेदे हरिवं०

प्लक्षप्रस्रवण न० प्लक्षस्य समीपस्थं प्रस्रवणम्। सरस्वत्युत्पत्तिस्थाने भा०श० ५०अ०।

प्लक्षराज पु० ६त०। सोमतीर्थस्थिते प्लक्षवृक्षे भा०श०४४अ०

प्लक्षादि पु०फले अण्प्रत्ययलुगनिमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा "प्लक्ष न्यग्रोध अश्वत्थ इङ्गुदी शिग्रु रुरु कक्षतु वृहती"।

प्लक्षावतरण न० अवतरत्यस्मात् अव–तॄ–अपादाने ल्युट् प्लक्षः तन्निकटस्थितप्रस्रवणरूपमवतरणम्। सरस्वत्या अवतरणस्थाने प्लक्षप्रस्रवणे भा०व० ८९अ०।

प्लति पु० प्लु–बा० डति। ऋषिभेदे ऋ० १०।८४।१७।

प्लव न०प्लु–अच्। १कैवर्त्तीमुस्तके २गन्धतृणे मेदि०। प्लुत्वा ३गन्तरि त्रि०। भावे अप्। ४प्लवने (भासा) कर्त्तरि करणे वा अप्। ५भेके ६भेलके (भेला) ७मेषे ८श्वपचे ९वानरे १०जलकाके ११कुलके १२प्रवणे १३पर्कटीवृक्षे १४कारण्डवखगे १५शब्दे १६प्रतिगतौ च पु० मेदि०। जातित्वे स्त्रीत्वमपि स्त्रियां ङीष्। १७प्रेरणे १८गतौ च पु०शब्दरत्ना०। १९जालभेदे हेमच०२०पलवे (पोलो) मत्स्यधारणयन्त्रभेदे त्रिका०। २१जलकुक्कुटे मिता० २२जलचरपक्षिगणभेदे यथोक्तं भावप्र० "हंससारसकादम्बबकक्रौञ्चशरारिकाः। नान्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः। प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः"। एतेषां मांसगुणाः। "प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः। वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः"।

प्लवक त्रि० प्लु–बा० अक। १प्लुतगतिकारके २खड्गधारादौ नर्त्तके त्रिका० ३चण्डाले हला० ४भेके ६प्लक्षे राजनि०

प्लवग पु० प्लवन् सन् गच्छति गम–ड नि०। १वानरे २भेके ३सूर्य्यसारथौ मेदि० ४प्लवङ्गखगे शब्दर०। ५शिरीषवृक्षे राजनि०। [भेकानां गतौ स्त्री।

प्लवगति पु० प्लवेन गतिरस्य। १भेके शब्दच०। ६त०। प्लवानां

प्लवङ्ग पु० प्लवन् सन् गच्छति गम–ड खच् मुम् नि०। १वानरे २मृगे शब्दच०। ३प्लक्षवृक्षे राजनि०। [१वानरे अमरः।

प्लवङ्गम पु० प्लवन् सन् गच्छति गम–खच् मुम् नि०। १भेके।

प्लवन त्रि० प्लु–ल्यु। १निम्ने प्रवणे क्रमनिम्नतां गन्तरि "प्रागुदक् प्लवनां भूमिं कारयेत् यत्नतो नरः" ति०त० मत्स्यपु०। भावे ल्युट्। जलोपरि गतौ न० (भासा)।

प्लविक त्रि० प्लवेन तरति ठन्। प्लवेन तारिणि।

प्लाक्ष न० प्लक्षस्य समूहः, तस्य विकारस्तस्य फलं वा अण् न लुप्। १प्लक्षवृक्षफले २तद्विकारे ३तत्समुदाये च।

प्लायोगि पु० प्रयोगनाम्नः राज्ञः पुत्रः इञ् वेदे रस्य लः। प्रयोगनाम्नः राज्ञः पुत्रे ऋ० ८।१।२२

प्लावन न० प्लु-णिच्-ल्युट् । (उथलान) द्रवद्रव्यस्य समन्तात् क्षरणे "तापनं घृततैलादेः प्लावनं गोरसस्य च । तस्मात्तदुद्धृतं कुर्य्यात् कठिनं तु पयोदधि" स्मृ०त० । २निमज्जनसम्पादने ३वर्द्धितजलसंयोजने च । करणे ल्युट् ङीप् । ४भूतानां धारणाभेदे स्त्री "स्तम्भनी प्लावनी चैव शोषणी भ्रामणी तथा । क्षोभणी च भवन्त्येताः भूतानां पञ्च धारणाः" काशीख० ४४अ० । [भाष्ट्रः १२२६ ।

प्लावित त्रि० प्लु-णिच्-क्त । जलादिना समन्तात् व्याप्ते

प्लाशि स्त्री प्रकर्षेणाश्नाति भुङ्क्तेऽनया प्र+अश-करणे इ वेदे रस्य लः । शिश्नमूलस्थनाड्याम् यजु०२५।७

प्लाशुक पु०प्रकर्षेण आशु कायति भवति कै-क वेदे रस्य लः । प्रकर्षेणाशु पच्यमाने व्रीहौ "प्लाशुकानां व्रीहीणां सविता वै देवानां प्रसविता सवितृप्रसूतः भूय इत्यथ यत् प्लाशुकानां व्रीहीणां क्षिप्रे मा प्रसुवानिति" शत० ब्रा० ५।३।३।२ "प्लाशूनां चीवीं गार्हपतं यावत् हृष्टे तदेनमग्निरेव गृहपतिर्गार्हपतमभिपरिणयत्यथ यदा शूनां क्षिप्रे मा परिणयानिति" श्म० "प्लाशुकानाम् प्रकर्षेण आशु शीघ्रं पच्यमानानां पुनः प्ररूढानां व्रीहीणाम्" रेफस्य छान्दसो लत्वनिर्देशः । प्रसुवान् प्रसुवन्तु प्रेरयन्तु । प्लाशुकाः पुनःप्ररूढव्रीहय इत्युक्तम् ततोऽप्यधिककाले षष्ट्या पाच्यमानाः षष्टिका व्रीहयःस्ताशवः तेषामाशुत्वं च त्रिचतुरमासनियतपरिपाकव्रीह्यपेक्षम्" भा० ।

प्लाशुचित् अ० शीघ्रे प्राशु इत्यत्र पाठान्तरं निघण्टुः ।

प्लिह गतौ भ्वा०पर०सक०सेट् । प्लेहति अप्लेहीत् पिप्लेह ।

प्लि(प्ली)हन् पु० प्लिह-कनिन् पृषो० वा दीर्घः । (पिला) १वामकुक्षिपार्श्वस्थे मांसखण्डे तद्वृद्धिहेतुके २रोगभेदे च तन्निदानादि भावप्र० उक्तं यथा "विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक्कफश्च । प्लीहाभिवृद्धिं कुरुतः प्रवृद्धौ तं प्लीहसंज्ञं गदमामनन्ति । वामे च पार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र । मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः" । विदाहि कुलत्थमाषसर्षपशाकादि । अभिष्यन्दि माहिषं दध्यादि । कफपित्तलिङ्गैरुपद्रुत इत्यर्थः । प्रदुष्टमत्यर्थमसृक्कफश्चेति संप्राप्तिः असृजः पित्तस्य च समानधर्मत्वात् । रक्तजमाह "क्लमो भ्रमो विदाहश्च वैवर्ण्यं गात्रगौरवम् । मोहो रक्तोदरत्वञ्च ज्ञेयं रक्तप्रलक्षणम्" । पैत्तिकस्य लक्षणमाह "ज्वरः सपिपासश्च विदाहो मोहसंयुतः । पीतगात्रो विशेषेण प्लीहा पैत्तिक उच्यते" । श्लैष्मिकलक्षणमाह "प्लीहा मन्दव्यथास्थूलः कठिनो गौरवान्वितः । अरोचकेन संयुक्तः प्लीहा कफज उच्यते" । वातिकमाह "नित्यमानद्धकोष्ठः स्यान्नित्योदावर्त्तपीडितः । वेदनाभिः परीतश्च प्लीहा वातिक उच्यते" । तमसाध्यमाह "दोषत्रितयरूपोऽन्यः प्लीहाऽसाध्यो भवत्यपि" भावप्र० । तत्रैवान्यत्र तत्स्थानमुक्तं यथा "अथ शरीरावयवविशेषस्य यकृत्प्लीहस्वरूपमाह "अधो दक्षिणतश्चापि हृदयाद्यकृतः स्थितिः । तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम्"

प्ली गतौ क्र्या० पर० सक० अनिट् । प्लीनाति अप्लैषीत् । अयं धातुः कविकल्पद्रुमे न दृश्यते धातुपाठे पाठान्तरेऽस्ति । [कुसुमवति वृक्षभेदे शब्दच० ।

प्लीहघ्न पु० प्लीहानं हन्ति हन-क । (रोहा) दाडिमतुल्य-

प्लीहशत्रु पु० ६त० । प्लीहघ्नवृक्षे अमरः ।

प्लीहा स्त्री प्लिह-क पृषो० दीर्घः । प्लीहरोगे भरतः ।

प्लीहारि पु० ६त० । अश्वत्थवृक्षे शब्दच० ।

प्लीहोदर न० उदररोगभेदे उदरशब्दे ११४८ पृ० दृश्यम् ।

प्लु सर्पणे उत्प्लुत्य गतौ च भ्वा०आत्म०सक० अनिट् । प्लवते अप्लोष्ट पुप्लुवे । अयं त्रिमात्रतयोच्चारणे च प्लुतशब्दे सि०कौ० प्लवते इति निर्देशात् । गतौ निघण्टुः ।

प्लुषि पु० प्लुष-दाहे किप् । १वह्नौ उज्ज्वलद० । २स्नेहे ३गृहदाहे संक्षिप्तसारः ।

प्लुत न० प्लु-भावे क्त । १अश्वगतिभेदे अमरः । २तिर्य्यग्गतौ ३लम्फेन गतौ त्रिमात्रकालेनोच्चार्य्ये वर्णे पु० "एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्" प्राचीनकारिका । अस्य ह्रस्वदीर्घाभ्यां लिप्याकारभेदाभावेन तदुत्तरवर्त्तिव्यङ्केनैव तथात्वसूचनं न तु लेखनेऽस्याकारविशेषोऽस्ति । प्लुतत्वविधायकानि पा०सूत्राणि सवृत्तिकानि सोदाहरणान्यत्र प्रदर्श्यन्ते "वाक्यस्य टेः प्लुत उदात्तः" पा० इत्यधिकृत्य "प्रत्यभिवादेऽशूद्रे" पा० "अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात् । अभिवादये देवदत्तोऽहम् । भो आयुष्मानेधि देवदत्त ३ । स्त्रियां न अभिवादये गार्ग्यहं भो आयुष्मती भव गार्गि ! । नामगोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते नेह आयुष्मानेधि भोः । राजन्यविशाश्चेति वाच्यम् । आयुष्मानेधि भोः । आयुष्मानेधीन्द्रवर्म्म३न् आयुष्मानेधीन्द्रपालित३!

सि॰कौ॰ "दूराद्धूते च" पा॰। "दूरात् सम्बोधने यद्वाक्यन्तस्य टेः प्लुतः स्यात्। सक्तून् पिब देवदत्त३!" "है हे प्रयोगे हैहयोः" पा॰। एतयोः प्रयोगे दूराद्धूते यद्वाक्यन्तत्र हैहयोरेव प्लुतः स्यात्। है३ राम! राम! है३ "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्" पा॰ दूराद्धूते यद्वाक्यन्तस्य ऋकारवर्जस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात्। दे३वदत्त। देवद३त्त। देवदत्त३। गुरोः किम्। वकारात् परस्य अकारस्य मा भूत्। अनृतः किम्। कृष्ण३। एकैकग्रहणं पर्य्यायार्थम्। इह प्राचामिति योगो विभज्यते तेन सर्वः प्लुतो विकल्प्यते "अप्लुतवदुपस्थिते" पा॰। उपस्थितोऽनार्ष इतिशब्दस्तस्मिन् परे प्लुतोऽप्लुतवद्भवति। अप्लुतकार्यं यणादिकं करोति। सुश्लोक३ इति। सुश्लोकेति। वत् किम् अप्लुत इत्युक्ते प्लुत एव निषिध्येत तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं स्यात्। अग्नी३ इति। "इ३ चाक्रवर्मणस्य" पा॰ इ३ प्लुतोऽचि परेऽप्लुतवद्वा स्यात्। चिनुहीति चिनु हि३ इति। चिनु हि३ इदं चिनुहीदम्। उभयत्र विभाषेयम् "ओमभ्यादाने" पा॰ ओंशब्दस्य प्लुतः स्यात् आरम्भे। ओ३म् अग्निमीळे पुरोहितम्। अभ्यादाने किम् ओमित्येकाक्षरम् "ये यज्ञकर्मणि" पा॰ ये३ यजामहे। यज्ञेति किम् ये यजामहे३ "प्रणवष्टेः" पा॰ यज्ञकर्मणि टेरोमित्यादेशः स्यात्। अपां रेतांसि जिन्वतो३म्। टेः किम् हलन्ते अन्त्यस्य मा भूत्। "याज्यान्तः" पा॰ ये याज्यान्ता मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि। जिह्वामग्ने! चकृषे हव्यवाह३म्। अन्तः किम्। याज्यानामृचां वाक्यसमुदायरूपाणां प्रतिवाक्यं टेर्न स्यात्। सर्वान्तस्य चेष्यते "ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः" पा॰ एषामादेः प्लुतो यज्ञकर्मणि। अग्नयेऽनुब्रू३हि। अग्नये गोमयानि प्रे३ष्य। अस्तु श्रौ३षट्। सोमस्याग्ने ब्रूहि वौ३षट्। अग्निमा३वह "अग्नीत् प्रेषणे परस्य च" पा॰ अग्नीधः प्रेषणे आदेः प्लुतस्तस्मात् परस्य च। ओ३ श्रा३वह नेह अग्नीदग्नीन् विहर३। बर्हिस्तृणीहि३। "विभाषा पृष्टप्रतिवचने हेः" पा॰ प्लुतः। अकार्षीः कटम् अकार्षं हि३। अकार्षं हि। पृष्टेति किम् कटं करिष्यति हि३। हेः किम् करोमि ननु "निगृह्यानुयोगे च" पा॰ अत्र यद्वाक्यन्तस्य टेः प्लुतो वा। अद्यामावास्येत्यात्थ३। अद्य अमावास्येत्येवंवादिनं युक्त्या स्वमतात् प्रच्याव्य एवमनु-

युज्यते। "आम्रेडितम्भर्त्सने" पा॰ दस्यो दस्यो३ घातयिष्यामि त्वाम्। आम्रेडितग्रहणं द्विरुक्तोपलक्षणम्। चौर३ चौर। "अङ्गयुक्तन्तिङाकाङ्क्षम्" पा॰ अङ्गेत्यनेन युक्तन्तिङन्तं प्लवते। अङ्ग कूज३ इदानीं ज्ञास्यसि जाल्म!। तिङ किम्? अङ्ग देवदत्त! मिथ्या वदसि३। आकाङ्क्षं किम् अङ्ग पच नैतदपरमाकाङ्क्षति। भर्त्सन इत्येव। अङ्गाधीष्व भक्तन्तव दास्यामि। "विचार्य्यमाणानाम्" पा॰ वाक्यानां टेः प्लुतः। होतव्यं दीक्षितस्य गृह३इ। (वक्ष्यमाणेन एतः स्थाने इः) न होतव्य३मिति। होतव्यन्न होतव्यमिति विचार्य्यते। प्रमाणैर्वस्तुतत्त्वपरीक्षणं विचारः। "पूर्वन्तु भाषायाम्" पा॰ विचार्य्यमाणानां पूर्वमेव प्लवते। अहिर्नु३ रज्जुर्नु। प्रयोगापेक्षत्वं पूर्वत्वम्। इह भाषाग्रहणात् पूर्वयोगश्छन्दसीति ज्ञायते। "प्रतिश्रवणे च" पा॰ वाक्यस्य टेः प्लुतोऽभ्युपगमे प्रतिज्ञाने श्रवणाभिमुख्ये च। गां मे देहि भो हन्त३ ते ददामि३। नित्यः शब्दो भवितुमर्हति३। देवदत्त! किमात्थ३। "अनुदात्तं प्रश्नान्ताभिपूजितयोः" पा॰ अनुदात्तः प्लुतः स्यात्। दूराद्धूतादिषु सिद्धस्य प्लुतस्यानुदात्तत्वमात्रमनेन विधीयते। अग्निभूत३ इ। पट३ उ। अग्निभूते पटो एतयोः प्रश्नान्ते टेरनुदात्तः प्लुतः। शोभनः खल्वसि३ माणवक३। "चिदिति चोपमार्थे प्रयुज्यमाने" पा॰ वाक्यस्य टेरनुदात्तः प्लुतः। अग्निचिद्भायात्३। अग्निरिव भायात्। उपमार्थे किम् कथञ्चिदाहुः। प्रयुज्यमाने किम् अग्निर्माणवको भायात् "उपरिस्विदासीदिति च" पा॰ टेः प्लुतोऽनुदात्तः स्यात्। उपरिस्विदासी३त्। अधः स्विदासी३दित्यत्र तु विचार्य्यमाणानामित्युदात्तः प्लुतः। "स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु" पा॰ स्वरितः प्लुतः स्यादाम्रेडिते परेऽसूयादौ गम्ये। असूयायाम् अभिरूपक३ अभिरूपक रिक्तन्त आभिरूप्यम्। सम्मतौ। अभिरूपक३ अभिरूपक शोभनोऽसि। कोपे। अविनीतक३ अविनीतक इदानीं ज्ञास्यसि जाल्म!। कुत्सने। शाक्तीक३ शाक्तीक रिक्ता ते शक्तिः। "क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्" पा॰ आकाङ्क्षस्य तिङन्तस्य टेः स्वरितः प्लुतः स्यात् आचारभेदे आशिषि प्रैषेषु गम्यमानेषु। स्वयं ह रथेन याति३ उपाध्यायं पदातिं गमयति। प्रार्थनायाम्। पुत्रांश्च लप्सीष्ट३ धनञ्च तात। व्यापारणे। कटं कुरु३ ग्रामं गच्छ। आकाङ्क्षं किम्

दीर्घायुरसि अग्नीदग्नीन्विहर। "अनन्त्यस्यापि प्रश्नाख्यानयोः" पा॰ अनन्त्यस्यान्त्यस्यापि पदस्य टेः स्वरितः प्लुत एतयोः। प्रश्ने। अगमः३ पूर्वा३न् ग्रामा३न्। सर्वपदानामयम्। आख्याने अगमः३म् पूर्वा३न् ग्रामा३न्। "प्लुतावैच इदुतौ" पा॰ यत्र दूराद्धूतादिषु प्लुतो विहितस्तत्रैव ऐचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लवेते। ऐ ३ तिकायन !। औ ३ पगव। अतुर्मात्रावत्त ऐचौ सम्पद्यते। "एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्याद्धस्यादुत्तरस्येदुतौ" पा॰ अप्रगृह्यस्य एचोऽदूराद्धूते प्लुतविषये पूर्वस्यार्द्धस्याकारः प्लुतः स्यादुत्तरस्य त्वर्द्धस्य इदुतौ स्तः। प्रश्नान्ताभिपूजितविचार्य्यमाणप्रत्यभिवादयाज्यान्तेष्वेव। प्रश्नान्ते। अगम३ पूर्वा३न् ग्रामा३न् अग्निभूत३ इ। अभिपूजिते। भद्रं करोषि पट३ उ। विचार्य्यमाणे। होतव्यं दीक्षितस्य गृह३ इ। प्रत्यभिवादे। आयुष्मानेधि अग्निभूत३ इ। याज्यान्ते। स्तोमैर्विधेमाग्नय३ इ। एतेषु किम् विष्णुभूते३ घातयिष्यामि त्वाम्। अदूराद्धूत इति न वक्तव्यम्। पदान्तग्रहणन्तु कर्त्तव्यम्। इह मा भूत् भद्रं करोषि गौ३रिति। अप्रगृह्यस्य किम् शोभने माले३। "आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः। अग्ना३इ पत्नीव" सि॰कौ॰

प्लुति स्त्री प्लु—भावे क्तिन्। प्लवने उत्प्लुत्यगमने। प्लुतिश्च शशादीनामिव गतिः (कयलापि) समन्तात् जलादेर्गतिश्च। त्रिमात्रत्वयोच्चारणे च।

प्लुष दाहे भ्वा॰पर॰सक॰ सेट्। प्लोषति अप्लोषीत्। पुप्लोष उदित् क्त्वा वेट्। प्लुषित्वा प्लुष्ट्वा।

प्लुष दाहे दिवा॰पर॰सक॰ सेट्। प्लुष्यति लृदित् अप्लुषत्।

प्लुष सेके पूर्त्तौ च सक॰ स्नेहे अक॰ क्र्या॰ पर॰ सेट्। प्लुष्णाति अप्लोषीत् पुप्लोष।

प्लुषि पु॰ प्लुष—बा॰ कि। वकतुल्यतुण्डयुक्ते १खगभेदे यजु॰ २४।२९ वेददीपः। २दाहके सर्पभेदे च॰ ११।८१।१भा॰। ३अल्पपरिमाणपुत्तिकादेहे शत॰ब्रा॰ १४।४।१।२४ भाष्ये दृश्यम्। [मदक्षस भाग॰

प्लुष्ट त्रि॰ प्लुष—क्त। दग्धे अमरः। "प्लोषयन्नविप्लुष्टमिदं

प्लुस दाहे विभागे च दिवा॰पर॰सक॰ सेट्। प्लुस्यति इरित् अप्लुसत् अप्लोसीत् पुप्लोस। [तैत्ति॰ ७।५।८।५

प्लेङ्ख पु॰ प्र+इङ्ख—घञ् वेदे रस्य लः। प्रेङ्खणे प्रकृष्टकम्पने

प्लेव सेवने भ्वा॰आत्म॰सक॰सेट्। प्लेवते अप्लेविष्ट। पिप्लेवे ऋदित् च ङ न ह्रस्वः।

प्लोत न॰ प्र+वे—क्त संप्र॰रस्य लः। सुश्रुतोक्ते शस्त्रकर्मोपकरणभेदे "अतोऽन्यतमं कर्म चिकीर्षता वैद्येन पूर्वमेवोपकल्पयितव्यानि तद्यथा यन्त्रशस्त्रक्षाराग्निशलाकाशृङ्गजलौकालाबूजाम्बवौष्ठपिचुप्लोतसूत्रपत्रपट्टमधुघृतवसापयस्तैलतर्पणकषायालेपनकल्कव्यजनशीतोष्णोदककटाहादीनि"। [दाहे न॰

प्लोष पु॰प्लुष—भावे घञ्। दाहे अमरः। भावे ल्युट्। प्लोषण

प्सा भक्षणे अदा॰पर॰सक॰ अनिट्। प्साति अप्सासीत्। पप्सौ। गतौ निघण्टुः।

प्सा स्त्री प्सा—भावे अङ्। भक्षणे त्रिका॰।

प्सात त्रि॰ प्सा—कर्मणि क्त। भक्षिते अमरः।

प्सान न॰ प्सा—भावे ल्युट्। भोजने हेमच॰।

प्सु पु॰ प्सा—बा कु। रूपे निघण्टुः।

प्सुर त्रि॰ प्सु+बा॰ अस्त्यर्थे र। रूपवति ऋ॰१०।२६।२भाष्ये

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसंकलिते वाचस्पत्ये पकारादिशब्दार्थसङ्कलनम्।

पकारादिषु शब्देषु केचित् शब्दा न सङ्कलिता केषाञ्चिच्चार्थभेदा भ्रमान्नोक्तास्ते इतःपरं परिशिष्टे प्रदर्श्यन्ते।

परिशिष्टम्

४२२५पृष्ठस्यपद्मशब्दपरिशिष्टम्

"अष्टकात्तु भवेत् पद्मं तत्र दत्तं तथाऽक्षयम्" हेमा० श्रा० जातूकर्ण्योक्ते १५ अष्टकाश्राद्धे ।

४२२५पृष्ठस्य पद्मकशब्दपरिशिष्टम्

"यदा विष्टिर्व्यतीपातो भानुवारस्तथैव च । पद्मकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणम्" हेमा०श्रा० यमोक्ते श्राद्ध-५कालभेदे न० ।

४२१४पृ० पारावतशब्दस्य परिशिष्टम्

सर्वार्थचिन्तामण्युक्ते क्षेत्रहोराद्रेक्काणादिदशवर्गमध्ये येषु केषु चित् षट्सु शुभांशेषु । प्रसङ्गात् क्षेत्रादिदशवर्ग-निरूपणेन तत्र द्वित्रादिवर्गे एकैकस्य योगे नव विशेष-संज्ञाः तत्फलञ्च तत्रोक्तं प्रदर्श्यते तत्र क्षेत्रशब्दे क्षेत्रपतय उक्ताः द्रेक्काणाद्यधीश्वराः सर्वार्थ०उक्ता यथा "राशिं त्रिधाकृत्य द्रेक्काणमाहुस्तदीश१ पुत्रेश२ शुभाधि-नाथाः९ । युग्मोन्दुरुयौँ भवने रवीन्दू नाथौ त्वयुग्मे भवनस्य चार्द्धे । चरेऽशकानामधिपास्तदंशा राशौ स्थिरे तन्नवमेश्वराद्याः । द्विदेहभे तत्सुतराशिनाथादृदन्ति शास्त्रार्थविदो महान्तः । तत् क्षेत्रपा द्वादशभागनाथा लग्नस्य वर्गाधिपतिस्तदीशात् । त्रिंशांशपा भौमशनीज्य-सौम्यशुक्रा भवन्त्योजगृहे समे तु । विलोमतः पञ्चश-राष्टसप्तबाणाः क्रमाद्भूरनेकशास्त्रैः । सप्तांशपास्त्वोज-गृहे तदीशाद्युग्मे गृहे सप्तमराशिपास्तु । दशांशपा-नामधिपास्तदीशादोजे समे तन्नवमेश्वराद्याः । ओजे १५कलानामधिपास्तदीशात्तच्चतुर्थो (अंश) विष्णु४५हरौ टिनेशः५० । युग्मे क्रमाद्व्युत्क्रममेव राशौ षष्ट्यंश१०कानाम-धिपास्त्वयुग्मे । घोरांशको१ राक्षस२ देवभागौ३ कुवेर४ रक्षोगण५ किन्नरांशाः६ । भ्रष्टः७ कुलघ्नो८ गरलाऽग्नि संज्ञौ१० मायांशकः११ प्रेतपुरीशभाग १२ । अपां पति-१३र्देवगणेशभागः१४ काला१५ऽहिभागा१६वमृतांशु१७ चन्द्रौ१८ । मृद्वंशकः१९ कोमल२० पद्मभागौ२१ ल क्ष्मीश२२ वागीश२३ दिगम्बरांशाः२४ ! देवार्द्रभागौ२५ २६। कलिनाशभागः२७ क्षितीश्वरांशः२८ कमलाकरांशः २९ । क्रमेण मन्दात्मज३० मृत्यु३१काल३२ दावाग्निघोरा३३ऽ३४मय३५ कण्टकाख्य३६ । सुधामृतांशु:३८ परिपूर्णचन्द्र३९ विषप्रदग्धौ४० कलिनाश४१मुख्यौ४२ । वंशक्षयोत्पातककालरूपाः ४३।४४।४५ सौम्य४६श्च मृद्वंश ४७ सुशीतलांशू ४८ । दंष्ट्रा४९ कराले५०न्दुमुख५१प्रवीणाः ५२ कालाग्नि५३दण्डायुध५४निर्मलांशाः५५ । शुभाशु-भांशा५६।५७ वतिशीतलांशः५८ सुधापयोधिभ्रमणेन्दु-रेखाः५९।६० शेयाः क्रमाद्व्युत्क्रममेव युग्मे शुभान्वि-तांशो यदि शोभनाप्तिः । क्रूराः षष्ट्यंश(?०)गाः सर्वे नाशयन्ति खचारिणः । परिपूर्णबलैर्युक्ता स्त्रोच्चमूलत्रि-कोणगाः । स्वर्क्षकेन्द्रोत्तमांशस्था मित्रक्षेत्रत्रिकोणगाः । सप्तवर्गोद्भवाः स्वांशाः स्वाधिमित्रांशकान्विताः । वर्गास्तु ये दश प्रोक्ताः पूर्वाचार्यैर्महर्षिभिः । भवन्ति वर्गसंयोगे पारिजातादिसंज्ञकाः१० दुःस्थारिनीचमूढस्था ग्रहा बल-विवर्जिताः । मरणावस्थगाश्चेत्तु पारिजातादिनाश-काः" । अयं पक्षो नादरणीयः । सत्यपक्षस्तु स्वत्रांशे स्वनवांशके स्वभवन इति ग्राह्याः।"उत्तमं१ तु त्रिवर्गैक्यं चतुर्वर्गैस्तु गोपुरम्२। वर्गपञ्चकसंयोगे सिंहासन३मिहो-च्यते । वर्गद्वयं पारिजातः४षष्ठां पारावतांशकः५ । सप्तमं देवलोकः६स्यादष्टमं च तथा भवेत् । ऐरावतं८ तु नवमं फलं तेषां पृथक् पृथक् । दशवर्गस्य संयोगे विदुर्वैशेषिकां-शकान् १० । ऐरावते सार्वभौमः सर्वैश्वर्य्यसमन्वितः । देव-लोके६ महादानकर्त्ता राजा क्षितीश्वरः । पारावते५ मा-तुलिकः सर्वशास्त्रविशारदः । सिंहासने३ भवेद्भूमिपतिः सर्वैः स्तुतो महान् । गोपुरे२ धनधान्याढ्यः सर्वविद्याविशा-रदः । उत्तमे१ सकला सम्पत् पारिजाते४ धनान्वितः । स्वांशे १० यशस्वी मतिमान् सर्वसौख्यसमन्वितः" ।

४२२८पृ० पिण्डशब्दपरिशिष्टम् ।

तत्र संहतश्च एकीकृतः यथा"श्वशमनूनां तु संपिण्ड्य कालं तत्पाक्षिकैः श्च्ह" स्मृ०चि० व्याख्याने "संपिण्ड्य एकी-कृत्य रघुनाथः । संपिण्ड्य मिश्रितं पिण्डितं कृत्वेत्यर्थः । तथा च छन्दोगैणानयने प्रथमभवटानां छन्दमेकत्र कार्य-मिति बोध्यम् । कौरवशब्दे २२४१पृ० पाशकगोरक्षाट-शिते "वर्गवर्गात्मकाण्डज्ञ भस्वरं ताडितं त्रिधा । पिण्ड-संज्ञा भवेत तस्य यथाभागैस्तु कल्पना" इत्युक्ते२१४ राधे च ।

४२२४पृ० पित्तपक्षशब्दपरिशिष्टम्

जौवाग्निकल्पद्रुमे ३पत्तपक्षे लक्ष्यं दृश्यम् ।

४२२६ पृष्ठस्यपित्तलशब्दपरिशिष्टम् :

उक्तोक्ते योगिरोगभेदे दर्शौ रनौघ्यां पत्तौमिरोगा विंश-तिविधा उदाहर्तं च्छ्रे ११६२ पृ० क्लीवा दर्शिताः । तथा लक्षणान्यत्रोच्यन्ते "सर्वैमिलमुद्रावली रजःकष्टेन उच्यते । वन्ध्यां नष्टार्तवां विद्यात्तिसु तां२नित्यदंदनाम् । पारिप्लुतायां१ भवति ग्राम्यधर्मे रुजा भृशम् । वातला३

कर्कशत्वक् शूलनिस्तोदपीडिता। चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः। सदाह्रं प्रकिरत्यस्रं यस्याः सा लो-हितक्षराद्। सवातमुद्गिरेद्वीजं वामिनी ७रजसा युतम्। प्रस्रंसिनी८स्रन्दते तु क्षोभिता दुःप्रसूश्च या। स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी९ रक्तसंस्रवात्। अत्यर्थं पित्तला१० योनिर्दाहपाकज्वरान्विता। चतसृष्वपि चाद्यासु पित्तलि-ङ्गोच्छ्रयो भवेत्। अत्यानन्दा११ न सन्तोषं ग्राम्यधर्मेण गच्छति कर्णिन्या१२ कर्णिका योनौ श्लेष्मासृग्भ्यान्तु जायते। मैथुनाच्चरणात् पूर्वा १३ पुरुषादतिरिच्यते। बहुशश्चातिचरणात्तस्या१४ बीजं न विन्दति। श्लेष्मला१५ पिच्छिला योनिः कण्डूयुक्तातिशीतला। चतसृष्वपि चाद्यासु श्लेष्मलिङ्गोच्छ्रितिर्भवेत्। अनार्त्तवस्तना षण्ढी १६ खरस्पर्शा च मैथुने। अतिकायगृहीतायास्तरुण्याः फलिनी१७ भवेत्। विवृता महती१८योनिः सूचीवक्त्रा१९ ऽतिसंवृता। सर्वलिङ्गसमुत्थाना सर्वदोषप्रकोपजा २०। चतसृष्वपि चाद्यासु सर्वलिङ्गोच्छ्रितिर्भवेत्"।

४२२९ पृ॰पिष्टपचनशब्दात् परतः परिशिष्टम्

पिष्टपशु पु॰ पिष्टमयः पशुः। यज्ञे पशुस्थाने पिष्टमये पशौ तथा हि पिष्टपशुमीमांसायाम् अनिष्टसाधनस्यापि हिंसाया वैदिकमन्त्रद्वारा संस्कारविशेषे जनिते इष्टसा-धनत्वं यथा विषादेरनिष्टसाधनस्यापि वैद्यकोक्तसंस्कारभेदे कृते इष्टसाधनत्वम्। एवञ्च वैद्यकोक्तविषसंस्कारस्य वि-च्छिद्रकर्मवैगुण्ये यथा नेष्टसाधनत्वमेवं वैदिकप्रयोगे मन्त्रा-दीनां यथोक्तस्वरादिवैगुण्येऽपि न हिंसाया इष्टसाधन-त्वम्। विशेषतः सांख्यमते हिंसाया इष्टसाधनत्वेऽपि अनिष्टान्तरसाधनत्वमङ्गीकृतम्। तथा च वेदोच्चारणादौ सामर्थ्यहीनानामिदानीन्तनानां सुतरां पशुयागादौ पिष्ट-पशुनैव यागो विधेयः न तु साक्षात् पशुनेति व्यवस्था-पितम्। मनुनापि "कुर्य्यात् घृतपशुं सङ्गे कुर्य्यात् पिष्टपशुं तथा" इत्यनेन कामनाद्युपासक्तौ पिष्टपशोरेव विधानमु-क्तम्। एतन्न्यायानुसारेणैव मा॰आश्व॰९१अ॰"आलम्भसमये तस्मिन् गृहीतेषु पशुष्वथ। महर्षयो महाराज! बभूवुः कृपयान्विताः। ततो दीनान् पशून् दृष्ट्वा ऋषयस्ते त-पोधनाः। ऊचुः शक्रं समागम्य नायं यज्ञविधिः शुभः। अपरिज्ञानमेतत्ते महान्तं धर्ममिच्छतः। न ... पशुगणा विधिदृष्टाः पुरन्दर!। ...धर्मोपघा- ...। नायं धर्मकृतो यज्ञो न ...

...हेच्छसि। विधिदृष्टेन यज्ञेन धर्मस्ते सुमहान् भवेत्। यज बीजैः सहस्राक्ष! त्रिवर्षपरमोषितैः। एष धर्मो महान् शक्र! महागुणफलोदयः"।

४२९२ पृष्ठस्थपुष्यस्नानशब्दात् परतः परिशिष्टम्।

पुष्यानुग न॰ चक्रदत्तोक्ते चूर्णभेदे "अम्बष्ठकीमोचरसौ समङ्गापद्मकेशरान्। वाह्लीकातिविषामुस्तं बिल्वं लोध्रं सगैरिकम्। कट्फलं मरिचं शुण्ठीं मृद्वीकां रक्तचन्दनम्। कट्वङ्गवत्सकानन्तधातकीमधुकार्जुनम्। पुष्येणोद्धृत्य तुल्यानि श्लक्ष्णचूर्णानि कारयेत्। तानि क्षौद्रेण संयुक्य पाययेत् तण्डुलाम्बुना। असृग्दरा-तिसारेषु रक्तं यच्चोपवेश्यते। दोषागन्तुकृता ये च बा-लानां तांश्च नाशयेत्। योनिदोषं रजोदोषं श्वेतं नीलं सपीतकम्। स्त्रीणां श्यावारुणं यच्च तत् प्रसह्य निव-र्त्तयेत्। चूर्णं पुष्यानुगं नाम हितमात्रेयपूजितम्"।

४४२७पृ॰ प्रकृतिशब्दस्य परिशिष्टम्

राज्ञां पुरोहितादिषु२१ दशसु सुमन्त्रादिषु२२ अष्टासु च यथोक्तं शुक्रनीतिशास्त्रपरिशिष्टे

"पुरोधाश्च प्रतिनिधिः प्रधानः सचिवस्तथा। मन्त्री च प्राड्विवाकश्च पण्डितश्च सुमन्त्रकः। अमात्यो दूत इ-त्येता राज्ञः प्रकृतयो दश। दशमांशाधिकाः पूर्वं दू-तान्ताः क्रमशः स्मृताः। अष्टप्रकृतिभिर्युक्तो नृपः कैश्चित् स्मृतः सदा। सुमन्त्रः पण्डितो मन्त्री प्रधानः सचिव-स्तथा। अमात्यः प्राड्विवाकश्च तथा प्रतिनिधिः स्मृतः। एताष्टप्रकृतयस्त्वष्टौ राज्ञः प्रकृतयः सदा"। एतेषां लक्षणानि तत्रैवोक्तानि दृश्यानि विस्तरभयान्नोक्तानि।

४४२१ पृष्ठस्थप्रगल्भशब्दात् पूर्वतः परिशिष्टम्

प्रगदिन् त्रि॰ प्रगदति बा॰ शीलार्थे इनि। प्रकर्षेण कथन-शीले स्त्रियां ङीप् ततः प्रगद्या॰ चतुरर्थ्यां ञ्य। प्रा-गाद्य तददूरदेशादौ त्रि॰।

प्रगद्यादि पु॰ चतुरर्थ्यां ञ्यप्रत्ययनिमित्ते शब्दगणे स च गणः पा॰ग॰ उक्तो यथा "प्रगदिन् मगदिन् मदिन् कविल खण्डित गदित चूडार मडार मन्दार कोविदार"।

४४६६पृष्ठस्थप्रसाधनशब्दस्य परिशिष्टम्

प्रसाधनीकरणप्रकारश्च युक्तिकल्पतरावुक्तो यथा

"प्रसाधनी दिङ्नवनागसप्तसंख्याभिरङ्गाङ्गुलिभिः क्रमेण। चतुर्विधानां पृथिवीपतीनां सम्पत्तिसौभाग्य-यशःसमृद्धिदा। काष्ठजा दन्तजा चैव शृङ्गजा च यथा-क्रमम्। लाङ्गलानूपधामान्यदेशजानां महीभुजाम्।

छत्रदण्डवदुन्नेयः काष्ठजाया विनिश्चयः । कनकं रजतं ताम्रं पित्तलं सीसकं तथा । लौहं सर्वञ्च सर्वत्र नाटित्यादिद्वयाभुवाम् । राज्ञामेवोपयुञ्जीत कालकीर्त्तिप्रसाधनी । स्वर्गाणां मणिमाणाञ्च स्फटजाता प्रसाधनी । गजदन्तसमुद्भूता राज्ञामेवोपयुज्यते । अत्रापि रत्नविन्यासो मेयश्चामरदण्डवत्" ।

४५०४ पृष्ठस्यप्राकृतशब्दस्य परिशिष्टम्

प्राकृतभाषा च अष्टादशभाषामध्ये भाषाभेदः । तासां स्थानं सा०द० उक्ता यथा "पुरुषाणामनीचानां संस्कृतं१ स्यात् कृतात्मनाम् । शौरसेनी२ प्रयोक्तव्या तादृशीनाञ्च योषिताम् । आसामेव तु गाथासु महाराष्ट्रीं३ प्रयोजयेत् । अत्रोक्ता मागधी४ भाषा राजान्तःपुरचारिणाम् । चेटानां राजपुत्राणां श्रेष्ठिनां चार्द्धमागधी५ । प्राच्या६ विदूषकादीनां धूर्त्तानां स्यादवन्तिजा७ । योधनागरिकादीनां दाक्षिणात्या८ हि दीव्यताम् । शकाराणां शकादीनां शाकारीं९ सम्प्रयोजयेत् । वाह्लीकभाषा१० दिव्यानां द्राविडी११ द्रविडादिषु । आभीरेषु तथाऽऽभीरी१२ चाण्डाली१३ पुक्कसादिषु । आभीरी शावरी१४ चापि काष्ठपत्रोपजीविषु । तथैवाङ्गारकारादौ पैशाची१५ स्यात् पिशाचवाक् । चेटीनामप्यनीचानामपि स्यात् शौरसेनिका१६ । बालानां षण्डकानाञ्च नीचग्रहविचारिणाम् । उन्मत्तानामातुराणां सैव स्यात् संस्कृता क्वचित् । ऐश्वर्येण प्रमत्तस्य दारिद्र्योपद्रुतस्य च । भिक्षुबन्धधरादीनां प्राकृतं१७ सम्प्रयोजयेत् । संस्कृतं सम्प्रयोक्तव्यं लिङ्गिनीषूत्तमासु च । देवीमन्त्रिसुतावेश्यास्वपि कैश्चित्तथोदितम् । यद्देशं नीचपात्रन्तु तद्देशं तस्य भाषितम् १८ । कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः । योषित्सखीबालवेश्याकितवाप्सरसां तथा । वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा" । तत्तद्भाषालक्षणानि भाषार्णवे द्रष्टव्यानि ।

४५२२पृष्ठस्य प्रातर्शब्दस्य परिशिष्टम्

"प्रहरोऽप्यर्द्धसंयुक्तः प्रातरित्यभिधीयते" नि०सि० गार्ग्योक्तेः दिवसाद्ये १सार्द्धप्रहरात्मके काले ।

फ

फकारः पवर्गस्य द्वितीयवर्णः स्पर्शवर्णेषु द्वाविंशतितमः । अस्योच्चारणस्थानमोष्ठौ तस्योच्चारणे आभ्यन्तरः प्रयत्नः जिह्वाग्रस्य ओष्ठाभ्यां सह स्पर्शः अतएवास्य स्पर्शवर्णता । बाह्याः प्रयत्नाः विवारश्वासाघोषाः महाप्राणश्च । क्वचित् पवर्गस्य स्थाने उपध्मानीयः ᳵ । तन्त्रे वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा "फः सखी दुर्गिणी धूम्रा वामपार्श्वो जनार्दनः । जया पादशिखा रौद्री फेत्कारः शाखिनी प्रियः । दला विहङ्गमः कण्ठः कुञ्जिनी प्रियपावकौ । प्रलयाग्निर्नीलपादोऽक्षरः पशुपतिः शशी । फुत्कारो यामिनी झञ्झापवनो मोहवर्द्धनः । निष्फलस्तालमङ्कुरः प्रर्याणो ग्रामणी फलम्" । तदीयदेवताध्यानं यथा "प्रलयाम्बुदवर्णाभां लसज्जिह्वां चतुर्भुजाम् । भक्ताभयप्रदां नित्यां नानालङ्कारभूषिताम् । एवं ध्यात्वा फकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम् । अस्य ध्येयस्वरूपं यथा "फकारं शृणु चार्वङ्गि ! रक्तविद्युल्लतोपमम् । चतुर्वर्गप्रदं वर्णं पञ्चदेवमयं सदा । पञ्चप्राणमयं वर्णं सदा त्रिगुणसंयुतम् । आत्मादितत्त्वसंयुक्तं त्रिबिन्दुसहितं सदा" कामधेनुतन्त्रम् । मातृकान्यासेऽस्य वामपार्श्वे न्यासः । काव्यादावस्य प्रथमविन्यासफलं पकारशब्दे उक्तं द्रष्टव्यम् ।

फ न० फक्क—ड । १रूक्षकथने २निष्फलवाक्ये ३फुत्कारे च मेदि० ४झञ्झावाते ५वर्द्धके ६जृम्भाविष्कारे ७फलभागे च पु० विश्वः ।

फकार पु० फ+स्वरूपे कार । फस्वरूपे वर्णे ।

फक्क असद्व्यवहारे मन्दगतौ च भ्वा०पर०सक० सेट् । फक्कति अफक्कीत् पफक्क ।

फक्किका स्त्री फक्क—धातुनिर्द्देशे भावे ण्वुल्—टाप् अतइत्त्वम् । १असद्व्यवहारे (फाँकि) २तत्त्वनिर्णयार्थं पूर्वपक्षे च "फणिभाषितभाष्यफक्किका" इति नैषधम् ।

फगुन पु० गोत्रप्रवरर्षिभेदे प्रवराध्यायः ।

फञ्जिका स्त्री भञ्जति रोगान् भन्ज—मर्दने ण्वुल् पृषो० । (वामनहाटि) १वृक्षे अमरः । २देवताडे ३दूरालभायां शब्दरत्ना० ।

फञ्जिपत्रिका स्त्री भञ्ज—णिनि पृषो० फञ्जि रोगमर्दि पत्त्रं यस्याः । आखुकर्णीम् (उन्दुरकानि) रत्नमा० ।

फञ्जि(ञ्जी) स्त्री भनृज–इन पृषो॰ वा ङीप्। भार्ग्याम् (वामनहाटि) राजनि॰।

फट पुंस्त्री॰ स्फुट–विकाशे अच् पृषो॰। १सर्पाणां फणायाम् अमरः स्त्रियां टाप्। सा च २दन्ते मेदि॰ ३कितवे पु॰ हेमच॰।

फट् अव्य॰ स्फुट–क्विप् पृषो॰। १योगे तन्त्रोक्ते २अस्त्रनामके मन्त्रभेदे च। ३अनुकरणशब्दे तस्य नम आदिवद् द्रव्य-विशेषस्य त्यागार्थताऽपि। शान्तिकुम्भचालने, अर्घ्यपात्र-चालने, अर्घ्यजलेन पूजोपकरणाभ्युक्षणे, अन्तरीक्ष-गविघ्नोत्सारणाय विकिरक्षेपणे, गन्धपुष्पाभ्यां करशोधने, अघमर्षणे पापपुरुषताडने, कराङ्गन्यासे, नैवेद्यप्रोक्षणे, होमाग्नेः क्रव्यादांशत्यागे, होमाग्न्यावाहने, तदग्नि-प्रोक्षणादौ च इत्यादिषु कर्मसु अस्य प्रयोगः नाना-तन्त्रेषु दर्शितः। [स्यातायां भिल्लिकायां शब्दच॰।

फडिङ्गा स्त्री फडिति इङ्गते इङ्ग–अच्। (फड़िङ)

फण अनायासेनोत्पत्तौ भ्वा॰पर॰ सक॰ सेट् फणति अफा-णीत्-अफणीत् पफाण। फणा॰ फेणतुः पफणतुः।

फण गतौ भ्वा॰पर॰सक॰ सेट्। फणति अफाणीत् अफणीत् मित् वा घटादि॰। णिचि फाणयति फणयति फणादि॰।

फण पुंस्त्री॰ फण–अच्। दर्व्याकारे सङ्कोचविकाशवति सर्प-मस्तके अमरः।

फण(णा)कर पु॰फणः(णा) कर इव यस्य। सर्पे शब्दरत्ना॰।

फणादि न॰ "फणाञ्च सप्तानाम्" पा॰ किति लिटि सेटि थलि च परे एत्वाभ्यासलोपनिमित्ते धातुसप्तके तच्च धातुपाठे उक्तं यथा "फण राज भ्राज भ्राश भ्लाश स्यम स्वन" सि॰कौ॰ भ्वादौ दृश्यः।

फण(णा)धर पुंस्त्री॰ फणं(णां) धरति धृ–अच्। सर्पे शब्दरत्ना॰। स्त्रियां जातित्वात् ङीष्। फण(णा)भृदा-दयोऽप्यत्र।

फणाभर पुंस्त्री॰ फणां बिभर्त्ति भृ–अच्। सर्पे हारा॰ स्त्रियां जातित्वात् ङीष्। [सङ्कः।

फणिकार पु॰ देशभेदे स च देशः वृ॰सं॰ १४अ॰ दक्षिणस्या-

फणिकेसर पु॰ फणिनामकः केशरः। नागकेसरे राजनि॰।

फणिखेल पुंस्त्री॰ फणिना खेलति खेल–अच्। (भारुइ) खगे त्रिका॰ स्त्रियां ङीष्।

फणिचक्र न॰ फणाकारं चक्रम्। विवाहादौ शुभाशुभ-सूचकनाडीकूटस्थापनार्थे चक्रभेदे उपयमशब्दे १२५४ पृ॰ दृश्यम्।

फणिजा स्त्री फणीव जायते जन–ड। (फणिमनसा) इति नैघण्टुप्र॰। [गताश्वर्याम् २मरुवकमञ्जर्यायाञ्च राजनि॰।

फणिजिह्वा स्त्री फणिजिह्वा आकारोऽस्त्यस्य अच्। १महा-

फणिज्झक पु॰ फणिनमुज्झति उज्झ–ण्वुल् पृषो॰। १वनतुलसीभेदे २जम्बीरवामाम्ले च अमरः।

फणितल्पग पु॰ फणिरूपे तल्पे गच्छति तिष्ठति गम–ड। शेषशायिनि विष्णौ शब्दार्थकल्प॰।

फणिन् पु॰ फणा अस्त्यस्य इनि। दर्वीकरे सर्पभेदे अमरः। अहिशब्दे ५८१ पृ॰ तद्भेदाः दृश्याः। २सर्पिणीनामकौ-षधौ स्त्री राजनि॰। ३शेषावतारे पतञ्जलिमुनौ पु॰ स च पाणिनीयभाष्यकारकः योगसूत्रकारश्च तयोर्भेदे ऐक्ये वा

फणिप्रिय पु॰ फणिनां प्राणप्रदत्वात् प्रियः। वायौ शब्दर॰ सर्पाणां वायुभक्षकत्वेन वायोस्तत्प्रियत्वम्।

फणिफेन न॰फणिनां फेन इव। (आफिङ)अहिफेने रत्नमा॰

फणिभुज् पु॰फणिनं भुङ्क्ते भुज–क्विप्। पन्नगाशने गरुडे

फणिमुख न॰फणिन इव मुखमस्य। स्तेयसाधनोपयोगिनि भित्तिकाक्षेपणार्थे यन्त्रभेदे दशकुमा॰।

फणिवल्ली स्त्री फणिसदृशी दीर्घा, फणिलोकस्था वा वल्ली। नागवल्ल्याम् (पानलता) फणिलतादयोऽप्यत्र हेमच॰।

फणिहन्त्री स्त्री फणिनं हन्ति हन–तृच् ङीप्। गन्धना-कुल्याम् राजनि॰। [इदुराकभायां राजनि॰।

फणिहृत् स्त्री फणिन हरति अपसारयति हृ–क्विप्। सु-

फणीन्द्र पु॰ ६त॰। सर्पेश्वरे अनन्ते २वासुकौ च।

फणीश्वर पु॰ ६त॰। १अनन्ते २वासुकौ शब्दरत्ना॰।

फणीश्वरचक्र न॰ नक्षत्रभेदे शनिस्थित्या सप्तद्वीपस्य शुभा-शुभसूचके चक्रभेदे चक्रशब्दे २८२॰ दृश्यम्।

फण्ड पु॰ फण-गतौ ड तस्य नेत्त्वम्। जठरे उणादिकोषः।

फत्कारिन् पु॰ फदित्यव्यक्तं करोति कृ–णिनि। खगमात्रे शब्दच॰।

फर न॰ फल+अच् लस्य रः। फलके भरतः।

फरुवक न॰ पूगपात्रे हारा॰। [अफरी फर्फरायते"उद्भटः।

फर्फर त्रि॰ स्फुर-अच् पृषो॰। चञ्चलस्वभावे "गण्डूषजलमात्रेण

फर्फरीक न॰ स्फुर–ईकन् "फर्फरीकादयश्च" उणा॰ नि॰। १नवपल्लवे उज्ज्वल॰। २चपेटे पु॰ ३मृदुत्वे न॰ मेदि॰। ४पादुकायां स्त्री संक्षिप्तसारः।

फर्व गतौ भ्वा॰पर॰सक॰ सेट्। फर्वति अफर्वीत् पफर्व। "प्रफर्व्यं च पीवरी"यजु॰ १२।७१ वेददी॰"फर्वतिः पूर-णार्थः" ऋ॰ १०।१०६।२ भा॰ दृश्यम्।

फर्व्वर त्रि॰ फर्व—पूरणे घरन्। पूरके क॰१॰।१०६।२भा॰।

फल भेदने भ्वा॰पर॰सक॰सेट्। फलति अफालीत् पफाल फेलतुः आदित् आरम्भे भावे क्त वा इट्। फुल्तः फलितः। फुल्तम् फलितम् अन्यत्र फलितः इत्येव। ओत् वर्त्तमाने क्त। फलितः।

फल निष्पत्तौ भ्वा॰पर॰अक॰सेट्। फलति अफालीत्। पफाल फेलतुः। क्त फलितः।

फल गतौ भ्वा॰पर॰सक॰सेट्। फलति अफालीत्। ज्वला॰ कर्त्तरि णा च। फलः फालः। फलयति फालयति।

फल न॰फल—अच्।१शस्यादीनां शस्ये २लाभे ३फलके (ढाल) ४कार्य्ये ५वहेय्ये ६प्रयोजने अमरः ७जातीफले ८त्रिफलायां ९कक्कोले मेदि॰१०बाणाग्रे ११आर्त्तवे शब्दर॰१२फाले हेम॰ १३दाने धर॰।१४शुक्रे च।१५कुटजद्रुमे पु॰शब्दर॰। १६धात्वर्थनिष्पाद्ये प्रधानोद्देश्ये प्रयोजने "स्वरितञित आत्मनेपदं कर्त्रभिप्राये क्रियाफले" पा॰।"यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः। तत् प्रधानं फलं तेषां न लाभादि प्रयोजनम्" हरिः। तेन पाकादिजन्यं भोजनं यागादिजन्यस्य पुण्यमेव फलम्। न वेतनादिलाभरूपं फलं तेन सूदस्य ऋत्विगादेर्वा न धात्वर्थजन्यफलभागित्वम्। धात्वर्थजन्ये १७संयोगादौ च "फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्" हरिः। धात्वर्थशब्दे दृश्यम्। गोतमोक्ते १८प्रमेयभेदे तल्लक्षणञ्च तत्रोक्तं यथा

"आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्"गौ॰सू॰उद्दिष्ट"प्रवृत्तिदोषजनितोऽर्थः फलम्" गौ॰ सू॰। "सुखदुःखसंवेदनं फलम् सुखविपाकं कर्म्म दुःखविपाकञ्च तत् पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सह देहादिभिः फलमभिप्रेतम् तथा हि प्रवृत्तिदोषजनितोऽर्थः फलमेतत् सर्वं भवति तदेतत् फलमुपात्तमुपात्तं हेयं त्यक्तं त्यक्तमुपादेयमिति नास्य हानोपादानयोर्निष्ठा पर्य्यवसानं वाऽस्ति स खल्वयं फलस्य हानोपादानस्रोतसोह्यते लोक इति" वात्स्या॰। "अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम्। भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्" गीता। लवणादिसंयोगे फलसादृश्यमतं यथा "लवणं लोऽग्निसंयोगाल्लवणेन च पिष्टकम्। फलं त्रितयसंयोगादम्लं भवति तत्क्षणात्" रामार्च्चनचन्द्रिकाधृतवचनम् १९निष्पन्ने त्रि॰।

फलक न॰ स्वार्थे क। (ढाल) इति ख्याते चर्म्मदे अस्त्रप्रतिघातनिवारके १पदार्थे। २अस्थिखण्डे जटाध॰३नागकेशरे ४काष्ठादिपट्टके च त्रिका॰।

फलकाम पु॰ यक्षभेदे भा॰स॰ १०अ॰।

फलकण्टक पु॰फले कण्टकं यस्य। कण्टकिफलवृक्षे नैघण्टु प्र॰

फलकपाणि पु॰फलकं पाणौ यस्य। (ढालि) चर्म्मिणि अम॰

फलपुर न॰ पुरभेदे तस्य मान्तोदात्तता।

फलकयन्त्र न॰ सि॰शि॰ उक्ते यन्त्रभेदे यथा

"कर्त्तव्यं चतुरस्रकं सुफलकं स्यादङ्गुल॰कुर्विस्तृतं विस्ताराद्द्विगुणा१८॰यतं सुगणकैनायामध्ये तथा। आधारः खचतुष्टयाङ्गुलिघटितः कार्य्यो च रेखा ततस्त्वाधाराद्रलम्बसूत्रसदृशी सा लम्बरेखोच्यते। लम्बं नवत्यङ्गुलकैर्विभज्य प्रत्यङ्गुलं तिर्य्यगतः प्रसार्य्य। सूत्राणि तत्रायतसूत्ररेखा जीवाभिधानाः सुधिया विधेयाः। आधारतोऽधः खगुणाङ्गुलेषु व्यासाद्रवयोगे सुषिरं च सूक्ष्मम्। दृष्टप्रमाणा सुषिरे शलाका श्लेष्याऽक्षसंज्ञा खलु सा प्रकल्प्या। षष्ट्यङ्गुलव्यासमितं च वृत्तं कृत्वा तदन्तं परिधौ तदङ्कम्। षष्ट्या घटीनां भगणांश ३६॰कैव प्रत्यंशकं चाप्युपचैव दिग्भिः। अग्रे परस्यां ततपट्टिकैका षष्ट्यङ्गुला दीर्घतया तथाङ्गुल्या" सू॰। "समादौ धातुमयं श्रीपर्णीदिदारुमयं वा फलकं चतुरस्रं सम्यक् समं कर्त्तव्यम्। तत्र नवत्यङ्गुलविस्तारं द्विगुणा१८॰विस्तारदैर्घ्यम्। तत्समीपे दैर्घ्यमध्ये तस्याधारः शिथिलः शङ्क्वादिः कार्य्यः। आधारे धृतं यन्त्रं यथा लम्बमानं स्यात् तथा धृते फलके आधारादधःसूत्रमवलम्बरेखा कार्य्या। सा च लम्बसंज्ञा। तं लम्बं नवतिभागं कृत्वा भागे भागे तिर्य्यग्रेखा दीर्घा कार्य्या। तिर्य्यक्त्वं तु लम्बभवाग्रतः स्यात्। सा रेखा ज्यासंज्ञा ज्ञेया। आधारादधस्त्रिंशदङ्गुलान्तरे या ज्या तस्याः लम्बस्य च सम्पाते सुषिरम्। तत्रेष्टप्रमाणा शलाका क्षेप्या साऽक्षसंज्ञा। तस्मादक्षात् त्रिंशदङ्गुलेन कर्कटकेन वृत्तरेखा कार्य्या। सा षष्ट्या३६॰ घटिकाभिर्भगणांशकैः खषड्भिसंख्यैः ३६॰ प्रत्यंशं दशभिर्दशभिः पानीयपलैश्चाङ्क्या। अथ ताम्रादिमयी वंशजा काष्ठमयी वा पट्टिका षष्ट्यङ्गुला६॰ दीर्घतया तैरेव फलकाङ्कैस्तथैवाङ्किता कार्य्या। सा पट्टिकार्धाङ्गुलविस्तृता। एकस्मिन्नग्रेऽङ्गुलविस्तृता कुठाराकारा कार्य्या। तत्र विस्तारमध्ये छिद्रं कार्य्यम्। अक्षप्रोतायाः पट्टिकाया लम्बो-

परिच्छिन्नाया एक पार्श्वं यथा लम्बरेखया न कृश्यति तथा सरन्ध्रा कार्य्येत्यर्थः” शि॰ टि॰ व्याख्या प्रमिताक्षरा।

फलकर्कशा स्त्री फलेन कर्कशा कठोरा। वनकोल्याम्।

फलकसक्थ त्रि॰ फलकमिव सक्थि यस्य बहुव्री॰। फलकतुल्यसक्थियुक्ते स्त्रियां ङीष्। फलकमिव सक्थि। कर्म॰ स॰ टच् समा॰। फलकतुल्यसक्थि न॰।

फलकाम त्रि॰ फलं कामयते कमि—णिङ् अण् उप॰ स॰। विहितकर्म्मणां फलकामनायुक्ते। तस्य निन्दा मत्स्य॰ त॰ विष्णुधर्म्मोत्तरे उक्ता यथा “धर्म्मवाणिजका मूढाः फलकामा नराधमाः। अर्च्चयन्ति जगन्नाथं ते कामं नाप्नुवन्त्युत”। “कामात्मता न प्रशस्ता” मनुना “कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन” गीतया च।

फलकिन् पु॰ फलकं तदाकारोऽस्त्यस्य इनि। (फलुइ) १मत्स्यभेदे २फलकान्विते त्रि॰ मेदि॰। फला फलिरिष्टा एव स्वार्थे क। फलका ततः चतुरर्थ्यां प्रेक्षा॰ इनि। ३तद्वच्चमीपादौ त्रि॰ स्त्रियां ङीप्।

फलकीवन न॰ वनस्पतीर्थभेदे भा॰ व॰ ८३ अ॰।

फलकृष्ण पु॰ फलेन कृष्णः। १पानीयामलके शब्दच॰। फलं कृष्णं यस्य। २कृष्णफलयुक्ते त्रि॰।

फलकेशर पु॰ फले केशरा इवास्य। नारिकेलवृक्षे जटाध॰।

फलकोष पु॰ फलस्य शुक्रस्य कोष इव। मुष्कावरकचर्म्मयुते अण्डकोषे तद्वृद्धिहेतवश्च सुश्रुते “वातपित्तश्लेष्मशोणितमेदो मूत्रान्त्रनिमित्ताः सप्त वृद्धयः। तासां मूत्रान्त्रनिमित्ते ह… रे वातसमुत्थे केवलमुत्पत्तिहेतुरन्यतमः अधः प्रकुपितोऽन्यतमो … दोषः फलकोषवाहिनीरभिप्रपद्य धमनीः फलकोषयो… र्वृद्धिं जनयति तां वृद्धिमित्याचक्षते”।

फलकोषक पु॰ फल … कोषोऽस्य कप्। मुष्के अण्डकोषे त्रिका॰।

फलग्रहि पु॰ ग्रह—इन् … उचितकालफलधरे वृक्षे भरतः

फलग्राहिन् पु॰ फलं गृह्णाति ग्रह—णिनि। १वृक्षे धरणिः च शब्दार्थ २फलग्राहके त्रि॰ स्त्रियां ङीप्।

फलघृत न॰ फला … कं घृतम् शा॰ त॰। शुक्रादिदृष्टविकारके चक्रदत्तोक्ते घृतभेदे “… मञ्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा बला। मेदा प… कोली मूलञ्चैवाश्वगन्धजम्। अजमोदा हरिद्रे … रे हिङ्गुकं कटुरोहिणी। उत्पलं कुमुदं द्राक्षाकाकोल्यौ … चन्दनद्वयम्। एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत्। शतावरीरसक्षीरं घृतात्देयं चतुर्गुणम्। सर्पिरेतन्नरः … पीत्वा नित्यं स्त्रीषु

हन्यायते। पुत्रान् जनयते नारी मेधाढ्यान् प्रियदर्शनान्। या चैवास्थिरगर्भा स्याद् या वा जनयते मृतम्। अल्पायुषं वा जनयेद् या च कन्यां प्रसूयते। योनिदोषे रजोदोषे परिस्रावे च शस्यते। प्रजावर्द्धनमायुष्यं सर्वग्रहनिवारणम्। नाम्ना फलघृतं ह्येतद् अश्विभ्यां परिकीर्त्तितम्। अनुक्तमाक्षये मूलं विपन्त्यत्र चिकित्सकाः। जीवद्वत्सैकवर्णाया घृतमत्र प्रशस्यते। आरण्यगोमयेनापि वह्निज्वाला प्रदीयते”।

फलचमस पु॰ १दधिमिश्रितवटत्वक्चूर्णे तदधिकृत्यप्रवृत्ते २न्यायभेदे च “फलचमसमस्मै भक्ष्यं ददातीति” श्रुत्या ऋत्विग्भक्ष्यत्वेन फलचमसविधानात् ऋत्विग्भक्ष्यस्य च यज्ञशेषद्रव्यत्वेन तद्विकारैः अन्योऽपि फलचमसलाभः। फलचमसश्च दधिमिश्रितवटत्वक्चूर्णमिति” मल॰ त॰ रघु॰।

फलचोरक पु॰ फलं चोर इव यस्य कप्। चोरनामगन्धद्रव्ये राजनि॰। [फलकास्थोरकपेषु च त्रिषु फलेषु।

फलत्रय न॰ द्वन्द्व॰। १पथ्यामलकीहरीतकीरूपे २द्राक्षाप-

फलत्रिक न॰ द्वन्द्व॰। त्रिफलायाम् शुण्ठीपिप्पलीमरिचरूपायाम् अमरः। त्रि॰।

फलद पु॰ फलं ददाति दा—क। १वृक्षमात्रे २फलदातरि

फलपञ्चाम्ल न॰ अम्लपञ्चफले तन्त्रस्य १११ पृ॰ दृश्यम्।

फलपाक पु॰ फलेषु पाको यस्य। १करमर्द्दके भरतः २पानीयामलके शब्दच॰। द्वन्द्व॰। ३फलस्य पाके च।

फलपाकान्ता स्त्री फलपाकेनान्तो नाशोऽस्याः। कदलीधान्याद्योषधौ अमरः। [रत्नमा॰।

फलपाकिन् पु॰ फलपाकोऽस्त्यस्य इनि। गर्द्दभाण्डे वृक्षे

फलपुच्छ पु॰ फलं पुच्छ इवास्य। वरकाश्वो त्रिका॰।

फलपुष्पा स्त्री फलानि पुष्पाणीव यस्याः। पिण्डखर्ज्जूर्य्याम् राजनि॰। [तत्रैवार्थे अमरः।

फलपूर(क) पु॰ फलेन पूरः पूर्णः। बीजपूरे स्वार्थे क।

फलप्रिया स्त्री फलेन प्रीणाति प्री—क। प्रियङ्गौ राजनि॰।

फलबन्ध पु॰ फले बन्ध्यः। अबकेशिनि फलशून्यवृक्षे हेमच॰।

फलभूमि स्त्री फलभोगार्थं कर्म्मफलभोगार्थं भूमिः। कर्म्मभूमि अतिरिक्ते भूदेशे “भारतान्यैरावतानि विदेहाश्च कुरून् विना। वर्षाणि कर्म्मभूम्यः स्युः शेषाणि फलभूमयः” हेमच॰। [भोगे अनुभवे

फलभोग पु॰ द्वन्द्व॰। फलानां कर्म्मफलानां सुखदुःखादीनां

फलमुख्या स्त्री फलेन मुख्या श्रेष्ठा। अजमोदायाम् राजनि॰

फलमुद्गरिका स्त्री फलं गिरति गृ—ण्वुल् फलं मुद्गरि

स्याः कप् । पिण्डखर्जूर्य्याम् (पिण्डखेजुर) शब्दमा०

फलयोग पु० ६त० । फलसम्बन्धे नाटकाङ्गकार्य्यस्य अवस्था "सावस्था फलयोगः स्याद् यः समग्रफलागमः सा० द० लक्षिते २अवस्थाभेदे च ।

फललक्षणा स्त्री फलहेतुका लक्षणा । प्रयोजनहेतुकायां लक्षणायाम् "व्यङ्ग्यस्य गूढागूढत्वाद्द्विधा स्युः फललक्षणाः" सा० द० ।

फलवत् त्रि० फल+अस्त्यर्थे मतुप् मस्य वः । १फलयुते पुरुषे २तत्साधने यागादौ च "फलवत्सन्निधावफलं तदङ्गमिति न्यायः । ३फलयुते वृक्षे पु० अमरः । [न० राजनि० ।

फलवर्त्तुल पु० फलं वर्त्तुलं यस्य । १कालिङ्गवृक्षे । २तत्फले

फलवृक्षक पु० फलप्रधानो वृक्षः संज्ञायां कन् । पनसवृक्षे राजनि० ।

फलशाक न० "पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा । शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम्" भावप्र० उक्ते षड्विधशाकमध्ये फलरूपशाके तच्च कुष्माण्डादि तत्रोक्तम्

फलशाडव पु० दाडिमवृक्षे राजनि० ।

फलशालिन् त्रि० फलेन शालते श्लाघते शाल–णिनि । फलयुक्ते स्त्रियां ङीप् । [बदरवृक्षे राजनि० ।

फलशैशिर पु० शिशिरं प्राप्तमस्य अण् फलं शैशिरं यस्य ।

फलश्रुति स्त्री श्रु–करणादौ क्तिन् ६त० । १वैदिककर्म्मणां फलप्रतिपादनार्थवाक्ये २फलश्रवणे च "फलश्रुतिरियं नॄणां न श्रेयो रोचनं परम् । श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनम्" । अपिच "वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे । नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः" भाग० ११स्क० मल०त० धृतवचनम् ।

फलश्रेष्ठ पु० फलेन श्रेष्ठः प्रशस्ततरः । आम्रवृक्षे शब्दच० ।

फलस पु० फलं+सणा० ड । १फलयुक्ते २पनसे भरतः फलस इति पाठान्तरं तत्रार्थे ।

फलस्थापन न० फलयोरौडुम्बरफलयोः स्थापनमत्र । सीमन्तोन्नयनसंस्कारे "फलस्थापनात् मातापितृजं पाप्मानमपोहति" हारीतः "फलस्थापनात् फलस्थापनाङ्गकसीमन्तोन्नयनात्" सं०त० रघु० । तत्र पश्चात् पतिरवस्थाय युगमनमौडुम्बरं शलाटु ग्रन्थमावध्नाति" गोभिलेन औडुम्बरफलयुगस्थापनस्य विधानात् तथात्वम् ।

फलस्नेह पु० फले स्नेहो यस्य । अक्षोटवृक्षे राजनि० ।

फलहारिन् त्रि० फलं हरति हृ–णिनि । फलहारके ।

फलहारी स्त्री फलानां हारो हरणं यत्र गौरा० ङीष् ।

कालीभेदे तत्पूजादिनञ्च "ज्यैष्ठे मासि अमायां वै मध्यरात्रे महेश्वरि ! । पूजयेत् कालिकां देवीं नानाद्रव्योपहारकैः । तत्र वासितपक्षे तु पञ्चदश्यां निशार्द्धके । पूजयेच्च फलैर्वर्ण्यैः शक्तितो वापि कालिकाम्" मायातन्त्र १७पटले । [राजनि० । २फलयुक्ते त्रि०

फलाढ्या स्त्री फलेनाढ्या समृद्धा ३त० । १काष्ठकदल्याम् ।

फलादन पुंस्त्री० फलमदनमस्य । १शुकखगे हेमच० स्त्रियां जातित्वात् ङीष् । फलाशन तत्रार्थे त्रिका० । २फलभक्षके त्रि० स्त्रियां टाप् ।

फलाध्यक्ष पु० फलमध्यक्षमिव यस्य । १राजादने अमरः । २फलदाताध्यक्षे ईश्वरे च । फलसाक्षीत्यादयोऽपीश्वरे ।

फलान्त पु० फलेनान्तोऽस्य । १वंशे शब्दमा० । ६त० । २फलस्यान्ते च ।

फलाफलिका स्त्री फलचफलितमफलं शा०त० तदस्त्यस्य ठन् टाप् कापि अत इत्वम् । फलचफलिताफलयुतायां स्त्रियाम् ।

फलावन्ध्य पु० फलेनावन्ध्यः । फलयोग्ये वृक्षे हेमच० ।

फलाम्ल न० फलमम्लं यस्य । १वृक्षाम्ले २अम्लवेतसे पु० राजनि० ।

फलाम्लपञ्चक न० अम्लपञ्चके तच्छब्दे दृश्यम् ।

फलि पु० फल–इन् । (फलुइ) मत्स्यभेदे रायमु० ।

फलिका स्त्री फल+अस्त्यर्थे ठन् टाप् । निष्पाव्याम् राजनि०

फलिग पु० फलिनं गच्छति गम–ड । मेघे निघण्टुः ।

फलित त्रि० फल–निष्पत्तौ क्त फलं जातमस्य तार० इतच् वा । १निष्पन्ने २जातफले वृक्षे पु० धरणिः । ३शैलेये न० राजनि० ।

फलिन् त्रि० फल+अस्त्यर्थे इनि । १फलयुते स्त्रियां ङीप् । २वृक्षे पु० अमरः ३प्रियङ्गौ स्त्री ङीप् अमरः । [अमरः ।

फलिन पु० फल+अस्त्यर्थे इनच् । १फलयुक्ते २ताडये वृक्षे पु०

फली स्त्री फलमस्त्यस्याः अच् गौ० ङीष् । प्रियङ्गुवृक्षे अमरः

फलीकार पु० फल+च्वि–कृ कर्मणि घञ् । फलेष्कायां भाग० ४।८।२६ श्रीधरः । भावे घञ् । २निष्फलीकरणे अफलस्य ३फलसम्पादने [धनिकरादौ च ।

फलीय त्रि० फल+उत्करा० चतुरर्थ्यां छ । १फलयुक्ते २फल-

फलेग्रहि पु० फले फलं (कर्म्मण आधारत्वविवक्षा) ग्रह–इन् धारयति स्वीकरोति वा इनि अलुक्स० । १योग्यकाले फलधारके वृक्षे यथाकालं फलशालिनि च । "फलेग्रहीन् हंसि वनस्पतीनाम्" भट्टिः । लुकि तु फलग्राहि तच्छब्दे दृश्यम् । पृषो० फलेग्राहिरप्यत्र शब्दरत्ना० ।

फलेन्द्र पु० फलेन इन्द्र ऐश्वर्यान्वितः। राजजम्ब्वाम्। "फलेन्द्रा कथिता नन्दा राजजम्बूर्महाफला" भावप्र०।

फलेपुष्पा स्त्री फले फलकाले पुष्पमस्याः। द्रोणपुष्पीवृक्षे भावप्र०।

फलेरुहा स्त्री फले तन्निमित्तं रोहति रुह–क। पाटलिवृक्षे अमरः।

फलोत्तमा स्त्री फलेन उत्तमा। १द्राक्षाभेदे राजनि०। २त्रिफलायां वैद्यकप्र०। [हेम०। २फलस्योत्पत्तौ स्त्री।

फलोत्पत्ति पु० फलानाय उत्पत्तिरस्य। १आम्रवृक्षे शब्दच०।

फलेच्छुक पु० १यक्षभेदे भा० स० १०अ०। २फलकामे त्रि०।

फलोदय पु० ६त०। १फलोत्पत्तौ २लाभे ३स्वर्गे ४हर्षे च शब्दर०

फल्क पु० फल–क नेत्त्वम। विशोधिताङ्गे उज्ज्वलद०।

फल्गु त्रि० फल–उ गुक् च। १रम्ये मेदि० २असारे अमरः। ३निरर्थके त्रिका० ४मिथ्यावाक्ये शब्दर० ५गयातीर्थस्थनद्यां स्त्री। मेदि० (फागु) इति ख्याते धूलिरूपे ६पटार्थे अवलम्बने, जटा०। ७काकोडुम्बरिकायाम् अमरः। फल्गुतीर्थमाहात्म्यं यथा "फल्गुतीर्थं व्रजेत् तस्मात् सर्वतीर्थोत्तमोत्तमम्। मुक्तिर्भवति पितृणां कर्तॄणां चात्मनः सदा। ब्रह्मणा प्रार्थितो विष्णुः फल्गुको ह्यभवत् पुरा। दक्षिणाग्निहुतं ह्यन्नं तद्रजः फल्गुतीर्थकम्। तीर्थानि यानि सर्वाणि भुवनेष्वखिलेष्वपि। तानि स्नातुं समायान्ति फल्गुतीर्थं सुरैः सह। गङ्गापादोदकं विष्णोः फल्गुर्ह्यादिगदाधरः। स्वयं हि द्रवरूपेण तस्माद्गङ्गाधिकं विदुः। अश्वमेधसहस्राणां सहस्रं यः समाचरेत्। नासौ तत्फलमाप्नोति फल्गुतीर्थे यदाप्नुयात्" वायुपु० गयामा०।

फल्गुदा स्त्री फल्गुनद्यां "तत्र देशे गया नाम पुण्यदेशोऽस्ति पावनः। नदी च फल्गुदा नाम पितॄणां स्वर्गदायिनी" वृहद्धर्म पु०। [मासि २अर्जुने च भरतः।

फल्गुन पु० फल्गुनर्क्षभेदो गौयतेऽस्मिन् गै–ड। १फाल्गुने

फल्गुनी स्त्री फल–उनन् गुक् च गौरा० ङीष्। १काकोडुम्बरिकायाम् राजनि०। अश्विन्यवधिके एकादशे द्वादशे च २नक्षत्रे च ज्यो० भरतः।

फल्गुलुका यादुकाश्रमे देशभेदे ह०वं० १४अ०।

फल्गुवाटिका स्त्री फल्गुर्नाम वाटीव इवार्थे कन्। काकोडुम्बरिकायाम् राजनि०।

फल्गुहस्ताक पु० फल्गुना रम्येण हस्तेन आकायति आ+कै–क। श्योनाकभेदे। राजनि०।

फल्गूत्सव पु० फल्गुनिमित्तक उत्सवः। फाल्गुनपौर्णमास्यादिषु कर्त्तव्ये (आबीर)फल्गुद्रव्यकरणे उत्सवे "गोविन्दानुग्रहोत्सवं यात्राङ्गं तत्प्रकीर्त्तितम्। फल्गूत्सवं प्रकुर्वीत पञ्चाहानि त्र्यहाणि वा" दोलयात्रापद्धतिः।

फल्य न० फलाय हितं यत्। पुष्पे शब्दच०।

फल्लकिन् पु० फलक+पृषो० तदाकारोऽस्यस्य इनि। (फलुइ) मत्स्यभेदे शब्दार्थकल्प०।

फल्लफल पु० शूर्पवाते जटाधरः।

फा पु० फल–बा० डा। १निष्फलभाषणे शब्दर०। २सन्तापे ३वृद्धौ ४वर्द्धके च त्रिका०। [उपधातुभेदे राजनि०।

फाटकी स्त्री स्फुट ण्वुल् पृषो० गौरा० ङीष्। (फट्किरी)

फाणि स्त्री स्फाय–नि पृषो०। १गुडविकारे, २करम्भे (दधिमिश्रितसक्तौ) च उणादिकोषः।

फाणित न० फण–णिच्–क्त। गुडविकारभेदे (फेणी) अमरः "इक्षो रसस्तु यः पक्वः किञ्चिद्गाढो बहुद्रवः। स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया" भावप्र०। "फाणितं गुर्वभिष्यन्दि बृंहणं कफशुक्रकृत्। वातपित्तश्रमहरं मूत्रवस्तिविशोधनम्" तद्गुणास्तत्रोक्ताः।

फाण्ट न० फण–क्त नि०। १अनायासेन कृते अमरः। "क्षिप्रोष्णतोये मृदितः फाण्ट इत्यभिधीयते" इत्युक्ते २काथभेदे पु०। "क्षुण्णद्रव्यपले सम्यक् जलमुष्णं विनिःक्षिपेत्। पात्रे चतुःपलमितं ततस्तु स्रावयेज्जलम्। सोऽयं चूर्णद्रवः फाण्टः भिषग्भिरभिधीयते" वैद्यक०।

फाल न० फलाय शस्याय हितम् अण्, फल्यते विदार्य्यते भूमिरनेन वा घञ्। १फालनामख्याते लाङ्गलमुखस्थे लोहभेदे अमरः। फालमस्त्यस्य अच्। २बलदेवे ३महादेवे च पु०। फलस्य विकारः अण्। ४कार्पासवस्त्रे मेदि०। ५तप्तफालकरणपरीक्षाभेदे न०। फलेषु भवः अण्। ६जम्बीरबीजे पु० कल्पद्रु०। फालदिव्यप्रकारश्च मिता०उक्तो यथा "बृहस्पतिः "आयसं द्वादशपलघटितं फालमुच्यते। अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तरम्। अग्निवर्णं ततश्चौरो जिह्वया लेहयेत् सकृत्। न दग्धश्चेच्छुद्धिमियादन्यथा स तु हीयते" चौरोऽत्र गोचौरः "गोचौरस्य प्रदातव्य तप्तफालावलेहनम्" इति स्मृतेरिति मैथिलाः। अन्यापि तस्मे इत्यादिमन्त्रान्तरम्। "आयसं लेलिहानस्य जिह्वयापि समादिशेत्" इति पितामहोक्तेः प्राड्विवाकशोध्याभ्यामभिमन्त्रणं कार्यम्। अत्र प्रयोगः मौक्तिकचत्वारिंशत्तोलकमितं लौहघटितमष्टाङ्गुलमायामचतुरङ्गुलदीर्घम्। तथाविध-

चतुरङ्गुलप्रमाणं फालमग्नौ तापयेत्। तत्र प्राड्विवाकोऽधर्मावाहनादि पूर्ववत् कर्म कृत्वा दक्षिणां दत्त्वा तदन्तकं प्रतिज्ञापत्रं शोध्यशिरसि निधाय ओम् "त्वमग्ने वेदाश्चत्वारस्त्वञ्च यज्ञेषु हूयसे। त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम्। जठरस्थो हि भूतानां ततो वेत्सि शुभाशुभम्। पापं पुनासि वै यस्मात् तस्मात् पावक उच्यसे। पापेषु दर्शयात्मानमर्चिष्मान् भव पावक!। अथ वा शुद्धभावेषु शीतो भव हुताशन!। त्वमेव सर्वभूतानामन्तश्चरसि साक्षिवत्। त्वमेव देव! जानीषे न विदुर्यानि मानवाः। व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति। तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि"। इत्येतैः फालस्थमग्निमभिमन्त्रयेत्। शोध्यस्तु "त्वमग्ने सर्वभूतानामन्तश्चरसि पावक!। साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं कवे! मम" इत्यनेनाभिमन्त्राग्निवर्णं फालं जिह्वया सकृत् लिह्यात्। न दग्धश्चेत् शुद्धः"।

फाल्गुन पु० फल्गुनीयुक्ता पौर्णमासी अण् सा यत्र मासे ऽब्दे वर्षे अर्द्धमासे वा अण्। चैत्रावधिके द्वादशे १स्वनामख्याते मासभेदे २तादृशे पक्षे ३अब्दे वर्षभेदे च कार्त्तिकशब्दे १९४८ पृ० दृश्यम्। "अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुन त्रिभोमत" इत्युक्तेः पौर्णमास्यां फाल्गुनीस्तपनक्षत्रयोगात् तथात्वम्। स च मासः त्रिविधः मुख्यगौणचान्द्रसौरभेदात् तत्र कुम्भस्थरव्यारब्ध शुक्लप्रतिपदादिदर्शान्तो मुख्यचान्द्रः। तथाभूतकृष्णप्रतिपदादिपौर्णमास्यन्तो गौणः, कुम्भस्थरविकः सौरः इति। अयञ्च शब्दः हसन्तान्ते मेदिनिकोषे पठितः। फाल्गुने गगने फेने णत्वमिच्छन्ति बर्बराः" कारिकायाम् अणत्वमितिकल्पनं मेदिनिविरोधात् प्रामादिकमेव। ४तत्पौर्णमास्यां स्त्री ङीप्। ५अर्जुनाख्ये पाण्डवे तन्नामकारणम् भा०वि०४४अ०उक्तं यथा "उत्तराभ्यां फलगुनीभ्यां नक्षत्राभ्यामहं दिवा। जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः"। ६अर्जुनवृक्षे पु० मेदि०।

फाल्गुनानुज पु० फाल्गुनादनुजायते अनु+जन–ड। १चैत्रे मासि २वसन्तकाले हारा०। ३नकुलसहदेवयोः हि० व०।

फाल्गुनिक पु० फाल्गुनीनक्षत्रयुक्ता पौर्णमासी अस्मिन् मासे ठञ्। चैत्रावधिके द्वादशे मासे। [२कोपे शब्दर०

फि पु० स्फाय–बा०ङि। १निष्फलवाक्ये २पापे च एकाक्ष०को०

फिङ्गक पु० कपिङ्ग+पृषो०। (फिङ्गा) पक्षिभेदे शब्दमा०।

फिरङ्ग पु० फिरङ्गनामख्याते देशभेदे। रोगविशेषे२ भावप्र० तत्र फिरङ्गस्य निरुक्तिमाह। "फिरङ्गसंज्ञके देशे बाहुल्येनैव यद्भवेत्। तस्मात् फिरङ्ग इत्युक्तो व्याधिर्व्याधिविशारदैः"। तस्य विप्रकृष्टं निदानमाह गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम्। फिरङ्गिणोऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः। व्याधिरागन्तुजो ह्येष दोषाणामनुसंक्रमः। भवेत्ता लक्षयेत्तेषां लक्षणैर्भिषजां वरः"। फिरङ्गिण्याः प्रसङ्गत इति विशेषार्थम्। रूपमाह "फिरङ्गस्त्रिविधो ज्ञेयो बाह्याभ्यान्तरस्तथा। बहिरन्तर्भवश्चापि तेषां लिङ्गानि च ध्रुवम्। तत्र बाह्यः फिरङ्गः स्याद्विस्फोटसदृशोऽल्परुक्। स्फुटितो व्रणवद्वेद्यः सुखसाध्योऽपि स स्मृतः। सन्धिष्वाभ्यन्तरः स स्यादुभयोर्लक्षणैर्युतः। कष्टोऽतिचिरस्थायी कष्टसाध्यतमश्च सः"। उपद्रवानाह "कार्श्यं बलक्षयो नासाभङ्गो वह्नेश्च मन्दता। अस्थिशोषोऽस्थिवक्रत्वं फिरङ्गोपद्रवा अमी"। साध्यत्वादिकमाह "बहिर्भवो भवेत् साध्यो नूतनो निरुपद्रवः। आभ्यन्तरस्तु कष्टेन साध्यः स्यादयमामयः। बहिरन्तर्भवो जीर्णः क्षीणस्योपद्रवैर्युतः। बोध्यो व्याधिरसाध्योऽयमित्यूचुर्मुनयः पुरा"। ततोऽस्त्यर्थे इनि। फिरङ्गिन् तद्देशजाते तद्रोगयुते च त्रि० स्त्रियां ङीप्। [विश्वः।

फु पु० फल–डु। मन्त्रोच्चारणपूर्वके १फुत्कारे २तुच्छवाक्ये च

फुक पु० खगे शब्दच०। [फणायां पु० हेमच०।

फुट त्रि० स्फुट–क पृषो०। १विदीर्णे २अस्फुटिते च। ३सर्प-

फु(फू)त् अव्य० फल–डुति पृषो० वा दीर्घः। अनुकरणशब्दे।

फुत्कर पु० फुत् इत्यव्यक्तं शब्दं करोति कृ–ट। वह्नौ शब्दच०

फुत्कार पु० कृ–भावे घञ् फुदित्यव्यक्तशब्दस्य कारः। फुदित्यव्यक्तशब्दकरणे। फुत्कारयुक्ते वह्नौ आहुतिनिषेधो यथा "अल्पे कक्षे सस्फुलिङ्गे वामावर्त्ते भयानके। आर्द्रकाष्ठैः समुत्पन्ने फुत्कारवति पावके। कृष्णार्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम्। आहुतिं जुहुयाद्यस्तु तस्य नाशो भवेद् ध्रुवम्" ति०त०।

फुप्फुस पु० सुश्रुतोक्ते हृदयस्य वामपार्श्वस्थिते (फुलका) इति ख्याते कोष्ठभेदे "स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च। हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते" व्याख्या चेदम् "आमस्य स्थानमामाशयः नाभेरूर्द्ध्वम्। अग्नेः स्थानं पक्वामाशयः नाभिमध्यम्। पक्वस्य स्थानं पक्वाशयः नाभेरधः। मूत्रस्य स्थानं वस्तिः) रुधिरस्य स्थानं यकृत्प्लीहानौ। हृत् हृदयम्। उण्डुकः पक्वमलवहः

शोणितमलसम्भवः उण्डुकः स चान्त्रदेशे प्रदेशस्थितः पुरीषाधारस्। फुप्फुसः हृदयस्य वामपार्श्वे स्थितः। (फक्का) इति ख्यातः” इति विजयरक्षितः।

फुल्त(ल्ल) त्रि० फल-आरम्भे भावे क्त वा तयोर्नेट् अत इत्वम्।१फलनारम्भयुते २फलने च। पक्षे फलित इति। अन्यत्र फलित इत्येव। भावे क्तिन् फुल्तिं फलने स्त्री।

फुल्ल विकाशे भ्वा०पर०अक०सेट। फुल्लति अफुल्लीत् पुफुल्ल।

फुल्ल त्रि० फुल्ल-विकाशे अच्। विकशिते पुष्पे अमरः।

फुल्लफाल पु० फुल्लं फलति फल-अण्। शूर्पवाते त्रिका०।

फुल्लदामन् न० छन्द०। १फुल्लानां दामनि “मोगो नौ तौ गौ यरहयवरगैः फुल्लदाम प्रसिद्धम्” वृ०र० उक्ते जनविंशत्यक्षरपादके छन्दोभेदे।

फुल्ललोचन त्रि०फुल्लं विकसितं लोचनमस्य।१विकसितनेत्रे स्त्रियां स्वाङ्गत्वेऽपि बह्वच्कत्वात् टाप्। २मृगभेदे पुंस्त्री०शब्दच० स्त्रियां जातित्वात् ङीप्। [संक्षिप्तसा०।

फुल्लरीक पु० फल-फर्फरीकादि० नि० १देशभेदे २सर्पे च

फेण(न) पु० स्फाय-न पृषो० मतान्तरे णत्वम्। दुग्धजलादेः क्वथ्यपरिस्थे बुद्बुदाकारे पदार्थे (फेना) अस्य णान्तत्वमपि “इंबन्वेषयो नदीतीरे निनदैः षं णीयिरे। यथा सारस्वता मन्त्रा अन्तरे फेणसङ्गता” इत्युक्तौ पक्षे अन्तरेफेण अन्तःस्वरकारेण संयुता इत्यर्थः। २हिमे च ३गुड़विकारभेदे स्त्री ङीप। “वटी वेशवाराद् लवङ्गेन फेणी शमं पर्पटः शिग्रुबीजेन याति”जीर्णमञ्जरी।“वानीरं गगनं फेनमूनश्च दन्त्यनान्वितम्। आहुः फाल्गुनमिच्छन्ति केचिन्मूर्द्धन्यणान्वितम्” भरतधृतवाक्यम्।

फेण(न)क स्वार्थे क संज्ञायां कन् वा। १फेनशब्दार्थे २पिष्टकभेदे त्रिका०।

फे(ण)नका स्त्री फे(ण)न इव कायति कै-क। जलपक्वतण्डुलचूर्णे (काइ) शब्दच०।

फेण(न)दुग्धा स्त्री फेणः(नः) इव दुग्धं निर्यासोऽस्य। (दुधफेणा) क्षुपभेदे राजनि०।

फेण(न)वाहिन् पु० (फेण(न)मिव वहति श्वेततास। वह-णिनि। वस्त्रे शब्दमाला। [राजनि०।

फेणा(ना) स्त्री फेण(न) अस्त्यर्थे अच्। सातलाक्षुपे

फेणा(ना)ग्र न० ६त०। बुद्बुदे। हारा०।

फे(णि)निका स्त्री (फाञा) इति ख्याते पक्वान्नभेदे ततात्र गत्वे २।८३१२४ पृ० दृश्यम्।

फेणि(नि)ल त्रि० फे-(ण)+अस्त्यर्थे इलच्। फेन(ण)विशिष्टे।२कोविफले ३मदनवृक्षफले च न०मेदि०।४वदरवृक्षे राजनि० ५अरिष्टवृक्षे च पु० अमरः।

फेत्कारिणी स्त्री तन्त्रभेदे।

फेत्कारीय पु० तन्त्रभेदे। [स्त्रियां जातित्वात् ङीप्।

फेर पुंस्त्री० फे इत्यव्यक्तं रौति रु-बा० ड। शृगाले शब्दर०

फेरण्ड पुंस्त्री० फे इत्यव्यक्तं रण्डति रण्ड-अच्। शृगाले हेमच० स्त्रियां जातित्वात् ङीष्।

फेरव पुंस्त्री फे इत्यव्यक्तो रवोऽस्य। १शृगाले अमरः। २राक्षसे मेदि०। स्त्रियां ङीप् ३धूर्त्ते त्रि० शब्दर०।

फेरु पु० फे इत्यव्यक्तं रौति रु-डु। १शृगाले अमरः।

फेल गतौ भ्वा०पर०सक०सेट्। फेलति अफेलीत् पिफेल। ऋदित् चङि न ह्रस्वः। अपिफेलत् त।

फेल(ला) न०स्त्री० फेल-अच् वा टाप्। १भुक्तावशिष्टे उच्छिष्टे शब्दरत्ना० न०। अमरे स्त्री।

फेलि स्त्री फेल-इन्। उच्छिष्टे भुक्तावशिष्टे अटाध० स्वार्थे क फेलिका तत्रार्थे

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य-
सङ्कलिते वाचस्पत्ये फकारादिशब्द-
सङ्कलनम्।

फाण्टशब्दपरिशिष्टम्—“तद्वै नवनीतं भवति घृतं देवानां फाण्टं मनुष्याणाम्” शत०ब्रा० “नवनीतभावात् प्रागवस्थापन्नं द्रव्यं फाण्टमित्युच्यते” भाष्यम्।

ब

बकारः पवर्गस्य तृतीयवर्णः कादिषु त्रयोविंशतितमो व्यञ्जनवर्णः जिह्वाग्रेण ओष्ठयोः स्पर्शेन उच्चार्यत्वात् स्पर्शवर्णः। अस्योच्चारणस्य स्थानमोष्ठौ। उच्चारणे ओष्ठजिह्वाग्रेण स्पर्शः आभ्यन्तरप्रयत्नः। बाह्यप्रयत्नाः संवारनादघोषाः अल्पप्राणश्च। अस्य वाचकशब्दाः तन्त्रे वर्णाभिधानोक्ता यथा “बो वनी भूधरो मार्गी शर्वरी लोचनप्रियः। प्रचेताः कलसः पक्षी स्थलगण्डः कपर्दिनी। पृष्ठवंशोऽभया मत्तः शिखिवाहो युगन्धरः। सुखबिन्दुर्बली घण्टा योद्धा त्रिलोचनप्रियः। क्लेदिनी तापिनी भूमिः सुगन्धिस्वविप्रियः। सुरभिर्मुखविष्णुश्च संहारो वसुधाधिपः। षष्ठी पुत्रं चपेटा च मोदका गगनं पतिः। पूर्वाषाढ़ा मध्यलिङ्गः शनिः कृष्ण तृतीयकौ”। तस्याधिष्ठातृदेवताध्यानं यथा ‘गोरवर्णां

त्रिनयनां नीलाम्बरधरां पराम्। नानाहारोज्ज्वलां देवीं द्विभुजां पद्मलोचनाम्। एवं ध्यात्वा बकारन्तु तन्मन्त्रं दशधा जपेत्” वर्णोद्धारतन्त्रम्। अस्य ध्येयस्वरूपं यथा “बकारं शृणु चार्वङ्गि! चतुर्वर्गप्रदायकम्। शरच्चन्द्र प्रतीकाशं पञ्चदेवमयं सदा” कामधेनुत०। मातृन्यासेऽस्य पृष्ठवंशे न्यस्तता। काव्यादौ प्रथमप्रयोगे पकार-शब्दोक्तं फलम्।

व पु० वल–ड। “वः पुमान् १वरुणे २सिन्धौ ३भगे ४तोये ५गते त्रु वा। ६गन्धने ७तन्तुसन्ताने पुंस्येव ८वपने स्मृतः” मेदि०। ९कुम्भे शब्दर०।

वंहिष्ठ त्रि० अतिशयेन बहुः इष्ठन् बंहादेशः। अतिशय बहुले अमरः। [बहुले स्त्रियां ङीप्।

वंहीयस् त्रि० अतिशयेन बहुः ईयसु बंहादेशः। अतिशय-

बकुर त्रि० भास्कर+भयङ्कर+वा पृषो०। १भास्करे २भयङ्करे च ऋ० १।११७।२१ भा०।

वठ हठौ सामर्थ्ये च भ्वा०पर०सक०सेट्। वठति अवठीत् अवाठीत्। ववाठ वेठतुः। [अमरः।

वड़वा स्त्री बलं वाति वा–क लस्य डः। १घोटक्याम्, २अश्विनीनक्षत्रे ज्यो०। ३दास्याञ्च। वड़वाकृतशब्दे उदा०

वड़वाकृ(हृ)त न० वड़वया दास्या कृतः (हृतः) वा। दास भेदे “भक्तदासश्च विज्ञेयस्तथैव वड़वाकृ(हृ)तः” स्मृतिः।

वडवाग्नि पु० वड़वायाः शिवरूपाश्वायामुखस्थोऽग्निः। स-मुद्रस्थिते घोटकीमुखस्थे कालानले। कालिकापु०४१अ०। तयोत्पत्तिरुक्ताऽस्य। और्वशब्दे १५८१।८२पृ० अस्य-चोत्पत्तिरुक्ता दृश्या। वड़वानलादयोऽप्यत्र।

वड़वामुख पु० वड़वाया मुखं स्थानत्वेनास्त्यस्य अर्श आदि-त्वादच्। समुद्रस्थे कालानले हेमच०।

वड़वासुत पु० द्वि०व० ६त०। अश्विनीकुमारयोः। अश्विनी-कुमारशब्दे दृश्यम्। [त्रेणतुः

वण शब्दे भ्वा०पर०सक०सेट्। वणति अवाणीत्-अवणीत्

वण पु० वण–अच्। शब्दे भरतः।

वणिक्पथ पु० ६त० अच्समा०। हट्टे। [शब्दच०

वणिग्बन्धु पु० वणिजां बन्धुरिव पोषकत्वात्। नीलीवृक्षे

वणिग्भाव पु० ६त०। वाणिज्ये आजीवनार्थं क्रयविक्रय करणे अमरः।

वणिग्वह पु० वणिजं वहति वह–अच्। उष्ट्रे शब्दच०

वणि(ज)ज् पु० पणायते व्यवहरति पण–इजि पस्य वा वः। आजीवनार्थं क्रयविक्रयव्यवहारकर्त्तरि अमरः। २ज्योतिषोक्ते ववादितः षष्ठे करणे च ४वाणिज्ये स्त्री मेदि०। स्वार्थे अण् वाणिज तत्रार्थे अमरः।

वणिज्य न० वणिजो भावः कर्म वा य। वाणिज्ये आ-जीवनार्थं क्रयविक्रयादिव्यवहारे भरतः स्त्रीत्वमपि। “चतुरेण चतुर्वर्गचिन्तामणिवणिज्ययेति” मुक्ताफलम्। ष्यञ्। वाणिज्य तत्रार्थे न०।

वद स्थैर्ये निश्चलभवने भ्वा०पर०सक०सेट्। वदति अवादीत् अवदीत्। ववाद वेदतुः।

वद भाषणे वा चु०उभ०पक्षे भ्वा०पर०सक०सेट्। वादयति ते अवीवदत्-त। पक्षे वदतीत्यादि।

व(ब)दर पु० वदति स्थिरीभवति छिन्नस्यापि पुनः प्ररोहेण वद+स्थैर्ये अरच्। १कोलिवृक्षे २देवसर्षपवृक्षे राजनि०। तस्य फलम् अण् तस्य लुक्। ३कोलिफले राजनि०। कर्क-न्धूशब्दे दृश्यम्। ४कार्पासफले ५कोलिफले न० ६कोलिभेदे (सेव्वोयाकुल) कार्पासास्थ्नि पु० मेदि०। अन्त्यस्यादित्वम-स्यान्ये रक्तम्। ८वराहक्रान्तायां १कार्पासवृक्षे स्त्री अमरः।

बदर(प)पाचन न० तीर्थभेदे भा०श०४८अ०। तत्र इन्द्रोप-देशेन कुमार्य्यां पञ्चवदराणां पचनात्तथात्वम्।

व(ब)दरफली स्त्री व(ब)दरस्येव फलमस्याः ङीप्। भूमि-व(ब)दर्य्याम् राजनि०।

व(ब)दरवल्ली स्त्री व(ब)दरफलप्रधाना वल्ली शा०त०। भूमि-व(ब)दरीतिख्याते लताभेदे राजनि०।

व(ब)दरामलक न० व(ब)दरमिवामलकम्। १प्राचीनामलके हारा०। समा०द्व०। २वदरामलकफलयोः समाहारे न०

व(ब)दरिकाश्रम पु० न०। वदरी+स्वार्थे क तस्याः स-मीपे तच्चिह्नितोवाश्रमः। तीर्थविशेषे। व(ब)दरीशैलो-ऽप्यत्र। भा० व० ९२ अ० दृश्यम्। वदरिकावनमध्यत तत्र हिमालयपर्वतैकदेशे श्रीनगरास्यदेशसमीपे अलक-नन्दानदीपश्चिमभागे स्थितम्।

व(ब)दरी स्त्री व(ब)दर+गौरा०ङीष्। १कोलिवृक्षे अमरः २कार्पास्यां शब्दर० कपिकच्छ्वाम् राजनि०। ततः पील्वा० पाके कुणच्। वदरीकुण तत्पाके न०।

व(ब)दरीच्छदा स्त्री व(ब)दर्य्या इव च्छदो यस्याः। १हस्ति-कोलिवृक्षे २गन्धनख्याञ्च राजनि०।

बवदरीपत्र पु० व(ब)दर्य्या इव पत्रमस्याः। नखीनामगन्ध-द्रव्ये जटा०। स्वार्थे क। तत्रैव। [लिकायाम् शब्दमा०

बवदरीफला स्त्री व(ब)दर्य्या इव फलमस्याः। नीलशेफा-

बद्ध त्रि० बन्ध–कर्मणि क्त। बन्धनकर्माणि अमरः।

बद्धगुद न० बद्धं गुदमत्र । कोष्ठस्थकारके रोगभेदे "यस्यान्त्रमन्नैरुपलेपिभिर्वा बालाश्मभिर्वापिहितं यथावत् । सञ्चीयते तस्य मलः सदोषात् शनैः शनैः सङ्करवच्च नाड्याम् । निरुध्यते तस्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पम् । हृन्नाभिमध्ये परिवृद्धिमेति तस्योदरं बद्धगुदं वदन्ति" भावप्र० ।

बद्धफल पु० बद्धानि फलान्यस्य । करञ्जवृक्षे राजनि० ।

बद्धमुष्टि त्रि० बद्धः दानायाप्रसारितो मुष्टिरस्य । कृपणे ।

बद्धमूल त्रि० बद्धं मूलमस्य । दृढमूले ।

बद्धरसाल पु० नि०क० । राजाम्रभेदे राजनि० ।

बद्धशिख त्रि० बद्धा शिखा येन यस्या वा । "सदोपवीतेन भाव्यं सदा बद्धशिखेन च" प्रा०त०उक्ते १शिखाबन्धनयुक्ते २उच्चटायां स्त्री मेदि० ।

बध पु० हन–घञ् । वधादेशः । हनने प्राणवियोगसाधने व्यापारे अमरः । वधपदार्थविशेषं वधिभेदश्च प्रा० वि० उक्तो यथा

"अथ वधो निरूप्यते । ननु कोऽयं वधः किं वधित्वं कति विधं च तत्, ? उच्यते प्राणवियोगफलकव्यापारो वधः तन्निष्पादकत्वञ्च साक्षात्परम्परोदासीनं स्वातिशयपरिगणितं वधित्वम् अतो नैषुकारादिष्वतिव्याप्तिः तच्च पञ्चविधं स्मृतिस्वरसात् कर्त्ता प्रयोजकोऽनुमन्ता अनुग्राहको निमित्ती चेति यथाह आपस्तम्बः "प्रयोजयिता अनुमन्ता कर्त्ता चेति सर्वे स्वर्गनरकफलभोक्तारो यो भूय आरभते तस्मिन् फले विशेषः" । अनुग्राहकमाह याज्ञवल्क्यः "चरेद्व्रतमहत्वापि घातार्थञ्चेत् समागतः" । तथा मनुः "बहूनामेककार्य्याणां सर्वेषां शस्त्रधारिणाम् । यद्येको घातकस्तत्र सर्वे ते घातकाः स्मृताः" । भविष्ये "यद्येकं बहवो विप्रा घ्नन्ति विप्रमनागसम् । तदेषां निष्कृतिं वक्ष्ये शृणुष्वैकमना गुह ! ॥ तेषां यस्य प्रहारेण स विप्रो निधनं गतः । सरस्वतीं प्रतिस्रोतः सञ्चरेत् पापशुद्धये" । स च द्विविधः । एको वध्यप्रतिरोधकः अन्यः स्वल्पप्रहर्त्ता । निमित्तिनमाह विष्णुः "अन्यायेन गृहीतस्वो न्यायमर्थयते तु यः । यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" । अत्र नराकारव्यापाराद्यप्रधानेन वधनिष्पादकः कर्त्ता, यः कर्त्तारं कारयति स प्रयोजकः सोऽपि द्विविधः । एकः स्वतोऽप्रवृत्तमेव पदातिं वेतनादिना वधार्थं प्रवर्त्तयति अपरः स्वतः प्रवृत्तमेव मन्त्रोपायोपदेशादिना प्रोत्साहयति । अनुमतिदाता अनुमन्ता । अनुमतिश्च द्विविधा । एका यद्विरोधाद्धननं न सम्भवति तस्य विरोधिनो मया निरोधः कर्त्तव्य इति प्रतिज्ञा । अपरा एनं हन्मीति वचने मत्स्वप्रतिषेध एव" । हिंसायाः पापाद्यनिष्टजनकत्वेऽपि वैधहिंसाया इष्टफलजनकत्वात् नानिष्टजनकता "यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा । अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः" ति० त० उक्तेः मनुनापि "या वेदविहिता हिंसा नियतास्मिंश्चराचरे । अहिंसामेव तां विद्याद् वेदाद् धर्मो हि निर्बभौ" इत्युक्तेश्च । अन्यत्र अहिंसा च तज्जन्यपापाजनकत्वेन तद्विरोधीत्यर्थः । बहूनां दुष्टपापमेकस्य वधेऽपि पुण्यजनकत्वमुक्तम् "एकस्य यत्र निधने प्रवृत्ते दुष्टचारिणः । बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः । स्वर्णस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः । आत्मानं घातयेद्यस्तु तस्य पुण्यप्रदो वधः" कालिका०२०अ० । ब्रह्महन्तृवधेऽपि न दोषो दोषः प्रा०वि०स्थितः "तथा नाततायिवधे दोषो हन्तुर्भवति कश्चन" इति स्मृतेः आततायिवधेऽपि नानिष्टफलमिति यथायथं बोध्यम् ।

बध संयमने चु०उ०सक०सेट् । बाधयति–ते अबीबधत्–त ।

बध निन्दायां बन्धने च भ्वादि०आत्म०सक०सेट् । बीभत्सते अबीभत्सिष्ट । निन्दनेऽर्थे स्वार्थे सन् बन्धने तु न तेन तत्र बधते अबधिष्ट इत्येव ।

बधक त्रि० बध–क्वुन् । १बधकर्त्तरि त्रि० मेदि० । २हिंस्रे ३व्याधौ ४मृत्यौ च संक्षिप्तसा० ।

बधत्र न० बध–करणे अत्रन् । अस्त्रे उणादि० । [हारा० ।

बधस्थली स्त्री ६त० । श्मशाने त्रिका० । बधस्थानमप्यत्र न० ।

बधाङ्गक न० बधः अङ्गमत्र कप् । कारागृहे त्रिका० ।

बधार्ह त्रि० बधमर्हति अर्ह–अच् उ०स० । बधदण्डार्हे ।

बधिर त्रि० बन्ध–किरच् । श्रोत्रेन्द्रियरहिते श्रवणशक्तिशून्ये । तस्यानंशिता मनुनोक्ता यथा "अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा" । ततः अरीहणा० चतुरर्थ्यां वुञ् । बाधिरक तन्निकटदेशादौ त्रि० । ततः दृढा०भावे वा इमनिच् पक्षे ष्यञ् । बधिरिमन् पु० बाधिर्य्य न० तद्भावे तन्निदानादि भावप्रकाशे उक्तं यथा "यदा शब्दवहं वायुः स्रोत आवृत्य तिष्ठति । शुद्धः श्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते" ।

ब(व)भ्रु पु० बिभर्त्ति भरणतया भृ–कु नलोपः, उच्यते नञ्–श्च मशाकादेशौ च । १पावके, २विशालाक्षे अमरः

३स्नुषायां, ४नवोढायाम्, भार्य्यायां ५प्यारिवोषधौ ६गवाम्, च मेदि० ।

ब(व)धूटी स्त्री अल्पा ब(व)धूः अल्पार्थे टि वा ङीप्। अल्प-वयस्कायां नार्य्याम् "गोपवधूटीदुकूलचौराय" भाषाप०।

ब(व)धूत्सव पु०व(ब)ध्वा उत्सव आर्त्तवम् रजः स इव प्रसवः पत्रादिर्यस्य । रक्ताम्लाने राजनि० ।

बधोद्यत त्रि०बधाय उद्यतः। मारणार्थमुद्युक्ते आततायिनि अमरः। आततायिनशब्दे ६४७ पृ० दृश्यम् ।

बध्य त्रि०बधमर्हति बध+यत् ।१बधार्हे अमरः। बन्ध-कर्मणि क्यप् ।२कारारोद्धव्ये । आधारे क्यप् । ३बन्धनस्थाने च

बध्यपाल पु० बध्यं कारागारं पालयति पालि-अण् उप० स० । कारागाररक्षके । विष्णु० पु० २अंशे ६अ० ।

बध्यभूमि स्त्री कर्म-भावे यत् बधार्थाः बध्यस्य भूमिः । स्म-शाने बधस्थाने बध्यस्थानादयोऽप्यत्र [मङ्गलेलापत्रे पुंस्त्री०

बध्योग पु०ऋषिभेदे ततो बिदा० गोत्रापत्ये अञ् । बाध्योग

बध्र न० बन्ध-ष्ट्रन् नलोपः । १सीसके, २चर्म्मनयरज्ज्वां स्त्री ङीप् । पृषो० नस्य रः । बध्रीत्यप्यत्र स्त्री अमरः ।

बन याचने तना० आत्म० द्विक० सेट् । बनुते अबनिष्ट । वेने उदित् क्त्वा वेट् बनित्वा बान्त्वा बान्तः । [बबन्ध बध्यते ।

बन्ध बन्धने क्र्या०-पर०-सक०-अनिट् । बध्नाति अभान्त्सीत्

उद्+उत्तोलय बन्धने "उद्बध्नन्त्यसता वै च" स्मृतिः ।

अनु+नियतपूर्ववर्त्तित्वे अनुगमने च । "तेषु किं भवतः स्नेहमनुबध्नाति मानवम्" देवीमा० ।

नि+निबन्धने निबन्धशब्दे दृश्यम् ।

निर्+आग्रहे निर्बन्धशब्दे दृश्यम् ।

प्र+ग्रन्थने आत्मनिबन्धने च प्रबन्धशब्दे दृश्यम् ।

प्रति+निरोधे "प्रतिबध्नाति हि श्रेयः" रघुः । व्याप्तौ च प्रति-बन्धशब्दे दृश्यम् ।

सम्+सम्बन्धशब्दे संसर्गे च ।

बन्ध संयमने चुरा०-उभ०-सक०-सेट् । बन्धयति ते अबबन्धत् त

बन्ध पु०बन्ध-घञ् । १संयमने निगडादिना गतिरोधने २हट-हादिवेष्टनकल्ले च । रज्जुशब्दे २६२५पृ०दृश्यम्। करणे कर्मणि वा घञ् ।३देहे ४ऋणशोधनविश्वासाय स्थापिते द्रव्ये आधौ च । आधिशब्दे ७११पृ० दृश्यम्। करणे घञ् ।५ग-तिरोधसाधने शब्दर० । रतिबन्धभेदाश्च रतिमञ्जर्य्युक्ता यथा "पद्मासनो नागपदो लतावेष्टोऽर्द्धसंपुटः कुलिशं सुन्दरश्चैव तथा केशर एव च । हिल्लोलो नरसिंहोऽपि विपरीततथाऽपरः । कुर्म्मो वै वेणुकश्चैव पङ्कजक

स्ततः परम् । सिंहासनो रतिनागो विद्याधरस्तु भोङ्गनः" तत्तच्छब्दे तेषां लक्षणानि दृश्यानि । स्मरदीपिकोक्ता अन्येऽपि बन्धाः सन्ति यथा

"कामप्रदो विपरीतो नागरो रतिपाशकः । केयूरः प्रिय-तोषश्च ततः समपदस्तथा । ततश्चैकपदो ज्ञेयः सम्पुट-श्चार्द्धसम्पुटः । ततः स्तनभरश्चैव ततोऽसुरतिसुन्दरः । कण्ठपीडागलश्चक्रो ततश्चोत्क्रमः स्मृतः । वेष्टको हृदको-ऽस्तु ततो लीलाबनस्तथा । अष्टादश क्रमाद्बन्धाः स्त्रीणां मन्मथप्रदाः । पुंसां सुखकराश्चैव कथितास्तु क्रमा-गतः" । प्रत्याहृत्यैव सततं देहाद्देहान्तरगतिरूपे ६संसारे च ।

बन्धक न० बन्धे स्थापितं धनम् कन् । ऋणशोधार्थम् विश्वास-हेतुतया आधीकृते १पदार्थे शब्दर०। स्वार्थे क ।२विनिमये पु० मेदि० । ३रतहिण्डके नानार्थमाला । ४पुंश्चल्यां स्त्री अमरः । ५कुलिन्यां मेदि० ७अधम गौरा० ङीष् । ६पञ्चपुरुषगामिन्यां स्त्रियाम् भा० आ० १२२अ०।

बन्धन न० बन्ध-भावे ल्युट् ।१निगडादिना २संयमने अमरः ३वधे मेदि०। करणे ल्युट् । ४तन्तौ रज्ज्वां । हेमच०

बन्धनवेश्मन् न० ६त०। कारागारे हारा०। बन्धनागारादयो ऽप्यत्र । बन्धनालयोऽपि तत्रार्थे अमरः ।

बन्धनस्तम्भ पु० ६त० । हस्तिबन्धनकाष्ठे आलाने अमरः ।

बन्धित पु०बन्ध इतच् । १कामदेवे उणादि०। २चर्म्मव्यजने संक्षि०

बन्धु पु० बध्नाति मनः स्नेहादिना बन्ध-उ । १भ्रातरि मातुल-पुत्रादौ अमरः । "३बन्धुभ्यः पितृमातृतः" इति स्मृतिः बान्धवे ३मित्रे ४पितरि ५मातरि ६भ्रातरि ७बन्धुजीववृक्षे च स्वार्थे अण् । बान्धव तत्रार्थे बन्धवश्च त्रिविधाः पारिभाषिका आत्मबन्धुशब्दे पितृ-बन्धुशब्दे च मातृबन्धुशब्दे वक्ष्यमाणाश्च दृश्याः । अतएव "तत्सुतो गोत्रजो बन्धुरिति" याज्ञ० तएव ग्राह्या इति मिता० । दायभागमते तु मातामहादयोऽपि बन्धवः अतएव "तत्सुतो गोत्रजो बन्धुरिति" याज्ञ०व्या० तेन बन्धुपदेन असगोत्राणां मातामहादीनां ग्रहण-मित्युक्तम् । अतो मतभेदेन धनग्रहणे व्यवस्थाभेदः ।

बन्धुक पु० बन्ध-उक । बन्धुजीववृक्षे शब्दरत्ना० ।

बन्धुजीव(क) पु०बन्धुरिव जीवयति जीवि-अण् ण्वुल् वा । बन्धुजीववृक्षे । (बाँधुलि) ख्याते अमरः । [च अमरः

बन्धुता स्त्री बन्धु+समूहे भावे तल् वा । १बन्धुसमूहे, २तद्भावे

बन्धुदत्त न० ६त० । १स्त्रीधनभेदे "बन्धुदत्तं तथा शुल्क

मन्वाधेयकमेव च। अप्रजायामतीतायां बान्धवास्तदवाप्नुयुः” याज्ञ०। “बान्धवा भ्रातरः बन्धुदत्तपदेन कन्यादशायां यत् पितृभ्यां दत्तं तदुच्यते” दायभागः। तन्मते कन्यादशायां बन्धुभ्यां पितृभ्यां दत्ते स्त्रीधने च।

बन्धुर न० बन्ध-उरच्। १मुकुटे शब्दर०। २स्त्रीचिह्ने ३तिलकल्के ४बन्धुजीववृक्षे ५बधिरे ६हंसे च मेदि०। ७विडङ्गे हेमच०। ८ऋषभौषधौ राजनि०। ९बके विहङ्गे च पु० शब्दर०। १०रम्ये ११नम्रे १२वेश्यायां स्त्री १३खलु च पु० अ०२ मेदि०। १४उन्नतानते च त्रि० अमरः पाठान्तरम्।

बन्धुल पु० बन्ध-उलच्। १असतीपुत्रे अमरः २बन्धुके शब्दर० ३सुन्दरे ४रम्ये ५नम्रे च त्रि० अजयपालः।

बन्धूक पु० बन्ध-ऊक। (बान्धुली) वृक्षे अमरः “बन्धूकपुष्परक्ताभम्” रविप्रणाममन्त्रः। रक्तपीतादिपुष्पे मध्याह्ने प्रकाशवति पुष्पवृक्षे २पीतशालके मेदि०। “असितपीतलोहितपुष्पविशेषाच्चतुर्विधो बन्धूकः। ज्वरहारी विषहारी ग्रहापि शाचशमनः प्रसादनः पवितः स्यात्” राजनि०। “बन्धूकः कफकृद्ग्राही रक्तपित्तहरो लघुः” भावप्र०। (बन्दुक) इति ख्याते ३अस्त्रभेदे न० हेमच०।

बन्धूर पु० बन्धू-ऊरच्। १छिद्रे उणा०। २रम्ये ३नम्रे च त्रि० रभसः ४उन्नतानते क्वचिदुन्नते क्वचिन्नते त्रि० अमरः।

बन्धूलि पु० बन्ध-ऊलि। बन्धुजीववृक्षे शब्दर०।

वन्ध्य त्रि० बन्ध-यत्। कालप्राप्तावपि १फलशून्ये वृक्षे अमरः। २निष्फले राजनि० “अवन्ध्यकोपस्य निहन्तुरापदाम्” किरा०। १० ३बन्धनीये च त्रि०। ४अपुत्रायां स्त्रीजातौ स्त्री शब्दच०। ५बालाख्ये गन्धद्रव्ये स्त्री मेदि०। प्रा० वि० बन्ध्यायाः संज्ञोत्पत्तिरुक्ता यथा “बन्ध्या च द्विपत्नी ज्ञेया द्विपत्नी च रजस्वला। अथ या द्विपत्नी ज्ञेया कुमारी या रजस्वला” ६योनिरोगभेदे स्त्री भावप्र०। ४५८७पृ० मिश्रकशब्दे परिशिष्टे दृश्यम्।

बन्ध्यफल पु० फले बन्ध्यः पूर्वनि०। फलहीने वृक्षे अमरः।

बन्ध्याकर्कोटी स्त्री बन्ध्याया उपकारिणी पुत्रप्रदत्वात् कर्कोटी। तिक्तकर्कोट्याम् अस्याः पुत्रदायित्वेन बन्ध्योपकारित्वम्। स्वार्थे क अत इत्वम्। बन्ध्याकर्कोटिका तत्रैव भावप्र० “बन्ध्याकर्कोटिका तिक्ता कटूष्णा च कफापहा। सर्पदर्पविपन्नी च रसायनकरी परा” तत्राभक्षत एतदेति कोषमान् तस्य बन्ध्योपकारित्वं बोध्यम्।

बन्ध्यातनय पु० बन्ध्यायाः तनय इव। अलीके पदार्थे बन्ध्यासुतादयोऽप्यत्र।

बभ्र गतौ भ्वा० पर० सक० सेट्। बभ्रति अबभ्रीत् बबभ्र।

बभ्रु पु० भृ-कु-द्वित्वम् बभ्र-उ वा। १शिवे २विष्णौ ३नकुले ४वह्नौ, ५विशाले देशभेदे ६तद्देशवासिनि ब०व० मेदि०। ७मुनिभेदे च ८पिङ्गलवर्णे पु०। ९तद्वति त्रि० अमरः। स्त्रियाम् ऊङ्। १०खलतौ वह्निकरे पु० हेमच०। ११पिताम्बरकषाये राजनि०। गर्गा० अपत्ये यञ्। बाभ्रव्य तन्मुनेरपत्ये पुंस्त्री०। स्त्रियां ङीप् यलोपः बाभ्रवी।

बभ्रुधातु पु० कर्म०। १स्वर्णे २गैरिके च राजनि०।

बम्ब गतौ भ्वा० पर० सक० सेट्। बम्बति अबम्बीत् बबम्ब।

बभ्रारि त्रि० भृ-इन् द्वित्वं अभ्यासे मुक्। धर्तरि भर्तरि “बभ्रारिरवस्युरसि” ताण्ड्यब्रा०।

बर न० वृ-अच् १कुङ्कुमे। २आर्द्रके ३त्वचे ४बालके गन्धद्रव्ये राजनि०। कर्मणि अप्। ५जामातरि देवादिभ्यः ६वाञ्छायां ७विछ्रेने जारे च पु०। भावे अप्। ८वरणे ९त्रिफलायां मेदि०। १०गुडूच्यां, ११मेदायां १२ब्राह्म्याम् १३विडङ्गे १४पाठायां १५हरिद्रायाञ्च स्त्री टाप् राजनि०। १६शतावर्यां स्त्री मेदि० गौरा० ङीष्।

बरम अव्य० वृ-बा० अमु। ईषदिष्टे अयमन्यस्यवादिरित्येके।

बर्जह न० गवादीनां दुग्धस्रोतुर्वर्त्तिस्थाने ऋ० १।१६२।४ भा०।

बर्ब गतौ भ्वा० पर० सक० सेट्। बर्बति अबर्बीत् बबर्ब।

बर्बट पु० बर्ब-अटन्। १राजमाषे (बरबटी) त्रिका०। गौरा० ङीष्। २तस्यैव बीजे ३वेश्यायाञ्च स्त्री मेदि०।

बर्बणा स्त्री बर्ब-ल्यु। नीलमक्षिकायाम् अमरः।

बर्बुर पुं न० बर्ब-उरच्। उदके निघण्टुः।

बर्ह दाने वधे स्तुतौ वाचि च भ्वा० आ० सक० सेट्। बर्हते अबर्हिष्ट “विगर्हितं धर्मधनैर्निबर्हणम्” नैष०।

बर्ह न० बर्ह-अच्। १मयूरपिच्छे अमरः। २पत्रे ३परीवारे हेमच० मयूरपिच्छे पुंस्त्वमपि। “कं हरदेव बर्हः” इति विक्रमो० प्रयोगात् “यथा बर्हाणि चित्राणि बिभर्त्ति भुजगाशनः” क्लीबे प्रयोगः। [पु० ६४ अ०

बर्हकेतु पु० बर्हं केतुचिह्नं यस्य। नवममनोः पुत्रभेदे मार्क०

बर्हवत् पु० बर्ह+अस्त्यर्थे मतुप् मस्य वः। मयूरपिच्छयुक्ते ततः विमुक्तादि० अण्। बार्हवत तत्सम्बन्धिनि त्रि०।

बर्हस् न० बर्ह-स्तुतौ असुन्। आकारणे ऋ० १।११४।१०।

बर्हि न० बर्ह-इन्। कुशे।

बर्हिण पु० बर्ह+इन। मयूरे अमरः।

बर्हिन् पु० बर्ह+अस्त्यर्थे इनि। मयूरे अमरः।

बर्हिवाहन पु० बर्ही मयूरो वाहनमस्य। कार्त्तिकेये।

बर्हिःपुष्प पु० बर्हिः बर्हश्रेष्ठमिव पुष्पमस्य । मयूरपिच्छवृक्षे बर्हिकुसुमादयोऽप्यत्र ।

बर्हिर्मुख पु० बर्हिर्वह्निर्मुखमस्य । देवे अमरः ।

बर्हिःशुष्मन् पु० बर्हिः कुशः बलमस्य । वह्नौ अमरः ।

बर्हिषद् पु० ब०व० बर्हिषि सीदति सद–क्विप् षत्वम् । पितृगणभेदे पितृशब्दे दृश्यम् ।

बर्हिष्केश पु० बर्हिः केश इव यस्य । वह्नौ ।

बर्हिष्मत् त्रि० बर्हिरस्त्यस्य मतुप् । कुशयुक्ते स्त्रियां ङीप् ।

बर्हिष्य त्रि० बर्हिषि दत्तम् यत् । कुशे दत्ते पिण्डादौ ।

बर्हिष्ठ त्रि० बर्हिषि कुशे तिष्ठति स्था–क ७त० वा विसर्गलोपः षत्वम् । कुशस्थिते ।

बर्हिस् न० बर्ह–कर्मणि इसि । कुशे १यज्ञिये कुशे "विष्टीर्णं बर्हिषि" सामाचिकम् १।१ "उपमूललूनं बर्हिः पितृणां पर्वसु लूनं देवानाम्" कौ०त० । प्राचीनबर्हिःशब्दे दृश्यम् २दीप्तौ ३अग्नौ च "बर्हिषि रजतं न देयम्" श्रुतिः ।

बल जीवने, धान्यावरोधे च भ्वा०पर०सक०सेट् । बलति । अबालीत् बेलतुः । ज्वलादि० कर्त्तरि ण । बलः बालः ।

बल दाने वधे निरूपणे च भ्वा०उभ०सक०सेट् । बलति–ते अबालीत् अबलिष्ट । बेलतुः बेले । [बलत् तु ।

बल जीवने चु०उभ०अक०सेट् मित् घटा० । बलयति-ते अबी-

बल निरूपणे चु०आत्म०सक०सेट् । बालयते अबीबलत ।

बल न० बल-अच् । १सैन्ये २देहजे सामर्थ्ये ३स्थौल्ये ४गन्धरसे ५रूपे मेदि० ६शुक्रे हेमच० ७८देहे जटा० ८पल्लवे शब्दर० ९रक्ते च शब्दच० । १०बलयुक्ते त्रि० मेदि० ११काके १२बलदेवे अमरः । १३वरुणवृक्षे शब्दच० । १४दैत्यभेदे पु० मेदि० । तत्र पारिभाषिकबलानि ब्रह्मवै०पु० ३५ अ० उक्तानि यथा

"क्षत्रियाणां बलं युद्धं व्यापारश्च बलं विशाम् । भिक्षाबलं भिक्षुकाणां शूद्राणां विप्रसेवनम् । हरौ भक्तिर्हरेर्दास्यं वैष्णवानां बलं हरिः । हिंसा बलं खलानाञ्च तपस्या च तपस्विनाम् । बलं वेशश्च वेश्यानां योषितां यौवनं बलम् । बलं प्रतापो भूपानां बालानां रुदितं बलम् । सतां सत्यं बलं, मिथ्या बलमेवासतां सदा । अनुगानामनुगमः स्वस्थानाञ्च सञ्चयः । विद्या बलं पण्डितानां वाणिज्यं वणिजां बलम् । प्रवृत्तकर्मशीलानां गाम्भीर्यं साहसं बलम् । धनं बलं च धनिनां शुचीनां शौचमेव च । बलं विवेकः शान्तानां दुःखिनां चञ्चलता । शुष्को बलं च दुःखिनां चौराणां चौर्यमेव च । विप्रलम्भश्च कापट्यमधर्मश्चाधिनां बलम् । हिंसा च हिंस्रजन्तूनां सतीनां पतिसेवनम् । वरप्राप्तौ सुराणाञ्च शिष्याणां गुरुसेवनम् । बलं धर्मो गृहस्थानां भृत्यानां राजसेवनम् । बलं स्तवः स्तावकानां ब्रह्म च ब्रह्मचारिणाम् । यतीनाञ्च सदाचारो न्यासः सन्न्यासिनां बलम् । पापं बलं पातकिनां सुभक्तानां हरिर्बलम् । पुण्यं बलं पुण्यवतां प्रजानां नृपतिर्बलम् । फलं बलञ्च वृक्षाणां जलधीनां जलं बलम् । जलं बलञ्च मत्स्यानां मत्स्यानाञ्च जलं बलम् । शान्तिर्बलञ्च भूपानां विप्राणाञ्च विशेषतः" । "विद्याभिजनमित्राणि बुद्धिसत्त्वधनानि च । तपःसहायवीर्याणि दैवञ्च दशमं बलम्" भा० शा० ।

वैद्यके सद्योबलकरपदार्थाः संक्षेपे दर्शिता यथा "सद्यो बलकरं ज्ञेयं बालाभ्यङ्गः सुभोजनम् । सद्यो बलकरं ज्ञेयं सर्पिश्च मांसमद्युत" । "धातूनां यत् महत् तेजस्तत्खल्वोजस्तदेव बलमित्युच्यते" वैद्य० सुश्रुते १५स्कन्दानुचरभेदे पु० । "बलश्चातिबलश्चैव महावक्त्रो महाबलौ" भा० श० ४५।३६ श्लो० । असुरभेदश्च इन्द्रेण हतः इन्द्रपर्य्याये बलारातिशब्ददर्शनात् देवीपु० ४७अ० तु स विष्णुना हत. "तदा दत्ता तनुस्तेन दानवेन महात्मना । विष्णुनापि स्वचक्रेण शिरस्यभिहतो बलः । प्राकृतं देहमुत्सृज्य दिव्यकायस्त्वभूत्तदा । तस्यावयवसंजाता वज्राद्या रत्नजातयः । शोषिते सुर तेजांसि पद्मरागाणि चाभवन् । विशुद्धपात्रदानेन कायो रत्नाकरोऽभवत्" । [अमरः । अन्त्यस्थवादिरयमिति स्वामी ।

बलक्ष पु०बलं क्षायत्यस्मात् क्षै–क । १शुक्लवर्णे । २तद्वति त्रि० ।

बलज न० बलात् जायते जन–ड । १क्षेत्रे २पुरद्वारे ३शस्ये ४युद्धे च । ५बलजाते त्रि० मेदि० । ६वरयोषायां ७यूथिकायां च स्त्री मेदि० ।

बलद पु० बलं ददाति दा–क । "पौष्टिके बलदः स्मृतः" १पौष्टिककर्माङ्गे वह्निभेदे । २अश्वगन्धायां स्त्री । राजनि० ३बलदातरि त्रि० । ४जीवके पु० राजनि० ।

बलदीनता स्त्री ३त० । ग्लानौ हेमच० ।

बलदेव पु० बलेन दीव्यति दिव–अच् बलोद्रिक्तो देवो वा शाक०त० । १बलरामे "बलदेवो बलोद्रेकात्" ब्रह्मवै० ज०ख० ४१ अ० । २त्रायमाणौषधौ स्त्री अमरः । ३वायौ पु० मेदि० ।

बलप्रसू स्त्री ६त० । रोहिण्यां वसुदेवभार्य्याभेदे स्त्री शब्दच० तज्जनन्यात्तथोऽस्याः ।

बलभद्र पु० बल+अर्श आद्यच् बलो बलवानपि भद्रः सौम्यः । १बलदेवे, अमरः । २गवये राजनि० । ३अनन्ते पु० ४बलयुते त्रि० हेमच० । ५लोध्रे शब्दच० । बलेषु भद्रा । ६त्रायमाणौषधौ ६घृतकुमार्य्यां च स्त्री मेदि० स्वार्थे क । बलभद्रिका तत्रार्थे स्त्री अमरः ।

बलराम पु० बलेन रमते रम-संज्ञायां कर्त्तरि घञ् बलोपपदको वा रामाख्या० त० । कृष्णाग्रजे रोहिणीनन्दने संकर्षणे रामस्य दाशरथिपरशुरामबलरामभेदेन त्रित्वात् अस्य बलोपदकत्वात्तथात्वम् । [भरतः ।

बलल पु० बलं लाति ला—क बल-कलच् वा । बलरामे

बलवत् अव्य० बल+अतिशये मतुप् मस्य वः । १अतिशये अमरः । "बलवदपि शिक्षितानाम्" शकुन्तला । २बलविशिष्टे सोढरि त्रि० अमरः स्त्रियां ङीप् । [जटाधरः ।

बलवर्द्धिनी स्त्री० बलं वर्द्धयति वृध—णिनि । जीवकौषधौ

बलविन्यास पु० बलानां सैन्यानां विशेषेण दुर्भेद्यतायै न्यासः स्थापनम् । व्यूहे सैनासन्निवेशविशेषे अमरः ।

बलशालिन् त्रि० बलेन शालते शाल-णिनि । बलविशिष्टे स्त्रियां ङीप् । [इन्द्रे हला० । बलनिसूदनोऽप्यत्र ।

बलसूदन पु० बलं तन्नामकमसुरं सूदयति सूद-ल्यु ।

बलस्थिति स्त्री स्था-आधारे क्तिन् ६त० । शिबिरे त्रिका० ।

बलहन् पु० बलनामासुरं बलं वा हन्ति हन-क्विप् । बलारातौ १इन्द्रे २श्लेष्मधातौ शब्दर० । ३बलरामे हरिवं० १११ अ० ।

बला स्त्री० बलं कार्य्यत्वेनास्त्यस्याः । (बालियड़ा) १क्षुपभेदे, अमरः । "बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् । स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् । बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम् । मूत्रातिसारं हरति दृष्टमेतन्न संशयः" भावप्र० । विश्वामित्रेण रामाय दत्ते २अस्त्रविद्याभेदे अतिबलाशब्दे दृश्यम् ।

बलाका स्त्री० बल-संवरणे अाक । १बकपङ्क्तौ २बके विसकण्ठिकायां ३बकभेदे ४कामुक्यां च शाश्वतः ।

बलाकाश्व पु० अजकन्दपपुत्रे नृपभेदे हरिवं० ७अ० ।

बलाकिन् त्रि० बलाका+अस्त्यर्थे इनि । १बलाकायुक्ते स्त्रियां ङीप् २धृतराष्ट्रपुत्रभेदे पु० भा० आ० ६७अ० ।

बलाङ्गक पु० बलयुक्तमङ्गमत्र कप् । वसन्तकाले हेमच० ।

बलाञ्चिता स्त्री ३त० । बलरामवीणायां शब्दरत्ना० ।

बलाट पु० बलाय तद्रामय अटति गच्छति बलरम् अट-अच् । मुद्गे (मुग) हेमच० ।

बलात् अव्य० बलं सामर्थ्यं कारणत्वेनाततीति अत-क्विप् । हठादित्यर्थे । पञ्चम्यन्तबलशब्देनास्य न गतार्थता बलात्कार इत्यादिसिद्धये तस्याव्ययसङ्गीकार्य्यत्वात् । [च ।

बलात्कार पु० बलात्+कृ-घञ् । बलपूर्वककरणे, हठात्करणे

बलात्मिका स्त्री० बलमेवात्मा स्वरूपं कारणत्वात् यस्याः कप् अत इत्वम् । (हातिशुण्डा) हस्तिशुण्डीवृक्षे शब्दर० ।

बलादि पु० मत्वर्थीय प्रत्ययनिमित्ते १शब्दगणे स च गणः पा० ग० उक्तो यथा "बल चुल नल दल वट लकुल उरल पुल मूल उल डुल वन कूल" । अत्वर्थे वा १मतुप्प्रत्ययं निमित्ते २शब्दगणे च स च गणः पा० ग० सूत्रे उक्तो यथा "बल उत्साह उद्भास उद्वास उद्वास शिखा कुल चूड़ा सुल कूल आयाम व्यायाम उपयाम आरोह अवरोह परिणाह युद्ध" ।

बलाद्या स्त्री० बलाय आद्या । (बेलियाड़ा) क्षुपभेदे राजनि

बलाध्यक्ष पु० ६त० । सेनापतौ मनु० ७।१८९ ।

बलानुज पु० अनुजायते अनु+जन-ड ६त० । श्रीकृष्णे ।

बलाबलाधिकरण न० बलञ्च अबलञ्च ते अधिक्रियेते अस्मिन् अधि+कृ-आधारे ल्युट् । आकाङ्क्षानाकाङ्क्षारूपबलाबलयोर्निश्चायके जैमिन्युक्ते न्यायभेदे यथा "सा वैश्वदेव्यामिक्षा भवति वाजिभ्यो वाजिनम्" इत्यत्र वैश्वदेवयागस्यामिक्षाकाङ्क्षत्वेन वाजिनाकाङ्क्षेति न तत्र तस्यान्वयः वेदान्तप० ।

बलामोटा स्त्री० बलमामोटयति आ+मुट-अच् । नागदमन्याम् भावप्र०

बलाय पु० बलस्यायः स्थानम् । वरुणवृक्षे शब्दच० ।

बलाराति पु० बलस्य तन्नामासुरस्यारातिः । इन्द्रे अमरः बलशत्रु प्रभृतयोप्यत्र । [स्वल् । पानीयामलके शब्दच०

बलालक पु० बलाय सामर्थ्याय अलति पर्य्याप्नोति अल-

बलास पु० बलमस्यति क्षिपति अस-अण् उप० स० । कफधातौ हेमच० "गौरवं कफसंस्रावोऽरुचिस्तम्भोऽग्निमार्दवम् । माधुर्य्यमपि चास्यस्य बलासावृतते हृदि" सुश्रु०

बलाह्वकन्द पु० बलं सामर्थ्यमाह्वयति आ+ह्वे-क तादृशः कन्दः । शुक्लकन्दे राजनि० ।

बलि पु० बल—इन् । १पूजायाम् २उपहारे, "ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितमिति" चण्डी ३राजग्राह्ये अमरः ४चामरदण्डे, ५गृहस्थकर्त्तव्यपञ्चयज्ञमध्ये भागे, ६भूतयज्ञे, हेमच० । "बलिकर्म ततः कुर्य्यादिति" स्मृतिः ।

विरोचनसुते ६दैत्यभेदे च "येन बद्धो बली राजा दानवेन्द्रो महाबलः" इत्याद्युक्तमन्त्रः। ७जरया श्लथचर्मणि स्त्री० क्लीब्। "गृहस्थस्तु यदा पश्येत् बलीपलितमात्मनः" इति मनुः। ८उदरावयवभेदे "बलि-त्रयं चारु बभार बाला" इति कुमारः। ९गुह्यस्य अङ्कुराकारे मांसपिण्डे, वैद्यकम् अर्शःशब्दे दृश्यम्। गृहदारुभेदे च (पाड़) स्त्री० स्वार्थे क, बलिका तत्रार्थे अतिबलायाञ्च राजनि०। १०ययातिवंश्ये सुतपोनृपपुत्रे विष्णु पु०। दानवभेदकथा भाग० ८स्क० दृश्या।

वैश्वदेवबलिकरणप्रकारः मार्क० पु० उक्तो यथा। "ततोऽन्नेनार्पणं कुर्य्याद्दद्याच्च बलिमित्यथ। ब्रह्मणे गृहमध्ये तु विश्वेदेवेभ्य एव च। धन्वन्तरिं समुद्दिश्य प्रागुदीच्यां बलिं क्षिपेत्। प्राच्यां शक्राय, याम्यायां यमाय बलिमाहरेत्। प्रतीच्यां वरुणायैव सोमायोत्तरतो बलिम्। दद्याद्धात्रे विधात्रे च बलिं द्वारे गृहस्य च। अर्य्यम्णे च बलिं दद्यात् गृहेभ्यश्च समन्ततः। नक्तञ्चरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत्। पितॄणां निर्वपेच्चैव दक्षिणाभिमुखस्थितः। गृहस्थस्तत्परो भूत्वा सुसमाहितमानसः। ततस्तोयमुपादाय तिष्ठेदाचमनाय वै। स्थानेषु निक्षिपेत् प्राज्ञस्तास्तु उद्दिश्य देवताः। एवं गृहबलिं कृत्वा गृहे गृहपतिः शुचिः। आप्यायनाय भूतानां कुर्य्यादुत्सर्गमादरात्। श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्च वपेद्भुवि। वैश्वदेवं हि नामैतत् सायं प्रातरुदाहृतम्"।

देवोद्देश्यकबलिविशेषादिकं यथा

"साधकैर्बलिदानेषु ग्राह्याः सर्वस्य तत्र च। पक्षिणः कच्छपा ग्राहा मत्स्या नवविधा मृगाः। महिषो गोधिका गावश्छागो बभ्रुश्च शूकरः। खड्गश्च कृष्णसारश्च गोधिका शरभो हरिः। शार्दूलश्च नरश्चैव स्वगात्ररुधिरं तथा। चण्डिकाभैरवादीनां बलयः परिकीर्त्तिताः। बलिभिः साध्यते मुक्ति-र्बलिभिः साध्यते नृपम्। बलिदानेन सततं जयेच्छत्रू-न्नृपान् नृपः। मत्स्यानां कच्छपानान्तु रुधिरैः सततं शिवा। मासैकं तृप्तिमाप्नोति ग्राहैर्मासांस्तु त्रीनथ। मृगाणां शोणितैर्देवी नराणामपि शोणितैः। अष्टौ मासानाप्नोति तृप्तिं कल्याणदा च सा। गोगोधि-कयो रुधिरैर्वार्षिकीं तृप्तिमाप्नुयात्। कृष्णसारस्य रुधिरैः शूकरस्य च शोणितैः। आप्नोति सततं देवी तृप्तिं द्वादशवार्षिकीम्। अजाविकानां खड्गानां रुधिरैः शतवार्षिकीम्। तृप्तिमाप्नोति परमां शार्दूलरुधिरैस्तथा। सिंहस्य शरभस्यापि स्वगात्रस्य च शोणितैः। देवी तृप्ति-मवाप्नोति सहस्रं परिवत्सरान्। मांसैरपि तथा प्रीती रुधिरैर्यस्य यावती। कृष्णसारस्तथा खड्गं तथा मत्स्यस्य रोहितम्। वार्द्धीणसयुगस्यापि फलं तेषां पृथक् शृणु। कृष्णसारस्य मांसेन तथा खड्गेन चण्डिका। वर्षाणि पञ्च शतान्येव तृप्तिमाप्नोति केशवाम्। रोहितस्य तु मत्स्यस्य मांसैर्वार्द्धीणसस्य च। तृप्तिमाप्नोति वर्षाणां शतानि त्रीणि मत्प्रिया। त्रिःपिबंस्त्वीन्द्रिय-क्षीणः श्वेतो वृद्धस्त्वजापतिः। वार्द्धीणसः प्रोच्यतेऽसौ हव्ये कव्ये च सत्तमः। नीलग्रीवो रक्तशीर्षः कृष्ण-पादः सितच्छदः। वार्द्धीणसः स्यात् पक्षीयो मम विष्णो रतिप्रियः। "मन्त्रपूतं शोणितन्तु पीयूषं जायते सदा। मस्तकञ्चापि तस्यास्ति मांसञ्चापि सदा शिवा। तस्मात् पूजने दद्याद्बुधैः शीर्षञ्च लोहितम्। भोज्ये होमे च मांसानि नियुञ्ज्याद्विचक्षणः। पूजायां नाऽऽम मांसानि दद्याद्वै साधकः क्वचित्। ऋते तु लोहित शीर्षममृतं तत्तु जायते। कुष्माण्डमिक्षुदण्डञ्च मद्य-मासवमेव च। एते बलिसमाः प्रोक्तास्तृप्तौ छाग-समाः सदा। चन्द्रहासेन कर्त्र्या वा छेदनं मुख्यमि-ष्यते। दात्रासिधेनुकक्रचशङ्कुलाभिस्तु मध्यमम्। क्षुरस्तुरप्रभल्लैश्चैवाधमं परिकीर्त्तितम्। एभ्योऽन्यैः शक्तिबाणप्रासैर्बलिश्छेद्यः कदापि न। नाप्नोति देवी बलिं तन्तु दाता मृत्युमवाप्नुयात्। हस्तेन च्छेदयेद्यस्तु प्रोक्षितं साधकः पशुम्। पक्षिणं वा ब्रह्महत्यां सोऽवा-प्नोति सुदुःसहाम्। नामन्त्र्य खड्गन्तु बलिं नियुञ्जीत विचक्षणः।" "पशूनां पक्षिणाञ्चापि नराणाञ्च विशे-षतः। स्त्रियं न दद्यात्तु बलिं दत्त्वा नरकमाप्नुयात्। सङ्कल्पितबलिदानेषु योषितं पशुपक्षिणोः। बलिं दद्या-न्मानुषीन्तु त्यक्त्वा सङ्कल्पपूजितम्। न क्लिमाशीयकाव्यूनं पशुं दद्यात् शिवाबलिम्। न च त्रिपक्षकाद्यूनं प्रद-द्याद्वै पतत्रिणम्। काणाभ्यङ्गादिदुष्टन्तु न पशुं पक्षिणं तथा। दैव्यै दद्याद्यथामत्यां तथैव पशुपक्षिणौ। छिन्नवाङ्गूलकर्णादिभग्नदन्तांस्तथैव च। भग्नशृङ्गादि-कञ्चापि न दद्यात्तु कदाचन।" "भारं पञ्च शिरो-रत्नं देवाः पश्चात् निवेदयेत्। वामन्तु वामतो दद्यात्त-च्छिन्नं वितरेत् पुरः। पक्षिणं वामतो दद्याद्दक्षिणे देव

शोणितम् । क्रव्यादीनां पशूनान्तु पक्षिणाञ्च शिरोऽसृजम् । वामे निवेदयेत् पार्श्वे अजजानाञ्च सर्व्वशः । शूकरस्य कूर्म्मस्य खड्गस्य शशकस्य च । पाञ्चालास्य मनुष्याणामग्र एव निवेदयेत् । सिंहस्य दक्षिणे दद्यात् खड्गिनोऽपि च दक्षिणे । पृष्ठदेशे न दद्यात्तु शिरो वा रुधिरं पशोः ।" कालिकापु० नानास्थानीयम् । "बलिदानेन विप्रेन्द्र ! दुर्गाप्रीतिर्भवेन्नृणाम् । हिंसाजन्यञ्च पापञ्च लभते नात्र संशयः । उत्सर्गकर्त्ता दाता च छेत्ता पोष्टा च रक्षकः । अग्रपश्चान्निरोद्धा च सप्तैते वधभागिनः । यो यं हन्ति स तं हन्ति चेति वेदोक्तमेव च । कुर्व्वन्ति वैष्णवीं पूजां वैष्णवास्तेन हेतुना" ब्रह्म० प्रकृ० ६१ । ६२ अ० । बलिदाननिन्दा यथा

"पार्व्वत्युवाच । ये समाचर्न्नमित्युक्ता प्राणिहिंसनतत्पराः । तत् पूजनं समाविश्य यद्दोषात्तदधोगतिः । मदर्थे शिव ! कुर्व्वन्ति तामसा जीवघातनम् । आकल्पकोटि निरये तेषां वासो न संशयः । मम नाम्नाथ वा यज्ञे पशुहत्यां करोति यः । क्वापि तन्निष्कृतिर्नास्ति कुम्भीपाकमवाप्नुयात् । दैवे पैत्रे तथात्मार्थे यः कुर्य्यात् प्राणिहिंसनम् । कल्पकोटिशतं शम्भो ! रौरवे स वसेत् ध्रुवम् । यो मोहान् मानवैर्द्देहिहत्यां कुर्य्यात् सदाशिव ! । एकविंशतिजन्मः स तत्तद्योनिषु जायते । यस्तु यज्ञे पशून् हत्वा कुर्य्यात् शोणितकर्द्दमम् । स पचेन्नरके तावद् यावल्लोमानि तस्य वै । हन्ता कर्त्ता तथोत्सर्गकर्त्ता धर्त्ता तथैव च । तुल्याभवन्ति सर्व्वे ते ध्रुवं नरकगामिनः । सम्मोहाद् ये पशून् हत्वा नरकं पातकलुब्धजेन । यो मूढः स तु पूयोदे वसेद् देव ! न संशयः । देवतान्तरसम्मानव्याजेन स्वेच्छया तथा । हत्वा जीवांस्ततो मोहात् नित्यं नरकमाप्नुयात् । यूपे बद्धा पशून् हत्वा यः कुर्य्याद्रक्तकर्द्दमम् । तेन चेत् प्राप्यते स्वर्गो नरकं केन गम्यते । उपदेष्टा वधे हन्ता कर्त्ता धर्त्ता च विक्रयी । उत्सर्गकर्त्ता जीवानां सर्व्वेषां नरकं भवेत् । मध्यस्थस्तु वधायापि प्राणिनां क्रयविक्रये । तथा दृष्ट्वा सूनायां कुम्भीपाको भवेद् ध्रुवम् । स्वयंकामाशयो भूत्वा योऽज्ञानेन विमोहितः । हन्यन्याय विवशान् जीवान् कर्म्मज्ञान शङ्कर ! । तदान्वयंशतस्य सर्व्वातिदारादिसम्पदाम् । अचिरादुपैभेत्रायो मृतः स नरकं व्रजेत् दवयस्ते शिवघाते तदा साङ्कुलकसार्या । तथैव नरकवासी यः कुर्य्याज्जीवघातनम् । मद्व्याजेन पशून् हत्वा यो भवेत् सह बन्धुभिः । तद्गात्रलोमसंख्याब्दैर्विपच्यते वसेत् । आवयोरन्यदेवानां नाम्ना च परकर्म्मणि । यः संपोष्य पशून् हन्यात् सोऽन्धतामिस्रमाप्नुयात् । पशून् हत्वा तथा त्वां मां योऽर्च्चयेन्मांसशोणितैः । तावत्तन्नरके वासो यावच्चन्द्रदिवाकरौ । निर्विघ्नभक्तसन्ध्यं तत् वक्तृव्येण यत् कृतम् । यस्मिन् यज्ञे प्रभो । शम्भो ! जीवहत्या भवेद्ध्रुवम् । यज्ञमारभ्य चेत् यज्ञः कुर्य्याद्वै पशुघातनम् । स तदाऽधोगतिं गच्छेदितरेषाञ्च का कथा । आवयोः पूजनं मोहाद् ये कुर्य्युर्मांसशोणितैः । पतन्ति कुम्भीपाके ते भवन्ति पशवः पुनः । फलकामास्तु वेदोक्तैः पश्वोरालभनं मखे । पुनस्तत् फलं भुक्त्वा ये कुर्व्वन्ति पतन्त्यधः । स्वर्गकामोऽश्वमेधं यः करोति निगमाज्ञया । तद्भोगान्ते पतेद्भूयः स जन्मनि भवार्णवे । ये हताः पशवो लौकैरिह स्वार्थेषु कोविदैः । ते परत्र तु तान् हन्युस्तथा खड्गेन शङ्कर ! । आत्मपुत्रकलत्रादिसुसम्पत्तिकुशलेच्छया । यो दुरात्मा पशून् हन्यात् आत्मादीन् पातयेत् स हि" । जानन्ति नो वेद पुराणतत्त्वं ये कपठाः पण्डितमानयुक्ताः । लोकाधमास्ते नरके पतन्ति कुर्व्वन्ति मूर्खाः पशुघातनञ्चेत् । येऽज्ञानिनो मन्दधियोऽजितात्मा भवे पशुं घ्नन्ति न धर्म्मशास्त्रम् । जानन्ति नाकं नरकं न मुक्तिं गच्छन्ति घोरं नरकं नरास्ते । शुद्धा ध्यानाद्यां न विदन्ति शास्त्रा न धर्म्ममार्गं परमार्थतत्त्वम् । पापं न पुण्यं पशुघातका ये पूयोदवासो भवतीह तेषाम् । जीवानुकम्पां न विदन्ति मूढा भ्रान्ताश्च येऽसद्वृपथिनोऽथ धर्म्मम् । आर्त्तो यदि प्राणिवधं तु कुर्य्युस्ते यान्ति मर्त्याः खलु रौरवाख्यम् । ततस्तु खलु जन्तूनां घातनं नो करिष्यति । शुद्धात्मा धर्म्मवान् ज्ञानी प्राणान्ते नैव मानवः । यदीच्छेदात्मनः क्षेमं त्यक्त्वाऽज्ञानं तदा नरः । जीवान् कानपि नो हन्यात् सङ्कटापन्न एव चेत् । सम्पत्तौ च विपत्तौ वा परलोकेच्छुकः पुमान् । कदाचित् प्राणिनो हत्यां न कुर्य्यात् तत्त्ववित् सुधीः । मानवो यः परत्रेह तच्छुभमिच्छेत् सदाशिव ! । सर्व्वविष्णुमयत्वेन न कुर्य्यात् प्राणिनां वधम् । वधाद्रक्षति यो मर्त्त्यो जीवान् तत्त्वज्ञ ! धर्म्मवित् । किं पुण्यं तस्य वक्ष्येऽहं ब्रह्माण्डं स तु रक्षति । यो रक्षेत् घातनात् शम्भो ! जीवमात्रं दयापरः । तपःप्रयततो नित्यं सर्व्वरक्षां करोति सः । एकस्मिन्नपि जीवे त्रैलोक्यं तेन रक्षि-

तम्। वदामि शङ्कर! वै येन तस्मात् त्वञ्च यातवत्। पशुहिंसाविधिर्यत्र पुराणे निगमे तथा। उक्तो रजस्तमोभ्यां च केवलं मनसापि वा। नरकस्वर्गसंज्ञायं संसाराय प्रवर्त्तितः। तयोस्तत्कर्मभोगेन गमनागमनं भवेत्। सत्त्वेन सात्त्वतप्रन्थे च विधिर्नैव शङ्कर!। प्रवृत्तितो निवृत्तिस्तु यत्रापि सात्त्विकी क्रिया। एवं नानाविधं कर्म पयोराजमनादिकम्। कामाशयः फलाकाङ्क्षी तत्त्वाऽज्ञानेन मानवः। पञ्चाज्ञानाविना ज्ञित्वा भ्रान्त्यामां तामसीं सदा। भवभीतिहरं भक्त्या यदि गोविन्दमाश्रयेत्।" पाद्मोत्तरखण्डे १०४।१०५ अ०।

बलिध्वंसिन् पु० बलिं ध्वंसयति स्वस्थानात् पातयति ध्वन्स-णिच्-णिनि। विष्णौ वामनावतारेण हि तस्य तथात्वम्। तत्कथा च वामनपु० २२ अ० दृश्या।

बलिनन्दन पु० ६त० बाणासुरे शब्दर०। [र्णवति अमरः।

बलिन(भ) त्रि० बलि+अस्त्यर्थे-इन भ वा। जरया शिथिल-

बलिन् त्रि० बलमस्त्यस्य इनि। १बलवति। २उष्ट्रे, ३मांषे, ४वृषे, ५शूकरे, ६कुन्दवृक्षे, ७कफे पु० जटा० ८माषे पु० हेम०। ९वनरामे शब्दर० (वेलियाडा) १०बुधे स्त्री ङीप् शब्दच०।

बलिपुष्ट पु० बलिना वैश्वदेवबलिद्रव्येण पुष्टः पुष-क्त ३त०। काके अमरः स्त्रियां ङीप्।

बलिपोदकी स्त्री उपोदक्यां राजनि०।

बलिप्रिय पु० बलिनं प्रीणाति प्री-क। लोध्रद्रुमे शब्दच०।

बलिविन्ध्य पु० रैवतकमनोःपुत्रभेदे भाग०८।५।२।

बलिभुज् पु० बलिं वैश्वदेवद्रव्यम् उदक्सादनवलिं भुङ्क्ते भुज-क्विप्। काके अमरः।

बलि(ली)मुख पु० बलि(ली)युक्तं मुखमस्य शाक०त०। वानरे अमरः। [वति। २उष्ट्रे पु० राजनि०।

बलिष्ठ त्रि० अतिशयेन बली बलिन्+इष्ठन्। १अत्यन्तबल-

बलिष्णु त्रि०बल-संवरणे इष्णुच्। अपमानिते उणा०।

बलिसद्मन् न०६त०। पाताले अमरः बलिमन्दिरादयोऽप्यत्र।

बलीक पु० न० बालयति आवृणोति बल-ईकन् नि०। पटलप्रान्ते (ओँच) अमरः। [युते स्त्रियां ङीप्।

बलीयस् त्रि० अतिशयेन बली बलिन्+ईयसु। अत्यन्तबल-

बलीवर्द पु० वै ई लक्ष्मीः व-क्विप् वर् तौ ईवरौ ददाति दा-क ईवर्दः बली चासौ ईवर्दश्चेति। उक्षे अमरः। ततः शुभ्रा० अपत्ये ढक्। बालीवर्देय तदपत्ये-पुंस्त्री०

बलूल त्रि०बल+सिध्मा० वा लच् जडः। बलयुक्ते।

बलोत्कटा स्त्री १स्कन्दानुचरमातृकाभेदे भा० श०४५अ०। २बलेनोत्कटे त्रि०।

बल्य न० बलाय हितं बल+यत् १प्रधानधातौ शुक्रे, २बल-साधने च ३अश्वगन्धायाम् ४अतिबलायां, ५प्रियङ्गौ च ६प्रसारिण्याञ्च स्त्री राजनि०। बला० चतुरर्थ्यां यत्। ७बल-निर्वृत्ते त्रि०८बुद्धभिक्षुके पुंलिङ्गः। [तृणभेदे हेमच०

बल्वजा स्त्री० बल-क्विप् तं वजति वज-गतौ अच्। उलपे

बल्ह स्तुतौ दाने, वधे, च सक० याचने द्विक० भ्वा०आत्म० सेट्। बल्हते अबल्हिष्ट बबल्हे।

बल्हि पु०बल्ह-इन् ।१क्षत्रियभेदे२जनपदभेदे स्वार्थे क तत्रार्थे। ततः कोपधत्वात् भवे अण्। बाल्हिकं हिङ्गुनि न०।

बव पु०प्रथमे तिथ्यर्द्धरूपे करणभेदे करणशब्दे दृश्यम्।

बष्क(स्क)यि(यी)णी स्त्री भस्क गतौ अयन् पृषो० भस्य वः वस्य वा भत्वम्। बष्क(स्क)योऽस्त्यस्ति इनि ङीप् णत्वम्। चिरप्रसूतायां गवि अमरः। बष्क(स्क)यं नयतीति नी-ड गौ० ङीष् णत्वे पूर्व० णत्वम्। बष्क(स्क)यणी(नी) इत्यप्यत्र स्त्री।

ब(व)ह वृद्धौ भ्वा० आत्म० अक० सेट् इदित्। बं(वं)हते अबं(वं)हिष्ट। बबंहे महिवाहव्यादयमोष्ठ्यादिरिति पाणिनीयाः। दन्तोष्ठ्यादिरिति वोपदेवः।

बहल त्रि०बहि-कलच् नलोपश्च १प्रचुरे २बहुशब्दार्थे च।

ब(व)हु त्रि० बं(वं)हि-कु नलोपः। १त्रिप्रभृत्यनेकसंख्यान्विते, २विपुले च। ब(व)ह्वादि० स्त्रियां वा ङीष्।

बहुत्वं च त्रित्वपर्य्यवसायि कपिञ्जलन्यायात् अपेक्षाबुद्धिविशेषजन्यत्वं तच्च पर्य्याप्त्या सर्वत्र वर्त्तते समवायेन प्रत्येकं इत्थित्थम्। अस्य संख्यावत् कार्य्यम् तेन बहुशः बहुत्र बहुतिथ इत्यादि। [४दाव्यूहे खगे५जलखातके च मेदि०

बहुक पु० बहु+संज्ञायां कन्। १कर्कटे २सूर्य्ये ३अर्कवृक्षे

ब(व)हुकण्टक पु० ब(व)हूनि कण्टकान्यस्य। १क्षुद्रगोक्षुरे। २यवासे (गोखुरी) ३हिन्ताले ४अग्निदमन्यां स्त्री क्षुपभेदे राजनि०। [कण्टकारिकायाम् राजनि०।

ब(व)हुकण्टा स्त्री ब(व)हवः कण्टाः कण्टकाः यस्याः।

ब(व)हुकन्द पु० ६ब०। १शूरणे। २कर्क्यां स्त्री० राजनि०।

बहुकर त्रि०ब(व)हूनि किरति कृ-अच्।(फराश) १सम्मार्जनकरे चलपो अमरः। करणे'अप्। २सम्मार्जन्यां स्त्री हेम० गौरा० ङीष्। कृ-अच् ६त०। ३उष्ट्रे त्रिका०। ४अनेककार्य्यकरे त्रि०। [कण्टकीम् राजनि०।

ब(व)हुकर्णिका स्त्री०ब(व)हवः कर्णा इव पत्राण्यस्य। आखु

वहुकूर्च्च पु० बहूनि कूर्चान्यस्य । मधुनारिकेलविशेषे राजनि० ।

व(ब)हुगन्ध पु० ६ब०। १कुन्दुरुके । २त्वचे, (तेजपात) न० । ३चम्पककलिकायां ४यूथिकायां५कृष्णजीरके च स्त्री राजनि०

वहुगन्धदा स्त्री० व(ब)हुगन्धं ददाति दा–क । मृगमदे । राजनि० ।

व(ब)हुग्रन्थि पु० ६ब०। झावुके (झाउ) । शब्दर०

वहुच्छिन्ना स्त्री व(ब)हु यथा स्यात् छिद्यते या छिद-क्त तस्य इत्व च नः । वन्दगुडूच्याम् राजनि० ।

वहुतरकणिश पु० ६त० । रागीधान्ये राजनि० ।

वहुतिक्ता स्त्री व(ब)हुस्तिक्तो रसोऽस्याः । काकमाच्याम् राजनि० ।

व(ब)हुतिथ त्रि० व(ब)हूनां पूरणः व(ब)हु+डट् तिथुक् च । अनेकसंख्याते, "काले गते बहुतिथे" इत्युद्भटः ।

व(ब)हुत्र अव्य० व(ब)हुषु त्रल् । अनेकेषु दिग्देशकालेषु ।

व(ब)हुत्वच्(क) पु० ६ब० वा कप् । भूर्जपत्रवृक्षे शब्दर० अमरः । हेमच० ।

व(ब)हुदुग्ध पु० व(ब)हूनि दुग्धानीव चूर्णानि शुभ्रवर्णत्वात् यस्य । १गोधूमे राजनि० । २ प्रचुरक्षीरवत्यां ३गवि, स्त्री हेमच०।वा कप् अत इत्वम् । बहुदुग्धिका स्नुहीवृक्षे स्त्री शब्दच० ।

व(ब)हुधा अव्य० व(ब)हु+प्रकारे–धाच् । अनेकप्रकारे

व(ब)हुधार न० ६ब० । वज्रास्त्रे राजनि० तस्य षट्कोणत्वात् सर्वत्र कोणेषु धारायुक्तत्वात्तथात्वम् ।

वहुनाड़ीक पु० ६त०। अप्राङ्गत्वात् कप् । १अनेकदण्डयुते २दिवसे ३स्तम्भे च त्रि०कौ०।प्राङ्गे न कप् न वा ह्रस्वः । बहुनाड़ी इत्येव अनेकान्त्रयुते एवं तन्त्रीशब्देऽपि ह्रस्वकपोर्विकल्पाभावो ज्ञेयौ ।

वहुनाद पु० ६ब० । शङ्खे राजनि० ।

व(ब)हुपत्त्र पु० ६ब० । १पलाण्डौ २अनेकपर्णयुक्ते त्रि०। ३त्रिकृत्याम् ४हतकुमार्य्यां ५तरुण्यां ६वृहत्यां,७गोरक्षदुग्धायां, ८जतुकायाञ्च स्त्री राजनि०। गौरा० ङीप् । ९तरणीपुष्पे स्त्री टाप् । ततः संज्ञायां क । बहुपत्त्रिका भूम्यामलक्यां, मेथिकायां, महाशतावर्य्याञ्च राजनि० ।

व(ब)हुपर्ण पु० ६ब० ।१सप्तच्छदवृक्षे तस्य प्रतिपर्वं सप्तसप्तपर्णवत्त्वात् तथात्वम् । २अनेकपर्णयुक्ते त्रि०३मेथिकायां स्त्री ङीप्। ततः संज्ञायां क । बहुपर्णिका आखुकर्ण्यां स्त्री टाप् । राजनि० ।

व(ब)हुपाद(द) पु० ६ब० वा अन्त्यलोपः । वटवृक्षे ह न अमरः । अदन्तः राजनि०।तस्यानेकशिफावत्त्वात्तथात्वम् ।

व(ब)हुपुत्र व(ब)हवः पुत्रा–इव पर्णान्यस्य ।१सप्तच्छदे शब्दच० अनेके पुत्रा इव मूलान्यस्य ।२शतमूल्यां स्त्री ङीप् रत्नमा० ६ब० । ३अनेकतनयान्विते त्रि० ।

व(ब)हुपुष्प पु०६ब०। निम्बवृक्षे । संज्ञायां कन् अत इत्वम् । बहुपुष्पिका धातक्यां स्त्री राजनि० ।

व(ब)हुप्रज त्रि० ६ब०। १बहुसन्तानवति । २शूकरे पु० हेम०। प्रजास्त्वप्रचुरत्ववत्त्वात् ३मुञ्जवृक्षे पु० राजनि० ।

वहुप्रतिज्ञ पु०७ब०। अनेकविषयकप्रतिज्ञायुक्ते व्यवहारे यथा मदीयं रूपकमनेन गृहीतं, सुवर्णञ्चापहृतं, क्षेत्रे निक्षिप्तं न ददाति,मदीयं क्षेत्रमपहरतीत्येवमादीनां पक्षत्वमिष्यत एव किन्तु क्रियाभेदात् क्रमेण व्यवहारो न युगपदित्येव "बहुप्रतिज्ञं यत् कार्य्यं व्यवहारेषु निश्चितम् । कामं तदपि गृह्णीयात् राजा तत्त्वबुभुत्सया" कात्यायनोक्तेः मिता०

वहुप्रद त्रि०बहूनि प्रददाति प्र+दा–क । दानशीलवे वदान्ये

व(ब)हुफल पु०६ब०। १कदम्बवृक्षे मेदि०२विकङ्कते, ३तेजःफले च राजनि०। ४अनेकफलयुक्ते त्रि०।५माषपर्ण्यां,६क्षविकायां, ७काकमाच्यां, ८त्रिपुस्यां,(शशा)९क्षुद्रकारवेल्ल्यां, स्त्री राजनि० १०भूम्यामलक्या भावप्र०स्त्री । ११कामर्ङ्कयां स्त्री ङीप् मेदि० १२मृगेर्वारौ राजनि०। संज्ञायां कन् इत्वम् । बहुफलिका । भूमिवदर्य्यां स्त्री राजनि०।

वहुफेना स्त्री ६त० । सातलायां राजनि० । [वले त्रि०

वहुबल पु० ६ब० । १सिंहे राजनि० स्त्रियां ङीप् । २अति

वहुवल्ली स्त्री नित्यक० । डोड़िक्षुपे राजनि० ।

व(ब)हुमञ्जरी स्त्री० ६ब० संज्ञात्वात् न कप् । तुलस्याम् भावप्र०। [युक्ते त्रि० ।

व(ब)हुमल पु० ६ब० । १सीसके रत्नमा० । २अनेकमल-

वहुमार्ग न० ७ब० ।१चत्वरे हेमच०। २अनेकपथयुते त्रि० ।

व(ब)हुमूर्त्ति स्त्री ६ब०।१वनकार्पासे शब्दच०। २नानाकारयुते त्रि० । [तथात्वम् ।

वहुमूर्द्धन् पु० ६ब० । विष्णौ सहस्रशीर्षत्वात्तस्य

व(ब)हुमूल त्रि० ६ब० । १अनेकमूलयुते । २शिग्रौ ३स्थूलशरे पु०राजनि०। ४शाकम्भ्यां ५शतावर्य्यां स्त्री टाप् । ६वनहालमले त्रि० ङीप् राजनि० । ७नागभेदे भा० आ० ३५अ०। संज्ञायां कन् । बहुमूलक उशीरे न० भावप्र० ।

वहुमूल्य त्रि० ६ब० । महार्घे महाधने अमरः । [राजनि०।

वहुरन्ध्रिका स्त्री ६ब० वा कप् अत इत्वम् । मेदायाम्

ब(व)हुरसा स्त्री० ६ब०। १महाज्योतिष्मत्याम् राजनि०। २नानारसवति त्रि०।

बहुरुहा स्त्री बहु रोहति रुह—क। चन्द्रगुडूच्यां राजनि०

ब(व)हुरूप पु० ६ब०। १सर्जरसे (धुना) अमरः। २शिवे, ३विष्णौ ४सरटे ५कामे मेदि० ६केशे ७ब्रह्मणि शब्दर०। ८बुद्धभेदे त्रिका० ९नानारूपवति त्रि०

बहुरेतस् पु० ६ब०। ब्रह्मणि चतुर्मुखे शब्दरत्ना०। [कारा

ब(व)हुरोमन् त्रि०६ब०। १अनेकरोमवति रोमशे। २मेषे पु०

ब(व)हुल त्रि०ब(व)हि—कुलच् नि० नलोपः। १अनेकसंख्यान्विते २प्रचुरे। ब(व)हूनि चाति ला—क।३अग्नौ ४कृष्णपक्षे पु० मेदि०। "ब(व)हुलेऽपि गते निशाकरः" कुमारः। ५आकाशे ६श्वेतमरिचे न० ७कृष्णवर्णे ८तद्वति त्रि० ९एलायां १०नीलिकायां ११गवि स्त्री मेदि०। १२देवीभेदे स्त्री कालिकापु०२१अ० अग्निदेवतत्वात् १३कृत्तिकानक्षत्रे स्त्री ब०व० मेदि०।

बहुलगन्धा स्त्री० ६ब०। एलायाम् राजनि०।

ब(व)हुलच्छद पु० ६ ब०। रक्तशोभाञ्जने राजनि०।

बहुलवण न० नित्य०क०। ऊषरभूमिजे लवणभेदे राजनि०।

बहुलाश्व पु० मैथिलवंश्ये नृपभेदे भाग० ९।१३।१६।

ब(व)हुलीकृत त्रि० ब(व)हुल+च्वि—कृ—क्त। (आगड़ा) बुषस्यापसारणेन राशीकृते खलस्थे १धान्ये, अमरः। २राशीकृतमात्रे च।

बहुवचन न० बहुत्वं वक्ति वच—ल्यु। "द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनम्" पा० उक्ते बहुत्वबोधके जस्प्रभृतौ सुब्विभक्तौ झिप्रभृतौ २तिङ्विभक्तौ च।

ब(व)हुवल्क पु० ६ब०। प्रियाले। (पियाशाल) राजनि०।

ब(व)हुवारक पु० ब(व)हूनि वारयति अण्, ण्वुल् वा। श्लेष्मातके (चोना आता) शब्दर०।

बहुविध त्रि० ६त०। नानाप्रकारे अमरः।

ब(व)हुविस्तीर्णा स्त्री० ब(व)हु यथा तथा विस्तीर्णा वि+स्तॄ—क्त। (कांकुड) १कुचिकाख्ये शब्दच०। २अनेकविस्तारयुते त्रि०। [बीजवति त्रि०

ब(व)हुबीज पु०६ब०। १आतृप्ये (आता) शब्दच०।२प्रचुर-

ब(व)हुवीर्य्य पु० ६ब०। १बिभीतके, (बयड़ा) जटा०। २तण्डुलीयशाके, (नटेशाक) ३शाल्मलिवृक्षे ४मरुवके च राजनि। ५भूम्यामलक्यां स्त्री राजनि०।

ब(व)हुव्रीहि त्रि० ६ब०। १अनेकधान्यादियुक्ते "तत्पुरुष ! कर्म धारय येन वयं सदा बहुव्रीहिः" उद्भटः। व्याकरणोक्ते प्रायेण अन्यपदार्थप्रधाने २समासभेदे पु०। तल्लक्षणादिकं शब्दशक्तिप्रकाशिकायामुक्तं यथा बहुव्रीहिं लक्षयति। "बहुव्रीहिः स्वगर्भार्थसम्बन्धित्वेन बोधकः। निरूढ़या लक्षणया स्वांशज्ञापकशब्दवान्" समास इति प्रकृतं तथा च स्वांशस्य निरूढ़लक्षणया ज्ञापकेन शब्देन घटितः स्वगर्भस्य यादृशार्थस्य सम्बन्धित्वप्रकारेणान्वयबोधं प्रति समर्थः समासः स्वगर्भतादृशार्थसम्बन्धिबोधेन बहुव्रीहिरित्यर्थः। आरूढ़वानरो वृक्ष इत्यत्रारूढ़ो वानरो यमिति व्युत्पत्त्या आरोहणकर्तृवानरसम्बन्धित्वेन वृक्षं, पीतपयस्कं पात्रमित्यत्र 'पीतं पयो येन' इति रीत्या स्वकरणकपानकर्मजलसम्बन्धित्वेन पात्रम्, पक्वतण्डुलश्चैत्र इत्यत्र पक्वास्तण्डुला येनेति दिशा स्वकर्तृकपाककर्मतण्डुलसम्बन्धित्वेन चैत्रं, दत्तदक्षिणो द्विज इत्यत्र दत्ता दक्षिणा यस्मै इति क्रमेण स्वसम्प्रदानकदानकर्मदक्षिणासम्बन्धित्वेन द्विजं, पतितपत्रस्तरुरित्यत्र पतितं पत्रं यस्मादिति विग्रहेण स्वापादानकपतनाश्रयपत्रसम्बन्धित्वेन तरुं, चित्रगुरित्यत्र चित्रा गौर्यस्येति वाक्यानुसारेण चित्राभिन्नस्वगोसम्बन्धित्वेन चैत्रम् रक्तपटः काय इत्यत्र रक्तः पटो यत्रेति व्युत्पत्त्या रक्ताभिन्नस्ववृत्तिपटसम्बन्धित्वेन कायम् एवं चापच्छिन्नकरो नर इत्यादावपि। चापेन छिन्नः करो येन यस्य वा इत्यादि विग्रहे चापकरणकस्वकर्तृकच्छिदाकर्मकरसम्बन्धित्वादिना नरादिकं बहुव्रीहिर्बोधयतीति सर्वत्र स्वगर्भतत्तदर्थसम्बन्धित्वेन धर्म्मिणामवगमः। दक्षिणपूर्वा पूर्वोत्तरेत्यादिविदिग्बहुव्रीहिस्थले दक्षिणया पूर्वा यस्या इत्यादिविग्रहेण स्वपार्श्वस्थदक्षिणसहितपूर्वदिक्सम्बन्धित्वादिना आग्नेयीप्रभृतीनां विदिशां बोधः। अस्तिक्षीरा गौरीत्यादावस्ति क्षीरं यस्या इत्यादिविग्रहेणास्तित्ववत्स्वक्षीरसम्बन्धित्वादिप्रकारेण गवादेरवगतिः। इयांस्तु विशेषो यत्त्वेकेषाम्मतेऽस्तीत्यादिकं तिङन्तमन्येषां मते तत्प्रतिरूपकाव्ययमिति। उप समीपे दश येषामिति समीपगणितत्वार्थकषष्ठ्या विग्रहादुपदशाः शकुनय इत्यादौ स्वसमीपगणितदशसम्बन्धित्वेन नवानामेकादशानाञ्च पक्षिणामवगमस्तत्र दशशब्दस्य दशत्वलक्षणया स्वपर्य्याप्तसंख्यासमीपगणितदशत्वसम्बन्धित्वेनैव नवादेर्बोध इति दुर्गप्रभृतयः। अधिका दश येषामित्यादिविग्रहे अधिकदशाः पञ्चषा इत्यादावपि स्वपर्य्याप्तसंख्याधिकदशत्वसंख्या-

पर्य्याप्त्यधिकरणत्वसम्बन्धित्वेन नवादिपुंसां प्रत्ययः। द्वौ त्रयो वा येषां इत्यन्यतरार्थकवाशब्देन विग्रहे द्वित्राः पञ्चषाः इत्यादौ। द्वित्र्यन्यतरपर्य्याप्तसपर्य्याप्तसंख्यासम्बन्धित्वेन द्वयोस्त्रयाणां वा पञ्चानां बोधः। घटे पटे वा घटत्वमित्याद्यनुरोधेन वाकारस्यान्यतरार्थकताया व्युत्पाद्यत्वात् तस्य च वृत्तौ गतार्थत्वादश्रुतिः पञ्च षड् वा येषामित्यादिविग्रहात् पञ्चषाः पुरुषाः इत्यादावप्युक्तरीत्यैवान्वयोद्रष्टव्यः। परे तु द्वौ वा त्रयो वा येषामित्यादिविग्रहे वाशब्दस्य संशयकोट्यर्थकतया द्वित्रा इत्यादि बहुव्रीहेः स्वधर्मिकसंशयकोटितापन्नद्वित्वसम्बन्धित्वेन द्विप्रभृतिबोधकत्वमित्याहुः”। वैयाकरणास्तु बहुव्रीहिप्रकरणपठितत्वमेव तत्त्वमित्याहुः तेन उन्मत्तगङ्गाद्यव्ययीभावे नातिव्याप्तिः। तद्भेदौ च तद्गुणातद्गुणसंविज्ञानौ तद्गुणसंविज्ञानशब्दे ३२१७ पृ० उक्तौ तत्र समानाधिकरणपदघटितस्यैव प्रायेण साधुत्वम्।

बहुपत्र पु० ६ब०। १पटोले शब्दच०। २अनेकपत्रयुते त्रि०। “बहुपत्रः पटोलः स्यात्” वि० त०। [युक्ते त्रि०।

ब(व)हुशल्य पु० ६ब०। १रक्तखदिरे राजनि०। २अनेकशीव-

ब(व)हुशस् अव्य० ब(व)हु+शस्। अनेकवारानित्यर्थे ‘गुणवत्यं ब(व)हुशो नियोजिता’ इति कुमारः।

ब(व)हुशाल पु० ब(व)हुभिः शालते शाल-संज्ञायां कर्त्तरि अच्। १स्नुहीवृक्षे राजनि०। [२अनेकशाखायुक्ते त्रि०

ब(व)हुशिखा स्त्री० ६ब०। १जलपिप्पल्याम्। राजनि०।

बहुशिरस् पु० ६ब०। विष्णौ “इद्रो बहुशिरा बभ्रुः” विष्णुस०।

बहुशृङ्ग पु० ६ब०। विष्णौ हेमकरः “चत्वारि शृङ्गा” “त्रयो अस्य पादाः” इत्यादिश्रुत्या तस्य तथात्वम्।

बहुश्रुत त्रि० श्रु-भावे क्त ६ब०। अनेकशास्त्रश्रुतियुक्ते मनुः ४।१२५। [अनेकश्रेयसीयुक्ते।

बहुश्रेयसी त्रि०। ६ब० ईयसन्तत्वात् न कप् न वा ह्रस्वः।

बहुसन्तति पु० बहुः सन्ततिर्विस्तारोऽस्य (बेड़बाँश) १वंशभेदे शब्दच०। २अनेकसन्तानयुक्ते त्रि०।

बहुसम्पुट पु० ६ब०। विष्णुकन्दे राजनि०।

ब(व)हुसार पु० ६ब०। १खदिरे राजनि० २अनेकसारवति त्रि०

ब(व)हुसुता स्त्री० ब(व)हवः सुता इव मूलान्यस्याः। १शतमूल्याम् अमरः। २अनेकपुत्रयुते त्रि०।

बहुसू स्त्री० बहून् सूते सू-क्विप्। १शूकर्यां शब्दर०। २अनेकप्रसवकर्त्र्यां स्त्रियाम्।

ब(व)हुसूति स्त्री० ६ब०। १अनेकप्रसववत्यां २गवि अमरः। २ब(व)हुप्रसवयुते स्त्रीमात्रे च।

ब(व)हुस्रवा स्त्री० ब(व)हु यथा तथा स्रवति स्रु-अच्। १शल्लकीवृक्षे शब्दच०। २अनेकधा क्षरणवति त्रि०।

बहूदक न० बहूनि उदकानि शौचाङ्गतया यस्य। सन्न्यासिभेदे कुटीचकशब्दे दृश्यम्। [कालजयुते त्रि०।

बह्वपत्य पु० ६ब०। १शूकरे २मूषिके च राजनि०। ३अने-

बह्वादि विभाषया स्त्रियां ङीष्प्रत्ययनिमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा “बहु पद्धति अञ्चति अंहति शकटि शक्ति (शस्त्रे) शारि वारि राति राधि अहि कपि यष्टि मुनि (इतः प्राण्यङ्गात्) चण्ड अराल कृपण कमल विकट विशाल विशङ्कट भरुज ध्वज चन्द्रभाग (अनद्याम्) कल्याण उदार पुराण अहन् क्रोड नख खुर शिखा बाल शफ गुद” आकृतिगणोऽयम् “तेन भग गल राग इत्यादि ग्रहणम्”।

बह्वाशिन् त्रि० बहु अश्नाति अश-णिनि। १बहुभोजनशीले स्त्रियां ङीप्। “बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः। प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः” चाणक्यः। २धृतराष्ट्रपुत्रभेदे पु० भा० आ० ६७ अ०।

ब(व)ह्वृच् (च) त्रि० ६ब० अध्येतव्ये च अच्समा० वा अच्। १ऋग्वेदे २सूक्ते न०। ३तदध्येतरि पु०। ४तत्पत्न्यां स्त्री।

बा(वा)ड व स्नाने भ्वा० आत्म० अक० सेट्। बा(वा)डते अब(वा)डिष्ट। ऋदित् चङि न ह्रस्वः अबबाडत् त।

बाड़व न० बड़वानां समूहः अण्। १घोटकीसमुदाये। बाड घञ् बल-घञ् लस्य डो वा बाडो दृष्टिः तं वाति वा-क वा। २ब्राह्मणे पु०। बड़वायां जातः अण्। ३और्वे समुद्रस्थे कालाग्निभेदे पु० हेमच०। वाड़वाग्न्यादयोऽप्यत्र पु०। [शब्दमा०।

बाड़वेय पु० द्विव० बडवायाः अपत्यम्-ढक्। अश्विनीकुमारयोः

बाड़व्य न० बाड़व+समूहे-यत्। विप्रसमुदाये। [रत्नमा०।

बाडिङ्गन पु० बाडे इङ्गते इङ्ग-ल्यु। वार्त्ताकौ

बा(वा)ण पु० वण-शब्दे वण-गतौ वा संज्ञायां कर्त्तरि घञ्। १शरे, २गोस्तने, (बांट) ३विरोचनसुते ४दैत्यभेदे, ५केवले च ६शरपुङ्खे ७नीलझिण्ट्याम् पुंस्त्री० अमरः इत्याद्यमूले रत्नो मेदि०। मेदिन्यां दन्त्योष्ठ्यवादित्वेन पठितः रायमुकुटादयस्तु वण शब्दे इति धातुप्रकृतिकत्वमभ्युपगताः (?)-भयविधादित्वम्। वण-भावे घञ्। ८शब्दे १०तद्विधवाद्यविशेषां तदरतलायां रतौ उपचारात् ११वाद्ये अमरः।

बाणगङ्गा स्त्री रावणबाणनिर्भेदेन प्रवृत्तायां नद्याम् “सो- मेश्वराद्दक्षिणे भागे बाणेनाभिविभिद्य वै। रावणेन प्रक- टिता जलधारातिपुण्यदा। बाणगङ्गेतिविख्याता या स्नानादघहारिणी” वराहपु०। [२तूणे हेमच०।

बाणधि पु० बाणाधीयन्तेऽस्मिन् धा—आधारे कि। १इषुधौ

बाणपुङ्खा स्त्री बाणस्य पुङ्खोऽस्याः ५ब०। शरपुङ्खायां राजनि०

बाणपुर न० ६त०। बाणासुरनगरे शोणितपुरे त्रिका०।

बाणमुद्रा स्त्री “यथा हस्तगता बाणास्तथा हस्ताङ्गुरं प्रिये!। बाणमुद्रा समाख्याता रिपुवर्गनिकृन्तनी” तन्त्रसा० उक्ते मुद्राभेदे।

बाणयुद्ध न० ६त०। कृष्णेन सह मित्रबाहायकस्य बाणस्य युद्धे तच्च युद्धं भाग० १०।६१ अध्यायादौ दृश्यम्।

बा(व)णलिङ्ग न० बाणदैत्येन संपूज्य विसृज्य नर्मदायां निक्षिप्ते शिवलिङ्गभेदे। नर्मदाशब्दे ३९८७ पृ० विवृतिः।

बाणवार न० बाणं वारयति वारि—अण् उप०स०। १कञ्चुके सन्नाहे हारा०।

वाणिज्य न० वणिजो भावः, कर्म वा ब्राह्मणादित्वात् ष्यञ्। क्रयविक्रयादौ “वाणिज्येन गतस्य मे स्वदपतेर्वार्त्तापि न श्रूयते” सा०द० परि०।

तत्र विहितनिषिद्धानि मिता० उक्तानि यथा “मानेन तुलया वापि योऽंशमष्टमकं हरेत्। दण्डं स दाप्यो द्विशतं वृद्धौ हानौ च कल्पितम्”। यः पुन- र्वणिक् कौशिकाद्यौषधादेः पण्यद्रव्याष्टमभागं कूटमानेन कूटतुलया वाऽन्यथापहरत्यसौ पणानां द्विशतं दण्ड- नीयः। अपहृतस्य पुनर्द्रव्यस्य वृद्धौ हानौ च दण्ड- स्यापि वृद्धिहानी कल्प्ये। “भेषजस्नेहलवणगन्धधान्य गुडादिषु। पण्येषु प्रक्षिपन् हीनं पणान् दाप्यस्तु षो- डश” याज्ञ०। भेषजमौषधद्रव्यं स्नेहो घृतादिः। गन्ध- द्रव्यमुशीरादि आदिशब्दाद्धिङ्गुमरिचादि। एतेष्वसार- द्रव्यं विक्रयार्थं मिश्रयतः षोडशपणो दण्डः। किञ्च। “मृच्चर्ममणिसूत्रायःकाष्ठवल्कलवाससाम्। अजातौ जाति- करणे विक्रेयाष्टगुणोदमः” याज्ञ०। “न विद्यते बहुमूल्या- जातिर्येषु मृच्चर्मादिषु तदजाति तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णरसान्तरसञ्चारणेन बहुमूल्यजातीय ताद्रूप्यसम्पादने यथा मल्लिकामोदसञ्चारणेन मृत्तिकायां सुगन्धामलकमिति। मार्जारचर्मणि वर्णोत्कर्षापादनेन व्याघ्रचर्मेति स्फटिकमणौ वर्णान्तरकरणेन पद्मराग इति कार्पासिके सूत्रे गुणोत्कर्षाधानेन पट्टसूत्रमिति कालायसे वर्णोत्कर्षाधानेन रजतमिति बिल्वकाष्ठे चन्दनामोदसञ्चारणेन चन्दनमिति वल्कले त्वगाख्यं लवङ्ग- मिति कार्पासिके वाससि गुणोत्कर्षाधानेन कौशेयमिति विक्रेयस्यापादितस्य द्रव्यस्य मृच्चर्मादेः पण्यस्याष्टगुणो दण्डो वेदितव्यः। “समुद्गपरिवर्त्तञ्च सारभाण्डञ्च कृत्रि- मम्। आधानं विक्रयं वापि नयतो दण्डकल्पना। भिन्ने पणे तु पञ्चाशत्पणे तु शतमुच्यते। द्विपणे द्विशतो दण्डो मूल्यवृद्धौ च वृद्धिमान्” याज्ञ०। समुद्गं विधानं मुद्गेन सह वर्त्तत इति समुद्गं करण्डकम्। परिवर्त्तनं व्यत्यासः। योऽन्यदेवमुक्तानां पूर्णं करण्डकं दर्शयित्वा हस्तलाघवेनान्यदेव स्फटिकानां पूर्णकरण्डकं समर्पयति यश्च सारं भाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रय- माधिं वा नयति तस्य दण्डकल्पना वक्ष्यमाणा वेदितव्या। कृत्रिमकस्तूरिकादेर्मूल्यभूते पणे भिन्ने न्यूने न्यूनपण- मूल्यमिति”।

“लोकेऽस्मिन् द्विविधं पण्यं जङ्गमं स्थावरं तथा। षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः। गणिमन्तु- लिमं मेयं क्रियया रूपतः श्रियेति” गणितं क्रमुकफलादि तुलितं कुङ्कुमादि मेयं शाल्यादि क्रियया वाहदोहादि- रूपयोपलक्षितमश्वमहिष्यादि। रूपतः पण्याङ्गनादि श्रिया दीप्त्या मरकतपद्मरागादि। इत्येतत् षट्प्रकारमपि पण्यम्” मिता०। तस्य विप्रैरापदि स्वयं कार्य्यत्वं वि- दधे बृहस्पतिः “कुसीदकृषिवाणिज्यं प्रकुर्वीतास्वयं कृतम्। आपत्काले स्वयं कुर्वन् नैनसा युज्यते द्विजः। लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत्। ते तुष्टास्तस्य तं दोषं शमयन्ति न संशयः। वणिक् कुसीदी दद्यात्तु वस्त्रगोकाञ्चनादिकम्। कृषीवलोऽन्नपानादि यानशय्यासनानि च। प्रत्येकं विंशकं दत्त्वा पशु- स्वर्णादिकं शतम्। वणिक् कुसीदद्दोषः स्यात् ब्राह्मणा- नाञ्च पूजनात्। राज्ञे दत्त्वा तु षड्भागं देवतानाञ्च विंशकम्” चा०त०। अधिकं कृषिशब्दे २२०५ पृ० दृश्यम्।

वाणिनी स्त्री वण-णिनि ङीप्। १विदग्धायां स्त्रियां २नर्त्तक्याम् ३मत्तस्त्रियाञ्च अजयपालः।

वा(बा)दर पु० व(ब)दर+स्वार्थेऽण्। १कार्पासवृक्षे, मेदि०। व(ब)दरस्येदं तस्य विकारो वा अण्। २कार्पासवस्त्रे न०। ३तद्वस्त्रादौ त्रि० अमरः। ४कार्पासवृक्षे स्त्री अनन्त्येऽपि प्रज्ञादेराकृतिगणत्वात् टाप् शब्दच०। [वा(बा)दरिरप्यत्र।

वा(बा)दरायण पु० व(ब)दर्य्यां भवः फक्। वेदव्यासे। ऋषि

बादरिक त्रि॰ बदराण्युञ्छति बदर–ठक्। बदरफलस्य भूमौ पतितस्यैकैकग्राहिणि।

बाध्र विहृतौ भ्वादि॰आत्म॰सक॰ सेट्। बाधते अबाधिष्ट। ऋदित् चङि न ह्रस्वः अबबाधत् त।

बाध पु॰ बाध भावे-घञ्। १प्रतिरोधे। २प्रतिबन्धे, पीडने, ३उपद्रवे च। न्यायमते ४साध्याभाववत्पदार्थे यथा वह्न्यनुमितौ वह्न्यभाववान् ह्रदो बाधः। "साध्याभाववत्त्वप्रमाविषयमपक्षत्वम्" तल्लक्षणम्। ५हेतुदोषभेदे अनुमिन्ता॰ बाध-कर्त्तरि अच्। ६प्रतिबन्धके त्रि॰।

बाधक त्रि॰ बाध–ण्वुल्। १प्रतिबन्धके। २स्त्रीणामृतुकाले गर्भाजननशक्तिप्रतिरोधके रोगभेदे पु॰।

स च रोगश्चतुर्विधस्तल्लक्षणं वैद्यके उक्तं यथा "यथा कट्यां तथा नाभेरधः पार्श्वे स्तनेऽपि च। रक्तमाड्रीप्रदोषेण जायते फलहीनता। मासमेकं द्वयं वापि ऋतुयोगो भवेद्यदि। रक्तमाड्रीप्रदोषेण फलहीना तदा भवेत्। नेत्रे हस्ते भवेज्ज्वाला योनौ चैव विशेषतः। लालासंयुक्तरक्तञ्च षष्ठी बाधकयोगतः। मासैकेन भवेद् यस्य ऋतुस्नानद्वयं तथा। मलिना रक्तयोनिः स्यात् षष्ठीबाधकयोगतः। उद्वेगो गुरुतादेहे रक्तस्रावो भवेद् बहुः। नाभेरधो भवेत् शूलं चाङ्कुरः स च बाधकः। ऋतुहीना चतुर्मासं त्रिमासं वा भवेद्यदि। कृशाङ्गी करपादे च ज्वाला चाङ्कुरयोगतः। अमूत्रा च भगर्भा च शुष्कदेहाल्परक्तिका। जलकुमारस्य दोषेण जायते फलहीनता। या कृशाङ्गी भवेत् स्थूला बहुकालमृतुस्तथा। गुरुस्तनी स्वल्परक्ता जलकुमारस्य दूषणात्" वैद्यकम्। [बन्धे च।

बाधन न॰ बाध–भावे ल्युट्। १पीडायां शब्दर॰। २प्रति-

बाधा स्त्री बाध–भावे १पीडायां २निषेधे ३प्रतिबन्धे च।

बाधित त्रि॰बाध–कर्मणि क्त।१प्रतिबद्धे।२बाधज्ञानविषये च

बाधिर्य्य न॰ बधिरस्य भावः ब्राह्मणादित्वात् ष्यञ्। श्रवणशक्तिराहित्ये रोगभेदे बधिरशब्दे दृश्यम्।

बान्धकिनेय पु॰स्त्री॰बन्धक्याः अपत्यं ढक् इनङ् च। असत्या अपत्ये अमरः।

बान्धव पु॰ बन्धु+स्वार्थे, इदमर्थे वाऽण्। १बन्धुशब्दार्थे, २पितृमातृसम्बन्धिनि ३भ्रातरि ४मातुलादौ च। "बान्धवाःसदयाश्रु युः" काव्या॰ स्मृति.। [शते हेमच॰

बार्बटीर पु॰ १घट्टे घाती २आम्रास्थि ३अङ्कुरे ४गणिका-

बार्हत न॰ बृहत्याः फलम् अस्था॰ अण्। १पृहतीफले बृहतिभवः उत्सा॰ अञ्। २बृहतिभवे त्रि॰।

बार्हद्गिर पुंस्त्री॰ बृहद्गिरेरपत्यम् कण्वा॰ अण्। बृहद्गिरिनामकर्षेगोत्रापत्ये। [अपत्यते २तत्सम्बन्धिनि त्रि॰।

बार्हद्रथ पुंस्त्री॰ बृहद्रथस्यापत्यम् शैविकोऽण्। १बृहद्रथ-

बार्हस्पत पु॰ बृहस्पतेरिदम् सवदेवताऽस्य वा अण्। गुरुसम्बन्धिनि १वत्सरे २चर्वादौ च। पत्यन्तत्वात् पुरोहिता॰यक्। बार्हस्पत्य तत्रार्थे त्रि॰। "बार्हस्पत्येन षट्त्रिंशद् ज्ञेयं नाम्यैस्तु नित्यशः" सू॰सि॰।

बार्हिण त्रि॰ बर्हिणो विकारः ताला॰ अण्। बर्हिविकारे।

बाल पु॰न॰ बालाख्ये १गन्धद्रव्यभेदे। २मूर्खे ३शिशौ मेदि॰ "बाल आषोडशात् वर्षात्" स्मृतिपरिभाषित ४षोडशवर्षावधिकवयस्के च त्रि॰। ५केशे पु॰ अमरः। अर्शआदित्वादस्त्यर्थे अच्। ६अश्वशिशौ अमरः ७अश्ववालधौ ८हस्तिवालधौ ९नारिकेले मेदि॰ १०पद्मपुष्पे च पु॰ हेमच॰। मत्स्यभेदे शब्दच॰। "पञ्चवर्षो मतो बालः" हेम॰ उक्ते पञ्चवयस्कारदे।

"बालाचतुष्टय शीतं मधुरं बलकान्तिकृत्। स्निग्धं ग्राहि शमीरास्रपित्तास्रक्षयनाशनम्"। "बालामूलत्वचः चूर्णं पीतं क्षीरयशर्करम्। मूत्रातिसारं हरति दृष्टमेतन्न संशयः। हरेज्ज्ज्वालावा कफं भवेद्वातानुलोमनी। हन्यादिति बलामोहं पयसा सितया सह" भावप्र॰।

बालादेरवधिमाह सुश्रुतः "वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा। ऊनषोड़शवर्षस्तु नरो बालो निगद्यते। त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथान्नभुक्। दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी वरद्वयम्। तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधामतः"।

"यथोक्त विधिना बालं मासि षष्ठेऽष्टमेऽपि च। अन्नं प्राशयेत्किञ्चित् ततस्तद्वर्धयन् क्रमात्" अथ बालस्य परिचर्य्याविधिः। "बालमहं उत्सन्ध्या मर्षेन्नत्वर्जयेत् कञ्चित्। सहसा बोधयेन्नैव नायोग्यं समुपवेशयेत्" अयोग्यं उपवेशनासमर्थम्। "बालमन्नं स्थापयेत् क्रोड़े न क्षिप्रं शयने क्षिपेत्। रोदयेन्न कचित् कार्य्ये विधिमावश्यकं विना" आवश्यको विधिः भेषज दान तैलाभ्यङ्गोद्वर्त्तनादिः। "तच्चित्तमनुवर्त्तेत तं सदैवानुमोदयेत्। निम्नोद्गेधानतश्चापि रक्षेद् बालं प्रयत्नतः, बालस्य स्वभावचिन्ताभ्याच"। "अभ्यङ्गोद्वर्त्तनं स्नानं नेत्रयोरञ्जनन्तथा। मृदुं सुक्ष्मं यत् मलं तथा गदश्शतेप मत्र। जन्मप्रभृतिपथ्यानि बालकानां सर्व्वदा"

बालस्य कवलादेः समयमाह। "कवलः षष्ठमासादर्वादष्टमान्तस्य कर्म च। विरेकः षोडशाद्वर्षाद्विंशतेश्चैव नैथुनम्"। ततः पृथ्व्या॰ इमनिच् बालिमन् बालभावे पु॰ पक्षे ष्यञ् बाल्य तत्रार्थे न॰।

बालक पु॰ बाल+स्वार्थे क। १शिशौ (बाला) २गन्धद्रव्ये न॰ राजनि॰। ३ह्रीवेरे ४अङ्गुरीयके ५पारिहार्य्ये न॰विश्वः। ६अश्वकरिपुच्छयोः ७वलये मेदि॰ ८केशे च पु॰ विश्वः।

बालकप्रिया स्त्री बालकं प्रीणाति प्री–क। १इन्द्रवारुण्यां (राखालशशा) २कदल्याञ्च राजनि॰ ३शिशुप्रियमात्रे त्रि॰।

बालकृमि पु॰ ६त॰। केशकीटे (उकुन) जटा॰।

बालक्रीड़नक पु॰ बालः क्रीड्यनेन क्रीड–करणे ल्युट्। स्वार्थे क। कपर्दके (कड़ि) राजनि॰ २तत्क्रीड़ासाधनमात्रे त्रि॰।

बाल(लि)खिल्य पु॰ ब॰ अङ्गुष्ठपर्वमितेषु षष्टिसहस्रसंख्येषु "क्रतोश्च सन्ततिर्भार्य्या बालखिल्यानसूयत। षष्टियानि सहस्राणि ऋषीणामूर्ध्वरेतसाम्" मार्कपु॰उक्तेषु १मुनिभेदेषु। तेषां पारमाण्यञ्च अङ्गुष्ठमात्रं यथोक्तं भा॰ स॰ ३१ अ॰। "अथापश्यद्दषीन् ह्रस्वान् अङ्गुष्ठोदरवर्ष्मणः। पलाशयष्टिकामेकां सहितान् वहतः पथि। प्रलीनान् स्वेष्विवाङ्गेषु निराहारांस्तपोधनान्। क्लिश्यमानान् मन्दबलान् गोष्पदे संप्लुतोदके"।"प्राणा वै बालखिल्याः" श्रुत्युक्तेषु २प्राणेषु च। [अमरः।

बालगर्भिणी स्त्री बालैव गर्भिणी। प्रथमगर्भवत्यां गवि

बालगोपाल पु॰ कर्म॰। श्रीकृष्णमूर्त्तिभेदे शिशुरूपे गोपाले नारदपञ्चरात्रे दृश्यम्।

बालग्रह पु॰६त॰। बालानां पीड़के उपग्रहभेदे 'बालग्रहाभिभूतानां बालानां शान्तिकारकमिति" षष्ठी। कुमारभृत्याशब्दे २१०८ पृ॰ दृश्यम्। [२शिशुचर्य्यायां स्त्री

बालचर्य्य पु॰ बालस्येव चर्य्याऽस्य। १कार्त्तिकेये त्रिका॰ ६त॰।

बालतनय पु॰ बालास्तनया इव पत्राण्यस्य।१खदिरे अमरः २शिशुसुतके पु॰स्त्री॰।

बालतन्त्र न॰ बालार्थं तद्रक्षार्थं तन्त्रमुपायः।

गर्भिणीचर्य्यायाम् कुमारभृत्याया त्रिका॰२१०८पृ॰दृश्यम्

बालतृण न॰ कर्म॰। नवतृणे शष्पे अमरः।

बालदलक पु॰बाल इव स्वल्पं दलमस्य कप्। खदिरे भरतः

बालधि पु॰ बाला धीयन्तेऽत्र धा–आधारे कि। केशयुक्तलाङ्गूले अमरः।

बालपत्र पु॰ बाल इव क्षुद्रं पत्रमस्य। १यवासे राजनि॰। २खदिरवृक्षे भरतः। ३नवपत्रयुते त्रि॰ कर्म॰। ४नवीने पत्रे न॰ वा कप्। बालपत्रक खदिरे त्रिका॰।

बालपाश्या स्त्री बालस्य केशस्य समीपस्था पाश्या। सीमन्तान्तिकस्थस्वर्णादिरचितपट्टिकारूपे भूषाभेदे (सिँथी) अमरः।

बालपुष्पी स्त्री॰ बालानि क्षुद्राणि पुष्पाण्यस्याः ङीप्। यूथिकायाम् राजनि॰। कप् बालपुष्पिका तत्रार्थे जटाधरः।

बालभद्रक पु॰ बालेऽपि भद्र इव कायति कै–क। विषभेदे शब्दच॰। [षधे च।

बालभैषज्य न॰ ६त॰। १रसाञ्जने राजनि॰ २शिशूनामौ-

बालभोज्य पु॰ ६त॰।१चणके राजनि॰ २बालकभक्षणीये त्रि॰

बालमूषिका स्त्री॰ कर्म॰। क्षुद्रमूषिकायां गिरिकायाम् अमरः।

बालयज्ञोपवीतक न॰बालस्य यज्ञोपवीतमिव कायति कै–क। उरस्कटे (बुकबाकाडि) त्रिका॰। [शब्दर॰।

बालराज न॰बालः स्वल्पोऽपि राजते राज–अच्। वैदूर्य्यमणौ

बालरोग पु॰ भावप्र॰ उक्ते बालस्य रोगभेदे तन्निदानादि तत्रोक्तं यथा

"अथ बालरोगाणां निदानानि लक्षणानि चाह। "धात्र्यास्तु गुरुभिर्भोज्यैर्विषमैर्दोषलैस्तथा। दोषा देहे प्रकुप्यन्ति ततः स्तन्यं प्रदुष्यति। मिथ्याहारविहारिण्या दुष्टा वातादयस्त्रयः। दूषयन्ति पयस्तेन जायन्ते व्याधयः शिशोः। ह्रीवेरं शर्करा लोध्रं लोढं तृष्णाहरं परम्।" इति तृष्णायाम्। "वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः। क्षामस्वरः कृशाङ्गः स्याद्बद्धविण्मूत्रमारुतः। स्विन्नो भिन्नमलो बालः कामलापित्तरोगवान्। तृष्णालुरुष्णसर्वाङ्गः पित्तदुष्टं पयः पिबन्। श्लेष्मदुष्टं पिबन् क्षीरं लालायुक् श्लेष्मरोगवान्। निद्रार्दितो जडः शूनो वक्राक्ष्युर्द्दनः शिशुः। ज्वराद्या व्याधयः सर्वे वर्द्धन्ते महतान्तु ये। बालानामपि ते तद्वज्ज्ञेया भिषगुत्तमैः। बालानामेव ये रोगा भवन्ति महतां न च। तालुकण्टकमुख्यांस्तान् वक्ष्ये पारकयत्नतः।" तत्रादौ तालुकण्टकमाह। "तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम्। तेन तालुप्रदेशस्य निम्नता मूर्ध्नि जायते। तालुपातात् स्तनद्वेषः कृच्छ्रात् पानं शकृद्द्रवम्। तृडक्षिकण्ठास्यरुजा ग्रीवादुर्द्धरता वमिः।" पानं स्तनस्य, शकृद्द्रवं द्रवरूपम्। महापद्ममाह। "वीसर्पस्तु शिशोः प्राणनाशनः शीर्षवस्तिजः। पद्मवर्णो महापद्मरोगो दोषत्रयोद्भवः। शङ्खाभ्यां

हृदयं याति हृदयाच्च गुदं व्रजेत्।" पद्मवर्णः लोहित वर्णो ऽत्र शीर्षजो वीसर्पः। मस्तकाद्यो हृदयं याति हृदयाच्च गुदं व्रजेत् एवं वस्तिजो गुदं याति गुदतः हृदयं हृदयाच्छिरो याति इति बोद्धव्यम्। कुकूणकमाह "कुकूणकः२ क्षीरदोषाच्छिशूनामेव वर्त्मनि। जायते सरुज नेत्रं कण्डूरं प्रस्रवेद्बहु। शिशुः कुर्य्याल्ललाटाक्षिकूटनासाप्रघर्षणम्। शक्तो नार्कप्रभां द्रष्टुं न चाक्ष्युन्मीलनक्षमः।" कुकूणकं (कोथु) इति लोके। अथ तुण्डीगुदपाकमाह। "वातेनाध्मापिता नाभिः सरुजा तुण्डिरुच्यते। बालस्य गुदपाकाख्यो ४व्याधिः पित्तेन जायते।" अहिपूतनमाह। "शकृन्मूत्रसमायुक्ते धौते याने शिशोर्भवेत्। स्विन्ने वा स्नाप्यमानस्य कण्डू रक्तकफोद्भवा। कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते। एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम्५।" स्विन्ने स्वेदिते। अजगल्लीमाह। "स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा। कफवातोत्थिता ज्ञेया बालानामजगल्लिका६। ग्रथिता गुम्फितेव मुद्गसन्निभा मुद्गाकृतिः। परिगर्भिकमाह माधवः। "कुमारो गर्भिण्याः स्तन्यं प्रायः पिबन्नपि। कासाग्निसादवमथुतन्द्राकार्श्यारुचिभ्रमैः। युज्यते कोष्ठवृद्ध्या च तमाहुः परिगर्भिकम्७। रोगं परिभवाख्यञ्च तत्र युञ्जीत दीपनम्।" पिबन्नपीत्यपिशब्दादपिबन्नपि परिगर्भिकः (अड्डोडोति) लोके। परिभवाख्यं परिभवेति नामान्तरम्। अथ दन्तोद्भेदकान् रोगानाह "दन्तोद्भेदः शिशोः सर्वं रोगाणां कारणं स्मृतम्। विशेषात् ज्वरविड्भेदकासच्छर्दिशिरोरुजाम्। अभिष्यन्दस्य पोथक्याश्चीसर्पस्य च जायते। कारणमित्यन्वयः पोथक्या वर्त्मरोगविशेषस्य।"

वालव पु० तिथ्यर्द्धात्मकेषु करणेषु द्वितीये करणे ज्यो० त०।

वालवायज न० वैदूर्य्यमणौ त्रिका०।

वालवाह्य पु० वालो वाह्यो यस्य। दृककटे वनच्छागे हारा०

वालव्यजन न० वाला एव व्यजनम्। चामरे हेमच०। 'कुर्वन्ति वालव्यजनैश्चमर्य्यः' इति कुमारः। [हेमच०।

वालसन्ध्याभ पु० वाल सन्ध्याया इवाभा यस्य। अरुणवर्णे

वालसूर्य्य न० वालः सूर्य्य स्तद्वर्णोऽस्त्यस्य। १वैदूर्य्यमणौ त्रिका० कर्म०। २अचिरोदिते सूर्य्ये पु०। [शब्दर०।

वालसूर्य्यक न० वालसूर्य्य इव कायति कै–क। वैदूर्य्यमणौ

वालहस्त पु० वालाः केशा हस्त इव यत्र। १पशूनां लाङ्गूले अमरः। वाल+संघे हस्तच्०। २केशसंघे च पु०।

वाला स्त्री० वालाः केशाकाराः पदार्थाः सन्त्यस्य अच् १नारिकेले २हरिद्रायां ३मल्लिकाभेदे, ४वलये, ५मेध्ये ६त्रुटौ स्त्री मेदि० ७हतकुमार्य्यां (वाला) ८गन्धद्रव्यभेदे शब्दच०। ९अम्बष्ठायां, १०नीलझिण्ट्याम् स्त्री राजनि० ११षोडशवर्षीयायां स्त्रियां १२कन्यायाञ्च "वर्षमाला भवेद् वाला" प्रा०त०उक्तायामेकवर्षीयायां १३गवि स्त्री १४देवीमूर्त्तिभेदे तन्त्रसारः। स्वार्थे क अत इत्त्वम्। वालिका तत्रैव। वालुकायां, पत्रकाहलायां मेदि० कर्णभूषणे (कानवाला) मेदि० एलायां शब्द०।

वालाकि पु० वलाकाया अपत्यम् वा० इञ्। "दृप्तवालाकिर्हानूचानो गार्ग्य आस" छा०उ०उक्ते गार्ग्ये ऋषिभेदे।

वालाञ्ची स्त्री वालः केशा इवाञ्चितत्वं पुष्पमस्याः पचसमा० स्त्रियां ङीष्। केशपुष्पाहवे शब्दच०।

वालायनि पुंस्त्री० वालाया अपत्यं तिका० फिञ्। वालाया अपत्ये स्त्रियां ङीप्। [चाणक्य

वालार्क पु० कर्म०। प्रातःकालीनसूर्य्ये "वालार्कस्तरुणं दधि

वालि पु० वाले केशे जातः इञ्। केशे इन्द्रस्कन्नशुक्रजाते वानरभेदे। वालः उत्पत्तिस्थानत्वेनास्त्यस्य इनि वालिन् तत्रार्थे त्रिका०।

तदुत्पत्तिकथा रामा० उत्तरा० ३७ स० यथा

"उत्प्लुत्य तस्मात् स ह्रदादुत्थितः प्लवगः पुनः। तस्मिन्नेव क्षणे राम! स्त्रीत्वं प्राप स वानरः। तद्रूपमद्भुतं दृष्ट्वा त्यजितो धैर्य्यमात्मनः। ततस्तस्यां सुरेन्द्रेण स्कन्नं शिरसि पातितम्। अनाशाद्यैव तां नारीं संनिवृत्तमभवत्। ततः सा वानरपतिं जज्ञे वानरमीश्वरम्। अमोघरेतसस्तस्य वासवस्य महात्मनः। वालेषु पतितं बीजं वाली नाम बभूव ह। भास्करेणापि तस्यां वै कन्दर्पवशवर्त्तिना। बीजं निषिक्तं ग्रीवायां विधानमनुवर्त्तता। ग्रीवायां पतितं बीजं सुग्रीवः समजायत"।

वालिश त्रि० वाड-इन् वाडिं छिद्रं श्यति शो–क डस्य लः १मूर्खे, २शिशौ च मेदि० "वालिशमाचि! शयानम्" उद्भटः। वालाः सन्त्यस्य इनि वाली मूर्द्धा शेतेऽत्र शी-वा० आधारे ड। ३उपधाने न० शब्दमा०।

वालीश पु० मूत्रकृच्छ्ररोगे शब्दर०।

वालिहन् पु० वालिं वालिनं वा हन्ति हन–क्विप्। रामे वालिहन्त्रादयोऽप्यत्र पु०। तत्कथा रामा० सुन्दराकाण्डे दृश्या।

वालु पु० वल-उण्। १एलवालुकनामगन्धद्रव्ये उणादि०

लुक न० बालु+स्वार्थे क। १तत्रैव अमरः। उ० बाल-उक। २पानीयामलके पु० राजनि०। ३सिकतासु स्त्री। ४कर्कट्यां जटा० ५कर्पूरे ६यन्त्रभेदे शब्दच०।

लुकायन्त्र न० ६त०। १औषधपाकार्थे यन्त्रभेदे।
"भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके। कूपिका-कण्ठपर्य्यन्तं बालुकाभिश्च पूरिते। भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते। बालुकायन्त्रमेतद्धि यन्त्रतन्त्रबुधैः स्मृतम्" भावप्र०। २कालज्ञापने रघुना० प्रदर्शिते यन्त्र-भेदे "सच्छिद्रेणुगर्भेण सम्यक् कालं प्रसाधयेत्" स्मृ०सि० व्याख्यायां "छत्राकारेण रेणवः सिकतायागर्भे उदरे यस्यैतादृशं यन्त्रं बालुकायन्त्रं प्रसिद्धम्" रघुनाथः।

लुकास्वेद पु० ३त०। भावप्र० उक्ते तप्तबालुकाभिः स्वेदने। "वातश्लेष्मणि स्वेदान् कारयेद्रूक्षनिर्मितान्। स्निग्धः स्वेदो निषिद्धोऽत्र विना केवलवातजान्। खर्परभ्रष्टपटस्थितकाञ्जिकसंसिक्तबालुकास्वेदः। शम-यति वातकफामयमस्तकशूलाङ्गभङ्गादीन्। स्रोतसां मार्दवं कृत्वा नीत्वा पावकमाशयम्। हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति"। [ष्टपो०हुक्। बालुकीत्यप्यत्र सिका०

लुकी स्त्री० उ०बल-उक गौरा०ङीष्। कर्कटीभेदे राजनि०

लूक पु० उ० बाल-ऊक। विषभेदे हेमच०।

लेय पु०बलेरपत्यं, बलये हितं वा ढक्। १रासभे,अमरः २दैत्यभेदे, धरणिः ३अङ्गारवल्ल्यां विश्वः। ४चा-णक्यमूलके पु० ५बालहिते च त्रि०मेदि०। [अमरः।

लेयशाक पु०बलये हितं ढक् कर्म०(वामनहाटि) शाकभेदे

लेष्ट पु० बालानामिष्टः १ब(व)दरे राजनि०। २बाल-कानामभीष्टे त्रि०।

लोपवीत न०६त० उरस्कृते बालयज्ञोपवीतशब्दार्थे हारा०

ल्वजभारिक त्रि०बल्वजानां भारं वहति वंशा० ठक्। उलपतृणभारवाहके।

ल्य न० बालस्य भावः, कर्म वा, वयोवचनत्वात् ष्यञ्। 'आ षोड़शाद्भवेद्बाल' इत्युक्ते अवस्थाभेदे।

ल्हक न० बल्हिदेशे भवः बा० वुञ्। कुङ्कुमे अमरः पाठान्तरम्। [हिङ्गुनि न०।

ल्हायन त्रि० बल्हौ जातम् फक्। १बल्हिदेशोद्भवे

ल्हि(ह्ली)क पु० बल्हि+स्वार्थे ठञ्। ईक वा।१कुङ्कुमे हिङ्गुनि च न० मेदि०२देशभेदे ३तद्देशीये च पु०मेदि०। ५तद्देशनृपे हरिवं०६अ०। दीर्घमध्यः गन्धर्वभेदे पु०शब्दर०

ष्कल पु० महर्षिभेदे आश्व०ब्रा० २४.४।

बाष्प(स्प) पु०बाध-पृषो०सत्वं षत्वं वा। १नेत्रजले, २ऊष्मणि च अमरः लौहे च मेदि०तत्र अयमन्त्यस्थवादितवोक्तः।

बास्कल पु० दैत्यभेदे हरिवं० ४अ०।

बा(वा)ह प्रयत्ने भ्वादि० आत्म० अक० सेट्। बा(वा)हते अबा(वा)हिष्ट। ऋदित् चङि न ह्रस्वः अबबाहत् त।

बाह पुंस्त्री बाहु+पृषो०। नाहुशब्दार्थे रमानाथः।

बाहा(हू)बाहवि अव्य० बाहुभ्यां बाहुभ्यां प्रहृत्य प्रवृत्तम् युद्धम् इच्समा० पूर्वपदे आत् दीर्घो वा। बाहुभ्यां बाहुभ्यां प्रहृत्य प्रवृत्ते युद्धे। [अमरः।

बाहु पु० बाध-कु धस्य हः। भुजे कक्षावध्यङ्गुलिपर्य्यन्तेऽवयवे

बाहुक पु० ऋतुपर्णनृपस्य अश्वपालत्वादिरूपेण स्थिते नल-नृपे तत्कथा भा०व०६७अ०दृश्या। २नागभेदे भा०आ० ५७ अ०।

बाहुकुण्ठ त्रि० ३त०। कुण्ठितबाहुके (कोपा) जटा०।

बाहुकुन्थ पु० बाहुरिव कुन्थति कुन्थ-अच्। विहगानां बाहुस्थानीये पक्षे शब्दच०। [जाते।

बाहुकुलेयक त्रि० बहुकुले जातादि ढकञ्। बहुकुल-

बाहुज पु०बाहुभ्यां ब(व)ह्मबाहुभ्यां जायते जन-ड।१क्षत्रिये अमरः। 'बाहू राजन्यावि'ति श्रुतिः। २कीरे ३स्वयं जाततिले च मेदि० ४बाहुजातमात्रे त्रि०।

बाहुत्र पु०न०बाहुं त्रायते त्रै-क। अस्त्राघातवारणार्थं हस्त-बद्धे लौहचर्मादौ हेमच०।

बाहुत्राण न०बाहू त्रायते अनेन त्रै-करणे ल्युट्। अस्त्रा-घात वारणार्थं बाहुबद्धवर्मणि हेमच०।

बाहुदन्तक पु० बहवश्चत्वारो दन्ता अस्य कप् ऐरावतः उप-चारात् इन्द्रः तेन प्रोक्तमण्। पुरन्दरप्रोक्ते पञ्चसहस्रात्मके नीतिशास्त्रभेदे भा०शा०५९अ०। [इन्द्रे हेमच०।

बाहुदन्तेय पु० बहुदन्तश्चतुर्दन्त ऐरावतस्तमर्हति वा० ढ।

बाहुदा स्त्री स्वनामख्याते १नदीभेदे। सा च प्रसेनजिद्भार्य्या गौरी नाम, भर्त्रा शप्ता नदीरूपा जाता हरिवं०१२अ०। सा हि शङ्खस्य भ्रातः फलहरणे प्रद्युम्नदण्डेन छिन्नं लिखितस्य मुनेः हस्तम् अवगाहनात् पुनर्ददाविति कथा भा०शा० २३ अ० यथा "स गत्वा बाहुदां शीघ्रं तर्पयस्व यथाविधि। देवानृषीन् पितॄंश्चैव मा चाधर्मे मनः कृथाः। तस्य तद्वचनं श्रुत्वा शङ्खस्य लिखितस्तदा। अवगाह्यापगां पुण्यामुदकार्थं प्रचक्रमे। प्रादुरास्तां ततस्तस्य करौ जलजसन्निभौ। ततः स विस्मितो भ्रातु-र्दर्शयामास तौ करौ"।

२परीक्षिद्राज्यभेदे भा॰ आदिपर्व्वणि ९५ अध्याये ।

बाहुबल न॰ ६त॰। युद्धोपयोगिनि बाहुविक्रमे ।

बाहुभूषा स्त्री ६त॰ । केयूरे हेमच॰ ।

बाहुमात्र त्रि॰ बाहुः प्रमाणमस्य बाहु+मात्रच् । बाहु-परिमाणे स्त्रियां ङीप् "बाहुमात्र्यः स्रुचः" कात्या॰श्रौ॰ १।३।२७ ।

बाहुमूल न॰ ६त॰ । कक्षे (काँक) (वगल) ख्याते अमरः ।

बाहुयुद्ध न॰ ३त॰ । नियुद्धे अमरः ।

तत्प्रकारः भा॰ वि॰ १३ अ॰ यथा "कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः । सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा । क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिःस्वनैः । तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च । शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः । जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टनैः । तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा । बलप्राणेन शूराणां समाजोत्सवसन्निधौ । अरज्यत जनः सर्वः सोत्क्रुष्टनिनदोत्थितः । बलिनोः संयुगे राजन् ! वृत्रवासवयोरिव । प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः । आकर्षतुरथान्योन्यं जानुभिश्चापि जघ्नतुः"। मू॰ "कृतं कस्मिंश्चिदङ्गे निपीडनं प्रतिकृतं तस्य मोचनम् । सुसङ्कटैः सुष्टिप्रहरणेन सघीकृतैः सकङ्कटैरिति पाठे सकवचैः मल्लविशेषैः "कङ्कटो बाहुवरणे कवचे कठिने क्रिये" इति विश्वः सन्निपातोऽङ्गसंघट्टनम् अवधूतं तेनैव दूरीकरणं प्रमाथादय उक्ता मल्लशास्त्रे "निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते । यत्तूत्थाप्याक्रमणं तदुन्मथनमुच्यते । क्षेपणं कथ्यते यत्तु स्थानात् प्रच्यावनं हठात् । उभयोर्भुजयोर्मुष्टिरुरोमध्ये निपात्यते । मुष्टिरित्युच्यते तज्ज्ञैर्मल्लविद्याविशारदैः । अवाङ्मुखं स्कन्धगतं भ्रामयित्वा तथैव यः । क्षिप्तश्च मल्लः स भवेद्वराहोद्धूतनिःस्वनः । तलैर्वज्रनिपातैर्वज्रवद्दृढपातैश्चपेटैः । "अङ्गुल्यः प्रसृतास्तासु प्रसृष्टा या अदोरिताः । ऋज्वी दृढा घना क्षिप्रशालाका सा‌ङ्गुली स्मृता"। तस्या नखपातैः पादोद्धूतैः पादप्रसारणेनाक्षेपैः जानुभिः शिरोभिश्च कर्त्तरघट्टनैरास्फालनैः काश्मनिर्घोषैरित्युभयविशेषणम् । अशस्त्रं निन्द्यं यथोक्तं तत्रैव "बाहुयुद्धं हि मल्लानामशस्त्रभिः स्मृतम् । मृतस्य तत्र न स्वर्गो यशो नेहापि विद्यते" इति । बलप्राणेन बलेन शारीरबलेन प्राणेन मानसबलेन च । सोत्क्रुष्टनिनदः हीहीशब्दोच्चारणेन रञ्जितश्च सहुल्लापनम् । तदुदाहृतः । "आकृष्य क्रोडीकरणं प्रकर्षणमुदाहृतम् । आकर्षणं दोलयैव सम्मुखीकरणं स्मृतम् । पुरः पश्चात् पार्श्वयोश्चाभ्याकर्षो भ्रमणं तथा । पश्चात् प्रपातनं वेगाद्विकर्षणमुदाहृतम्" नीलक॰ ।

बाहुल पु॰ बहुलानां कृत्तिकानामयं स्वामी अण् । १वह्नौ शब्दच॰ । बहुलाभिर्युक्ता पौर्णमासी अण् । २कार्त्तिकपौर्णमास्यां स्त्री ङीप् । सा यत्र मासे पुनः अण् । ३चान्द्रकार्त्तिकमासे पु॰ अमरः । ४बाहुत्राणे हेमच॰ । बहुलेन निर्वृत्तम् सङ्कला॰ अण् । ५अनेकसाध्ये त्रि॰ । दृढा॰इमनिचोऽभावे भावे अण् । ६बाहुल्ये न॰ ।

बाहुलक न॰ बहुलेन बहुलग्रहणेन निर्वृत्तं सङ्कला॰ अण् संज्ञायां कन् । व्याकरणोक्तसर्वोपाधिरहिते विधानादौ यत्र यद्विधीयते तत्र क्वचिन्न स्यात् क्वचिद्वा स्यात् क्वचित्ततोऽन्यत्रापि स्यादित्येवं परे विधाननिषेधादौ । मनोज्ञा॰ भावे वुञ् । २बाहुलिका बहुलभावे स्त्री ।

बाहुलेय पु॰ बहुलानामपत्यं ढक् । कार्त्तिकेये अमरः

बाहुशालिन् त्रि॰ बाहुभ्यां शालते तद्विक्रमाधिक्येन श्लाघते शाल-णिनि । बाहुवीर्य्याधिक्ययुते स्त्रियां ङीप् ।

बाहुसम्भव पु॰ बाहू ब्रह्मबाहू सम्भवोऽस्य । १बाहुजे क्षत्रिये हेमच॰ । २बाहुजातमात्रे त्रि॰ ।

बाहुसहस्रभृत् पु॰ बाहुसहस्रं बिभर्त्ति भृ-क्विप् तुक् च । कार्त्तवीर्य्ये त्रिका॰ कार्त्तवीर्य्यशब्दे दृश्यम् ।

बाह्य त्रि॰ बहिर्भवः ष्यञ् टिलोपः । बहिर्भवे

बाह्यकर्ण पु॰ नागभेदे भा॰ आ॰ ३५अ॰ ।

बाह्यकुण्ड पु॰ नागभेदे भा॰ उ॰ १०२ अ॰ ।

बाह्वादि पु॰ इञ् प्रत्ययनिमित्ते शब्दगणे स च गणः पा॰ग॰ उक्तो यथा "बाहु उपबाहु उपवाकु निवाकु शिवाक वटाकु उपबिन्दु वृषली वृकला चूडा बलाका मूषिका कुशला छगला ध्रुवका धुवका सुमित्रा दुर्मित्रा पुष्करसद् अनुहरत् देवशर्मन् अग्निशर्मन् भद्रशर्मन् सुशर्मन् कुनामन् सुनामन् पञ्चन् सप्तन् अष्टन् अमितौजसः (सलोपश्च) सुधावत् उदञ्चु शिरस् माष शराविन् मरीची क्षेमवृद्धिन् शृङ्खलतोदिन् खरनादिन् नगरमर्दिन् प्राकारमर्दिन् लोमन् अजीगर्त्त कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम उदङ्क उदकः (संज्ञायाम्) सम्भूयोऽम्भसोः (सलोपश्च) बाह्वादिः । बाहविः वार्त्तिः ।

बि(वि)ट आक्रोशे भ्वा॰पर॰सक॰सेट् । बे(वे)टति अबे(वे)टीत्

बिटक पु॰ पिटक+पृषो॰ । पिटके अमरे पाठान्तरम् ।

बि(वि)ठ न० विट–क पृषो० अन्तरीक्षे निरुक्तकारः ६।२०।

बिद् अवयवे भ्वा०पर०सक० सेट् इदित्। बिन्दति अबिन्दीत्

बिदल न०बिदि–कलच् नि०नलोपः। १दिदले अमरः २अंशे च

बिन्दवि पु० बिदि–अवयवे बा० अवि। बिन्दौ अंशे। ततः गहा०छ। बिन्दवीय तत्सम्बन्धिनि।

बिन्दु पु०बिदि-उ। १अल्पेऽंशे अमरः। २राजभेदे ततोऽपत्ये विदा० अञ्। बैन्दव तदपत्ये पुंस्त्री०। ३रेखागणित प्रसिद्धे स्थूलत्वदैर्घ्यत्वहीने लक्षितं शक्ये २पदार्थे क्षेत्रयन्त्रे २३८६ पृ० दृश्यम्।
सा०द० उक्ते ४अर्थप्रकृतिभेदे “बीजं बिन्दुः पताका च प्रकरी कार्य्यमेव च। अर्थप्रकृतयः पञ्च” उद्दिश्य “अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्” लक्षितम्। ५अनुस्वारसूचके रेखाभेदे। “बिन्दुर्हि बिन्दुमात्रौ” मुग्धबो०। शा०ति० उक्ते ६नादजन्ये क्रियाप्राधान्यलक्षणे चिच्छक्तेरवस्थाभेदे यथा “सच्चिदानन्दविभवात् सकलात् परमेश्वरात्। आसीच्छक्तिस्ततो नादो नादाद् बिन्दुसमुद्भवः”। तद्व्याख्यायां राघवभट्टधृतम् “सा तत्त्वसंज्ञा चिन्मात्रज्योतिषः सन्निधेस्तदा। विचिकीर्षुर्घनीभूता क्वचिदभ्येति बिन्दुताम्” “अभिव्यक्ता परा शक्तिरविनाभावलक्षणा। अखण्डपरचिच्छक्तिव्याप्ता चिद्रूपिणी विभुः। समस्ततत्त्वभावेन विवर्त्तेच्छासमन्विता। प्रयाति बिन्दुभावञ्च क्रियाप्राधान्यलक्षणम्”। तस्मादेव रौद्रीरुद्रयोराविर्भावः यथाह शा० ति० “रौद्री बिन्दोस्ततो नादात् ज्येष्ठा बीजादजायत। वामेताभ्यः समुत्पन्ना रुद्रब्रह्मरमाधिपाः”। ७बीजभेदे “बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः। समवायः समाख्यातः सर्वागमविशारदैः” शा० ति०।

बिन्दुचित्रक पु० बिन्दुरूपं चित्रमस्य कप्। मृगभेदे शब्दर०

बिन्दुजाल न० ६त०। १बिन्दुसमूहे २हस्तिशुण्डोपरिस्थबिन्दुसमूहे हेमच०। संज्ञायां कन्। बिन्दुजालक गजकुम्भादिस्थे तत्समूहे पद्मके अमरः। [३पाशके हारा०

बिन्दुतन्त्र पु०। १शारीफलके २चतुरङ्गक्रीडने च मेदि०।

बिन्दुदेव पु० ६त०। बिन्दुर्वर्णस्येश्वरे शिवे मेदि०।

बिन्दुपत्र पु० बिन्दुचिह्नितं पत्रमस्य। भूर्जपत्रवृक्षे रत्नमा०।

बिन्दुमाधव पु० काशीस्थे वेणीमाधवे काशीख०।

बिन्दुरेखक पु० बिन्दुरूपा रेखा चूचिकाऽस्य कप्। १अनुस्वारे वर्णे २पक्षिभेदे शब्दच०।

बिन्दुसरस् न० बिन्दुजातं सरः शा०त०। सरोवरभेदे यत्र गङ्गावतारणार्थं भगीरथेन तपस्तेपे तत्कथा “उत्तरेण कैलासात् मैनाकं पर्वतं प्रति। हिरण्यशृङ्गः सुमहान् महामणिमयो गिरिः। रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः। द्रष्टुं भागीरथीं गङ्गामुवास बहुलाः समाः” भा० स० ३अ०। मात्स्ये १०१ अ० तदुत्पत्तिकथा उक्ता यथा
“तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता। सोमपादात् प्रसूता सा सप्तधा प्रविभज्यते। यूपा मणिमयास्तत्र चितयश्च हिरण्मयाः। तत्रेष्ट्वा क्रतुभिः सिद्धः शक्रः सुरगणैः सह। दिव्यच्छायापथस्तत्र नक्षत्राणान्तु मण्डलम्। दृश्यते भास्वरा रात्रौ देवी त्रिपथगा तु सा। अन्तरीक्षं दिवञ्चैव भावयित्वा भुवङ्गता। भवोत्तमाङ्गे पतिता संरुद्धा योगमायया। तस्या ये बिन्दवः केचित् क्रुद्धायाः पतिता भुवि। कृतन्तु तैर्बिन्दुसरस्ततो बिन्दुसरः स्मृतम्”। बिन्दुह्रदोऽप्यत्र पु०।

बिल भेदने वा चुरा०उभ०पक्षे तु०पर०सक० सेट्। बेलयति ते बिलति। अबीबिलत् त अबेलीत्।

बिल न०तु०बिल+क। रन्ध्रे १छिद्रे अमरः। २गुहायाम् ३उच्चैःश्रवसि पु० मेदि०। ४वेतसे शब्दच० ५भल्ले च। ततः कृशा० चतुरर्थ्यां र। बिलर तददूरदेशादौ त्रि०।

बिलकारिन् त्रि० बिलं करोति कृ–णिनि। १गर्त्तकारके स्त्रियां ङीप्। २मूषके पुंस्त्री० राजनि०।

बिलवास पु० बिले वासोऽस्य। गाहकजन्तौ राजनि०।

बिलवासिन् पु० बिले वसति वस-णिनि। १सर्पे शब्दरत्ना०। २गर्त्तवासिनि त्रि० स्त्रियां ङीप्। अलुक्स० बिलेवासिन् तत्रार्थे। [स्त्रियां योपधत्वात् टाप्।

बिलशय पुंस्त्री० बिले शेते शी–अच्। सर्पे शब्दरत्ना०।

बिलेशय पुंस्त्री० बिले शेते शी–अच् अलुक्स०। १सर्पे अमरः २मूषिके जटा० ३गोधायां ४शशे ५शल्लक्याञ्च भावप्र०। “गोधाशशभुजङ्गाखुशल्लक्याद्या बिलेशयाः। बिलेशया वातहरा मधुरा रसपाकयोः। बृंहणा बद्धविण्मूत्रा वीर्य्योष्णा अपि कीर्त्तिताः” तत्र तन्मांसगुणा उक्ताः।

बिल्म न० तु०बिल–बा०मन्। भासने निरु० १।२०। ऋ०२।२५।१२। २शिरस्त्राणे यजु०१६।३५। तदस्यास्ति इनि। बिल्मिन् तद्वति त्रि०रुद्रभेदे पु०यजु०तन्मन्त्रे दृश्यम्।

बिल्ल न० बिलं क्षिप् तं लाति ला–क। १आलवाले त्रिका०। २हिङ्गुनि शब्दच०।

बिल्लमूला स्त्री बिल्लमिव मूलमस्याः। वाराहीकन्दे शब्दच०

२परीक्षिद्राजभेदे भा० आदिपर्वणि ९५ अध्याये।

बाहुबल न० ६त०। युद्धोपयोगिनि बाहुविक्रमे।

बाहुभूषा स्त्री ६त०। केयूरे हेमच०।

बाहुमात्र त्रि० बाहुः प्रमाणमस्य बाहु+मात्रच्। बाहुपरिमाणे स्त्रियां ङीप् "बाहुमात्र्यः स्रुचः" कात्या०श्रौ० १।२।२७।

बाहुमूल न० ६त०। कक्षे (काँक) (वगल) ख्याते अमरः।

बाहुयुद्ध न० ३त०। नियुद्धे अमरः।

तत्प्रकारः भा० वि० १२ अ० यथा "कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः। सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा। क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिःस्वनैः। तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च। शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः। जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टनैः। तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा। बलप्राणेन शूराणां समाजोत्सवसन्निधौ। अरज्यत जनः सर्वः सोत्कृष्टनिनदोत्थितः। बलिनोः संयुगे राजन्! वृत्रवासवयोरिव। प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः। आकर्षतुरथान्योन्यं जानुभिश्चापि जघ्नतुः"। मू० "कृतं कञ्चिद्देशे निपीड्नं प्रतिकृतं तस्य मोचनम्। सुसङ्कटैः सुदृढ़ग्रहणेन स्वीकृतैः सकङ्कटैरिति पाठे सकवचैः सकिणैर्वा "कङ्कटो बाहुवरणे कवचे कठिने किणे" इति विश्वः सन्निपातोऽङ्गसंघट्टनम् अवधूतं तेनैव दूरीकरणं प्रमाथादय उक्ता मल्लशास्त्रे "निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते। यत्तूत्थायाप्युन्मथनं तदुन्मथनमुच्यते। क्षेपणं कथ्यते यत्तु स्थानात् प्रच्यावनं हठात्। उभयोर्भुजयोर्मुष्टिरुरोमध्ये निपात्यते। मुष्टिरिच्यते तज्ज्ञैर्मल्लविद्याविशारदैः। अधोमुखं स्कन्धगतं भ्रामयित्वा तथैव यः। क्षिप्तस्य शब्दः स भवेद्वराहोद्धूतनिःस्वनः। तलैर्वज्रनिपातैर्वज्रवद्दृढ़पातैश्चपेटैः। "अङ्गुल्यः प्रसृतास्तासु प्रसृष्टा या उदीरिताः। ऋज्वी दृढ़ा सा शिप्रशालका शाङ्कुली स्मृता"। तस्मान्नखपातैः पादोद्धूतैः पादप्रहारेणाक्षेपैः जानुभिः शिरोभिश्च कृतैरवघट्टनैरास्फालनैः अश्मनिर्घोषैरित्युभयविशेषणम्। अशस्त्रं निन्द्यं यथोक्तं तत्रैव "बाहुयुद्धं हि मल्लानामशस्त्रपाणिभिः कृतम्। मृतस्य तत्र न स्वर्गो यशो नेहापि विद्यते" इति। बलप्राणेन बलेन शारीरबलेन प्राणेन मानसबलेन च। सोत्कृष्टनिनदः हीहीशब्दोच्चारणेन रञ्जितस्य सन्तुष्टस्योत्थितः। "आक्षिप्य क्रोड़ीकरणं प्रकर्षणमुदाहृतम्। आकर्षणं लोलयैव सम्मुखीकरणं स्मृतम्। पुरः पश्चात् पार्श्वयोश्चाभ्याकर्षो भ्रमणं तथा। पश्चात् प्रपातनं वेगाद्विकर्षणमुदाहृतम्" नीलक०।

बाहुल पु० बहुलानां कृत्तिकानामयं स्वामी अण्। १वह्नौ शब्दच०। बहुलाभिर्युक्ता पौर्णमासी अण्। ३कार्त्तिकपौर्णमास्यां स्त्री ङीप्। सा यत्र मासे पुनः अण्। ३चान्द्रकार्त्तिकमासे पु० अमरः। ४बाहुत्राणे हेमच०। बहुलेन निर्वृत्तम् सङ्कला०अण्। ५अनेकसाध्ये त्रि०। शृङ्गा०दर्शनिचोऽभावे भावे अण्। ६बाहुल्ये न०।

बाहुलक न० बहुलेन बहुलपदग्रहणेन निर्वृत्तं सङ्कला०अण् संज्ञायां कन्। व्याकरणोक्तसर्वोपाधिरहिते विधानादौ यत्र यद्विधीयते तत्र क्वचिन्न स्यात् क्वचिद्वा स्यात् क्वचित्ततोऽन्यत्रापि स्यादित्येवं परे विधाननिषेधादौ। मनोज्ञा० भावे वुञ्। २बाहुलिका बहुलभावे स्त्री।

बाहुलेय पु० बहुलानामपत्यं ढक्। कार्त्तिकेये अमरः

बाहुशालिन् त्रि० बाहुभ्यां शालते तद्विक्रमाधिक्येन श्लाघते शाल–णिनि। बाहुवीर्य्याधिक्ययुते स्त्रियां ङीप्।

बाहुसम्भव पु० बाहू ब्रह्मबाहू सम्भवोऽस्य। १बाहुजे क्षत्रिये हेमच०। २बाहुजातमात्रे त्रि०।

बाहुसहस्रभृत् पु० बाहुसहस्रं बिभर्त्ति भृ–क्विप् तुक् च। कार्त्तवीर्य्ये त्रिका० कार्त्तवीर्य्यशब्दे दृश्यम्।

बाह्य त्रि० बहिर्भवः ष्यञ् टिलोपः। बहिर्भवे

बाह्यकर्ण पु० नागभेदे भा० आ० ३५अ०।

बाह्यकुण्ड पु० नागभेदे भा० उ० १०२ अ०।

बाह्वादि पु० इञ्प्रत्ययनिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा "बाहु उपबाहु उपवाकु निवाकु शिवाकु वटाकु उपबिन्दु वृषली वृकला चूड़ा बलाका मूषिका कुशला छगला ध्रुवका धुवका सुमित्रा दुर्मित्रा पुष्करसद् अनुहरत् देवशर्मन् अग्निशर्मन् भद्रशर्मन् सुशर्मन् कुनामन् सुनामन् पञ्चन् सप्तन् अष्टन् अमितौजसः (सलोपश्च) सुधावत् उदञ्चु शिरस् माष शराविन् मरीची क्षेमवृद्धिन् शृङ्खलतोदिन् खरनादिन् नगरमर्दिन् प्राकारमर्दिन् लोमन् अजीगर्त कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम उदङ्क उदकः (संज्ञायाम्) सम्भूयोऽम्भसोः (सलोपश्च) बाह्वादिः। बाहविः कार्ष्णिः।

बि(वि)ट आक्रोशे भ्वा०पर०सक०सेट्। बे(वे)टति अबे(वे)टीत्

बिटक पु० पिटक+पृषो०। पिटके अमरे पाठान्तरम्।

बि(वि)ठ न० विट–क पृषो० अन्तरीक्षे निरुक्तकारः ६।१०।

बिद् अवयवे भ्वा०पर०सक० सेट् इदित् । बिन्दति अबिन्दीत्

बिदल न०बिदि–कलच् नि०नलोपः ।१हिदले अमरः २खण्डे च

बिन्दवि पु० बिदि–अवयवे बा० अवि । बिन्दौ अंशे । ततः गहा०छ । बिन्दवीय तत्सम्बन्धिनि ।

बिन्दु पु०बिदि-उ। १अल्पेऽंशे अमरः । २राजभेदे ततोऽपत्ये विदा० अञ् । बैन्द तदपत्ये पुंस्त्री० । ३रेखागणित प्रसिद्धे स्थूलत्वदैर्घ्यहीने लक्षविते यस्मिं ४पदार्थे क्षेत्रमस्ते २३८९ पृ० दृश्यम् ।

सा०द० उक्ते ४अर्थप्रकृतिभेदे "बीजं बिन्दुः पताका च प्रकरी कार्य्यमेव च। अर्थप्रकृतयः पञ्च" इत्युक्त्वा "अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्" लक्षितम् । ५अनुस्वारसूचके रेखाभेदे । "बिन्दुद्विबिन्दुमात्रौ" मुग्धबो० शा०ति० उक्ते ६नादजन्ये क्रियाप्राधान्यलक्षणे चिच्छक्तेरवस्थाभेदे यथा "सच्चिदानन्दविभवात् सकलात् परमेश्वरात् । आसीच्छक्तिस्ततो नादो नादाद् बिन्दुसमुद्भवः" । तद्व्याख्यायां राघवभट्टधृतम् "सा तत्त्वसंज्ञा चिन्मात्रज्योतिषः सन्निधेस्तदा । विचिकीर्षुर्घनीभूता क्वचिदभ्येति बिन्दुताम्" "अभिव्यक्ता परा शक्तिरविनाभावलक्षणा । अखण्डपरचिच्छक्तिजाता शिवरूपिणी विभुः । समस्ततत्त्वभावेन विवर्त्तेच्छासमन्विता । प्रयाति बिन्दुभावञ्च क्रियाप्राधान्यलक्षणम्" । तस्मादेव रौद्रीरुद्रयोराविर्भावः यथाक्तं शा० ति० "रौद्री बिन्दोस्ततो नादात् ज्येष्ठा बीजादजायत । रुद्रेतास्यः समुत्पन्ना रुद्रब्रह्मरमाधिपाः" । ७बीजभेदे "बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः । समवायः समाख्यातः सर्वागमविशारदैः" शा० ति० ।

बिन्दुचित्रक पु० बिन्दुरूपं चित्रमस्य कप् । मृगभेदे शब्दर०

बिन्दुजाल न० ६त० । १बिन्दुसमूहे २हस्तिशुण्डोपरिस्थ बिन्दुसमूहे हेमच० । संज्ञायां कन् । बिन्दुजालक गजशुण्डादिस्थे तत्समूहे पद्मके अमरः । [हाराः

बिन्दुतन्त्र पु० । १शारीफलके २चतुरङ्गक्रीडने च मेदि० ।

बिन्दुदेव पु० ६त० । बिन्दुवर्णस्येश्वरे शिवे मेदि० ।

बिन्दुपत्र पु० बिन्दुचिह्नितं पत्रमस्य । भूर्जपत्रद्रुमे रत्नमा० ।

बिन्दुमाधव पु० काशीस्थे केशवाधवे काशीख० ।

बिन्दुरेखक पु० बिन्दुरूपा रेखा भूषिकाऽस्य कप् । १अनुस्वारे वर्णे २पक्षिभेदे शब्दच० ।

बिन्दुसरस् न० बिन्दुजातं सरः शा०त० । सरोवरभेदे यत्र गङ्गावतारणार्थं भगीरथेन तपस्तेपे तत्कथा "अथो त्तरेण कैलासात् मैनाकं पर्वतं प्रति । हिरण्यशृङ्गः सुमहान् महामणिमयो गिरिः । रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः । द्रष्टुं भागीरथीं गङ्गामुवास बहुलाः समाः" भा० स० ३अ० । मात्स्ये १०१ अ० तदुत्पत्तिकथा उक्ता यथा

"तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता । सोमपादात् प्रसृता सा सप्तधा प्रविभज्यते । यूपा मणिमयास्तत्र चितयश्च हिरण्मयाः । तत्रेष्ट्वा क्रतुभिः सिद्धः शक्रः सुरगणैः सह । दिव्यच्छायापथस्तत्र नक्षत्राणान्तु मण्डलम् । दृश्यते भास्वरा रात्रौ देवी त्रिपथगा तु सा । अन्तरीक्षं दिवञ्चैव भावयित्वा भुवङ्गता । भवोत्तमाङ्गे पतिता संरुद्धा योगमायया । तस्या ये बिन्दवः केचित् क्रुद्धायाः पतिता भुवि । कृतन्तु तैर्बिन्दुसरस्ततो बिन्दुसरः स्मृतम्" । बिन्दुह्रदोऽप्यत्र पु० ।

बिल भेदने वा चुरा०उभ०पक्षे तु०पर०सक० सेट् । बेलयति ते बिलति । अबीबिलत् त अबेलीत् ।

बिल न०तु०बिल+क । रन्ध्रे १छिद्रे अमरः ।२गुहायाम् ३उच्चैःश्रवसि पु० मेदि० । ४वेतसे शब्दच० ५भल्ले च । ततः कृशा० चतुरर्थ्यां छ । बिलीय तददूरदेशादौ त्रि० ।

बिलकारिन् त्रि० बिलं करोति कृ–णिनि । १गर्त्तकारके स्त्रियां ङीप् । २मूषके पुंस्त्री० राजनि० ।

बिलवास पु० बिले वासोऽस्य । गन्धकजन्तौ राजनि० ।

बिलवासिन् पु० बिले वसति वस-णिनि । १सर्पे शब्दरत्ना० । २गर्त्तवासिनि त्रि० स्त्रियां ङीप् । अलुकस० बिलेवासिन् तत्रार्थे । [स्त्रियां योपधत्वात् टाप् ।

बिलशय पुंस्त्री० बिले शेते शी–अच् । सर्पे शब्दरत्ना० ।

बिलेशय पुंस्त्री० बिले शेते शी–अच् अलुकस० । १सर्पे अमरः २मूषिके जटा० ३गोधायां ४शशे ५शल्लक्यादौ भावप्र० । "गोधाशशभुजङ्गाखु शल्लक्याद्या बिलेशयाः । बिलेशया वातहरा मधुरा रसपाकयोः । बृंहणा बद्धविण्मूत्रा वीर्य्योष्णा अपि कीर्त्तिताः" तत्र तन्मांसगुणा उक्ताः ।

बिल्म न० तु०बिल–बा०मन् । भासने निरु० ११२०। ऋ०२।३५ ।१२। २शिरस्त्राणे यजु०१६।३५। तदस्यास्ति इनि । बिल्मिन् तद्वति त्रि०रुद्रभेदे पु०यजु०तन्मन्त्रे दृश्यम् ।

बिल्ल न० बिलं क्षिप् तं लाति ला–क । १आलबाले त्रिका० । २हिङ्गुनि शब्दच० ।

बिल्लमूला स्त्री बिल्लमिव मूलमस्याः । वाराहीकन्दे शब्दच०

बिल्वसू स्त्री "बिल्वसूर्दशपुत्रा स्यादिति" शब्दर० उक्तायां प्रसूतदशपुत्रायां स्त्रियाम् ।

बिल्व पु० बिल-उल्व्वा०नि० । १स्वनामख्याते वृक्षे अमरः "श्रीफलः शशलिङ्गो शाण्डी हृद्योऽग्निर्मिपत्तहृत् । बालः श्लेष्महरो बल्यो लघुरुष्णश्च पाचनः" भा०प्र० । "बिल्वं बालं कषायोष्णं पाचनं वह्निदीपनम् । संग्राहि तिक्तकटुकं तीक्ष्णं वातकफापहम् । पक्वं सुगन्धि मधुरं दुर्जरं ग्राहि दोषलम् । फलेषु परिपक्वेषु यो गुणः समुदाहृतः । बिल्वादन्यत्र सर्वेषो बिल्वमामं गुणोत्तरम् । कफवातामपित्तघ्नी ग्राहिणी बिल्वपेशिका" राजवल्लभः । "काञ्जिके संस्थितं बिल्वमग्निसन्दीपनं परम्" इति वैद्यकम् । २तत्फले न० मेदि० । ३पलपरिमाणे न० शब्दमाला । तद्वृक्षोत्पत्त्यादिर्यथा "भृगोर्लक्ष्मीश्च या धेनुर्गोरूपा सा गता महीम् । तद्गोमयभवो बिल्वः श्रीश्च तस्मादजायत । "बिल्ववृक्षः प्रियः शम्भोस्तत्र योनिर्भविष्यति । सर्वपुष्पोत्तमः श्रेष्ठो देवाहारो मनोरमः । अच्छेद्यः सर्वलोकानां छेदाच्चायः सदा नृणाम् । ये च पापा दुराचाराः श्रीतरोश्छेदकारिणः । ते रौरवादिनरके पात्यन्ते ब्रह्मणोदिनम् । सदुःखिता भविष्यन्ति नरा दुष्कृतिनः सदा । तत्र देशे भयं नित्यं चिरं राजा न जीवति । न च द्रव्यपतिः कश्चिद् बिल्ववृक्षस्य छेदकः । क्रियते यत्र विच्छेदः सपुष्पफलिनस्तरोः । अनावृष्टिभयं घोरं तस्मिन् देशे प्रजायते" । अग्निपु० । वृहद्धर्मपुराणे १०अ० अस्योत्पत्तिरन्यथोक्ता "लक्ष्म्या शिवाराधनार्थं स्वैकस्तनस्योत्पाटने कृते तुष्टेन शिवेन लक्ष्मीं प्रत्युक्तं यथा "मातः समुद्रतनये ! मा मा छिन्धि स्तनं परम् । यस्ते छिन्नः स्तनो वामो जायतां पुनरेव सः । ज्ञाता ते परमा भक्तिः पूर्णस्तेन मनोरथः । यश्छिन्नः स्तनो भक्त्या मल्लिङ्गोपरि ते शुभे । सोऽस्तु वृक्षः क्षितौ पुण्यो नाम्ना श्रीफल इत्यतः । मूर्त्तिमांस्तव वै भक्तिर्वृक्षः श्रीफलनामकः । त्वत्कीर्त्तये क्षितावास्तां यावच्चन्द्रदिवाकरौ । स तरुर्मम वै लक्ष्मि ! परमः सुप्रियो भवेत् । तत्पत्रेणैव मे पूजा भविष्यति न चान्यथा । स्वर्णरत्नप्रवालादि पुष्पाण्यन्यानि च ध्रुवम् । श्रीफलच्छदलेशस्य कलां नार्हन्ति कोटिकाम् । यथा मे श्रीफलतरुर्यथा लक्ष्म्यालयं मम । तथा प्रियतमं लक्ष्मि ! शिवमूः श्रीफलच्छदः" तत्रैव ११अ० । "धनुः शतप्रमाणं तु वृक्षाद् उत्तमं तीर्थमुच्यते । अधो भूमेस्तथा तीर्थमतीर्थत्रयं सखि ! । ऊर्द्ध्वपत्रं हरो ज्ञेयः पत्रं वामं विधिः स्वयम् । अहं दक्षिणपत्रश्च त्रिपत्रदर्णमत्युत । अस्य छायाश्च पत्रञ्च लङ्घयेन्न पदा स्पृशेत् । हरते लङ्घनादायुः पदा स्पर्शात् श्रियं हरेत्" । इत्यादिना तन्माहात्म्यमुक्त्वा तत्पत्रहरणविधानादि तत्रोक्तं यथा "पञ्चान्तद्वादशीसायमध्याह्नभिन्नकालतः । शाखाभङ्गो न कर्त्तव्यो नैवारोहेत्तथा तरुम् । वरमारुह्य चिन्तुयाच्च शाखाभञ्जनं कचित् । खण्डितैश्च शिवः पूज्यः पत्रैरन्यैश्च खण्डितैः । षण्मासानन्तरं बिल्वपत्रं पर्युषितं भवेत् । पूज्या एतेन वै देवाः सूर्यलम्बोदरौ विना । बिल्ववृक्षवनं यत्र सा तु वाराणसी पुरी । पञ्च बिल्वद्रुमा यत्र तत्र तिष्ठेत् स्वयं हरिः । सप्त बिल्वद्रुमा यत्र तत्र दुर्गायुतो हरः । एको बिल्वतरुर्यत्र तत्र शम्भुर्मया सह । बिल्ववृक्षा यत्र दश तत्र शम्भुर्गणैः सह । एतान्युक्तानि तीर्थानि देवाः सर्वे मरुद्गणाः । यत्र वाञ्छा वृहस्पतेः कोणे ईशाननामके । जायते श्रीफलतरुर्न तत्र विपदः कचित् । पूर्वस्यां सुखदः स स्याद्दक्षिणे यमभीतिहा । पश्चिमे तु प्रजादायी वृक्षो बिल्व उदाहृतः । श्मशाने च नदीतीरे प्रान्तरे वा वनान्तरे । बिल्ववृक्षतलं प्रोक्तं सिद्धपीठस्थलं समम् । न मध्यप्राङ्गणे वृक्षं स्थापयेत् श्रीफलाख्यकम् । दैवाद् यदि प्रजायेत तदा शिववदर्चयेत् । चैत्रादिचतुरो मासान् शम्भवे परमात्मने । दत्तं स्याद् बिल्वपत्रैकं लक्षधेनुसमं सुराः । मध्याह्नकाले ये मर्त्त्या बिल्वं कुर्युः प्रदक्षिणम् । तैः सुमेरुर्गिरिवरः कृतएव प्रदक्षिणम् । न छिन्द्यात् श्रीफलतरुं न दहेत् काष्ठमेव च । विना ब्राह्मणयज्ञार्थं पतितो बिल्वविक्रयी । पक्वबिल्वसमुद्भूतं यो धत्ते मूर्ध्नि मानवः । यमाधिकारो नास्य स्यात् स्पृतः पापोपपातकैः । बिल्वपत्रं फलं बीजं भूमौ पतितमीश्वरः । स्वयं गृह्णाति शिरसा वैयर्थ्यभयशङ्कितः । चैत्रादिचतुरो मासान् सिञ्चेद्बिल्वतरुं कृती । यथा स्निग्धो भवेद्वृक्षस्तथा तत्पितरोऽपि च । चैत्रादिचतुरो मासान् सदा भ्रमति शङ्करः । नवीनबिल्वपत्रार्थी भुक्तिमुक्तिप्रदायकः । हरिद्वानगरे यत्र वैद्यनाथो महेश्वरः । तत्रालयो बिल्ववृक्षः स्वर्गवृक्ष उदाहृतः । कामरूपे कामतरुः कामाख्यायुक्तस्तथादिमः । काञ्चीपुरे पुरः प्रोक्तः श्रीफलोऽक्षयपुण्यदः । तेऽपि तीर्थविशेषाः स्युस्तीर्थेष्वपि सदाऽव्ययाः ।" वृह० धर्मपु० ११अ० । "तत्फले तत्प्रमाणे-

वा तत्पत्रैर्यः प्रपूजयेत्। तत्काष्ठचन्दनैर्वापि स मे भक्तः स मे प्रियः। तत्काष्ठचन्दनं भाले यो धारयति सम्भ्रमात्। तत्तु शिवबुद्ध्या सा नमेद्देवी सुदान्विता। अतस्तच्चन्दनं देवि! न धारयति कश्चन। तत्पत्रं तत् प्रसूनं वा कदापि धारयेन्न हि। तस्य मूले महेशानि! प्राणांस्त्यजति यो नरः। रुद्रदेहो भवेत् सत्यं पाप कोटियुतोऽपि सन्" योगिनीतन्त्रे पटले।

"बिल्ववृक्षं तथा देवि! भगवान् शङ्करः स्वयम्। बिल्ववृक्षतले स्थित्वा यदि प्राणांस्त्यजेत् सुधीः। तत्-क्षणान्मोक्षमाप्नोति किन्तस्य तीर्थकोटिभिः। यत्र ब्रह्मा-दयो देवास्तिष्ठन्ति मुक्तिहेतवे। बिल्ववृक्षतले स्थानं यदि विष्ठादिपूरितम्। तदेव शाङ्करं क्षेत्रं सर्वतीर्थमयं सदा। सर्वपीठमयं तत्तु सर्वदेवमयं सदा। न त्यजेत् शाङ्करं क्षेत्रं न च गङ्गां त्यजेत् प्रिये!। समीपे स च चार्वाङ्गि! बिल्ववृक्षो यदि प्रिये!। काशीपुरसमं तत्तु तत्र प्राणान् त्यजेद् यदि। किन्तस्य कोटितीर्थेन काशीवासेन किं प्रिये!। पुरश्चरणरत्नोल्लासे १० पटले। तद्दानविधिर्यथा

"पत्रं वा यदि या पुष्पं फलं नेष्टमधोमुखम्। यथोत्-पन्नं तथा देयं बिल्वपत्राण्यधोमुखम्।" मातृकातन्त्रे ५५ पटले। "शिव उवाच। शृणु देवि! प्रवक्ष्यामि रहस्यं त्रिजटात्मकम्। पत्रं ब्रह्ममयं देवि! अद्भुत वर वर्णिनि!। श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः। विष्णुप्रीतिकरश्चैव मम प्रीतिकरः सदा। ब्रह्मविष्णु-शिवाः पत्रे वृन्तञ्च शक्तिरूपकम्। वृन्तमूले तु वज्रं स्यात् पत्रे ब्रह्मपदं प्रिये!। त्रिजटापत्रकेणैव हरं वा हरिमर्च्चयेत्। कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः। पत्रं पुष्पं फलं तोयं नैवेद्यं धूपदीपकम्। दत्त्वा यद्यत् फलं प्राप्तं तस्मात् कोटिगुणं भवेत्। सर्वैरर्च्चनतो देवि! त्रिजटात्मसमर्पणम्। कैवल्यदो हरिश्चैव दासोऽहं त्वत्-स्वरूपताम्। त्वयि कैवल्यदं ज्ञानं धर्मकामार्थदं प्रिये!। वज्रहीनमिदं देवि! प्राप्नुयाद्वाञ्छितं फलम्। सवज्रे म्रियते न्यूनं वज्राघातेन पार्वति!। तस्माच्च साधकेन्द्रेण वज्रहीनं प्रदीयते"। 'शाखां गृहीत्वा यो गच्छेत् सर्वसिद्धिमवाप्नुयात्। ऊर्द्ध्वं सुदर्शनं रक्षेदधः पशुपति-स्तथा। पुरो माहेश्वरी रक्षेत् पृष्ठे च शूलधारिणी। दक्षपार्श्वे च श्रीनाथो वामपार्श्वे प्रजापतिः। चन्द्र सूर्य्यौ धृतौ कलमहंवादकरौ सदा"। ज्ञानभैरव-तन्त्रे ३ पटले। बिल्वशब्दस्य वर्ग्यवोपधत्वेऽपि सुद्रा-

क्षरे तादृशस्यौ भावात् अन्त्यस्थबोपधत्वं पूजितं सर्वत्र तस्याशुद्धत्वं बोध्यम्। [आ॰ २५ अ॰।

बिल्वक न॰ १तीर्थभेदे भा॰अनु॰ २५ अ॰। २नागभेदे भा॰

बिल्वकादि पु॰ "बिल्वादिभ्यश्छस्य लुक्" पा॰ उक्ते छमन्त्रय लुगनिमित्ते शब्दगणे स च पा॰ ग॰ उक्तो यथा "बिल्व वेणु वेत्र वेतस तृण इक्षु काष्ठ कपोत तृण कुञ्चा (तृणत्वञ्च)। तत्र (नलोपश्च)"बैल्वकीयायां भूमौ भवाः बैल्वकाः तस्य लुक् न कुको निवृत्तिः।

बिल्वकीय त्रि॰ बिल्वाः सन्ति यस्यां नडा॰ छ कुक्च। बिल्व-युक्तभूमौ ततो वहुत्वे बिल्वका॰ कमातस्य लुक्।

बिल्वज त्रि॰बिल्वात् जायते जन-ड। मालूरजाते। बिल्वस्य विषयः राजन्या॰ वुञ्। बैल्वजक तद्विषये।

बिल्वतेजस् पु॰ नागभेदे भा॰ आ॰ ५७ अ॰।

बिल्वपत्र पु॰१नागभेदे भा॰भी॰ १०२। ६त॰२मालूरस्य पत्रे न॰ "बिल्वपत्रकृता पीड़ दुर्गोत्सवपद्धतिः।

बिल्वपाण्डर पु॰ नागभेदे भा॰आ॰ ३५ अ॰।

बिल्वपेषिका स्त्री बिल्वस्य पेषः साधनत्वेन अस्त्यस्याः ठन्। (बेलशुँठ) शुष्कबिल्वखण्डे राजनि॰।

बिल्ववन न॰ ६त॰। मालूरसमुदाये तस्य विषयः राजन्या॰ वुञ्। बैल्ववनक तद्विषये।

बिल्वा स्त्री॰ बिल-भेदने उल्वा॰नि॰। हिङ्गुपत्र्यां राजनि।

बिल्वोदकेश्वर पु॰। शिवमूर्त्तिभेदे तस्याविर्भवकथा हरिवं॰ १२६ अ॰। [अवेसीत् बिवेस।

बिस क्षेपे दि॰ पर॰सक॰सेट्। बिस्यति। इरित् अबिसत्-

बिस न॰ बिस-क। मृणाले अमरः। [अमरः।

बिसकण्ठिका स्त्री बिसमिव कण्ठोऽस्याः कप्। बलाकायाम्

बिसकण्ठिन् पु॰बिसमिव कण्ठोऽस्त्यस्य इनि। बके राजनि॰

बिसकुसुम न॰ बिसस्थितं कुसुमम् शा॰त॰। कमले राजनि॰। बिसप्रसून तत्रार्थे अमरः। [खननकर्त्तरि।

बिसखा त्रि॰ बिसं मृणालं खनति खन-विट् डा। मृणाल

बिसग्रन्थि पु॰ ६त॰। मृणालग्रन्थौ। तस्य जलकालुष्यनि-वारकता सुश्रुते उक्ता यथा "सप्त कलुषस्य प्रसाधनानि भवन्ति। तद्यथा कतकगोमे-दकबिसग्रन्थिशैवालमूलवस्त्राणि मुक्तामणिश्चेति"।

बिसनाभि स्त्री बिसं नाभिरिवास्याः। पद्मिन्यां त्रिका॰

बिसनालिका स्त्री बिसस्य नालिकेव। मृणाले शब्दार्थ॰ कल्प॰। तस्य सच्छिद्रकनालत्वात् तथात्वम्।

बिसल न॰बिस-कलच्। किसलये त्रिका॰।

बिसवत् त्रि॰ बिस+चतुरर्थ्यां मतुप् मस्य वः। स्त्रियाम् कुमुदादौ स्त्रियां ङीप्।

बिसवर्त्मन् पु॰न॰ बिसाख्ये नेत्रवर्त्मगतरोगभेदे सुश्रुतः। “शून्यं यद्वर्त्म बहुभिः सूक्ष्मैश्छिद्रैः समन्वितम्। बिसमन्तर्जल इव बिसवर्त्मेति तन्मतम्”।

बिसिनी स्त्री बिस+पुष्करा॰ इनि। १पद्मिन्याम् अमरः। २मृणालादियुक्ते देशे ३तत्समुदये च। [पादी।

बिसिल त्रि॰ बिस+चतुरर्थ्याम् काश्या॰ इल। मृणालसमी·

बीभत्स त्रि॰बध-निन्दायां स्वार्थे सन् कर्मणि घञ्। १पापिष्ठे २जुगुप्सिते, ३घृणाविषये च ४तद्वति त्रि॰ मेदि॰। ५नाट्यादौ प्रसिद्धे जुगुप्सास्थायिभावके रसभेदे,पु॰अमरः तद्रूपविषये ६विकृतमांसादौ त्रि॰। “शृङ्गारहास्यकरुण-रौद्रवीरभयानकाः। बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः” रसानुद्दिश्य सा॰द॰वर्णितो यथा “जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः। नीलवर्णो महाकालदैवतोऽयमुदाहृतः। दुर्गन्धमांसपिशितमेदांस्यालम्बनं मतम्। तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम्। निष्ठीवनास्यवलननेत्रसङ्कोचनादयः। अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः। मोहापस्मारादिरोग। व्याधिश्च मरणादयः” तल्लिरुक्तिः। ७अर्जुने पु॰ मेदि॰।

बीभत्सु पु॰ बध-निन्दने स्वार्थे सन् उ। १अर्जुने। भा॰ वि॰ ४४अ॰ अस्य निरुक्तिश्च अन्यथोक्ता यथा “न कुर्य्यां कर्म बीभत्सं युध्यमानः कथञ्चन। तेन देवमनुष्येषु बीभत्सुरिति विश्रुतः”। बीभत्सुरिति भद्रं कल्याणं सुखे चेत्यस्य सनि रूपम्” नीलक॰। तत्र पृषो॰ इटोऽभावो नलोपश्च। अन्ये तु बीभत्सकर्मरहितत्वात् विरोधिलक्षणया तन्निन्दनकारित्वाद्वा तथात्वमित्याहुः।

बुक त्रि॰बुक्क-अच् पृषो॰उपधालोपः। भषणशब्दकारके ततः ऐश्या॰ चतुरर्थ्याम् इनि। बुकिन् भषणशब्दकारकसमीपादौ त्रि॰।

बुक्क कुक्कुरादिशब्दे कथने च वा चु॰उभ॰पक्षे भ्वा॰ पर॰सक॰ सेट्। बुक्कयति ते बुक्कति अबुबुक्कत् त इदित् अबुक्कत् अबुक्कीत्। “कथने चुरा॰कथादिगणे तु भ्वा॰” रमानाथः।

बुक्क न॰ बुक्क-अच। १हृदयस्थे मांसपिण्डे २अग्रमांसे ३हृदये च अमरः अस्य स्त्रीत्वमपि स्त्रीत्वे टाप् गौ॰ङीष् वा। “बुक्काग्रान्तर्युवतिनिकटे प्रोद्गताक्रोन राधा” उद्भटः। ४छागे पु॰(बोका)त्रिका॰। ५समये च पु॰। ६शोणिते भरतः स्त्री टाप्। ५शौ॰ बुक्कशब्दोऽपि हृदये।

बुक्कन न॰ बुक्क-भावे ल्युट्। भषणे कुक्कुरादिशब्दे।

बुक्कन् पु॰ बुक्क-कनिन्। बुक्कशब्दार्थे भरतः।

बुक्कस पुंस्त्री॰पुक्कस+पृषोदरादि। चण्डाले हेमचन्द्र। [मुकुटः।

बुक्काग्रमांस न॰६त॰। हृदयस्थे मांसपिण्डाकारे अग्रमांसे राय-

बुक्कार पु॰ बुक्कं भषणशब्दमृच्छति ऋ-अण्। सिंहध्वनौ हारा॰

बुट हिंसायां चुरा॰उभ॰ पक्षे भ्वा॰पर॰सक॰सेट्। बोटयति ते। बोटति। अबुबुटत् त। अबोटीत्। [बुबोड।

बुड त्यागे संवरणे च तु॰कुटा॰सक॰ सेट्। बुडति अबुडीत्

बुडिल पु॰तुदा॰बुड-इलच्। अश्वतराश्वापत्ये राजभेदे छा॰ उ॰५।१०।१। [अबुदत्-अबोदीत् अबोदिष्ट। उदित् क्त्वा वेट्।

बुद निशामने (आलोचने)भ्वा॰उ॰सक॰सेट्। बोदति ते। इरित्

बुद्ध पु॰बुध क्त। १भगवतोऽवतारभेदे येन वेदतत्कर्मणोर्निन्दा कृता।२जागरिते,३ज्ञातवति च त्रि॰। ४पण्डिते पु॰मेदि॰। बुद्धश्च विष्णोः चतुर्विंशत्यवतारमध्ये एकविंशोऽवतारो यथोक्तं “ततः कलौ संप्रवृत्ते सम्मोहाय सुरद्विषाम्। बुद्धो नाम्नाऽञ्जनसुतः कीकटेषु भविष्यति” भाग॰१स्क॰ । बुद्धेन प्रोक्तम् अण् तद्वेत्ति अण्। बौद्धप्रोक्तशास्त्रे तदभिज्ञे च त्रि॰। तद्दर्शनभेदतन्मतादिकं सर्वद॰सं॰दर्शितं यथा “अत्र बौद्धैरभिधीयते यदव्यधायि अविनाभावो दुर्बोध इति तदसाधीयः तादात्म्यतदुत्पत्तिभ्यामविनाभावस्य सुज्ञानत्वात्। तदुक्तम् “कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमो दर्शनान्तरदर्शनादिति” अन्वयव्यतिरेकावविनाभावनिश्चायकाविति। ननु पक्षे साध्यसाधनयोरव्यभिचारो दुरवधारणो भवेत्, भविष्यति, भूते अनुपलभ्यमाने च व्यभिचारशङ्काया अनिवारणात्। ननु तथाविधस्थले तावकेऽपि मते व्यभिचारशङ्का दुष्परिहरेति चेत् मैवं दोषः विनापि कारणं कार्य्यमुत्पद्यतामित्येवंविधायाः शङ्काया व्याघातावधिकतया निवृत्तत्वात्। तदेव ह्याशङ्क्येत यस्मिन्नाशङ्क्यमाने व्याघातादयो नावतरेयुः तदुक्तम्। “व्याघातावधिराशङ्केति” तस्मात् तदुत्पत्तिनिश्चयेन अविनाभावो निश्चीयते तदुत्पत्तिनिश्चयश्च कार्य्यहेत्वोः प्रत्यक्षोपलम्भानुपलम्भपञ्चकनिबन्धनः। कार्य्यस्योत्पत्तेः प्रागनुपलम्भः१कारणोपलम्भे २सत्युपलम्भः३उपलब्धस्य पश्चात् कारणानुपलम्भात्४अनुपलम्भ५ इति पञ्चकारण्या धूमधूमध्वजयोः कार्य्यकारणभावो निश्चीयते। तथा तादात्म्यनिश्चयेनाप्यविनाभावो निश्चीयते यदि शिंशपा वृक्षत्वमतिपतेत् स्वात्मानमेव जह्यादिति विपक्षे बाधकप्रवृत्तेः (अप्रवृत्ते

सु बाधकं भूयःसहभावोपलम्भेऽपि व्यभिचारशङ्कायाः को निवारयिता। शिंशपावृक्षयोश्च तादात्म्यनिश्चयो वृक्षोऽयं शिंशपेति सामानाधिकरण्यबलादुपपद्यते। न ह्यत्यन्ताभेदे तत् सम्भवति पर्य्यायत्वेन युगपदपि प्रयोगायोगात् नाप्यत्यन्तभेदे गवाश्वयोरिवानुपलम्भात्। तस्मात् कार्य्यात्मानौ कारणमात्मानमनुमापयत इति सिद्धम्। यदि कश्चित् प्रामाण्यमनुमानस्य नाङ्गीकुर्य्यात् तं प्रतिब्रूयात् अनुमानं न भवतीत्येतावन्मात्रं प्रमाणं तत्र न किञ्चन साधनमुपन्यस्यते उपन्यस्यते वा। न प्रथमः एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायात्। नापि चरमः अनुमानं प्रमाणं न भवतीति ब्रुवाणेन त्वया अविरुद्धवचनस्योपन्यासे मम माता वन्ध्येतिवद् व्याघातापातात्। किञ्च प्रमाणतदाभासव्यवस्थापनं तत्समानजातीयत्वादिति वदता भवतैव स्वीकृतं स्वभावानुमानम्। परगता विप्रतिपत्तिस्तु वचनलिङ्गेनेति ब्रुवता कार्य्यलिङ्गकमनुमानम्। अनुपलब्ध्या कञ्चिदर्थं प्रतिषेधतानुपलब्धिलिङ्गकमनुमानम्। तथाचोक्तं तथागतैः "प्रमाणान्तरसामान्यस्थितेरन्यधियो गतेः। प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचिदिति" पराक्रान्तमत्र सूरिभिरिति ग्रन्थभूयस्त्वभयादुपरम्यते। ते च बौद्धाश्चतुर्विधया भावनया परमपुरुषार्थं कथयन्ति। ते च माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाभिः प्रसिद्धा बौद्धा यथाक्रमं सर्वशून्यत्व-बाह्यशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षत्ववादानातिष्ठन्ते। यद्यपि भगवान् बुद्ध एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यं यथा गतोऽस्तमर्क इत्युक्ते जारचौरानूचानादयः स्वेष्टानुसारेणाभिसरणपरस्वहरणसदाचरणादिसमयं बुध्यन्ते। सर्वं क्षणिकं क्षणिकम्, दुःखं दुःखं, स्वलक्षणं स्वलक्षणं, शून्यं शून्यमिति भावनाचतुष्टयमुपदिष्टं द्रष्टव्यम्। तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यं यत् सत् तत् क्षणिकं यथा जलधरपटलं सन्तश्चामी भावा इति। न चायमसिद्धो हेतुः अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य नीलादिक्षणानां प्रत्यक्षसिद्धत्वात् व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिरिति न्यायेन व्यापकक्रमाक्रमव्यावृत्तावक्षणिकात् सत्त्वव्यावृत्तेः सिद्धत्वाच्च। तच्चार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति "परस्परविरोधे हि न प्रकारान्तरस्थितिः। नैकतापि विरुद्धानामुक्तिमात्रविरोधतः"

इति न्यायेन व्याघातस्योद्भटत्वात्। तौ च क्रमाक्रमौ स्थायिनः सकाशाद् व्यावर्त्तमानौ अर्थक्रियामपि व्यावर्त्तयन्तौ क्षणिकत्वपक्ष एव सत्त्वं व्यवस्थापयत इति सिद्धम्। नन्वक्षणिकस्यार्थक्रियाकारित्वं किं न स्यादिति चेत् तदयुक्तं विकल्पासहत्वात् तथा हि वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोः किमर्थक्रिययोः स्थायिनः सामर्थ्यमस्ति ? नो वा ? आद्ये तयोर्निराकरणप्रसङ्गः समर्थस्य क्षेपायोगात् यत् यदा यत्करणसमर्थं तत् तदा तत्करोत्येव यथा सामग्री स्वकार्य्यं समर्थश्चायं भावः इति प्रसङ्गानुमानाच्च। द्वितीयेऽपि कदापि न कुर्य्यात् सामर्थ्यमात्रानुबन्धित्वादर्थक्रियाकारित्वस्य यत् यदा यन्न करोति तत् तदा तत्रासमर्थं यथा हि शिलाशकलमङ्कुरे, न चैष वर्त्तमानार्थक्रियाकरणकाले वृत्तवर्त्तिष्यमाणे अर्थक्रिये करोतीति तद्विपर्य्ययाच्च। ननु क्रमवत्सहकारिणः स्थायिनः अतीतानागतयोः क्रमेण करणमुपपद्यते इति चेत् तत्रेदं भवान् पृष्टो व्याचष्टां सहकारिणः किं भावस्योपकुर्वन्ति ? न वा ? न चेत् नापेक्षणीयास्ते अकिञ्चित्कुर्वतां तेषां तादर्थ्यायोगात्। उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्भिद्यते ? न वा ? भेदपक्षे आगन्तुकस्यैव तस्य कारणत्वं स्यात् न भावस्याक्षणिकस्य, आगन्तुकातिशयान्वयव्यतिरेकानुविधायित्वात् कार्य्यस्य। तदुक्तम् "वर्षातपाभ्यां किं व्योम्नश्चर्म्मण्यस्ति तयोः फलम् ?। चर्म्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फल इति"। अथ भावस्तैः सहकारिभिः सहैव कार्य्यं करोतीति स्वभाव इति चेत् अङ्ग तर्हि सहकारिणो न जह्यात् प्रत्युत पलायमानानपि पाशेन बद्ध्वा तत्कार्य्यं कुर्य्यात् स्वभावस्यानपायात्। किञ्च सहकारिजन्योऽतिशयः किमतिशयान्तरमारभते न वा उभयथापि प्रागुक्तदूषणपाषाणवर्षणप्रसङ्गः। अतिशयान्तरारम्भपक्षे बहुमुखानवस्थादौस्थ्यमपि स्यात् अतिशये जनयितव्ये सहकार्य्यन्तरापेक्षायां तत्परम्परापात इत्येकानवस्थाऽऽस्थेया, तथाहि सहकारिभिः सलिलपवनादिभिः पदार्थसार्थैराधीयमाने बीजस्यातिशये बीजमुत्पादकमभ्युपेयम् अपरथा तदभावेऽप्यतिशयः प्रादुर्भवेत् बीजञ्चातिशयमादधानं सहकारिसापेक्षमेवाधत्ते अन्यथा सर्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत। तस्मादतिशयार्थमपेक्षमाणैः सहकारिभिरति-

बिसवत् त्रि॰ बिस+चतुरर्थ्यां मतुप् मस्य वः। कुमुदादि° नड़ादौ स्त्रियां ङीप्।

बिसवर्त्मन् पु॰न॰ बिसाख्ये नेत्रवर्त्मगतरोगभेदे सुश्रुतः। "शून्यं यद्वर्त्म बहुभिः सूक्ष्मैश्छिद्रैः समन्वितम्। बिसमन्तर्जल इव बिसवर्त्मेति तन्मतम्"।

बिसिनी स्त्री बिस+पुष्करा॰ इनि। १पद्मिन्याम् अमरः। २मृणालादियुक्ते देशे ३तत्समुदये च। [पादौ।

बिसिल त्रि॰ बिस+चतुरर्थ्याम् काश्या॰ इल। मृणालसमी॰

बीभत्स त्रि॰बध-निन्दायां स्वार्थे सन् कर्मणि घञ्। १पापिनि २जुगुप्सिते, ३हृणाविषये च ४तद्धेतौ त्रि॰ मेदि॰। ५नाट्यादौ प्रसिद्धे जुगुप्सास्थायिभावके रसभेदे,पु॰अमरः तद्रसविषये ६विकृतमांसादौ त्रि॰। "शृङ्गारहास्यकरुण-रौद्रवीरभयानकाः। बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः" रसानुद्दिश्य सा॰द॰लक्षितो यथा "जुगुप्सा-स्थायिभावस्तु बीभत्सः कथ्यते रसः। नीलवर्णो महा-कालदैवतोऽयमुदाहृतः। दुर्गन्धमांसपिशितमेदांस्यालम्बनं मतम्। तत्रैव कृमिपाताद्युद्दीपनमुदाहृतम्। निष्ठीव-नास्यवलननेत्रसङ्कोचनादयः। अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः। मोहापस्मारादिरोग। व्याधिश्च मर-णादयः" तल्लिरुक्तिः। ७अर्जुने पु॰ मेदि॰।

बीभत्सु पु॰ बध-निन्दने स्वार्थे सन् उ। १अर्जुने। भा॰ वि॰ ४४अ॰ अस्यनिरुक्तिर अन्यथोक्ता यथा "न कुर्य्यां कर्म बीभत्सं युध्यमानः कथञ्चन। तेन देवमनुष्येषु बीभत्सुरिति विश्रुतः"। बीभत्सुरिति भटि कल्याणे सुखे चेत्यस्य सनि रूपम्" नीलक॰। तत्र पृषो॰ इटोऽभावो नलोपश्च। अन्ये तु बीभत्सकर्मरहितत्वात् विरोधिवञ्चनया तन्निन्दनकारित्वाद्वा तथात्वमित्याहुः।

बुक त्रि॰बुक्क-अच् पृषो॰उपधालोपः। भषणशब्दकारके ततः ऐत्या॰ चतुरर्थ्याम् इनि। बुकिन् भषणशब्दकारकस-मीपादौ त्रि॰।

बुक्क बुक्क,रादिशब्दे कथने च वा चु॰उभ॰पक्षे भ्वा॰ पर॰सक॰ सेट्। बुक्कयति ते बुक्कति।अबुबुक्कत् त इरित् अबुक्कत् अबुक्कीत्।"कथने चुरा॰कथादिगणे तु भ्वा॰"रमानाथः।

बृक्क न॰ बुक्क-अच। १हृदयस्थे मांसपिण्डे २अग्रमांसे ३हृदये च अमरः अस्य क्लीवत्वमपि स्त्रीत्वे टाप् गौ॰ङीष् वा। "वृक्काग्रान्तर्युवतिनिकटे प्रोदरायेन राधा" उद्भटः। ४छागे पु॰(बोका)त्रिका॰।५समये च पु॰।६शोणिते भरत स्त्री टाप्। ५धौ॰ वृक्कशब्दे अपि हृदये।

बुक्कन न॰ बुक्क-भावे ल्युट्। भषणे कुक्कुरादिशब्दे

बुक्कन् पु॰ बुक्क-कनिन्। बुक्कशब्दार्थे भरतः।

बुक्कस पुंस्त्री॰पुक्कस+पृषोदरादि। चण्डाले हेमचन्द्रः। [मुकुटः।

बृक्काग्रमांस न॰६त॰। हृदयस्थे मांसपिण्डाकारे अग्रमांसे राय-

बुक्कार पु॰ बुक्कां भषणशब्दमृच्छति ऋ-अण्। सिंहध्वनौ हारा॰

बुट हिंसायां चुरा॰उभ॰ पक्षे भ्वा॰पर॰सक॰सेट्। बोटयति ते। बोटति। अबुबुटत् त। अबोटीत्। [बुबोड़

बुड त्यागे संवरणे च तु॰कुटा॰सक॰ सेट्। बुडति अबुडीत्

बुड़िल पु॰तुदा॰बुड-इलच्। अश्वतराश्वापत्ये राजभेदे छा॰ उ॰५।१०।१। [अबुदत्-अबोदीत् अबोदिष्ट। उदित् क्त्वा वेट्।

बुद् निशामने (आलोचने)भ्वा॰उ॰सक॰सेट्। बोदति ते। इरित्

बुद्ध पु॰बुध क्त। १भगवतोऽवतारभेदे येन वेदतत्कर्मणोर्निन्दा-कृता।२जागरिते,३ज्ञातवति च त्रि॰। ४पण्डिते पु॰मेदि॰। बुद्धश्च विष्णोः चतुर्विंशत्यवतारमध्ये एकविंशोऽवतारो यथोक्तं "ततः कलौ संप्रवृत्ते सम्मोहाय सुरद्विषाम्। बुद्धो नाम्नाऽञ्जनसुतः कीकटेषु भविष्यति" भाग॰१स्क॰ ।६ बुद्धेन प्रोक्तम् अण् तदेति अण्। बौद्धप्रोक्तशास्त्रे तद्-भिन्ने च त्रि॰। तद्दर्शनभेदतन्मतादिकं सर्वद॰सं॰दर्शितं यथा "अत्र बौद्धैरभिधीयते यद्यप्यपि अविनाभावो दुर्बोध इति तदसाधीयः तादात्म्यतदुत्पत्तिभ्यामविनाभावस्य सु-ज्ञानत्वात्। तदुक्तम् "कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमो दर्शनान्तरदर्शनादिति" अन्वयव्यतिरेकावविनाभावनिश्चायकाविति। नतु पक्षे सा-ध्यसाधनयोरव्यभिचारो दुरवधारणो भवेत्, भविष्यति, भूते अनुपलभ्यमाने च व्यभिचारशङ्काया अनिवार-णात्। ननु तथाविधस्थले तावकेऽपि मते व्यभि-चारशङ्का दुष्परिहरेति चेत् मैवं वोचः विनापि कारणं कार्य्यमुत्पद्यतामित्येवंविधायाः शङ्काया व्याघातावधिकतया निवृत्तत्वात्। तदेव ह्याशङ्क्येत यस्मि-न्नाशङ्क्यमाने व्याघातादयो नावतरेयुः तदुक्तम्। "व्याघातावधिराशङ्केति" तस्मात् तदुत्पत्तिनिश्चयेन अवि-नाभावो निश्चीयते तदुत्पत्तिनिश्चयश्च कार्य्यहेत्वोः प्रत्यक्षो-पलम्भानुपलम्भपञ्चकनिबन्धनः। कार्य्यस्योत्पत्तेः प्रागनु-पलम्भः१कारणोपलम्भे २सत्युपलम्भः३उपलब्धस्य पश्चात् कारणानुपलम्भात्४अनुपलम्भ५ इति पञ्चकारण्या धूमधूम-ध्वजयोः कार्य्यकारणभावो निश्चीयते। तथा तादात्म्यनि-श्चयेनाप्यविनाभावो निश्चीयते यदि शिंशपा वृक्षत्वमतिपतेत् स्वात्मानमेव जह्यादिति विपक्षे बाधकप्रवृत्तेः (अप्रवृत्ते

स्य बाधके भूयःसहभावोपलम्भेऽपि व्यभिचारशङ्कायाः को निवारयिता। शिंशपावृक्षयोश्च तादात्म्यनिश्चयो वृक्षोऽयं शिंशपेति सामानाधिकरण्यबलादुपपद्यते। न ह्यत्यन्ताभेदे तत् सम्भवति पर्य्यायत्वेन युगपत्प्रयोगायोगात् नाप्यत्यन्तभेदे गवाश्वयोरिवानुपलम्भात्। तस्मात् कार्य्यात्मानौ कारणमात्मानमनुमापयत इति सिद्धम्। यदि कश्चित् प्रामाण्यमनुमानस्य नाङ्गीकुर्य्यात् तं प्रति ब्रूयात् अनुमानं न भवतीत्येतावन्मात्रं प्रमाणं तत्र न किञ्चन साधनमुपन्यस्यते उपन्यस्यते वा। न प्रथमः एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायात्। नापि चरमः अनुमानं प्रमाणं न भवतीति ब्रुवाणेन त्वया अविरुद्धवचनस्योपन्यासे मम माता वन्ध्येतिवद् व्याघातापातात्। किञ्च प्रमाणतदाभासव्यवस्थापनं तत्समानजातीयत्वादिति वदता भवतैव स्वीकृतं स्वभावानुमानम्। परगता विप्रतिपत्तिस्तु वचनलिङ्गेनेति ब्रुवता कार्य्यलिङ्गकमनुमानम्। अनुपलब्ध्या कञ्चिदर्थं प्रतिषेधयतानुपलब्धिलिङ्गकमनुमानम्। तथाचोक्तं तथागतैः "प्रमाणान्तरसामान्यस्थितेरन्यधियो गतेः। प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचिदिति" पराक्रान्तञ्चात्र सूरिभिरिति ग्रन्थभूयस्त्वभयादुपरम्यते। ते च बौद्धाश्चतुर्विधया भावनया परमपुरुषार्थं कथयन्ति। ते च माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाभिः प्रसिद्धा बौद्धा यथाक्रमं सर्वशून्यत्व-बाह्यशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षत्ववादानातिष्ठन्ते। यद्यपि भगवान् बुद्ध एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यं यथा गतोऽस्तमर्क इत्युक्ते जारचौरानूचानादयः स्वेष्टानुसारेणाभिसरणपरस्वहरणसदाचरणादिसमयं बुध्यन्ते। सर्वं क्षणिकं क्षणिकम्, दुःखं दुःखं, स्वलक्षणं स्वलक्षणं, शून्यं शून्यमिति भावनाचतुष्टयमुपदिष्टं द्रष्टव्यम्। तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यं यत् सत् तत् क्षणिकं यथा जलधरपटलं सन्तश्चामी भावा इति। न चायमसिद्धो हेतुः अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य नीलादिक्षणानां प्रत्यक्षसिद्धत्वात् व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिरिति न्यायेन व्यापकक्रमाक्रमव्यावृत्तावक्षणिकात् सत्त्वव्यावृत्तेः सिद्धत्वाच्च। तच्चार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति "परस्परविरोधे हि न प्रकारान्तरस्थितिः। नैकतापि विरुद्धानामुक्तिमात्रविरोधतः" इति न्यायेन व्याघातस्योद्भटत्वात्। तौ च क्रमाक्रमौ स्थायिनः सकाशाद् व्यावर्त्तमानौ अर्थक्रियामपि व्यावर्त्तयन्तौ क्षणिकत्वपक्ष एव सत्त्वं व्यवस्थापयत इति सिद्धम्। नन्वक्षणिकस्यार्थक्रियाकारित्वं किं न स्यादिति चेत् तदयुक्तं विकल्पासहत्वात् तथा हि वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोः किमर्थक्रिययोः स्थायिनः सामर्थ्यमस्ति ? नो वा ? आद्ये तयोरनिराकरणप्रसङ्गः समर्थस्य क्षेपायोगात् यत् यदा यत्करणसमर्थं तत् तदा तत्करोत्येव यथा सामग्री स्वकार्य्यं समर्थश्चायं भावः इति प्रसङ्गानुमानाच्च। द्वितीयेऽपि कदापि न कुर्य्यात् सामर्थ्यमात्रानुबन्धित्वादर्थक्रियाकारित्वस्य यत् यदा यन्न करोति तत् तदा तत्रासमर्थं यथा हि शिलाशकलमङ्कुरे, न चैष वर्त्तमानार्थक्रियाकरणकाले वृत्तवर्त्तिष्यमाणे अर्थक्रिये करोतीति तद्विपर्य्ययाच्च। ननु क्रमवत्सहकारिणः स्थायिनः अतीतानागतयोः क्रमेण करणमुपपद्यते इति चेत् तत्रेदं भवान् पृष्टो व्याचष्टां सहकारिणः किं भावस्योपकुर्वन्ति ? न वा ? न चेत् नापेक्षणीयास्ते अकिञ्चित्कुर्वतां तेषां तादर्थ्यायोगात्। उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्भिद्यते ? न वा ? भेदपक्षे आगन्तुकस्यैव तस्य कारणत्वं स्यात् न भावस्याक्षणिकस्य, आगन्तुकातिशयान्वयव्यतिरेकानुविधायित्वात् कार्य्यस्य। तदुक्तम् "वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम् ?। चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फल इति"। अथ भावस्तैः सहकारिभिः सहैव कार्य्यं करोतीति स्वभाव इति चेत् अङ्ग तर्हि सहकारिणो न जह्यात् प्रत्युत पलायमानानपि पाशेन बद्ध्वा तत्कार्य्यं कुर्य्यात् स्वभावस्यानपायात्। किञ्च सहकारिजन्योऽतिशयः किमतिशयान्तरमारभते न वा उभयथापि प्रागुक्तदूषणपाषाणवर्षणप्रसङ्गः। अतिशयान्तरारम्भपक्षे बहुमुखानवस्थादौस्थ्यमपि स्यात् अतिशये जनयितव्ये सहकार्य्यन्तरापेक्षायां तत्परम्परापात इत्येकानवस्थाऽऽस्थेया, तथाहि सहकारिभिः सलिलपवनादिभिः पदार्थसार्थैराधीयमाने बीजस्यातिशये बीजमुत्पादकमभ्युपेयम् अपरथा तदभावेऽप्यतिशयः प्रादुर्भवेत् बीजञ्चातिशयमादधानं सहकारिसापेक्षमेवाधत्ते अन्यथा सर्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत। तस्मादतिशयार्थमपेक्षमाणैः सहकारिभिरति-

शयान्तरमाधेयं बीजे, तस्मिन्नप्युपकारे पूर्वन्यायेन सहकारिसापेक्षस्य बीजस्य जनकत्वे सहकारिसम्पाद्यबीजगतातिशयानवस्था प्रथमा व्यवस्थिता । अथोपकारः कार्य्यमपेक्षमाणोऽपि बीजादिनिरपेक्षं कार्य्यं जनयति तत्सापेक्षो वा । प्रथमे बीजादेरहेतुत्वमापतेत् । द्वितीये अपेक्ष्यमाणेन बीजादिना उपकारे अतिशय आधेयः एवं तत्र तत्रापीति बीजादिजन्यातिशयनिष्ठातिशयपरम्परापात इति द्वितीयानवस्था स्थिरा भवेत् । एवमपेक्ष्यमाणेनोपकारेण बीजादौ धर्मिण्युपकारान्तरमाधेयमित्युपकाराधेयबीजातिशयाश्रयातिशयपरम्परापात इति तृतीयानवस्था दुरवस्था स्यात् । अथ भावादभिन्नोऽतिशयः सहकारिभिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावोऽनतिशयात्मा निवृत्तः अन्यश्चातिशयात्मा कुर्वद्रूपादिपदवेदनीयो जायत इति फलितं ममापि मनोरथद्रुमेण । तस्मादक्षणिकस्यार्थक्रिया दुर्घटा । नाप्यक्रमेण घटते विकल्पासहत्वात् । तथा हि युगपत्सकलकार्य्यकरणसमर्थः स भावस्तदुत्तरकालमनुवर्त्तते न वा । प्रथमे तत्कालवत् कालान्तरेऽपि तावत्कार्य्यकरणमापतेत् । द्वितीये स्थायित्वप्रत्याशा मूषिकभक्षितबीजादावङ्कुरादिजननप्रार्थनामनुहरेत् । यत् विरुद्धधर्माध्यस्तं तन्नाना यथा शीतोष्णे । विरुद्धधर्माध्यस्तश्चायमिति जलधरे प्रतिबन्धसिद्धिः । न चायमसिद्धो हेतुः, स्थायिनि कालभेदेन सामर्थ्यासामर्थ्ययोः प्रसङ्गतद्विपर्य्ययसिद्धत्वात् तत्रासामर्थ्यसाधकौ प्रसङ्गतद्विपर्य्ययौ प्रागुक्तौ सामर्थ्यसाधकावभिधीयेते यद्यदा यज्जननासमर्थं तत् तदा तन्न करोति यथा शिलाशकलमङ्कुरम् असमर्थश्चायं वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोरर्थक्रिययोरिति प्रसङ्गः यद्यदा यत् करोति तत् तदा तत्र समर्थं यथा सामग्री स्वकार्य्ये इति, करोति चायमतीतानागतकाले तत्कालवर्त्तिन्यावर्थक्रिये भाव इति प्रसङ्गव्यत्ययः विपर्य्ययः । तस्माद् विपक्षे क्रमयौगपद्यव्यावृत्त्या व्यापकानुपलम्भेनाधिगतव्यतिरेकव्याप्तिकं प्रसङ्गतद्विपर्य्ययबलात् गृहीतान्वयव्याप्तिकं सत्त्वं क्षणिकत्वपक्ष एव व्यवस्थास्यतीति सिद्धम् । तदुक्तं ज्ञानश्रिया "यत् सत् तत् क्षणिकं यथा जलधरः सन्तश्च भावा अमी सत्ताशक्तिरिहार्थकर्मणि मितेः सिद्धेषु सिद्धा न सा । नाप्येकैव विधाऽन्यथा परकृतेनापि क्रियादिर्भवेत् द्वेधापि क्षणभङ्गसङ्गतिरतः साध्ये च विश्राम्यतीति" । न च कणभक्षाक्षचरणादिपक्षकक्षीकारेण सत्तासामान्ययोगित्वमेव सत्त्वमिति मन्तव्यं सामान्यविशेषसमवायानामसत्त्वप्रसङ्गात् । न च तत्र स्वरूपसत्तानिबन्धनः सद्व्यवहारः प्रयोजकगौरवापत्तेः अनुगतत्वाननुगतत्वविकल्पपराहतेश्च, सर्षपमहीधरादिषु विलक्षणेषु क्षणेष्वनुगतस्याकारस्य मणिषु सूत्रवद्भूतगणेषु गुणवच्चाप्रतिभासनाच्च । किञ्च सामान्यं सर्वगतं स्वाश्रयसर्वगतं वा प्रथमे सर्ववस्तुसङ्करप्रसङ्गः अपसिद्धान्तापत्तिश्च यतः प्रोक्तं प्रशस्तपादेन "स्वविषयसर्वगतमिति । किञ्च विद्यमाने घटे वर्त्तमानं सामान्यमन्यत्र जायमानेन संबध्यमानं तस्मादागच्छत् सम्बध्यते अनागच्छद् वा आद्ये द्रव्यत्वापत्तिः द्वितीये सम्बन्धानुपपत्तिः । किञ्च विनष्टे घटे सामान्यमवतिष्ठते, विनश्यति, स्थानान्तरं गच्छति वा प्रथमे निराधारत्वापत्तिः, द्वितीये नित्यत्ववाचोयुक्तिरयुक्तिः, तृतीये द्रव्यत्वप्रसक्तिः इत्यादि दूषणग्रहग्रस्तत्वात् सामान्यमप्रामाणिकम् । "अन्यत्र वर्त्तमानस्य ततोऽन्यस्थानजन्मनि । तस्मादचलतः स्थानाद् वृत्तिरित्यतियुक्तता । यत्रासौ वर्त्तते भावस्तेन संबध्यते न तु । तद्देशिनञ्च व्याप्नोति किमप्येतन् महाद्भुतम् । न याति न च तत्रासीदस्ति पश्चान्न चांशवत् । जहाति पूर्वं नाधारमहो व्यसनसन्ततिरिति" अनुवृत्तप्रत्ययः किमालम्बन इति चेत् अङ्ग अन्यापोहालम्बन एवेति सन्तोष्टव्यमायुष्मतेति अलमतिप्रसङ्गेन । सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतीर्थकरसम्मतम् अन्यथा तन्निविवर्त्तयिषूणां तेषां तन्निवृत्त्युपाये प्रवृत्त्यनुपपत्तेः । तस्मात् सर्वं दुःखं दुःखमिति भावनीयम् । ननु किंवदिति दृष्टे दृष्टान्तः कथनीय इति चेन्नैवं स्वलक्षणानां क्षणानां क्षणिकतया सालक्षण्याभावात् नैतेन सदृशमपरमिति वक्तुमशक्यत्वात् । ततः स्वलक्षणं स्वलक्षणमिति भावनीयम् । एवं शून्यं शून्यमपि भावनीयं स्वप्ने जागरणे च न मया दृष्टमिदं रजतादीति विशिष्टनिषेधस्योपलम्भात् । यदि दृष्टं सत् तदा तद्विशिष्टस्य दर्शनस्येदन्ताया अधिष्ठानस्य च तन्निबध्यस्य रजतत्वादेस्तत्सम्बन्धस्य च समवायादेः सत्त्वं स्यात् न चैतदिष्टं कस्यचिद्वादिनः । न चार्द्धजरतीयमुचितं न हि कुक्कुट्या एको भागः पाकाय अपरो भागः प्रस-

वाय कल्प्यतामिति कल्प्यते। तस्मादध्यस्ताधिष्ठानतत्सम्बन्धदर्शनद्रष्टॄणां मध्ये एकस्यानेकस्य वा असत्त्वे निषेधविषयत्वेन सर्वस्यासत्त्वं बलादापतेदिति।

(माध्यमिकाः) भगवतोपदिष्टे माध्यमिकास्तावदुत्तमप्रज्ञा इत्थमचीकथन् भिक्षुपादप्रसारणन्यायेन क्षणभङ्गाद्यभिधानमुखेन स्थायित्वानुकूलवेदनीयत्वानुगतसर्वसत्यत्वभ्रमव्यावर्त्तनेन सर्वशून्यतायामेव पर्य्यवसानम्। अतस्तत्त्वं सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव। तथा हि यदि घटादेः सत्त्वं स्वभावस्तर्हि कारकव्यापारवैयर्थ्यम्। असत्त्वं स्वभाव इति पक्षे प्राचीन एव दोषः प्रादुः ष्यात्। यथोक्तम् "न सतः कारणापेक्षा व्योमादेरिव युज्यते। कार्य्यस्यासम्भवो हेतुः खपुष्पादेरिवासतः" इति विरोधादितरौ पक्षावनुपपन्नौ तदुक्तं भगवता लङ्कावतारे "बुद्ध्या विविच्यमानानां स्वभावो नावधार्य्यते। अतो निरभिलप्यास्ते निःस्वभावाश्च दर्शिताः" इति। "इदं वस्तु बलायतं यद्वदन्ति विपश्चितः। यथा यथार्थाश्चिन्त्यन्ते विशीर्य्यन्ते तथा तथेति" च। न कश्चिदपि पक्षो व्यवतिष्ठत इत्यर्थः। इष्टार्थव्यवहारश्च न स्वप्नव्यवहारवत् संवृत्या सङ्गच्छते। अतएवोक्तम् "परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ। कुणपः कामिनी भक्ष्य इति तिस्रो विकल्पना इति।" तदेवं भावनाचतुष्टयवशान्निखिलवासनानिवृत्तौ निर्वाणं शून्यरूपं सेत्स्यतीति वयं कृतार्थाः नास्माकमुपदेश्यं किञ्चिदस्तीति। शिष्यैश्चावद्योगाचारश्चेति द्वयं करणीयम्। तत्राप्राप्तस्यार्थस्य प्राप्तये पर्य्यनुयोगो योगः गुरूक्तस्यार्थस्याङ्गीकरणमाचारः गुरूक्तस्याङ्गीकरणादुत्तमाः पर्य्यनुयोगस्याकरणादधमाश्च अतस्तेषां माध्यमिका इति प्रसिद्धिः।

(योगाचाराः) गुरूक्तभावनाचतुष्टयं बाह्यार्थस्य शून्यत्वं चाङ्गीकृत्याऽऽन्तरस्य शून्यत्वमङ्गीकृतं कथमिति? पर्य्यनुयोगस्य करणात् केषाञ्चिद् योगाचारप्रथा एषा हि तेषां परिभाषा स्वयंवेदनं तावदङ्गीकार्य्यम् अन्यथा जगदान्ध्यं प्रसज्येत। तत्कीर्त्तितं धर्मकीर्त्तिना "अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यतीति।" बाह्यं ग्राह्यं नोपपद्यत एव विकल्पानुपपत्तेः। अर्थो ज्ञानग्राह्यो भावादुत्पन्नो भवति अनुत्पन्नो वा, न पूर्वः उत्पन्नस्य स्थित्यभावात् नापरः अनुत्पन्नस्यासत्त्वात्। अथ मन्येथाः अतीत एवार्थो ज्ञानग्राह्यः तज्जनकत्वादिति तदपि बालभाषितं वर्त्तमानतावभासविरोधात् इन्द्रियादेरपि ग्राह्यत्वप्रसङ्गाच्च। किञ्च ग्राह्यः किं परमाणुरूपोऽर्थः अवयविरूपो वा। न चरमः कृत्स्नैकदेशविकल्पादिना तन्निराकरणात्। न प्रथमः अतीन्द्रियत्वात् षट्केन युगपद्योगस्य बाधकत्वाच्च। यथोक्तम् "षट्केन युगपद् योगात् परमाणोः षडंशता। तेषामप्येकदेशत्वे पिण्डः स्यादणुमात्रकः" इति। तस्मात् स्वव्यतिरिक्तग्राह्यविरहात्तदात्मिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका प्रकाशवदिति सिद्धम्। तदुक्तम् "नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः। ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते इति।" ग्राह्यग्राहकयोरभेदश्चानुमातव्यः यद्वेद्यते येन वेदनेन तत्ततो न भिद्यते यथा ज्ञानेनात्मा, वेद्यन्ते तैश्च नीलादयः। भेदे हि सत्यधुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियमहेतोरभावात् तदुत्पत्तेरनियामकत्वात् यश्चायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एकस्मिन्श्चन्द्रमसि द्वित्वावभास इव भ्रमः अत्राप्यनादिरविच्छिन्नप्रवाहा भेदवासनैव निमित्तम्। यथोक्तम् "सहोपलम्भनियमादभेदो नीलतद्धियोः। भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये" इति। "अविभागोऽपि बुद्ध्यात्मा विपर्य्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" इति च। न च रसवीर्य्यविपाकादिसमानमाशामोदकोपार्जितमोदकानां स्यादिति वेदितव्यं वस्तुतो वेद्यवेदकाकारविधुराया अपि बुद्धेर्व्यवहर्तृपरिज्ञानानुरोधेन विभिन्नग्राह्यग्राहकाकाररूपवत्तया तिमिराद्युपहताक्षाणां केशेन्द्रनाडीज्ञानाभेदवदनाद्युपप्लववासनासामर्थ्याद् व्यवस्थोपपत्तेः पर्य्यनुयोगायोगात्। यथोक्तम् "अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते। विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा। तथा कृतव्यवस्थेयं केशादिज्ञानभेदवत्। यदा तदा न सञ्चोद्या ग्राह्यग्राहकलक्षणेति" तस्माद् बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति सिद्धम्। ततश्च प्रागुक्तभावनाप्रचयबलान्निखिलवासनोच्छेदविगलितविविधविषयाकारोपप्लवविशुद्धविज्ञानोदयो महोदय इति।

(सौत्रान्तिकाः) अन्ये तु मन्यन्ते यदुक्तं बाह्यं वस्तुजातं नास्तीति तदयुक्तं प्रमाणाभावात्। न च सहोपलम्भनियमः प्रमाणमिति वक्तव्यं वेद्यवेदकयोरभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्धविपक्षव्यावृत्तिकत्वात्। ननु भेदे सहोपलम्भनियमात्मकं

बाधेन न स्यादिति चेन्न ज्ञानस्यान्तर्मुखतया च भेदेन प्रतिभासमानतया एकदेशत्वैककालत्वलक्षणसहत्व-नियमासम्भवाच्च नीलार्थस्य ज्ञानाकारत्वे अहमिति प्रतिभासः स्यात् नत्विदमिति प्रतिपत्तिः प्रत्ययाव्यतिरेकात्। अथोच्यते ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्वद्भेदेन प्रतिभासत इति न च तस्माह-मुल्लेख इति यथोक्तम् "परिच्छेदान्तराद् योऽयं भागो बहिरिव स्थितः। ज्ञानस्याभेदिनो भेदप्रतिभासोऽप्युपप्लवः" इति। "यदन्तर्ज्ञेयतत्त्वं तद् बहिर्वदवभासत इति च"—तदयुक्तं बाह्यार्थाभावे तदुत्पत्तिरहिततया बहिर्वदित्युपमानोक्तेरयुक्तेः न हि वसुमित्रो बन्ध्यापुत्रवदवभासत इति प्रेक्षावानाचक्षीत। भेदप्रतिभासस्य भ्रान्तत्वे अभेदप्रतिभासस्य प्रामाण्यं, तत्प्रामाण्ये च भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गाच्च। अविसंवादान्नीलतादिकमेव संविदाना बाह्यमेवोपाददते जगत्युपेक्षन्ते चान्तरमिति व्यवस्थादर्शनाच्च। एवञ्चायमभेदसाधको हेतुर्गोमयपायसीयन्यायवदाभासतां भजेत् अतो बहिर्वदिति वदता बाह्यं ग्राह्यमेवेति भावनीयमिति भवदीय एव बाणो भवन्तं प्रहरेत्। ननु ज्ञानाभिन्नकालस्यार्थस्य ग्राह्यत्वमनुपपन्नमिति चेत् तदनुपपन्नम् इन्द्रियसन्निकृष्टस्य विषयस्योत्पाद्ये ज्ञाने स्वाकारसमर्पकतया समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोपपत्तेः अतएव पर्यनुयोगपरिहारौ समग्राहिषाताम्। "भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः। हेतुत्वमेव च व्यक्तेर्ज्ञानाकारार्पणक्षममिति" तथा च यथा पुष्ट्या भोजनमनुमीयते यथा च भाषया देशः यथा वा सम्भ्रमेण स्नेहः तथा ज्ञानाकारेण ज्ञेयमनुमेयम्। तदुक्तम् "अर्थेन घटयत्येनां न हि मुक्त्वाऽर्थरूपताम्। तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपतेति" न हि वित्तिसत्तैव तद्वेदना युक्ता तस्याः सर्वत्राविशेषात् तान्तु सारूप्यमाविशत् सरूपयितुं घटयेदिति च। तथा च बाह्यार्थसद्भावे प्रयोगः ये यस्मिन् सत्यपि कादाचित्काः ते सर्वे तदतिरिक्तसापेक्षाः यथा अविवक्षति, अजिगमिषति मयि वचनगमनप्रतिभासा विवक्षुजिगमिषुपुरुषान्तरसन्तानसापेक्षाः तथा च विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचिदेव नीलाद्युल्लेखना इति। तत्रालयविज्ञानं नामाहमास्पदं विज्ञानं, नीलाद्युल्लेखि च प्रवृत्ति-विज्ञानम्। यथोक्तम् "तत् स्यादालयविज्ञानं यद्भवेदहमास्पदम्। तत् स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेदिति" तस्मादालयविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्बाह्योऽर्थो ग्राह्य एव न वासनापरिपाकप्रत्ययः कादाचित्कत्वात् कदाचिदुत्पाद इति वेदितव्यम्। विज्ञानवादिनये हि वासनानामेकसन्तानवर्त्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिजननशक्तिः तस्याश्च स्वकार्योत्पादं प्रत्याभिमुख्यं परिपाकः तस्य च प्रत्ययः कारणं स्वसन्तानवर्त्तिपूर्वक्षणः कक्षीक्रियते सन्तानान्तरनिबन्धनत्वानङ्गीकारात्। ततश्च प्रवृत्तिज्ञानजननालयविज्ञानवर्त्तिवासनापरिपाकं प्रति सर्वेऽप्यालयविज्ञानवर्त्तिनः क्षणाः समर्था एवेति वक्तव्यम्। न चेदेकोऽपि न समर्थः स्यादालयविज्ञानसन्तानवर्त्तित्वाविशेषात्। सर्वे समर्था इति पक्षे कार्यक्षेपानुपपत्तिः ततश्च कादाचित्कत्वनिर्वाहाय शब्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाः षडपि प्रत्ययाश्चतुरः प्रत्ययान् प्रतीत्योत्पद्यन्ते इति चतुरेणानिच्छताप्यच्छमतिना स्वानुभवमनाच्छाद्य परिच्छेत्तव्यम्। ते चत्वारः प्रत्ययाः आलम्बनसमनन्तरसहकार्यधिपतिरूपाः तत्र ज्ञानपदवेदनीयस्य चित्तस्य नीलालम्बनप्रत्ययात् नीलाकारता भवति, समनन्तरप्रत्ययात् प्राचीनज्ञानाद् बोधरूपता, सहकारिप्रत्ययादालोकात्, चक्षुषोऽधिपतिप्रत्ययाद्विषयग्रहणप्रतिनियमः विदितस्य ज्ञानस्य रसादिसाधारण्यप्राप्तौ नियामकं चक्षुरधिपतिर्भवितुमर्हति लोके नियामकस्याधिपतित्वोपलम्भात्। एवं चित्तचैत्तात्मकानां सुखादीनां चत्वारि कारणानि द्रष्टव्यानि। एव चित्तचैत्तात्मकस्कन्धः पञ्चविधः रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः। तत्र रूप्यन्ते एभिर्विषया इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः। आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः। प्रागुक्तस्कन्धद्वयसम्बन्धजन्यः सुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः। गौरित्यादिशब्दोल्लेखिसविज्ञानप्रवाहः संज्ञास्कन्धः। वेदनास्कन्धनिबन्धना रागद्वेषादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्माधर्मौ च संस्कारस्कन्धः। तदिदं सर्वं दुःखं दुःखायतनं दुःखसाधनञ्चेति भावयित्वा तन्निरोधोपायं तत्त्वज्ञानं सम्पादयेत्। अत एवोक्तं "दुःखसमुदायनिरोधमार्गाश्चत्वारः बुद्धाभिमतानि तत्त्वानि"। तत्र दुःखं प्रसिद्धं, समुदायो दुःखकारणं,

तद् द्विविधं प्रत्ययोपनिबन्धनो हेतूपनिबन्धनश्च। तत्र प्रत्ययोपनिबन्धनस्य संग्राहकं सूत्रम् "इदं कार्य्यं ये अन्ये हेतवः प्रत्ययन्ति" गच्छन्ति तेषामयमानानां हेतूनां भावः प्रत्ययत्वं, कारणसमवायः तन्मात्रस्य फलं, न चेतनस्य कस्यचिदिति सूत्रार्थः। यथा वीजहेतुरङ्कुरो धातूनां षण्णां समवायाज्जायते। तत्र पृथिवीधातुरङ्कुरस्य काठिन्यं गन्धञ्च जनयति, अब्धातुः स्नेहं रसञ्च जनयति, तेजोधातुः रूपमौष्ण्यञ्च, वायुधातुः स्पर्शनं चलनञ्च, आकाशधातुरवकाशं शब्दञ्च ऋतुधातुर्यथायोगं पृथिव्यादिकम्। हेतूपनिबन्धनस्य च संग्राहकं सूत्रम् "उत्पादाद् वा तथागतानामनुत्पादाद् वा स्थितैवैषां धर्म्माणां धर्म्मता धर्म्मस्थितिता धर्म्मनियामकता च प्रतीत्य समुत्पादानुलोमतेति"। तथागतानां बुद्धानां मते धर्म्माणां कार्य्यकारणरूपाणां या धर्म्मता कार्य्यकारणभावरूपा उत्पादादनुत्पादाद् वा स्थिता, यस्मिन् सति यदुत्पद्यते तत् तस्य कारणस्य कार्य्यमिति धर्म्मतैतस्य विवरणं, धर्म्मस्य कार्य्यस्य कारणानतिक्रमेण स्थितिः स्वार्थिकस्तल्प्रत्ययः। धर्म्मस्य कारणस्य कार्य्यं प्रति नियामकता। नन्वयं कार्य्यकारणभावश्चेतनमन्तरेण न सम्भवतीति अत उक्तं कारणे सति तत्प्रतीत्य प्राप्य समुत्पादे अनुलोमता अनुसारिता या सैव धर्म्मता उत्पादादनुत्पादाद् वा धर्म्माणां स्थिता। न चात्र कश्चिच्चेतनोऽधिष्ठातोपलभ्यत इति सूत्रार्थः। यथा प्रतीत्य समुत्पादस्य हेतूपनिबन्धः बीजादङ्कुरोऽङ्कुरात् काण्डं काण्डान्नालो नालाद्गर्भस्ततः शूकं ततः पुष्पं ततः फलम्। न चात्र बाह्ये समुदाये कारणं बीजादि कार्य्यमङ्कुरादि चेतयते अहमङ्कुरं निर्वर्त्तयामि अहं बीजेन निर्वर्त्तित इति। एवमाध्यात्मिकेष्वपि कारणद्वयमवगन्तव्यम्। पुरःस्थिते प्रमेयाब्धौ ग्रन्थविस्तरभियोपरम्यते। तदुभरु ।रोधः तदनन्तरं विमलज्ञानोदयो वा मुक्तिः त ्रोधोपायो मार्गः स च तत्त्वज्ञानं तच्च प्राचीन- [illegible]नावशाद् भवतीति परमं रहस्यम्। सूत्रान्तं पृच्छतां कथितं भवन्तश्च सूत्रस्यान्तं पृष्टवन्तः सौत्रान्तिका भवन्त्विति भगवताभिहिततया सौत्रान्तिकसंज्ञाः सञ्जाताः।

(वैभाषिकाः) केचन बौद्धा बाह्येषु रूपादिषु आन्तरेषु सुखादिषु स्कन्धेषु सत्स्वपि तत्रानास्थामुत्पादयितुं सर्वं शून्यमिति, प्राथमिकान् विनेयानचीकथत् भगवान्, द्वितीयांस्तु विज्ञानमात्रग्रहाविष्टान् विज्ञानमेवैकं सदिति, तृतीयानुभयं सत्यमित्यास्थितान् विज्ञेयमनुमेयमिति, सेयं विरुद्धा भाषेति वर्णयन्तो वैभाषिकाख्यया ख्याताः। एषा हि तेषां परिभाषा समुन्मिषति। विज्ञेयानुमेयत्ववादे प्रात्यक्षिकस्य कस्यचिदप्यर्थस्याऽभावेन व्याप्तिसंवेदनस्थानाभावेनानुमानप्रवृत्त्यनुपपत्तिः सकललोकानुभवविरोधश्च। ततश्चार्थो द्विविधः ग्राह्योऽध्यवसेयश्च तत्र ग्रहणं निर्विकल्पकरूपं प्रमाणं कल्पनापोढत्वात्, अध्यवसायः सविकल्पकरूपोऽप्रमाणं कल्पनाज्ञानत्वात्। तदुक्तम् "कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्। विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः" इति। "ग्राह्यं वस्तु प्रमाणं हि ग्रहणं यदितोऽन्यथा। न तद्वस्तु न तन्मानं शब्दलिङ्गेन्द्रियादिजमिति च" ननु सविकल्पकस्याप्रामाण्ये कथं ततः प्रवृत्तस्यार्थप्राप्तिः संवादश्चोपपद्येयातामिति चेन्न तद्दृष्टं मणिप्रभाविषयमणिविकल्पन्यायेन पारम्पर्येणार्थप्रतिलम्भसम्भवेन तदुपपत्तेः। अवशिष्टं सौत्रान्तिकप्रस्तावे प्रपञ्चितमिति नेह प्रतन्यते। न च विनेयाशयानुरोधेनोपदेशभेदः साम्प्रदायिको न भवतीति भणितव्यं यतो भणितं बोधचित्तविवरणे "देशना लोकनाथानां सत्त्वाशयवशानुगाः। भिद्यन्ते बहुधा लोके उपायैर्बहुभिः किल। गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणाः। भिन्ना हि देशनाऽभिन्ना शून्यताऽद्वयलक्षणेति।

द्वादशायतनपूजा श्रेयस्करीति बौद्धमये प्रसिद्धम्। "अर्थानुपार्ज्य बहुशो द्वादशायतनानि वै। परितः पूजनीयानि किमन्यैरिह पूजितैः। ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च। मनोबुद्धिरिति प्रोक्तं द्वादशायतनं बुधैरिति"। विवेकविलासे बौद्धमतमित्थमभ्यधायि। "बौद्धानां सुगतो देवो विश्वञ्च क्षणभङ्गुरम्। आर्य्यसत्त्वाख्यया तत्त्वचतुष्टयमिदं क्रमात्। दुःखमायतनञ्चैव ततः समुदयो मतः। मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः। दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्त्तिताः। विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च। पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम्। धर्म्मायतनमेतानि द्वादशायतनानि तु। रागादीनां गणोऽयं स्यात् समुदेति नृणां हृदि। आत्मात्मीयस्वभावाख्यः स स्यात् समुदयः पुनः। क्षणिकाः

सर्वसंस्कारा इति या वासना स्थिरा। स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते। प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा। चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः। अर्थो ज्ञानान्वितो वैभाषिकेण बहुमन्यते। सौत्रान्तिकेन प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः। आकारसहिता बुद्धिर्योगाचारस्य सम्मता। केवलां संविदं स्वस्थां मन्यन्ते मध्यमाः पुनः। रागादिज्ञानसन्तानवासनाच्छेदसम्भवा। चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्त्तिता। कृत्तिः कमण्डलुर्मौण्ड्यं चीरं पूर्वाह्णभोजनम्। सङ्घो रक्ताम्बरत्वञ्च शिश्रिये बौद्धभिक्षुभिरिति"।

बुद्धगया स्त्री (बुधगया) प्रसिद्धे कीकटस्थे बुद्धानां गयाभेदे।

बुद्धद्रव्य न० स्तौपिके स्तूपीकृते द्रव्ये त्रिका०।

बुद्धधर्म्म पु० ६त०। बुद्धानामहिंसादौ धर्मे।

बुद्धपुराण न० बुद्धस्याविर्भावादिज्ञापके पुराणभेदे।

बुद्धान्त पु० बुध–भावे क्त तस्यान्तः परिच्छेदः। जीवस्यावस्थाभेदे जाग्रदवस्थायाम् शत०ब्रा०१४। ७।१।१८।

बुद्धि स्त्री० बुध-क्तिन्। १ज्ञाने, २सांख्योक्ते सुखदुःखाद्यष्टविधधर्मयुते प्रकृतिपरिणामभेदे "महत्तत्त्वमिति प्रोक्तं बुद्धितत्त्वं तदुच्यते" सां० प्र० भा० धृतवाक्यम्। वेदान्तोक्ते निश्चयात्मकवृत्तियुते ३अन्तःकरणे च। "मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयो निश्चयो गर्वः स्मरणं विषया अमी" वेदान्तप०। ४धर्मपत्नीभेदे भा०आ०६६अ०। कणा०सूत्रोपस्कारवृत्तौ सांख्यमतसिद्धमहत्तत्त्वरूपबुद्धितत्त्वनिराकरणेन बुद्धेर्ज्ञानपर्य्यायता तद्भेदाश्चोक्ता यथा "द्रव्येषु ज्ञानं व्याख्यातम्" सू० "विषयेण विषयिणं तृतीयाध्यायस्यमुपलक्षयति। "इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः" "आत्मेन्द्रियार्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत्" इत्येताभ्यां सूत्राभ्यां ज्ञानं व्याख्यातमित्यर्थः"। तत्र "बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्य्यायाः" गौ०सू० समानतन्त्रे बुद्धिलक्षणे सांख्यमतनिरासार्थं पर्य्यायाभिधानम्। सांख्या हि बुद्ध्यादिशब्दानामर्थभेदमाचक्षते तथा हि सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, सा चैकैव पुरुषास्तु परं भिद्यन्ते ते च कूटस्था नित्या अपरिणामिनो नित्यचैतन्यस्वभावाः ते च पङ्गवोऽपरिणामित्वात् प्रकृतिस्त्वन्धा जडत्वात् यदा विषयभोगेच्छा प्रकृतिपुरुषभेददिदृक्षा च प्रकृतेर्भवति तदा सा पुरुषोपरागवशात् परिणमेत् तस्याश्चाद्यः परिणामो बुद्धिरन्तःकरणविशेषः अविरेव महत्तत्त्व तदुक्तम् "प्रकृतेर्महान्" इति सां०सू०। सा च बुद्धिर्दर्पणवत् स्वच्छा तस्याश्च बहिरिन्द्रियप्रणाडिकया विषयाकारो यः परिणतिभेदो घट इति पट इत्याद्याकारस्तज्ज्ञानं वृत्तिरिति चाख्यायते स्वच्छायां बुद्धौ वर्त्तमानेन ज्ञानेन चैतन्यस्य पुरुषस्य भेदाग्रहादहं जानामीति योऽभिमानविशेषः सैवोपलब्धिः। स्रक्चन्दनादिविषयसन्निकर्षादिन्द्रियप्रणाडिकयैव सुखदुःखाद्याकारो बुद्धेरेव यः परिणामविशेषः स प्रत्ययः। अतएव ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारधर्माऽधर्माः सर्वएव बुद्धेः परिणामविशेषाः सूक्ष्मतया प्रकृतावेव वर्त्तमाना अवस्थाभेदादाविर्भवन्ति तिरोभवन्ति च। पुरुषस्तु पुष्करपलाशवन्निर्लेपः प्रतिविम्बते परं बुद्धाविति यन्मन्यन्ते। तदनेन पर्य्यायाभिधानसूचितप्रमाणेन निराक्रियते तथा हि बुद्धिशब्दो यदि बुध्यतेऽनयेति करणव्युत्पन्नस्तदा मन एव तत्पर्य्यवस्यति नच मनः प्रत्यक्षम् बुद्धिस्त्वहं बुध्ये इति प्रत्यक्षवेद्यैव। नचान्तःकरणस्य ज्ञानाद्याधर्मा कर्त्तृधर्मत्वेनैव तेषां सिद्धेः भवति हि अहं जाने अहं प्रत्येमि अहमुपलभे इत्यहन्त्वसामानाधिकरण्येन प्रतिभासः। अभिमानोऽसाविति चेत् तात्त्विकत्वे बाधकाभावात्। पुरुषस्यागन्तुकधर्मानाधारत्वं कूटस्थत्वं तदेव बाधकमिति चेन्नागन्तुकधर्माधारत्वेऽपि नित्यत्वसम्भवात् न हि धर्मी धर्मश्चैकं तत्त्वं येन धर्मोत्पादविनाशावेव धर्म्युत्पादविनाशौ स्यातां तथा च यएव चेतयते स एव बुध्यते जानात्युपलभ्यते प्रत्येति चेति नार्थान्तरकल्पना युक्तेति दिक्। तच्च ज्ञानं द्विविधं विद्या चाविद्या च विद्या चतुर्व्विधा प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा। अविद्याऽपि चतुर्व्विधा संशयविपर्य्ययस्वप्नानध्यवसायलक्षणा। तत्र यल्लैङ्गिकं तदनिन्द्रियजम् श्रुतएतदित्याह" उप० वृ०। "तत्रात्मा मनश्चाप्रत्यक्षे" कणा०सू०।

"आत्माऽत्र परात्मा स्वात्मा वा स्वात्मनि मानसस्य काचित्काहम्प्रत्ययस्याहं गौरः कृशो मकावाङ्कुरित्यादिप्रत्ययतिरस्कृतत्वात् स्वात्मनोऽप्यप्रत्यक्षतोक्ता। चकाराद्आकाशकालदिशां वायोः परमाणूनाञ्च द्रव्याणामुपग्रहः। इन्द्रियजमपि द्विविधं सर्वज्ञीयमसर्वज्ञीयञ्च सर्वज्ञीयं योगजधर्मलक्षणया प्रत्यासत्त्या तत्तत्पदार्थसार्थज्ञानं तथा हि परमाणवः प्रत्यक्षप्रसक्ताः प्रमेयत्वादभिधेयत्वात् सत्त्वात्। सामग्रीविरहात् कथमेवं महत्त्वस्यापि प्रत्यक्षं प्रति कारणत्वात् न च परमाणो महान्तः रूपवत्त्वस्यापि बाह्यप्रत्यक्षकारणत्वात् न प टिगादयो रूपवन्त

इति चेन्न योगजधर्मसहकारिणा मनसैव तदुपपत्तेः तदुपग्राहकचक्षुरादिना वा। अचिन्त्यप्रभावो हि योगजो धर्मो न सहकार्य्यन्तरमपेक्षते। विवादाध्यासितः पुरुषो न सर्वज्ञः पुरुषत्वादहमिवेत्यादि तु प्राभाकरो न मीमांसाभिज्ञः पुरुषत्वादहमिवेत्यादिवद्विपक्षबाधकतर्कशून्यत्वादप्रयोजकम्। असर्वज्ञीयस्तु प्रत्यक्षं द्विविधं सविकल्पकं निर्विकल्पकञ्च सविकल्पकं ज्ञानं न प्रमाणमिति कीर्त्तिदिङ्नागादयः तथा हि अभिलापसंसर्गयोग्यप्रतिभासं हि तत् यस्त्वभिलापेन नाम्ना सम्बध्यतेऽर्थस्य सम्बन्धो येन घट इति पट इति वा नामानुरञ्जितः प्रत्ययः स्यात् न च जात्यादि परमार्थसत् येन तद्वैशिष्ट्यं विषयेषु इन्द्रियगोचरः तस्मादिन्द्रियेणालोचनं जन्यते आलोचनमहिम्ना च सविकल्पकमुत्पद्यमानं तत्रार्थे प्रवर्त्तयत् प्रत्यक्षमिति प्रोच्यते इति। तन्नैतदनुपपन्नमभिलापसंसर्गयोग्यप्रतिभासस्य भवेत् प्रमाणत्वमिन्द्रियार्थसन्निकर्षजन्यं स्यादिति सन्दिग्धव्यतिरेकित्वं नामवैशिष्ट्यस्य चाक्षुषज्ञाने सम्भवत्येव सुरभि चन्दनमितिवदुपनीतभानसम्भवात्। यद्वा संज्ञावैशिष्ट्यं प्रत्यक्षज्ञाने न भासते संज्ञायाः स्मरणात्मकत्वात् दार्ढ्यव्यावर्त्तिका अभावज्ञाने प्रतियोगिस्मरणवत् जात्यादिकञ्च वस्तुभूतं साधितमेवातः सविकल्पकमपीन्द्रियार्थसन्निकर्षजत्वात् प्रत्यक्षम् प्रमाणम्। ननु निर्विकल्पकं न व्यवहारप्रवर्त्तकं न वा व्यवहारविषय इति किन्तत् प्रमाणमिति चेत् सविकल्पकमेव तद्धि विशिष्टज्ञानम् न च विशेषणज्ञानमन्तरेण तदुत्पद्यते विशिष्टज्ञाने हि विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहस्य कारणत्वावधारणात्” उपस्काररवृत्तिः।

“सा च सात्त्विकराजसतामसभेदेन त्रिविधा। तत्र सात्त्विकी यथा “प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये। बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ ! सात्त्विकी”। राजसी यथा “यया धर्ममधर्मञ्च कार्य्यञ्चाकार्य्यमेव च। अयथावत् प्रजानाति बुद्धिः सा पार्थ ! राजसी”। तामसी यथा “अधर्मं धर्ममिति या मन्यते तमसावृता। सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ ! तामसी” गीता०

तस्याः पञ्चगुणा यथा। “इष्टानिष्टविपत्तिश्च व्यवसायः समाधिता। संशयप्रतिपत्तिश्च बुद्धेः पञ्च गुणान् विदुः” महाभारते मोक्षधर्मः “इष्टानिष्टविपत्तिः इष्टानिष्टानां वृत्तिविशेषाणां विपत्तिर्नाशः निद्रारूपा वृत्तिरित्यर्थः। व्यवसायः उद्योगः। समाधिता चित्तस्थैर्य्यं चित्तवृत्तिनिरोध इत्यर्थः संशयः द्वयस्पृक् ज्ञानम्। प्रतिपत्तिः प्रत्यक्षादिप्रमाणवृत्तिः” तट्टीका। तस्याः सप्त गुणा यथा। “शुश्रूषा श्रवणञ्चैव ग्रहणं धारणन्तथा। ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः” हेमच०। तस्या वृत्तिः पञ्चधा यथा। “प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयः” पात०सू० तल्लक्षणं च तत्तच्छब्दे दृश्यम्।

बुद्धिक्षयकरा यथा “शोकः क्रोधश्च लोभश्च कामो मोहः परासुता। ईर्ष्या मानो विचिकित्सा हिंसाऽसूया जुगुप्सता। द्वादशैते बुद्धिनाशहेतवो मानसा मलाः”। कालिकापु० १८अ०। “बुद्धिक्षयकरा एते माषकासारमृत्तिकाः”। बुद्धिवृद्धिकरा यथा “निम्बाटरूषपल्लाश्च बुद्धिवृद्धिकरा मताः। बुद्धिक्षयकरांश्चित्यं त्यजेद्राजा च भोजने। भोजयेदन्वहं बुद्धिवृद्धिहेतुं नृपोत्तमः। कालिकापु० ८९ अ०।

बुद्धिकामा स्त्री कुमारानुचरमातृभेदे भा० श० ४७ अ०।

बुद्धिजीविन् त्रि० बुद्ध्या जीवति जीव–णिनि। बुद्ध्युपायेन जीविनि। “भूतानां प्राणिनां श्रेष्ठा प्राणिनां बुद्धिजीविनः” मनुः।

बुद्धिसहाय पु० ७त०। धीसचिवे अमात्यभेदे हारा०।

बुद्धीन्द्रिय न० ६त०। “मनः कर्णौ तथा नेत्रे रसना त्वक् च नासिके। बुद्धीन्द्रियमिति प्रोक्तम्” इत्युक्तेषु इन्द्रियेषु उभयोः ज्ञानकर्मेन्द्रिययोरुपकारकत्वात् मनसो ज्ञानमात्रसहकारित्वविवक्षया बाह्यान्तरज्ञानकरणतया च तथात्वम् “चक्षुः श्रोत्रे स्पर्शनञ्च रसनाघ्राणमेव च। बुद्धीन्द्रियाणि जानीयात्” इत्यत्र बाह्यमात्रापेक्षया पञ्चत्वमुक्तम्।

बुद्बुद न० बुद-क पृषो० द्वित्वम्। जलस्य गोलाकारे विकारभेदे अमरः। “पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत्”। सुश्रुतो० उक्ते २गर्भावस्थाभेदे च।

बुध ज्ञापने भ्वा०प०सक०अनिट्। बोधति अभौत्सीत् शिष्यं गुरुः। बोद्धा बुद्धः।

बुध ज्ञाने भ्वा०उभ०सक०सेट्। बोधति ते। इरित् अबुधत् अबोधीत् अबोधि अबोधिष्ट। ज्वला० वा ण पक्षे क। बोधः बुधः।

बुध ज्ञाने दि० आ०सक० अनिट्। बुध्यते अबोधि अबोधिष्ट। बुबुधे। उद्+बुध–जागरणे विषयस्फुरणाभिमुखीभावरूपे संस्कारनिष्ठे व्यापारभेदे उद्बुद्धसंस्कारादेव स्मृतिर्भवतीति शास्त्रे स्थितम्।

बुध पु० बुध–क । १पण्डिते, बृहस्पतिभार्य्यायां तारायां चन्द्रेण जनिते २पुत्रे तस्य रोहिण्या प्रतिपालनात् रौहिणेयत्वम् । ३ग्रहभेदे । तस्योत्पत्तिकथा शिवपरेण तस्य ग्रहत्वप्राप्तिकथा च काशीख० १५अ० । "बृहस्पतेः स वै भार्य्यामैश्वर्य्यमदमोहितः । पुरोहितस्यापि गुरोर्भ्रातुराङ्गिरसस्य वै । जहार तरसा ताराम्" इत्युपक्रमे । "ददावाङ्गिरसे तारां स्वयमेव पितामहः । अथान्तर्गर्भमालोक्य तारां प्राह बृहस्पतिः । मदीयायां न ते योनौ गर्भो धार्य्यः कथञ्चन । इषिकास्तम्बमासाद्य सा गर्भं चोत्ससर्ज ह । जातमात्रः स भगवान् देवानामाक्षिपद्वपुः । ततः संशयमापन्नास्तारामूचुः सुरोत्तमाः । सत्यं ब्रूहि सुतः कस्य सोमस्याथ बृहस्पतेः । पृच्छ्यमाना यदा देवैर्नाह ताराऽतिसत्रपा । तदा तां शप्तुमारब्धः कुमारः सोऽतितेजसा । तन्निवार्य्य तदा ब्रह्मा तारां पप्रच्छ संशयम् । प्रोवाच प्राञ्जलिः सा तं सोमस्येति पितामहम् । तदा स मूर्द्ध्न्याघ्राय तारागर्भं प्रजापतिः । बुध इत्यकरोन्नाम तस्य बालस्य धीमतः । ततः स सर्व्वदेवेभ्यस्तेजोरूपबलाधिकः । बुधः सोमं समापृच्छ्य तपसे कृतनिश्चयः । जगाम काशीं निर्व्वाणराशिं विश्वेशपालिताम् । तत्र लिङ्गं प्रतिष्ठाप्य स्वनाम्ना तु बुधेश्वरम् । तपश्चचार चात्युग्रतपः संचिन्तयन् हृदि" । इति तत्तप उक्तं तत्तपसा च तुष्टेन शिवेनोक्तं यथा "रौहिणेय ! महाभाग ! सौम्य ! सौम्यवचोनिधे ! । नक्षत्रलोकादुपरि तव लोको भविष्यति । मध्ये सर्व्वग्रहाणाञ्च सपर्य्यां लप्स्यसे पराम्" । बुधग्रहस्य कक्षाभगणादिकं खगोलशब्दे दृश्यम् ।

बुधचक्र न० बुधस्य राश्यन्तरसञ्चारकाले स्वनक्षत्रस्य सूर्य्यादिस्थानस्थितिभेदेन शुभाशुभसूचके चक्रभेदे "शीर्षे मुखैकमथ मूर्ध्नि चतुष्कं रोगः षट् पाणिभेऽसुखहृतं सुखदं स्तनेऽत्र । दुःख पदाक्षि सुयशो हृदि सप्त राज्यं नाभीन्दु मे द्विभ गले निधनं बुधस्य" इति समयामृतम् ।

बुधचार पु० ६त० । वृ० स० ७अ० उक्ते बुधग्रहस्य शुभाशुभसूचके सञ्चारे यथा

"नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयम् । जलदहनपवनभयकृद्धान्यार्घक्षयविवृद्ध्यै वा । विचरन् श्रवणधनिष्ठाप्राजापत्येन्दु४।५विश्वदैवानि६।१। मृद्नन् हिमकरतनयः करोत्यवृष्टिं सरोगभयाम् । रौद्रा६दीनि मघान्तान्याश्रिते चन्द्रजे प्रजापीडा । शस्त्रनिपातक्षुद्भयरोगानावृष्टिसन्तापैः । हस्तादीनि विचरन् षड्ङ्गान्युपपीडयन् गवामशुभः । स्नेहरसार्घविवृद्धिं करोति चोर्व्वीं प्रभूतान्नाम् । आर्य्यमण१२हौतभुज३ भद्रपदाश्चोत्तरां यमेशं२ च । चन्द्रस्य सुतो निघ्नन् प्राणभृतां धातुसंक्षयकृत् । आश्विनवारुण२४मूलान्युपमृद्नन् रेवतीं च चन्द्रसुतः । पण्यभिषग्नौजीविकसलिलजतुरगोपघातकरः । पूर्व्वात्रय११।२०।२६मितयादेकमपीन्दोः सुतोऽभिमृद्नीयात् क्षुच्छस्त्रतस्करामयभयप्रदायी चरन् जगतः"। इतःपरं तस्य गतिविशेषास्तत्राभिहितास्तत्फलञ्च तत्र दर्शितं तच्च गतिशब्दे २५१५पृ० दर्शितम् । अध्यायशेषे च ।

"पौषाषाढश्रावणवैशाखेष्विन्दुजः समाघेषु । दृष्टो भयाय जगतः शुभफलकृत् प्रोषितस्तेषु । कार्त्तिकेऽश्वयुजि वा यदि मासे दृश्यते तनुभवः शिशिरांशोः । शस्त्रचौरहुतभुग्गदतोयक्षुद्भयानि च तदा विदधाति । रुद्धानि सौम्येऽस्तमिते पुराणि यान्युद्गते तान्युपयान्ति मोक्षम् । अन्ये तु पश्चादुदिते वदन्ति लाभः पुराणां भवतीति तज्ज्ञाः । हेमकान्तिरथ वा शुकवर्णः सस्यकेन मणिना सदृशो वा । स्निग्धमूर्त्तिरलघुश्च हिताय व्यत्यये न शुभकृच्छशिपुत्रः" । [सुतादयोऽप्यत्र ।

बुधतनय पु० ६त० । पुरूरवसि इलाशब्दे दृश्यम् बुध-

बुधतात पु० ६त० । चन्द्रे शब्दच० ।

बुधरत्न न० बुधप्रियं रत्नं शाक०त० । मरकतमणौ गारुत्मते राजनि० । ग्रहयज्ञे २७६२ पृ० दृश्यम् ।

बुधवार पु० ६त० बुधपतिकदिवसे दिनपशब्दे १५८२पृ० दृश्यम्

बुधसानु पु० बुध–आनुक् सुक् च । यज्ञपुरुषे पर्णे च संक्षिप्तसा०

बुधा स्त्री बोधयति ज्ञापयति रोगिणं सेवनात् बुध–ज्ञापने क । जटामांस्याम् शब्दच० ।

बुधादित्य पु० बुधसहित आदित्यः । जन्मकाले एकस्मिन् राशौ बुधादित्ययोर्योगे स च तयोरन्यतरदृष्ट एव भवतीति सम्प्रदायः ।

बुधान पु० बुध–आनच् किच्च । १आचार्य्ये गुरौ २विज्ञे मेदि० । ३कवौ जटा० । ४ब्रह्मवादिनि ५प्रियवादिनि त्रि० उणादिकोषः ।

बुधाष्टमी स्त्री० बुधवारयुताष्टमी शाक०त० । चैत्रपौषहरिशयनादोतरस्य शुक्लकाले बुधवारयुतायां १शुक्लपक्षाष्टम्यां, २तत्कर्त्तव्ये व्रते च । तस्याः पूज्यत्वहेतुः हेमा० व्र० भविष्योत्तरे उक्तो यथा

"पुरा कृतयुगस्यादौ इलो राजा बभूव ह । बहुभृत्य-

युतो मित्रमन्त्रिभिः परिवारितः। जगाम हिमवत्-पार्श्वे मृगयार्थेऽभिधावतः। योऽसौ प्रविशते भूमौ स स्त्री भवति निश्चितम्। स राजा स्वर्गसङ्गेन प्राविशत्तदुमावने। एकाकी तुरगोपेतः क्षणात् स्त्रीत्वं जगाम ह। सा बभ्राम वने शून्ये पीनोन्नतपयोधरा। का त्वं कस्य कुतः प्राप्ता चतुरोधोऽसि कथय। तां ददर्श बुधस्तन्वीं रूपौदार्यगुणान्विताम्। अष्टम्यां बुधवारेण तस्यां जातो बुधो ग्रहः। ददौ स्वहस्तमन्नाद्यामानीय प्रतोषिताम्। पुत्रमुत्पादयामास योऽसौ ख्यातः पुरूरवाः। चन्द्रवंशकरो राजा आद्यः सर्वमहीक्षिताम्। ततः प्रभृति पूज्येयमष्टमी बुधसंयुता"। सा च सम्पूर्णा ग्राह्या न भिन्ना यथोक्तं तत्रैव "बुधाष्टमी शुभा पूज्या यथोक्तफलदायिनी" तत्र व्रतपष्टर्वं कार्यं तत्र भक्ष्यभेदादिकं च तत्रैवोक्तं यथा

"अष्टम्यष्टविधानेन विचित्राद्यैः पृथक् पृथक्। प्रथमा मोदकैर्भक्ष्यैः द्वितीया घानकैस्तथा। तृतीया घृतपूरैश्च चतुर्थी वटकैरपि। पञ्चमी पुष्पकाकारैः षष्ठी चोक्तारकैः शुभैः। सप्तमी वर्तिभिः पुण्यैः पतत्रैर्वा तिलकैस्तथा। अष्टमी फाणितैः पूर्णैः भक्ष्यभेदैर्युधिष्ठिर!।" तत्र विहितनिषेधकालादि राजमार्तण्डे उक्तं यथा "पतङ्गे मकरे याते देवे स्वपिति माधवे। बुधाष्टमीं प्रकुर्वीत वर्जयित्वा तु चैत्रकम्। ग्रहणे च जगन्नाथे सन्ध्याकाले घनो तथा। बुधाष्टमीं न कुर्वीत कृता हन्ति पुराकृतमिति"। एतद्व्रतमारब्धमपि चैत्रादौ न कर्त्तव्यं यथाह स्मृतिः "पीते धनुषि देवेशे सुप्तेऽप्यर्द्धदिने तथा। बुधाष्टमीं न कुर्वीत पूर्वविद्धामपि क्वचित्" अपुष्टदिने समयाद्यविशुद्धदिने।

बुधित त्रि० ज्ञा०-बुध-क्त इट्। ज्ञाते अमरः।

बुधिल त्रि० बुध-किलच्। विदुषि उणादि०।

बुध्न पु० बन्ध-नक् बुधादेशः। १मूले अमरः २शिवे भरतः ३अन्तरीक्षे ऋ० ३।१९।४ भाष्यम्। "पृथुबुध्नोदराकृतिः" वेदान्तप०। "यतीन् कियन्तमवन्तं बुध्नः" मा०भा० कृता श्रुतिः। निरुक्ते तु बद्धा अस्मिन् धृता आप इति अन्तरिक्षं बुध्नम्" तत्र निरुक्तिरुक्ता।

बुध्न्य पु० बुध्ने मूले भवः यत्। १मार्कण्डेये यस्मो "अहिर्बुध्न्य बुध्न्यः" नाम्नैक्य मा०।१।४।११ "अहिर्बुध्न्य इत्यत्र रजःप्रभृतीनां बुध्न्यः बुध्ने मूले आदौ आधानकाले प्रथमं जातोऽसि" २अहिर्बुध्न्ये रुद्रभेदे च। बुध्ने निवसति यन्मूलः योऽहिः सः अस्ति बुध्न्यः बुध्नमन्तरीक्षं अन्तरिक्षे च तन्निवासाद्वा निरु०। "अजोऽहिर्बुध्न्योऽहिर्बुध्न्ये तद्भूता स्तुतिः।

बुन्द निशामने-भ्वा० उभ० सक० सेट्। बुन्दति ते इरित् अबुदत् अबुन्दीत्। अबुन्दिष्ट। उदित् क्त्वा वेट्। निशामनमालोचनम् प्रणिधानमिति यावत्।

बुन्ध निशामने भ्वा० उभ० सक० सेट्। बुन्धति ते इरित् अबुधत्-अबुन्धीत् अबुन्धिष्ट। निशामनमालोचनम्। उदित् क्त्वा वेट्।

बुन्ध बन्धे चु० उभ० सक० सेट्। बुन्धयति ते अबुबुन्धत् त।

बुबुर न० उदके निघण्टौ बर्बुरमित्यत्र पाठान्तरम्।

बुभुक्षा स्त्री० भुज-सन्-भावे अ। भोजनेच्छायां क्षुधायाम् सा च प्राणधर्मः यथोक्तं शा०ति० "बुभुक्षा च पिपासा च प्राणस्य" ऊर्मिषट्के इत्युक्तम्। अजीर्णे च सा न भवति अथ भवति चेत् अनिष्टदा यथोक्तं सुश्रुते "उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य" "भक्तं यदा दोषविदह्यमानं जीर्णं न तेजः पचत्याप्नोति। भवत्यजीर्णेऽपि तदा बुभुक्षा या मन्दबुद्धिं विषवन्निहन्ति"। इत्यादि०सौश्रुतं वच्। बोभुक्ष तच्छीले त्रि०

बुभुक्षित त्रि० बुभुक्षा+तार० इतच्। क्षुधायुक्ते "बुभुक्षितः किं द्विकरेण भुङ्क्ते" उद्भटः।

बुल मज्जने चु० उभ० सक० सेट्। बोलयति ते अबूबुलत्। बोलयति प्लवः पयसि मज्जतीत्यर्थः।

बुलि स्त्री उणा० बुड-इन् किच डस्य लः। भये हेमच०।

बुल्व त्रि० बुल्-व उल्वा० नि०। तिर्यग्भूते शत०ब्रा० १।५।४।१४।

बुष(स) न० बुष्यते उत्सृज्यते बुष-उत्सर्गे क पृषो० वा सत्वम्। (भागडा) १शुष्कधान्ये फलरहितधान्ये अमरः ; धान्यं बोधयः २उदके वेदनिघण्टुः ततः तृणा० चतुरर्थ्यां क। बुसक तत्समीपादौ त्रि०। पृषो० दीर्घः। बूसयम। [अबोसीत् अबोसि

बुस उत्सर्गे दि०पर०सक०सेट्। बुस्यति। इरित् अबुसत्

बस्त आदरे अनादरे च चु०उभ०सक०सेट्। बुस्तयति ते अबुबुस्तत् त।

बुस्त न० बुस्यते नाद्रियते आद्रियते वा बुस्त-घञ्। १पनसादिफलस्य त्वाच्ये अंशे (भुषि) २मांसपिष्टकभेदे च अमरभरतौ।

बूक न० बुक+पृषो० दीर्घः। बुकपक्षार्थे रमानाथः।

बृहदुक्थ म० पदे निघण्टुः।

बृषी स्त्री बृषन्तोऽस्यां सीदन्ति पृषो० बृषी च वृ इन्-ङ गौरा० ङीषस्य । व्रतीनामासने अमरः ।

बृ(वृ)ह वृद्धौ भ्वादि० पर० अक० सेट् ब(व)र्हति अब(व)र्हीत् । इदित् इत्येके तेन बृ(वृ)हति इत्यपि । कवि० कल्पद्रुमे बृहधातुमात्रस्य अन्तस्थादित्वमुक्तम् मेदि० "प्रोच्छितं निहते सिक्ते बृंहती वचनान्तरे । छन्दोभित् क्षुद्रवार्त्ताकीवारिधानीषु वाचि च । कण्टकारीमहत्योश्च" "भ्रमुतत्त्वतपोवेदे न द्वयोः पुंसि वेधसि" । ऋत्विग्योगभिदोर्विप्रे बृह्मणं वधवन्त्वयोः" । इत्यप्रकृतिबृहती ब्रह्मपदयोः ओष्ठ्यादितयोक्तत्वादस्य उभयादित्वम् ।

बृ(वृ)हक पु० बृ(ह)ह-क्वुन् । देवगन्धर्वभेदे भा० आ० १२३अ० ।

बृ(वृ)हच्चञ्चु पु० ६व० । महाचञ्चुशाके राजनि० ।

ब(वृ)हच्चित्र पु० ७ब० । फलपूरे बीजपूरे शब्दच० ।

बृ(वृ)हच्छल्क पु० ६ब० । चिङ्गटमत्स्ये जटा० ।

बृ(वृ)हच्छ्रवस् त्रि० ६ब० । महायशस्के भाग० ११४।१ ।

बृ(वृ)हज्जातक न० कर्म० । वराहमिहिरकृते जातकग्रन्थभेदे ।

बृ(वृ)हज्जाबाल पु० कर्म० । उपनिषद्भेदे उपनिषच्छब्दे दृश्यम् ।

बृ(वृ)हज्जीवन्ती स्त्री कर्म० । महाजीवन्त्याम् राजनि० ।

बृ(वृ)हड्ढक्का स्त्री कर्म० । १भेरीवाद्ये जटा० ।

बृ(वृ)हत् त्रि० बृह-अति संप्रवत् कार्य्यम् । १महति स्त्रियां ङीप् । सा च २उत्तरीयभेदे नवाक्षरपादके ३छन्दोभेदे ४क्षुद्रवार्त्ताक्यां ५वारिधान्यां ६वाचि ७कण्टकार्य्यांञ्च स्त्री मेदि० । ८विष्णौ पु० । "अणुर्बृ(वृ)हन् कृशः स्थूलः" विष्णुस० । आच्छादनवस्त्रे कन् । बृहतिका उत्तरीयवस्त्रे अमरः । स्वार्थे क । बृहतीशब्दे च स्त्री ।

बृ(वृ)हतीपति पु० बृ(ह)हत्या वाचः पतिः । पारस्करा० "तद्बृहतोः करपत्योश्चोरदेवयोः" वार्त्ति० देवतायामेव सुट् तलोपश्च नान्यत्र वाक्‌पतौ हेमच० ।

बृ(वृ)हत्क त्रि० बृहत्प्रकारः कन् । बृहत्प्रकारे

बृ(वृ)हत्कथा स्त्री वररुचिप्रणीते कथाभेदे ।

बृ(वृ)हत्कन्द पु० ६ब० । १गृञ्जने रत्नमाला । २विष्णुकन्दे राजनि० । [पु० हरिवं० ३१अ०

बृ(वृ)हत्कर्म्मन् त्रि० ६त० । १महाकर्मयुते २बृहद्रथपुत्रभेदे

बृ(वृ)हत्काय पु० अजमीढवंश्ये नृपभेदे भाग० ३१।१७ । ६ब० । २महादेहे त्रि० । [शाकभेदे त्रिका० ।

बृ(वृ)हत्कालशाक पु० नित्यक० । कृष्णति (कालकासुन्दिया)

बृ(वृ)हत्काश पु० नित्यक० । खड्गटे तृणभेदे हारा० ।

बृ(वृ)हत्कीर्त्ति त्रि० ६ब० । १महाकीर्त्तियुक्ते २आङ्गिरसाग्निपुत्रभेदे पु० भा० व० २१७अ० । ३असुरभेदे पु० हरिवं० ४२अ० ।

बृ(वृ)हत्कुक्षि त्रि० ६ब० । तुन्दिले अमरः । [अ० ६अ० ।

बृ(वृ)हत्केतु त्रि० ६ब० । १महाध्वजयुते । २राजभेदे पु० भा०

बृ(वृ)हत्क्षत्र पु० अजमीढवंश्ये नृपभेदे भाग० ८।२६ ।

बृ(वृ)हत्ताल पु० नित्यक० । हिन्तालवृक्षे राजनि० ।

बृ(वृ)हत्तिक्ता स्त्री बृहन् तिक्तो रसोऽस्याः । पाठायाम् राजनि० ।

बृ(वृ)हत्तृण पु० ६ब० । वंशे शब्दच० ।

बृ(वृ)हत्त्वच् पु० ६ब० । (छातिम) वृक्षभेदे रत्नमा० ।

बृ(वृ)हत्पत्र त्रि० ६ब० । १महापत्रयुक्ते वृक्षे २हस्तिकन्दे राजनि० । ३त्रिपर्णिकायां स्त्री राजनि० ।

बृ(वृ)हत्पाटलि पु० नित्यक० । धुस्तूरे त्रिका० । [शब्दच०

बृ(वृ)हत्पाद त्रि० ६ब० । १महाचरणयुक्ते वृक्षे २वटवृक्षे पु०

बृ(वृ)हत्पारेवत न० कर्म० । महापारेवते राजनि० ।

बृ(वृ)हत्पालिन् पु० बृ(ह)हन्तं पालयति पालि-णिनि । वनजीरके राजनि० ।

बृ(वृ)हत्पील पु० नित्यकर्म० । महापीलौ राजनि० ।

बृ(वृ)हत्पुष्पी स्त्री ६ब० ङीप् । १घण्टारववृक्षे जटा० । २महापुष्पयुतवृक्षमात्रे त्रि० स्त्रियां टाप् ।

बृ(वृ)हत्फल त्रि० ६ब० । १महाफलयुते । २कटुतुम्ब्यां ३माहेन्द्रवारुण्यां ४कुष्माण्ड्यां ५महाजम्बूवृक्षे च स्त्री टाप् राजनि० । [भेदे ।

बृ(वृ)हत्संहिता स्त्री वराहमिहिरप्रणीते ज्योतिषग्रन्थ-

बृ(वृ)हत्सामन् न० नित्यक० । सामभेदे तच्च साम "त्वामिद्धि हवामहे" इत्यस्यामृचि गेयं तच्च छन्दआर्चिकादि० पञ्चतावशाभिः १६१।६२ पृ० दर्शितम् । "वामदेव्यं बृ(ह)हत्साम ज्येष्ठसाम रथन्तरम्" सामगद्वारपाठपाठ्यतया विधानपारि० उक्तम् । "बृ(ह)हत्साम तथा साम्नाम्" गीता० । तच्च साम ब्रह्मप्रतिपादकमिति तद्भाष्यकारेणोक्तं समर्थितमानन्दगिरिणा "इन्द्रः सर्वेश्वरत्वेनानेन स्तूयते इति तस्य श्रैष्ठ्यमिति" ।

बृ(वृ)हत्सेन त्रि० ६ब० । १महासेनायुक्ते । २बार्हद्रथवंश्ये भाविनि नृपभेदे पु० भाग० ६।२२।१। ३मागधदेशीये नृपभेदे भा० आ० ६७अ० । कर्म० । ४महत्यां सेनायां स्त्री

बृ(वृ)हदग्नि पु० ६ब० । १नानाविधाग्नियुते ततः गोत्रा

पत्ये नर्गा॰ यञ्। बार्हदग्न्य तदपत्ये तस्य छात्राः कण्वा॰ अण् यलोपः। बार्हदग्न तस्य छात्रेषु ब॰ व॰ सि॰कौ॰। [स्त्रियां स्वाङ्गत्वात् ङीष्।

बृ(ब्र)हदङ्ग पुंस्त्री ६ब॰। १गजे शब्दच॰ २महाकाये त्रि॰।

बृ(ब्र)हदम्बालिका स्त्री कुमारानुचरमातृभेदे भा॰श॰४७अ॰

बृ(ब्र)हदम्ल पु॰ बृहन् अम्लो रसोऽस्य। (कामराङ्गा) कामरङ्गे शब्दच॰। [नृपभेदे हरिवं॰११अ॰।

बृ(ब्र)हदश्व पु॰ १ऋषिभेदे भा॰व॰५२अ॰। २श्रावस्तस्य पुत्रे

बृहदारण्यक न॰। उपनिषद्भेदे।

बृहदिषु पु॰ आजमीढपुत्रे १नृपभेदे हरिवं॰२०अ॰। हर्य्यश्ववंश्ये २नृपभेदे च ३२ अ॰।

बृ(ब्र)हदुक्थ न॰ कर्म॰। १महति उक्थे २अग्निवंश्ये तपस्पुत्रे २अग्निभेदे पु॰ भा॰ व॰ २१९ अ॰। "बृ(ब्र)हदुक्थोह वै वामदेव्यः" शत॰ ब्रा॰ १।२।२।१४। तदुक्थेन साध्ये २यज्ञे अश्वमेधे पु॰। [वेददीपे दृश्यम्।

बृ(ब्र)हदुक्ष पु॰ १जगत्सृष्टिकारके २प्रजापतौ च यजु॰८।८।

बृ(ब्र)हदुत्तरतापनी स्त्री कर्म॰। उपनिषद्भेदे।

बृ(ब्र)हदेला स्त्री कर्म॰। स्थूलैलायां राजनि॰।

बृ(ब्र)हद्गर्भ पु॰शिबिनृपपुत्रे यो हि ब्राह्मणभोजनार्थं प्रस्ताप्य संस्कृतः पुनरपि जीवितः तत्कथा भा॰ व॰ ११७ अ॰।

बृ(ब्र)हद्गु पु॰ राजभेदे भा॰ आ॰ १अ॰।

बृ(ब्र)हद्(गु)गृह पु॰ कारूषदेशे हेमच॰ स च देशः विन्ध्यपर्वतस्य पश्चात्स्थमालवदेशसमीपे स्थितः (बृहद्गृह) इति शिलापट्टलेखः। [शब्दच॰।

बृ(ब्र)हद्गोल न॰ नित्यक॰। (तरमुज) फलप्रधानवृक्षे

बृ(ब्र)हद्दर्भ पु॰ कक्षेयुवंश्ये नृपभेदे हरिवं॰ ३२अ॰।

बृ(ब्र)हद्दल पु॰६ब॰। १हिन्ताले २पट्टिकालोध्रे च राजनि॰

बृ(ब्र)हद्द्युम्न पु॰नृपभेदे भा॰व॰१३८अ॰ [महाधनयुते त्रि॰

बृ(ब्र)हद्धनुस् पु॰ आजमीढवंश्ये नृपभेदे हरिवं॰ २०अ॰।

बृ(ब्र)हद्धर्मन् पु॰ आजमीढवंश्ये नृपभेदे। हरिवं॰२०अ॰।

बृ(ब्र)हद्धर्मपुराण न॰ उपपुराणभेदे।

बृ(ब्र)हद्धन त्रि॰ बृहद्धनमस्य। १महाधने २इक्ष्वाकुवंश्ये नृपभेदे पु॰ हरिवं॰१५अ॰।

बृ(ब्र)हद्दल न॰ कर्म॰। महानाडुके त्रिका॰।

बृ(ब्र)हद्ब्रह्मन् पु॰आङ्गिरसे ऋषिभेदे। "ब्रह्मणो यस्तृतीयस् पुत्रः कुरुकुलोद्वह!। तस्याभवत् सुता भार्य्या प्रजानां च मे शृणु। बृहत्कीर्त्तिर्बृहज्ज्योतिर्बृहद्ब्रह्मा बृहन्मनाः। बृहन्मन्त्रो बृहद्भासस्तथा राजन्!

बृहस्पतिः" भा॰व॰ २१७ अ॰। बृहज्ज्योतिरादयस्तत्पुत्रे

बृ(ब्र)हद्भट्टारिका स्त्री॰ कर्म॰। दुर्गायां शब्दमाला।

बृह(ब्र)द्भय पु॰ सावर्णिमनोः पुत्रभेदे मार्कण्डेयपु॰९२अ॰।

बृ(ब्र)हद्भानु पु॰ ६ब॰। १अग्नौ २चित्रकवृक्षे च अमरः। ३आङ्गिरसे वह्निभेदे भा॰व॰ २२०। इन्द्रसावर्णिमन्वन्तरे ४हरेरवतारभेदे भाग॰ ८।१२ अ

बृ(ब्र)हद्रण पु॰इक्ष्वाकुवंश्ये भाविनि नृपभेदे भाग॰९।१२।९।

बृ(ब्र)हद्रथ पु॰ मौर्य्ये १नृपभेदे भाग॰१२।१। २आङ्गिरसे वह्नेः पुत्रभेदे भा॰२१९ ३मागधराजभेदे जरासन्धताते हरिवं॰३अ॰। ४चेदिराजवसोःपुत्रभेदे हरिवं॰ ११७अ॰।

बृ(ब्र)हद्रथन्तर न॰ साममेदे १आङ्गिरसवंश्ये वह्निभेदे भा॰व॰२१९अ॰।

बृ(ब्र)हद्राज पु॰ इक्ष्वाकुवंश्ये भाविनि नृपभेदे भाग॰ ९।१।१२

बृ(ब्र)हद्राविन् पु॰ बृहत् यथा तथा रौति रु-णिनि। क्षुद्रोलूके राजनि॰।

बृ(ब्र)हद्रूप पु॰ मरुद्गणभेदे हरिवं॰ २०४ अ॰।

बृ(ब्र)हद्वत् पु॰ बृहत् बृहत्साम तदस्त्यस्य स्तोत्रतया मतुप् मस्य वः। बृहत्सामस्तोत्रस्तुत्ये इन्द्रे मनु॰७।२२ २तत्साध्ये यज्ञे च ३नदीभेदे स्त्री ङीप् भा॰भी॰९अ॰।

बृ(ब्र)हद्वल्क पु॰ ६ब॰। पट्टिकालोध्रे राजनि॰।

बृ(ब्र)हद्वात पु॰७ब॰। अश्वारीहरे धान्यभेदे (देधान) रत्नमा॰

बृ(ब्र)हद्वारुणी स्त्री कर्म॰। महेन्द्रवारुण्याम् राजनि॰।

बृ(ब्र)हद्वीज ६ब॰। महाबीजयुते आम्रातकवृक्षे शब्दच॰।

बृ(ब्र)हन्नल पु॰ बृहन्नलेति आख्यात्वेन अस्त्यस्य अच्। अर्ज्जुने हेमच॰ "आदाय प्रययौ वीरः स बृहन्नलसारथिः" भा॰ वि॰३७अ॰। "अर्ज्जुन उवाच। प्रतिज्ञा षण्ढकोऽस्मीति करिष्यामि महीपते!। ज्याघातौ हि महान्तौ मे संवर्त्तुं नृप! दुष्करौ। वलयैश्छादयिष्यामि बाहू किणकृताविमौ। कर्णयोः प्रतिमुच्याहं कुण्डले ज्वलनप्रभे, पिनद्धकम्बुः पाणिभ्यां तृतीयां प्रकृतिं गतः। वेणीकृतशिरा राजन्! नाम्ना चैव बृहन्नला" इति तस्य च अज्ञातवासकाले तथाख्यत्वम् भा॰वि॰ १२अ॰ उक्तम्।

बृहन्नारदीय न॰ उपपुराणभेदे।

बृहन्नारायणोपनिषद् स्त्री॰उपनिषद्भेदे। [शब्दे दृश्यम्।

बृहन्नौका स्त्री॰ चतुरङ्गशब्दोक्ते क्रीडनभेदे। चतुरङ्ग-

बृहस्पति पु॰ बृहत्या॰ वाचः पतिः पारस्करा॰सुडादिः बृहतीपतिशब्दे दृश्यम्। आङ्गिरसे १ऋषिभेदे बृहद्ब्रह्मन्शब्दे दृश्यम्। २देवपुरोहिते ग्रहभेदे च। तस्य गतिभग-

चारादिकं भगोलशब्दे दर्शितम्। तत्रारम्भ गुरुवर्षशब्दे २६२१ पृ० तस्य ग्रहत्वप्राप्तिकथा गुरुशब्दे दृश्या।

बृहस्पतिचक्र न० बृहस्पतेः सञ्चारकाले नराकारचक्रस्य मूर्द्धादिषु स्थानगतस्य पातेन शुभाशुभसूचके चक्रभेदे तच्च ज्यो०त० उक्तं यथा "शीर्षे चत्वारि राज्यं जनयति करे दक्षिणे चापि षोढा चैवं कण्ठे विभूतिं मदन-परमितं यच्छति प्रीतिविघ्नम्। पादस्थाः षट् च पीड़ां पुनरपि जनयितुं वह्निको ... नेत्रे लीयन्ते मदयुः सुखमथ विजभे वाक्पतेः संक्रमणात्"।

बृहस्पतिपुरोहित पु० ६ब० १इन्द्रे २देवमात्रे च यजु० २।११

बृहस्पतिवार पु० ६त०। जीवाधिपत्ययुक्ते दिने तदानयनादिकं दिनपशब्दे दृश्यम्।

बृहस्पतिसव पु० यज्ञभेदे "वाजपेयेनेष्ट्वा राजा राजसूयेन यजेत ब्राह्मणो बृहस्पतिसवेन" आश्व० श्रौ० ९।९।

बृ(ब्र)हस्पतिस्तोम पु० यज्ञभेदे ताण्ड्य० २५।१।१।

बृ वृत्यां भृतौ च क्र्या०उभ०पर०सक०सेट्। बृ(वृ)णाति अवारीत् ववार वरि(री)ता विवरी(रि)षति बुबूर्षति बूर्षः।

बेकनाट पु० वे इत्यपभ्रंशः द्वित्वबोधकः एकं गुणं द्रव्यमृणिकाय दत्त्वा द्विगुणं मह्यं देयमिति ऋणेन नाटयति व्याहरति नाटि–अच् वे एकशब्दयोः पृषो० वेकभावः। कुसीदिनि ऋ० ८।६६।१० भाष्ये दृश्यम्।

बेकुरा स्त्री वाचि निघण्टुः।

बे(वे)ह प्रयत्ने भ्वा० आत्म० सक० सेट्। बे(वे)हते अबे(वे)हिष्ट बे(वे)हे। ऋदित् चङि न ह्रस्वः।

बोकड़ी स्त्री वस्तान्त्र्यां राजनि०।

बोध पु० बुध–भावे घञ्। १ज्ञाने त्रिका०। २जागरे च ३देशभेदे भा०भी०९अ०। [चक्रे वैतालिके शब्दमा०।

बोधक त्रि० बुध–णिच् ण्वुल्। १ज्ञापके बोधकरे द्र०।

बोधकर त्रि० बोधं ज्ञानं जागरणं वा करोति कृ–ट। १ज्ञानकारके निशान्ते जागरणकारके २वैतालिके च अमरः

बोधन न० बुध–णिच्–ल्युट्। १विज्ञापने कालवशात् गन्धा० देव्यू गतायां २तदुद्दीपने ३जागरणे च। "प्रथमं बोधनं हरेः" इति पुराणम्। "बाधाष्टे बोधनं कुर्यात्" इति स्मृतिः। देवीबोधनकालादिः ति०त०प्रदर्शितो यथा विष्णुपुराणम् "कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभे दिवा। नवम्यां बोधयेद्देवीं महाविभवविस्तरैः" "इषे आश्विने पक्षे नवम्यामार्द्रयोगतः। श्रीवृक्षे बोधयामि त्वां यावत् पूजां करोम्यहम्। ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च। अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा" इति मन्त्रलिङ्गञ्च। अकाल इति तु रात्रित्वेन दक्षिणायनस्य तथा च श्रुतिः "तपस्तपस्यौ शिशिरावृतुः। मधुश्च माधवश्च वासन्तिकावृतुः। शुक्रश्च शुचिश्च ग्रैष्मावृतुः। अथैतदुत्तरायणं देवानां दिनं, नभाश्च नभस्यश्च वार्षिकावृतुः इषश्च ऊर्जश्च शारदावृतुः। सहाश्च सहस्यश्च हैमन्तिकावृतुः। अथैतद्दक्षिणायनं देवानां रात्रिः" इति एतच्च "रात्रावेव महामाया ब्रह्मणा बोधिता पुरा। तथैव च नराः कुर्युः प्रतिसंवत्सरं नृप!" इति भविष्ये तद्विषयत्वम्। अतएव विष्णुपुराणे दिवेत्युक्तम्। एवञ्च कालिकापुराणेऽपि बोधने रात्राविति पदं देवतारात्रिपरम्। ततश्च पूर्वाह्णे नवम्यामार्द्रानक्षत्रयुक्तायां बोधनं पूर्वाह्णेतरकाले आर्द्रालाभे नवम्यामार्द्राभे दिवेत्यत्र दिवापदात् तत्रापि बोधनम्, अन्यथा दिवापदं व्यर्थं स्यादिति। ज्योतिषार्णवे व्यक्तमुक्तं वराहेण "कन्यादिमीनपर्य्यन्तं यत्र संप्राप्यते शिवः। तत्र बोधः प्रकर्त्तव्यो देव्या रात्रौ शुभप्रदः"। शिव आर्द्रा। एवञ्चोभयदिने पूर्वाह्णे नवमीलाभे परत्रार्द्रालाभे परत्र बोधनं न कुर्य्यात् पूर्वत्र, कुर्य्याद्बाधकपूर्वाह्णस्य बाधकप्रमाणानुरोधात् दिवानक्षत्रालाभे तु पूर्वाह्ण एव नवम्याम् उभयत्र पूर्वाह्णलाभे तु पूर्वदिन एव कुर्य्यात्। अत्र केवलनवम्यां बोधनविधेर्नक्षत्रस्यापि शुभफलत्वात्। "माघे वा फाल्गुने वापि भवेद् वै सायसप्तमी। आकरोति च यत् प्रोक्तं तत् प्रायो दृष्टिदर्शनात्" इति गौरागमाद्याकरीतिवत् आर्द्रायोगतः इत्यस्य प्राशस्त्यत्वेनाभिधानं प्रतीयते। ततश्चार्द्रारहितबोधने मन्त्रान्तरानुपदेशात् तद्युक्तमन्त्रः प्रथमयुक्तत्वेन प्रयुज्यते। "मन्त्रैर्न्यूनातिरिक्तञ्च यच्छिद्रं यदयज्ञियम्। यदमेध्यमशुद्धञ्च यातयामञ्च यद् भवेत्। तदोङ्कारप्रयुक्तेन सर्वञ्चाविकलं भवेत्" इति योगियाज्ञवल्क्यवचनात्। षष्ठ्यां बोधनेऽप्येवं नवम्यां बोधनावसरे तु षष्ठ्यां सायं बोधनं यथाह भविष्ये "षष्ठ्यां बिल्वतरौ बोधं सायं सन्ध्यासु कारयेत्"। सन्ध्योक्ता वराहमिहिरेण "अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत्"। षष्ठ्यां बोधने तु प्रागुक्तः "ओं रावणस्य वधार्थाय" इति "अहमथाद्रिजे षष्ठ्यां सायाह्ने संबोधये" इति च पठेत्। अत्र बोधनामन्त्रणयोः पृथक्त्वं तत्-

प्रकाशकमन्त्रभेदात् अत्र बोधनमन्त्रानुक्तावेव आमन्त्रणमन्त्रो तु "मेरुमन्दरकैलासहिमवच्छिखरे गिरौ"। इत्यादौ प्रागुक्तदेवीपुराणे नवमीषष्ठ्योर्बोधनामन्त्रणयोः पृथक्त्वाभिधानाच्च। ततश्च षष्ठ्यामुभयकरणेऽपि नवमीप्रवेशपूर्वदिने सायंषष्ठीलाभे एकदैवोभयकरणम्। यदा तु पूर्वदिने सायंषष्ठीलाभः न परदिने सायंषष्ठीलाभः तदा पूर्वेद्युर्बोधनं परदिने सायमामन्त्रणम्। यदा तूभयदिने सायंषष्ठ्यलाभस्तदा परदिने पूर्वाह्णे षष्ठ्यां बोधनं "बोधयेद् बिल्वशाखायां षष्ठ्यां देवीं फलेषु च। सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत्"।

बोधनी स्त्री बोध्यतेऽनया अत्र वा बुध–णिच्–करणे आधारे वा ल्युट्। १पिप्पल्यां तया हि मूर्च्छितो बोध्यते। २कार्त्तिकशुक्लैकादश्यां तत्र हि हरेर्बोधनम्। "शयनीबोधनीमध्ये या कृष्णैकादशी भवेत्। सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन" इति तिथ्यादित०। "तावद्गर्जन्ति तीर्थानि वाजिमेधादयो मखाः। मथुरायां प्रिया विष्णोर्यावन्न नायाति बोधनी" हरिभक्तिविलासे पद्मपु०वचनम्।

बोधवासर पु० ६त०। १हरिबोधनदिने कार्त्तिकशुक्लैकादश्याम् २तत्कर्त्तव्ये व्रते च। "जन्मप्रभृति यत् पुण्यं नरेणोपार्जितं भुवि। वृथा भवति तत् सर्वं न कृत्वा बोधवासरम्" हरिभक्तिविलासधृतस्कन्दपु०।

बोधान त्रि० बुध–शानच्। १विज्ञे २गीष्पतौ शब्दर०।

बोधि पु० बुध–इन्। १समाधिभेदे २पिप्पलवृक्षे ३बुद्धभेदे मेदि० ४बोधे त्रिका०। ५ज्ञातरि त्रि०। [ऽप्यत्र पु०

बोधितरु पु० कर्म०। अश्वत्थवृक्षे हेमच०। बोधिद्रुमादयो-

बोधिसत्त्व न० बोधि बोधयुतं सत्त्वम्। बुद्धभेदे हेमच०।

बौद्ध न० बुद्धेन प्रोक्तमण्। १बुद्धशास्त्रभेदे तच्च शास्त्रं प्रथमं बृहस्पतिना प्रयुक्तं तच्च बुद्धावतारे प्रपञ्चितम्। यथोक्तं मत्स्यपु० २४ अ०।

"आयुषो नहुषः पुत्रो वृद्धशर्मा तथैव च। रजिर्दम्भो विपाप्मा च वीराः पञ्च महारथाः। रजेः पुत्रशतं जज्ञे राजेयमिति विश्रुतम्" इत्युपक्रमे "रजिपुत्रैस्तदाच्छिन्नं बलादिन्द्रस्य वैभवम्। यज्ञभागश्च राज्यञ्च तपोबलगुणान्वितैः। राज्याद् भ्रष्टस्तदा शक्रो रजिपुत्रैर्निपीडितः। प्राह वाचस्पतिं दीनः पीडितोऽस्मि रजेः सुतैः। न यज्ञभागो राज्यं मे निर्जितश्च बृहस्पते!। राज्यलाभाय मे यत्नं विधत्स्व धिषणाधिप!। ततो बृहस्पतिः शक्रमकरोद्बलदर्पितम्। ग्रहशान्तिविधानेन पौष्टिकेन च कर्मणा। गत्वाथ मोहयामास रजिपुत्रान् बृहस्पतिः। जिनधर्मं समास्थाय वेदबाह्यं स वेदवित्। वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः। वेदबाह्यान् परिज्ञाय हेतुवादसमन्वितान्। जघान शक्रो वज्रेण सर्वान् धर्मबहिष्कृतान्"। तदधीते वेत्ति वा पुनः अण्। २तच्छास्त्राध्यायिनि ३तद्वेत्तरि च त्रि०। बुद्धशब्दे तन्मतं दर्शितम्।

बौध पु० बुधस्यायम् शैषिकोऽण्। बुधात्मजे पुरूरवसि हेम०।

बौधायन पु० बोधस्य गोत्रापत्यम् आङ्गिरसभिन्नम् इञ्। ततो यूनि इञन्तत्वात् फक्। यूनि बोधगोत्रापत्ये ऋषिभेदे तेन च कल्पसूत्रसपद्धतिश्च कृता।

बौधि पु० बोधस्य गोत्रापत्यमाङ्गिरसभिन्नम् इञ्। बोधस्य गोत्रापत्ये आङ्गिरसभिन्ने आङ्गिरसे तु यञ्। बौध्य इत्येव

बौध्य पु० बोधस्य गोत्रापत्यमाङ्गिरसः यञ्। आङ्गिरसे बोधगोत्रापत्ये तद्गीता च भा० शा० १७८अ० दर्शिता यथा "बौध्य उवाच। "उपदेशेन वर्त्तामि नानुशास्मीह कञ्चन। लक्षणं तस्य वक्ष्येऽहं तत्स्वयं परिमृश्यताम्। पिङ्गला कुररः सर्पः सारङ्गान्वेषणं वने। इषुकारः कुमारी च षडेते गुरवो मम"। भीष्म उवाच "आशाबलवती राजन्नैराश्यं परमं सुखम्। आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला१। सामिषं कुररं दृष्ट्वा बध्यमानं निरामिषैः। आमिषस्य परित्यागात् कुररः२ सुखमेधते। गृहारम्भो हि दुःखाय न सुखाय कदाचन। सर्पः३ परकृतं वेश्म प्रविश्य सुखमेधते। सुखं जीवन्ति मुनयो भैक्ष्यवृत्तिं समाश्रिताः। अद्रोहेणैव भूतानां सारङ्गा४ इव पक्षिणः। इषुकारो५ नरः कश्चिदिषावासक्तमानसः। समीपेनापि गच्छन्तं राजानं नावबुद्धवान्। बहूनां कलहो नित्यं द्वयोः सङ्कथनं ध्रुवम्। एकाकी विचरिष्यामि कुमारीशङ्खको६ यथा"। बोधो देशभेदोऽभिजनोऽस्य शण्डिकादि० ञ्य। पित्रादिक्रमेण २तद्देशवासिनि त्रि०।

ब्य(व्य)ध ताडने दिवा० पर० सक० अनिट्। वि(वि)ध्यति अव्या(व्या)त्सीत् वि(वि)व्या(व्या)ध वव्यद्धिथ सनि बिभ्यत्सति। [अबुबुधत् त।

ब्रध उत्सर्गे विभागे च चु०उभ०सक० सेट्। व्राधयति–ते

ब्र(व्र)ण शब्दे भ्वा०पर०अक०सेट्। (ब्र)व्रणति। अब्र(व्र)णीत्-अब्र(व्र)ाणीत्। कविकल्पद्रुमेऽयमन्त्यस्थादिः।

ब्रध्न पु० बन्ध–नक् ब्रधादेशः। १सूर्य्ये २अर्कवृक्षे अमरः। ३शिवे हेमच०। ४दिने ५अश्वे जिदण्डुः ६वृक्षभेदे

तस्य गोत्रापत्यम् कुञ्जा० च्फञ्। ब्राध्नायन तद्गोत्रापत्ये पुंस्त्री०। ७भौत्यमनोः पुत्रभेदे मार्कपु० १००अ०। ८रोगभेदे "अभ्यभिष्यन्दिगुर्वन्नसेवनान्निचयं गतः। करोति पञ्चिवच्छोथं दोषो वङ्क्षणसन्धिषु। ज्वरशूलाङ्गसादाढ्यं तं ब्रध्नमिति निर्दिशेत्" माधवनि०

ब्रध्नश्व पु० नृपभेदे भा०व० ९८अ०।

ब्रह्मकन्यका स्त्री ६त०। १सरस्वत्यां त्रिका० (वामनहाटी) २ब्राह्म्यां राजनि०। [उ०३८अ०। २ईश्वरार्पितकर्मफले त्रि०

ब्रह्मकर्मन् न० ब्रह्मविहितं कर्म०। १वेदविहिते कर्मणि भा०

ब्र(व)ह्मकर्मसमाधि पु० ब्रह्मणि कर्मणां समाधिः "ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गन्तव्यम् ब्रह्मकर्मसमाधिना" गीतोक्ते सर्वकर्मणां कर्त्राद्यस्य जातस्य ब्रह्मरूपेण चिन्तने।

ब्र(व्र)ह्मकुण्ड न० ब्रह्मनिर्मितं कुण्डम् शा० त०। सरोवरभेदे तदाविर्भावकथा।

"पाण्डुनाथस्योत्तरस्यां ब्रह्मकुण्डाह्वयं सरः। ब्रह्मणा निर्मितं पूर्वं स्नानाय स्वर्गवासिनाम्। आयामेन शतव्यामं विस्तीर्णेन तदर्द्धकम्। सर्वपापहरं पुण्यं देवलोकात् समागतम्" तत्र स्नानमन्त्रः। "कमण्डलु समुद्भूतः ब्रह्मकुण्डाभिधस्तथ!। हर मे सर्वपापानि पुण्य स्वर्गञ्च साधय। इत्यनेन तु मन्त्रेण स्नायात् तस्मिन् सरोजले। पाण्डुनाथञ्च संपूज्य विष्णुसायुज्यमाप्नुयात्। ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्। ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः" कालिकापु०८१ अ०।

ब्र(ब्र)ह्मकूट पु० पर्वतभेदे ब्रह्मकुण्डशब्दे दृश्यम्।

ब्र(व्र)ह्मकूर्च न० "अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः। पञ्चगव्यं पिबेत् प्रातः ब्र(व्र)ह्मकूर्चमिति स्मृतम्" इत्युक्ते १पञ्चगव्यपानरूपे व्रतभेदे। २कुशोदकसहित पञ्चगव्ये च नारसिंहपु० "पञ्चगव्येन देवेशं यः स्नापयति भक्तितः। ब्रह्मकूर्चविधानेन विष्णुलोके महीयते" "ब्र(व्र)ह्मकूर्चविधानेन कुशोदकयुक्तेन" देव० प्र०त० रघु०। प्रायश्चित्ताङ्ग ब्र(व्र)ह्मकूर्चप्रमाणादि तत्पानादिपद्धतौ २२६१पृ० अस्माभिर्दर्शितम्।

ब्र(व्र)ह्मकृत् त्रि० ब्र(व्र)ह्म तपः करोति कृ-क्विप्। १तपःकर्त्तरि २विष्णौ पु० "ब्र(व्र)ह्मण्यो ब्र(व्र)ह्मकृत् ब्रह्मा" विष्णुस०

ब्र(व्र)ह्मकृत त्रि० ३त०। ब्रह्मणा कृते। ततः शुभ्रा० अपत्ये ढक्। ब्राह्मकृतेय तदपत्ये पुंस्त्री०। [राजनि०।

ब्र(व्र)ह्मकोशी स्त्री ब्र(व्र)ह्मणः कोषीव। अजमोदायाम्

ब्र(व्र)ह्मगर्भा स्त्री ब्र(व्र)ह्मेव गर्भोऽस्य। आदित्यभक्तायां राजनि०।

ब्र(व्र)ह्मगार्ग्य पु० ऋषिभेदे हरिवं० १५८ अ०।

ब्र(व्र)ह्मगिरि पु० कामाख्यानिलयपूर्वस्यां स्थिते गिरिभेदे "ततस्तु नीलकूटाख्यं कामाख्यानिलयं परम्। तत्पूर्वभागे वसति ब्रह्मा ब्रह्मगिरिः पुनः" कालिकापु०८१अ०

ब्र(व्र)ह्मगीता स्त्री ६त०। भा० आनु० ३५ अ० दर्शितायां ब्रह्मणा कथितायां अनुशासनरूपगाथायाम्।

"अत्र गाथाः पुरा गीताः कीर्त्तयन्ति पुराविदः। सृष्टा द्विजातीन् धाता हि यथापूर्वं समादधत्। न चान्यदिह कर्त्तव्यं किञ्चिदूर्द्ध्वं यथाविधि। गुप्तो गोपायते ब्रह्म श्रेयो वस्तेन शोभनम्। स्वमेव कुर्वतां कर्म श्रीर्वो ब्राह्मी भविष्यति। प्रमाणं सर्वभूतानां प्रग्रहाश्च भविष्यथ। न शौद्रं कर्म कर्त्तव्यं ब्राह्मणेन विपश्चिता। शौद्रं हि कुर्वतः कर्म धर्मः समुपरुध्यते। श्रीश्च बुद्धिश्च तेजश्च विभूतिश्च प्रतापिनी। स्वाध्यायेनैव माहात्म्यं विपुलं प्रतिपत्स्यथ। हुत्वा चाहवनीयस्थं महाभाग्ये प्रतिष्ठिताः। अग्रभोज्याः प्रसूतानां श्रिया ब्राह्म्याऽनुकल्पिताः। श्रद्धया परया युक्ता ह्यनभिद्रोहलब्धया। स्वस्वाध्यायनिरताः सर्वान् कामानवाप्स्यथ। यच्चैव मानुषे लोके यच्च देवेषु किञ्चन। सर्वं तु तपसा साध्यं ज्ञानेन नियमेन च। इत्येवं ब्रह्मगीतास्ते समाख्याता मयाऽनघ"।

ब्र(व्र)ह्मग्रन्थि पु० यज्ञोपवीतस्य ग्रन्थिभेदे

ब्र(व्र)ह्मघातक पु० ब्रह्माणं विप्रं हन्ति हन-ण्वुल्। १ब्रह्महत्याकारके "पङ्क्तिभेदी वृथा पाकी नित्यं ब्राह्मणनिन्दकः। आदेशी वेदविक्रेता पञ्चैते ब्रह्मघातकाः"। व्यासोक्ते पारिभाषिके २पापभेदयुक्ते त्रि०। ब्रह्मघातोऽस्त्यस्यां मत्वर्थेन ठन्। द्वादश्यां भक्षणे ब्रह्महत्यापापयुतायां पूतिकायां "पूतिका ब्रह्मघातिका" ति०त०।

ब्र(व्र)ह्मघोष पु० ६त०। वेदध्वनौ।

ब्र(व्र)ह्मघ्न त्रि० ब्रह्माणं ब्राह्मणं हन्ति हन-क। ब्रह्महत्याकारके "ब्रह्मघ्नमपि चण्डालं कं पतन्तं पुनीमहे" म० त०। स्त्रियां ङीप्।

ब्र(व्र)ह्मचक्र न० ब्रह्मनिर्मितं चक्रम्। १कार्यकारणात्मके संसाररूपे चक्रे। "सर्वाजीवे सर्वसंस्थे बृहन्ते अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे" श्वेताश्वतरोप०। रुद्रयामलोक्ते २दीक्षोपयोगिचक्रभेदे च।

ब(व)ह्मचर्य्य न॰ ब्रह्मणे वेदग्रहणार्थं चर्य्यम्। द्विजानां वेदग्रहणार्थव्रतभेदे। "प्रतिवेदं ब्रह्मचर्य्यं द्वादशाब्दानि पञ्च वा। ग्रहणान्तिकमित्येके" गरुड़पु॰ ९४अ॰। तत्प्रकारो मनुनोक्तो यथा

"कृतोपनयनस्यास्य व्रतादेशनमिष्यते। ब्रह्मणो ग्रहणञ्चैव क्रमेण विधिपूर्ब्बकम्। यद् यस्य विहितञ्चर्म्म यत् सूत्रं या च मेखला। यो दण्डो यच्च वसनन्तत्तदस्य व्रतेष्वपि। सेवेतेमांस्तु नियमान् ब्रह्मचारी गुरौ वसन्। सन्नियम्येन्द्रियग्रामन्तपोवृद्ध्यर्थमात्मनः। नित्यं स्नात्वा शुचिः कुर्य्याद्देवर्षिपितृतर्पणम्।' देवताभ्यर्चनञ्चैव समिदाधानमेव च। वर्जयेन्मधुमांसञ्च गन्धं माल्यं रसान् स्त्रियः। शुक्तानि यानि सर्व्वाणि प्राणिनाञ्चैव हिंसनम्। अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्रधारणम्। कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्। द्यूतञ्च जनवादञ्च परिवादन्तथाऽनृतम्। स्त्रीणाञ्च प्रेक्षणालम्भमुपघातम्परस्य च। एकः शयीत सर्व्वत्र न रेतः स्कन्दयेत् क्वचित्। कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः। स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः। स्नात्वार्कमर्च्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्। उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान्। आहरेद्यावदर्थानि भैक्षञ्चाहरहश्चरेत्। वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु। ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्। गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु। अलाभे त्वन्यगेहानां पूर्ब्बं पूर्ब्बं विवर्जयेत्। सर्व्वं वापि चरेद् ग्रामं पूर्ब्बोक्तानामसम्भवे। नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत्। दूरादाहृत्य समिधः संनिदध्याद्विहायसि। सायम्प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः। अकृत्वा भैक्षचरणमसमिध्य च पावकम्। अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्। भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद् व्रती। भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता। व्रतवद्देवदैवत्ये पित्र्ये कर्म्मण्यथर्षिवत्। काममभ्यर्थितोऽश्नीयाद् व्रतमस्य न लुप्यते। ब्राह्मणस्यैव कर्म्मैतदुपदिष्टं मनीषिभिः। राजन्यवैश्ययोस्त्वेवं नैतत् कर्म्म विधीयते"। ततः गुरुशुश्रूषोक्ता सा च गुरुशुश्रूषाशब्दे २६२१ पृ॰ दर्शिता। २योगाङ्गयमभेदे च "अहिंसासत्याऽस्तेय ब(व)ह्मचर्य्याऽपरिग्रहा यमाः" पात॰। तत्र ब(व)ह्मचर्य्यं व्याकृतं भाष्यविवरणाभ्यां यथा "ब(व)ह्मचर्य्यं गुप्तेन्द्रियस्योपस्थस्य संयमः" भा॰। "संयतोपस्थोऽपि हि स्त्रीप्रेक्षणतदालापकन्दर्पायतनतदङ्गस्पर्शनसक्तो न ब(व)ह्मचर्य्यवान् तन्निरासायोक्तं गुप्तेन्द्रियस्येति इन्द्रियान्तराण्यपि तत्र लोलुपानि रक्षणीयानि" विव॰। तत्र अष्टाङ्गमैथुनशब्दे ५२४ पृ॰ दर्शितवाक्येन मैथुनस्य स्मरणाद्यष्टाङ्गतया तदुपयोगीन्द्रियाणि संयम्यानीत्यर्थः। तत्फलञ्च तत्रोक्तं यथा "ब(व)ह्मचर्य्यप्रतिष्ठायां वीर्य्यलाभः" पात॰। "यस्य लाभादप्रतिघान् गुणानुत्कर्षयति सिद्धश्च विनेयेषु ज्ञानमाधातुं समर्थो भवति" भा॰। "वीर्य्यं सामर्थ्यं यस्य लाभादप्रतिघान् गुणानणिमादीन् विनेयेषु शिष्येषु ज्ञानं योगतदङ्गविषयमाधातुं समर्थो भवति" विव॰। तथाच अष्टाङ्गमैथुनवर्जनमेव ब(व)ह्मचर्य्यं तच्च स्त्रीपुंसयोः साधारणं पुंसः स्त्रीस्मरणाद्यष्टाङ्गराहित्यस्येव स्त्रीणां पुंस्मरणादिशून्यत्वस्यापि तथात्वम् "अतएव ब(व)ह्मचर्य्यं तदभ्यावरोहणं वा" विष्णुसू॰। विधवानामपि ब(व)ह्मचर्य्यं विहितम् "मृते भर्त्तरि साध्वी स्त्री ब(व)ह्मचर्य्यव्यवस्थिता। स्वर्गं गच्छत्यपुत्रापि यथा ते ब(व)ह्मचारिणः" मनुव्याख्यायां ब(व)ह्मचर्य्ये व्यवस्थिता अकृतपुरुषान्तरमैथुना" कुल्लू॰ उक्तम्। भावे क्यप् ब्रह्मचर्य्या तत्रार्थे स्त्री।

ब(व)ह्मचारिन् पु॰ ब(व)ह्म वेदस्तद्ग्रहणार्थं चरति व्रतभेदम् चर+णिनि। १उपनयनानन्तरमाद्याश्रमयुते द्विजातौ उपचारात् २तदाश्रमे च। तस्य कर्त्तव्यादिकं मनूक्तं ब(व)ह्मचर्य्यशब्दे दर्शितम्।

ब(व)ह्मचारिणी स्त्री "वेदेषु चरते यस्मात् तेन सा ब्रह्मचारिणी" देवीपु॰ ४५ अ॰ निरुक्तियुक्तायां वेदमातृगायत्र्यां चिच्छक्तिरूपायां १दुर्गायां २ब्रह्मचर्य्ययुतायां स्त्रियाञ्च "आसीतामरणात् क्षान्ता नियता ब(व)ह्मचारिणी" मनुः। ३वारुणीवृक्षे राजनि॰। ४भार्ङ्गीशाके रत्नमाला।

ब(व)ह्मज पु॰ ब्रह्मणो जायते जन–ड। १हिरण्यगर्भे "यो वै ब(व)ह्माणं विदधाति पूर्वं यश्चास्मै प्रहिणोति वेदम्" श्रुतेः "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्बहुधा प्रजाः" इत्युपक्रमे "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयंब्रह्मा सर्व्वलोकपितामहः" इति मनूक्तेश्च तस्य तथात्वम्। २ब्रह्मजातमात्रे पञ्चभूतादौ च "यतो वा इमानि भूतानि जायन्ते" इत्युपक्रमे "तद् विजिज्ञासस्व ब्रह्मेति" श्रुतौ ब्रह्मतः सर्व्वभूतोत्पत्तिश्रवणात्।

ब(व्र)ह्मज्ञ त्रि॰ ब्रह्म जानाति ज्ञा–क। १ब्रह्मवेत्तरि २विष्णौ पु॰ “ब्रह्मज्ञो ब्राह्मणप्रियः” विष्णु स॰। [राजनि॰

ब(व्र)ह्मजटा स्त्री ब्रह्मणो जटेव संहतत्वात्। दमनकवृक्षे

ब्र(व)ह्मजा(या)मल न॰ यामलभेदे तन्त्रे।

ब(व्र)ह्मजिज्ञासा स्त्री ६त॰। ब्रह्मावगतिफलके विचारे। शारीरकभाष्ये १सूत्रे तत्राधिकार्य्यादिकं दृश्यम्।

ब्र(व्र)ह्मजीविन् पु॰ ब्रह्म वेदस्तद्विहितेन श्रौतकर्मणा जीवति जीव–णिनि। द्रव्यार्थं परकीयश्रौतादिकर्मकारके

ब्र(व्र)ह्मज्ञान न॰ ब्रह्मणो ज्ञानं तेन सह आत्माभेदज्ञानम्। ब्रह्मविद्यायां तच्च अहं ब्रह्मास्मीत्येवंरूपम् “आत्मानं चेत् विजानीयादयमस्मीति पुरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्” श्रुत्या तदभेदज्ञानस्यैव मोक्षहेतुत्वमुक्तं “वेदान्तशास्त्रसिद्धान्तब्रह्मज्ञानं वदाम्यहम्। अहंब्रह्म परं ज्योतिः विष्णुरित्येव चिन्तयेत्। सूर्य्ये हृद्व्योम्नि वह्नौ च ज्योतिरेकं त्रिधा स्थितम्। यथा वर्षिः शरीरस्थं गवां न कुरुते बलम्। निर्गतं कर्मसंयुक्तं दत्ते तासां महाबलम्। तथा विष्णुः शरीरस्थो न करोति हितं नृणाम्। विनाऽऽराधनया देवः सर्वगः परमेश्वरः। आरुरुक्षुयतीनाञ्च कर्मज्ञानमुदाहृतम्। आरूढ़योगवृक्षाणां ज्ञानं योगः परं मतम्” गरुड़पु॰ २४॰ अ॰। न्यायादिमते तच्चारोपज्ञानं वेदान्तिमते प्रमारूपम्। तत्त्वमसि अहंब्रह्मास्मीत्यादिवाक्यजन्यमपि तज्ज्ञानं मननिदिध्यासनादिना पश्चात् प्रत्यक्षमुत्पद्यते। तज्ज्ञानाभिलापादिकं विवेकचू॰ दर्शितं यथा “अव्यक्तादिस्थूलपर्य्यन्तमेतद्विश्वं यत्राभासमात्रं प्रतीतम्। व्योमप्रख्यं सूक्ष्ममाद्यन्तहीनं ब्रह्माद्वैतं यत्तदेवाहमस्मि। सर्वाधारं सर्ववस्तुप्रकाशं सर्वाकारं सर्वगं सर्वशून्यम्। नित्यं शुद्धं निश्चलं निर्विकल्पं ब्रह्माद्वैतं यत् तदेवाहमस्मि। यन्निरस्ताशेषमायाविशेषं प्रत्यग्रूपं प्रत्ययागम्यमानम्। सत्यज्ञानानन्दमानन्दरूपं ब्रह्माद्वैतं यत् तदेवाहमस्मि। निष्क्रियोऽस्म्यविकारोऽस्मि निष्कलोऽस्मि निराकृतिः। निर्विकल्पोऽस्मि नित्योऽस्मि निरालम्बोऽस्मि निर्द्वयः। सर्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमद्वयः। केवलाखण्डबोधोऽहमानन्दोऽहं निरन्तरम्”।

ब्र(व्र)ह्मण्यति पु॰ ६त॰ बहुव्रह्म॰ निपातो तस्य पदत्वपतीतेः रुत्वपदत्वम्। १ब्राह्मणजातिस्वामिनि यजु॰ १६।२८।२मन्त्रस्वामिनि च “वह्निं विततं बृहस्पते। ताण्ड्यब्रा॰ १।२।८। “हे ब्रह्मणस्पते! मन्त्रस्वामिन्” भा॰

ब(व्र)ह्मण्य पु॰ ब्रह्मणे हितः। १विष्णौ “ब्रह्मण्यो देवकीपुत्रः” विष्णु सं॰। २ब्राह्मणहितमात्रे त्रि॰ ३ब्रह्मदारुवृक्षे पु॰ अमरः। ४मुञ्जतृणे ५तालवृक्षे राजनि॰। ६शनैश्चरे ७ब्रह्मणि तपसि साधौ त्रि॰ मेदि॰।

ब्र(व्र)ह्मतीर्थ ६त॰। १पुष्करमूले राजनि॰ २पुष्करतीर्थे च। ३तीर्थभेदे यत्र स्नाने “तत्र वर्णावरः स्नात्वा ब्राह्मण्य लभते नरः। ब्राह्मणश्च विशुद्धात्मा गच्छेत परमां गतिम्” भा॰ व॰ ८३अ॰। फलसुक्तम्।

ब(व्र)ह्मत्व न॰ ब्रह्मणो भावः त्व। १ऋत्विग्विशेषस्य ब्रह्मणो धर्मे २शुद्धरीयब्रह्मभावे च।

ब्र(व्र)ह्मतुङ्ग पु॰ कालपर्वतभेदे। “स्निग्धाञ्जनचयाकारं संप्राप्तः कालपर्वतम्। ब्रह्मतुङ्गं नदीश्चान्यास्तथा जनपदानपि” भा॰ द्रो॰ ८अ॰।

ब्र(व्र)ह्मद पु॰ ब्रह्म वेदं ददाति। उपनीय वेददातरि आचार्य्ये “उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता” मनुः दा–क ब्रह्मदात् तत्रार्थे पु॰।

ब्र(व्र)ह्मदण्ड पु॰ ब्रह्मणो दण्डः। १ब्राह्मणदत्ते रुषाभिशापरूपे दण्डे “ब्रह्मदण्डहता ये च विद्युदग्निहताश्च ये” ति॰ त॰ षोड़शीश्राद्धमन्त्रः। २तन्निमित्तयष्टिरूपे दण्डे च। “धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं परम्। एकेन ब्रह्मदण्डेन बहवो नाशिता मम” रामा॰ अयो॰ विश्वामित्रवाक्यम्। ४ब्राह्मणयष्टिकवृक्षे शब्दच॰। ५विप्रस्य यष्टौ च। ६केतुभेदे वृ॰स॰ ११अ॰। केतुशब्दे दृश्यम्।

ब्र(व्र)ह्मदण्डी स्त्री वृद्धो दण्डः कोप् ब्रह्मोपपन्नाङ्गं दण्डी। क्षुद्रक्षुपभेदे कण्टकपत्रफलायामजगण्डयां राजनि॰।

ब्र(व्र)ह्मदत्त दशाश्वमेधस्थे नृपभेदे ३त॰। २हिरण्यगर्भेण दत्ते त्रि॰ ३त॰। ३विप्राय दत्ते त्रि॰ ४शुकदेवस्य कन्यायां कत्वीनामाख्यायां अणूहस्य पुत्रभेदे पु॰ तत्कथा हरिवं॰ ११ अ॰ दृश्या। [यान् अमरः।

ब्र(व्र)ह्मदर्भा स्त्री ब्रह्मणो दर्भो यस्थानस्याः। यमानिका-

ब्र(व्र)ह्मदाय पु॰ ब्र(व्र)ह्म ण(वे) इ वेदाध्ययनसमाप्तौ, विप्राय वा राज्ञा दीयते दा–कर्मणि घञ्। समावर्त्तविप्राय देये धने “ब्र(व्र)ह्मदायागतां भूमिं हरेयुर्ब्राह्मणो-सुताः” दायभागधृतस्मृतिः। [वृक्षभेदे अमरः।

ब्र(व्र)ह्मदारु पु॰ ब्रह्मणो विप्रस्य हितः दारुः। अश्वत्थाकारे

ब्र(व्र)ह्मद्विष् त्रि॰ ब्रह्म वेदाय विप्राय वा द्वेष्टि द्विष–क्विप्। १वेदनिन्दके हरि वेदनिन्दके च मनुः ८।१५।

बृ(ब्र)ह्मन् न० बृंह-मनिन् "बृंहेर्नोऽच्चेति" उणा० नकारस्याकारे ऋतो रत्वम्। १वेदे "तस्मादेतद् ब्रह्म नाम रूपमन्नञ्च जायते श्रुतिः"। "तेन ब्रह्म हृदा" भाग० १।१।१। २तपसि, ३सत्ये ४तत्त्वे यथार्थे अमरः। सर्वगुणातीते विशुद्धे तुरीये ५चित्स्वरूपे च। ६ हिरण्यगर्भे ७विप्रे ८ऋत्विग्विशेषे च पु० अमरः। विष्कम्भादिषु सप्तविंशे ९योगे मेदि०। उज्ज्वलदत्तेन दन्त्योष्ठ्यादित्वेन साधितम् मेदिनीकरेण त्वोष्ठ्यादित्वेन कीर्त्तनात्तथापि। ब्रह्म च सच्चिदानन्दात्मकम्। तच्च तस्य स्वरूपलक्षणम्। विवरणानुसारिणस्तु "आनन्दो विषयानुभवो नित्यत्वञ्चेति सन्ति धर्मा अपृथक्त्वेऽपि पृथगिवावभासन्ते" इति तन्मोक्तौ मिथ्याभावः सत्यत्वम् अज्ञानभावश्चित्त्वम्। दुःखाभाव आनन्द इत्याहुः। तेषामभावानाञ्च ब्रह्मरूपाधिकरणे स्थितत्वात् अभावस्याधिकरणस्वरूपतया ब्रह्मरूपत्वमिति। तस्य तटस्थलक्षणञ्च जगज्जन्मस्थितिप्रलयानां प्रत्येकमुपादानप्रत्यक्षचिकीर्षाकृतिमत्त्वं तेन भवन्तच्युतत्वम्" वेदान्तप०। अतएवोक्तं श्रीधरेण "विश्वसर्गविसर्गादिनवलक्षणलक्षितमिति"। तच्च ब्रह्म द्विविधं निर्गुणं सगुणञ्च। सच्चिदानन्दात्मकस्यैव निर्गुणत्वं जगज्जन्मादिकर्तृत्वे च सगुणत्वम्। जाग्रदाद्यवस्थात्रयसाक्षिणश्च सगुणत्वं अवस्थात्रयातीतस्य चतुरीयसंज्ञा "शिवमद्वैतं चतुर्थं मन्यन्ते" इति श्रुतेस्तथात्वम्। तत्र तस्य तटस्थलक्षणाभिप्रायेण "जन्माद्यस्य यतः" शा०सू० "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व ब्रह्मेति" श्रुतिश्च प्रवृत्ते तस्य स्वरूपलक्षणाभिप्रायेण "निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनम्" इत्याद्याः श्रुतयः प्रवृत्ताः। आत्मबोधे तु तस्य ब्रह्मणोऽखिलवस्त्वपेक्षया श्रेष्ठत्वाद्ब्रह्मत्वमुक्तं यथा "यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम्। यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत्। यद् दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः। यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत्। तिर्यगूर्द्ध्वमधः पूर्णं सच्चिदानन्दमद्वयम्। अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत्। अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽद्वयम्। अखण्डानन्दमेकं यत् तद्ब्रह्मेत्यवधारयेत्। दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत्। तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम्। सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते। अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत्"। तच्च निर्गुणमपि गुणभेदेन नानारूपं यथोक्तम् "ब्रह्मैकं मूर्त्तिभेदस्तु गुणभेदेन सन्ततम्। तद्ब्रह्म द्विविधं वस्तु सगुणं निर्गुणं शिव!। मायाश्रितो यः सगुणो मायातीतश्च निर्गुणः। स्वेच्छामयश्च भगवानिच्छया विकरोति च। इच्छाशक्तिश्च प्रकृतिः सर्वशक्तिप्रसूः सदा। केचिद्वदन्त्येकं ब्रह्म ज्योतिः सनातनम्। केचिद्वदन्ति द्विविधं ब्रह्मप्रकृतिपूर्वकम्। शृणु ये च वदन्त्येकं प्रकृतिपुरुषयोः परम्। तस्माद्भवति तौ द्वौ च तद्ब्रह्म सर्वकारणम्"। अथवैकं परं ब्रह्म द्विविधं भवतीच्छया। इच्छाशक्तिश्च प्रकृतिः सर्वशक्तिप्रसूः सदा" ब्रह्मवैवर्त्ते जन्मख० ४१ अ०। तस्य नवधा रूपं यथा "योगिनो यं वदन्त्येव ज्योतीरूपं सनातनम्१। ज्योतिरभ्यन्तरे नित्यरूपं२ भक्ता वदन्ति यम्। वेदा वदन्ति सत्यं३ यं नित्यमाद्यं४ विचक्षणाः। यं वदन्ति सुराः सर्वे परं स्वेच्छामयं प्रभुम्५। सिद्धेन्द्रा मुनयः सर्वे सर्वरूपं६ वदन्ति यम्। यमनिर्वचनीयञ्च योगीन्द्रः शङ्करो वदेत्७। स्वयं धाता च प्रवदेत् कारणानाञ्च कारणम्८। शेषो वदेदनन्तं९ यं नवधारूपमीश्वरम्। तर्काणामेव षण्णां यं षड्विधं रूपमीश्वरम्। वैष्णवानामेकरूपं वेदानामेकमेव च। पुराणानामेकरूपं तथा त्रिविधं स्मृतम्। न्यायोऽनिर्वचनीयञ्च यन्मतं शङ्करोऽब्रवीत्। नित्यं वैशेषिकास्त्वन्यं वदन्ति च विचक्षणाः। सांख्यो वदति तं देवं ज्योतीरूपं सनातनम्। मीमांसा सर्वरूपञ्च वेदान्तः सर्वकारणम्। पातञ्जलोऽप्यनन्तञ्च वेदाः सत्यस्वरूपकम्। स्वेच्छामयं पुराणञ्च भक्ताश्च नित्यविग्रहम्" इति तत्रैव १२८अ०। अन्यथाऽपि सत्त्वादिगुणभेदेन तस्य चतुर्धा रूपं यथा "चतुर्विभागः संसृष्टौ चतुर्धा संस्थितः स्थितौ। प्रलयञ्च करोत्यन्ते चतुर्भेदो जनार्दनः। एकेनांशेन ब्रह्माऽसौ भवत्यव्यक्तमूर्त्तिमान्। मरीचिमिश्राः पतयः प्रजानामन्यभागतः। कालस्तृतीयस्तस्यांशः सर्वभूतानि चापरः। इत्थं चतुर्धा संसृष्टौ वर्त्ततेऽसौ रजोगुणः। एकांशेन स्थितो विष्णुः करोति परिपालनम्। मन्वादिरूपी चान्येन कालरूपी परेण च। सर्वभूतेषु चान्येन संस्थितिं कुरुते स्थितः। सत्त्वं गुणमुपाश्रित्य जगतः पुरुषोत्तमः। आश्रित्य तमसो हन्ति मन्तकाले तथा प्रभुः। रुद्रस्वरूपो भगवानेकांशेन भवत्यजः। अग्न्यन्तकादिरूपेण भागेनान्येन वर्त्तते।

कालस्वरूपो भागोऽन्यः सर्वभूतानि चापरः। विनाशं कुर्वतस्तस्य चतुर्द्धैवं महात्मनः” विष्णुपु० १अंशे २अ०। वेधाश्च रजोगुणप्रधानोपाधिकः कार्य्यब्रह्मा। ऋत्विग्भेदश्च अच्छावाकशब्दे ८५ पृ० दर्शितेषु प्रधानेषु चतुर्षु ऋत्विक्षु मध्ये एकतमः।“त्रयाणामपराधे तु ब्रह्मा परिहरेत् सदा” आश्व० श्रौतसूत्रकारिका। “त्रयाणामध्वर्य्यूद्गातृहोतॄणां वेदत्रयविदां मध्ये ऋत्विगेको ब्रह्मनामको वेदत्रयमन्त्रतद्विहितकर्मविषये अपराधो न्यूनभावो यदि जायते तस्यापराधस्य परिहारं प्रतीकारं कुर्य्यात्” इति तदर्थः। “यज्ञस्य हैष भिषक् ब्रह्मेति” श्रौतसूत्रश्रुत्यन्तरम्। अतएवास्य कृताकृतावेक्षणार्थं वरणमन्यत्रोक्तम्। १०बृहस्पतौ च ब्रह्मपुरोहितशब्दे दृश्यम्।

ब्(ब्र)ह्मनाल न० ब्रह्मणो नालमिव। काश्यां मणिकर्णिकासमीपस्थे तीर्थभेदे। “पितामहेश्वरं लिङ्गं ब्रह्मनालोपरि स्थितम्। पूजयित्वा नरो भक्त्या ब्रह्मलोकमवाप्नुयात्। ब्रह्मस्रोतःसमीपे तु कृतं कर्म शुभाशुभम्। परामक्षयतामेति शुभमेव ततश्चरेत्। अनल्पमपि यत् कर्म कृतमत्र शुभाशुभम्। प्रलयेऽपि न तस्यास्ति क्षयो मुनिसत्तम!। नाभीतीर्थमिदं प्रोक्तं नाभीभूतं यतः क्षितेः। अपि ब्रह्माण्डगोलस्य नाभिरेषा शुभोदया। सा नाभिकर्णिकेयीयं नाभिगाम्भीर्य्यभूमिका। ब्रह्माण्डगोलकं सर्वं यस्यामेति लये लयम्। ब्रह्मनालं परं तीर्थं त्रिषु लोकेषु विश्रुतम्। तत्र स्नाने नरः स्नातः कोटिजन्ममलं हरेत्। ब्रह्मनाले पतेद्येषामपि कीकसमात्रकम्। ब्रह्माण्डमण्डपान्तस्ते न विशन्ति कदाचन” काशीख० ६१अ०।

ब्(ब्र)ह्मनिर्वाण न० ब्(ब्र)ह्मणि निर्वाणं निर्वृतिः। ब्(ब्र)ह्मभावलाभे सकलानर्थनिवृत्तिरूपे परमानन्दे “एषा ब्राह्मी स्थितिः पार्थ! नैनां प्राप्य विमुह्यति। स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति” गीता।

ब्(ब्र)ह्मपत्र न०ब्रह्मणः तन्नामकवृक्षस्य पत्रम्। पलाशपत्रे। “भोजनं ब्रह्मपत्रेषु कथया लोचनं हरेः। दर्शनं वैष्णवानाञ्च महापातकनाशनम्” पाद्मोत्तरख०११८अ०।

ब्(ब्र)ह्मपर्णी स्त्री ब्(ब)ह्मेव विस्तीर्णानि मूलादारभ्य स्थितानि पर्णान्यस्याः ङीप्। पृश्निपर्ण्याम् राजनि०।

ब्(ब्र)ह्मपवित्र पु०ब्(ब्र)ह्मेव वेदोक्तकर्मणि वा पवित्रः। कुशे राजनि०।

ब्(ब्र)ह्मपादप पु० ब्(ब्र)ह्मणः प्रियः वैदिककर्मयोग्यत्वात् विप्रब्(ब्र)ह्मचारिधार्य्यदण्डार्थत्वाद्वा ब्रह्मनामकत्वात् वा पादपः। पलाशवृक्षे हेमच०। “पलाशो वै ब्रह्म” शत०ब्रा० पलाशवृक्षशब्दे दृश्यम्।

ब्(ब्र)ह्मपुत्र पु० ब्(ब्र)ह्मणः पुत्र इव कपिलवर्णत्वात्। १विषभेदे अमरः। तद्विषस्य लक्षणं भावप्र० उक्तं यथा “वर्णतः कपिलो यः स्यात्तथा भवति सारकः। ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले”। २उत्तरदेशप्रसिद्धे ३नदभेदे ४क्षेत्रभेदे च। ५सरस्वत्यां नद्यां स्त्री। तस्याः पितामहजातत्वं ब्रह्माणीशब्दे दृश्यम्। तस्य नदस्योत्पत्तिकथा “हरिवर्षे महावर्षे शान्तनुर्नाम नामतः। मुनिराशीन्महाभागो ज्ञानवान् सुतपोधनः। तस्य भार्य्या महाभागा अमोघाख्या महासती। हिरण्यगर्भस्य मुनेस्तु चन्द्राश्रमोद्भवा। तया सार्द्धं स कैलासमर्य्यादापर्वतेऽवसत्। लौहिताख्यस्य सरसस्तीरे वै गन्धमादने। एकदा स तपोनिष्ठो निजपुष्पादिगोचरे। अगाम वनमध्यन्तु चिन्वन् कन्दफलानि च। तस्मिन्नवसरे ब्रह्मा सर्वलोकपितामहः। तत्राजगाम यत्रास्ति अमोघा शान्तनोः प्रिया। तां दृष्ट्वा देवगर्भाभां युवतीमतिसुन्दरीम्। मोहितो मदनेनाशु तथाऽभूत् हृषितेन्द्रियः। उद्दीरितेन्द्रियो भूत्वा जिघृक्षुस्तां महासतीम्। अथाधावत्तदा ब्रह्मा सम्मुखो मदनार्दितः। धावमानं विधातारं दृष्ट्वाऽमोघा महासती। नैवं नैवमिति प्रोच्य पर्णशालां व्यलीयत। दृढञ्चोवाच धातारममोघा कुपिता तदा। पर्णशालान्तरगता द्वारमाहृत्य तत्क्षणात्। अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम्। बलात् प्रमथ्यां चाहं चेत्तया त्वाञ्च शपाम्यहम्। अमोघया चैवमुक्ते विधातुश्च तदा नृप!। रेतश्चस्कन्द च तदैवाश्रमे शान्तनोर्मुनेः। च्युते रेतसि धातापि हंसयानं समास्थितः। लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ। गते वेधसि शान्तनुर्निजमाश्रममागतः। आगत्य दृष्ट्वा हंसानां पदन्यासं तथा भुवि। तेजश्च पतितं भूमौ विधातुर्ज्वलनोपमम्। अमोघां परिपप्रच्छ पर्णशालान्तरस्थिताम्। किमेतदत्र सुभगे! प्रकृतं दृश्यते तु यत्। पक्षिणाञ्च पदक्षोभस्तेजश्चेदृग् कीदृशम्। सा तस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमम्। आचष्टेव त्वनद्दाकुत्वा विकलानना। हंसयुक्तस्यन्दनेन कोऽप्यागत्य चतुर्मुखः।

कमण्डलुकरो मोक्ष इति मां समयाचत । ततो मया भर्त्सितः स कुटजान्तरलीनया । प्रच्याव्य तेजः स गतो मम शापभयार्दितः । कुरु तत्र प्रतीकारं यदि शक्नोषि शान्तनो ! । न हि तां धर्षणां सोढुं कश्चित् शक्नोति जीवभृत् । स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः । इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत् । दिव्यज्ञानेन स ज्ञात्वा देवकार्य्यमुपस्थितम् । तीर्थावतारणञ्चापि हिताय जगतां मुनिः । ज्ञात्वोदर्कं चिन्तयित्वा स्वभार्य्यामिदमब्रवीत् । इदं तेजो ब्रह्मणस्त्वं पिबामोघे ! ममाज्ञया । हिताय सर्वजगतां देवकार्य्यार्थसिद्धये । भवत्या निकटे ब्रह्मा स्वयमेव समागतः । त्वामप्राप्य स महात्मा श्रावयोः स समर्प्य च । गतो निजास्पदं तत्त्वं कर्त्तुमर्हसि मद्वचः । तत् श्रुत्वा शान्तनोर्वाक्यममोघातीव लज्जिता । सान्त्वयन्तीव तं प्राह पतिं नत्वा महासती । नान्यस्य तेजो धास्यामि न चेत्ते विमनस्कता । अवश्यं यदि कर्त्तव्यं पीत्वा त्वं मयि चोत्सृज । ततस्तस्या वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः । स्वयं पीत्वा च तत्तेजस्तस्या गर्भेऽभ्यषेचयत् । संक्रामितैः शान्तनुना तेजोभिर्ब्रह्मणः सती । गर्भं दधारामोघाख्या हिताय जगतां ततः । तस्यां काले तु संप्राप्ते संजातो जलसञ्चयः । तन्मध्ये तनयश्चापि नीलवासाः किरीटधृक् । रत्नमालासमायुक्तो रक्तगौरश्च ब्रह्मवत् । चतुर्भुजः पद्मविद्यावरशक्तिधरस्तथा । शिशुमारशिरस्थश्च तुल्यकायो जलोत्करैः । तं जातञ्च तथाभूतं शान्तनुर्लोकशान्तनुः । चतुर्णां पर्वतानाञ्च मध्यदेशे न्यवेशयत् । कैलासश्चोत्तरे पार्श्वे दक्षिणे गन्धमादनः । जारुधिः पश्चिमे शैलः पूर्वे संवर्त्तकाह्वयः । तेषां मध्ये स्वयं कुण्डं पर्वतानां विधेः सुतः । क्रमाऽतिवृधे नित्यं शरदीव निशाकरः । तं तोयमध्यगं पुत्रमासाद्य द्रुहिणः स्वयम् । क्रमतस्तस्य संस्कारानकरोद्देहशुद्धये । अथ काले बहुतिथे व्यतीते ब्रह्मणः सुतः । तोयराशिस्वरूपेण ववृधे पञ्च योजनान् । तस्मिन् देवाः पपुः सस्नुर्द्वितीय इव सागरे । शीतामलजले हृद्ये देव्याप्सरसां गणैः । तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान् । चक्रे मातृवधं घोरमत्युग्रं पितुराज्ञया । तस्य पापस्य मोक्षाय स्वपितुश्चोपदेशतः । स जगाम महाकुण्डं ब्राह्माख्यं स्नातुमिच्छया । तत्र स्नात्वा च पीत्वा च मातृहत्यां व्यपानयत् । वीचिं परशुना कृत्वा तस्य क्ष्मामवातारयत्" तदुत्तरत्र "ब्रह्मकुण्डात् सृतः सोऽथ कासारे लोहिताह्वये । कैलासोपत्यकायान्तु न्यपतद् ब्रह्मणः सुतः । तस्यापि सरसस्तीरं समुत्पाट्य महाबलः । कुठारेण दिशं पूर्वामनयद्ब्रह्मणः सुतम् । ततोऽपरत्रापि गिरिं हेमशृङ्गं विभिद्य च । कामरूपान्तरं पीठमावाहयदसौ हरिः । तस्य नाम विधिश्चक्रे स्वयंलोहितगङ्गकम् । लोहित्यात् स... जातो लौहित्याख्यस्ततोऽभवत् । स कामरूपमखिलं पीठमाप्लाव्य वारिणा । गोपयन् सर्वतीर्थानि दक्षिणं याति सागरम् । प्रागेव दिव्ययत्नां संत्यज्य ब्रह्मणः सुतः । पुनः पतति लौहित्ये गत्वा द्वादशयोजनम् । चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः । स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् । चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः । लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात्" कालिकापु० ८४,८५ अ० "मीने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीम् । पिबेच्छोककलिकाः स्नायाल्लौहित्यवारिणि । पुनर्वसौ बुधे लग्ने चैत्रे मासि सिताष्टमीम् । लौहित्ये विरजे स्नायात् सर्वपापैः प्रमुच्यते" ति०त० ।

ब(व्र)ह्मपुर न० ६त० । १ब्रह्मण उपासनार्थे हृदयस्थाने "अथ यदिदं ब्रह्मपुरे दहरं पुण्डरीकम्" छा० उ० । दहरशब्दे ३५१० पृ० दृश्यम् । "यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः" मुण्डकोप० । "ब्रह्मणोऽत्र चैतन्यस्वरूपेण नित्याभिव्यक्तत्वाद्ब्रह्मणः पुरं हृदयपुण्डरीकं तस्मिन्" भा० । २विश्वाम्नगर्य्यां ३काश्याञ्च वा स्त्रीङीप् तत्रार्थे । वृ०सं०१४अ० उक्ते ईशानदिक्स्थे देशभेदे पु० (वरमा) देशे स्वार्थे क । तत्रार्थे मार्कपु० पूर्वोत्तरकूर्मभागस्थदेशोक्तौ ।

ब(व्र)ह्मपुराण न० वेदव्यासप्रणीते महापुराणभेदे तत्प्रतिपाद्यविषयाश्च बृहन्नारदीये ४पा० ९२अ० उक्ता यथा "ब्राह्मं पुराणं तत्रादौ सर्वलोकहिताय वै । व्यासेन वेदविदुषा समाख्यातं महात्मना । तद्वै सर्वपुराणाग्र्यं धर्मकामार्थमोक्षदम् । नानाख्यानेतिहासाढ्यं दशसाहस्रमुच्यते" तत्पूर्वभागे "देवानामसुराणाञ्च यत्रोत्पत्तिः प्रकीर्त्तिता । प्रजापतीनाञ्च तथा दक्षादीनां मुनीश्वर ! । ततो लोकेश्वरस्यात्र सूर्य्यस्य परमात्मनः । वंशानुकीर्त्तनं पुण्यं महापातकनाशनम् । तत्रावतारः कथितः परमानन्दरूपिणः । श्रीमतो रामचन्द्रस्य चतुर्व्यूहाव-

तारिणः। ततश्च सोमवंशस्य कीर्त्तनं यत्र वर्णितम्। कृष्णस्य जगदीशस्य चरितं कल्मषापहम्। द्वीपानाञ्चैव सिन्धूनां वर्षाणां चाप्यशेषतः। वर्णनं यत्र पातालस्वर्गाणाञ्च प्रदृश्यते। नरकाणां समाख्यानं सूर्य्यस्तुतिकथानकम्। पार्वत्याश्च तथा जन्म विवाहश्च निगद्यते। दक्षाख्यानं ततः प्रोक्तमेकाम्रक्षेत्रवर्णनम्। पूर्वभागोऽयमुदितः पुराणस्यास्य मानद!"। तदुत्तरभागे। "अस्योत्तरे विभागे तु पुरुषोत्तमवर्णनम्। विस्तरेण समाख्यातं तीर्थयात्राविधानतः। अत्रैव कृष्णचरितं विस्तरात् समुदीरितम्। वर्णनं यम लोकस्य पितृश्राद्धविधिस्तथा। वर्णाश्रमाणां धर्माश्च कीर्त्तिता यत्र विस्तरात्। विष्णुधर्मयुगाख्यानं प्रलयस्य च वर्णनम्। योगानाञ्च समाख्यानं साङ्ख्यानां चापि वर्णनम्। ब्रह्मवादसमुद्देशः पुराणस्य च शंसनम्। एतद्ब्रह्मपुराणन्तु भागद्वयसमाचितम्। वर्णितं सर्वपापघ्नं सर्वसौख्यप्रदायकम्" तत्फलस्तुतिः। 'सूतशौनकसंवादं भुक्तिमुक्तिप्रदायकम्। लिखित्वैतत् पुराणं यो वैशाख्यां हेमसंयुतम्। जलधेनुयुतञ्चापि भक्त्या दद्याद्द्विजातये। पौराणिकाय सम्पूज्य वस्त्रभोज्यविभूषणैः। स वसेद् ब्रह्मणो लोके यावच्चन्द्रार्कतारकम्। यः पठेच्छृणुयाद्वापि ब्रह्मानुक्रमणीं द्विज!। सोऽपि सर्वपुराणस्य श्रावकः फलं लभेत्। शृणोति यः पुराणन्तु ब्राह्मं सर्वं जितेन्द्रियः। हविष्याशी च नियमात् स लभेद् ब्रह्मणः पदम्। किमत्र बहुनोक्तेन यद्यदिच्छति मानवः। तत् सर्वं लभते वत्स! पुराणस्यास्य कीर्त्तनात्"

ब(ब्र)ह्मपुरुष पु० ब्रह्मणः पुरुष इव। ब्रह्मप्रापकेषु द्वारपालरूपेषु चक्षुः वाङ्मनःप्राणेषु। चक्षुरादीन् प्रकृत्य "ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपालाः" छा० उ०। देवर्षिभिरयञ्च २७४५।२७४६ पृ० एतद्भाष्यञ्च दृश्यम्।

ब्र(ब्र)ह्मपुरोहित पु० ब्रह्म बृहस्पतिः पुरोहितो यस्य देवे। त्रयस्त्रिंशद्वि देवाः ब्रह्म पुरोहिता इति ब्रह्म वै बृहस्पतिर्ब्रह्मपुरोहिताः" शत०ब्रा०१२।८।२।२९।

ब्र(ब्र)ह्मप्रसूत त्रि० ३त०। १ब्रह्मजाते जगति २ब्राह्मणारब्धे कर्मणि न०। "यत् क्षत्रियोऽब्राह्मणो भवति स यत् किं च कर्म कुरुतेऽप्रसूतं ब्रह्मणा मित्रेण न हैवास्मै तद् समृध्यते तस्माद् क्षत्रियेण कर्म करिष्यमाणेनोपसर्तव्य एव ब्राह्मणः सं हैवास्मै तद्ब्रह्मप्रसूतं कर्मार्ध्यते" शत०ब्रा० ४।१।४।६।

ब्र(ब्र)ह्मबन्धु पु० ब्रह्मा विप्रो बन्धुरुत्पादको यस्य ब्रह्मणो विप्रस्य बन्धुरिव वा। १विप्राचाररहिते निन्द्यकर्मकारिणि जात्या विप्रे २विप्रतुल्ये भट्टादौ च। "अननुकुलीनोऽननूच्य ब्रह्मबन्धुरिव भवति" छा०उ०। "हे सौम्याऽननूच्यानधीत्य ब्रह्मबन्धुरिव भवतीति ब्राह्मणान् बन्धून् व्यपदिशति न स्वयं ब्राह्मणवृत्तः" इति भा०। विप्रवंश्यापकृष्टब्राह्मणस्यापि दैहिकदण्डनिषेधो यथा "वपनं द्रविणादानं स्थानान्निर्यापणन्तथा। एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः" भाग०१स्क०

ब्र(ब्र)ह्मबिन्दु पु० ब्रह्मणि वेदाध्ययनकाले बिन्दुः। वेदाध्ययनकाले मुखनिःसरल्लालालेशे।

ब्र(ब्र)ह्मवध्या स्त्री वध—भावे क्यप् ६त०। ब्रह्महत्यायाम्।

ब्र(ब्र)ह्मब्रुवाण पु० आत्मानं ब्रह्माणं ब्रूते ब्रू—शानच्। विप्रतया आत्मनः कथके। यथा कर्णः आत्मानं विप्रं कथयित्वा परशुरामादस्त्रशास्त्रमधीतवान्" भा० उद्योग० ६१अ०। ब्राह्मणब्रुवि २अपकृष्टब्राह्मणे च। [मेघदूतप्र०।

ब्र(ब्र)ह्मभद्रा स्त्री ७त०। विप्रहितायां त्रायमाणौषधौ

ब्र(ब्र)ह्मभाग पु० ६त०। ब्रह्मरूपर्त्विजे हरणीये यज्ञद्रव्यस्य भागभेदे "अथास्मै ब्रह्मभागं पर्य्याहरन्ति। ब्रह्मा वै यज्ञस्य दक्षिणत आस्तेऽभिगोप्ता स एतं भागं प्रतिविद्वान् आस्ते यत् प्राशित्रं तदस्मै पर्य्याहार्षुस्तत् प्राशीदथ यमस्य ब्रह्मभागं पर्य्याहरन्ति तेन भागी सन्नदत ऊर्द्ध्वम स्थितं यज्ञस्य तदभिगोपायति तस्माद्वाऽस्मै ब्रह्मभागं पर्य्याहरन्ति" शत०ब्रा०१।७।४।१८।

ब्र(ब्र)ह्मभूति स्त्री ब्रह्मणो भूतिरस्याः। १सन्ध्यायां शब्दच०। २ब्रह्मजातमात्रे त्रि०। [राजनि०।

ब्र(ब्र)ह्मभूमिजा स्त्री ब्रह्मभूमितो जायते जन—ड। सिंहल्यां

ब्र(ब्र)ह्मभूय न० भू—भावे क्यप् ६त०। ब्रह्मभावे शुद्धचैतन्यस्वरूपप्राप्तौ अमरः। [२५।७।१७ सप्तव्याख्या।

ब्र(ब्र)ह्ममण्डूकी स्त्री मण्डूकाख्ये ओषधीभेदे कात्या०श्रौ०

ब्र(ब्र)ह्ममय त्रि० ब्रह्मात्मकं ब्रह्मन्+मयट्। ब्रह्मात्मके "दर्शनं तस्य लाभः स्यात् त्वं हि ब्रह्ममयो निधिः" भा०शा०४६अ०। स्त्रियां ङीप्। काशी ब्रह्ममयीत्यादि। २ब्रह्मास्त्रे ५ भा० उ० ६१अ०।

ब्र(ब्र)ह्ममह पु० ६त०। विप्रानुद्दिश्य उत्सवे। भा०आ०१६४अ०

ब्र(ब्र)ह्ममित्र पु० ब्रह्म मित्रमस्य। मुनिभेदे मार्कपु० ६२अ०।

ब्र(ब्र)ह्ममीमांसा स्त्री ६त०, ब्रह्मज्ञानार्थं वेदान्तवाक्यविचारात्मके व्यासप्रणीते ग्रन्थभेदे तत्प्रतिपाद्यविषयादि

वैयासिकन्यायमालायामुक्तं यथा “शास्त्रं ब्रह्मविचाराख्यमध्यायाः स्युश्चतुर्विधाः। समन्वयाविरोधौ २द्वौ साधन३ञ्च फलं४ तथा। समन्वये स्पष्टलिङ्ग१मस्पष्टत्वे२ऽप्युपास्यगम्३। ज्ञेयगं४ पदमात्रञ्च चिन्त्यं पादेष्वनुक्रमात्। द्वितीये स्मृतितर्काभ्यामविरोधो१ऽन्यदुष्टता२। भूतभोक्तृश्रुते३र्लिङ्गश्रुते४रप्यविरुद्धता। तृतीये विरति१स्तत्त्वम्पदार्थपरिशोधनम्२। गुणोपसंहृति३र्ज्ञाने बहिरङ्गादिसाधनम्४। चतुर्थे जीवतो मुक्ति१रुत्क्रान्ति२र्गतिरुत्तरा३। ब्रह्मप्राप्तिब्रह्मलोकाविति ४पादार्थसंग्रहः। तेन तत्र प्रत्येकं चतुष्टयपादयुताः चत्वारोऽध्यायाः। तच्च शास्त्रं बहुभिः स्वस्वमतानुसारेण व्याख्यातम् तत्र गौडपादाचार्यशङ्कराचार्यादिभिरद्वैतपरतया व्याख्यातं रामानुजादिभिश्च विशिष्टाद्वैतपरतया, वल्लभाचार्यादिभिश्च विशुद्धाद्वैतपरतया माध्वाचार्यादिभिश्च द्वैतपरतया व्याख्यातं तत्तन्मतञ्च प्रायेण तत्तच्छब्दे दृश्यम्।

ब्र(व्र)ह्मयज्ञ पु॰ ब्रह्मनिमित्तकस्तदध्ययनतदध्यापनानिमित्तको यज्ञः। वेदाध्ययनाध्यापनादौ अमरः। “अध्यापनं ब्रह्मयज्ञः” मनुः। “स्वाध्यायो ब्रह्मयज्ञः” विष्णुसू॰। तेन वेदाध्ययनाध्यापनयोर्ब्रह्मयज्ञता।

ब्र(व्र)ह्मयष्टि स्त्री ब्रह्मणो यष्टिरिवावलम्बनत्वात्। (वामनहाटि) इति ख्याते शब्दरत्ना॰।

ब्र(व्र)ह्मयुग न॰ ब्रह्मा विप्रस्तदुपलक्षितं युगम्। हिरण्यगर्भस्य विप्रसृष्टिप्रधाने कालभेदे। तच्च हरिवं॰२०८।२०९ अध्याये ततः चत्वादिसृष्ट्युपलक्षितं तद्युगं २१०अ॰उक्तम्

ब्र(व्र)ह्मयोग पु॰ब्रह्मणस्तत्साक्षात्कारस्य योगः समाधिः। ब्रह्मसाक्षात्कारसाधने समाधिभेदे हरिवं॰२१० अ॰ “एष ब्रह्ममयो यज्ञो योगः सांख्यञ्च तत्त्वतः। विज्ञानञ्च स्वभावश्च क्षेत्रं क्षेत्रज्ञ एव च। एकत्वञ्च पृथक्त्वञ्च सम्भवं निधनं तथा। कालः कालत्रयश्चैव ज्ञेयो विज्ञानमेव” च विष्णुपादिषु पञ्चविंशे२ योगे च।

ब्र(ब्र)ह्मयोनि पु॰ ब्रह्मणो योनिरुत्पत्तिस्थानम्। १ब्रह्मगिरौ शब्दर॰। २ब्रह्मप्राप्त्युपायध्याननिष्ठायाञ्च “ब्राह्मणा ब्रह्मयोनिस्थाः” मनुः ३ब्रह्मोत्पन्ने त्रि॰। ४सरस्वत्यां स्त्री ङीप्। “सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम्। पृथूदके जप्यपरो नैनं श्वोमरणं लभेत्। तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्मिता। पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः। चतुर्वर्णस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत्। ब्रह्माभिध्यायतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः। मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रियास्तथा। ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन्। चातुर्वर्ण्यं ततो दृष्ट्वा आश्रमस्थान् सुतांस्ततः। एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीति संज्ञितम्। तत्र स्नात्वा मुक्तिकामः पुनर्योनिं न पश्यति” वामनपु॰ ३८अ॰ उक्ते तीर्थभेदे स्त्री वा ङीप्।

ब्र(व्र)ह्मरन्ध्र न॰ उत्तमाङ्गस्य रन्ध्रभेदे। “तयोर्ध्वमायन्नमृततमेति” श्रुत्या तद्रन्ध्रेण प्राणोत्क्रमणे ब्रह्मलोकप्राप्तेरुक्तत्वात् तथात्वम्।

ब्रह्मराक्षस पु॰ ब्र(व्र)ह्मा विप्रोऽपि कुकर्मभिः राक्षसः। कुकर्मणा विप्रयोनितो राक्षसरूपतां प्राप्ते भूतभेदे “संयोगं पतितैर्गत्वा परस्य योषितं तथा। अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः” इति मनुः। पतितप्रतिग्रहेऽपि तद्योनिप्राप्तिः भा॰ आनु॰ ११अ॰ दर्शिता। तच्च वाक्यं अधर्मशब्दे १२१ पृ॰ दर्शितं तच्च न हरिवंशवाक्यं किन्तु अनुशासनपर्वीयमिति बोध्यम्। पारिभाषिकब्रह्मराक्षसा यथा “मूर्खः स्त्री कच्छपश्चैव वाजी बधिर एव च। गृहीतार्थं न मुञ्चन्ति पञ्चैते ब्रह्मराक्षसाः” व्यवहारप्रदीपः। २शिवानुचरभेदे भाग॰ १०।६२अ॰।

ब्र(ब्र)ह्मरात न॰ ब्रह्म तज्ज्ञानं रातं यस्मै। १शुकदेवे “ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि” भाग॰२।८।२७। २याज्ञवल्क्ये मुनौ हेमच॰ब्रह्मरातिरिति वा पाठः। तेन हि जनकाय ब्रह्मविद्यायादानात् तथात्वम् बृहदारण्यकोपनिषदि तत्कथा दृश्या।

ब्र(व्र)ह्मरात्र पु॰ रात्रेरयम् अण् ६त॰. ब्रह्मस्वामिके रात्रिशेषभागे मुहूर्ते “उपावृत्ते ब्रह्मरात्रे” भा॰ १०।३२।२९। व्याख्यायां श्रीधरः।

ब्र(व्र)ह्मरीति ब्रह्मवर्णा रीतिः। पित्तलभेदे हेमच॰।

ब्र(व्र)ह्मर्षि पु॰ ब्र(ब्र)ह्मा विप्रः चतुर्वक्त्रो वा ऋषिः वेदस्य वा ऋषिः कर्त्ता। ब्रह्मवल्लेषु वशिष्ठादिषु १वेदसार्थेषु २ऋषिषु हेमच॰।

ब्र(व्र)ह्मर्षिदेश ६त॰। “कुरुक्षेत्रञ्च मत्स्याश्च पाञ्चालाः शूरसेनकाः। एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरम्” मनूक्ते कुरुक्षेत्रादिदेशचतुष्टये। [ब्रह्मन्शब्दे दृश्यम्।

ब्र(व्र)ह्मलक्षण न॰ ६त॰। ब्रह्मणः स्वरूपतटस्थलक्षणे

ब्र(ब्र)ह्मलोक पु॰ ६त॰। ब्रह्माधिष्ठाने भुवने सत्यलोके “सत्यस्तु सप्तमो लोको ह्यपुनर्भववासिनाम्।

ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः" देवीपु०। "षड्गुणेन तपोलोकात् सत्यलोको विराजते। अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः"। ब्रह्मणः लोकः। २तुरीयब्रह्मस्वरूपे च ब्रह्मानन्दशब्दे दृश्यम्।

ब्र(ब्र)ह्मवर्च्चस न० ब्रह्मणा वेदाध्ययनेन वर्चः अच् समा०। वेदाध्ययनजनिते तेजसि "तपःस्वाध्यायजं यत्तु तेजस्तु ब्रह्मवर्चसम्" जटा०। "ब्रह्मवर्चसकामः स्तुवीत" ताण्ड्य० ब्रा० २।५।२ "ब्रह्मवर्चसकामस्य कुर्य्यात् विप्रस्य पञ्चमे" मनुः तदस्यास्ति इनि। ब्रह्मवर्चसिन् तद्युते त्रि० "ब्रह्मवर्चसी तादृशो भवति" छा० उ०। "तपःस्वाध्यायजं तेजः ब्रह्मवर्चसम्" शङ्करभाष्यम्।

ब्र(ब्र)ह्मवर्चस्विन् पु० इत०। ब्रह्मवर्चसः समासान्तविधेरनित्यत्वात् न अच् समा० ततोऽस्त्यर्थे विनि। ब्रह्मवर्चसिनि। "ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः" मनुः।

ब्र(ब्र)ह्मवर्त्त पु० ब्रह्मणो वर्त्तो वर्त्तनं यत्र। ब्रह्मावर्त्ते देशे शब्दर०। [ताम्रे हेमच०।

ब्र(ब्र)ह्मवर्द्धन न० ब्रह्म वेधो रूपमिव वर्द्धते वृध–ल्यु।

ब्र(ब्र)ह्मवाटीय पु० मुनिभेदे हरिवं० १४१।

ब्र(ब्र)ह्मवाद पु० इत०। १वेदपाठे हारा०। २ब्रह्माधिकारेण तत्त्वनिर्णयार्थे वादे कथाभेदे च।

ब्र(ब्र)ह्मवादिन् पु० ब्रह्म वेदं वदति पठति वद–णिनि। १वेदपाठके। ब्रह्म शुद्धं चैतन्यं सर्वात्मकतया वदति वद–णिनि। २वेदान्तप्रतिपाद्यसर्वात्मकब्रह्मनिर्णयार्थकथाभेदरूपवादयुते। "ब्रह्मवादिनो वदन्ति" छा० उ०। शुद्धचैतन्यं वदति बोधयति। ४ब्रह्मबोधके शास्त्रे जटा०। ५गायत्र्यां स्त्री ङीप्। सा च निर्गुणब्रह्मप्रतिपादिकेति तस्यास्तथात्वम्। "आयाहि वरदे! देवि! त्र्यक्षरे! ब्रह्मवादिनि!" गायत्र्यावाहनमन्त्रः।

ब्र(ब्र)ह्मवालुक न० तीर्थभेदे भा० व० ८२ अ०।

ब्रह्मवास पु० इत०। ब्रह्मलोके हरिवं० २१२ अ०।

ब्रह्मवाहस् त्रि० ब्रह्मणा मन्त्ररूपवेदेन उह्यते वह–कर्मणि वा० असुन् णिच्। मन्त्रैः प्राप्यमाणे ऋ० १।१०१।९।

ब्र(ब्र)ह्मविद् ब्रह्मस्वरूपतया वेत्ति आत्मानम् विद–क्विप्। ब्रह्मात्मैक्यवेत्तरि "ब्रह्मविद् ब्रह्म भवति" श्रुतिः। २विष्णौ पु० "ब्रह्मविद् ब्राह्मणो ब्रह्मी" विष्णुस०। वेदं वेदार्थं यथावत् वेत्तीति ब्रह्मविद्" भा० ३वेदार्थज्ञातरि त्रि०। [ऽभेदेन ज्ञाने।

ब्र(ब्र)ह्मविद्या स्त्री इत०। शुद्धचैतन्यात्मनः ब्रह्मण ज्ञाता·

ब्र(ब्र)ह्मविवर्द्धन पु० इत०। १तपोवर्द्धके विष्णौ "सत्त्वं ब्रह्मविवर्द्धनम्" विष्णुस०। वृध–णिच् भावे ल्युट्। २तपआदीनां विशेषेण वर्द्धने न०।

ब्र(ब्र)ह्मवृक्ष पु०। पलाशवृक्षे हलायुधः। "ब्रह्म वै पलाशः" शत० ब्रा० १२।८।४।१ तपःसाधने २उडुम्बरवृक्षे रत्नमाला।

ब्र(ब्र)ह्मवृत्ति स्त्री इत०। १ब्राह्मणस्य जीवनोपाये "स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः। षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः" भाग०। २ब्रह्माकारान्तःकरणवृत्तौ च। [वेदान्ते च।

ब्र(ब्र)ह्मवेद पु० इत०। १ब्रह्मज्ञाने २ब्रह्मप्रतिपादके वेदभागे

ब्र(ब्र)ह्मवेदि स्त्री ब्रह्मणो वेदिरिव। "ब्रह्मवेदिः कुरुक्षेत्रे पञ्चरामह्रदान्तरम्" इत्युक्ते देशे हेमच०।

ब्र(ब्र)ह्मवेदिन् त्रि० ब्रह्म वेत्ति आत्माभेदेन विद–णिनि। ब्रह्मात्मैक्याभिज्ञे "ब्राह्मणेषु तु विद्वांसो विद्वत्सु कृतबुद्धयः। कृतबुद्धिषु कर्त्तारः कर्त्तृषु ब्रह्मवेदिनः" मनुः।

ब्रह्मवैवर्त्त न० अष्टादशमहापुराणमध्ये अष्टादशसङ्ख्यसंख्यके १महापुराणभेदे तत्प्रतिपाद्यविषयादिकं वृहन्नारदीये ४ पादे १०१अ० उक्तं यथा

"ब्रह्मा उवाच। शृणु वत्स! प्रवक्ष्यामि पुराणं दशमं तव। ब्रह्मवैवर्त्तकं नाम वेदमार्गानुदर्शकम्। सावर्णिर्यत्र भगवान् साक्षाद्देवर्षयेऽर्चितः। नारदाय पुराणार्थं प्राह सर्वमलौकिकम्। धर्मार्थकाममोक्षाणां सारः प्रीतिर्हरौ हरे। तयोरभेदसिद्ध्यर्थं ब्रह्मवैवर्त्तमुत्तमम्। रथन्तरस्य कल्पस्य वृत्तान्तं यन्मयोदितम्। शतकोटिपुराणं तत् संक्षिप्य प्राह वेदवित्। व्यासश्चतुर्धा संव्यस्य ब्रह्मवैवर्त्तसंज्ञितम्। अष्टादशसहस्रन्तु पुराणं परिकीर्त्तितम्। ब्रह्म१प्रकृति२विघ्नेश३कृष्णखण्ड४समाचितम्। तत्र सूतर्षिसंवादः पुराणोपक्रमो मतः"। तत्र प्रथमे ब्रह्मखण्डे। "सृष्टिप्रकरणं त्वाद्यं ततो नारदवेधसोः। विवादः सुमहान् यत्र द्वयोरासीत् पराभवः। शिवलोकगतिः पश्चाज्ज्ञानलाभः शिवान्मुनेः। शिववाक्येन तत् पश्चात् मरीचेर्नारदस्य। तु गमनञ्च सावर्णिमुनिनाथं सिद्धसेविते। आश्रमे सुमहापुण्ये त्रैलोक्याश्चर्यकारिणि। एतद्धि ब्रह्मखण्डं हि श्रुतं पापविनाशनम्"। द्वितीये प्रकृतिखण्डे "ततः सावर्णिसंवादो नारदस्य समीरितः। कृष्णमाहात्म्यसंयुक्तो नानाख्यानकथोत्तरः। प्रकृतेरंशभूतानां कलानाञ्चापि

वर्णितम्। माहात्म्यं, पूजनाद्यस्य विस्तरेण यथास्थि-तम्। एतत् प्रकृतिखण्डं हि श्रुतं भूतिविधायकम्। तृतीये गणेशखण्डे। "गणेशजन्मसंप्रश्नः सपुण्यक-महाव्रतम्। पार्वत्याः कार्त्तिकेयेन सह विघ्नेशसम्भवः। चरितं कार्त्तवीर्य्यस्य जामदग्न्यस्य चाद्भुतम्। विवादः सुमहान् पश्चाज्जामदग्न्यगणेशयोः। एतद्विघ्नेशखण्डं हि सर्वविघ्नविनाशनम्" चतुर्थे श्रीकृष्णजन्मखण्डे "श्रीकृष्णजन्मसम्प्रश्नो जन्माख्यानं ततोऽद्भुतम्। गोकुले गमनं पश्चात् पूतनादिवधोऽद्भुतः। बाल्यकौमारजा लीला विविधास्तत्र वर्णिताः। रासक्रीडा च गोपीभिः शारदी समुदाहृता। रहस्ये राधया क्रीड़ा वर्णिता बहुविस्तरा। सहाक्रूरेण तत्पश्चान्मथुरागमनं हरेः। कंसादीनां वधे वृत्ते सदस्यद्विजसंस्कृतिः। काश्य-सान्दीपनेः पश्चाद्विद्योपादानमद्भुतम्। यवनस्य वधः पश्चाद्द्वारकागमनं हरेः। नरकादिवधस्तत्र कृष्णेन विहितोऽद्भुतः। कृष्णखण्डमिदं विप्र! नृणां संसार-खण्डनम्" तदफलश्रुतिः "पठितस्य श्रुतं ध्यातं पूजितं चाभिवर्णितम्। इत्येतद्ब्रह्मवैवर्त्तं पुराणं चात्य-लौकिकम्। व्यासोक्तं चादिसम्भूतं पठन् शृण्वन् विमुच्यते। विज्ञानाज्ञानशमनात् घोरात् संसारसाग-रात्। विलिख्यैतच्च यो दद्यान्माघ्यां धेनुसमा-न्वितम्। ब्रह्मलोकमवाप्नोति स मुक्तोऽज्ञानबन्धनात्। यश्चानुक्रमणीं वापि पठेद्वा शृणुयादपि। सोऽपि कृष्णप्रसादेन लभते वाञ्छितं फलम्"। विवर्त्तः उपादान-विषमसत्ताकं कार्य्यं स्वार्थे ष्यञ् ६त०। २ब्रह्मणोऽतल्प-सत्ताके कार्य्ये च। [भेदे भा० स० ११अ०।

ब्र(ब्र)ह्मव्रत न० षड्वर्षसाध्ये ब्रह्मलोकदर्शनफलके व्रत-

ब्र(ब्र)ह्मशल्य पु० ब्रह्मेव कृष्णं शल्यं कण्टकाग्रं यस्य। (बाबला) वृक्षभेदे रत्नमाला। [शाखायाम्।

ब्र(ब्र)ह्मशाला स्त्री १तीर्थभेदे भा० व० ८७अ०। २वेदपाठार्थं

ब्र(ब्र)ह्मशासन न० ६त०। तत्तत्कार्य्येषु ब्रह्मकर्त्तृके १नियो-जने। तेन च यथा यस्य शासनं कृतं यथा पृथिव्या धार-णाय वायोर्वहनाय सूर्य्यादीनां प्रकाशनाय इत्यादि तत्तथैव तैः शासनमनुपाल्यते एवं वर्णाश्रमादिकर्मानुशासनमपि तेनैव अनुशिष्टम् "श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्त्तते। आज्ञाच्छेदी मम द्वेषी नरकं प्रतिपद्यते" भगवदुक्तेः। तदर्थो वेदस्यानुशासने २कर्त्तव्यतोपदेशे च। स्वधि-ष्ठ्या ३पद १ १ब्रह्मविचारदक्षे यज्ञरता०।

ब्र(ब्र)ह्मशिरस् न० अस्त्रभेदे तच्चास्त्रं द्रोणेन सन्तुष्टाय दत्त्वाऽन्ते अर्जुनाय चाध्यापितं तदस्त्रप्रयोगसंहारादिकथा भा० सौ० १२अ०। [कृते ऋ० ६।७५।१६

ब्र(ब्र)ह्मसंशित त्रि० ३त० ब्राह्मणा मन्त्रेण संशिते तीक्ष्णी-

ब्र(ब्र)ह्मसंहिता स्त्री वैष्णवाचारविधाने अध्यायशतात्मके ग्रन्थभेदे [निघण्टुः।

ब्र(ब्र)ह्मसती स्त्री ब्रह्मरूपा ब्रह्मणो वा जाता सती। सरस्वत्यां

ब्र(ब्र)ह्मसत्ता स्त्री० ६त०। ब्रह्मरूपजगदधिष्ठातृसत्तायाम्। शुक्तिसत्तया रजतसत्तावत् तत्सत्तयैव जगतःसत्त्व वेदान्तमतम्।

ब्र(ब्र)ह्मसत्र न० ब्रह्म वेदस्तत्पाठरूपं सत्रम्। ब्रह्मयज्ञ-शब्दार्थे "नैत्यिके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृ-तम्" मनुः।

ब्र(ब्र)ह्मसदन न० सीदत्यस्मिन् सद–आधारे ल्युट् ६त०। ब्रह्मण ऋत्विग्भेदस्य चात्वालादिजाते कुशास्तृते मागधे १आसने कात्या० श्रौ० २।१।२ सूत्रादौ दृश्यम्। २हिरण्यगर्भसदने च।

ब्र(ब्र)ह्मसरस् न० तीर्थभेदे तत्कथा भा० व० ८४अ० दृश्या।

ब्र(ब्र)ह्मसर्प पु० ब्रह्मेव दहन् सर्पः। सर्पभेदे त्रिका०।

ब्र(ब्र)ह्मसात् अव्य० ब्रह्माधीनं करोति याति। ब्रह्माधीने कृभ्वादिष्वेवास्य प्रयोगः ब्रह्मसात्-करोति भवति सम्पद्यते वा

ब्र(ब्र)ह्मसामन् न० सामभेदे तच्च साम ताण्ड्यब्रा० ८।१।१ दर्शितं यथा "यथाभिवर्त्तेऽहनि माध्यन्दिनसवने ब्राह्म-णाच्छंसिनः पृष्ठस्तोत्रनिवर्त्तकमेकं साम विधत्ते भा० "अभीवर्त्तो ब्रह्म साम भवति" ताण्ड्यब्रा० "तस्योदस्य अनीशमिवस्यां योनावुत्पन्नं साम अभीवर्त्ताख्यम् एतत् साम ब्राह्मणाच्छंसी पृष्ठस्तोत्रमनुशंसति, तत्र अभ्य-साधाय कर्त्तव्यम्" अथैतन्नामनिर्वचनेन प्रशं-सति भा०। "अभीवर्त्तेन वै देवाः स्वर्गं लोकमभ्यवर्त्तन्त यदभीवर्त्तो ब्रह्म साम भवति स्वर्गस्य लोकस्याभिवृत्त्यै" ब्रा०। "अभीवर्त्ताख्येन साम्ना देवाः स्वर्गं लोकमभ्य-वर्त्तन्त अगच्छन् अतएवास्याभिवृत्तिसाधनत्वादस्य साम्नो-ऽभीवर्त्त इति संज्ञा निष्पन्ना। अतएव याचायनकं "यदभ्यवर्त्तन्त तदभीवर्त्तस्याभीवर्त्तत्वमिति"। अभिपूर्वाद्-वृत वर्त्तने इत्यस्मात् करणे घञ्। उपसर्गस्य घञ्यमनुष्ये बहुलमिति पूर्वपदस्य दीर्घः। एवं सति अस्मिन्नहनि अभीवर्त्तो ब्रह्मणः पृष्ठ्यसाम भवतीति यत् तत् स्वर्गस्य लोकस्याभिवृत्त्यै अभिवर्त्तनायाभिगमनाय सत्रिणां

भवति” भा॰। तत्र साम रूद्धगाने। ६प्र॰ १४क॰ दर्शितम्।

ब्र(ब्र)ह्मसायुज्य न॰ सह युनक्ति युज–क्विप् तस्य भावः सायुज्यं ६त॰। ब्र(ब्र)ह्मभावे।

ब्र(ब्र)ह्मसार्ष्टिता स्त्री ६त॰। ब्रह्मतुल्यगतित्वे मनुः ४।२३२।

ब्र(ब्र)ह्मसावर्णि पु॰ दशमे मनुभेदे “दशमो ब्रह्मसावर्णि रुपश्लोकसुतो महान्। तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः। हविष्मान् सुकृतः सत्यो जयो मूर्त्तिस्तदा द्विजाः। सुवासनविरुद्धाद्या देवाः शम्भुः सुरेश्वरः। विष्वक्सेनो विषूच्यान्तु शम्भोः सख्यं करिष्यति। जातः स्वांशेन भगवान् गृहे विश्वसृजो प्रभुः” भाग॰ ८।१३।१०

[वसिष्ठादौ च।

ब्र(ब्र)ह्मसम्भव पु॰ ६त॰। १जैनभेदे हेम॰ २ब्रह्मणो जाते

ब्र(ब्र)ह्मसिद्धान्त ६त॰। पैतामहे ज्योतिषसिद्धान्तभेदे “पौलिशरोम(रोम)क वासिष्ठसौरपैतामहेषु पञ्चस्वेतेषु सिद्धान्तेषु” सू॰ स॰ १अ॰।

[दशरथम्। २मरीच्यादौ च

ब्र(ब्र)ह्मसुत पु॰ ६त॰। १केतुभेदे बृ॰ स॰ ११ अ॰ केतुशब्दे

ब्र(ब्र)ह्मसुवर्चला स्त्री ओषधिभेदे तत्स्थानलक्षणादिकमुक्तं सुश्रुते “देवसुन्दे सुदरे तथा सिन्धौ महानदे। दशरते च जलान्तेषु मध्ये ब्रह्मसुवर्चला”। “कनकाभा जलान्तेषु सर्वतः परिसर्पति। सक्षीरा पद्मिनीप्रस्था देवी ब्रह्मसुवर्चला”। तत्क्वथिते २जले च “पिबेत् ब्रह्मसुवर्चलाम्” मनुः।

ब्र(ब्र)ह्मसू पु॰ ब्रह्माणं सूतवान् सू–क्विप्। चतुर्व्यूहात्मकस्य विष्णोर्मूर्त्तिभेदे अनिरुद्धे तस्यावतारभेदे २प्रजापतौ च अमरः। “अनिरुद्धात्ततो ब्रह्मा तन्नाभिकमलोद्भवः” ब्रह्मपु॰। ब्रह्मणि तपसि सुवति प्रेरयति सू–प्रेरणे क्विप्। तपःप्रवर्त्तके ३कामे च कामेनैव सर्वतपस्सु प्रेरणात्तस्य तथात्वम्। तदभिमानिदेवे ४कन्दर्पे च अमरः।

ब्र(ब्र)ह्मसूत्र न॰ ब्रह्मणि वेदपठनकाले उचितं सूत्रम्। १यज्ञोपवीते त्रिका॰। २ब्रह्मप्रतिपादके शारीरकसूत्रे च। “ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितम्” गीता।

ब्र(ब्र)ह्मसूनु पु॰ ६त॰। इक्ष्वाकुवंशोद्भवे १राजभेदे ब्रह्मदत्ते हेमच॰ २वसिष्ठादौ च।

ब्र(ब्र)ह्मस्तेय ६त॰। स्वार्थमधीयानात् ततोऽननुज्ञामप्राप्य तदाकर्ण्यश्रवणेन वेदाध्येतरि। “ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात्। स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते” मनुः

ब्र(ब्र)ह्मस्थान न॰ ६त॰। तीर्थभेदे भा॰ व॰ ८१ अ॰।

ब्र(ब्र)ह्मस्व ६त॰। ब्राह्मणस्वामिके धने। “ब्राह्मणस्वं वा गुरुस्वं वा देवस्वं वापि यो हरेत्। स ज्ञातघ्न इति ज्ञेयो महापापी च भारत!। स वटोदे वसेत् सोऽपि यावदिन्द्रा शतं शतम्। ततो भवेत् सुरापीति ततः शूद्रस्ततः शुचिः”। ब्रह्मवै॰ प्रकृ॰ ४८अ॰।

ब्र(ब्र)ह्महत्या स्त्री॰ हन–क्यप् ६त॰। विप्रहनने। तस्य महापातकत्वमुक्तं मनुना “ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्येव संसर्गश्चापि तैः सह” तदधिष्ठातृस्वरूपमुक्तं ब्रह्मवै॰ पु॰ जन्म॰ ४७ अ॰ यथा “रक्तवस्त्रपरीधाना वृद्धा स्त्रीवेशधारिणी। सप्ततालप्रमाणा सा शुष्ककण्ठोष्ठतालुका। ईषाप्रमाणदशना महाभीतञ्च कातरम्। धावन्तं परिधावन्ती बलिष्ठाहतचेतनम्। खड्गहस्ता हतास्त्रं तं दयाहीना च मूर्च्छितम्। इन्द्रो दृष्ट्वा च तां घोरां स्मारं स्मारं गुरोः पदम्। विवेश मानससरो मृणालसूक्ष्मसूत्रतः। तत्र गन्तुं न शक्ता सा ब्रह्मणः शापकारणात्”। इत्या सुरवधनिमित्तकब्रह्महत्यापनोदनार्थं शक्रेणाश्वमेधे कृते तस्या विभज्य स्थानविशेषे संक्रामणकथा भा॰ उ॰ उ॰ १२अ॰ यथा “तत्राश्वमेधः सुमहान् महेन्द्रस्य महात्मनः। वहते पावनार्थं वै ब्रह्महत्यापहो नृप!। विभज्य ब्रह्महत्यां तु वृक्षेषु च नदीषु च। पर्वतेषु पृथिव्याञ्च स्त्रीषु चैव युधिष्ठिर!”आतिदेशिकब्रह्महत्याः कतिचित् ब्रह्मवै॰प्रकृ॰२७अ॰ उक्ता यथा

“श्रीकृष्णे च तदंशायां तन्मय्यां प्रकृतौ तथा। शिवे च शिवलिङ्गे वा सूर्य्ये सूर्य्यतनौ तथा। गणेशे वा तदंशायामेवं सर्वत्र सुन्दरि!। यः करोति भेदबुद्धिं ब्रह्महत्यां लभेत् तु सः। स्वगुरौ स्वेष्टदेवेषु जन्मदातरि मातरि। करोति भेदबुद्धिं यो ब्रह्महत्यां लभेत् तु सः। वैष्णवेष्वन्यभक्तेषु, ब्राह्मणेष्वितरेषु च। करोति समतां यो हि ब्रह्महत्यां लभेत् तु सः। हरेः पादोदकेष्वन्यदेवपादोदके तथा। करोति समतां यो हि ब्रह्महत्यां लभेत् तु सः। विमूढो विष्णुनैवेद्ये चान्यनैवेद्यके तथा। करोति समतां यो हि ब्रह्महत्यां लभेत् तु सः। सर्वेश्वरेश्वरे कृष्णे सर्वकारणकारणे। सर्वाद्ये सर्वदेवानां सेव्ये सर्वात्मनात्मनि। मायया नैकरूपे वाप्येकस्मिन् हि निर्गुणे। करोत्यनेन समतां ब्रह्महत्यां लभेत् तु सः। पितृदेवार्चनं पौर्वापर्यं वेदविनिर्मितम्। यः करोति तन्निषेधं ब्रह्महत्यां स विन्दति। ये निन्दन्ति हृषीकेशं तन्मन्त्रोपासकं तथा।

पवित्रायां पवित्रञ्च ब्रह्महत्यां लभन्ति ते। ये निन्दन्ति विष्णुमायां विष्णुभक्तिप्रदां सतीम्। सर्वशक्तिस्वरूपाञ्च प्रकृतिं सर्वमातरम्। सर्वदेवस्वरूपाञ्च सर्वाद्यां सर्ववन्दिताम्। सर्वकारणरूपाञ्च ब्रह्महत्यां लभन्ति ते। कृष्णजन्माष्टमीं रामनवमीं पुण्यदां पराम्। शिवरात्रिं तथा चैकादशीं वारं रवेस्तथा। पञ्च पर्वाणि पुण्यानि ये न कुर्वन्ति मानवाः। लभन्ते ब्रह्महत्यां ते चाण्डालाधिकपापिनः। अम्बुवाच्यां भूखननं जले शौचादिकञ्च ये। कुर्वन्ति भारते वर्षे ब्रह्महत्यां लभन्ति ते। गुरुञ्च मातरं तातं साध्वीं भार्य्यां सुतं सुताम्। अनाथां यो न पुष्णाति ब्रह्महत्यां लभेत् तु सः। विवाहो यस्य न भवेत् न पश्यति सुतन्तु यः। हरिभक्तिविहीनो यो ब्रह्महत्यां लभेत् तु सः। हरेरनैवेद्यभोजी नित्यं विष्णुं न पूजयेत्। पुण्यं पार्थिवलिङ्गं वा ब्रह्महत्यां लभेत् तु सः"। आतिदेशिक्यास्तस्या विनाशनं हरिस्मरणगङ्गास्नानादि।

ब्र(व्र)ह्महत्यासम न० "अनृतञ्च समुत्कर्षे राजगामि च पैशुनम्। गुरोरलीकनिर्बन्धः समानि ब्रह्महत्यया" मनूक्ते अनुपातकभेदरूपे मिथ्याभेदकथनादौ।

ब्र(व्र)ह्महन् त्रि० ब्र(व्र)ह्माणं हतवान् हन–क्विप्। १विप्रहत्याकारिणि। "ब्र(व्र)ह्महा न भवत्यन्यो ब्र(व्र)ह्महा वृषलीपतिः। यस्तस्यामाहितो गर्भः स तेन ब्रा(व्रा)ह्मणो हतः" इत्युक्ते २वृषलीपतौ च। "श्रुतोत्पतनजिह्वासु जीवोत्तिष्ठाङ्गुलिध्वनिः। गुरोरपि च कर्त्तव्यमन्यथा ब्रह्महा भवेत्" ३इत्यादिस्मृत्युक्तातिदेशिकब्र(व्र)ह्महत्यापापयुक्ते च। तत्प्रायश्चित्तं मनुनोक्तं यथा

"ब्रह्महा द्वादश समाः कुटीं कृत्वा वने वसेत्। भैक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम्१। लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः२। प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः३। यजेत वाश्वमेधेन४ स्वर्जिता५ गोसवेन वा६। अभिजिद्विश्वजिद्भ्यां७। ८वा त्रिवृताग्निष्टुतापि९ वा। जपन् वान्यतमं१० वेदं योजनानां शतं व्रजेत्११। ब्रह्महत्यापनोदाय मितभुङ् नियतेन्द्रियः। सर्वस्वं वेदविदुषे ब्राह्मणायोपपादयेत्१२। धनं वा जीवनायालं गृहं वा सपरिच्छदम्१३। हविष्यभुग्वानुसरेत् प्रतिस्रोतः सरस्वतीम्१४। जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहिताम्१५। कृतवापनो निवसेद् ग्रामान्ते गोव्रजेऽपि वा। आश्रमे वृक्षमूले वा गोब्राह्मणहिते रतः। ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान् परित्यजन्१६। मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च। त्रिवारं प्रतियोद्धा वा१७ सर्वस्वमवजित्य वा। विप्रस्य तन्निमित्ते वा प्राणालाभे विमुच्यते"।

ब्र(व्र)ह्माङ्गभू पु० ब्रह्मणोऽङ्गात् भवति भू–क्विप्। घोटके हारा०। ब्रह्मात्मभूशब्दे दृश्यम्।

ब्र(व्र)ह्माञ्जलि पु० ब्र(व्र)ह्मणे वेदपाठाय अञ्जलिः गुरौ कृतो विनयाञ्जलिः, स्वरविशेषज्ञापनार्थं वा कृतोऽञ्जलिः संकुचितपाणिः। वेदपाठार्थं गुरुनिकटे कार्य्ये १विनयाञ्जलौ स्वरविशेषार्थज्ञापनाय कृतसङ्कोचे २पाणिद्वये च अमरः।

ब्र(व्र)ह्माणी पु० ब्र(व्र)ह्माणम् आनयति जीवयति अन–णिच्–अण् पूर्व०णत्वम्। ब्रह्मशक्तौ "हंसयुक्तविमानस्था साक्षसूत्रकमण्डलुः। आयाता ब्रह्मणः शक्तिः ब्रह्माणी साऽभिधीयते" इति देवीमा०। "ब्रह्माणी ब्रह्मजननात्" देवीपु०। ब्रह्मशब्दात् ङीप् आनङ् चेति त्वपाणिनीयम्। २रेणुकानामगन्धद्रव्ये रत्नमा०। ३राजरीतौ राजनि०। ४ब्रह्मणोऽर्द्धशरीरादुत्पन्नायां शतरूपायाम्। "ततः संजपतस्तस्य भित्त्वा देहमकल्मषम्। स्त्रीरूपमर्द्धमकरोदर्द्धं पुरुषरूपवत्। शतरूपा च सा ख्याता सावित्री च निगद्यते। सरस्वत्यथ गायत्री ब्रह्माणीत्युच्यते च सा" मत्स्यपु० ३अ०।

ब्र(व्र)ह्माण्ड न० ६त०। "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः" इति मनूक्ते ब्रह्मण उत्पादके अण्डाकारे १भुवनकोषे "ब्रह्माण्डभाण्डोदरभ्राम्यत्पिण्डितचण्डिमेति" वीरचरितम्।

ब्रह्माण्डसंस्था स्क०सि० दर्शिता यथा

"वासुदेवः परं ब्रह्म तन्मूर्त्तिः पुरुषः परः। अव्यक्तो निर्गुणः शान्तः पञ्चविंशात् परोऽव्ययः। प्रकृत्यन्तर्गतो देवो बहिरन्तश्च सर्वगः। सङ्कर्षणोऽपः सृष्ट्वादौ तासु बीजमवासृजत्। तदण्डमभवद्धैमं सर्वञ्च तमसावृतम्। तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातनः। हिरण्यगर्भो भगवानेष छन्दसि पठ्यते। आदित्यो ह्यादिभूतत्वात् प्रसूत्या सूर्य उच्यते। परं ज्योतिस्तमःपारे सूर्योऽयं सवितेति च। पर्येति भुवनान्येष भावयन् भूतभावनः" इत्युपक्रमे "गुणकर्मविभागेन सृष्ट्वा प्रागवदनुक्रमात्। विभागं कल्पयामास यथास्वं वेददर्शनात्। ग्रहनक्षत्रताराणां भूमेर्विश्वस्य वा विभुः। देवा-

सुरमनुष्याणां सिद्धानां च यथाक्रमम्। ब्रह्माण्डमेतत् सुषिरं तत्रेदं भूर्भुवादिकम्। कटाहद्वितयस्यैव सम्पुटं गोलकाकृति(१)। ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाऽभिधीयते। तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा। मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः। परिभ्रमन्त्यधोऽधस्थाः सिद्धविद्याधरा घनाः। उपरिष्टात् स्थितास्तस्य सेन्द्रा देवा महर्षयः। अधस्तादसुरास्तद्वत् द्विषन्तोऽन्योन्यमाश्रिताः। ततः समन्तात् परिधिः क्रमेणायं महार्णवः। मेखलेव स्थितो धात्र्या देवासुरविभागकृत्। समन्तान्मेरुमध्यात् तु तुल्यभागेषु तोयधेः। द्वीपेषु दिक्षु पूर्वादिनगर्यो देवनिर्मिताः। भूवृत्तपादे पूर्वस्यां यमकोटीति विश्रुता। भद्राश्ववर्षे नगरी स्वर्णप्राकारतोरणा। याम्यायां भारते वर्षे लङ्का तद्वन्महापुरी। पश्चिमे केतुमालाख्ये रोमकाख्या प्रकीर्त्तिता। उदक् सिद्धपुरी नाम कुरुवर्षे प्रकीर्त्तिता। तस्यां सिद्धा महात्मानो निवसन्ति गतव्यथाः" सू॰ सि॰।

(१)"एतत् प्रागुक्तं ब्रह्मणाधिष्ठितं सुवर्णाण्डं सुषिरमवकाशात्मकं तदवकाशे इदं जगत् भूर्भुवादिकं भूर्भुवःस्वर्लोकात्मकमवस्थितं न बहिः। नन्वण्डस्य गोलाकारत्वेनान्तरवकाशात्मकत्वमसम्भवमत आह कटाहद्वितयस्येति। कटाहोऽर्द्धगोलाकारं सावकाशं पात्रं तस्य द्वितयं द्वयं समं तस्य। एवकारो न्यूनाधिकव्यवच्छेदकार्थः। सम्पुटमाभिमुख्येन मिलितं गोलकाकृतिर्गोलाकारः स्यात्। तथाच न क्षतिः" रङ्गना॰।

"भूभूधरत्रिदशदानवमानवाद्या येऽयाश्च धिष्ण्यग्रगनेचरचक्रकक्षाः। लोकव्यवस्थितिरुपर्युपरि प्रदिष्टा ब्रह्माण्डभाण्डजठरे तदिदं समस्तम्" सि॰शि॰। इदानीमभ्योदितं ब्रह्माण्डमानं पूर्वं कथितमपि प्रसङ्गादनुवदति स्म" प्रमिता॰। "कोटिघ्नैर्नखनन्दषट्कनखभूभृद्भुजङ्गेन्दुभिः१८७१२०६९२००००००००र्ज्योतिः शास्त्रविदो वदन्ति नभसः कक्षामिमां योजनैः। तद्ब्रह्माण्डकटाहसंपुटतटे केचिज्जगुर्वेष्टनं केचित् प्रोचुरदृश्यदृश्यकगिरिं पौराणिका. सूरयः। करतलकलितामलकवदमलं सकलं विदन्ति ये गोलम् दिनकरकरनिकरनिहततमसो नभसः स परिधिरुदितस्तैः। ब्रह्माण्डमेतन्मितमस्तु नो वा कल्पे ग्रहः क्रामति योजनानि। यावन्ति पूर्वैरिह तत्प्रमाणं प्रोक्तं खकक्षाख्यमिदं मतं नः"। प्रमाणशून्यत्वात् प्रयोजनाभावाच्चास्माभिर्ब्रह्माण्डमानं न कथितमित्यर्थः" प्रमि॰।

दानार्थकल्पिते महादानान्तर्गते ब्रह्माण्डात्मकस्वर्णनिर्मिते २पदार्थे तत्स्वरूपादि हेमा॰दा॰ख॰मत्स्यपु॰उक्तं यथा "अथातः संप्रवक्ष्यामि ब्रह्माण्डं विधिपूर्वकम्। यच्छ्रेष्ठं सर्वभूतानां महापातकनाशनम्। पुण्यं दिनमथासाद्य तुलापुरुषदानवत्। ऋत्विग्मण्डपसम्भारभूषणाच्छादनादिकम्। लोकेशावाहनं तद्वदधिवासनकं तथा" तुलापुरुषदानवदिति, कालदेशशुद्धिश्राद्धशिवादिपूजाब्राह्मणवाचनगुरुऋत्विग्वरणमधुपर्कदानकुण्डमण्डपवेदिकासम्भारलोकेशावाहनाधिवासनादि सर्वं मत्स्यपुराणोक्ततुलापुरुषदानविहितं वेदितव्यमित्यर्थः। "कुर्य्याद्विंशत्पलादूर्द्ध्वमासहस्राच्च शक्तितः। शकलद्वयसंयुक्तं ब्रह्माण्डं काञ्चनं बुधः"। शकलद्वयं, खण्डद्वयम्। तल्लक्षणन्तु ब्रह्माण्डपुराणे "कुम्भच्छाया भवेद्यावद् प्रतीच्यां दिशि चन्द्रमाः। मदितः शुक्लपक्षादौ वपुरण्डस्य तादृशमिति" कुम्भच्छाया इति, कुम्भच्छाया ग्रीवाहीनकुम्भादिजेत्यवधेयम्। "दिग्गजाष्टकसंयुक्तं षड्वेदाङ्गसमन्वितम्। लोकपालाष्टकोपेतं मध्यस्थितचतुर्मुखम्। शिवाच्युतार्कशिखरस्रमालक्ष्मीसमन्वितम्। वस्वादित्यमरुद्गर्भं महारत्नसमन्वितम्"। अथैतेषां दिग्गजप्रभृतीनां क्रमेण लक्षणान्युच्यन्ते आदित्यपुराणे "शुभ्राभश्च चतुर्दंष्ट्रः श्रीमानैरावतो गजः। पुष्पदन्तो इहवृषाक्षः षड्दन्तः पुष्पदन्तवान्। सामान्यगजरूपेण शेषा दिक्करिणः स्मृताः"। तन्नामानि शास्त्रान्तरे "ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः"। वेदाङ्गानि स्कन्दपुराणे "शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषास्थिति। छन्दश्चेति षडेतानि वेदाङ्गानि प्रचक्षते। मूर्त्तानि ब्रह्मणो लोके शास्त्ररूपाणि तानि तु। द्विजाकृतिभिः शुभाख्यानि वामे दधति कुण्डिकाम्"। तानि च पश्चिमदिशि वेदसन्निधौ निवेशनीयानि दिक्शेषानाम्नानात् प्रधानं नीयमानं हि तत्राङ्गान्यपकर्षतीतिन्यायाच्च, वक्ष्यते च, "पश्चिमे चतुरोवेदानिति"। लोकपालरूपाण्याह विश्वकर्मा "चतुर्दन्तो गजारूढो वज्रपाणिः पुरन्दरः। प्राचीपतिः प्रकर्त्तव्यो नानाभरणभूषितः। पिङ्गभ्रूश्मश्रुकेशाक्षः पीनाङ्गजठरोऽरुणः। छागस्थः साक्षसूत्रश्च सप्तार्च्चिः शक्तिधारकः। दंष्ट्रापीनो यमः कार्य्यो दण्डहस्तो विभानतः। रक्तदृक् पाशहृक् क्रुद्धो निर्ऋतिर्विकृताननः। पुंस्थितः

षड्गहस्तश्च भूतवान् राक्षसाहृतः। वरुणः पाशभृत् सौम्यः प्रतीच्यां मकराश्रयः। धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः। दशाश्वरथगः सोमो गदापाणिर्वरप्रदः"। "शशकवाहनः" इत्यागमान्तरम्। "पूर्वोत्तरे त्रिनेत्रश्च वृषभस्थस्त्रिशूलभृत्। कपालपाणिश्चन्द्रार्द्धभूषणः परमेश्वरः"। चतुर्थस्वरूपन्तु विष्णुधर्मोत्तरात् "पद्मपत्रासनस्थश्च ब्रह्मा कार्य्यश्चतुर्मुखः। अक्षमालास्रुजं बिभ्रत् पुस्तकञ्च कमण्डलुम्। वासः कृष्णाजिनं तस्य पार्श्वे हंसस्तथैव च"। शिवलक्षणमुक्तं वायुपुराणे "पञ्चवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोचनः। कपालशूलखट्वाङ्गी चन्द्रमौलिः सदाशिवः"। विष्णुलक्षणमुक्तं तुलापुरुषदाने। सूर्य्यलक्षणमुक्तं विष्णुधर्मोत्तरे "रविः कार्य्यः शुभश्मश्रुः सिन्दूरारुणसुप्रभः। पद्मासनः पद्मकरो भूषितो रशनाधरः"। उमालक्ष्मीसमन्वितमित्यत्र, शिवाच्युतयोः सन्निहिते उमालक्ष्म्यौ विधेयौ। उमालक्षणमुक्तं देवीपुराणे "गौरीं शङ्खेन्दुवर्णाभां सर्व्वरीषनिषेवितास्। हृत्पद्मासनासीनां साक्षसूत्रकमण्डलुम्। वरदोद्यतहस्ताद्यां सर्व्वमाल्यफलप्रियाम्"। वरदोद्यतहस्ताद्यां, वरदाभयपाणिकामित्यर्थः। लक्ष्मीलक्षणमुक्तं पञ्चरात्रे "पद्मासनस्थां कुर्व्वीत श्रियं त्रैलोक्यमातरम्। गौरवर्णां सुरूपाञ्च सर्व्वालङ्कारभूषिताम्। रौक्मपद्मकरव्यग्रां वरदां दक्षिणेन तु"। वस्वादित्यरूपाणि, नारदीये, "प्रसन्नवदनाः सौम्या वरदाः शक्तिपाणयः। पद्मासनस्था द्विभुजाः कर्त्तव्या वसवः सदा। पद्मासनस्था द्विभुजाः पद्मगर्भान्तिकान्तयः। करादिस्कन्धपर्य्यन्तनालपङ्कजधारिणः। अधःसंस्थितमेषादिराशयः प्राहृताङ्घ्रिकाः। इन्द्राद्या द्वादशादित्यास्तेजोमण्डलमध्यगाः" तथा। वायुतुल्येन रूपेण मरुतो नाम देवताः"। कर्त्तव्या इति शेषः, वस्वादिनामानि, तुलापुरुषोक्तानि वेदितव्यानि। महारत्नसमन्वितमिति, महारत्नानि परिभाषायामुक्तानि, अनन्तमिथुनान्वितमिति क्वचित्पाठः। "फणासप्तान्वितोऽनन्तः पृथ्वी स्त्रीरूपधारिणीत्यनन्तमिथुनम्। अथ प्रकृतमुच्यते "वितस्तेरङ्गुलशतं यावदायामविस्तरम्। कौशेयवस्त्रसंवीतं तिलद्रोणोपरि न्यसेत्। तथाष्टादश धान्यानि समन्तात् परिकल्पयेत्"। वितस्तेरङ्गुलशतमिति, द्वादशाङ्गुलमारभ्याङ्गुलशतं यावच्छक्त्यनुसारेण कार्य्यमित्यर्थः। द्रोणमानमष्टादश धान्यानि च परिभाषायां

द्रष्टव्यानि। स च तिलद्रोणो वेदिकायां लिखितचक्रस्योपरि स्थापनीयः। "पूर्व्वेणानन्तशयनं प्रद्युम्नं पूर्व्वदक्षिणे। प्रकृतिर्दक्षिणे देशे संकर्षणमतः परम्। पश्चिमे चतुरो वेदानानिरुद्धमतः परम्। अग्निमुत्तरतो हैमं वासुदेवमतः परम्। समन्तादुणपीठस्थानर्च्चयेत् काञ्चनान् बुधः। स्थापयेद्वस्त्रसंवीतान् पूर्णकुम्भान् दशैव तु"। पूर्व्वेणेत्यादि, ब्रह्माण्डात् पूर्व्वदेशे अनन्तशयनं शेषशायिनं गु…(स्वादि)पीठे स्थापयेत्, तन्मूर्त्तिलक्षणं विष्णुधर्मोत्तरात् "देवदेवस्य कर्त्तव्यः शेषसुप्तश्चतुर्भुजः। एकपादोऽस्य कर्त्तव्यो लक्ष्म्युत्सङ्गगतः प्रभोः। तथाऽपरश्च कर्त्तव्यः शेषभोगाङ्कसंस्थितः। एको भुजोऽस्य कर्त्तव्यस्तत्र जानौ प्रसारितः। कर्त्तव्यो नाभिदेशस्थस्तथा तस्यापरः करः। तथैवान्यः करः कार्य्यो देवस्य तु शिरोधरः। सन्तानमञ्जरीधारी तथा चास्य करः परः। नाभिसम्भूतकमले सुखासीनः पितामहः। नालसक्तौ तु कर्त्तव्यौ पद्मस्थौ मधुकैटभौ। शङ्खचक्रगदादीनि मूर्त्तानि परितो न्यसेदिति"। प्रद्युम्नलक्षणं पञ्चरात्रादिषु "दक्षिणोर्द्धकरे पद्मं दद्याच्छङ्खमधः करे। चक्रमूर्द्धे ततो वामे गदां दद्यात् तथा द्विज!। वामेषु-धन्वा प्रद्युम्नो रूपवान् विश्वमोहनः" इति। अत्र यद्यपि प्रकृतेरव्यक्तरूपतया विधानमशक्यं तथापि लक्ष्म्यादिशब्दव्यपदेश्यं सुकरमस्ति तद्रूपमित्यतस्तदन्यतमरूपनिर्माणमेव न्याय्यम्। तदुक्तं मार्कण्डेयपुराणे "सर्व्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी। मातुलुङ्गं गदां खेटं पानपात्रञ्च बिभ्रती। नागं योनिञ्च लिङ्गञ्च बिभ्रती नृप! मूर्द्धनीति"। संकर्षणरूपम् विष्णुधर्मोत्तरे "वासुदेवस्य रूपेण कार्य्यः संकर्षणः प्रभुः। स तु शुक्लवपुः कार्य्यो नीलवासा यदूत्तम!। गदास्थाने च मुषलं शङ्खस्थाने च लाङ्गलमिति"। वेदमूर्त्तयो भूतघटे वक्ष्यन्ते। अनिरुद्धरूपं नारदीये। "कृष्णं चतुर्भुजं दक्षे शरं खड्गं तदुत्तरे। धनुःखेटधरं वीरमनिरुद्धं प्रचक्षते"। अग्निलक्षणमुक्तम्। वासुदेवरूपमपि नारदीये "वासुदेवः शिवः शान्तः सिताभश्च चतुर्भुजः। योगमूर्द्ध्नि शङ्खञ्च हृद्देशार्पितहस्तकः। धारयेदुत्तरे चक्रं करे वै दक्षिणे गदामिति"। एते च देवताविशेषा ब्रह्माण्डनिर्माणप्रकृतत्वात् पृथक् सुवर्णेनैव घटनीयाः ब्रह्माण्डस्य किल विंशतिपलात् प्रभृति पलसहस्रावधिरिह नियमः, पुराणेषु दृश्यते ततोऽवशिष्ट-

साधकाश्रुने तस्मिन् न्यूनसंख्यत्वादयथावद्विहितत्वमापद्यते । न च दिग्गजाष्टकसंयुक्तं लोकपालोपेतमित्यादिना एक एव तावद्भिरङ्गैरङ्गी निष्पाद्यत इति ब्रह्माण्डवत् प्रकृतस्वर्णेनैव दिग्गजादिप्रतिमानिर्मितौ न कश्चिद्बाध इति वाच्यं, "काञ्चनान् कारयेदिति" पुनः काञ्चनोपदेशानर्थक्यापत्तेः । अत्र यमादिपरिमाणानां प्रतिमानामङ्गुष्ठपर्वप्रभृतिवितस्तिपर्य्यन्तं यथाशक्ति परिमाणं कल्पनीयम् । "पूर्णकुम्भान् स्थापयेदित्यत्र समन्तादिति योज्यम् । "दशैव धेनवो देया सहेमाम्बरदोहनाः । पादुकोपानहच्छत्रचामरासनदर्पणैः । भक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः । होमाधिवासनान्ते च स्नापितो वेदपुङ्गवैः । इत्यमुच्चारयेन्मन्त्रं त्रिःकृत्वाथ प्रदक्षिणम्" । सहेमाम्बरदोहना इति, हेमशृङ्ग्यः ताम्रदोहनाः सवस्त्राः पार्श्वतो दक्षिणार्थमुपकल्पनीयाः । तत्राचार्य्याय द्वे, ऋत्विग्भ्योऽष्टौ संप्रदेया, जापकादीनां चान्यैव यथाशक्ति दक्षिणेति, । भविष्योत्तरे तु "स्रोयं निष्कशतं पार्थेत्यादिना सुवर्णमेव दक्षिणार्थमुपकल्पनीयमित्युक्तं, आद्याधिवासनदिनादन्येद्युरग्निकुण्डेषु ऋत्विगुपवेशनादिकर्मशेषसमाप्तौ तुलापुरुषदानवद्विहितायां, पूर्ववदेव स्नापितः शुक्लमाल्याम्बरधरो गृहीतकुसुमाञ्जलिर्यजमानो ब्रह्माण्डं त्रिःप्रदक्षिणीकृत्य मन्त्रमुच्चारयेत् । मन्त्रः । "नमोऽस्तु विश्वेश्वर ! विश्वधामन् ! जगत्सवित्रे भगवन्नमस्ते । सप्ताधिलोकामरभूतलेन गर्भेण सार्द्धं वितराभिरक्षाम् । ये दुःखितास्ते सुखिनो भवन्तु प्रयान्तु पापानि चराचराणाम् । त्वद्दानशस्त्राहतपातकानां ब्रह्माण्डदोषाः प्रलयं व्रजन्तु । एवं प्रणम्यामरविश्वगर्भं दद्याद् द्विजेभ्यो दशधा विभज्य । भागद्वयं तत्र गुरोः प्रकल्प्य समम्भजेच्छेषमतः क्रमेण" । दानवाक्यं तुलापुरुषवद्वेदितव्यं तच्च दशधा विभज्य गुरोर्भागद्वयं प्रकल्प्य अवशिष्टाष्टभागानामेकैकं भागं त्रिधा विभज्य चतुर्विंशतिसंख्येभ्य ऋत्विगादिभ्यः समं दद्यात्, तदनुज्ञयान्येभ्योऽपि ब्राह्मणेभ्यो दद्यात् । "स्वल्पं होमं गुरुरेक एव कुर्य्यादथैकाग्निविधानयुक्त्या । स एव संपूज्यतमोऽल्पवित्तैर्यथोक्तवस्त्राभरणादिकेन" । विंशतिपलादारभ्य पलसहस्रावधिद्रव्ये ब्रह्माण्डे सहस्रतदर्द्धादित्युत्तममध्यमादित्रैविध्यकल्पनायां कनीयोभागस्याल्पत्वमवधेयं, विंशतिपलनिर्मितस्यैवाल्पत्वमित्येके उक्तविंशतिपलादर्वाक् यथाशक्तिविधानं स्वल्पत्वमवगन्तव्यमिति केचित् । एकाग्निविधानम्

एकस्मिन्नेव कुण्डे होमकरणम् कुण्डमपि वरुणदिग्भागस्थितं वृत्ताकारञ्च कार्य्यं तदेतत्परिभाषायामुपपादितम् । अथ पुण्याहवाचने कृते देवतावेदीसमीपं गत्वा पूर्ववद्यजमानेन देवतापूजायां विहितायामाचार्य्यो विसर्जनं विदध्यात् । "इत्थं य एतदखिलं पुरुषोऽत्र कुर्य्याद्ब्रह्माण्डदानमधिगम्य महद्विमानम् । निर्धूतकल्मषविशुद्धतनुर्मुरारेरानन्दकृत् पदमुपैति सहाप्सरोभिः । सन्तारयेत् पितृपितामहपुत्रपौत्रबन्धुप्रियातिथिकलत्रशताष्टकं सः । ब्रह्माण्डदानशकलीकृतपातकौघमानन्दयेच्च जननीकुलमप्यशेषम् । इति पठति शृणोति वा य एतत् सुरभवनेषु गृहेषु धार्मिकाणाम् । मतिमपि च ददाति मोदते सोऽमरपतिभवने सहाप्सरोभिः" । "राजोवाच विधिं ब्रह्माण्डदानस्य कृत्वा यं मोक्षभाग्भवेत् । कालं देशं द्विजं तीर्थं सर्वमेतद्वदस्व मे । कृतेन येन सर्वस्य फलभागी भवाम्यहम् । कुत्सितस्यास्य भावस्य मोक्षः स्यादचिराच्च मे । वशिष्ठ उवाच "एवं श्रुत्वा ततो राजन् ! पुरोधास्तस्य तं द्विजः । ब्रह्माण्डं कारयामास सौवर्णं सर्वधातुभिः । पीठं निष्कसहस्रेण पद्मं तत्र प्रकल्पयेत् । तत्र ब्रह्मा तस्य मध्ये पद्मरागैरलङ्कृतः । सावित्र्या चैव गायत्र्या ऋषिभिर्मुनिभिः सह । नारदाद्यैः सुतैः सर्वैरिन्द्राद्यैश्च सुरैस्तथा । सौवर्णविग्रहाः सर्वे ब्रह्मणस्तु पुरःसराः । वाराहरूपो भगवान् लक्ष्म्या सह सनातनः । नीलान्मरकतांश्चैव भूषायान्तस्य कारयेत् । रजतस्य विशुद्धस्य देहं रुद्रस्य कारयेत् । गोमेदकैस्तस्य शोभाङ्कारयेदत्र बुद्धिमान् । मौक्तिकैश्चापि सोमस्य शोभां वज्रैर्दिवाकरैः" । सावित्रीगायत्र्यौ तु, ब्रह्मणः पार्श्वभागे स्थापनीयौ । तदाह नारदः "सावित्री दक्षिणे पार्श्वे गायत्री नाम वामतः । विलोकयन्त्यौ ब्रह्माणं साक्षसूत्रकमण्डलुम्" । ऋषयः सप्त गोतमाद्याः तदुक्तमादित्यपुराणे "गोतमश्च भरद्वाजो विश्वामित्रश्च काश्यपः । जमदग्निर्वशिष्ठोऽत्रिः सप्त वैवस्वतेऽन्तरे" । सप्तर्षिलक्षणमाह यमः "सप्तर्षयस्तु जटिलाः कमण्डल्वक्षसूत्रिणः । ध्याननिष्ठा वशिष्ठस्तु कार्य्यो भार्य्यासमन्वितः" । मुनयो वानप्रस्थाः, नारदाद्यैरिति तेषां विशेषणम्" । तानाह मनुः "अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम् । पतीन् प्रजानामसृजं महर्षीनादितो दश । मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम् । प्रचेतसं वशिष्ठञ्च

भृगुन्नारदमेव च"। तल्लक्षणमाह विश्वकर्म्मा "जटिलाः श्मश्रुलाः शान्ता दण्डाऽधमनिसन्नताः। कृष्णाजिनधराः कार्य्या मुनयो द्विभुजाः सदा। तेषु सव्यभुजामूलश्लिष्टचीरस्तु नारदः। कर्पूरगौरदेहश्च साक्षसूत्रकमण्डलुः"। इत्यादिरूपाण्यपि प्रागभिहितानि। वाराहरूपं विष्णुधर्मोत्तरे "वाराहरूपः कार्य्यस्तु शेषोपरिगतः प्रभुः। शेषश्चतुर्भुजः कार्य्यश्चारुरत्नफणान्वितः। कर्त्तव्यौ चोरमुसलौ करयोस्तस्य यादव!। सर्परूपश्च कर्त्तव्यस्तथैव रचिताञ्जलिः। आलीढस्थानसंस्थानस्तत्पृष्ठे भगवान् भवेत्। वामारत्निगता तस्य योषिद्रूपा वसुन्धरा। नमस्कारपरा तस्य कर्त्तव्या द्विभुजा शुभा। यस्मिन् भुजे धरा देवी तत्र शङ्खः करे भवेत्। अन्ये तस्य कराः कार्य्याः पद्मचक्रगदाधराः। पद्मासनस्थां कुर्व्वीत श्रियं त्रैलोक्यमातरम्। गौरवर्णां सुरूपाञ्च सर्व्वालङ्कारभूषिताम्। रौक्मपद्मकरव्यग्रां वरदां दक्षिणेन तु"। इत्यादिरूपं प्रागभितं ग्रहलक्षणानि तद्वर्णाश्च नवग्रहदाने वक्ष्यन्ते। सर्व्ववर्णानि ग्रहसमानवर्णानि, रत्नानि भूषणार्थं दापयेदित्यर्थः। सर्व्वधातुभिः ब्रह्माण्डं कर्त्तव्यमित्युक्तं, तत्र सुवर्णस्य पीठनिर्म्माणादिविनियोगमभिधायेदानीं धात्वन्तरैः कर्त्तव्यं तदुच्यते "पीठात् सप्तगुणं रौप्यं रौप्यात्ताम्रं तथाविधम्। ताम्रात् सप्तगुणं कार्य्यं कांस्यमत्र नराधिप!। त्रपुणः परतः सीसं तावल्लौहं च कारयेत्। सप्तद्वीपाः समुद्राश्च सप्तैव कुलपर्व्वताः। अनया संख्यया ज्ञात्वा निपुणैः शिल्पिभिः कृताः"। तथाविधं सप्तगुणमित्यर्थः सप्तद्वीपा इत्यादि एतेषामेकैकधातुना एकैकं द्वीपं समुद्रं कुलाचलञ्च रचयेदित्यर्थः। "यादसानि च भूतानि राजतान्येव कारयेत्। आरण्यानि च सत्त्वानि सौवर्णानि च कारयेत्। वृक्षान् वनस्पतींश्चात्र लतावल्लीः सवीरुधः"। यादसानि, जलसम्भवानि, पुष्पफलवन्तो वृक्षाः अपुष्पाः फलिनो वनस्पतयः, वीरुधो गुल्मगुल्मादयः। "एवं प्रकल्प्य विधिवत्तीर्थे देयं विचक्षणैः। कुरुक्षेत्रे गयायां च प्रयागेऽमरकण्टके। द्वारवत्यां प्रभासे च गङ्गाद्वारे च पुष्करे। तीर्थक्षेत्रेषु वै देयं ग्रहणे सोमसूर्य्ययोः। दिनच्छेदेषु सर्व्वेषु अयने दक्षिणोत्तरे। व्यतीपाते बहुगुणं विषुवे च विशेषतः। दातव्यमेतद्राजेन्द्र! विचारं नैव कारयेत्। कालाग्निहोत्रिणं विप्रं सुरूपञ्च गुणान्वितम्। सपत्नीकं च संपूज्य भूषयित्वा विभूषणैः। पुरोहितं मुख्यतमं कृत्वान्यांश्च तथर्त्विजः। चतुर्विंशद्गुणोपेतान् सपत्नीकान्निमन्त्रितान्। अहताम्बरसञ्छन्नान् स्रग्विणः सुविभूषितान्। अङ्गुलीयककटकानि कर्णवेष्टांश्च दापयेत्। एवंविधांश्च संपूज्य तेषामध्ये स्वयं स्थितः। अष्टाङ्गप्रणिपातेन प्रणम्य च पुनः पुनः। पुरोहिताय पुरतः कृत्वा वै करसंपुटम्। यूयं वै ब्रह्मणा धाता, मैत्रत्वेनानुगृह्यताम्। सौमुख्येनेह भवताम्भवेत् पूतो नरः स्वयम्। भवतां प्रीतियोगेन स्वयं प्रीतः पितामहः। ब्रह्माण्डेन तु दत्तेन तेषां प्रीतो जनार्दनः। पिनाकपाणिर्भगवान् शक्रश्च त्रिदशेश्वरः। एते वै तोषमायान्ति अनुध्याता द्विजोत्तमैः। एवं स्तुत्वा ततो राजा ब्राह्मणान् वेदपारगान्। ब्रह्माण्डं गुरवे प्रादात् सविधानं पुनः पुनः। सर्व्वकामैस्ततस्तृप्तो ययौ स्वर्गं नराधिपः। तेनापि गुरुणा तच्च विभक्तं ब्राह्मणैः सह। दत्तस्तैरपि चान्येभ्यो ब्रह्माण्डांशो नराधिप!। ब्रह्माण्डं भूमिदानं च ग्राह्यं नैकेन तद्भवेत्। गृह्णन् दोषमवाप्नोति ब्रह्महत्यां न संशयः। सर्व्वेषाञ्चैव प्रत्यक्षं दातव्यं तन्नराधिप!। दीयमानञ्च पश्यन्ति तेऽपि पूता भवन्ति हि। दर्शनादेव ते पूता भवेयुर्नात्र संशयः"। पद्मपुराणोक्तस्तद्विधिर्यथा

"शृणु वत्स! प्रवक्ष्यामि ब्रह्माण्डाख्यं पुरातनम्। तच्च द्वादशसाहस्रं भाविकल्पकथायुतम्। प्रक्रियाख्यो१ ऽनुषङ्गाख्य२ उपोद्घातस्तृतीयकः३। चतुर्थ उपसंहारः४ पादाश्चत्वार एव हि। पूर्व्वपादद्वयं पूर्व्वो भागोऽत्र समुदाहृतः। तृतीयो मध्यमो भागश्चतुर्थस्तूत्तरो मतः। तत्र पूर्व्वभागे प्रक्रियापादे "आदौ कृत्यसमुद्देशो नैमिषाख्यानकं ततः। हिरण्यगर्भोत्पत्तिश्च लोककल्पनमेव च। एष वै प्रथमः पादो द्वितीयं शृणु मानद"। पूर्व्वभागे अनुषङ्गपादे "कल्पमन्वन्तराख्यानं लोकज्ञानं ततः परम्। मानससृष्टिकथनं रुद्रप्रसववर्णनम्। महादेवविभूतिश्च ऋषिसर्गस्ततःपरम्। अग्नीनां विजयश्चाथ कालसद्भाववर्णनम्। प्रियव्रतान्वयोद्देशः पृथिव्यायामविस्तरः। वर्णनं भारतस्यास्य ततोऽन्येषां निरूपणम्। जम्ब्वादिसप्तद्वीपाख्या ततोऽधोलोकवर्णनम्। ऊर्द्ध्वलोकानुकथनं ग्रहचारस्ततःपरम्। आदित्यव्यूहकथनं देवग्रहानुकीर्त्तनम्। नीलकण्ठाह्वयाख्यानं महादेवस्य वैभवम्। अमावास्यानुकथनं युगतत्त्वनिरूपणम्। यज्ञप्रवर्त्तनं चाथ युगयोरन्त्ययोः कृतिः। युगप्रजालक्षणञ्च ऋषि-

प्रवरवर्णनम्। वेदानां व्यसनाख्यानं स्वायम्भुवनिरूपणम्। शेषमन्वन्तराख्यानं पृथिवीदोहनन्ततः। चाक्षुषेऽद्यतने सर्गो द्वितीयोऽङ्घ्रिः पुरोदले"। मध्यभागे उपोद्घातपादे "अथोपोद्घातपादे तु सप्तर्षिपरिकीर्त्तनम्। प्राजापत्यान्वयस्तस्माद्देवादीनां समुद्भवः। ततो जयाभिव्याहारौ मरुदुत्पत्तिकीर्त्तनम्। काश्यपेयानुकथनम् ऋषिवंशनिरूपणम्। पितृकल्पानुकथनं श्राद्धकल्पस्ततः परम्। वैवस्वतसमुत्पत्तिः सृष्टिस्तस्य ततः परम्। मनुपुत्रान्वयश्चातो गान्धर्वस्य निरूपणम्। इक्ष्वाकुवंशकथनं वंशोऽत्रेः सुमहात्मनः। अमावसोरान्वयश्च रजेश्चरितमद्भुतम्। ययातिचरितञ्चाथ यदुवंशनिरूपणम्। कार्त्तवीर्यस्य चरितं जामदग्न्यं ततः परम्। वृष्णिवंशानुकथनं सगरस्याथ सम्भवः। भार्गवस्यानुचरितं तथा कार्त्तवधाश्रयम्। सगरस्याथ चरितं भार्गवस्य कथा पुनः। देवासुराहवकथा कृष्णाविर्भाववर्णनम्। इनस्य च स्तवः पुण्यः शुक्रेण परिकीर्त्तितः। विष्णुमाहात्म्यकथनं बलिवंशनिरूपणम्। भविष्यराजचरितं संप्राप्तेऽथ कलौ युगे। एवमुद्घातपादोऽयं तृतीयो मध्यमे दले"। उत्तरभागे उपसंहारपादे "चतुर्थमुपसंहारं वक्ष्ये खण्डे तथोत्तरे। वैवस्वतान्तराख्यानं विस्तरेण यथातथम्। पूर्वमेव समुद्दिष्टं संक्षेपादिह कथ्यते। भविष्याणां मनूनाञ्च चरितं हि ततः परम्। कल्पप्रलयनिर्देशः कालमानं ततः परम्। लोकाश्चतुर्दश ततः कथिता मानलक्षणैः। वर्णनं नरकाणाञ्च विकर्माचरणैस्ततः। मनोमयपुराख्यानं लयः प्राकृतिकस्ततः। शैवस्याथ पुरस्यापि वर्णनञ्च ततः परम्। त्रिविधाद्गुणसम्बन्धाज्जन्तूनां कीर्त्तिता गतिः। अनिर्देश्याप्रतर्क्यस्य ब्रह्मणः परमात्मनः। अन्वयव्यतिरेकाभ्यां वर्णनं हि ततः परम्। इत्येष उपसंहारः पादो वृत्तः स चोत्तरः। चतुष्पादं पुराणं ते ब्रह्माण्डं समुदाहृतम्। अष्टादशमनौपम्यं सारात् सारतरं द्विज!। ब्रह्माण्डञ्च चतुर्लक्षं पुराणत्वेन पठ्यते। तदेव व्यस्य गदितमत्राष्टादशधा पृथक्। पाराशर्येण मुनिना सर्वेषामपि मानद!। वस्तुदृष्ट्वाथ तेनैव मुनीनां भावितात्मनाम्। मत्तः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे। मुनयो धर्मशीलास्ते दीनानुग्रहकारिणः। मया चेदं पुराणन्तु वशिष्ठाय पुरोदितम्। तेन शक्तिसुतायोक्तं जातूकर्ण्याय तेन च। व्यासो लब्ध्वा ततश्चैतत् प्रभञ्जनमुखोद्गतम्। प्रमाणीकृत्य लोकेऽस्मिन् प्रावर्त्तयदनुत्तमम्"। तत्फलश्रुतिः "य इदं कीर्त्तयेद्वत्स! शृणोति च समाहितः। स विधूयेह पापानि याति लोकमनामयम्। लिखित्वैतत् पुराणन्तु स्वर्णसिंहासनस्थितम्। पात्रेणाच्छादितं यस्तु ब्राह्मणाय प्रयच्छति। स याति ब्रह्मणो लोकं नात्र कार्य्या विचारणा। मरीचे! ऽष्टादशैतानि मया प्रोक्तानि यानि ते। पुराणानि तु संक्षेपाच्छ्रोतव्यानि च विस्तरात्। अष्टादश पुराणानि यः शृणोति नरोत्तमः। कथयेद्वा विधानेन नेह भूयः स जायते। सूत्रमेतत् पुराणानां यन्मयोक्तं तवाधुना। तन्नित्यं शीलनीयं हि पुराणफलमिच्छता। न दाम्भिकाय पापाय देवगुर्वनुसूयवे। देयं कदापि साधूनां द्वेषिणे न शठाय च। शान्ताय शमचित्ताय शुश्रूषाभिरताय च। निर्मत्सराय शुचये देयं सद्वैष्णवाय च" नारदीयपु० ४पा० १०९ अ०।

ब्र(ब्र)ह्मात्मभू पु० ब्रह्मण आत्मनः देहात् भवति भू–क्विप्। अश्वे शब्दमाला तस्य ब्रह्मदेहजातत्वं वृ० उ० उक्तं यथा "प्राणा वै यशोवीर्य्यं तत् प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमध्रियत तस्य शरीर एव मन आसीत्। सोऽकामयत मेध्यं म इदं स्यादात्मन्व्यनेन स्यामिति। ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम्" मू०। "तदेवं यशोवीर्य्यभूतेषु प्राणेषूत्क्रान्तेषु शरीरान्निष्क्रान्तेषु तच्छरीरं प्रजापतेः श्वयितुमुच्छूनभावमृतमध्रियतामेध्यञ्चाभवत्। तस्य प्रजापतेः शरीरान्निर्गतस्यापि तस्मिन्नेव शरीरे मन आसीत्। यथा कस्यचित् प्रिये विषये दूरङ्गतस्यापि मनो भवति तद्वत्। स तस्मिन्नेव शरीरे गतमनाः सन् किमकरोदिति। उच्यते सोऽकामयत कथं मेध्यं मेधार्हं यज्ञियं मे ममेदं शरीरं स्यात्। किञ्चात्मन्वी आत्मवांस्तेनेन शरीरेण शरीरवान् स्यामिति प्रविवेश। यस्मात्तच्छरीरं मद्वियोगात् गतयशोवीर्य्यं सदश्वयत् ततस्तस्मादश्वः समभवत्। ततोऽश्वनामा प्रजापतिरेव साक्षादत्र स्तूयते। यस्माच्च पुनस्तत् प्रवेशाद्गतयशोवीर्य्यत्वादमेध्यं सन्मेध्यमभूत्तदेव तस्मादेवाश्वमेधस्याश्वमेधनाम्नः क्रतोरश्वमेधत्वमश्वमेधनामलाभः" शा० भा०

ब्र(ब्र)ह्मादनी स्त्री ब्रह्मा ब्रह्मवाहनं हंस तस्येवादनं पादरूपं यस्याः गौरा० ङीष्। हंसपद्यां राजनि०।

ब्र(ब्र)ह्माभिजाता स्त्री गोदावर्य्यां राजनि०।

ब्र(ब्र)ह्मानन्द पु० ब्रह्मस्वरूपानन्दे तस्य मनुष्यादी०

नामानन्देभ्यः श्रेष्ठत्वम् शत० ब्रा० १४।७।१।२१ वा क्यादौ उक्तं यथा

"एषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति। स यो मनुष्याणां राद्धः समृद्धो भवति। अन्येषामधिपतिः सर्वैर्मानुष्यकैः कामैः सम्पन्नतमः स मनुष्याणां परम आनन्दः। अथ ये शतं मनुष्याणामानन्दाः। स एकः पितॄणां जितलोकानामानन्दः। अथ ये शतं पितॄणां जितलोकानामानन्दाः। स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते। अथ ये शतं कर्मदेवानामानन्दाः। स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतमाजानदेवानामानन्दाः। स एको देवलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं लोक आनन्दाः। स एको गन्धर्वलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं गन्धर्वलोक आनन्दाः। स एकः प्रजापतिलोक आनन्दः अथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः एष ब्रह्मलोकः सम्राडिति" सू०। "परमो मोक्षलक्षणो लोकः स्वयंज्योतिःस्वभावो लोकशब्दस्य मुख्यवृत्तिविषयः स्वाभाविकः। परमः स्वरूपानुभवलक्षणो मुख्यो निरतिशय आनन्दः पूर्णानन्दः। किं च वस्तुतो नास्त्येतस्माद्ब्रह्मानन्दव्यतिरिक्तं वैषयिकमपि सुखमित्याह एतस्यैव ब्रह्मानन्दस्य मात्रां कलाम् अन्यानि अविद्यया ब्रह्मणोऽन्यत्वेन परिकल्पितानि ब्रह्मादिस्तम्बपर्य्यन्तानि भूतान्युपजीवन्ति उपभुञ्जते तावन्मात्रयैवानन्दीनि भवन्तीत्यर्थः। मानुषानन्दमारभ्य ब्रह्मानन्दपर्य्यन्तमुत्तरोत्तरशतगुणितातिशयशालिनां परब्रह्मानन्दावयवानां प्रतिपादनद्वारेणावयविनं निरस्तगणितभेदमनतिशयं ब्रह्मानन्दं दर्शयितुमुत्तरा श्रुतिः प्रवर्त्तते" भा०।

ब्र(ब्र)ह्मापित पु० सूर्य्यमण्डलस्थराक्षसभेदे "त्वष्टा च यमदग्निश्च कम्बलोऽथ तिलोत्तमा। ब्रह्मापेतोऽथ ऋतजिद्धृतराष्ट्रश्च सप्तमः। माघमासे वसन्त्येते सप्त मैत्रेय भास्करे" विष्णुपु० २अंशे १०अ०।

ब्र(ब्र)ह्मारण्य न० ब्रह्मणोऽरण्यमिव। वेदपाठभूमौ त्रिका०

ब्र(ब्र)ह्मार्पण न० १सर्वकर्म्मणामीश्वरात्मकतया ब्रह्मचिन्तने ब्रह्मणि परमात्मनि ईश्वरे २सर्वकर्म्मफलानां समर्पणे च तत्प्रकारः कूर्म्मपु० ४अ० उक्तो यथा "ब्रह्मणा दीयते देयं ब्रह्मणे संप्रदीयते। ब्रह्मैव दीयते चेति ब्रह्मार्पणमिदं परम्। नाहं कर्त्ता सर्वमेतद्ब्रह्मैव कुरुते तथा। एतद्ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः। प्रीणातु भगवानीशः कर्मणाऽनेन शाश्वतः। करोति सततं बुद्ध्या ब्रह्मार्पणमिदं परम्। यद्वा फलानां संन्यासं प्रकुर्य्यात् परमेश्वरे। कर्म्मणामेतदप्याहुर्ब्रह्मार्पणमनुत्तमम्"।

ब्र(ब्र)ह्मावर्त्त पु० "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते" मनूक्ते १देशभेदे २तत्रस्थे तीर्थभेदे च भा०व० ८३अ०।

ब्र(ब्र)ह्मासन न० ६त०। ब्रह्मण ऋत्विग्भेदस्य १आसने ब्रह्मास्तरणादयोऽप्यत्र। ब्रह्मणस्तदुपासनाङ्गमासनम्। २पद्मस्वस्तिकादौ आसने। "ब्रह्मासनं तदाख्यं यत् कृत्वा ब्राह्मणो भवेत्। एकपादमुरौ दत्त्वा तिष्ठेद्दण्डाकृतिर्भवेत्" रुद्रया० उक्ते देवपूजाङ्गे ३आसनभेदे च।

ब्र(ब्र)ह्मास्त्र न० ६त०। अस्त्रभेदे भा० आ० १६६ अ०।

ब्र(ब्र)ह्माहुति न० ब्रह्मैवाहुतिः। वेदाध्ययने "ब्रह्माहुतिहुतं पुण्यमनध्यायवषट्कृतम्" मनु०।

ब्र(ब्र)ह्मिन् पु० ब्रह्म वेदस्तपो वाऽस्त्यस्य शेषतया व्रीह्या० इनि टिलोपः। वेदतपसोः शेषीभूते १परमेश्वरे। तदाराधनार्थमेव तयोरनुष्ठानात् तस्य तच्छेषित्वम्। "ब्रह्मविद् ब्राह्मणो ब्रह्मी" विष्णु स०। ब्रह्म वेदो वेद्यतयाऽस्त्यस्य इनि। २वेदतदर्थाभिज्ञे।

ब्र(ब्र)ह्मिष्ठ त्रि० अतिशयेन ब्रह्मी इष्ठन् टिलोपः। अतिशयेन ब्रह्मज्ञे। "ब्राह्मणा भगवन्तो यो ब्रह्मिष्ठः स एता (गाः) उदजताम्" बृ० उ० "ब्राह्मणाः स्वाध्यायानिष्ठास्तदर्थनिष्ठाः सर्वे यूयं ब्रह्मणोऽतिशयेन अभिज्ञः" भा०। "ब्रह्मिष्ठमाधाय निजेऽधिकारे ब्रह्मिष्ठमेव स्वतनुप्रसूतम्" रघुः। २दुर्गायां स्त्री "ब्रह्मिष्ठा वेदमातृत्वात् गायत्री परिकीर्तिता। वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी" देवीपु० ४५अ०।

ब्र(ब्र)ह्मी स्त्री ब्रह्मणे हिता मेधाजनकतया अण् टिलोपः वा० न वृद्धिः ङीप्। (वामनहाटि) स्वनामख्याते लताभेदे त्रिका०।

ब्र(ब्र)ह्मीघृत न० स्वारस्वतघृतमिति ख्याते औषधविशेषे यथा "समूलपत्रामुत्पाट्य ब्राह्मीं प्रक्षाल्य वारिणा। उदूखले क्षोदयित्वा रसं वस्त्रेण गालयेत्। रसे चतुर्गुणे तस्मिन् घृतप्रस्थं विपाचयेत्। हरिद्रा

मातलीकुण्डं बृहती च हरीतकी। एतेषां पाचिकैर्भागैः शेषास्तु कार्षिकाः स्मृताः। पिप्पल्योऽथ त्रिवृङ्गानि केम्बुकं शर्करा वचा। सर्वमेतत् समालोड्य शनैर्मृद्वग्निना पचेत्। एतत् प्राशितमात्रेण वाग्विशुद्धिः प्रजायते। सप्तरात्रप्रयोगेण किन्नरैः सह गीयते। अर्द्धमासप्रयोगेण स्वरो भवति कोकिलः। मासमेकं प्रयोगेण भवेत् श्रुतिधरो नरः। पञ्च गुल्मान् प्रमेहांश्च कासं पञ्चविधं जयेत्। वन्ध्यानाञ्चैव नारीणां नराणामल्परेतसाम्। घृतं सारस्वतं नाम बलवर्णवपुःप्रदम्" निक्तिसारसंग्रहः।

ब्र(ब्र)ह्मेशय ब्रह्मणि तपसि शेते शी—अच् पृषो०। १कार्त्तिकेये भा०व० २११ अ०। २विष्णौ च भा०शा०२४०अ०।

ब्र(ब्र)ह्मोज्झ पु० ब्रह्म वेदमुज्झति उज्झ—त्यागे अण् उप० स०। वेदत्यागिनि "ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः। गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट्" मनुना तत्त्यागस्योपपातकत्वमुक्तम्।

ब्र(ब्र)ह्मोडु(दु)म्बर न० तीर्थभेदे भा० व० ८१ अ०।

ब्र(ब्र)ह्मोत्तर त्रि० ब्रह्मा ब्राह्मणः उत्तरोऽधिकारी यस्य। ब्राह्मणस्वामिके भूम्यादौ। २ब्रह्मप्रधाने च।

ब्र(ब्र)ह्मोद्य न० वद—भावे क्यप् ६त०। ब्रह्मप्रतिपादकवाक्ये कात्या० श्रौ० १२।४।२०। २ब्रह्मकथने च "ब्राह्मणा भगवन्तो हन्ताहमिमं (याज्ञवल्क्यम्) द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चित् ब्रह्मोद्यम् जेतेति" वृ०उ०।

ब्र(ब्र)ह्मोपनेतृ पु० ब्रह्माणं विप्रमुपनयते तद्धेतुदण्डहेतुत्वात् उप—नी—तृच्। पलाशवृक्षे "विप्रस्य पालाशो दण्डः" स्मृतिः।

ब्र(ब्र)ह्मोपनिषद् स्त्री उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।

ब्र(ब्र)ह्मौदन पुंन० ब्रह्मार्थमोदनम्। यज्ञे ऋत्विग्भेदार्थे कल्पे। "ब्रह्मौदनं पचति चतुर्णां पात्राणामञ्जलिप्रसृतानाम्" कात्या०श्रौ० २०।१।४। "चतुर्णां पात्राणां चतुर्णामञ्जलीनां चतुर्णां प्रसृतानां च प्रसृतश्चैकाङ्गुलिकोषः। "ब्रह्मौदनमादायर्त्विग्भ्यः प्रयच्छति" पृ०उ०। "एतमोदनम्" कर्कः।

ब्रा(ब्रा)ह्म न०ब्रह्मण इदम्, तेन प्रोक्तम् वा अण् टिलोपः। १अङ्गुष्ठमूले तीर्थे, तेन हि तीर्थेन द्विजाचमनं विहितमिति तस्य तत्सम्बन्धित्वम् "प्राग्वा ब्रा(ब्रा)ह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्" इति मनुम् "अङ्गुष्ठोत्तरतो रेखा या पाणेर्दक्षिणस्य च। एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै" स्मृतिः। २नारदे पु०जटा०। ब्र(ब्र)ह्मणोक्ते अष्टादशपुराणान्तर्गते ३महापुराणभेदे न०। ४विवाहभेदे ५पारदे च पु०। ६सरस्वत्यां तदधिष्ठातृकायां ७शाचि दशोमलतायां ८ब्रह्मीशाके (वामनहाटि) शाकभेदे च स्त्री। "आहुतानां गुरुकुलात् विप्राणां पूजको भवेत्। न्यायाणामक्षयो ह्येष ब्राह्मो धर्मो विधीयते" इति मनूक्ते राज्ञां १०धर्मभेदे पु०। ११मातृभेदे स्त्री ङीप्। "ब्राह्मी नारायणी तथेति" कालकवचम्। "बृहदस्याः शरीरं यदप्रमेयं प्रमाणतः। बृहद्विस्तीर्णमित्युक्तं ब्राह्मी देवी ततः स्मृता" देवीपु० उक्तनिर्वचनायां १२देव्याञ्च स्त्री १३ब्रह्मसम्बन्धिनिमात्रे त्रि० स्त्रियां ङीप् "एषा ब्राह्मी स्थितिः पार्थ!" गीता। सरस्वत्या ब्रह्मजातत्वं च ब्रह्माणीशब्दे दर्शितं तत्र दृश्यम्। "ब्राह्मी हिमा सरा तिक्ता लघुर्मेध्या च शीतला। कषाया मधुरा स्वादुपाकायुष्या रसायनी। स्वर्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्रकासजित्। विषशोथज्वरहरी तद्वन्मण्डूकपर्ण्यपि" भावप्र० ब्राह्मीशाकस्य गुणा उक्ताः। १४वाराहीकन्दे १५हिलमोचिकायां स्त्री राजनि०। १६रोहिण्यां स्त्री १७नक्षत्रे न० तयोर्ब्रह्माधिष्ठातृदैवताकत्वात् तथात्वं "रात्रेश्च पश्चिमे भागे मुहूर्त्तो ब्राह्म उच्यते" पितामहोक्ते रात्रिशेषयामार्द्धस्थिते अरुणोदयकालात् प्राग्दण्डद्वयात्मके १८ काले पु०।१९ब्रह्मसम्बन्धिदिने २०तन्माने च अहन्शब्दे दृश्यम्।

ब्रा(ब्र)ह्मक त्रि० ब्रह्मणा कृतं कुलालादि०वुञ्। विप्रेण कृते।

ब्रा(ब्र)ह्मगुप्त पु० आयुधजातिवर्गभेदे त्रिगर्त्तषष्ठशब्दे दृश्यम् स वर्गो येषां त्रिगर्त्ता० स्वार्थे छ। ब्राह्मगुप्तीय तदर्थे।

ब्रा(ब्रा)ह्मण पुंस्त्री० ब्रह्म वेदं शुद्धं चैतन्यं वा वेत्त्यधीते वा अण् "ब्रह्मणो जाताविति" पा० न टिलोपः ब्रह्मणो मुखजातत्वात् ब्रह्मणोऽपत्यम् वा अण्। १विप्रे जातिभेदे स्त्रियां जातित्वात् ङीष्। २पृक्कायां स्त्री ङीप्। "ब्रह्म जानाति ब्राह्मणः" इत्युक्ते ३परब्रह्मज्ञे त्रि०। ब्राह्मणत्वञ्च ब्राह्मणाज्जातदेहे तत्सङ्कल्पजातदेहे च ब्राह्मणत्वजातिः स्वीक्रियते यथा सोमयज्ञियको भयजातदेहस्य तवित्वं तद्वत्। तत्र सङ्कल्पजाते देहे ब्राह्मणत्वं यथा नारदद्रोणादौ। इदानीन्तु ब्राह्मणस्य सङ्कल्पजत्वाभावान्न तथात्वम्। किन्तु मनौ असवर्णाविवाहनिषेधादपि न तथात्वम्।

"ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स्यान्न संशयः। क्षत्रियायां तथैव स्याद्वैश्यायामपि चैव हि" भा० दानधर्म-वाक्यस्यापि कल्पभेदादेव तथात्वेन युगान्तरविषयत्वम्। तत्र लक्षणं यथा "आत्मा कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च। एभिर्युक्तो हि यस्तिष्ठेन्नित्यं स द्विज उच्यते" वह्निपु०। "न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च यः। सर्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः। अहेरिव गणाद्भीतः सौहित्यान्नरकादिव। कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः। येन केनचिदाच्छन्नो येन केनचिदाशितः। यत्र क्वचन शायी च तं देवा ब्राह्मणं विदुः। विविक्तं सर्वसङ्गेभ्यो मुनिमाकाशवत् स्थितम्। अस्वमेकचरं शान्तं तं देवा ब्राह्मणं विदुः। जीवितं यस्य धर्मार्थं धर्मो रत्यर्थमेव च। अहोरात्रश्च पुण्यार्थं तं देवा ब्राह्मणं विदुः। निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्। अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः" भा० मोक्षध०। "विश्वामित्र उवाच। विप्रस्य लक्षणं ब्रूहि त्वद्भक्तिः का च तत्कृता। यतस्त्वदनुग्रहेण वासवाद्याः ब्राह्मणाः कृताः"। कल्किरुवाच "वेदानामीश्वरं साक्षरमक्षरं व्यक्तिमत् परम्। ते वेदा ब्राह्मणमुखे नानाधर्माः प्रकाशिताः। यो धर्मो ब्राह्मणानां हि सा भक्तिर्मम पुष्कला। तयाहं तोषितः श्रीशः संभवामि युगे युगे। ऊर्ध्वं तु त्रिवृतं सूत्रं सधवानिर्मितं शनैः। तन्तुत्रयमधोवृत्तं यज्ञसूत्रं विदुर्बुधाः। त्रिगुणं तद्ग्रन्थियुक्तं वेदप्रवरसम्मितम्। शिरोधरान्नाभिमध्यात् पृष्ठार्द्धपरिमाणकम्। यजुर्विदां नाभिमितं सामगानामयं विधिः। वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम्। मृद्भस्मचन्दनाद्यैस्तु धारयेत्तिलकं द्विजः। भाले त्रिपुण्ड्रं कर्णे च केशपर्यन्तमुज्ज्वलम्। पुण्ड्रमङ्गुलिमानन्तु त्रिपुण्ड्रं तत्त्रिधा कृतम्। ब्रह्मविष्णुशिवावासं दर्शनात् पापनाशनम्। ब्राह्मणानां मुखे सन्ति वाचि वेदाः करे हरिः। गात्रे तीर्थानि रागाश्च नाड़ीषु प्रकृतिस्त्रिवृत्। सावित्री कण्ठकुहरा हृदयं ब्रह्मसंज्ञितम्। तेषां स्तनान्तरे धर्मः पृष्ठेऽधर्मः प्रकीर्त्तितः। भूदेवा ब्राह्मणा राजन्! पूज्या वन्द्याः सदुक्तिभिः। चातुराश्रम्यकुशला मम धर्मप्रवर्त्तकाः। बालाश्चापि ज्ञानवृद्धास्तपोवृद्धा मम प्रियाः। तेषां वचः पालयितुमवताराः कृता मया। माहात्म्यं ब्राह्मणानां सर्वपापप्रणाशनम्। कलिदोषहरं श्रुत्वा मुच्यते सर्वतोभयात्" कल्किपु० ४अ०। "कर्म्मणा ब्राह्मणो जातः करोति ब्रह्मभावनाम्। स्वधर्मनिरतः शुद्धस्तस्माद् ब्राह्मण उच्यते" ब्रह्मवै० गणेशख० ३५अ०।

"जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः। वेदाध्ययनसम्पन्नः षट्सु कर्मस्ववस्थितः। शौचाचारपरो नित्यं विघसाशी गुरुप्रियः। नित्यव्रती सत्यरतः स वै ब्राह्मण उच्यते। सत्यं दानमथाद्रोह आनृशंस्यं त्रपा घृणा। तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः"। तस्य धर्मो यथा "ब्राह्मणस्य तु यो धर्मस्तं ते वक्ष्यामि केवलम्। दममेव महाराज! धर्ममाहुः पुरातनम्। स्वाध्यायाभ्यसनञ्चैव तत्र कर्म समाप्यते। तञ्चेद्वित्तमुपागच्छेद्वर्त्तमानं स्वकर्मणि। अकुर्वाणं विकर्माणि शान्तं प्रज्ञानतर्पितम्। कुर्वीतापत्यसन्तानमथ दद्याद्यजेत च। संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते। परिनिष्ठितकार्य्यस्तु स्वाध्यायेनैव ब्राह्मणः। कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते" पाद्मे स्वर्गख० २६ अ०। तस्य माहात्म्यादि यथा। "सर्वेषामेव वर्णानां ब्राह्मणः परमो गुरुः। तस्मै दानानि देयानि भक्तिश्रद्धासमन्वितैः। सर्वदेवाग्रजो विप्रः प्रत्यक्षत्रिदशो भुवि। स तारयति दातारं दुस्तरे विश्वसागरे। हरिशर्मोवाच। सर्ववर्णगुरुर्विप्रस्त्वया प्रोक्तः सुरोत्तम!। तेषां मध्ये च कः श्रेष्ठः कस्मै दानं प्रदीयते। ब्रह्मोवाच। सर्वेऽपि ब्राह्मणाः श्रेष्ठाः पूजनीयाः सदैव हि। अविद्या वा सविद्या वा नात्र कार्य्या विचारणा। स्तेयादिदोषलिप्ता ये ब्राह्मणा ब्राह्मणोत्तम!। आत्मभ्यो द्वेषिणस्तेऽपि परेभ्यो न कदाचन। अनाचारा द्विजाः पूज्या न च शूद्रा जितेन्द्रियाः। अभक्ष्यभक्षका गावः कोलाः सुमतयो न च। माहात्म्यं भूमिदेवानां विशेषादुच्यते मया। तव स्नेहाद्द्विजश्रेष्ठ! निशामय समाहितः। क्षत्रियाणाञ्च वैश्यानां शूद्राणां गुरवो द्विजाः। अन्योऽन्यं गुरवो ज्ञेयाः पूजनीयाश्च भूसुर!। ब्राह्मणं प्रणमेद्यस्तु विष्णुबुद्ध्या नरोत्तमः। आयुः पुत्राश्च कीर्त्तिश्च सम्पत्तिस्तस्य वर्द्धते। न च नौति द्विजं यस्तु मूढ़धीर्मानवो भुवि। सुदर्शनेन तच्छीर्षं छिन्नुमिच्छति केशवः"। पुष्पादिकरणस्य विप्रस्य प्रणामनिषेधो यथा। "पुष्पहस्तं पयोहस्तं देवहस्तञ्च भूसुर!। न नमेद् ब्राह्मणं प्रातस्तैलाभ्यक्तविग्रहम्। जलस्थं देवनैवेद्यं ध्यान-

गच्छन्तमेतसम्। देवपूजाञ्च कुर्वन्तं न नमेद् ब्राह्मणं बुधः। वहिष्क्रियां प्रकुर्वन्तं भुञ्जानञ्च द्विजोत्तम!। तथा सामानि गायन्तं न नमेद् ब्राह्मणं बुधः। ब्राह्मणा यत्र तिष्ठन्ति बहवो द्विजसत्तम। प्रत्येकन्तु नमस्कारस्तत्र कार्य्यो न धीमता। कृताभिवादनं विप्रं भक्त्या यो नाभिवादयेत्। स चाण्डालसमो ज्ञेयो नाभिवाद्यः कदापि च। कृतप्रणामं तनयं नमेतां पितरौ न च। कृतप्रणामाः सर्वेऽपि नमस्कार्य्या द्विजैर्द्विजाः। कृतदोषान् द्विजान् गावश्च न द्विषन्ति विचक्षणाः। द्विषन्ति वापि मोहेन तेषां रुष्टः सदा हरिः। याचकान् ब्राह्मणान् यस्तु कोपदृष्ट्या प्रपश्यति। सूचीप्रक्षेपणं तस्य नेत्रयोः कुरुते यमः। विप्रनिर्भर्त्सनं मूढा येन वक्त्रेण कुर्वते। तस्मिन् वक्त्रे यमस्तप्तं लौहपिण्डं ददाति वै। ब्राह्मणो यद्गृहे भुङ्क्ते तद्गृहे केशवः स्वयम्। देवताः सकला एव पितरश्च सुरर्षयः। तस्य पादोदकादिमाहात्म्यं यथा "विप्रपादोदकं यस्तु कणमात्रं वहेद्बुधः। देहस्थं पातकं तस्य सर्वमेवाशु नश्यति। कोटिब्रह्माण्डमध्येषु सन्ति तीर्थानि यानि च। तानि सर्वाणि तीर्थानि वसन्ति द्विजपादयोः। विप्रपादोदकैर्नित्यं सिक्तं स्याद् यस्य मस्तकम्। स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः। सर्वपापानि घोराणि विप्रहत्यादिकानि च। सद्य एव विनश्यन्ति विप्रपादाम्बुधारणात्। क्षयाद्या व्याधयः सर्वे परमक्लेशदायकाः। गच्छन्ति विलयं सद्यो विप्रपादाम्बुभक्षणात्। पितॄणां यानि तोयानि दीयन्ते विप्रपादयोः। तैस्तृप्ताः पितरः स्वर्गे तिष्ठन्त्याचन्द्रतारकम्। प्रक्षाल्य विप्रचरणौ दूर्वाभिर्योऽर्चयेद्बुधः। तेनार्चितो जगत्स्वामी विष्णुः सर्वसुरोत्तमः। विप्राणां पादनिर्माल्यं यो मर्त्यः शिरसा वहेत्। सत्यं सत्यमहं वच्मि तस्य मुक्तिर्हि शाश्वती"। तस्य प्रदक्षिणफलम् "विप्रं प्रदक्षिणीकृत्य वन्दते यो नरोत्तमः। प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा"। तस्य पादसेवनफलम् "यो दद्यात् फलताम्बूलं विप्राणां पादसेवने। इह लोके सुखं तस्य परलोके ततोऽधिकम्। पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्। मोक्षार्थी लभते मोक्षं विप्रपादस्य सेवनात्। रोगी रोगात् प्रमुच्येत पापी मुच्येत पातकात्। मुच्येत बन्धनाद्बद्धो विप्राणां पादसेवनात्। अनपत्याश्च या नार्य्यो मृतापत्याश्च याः स्त्रियः। बहुपत्या जीववत्साः स्युर्विप्रपादसेवनात्" पाद्मे क्रियायोगसारे २अ०। तस्य सन्ध्यावन्दनाकरणे दोषो यथा "नोपतिष्ठति यः पूर्वां नोपास्ते यस्तु पश्चिमाम्। स शूद्रवद्बहिष्कार्य्यः सर्वस्माद् द्विजकर्मणः" मनुः। अन्यत्र च "न गृह्णन्ति सुरास्तेषां पितरः पिण्डतर्पणम्। स्वेच्छया च द्विजातेश्च त्रिसन्ध्यरहितस्य च। तस्य सन्ध्यावन्दनफलं यथा "यावज्जीवनपर्य्यन्तं यस्त्रिसन्ध्यं करोति हि। स च सूर्य्यसमो विप्रस्तेजसा तपसा सदा। तत्पादपद्मरजसा सद्यः पूता वसुन्धरा। जीवन्मुक्तः स तेजस्वी सन्ध्यापूतो हि यो द्विजः। तीर्थानि च पवित्राणि तस्य संस्पर्शमात्रतः। ततः पापानि यान्त्येव वैनतेयादिवोरगाः। तस्य निन्द्यकर्माणि यथा "विष्णुमन्त्रविहीनश्च त्रिसन्ध्यरहितो द्विजः। एकादशीविहीनश्च विषहीनो यथोरगः। हरेर्नैवेद्यभोगी न धावको वृषवाहकः। शूद्रान्नभोजी विप्रश्च विषहीनो यथोरगः। शवदाही च शूद्राणां यो विप्रो वृषलीपतिः। शूद्राणां सूपकारी च शूद्रयाजी च यो द्विजः। असिजीवी मसीजीवी विषहीनो यथोरगः। यो विप्रोऽवीरान्नभोजी ऋतुस्नातान्नभोजकः। भगजीवी वार्द्धुषिको विषहीनो यथोरगः। यः कन्याविक्रयी विप्रो यो हरेर्नामविक्रयी। यो विद्याविक्रयी विप्रो विषहीनो यथोरगः। सूर्य्योदये च द्विर्भोजी मत्स्यभोजी च यो द्विजः। शिवपूजादिरहितो विषहीनो यथोरगः" ब्रह्मवै०प्र०२१ अ०। अन्यत्र च "यदि शूद्रां व्रजेद्विप्रो वृषलीपतिरेव सः। स भ्रष्टो विप्रजातेश्च चाण्डालात् सोऽधमः स्मृतः। विष्ठासमश्च तत्पिण्डो मूत्रं तस्य च तर्पणम्। तत्पितॄणां सुराणाञ्च पूजने तत् समं स्मृतम्। कोटिजन्मार्जितं पुण्यं सन्ध्यार्चातपसाऽर्जितम्। द्विजस्य वृषलीभोगान्नश्यत्येव न संशयः। ब्राह्मणश्च सुरापीतः विड्भोजी वृषलीपतिः। हरिवासरभोजी च कुम्भीपाकं व्रजेद्ध्रुवम्"। "करोत्यशुद्धां सन्ध्याञ्च सन्ध्यां वा न करोति यः। त्रिसन्ध्यं वर्जयेद् यो वा सन्ध्याहीनश्च स द्विजः"। नारायणक्षेत्रादितीर्थे तस्य प्रतिग्रहदोषो यथा "तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे। वाराणस्यां बदर्य्याञ्च गङ्गासागरसङ्गमे। पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले। हरिद्वारे च केदारे सोमे बदरपाचने। सरस्वतीनदीतीरे पुण्ये वृन्दावने वने। गोदावर्य्याञ्च कौशिक्यां त्रिवेण्याञ्च हिमा-

चये। एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः। स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च"। पारि-भाषिकमहापातकिब्राह्मणा यथा "सन्ध्याहीनोऽशुद्धयाजी ग्रामयाजीति कीर्त्तितः। देवोपजीवजीवी च देवलश्च प्रकीर्त्तितः। शूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः। सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः। एते महा-पातकिनः कुम्भीपाकं प्रयान्ति ते" ब्रह्मवै०जन्म०ख०२७अ०। "ब्राह्मणस्य स्वधर्मश्च त्रिसन्ध्यमर्च्चनं हरेः। तत्पादोद-कनैवेद्यभक्षणञ्च सुधाधिकम्। अन्नं विष्ठा जलं मूत्रमनिवेद्य हरेरपि। भवन्ति शूकराः सर्वे ब्राह्मणा यदि भुञ्जते। एकादशीं भुञ्जते विप्रा एकादश्यां न भुञ्जते। कृष्णजन्मा-दिने चैव शिवरात्रौ सुनिश्चितम्। तथा रामनवम्याञ्च यत्नतः पुण्यवासरे। ब्राह्मणानां स्वधर्मश्च कथितो वे-भसा खण्ड। ५६ अ०। गृहस्थब्राह्मणनियमा यथा "वेदं वेदौ तथा वेदानधीत्य तु समाहितः। तदर्थमभि-गम्याथ ततः स्नायाद् द्विजोत्तमः। गुरवे तु धनं दत्त्वा स्नायीत तदनुज्ञया। चीर्णव्रतोऽथ शुक्तात्मा सशक्तः स्नातुमर्हति। वैणवीं धारयेद्यष्टिमन्तर्वासस्तथोत्तरम्। यज्ञोपवीतद्वितयं सोदकञ्च कमण्डलुम्। छत्रञ्चोष्णीष-ममलं पादुके चाप्युपानहौ। रौक्मे च कुण्डले धार्य्ये कृत्तकेशनखः शुचिः। स्वाध्याये नित्ययुक्तः स्याद्बहि-र्माल्यं न धारयेत्। अन्यत्र काञ्चनाद्विप्रो न रक्तां बि-भृयात् स्रजम्। शुक्लाम्बरधरो नित्यं सुगन्धः प्रिय-दर्शनः। न जीर्णमलवद्वासा भवेच्च विभवे सति। न रक्त-मुल्वणञ्चान्यधृतं वासो न कुण्डिकाम्। नोपानहौ स्रजं चाथ पादुके च प्रयोजयेत्। उपवीतमलङ्कारं कुशान् कृष्णाजिनानि च। नापसव्यं परीदध्याद्वासो न विकृतं वसेत्। आहरेद्विधिवद्धीमान् सदृशीमात्मनः शुभाम्। रूपलक्षणसंयुक्तां योनिदोषविवर्जिताम्। अमातृ-गोत्रप्रभवामसमानार्षगोत्रजाम्। आहरेद्ब्राह्मणो भार्य्यां शीलशौचसमन्विताम्। ऋतुकालाभिगामी स्याद् यावत् पुत्रोऽभिजायते। वर्ज्जयेत् प्रतिषिद्धानि प्रय-त्नेन दिनानि तु। षष्ठ्यष्टमी पञ्चदशी द्वादशी च चतु-र्दशी। ब्रह्मचारी भवेन्नित्यं तद्वज्जन्मत्रयाहनि। आदधीतावसथ्याग्निं जुहुयाज्जातवेदसम्। व्रतानि स्नातको नित्यं पावनानि च पालयेत्। वेदोदितं स्वकं कर्म नित्यं कुर्य्यादतन्द्रितः। अकुर्वाणः पतत्याशु नर-कानतिभीषणान्। अभ्यसेत् प्रयतो नित्यं वेदं सम्या-

हापयेत्। कुर्य्यात् गृह्याणि कर्माणि सन्ध्योपासनमेव च। सख्यं समाधिकैः कुर्य्यादुपेयादीश्वरं सदा। दैवता-न्यपि गच्छेत् तु कुर्य्याद्भार्य्याभिपोषणम्। न धर्मं ख्यापयेद्विद्वान् न पापं गूहयेदपि। कुर्व्वीतात्महितं नित्यं सर्व्वभूतानुकम्पनम्। वयसः कर्म्मणोऽर्थस्य श्रुत-स्याभिजनस्य च। देशवाग्बुद्धिसारूप्यमाचरन् विचरेत् सदा। श्रुतिस्मृत्युदितं सम्यक् साधुभिर्यश्च सेवितः। तमाचारं निषेवेत नेहेतान्यत्र कर्हिचित्। येनास्य पि-तरो याता येन याताः पितामहाः। तेन यायात् सतां मार्गं तेन गच्छन्न रिष्यति। नित्यं स्वाध्याय-शीलः स्यान्नित्यं यज्ञोपवीतवान्। सत्यवादी जित-क्रोधो ब्रह्मभूयाय कल्पते। सन्ध्यास्नानरतो नित्यं ब्रह्म-यज्ञपरायणः। अनसूयुर्मृदुर्दान्तो गृहस्थः प्रत्य-यान्विता। वीतरागभयक्रोधो लोभमोहविवर्जितः। सावित्रीजापनिरतः श्रद्धावान् मुच्यते गृही। माता-पित्रोर्हिते युक्तो गोब्राह्मणहिते रतः। दाता यज्वा देवभक्तो ब्रह्मलोके महीयते। त्रिवर्गसेवी सततं देव-तानाञ्च पूजनम्। कुर्य्यादहरहर्नित्यं नमस्येत प्रयतः सुरान्। विभागशीलः सततं क्षमायुक्तो दयालुकः। गृहस्थस्तपसा युक्तो न गृहेऽपि गृही भवेत्। क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः। अध्यात्म-नित्यता ज्ञानमेतद्ब्राह्मणलक्षणम्। एतस्मान्न प्रमा-द्येत विशेषेण द्विजोत्तमः। यथाशक्ति चरन् कर्म्म निन्दितानि विवर्ज्जयेत्। विधूय मोहकलिलं लब्ध्वा योगमनुत्तमम्। गृहस्थो मुच्यते बन्धात् नात्र कार्य्या-विचारणा। विगर्हातिक्रमाक्षेपहिंसाबन्धवधात्मकान्। अन्यमन्युसमुत्थानां दोषाणां वर्ज्जनं क्षमा। स्वदुः-खेष्विव कारुण्यं परदुःखेषु सौहृदात्। दया यां मुनयः प्राहुः साक्षाद्धर्म्मस्य साधनम्। चतुर्दशानां विद्यानां धारणं हि यथार्थतः। विज्ञानमेतच्च विद्याद् येन धर्म्मो विवर्द्धते। अधीत्य विधिवद्विद्यामर्थञ्चैवोप-लभ्य तु। धर्म्मकार्य्यान्निवृत्तश्चेन्न तद्विज्ञानमिष्यते। सत्येन लोकं जयति सत्यन्तत् परमं पदम्। यथाभूत-प्रवादन्तु सत्यमाहुर्मनीषिणः। दमः शरीरोपरतिः शमः प्रज्ञाप्रसादजः। अध्यात्ममक्षरं विद्याद्यत्र गत्वा न शोचति। यया स देवो भगवान् विद्यया शिव! वेद्यते। साक्षाद्देव महादेव! तज्ज्ञानमिति कीर्त्तितम्। तन्निष्ठ-स्तत्परो विद्वान्नित्यमक्रोधनः शुचिः। तत्परो

विप्रो लभते तदनुत्तमम् । धर्मस्यायतनं यत्नाच्छरीरं परिपालयेत् । न हि देहं विना रुद्र ! पुरुषैर्विद्यते परः । नित्यं धर्मार्थकामेषु युञ्जीत नियतो द्विजः । न धर्मवर्जितं काममर्थं वा मनसा स्मरेत् । सीदन्नपि हि धर्मेण न त्वधर्मं समाचरेत् । धर्मो हि भगवान् देवो गतिः सर्वेषु जन्तुषु । भूतानां प्रियकारी स्यात् परद्रोहकर्मधीः । न वेददेवतानिन्दां कुर्यात्तैश्च न संवदेत् । यस्त्विमं नियतो विप्रो धर्माध्यायं पठेत् शुचिः । अध्यापयेच्छ्रावयेद्वा ब्रह्मलोके महीयते" । कूर्मपु० १६अ० सूत उवाच । आनृशंस्यं क्षमा सत्यमहिंसा दममार्जवम् । ध्यानं प्रसादो माधुर्यं मार्दवं शौचमेव च । इज्या दानं तपः सत्यं स्वाध्यायो ह्यात्मनिग्रहः । व्रतोपवासौ मौनञ्च स्नानं पैशुन्यवर्जनम् । एभिर्युक्तो मुनिश्रेष्ठा ! यः सदा वर्त्तते द्विजः । हुत्वा तु पावकं पूर्वं परं ब्रह्माधिगच्छति । सविद्यो वा अविद्यो वा निरग्निः साग्निकोऽपि वा । यो विप्रस्तपसा युक्तः स परं स्वर्गमाप्नुयात् । सर्वेषामुत्तमं श्रेष्ठं विमुक्तिफलदायकम् । ब्राह्मणस्य तपो वक्ष्ये तन्मे निगदतः शृणु । सायं प्रातश्च यः सन्ध्यामुपास्तेऽखिन्नमानसः । जपन् हि पावनीं देवीं गायत्रीं वेदमातरम् । तपसा भावितो देव्या ब्राह्मणः पूतकिल्बिषः । न सीदेत् प्रतिगृह्णन् स त्वपि पृथ्वीं ससागराम् । द्वे सन्ध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः । यस्तस्य दुष्कृतं नास्ति पूर्वतः परतोऽपि वा । अन्नदानरतो विद्वान् साङ्गवेदस्य पाठकः । गायत्री ध्यानपूतस्य कलां नार्हति षोडशीम् । एवं किल्बिषयुक्तस्तु विनिर्दहति पातकम् । उभे सन्ध्ये ह्युपासीत तस्मान्नित्यं द्विजोत्तमः" । तत्र देहापवित्रताहेतुः यथा "यथा देहापवित्रत्वं विप्रादीनां यतो भवेत् । देवर्षे ! शृणु तत् सर्वं नराणामानुपूर्विकम् । जातके मृतकेऽस्नाते जलौकाभिः क्षते तथा । अपवित्रो द्विजादीनां देहः सन्ध्यादिकर्मसु । अपूततनूत्सर्गे नरो मूत्रपूरीषयोः । अस्पृश्यस्पर्शने चैव ब्रह्मयज्ञजपादिषु । रक्तपाते नखश्मश्रुदन्तखड्गादिभिः क्षते । विप्रादेरशुचिः कायः शस्त्रास्त्रैः कण्टकादिभिः । भुक्तस्नाननोच्छिष्टेऽपवित्रः कृतमैथुने । शयने ब्राह्मणादीनां शरीरं क्षुरकर्मणि । ज्वरादिभिस्तथान्यैरोगैर्युक्ते द्विजन्मनाम् । चतुरप्रयतं पूजादानहोमजपादिषु । धूमोद्गारे वमौ चाण्डपतिताद्यादिभोजने । तथा च रेतस्रवने सत्या, देहापवित्रता । अपवित्रं द्विजातीनां वपुः स्याद्राक्षुदर्शने । गर्हितदानग्रहणे पतिते पातकादिभिः । अशौचान्तेन शुद्धिः स्याज्जातके मृतके द्विज ! । पूर्ववर्णाश्रमादीनां तनोः सन्ध्यादिकर्मसु" पाद्मोत्तरखण्डे १०६अ० । २मन्त्रेतरवेदभागे म०ब्र०भाष्योपोद्घाते सायणापूर्वकं तल्लक्षणमुक्तं यथा "तत्र ब्राह्मणस्य लक्षणं नास्ति । कुतः ? वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयितुमशक्यत्वात् । पूर्वोक्तमन्त्रभाग एकः । भागान्तराणि च कानिचित् पूर्वैरुदाहृतं संगृहीतानि "हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः । परक्रिया पुराकल्पो व्यवधारणकल्पनेति" । "तेन ह्यन्नं क्रियत" इति हेतुः१ । "तद्दध्नो दधित्वमिति" निर्वचनम्२ । "अमेध्या वै माषाः" इति निन्दा३ । "वायुर्वै क्षेपिष्ठेति" प्रशंसा४ । "तद्व्यचिकित्सा जुहवानीश्मा हौषाश्मिति" संशयः५ । "यजमानेन सम्मितौदुम्बरी भवतीति" विधिः६ । "माषानेव मह्यं पचन्तीति" परकृतिः७ । "पुरा ब्राह्मणा अभैषुः" इति पुराकल्पः८ । "यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति" विशेषावधारणकल्पनम्९ । एवमन्यदप्युदाहार्यम् । न च हेत्वादीनामन्यतमं ब्राह्मणमिति लक्षणम् । मन्त्रेष्वपि हेत्वादिसद्भावात् । "इन्द्रवो वा तुदन्ति त्वीति" हेतुः । "उदानिषुर्महीरिति तस्मादुदकमुच्यत इति" निर्वचनम् । "मोघमन्नं विन्दते अप्रचेताः" इति निन्दा । "अग्निर्मूर्द्धा दिवः ककुद्" इति" प्रशंसा । "अधः स्विदासीदुपरि स्विदासीदिति" संशयः । "वसन्ताय कपिञ्जलानालभेत" इति विधिः । "सहस्रमयुता ददाविति" परकृतिः । "यज्ञेन यज्ञमयजन्त देवाः" इति पुराकल्पः । इतिकरणबहुलं ब्राह्मणमिति चेत् न "इत्यददा इत्ययजथा इत्यपच इति ब्राह्मणो गायेत्" इत्यस्मिन् ब्राह्मणेन गातव्ये मन्त्रेऽतिव्याप्तेः । इत्याहेत्यनेन वाक्येनोपनिबद्धं ब्राह्मणमिति चेत् न "राजा चित्रं भर्गं भक्षीत्याह यो मायातुं यातुधानेत्याह यो वा रक्षः । "शुचिरग्नीत्याह" इत्यनयोर्मन्त्रयोरतिव्याप्तेः । आख्यायिकारूपं ब्राह्मणमिति चेत् न यमयमीसंवादसूक्तादावतिव्याप्तेः । तस्मान्नास्ति ब्राह्मणलक्षणमिति प्राप्ते ब्रूमः मन्त्रब्राह्मणरूपौ द्वावेव वेदभागावित्यङ्गीकारात् मन्त्रलक्षणस्य पूर्वमभिहितत्वादवशिष्टो वेदभागो ब्राह्मणमित्येतल्लक्षणं भविष्यति" ।

ब्रा(व्रा)ह्मणक पु० कुत्सितार्थे कन्। कुत्सितब्राह्मणे। ब्राह्मणकर्माण्यकृत्वा "एवमुक्तो ब्राह्मणः स्यादन्यो ब्राह्मणको भवेत्" भा० शा० २७१ अ० उक्तेः। ब्राह्मणेन जातिमात्रेण कायति कै–क। २ब्राह्मणकत्यरहिते विप्रवंशजे। संज्ञायाम् कन्। आयुधजीविब्राह्मणप्रधाने २देशे सि० कौ० ततः कोपधत्वात् छ। ब्राह्मणकीय तत्सम्बन्धिनि त्रि०।

ब्रा(व्रा)ह्मणकाम्या स्त्री ६ त०। १विप्रेच्छायाम् उपचारात् २तद्विषये च "अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः। हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्" प्रा० त०।

ब्रा(व्रा)ह्मणचक्षुस् न० ब्राह्मणस्य सर्वार्थप्रकाशकत्वात् चक्षुरिव। "श्रुतिस्मृती च विप्राणां चक्षुषी देवनिर्मिते। काणस्तत्रैकया हीनो द्वाभ्यामन्धः प्रकीर्त्तितः" हरीतोक्ते सर्वार्थप्रकाशकत्वेन विप्रस्य चक्षुस्तुल्ये वेदस्मृतिरूपे पदार्थे।

ब्रा(व्रा)ह्मणचाण्डाल पु० ब्राह्मणश्चाण्डाल इव। शास्त्रनिषिद्धकर्मकारिणि अपकृष्टब्राह्मणे मनुः ६ ८७।

ब्रा(व्रा)ह्मणजातीय पु० ब्राह्मणजाति+स्वार्थे वस्य अन्त्यजात्वात् छ प्रकृतिलिङ्गस्यातिक्रमः। ब्राह्मजातियुक्ते।

ब्रा(व्रा)ह्मणजीविका स्त्री ६ त०। याजनाध्यापनप्रतिग्रहरूपायां ब्राह्मणवृत्तौ "ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्मण्यवस्थिताः। ते सम्यगुपजीवेयुः षट् कर्माणि यथाक्रमम्। अध्यापनमध्ययनं यजनं याजनन्तथा। दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः। षण्णान्तु कर्मणामस्य त्रीणि कर्माणि जीविका। याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" मनुः। ब्राह्मणवृत्तिरप्यत्र स्त्री।

ब्राह्मणत्रा अव्य० ब्राह्मणाय देयम् त्राच्। विप्राय देयमित्यर्थे

ब्रा(व्रा)ह्मणप्रिय ६ त०। १विष्णौ "ब्रह्मतो ब्राह्मणप्रियः" विष्णुस०। २विप्रहिते त्रि०।

ब्रा(व्रा)ह्मणब्रुव पु० ब्राह्मणं विप्रजातिमात्रतया आत्मानं ब्रवीति ब्रू–क वा० न वच्यादेशः। वेदतत्कर्महीने जातिमात्रोपजीविनि विप्रे "गर्भाधानादिमन्त्रैर्यो वेदोपनयनेन च। नाध्यापयति नाधीते स भवेद्ब्राह्मणब्रुवः" व्याससं०। "जातिमात्रोपजीवी च कामं स्याद् ब्राह्मणब्रुवः। धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथञ्चन" मनुः "समममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे" मनुः।

ब्रा(व्रा)ह्मणयज्ञ पु० ब्राह्मणमात्रकर्त्तृको यज्ञः शा० त०। विप्रमात्रकर्त्तव्ये सौत्रामणीयज्ञे "ब्राह्मणयज्ञः सौत्रामण्यृद्धिकामस्य" कात्या० श्रौ० १६ १ १ "ब्राह्मणग्रहणं क्षत्रियवैश्ययोर्निवृत्त्यर्थम् ऋद्धिकामस्य ब्राह्मणस्य नेतरयोर्वर्णयोरिति सौत्रामणीति कर्मनामधेयम्" कर्कः। "तस्मादेष ब्राह्मणयज्ञो यत् सौत्रामणी" शत० ब्रा० १२ ६ १ १।

ब्रा(व्रा)ह्मणयष्टि स्त्री ६ त० वा ङीप्। (वामनहाटी) १वृक्षभेदे २विप्रदण्डे च स्वार्थे क। अत्रैव अमरः।

ब्रा(व्रा)ह्मणलक्षण न० ६ त०। विप्रस्यासाधारणे धर्मभेदे तच्च वशिष्ठेनोक्तं यथा "योगस्तपोदमोदानं सत्यं शौचं दया श्रुतम्। विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम्। सर्वत्र दान्ताः श्रुतपूर्णकर्णा जितेन्द्रियाः प्राणिवधे निवृत्ताः। प्रतिग्रहे सङ्कुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः"।

ब्रा(व्रा)ह्मणशस्त्र न० ब्राह्मणस्य शस्त्रमिव तत्कार्य्यकारित्वात्। अभिचारादिमन्त्रोच्चारणात्मके विप्रवाक्ये "वाक् शस्त्रं वै ब्राह्मणस्य तेन हन्यादरीन् द्विजः" मनुः। "यस्मादभिचारमन्त्रोच्चारणात्मिका ब्राह्मणस्य वागेव शस्त्रं शस्त्रसाध्यकार्यकारि" कुल्लू०।

ब्रा(व्रा)ह्मणसम पु० ६ त०। "ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः। जातिमात्रोपजीवी च स भवेद् ब्राह्मणः समः" व्यासोक्ते क्रियारहिते विप्रे

ब्रा(व्रा)ह्मणाच्छंसिन् पु० ब्राह्मणे मन्त्रेतरवेदभागे विहितानि शस्त्राणि उपचारात् ब्राह्मणानि तानि शंसति द्वितीयायार्थे पञ्चम्या उपसंख्यानम् तस्याः "ब्राह्मणाच्छंसिन उपसंख्यानम्" वार्त्ति० अलुक्। ब्रह्मरूपस्य ऋत्विजः सहकारिणि ऋत्विग्भेदे अच्छावाकशब्दे ८५ पृ० दृश्यम्। अत्र कश्चिद्विशेषोऽभिधीयते। षोडशर्त्विजां मध्ये प्रधानभूतान् चतुर उक्त्वा कात्या० श्रौ० ७ १ ८ ६ १०। उक्तं यथा "तत्पुरुषा इतरे यथावेदम्" सू० "इतरे द्वादशर्त्विजो तेषामाद्यानां ब्रह्मादीनां चतुर्णां पुरुषाः आदेशकारिणोऽनुचराः सेवकाः यथावेदमिति ये यद्वेदविहितस्य कर्मणः कर्त्तारस्ते तत्पुरुषाः यथावेदमिति ये ब्रह्मपुरुषा न ज्ञायन्त इति तान् स्वयमेवाह" कर्कः "ब्राह्मणाच्छंस्याग्नीधपोतारो ब्रह्मणः" सू०। प्रधानपुरुषत्वेन तद्वशवर्त्तित्वात्तेऽपि वृता एव भवन्ति प्रधानपुरुषे कार्य्यान्तरासक्तेऽन्यत्र गते वा तदीयं कर्म तत्पुरुषैरेव कर्त्तव्यम् नान्यपुरुषैरिति पुरुषाणामपि पूर्वपूर्वेण करणसम्भवे नोत्तरेण"। तस्य भावः कर्म वा "होत्राभ्यश्छः" पा० छ। ब्राह्मणाच्छंसीय तद्भावादौ

ब्रा(व्रा)ह्मणादि पु० भावे कर्मणि चार्थे ष्यञ्प्रत्ययनिमित्ते शब्दगणे स च गणः "ब्राह्मण बाडव माणव (अर्हतोनुम्

च) चोर धूर्त्त आराधय विराधय अपराधय उपराधय एकभाव द्विभाव त्रिभाव अन्यभाव अक्षेत्रज्ञ संवादिन् संवेशिन् संभाषिन् बहुभाषिन् शीर्षघातिन् विघातिन् समस्थ विषमस्थ परमस्थ मध्यमस्थ अनीश्वर कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ निघ्न बालिश अलस दुःपुरुष कापुरुष राजन् गणपति अधिपति गडुल दायाद विशस्ति विषम विपात निपात (सर्ववेदादिभ्यः स्वार्थे) (चतुर्वेदस्योभयपदवृद्धिश्च) शौटीर पा॰ग॰सू॰। ब्राह्मणादिराकृतिगणः। तेन औचित्यादि।

ब्रा(व्रा)ह्मणायन पुंस्त्री॰ ब्रह्मणापत्यं नडा॰ फक्। विप्रगोत्रापत्ये शुद्धवंशजाते विप्रे त्रिका॰।

ब्रा(व्रा)ह्मणिक त्रि॰ ब्राह्मणस्य मन्त्रेतरवेदभागस्य व्याख्यानो ग्रन्थः ठक्। मन्त्रेतरवेदभागव्याख्याने ग्रन्थे।

ब्रा(व्रा)ह्मण्य न॰ ब्राह्मणानां समूहः भावो वा ष्यञ्। १विप्रसमूहे। २ब्राह्मणधर्मे ३विप्रत्वे च। जात्यन्तरगतस्य कारणविशेषाभावे ब्राह्मण्यप्राप्तिर्नास्तीति ब्राह्मण्यस्य दुष्प्रापत्वम् भा॰ २८ अ॰ मतङ्गोपाख्याने विस्तरेण उक्तं यथा "तिर्य्यग्योनिगतः सर्वो मानुष्यं यदि गच्छति। स जायते पुल्कशो वा चाण्डालो वाऽप्यसंशयम्। पुल्कशः पापयोनिर्वा यः कश्चिदिह लक्ष्यते। स तस्यामेव सुचिरं मतङ्ग! परिवर्त्तते। ततो दशगते काले लभते शूद्रतामिति। शूद्रयोनावपि ततो बहुशः परिवर्त्तते। ततस्त्रिंशद्गुणे काले लभते वैश्यतामपि। वैश्यतायां चिरं कालं तत्रैव परिवर्त्तते। ततः षष्टिगुणे काले राजन्यो नाम जायते। ततः षष्टिगुणे काले लभते ब्रह्मबन्धुताम्। ब्रह्मबन्धुश्चिरं कालं तत्रैव परिवर्त्तते। ततस्तु द्विशते काले लभते काण्डपृष्ठताम्। काण्डपृष्ठश्चिरं कालं तत्रैव परिवर्त्तते। ततस्तु त्रिशते काले लभते विप्रतामपि। ताञ्च प्राप्य चिरं कालं तत्रैव परिवर्त्तते। ततश्चतुःशते काले श्रोत्रियो नाम जायते" एतच्च जात्यभिप्रायं संस्कारादिना तु विशिष्टब्राह्मण्यलाभः यथोक्तमङ्गिरसा "चित्रं कर्म यथाऽनेकैरङ्गैरुन्मील्यते शनैः। ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्वकैः"। ३शनिग्रहे पु॰ शब्दमाला। तादृशब्राह्मण्यहानिस्तु कर्मभेदात् यथा "शूद्रां शयनमारोप्य ब्राह्मणाद्धीयते" इत्यादि।

ब्रा(व्रा)ह्मणी स्त्री ब्राह्मणस्य पत्नी ङीष्। १ब्राह्मणस्य पत्न्यां ब्राह्मणस्येयम् अण् ङीप्। २ब्रह्मसम्बन्धिन्यां स्त्रियाम। २बुद्धौ च। "मनो मे ब्राह्मणं विद्धि बुद्धिं मे विद्धि ब्राह्मणीम्"। "अरणीं ब्राह्मणीं विद्धि गुरुमस्योत्तरारणिम्। तपःश्रुते अभिमथ्नीतो ज्ञानाग्निर्जायते ततः" भा॰आश्व॰२४अ॰।

ब्रा(व्रा)ह्मीकन्द पु॰ ब्राह्मा इव कन्दोऽस्य। १वाराहीकन्दे राजनि॰। २ब्रह्मयष्टिकायां शब्दच॰।

ब्रा(व्रा)ह्म त्रि॰ ब्रह्मण इदं अण्। १ब्रह्मसम्बन्धिनि स्त्रियां ङीप्। २विवाहभेदे ३हृदये च धरणिः।

ब्रा(व्रा)ह्ममुहूर्त्त पु॰ ब्रह्मा देवताऽस्य अण् टिलोपः कर्म॰ अरुणोदयात् प्रागवर्त्तिनि "रात्रेश्च पश्चिमे यामे मुहूर्त्तो ब्राह्म उच्यते" "रात्रेश्च पश्चिमे यामे मुहूर्त्तो यस्तृतीयक। स ब्राह्म इति विख्यातो विहितः सम्प्रबोधने" व्या॰ त॰ सुमन्तुना उक्ते दण्डद्वयात्मके काले।

ब्रू कथने अदा॰उभ॰द्विक॰सेट्। ब्रवीति आह ब्रूते। अवोचत् अवोचत। उवाच ऊचतुः। अस्यार्द्धधातुके वच्यादेशोऽनित्यः तेन "विब्रुविः कटके कृता"। ब्रूमण्डं। इत्यादि सिद्धम्। अनु+पश्चात् कथने अनुवादे। वि+विरुद्धतया कथने विवादे च।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्याभिधाने बकारादिशब्दार्थसङ्कलनम्।

भ

भकारः पवर्गीयचतुर्थवर्णो व्यञ्जनवर्णभेदः। तस्योच्चारणस्थानमोष्ठौ। अस्योच्चारणे आभ्यन्तरप्रयत्नः ओष्ठाभ्यां स्पृष्टजिह्वाग्रस्य स्पर्शः अतस्तस्य स्पर्शवर्णता। बाह्यप्रयत्नाश्च संवारनादघोषाः महाप्राणश्च। तस्य ध्येयरूपं यथा "भकारं शृणु चार्वङ्गि! स्वयंपरमकुण्डली। महामोक्षप्रदं वर्णं तरुणादित्यसंप्रभम्। पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा कामधेनुतन्त्रम्। अस्य अधिष्ठातृदेवताध्यानं यथा "तडित्प्रभां महादेवीं नागकङ्कणशोभिताम्। षड्भुजां वरदां भीमां रक्तपङ्कजलोचनाम्। रक्तवस्त्रपरीधानां रक्तपुष्पोपशोभिताम्। चतु-

वर्गप्रदां देवीं साधकाभीष्टसिद्धिदाम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्”। अस्य वाचकशब्दाः यथा “भः क्लिन्ना भ्रमरो भीमो विश्वमूर्त्तिर्निशा-भवम्। हिरण्डो भूषणोमूर्त्तं यज्ञस्तम्भप्रशायकः। नक्षत्रं कमला दीप्तिर्द्योभूमिः पयो नभः। नाभिर्दंष्ट्री महाबाहुर्विश्वमूर्त्तिर्विनायकः। मायात्मा तापिनी वत्ता विश्वरूपी च चन्द्रिका। भीमसेनः सुधासेनः सुखी महापुरं हरः”। वर्णाभिधानम्। मातृकान्यासेऽस्य नाभौ न्यास्यता काव्यादावस्य प्रयोगे “सुखभयमरणक्लेश-दुःखं पवर्गः” वृ॰टी॰ उक्तेः क्लेशः फलम्।

भ न॰ भाति भा—क। १नक्षत्रे अमरः। २ग्रहे शब्दरत्ना॰। ३राशौ ज्यो॰त॰। ४शुक्राचार्य्ये पु॰ मेदि॰। तेषां दीप्तिमत्त्वात् तथात्वम्। ५भूधरे एकाक्षरकोषः। ६भ्रान्तौ पु॰ शब्दरत्ना॰। वृ॰र॰उक्ते ७आदिगुरुके अन्त्य-लघुद्वये वर्णत्रये। तस्य काव्यादौ प्रयोगे फलं यशः देवताचन्द्रः यथोक्तं वृ॰र॰ टीकायाम् “भश्चन्द्रो यश उज्ज्वलम्”। [पायौ च॰ १०।१६२।

भंसस् पु॰ भसत् कटिदेशः पृषो॰। उपचारात् तत्सम्बन्धिनि

भकार पु॰ भ+स्वरूपे कार। भस्वरूपे वर्णे।

भकक्षा स्त्री ६त॰। नक्षत्रकक्षायाम्।

“भवेत् भकक्षा तिग्मांशोर्भ्रमणं षष्टिताडितम्। सर्वो-परिष्टाद्भ्रमति योजनैस्तैर्भमण्डलम्” सू॰ सि॰। “सूर्य्यस्य भ्रमणं कक्षापरिधिमानं योजनात्मकम्” “खखार्थैकसुरार्णवाः” ४३१ १२०० इति वक्ष्यमाणं षष्ट्या गुणितं सत् नक्षत्राणां कक्षा नक्षत्राधिष्ठितगोलस्य मध्यवृत्तं स्यात्। तैर्नक्षत्रकक्षामितैर्योजनैर्भमण्डलं नक्ष-त्राधिष्ठितगोलमध्यवृत्तं सर्वोपरिष्टाच्चन्द्रादिसप्तग्रहेभ्य उपरि दूरं भ्रमति भूगोलादभितः परिभ्रमति” रङ्गना॰।

भकूट न॰ ६त॰। विवाहे दम्पत्योः शुभाशुभसूचके राशिसमूहे तस्य शुभाशुभत्वं च उपयमशब्दे १२५१ पृ॰ दृश्यम्। “खेटारित्वं नाशयेत् सत् भकूटम्”। “प्रोक्ते दुष्टभकूटके परिणयः” मुहू॰ तत्रैव दृश्या। [शब्दार्थकल्पतरुः।

भक्किका स्त्री फड़िङ्गा+पृषो॰। (फड़िङ) ख्याते कीटभेदे

भक्त पुंन॰ भज—क्त। १अन्ने ओदने अमरः। २भक्तियुक्ते ३तदात्मके तत्परे ४विभक्ते कृतभागे च त्रि॰ “भक्तो हरः शुध्यति यद्गुणः स्यात्” लीला। अन्नपाकप्रकारस्त-द्गुणश्च भावप्र॰ उक्तो यथा

“सुधौतांस्तण्डुलान् स्फीतांस्तोये पञ्चगुणे पचेत्। तद्भक्तं प्रसृतं प्रोक्तं विशदं गुणवन्मतम्। भक्तं वह्नि-करं पथ्यं तर्पणं रोचनं लघु। अधौतमसृतं शीतं गुर्वरुच्यं कफप्रदम्”।

भक्तियुक्तलक्षणादिकं तद्भेदश्च मुक्ताफले उक्तं यथा “सक्तमनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यै-रिह” “ते भक्ताः इति लक्षणं स च नवधा हासादिनवविध-रसास्वादमूलकत्वेन नवविधत्वात्”। रसभेदे भक्तविशेषाः मुक्ताफले दर्शिताः यथा “तस्य तत् खेलनं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः। व्रीडिताः प्रेक्ष्य चान्योऽन्यं जातहासा न निर्ययुः” भाग॰१०।१२अ॰तथाच हासे गोप्यः सम्भोगशृ-ङ्गारे गोप्यादयस्तत्र दर्शिताः। विप्रलम्भशृङ्गारेऽपि गोप्य स्तत्र दर्शिताः। “अन्तर्गृहगताः काश्चिद्गोप्योऽलब्धविनि-र्गमाः। इत्यादितद्भावनायुक्ता दध्युर्मीलितलोचनाः। दुः-सहप्रेष्ठविरहतीव्रतापधुताशुभाः। ध्यानप्राप्ताच्युताश्लेष-निर्वृत्त्या क्षीणमङ्गलाः। तमेव परमात्मानं जार-बुद्ध्याऽपि सङ्गताः। जहुर्गुणमयं देहं सद्यः प्रक्षीण-बन्धनाः। अन्यानि रासपञ्चाध्यायीवाक्यानि तत्रोदा-हृतानि दृश्यानि। करुणरसेऽर्जुनादयः। वाक्यानि तत्र दृश्यानि। रौद्ररसे हिरण्यकशिपुशिशुपालादयः। भयानकरसे कंसादयः। बीभत्सरसे सुहृत्पाःपिङ्गला-दयश्च। शान्तरसे नारदादयः। अद्भुतरसे श्रीदाम-ब्रह्मादयः। वीररसे बलिप्रभृतयः। तत्र दानवीरे बलिः धर्मवीररसे कविप्रभृतयः। युद्धवीरे शिशुपालादयः। ए-तेषां मूलवाक्यानि तत्र दृश्यानि। अधिकं भक्तिशब्दे दृश्यम्। “भक्तानां लक्षणं लक्ष्मि! गूढं श्रुतिपुराणयोः। पुण्य-स्वरूपं पापघ्नं सुखदं भक्तिमुक्तिदम्। सारभूतं गोप-नीयं न वक्तव्यं खलेषु च। गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे विशत्यलम्। वेदवेदाङ्गवेदान्तास्तं पवित्रं वदन्ति हि। पुरुषाणां शतं पूर्वं पूतं तज्जन्ममात्रतः। स्वर्गस्थं नरकस्थं वा मुक्तिमाप्नोति तत्क्षणात्। यैः कैश्चिद् यत्र वा जन्म लब्धं येषु च जन्तुषु च। जीवन्मुक्तास्ते च पूता यान्ति काले हरेः पदम्। मद्भक्तियुक्तो मत्पूजा-नियुक्तो मद्गुणाश्रितः। मद्गुणश्रावणीयश्च सन्निविष्टश्च सन्ततम्। सगद्गदः साश्रुनेत्रः स्वात्मविस्मृत एव च। न वाञ्छति सुखं मुक्तिं सालोक्यादिचतुष्टयम्। ब्रह्म-त्वममरत्वं वा तद्वाञ्छा मम सेवने। इन्द्रत्वञ्च मनुत्वञ्च देवत्वञ्च सुदुर्लभम्। स्वर्गराज्यादिभोगांश्च स्वप्ने च न हि वाञ्छति। ब्रह्माण्डानि विनश्यन्ति देवा ब्रह्मादयस्तथा।

कल्याणभक्तियुक्तस्य मद्भक्तो न प्रणश्यति। भ्रमन्ति भारते भक्ता लब्ध्वा जन्म सुदुर्लभम्। तेऽपि यान्ति मही पूता पदं तीर्थं ममालयम्" ब्रह्मवै० प्र० ५अ०। "इति कृष्ण-कथायाञ्च यस्यास्तु पुलकोद्गमः। मनो निमग्नं यस्यैव स भक्तः कथितो बुधैः। पुत्रदारादिकं सर्वं जानाति श्री-हरेरपि। आत्मना मनसा वाचा स भक्तः कथितो बुधैः। दयास्ति सर्वभूतेषु सर्वं कृष्णमयं जगत्। यो जानाति महाज्ञानी स भक्तो वैष्णवोत्तमः" ब्रह्मवै० जन्म० १अ०। त्रिविधभक्तलक्षणं यथा "भक्तानां त्रिविधा-नाञ्च लक्षणं श्रूयतामिति। हरिगय्यारतो भक्तो मन्नाम-गुणकीर्त्तिषु। मनोनिवेशयेत् त्यक्त्वा संसारसुखकारणम्। दास्यं विना नहीच्छेत्तु सालोक्यादिचतुष्टयम्। नैव निर्वाणमुक्तिञ्च सुधापानमभीप्सितम्। ध्यायते मत्पदा-ब्जञ्च पूजयेद्भक्तिभावतः। ब्रह्मेन्द्रकालस्य देवा मङ्गलपर-ञ्छितस्य च। सर्वसिद्धिं न वाञ्छन्ति तेऽणिमादिकमीप्सि-तम्। ब्रह्मत्वममरत्वञ्च सुरत्वं सुखकारणम्। वाञ्छन्ति निश्चलां भक्तिं मदीयामतुलामपि। स्त्रीपुंविभेदो ना-स्त्येव सर्वजीवेषु भिन्नता। तेषां सिद्धेश्वराणाञ्च मत्पराणां व्रजेश्वर!। क्षुत्पिपासादिकां निद्रां लोभमोहादिकं रिपुम्। त्यक्त्वा दिवानिशं मां च ध्यायते च दिगम्बरः। स मद्भक्तोत्तमो नन्द! श्रूयतां मध्यमादिकम्। नासक्तः कर्मसु स्पृहो पूर्वमात्मनतः शुचिः। करोति सततञ्चैव पूर्वकर्मनिकृन्तनम्। न करोत्यपरं यत्नात् सङ्कल्परहि-तश्च यः। सर्वं कृष्णस्य यत्किञ्चित्साक्षी कर्त्ता च कर्मणः। कर्मणा मनसा वाचा सततं चिन्तयेदिति। न्यूनभक्तश्च तन्न्यूनः स च प्राकृतिकः स्मृतः। यमं वा यम-दूतं वा स्वप्नेन च न पश्यति। पुरुषाणां सहस्रञ्च पूर्वं भक्तः समुद्धरेत्। पुंसां शतं मध्यमश्च तदर्द्धञ्च प्राकृतः। भक्तश्च त्रिविधस्तात! कथितश्च तवाप्यतः" इति तत्रैव ८४अ०। भावे क्त। ५भजने न०।

भक्तकंस पुं० भक्तार्थः कंसः। भक्ताहरणार्थे पात्रे "भक्ता-ख्यास्तदर्थेषु" पा० आद्युदात्तता च।

भक्तकर पु० भक्तं भक्तमिव करोति कृ–ट। धूपे कृत्रिमधूपे शब्दच०। [सूपकारे हेमच०।

भक्तकार त्रि० भक्तं करोति कृ–अण् उप०स०। पाचके

भक्ततूर्य न० भक्ते तद्ग्रहणकाले वादनीयं तूर्यम् शा०त०। भोजनकाले वादनीये वाद्यभेदे त्रिका०।

भक्तदास पु० भक्तेन अन्नमात्रलाभेन दासः अन्नोपदास-भावः। पञ्चदशदासान्तर्गते दासभेदे। "भक्तदासश्च विज्ञेयः" इति स्मृतिः। दासशब्दे दृश्यम्।

भक्तपुलाक पु० भक्तस्य पुलाक इव। सिक्थे भक्तमण्डे (माँड़) त्रिका०

भक्तमण्ड पु० ६त०। भक्तस्य निस्रावे (माँड़)। हेमच०।

भक्तवत्सल त्रि० ६त०। १भक्तेषु स्निग्धे २विष्णौ पु०। "माधवो भक्तवत्सलः" विष्णुस०।

भक्तसिक्थ पु० ६त०। भक्तमण्डे अमरः।

भक्ति स्त्री भज–क्तिन्। १सेवायाम् आराधनायां, २तदेकताने चित्तवृत्तिभेदे ३विभागे ४गौण्यां वृत्तौ ५उपचारे ६अव-यवे ७भङ्ग्याम् ८श्रद्धायाम् ९रचनायाञ्च "भवति विरल-भक्तिः" रघुः। भक्तिलक्षणमुक्तं शाण्डिल्यसूत्रटीकयो यथा "सा परानुरक्तिरीश्वरे" सू० "अत्र सा परेति लक्ष्यनि-र्देशः। शेषं लक्षणम्। परेति गौणीं व्यावर्त्तयति। ईश्वर इति प्रकृताभिप्रायम्, आराध्यविषयकरागत्वमेव भक्ति-त्वम्। इह तु परमेश्वरविषयकान्तःकरणवृत्तिविशेष एव भक्तिस्तद्वैशेष्यं च लौकिकानुरागादौ सुस्पष्टम्। यथोक्तं परमभक्तमतः प्रह्लादेन। (विष्णुपु०। अंशे १। अ०२०। श्लो० १७)। "या प्रीतिरविवेकानां विषयेष्वनपायिनी। त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु"। अत्र प्रीति-पदेन सुखनियतो राग एव लक्षितः। अन्यथा प्रीतेः सुखरूपाया निर्विषयत्वेन विषयसप्तमी न स्यात् तस्याः सुखज्ञानरूपत्वेऽपि तज्ज्ञानस्य सुखविषयत्वाद्विषयविषय-त्वासम्भवात्। तस्मादनुरक्तिरेव सविषयिणी लक्षिता। न च विषयजन्यप्रीतिरर्थः जनकसप्तम्या अननुशासनात्। किन्तु "अचलास्तु सदा त्वयि" इत्यत्र भक्तेरीश्वरविषय-तासिद्धौ प्रीतिपदेनापि तदेकवाक्यतया सैवोच्यते। पूर्वं प्रतिजन्म भक्तिप्रार्थनमिह तु विषयरागदृष्टान्तेन तस्या एव सर्वथान्यपरिहार्यत्वप्रार्थनमिति विशेषः। विषयजन्यप्रीतिरपि रागं विना न सम्भवतीति रागा-वश्यकत्वम्। तथा च पातञ्जलसूत्रम्। (पा०२। सू० ७पृ०७८) "सुखानुशयी रागः" इति। तस्यैव वक्ष्यमाण-लिङ्गेषु व्यापनाल्लाघवाच्च भक्तित्वम्। न तु कस्यचित् कारणस्य, कस्यचित् कीर्त्तनादेः अननुगमात्। न च तज्-ज्ञानस्य तत्त्वं द्वेषादिमत्स्वपि तत्प्रसङ्गात्। नाप्या-राध्यत्वेन ज्ञानं वा पूजानमस्काराद्याराधनास्वननु-गमात्। अपि च बलाद्भयाद्वा नमस्कार्यत्वादिज्ञान-वत्स्वपि भक्तोऽयमहरकोऽयमिति व्यवहारापत्तेः। अनु-

रागादिवच्छिताराध्यत्वज्ञानमिति चेत् अनुराग एवास्तु अतएव गी०।अ०१०। श्लो०९)। "मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्। कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च। तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते" इत्यादौ तद्गतचित्तप्राणादीनां भजनमुक्तं नाराध्यत्वज्ञानवताम्। अतएव च कृष्णस्य कमनीयाकृतिदर्शनेनानुरक्तानां गोपतरुणीनामपि भक्तिफलं मुक्तिः श्रूयते। अनुस्तु न तत्पक्षान्तर्गतः किन्तु भगवन्महिमादिज्ञानादनुपश्चाज्जायमानत्वादनुरक्तिरित्युक्तम्। ननु पित्रादिगोचरानुरागस्यापि प्रकृतभक्तित्वं प्रसज्येत जगत एव परमेश्वरात्मकत्वात्। अथ विकाराविशिष्ट एव तथात्वं वाच्यं तथापि गोपीप्रभृतीनां प्रादुर्भावविच्छिन्नेश्वरभक्त्याव्यापकम्। उच्यते जीवोपाध्यनवच्छिन्नचेतनविषयिणी अनुरक्तिरेव सेति। एवञ्च प्रादुर्भावविच्छिन्ने परिपूर्णे च भक्तिः संगृहीता भवति" टीका। "तत्संस्थस्यामृतत्वोपदेशात्" ३सू० "तस्मिन्नीश्वरे संस्था भक्तिर्यस्य स तथोक्तः। तस्यामृतत्वं फलमुपदिश्यते (छा०।पृ० ११७) "ब्रह्मसंस्थोऽमृतत्वमेतीति"। तस्मिन्नमृतत्वगोचरफलत्वनिबन्धना तदभिलाषा परिहृता भवतीति" टी०। "ज्ञानमिति चेन्न द्विषतोऽपि ज्ञानस्य तदसंस्थितेः" ४सू० "ननु ब्रह्मसंस्थाशब्देन ब्रह्मज्ञानमेवोच्यते न तु तद्भक्तिः। तथाचामृतत्वफलं तस्यैवेति चेद्ब्रूषे। नैष दोषः। संस्था भक्तिरेव न ज्ञानं द्विषतस्तज्ज्ञानवतोऽपि तत्संस्थत्वव्यवहाराभावात्, राजाद्यनुरक्ताः खल्वमात्यमित्रादयस्तत्संस्था इति व्यपदिश्यन्ते न पुनः प्रतिपक्षभूपालाः। शब्दार्थनिर्णयो हि लोकवदेव वेदेऽपीति। अतएव चिरकारिकोपाख्याने "विश्वसन्ते न कालेन पत्नीसंस्था व्यतीक्रमः। सोऽभवीश्च भयं तप्तो दुःखेनाश्रूणि वर्त्तयन्"। (महाभा० शा० अ० २६७ श्लो० ९५२६) इत्यनेन पतिभक्त्यतिक्रम उक्तः। तस्मात् संस्था भक्तिरिति एवञ्च (ब्रह्मसू०।अ०१।पृ०७)"तन्निष्ठस्य मोक्षोपदेशादिति"बादरायणीयसूत्रस्याप्ययमेवार्थोऽध्यवसेयः"टी० 'तथोपलब्धाश्च"५सू०। "तथा भक्त्या मुक्तिं प्रति ज्ञानमुपचीर्णं यथाश्चकार उक्तयुक्तिसमुच्चयार्थः (गी०।अ०७।श्लो० १२)। "यदा ते निश्चलं चेतो मयि भक्तिसमन्वितम्। तदा त्वं मत्प्रसादेन निर्वाणमपि यास्यसि" इति स्थितम्। ननु (श्वे०।उ०।७२) "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यत्र वेदनफलं मुक्तिः श्रुता तद्विरोधेन स्मृतीनामन्यार्थत्वं स्यादिति चेन्न अत्रापि तथैवोपलब्धात्। तथा हि अतिमृत्युपदं न मुक्तौ रूढं किन्तु यस्यां सत्यां मृत्योरतिक्रम इति व्युत्पत्त्या तदपेक्षया यतो भक्तेर्मृत्यतिक्रम इति व्युत्पाद्य भक्तिमेवातिमृत्युपदेनाभिधत्ताम् उपपदविभक्त्यर्थापेक्षया कारकविभक्त्यर्थस्य बलवत्त्वात्। (गी०।अ०१२श्लो०७)। "तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात्। भवामि न चिरात् पार्थ! मय्यावेशितचेतसाम्"। इत्यादिना भक्तितो मृत्योरतिक्रमोक्तिः। मन्त्रश्च भवति (तैत्तिरीयमन्त्रभागे) "त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतादिति"। अत्र यजनं भक्तिः तथैव तत्कल्पव्याख्यानात् नचास्यां श्रुतौ भक्तेरसन्निधानं मुक्तावपि तुल्यत्वात्। तस्मादनयापि श्रुत्या ज्ञानस्योपचय एव प्रतीयत इति। ननु तथापि भक्ते रागरूपत्वे किं कारणमित्यपेक्षायामाह" टी०। "द्वेषप्रतिपक्षभावाद्रसशब्दाच्च रागः"६सू०। "भक्तिः खलु राग एव भवितुमर्हति कुतः द्वेषविरोधित्वात्। लोके हि द्वेष्टायं भक्तोऽयमिति मिथोविरुद्धधर्मवत्ति व्यवह्रियते तत्र द्वेषविरोधी च राग एव प्रसिद्धो न ज्ञानादिः। एवञ्च भगवति शिशुपालस्य द्वेषानुबन्धमभिधाय विष्णुपु० अ० ४ १५ गद्येन १० "अयं हि भगवान् कीर्त्तितः संस्मृतश्च द्वेषानुबन्धेनापि अखिलसुरासुरदुर्लभं फलं प्रयच्छति किमुत सम्यग्भक्तिमताम्" इत्युक्तम्। तथा चाग्निस्मृतौ "विद्वेषादपि गोविन्दं दमघोषात्मजः स्मरन्। शिशुपालो गतः स्वर्गं किं पुनस्तत्परायणः" इति अत्रापि द्वेषविरोधित्वेन भक्तेरभिधानात्। तथा च गीतासु (गी०अ०१६। श्लो०१८)। "ममात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः। तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु। आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय! ततो यान्त्यधमां गतिम्। इति। तद्विरोधिनी च भक्तिरीश्वरविषयैवानुरक्तिरिति युज्यते। किञ्च (तैत्ति०। उ०१००) "रसं ह्येवायं लब्ध्वानन्दीभवतीति शब्दाद् ब्रह्मानन्दाविर्भावसक्तेर्ब्रह्मगोचरस्य रसस्य हेतुतावगम्यते। रसश्च रागः (गी०। अ० २। श्लो० ५९)। "रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते" इत्यादौ प्रसिद्धः। अत्र

ऽयो विषयरागः। अत एव च (विष्णुपु० अ० ४। अ० ४ गद्यम्) रामचन्द्रपाटीनां सर्वलोकारोहणमुक्त्वा "येऽपि तेषु भगवदंशेष्वनुरागिणः कोशलनगरजानपदास्तेऽपि तन्मनसस्तत्सालोक्यतामापुरिति" वाक्यादेव भक्तावनुरागशब्दः प्रयुक्त इति। तस्मादपि न ज्ञानं किन्त्वनुरागरूपैव भक्तिर्निःश्रेयसफलेति। ननु द्वेषविरोधित्वं न रागत्वे लिङ्गम् उदासीनत्वेनानैकान्त्यादिति चेत् उच्यते द्वेषकार्य्यं हि निवृत्तिस्तद्विरोधिनी प्रवृत्तिरिति। भवति च भक्तानां भजनीयानुवर्त्तनादौ प्रवृत्तिस्तद्विरोधिनां तदनुवर्त्तनादौ निवृत्तिः। एवञ्च कार्य्यमुखेन विरोधमभिप्रेत्य द्वेषप्रतिपक्षेत्युक्तम्। तथा च प्रयोगः भक्तिर्भजनीयगोचररागरूपा तदनुवर्त्तनादिहेतुहितसाधनताधीभिन्नात्मविशेषगुणत्वात् यन्नैवं तन्नैवं यथा द्वेषः। रागोत्कर्षेण तदनुवर्त्तनाद्युत्कर्षस्य दृष्टत्वाच्च। किञ्च यो यस्मिन् भक्तस्तत्र तस्यौदासीन्याभावेऽवगते भक्तिस्तादृशानुवर्त्तनाद्यनुकूलद्वेषविरोधिगुणरूपा अनुवर्त्तनहेत्वात्मविशेषगुणत्वाद्धितसाधनताधीवदिति हितसाधनताधीत्वबाधसहकारेण परिशेषाद्रागत्वसिद्धिः। किञ्च भक्तिमतामिमित्येतत् कैमुतिकन्यायो विरोधिन्येव द्रष्टव्यः। (गी०। अ० ९। श्लो० ३२)। "मां हि पार्थ! व्यपाश्रित्य येऽपि स्युः पापयोनयः"। "किं पुनर्ब्राह्मणाः पुण्याः" इत्यादौ च। एवं (गी०। अ० १६। श्लो० १८) "मामात्मपरदेहेष्वित्यनेन द्वेषस्य संसारहेतुत्वात् तद्विरोधिगुणो जीवोपाधिपरिहारेण परात्मगोचरो राग एव भक्तिरूपः संसारनाशहेतुः। एतदेवोक्तं मामप्राप्यैवेति। चकारात् पुत्रकादिरागविशेषेऽपि रागत्वम्। प्रसिद्धं हि "पुत्रकाश्लिष्टेन कथयति मय्यनुरागं कपोल" इत्यादौ। भक्तेर्गुणान्तरत्वे तु पृथग्विशिष्टताकल्पने गौरवात्। स च रागः वैधाश्लिष्टेष्टसाधनताज्ञानजन्योऽपि यागादिवदिच्छारूप एव। अस्माकं तु मोक्षाय्यनुरज्यामि नेच्छामीत्यादिप्रतीते रागः पृथगेव द्वेषवत्। इच्छाया असिद्धमात्रविषयत्वाद्रागस्य सिद्धासिद्धविषयत्वाच्च। प्रत्युत तस्येच्छात्वादिव्याप्यत्वकल्पनागौरवाच्चेति दिक्। तस्मात् तद्वचाभिसिद्धिरिति। ननु भक्तिः क्रियात्मिका सा च निःश्रेयसाय न क्षमते (तैत्ति। आरण्य०। त्रिसुपर्णे अनु० २१) "न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः" इत्यादिश्रुतिभ्य इत्याशङ्कां परिहर-

त्याह टी०। "न क्रिया कृत्यनपेक्षणाज्ज्ञानवत्" ७सू०। सा भक्तिर्न क्रियात्मिका भवितुमर्हति प्रयत्नानुविधानाभावात्। यन्न प्रयत्नानुविधायि तन्न क्रियात्मकं यथा ज्ञानम्। तद्धि प्रमाणवस्त्वधीनं न पुरुषेच्छयान्यथा कर्त्तुमकर्त्तुमन्यथा कर्त्तुं शक्यते। तथा भक्तिरपि न हि रागिणां प्रमदापुत्रादिविषयिणी पुंव्यापारेण तथा भवति भक्तिः किन्तु पूर्वोक्तगौणभक्त्यादिसाधनाधीनेति" टी०। "अतएव फलानन्त्यम्" ८सू०। "यतः सा न क्रियात्मिका अतएव तत्फलस्य निःश्रेयसस्यानन्त्यमुपपद्यते। अन्यथा (छा०। ८।१।६) 'तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते" इत्यनेनामृतत्वस्यापि क्षयित्वं प्रसज्येतेति" टी०। "तद्वतः प्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत्" ९सू०। "भवति हि भगवद्वाक्यं (गी०। अ० ७। श्लो० १९) "बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते। वासुदेवः सर्वमिति स महात्मा सुदुर्लभः" इति। ज्ञानवतः प्रपत्तिरुक्ता भक्तेर्ज्ञानहेतुत्वे नेदमुपपद्यते इतरप्रपत्तिवदिति। यथा तदनन्तरं (गी०। अ० ७। श्लो० २०)। "कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः"। इत्यनेन देवतान्तरप्रपत्तिनिन्दामुखेनैव प्रपत्तिः स्तूयते। तत्र देवताभक्तेरेव प्रपत्तिशब्देन कथनं न तज्ज्ञानस्य। तस्या एव प्रपत्तेरुभयत्र प्रत्यभिज्ञानात् इति। चकाराज्ज्ञानानन्तर्य्यश्रवणमपि ज्ञानत्वाभावे निदानम्। यथा (गी०। अ० १५। श्लो० १९)। "यो मामेवमसंमूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत!" इति। तथा (गी०। अ० ९। श्लो० १३)। "भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्। इति मत्वा भजन्ते मां बुधा भावसमन्विताः"। इति च। तस्मान्न ज्ञानात्मिका। यद्यपि रागत्वेनैव ज्ञानभेदः सिद्धस्तथापि भक्तिशब्दो ब्रह्मज्ञाने गौण इति शङ्कानिरासार्थमेतत्। इदन्तु चिन्त्यते भगवद्गीतावाक्यानि न शब्दविधया वेदवत् प्रमाणम्। किन्तु भारतस्मृतित्वेन तथा च कथं शब्दादिति निर्देशः। अत्र वेऽनुमितशब्दादिति व्याचष्टे। अत्रोच्यते षडर्थकभगवद्वाक्यत्वमेव वेदत्वं तच्च गीतावाक्यविशिष्टम्। अतएव भगवद्गीतासूपनिषत्स्विति श्रूयते, केवलं त एव श्लोका व्यासेन निबद्धाः तथा च पुराणान्तरम्। "गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः। या स्वयं पद्मनाभस्य मुखपद्मा-

-हितिःस्मृता"। न च गूढार्थानामन्यथाप्रसङ्गः भारतस्वरूपाख्यानेनैव तदुपपत्तेः यथावादिस्तुत्यादिवत्। तद्विचारेऽपि चेन्न तथात्वाऽपरिपूर्त्तेः। तथाचोक्तमाचार्य्यैः। "तानेव वैदिकान् मन्त्रान् भारतादिनिवेदितान्। व्याख्यातविषयं हित्वा लोकबुद्ध्या प्रयुञ्जते" टी०। १आ०। "एवमनन्तरं प्रत्यनन्यथासिद्धायां भक्तौ वर्णितायां ज्ञानयोगभक्तीनामङ्गप्रधानभावविवेकाय द्वितीयाह्निकस्यारम्भः। "सा मुख्येतरापेक्षितत्वात्" १०सू० "आह्निकसमाप्त्युक्तस्य पुनः स्मरणाय सेति निर्देशः। सा परा भक्तिस्तु सा प्रधानम् इतरैरात्मज्ञानयोगादिभिः स्वोपकार्यतयापेक्षितत्वादित्यर्थः। छान्दोग्ये (प्र०६।१६) "यो भूमा तदमृतम्" इत्याद्युपक्रम्य श्रूयते "आत्मैवेदं सर्वमिति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवतीति" तत्रात्मरतिरूपायाः परभक्तेः पश्यन्निति दर्शनसप्रियत्वादिसमभिव्याहृतत्वेनाङ्गं भवति। यथा "दण्डी प्रैषमन्वाह मैत्रावरुणो दोहयति अभिजानन् जुहोति भगवान् सुखशानित्यादौ दण्डाद्यङ्गं तथा "दर्शनमपि रतेरङ्गं मननविज्ञानयोरङ्गप्रियदर्शनार्थतया ध्यानप्राप्त्योरनुवादः। एवमात्मक्रीडादेरतिनैयत्यादर्थप्राप्तोऽनुवाद एव। अन्यथा रत्युद्देशेन दर्शनादिविधौ दर्शनाद्युद्देशेन वा रत्यादिविधौ वाक्यानि भिद्येरन्। तस्मात् (पूर्वमीमांसायाम्। अ० ३। पा०१। सू० २) "शेषः परार्थत्वादिति" न्यायाद्दर्शनमङ्गमिति। अतएव भगवान् मनुरपि। (महाभार०। शान्ति०। अ०१८४। श्लो० ७१११।७११२)। "यस्त्यक्त्वा प्राकृतं कर्म नित्यमात्मरतिर्मुनिः। सर्वभूतात्मभूतात्मा स्यात् परमा गतिः"। इत्यनेनात्मरतेः प्राधान्यमाहेति" टी०। "प्रकरणाच्च" ११सू०। "प्रकरणं रतेरेव फलवत्त्वात् तस्मात् तत्प्रकरणस्थं दर्शनमङ्गं भवितुमर्हतीति" टी०। "दर्शनफलमिति चेन्न तेन व्यवधानात्" १२सू०। "अथ दर्शनस्यैव फलं स्वाराज्यमवगतं तथा च तस्यैव प्रकरणमिति वैपरीत्यमिति चेन्न तेन तच्छब्देन व्यवधानात् (छां० प्र०५।१६।७) स स्वराड् भवतीत्यत्र तच्छब्देन सन्निहितात्मरतिमात्रमेवोपस्थाप्यते न विप्रकृष्टं पश्यन्निति व्यवहितोपस्थितौ कारणाभावात्। प्रकरणमेव कारणमिति चेन्न अन्योन्याश्रयात्" टी०। "दृष्टत्वाच्च" १३सू० "दृष्टं हि लोके लोकवेदयोर्ज्ञानस्य तदपत्राकरणे रतिहेतुत्वं न तु रतेर्ज्ञानहेतुत्वमिति दृष्टोपकारत्वादप्यङ्गत्वमवसीयते। दृष्टं च प्राकृतनिष्कृत्यतात्यप्रहितत्वात्प्रियत्वादिज्ञानं मनोमालिन्यवारणं भूतेषु करुणामैत्र्याद्युत्कर्षयति यन्त्रितरूपाणां च आत्मेति ज्ञानव्यालिन्यनिवृत्तिस्ततः परा भक्तिरिति। अतएव गीयते (गी०। अ०५। श्लो० १७)। "तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः। गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः। इति। तथा आयुर्वेदेऽपि (अष्टाङ्गहृदये। अ० १ श्लो० २१)। धीधैर्य्यात्मादिविज्ञानं मनोदोषौषधं परम्" टी०। "अतएव तदभावाद्वल्लवीनाम्" १४सू०। "यतो ज्ञानं दृष्टोपकारकमङ्गमत एव दृष्टोपकारं निरस्य मनोमालिन्यादिबाधात् प्रधानभगवदनुरागमात्रेण वल्लवीनां मुक्तिः स्मर्यते। (विष्णुपुराणे। अंशे ५। अ० १३। श्लो० १४। १५।) "तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया सती। तदप्राप्तिमहादुःखविलीनाशेषपातका। चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम्। निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका" इति। अत्र सुखदुःखविकल्पेनानुरागोऽनुमीयते न मुक्तिरिति वाक्यार्थः। द्वारबाधादनवक्लृप्तकल्पत्वेनापि कर्म्मणा फलविहितिरिव तासां रागान्मुक्तिस्तदप्यवगम्यते ज्ञानमङ्गमेव प्रधानत्वे तु तदभावे फलं न स्यात् चिन्ता च न ब्रह्मात्मैक्यज्ञानं तत्कारणश्रवणमननाद्यसम्भवात्। किन्त्वनुरागनियतानुस्मृतिरेव। न चायमर्थवादः अपूर्वार्थत्वाभावात् सन्निधौ विध्यभावाच्चेति" टी०। "भक्त्या जानातीति चेन्नाभिज्ञप्त्या साहाय्यात्" १५सू० "इदानीं स्मृतिविरोधेन प्रकरणस्यानिष्टबाधमाक्षिप्य समाधीयते। यथा स्मृतं (गी०। अ० १८। श्लो० ५५।) "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्"। इति। तत्र (तैत्तिरीयसं०। अ०१। प्र०५। अनुवाक०८) "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इतिवत् कारकस्तुत्या तृतीयस्या भक्तेर्ज्ञानहेतुत्वमाधीयते। यद्यपि दृष्टत्वादित्यनेन दृष्टोपकारे प्रत्यक्षगम्ये न स्मृतेरवकाशः तथापि ब्रह्मविषयिण्या रतेर्ब्रह्मविषयज्ञानोपकार्य्यत्वं न प्रत्यक्षगम्यम्। किन्तु तदन्यादृशे रतौ तथा दर्शनेन ब्रह्मगोचरायामप्यनुमातव्यम्। तथाच विकल्पे पर्य्यवसानादिति चेन्न दोषः। तथाहि यदि केवलं जानातीति वदेत् स्यादेवम्। किन्त्वभिजानातीति। अभिज्ञा पूर्वज्ञातज्ञानमुच्यते। तथा च भक्त्युपकारिपूर्व-

ज्ञानं तत्फलरूपभक्तिप्रवर्त्तनम्। अनन्तरं यावत् तद्दार्ढ्यं भक्त्यैवाभिव्याप्तिभावेनापेक्ष्यते व्रीह्यवहननेनावघातवदिति। कार्य्यसाहाय्यार्थमुक्तं ततो ज्ञानदार्ढ्येन भक्तिदार्ढ्ये सति शिवत इति। तथाचेयं श्रुतिः किन्तु न्यायप्राप्तानुवाद इति। एतमेवार्थं स्फुटीकरोति" टी०। "प्रागुक्तं च" १६सू०। "भक्त्या मामित्यस्य पूर्वं ब्रह्मभूयाय कल्पत इत्यभिधाय (गी०। अ० १८। श्लो० ५४)। "ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्" इत्युक्तम्। तस्य तु ज्ञातब्रह्मणो ज्ञानप्रयोजनाभावादुयुक्तमनुवादत्वमिति" टी० "एतेन विकल्पोऽपि प्रत्युक्तः" १७सू०। "एतेन ज्ञानस्याङ्गत्वनिर्णयेन ज्ञानभक्त्योरत्र विकल्पपक्षोऽपि प्रत्युक्तः निराकृत इति मन्तव्यम्। नह्यङ्गाङ्गिनोरेकत्र विकल्पो भवतीति। अपिशब्दात् समुच्चयोऽपीति" टी०। "देवभक्तिरितरस्मिन् साहचर्यात्" १८सू०। "क्वचिदेवं श्रूयते (श्वेताश्व० ६।२३) "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति। अत्र देवभक्तिरीश्वरेतरस्मिन् देवे मन्तव्या कुतः गुरुभक्तिसाहचर्यात्। साहचर्यं हि नान्यतफलायां भक्तौ घटते। इन्द्रादि देवतास्त्वाराधिताः शुभज्ञानफलाय भवन्तीति साहचर्यमपि निर्वाहकम्। साहचर्यादुलूकशब्दवदुपयुक्तरूपष्टम्भकमेतत्" ११टी०। "योगस्तूभयार्थमपेक्षणात् प्रयाजवत्" १९सू०। "योगः पुनर्ज्ञानार्थं भक्त्यर्थं च भवति। समाहितमनस्कताया उभाभ्यामपेक्षणात्। ननु (पूर्वमीमांसायाम्। अ०२। पा० १। सू० २१) "गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यादिति" न्यायात् प्रधानाङ्गं योगः कथमङ्गाङ्गमित्यत आह प्रयाजवदिति यथा प्रयाजो वाजपेयाद्यङ्गं तदीयदीक्षणीयादेरप्यङ्गं तद्वत्। तदङ्गताबोधकप्रमाणाविशेषात्। केवलं ज्ञानार्थं योगानुष्ठानप्रसङ्गेन भक्तिमुपकरोतीति। एवं विषयवैराग्यमपि उभयार्थं मन्तव्यम्। ननु योगे पातञ्जलदर्शने २३सू०) "ईश्वरप्रणिधानाद्वेति" पतञ्जलिस्मरणं हिरण्यगर्भं तत्र प्रणिधानाभिधेयस्य भगवद्भजनस्य समाधिसिद्ध्यर्थत्वमिति कथं भक्तेः प्राधान्यमित्यत आह" टी०। "गौण्या तु समाधिसिद्धिः" २०सू०। तत्र प्रणिधानं गौणभक्तिरेव न प्रधानं तया समाधिसिद्धिरिति न स्मृतिविरोधोऽपीति। भवति च वाक्यशेषस्तत्रैव (पा०द०१।२७सू०) "तस्य वाचकः प्रणवः" "तज्जपस्तदर्थभावनमिति" टी०। "हेया रागत्वादिति चेन्नोत्तमास्पदत्वात् सङ्गवत्" २१सू०। "योगशास्त्रप्रस्तावादिदं सूत्रम्। योगशास्त्रोक्तरागत्वाविशेषाद्भक्तेरपि मुमुक्षुणा हेयैव। तथा च सूत्रं पा० द० ७२सू०) "हेयाः रागद्वेषाभिनिवेशाः क्लेशाः" इति। एवञ्चेदुच्यते। नैवं वाच्यम् उत्तमास्पदत्वाद्भक्तेः परमेश्वरविषयत्वादिति यावत्। न हि रागत्वमात्रेण हेयत्वं किन्तु संसारानुबन्धिरागत्वेनैव। यथा सङ्गत्वमात्रेण न त्याज्यता किन्तु असत्सङ्गत्वेन तद्वत्। तथा चेश्वरभक्तिर्हेया रागत्वादित्यत्र संसारानुबन्धित्वं मोक्षाननुगुणत्वं चोपाधिः। नच सात्त्विकी सा (गी०। अ० १७। श्लो०४) "यजन्ते सात्त्विका देवान्" इत्यादिना सात्त्विकत्वकीर्त्तनादिति" टी०। "तदेव कर्मिज्ञानियोगिभ्य आधिक्यशब्दात्" २२सू०। "तदेव भजनं मुख्यं तस्या भक्तेर्वा मुख्यत्वम्। एतत् सर्वथैव निश्चितं यस्मादेवं शब्द्यते (गी०। अ० ६। श्लो० ४६। ४७)। "तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः। कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन। योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो मां स मे युक्ततमो मतः" इति। अत्र विशेषणानां तपआदीनामाधिक्यनिबन्धनं विशेष्याणामाधिक्यं क्रमादिति मन्तव्यम्। न खल्वन्यस्य मुख्यादाधिक्यमुपपद्यते। तस्माद्भक्तिः प्रधानमिति। मुख्यार्थेनापि तदुत्पत्तिपरिहारार्थं पठन्ति" टी०। "प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः" २३सू०। अत्र कृत्स्नोऽपि द्वादशाध्याय उदाहरणम् (गी०। अ० १२। भक्तियोगशब्दे स च अध्यायो दृश्यः।

तल्लिङ्गानि च तत्रैवोक्तानि यथा

"तत्परिशुद्धिश्च गम्या लोकवल्लिङ्गेभ्यः" ४२सू०। "यद्यपि जानामीच्छामीत्यादिवदहं भजे अनुरज्ये इत्येवं मानादिना प्रत्यक्षगम्यैव भक्तिस्तथापि तस्या इतरतरसंस्कारवैशिष्ट्यलक्षणा परिशुद्धिर्न प्रत्यक्षतो निर्णेतुं शक्यते ज्ञानप्रामाण्यवत्। तस्मात् तन्निर्णयो लोकवज्ज्ञातलिङ्गेभ्य एव। यथा लोकेऽनुरागतारतम्यं तत्कथादावश्रुपुलकादिविकारैरनुमीयते तद्वदिति। न केवलं लोकवल्लिङ्गानि भवन्ति महर्षीणां स्मृतिभ्योऽपि तानि लिङ्गानि बाहुल्येन लभ्यन्त इत्याह" टीका। "सम्मानबहुमानप्रीतिविरहेतरविचिकित्सामहिमख्यातितदर्थप्राणस्थानतदीयतासर्वतद्भावाप्रातिकूल्यादीनि च

गुरुन्येभ्यो बाहुल्यात्" ४४ सू०। "यथार्जुनस्य सम्मानः। "प्रत्युत्थानं तु कृष्णस्य सर्वावस्थो धनञ्जयः। न लङ्घयति धर्मात्मा भक्त्या प्रेम्णा च सर्वदा"। बहुमानः यथा इक्ष्वाकोः (नृसिंहपु० अ० २५ श्लो० २२) "पक्षपातेन तन्नाम्नि मृगे पद्मे च तादृशि। बभार मेघे तद्वर्णे बहुमानमतिं नृपः"। प्रीतिर्यथा विदुरस्य। (महाभारते। उद्यो० अ० ८८ श्लो० ३११४) "या प्रीतिः पुण्डरीकाक्ष! तवागमनकारणात्। सा किमाख्यायते तुभ्यमन्तरात्मासि देहिनाम्"। विरहो यथा गोपीनाम् (विष्णुपु०। अंशे ५। अ० १८। श्लो० १७) "गुरूणामग्रतो वक्तुं किं ब्रवीमि न नः क्षमम्। गुरवः किं करिष्यन्ति दग्धानां विरहाग्निना"। इतरविचिकित्सा यथा श्वेतद्वीपनिवासिनाम्। नारददर्शनेऽपि विम्नवृत्तिः यथा चोपमन्योः (महाभारते। अनुशा० अ० १४। श्लो० ७०७)। "अपि कीटपतङ्गो वा भवेयं शङ्कराज्ञया। न तु शक्र! त्वया दत्तं त्रैलोक्यमपि कामये"। गर्हिमख्यातो यथा यमस्य। (नृसिंहपुरा० अ० ८ श्लोक० १) "नरके पच्यमानस्तु यमेन परिभाषितः। किं त्वया नार्चितो देवः केशवः क्लेशनाशनः"। (विष्णुपु०। अंशे ३। अ० ७। श्लो० १०)। "स्वपुरुषमभिवीक्ष्य पाशहस्तम्। वदति यमः किल तस्य कर्णमूले। परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानाम्" तदर्थप्राणस्थितिर्यथा हनूमतः। तेनैवोक्तम् (वाल्मीकीये उत्तरकाण्डे। स० १०७, श्लो० २१२१)। "यावत् तव कथा लोके विचरिष्यति पावनी। तावत् स्थास्यामि मेदिन्यां तवाज्ञामनुपालयन्"। अथ वा हतसत्वानामपि नारदादीनां तदेकाराधनार्थं प्राणधारणम्। अतएव श्रुतिः। (नृसिंहतापिनी। खं० ६) "यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्चेति"। तदीयताभावस्तु वसोरुपरिचरस्य (महाभारते। शा०। अ० २२७। श्लो० १२७३८) "आत्मराज्यं धनं चैव कलत्रं वाहनं तथा। एतद्भागवतं सर्वमिति तत् प्रेक्षते सदा" इति। सर्वभूतेषु तद्भावो यथा प्रह्लादस्य प्रसिद्धः। उक्तञ्च तेनैव। (विष्णुपु०। अंशे १। अ० १९। श्लो० ५) "एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी। कर्त्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम्"। तदीयप्रातिकूल्यं यथा हन्तुमागतेऽपि भगवति भीष्मस्य। तेनैवोक्तम्। (महाभारते भीष्मप०। अ० ५८ श्लो० २६४) "एह्येहि देवेश! जगन्निवास! नमोऽस्तु ते शार्ङ्गगदासिपाणे!। प्रसह्य मां पातय लोकनाथ। रथादुदग्राद्भुतयोध्य संख्ये"। आदिपदादुद्धवाक्रूरादिचेष्टितान्यपि द्रष्टव्यानि। यद्यपि द्वेषविपक्षभावादत्यन्तभेद उक्तं तथापि तत्र रागलिङ्गत्वेनात्र च बहुभक्तिपरिशुद्धिलिङ्गतयेति विशेष इति। ननु स्वामिन्यनुरागिणां तदनुपहतारतम्यवत्सु द्वेषादयो भवन्ति तेऽपि किं लिङ्गानि नेत्याह" टी०। "द्वेषादयस्तु नैवम्" ४५ सू०। "तदसम्भवादेव। यथोक्तं भगवता द्वैपायनेन महाभारते अनुशा०। अ० १४९ पृ० १४६। श्लो० ७६९) "न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे" इति। शिशुपालस्य तु द्वेषात् स्मरणं ततः परा भक्तिस्ततो मुक्तिरित्येव क्रमः इति" टी०।

अत्रेदमवधेयम् शाण्डिल्यसूत्रादौ "भक्तेर्ज्ञानाङ्गत्वं" यदुक्तं तद् भक्तेः प्रशंसार्थं तत्त्वज्ञानेनाज्ञाननिवृत्तौ अज्ञानकार्यानुरागविशेषान्तःकरणवृत्तिरूपाया भक्तेः कुतस्तरां सम्भवोऽतो ज्ञानस्यैव भक्तिरङ्गम्। अतएव पात०सू० ईश्वरप्रणिधानात् योगसिद्धिरुक्ता "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगाः" क्रियायोगस्येश्वरप्रणिधानस्य योगाङ्गत्वमुक्तम् अतएव भक्तिर्ज्ञानाय कल्पते इति मुक्ताफलकर्त्ता वोपदेव उदाजहार। इयांस्तु भक्तौ रसास्वादः मुक्तौ सुखस्वरूपतेति।

तेन च मुक्ताफलग्रन्थे भक्तिलक्षणं तद्भेदाश्चाप्युक्ता यथा "तत्र विष्णुभक्तिलक्षणं भेदाश्च। "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्" मू० "यस्मात् कृष्ण एव कैवल्यप्रदः यद्वा तस्मात् उपायविशेषस्याविवक्षितत्वात्। केनापि विहितेन अविहितेन वा उपायेन साध्यसिद्धावभूतसामर्थ्येन, न तून्मादादिना कृष्णे सत्त्वोपाधौ मनश्च निवेशयेत् स्थिरीकुर्य्यात् लिङ्निर्देशस्याविवक्षितत्वात् उपायपूर्वं भगवति मनःस्थिरीकरणं भक्तिरिति लक्षणार्थः। न तावदस्यासम्भवः प्रह्लादादौ सुप्रसिद्धत्वात्। न च कर्मत्वयार्थविधिसिद्धार्थयोः भक्त्योरव्याप्तिः तयोरप्यन्तःकरणशुद्धिहेतुत्वेन मनोनिवेशहेतुत्वात्। नाप्युन्मादादावभक्तिभूतेऽतिव्याप्तिः तस्यानुपायत्वेन निरस्तत्वात्। नापि शुद्धायां भक्तौ उपायानिर्देशादुपायेनेति लक्षणेऽनन्तर्भूतमिति वाच्यम्। श्रौताभावेऽप्यानुमानिकस्य सम्भवात्। सा द्विधा विहिता अविहिता च। तत्र विहिता "देवानां गुणलिङ्गानामानुश्रविककर्मणाम्। सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या।

अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी । जरयत्याशु या कोषं निगीर्णमनलो यथा"। सा द्वेधा मिश्रा शुद्धा च। मिश्रा त्रेधा। कर्ममिश्रा कर्मज्ञानमिश्रा ज्ञानमिश्रा च। कर्ममिश्रापि त्रेधा। तामसी राजसी सात्त्विकी च तामसी च त्रेधा। हिंसार्था दम्भार्था मात्सर्य्यार्था च।"अभिसन्धाय यो हिंसां दम्भं मात्सर्य्यमेव वा। संरम्भी भिन्नदृग्भावमपि कुर्य्यात् स तामसः। राजसी त्रेधा। विषयार्थी यशोऽर्थी ऐश्वर्य्यार्थी च। "विषयानभिसन्धाय यश ऐश्वर्य्यमेव वा। अर्चायामर्चयेद् यो मां पृथग्भावः स राजसः। सात्त्विकी त्रेधा कर्मक्षयार्था विष्णुप्रीत्यर्था विधिसिद्ध्यर्था च। "कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्। यजेत् यष्टव्यमिति वा पृथग्भावः स सात्त्विकः"। कर्मज्ञानमिश्रा त्रेधा उत्तमा मध्यमाऽधमा च सत्त्वतारतम्यात्। तत्रोत्तमा "सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः। भूतानि भगवत्यात्मन्येष भागवतोत्तमः। मध्यमा "ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च। प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः"। अधमा "अर्चायामेव हरये पूजां यः श्रद्धयेहते। न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः"। ज्ञानमिश्रा "मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये। मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ। लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्। अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे! सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत। दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः। स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः। येनातिव्रज्य त्रिगुणान् मद्भावायोपपद्यते"। अविहिता चतुर्धा, कामजा द्वेषजा भयजा स्नेहजा च।"कामाद् द्वेषाद् भयात् स्नेहाद् यथा भक्त्येश्वरे मनः। आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः"। भक्त्यधिकारिणश्च तत्रोक्ता यथा "गोप्यः कामाद्भयात् कंसो द्वेषाच्चैद्यादयो नृपाः। सम्बन्धात् वृष्णयः स्नेहात् यूयं भक्त्या वयं विभोः"। सम्बन्धात् स्नेहाद्वृष्णयो यूयं चेत्येकम्। भक्त्या विहितया वयमित्यत्र विभागः। "निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु। तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम्। यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्। न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः। य एतान् मे पथो हित्वा भक्तिज्ञानक्रियात्मकान्। क्षुद्रान् कामान् चलैः प्राणैर्जुषन्तः संसरन्ति ते। ये स्वेऽधिकारे या निष्ठा स गुणः स प्रकीर्त्तितः"। एवं सति कर्ममिश्रा नव गृहस्थानाम्। कर्मज्ञानमिश्रास्तिस्रो वनस्थानाम्। ज्ञानमिश्रैका भिक्षूणाम्। शुद्धैका सर्वेषां उत्पन्नेऽनुरागे। उत्पाद्ये तु यथा संभवम्। अविहिताश्चतस्रो गोप्यादीनाम् एवमष्टादश भेदाः। "यावज्जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः। तावत् स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत। नैष्कर्म्यमप्यच्युतभाववर्जितम् न शोभते ज्ञानमलं निरञ्जनम्। कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम्"। विष्णुभक्त्यङ्गवर्गलक्षणं भेदाश्च तत्रोक्ता यथा "कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतः स्वभावात्। करोति यद् यत् सकलं परस्मै नारायणायेति समर्पयेत्तत्" इत्युपक्रमे स एकोनविंशतिधा। षट्त्रिंशद्वर्गः१। त्रिंशद्वर्गः२। षड्विंशतिवर्गः३। पञ्चविंशतिवर्गः४। चतुर्विंशतिवर्गः५। विंशतिवर्गः ६। एकोनविंशतिवर्गः७। अष्टादशवर्गः८। पञ्चदशवर्गः ९। त्रयोदशवर्गः १०। द्वादशवर्गः ११। एकादशवर्गः १२। दशवर्गः १३। नववर्गः १४। सप्तवर्गः १५। षड्वर्गः १६। पञ्चवर्गः १७। चतुर्वर्गः १८। त्रिवर्गः १९। एते च यथोत्तरमन्तरङ्गवर्गाः।

तत्र षट्त्रिंशद्वर्गः "तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम्। शाब्दे परे च निष्णातो ब्रह्मण्युपशमाश्रयम्। तत्र भागवतान् धर्मान् शिक्षेद्गुर्वात्मदैवतः। अमाययानुवृत्त्या च यैस्तुष्येदात्मदो हरिः। सर्वतो मनसोऽसङ्गमादौ सङ्गञ्च साधुषु। दयां मैत्रीं प्रश्रयञ्च भूतेष्वद्धा यथोचितम्। शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवम्। ब्रह्मचर्यमहिंसां च समत्वं द्वन्द्वसंज्ञयोः। सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतताम्। विविक्तचीरवसनं सन्तोषं येन केनचित्। श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि। मनोवाक्कायदण्डञ्च सत्यं शमदमावपि। श्रवणं कीर्त्तनं ध्यानं हरेरद्भुतकर्मणः। जन्मकर्मगुणानाञ्च तदर्थेऽखिलचेष्टितम्। इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम्। दारान् सुतान् गृहान् प्राणान् यत् परस्मै निवेदनम्। एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम्। परिचर्य्यां चोभयत्र महत्सु नृषु साधुषु। परस्परानुकथनं पावनं भगवद्यशः। मिथो रतिर्मिथस्तुष्टिः निवृत्तिर्मिथ आत्मनः। स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं

हरिम्। भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम्। क्वचिद्रुदन्त्यच्युतचिन्तया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः। नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः। इति भागवतान् धर्मान् शिक्षन् भक्त्या तदुत्थया। नारायणपरो मायामञ्जस्तरति दुस्तराम्" भाग० ११।३अ०।

त्रिंशद्वर्गः "सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः। अहिंसा ब्रह्मचर्य्यञ्च त्यागः स्वाध्याय आर्जवम्। सन्तोषः समदृक्सेवा ग्राम्येहोपरमः शनैः। नृणां विपर्य्ययेहेक्षा मौनमात्मविमर्शनम्। अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः। तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव!। श्रवणं कीर्त्तनं चास्य स्मरणं महतां गतेः। सेवेज्याऽवनतिर्दास्यं सख्यमात्मसमर्पणम्। नृणामयं परो धर्मः सर्वेषां समुदाहृतः। त्रिंशल्लक्षणवान् साक्षात् सर्वात्मा येन तुष्यति" भाग० ७।११अ०।

षड्विंशतिवर्गः। "हरौ गुरौ मयि भक्त्यानुवृत्त्या वितृष्णया द्वन्द्वतितिक्षया च। सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या। मत्कर्मभिर्मत्कथया च नित्यं मद्देवसङ्गाद्गुणकीर्त्तनान्मे। निर्वैरसाम्योपशमेन पुत्राः! जिहासया देहगेहात्मबुद्धेः। अध्यात्मयोगेन विविक्तसेवया प्राणेन्द्रियात्माभिजयेन सध्र्यक्। सच्छ्रद्धया ब्रह्मचर्य्येण शश्वदसंप्रमादेन यमेन वाचाम्। सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन। योगेन धृत्युद्यमसत्त्वयुक्तो लिङ्गं व्यपोहेत् कुशलोऽहमाख्यम्" भाग० ५।५अ०।

पञ्चविंशतिवर्गः "स्वधर्माचरणं शक्त्या विधर्माच्च निवर्त्तनम्। दैवलब्धेन सन्तोष आत्मविच्चरणार्चनम्। ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा। मितमेध्यादनं शश्वत् विविक्तक्षेमभावनम्। अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः। ब्रह्मचर्य्यं यमं शौचं स्वाध्यायः पुरुषार्चनम्। मौनं सदासनजयः स्थैर्य्यं प्राणजयः शनैः। प्रत्याहारश्चेन्द्रियाणां विषयान्मनसो हृदि। धिष्ण्यानामेकदेशे च मनसः प्राणधारणा। वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः। एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथे। बुद्ध्या युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः" भाग० ३ २८अ०।

चतुर्विंशतिवर्गः "मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनम्। परिचर्य्या स्तुतिः प्रह्वगुणकर्मानुकीर्त्तनम्। मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव!। सर्वलाभोपहरणं दास्येनात्मनिवेदनम्। मज्जन्मकर्मकथनं मम पर्वानुमोदनम्। गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः। यात्राबलिविधानञ्च सर्ववार्षिकपर्वसु। वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम्। ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः। उद्यानोपवनाक्रीड़पुरमन्दिरकर्मणि। संमार्जनोपलेपाभ्यां सेकमण्डलवर्त्तनैः। गृहशुश्रूषणं मह्यं दासवद्यदमायया। अमानित्वमदम्भित्वं कृतस्यापरिकीर्त्तनम्। अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितम्। यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः। तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते। मदर्चां संप्रतिष्ठाप्य मन्दिरं कारयेद्दृढम्। पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान्। पूजादीनां प्रवाहार्थं सदा पर्वस्वथान्वहम्। क्षेत्रापणपुरग्रामान् दत्त्वा मत्सार्ष्टितामियात्। प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयम्। पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात्" भाग० ११ २७अ०।

विंशतिवर्गः "सेवितेनानिमित्तेन स्वधर्मेण महीयसा। क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः। मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवन्दनैः। भूतेषु मद्भावनया सत्त्वेनासङ्गमेन च। महतां बहुमानेन दीनानामनुकम्पया। मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च। आध्यात्मिकानुश्रवणान्नामसंकीर्त्तनाच्च मे। आर्जवेनार्य्यसङ्गेन निरहङ्क्रियया तथा। मद्धर्मीचरणैरेतैः परिसंशुद्ध आशयः। पुरुषस्याञ्जसाभ्येति श्रुतमात्रगुणं हि माम्" भाग० ३।२९अ०।

एकोनविंशतिवर्गः "सच्छ्रद्धया भगवद्धर्मचर्य्यया जिज्ञासयाऽऽध्यात्मिकयोगनिष्ठया। योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया च। अर्थेन्द्रियारामसगोष्ठ्यतृष्णया तत्सम्मतानामपरिग्रहेण। विविक्तरुच्या परितोष आत्मन् विना हरेर्गुणपीयूषपानात्। अहिंसया पारमहंस्यचर्य्यया स्मृत्या मुकुन्दाचरिताग्र्यसीधुना। यमैरकामैर्नियमैरनिन्दया निरीहया द्वन्द्वतितिक्षया च। हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेन विजृम्भमाणया। भक्त्या ह्यसङ्गः सदसत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चाञ्जसा रतिः" भाग० ४।२२अ०।

अष्टादशवर्गः "मयि भावेन सत्येन मत्कथाश्रवणेन च। सर्वभूतसमत्वेन निर्वैरेणाप्रसङ्गतः। ब्रह्मचर्य्येण मौ-

नेन स्वधर्म्मेण महीयसा। यदृच्छयोपस्थितेन सन्तुष्टो मितभुक् मुनिः। विविक्तशरणः शान्तो मैत्रः करुण आत्मवान्। सानुबन्धे च देहेऽस्मिन्न कुर्व्वन्नसदाग्रहम्। ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च। निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः। उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक्। मुक्तलिङ्गं सदाभासमसति प्रतिपद्यते। सतो बन्धुमसच्चक्षुः सर्व्वानुस्यूतमद्वयम्” भाग०३ २७अ०।

पञ्चदशवर्गः “श्रद्धामृतकथायां मे शश्वन्मदनुकीर्त्तनम्। परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम। आदरः परिचर्य्यायां सर्व्वाङ्गैरभिवन्दनम्। मद्भक्तपूजाभ्यधिका सर्व्वभूतेषु मन्मतिः। मदर्थेष्वङ्गचेष्टा च वचसा मद्गुणेरणम्। मय्यर्पणञ्च मनसः सर्व्वकामविवर्ज्जनम्। मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च। इष्टं दत्तं हुतं भुक्तं मदर्थं यद्व्रतं तपः। एवं धर्म्मैर्मनुष्याणामुद्धवात्मनिवेदनम्। मयि सञ्जायते भक्तिः कोऽन्यो-ऽर्थोऽस्यावशिष्यते” भाग० ११।१९अ०।

त्रयोदशवर्गः “कुर्य्यात् सर्व्वाणि कर्म्माणि मदर्थं शनकैः स्मरन्। मय्यर्पितमनश्चित्तो मद्धर्म्मात्ममनोरतिः। देशान् पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान्। देवासुरमनुष्येषु मद्भक्ताचरितानि च। पृथक्सत्रेण वा मह्यं पर्व्वयात्रामहोत्सवान्। कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः। मामेव सर्व्वभूतेषु बहिरन्तरपावृतम्। ईक्षेतात्मनि चात्मानं यथाखममलाशयः। इति सर्व्वाणि भूतानि मद्भावेन महाद्युते!। सभाजयन् मन्यमानो ज्ञानं केवलमाश्रितः। ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिङ्गके। अक्रूरे क्रूरके चैव समदृक् पण्डितो मतः। विसृज्य स्मयमानान् स्वान् दृशं व्रीड़ां च दैहिकीम्। प्रणमेद्दण्डवद्भूमावाश्वचाण्डालगोखरम्। यावत् सर्व्वेषु भूतेषु मद्भावो नोपजायते। तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः। नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात्। स्पर्द्धासूयातिरस्काराः साहङ्कारा वियन्ति हि” भाग०११।२९अ०।

द्वादशवर्गः “गुरुशुश्रूषया भक्त्या सर्व्वलाभार्पणेन च। सङ्गेन साधुभक्तानामीश्वराराधनेन च। श्रद्धया तत्कथायाञ्च कीर्त्तनैर्गुणकर्म्मणाम्। तत्पादाम्बुरुहध्यानात् तल्लिङ्गेक्षार्हणादिभिः। हरिः सर्व्वेषु भूतेषु भगवानास्त ईश्वरः। इति भूतानि मनसा कामैस्तैः साधु मानयेत्। एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे। वासुदेवे भगवति यया संलभते रतिम्। निशम्य कर्म्माणि गुणानतुल्यान् वीर्य्याणि लीलातनुभिः कृतानि। यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति रौति नृत्यति। यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम्। मुहुः श्वसन् वक्ति हरे! जगत्पते! नारायणेत्यात्ममतिर्गतत्रपः। तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः। निर्द्दग्धबीजानुशयो महीयान् भक्तिप्रयोगेण समेत्यधोक्षजम्” भाग० ७ ७।

एकादशवर्गः “स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुकीर्त्तने। करौ हरेर्मन्दिरमार्ज्जनादिषु श्रुती चकाराच्युतसत्कथोदये। मुकुन्दलिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गमम्। घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसना तदर्पिता। पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने। कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः” भाग०९ ४।

दशवर्गः “आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ। तस्यर्त्ते यत्क्षणो नीत उत्तमश्लोकवार्त्तया। तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत। न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे। श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः। न यत्कर्णपथोपेतो जातु नाम गदाग्रजः। बिले बतोरुक्रमविक्रमान् न ये शृण्वतः कर्णपुटे नरस्य। जिह्वाऽसती दार्द्दुरिकेव सूत! न चोपगायत्युरुगायगाथाः। भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम्। शावौ करौ नो कुरुतः सपर्य्यां हरेर्लसत्काञ्चनकङ्कणौ वा। बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये। पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ। जीवञ्छवो भागवताङ्घ्रिरेणुं न जातु मर्त्त्योऽभिलभेत यस्तु। श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसञ्छवो यस्तु न वेद गन्धम्। तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः। न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः” भाग०२ ३अ०।

नववर्गः “श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्। अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्। इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा। क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्” भाग०७।५अ०।

सप्तवर्गः "अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना। तीव्रया मयि भक्त्या च श्रुतसम्भृतया चिरम्। ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा। तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना। प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम्। तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः" भाग०३।२७अ०।

षड्वर्गः "वाणी गुणानुकथने, श्रवणौ कथायां, हस्तौ च कर्मसु,मनस्तव पादयोर्नः। स्मृत्यां, शिरस्तव निवासजगत्! प्रणामे, दृष्टिः सतां दर्शनेऽस्तु भगवत्तनूनाम्" भाग० १०।११ अ०।

पञ्चवर्गः "शृण्वतां गदतां शश्वदर्चतां त्वाभिवन्दताम्। नृणां संवदतामन्तर्हृदि भास्यमलात्मनाम्" भाग०१०।८६अ०।

चतुर्वर्गः "तस्मादेकेन मनसा भगवान् सात्वताम्पतिः। श्रोतव्यः कीर्त्तितव्यश्च ध्येयः पूज्यश्च नित्यदा" भाग० १।२ अ०।

त्रिवर्गः "तस्माद्भारत! सर्वात्मा भगवान् हरिरीश्वरः। श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यश्चेच्छताऽभयम्" भाग०२।१अ० "तस्मात् सर्वात्मना राजन्! हरिः सर्वत्र सर्वदा। श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यो भगवान्नृणाम्" भाग०२।२अ० पुनर्वचनं त्रिवर्गस्यान्तरङ्गत्वख्यापनार्थम्"।

"भज इत्येष वै धातुः सेवायां परिकीर्त्तितः। तस्मात् सेवा बुधैः प्रोक्ता भक्तिः साधनभूयसी" गारुडे २३१अ०।

अथ विशेषलक्षणानि। गौतमीयतन्त्रे "देवतायाञ्च मन्त्रे च तथा मन्त्रप्रदे गुरौ। भक्तिरष्टविधा यस्य तस्य कृष्णः प्रसीदति। तद्भक्तजनवात्सल्यं१ पूजायाञ्चानुमोदनम्२। सुमना अर्चयेन्नित्यं३ तदर्थे दम्भवर्जनम्४। तत्कथाश्रवणे रागः५ तदर्थे चाङ्गविक्रिया६। तदनुस्मरणं७ नित्यं यस्तन्नाम्नोपजीवति८। भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते। स मुनिः सत्यवादी च कीर्त्तिमान् स भवेन्नरः"। पाद्मे कार्त्तिकमाहात्म्ये यमधूम्रकेशसंवादे। "श्रवणं कीर्त्तनं पूजा सर्वकर्मार्पणं स्तुतिः। परिचर्या नमस्कारः प्रेम स्वात्मार्पणं हरौ"। तत्रैवोत्तरे शिवपार्वतीसंवादे "आद्यन्तु वैष्णवं प्रोक्तं शङ्खचक्राङ्कनं हरेः। धारणञ्चोर्द्ध्वपुण्ड्राणां तन्मन्त्राणां परिग्रहः। अर्चनञ्च जपो ध्यानं तन्नामस्मरणं तथा। कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम्। तत्पादोदकसेवा च तन्निवेदितभोजनम्। तदीयानाञ्च संसेवा द्वादशीव्रतनिष्ठता। तुलसीरोपणं विष्णोर्देवदेवस्य शार्ङ्गिणः। भक्तिः षोडशधा प्रोक्ता भवबन्धविमुक्तये"। किञ्च। "दर्शनं भगवन्मूर्त्तेः स्पर्शनं क्षेत्रसेवनम्। आघ्राणं धूपशेषादेर्निर्माल्यस्य च धारणम्। नृत्यं भगवदग्रे च तथा वीणादिवादनम्। कृष्णलीलाद्यभिनयः श्रीभागवतसेवनम्। पद्माक्षमालादिधृतिरेकादश्यादिजागरः। प्रासादरचनाद्यन्यज्ज्ञेयं शास्त्रानुसारतः। लिखिता भगवद्धर्मा भक्तानां लक्षणानि च। तानि ज्ञेयानि सर्वाणि भक्तेर्वै लक्षणानि हि। तेषु ज्ञेयानि गौणानि मुख्यानि च विवेकिभिः। बहिरङ्गान्तरङ्गाणि प्रेमसिद्धौ च तानि यत्। भेदास्तु विविधा भक्तेर्भक्तभावादिभेदतः। मुक्ताफलादिग्रन्थेभ्यो ज्ञेयास्तल्लिखनैरलम्" "प्रेमभक्तौ च सिद्धायां सर्वेऽर्थाः सेवकाः स्वयम्। भगवांश्चातिवश्यः स्याल्लिख्यतेऽस्याः सुलक्षणम्। अथ प्रेमभक्तिलक्षणम्। नारदपञ्चरात्रे "अनन्यममता विष्णौ ममता प्रेमसङ्गता। भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः। प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यकं परम्। सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम्। चिह्नानि प्रेमसम्पत्तेर्बाह्यान्याभ्यन्तराणि च। अथ प्रेमसम्पत्तिचिह्नानि ७स्कन्धे प्रह्लादस्य बालाननुशासने। "निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि" इत्यादि ४६२६ पृ० दर्शितम्।

एकादशे च कवियोगेन्द्रोत्तरे "शृण्वन्, सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके। गीतानि नामानि तदर्थकानि गायन् विलज्जो विचरेदसङ्गः। एवंव्रतः स्वप्रियनामकीर्त्त्या जातानुरागो द्रुतचित्त उच्चैः। हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः"। श्रीभगवदुद्धवसंवादे च "कथं विना रोमहर्षं द्रवता चेतसा विना। विनानन्दाश्रुकलया शुध्येद्भक्त्या विनाऽऽशयः। वाग्गद्गदा द्रवते यस्य चित्तं रोदित्यभीक्ष्णं हसति क्वचिच्च। विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति। यथोक्तभक्त्यशक्तौ तु भगवच्चरणाम्बुजम्। शरणागतभावेन तदभीतिसमाश्रयेत्" हरिभक्तिविलासे ११विलासः। उत्तमभक्तेर्लक्षणं यथा "अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्। आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा"। तथा नारदपञ्चरात्रे। "सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम्। हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते" भाग० ३स्क० च।सा उत्तमा भक्तिः षड्विधा यथा "क्लेशघ्नी

शुभदा मोक्षलघुताकृत् सुदुर्लभा। सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षिणी च सा”। तत्रास्याः क्लेशघ्नत्वम् क्लेशस्तु पापं तद्बीजमविद्या चेति ते त्रिधा”। शुभदत्वं यथा “शुभानि प्रीणनं सर्वजगतामनुरक्तता। सद्गुणाः सुखमित्यादीन्याख्यातानि मनीषिभिः”। मोक्षलघुताकृद् यथा “मनागेव प्ररूढ़ायां हृदये भगवद्रतौ। पुरुषार्थास्तु चत्वारस्तृणायन्ते समन्ततः”। सुदुर्लभा यथा “साधनौघैरनासङ्गैरलभ्या सुचिरादपि। हरिणा चाशुदेयेति द्विधा सा स्यात् सुदुर्लभा। सान्द्रानन्दविशेषात्मा यथा “ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः। नैति भक्तिसुखाम्भोधेः परमाणुतुलामपि”। श्रीकृष्णाकर्षिणी यथा “कृत्वा हरिं प्रेमभाजं प्रियवर्गसमन्वितम्। भक्तिर्वशीकरोतीति श्रीकृष्णाकर्षिणी च सा”। सा उत्तमा भक्तिस्त्रिधा यथा “सा भक्तिः साधनं भावः प्रेमा चेति त्रिधोदिता”। साधनभक्तिर्यथा। कृतिसाध्या भवेत् साध्यभावा सा साधनाभिधा। नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता”। भावभक्तिर्यथा “शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक्। रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते”। प्रेमभक्तिर्यथा “सम्यङ्मसृणितस्वान्तो ममतातिशयाङ्कितः। भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्यते” भक्तिरसामृतसिन्धौ पूर्वविभागः।

भक्तियोग पुं॰ भक्तिरूपो योगश्चित्तैकाग्रतासाधनम् उपायभेदः। भक्तिरूपे योगे भक्तियोगस्य सामात् श्रेष्ठत्वम् सुखायाससाध्यत्वात् गीतायामुक्तं यथा

“एवं सततयुक्ता ये भक्तास्त्वां पर्य्युपासते। ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः” मू॰। “द्वितीयप्रभृतिष्वध्यायेषु विभूत्यन्तेषु परमात्मनो ब्रह्मणोऽक्षरस्य विध्वस्तसर्वविशेषणस्योपासनमुक्तं सर्वयोगैश्वर्य्यसर्वज्ञानशक्तिमत्सत्त्वोपाधेरीश्वरस्य तव चोपासनम्। तत्र तत्रोक्तं विश्वरूपाध्याये तु समस्तजगदात्मरूपं विश्वरूपं त्वदीयं दर्शितमुपासनार्थमेव त्वया तच्च दर्शयित्वोक्तवानसि मत्कर्मकृदित्यादिना अहमनयोरुभयोः पक्षयोर्विशिष्टतरबुभुत्सया त्वां पृच्छामीति अर्जुन उवाच। एवमिति। एवं सततयुक्ता नैरन्तर्य्येण भगवत्कर्मादौ यथोक्तेऽर्थे समाहिताः सन्तः प्रवृत्ता इत्यर्थः ये भक्ताः अनन्यशरणाः सन्तस्त्वां यथादर्शितं विश्वरूपमर्य्युपासते ध्यायन्ति ये चाप्यक्षरमिति ये चापि त्यक्तसर्वैषणाः सन्न्यस्तसर्वकर्माणो यथाविशेषितं ब्रह्माक्षरं निरस्तसर्वोपाधित्वादव्यक्तमकरणगोचरं यद्धि लोके करणगोचरन्तद्व्यक्तमुच्यते अञ्जेर्धातोस्तत्कर्मकत्वादिदं त्वक्षरं तद्विपरीतं शिष्टैश्चोच्यमानैर्विशेषणैर्विशिष्टं तद्ये चापि पर्य्युपासते तेषामुभयेषां मध्ये के योगवित्तमाः के अतिशयेन योगविद इत्यर्थः” भा॰।

“श्रीभगवानुवाच। मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते। श्रद्धया परयोपेतास्ते मे युक्ततमा मताः” मू॰। “ये त्वक्षरोपासकाः सम्यग्दर्शिनो निवृत्तैषणास्ते तावत्तिष्ठन्तु तान् प्रति यद्वक्तव्यं तदुपरिष्टाद्वक्ष्यामः ये त्वितरे मयीति। मयि विश्वरूपे परमेश्वरे आवेश्य समाधाय मनः, ये भक्ताः सन्तो मां सर्वयोगेश्वराणामधीश्वरं सर्वज्ञं विमुक्तरागादिक्लेशतिमिरदृष्टिं नित्ययुक्ता अतीतानन्तराध्यायान्तोक्तश्लोकार्थन्यायेन सततयुक्ताः सन्त उपासते श्रद्धया परया प्रकृष्टया उपेताः ते मम मताः अभिप्रेता युक्ततमा इति नैरन्तर्य्येण हि ते मच्चित्ततयाहोरात्रमतिवाहयन्ति अतो युक्तं तान् प्रति युक्ततमा इति वक्तुम्” भा॰। ‘ये त्वक्षरमनिर्द्देश्यमव्यक्तं पर्य्युपासते। सर्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुवम्”। “किमितरे युक्ततमा न भवन्ति न, किन्तु तान् प्रति यद्वक्तव्यन्तत् शृणु ये तु अक्षरमनिर्द्देश्यमव्यक्तमव्यक्तत्वादशब्दगोचरमिति न निर्द्देष्टुं शक्यते अतोऽनिर्द्देश्यमव्यक्तं न केनापि प्रमाणेन व्यज्यत इत्यव्यक्तं पर्य्युपासते परिसमन्तादुपासते उपासनं नाम यथाशास्त्रमुपास्यस्य विषयीकरणेन सामीप्यमुपगम्य तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं यदासनन्तदुपासनमाचक्षते। अक्षरस्य विशेषणमाह सर्वत्रगं व्योमवद्व्यापि अचिन्त्यं चाव्यक्तत्वादचिन्त्यं यद्धि करणगोचरं तन्मनसापि चिन्त्यं तद्विपरीतत्वादचिन्त्यमक्षरं कूटस्थं दृश्यमानगुणमन्तर्दोषं वस्तु कूटं कूटरूपं कूटसाक्ष्यमित्यादौ कूटशब्दः प्रसिद्धो लोके तथा चाविद्याद्यनेकसंसारबीजमन्तर्दोषं मायाव्याकृतादिशब्दवाच्यतया “मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्” “मम माया दुरत्यया” इत्यादौ प्रसिद्धं यत्तत् कूटं तस्मिन् कूटे स्थितं तदध्यक्षतया। अथ वा राशिरिव स्थितं कूटस्थमत एवाचलं यस्मादचलं तस्मात् ध्रुवं नित्यमित्यर्थः” भा॰।

"संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः। ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः" मू०। "संनियम्येति। संनियम्य सम्यक् नियम्य संहृत्य इन्द्रियग्रामं इन्द्रियसमुदायं सर्वत्र सर्वस्मिन् काले समबुद्धयः समा तुल्या बुद्धिर्येषामिष्टानिष्टप्राप्तौ ते समबुद्धयः ते समबुद्धयः ते ये एवंविधाः ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः न तेषां वक्तव्यं किञ्चित् मां ते प्राप्नुवन्ति इति ज्ञानित्वादात्मैव मे मतमित्युक्तत्वात् न हि भगवत्स्वरूपाणां सतां युक्ततमत्वमयुक्ततमत्वं वा वाच्यम्" भा०।

"क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्। अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते" मू०। "किन्तु क्लेशोऽधिकतरो यद्यपि मत्कर्मादिपराणां क्लेशोऽधिकस्तथापि अधिकतरस्त्वक्षरात्मनाम्। परमार्थदर्शिनां देहाभिमानपरित्यागनिमित्तः अव्यक्तासक्तचेतसामव्यक्ते आसक्तं चित्तं येषां ते अव्यक्तासक्तचेतसाम् अव्यक्ता हि यस्मात् या गतिरक्षरात्मिका दुःखं देहवद्भिर्देहाभिमानवद्भिरवाप्यते अतः क्लेशोऽधिकतरः" भा०। "ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः। अनन्येनैव योगेन मां ध्यायन्त उपासते" मू०। "अक्षरोपासकानां यद्वर्त्तनं तदुपरिष्टाद् वक्ष्यामः ये त्विति। ये तु सर्वाणि कर्माणि मयीश्वरे सन्न्यस्य मत्परा अहं परो येषां ते मत्पराः सन्तः अनन्येनैव अविद्यमानमन्यदालम्बनं विश्वरूपं देवमात्मानं मुक्त्वा यस्य सोऽनन्यस्तेनानन्येनैव केवलेन योगेन समाधिना मां ध्यायन्तश्चिन्तयन्त उपासते" भा०। "तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात्। भवामि न चिरात् पार्थ! मय्यावेशितचेतसाम्"। "तेषां किमित्याह तेषामिति। तेषां मदुपासनैकपराणाम् अहमीश्वरः समुद्धर्त्ता कुत इत्याह मृत्युसंसारसागरात् मृत्युयुक्तः संसारो मृत्युसंसारः स एव सागरवत् सागरो दुस्तरत्वात् तस्मान्मृत्युसंसारसागरादहं तेषां समुद्धर्त्ता भवामि न चिरात् किं तर्हि क्षिप्रमेव हे पार्थ! मय्यावेशितचेतसां मयि विश्वरूपे आवेशितं समाहितं चेतो येषां ते मय्यावेशितचेतसस्तेषाम्" भा०।

"मय्येव मन आधत्स्व मयि बुद्धिं निवेशय। निवसिष्यसि मय्येव अत ऊर्द्ध्वं न संशयः। अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्। अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय!। अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव। मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि। अथैतदप्यशक्तोऽसि कर्त्तुं मद्योगमाश्रितः। सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्। श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते। ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्। अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च। निर्ममो निरहङ्कारः समदुःखसुखः क्षमी। सन्तुष्टः सततं योगी यतात्मा दृढ़निश्चयः। मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः। यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः। हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः। अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः। सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः। यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति। शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः। समः शत्रौ च मित्रे च तथा मानापमानयोः। शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः। तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्। अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः। ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते। श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः" मू० गीता० १२अ०।

भक्तिरस पु० भक्तिः ईश्वरविषया रतिरेव रसः। तत्स्थायिभावके रसभेदे "विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः। स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः। एषः कृष्णरतिस्थायिभावो भक्तिरसो भवेत्" इति भक्तिरसामृतसिन्धुः। मुक्ताफले तट्टीकायाञ्च भक्तेरसत्वम् व्यवस्थापितं यथा "भक्तिरसस्यैव हास्यशृङ्गारकरुणरौद्रभयानकबीभत्सशान्ताद्भुतवीररूपेणानुभवात् व्यासादिभिः वर्णितस्य विष्णोर्विष्णुभक्तानां वा चरितस्य नवरसात्मकस्य श्रवणादिना जनितश्चमत्कारो हि भक्तिरसः" मुक्ता०। "भक्तिर्विहिताऽविहिता च सैव परां प्रकर्षरेखामापन्ना रसः। यदाहुः। "भावा एवातिसम्पन्नाः प्रयान्ति रसतामसी" इति। भक्तिरसानुभावाच्च भक्तः यथा स्वप्रानुभवात् स्वप्न इत्युच्यते सचानुभवो नवधा हास्यादिभङ्गिभेदेन हास्यादय एव हि भगवति प्रयुज्यमानाः "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेदिति" भक्तिलक्षणाक्रान्तत्वात् भक्तिरसपदवीमासादयन्तीति भावः। हास्यादिलक्षण तु वक्ष्यते। ते चामी नवापि सुखः स्व मोहात्मकत्वे गुणव्यतिकरोद्भवाः तथा हि। प्रथमे त्रयो रजोमूलाः, मध्यास्तु तमोमूलाः, चरमे सत्त्वमूलाः। रतिहासादयो हि रजःप्रभृतीनां विकारा इत्युक्तमेकादशस्य पञ्चविंशाध्याये। तत्रापि प्रथमे त्रिषु-

क्रमात् सत्त्वसंमिश्रं तमःसंमिश्रं सत्त्वतमःसंमिश्रं च रजोमूलम्। मध्येषु रजोमिश्रं सत्त्वमिश्रं रजः सत्त्वमिश्रञ्च तमः। चरमेषु तमोमिश्रं रजोमिश्रं रजस्तमोमिश्रं च सत्त्वम् हेयाभिधानक्रमेण चैष क्रमः"। व्याक्षेपपूर्वकं तस्या रसरूपत्वं तत्र व्यवस्थापितं यथा "तस्माद्विभावादिरससामग्रीविरहान्न भक्तौ रसत्वम् अत एवायमन्यैः "एवं भक्तावपि वाच्यमिति" वदद्भिः सत्यादिष्टः। अत उत्तरं पठति। व्याधादिभिरिति। वर्णितस्य चरित्रस्य विष्णुभक्ताः गोप्यादयः श्रवणादिनेत्यादिशब्दाद्दर्शनकीर्त्तनस्मरणाभिनयात् चमत्कारः सामाजिकानां हि यस्मादेव सामग्रीको भक्तिरसस्वादनपक्षवनीय इत्यर्थः। तत्रैषा सामग्री केनाप्युपायेन मनोनिवेशः स्थायी चरित्रश्रवणादय उद्दीपनविभावा विष्णुर्विष्णुभक्ताश्चालम्बनम् अनुभावास्तु स्तम्भादयो वक्ष्यमाणा यथायोग्यं धृत्यादिका व्यभिचारिणश्च। उपायस्तु रतिस्थामादिः। कविभिर्वर्णितस्येत्यनेन महाकविप्रबन्धनमध्यमाणेष्वेव रसव्यवहारो नान्यत्रेऽत्युक्तम्। एवमेवैतत् अनुकार्येषु हि जानकीरामभद्रादिषु रत्यादिमात्रं चमत्कारश्च यद्यपि शृङ्गारादौ कश्चिदस्ति। तथापि तस्य भयानकादावनुपलम्भान्न तत्र रसव्यवहारः। अत एव च "तानि चेन्नाट्यकाव्ययोः" इत्यादीनि विशेषणानि। अभिनयैरुपदर्श्यमानादपि सन्दर्भैः समर्प्यमाणो रसोऽतिस्वदते अतएवोक्तं "कविवागभिनेयश्च तदुपायो द्विधेष्यते। वस्तुशक्तिमहिम्ना तु प्रथमोऽत्र विशिष्यते" इति। यत्त्वभिनवगुप्तहेमचन्द्राभ्याम् "एवं भक्तावपि वाच्यम्" इत्युक्तं तदसत् रसत्वस्य दर्शितत्वात्। सामग्रीसद्भावेऽपि प्रत्याख्यानमरोचकताभावशरणम्। न च संगच्छमानोप्ययमसर्वविषयत्वात् रसत्वात् भ्रष्टतामिति चोद्यं तथा सति सर्वरसोच्छेदापातात्। तथा हि श्रोत्रियजरन्मीमांसकादयो हि नाट्यमण्डपान्तःप्रविष्टा अपि चमत्काराभावात् कौश्यप्राया एव। एवं प्रशान्तब्रह्मचारिप्रभृतयः शृङ्गाररसास्वादे बालानां गाढरागाणाञ्च शान्तरसचर्वणानभिज्ञत्वम्। अननुभूतशोकस्पर्शानां च करुणरसास्वादावसरे पाषाणप्रख्यत्वम् तस्मात् सवासनस्यैव रसचर्वणेति भक्तिरसदर्शनम्"।

भक्तिल पु॰ भक्तिं भर्त्तीं लाति ला–क। साधुहये शब्दच॰

भक्तिसूत्र न॰ "अथातो भक्तिजिज्ञासेत्यादिके शाण्डिल्यमुनिप्रणीते सूत्रात्मकग्रन्थे।

भक्ष अदने चु॰उभ॰सक॰सेट्। भक्षयति–ते अबभक्षत्–त तस्य भ्वादित्वमपीत्येके भक्षति अभक्षीत्। उभयपदित्वमप्येतन्ये भंक्षते अभक्षिष्ट।

भक्ष पु॰ भक्ष–भावे कर्मणि वा घञ्। १अशने २भक्ष्ये च। "वषट् कर्त्तुः प्रथमभक्षः" श्रुतिः उञ्छा॰ अन्तोदात्तताऽस्य "गावः सोमस्य प्रथमस्य भक्षाः" सि॰कौ॰ धृतश्रुतिः।

भक्षक त्रि॰ भक्ष–ण्वुल् भक्षणकारके अमरः।

भक्षिका स्त्री भक्ष अहादौ नस्ये भावे ण्वुच्। भक्षणाडादौ "भवानिक्षुभक्षिकामर्हति कथं इक्षुभक्षिकां मे धारयति" सि॰कौ॰।

भक्ष(क्ष्य)कार पु॰ भ(क्ष)क्ष्यं वा करोति कृ–अण्। भक्ष्यपिष्टकादिविक्रयोपजीविनि आपूपिके भरतः।

भक्षटक पु॰ भक्ष–बा॰अटन् संज्ञायां कन्। गोक्षुरे राजनि॰

भक्षण न॰ भक्ष–भावे ल्युट्। कठिनद्रव्यस्य गलाधःकरणव्यापारे भक्षणप्रकारः सुश्रुतोक्तः आहारशब्दे ८६७ पृष्ठादौ दृश्यः। [राजनि॰।

भक्ष(क्ष्य)पत्रा स्त्री भक्ष्यं पत्रमस्याः। ताम्बूलीलतायाम्

भक्षालि पु॰ भक्षाणामालिर्यत्र। देशभेदे ततो भवार्थे वुञ्। भाक्षालिक तद्देशभवे त्रि॰।

भक्षिवस् त्रि॰ भक्ष–क्वसु वेदे न द्वित्वम्। भक्षणे अथर्व॰ ६।१८। लोके तु बिभक्षिवस् इत्येव त्रि॰ स्त्रियां ङीप् बिभक्षुषी।

भक्ष्य त्रि॰ भक्ष–कर्मणि ण्यत्। १अदनीये 'कठिनं विशदमव्यवहार्यं भक्ष्यम् महाभाष्योक्ते त्रिविक्रावयवे कठिने २खाद्ये च "भक्ष्येण मिश्रीकरणम्" पा॰ मिश्रीकरणद्वारा सामर्थ्यम् इत॰। गुडधानाः।

भक्ष्यालाबू स्त्री.कर्म॰। राजालाबूलतायां राजनि॰।

भग पु॰न॰ भज+घ। १सूर्य्ये २अणिमाद्यष्टविधैश्वर्य्ये ३वीर्य्ये ४यशसि ५श्रियां ६ज्ञाने ७वैराग्ये ८योनौ ९इच्छायाम् १०माहात्म्ये ११यत्ने मेदि॰ १२धर्मे १३मोक्षे १४सौभाग्ये १५कान्तौ १६चन्द्रे च। ज्योतिषोक्ते योनिनक्षत्रदेवते १७पूर्वफल्गुनीनक्षत्रे १८गुह्यमुष्कयोर्मध्यस्थाने च पु॰। आद्युदात्ततास्य ।।१९धने २०पदे च न॰निघण्टुः। भगयन्त्रशब्दे दृश्यम्। स्त्रीचिह्नस्य लक्षणभेदादिकं यथा "विस्तीर्णञ्च गभीरञ्च द्विविधं भगलक्षणम्" "कूर्मपृष्ठं गजस्कन्धं पद्मगन्धं सुकोमलम्। अकोमलं सुविस्तीर्णं पश्यैते च भगोत्तमाः। 'शीतलं निम्नमत्युष्णं मोलिद्धासदृशं परम्' रतिमञ्जरी।

भगघ्न पु० भगं तन्नेत्रं हन्ति हन–टक्। १महादेवे "नमस्ते त्रिपुरघ्नाय भगघ्नाय नमो नमः" भा०द्रो०२०२अ०। तस्य दक्षयज्ञकाले तन्नेत्रहारित्वात् तथात्वम्।

भगण पु० ६त०। १द्वादशराशीनां समूहे २तद्भोगकाले च। यथोक्तं सू० सि० "पश्चाद्व्रजन्तोऽतिजवान्नक्षत्रैः सततं ग्रहाः। जीयमानास्तु लम्बन्ते तुल्यमेव स्वमार्गगाः। प्रागगतित्वमतस्तेषां भगणैः प्रत्यहं गतिः। परिणाहवशाद्भिन्ना तद्वशाद्भानि भुञ्जते। शीघ्रगस्तान्यथाल्पेन कालेन महताल्पगः। तेषां तु परिवर्त्तेन पौष्णान्ते भगणः स्मृतः। विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते। तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते" सू०सि०। "शीघ्रगतिर्ग्रहस्तानि भान्यल्पेन कालेन भुनक्त्यल्पगतिर्ग्रहो बहुकालेन भुनक्ति, तुल्यराश्यादिभोगो मन्दशीघ्रगतिग्रहयोस्तुल्यकालेन न भवतीति विशेषार्थः। तेषां राशीनां परिवर्त्तेन भ्रमणेन। तुकारात् ग्रहादिगतिभोगजनितेन भगणः प्राग्मुक्तः। क्रान्तिवृत्ते द्वादशराशीनां सत्त्वात् तद्भोगेन चक्रभोगसमाप्तेर्यत् स्थानमारभ्य चलितो ग्रहः पुनस्तत् स्थानमायाति स चक्रभोगः परिवर्त्तसञ्ज्ञोऽपि द्वादशराशिभोगाद्भगण इत्यर्थः। ननु क्रान्तिवृत्ते सर्वप्रदेशेभ्यः परिवर्त्तसम्भवादत्र कः परिवर्त्तादिभूतः प्रदेश इत्यत आह पौष्णान्त इति। सृष्ट्यादौ ब्रह्मणा क्रान्तिवृत्ते रेवतीयोगतारासन्नप्रदेशे सर्वग्रहाणां निवेशितत्वात् तदवधितो ग्रहचलनाच्च पौष्णस्य रेवतीयोगताराया अन्ते निकटे प्रदेशे तथा च रेवतीयोगतारासन्नापिमस्थानमेवाद्यन्तावधिभूतमिति भावः" रङ्गनाथः। [२६ अ०।

भगदत्त पु० प्राग्ज्योतिषपुराधीशे नरकासुरपुत्रभेदे कालिकापु०

भगदा स्त्री स्कन्दानुचरमातृभेदे भा०श०४७अ०। [४२अ०।

भगदेव पु० भगेन दीव्यति दिव–अच्। कामुके भा० आनु०

भगदैवत न० भगो योनिः दैवतं यस्य। पूर्वफल्गुनीनक्षत्रे तस्या योनिदेवताकत्वात् तथात्वम्। अगु पापशब्दे दृश्यम्। तच्च वृहस्पतिजन्मनक्षत्रं यथोक्तं ज्यो०त० "विशाखानल३तोयाग्नि२४वैश्वदेव२२ भगदैवतम्११। पुष्या पौष्णौ२७ यमः२ सर्पा९ जन्मभान्यर्कतः क्रमात्"। [इशत्रम्।

भगनन्दन पु० ६त०। ऐश्वर्येनानन्दयुक्ते विष्णौ भगहनृशब्दे

भगनन्दा स्त्री कुमारानुचरमातृभेदे भा० श० ४७ अ०।

भगनेत्रघ्न पु० भगनेत्रं हन्ति दक्षयज्ञकाले हन–टक्। महादेवे भा० अनु० १४९अ०। भगनेत्रापहादयोऽप्यत्र।

भगन्दर पु० भगं गुह्यमुष्कमध्यस्थानं दारयति दृ–णिच्–खच् मुम् खचि ह्रस्वः। स्वनामख्याते रोगभेदे। भावप्र० तन्निदाननिरुक्त्यादिकमुक्तं यथा

"अथ भगन्दरस्य पूर्वरूपसहितं स्वरूपमाह। "कटीकपालयोस्तोददाहकण्डूरुजादयः। भवन्ति पूर्वरूपाणि भविष्यति भगन्दरे। गुदस्य द्व्यङ्गुले क्षेत्रे, पार्श्वतः पीडकार्त्तिकृत्। भिन्नो भगन्दरो ज्ञेयः स च पञ्चविधो भवेत्"। आर्त्तिकृत् पीडाकृत्। पञ्चविधः वातिकपैत्तिकश्लैष्मिकसान्निपातिकशल्यजभेदैः। अथ भगन्दरशब्दस्य निरुक्तिमाह भोजः "भगन्दरः समन्ताच्च गुदं वस्तिं तथैव च। भगवद्दारयेद्यस्मात् तस्मादेष भगन्दरः"। भजन्त्यनेनेति भगो मेहनम्। भजन्त्यस्मिन्निति भगं योनिः। अत्र भगशब्देन द्वयमपि कथ्यते। भगवत् योनिवत्। अथ वातिकं शतपोनकसंज्ञं भगन्दरमाह। "कषायरूक्षैरतिकोपितोऽनिलस्त्वपानदेशे पिडकां करोति याम्। उपेक्षणात्तामुपैति दारुणं रुजा च भित्त्वारुणफेनवाहिनीम्। तत्रागमो मूत्रपुरीषरेतसां व्रणैरनेकैः शतपोनकं वदेत्"। दारुणम् अतिदारुणरुक्। व्रणैरनेकैः सूक्ष्ममुखैः। शतपोनकं शतपोनकश्चालनी तत्तुल्यम्। अथ पैत्तिकमुष्ट्रग्रीवसंज्ञमाह "प्रकोपणैः पित्तमतिप्रकोपितं करोति रक्तां पिडकां गुदे गताम्। तदाशुपाकां हिमपूतिवाहिनीं भगन्दरं चोष्ट्रशिरोधरं वदेत्"। आशुपाकां हि मपूतिवाहिनीं शीघ्रपाकासृग्दुर्गन्धवाहिनीं च। तदा भगन्दरमुष्ट्रशिरोधरं वदेत्। उष्ट्रग्रीवसंज्ञा च पिडकागलेन वक्रतयोष्ट्रग्रीवाकत्वेन। अथ श्लैष्मिकं परिस्राविसंज्ञमाह। "कण्डूयनो घनस्रावी कठिनो मन्दवेदनः। श्वेतावभासः कफजः परिस्रावी भगन्दरः"। कठिनः पिडकावस्थायाम्। परिस्रावी निरन्तरस्रावशीलः। अथ सान्निपातिकं शम्बूकावर्त्तसंज्ञमाह। "बहुवर्णरुजास्रावा पिडका गोस्तनोपमा। शम्बूकावर्त्तगतिकः शम्बूकावर्त्तकोमतः" बहुवर्णरुजास्रावा बहुशब्दो वर्णादिभिः प्रत्येकं संबध्यते गतिः स्रावमार्गः। अथ शल्यजमुन्मार्गसंज्ञमाह। "क्षतादुगतिः पायुगता विवर्द्धते ह्युपेक्षणात् स्युः क्रमयो विदार्य्य ते। प्रकुर्वते मार्गमनेकधासुखैर्व्रणैस्तमुन्मार्गभगन्दरं वदेत्"। क्षतात् कण्टककादिना नखेन कण्डूयनादिना वाऽभिघातात्। गतिः स्रावः उन्मार्गभन्दरम् एतस्य तिर्य्यक्कृतमार्गैः हरी-

-चादिनिर्गमाद्दुन्नगंधस्य"। कष्टसाध्यमसाध्यञ्चाह "घोराः साधयितुं दुःखा सर्व एव भगन्दराः। तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च विशेषतः। वातमूत्रपुरीषाणि क्रमयश्च क्रमयस्तथा। भगन्दरात् स्रवन्तस्तु नाशयन्ति तमातुरम्"।

भगभक्त त्रि० भगे धने भक्तः। धनरते ऋ० १।२४।५।

भगभक्षक पु० भगेन तद्व्यापारोपपादनेन भक्षति भक्ष-ण्वुल्। (कोटना)ख्याते नायकयोर्मेलके।

भगल त्रि० भगं तद्व्यापारं लाति-ला-क। भगव्यापार चालके ततः चतुर्थ्यां वुञ्। भागलक तन्निहत्तादौ त्रि०।

भगशास्त्र न० भगव्यापारबोधकं शास्त्रम् शा०त०। कामशास्त्रे

भगवत् पु० भगम् "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गनेत्युक्तम् अस्त्यस्य मतुप् मस्य वः। १ऐश्वर्यादियुक्ते परमेश्वरे २बुद्धे अमरः तस्य षड्भिज्ञत्वात् भगरूपैश्वर्यादियोगाच्च तथात्वम्। अस्य संबोधने भगो इत्येव अजादौ तस्य विसर्गस्य लोपः। ३दुर्गायां स्त्री ङीप्। "सेव्यते या सुरैः सर्वैस्ताश्चैव भजते यतः। धातुर्भजेति सेवायां भगवत्येव सा स्मृता" देवीपु० ४५ अ०।

भगवद्गीता स्त्री २त०। भीष्मपर्वान्तर्गते अष्टादशाध्यायात्मके कर्मयोगज्ञानयोगभक्तियोगसूचके ग्रन्थे।

भगवद्दृश्य त्रि० भगवानिव दृश्यते दृश-कर्मणि क्यप्। भगवत्तुल्ये। "श्रुतं मे भगवद्दृश्येष्वस्तरति शोकमात्मवित्" छा० उ०। [विष्णौ "भगहा भगनन्दनः" विष्णुस०।

भगहन् पु० भगमैश्वर्यं संहारकाले हन्ति-हन-क्विप्।

भगाङ्कुर पु० भगे गुह्यस्थानेऽङ्कुर इव। अर्शोरोगे शब्दार्थक०

भगाधान न० ६त०। १माहात्म्याधाने २सौभाग्ये च हरिवं० १२४ अ०।

भगाल न० भज-कालन् न्यङ्क्वा० कुत्वम्। १नरमस्तके २नरकपाले उज्ज्वलः। ततः अस्त्यर्थे इनि। भगालिन् कपालधारके शिवे त्रिका०। भगालशब्दे परे द्विगौ पूर्वपदप्रकृतिस्वरः पञ्चभगालः। द्विगुभिन्ने तत्पुरुषे प्रकृतिस्वरत्वेन अन्तोदात्तता च।

भगिनी स्त्री भगं यत्नः पित्रादीनां द्रव्यादानेऽस्त्यस्याः इनि ङीप्। १सोदरायाम् स्वसरि अमरः। "भगिनीशुल्कं सोदर्याणाम्" दायभागः। २स्त्रीमात्रे च शब्दच०। २मात्यालितस्त्रीमात्रेऽपि तेन सर्वस्त्रीणां तत्पदेन संबोधनं विहितम्। "परपत्नी च या स्त्री स्यादसम्बन्धा च योनितः। तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति च" मनुः।

भगीरथ पु० सूर्यवंश्ये नृपभेदे "असमञ्जसस्तु तनयो ह्यंशुमान्नाम विश्रुतः। तस्य पुत्रो दिलीपस्तु दिलीपात्तु भगीरथः। येन भागीरथी गङ्गा तपः कृत्वाऽवतारिता" मत्स्यपु० १२ अ०। [श्वेता० उ०।

भगेश पु० ६त०। ऐश्वर्यादेरीश्वरे "धर्मावहं पापनुदं भगेशम्"

भगोल पु० भानां नक्षत्राणां गोलाकारः पदार्थः। राशिचक्रे तस्य भ्रमणभेदादिकं सू० सि० उक्तं यथा

"सव्यं भ्रमति देवानामपसव्यं सुरद्विषाम्। उपरिष्टाद् भगोलोऽयं व्यक्षे पश्चान्मुखः सदा" सू० सि०। "अयं प्रत्यक्षो भगोलो नक्षत्राधिष्ठितमूर्तगोलो देवानां मेरोरुत्तराग्रवर्तिनां सव्यम् पूर्वादिक्रममार्गेणेत्यर्थः। भ्रमति भ्रमं परिवर्तं करोतीत्यर्थः। दैत्यानां मेरोर्दक्षिणाग्रवर्तिनामपसव्यं पूर्वादिदिग्व्युत्क्रममार्गेण। पूर्वोत्तरपश्चिमदक्षिणक्रमेणेत्यर्थः। नक्षत्राधिष्ठितगोलो भ्रमति। व्यक्षे निरक्षदेशेषु जात्यभिप्रायेणैकवचनम्। उपरिष्टान्मस्तकोर्ध्वमध्यभागो भगोलः पश्चान्मुखः पश्चिमदिगभिमुखः सदा नित्यं परिभ्रमति भगोलस्य ध्रुवमध्यस्थत्वेन भ्रमणात् तयोस्तत्र क्षितिजवृत्तस्थत्वाच्च" रङ्ग०। तस्य प्रत्यक्षदर्शनार्थं सि० शि० भगोलबन्धप्रकारमाह यथा

"इदानीं भगोलबन्धमाह। "याम्योत्तरक्षितिजवत् सुदृढं विदध्यादाधारवृत्तयुगलं ध्रुवयष्टिबद्धम्। षष्ट्यङ्कमात्मसममण्डलवत् तृतीयं नाड्याह्वयं च विषुवद्वलयं तदेव" सू०। इदानीं क्रान्तिवृत्तमाह। "क्रान्तिवृत्तं विधेयं षडङ्काङ्कं भ्रमत्यत्र भानुश्च भार्धे कुभा भानुतः। क्रान्तिपातः प्रतीपं तथा प्रस्फुटाः क्षेपपाताश्च तत्स्थानकान्यङ्कयेत्"। इदानीं क्रान्तिवृत्तस्य निवेशनमाह। "क्रान्तिपाते च पाताङ्कषट्कान्तरे नाडिकावृत्तलग्नम् विदध्यादिदम्। पाततः प्राक्त्रिभे सिद्धभागैरुदग् दक्षिणे तैश्च भागैस्त्रिभागेऽपरे"। इदानीं विमण्डलमाह। "नाडिकामण्डले क्रान्तिवृत्ते तथा क्षेपवृत्तं न्यसेत्। क्षेपवृत्तं तु राश्यङ्कितं तत्र च क्षेपपातेषु चिह्नानि कृत्वोक्तवत्। क्रान्तिवृत्तस्य विक्षेपवृत्तस्य च क्षेपपाते समन्ते च कृत्वा युतिम्। क्षेपपातात्ततः षड्भ त्रिभे क्षेपभागैः स्फुटैः सौम्ययाम्ये न्यसेत्, शीघ्रकर्णेन भक्ताश्चिभज्यागुणाः स्युः परक्षेपभामा ग्रहाणां स्फुटाः। क्षेपवृत्तानि चत्वारि विदध्यात् पृथक् खेटवृत्ते भ्रमन्तीन्दुपूर्वा ग्रहाः"।

इदानीं क्रान्तिं विक्षेपं चाह । "नाडिकामण्डलात् तिर्यगल्पापमः क्रान्तिवृत्तावधिः क्रान्तिवृत्ताच्छरः । क्षेपवृत्तावधिस्तिर्यगेवं स्फुटो नाडिकावृत्तखेटान्तरालेऽपमः" । इदानीं क्रान्तिपातानां विषुवत्क्रान्तिवलययोः सम्पातः क्रान्तिपातः स्यात् । तद्भगणाः सौरोक्ता व्यस्ता अयुतत्रयं कल्पे । 'अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम् । तत्पक्षे तद्भगणाः कल्पे गोऽङ्गर्तुनन्दगोचन्द्राः । तत् संजातं पातं क्षिप्त्वा खेटेऽपमः साध्यः । क्रान्तिवशाच्चरमुदयाश्चरदलकग्नापमे ततः क्षेप्यः" । इदानीं विक्षेपपातानाह । "एवं क्रान्तिविमण्डलसंपाताः क्षेपपाताः स्युः । चन्द्रादीनां व्यस्ताः क्षेपानयने तु ते योज्याः । मन्दस्फुटो द्राक् प्रतिमण्डले हि ग्रहो भ्रमत्यत्र च तस्य पातः । पातेन युक्ताद्गणितागतेन मन्दस्फुटात् खेचरतः शरोऽस्मात् । पातेऽथ वा शीघ्रफलं विलोमं कृत्वा स्फुटात् तेन युताच्छरोऽतः । चन्द्रस्य कक्षावलये हि पातः स्फुटाद्विधोर्मध्यमपातयुक्तात्" । इदानीं ज्ञशुक्रयोर्विशेषमाह "ये चात्र पातभगणाः पठितास्तु भृग्वोस्ते शीघ्रकेन्द्रभगणैरधिका यतः स्युः । स्पष्टाः सुखार्थमुदिताश्चलकेन्द्रयुक्तौ पातौ तयोः पठितचक्रभवौ विधेयौ । चलाद्विशोध्यः किल केन्द्रसिद्ध्यै सपातद्युचरस्तु योज्यः । अतश्चलात् पातयुताज्ज्ञभृग्वोः सुधीभिराद्यैः शरसिद्धिरुक्ता । स्फुटो न शीघ्रोच्चयुतौ स्फुटौ तयोः पातौ भगोले स्फुट एव पातः" । इदानीं ग्रहगोले विशेषमाह । "ग्रहस्य गोले कथितापमण्डलं प्रकल्प्य कक्षावलयं यथोदितम् । निबध्य शीघ्रप्रतिवृत्तमस्मिन् विमण्डलं तत्पठितैः शरांशैः । मध्येऽत्र पातो द्युसदां ज्ञभृग्वोः स्वशीघ्रकेन्द्रेण युतस्तु देयः" । इदानीमहोरात्रवृत्तमाह । "इष्टचितक्रान्तितुल्येऽन्तरे सर्वतो नाडिकावृत्तादहोरात्रवृत्तद्वयम् । तत्र बद्धा घटीनां च षष्ट्याङ्कवेदृयस्य विष्कम्भखण्डं द्युजीवा मता । इदानीमन्यदाह । "अथ कल्प्यामेषाद्या अनुलोमं क्रान्तिपाताङ्कात् । एषां मेषादीनां द्युरात्रवृत्तानि बध्नीयात् । नाडीवृत्तोभयतस्त्रीणि त्रीणि क्रमोत्क्रमात् तानि" । इदानीमस्योपसंहारमाह "एष भगोलः कथितः खेचरगोलोऽयमेव विज्ञेयः । चलापमण्डले वा कक्षाधारैरधश्च तस्यैव । शन्यादीनां कक्षा बध्नीयादूर्ध्वनाभजाबामाः । बद्धा भगोलमेवं यष्ट्यां यष्टिं स्वगोलनाभिकान्तः । प्रक्षिप्य भ्रमयेत् तं यष्ट्याधारं स्थिरौ खद्वगोलौ" सि० शि० ।

भग्न त्रि० भन्ज-क्त । १क्षतावयवभेदे २रोगभेदे हेमच० । तन्निदानभेदादिकं सुश्रुते उक्तं यथा

"अथातो भग्नानां निदानं व्याख्यास्यामः । पतनपीडनप्रहाराक्षेपणव्यालमृगदशनप्रभृतिभिरभिघातविशेषैरनेकविधमस्थ्नां भङ्गमुपदिशन्ति तत्तु भङ्गजातमनुसार्य्यमाणं द्विविधमेवोत्पद्यते सन्धिमुक्तं काण्डभग्नञ्च । तत्र सन्धिमुक्तमुत्पिष्टं विश्लिष्टं विवर्त्तितमवक्षिप्तमतिक्षिप्तं तिर्य्यक्क्षिप्तमिति षड्विधम् । तत्र प्रसारणाकुञ्चनविवर्त्तनाक्षेपणाऽशक्तिरुग्रुजत्वं स्पर्शासहत्वं चेति सामान्यं सन्धिमुक्तलक्षणमुक्तम् । विशेषेणोत्पिष्टे सन्धावुभयतः शोफो वेदनाप्रादुर्भावो विशेषतश्च नानाप्रकारा वेदना रात्रौ प्रादुर्भवन्ति । विश्लिष्टेऽल्पशोफो वेदनासातत्यं सन्धिविक्रिया च । विवर्त्तिते तु सन्धिपार्श्वापगमनाद्विषमाङ्गता वेदना च । अवक्षिप्ते सन्धिविश्लेषस्तीव्ररुजत्वञ्च । अतिक्षिप्ते द्वयोः सन्ध्यस्थ्नोरतिक्रान्तता वेदना च । तिर्य्यक्क्षिप्ते त्वेकास्थिपार्श्वापगमनमत्यर्थं वेदना चेति । काण्डभग्नमत ऊर्द्ध्वं वक्ष्यामः कर्कटकमश्वकर्णं चूर्णितं पिच्चितमस्थिच्छल्लितं काण्डभग्नं मज्जानुगतमतिपातितं वक्रं छिन्नं पाटितं स्फुटितमिति द्वादशविधम् । श्वयथुबाहुल्यं स्पन्दनविवर्त्तनस्पर्शासहिष्णुत्वमवपीड्यमाने शब्दः स्रस्ताङ्गता विविधवेदनाप्रादुर्भावः सर्वास्ववस्थासु न शर्म्मलाभ इति समासेन काण्डभग्नलक्षणमुक्तम् । विशेषतस्तु संमूढमुभयतोऽस्थिमध्यभग्नं ग्रन्थिरिवोन्नतं कर्कटकम् । चूर्णितमस्थि तत्तु शब्दस्पर्शाभ्यां बोद्धव्यम् । पिच्चितं पृथुताङ्गतमनल्पशोफम् । पार्श्वयोरस्थिडीनोद्गतमस्थिच्छल्लितम् । वेल्लत प्रकम्पमानं काण्डभग्नत्वम् । अस्थ्यवयवोऽस्थिमध्यमनुप्रविश्य मज्जानमुद्वहतीति मज्जानुगतम् । अस्थि निःशेषतश्छिन्नमतिपतितम् । आभुग्नमविमुक्तास्थि वक्रम् । अन्यतरपार्श्वावशिष्टं छिन्नम् । पाटितमणु बहुविदारितं वेदनावच्च । शूकपूर्णमिवाध्मातं विपुलं विस्फुटीकृतं स्फुटितमिति । तेषु चूर्णितच्छिन्नातिपातितमज्जानुगतानि कृच्छ्रसाध्यानि कृशवृद्धबालानां क्षतक्षीणकुष्ठश्वासिनां सन्ध्युपगतञ्चेति । भवन्ति चात्र "भिन्नं कपालं कट्यान्तु सन्धिमुक्तं तथा च्युतम् । जघनं प्रतिपिष्टञ्च वर्जयेत् तच्चिकित्सकः । असंश्लिष्टं कपालन्तु ललाटे चूर्णितञ्च यत् । भग्नं

समानान्तरे मज्जे पृष्ठे मूर्ध्नि च वर्जयेत् । आदितो यच्च दुर्ज्जातमस्थिसन्धिरथापि वा । सम्यक् संहितमप्यस्थि दुर्न्यासाद् दुर्निबन्धनात् । सङ्क्षोभाद्वापि यद्गच्छेद्विक्रियां तत्तु वर्जयेत् । मध्यस्य वयसोऽवस्थास्तिस्रो याः परिकीर्त्तिताः । तत्र स्थिरो भवेज्जन्तुरुपक्रान्तो विजानता । तरुणान्यस्थीनि नम्यन्ते भज्यन्ते नलकानि तु । कपालानि विभिद्यन्ते स्फुटन्ति रुचकानि च" ।

भग्नपाद् न० ज्यो०त० उक्ते कृत्तिकादिनक्षत्रेष्वंशस्य नक्षत्रस्य तृतीयपादस्य आद्यपादस्य वा राश्यन्तरघटकता तादृशे नक्षत्रे । "पुनर्वसूत्तराषाढ़ाकृत्तिकोत्तरफल्गुनी । पूर्वभद्रा विशाखा च षड़ेते पुष्कराः स्मृताः भग्नपादत्वसंयोगात्" ।

भग्नपृष्ठ त्रि० भग्नं पृष्ठं यस्य । १त्रुटितपृष्ठके २सम्मुखे च त्रिका० ।

भग्नप्रक्रम पु० भग्नः प्रक्रमो यत्र । काव्यगते वाक्यदोषभेदे २७६३।६४ पृ० दोषशब्दे दृश्यम् । तदुदाहरणं सा०द० "एवमुक्तो मन्त्रिमुख्यै रावणः प्रत्यभाषत" अत्र वचधातुना प्रक्रान्तं प्रतिवचनमपि तेनैव वक्तुमुचितं तेन "रावणः प्रत्यवोचतेति" पाठो युक्तः । एवञ्च सति न कथितपदत्वदोषः तस्योद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयत्वात् इह हि वचनप्रतिवचनयोरुद्देश्यप्रतिनिर्देश्यत्वम् । यथा "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" इत्यत्र । यदि पदान्तरेण स एवार्थः प्रतिपाद्यते तदान्योऽर्थ इव प्रतिभासमानः प्रतीतिं स्थगयति । यथा वा । "ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् । सिद्धञ्चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः" । अत्र "अस्मा इति" इदमा प्रक्रान्तस्य तेनैव तत्समानार्थाभ्यामेतददःशब्दाभ्यां वा परामर्शो युक्तो न तच्छब्देन । यथा वा । उदन्वच्छिन्ना भूः स च पतिरपां योजनशतम्" । अत्र "मिता भूः पत्यापां स च पतिरपामिति" युक्तः पाठः । एवं "यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्त्तितुं वा । निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः" अत्र सप्तमीस्थितमित्युचितम् । अत्राद्ययोः प्रकृतिविषयः प्रक्रमभेदः । तृतीये पर्य्यायविषयः चतुर्थे प्रत्ययविषयः" ।

भग्नसन्धि पु० भग्नः सन्धिरत्र । रोगभेदे गरुड़पु० १५७अ० ।

भग्नसन्धिक न० भग्नः सन्धिः सन्धानमवयवयोजनमत्र कप् । तक्रे (घोल) शब्दच० ।

भग्नात्मन् पु० ६ब० । चन्द्रे शब्दचन्द्रिका । तस्य दक्षशापात् पदादिक्रमेण एकैकस्याविच्छेदेन भग्नदेहत्वात् तथात्वम् ।

भग्नाश त्रि० ६त० । १हताशे इष्टविषयाया इच्छायाः प्रतिघातयुक्ते ।

भग्नी स्त्री भगिनी+पृषो० । भगिन्यां द्विरूपकोषः ।

भङ्कारी स्त्री भमित्यव्यक्तशब्दं करोति कृ—अण् गौरा०ङीष् । भम्भरालिकायां दंशे त्रिका० ।

भङ्ग पु० भन्ज—भावादौ घञ् । १तरङ्गे अमरः २पराजये । ३खण्डे ४रोगभेदे मेदि० ५कौटिल्ये ६भये ७पत्ररचनाभेदे हेम० । ८गमने ९जलनिर्गमे च अजयपालः १०मातुलान्याम्, अमरः । ११शणाख्ये १२गञ्जे त्रिवृतायां (तेउड़ी) १३विजयायाञ्च (भाङ) स्त्री । १४रोगमात्रे पु० राजनि० ।

भङ्गकार पु० अविक्षितो नृपस्य १पुत्रभेदे भा० आ० ९४अ० । २सत्राजित्पुत्रभेदे हरिवं ३८ अ० ।

भङ्गवासा स्त्री भङ्गे सति वासः सौरभं यस्याः । हरिद्रायां शब्दरत्ना० तस्याः पेषणे एव वासनावत्त्वात्तथात्वम् ।

भङ्गसार्थ त्रि० भङ्गस्तद्युतः सार्थः मायायुतत्वात् समयोजनः । कुटिले हारा० । [रज'व

भङ्गाकट न० भङ्गाया रजः भङ्गा+रजसि कटच् । भङ्गौघे ।

भङ्गान पुंस्त्री भङ्गेन तरङ्गेण अनिति अन—अच् । (भाङ्गन) मत्स्यभेदे शब्दमा० स्त्रियां जातित्वात् ङीष् ।

भङ्गारी स्त्री भमित्यव्यक्तं गिरति गॄ—अण् गौरा० ङीष् । दंशे त्रिकाण्डे पाठान्तरम् ।

भङ्गासन पु० नृपभेदे तत्कथा भा० अनु० १२अ० ।

भङ्गि(ङ्गी) स्त्री भन्ज—इन् न्यङ्क्वा० कुत्वम् वा ङीप् । १विच्छेदे २कौटिल्ये ३विन्यासे ४कल्लोले ५भेदे ६व्याजे च ।

भङ्गिमन् पु० भङ्ग+वा० स्वार्थे इमनिच् । भङ्ग्याम् ।

भङ्गुर त्रि० भन्ज—घुरच् । १स्वयं भञ्जनशीले जटा० । २कुटिले ३नदीनां वक्रे च शब्दमा० । ४प्रियङ्गौ ५अतिविषायाम् च (आतइच्) स्त्री राजनि० ।

भङ्ग्य न० भङ्गानां भवनं क्षेत्रं तमर्हति वा यत् । भङ्गाभवनयोग्ये क्षेत्रे २भङ्गार्हे त्रि० ।

भचक्र न० भानां नक्षत्राणां राशीनां वा चक्रम् । १राशिचक्रे २नक्षत्रचक्रे च "भ्रमावर्तो भचक्रेऽस्मिन् भुवो नाभौ व्यवस्थितः । आराचक्रे त्विन्दुभौमौ शुक्रजीवशनैश्चराः । राहुः केतुरगस्त्यश्च नक्षत्राण्यथ राशयः । यदा दिक्षु च चाष्टासु मेरोर्भूगोलकोद्भवा । छाया भवेत्तदा रात्रिः स्यात्तु तद्विरहाद्दिनम् । सूर्य्येन्दोरुपरागस्तु गोलकच्छायया भवेत् । अन्योन्ययोस्तयोरेव छाययोरेव चार·

च्यात् । पाण्डवोत्थौ तु जायेते तस्मात् पूर्वपश्चिमौ । तत्र पुण्यफलान्नागः ततो राक्षोस्तु विष्णुना" वह्निपु० । अधिकं मनोरमङ्गे हययम् ।

भज भागे पृथक्करणे सेवायाञ्च भ्वा० उभ० सक० अनिट् । भजति-ते अभाक्षीत् अभक्त बभाज भेजतुः भेजे । [ति

भज पाके दाने च चु० उ० सक० सेट् । भाजयति-ते अबीभजत्

भञ्ज दीप्तौ चु० उभ० सक० सेट् इदित् । भञ्जयति-ते अबभञ्जत्-त

भजमान त्रि० भज-शानच् । १न्यायागतद्रव्यादौ २विभाजके ३सेवके च । सात्वतो यदुवंश्ये कौसल्यागर्भजाते ४पुत्रभेदे पु० हरिवं० ३८अ० ।

भजि पु० भज-भावनिर्द्देशे इन् । १भजधातौ । इन् । सात्वतो यदुवंश्ये २पुत्रभेदे भाग० ९।२४।४श्लो० । हरिवं० ३८ अ० । भजिन् इति पाठान्तरम् तत्रार्थे

भजेन्य त्रि० भज-वा० कर्मणि एन्य । भजनीये भाग० ५।१७।२०

भजेरथ पु० राजभेदे भा० आ० १।६०२ ।

भञ्जनक पु० मुखरोगभेदे "वक्त्रं वक्रं भवेद्यस्य दन्तभङ्गश्च जायते । कफवाततो व्याधिः स भञ्जनकसंज्ञितः" माधवकरः ।

भञ्जनागिरि पु० कृत० । किंपुरुषा० टीका० । पर्वतभेदे

भञ्जर पु० भन्ज-बा० अर । देवकुलोद्भवे वृक्षे त्रिका० ।

भञ्जा स्त्री अन्नपूर्णायाम् रुद्रयामले ।

भट भृतौ कर्ममूल्यग्रहणे भ्वा० पर० सक० सेट् भटति । अभाटीत्-अभटीत् । यो भाटयित्वा शकटं नीत्वा चान्यत्र गच्छति । भाटं न दद्यात् दाप्योऽसावरूढस्यापि भाटकम्" स्मृतिः ।

भट भाषणे भ्वा० पर० सक० सेट् । भटति अभा(भ)टीत् ।

भट पु० भट-अच् । १योद्धरि अमरः "तद्भटचातुरीतुरी" नैष० ।२म्लेच्छभेदे हेम० ३शौरे ४नीचभेदे ५रात्रिचरे च मेदि० ६इन्द्रवारुणयाम् (राखालशशा) स्त्री रत्ना० ।

भटित्र न० भट-इत्र । शूलपक्वे मांसादौ (काबाब) अमरः ।

भट्ट पु० भट-तन् । स्तुतिपाठकेऽसिद्धे (भाट) १जातिभेदे "वैश्यायां शूद्रवीर्य्येण पुमानेको बभूव ह । स भट्टो वावदूकश्च सर्वेषां स्तुतिपाठकः" ब्रह्मवै० ब्रह्मख० ७अ० "क्षत्रियाद्विप्रकन्यायां भट्टो जातोऽनुवाचकः" । तेन द्विविधा जातिः । २स्वामिनि, ३वेदाभिज्ञे ४पण्डिते च । भट्टश्च कुमारिलभट्टः मीमांसकभेदः तन्मतं च १०१ पृ० दर्शितम् । द्विमतान्तं मीमांसाभाष्ये दर्शितं यथा "स च प्रत्ययादिवर्ज्जितेन आर्थेन इत्यादि शब्देन च-र्गमुद्दिश्य पुरुषं प्रति विधीयते । तथाहि यजेत-इत्यत्र यजेत्यंशद्वयं यजिधातुः प्रत्ययश्च । प्रत्ययेऽप्यंशद्वयमाख्यातत्वं लिङ्त्वञ्च । तत्राख्यातत्वं दशलकारसाधारणं, लिङ्त्वं पुनर्लिङ्मात्रे । उभाभ्यामप्यंशाभ्यां भावनैवोच्यते । भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः । सा द्विधा—शाब्दी आर्थी चेति । तत्र पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः शाब्दी भावना । सा च लिङंशेनोच्यते लिङ्श्रवणेऽयं मां प्रवर्त्तयति मत्प्रवृत्त्यनुकूलव्यापारवानिति नियमेन प्रतीतेः । यद्यस्माच्छब्दान्नियतं प्रतीयते तत् तस्य वाच्यं गामानयेत्यस्मिन् वाक्ये यथा गोशब्दस्य गोत्वम् । स च व्यापारविशेषो लौकिकवाक्ये पुरुषाभिप्रायविशेषः वैदिकवाक्येषु पुरुषाभावात् लिङादिशब्दनिष्ठ एव । अतएव शाब्दी भावनेति व्यवह्रियते । सा च भावनांशत्रयमपेक्षते—साध्यं साधनमितिकर्त्तव्यताञ्च । किं भावयेत् ? केन भावयेत् ? कथं भावयेत् ?—इति तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेता आर्थी भावना साध्यत्वेनान्वेति, एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः सङ्ख्यादीनामेकप्रत्ययगम्यत्वेऽप्ययोग्यत्वान्न साध्यत्वेनान्वयः । साधनाकाङ्क्षायां लिङादिज्ञानं करणत्वेनान्वेति, तस्य च करणत्वं न भावनोत्पादकत्वेन तत्पूर्व्वमपि तस्याः शब्दे सत्त्वात् किन्तु भावनाज्ञापकत्वेन शब्दभावनाभाव्यनिर्वर्त्तकत्वेन वा । इतिकर्त्तव्यताकाङ्क्षायामर्थवादज्ञाप्यप्राशस्त्यमितिकर्त्तव्यत्वेनान्वेति । प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थी भावना । सा चाख्यातत्वांशवाच्या, आख्यातसामान्यस्य व्यापारवाचित्वात् । साप्यंशत्रयमपेक्षते साध्यं साधनमितिकर्त्तव्यताञ्च । किं भावयेत् ? केन भावयेत् ? कथं भावयेत् ? इति । तत्र साध्याकाङ्क्षायां स्वर्गादिफलं साध्यत्वेनान्वेति । साधनाकाङ्क्षायां यागादिः करणत्वेनान्वेति, इतिकर्त्तव्यताकाङ्क्षायां प्रयाजाद्यङ्गजातमितिकर्त्तव्यत्वेनान्वेति" ।

भट्टाचार्य्य पु० भट्टस्तुतातभट्टश्च आचार्य्य उदयनाचार्य्यश्च तौ तुल्यतया तन्मताभिज्ञतया वाऽस्त्यस्य । तुतातभट्टेन उदयनाचार्य्येण च तुल्ये २तयोर्मताभिज्ञे च । इन्दुः । एतयोः द्वि० व० । "वार्त्तिकानां निबन्धाय भट्टाचार्य्यौ भविष्यतः" ।

भट्टार त्रि० भट्टं स्वामित्वमर्हति अर्ह अण् । १पूज्ये

मिश्रा०। मूर्खे पुं० स्वार्थे क। पूज्ये त्रि० जटा०। नाट्योक्तौ नृपे संज्ञायां कन्। देवे तपोधने पुं० मेदि० अमरः। "सखे! वायुनिमित्ताः पाशास्तदद्य भट्टारकवारे कथमेतान् दन्तैः स्पृशामि" हितो०।

भट्टि पुं० १द्वाविंशतिसर्गात्मके महाकाव्यभेदे तस्य जयमङ्गलेन श्रीधरस्वामिसूनो महाब्राह्मणस्य महावैयाकरणस्य भट्टेः कृतिरित्युक्तं भरतमल्लिकेन भर्तृहरिणा कृतमित्युक्तं तच्चिन्त्यं "काव्यमिदं विहितं मया वलभ्यां श्रीधरसेननरेन्द्रपालितायाम्" तत्र द्वाविंशसर्गश्लोके उक्तेः न भर्तृहरिकृतत्वम् भर्तृहरेरुज्जयिनीवासव्यत्वेन तत्पतित्वेन च नृपान्तरराजधानीवासव्यत्वोक्तेरनुचितत्वात्।

भट्टिनी स्त्री भट्टं स्वामित्वमस्यास्ति इनि ङीप्। नाट्योक्तौ १अकृताभिषेकायां राज्ञः स्त्रियाम् अमरः। २विप्रभार्य्यायाम् मेदि०।

भट्टोजि पुं० सिद्धान्तकौमुदीग्रन्थकौस्तुभादिग्रन्थकारके दीक्षितोपनामके वैयाकरणभेदे। [वमथ्ये।

भड परिभाषणे भ्वा०आ०सक०सेट् इदित्। भण्डते अभण्डिष्ट

भड कल्याणभाषणे चु० उ० सक० सेट् इदित्। भण्डयति–ते अबभण्डत्–त। प्रतारणे च भण्डयति प्रतारको मुग्धं धनदानाङ्गीकारेण, सनिन्दोपलम्भे परिहासे च उणा० सू० भडिभण्ड्योः पृथगनिर्देशात् अयमिदिद्भिन्नोऽपि।

भड पु० भडि–अच्। वर्णसङ्करभेदे "लेटतीवरकन्यायां जनयामास षड् नरान्। माल्लं मल्लं मातरं च भडं कोलं च कन्दरम्" ब्रह्मवै० ब्रह्मख० २० अ०।

भडिल पु० भड–इलच्। १वीरे २सेवके उज्ज्वलः। ३ऋषिभेदे ततः गर्गा० अपत्ये यञ्। भाडिल्य तदपत्ये अश्वा० फञ्। भाडिल्यायन तदपत्ये बहुत्वे तस्य लुक्।

भण कथने भ्वा०पर०द्विक०सेट्। भणति। अभाणीत्–अभणीत्। घटि वा ह्रस्वः। अबीभणत्–त अबभाणत्–त। कथनमिह व्यक्तवाक्यम्।

भणिति स्त्री भण–क्तिन् ग्रहादित्वादिट्। कथने। "गौडोर्वीशकुलप्रशस्तिभणितेः" नैष०। [२उक्त्यां रत्नमाला।

भण्टाकी स्त्री भटि–आकन् ङीष्। १वार्त्ताक्याम्, अमरः।

भण्टु(ण्टू)क पु०भटि–उक ऊक वा। श्योनाकवृक्षे रत्नमा०

भण्ड पु० भडि–अच्। अश्लीलवाक्यभाषके (भाँड़) "त्रयो वेदस्य कर्त्तारो भण्डधूर्त्तनिशाचराः" सर्व०सं०चार्वाकदर्शनम्

भण्डक पुंस्त्री० भण्ड+संज्ञायां कन्। खञ्जनखगे जटा०। स्त्रियां जातित्वात् ङीष्।

भण्डन न० भडि–भावाधारादौ ल्युट्। १खलीकारे (प्रतारणे) २कवचे मेदि०। [विध्यायां शब्दर०।

भण्डहासिनी स्त्री भण्डेन सह हसति णिनि ङीप्।

भण्डि स्त्री भडि–इन्। १वीचौ हारा०। वा ङीप् ङीबन्तः २शिरीषवृक्षे राजनि०। [शब्दर०

भण्डिका स्त्री भण्ड–ण्वुल् कापि अत इत्वम्। मञ्जिष्ठायां

भण्डित पु०भडि–क्त। १ऋषिभेदे ततः गर्गा० यञ्। भाण्डित्य तद्गोत्रापत्ये पुंस्त्री अश्वा०फञ्। भाण्डित्यायन तद्गोत्रापत्ये पुंस्त्री०। तस्य बहुत्वे वा लुक्।

भण्डिर(ल) पु०भण्ड–इलच् पृषो०रस्य वा लः। १शिरीषवृक्षे अमरः। रान्तः वाचस्पतिः। लान्तः शुभे दूते त्रि० उणादिको०।

भण्डीतकी स्त्री भण्डो सती तकति तक–हासे अच् गौरा० ङीष्। मञ्जिष्ठायां भावप्र०।

भण्डीर पु० भण्ड वा० ईर। १समष्ठिलक्षुपे २तण्डुलीयशाके ३शिरीषवृक्षे च राजनि० हरिवं० ६५ अ०। तदनवर्णनम्

भण्डीरलतिका स्त्री भण्डीर इव लतते लत–अच् स्वार्थे क कापि अत इत्वम्। मञ्जिष्ठायां राजनि०।

भण्डीरी स्त्री भडि। वा० ईर गौरा० ङीष्। मञ्जिष्ठायाम् अमरः। इस्य लः। तत्रार्थे पु० शब्दच०।

भण्डु पु० भडि–उण्। देशभेदे ततः सुवास्त्वा० चतुरर्थ्याम् अण्। भाण्डव तद्दूरदेशादौ त्रि०।

भण्डु(ण्डू)क पु० भडि–उक ऊक वा। (भाकुन) मत्स्यभेदे रत्नमाला। दीर्घमध्यः २श्योनाकवृक्षे रत्नमाला।

भद शुभकथने प्रीतौ च भ्वा० आ० अक० सेट् इदित्। भन्दते अभन्दिष्ट। [भन्दत्–त।

भद कल्याणकरणे चु०उ०सक०सेट् इदित्। भन्दयति–ते अब०

भदन्त पु० भदि–झच् नलोपः। १बौद्धभेदे। २पूजिते त्रि०। उणादि० ३प्रव्रजिते उज्ज्वल०।

भद्राक न०भदि कल्याणे आकन् नलोपः। कल्याणे उज्ज्वल०

भद्र न० भदि-रक् नि० नलोपः। १मङ्गले उणा०२ मुस्तायां ३स्वर्णे च मेदि०। ज्योतिषोक्ते ववादितः सप्तमे करणे स्त्री न०। ४महादेवे ५वृषे ६खञ्जने ७कदम्बे ८हस्तिजातिभेदे ९बलदेवे १०रामचरभेदे पु० मेदि०। ११सुमेरुशैले पु० हेमच० १२गुहीवृक्षे च पु० राजनि०। ज्योतिषोक्तासु १३द्वितीयासप्तमीद्वादशीतिथिषु च स्त्री। १४साधौ १५श्रेष्ठे च त्रि० मेदि०। १६देवदारुणि पु०। १७कल्याणमत्यां स्त्री "रामं मां भद्रया युङ्" ति० त०।

१८मध्यदेशभेदे पु० वृ० स० १४अ० कूर्मविभागे दृश्यम्। १९वसुदेवपुत्रभेदे पु० भाग० ९।२४।४५ श्लो०। २०तुषितदेवगणभेदे भाग० ४।१।८। २१वैश्रवणपत्न्यां स्त्री० भा० १९८अ०। २२सोमस्य दुहितरि उतथ्यपत्न्यां स्त्री भा० अ० १५४अ०। २३रौद्राश्वस्य कन्याभेदे हरिवं० ३१अ०। २४नटभेदे पु० हरिवं० १५० अ०। २५भारतवर्षस्थे नदीभेदे स्त्री मार्कपु० ५९ अ०। विष्टिभद्रायाः सर्वकार्य्यवर्जनप्रतिप्रसवादिकं मु० चि० पी० धा० दर्शितं यथा "अयोगे सुयोगोऽपि चेत् स्यात् तदानीमयोगं निहत्यैष सिद्धिं तनोति। परे लग्नशुद्ध्या कुयोगादिनाशं दिनार्द्धोत्तरं विष्टिपूर्वं च शस्तम्(१)। शुक्ले पूर्वार्द्धेऽष्टमीपञ्चदश्योर्भद्रैकादश्यां चतुर्थ्यां परार्द्धे। कृष्णेऽन्त्यार्द्धे स्यात् तृतीयादशम्योः पूर्वे भागे सप्तमीशम्भुतिथ्योः(२)। पञ्चद्व्यद्रिकृताष्टरामरसभूयामादिघट्यः शरा विष्टेरास्यमसद्गजेन्दुरसरामाद्यश्विबाणाब्धिषु। यामेष्वन्त्यघटीत्रयं शुभकरं पुच्छं तथा वासरे विष्टिस्तिथ्यपरार्द्धजा शुभकरी रात्रौ तु पूर्वार्द्धजा(३)। कुम्भकर्कद्वये मर्त्ये स्वर्गेऽब्जेऽजात्त्रयेऽलिगे। स्त्रीधनुर्जूकनक्रेऽधो भद्रा तत्रैव तत्फलम्(४)" मू०।

"अथावश्यकशुभकार्य्ये कालान्तरप्रतीक्षाऽयोग्यतायां परिहारमाह विष्टिरिति विष्टिर्भद्रा तत्पूर्वं तदादि व्यतीपातादिकं दिनार्द्धोत्तरं मध्याह्नादनन्तरं शस्तं प्राक् अर्थात् मध्याह्नं यावत्कालो निषिद्धः "विष्टिरङ्गारकश्चैव व्यतीपातश्च वैधृतिः। प्रत्यरं जन्मनक्षत्रं मध्याह्नात् परतः शुभम्" इति तेनैवोक्तत्वात्(१)। अथ भद्रा निषिद्धेति प्रागुक्तं तदधुना प्रस्तावात् तन्निषिद्धकालं शालिनीच्छन्दसाह शुक्ले इति। शुक्लपक्षे अष्टम्यां पूर्णिमायाञ्च पूर्वार्द्धे भद्रा भवति एकादश्यां चतुर्थ्यां चोत्तरार्द्धे भद्रा। अथ कृष्णे कृष्णपक्षे तृतीयायां दशम्यां चान्त्यार्द्धे उत्तरार्द्धे भद्रा स्यात् सप्तम्यां शम्भुतिथौ चतुर्दश्याञ्च पूर्वे भागे पूर्वार्द्धे भद्रा स्यात् पूर्वे इति पूर्वादिभ्यो नवभ्यो वेति विकल्पनाभावपक्षे रूपम्। अष्टम्यादीनां तिथीनां गतभोग्यघटिकायोगार्द्धं भद्राप्रमाणमिति यावत् "तिथेर्गतैष्यैक्यदलं तन्मानं करणं भवेत्" वोपदेवोक्तेः "तिथ्यर्द्धभागं सर्वेषां करणानां प्रकल्पयेत्" इति सूर्य्यसिद्धान्तोक्तेश्च। उक्तञ्च दीपिकायाम् "तृतीयादशमीशेषे तदुपश्चान्योस्तु पूर्वतः। कृष्णे विष्टिः सिते तद्वत्तासां परतिथिष्वपि" बृहस्पतिना तु स्पष्टमुक्तम्। "सिते चतुर्थ्यामन्त्यार्द्धमष्टम्याद्यार्द्धमेव च। एकादश्याः परार्द्धे तु पूर्वार्द्धे पूर्णिमातिथौ। कृष्णे तृतीयान्त्यार्द्धे हि सप्तम्याद्यार्द्धमेव च। दशम्याश्चोत्तरार्द्धे तु चतुर्दश्यर्द्धमादितः। विष्ट्याख्योऽयं महादोषः कथितोऽत्र समस्तगः। तदानीं कृतं तत्कर्म कर्त्रा सह विनश्यति" इति। पूर्णिमातिथौ पूर्णिमायाम्। रत्नकोषे प्रत्येकं भद्रानामानि "हंसी नन्दिन्यपि च त्रिशिराः सुमुखी करालिका चैव वैकृतिरौद्रमुखी च चतुर्मुखी विष्टयः क्रमशः"। चतुर्थ्यादितिथिसम्बन्धि भद्रानामामाभिधानं नामसादृश्येन फलतारतम्यसूचनार्थम्। भद्रास्वरूपं रत्नमालायाम् "उद्बद्धोद्भटतरपीडिताऽतिकृष्णा दंष्ट्रोग्रा पृथुहनुगण्डदीर्घनासा। कार्य्यघ्नीडितबहुवक्त्रमद्गुमिरन्ती विश्रान्तः पतति समन्ततोऽत्र विष्टिरिति"(२)। अथ चतुर्थ्यादितिथिषु भद्रायामुखपुच्छविभागादिकं शार्दूलविक्रीडितेनाह। पञ्चेति चतुर्थ्यादितिथीनां क्रमशः पञ्चादिप्रहरेषु शराः पञ्च नाड्यः आदिमा विष्टेर्भद्राया आस्यं मुखं यथा चतुर्थ्याः पञ्चमप्रहरे, आदिभूताः पञ्च घट्यो भद्रामुखम् एवमष्टम्या द्वितीयप्रहरे, एकादश्याः सप्तमप्रहरे, पौर्णमास्याश्चतुर्थप्रहरे, तृतीयाया अष्टमप्रहरे, सप्तम्यास्तृतीयप्रहरे, भद्रामुखमित्यर्थः तच्च भद्रायामुखमसदशुभमित्यर्थः अथ पुनश्चतुर्थ्यादितिथीनां क्रमेण गजादिप्रहरेषु अन्त्यम् अन्ते भवमन्त्यं दिगादिभ्यो यदिति यत् घटीत्रयं पुच्छं पुच्छसंज्ञं तच्छुभकरं समस्तकार्य्येष्वित्यर्थः। यथा चतुर्थ्या अष्टमप्रहरस्यान्त्यं घटीत्रयं भद्रापुच्छम् एवमष्टम्याः प्रथमप्रहरस्य, एकादश्याः षष्ठप्रहरस्य, पूर्णिमायास्तृतीयप्रहरस्य, तृतीयायाः सप्तमप्रहरस्य, सप्तम्या द्वितीयप्रहरस्य, दशम्याः पञ्चमप्रहरस्य, चतुर्दश्याश्चतुर्थप्रहरस्यान्त्यं घटीत्रयं भद्रापुच्छमित्यर्थः। यदाह गुरुः "भूतदस्रस्वराम्भोधिवसुत्र्यङ्गरूपकाः। यामेष्वेषु क्रमादास्यं भवेत तिथ्यर्द्धविष्टिष्विति"। व्यवहारसमुच्चये "दशम्यामष्टम्यां प्रथमघटिकापञ्चकपरं हरिद्युः सप्तम्यां द्विदश १२घटिकान्ते त्रिघटिकम्। तृतीयाराकायां स्वयम २०घटिकाभ्यः परभवं शुभं विष्टेः पुच्छं शिवतिथिचतुर्थ्योस्तु विरमे" इति। हरिद्युरेकादशी राका पूर्णिमा। ननु भद्रा देवतेत्यभिधीयते तस्याः पुच्छकथनात्तु पशुत्वसिद्धिर्दृश्यते देवता च कथं पशुर्भवितुमर्हति। सत्यं दैत्येन्द्रैर्देवेषु पराजितेषु रुद्रस्य क्रोधाभाराकुलनेत्रावोक्षितदेहाद देवी भद्रासंज्ञा मुखपुच्छादिमत्येव

तत्पश्चा दैत्यान् जघान यदुक्तं श्रीपतिना दैत्येन्द्रैः समरेऽमरेषु विजितेष्वीशः क्रुधा दृष्टवान् स्वकायं किल निर्गता खरमुखी लाङ्गूलिनी च त्रिपात् । विष्टिः सप्तभुजा मृगेन्द्रगलका क्षामोदरी प्रेतगा दैत्यघ्नी मुदितैः सुरैस्तु करणप्रान्ते नियुक्ता सदेति" । भद्राङ्गन्यासमाह वशिष्ठः "वक्त्रकण्ठहृदिनाभ्यन्तपुच्छदेशोत्था-टनादि यत् । तुरगमहिषोष्ट्रादि कर्म विष्ट्यास्तु सिद्ध्यति । न कुर्यात् मङ्गलं विष्ट्यां जीवितार्थी कदाचन । कुर्वन्नज्ञस्तदा क्षिप्रं तत् सर्वं नाशतां व्रजेत्" । तदङ्गविभागः फलञ्च कश्यपसंहितायाम् "मुखे पञ्च गले त्वेका वक्षस्येकादश स्मृताः । नाभौ चतस्रः षट् कट्यां तिस्रः पुच्छे तु नाडिकाः । कार्यहानिर्मुखे मृत्युर्गले वक्षसि निःस्वता । कट्यामुन्मत्तता नाभौ च्युतिः पुच्छे ध्रुवो जयः" । अयञ्च भद्राङ्गविभागो नाडीनां त्रिंशतोन्यूनाधिकत्वे तु त्रैराशिकेन मुखादीनामङ्गानां विभागज्ञानं यथा यदि नाडी त्रिंशता इष्टमुखाङ्गपरिमाणं इष्टपरिमाणेन किमिति त्रैराशिकम् एवं सति मुखाङ्गपरिमाणं भद्राभोगमितघटीभिः गुणयं त्रिंशता भाज्यं लब्धसमोऽङ्गविभागः । तत्र मुखादिकाशा रत्नमालायाम् "अब्धियमाष्टिरसाःशर्वकीनाशवायुशिवदिक्पतिनक्षत्रप्रोक्तमाशु हि विष्टेः । नियतमष्टभिराशाः संख्यया प्रक्रमेण स्फुटमिह परिहार्यं मङ्गलेष्वेतदेव" । अयं भावः कीनाशा यमः शुक्लपक्षस्य उत्तरार्द्धे पश्चिमदिशि भद्रामुखं तत्राशासंख्याक्रमेण पञ्चमे प्रहरे भवति अष्टार्द्धैव भद्रायाः प्रहरचतुष्टयाधिकस्थितभावादन्ते एव घटिकात्रयं पुच्छं ततोऽस्यां द्वितीयप्रहरेऽनेन प्रकारेण आग्नेय्यां दिशि मुखं मुखाच्च प्राक् पुच्छमिति प्रथमप्रहरान्त एव पुच्छघटिका इत्येवं सर्वास्वपि भद्रातिथिष्ववगन्तव्यं प्रयोजनमपि तत्रैव "मनुवसुमुनितिथियुगदशशिवभुजसंख्यासु तिथिषु पूर्वाद्याः । आयाति विष्टिरेषा इह शुभदा पुरस्त्वशुभेति" तदेतदावश्यिककार्यस्यासम्भवे सति मुखदिक्संमुखयात्रानिषेधकमवधेयम् । ग्रन्थान्तरे चान्यदप्युक्तम् । "असिते सर्पिणी ज्ञेया सिते विष्टिस्तु वृश्चिकी । सर्पिण्यास्तु मुखं त्याज्यं वृश्चिक्याः पुच्छमेव च" । अथ परिहारमाह तत्रैव विष्टिस्तिथ्यपरार्द्धजा तिथ्युत्तरार्द्धे संभूता वासरे दिवसे यदि स्यात् भद्रा तदा शुभकरी तेनैव प्रकारेण तिथिपूर्वार्द्धजा भद्रा रात्रौ चेत् स्यात् तदा शुभा शुभकरी स्यात् । उक्तञ्च "रात्रिभद्रा यदाह्नि स्यात् दिवा भद्रा यदा निशि । न तत्र भद्रादोषः स्यात् सा भद्रा भद्रदायिनी" इति । रात्रिभद्रा तिथ्युत्तरार्द्धभवा दिवाभद्रा तिथिपूर्वार्द्धोद्भवा अमुमर्थं स्पष्टमाह गुरुः । "निशि पूर्वार्द्धजा विष्टिर्दिवा चापरतः शुभा । क्रमागता तु या विष्टिः सैव हानाहबोधमा" इति । अन्योऽपि "दिवा परार्द्धजा विष्टिः पूर्वार्द्धोत्था यदा निशि । तदा विष्टिः शुभायेति कमलासनभाषितम्" । ब्रह्मसिद्धान्तेऽपि "दिवा परार्द्धजा विष्टिर्विष्टिरेव दिवानिशोः । सा त्याज्या त्वन्यथा विष्टिः सर्वकर्मशुभप्रदा" । ननु यत् तु नारदकश्यपादिभिरुक्तम् । "करणानि बवादीनि शुभसंज्ञानि षट् क्रमात् । क्रमायाता क्रमायाता विष्टिर्नेष्टा तु मङ्गले" । अत्र क्रमायाता दिवारात्रिक्रमायाता दिवाभद्रा रात्रौ रात्रिभद्रा च दिवेत्यर्थः । एवं सति द्विविधाया अपि भद्राया दोषवत्त्वोक्तेः पूर्वोक्तपरिहाराभिधानमयुक्तम् उच्यते इदमेव क्रमायातेति वचनं ज्ञापकमर्थस्य अन्यथा सामान्यतो भद्रादवे इत्युक्ते द्विविधभद्राया दोषवत्त्वसिद्धेरनर्थकमिदं स्यात् तथा शुभकार्येषु भद्रारूपदुष्टदिनव्यतिरिक्तकालाप्रतीक्षासहत्वे तदैव कार्यं न दुष्टदिने कथं चेनोपपत्तौ बाधो न स्यात् इति न्यायात् वचनस्य निषेध एव तात्पर्याच्च । अवश्यकर्त्तव्यस्य तु शुभकर्मणः कालान्तरप्रतीक्षासहत्वाभावे मुखादिपरिहारमाश्रित्य दुष्टदिने क्रतिरुचितैव विष्टिरपकारकत्वेऽपि परिहार एतत्पर एवेत्यलं पल्लवितेन । अथ भद्रानिवासं तत्फलञ्चाहुर्भाव (२)। कुम्भेति कर्के चन्द्रमसि कुम्भद्वये कुम्भमीनस्थे कर्कद्वये कर्कसिंहराशिस्थिते सति भद्रा मर्त्ये मनुष्यलोके तिष्ठति । अजाजातद्वये मेषवृषमिथुनस्थितेऽलिनि वृश्चिकस्थिते चन्द्रे स्वर्गे भद्रा तिष्ठति । कन्याधनुस्तुलामकरराशिस्थितेऽधः पातालकोके भद्रा तिष्ठति । यत्र भद्रा तत्रैव मर्त्ये कार्यपातादेषु फलं ददातीत्यर्थवादद्वारा प्रयोजनमुक्तं भवति । उक्तञ्च "मेषोक्षकीर्पैर्मिथुने घटसिंहमीनकर्केषु चापाङ्गनतौलिकताम्र चन्द्रे । स्वर्मर्त्यनागनगरीः क्रमशः प्रयाति विष्टिः फलान्यपि ददाति हि तत्र देशे" इति । भूपालवल्लभे "कन्यातुलामकरधन्विषु नागलोके मेषालिगोमिथुनकेषु सुरालये स्यात् । पाठीनसिंहघटकर्कटकेषु मर्त्ये चन्द्रे वदन्ति मुनयस्त्रिविधां त्रिविष्टिम्" (४) को० धा०

भद्रशब्दात् परिवापणे (मुण्डने)ऽर्थे मद्रात् डाच्। तस्योऽ-
नुप्रयोगः बाधादाःकः। भद्राकरोति नापितः मुण्डनेन
संस्करोतीत्यर्थः सि०कौ०। एवं भद्रशब्देऽपि बोध्यम्।

भद्रक त्रि०भद्र—स्वार्थे संज्ञायां वा कन्। १मनोहरे त्रिका०।
२भद्रमुस्तके न० शब्दमाला। ३देवदारुवृक्षे शब्दर०।
"भो नरनारमावय शृद्दिगर्वविरसं हि भद्रकमिदम्"।
इ०र०उक्ते द्वाविंशत्यक्षरपादके ४छन्दोभेदे।

भद्रकपट पु० भद्रः कपटोऽस्य। गोक्षुरक्षुपे राजनि०।

भद्रकर्ण पु० भद्रस्य हस्य कर्णौ यत्र। गोकर्णक्षुपे तीर्थभेदे।

भद्रकर्णेश्वर पु०६त०। गोकर्णस्थे शिवलिङ्गभेदे भा०व०८२अ०।

भद्रकार त्रि० भद्रं करोति कृ—अण् उप०स०। १मङ्गलकारके
२देशभेदे पु० भा० स० १२ अ०।

भद्रकाय पु०। १कान्दिन्यां जाते श्रीकृष्णस्य पुत्रभेदे हरिवं०
१६२ अ०। ६ब०। २मङ्गलदेहके त्रि०।

भद्रकाली स्त्री १दुर्गाशक्तिभेदे "जयन्ती मङ्गला काली भद्र-
काली कपालिनी" दुर्गापूजामन्त्रः। तदाविर्भावकथा च
कालिपु० ५८अ० दृश्या। तन्मन्त्रादिकं तन्त्रसारे दृश्यम्।
२कुमारानुचरभेदे भा० श० ४७ अ०।

भद्रकाशी स्त्री भद्राय काशते काश-अच् गौरा० ङीष्।
भद्रमुस्तायाम् राजनि०।

भद्रकाष्ठ न० ६ब०। देवदारुवृक्षे शब्दच०। [अमरः।

भद्रकुम्भ पु० भद्रकारकः कुम्भः शा०त०। पूर्णकुम्भे जलपूर्णघटे

भद्रगन्धिका पु० भद्रो गन्धोऽस्त्यस्या बाहुल्येन ठन्। सुस्तके
रत्नमाला।

भद्रगौर प० देशभेदे स च पूर्वदिग्वर्त्ती मार्क०५८ अ०।

भद्रङ्कर त्रि०भद्रं करोति कृ—खच् मुम्। मङ्गलकारके।

भद्रङ्करण न०भद्रं क्रियतेऽनेन कृ—ल्युट् मुम्। मङ्गलसाधने।

भद्रचारु पु०रुक्मिण्यां जाते वासुदेवस्य पुत्रभेदे हरिवं०११८अ०

भद्रचूड पु० भद्रा चूडा यस्य। (वज्राविज) वृक्षभेदे शब्दच०।

भद्रज पु० भद्राय जायते जन—ड। इन्द्रयवे राजनि०।

भद्रतरुणी स्त्री भद्रः तरुणीव। कुब्जकवृक्षे राजनि०।

भद्रतुङ्ग पु० तीर्थभेदे भा०व० ८२अ०।

भद्रतुरग न० भद्रास्तुरगा यत्र। जम्बुद्वीपस्य नववर्षमध्ये
वर्षभेदे। "माल्यवज्जलधिमध्यवर्त्ति यत्तत् भद्रतुरग
मामुखं धाः" सि० शि०। जम्बुद्वीपशब्दे भद्राश्वशब्दे च
विवरणं दृश्यम्।

भद्रदन्तिका स्त्री कर्म० स्वार्थे कन्। दन्तीवृक्षभेदे।

भद्रदारु पुंन०। कर्म०। देवदारुवृक्षभेदे अमरः।

भद्रद्वीप पु० कुरुवर्षान्तर्गते उपद्वीपभेदे मार्कपु० ५८ अ०।

भद्रनामन् पु०६ब०। (काटठोकरा) खगभेदे त्रिका०।

भद्रनामिका स्त्री भद्रं मङ्गलं नामयति प्रापयति नम—
णिच्—ण्वुल्। त्रायन्तीलतायां रत्नमा०।

भद्रनिधि पु० दानार्थकल्पिते ताम्रादिघटितघटे तद्दानविधिश्च
हेमा० दा० वामनपु० उक्तो यथा
"पुण्यान्तिथिं प्राप्य तु पौर्णमास्यां तथोपरागे शशि-
सूर्य्ययोर्वा। चतुर्युगादिष्वयनद्वये वा प्रबोधने प्रस्व-
पनेऽथ विष्णोः। कुर्य्यादथोदुम्बरमेव कुम्भं हिरण्य-
भारेण यथात्मशक्त्या। तथाविधानस्य सुराजतं स्या-
द्धिरण्यभारेण तु पूरयेत् तम्। तदर्द्धतोऽर्द्धेन तद-
र्द्धतो वा स्वशक्तितः स्वर्णपलैः शतेन। तदर्द्धमर्द्धेन तु
वित्तशक्त्या पलत्रयादूर्द्ध्वमपि प्रकुर्य्यात्। तत्ताम्र-
भाण्डे कनकं निधाय सवज्रनीलोत्पलपद्मरागम्। समु-
क्तावैदूर्य्यसविद्रुमञ्च तद्राजतं पात्रमधोमुखं स्यात्।
एवन्तु तं भद्रनिधिं सुविद्वान् कृत्वासने प्रावरणोप-
युक्ते। कृष्णोत्तरे दर्पणचामराढ्ये सपादुकोपानहच्छत्र-
युक्तम्। सवृषोमवस्त्रोत्तमयुग्मयुक्तं संपूजयेन्मन्त्रवरै-
रथैतैः" "आदौ तु पञ्चामृतकेन विष्णुं संस्नाप्य संसा-
रहरं वरार्च्यं। तथेश्वरं पावकमेव स्तुत्वा आमन्त्र-
येद्भद्रनिधिं ततस्तम्। श्रीखण्डकर्पूरकुङ्कुमेन पद्मा-
क्षरं नाम श्रियः प्रलिख्य। नमस्तथोङ्कारयुतं च
पात्रे तद्राजतेऽप्येवमथार्चयेत। त्वया समस्तामर-
सिद्धयक्षविद्याधरेन्द्रोरगकिंनरेन्द्रैः। गन्धर्वविद्याधर-
दानवेन्द्रैर्युतं धृतं विश्वमिदं नमस्ते! समस्तसार-
करी त्वमेव विभोः सदानन्दमयी च माया। समस्त-
कल्याणनिधिः समाधिः। हरिप्रिये! भद्रनिधिर्नमस्ते।
एवं पूज्य विधानेन ततो विप्रमथार्चयेत्। किरीटा-
ङ्गदनिष्काग्र्यकुण्डलाङ्गुलिभूषणैः। अलङ्कृत्य हरिं
तद्वत् पीताम्बरधरं ततः। पूजयेदच्युतं ध्यात्वा मन्त्रेणा-
नेन भक्तिमान्। भूदेवोऽसीत्यतो नित्यं नित्यानन्दमयो
हरे!। हर मे दुष्कृतं कृष्ण! कृपाकर! नमस्तु ते।
भूदेव! भगवद्धर्म! भवभङ्गकरेश्वर!। भवभूतिकरोजिष्णो!
प्रभविष्णुर्नमोऽस्तु ते। एवं पूज्य हृदि ध्यात्वा तं द्विजं
विष्णुरूपिणम्। ततो भद्रनिधिं दद्यान्मन्त्रेणानेन
मानवः। स्वगोत्रोच्चारणेनादौ वपुर्नाम तथात्मनः।
यवदर्भतिलैः सार्द्धमुदकं संपरित्यजेत्। पितृकल्पार-
चार्य्याय नित्यानन्दविवृद्धये। सर्वोपद्रवनाशाय विष्णो-

भयद्रुत त्रि० भयेन द्रुतः ३त०। भयेन पलायिते अमरः।

भयनाशन त्रि० भयं नाशयति नाशि-ल्यु। १भयनिवारके २विष्णौ पु० "भयकृद् भयनाशनः" विष्णुस०।

भयनाशिनी स्त्री भय रोगभयं नाशयति नश-णिच्-णिनि। त्रायमाणालतायाम् राजनि०। [त्मनः स्थापके।

भयब्राह्मण पु० भयेन ब्राह्मणः सम्पद्यते। भयेनात्मा विप्रत्वेना-

भयभ्रष्ट त्रि० ३त०। भयेन पलायिते जटाधरः।

भयव्यूह पु० भये सति व्यूहः। पार्श्वादितो भयभेदेन राज्ञा कर्त्तव्ये व्यूहभेदे भयभेदेन तत्प्रकारः काम० नी० उक्तो यथा "यायाद्व्यूहेन महता मकरेण पुरोभये। श्येनेनोभयपक्षेण सूच्या वाधीरवक्त्रया। पश्चाद् भये तु शकटं पार्श्वयोर्वज्रसञ्ज्ञितम्। सर्वतः सर्वतोभद्रं भयव्यूहं प्रकल्पयेत्"।

भयानक पु० बिभेत्यस्मात् भी-आनक। १व्याघ्रे २राहौ ३रसभेदे च मेदि०। ४भयङ्करे त्रि०। ५भीतेः अपादाने अमरः। तद्रसलक्षणादि सा०द० उक्तं यथा "भयानको भयस्थायिभावः कालाधिदैवतः। स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः। यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम्। चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः। अनुभावोऽत्र वैवर्ण्यं गद्गदस्वरभाषणम्। प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः। जुगुप्सावेगमोहसंत्रासग्लानिदीनताः। शङ्कापस्मारसंभ्रान्तिमृत्य्वाद्या व्यभिचारिणः"।

भयापह त्रि० भयमपहन्ति अप+हन-ड। १भयनाशके २नृपे पु० त्रिका०। ३विष्णौ पु० "जितमन्युर्भयापहः" विष्णुस०।

भयावह त्रि० भयमावहति आ+वह-अच् ६त०। भयकारके हेमच०।

भय्य न० भी-भावे यत् वेदे नि०। भये पञ्चमी० १।५६। लोके तु भेयमित्येव। [त्रि० अमरः।

भर पु० भृ-अप्। १अतिशये। कर्मणि अप्। २भरणकर्त्तरि

भरग त्रि० भरमतिशयं गच्छति गम-ड। १अतिशयगन्तरि भरगेति वर्णत्रयद्योत्ये २भर्गदेवाख्ये परब्रह्मणि यथोक्तं ब्राह्म०प० योगियाज्ञवल्क्येन "भेति भासयते यस्मात् रेति रञ्जयति प्रजाः। गेति च गच्छतेऽजस्रं भरगात् भर्ग उच्यते"। तत्र भादि-ड भः रञ्जि ड-रः। गम-ड गः तेषां समाहारः भरगम्। तद्वर्णत्रययोगात् भर्गं इत्युच्यते प्रभो।

भरट पु० भृ-अटन्। १कुम्भकारे तेन हरति भस्त्रा०ष्ठन् भरटिक तेन हर्त्तरि त्रि० स्त्रियां षित्त्वात् ङीष् भराटकी।

भरण न० भृ-भावकरणादौ ल्युट्। १वेतने २पोषणे ३धारणे च। अश्विन्यवधिके द्वितीये ४नक्षत्रे शब्दर०। ५घोषकलतायाञ्च स्त्री ङीप्। नक्षत्रभेदे पु० मेदि०। तस्यायोगतारादिकम् नक्षत्रशब्दे उक्तम् सा च राशिचक्रस्य ४०अंशोत्तरं १२।२० कलाविकलात्मिका। उपगतान्तर्गता अधोमुखान्तर्गता च। भरणेन हरति भस्त्रादि०ठन् भरणिक वेतनेन हारिणि त्रि० स्त्रियां ङीप्।

भरणीभू पु० भरण्यां भवति भू-क्विप्। राहुपर्य्ये हेमच०। भगदैवतशब्दे दृश्यम्।

भरण्ड पु० भृ-अण्डन्। १स्वामिनि २नृपे च उणादिको०।

भरण्य कण्ड्वा० नामधातुः भुरण्येत्यत्र पाठान्तरम् धारणे पोषणे पर० सक० सेट् भरण्यति भुरण्यति वा।

भरण्यभुज् त्रि० भरण्यं वेतनं भुङ्क्ते भुज-क्विप्। वैतनिके कर्मकरे अमरः। [वृत्ते (रामदूती) शब्दच०।

भरण्याह्वा स्त्री भरण्या आह्वा आह्वा यस्याः। पर्ब्बुली-

भ(भु)रण्यु पु० कण्ड्वा० भ(भु)रण्य उन्। १शरण्ये २मित्रे च शब्दमाला। ३अग्नौ ४चन्द्रे ५स्वामिनि च संक्षिप्तसा०। भुरण्युरिति पाठान्तरम्।

भरत पु० भरं तनोति तन-ड। (जड़भरत) इति ख्याते १मुनिभेदे जड़भरतकथा च २०१५ पृ० दृश्या नाट्यशास्त्रस्य अलङ्कारशास्त्रस्य च २कर्त्तरि मुनिभेदे ३शबरे ४तन्तुवाये ५क्षेत्रे ६कैकयीसुते रामानुजे च। भरतेन प्रोक्तम् भारतं नाट्यशास्त्रमधीयते अण् तस्य लुक्। ७तच्छास्त्राध्येतृषु ब०व०। ८दुष्मन्तेन शकुन्तलायामुत्पादिते पुत्रभेदे पु० तस्यापत्यानि इञ् तस्य बहुषु लुक्। ९भरतवंश्ये नृपे पु० ब०व०। दौष्मन्तिभरतकथा भाग० ९।१०अ० दृश्या १०ऋषभदेवपुत्रभेदे भाग०५।४अ०। ११वह्निपुत्रभेदे "पावको लौकिको ह्यग्निः प्रथमो ब्रह्मणः सुतः। ब्रह्मौदनाग्निस्तत्पुत्रो भरतो नाम विश्रुतः" मात्स्ये ४८ अ०। रामानुजभरतस्य जन्म यथा "भरतो नाम कैकय्यां जज्ञे सत्यपराक्रमः। साक्षाद्विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः"। १२भौत्यमनुपुत्रभेदे मार्कपु० १००अ०। १३आयुधजीविसंघभेदे पु० ततः यौधेया० स्वार्थे अण्। भारत तदर्थे ब० व०। १४ऋत्विजि ब० व० निघण्टुः।

भरतखण्ड कुमारिकाखण्डे "कुमारिकेति विख्याता यस्या नाम्ना प्रकथ्यते। इदं कुमारिकाखण्डं चतुर्वर्णफलप्रदम्। यथा कृतायनीयस्य ज्ञानाध्यायादिकल्पना।

इदं भरत—खण्डञ्च मया सम्यक् प्रकल्पितम्” स्कन्दपु० ।

भरतद्वादशाह पु० भरतकृते द्वादशाहसाध्ये यज्ञभेदे "सर्वोऽग्निष्टोमो भरतद्वादशाहः" कात्या०श्रौ०२४।७।१२। "तत्र यज्ञे सर्वेऽग्निष्टोमा भवन्ति प्रायणीयोदनीयवर्जम्। तेन दशरात्रस्य स्थाने दशाप्यग्निष्टोमाः भवन्ति आद्यन्तयोः प्रायणीयोदनीययोरतिरात्रावेव" संपङ्व्याख्या आश्व० श्रौ० १०।५।८ सूत्रादौ तु अन्यथोक्तं यथा "अथ भरतद्वादशाहः" सू० "अथशब्दोऽहीनकैवल्यवृत्तिविच्छेदार्थः। सत्राहीनसाधारणाश्चत्वारो द्वादशाहा उक्ताः। तत्र एकोऽहीन उक्तः। उत्तमश्च साधारण एव अतस्तद्विच्छेदार्थमथशब्दः प्रयुक्तः" नारा०। "इममेवैकाहं पृथक् संस्थाभिरुपेयुः" सू० "भरतद्वादशाहस्याहःक्लृप्तिः। इममेव प्रकृतैकाहं पृथग्भूताभिः संस्थाभिर्युक्तं द्वादशकृत्वः कुर्युः। विकृतिषु प्रकृतेः संनिहितत्वादिदमुच्यते। उत्तरत्र संस्थाविधानादेव संस्थासम्बन्धे सिद्धे पृथक्संस्थाभिरितिवचनं वचनादेव स्थाननियमो नातिदेशादिति ज्ञापनार्थम्" नारा०। "अतिरात्रमध्येऽग्निष्टोममथाष्टा उक्थ्यानग्निष्टोममथातिरात्रम्" सू० "द्वादशाहसामान्येन प्राप्तानां संस्थानां विधीयमानो भरतद्वादशाहे अयमपवादः" नारा०।

भरतपुत्रक पु० भरतस्य नाट्यशास्त्रकर्त्तुः पुत्र इव कायति कै—क। नटे हेम०। [१ऋषभदेवपत्न्यां च।

भरतप्रसू स्त्री ६त०। १कैकेय्यां शब्दर०। २शकुन्तलायाम्

भरतवर्ष न० ६त०। भारते वर्षे।

भरताग्रज पु० ६त०। दाशरथौ श्रीरामे।

भरद्वाज पु० उचथ्यस्य भ्रातुरुतथ्यस्य पत्न्यां ममतायां बृहस्पतिना जनिते मुनिभेदे। तदुत्पत्तिकथा विष्णु पु० ४अं० १९अ०। भाग०९।२०अ०। द्वाजशब्दे २७६९पृ०तद्विरुक्तिरुक्ता। भा०अनु०९३अ०अन्यथा निर्वचनमुक्तं यथा "भरेऽसुतान् भरेऽशिष्यान् भरे देवान् भरे द्विजान्। भरे भार्य्यां भरद्वाजं भरद्वाजोऽस्मि शोभने!"। "प्रजा वै वाजस्ता एष बिभर्त्ति यद्बिभर्त्ति तस्माद्भरद्वाज इति" श्रुत्यनुसारेण अनामाह "भरे इति अशिष्यान् शासितुमयोग्यानपि राक्षसान् भूतं वशीकृत्य करुणया पालयामि तथा असुतान् अपुत्रानुदासीनानपि दीनानदीनान् पालयामि भार्य्यां भार्य्येति पुत्रस्यात्यादेरुपलक्षणम् इदन्त्विदोऽन्योऽपि वाजं वेगं शत्रूणां साहसमन्नं वा भरेदुष प्रायशोऽपि सर्वं तेजोऽन्नदश्च भवतीति तथा-

द्द्वमपि तथाऽस्तीत्यर्थः। भरे द्वाजमिति अदे तु द्वाभ्यां जातं सङ्करजमित्यर्थः ननु "माता भस्त्रा पितुः पुत्रो येन जातः स एव सः" इति स्मृतेश्चर्मकोशतुल्या मातेत्यतः सर्वोऽप्येकज एवेति नास्ति कश्चिद् द्वाजः न हि द्वाभ्यां रेतःसेकाभ्यामेको जायत इति सम्भवति सत्यम् आङ्गवनीयादीनामपि संस्कारवतां सर्वेषां द्विविधं जन्म योनितः संस्कारतश्च तत्र सङ्करोऽन्यस्माज्जातोऽन्येन स्वपुत्र इति बुद्ध्या संस्कृत इति स एव द्वाजः द्विर्जायत इति द्विजोऽन्यः द्वाभ्यां स्त्रीपुरुषाभ्यां जायत इत्यर्थः द्वाजादयो निपात्यन्ते तत एव द्वाजा अपि सन्तीति "वशी वशं नयसि एकजात! त्वमिति" मन्त्रे मन्योः संकल्पस्य एकजेति विशेषणं द्वाजे तु बीजसंस्कारसङ्करादश्चत्रं संकल्पयोर्वाङ्मनसयोश्च पौर्वापर्यविरोधो भवतीति विश्वासघातकादयो द्वाजा इति ज्ञेयं तदयं संपङ्:"कौशिके क्रोधतपसी राधेये शौर्यभीरुते। अत्रे वाकचित्तवैमत्ये बीजसंस्कारसङ्करादिति" नीलक०। २मनोरूपे सचेतने ऋषिभेदे तन्निरुक्तिर्यथा "भरद्वाज ऋषिरिति। मनो वै भरद्वाज ऋषिरन्नं वाजो यो वै मनो बिभर्त्ति सोऽन्नं वाजं भरति तस्मान्मनो भरद्वाज ऋषिः" शत० ब्रा० ८।१।१।९। अस्यार्थः "भरद्वाज ऋषिः बिभर्त्तीति भरन् वाजमन्नं यः स भरद्वाजोऽन्नभर्त्ता मनः मनसि सत्ये अन्नादनेच्छोत्पत्तेः ऋषिः सचेतनो मनोरूपः" यजु० १३।५५ वेददी०। (भारद्वाज) ३खगभेदे पुंस्त्री० अमरः। ४देशभेदे भा० भी० ९अ०। भरद्वाज ऋषिश्च मोक्षप्रवर्त्तकः तत्कथा २७९६ पृ० दृश्यम्।

भरम त्रि० भृ—बा० अमच्। भरणकर्त्तरि। ततः शुभ्रादि० अपत्ये ढक्। भारमेव तदपत्ये पुंस्त्री०।

भरस् पु० भृ—असुन्। भरणे। ऋ०५।१५।४।

भरित त्रि० भरो जातोऽस्य तारका० इतच्। १जातभरणे हरित+पृषो०हस्य भः। २हरितवर्णे शब्दार्थ त्रि० स्त्रियां ङीप् तस्य नः। भरिणी तद्वर्णयुक्तायां स्त्रियाम्।

भरित्र न० डि०व० भृ—इत्र। बाह्वोः निघण्टुः।

भरिमन् पु० भृ—कर्मणि इमनिच्। १कुटुम्बे उज्ज्वल०। भावे इमनिच्। २भरणे उणादिको० कर्त्तरि इमनिच्। ३विष्णौ सि० कौ०।

भरु पु०भृ—उन्।१स्वामिनि उज्ज्वल०। २स्वर्णे ३शिवे मेदि०।

भरुक पु० दक्षिणदेशभेदे ह०स० १४अ०।

भरुज पुंस्त्री० भेनिभस्त्रेन रुजति रुज–क । शृगाले ततः जातित्वेऽपि स्त्रियां बह्वा० वा ङीष् । भरुजा भरुजी । ततः इवार्थे अङ्गुल्या० ठक् । भारुजिक तदर्थे ।

भरुटक न० भृ–उट संज्ञायां कन् । भृष्टामिषे हेमच० ।

भरे अव्य० भृ–बा० ए । संग्रामे निघण्टुः ।

भर्ग पु० भ्रस्ज–घञ् भर्जादेशे कुत्वम् । १शिवे २ज्योतिःपदार्थे ३आदित्यान्तर्गते ऐश्वरे तेजसि, "आदित्यान्तर्गतं वर्चो भर्गाख्यं तन्मुमुक्षुभिः । जन्ममृत्युविनाशाय दुःखस्य त्रितयस्य च । ध्यानेन पुरुषैर्यश्च द्रष्टव्यं सूर्य्यमण्डले" योगियाज्ञ० । तस्य तेजस ऐश्वरत्वञ्च "यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" इति गीतायामुक्तम् । भावे घञ् । ४भर्जने च ।५धृष्टकेतुवंश्ये नृपभेदे हरिवं० २९अ० । ६देशभेदे । तत्र भवः तस्य राजा वा अण् । भार्ग । तद्देशनृपे तत्र भवे च स्त्रियां न लुक् भार्गी ।

भर्गस् पु० भ्रज–असुन् न्यङ्क्वा० । तेजसि ऋ० १।१४१।१ ।

भर्गादि पु० तद्राजार्थे प्रत्ययस्य स्त्रियां लुगनिमित्ते शब्दगणे स च गणः "भर्ग करूष केकय कश्मीर साल्व सुस्थाल उरस् कौरव्य" ।

भर्गायण पु० प्रवरर्षिभेदे प्रवराध्यायः ।

भर्ग्य पु० भ्रस्ज–ण्यत् भर्जादेशे कुत्वम् । शिवे रायमु० ।

भर्जन न० भ्रस्ज–भावे ल्युट् भर्जादेशः (भाजा) तण्डुलादेः पाकभेदे शब्दमा० ।

भर्णस् त्रि० भृ–असुन् नुगागमः । भरणकारके ऋ० ८।६०।२

भर्त्तृ पु० भृ–तृच् ।१स्वामिनि २अधिपतौ अमरः । ३राजनि ४पोषके ५धातरि च त्रि० मेदि० याजका० षष्ठ्या समासः । ६विष्णौ पु० "भवनो भावनो भर्त्ता" विष्णुस० तस्य सत्त्वगुणेन पालनात् तथात्वम् ।

भर्तृघ्नी स्त्री भर्त्तारं हन्ति हन–टक् ङीप् । पतिघातिन्यां पापिष्ठायां "पाषण्डमानाश्रितास्तेनाभर्तृघ्नः कामगादिकाः" याज्ञ० । आर्षत्वात् मनुष्यकर्तृकत्वेऽपीह टक् ।

भर्तृदारक पु० भर्तुरधिपस्य राज्ञः दारकः पुत्रः । नाट्योक्तौ १राजकुमारे । २तत्कन्यायां स्त्री । भर्तृदारिका० अमरः ।

भर्तृस्थान न० तीर्थभेदे भा०व० ८४ अ० ।

भर्तृहरि पु० भर्त्ता हरिरिव । वाक्यपदीयादि ग्रन्थकर्त्तरि विक्रमादित्यस्य ज्येष्ठे भ्रातरि राजभेदे । [भर्त्सवत् त ।

भर्त्स अधिक्षेपे चुरा०उभ०सक०सेट् । भर्त्सयति ते अब-

भर्त्सन न० भर्त्स–ल्युट् । अपकारवचने अधिक्षेपे तिरस्कारायापकारार्थकवाक्योक्तौ । युच् । भर्त्सनाप्यत्र स्त्री

भर्त्स्यपत्रिका स्त्री भर्त्स्यं भर्त्सनीयं पत्रमस्याः कप् कापि अत इत्त्वम् । महानीलीवृक्षे राजनि० ।

भर्भ हिंसायां भ्वा०पर०सक०सेट् । भर्भति अभर्भीत् ।

भर्म(न्) न० भृ–मन् मनिन् वा । १स्वर्णे अमरः । २भृतौ ३नाभौ ४धुस्तूरे च हेमच० । नान्तः अदन्तश्च द्विरूपकोषः

भर्मण्या स्त्री भर्मणि साधु यत् । भृतौ हेमच० ।

भर्म्याश्व पु० भरतवंश्ये नृपभेदे भाग० ९।२१।२४ ।

भर्व हिंसायां भ्वा०पर०सक०सेट् । भर्वति अभर्वीत् । भोजने निघण्टुः । [लिट् बभले ।

भल वधे दाने निरूपणे च भ्वा०आ०सक०सेट् । भलते अभ-

भल निरूपणे चु०आ०सक०सेट् । भालयते अबीभलत ।

भलता स्त्री भाति–भा–क कर्म० । राजबलाख्यलतायाम् शब्दर०

भलन्दन पु० १दिष्टवंश्ये नृपभेदे भाग०९।२।१६ । २कान्यकुब्जदेशीये नृपभेदे ब्रह्मवै० प्रकृ०ख० १७ अ० ।

भलानस् त्रि० भद्रमुखे ऋ० ७।१८।७ । [अल्लीत् ।

भल्ल दाने वधे निरूपणे च भ्वा०प०सक०सेट् । भल्लति अभ-

भल्ल पु० भल्ल-अच् । १भल्लूके । २अस्त्रभेदे पुंन० । स्वार्थे क भल्लूके पुंस्त्री०वा गौरा० ङीष् पक्षे टाप् । भल्लकाप्यत्र । ततः सङ्ख्या०निर्वृत्तार्थे अण् । भाल्ल भल्लकृते त्रि० चतुरर्थ्यां सख्या० ठञ् । भाल्लिक तस्यादूरदेशादौ त्रि० । ३क०स०११ उक्ते पैशान्यां स्थिते ४देशभेदे पु० ।४तद्देशभवे च ब०व० । स्वार्थे क । भल्लक तत्रार्थे ततः स्वार्थे छ । भल्लकीय तदर्थे तस्यापत्यं छ । भल्लकीय तदपत्यादौ त्रि० ।

भल्लपाल पु० भल्लं पालयति पालि–अण् उप०स० । भल्लपालके ततः वस्त्रा०चतुरर्थ्याम् ठञ् । भाल्लपालिक तेन निर्वृत्तादौ । (तण्डुला) क्षुपभेदे शब्दच० ।

भल्लपुच्छी स्त्री भल्लस्य पुच्छमिव पुष्पमस्याः ङीप् । (गोरक्ष-

भल्लवि पु० ऋषिभेदे तस्यापत्यमिञ् । भाल्लवि तदपत्ये तस्यापत्यं ढकञ् । भाल्लवेय तदपत्ये पुंस्त्री० । इन्द्रद्युम्ने ऋषिभेदे पु० छा०उ० । [छा०उ० ।

भल्लाक्ष पु० भल्लस्येवाक्षि यस्य षच्समा० । मन्दद्दष्टौ हंसभेदे

भल्लाट पु० १शशिध्वजराजपुत्रे कल्किपु० २२अ० । २ब्रह्मदत्तवंश्ये ३नृपभेदे हरिवं०२०अ० ।

भल्लात पु०न० भल्लुं भल्लाद्रमिवाततति सर्षिनम् अत–अच् । (भेला) वृक्षभेदे स्वार्थे क । तत्रैव पुंस्त्री०गौ०ङीष् । भल्लातकमप्यत्र रत्नमा० । "भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करो

ऽग्निकः। तथैवाग्नीसखो भल्लो वीरहच्छ शोफहृत्। भल्लातकफलं पक्वं स्वादुपाकरसं लघु। कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम्। मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम्। कुष्ठार्शोग्रहणीगुल्मशोफानाह-ज्वरक्रिमीन्। तन्मज्जा मधुरो वृष्यो वृंहणो वातपित्तहा। वृन्तमायुष्करं स्वादु पित्तघ्नं केश्य-मग्निकृत्। भल्लातकः कषायोष्णः शुक्रलो मधुरो लघुः। वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान्। हन्ति गुल्म-ज्वरं श्वित्रवह्निमान्द्यक्रिमिव्रणान्" भावप्र०। गुड़भल्लातक-शब्दे भल्लातकीगुड़पाकविधिर्दृश्यः।

भल्लातकतैल सुश्रुतोक्ते भल्लातकफलच्यवनजाते तैलभेदे "दुष्टदत्वात् तु शुक्लानां क्षणकर्म हितं भवेत्। भल्ला-तकान्वासयेत् तु क्षीरे प्राङ्मूत्रभावितान्। ततो द्विधा छेदयित्वा लौहे कुम्भे निधापयेत्। कुम्भेऽन्यस्मि-न्निखाते तु तं कुम्भमथ योजयेत्। मुखं मुखेन सं-न्धाय गोमयैर्दाहयेत् ततः। यः स्नेहश्च्यवते तस्मा-दुपाहरेत् तं शनैर्भिषक्। प्रास्यानूपशफान्दग्ध्वान् सूक्ष्मचूर्णानि कारयेत्। तैलेनानेन संसृष्टं शुक्लमालेप-येद् व्रणम्। भल्लातकविधानेन सारस्नेहांस्तु कार-येत्। ये च केचित्फलस्नेहा विधानं तेषु कीर्त्तितम्। दुष्टदत्वात्तु कृष्णानां पाण्डुकर्म हितं भवेत्। सप्तरात्रं स्थितं क्षीरे छागले रोहिणीफलम्। तेनैव पिष्टं सुश्लक्ष्णं सवर्णकरणं हितम्"। [औषधभेदे

भल्लातकलौह न० चक्रदत्तोक्ते भल्लातकादिपक्वे लौहरूपे "चित्रक त्रिफला मुस्तं ग्रन्थिकं चविकाऽमृता। हस्ति-पिप्पल्यपामार्गदण्डोत्पलकुठेरकाः। एषां चतुष्पलान् भागान् जलद्रोणे विपाचयेत्। भल्लातकसहस्रे द्वे छित्त्वा तत्रैव दापयेत्। तेन पादावशेषेण लौहपात्रे पचेद्भिषक्। तुलार्द्धं तीक्ष्णलौहस्य घृतस्य कुड़वद्वयम्। त्र्यूषणं त्रिफलावह्निसैन्धवं विड़मौद्भिदम्। सौवर्च-लविडङ्गानि पालिकांशानि कल्पयेत्। कुडवं वृद्धदारस्य तालमूल्यास्तथैव च। शूरणस्य पलान्यष्टौ चूर्णं कृत्वा विनिः क्षिपेत्। सिद्धे शीते प्रदातव्यं मधुनः कुड़वद्वयम्। प्रातर्भोजनकाले च ततः खादेद् यथाबलम्। अर्शांसि ग्रहणीदोषं पाण्डुरोगमरोचकम्। क्रिमिगुल्माश्मरीमेहान् शूलञ्चाशु व्यपोहति। करोति शुक्रोप-चयं वलीपलितनाशनम्। रसायनमिदं श्रेष्ठं सर्व-रोगहरं परम्"।

भल्लातकविधान सुश्रुतोक्ते सहस्रतत्फलसेवनप्रकारभेदे "अत ऊर्द्ध्वं भल्लातकविधानमुपदेक्ष्यामः। भल्लातकानि परिपक्वान्यनुपहतान्याहृत्यैकमादाय द्विधा त्रिधा चतुर्द्धा वा छेदयित्वा कषायकल्पेन विपाच्य कषायस्य शुक्तिमनुष्णां घृताभ्यक्तताल्वोष्ठजिह्वः प्रातः प्रातरुपसेवेत ततोऽपराह्णे क्षीरं सर्पिरोदन इत्याहार एवमेकैकं वर्द्धयेत् तावद्-यावत्पञ्चेति ततः पञ्च पञ्चाभिवर्द्धयेद्यावत् सप्ततिरिति प्राप्य च सप्ततिमपकर्षयेद्भूयः पञ्च पञ्च यावत्पञ्चेति पञ्चभ्यश्चैकैकं यावदेकमिति। एवं भल्लातकसहस्र-मुपयुज्य सर्वकुष्ठार्शोभिर्विमुक्तो बलवानरोगः शतायु-र्भवति। द्विव्रणीयोक्तेन विधानेन भल्लातकनिश्च्यु-तितं स्नेहमादाय प्रातः प्रातः शुक्तिमात्रमुपयुञ्जीत जीर्णे पूर्ववदाहारः फलप्रकर्षश्च। भल्लातकमज्जभ्यो वा स्नेहमादायापकृष्टदोषः प्रतिसंसृष्टभक्तो निवातमा-गारं प्रविश्य यथाबलं प्रसृतिं प्रकुञ्चं चोपयुञ्जीत। तस्मिन् जीर्णे क्षीरं सर्पिरोदन इत्याहारः"।

भल्ली स्त्री भल्ल हिंसे अच् गौरा० ङीष्। भल्लातके शब्द-रत्ना० तत्फलस्य स्पर्शिनां व्रणकारितया हिंसकत्वा-त्तस्यास्तथात्वम्। स्वार्थे क भल्लिका तत्रार्थे शब्दच०।

भल्लु(ल्लू)क पु०स्त्री भल्ल–उ(ऊ)क। (भालुक) १जन्तुभेदे अमरः स्त्रियां ङीष्। २श्योनाकभेदे राजनि०। स च वीरभल्लादिगणे सुश्रुते उक्तः। द्रव्यगणशब्दे दृश्यम्। ३कोषस्थे जलजन्तुभेदे "शङ्खशङ्खनखशुक्तिशम्बूकभल्लूक-प्रभृतयः कोषस्थाः" सुश्रुतः।

भव पु० भवत्यस्मात् भू–अपादाने अप्। १महादेवे तस्य तन्नामनिरुक्तिः शत० ब्रा० ६।१।३।१५। "तमब्रवीद्भवो-ऽसीति। तद्यदस्य तन्नामाकरोत्पर्जन्यस्तद्रूपमभवत् पर्जन्यो वै भवः पर्जन्याद्धीदं सर्वं भवति सोऽब्रवीज्ज्या-यान् वाऽतोऽस्मि धेह्येव मे नामेति" जलस्य पर्जन्यहेतु-कत्वात् तस्य जलमूर्त्तित्वम्। अतएवाष्टमूर्त्तिमध्ये जलरूपेण भवनाम्ना तस्यार्चा। भावे अप्। २जन्मनि ३उत्पत्तौ ४प्राप्तौ ५संसारे मेदि०। कर्त्तरि अच् (चालता) ६फले न० राजनि०।

भवक त्रि० भू-वुन्। १उत्पन्ने २आशीर्वादके संक्षिप्तसा०।

भवकेतु पु० केतुभेदे बृ०सं० ११अ० केतुशब्दे दृश्यम्।

भवघस्मर पु० ६त०। दावानले शब्दमा०।

भवत् त्रि० भा–डवतु। १युष्मदर्थे, सर्वनामता चास्य। भवान् भवत्याः पुत्रः भवत्पुत्रः। भू–शतृ। २वर्त्तमानकालीन

३भवनकर्त्तरि च। भवन् स्त्रियामुभयत्र ङीप् शतन्तस्य नुम्। ङीवन्तः ४विशाखायां शब्दरत्ना०।

भवदा स्त्री स्कन्दानुचरमातृभेदे भा० श० ४७ अ०।

भवदादि पञ्चमीषष्ठीतरविभक्त्यन्तादपि "इतराभ्योऽपि दृश्यन्ते" पा० तसिलादिप्रत्ययनिमित्ते शब्दगणे तत्र "दृशि-ग्रहणात् भवदादियोग एव" वार्त्ति०। स च गणः "भवान् दीर्घायुः देवानांप्रियः आयुष्मान्"। तेन स भवान् ततो भवान् तत्रभवान् तत्रभवन्तम् इत्यादि एवम् सदीर्घायुः ततो दीर्घायुरित्यादि।

भवदारु पुंन० भवप्रियं दारु। देवदारुवृक्षे राजनि०।

भवदीय त्रि० भवतोऽयम् छस् सित्त्वात् पदत्वे तस्य दः। त्वत्सम्बन्धिनि। [१जन्मनि ४सत्तायाञ्च मेदि०।

भवन न० भू-आधारे ल्युट्। १गृहे अमरः भावे ल्युट्। २भावे

भवनपति पु० ६त०। १गृहस्वामिनि २राज्यधीशे च भवन-नाथादयोऽप्यत्र।

भवन्त पु० भू-झच्। काले उज्ज्वल० संक्षिप्तसा०।

भवन्ति पु० भू-झिच् अस्य स्त्रीत्वमपि। वर्त्तमानकाले जन्मादौ स्त्रीत्वे ङीप्। "वर्त्तमानभवन्तीपरः प्रयोक्तव्यः" महाभाष्यम्।

भवभूत न० भवरूपे अविततस्वरूपे परमेश्वरे "विश्वरूपं भव-भूतमीशम्" श्वेता०उ०।

भवभूति पु० ६त०। १महादेवविभूतौ। महावीरचरितो-त्तररामचरितमालतीमाधवादिनाटककर्त्तरि २विदग्धे।

भवरुत् पु० भव जन्मान्ते रोदित्यनेन रुद-करणे क्विप्। प्रेतपटहे त्रिका०।

भवाचल पु० ६त०। मन्दरस्य पूर्ववर्त्तिनि शैलभेदे कैलासे। "शीतार्त्तश्चक्रमुञ्जश्च कुलीरोऽथ सकङ्कवान्। मणिशैलो-ऽथ वृषवान् महानीलो भवाचलः। सबिन्दुर्मन्दरो वेणुस्तामसो निषधस्तथा। देवशैलश्च पूर्वेण मन्दरस्य महाचलाः" मार्क०पु०५५अ०। [स्त्री शब्दमा०

भवात्मज पु० ६त०। १कार्त्तिकेये २गणेशे च ३मनसादेव्यां

भवादृश(क्ष)श् त्रि० भवत इवैव दर्शनमस्य भवत्+दृश-क्विप् टक् क्स क्विप् वा सर्वनामत्वात् आत्। भवत्तुल्ये जने। टकि क्विपि च ङीप भवादृशी।

भवानी स्त्री भवस्य पत्नी भव+ङीप् आनुक् च। शिव-भार्य्यायाम् दुर्गायाम् अमरः। [गुरुत्वात् तथात्वम्।

भवानीगुरु पु० ६त०। हिमाचले तस्य तदुत्पादकत्वेन तद्गु-

भवानीपति पु०६त०।महादेवे तत्पदस्य काव्ये प्रयोगे भवा-न्याः पत्यन्तरप्रतीतिकारित्वाद्विरुद्धार्थद्योतकत्वं काव्यदोषः।

भवान्तकृत् पु० ६त०। १वेधसि तस्य प्रलयकाले सर्वभूतानां जन्मविनाशकत्वात् तथात्वम्। "यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते" मनुः। २संसारनाशके ज्ञाने च।

भवाभीष्ट पु० भवस्य महादेवस्याभीष्टः। १गुग्गुलौ राजनि० ७त०। २भवेऽभीप्सिते त्रि०।

भवायनी स्त्री भवे महादेवशिरसि अयनं स्थानमस्याः गौरा०ङीष्। १गङ्गायाम् शब्दर०२शिवतत्परे शैवे त्रि०।

भविक न० भवो भूतिरुत्पाद्यत्वेनास्त्यस्य ठन्। १कुशले कुश-लस्य भूतिहेतुत्वात्तथात्वम्। अर्श० अच् २तद्वति त्रि० अमरः। [पत्तिके जटा०।

भवित त्रि० भवो जातोऽस्य तार० इतच्। भूते अतीतोत्-

भवितव्य न० भू-भविष्यति कर्त्तरि च नि० तव्यत्। अवश्य भव्ये "भवितव्यं भवत्येव यद्विधेर्मनसि स्थितम्"।

भवितव्यता स्त्री भवितव्यस्य भावः तल्। १अवश्यम्भावे। २भाग्ये च जटाधरः। [त्रिका०

भविन त्रि० भू-चिन्तायाम् बा० इन। काव्यस्य कर्त्तरि

भविल पु०भू-भविष्यति इलच्। १भव्ये भविष्यति उज्ज्वल० २जारे पु० त्रिका०।

भविष्णु त्रि० भू-इष्णुच्। भवनशीले अमरः।

भविष्य(त्) पु० भू-"लृटः सदेति" शतृ-स्यट् च पृषो० वा तल्लोपः। भाविनि १काले २तत्कालवर्त्तिनि पदार्थे त्रि० स्त्रियां ङीप् नुम् च "अव्याक्षेपो भविष्यन्त्याः" रघुः। तल्लोपपक्षे क्लीवता। उत्तर-पदस्थः त्रि०। "यद्भविष्यो विनश्यति" पञ्चत० ३भवि-ष्यमधिकृत्य कृते पुराणभेदे न०। तच्च महापुराणान्त-र्गतं पुराणं तत्प्रतिपाद्यविषयादिकं नारदीयपु० ४पा० १००अ० उक्तं यथा

"अथ ते संप्रवक्ष्यामि पुराणं सर्वसिद्धिदम्। भविष्यं भवतः सर्वलोकाभीष्टप्रदायकम्। तत्राहं सर्वदेवाना-मादिकर्त्ता समुद्यतः। सृष्ट्यर्थं तत्र सञ्जातो मनुः स्वायम्भुवः पुरा। स मां प्रणम्य पप्रच्छ धर्मं सर्वार्थ-साधकम्। ——ं तस्मै तदा प्रीतः प्रावोचं धर्मसंहि-ताम्। पुराणानां यदा व्यासो व्यासञ्चक्रे महामतिः। तदा तां संहितां सर्वां पञ्चधा व्यभजन्मुनिः। अघो-रकल्पवृत्तान्तनानाश्चर्यकथाचिताम्"। तत्र प्रथम-पर्वणि। तत्रादिमं स्मृतं पर्व ब्राह्मं यत्राप्युप-क्रमः। सूतशौनकसंवादे पुराणप्रश्नसंक्रमः। आदित्य-चरितः प्रायः सर्वाख्यानसमाचितः। सृष्ट्यादिलक्षणो-

येतः शास्त्रसर्वस्वरूपकः। पुस्तकलेखकानां लक्षणञ्च ततः परम्। संस्काराणाञ्च सर्वेषां लक्षणञ्चात्र कीर्त्तितम्। पक्षत्यादितिथीनाञ्च कल्पाः सप्त च कीर्त्तिताः। अष्टम्याद्याः शेषकल्पाः वैष्णवे पर्वणि स्मृताः। शैवे च कामतो भिन्नाः सौरे चान्त्यकथाचयः। प्रतिसर्गाह्वयं पश्चान्नानाख्यानसमाचितम्। पुराणस्योपसंहारसहितं पर्व पञ्चमम्। एषु पञ्चसु पूर्वस्मिन् ब्रह्मणो महिमाधिकः"। द्वितीयतृतीयचतुर्थपञ्चमपर्वसु "धर्मे कामे च मोक्षे तु विष्णोश्चापि शिवस्य च। द्वितीये च तृतीये च सौरो वर्गचतुष्टये॥। प्रतिसर्गाह्वयं त्वान्त्यं प्रोक्तं सर्वकथाचितम्। एतत् भविष्यं निर्दिष्टं पर्व व्यासेन धीमता। चतुर्दशसहस्रन्तु पुराणं परिकीर्त्तितम्। भविष्यं सर्वदेवानां साम्यं यत्र प्रकीर्त्तितम्। गुणानां तारतम्येन समं ब्रह्मेति हि श्रुतिः"। तद्दानफलस्तुतिः। "तल्लिखित्वा तु यो दद्यात् पौष्यां विद्वान् विमत्सरः। गुडधेनुयुतं हेमवस्त्रमाल्यविभूषणैः। वाचकं पुस्तकञ्चापि पूजयित्वा विधानतः। गन्धाद्यैर्भक्ष्यभक्ष्यैश्च कृत्वा नीराजनादिकम्। यो वै जितेन्द्रियो भूत्वा सोपवासः समाहितः। अथ वा यो नरो भक्त्या कीर्त्तयेच्छृणुयादपि। स मुक्तः पातकैर्घोरैः प्रयाति ब्रह्मणः पदम्। योऽप्यनुक्रमणीमेतां भविष्यस्य निरूपिताम्। पठेद्वा शृणुयाच्चैतौ भुक्तिमुक्तिञ्च विन्दतः"। ४(चालता) फलभेदे राजनि०। तान्तं ५जले निघण्टुः। भविष्यत्त्वञ्च वर्त्तमानप्रागभावप्रतियोगित्वमिति नैयायिकाः पदार्थस्य अनागतावस्थाभेद इति सांख्यादयः। ४हरिवंशपर्वभेदे न०।

भविष्यदाक्षेप पु० "सत्यं ब्रवीमि न त्वं मां द्रष्टुं वल्लभ! लप्स्यसे। अन्यचुम्बनसंक्रान्तलाक्षारक्तेन चक्षुषा। सोऽयं भविष्यदाक्षेपः प्रागेवातिमनस्विनी। कदाचिदपराधोऽस्य भावीत्येवमरुन्ध यत्"। साव्यादर्शोक्ते अर्थालङ्कारभेदे।

भवीयस् त्रि०अतिशयेन बहुः बहु+ईयसुन् "बहोर्लोपो भू च बहोः" पा०भूरादेशः वेदे न ईलोपः। बहुतरे ऋ०१।८१।१ लोके तु ईयसुन ईकारलोपः भूय इत्येव।

भव्य त्रि० भू–कर्त्तरि नि० यत्। १भाविनि "अवश्यभव्येष्वनवग्रहग्रहेति" नैषधम्। (चालता)२फलभेदे राजनि० "भव्यं स्वादु कषायाम्लं हृद्यमास्यस्य शोधनम्। तदेव पक्वं दोषघ्नं गुरु ग्राहि विषापहम्" राजनि०। ३अस्थिरे मेदि० ४शुभे ५सत्ये ६योग्ये च न०। ७तद्वति त्रि०। ८कर्मरङ्गे पु० ९गजपिप्पल्यां १०उमायां च स्त्री मेदि०। ११रसभेदे शब्दर०।

भष कुक्कुरशब्दे भ्वा०पर०सक०सेट्। भषति अभषीत्-अभाषीत्

भष पुंस्त्री०भष–अच्। १कुक्कुरे शब्दरत्ना०। स्त्रियां जातित्वात् ङीष्। २स्वर्णचौर्य्यां स्त्री रत्नमा० टाप्।

भषक पु० स्त्री० भष–क्वुन्। कुक्कुरे अमरः। स्त्रियां ङीष्।

भषण न० भष–भावे ल्युट्। कुक्कुरशब्दे हेमच०।

भस दीप्तौ अक०भर्त्सने सक०जु०पर०सेट्। बभस्ति। अभासीत् अभसीत् बभास। वैदिकोऽयम्। [बभास।

भस भक्षणे प०सक०सेट् निघण्टुः। भसति अभा(भ)सीत्

भसद् न० भस–अदि। १जघने उज्ज्वल०।२भास्वरे ३मांसे च ४जघने स्त्री मेदि०५कारण्डवखगे ६प्लवे पु०उणादिको० ७काले पुंलिङ्गका० [पाठः।

भसन्त पु० भस–वा० झच्। काले त्रिका० तत्र भवन्त इत्येव

भसन्धि पु०६त०। नक्षत्रभेदानां सन्ध्यात्मके कालभेदे यथोक्तम् "सार्पेन्द्रपौष्ण्यधिष्ण्यानामन्त्याः पादाः भसन्धयः। तदग्रभेष्वाद्यपादो गण्डान्तं नाम कीर्त्यते" सू०सि०। "अश्लेषाज्येष्ठारेवतीनक्षत्राणामन्त्याश्चतुर्थचरणाः नक्षत्रसन्धयो भवन्ति। तदग्रभेषु तेषामश्लेषाज्येष्ठारेवतीनक्षत्राणामुत्तरेषु मघामूलाश्विनीनक्षत्रेष्वित्यर्थः प्रथमचरणो गण्डान्तं नाम प्रसिद्धमुच्यते। यद्यप्यश्लेषाज्येष्ठारेवतीनक्षत्राणामन्तिमं घटिकाद्वयं मघामूलाश्विनीनक्षत्राणामादिमं घटिकाद्वयमिति चतस्रोऽन्तरघटिका गण्डान्तम्। एतदतिरिक्तो नक्षत्रसन्धिः पूर्वनक्षत्रान्तघटिकोत्तरनक्षत्रादिमघटिकेत्यन्तरालघटिकाद्वय चन्द्रमण्डलसम्बन्धेन घटिकाः सार्द्धद्वयमिति संहिताविरुद्धं तथापि सूर्योक्तस्य स्वतः प्रामाण्यान्न क्षतिः। अथैकवाक्यतार्थं पादशब्दः कर्मेत्यादिवद् द्विसङ्ख्यावाचकः। घटिका इत्यध्याहारश्च। तथा च द्विसङ्ख्यामिता अन्त्यघटिका नक्षत्रसन्धिः" रङ्ग०। २नक्षत्रयोः सन्धिकाले च तदानयनं सि०शि०दर्शितं तच्च तिथिसन्धिशब्दे ११०० पृ० दर्शितम्।

भसित न० भस–क्त। भस्मनि हेम०। [देशभेदे शब्दर०।

भसूचक पु० भानि नक्षत्राणि सूचयति सूचि-ण्वुल्।

भस्त्रा स्त्री भस–ष्ट्रन्। १चर्मप्रसेविकायाम् अग्निसन्धुक्षणे चर्मनिर्मिते यन्त्रभेदे। (याँता) अमरः। षित्त्वात् ङीष्। अत्रैव शब्दरत्ना० स्वार्थे क टाप न इत्त्वम्। भस्त्रा काप्यत्रैव। ततः उत्करा० चतुरर्थ्यां छ। भस्त्रीय दूरदेशादौ त्रि०।

भस्त्राफला स्त्री भस्त्रेव फलमस्याः ङीप् । (टेपारि) क्षुपभेदे

भस्मक न॰ भस्म करोति कृ–ड । (भस्मकीट) बहुभोजनकारके १रोगभेदे । "कट्वादिरूक्षान्नभुजां नराणां क्षीणे कफे मारुतपित्तवृद्धौ । अतिप्रवृद्धः पवनान्वितोऽग्निर्भुक्तं क्षणाद्भस्म करोति यस्मात् । तस्मादसौ भस्मकसंज्ञकोऽभूदुपेक्षितोऽयं पचते च धातून्" । भस्मकस्य सोपद्रवमरिष्टमाह "तृट्स्वेददाहमूर्च्छादीन् कृत्वैवात्यग्निसम्भवान् । पक्वाद्यमाशु धात्वादीन् स क्षिप्रं नाशयेदसून्" भावप्र॰ । भस्मेव इवार्थे कन् । २कलधौते रूप्ये ३विडङ्गे च मेदि॰ ।

भस्मकूट पु॰ भस्मरूपे पर्वतभेदे कालि॰ ८१६॰ ।

भस्मगन्धा स्त्री भस्मन इव गन्धोऽस्याः । रेणुकाख्यगन्धद्रव्ये भावप्र॰ । स्वार्थे क अत इत्त्वम् । तत्रैव जटा॰

भस्मगन्धिनी स्त्री भस्मन इव गन्धोऽस्त्यस्या व.हुल्येन इनि ङीप् । रेणुकाख्ये गन्धद्रव्ये अमरः ।

भस्मगर्भ पु॰ भस्म गर्भे यस्य । १तिनिशवृक्षे राजनि॰ २कपिलशिंशपायाम् अमरः । ३रेणुकाख्यगन्धद्रव्ये स्त्री जटाधरः टाप् ।

भस्मजावाल पु॰ उपनिषद्भेदे उपनिषच्छब्दे दृश्यम् ।

भस्मतूल न॰ भस्म तूलयति तूल–उत्क्षेपे क । १ग्रामकूटे २पांशुवर्षणे ३हिमे च मेदि॰ ।

भस्मन् न॰भस–मनिन् । (छाइ) दग्धगोमयादिविकारे अमरः अस्य शिवदेहलेपने कारणं कालिकापु॰ ४१ अ॰ उक्तं यथा "महादेवोऽथ तद्भस्म मनोभवशरीरजम् । आदाय सर्वगात्रेषु भूतिलेपं तदाकरोत् । लेपशेषाणि भस्मानि समादाय तदा हरः । सगणोऽन्तर्दधे काली विहाय विधिसम्मतः" । तद्धारणविधिर्यथा

"भस्मोपरि चन्दनादिकं न धार्यं तदुक्तं कौर्मे "वैदिकैर्मन्त्रै रहितं चन्दनागुरुकुङ्कुमम् । तिर्यक्पुण्ड्रात्मना धार्यं कान्तिसौख्याभिवाञ्छिभिः । पुण्ड्रोद्धृतचन्दनाद्यैरपि भस्म न संत्यजेत् । इच्छेत भस्मत्यागी सर्तीशक्रोधवह्निवः । चन्दनादुपरि प्राप्तो धारयेद्भस्म वैदिकम् । लौकिकं चन्दनाद्यं तु भस्मोपरि न धारयेत् । भस्मचन्दनादीनां त्यागेनार्थो न विद्यते । चन्दनादीन्यतो लौकिकान्येवात्र न संशयः । उपरिष्टाच्चन्दनादेर्धृतेऽस्मे मितभस्मनि । चन्दनाद्युत्थभूषाया फलाप्तेः को निवारकः" । त्रिपुण्ड्रधारणं मन्त्ररहितं तूष्णीं च कार्यम्" तदुक्तं शिवेश्वरसंहितायां "जावालोक्तादिकैर्मन्त्रैर्धार्यं भस्मत्रिपुण्ड्रकम् । अन्यथा श्वेप्जलं यावद्रजस्तत्रक व्रजेदिति" । शिवधर्मे "येन भस्मोक्तमार्गेण न धृतं मुनिपुङ्गव ! । तस्य शिवि मुने ! जन्म निःफलं सूकरो यथा" । मन्त्रसारसुधानिधौ "त्रिपुण्ड्रकं सदा कुर्यात् मन्त्रपूतेन भस्मना । मन्त्रेण हीनं यः कुर्यात् परभागी भवेन्नरः" । शिवापूजा तद्धारणं न सिध्यति "विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया । महादेवोऽर्चितो येन न च तस्य फलप्रदः लिङ्गपु॰ ।

भस्मरोहा स्त्री भस्मनि रोहति रुह–अच् । दग्धिकायाम् राजनि॰ ।

भस्मवेधक पु॰भस्मन इव वेधो वेधनं यस्य कप् । कर्पूरे शब्द॰

भस्मसा अव्य॰ डाजन्तः । अवर्णजन्यशब्दानुकारे यजु॰११।८॰ वेददी॰ । [साति । साकल्येन भस्मरूपताकरणे ।

भस्मसात् अव्य॰ भस्म कात्स्न्येन सम्पन्नं करोति भस्मन्+

भस्माचल पु॰ कामरूपस्थे गिरिभेदे कालिकापु॰ ८१ अ॰ ।

भस्मासुर पु॰ असुरभेदे । इति ख्याते वृकासुरे शिववरेण स यस्य शीर्षं करेण स्पृशति स भस्म भवतीति कथा भाग॰ १०।८८ अ॰ । [वा॰ इ । कर्पूरे त्रिका॰ ।

भस्माह्वय पु॰ भस्म आह्वयते साद्दृश्येण स्पर्द्धते आ+ह्वे

भा दीप्तौ अदा॰पर॰अक॰अनिट् । भाति अभासीत् बभौ । प्रति+बुद्धिप्राकट्ये । वि+अति+विशेषभासने–आ॰।दीप्तिश्च तैजसपदार्थावयवभेदः प्रकाशश्च । स च ज्ञाने विषयतदाप्रकाशः भित् । भावे अङ् । भा

भा स्त्री भा–अङ् टाप् । दीप्तौ अमरः । [१।४४।३भा॰ ।

भाऋजीक पु॰ भास ऋजीकः । भासः प्रार्जके प्रसिद्धे ऋ॰

भाकुट पु॰ भया दीप्त्या कुटति कुट–क । (भेटकी) मत्स्यभेदे राजव॰ । [ब्रा॰६.४ १.६ भा॰ ।

भाकुरि पु॰भां कुर्चति कुर्च–कि पृषो॰ । दीप्तिकारके यत॰

भाकूट पु॰ । १पर्वतभेदे २मत्स्यभेदे च (भेटकी)मेदि॰ ।

भाकोष पु॰ भानां दीप्तीनां कोष इव । सूर्ये त्रिका॰ ।

भाक्त त्रि॰ भक्तेः गौण्यावृत्तेरागतः अण् । १औपचारिके गौण्या वृत्त्या बोधितेऽर्थे । भक्तस्यास्येदम् अण् ।२अन्नसम्बन्धिनि त्रि॰ । भक्तमन्नमस्मै नियतं दीयते वा अण् । ३नियतभक्तदानसम्प्रदाने त्रि॰ । भक्ताय हितम् अण् । ४भक्तसम्पादनसाधने तण्डुले । [सम्प्रदाये ।

भाक्तिक त्रि॰ भक्तमस्मै नियतं दीयते ठक् । नियतभक्तदान्

भाक्ष त्रि॰ भक्षा शीलमस्य छत्रा॰ अण् । भक्षणशीले ।

भाग पु॰भज–भावे घञ् ।१भजने कर्मणि घञ् । २अंशे अमरः

इष्टवस्तुनोऽङ्के २एकदेशे ४भाग्ये "त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते" इति ज्योतिषोक्ते राशेः ५त्रिंशांशके च शब्दर०। भगो देवताऽस्य अण्। ६पूर्वफल्गुनीनक्षत्रे तत्सनसख्यायाम् ७एकादशसंख्यायां ८भागहारे केनचित् अङ्केन कस्यचित् भजनरूपे अङ्कशास्त्रोक्ते व्यापारभेदे।

भागजाति स्त्री। भागस्य विभजनस्य प्रकारभेदे सा च चतुर्विधा भागजातिः प्रभागजातिः भागानुबन्धो भागापवाहश्च तत्र अंशानां समच्छेदकरणं भागजातिः इत्युच्यते। यथा "अन्योऽन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवम्। मिथो हराभ्यामपवर्त्तिताभ्यां यद्वा हरांशौ सुधियात्र गुण्यौ" लीला०। भागस्य भागः प्रभागो यथा "लवाल्लवघ्नाश्च हराहरघ्नाः भागप्रभागेषु सवर्णनं स्यात्" लीला०। भागस्यानुबन्धो योजनं भागानुबन्धो भागापवाहश्च तद्वियोजनम् यथा "छेदघ्नरूपेषु लवा धनर्णमेकस्य भागा अधिकोनकाश्चेत्। स्वांशाधिकोनाः खलु यत्र तत्र भागानुबन्धे च लवापवाहे। तलस्थहारेण हरं निहन्यात् स्वांशाधिकोनेन न तु तेन भागान्" लीला०

भागधेय न० भाग+स्वार्थे धेय अभिधानात् नपुंसकत्वम्। १भाग्ये। भागेन धीयतेऽसौ धा-कर्मणि यत्। २राजदेये करे पु० अमरः। भागो धीयतेऽस्मै धा-सम्प्रदाने यत्। ३दायादे सपिण्डे जटाधरः।

भागलक्षणा स्त्री भागे लक्षणा। शक्यार्थांशभेदपरित्यागेन इतरांशबोधकलक्षणाभेदे जहदजहत्स्वार्थलक्षणायाम्। जहदजहल्लक्षणाशब्दे १०८१ पृ० दृश्यम्।

भागवत त्रि० भगवतः भगवत्या वा इदम् सोऽस्य देवता वा अण्। भगवतः भगवत्या वा १भक्ते, २तयोः सम्बन्धिनि च "भक्ताः सर्वे भागवता भवन्ति" उद्भटः। तयोः सम्बन्धिगुणवर्णने ३महापुराणे ४उपपुराणे च न० "येन श्रुतं भागवतं पुराणम्" भाग०। भागवतञ्च महापुराणभेदः उपपुराणभेदो वा उपपुराणशब्दे विस्तरेण दर्शितः। नारदीयपु० महापुराणप्रतिपाद्यविषयोक्तौ ये विषया उक्तास्ते नान्यत्रेति विष्णुभागवतस्यैव महापुराणत्वमित्येके उपपुराणशब्दे अन्यमतं दृश्यम्।

विष्णुभागवतप्रतिपाद्यविषयाश्च नार०पु०४अ०९६ उक्ता यथा "मरीचे! शृणु वक्ष्यामि वेदव्यासेन यत् कृतम्। श्रीमद्भागवतं नाम पुराणं ब्रह्मसम्मितम्। तदष्टादशसाहस्रं कीर्त्तितं पापनाशनम्। सुरपादपरूपोऽयं स्कन्धैर्द्वादशभिर्युतः। भगवानेव विप्रेन्द्र! विश्वरूपी समीरितः" तत्र प्रथमस्कन्धे। "तत्र तु प्रथमे स्कन्धे सूतर्षीणां समागमः। व्यासस्य चरितं पुण्यं पाण्डवानां तथैव च। पारीक्षितमुपाख्यानमितीदं समुदाहृतम्"। द्वितीयस्कन्धे "परीक्षिच्छुकसंवादे सृतिद्वयनिरूपणम्। ब्रह्मनारदसंवादेऽवतारचरितामृतम्। पुराणलक्षणञ्चैव सृष्टिकारणसम्भवः। द्वितीयोऽयं समुदितः स्कन्धो व्यासेन धीमता"। तृतीयस्कन्धे "चरितं विदुरस्याथ मैत्रेयेणास्य सङ्गमः। सृष्टिप्रकरणं पश्चाद् ब्रह्मणः परमात्मनः। कापिलं साङ्ख्यमप्यत्र तृतीयोऽयमुदाहृतः"। चतुर्थस्कन्धे "सत्याश्चरितमादौ तु ध्रुवस्य चरितं ततः। पृथोः पुण्यसमाख्यानं ततः प्राचीनबर्हिषः। इत्येष तुर्यो गदितो विसर्गे स्कन्ध उत्तमः"। पञ्चमस्कन्धे "प्रियव्रतस्य चरितं तद्वंश्यानाञ्च पुण्यदम्। ब्रह्माण्डान्तर्गतानाञ्च लोकानां वर्णनन्ततः। नरकस्थितिरित्येष संस्थाने पञ्चमो मतः"। षष्ठस्कन्धे "अजामिलस्य चरितं दक्षसृष्टिनिरूपणम्। वृत्राख्यानं ततः पश्चान्मरुतां जन्म पुण्यदम्। षष्ठोऽयमुदितः स्कन्धो व्यासेन परिपोषणे" सप्तमस्कन्धे "प्रह्लादचरितं पुण्यं वर्णाश्रमनिरूपणम्। सप्तमो गदितो वत्स! वासनाकर्मकीर्त्तने"। अष्टमस्कन्धे। "गजेन्द्रमोक्षणाख्यानं मन्वन्तरनिरूपणम्। समुद्रमथनञ्चैव बलिवैभवबन्धनम्। मत्स्यावतारचरितमष्टमोऽयं प्रकीर्त्तितः"। नवमस्कन्धे "सूर्य्यवंशसमाख्यानं सोमवंशनिरूपणम्। वंश्यानुचरिते प्रोक्तो नवमोऽयं महामते!"। दशमस्कन्धे "कृष्णस्य बालचरितं कौमारञ्च व्रजस्थितिः। कैशोरं मथुरास्थानं यौवनं द्वारकास्थितिः। भूभारहरणञ्चात्र निरोधे दशमः स्मृतः"। एकादशस्कन्धे "नारदेन तु संवादो वसुदेवस्य कीर्त्तितः। यदोश्च दत्तात्रेयेण श्रीकृष्णेनोद्धवस्य च। यादवानां मिथोऽन्तश्च मुक्तावेकादशः स्मृतः। द्वादशस्कन्धे "भविष्यत्कलिनिर्देशो मोक्षो राज्ञः परीक्षितः। वेदशाखाप्रणयनं मार्कण्डेयतपः स्मृतम्। सौरी विभूतिरुदिता सात्त्वती च ततः परम्। पुराणसंख्याकथनमाश्रये द्वादशो ह्ययम्। इत्येवं कथितं वत्स! श्रीमद्भागवतं तव"। तत्फलश्रुतिः "वक्तुः श्रोतुश्चोपदेष्टुरनुमोदितुरेव च। साहाय्यकर्त्तुर्गदितं भक्तिभुक्तिविमुक्तिदम्। प्रौष्ठपद्यां पूर्णिमायां हेमसिंहसमन्वितम्। देयं भागवतायेदं द्विजाय

प्रीतिपूर्वकम् । संपूज्य वस्त्रहेमाद्यैर्भगवद्भक्तिमिच्छता । योऽप्यनुक्रमणीमेतां श्रावयेच्छृणुयात्तथा । स पुराणश्रवणं प्राप्नोति फलमुत्तमम्" । विस्तरस्तु भाग० १२ उपसंहाराध्याये दृश्यः ।

भगवद्भक्तरूपभागवतलक्षणं यथा भाग० ११ स्क० । "सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः । भूतानि भगवत्यात्मन्येष भागवतोत्तमः । न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा । सर्वभूतसमः शान्तः स वै भागवतोत्तमः" । हरियोगेश्वरोत्तरे "गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न काङ्क्षति । विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः" । बृहन्नारदीये "शिवे च परमेशाने विष्णौ च परमात्मनि । समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः" । स्कान्दे "येषां भागवतं शास्त्रं सदा तिष्ठति सन्निधौ । पूजयन्ति च ये नित्यं ते स्युर्भागवता नराः । येषां भागवतं शास्त्रं जीवितादधिकं भवेत् । महाभागवताः श्रेष्ठा विष्णुना कथिता नराः" । तत्रैव "भोजनाच्छादनं सर्वं यथा शक्त्या ददाति यः । विष्णुभक्तस्य सततं स वै भागवतः स्मृतः" । गारुडे "येन सर्वात्मना विष्णुभक्त्या भावो निवेशितः । वैष्णवेषु कृतात्मत्वात् महाभागवतो हि सः" । बृहन्नारदीये "तुलसीकाननं दृष्ट्वा ये नमस्कुर्वते नराः । तत्काष्ठाङ्कितकर्णा ये ते वै भागवतोत्तमाः । तुलसीगन्धमाघ्राय सन्तोषं कुर्वते तु ये । तन्मूलमृद्धृता येश्च ते वै भागवतोत्तमाः" । स्कान्दे "मत्कथां कुरुते यस्तु मत्कथांश्च शृणोति च । हृष्यते मत्कथायाञ्च स वै भागवतोत्तमः" । बृहन्नारदीये "भक्तानमाश्च भक्त्या भक्तभक्तजनलोलुपाः । महाभवणावसक्तास्ते वै भागवतोत्तमाः । येऽभिनन्दन्ति नामानि हरेः शृण्वन्ति हर्षिताः । रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः । अम्बुपाब्दोदयं दृष्ट्वा येऽभिनन्दन्ति मानवाः । हरिनामपरा ये च ते वै भागवतोत्तमाः" । स्कान्दे "येऽर्चयन्ति सदा विष्णुं यत्नेन वरदं हरिम् । देहिनः पुण्यकर्माणः सदा भागवता हि ते" । तत्रैव "विष्णुक्षेत्रे शुभान्येव करोति स्नेहसंयुतः । प्रतिमाश्च हरेर्नित्यं पूजयेत् प्रयतात्मवान् । विष्णुभक्तः स विज्ञेयः कर्मणा मनसा गिरा । नारायणपरो नित्यं भूप ! भागवतो हि सः" पद्मोत्तरखण्डे "तापादिपञ्चसंस्कारी नवेज्याकर्मकारकः । अर्थपञ्चकविद्विप्र ! महाभागवतो हि सः । एकान्तेन सदा विष्णौ यस्मादेवे परायणाः । तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः" भाग० ११ स्कान्दे "ज्ञात्वा ज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः । भजन्त्यनन्यभावेन ते वै भागवता मताः । न कामकर्मबीजानां यस्य चेतसि सम्भवः । वासुदेवैकनिलयः स वै भागवतोत्तमः" । स्कान्दे "यस्य तत्त्वगतस्यापि केशवे रमते मनः । न विच्युता च भक्तिर्वै स वै भागवतो नरः । आपद्गतस्य यस्येह भक्तिरव्यभिचारिणी । नान्यत्र रमते चित्तं स वै भागवतो नरः" । हरियोगेश्वरे "विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः । प्रणयरसनया धृताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः" हरिभक्तिविलासे १० वि० ।

भागवित्ति पु० चूड़नामके ऋषिभेदे "एतदु हैव चूड़ो भागवित्तिः" शत० ब्रा० १४।६।३।१८ ततः कुत्सायां यून्यपत्ये वा ठक् । भागवित्तिक तदीये कुत्सिते यून्यपत्ये पक्षे फक् । भागवित्तेय तत्रार्थे

भागवृत्ति स्त्री उणादिवृत्तिभेदे ।

भागहार पु० भागस्य हारो हरणम् । लीलावत्युक्ते अङ्कपरिकर्माष्टकमध्ये भागहरणरूपे व्यापारभेदे "भागहारे करणसूत्रं वृत्तम् । भाज्याद्धरः शुध्यति यद्गुणः स्यादन्त्यात् फलं तत् खलु भागहारे । समेन केनाप्यपवर्त्य हारभाज्यौ भजेद्वा सति सम्भवे तु" । अत्र पूर्वोदाहरणे गुणिताङ्कानां स्वगुणच्छेदानां भागहारार्थं न्यासः भाज्यः । १६२० । भाजकः १२ । भजनाल्लब्धो गुणः १३५ । अथवा भाज्यहारौ त्रिभिरपवर्त्तितौ ५४० चतुर्भिर्वा ४०५ स्वस्वहारेण हृते फलं तदेव १३५ ।

भागासिद्धि स्त्री हेत्वाभासभेदे "पक्षतावच्छेदकसामानाधिकरण्येन साध्याभावः । यथा पृथिवी गन्धवती घटत्वादित्यादौ पृथिवीत्वसामानाधिकरण्येन पटादौ घटत्वाद्यभावः । बाधे गदा० । यथा वा पृथिव्याद्यश्चत्वारः परमाणवो नित्या गन्धवत्त्वादित्यत्र जलादौ गन्धाभावः ।

भागिन् त्रि० भज-घिनुण् । अंशविशिष्टे । स्त्रियां ङीप् ।

भागिनेय पुंस्त्री० भगिन्या अपत्यम् ढक् । स्वस्रपुत्रे । तत्कन्यायां स्त्री ङीप् ।

भागीयस् त्रि० अतिशयेन भागी ईयसुन् इनो लोपः । अतिशयभागयुते हरिवं० १११अ० श्लो० ।

भागीरथी स्त्री भगीरथेन आनीता तेन भागीरथी मता' प्रकाशं० प्र० स्व ठक् गङ्गारूपे नदीभेदे ।

भागुरि पु० स्मृतिव्याकरणादिकर्त्तरि मुनिभेदे । "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" सि० कौ० ।

भाग्य न० भज-ण्यत् कुत्वम् । १शुभाशुभसूचके कर्मजन्येऽदृष्टे अमरः । भागः प्रयोजनमस्य यत् । २भागार्थे त्रि० । भागमर्हति यत् । ३भागार्हे त्रि० ।

भाङ्गीन न० भङ्गायाः विजयायाः भवनं क्षेत्रं खञ् । (भाङ) भङ्गाभवनयोग्ये क्षेत्रे । खञ् । भाङ्गमप्यत्र । हेमच । [अवभाजत् त ।

भाज पृथक्करणे, अद० चु० उभ० सक० सेट् । भाजयति ते

भाजक त्रि० भज-ण्वुल् । भागकारके अङ्कभेदे विभाजके

भाजन न०भज्यतेऽनेन भाज-ल्युट् । १पात्रे अमरः । २आधारे ३योग्ये च मेदि० । ४आढकपरिमाणभेदे वैद्यकम् ।

भाजिन् त्रि० भज-सेवायां णिनि । सेवके कामन्दकीय० ।

भाजित त्रि० भाजि-कर्मणि क्त । १पृथक्कृते । २भक्ते च ।

भाजी स्त्री० भाज-कर्मणि घञ् नि० ङीप् । भक्तव्यञ्जनभेदे । अन्यत्र भाजा । सि० कौ० ।

भाज्य त्रि० भज्यते विभज्यते भज-कर्मणि ण्यत् । विभजनीये "भाज्यो हरः शुध्यति यद्गुणः स्यादि"ति लीलावती ।

भाटक पु०न० भट-पोषणे ण्वुल् । परगृहयानादेरुपभोगार्थं तत्स्वामिने दीयमाने धने । (भाडा) हला० ।

"परभूमौ गृहं कृत्वा भाटयित्वा वसेत् तु यः । स तद् गृहीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकम् । लोमं विना वसित्वा तु परभूमावनिच्छतः । निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात् कथञ्चन" कात्यायनः । "गृहवाण्यापणादीनि गृहीत्वा भाटकेन यः । स्वामिनोनार्पयेद्यावत्तावद्दाप्यः स भाटकम् । वापी परकृता अप्रतिष्ठितेति विवक्षितम् । "हस्त्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः । स्वामिनोनार्पयेद्यावत्तावद्दाप्यः स भाटकम्" । वृद्धमनुः "यो भाटयित्वा शकटं नीत्वा नान्यत्र गच्छति । भाटं न दद्याद्दाप्योऽसावनूढस्यापि भाटकम्" । शकटं तृणनौकादेरप्युपलक्षणम् । अनूढस्यावाहितस्यापि शकटादेः" इति विवादचिन्तामणिः ।

भाण पु० सा० द० उक्तलक्षणे दशरूपकान्तर्गते दृश्यकाव्यभेदे तल्लक्षणं यथा

"भाणः स्याद्धूर्त्तचरितो नानावस्थान्तरात्मकः । एकाङ्क एक एवात्र निपुणः पण्डितो विटः । रङ्गे प्रकाशयेत् स्वेनानुभूतमितरेण वा । सम्बोधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः । सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यवर्णनैः । तत्रेतिवृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती । मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च" । आकाशभाषितरूप० परवचनमपि स्वयमेवानुवदन्नुत्तरप्रत्युत्तरे कुर्यात् । शृङ्गारवीररसौ च सौभाग्यशौर्यवर्णनेन सूचयेत् । प्रायग्रहणात् कौशिक्यपि वृत्तिर्भवति । उदाहरणं लीलामधुकरः" सा० द० ।

भाण्ड न० भाण्ड-अच् भण-ड-स्वार्थे अण् वा । पात्रे १तैलाद्याधारे २भाजने (भाँड) "अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः" नारदः । ३गृहभेदे (भाँड़ार) "ब्रह्माण्डभाण्डोदरेत्यादि" वीरचरितम् । ४वणिजां मूलधने ५अश्वभूषायां मेदि० । ६नदीकूलद्वयमध्ये पात्रे च हेमच० । ७गर्दभाण्डे वृक्षे पु० शब्दच० । भण्डस्य भावः अण् । ८भण्डचरित्रे न० (भाड़ामि) अजयः ।

भाण्डपुट पु० नापिते जटाधरः ।

भाण्डपुष्प पु० सर्पभेदे त्रिका० ।

भाण्डल त्रि० भाण्डं लाति ला-क । भाण्डग्राहके स्त्रियां गौरा० ङीष् । [समीपादौ ।

भाण्डव त्रि० भण्डोरदूरादि सुवास्वा० अण् । भण्डु-

भाण्डागार कर्म० । (भाँड़ार) गृहभेदे हेमच० । तत्र नियुक्तः ठञ् । भाण्डागारिक तत्र नियुक्ते त्रि० ।

भाण्डार न० भाण्डं तदाकारमृच्छति ऋ-अण् उप०स० । गृहभेदे (भाँड़ार) ।

भाण्डारिन् पु० भाण्डमृच्छति ऋ-णिनि । धनादिद्रव्यगृहेषु कृताधिकारे । "क्षुधितस्तृषितः कामी विद्यार्थी कलिकारकः । भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत्" इति व्यवहारप्रदीपः । [(भाँड़ि)

भाण्डि स्त्री भण्ड्यतेऽदम् । नापितस्य क्षुराद्याधारपात्रभेदे

भाण्डिवाह पु०भाण्डिं क्षुराद्याधारं (भाण्डि) वहति वहअण् उप०स० नापिते भाण्डि+अस्त्यर्थे लच् । भाण्डिल तत्रार्थे शब्दमा० ।

भाण्डीर पु० भण्ड-ईरच् पृषो० । १वटवृक्षे २वृन्दावनस्थे ३वटवृक्षभेदे च जटा० । "प्रलम्बो नाम भूत्वाथो वटं भाण्डीरमाश्रितः" हरिवं० ५५ अ० ।

भाति स्त्री भा-क्तिन् । शोभायाम् राजनि० ।

भातु पु०भा-तुन् । १सूर्य्ये त्रिका० । २दीप्ते त्रि०उणादिक० ।

भाद्र पु० भद्राभियुक्ता पौर्णमासी भाद्री सा यस्मिन् मासे अण् । चैत्रादितः षष्ठे चान्द्रे १मासे अमरः । २तन्मा-

दीश्चपौर्णमास्यां स्त्री ङीप्। भद्रैव स्वार्थे अण्। ३पूर्वोत्तरभाद्रपदाख्यनक्षत्रे न०। "भाद्रद्वये सागरे" ज्योतिषम्। ४भाद्र्या पौर्णमास्यायुक्ते पक्षे तथाविधे ५गुरुवर्षे च कार्त्तिकशब्दे दृश्यम्।

भाद्रपदा स्त्री ब०व०। भद्रस्येदं अण् भाद्रमिव पदमासाम्। अश्विन्यवधिके पञ्चविंशषड्विंशयोर्नक्षत्रयोः। १तद्युक्ता पौर्णमासी अण् ङीप्। २भाद्रमासस्य पौर्णमास्याम् साऽत्र मासे अण्। ३चान्द्रे भाद्रे मासि पु०। तादृशे ४पक्षे ५गुरुवर्षभेदे च कार्त्तिकशब्दे दृश्यम्।

भाद्रमातुर पु० भद्रायाः सत्याः मातुः अपत्यम् अण् मातुरुत्। सतीपुत्रे हेमच०।

भान न० भा—भावे ल्युट्। १प्रकाशे २दीप्तौ ३ज्ञाने प्रकाशे च।

भानु पु० भा—नु। १सूर्य्ये २अर्कवृक्षे ३किरणे ४राजनि च अमरः ५प्रभौ धरणिः। ६भूतजैनभेदे हेमच०। उत्तममन्वन्तरे ७देवे ब०व० हरिवं०८अ०। ८धर्मपत्नीभेदे स्त्री हरिवं० ३अ०। १०गन्धर्वभेदे पु० भा०आ०६५अ०। ११यदुवंश्यक्षत्रियभेदे भानुमत्याः पितरि पुः हरिवं० १४८अ०। १२विष्णौ पु० "अमृतांशूद्भवो भानुः"विष्णु स० "तमेव भान्तमनुभाति सर्वम्" श्रुतेस्तस्य तथात्वम्।

भानुफला स्त्री भानुरिव दीप्तिमत् फलं प्रसवो यस्याः। कदल्याम् जटाधरः। तस्याः मोचकस्य सूर्य्यतुल्यवर्णत्वात्तथात्वम्।

भानुमती स्त्री भानोर्यादवनृपभदस्य कन्यायां हरिवं० [१४८ अ०।

भानुमत् स्त्री भानुः किरणोऽस्त्यस्य मतुप्। १सूर्य्ये शब्दरत्ना० २अर्कवृक्षे च। भानुमालीत्यप्यत्र। ३नृपभेदे पु० भा०भी० ५४अ०। अहंयातिनृपस्य भार्य्यायां जाते कृतवीर्य्यस्य ४दुहितृभेदे स्त्री भा० आ० ९५अ०।

भानुसेन पु० कर्णपुत्रभेदे भा० क० ४८ अ०।

भानेमि पु० भानोः नेमिरिव। १सूर्य्ये २अर्कवृक्षे च त्रिका०।

भान्त पु० भासः दीप्तेः पञ्चदशाहमध्ये अन्तो यस्य। शुक्लकृष्णपक्षयोः पञ्चदशाहमध्ये कान्तेरुपचयापचययुक्ते चन्द्रे "भान्तः पञ्चदशी" यजु० १४।२३ वेददी० ६त०। २नक्षत्रराश्योरन्ते च।

भाम क्रोधे भ्वा० आत्म० सक० सेट्। भामते अभामिष्ट बभामे।

भाम पु० भाम—घञ्। १क्रोधे निघण्टुः। भा—भावे म। २दीप्तौ च। कर्त्तरि म। ३सूर्य्ये मेदि०। ४अर्कवृक्षे च। ५भगिनीपतौ पु० शब्दरत्ना० ६कोपनायां स्त्रियां स्त्री मेदि०।

भामनी पु० भामं नयति नी—क्विप्। परमेश्वरे "एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति य एवं वेद" छा०उ०। "एष उ भामनीरेष हि यस्मात् सर्वेषु लोकेष्वादित्यचन्द्राग्न्यादिरूपैर्भाति दीप्यते। "तस्य भासा सर्वमिदं विभातीति" श्रुतेरतो भामानि नयतीति भामनीः"भा०। [तायां स्त्रियाम् स्त्री ङीप् अमरः।

भामिन् त्रि०भाम—णिनि। क्रोधयुक्ते स्त्रियां ङीप्। कोप-

भार पु० भृ—घञ्। १गुरुत्वपरिमाणे २तद्वति द्रव्ये ३विंशतितुलापरिमाणे (अष्टसहस्रतोलकपरिमाणे) च पु०। ३वीवधे ४विष्णौ च मेदि०।

भारङ्गी स्त्री भृ—बा० अङ्गच्। पोमबकत्र्यां स्त्रियां ततः काश्या० ठञ्। भारङ्गिक तत्र भवे त्रि०।

भारण्ड पु० उत्तरदेशजे खगभेदे "एकोदराः पृथग्ग्रीवा अन्योऽन्यफलभक्षिणः। असंहता विनश्यन्ति भारण्डा इव पक्षिणः" पञ्चत०।

भारत न० भरताम् भरतवंश्यानधिकृत्य कृतो ग्रन्थः अण्। भारं वेदादिशास्त्रेभ्योऽपि सारांशं तनोति तन—ड वा। १वेदव्यासप्रणीते लक्षश्लोकात्मके ग्रन्थभेदे। भरतेन चिह्नितं तस्येदं वा अण्। "हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता। तस्माच्च भारतं वर्षम्" इत्युक्ते जम्बुद्वीपान्तर्गते २वर्षभेदे। भरतस्य गोत्रापत्यम् अण्। भरतनृपस्य ३वंश्ये। भरतेन मुनिना प्रोक्तमण्। ४भरतमुनिकृते नाटकशास्त्रादौ न०। तदधीयते पुनरण्। ५नटे ब०व० ६अग्निभेदे च ग्रन्थरूपभारतशब्दस्य निरुक्तिः भा०आ०१अ०दर्शिता यथा "एकतश्चतुरो वेदान् भारतञ्चैतदेकतः। पुरा किल सुरैः सर्वैः समेत्य तुलया धृतम्। चतुर्भ्यः सरहस्येभ्यो वेदेभ्यो ह्यधिकं यदा। तदाप्रभृति लोकेऽस्मिन् महाभारतमुच्यते। महत्त्वे च गुरुत्वे च ध्रियमाणं यतोऽधिकम्। महत्त्वाद्भारतत्वाच्च महाभारतमुच्यते। निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते"।

तच्च वेदव्यासेन कृतं तदादिष्टः तच्छिष्यः वैशम्पायनः जनमेजयं श्रावयामास यथोक्तं भा० आ० १अ०।

"जनमेजयेन पृष्टः सन् ब्राह्मणैश्च सहस्रशः। शशास शिष्यमासीनं वैशम्पायनमन्तिके। स सदस्यैः सहासीनः श्रावयामास भारतम्। कर्मान्तरेषु यज्ञस्य चोद्यमानः पुनःपुनः। विस्तरं कुरुवंशस्य गान्धार्य्या धर्मशीलताम्। क्षत्तुः प्रज्ञां,धृतिं कुन्त्याः सम्यग्द्वैपायनोऽब्रवीत्। वासुदेवस्य माहात्म्यं पाण्डवानाञ्च सत्यताम्। दुर्वृत्तं धार्त्तराष्ट्राणामुक्तवान् भगवानृषिः"।

तच्च नानाविधं नानासंख्यान्वितं च कृतं लोके तु शतसाहस्रसंख्यातं यथोक्तं तत्रैवाध्याये

"चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम्। उपाख्यानैर्विना तावद्भारतं प्रोच्यते बुधैः। ततोऽध्यर्द्धशतं भूयः संक्षेपं कृतवानृषिः। अनुक्रमणिकाध्यायं वृत्तान्तानां सपर्वणाम्। इदं द्वैपायनः पूर्वं पुत्रमध्यापयच्छुकम्। ततोऽन्येभ्योऽनुरूपेभ्यः शिष्येभ्यः प्रददौ विभुः। षष्टिं शतसहस्राणि चकारान्यां स संहिताम्। त्रिंशच्छतसहस्रञ्च देवलोके प्रतिष्ठितम्। पित्र्ये पञ्चदश प्रोक्तं गन्धर्व्वेषु चतुर्दश। एकं शतसहस्रन्तु मानुषेषु प्रतिष्ठितम्। नारदोऽश्रावयद्देवानसितो देवलः पितॄन्। गन्धर्व्वयक्षरक्षांसि श्रावयामास वै शुकः। अस्मिंस्तु मानुषे लोके वैशम्पायन उक्तवान्। शिष्यो व्यासस्य धर्म्मात्मा सर्व्ववेदविदांवरः। एकं शतसहस्रन्तु मयोक्तं वै निबोध तत्"। तच्चाष्टादशमहापर्व्वयुतं तदवान्तरपर्व्वशतकं तद्विभागस्तत्र वर्णनीयपदार्थानां संग्रहश्च आ० अ० २अ० दर्शितो यथा

"भारतस्येतिहासस्य श्रूयतां पर्व्वसंग्रहः। आदिपर्व्वणि १पर्व्वानुक्रमणी पूर्वं द्वितीयः२ पर्व्वसंग्रहः।३पौष्यं ४पौलोममास्तीक५मादिरं(ं)शावतारणम्६। ततः सम्भव७पर्व्वोक्तमद्भुतं रोमहर्षणम्। दाहो जतुगृहस्यात्र हैडिम्बं९ पर्व्व चोच्यते। ततो वकवधः१० पर्व्व पर्व्व चैत्ररथं११ ततः। ततः स्वयम्बरो१२ देव्याः पाञ्चाल्याः पर्व्व चोच्यते। क्षात्रधर्म्मेण निर्ज्जित्य ततो वैवाहिकं१३ स्मृतम्। विदुरागमनं पर्व्व राज्यलाभस्तथैव१४ च। अर्ज्जुनस्य वने वासः१५ सुभद्राहरणं१६ ततः। सुभद्राहरणादूर्द्ध्वं ज्ञेयं हरणहारिका १७। ततः खाण्डवदाहाख्यं१८ तत्रैव मयदर्शनम्।(२)सभापर्व्व तत१९श्चोक्तं मन्त्रपर्व्व२० ततः परम्। जरासन्धवधः२१ पर्व्व पर्व्व दिग्विजय२२स्तथा। पर्व्व दिग्विजयादूर्द्ध्वं राजसूयिकं२३-मुच्यते। ततश्चार्घाभिहरणं२४ शिशुपालवध२५स्ततः। द्यूतपर्व्व२६ ततः प्रोक्तमनुद्यूत२७मतः परम्। तत (३)आरण्यकं पर्व्व किर्म्मीरवधः२८ एव च। अर्ज्जुनस्याभिगमनं२९ पर्व्व ज्ञेयमतः परम्। ईश्वरार्ज्जुनयोर्युद्धं पर्व्व कैरात३०संज्ञितम्। इन्द्रलोकाभिगमनं ३१ पर्व्व ज्ञेयमतः परम्। नलोपाख्यान३२मपि च धार्म्मिकं करुणोदयम्। तीर्थयात्रा३३ ततः पर्व्व कुरुराजस्य धीमतः। जटासुरवधः३४ पर्व्व यक्षयुद्ध३५मतः परम्।

निवातकवचैर्युद्धं ३६ पर्व्व चाजगर३७न्ततः। मार्कण्डेयसमास्या३८ च पर्व्वानन्तरमुच्यते। संवादश्च ततः पर्व्व द्रौपदीसत्यभामयोः३९। घोषयात्रा४० ततः पर्व्व मृगस्वप्नोद्भव४१स्ततः। व्रीहिद्रौणिक४२माख्यानमैन्द्रद्युम्नं (समास्यान्तर्गतं) तथैव च। द्रौपदीहरणं४३ पर्व्व जयद्रथविमोक्षणम४४। पतिव्रताया माहात्म्यं सावित्र्याश्चैवमद्भुतम्४५। रामोपाख्यान४६मत्रैव पर्व्व ज्ञेयमतः परम्। कुण्डलाहरणं४७ पर्व्व ततः परमिहोच्यते। आरणेय४८न्ततः पर्व्व (४)वैराटन्तदनन्तरम्। पाण्डवानां प्रवेशश्च४९ समयस्य च पालनम्। कीचकानां वधः५० पर्व्व पर्व्व गोग्रहणं५१न्ततः। अभिमन्योश्च वैराट्या पर्व्व वैवाहिकं ५२ स्मृतम्। (५)उद्योगपर्व्व विज्ञेयमत ऊर्द्ध्वं महाद्भुतम्। ततः सञ्जययानाख्यं५३ पर्व्व ज्ञेयमतः परम्। प्रजागरस्ततः५४ पर्व्व धृतराष्ट्रस्य चिन्तया। पर्व्व सनत्सुजातं ५५ वै गुह्यमध्यात्मदर्शनम्। यानसन्धि५६स्ततः पर्व्व भगवद्यान५७मेव च। मातलीयमुपाख्यानं चरितं गालवस्य च। सभाप्रवेशः कृष्णस्य विदुरापुत्रशासनम्। ज्ञेयं विवादपर्व्वा५८त्र कर्णस्यापि महात्मनः। निर्याणञ्च५९ ततः पर्व्व कुरुपाण्डवसेनयोः। रथातिरथसंख्या६० च पर्व्वोक्तं तदनन्तरम्। उलूकदूतागमनं ६१ पर्व्वामर्षविवर्द्धनम्। अम्बोपाख्यान६२मत्रैव पर्व्व ज्ञेयमतः परम्। भीष्माभिषेचनं(६) पर्व्व ततश्चाद्भुतमुच्यते। जम्बूखण्डविनिर्म्माणं६३ पर्व्वोक्तं तदनन्तरम्। भूमिपर्व्व६४ ततः प्रोक्तं द्वीपविस्तारकीर्त्तनम्। पर्व्वोक्तं भगवद्गीता६५ पर्व्व भीष्मवध६६स्ततः। द्रोणाभिषे(७)चनं पर्व्व संशप्तकवधः६७स्ततः। अभिमन्युवधः६८ पर्व्व प्रतिज्ञा६९ पर्व्व चोच्यते। जयद्रथवधः७० पर्व्व घटोत्कचवध७१स्ततः। ततो द्रोणवधः७२ पर्व्व विज्ञेयं लोमहर्षणम्। मोक्षो७३ नारायणास्त्रस्य पर्व्वानन्तरमुच्यते। कर्णपर्व्व(८) ततो ज्ञेयं शल्यपर्व्व(९) ततः परम्। ह्रदप्रवेशनं७४ पर्व्व गदायुद्धमतः७५ परम्। सारस्वतं७६ ततः पर्व्व तीर्थवंशानुकीर्त्तनम्। अत ऊर्द्ध्वं सुबीभत्सं पर्व्व सौप्तिक(१०)मुच्यते। ऐषीकं७७ पर्व्व चोद्दिष्टमत ऊर्द्ध्वं सुदारुणम्। जलप्रदानिकं७८ पर्व्व स्त्रीविलाप(११)स्ततः परम्। श्राद्धपर्व्व७९ ततो ज्ञेयं कुरूणामौर्द्ध्वदेहिकम्। चार्व्वाकस्य वधः८० पर्व्व रक्षसो ब्रह्मरूपिणः। आभिषेचनिकं८२

पर्व्व धर्म्मराजस्य धीमतः । प्रतिभागो८२ गृहाणाञ्च पर्व्वोक्तं तदनन्तरम् । शान्तिपर्व्व(१२) ततो यत्र राजधर्म्मानुशासनम्८३ । आपद्धर्म्मश्च८४ पर्व्वोक्तं मोक्षधर्म्म८५स्ततः परम् । शुकप्रश्नाभिगमनं ब्रह्मप्रश्नानुशासनम् । प्रादुर्भावश्च दुर्व्वासःसंवादश्चैव मायया । ततः पर्व्व परिज्ञेयमानुशासनिकम्(१३) परम् । स्वर्गारोहणिकञ्चैव ततो भीष्मस्य धीमतः । ततोऽश्वमेधिकं(१४) पर्व्व सर्व्वपापप्रणाशनम् । अनुगीता८६ ततः पर्व्व ज्ञेयमध्यात्मवाचकम् । पर्व्व चाश्रमवासा(१५)ख्यं पुत्त्रदर्शनमेव च । नारदागमनं८७ पर्व्व ततः परमिहोच्यते । मौसलं(१६) पर्व्व चोद्दिष्टं ततो घोरं सुदारुणम् । महाप्रस्थानिकं(१७) पर्व्व स्वर्गारोहणिकं(१८) ततः । हरिवंशस्ततः पर्व्व८८ पुराणं खिलसंज्ञितम् । विष्णुपर्व्व८९ शिशोश्चर्य्या विष्णोः कंसवधस्तथा । भविष्यं पर्व्व९० चाप्युक्तं खिलेष्वेवाद्भुतं महत् । एतत् पर्व्व शतं पूर्णं व्यासेनोक्तं महात्मना । (महापर्व्वसहितं किञ्चिदधिकशतंपर्व्वात्रेति बोध्यम्) । यथावत् सूतपुत्त्रेण लौमहर्षणिना ततः । उक्तानि नैमिषारण्ये पर्व्वाण्यष्टादशैव तु । समासो भारतस्यायमत्रोक्तः पर्व्वसंग्रहः । पौष्यं पौलोममास्तीकमादिरं(वं)शावतारणम् । सम्भवो जतुवेश्माख्यं हिडिम्बवकयोर्वधः । तथा चैत्ररथं देव्याः पाञ्चाल्याश्च स्वयंवरः । क्षात्रधर्म्मेण निर्जित्य ततो वैवाहिकं स्मृतम् । विदुरागमनञ्चैव राज्यलम्भस्तथैव च । वनवासोऽर्ज्जुनस्यापि सुभद्राहरणं ततः । हरणाहरणञ्चैव दहनं खाण्डवस्य च । मयस्य दर्शनञ्चैव आदिपर्व्वणि कथ्यते । पौष्ये पर्व्वणि माहात्म्यमुत्तङ्कस्योपवर्णितम् । पौलोमे भृगुवंशस्य विस्तारः परिकीर्त्तितः । आस्तीके सर्व्वनागानां गरुडस्य च सम्भवः । क्षीरोदमथनञ्चैव जन्मोच्चैःश्रवसस्तथा । यजतः सर्पसत्त्रेण राज्ञः पारीक्षितस्य च । कथेयमभिनिर्वृत्ता भारतानां महात्मनाम् । विविधाः सम्भवा राज्ञामुक्ताः सम्भवपर्व्वणि । अन्येषाञ्चैव शूराणामृषेर्द्वैपायनस्य च । अंशावतरणञ्चात्र देवानां परिकीर्त्तितम् । दैत्यानां दानवानाञ्च यक्षाणाञ्च महौजसाम् । नागानामथ सर्पाणां गन्धर्व्वाणां पतत्त्रिणाम् । अन्येषाञ्चैव भूतानां विविधानां समुद्भवः । महर्षेराश्रमपदे कण्वस्य च तपस्विनः । शकुन्तलायां दुष्मन्ताद्भरतश्चापि जज्ञिवान् । यस्य लोकेषु नाम्नेदं प्रथितं भारतं कुलम् । वसूनां पुनरुत्पत्तिर्भागीरथ्यां महात्मनाम् । शान्तनोर्वेश्मनि पुनस्तेषाञ्चारोहणं दिवि । तेजोंऽशानाञ्च सम्पातो भीष्मस्याप्यत्र सम्भवः । राज्यान्निवर्त्तनं तस्य ब्रह्मचर्य्यव्रते स्थितिः । प्रतिज्ञापालनञ्चैव रक्षा चित्राङ्गदस्य च । हते चित्राङ्गदे चैव रक्षा भ्रातुर्यवीयसः । विचित्रवीर्य्यस्य तथा राज्ये सम्प्रतिपादनम् । धर्म्मस्य नृषु सम्भूतिरणीमाण्डव्यशापजा । कृष्णद्वैपायनाच्चैव प्रसूतिर्वरदानजा । धृतराष्ट्रस्य पाण्डोश्च पाण्डवानाञ्च सम्भवः । वारणावतयात्रायां मन्त्रो दुर्य्योधनस्य च । कूटस्य धार्त्तराष्ट्रेण प्रेषणं पाण्डवान् प्रति । हितोपदेशश्च पथि धर्म्मराजस्य धीमतः । विदुरेण कृतो यत्र हितार्थं म्लेच्छभाषया । विदुरस्य च वाक्येन सुरङ्गोपक्रमक्रिया । निषाद्याः पञ्चपुत्त्रायाः सुप्ताया जतुवेश्मनि । पुरोचनस्य चात्रैव दहनं सम्प्रकीर्त्तितम् । पाण्डवानां वने घोरे हिडिम्बायाश्च दर्शनम् । तत्रैव च हिडिम्बस्य वधो भीमान्महाबलात् । घटोत्कचस्य चोत्पत्तिरत्रैव परिकीर्त्तिता । महर्षेर्दर्शनञ्चैव व्यासस्यामिततेजसः । तदाज्ञयैकचक्रायां ब्राह्मणस्य निवेशने । अज्ञातचर्य्यया वासो यत्र तेषां प्रकीर्त्तितः । वकस्य निधने चैव नागराणाञ्च विस्मयः । सम्भवश्चैव कृष्णाया धृष्टद्युम्नस्य चैव हि । ब्राह्मणात् समुपश्रुत्य व्यासवाक्यप्रचोदिताः । द्रौपदीं प्रार्थयन्तस्ते स्वयंवरदिदृक्षया । पाञ्चालानभितो जग्मुर्यत्र कौतूहलान्विताः । अङ्गारपर्णं निर्जित्य गङ्गाकूलेऽर्ज्जुनस्तदा । सख्यं कृत्वा ततस्तेन तस्मादेव च शुश्रुवे । तापत्यमथ वाशिष्ठमौर्व्वञ्चाख्यानमुत्तमम् । भ्रातृभिः सहितः सर्व्वैः पाञ्चालानभितो ययौ । पाञ्चालनगरे चापि लक्ष्यं भित्त्वा धनञ्जयः । द्रौपदीं लब्धवानत्र मध्ये सर्व्वमहीक्षिताम् । भीमसेनार्ज्जुनौ यत्र संरब्धान् पृथिवीपतीन् । शल्यकर्णौ च तरसा जितवन्तौ महामृधे । दृष्ट्वा तयोश्च तद्वीर्य्यमप्रमेयममानुषम् । शङ्कमानौ पाण्डवांस्तान् रामकृष्णौ महामती । जग्मतुस्तैः समागन्तुं शालां भार्गववेश्मनि । पञ्चानामेकपत्नीत्वे विमर्शो द्रुपदस्य च । पञ्चेन्द्राणामुपाख्यानमत्रैवाद्भुतमुच्यते । द्रौपद्या देवविहितो विवाहश्चाप्यमानुषः । क्षत्तुश्च धृतराष्ट्रेण प्रेषणं पाण्डवान् प्रति । विदुरस्य च सम्प्राप्तिर्दर्शनं केशवस्य च । खाण्डवप्रस्थवासश्च तथा राज्यार्द्धशासनम् । नारदस्याज्ञया

चैव द्रौपद्याः समयक्रिया । सुन्दोपसुन्दयोस्तद्वदाख्यानं परिकीर्त्तितम् । अनन्तरञ्च द्रौपद्या सहासीनं युधिष्ठिरम् । अनुप्रविश्य विप्रार्थं फाल्गुनो गृह्य चायुधम् । मोक्षयित्वा गृहं गत्वा विप्रार्थं कृतनिश्चयः । समयं पालयन् वीरो वनं यत्र जगाम ह । पार्थस्य वनवासे च उलूप्या पथि सङ्गमः । पुण्यतीर्थानुसंयानं बभ्रुवाहनजन्म च । तत्रैव मोक्षयामास पञ्च सोऽप्सरसः शुभाः । शापाद्ग्राहत्वमापन्ना ब्राह्मणस्य तपस्विनः । प्रभासतीर्थे पार्थेन कृष्णस्य च समागमः । द्वारकायां सुभद्रा च कामयानेन कामिनी । वासुदेवस्यानुमते प्राप्ता चैव किरीटिना । गृहीत्वा हरणं प्राप्ते कृष्णे देवकिनन्दने । अभिमन्योः सुभद्रायां जन्म चोत्तमतेजसः । द्रौपद्यास्तनयानाञ्च सम्भवोऽनुप्रकीर्त्तितः । विहारार्थञ्च गतयोः कृष्णयोर्यमुनामनु । सम्प्राप्तिश्चक्रधनुषोः खाण्डवस्य च दाहनम् । मयस्य मोक्षो ज्वलनाद्भुजङ्गस्य च मोक्षणम् । महर्षेर्मन्दपालस्य शार्ङ्ग्यां तनयसम्भवः । इत्येतदादिपर्व्वोक्तं प्रथमं बहुविस्तरम् । अध्यायानां शते द्वे तु संख्याते परमर्षिणा । सप्तविंशतिरध्याया व्यासेनोत्तमतेजसा । अष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च । श्लोकाश्चतुरशीतिश्च मुनिनोक्ता महात्मना (१) ।

द्वितीयन्तु सभापर्व्व बहुवृत्तान्तमुच्यते । सभाक्रिया पाण्डवानां किङ्कराणाञ्च दर्शनम् । लोकपालसभाख्यानं नारदाद्देवदर्शिनः । राजसूयस्य चारम्भो जरासन्धवधस्तथा । गिरिव्रजे निरुद्धानां राज्ञां कृष्णेन मोक्षणम् । तथा दिग्विजयोऽप्यत्रैव पाण्डवानां प्रकीर्त्तितः । राज्ञामागमनञ्चैव सार्हणानां महाक्रतौ । राजसूयेऽर्घ्यसंवादे शिशुपालवधस्तथा । यज्ञे विभूतिं तां दृष्ट्वा दुःखामर्षान्वितस्य च । दुर्य्योधनस्यावहासो भीमेन च सभातले । यत्रास्य मन्युरुद्भूतो येन द्यूतमकारयत् । यत्र धर्म्मसुतं द्यूते शकुनिः कितवोऽजयत् । यत्र द्यूतार्णवे मग्नां द्रौपदीं नावमर्थवत् । धृतराष्ट्रो महाप्राज्ञः स्नुषां परमदुःखिताम् । तारयामास तां तीर्णां ज्ञात्वा दुर्य्योधनो नृपः । पुनरेव ततो द्यूते समाह्वयत पाण्डवान् । जित्वा स वनवासाय प्रेषयामास तांस्ततः । एतत् सर्व्वं सभापर्व्व समाख्यातं महात्मना । अध्यायाः सप्ततिर्ज्ञेयास्तथा चाष्टौ प्रसंख्यया । श्लोकानां द्वे सहस्रे तु पञ्च श्लोकशतानि च । श्लोकाश्चैकादश ज्ञेयाः पर्व्वण्यस्मिन् द्विजोत्तमाः" (२) । (द्वितीयसभापर्व्व)

"अतःपरं तृतीयन्तु ज्ञेयमारण्यकं महत् । वनवासं प्रयातेषु पाण्डवेषु महात्मसु । पौरानुगमनञ्चैव धर्म्मपुत्रस्य धीमतः । अन्नौषधीनाञ्च कृते पाण्डवेन महात्मना । द्विजानां भरणार्थञ्च कृतमाराधनं रवेः । धौम्योपदेशात्तिग्मांशुप्रसादादन्नसम्भवः । हितन्तु ब्रुवतः क्षत्तुः परित्यागोऽम्बिकासुतात् । त्यक्तस्य पाण्डुपुत्राणां समीपगमनन्तथा । पुनरागमनञ्चैव धृतराष्ट्रस्य शासनात् । कर्णप्रोत्साहनाच्चैव धार्त्तराष्ट्रस्य दुर्मतेः । वनस्थान् पाण्डवान् हन्तुं मन्त्रो दुर्य्योधनस्य च । तं दुष्टभावं विज्ञाय व्यासस्यागमनं द्रुतम् । निर्य्याणप्रतिषेधश्च सुरभ्याख्यानमेव च । मैत्रेयागमनञ्चात्र राज्ञश्चैवानुशासनम् । शापोत्सर्गश्च तेनैव राज्ञो दुर्य्योधनस्य च । किर्म्मीरस्य वधश्चात्र भीमसेनेन संयुगे । वृष्णीनामागमश्चात्र पाञ्चालानाञ्च सर्व्वशः । श्रुत्वा शकुनिना द्यूते निकृत्या निर्जितांश्च तान् । क्रुद्धस्यानुप्रशमनं हरेश्चैव किरीटिना । परिदेवनञ्च पाञ्चाल्या वासुदेवस्य सन्निधौ । आश्वासनञ्च कृष्णेन दुःखार्त्तायाः प्रकीर्त्तितम् । तथा सौभवधाख्यानमत्रैवोक्तं महर्षिणा । सुभद्रायाः सपुत्रायाः कृष्णेन द्वारकां पुरीम् । नयनं द्रौपदेयानां धृष्टद्युम्नेन चैव हि । प्रवेशः पाण्डवेयानां रम्ये द्वैतवने ततः । धर्म्मराजस्य चात्रैव संवादः कृष्णया सह । संवादश्च तथा राज्ञा भीमस्यापि प्रकीर्त्तितः । समीपं पाण्डुपुत्राणां व्यासस्यागमनं तथा । प्रतिस्मृत्याश्च विद्याया दानं राज्ञो महर्षिणा । गमनं काम्यके चापि व्यासे प्रतिगते ततः । अस्त्रहेतोर्विवासश्च पार्थस्यामिततेजसः । महादेवेन युद्धञ्च किरातवपुषा सह । दर्शनं लोकपालानामस्त्रप्राप्तिस्तथैव च । महेन्द्रलोकगमनमस्त्रार्थे च किरीटिनः । यत्र चिन्ता समुत्पन्ना धृतराष्ट्रस्य भूयसी । दर्शनं बृहदश्वस्य महर्षेर्भावितात्मनः । युधिष्ठिरस्य चार्त्तस्य व्यसने परिदेवनम् । नलोपाख्यानमत्रैव धर्म्मिष्ठं करुणोदयम् । दमयन्त्याः स्थितिर्यत्र नलस्य चरितं यथा । तथाक्षहृदयप्राप्तिस्तस्मादेव महर्षितः । लोमशस्यागमस्तत्र स्वर्गात् पाण्डुसुतान् प्रति । वनवासगतानाञ्च पाण्डवानां महात्मनाम् । स्वर्गे प्रवृत्तिराख्याता लोमशेनार्ज्जुनस्य वै । सन्देशादर्ज्जुनस्यात्र तीर्थाभिगमनक्रिया । तीर्थानाञ्च फलप्राप्तिः पुण्यत्व-

स्त्रापि कीर्त्तितम्। पुलस्त्यतीर्थयात्रा च नारदेन महर्षिणा। तीर्थयात्रा च तत्रैव पाण्डवानां महात्मनाम्। कर्णस्य परिमोक्षोऽत्र कुण्डलाभ्यां पुरन्दरात्। तथा यज्ञविभूतिश्च गयस्यात्र प्रकीर्त्तिता। आगस्त्यमपि चाख्यानं यत्र वातापिभक्षणम्। लोपामुद्राभिगमनमपत्यार्थमृषेस्तथा। ऋष्यशृङ्गस्य चरितं कौमारब्रह्मचारिणः। जामदग्न्यस्य रामस्य चरितं भूरितेजसः। कार्त्तवीर्य्यवधो यत्र हैहयानाञ्च वर्ण्यते। प्रभासतीर्थे पाण्डूनां वृष्णिभिश्च समागमः। सौकन्यमपि चाख्यानं च्यवनो यत्र भार्गवः। शर्य्यातियज्ञे नासत्यौ कृतवान् सोमपीतिनौ। ताभ्याञ्च यत्र स मुनिर्यौवनं प्रतिपादितः। मान्धातुश्चाप्युपाख्यानं राज्ञोऽत्रैव प्रकीर्त्तितम्। जन्तूपाख्यानमत्रैव यत्र पुत्रेण सोमकः। पुत्रार्थमयजद्राजा लेभे पुत्रशतञ्च सः। ततः श्येनकपोतीयमुपाख्यानमनुत्तमम्। इन्द्राग्नी यत्र धर्म्मश्चाप्यजिज्ञासंश्छिबिं नृपम्। अष्टावक्रीयमत्रैव विवादो यत्र बन्दिना। अष्टावक्रस्य विप्रर्षेर्जनकस्याध्वरेऽभवत्। नैयायिकानां मुख्येन वरुणस्यात्मजेन च। पराजितो यत्र बन्दी विवादेन महात्मना। विजित्य सागरं प्राप्तं पितरं लब्धवानृषिः। यवक्रीतस्य चाख्यानं रैभ्यस्य च महात्मनः। गन्धमादनयात्रा च वासो नारायणाश्रमे। नियुक्तो भीमसेनश्च द्रौपद्या गन्धमादने। व्रजन् पथि महाबाहुर्दृष्टवान् पवनात्मजम्। कदलीषण्डमध्यस्थं हनूमन्तं महाबलम्। यत्र सौगन्धिकार्थेऽसौ नलिनीं तामधर्षयत्। यत्रास्य युद्धमभवत् सुमहद्राक्षसैः सह। यक्षैश्चैव महावीर्य्यैर्मणिमत्प्रमुखैस्तथा। जटासुरस्य च वधो राक्षसस्य वृकोदरात्। वृषपर्व्वणो राजर्षेस्ततोऽभिगमनं स्मृतम्। आर्ष्टिषेणाश्रमे चैषां गमनं वास एव च। प्रोत्साहनञ्च पाञ्चाल्या भीमस्यात्र महात्मनः। कैलासारोहणं प्रोक्तं यत्र यक्षैर्बलोत्कटैः। युद्धमासीन्महाघोरं मणिमत्प्रमुखैः सह। समागमश्च पाण्डूनां यत्र वैश्रवणेन च। समागमश्चार्जुनस्य तत्रैव भ्रातृभिः सह। अवाप्य दिव्यान्यस्त्राणि गुर्व्वर्थं सव्यसाचिना। निवातकवचैर्युद्धं हिरण्यपुरवासिभिः। निवातकवचैर्घोरैर्दानवैः सुरशत्रुभिः। पौलोमैः कालकेयैश्च यत्र युद्धं किरीटिनः। वधश्चैषां समाख्यातो राज्ञस्तेनैव धीमता। अस्त्रसन्दर्शनारम्भो धर्म्मराजस्य सन्निधौ। पार्थस्य प्रतिषेधश्च नारदेन सुरर्षिणा। अवरोहः पुनश्चैव पाण्डूनां गन्धमादनात्। भीमस्य ग्रहणञ्चात्र पर्व्वताभोगवर्ष्मणा। भुजगेन्द्रेण बलिना तस्मिन् सुगहने वने। अमोक्षयद्यत्र चैनं प्रश्नानुक्त्वा युधिष्ठिरः। काम्यकागमनञ्चैव पुनस्तेषां महात्मनाम्। तत्रस्थांश्च पुनर्द्रष्टुं पाण्डवान् पुरुषर्षभान्। वासुदेवस्यागमनमत्रैव परिकीर्त्तितम्। मार्कण्डेयस्य च तथा देवर्षेर्नारदस्य च। मार्कण्डेयसमास्यायामुपाख्यानानि सर्व्वशः। पृथोर्वैण्यस्य यत्रोक्तमाख्यानं परमर्षिणा। संवादश्च सरस्वत्यास्तार्क्ष्यर्षेः सुमहात्मनः। मत्स्योपाख्यानमत्रैव प्रोच्यते तदनन्तरम्। मार्कण्डेयसमास्या च पुराणं परिकीर्त्तितम्। ऐन्द्रद्युम्नमुपाख्यानं धौन्धुमारं तथैव च। पतिव्रतायाश्चाख्यानं तथैवाङ्गिरसं स्मृतम्। द्रौपद्याः कीर्त्तितश्चात्र संवादः सत्यभामया। पुनर्द्वैतवनञ्चैव पाण्डवाः समुपागताः। घोषयात्रा च गन्धर्व्वैर्यत्र बद्धः सुयोधनः। ह्रियमाणस्तु मन्दात्मा मोक्षितोऽसौ किरीटिना। धर्म्मराजस्य चात्रैव मृगस्वप्ननिदर्शनम्। काम्यके काननश्रेष्ठे पुनर्गमनमुच्यते। व्रीहिद्रौणिकमाख्यानमत्रैव बहुविस्तरम्। दुर्व्वाससोऽप्युपाख्यानमत्रैव परिकीर्त्तितम्। जयद्रथेनापहारो द्रौपद्याश्चाश्रमान्तरात्। यत्रैनमन्वयाद्भीमो वायुवेगसमो जवे। चक्रे चैनं पञ्चशिखं यत्र भीमो महाबलः। रामायणमुपाख्यानमत्रैव बहुविस्तरम्। यत्र रामेण विक्रम्य निहतो रावणो युधि। सावित्र्याश्चाप्युपाख्यानमत्रैव परिकीर्त्तितम्। कर्णस्य परिमोक्षोऽत्र कुण्डलाभ्यां पुरन्दरात्। यत्रास्य शक्तिं तुष्टोऽदादेकवीरवधाय च। आरणेयमुपाख्यानं यत्र धर्म्मोऽन्वशात् सुतम्। जग्मुर्लब्धवरा यत्र पाण्डवाः पश्चिमां दिशम्। एतदारण्यकं पर्व्व तृतीयं परिकीर्त्तितम्। अत्राध्यायशते द्वे तु संख्यया परिकीर्त्तिते। एकोनसप्ततिश्चैव तथाध्यायाः प्रकीर्त्तिताः। एकादश सहस्राणि श्लोकानां षट्शतानि च। चतुःषष्टिस्तथा श्लोकाः पर्व्वण्यस्मिन् प्रकीर्त्तिताः॥ (वनपर्व्व)

“अतःपरं निबोधेदं वैराटं पर्व्व विस्तरम्। विराटनगरं गत्वा श्मशाने विपुलां शमीम्। दृष्ट्वा संनिदधुस्तत्र पाण्डवा ह्यायुधान्युत। यत्र प्रविश्य नगरं छद्मना न्यवसन्त ते। पाञ्चालीं प्रार्थयानस्य कामोपहतचेतसः। दुष्टात्मनो वधो यत्र कीचकस्य वृकोदरात्। पाण्डवाश्च यथा-

र्थञ्च राज्ञो दुर्य्योधनस्य च । चराः प्रस्थापिताश्चात्र निपुणाः सर्व्वतो दिशम् । न च प्रवृत्तिस्तैर्लब्धा पाण्डवानां महात्मनाम् । गोग्रहश्च विराटस्य त्रिगर्त्तैः प्रथमं कृतः । यत्रास्य युद्धं सुमहत् तैरासील्लोमहर्षणम् । ह्रियमाणश्च यत्रासौ भीमसेनेन मोक्षितः । गोधनञ्च विराटस्य मोक्षितं यत्र पाण्डवैः । अनन्तरञ्च कुरुभिस्तस्य गोग्रहणं कृतम् । समस्ता यत्र पार्थेन निर्ज्जिताः कुरवो युधि । प्रत्याहृतं गोधनञ्च विक्रमेण किरीटिना । विराटेनोत्तरा दत्ता स्नुषा यत्र किरीटिनः । अभिमन्युं समुद्दिश्य सौभद्रमरिघातिनम् । चतुर्थमेतद्विपुलं वैराटं पर्व्व वर्णितम् । अत्रापि परिसंख्याता अध्यायाः परमर्षिणा । सप्तषष्टिरथो पूर्णा श्लोकानामपि मे शृणु । श्लोकानां द्वे सहस्रे तु श्लोकाः पञ्चाशदेव तु । उक्तानि वेदविदुषा पर्व्वण्यस्मिन् महर्षिणा ४ । (विराटपर्व्व)

"उद्योगपर्व्व विज्ञेयं पञ्चमं शृण्वतः परम् । उपप्लव्ये निविष्टेषु पाण्डवेषु जिगीषया । दुर्य्योधनोऽर्ज्जुनश्चैव वासुदेवमुपस्थितौ । साहाय्यमस्मिन् समरे भवान्नौ कर्त्तुमर्हति । इत्युक्ते वचने कृष्णो यत्रोवाच महामतिः । अयुध्यमानमात्मानं मन्त्रिणं पुरुषर्षभौ । अक्षौहिणीं वा सैन्यस्य कस्य किं वा ददाम्यहम् । वव्रे दुर्य्योधनः सैन्यं मन्दात्मा यत्र दुर्म्मतिः । अयुध्यमानं सचिवं वव्रे कृष्णं धनञ्जयः । मद्रराजञ्च राजानमायान्तं पाण्डवान् प्रति । उपहारैर्वञ्चयित्वा वर्त्मन्येव सुयोधनः । वरदं तं वरं वव्रे साहाय्यं क्रियतां मम । शल्यस्तस्मै प्रतिश्रुत्य जगामोद्दिश्य पाण्डवान् । शान्तिपूर्व्वञ्चाकथयद्यत्रेन्द्रविजयं नृपः । पुरोहितप्रेषणञ्च पाण्डवैः कौरवान् प्रति । वैचित्रवीर्य्यस्य वचः समादाय पुरोधसः । तथेन्द्रविजयञ्चापि यानञ्चैव पुरोधसः । सञ्जयं प्रेषयामास शमार्थी पाण्डवान् प्रति । यत्र दूतं महाराजो धृतराष्ट्रः प्रतापवान् । श्रुत्वा च पाण्डवान् यत्र वासुदेवपुरोगमान् । प्रजागरः संप्रजज्ञे धृतराष्ट्रस्य चिन्तया । विदुरो यत्र वाक्यानि विचित्राणि हितानि च । श्रावयामास राजानं धृतराष्ट्रं मनीषिणम् । तथा सनत्सुजातेन यत्राध्यात्ममनुत्तमम् । मनस्तापान्वितो राजा श्रावितः शोकलालसः । प्रभाते राजसमितौ सञ्जयो यत्र वा विभोः । ऐकात्म्यं वासुदेवस्य प्रोक्तवानर्ज्जुनस्य च । यत्र कृष्णो दयापन्नः सन्धिमिच्छन्महामतिः । स्वयमागाच्छमं कर्त्तुं नगरं नागसाह्वयम् । प्रत्याख्यानञ्च कृष्णस्य राज्ञा दुर्य्योधनेन वै । शमार्थे याचमानस्य पक्षयोरुभयोर्हितम् । दम्भोद्भवस्य चाख्यानमत्रैव परिकीर्त्तितम् । वरान्वेषणमत्रैव मातलेश्च महात्मनः । महर्षेश्चापि चरितं कथितं गालवस्य वै । विदुलायाश्च पुत्रस्य प्रोक्तञ्चाप्यनुशासनम् । कर्णदुर्य्योधनादीनां दुष्टं विज्ञाय मन्त्रितम् । योगेश्वरत्वं कृष्णेन यत्र राज्ञां प्रदर्शितम् । रथमारोप्य कृष्णेन यत्र कर्णोऽनुमन्त्रितः । उपायपूर्व्वं शौटीर्य्यात् प्रत्याख्यातश्च तेन सः । आगम्य हास्तिनपुरादुपप्लव्यमरिन्दम ! । पाण्डवानां यथावृत्तं सर्व्वमाख्यातवान् हरिः । ते तस्य वचनं श्रुत्वा मन्त्रयित्वा च यद्धितम् । सांग्रामिकं ततः सर्व्वं सज्जञ्चक्रुः परन्तपाः । ततो युद्धाय निर्य्याता नराश्वरथदन्तिनः । नगराद्धास्तिनपुराद्बलसंख्यानमेव च । यत्र राज्ञा उलूकस्य प्रेषणं पाण्डवान् प्रति । श्वो भाविनि महायुद्धे दौत्येन कृतवान् प्रभुः । रथातिरथसंख्यानमम्बोपाख्यानमेव च । एतत्सुबहुवृत्तान्तं पञ्चमं पर्व्व भारते । उद्योगपर्व्व निर्द्दिष्टं सन्धिविग्रहमिश्रितम् । अध्यायानां शतं प्रोक्तं षडशीतिर्महर्षिणा । श्लोकानां षट् सहस्राणि तावन्त्येव शतानि च । श्लोकाश्च नवतिः प्रोक्तास्तथैवाष्टौ महात्मना । व्यासेनोदारमतिना पर्व्वण्यस्मिंस्तपोधनाः ! (५) । (उद्योगपर्व्व)

"अतःपरं विचित्रार्थं भीष्मपर्व्व प्रचक्षते । जम्बूखण्डविनिर्म्माणं यत्रोक्तं सञ्जयेन ह । यत्र यौधिष्ठिरं सैन्यं विषादमगमत् परम् । यत्र युद्धमभूद्घोरं दशाहानि सुदारुणम् । कश्मलं यत्र पार्थस्य वासुदेवो महामतिः । मोहजं नाशयामास हेतुभिर्म्मोक्षदर्शिभिः । समीक्ष्याधोक्षजः क्षिप्रं युधिष्ठिरहिते रतः । रथादाप्लुत्य वेगेन स्वयं कृष्ण उदारधीः । प्रतोदपाणिराधावद्भीष्मं हन्तुं व्यपेतभीः । वाक्यप्रतोदाभिहितो यत्र कृष्णेन पाण्डवः । गाण्डीवधन्वा समरे सर्व्वशस्त्रभृताम्वरः । शिखण्डिनं पुरस्कृत्य यत्र पार्थो महाधनुः । विनिघ्नन्निशितैर्व्वाणैरथाद्भीष्ममपातयत् । शरतल्पगतश्चैव भीष्मो यत्र बभूव ह । षष्ठमेतत् समाख्यातं भारते पर्व्व विस्तृतम् । अध्यायानां शतं प्रोक्तं तथा सप्तदशापरे । पञ्च श्लोकसहस्राणि संख्ययाष्टौ शतानि च । श्लोकाश्च चतुरशीतिरस्मिन् पर्व्वणि की-

र्त्तिताः। व्यासेन वेदविदुषा संख्याता भीष्मपर्वणि (६)। द्रोणपर्व ततश्चित्रं बहुवृत्तान्तमुच्यते। सैनापत्येऽभिषिक्तोऽथ यत्राचार्य्यः प्रतापवान्। दुर्य्योधनस्य प्रीत्यर्थं प्रतिजज्ञे महास्त्रवित्। ग्रहणं धर्मराजस्य पाण्डुपुत्रस्य धीमतः। यत्र संशप्तकाः पार्थमपनिन्यू रणाजिरात्। भगदत्तो महाराजो यत्र शक्रसमो युधि। सुप्रतीकेन नागेन स हि शान्तः किरीटिना। यत्राभिमन्युं बहवो जघ्नुरेकं महारथाः। जयद्रथमुखा बालं शूरमप्राप्तयौवनम्। हतेऽभिमन्यौ क्रुद्धेन यत्र पार्थेन संयुगे। अक्षौहिणीः सप्त हत्वा हतो राजा जयद्रथः। यत्र भीमो महाबाहुः सात्यकिश्च महारथः। अन्वेषणार्थं पार्थस्य युधिष्ठिरस्याज्ञया। प्रविष्टौ भारतीं सेनामप्रधृष्यां सुरैरपि। संशप्तकावशेषञ्च कृतं निःशेषमाहवे। अलम्बुषः श्रुतायुश्च जलसन्धश्च वीर्य्यवान्। सौमदत्तिर्विराटश्च द्रुपदश्च महारथः। घटोत्कचादयश्चान्ये निहता द्रोणपर्वणि। अश्वत्थामापि चात्रैव द्रोणे युधि निपातिते। अस्त्रं प्रादुश्चकारोग्रं नारायणममर्षितः। आग्नेयं कीर्त्त्यते यत्र रुद्रमाहात्म्यमुत्तमम्। व्यासस्य चाप्यागमनं माहात्म्यं कृष्णपार्थयोः। सप्तमं भारते पर्व महदेतदुदाहृतम्। यत्र ते पृथिवीपालाः प्रायशो निधनं गताः। द्रोणपर्वणि ये शूरा निर्द्दिष्टाः पुरुषर्षभाः। अत्राध्यायशतं प्रोक्तं तथाध्यायाश्च सप्ततिः। अष्टौ श्लोकसहस्राणि तथा नव शतानि च। श्लोका नव तथैवात्र संख्यातास्तत्त्वदर्शिना। पाराशर्य्येण मुनिना संचिन्त्य द्रोणपर्वणि (७)।

अतःपरं कर्णपर्व प्रोच्यते परमाद्भुतम्। सारथ्ये विनियोगश्च मद्रराजस्य धीमतः। आख्यातं यत्र पौराणं त्रिपुरस्य निपातनम्। प्रयाणे परुषश्चात्र संवादः कर्णशल्ययोः। हंसकाकीयमाख्यानं तत्रैवाक्षेपसंहितम्। वधः पाण्ड्यस्य च तथा अश्वत्थाम्ना महात्मना। दण्डसेनस्य च ततो दण्डस्य च वधस्तथा। द्वैरथे यत्र कर्णेन धर्मराजो युधिष्ठिरः। संशयं गमितो युद्धे मिषतां सर्वधन्विनाम्। अन्योन्यं प्रति च क्रोधो युधिष्ठिरकिरीटिनोः। यत्रैवानुनयः प्रोक्तो माधवेनार्जुनस्य हि। प्रतिज्ञापूर्वकञ्चापि वक्षो दुःशासनस्य च। भित्त्वा वृकोदरो रक्तं पीतवान् यत्र संयुगे। द्वैरथे यत्र पार्थेन हतः कर्णो महारथः। अष्टमं पर्व निर्द्दिष्टमेतद्भारतचिन्तकैः। एकोनसप्ततिः प्रोक्ता अध्यायाः कर्णपर्वणि। चत्वार्य्येव सहस्राणि नव श्लोकशतानि च। चतुःषष्टिस्तथा श्लोकाः पर्वण्यस्मिन् प्रकीर्त्तिताः (८)। (कर्णपर्व)

"अतःपरं विचित्रार्थं शल्यपर्व प्रकीर्त्तितम्। हतप्रवीरे सैन्ये तु नेता मद्रेश्वरोऽभवत्। यत्र कौमारकाख्यानमभिषेचनकर्म च। वृत्तानि रथयुद्धानि कीर्त्त्यन्ते यत्र भागशः। विनाशः कुरुमुख्यानां शल्यपर्वणि कीर्त्त्यते। शल्यस्य निधनञ्चात्र धर्मराजान्महात्मनः। शकुनेश्च वधोऽत्रैव सहदेवेन संयुगे। सैन्ये च हतभूयिष्ठे किञ्चिच्छिष्टे सुयोधनः। ह्रदं प्रविश्य यत्रासौ संस्तभ्यापो व्यवस्थितः। प्रवृत्तिस्तत्र चाख्याता यत्र भीमस्य लुब्धकैः। क्षेपयुक्तैर्वचोभिश्च धर्मराजस्य धीमतः। ह्रदात् समुत्थितो यत्र धार्त्तराष्ट्रोऽत्यमर्षणः। भीमेन गदया युद्धं यत्रासौ कृतवान् सह। समवाये च युद्धस्य रामस्यागमनं स्मृतम्। सरस्वत्याश्च तीर्थानां पुण्यता परिकीर्त्तिता। गदायुद्धञ्च तुमुलमत्रैव परिकीर्त्तितम्। दुर्य्योधनस्य राज्ञोऽथ यत्र भीमेन संयुगे। ऊरू भग्नौ प्रसह्याजौ गदया भीमवेगया। नवमं पर्व निर्द्दिष्टमेतदद्भुतमर्थवत्। एकोनषष्टिरध्यायाः पर्वण्यत्र प्रकीर्त्तिताः। संख्याता बहुवृत्तान्ताः श्लोकसंख्यात्र कथ्यते। त्रीणि श्लोकसहस्राणि द्वे शते विंशतिस्तथा। मुनिना सम्प्रणीतानि कौरवाणां यशोभृता (९)। (शल्यपर्व)

"अतःपरं प्रवक्ष्यामि सौप्तिकं पर्व दारुणम्। भग्नोरुं यत्र राजानं दुर्य्योधनममर्षणम्। अपयातेषु पार्थेषु त्रयस्तेऽभ्याययू रथाः। कृतवर्म्मा कृपो द्रौणिः सायाह्ने रुधिरोक्षितम्। समेत्य ददृशुर्भूमौ पतितं रणमूर्द्धनि। प्रतिजज्ञे दृढक्रोधो द्रौणिर्यत्र महारथः। अहत्वा सर्वपाञ्चालान् धृष्टद्युम्नपुरोगमान्। पाण्डवांश्च सहामात्यान्न विमोक्ष्यामि दंशनम्। यत्रैवमुक्त्वा राजानमपक्रम्य त्रयो रथाः। सूर्य्यास्तमनवेलायामासेदुस्ते महद्वनम्। न्यग्रोधस्यात्र महतो यत्राधस्ताद्व्यवस्थिताः। ततः काकान् बहून् रात्रौ दृष्ट्वोलूकेन हिंसितान्। द्रौणिः क्रोधसमाविष्टः पितुर्वधमनुस्मरन्। पाञ्चालानां प्रसुप्तानां वधं प्रति मनो दधे। गत्वा च शिविरद्वारि दुर्दर्शन्तत्र राक्षसम्। घोररूपमपश्यत् स दिवमावृत्य धिष्ठितम्। तेन व्याघातमस्त्राणां क्रियमाणमवेक्ष्य च। द्रौणिर्यत्र विरूपाक्षं रुद्रमाराध्य सत्वरः। प्रसुप्तान्निशि विश्वस्तान् धृष्टद्युम्नपुरोगमान्। पाञ्चालान् सपरीवारान् द्रौपदेयांश्च सर्वशः। कृतवर्म्मणा च सहितः कृपेण च

निजघ्निवान्। यत्रासुवपन्त ते पार्थाः पञ्च कृष्णबलाश्रयात्। सात्यकिश्च महेष्वासः शेषाश्च निधनं गताः। पाञ्चालानां प्रसुप्तानां यत्र द्रोणसुताद्वधः। धृष्टद्युम्नस्य सूतेन पाण्डवेषु निवेदितः। द्रौपदी पुत्रशोकार्त्ता पितृभ्रातृवधार्दिता। कृतानशनसंकल्पा यत्र भर्तॄनुपाविशत्। द्रौपदीवचनाद्यत्र भीमो भीमपराक्रमः। प्रियं तस्याश्चिकीर्षन् वै गदामादाय वीर्यवान्। अन्वधावत् सुसंक्रुद्धो भारद्वाजं गुरोः सुतम्। भीमसेनभयाद्यत्र दैवेनाभिप्रचोदितः। अपाण्डवायेति रुषा द्रौणिरस्त्रमवासृजत्। मैवमित्यब्रवीत् कृष्णः शमयंस्तस्य तद्वचः। यत्रास्त्रमस्त्रेण च तच्छमयामास फाल्गुनः। द्रौणेश्च द्रोहबुद्धित्वं वीक्ष्य पापात्मनस्तदा। द्रौणिद्वैपायनादीनां शापाश्चान्योन्यकारिताः। मणिं तथा समादाय द्रोणपुत्रान्महारथात्। पाण्डवाः प्रददुर्हृष्टा द्रौपद्यै जितकाशिनः। एतद्वै दशमं पर्व सौप्तिकं समुदाहृतम्। अष्टादशास्मिन्नध्यायाः पर्वण्युक्ता महात्मना। श्लोकानां कथितान्यत्र शतान्यष्टौ प्रसंख्यया। श्लोकाश्च सप्ततिः प्रोक्ता मुनिना ब्रह्मवादिना। सौप्तिकैषीकसम्बद्धे पर्वण्युत्तमतेजसा (१०)। (सौप्तिकपर्व)

"अत ऊर्द्ध्वमिदं प्राहुः स्त्रीपर्व करुणोदयम्। पुत्रशोकाभिसन्तप्तः प्रज्ञाचक्षुर्नराधिपः। कृष्णोपनीतां यत्रासावायसीं प्रतिमां दृढ़ाम्। भीमसेनद्रोहबुद्धिर्धृतराष्ट्रो बभञ्ज ह। तथा शोकाभितप्तस्य धृतराष्ट्रस्य धीमतः। संसारगहनं बुद्ध्या हेतुभिर्मोक्षदर्शनैः। विदुरेण च यत्रास्य राज्ञ आश्वासनं कृतम्। धृतराष्ट्रस्य चात्रैव कौरवायोधनं तथा। सान्तःपुरस्य गमनं शोकार्त्तस्य प्रकीर्त्तितम्। विलापो वीरपत्नीनां यत्रातिकरुणः स्मृतः। क्रोधावेशः प्रमोहश्च गान्धारीधृतराष्ट्रयोः। यत्र तान् क्षत्रियान् शूरान् संग्रामेष्वनिवर्त्तिनः। पुत्रान् भ्रातॄन् पितॄंश्चैव ददृशुर्निहतान् रणे। पुत्रपौत्रवधार्त्तायास्तथात्रैव प्रकीर्त्तिता। गान्धार्याश्चापि कृष्णेन क्रोधोपशमनक्रिया। यत्र राजा महाप्राज्ञः सर्वधर्मभृतां वरः। राज्ञां तानि शरीराणि दाहयामास शास्त्रतः। तोयकर्मणि चारब्धे राज्ञामुदकदानिके। गूढ़ोत्पन्नस्य चाख्यानं कर्णस्य पृथयात्मनः। सुतस्यैतदिह प्रोक्तं व्यासेन परमर्षिणा। एतदेकादशं पर्व शोकवैक्लव्यकारकम्। प्रणीतं सज्जनमनोवैक्लव्याश्रुप्रवर्त्तकम्। सप्तविंशतिरध्यायाः पर्वण्यस्मिन् प्रकीर्त्तिताः। श्लोकसप्तशती चापि पञ्चसप्ततिसंयुता। संख्यया भारताख्यानमुक्तं व्यासेन धीमता (११) (स्त्रीपर्व)

"अतःपरं शान्तिपर्व द्वादशं बुद्धिवर्द्धनम्। यत्र निर्वेदमापन्नो धर्मराजो युधिष्ठिरः। घातयित्वा पितॄन् भ्रातॄन् पुत्रान् सम्बन्धिमातुलान्। शान्तिपर्वणि धर्माश्च व्याख्याताः शारतल्पिकाः। राजभिर्वेदितव्यास्ते सम्यग्ज्ञानबुभुत्सुभिः। आपद्धर्माश्च तत्रैव कालहेतुप्रदर्शिनः। यान् बुद्ध्वा पुरुषः सम्यक् सर्वज्ञत्वमवाप्नुयात्। मोक्षधर्माश्च कथिता विचित्रा बहुविस्तराः। द्वादशं पर्व निर्दिष्टमेतत् प्राज्ञजनप्रियम्। अत्र पर्वणि विज्ञेयमध्यायानां शतत्रयम्। त्रिंशच्चैव तथाध्याया नव चैव तपोधनाः। चतुर्दशसहस्राणि तथा सप्त शतानि च। सप्त श्लोकास्तथैवात्र पञ्चविंशतिसंख्यया (१२)। (शान्तिपर्व)

"अत ऊर्द्ध्वं तु विज्ञेयमनुशासनमुत्तमम्। यत्र प्रकृतिमापन्नः श्रुत्वा धर्मविनिश्चयम्। भीष्माद्भागीरथीपुत्रात् कुरुराजो युधिष्ठिरः। व्यवहारोऽत्र कार्त्स्न्येन धर्मार्थीयः प्रकीर्त्तितः। विविधानाञ्च दानानां फलयोगाः प्रकीर्त्तिताः। तथा पात्रविशेषाश्च दानानाञ्च परो विधिः। आचारविधियोगश्च सत्यस्य च परा गतिः। माहात्म्यं गवाञ्चैव ब्राह्मणानां तथैव च। रहस्यञ्चैव धर्माणां देशकालोपसंहितम्। एतत् सुबहुवृत्तान्तमुत्तमञ्चानुशासनम्। भीष्मस्यात्रैव सम्प्राप्तिः स्वर्गस्य परिकीर्त्तिता। एतत्त्रयोदशं पर्व धर्मनिश्चयकारकम्। अध्यायानां शतं त्वत्र षट्चत्वारिंशदेव तु। श्लोकानान्तु सहस्राणि प्रोक्तान्यष्टौ प्रसंख्यया (१३)। (अनुशासनपर्व)

"ततोऽश्वमेधिकं नाम पर्व प्रोक्तं चतुर्दशम्। तत् संवर्त्तमरुत्तीयं यत्राख्यानमनुत्तमम्। सुवर्णकोषसम्प्राप्तिर्जन्म चोक्तं परीक्षितः। दग्धस्यास्त्राग्निना पूर्वं कृष्णात् सञ्जीवनं पुनः। चर्यायां हयमुत्सृष्टं पाण्डवस्यानुगच्छतः। तत्र तत्र च युद्धानि राजपुत्रैरमर्षणैः। चित्राङ्गदायाः पुत्रेण पुत्रिकाया धनञ्जयः। संग्रामे बभ्रुवाहेण संशयञ्चात्र लम्भितः। अश्वमेधे महायज्ञे नकुलाख्यानमेव च। अनुगीता तथा प्रोक्ता कृष्णभगवता पुनः। कथितः शाश्वतो धर्मः कृष्णेनार्जुनसन्निधौ। तथा ब्राह्मणगीता च धर्मादौ गुरुशिष्ययोः। इत्याश्वमेधिकं पर्व प्रोक्तमेतन्महाद्भुतम्। अध्यायानां शतञ्चैव त्रयोऽध्यायाश्च कीर्त्तिताः। त्रीणि श्लोकसहस्राणि तावन्त्येव शतानि च। विंशतिश्च तथा

श्लोकाः संख्यातास्तत्त्वदर्शिना" (१४ आश्वमेधिकपर्व)।

"ततस्त्वाश्रमवासाख्यं पर्व पञ्चदशं स्मृतम्। यत्र राज्यं समुत्सृज्य गान्धार्य्या सहितो नृपः। धृतराष्ट्राश्रमपदं विदुरश्च जगाम ह। यं दृष्ट्वा प्रस्थितं साध्वी पृथाप्यनुययौ तदा। पुत्रराज्यं परित्यज्य गुरुशुश्रूषणे रता। यत्र राजा हतान् पुत्रान् पौत्रानन्यांश्च पार्थिवान्। लोकान्तरगतान् वीरानपश्यत् पुनरागतान्। ऋषेः प्रसादात् कृष्णस्य दृष्ट्वाश्चर्य्यमनुत्तमम्। त्यक्त्वा शोकं सदारश्च सिद्धिं परमिकां गतः। यत्र धर्मं समाश्रित्य विदुरः सुगतिं गतः। सञ्जयश्च महामात्यो विद्वान् गावल्गणिर्वशी। ददर्श नारदं यत्र धर्मराजो युधिष्ठिरः। नारदाच्चैव शुश्राव वृष्णीनां कदनं महत्। एतदाश्रमवासाख्यं पर्वोक्तं सुमहाद्भुतम्। द्विचत्वारिंशदध्यायाः पर्वैतदभिसंख्यया। सहस्रमेकं श्लोकानां पञ्च श्लोकशतानि च। षडेव च तथा श्लोकाः संख्यातास्तत्त्वदर्शिना" (१५आश्रमवासपर्व)

"अतःपरं निबोधेदं मौषलं पर्व दारुणम्। यत्र ते पुरुषव्याघ्रा शस्त्रस्पर्शहता युधि। ब्रह्मदण्डविनिष्पिष्टाः समीपे लवणाम्भसः। आपाने पानकलिता दैवेनाभिप्रचोदिताः। एरकारूपिभिर्वज्रैर्निजघ्नुरितरेतरम्। यत्र सर्वक्षयं कृत्वा तावुभौ रामकेशवौ। नातिचक्रमतुः कालं प्राप्तं सर्वहरं महत्। यत्रार्जुनो द्वारवतीमेत्य वृष्णिविनाकृताम्। दृष्ट्वा विषादमगमत् परां चार्त्तिं नरर्षभः। स संस्कृत्य नरश्रेष्ठं मातुलं शौरिमात्मनः। ददर्श यदुवीराणामापाने वैशसं महत्। शरीरं वासुदेवस्य रामस्य च महात्मनः। संस्कारं लम्भयामास वृष्णीनाञ्च प्रधानतः। स वृद्धबालमादाय द्वारवत्यास्ततो जनम्। ददर्शापदि कष्टायां गाण्डीवस्य पराभवम्। सर्वेषाञ्चैव दिव्यानामस्त्राणामप्रसन्नताम्। नाशं वृष्णिकलत्राणां प्रभावानामनित्यताम्। दृष्ट्वा निर्वेदमापन्नो व्यासवाक्यप्रचोदितः। धर्मराजं समासाद्य संन्यासं समरोचयत्। इत्येतन्मौषलं पर्व षोडशं परिकीर्त्तितम्। अध्यायाष्टौ समाख्याताः श्लोकानाञ्च शतत्रयम्। श्लोकानां विंशतिश्चैव संख्यातास्तत्त्वदर्शिना" (१६मौषलपर्व)।

"महाप्रस्थानिकं तस्मादूर्द्ध्वं सप्तदशं स्मृतम्। यत्र राज्यं परित्यज्य पाण्डवाः पुरुषर्षभाः। द्रौपद्या सहिता देव्या महाप्रस्थानमास्थिताः। यत्र तेऽग्निं ददृशिरे लौहित्यं प्राप्य सागरम्। यत्राग्निना चोदितश्च पार्थस्तस्मै महात्मने। ददौ सम्पूज्य तद्दिव्यं गाण्डीवं धनुरुत्तमम्। यत्र भ्रातॄन् निपतितान्द्रौपदीञ्च युधिष्ठिरः। दृष्ट्वा हित्वा जगामैव सर्वाननवलोकयन्। एतत् सप्तदशं पर्व महाप्रस्थानिकं स्मृतम्। यत्राध्यायास्त्रयः प्रोक्ताः श्लोकानाञ्च शतत्रयम्। विंशतिश्च तथा श्लोकाः संख्यातास्तत्त्वदर्शिना"। (१७महाप्रस्थानिकपर्व)।

"स्वर्गपर्व ततो ज्ञेयं दिव्यं यत्तदमानुषम्। प्राप्तं दैवरथं स्वर्गान्नेष्टवान् यत्र धर्मराट्। आरोढुं सुमहाप्राज्ञ आनृशंस्याच्छुना विना। तामस्याविचलां ज्ञात्वा स्थितिं धर्मे महात्मनः। स्वरूपं यत्र तत्त्यक्त्वा धर्मेणासौ समन्वितः। स्वर्गं प्राप्तः स च तथा यातनां विपुलां भृशम्। देवदूतेन नरकं यत्र व्याजेन दर्शितः। शुश्राव यत्र धर्मात्मा भ्रातॄणां करुणा गिरः। निदेशे वर्त्तमानानां देशे तत्रैव वर्त्तताम्। अनुदर्शितश्च धर्मेण देवराज्ञा च पाण्डवः। आप्लुत्याकाशगङ्गायां देहं त्यक्त्वा स मानुषम्। स्वधर्मनिर्जितं स्थानं स्वर्गे प्राप्य स धर्मराट्। मुमुदे पूजितः सर्वैः सेन्द्रैः सुरगणैः सह। कर्णस्य नरकप्राप्तिः प्रमोक्षश्चात्र कीर्त्त्यते। समागमश्च वीराणां स्वर्गलोके महात्मना। कीर्त्त्यते यत्र विधिवत् स्वर्गसंवाद एव च। स्थानि स्थानानि च प्राप्ता यत्र ते पुरुषर्षभाः। एतदष्टादशं पर्व प्रोक्तं व्यासेन धीमता। अध्यायाः पञ्च संख्याताः पर्वण्यस्मिन्महात्मना। श्लोकानां द्वे शते चैव प्रसंख्याते तपोधनाः। नव श्लोकास्तथैवान्ये संख्याताः परमर्षिणा। (१८स्वर्गारोहणिकपर्व)।

अष्टादशैवमेतानि पर्वाण्युक्तान्यशेषतः। खिलेषु हरिवंशश्च भविष्यञ्च प्रकीर्त्तितम्। विष्णुपर्व शिशोश्चर्य्या विष्णोः कंसवधस्तथा। भविष्यं पर्व चाप्युक्तं खिलेष्वेवाद्भुतं महत्। दश श्लोकसहस्राणि विंशत् श्लोकशतानि च। खिलेषु हरिवंशे च संख्यातानि महर्षिणा"। "भारतं शृणुयान्नित्यं भारतं परिकीर्त्तयेत्। भारतं भवने यस्य तस्य हस्तगतो जयः" भा०आ० १अ०। भरतस्य अपत्यादि शुभ्रा०ढक् भारतेय तदपत्यादौ पुंस्त्री०।

भारतवर्ष पुंन० जम्बुद्वीपान्तर्गते वर्षभेदे जम्बुद्वीपशब्दे ३०४६ पृ० दृश्यम्।

भारती स्त्री भृ-अतच्। स्वार्थे प्रज्ञाद्यण्। १वाक्ये तदधिदेवतायां २सरस्वत्यां ३पक्षिभेदे "भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः" इति सा०द० व्यवहारोक्ते

४हस्तिभेदे च ५कन्यामिनाख्यपक्षिभेदे च स्त्री ।

भारद्वाज पु० भरद्वाजस्य गोत्रापत्यम् अण् । गोत्रप्रवर्त्तके १मुनिभेदे २द्रोणाचार्य्ये मेदि० ३अगस्त्यमुनौ शब्दर० ४व्याघ्राटविहगे ५वृहस्पतिपुत्रे च हेमच० ६वनकार्पास्यां स्त्री ङीप् । पृषो० । भाद्वाजोऽप्यत्र । विदा० अञ् ततः अश्वा० फञ् । भारद्वाजायन तद्गोत्रापत्ये पुंस्त्री० । स्त्रियां ङीप् । भारद्वाजी हृत० । भारद्वाजीपुत्र तत्पुत्रे स च यजुर्वेदस्य वंशस्थः ऋषिभेदः शत०ब्रा०१४।६।४।२।

भारभृत् त्रि० भारं बिभर्त्ति भृ-क्विप् । १भारधारके । २विष्णौ पु० "भारभृत् कथितो योगी" विष्णु स० ।

भारमेय त्रि० भारमस्येदम् शुभ्रा० ढक् । भरमसम्बन्धिनि स्त्रियां ङीप् ।

भारय पु०भासा रयो वेगो यस्य ।(भारद) खगभेदे शब्दच० ।

भारयष्टि स्त्री भारस्य वहनार्था यष्टिः शाक०त० । भारवहनदण्डे (बाँक) अमरः ।

भारव न० भार वाति वा-क । धनुर्गुणे त्रिका० ।

भारवाह(ह्) त्रि० भारं वहति अण् णिच वा । भारवाहिनि एवम् । भारवाहकोऽप्यत्र । अमरः स्त्रियां ङीप् णिप्रत्ययान्तस्य यथादावजादौ ङीपि च ऊठ् । भारौहः भारौही ।

भारवि पु० किरातार्जुनीयकाव्यकारके १कविभेदे । "तावद्भा भारवेर्भाति यावन्माघस्य नोदयः । उदिते च पुनर्माघे भारवेर्भा रवेरिव" उद्भटः । तत्कृते २काव्ये च "उपमा कालिदासस्य भारवेरर्थगौरवम्" उद्भटः ।

भारवृक्ष पु० भारीभूतो वृक्षः । काञ्चोनामगन्धद्रव्ये शब्दच० ।

भार(ह)हार त्रि० भारं हरति हृ-अण् अच् वा । भारवाहके तत्रानुद्यमने अच् । उद्यमने तु अण् इतिभेदः ।

भाराक्रान्त त्रि० ३त० । १भारेणाक्रान्ते "भाराक्रान्ता भमनरसला गुरुः स्मृतिरवश्वैः" छन्दोम०उक्ते २सप्तदशाक्षरपादके वर्णवृत्तभेदे स्त्री ।

भारि पु० इभस्यारिः पृषो० । सिंहे हेमच० ।

भारिक त्रि० भारं वहति भार+ठक् । भारवाहके अमरः ।

भारिट पु० भासा रेटति रिट-क । श्यामचटके खगभेदे राजनि० ।

भारिन् त्रि० भारोऽस्त्यस्य धाय्यत्वेन इनि । भारवाहके सततपरस्य भावायत्तस्य सुखः । भावभारी । "मल्लिकाभावभारिणः" काव्याद० ।

भारुण्ड पु० उत्तरकुरुवर्त्तिनि १खगभेदे तद्वर्णने "भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा भयानकाः । तान्निर्हरन्तीह मृतान् दरीषु प्रक्षिपन्ति च" भा०भी० ७अ० । २साममेदे तत्र भारुण्डेति पाठभेदः । तत्सामद्रष्टरि ३ऋषिभेदे "भारुण्डसामगीताभिरथर्वशिरसोद्गतैः" भा०आ०६७ अ० । तत्र सामार्चिके १।२।२ "इमं स्तोममर्हते" इत्यादिमन्त्रे गेयं साम, मत्कृत वृत्तादानादिपद्धतौ १०१ पृ०दृश्यम् । "आज्यदोहानि सामानि शान्तिकं भारुण्डानि च । पश्चिमे द्वारपालौ तु पठेताम् सामगौ तथा" विधानपा० ।

भारूप न० भारूपमस्य । चिदात्मके १ब्रह्मणि २आत्मनि पु० ।

भार्ग पु० भर्गस्य देशभेदस्य राजा अण् । १भर्गदेशनृपे तत्र तद्राजस्य भार्गा० स्त्रियां न लुक् । भार्गी । २प्रतर्द्दनस्य पुत्रभेदे पु० हरिवं० २६ अ० ।

भार्गभूमि पु० आङ्गिरसे भार्गेयपुत्रभेदे हरिवं० ३अ० ।

भार्गव पुंस्त्री० भृगोरपत्यम् तद्गोत्रापत्यं वा अण् ।१भृगुवंश्ये बहुत्वे तु अत्रिभृग्वित्यादिना अणो लुक् । भृगवः तद्गोत्रापत्येषु । २शुक्राचार्य्ये ३धन्विनि ४गजे च पु० मेदि० । तेन प्रोक्ता तेनाधीता ज्ञाता वा अण् । ५वेदप्रसिद्धे विद्याभेदे ६पार्वत्यां ७लक्ष्म्यां ८दूर्वायां च स्त्री मेदि० ङीप् । प्राच्ये ९देशभेदे पु० । "ब्रह्मोत्तराः प्रविजया भार्गवाश्चेयमल्लकाः" मार्कपु० । १०द्रुपदनगरस्थे कुम्भकारभेदे पु० भा०आ०१६०अ० । ११महादेवे पु० भा० द्रो० २०१अ० ।

भार्गवन न० द्वारकास्थे वनभेदे हरिवं० १६७ अ० ।

भार्गवप्रिय पु० ६त० । हीरके तस्य शुक्रग्रहप्रियत्वात् तथात्वम् । [भर्गगोत्रापत्ये ।

भार्गायण पुंस्त्री०भर्गस्य गोत्रापत्यं त्रैगर्त्तः फञ् । त्रैगर्त्ते

भार्गी स्त्री भार्गस्येयमण् । (बामनहाटि)वृक्षभेदे राजनि० ।

भार्म्य पु० भर्गस्य गोत्रापत्यं गर्गा०यञ् । मुद्गलगोत्रे नृपभेदे भाग० ९।२१।२४।

भार्य्या स्त्री भृ-ण्यत् । १विधिनोढ़ायां स्त्रियाम् २स्त्रीमात्रे ३भरणीयमात्रे त्रि० । भार्य्याशब्दश्च यूपाहवनीयादिवत् अलौकिकसंस्कारसहितस्त्रीबोधकः । तस्याः गुणदोषा यथा "सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रियंवदा । सा भार्य्या या पतिप्राणा सा भार्य्या या पतिव्रता । नित्यस्नाता सुगन्धा च नित्यञ्च प्रियवादिनी । अल्पभुक् अल्पभाषी च सततं मङ्गलैर्युता । सततं धर्मबहुला सततञ्च पतिप्रिया । सततं प्रियवक्त्री च सततं भर्त्तृकामिनी । पितृदेवक्रियायुक्ता सर्व्वसौभाग्यवर्द्धिनी ।

यस्येदृशी भवेद्भार्य्या देवेन्द्रो न च मानुषः” । “यस्य भार्य्या विरूपाक्षी कश्मला कलहप्रिया । उत्तरोत्तरवादा स्यात् सा जरा न जरा जरा । यस्य भार्य्या श्रिताऽन्यत्र परवेश्माभिकाङ्क्षिणी । कुक्रिया त्यक्तलज्जा च सा जरा न जरा जरा । यस्य भार्य्या गुणज्ञा च भर्त्तारमनुगामिनी । अल्पाल्पेन तु सन्तुष्टा सा प्रिया न प्रिया प्रिया । दुष्टा भार्य्या शठो मित्रं भृत्याश्चोत्तरदायकाः । ससर्पे च गृहे वासो मृत्युरेव न संशयः । आपत्सु मित्रं जानीयात् युद्धे शूरं धने शुचिम् । भार्य्याञ्च विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम्” । गारुडे १०८।१०९ अ० । “वृहस्पतिरुवाच “यस्य नास्ति सती भार्य्या गृहेषु प्रियवादिनी । अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् । सुशीला सुन्दरी शान्ता गता यस्य गृहोदरात् । अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् । भावानुरक्ता वनिता हृता यस्य च मृत्युना । अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् । दैवेनापहृता यस्य पतिसाध्वी पतिव्रता । अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् । यस्य माता गृहे नास्ति भार्य्या चाप्रियवादिनी । अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् । प्रियाशून्यं गृहं यस्य पूर्णं श्रीधनबन्धुभिः । अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् । भार्य्याशून्या वनसमाः सभार्य्याश्च गृहा गृहाः । गृहिणी च गृहं प्रोक्तं न गृहं गृहमुच्यते । अशुचिः स्त्रीविहीनश्च दैवे पैत्रे च कर्म्मणि । यदह्ना कुरुते कर्म न तस्य फलभाग्भवेत् । दाहकशक्तिहीनश्च यथा मन्दो हुताशनः । प्रभाहीनो यथा सूर्य्यः शोभाहीनो यथा शशी । शक्तिहीनो यथा जीवो यथात्मा च तनुं विना । विनाधारं यथाधेयो यथेशः प्रकृतिं विना । न च शक्तो यथा यज्ञः फलदो दक्षिणां विना । कर्म्मिणे च फलं दातुं सामग्रीमूलमेव च । विना स्वर्णं स्वर्णकारो यथाऽशक्तः स्वकर्म्मणि । यथाऽशक्तः कुलालश्च मृत्तिकाञ्च विना क्रियाः । तथा गृही न शक्तश्च सततं सर्वकर्म्मणि । भार्य्यामूलाश्च पुत्राश्च भार्य्यामूला गृहास्तथा । भार्य्यामूलं सुखं शश्वद् गृहस्थानां गृहे सदा । भार्य्यामूलो सदा हर्षः भार्य्यामूलञ्च मङ्गलम् । भार्य्यामूलश्च संसारो भार्य्यामूलञ्च गौरवम् । यथा रथश्च रथिनां गृहिणाञ्च तथा गृहम् । सारथिस्तु यथा तेषां गृहस्थानां तथा प्रिया । सर्वरत्नप्रधाना च स्त्रीरत्नं दुष्कुलादपि । सा गृहीता गृहस्थेनेत्याह कमलोद्भवः । यथा जलं विना पद्मं पद्मं शोभां विना यथा । तथैव च गृहं शश्वद् गृहिणां गृहिणीं विना” । ब्रह्मवै०पु० प्र० ख० ५६ अ० । “तोषयेत् सततं भार्य्या विधिवत् पाणिपीडिताः । तासां तुष्ट्या तु कल्याणमकल्याणमतोऽन्यथा । सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च । यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् । यथा विरुद्धयते स्वामी सौभाग्यमदद्दप्तया । असतीशब्दमाप्नोति सा स्यादेष्या भवान्तरे । इहापि लोकेऽवाच्यत्वमधर्म्मञ्चापि विन्दति । न च पितृकुलं स्वामिकुलं तस्याः प्रमोदते । विरुध्यमाने पत्यौ यत् सपत्न्या वा प्रवर्त्तते । अतीव दुःखं भवति तदकल्याणलक्षयोः” कालिकापु० २० अ० ।

भार्य्याट पु० भार्य्यां तद्दानमटति अट अण् उप० स० । अन्यस्मै स्वभार्य्यादानार्थं गन्तरि त्रिका० ।

भार्य्याटिक पु० भार्य्यया आटो गतिः प्रयोजनमस्य ठक् । १स्त्रीजिते २हरिणभेदे च मेदि० ।

भार्य्यारु पु० भार्य्यं धार्य्यमृच्छति ऋ उण् । १शैलभेदे २हरिणभेदे । भार्य्यां परभार्य्यामृच्छति ऋ-उण् । ३अनियोगेन परभार्य्यागामिनि च मेदि० ।

भार्य्यावृक्ष पु० भार्य्येव प्रियत्वात् वृक्षो यस्य पतङ्गे राजनि० । [ऊढ़भार्य्ये

भार्य्योढ़ पु० ऊढ़ा भार्य्या येन आहिता० वा परनिपातः ।

भाल न० भा—लच् । १ललाटे भ्रुवोरूर्द्ध्वभागे २तमसि मेदि० ।

भालकृत् पु० गोत्रप्रवरर्षिभेदे प्रवराध्यायः ।

भालचन्द्र पु० भाले चन्द्रोऽस्य । १शिवे २गणेशे ३दुर्गायां स्त्री ।

भालदर्शन न०भाले दृश्यते कर्म्मणि ल्युट् । १सिन्दूरे शब्दच० भाले दर्शनं नेत्रमस्य । २कपाललोचने महादेवे ।

भालदृश् पु० भाले दृगस्य । त्रिनयने महादेवे हेमच० ।

भालनेत्र पु०भाले नेत्रमस्य ।१शिवे । भाललोचनादयोऽप्यत्र । २त्रिनयनायां दुर्गायां स्त्री ।

भालाङ्क पु०भालस्येवाङ्को यस्य भाले अङ्को यस्य वा । १शाकभेदे २करपत्रेऽस्त्रे (करात्) ३रोहितमत्स्ये महालक्षणविशेष लक्षाटाविचक्रयुक्ते ४पुरुषभेदे ५शिवे ६कच्छपे च मेदि० । [उज्ज्वल० ।

भालु पु०भृणाति रोगान् भृ भदृसने उण् रस्य लः । आदित्ये

भालु(लू)क पु०स्त्री०पु० भल-अवरोधे उक ऊक वा । स्त्रीत्वा-

पख्याते मत्स्यभेदे अमरः पाठान्तरम्। स्त्रियां जातित्वात् ङीष्।

भाल्लवि पु० १शाखाभेदे २तदध्येतरि च। "तामेतां भाल्लवय उदाहरन्ति" ताण्ड्य ब्रा० २।२।४ "तामेतां परिवर्त्तिनीं विष्टुतिम् भाल्लविशाखाध्यायिन उपासते" भा०।

भाल्लू(ल्लु)क पुंस्त्री० भल्लूक+स्वार्थे अण् वा पृषो० ह्रस्वः। जन्तुभेदे भल्लूके स्त्रियां ङीष्।

भाव पु० भावयति चिन्तयति पदार्थान् चु०भू–अच्। भावशीले नानापदार्थचिन्तके १पण्डिते। भावयति ज्ञापयति हृदयगतम् भू–णिच्–अच्। २हृद्गतावस्थावेदके मानसविकारे स्वेदकम्पादौ व्यभिचारिभावे। ३सत्त्वादिभावे वेदि० भू-भावे घञ्। साध्यरूपे सिद्धरूपे वा ३क्रियारूपे धातोरर्थे। ४रागे ५आशये च ६सत्तायां ७चेष्टायाम् ८जन्मनि च अमरः ९विभूतौ। कर्त्तरि च। १०आत्मनि ११बुधे १२जन्तौ करणे अच्। १३गौरविते १४[illegible]भेदे त्रिका०। १६योनौ १७उपदेशे धरणिः। संसारे भवगन्धार्थे च। ज्यो० उक्ते १८लग्नादितः तन्वादिद्वादशभावे तच्छब्दे ३८०२ पृ० तदानयनम् दृश्यम्। २०स्त्रीणां यौवनकाले सत्त्वभवाष्टाविंशत्यलङ्कारान्तर्गतेऽङ्गजे प्रथमालङ्कारे। यथा "यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः। अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः। तत्र भावः "निर्विकारात्मके चित्ते भावः प्रथमविक्रिया"। जन्मतः प्रभृति निर्विकारे मनसि उद्बुद्धमात्रो विकारो भावः। यथा "स एव सुरभिः कालः स एव मलयानिलः। सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते" सा० द०। भावस्य लक्षणान्तरं यथा "शरीरेन्द्रियवर्गस्य विकाराणां विधायकाः। भावा विभावजनिताश्चित्तवृत्तय ईरिताः। पुराणे नाट्यशास्त्रे च द्वयोस्तु रतिभावयोः। समानार्थतया चात्र द्वयमैक्येन गच्छति"। २१ग्रहाणां द्वादशविधचेष्टाभेदे तदानयनं फलं च ज्यो०त० उक्तं यथा

"शयनञ्चोपवेशञ्च नेत्रपाणिः प्रकाशनम्। गमनं गमनेच्छा च सभायां वसतिस्तथा। आगमनं भोजनञ्च नृत्यलिप्सा च कौतुकम्। निद्रा ग्रहाणां भावाश्च द्वादशैते प्रकीर्त्तिताः"। भावज्ञानक्रमो यथा "यद्राशौ विद्यते खेटस्तेन तं परिपूरयेत्। पुनरंशेन संपूर्य ऋक्षं तत्र नियोजयेत्। जातदण्डं तथा जन्मसंख्यां यथा बुधैः। रविभक्ता नामवर्णैः शेषं कार्य्ये नियोजयेत्"। अंशेन ऋक्षसंख्यया। ऋक्षं ग्रहाणां जन्मनक्षत्रम्। तद्यथा। "विशाखानलतोयानि वैष्णवं भगदैवतं पुष्या पौष्णाश्विनः सार्पौ जन्मभान्यर्कतः क्रमात्। कलौ राशिः। यदा मेषे ग्रहस्तदा १एकपूरितग्रहसंख्याङ्कः। यदा वृषे ग्रहस्तदा २द्विपूरितो ग्रहसंख्याङ्कः कार्य्यः। जायासुतमृत्युलग्नकण्टकत्रिकोणस्थानस्थितपापग्रहाणां निद्राशयनभावयोः फलम् "निद्रायाञ्च यदा पापो जायास्थाने शुभं वदेत्। यदि पापः शुभैर्दृष्टो नाशुभञ्च कदाचन। यदि वा शत्रुगेही स्याच्छयने यदि वेक्षितः। तदा नारीसमं तस्य नाशो भवति निश्चितम्। शुभाशुभैर्यदा दृष्टः शुभग्रहसमन्वितः। नारी च म्रियते तस्य प्रथमा च विशेषतः। सुतस्थाने स्थितः पापो निद्रायां शयनेऽपि वा। तदा शुभं भवेत्तस्य नात्र कार्य्या विचारणा। लग्नस्थाने कण्टके वा त्रिकोणे वा यदा भवेत्। अपत्यस्य तदा नाशो जायते नात्र संशयः। शुभग्रहो यदा तत्र क्रूरो वा यदि वेक्षितः। तदा प्रथमापत्यस्य नाशो भवति निश्चितम्। मृत्युस्थाने स्थितः पापो निद्रायां शयनेऽपि वा। तदात्मनोऽपमृत्युः स्याद्राजतोऽपरतोऽपि वा। शुभग्रहो यदा तत्र मृत्युस्थानेऽपि संस्थितः। तदा च मरणं तस्य मृत्युस्थाने विशेषतः। पापग्रहैर्यदा दृष्टः शुभो वा शत्रुवीक्षितः। तदा तस्य शिरश्छेदो मुनिना परिकीर्त्तितः। एवं क्रमेण बोद्धव्यं ग्रहभावे सुबुद्धिना। बलाबलविचारेण जायते च शुभाशुभम्। ज्योतिर्विद्भिश्च सर्वेषु परिहारः कृतो मया। शयनादिकभावेषु ज्ञातव्यश्चोपदेशतः। एकादशे वा दशमालये वा धनालये वा यदि वा विलग्ने। पापेन युक्तो न शुभग्रहस्तथापि सिद्धिं महतीं ददाति"। ग्रहभेदेन दशाभेदे फलं यथा

"मन्दाग्निः पित्तशूली च जायते शयने नरः१। उपवेशे भवेत्पक्षी ध्यानवर्णस्तथा नरः२। नेत्रपाणौ भवेत् क्रूरो जलदोषो भवेन्नरः३। पुण्यवान् भास्करश्चैव धनयांश्च प्रकाशने४। गमने च रवेर्जातः नरश्च धनसंयुतः। बहुभाषी भ्रमी क्रोधी लुब्धचित्तः सदा भवेत्५। अल्पभोक्ता शीघ्रगामी दीर्घायुर्नृपवल्लभः। शूरः श्रीमान् सुशीलश्च गमनेच्छाभवो नरः६। सभायाञ्च रवेर्जातः खलो दाता यशी भवेत्। दयालुः पण्डितो धीमान् गुणवान् पण्डितप्रियः७। आगमने भवेन्मूर्खः कुरूपो धनवान् भ-

वेद्८ । भोजने भक्तको मांसलुब्धो महावपुर्बली९ । नृत्यलिप्सौ सुन्दरो वाग्मी पण्डितस्तद्राधिपः१० । उत्साही च महाभोगी कौतुके च दिवाकरे११ । दाता भोक्ता प्रियः पुत्रकलत्राभ्यां न संशयः । सिद्धे देहे करे चैव गुदे रोगी तथैव च । निद्रायाञ्च भवेद्भानोः क्रोधनो रक्तनेत्रकः"१२ । इति रवेः ।

"शयने च विधौ क्रोधी दरिद्रो बहुलम्पटः१ । उपवेशे महारोगी धनहीनश्च भवेन्नरः२ । नेत्रपाणौ नेत्ररोगी श्लीपदी बहुभाषकः । क्रूरः सर्वोऽतिदूरश्च जायते च विधौ तदा३ । प्रकाशने निशानाथे धनवांश्च भवेन्नरः । दक्षो बुद्धिमान् दाता च परदारेषु लम्पटः ४ । खरोगी विग्रहः चैव क्रूरकर्मा धनान्वितः । शिरोरोगी दन्तशूली जायते गमने विधौ५ । नानाव्रतिर्महाक्रोधी सम्पद्युक्तो भवेन्नरः । गमनेच्छुर्विधौ जातो धनहीनो भवेत् तदा६ । दाता च धार्मिकश्चैव राजमान्यो भवेत् सदा । सभायाञ्च विधौ नित्यं जायते पुरुषोत्तमः७ । नित्यक्रोधी महादुःखी भवेदागमने विधौ८ । भोजने च भवेद्युक्तो मानवस्तु महादरः९ । यो जातो नृत्यलिप्सायां गुणवान् धार्मिको भवेत् । बहुपुत्रो धनी दाता जायते नात्र संशयः१० । कौतुके च भवेद्भोगी नानाविद्याविशारदः । उत्साही च महाक्रोधी जायते च सुचिन्तितः११ । निद्रायां हृद्रोगी स्यात् सपापरुजान्वितः । पुत्रशोकमहादुःखी नित्यं भ्रमति मेदिनीम्"१२ । इति चन्द्रस्य ।

"शयने च कुजे जातो व्रणोपद्रवपीडितः । उपक्रोधी महादुःखः सपक्षो जायते नरः१ । उपवेशे यदा भौमे जायते च नराधमः । धनवान् क्रूरकर्मा च निष्ठुरो जातिवर्जितः२ । नेत्रपाणौ च यो जातोऽक्षिरोगी भवेन्नरः । पुत्रदारधनैर्युक्तो दारिद्र्येण च दह्यते३ । प्रकाशने कुजे जातो धनवान् पण्डितः सुधीः । नारी च म्रियते तस्य प्रथमा च [illegible]ः४ । गमने च यदा जातः प्रवासी नित्यदुःखितः । शरीरे च भवेद्रोगी कण्ड्वादिकुष्ठदद्रुकः । प्रवासी गमनेच्छायां गुदरोगी भवेत् सः । धनहीनः कृशाङ्गश्च जायते शिथिलश्च ६ । सभायाञ्च यदा जातो धार्मिको मङ्गलप्रदः । गुणवांश्च महादाता शिरोरोगी भवेद् ध्रुवम्"७ । कुजस्यागमने नित्यं व्याधी भवति नान्यथा । सर्वरोगी पित्तशूली जायते च नराधमः८ । भोजने भूमिजस्यापि यो जातो मानलुब्धकः । हठवादी महाक्रोधी मिथ्यावादी धनान्वितः९ । कुजस्य नृत्यलिप्सायां यो जातो धनवान् भवेत् । दाता भोक्ता सदा कामी राजमान्यो भवेच्च सः१० । कौतुके क्षितिजस्यापि जातो भवति पण्डितः । नानाधनेन संयुक्तो बहुपुत्रो द्विभार्यकः११ । निद्रायां भूमिपुत्रस्य यो जातो मूर्ख एव सः । कलहो बान्धवैः सार्द्धं योषिन्मदजान्वितः१२" इति कुजस्य ।

"बुधस्य शयने जातो धनवान् सुखितः सदा । खड्गच्छेदाद्भवेद्वापि खञ्जो भवति नान्यथा१ । उपवेशे च यो जातः प्रवासी जायते ध्रुवम् । कवितागुणधीयुक्तो गौरवर्णो महाशयः२ । नेत्रपाणौ च यो जातः श्लीपदादिरुजान्वितः । चक्षुरोगी विशेषः स्यात् पुत्रनाशो भवेद्ध्रुवम्३ । प्रकाशने भवेज्जातो राजमान्यो धनान्वितः । नानाधनेन संयुक्तो जायते देहपारगः४ । गमने यो नरो जातः प्रवासी नित्यदुःखितः । शरीरं च न प्राप्नोति नित्यरोगी भवेच्च सः५ । यो जातो गमनेच्छायां लम्पटो दुष्टचित्तकः । क्रोधनो दुष्टभार्यश्च नरो बहुभाषकः६ । सभायाञ्च बुधे जातो मूर्खो भवति पण्डितः । धनवान् धार्मिकश्चैव चिररोगी भवेत्तु सः७ । क्रूरः सदा हतो मूर्खः पापयोगो भवेन्नरः । बुधस्यागमने नित्यं जायते च नराधमः८ । भोजने च भवेद्योगी धनहीनो भवेन्नरः । परद्वेषी प्रवासी च शोकनानाव्याधान्वितः९ । यो जातो नृत्यलिप्सायां धनवान् पण्डितः कविः । उत्साही च महाहृष्टो भुनक्ति सुखमन्वहम्१० । कौतुके च यदा जातो भवेत् सर्वजनप्रियः । वातरोगी हृद्युक्तो धनवान् सुलक्षणः११ । निद्रायाञ्च यदा जातः सर्वदा दुःखभाजनम् । नानाक्लेशमवाप्नोति रोगशोकसमन्वितम्"१२ । इति बुधस्य ।

"धनवान् लम्पटः ख्यातः [illegible]ान्वितः । जीवस्य शयने जातो जायते नात्र संशयः१ । उपवेशे गुरोर्जातो बहुभाषी च रोमवान् । पटुभाषी महाविद्वान् श्लीपदरोगसंयुतः२ । नेत्रपाणौ गुरोर्जातः कामरोगी धनी भवेत् । नृत्यादिरक्षे नित्यं जायते नात्र संशयः३ । गुरोः प्रकाशे धनवान् विद्यायुक्तो दयान्वितः । दक्षो लम्पटभाषी च ज्ञानपूर्णो बलान्वितः४ । सर्वशीलो गुरुश्च कामदो गमनोत्सुके । परविक्षेप धनवान् सुजान् भवे

वाक्पतौ५ । गुरोश्च गमनेच्छायां जातो भवति मानवः । शूरो धनी प्रवासी च सेवाकर्मेऽपि तत्परः६ । वक्ता दाता च धनवान् राजसेवान्वितो नरः । मूत्ररोगी भवेन्नित्यं सभायां वाक्पतौ स्थिते७ । धार्मिकः कीर्त्तिमान् ज्ञानी धनी चागमने गुरोः । परदारेषु संयुक्तो जायते नात्र संशयः । भोजने बहुसौख्याढ्यो मांसलुब्धो महातुरः । वाचकः प्रियवाक्यश्च जायते नात्र संशयः८ । नृत्यलिप्सौ शठो दम्भो धनवान् सात्त्विकस्तथा । महदैश्वर्य्यसंयुक्तो जीवस्य च भवेन्नरः१० । कौतुके च गुरोर्जातो धनवान् धार्मिकः सदा । कन्योत्साही महत्पक्षो भुनक्ति सुखमद्भुतम्११ । निद्रायाञ्चैव यो जातश्चक्षूरोगी भवेच्च सः । तपस्वी बहुभाषी च दुःखितो भ्रमते महीम्१२ । इति गुरोः ।

शुक्रस्य शयने जातो लम्पटो बहुभाषकः । दन्तरोगी महाक्रोधी नीचो भवति निश्चयः१ । उपवेशे तथा जातो बलवान् दाम्भिकः सदा । नित्यप्रवासी रोगी च जायते नीचसंस्थिते२ । नेत्रपाणौ भृगोर्दुःखी रोगशोकसमन्वितः । धनहीनो महारोगी मानवः स्यान्न-संशयः३ । भृगोः प्रकाशने जातो विद्याधनसमन्वितः । दाता च धार्मिकश्चैव कीर्त्तिमान् जायते नरः४ । शुक्रस्य गमने जातः पादमूले व्रणान्वितः । नित्योत्साही महाभिक्षी भवेत्तीर्थगतो रतः५ । गमनेच्छो यदा जातो भ्रातृनाशो भवेद्ध्रुवम् । माता च म्रियते तस्य शैशवे व्याधिसंयुतः६ । सभायाञ्च भृगोर्जातो राजपात्रो महाधनी । कुलश्रेष्ठो महादक्षः केवलं मूत्ररोगवान्७ । भृगोरागमने जातो दुःखितो बहुलम्पटः । दद्रुरोगी गुह्यरोगी जायते च नराधमः । शुक्रस्य भोजने जातो बलवान् दाम्भिकः सदा । महाधनी भवेन्नित्यं वाणिज्येन विशेषतः८ । यो जातो नृत्यलिप्सायां स वाग्मी जायते ध्रुवम् । पाण्डित्यं कविता चैव वर्द्धते च दिने दिने । यदि चैव भवेन्नीचे मूर्खो भवति निश्चयः । उच्चस्थाने विशेषेण राजपात्रो महाधनी । कातरो बहुकान्तश्च परस्त्रीनिरतप्रियः सदा । महाहृष्टो महानन्दः कौतुकी च भवेद्यदा । बहुपुत्रकलत्रश्च नानासुखसमन्वितः । नीचे तद्विपरीतः स्यात् दुःखशोकसमन्वितः११ । निद्रायाञ्च भृगोर्जातो भवेद्रोगी च निश्चितम् । निन्दकोऽसौ महादुःखी जायते नात्र संशयः । आयायाञ्च उच्चस्थाने यदि निद्रा भृगोर्भवेत् । तदा सर्व्वविनाशः ज्ञादिमुना परिकीर्त्तितम्”१२ । शुक्रस्य ।

“शयने च शनेर्जातो लम्पटो बहुभाषकः । गुह्यस्थाने भवेद्रोगी कोपवृद्धिश्च जायते । तस्मात् सप्ताष्टमे चैव शयनस्थः शनैश्चरः । तदा नित्यप्रवासी स्याच्छत्रुजयी भवेच्च सः१ । उपवेशे यदा जातः श्लीपदीदद्रुसंयुतः । धनहीनो भवेत्तस्य पीड़ा भवति नित्यशः२ । नेत्रपाणौ यदा जातो मूर्खो भवति पण्डितः । धनवान् धार्मिकश्चैव द्विभार्य्यो बहुभाषकः३ । प्रकाशने च यो जातो राजपात्रो भवेच्च सः । नानागुणेन गुणवान् धार्मिकः पण्डितः शुचिः” मतान्तरे “आत्मस्थाने च लग्ने च प्रकाशने यदा शनिः । तदा सर्व्वविनाशः स्यात् जातिध्वंसो भवेद्ध्रुवम्४ । गमने च यदा जातः पादमूले व्रणान्वितः । तीर्थे च गतिमान्नित्यं पुत्रदारैर्विवर्जितः५ । यो जातो गमनेच्छायां श्लीपदीरोगसंयुतः । दन्ताघाती महाक्रोधी कृपणः परनिन्दकः६ । सभायाञ्च शनौ जातः पुत्रदारधनैर्युतः । सर्व्वञ्च लभते वित्तं नानारत्नसमन्वितम्७ । आगमने यदा जातो महाक्रोधी व्रणान्वितः । सर्पादिभिश्च दष्टो भ्रातृनाशी भवेद्ध्रुवम्८ । भोजने चैव यो जातो मत्स्यान्विष महानपि । अर्शोरोगी तथा मूढो मूत्ररोगी भवेच्च सः । यो जातो नृत्यलिप्सायां मतङ्गो बहुभाषकः । जीवने दुःखितश्चैव प्रवासी परिदेवकः१० । कौतुके च शनेर्जातो राजपात्रो महाधनः । दाता भोक्ता महादक्षो धार्मिकः पण्डितः शुचिः११ । निद्रायाञ्च शनेर्जातो धनवान् पण्डितः शुचिः । चक्षूरोगी पितृशूली द्विभार्य्यो बहुपुत्रकः । विशेषतश्च धर्मज्ञो धर्म्मगो च कदाचन । यदि देशान्तरेऽनिद्रा नाशो भवति निश्चितम् । कर्म्मनाशो धर्म्मनाशः क्षुधार्त्तः दुःखितः सदा । नित्यप्रवासी रोगी च कार्य्यनाशः पदे पदे । अष्टमे वा षष्ठे वा केन्द्रे वा लग्ने पुनः । तदा सर्वं विचार्य्यश्च वैपरीत्येन चिन्तनम् । आयायाञ्च उच्चस्थाने यदि निद्रा भवेत् पुनः । तदा सर्वं शुभं ज्ञादिमुना परिकीर्त्तितम्”१२ । शनेः ।

“शयने च यदा राहोर्जन्म यस्य भवेत् पुनः । तस्य क्लेशो महादुःखं जायते च न संशयः१ । उपवेशे च यो जातः श्लीपदीरोगसंयुतः । बहुहानिर्नरेन्द्रस्य पीड़ा भवति नित्यशः२ । नेत्रपाणौ यदा जातश्चक्षूरोगी भवेद्ध्रुवम् । सर्पाभीतिर्द्विभार्य्यो बहुभाषकः३ । प्रकाशने च यो जातो धनवान् धा०

र्म्मिकः पुनः। नित्यप्रवासी चोत्साही सात्त्विको धार्म्मिकः शुचिः४। गमने चैव यो जातो नानारोगैर्धनक्षयः। दन्तघाती महाक्रोधी पिशुनः परनिन्दकः५। यो जातो गमनेच्छायां बहुपुत्रो महाधनः। पण्डितो गुणवान् दाता जायते च नरोत्तमः६। सभायाञ्च यदा जातः कृपणो धनसंयुतः। नानागुणेन गुणवान् धार्म्मिकः पण्डितः शुचिः७। आगमने च यो जातो लम्पटो बहुभाषकः। सुहृद्बन्धुविनाशः स्यादागमने यस्य जायते८। भोजने च महादुष्टो मन्दाग्निश्च रुजान्वितः। कृपणः कटुवाक्यश्च दुःखितो नित्यसेवकः९। यो जातो नृत्यलिप्सायां खञ्जो भवति नान्यथा। पुत्रनाशो भवेत् तस्य जायानाशो भवेद् ध्रुवम्१०। कौतुके च यदा जातो गुणैः सर्वैः समन्वितः। नानाधनेन धनवान् राजसेवासु तत्परः। यदि दैवाद् भवेत् तस्मिन् खल्वटी वा कदाचन। तदा सर्वं वैपरीत्यं जायते च न संशयः११। यो जातो राहुनिद्रायां दुःखितः सर्वतस्तथा। नानास्थाने गतो वापि धनपुत्रविवर्जितः। जायायाश्च सुतस्थाने यातो निद्रां विधुन्तुदः। तदा सर्वं वैपरीत्यं सुतजायासमन्वितः१२। राहोः एवं केतुनाम्। २२वैशेषिकोक्तेषु द्रव्यगुणकर्मसामान्यविशेषसमवायात्मकेषु षट्सु पदार्थेषु "द्रव्यादयः पञ्च भावा अनेके समवायिनः" भाषा० "तथा हि पदार्थो द्विविधः भावोऽभावश्च। तत्र भावाः षट् सप्तमस्याभावस्य कीर्त्तनात्" सि०मु०। अभाव एक इति पदार्थाः सप्त। तत्र द्रव्यादिपञ्चकस्य अनेकत्वविशिष्टं भावत्वं लक्षणं समवायस्य भावत्वेऽपि एकत्वात् न तत्र प्रसङ्गः। तत्र च द्रव्यादिषट्कान्यतमत्वम् भावत्वमिति सि०मु०। सत्तावत्त्वमित्यन्वितमिति दिनकरप्रभृतयः। सत्तावत्त्वं समवाय सम्बन्धेन तादात्म्येन एकार्थसमवायेन वा बोध्यम्। तेन द्रव्यादित्रिके समवायेन, सत्तायां तादात्म्येन विशेषेषु एकार्थसमवायेन, समवाये आत्माश्रयसम्बन्धेन स्वरूपसम्बन्ध विशेषेण सत्तासम्बन्धस्यासम्भवः"। 'भावो यथा 'तथाऽभावः कार्य्यवत्कारणं यतः' कुसुमा०। भू-क्रियायाम् करणे घञ्। २३अन्तःकरणे "भावदुष्टो न शुध्यति" आ०त०। २४तन्त्रोक्ते पश्वाचारादिरूपे "भावस्तु त्रिविधा देवि! दिव्यवीरपशुक्रमात्। दिव्यवीरो महाभावौ अधमः पशुभावकः। वैष्णवः पशुभावेन पूजयेत् परमेश्वरम्। गर्त्तामन्ते वरारोहे! पशुभावो भयानकः। दिव्ये वीरे महेशानि! जायते सिद्धिरुत्तमा"। धात्वर्थेन साध्यरूपायाः क्रियाया भावत्वमुक्तं यथा "तदु यत्रोभे भावप्रधाने भवतः पूर्व्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्य्यन्तं, मूर्त्तं सत्त्वभूतं सत्त्वनामभिर्व्रज्या पक्तिरित्यादिभिः सत्त्वानामुपदेशो गौरश्वः पुरुषो हस्तीति भवतीति भावस्य, आस्ते शेते व्रजति तिष्ठतीति"। आलङ्कारिकोक्तभावस्य द्विविधता सञ्चारिव्यभिचारिभेदात् तत्तच्छब्दे दृश्यम्। २५सङ्गीतसङ्केतपदार्थद्योतकहस्तादिचेष्टाभेदे च। "यस्य च क्रियया क्रियान्तरं लक्ष्यते स भावः" इति व्याकरणपरिभाषिते २६पदार्थे च तत्र च सप्तमीत्याकरे स्थितम्। भवतीति भू-कर्त्तरि ण। २७उत्पत्तियुते षड्विकारयुते च पदार्थे भावविकारशब्दे दृश्यम्। २८सांख्यमतसिद्धेषु धर्माधर्मादिषु बुद्धिधर्मेषु "संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" सां०का०। "भावैरधिवासितं धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्य्यानैश्वर्य्याणि भावास्तदन्विता बुद्धिः तदन्वितञ्च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा सुरभिचम्पककुसुमसम्पर्कादुद्वस्त्रं तदामोदवासितं भवति तस्माद्भावैरेवाधिवासितत्वात् संसरति" तत्त्वकौ०। तेषां करणाश्रितत्वं कार्य्याश्रितत्वञ्च दर्शितं यथा "सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः। दृष्टाः करणाश्रयिणः कार्य्याश्रयिणश्च कललाद्याः" सां०का० "वैकृतिकानैमित्तिकाः प्राकृतिकाः, स्वाभाविकाः सांसिद्धिकाः भावाः यथा सर्गादावाविर्भवन् भगवान् कपिलो महामुनिर्धर्मज्ञानवैराग्यैश्वर्य्यसम्पन्नः प्रादुर्बभूवेति स्मरन्ति। वैकृतिकाश्च भावाः असांसिद्धिकाः उपायानुष्ठानोत्पन्नाः यथा प्राचेतसप्रभृतीनां महर्षीणाम्। एवमधर्माज्ञानावैराग्यानैश्वर्य्याण्यपि। कार्य्यं शरीरं तदाश्रयिणस्तस्यावस्थाः कललबुद्बुदमांसपेशीकरण्डाङ्गप्रत्यङ्गव्यूहाः गर्भस्थस्य, ततो निर्गतस्य बालस्य बाल्यकौमारयौवनवार्द्धकानीति" त०कौ०। २९तत्तत्पदार्थासाधारणे धर्म्मे च "भावे त्वतलौ" पा०। भावशब्देनासाधारणधर्म उच्यते। स च तदितरावृत्तित्वे सति तन्मात्रवृत्तिधर्मः यथा गोत्वमित्यादौ भावार्थकत्वप्रत्ययेन गवेतरावृत्तित्वे सति सकलगोव्यक्तिवृत्तिधर्मो बोध्यते।

भावक पु० भाव+स्वार्थे क। भावशब्दार्थे मनोविकारे शब्दा०। भू-भावि-वा ण्वुल्। २सत्ताश्रये ३उत्पादके च त्रि०।

भावत त्रि० भू-मतु भवत् तस्येदम् अण्। भवत्पादाद्यामन्त्र्याणि स्त्रियां ङीप्।

भावत्क त्रि० युष्मदर्थवाच भवच्छब्दात् इदमर्थे पक्षे ठक्। भवत्सम्बन्धिनि पक्षे छस्। स्त्रियां ङीप्। भवदीय तत्रार्थे त्रि०।

भावन न० भू—णिच्—ल्युट्। (भावना) १फलभेदे २विष्णौ पु०। भावे ल्युट्। ३अधिवासने ४चिन्तायाम् ५ध्याने ६पर्या-लोचनायां वैद्यकोक्ते ७औषधसंस्कारभेदे। भावि—युच्। "व्यापारो भावना सैवोत्पादना सैव च क्रिया" उक्ते कर्मविधिर्भवनानुकूलव्यापारभेदे स्त्री भट्टपक्षे इत्यन्यम्। अनुभवजन्ये स्मृतिहेतौ ९संस्कारभेदे स्त्री। "संस्कार-भेदो वेगोऽथ स्थितिस्थापकभावने" "अतीन्द्रियोऽसौ वि-ज्ञेयः क्वचित् स्पन्देऽपि कारणम्। भावनाख्यस्तु सं-स्कारो जीववृत्तिरतीन्द्रियः। उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत्। स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते" भाषाप०। "भावनाख्य इति। तस्य संस्कारस्य, उपेक्षा-त्मकज्ञानात् संस्कारानुत्पत्तेरुपेक्षानात्मकनिश्चय इत्युक्तम्। तेनोपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुतेति भावः। ननु स्मरणं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वं तेनोपेक्षादि-स्थले न स्मरणम् इत्यस्तु संस्कारं प्रति ज्ञानत्वेनैव हेतुता-स्त्विति चेन्न विनिगमनाविरहेणापि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात्। किञ्च उपे-क्षास्थले संस्कारकल्पनाया गुरुत्वात् संस्कारं प्रति चोपे-क्षान्यत्वेन हेतुतायाः सिद्धत्वात्। तत्र प्रमाणं दर्शयति। स्मरणे इति। असौ संस्कारः स्मरणं प्रत्यभिज्ञानञ्च जनयति। अतः संस्कारः कल्प्यते। विना व्यापारं पूर्वानुभवस्य स्मरणादिजननासामर्थ्यं स्वस्वव्या-पारान्यतराभावे कारणत्वासम्भवात्। न च प्रत्यभिज्ञां प्रति तत्तत्संस्कारस्य हेतुत्वेन प्रत्यभिज्ञायाः संस्कार-जन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम्। अप्रयोजकत्वात्। परे तु अनुद्बुद्धसंस्कारात् प्रत्यभिज्ञानुदयादुद्बुद्ध-संस्कारस्य हेतुत्वापेक्षया तत्तत्स्मरणत्वेन प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यत इत्याहुः" सि०मु०। भू—चिन्तायां युच्। १०चिन्तायां स्त्री। चिन्ता च मानस-वृत्तिभेदः सा च त्रिविधा यथोक्तं विष्णुपु० ६अं० ७अ०। "त्रिविधा भावना विप्र! विश्वमेतन्निबोधत। ब्र-ह्माख्या कर्मसंज्ञा च तथा चैवोभयात्मिका। ब्रह्मभा-वात्मिका ह्येका कर्मभावात्मिका परा। उभयात्मिका तथैवान्या त्रिविधा भावभावना। सनन्दनादयो ब्रह्म भावभावनया युताः। कर्मभावनया चान्ये देवाद्याः स्थावराचराः। हिरण्यगर्भादिषु च ब्रह्मकर्मात्मिका द्विधा। बोधाधिकारयुक्तेषु विद्यते भावभावना"। सुगतपक्षदर्शितं बौद्धमतसिद्धभावनाचतुष्टयञ्च दृश्यम्। चु० भू—मिश्रणे भावे युच्। ११निर्यासादिना चूर्णद्रव्यस्य मिश्रीकरणे चूर्णद्रव्यस्य निर्यासादिना संस्कारभेदो भावना तत्प्रमाणमुक्तं भावप्र० यथा "द्रवेण यावन्मानेन चूर्णं सर्वं प्लुतं भवेत्। भाव-नायाः प्रमाणन्तु चूर्णे प्रोक्तं भिषग्वरैः"।

भावबोधक पु०भावस्य रत्यादेर्बोधकः अनुमापकः। रत्याद्यनु-मापके १अनुभावादिरूपचेष्टाविशेषे २सुखरागादौ च अमरः

भावयु त्रि० भावमिच्छति क्यच् उन् वेदे नि०। भावेच्छौ। ऋ०१०।८६।१५। [ङीप्।

भाववत् त्रि० भाव+स्त्यर्थे मतुप् मस्य वः। भावयुते स्त्रियां

भावविकार पु० ६त०। यास्कोक्तेषु उत्पत्तियुतपदार्थस्य जन्मादिषु षट्सु धर्मेषु "षड्भावविकारा भवन्तीति वार्ष्यायणिः, जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विन-श्यतीति, जायत इति पूर्वभावस्यादिमाचष्टे नापरभाव-माचष्टे न प्रतिषेधति अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणं, विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारं, वर्धत इति स्वाङ्गाभ्युच्चयं, सांयोगिकानां वार्थानां, वर्धते विजयेनेति वा वर्धते शरीरेणेति वा, अपक्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमं, विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभाव-माचष्टे न प्रतिषेधति"।

भाववृत्त पु० भावे वृत्तः प्रवृत्तः भावो वृत्तो जातो यस्माद्वा। सृष्टिकर्त्तरि ब्रह्मणि "अनुष्टुप् च भवेच्छन्दो भाववृत्तस्तु दैवतम्" स्मृतिः।

भावाट पु० भावं भावेन वा अटति अट—अण् अच् वा। १भावके २नायौ ३वासके ४नटे ५निवेशे च मेदि०। भावे अञ् ६त०। ६भावप्राप्तौ।

भावानुगा स्त्री भावं पदार्थमात्रं वानुगच्छति गम—ड। १छायायाम् २अभिप्रायानुगन्तरि त्रि० राजनि०।

भावालीना स्त्री भावे पदार्थे आलीना। छायायां राजनि०

भाविक त्रि० भावेन निर्वृत्तम् ठक्। १भावसाध्ये पदार्थे २अर्थालङ्कारभेदे ४०१ पृ० दृश्यम्।

भावित त्रि० चु०भू—शुद्धौ चिन्तायां मिश्रणे वा कर्मणि क्त। १वासिते २प्राप्ते मेदि०। ३शुद्धे ४चिन्तिते ५मिश्रिते वैद्यकोक्तनिर्यासादिना मिश्रिते ६चूर्णादौ च। बीजग० उक्ते अव्यक्तानेकवर्णसमीकरणेन ७अव्यक्तीकरणे।

भावित्र त्रि॰ भू—सत्तायां णित्रन्। त्रैलोक्ये उज्ज्वल॰।

भाविन् त्रि॰ भू—गम्या॰ भविष्यति णिनि। १भविष्यत्पदार्थे "भाविनि भूतवदुपचारः" न्यायः। स्त्रियां ङीप्। भावो रत्यादिभावः सात्त्विकभावो वाऽस्त्यस्य एकाचरत्वदन्तत्वेऽपि बाहुल्यार्थे इनि ङीप्। २बहुभावान्वितायां स्त्रियाम् भरतः ३स्त्रीमात्रे राजनि॰। ४गन्धर्वकन्याभेदे स्त्री मार्कपु॰१२८ तत्र भामिनीति पाठान्तरम्।

भावुक न॰ भू—उकञ्। १मङ्गले २तद्वति त्रि॰ अमरः। ३भावनायुते त्रि॰ हेमच॰। "मुहुरहो रसिका भुवि भावुकाः" इति भाग॰१।१।२।

भाव्य न॰ भू—आवश्यके भावे ण्यत्। १अवश्यम्भवितव्ये। भू—कर्त्तरि यत् भव्य स्वार्थे ष्यञ्। २भव्यशब्दार्थे "भावीत्यवश्यं यत् भाव्यं तत्र ब्रह्मा न बाधकः" कालि॰पु॰२८अ॰

भाष वचने भ्वा॰ आत्म॰ द्विक॰ सेट्। भाषते अभाषिष्ट। ऋदित् चङि न ह्रस्वः। उपसर्गपूर्वकस्तु तत्तदुपसर्गद्योतितार्थयुक्तवचने। परि+परिष्कारमङ्कृते।

भाषण न॰ भाष-भावे ल्युट्। कथने अमरः। सा॰द॰ उक्ते निर्वहणाङ्गभेदे "सन्धिर्विरोधो ग्रथनम्" इत्युपक्रमे "भाषणं पूर्ववाक्यञ्च" इत्यादिनोद्दिश्य लक्षितं यथा "सामदानादि भाषणम्"।

भाषा स्त्री भाष-अ। १वाक्ये २संस्कृतादिवाक्ये च "अष्टादशभाषावारविलासिनीभुजङ्गः" इति सा॰द॰। भाषाभेदाश्च प्राकृतशब्दे ४५४२४पृ॰ दर्शिताः। व्यवहारे ३प्रतिज्ञारूपपक्षवाक्ये "यदावेदयते राज्ञे तद्भाषेत्यभिधीयते" इति स्मृतिः। पूर्वपक्षशब्दे ४४०६ पृ॰ दृश्यम्। ४रागिणीभेदे हला॰।

भाषासम न॰ शब्दालङ्कारभेदे यथोक्तं सा॰द॰ १०परि॰। "शब्दैरेकविधैरेव भाषासु विविधास्वपि। वाक्यं यत्र भवेत् सोऽयं भाषासम इतीष्यते" यथा "मञ्जुलमणिमञ्जीरे कलगम्भीरे विहारसरसीतीरे। विरसासि केलिकीरे किमालि! धीरे च गन्धसारसमीरे" एष श्लोकः संस्कृतप्राकृतशौरसेनीप्राच्यावन्तीनागरापभ्रंशेष्वेकविध एव"।

भाषापाद पु॰कर्म॰। चतुष्पाद्व्यवहारे प्रतिज्ञारूपपक्षे वाक्यरूपे प्रथमेऽंशे पूर्वपक्षशब्दे ४४०६ पृ॰ दृश्यम्।

भाषिक त्रि॰भाषया निर्वृत्तः ठञ्। वेदादिपरिभाषानिर्वृत्ते निरु॰२।२। [कात्या॰श्रौ॰१।१।१८।१०। भाष्ये दृश्यम्।

भाषिकस्वर पु॰ कर्म॰। मन्त्रेतरवेदभागरूपब्राह्मणे पठितस्वरे

भाषित न॰भाष-भावे—क्त। १कथने कर्मणि—क्त। २कथिते त्रि॰। "भाषितपुंस्कात्" पा॰। भाषित उक्तः पुमान् येन कर्

भाष्य न॰ "सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो जनाः" इत्युक्तलक्षणे १सूत्रव्याख्यानग्रन्थभेदे "फणिभाषितभाष्यफक्किका" नैष॰। २कथनीये त्रि॰।

भाष्यकार पु॰ भाष्यं करोति कृ—अण् उप॰स॰। पाणिन्यादिसूत्रभाष्यकारके पतञ्जलिप्रभृतौ भाष्यकाराश्च सूत्रभेदे विभिन्ना यथा पाणिनिसूत्रस्य पतञ्जलिः ब्रह्मसूत्रस्य शङ्कराचार्यादयः। योगसूत्रस्य वेदव्यासः, सांख्यसूत्रस्य विज्ञानभिक्षुः, गौतमसूत्रस्य वात्स्यायनः, कणादसूत्रस्य प्रशस्तपादः। मीमांसासूत्रस्य शबरस्वामी इत्यादयः। "अहञ्च भाष्यकारश्च कुशाग्रीयधियावुभौ। नैव शब्दाम्बुधेः पारं किमन्ये जडबुद्धयः" दुर्गसिंहः नैव न दैव गतवन्ताविव्यर्थः। क्विप् इत॰। भाष्यकृदप्यत्र।

भास दीप्तौ भ्वा॰आत्म॰सक॰सेट्। भासते अभासिष्ट। चङि वा ह्रस्वः। अबीभसत् त अबभासत् त। ज्ञानविषयत्वे च "प्रकारीभूय भासते"। [मेदि॰ १इच्छायां धरणिः।

भास् स्त्री भास—सम्प॰भावे क्विप्। १प्रभायाम् अमरः २मयूखे

भास पु॰ भास—भावे घञ्। १दीप्तौ विश्वः आधारे घञ् २गोष्ठे। कर्त्तरि अच्। ३कुक्कुरे ४शुक्ले च ५शकुन्ते स्वप्रसने हेमच॰ "यद्वाऽर्थमदत्तं वस्तु भासः काकोऽथवा भवेत्" स्मृतिः। ६कविभेदे "भासो हासः कविकुलगुरुः कालिदासो विलासः" प्रसन्नरा॰।

भासद न॰भसदः कटिदेशस्येदम् अण्। चितम्बे ऋ॰१०।१६२ भाष्यम्। यजु॰२५।६ वेददीपे तु भासेते भास—वा॰अदि। भासदृ दान्तः तत्रार्थे इत्युक्तम्।

भासन्त पु॰ भास—झच्। १सूर्य्ये २चन्द्रे उणा॰ ४नक्षत्रे हेमच॰। ५सुन्दराकारे त्रि॰ ६भासखगे पुंस्त्री॰ मेदि॰। ७तारायां स्त्री गौरा॰ ङीष्।

भासस् न॰ भास—भावे असिच्। दीप्तौ द्विरूपकोषः।

भासाकेतु पु॰ भास—भावे अ। भासा दीप्तिः हुव॰। दीप्तिकारके वह्नौ ऋ॰ १०।२०।२।

भासापुर न॰ पुरभेदे ह॰स॰ १६अ॰।

भासु पु॰ भास—उण्। सूर्य्ये त्रिका॰।

भासुर त्रि॰भास—घुरच्। १दीप्तियोगे २स्फटिके च त्रिका॰३वीरे पु॰ धरणिः ४कुष्ठौषधे न॰अटा॰। [(त्रिषाति) राजनि॰।

भासुरपुष्पी स्त्री॰ भासुराणि पुष्पाण्यस्याः। वृश्चिकाली

भास्कर पु॰ भासं करोति भास्+कृ-ट। कस्क॰। १सूर्य्ये

१अग्नौ मेदि० ३वीरे धरणिः। ४अर्कवृक्षे ५शिवाम्लशिरोमणिग्रन्थकल्पपठिते। ६स्वर्णे न० राजनि०। ७महादेवे पु० भा० आनु० १७अ०। ८भास्करेण कृते पक्कलवणभेदे न० चक्रदत्तः। भास्करलवणशब्दे दृश्यम्।

भास्करद्युति पु० भास्करे द्युतिरस्य। १विष्णौ पु० "चन्द्रांशुर्भास्करद्युतिः" विष्णुस०। "यदादित्यगतं तेज" इत्युक्तेस्तस्य तथात्वम्। ६त०। २सूर्य्यस्य द्युतौ स्त्री।

भास्करप्रिय पु० ६त०। पद्मरागमणौ (चुनि)।

भास्करलवण न० भास्करनिर्मिते लवणभेदे "पिप्पली पिप्पलीमूलं धन्याकं कृष्णजीरकम्। सैन्धवञ्च विडञ्चैव पत्रं तालीशकेशरम्। एषां द्विपलिकान् भागान् पञ्चसौवर्चलस्य च। मरिचाजाजिशुण्ठीनामेकैकस्य पलं पलम्। त्वगेले चार्द्धभागे च सामुद्रात् कुडवद्वयम्। दाडिमात् कुडवञ्चैव द्वे पले चाम्लवेतसात्। एतच्चूर्णीकृतं श्लक्ष्णं गन्धाढ्यममृतोपमम्। लवणं भास्करं नाम भास्करेण विनिर्मितम्। जगतस्तु हितार्थाय वातश्लेष्मामयापहम्। वातगुल्मं निहन्त्येतद्वातशूलानि यानि च। तक्रमस्तुसुरासीधुशुक्तकाञ्जिकयोजितम्। जाङ्गलानान्तु मांसेन रसेषु विविधेषु च। मन्दाग्नेरश्नतः श्रद्धा भवेदाश्वेव पावकः। अर्शांसि च ग्रहणीदोषकुष्ठामयभगन्दरान्। हृद्रोगमामदोषांश्च विविधानुदरस्थितान्। प्लीहानमष्ठीलाञ्चैव श्वासकासोदरक्रिमीन्। विशेषतः शर्करादीन् रोगान्नानाविधांस्तथा। पाण्डुरोगांश्च विविधान् शमयत्यशनिर्यथा" चक्रद०।

भास्करावर्त्त पु० सुश्रुतोक्ते शिरोरोगभेदे "सूर्य्योदयं या प्रतिमन्दमन्दमक्षिभ्रुवं रुक् समुपैति गाढम्। विवर्द्धते चांशुमता सहैव सूर्य्यापवृत्तौ विनिवर्त्तते च। शीतेन शान्तिं लभते कदाचिदुष्णेन जन्तुः सुखमाप्नुयाच्च। तं भास्करावर्त्तमुदाहरन्ति सर्वात्मकं कष्टतमं विकारम्"। [२मुनिभेदे भा० शा० ४७ अ०।

भास्करि पु० भास्करस्यापत्यम् इञ्। १वैवस्वते मनौ २कर्णे च।

भास्करेष्टा स्त्री ६त०। आदित्यभक्तालतायां राजनि०।

भास्मन त्रि० भस्मनो विकारः अण् मन्नन्तत्वात् न टिलोपः। भस्मविकारे।

भास्मायन पु० भस्मनो गोत्रापत्यम् फक्। भस्मर्षिगोत्रापत्ये ततः स्वार्थे अण् स्त्रियां तु भास्मायन्या तत्रार्थे स्त्री।

भास्वत् पु० भास्+अस्त्यर्थे मतुप् मस्य वः। १सूर्य्ये २अर्कवृक्षे ३वीरे मेदि० ४दीप्ते त्रि० हेमच०। स्त्रियां ङीप्। सा च ५नद्यां श०र० ६उषसि च स्त्री निघण्टुः। ७ज्योतिषनिबन्धभेदे स्त्री यत्र पूर्व्वपक्षादिनिरूपणमस्ति।

भास्वर त्रि० भास-वरच्। १दीप्तियुक्ते २सूर्य्ये ३अग्नौ मेदि० ४दिने ५अर्कवृक्षे च पु०। ६कुष्ठौषधे (कुड़) न० राजनि०। ७स्कन्दानुचरभेदे पु० भा० श० ४६ अ०।

भिक्ष लाभे याच्ञायाञ्च सक० याच्ञने द्विक० क्लेशे अक० भ्वा० आत्म० सेट्। भिक्षते अभिक्षिष्ट बिभिक्षे।

भिक्षा स्त्री भिक्ष-अ। १याच्ञायाम् अमरः। २सेवायां ३भृतौ च मेदि०। उपचारात् ४भिक्षिते वस्तुनि। तत्र ब्रह्मचारिभिक्षाप्रकारः ब्रह्मचर्य्यशब्दे ४५८६ पृ० उक्तः। तस्या दानावश्यकत्वम् प्रमाणं च आ०त० मार्कपु० उक्तं यथा "भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा। अदत्त्वा नैव भोक्तव्यं यथाविभवमात्मनः। ग्रासप्रमाणा भिक्षा स्यात् अग्रं ग्रासचतुष्टयम्। अग्राच्चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः"। ग्रासं पक्षमात्रमिति नव्यवर्द्धमानः"। भिक्षाया दानपात्राणि उक्तानि विष्णुपु० "दद्याच्च भिक्षात्रितयं परिव्राड्ब्रह्मचारिणाम्। इच्छया च नरो दद्यात् विभवे सत्यवारितम्। इत्येतेऽतिथयः प्रोक्ताः संप्राप्ता भिक्षुकाश्च ये। चतुरः पूजयन्नेतान् नृयज्ञात् प्रमुच्यते"। चकारः पूर्वोक्तातिथिभोजनेन समुच्चयार्थः। सन्न्यासिभिक्षादाने तु "यतिहस्ते जलं दद्यात् भैक्ष्यं दद्यात् पुनर्जलम्। तद्भैक्ष्यं मेरुणा तुल्यं तज्जलं सागरोपमम्"। विष्णुधर्मोत्तरे "चाण्डालो वाथ पापो वा शत्रुर्वा पितृघातकः। देशकालागतो भरणीयो मतो मम" विष्णुपु०। "व्याधितस्यान्नहीनस्य कुटुम्बात् प्रच्युतस्य च। अध्वानं वा प्रपन्नस्य भिक्षाचर्य्यं विधीयते"। अत्र भिक्षाद्यदाने भोजननिषेधात् मनुष्ययज्ञस्य नित्यत्वाच्च अतिथिप्राप्तेरनित्यत्वात् तद्विषये मनुष्ययज्ञनिर्वाहाय भिक्षादिदानमावश्यकम्। अतएव बौधायनः "अहरहर्ब्राह्मणेभ्योऽन्नं दद्यात् आमूलफलशाकेभ्यः अथैवं मनुष्ययज्ञमाप्नोति"। विष्णुः "भिक्षुकाभावे चाग्रं गोभ्यो दद्यात् अग्नौ वा क्षिपेत्"।

भिक्षाटन न० भिक्षार्थमटनम्। भिक्षार्थं गमने तस्य सायं प्रातश्च निषेधो यथा "सायं प्रातर्गृहद्वारं भिक्षार्थं नावघट्टयेत्" कूर्मपु० १५ अ०।

भिक्षादि पु० "समूहार्थे भिक्षादिभ्योऽण्" पा० उक्ते अण्प्रत्ययनिमित्ते शब्दगणे स च गणो यथा "भिक्षा गर्भिणी

क्षेत्र करीष अङ्गार चर्मन् सहस्र युवति पदाति पद्धति अर्धर्च् दक्षिणा भत विषय श्रोत्र'' पा॰ग॰ ।

भिक्षापात्र न॰ भिक्षाहरणार्थं पात्रम् शा॰त॰ । १भिक्षाया आहरणार्थे पात्रे भिक्षुशब्दे दृश्यम् । २भिक्षादानसंप्रदाने ब्रह्मचार्य्यादौ भिक्षाशब्दे दृश्यम् । [२पैशुन्ये हारा॰।

भिक्षाशित्व न॰ भिक्षाशिनो भावः त्व । १भिक्षाशिनोभावे

भिक्षाशिन् त्रि॰ भिक्षालब्धमश्नाति अश–णिनि । भिक्षालब्धोपजीविनि । "भिक्षाशी विचरेद् ग्रामम्" स्मृतिः ।

भिक्षु त्रि॰ भिक्ष–उन् । १भिक्षाकारके २चतुर्थाश्रमे पु॰ ३तद्वति च । तदाश्रमे अधिकारिणश्च आश्रमशब्दे उक्ताः । तद्धर्माः नि॰ सि॰ उक्ता यथा

"अथ यतिधर्माः प्रातरुत्थाय ब्रह्मणस्पते इति जपित्वा दण्डादीनि भूदेशे निधाय मूत्रपुरीषयोर्द्विगुणचतुर्गुणं शौचं कृत्वाचम्य पर्वद्वादशीवर्जं प्रणवेन दन्तधावनं कृत्वा तेनैव मृदा बहिःकटिं प्रक्षाल्य जलतर्पणवर्जं स्नात्वा पुनर्जङ्घे प्रक्षाल्य वस्त्रादीनि गृहीत्वा मार्जनान्तं कृत्वा केशवादिनमोन्तनामभिस्तर्पयित्वा ओं भूस्तर्पयामीत्यादि व्यस्तसमस्तव्याहृतिभिर्महर्जनस्तर्पयामीति तर्पयेत् । "ओं भूः स्वाहेति स्वाहाशब्दान्तैः स्वधाशब्दान्तैर्वा भिरेव पुनस्तर्पयेदिति केचित् । तत आत्तस्याञ्जलिना प्रणवेन जलमादाय व्याहृतिभिरुक्त्वा गायत्र्याभिः क्षिप्त्वा गायत्रीं जपेत् । उदिते सूर्य्ये प्रणवेन व्याहृतिभिश्चार्घ्यं निर्दिश्य मित्रस्य चर्षणीत्याद्यैः पूर्वोक्तसौरीभिरिदं विष्णुस्त्रिर्देवो ब्रह्मजज्ञानमिति चोपस्थाय सर्वभूतेभ्यो नम इति प्रदक्षिणमावर्त्तते ततो नत्वा "आदित्याय विद्महे सहस्रांशाय धीमहि । तन्नः सूर्य्यः प्रचोदयादिति" त्रिर्जपेत् । एवं त्रिकालं विष्णुपूजां ब्रह्मयज्ञञ्च कुर्य्यात् । अथ भिक्षा । विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने । काले पराह्णभूयिष्ठे नित्यं भिक्षां यतिश्चरेत्" इत्युक्ते काले षड्भिरिति चतसृभिरादित्यमुपस्थाय नैवेद्यं ध्यात्वा आत्मन्येनेति प्रदक्षिणं कृत्वा ये ते पन्थान इति जप्त्वा "योऽसौ विष्ण्वाख्य आदित्ये पुरुषोऽन्तर्हृदि स्थितः । सोऽहं नारायणो देव इति ध्यात्वा प्रणमेत्तम्" । त्रिदण्डं दक्षिणे हस्ते ततः सव्ये दा... पात्रं वामकरे क्षिप्त्वा स्रैणयज्ञियेन त्विति बोधायनोक्तदिशा भवेत् पञ्च सप्त वा गृहान् गत्वा । भवत्पूर्वं भिक्षां याचेत् "पूर्णमसि पूर्णं मे भूया" इत्यामन्त्र्य भूमिपरस्य मोक्ष ओं भूः स्वधा नम इत्यादिभ्य इत्यन्त· व्याहृतिभिः सूर्य्यादिदेवेभ्यो भूतेभ्यश्च भूमौ क्षिप्त्वा भुक्त्वा प्रणवेन षोडश प्राणायामान् कुर्य्यादिति संक्षेपः । गौतमव्याख्यायां भृगुः । "यतिहस्ते जलं दत्त्वा भैक्ष्यं दद्यात् पुनर्जलम् । भैक्ष्यं पर्वतमात्रं स्यात् तज्जलं सागरोपमम्" । अत्र सर्वत्र मूलं माधवापरार्कमदनरत्नतत्त्वसारादौ ज्ञेयम् । दक्षः "एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम् । वर्षाभ्योऽन्यत्र वर्षासु मासांस्तु चतुरो वसेत्" । जाबालश्रुतौ "शून्यागारे देवगृहतृणकुटीवल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगिरिकुहरनिर्झरस्थण्डिलेष्वनिकेतनः" इति । मात्स्ये "अष्टौ मासान् विहारः स्याद् यतीनां संयतात्मनाम् । एकत्र चतुरो मासान् वार्षिकान्निवसेत् पुनः । अविमुक्तप्रविष्टानां विहारस्तु न विद्यते" । अत्रिः "भिक्षाटनं जपं स्नानं ध्यानं शौचं सुरार्चनम् । कर्त्तव्यानि षडेतानि सर्वथा नृपदण्डवत् । मञ्चकं शुक्लवस्त्रञ्च स्त्रीकथां लौल्यमेव च । दिवास्वापश्च यानञ्च यतीनां पतनानि षट् । आसनं पात्रलोभश्च सञ्चयः शिष्यसंग्रहः । दिवास्वापो वृथालापो यतेर्बन्धकराणि षट्" । दक्षः "नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथञ्चन । यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च" । मदनरत्ने अत्रिः "पित्रर्थं कल्पितं पूर्वमन्नं देशादिकारणात् । वर्जयेत् तादृशीं भिक्षां परबाधाकरीं तथा" । बृहस्पतिः "न तीर्थवासी नित्यं स्यान्नोपवासपरो यतिः । न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत्" । एतद्वेदार्थभिन्नपरम् । अत्रिः "स्नानं सुरार्चनं ध्यानं प्राणायामो बलिस्तुतिः । भिक्षाटनं जपः सन्ध्या त्यागः कर्मफलस्य च" । एते धर्मा मिता॰ प्रायेणोक्ताश्चाश्रमशब्दे दृश्यम् । ४बुद्धभेदे जटा॰ ५श्रावणीक्षुपे राजनि॰ । ६कोकिलाक्षे भावप्र॰ ७उपनिषद्भेदे च ।

भिक्षुक पु॰ भिक्ष–उकञ् । भिक्षोपजीविनि । "ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः । अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः" अत्रिणा पारिभाषिका दर्शिताः । तस्य समूहे खण्डिका॰ ठञ् । भैक्षुक तत्समुदाये न॰ । कडारा॰ कर्म॰ वा परनिपातः । विप्रभिक्षुकः भिक्षुकविप्र इत्यादि । [उप॰स॰ । चीवरे हेमच॰।

भिक्षुसंघाटी स्त्री भिक्षुं संघटते प्राप्नोति सम्+घट–अण्

भिक्षुसूत्र न॰ भिक्षोः तदाश्रमविहितधर्मस्य ज्ञापकं सूत्रम् शा॰त॰ । व्यासकृते ब्रह्मसूत्रे शारीरकसूत्रे ।

भिण्ड पुंस्त्री० भण–ड पृषो०। वराकृतिरक्तवर्णपर्णे वर्त्तुलाकारबीजे क्षुपभेदे। स्त्रीत्वे टाप् राजनि० गौरा० ङीष तत्रार्थे [भिण्डीक्षुपे राजनि०।

भिण्डीतक पु० भिण्डी सती तकते तक–हासे अच्।

भिन्त न० भिद–क्त नि० तस्य न नः। खण्डे अमरः।

भित्ति स्त्री भिद–क्तिन। १दृढादेः कुड्ये (देयाल) २प्रभेदे शब्दरत्ना०। ३अवकाशे ४संविभागे विश्वः। खण्डार्थे क। तत्रार्थे स्वार्थे कन्। भित्तिका। पञ्जर्यां हेमच०।

भित्तिचौर पु० भित्त्या कुड्यादिभेदनेन चोरयति चुर–अच्। (सिंधेल) सन्धिभेदकचौरे।

भित्तिपातन पुंस्त्री० भित्तिं कुड्यं पातयति भेदनेन पाति–ल्यु। महामूषिकभेदे राजनि० स्त्रियां जातित्वात् ङीष्।

भिद् द्विधाकरणे विशेषकरणे च रुधा० उभ० सक० अनिट्। भिनत्ति भिन्ते इरित् अभिदत् अभैत्सीत् अभित्त। बिभेद बिभिदे। भिन्नः। भेत्ता।

भिद् ध्वंसकरणे भ्वा० पर० सक० सेट् इदित्। भिन्दति अभिन्दीत्

भिद् स्त्री भिद्–सम्प० भावे क्विप्। १भेदे २विशेषकरणे च। कर्त्तरि क्विप्। ३भेत्तरि त्रि०।

भिदक न० भिद–क्वुन्। वज्रे १हीरके। २खड्गे उज्ज्वल०।

भिदा स्त्री भिद–भावे अङ्। १विदारणे द्वैधीकरणे २विशेषकरणे च।

भिदादि स्त्री अङ्प्रत्ययनिमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा "भिदा छिदा विदा क्षिपा गुहा श्रद्धा मेधा गोधा आरा हारा कारा (बन्धनस्थाने) क्षिपा तारा (ज्योतिषि) धारा रे(ले)खा चूडा पीडा वपा वसा मृजा कृपा। अत्र छिदा द्वैधीकरण एवान्यत्र छित्तिः। आरा शस्त्र्यामन्यत्र आर्त्तिः। धारा जलप्रवाहेऽन्यत्र धृतिः। गुहा गिर्योषध्योः अन्यत्र गूढिरिति बोध्यम्"।

भिदि पु० भिद–कि। वज्रे हिरुप०।

भिदिर न० भिद–किरच्। वज्रे त्रिका०।

भिदु न० भिद–कु। वज्रे त्रिका०।

भिदुर न० भिद–कुरच्। १स्वयंभेदनशीले अमरः। २प्लक्षवृक्षे राजनि०। तस्य ग्रीष्मभेदकारकत्वात् तथात्वम्।

भिदेलिम त्रि० भिद–कर्मकर्त्तरि केलिम। स्वयं भिद्यमाने।

भिद्य पु० भिद–कर्त्तरि क्यप् नदे नि०। नदे हेमच०।

भिद्र न० भिद–रक्। वज्रे त्रिका०।

भिन्दिपाल पु० भिदि विदारणे शतृ भिन्दिं भेदनं पालयति पालि–अण्। १हस्तक्षेप्ये नालिकास्त्रे अमरटीकायां भरतः। हस्तप्रमाणे अस्त्रभेदे क्षीरस्वामी। हेमा० प० तल्लक्षणमस्त्रयोक्तं यथा "भिन्दिपालस्य लक्षणं प्रोच्यते तस्य य आयामो यत्प्रमाणं दण्डस्य च यः परिणाहो यत्संस्थानं द्रव्यादिप्रमाणं यच्चान्यो गुणागुणश्च गतयश्च तत्सर्वं यथोक्तं वक्ष्यामि शृणु! निबोध। तत्र भिन्दिपालस्य दण्डः कराश्चितः सप्तहस्तो ज्येष्ठो भवति द्वादशाङ्गुलहीनो मध्यमो वितस्तिहीनस्तु कनिष्ठो मानतः अष्टादशाङ्गुलपरिणाहः श्रेष्ठो भवति मध्यमो द्व्यङ्गुलहीनस्त्र्यङ्गुलहीनश्च कनिष्ठो भवति मूले परीणाहो ग्राह्यः स च गोपुच्छवत् वेष्टितव्यो दण्डार्धं पुनः कूटमहच्चञ्च वैणवं भद्रसिंहं कदम्बं वा दारुमयं वा कारयेत तन्मया हि दण्डा दृढाः स्युः बाणाक्षोभोत्पादकारिणः क्रमणा विवर्द्धयन्ति चतुर्विंशत्यवा अवमोदकारवाणमोक्षणसहा पूर्वभारपरीक्षणाय भवन्ति ते नित्यं दण्डेषु कुशलैः शुभलक्षणा विज्ञेया दण्डस्योपरि पत्रं घण्टिकासंस्थानं प्रयोजयेत् कर्णिका च द्व्यङ्गुलोत्सेधा चतुरङ्गुष्टा च वेष्ट्या स्यात् यथा दण्डपरीणाहं वलित्यां कारयेत् सौवर्णं राजतमयं वा कांस्यं वा ताम्रं वा लौहमयं धातुजातमश्मजं योजयेत् तदाकाशे न वैष्णवं दृढं वा विदध्यात् भिन्दिपालफलन्तु विंशत्यङ्गुलप्रमाणं भवति त्रिधिशं शस्त्रयम् पीतं सुनिशितधारमुत्तमं कुर्वीत अष्टादशाङ्गुलप्रमाणं मध्यं षोडशाङ्गुलप्रमाणं नीचं निर्दिष्टं तत्र यावन्तः फलपत्रपुष्पाणां योनयो दृश्यन्ते तावन्तो भिन्दिपालफलकाः, कर्त्तव्या तथा विस्तारे त्र्यङ्गुलमूले षोडशकहस्तयोर्मष्टाङ्गुलं दण्डमूले चावेष्टयेत् पूर्वभागे मध्यान्तादिपार्श्वैरिष्टसमाधममध्यमानां भवेत् दण्डस्य प्रमाणद्विगुणं फलं तस्य गौरवात् भवति तस्मादष्टाङ्गुलं भिन्दिपालफलायाम मृदु कार्य्यं पञ्चभिः पञ्चभिः पलैर्वितनयः ३।३ष्णत-फलं श्रेष्ठं पलाधपेषु गुणितः उत्तमः कर्त्तव्यः अशीतिपलोपमध्यमः षष्टि। १स्रग्धरः"।

भिन्न त्रि० भिद–क्त। १विदारिते अमरः २सङ्गते ३अन्यार्थे ४प्रस्फुटिते च मेदि०। ५रोगभेदे न०। "शक्तिकुन्तेषुखड्गाग्रविषाणैराशयो हतः। यत्किञ्चित् प्रस्रवेत्तद्धि भिन्नमित्यभिधीयते" भावप्र०। आशयः कोष्ठः।

भिन्नक पु० भिन्नं कं यस्य। बौद्धे त्रिका०। तन्मते विश्वस्य क्षणभङ्गुरत्वेन स्थायिसुखराहित्यात्तस्य तथात्वम्।

भिन्नकूट न० कामन्द० उक्ते बलव्यसनभेदे। तत्र च बल-

— व्यञ्जनं नानाविधमुक्तं यथा“उपहतं परिच्छिन्नं विमानितमसम्मानितम्। अकृतं व्याधितं श्रान्तं दूरायातं नवागतम्। परिक्षीणापरिक्षतं मन्दतायजनं तथा। आयासनिर्वेदभूयिष्ठमन्तमप्राप्तमेव च। कतत्रगर्भं विच्छिन्नमन्तःशल्यं तथैव च। भिन्नगर्भं ह्यपक्रान्तमभियुक्तं तथैव च। क्रतुभीतादिभिन्नस्य विधिदृष्टापि विद्विषा। दुःप्रयुक्तं अविच्छिन्नं निमविञ्छिन्नमेव च। विच्छिन्नविविधाकारं शून्यमूलं तथैव च। असम्भिन्नकृतस्यापि भिन्नकूटं तथैव च। दुष्पार्ष्णिग्रहमन्यच्च व्यसनमुच्यते”। भिन्नगर्भमत्र।

भिन्नक्रम पु० भिन्नः क्रमो यत्र। वाक्यगते उपक्रमराहित्यरूपे भग्नप्रक्रमाख्ये काव्यदोषभेदे। [कर्कटशृङ्ग्याम् राजनि०

भिन्नगात्रिका स्त्री भिन्नं विदारितं गात्रमवयवो यस्याः।

भिन्नगुणन न० लीला० उक्ते पूरणभेदे “अंशाहतिश्छेदवधेन भक्ता लब्धं विभिन्ने गुणने फलं स्यात्” उदा०। तत्र दृश्यम्।

भिन्नपरिकर्म्मन् न० लीला० उक्ते सच्छेदस्य सङ्कलनव्यवकलनादिरूपाष्टसंस्कारात्मके परिकर्मन्यङ्के दृश्यम्।

भिन्नभिन्नात्मन् पु०भिन्नप्रकारः प्रकारे द्वित्वम् तादृश आत्मा यस्य। चणके (छोला) शब्दच०।

भिन्नयोजनी स्त्री भिन्नं युज्यतेऽनया युज–करणे ल्युट ङीप्। पाषाणभेदके वृक्षे राजनि०। [मलके सुश्रुतः।

भिन्नवर्चस्(स्क) त्रि० भिन्नं वर्चो यस्य वा कप्। द्रवीभूत-

भिन्नविट्का स्त्री० भिन्ना विट् मलं यया। १अलाबू लतायां सुश्रुतः। ६ब०। २द्रवीभूतमलके त्रि०। [अमरः।

भिन्नार्थ त्रि० भिन्नोऽर्थो वाच्यो यस्य कप्। अन्वपदार्थे

भियस् न० भी–बा० कसुन्। भये ऋ० १।५२।६। उदा०

भिरिण्टिका स्त्री श्वेतगुञ्जायाम् राजनि०।

भिल भेदने वा चु० उ०पक्षे तु०पर०सक०सेट्। भेलयति-ते भिलति अबीभिलत् अ

भिल्ल पु० भिल–लक्। म्लेच्छजातिभेदे। (भिल) स च ब्राह्मणकन्यायां तीवराज्जातः। “पुलिन्दमेदभिल्लाश्च” इत्युपक्रमे “एते वै तीवराज्जाताः कन्यायां ब्राह्मणस्य च” पराशरपद्धतिः। [त्रियां राजनि०।

भिल्लगवी स्त्री भिल्लानां गौरिव टच् समा०ङीप्। गवयजाति

भिल्लतरु पु० भिल्लप्रियः तदुपजीव्यत्वात् तरुः। लोध्रे राजनि०

भिल्लभूषण न०भिल्लं भूषयति भूषि–ल्यु। गुञ्जायां राजनि० तत्फलस्य तेषां भूषणत्वात् तस्य तथात्वम्।

भिल्लोट पु० भिल्लप्रियमुटम् पत्रं यस्य। लोध्रवृक्षे सुश्रुतः।

भिल्ली स्त्री भिल–लक् गौ० ङीष्। लोध्रे राजनि०।

भिष रोगप्रतीकारे भ्वा०पर०सक०सेट्। भेषति अभेषीत्।

भिषक्प्रिया स्त्री ६त०। गुडूच्याम् राजनि०।

भिषग्जित न० ३त०। औषधे त्रि०।

भिषग्भद्रा स्त्री ७त०। भद्रदन्तिकायाम् राजनि०।

भिषग्मातृ स्त्री भिषजां मातेव। वासकवृक्षे राजनि०।

भिषज् चिकित्सायां कण्ड्वा०प०सक०सेट्। भिषज्यति अभिषजी(ज्यी)त्।

भिषज् पु०बिभेत्यस्मात् रोगः“भियः षुक् ह्रस्वश्च” उणा०अजि कण्ड्वा०भिषज्–क्विप् वा। १चिकित्सके। २विष्णौ पु०। तस्य संसाररोगहारित्वात्“भीषा स्मात् वातः पवते”इत्यादिश्रुत्या सर्वेषां भीतिजनकत्वाद्वा तथात्वम्। ततः अपत्ये गर्गा० यञ्। भैषज्य वैद्यपुत्रे स्त्रियां ङीप् यलोपः भैषजी। भिषजो भावः अण् “भैषजाश्च” पा० निर्देशात् गुणः न वृद्धिः। भेषज चिकित्सायाम् न०। ततः स्वार्थे अण्। भैषज्य न० तत्रार्थे।

भिष्णज् उप० सेवायां कण्ड्वा० प०सक० सेट्। भिष्णज्यति अभिष्णजी(ज्यी)त्।

भिस्सटा स्त्री भिस्सामन्नं टीकते टीक–ड पृषो०। अमरः। पृषो०। भिस्टा भिःस्सटा भिस्सिकाश्च पाठान्तराणि।

भिस्सा स्त्री भिद्–क्विप् सो–क पृषो० इत्त्वम्। अन्ने अमरः

भी भये जु०पर० अक०अनिट्। बिभेति अभैषीत् बिभयाञ्चकार बिभयाम्बभूव बिभयाञ्चकार बिभाय। भीरुः भीतः। एतद्योगे“भीत्रार्थानां भयहेतुः” पा०भयहेतोरपादानता। व्याघ्रात् भीतः।

भी भये अक० भरणे सक० क्र्यादि०वा पा० पर० अनिट भीनाति भिनाति। अभैषीत्।

भी स्त्री भी–सम्प० क्विप्। भये अमरः।

भीणी स्त्री कुमारानुचरमातृभेदे भा०श० ४७अ०।

भीत न०भी–भावे कर्त्तरि वा क्त।१भये २तद्युते त्रि०।३सत्त्वभेदे पु० “पिधे वा यत्किरस वा भीताश्च स प्रकीर्त्तितः”तन्त्रसारः

भीति स्त्री भी–क्तिन्। १भये अमरः। २कम्पे च त्रिका०।

भीम त्रि० बिभेत्यस्मात् भी–अपादाने मक्। १भयहेतौ २भयानकरसे अमरः। ३महादेवे ४भीमसेने ५अम्लवेतसे च पु० मेदि०। ६परमेश्वरे पु० तस्य “भीषास्माद्वातः पवते” इत्यादिश्रुतेः सर्वेषां भयहेतुत्वात् तथात्वम्। महादेवस्याष्टमूर्त्तिमध्ये आकाशरूपे मूर्त्तिभेदे

८देवगन्धर्वभेदे भा॰ आ॰ ६५ अ॰ । आङ्गिरसे वह्निभेदे भा॰ व॰ २१९ अ॰ । १०दानवभेदे भा॰ स॰ २२७ अ॰ । ११अमावसुवंश्ये नृपभेदे हरिवं॰ २७ अ॰ । सात्वतवंश्ये १२नृपभेदे हरिवं॰ ९५अ॰ । १३विदर्भाधीशे नृपभेदे दमयन्तीपितरि तत्कथा भा॰ व॰५१अ॰ । १४अष्टादशाक्षरमन्त्रभेदे "आदौ मध्ये तथा चान्ते चतुरक्षयुतो मनुः । भातव्यो भीम इत्येष वः स्यादष्टादशाक्षरः" तन्त्रसा॰ ।

भीमक पु॰ पार्वत्यारोषजाते गणभेदे हरिवं॰ १६८अ॰ ।

भीमजानु पु॰ यमसभास्थे नृपभेदे भा॰ स॰ ८अ॰ ।

भीमतिथि स्त्री भीमोपासिता तिथिः शा॰त॰ । भीमैकादश्याम् माघशुक्लैकादश्याम् ।

भीमद्वादशी स्त्री भीमोपासिता द्वादशी १माघशुक्लद्वादश्याम् तत्र भीमसेनकृते २व्रतभेदे च हेमा॰ व्र॰ पद्मपु॰ ।

भीमनाद पु॰६ब॰। १सिंहे शब्दच॰। कर्म॰। २भयानकशब्दे पु॰

भीमपराक्रम त्रि॰ भीमः पराक्रमोऽस्य । १भयानकपराक्रमे २विष्णौ पु॰ "भीमो भीमपराक्रमः" विष्णुस॰ ।

भीमपुर न॰ ६त॰ । विदर्भराजस्य नगरे कुण्डिनपुरे भीमनगरादयोऽप्यत्र ।

भीमबल त्रि॰ ६ब॰ । १भयानकवीर्य्ये २धृतराष्ट्रपुत्रभेदे पु॰ भा॰ आ॰ १७ अ॰ । ३वह्निभेदे पु॰ भा॰ व॰ २१९ अ॰ ।

भीमयु स्त्री आत्मनो भीमं इच्छति क्यच् वेदे नि॰ उन् । आत्मनो इच्छन्त्यां स्त्रीगव्याम् ऋ॰ ५.८६।२ ।

भीमरथ पु॰ १असुरभेदे गरुड़पु॰ ८६अ॰ । २धृतराष्ट्रपुत्रभेदे भा॰ आ॰ ६७ अ॰ । ३धन्वन्तरिवंश्ये नृपभेदे हरिवं॰ २९ अ॰ । ४दशार्हवंश्ये नृपभेदे हरिवं ३७ अ॰ । सत्यभामायां जाते वासुदेवस्य ५पुत्रभेदे हरिवं १६२अ॰ ।

भीमरथी स्त्री "सप्तसप्ततिमे वर्षे सप्तमे मासि सप्तमी । रात्रिर्भीमरथी नाम नराणामतिदुस्तरा" इत्युक्तायां १रात्रौ । "तामतीत्य नरो योऽसौ दिनानि यानि जीवति । क्रतुभिस्तानि तुल्यानि सुवर्णशतदक्षिणैः । गतिः प्रदक्षिणं विष्णोर्जल्पनं मन्त्रभाषणम् । ध्यानं निद्रा सुधा चान्नं भीमरथ्याः फलश्रुतिः" वैद्यके । २नदीभेदे भा॰व॰८८अ॰ ।

भीमरिका स्त्री सत्यभामागर्भजातायां श्रीकृष्णस्य कन्यायां हरिवं॰ १६२ अ॰ ।

भीमल त्रि॰भियोभयः सम्बन्धो यतः । भयङ्करे यजु॰२०।६ ।

भीमविक्रम पु॰ १धृतराष्ट्रपुत्रभेदे भा॰आ॰ ६७ अ॰। ६ब॰ । २भयानकविक्रमे त्रि॰।

भीमविक्रान्त पुंस्त्री ६ब॰ । १सिंहे त्रिका॰ स्त्रियां जातित्वात् ङीप् । ६ब॰ । २भयानकविक्रमयुते त्रि॰ ।

भीमवेग त्रि॰ ६ब॰ । १भयानकवेगयुते २धृतराष्ट्रपुत्रभेदे पु॰ भा॰आ॰ ५७ अ॰। ३दानवभेदे पु॰हरिवं २४ अ॰ ।

भीमवेगवत् पु॰ धृतराष्ट्रपुत्रभेदे भा॰ आ॰ १८६ अ॰ ।

भीमशर पु॰ धृतराष्ट्रपुत्रभेदे भा॰ आ॰ ६७ अ॰ ।

भीमशासन पु॰भीमं शासनमस्य । १यमे शब्दार्णवः भयानकशासनकर्त्तरि २नृपादौ च ।

भीमसेन पु॰ युधिष्ठिरानुजे १मध्यमपाण्डवे २कर्पूरभेदे च शब्दरत्ना॰ । ३जनमेजयस्य भ्रातृभेदे भा॰ आ॰ ३अ॰ । ४पौरवप्राचीनजनमेजयस्य पुत्रभेदे भा॰आ॰ ९४ अ॰ ।

भीमहास पु॰ इन्द्रतूले (बुढ़िरसुता) शब्दरत्ना॰ ।

भीमा स्त्री १भीमाख्यायाम दुर्गायाम् २रोचनाख्यगन्धद्रव्ये शब्दरत्ना॰ ३कशायां शब्दमाला ४नदीभेदे भा॰व॰२२२अ॰

भीमादेवी स्त्री भीमाख्या देवी । दुर्गामूर्त्तिभेदे "पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले । रक्षांसि क्षपयिष्यामि मुनीनां त्राणकारणात् । तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्त्तयः । भीमादेवीति विख्यातं तन्मे नाम भविष्यति" देवीमा॰

भीमादि पु॰ "भीमादयोऽपादाने" पा॰ अपादाने निपातनसाध्ये शब्दगणे स च गणः पा॰ ग॰ उक्तो यथा "भीम भीष्म भयानक वाह चरु प्रस्कन्दन प्रपात समुद्र स्रुव स्रुक् दृष्टि रक्षः शङ्कु सुक मूर्ख खलति" ।

भीमैकादशी स्त्री भीमेनोपास्या एकादशी शाक॰ त॰ । माघशुक्लैकादश्याम् । तत्कर्त्तव्यव्रतादिकं मत्स्यपु॰६५अ॰ उक्तम् ।

भीरु त्रि॰भी-क्रु । १भयशीले अमरः । २शतावर्य्यां स्त्री धरणिः । ३कण्टकार्य्यां ४शतपादिकायां शब्दर॰। ५छायायां ६योषिति ७अजायां स्त्री मेदि॰। ८शृगाले पु॰शब्दमा॰। ९व्याघ्रे राजनि॰ १०इक्षुभेदे रत्नमा॰ ।

भीरुक पु॰ भी-क्रुकन् । १शृगाले २व्याघ्रे ३इक्षुभेदे च । "वातपित्तप्रशमनो मधुरो रसपाकयोः । सुशीतो बृंहणो बल्यः पौण्ड्रको भीरुकस्तथा" भावप्र॰। ४भययुक्ते त्रि॰।

भीरुकच्छ पु॰ देशभेदे मार्कपु॰ ५७ अ॰ । [अमरः

भीरुपत्री स्त्री भीरूणि पत्राणि यस्याः ङीप् । शतमूल्याम्

भीरुस्थान न॰ ६त॰ अस्थास्नेति षत्वम् । भीरूणां स्थाने ।

भीरुहृदय पु॰ ६ब॰ । १मृगे त्रिका॰ २भयशीलहृदये त्रि॰ ।

भीरू स्त्री भीरु+स्त्रियामूङ् । भयशीलायां नार्य्यां भरतः ।

भीलु(क)(लूक) त्रि॰भी क्रु । भयशीले, लुकन् । तत्र भल्लूके पु॰

शब्दरत्ना० उणा० भीरुक तन्नार्थे मधूके शब्दमा० ।

भीषक त्रि० भीषयते भी-णिच्-षुक् ण्वुल्। भयकारके हेमच०।

भीषण पु० भीषयते भी-णिच्-षुक् ल्यु १भयानकरसे २कुन्दुरुके ३शिह्लके राजनि० ४शल्लक्यां ५महादेवे शब्दरत्ना० ६कपोते च पु० ७गाढे ८दारुणे च त्रि० मेदि० ।

भीषा स्त्री भी-णिच्-षुक् भावे अङ्। १भयप्रदर्शने "क्लिन्नं वा भीषया हरन्" मनुः। स्वार्थे णिच्। २भये च "भीषास्माद्वातः पवते" श्रुतिः। तृतीयास्थाने वेदे आच्।

भीष्म न० भी-णिच्-षुक् अपादाने मक्। १भयानकरसे अमरः। २भयानके त्रि० ३रुद्रे ४राक्षसे पु० हेमच० ५गङ्गागर्भजाते शान्तनुपुत्रभेदे पु० गङ्गाजशब्दे दृश्यम्।

भीष्मक पु० रुक्मिण्याः पितरि नृपभेदे हरिवं० ९१ अ०।

भीष्मकेशव पु० काशीस्थे केशवमूर्त्तिभेदे काशी० १२अ०।

भीष्मजननी स्त्री ६त०। गङ्गायाम् राजनि०। गङ्गाजशब्दे २४९१ पृ० दृश्यम्।

भीष्मपञ्चक न० भीष्मेण प्राप्तमुपदिष्टं वा पञ्चकम्। कार्त्तिकशुक्लैकादश्यादिषु १पञ्चसु तिथिषु तत्कर्त्तव्ये २व्रतभेदे च। तन्निरुक्तिर्यथा "भीष्मेणैतद् पुरा प्राप्तं व्रतं पञ्चदिनात्मकम्। सकाशाद् वासुदेवस्य तेनोक्तं भीष्मपञ्चकम्" हेमा०व्र० नारदपु०। पश्चात् तेन च पाण्डवायोपदिष्टं यथोक्तं तत्रैव "इदं भीष्मेण धर्म्मज्ञ शरतल्पगतेन च। तदेवाद्य समाख्यातं दुष्करं भीष्मपञ्चकम्"। तत्कालश्च तत्रोक्तो यथा "कार्त्तिकस्य शुभे पक्षे स्नात्वा सम्यग्यतव्रतः। एकादश्यान्तु गृह्णीयाद् व्रतं पञ्चदिनात्मकम्"। तत्रैव तद्विधानं दृश्यम्।

भीष्मरत्न हिमालयोत्तरदेशजाते शुक्लवर्णप्रस्तरविशेषे। तस्योत्पत्त्यादि यथा "सूत उवाच। "हिमवदुत्तरे देशे वीर्य्यं पतितं सुरद्विषस्तस्य। सम्प्राप्तमुत्तमानामाकरतां भीष्मरत्नानाम्। शुक्लाः शङ्खाब्जनिभाः स्योनाकसन्निभाः प्रभावन्तः। प्रभवन्ति ततस्तरुणा वज्रनिभा भीष्मपाषाणाः। हेमाद्रिप्रतिबद्धं शुद्धमपि श्रद्धया बिभर्त्ति यः। भीष्ममणिं ग्रीवादिषु स सम्पदं सर्वदा लभते। शत्रुयुक्तस्य तस्यैव धारणात्तु नियुक्तव!। विषाणि तानि नश्यन्ति पशीघ्रेव महीतले। विषमा न बाधन्ते वै नमरण्यनिवासिनः समीपेऽपि। द्वीपिवृकशरभकुञ्जरसिंहव्याघ्रादयो हिंस्राः। तस्योत्सृजन्ति दूरतो यान्ति भयं न चापि सदुपस्थितम्। भीष्ममणिर्गुरुयुक्तः सम्यक् संप्राप्ताङ्गुलिनिबद्धः। पितृतर्पणे पितॄणां तृप्तिर्बहुवार्षिकी भवति। शाम्यन्त्युत्कटान्यपि सपोलुकाखुवृश्चिकविषाणि। सलिलाग्निवैरितस्करभयानि भीमानि नश्यन्ति। शैवलवलाहकाभं परुषं पीतप्रभं प्रभाहीनम्। मलिनद्युति विवर्णं दूरात् परिवर्जयेत् प्राज्ञः। मूल्यं प्रकल्प्यमेषां विबुधवरैर्देशकालविज्ञानात्। दूरे सुतानां बहु किञ्चिन्निकटप्रसूतानाम्" गारुडे ७१अ०। भीष्मशब्दादयोऽप्यत्र।

भीष्मसू स्त्री भीष्मं सूते सू-क्विप्। गङ्गायाम् अमरः।

भीष्माष्टमी स्त्री ६त०। भीष्मस्य देहत्यागदिवसे माघस्य शुक्लाष्टम्याम्। अतस्तस्मिन् दिने सर्ववर्णैस्तस्य तर्पणं कार्य्यम् यथोक्तं ति० त० भविष्योत्तरे "शुक्लाष्टम्यान्तु माघस्य दद्याद् भीष्माय यो जलम्। संवत्सरकृतं पापं तत्क्षणादेव नश्यति"। धवलधृता स्मृतिः "अष्टम्यान्तु सिते पक्षे भीष्माय सतिलोदकम्। अत्रस्त विधिवद्दद्युः सर्वे वर्णा द्विजातयः"। सर्वे इत्युपादानात् ब्राह्मणशूद्रयोरप्यधिकारः। द्विजातय इति सम्बोधनम् "ब्राह्मणक्षत्रियवर्णानां यः करोत्यौर्द्ध्वदेहिकम्। तद्वर्णत्वमसौ याति इह लोके परत्र च" इति मरीचिवचनन्तु भीष्मभिन्नेतरपरम्। तथा च स्मृतिः। "ब्राह्मणाद्यास्तु ये वर्णा दद्युर्भीष्माय नो जलम्। संवत्सरकृतं तेषां पुण्यं नश्यति सत्तम!"। असवर्णजलदाननिषेधस्तु प्रकरणादपि श्राद्धादिविषय इति श्रीदत्तः। "आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम्" इत्याशंसामन्त्रे पुत्रपौत्रोचितामित्यभिधानात् पितृकर्मरीत्या तच्च कर्त्तव्यम्। ब्राह्मणः पितृतर्पणानन्तरं क्षत्रियादिकस्तु तत् पूर्वं तर्पयेत् इति संवत्सरप्रदीपादयः। अत्र बीज वर्ण्यं दृश्यम्" रघु०।

भुक्त त्रि० भुज-कर्मणि क्त। १भक्षिते २कृतभोगे च "भुक्तं भोग्यं रवेस्त्यजेत्" नील०ता०। भावे-क्त। ३भक्षणे न०।

भुक्तभोग त्रि० भुक्तः कृतो भोगो येन। कृतभोगे "जहात्येनां भुक्तभोगामजोऽन्यः" श्वेता० उ०।

भुक्तसमुज्झित त्रि० पूर्वं भुक्तं पश्चात् समुज्झितं त्यक्तम्। भोजनोत्तरं त्यक्ते अन्नादौ।

भुक्ति स्त्री भुज-क्तिन्। १भोजने २रव्यादिग्रहाणां राश्यंशादिषु गमने ३भोगे च "आगमो निम्नकस्तत्र भुक्तिः स्तोकापि यत्र नो" इति स्मृतिः। भुक्तिमानाद्यनिर्णयादिकम् आगमशब्दे ६१४पृ० दृश्यम्। अत्र

कश्चिद्विशेषो वीरमित्रोदयधृतः दर्शितो यथा "नारदः "आगमेन विशुद्धेन भोगो याति प्रमाणताम्। अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति। आगमस्यापि तत्त्वं विरोध्यावलम्बनं भवेत्"। व्यासः "आगमो दीर्घकालश्च विच्छेदोपरवोज्झितः। प्रत्यर्थिसन्निधानञ्च परिभोगोऽपि पञ्चधा"। विच्छेदोऽन्तराय उपरव आक्रोशस्ताभ्यामुज्झितो रहितः। यद्वा विच्छेदो व्यवधानान्तरितगमनात् विच्छेदो निरन्तर इति यावत्। अपरवो वर्जनविषयोरवः। मदीयं क्षेत्रादि त्वया किमिति भुज्यते इति प्रतिषेधः अपशब्दस्य वर्जनार्थत्वात् तेनोज्झितः। नारदः "सम्भोगं केवलं यस्तु कीर्त्तयेन्नागमं क्वचित्। भोगच्छलापदेशेन विज्ञेयः स तु तस्करः"। विद्यमानेऽपि लिखिते जीवत्स्वपि हि साक्षिषु। विशेषतः स्थावराणां यत्र भुक्तं तत् स्थिरम्"। दानविक्रयादेरुपभोगसापेक्षस्यैव स्वत्वोत्पादकत्वात् कियान् भोगस्तयोऽप्यवश्यं तत्रापेक्ष्यते इत्याशङ्कायामुपपत्तिरुक्ता विज्ञानेश्वराचार्य्यैः। "दानादेः स्वत्वापादने परकर्त्तृकस्वीकारापेक्षाऽवश्यम्भावनीया। स्वीकारश्च त्रिविधो मानसो वाचिकः कायिकश्च। ममेदमित्यध्यवसायो मानसः। ममेदमित्याद्यभिलापो वाचिकः। उपादानाभिमर्शनादिरूपेणानेकप्रकारकः कायिकः। तत्र मानसं विना स्वत्वासम्भवात् स त्वावश्यक एव। दानविशेषपुरस्कारेण शब्दप्रयोगविशेषनियमहस्तादिदर्शनादिचेष्टाविशेषनियमाच्च वाचिकश्च। यिवाबश्यावश्यत्वाविष्कश्रीयते। तत्र हिरण्यवस्त्रादौ दातृकर्तृकत्यागादनन्तरमेव प्रतिग्रहीतृकर्तृकोपादानादिसम्भवात् त्रिविधोऽपि व्यापारः सम्पद्यते। क्षेत्रादौ तु फलोपभोगं विना कायिकस्वीकारासम्भवादल्पेनाप्युपभोगेनावश्यम्भवितव्यमन्यथा दानविक्रयादेः सम्पूर्णता न भवत्युत्तरकालीनाङ्गीकाराभावात्। तेन तत्सहितादागमात्तदादिरहित आगमो दुर्बलो भवति। एतच्च द्वयोरागमयोः पूर्वापरभावानवगमे तदवगमे तु स्वल्पभोगविरहितोऽपि प्राक्तन एवागमो बलवान्। पूर्वं च दानादिना स्वत्वागमे दानाद्यन्तरासम्भवात्। न चैवमाद्यचेष्टाद्वैविध्यमपत्यार्थितः पूर्वस्याप्यपगमादुत्तरस्याप्यनुत्पत्तेरिति वाच्यम्। प्रतिश्रुतन्यायेनापेक्षणीयस्वीकारस्य पूर्वस्याप्यकृतत्वेऽपि दात्रैव प्रतिग्रहीत्रादेः कायिकस्वीकारस्यानिषेधात् प्रतिपक्षस्य सम्पादनीयत्वात्"

भुक्तिप्रद पु॰ भुक्तिं भोगं भोजनं वा प्रददाति स्वल्पायासभक्ष्यत्वात्। मुद्गे राजनि॰ लघुपाकत्वात्तथात्वम्। [भोगे

भुक्तिसुहित त्रि॰ सुहितस्य भुक्तिः मयूर॰ परनि॰। सुतृप्त-

भुग्न त्रि॰ भुज–मोटने क्त। रोगादिना कुटिलीकृते।

भुज मोटने तु॰ प॰ सक॰ अनिट्। भुजति अभौक्षीत्। क्त ओदित् भुग्नः।

भुज भक्षणे भोगे च आ॰ पालने पर॰ सक॰ रुधा॰ अनिट्। भुङ्क्तेऽन्नम्। अभौक्षीत्। भूमिं भुनक्ति पालयति। "दिवं मरुत्वानिव भोक्ष्यते महीम्" रघुः। भुक्तः। उपसर्गपूर्वस्तु तत्तदुपसर्गद्योत्ययुक्तभोगादौ। भोगश्च सुखदुःखाद्यनुभवः सुखं दुःखं वा भुङ्क्ते सुखादिकमनुभवतीत्यर्थः।

भुज त्रि॰ भुज+क। १भोगकर्त्तरि २कुटिलीभूते च।

भुज पुंस्त्री॰ भुज्यतेऽनेन भुज–घञर्थे करणे क। १बाहौ २करे मेदि॰। लीलावत्यादौ त्रिकोणचतुष्कोणादिक्षेत्रप्रसिद्धे क्षेत्रांशभेदे "तथायते तद्भुजकोटिघातः" इति लीलावती। क्षेत्रशब्दे दृश्यम्।

भुजकोटर पु॰ भुजस्य कोटर इव। कक्षदेशे (काँक) हेमच॰

भुजग पुंस्त्री॰ भुज–वक्रणे क भुजः कुटिलीभवन् सन् गच्छति गम–ड। १सर्पे अमरः स्त्रियां ङीप्। २अश्लेषानक्षत्रे ज्यो॰ त॰। तस्य तद्देवताकत्वात् तथात्वम्। अश्लेषाशब्दे दृश्यम्।

भुजगदारण पु॰ भुजगं दारयति दारि–ल्यु। गरुडे त्रिका॰

भुजगनिसृता स्त्री "भुजगनिसृता नसौमः" वृ॰ र॰ उक्ते नवाक्षरपादके छन्दोभेदे। [राजनि॰

भुजगान्तक पु॰ ६त॰। गरुडे। भुजगनाशनादयोऽप्यत्र।

भुजगभोजिन् पु॰ भुजगं भुङ्क्ते भुज–णिनि। मयूरे राजनि॰ स्त्रियां ङीप्। [त्रिका॰ भुजगभक्षकादयोऽप्यत्र।

भुजगाशन पु॰ भुजगान् अश्नाति अश–ल्यु। गरुडे

भुजङ्ग पुंस्त्री॰ भुजः सन् गच्छति गम–खच् मुम् डिच्च। १सर्पे स्त्रियां ङीष् २जारे च पु॰ अमरः। ३अश्लेषानक्षत्रे पु॰ ज्यो॰ त॰

भुजङ्गघातिनी स्त्री ६त॰। भुजङ्गं तद्विषं हन्ति–हन णिनि ङीप्। सर्पाक्षीलतायाम् राजनि॰।

भुजङ्गजिह्वा स्त्री ६त॰। १सर्पजिह्वायां ६त॰ २तदाकारयुतायां महासमङ्गायाम् राजनि॰।

भुजङ्गदमनी स्त्री भुजङ्गो दम्यतेऽनया दम–करणे ल्युट् गौरा॰ ङीष्। नाकुलीवृक्षाम् वैद्यक प्र॰

भुजङ्गपर्णिनी भुजङ्गस्याकार इव पर्णानि सन्ति यस्याः

इति ङीप्। नागदमन्यां नैघण्टुप्रकाशिकायाम्।

भुजङ्गपुष्प पु० भुजङ्ग इव पुष्पमस्य। क्षुपभेदे शब्दच०।

भुजङ्गप्रयात न० "भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः" वृ० र० उक्ते द्वादशाक्षरपादके छन्दोभेदे।

भुजङ्गभुज् पु० भुजङ्गं भुङ्क्ते भुज–क्विप् ६त०। १गरुडे शब्दर० २मयूरे अमरः।

भुजङ्गभोजिन् पु० भुजङ्गं भुङ्क्ते भुज–णिनि ६त०। राजसर्पे हेमच०। २गरुडे ३मयूरे च।

भुजङ्गम पुंस्त्री० भुजः कुटिलीभवन् सन् गच्छति गम–खच् मुम्। १सर्पे अमरः स्त्रियां जातित्वात् ङीष्। २सीसके न० राजनि०। ३अश्लेषानक्षत्रे पु०। [ताम्बूल्यां राजनि०।

भुजङ्गलता स्त्री भुजङ्ग इव कुटिला तल्लोकस्था वा लता।

भुजङ्गविजृम्भित न० "वस्वीशाश्वच्छेदोपेतं ममतनयुगनरसलगैर्भुजङ्गविजृम्भितम्" वृ० र० उक्ते षड्विंशत्यक्षरपादके १छन्दोभेदे। ६त०। २सर्पचेष्टिते च।

भुजङ्गहन् पु० भुजङ्गं हन्ति हन-क्विप्। गरुडे त्रिका०।

भुजङ्गाक्षी स्त्री भुजङ्गस्येवाक्षि पुष्पं यस्याः षच् समा० ङीष्। रास्नायाम् अमरः। [शब्दमा०

भुजङ्गाख्य पु० भुजङ्गतुल्या आख्या यस्य। नागकेसरे।

भुजङ्गेश पु० ६त०। १वासुकौ २शेषे नटवतारे ३पिङ्गलमुनौ ४पतञ्जलिमुनौ च भुजङ्गेशादयोऽप्यत्र।

भुजज्या स्त्री सू० सि० उक्तायाम् त्रिकोणक्षेत्रस्य भुजजीवायाम् "ग्रहं संशोध्य मन्दोच्चात् तथा शीघ्राद्विशोध्य च। शेषं केन्द्रपदं तस्माद्भुजज्या कोटिरेव च" सू० सि०। "ग्रहं राश्यादिकं मन्दोच्चात् प्रागानीततत्कालीयराश्यादिकमन्दोच्चभोगात् संशोध्योनीकृत्य शीघ्रात् प्रागानीतराश्यादिशीघ्रोच्चात्। चः समुच्चये। ऊनीकृत्य शेषं राश्यादिकं तयोस्तत्सम्बन्धेन केन्द्रं मन्दोच्चोनो ग्रहो मन्दकेन्द्रम्। शीघ्रोच्चोनो ग्रहः शीघ्रकेन्द्रं भवतीत्यर्थः। तस्मात् केन्द्रात् पदं राशित्रयात्मकं विषमं समं च पदं ज्ञेयम्। त्रिराश्यन्तर्गतं चेत् प्रथमं विषमं पदम्। ततः षड्राश्यन्तर्गतं चेत् त्र्यूनं केन्द्रं द्वितीयं समं पदम्। ततो नवराश्यन्तर्गतं चेत् षडूनं तृतीयं विषमं पदम्। ततो नवोनं चतुर्थं पदं सममित्यर्थः। तस्मात् पदाद्भुजज्या कोटिः कोटिज्या च" रङ्ग०। तदानयनं यथा "गताद्भुजज्या विषमे गम्यात् कोटिः पदे भवेत्। युग्मे तु गम्याद्बाहुज्या कोटिज्या तु गताद्भवेत्" सू० सि०। "विषमे पदे गतः तत्पदस्य पदादितो यद्गतं राशिविभागात्मकं प्रागुक्तं तस्माद्दित्यर्थः। भुजज्या स्यात्। गम्यात् गतोनं त्रिभं यत् तस्मात् पादान्तावधिकमेष्यम्। तस्मात् कोटिः कोटिज्या स्यात्। युग्मे समे तुकारात् पदे एष्याद्भुजज्या गतात् कोटिज्या स्यात्। तुकारो विशेषद्योतकः। एतस्मादेवोक्तरीत्या इयं साधितम्" रङ्ग०।

भुजफल न० "खेनाहते परिधिना भुजकोटिजीवे भांशैः ३६० हृते च भुजकोटिफलाह्वये स्तः" सि० शि० उक्ते भुजेनानीते फलभेदे

भुजमध्य न० ६त०। भुजान्तरे क्रोडे हला०।

भुजशिखर पु० ६त०। स्कन्धे हेम०।

भुजशिरस् न० ६त०। स्कन्धदेशे अमरः।

भुजाग्र पु० ६त०। करे हला०।

भुजादल पु० भुजाया बाहोर्दलं इव। करे हस्ते त्रिका०।

भुजान्तर न० ६त०। भुजयोरन्तरं मध्यम्। क्रोडे अमरः। इतस्ततश्चलबाहोर्विक्षेपरूपे गणितागते पदार्थे यथोक्तं सि० शि० "भानोः फलं गणितमर्कयुतस्य राशेर्व्यक्षोदयेन खखनागमहीः १८०० विभक्तम्। गत्या ग्रहस्य गुणितं द्युनिशा विभक्तं स्वर्णं ग्रहेऽर्कवदिदं तु भुजान्तराख्यम्"।

भुजि पु० भुज–धातुनिर्देशे इक्। १भुजधातौ भुज-इन् किच्च। २वह्नौ उणादि० तस्य सर्वभक्षकत्वात् तथात्वम्।

भुजिङ्ग पु० देशभेदे भा० भी० ९अ०।

भुजिष्य पु० भुज–किष्यन्। १दासे २रोगे ३स्वतन्त्रे ४हस्तसूत्रे च। ५दास्यां ६वेश्यायाञ्च स्त्री मेदि०।

भुज्यु पु० भुज–युच् न अनादेशः। १भाजने उज्ज्वल०। २भोजने उणा०। ३अग्नौ संक्षिप्त० ४यज्ञे यजु० १८।४२ वेददी० "यज्ञो हि सर्वाणि भूतानि प्रावयतीति" श्रुतेः सर्वलोकपालकत्वात्तस्य तथात्वम्।

भुड भरणे करणे च भ्वा० आ० सक० सेट् इदित्। भुण्डते अभुण्डिष्ट बुभुण्डे कर्मणि भुण्ड्यते।

भुणिक पु० गोत्रावयवभेदे तस्यापत्यम् ततः इञ्। भौणिकि तदपत्ये पुंस्त्री० स्त्रियां ष्यङ्। भौणिक्या तद्गोत्रावयवस्त्रियाम् सि० कौ०।

भुमन्यु पु० १पौरवे भरतपुत्रे नृपभेदे भा० आ० १४अ०। २तद्वंश्ये प्राचीनष्वतराट्पुत्रभेदे भा० आ० ९४अ०।

भुरज पाके भ्वा० आ० सक० सेट्। भुरजते "भुरजन्त पक्वाः" ऋ० ४।४३।५। अयं धातुः धातुपाठादौ न दृश्यते।

भुरण धारणपोषणयोः कण्ड्वा० यक् भ्वा० सक० सेट्। भुरण्यति अभुरण्यी(णी)त् अयं नतौ निघण्टुः।

भुरण्यु न० भृ-भर्त्तौ अन्यु । १भरणे यजुः १८।५२ १२।४९ वेददीपे अव्यु०भुरण्य–छन् इत्युक्तम् । २क्षिप्रे निघण्टुः ३तद्वति त्रि० ।

भुरिज् स्त्री "भञ्ज दाह्ने" उणा० भ-इजि किच्च धातोरुकारादेशः । बहुस्वराणाम् उज्ज्वल० । २बाह्वोः द्वि०व० निघण्टुः । [वि० १७ अ० ।

भुरुण्ड पु० १म्लेच्छजातिभेदे भरताध्यायः भारतभूखण्डे भा०

भुर्व अदने भ्वा०पर०सक०सेट् । भूर्वति अभूर्वीत् "भुर्वतिरत्तिकर्मा" इति यास्कोक्तेः अयं तदर्थे धातुर्बोध्यः ।

भुर्वणि पु० भुर्व–अनि न दीर्घः । १भर्त्तरि । ऋ० १।५६।१ ।

भुव पु० भवत्यनेन भू–क । अग्नौ यजु० ।१२।५४ । वेददी० २भुवर्लोके च "तस्येदं भूर्भुवादिकम्" छ०कि० ।

भुवद्वत् पु० भू–शतृ मत्वर्थमाचे तुदा० । भुवत् धारयत् अस्त्यस्य मतुप् मस्य वः तान्तत्वेऽपि "भुवद्वद्भ्यो धारयद्भ्यः पदसंज्ञा वक्तव्या" वार्त्ति० उक्तेः पदत्वम् । धारकवति आदित्ये आ०श्रौ० ४।२।६

भुवन न०भवत्यत्र भू–आधारादौ क्युन् । १जगति २जले ३आकाशे ४चतुर्दशसंख्यायाम् । ५जने च मेदि० । भुवनानि च चतुर्दश यथा "चतुर्दशविधं ह्येतद् भुवनं प्रकीर्त्तितम् । भूर्भुवःस्वर्महश्चैव जनश्च तप एव च । सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः" "अतलं सुतलञ्चैव वितलञ्च गभस्तिमत् । महातलं रसातलं पातालं सप्तमं स्मृतम् । शुक्लभौमं शिलाभौमं पातालं नीलमृत्तिकम् । रक्तपीतश्वेतकृष्णभौमानि च भवन्त्यपि । पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम् । सुषिरं तानि कथ्यन्ते भुवनानि चतुर्दश" वह्निपु०

भुवनकोष पु० भुवनस्य कोष इव । १भूगोले २ज्योतिषग्रन्थभेदे च । पुराणसर्वस्वे विष्णुपु० तद्वर्णनं यथा "रविचन्द्रमसोर्यावन्मयूखैरवभास्यते । ससमुद्रसरिच्छैला तावती पृथिवी स्मृता । यावत्प्रमाणा पृथिवी विस्तारपरिमण्डला । नभस्तावत्प्रमाणं वै विस्तारपरिमण्डलम् । भूमेर्योजनलक्षे तु सौरं मैत्रेय! मण्डलम् । लक्षे दिवाकरस्यापि मण्डलं शशिनः स्थितम् । पूर्णे शतसहस्रे तु योजनानां निशाकरात् । नक्षत्रमण्डलं कृत्स्नमुपरिष्टात् प्रकाशते । द्विलक्षे चोत्तरे ब्रह्मन्! बुधो नक्षत्रमण्डलात् । तावत्प्रमाणभागे तु बुधस्याप्युशना स्थितः । अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थितः । लक्षद्वयेन भौमस्य स्थितो देवपुरोहितः । सौरिर्बृहस्पतेश्चोर्द्ध्वं द्विलक्षे समवस्थितः । सप्तर्षिमण्डलं तस्माल्लक्षमेकं द्विजोत्तम । ऋषिभ्यस्तु सहस्राणां शतादूर्द्ध्वं व्यवस्थितः । मेढीभूतः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः । त्रैलोक्यमेतत् कथितमुत्सेधेन महामुने! । इज्याफलस्य भूरेषा इज्या चात्र प्रतिष्ठिता । ध्रुवादूर्द्ध्वं महर्लोको यत्र ते कल्पवासिनः । एका योजनकोटी तु महर्लोको विधीयते । द्वे कोट्यौ तु जनो लोको यत्र ते ब्रह्मणः सुताः । सनन्दनाद्याः कथिता मैत्रेयामलचेतसः । चतुर्गुणोत्तरे चोर्द्ध्वं जनलोकात्तपः स्मृतः । वैराजा यत्र ते देवाः स्थिता दाहविवर्जिताः । षड्गुणेन तपोलोकात् सत्यलोको विराजते । अपुनर्मारकायत्र ब्रह्मलोको हि स स्मृतः । पादगम्यन्तु यत् किञ्चिद्वस्त्वस्ति पृथिवीमयम् । स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः । भूमिसूर्य्यान्तरं यच्च सिद्धादिमुनिसेवितम् । भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम! । ध्रुवसूर्य्यान्तरं यच्च नियुतानि चतुर्दश । स्वर्लोकः सोऽपि कथितो लोकसंस्थानचिन्तकैः । त्रैलोक्यमेतत् कृतकं मैत्रेय! परिपठ्यते । जनस्तपस्तथा सत्यमिति चाकृतकं त्रयम् । कृतकाकृतयोर्मध्ये महर्लोक इति श्रुतिः । शून्यो भवति कल्पान्ते योऽत्यन्तं न विनश्यति । एते सप्त मया लोका मैत्रेय! कथितास्तव । पातालानि च सप्तैव ब्रह्माण्डस्यैव विस्तरः । एतदण्डकटाहेन तिर्य्यक् चोर्द्ध्वमधस्तथा । कपित्थस्य यथा बीजं सर्वतो वै समावृतम् । दशोत्तरेण पयसा मैत्रेयाण्डञ्च तद्वृतम् । सर्वोऽम्बुपरिवारोऽसौ वह्निना वेष्टितो बहिः । वह्निश्च वायुना, वायुर्मैत्रेय! नभसावृतः । भूतादिना नभः सोऽपि महता परिवारितः । दशोत्तराण्यशेषाणि मैत्रेयैतानि सप्त वै । महान्तञ्च समावृत्य प्रधानं समवस्थितम् । अनन्तस्य न तस्यान्तः संख्यानं चापि विद्यते" । भाग० ५।१६।१८ अ० विस्तरो दृश्यः ।

भुवनेश्वरी स्त्री ६त० । महाविद्यामध्ये देवीमूर्त्तिभेदे तन्मन्त्रध्यानादिकं तन्त्रसा० दृश्यम् ।

भुवन्ति पु० भुवं तनोति तन वा० डि किच्च मुम् । रुद्रभेदे यजु० १६।१८ । [३वह्नौ ४चन्द्रे च मेदि० ।

भुवन्यु पु० भू–कन्युच् । १स्वामिनि २सूर्य्ये च उज्ज्वल० ।

भुवपति पु० ६त० । भुवोलोकपतौ यजु०२।२ । भुवभर्त्तादयोऽप्यत्र ।

भुवर् अव्य० भू-असुन्-किच्च । आकाशात्मके १द्वितीये लोके भुवर्लोकशब्दे विष्णुपु०वाक्यं दृश्यम् । २व्याहृतिभेदे च

भुवर्लोक पु० कर्म० । द्वितीये लोके ।

भुवस् अव्य० भू-असुन् किच्च । १आकाशात्मके द्वितीये लोके २व्याहृतिभेदे भुवः स्वाहा ।

भुवस्पति पु० कर्म०। भुवो लोकस्वामिनि अथर्व० १०५

भुविष्ठ त्रि०भुवि तिष्ठति स्था-क अलुक्स० षत्वम् । भूमिस्थिते भाग० १।५।१७ ।

भुविस् पु० भू-इसिन् किच्च । समुद्रे उज्ज्वल० ।

भुशुण्डी स्त्री पाषाणक्षेपणार्थे चर्ममययन्त्ररूपे अस्त्रभेदे "भुशुण्ड्युद्यतबाहवः" भा० आ० २२७ अ० नीलकण्ठः

भू प्राप्तौ चु० आ० सक० सेट् । भावयत अबीभवत ।

भू प्राप्तौ भ्वा०उ०सक०सेट् । भवति-ते अभूत् अभविष्ट ।

भू शुद्धौ अक० चिन्तने मिश्रणे च सक० चुरा० उभ० सेट् । भावयति-ते अबीभवत्-त ।

भू सत्तायां भ्वा०पर०अक०सेट्। भवति अभूत् बभूव । "भवतु दुरितक्षयं यथोक्तैः क्रतुभिर्भावयते च नामलोकम्। भवति त्रिदशैश्च पूजितो यस्तु भवद्भावयति द्विजश्च सर्वान्" कविर०

अधि-आधिक्येन भवने ऐश्वर्ये ।

अनु-अनुभवे ज्ञानभेदे सक० अनुभवशब्दे दृश्यम् ।

अन्तर्+तिरोभावे अक० ।

अभि+तिरस्कारे सक० । अभिभवति शत्रून् ।

आविस्+प्रादुस्+प्रथमप्रकाशे ।

उद्-उत्पत्तौ अक० ।

तिरस् अन्तर्धाने स्थितस्य वस्तुनः कारणात्मनाऽवस्थाने अक०

परा+अवहेलने पराभवः ।

परि+तिरस्कारे परिभवति अतिक्रम्य भवने ।

प्रति+तुल्यरूपभवने अक० प्रतिभूः ।

वि+व्याप्तौ विभुः । [वोपदेवः

वि+अति-परस्परभवने आत्म० सक० व्यभिभवतेऽर्कमिन्दुः ।

सम्+योग्यत्वे अक० । सम्भाति सम्+भू-णिच् सम्भावनारूपज्ञानविषयत्वे सम्भाव्यते ।

भू स्त्री भू-आधारे कर्त्तरि अपादाने वा यथायथम् क्विप् । १भूमौ अमरः २स्थानमात्रे मेदि० ३यज्ञाग्नौ पु० जटा० ४उत्पद्यमाने त्रि० ५परमेश्वरे पु० "अनिर्विण्णः स्थविष्ठो भूः" विष्णुस० ।

भूक न० भू-कक् । १छिद्रे २काले मेदि० ।

भूकदम्ब पु० भूवि कदम्ब इव । (कोकसिमा) १अजमोदायां रत्नमा०। २गोरक्षतण्डुलायां स्त्री भैषज्यर०। संज्ञायां कन् । भूकदम्बक । यवान्यां राजनि० । [राजनि०।

भूकन्द पु० भुवः कन्द इव । (शुकर्कुण्डि) महाश्रावणिकायां

भूकम्प पु० ६त० । लोकानामानष्टादिसूचके अद्भुतरूपे पृथिव्याः स्वयंचलने । तस्य शुभाशुभसूचकता अद्भुतसागरे उक्ता यथा "मेषे हरिवृषभे गजः प्रचलति व्याधादिभिः कथ्यते चापे मीनकुलीरभ च वृषभे सत्यं चलेत् कच्छपः । यूके कुम्भधरे मृगेन्द्रमिथुने कन्यामृगे पन्नगस्तेषामेकतमो यदि प्रचलति चौर्वी तदा कम्पते । कच्छपे मरणं ज्ञेयं मरणञ्चापि पन्नगे । सर्वत्र सुखदश्चैव पृथिव्यां चलिते गजे । प्रथितनरेश्वर मरणं व्यसनान्याग्नेयमारुतयोः । क्षुद्भयमतिहृष्टिभिरुपपीड्यन्ते जनाश्चापि । त्रिचतुर्थपञ्चदिने मासे पक्षे त्रिपक्षके । भवति यदा भूकम्पः प्रधानरूपनाशनं कुरुते" । स च भूमिजोत्पातविशेषः यथा "चरस्थिरभवं भौमं भूकम्पमपि भूमिजम् । जलाशयानां वैकृत्यं भौमन्तदपि कीर्तयेत् । भौमं चाल्पं फलं ज्ञेयं चिरेण परिपच्यते" ज्यो०त० ।

भूकर्वुदारक पु० भूश्लेष्मे राजनि०।

भूकल पुंस्त्री० दुर्विनीताश्वे राजनि० ।

भूकश्यप पु० भूमिजातः कश्यपस्तदवतार । वसुदेवे त्रिका० कश्यपस्य वसुदेवरूपेणावतारकथा च हरिवं० ५६ अ० ! "तदस्य कश्यपस्यांशस्तेजसा कश्यपोपमः । वसुदेव इति ख्यातो गोषु तिष्ठति भूतले" ।

भूकाक पु० भुवि ख्यातः काकः । १क्षुद्रकाके २क्रौञ्चे ३नीलकपोते च राजनि० ।

भूकुम्भी स्त्री भुवि कुम्भीव । भूमिपाटल्यां राजनि० ।

भूकुष्माण्डी स्त्री भुवि कुष्माण्डीव । वदर्याम् राजनि०

भूकेश पु० भुवः पृथिव्याः केश इव । १वटे २शैवले च मेदि० ३राक्षस्यां स्त्री शब्दरत्ना० ङीष् ।

भूच्छिद् पु० भुवं छिनत्ति छिद-क्विप् । भूचरे त्रिका० ।

भूखर्जूरी स्त्री भुवि जाता खर्जूरी शाक०त०। क्षुद्रखर्जूर्याम् राजनि०। भूमिखर्जूर्यादयोऽप्यत्र ।

भूगर न० १विषे राजनि० २भगभूतिकरौ पु० त्रिका०। [विष्णुस०

भूगर्भ पु०भूर्गर्भेऽस्य । विष्णौ पु० "हिरण्यगर्भो भूगर्भः"

भूगृह न० भूमध्यस्थं गृहम् । १भूमध्यस्थे गृहे धरणीधरनादयोऽप्यत्र । २तन्त्रोक्ते यन्त्रबहिःस्थे रेखाबर्हिविशेषात्मके पदार्थे "धरणीगृहसंयुक्तं" भीयन्त्रोद्धार ।

भूगोल पुं॰ भूर्गोल इव। गोलाकारे ब्रह्माण्डे "मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति। बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम्" सू॰सि॰। तत्स्थानभेदस्तन्मानादिकं च सि॰ शि॰ उक्तं यथा "भूमेः पिण्डः शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षा-वृत्तैर्वृत्तो वृतः सन् मृदनिलसलिलव्योमतेजोमयोऽयम्। नान्याधारः स्वशक्त्यैव वियति नियतं तिष्ठतीहास्य पृष्ठे निष्ठं विश्वं च शश्वत् सदनुजमनुजादित्यदैत्यं समन्तात्। सर्वतः पर्वतारामग्रामचैत्यचयैश्चितः। कदम्बकुसुमग्रन्थिः केसरप्रसरैरिव। मूर्तो धर्ता चेद्धरित्र्यास्ततोऽन्यस्तस्याप्यन्योऽप्येवमत्रानवस्था। अन्त्ये कल्प्या चेत् स्वशक्तिः किमाद्ये किं नो भूमेः साष्टमूर्तेश्च मूर्त्तिः?। यथोष्णताऽर्कानलयोश्च, शीतता विधौ, द्रुतिः के, काठिनत्वमश्मनि। मरुच्चलो भूरचला स्वभावतो यतो विचित्रा बत वस्तुशक्तयः। आकृष्टिशक्तिश्च मही-तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या। आकृष्यते तत् पततीव भाति समे समन्तात् क्व पतत्वियं खे। भपञ्जरस्य भ्रमणावलोकादाधारशून्या कुरिति प्रतीतिः। खस्थं न दृष्टं च गुरु क्षमातः खेऽधः प्रयातीति वदन्ति बौद्धाः। द्वौ द्वौ रवीन्दू भगणौ च तद्वदेकान्तरौ तावुदयं व्रजेताम्। यदब्रुवन्नेवमनम्बराद्या ब्रवीम्यतस्तान् प्रति युक्तियुक्तम्। भूः खेऽधः खलु यातीति बुद्धिर्बौद्ध मुधा कथम्। यातायातं तु दृष्ट्वापि खे यत् क्षिप्तं गुरु क्षितिम्। किं गण्यं तव वैगुण्यं द्वैगुण्यं वा वृथा कथा। भार्केन्दूनां विलोक्याह्नि ध्रुवमत्स्यपरिभ्रमम्। यदि समा मुकुरोदरसन्निभा भगवती धरणी तरणिः क्षितेः। उपरि दूरगतोऽपि परिभ्रमन् किमु नरैरमरैरिव नेक्ष्यते। यदि निशाजनकः कनकाचलः किमु तदन्तरगः स न दृश्यते। उदगयं ननु मेरुरथांशुमान् कथमुदेति च दक्षिणभागके। समो यतः स्यात् परिधेः शतांशः पृथ्वी च पृथ्वी, नितरां तनीयान्। नरश्च, तत्पृष्ठगतस्य कृत्स्ना समेव तस्य प्रतिभात्यतः सा। पुरान्तरं चेदिदमुत्तरं स्यात् तदक्षविश्लेषलवैस्तदा किम्। चक्रांशकैरित्यनुपातयुक्त्या युक्तं निरुक्तं परिधेः प्रमाणम्। निरक्षदेशात् क्षितिषोडशांशे भवेदवन्ती गणितेन यस्मात्। तदन्तरं षोडशसंगुणं स्याद् भूमानमस्माद् बहु किं तदुक्तम्। स्फुटगतिग्रहयुतिपर्वोदयास्तमयादिकं परिधिना घटतेऽमुना हि। नान्येन तेन जगुरुक्तमहीप्रमाणप्रामाण्यमन्वयभुजा व्यतिरेकतोऽपि। लङ्का कुमध्ये यमकोटिरस्याः प्राक्, पश्चिमे रोमकपत्तनं च। अधस्ततः सिद्धपुरं सुमेरुः सौम्येऽथ याम्ये वडवानलश्च। कुवृत्तपादान्तरितानि तानि स्थानानि षड् गोलविदो वदन्ति। वसन्ति मेरौ सुरसिद्धसङ्घा वडवे च सर्वे नरकाः सदैत्याः। यो यत्र तिष्ठत्यवनीं तलस्थामात्मानमस्या उपरिस्थितं च। स मन्यतेऽतः कुचतुर्थसंस्था मिथश्च ते तिर्यगिवामनन्ति। अधःशिरस्काः कुदलान्तरस्थाश्छायामनुष्या इव नीरतीरे। अनाकुलास्तिर्यगधःस्थिताश्च तिष्ठन्ति ते तत्र वयं यथात्र। भूमेरर्धं क्षारसिन्धोरुदक्स्थं जम्बूद्वीपं प्राहुराचार्यवर्याः। अर्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेशः। लवणजलधिरादौ दुग्धसिन्धुश्च तस्मादमृतममृतरश्मिः श्रीश्च यस्मादुबभूव। महितचरणपद्मः पद्मजन्मादिदेवैर्वसति सकलवासो वासुदेवश्च यत्र। दध्नो घृतस्येक्षुरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चान्त्यः। स्वादूदकान्तर्वडवानलोऽसौ पातालोकाः पृथिवीपुटानि। वसुन्धराफणाविवरप्रकाशितप्रकाशा एतेषु चासुरगणाः फणिनो वसन्ति। दिव्याङ्गनारमणी रमणीयदेहैः विलासैश्च तत्र च वसत्पन्नगभार्याः। शाकं ततः शाल्मलमत्र कौशं क्रौञ्चं च गोमेदकपुष्करे च। द्वयोर्द्वयोरन्तरमेकमेकं समुद्रयोर्द्वीपमुदाहरन्ति। लङ्कादेशाद्धिमगिरिरुदग्घेमकूटोऽथ तस्मात् तस्मादन्यो निषध इति ते सिन्धुपर्यन्तदैर्घ्याः। एवं सिद्धादुदगपि पुराच्छृङ्गवच्छुक्लनीला वर्णोक्ता वा अपरिच बुधा अन्तरे द्वीपिदेशान्। भारतवर्षमिदं हिमदुग्-मात् किन्नरवर्षमतो हरिवर्षम्। सिद्धपुराच्च तथा कुरुमध्यात् विद्धि हिरण्मयरम्यकवर्षे। माल्यवांश्च यमकोटिपत्तनाद्रोमकाच्च किल गन्धमादनः। नीलशैलनिषधावधी च तावन्तरालमनयोरिलावृतम्। माल्यवज्जलधिमध्यवर्त्ति यत् तत्तु भद्रतुरगं जगुर्बुधाः। गन्धशैलजलराशिमध्यगं केतुमालकमिलाकलाविदः। निषधनीलकगन्धसुमाल्यकैरभिलावृतमावृतमावनौ। अमरकेलिकुलायसमाकुलं रुचिरकाञ्चनचित्रमहीतलम्। इह हि मेरुगिरिः किल मध्यगः कनकरत्नमयस्त्रिदशालयः। द्रुहिणजन्मकुपद्मजकर्णिकेति च पुराणविदोऽस्य समवर्णयन्। विष्कम्भशैलाः खलु मन्दरोऽस्य

सुगन्धशैलो विपुलः सुपार्श्वः । तेषु क्रमात् सन्ति च केतुवृक्षाः कदम्बजम्बूवटपिप्पलाख्याः । जम्बूफलामलगलद्रसतः प्रवृत्ता जम्बूनदी रसयुता मृदभूत् सुवर्णम् । जाम्बूनदं हि तदतः सुरसिद्धसङ्घाः शश्वत् पिबन्त्यमृतपानपराङ्मुखास्तम् । वनं तथा चैत्ररथं विचित्रं तेष्वप्सरोनन्दननन्दनं च । धृत्याह्वयं यद्धृतिकृत् सुराणां भ्राजिष्णु वैभ्राजमिति प्रसिद्धम् । सरांस्यथैतेष्वरुणं च मानसं महाह्रदं श्वेतजलं यथाक्रमम् । सरःसु रामारमणग्रमालसाः सुरा रमन्ते जलकेलिलालसाः । यदूर्ध्वकाञ्चनमयं शिखरत्रयं च मेरौ मुरारिकपुरारिपुराणि तेषु । तेषामधः शतमखज्वलनान्तकानां रक्षोऽम्बुपानिलशशीशपुराणि चाष्टौ । विष्णुपदी विष्णुपदात् पतिता मेरौ चतुर्धाऽस्मात् । विष्कम्भाचलमस्तकसरःसु प्लुता गता वियता । सीताख्या भद्राश्वं, चालकनन्दा च भारतं वर्षम् । चक्षुश्च केतुमालं, भद्राख्या चोत्तरान् कुरून् याता । याऽऽकर्णिताभिलषिता दृष्टा स्पृष्टावगाहिता पीता । उक्ता स्तुता स्मृता वा पुनाति बहुधा पापिनः पुरुषान् । यां चलितो दयिताभिमुखो गच्छति नृत्यति तद्पितृसङ्घः । प्राप्तटे विजितान्तककृतो याति नरो निरयात् सुरलोकम् । ऐन्द्रं कशेरुमपरं किल ताम्रपर्णमन्यद्गभस्तिमदतश्च कुमारिकाख्यम् । नागं च सौम्यमिह वारुणमन्त्यखण्डं गान्धर्वसंज्ञमिति भारतवर्षमध्ये । वर्णव्यवस्थितिरिहैव कुमारिकाख्ये शेषेषु चान्त्यजजना निवसन्ति सर्वे । माहेन्द्रशुक्तिमलयर्क्षकपारियात्राः सह्यः सविन्ध्य इह सप्त कुलाचलाख्याः । भूर्लोकाख्यो दक्षिणे व्यक्षदेशात् तस्मात् सौम्योऽस्य भुवः, स्वश्च मेरुः । लभ्यः पुण्यैः खे महः स्याज्जनोऽतोऽनल्पानल्पैः स्वैस्तपः सत्यमन्त्यः । लङ्कापुरेऽर्कस्य यदोदयः स्यात् तदा दिनार्धं यमकोटिपुर्याम् । अधस्तदा सिद्धपुरेऽस्तकालः स्याद्रोमके रात्रिदलं तदैव । यत्रोदितोऽर्कः किल तत्र पूर्वा, तत्रापरा यत्र गतः प्रतिष्ठाम् । तन्मध्यतोऽन्ये च ततोऽखिलानामुदक्स्थितो मेरुरिति प्रसिद्धम् । यदोज्जयिन्याः कुचतुर्थभागे प्राच्यां दिशि स्याद्यमकोटिरेव । ततश्च पश्चान्न भवेदवन्ती लङ्कैव तस्याः ककुभि प्रतीच्याम् । तथैव सर्वत्र यतो हि यत् स्यात् प्राच्यां ततस्तत्र भवेत् प्रतीच्याम् । निरक्षदेशादितरत्र तस्मात् प्राचीप्रतीच्यौ च विचित्रसंस्थे । निरक्षदेशे क्षितिमण्डलोपगौ ध्रुवौ नरः पश्यति दक्षिणोत्तरौ । तदाश्रितं खे जलयन्त्रवत् तथा भ्रमद्भचक्रं निजमस्तकोपरि । उदग्दिशं याति यथा यथा नरस्तथा तथा स्यान्नतमृक्षमण्डलम् । उदग्ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः । योजनसंख्याभांशैर्गुणिता स्वपरिधिहृता भवन्त्यंशाः । भूमौ कक्षायां भागेभ्यो योजनानि च व्यस्तम् । सौम्यं ध्रुवं मेरुगताः खमध्ये याम्यं च दैत्या निजमस्तकोर्ध्वे । सव्यापसव्यं भ्रमदृक्षचक्रं विलोकयन्ति क्षितिजप्रसक्तम् । प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताङ्गनन्दाब्धय ४९६७ स्तद्व्यासः कुभुजङ्गसायकभुवः १५८१ सिद्धांशकेनाधिकः १-२४ पृष्ठे क्षेत्रफलं तथा युगगुणत्रिंशच्छराष्टाद्रयो ७८५१०३४ भूमेः कन्दुकजालवत् कुपरिधिव्यासाहतेः प्रस्फुटम् । दृष्टं कन्दुकपृष्ठजालवदिलागोले फलं कल्पितं लक्षेणात्र शतांशकोऽपि न भवेद्यस्मात् फलं वास्तवम् । तत् प्रत्यक्षविरुद्धमुक्तमिदं नैवास्तु वा स्वस्तु वा हे प्रौढा ! गणका विचारयत तन्मध्यस्थबुद्ध्या स्वयम् । यत् परिध्यर्धविष्कम्भहतं क्षेत्रं विचार्यकम् । तेनार्धं स्याद्यते गोलः किञ्चिदस्त्वऽवसीयते । गोलक्षेत्रफलात् तस्मादल्पक्षेत्रफलं यतः । सार्धद्विगुणितायतं तावदेवापरे दले । एवं पञ्चगुणात् क्षेत्रफलात् पृष्ठफलं खलु । नाधिकं जायते तेन परिधिघ्नं कुतः कृतम् । वृत्तक्षेत्रफलं यस्मात् परिधिघ्नं न युक्तिमत् । दृष्टत्वाद् गणितस्यास्य दृष्टं भूपृष्ठजं फलम् । गोलस्य परिधिः कल्प्यो वेदघ्नव्यासमितोऽमितः । सुखबुध्नगरेखाभिर्यद्दामलके स्थिताः । हयग्रन्ते वप्रकाशवत् प्रागुक्तपरिधेर्मितान् । ऊर्ध्वाधःवृत्तरेखाभिर्गोले यथा प्रकल्पयेत् । तत्रैकवप्रक्षेत्रफलं स्वखैः प्रसाध्यते । सर्वज्यैक्यं त्रिभज्यार्धहीनं त्रिज्यार्धभाजितम् । एवं वप्रफलं तत् स्याद् गोलव्याससमं यतः । परिधिव्यासघातोऽतो गोलपृष्ठफलं स्मृतम् । वृत्तक्षेत्रे परिधिगुणितव्यासपादः फलं तत् क्षुण्णं वेदैरुपरि परितः कन्दुकस्येव जालम् । गोलस्यैवं तदपि च फलं पृष्ठजं व्यासनिघ्नं षड्भिर्भक्तं भवति नियतं गोलगर्भे घनाख्यम्" । पुराणवर्णने विष्णुपु० अन्यथोक्तं यथा.

"जम्बुप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज ! । कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः । एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः । लवणेक्षुसुरासर्पिर्दधि-

दुग्धजलैः समः। जम्बूद्वीपः समस्तानामेतेषां मध्यसंस्थितः। तस्यापि मेरुर्मैत्रेय! मध्ये कनकपर्वतः। चतुरशीतिसाहस्रो योजनैरस्य चोच्छ्रयः। प्रविष्टः षोडशाधस्ताद् द्वात्रिंशन्मूर्द्ध्नि विस्तृतः। मूले षोडशसाहस्रो विस्तारस्तस्य भूभृतः। भूपद्मस्यास्य शैलोऽसौ कर्णिकावस्थितिः स्थितः। हिमवान् हेमकूटश्च निषधश्चास्य दक्षिणे। नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः। लक्षप्रमाणौ द्वौ मध्यौ दशहीनास्तथा परे। सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते। भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतम्। हरिवर्षं तथैवान्यं मेरोर्दक्षिणतो द्विजः। रम्यकञ्चोत्तरं वर्षं तथैवानु हिरण्मयम्। उत्तराः कुरवश्चैव यथा वै भारतं तथा। नवसाहस्रमेकैकमेतेषां द्विजसत्तम!। इलावृतञ्च तन्मध्ये सौवर्णो मेरुरुच्छ्रितः। मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतम्। इलावृतं महाभाग! चत्वार उपपर्वताः। विष्कम्भा रचिता मेरोर्योजनायुतमुच्छ्रिताः। पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः। विपुलः पश्चिमे भागे सुपार्श्वश्चोत्तरे स्मृतः। कदम्बस्तेषु जम्बूश्च पिप्पलो वट एव च। एकादशशतायामाः पादपा गिरिकेतवः। जम्बूद्वीपस्य सा जम्बूर्नामहेतुर्महामुने!। महागजप्रमाणानि जम्ब्वास्तस्याः फलानि वै। पतन्ति भूभृतः पृष्ठे शीर्य्यमाणानि सर्वतः। रसेन तेषां प्रख्याता तत्र जम्बूनदीति वै। सरित् प्रवर्त्तते सा च पीयते तन्निवासिभिः। न स्वेदो न च दौर्गन्ध्यं न जरा नेन्द्रियक्षयः। तत्पानात् स्वच्छमनसां जनानां तत्र जायते। तीरमृत्तत्र संप्राप्य सुखवायुविशोषिता। जाम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणम्। भद्राश्वं पूर्वतो मेरोः केतुमालञ्च पश्चिमे। वर्षे द्वे तु मुनिश्रेष्ठ! तयोर्मध्यमिलावृतम्। वनं चैत्ररथं पूर्वे दक्षिणे गन्धमादने। वैभ्राजं पश्चिमे तद्वदुत्तरे नन्दनं स्मृतम्। अरुणोदं महाभद्रं असितोदं समानसम्। सरांस्येतानि चत्वारि देवभोग्यानि सर्वदा। शीतान्तश्चैव मुञ्जश्च कुररो माल्यवांस्तथा। वैकङ्कप्रमुखा मेरोः पूर्वतः केसराचलाः। त्रिकूटः शिशिरश्चैव पतङ्गो रुचकस्तथा। निषधाद्या दक्षिणतस्तस्य केसरपर्वताः। शिखिवासः सवैदूर्य्यः कपिलो गन्धमादनः। जारुधिप्रमुखास्तद्वत् पश्चिमे केसराचलाः। मेरोरनन्तराङ्गेषु जठरादिष्ववस्थिताः। शङ्कुकूटोऽथ ऋषभो हंसो नागस्तथा परः। कालञ्जराद्याश्च तथा उत्तरे केसराचलाः। चतुर्दशसहस्राणि योजनानां महापुरी। मेरोरुपरि मैत्रेय। ब्रह्मणः प्रथिता पुरी। तस्याः समन्ततश्चाष्टौ दिशासु विदिशासु च। इन्द्रादिलोकपालानां प्रख्याताः प्रवराः पुरः। विष्णुपादविनिष्क्रान्ता पूरयित्वेन्दुमण्डलम्। समन्ताद् ब्रह्मणः पुर्य्यां गङ्गा पतति वै दिवः। सा तत्र पतिता दिक्षु चतुर्द्धा प्रत्यपद्यत। सीता चालकनन्दा च चक्षुर्भद्रा च वै क्रमात्। पूर्वेण शैलात् सीता तु शैलं यात्यन्तरीक्षगा। ततश्च पूर्ववर्षेण भद्राश्वेनैति चार्णवम्। भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून्। अतीत्योत्तरमम्भोधिं समभ्येति महामुने!। चक्षुश्च पश्चिमगिरीनतीत्य सकलांस्ततः। पश्चिमं केतुमालाख्यं वर्षमभ्येति सार्णवम्। तथा चालकनन्दापि दक्षिणेनैत्य भारतम्। प्रयाति सागरं भूत्वा सप्तभेदा महामुने!। आनीलनिषधायामौ माल्यवद्गन्धमादनौ। तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः। भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा। पत्राणि लोकपद्मस्य मर्य्यादाशैलबाह्यतः। जठरो देवकूटश्च मर्य्यादापर्वतावुभौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ। मेरोः पश्चिमदिग्भागे यथा पूर्वौ तथा स्थितौ। त्रिशृङ्गो जारुधिश्चैव उत्तरे वर्षपर्वतौ। पूर्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ। इत्येते मुनिवर्य्योक्ता मर्य्यादापर्वतास्तव। जठराद्याः स्थिता मेरोर्येषां द्वौ द्वौ चतुर्दिशम्। मेरोश्चतुर्दिशं ये तु प्रोक्ताः केसरपर्वताः। शीतान्ताद्या मुने! तेषामतीव हि मनोरमाः। शैलानामन्तरे द्रोण्यः सिद्धचारणसेविताः। सुरम्याणि तथा तेषु काननानि पुराणि च। लक्ष्मीविष्ण्वग्निसूर्य्यादिदेवानां मुनिसत्तम!। तान्यायतनवर्य्याणि जुष्टानि वरकिन्नरैः। गन्धर्वयक्षरक्षांसि तथा दैतेयदानवाः। क्रीडन्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम्। भौमा ह्येते स्मृताः स्वर्गा धर्म्मिणामालया मुने!। नैतेषु पापकर्म्माणो यान्ति जन्मशतैरपि। भद्राश्वे भगवान् विष्णुरास्ते हयशिरा द्विज!। वराहः केतुमाले तु भारते कूर्म्मरूपधृक्। मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते सनातनः। विश्वरूपेण सर्वत्र सर्वः सर्वेश्वरो हरिः। सर्वस्याधारभूतोऽसौ मैत्रेयास्तेऽखिलात्मकः। यानि किम्पुरुषाद्यानि वर्षाण्यष्टौ महामुने!। न तेषु शोको नायासो नोद्वेगः क्षुद्भयादिकम्। सुस्थ-

प्रजा निरातङ्काः सर्व्वदुःखविवर्ज्जिताः । दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः । न तेषु वर्षते देवो भौमान्यम्भांसि तेषु वै । कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना । सर्व्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः । नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम !” । “पराशर उवाच । उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् । वर्षं तद्भारतं नाम भारती यत्र सन्ततिः । नवयोजनसाहस्रो विस्तारोऽस्य महामुने ! । कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम् । महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः । विन्ध्यश्च पारि(या)त्रश्च सप्तात्र कुलपर्व्वताः । अतः संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति च । तिर्य्यक्त्वं नरकञ्चापि यान्त्यतः पुरुषा मुने ! । इतः स्वर्गश्च मोक्षश्च मध्यञ्चान्तश्च गम्यते । न खल्वन्यत्र मर्त्त्यानां कर्म्म भूमौ विधीयते । भारतस्यास्य वर्षस्य नवभेदान्निशामय । इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान् । नागद्वीपस्तथा सौम्यो गन्धर्व्वस्त्वथ वारुणः । अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः । योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् । पूर्व्वे किराता यस्यापि पश्चिमे यवनाः स्थिताः । ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः । इज्यायुधवणिज्याद्यैर्व्वर्त्तयन्तो व्यवस्थिताः । वेदस्मृतिमुखाश्चान्याः पारि(या)त्रोद्भवा मुने ! । नर्म्मदा सुरसाद्याश्च नद्यो विन्ध्यविनिर्गताः । तापीपयोष्णीनिर्व्विन्ध्या कावेरीप्रमुखा नदी । गोदावरीभीमरथीकृष्णवेण्यादिकास्तथा । सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः । कृतमालाताम्रपर्णीप्रमुखा मलयोद्भवाः । त्रिसामा ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः । ऋषिकुल्याकुमाराद्याः शुक्तिमत्पादसम्भवाः । शतद्रुचन्द्रभागाद्या हिमवत्पादनिःसृताः । आसां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः । तास्विमे कुरुपाञ्चालमध्यदेशादयो जनाः । पूर्व्वदेशादिकाश्चैव कामरूपनिवासिनः । ओड्राः कलिङ्गा मगधा दाक्षिणात्याश्च सर्व्वशः । तथापरान्ताः सौराष्ट्राः शूराभीरास्तथार्व्वुदाः । कारूषामालवाश्चैव पारि(या)त्रनिवासिनः । सौवीराः सैन्धवा हूणाः शाल्वाः शाकलवासिनः । मद्रारामास्तथाम्बष्ठाः पारसीकादयस्तथा । आसां पिबन्तः सलिलं वसन्ति सरितां सदा । चत्वारि भारते वर्षे युगान्यत्र महामुने ! । कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् । तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्विनः । दानानि चात्र दीयन्ते परलोकार्थमादरात् । पुरुषैर्य्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते । तत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने ! । यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः । अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ! । कदाचिल्लभते जन्तुर्म्मानुष्यं पुण्यसञ्चयम् । गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे । स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात् । कर्म्माण्यसंकल्पिततत्फलानि संन्यस्य विष्णौ परमात्मरूपे । अवाप्य तां कर्म्ममहीमनन्ते तस्मिंल्लयं ये त्वमलाः प्रयान्ति । जानीम नैतत् क्व वयं विलीने स्वर्गप्रदे कर्म्मणि देहबन्धम् । प्राप्स्याम धन्याः खलु ते मनुष्या ये भारते नेन्द्रियविप्रहीनाः । नववर्षन्तु मैत्रेय ! जम्बूद्वीपमिदं मया । लक्षयोजनविस्तारं संक्षेपात् कथितं तव । जम्बूद्वीपं समावृत्य लक्षयोजनविस्तृतः । मैत्रेय ! वलयाकारः स्थितः क्षारोदो बहिः ।” “पराशर उवाच । क्षारोदेन यथा द्वीपो जम्बुसंज्ञोऽभिवेष्टितः । संवेष्ट्य क्षारमुदधिं प्लक्षद्वीपस्तथा स्थितः । जम्बूद्वीपस्य विस्तारः शतसाहस्रसम्मितः । स एव द्विगुणो ब्रह्मन् ! प्लक्षद्वीपोऽप्युदाहृतः । सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै । ज्येष्ठः शान्तभयो नाम शिशिरस्तदनन्तरः । सुखोदयस्तथानन्दः शिवः क्षेमक एव च । ध्रुवश्च सप्तमस्तेषां प्लक्षद्वीपेश्वरा इमे । पूर्व्वं शान्तभयं वर्षं शिशिरं सुखदं तथा । आनन्दञ्च शिवञ्चैव क्षेमकं ध्रुवमेव च । मर्य्यादाकारकास्तेषां तथान्ये वर्षपर्व्वताः । सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम ! । गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा । सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः । वर्षाचलेषु रम्येषु सर्व्वेष्वेतेषु चानघाः । वसन्ति देवगन्धर्व्वसहिताः सततं प्रजाः । तेषु पुण्या जनपदाश्चिराच्च म्रियते जनः । नाधयो व्याधयो वापि सर्व्वकालसुखं हि तत् । तेषां नद्यश्च सप्तैव वर्षाणान्तु समुद्रगाः । नामतस्ताः प्रवक्ष्यामि श्रुताः पापं हरन्ति याः । अनुतप्ता शिखी चैव विपापा त्रिदिवा क्रमुः । अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः । एते शैलास्तथा नद्यः प्रधानाः कथितास्तव । क्षुद्रनद्यस्तथा शैलास्तत्र सन्ति सहस्रशः । ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते । अपसर्पिणी न तेषां वै न चैवोत्सर्पिणी प्रजा । नास्ति चात्र युगावस्था तेषु स्थानेषु सप्तसु । त्रेतायुगसमः कालः सर्व्वदैव महामते ! । प्लक्षद्वीपादिषु ब्रह्मन् ! शाकद्वीपान्तिकेषु वै । पञ्चवर्षसहस्राणि जना जीवन्त्यना-

भयाः। धर्माः पञ्चस्वथैतेषु वर्णाश्रमविभागजाः। वर्णाश्च तत्र चत्वारस्तान्निबोध वदामि ते। आर्यकाः कुरराश्चैव विविंशाभाविनश्च ते। विप्रक्षत्रियवैश्यास्ते शूद्राश्च द्विजसत्तम। जम्बूवृक्षप्रमाणस्तु तन्मध्ये सुमहा-तरुः। प्लक्षनामसंज्ञोऽयं प्लक्षद्वीपो द्विजोत्तम!। इज्यते भगवांस्तत्र तैर्वर्णैरार्यकादिभिः। सोमरूपी जगत्स्रष्टा सर्वः सर्वेश्वरो हरिः। प्लक्षद्वीपप्रमाणेन प्लक्षद्वीपसमावृतः। तथैवेक्षुरसोदेन परिवेशानुकारिणा। इत्येतत्तव मैत्रेय! प्लक्षद्वीपमुदाहृतम्। संक्षे-पेण मया भूयः शाल्मलं मे निशामय। शाल्मल-स्येश्वरो वीरो वपुष्मांस्तत्सुतान् शृणु। तेषान्तु नाम-संज्ञानि सप्त वर्षाणि तानि वै। श्वेतोऽत्र हरितश्चैव जीमूतो हरितस्तथा। वैद्युतो मानसश्चैव सुप्रभश्च महामुने!। शाल्मलेन समुद्रोऽसौ द्वीपेनेक्षुरसोदकः। विस्तारद्विगुणेनाथ सर्वतः संवृतः स्थितः। तत्रापि पर्वताः सप्त विज्ञेया रत्नयोनयः। रत्नाभिव्यञ्जकास्ते तु तथा सप्तैव निम्नगाः। कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः। द्रोणो यत्र महौषध्यः स चतुर्थो मही-धरः। कङ्कस्तु पञ्चमः षष्ठो महिषः सप्तमस्तथा। ककुद्मान् पर्वतवरः सरिन्नामानि मे शृणु। योनितोया वितृष्णा च चन्द्रा शुक्रा विमोचनी। निवृत्तिः सप्तमी तासां स्मृतास्ताः पापशान्तिदाः। श्वेतञ्च लोहितञ्चैव जीमूतं हरितं तथा। वैद्युतं मानसञ्चैव सुप्रभं नाम सप्तमम्। सप्तैतानि तु वर्षाणि चातुर्वर्ण्ययुतानि वै। शाल्मलेऽपि च ये वर्णा वसन्त्येते महामुने!। कपिला-श्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक्। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव यजन्ति तम्। भगवन्तं सम-स्तस्य विष्णुमात्मानमव्ययम्। वायुभूतं मखश्रेष्ठै-र्यज्वितोऽसत्कसंस्थितिम्। देवानामत्र सान्निध्यमतीव सुमनोरमे। शाल्मलिश्च महावृक्षो नाम निर्वृतिकारकः। एष द्वीपः समुद्रेण सुरोदेन समावृतः। विस्तारः शाल्-मलस्यैव समेन तु समन्ततः। सुरोदकः परिवृतः कुश-द्वीपेन सर्वतः। शाल्मलस्य तु विस्ताराद्द्विगुणेन सम-न्ततः। ज्योतिष्मतः कुशद्वीपे सप्त पुत्राः शृणुष्व तान्। उद्भिदो वेणुमांश्चैव सुरथो लम्बनो धृतिः। प्रभाकरोऽथ कपिलस्तन्नाम्ना वर्षपद्धतिः। तस्मिन् वसन्ति मनुजाः सह दैतेयदानवैः। तथैव देवगन्धर्वयक्षकिंपुरुषा-दिभिः। वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः।

दमिनः शुष्मिणः स्नेहा मन्देहाश्च महामुने!। ब्रा-ह्मणाः क्षत्रियाः वैश्याः शूद्राश्चानुक्रमोदिताः। यथोक्त-कर्मकर्तृत्वात् स्वाधिकारक्षयाय ते। तत्र यजन्ति कुशद्वीपे ब्रह्मरूपं जनार्दनम्। यजन्तः क्षपयन्त्युग्रमधिकारफल-प्रदम्। विद्रुमो हेमशैलश्च द्युतिमान् पुष्पवांस्तथा। कुशेशयो हरिश्चैव सप्तमो मन्दराचलः। वर्षाचलास्तु सप्तैव तत्र द्वीपे महामुने!। नद्योऽपि सप्त तासाञ्च शृणु नामान्यनुक्रमात्। धूतपापा शिवा चैव पवित्रा सम्मतिस्तथा। विद्युदम्भा मही चैव सर्वपापहरा-स्त्विमाः। अन्याः सहस्रशस्तत्र क्षुद्रनद्यस्तथाऽचलाः। कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत् स्मृतम्। तत्प्रमा-णेन स द्वीपो घृतोदेन समावृतः। घृतोदश्च समुद्रो वै क्रौञ्चद्वीपेन संवृतः। क्रौञ्चद्वीपो महाभाग! श्रूयताञ्चा-परो महान्। कुशद्वीपस्य विस्ताराद्द्विगुणो यस्य वि-स्तरः। क्रौञ्चद्वीपे द्युतिमतः पुत्राः सप्त महात्मनः। तन्ना-मानि च वर्षाणि तेषाञ्चक्रे महीपतिः। कुशलो मन्दग-श्चोष्णः पीवरोऽथान्धकारकः। मुनिश्च दुन्दुभिश्चैव सप्तैते तत्सुता मुने!। तत्रापि देवगन्धर्वसेविताः सुमनोरमाः। वर्षाचला महाबुद्धे! तेषां नामानि मे शृणु। क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः। चतुर्थो रत्नशैलश्च स्वभाभिर्भासयत्प्रभः। देवावृत् पञ्चमश्चैव तथा सः पुण्ड-रीकवान्। दुन्दुभिश्च महाशैलो द्विगुणास्ते पर-स्परम्। द्वीपद्वीपेषु ये शैला यथा द्वीपानि ते तथा। वर्षेष्वेतेषु रम्येषु वर्षशैलवरेषु च। निवसन्ति निरा-तङ्काः सहदेवगणैः प्रजाः। पुष्कराः पुष्कलाधन्याश्च ख्याताश्च महामुने!। ब्राह्मणाः क्षत्रियावैश्याः शूद्राश्चा-नुक्रमोदिताः। ते तत्र नद्यो मैत्रेय! याः पिबन्ति शृ-णुष्व ताः। सप्त प्रधानाः शतशस्तत्रान्याः क्षुद्रनिम्नगाः। गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा। ख्यातिश्च पुण्डरीका च सप्तैता वर्षनिम्नगाः। तत्रापि वर्णैर्भग-वान् पुष्कराद्यैर्जनार्दनः। योगिरुद्रस्वरूपस्तु इज्यते यज्ञसन्निधौ। क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च। आवृतः सर्वतः क्रौञ्चद्वीपतुल्येन मानतः। दधि-मण्डोदकश्चापि शाकद्वीपेन संवृतः। क्रौञ्चद्वीपस्य विस्ताराद् द्विगुणेन महामते!। शाकद्वीपेश्वरस्यापि भव्यस्य सुमहात्मनः। सप्तैव तनयास्तेषां ददौ वर्षाणि सप्त च। जलदश्च कुमारश्च सुकुमारो मणीरकः। कुसु-मोदः समोदाकिः सप्तमश्च महाद्रुमः। तत्संज्ञान्यपि-

तान्येव सप्त वर्षाण्यनुक्रमात् । तत्रापि पर्वताः सप्त वर्षविच्छेदकारिणः । पूर्वस्तत्रोदयगिरिर्जलाधारस्तथा परः । तथा रैवतकः श्यामस्तथैवास्तगिरिर्द्विज ! । आम्बिकेयस्तथा रम्यः केशरी पर्वतोत्तमः । शाकस्तत्र महावृक्षः सिद्धगन्धर्वसेवितः । यत्पत्रवातसंस्पर्शादाह्लादो जायते परः । तत्र पुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः । नद्यश्चात्र महापुण्याः सर्वपापभयापहाः । सुकुमारी कुमारी च नलिनी रेणुका तथा । इक्षुश्च धेनुका चैव गभस्ती सप्तमी तथा । अन्याश्च शतशस्तत्र क्षुद्रनद्यो महामुने ! । महीधरास्तथा सन्ति शतशोऽथ सहस्रशः । ताः पिबन्ति मुदा युक्ता जलदादिषु ये स्थिताः । वर्षेष्वेते जनपदाः स्वर्गादभ्येत्य मेदिनीम् । धर्महानिर्न तेष्वस्ति न संघर्षः परस्परम् । मर्य्यादाव्युत्क्रमो नापि तेषु देशेषु सप्तसु । मगाश्च मागधाश्चैव मानसा मन्दगास्तथा । मगा ब्राह्मणभूयिष्ठा मागधाः क्षत्रियास्तथा । वैश्यास्तु मानसास्तेषां शूद्रास्तेषां तु मन्दगाः । शाकद्वीपे तु तैर्विष्णुः सूर्य्यरूपधरो मुने ! । यथोक्तैरिज्यते सम्यक्कर्मभिर्नियतात्मभिः । शाकद्वीपस्तु मैत्रेय ! क्षीरोदेन समन्ततः । शाकद्वीपप्रमाणेन वलयेनेव वेष्टितः । क्षीराब्धिः सर्वतो ब्रह्मन् ! पुष्कराख्येन वेष्टितः । द्वीपेन शाकद्वीपात्तु द्विगुणेन समन्ततः । पुष्कराख्यद्वीपपतेर्महावीतोऽभवत् सुतः । धातकिश्च तयोस्तत्र द्वे वर्षे नामचिह्निते । महावीतं तथैवान्यत् धातकीखण्डसंज्ञितम् । एकश्चात्र महाभाग ! प्रख्यातो वर्षपर्वतः । मानसोत्तरसंज्ञो वै मध्यतो वलयाकृतिः । योजनानां सहस्राणि ऊर्द्ध्वं पञ्चाशदुच्छ्रितः । तावदेव च विस्तीर्णः सर्वतः परिमण्डलः । पुष्करद्वीपवलयं मध्ये संविभजन्निव । स्थितोऽसौ समहान् शैलो व्याप्य तद्वर्षकद्वयम् । वलयाकारमेकैकं तयोर्मध्ये तथा गिरिः । दशवर्षसहस्राणि यत्र जीवन्ति मानवाः । निरामया विशोकाश्च रागद्वेषविवर्जिताः । अधमोत्तमौ न तेष्वास्तां न वध्यवधकौ द्विज ! । नेर्ष्यासूयाभयं रोषो दोषो लोभादिको न च । महावीतं बहिर्वर्षं धातकीखण्डमन्ततः । मानसोत्तरशैलस्य देवदैत्यादिसेवितः । सत्यानृते न तत्रास्तां द्वीपे पुष्करसंज्ञिते । न तत्र नद्यः शैला वा द्वीपे वर्षद्वयान्विते । तुल्यवेषास्तु मनुजा देवैस्तत्रैकरूपिणः । वर्णाश्रमाचारहीनं धर्माहरणवर्जितम् । त्रयीवार्त्तादण्डनीतिशुश्रूषारहितञ्च तत् । वर्षद्वयन्तु मैत्रेय ! भौमः स्वर्गोऽयमुत्तमः । सर्वस्य सुखदः कालो जरारोगादिवर्जितः । पुष्करे धातकीखण्डे महावीते च वै मुने ! । न्यग्रोधः पुष्करद्वीपे ब्रह्मणः स्थानमुत्तमम् । तस्मिन्निवसति ब्रह्मा पूज्यमानः सुरासुरैः । स्वादूदकेनोदधिना पुष्करः परिवेष्टितः । समेन पुष्करस्यैव विस्तारान्मण्डलात्तथा । एवं द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः । द्वीपश्चैव समुद्रश्च समानौ द्विगुणौ परौ । पयांसि सर्वदा सर्वसमुद्रेषु समानि वै । न्यूनातिरिक्तता तेषां कदाचिन्नैव जायते । स्थालीस्थमग्निसंयोगादुद्रेकि सलिलं यथा । तथेन्दुवृद्धौ सलिलमम्भोधौ मुनिसत्तम ! । अन्यूनानतिरिक्ताश्च वर्द्धन्त्यापो ह्रसन्ति च । उदयास्तमनेष्विन्दोः पक्षयोः शुक्लकृष्णयोः । दशोत्तराणि पञ्चैव ह्यङ्गुलानां शतानि वै । अपां वृद्धिक्षयौ दृष्टौ सामुद्रीणां महामुने ! । भोजनं पुष्करद्वीपे तत्र स्वयमुपस्थितम् । यत्र संभुञ्जते विप्र ! प्रजाः सर्वाः सदैव हि । स्वादूदकस्य पुरतो दृश्यते लोकसंस्थितिः । द्विगुणा काञ्चनी भूमिः सर्वजन्तुविवर्जिता । लोकालोकस्ततः शैलो योजनायुतविस्तरः । उच्छ्रायेणापि तावन्ति सहस्राण्यचलो हि सः । ततस्तमः समावृत्य तं शैलं सर्वतः स्थितम् । तमश्चाण्डकटाहेन समन्तात् परिवेष्टितम् । पञ्चाशत्कोटिविस्तीर्णा सेयमुर्वी महामुने ! । सहैवाण्डकटाहेन सद्वीपाब्धिमहीधरा । सेयं धात्री विधात्री च सर्वभूतगुणाधिका । आधारभूता सर्वेषां मैत्रेय ! जगतामिति" ।

भूगोलस्य स्थिरत्वे युक्तिः खगोलग्रन्थे उक्ता अधिकमत्र किञ्चिदुच्यते इंलण्डीयज्योतिर्विदां मते भूगोलस्यैव दक्षिणोत्तरगतिभ्यां सूर्य्यस्य उत्तरदक्षिणगतित्वं कल्प्यते स्थिरस्य सूर्य्यस्य उत्तरदक्षिणायनयोरसम्भवादिति । तदेतन्मतमतीवासमञ्जसं भूगोलस्य दक्षिणोत्तरगतिस्वीकारे सूर्य्यस्येव कृत्तिकारोहिणीशकटमृगव्याधादीनामपि उत्तरदक्षिणयोर्गतिः प्रसज्येत न च तथा दृश्यते तेषाञ्च यथा विक्षेपनामशरसंख्या सौरागमे पठिता तादृशान्तर एव प्रत्यहं दर्शनं न मनागपि उत्तरदक्षिणाश्रयमिति विवेच्य भूगोलस्य स्थिरत्वमनुसन्धातव्यम् ।

भूच्छाया, स्त्री भुवश्छाया । सूर्य्यकिरणावरणकारणात् आपन्ने राहुपदाभिधाने १तमसि २अन्धकारे च शब्दमाला ।

भूजन्तुः, पुं भूरिव जन्तुः । नागे हस्तिनि राजनि० ।

भूजम्बूः, स्त्री भुवो जम्बूरिव स्वादुत्वात् । १गोधूमे २विकङ्क-

तस्करे च (वद्रिच) मेदि॰ भूमिजीवा जन्तुः शब्द॰त॰ २कुकुरजन्ताम् । भूमिजम्बादयोऽप्यत्र स्त्री

भूत न॰ भू-क्त । १न्याय्ये उचिते पृथिवीजलतेजोवायुगगन-रूपेषु गन्धादिविशेषगुणवत्सु २द्रव्येषु, ४सत्ये, यथार्थे वास्तविके 'भूतमप्यनुपन्यस्तं हीयते व्यवहारतः" इति स्मृतिः । ५तत्त्वानुसन्धाने च "क्षमं निरस्य भूतेन" स्मृतिः । ६पिशाचादौ पु॰ ७कुमारे ८योगीन्द्रे ९जन्तुपक्षे १०प्राणिनि च न॰ । ११अतीते वृत्ते १२सदृशे १३प्राप्ते १४वस्त्रार्थे त्रि॰ । १५कृष्णचतुर्दश्यां स्त्री टाप् । भूतत्वं च आत्मान्यत्वे सति विशेषगुणवत्त्वम् न तु जातिः मूर्त्तत्वेन साङ्कर्य्यात् तथाहि भूतत्वाभाववति मनसि मूर्त्तत्वस्य सत्त्वात् मूर्त्तत्वाभाववति गगने भूतत्वस्य सत्त्वात् उभयोः परस्परभावसामानाधिकरण्यम् पृथिव्यादिषु चतुर्षु च भूतत्वमूर्त्तत्वयोरुभयोः सत्त्वात् परस्परसामा-नाधिकरण्यमिति साङ्कर्य्यात् जातिव्याघातकता ।

भूतकला स्त्री ६त॰ । शा॰ ति॰ उक्ते धरादिभूतानामुत्-पादके निवृत्त्याद्ये शक्तिभेदे "धरादिपञ्चभूतानां निवृ-त्त्याद्याः कलाः स्मृताः । निवृत्तिः सुप्रतिष्ठा स्यात् विद्या शान्तिरनन्तरम् । शान्त्यतीतेति ता ज्ञेया नादरेक-वल्लभाः" शा॰ ति॰ "शक्तिः प्रथमसम्भूता शान्त्य-तीतापदोत्तरा शान्त्यतीतापदाक्रान्तस्ततः शान्तिपदं क्रमात् । ततो विद्यापदं तस्मात् प्रतिष्ठापदसंभवः । निवृत्तिपदमुत्पन्नं प्रतिष्ठापदतः परम् । एवमुक्ता च-याचेन सृष्टिरीश्वरचोदिता । आनुलोम्यादथैतेषां प्राति-लोम्येन संहृतिः । अथात् पञ्चपदोद्दिष्टात् सृष्टरन्तर-मिष्यते । कलाभिः पञ्चभिर्व्याप्तं यस्मादिदमिदं जगत्" राघवभट्टधृतवायवीयसंहिता ।

भूतकेश पु॰ भूतानां केश इव । (भूतकेश) नामके १तृणभेदे स्त्रीत्वमपि ङीष् । सा च तत्र, २शेफालिकायां च टाप् । ३नीलसिन्धुवारे स्त्री ङीप् ।

भूतक्रान्ति स्त्री ६त॰ । पिशाचावेशे राजनि॰ ।

भूतगन्धा स्त्री॰ भूतः प्रभूतः गन्धो यस्याः । मुरानामगन्ध-द्रव्ये जटाध॰ ।

भूतगुण पु॰ ६त॰ । आकाशादीनां शब्दस्पर्शादिषु विशेष-गुणेषु "शब्दस्पर्शरूपरसगन्धा भूतगुणाः स्मृताः" शा॰ति॰ "भूतगुणा भूतविशेषगुणा इत्यर्थः राघवः" । तत्रैव भू-तानामेकैकविशेषगुणा उक्ता यथा, "आकाशस्य गुणः शब्दो वायोः स्पर्शः तेजसो रूपं जलस्य रसः भूमेर्गन्धः इति नैयायिकादयः । सांख्यादयस्तु अन्यथाङ्गीचक्रुर्यथोक्त-मीशानसंहितायाम् "शब्दैकगुण आकाशः शब्दस्पर्श-गुणो मरुत् । शब्दस्पर्शरूपगुणैस्त्रिगुणं तेज उच्यते । शब्दस्पर्शरूपरसैरापो ज्ञेयाश्चतुर्गुणाः । शब्दस्पर्शरूप-रसगन्धैः पञ्चगुणा मही" ।

भूतघ्न पु॰ भूतं हन्ति हन-टक् । १भूर्जपत्रे राजनि॰ तद्धारणे हि बालग्रहभूतादिनिवारणं शास्त्रे प्रसिद्धम् । भूतं प्रकृतं गन्धं हन्ति अधःकरोति । २लशुने २उष्ट्रे च राजनि॰ । ३भूतनाशके त्रि॰ हेमच॰ । ४तुलस्यां स्त्री राजनि॰ ङीप् ।

भूतचतुर्दशी स्त्री॰ भूतप्रिया चतुर्दशी तदुद्देशेन तस्यां दीपदानात् । आश्विनकृष्णपक्षचतुर्दश्यां दीपान्विता-मावास्यापूर्वतिथौ यमचतुर्दश्याम् ।

भूतजटा स्त्री भूतस्य पिशाचस्य जटेव । १जटामांस्याम् शब्दमा॰ । २गन्धमांस्यां राजनि॰ ।

भूतद्राविन् पु॰ भूतान् पिशाचान् द्रावयत्यपसारयति द्रु-णिच्-णिनि । १रक्तकरवीरवृक्षे २भूताङ्कुशवृक्षे च राजनि॰

भूतद्रुम पु॰ भूतइव द्रुमः । श्लेष्मातकवृक्षे । भूतवृक्षादयोऽ-प्यत्र । भूतप्रियः द्रुमः शाक॰त॰ । २शाखोटकवृक्षे ।

भूतधात्री स्त्री॰ भूतानि जन्तून् धारयति धा-तृच् ङीप् । पृथिव्याम् त्रिका॰ ।

भूतनाथ पु॰ ६त॰ । १शिवे २वटुकभैरवे च । "भैरवो भूत-नाथश्च" इति वटुकस्तोत्रम् । भूतेशभूतपत्यादयोऽप्यत्र ।

भूतनाशन न॰ भूतान् नाशयति नश-णिच्-ल्यु । १रुद्राक्षे राजनि॰ २सर्षपे पु॰ ३भल्लातके च रत्नमा॰ ।

भूतपक्ष पु॰ भूतप्रियः पक्षः अन्धकारवत्त्वात् । कृष्णपक्षे ।

भूतपत्री स्त्री भूतइव कृष्णं पत्रं यस्याः ङीष् । कृष्ण-तुलस्याम् राजनि॰ । [रत्नमा॰

भूतपुष्प पु॰ भूत इव पुष्पं कृष्णत्वात् यस्य । श्योनाकवृक्षे

भूतपूर्णिमा स्त्री आश्विनपूर्णिमायाम् शब्दर॰ ।

भूतभावन पु॰ भूतानि पृथिव्यादीनि भावयति उत्पादयति भू-णिच्-ल्यु, भूता सत्या यथार्था भावना यस्य वा । १विष्णौ, २वटुकभैरवे च "भूतात्मा भूतभावनः" इति तयोः स्तोत्रे ।

भूतमण्डल न॰ ६त॰। शा॰ति॰ उक्ते पृथिव्यादीनां मण्डल-भेदे तत्स्वरूपं तत्रोक्तं यथा 'वृत्तं दिक्स्वरयुक् वज्रविन्दु-लाञ्छितं धारितम्नः । त्रिकोणं स्वस्तिकोपेतं वह्ने-रर्द्धेन्दुसंयुतम् । षट्कोणमथवो भूमेश्चतुरस्रं सवज्र-कम् । तत्तद्भूतमण्डलानि क्रमशानि विदुर्बुधाः । एतैः

वैरञ्जिताग्याहुः स्वस्थानामादृतान्यपि"। "वर्णैः श्वेतादिभिर्भूतवर्णैरजोभिरञ्जितानीति पदार्थादर्शः। तत्रैतद्व्याख्या विस्तरेण दृश्या। मन्त्रमहोदधौ तेषां स्वरूपं कर्मविशेषे विनियोगश्चोक्तो यथा "अर्द्धचन्द्रनिभं पार्श्वद्वये पद्मद्वयाङ्कितम्। जलस्य मण्डलं प्रोक्तं प्रशस्तं शान्तिकर्मणि। त्रिकोणं स्वस्तिकोपेतं वश्ये वह्नेस्तु मण्डलम्। चतुरस्रं वज्रयुक्तं स्तम्भे भूमेस्तु मण्डलम्। वृत्तं दिवस्तु विद्वेषे बिन्दुषट्काङ्कितं तु तत्। वायुमण्डलमुच्चाटे मारणे वह्निमण्डलम्"।

भूतमारिन् पु० भूतान् पिशाचान् मारयति अपसारयति मृ-णिच्-णिनि। चिड़ानामगन्धद्रव्ये राजनि०।

भूतयज्ञ पु० भूतानि प्राणिनो वायसादीन् उद्दिश्य यज्ञो वलिः। नित्यं गृहस्थकर्त्तव्यपञ्चयज्ञान्तर्गते बलिवैश्वदेव कर्मणि 'भूतेभ्यो बलिहरणं भूतयज्ञः" हारीतस्मृतिः।

भूतयोनि स्त्री ६त०। भूतानामाकाशादीनां कारणे परमेश्वरे वेदान्तोप०। [भूमेरधोभागे।

भूतल न० भूरेव तलम्। १पृथिव्याम्। ६त०। २पाताले

भूतलिका स्त्री भूतलं पातालं मूलत्वेनास्त्यस्याः ठन्। पृक्कायाम् (पिड़िङ्शाक) राजनि० बहुदूरगमूलत्वात्तस्यास्तथात्वम्।

भूतलिपि स्त्री ६त०। भूतदैवत्ये वर्णभेदे "वाय्वग्निभूजलाकाशाः पञ्चाशल्लिपयः क्रमात्। पञ्च ह्रस्वाः पञ्च दीर्घा बिन्द्वन्ताः सन्धिसम्भवाः। पञ्चशः कादयः षष्ठवकारान्ताः प्रकीर्त्तिताः" शा० ति०। कुलाकुलचक्रशब्दे २१२४पृ० दृश्यम्।

भूतलोन्माद पु० दानवभेदे हरिवं० २४अ०।

भूतवर्ण पु० ६त०। ध्येये भूतानां श्वेतादिवर्णे यथोक्तं शा०ति० "स्वच्छं वियन्मरुत् कृष्णो रक्तोऽग्निर्विशदं पयः। पीता भूमिः पञ्चभूतान्येकैकाधारतो विदुः"। "स्वच्छं श्वेतं तत्र केषाञ्चिदरूपित्वाद्वर्णकथनमुपादानार्थं स्वभावानुरोधेन" राघवः। भूतदैवते ह्रस्वदीर्घसहिते वर्णादिवर्णे च। भूतलिपिशब्दे कुलाकुलचक्रशब्दे च दृश्यम्।

भूतवास पु० ७त०। (बयड़ा) विभीतकवृक्षे। भूतावासादयोऽप्यत्र [यतः। अपस्माररोगे राजनि०

भूतविक्रिया स्त्री भूतानां तदाविष्टानामिव विक्रिया

भूतविद्या स्त्री भूतादिनिवारणार्था विद्या। सुश्रुतोक्ते देवाद्युपसर्गोपशमार्थे वलिहरणादौ "भूतविद्या नाम देवासुरगन्धर्वयक्षरक्षःपितृपिशाचनागग्रहाद्युपसृष्टचेतसां शान्तिकर्म वलिहरणादि ग्रहोपशमनार्थम्" सा च तत्र उत्तरतन्त्रे दर्शिता "ब्रह्मविद्या क्षत्रविद्या नक्षत्रविद्या भूतविद्या सर्पविद्या" छा०उ०। [शेफालिकायाम् अमरः।

भूतवेशी स्त्री भूतानामिव वेशोऽस्याः गौरा० ङीष्। श्वेत-

भूतब्रह्मन् पु० भूतः पिशाच इव ब्रह्मा। देवले ग्रहमाला।

भूतशुद्धि स्त्री० भूतानां देहारम्भकपृथिव्यादीनां शुद्धिर्भावनाविशेषात् शोधनम्। तन्त्रादौ प्रसिद्धे देहारम्भकचतुर्विंशतितत्त्वानां भावनाविशेषेण संस्कारेण देवरूपतासम्पादने। भूतशुद्धिप्रकारस्तन्त्रसारे उक्तो यथा गौतमीये "सुषुम्णावर्त्मना सोऽहमिति मन्त्रेण योजयेत्। सहस्रारे शिवे स्थाने परमात्मनि देशिकः। धूम्रवर्णं ततो वायुबीजं(यं) षड्बिन्दुलाञ्छितम्। पूरके ईड़या वायुं सुधीः षोड़शमात्रया। मात्रया तु चतुःषष्ट्या कुम्भयेच्च सुषुम्णया। द्वात्रिंशन्मात्रया मन्त्री रेचयेत् पिङ्गलाख्यया। पूरयेद्वनया चैव सञ्चिन्त्य शोषमारुतम्। रक्तवर्णं वह्निबीजं (रं) त्रिकोणं स्वस्तिकान्वितम्। तेन पूरकयोगेन मात्रया षोड़शाख्यया। चतुःषष्ट्या मात्रया च निर्दहेत् कुम्भकेन च। वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम्। ब्रह्महत्याशिरःस्कन्धं स्वर्णस्तेयभुजद्वयम्। सुरापानहृदायुक्तं गुरुतल्पकटिद्वयम्। तत्संसर्गिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम्। उपपातकरोमाणं रक्तश्मश्रुविलोचनम्। खड्गचर्मधरं क्रुद्धमेवं कुक्षौ विचिन्तयेत्। मूलाधारोत्थितेनैव वह्निना निर्दहेत्तु तम्। एवं चन्द्रस्य परितो द्वात्रिंशन्मात्रया ततः। भस्मना सहितं मन्त्री रेचयेदिड़या पुनः। वामनाशां चन्द्रबीजं (ठं) कुन्देन्दुयुतसन्निभम्। भालेन्दुबीजे संयोज्य ततः षोड़शमात्रया। सुषुम्णया चतुःषष्टिमात्रया तोयबीजकम (वं)। ध्यात्वाऽमृतमयीं हृदि पञ्चाशद्वर्णरूपिणीम्। तया देहं विचिन्त्यैवं मनसा पिङ्गलाध्वना। द्वात्रिंशन्मात्रया मन्त्री लं-बीजेन दृढं नयेत्। स्वस्थाने हंसमन्त्रेण पुनस्तेनैव वर्त्मना। जीवं तत्त्वानि चानीय स्वस्थाने स्थापयेत् ततः। इति कृत्वा भूतशुद्धिं मातृकान्यासमाचरेत्"। ततो हंस इति बीजं हृदयमानीय कुलकुण्डलिनीं पृथिव्यादीनि च यथास्थाने स्थापयेत्। विशेषतस्तु शक्तिविषये। हंस इति जीवादिकं परमशिवे संयोज्य सोऽहमिति मन्त्रेण स्थाने नयेत्। तन्त्रान्तरे "सोऽहमेवं

समानाय्य जीवं हृदि समानयेत्"। शूद्रे तु विशेषो वाराहीतन्त्रे "हंसाख्यं न चरेत् शूद्रो भूतशुद्धौ कदाचन। चरणाचरणं याति दीक्षा च विफला भवेत्"। शारदायाम् "जीवं तेजोमयं ध्यात्वा तमो मन्त्रेण योजयेत्"। भूतशुद्धिपदव्युत्पत्तिमाह विश्वसारे "शरीराकारभूतानां भूतानां यद्विशोधनम्। अव्ययब्रह्मसंयोगात् भूतशुद्धिरियं मता" वाराहीये "मूलाधारात्ततो बीजं ब्रह्ममार्गेण देशिकः। हंसेन पुष्करस्थाने परमात्मनि योजयेत्"। ब्रह्ममार्गः सुषुम्णा। त्रिपुरासारसमुच्चये "संयोज्य बीजमथ दुर्गममध्यनाडी-मार्गेण पुष्करनिविष्टशिवे सुसूक्ष्मे"। ज्ञानार्णवे "प्राणप्रतिष्ठया पश्चात् जीवं देहे निधापयेत्। सुसूक्ष्मं सुषुम्णाया हंसस्तु विपरीतकः। उद्धरेत् परमेशानि! विद्येयं त्र्यक्षरी मता। प्राणप्रतिष्ठामन्त्रोऽयं सर्वकर्माणि साधयेत्। तेनैव विधिना देवि! स्थिरीकुर्य्यान्निजां तनुम्"। तारादौ विशेषस्तत्रैव द्रष्टव्यः।

भूतसञ्चार पु० ६त०। भूतावेशे राजनि०।

भूतसञ्चारिन् पु० भूत इव सञ्चरति सम्+चर-णिनि। दावानले शब्दमा०। [हि भाषते"।

भूतसंप्लव पु० ६त०। प्रलये "आभूतसंप्लवस्थानममृतत्वं

भूतसर्ग पु० ६त०। भूतसृष्टौ स च चतुर्दशविधः यथोक्तं वह्निपु० "ब्राह्मं प्राजापत्यञ्च सौम्यमैन्द्रन्तथैव च। गान्धर्वमथ कौबेररक्षःपैशाचमानुषम्। स्थावरं पाशवं मार्गं सार्पं शाकुनिकन्तथा। चतुर्दशविधं ह्येतद्भूतसर्गं प्रकीर्त्तितम्" क्लीवत्वमार्षम्।

भूतसाधनी स्त्री भूतानि प्राणिनः साधयति अत्र आधारे ल्युट् ङीप। भूमौ। भूमिं विना जन्तुमात्राणामुत्पत्तेरभावात् तस्यास्तथात्वम् यजु०२६।१ वेददीपः। [राजनि०

भूतसार पु० भूत इव कृष्णत्वात् सारोऽस्य। श्योनाकवृक्षे

भूतहन्त्री स्त्री भूतान् तद्भयं हन्ति हन-तृच् ङीप्। १वन्ध्याकर्कोट्यां, २श्वेतदूर्वायाञ्च तद्धारणे हि स्त्रीणां प्रजोत्पत्तिरोधकभूतभयनाशः। [राजनि०

भूतहर पु० भूतान् हरति अपसारयति हृ-अच्। गुग्गुलौ

भूतहारिन् पु० भूतान् हरति स्थानान्तरं नयति हृ-णिनि। देवदारुवृक्षे राजनि०।

भूतांश पु० १ऋषिभेदे ऋ० १०।१०६।११। २काश्यपर्षौ निरु० १२।४०। ६त०। ३भूतानामंशे च। [स्थनामख्याते वृक्षे।

भूताङ्कुश पु० भूतानां पिशाचानामङ्कुश इवापसारकत्वात्।

भूतात्मन् पु० भूतानि पृथिव्यादीनि पञ्च द्रव्याणि आत्मा स्वरूपं यस्य। १देहे भूतानि पञ्च द्रव्याणि भूताः प्राणिनश्च आत्मा स्वरूपं यस्य। २परब्रह्मणि "सर्वं खल्विदं ब्रह्म तज्जलानिति" श्रुतिः। ३सर्वभूतात्मके हिरण्यगर्भे ४विष्णौ ५बहुकलेवरे च 'भूतात्मा भूतभावनः' इति तयोः स्तोत्रे।

भूतादि पु० ६त०। "परमेश्वरे भूतादिर्निधिरव्ययः" विष्णुस० सांख्यमतसिद्धे २अहङ्कारतत्त्वे "अहङ्कारात् पञ्चतन्मात्राणि"सां०सू० स्वार्थे क तत्रार्थे।

भूतारि पु० ६त०। हिङ्गौ राजनि० तद्गन्धेन हि भूतापसरणमिति तस्य तथात्वम्।

भूतार्त्त त्रि० ३त०। पिशाचाविष्टे हेमच०।

भूतार्थ पु० भूतः सत्यभूतोऽर्थो यस्य। यथार्थे

भूताली स्त्री० भूतानीव अलति पर्य्याप्नोति अल-अच् गौरा० ङीष्। १भूमिपाटल्यां, २भूम्यामलक्यां राजनि०।

भूतावास पु० भूतानां प्राणिनामावासः अधिष्ठानत्वात्। १विष्णौ, "भूतावासो वासुदेवः"विष्णुस०।"वसन्ति त्वयि भूतानि भूतावासस्ततो हरिः" हरिवं० ६त०।२विभीतकवृक्षे राजनि०।

भूताविष्ट त्रि० भूतेनाविष्टः। पिशाचग्रस्ते "भूताविष्टेषु पञ्चाशत् स्वतापत्यासु वै शतम्" ज्यो०त०।

भूतावेश पु० ६त०। पिशाचप्रवेशे (भूते पाओया) त्रिका०।

भूति स्त्री भू-क्तिन्। १भवने २अणिमाद्यष्टविधैश्वर्ये ३शिवाङ्गस्थभस्मनि ४गजवेशे च मेदि०५भूतृणे ६सम्पत्तौ ७जात्यां त्रिकाः ८वृद्धिनामौषधे च राजनि०।

भूतिक न०भूत्या सम्पत्त्या कायति कै-क। १भूनिम्बे २कत्तृणे च अमरः। ३यमान्याम् ४चन्दने ५कट्फले हेमच०। पृ० वा दीर्घः। भूतीकोऽप्यत्र त्रिलके भावप्र०। [शब्दमा०।

भूतिकील पु० भूतेः सम्पत्तेः कील इव। (खाना) भूमिखाते

भूतितीर्था स्त्री कुमारानुचरमातृभेदे भा० श० ४७अ०।

भूतियुवक पु०कूर्मचक्रस्य वामकुक्षिस्थे देशभेदे मार्कपु०५८अ०

भूतिलय पु० तीर्थभेदे भा०व० १२९अ०।

भूतृण न० भुव इव तृणं गन्धवत्त्वात् (गन्धखड) १तृणभेदे रत्नमा० २रोहिषतृणे पु० राजनि०।

भूतेश ६त०। १प्रथमाधीशे २परमेश्वरे च भूतेश्वरादयोऽप्यत्र।

भूतेष्टा स्त्री ६त०। आश्विनकृष्णचतुर्दश्याम्।

भूतोड्डामर न० तन्त्रभेदे।

भूतोन्माद पु० भूतकृत उन्मादः। पिशाचकृते उन्मादे।

भूत्तम न॰ भुवि उत्तमम्। सुवर्णे हेमच॰।

भूदरीभवा स्त्री॰ भूदर्यां भूमिविवरे भवति भू-अच्। आखु-कर्ण्याम् (उन्दुरकानि) भावप्र॰।

भूदार पुंस्त्री॰ भुवं दृणाति खनति मुखाग्रेण दृ-अण्। शूकरे अमरः स्त्रियां जातित्वात् ङीष्।

भूदेव पु॰ भुवि देव इव। विप्रे अमरः। भूसुरादयोऽप्यत्र

भूधन पु॰ भूरेव धनमस्य। नृपे हेमच॰।

भूधर पु॰ भुवं धरति धृ-अच्। पर्वते अमरः।

भूध्र पु॰ भुवं धरति धृ—क। महीध्रे पर्वते हेमच॰।

भूधात्री स्त्री भुवि जाता धात्री आमलकी शाक॰त॰। भूम्या-मलक्याम् राजनि॰।

भूनाग पु॰ भुवि नाग इव। कृमिभेदे राजनि॰। [राजनि॰

भूनिम्ब पु॰ भुवि जातः निम्बः शाक॰त॰। (चिराता) क्षुपभेदे

भूनिम्बाद्य न॰ चक्रदत्तोक्ते औषधभेदे "भूनिम्बकटुका व्योषमुस्तकेन्द्रयवान् समान्। द्वौ चित्रकात् वत्सक-त्वग्भागान् षोडश चूर्णयेत्। गुडशीताम्बुना पीतं ग्रहणीदोषगुल्मनुत्। कामलाज्वरपाण्डुत्वमेहारु-च्यतिसारनुत्। गुडयोगात् गुडाम्बु स्यात् गुडवर्ष रसान्वितम्"।

भूनीप पु॰ भुवि जातो नीपः शाक॰त॰। भूमिकदम्बे राजनि॰

भूप पु॰ भुवं पाति पा-क। भूमिपाले अमरः भूमिपादयोऽप्यत्र।

भूपति पु॰ ६त॰। नृपे भूमिपत्यादयोऽप्यत्र।

भूपद पु॰ भुवि पदं मूलं यस्य। १वृक्षमात्रे शब्दच॰। २मल्लि-कायां स्त्री॰ ङीष् अमरः।

भूपरिधि पु॰ ६त॰। भूमेः परिधौ तन्मानं सू॰सि॰ उक्तं यथा "योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु। तद्वर्गतो दशगुणात् पदं भूपरिधिर्भवेत्" "लम्बज्याघ्नस्त्रि-जीवाप्तः स्फुटो भूपरिधिः ,,"। सि॰शि॰उक्तमतया-प्युक्तं यथा "प्रोक्तो योजनसंख्या कुपरिधिः सप्ताङ्ग-नन्दाब्धय ४९६७ स्तद्व्यासः कुभुजङ्गसायकभुवः १५८१ सिद्धां-शकेनाधिकः १५८१।१/२४। पृष्ठक्षेत्रफलं तथा युग-गुणितं स्त्र्यासाहतो ७८६१ इत्यभूमेः फलं यथाजवत् कुपरिधिव्यासाहतेः प्रस्फुटम्"। [रत्नमा॰

भूपलाश पु॰ भुवि पलाशं यस्य। चित्रक्षाकारके क्षुपभेदे

भूपाटलि भुवि स्थाता पाटलिः। भूतालीवृक्षे राजनि॰।

भूपाल पु॰भुवं पालयति पालि-अण् उप॰स॰। भूपतौ शब्दमा॰

भूपुत्र पु॰ ६त॰। १मङ्गले २नरकासुरे च। ३जानक्यां स्त्री अमर॰ गौ॰ ङीष्।

भूपुर न॰भूरिव पुरम्। यन्त्रबहिःस्थे रेखाचतुष्टयेनावेष्टिते भूम्याकारे स्थाने।

भूपेष्ट पु॰ भूपस्येष्टः। राजादनीवृक्षे (पियाशाल) राजनि॰ तद्वीजस्य चिरञ्जि इति ख्यातस्य राजप्रियत्वात्तथात्वम्।

भूबदरी स्त्री भुवि जाता बदरी। क्षुद्रकोल्यां राजनि॰।

भूबल न॰ नरपतिजयचर्य्योक्ते जयसाधनोपाये चक्रभेदे "स्वरोदयेव चक्रेच यन्मुर्य्यन्तजनोऽधिकः। तत्र युद्धे वर्ण्णे-येऽयं भूबलानां जयार्थिनाम्। तेषां नामानि वक्ष्ये-ऽहं ख्यातानि ब्रह्मयामले। चतुरशीतिसंख्यानां वर्ण्ण-भेदेन जयी रणे। चण्डी जालन्धरी पूर्वा कामा कोल्ले कवीरिका। श्रीकोष्ठा च महामारी होमपाली च मङ्गला। रुद्रकालानलं प्रोक्तं कालरेखा निरा-मया। जयन्तमोक्षमहालक्ष्मीर्जया विजयभैरवी। वाला योगेश्वरी चण्डी व्योमाम्बुभूककर्णरी। शाङ्करी सिंहली तन्त्री महामाया महेश्वरी। देवकोटी शिवा शक्तिघण्टा माला वराटिका। सिद्धवक्त्रा मतृकरी धर्मी सुता इष्टाजयाऽजया। दुर्गती प्रवरा गौरी काली नरहरी भृता। खेचरी भूचरी गुह्या दाक्षी सिद्धि केवला। त्रैलोक्यविजया वाली वराका सुखदा परा। रौद्री च चिगुमातङ्गी अभेद्या हस्तनी जिता। वज्रका वर्णभूमिच कापाली स्वनिकानका। चन्द्रार्कबिम्बभूमी च पञ्चभूराशिबन्धना। राक्षसाकाननी भूमिः चार भूमिर्द्विधा मता। रुद्रलिकाविकाश्चैव राक्षसाष्टविध-स्तथा। चन्द्रः सप्तविधः सूर्य्यश्चतुर्धा योगिनी त्रिधा। कालरेखा त्रिभेदा च तिथिनक्षत्रवारगा। इमानि भूबलान्यत्र ज्ञात्वा यः प्रयात् रणे। शरदस्तत्र नश्यन्ति मेघा वातहता यथा। बलकालाधिके नास्ति वरैश्चैव भूबलैः। ज्ञानहीनाधिकं यन्त्रो बलविज्ञान-संयुते"। एतल्लक्षणानि तत्र दृश्यानि।

भूभर्तृ पु॰ वाचस्पा॰। ६त॰। भूमिपतौ भूमिभर्त्रादयोऽप्यत्र।

भूभुज् पु॰ भुवं भुङ्क्ते भुनक्ति पालयति वा भुज-क्विप्। भूपाले जटा॰। [१पर्वते, २भूपाले च मेदि॰।

भूभृत् पु॰ भुवं बिभर्त्ति धारयति, पालयति वा भृ क्विप्।

भूमण्डल त्रि॰ ६त॰। मण्डलाकारे भूमिभागे।

भूमन् पु॰ बहोर्भावः बहु+इमनिच् "बहोर्लोपो भू च बहोः" इत्योपे भ्वादेशः। १बहुत्वे अतिशये अर्थे इमनिच् प्रत्ययात् २अतिशयबहुत्वयुते च। "यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासि-

तव्यः । भूमानं भगवो विजिज्ञास” छा॰ उ॰ । “यो वै भूमा महत् निरतिशयम् बहुरितिपर्य्यायास्तत् सुखं ततोऽर्वाक् सातिशयत्वादल्पम् । अतस्तस्मिन्नल्पे सुखं नास्ति अल्पानां तृष्णाहेतुत्वात् तृष्णा च दुःखबीजम् । न हि दुःखबीजं ज्वरादि सुखं दृष्टं लोके । तस्माद्युक्तं नाल्पे सुखमस्तीति । अतो भूमैव सुखम् तृष्णादिदुःखबीजत्वासम्भवाद्भूम्नः” भाष्यम् तस्मिन् प्रपाठके च वर्णाद वा भूमा तन्निरूपितं ब्रह्म ।

भूमय त्रि॰ भू+मयट् । १तद्रूपात्मके २छायायां त्रिका॰ स्त्री ङीप् ।

भूमि(मी) स्त्री भवन्त्यस्मिन् भूतानि भू—मि किद् वा ङीप् । १पृथिव्याम् २स्थानमात्रे मेदि॰ ३जिह्वायां संक्षि॰ उणा॰ योगशास्त्रोक्ते ४योगिनां चित्तस्यावस्थाभेदे, ५एकसंख्यायाञ्च । पाद्रसंख्यादितोऽच् समा॰ बहु॰ । द्विभूमः प्रसादः पाद्रभूमो देशः । योगोक्तभूमयश्च “तस्य भूमिषु विनियोगः” पा॰ सू॰ उक्ताः । “तस्य संयमस्य जितभूमेर्योऽनन्तरा भूमिस्तत्र विनियोगः । नह्यजिताधरभूमिरनन्तरभूमिं विलङ्घ्य प्रान्तभूमिषु संयमं लभते तदभावाच्च कुतः तस्य प्रज्ञालोकः, ईश्वरप्रसादाज्जितोत्तरभूमिकस्य च नाधरभूमिषु परचित्तज्ञानादिसंयमो युक्तः कस्मात् तदर्थस्यान्यत एवावगतत्वात् भूमेरस्या इयमनन्तरा भूमिः” भा॰ । सा च भूमिः सप्तप्रकारा यथोक्तं तत्रैव “तस्य सप्तधा प्रान्तभूमिः प्रज्ञा” पात॰ सू॰ । “तस्येति प्रत्युदितख्यातेः प्रत्याम्नायः सप्तधेति अशुद्ध्यावरणमलापगमाच्चित्तस्य प्रत्ययान्तरानुत्पादे सति सप्तप्रकारैव प्रज्ञा विवेकिनो भवति । तद्यथा परिज्ञातं हेयं नास्य पुनः परिज्ञेयमस्ति क्षीणा हेयहेतवो न पुनरेतेषां क्षेतव्यमस्ति साक्षात्कृतं निरोधसमाधिना हानम् । भावितो विवेकख्यातिरूपो हानोपाय इत्येषा चतुष्टयी कार्य्याविमुक्तिः प्रज्ञायाः । चित्तविमुक्तिस्तु त्रयी चरिताधिकारा बुद्धिगुणा गिरिशिखरकूटच्युता इव ग्रावाणो निरवस्थानाः स्वकारणे प्रलयाभिमुखाः सह तेनास्तं गच्छन्ति । न चैषां विप्रलीनानां पुनरस्त्युत्पादः प्रयोजनाभावादिति एतस्यामवस्थायां गुणसम्बन्धातीतः स्वरूपमात्रज्योतिरमलः केवली पुरुष इत्येतां सप्तविधां प्रान्तभूमिप्रज्ञामनुपश्यन् पुरुषः कुशल इत्याख्यायते प्रतिप्रसवेऽपि चित्तस्य मुक्तः कुशल इत्येव भवति गुणातीतत्वादिति सिद्धा भवति विवेकख्यातिर्हानोपायः इति” भा॰ । “प्रत्युदितख्यातेः वर्त्तमानख्यातेः योगिनः प्रत्याम्नायः परामर्शः अशुद्धिरेवावरणं चित्तसत्त्वस्य तदेव मलं तस्यापगमात् चित्तस्य प्रत्ययान्तरानुत्पादे राजसतामसव्युत्थानप्रत्ययानुत्पादे निरङ्कुशविवेकख्यातिनिष्ठामापन्नस्य सप्तप्रकारैव प्रज्ञा विवेकिनो भवति विषयभेदात् प्रज्ञाभेदः प्रकृष्टोऽन्तो यासां भूमीनामवस्थानां तास्तथोक्ता यतः परं नास्ति संप्रकर्षः प्रान्ता भूमयः यस्याः प्रज्ञाया विवेकख्यातेः सा तथोक्ता ता एव सप्तप्रकाराः प्रज्ञा॰ भूमी॰ उदाहरति । तद्यथेति तत्र पुरुषप्रयत्ननिष्पाद्यासु चतसृषु भूमिषु प्रथमामुदाहरति परिज्ञातं हेयं यावत् किञ्च प्राधानिकं तत् सर्वं परिणामतापसंस्कारैर्गुणवृत्तिविरोधात् दुःखमेवेति हेयं तत् परिज्ञातम् । प्रान्ततां दर्शयति नास्य पुनः किञ्चित् परिज्ञातं परिज्ञेयमस्ति । द्वितीयामाह क्षीणा इति । प्रान्ततामाह न पुनरिति । तृतीयामाह साक्षात्कृतं प्रत्यक्षेण निश्चितं यथा संप्रज्ञातावस्थायामेव निरोधसमाधिसाध्यं हानं न पुनरस्मात् परं निश्चेतव्यमस्तीति शेषः । चतुर्थीमाह भावितो निष्पादितः विवेकख्यातिरूपो हानोपायो नास्याः परं भावनीयमस्ति इति शेषः । एषा चतुष्टयी कार्य्यविमुक्तिरिति कार्य्यान्तरेण विमुक्तिः प्रज्ञाया इत्यर्थः प्रयत्ननिष्पाद्यत्वात्अनिष्पादनीयामप्रयत्नसाध्यां चित्तविमुक्तिमाह चित्तविमुक्तिस्तु त्रयी । तत्र प्रथमामाह चरिताधिकारा बुद्धिः कृतभोगापवर्गेत्यर्थः । द्वितीयामाह गुणा इति प्रान्ततामाह न चैषामिति । तृतीयामाह एतस्यामवस्थायामिति तस्यामवस्थायां जीवन्नेव पुरुषः कुशलो मुक्त इत्युच्यते चरमदेहत्वादित्याह एताविति । अनौपचारिकं मुक्तमाह प्रतिप्रसवे प्रधानलयेऽपि चित्तस्य मुक्तः कुशल इत्येव भवति गुणातीतत्वादिति” विवरणम् ।

पृथिवीरूपभूमिगुणाश्च भा॰ शा॰ उक्ता यथा “भूमेः स्थैर्यं गुरुत्वञ्च काठिन्यं प्रसवार्थता । गन्धो गुरुत्वं शक्तिश्च संघातः स्थापना धृतिः” । प्रथमगुरुत्वं पतनविरोधी गुणः द्वितीयगुरुत्वम विशकुटिरतो न पौनरुक्त्यम् । शक्तिः धारणादिसामर्थ्यम् संघातः संश्लिष्टावयवत्वम् । स्थापना मनुष्यादेर्धारणादङ्कुरस्थापनादः । धृतिर्धारणा इत्यर्थः ।

भूमिकदम्ब पु॰ भूमिजातः कदम्बः शा॰ त॰ । कदम्बभेदे “भूमिकदम्बाः कटूपाकरसा दोषहरा हिमाः । कषाय

तिक्ताः पित्तघ्ना वीर्य्यवृद्धिकरा पराः" राजनि० ।

भूमिकन्दली स्त्री भूकन्दा कन्दली षा०त० । कन्दलीभेदे माघः ६।२०। मल्लि० ।

भूमिकम्प पु० ६त० । क्षितिचलने तत्कारणादिकं तत्फलविशेषं वृ०स० ३२अ० उक्तं यथा

"क्षितिकम्पमाहुरेके बृहदन्तर्जलनिवासिसत्त्वकृतम् । भूभारखिन्नदिग्गजविश्रामसमुद्भवं चान्ये । अनिलोऽनिलेन निहतः क्षितौ पतन् सस्वनं करोत्येके । केचित्त्वदृष्टकारितमिदमन्ये प्राहुराचार्य्याः । गिरिभिः पुरा सपक्षैर्वसुधा प्रपतद्भिरुत्पतद्भिश्च । आकम्पिता पितामहमाहामरसदसि सव्रीडम् । भगवन्नाम ममैतत्त्वया कृतं यदचलेति तन्न तथा । क्रियतेऽचलैश्चलद्भिः शक्ताहं नास्य खेदस्य । तस्याः सगद्गदगिरं किञ्चित्स्फुरिताधरं विनतमीषत् । अश्रुविलोचनमवलोक्य पितामहः प्राह । मन्युं हरेन्द्र ! धात्र्याः क्षिप कुलिशं शैलपक्षभङ्गाय । शक्रः कृतमित्युक्त्वा मा भैरिति वसुमतीमाह । किन्त्वनिलदहनसुरपतिवरुणाः सदसत्फलावबोधार्थम् । प्राग्द्वित्रिचतुर्भागेषु दिननिशोः कम्पयिष्यन्ति । चत्वार्य्यर्यमणाद्यान्यादित्यं मृगशिरोऽश्वयुक् चेति । मण्डलमेतद्वायव्यमस्य रूपाणि सप्ताहात् । धूमाकुलीकृताशे नभसि नभस्वान् रजः क्षिपन् भौमम् । विरुजन् द्रुमांश्च विचरति रविरपटुकरावभासी च । वायव्ये भूकम्पे सस्याम्बुवनौषधीक्षयोऽभिहितः । श्वयथुश्वासोन्मादज्वरकासभवा वणिक्पीडा । रूपायुधभृद्वैद्याः स्त्रीकविगान्धर्वपण्यशिल्पिजनाः । पीड्यन्ते सौराष्ट्रकुरुमगधदशार्णमत्स्याश्च । पुष्याग्नेयविशाखाभरणीपित्र्याजभाग्यसंज्ञानि । वर्गो हुतभुजोऽयं करोति रूपाण्यथैतानि । तारोल्कापाताढ्यमादीप्तमिवाम्बरं सदिग्दाहम् । विचरति मरुत्सहायः सप्तार्च्चिः सप्तदिनान्तः । आग्नेयेऽम्बुदनाशः सलिलाशयसंक्षयो नृपतिवैरम् । दद्रूविचर्च्चिकाज्वरविसर्पिकाः पाण्डुरोगश्च । दीप्तौजसः प्रचण्डाः पीड्यन्ते चाश्मकाङ्गबाह्लीकाः । तङ्गणकलिङ्गवङ्गद्रविडाः शबराश्च नैकविधाः । अभिजिच्छ्रवणधनिष्ठाप्राजापत्यैन्द्रवैश्वमैत्राणि । सुरपतिमण्डलमेतद्भवन्ति चास्य स्वरूपाणि । चलिताचलवर्ष्माणो गम्भीरविराविणस्तडित्वन्तः । गवलालिकुलाहिनिभा विसृजन्ति पयः पयोवाहाः । ऐन्द्रं श्रुतिकुलजातिख्यातावनिपालगणपविध्वंसि । अतिसारगलग्रहवदनरोगकृच्छर्दिकोपाय । काशियुगन्धरपौरवकिरातकीराभिसारहलमद्राः । अर्बुदसुराष्ट्रमालवपीडाकरमिष्टवृष्टिकरम् । पौष्णाप्याद्रीश्लेषामूलाहिर्बुध्न्यवरुणदेवानि । मण्डलमेतद्वारुणमस्यापि भवन्ति रूपाणि । नीलोत्पलालिभिन्नाञ्जनत्विषो मधुरराविणो बहुलाः । तडिदुद्भासितदेहा धाराङ्कुरवर्षिणो जलदाः । वारुणमर्णवसरिदाश्रितघ्नमतिवृष्टिदं विगतवैरम् । गोनर्दचेदिकुकुरान् किरातवैदेहकान् हन्ति । षड्भिर्मासैः कम्पो द्वाभ्यां पाकञ्च याति निर्घातः । अन्यानप्युत्पातान् जगुरन्ये मण्डलैरेतैः । उल्का हरिश्चन्द्रपुरं रजश्च निर्घातभूकम्पककुप्प्रदाहाः । वातोऽतिचण्डो ग्रहणं रवीन्द्वोर्नक्षत्रताराग्रहवैकृतानि । व्यभ्रे वृष्टिर्वैकृतं वातवृष्टिर्धूमोऽनग्नेर्विस्फुलिङ्गार्च्चिषो वा । वन्यं सत्त्वं ग्राममध्ये निशेहा रात्रावैन्द्रं कार्मुकं दृश्यते वा । सन्ध्याविकाराः परिवेषखण्डा नद्यः प्रतीपा दिवि तूर्य्यनादाः । अन्यच्च यत् स्यात् प्रकृतेः प्रतीपं तन्मण्डलैरेव फलं निगाद्यम् । हन्त्यैन्द्रो वायव्यं वायुश्चाप्यैन्द्रमेवमन्योऽन्यम् । वारुणहौतभुजावपि वेलानक्षत्रजाः कम्पाः । प्रथितनरेश्वरमरणव्यसनान्याग्नेयवायुमण्डलयोः । क्षुद्भयमरकावृष्टिभिरुपताप्यन्ते जनाश्चापि । वारुणपौरन्दरयोः सुभिक्षशिववृष्टिहार्दयो लोके । गावोऽतिभूरिपयसो निवृत्तवैराश्च भूपालाः । पक्षैश्चतुर्भिरनिलस्त्रिभिरग्निर्देवराट् च सप्ताहात् । सद्यः फलति च वरुणो येषु न कालोऽद्भुतेषूक्तः । चलयति पवनः शतद्वयं शतमनलो दशयोजनान्वितम् । सलिलपतिरशीतिसंयुतं कुलिशधरोऽभ्यधिकं च षष्टिकम् । त्रिचतुर्थसप्तमदिने मासे पक्षे तथा त्रिपक्षे च । यदि भवति भूमिकम्पः प्रधाननृपनाशनो भवति ।"

भूमिचलनादयोऽप्यत्र । "निर्घाते भूमिचलने" म०त० ।

भूमिका स्त्री भूमिरिव कायति कै—क ; १रचनायां "अन्यरूपैर्यदन्यस्य प्रवेशनम् भूमिका" इत्युक्ते नाट्ये-ऽभिनेयपात्रादिवेषान्तरग्रहणे २रूपभेदे ३वक्तव्यकथोद्घाते ४कथायाम् "नैवाविवादिभिरात्मा प्रथमभूमिकायामवतारितः" इति सांख्यप्रवचनभाष्यम् ।

भूमिकुष्माण्ड पु० भूमिजातः कुष्माण्डः शा०त० (भुँइकुमड़ा) ख्याते लताभेदे रत्नमा० ।

भूमिखर्जूरिका स्त्री भुवि जाता खर्जूरिका शा० त० । खर्जूरिकाभेदे "भूमिखर्जूरिका स्वाद्वी दुरारोहा मृदु-

ष्णदा। अथ स्वल्पफला काकर्कटी स्वादुमस्तका। पिण्डखर्जूरिका त्वन्या सा देशे पश्चिमे भवेत्। खर्जूरी गोस्तनाकारा परद्वीपादिहागता। जायते पश्चिमे देशे सा छोहारेति कीर्त्तिता। खर्जूरीत्रितयं शीतं मधुरं रसपाकयोः। स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु। तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम्। कोष्ठमारुतहृद्बल्यं वान्तवातकफापहम्। ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारणम्। मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत्। महतीभ्यां गुणैरल्पा स्वल्पखर्जूरिका स्मृता। खर्जूरीतरुतोयन्तु मदपित्तकरं भवेत्। वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत्" भावप्र०।

भूमिचम्पक पु० भूमिलग्नः चम्पकः शाक०त०(भूइचांपा) वृक्षभेदे शब्दच०।

भूमिज पु० भूमेर्जायते जन-ड। १मङ्गलग्रहे २नरकासुरे मेदि० ३भूमिकदम्बे ४मनुष्ये च राजनि०। ५भूमिजातमात्रे त्रि०। ६सीतायां स्त्री।

भूमिजगुग्गुलु पु० कर्म०। आशापुरजाते गुग्गुलौ राजनि०

भूमिजम्बु स्त्री ७त०। क्षुद्रजम्ब्वां रत्नमा० वा ऊङ्। तत्रार्थे राजनि०। स्वार्थे क। तत्रार्थे स्त्री अमरः।

भूमिजीविन् पु० भूमिं तत्कर्षणं जीवति जीव-णिनि। वैश्ये शब्दरत्ना०।

भूमिञ्जय पु० विराटनृपस्य पुत्रभेदे भा० वि० ३५अ०।

भूमिधर पु० भूमिं धरति धृ-अच्। १कुलपर्वते उपचारात् २पर्वतमात्रे। [द्योऽप्यत्र।

भूमिप पु० भूमिं पाति पा-क। नृपे जटा०। भूमिपाला-

भूमिपक्ष पु० भूमिः पक्ष इवास्य। वाताश्वे हारा०।

भूमिपति पु० ६त०। भूपतौ भूमिनाथादयोऽप्यत्र।

भूमिपिशाच पु० भूमौ पिशाच इव। तालवृक्षे जटा०।

भूमिपुत्र पु० ६त०। १मङ्गलग्रहे २नरकासुरे च भूमिपुत्रादयोऽप्यत्र। ३जानक्यां स्त्री गौरा० ङीष्।

भूमिप्रविभाग पु० सुश्रुतोक्ते औषधार्थभूमिविभागे "अथातो भूमिप्रविभागविज्ञानीयमध्यायं व्याख्यास्यामः। श्वभ्रशर्कराश्मविषमवल्मीकश्मशानाघातनदेवतायतनसिकताभिरनुपहतामनूषरामभङ्गुरामदूरोदकां स्निग्धां प्ररोहवतीं मृद्वीं स्थिरां समां कृष्णां गौरीं लोहितां वा भूमिमौषधार्थं परीक्षेत तस्यां जातमपि कृमिविषशस्त्रातपपवनदहनतोयसम्बाधमार्गैरनुपहतमेकरसं पुष्टं पृथ्ववगाढ़मूलमुदीच्यां चौषधमाददीतेत्यौषधभूमिपरीक्षाविशेषः सामान्यः। विशेषतस्तु। तत्राश्मवती स्थिरा गुर्वी श्यामा कृष्णा वा स्थूलवृक्षशस्यप्राया स्वगुणभूयिष्ठा। स्निग्धा शीतलाऽऽसन्नोदका स्निग्धशस्यतृणकोमलवृक्षप्राया शुक्लाऽम्बुगुणभूयिष्ठा। नानावर्णा लघ्वश्मवती प्रविरलाल्पपाण्डुवृक्षप्ररोहाऽग्निगुणभूयिष्ठा। रूक्षा भस्मरासभवर्णा तनुवृक्षकोटराल्परसवृक्षप्रायाऽनिलगुणभूयिष्ठा। मृद्वी समा श्वभ्रवत्यव्यक्तरसजला सर्वतोऽसारवृक्षा महापर्वतवृक्षप्राया श्यामा चाकाशगुणभूयिष्ठा। तत्र केचिदाचार्य्याः प्रावृड्वर्षाशरद्धेमन्तवसन्तग्रीष्मेषु यथासंख्यं मूलपत्रत्वक्क्षीरसारफलान्याददीतेति तत्तु न सम्यक् कस्मात् सौम्याग्नेयत्वाज्जगतः। सौम्यान्यौषधानि सौम्येष्वृतुष्वाददीताग्नेयान्याग्नेयेष्वेवमव्यापन्नगुणानि भवन्ति। सौम्यान्यौषधानि सौम्येष्वृतुषु गृहीतानि सोमगुणभूयिष्ठायां भूमौ जातान्यतिमधुरस्निग्धशीतानि जायन्ते। एतेन शेषं व्याख्यातम्। तत्र पृथिव्यम्बुगुणभूयिष्ठायां भूमौ जातानि विरेचनद्रव्याण्याददीताग्न्याकाशमारुतगुणभूयिष्ठायां वमनद्रव्याणि। उभयगुणभूयिष्ठायामुभयतोभागानि। आकाशगुणभूयिष्ठायां संशमनान्येवं बलवत्तराणि भवन्ति। सर्वाण्येव चाभिनवान्यन्यत्र मधुघृतगुडपिप्पलीविड़ङ्गेभ्यः। सर्वाण्येव सक्षीराणि वीर्य्यवन्ति तेषामसम्पत्तावनतिक्रान्तसंवत्सराण्याददीतेति। भवन्ति चात्र। गोपालास्तापसा व्याधा ये चान्ये वनचारिणः। मूलाहाराश्च ये तेभ्यो भेषजव्यक्तिरिष्यते। सर्वावयवसाध्येषु पलाशलवणादिषु। व्यवस्थितो न कालोऽस्ति तत्र सर्वं विधीयते। गन्धवर्णरसोपेता षड़्विधा भूमिरिष्यते। तस्माद्भूमिस्वभावेन बीजिनः षड़्रसैर्युताः। अव्यक्तः किल तोयस्य रसो निश्चयनिश्चितः। रस एव स चाव्यक्तो भूमेरेव रसाद्भवेत्। सर्वलक्षणसम्पन्ना भूमिः साधारणी स्मृता। द्रव्याणि यत्र तत्रैव तद्गुणानि विशेषतः। विगन्धेनापरामृष्टमविपन्नं रसादिभिः। नवं द्रव्यं पुराणं वा ग्राह्यमेव विनिर्दिशेत्। विडङ्गं पिप्पली क्षौद्रं सर्पिस्त्वाप्यनवं हितम्। शेषमन्यत्त्वभिनवं गृह्णीयाद्दोषवर्जितम्। जङ्गमानां वयःस्थानां रक्तरोमनखादिकम्। क्षीरमूत्रपुरीषाणि जीर्णाहारेषु संहरेत्। प्लोतमृद्भाण्डफलकशङ्कुविन्यस्तभेषजम्। प्रशस्तायां दिशि शुचौ भेषजागारमिष्यते।"

भूमिमण्ड पु॰ भूमिं मण्डयति मण्ड–अण् । (हापरमालि) लताभेदे रत्नमा॰ । [ल्यु । माधवीलतायाम् राजनि ।

भूमिमण्डपभूषणा स्त्री भूमिमण्डप इव तं भूषयति भूषि–

भूमि(मी)रुह पु॰ भूम्या भूमौ वा रोहति रुह–क । वृक्षे महीरुहादयोऽप्यत्र । [त्रिका॰।

भूमिलाभ पु॰ भूमिर्लभ्यतेऽत्र लभ–आधारे घञ् । मृत्यौ

भूमिलेपन न॰ भूमिर्लिप्यतेऽनेन लिप–करणे ल्युट् ६त॰ । गोमये हेमच॰ ।

भूमिवर्द्धन पु॰ भूमिं वर्द्धयति शरीरस्यपार्थिवांशोपचयेन वृध–णिच्–ल्यु । शवे मृते हेमच॰ क्षितिवर्द्धनादयोऽप्यत्र

भूमिशय पु॰भूमौ शेते शी–अच्।१बालके २भूमौ शयाने त्रि॰

भूमिष्ठ पु॰ भूमौ तिष्ठति स्था–क अम्ब॰षत्वम् । भूपृष्ठस्थे ।

भूमिसत्त्र न॰भूमिदानरूपं सत्त्रं या॰त॰। भूमिदानरूपे याग-भेदात्मके सत्त्रे "दशुभिः सहितां भूमिं यवगोधूमशालि-नीम् । गोऽश्ववाहनपूर्णां वा बाहुवीर्य्यादुपार्जिताम् । निधिगर्भां ददद्भूमिं सर्वरत्नपरिच्छदाम् । अक्षयान् लभते लोकान् भूमिसत्त्रं हि तस्य तत्" भा॰अनु॰६२अ॰

भूमिसम्भवा स्त्री भूमिः सम्भवोऽस्याः । १सीतायां जटा॰ । २मङ्गलग्रहे ३नरकासुरे पु॰ । ४भूमिजातमात्रे त्रि॰ ।

भूमिसेन पु॰ दशममनोःपुत्रभेदे मार्क॰पु॰ ९४अ॰ ।

भूमिस्तोम पु॰ एकाहसाध्ये यज्ञभेदे आश्व॰ ९।५।२ ।

भूमिस्पृश् पु॰ भूमिं स्पृशति स्पृश–क्विन् । १वैश्ये २मनुष्ये ३चौरभेदे मेदि॰। ४खञ्जे ५अन्धे च शब्दरत्ना॰ ।

भूमी स्त्री भू–मि कित् ङीप् ।।कृदिकारान्तत्वाभावेऽपि विकल्पेन ङीप् उच्यते यथा "भूमौ कृदन्तवच्चैव गण एकशरः स्मृतः । एकयो द्विस्त्रियो वापि प्रयोक्तव्यो विचारकैः" ।

भूमीच्छा स्त्री भूमौ तत्पतने इच्छा । भूमिपतनेच्छायाम् ।

भूमीन्द्र पु॰ भूमौ इन्द्र इव । नृपे शब्दर॰ ।

भूमीसह पु॰ भूमीं सहते सह–अच् । (भूरसह) वृक्षभेदे "भूमीसहस्तु शिशिरः रक्तपित्तप्रसादनः" भावप्र॰ ।

भूम्यनन्तर पु॰भूमेरनन्तरः । स्वविषयसन्निकृष्टदेशस्थे नृपाणां शत्रौ कामन्द॰ ८।१६ ।

भूम्य त्रि॰ भूमिमर्हति यत् । धरार्हे ऋ॰ ५।४१।१॰ ।

भूम्यामलकी स्त्री भूमिलग्ना आमलकी शाक॰त॰। स्वनामख्याते क्षुपे राजनि॰। "स्याद् भूम्यामलकी तिक्ता कषाया मधुरा हिमा । पिपासाकासपित्तास्रकफकण्डूपाण्डुक्षय-नुत्" भावप्र॰ ।

भूम्यामली स्त्री भूम्या सह आमलति सम्बध्नाति आ+मल अच् गौ॰ ङीष् । भूम्यामलक्याम् राजनि॰ ।

भूम्याह्वय न॰ तृणभेदे (भूजातखड़) राजनि॰। शब्दरत्ना॰

भूयस् अव्य॰ भुवं भावाय यस्यति यस–भावे क्विप् । पुनरर्थे

भूयस् त्रि॰अतिशयेन बहुः ईयसुन् । "बहोर्लोपो भू च बहोः" ईलोपः भूरादेशश्च । बहुतरे मेदि॰स्त्रियां ङीप् ।

भूयशस् अव्य॰भूयस्+वीप्सार्थे शस् सलोपः। बहुश इत्यर्थे

भूयिष्ठ त्रि॰ अतिशयेन बहुः इष्ठन् भ्वादेशो युक् च ।१बहु-तरे २प्रचुरे च ।

भूयुक्ता स्त्री भुवा युक्ता संबद्धा । भूमिखर्जूर्य्याम् राजनि॰

भूर् अव्य॰ भू–रुक् । अन्तरीक्षलोकादधःस्थे मरणसञ्चार-योग्यस्थाने लोके भूः स्वाहा इदं भूः यजुषां देवतोद्देशः ।

भूरि त्रि॰ भू–क्रिन् । १विष्णौ २शिवे ३इन्द्रे च मेदि॰ ; ४स्वर्णे न॰शब्दरत्ना॰बहु–रि भ्वादेशः ५प्रचुरे त्रि॰अमरः ६सोमदत्तपुत्रभेदे पु॰ भा॰ आ॰ १८६ अ॰। शिवा॰ अपत्ये अण् । भौर भूरेरपत्ये पुंस्त्री॰ । [द्रव्ये राजनि॰ ।

भूरिगन्धा स्त्री भूरिः प्रचुरो गन्धो यस्याः । मुरानामगन्ध-

भूरिगम पु॰ भूरि भारयुक्तत्वेऽपि बहु गच्छति गम–अच् । गर्दभे राजनि॰ स्त्रियां जातित्वात् ङीष् ।

भूरिज् स्त्री भू–इजि अत इत्त्वः । पृथिव्यां सि॰कौ॰ ।

भूरिदक्षिण त्रि॰ भूरिर्दक्षिणा यस्य । १बहुतरदक्षिणा-दानयुक्ते २विष्णौ पु॰ "कपीन्द्रो भूरिदक्षिणः" विष्णुस॰ ।

भूरिदुग्धा स्त्री भूरीणि दुग्धानि निर्यासा यस्याः । वृश्चि-काल्यां राजनि॰ ।

भूरिद्युम्न पु॰ भूरि द्युम्नं यस्य । नवममनोः पुत्रभेदे हरिवं॰ ७अ॰ । मार्क॰पु॰ भूर्युरिसृष इति पाठः प्रथमादिकः तदेकवाक्यतया भूरिद्युम्न इत्येव तत्र पाठस्यौचित्यात् ।

भूरिधामन् पु॰ नवममनोःपुत्रभेदे हरिवं॰ ७अ॰ ।

भूरिपत्र पु॰ भूरीणि पत्राण्यस्य । उर्वन्ध्वृक्षे राजनि॰ ।

भूरिपलितदा स्त्री भूरि पलितमिव दायति दै–क । पाण्डुरकदलीवृक्षे राजनि॰ ।

भूरिपुष्पा स्त्री भूरीणि पुष्पाण्यस्याः । शतपुष्पायाम् राजनि॰

भूरिप्रेमन् पु॰ भूरिः प्रचुरः प्रेमास्य । चक्रवाके राजनि॰ ।

भूरिफेना स्त्री भूरीणि फेनान्यस्याः । (चामकषा) वृक्षभे॰ दस्थे अमरः ।

भूरिबला स्त्री भूरीणि बलानि यस्याः ६ब॰।१अतिबलायाम्

राजनि०।२प्रचुरबले त्रि०३एतदाख्यनृपभेदे पु०भा०आ०२७अ०

भूरिमल्ली स्त्री भूरि बहु यथा स्यात् तथा मल्लति मल्ल-अच् गौरा० ङीष्। अम्बष्ठायाम राजनि०।

भूरिमाय पुंस्त्री० भूरयः माया यस्य। १शृगाले अमरः स्त्रियां योपधत्वात् टाप्। २प्रभूतमायायुते त्रि०

भूरिमूलिका स्त्री भूरीणि मूलानि यस्याः कप् टापि अत इत्वम्। अम्बष्ठायाम् नैघण्टुप्र०।

भूरिशस् अव्य० भूरि–शस्। बहुश इत्यर्थे।

भूरिश्रवस् पु० द्व०। चन्द्रवंश्ये १सोमदत्तसुते नृपभेदे। भा० आ० १८७ अ०। २प्रचुरयशस्के त्रि०।

भूरिश्रेष्ठिक पु० भूरयः श्रेष्ठिनो यत्र। (भुरशुट्) गौड़देशस्थे पुरभेदे "गौड़े राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमोनः पिता" प्रबोधच०।

भूरिहन् त्रि० भूरीन् हन्ति हन-क्विप्। १बहुतरनाशके २असुरभेदे पु० भा०आ० २२७ अ०।

भूरुण्डी स्त्री भुवं रुण्डति आच्छादयति रुडि-आहृतौ (माधवधृतो पठितः) अण् उप०स०। (हातिशुँड़ा) वृक्षभेदे अमरः। [शब्दमा०

भूरुह पु० भुवि रोहति रुह-क ७त०। महीरुहे वृक्षे

भूर्ज पु० ऊर्ज-अच् ७त०। स्वनामख्याते वल्कप्रधाने वृक्षे। "भूर्जत्वचः स्पर्शवतीर्दधानाः" कुमा०। "भूर्जः कटुः कषायोष्णः भूतरक्षाकरः परः। त्रिदोषशमनः पथ्यः दुष्टकौटिल्यनाशनः" राजनि०। "कर्णरोगपित्तकफ मेदोविषहरश्च सः" भावप्र०।

भूर्जकण्टक पुंस्त्री० "व्रात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः" मनूक्ते जातिभेदे स्त्रियां ङीष्।

भूर्जपत्र पु० भुवि–ऊर्जं पत्रं यस्य। स्वनामख्याते वृक्षे। भूर्जत्वगादयोऽप्यत्र रत्नमा०।

भूर्णि स्त्री भृ–नि नि० ऊश्च रपरः। पृथिव्यां सि० कौ०।

भूर्लोक पु० कर्म०। तादृशद्वारयोर्मध्यस्थानरूपे लोके।

भूलग्ना स्त्री भुवि लग्ना ७त०। शङ्खपुष्प्याम् राजनि०।

भूलता स्त्री भुवि लतेव। महीलतायां (केँचो) सरीसृपभेदे हेम०।

भूलिङ्गशकुनि पु० भूलिङ्गः शकुनिः कर्म०। विस्रशायिनि पक्षिभेदे "प्रकृतिं यान्ति भूतानि भूलिङ्गशकुनिर्यथा" भा० स० ४१अ०। तद्वित्तिर्यथा "अथ चैषा न ते बुद्धिः प्रकृतिं याति भारत!। मयैव कथितं पूर्वं भूलिङ्गशकुनिर्यथा। भूलिङ्गशकुनिर्नाम पार्श्वे हिमवतः परे। भीष्म! तस्याः सदा वाचः श्रूयन्तेऽर्थविगर्हिताः। मा साहसमितीदं सा सततं वाशते किल। साहसं चात्मनातीव चरन्ती नावबुध्यते। सा हि मांसार्गलं भीष्म! मुखात् सिंहस्य खादतः। दन्तान्तरविलग्नं यत्तदादत्तेऽल्पचेतना। इच्छतः सा हि सिंहस्य भीष्म! जीवत्यसंशयम्'। तद्वत्त्वमप्यधर्मिष्ठ! सदा वाचः प्रभाषसे भा०स०४४अ०। "भूलिङ्गशकुनिर्यथाप्यद्वदन्यत् करोति तद्वत्ते युद्धं कामयन्ते शकुनं वदन्तीत्यर्थः भुवं लिङ्गतीति भूलिङ्गो विस्रशायी पक्षिविशेषः एषेति पाठे एषा अस्मदीया बुद्धिस्त्वदीया त्वद्वत्ते इति योज्यं तदा स्वयैव शकुन्युपमत्वम् अर्थविगर्हिताः उक्तिविपरीतक्रियया अर्थोविगर्हितो यासां ताः। वाशते शब्दं करोति। मांसार्गलं दंष्ट्रान्तरलग्नस्य मांसस्य बहिर्निर्गतभागमुल्लोलम् इच्छति इति। सा हि पक्षिणी मृत्युमुखे प्रविष्टापि तदुपेक्षया जीवन्ती यथा लोकानुपदिशति मा साहसमिति तथा त्वमुपदेशकारित्वात् मृत्युमुखे पतितोऽपि मृत्युना उपेक्षितो जीवल्लोकांस्तोपदिशसि मृत्युमुखे न पतितव्यमिति" नील०।

भूवलय न० भूर्वलयमिव। भूमिपरिधौ। [निघण्टुः

भूशमी स्त्री भूलग्ना शमी शाक०त०। लघुशम्यां मदनपाल-

भूशय पु० भुवि शेते शी–अच् ७त०। १बिलशये नकुलादौ। २विष्णौ च "भूशयो भूषणो भूतिः" विष्णुस०। स हि रामावतारे समुद्रलङ्घनाय सागरोपान्तभूमौ शयित इति तस्य तथात्वम्। [नैघण्टुप्र०

भूशर्करा स्त्री भुवि ख्याता शर्करा शा० त०। कन्दभेदे

भूशेलु पु० भुवि ख्याता शेलुः शा० त०। भूकर्वुदारके राजनि०।

भूष मण्डने वा चु०उभ०पक्षे भ्वा० पर० सक० सेट्। भूषयति ते भूषति अबूभुषत्-त अभूषीत्।

भूषण न० भूष्यतेऽनेन भूष-करणे ल्युट्। १अलङ्कारे किरीटादौ। भावे ल्युट्। २भूषायाम्। अलङ्कारभेदाः तत्साधनद्रव्याणि यथा

"किरीटञ्च शिरोरत्नं कुण्डलञ्च ललाटिका। तालपत्रञ्च हारश्च ग्रैवेयकमथोर्मिका। प्रालम्बिका रत्नसूत्रसरस्रजो-ऽर्धमालिका। पार्श्वद्योतौ नखद्योतोऽङ्गुलीच्छादकस्तथा। कटिबन्धं मापचको मूर्द्धमाला वलन्तिका। अङ्गदो

बाहुवलयः शिखाभूषणमिष्टिका । प्रगण्डवन्धं तत्-पार्श्वं नाभिपूरोऽथ मालिका । अङ्गुली अङ्गुलकञ्चैव दण्डपत्रञ्च वर्णकः । अधस्तनञ्च नीवी च तुन्दिवद्धं प्रकीर्णकम् । पादाङ्गदं हंसकञ्च नूपुरं क्षुद्रघण्टिका । उत्तपङ्क्तिमिति प्रोक्ता अलङ्काराः सुशोभनाः । चत्वारिंशदमी प्रोक्ता लोके वेदे च मोक्षदाः । अलङ्काराः प्रदानेन चतुर्वर्गप्रदायकाः । एतेषां पूजनं कृत्वा प्रदद्यादिष्टसिद्धये । तेषां दैवतमन्त्राण्यं पूजयेत्तु विचक्षणः । शिरोगतानि चादद्यात् सौवर्णानि तु सर्वदा । चूड़ारत्नादिकानीह भूषणानि तु भैरव ! । ग्रैवेयकादिहंसान्तं सौवर्णं राजतञ्च वा । निवेदयेत्तु देवेभ्यो नान्यतैजससम्भवम् । रीतिकांस्यादिसंजातं पात्रोपकारणादिकम् । दद्याद्दारवर्जन्तु भूषणं न कदाचन । घण्टाचामरकुम्भादिपात्रोपकरणादिकम् । तद्भूषणान्तरे दद्यात् यस्मात्तु तदुपभूषणम् । सर्वं ताम्रमयं दद्यात् यत् किञ्चिद्भूषणादिकम् । सर्वञ्च स्वर्णरजतमर्घ्यपात्रे ततोऽधिकम् । पूजार्घ्यपात्रं नैवेद्याधारपात्रञ्च पानकम् । औदुम्बरं सदा विष्णोः प्रीतिदं तोषदं तदा । ताम्रे देवाः प्रमोदन्ते ताम्रे देवाः सदा स्थिताः । सर्वप्रीतिकरं ताम्रं तस्मात्ताम्रं प्रयोजयेत् । लोहयोगे नरः कुर्यात् दैत्यानामपि भैरव ! । पीतोऽथ देवे रौप्यन्तु न कदाचिच्च भूषणम् । प्रावारः पानपात्रञ्च नेत्रयुक्तं स्वदृमेव च । पर्य्यङ्कादि यदन्यच्च सर्वं तदुपभूषणम् । अयोमयकृते कांस्यकृते यद्भूषणं भवेत् । स्वर्णरौप्यस्य चाभावे त्वधःकाये नियोजयेत् । एतेषां भूषणादीनां यद्दानं शस्यते नरैः । तत्तद्दद्यात् समस्ते तु सर्वमेव प्रदापयेत् । चतुर्वर्गप्रदं नित्यं भूषणं सर्वतोऽस्पदम् । तुष्टिपुष्टिप्रीतिकरं यथाशक्तीष्टये सृजेत् । इदं ते भूषणं प्रोक्तं सर्वदेवस्य तुष्टिदम्" कालि॰पु॰ ६८अ॰ । तद्धारणादिनमुच्यते "रिक्तत्रिषष्ठनिशासु हस्तादिष्वपि पञ्चसु । गुरुशुक्रबुधस्याह्नि वस्त्रालङ्कारधारणम् । अनिष्टेष्वपि निर्दिष्टं वस्त्रालङ्कारधारणम् । उद्वाहे राजसम्माने ब्राह्मणानाञ्च सम्मते । शिरस्त्रं मुकुटं हारः कुण्डलञ्चाङ्गदं तथा । कङ्कणं वालकञ्चैव मेखलाष्टाविति क्रमात् । प्रधानभूषणान्येषु यथोक्तं याति निश्चयः । पद्मरागश्च वज्रञ्च विजयो गोमेदस्तथा । मुक्तावैदूर्य्यनीलञ्च तथा मरकतं क्रमात् । आदित्यादिग्रहाणां सर्वसम्पत्तिदायकाः । शुभर्क्षेणापि घटना सर्वत्राप्युपयुज्यते । प्रधानभूषणेष्वेवमप्रधाने न निर्णयः । प्रधानभूषणं प्रायः शिरसो ह्यभिधीयते । तत्र प्रधानभूतत्वादित्याह भृगुनन्दनः । सुखदा मणयः शुद्धा दुःखदाः दोषशालिनः ।" इति युक्तिकल्पतरुः ।

भूषा स्त्री भूष-भावे अ । मण्डनक्रियायाम् अमरः ।

भूषित त्रि॰ भूष-क्त । अलङ्कृते ।

भूष्णु त्रि॰ भू-ग्स्नु । भवनशीले ।

भूसंस्कार पु॰६त॰ । यज्ञादौ भूमिभागस्य परिसमूहनोपलेपनरेखाकरणपांशूद्धरणजलसेकरणकाभ्युक्षणरूपेषु पञ्चसु संस्कारेषु तत्प्रकारश्च कात्या॰ श्रौ॰ २।१।२४सूत्रपद्धतौ दर्शितो यथा "तत्र पूर्वमाहवनीयखरे पञ्च भूसंस्कारा कर्त्तव्याः तद्यथा दर्भैः खरं प्राक्संस्थमुदक्संस्थं वा त्रिः परिसमूह्य १गोमयेन त्रिरुपलिप्य २स्फ्येन प्रागायता उदक्संस्था उदगायताः प्राक्संस्था वा तिस्रो रेखाः खरप्रमाणाः कृत्वा ३अनामिकाङ्गुष्ठेन ताभ्यो रेखाभ्यः पांशूनुद्धृत्य ४अद्भिरभ्युक्षेत् ५। परिसमूहनं (तृणानामपनुम्पनम्) कात्या॰श्रौ॰ ४।१२।१० कर्कः ।

भूसुत पु॰ ६त॰ । १मङ्गलग्रहे शब्दमा॰ २नरकासुरे च ३सीतायां स्त्री ।

भूस्तृण न॰ भुवस्तृणम् पृषो॰सुट् । भूतृणे रत्नाकरे अमरः "गुह्यबीजञ्च भूतीकं सुगन्धं गोमयप्रियम् । भूस्तृणन्तु भवेच्छत्रा माला तृणकमित्यपि । भूस्तृणं कटुकं तिक्तं तीक्ष्णोष्णं रोचनं लघु । विदाहि दीपनं रूक्षमनोज्ञं मुखशोधनम् । अवृष्यं बद्धविट्कञ्च पित्तरक्तप्रदूषणम्" भावप्र॰ ।

भूस्पृश् ३० भूमिं स्पृशति स्पृश-क्विन् । मनुष्ये हेमच॰ ।

भूस्वर्गः पु॰भूमिस्थितः स्वर्गः शा॰ त॰ । सुमेरुपर्वते जटा॰ तस्यामरधारत्वेन स्वर्गत्वात् तथात्वम् । [वभ्रे ।

भृ भरणे भ्वा॰ उभ॰सक॰अनिट् । भरति-ते अभार्षीत् बभार

भृ धारणे पोषणे च जु॰उभ॰सक॰अनिट् । बिभर्त्ति बिभृते अभार्षीत् अभृत । बिभरामास-बभार । क्वित् । भृतुः भरथुः । क्विप् । क्ति-मप् च । भृत्रिमः ।

भृकुंस(श) पु॰ भ्रुवा कुंसा(शा) दङ्गितभाषणं यस्य नि॰ भ्रुवः वा संप्रसारणम् । स्त्रीवेशधारिणि नटे अमरः ।

भृकुटि(टी) स्त्री भ्रुवः कुटिः भङ्गिः वा संप्रसारणं वा ङीप् । भ्रुभङ्गे "रचितभृकुटिबन्धं नन्दिना द्वारिदत्ते" हरविलासः ।

भृगु पु॰ । भ्रस्जति क्विप् भृक् ज्वाला तया सहोत्पन्नः ।

१ब्रह्मणः पुत्रे ऋषिभेदे "अग्निस्त्वेव भृगुः पूर्वमङ्गारेभ्योऽङ्गिराऽभवत्। अङ्गारसंश्रयाच्चैव कविरित्यपरोऽभवत्। सह ज्वालाभिरुत्पन्नो भृगुस्तस्मात् भृगुः स्मृतः" भा० अनु० ८५अ०। "भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्वमुदधेः पुनः। तथा धाता विधाता च तस्यां जातौ भृगोः सुतौ। आयतिर्नियतिश्चैव मेरुकन्ये महाप्रभो!। धातुर्विधातुस्ते भार्य्ये ययोर्जातौ सुतावुभौ। प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डुतः। ततो वेदशिरा जज्ञे प्राणस्य द्युतिमान् सुतः। ततो वंशो मुनिश्रेष्ठ! विस्तरं भार्गवो गतः" वह्निपु०। २महादेवे ३शुक्रग्रहे मेदि०। ४गिरिसानौ ५जमदग्नौ हेम०। ६निरवलम्बने पर्वताद्युच्चस्थाने यतः पातेऽवलम्बनं न भवति तस्मिन् अतटस्थाने अमरः। भृगोर्गोत्रापत्यानि अण् बहुषु तस्य लुक्। ७भृगोरपत्येषु ब०व०। ८वरुणापत्ये ऋषिभेदे "भृगुर्वै वारुणिर्वरुणं पितरमुपससार" तैत्ति०उ०।

भृगुक पु० कूर्मचक्रस्य दक्षिणपार्श्वस्थे देशभेदे मार्क०पु०५८अ०।

भृगुकर्ण पु० तीर्थभेदे काशी० ६अ०। [११अ०।

भृगुकेशव पु० काशीस्थे भृगुस्थापितकेशवमूर्त्तिभेदे काशी०

भृगुज पु० भृगोर्जायते जन–ड। भार्गवे शुक्राचार्य्ये।

भृगुतनय पु० ६त०। शुक्राचार्य्ये भृगुनन्दनभृगुसुतादयोऽप्यत्र

भृगुतुङ्ग न० तीर्थभेदे भा० आ० २१५ अ०। भा०व० ८४अ०।

भृगुपति पु० भृगूणां भार्गववंशस्य पतिः। परशुरामे शब्दमा० तेषां हैहयपतितो हि तेन रक्षा कृता इति तस्य तथात्वम्

भृगुभूमि पु० भार्गवपुत्रभेदे हरिवं० १अ०।

भृगुवल्ली स्त्री भृगुणाऽधीता वल्ली। "भृगुर्वै वारुणिर्वरुणं पितरमुपससार" इत्यादिकायां तैत्तिरीयोपनिषदः तृतीयवल्ल्याम्।

भृगूणांपति पु० ६त० अलुक्स०। परशुरामे शब्दर०।

भृङ्ग पु० भृ–गन् कित् नुट् च। भ्रमरे २धूम्याटविहगे (फिङ्गा) अमरः। ३भृङ्गराजे ४जारे मेदि० ५भृङ्गारे ६भृङ्गरोले च कीटभेदे (भीमरुल) शब्दरत्ना०।

भृङ्गक पु० भृङ्ग इव कायति कै–क। राजवासनखगे शब्दच०

भृङ्गजा स्त्री भृङ्ग इव जायते जन–ड। १भार्ग्याम्। २अगुरुचन्दने न० राजनि० ३अभ्रके ४गुडत्वचि न० रत्नमा०।

भृङ्गपर्णी स्त्री भृङ्ग इव कृष्णत्वात् पर्णं यस्याः ङीप्। सूक्ष्मैलायाम्। स्वार्थे क। भृङ्गपर्णिका तत्रार्थे शब्दच०

भृङ्गप्रिया स्त्री ६त०। माधवीलतायां प्रचुरमधुमत्त्वात् तस्यास्तत्प्रियत्वम् राजनि०।

भृङ्गमूलिका स्त्री भृङ्गस्य भृङ्गराजस्येव मूलमस्याः कप् कापि अत इत्वम्। भ्रमरच्छल्ल्याम् राजनि०।

भृङ्गरज पु० भृङ्गान् रञ्जयति अन्तर्भूतण्यर्थे रन्ज–अच् पृषो० नलोपः। भृङ्गराजे (केशुरिया)। भरतः।

भृङ्गरजस् पु० भृङ्गान् रञ्जयति अन्तर्भूतण्यर्थे रन्ज–असुन् नलोपः। भृङ्गराजे अमरटीकायां भरत०।

भृङ्गराज पु० भृङ्गान् रञ्जयति रन्ज–णिच्–अच् नि० ६त०। (केशुरिया)। १क्षुपभेदे। "भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातहृत्। केश्यस्त्वच्यः कृमिश्वासकासशोथामयापहः। दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्तिजित्" भावप्र० २पक्षिभेदे ६त० टच्। ३भ्रमरश्रेष्ठे मेदि० ४यन्त्रभेदे च धरणिः।

भृङ्गराजाद्य न० "भृङ्गराजरसप्रस्थे यष्टीमधुपलेन च। तैलस्य कुडवं पक्वं सद्यो दृष्टिं प्रसादयेत्। तत् स्याद्वलीपलितघ्नं मासेनैतन्न संशयः" चक्रदत्तोक्ते तैलभेदे।

भृङ्गरिट(टि) पु० भृङ्ग इव रटति अच् इन् वा पृषो० अत इत्वम्। शिवपार्षदभेदे। [कीटभेदे त्रिका०।

भृङ्गरोल पु० भृङ्ग इव रौति रु–अच्। (भीमरुल) ख्याते

भृङ्गवल्लभ पु० ६त०। १धाराकदम्बे २भूमिकदम्बे च। भृङ्गैर्वल्लभ्यते वल्ल–क। ३भूमिजम्ब्वाम् स्त्री राजनि०। [त्रिका०

भृङ्गसोदर पु० भृङ्गस्य सोदर इव। (केशुरिया) केशराजे

भृङ्गानन्दा स्त्री आनन्दयति आ+नन्द+णिच्–अच् ६त०। यूथिकायाम् (जुइ) राजनि०।

भृङ्गाभीष्ट पु० अभि+इष–क्त ६त०। आम्रवृक्षे राजनि०।

भृङ्गार पु० बभर्त्ति जलं भृ–आरन् नि०। १स्वर्णमयजलपात्रभेदे अमरः २जलपात्रभेदे च (झारी)। भृङ्ग इव ऋच्छति ऋ–अण्। ३भृङ्गराजे जटा०। ४लवङ्गे ५सुवर्णे च न० राजनि०। ६झिल्लीनामकीटे स्त्री अमरः गौरा० ङीष्। स्वार्थे क। भृङ्गारिका तत्रैव। तत्र भृङ्गारपात्ररचनादिकं युक्तिकल्पतरावुक्तं यथा

"राज्ञोऽभिषेकपात्रं यद् भृङ्गार इति तन्मतम्। तदष्टधा तस्य मानं प्रकृतिश्चापि चाष्टधा। सौवर्णं राजतं शौर्वं ताम्रं स्फाटिकमेव च। चान्दनं लौहजं शार्ङ्गमेतदष्टविधं मतम्। भानु१२दिङ्१०नवसप्ताष्टरुद्र११लोक-३शरोन्मिताः५। अष्टावष्टौ समाख्याता आयामपरिणाहयोः। द्विचतुःषड्वेदाब्धि४बाण५सप्ताष्टकल्पिता। यथाक्रमं सहद्दिष्टमादित्यादिदशाङ्गुलाम्। पद्मरागस्तथा वज्रं वैदूर्य्यं मौक्तिकन्तथा। नीलं मारकतञ्चैव एता

च सप्त कीर्त्तिताः। भृङ्गारस्तम्भे व्याघ्रा न भौमो मणि-मर्हति। कानकं राजतं वापि सर्वैरपि प्रयुज्यते।" "कानकन्तु क्षितीशानां राजतं सार्वभौतिकम्। अष्ट-पत्रं तु भृङ्गारं प्रबलं विन्यसेत् क्रमात्। चतुर्विधानां भूपानां ताम्रः (रौप्यः) वर्जन इष्यते। श्वेतं रक्तं तथा पीतं कृष्णं चन्द्रनमुच्यते। एतेषां मणिभिः वेषचतुर्णां भ्राजयीभुजाम्। वज्रो पद्मश्च नीलश्च तथा कृष्णाप-राजिता। एषां पुष्पाणि वेषेषु चतुर्णामिति महो भुजाम्। हीरकं पद्मरागश्च वैदूर्य्यं नीलमेव च। चत्वारो मणयो धेयाश्चतुर्णां वेषनामभिः। इत्थं निर्म्मितं यः कुर्य्यान्नृपतिः वेषमात्मनः। स चिरायु-र्सर्वेदुर्योगी इतोऽन्यस्तन्मयाप्परन्"।

भृङ्गारि स्त्री भृङ्गवद्वर्णमृच्छति ऋ-इन्। १मेदिष्ठायाम् २भ्रमरच्छल्ल्यां राजनि०।

भृङ्गाह्व पु० भृङ्गमाह्वयते स्पर्द्धते आ+ह्वे-क। १जीरके २भृङ्गराजे च ३भ्रमरच्छल्ल्यां स्त्री राजनि०।

भृङ्गि पु० भृ-गिच् तुट् च। शिवपार्श्वचरभेदे। "प्राप्ता मयाधिपत्यं त्वं नाम्ना भृङ्गिरिति श्रुतः" वामनपु०।

भृङ्गिन् पु० भृङ्गसदृशैः कण्टकादभिरस्त्यस्य इनि। १वटवृक्षे राजनि० २शिवानुचरभेदे। तस्य शिवतेजो जातत्वेऽपि कण्टकत्वात् तथात्वता अवोचत् कालिकापु० ४६ अ० यथा "अन्धानुलक्ष्यमाणस्य तेजसः शम्भुसम्भृतः। तत्पुत्र-नतिसलं लिन्दिमस्त्वे पपात ह। तयोः कारणयोः वृद्धः सञ्जातौ भृङ्गरावको। एको भृङ्गवमः कृष्णो मिश्राञ्जननिभोऽपरः। भृङ्गी तत्र तदा सञ्ज्ञा नाम भृङ्गीति चाकरोत्। महाकालेकस्य महाकालेति लोकतः"। वामनपु० तु अन्धकासुरस्यैव शिववरेण भृङ्गि-रूपत्व मयाधिपत्यञ्च जातमित्युक्तम्।

भृङ्गी स्त्री भृ-गन् किन् तुट् च गौरा० ङीष्। अति-विषायाम् राजनि०। [तत्रैव राजनि०।

भृङ्गीफल पु० भृङ्ग्या अतिविषाया इव फलमस्य। आम्रा-

भृङ्गीय पु० इत०। महादेवे शब्दरत्ना०। [शिवा०।

भृङ्गेरिटि पु० भृङ्गिरिटि+पृषो०। भृङ्गिणि शिवपार्श्वचरे

भृङ्गेष्टा स्त्री ६त०। १घृतकुमार्य्यां २भार्ग्यां ३तरुण्यां ४काकजम्ब्वाञ्च राजनि०।

भृज भर्जने (भाजा) पाकभेदे भ्वा०आत्म०सक०सेट्। भर्जते अभर्जिष्ट। ईदित् निष्ठायां नेट् भृक्तः। [वोपा०)भञ्ज०

भृज्जन पु० भ्रस्ज-करणे ल्युट् पृषो०। अम्बरीषे (भाजना-

भृणीय क्रोधे भा०आत्म०सक०सेट्। निघण्टुः। भृणीयते। अभृणीयिष्ट।

भृण्टिका स्त्री भिरिण्टिका पृषो०। श्वेतगुञ्जायाम् राजनि०।

भृगिष्ठ स्त्री वीचौ चारा०।

भृत त्रि० भृ-क्त। १पुष्टे वेतनादिना प्रतिपालिते २दासभेदे च। "उत्तमस्त्वायुधीयो यो मध्यमस्तु कृषीवलः। अधमो भारवाही स्यादित्येवं त्रिविधो भृतः" मिता०। भावे-क्त। ४भरणे न०।

भृतक त्रि० भृतं भरणं वेतनमुपजीवति कन्। वेतनोप-जीविनि अमरः "भृतकाध्यापको यस्तु भृतकाध्यापित-स्तथा" मनुः। भृतकभेदाः शुक्रनीतिसारे ४अ०उक्ता यथा "इष प्रोक्ताः पुरोधाद्या ब्राह्मणाः सर्व एव ते। अभावे क्षत्रिया योज्यास्तदभावे तथोरुजाः। नैव शूद्रास्तु संयोज्या गुणवन्तोऽपि पार्थिवैः। ग्रामपाले क्षत्रियस्तु वाहसाधिपतिश्च सः। ग्रामपो ब्राह्मणो योज्यः का-यस्थो लेखकस्तथा। शुल्कग्राही तु वैश्यो हि प्रति-प्रतिहारश्च पादजः। सेनाधिपः क्षत्रियस्तु ब्राह्मण-स्तदभावतः। न वैश्यो न च वै शूद्रः कातरश्च कदा-चन। सेनापतिः शूर एव योज्यः सर्वासु जातिषु। वर्णसङ्करचतुर्वर्णधर्मोऽयं चैव पावनः। यस्य वर्णस्य यो राजा स वर्णः सुखमेधते। नोपमतं मन्यते स न नृपप्रति कुर्वनैः। कथान्तरे न स्मरति संस्तुते पदप-र्य्यपि। सुचक्षनीति मनीषि तं नृपं भृतकस्त्यजेत्"

भृति स्त्री भृ-क्तिन्। १भरणे २मौल्ये च भावे क्तिन्। ३वेतने अमरः ४मूल्ये च मेदि०। भृत्यभेदानां भृति-दानप्रकारादिकं शुक्रनीतिसारे उक्तं यथा "कालमानं त्रिधा ज्ञेयं चान्द्रं सौरं च सावनम्। भृतिदाने सदा सौरं चान्द्रं कौसीदवृद्धिषु। कल्पयेत् सावनं नित्यं दिनभृत्येऽवधौ सदा। कार्य्यमाना काल-माना कार्य्यकालमितिस्त्रिधा। भृतिरुक्ता तु तद्विज्ञैः सा देया भाषिता यथा। अमुं भारस्त्वया तत्र स्थाप्य-स्त्वेतावतीं भृतिम्। दास्यामि कार्य्यमाना सा कीर्त्तिता तद्विदेशकैः। वत्सरे वत्सरे वापि मासि मासि दिने दिने। एतावतीं भृतं तेऽहं दास्यामीति च कालिकी। एतावता कार्य्यमिदं कालेनापि त्वया कृतम्। भृतिमेता-वतीं दास्ये कार्य्यकालमिता च सा। न कुर्य्याद् भृति-लोपं तु तथा भृतिविलम्बनम्। अवश्यपोष्यभरणा-भृतिर्मध्या प्रकीर्त्तिता। परिपोष्या भृतिः श्रेष्ठा स मा-

च्छादनमात्रिका । भवेद्देशस्य भरणं यथा वा हीन-संस्थिता । यथा यथा तु गुणवान् भृतकस्तद्भृतिस्तथा । संयोज्या तु प्रयत्नेन नृपेणात्महिताय वै । अवश्य-पोष्यवर्गस्य भरणं भृतकाद्भवेत् । तथा भृतिस्तु संयोज्या तद्योग्या भृतकाय वै । ये भृत्या हीनभृतिकाः शत्रवस्ते स्वयं कृताः । परस्य साधकास्ते तु छिद्रकोशप्रजा-हराः । अन्नाच्छादनमात्रा हि भृतिः शूद्रादिषु स्मृता । तत्पापभागन्यथा स्यात् पोषको मांसभोजिषु । यद्‌ ब्राह्मणेनापहृतं धनं तत् परलोकदम् । शूद्राय दत्त-मपि यन्नरकायैव केवलम् । मन्दो मध्यस्तथा शीघ्र-स्त्रिविधो भृत्य उच्यते । समा मध्या च श्रेष्ठा च भृतिस्तेषां क्रमात् स्मृता । भृत्यानां गृहकृत्यार्थं दिवा-यामं समुत्सृजेत् । निशि यामत्रयं नित्यं दिनभृत्ये-ऽर्द्धयामकम् । तेभ्यः कार्यं कारयीत ह्युत्सवाद्यै-र्विना नृपः । अत्यावश्यं तूत्सवेऽपि हित्वा श्राद्ध-दिनं सदा । पादहीनां भृतिं त्वार्त्ते दद्यात् त्रैमा-सिकीं ततः । पञ्चवत्सरभृत्ये तु न्यूनाधिक्यं यथा तथा । षाण्मासिकीं तु दीर्घार्त्ते तदूर्द्ध्वं न च कल्पयेत् । नैव पक्षार्द्धमार्त्तस्य हातव्याल्पापि वै भृतिः । संवत्सरोषितस्यापि ग्राह्यः प्रतिनिधिस्ततः । सुमहद्‌-गुणिनं त्वार्त्तं भृत्यर्द्धं कल्पयेत् सदा । सेवां विना नृपः पक्षं दद्याद्‌ भृत्याय वत्सरे । चत्वारिंशत् समा नीताः सेवया येन वै नृपे । ततः सेवां विना तस्मै भृत्यर्द्धं कल्पयेत् सदा । यावज्जीवं तु तत्पुत्रेऽक्षमे बाले तद-र्द्धकम् । भार्य्यायां वा सुशीलायां कन्यायां वा स्वश्रे-यसे । अष्टमांशं पारितोष्यं दद्याद्‌ भृत्याय वत्सरे । कार्य्याष्टमांशं वा दद्याद्‌ कार्य्यं द्रागधिकं कृतम् । स्वामिकार्य्ये विनष्टो यस्तत्पुत्रे तद्भृतिं वहेत् । यावद्‌ बालोऽन्यथा पुत्रगुणान् दृष्ट्वा भृतिं वहेत् । षष्ठांशं वा चतुर्थांशं भृतेर्भृत्यस्य पालयेत् । दद्याद्‌ तदर्द्धं भृत्याय द्वित्रिवर्षेऽखिलं तु वा । वाक्पारुष्यान्न्यूनभृत्या स्वामी प्रबलदण्डतः । भृत्यं प्रशिक्षयेन्नित्यं शत्रुत्वं त्वप-मानतः । भृतिदानेन सन्तुष्टा मानेन परिवर्द्धिताः । सान्त्विता मृदुवाचा ये न त्यजन्त्यधिपं हि ते । अधमा-धनमिच्छन्ति धनमानौ तु मध्यमाः । उत्तमा मान-मिच्छन्ति मानो हि महतां धनम् । यथागुणान् स्व-भृत्यांश्च प्रजाः संरञ्जयेन्नृपः । शाखापदानतः कांश्चि-दपरान् फलदानतः । अन्यान् सुमधुरा वाक्ये तथा को-मलया गिरा । सुभोजनैः सुवसनैस्ताम्बूलैश्च धनैरपि । कांश्चित् सुकुसुमस्रग्भिरधिकारप्रदानतः । वाहनानां प्रदा-नेन योग्याभरणदानतः । छत्रातपत्रचामरदीपिकानां प्रदानतः । क्षमया प्रणिपातेन मानेनाभिनमेन च । सत्कारेण च दानेन आदरेण शमेन च । प्रेमश्रवा-समीपवासेन स्वाधीनप्रदानतः । सम्यक्‌पोषणदानेन सुश्लोककारकीर्त्तनात् यत्कार्य्ये विनियुक्ता ये कार्य्य-दूरक्षयेच्च तान् । षोड्शैस्त्वम्बरैर्गीतमद्यैरनुनयैः । दीनैश्चैव रक्तैश्चापि यथायोग्यैः स्वकाञ्चनैः । प्रतिष्ठा-नाय दूरात्तु वस्त्रैश्च सुकटैरपि । तद्युवावस्थभेदैश्च भृत्यान् कुर्य्यात् पृथक् पृथक् । अविदितं च यच्छिद्रं न दद्यात् सर्व्वमित्युपः” ।

शुक्र०तत्र विशेष उक्तो यथा “कार्य्यं मासवधिं देयं दत्वा भृत्यस्य वेतनम् । अति दत्तं हि भृत्येभ्यो वेतनं पारि-तोषिकम् । तत्प्राप्तिपत्रं स्वहस्तेनैव दद्याद्वेतनपत्रकम् । सेविकाः शिक्षिता ये ये तेषु पूर्णा भृतिः स्मृता । स्वल्पकार्य्ये नियुक्ता ये तेषद्धीं भृतिमावहेत्” “स्व-कार्य्यसाधका ये तु सुभृत्या पोषयेच्च तान् । शोभना-दिवसात्तूष्णात्तेषद्धीं भृतिमावहेत् । अनुत्यक्तान् सगु-णिनः सुभृत्या पालयेन्नृपः । चत्वारिंशे कृते दद्याद् भृतिं निर्वापधिं तथा । दद्याद्दत्तं तस्य पुत्रे स्त्रियै चाद्दन्तिकं किम । स्वतरास्तस्य पुत्रादौ सद्गुणे पार-रक्षिताम् । दद्यादा तद्राष्ट्रतस्तु स्वामिकार्य्ये प्रकल्पयेत्”

भृतिभुज् त्रि० भृतिं वेतनं भुङ्क्ते भुज-क्विप् । वेतनोप-जीविनि कर्म्मकरे अमरः ।

भृत्य पु०भृ-क्यप् तुक् च ।दासे ३भरणीये त्रि०अमरः। भावे क्यप् ३भरणे स्त्री टाप् । “कुमारभृत्याकुशलैः” रघुः । भृत्याभृत्यपरीक्षा शुक्रनीतिसारे २अ० उक्ता यथा “भृत्यं परीक्षयेन्नित्यं विश्वास्यं विश्वसेत् सदा । नैव जातिर्न च कुलं केवलं कल्पयेदपि । कर्म्मशीलगुणाः पूज्यास्तथा जातिकुले न हि । न जात्या न कुलेनैव श्रेष्ठत्वं प्रतिपद्यते । विवाहे भोजने नित्यं कुलजाति-विवेचनम् । सत्यभाक् गुणसम्पन्नस्तथाभिजनवान् धनी । सुकुलश्च सुशीलश्च सुकर्म्मा च निरालसः । यथा करो-त्यात्मकार्य्यं स्वामिकार्य्यं ततोऽधिकम् । चतुर्गुणेन शस्तेन कायवाङ्मानसेन च । अन्येव सतो मृदुवाक् कार्य्य-दक्षः सुचिर्दृढः । परोपकरणे दक्षो ह्यपकारपराङ्-मुखः । आज्ञानुसारिणं पुत्रं पितरं वापि दण्डकः ।

अज्ञायमानोऽपि प्रज्ञावान् रूपः सुबोधकः । चाचेष्टा तद्गिरं काञ्चित् तत्त्वं तस्याप्रकाशकः । पटीयस्तमः सत्कार्ये स्वकृत्यकार्ये चिरस्थिरः । न तद्भार्य्यापुत्र-मित्रैश्चाद्रूदर्शी कदाचन । तद्बद्धुद्धिरतदोषेषु भार्य्या-पुत्रादिकेष्वपि । न स्तौति स्वहते न नाभ्यसूयति निन्दति । नेच्छत्यन्याधिकारं हि नित्यं यो मोदते सदा । तद्वृत्तवस्त्रभूषादिधारकस्तत्पुरोऽग्रिमम् । अति-सुखमयी दान्तो दयालुः शूर एव हि । तद् कार्य्येषु रक्षेत दक्षको भक्तको वरः । विपरीतगुणै-रेभिर्भृत्यो निन्द्य उच्यते । ये भृत्या हीनभक्तका ये दण्डेन प्रकर्षिताः । शठाश्च कातरा लुब्धाः सम्यक् प्रियवादिनः । मत्ता व्यसनिनश्चार्त्ता अनुकोपैराश देविनः । नास्तिका दाम्भिकाश्चैवासत्यवाचोऽभ्यसू-यकाः । ये चापमानिता येऽवद्यास्ये वर्णाश्च भेदिताः । रिपोर्मित्रास्तथैवाश्च पूर्ववैरानुबन्धिनः । अवज्ञाः धात्र विद्या धर्महीना नैते सुसेवकाः । संक्षेपतस्तु कथितं भृत्यदुर्भृत्यलक्षणम्" ।

तत्परिशिष्टे सर्व्वभृत्यकृत्यमुक्तं यथा

"उत्थाय पश्चिमे यामे कृत्यजातं विचिन्त्य च । कृत्वोत्सर्गं तु विप्रेषु हि स्नात्वा ध्यायादनन्तरम् । प्रातः कृत्यं तु निर्वर्त्य यावत् सार्द्धमुहूर्त्तकम् । गत्वा स्वकार्य्यशालायां कार्य्याकार्य्यं विचिन्त्य च । प्रियतया विमलं तु द्वाःस्थः सम्यक् निरोधयेत् । निदेशकांश्च विज्ञाप्य तेनाग्रतः प्रबोधयेत् । दृष्ट्वा नृपं सभामध्ये राज्ञो दण्डधरः क्रमात् । निवेद्य तस्मै तः पश्चात् तेषां स्थानानि दर्शयेत् । ततो राजगृहं गत्वा-ऽऽसन्नो गच्छेत् सविधिम् । नत्वा नृपं यथान्यायं विष्णुरूपमिवापरम् । प्रविश्य साह्युरागस्य चित्तमस्य समन्ततः । भर्त्तुर्दर्शने दृष्टिं कृत्वाऽन्यत्र विनिःक्षि-पेत् । अग्निं दीप्तमिवासीदेद्राजानमुपशिक्षितः । आ-शीविषमिव क्रुद्धं प्रभुं प्राणधनेश्वरम् । यत्नेनोपचरे-न्नित्यं नाहमस्मीति चिन्तयन् । समर्थयंश्च तत्पक्षं साधु भाषेत भाषितम् । तन्नियोगेन वा ब्रूयादर्थं सुपरि-निश्चितम् । सुखप्रवृत्तगोष्ठीषु विवादे वादिनां मतम् । विज्ञातमपि नो ब्रूयात् भर्त्तुः श्रितोत्तरं वचः । सदा-ऽनुमतवेशः स्यात् (भृत्यवृत्तानुगतस्तु प्राञ्जलिः । तद्गता कृतनतिः स्नात्वा वस्त्रालङ्कारमस्तुतः । तदाज्ञां धारयित्वाऽपि कार्य्याण्यपि निवेदयेत् । नत्वाऽऽसीतासने प्रसन्नतः-पार्श्वे सम्मुखाग्रतः । उच्चैःप्रहसनं कासं ष्ठीवनं कुत्सनं तथा । जृम्भणं गात्रभङ्गं वा पर्व्वस्फोटञ्च वर्ज्ज-येत् । राज्ञादिष्टं तु यत् स्थानं तत्र तिष्ठेन्मुदान्वितः । प्रवीणोऽचलमेधावी वर्जयेदभिमानिताम् । आप-त्स्वनार्गगमने कार्य्यकालात्ययेषु च । अपृष्टोऽपि हितान्वेषी ब्रूयात् कल्याणभाषितम् । प्रियं तथ्यं च पथ्यञ्च वदेत् धर्मार्थकं वचः । समानवार्त्तया चापि तद्धितं बोधयेत् सदा । कीर्त्तिमन्यनृपाणां च वदे-त्रीतिफलं तथा । दाता त्वं धार्म्मिकः शूरो नीतिमानसि भूपते ! । अनीतिकस्तु मनसि वर्त्तते न कदाचन । ये ये भृत्या अनीत्या तान् तदग्रे कीर्त्तयेत् सदा । अपेभ्यो ह्यधिकोऽसीति सर्वेभ्योऽपि विशेषयेत् । परार्थं देशकालज्ञो देशे काले च साधयेत् । परार्थनाशनं न स्वामिना ब्रूयात् वदेत हि । न कर्षयेत् प्रजाकार्य्य-सुमेतन्न नृपं सदा । अपि स्वामिसुदाशीन पुनर्नृप परि-तत. बुधा । आत्मसम्मानवर्ज्जनमत्त्वा हर्त्ति नेच्छेत पण्डितः । यत्कार्य्ये यो नियुक्तः स भूयात्तत्कार्य्यतत्परः । नान्याधिकारमन्विच्छन्नाभ्यसूयेत केनचित् । न न्यूनं वाचयेत् यत्र पूरयीत समाहितः । परोपकरणं भय्यत्र-न्वाश्रितवरः सदा । करिष्यामीति ते कार्य्यं न कुर्य्यात् कालकल्पनम् । दूराद् कुर्य्यात् समर्थयेत् स्वामं दीर्घं न रक्षयेत् । गुह्यं कर्म च मन्त्रं च न भर्त्तुः संप्रकाशयेत् । विद्वेषं च विनाशं च मनसापि न चिन्तयेत् । राजा परममित्रोऽस्ति न चाहं विरिचेदिति । स्त्रीभिस्तद्विषिभिः पापैर्वैरिभूतैर्निराकृतैः । एकार्थचर्य्यां साहित्यं संसर्गञ्च विवर्जयेत् । वेशभाषानुकरणं न कुर्य्यात् पृथिवीपतेः । सम्पन्नोऽपि च मेधावी न च स्पर्द्धेत तद्गुणैः । रागापरागौ जानीयाद्भर्त्तुः कुशल-कर्म्मकृत् । इङ्गिताकारचेष्टाभ्यस्तदभिप्रायतां तथा । त्यजेत् विरक्तं नृपतिं रक्ते वृत्तिं तु कारयेत् । विरक्तः कारयेन्नाशं विपक्षाभ्युदयं तथा । आशावर्द्धनकं (कामच्छेदम्) कृत्वा फलनाशं करोति च । अकोपोऽपि सकोपाभः प्रसन्नोऽपि च निष्फलः । वाक्यञ्च समदं वक्ति वृत्तिच्छेदं करोति च । सम्पाते विसम्वादैव गुणसं-कीर्त्तने कृते । दृष्टिं विपर्य्ययाभ्याम क्रियमाणे च कर्म्मणि । विरक्तलक्षणं चेत्तत्तद्वक्ष्ये शृणु वै । दृष्ट्वा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् । कुशलादि यदि पृच्छेत् प्रदापयति चासनम् । विविक्तदर्शने चास्य रह-

यत्नेन न गृह्यते। जायेत हृष्टवदनः श्रुत्वा तद्विरमन्तरा। अप्रियाण्यपि चाज्ञानि तथ्यान्यभिमन्यते। उपायनं च गृह्णाति स्तोकं बह्वादरेण तथा। कथान्तरेषु स्मरति प्रहृष्टवदनस्तथा। इति रक्तस्य वै लक्ष्म चरेत्तस्य सेवनम्। तद्दत्तवस्त्रभूषादि चिह्नं संधारयेत् सदा। न्यूनाधिके स्वाधिकारे नित्योद्युक्तो भवेत् सदा। तदर्थां तत्कृतां वार्त्तां शृणुयाद्वापि कीर्त्तयेत्। चारसूचकदोषेण ह्यन्यथा यदसौ नृपः। शृणुयान्मौनमाश्रित्य तथ्यं यत्नेन मोहयेत्। आपद्गतं स्वभर्त्तारं कदापि न परित्यजेत्। बलकारणयादिष्टं यत् स्थानं स्वप्रादरेण तत्। तदिष्टं चिन्तयेच्चित्तं पावकस्याग्रसा न किम्। अप्रधानः प्रधानः स्यात्, काले चात्यन्तसेवनात्। प्रधानोऽप्यप्रधानः स्यात् सेवालस्यादिना यतः। नित्यं संसेवनरतो भृत्यो राज्ञः प्रियो भवेत्। स्वाधिकारकार्य्यं यत् द्राक् कुर्य्यात् सुमाना यतः। न कुर्य्यात् सहसा कार्य्यं नीचं राजापि चोदयेत्। तत्कार्य्यकारकाभावे राज्ञः कार्य्यं वदेत हि। काले यदुचितं कर्त्तुं नीचमप्युत्तमोऽर्हति। यस्मिन् प्रीतो भवेद्राजा तदनिष्टं न चिन्तयेत्। न दर्शयेत् स्वाधिकारगौरवं तु कदाचन। परस्परं नाभ्यसूयुर्न भेदं प्राप्नुयुस्तथा। राज्ञा चाधिकृताः सन्तः स्वस्वाधिकारगुप्तये। अधिकारिगणो राजा सद्वृत्तौ यत्र तिष्ठतः। उभौ, तत्र स्थिरा लक्ष्मीर्विपुला सुसुखी भवेत्। अन्याधिकारवृत्तं तु न ब्रूयात् पृष्टमप्युत। राजा न शृणुयादस्य सूचकस्य कदाचन। न बोधयन्ति च हितमहितं चाधिकारिणः। प्रच्छन्नवैरिणस्ते तु दासरूपसुपाश्रिताः। हिताहितं न शृणोति राजा मन्त्रिमुखाच्च यः। स दस्यू राजरूपेण प्रजानां धनहारकः। सुपुष्टव्यवहारा ये राजपुत्रैश्च मन्त्रिणः। विरुध्यन्ति च तैः सार्द्धं ते तु प्रच्छन्नतस्कराः। बाला अपि राजपुत्राः नावमान्यास्तु मन्त्रिभिः। सदा सुमधुरवाक्यैस्तु संबोध्यास्ते प्रयत्नतः। असदाचरितं तेषां कश्चित् राज्ञे न दर्शयेत्। स्त्रीपुत्रमोहो बलवान् तयोर्निन्दा न श्रेयसे। राज्ञोऽवश्यतरं कार्य्यं प्राणसंशयितं च यत्। आज्ञापयाप्यतस्त्वाहं करिष्ये तन्न निश्चितम्। इति विज्ञाप्य तत् कर्त्तुं प्रयतेत अशङ्कितः। प्राणानपि च संदद्यान्महाकार्य्ये नृपस्य च। भृत्यकुटुम्बपुष्ट्यर्थं नान्यथा तु कदाचन। भृत्या धनहराः सर्व्वे युक्त्या प्राणहरो नृपः। युद्धादौ तु महाकार्य्ये भृत्यप्राणान् हरेन्नृपः। नान्यथा भृतिरूपेण भृत्यो राजधनं हरेत्। अन्यथा हरतस्तौ तु भवतः पापभागिनौ। राजा च युवराजश्च मान्योऽमात्यादिकैः सदा। तदूनाधिकृतेन च किं तन्न्यूनाधिकृतेन किम्। धार्म्मिकस्यापि भृतको न्यूनः साहसिको यतः। न क्रीडयेद्राजवत्सं प्रोक्षितं तं विशेषयेत्। नाशनाच्चा राजपत्नी कन्या स्त्र्यपि च मन्त्रिभिः। राजसम्बन्धिनः पूज्याः सुहृदश्च यथार्हतः। नृपाङ्कितसुरं गच्छेत् त्यक्त्वा कार्य्यगतं महत्। मित्रायापि न वक्तव्यं राजकृत्यं सुमन्त्रितम्। भृतिं विना राजद्रव्यमदत्तं नाभिलाषयेत्। राजाज्ञया विना नेच्छेत् कार्य्यं माध्यस्थिकीं भृतिम्। न हि हन्यात् द्रव्यलोभात् न कार्य्यं यस्य कस्यचित्। स्वस्तोपुष्टधनप्राणैः काले संरक्षयेन्नृपम्। उत्कोचं नैव गृह्णीयात् नान्यथा बाधयेन्नृपम्। अन्यथादण्डकं भूपं नित्यं प्रबलदण्डकम्। निरुद्ध्य बाधयेत् सम्यक् एकान्ते राज्यगुप्तये। हितं राजाहितं यशोकानां तत्र कारयेत्। नवीनकरशुल्कादौ लोक उद्विजते ततः।”

“भृत्यः कुर्य्यात् तु राजाज्ञां शिष्यवत् सच्छियः पतेः। न क्षिपेत् वचनं राज्ञो ह्यनुकूलं प्रियं वदेत्। रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत्। न नियुक्तो हरेद् वित्तं नोपेक्षेत् तस्य मानकम्। राज्ञश्च न तथाकार्य्यं वेशभाषाविचेष्टितम्। अन्तःपुरचराध्यक्षो वैरभूतैर्निराकृतैः। संसर्गं न व्रजेद् भृत्यो राज्ञो गुह्यञ्च गोपयेत्। दर्शयेत् कौशलं किञ्चिद्राजानं च विशेषयेत्। राज्ञा यच्छ्राविता गुह्यं न तल्लोके प्रकाशयेत्। आज्ञाप्यमाने वाऽन्यस्मिन् किङ्करोमीति वा वदेत्। वस्त्रं रत्नमलङ्कारं राज्ञा दत्तं च धारयेत्। नानिर्द्दिष्टो द्वारि विशेन्नायोग्यभुवि राजदृक्। जृम्भां निष्ठीवनं कासं कोपं पर्य्यङ्किकाश्रयम्। भृकुटीं वातमुद्गारं तत्समीपे विवर्जयेत्। स्वगुणाख्यापने युक्त्या परात्मानं नियोजयेत्। शाठ्यं लौल्यं सपैशुन्यं नास्तिक्यं क्षुद्रता तथा। चापल्यञ्च परित्याज्यं नित्यं राजानुजीविना। श्रुतेन विद्याशिल्पैश्च संयोज्यात्मानमात्मना। राजसेवां ततः कुर्य्याद् भूतये भूतिवर्द्धनः। नमस्कार्य्याः सदा चास्य पुत्रवल्लभमन्त्रिणः। सचिवैर्नास्य विश्वासो राजचित्तप्रियश्चरेत्। त्यजेद् विरक्तं रक्तात् तु वृत्तिमीहेत राजवित्। अपृष्टश्चास्य न ब्रूयात् कामं ब्रूयात्तथा-

पदि। आसन्नो वाक्यसङ्ग्राही रहस्ये न च शङ्कते। कुशलादि परिप्रश्नं सम्प्रयच्छति चासनम्। तत्कथा-श्रवणाद्धृष्टो ह्यप्रियाण्यपि मन्यते। अल्पं दत्तं प्रहृ-ष्टाति स्मरेत् तत्तु कथान्तरे। रक्तस्य राज्ञः कर्त्तव्या सेवामन्यस्य वर्जयेत्" अग्निपु० २२१अ०।

ते च दशधा तेषां प्राधान्याप्राधान्ये च तत्रैव उक्ते यथा "पुरोधाः प्रथमं श्रेष्ठः सर्वेभ्यो राजराड्भवेत्। तदनु-स्यात् प्रतिनिधिः प्रधानस्तदनन्तरम्। सचिवस्तु ततः प्रोक्तो मन्त्री तदनु चोच्यते। प्राड्विवाकस्ततः प्रोक्तः पण्डितस्तदनन्तरम्। सुमन्त्रस्तु ततः प्रोक्तो ह्यमात्यस्तु ततःपरम्। दूतस्ततः क्रमादेते पूर्वश्रेष्ठा यथा गुणाः"।

तत्करणमुहूर्त्तादि मु०चि० उक्तं यथा

"क्षिप्रे मैत्रे वितृषिताऽर्कज्यवारे सौम्ये लग्नेऽर्के कुजे वा खलाभे। योनौ मैत्र्यां राशिपोश्चापि मैत्र्यां सेवा कार्य्या स्वामिनः सेवकेन" मु० चि०। "अथ सेवकस्य स्वामिसेवायां मुहूर्त्तं शालिन्याह। क्षिप्रे मैत्रे इति। क्षिप्रे मैत्रे अश्विनीपुष्यहस्तचित्रानुराधामृग-रेवतीपुष्यनक्षत्रेषु, वितृषिताऽर्कज्यवारे बुधशुक्रसूर्य्य-गुरुवारे तथा सौम्यग्रहे लग्नसंस्थे सति अर्के वा अथ वा कुजे भौमे वा खलाभे दशमैकादशस्थे सति सेवकेन भक्तेन स्वामिनो राजादेः सेवा कार्य्या। रा-जादिदर्शनं प्रागुक्तं वेतनग्रहणकार्य्याद्यङ्गीकाररूपा सेवाक्षिप्र मुहूर्त्ते कार्य्या तत्रापि स्वामिसेवकयोर्योनि-मैत्र्यां सत्याञ्च पुनः राशिपोः स्वामिसेवकयोर्यौ जन्मराशी तयोर्याविधिपती तयोरपि मैत्र्यां प्रीतौ सत्यां कार्य्या उक्तञ्च श्रीपतिना "शुभे विलग्ने दशमायगे च रवौ कुजे वा स्ववशेन योनेः। विद्यायुधाभ्यासरतेन कार्य्यः समाश्रयः स्वामिनि सेवकेन"। कश्यपोऽपि "दशमैकादशे सूर्य्ये कुजे वा शुभलग्नके। विद्यायुधाभ्यासयुक्तसेवा, कर्मापि सिद्ध्यति"। राशिमैत्रीसाहित्यं तु "बभ्रूरग-श्रेणिभेन्द्रसिंहमीनालिकुम्भं लवणालरश्च मोव्याप्रमथो-त्तरमाहिपश्च वैर भनार्योर्मध्यमयोश्चेति" वशिष्ठोक्तिमङ्गीकृत्य ज्ञातव्यम् यत्र यत्र योनिमैत्री राशिमैत्री च विवाहप्रकरणे चश्विन्यसुपयोरिति "मित्राण्य द्वयमयोरिति वक्ष्यते" पी० धा०। उपयमशब्दे १२५० पृ० दृश्यम्।

भृतिम त्रि० भरणाज्जातः भृ-क्ति-मप् च। भरणाज्जाते।

भृ(भ्र)मि पु० भ्रम-इन् पृषो० वा संप्रसारणम्। (घूर्णी) १वायुभेदे २भ्रमणे च। "किन्तु चक्रभ्रमिकारितागुणः" नैषधम्।

भृम्यश्व पु० भृमय इवाश्वाः यस्य। ऋषिभेदे तस्य पुत्रः अण्। भार्म्यश्व तदपत्ये ऋषौ नि० ६।४।

भृश अधःपतने दि०पर०अक०सेट्। भृश्यति इरित् अभृशत् अभर्शीत् बभर्श। उदित्त्वात् क्त्वा वेट्।

भृश न० भृश-क। १अतिशये २तद्वति त्रि०। ततो भृशादि० च्व्यर्थे भवतौ क्यङ् भृशायते। [शब्दरत्ना०।

भृशम् अव्य० मान्तमव्ययम् भृश-बा० कमु। १उत्कर्षे २शोभने

भृशादि पु० च्व्यर्थे भवतौ क्यङ्प्रत्ययनिमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा

"भृश शीघ्र चपल मन्द पण्डित उत्सुक सुमनस् दुर्मनस् अभिमनस् उन्मनस् रहस् रोहत् रेहत् संश्चत् तृपत् शश्वत् भ्रमत् वेहत् शुचिस् शुचिवर्चस् अण्डर वर्चस् ओजस् सुरजस् अरजस् एते भृशादयः। आकृति-गणोऽयं तेन श्यामायते इत्यादि सि० कौ०। एवं घूर्णायते "घूर्णायमानेक्षणम्" घूर्णायमानशब्दे दर्शितम्

भृषद् स्त्री दृषद्+पृषो०। पाषाणे शब्दरत्ना०। तत्र दृषद् इत्येव पाठः भृषदित्यपपाठः।

भृष्ट त्रि० भ्रस्ज-क्त। जलोपसेकं विना बालुकाग्निसंयोगाभ्यां पक्वे हेम०। "सुगन्धिः कफहा रूक्षः पित्तघ्नो भृष्ट-तण्डुलः" राजनि०।

भृष्टयव पु० कर्म०। धानाशब्दार्थे अमरः।

भृष्टान्न न० कर्म०। जलोपसेकेन भृष्टे तण्डुले (मुड़ि)शब्दच०

भृष्टि स्त्री भ्रस्ज-भावे क्तिन्। १भर्जने २शून्यवाटिकायां मेदि०

भॄ भर्जने भर्त्सने भरणे च क्र्यादि०प्वा०पर०सक०सेट्। भृणाति अभारीत् बभार बभरतुः।

भेक पुंस्त्री० भी-कन् कस्य नेत्त्वम्। (व्याङ) १जन्तुभेदे अमरः स्त्रियां जातित्वात् ङीष्। "तेजःशुक्रोबलकरः भ्रमहृद्-दाहमेहनुत्। स्वादुकृच्छ्रादिनाशी भेकस्तु परिकीर्त्तितः" राजनि०। २मेघे मेदि० ३मण्डूकपर्ण्यां स्त्री ङीप् अमरः

भेकट पु० भेक इव टलति टल-ड। मत्स्यभेदे द्विरूपकोषः।

भेकनि(लि) पु० (भाकुन) मत्स्यभेदे राजव०।

भेकपर्णी स्त्री भेक इव पर्णमस्याः ङीप्। मण्डूकपर्ण्याम्

भेकभुज् पु० भेकं भुङ्क्ते भुज-क्विप्। सर्पे त्रिका०।

भेकासन न० रुद्रयामलोक्ते पूजाङ्गे आसनभेदे तल्लक्षणं यथा

"भेकनामासनं योगं निजवक्षसि स्वं सुखम्। निधाय पादयुगलं स्कन्धे बाहौ पदोपरि। ध्यायेदिष्टपदं श्रीमान्

आसनस्थः सुखाद्ध तत्। यदि सर्वाङ्गसुत्तोल्य गगने खेचरासनम्। महाभेकासनं प्रोक्तं सर्वसिद्धिप्रदायकम्। महाविद्यामहामन्त्रं प्राप्नोति जपतीह यः"।

भेकुरि स्त्री अप्सरोरूपे नक्षत्रे "सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम" यजु०।१८।४० "तस्य चन्द्रमसः नक्षत्राणि नाम अप्सरसः कीदृश्यः भेकुरयः भां कान्तिं कुर्वन्तीति भेकुरयः पृषोदरादित्वात्साधुः "चन्द्रमाह गन्धर्वो नक्षत्रैरप्सरोभिर्मिथुनेन सहोच्चक्राम भेकुरयो नामेति भेकुरयोह नामैते भां हि नक्षत्राणि कुर्वन्तीति" शत०ब्रा० ६।४।१।६। [स्त्रियां ङीष्।

भेड पुंस्त्री० भी-ड तस्य नेत्त्वम्। मेषे (भेड़ा) हेमच०

भेड्र पुंस्त्री० भेड+पृषो०। मेषे त्रिका० स्त्रियां ङीष्।

भेद पु० भिद-घञ्। १पृथक्करणे २अन्यतो विश्लेषे राज्ञामुपायभेदे विपक्षनाशनार्थं ३तत्पक्षीयामात्यादिभेदने ४न्यायमतोक्ते अन्योऽन्याभावे च यथा घटात् पटस्य भेदः (तादात्म्येनाभावः) उपायभेदभेदप्रकारो यथा "परस्परन्तु ये द्विष्टाः क्रुद्धभीतावमानिताः। तेषां भेदं प्रयुञ्जीत परमं दर्शयेत् भयम्। आत्मीयान् दर्शयेदाशां येन दोषेण बिभ्यति। परास्तेनैव ते भेद्या रक्ष्यो वै ज्ञातिभेदकः। सामन्तकोपो बाह्यस्तु मन्त्र्यमात्यात्मजादिकः। अन्तःकोपश्चोपशाम्य कुर्वन् शत्रोर्जयं नयेत्" अग्निपु०२२५ अ०। ५द्वैधे ६विदारणे मेदि०। ७विरेके वैद्यकम्।

भेदक त्रि० भिद-ण्वुल्। १रेचके २विदारके ३भेदकारके ४विशेषणे च। "स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः। गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः" अमरः

भेदन त्रि० भेदयति भिद-णिच्-ल्यु। १विरेचने २विशेषणे च ३हिङ्गौ न० ४शूकरे ५अम्लवेतसे च पु० राजनि०। भिद-भावे ल्युट्। ६विदारणे ७द्वैधीकरणे न०।

भेदित त्रि० भिद-णिच्-क्त। १विदारिते भिन्ने च "आद्यं हृदये, शीर्षे वषट् वौषट् च मध्यमे। स एव भेदितो मन्त्रः सर्वशास्त्रविवर्जितः" तन्त्रसारोक्ते २मन्त्रभेदे पु०।

भेदिन् त्रि० भिद-णिनि। १भेदकारके स्त्रियां ङीप्। २अम्लवेतसे पु० राजनि०।

भेदुर न० भिदुर+पृषो०। वज्रे द्विरूपकोषः।

भेद्य त्रि० भिद-ण्यत्। १शस्त्रादिना विदार्ये २विशेष्ये च। "लिङ्गेष्वेषां भेद्यगामि यत्" अमरः। भेद्यरोगप्रतिषेधश्च सुश्रुते उक्तो यथा

"अथातो भेद्यरोगप्रतिषेधं व्याख्यास्यामः। छेदयित्वा विसर्पन्थिं छिद्रमस्य निराश्रयम्। पक्वं भित्त्वा तु शस्त्रेण सैन्धवेनावचूर्णयेत्। काशीसमागधीपुष्पनैपाल्यैर्वायुगेन तु। ततः क्षौद्रं घृतं दत्त्वा सम्यगेवमुपाचरेत्। रोचनाक्षारतुल्यानि पिप्पल्यः क्षौद्रमेव च। प्रतिसारणमेकैकं भिन्ने च कफजे इष्यते। महत्यपि च युञ्जीत क्षाराग्निविधिकोविदः। स्विन्नां भिन्नां विनिष्पीड्य भिषगञ्जननामिकाम्। शिलैलानतसिन्धूत्थैः सक्षौद्रैः प्रतिसारयेत्। रसाञ्जनमधुभ्यां वा भिन्नां वा शस्त्रकर्मवित्। प्रतिश्याय्योऽञ्जनैर्युञ्ज्यात् दुष्णैर्दीपशिखोद्भवैः। सम्यक्स्विन्ने कृमिग्रन्थौ भिन्ने स्यात् प्रतिसारणम्। त्रिफलातुत्थकाशीससैन्धवैस्तु रसक्रियाम्। भित्त्वोपनाहं कफजं पिप्पलीमधुसैन्धवैः। लेखयेन्मण्डलाग्रेण समन्तात् प्रोञ्छयेदपि। संस्वेद्य पत्रभङ्गैश्च स्वेदयित्वा यथासुखम्। अपाकाद्विधिनोक्तेन पश्चाद्भेद्यानुपाचरेत्। सर्वेष्वेतेषु विहितं विधानं स्नेहपूर्वकम्। सम्यक् प्रयतो भूत्वा कुर्वीत व्रणरोपणम्"।

भेर पु० भी-रन्। पटहे संक्षिप्तसा०। उज्ज्वलदत्तेन गौरा० ङीष् भेरीत्युक्ता भेरी दुन्दुभिरित्युक्तम्।

भेरि(री) स्त्री भी-क्रिन् वृद्ध्या० नि० वा ङीप्। १वृहड्ढक्कायाम्। २पटहे "रवः प्रगल्भाहतभेरिसम्भवः" कुमारः उज्ज्वलदत्तः। "ततः शङ्खाश्च भेर्यश्च" गीता।

भेरीस्वनमहास्वना स्त्री कुमारानुचरमातृभेदे भा०श०४७अ०

भेरुण्ड न० १गर्भधारणे शब्दर० २भयानके त्रि० ३देवताभेदे कालिपु० "महाविश्वेश्वरी श्वेता भेरुण्डा कुलसुन्दरी" तत्सहस्रनाम। ४पक्षिणीभेदे स्त्री मेदि०

भेल त्रि० भी-र रस्य लः। १पुरे २भीरुके ३निर्बुद्धौ ४मुनिभेदे विश्वः। ५चञ्चले शब्दर०। स्वार्थे क। भेलकं प्लवे उडुपे (भेला) शब्दर०।

भेष भये भ्वा०उभ०सक०सेट्। भेषति ते अभेषीत् अभेषिष्ट। ऋदित् चङि न ह्रस्वः। अबिभेषत् त।

भेषज न० भेष-घञ् भेषं रोगभयं जयति जि-ड। १औषधे। स्वार्थे ष्यञ्। भैषज्य तत्रार्थे भेषजसेवनकालादि भावप्र० उक्तं यथा

"अथ भेषजभक्षणसमयः "भैषज्यमभ्यवहरेत् प्रभाते प्रायशो बुधः। कषायांस्तु विशेषेण तत्र भेदस्तु दर्शितः। ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम्। किञ्चित् सूर्योदये जाते तथा दिवसभोजने। सायन्तने

भोजने च समुद्गादि तथा निशि। तत्र प्रथमकालः 'प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः। लेखनार्थे च भैषज्यं प्रभातेऽनन्नमाहरेत्'। अथ द्वितीयकालः "भैषज्यं विगुणे पाने भोजनाग्रे प्रशस्यते। अरुचौ चित्रभोज्यैश्च मिश्रं रुचिरमाहरेत्। समानवाते विगुणे मन्देऽग्नावग्निदीपनम्। दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक्। व्यानकोपे तु भैषज्यं भोजनान्ते समाहरेत्। हिक्काक्षेपककम्पेषु पूर्वमन्ते च भोजनात्"। अथ तृतीयकालः "उदाने कुपिते वाते स्वरभङ्गादिकारिणि। ग्रासग्रासान्तरे देयं भैषज्यं सान्ध्यभोजने। प्राणे प्रदुष्टे सान्ध्यस्य भुक्तस्यान्ते प्रदीयते। औषधं प्रायशो धीरैः कालोऽयं स्यात् तृतीयकः"। अथ चतुर्थकालः "मुहुर्मुहुश्च तृट्छर्द्दिहिक्काश्वासगरेषु च। सान्नञ्च भेषजं दद्यादिति कालश्चतुर्थकः"। अथ पञ्चमकालः "ऊर्द्ध्वजत्रुविकारेषु लेखने बृंहणे तथा। पाचने शमने देयमनन्नं भेषजं निशि" इति पञ्चमकालः। निरन्नस्य भेषजस्य गुणमाह "वीर्य्याधिकं भवति भेषजमन्नहीनं हन्यात्तदामयमसंशयमाशु चैव। तद्बालवृद्धयुवतीमृदुभिश्च पीतम् ग्लानिं परां नयति चाशु बलक्षयञ्च"। सान्नस्य भेषजस्य गुणमाह "शीघ्रं विपाकमुपयाति बलेन हिंस्यादन्नावृतञ्च मुहुर्वदनान्निरेति। एतद्धितं स्थविरबालकयाकुलाभ्यः प्राग्भोजनाद्यदशितं किल तन्न तद्वत्" तद्वत् सान्नादत्तवत् भेषजमिति शेषः। 'औषधशेषे भुक्तं भोजनशेषे यदौषधं पीतम्। न करोति गदोपशमं प्रकोपयत्यन्यरोगांश्च'। पीतमित्युपलक्षणं लीढादिकस्य। "अनुलोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णा सुमनस्कता। लघुत्वमिन्द्रियोद्गारशुद्धिर्जीर्णौषधाकृतिः। क्लमो दाहोऽङ्गसदनं भ्रममूर्च्छा शिरोरुजः। अरतिर्बलहानिश्च सावशेषौषधाकृतिः"। अथ भेषजभक्षणविधिमाह चरकः "देवान् गुरूंस्तथा विप्रान् पूजयित्वा प्रणम्य च। आशिषश्च समादाय श्रद्धया भेषजं भजेत्। रसायनमिवर्षीणां देवानाममृतं यथा। सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते। ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः। देवाश्च सौषधिग्रामा भूमिदेवाश्च पान्तु वः। औषधं हेमरजतमृद्भाजनपरिस्थितम्। पिबेदाम्रजनस्थाप्ये पमसत्रटनेक्षणः। त्रिस्रान्तस्य पवित्र्याथ पीत्वा पात्रमधोमुखम्। निःक्षिप्याचम्य सलिलताम्बूलाद्युपयोजयेत्।"

जन्म शुक्रे च निधनष्टुः। ४विष्णौ पु० "निर्वाणं भेषजं भिषक्" विष्णुस०। नक्षत्रविहितनक्षत्रादिकं ज्यो० त० उक्तं यथा

"विष्णुधर्मोत्तरे। हरिं गोद्विजचन्द्रार्कसुरान्वीन् प्रतिपूज्य च। पठन्नेवं मन्त्रमिमं पुण्यं विद्वान् भेषजमारभेत्। ब्रह्मदक्षाश्विरुद्रेन्द्राभूचन्द्रार्कानिलानलाः। ऋषयश्चौषधिग्रामाभूतसङ्घाश्च पान्तु ते। रसायनमिवर्षीणां देवानाममृतं यथा। सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते। अथ भक्षणे तु ते इत्यस्य मे इति वदेत्। अविशेषेण स्वयं भक्षणेऽपि पठेत्। "हरश्चोदये गुरुबुधेन्दुसितेषु तेषां वारे रवेश्च सुविधौ सुतिथौ सुयोगे। भे मूलपन्नगविशाखशिवेतरेषु जन्मर्क्षविष्टिरहितेष्वगदः शुभाय"। "औषधकरणं चित्रायुगे विधियुगे मित्रयुगे लघुषु वारुणविष्णौ। वस्तिविरेचनवेधाः शुभदिनतिथिचन्द्रलग्नेषु"। वस्तिश्चर्मपुटं विरेचनं विरेकः। वेधो व्रणादिवेधः। "पौष्णाश्विनीमृगविशाखमघेन्द्रपुष्यभाग्याहस्तादितीन्दुहरिमूलकृताभिलैः, चित्रान्वितैर्भृगुबुधेन्दुरवीज्यवारे भैषज्यपानमचिरादपहन्ति रोगान्। रत्नमालायाम् द्यूनगतनुनिधनव्ययगौ सद्दुष्टेषु निरतौ बलवत्सु। आयुषश्च हितकारिणि योगे कीर्त्तिता नियतमौषधसेवा। द्यूनादिषु पापयोगेष्वशून्येषु। आयुष्मानित्यादिशुभयोगे। भीमपराक्रमे, "भैषज्यपाने गुरुसोमशुक्राः शुभं विलग्नं दिवसोरवेश्च। तिथावरिक्ते करणे च शस्ते योगे च लग्ने द्विशरीरसंज्ञे"। तत्रैव "रोहिणी चानुराधा च शस्तमौषधभक्षणे" इति वचनाद्रोहिण्यामपि। "भैषज्यं लघुमृदुचरे मूलभे द्व्यङ्गलग्ने शुक्रेन्द्वीज्ये विदि च दिवसे चापि तेषां रवेश्च। शुद्धे रिष्फद्युनमृतिगृहे सत्तिथौ नोजनेभे" मु० चि०। "लघुमृदुचरे अश्विनीपुष्यहस्तचित्रामृगानुराधारेवतीश्रवणधनिष्ठाशततारकास्वातीपुनर्वसुभेषु मूले च भैषज्यम् औषधं प्रारब्धं भक्षितं वा सत् शुभफलदं भवतीत्यर्थः तथाचाह श्रीपतिः "पौष्णद्वये चादितिभद्वये च हस्तत्रये च श्रवणत्रये च। मैत्रे च मूले च मृगे च शस्तं भैषज्यकर्म प्रवदन्ति सन्तः"। वसिष्ठोऽपि "हस्तत्रये चाश्विनपौष्णभेषु मित्रेन्दुमूलेषु च सूर्य्यवारे। भैषज्यमुक्तं शुभवासरेऽपि"। अथ द्व्यङ्गलग्ने द्विस्वभावराशिषु मिथुनकन्याधनुर्मीनेषु शुक्रेन्द्वीज्ये विदि च

शुक्रचन्द्रबृहस्पतिबुधेषु दिवमावमबन्धेषु सतत्सु च पुनस्तेषां शुक्रचन्द्रबृहस्पतीनां रवेश्च दिवसे वारे वर्जितौ रिक्तामारहिते दिने भैषज्यं सत् । उक्तञ्च दीपिकायाम् "हरक्षोदये शुभबुधेन्दुसितेषु तेषां वारे रवेश्च सुविधौ सुतिथौ सुयोगे" । अथ रिपुफल्गुनकृतिमघेषु लग्नात् हादशषष्ठाष्टमस्थेषु शुभेषु शुभपापरहितेषु सत्सु भैषज्यं सत् तत्र वर्षफलप्रमादिना सत्यायुर्दायोयोगे औषधसेवनं हितमित्ययं विशेषो ध्येयः । तदुक्तं श्रीपतिना "शूनगतं निधनव्ययसुतौ षदषष्ठेषु नितरां बलवत्सु । आयुर्दये हितकारिणि योगे कीर्त्तिता नियतमौषधसेवा" । कश्यपोऽपि "षट्सप्ताष्टान्त्यशुद्धौ च बलिनः शुभखेचराः । आयुर्दायकरे योगे कर्त्तव्या ह्यौषधक्रियेति" । अथ जनेभे जन्मनक्षत्रे नो भैषज्यं सत् तदुक्तं दीपिकायां "जन्मनक्षत्रगचन्द्रः प्रशस्तः सर्वकर्मसु । क्षौरभैषज्यवादाध्वकर्त्तनेषु च वर्जयेत् ।" पी० धा० ।

भैषजाङ्ग न० ६त० । औषधस्य अनुपेये वस्तुनि शब्दच० ।

भैक्ष न० भिक्षैव तत्समूहो वा अण् । १भिक्षायां २भिक्षासमूहे च । भिक्षायां भवः तत्प्रतिपाद्यग्रन्थव्याख्या वा ऋगयना० अण् । ३भिक्षाभवे त्रि० स्त्रियां ङीप् । ४तत्प्रतिपादकग्रन्थव्याख्याने च । "भिक्षायनमनुद्योगात् प्राक् केनाप्यनिमन्त्रितम् । अयाचितं तु तद्भैक्ष्यं भोक्तव्यं मनुरब्रवीत्" उशनाः । [२।१०८

भैक्षचर्य्या स्त्री चर-भावे क्यप् ६त० । भिक्षाचरणे मनुः

भैक्षजीविका स्त्री ३त० । भिक्षया जीवने त्रि० ।

भैक्षव न० भिक्षूणां समूहः खण्डिका० अञ् । भिक्षुसमूहे । [चातुर्वर्ण्या० ष्यञ् । २भिक्षायाम् ।

भैक्ष्य न० भिक्षाणां समूहः ष्यञ् । १भिक्षासमूहे । भिक्षैव

भैदिक त्रि० भेदं नित्यमर्हति छेदा० ठञ् । नित्यभेदनार्हे

भैम त्रि०भीमस्य नृपस्येदम् अण् ।१भीमनृपसम्बन्धिनि स्त्रियां ङीप् । सा च २नलपत्न्यां दमयन्त्याम् । भीमेनोपासिता अण् ङीप् ।३माघशुक्लैकादश्याम् । एका०त० विष्णुधर्मोत्तरे "मृगशीर्षे शशधरे माघे मासि प्रजायते । एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः । द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते । तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी । तिलस्य दाता भोक्ता च षट्तिली नावसीदति" । मत्स्यपुराणे "यदाष्टम्यां चतुर्दश्यां द्वादश्यामथ भारत ! । अन्येष्वपि दिनर्क्षेषु न शक्तस्तदुपोषितुम् । ततः पुण्यामिमां भीमतिथिं पापप्रणाशिनीम् । उपोष्य विधिनानेन गच्छेद्विष्णोः परं पदम् । भीमतिथिं भैमीत्वेन ख्यातामेकादशीम्" रघु०

भैमगव पु० गोत्रभेदे "हरितकुत्सपिशङ्गदर्भभैमगवानामाश्वाम्बरीषयौवनाश्वेति" आश्व० श्रौ० १२।१२।१

भैमरथ पु० भीमरथमधिकृत्य कृतो ग्रन्थः । भीमरथाधिकारेण कृते ग्रन्थे

भैमसेन्य पु० भीमसेनस्यापत्यम् कुरुत्वात् ण्य माग्रे वार्ति० टाप् । भीमसेनापत्ये वा० रञ् । भैमसेनि तत्रार्थे

भैमायन पुं स्त्री० भीमस्यापत्यं युवा रञन्तात् फक् । भीमस्य यून्यपत्ये ।

भैरव पु० भीरोरिदम् अण् । १भये २तद्धति त्रि० अमरः । नाट्यादिप्रसिद्धे ३भयानके रसे । ४भयसाधने त्रि० मेदि० स्त्रियां ङीप् । ५शङ्करे ६तदवतारतद्गणभेदे शब्दर० ७नदभेदे च पु० हेमच० । ८भैरवपत्न्यां स्त्री ङीप् । भैरवभेदाश्चतुर्वर्गचिन्तामणौ० १७ अ० यथा "दैत्याधिपः सत्वयमत्य करोरसि गदां क्षिपत् । अंहितस्तु महायोगी सर्वाधारः प्रजापतिः । गदापातक्षताङ्गुरि ललुधोऽसृगपापतत् । पूर्वधाराससञ्जतो भैरवोऽग्निसमप्रभः । विद्याराजेति विख्यातः पद्ममालाविभूषितः । तथा दक्षिणधारोत्थो भैरवः प्रेतमास्थितः । कामराजेति विख्यातः कृष्णाञ्जनसमप्रभः । नागराजेति विख्यातस्तक्षमालाविभूषितः । जातजाद्रुधिराज्जातो भैरवः शूलभूषितः । स्वच्छन्दराजेति ख्यात इन्द्रायुधसमप्रभः । भूयिष्ठाद्रुधिराज्जातो भैरवः फणभूषितः । ख्यातो लम्बितराजेति घोभाञ्जनसमप्रभः । ततो भूद्वेराजेति भैरवः क्षतजादथ । ७ष्टराजो बभूवाथ क्षतजाद्भैरवोऽपरः । एवं हि सप्तरूपोऽसौ कथ्यते भैरवोत्तमे ! । विघ्नराजोऽष्टमः प्रोक्तो भैरवाष्टकमुच्यते ।" शारदीयदुर्गापूजायां तत्राष्टौ भैरवा यथोक्तं ब्रह्मवै० प्र०ख० ६१अ० । "आदौ महाभैरवञ्च संहारभैरवन्तथा । असिताङ्गभैरवञ्च रुरुभैरवमेव च । ततः कालभैरवञ्च क्रोधभैरवमेव च । ताम्रचूडं चन्द्रचूडम् अन्ते च भैरवद्वयम् । एतान् संपूज्य मध्ये च नव शक्तीश्च पूजयेत् ।" काशीपूजादौ पूजनीया भैरवाश्च तन्त्रसारोक्ता यथा "असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः । कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः" । ९शिवगणाधिपभेदे काशी०पु० ४४ अ० यथा "नन्दी भृङ्गी

महाकालो वेतालो भैरवस्तथा । अङ्गं भूत्वा महेशस्य शीतभीतास्तपोधनाः । येनाङ्गुष्ठशरीरेण प्रापिरे तपसोऽबलात् । गणानामाधिपत्यन्तु ते जानन्ति हरं परम् ।" शिवांशचन्द्रशेखरस्य पार्वत्यंश तारावतीगर्भजाते १०वेतालसोदरे च यथोक्तं कालिपु०४५अ०। "प्रविवेश ततो देवी स्वयं तारावतीतनौ । महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः। कामावसाने तस्यान्तु सद्योजातं सुतद्वयम् । अभवत् पश्चाद्वत्स ! तथा शाखामृगाननम् । ततस्तयोर्नाम चक्रे नारदवचनान्नृपः । ज्येष्ठो भैरवनामाभूत् भीरोः पुत्रो भयङ्करः । वेतालसदृशः कृष्णो वेतालोऽभूत्तथाऽपरः" । अपि च "योऽसौ भृङ्गी हरसुतो महाकालोऽपि भूगतः । तावेव गौरीशापेन सम्भूय नरयोनिजौ । वेतालभैरवौ जातौ पृथिव्यां नृपवेश्मनि । यथा भृङ्गिमहाकालावुत्पन्नौ प्राक् तथा शृणु । योऽसौ महाभैरवाख्यः सकायः शारभो हरः । भैरवः पृथगेवायं गणाध्यक्षो हरात्मजः ।" देवीभेदेषु शिवरूपभैरवभेदाश्च तोडलतन्त्रे १पटले उक्ता यथा "शिव उवाच । शृणु पार्वति ! सुभगे ! कालिकायाश्च भैरवम् । महाकालं दक्षिणाया दक्षभागे प्रपूजयेत् । महाकालेन वै सार्द्धं दक्षिणा रमते सदा । ताराया दक्षिणे भागे अक्षोभ्यं परिपूजयेत् । समुद्रमथने देवि ! कालकूटं समुत्थितम् । सर्वे देवाः सदाराश्च महाक्षोभमवाप्नुयुः । क्षोभादिरहितं यस्मात् पीतं हालाहलं विषम् । अतएव महेशानि ! अक्षोभ्यः परिकीर्त्तितः । तेन सार्द्धं महामाया तारिणी रमते सदा । महात्रिपुरसुन्दर्य्या दक्षिणे पूजयेत् शिवम् । पञ्चवक्त्रं त्रिनेत्रञ्च प्रतिवक्त्रं सुरेश्वरि ! । तेन सार्द्धं महादेवी सदा कामकुतूहला । अतएव महेशानि ! पञ्चमीति प्रकीर्त्तिता । श्रीमद्भुवनसुन्दर्य्या दक्षिणे त्र्यम्बकं यजेत् । स्वर्गे मर्त्त्ये च पाताले या चाद्या भुवनेश्वरी । एतया रमते तेन त्र्यम्बकस्तेन कथ्यते । सर्वाङ्गश्च समाख्यातः सर्वतन्त्रे प्रपूजितः । भैरव्या दक्षिणे भागे दक्षिणामूर्त्तिसंज्ञकम् । पूजयेत् परयत्नेन पञ्चवक्त्रं तमेव हि । छिन्नमस्तादक्षिणांशे कबन्धं पूजयेत् शिवम् । कबन्धपूजनाद्देवि ! सर्वसिद्धीश्वरो भवेत् । धूमावती महाविद्या विधवारूपधारिणी । बगलाया दक्षभागे एकवक्त्रं प्रपूजयेत् । महारुद्रेति विख्यातं जगत्संहारकारकम् । मातङ्गीदक्षिणांशे च मतङ्गं पूजयेत् शिवम् । तमेव दक्षिणामूर्त्तिं जगदानन्दकारकम् । कमलाया दक्षिणांशे विष्णुरूपं सदाशिवम् । पूजयेत् परमेशानि ! स सिद्धो नात्र संशयः । पूजयेदन्नपूर्णाया दक्षिणांशे च रूपकम् । महामोक्षप्रदं देवं दशवक्त्रं महेश्वरम् । दुर्गाया दक्षिणे देशे नारदं परिपूजयेत् । नकारः सृष्टिकर्त्ता च दकारः पालकः सदा । रेफः संहाररूपत्वान्नारदः परिकीर्त्तितः । अन्याश्च सर्वविद्याश्च ऋषिर्यः परिकीर्त्तितः । स एव तस्या भर्त्ता च दक्षभागे तु पूज्यते"। ११रागभेदे स च महादेवस्वरूपः । धैवतनिषादषड्जगान्धारमध्यमरूपपञ्चस्वरैर्मिलितैर्गेयः । अस्य स्थाने धैवतस्वरः शरदृतौ प्रातर्गेयता । मतान्तरे अस्य रागिण्यः पञ्च । भैरवी वैराटी मधुमाधवी सिन्धवी बङ्गाली चेति" कल्लिनाथमते भैरवी गुर्जरी भाषा बिलावली कर्णाटी वसंशा बड़हंसी चेति षट् । भरतमते मधुमाधवी ललिता वरारी बङ्गाली भैरवी चेति अन्यविधा पञ्च सङ्गी० दा० दयत्रा । १२महाविद्यामूर्त्तिभेदे स्त्री ङीप् । सा च पञ्चदशविधा तन्त्रसारे उक्ता यथा

१त्रिपुरभैरवी २सम्पत्प्रदा भैरवी ३कौलेशभैरवी ४भयविध्वंसिनी भैरवी ५सकलसिद्धिदा भैरवी ६चैतन्यभैरवी ७कामेश्वरी भैरवी ८षट्कूटा भैरवी ९नित्या भैरवी १०रुद्रभैरवी ११भुवनेश्वरी भैरवी १२सकलेश्वरी भैरवी १३त्रिपुरबाला भैरवी १४नवकूटा बाला भैरवी १५अन्नपूर्णेश्वरी भैरवी च एतासां मन्त्रध्यानादिकं क्रमेण तत्र द्रष्टव्यम् । १३तारिणीशक्तियोगिनीभेदे च "महाकाली च रुद्राणी उग्रा भीमा तथैव च । घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी । अष्टमी भैरवी प्रोक्ता योगिनीस्ताः प्रपूजयेत्" तन्त्रसा० । तत्र शिवस्य पत्न्यां "कालीतन्त्रादौ "भैरव्युवाच "कालीपूजा श्रुता नाथ" कालीवचनम् १४भैरवरागस्य पत्नीरूपरागिणीभेदे स्त्री "भैरवी कौशिकी चैव भाषा वेलावली तथा । बङ्गाली चेति रागिण्यो भैरवस्यैव वल्लभाः" संगीतसा०। मतान्तरे १५मालवरागस्य पत्नीभेदे "धानसी मानसी चैव रामकीरी च सिन्धुडा । आशावरी भैरवी च मालवस्य प्रिया इमाः" । तस्या गानकालः पूर्वाह्णः । "विभाषा ललिता चैव कामोदा पटमञ्जरी । रामकीरी रामकेली वेलावारी च गुर्जरी । देशकारी च सुभगा पञ्चमी च गडाहरी । भैरवी चाद्य

कौमारी रागिण्यो दश पञ्च च । एताः पूर्वाङ्गकाले तु गीयन्ते गायनोत्तमैः" सङ्गीतदा० । १५नागभेदे पु० भा० आ० ५७ अ० ।

भैरवीचक्र न० भैरव्याः पूजनार्थं चक्रम् । देवीपूजार्थे कुलाचारवतां चक्राकारसमूहे तद्विधिर्यथा उत्पत्तितन्त्रे "नित्यं नैमित्तिकं काम्यं प्रकुर्य्याच्च दिने दिने । कुजवारे कुहूर्त्ते च तिथौ चन्द्रमके तथा । भैरव्याः कल्पितं चक्रं संस्थाप्य पूर्ववत् प्रिये । सुरायाः शोधनं कुर्य्याद् यथावत् परमेश्वरि ! । प्रवृत्ते भैरवीचक्रे सर्वे वर्णा द्विजोत्तमाः । निवृत्ते भैरवीचक्रे सर्वे वर्णाः पृथक् पृथक्" ।

भैषज न० भेषजमेव स्वार्थे अण् ।१औषधे २लावकपक्षिणि जटा० भिषजो गोत्रापत्यं गर्गा० यञ् । भैषज्य तस्य छात्राः कण्वा० अण् यलोपः । ३भिषजो गोत्रापत्यच्छात्रेषु ब०व०

भैषज्य न० भिषजः कर्म भेषज-स्वार्थे वा ष्यञ् । १औषधे भिषजोऽपत्यं गर्गा० यञ् । २भिषजोऽपत्ये पुंस्त्री० ।

भैष्णज पु० ब०व० भिष्णजो गोत्रापत्यं गर्गा०यञ् तस्य छात्राः कण्वा० अण् यलोपः । भिष्णग्गोत्रापत्यच्छात्रेषु ।

भैष्णज्य पुंस्त्री० भिष्णजो गोत्रापत्यं गर्गा०यञ् । तद्गोत्रापत्ये

भैष्मकी स्त्री भीष्मकस्य अपत्यम् इञ् ङीप् । भीष्मकापत्यायां रुक्मिण्याम् हरिवं० १२० अ० ।

भोक्तृ त्रि० भुज-भोजने अवने च तृच् । १भोजनकर्त्तरि २भोगकर्त्तरि च ३त्राणकर्त्तरि हेमच० । स्त्रियां ङीप् । ४विष्णौ पु० "भ्राजिष्णुर्भोजनं भोक्ता" विष्णुस० ।

भोग पु० भुज-भावकर्मादौ घञ् । १सुखे २दुःखे ३सुखदुःखान्यतरानुभवे ४स्त्र्यादीनां भाटके ५भाटकमात्रे च ६सर्पदेहे ७तत्फणायाञ्च अमरः । ८धने ९पालने १०भोजने च मेदि० ११देहे १२सर्पे १३माने च शब्दरत्ना० १४रव्यादीनां राशिगतिकाले "अतीतानागतो भोगो नाड्यः पञ्चदश स्मृताः" तिथित० । १५भूम्यादीनां फलभुक्तौ भुक्तिशब्दे दृश्यम् । १६विभवभेदे "कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा । भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च" ब्रह्मवै० प्र० ख० २२अ० ।

भोगक त्रि० भोग+संज्ञायां कन् । भोगकादीने ततः विदा० अपत्ये अञ् । भौगक तदपत्ये पुंस्त्री० ।

भोगगृह न० भोगार्थं गृहम् । वासगृहे हेमच० ।

भोगदेह पु० भुज्यते सुखदुःखादिकमत्र भुज-आधारे घञ् कर्म० । पुण्यपापफलभोगार्थे देहे "प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते" शु० त० । २भोगसाधने देहे स च लिङ्गशरीरात्मकः तस्यैव भोगसाधनत्वात् "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" वेदान्तिनः । सांख्यमते पञ्चप्राणस्थाने पञ्चभूतमात्रा इति भेदः । स्थूलदेहस्य भोगावच्छेदकत्वात् उपचारात् तथात्वमिति बोध्यम् । तद्विवृतिर्यथा "शृणु देहविवरणं कथयामि यथागमम् । पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम् । देहिनां देहबीजञ्च स्रष्टुः सृष्टिविधौ परम् । पृथिव्यादिपञ्चभूतैर्यो देहो निर्म्मितो भवेत् । स कृत्रिमो नश्वरश्च भस्मसाच्च भवेदिह । वृद्धाङ्गुष्ठप्रमाणश्च यो जीवः पुरुषः कृतः । बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे । स देहो न भवेद्भस्म ज्वलदग्नौ यमालये । जले न नष्टो देहो वा प्रहारे सुचिरे कृते । न शस्त्रे च न चास्त्रे च न तीक्ष्णकण्टके तथा । तप्तद्रवे तप्तलौहे तप्तपाषाण एव च । प्रतप्तप्रतिमाश्लेषेऽप्यत्यूर्द्ध्वपतनेऽपि च । न च दग्धो न भग्नश्च भुङ्क्ते सन्तापमेव सः" ब्रह्मवै०प्र०२९अ० ।

भोगपाल पु० भोगं भोगसाधनमश्वं पालयति पालि-अण् उप०स० । अश्वरक्षके शब्दमा० ।

भोगपिशाचिका स्त्री भोगे पिशाचिकेव । क्षुधायाम् हारा० ।

भोगप्रस्थ पु० उत्तरस्थदेशभेदे वृ०सं० १४अ० दृश्यम् ।

भोगभूमि स्त्री भोगार्थैव भूमिः न कर्मार्था । भारतवर्षातिरिक्ते वर्षे "तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ! । यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः" विष्णुपु० २अंशे ३अ० ।

भोगवती स्त्री भोगः सर्पशरीरं भूम्नाऽस्त्यस्याम् मतुप् मस्य वः ङीप् ।१पातालगङ्गायाम् "भोगवती च पाताले स्वर्गे मन्दाकिनी तथा" इति पुराणम् । २कुमारानुचरमातृभेदे भा० श० ४७ अ० । ३नदीभेदे भा० व० १२अ० । ४भोगयुक्ते त्रि० स्त्रियां ङीप् ।

भोगवर्द्धन पु० देशभेदे मार्क०पु० ५७ अ० ४८ श्लो० ।

भोगसद्मन् न० भोगार्थं सद्म । वासगृहे शब्दरत्ना० ।

भोगायतन न० ६त० । स्थूलदेहे "भोक्तुरधिष्ठानात् भोगायतननिर्माणमन्यथा पूतिभावः" सां०सू० ।

भोगार्ह न० भोगमर्हति अर्ह-अण् उप०स० । १धान्ये राजनि० भोग्ये २वस्तुमात्रे च त्रि० ।

भोगावली स्त्री ६त० । १भोगश्रेणौ । २स्तुतौ उपचारात् ३स्तुतिपाठके शब्दा० ४नागपुर्यां हेमच० ।

भोगावास पु० भोगार्थं आवासः। वासगृहे हारा०।

भोगिक पु० भोगः अश्वभोगः अस्त्यस्य कर्मत्वेन ठन्। अश्वरक्षके शब्दमा०।

भोगिकान्त पु० ६त०। वायौ त्रिका०। सर्पाणामनिलाहारत्वात् तस्य तत्कान्तत्वम्।

भोगिगन्धिका स्त्री भोगिनः सर्पस्येव गन्धो यस्याः कप् कापि अत इत्वम्। गन्धनाकुल्याख्ये क्षुपे नैघण्टुप्र०।

भोगिन् पु० भोगः फणाऽस्त्यस्य इनि। १सर्पे अमरः तद्देवताके। २अश्लेषानक्षत्रे च ३ग्रामणि ४नृपे मेदि०तस्य प्रशस्तभोगवत्त्वात्तथात्वम्। ५नापिते त्रिका०। ६व्याडनिवरे हेमच० ७भोगयुते त्रि० स्त्रियां ङीप् सा च ८महिषी-भिन्नराजभार्यायाम् अमरः भङ्गिनीत्यत्र पाठान्तरम्।

भोगिभुज् पु० भोगिनं सर्पं भुङ्क्ते भुज-क्विप्। मयूरे नैघण्टुप्र०।

भोगिवल्लभ न० ६त०। चन्दने राजनि०।

भोगीन्द्र(श) पु० भोगी इन्द्र इव ६त० वा। १अनन्तदेवे शब्दरत्ना० २वासुकौ च।

भोग्य न०भुज-ण्यत् कुत्वम्।१धने २धान्ये च। भोगमर्हति यत्। ३भोगार्हे त्रि०। भोगार्हस्त्रियां ४वेश्यायाम् स्त्री राजनि०।५आधिभेदे पु०यथाह नारदः"विश्वस्येन्न हा-वस्तु प्रतिभूराधिरेव च। अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः। कृतकालोपनेयश्च यावद्देयोद्यतस्तथा। स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च"।

भोज पु० भुज-अच्। १स्वनामख्याते देशभेदे स च देशः (भोजपुर) इति ख्यातः। २धारापुरस्य नृपभेदे भोजप्रबन्ध भोजचरित्रादौ तद्वृत्तान्तो दृश्यः। "धन्यः श्रीभोजराजस्त्रिभुवनविजयी" उद्भटः। वसुदेवस्य शान्तिदेवागर्भजाते ३पुत्रभेदे पु० हरिवं० ३६अ०। ४द्रुह्युनृपपुत्रभेदे भा० आ० ८२ अ०।

भोजक त्रि० भोजयति भुज-णिच्-ण्वुल्। १भोजनसम्पादके याज्ञ०१।२१५ श्लो०भुज-ण्वुल्।२भोजनकर्त्तरि त्रि०

भोजकट पु०भोजः कट इव। भोजाख्ये देशे भा०स०३१अ०। भोजकटे भवः "एङ्प्राचां देशे" पा० वृद्धसंज्ञायाम् "वृद्धाच्छः" पा० छ। भोजकटीय तद्देशभवे त्रि०।

भोजदेव पु० भोजो देव इव। भोजराजे तेन च पातञ्जलवृत्तिप्रभृतिग्रन्थाः कृताः।

भोजन न० भुज-ल्युट्।१कठिनद्रव्यस्य गलबिलाधःसंयोजने। करणे ल्युट्। २धने निघण्टुः ३विष्णौ पु०।"भ्राजिष्णु-र्भोजनं भोक्ता" विष्णुस०। "भोज्यरूपा च प्रकृतिर्यया भोजनमुच्यते" भाष्ये भोज्यरूपेण परिणामात् विष्णो-स्तदधिष्ठानत्वात् तथात्वमिति भाष्यादौ दृश्यम्। भोजन-गुणादि भावप्र० उक्तम् आहारशब्दे ८९७पृ० दृश्यम्। तत्र विशेष आह्निकतत्त्वोक्तोऽत्राभिधीयते "विष्णुपु० "मन्त्राभिमन्त्रितं शस्तं न च पर्युषितं नृप!। अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात् तथा। तद्वद्बादरिके-भ्यश्च गुडपक्वेभ्य एव च। भुञ्जीतोद्धृतसाराणि न कदाचिन्नरेश्वर!। नाशेषं पुरुषोऽश्नीयादन्यत्र जगती-पते!। मध्वम्बुदधिसर्पिर्भ्यः सक्तुभ्यश्च विवेकवान्। अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं रसम्। लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्तथा। प्राग्द्रवं पुरुषोऽश्नन् वै मध्ये च कठिनाशनः। पुनरन्ते द्रवाशी तु बला-रोग्ये न मुञ्चति। अनिन्द्यं भक्षयेदित्थं वाग्यतोऽन्न-मकुत्सयन्। पञ्च ग्रासान् महामौनं प्राणाद्याप्यायनाय तत्"। मन्त्राभिमन्त्रितमिति मन्त्रानादेशे गायत्रीति वच-नात् गायत्र्याभिमन्त्रितम्। नारदः "ग्रासं प्रमाणं भूयिष्ठम् अत्यन्तञ्च निवर्जयेत्। न चैकरससेवायां प्रसज्येत कदाचन।" "मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम्। अह्नि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः" छन्दोगप०। विष्णुः "न तृतीयमथा-श्नीयादापद्यपि कदाचन"। भगवद्गीतासु "आयुःसत्त्व-बलारोग्यसुखप्रीतिविवर्द्धनाः। रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः। कट्वम्ललवणात्युष्ण-तीक्ष्णरूक्षविदाहिनः। आहारा राजसस्येष्टा दुःख-शोकामयप्रदाः। यातयामं गतरसं पूति पर्युषितञ्च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्"। महाभारते "इन्दुमतश्चलस्तु प्रचरेत् कायशोधनम्। पिबेद् यथापि गङ्गाम्भसा साम्यं न यास्यतो"। गङ्गामधिकृत्य मत्स्यपुराणम् "अवगाह्य च पीत्वा च पुनात्यासप्तमं कुलम्"। देवीपुराणम् "ये चैव भक्तितस्तस्याः तीर्थोदकाद्यञ्च भुञ्जते। ते सर्वपापनिर्मुक्ताः प्रभवन्ति गतामयाः"। मनुः "आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः। श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः"। नियमे त्वेवम्। अनियमे तु नोदङ्मुखः। हारीतः "नोदङ्मुखो-ऽश्नीयात्" इति "निष्कामस्य तु प्राङ्मुखेनैव भोजनम्। यथाह देवल "प्राङ्मुखोऽन्नानि भुञ्जीत शुचिः पीठमधि-

ष्ठितः। विशुद्धवदनः प्रीतो भुञ्जीत न विदिङ्मुखः" जीवन्मातृकस्य दक्षिणामुखत्वनिषेधमाह आपस्तम्बः "दक्षिणामुखो न भुञ्जीत एवंविधभोजनममायुष्य मातुरुपदिशति" केचित्तु "कुरुक्षेत्रं गयाश्राद्धं तिलैस्तर्पणमेव च। न जीवत्पितृकः कुर्य्याद्दक्षिणामुखभोजनम्" इत्याचारेन्दुधृतवचनाज्जीवत्पितृकस्यापि निषेध इत्याहुः। व्यासः "पञ्चार्द्रो भोजनं कुर्य्यात् प्राङ्मुखो मौनमास्थितः। हस्तौ पादौ तथैवास्यमेषु पञ्चार्द्रता मता।" गोभिलः "भुञ्जानेषु तु विप्रेषु यस्तु पात्रं परित्यजेत्। भोजने विघ्नकर्त्तासौ ब्रह्महापि तथोच्यते"। आपस्तम्बः "दिवा पुनर्न भुञ्जीतान्यत्र फलमूलेभ्यः"। मनुः "नातिप्रगे नातिसायं न सायं प्रातराशितः"। अतिप्रगेऽचिरोदितसूर्य्ये अतिसायं सूर्य्यास्तमितिसमय एवं प्रातराशितः दिनभोजनेनातितृप्तः न सायं न रात्रौ भुञ्जीतेत्यर्थः। आपस्तम्बः "यस्तु भोजनशालायां भोक्तुकाम उपस्पृशेत्। आसनस्थो न चान्यत्र स विप्र पङ्क्तिदूषकः" भोजनशालायां भोक्तुकामः सन् आसनस्थो वान्यत्र स्थितो वा न चोपस्पृशेत्। बौधायनः "उपविष्टे समे स्थाने शुचौ श्लाघ्यासनान्विते। चतुरस्रं त्रिकोणञ्च वर्त्तुलञ्चार्द्धचन्द्रकम्। कर्त्तव्यमानुपूर्व्वेण ब्राह्मणादिषु मण्डलम्। अकृत्वा मण्डलं ये तु भुञ्जतेऽधमयोनयः। तेषान्तु यक्षरक्षांसि हरन्त्यन्नानि तद्रसात्"। आपस्तम्बः "भिन्नकांस्ये तु यो विप्रो यदि भुङ्क्ते तु कामतः। उपवासेन चैकेन पञ्चगव्येन शुद्ध्यति"। तथा शूद्रादिभोजनेनापरिष्कृतपात्रेऽपि। वृद्धमनुः "ताम्रपात्रे न भुञ्जीत भिन्नकांस्ये मलाविले। पलाशपद्मपत्रे वा गृही भुक्त्वैन्दवं चरेत्"। मध्यदेशमानधृताग्निपुराणम् "अर्कपत्रे तथा पृष्ठे आयसे ताम्रभाजने। करे कर्पटके चैव भुक्त्वा चान्द्रायणं चरेत्" पृष्ठे कदलीपत्रादिपृष्ठे। पैठीनसिः "ताम्ररजतसुवर्णाश्ममणिमुक्तास्फटिकानां भिन्नमभिन्नम् इति न दोषः"। अत्र पाषाणपात्रे भोजने विहितम् "तैजसानां मणीनाञ्च सर्व्वस्याश्ममयस्य च। भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः" इति मनुना पाषाणपात्रस्य शुद्धिविधानाच्च। प्रचेताः "ताम्बूलाभ्यञ्जने चैव कांस्यपात्रे च भोजनम्। यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्"। अत्रिः "आसने पादमारोप्य यो भुङ्क्ते ब्राह्मणः क्वचित्। मुखेन चान्नमश्नाति तुल्यं गोमांसभक्षणैः"। मुखेन हस्तोत्तोलनं विना गवादिवदित्यर्थः। आश्वमेधिके "आर्द्रपादस्तु भुञ्जीत प्राङ्मुखश्चासने शुचौ। पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनः"। बौधायनः "भोजनं हवनं दानमुपहारः परिग्रहः। बहिर्जानु न कार्य्योऽपि तद्वदाचमनं स्मृतम्"। हारीतः "मार्जनाञ्च बलिकर्म्म भोजनानि देवतीर्थेन कुर्य्यात्"। पराशरभाष्ये वृद्धमनुः "न पिबेन्न च भुञ्जीत द्विजः सव्येन पाणिना। नैकहस्तेन च जलं शूद्रेणावर्जितं पिबेत्"। मार्कण्डेयपुराणम् "पादप्रसारणं कृत्वा न च वेष्टितमस्तकः"। मनुः "पूजयेदशनं नित्यं अद्याच्चैव मकुत्सयन्। दृष्ट्वा हृष्येत् प्रसीदेच्च प्रणमेच्चैव सर्व्वदा। अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिः प्रार्थयेत्ततः। अस्माकं नित्यमस्त्वेतदिति भक्त्याथ वन्दयेत्"। विष्णुपु० "नागः कूर्म्मश्च कृकरो देवदत्तो धनञ्जयः। बहिस्था वायवः पञ्च तेषां भूमौ प्रदीयते। अदत्त्वा वाह्यवायुभ्यः प्राणादिभ्यो न होमयेत्"। इति शिष्टपठितवचनान्नागादिभ्यो बलिदानमिति प्राचीनाचारः। तस्माद्देवेभ्योदत्त्वा भोक्तव्यं तथा च भगवद्गीतायाम् "इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः। तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः"। यज्ञैः संवर्द्धिता देवा वो युष्मभ्यं भोगानन्नादीनि वृष्ट्यादिद्वारा दास्यन्ति। अतो देवैर्दत्तान् अन्नादीन् तेभ्योऽदत्त्वा यो भुङ्क्ते स चौर एव। स्मृतिः "निवेद्य प्राशनात् पूर्व्वं देवपादोदकाञ्जलिः। होतव्या जठरे वह्नौ स्नेन पाचितवेन तु"। तेन पादोदकेनापोशानं कृत्वा प्राणाहुतिर्नैवेद्येन कार्य्या" आ०त० रघु०।

भोजनगर न० भोजदेशस्थे नगरे धारापुरे भा० व० ११७अ० भोजपुरादयोऽप्यत्र।

भोजपति पु० ६त०। १भोजदेशाधिपे २कंसराजे च भाग० [१०।४७अ० भोजनाथादयोऽप्यत्र

भोजिन् त्रि० भुज-णिनि। भोजनकर्त्तरि स्त्रियां ङीप्।

भोज्य त्रि० भोज-ण्यत् भक्ष्यार्थत्वान्न कुत्वम्। १भक्षणीयद्रव्यमात्रे २भक्ष्यभेदे आहारयोग्ये इत्यमरः। ३श्राद्धकल्पे पितृणां तृप्तत्रयं देये ४खाद्यादौ च।

भोज्यसम्भव पु० सम्भवत्यस्मात् सम्+भू-अपादाने अप् ६त०। भोज्यजाते देहस्थे रसधातौ शब्दच०।

भोट पु० (भोटान) देशभेदे शब्दरत्ना०।

भोटाङ्ग पु० (भोटान) देशभेदे शब्दर०।

भौलि पु० भा-उलि। उष्ट्रे त्रिका०।

भोस् अव्य०भा-डोसि। १सम्बोधने अमरः २प्रश्नविधाने शब्दर०

भौजीय त्रि० भोजे देशभेदे भवः गहा०छ। भोजदेशभवे।

भौत पु०भूतानि प्राणिनोऽधिकृत्य प्रवृत्तः तानि देवता वा अस्य अण्। १देवले ब्राह्मणे शब्दमा०। बलिकर्मरूपे भूतकर्त्तव्ये पञ्चयज्ञान्तर्गते २महायज्ञभेदे। "होमो दैवो बलिर्भौतो ब्राह्मोऽतिथिपूजनम्" मनुः। ३रात्रौ स्त्री ङीप् हेमच०। भूतप्रियत्वात्तस्यास्तथात्वम्।

भौतिक त्रि० भूतानि पृथिव्यादीनि विकाराद् वा अधिकृत्य जातानि ठञ्। १भूताधिकारेण जाते "व्याकृताविकल्पस्तैर्भौतिकानि" शा० सू०। २उपद्रवे व्याघ्रादौ। ३मुक्तायां राजनि०। ४महादेवे पु०त्रिका०।

भौत्य पु० भूतेरपत्यं बा० यञ्। चतुर्दशमनौ हरिवं ७अ०। "बभूवाङ्गिरसःपुत्रो भूतिर्नाम्नातिकोपनः" इत्युपक्रमे मार्कपु० १०० तदुत्पत्त्यादिकमुक्तम्।

भौम पु० भूमेरपत्यं तस्या इदं वा अण्। १नरकासुरे "त्वयि भौमं गते जेतुम्" माघः। २मङ्गलग्रहे च। ३भूमिभवे त्रि० मेदि०। भौमजन्मत्वादिकम् अन्नयशब्दे ४१०पृ० दृश्यम्। ४भूमिव्यापके अम्बरे धरणिः। ५रक्तपुनर्नवायां राजनि०

भौमन पु० भूम्नोऽपत्यम् अण् मन्नन्तत्वात् न टिलोपः। विश्वकर्मणि भा० आ० ११अ०।

भौमिक त्रि० भूमौ तिष्ठति अधिकरोति वा ठञ्। भूम्यधिकारिणि २भूमिस्थिते च मनुः ५।१४२। [अमरः।

भौरिक त्रि० भूरि स्वर्णमधिकरोति ठक्। कनकाध्यक्षे

भौरिकि पुंस्त्री० भूरिकस्यर्षेरपत्यमिञ्। भूरिकर्षेरपत्ये स्त्रियां क्रौड्या० ष्यङ्। भौरिक्या तदपत्ये स्त्रियां चित्त्वात् ङीप् च भौरिकीत्यपि तत्रार्थे। ततः अपत्ये तिका० फिञ्। भौरिक्यायणि भौरिकेरपत्ये पुंस्त्री०। भौरिक्या० विषये ऐं विधल्। भौरिकिविध तद्विषये देशे

भौरिक्यादि पु० ऐषे विषये विधलप्रत्ययनिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा "भौरिकि भौलिकि चौपयत चैटयत काणेय वाणिजक वालिकाज्य सैकयत वैकयत"। [भौरिकिशब्दवत् सर्वम्।

भौलिकि पुंस्त्री० भौरिकि+रस्य लः। भौरिकिशब्दार्थे

भौलिङ्गि पुंस्त्री०भूलिङ्गस्य ऋषिभेदस्यापत्यम् अण्। भूलिङ्गर्षेरपत्ये स्त्रियां गौरा०ङीष्। ततः युवप्रत्ययस्य लुक्

भौवादिक पु० भ्वादौ गणे पठितः ठञ् वा वृद्धिः पूर्वम् ऐच्। भ्वादिगणपठिते धातौ। एवम् आदादिकजौहोत्यादिकदैवादिकादयोऽपि अदादादिगणपठिते धातौ।

भ्यस भये भ्वा० आ० अक० सेट्। भ्यसते अभ्यसिष्ट।

भ्यसते अव्य०। उत्तरदिशि निघण्टुः।

भ्रंश पु० भ्रन्श-भावे घञ्। च्यवने अमरः। अधःपाते च

भ्रंशकला अव्य०च्व्यौ०। क्रियायाम् गणरत्न० टी०। भ्रंशकलात्य क्रियेत्यर्थः।

भ्र(भ्रु)(भ्रू)कंस पु० भ्रुवा कंसा इङ्गितज्ञापनं यस्य। "कभ्रूकुंसादीनाम्" वार्त्ति० वा पक्षे वा ह्रस्वः इति रूपत्रयम् स्त्रीवेशधारिणि नटे अमरः।

भ्र(भ्रु)(भ्रू)कुटि पुंस्त्री० भ्रुवः कुटिः कौटिल्यम्। भ्रुकुंसवत् रूपत्रयम्। भ्रुव. कौटिल्ये अमरः।

भ्र(भ्रु)क्ष अदने भ्वा० उ०सक० सेट् वा रस्य लः धातुपाठः। भ्र(भ्रु)क्षति ते अभ्र(भ्रु)क्षीत्। बभ्र(भ्रु)क्ष।

भ्रजस् पु० भ्राजते भ्राज-असुन् पृषो० ह्रस्वः। १अग्नौ छन्दसि यजु०१५।५। "अग्निर्वै भ्रजस्कन्दः" शत० ब्रा० ८।५।२।५। २आदित्यरूपे सुरे च "सुरो भ्रजस्कन्द इत्यसौ वा आदित्यः सुरो भ्रजस्कन्दः" तत्रैव।

भ्रण शब्दे भ्वा०पर०सक०सेट्। भ्रणति अभ्राणीत् अभ्रणीत् बभ्राण। [अभ्रंशीत् भ्रश्यते।

भ्रन्श अधःपतने दिवा०अक०सेट्। भ्रश्यति इरित् अभ्रशत्

भ्रन्श अधःपाते अक० सेट्। भ्रंशति इदित् अभ्रंशत्। उदित्। भ्रंशित्वा भ्रष्ट्वा। भ्रष्टः। [भ्रुवो भङ्गे।

भ्र(भ्रु)(भ्रू)भङ्ग पु० ६त०। भ्रुकुंसवत् वा अकारह्रस्वौ

भ्रम चलने भ्वा०पर०अक०सेट्। भ्रमति कौटिल्ये इरित्। अभ्रमत् अभ्रमीत्। बभ्राम कथा० भ्रेमतुः बभ्रमतुः।

भ्रम चलने दिवा०पर०सक०सेट् शमा०। भ्राम्यति अभ्रमीत्।

भ्रम भ्वा०पर०अक०सेट्। भ्रमति अभ्रमीत् कथा० भ्रेमतुः बभ्रमतुः वक्ति न ह्रस्वः। ज्वला० भ्रमः भ्रामः।

भ्रम पु० भ्रम-घञ्। १मिथ्याज्ञाने (अन्यथाभूतस्य वस्तुनोऽन्यथारूपेण ज्ञाने) २जलनिर्गमस्थाने ३कुन्दे (कुंद) ४भ्रमणे च मेदि०। भ्रमश्च तद्वति तत्प्रकारकज्ञानम्। व्यधिकरणप्रकारावच्छिन्नविषयताशालिज्ञानम्। यत्प्रकारिका या विषयता तत्प्रकारव्यधिकरणविषयताकज्ञानम्। स्वप्रकारव्यधिकरणविषयताकज्ञानम्। स्वव्यधिकरणप्रकारावच्छिन्नविषयताप्रतियोगिज्ञानम्" (चि०) तदभाववद्विशेष्यकतत्त्वप्रकारकविषयताप्रतियोगिताकतदभाववति तत्सम्बन्धेन तद्धर्मविशिष्टनिष्ठवैशिष्ट्यविषयताशालिज्ञानम्। विशेषितावच्छेदेन तत्तद्व्याप्त्यावच्छिन्नप्रतियोगिताकतदभाववद्विशेष्यकत्वा वा तद्धर्मावच्छिन्नप्रकारिता त-

ऽतस्मिंस्तज्ज्ञानम्। (भ्र॰मा॰) "मिथ्याज्ञानापरपर्य्यायोऽयं निश्चयः" (गौ॰ड॰) अतस्मिंस्तद्ग्रहः (भा॰प॰)। तदभाववति तत्प्रकारकं ज्ञानम् यथा शुक्तौ इदं रजतम् इति ज्ञानम्। (त॰प्र॰) भ्रमो द्विविधः। विपर्य्ययः संशयश्च। तद्धेतवश्च दोषा दोषशब्दे ३७६१ पृ॰ दृश्याः

भ्रमण न॰ भ्रम–ल्युट्। गतिभेदे पर्य्यटने कर्मन्शब्दे दृश्यम्

भ्रमणी स्त्री भ्रम–करणे ल्युट् ङीप्। १क्रीडार्थपर्य्यटने तत्साधने २क्रीडिकायाञ्च मेदि॰। [त्रिका॰

भ्रमत्कुटी स्त्री भ्रमन्ती कुटीव। दृषादिनिर्म्मिते छत्रे

भ्रमर पुंस्त्री॰ भ्रम-करन्। १मधुकरे अमरः स्त्रियां जातित्वात् ङीष्। २कामुके मेदि॰।३भ्रमरच्छल्लीलताभेदे स्त्री राजनि॰ टाप्।

भ्रमरक पु॰ भ्रमर इव कायति कै-क। ललाटलम्बिते भ्रमरतुल्ये चूर्णकुन्तले अमरः। स्वार्थे क। भ्रमरके भ्रमरे वालभूषिकायाञ्च मेदि॰। (लरकीन) वेधनयन्त्रभेदे दशकुमा॰। जलभ्रमणे विश्वः।

भ्रमरकीट पु॰ भ्रमर इव कीटः। (कुमेरपोका) कीटभेदे

भ्रमरच्छल्ली स्त्री लताभेदे राजनि॰। भृङ्गच्छल्ल्यादयोऽप्यत्र "भृङ्गच्छल्ली च कटुका तिक्ता दीपनरोचनी" राजनि॰।

भ्रमरपदक न॰ "भ्रमरपदकमिदमभिहितम्" द्वादशाक्षरपादके इ॰ र॰ टी॰ उक्ते छन्दोभेदे।

भ्रमरप्रिय पु॰ ६त॰। धाराकदम्बे रत्नमा॰।

भ्रमरमारी स्त्री भ्रमरं मारयति मारि अण् उप॰स॰गौरा॰ ङीष्। भ्रमरारिलतायाम् राजनि॰। भृङ्गार्य्यादयोऽप्यत्र "भ्रमरारिश्च तिक्ता स्यात् पित्तश्लेष्मकफापहा। त्रिदोषकुष्ठकण्डूतिशोफव्रणविनाशिनी" राजनि॰।

भ्रमरविलसिता स्त्री "मोगौ नौगौ भ्रमरविलसिता" छन्दोम॰ उक्ते एकादशाक्षरपादके छन्दोभेदे अस्य क्लीवत्वमेके वदन्ति।

भ्रमरातिथि पु॰ भ्रमरः अतिथिर्यस्य। चम्पके राजनि॰।

भ्रमरानन्द पु॰ भ्रमरान् आनन्दयति आ+नन्द–णिच्-अण् उप॰स॰। १बकुले २अतिमुक्ते रक्ताम्लाने च राजनि॰

भ्रमरालक पु॰ भ्रमर इव अलति पर्य्याप्नोति अल-ण्वुल्। ललाटस्थे चूर्णकुन्तले हेमच॰।

भ्रमरी स्त्री भ्रमर+ङीष्। १षट्पद्यां अस्त्यर्थे अच् गौरा॰ ङीष्। तदाकारवत्यां २जतुकायां ३पुत्रदात्र्याञ्च राजनि॰

भ्रमरेष्ट पु॰ ६त॰। १श्योनाकवृक्षे २भार्ग्यां ३भूमिजम्ब्वाञ्च स्त्री राजनि॰।

भ्रमरोत्सवा स्त्री भ्रमराणामुत्सवो मोदो यत्र। माधवीलतायाम् राजनि॰। [त्रिशालायाम् अश्वशालायाम् हेमच॰।

भ्रमासक्त त्रि॰ भ्रमे त्रिशालार्थयन्त्रभ्रमणे आसक्तः। शस्त्र-

भ्रश अधःपतने दि॰पर॰अक॰सेट्। भ्रश्यति अभ्रशीत् अभ्रशीत्। उदित् क्त्वा वेट्। भ्रशित्वा भ्रष्ट्वा। भ्रष्टः।

भ्रशिमन् पु॰भृशस्य भावः अतिशये वा इमनिच् ऋतोरः। १भृशत्वे २अतिशयत्वे च। अतिशये इष्ठन् भ्रशिष्ठ ईयसुन् भ्रशीयस् अतिशयवति त्रि॰ईयसुनि स्त्रियां ङीप्।

भ्रष्ट त्रि॰ भ्रश–क्त। च्युते गलिते स्वार्थे क। तत्रार्थे व च उपधा॰।

भ्रस्ज पाके तु॰ उ॰सक॰ अनिट्। भृज्जति आर्द्धधातुके वा भर्जादेशः स च वेट् अभ्राक्षीत् अभार्क्षीत्। अभ्रष्ट अभर्जिष्ट। बभर्ज बभ्रज्ज।

भ्राज दीप्तौ भ्वा॰आत्म॰अक॰सेट्। भ्राजते अभ्राजिष्ट फणा॰ भ्रेजे बभ्राजे। चङि वा ह्रस्वः। अबिभ्रजत् अबभ्राजत्।

भ्राज न॰ वर्षसाध्ये गवामयनसत्रे विषुवत्सामके प्रधानदिने गेये दिवाकीर्त्त्ये सामभेदे "दिवाकीर्त्त्यं साम भवति" इत्युपक्रमे तस्य दिवाकीर्त्त्यत्वं समर्थ्य "भ्राजाभ्राजे पवमानमुखे भवतो मुखत एवास्य ताभ्यां तमोऽपघ्नन्ति" ता॰ब्रा॰४।६।१४। "यद्यप्यत्र पवमानमुख इति सामान्यशब्दस्य एव दृश्यते ये गायत्रे ते गायत्रीसूक्तयोः पवमानयोरिति विशेषावगतेरेवं व्याख्यातं सुष्टमन्यत्। अनेन भ्राजाभ्राजयोः साम्नोः स्थाननियमोऽप्युक्तो भवति" भा॰ तत्र स॰म "परिस्वानो गिरिष्ठ" इत्यस्मिन् गेयम् तच्च ऊहगाने ११॰१२।

भ्राजक त्रि॰ भ्राज–ण्वुल्। १दीप्तिशीले २पित्तभेदे न॰ शब्दर॰। पित्तशब्दे ४२२५ पृ॰ भावप्र॰ वाक्यं दृश्यम्।

भ्राजिर पु॰ भौत्यमन्वन्तरे देवभेदे मार्कपु॰ १००अ॰।

भ्राजिष्णु त्रि॰ भ्राज-इष्णुच्। १दीप्तिशीले २विष्णौ पु॰। "भ्राजिष्णुर्भोजनं भोक्ता" विष्णुस॰।

भ्रातुष्पुत्र पु॰ ६त॰ षत्वम् कस्का॰। भ्रातुः पुत्रे।

भ्रातृ पु॰ भ्राज–तृच् पृषो॰। एकपितृजाते (भाइ) इति ख्याते पदार्थे तस्य स्वसा सहोक्तौ एक॰। २भ्रातृभगिन्योः द्वि॰व॰।

भ्रातृक त्रि॰ भ्रातुरिदम् ठञ्। भ्रातृसम्बन्धिनि।

भ्रातृज पुंस्त्री॰ भ्रातुर्जायते जन–ड ५त॰। १भ्रातृपुत्रे २तत्कन्यायां स्त्री।

भ्रातृजाया स्त्री ६त॰। भ्रातृपत्न्यां सा नियोगेनापि तद्-

गमननिषेधो यथा "भ्रातृजायां कमण्डलुम्" कलिवर्ज्ये १८७२पृ० दृश्यम्। अनियोगेन तद्गमने दोषो यथा "भ्रातृजायापहारी च मातृगामी भवेन्नरः" ब्रह्मवै०प्र० ५६ अ०। भ्रातृपत्न्यादयोऽप्यत्र।

भ्रातृद्वितीया स्त्री भ्रातृभोजनार्था द्वितीया। कार्त्तिकशुक्लपक्षस्य द्वितीयायाम् यमद्वितीयायां तद्विधिः निर्णयसि० भविष्ये "कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर!। यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः। अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता। अस्यां निजगृहे विप्र! न भोक्तव्यं ततो नरैः। स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम्। दानानि च प्रदेयानि भगिनीभ्योऽपि विधानतः। स्वर्णालङ्कारवस्त्रान्नपूजासत्कारभोजनैः। सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः" प्रतिपन्नाः मातृभगिन्य इति हेमाद्रिः। "पितृव्यभगिनीहस्तात् प्रथमायां युधिष्ठिर!। मातुलस्य सुताहस्ताद्द्वितीयायां तथा नृप!। पितुर्मातुः स्वसुः कन्ये तृतीयायां तयोः करात्। भोक्तव्यं सहजायाश्च भगिन्या हस्ततः परम्। सर्वासु भगिनीहस्ताद्भोक्तव्यं बलवर्द्धनम्। यस्यां तिथौ यमुनया यमराजदेवः सम्भोजितः प्रतिजगत् स्वसृसौहृदेन। तस्यां स्वसुः करतलादिह यो भुनक्ति प्राप्नोति रत्नधनधान्यमनुत्तमं सः। गौडास्तु "यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत्। अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः" मन्त्रः "एह्येहि मार्त्तण्डज! पाशहस्त! यमान्तकालोकधरामरेश!। भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते!। भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं शुभम्। प्रीतये यमराजस्य यमुनाया विशेषतः" ज्येष्ठाऽप्यजातेति वदेदिति आहुः। इत्यन्नदानमित्यध्याहारः। ब्रह्माण्डपुराणेऽपि "या तु भोजयते नारी भ्रातरं युग्मके तिथौ। अर्चयेच्चापि ताम्बूलैर्न सा वैधव्यमाप्नुयात्। भ्रातुरायुःक्षयो राजन् न भवेत् तत्र कर्हिचित्"।

भ्रातृवधू स्त्री ६त०। (भाद्दरबौ) कनिष्ठभ्रातृजायायां हारा०।

भ्रातृभगिनी स्त्री द्वि०व०। वा एकशेषः। भ्रात्रा सहित भगिन्याम्।

भ्रातृवत् त्रि० भ्राताऽस्त्यस्य मतुप्। भ्रातृयुक्ते।

भ्रातृव्य पु० भ्रातुः पुत्रः भ्रातृ+व्यत्। १भ्रातृपुत्रे २शत्रौ च हेमच० "अतिशापमानं भ्रातृव्यं पश्यति य एतया स्तुते" ता०ब्रा०२।७।२। [ज्येष्ठभ्रातरि (भाशुर) शब्दरत्ना०।

भ्रातृश्वशुर पु० भ्राता पतिभ्राता श्वशुर इव पूज्यत्वात्। पति-

भ्रात्र न० भ्रातुरिदम् शिवा० अण्। भ्रातृसम्बन्धिनि।

भ्रात्रीय पुंस्त्री० भ्रातुरपत्यम् छ। भ्रातृपुत्रे अमरः।

भ्रान्त न० भ्रम-भावे क्त। १भ्रमणे "वनस्थाने भ्रान्तम्" नाट० कर्त्तरि क्त। २मिथ्याज्ञानयुक्ते ३भ्रमणयुक्ते च त्रि०। ४धुस्तूरे ५मत्तगजे च पु० राजनि०।

भ्रान्ति स्त्री भ्रम-क्तिन्। १भ्रमणे २अयथार्थज्ञाने च। "षाण्मासिके तु संप्राप्ते भ्रान्तिः संजायते ध्रुवम्। धाताचरांश्च स्वप्नानि पश्यन्दूरात्यतः पुरा" ज्यो० त०। भ्रान्तिज्ञानञ्च चित्तविक्षेपः योगान्तरायः पात०सू० तच्च चित्तविक्षेपशब्दे २९४१ पृ० दृश्यम्।

भ्रान्तिमत् त्रि० भ्रान्तिरस्त्यस्य मतुप् मस्य वः। १भ्रमज्ञानयुते स्त्रियां ङीप्। २अर्थालङ्कारभेदे पु० अलङ्कारशब्दे दृश्यम्। [२भ्रमणनाशके त्रि० स्त्रियां ङीप्।

भ्रान्तिहर पु० भ्रान्तिं हरति हृ-ट। १मन्त्रिणि च शब्दरत्ना०

भ्राम त्रि० भ्रम-ज्वला० कर्त्तरि ण। भ्रमयुक्ते।

भ्रामक त्रि० भ्रामयति भ्रम-णिच्-ण्वुल्। १भ्रमजनके २शृगाले पुंस्त्री० स्त्रियां ङीप्। ३धूर्त्ते त्रि०। ४सूर्य्यावर्त्ते मणौ ५अयस्कान्ते (चुम्बकपाथर) मेदि० तस्य लौहचालकत्वात् तथात्वम्।

भ्रामर न० भ्रमरेण संभृतं सम्पादितम् तस्येदं वा अण्। १मधुनि। २भ्रमरसम्बन्धिनि त्रि० ३अयस्कान्ते पु०मेदि०। "तदाहं भ्रामरं रूपं कृत्वाऽसंख्येयषट्पदम्" इत्युपक्रम्य "भ्रामरीति च मां लोकाः" इति देवीमा० उक्ते ४चण्डीमूर्त्तिभेदे स्त्री। भ्रामरमधुगुणादि "किञ्चित् क्षुद्रैः प्रचितेभ्यः पुष्पेभ्योऽभिनिश्चितम्। निर्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम्। भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु। स्वादुपाकमभिष्यन्दि विशेषात् पिच्छिलं हिमम्" भावप्र० उक्तम्। ५अपस्माररोगे शब्दमाला।

भ्रामरिन् त्रि० भ्रामरं भ्रमरस्येव घूर्णनमस्त्यस्य इनि। अपस्माररोगयुते "भ्रामरी गण्डमाली च" मनुः ३।१६१। टीकायां कुल्लू०।

भ्राश भासे भ्वा०आ०अक०सेट्। भ्राशते भ्राश्यते अभ्राशिष्ट। फणा० भ्रेशे बभ्राशे। ऋदित् चङि न ह्रस्वः। क्विप् भ्राट्: भ्राशुः।

भ्राष्ट्र पु० भ्रस्ज-करणे ष्ट्रन्। १अम्बरीषे (भाजनाखोला) अमरः। भ्राष्ट्रे संस्कृतः अण्। २अम्बरीषसंस्कृते भक्ततण्डुलादौ त्रि० स्त्रियां ङीप्।

भ्राष्ट्रकि पु० गोत्रर्षिप्रवरभेदे प्रवरा०।

भ्राष्ट्रिजतिन् पु० गोत्रप्रवर्त्तकभेदे प्रेमा० प्र० प्रवराध्यायः।

भ्रास दीप्तौ दिवा०आ०अक०सेट्। भ्रास्यते अभ्रासिष्ट।

भ्रास दीप्तौ भ्वा०आ०अक०सेट्। भ्रासते अभ्रासिष्ट कथा० भ्रेसे बभ्रासे इत्व। भ्रासयुः ऋदित् चङि न ह्रस्वः।

भ्री भये क्र्या० भरणे सक० क्र्या० वा श्ना० पर० अनिट्। भ्रीणाति भ्रियाति अभ्रैषीत्।

भ्रुड संवरणे सक० संघाते अक० तु० कु० पर० सेट्। भ्रुडति अभ्रुडीत् बुभ्रोड।

भ्रू स्त्री भ्रम–डू। नेत्रयोरूर्ध्वस्थायां रोमराजौ अमरः। तच्छुभाशुभलक्षणं गरु० ६६ अ० उक्तं यथा "विशालोन्नता सुखिनो दरिद्रा विषमभ्रुवः। धनी दीर्घासंसक्तभ्रूर्बाले-न्दुनतसुभ्रुवः। आयो निम्नाव खण्डमध्यसंख्याय वि-नतभ्रुवः"। भ्रुवो भूवम् आहव्। भ्रूजात भ्रुभवे न०।

भ्रूक्षेप पु० ६त०। भ्रूभङ्गे २वङ्केतयापनाय भ्रुवोरितस्ततश्च-चालने "भ्रूक्षेपमात्रानुमितप्रवेशाम्" कुमारः।

भ्रूण आशायां विशङ्कायाम् चु०आत्म०सक०सेट्। भ्रूणयते अबुभ्रुणत

भ्रूण पु० भ्रूण–अच्। स्त्रीणां १गर्भे २बालके च अमरः।

भ्रूणघ्न त्रि० भ्रूणं गर्भं हन्ति हन–क। भ्रूणहत्याकारके क्विप् भ्रूणहाप्यत्र। "अपि भ्रूणहनं पाशात्" मनुः। तत्प्रायश्चित्तं प्रा० वि० उक्तं यथा

"तत्र पुंस्त्वेन ज्ञाते पुरुषवधप्रायश्चित्तं स्त्रीत्वेन ज्ञाते स्त्री-वधप्रायश्चित्तम्। अविज्ञाते तु पुंवधप्रायश्चित्तमाह मनुः "हत्वा गर्भमविज्ञातमेतदेव व्रतञ्चरेत्। राजन्यवैश्यौ चेज्यानावात्रेयीं(रजस्वलां)मेव च स्त्रियम्" इत्यदेवेति। ब्रह्मवधप्रायश्चित्तमित्यर्थः। ब्राह्मणीगर्भवधविषयमिदं तस्यैव प्रकृतत्वात्। क्षत्रियादिगर्भवधे तु तदर्थौ गर्भस्य-हर्त्तवधप्रायश्चित्तं कार्यं यथा याज्ञवल्क्यः "चागत-मनविज्ञाते चरेद्व्रतमाक्षचो व्रतम्। गर्भहा च यथा-वर्णं तथात्रेयीनिषूदनः" व्रतपदोपादानात् ब्रागत इदम् अज्ञानतपादेदं तेन ज्ञानकृते ब्राह्मणगर्भवधे द्वा-दशवार्षिकम्। क्षत्रियगर्भवधे नैवार्षिकं वैश्यगर्भवधे षाड्वार्षिकं शूद्रगर्भवधे नववार्षिकं, धेनुवर्षभवत्सम्भू-तीवम्"।

भ्रूभङ्ग पु० ६त०। क्रोधादिज्ञापनार्थं भ्रुवस्तिर्यक्चालने "भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य" इति कुमारः।

भ्रेज भासे भ्वा०आत्म०अक०सेट्। भ्रेजते अभ्रेजिष्ट। ऋदित् चङि न ह्रस्वः। अबिभ्रेजत् त।

भ्रे(भ्रे)ष पतने चलने च अक०भ्वा०उभ० सेट्। भ्रे(भ्रे)षति ते अभ्रे(भ्रे)षीत् अभ्रे(भ्रे)षिष्ट। ऋदित् चङि न ह्रस्वः। अबिभ्रे(भ्रे)षत् त। तत्र पतने आ० भये चलने उभ० अक० इति भेदः।

भ्रेष पु० भ्रेष–घञ्। उचितस्थानात् पतने अमरः। "कारकभ्रेषे कार्यभ्रेषो वा भवतीति" इ०ज० भा०।

भ्रौवेय त्रि० भ्रुव इदम् "भ्रुवो वुक् च" पा० ढक् वुक् च। भ्रूसम्बन्धिनि च।

भ्लक्ष भक्षणे भ्वा०उभ०सक०सेट्। भ्लक्षति ते अभ्लक्षीत् अभ्लक्षिष्ट। दुर्गमते भक्षधात्वन्तरम्।

भ्लाश दीप्तौ वा दिवा० पक्षे भ्वा० आ० अक० सेट्। भ्लाश्यते भ्लाशते अभ्लाशिष्ट कथा० भ्लेशे बभ्लाशे। इत्व (पत्व) भ्लाशयुः। बोपदेवमते भाषधात्वन्तरम्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यसङ्कलिते वाचस्पत्ये भकारादिशब्दार्थसङ्कलनम्।

म

मकारः स्पर्शेषु पञ्चमवर्णः। अस्योच्चारणस्थानमोष्ठौ नासिका च जिह्वामध्येन ओष्ठयोः स्पर्शेनोच्चारणात् आभ्यन्तरः प्रयत्नः अल्पप्राणः स्पर्शवर्णता अनुनासिकता च। बाह्य-प्रयत्नाश्च संवारनादघोषाः अल्पप्राणश्च। अस्य ध्येय-स्वरूपकं कामधेनुत० "मकारं शृणु चार्वङ्गि। स्वयं परमकुण्डली। तरुणादित्यसङ्काशं चतुर्वर्गप्रदायकम्। पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा"।

वर्णाभिधानेऽस्य वाचका उक्ता यथा "मः कालो लेखिनः कालो महाकालो महान्तकः। वैकुण्ठो वसुधा चन्द्रो-रविः पुरुषराजकः। कालभद्रो जया मेधा विश्वदा दीप्तसंज्ञकः। जठरश्च ज्वलो मानं लक्ष्मीर्मातोपकल्पकरी। शिवं शिवो महावीरः शशिप्रभा जनेश्वरः। प्रमत्तः प्रियतद्रूः दर्वीकृत् वह्निमण्डलम्। मातङ्गमालिनी बिन्दुः आत्मा भरतो विषद्"। तदधिष्ठातृदेवताध्यानं यथा "कृष्णां दशभुजां भीमां पीतलोहितलोचनाम्।

कृष्णाम्बरधरां नित्यां धर्मकामार्थमोक्षदाम्। एवं ध्यात्वा मकारन्तु तन्मन्त्रं दशधा जपेत्”। मातृकान्यासेऽस्य जठरे न्यस्तता। काव्यादौ प्रथमं प्रयोगे दुःखं फलं “सुखभयमरणं क्लेशदुःखं पवर्गः” इ॰र॰टी॰उक्तेः।

म पु॰ मा–क। १शिवे २चन्द्रे ३चतुर्मुखे ब्रह्मणि एकाक्ष॰। ४यमे ५समये ६विधौ ७विष्णौ च मेदि॰। छन्दःशास्त्रोक्ते ८त्रिगुरुके गणे “मो भूमिस्त्रिगुरुः श्रियं दिशति वः” इ॰र॰टी॰। तस्य देवता भूमिः काव्यादौ प्रथमप्रयोगे श्रीलाभः फलम्। [क्लिट मसक्रे।

मक भूषणे गतौ च भ्वा॰आ॰सक॰सेट् इदित्। मङ्कते अम-

मक पुंन॰ म इव कायति कै–क अर्द्धर्चादि। शिवादितुल्ये।

मकर पुंस्त्री॰ मं विषं किरति कॄ–अच्। १जलजन्तुभेदे अमरः स्त्रियां जातित्वात् ङीष्। स च गङ्गावाहनं कामस्य ध्वजश्च। मकराकरत्वात् २मेषादितो दशमे राशौ। तद्राशिश्च उत्तराषाढाशेषपादत्रयसहितं श्रवणं धनिष्ठार्द्धञ्चेति नवपादात्मकः। तद्राशिजातफलादिकं नी॰ता॰ उक्तं यथा “मृगधरः खलाऽर्थरतो यमाशासी पितृजनः शुभभूमिगीतः। अल्पप्रजापङ्कजमीरदाभिरादौ चतुष्पाद् विषमोदयो निट्। मकि–अच् पृषो॰ मकं भूषणं राति ददाति रा–क। ३निधिभेदे निधिशब्दे ४६८ पृ॰ दृश्यम्। [कारे कर्णभूषणे।

मकरकुण्डल पु॰मकराकृति कुण्डलं कर्णभूषणम्। मकरा॰

मकरकेतन पु॰ मकरः मकरचिह्नितं केतनं ध्वजो यस्य। कन्दर्पे हेमच॰ मकरकेत्वादयोऽप्यत्र।

मकरध्वज पु॰ मकरो ध्वजोऽस्य। कामदेवे अमरः।

मकरन्द पु॰ मकरमपि द्यति कामजनकत्वात् दो-अवखण्डने क पृषो॰मुम्। १पुष्परसे अमरः। २कुन्दवृक्षे च ३किञ्जल्के न॰ राजनि॰।

मकरन्दवती स्त्री मकरन्द+अस्त्यर्थे मतुप् मस्य वः ङीप्। १पाटलायाम् शब्दच॰ २मधुविशिष्टे त्रि॰।

मकरन्दिका स्त्री “रचैः षड्भिर्लोकैर्मनजभजगा सुरमकरन्दिका” इ॰ र॰ टीकोक्ते जनविंशत्यक्षरपादके छन्दोभेदे। [भेदे भा॰ भी॰ ६८ अ॰।

मकरव्यूह पु॰ मकर इव व्यूहः। मकराकारे सैन्यनिवेशन-

मकरसंक्रान्ति स्त्री ७त॰। मकरे राशौ रवेः १संक्रमणे २तदुपलक्षितपुण्यकालोपलक्षिते च दिने।

मकराकर पु॰ ६त॰। समुद्रे हेमच॰। [करञ्जभेदे शब्दच॰।

मकराकार पु॰ मकरस्येवाकारः फले यस्य। (काँटाकरमचा)

मकराक्ष पु॰ रावणपक्षस्थे राक्षसभेदे रामा॰ लङ्का॰ ७७स॰।

मकराङ्क पु॰मकरोऽङ्को यस्य। १कामदेवे २समुद्रे शब्दरत्ना॰।

मकरालय पु॰ ६त॰। समुद्रे मकरावासादयोऽप्यत्र।

मकरासन न॰ रुद्रयामलोक्ते पूजाङ्गे आसनभेदे “मकरासनमाख्यातं वायूनां स्तम्भकारणात् पृष्ठे पादद्वयं बद्ध्वा हस्ताभ्यां पृष्ठबन्धनम्”।

मकरीप्रस्थ पु॰ मकर्या उपलक्षितः प्रस्थः। यदा कदाचित् मकरीसम्बन्धे प्रस्थे ग्रामे कर्क्या॰ अस्य नाद्युदात्तता।

मकष्टु पु॰ऋषिभेदे तस्यापत्यं शुभ्रा॰ ढक्। माकष्टवेय तदपत्ये पुंस्त्री॰।

मकार पु॰ म+स्वरूपे कार। मस्वरूपे वर्णे। मकारादिर्यः आद्यक्षरेऽस्त्यस्य अच्। मद्यमत्स्यमांसमैथुनमुद्रारूपे मकारादिवर्णयुक्ते तन्त्रोक्ते पदार्थपञ्चके। [रूपकां॰।

मकुट न॰ मकि–भूषणे उट पृषो॰। शिरोभूषणे मुकुटे शि-

मकुति स्त्री मकि–उति पृषो॰। शूद्रशासने त्रिका॰।

मकुर पु॰ मकि–उरच् पृषो॰। १दर्पणे २बकुलवृक्षे ३कुलालदण्डे ४कलिकायाञ्च हेमच॰।

मकुल पु॰ मकि–उलच् पृषो॰। १मुकुले २बकुलवृक्षे शब्दरत्ना॰।

मकुष्टक पु॰मकि-भूषायां उ-पृषो॰मकुं भूषां स्तकति प्रतिहन्ति स्तक-अच् सुषामा॰षत्वम्। वनमुद्गे (मुगानि)राजनि॰।

मकुष्ठ पु॰ मीयते मा–उ कुत्सितं तिष्ठति स्था–क अम्बष्ठा॰ षत्वम् कर्म॰।१व्रीहिभेदे“मकुष्ठो वातलो ग्राही कफपित्तहरो लघुः। वान्तिकृन्मधुरः पाके क्रिमिकृज्ज्वरनाशनः” भावप्र॰। २मन्दगामिनि त्रि॰। स्वार्थे क। ३वनमुद्गे

मकूलक पु॰ मकि–ऊलच् पृषो॰ संज्ञायां कन्। १दन्तीवृक्षे अमरः। २मुकुले रमानाथः।

मक्क गतौ भ्वा॰आ॰सक॰सेट्। मक्कते अमक्किष्ट ममक्के।

मक्कल पु॰ शूलरोगभेदे “प्रजातायाश्च नार्य्या रूक्षशरीरायास्तीक्ष्णैरविशोधितं रक्तं वायुना तद्देशगेनातिसंरुद्धं नाभेरधःपार्श्वयोर्वस्तौ वस्तिशिरसि वा ग्रन्थिं करोति। ततश्च नाभिवस्त्युदरशूलानि भवन्ति सूचीभिरिव निस्तुद्यते भिद्यते दीर्य्यत इव च पक्वाशयः। समन्तादाध्मानमुदरे मूत्रसङ्गश्च भवतीति मक्कललक्षणम्” सुश्रुत।

मक्कूल न॰ मकक–ऊलच्। शिलाजतुनि शब्दर॰।

मक्कोल पु॰ मकक-बा॰ ओल। खटिकायां त्रिका॰।

मक्ष रोषे संघाते च भ्वा॰पर॰सक॰सेट्। मक्षति अमक्षीत्।

मक्षवीर्य्य पु॰मक्षं संहतं वीर्य्यं यस्मात्। ५ब॰ पियालवृक्षे राजनि॰।

मक्षिका स्त्री मश-सिकन् । कीटभेदे दंशरातीकीटे (मौमाछि) उज्ज्वल० । पृषो० दीर्घः तत्रार्थे राजनि० ।

मक्षिकामल न० ६त० । सिक्थके (मोम) राजनि० ।

मक्षिकासन न० ६त० । (मौचाक) सिक्थकाधारे राजनि० पाठान्तरम् । [ऋ०८।२६।६

मक्षु न० मख-उन् । १शीघ्रे निघण्टुः २शीघ्रगतियुते त्रि०

मख सर्पणे भ्वा०पर०सक०सेट् । मखति अमाखीत् अमखीत् ममाख मेखतुः । [मङ्ख्यते ।

मख सर्पणे भ्वा०पर०सक०सेट् इदित् । मङ्खति अमङ्खीत्

मख पु० मख-संज्ञायां घ । यज्ञे अमरः ।

मखत्रात पु० मखं विश्वामित्रमखं त्रायते त्रै-तृच् । श्रीरामे शब्दर० । [त्रि० ।

मखद्विष् पु० मखाय द्वेष्टि द्विष-क्विप् । १राक्षसे २यज्ञद्वेषिणि

मखाग्नि पु० ६त० । यज्ञे संस्कृताग्नौ जटा० । मखानलादयोऽप्यत्र ।

मखान्न न० मखे तत्काले भोज्यमन्नं सन्यन्नत्वात् शा०त० । (माखना) १जलजाते क्षुद्रजे फलभेदे "मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्दिशेत्" भावप्र० । ६त० । २यज्ञान्ने च ।

मखासुहृत् पु० ६त० । दक्षयज्ञस्य नाशके महादेवे हेमच०

मग सर्पणे भ्वा०पर०सक०सेट् इदित् । मङ्गति अमङ्गीत् ।

मगध पु० मङ्ग्यते अधोगम्यतेऽनेन मगि-क पृषो० मगं दोषं पापं वा दधाति धा-क । १देशभेदे २तद्देशस्थे जने ब०व० । स च कीकटेतिसंज्ञः अङ्गदेशस्यैव । कीकटेषु गया पुण्या नदी पुण्या पुनःपुना" इत्युक्तेः गयादीनामेव पुण्यत्वम् । अन्येषामपुण्यत्वं प्रत्युत पापजनकत्वम् "अङ्गवङ्गकलिङ्गान्ध्रान् गत्वा संस्कारमर्हति" मिता० देवलोक्तेः । "तीर्थयात्रां व्यतिरेकेणैतान् गत्वा तत्रैव चिरमुषित्वा गङ्गागमनं प्रायश्चित्तम् । तदशक्तौ पुनरुपनयनं अतिचिरवासे तु पुनरुपनयनं कृत्वा चान्द्रायणं कर्त्तव्यम्" प्रा० वि० । अतस्तस्य पापजनकत्वात् तथात्वम् । ततः भवार्थे गहा० छ । मगधीय तत्र भवे त्रि०

मगधा स्त्री मगध उत्पत्तिस्थानत्वेनास्त्यस्याः अच् । पिप्पल्यां रत्नमा० । [नाम्नि च ।

मगधेश्वर पु० ६त० । १जरासन्धनृपे हेम० । २तद्देशपति-

मगधोद्भवा स्त्री मगधदेशे बाहुल्येनोद्भवति अच् । पिप्पल्याम् राजनि० । तद्देशे तस्याः प्रचुरभवत्वात्तथात्वम् ।

मगध्य परिवेष्टने कण्ड्वा० प० सक०सेट् । मगध्यति अमगधी(धी)त् ।

मगन्द पु० मगं पापं ददाति दा ड पृषो० मुम् च । कुसीदिनि निरु० ६।२२ ।

मगण पु० छन्दःशास्त्रोक्ते सर्वगुरुके वर्णत्रये ।

मगल पु० गोत्रप्रवरर्षिभेदे प्रवरा० ।

मग्न त्रि० मस्ज-क्त । (डोवा) जलादौ कृतमज्जने ।

मघ कैतवे द्यूतक्रीड़ादौ अक० गतौ निन्दायां आरम्भे च सक०भ्वा०आ०सेट् इदित् । मङ्घते अमङ्घिष्ट । [मङ्घ्यते

मघ भूषणे भ्वा०पर०सक०सेट् इदित् । मङ्घति अमङ्घीत् ।

मघ पु० मघि-अच् पृषो० । १द्वीपभेदे मेदि० । (मग)नामके २म्लेच्छदेशभेदे । ३पुष्पभेदे न० शब्दरत्ना० ।

मघवन्(त्) पु० मह-कनिन् नि० हस्य घः "मघवा बहुलम्" पा० वा तृ । १इन्द्रे अमरः २तन्नामनामके पेचके च । तृपि मघवान् अतृपि मघवा । एवं मघवानौ मघवन्ताविन्यादिरूपद्वयम् । भत्वे अतृन्तस्य सम्प्र० । मघोनः तृन्तस्य न मघवतः इत्यादि ङीपि मघोनी मघवतीत्यादि तद्धिते न सम्प्र० । माघवनम् इत्यादि भाष्ये तु मघशब्दात् मतुपि रूपं साधयित्वा शब्दान्तरमित्युक्ता न तृबित्युक्तम् ।

मघा स्त्री मह-क हस्य घत्वम् । अश्विन्यवधिके दशमे नक्षत्रे तस्याश्च पञ्चताराक्त्वात् बहुत्वमपि "पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च" स्मृतिः । "मघां सूनाय वर्जयेदिति "मघायां पिण्डदानञ्चेति" स्मृतिस्तु समुदायस्यैकत्वाभिप्रायेण । अस्या योगतारादिकमश्विनीशब्दे ४८७ पृ० उक्तम् । २ओषधिभेदे धरणिः ।

मघात्रयोदशी स्त्री मघानक्षत्रेण युक्ता त्रयोदशी शा०त० । भाद्रकृष्णत्रयोदश्यां तत्रैव मघानक्षत्रसंयोगसम्भवात् । तत्र श्राद्धमावश्यकं यथोक्तं ति० त०

"प्रौष्ठपद्यूर्ध्वं कृष्णत्रयोदश्यां मघायुक्तायामनित्यत्व यत्किञ्चिद्द्रव्येण श्राद्धमावश्यकं मन्वादिविधिवाक्ये नक्षत्रविशिष्टतिथेः श्रुतेः । ततश्च केवलत्रयोदशीकेवलमघाश्राद्धार्थवादा अपि नक्षत्रविशिष्टविधिप्राप्तकर्मणो नित्यत्वबोधकाः न तु केवलविध्यन्तरकल्पना गौरवात् । तथाच मनुः "प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् । प्राप्य श्राद्धं हि कर्त्तव्यं मधुना पायसेन च" मनुः "यत्किञ्चित् मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम् । तदप्यक्षयमेव स्यात् वर्षासु च मघासु च" । विष्णुधर्मोत्तरम् "प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी । एतासु श्राद्धकालान् वै नित्यानाह प्रजापतिः" । शाता-

नथः "पितरः सर्वदैवत्यश्च मघासु च । तथा-ह्याद् यद्योद्दुक्ता पितृषु श्राद्धेषु च" । अमाव-स्यामतेः मघावचने यद्विधिविहितं तथैव मघोक्त-श्राद्धे फलातिशयार्थः । "गुणविशेषे फलविशेषः स्यात्" इति न्यायात् । अत्र विष्णुधर्मोत्तरे "मघायुक्ता च तस्यापि यदा दानाङ्कयोदयौ । तत्राक्षयं भवेच्छ्राद्धं मधुना पायसेन च" । तत्रापवृद्धश्यपचे । अत्र यद् श्राद्धं तन्मधुयोगेन पायसयोगेन चाक्षयं भवेत् । एवं मघावचने यद्विधिविहितमधुना विषद् एतनेन मधुपाय-सुखलक्षम् । अतोऽत्र सुतरां शूद्रस्याप्यधिकारः । अत्र मघाश्राद्धयोगे फलातिशयः । तथाच ब्रह्मचिन्ता मघौ स्मृतिः "अत्रश्चैव मघोद्भवा मघाश्रिन्दुः करे रविः । यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते । करे हस्तागते बच्चादव्यमायोपरि यदाद्मयोर्विशाख श्राद्ध । अविभक्तानामत्र पृथक् श्राद्धमस्त्रथम्" । यथा श्राद्धचिन्तामणौ स्मृतिः "विभक्ता अविभक्ता वा कुर्युः श्राद्धमदैविकम् । मघासु च तथान्यत्र नाधि-कारः पृथग्विना" । अदैविकं मघाश्रिदैवोद्दिष्टम् अन्यत्र अन्वष्टकादौ नाधिकारः न नित्याधिकारः । "अ-विभक्तैर्बहुधान्यपि तानि श्राद्धानि योगतः । पृथक् नैव हताः कुर्युः पृथग्द्रव्या अपि क्वचित्" इत्यत्रापि मघा-विशिष्टानामपृथग्द्रव्याणां पुंसां दैविकैर्बहुधान्या-नीति विशेषणात् तदुक्तं श्राद्धानां पृथक्करणमपि प्रतीयते । मघात्रयोदशीनिमित्तश्राद्धे पुत्रवता पिण्डा न देयाः । "भौमश्री तिथियाया मघायुक्तार्धचन्द्र-भम् । तत्रापि महती पूजा कर्त्तव्या पितृदैवते । अत्र पिण्डप्रदानन्तु ज्येष्ठपुत्री विवर्जयेत्" इति देवीपुराणात् भौमश्री पचनी चन्द्रार्धचन्द्रम् अमावास्यां पितृदैवते मघायामाय । श्रामायः "पिण्डनिर्वपरहितं यत्तु श्राद्धं विधीयते । अधायायमवोधोऽत्र विधिरस्तु न सुप्यते । अध्यवदृषिणा कवि पौषमघं श्राद्धमिति" रघु० ।

मघाभू पु०मघासु विद्यमाने चन्द्रे भवति भू-क्विप् । पूर्वफल्गुन्यां जाते शुक्रग्रहे त्रिका० । भगदैवतशब्दे ४६१२पृ० दृश्यम्

मघी पु० मघानक्षत्रयुक्ता पूर्णिमा मघी सास्मिन् अण् गौरा० ङीप् । मघानक्षत्रयुक्तपौर्णमासीयुक्ते मासे चैत्र-माघमासे आयमाने (आषढ) धान्यभेदे मेदि० ।

मङ्कुष्ठक पु० १कपिभेदे शा० च० ८९प० । २कपिभेदे तत्रैव ।

मङ्कि पु० मकि-इन् । मनेच्छुपाचनभेदे शा०चा० १७७प० ।

मङ्कु पु० मकि-उन् । बहुवदुगतिके मत०भा० ५।५।४।११ ।

मङ्कुर पु० मकि-उरच् । दर्पणे भरतः ।

मङ्क्षण मस्ज-ल्युट् । मज्जनार्थे हारा० ।

मङ्क्षु (क्षू) अव्य० मस्जि-उन् । १शीघ्रे २सत्यार्थे च । मुग्धो० बहु अव्ययमपि ।

मङ्ग पु० मगि-घञ् । नौकाशिरसि हेम० ।

मङ्गल पु० मगि-अलच् । १भूमिसुते ग्रहभेदे २प्रशस्ते ३अभीष्टार्थसिद्धौ च । ४तद्वति त्रि० अमरः । स्त्रियां ङीप् "सुमङ्गलीरियं वधूः" सि०कौ० । ५दूर्वायां ६हरि-द्रायां ७दूर्वायां ८पतिव्रतायाञ्च स्त्री शब्दरत्ना० ९क-रञ्जभेदे स्त्री शब्दच० । १०दत्ताङ्घ्र्यादभेदे स्त्री हेम० ११योनिनीदशाभेदे "मङ्गला पिङ्गलेति" दशाशब्दे दृश्यम् । अभिप्रेतसिद्धिर्मङ्गलं तच्च तत्स्वात् गोरोचनादेरपि मङ्गलम् । मङ्गल्यद्रव्याणि च मत्स्यपुराणे ४२प०उक्तानि यथा "योऽसौ विप्र मङ्गलाष्टौ ब्राह्मणो गौर्हुताशनः । हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः । एतानि सततं पश्येन्नमस्येदर्चयेत्ततः । प्रदक्षिणन्तु कुर्वीत तथा-ह्यायुर्न हीयते । दूर्वां दधि सर्पिरथोदकुम्भं धेनुं वत्स-वतीं वृषभं सुवर्णम् । मृद्गोमयं स्वस्तिकमक्षतानि लाजा मधु ब्राह्मणकन्यकाञ्च । श्वेतानि पुष्पाणि तथा शमीश्च हुताशनं चन्दनमर्कबिम्बम् । अश्वत्थवृक्षं समालभेत ततश्च कुर्यान्निजजातिधर्मम्" इत्यभिधानार्थम् । १२विष्णौ न० "पवित्रं मङ्गलं परम्" विष्णु स० । शब्दकल्प० २०६६पृ० मङ्गलपदव्याख्यादि दृश्यम् । "प्रशस्ताचरणं नित्यमप्रशस्त-विवर्जनम् । एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः" अत्रि० उक्ते १३प्रशस्ताचरणे निन्द्यवर्जने ।

मङ्गलचण्डी स्त्री मङ्गले चण्डी दक्षा । १देवीभेदे दुर्गायां च । मङ्गलचण्डिकाशब्द तन्नामनिरुक्तिः ब्रह्मवै० प० ४१ अ० उक्ता यथा "दक्षायां वर्त्तते चण्डी कल्याणेषु च मङ्ग-लम् । मङ्गलेषु च या दक्षा सा च मङ्गलचण्डिका । पूज्यायां वर्त्तते चण्डी मङ्गलोऽपि महीसुतः । मङ्गला-भीष्टदेवी या सा वा मङ्गलचण्डिका । मङ्गलो मनु-वंशश्च सप्तद्वीपधरापतिः । तस्य पूज्याभीष्टदेवी तेन मङ्गलचण्डिका" । [राजनि० ।

मङ्गलच्छाय पु० मङ्गला प्रशस्ता छाया यस्य । वटवृक्षे

मङ्गलपाठक पु० मङ्गलार्थं स्तुतीः पठति पठ-ण्वुल् । स्तुतिपाठके हेमच० । "आ इहामङ्गलपाठक ।" वेणी० ।

मङ्गलागुरु न० नित्यक० । अगुरुभेदे राजनि० ।

मङ्गल्य न० मङ्गलाय हितं यत्। १चन्दने २मङ्गल्यागुरुणि ३स्वर्णे ४सिन्दूरे राजनि० ५दध्नि च। ६रुचिरे त्रि० हेम० ७मङ्गलकरे त्रि० मेदि०। "सर्वमङ्गलमङ्गल्ये" इति देवीमा०। ८अश्वत्थे ९बिल्वे १०जीरके ११मसूरके च पु० मेदि० १२नारिकेले १३कपित्थे १४रीठाकरञ्जे च पु० राजनि०। १५त्रायमाणौषधौ पु० धरणिः।

मङ्गल्यक पु० मङ्गलपदस्य प्रियः तद्दोषनिवारणार्थं दीयमानत्वेन शास्त्रविधानात्। मसूरे अमरः। [भावप्र०।

मङ्गलकुसुमा स्त्री मङ्गल्यं कुसुमं यस्याः। शतपुष्पायाम्

मङ्गल्यनामधेया स्त्री ६ब०। जीवन्त्यामोषधौ जटा०।

मङ्गल्या स्त्री मङ्गलाय हिता यत्। १मल्लिकागन्धयुक्तागुरुणि अमरः २रोचनायाम् ३शताह्वपुष्पायाम् ४शम्यां ५शुक्लवचायां मेदि० ६प्रियङ्गौ ७माषपर्ण्यां हेमच० ८शतपुष्पायाम् ९जीवन्त्याम् १०ऋद्धिनामौषधौ ११हरिद्रायां १२दूर्वायां राजनि० १३दुर्गायाञ्च स्त्री रत्नमा०।

"मङ्गल्याऽगुरुशिशिरा गन्धाढ्या दोषशान्तिका" राजनि०

मङ्गिनी स्त्री मङ्गो नौकाशिरः अस्त्यस्याः इनि ङीप्। नौकायां हेमच०। [पत्ये पुंस्त्री

मङ्गुष पु० ऋषिभेदे तस्यापत्यं कुर्वा० ण्य। माङ्गुष्य तद-

मघ दम्भे शाठ्ये च अक०भ्वा०आ०सेट्। मघते अमघिष्ट मेघे।

मच उच्चताकरणे धारणे पूजायां च सक० दीप्तौ अक० भ्वा० आत्म० सेट् इदित्। मञ्चते अमञ्चिष्ट। मञ्च्यते।

मचक्रुक न० कुरुक्षेत्रान्तर्गते तीर्थभेदे। कुरुक्षेत्रशब्दे दृश्यम्

मचर्चिका स्त्री चर्च-धात्वर्थनिर्देशे ण्वुल् मस्य शस्तोरिव चर्चिका ख्यानम्। प्रशस्ते अमरः अस्य तु प्रयोऽयमित्थं वै "मतल्लिकादयो नियतलिङ्गा न तु विशेष्यलिङ्गाः" सि० कौ० "प्रशंसावचनैश्च" पा० अस्य विशेषणत्वेऽपि परनिपातः गोमचर्चिका गोतमल्लिका इत्यादि।

मच्छ पुंस्त्री० माद्यति मद्-क्विप् तथा सन् श्येते शी-ड। मत्स्ये शब्दर०। स्त्रियां जातित्वात् ङीष्।

मजिर पु० ऋषिभेदे तस्यापत्यं शिवा० अण्। माजिर तदपत्ये पुंस्त्री०।

मज्जकृत् न० मज्जानं करोति कृ-क्विप्। १देहस्थे अस्थिरूपे पदार्थे हेमच० अन्नादिषु भुक्तेषु रसादिपरिपाकेन क्रमेणशोणितमांसत्वगस्थिमज्जाख्यातदुत्पत्तेः अस्थ्नः मज्जाकृत्त्वम्।

मज्जन् पु० मस्ज-कनिन्। १अस्थिजाते अस्थिमध्यस्थे स्नेहाकारे पदार्थे २वृक्षादेः सारांशे च अमरः। "कश्च मज्जा-युक्षः यत्र यत्र क्रमशो वै वीर्यं भवति यादृशम्। तस्य तस्यैव वीर्यं च मज्जानमपि निर्दिशेत्" राजवल्लभः "अस्थि यद्वाग्निना पक्वं तस्य सारो द्रवो घनः। यः स्नेहवत् पृथग्भूतः स मज्जेत्यभिधीयते"। मज्जस्थानमाह "स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तरे स्थितः" भावप्र०।

मज्जन न० मस्ज-भावे ल्युट्। १स्नाने (डोबा) जटाध०। कर्त्तरि ल्यु। २मज्जायां शब्दर० अस्थिमध्यमज्जनात्तस्यास्तथात्वम्। ३कुमारानुचरगणभेदे भा०श०४६अ०।

मज्जसमुद्भव न० मज्जतः समुद्भवति सम्+उद्+भू-अच् ५त०। शुक्रे तस्य मज्जजातत्वम् मज्जनशब्दे दृश्यम्।

मज्जा स्त्री मस्ज-अच् टाप्। १अस्थिसारे २वृक्षादेः सारांशे च हेम०। "भल्लातकी मूलकयिष्टुमिश्रैः प्रियालमज्जासहितैः" सुश्रुतः। [राजनि० २शुक्रधातौ न०

मज्जाज न० मज्जातो जायते जन-ड। १भूमिजे गुग्गुलौ

मज्जारस मज्जायाः रसः परिपाकः। शुक्रे राजनि०। तस्य मज्जासम्भवत्वं मज्जनशब्दे उक्तम्।

मज्जासार न० मज्जायां सारोऽस्य। जातीफले राजनि०।

मज्जूषा स्त्री मस्ज-ऊषन्। मञ्जूषायां रायमुकुटः।

मज्मन् न० मस्ज-मनिन् पृषो०। बले निघण्टुः।

मञ्च पु० मचि-उच्छ्राये घञ्। १खट्वायाम् अमरः (माचा) वंशनिर्मिते २उच्चासने ३उच्चमण्डपभेदे शब्दा० "मञ्चस्थं रघुनन्दनम्" पुराणम्। स्वार्थे क। तत्रैव "दृष्टोऽन्धः पतितेन मञ्चकगतः" इति सा० द०।

मञ्चकाश्रय पु० ६त०। मत्कुणे (छारपोका) राजनि०।

मञ्चमण्डप पु० मञ्च इव मण्डपः। शस्यरक्षार्थं कृते पदादिकुटीरे (टङ्) शब्दा०। [शब्दरत्ना०।

मञ्जर न० मञ्ज-अरच्। १तिलकवृक्षे २मुक्तायाञ्च ३वल्लर्याञ्च

मञ्जरि(री) स्त्री मञ्जु ऋच्छति ऋ-इन् शक० पररूपं वा ङीप्। अभिनवोद्भिन्नतायां कुसुमाद्यायां पल्लवाङ्कुररूपायां १वल्लर्याम् अमरः ङीबन्तस्तु तत्र २मुक्तायां ३तिलकलतायां शब्दरत्ना०। ४तुलस्याम् राजनि० तत तारका० इतच्। मञ्जरित जातमञ्जरीके त्रि०। ङीबन्तः "रजसा वर्णोर्मित प्रयपद्यैर्मञ्जरी" ष० र० टी० उक्ते चतुर्दशाक्षरपादके छन्दोभेदे। [राज न०।

मञ्जरीनम्र पु० मञ्जर्यां तदवस्थायामपि नम्रः। वेतसे।

मञ्जा स्त्री मजि-अच्। १छाग्यां त्रिका०।२मञ्जर्यां हेमच०।

मञ्जि(ञ्जी) स्त्री मञ्ज-इन् वा ङीप्। मञ्जर्याम् त्रिका०।

मञ्जिका स्त्री मजि-ण्वुल् टाप् अत इत्वम्। वेश्यायां हारा०।

मञ्जिफला स्त्री मञ्जिः मञ्जरी फले यस्याः। कदल्याम् त्रिका०

मञ्जिष्ठा स्त्री अतिशयेन अञ्जीमती इष्ठन् मतुपो लोपः। स्वनामख्यातायां लतायाम् अमरः। “मञ्जिष्ठा मधुरा तिक्ता कषाया स्वर्णवर्णकृत्। गुरूष्णा विषश्लेष्मशोथयोन्यक्षिकर्णरुक्। रक्तातीसारकुष्ठास्रविसर्पव्रणमेहनुत्” भावप्र०। मञ्जिष्ठया रक्तम् अण्। माञ्जिष्ठ तत्काथेन रक्ते त्रि०।

मञ्जिष्ठामेह पु० सुश्रुतोक्ते मेहभेदे तल्लक्षणं तत्रोक्तं यथा मेहतीत्यनुषक्ते “मञ्जिष्ठोदकप्रकाशं मञ्जिष्ठामेही”।

मञ्जिष्ठाराग पु० मञ्जिष्ठेव रागः। “मञ्जिष्ठारागमाख्यातं यन्नापैत्यतिशोभते” सा०द० उक्ते पूर्वानुरागभेदे।

मञ्जीर न० मञ्ज-ध्वनौ ईरन्। १नूपुरे अमरः। “मञ्जुमणिमञ्जीरे कलगम्भीरे” इति सा०१०प०। २दधिमन्थनदण्डबन्धस्तम्भे पु० हेमच०

मञ्जीरक पु० मञ्जीर इव कायति मञ्जायते कै-क। नूपुरध्वनितुल्यध्वनियुते ततः शिवा० अपत्ये अण्। माञ्जीर तदपत्ये पुंस्त्री०। [मञ्जुल तद्धति त्रि०।

मञ्जु त्रि० मञ्ज-उन्। मनोहरे अमरः। सिध्मा० लच्।

मञ्जुकेशिन् पु० कर्म० प्राशस्त्ये इनि। १श्रीकृष्णे हला० २सुन्दरकेशयुते त्रि० स्त्रियां ङीप्। [त्रि०।

मञ्जुगमना स्त्री ६ब०। १हंस्यां राजनि० २सुन्दरगतियुते

मञ्जुघोष पु० तन्त्रोक्ते १उपास्यदेवभेदे तन्त्रसारे दृश्यम्। २पूर्वजिनभेदे त्रिका०। कर्म०। ३मनोहरशब्दे पु०।

मञ्जुपाठक पुंस्त्री० मञ्जु पठति पठ-ण्वुल्। १शुकखगे राजनि० स्त्रियां जातित्वात् ङीष्। २मनोहरपाठके त्रि०

मञ्जुप्राण पु० ६ब०। चतुर्मुखे ब्रह्मणि जटा० सर्वव्यापित्वेन विधातृप्राणस्य महाप्राणत्वात् तस्य तथात्वम्।

मञ्जुभद्र पु० जिनभेदे त्रिका०।

मञ्जुभाषिन् त्रि० मञ्जु भाषते भाष-णिनि। १सुन्दरभाषके स्त्रियां ङीप् सा च “सजसा जगौ भवति मञ्जुभाषिणी” छ०र० उक्ते २त्रयोदशाक्षरपादके छन्दोभेदे।

मञ्जुल त्रि० मञ्ज-सिध्मा० लच् मजि-उलच् वा। १मनोहरे २निकुञ्जे मेदि० ३यवले न० विश्वः। ४जलरङ्कुखगे पुंस्त्री० मेदि० स्त्रियां ङीष्। [५सुन्दरश्रीके त्रि०।

मञ्जुश्री पु० ६ब०। १मञ्जुघोषे २पूर्वजिनभेदे त्रिका०।

मञ्जुहासिनी स्त्री “सजौ सलौ गो भवति मञ्जुहासिनी” छ०र०टी०उक्ते १त्रयोदशाक्षरपादके २छन्दोभेदे। ३सुन्दरहास्ययुते त्रि०।

मञ्जूषा स्त्री मञ्ज-ऊषन् (पेटरा) १पेटिकायाम् अमरः। २मञ्जिष्ठायाञ्च राजनि० ३पाषाणे उणा० को०।

मट वादे भ्वा०प०सक०सेट्। मटति अमटीत् अमाटीत् मेटतुः

मटची स्त्री मट-बा० अचि ङीप्। १पाषाणवृष्टौ “मटचीहतेषु कुरुषु” छान्दोग्यश्रुतिः। २रक्तवर्णक्षुद्रखगभेदे गोविन्दः।

मटस्फटि पु० दर्पारम्भे जटा०। [अमाठीत् मेठतुः।

मठ वासे अक० मर्दने सक० भ्वा० पर० सेट्। मठति अमठीत्-

मठ आध्याने चा० इक० सेट् इदित्। मण्ठते अमण्ठिष्ट।

मठ पुं न० अर्द्ध चा० मठत्यत्र मठ-घञर्थे क। १छात्रादिवासे २देवागारे अमरः। मठप्रतिष्ठातत्त्वे तत्प्रतिष्ठाविधिर्दृश्यः। देवगृहशब्दे चास्य दृश्यम्। ३गन्धीरथे हारा०।

मठर पु० मठ-अरन्। १मुनिभेदे २शौण्डे त्रि० उणादिव०। राजद०परनिपातः राजमठरः। गर्गा० यञ्। माठर्य तस्य मुनेरपत्ये पुंस्त्री० स्त्रियां ङीप् यलोपः। शौण्डार्थकत्वापत्ये विदा० अञ्। माठर तदपत्ये पुंस्त्री०।

मठ मोहे चु० उभ० अक० सेट् इदित्। मण्ठयति-ते अममण्ठत् त। विभाषे भ्वा० आत्म०। मण्ठते।

मड भूषणे चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् इदित्। मण्डयति ते मण्डति अममण्डत्-त अमण्डीत्। [जटा०।

मडक पु० मडि-क्वुन् पृषो० नलोपः। धान्यभेदे (मेड्या)

मडर पु० मडि-बा० अरन् पृषो० नलोपः। भिक्षुभेदे कन्यायञ्शब्दे परे अस्याद्युदात्तता।

मडार पु० मडि-बा० आरन् पृषो०। भूषके ततः चतुरर्थ्यां प्रगद्या० ञ्य। माडार्य तेन निर्वृत्तादौ त्रि०।

मड्डु पु० मज्जन्ति अस्मिन् यस्मात् वा मस्ज्+उन् पृषो०। वाद्यभेदे अमरः स्वार्थे क मड्डुक तत्रार्थे। मड्डुकवादनं शिल्पमस्य वा ठक् पक्षे अण्। माड्डुकिक माड्डुक मड्डुवादनशिल्पयुते त्रि०। [अमणीत् मेणतुः।

मण अव्यक्तशब्दे भ्वा०प०अक०सेट्। मणति अमाणीत् अ-

मणि(णी) पुंस्त्री० मण-इन् स्त्रीत्वपक्षे वा ङीप्। १रत्नादौ रत्ने “मणिरत्नं सरं शीतं कषायं स्वादु लेखनम्। चक्षुष्यं धारणात्तत् पापालक्ष्मीविनाशनम्” राजवल्लभः। “मणिद्वारालिवरामणीयकमिति” “तपनीयमणीवलयावलिवेति च” नैषधम्। २स्तूपमयपात्रभेदे अलिञ्जरे (जाला) ३शिश्नाग्रे ४मानभेदे जटा० ५मणिबन्धे हेमच० स्वार्थे कप्रत्ययाभावे कन् वा। मणिक अलिञ्जरे न० अमरः।

अज्ञानकृसमे मेदि० योन्यर्थे शब्दर०। [द्रगन्नम्।

मणिकर्ण पु० १कामरूपस्थे २शिवलिङ्गभेदे मणिकूटशब्दे

मणिकर्णिका स्त्री मणिकर्णः मणिमयकर्णभूषणमस्त्यस्यां ठन्। विष्णुतपस्यादर्शनात् विस्मयेन शिवस्य मणिमयकुण्डलपतनस्थाने काशीस्थे १तीर्थभेदे।

तन्नामनिरुक्तिः काशी० २६अ० यथा

विष्णुं प्रति शिववाक्यम् "त्वदीयस्यास्य तपसो महोच्चयदर्शनात्। यन्मयान्दोलितो मौलिरहिश्रवणभूषणः। तदान्दोलनतः कर्णात् पपात मणिकर्णिका। मणिभिः खचिता रम्या ततोऽस्तु मणिकर्णिका। चक्रपुष्करिणीतीर्थं पुराख्यातमिदं शुभम्। त्वया चक्रेण खननाच्छङ्खचक्रगदाधर!। मम कर्णात् पपातेयं यदा च मणिकर्णिका। तदा प्रभृति लोकेऽत्र ख्यातास्तु मणिकर्णिका" मणिकर्णीत्यप्यत्र। २मणिमयकर्णभूषणे च।

मणिकर्णीश्वर न० काशीस्थे शिवलिङ्गभेदे काशीख०१००अ०

मणिकर्णेश्वर न०कामरूपस्थे शिवलिङ्गभेदे कालिपु०८१अ०,

मणिकानन न० मणिकमिवाननं यत्र। कण्ठे शब्दर०।

मणिकार पु० मणिमयं भूषणं करोति कृ-अण्। (जहुरि) १मणिमयभूषणकारके २प्रत्यक्षादिचतुःखण्डात्मकतत्त्वचिन्तामणिनामकग्रन्थकारे गङ्गेशोपाध्याये च। कृ-किप् ङ्रत०। मणिकृदादयोऽप्यत्र।

मणिकुट्टिका स्त्री कुमारानुचरमातृभेदे भा०श०४७अ०।

मणिकूट पु०मणिमयः कूटोऽस्य। कामरूपस्थे पर्वतभेदे यथोक्तम् "मत्स्यकूटस्य चैशान्यां मणिकूटो महागिरिः। मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गकः" कालिकापु०८१अ०।

मणिकेतु पु० केतुभेदे वृ०स० ११अ० केतुशब्दे दृश्यम्।

मणिगणनिकर पु० "नवहयवयतिरिह मणिगणनिकरः" वृ०र० उक्ते पञ्चदशाक्षरपादके छन्दोभेदे द्विगुणहय वसुरित्यस्यानुवृत्तिः।

मणिग्रीव पु० कुबेरपुत्रभेदे शब्दर०।

मणिच्छिद्रा स्त्री मणिरिव छिद्रमस्याम्। १मेदानामौषधौ २ऋषभानामौषधौ च मेदि०। [११मा०।

मणिजला स्त्री मणिप्रचुरं जलमस्याः। नदीभेदे भा० ६०

मणित न० मण-क्त। रतिकाले स्त्रीणामव्यक्तशब्दभेदे हेम०

मणितारक पुंस्त्री० मणिरिव तारकास्य। सारसखगे राजनि० स्त्रियां जातित्वात् ङीप्।

मणिद्वीप पु० मणिमयः मणिप्रचुरो वा द्वीपः। क्षीरसमुद्रमध्यस्थे श्रीविद्यापीठरूपे द्वीपभेदे "सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे" आनन्दल०।

मणिनाग पु० नागभेदे भा० आ० ३५ अ०। [१५८अ०।

मणिपर्वत पु० मणिप्रचुरः पर्वतः शा०त०। पर्वतभेदे हरिवं०

मणिपालि त्रि० मणिं पालयति पालि-इनि। मणिपालके तस्य धर्म्यं महिष्या०अण्। माणिपाल तस्य धर्म्ये त्रि०। तस्यापत्यम् रेवत्या०ठक्। माणिपालिक तदपत्ये पुंस्त्री०

मणिपुच्छी स्त्री मणिरिव पुच्छं यस्याः नित्यं ङीष्। मणिवत्पुच्छयुतायां स्त्रियाम्।

मणिपुष्पक पु० सहदेवस्य शङ्खे गीता १।१६।

मणिपुर न० पौरवस्थे देशभेदे।

मणिपूर न० सुषुम्णान्तर्गते षट्चक्रमध्ये नाभिस्थे पद्मभेदे "तदूर्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम्। मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः। मणिवद्भिन्नं तत्पद्मं मणिपूरं तथोच्यते। दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्। शिवेनाधिष्ठितं पद्मं विश्वालोकनकारणम्"

मणिबन्ध पु० मणिर्बध्यतेऽत्र बन्ध-आधारे घञ्। प्रकोष्ठपाण्योर्मध्यस्थे १करसन्धौ तस्य शुभाशुभलक्षणं गरु०पु० ६६अ० उक्तं यथा "मणिबन्धैर्निगूढैश्च दृढैश्च सुश्लिष्टशुभसन्धिभिः। नृपा हीनैः करच्छेदसबद्धैर्धनवर्जिताः" २सैन्धवलवणाकारे पर्वतभेदे च। [राजनि०।

मणिबी(वी)ज पु० मणिरिव बी(वी)जमस्य। दाडिमवृक्षे

मणिभद्र पु० यक्षभेदे भा० स० १०अ०।

मणिभूमि स्त्री ६त०। मणीनामाकरे।

मणिमञ्जरी स्त्री "इनाश्वैः स्यात् यभनयजजगाः कीर्त्तिता मणिमञ्जरी" वृ० र० टीकोक्ते ऊनविंशत्यक्षरपादके छन्दोभेदे।

मणिमण्डप पु० मणिमयः मणिप्रचुरो वा मण्डपः। १मणिखचिते मण्डपे २देवतापीठस्थानभेदे तन्त्रसारः।

मणिमत् त्रि० मणिरस्त्यस्य मतुप्। १मणियुते त्रि० स्त्रियां ङीप्। २यक्षभेदे पु० भा० स० १अ०। ३तत्रासुरांशजाते द्वापरयुगीये २नृपभेदे पु० भा० आ० ६७अ०। ४नागभेदे भा० स० ९अ०। ५राक्षसभेदे भा०व०१६०अ०। ६दैत्यभेदे हरिवं०२अ०। ७पश्चिमस्थे देशभेदे वृ०स०११अ०।

मणिमध्य न० "स्यान्मणिमध्यं चेद्भमसाः" छन्दोम० उक्ते नवाक्षरपादके छन्दोभेदे। [लवणे अमरः।

मणिमन्थ न०मणिरिव मथ्यते मन्थ-कर्मणि घञ्। सैन्धव-

मणिमाला स्त्री ६त०। "त्यौ त्यौ मणिमाला छिन्ना गुह-

वृत्तेः "छन्दो०उक्ते द्वादशाक्षरपादके छन्दोभेदे । २हारे ३टलकभेदे मेदि०। ४वल्मीकाग्रां शब्दर०।५दीप्तौ शब्दमा०

मणिराग न० मणेरिव रागो वर्णोऽस्य । १हिङ्गुले राजनि० ६त०। २मणिवर्णे पु० ।

मणिल त्रि० मणि+सिध्मा० अस्त्यर्थे लच् । मणियुते ।

मणिव पु० मणि-अस्त्यर्थे व । नागभेदे सि०कौ० ।

मणिवाल पु० मणिरिव शुक्लत्वात् वालः केशोऽस्य । अश्वि-दैवत्ये पशुभेदे यजु० २४।२ ।

मणिवाहन पु० नृपभेदे भा० आ० ६३अ० ।

मणिशैल पु० मन्दराचलस्य पूर्वस्थे पर्वतभेदे मार्कं० ५५ ।

मणिसर पु० मणीन् सरति धारकत्वेन गच्छति सृ-अच् ६त०। मणिखचिते हारभेदे ।

मणिस्कन्ध पु० नागभेदे भा० आ० ५७अ० ।

मणीचक न० मणेः ईं शोभां चकते प्रतिहन्ति चक-अच् ६त०। १चन्द्रकान्तमणौ त्रिका०। २मत्स्यरङ्कखगे पुंस्त्री० हारा० स्त्रियां ङीष् ।

मणीवक न० मणीव कायति कै-क । पुष्पे हारा० ।

मणीवती स्त्री मणि+अस्त्यर्थे मतुप् नि० मस्य वः शरा० दीर्घः । मणियुक्तनदीभेदे । [श्यामा राजनि० ।

मण्टपी स्त्री मण्टं पाति पा-क गौरा० ङीष् । क्षुद्रोपद

मण्टि पु० गोत्रप्रवरर्षिभेदे प्रवराध्यायः ।

मण्ठ(ठ) पु०मठ-घञ् पृषो०वा । (माठ) खाद्यभेदे राजनि० "समितां सर्पिषदाज्यैर्जलेनापि च संयमेत् । अस्यास्तु वटकं कृत्वा पचेत् सर्पिषि नीरसम् । एलालवङ्गकर्पूरमरिचाद्यैरलङ्कृते । मज्जयित्वा सितापाके ततस्तत्समुद्धरेत् । अयं प्रकारः संसिद्धो मण्ठ इत्यभिधीयते" । अस्य गुणाः "मण्ठस्तु बृंहणो वृष्यो बल्यः सुमधुरो गुरुः । पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः" भावप्र०मठ इति पठितम् कृतान्नशब्दे २१८१ पृ० दृश्यम्

मण्ड पुंन० मन-ड तस्य नेत्वम् ।१सर्वाग्रानाणपरके (माड) २सारे ३पिच्छे च । ४आमलक्यां ५सुरायाश्च स्त्री ६दधिमण्डे (माठ) न० मेदि० । ७एरण्डवृक्षे ८भूषायां च पुंन० हेमच० शब्दचन्द्रि०

भावप्र० तद्विधानं यथा

"तण्डुलानां सुसिद्धानां चतुर्दशगुणे जले । द्रवः सिक्थैर्विरहितो मण्ड इत्यभिधीयते । शुण्ठीसैन्धवसंयुक्तो दीपनः पाचनश्च सः ।। अथवा गव्यदधिवद्रात पेया मण्डस्य विहृता । पेयं यूषवतामूना विलेपी भक्तयोरपि" । तस्य गुणाः "मण्डो ग्राही लघुः शीतो दीपनो धातुसाम्यकृत् । ज्वरघ्नस्तर्पणो बल्यः पित्तश्लेष्मापहः"। "क्षुद्बोधनो वस्तिविशोधनश्च प्राणप्रदः शोणितवर्द्धनश्च । ज्वरापहारी कफपित्तहन्ता वायुं जयेदष्टगुणो हि मण्डः । बालमण्डोऽग्निजननो दाहतृष्णानिवारकः । ज्वरातीसारशमनोऽशेषदोषामपाचनः । वाट्यमण्डोऽग्निजननः शूलानाहविनाशनः । पाचनो दीपनो हृद्यः पित्तश्लेष्मानिलापहः" राजवल्लभः । वाट्यमण्डो भृष्टयवमण्डः ।

मण्डक पु० भाव० उक्ते पिष्टकभेदे कृतान्नशब्दे २१८१ पृ० दृश्यम् सङ्गीतदामो० उक्ते गीताङ्गभेदे यथा

"जयप्रियः कलापश्च कमलः सुन्दरस्तथा । मङ्गलो वल्लभश्चेति मण्डकाः षट् प्रकीर्त्तिताः । जयप्रियो हंसताले लघुमध्ये यदा गुरुः । ऊनविंशाक्षरैर्युक्तो रसे वीरे च वर्त्तते । लघुर्गुरुर्लघुर्यत्र हंसतालः स उच्यते ।। कलापो रङ्गतालेन युक्तो रौद्ररसे हि सः । द्वाविंशत्यक्षरैर्युक्तो लघुरादौ गुरुद्वयम् । लघुरादौ गुरुद्वन्द्वं रङ्गतालः इतीरितः २ । लघुद्वन्द्वं गुरुश्चैकोऽनिलोऽस्य गणात्मकः । पञ्चविंशत्यक्षरैः स्यात् कमलः शान्तहास्ययोः ३ । गुरुरेको लघुद्वन्द्वं त्रिपुटे भगणात्मके । अष्टाविंशत्यक्षरैस्तु शृङ्गारे सुन्दरे मतः ४ । आदौ गुरुर्लघुर्मध्ये प्लुतोऽन्ते भङ्गतालके । एकत्रिंशत्यक्षरैस्तु वीरे मङ्गलमण्डकः ५ । मङ्गितापुत्रके ताले गजसागरनागात्मके । चतुस्त्रिंशदक्षरोऽयं वल्लभो रौद्रके रसे ६ ।"

मण्डन पु० मण्डयति मडि-ल्यु ।१अलङ्कारके २प्रसिद्धमीमांसकभेदे पु० "शिष्यप्रशिष्यैरुपगीयमानमवेहि तत् मण्डनमिश्रधाम" । शङ्करदिग्विजयः तेन सह शङ्कराचार्य्यस्य विचारकथा तत्र दृश्या । भावे ल्युट् । ३भूषायाम् न०

मण्डप पुंन० मडि-घञ् मण्डं भूषां पाति रक्षति पा-क मडि-कपन् वा । १जनविश्रामस्थाने २देवादिगृहे च अमरः । यथा चण्डीमण्डप विष्णुमण्डप इत्यादि । ३मण्डपानकर्त्तरि त्रि० शब्दरत्ना० । ४निष्पाव्यां (शूकशिम्बीभेदे) स्त्री राजनि० । [षिति स्त्री त्रिका० ङीप् ।

मण्डयन्त त्रि० मडि-झच् । १अलङ्कारके सि०कौ० । २यो-

मण्डर त्रि० मडि-अरन् । १भूषणे ततः कुमुदा० स्वार्थे ठक् । माण्डरिक तत्रार्थे ।२घुण्ट्यां स्त्री हारा०ङीप् ।

मण्डल न० मडि-कलच् । १चक्राकारेण वेष्टने अमरः यथा सूर्य्यमण्डलं भूमण्डलम् । उभयतोऽशीतियोजनमिते

२देशभेदे ३सूर्य्यचन्द्रयोः परिवेषे ४द्वादशराजके ५कोठरोगे च मेदि० ६गावे अनेकतोयकोष० ७समूहे हेम० "अर्धमण्डपमण्डलम्" इति बोपदेवः। ८चक्रे त्रिका०। "मण्डलाकारपादाख्यं मण्डलं स्थानमीरितम्" इत्युक्ते ९धन्विनां स्थानभेदे शब्दर०। "मण्डलं सर्वतो हस्तिः" इत्युक्ते १०सैन्यव्यूहभेदे कामन्द०। चित्रकरैश्चार्णविवेकेन रचिते ११पदार्थे च यथा पद्ममण्डलं सर्वतोभद्रमण्डलमित्यादि। १२त्रिष्वे त्रि० अमरः स्त्रियां गौरा० ङीष्। सा च १३दूर्वायाम् शब्दर० १४कुक्कुरे पु० मेदि० १५सर्पभेदे पु० विश्वः १६व्याघ्रनखाख्यगन्धद्रव्ये शब्दच०। ततः स्वार्थे क। त्रिष्वे कुष्ठभेदे चादर्शे च।

चित्रमण्डलविधानप्रकारं देवीपु० यथा "चतुर्हस्तं समारभ्य यावद्धस्तशतं भवेत्। मण्डलं तत्र कर्त्तव्यमत ऊर्द्ध्वं न कारयेत्। विमलं१ विजयं२ भद्रं३ विमानं४ शुभदं५ चित्रम्६। वर्द्धमानञ्च७ देवाढ८ सताचं१० कामदायकम्। रुचकं११ स्वस्तिकाख्यं१२ द्विदशमिति मण्डलम्। सितादिकृष्णान्ताश्च रागाः कार्य्याः शुभोभगाः। माक्षिकस्फटिकाद्युत्थरजसोऽरिपरजा। मणिविद्रुमरागाश्च भक्त्या अभिमन्त्रिताः। वितस्त्येष भूपाठत्वं रजः कृत्वा तु पातयेत्। अङ्गुष्ठेन न्यसेन्मन्त्री सम्यगति पदं च वा। समोत्थानं शुभं कृत्वा गोमयेनोपलेपितम्। चन्दनागुरुकर्पूरपञ्चोदधूपाधिवासितम्। भूभागं सुचितं चित्रं पूर्व्वपश्चिमकोत्तरम्। दाम्यं सस्तिकमत्स्याद्यैः खनेर्वीणाक्ष्णपताकैः। पञ्चपत्रादिकं मध्ये द्विगुणं त्रिगुणञ्च वा। द्वाराणि समचतुरस्राणि वर्ण्णिकालेपरोज्ज्वलम्। पद्मं तथा पत्रवल्लि स्वस्तिकान्युत्पलानि च। अङ्गुष्ठेनानामिकया तु रजःपातं समाचरेत्। मध्यमानामिकाङ्गुष्ठैरूर्द्धदृष्ट्या यथेप्सया। अधोमुखाङ्गुलिं कृत्वा पातयेत्तु विचक्षणः। समा रेखा तु कर्त्तव्याऽविच्छिन्ना पुष्टिवर्द्धिनी। अङ्गुष्ठपर्व्ववैपुल्या समा कार्य्या विजानता। संसक्तं विषमं स्थूलं विच्छिन्नं दलदाहतम्। पर्य्यन्तमर्पितं सुमनाविशेष सदादन। संसक्ते कलहं विद्याद्धनुरेखे तु विग्रहम्। कटिस्थाने भवेद्व्याधिर्नित्यं पीडा विभिन्निते। दुन्दुभेर्भयमाप्नोति धनुपस्याच्च संशयः। कषायाश्चार्थहानिः स्यात् विच्छिन्ने मरणं ध्रुवम्। वियोगात्तु भवेत्तस्य इष्टद्रव्यसुतस्य वा। अविदित्वा लिखेद्यस्तु मण्डलन्तु यथेप्सया। सर्व्वदोषानवाप्नोति ये दोषाः पूर्व्वभाषिताः"। भोजनमण्डलं यथा "यातुधानाः पिशाचाश्च असुरा राक्षसास्तथा। घ्नन्ति ते बलमन्नस्य मण्डलस्य विवर्ज्जनात्। आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः। मण्डलान्युपजीवन्ति तस्मात् कुर्व्वीत मण्डलम्। चतुःकोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु। द्विकोणाकृति वैश्यस्य शूद्रस्य वर्त्तुलं सदा" वह्नि पु०। भोजनशब्दे आह्निकत० वाक्यं दृश्यम्।

व्यूहभेदलक्षणं कामन्दकीये उक्तं यथा "मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभिः। कथिताः प्रकृतिव्यूहा भेदास्तेषां प्रकीर्त्तिताः। अनन्तं व्यूहपतिमान् काले स्थाने प्रकल्पयेत्। तिर्य्यग्वृत्तिश्च दण्डः स्याद्भोगः स्यादृत्तिरेव च। मद्दटो दढकोऽसंहतावापो ये तद्विपर्य्ययः। प्रतिष्ठः सुप्रतिष्ठश्च श्येनौ विजयसञ्जयौ। विशालविजयः सूची स्थूणाकर्णचमूमुखः। सर्पास्यो वलयश्चैव दण्डभेदाः सुदुर्ज्जयाः। अतिक्रान्तः प्रतिक्रान्तः कक्षाभ्यां चैकपक्षतः। अतिक्रान्तश्च पक्षाभ्यां ततोऽन्यस्तु विपर्य्ययः। स्थूणापक्षो धनुःपक्षो द्विस्थूणो दण्ड ऊर्द्ध्वगः। द्विगुणान्तस्त्वतिक्रान्तपक्षोऽन्योऽस्य विपर्य्ययः। द्विचतुर्दण्ड इत्येवं ज्ञेयो लक्षणतः क्रमात्। गोमूत्रिकाऽहिसञ्चारी शकटो मकरस्तथा। भोगभेदाः समाख्यातास्तथा परिपतन्तकः। दण्डपक्षो युगोरस्यः शकटस्तद्विपर्य्ययः। मकरो व्यत्ययेनैव शेषः कुञ्जरराजिभिः। मण्डलव्यूहभेदौ च सर्व्वतोभद्रदुर्ज्जयौ। गजाष्टको द्वितीयस्तु प्रथमः सर्व्वतोमुखः। अर्द्धचन्द्रक उद्धानो वज्रभेदास्त्वसंहताः। तथा कुक्कुटशृङ्गी च काकपादी च गोधिका। त्रिचतुःपञ्चसैन्यानां ज्ञेया आकारभेदतः। इति व्यूहाः समाख्याता व्यूहभेदप्रयोक्तृभिः। एवं सप्तदश प्रोक्ता दण्डव्यूहाश्च पञ्चधा। तथा व्यूहद्वयञ्चैव मण्डलस्य प्रयोक्तृभिः। असंहतास्तु षड्व्यूहा भोगव्यूहाश्च पञ्चधा। व्यूहा एते प्रयोक्तव्याः स्युर्युद्धकाल उपस्थिते।" [भ्रमणरूपे नृत्ये शब्दमाला।

मण्डलनृत्य न० मण्डलाकारेण नृत्यम्। चक्राकारेण परि-

मण्डलपत्रिका स्त्री मण्डलाकारं पत्रमस्याः। रक्तपुनर्नवायाम् राजनि०।

मण्डलपुच्छक पु० कीटभेदे सुश्रुतः कीटशब्दे दृश्यम्।

मण्डलब्राह्मण न० शत०ब्रा०१०अध्याये पठिते "यदेतन्मण्डलं तपतीत्यादिके" ब्राह्मणे मण्डलाध्यायोऽयम्।

मण्डलाग्र पु० मण्डलं इवाग्रमस्य । खड्गभेदे अमरः ।

मण्डलाधिप पु० ६त० । मण्डलेश्वरे नृपभेदे चतुर्योजनपर्य्यन्तो ह्यधिकारो नृपस्य च । यो राजा तच्छतगुणः स एव मण्डलेश्वरः” ब्रह्मवै० ज० ख० ८६ अ० । मण्डलाधीश मण्डलेश्वरादयोऽप्यत्र । [शब्दर० ।

मण्डलाकृत त्रि० मण्डल+अभूततद्भावे कृ-क्त । वर्त्तुलाकारे

मण्डलिन् पु० मण्डलं कुण्डलनमस्त्यस्य इनि । १सर्पे २विडाले शब्दमाला । ३जाहके (खट्टाश) हेमच० । ४वटवृक्षे त्रिका० ५गोनससर्पे च राजनि० ।

मण्डहारक पु० मण्डं हरति हृ-ण्वुल् । शौ० । शुण्डे अमरः

मण्डा स्त्री मण्डः कारणत्वेनास्त्यस्या अच् । सुरायां हारा० मडि-अच् टाप् । २आमलक्यां मेदि० ।

मण्डित त्रि० मडि-क्त । १भूषिते २बौद्धभेदे पु० हेमच० ।

मण्डु पु० ऋषिभेदे तस्यापत्यं गर्गा० यञ् । माण्डव्य तदपत्ये ऋषिभेदे ।

मण्डूक पुंस्त्री० मण्डयति वर्षासमयम् मडि-ऊक । १भेके अमरः स्त्रियां जातित्वात् ङीष् । २शोणके ३मुनिभेदे च पु० मेदि० ४अश्वभेदे विश्वः । ५गाढतेजस्के त्रि० शब्दर० ।

मण्डूकपर्ण पु० मण्डूक इव पर्णमस्य । १श्योनाके अमरः २शोणके मेदि० । ३मञ्जिष्ठायां स्त्री टाप् ङीप् वा । ४ब्राह्म्यां (वामनहाटि) ५ओषधिभेदे (थुलकुड़ी) रत्नमा० । स्त्री ङीप् मेदि० । ६आदित्यभक्तायां स्त्री ङीप् राजनि० । स्वार्थे क । मण्डूकपर्णिका तत्रार्थे “मण्डूकपर्णिका वल्ली स्वादुपाका सरा हिमा” । “मण्डूकपर्णिका बल्यो हृद्या वातविबन्धनुत्” राजवल्लभः ।

मण्डूकमातृ स्त्री मण्डूकस्य मातेव पोषकत्वात् । ब्राह्म्यां (वामनहाटी) राजनि० । [सरोवरभेदे अमरः ।

मण्डूकसरस न० मण्डूकप्रचुरं सरः जातौ अच् समा० ।

मण्डूर न० मडि-ऊरच् । लौहमले अमरः ।

मण्डूरवज्र पु० चक्रदत्तोक्ते वटकभेदे
“पञ्चकोलं समरिचं देवदारु फलत्रिकम् । विडङ्गमुस्तयुक्ताश्च भागास्त्रिपलसम्मिताः । यावन्त्येतानि चूर्णानि मण्डूरं द्विगुणं ततः । पक्त्वा चाष्टगुणे मूत्रे घनीभूते तदुद्धरेत् । ततोऽक्षमात्रान् गुडकान् पिबेत् तक्रेण तक्रभुक् । पाण्डुरोगं जयत्येष मन्दाग्नित्वमरोचकम् । अर्शांसि ग्रहणीदोषमूरुस्तम्भमथापि वा । क्रिमिं प्लीहानमुदरं गररोगञ्च नाशयेत् । मण्डूरवज्र नामायं रोगानीकविनाशनः ।”

मण्डूरवटक पु० चक्रदत्तोक्ते मण्डूरादिघटिते वटकभेदे “त्र्यूषणं त्रिफला मुस्तं विडङ्गं चव्यचित्रकौ । दार्वीं त्वग्माक्षिको धातुर्ग्रन्थिकं देवदारु च । एतां द्विपलिकान् भागांश्चूर्णं कृत्वा पृथक् पृथक् । मण्डूरं द्विगुणं चूर्णं शुद्धमञ्जनसन्निभम् । मूत्रे चाष्टगुणे पक्त्वा तस्मिंस्तु प्रक्षिपेत् ततः । उडुम्बरसमान् कुर्य्याद्वटकांस्तान् यथाग्नितः । उपयुञ्जीत तक्रेण सात्म्यं जीर्णे च भोजनम् । मण्डूरवटका ह्येते प्राणदाः पाण्डुरोगिणाम् । कुष्ठान्यजरकं शोथमूरुस्तम्भकफामयान् । अर्शांसि कामलां मेहान् प्लीहानं शमयन्ति ते । पाठयन्त्यष्टगुणितं मूत्रं मण्डूरचूर्णतः ।”

मण्डोदक न० मण्ड इवोदकं यत्र । १आतर्पणे (आलिपोना) २चित्तरागे ३चित्रपर्य्ये मेदि० । सुश्रुतोक्ते सुराकल्पान्तर्गतकल्पभेदे “विरेचनिकमूलानां क्वाथे भावान् सुभावितान् । सुधौतांस्तण्डुलांश्चैव शालीनाञ्चापि तण्डुलान् । अवक्षुण्णीकृतः पिष्टकान् कृत्वा शुष्कान् सुचूर्णितान् । भावितपूतचूर्णस्य तत्कषायोष्णसाधितम् । तस्य पिष्टस्य भागांस्त्रीन् किण्वभागविमिश्रितान् । मण्डोदकार्थे क्वाथस्य दद्यात्तत्र सर्वमेकतः । निदध्यात् कलशे तान्तु सुरां जातरसां पिबेत् । एष एव सुराकल्पो वमनेष्वपि कीर्त्तितः ।”

मत त्रि० मन-क्त । १सम्मते २अभिप्रेते ३ज्ञाते ४अर्चिते च । भावे क्त । ५सम्मतौ ६अभिप्राये ७ज्ञाने ८अर्चायाञ्च न० । ९समीक्षिते त्रि० मत्यशब्दे दृश्यम् । ततः अश्वा० चतुरर्थ्यां क । मतक तत्समीपादौ त्रि० । स्वार्थे क । मतक शब्दार्थे ।

मतङ्ग पु० माद्यति अनेन मद्-अङ्गच् दस्य तः । १मेघे उणादिकोषः । २मुनिभेदे भा० अ० ८अ० । ३दानवभेदे हरिवं० २४२ अ० । ४राजर्षिभेदे शा० ७१ अ० । ब्राह्मण्यां नापितेन जाते ५चण्डालभेदे च तत्कथा भा० आनु० २८ अ० ।

मतङ्गज पुंस्त्री० मतङ्गः मेघ इव जायते जन-ड । १गजे अमरः तस्य मेघाकृतित्वात् तथात्वम् । स्त्रियां ङीष् । ग्रीष्मे गजानामूष्मणा कुष्ठादिरोगो भवति यथोक्तं पालक० “अतः तस्मिन् ग्रीष्मकालात् प्रतापात् कुर्वन्ति कुष्ठानि मतङ्गजानाम् । स्वस्थक्रियायामपि कुञ्जराणामूष्मा शरीरेष्वभिजायतीति । आयासयोगेन हि कर्म्मसङ्गः प्रवृद्ध हन्ति द्विरदान् प्रतापः । सर्वाणि कर्म्माणि

सकूप्रकाशे विनाम्बुना यान्ति पराभवस्थाम् । अस्वत्प-सुप्ततप्रवितप्रकायाः प्रयान्ति नद्यः सरितोऽपिदन्तः ।"

मतङ्गवापी स्त्री तीर्थभेदे भा० अनु० २५ अ० ।

मतत्न पु० पार्श्वस्थे ब्राह्मणवाक्तितुक्के र०१०।१६२।१भा०

मतल्लिका स्त्री मतं मतिमत्तति भूषयति अनु० व्युत् पृषो०। प्रशस्ते अमरः। अव्युत्पन्नोऽयमित्यन्ये नियतलिङ्गोऽयम् सि०कौ०।

मतानुज्ञा स्त्री निग्रहस्थानभेदे गौ०सू० तल्लक्षणमुक्तं यथा "स्वपक्षदोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञा" "यः परेण चोदितं दोषं स्वपक्षेऽभ्युपगम्यानुद्धृत्य वदति भवत्पक्षे समानो दोष इति स स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषं प्रसञ्जयन् परमतमनुजानातीति मतानुज्ञां नाम निग्रहस्थानमापद्यते" भा० ।

मति स्त्री मन-भावे क्तिन् । १ज्ञाने अमरः । २इच्छायां ३स्मृतौ च । कर्त्तरि क्तिच्। ४बाय्यें मेदि० ५शाकभेदे शब्दच० । ६मेधाविनि निघण्टुः । ७मतिकरौषधं गरु० १६८अ० उक्तं यथा "पाठा द्वे जीरके कृष्णमश्वगन्धाजमोदकम् । वचात्रिकटु कञ्चैव लवणं चूर्णमुत्तमम् । मण्डूकीरसे भावितञ्च सर्पिर्मधुसमन्वितम् । सप्ताहभक्षितं कुर्यान्मन्देऽप्यर्थे मतिं पराम् ।"

मतिदा स्त्री मतिं ददाति दा-क । १ज्योतिष्मतीलतायाम् (लितड़ी) राजनि० । दा-क । २बुद्धिदातरि त्रि० ।

मतिनौर पु० नदभेदे भा० आ० ६४अ० ।

मतिभ्रम पु०मतेर्भ्रमः अयथार्थविषयत्वेन भ्रमणम् । १बुद्धिभ्रंशे भ्रान्तौ अमरः । भ्रम-भावे क्तिन् । मतिभ्रान्तिरप्यत्र स्त्री । [मतिभ्रंशादयोऽप्यत्र ।

मतिविभ्रम पु० मतेर्विभ्रमोऽत्र । उन्मादरोगे राजनि० ।

मतुथ त्रि० १मतगायके ऋ०६।७१।५ । २मेधाविनि निघ० ।

मत्क पु० मद-क्विप् स्वार्थे क । १मत्कुणे (छारपोका) अस्मेदम् वत् मदादेशः । २मत्सम्बन्धिनि "नैतन्मतं मत्कमिति ब्रुवाणः" भट्टिः ।

मत्कुण पु० मद-क्विप् कुणति कुण-अच् कर्म० । १कीटभेदे (छारपोका) राजनि० । २निर्दन्तगजे ३श्मश्रुशून्यपुरुषे ४नारिकेले मेदि० ५जङ्घात्राणे हेम० । ६अलातलोमभगायां स्त्रियां स्त्री शब्दर० ।

मत्कुणारि पु० ६त० । (सिद्धि) भङ्गायां शब्दमाला । तत्सम्पर्केण हि तस्य नाशः ।

मत्कुणिका स्त्री कुमारानुचरमातृभेदे भा० श० १७अ० ।

मत्त पु० मद-क्त । १दुर्मदे गजे अमरः । २क्षीबे ३मदयुक्ते ४हृष्टे च त्रि० । ५धुस्तूरे ६कोकिले ७महिषे पु० राजनि० मत्तं मदोऽस्त्यस्याम् अच् । ८मदिरायां स्त्री राजनि० । "ज्ञेया मत्ता भभसगयुता" वृ० र० उक्ते दशाक्षरपादके छन्दोभेदे स्त्री ।

मत्तकाशि(सि)नी स्त्री मत्तेव कोशेन काशते कशति गच्छति वा णिनि पृषो० ह्रस्वः । उत्तमयोषिति अमरः ।

मत्तकीश पु० मत्तः कीश इव । गजे शब्दमा० स्त्रियां जातित्वात् ङीष् ।

मत्तमयूर पु० मत्तो मयूरो यस्मात् । १मेघे "वेदैरन्ध्रैर्म्तौ यसगा मत्तमयूरम्" वृ० र० उक्ते त्रयोदशाक्षरपादके २छन्दोभेदे च ।

मत्तवारण पु०कर्म०। १मत्तहस्तिनि । मत्तं वारयति वृ-णिच् ल्यु । २प्रासादवरण्डे न० (बारेण्डा) हेमच०। ३पूगचूर्णे शब्दमा० ।

मत्ताक्रीड़ा स्त्री "मत्ताक्रीड़ा मौ त्नौ नौ नलगिति भवति वसुशरदशयतियुता" वृ० र० उक्ते त्रयोविंशत्यक्षरपादके छन्दोभेदे । ।(बारेण्डा) प्रासादवरण्डे हेमच०।

मत्तालम्ब पु० मत्तैरालम्ब्यते आ+लवि-कर्मणि घञ् ।

मत्तेभविक्रीड़ित न० "सभरा न्मौ यलगास्त्रयोदशयतिर्मत्तेभविक्रीड़ितम्" वृ० र० टी० उक्ते एकविंशत्यक्षरपादके १छन्दोभेदे । ६त० । २मत्तगजक्रीड़ायाञ्च ।

मत्य न० मते समीकरणे साधु यत् । कृष्टक्षेत्रस्य समीकरणसाधने १फलकभेदे (मइ) "सप्तास्थितेन मत्येन मतीकरोति" ताण्ड्य०ब्रा०२।९।२ । "यथा लोके सप्तास्थितेन सप्तभिरनड्भिः सप्तभिस्तीक्ष्णभागैः षड्भिर्वा अधिष्ठितेन मत्येन मत्यनाम तृणस्य क्षेत्रस्य समीकरणादिसाधनं फलकम् । तेन मतीकरोति समीकरणार्थं कर्षकः प्रव्रजति क्षेत्रम्" भा० २दानादिसहटी हेम० [मन्त्रत ।

मत्र गुप्तभाषणे चु० आ० सक० सेट् इदित् । मन्त्रयते अम-

मत्स पुंस्त्री० मद-स । मत्स्ये उणा० ।

मत्सगण्ड पु० मत्सेन गण्डो लेपोऽत्र (माछेरघण्ट) व्यञ्जनभेदे शब्दच० ।

मत्सर पु० मद-सरन् । १अन्यशुभद्वेषे परसम्पत्त्यसहने २क्रोधे च ३तद्वति ४कृपणे च त्रि० अमरः । ५कीटभेदे मक्षिकायां स्त्री विश्वः । मत्सरश्च "निन्दन्ति मां सदा लोका धिगस्तु मम जीवनम् । इत्यात्मनि भवेद्यस्तु धिक्कारः स च मत्सरः" क्रिया-

योगवारोक्तः ।"स्वप्रयोजनप्रतिपत्त्यानं विना पराभिमत-निराकरणेच्छा ।" गौ० द० वृत्तौ बोध्यः ।

मत्स्य पु० मद–स्यन् । (माछ) १मीने २जलचरभेदे स्त्रियां ङीप् यलोपः मत्सी । तद्भेदगुणादि भावप्र०उक्तं यथा तत्र मत्स्येषु रोहितस्य "रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपक्षतिः । सप्रपुच्छो भवत्येषो रोहितः कथितो बुधैः । रोहितः सर्वमत्स्यानां वरो वृष्योऽर्दितार्त्तिजित् । कषायानुरसः स्वादुर्वातघ्नो नातिपित्तकृत् । ऊर्द्ध्वजत्रुगतान् रोगान् हन्याद्रोहितमुण्डकम् ।" (शिवल्का) "शिलन्ध्रः श्लेष्मलो बल्यो विपाके मधुरो गुरुः । वातपित्तहरो हृद्य आमवातकरश्च सः ।" (अथ भांगन) "भङ्गुरो मधुरः शीतो वृष्यः श्लेष्मकरो गुरुः । विष्टम्भजनकश्चापि रक्तपित्तहरः स्मृतः"। (नोनाचिङ्गा) "मोचिका वातहृद्बल्या बृंहणी मधुरा गुरुः । पित्तहृत् कफकृद्वृष्या दीप्ताग्नेश्च हिता । (बोयाल) "पाठीनः श्लेष्मलो बल्यो निद्रालुः पिशिताशनः । दूषयेद्रुधिरं पित्तकुष्ठरोगं करोति च ।" (अथ शिङ्गी) "शृङ्गी तु वातशमनी स्निग्धा श्लेष्मप्रकोपनी । रसे तिक्ता कषाया च लघ्वी रुच्या स्मृता बुधैः ।" (अथ इलिसा) "इल्लिशो मधुरः स्निग्धो रोचनो वह्निवर्द्धनः । पित्तहृत्कफकृत्किञ्चिल्लघुर्वृष्योऽनिलापहः ।" (अथ शौल) "शकुली पाचिनी हृद्या मधुरा तु वरा स्मृता ।" अथ (गर्गरा) "गर्गरः पित्तलः किञ्चिद्वातजित् कफकोपनः ।" अथ (कवइ) "कवयी मधुरा स्निग्धा कफघ्नी रुचिकारिणी । किञ्चित्पित्तकरी वातनाशनी वह्निवर्द्धिनी ।" अथ (बर्मी) "वर्मिमत्स्यो हरेद्वातं पित्तं रुचिकरो लघुः ।" अथ (दण्डारी) "दण्डमत्स्यो रसे तिक्तः पित्तरक्तं कफं हरेत् । वातसाधारणः प्रोक्तः शुक्रलो बलवर्द्धनः ।" (अथ चाङ्) "चरको मधुरः स्निग्धो विष्टम्भी शीतलो लघुः ।" (अथ पावता) "नलाम्बुरसंभवस्तु तिक्तः पित्त-कफापहः । शिशिरो मधुरो रुच्यो वातसाधारणः स्मृतः ।" अथ (गड़इ) "गडकी मधुरा तिक्ता तुवरा वातपित्तहृत् । कफघ्नी रुचिकृद्बल्या दीपनी बलवीर्य-कृत् ।" अथ (मागुर) "मद्गुरो वातहृद्बल्यो वृष्यः कफकरो लघुः ।" अथ टेङ्गरा "कपादमत्स्यो स्यात् श्लेष्मबलकरश्च सः । वातपित्तहरश्चापि परमो मतः ।" अथ शफरी (पोठी) "शफरी तिक्ता कटुः स्वादुः शुक्रघ्नी कफवातजित् । स्निग्धास्य-वक्त्ररोगघ्नी रोचनी च लघुः स्मृता ।" अथ क्षुद्र-मत्स्याः "क्षुद्रा मत्स्याः स्वादुरसाः दोषत्रयविनाशनाः । लघुपाका रुचिकरा बलदास्ते हिता मताः ।" अथातिक्षुद्रमत्स्याः "अतिसूक्ष्माः पुंस्त्वहरा रुच्याः कासानिलापहाः ।" अथ मत्स्याण्डः "मत्स्यगर्भो भवेद् वृष्यः स्निग्धः पुष्टिकरो लघुः । कफमेहप्रदो बल्यो ग्लानिकृन्मेहनाशनः ।" अथ (शुकटी) "शुष्कमत्स्याः नवा बल्याः दुर्जराः विष्टम्भिनः ।" अथ दग्ध-मत्स्याः "दग्धमत्स्यो गुणैः श्रेष्ठः पुष्टिकृद्बलवर्द्धनः ।" अथ कूपजादिमत्स्यगुणाः "कौपमत्स्याः शुक्रमूत्रकुष्ठश्लेष्मविवर्द्धनाः । सरोजा मधुराः स्निग्धा बल्या वातविनाशनाः । नादेया बृंहणा मत्स्या गुरवोऽनिलनाशनाः । रक्तपित्तकरा वृष्याः स्निग्धोष्णाः स्वल्पवर्चसः । चौण्ड्याः पित्तकराः स्निग्धा मधुरा लघवो हिमाः । ताड़ागा गुरवो वृष्याः शीतलाः बलमूत्रदाः । ताड़ागवच्चिप्रजाताः बलायुर्मतिदक्षराः ।" अथर्तुविशेषे मत्स्यविशेषगुणाः "हेमन्ते कूपजा मत्स्याः शिशिरे सारसा हिताः । वसन्ते ते तु नादेया ग्रीष्मे चौण्ड्यसरोभवाः । तड़ागजाता वर्षासु तादृक्पथ्या नदीभवाः । नैर्झराः शरदि श्रेष्ठा विशेषोऽयमुदाहृतः ।"

तद्भक्षणनिषेधादिकम्

"यो यस्य मांसमश्नाति स तन्मांसाद उच्यते । मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान् विवर्जयेत्" मनुः ।

"जलस्थलचरा ये च प्राणिनस्तान् मृतानपि । न भक्षेन्मानवो ज्ञानी हत्वा तेषां सदैव हि । हत्वा हत्वा तु मत्स्याशी सर्वेषां यो विशेषतः । मांसादः प्राणिनां सोऽपि तस्मान् मत्स्यं परित्यजेत्" । पाद्मोत्तरखण्डे १०५ अ० । वर्जनीया मत्स्या यथा । "शृणु देवि ! प्रवक्ष्यामि मांसभेदान् निबोध मे । नादेयं तिक्तकमठं पद्मं शृङ्गिणमेव च । गोमीनं चक्रमकुटं वड़ालं राघवं तथा । वामीनं चलकर्षं च सपंक्तं चेल्लमेव च । भूमिजस्थानिदस्य गाङ्ग्यानि विवर्जयेत्" मत्स्यसूक्तमहातन्त्रम् । रविवारे मत्स्यभक्षणे निषेधो यथा "आमिषं रक्तशाकञ्च यो भुङ्क्ते च रवेर्दिने । सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते" भविष्यपु० ।

"मासमामिषमांसञ्च मसूरं निम्बपत्रकम् । भक्षयेद्यो रवेर्वारे सप्तजन्मान्यपुत्रकः" ति० त० । कार्त्तिके मत्स्य-भक्षणनिषेधो यथा "न मत्स्यं भक्षयेन्मांसं न कौर्म्मं

नान्यदेव हि । चण्डालो जायते राजन् ! कार्त्तिके मांसभक्षणात्" नारदीयपु० । माघवैशाखयोर्हविष्य ब्रह्मचर्य्यविधानात् मत्स्यभक्षणं नितरां निषिद्धमिति कल्पतरुः । "नाभक्ष्यं नैवेद्यार्थे भक्ष्येष्वप्यजामहिषी-क्षीरं वर्जयेत् पञ्चनखमत्स्यवराहमांसानि च" आह्नि०त० विष्णुसूत्रम् । जन्मतिथौ मत्स्यभक्षणनिषेधो यथा "आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत्" "भुङ्क्ते यस्तु निरामिषं स हि भवेज्जन्मान्तरे पण्डितः" ति०त० । शैवस्य मत्स्यभक्षणनिषेधो यथा

"क्व मद्यं क्व शिवे भक्तिः क्व मांसं क्व शिवार्च्चनम् । मत्स्यमांसरतानां वै दूरे तिष्ठति शङ्करः" काशीख० । विन्ध्यपर्व्वतस्य पश्चिमे मत्स्यभक्षणनिषेधो यथा "विन्ध्यस्य पश्चिमे भागे मत्स्यभुक् पतितो नरः" पुराणम् । कामतो मत्स्यभक्षणप्रायश्चित्तं यथा "मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्" अस्या-नवस्तदर्हम्" प्रा०वि० । मत्स्यभक्षणनिषेधे प्रतिप्रसवो यथा "मत्स्यान् सशल्कान् भुञ्जीत मांसं रौरवमेव च । निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च नान्यथा । शफरं सिंह-तुण्डञ्च तथा पाठीनरोहितौ । मत्स्येष्वेते समुद्दिष्टा भक्षणाय तपोधनैः । प्रोक्षितं भक्षयेदेषां मांसञ्च द्विज-काम्यया । यथाविधि नियुक्तञ्च प्राणानामपि चात्यये" कौर्म्मे पु० १६अ० । "पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः । राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः" मनुः । "अनिवेद्य न भोक्तव्यं मत्स्यं मांसञ्च यद्भवेत् । अन्नं विना पयो मूत्रं यद्विष्णोरनिवेदितम्" आ० त० । प्रेतश्राद्धे मत्स्यदानविधिर्यथा

"सपिण्डीकरणं यावत् प्रेतश्राद्धानि षोड़श । पक्वान्नेनैव कर्त्तव्यं सामिषेण द्विजातिभिः" श्राद्ध०त० ।

२विराटदेशे पु० सोऽभिजनोऽस्य तस्य राजा वा अण् । मात्स्य पित्रादिक्रमेण तद्देशवासिनि तस्य नृपे च बहुषु अणो लुक् । ३तद्देशवासिषु ब० व० । ४मेषादितो द्वादशराशौ मीनराशौ । ५भगवतः प्रथमावतारे तत्कथा मत्स्यपु०२अ० । भा० व० १८७ अ० च । मत्स्यं भगवदवतारभेदमधिकृत्य कृतो ग्रन्थः अण् । मात्स्य महा-पुराणभेदे तत्प्रतिपाद्यविषयाश्च तत्रैव २९०अ० उक्ता यथा "सूत उवाच । एतद्वः कथितं सर्व्वं यदुक्तं विश्वरू-पिणा । मात्स्यं पुराणमखिलं धर्म्मकामार्थसाधनम् । यत्रादौ मनुसंवादो ब्रह्माण्डकथनन्तथा । सांख्यं

शारीरकं प्रोक्तं चतुर्मुखमुखोद्भवम् । देवासुराणा-मुत्पत्तिर्मारुतोत्पत्तिरेव च । मदनद्वादशी तद्वल्लोक-पालाभिपूजनम् । मन्वन्तराणामुद्देशो वैन्यराज्याभि-वर्णनम् । सूर्य्यादुवैवस्वतोत्पत्तिर्बुधस्यागमनं तथा । पितृवंशानुकथनं श्राद्धकालस्तथैव च । पितृतीर्थप्रवा-सश्च सोमोत्पत्तिस्तथैव च । कीर्त्तनं सोमवंशस्य ययाति-चरितं तथा । कार्त्तवीर्य्यस्य माहात्म्यं वृष्णिवंशानु-कीर्त्तनम् । भृगुशापस्तथा विष्णोर्दशधाशापस्तथैव च । कीर्त्तनं पुरुवंशस्य वंशो हौताशनस्तथा । पुराण-कीर्त्तनं तद्वत् क्रियायोगस्तथैव च । व्रतं नक्षत्रसंज्ञाकं मार्त्तण्डशयनं तथा । कृष्णाष्टमीव्रतं तद्वद्रोहिणी चन्द्रसंज्ञितम् । तड़ागविधिमाहात्म्यं पादपोत्सर्ग एव च । सौभाग्यशयनं तद्वदगस्त्यव्रतमेव च । तथा-नन्ततृतीया तु रसकल्याणिनी तथा । आर्द्रानन्द-करी तद्वद् व्रतं सारस्वतं पुनः । उपरागाभिषेकश्च सप्तमीस्नपनं पुनः । भीमाख्या द्वादशी तद्वदनङ्ग-शयनं तथा । अशून्यशयनं तद्वत्तथैवाङ्गारकव्रतम् । सप्तमीसप्तकं तद्वद्विशोकद्वादशी तथा । मेरुप्रदानं दशधा ग्रहशान्तिस्तथैव च । ग्रहस्वरूपकथनं तथा शिवचतुर्दशी । तथा सर्व्वफलत्यागः सूर्य्यवारव्रतं तथा । संक्रान्तिस्नपनं तद्वद्विभूतिद्वादशीव्रतम् । षष्टिव्रतानां माहात्म्यं तथा स्नानविधिक्रमः । प्रयागस्य तु माहात्म्यं सर्व्वतीर्थानुकीर्त्तनम् । पैलाश्रमफलं तद्वद्द्वीपलोकानुकीर्त्तनम् । तथान्तरिक्षचारश्च ध्रुव-माहात्म्यमेव च । भवनानि सुरेन्द्राणां त्रिपुरायोधनं तथा । पितृपिण्डदमाहात्म्यं मन्वन्तरविनिर्णयः । वज्रा-ङ्गस्य तु संभूतिः तारकोत्पत्तिरेव च । तारकासुरमा-हात्म्यं ब्रह्मदेवानुकीर्त्तनम् । पार्व्वतीसम्भवस्तद्वत् तथा शिवतपोवनम् । अनङ्गदेहदाहस्तु रतिशोकस्तथैव च । गौरीतपोवनं तद्वद्विश्वनाथप्रसादनम् । पार्व्वती ऋषि-संवादस्तथैवोद्वाहमङ्गलम् । कुमारसम्भवस्तद्वत् कुमार-विजयस्तथा । तारकस्य वधो घोरो नरसिंहोपवर्ण-नम् । पद्मोद्भवविसर्गस्तु तथैवान्धकघातनम् । वारा-णस्यास्तु माहात्म्यं नर्म्मदायास्तथैव च । प्रवरानुक्रम-स्तद्वत् पितृगाथानुकीर्त्तनम् । तथोभयमुखीदानं दानं कृष्णाजिनस्य च । तथा सावित्र्युपाख्यानं राजधर्म्मा-स्तथैव च । यात्रानिमित्तकथनं स्वप्नमाङ्गल्यकीर्त्त-नम् । वामनस्य तु माहात्म्यं तथैवादिवराहकम् ।

क्षीरोदमथनं तद्वत् कालकूटाभिभाषणम्। प्रासाद-लक्षणं तद्वत्प्रमाणं चान्तु लक्षणम्। पुरुवंशे तु संप्रोक्तं भविष्यद्राजवर्णनम्। तुलादानादि यद्यो महादानानुकीर्त्तनम्। कल्पानुकीर्त्तनं तद्वद् ग्रन्थानु-क्रमणी तथा। एतत्पवित्रमायुष्यमेतत् कीर्त्तिविव-र्द्धनम्। एतत् पवित्रं कल्याणं महापापहरं शुभम्। अस्मात् पुराणादपि पादमेकं पठेत्तु यः सोऽपि विमुक्तपापः। नारायणाख्यं पदमेति नूनमनङ्ग-वद्दिव्यसुखानि भुङ्क्ते।"

तद्दानविधिः मत्स्यपु० "श्रुतीनां यत्र कल्पादौ प्रवृत्त्यर्थं जनार्दनः। मत्स्यरूपी च मनवे नरसिंहोपवर्णनम्। अधिकृत्याब्रवीत् सप्तकल्पवृत्तं मुनिव्रताः!। तन्मात्रमिति जानीध्वं सहस्राणि चतुर्दश। विषुवे हेममत्स्येन धेन्वा चैव समन्वितम्। यो दद्यात् पृथिवी तेन दत्ता भवति चाखिला"।

मत्स्यकरण्डिका स्त्री मत्स्यानां करण्डिकेवाधारः। (खा-लुइ) मत्स्यरक्षणाधारे पात्रभेदे जटा०।

मत्स्यगन्धा स्त्री मत्स्यस्येव गन्धोऽस्याः। १व्यासमातरि सत्य-वत्याम् भा० आ० ६३अ०। २जलपिप्पल्याञ्च जटा०

मत्स्यघण्ट पु० स्वनामख्याते व्यञ्जनभेदे शब्दच०।

मत्स्यजाल न० मत्स्यधारणं जालम् शा०त०। मत्स्यधार-णार्थे जालभेदे हेमच०।

मत्स्यजीविन् पु० मत्स्येन तद्धारणविक्रयादिना जीवति जीव-णिनि। निषादे "मत्स्यघातो निषादानाम्" मनुना तस्य तज्जीविकोक्तेस्तस्य तथात्वम्।

मत्स्यण्डी स्त्री (राव) ख्याते गुडविकारभेदे। वैद्य० "इक्षो रसो यः संपक्वो घनः किञ्चिद्द्रवान्वितः। मन्दवत् स्यन्दते यस्मात् मत्स्यण्डीति निगद्यते"। अस्या गुणाः "मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिलापहा। मधुरा वृंहणी वृष्या रक्तदोषापहा मता"।

मत्स्यद्वीप पु० मत्स्यप्रधानो द्वीपः शा०त०। द्वीपभेदे विष्णुपु०

मत्स्यधानी स्त्री मत्स्या धीयन्तेऽस्यां धा-आधारे ल्युट् ङीप्। मत्स्यरक्षणाधारे (खालुइ) पात्रभेदे अमरः।

मत्स्यनाशन पुंस्त्री० मत्स्यान् नाशयति ल्यु। १कुररखगे हेमच०। स्त्रियां जातित्वात् ङीष् ण्वुल्। मत्स्यनाश-कोऽपि तत्रार्थे उभावपि २मीनघातके त्रि०।

मत्स्यपित्ता स्त्री मत्स्यस्य पित्तमिव रसोऽस्त्यस्याः अच्। कटुरोहिण्याम् (कट्की) अमरः।

मत्स्यबन्धक त्रि० मत्स्यान् बध्नाति बन्ध-ण्वुल्। १मीनधा-रके "न्यायागतेन तस्यैव जातो मत्स्यबन्धकः" उशन-सोक्ते सङ्कीर्णजातिभेदे २धीवरे पुंस्त्री०। स्त्रियां जातित्वात् ङीष्। णिनि। मत्स्यबन्धिन् तत्रार्थे मत्स्य-धान्यां स्त्री ङीप् हला०।

मत्स्यमुद्रा पूजाङ्गे मुद्राभेदे

"दक्षपाणिपृष्ठदेशे वामपाणितलं न्यसेत्। अङ्गुष्ठौ चालयेत् सम्यक् मुद्रेयं मत्स्यरूपिणी। मत्स्यमुद्रा च कूर्म्माख्या लेलिहा मुण्डसंज्ञिका। महायोनिरिति ख्याता सर्वसिद्धिसमर्द्धिदा" तन्त्रसारः।

"स्नानादौ मुण्डमुद्रिका। मत्स्यकूर्मलेलिहाख्या मुद्रा साधरणी मता" तत्रोक्तम्।

मत्स्यरङ्क पुंस्त्री० मत्स्ये रज्यति रन्ज-कर्त्तरि संज्ञायां घञ्। (माछराङ्गा) पक्षिभेदे हारा० "त्रिभुवनविदितो हा मत्स्यरङ्को वराकः" उद्भटः। स्त्रियां ङीष्।

मत्स्यराज पु० ६त०। १रोहितमत्स्ये त्रिका०। २वि-राटनृपे "नगरं मत्स्यराजस्य" भा० व० ७२ अ०। तस्य मत्स्यदेशाधिपत्वात् तथात्वम्।

मत्स्यविन्ना स्त्री विद-लाभे क्त मत्स्यो मत्स्यरसो विन्नो यया तत्प्रतिनिधित्वात्। कटुक्याम् वैद्यकम्।

मत्स्यवेधन न० मत्स्यो विध्यतेऽनेन विध-करणे ल्युट्। १बडिशे अमरः स्त्रीत्वमपि जटा० ङीप्। कर्त्तरि ल्यु। २मद्गुपक्षिणि (पानकौड़ि) स्त्री जटा०।

मत्स्यसन्तानिक पु० व्यञ्जनभेदे "दग्धोऽङ्गारे सलवणो वेशवारैरुपस्कृतः। सार्द्रकः कटुतैलेन मत्स्यसन्तानिको भवेत्" शब्दच०।

मत्स्याक्षी स्त्री मत्स्यस्याक्षीवाकारोऽस्याः षच्समा० ङीष्। १गण्डदूर्वायां राजनि० २सोमलतायाम् ३हिलमोचि-कायाम् ४ब्राह्मीशाके रत्नमाला।

मत्स्याङ्गी स्त्री मत्स्यः तत्पित्तमिवाङ्गं तिक्तत्वात् यस्याः ङीष्। हिलमोचिकायाम् त्रिका०।

मत्स्यादनी स्त्री मत्स्य इवाद्यते आस्वाद्यते अद-कर्म्मणि ल्युट्। जलपिप्पल्याम् राजनि०।

मत्स्याशन पुंस्त्री० मत्स्यानश्नाति अश-ल्यु। (माछराङ्गा) खगे त्रिका० स्त्रियां ङीष्

मत्स्यासन न० रुद्रयामलोक्ते आसनभेदे "अथ मत्स्या-सनं वक्ष्ये हस्तोपरिकराङ्गुलि। पादाङ्गुष्ठमानेन दृढाङ्गुष्ठस्य बोलनम्"।

मत्स्योदरी स्त्री मत्स्यगन्धवत् उदरमस्याः । १व्यासमातरि मत्स्यगन्धायां २काशीस्थे तीर्थभेदे च काशी० ६९ अ० "दुर्गाणि तैः कृतानीह तत्र स्वर्गसमानि च । वहाराणि सयन्त्राणि कवाटविकटानि च । कोटिकोटिभटाढ्यानि सर्वर्द्धिवर्द्धितान्यपि । ततः शैलमहादुर्गं तैः कार्यौ परितः कृतम् । परिखा च कृतालिन्दा मत्स्योदर्या जलाविला । मत्स्योदरी द्विधा जाता बहिरन्तश्चरा पुनः । तस्य तीर्थं महत् ख्यातं लिखितं गाङ्गवारिणि । यदा संहारमार्गेण गङ्गायाः प्रसरेदिह । तदा मत्स्योदरीतीर्थं लभ्यते पुण्यगौरवात् । सूर्याचन्द्रमसोः पर्व तदा कोटिगुणं मतम् । सर्वपर्वाणि तत्रैव सर्वतीर्थानि तत्र वै । तत्रैव सर्वलिङ्गानि गङ्गामत्स्योदरी यतः । मत्स्योदर्याञ्च ये स्नाता यत्र कुत्रापि मानवाः । कृतपिण्डप्रदानास्ते न मातुरुदरेशयाः । अविमुक्तमिदं क्षेत्रं मत्स्याकारत्वमाप्नुयात् । परितः स्वर्धुनीवारिसंहारे परितोऽहते । मत्स्योदर्यां कृतस्नाना ये नरास्ते नरोत्तमाः । कृत्वापि बहुपापानि नेक्षन्ते भास्करेः पुरीम् । किं स्नाता बहुतीर्थेषु किं तप्ता दुष्करं तपः । यदि मत्स्योदरीस्नाताः कुतो गर्भभयं ततः । यत्र यत्र हि लिङ्गानि सुरैर्वर्षिकृतान्यपि । तत्र मत्स्योदरीं प्राप्य स्नातो मोक्षभाजनम् । सन्ति तीर्थान्यनेकानि भूर्भुवःस्वर्गतान्यपि । न समानि परं तानि कोट्यंशेनापि निश्चितम् । इत्थं तीर्थं कृतं तेन विभो ! कैलासवासिना । मत्स्याधिपेन स्वमहत् स्वमहोदारकर्मणा ।"

मथ विलोडने भ्वा०पर०सक०सेट् । मथति मथित् अमथीत् ज्वला० वा ण । मथः माथः । कदित् घाञि न लुप्तः ।

मन्थ वधे सक० क्लेशे अक० भ्वा०पर०सेट् इदित् । मन्थति अमन्थीत् मन्थ्यते ।

मथन न० मथ-ल्युट् । १वधे २क्लेशे ३विलोड़ने च । "क्षीरोदमथनोद्धृता" चन्द्रस्तवः । ४गणिकारिकावृक्षे पु० रत्नमा० ।

मथित न० मथ-क्त । १निर्जलतक्रे २पीड़िते ३हते च त्रि० ।

मथु(थू)रा स्त्री मथ-उ(ऊ)रच् । स्वनामख्यातायां नगर्य्याम् । "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" काशी०ख० । तन्माहात्म्यं विष्णुपु० ६अंशे दृश्यम् । वराहपु०२७अ० । ततः चतुरर्थ्यां वरणा० अण् । माथुर तत्पुर्य्यदूरभवे त्रि० । मथूराप्यत्र द्विरूपको० ।

मथुरेश पु० ६त० । श्रीकृष्णे शङ्कर० । मथुरानाथादयोऽप्यत्र

मद हर्षे दिवा०पर०अक० सेट् शमा० । माद्यति इरित् अमदत् अमादीत् अमदीत् । ईदित् निष्ठायामनिट् पुषादिरयं तेन अमददित्येवेति प्राच्चीनाः । घटा० मदयति औत् मत्तोऽस्मि । प्र+अनवधाने । [दीत् घटा० मदयति ।

मद गर्वे दैन्ये च भ्वा०पर०अक०सेट् । मदति अमादीत् अमदीत्

मद तर्पणे चु०आ०सक०सेट् । मादयते । अमीमदत ।

मद जाड्ये स्वप्ने मदे आमोदे स्तुतौ दीप्तौ च यथायथं अक० सक० च भ्वा० आत्म० इदित् । मन्दते अमन्दिष्ट । तत्र स्तुतौ "मन्दमानः इमन्नभिः" ताण्ड्यब्रा०१.७.६ । "मन्दमानः स्तूयमानः मदि-स्तुतौ कर्मणि यकि प्राप्ते व्यत्ययेन शप्" भा० ।

मद पु० मद अच् । १हस्तिगण्डादिस्रुतजले दानजले अमरः २गर्वे हर्षे ३रेतसि ४मृगमदे मेदि० ५मत्ततायाम् हेमच० ४मद्ये ५कल्याणकरे वस्तुनि च धरणिः ।

मदकट पु० मदेन कटति कट-अच् षण्डे (षाँड़) हेमच० ।

मदकल त्रि० मदेन कलते कल-अच् । १मत्तहस्तिनि मदोत्कटे अमरः । २अव्यक्तशब्दकारिणि त्रि० शब्दरत्ना० । मदेन कलो यस्य । ३मदाव्यक्तभाषिणि त्रि० मेदि० ।

मदगन्ध पु० मदस्य हस्तिदानस्येव गन्धोऽस्य । १सप्तच्छदवृक्षे २मदिरायां स्त्री टाप् । ३अतस्याम् राजनि० ।

मदघ्नी स्त्री मदं मदिरामत्ततां हन्ति हन-ट ङीप् । पूतिकायाम् जटा० ।

मदधार पु० मदप्रधाना धारा यत्र । पर्वतभेदे भा०स०२९अ० ।

मदन पु० माद्यत्यनेन मद करणे ल्युट् । १कामदेवे अमरः । २स्मरायां हेमच० । ३वसन्ते काले ४सिक्थके ५धुस्तूरे च पु० मेदि० । (मयना) ६वृक्षभेदे रत्नमाला । ७भ्रमरे जटा० माषे ८कषायभेदे हेमच० । ९खदिरवृक्षे शब्दच० १०अङ्कोटवृक्षे ११बकुलवृक्षे (मयनफल) १२वृक्षभेदे च राजनि० । १३आलिङ्गनभेदे कामशास्त्रम् ।

मदनक पु० मदयति मद-णिच्-ल्युट् स्वार्थे क । दमनकवृक्षे राजनि० । [२रोमाञ्चे त्रिका० ।

मदनकण्टक पु० मदननिमित्तः कण्टक इव । १सात्त्विके

मदनकाकुरव पुंस्त्री० मदनेन हेतुना काकुरवोऽस्य । पारावते स्त्रियां जातित्वात् ङीष् ।

मदनगृह न० ६त० । १स्त्रीचिह्नभेदे सुरतगृहादयोऽप्यत्र । २जन्मावधिके सप्तमस्थाने ज्यो० ।

मदनगोपाल पु० मदन इव गोपालः । श्रीकृष्णे ।

मदनचतुर्दशी स्त्री मदनपूजार्था चतुर्दशी शा०त० । चैत्रशुक्लचतुर्दश्याम् तत्र दमनकेन मदनपूजाविहितेति तस्यास्तथात्वम् । ति०त० दर्शनम् ।

मदनत्रयोदशी स्त्री मदनपूजार्था त्रयोदशी । चैत्रशुक्लत्रयोदश्याम् ति०त०दर्शनम् । [मत्स्यपु०७अ०

मदनद्वादशी स्त्री मदनपूजार्था द्वादशी । चैत्रशुक्लद्वादश्याम्

मदनपक्षिन् पु० माद्यति मद-ल्यु कर्म०। खञ्जनखगे शब्दच०

मदनपाठक पु० मदनोद्दीपनार्थं पठति पठ-ण्वुल् । स्मरोद्दीपनशब्दकारके कोकिले राजनि० ।

मदनमोहन पु० मदनमपि मोहयति सौन्दर्येण मुह-णिच् ल्यु । श्रीकृष्णे ।

मदनललिता स्त्री "वेदाङ्काऽङ्कैर्मदनललिता म्भो भो नम त्रयाः" इ०र० टीकोक्ते षोड़शाक्षरपादके छन्दोभेदे ।

मदनलेख पु० मदनज्ञापनार्थं लेखः । स्वकीयानुरागज्ञापनार्थं नायकयोः परस्परं प्रति प्रेरिते लेखे पत्रभेदे । यथा शकुन्तलायाम् "तुज्झ ण आणे हिअअम्" इत्यादि ।

मदनबीज न० तन्त्रोक्ते (क्लीम्) इति बीजे

मदनशलाका स्त्री मदनोद्दीपिका शलाका तथाभूत शलाकेव वा । १स्मरोद्दीपकौषधे २शारसखगे मेदि० ३कोकिले शब्दर०।

मदनसदन न० ६त० । १स्त्रीचिह्नभेदे । ज्योतिषोक्ते लग्नावधिके २सप्तमे स्थाने च ।

मदनसारिका स्त्री मदनोद्दीपिका सारिका शा०त० । (शालिक) पक्षिभेदे जटा० । [धान्यभेदे राजनि० ।

मदनाग्रक पु० मदनं मादकमग्रमस्य कप् । कोद्रवे (कोदो)

मदनाङ्कुश पु० मदनस्याङ्कुश इव । १पुरुषचिह्ने लिङ्गे त्रिका० २मैथुनकाले नखाघाते च ।

मदनायुध न० ६त० । स्त्रीचिह्ने शब्दच० । [राजनि० ।

मदनायुध पु० मदनस्यायुधस्त्र अच्समा० । हिङ्गिकरक्षुपभेदे

मदनालय पु० ६त० । २स्त्रीचिह्ने ज्योतिषोक्ते लग्नावधिके सप्तमस्थाने मदनभवनादयोऽप्यत्र ।

मदनावस्था स्त्री मदनकृतावस्था शा०त०। कामिनां स्मरकृते उन्मादादौ दशाभेदे दशाशब्दे दृश्यम् ।

मदनी स्त्री माद्यत्यनया मद-ल्युट् ङीप् । १सुरायाम् हारा० २लगन्धाभौ ३अतिमुक्तके च राजनि० ।

मदनेच्छाफल पु० मदनेच्छां फलति फल-अच् ६त० । बहुरसाले राजनि० ।

मदनोत्सव पु० मदननिमित्त उत्सवः । १होलाकोत्सवे त्रिका० । २स्वर्वेश्यायाम् स्त्री शब्दर० ।

मदप्रयोग पु० ६त० । गजानां मदोद्गमे त्रिका० । [शब्दच०

मदभञ्जिनी स्त्री मदं भनक्ति भञ्ज-णिनि । शतमूल्याम्

मदयन्ती स्त्री मद-णिच्-शतृ गौरा० ङीष् । वनमल्लिकायाम् (काठमल्लिका) राजनि० । स्वार्थे क ह्रस्वः । मदयन्तिका तत्रैवार्थे शब्दरत्ना० ।

मदयित्नु पु० मद-णिच्-इत्नुच् । १कामदेवे २मेघे ३शौण्डिके च मेदि० । ४मद्ये न० शब्दर० । ५मादके त्रि० त्रिका० ।

मदलेखा स्त्री "म्भौ गः स्यात् मदलेखा" इ०र० उक्ते सप्ताक्षरपादके १छन्दोभेदे ६त० । २गजानां दानवारिपङ्क्तौ

मदविक्षिप्त पु० ३त० । १मत्तगजे शब्दच० । २मदेन क्षिप्ते त्रि० ।

मदशाक पु० मदार्थं शाकमस्य । उपोदक्यां शब्दच० ।

मदसार पु० मदं सारयति गमयति सृ णिच्-अण् उप०स०। तूलवृक्षे राजनि० ।

मदस्थल पु० ६त० । १सुरापाने शब्दरत्ना० । मदस्थानादयोऽप्यत्र । ज्योतिषोक्ते लग्नावधिके २सप्तमस्थाने च ।

मदहस्तिनी स्त्री मदेन हस्तिनीव । महाकरञ्जवृक्षे राजनि०

मदहेतु पु० ६त० । १मत्ततादेतौ २धातक्यां वैद्यकम् ।

मदाघ पु० ऋषिभेदे ततः । उपका० गोत्रप्रत्ययस्य द्वन्द्वे च अद्वन्द्वे च लुक् ।

मदाढ्य पु० मदेन मदकारणेन (ताड़ि) रसेनाढ्यः । १तालवृक्षे राजनि० । २रक्तभिण्ट्याम् स्त्री शब्दच० । ३मदयुक्ते त्रि० ।

मदातङ्क पु० ६त० । मदजनरोगभेदे राजनि० ।

मदात्यय पु० ६त० । मदनिमित्ते रोगभेदे तस्य निदानादि गरु०पु० १६० अ० उक्तं दृश्यम् । भावप्र० उक्तन्तु यथा "विषस्य ये गुणा दृष्टाः सन्निपातप्रकोपनाः । त एव मद्ये दृश्यन्ते विषे तु बलवत्तराः । तस्मादविधिपीतेन तथा मात्राधिकेन च । युक्तेन चाहितैरन्नैरकाले सेवितेन च । मद्येन खलु जायन्ते मदात्ययमुखा गदाः" । अविधिप्रयुक्तं मद्यं विकारान्तरमप्युत्पादयतीत्याह । "निर्भक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यम् । उत्पादयेत् कष्टतमान् विकारानुत्पादयेच्चापि शरीरभेदम्" । एकान्ततो नैरन्तर्येण, विकारान् मदात्ययादीन् । शरीरस्य भेदं नाशम् । मदात्ययादीनां हेत्वन्तरमप्याह "क्रुद्धेन भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन । व्यायामभाराध्वपरिक्षतेन वेगावरोधाभिहतेन चापि । अत्यम्लभक्ष्यावततोदरेण सा-

जीर्णभुक्तेन तथाऽबलेन। उष्णाभितप्तेन च सेव्यमानं करोति मद्यं विविधान् विकारान्"। तानेव विकारान् विवृणोति। "पानात्ययं परमदं पानाजीर्णमथापि वा"। पानविकारान् विवृणोति। "पानविभ्रमसंज्ञञ्च तेषां वक्ष्यामि लक्षणम्। तत्र मदात्ययस्य सामान्यलक्षणमाह "शरीरदुःखं बलवत्प्रमोहो हृदयव्यथा। अरुचिः सततं तृष्णा ज्वरः शीतोष्णलक्षणः। शिरःपार्श्वास्थिसन्धीनां वेदना विद्यते तथा। जायतेऽतिबलात् जृम्भा स्फुरणं वेपनं श्रमः। उरोविबन्धः कासश्च श्वासो हिक्काप्रजागरः। शरीरकम्पः कर्णाक्षिमुखरोगास्त्रिकग्रहः। छर्दिर्विड्भेदउत्क्लेशो वातपित्तकफात्मकः। भ्रमः प्रलापो रूपाणामसताञ्चैव दर्शनम्। तृणभस्मलतापर्णपांशुभिश्चावपूरितम्। प्रकर्षं विहङ्गैश्च भ्रान्तचेताः स मन्यते। व्याकुलानामशस्तानां स्वप्नानां दर्शनानि च। मदात्ययस्य रूपाणि सर्वाण्येतानि लक्षयेत्"। अथ मदात्ययस्य वातिकस्य निदानमाह "स्त्रीशोकभयभाराध्वकर्मभिर्योऽतिकर्षितः। रूक्षाल्पप्रमिताशी च यः पिबत्यतिमात्रया। रूक्षं परिणतं मद्यं निशि निद्रां निहन्ति च। करोति तस्य तच्छीघ्रं वातप्रायं मदात्ययम्" तत् मद्यम्। अथ तस्य लक्षणमाह। "हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः। विद्याद्बहुप्रलापस्य वातप्रायं मदात्ययम्"। अथ पैत्तिकस्य निदानमाह "तीक्ष्णोष्णं मद्यमम्लञ्च योऽतिमात्रं निषेवते। अम्लोष्णतीक्ष्णभोजी च क्रोधनोऽग्न्यातपप्रियः। तस्योपजायते तीव्रः पित्तप्रायो मदात्ययः"। अथ तस्य लक्षणमाह "तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः। विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम्"। अथ श्लैष्मिकस्य मदात्ययस्य निदानमाह "मधुरस्निग्धगुरुभोजी यः पिबत्यतिमात्रया। अव्यायामदिवास्वप्नशय्यासनसुखे रतः। मदात्ययं कफप्रायं स नरो लभते ध्रुवम्"। अथ तस्य लक्षणमाह "छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः। विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम्"। अथ सान्निपातिकस्य मदात्ययस्य निदानं लक्षणञ्चाह "त्रिदोषहेतुभिः सर्वैः सर्वलिङ्गैर्मदात्ययः"। अथ परमदलक्षणमाह "श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च। लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञा तृष्णा रुजा शिरसि सन्धिषु चापि भेदः"। तन्द्रिस्तन्द्रा। पानाजीर्णमाह "आध्मानमुग्रमथ चोद्गिरणं विदाहः पाने त्वजीर्णमुपगच्छति लक्षणानि"। उद्गिरणं वान्तिः उद्गारो वा। पीयत इति पानं मद्यम्। पानविभ्रममाह "हृद्गात्रतोदकफसंस्रवकण्ठधूममूर्च्छावमीज्वरशिरोरुजनप्रदेहाः। द्वेषः सुरान्नविकृतेषु च तेषु तेषु तं पानविभ्रममुशन्त्यखिलेषु धीराः। कण्ठधूमः निर्गम इव। प्रदेहः कफेन लिप्तास्यता। द्वेषः सुरान्नविकृतेषु सुराविकारेषु अन्नविकारेषु च द्वेषः। असाध्यानां मदात्ययादीनां लक्षणमाह। हीनोत्तरोष्ठमतिशीतममन्ददाहम् तैलप्रभास्यमतिपानहतं त्यजेत्तु। जिह्वौष्ठदन्तमसितं त्वथ वापि नीलम् पीते च यस्य नयने रुधिरप्रभे च। हिक्काज्वरौ वमथुवेपथुपार्श्वशूलाः कासभ्रमावपि च पानहतं त्यजेत्तम्"।

मदाम्नात पु॰ मदस्यातिक्रमे आम्नातः। गजपृष्ठस्थे ढक्कावाद्ये हारा॰।

मदाम्बर पु॰ मदो दानमम्बरमिवास्य। मत्तगजे त्रिका॰।

मदार पुंस्त्री॰ मद आरन्। १वराहे उज्ज्वल॰ स्त्रियां ङीष्। २धूर्त्ते ३मत्तगजे विश्वः। ४कामुके ५नृपभेदे उणादिको॰। [त्रिका॰

मदार्मद पु॰ मदजन्यमर्मं ददाति दा-क। फतकमत्स्ये

मदालस त्रि॰ मदेनालसः। १मदेनालसे २गन्धर्वराजविश्वकेतुकन्यायां स्त्री। [शब्दमाला

मदालापिन् पु॰ मदेनालपति आ+लप-णिनि। कोकिले

मदाह्व पु॰ मदः मृगमद आह्वा यस्य। मृगमदे कस्तूर्यां त्रिका॰।

मदि स्त्री मद्यन्ति लष्टक्षेत्रलोष्टम् मद-इन् उणा॰। (मइ) ख्याते कृषिसाधने लौहकयन्त्रभेदे स्वार्थे क। तत्रार्थे कृषिशब्दे २१९९ पृ॰ मदिकादानविधिर्दृश्यः। तल्लक्षणन्तु २११८ पृ॰ तत्र शब्दे दृश्यम्।

मदिन् त्रि॰ मदयतीति मदि-णिनि। तर्पके यजु॰ ६।२७।

मदिन्तम त्रि॰ अतिशयेन मदी तमप् वेदे नुमागमः। अतिशयतर्पके यजु॰ ६।२७।

मदिरा स्त्री मद-करणे किरच्। "माध्वीकं पानसं द्राक्षं खार्जूरं तालमैक्षवम्। मैरेयं माक्षिकं टाङ्कं मधूकं नारिकेलजम्। मुख्यमन्नविकारोत्थं मद्यानि द्वादशैव तु" इत्युक्ते १मद्यसामान्ये २मत्तखञ्जने शब्दरत्ना॰। ३रक्तखदिरे पु॰ शब्दच॰। ४कालभेदे तद्भेदपाद्यता यथा

"गौडी तु शिशिरे पेया पैष्टी हेमन्तवर्षयोः। शरद्ग्रीष्मवसन्तेषु माध्वी पाह्या न चान्यथा। कादम्बरी शर्करजादिमद्यं सुशीतलं रुच्यकरं मदाढ्यम्। माध्वीकमं स्यात् तरुवल्कजातं मद्यं सुशीतं गुरु तर्पणञ्च। अन्यथा कुरुते पानं मद्यं सन्तापशोफदम्। अवदोषमदात्ययकारकं मूर्च्छनञ्च तत्"। "पर्युषितमम्लमेतमनल्पं वा पिच्छिलं विगन्धं वा। दोषावहमविशेषात् मद्यं हृद्यं विवर्जयेत् सर्वम्। मद्यप्रयोगं कुर्वन्ति शूद्रादिषु सदार्त्तिषु। द्विजैर्द्धर्मिभिस्तु न पाह्यं यद्यप्युज्जीवयेन्मृतम्" राजनि०। अधिकं मद्यशब्दे दृश्यम्। ४वसुदेवस्य पत्न्यां हरिवं० २६अ०। ५दुर्गायां १७८अ०। "सप्तभकारततावथितौ च गुरुः कविभिः कथिता मदिरा" वृ० र० टी० उक्ते द्वाविंशत्यक्षरपादके ६छन्दोभेदे स्त्री।

मदिराक्ष पु० १विराटस्य भ्रातरि भा०वि०२१अ०। मदिरामत्तखञ्जनाक्षीवाक्षिणी यस्य बहुव्री०। २खञ्जनतुल्यनेत्रे त्रि० स्त्रियां ङीष्। [गञ्जाख्ये मद्यस्थानार्थे गृहे अमरः

मदिरागृह न० मदिरस्थानार्थं गृहम् शाक० त०।

मदिराश्व पु० १विराटस्य सेनापतिभेदे भा० आश्र० २अ०। हिरण्यहस्तस्य श्वशुरे २प्राचीने नृपभेदे भा०अनु०१४७अ०।

मदिरासख पु० ६त० टच्समा०। आम्रवृक्षे जटा०। तस्य मदिरातुल्यास्वादत्वात् तथात्वम्। [मदिरायां हेमच०।

मदिष्ठा स्त्री अतिशयेन मदिनी मदयित्री इष्ठन् टिलोपः।

मदेमहि पु० मार्गनायाम् निघण्टुः।

मदेष पु० मद-बा० एष। मत्ते ऋ०१।११०।६।६।

मदोत्कट पु० मदेन दानवारिणा उत्कटः उद्भटः। १मत्त गजे अमरः २मदिरायां स्त्री राजनि०। ३मदोद्धते त्रि०।

मदोदग्र पु० मदेन हर्षेण दर्पेण वा उदग्रः उच्चः। १मत्ते "मदोदग्राः ककुद्मन्तः" रघुः। २नार्य्यां स्त्री शब्दमा०।

मदोद्धत त्रि० मदेन उद्धतः। नन्दी जटा०।

मदोन्मत्त पु० "मन्त्रो वाण्यथ वा विद्या सप्ताधिकदशाक्षरः। फट्कारपञ्चकादिर्यो मदोन्मत्त उदाहृतः" तन्त्रसारोक्ते १मन्त्रभेदे २मदेनोन्मत्ते त्रि०।

मद्गु पु०मस्ज-उ न्यङ्क्वा०। (पानिकौडि) १पक्षिभेदे अमरः। "मद्गुः स्निग्धो वातनाशी भेदकः शुक्रकारकः। रक्तपित्तविनाशी च शीतलः परिकीर्त्तितः" राजव०। २मद्गुरमीने नीलकण्ठः।

मद्गुर पुंस्त्री०मस्ज-उरच् न्यङ्क्वा०। (मागुर)१मत्स्यभेदे। स्वार्थे क। तत्रैव अमरः स्त्रियां ङीष्। तद्गुणाः मत्स्यशब्दे भावप्र०उक्ताः। "निषादो मद्गुरं सूते" भा० अनु० ४८ उक्ते २वर्णसङ्करजातिभेदे (डुबुरि) पुंस्त्री०। "मद्गुरान् मीनभेदान् वाति वा·क वस्य रः" नीलकण्ठः। जलमज्जनेन मीनहारित्वात् तस्य तथात्वम्। "तस्मादेते जले मग्ना मद्गुरा नाम विश्रुताः। ये हरन्ति सदाऽसंख्यान् समुद्रोदरचारिणः" हरिवं० ९५अ०।

मद्गुरप्रिया स्त्री मद्गुरस्य प्रियेव। शृङ्गीमत्स्ये हेमच० "मद्गुरस्य प्रिया शृङ्गी" अमरः।

मद्गुरसी स्त्री मद्गोः मद्गुरस्येव रस–आस्वादोऽस्याः गौरा० ङीष्। शृङ्गीमत्स्ये शब्दर०।

मद्य न० माद्यत्यनेन करणे यत्। मदिराशब्दे उक्ते माध्वीकादिद्वादशविधे मादकद्रव्ये अमरः। मद्यभेदा वर्णभेदेन तत्पाननिषेधादिकं प्रा० वि० उक्तं यथा "पुलस्त्यः "पानसं द्राक्षमाधूकं खार्ज्जूरं तालमैक्षवम्। माध्वीकं टाङ्कमाध्वीकं मैरेयं नारिकेलजम्। समानानि विजानीयान्मद्यान्येकादशैव तु। द्वादशन्तु सुरामद्यं सर्वेषामधमं स्मृतम्"। अनेनैकादशानां सुरात्वं निषेधयति मद्यशब्दस्तु मदहेतुद्रवद्रव्यमात्रवचनः तस्मादेव वचनाच्च मद्यमात्रं सुराशब्दार्थः। तथा च बृहस्पतिः "गौड़ीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समाचरेत्। तप्तकृच्छ्रं पराकञ्च चान्द्रायणमनुक्रमात्"। तयापि सुरात्वे क्रमेण प्रायश्चित्तं न स्यात्। यथा भविष्ये "सुरा तु पैष्टी मुख्योक्ता न तस्यास्त्वितरे समे"। पैष्टीति तण्डुलविकारमात्रोपलक्षणम्। इतरे गौड़ीमाध्व्यौ अतोऽन्नविकार एव सुराशब्दस्य मुख्यत्वात् त्रिविधा सुरेति गौड़ीमाध्व्योर्गौणसुरात्वज्ञापनार्थम्। तेनैतत्पानेऽपि महापातकत्वमतिदिशति "यथैवैका तथा सर्वेति" पैष्ट्यां पूर्वप्रसिद्धिं दर्शयति यथा पैष्टी सुरा तथा सर्वा गौड़ी माध्वी च पूर्ववचनोक्ता पैष्टीदृष्टान्तेनात्र दर्शिता न पातव्या द्विजोत्तमैर्ब्राह्मणैरित्यर्थः। त्रैवर्णिकपरत्वे उत्तमपदानर्थक्यात्। न च बहुवचनानर्थक्यपरिहारार्थम् उत्तमप्रतिपदिकानर्थक्यं युक्तं बहुवचनस्य सजातीयोपस्थापके चरितार्थत्वात्। अतो ब्राह्मणस्य त्रिविधसुरापानं महापातकं क्षत्रियवैश्ययोस्तु "सुरा वै मलमन्नानामिति" वचनेन पैष्ट्येवेति स्थितम्। गोविन्दराजविश्वरूपधारेश्वराणामनुमतोऽयमर्थः। अतएव "एव माध्वी च गौड़ी च पैष्टी च त्रिविधा सुरा। द्विजातिभिर्न पातव्या कदाचिदपि कर्हिचिदिति" यमवचनेऽपि द्विजा

तिपदं ब्राह्मणपरमेव । अतएव द्विविधसुरापाने क्षत्त्रियादीनां महापातकं दूरे तावदस्तु दोषाभावमेवाह स्म याज्ञवल्क्यः "कामादपि हि राजन्यो वैश्यश्चापि कथञ्चन । मद्यमेवासुरां पीत्वा न दोषं प्रतिपद्यते" । तदेवं पैष्टीनिषेधस्त्रैवर्णिकानां गौडीमाध्वीनिषेधस्तु ब्राह्मणानामेव । ननु ब्राह्मणराजन्याविति विशेषणात् पुंलिङ्गमत्र विवक्षितम् । अतः कथं ब्राह्मण्याः सुरापानं महापातकम् । उच्यते निषिध्यमानक्रियाया विधेयत्वेन तत्कर्त्तुरनुपादेयत्वात्तद्विशेषणं लिङ्गमविवक्षितं हविरधमवत्तवत् अतस्तज्जातीयस्त्रीणामपि पाननिषेधः । यथा भविष्ये "तस्मात्र पेयं विप्रेण सुरामद्यं कथञ्चन । ब्राह्मण्यापि न पेया वै सुरा पापभयावहा" । "या ब्राह्मणी सुरापी स्यात् न तां देवाः पतिलोकं नयन्ति" इति श्रुतेः । "पत्युरर्द्धशरीरेण भार्य्या यस्य सुरां पिबेत् । पतितार्द्धशरीरस्य निष्कृतिर्नोपपद्यते" । न चैवं क्षत्त्रियवैश्यस्त्रीणामनिषेधः, ब्राह्मणीपदस्य निषिद्धसुरापानकर्त्तृभार्य्योपलक्षकत्वात् भार्य्या यस्य सुरां पिबेदिति सामान्यश्रवणात् । पानञ्च द्रवीभूतस्याभ्यवहारः स च कण्ठदेशादधोनयनं न तु वक्त्रमात्रप्रवेशः । निष्ठीवनाद्यर्थं कपोलधारणे पानशब्दाप्रयोगात् यथोक्तं "निघ्रन्नपि सुरां कश्चित् पिबतीत्यभिधीयते । यावन्न क्रियते वक्त्रे गण्डूषस्य प्रवेशनम्" । तत्र गण्डूषपरिमाणमविवक्षितं गण्डूषार्द्धपानेऽपि लोके पानशब्दप्रयोगात् अतएव मुखप्रवेशनमात्राविवक्षितं किन्तु येन मुखप्रवेशेन कण्ठादधोनयनं भवति तत्तदेवोपलक्षयति अतएवोष्ठमात्रलेपे न पाननिष्पत्तिः अतस्तत्रोत्तमाङ्गस्पर्शप्रायश्चित्तम् । एतेन केवलौष्ठसंयोगे तत्रामन्त्रसंस्काराविति वाचकस्य व्याख्यानमपकृतं पानानिष्पत्तेरिति ।"

मद्यभेदगुणादिकं भावप्र० उक्तं यथा

"मद्यन्तु सीधुर्मैरेयमिरा च मदिरा सुरा । कादम्बरी वारुणी च हालापि बलवल्लभा । पेयं यन्मादकं लोकैस्तन्मद्यमभिधीयते । यथारिष्टं सुरा सीधुरासवाद्यमनेकधा । मद्यं सर्वं भवेदुष्णं पित्तकृद्वातनाशनम् । भेदनं शीघ्रपाकञ्च रूक्षं कफहरं परम् । अम्लञ्च दीपनं रुच्यं पाचनं चाशुकारि च । तीक्ष्णं सूक्ष्मञ्च विशदं व्यवायि च विकाशि च" । अथारिष्टस्य लक्षणं गुणाश्च "पक्वौषधाम्बुसिद्धं यन्मद्यं तत्स्यादरिष्टकम्" । अरिष्टं मद्यमिति लोके । यथा द्राक्षारिष्टम् । दशमूलारिष्टम् । बब्बुलारिष्टमिति । "अरिष्टं लघुपाकेन सर्वतश्च गुणाधिकम् । अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः" । अथ सुरालक्षणं गुणाश्च "शालिषष्टिकपिष्टादिकृतं मद्यं सुरा स्मृता । सुरा गुर्वी बलस्तन्यपुष्टिमेदःकफप्रदा । ग्राहिणी शोथगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत्" । अथ सुराभेदो वारुणी तस्या लक्षणं गुणाश्च "पुनर्नवाशिलापिष्टैर्विहिता वारुणी स्मृता । संहितैस्तालखर्ज्जूररसैर्या सापि वारुणी । सुरावद्वारुणी लघ्वी पीनसाध्मानशूलनुत्" । सुरातो भेदार्थं लघ्वीति । अथ सीधुद्वयस्य लक्षणं गुणाश्च "इक्षोः पक्वैः रसैः सिद्धः सीधुः पक्वरसश्च सः । आमैस्तैरेव यः सीधुः स च शीतरसः स्मृतः । सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् । वातपित्तकरः सद्यः स्नेहनो रोचनो हरेत् । विबन्धमेदःशोफार्शःशोषोदरकफामयान् । तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ।" अथासवस्य लक्षणं गुणाश्च "यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः । यथा लोध्रासवादिः । "आसवस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ।" अथ नवपुराणमद्यगुणाः । "मद्यं नवमभिष्यन्दि त्रिदोषजनकं सरम् । अहृद्यं बृंहणं दाहि दुर्गन्धं विशदं गुरु । जीर्णं तदेव रोचिष्णु कृमिश्लेष्मानिलापहम् । हृद्यं सुगन्धिगुणवल्लघु स्रोतोविशोधनम्" । अथ सात्त्विकानां मद्यं पिबतां चेष्टाविशेषाः । "सात्त्विके गीतहास्यादि राजसे साहसादिकम् । तामसे निन्द्यकर्म्माणि निद्राञ्च मदिराचरेत्" । आचरेत् कुर्य्यात् "विधिना मात्रया काले हितैरन्नैर्यथाबलम् । प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतं यथा । किन्तु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम् । अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतम्" । अथ मद्यानां गन्धनाशनोपायः । "मुस्तैलवालमदजीरकधान्यकैला यश्चर्वयन् सदसि वाचमभिव्यनक्ति । स्वाभाविकं मुखजमुज्झति पूतिगन्धं गन्धञ्च मद्यलशुनादिभवञ्च नूनम् ।" औषधार्थमपि विप्रैर्मद्यं न पेयम् मदिराशब्दे राजनि० वाक्यं दर्शितम् ।

पुराणादौ ब्राह्मणस्य मद्यनिषेधो यथा

"अदेयमप्यनेयञ्च तथैवास्पृश्यमेव च । द्विजातीनामनालोच्यं नित्यं मद्यमिति स्थितम् । तस्मात् सर्व-

प्रयत्नेन मद्यं नित्यं विवर्जयेत् । पीत्वा पतति कर्म्मभ्यस्त्वसम्भाष्यो द्विजोत्तमः । भक्षयित्वाप्यभक्ष्याणि पीत्वापेयान्यपि द्विजः । नाधिकारी भवेत्तावद्यावत्तन्न जहात्यधः । तस्मात् परिहरेन्नित्यमभक्ष्याणि प्रयत्नतः । अपेयानि च विप्रो वै पीत्वा तद्याति रौरवम् । कूर्म्म पु० १६ अ० । "द्विजस्य पूजादौ मद्यदानविध्यनुकल्पनिषेधो यथा । "मदिरां छन्नतो दद्यात् अन्यत् पानन्तु कामतः । अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः । नारिकेलजलं कांस्ये ताम्रे च विसृजेन्मधु । नापद्यपि द्विजो मद्यं कदाचित् विसृजेदपि । ऋते, पुष्पासवाद्गुडात् व्यञ्जनाद्वा विशेषतः । राजपुत्रस्तथा मद्यैः क्षत्रियः सौम्रिकादयः । दद्युर्नरबलिं भूप सम्पत्या विभवाय च । नृपालानुमते मद्यं ददत् पापमवाप्नुयात्" कालिका पु० ६६ अ० । अथ ब्राह्मणस्य मद्यपाननिषेधकशुक्रशापो यथा "वैशम्पायन उवाच । सुरापानाद्वञ्चनां प्राप्य विद्वान् संज्ञानाशं प्राप्य चैवातिघोरम् । दृष्ट्वा कचञ्चापि तथाभिरूपं पीतं तथा सुरया मोहितेन । समन्युरुत्थाय महानुभावस्तदोशना विप्रहितं चिकीर्षुः । काव्यः स्वयं वाक्यमिदं जगाद सुरापानं प्रति वै जातमन्युः । यो ब्राह्मणोऽद्यप्रभृतीह कश्चित् मोहात् सुरां पास्यति मन्दबुद्धिः । अपेतधर्म्मा ब्रह्महा चैव स स्यादस्मिंल्लोके गर्हितः स्यात् परे च । मया चेमां विप्रधर्म्मोक्तसीमां मर्य्यादां वै स्थापितां सर्व्वलोके । सन्तो विप्राः शुश्रुवांसो गुरूणां देवा लोकाश्चोपशृण्वन्तु सर्व्वे" भा० आ० ७६ अ० । "नारिकेलस्य खार्ज्जूरं पानसञ्च तथैव चः ऐक्षवं मधूकं टाङ्कं तालञ्चैव च माक्षिकम् । द्राक्षन्तु दशमं ज्ञेयं गौड़ञ्चैकादशं स्मृतम् । पैष्टन्तु द्वादशं प्रोक्तं सर्व्वेषामधमं स्मृतम् । अधमं मधुजं गौड़ं शेषञ्चोत्तममिष्यते । एतद् द्वादशकं मद्यं न पातव्यं द्विजैः क्वचित् । क्षत्रियादिः पिबेत् सर्व्वं पैष्टीमेकन्तु वर्जयेत् । सुरां पीत्वा द्विजो मोहात् कामात् तप्तादिभिर्निश्चिताम् । त्रैवार्षिकं व्रतं कुर्य्यादोषग्निर्तु वार्षिकम् । तप्तादिमिश्रितां किञ्चित् सुरां पीत्वा त्वकामतः । कृच्छ्राब्दपादमाचर्य्य पुनः संस्कारमर्हति । मुखप्रवेशमात्रे तु प्रायश्चित्तार्द्धमाचरेत् । अनुपनीतो देवेशि ! व्रतं त्रैवार्षिकं चरेत् । चतुःकालाहारी स्याद् ब्रह्मचर्य्यमथापि वा । आपस्तम्बं व्रतं वा प्राणायामं विनिर्दिशेत् । शूद्रस्य च विशेषेण अतिकृच्छ्रद्वयं चरेत् । अज्ञातिसाधिते तस्मिन् तदर्द्धं व्रतमाचरेत् । पैष्टीपाने ब्राह्मणस्य मरणान्तिकमुच्यते । माध्वीगौड़ीसुरापाने द्वादशाब्दं विधीयते । इतरेषान्तु पानेन शुद्धिश्चान्द्रायणेन तु । राजन्यवैश्ययोश्चापि गौड़ी माध्वी न शस्यते । मोहात् क्षत्रस्य वैश्यस्य पीत्वा कृच्छ्रद्वयं चरेत् । शूद्रोऽपि गौड़ीं पैष्टीञ्च न पिबेद्धीनसंज्ञकाम् । कामात् पीत्वा सुरां विप्रो मरणान्तिकमाचरेत् । चरेच्चान्द्रायणं ज्ञानात् क्षत्रियो वैश्य एव च । पैष्टीपाने तु शूद्रस्य प्राजापत्यं विनिर्दिशेत् । ज्ञानादभ्यासयोगे तु चान्द्रायणमयं स्मृतम् । नारिकेलं तथा ज्ञानाद्विप्रश्चान्द्रायणेन तु । क्षत्रियश्चैव वैश्यश्च प्राणायामेन शुध्यति । अपक्वं पानसञ्चैव आम्रञ्च बदरं तथा । स्थापयित्वा घटे नित्यं दद्यादामपयः पलम् । त्रैलोक्यविजयाञ्चैव मातुलुङ्गं तथैव च । सप्तमेऽहनि ततो दद्यात् सन्धानात् सप्तमीरितम् । दधि मधु घृतञ्चापि माक्षिकं तिक्तकं तथा । चक्रपाने तु देवेशि ! द्राक्षमद्यं सुनिश्चितम् । पिष्टकं मायया युक्तं समभागेन योजितम् । मधुना सह संस्थाप्य शेषपाकं समाचरेत् । पिप्पलीलवणं दत्त्वा मधुना मद्यमीरितम् । पानसं पक्वखर्ज्जूरमाम्रं कोमलतारकम् । पक्वीकृत्याम्लसन्धानात् खार्ज्जूरं मद्यमीरितम् । पक्वतालं दन्तिमालं ककुभञ्च तथैव च । एतैरेव सुसन्धानात् तालमद्यं प्रकीर्त्तितम् । इक्षुदण्डं मरीचञ्च बदरञ्च तथा दधि । शेषे तु लवणं दत्त्वा इक्षुमद्यं प्रकीर्त्तितम् । नवं मधु तथा बिल्वं पक्वं शर्करया सह । सन्धानाज्जायते मद्यं माध्वीकं शरतो रसम् । शतावरी टङ्कमूलं लवणं पक्वमेव च । मधुना सह सन्धानात् टङ्कमाध्वीकमीरितम् । मालूरमूलं वटरी शर्करा च तथैव च । एतामेकत्र सन्धानात् मैरेयं मद्यमीरितम् । इन्द्रजिह्वा पक्वताली नारिकेलजलन्तथा । कदलीफलसन्धानमद्य तन्नारिकेलजम् । दधि त्रैलोक्यविजया तथैव च करीरका । गुड़ेन सह सन्धानात् गौड़ीमद्यं प्रकीर्त्तितम् । यवक्षोदं विहायाण्वीं दकसमन्वितम् । वह्नौ सन्तापयेत् किञ्चित् स्थापयित्वा दिनद्वयम् । शेषेऽहनि तु संप्राप्ते जीवनं तत्र निःक्षिपेत् । शृङ्गवेरं मरीचञ्च मातुलुङ्गं तथैव च । एतेषामेव सन्धानात् पैष्टीमद्यं प्रकीर्त्तितम्" मत्स्यसूक्ते १६ पटले । "मिश्रमन्त्रा भवेद्घोरो नयोरो मद्यपानतः । कलौ तु भारते वर्षे लोका

भारतवासिनः। गृहे गृहे सुरां पीत्वा वर्णभ्रष्टा भवन्ति हि"। उत्पत्तितन्त्रे ६४ पटले। "दीव्यवीरमयो भावः कलौ नास्ति कदाचन। केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम्" महानिर्वाणतन्त्रम्। "न दद्याद् ब्राह्मणो मद्यं महादेव्यै कथञ्चन। वामकामो ब्राह्मणो हि मद्यं मांसं न भक्षयेत्" तन्त्रम्। भैरवतन्त्रे "नारिकेलोदकं कांस्ये ताम्रे गव्यं तथा मधु। राजन्यवैश्ययोर्देयं न द्विजस्य कदाचन। एवं प्रदानमात्रेण हीनायुर्ब्राह्मणो भवेत्"। कलौ मद्यपानादिनिषेधो यथा याज्ञवल्क्यदीपकलिकायां ब्रह्मपु० "नराश्वमेधौ मद्यञ्च कलौ वर्ज्यौ द्विजातिभिः" निषेधविषयं सूचयति उशना "मद्यमदेयमपेयमनिर्ग्राह्यम्"। अनिर्ग्राह्यमस्पृश्यमिति कल्पतरुः। कालिकापु०। "स्वगात्ररुधिरं दत्त्वा आत्महत्यामवाप्नुयात्। मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते"। स्मृतिः "ताम्रे चेक्षुरसो मद्यं पयसा यवचूर्णकम्। गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना"। अतो मद्यप्रतिनिधिदानमपि न युक्तम् ति०त० रघु०। मद्यतुल्यं यथा "नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु। गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना" कर्मलोचनम्।

मद्यकीट पु० मद्यजातः कीटः। सुराजाते कीटभेदे हेम०।

मद्यद्रुम पु० मद्यहेतुर्द्रुमः शा०त०। माडवृक्षे राजनि०।

मद्यप त्रि० मद्यं पिबति पा—क। १मद्यपायिनि २दानवभेदे पु० हरिवं २४० अ०।

मद्यपङ्क पु० मद्यस्य पङ्क इव। सुराकल्के (मेथोया) हेम०।

मद्यपाशन न० मद्यपैरश्यते अश—कर्मणि ल्युट्। मद्यपानरोचके अवदंशे भक्ष्ये (चाटनी) हेम०।

मद्यपीत त्रि० पीतं मद्यं येन आहि० परनि०। सुरापानकर्त्तरि स्त्रियां ङीप्।

मद्यपुष्पा स्त्री मद्यं मदसाधनं पुष्पं यस्याः शा०त०। धातक्यां (धाइफुल) राजनि०। [जाते हेमच०।

मद्यबीज न० ६त०। किण्वादौ (बाखर) मद्यकारणे पदार्थे

मद्यवासिनी स्त्री मद्यस्येव वासो गन्धो विद्यते बाहुल्येनास्याः इनि। धातकीवृक्षे (धाइफुल) राजनि०।

मद्यसन्धान न०मद्यस्य मद्योत्पादनार्थं सन्धानम् अभिषवः। मद्योत्पादनव्यापारे हेमच०। [राजनि०

मद्यामोद पु० मद्यस्येव आमोदः गन्धोऽस्य। बकुलवृक्षे

मद्र पु०मद—रक्। "विराटपाण्ड्ययोर्मध्ये पूर्वदक्षिणतश्च च। मद्रदेशः समाख्यातः" इत्युक्ते १देशे २हर्षे ३मङ्गले च। भा०सं० १४अ०।

मधु न मन—उ नस्य धः। १मद्ये "गर्ज गर्ज क्षणं मूढ! मधु यावत् पिबाम्यहम्" देवीमा०। २क्षौद्रे "मधु वाता ऋतायते" इति मधुसूक्तम्। ३पुष्परसे शब्दर०। "मधु द्विरेफः कुसुमैकपात्रे" कुमारः। ४जले च विश्वः ५मधुररसे च। "मधुक्षरन्ति सिन्धवः" इति मधुसूक्तम्। ६मधुरे त्रि० ७विष्णुकर्णमलजाते दैत्यभेदे पु०। "विष्णुकर्णमलोद्भूतावसुरौ मधुकैटभाविति" देवीमा० कुम्भीनस्याभर्त्तरि ८दैत्यभेदे पु०रघुम् ९वसन्तर्त्तौ १०चैत्रमासि (मौल) ११वृक्षभेदे च मेदि० १२अशोकवृक्षे हेम० १३यष्टिमधौ पु० शब्दर० १४प्राणिनां शुभाशुभकर्मणि न०विष्णुस०भा०। १५जीवन्त्यां स्त्री अमरः। १६वन्द्भेदे १७खगभेदे च पु० विश्वः।

मधुकण्ठ पुंस्त्री० मधुः मधुरः कण्ठोऽस्य। कोकिले त्रिका०। स्त्रियां ङीष्।

मधुकर पुंस्त्री०मधूनि करोति सञ्चित्य निष्पादयति कृ अच्। १भ्रमरे अमरः २तद्योषिति स्त्री ङीप्। ३कामिजने धूर्त्तः। ४भृङ्गराजे च पु०रत्नमा०मधुभृङ्गराद्योऽपि भ्रमरे।

मधुकर्कटी स्त्री मधुः मधुरा कर्कटी। १जम्बीरभेदे २मिष्टखर्जूरिकायाञ्च राजनि०। स्वार्थे क ह्रस्वः टाप्। मधुकर्कटिका बीजपूरे। [च मेदि०।

मधुका स्त्री मधिव इवार्थे कन्। १यष्टिमधौ, २मधुपर्ण्याञ्च

मधुकोष पु० मध्वर्थं कृतः कोषः। (मौचाक) मक्षिकाकृते कोषाकारे पदार्थे शब्दच०। [क तत्रैव।

मधुक्षीर पु० मधु मधुरं क्षीरमस्य। खर्जूरवृक्षे। स्वार्थे

मधुखर्जूरी स्त्री मधुर्मधुरा खर्जूरी। अतिमिष्टखर्जूरीभेदे राजनि०।

मधुच्छदा स्त्री मधुर्मधुरः छदोऽस्याः। मधुरशिखायाम् भावप्र०

मधुज न० मधुनो जायते जन ड। १सिक्थके (मोम) राजनि० मधुस्थमेदोजातायां २भूमौ स्त्री शब्दच०।

मधुजम्बीर पु० मधुर्मधुरः जम्बीरः। अतिमिष्टजम्बीरे। (कमलालेबु) राजनि०।

मधुजित् पु० मधुमसुरभेदं जितवान् जि भूते क्विप्। विष्णौ शब्दरत्ना० मधुशत्रु मधुरिपुप्रभृतयोऽप्यत्र।

मधुतृण न०कर्म०। इक्षौ त्रिका०। पुंस्त्वं राजनि०।

मधुत्रय न० मधूनां मधुराणाम् त्रयम्। मधुघृतसितानां त्रये राजनि०। मधुत्रिकमप्यत्र न०।

मधुदूत पु० मधोर्वसन्तस्य दूत इवाग्रसरत्वात्। १आम्रवृक्षे त्रिका० २पाटलायां स्त्री ङीप् भावप्र०।

मधुद्रव पु० मधुरो द्रवोऽस्य। रक्तशिग्रौ शब्दर०।

मधुद्रुम पु० मध्वर्थं मद्यार्थं द्रुमः। (मौल) वृक्षभेदे अमरः। तत्पुष्पेण हि गौडमधुसम्भवः।

मधुधूलि पु० मधुर्मधुरो धूलिरिव। गुडे (खांड) गुडविकारादौ हेमच०। [धेनुशब्दे २६०९ पृ० दृश्यम्।

मधुधेनु स्त्री० दानार्थं कल्पितायां मधुप्रभृतिद्रव्यकृतधेनौ।

मधुप पु० मधु पिबति पा-क। १भ्रमरे अमरः २मधुपायिनि त्रि०। "प्रारब्धो मधुपैरकारणमहो" उद्भटः।

मधुपर्क न० पृच-घञ् मधुनः पर्को योगो यत्र। मधुयुते कांस्यपात्रस्थे कांस्यपात्रान्तरेणावृते "दधि सर्पिर्जलं क्षौद्रं सिता चैतैश्च पञ्चभिः। प्रोच्यते मधुपर्कस्तु" इत्युक्ते दध्यादिद्रव्यपञ्चके।

मधुपर्णी स्त्री मधु इव हितकरं पर्णं यस्याः। १गुडूच्याम् अमरः। २गाम्भार्यां ३नीलीवृक्षे मेदि० ४वराहक्रान्तायाम् ५मधुवीजपूरे च राजनि०। [र्याम् शब्दमा०।

मधुपालिका स्त्री मधूनि पालयति पाल-ण्वुल्। गाम्भा-

मधुपीलु पु० कर्म०। मधुरपीलौ राजनि०।

मधुपुरी स्त्री मधोर्दैत्यस्य पुरी। मथुरायाम् शब्दरत्ना०।

मधुपुष्प पु० मधुमधुरं पुष्पं यस्य १मधूकद्रुमे (मौल) रत्नमा० २शिरीषवृक्षे, ३अशोकवृक्षे ४वकुलवृक्षे च ५दन्तीवृक्षे ६नागदन्तीवृक्षे च स्त्री टाप् राजनि०।

मधुप्रिय पु० मधु मद्यं प्रियं यस्य। १बलरामे त्रिका० मधु इव प्रियः। २भूमिजम्ब्वां जटाधरः।

मधुफल पु० मधु मद्यं फलं यस्य। १मधुनारिकेले २मधुखर्जूरिकायां स्त्री राजनि० टाप्।

मधुबहुला स्त्री मधु बहुलं यत्र। माधवीलतायाम् राजनि०

मधुमक्षिका स्त्री मधुसम्पादिका मक्षिका शाक०त० (मौमाछि) सरघायाम् अमरः। [राजनि०।

मधुमज्जन् पु० मधुरः मज्जा सारोऽस्य। आक्षोटवृक्षे

मधुमत् त्रि० मधुर्मधुररसोऽस्त्यस्य मतुप्। १माधुर्ययुते "मधुमत् पार्थिवं रजः" इति मधुसूक्तम्। २काश्मरीवृक्षे ३नदीभेदे राजनि० ४योगशास्त्रप्रसिद्धे योगिनां चित्तवृत्तिभेदे ५वैदिकप्रसिद्धे "मधु वाता" इत्यादौ मन्त्रत्रये तन्त्रोक्ते ६देवीनायिकाभेदे च स्त्री ङीप्।

मधुमर्कटी स्त्री मधुजाता मर्कटी शाक०त०। (मिताखण्ड) मधुजाते खण्डे।

मधुमल्लि(ल्ली) स्त्री मल्ल-इन् वा ङीप् मधुप्रधाना मल्लिः (ल्ली) मालत्यां शब्दमाला।

मधुमस्तक न० "मधुतैलघृतैर्मध्ये वेष्टिताः समिताश्च याः। मधुमस्तकमुद्दिष्टम्" शब्दच० उक्ते पिष्टकभेदे।

मधुमूल न० मधु मधुरं मूलम्। (मौआलु) आलुभेदे शब्दच०

मधुयष्टि स्त्री मधुरा यष्टिः काण्डम्। १इक्षौ २यष्टिमधौ शब्द० स्त्री वा ङीप्। [मधौ अमरः।

मधुयष्टिका स्त्री मधुः मधुरा यष्टिरिव इवार्थे कन्। यष्टि-

मधुर पु० मधु माधुर्यं राति रा-क, मत्वर्थे र वा। १गुडादिस्थे मिष्टरसे माधुर्यरसवति इक्ष्वादौ च मेदि० "मधुरया मधुबोधितमाधवी" माघः। ३प्रिये ४स्वादौ च त्रि० मेदि०। ५रक्तशिग्रौ ६राजाम्रे ७रक्तेक्षौ ८गुडे ९माषे, १०जीरके च पु० राजनि० ११विषे १२विषे च न० मेदि० १३शतपुष्पायां १४यष्टिमधौ १५मधुकर्कटिकायां १६मधूल्यां १७मेदायां १८बहुरागगव्यां च स्त्री मेदि० १९काकोल्यां २०पलाश्यां २१क्षीरकाकोल्यां २२पालङ्क्याके २३मिश्रेयायां (मौरी) स्त्री। स्वार्थे क। अत इत्वम्। मिश्रेयाम् स्त्री अमरः,

मधुरजम्बीर पु० कर्म०। (कमलालेबु) जम्बीरभेदे राजनि०।

मधुरत्वच पु० मधुरा त्वचा यस्य। धवद्रुमे त्रिका०।

मधुरफल पु० मधुरं फलमस्य। राजबदरे राजनि०।

मधुरवल्ली स्त्री कर्म०। मधुवीजपूरे जम्बीरभेदे राजनि०।

मधुरस पु० मधुन इव रसो यस्य। १इक्षौ भावप्र०। २ताले राजनि०। ३मूर्वायाम् स्त्री अमरः। ४द्राक्षायां ५दुग्धिकायां स्त्री मेदि०। ६गाम्भार्यां च भावप्र०। [राजनि०।

मधुरस्रवा स्त्री मधुरं स्रवति स्रु-अच्। पिण्डखर्जूर्याम्

मधुराम्लक पु० कर्म०। आम्रातके शब्दच०।

मधु(धू)लग्न पु० मधुर्मधुररसो लग्नो यत्र पृषो०वा दीर्घः। रक्तशोभाञ्जने रत्नमाला।

मधु(धू)लिका स्त्री मधु माधुर्यं लाति ला-क पृषो० वा दीर्घः संज्ञायां कन् अत इत्वम् राजिकायां (राइसर्षे) राजनि०। [अमरः स्त्रियाम्। मधुलेहोऽप्यत्र।

मधुलिह् पु० मधु लेढि आस्वादयति लिह क्विप्। भ्रमरे

मधुवन न० मधुदैत्याधिष्ठितं वनम् शा०त०। १मथुरासन्निकृष्टे वनभेदे किष्किन्ध्यास्थे मधुप्रचुरे २वनभेदे च।

मधुवर्ग पु० ६त०। नानाविधमधुगणे भावप्र० दृश्यम्।

मधुवल्ली स्त्री मधुप्रधाना वल्ली। यष्टिमधौ राजनि०। [अमरः

मधुवार पु० मधुनो मद्यस्य वारः क्रमः। पुनःपुनःमद्यपानक्रमे

मधु(वी)वीज पु० मधु मधुरं वी(बी)जं यस्य । दाड़िमे राजनि०

मधु(बी)बीजपूर पु० कर्म०। मधुकर्कटिकायाम् राजनि० ।

मधुव्रत पुंस्त्री० मधु तद्भक्षणे व्रतं सततानुशीलनं यस्य । भ्रमरे अमरः स्त्रियां ङीष् ।

मधुशर्करा स्त्री मधुजाता शर्करा शा०त० । (मिताखण्ड) मधुजातशर्करायां राजनि० ।

मधुशाख पु० मधुर्मधुरा शाखाऽस्य (मौल) वृक्षे शब्दच० ।

मधुशिग्रु पु० मधुः मधुरः शिग्रुः । रक्तशोभाञ्जने अमरः

मधुशेष पु० न० मधुनः शेषः उच्छिष्टम् । सिक्थके (मोम) । राजनि० ।

मधुश्रेणी स्त्री मधुनः श्रेणीव । मूर्वायाम् अमरः ।

मधुश्वासा स्त्री मधुन इव श्वसित्यस्मात् श्वस-अपादाने घञ् । जीवन्तीवृक्षे राजनि० । [वृक्षे अमरः ।

मधुष्ठील पु० मधु अष्ठीले गर्भेऽस्य पृषो० । (मौल) गुड़पुष्प-

मधुसख पु० मधोर्वसन्तस्य सखा सहचरः टच्समा० । कामदेवे मधुसारथ्यादयोऽप्यत्र ।

मधुसूदन पु० मधुं तन्नामासुरं सूदयति, मधु, जीवानां शुभाशुभकर्म, ज्ञानदानेन सूदयति वा सूद-ल्यु । १श्रीकृष्णे । "भक्तानां कर्मणाञ्चैव सूदनात् मधुसूदनः" तन्नामनिरुक्तेः । मधु माध्वीकं सूदयति भक्षयति । २भ्रमरे जटा० पुंस्त्री० स्त्रियां ङीप् । मधु इव सूद्यते भक्ष्यते ल्युट् ङीप् । ३पालङ्कीशाके स्त्री हेमच०।

मधुस्रव पु० मधूनि मद्यानि स्रवन्त्यस्मात् स्रु-अप् । (मौल) १वृक्षे २मोरटलतायां राजनि० । ३मधुयष्टिकायां स्त्री जटा० ४जीवन्त्यां स्त्री शब्दच० । ५मूर्वायां स्त्री राजनि० । [जटाधरः ।

मधुस्रवस् पु० मधु स्रवति स्रु-असुन् । (मौल) वृक्षे

मधुस्वर पुंस्त्री० मधुर्मधुरः स्वरोऽस्य । १कोकिले शब्दर० स्त्रियां ङीष् । २मधुरस्वरवति त्रि० स्त्रियां टाप् ।

मधुहन् पु० मधुं तन्नामासुरं कर्मफलं वा ज्ञानद्वारा हन्ति हन् क्विप् । विष्णौ ।

मधूक न० मह-ऊक हस्य धः । १यष्टिमधौ अमरः । (मौल)२वृक्षे पु०राजनि०। [अमरः ।-मधूच्छिष्टमप्यत्र ।

मधूच्छिष्ट न० मधुन उच्छिष्टमवशिष्टम् । (मोम) सिक्थके

मधूपघ्न पु० मधुदैत्यस्योपघ्न आश्रयः । मथुरानगरे जटा० ।

मधूल पु० मधु लाति ला-क पृषो० । जलजगिरिजमधूकवृक्षयोः जटा० । २मधुकर्कटिकायाम् ३आम्रे ४क्षीतनके च स्त्री गौरा० ङीष् राजनि० । स्वार्थे क अत इत्वम् टाप् । मधूलिका मूर्वायाम् अमरः ।

मध्य पुं न० मन-यत् नस्य धः । १देहस्यावयवभेदे । (माजा) "मध्येन सा वेदिविलग्नमध्या" कुमारः । २चत्वारिंशत्सु शल्याभिद्ये ३व्यापारभेदे न० अमरः । ३पूर्वापरसीमयोरन्तराले ४परार्द्धसंख्यातोऽर्वाचीनायां ५दशक्रायां न० ६तत्संख्याते च । "अन्त्यं मध्यं परार्द्धम्" लीला०। ज्योतिषोक्ते ग्रहाणां ७गतिभेदे स्त्री तद्वति ग्रहे पु० । ८न्याय्ये १०अन्तर्वर्त्तिनि च त्रि० शब्दर०।११त्र्यक्षरपादके छन्दोभाले ह०र० ।

मध्यगन्ध पु० मध्ये फलमध्ये गन्धो यस्य । आम्रवृक्षे शब्दच०

मध्यतस् अव्य० मध्य+तसिल् । प्रथमापञ्चमीसप्तम्यर्थवृत्तेर्मध्यशब्दस्यार्थे ।

मध्यदेश पु कर्म० । 'हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः' मनूक्ते देशभेदे ।

मध्यदिन न० मध्यं दिनस्य एकदेशिस० । १मध्याह्ने । अलुक्स० । मध्यन्दिनमप्यत्र । तत्र भवे तत्र पुंस्त्वमिति २बन्धूकवृक्षे राजनि० ।

मध्यपञ्चमूलक न० । "बलापुनर्नवैरण्डशूर्पपर्णीद्वयेन च । एकत्र योजितेनैव स्यान्मध्यं पञ्चमूलकम्" राजनि० उक्ते पदार्थपञ्चके ।

मध्यपदलोपिन् पु० मध्यपदस्य लोपोऽस्त्यस्य इनि । व्याकरणप्रसिद्धे शाकपार्थिवादिके मध्यपदलोपयुते समासभेदे ।

मध्यम त्रि० मध्ये भवः म । १मध्यभवे । २षड्जस्वरमध्ये क्रौञ्चस्वरतुल्ये ३पञ्चमे स्वरे पु० अमरः ।

मध्यमपाण्डव पु० कर्म० । अर्जुने तस्य पूर्वापरयोर्द्वयोर्द्वयोर्मध्यवर्त्तित्वात् तथात्वम् । [मध्यमे दासे कर्मकरादौ ।

मध्यमभृतक पु० कर्म० । 'मध्यमस्तु कृषीवलः' इत्युक्ते

मध्यमलोक पु० कर्म० । पृथिव्याम् तस्याः पातालस्वर्गलोकयोर्मध्यवर्त्तित्वात् तथात्वम् । "मध्यमलोकपालः" इति रघुः मध्यलोकोऽप्यत्र ।

मध्यमसंग्रह पु० कर्म० । "प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम् । प्रलोभनञ्चान्नपानैर्मध्यमः संग्रहो मतः" व्यासोक्ते मध्यमे स्त्रीसंग्रहरूपे विवादभेदे ।

मध्यमसाहस न० कर्म० । "वासःपशन्नपानानां गृहोपकरणस्य च । एतेनैव प्रकारेण मध्यमं साहसं स्मृतम्" इत्युक्ते परकीयवस्त्रादेर्भङ्गाक्षेपादिरूपे साहसभेदे "पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः । मध्यमः

पञ्च विज्ञेयः” मनूक्ते पञ्चपण्यात्मके २दण्डभेदे पु० ।

मध्यमा स्त्री मध्य+म । १दृष्टरजस्कायां नार्य्याम् २तर्जन्यनामिकयोरन्तःस्थायामङ्गुलौ, ३पद्मादीनां कर्णिकायाम् मेदि० पराादिषु मध्ये ४हृदयोत्पन्नशब्दभेदे पश्यन्तीशब्दे ४२८१पृ० दृश्यम् ५नायिकाभेदे च ।

मध्यमेश्वर पु० काशीस्थे शिवलिङ्गभेदे । [गणनाभेदे ।

मध्यमाहरण न० बीजगणितप्रसिद्धे अव्यक्तमानज्ञापके

मध्यरात्र पु० मध्यं रात्रेः एकदेशिस० अच्समा० । रात्रान्तत्वात् पुंस्त्वम् । निशीथे अर्द्धरात्रे हला० ।

मध्यवर्त्तिन् त्रि० मध्ये वर्त्तते वृत-णिनि । वादिप्रतिवादिनोरन्ययोर्वा पक्षप्रतिपक्षयोर्शङ्क्यादिविषयविमर्शपूर्वकं १तत्त्वनिर्णायके स्वार्थाविरोधेन परार्थसम्पादके, कार्य्यसम्पादके च २मध्यस्थे ।

मध्यस्थ पु० मध्ये तिष्ठति स्था-क । १मध्यवर्त्तिनि २उदासीने च । ‘माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे’ इति कुमारः ।

मध्याह्न पु० मध्यमह्नः एक० स० टच्समा० अह्नादेशः । अह्नान्तत्वात् पुंस्त्वम् । त्रिधा विभक्तदिनस्य १द्वितीये भागे “प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु । मध्याह्नस्त्रिमुहूर्त्तं स्यात्” इत्युक्ते पञ्चधा विभक्तदिनस्य २तृतीये भागे च ।

मध्वालु(क) पु० मधुर्मधुर आलुः । (मौ आलु) मूलभेदे । शाके च । तत्रैव । [मधुद्रुमजाते मद्ये अमरः ।

मध्वासव पु० मधुना पुष्परसेन कृत आसवः शा०त० । (मौल)

मन पूजायां सक० गर्वे अक० भ्वा० पर० सेट् । मनति अमानीत्-अमनीत् मेनतुः ।

मन गर्वे अक० चु० आ० सेट् । मानयते अमीमनत ।

मन बोधे तना० आ० सक० सेट् । मनुते अमनिष्ट मेने ।

मन बोधे दि० आ० सक० अनिट् । मन्यते । अमंस्त मेने ।

मन धृतौ अद०चु०उ०सक०सेट् । मनयति ते अमनत् त ।

मन पु० मन-अच् । जटामांस्याम् शब्दच० । [त्रिका० ।

मनआप त्रि० मन आप्नोति आप-अण् उप०स० । मनोज्ञे

मन(णि)क पु० नीव० ता० उक्ते वर्षकालीने ग्रहयोगभेदे “वक्रःशनिर्वा यदि शीघ्रखेटात् पश्चात् पुरस्तिष्ठति तत्र्यर्द्धदृष्ट्या । एकर्क्षसम्पर्कभुवा दृशा वा पश्चस्थयोर्यैरधिकोनकस्तु । तेजो हरेत् कार्य्यपरेत्थशाली स्थितोऽपि नाशो मन(णि)ऊः शुभो न” ।

मनःशिला स्त्री मनःशब्दवाच्या शिला । (मनछाल) रक्तवर्णे उपधातुभेदे “मनःशिलाविच्छुरिता निषेदुः”

कुमारः । पृष० वा लुप्तं पुंस्त्वमपि । “टङ्कैर्मनःशिलगुहैरविदार्य्यमाणे”ति भरतधृतवाक्यम् ।

मनन न० मन-ल्युट् । १अनुमाने २युक्त्या पदार्थनिर्णये च

मनस् न० मन्यतेऽनेन मन-करणे असुन् । सर्वेन्द्रियप्रवर्त्तके अन्तरिन्द्रिये न्यायमतम् वेदान्तमते २सङ्कल्पविकल्पात्मकवृत्तिमदन्तःकरणे । तच्च सुखदुःखाद्याधारः “कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव” श्रुतेः । न्यायमते तज्ज्ञानादिसाधनमिति भेदः । ३मनःशिलायाञ्च शब्दच० ।

मनसा स्त्री मनं मननं स्यति सो-क । आस्तीकस्य मुनेर्मातरि वासुकिभगिन्याम् जरत्कारुपत्न्यां नाम्ना जरत्कारौ जटा० ।

मनसादेवी स्त्री मनसा दीव्यति दिवः करणस्य कर्मत्वात् कर्मोपपदत्वेन अण् ङीप् अलुक्स० मनसाशब्दार्थे जटा० ।

मनसिज पु० मनसि जायते जन-ड सप्तम्या वा अलुक् । १कामदेवे अमरः । लुकि । मनोजोऽप्यत्र । एवं चित्तजादयोऽप्यत्र ।

मनसिशय पु० मनसि शेते अच् अलुक्स० । कामदेवे हला० ।

मनस्कार पु० कृ घञ् मनसः कारो व्यापारभेदः । चित्तस्य सुखतत्परत्वे अमरः ।

मनस्ताप पु० मनसस्तापः । १अनुतापे २मनःपीडायाञ्च ।

मनस्विन् त्रि० प्रशस्तं मनोऽस्त्यस्य विनि । १प्रशस्तमनस्के । स्त्रियां ङीप् । “मनस्विनीनां प्रतिपत्तिरीदृशी” कुमारः ~~~ पु० राजनि० ।

मनाक् अव्य० मन-आकि । १ईषदर्थे अमरः “कुतूहलाक्रान्तमना मनागभूत्” नैषधम् । २मन्दे च मेदि० ।

मनाका स्त्री मन आक । हस्तिन्याम् उणादिको० ।

मनाक्कर न० मनाक् करोति कृ-अच् । १भङ्गिकागन्धयुक्ते अगुरुभेदे शब्दच० । २ईषत्करे त्रि० ।

मनावी(यी) स्त्री मनोः पत्नी वा ङीप् औङ् च । मनोः पत्न्याम् । जटाधरमते ऐङ् । मनायीत्येव तन्मते ।

मनित त्रि० भ्वा० मन-कर्मणि क्त । ज्ञाते ।

मनीक न० मन-ईक । अञ्जने उणादिको० ।

मनीषा स्त्री ईष-अङ् ईषा मनस ईषा शक० । बुद्धौ अमरः

मनीषिन् पु० मनीषा अस्त्यस्य इनि । १पण्डिते अमरः २बुद्धियुक्ते त्रि० ।

मनु स्त्री मन उ । १पृक्कायाम् (पानियाक) राजनि० । २मनुपत्न्याञ्च ३प्रजापतिभेदे, धर्मशास्त्रकर्त्तरि स्वाय-

अनुवादौ मुनिभेदे च पु०। मनवश्च चतुर्दश ते च हरिवं०
७अ० उक्ता द्रष्टव्याः। [स्त्रियां जातौ ङीष्।

मनुज पु० मनोः स्वायम्भुवात् जायते जन-ड। मनुष्ये अमरः

मनुष्य पु० मनोरपत्यं यत् सुक् च। मानवे जातिभेदे।
स्त्रियां जातौ टाप्। [कुबेरे अमरः।

मनुष्यधर्मन् पु० मनुष्यस्येव धर्मो यस्य अनिच् समा०।

मनोगुप्ता स्त्री मनसा मनःशब्देन तच्छब्दयाच्यत्वात् गुप्ता।
मनःशिलायाम् अमरः।

मनोजव त्रि० जु-अच् मनोजवं वेगवत् गमनाय यस्मिन्।
१पितृतुल्ये अमरः। मनस इव जवो यस्य। २अति-
वेगवति त्रि० ३विष्णौ पु०। ४अग्निजिह्वाभेदे स्त्री
जटा०। "काली कराली च मनोजवा च" श्रा० ति०।
५दुर्गाशक्तिभेदे। [कामवृद्धिकरद्रव्ये राजनि०।

मनोजवृद्धि पु० मनोजस्य कामस्य वृद्धिर्यस्मात् ५ब०।

मनोज्ञ त्रि० मनो जानाति ज्ञापयति बोधनाय प्रवणी-
करोति अन्तर्भूतण्यर्थे ज्ञा-क। १मनोहरे अमरः।
२मनःशिलायां रत्नमा०। ३वन्ध्याकर्कोट्यां, ४कटभ्यां,
५जीरके ६मदिरायाञ्च स्त्री राजनि०। ७राजपुत्र्यां
जटा० ८सरलकाष्ठे न० रत्नमा०। [तयोऽप्यत्र।

मनोभव पु० मनसि भवति भू-अच्। कामदेवे मनोभूप्रभृ-

मनोरथ पु० मन एव रथोऽत्र, मनसो रथ इव वा इष्ट-
साधनप्रापकत्वात्। इच्छायाम् अमरः।

मनोरम त्रि० मनोरमयति रम-णिच् अण् उप०स०। १मनो-
हरे अमरः। २गोरोचनायां स्त्री राजनि०। ३रुचि-
मनुभार्यायां स्त्री मार्कण्डे०। [वध्ये च।

मनोहत त्रि० मनो हतं यस्य। १प्रतिहते अमरः २प्रति-

मनोहर त्रि० मनो हरति स्वदर्शनाय हृ-अच्। १रुचिरे
२कुन्दवृक्षे पु० शब्दर०। ३जात्यां ४स्वर्णयूथ्यां च स्त्री।
५स्वर्णे न० राजनि०। णिनि। मनोहारिन् मनोहरे
त्रि० स्त्रियां ङीप्। [शिलायाम् अमरः।

मनोह्वा स्त्री० मनःशब्देनाह्वयते ह्वे-घञर्थे क। मनः-

मन्त्र मार्जने चक० ध्वनौ अक० भ्वा० पर० सेट्। मन्त्रति
अमन्त्रीत् ममन्त्रतुः। [मेदि०।

मन्तु पु० मन-तुन् तुट् च। १अपराधे २मनुष्ये ३प्रजापतौ च

मन्त्र पु० मन्त्रि-अच्। १गुप्तभाषणे, २रहसि कर्त्तव्याव-
धारणार्थमुक्तौ ३देवादीनां साधनार्थं तन्त्राद्युक्ते शब्द-
भेदे, ४वेदविभागभेदे च। वैदिकतान्त्रिकमन्त्रलक्षणादि
तद्भेदभाष्योक्तं वह्निपु० २९अ० उक्तञ्च द्रष्टव्यम्।

मन्त्रकृत् त्रि० मन्त्रं तदुच्चारणं वा कृतवान् कृ-भूते क्विप्।
१मन्त्रप्रकारके २वेदमन्त्राणां स्मरणकर्त्तरि ३ऋषिभेदे
पु० परिशिष्टखण्डे द्रष्टव्यम्।

मन्त्रजिह्व पु० मन्त्र एव जिह्वा आस्वादनसाधनं यस्य। अग्नौ
हेमच०। मन्त्रेण दत्तहविरास्वादकत्वात्तस्य तथात्वम्।

मन्त्रणा स्त्री मन्त्रि-युच्। गुप्तभाषणे ल्युट्। तत्रार्थे न०।

मन्त्रदातृ पु० दा-तृच् ६त०। गुरौ।

मन्त्रिन् पु० मन्त्रयते णिनि। धीसचिवे येन सह रहसि
कर्त्तव्यमवधीयते तस्मिन् अमात्ये अमरः।

मन्थ क्षोभे अक० विलोडने सक० भ्वा० पर० सेट्। मन्थति
अमन्थीत्। मथ्यते। [मथ्यते।

मन्थ विलोडे क्र्या० पर० द्विक० सेट्। मथ्नाति अमन्थीत्।

मन्थ पु० मन्थ करणे घञ्। १मन्थानदण्डे, "सक्तुभिः
सर्पिषाभ्यक्तैः शीतवारिपरिप्लुतैः। नात्युच्छो नाति-
सान्द्रश्च मन्थ इत्यभिधीयते" इत्युक्ते २पेयभेदे,
"सूर्ये चतुष्पदे पीते सुशाद्रव्यं पलं क्षिपेत्। कृतपात्रे
मन्थयेत् सम्यक् तस्माच्च द्विपलं पिबेत्" भावप्र० उक्ते
पेयभेदे च। ३नेत्रमले धरणिः ४किरणे च शब्दच०।
भावे घञ्। ५आलोडनादौ। [रत्नमा०।

मन्थज न० मन्थात् दधिमन्थनात् जायते जन-ड। नवनीते

मन्थन पु० मथ्यतेऽनेन करणे ल्युट्।१मन्थानदण्डे शब्दर०।
भावे ल्युट्। २विलोडनादौ न०।

मन्थर न० मन्थ-अरच्। १कुसुम्भग्रामे। २कोषे ३फले, बाधे
मन्थानदण्डे च पु०५वक्रे ६पृथौ ७मन्दे च त्रि० मेदि०
"मदर्थसन्देशमृणालमन्थरः" नैष०। ८जडे शब्दर०।
९नीचे हेम०। १०सूचके विश्वः ११कैकेय्याः दास्यां स्त्री।

मन्थशैल पु० ६त०। समुद्रमन्थनाय मन्थनदण्डरूपेण
कल्पिते मन्दरपर्वते। [वधवृक्षे राजनि०।

मन्थान पु० मन्थ-आनच्। १मन्थनदण्डे अमरः। २आरग्-

मन्द त्रि० मदि-अच्। १मूर्खे २मृदौ ३अभाग्ये ४रोगिणि
५अल्पे ६स्वतन्त्रे ७खले च हेम०। ८मदरते ९शनिग्रहे
१०हस्तिभेदे च पु० मेदि०। ११यमे त्रिका०। १२प्रलये
च पु०अजयः। १३ज्योतिषोक्ते रविसंक्रान्तिभेदे १४ग्रह-
गतिभेदे च स्त्री।

मन्दग त्रि० मन्दं गच्छति गम ड। १मृदुगामिनि २शनि-
ग्रहे पु० शनि, ज्ञानिपुरुष, वृष, हंस, गज, वरस्त्रियः
इत्येते स्वभावान्मन्दगतयः। णिनि। मन्दगामिन् तत्रार्थे
त्रि० स्त्रियां ङीप्।

मन्दट पु० मन्दं टीकते टीक-ड। पारिभद्रवृक्षे शब्दरत्ना०।
मन्दता स्त्री मन्दस्य भावः तल्। १आलस्ये २जाड्ये च "उच्चैरस्तुति मन्दतामरसतामिति" चन्द्रालोकः।
मन्दर पु० मदि-अरन्। समुद्रमन्थाने १पर्वतभेदे २मन्दारवृक्षे मेदि० ३स्वर्गे ४हारभेदे हेम० ५दर्पणे च शब्दर०। ६बहुले ७मन्दे च त्रि० मेदि०।
मन्दाकिनी स्त्री मन्दमकति अक-णिनि। १स्वर्गगङ्गायां "स्वर्गे मन्दाकिनी तथा" पुराणम्। २संक्रान्तिभेदे च।
मन्दाक्रान्ता स्त्री "मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ तौ गुरू चेत्" छ०र०उक्ते सप्तदशाक्षरपादके छन्दोभेदे।
मन्दाक्ष न० मन्दं यथा स्यात् तथा अक्षि यस्मात् प्रा०बहु०। १लज्जायाम् अमरः। ५ब०। २मन्दचितनेत्रे स्त्रियां ङीप्।
मन्दाग्नि पु० मन्दः पाचने अल्पशक्तिकः अग्निः अनलः, स यस्मात् वा। १दैहिके अपचनशक्तिकेऽनले २तद्वति रोगभेदे च। तन्निदानादि यथा "मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः। कफपित्तानिलाधिक्यात् तत्साम्याज्जाठरोऽनलः। विषमो वातजान् रोगान् तीक्ष्णः पित्तसमुद्भवान्। करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान्। समा समाग्नेरशिता मात्रा सम्यग् विपच्यते। स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः" भावप्र०।
मन्दार पु० मदि-आरक्। १स्वर्गस्थे देववृक्षभेदे २पारिभद्रवृक्षे च अमरः ३हस्ते ४धूर्त्ते ५तीर्थभेदे ६अर्कवृक्षे च मेदि०।
मन्दिर न० मन्द्यतेऽत्र मदि-किरच्। १गृहे २पुरे च अमरः तस्य द्विश्रुत्वमित्यन्ये। ३समुद्रे मेदि० ४जानुपश्चाद्भागे च पु० हेमच०। [नौयकटे च (मादुर) मेदि०।
मन्दुरा स्त्री मदि-उरच्। १अश्वशालायाम् अमरः। २शय-
मन्दोदरी स्त्री मयदानवकन्यायां रावणमहिष्याम्। [अमरः
मन्दोष्ण न० मन्दमीषदुष्णम्। १ईषदुष्णस्पर्शे २तद्वति त्रि०
मन्द्र पु० मदि-रक्। १वाद्यभेदे शब्दर०। २गम्भीरध्वनौ च। अर्श आद्यच् ३तद्वति त्रि० अमरः।
मन्मथ पु० मनकं मत् मन-क्विप् मथति मथ-अच् ६त०। १कन्दर्पे २कपित्थवृक्षे च अमरः ३कामचिन्तायां मेदि०।
मन्मथालय पु० ६त०। १आम्रवृक्षे राजनि० २स्त्रीचिह्नभेदे च।
मन्या स्त्री सेट्-मन-क्यप्। ग्रीवायाः पश्चाद्भागस्थायां शिरायाम् अमरः।
मन्यु पु० मन-युच् न अनादेशः। १शोके २दैन्ये ३क्रतौ ४क्रोधे च अमरः ५अहङ्कारे च शब्दर०।

मन्वन्तर न० मनूनामन्तरमवकाशस्तदुपलक्षितकालो वा। १स्वायम्भुवादिमनूनामधिकारे २तदुपलक्षिते काले च सत्ययुगमितवर्षाधिका एकसप्ततिचतुर्युगमिता (३११४४८-८०००) वर्षास्तदवकाश इति पुराणम्।
मभ्र गतौ भ्वा०पर०सक०सेट्। मभ्रति अमभ्रीत्।
मम अव्य०मा-बा०डम। षष्ठ्यर्थवृत्तेः अस्मच्छब्दस्यार्थे तेन ममत्वमिति ममतेति च सिध्यति।
ममता स्त्री मम भावः तल्। १दर्पे २अहङ्कारे हेम०। ३मत्सम्बन्धे च। एवं ममत्वमप्यत्र। "तथापि ममतावर्त्ते" इति "ममत्वं मम राज्यस्य" इति च देवीमा०। [विषये सि०कौ०
ममापताल पु० मम आलन् धातोर्बस्य मः अपद्युगागमश्च।
मय गतौ भ्वा०आ०सक०सेट्। मयते अमयिष्ट।
मय पुंस्त्री० मय-अच्। १उष्ट्रे २अश्वतरे स्त्रियां टाप् ३दानवभेदे च मेदि०।
मयष्टक पु० मि+अच् मयं प्रक्षेपं स्तकते प्रतिबध्नाति स्तक-अच् पृषो० सत्वम्। वनमुद्गे अमरः। पृषो० मपष्टक तत्रार्थे पु०।
मयु पु० मि-उ। १किन्नरे अमरः २मृगे मेदि०।
मयुष्टक पु० मिनोति मि-उ मयुः स्तक-अच् कर्म० पृषो० सत्वम्। वनमुद्गे पृषो०। मपुष्टकोऽप्यत्र।
मयूख पु० मा-ऊख मयादेशः। १त्विषि २किरणे ३शिखायाम् अमरः ४शोभायां मेदि० ५कीले शब्दच०।
मयूर पुंस्त्री० मी-ऊरन्। स्वनामख्याते १खगभेदे स्त्रियां ङीप्। २मयूरशिखावृक्षे पु० अमरः। इवार्थे कन् ३अपामार्गे अमरः। ४तुत्थाञ्जने (तुँते) न० मेदि०।
मयूरग्रीवक न० मयूरग्रीवेव कन्। तुत्थे (तुँते) राजनि०।
मयूरजङ्घ पु० मयूरस्य जङ्घेव मूलमस्य। श्योनाकवृक्षे राजनि०। [राजनि०।
मयूरतुत्थ न० मयूर इव तद्वर्णं तुत्थम्। तुत्थे (तुँते)
मयूरविदला स्त्री मयूरैर्विदल्यते मयूर इव विशिष्टदलमस्या वा। अम्बष्ठायाम् (आमरुल) वैद्यकम्।
मयूरशिखा स्त्री मयूरस्येव शिखाऽस्याः। स्वनामख्याते क्षुपभेदे मयूरचूडादयोऽप्यत्र। "नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित्" भावप्र०।
मयूरिका स्त्री मयूरस्तदाकारो विद्यतेऽस्याः तत्सन्द्रकत्वस्य हवत्वात् ठन्। अम्बष्ठायाम् राजनि० (आमरुल)।
मरक पु० मृ-वुन्। १दैविकभौतिकोपद्रवजन्ये प्राणिनाम कालमरणे (मड़क) २मारिभये लेमप०।

मरकत न॰ मरकं मारिभयं तरत्यनेन तॄ-ड । हरिद्वर्ण-मणिभेदे (पान्ना) अमरः । तल्लक्षणादि परिशिष्टे दृश्यम्

मरकतपत्त्री स्त्री मरकतमिव हरिद्वर्णं पत्त्रमस्याः ङीप् । पाच्याम् राजनि॰ ।

मरण न॰ म्रियतेऽनेन मृ-करणे ल्युट् । वत्सनाभाख्ये १विषे राजनि॰ । भावे ल्युट् । देहात्मनोर्विच्छेदरूपे, प्राणवायोरुत्क्रमणरूपे वा २व्यापारभेदे ।

मरत पु॰ मृ-अतच् । मरणे उणा॰ ।

मरन्द पु॰ मरं मरणं द्यति भ्रमराणां जीवनहेतुत्वात् दो-क पृषो॰ मुम् । मकरन्दे शब्दर॰ ।

मराकाली स्त्री मरो मरणकालिकं दुःखमिवाकति व्याप्नोत्यनेन मराको दृश्चिकः स इवाकति पर्याप्नोति दुःखदानाय अल-अच् गौरा॰ ङीष् । वृश्चिकाली (बिछाति) रत्नमाला ।

मराल पु॰ मृ-आलच् । १राजहंसे जटा॰ "तत्रामराजयमरालमरालकेशी" नैषधम् । २कज्जले ३कारण्डवे ४अश्वे ५मेघे ६दाड़िमीवने च शारदातः । ७चिक्कणे त्रि॰ त्रिका॰ ।

मरि(री)च पु॰ मृ-इच-पृ॰ वा दीर्घः । १स्वनामख्याते वृक्षे अमरः । २कक्कोलके राजनि॰ । [राजनि॰ ।

मरि(री)चपत्त्रक पु॰ मरिचस्येव पत्त्रमस्य कप् । सरलवृक्षे

मरीचि पु॰ मृ ईचि । सप्तर्षिमध्ये ब्रह्मणो मानसे ज्येष्ठे पुत्रे १मुनिभेदे २कृपणे च हेमच॰ । ३किरणे पुंस्त्री अमरः ।

मरीचिका स्त्री मरीचौ सूर्य्यकिरणे कमिव यत्र भ्रान्तौ । सूर्य्यकिरणे जलभ्रान्तौ, मृगतृष्णायाम् अमरः ।

मरु पु॰ मृ उ । १पर्वते २निर्जलदेशे च अमरः ३कुरुवकवृक्षे भावप्र॰ ४देशभेदे च (माड़वार) हेमच॰ ।

मरुज पु॰ मरुदेशे जायते जन ड । १नखीनामगन्धद्रव्ये शब्दच॰ । २निर्जलदेशजाते त्रि॰ । ३मृगकर्कट्याम् स्त्री राजनि॰ ।

मरुत् पु॰ मृ उति । १वायौ अमरः २मरुवके भावप्र॰ ३देवे ४ग्रन्थिपर्णे न॰ मेदि॰ । ५पृक्कायां स्त्री शब्दर॰ । स्वार्थे प्रज्ञाद्यण् । मारुतोऽप्यत्र । पृषो॰ मरुतः । मरुतोऽपि देवे च वायौ च व्याडिः । [शब्दच॰ ।

मरुत्कर पु॰ मरुतमपानवायुं करोति कृ-अच् । राजमाषे

मरुत्त पु॰ चन्द्रवंश्ये १नृपभेदे ;

मरुत्तक पु॰ मरुदिव तकति तक-हासे अच् । मरुवके भावप्र॰

मरुत्पथ पु॰ ६त॰ । आकाशे । मरुद्वर्त्मादयोऽप्यत्र ।

मरुत्पाल पु॰ । मरुतो देवान् पालयति पाल-अण् । इन्द्रे

मरुत्वत् पु॰ मरुत् पाल्यत्वेन हेतुत्वेन वाऽस्त्यस्य म पदत्वम् मस्य वः । १इन्द्रे अमरः । २हनूमति शब्दर॰ ।

मरुत्सख पु॰ मरुतो वायोः सखा-टच्समा॰ । १इन्द्रे भरतः । २वह्नौ ३चित्रकवृक्षे च । [शब्दमाला ।

मरुदान्दोल न॰ मरुतमान्दोलयत्यनेन करणे घञ् । व्यजने

मरुदिष्ट पु॰ मरुतां देवानामिष्टः । गुग्गुलौ राजनि॰ ।

मरुद्भवा स्त्री मरुतो वायोर्भवति वर्द्धते भू-अच् ५त॰ । ताम्रमूलीक्षुपे (खिराट) रत्नमा॰ । [खदिरे रत्नमा॰

मरुद्रुम पु॰ मरोर्निर्जलदेशस्य द्रुमः स्थलजातत्वात् । विट्-

मरुद्वाह पु॰ मरुत् वाह इव यस्य । १धूमे त्रिका॰ २वह्नौ शब्दमा॰ ३चित्रकवृक्षे च । [अमरः ।

मरुन्माला स्त्री मरुतो मालेव । (पिड़िङ्शाक) पृक्कायाम्

मरुभू पु॰ मरुर्भूमिर्यत्र (माड़ुआर) १देशभेदे त्रिका॰ । कर्म॰ । २निर्जलभुवि स्त्री । [भावप्र॰ ।

मरुभूरुह पु॰ मरुभुवि निर्जलभूमौ रोहति रुह-क । करवीरे

मरुव पु॰ मरुं निर्जलदेशं वाति कारणत्वेन वा-क । (नागदाना) (मरुया) वृक्षभेदे । स्वार्थे क । तत्र वृक्षभेदे (मयना) खरपत्रतुलस्याम् अमरः । जम्बीरभेदे भरतः पुष्पप्रधाने (मरुयाफुल) वृक्षभेदे रत्नमा॰ व्याघ्रे, राहौ भयानके च जटा॰ ।

मरुसम्भवा स्त्री मरौ सम्भवति सम्+भू-अच् ७त॰ । क्षुद्रदुरालभायाम् राजनि॰ मरुस्थादयोऽप्यत्र ।

मरूद्भवा स्त्री मरौ उद्भवति उद्+भू-अच् ७त॰ । १कार्पास्यां २क्षुद्रखदिरे ३यवासे च राजनि॰ ।

मर्क गतौ सौ॰ पर॰ सक॰ सेट् । मर्कति अमर्कीत् ममर्क ।

मर्कट पुस्त्री॰ मर्क-अटन् । १वानरे अमरः । स्त्रियां ङीष् २ऊर्णनाभे (माकड़सा) ३स्थावरविषभेदे हेमच॰ (हाड़गिला) ४पक्षिभेदे च पुंस्त्री॰ त्रिका॰ स्त्रियां ङीष् । स्वार्थे क । मर्कटक तत्रैव संज्ञायां कन् । मत्स्यभेदे दैत्यभेदे च शब्दर॰ । [भावप्र॰ ।

मर्कटतिन्दुक पु॰ मर्कटप्रियस्तिन्दुकः शाक॰त॰ । कुपीलौ

मर्कटपिप्पली स्त्री॰ मर्कटप्रिया पिप्पली शाक॰त॰ । अपामार्गे राजनि॰ ।

मर्कटप्रिय पु॰ ६त॰ । क्षीरवृक्षे (खिरइ) शब्दमा॰ ।

मर्कटवासस् पु॰ ६त॰ । (माकड़सारजाल)लूतातन्तौ शब्दर॰

मर्कटशीर्ष न॰मर्कटस्य वानरस्य शीर्षमिव । हिङ्गुले रत्नमा॰

मर्कटास्य मर्कटस्य वानरस्यास्यमिव रक्तत्वात् । १ताम्रवर्णे हेम० २तद्वति त्रि० ।

मर्कटी स्त्री मर्कटोऽस्त्यस्याः स्निग्धत्वेन अच् गौ० ङीष् । १अपामार्गे २अजमोदायाम् राजनि० ३करञ्जभेदे (माकड़करमचा) अमरः । ४मर्कटीजाले पिङ्गलः ।

मर्कटीजाल न० छन्दोग्रन्थोक्ते मात्रावर्णप्रस्तारे लघुगुरुस्थानविशेषज्ञानाय चक्रभेदे ह०र० ग्रन्थटीकायां दृश्यम् ।

मर्कर पु० मर्क-अरच् । १भृङ्गराजे (केशुरिया) २भाण्डे च ३सुरङ्गायां ४वन्ध्यायां स्त्रियाञ्च स्त्री विश्वः टाप् ।

मर्च ग्रहणे चु० उभ० सक० सेट् । मर्चयति-ते अममर्चत्-त

मर्जु पु० मृज-उन् । १रजके २पीठमर्दे च हेमच० । ३शुद्धौ स्त्री मेदि० ।

मर्त्त पु० मृ-तन् । १मनुष्ये २भूलोके च । तत्र भवः यत् । मर्त्त्य मनुष्ये । [२चूर्णने च ।

मर्द्दन न० मृद-ल्युट् । १गात्रपादादिसंवाहने अमरः

मर्द्दल पु० मृद-घञ् मर्द्दं लाति ला-क । वाद्यभेदे (माँदल) । अमरः ।

मर्द्दित त्रि० चु० मृद-क्त । १चूर्णिते २पन्थिते च भरतः ।

मर्ब गतौ भ्वा० पर० सक० सेट् । मर्बति अमर्बीत् ममर्ब ।

मर्म्मज्ञ पु० मर्म जानाति ज्ञा-क । तत्त्वज्ञे । मर्मविदादयोऽप्यत्र ।

मर्म्मन् न० मृ-मनिन् । १जीवनस्थाने राजनि० । २सन्धिस्थाने ३तात्पर्ये च “अपि धर्मागममर्मपारगैरि”ति नैषधम् । “सन्निपातः सिरास्नायुसन्धिमांसास्थिसम्भवः । मर्माणि तेषु तिष्ठन्ति प्राणाः खलु विशेषतः” भावप्र० ।

मर्म्मर पु० मृ-अरन् तुट् च । १वस्त्रपर्णानां शब्दे (मड़मड़) इत्यव्यक्तशब्दे अमरः । २पीतदारुणि ३हरिद्रायाञ्च स्त्री मेदि० गौरा० ङीष् ।

मर्म्मस्पृश् त्रि० मर्म प्राणस्थानं स्पृशति स्पृश-क्विन् । अरुन्तुदे मर्मपीडके अमरः । [दीर्घश्च । मर्मपीडके ।

मर्म्माविध् त्रि० मर्म सन्धिस्थानं विध्यति विध-क्विप् पूर्व

मर्य्या अव्य० म्रियतेऽनागच्छतेऽत्र मृ-यत् । १सीमायाम स्त्री त्यर्थापि रायमु० । कर्त्तरि यत् । २मनुष्ये पु० । “पेशो मर्य्या अपगमे” इति केतुमन्त्रः । “मर्य्या मनुष्या” इति भाष्यम् ।

मर्य्यादा स्त्री मर्य्यायां सीमायां दीयते दा-घञर्थे क मर्य्यादीयते वा परि+आ-दा-अङ् पृषो० परस्य मः । १न्याय्यपथस्थितौ अमरः । २सीमायाम् जटा० ३कूले च हेमच० ।

मर्व पूर्त्तौ भ्वा० पर० सक० सेट् । मर्वति अमर्वीत् ममर्व ।

मल धृतौ भ्वा० आ० सक० सेट् । मलते अमलिष्ट ।

मल पु० मृज्यते शोध्यते मृज-कल-टिलोपः । १पापे २पुरीषे लौहादीनां ३किट्टे अमरः । किट्टं कलङ्को मण्डूरादिर्देहजातस्वेदश्लेष्मादिश्च । “वसा शुक्रमसृङ्मज्जामूत्रं विट्कर्णविण्नखाः । श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः” स्मृतिः । ४कर्पूरे शब्दच० ५वातपित्तकफेषु च माधवः । ५दुष्टे दुष्टवस्त्रे च ।

मलघ्न पु० मलं विष्ठां हन्ति रेचयति हन-क । १शाल्मलीकन्दे २नागदमन्यां स्त्री ङीप् राजनि० । ३मलनाशके त्रि० । क्विप् । मलहन् तदर्थे त्रि० ।

मलदूषित त्रि० ३त० । मलिने अमरः ।

मलद्राविन् पु० मलं द्रावयति रेचयति द्रु-णिच्-णिनि । जयपाले राजनि० । तत्फलस्य रेचकत्वात् तथात्वम् ।

मलपू स्त्री मलं मलस्थानं पुनाति पू-क्विप् । काकोडुम्बरिकायाम् अमरः ।

मलभेदिनी स्त्री मलं भेदयति रेचयति भिद-णिच्-णिनि । कटुकायाम् । (कट्की) राजनि० ।

मलमास पु० मलो दुष्टो मासः । “अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितम् । मलमासः स विज्ञेयः” इत्युक्ते रविसंक्रान्तिशून्ये शुक्लप्रतिपदादिदर्शान्तरूपे चान्द्रे मासे । अधिमासशब्दे ११४० दृश्यम् ।

मलय पु० मल-कयन् । दक्षिणस्थे १पर्वतभेदे हेम० । यत्र चन्दनजन्म तत्पर्वतान्तिकस्थे २देशभेदे ३उपवने ४शैलाङ्गे च मेदि० । ५नन्दनवने धरणिः । अष्टादशसु द्वीपेषु ६द्वीपभेदे शब्दमा० ७ऋषभदेवस्य पुत्रभेदे भाग०५।४ ।

मलयज पुंन० मलये पर्वते जायते जन-ड । १चन्दने अमरः २मलयदेशजाते वायौ पु० । ३तद्देशजाते त्रि० ।

मलया स्त्री मलयो देशोऽस्त्यस्याः कारणत्वेन अच् । त्रिवृतायां (तेओड़ि) मेदि० ।

मलविनाशिनी स्त्री मलं तद्दोषं विनाशयति वि+नश-णिच्-णिनि । शङ्खपुष्प्याम् राजनि० ।

मलाकर्षिन् पु० मलमाकर्षति आ+कृष-णिनि । चण्डाले (मेतर) शब्दमा० । [न्याश्च शब्दमा० ।

मलाका स्त्री मल-आक । १कामिन्यां २दूत्यां ३हस्ति-

मलारि पु० मलस्य कलङ्ककिट्टादेररिः । सर्जक्षारद्रव्ये राजनि०

मलिन त्रि० मल+अस्त्यर्थे इनन् । १मलयुक्ते अमरः । २दूषिते ३कृष्णे च मेदि० । ४घोले न० शब्दच० । ५दोषे हेम०

६टङ्कणे न० राजनि० (सोहागा)। इति। मलीत्यप्यत्र

मलिनमुख पु० मलिनं मुखं यस्य १वह्नौ तस्यादौ धूमाय मानत्वेन कृष्णत्वात् २प्रेतकष्ठभेदे च। ३वानरे पुंस्त्री० गोलाङ्गूलस्त्रियां ङीप् ४क्रूरे ५खले च त्रि० मेदि० ६प्रेते हेम०।

मलिम्लुच पु० मलो वैदिककर्माननुष्ठानेन दुष्टः सन् म्लोचति गच्छति म्लुच-क। १मलमासे २वायौ ३अग्नौ ४चौरे च मेदि०। ५चित्रकवृक्षे। [कासीसे च मेदि०।

मलीमस त्रि० मल-ईमसच्। १मलिने अमरः। २लौहे ३पुष्प-

मल्ल धृतौ भ्वा० आ० अक० सेट्। मल्लते अमल्लिष्ट ममल्ले।

मल्ल पु० मल्ल-अच्। १बाहुयुद्धकारके नियोद्धरि २पात्रे ३वलीयसि ४मत्स्यभेदे ५कपोले च मेदि० ६व्रात्यक्षत्रियात् सवर्णायां जाते जातिभेदे (माल) ७सङ्कीर्णजातिभेदे लेटात् तीवरकन्यायां जाते सङ्कीर्णवर्णे (माला) ब्रह्मवै० पु० ८तन्त्रवाय्यां कुन्दकाराज्जाते सङ्कीर्णजातिभेदे च पुंस्त्री० स्त्रियां जातित्वात् ङीष्। ९देशभेदे स्वार्थे क मल्लक तत्रार्थे। संज्ञायां कन्। इत्ते हेम०।

मल्लक पु० मल्ल्यते ध्रियतेऽत्र मल्ल-वुन्। १दीपाधारे पात्रे २नारिकेलफलजाते पात्रे च (माला) अमरः। ५प्रदीपे मधुरेशः ६स्वनामपुष्पे स्त्री अमरः टाप् अत इत्त्वम्।

मल्लज न० मल्ले देशे जायते जन-ड। मरिचे जटा०।

मल्लभू स्त्री मल्लक्रीडनस्य बाहुयुद्धस्य योग्या भूः स्थानम्। देशभेदे। मल्लभूम्यादयोऽप्यत्र।

मल्लयुद्ध ६त०। बाहुयुद्धे तत्प्रकारः भा० वि० १२अ०।

मल्लार पु० मल्ल इव आच्छति ऋ-अच्। १रागभेदे २वसन्तरागस्य रागिणीभेदे स्त्री ङीप् सङ्गीतदामो०।

मल्लि(ल्ली) स्त्री मल्ल-इन् वा ङीप्। १मल्लिकायाम् शब्दमा० संज्ञायां कन्। मल्लिका कृष्णवर्णदेहे आलोहितचञ्चुचरणे २हंसभेदे पुंस्त्री० मल्लिकाक्षोऽप्यत्र।

मल्लिकापुष्प पुं० मल्लिकाया इव पुष्पमस्य। १कुटजवृक्षे राजनि०। २कदम्बवृक्षे च हेमच०। ६त०। ३मल्लिकायाः कुसुमे।

मल्लिपत्र न० मल्लिरिव पत्त्रमस्य। छत्राके त्रिका०।

मव बन्धे भ्वा० पर० सक० सेट्। मवति अमवीत् अमावीत्।

मव्य बन्धे भ्वा० पर० सक० सेट्। मव्यति अमव्यीत्।

मश ध्वनौ अक० कोपे सक० भ्वा० पर० सेट्। मशति अमशीत् अमाशीत् मेमतुः।

मशक पु० मश-वुन्। १कीटभेदे (मशा) राजनि०। २चर्ममयजलपात्रभेदे ३रोगभेदे शब्दर०। तद्रोगलक्षणं यथा "अवेदनं स्थिरं चैव यत्तु गात्रे प्रदृश्यते। माषवत् कृष्णमुत्पन्नं मलिनं मशकं दिशेत्" गरु० पु० १७५अ०।

मशकिन् पु० मशकोऽस्त्यस्य इनि। उदुम्बरवृक्षे हेम०।

मशहरी स्त्री मशं मशकं हरति हृ-ट। मशकनिवारणार्थे वस्त्रनिर्मिते पदार्थे चतुष्क्याम् जटा०।

मषि(षी) स्त्री मष(स) इन् वा ङीप्। (काली) १पत्रलेखनद्रव्ये त्रिका०। २नीलशेफालिकावृक्षे च शब्दर०।

मष वधे भ्वा० पर० सक० सेट्। मषति अमषीत् अमाषीत्।

मस परिणामे अक० परिमाणे सक० दि० पर० सेट्। मस्यति इरित् अमसत् अमसीत् अमासीत्। पुषादिरयं तेन अमसदित्येवेति पाणिनीयाः।

मसन न० मस-ल्यु। सोमराजीवृक्षे शब्दच०।

मसरा स्त्री मस-अरच्। मसूरे जटा०।

मसिका स्त्री मसीव इवार्थे कन्। नीलशेफालिकायाम् शब्दर०। [त्रिका०

मसि(सी)जल न० मसिमिश्रितं जलम्। (काली) लेखनद्रव्ये

मसिधान न० मसिर्धीयतेऽत्राधारे धा-ल्युट्। मस्याधारे (दोयात) स्त्रीत्वमपि तत्र ङीप्।

मसिपण्य पु० मसिस्तदुपलक्षितमक्षरमेव पण्यं विक्रेयं यस्य। लेखनोपजीविनि त्रिका०।

मसिप्रसू स्त्री मस्याः प्रसूरिव। १मस्याधारे। मसिः प्रसूरिव यस्याः। २लेखन्याम् हारा०।

मसीना स्त्री मस-ईनन्। अतस्याम् (तिसि) शब्दच०।

मसु(सू)र पुंस्त्री० मस-उरच् ऊरच् वा। १कलायभेदे त्रिका० स्त्रियां गौरा० ङीष्। २वेश्यायां, ३व्रीहिभेदे च स्त्री टाप् मेदि०।

मसूरविदला स्त्री मसूरस्येव विदलं यस्याः। १कृष्णत्रिवृति (कालतेओडी) अमरः। २श्यामलतायां रत्नमा०।

मसूरिका स्त्री मसूरेव इवार्थे कन्। १वसन्तरोगे २कुट्टिन्यां च शब्दमा० "कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः। दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः। क्रूरग्रहेक्षणाच्चापि देशे दोषाः समुद्धताः। जनयन्ति शरीरेऽस्मिन् दुष्टरक्तं समुद्धताः। मसूराकृतिसंस्थानाः पिडकाः स्युर्मसूरिकाः" भावप्र०।

मसूरी स्त्री मस-ऊरच् गौरा० ङीष्। १वसन्तरोगे मेदि० २त्रिवृति, ३रक्तत्रिवृति च राजनि०।

मसृण त्रि० मस-ऋणच्, मसृ+ऋण-क पृषो० वा। १स्निग्धे २अकर्कशे च। ३अतस्यां स्त्री मेदि०।

मस्क गतौ भ्वा॰ पर॰ सक॰ सेट् । मस्कति अमस्कीत् ।

मस्कर पु॰ मस्क-अरच् । १वंशे अमरः । २रन्ध्रयुक्तवंशे च राजनि॰ । भावे अरच् । ३गतौ ४ज्ञाने च ।

मस्करिन् पु॰ मस्करो ज्ञानं गतिर्वाऽस्यास्ति इनि, मा कर्त्तुं कर्म निषेद्धुं शीलमस्य मा+कृ-इनि “मस्करमस्करिणा-विति” निपा॰ । १परिव्राजके विधानेन सर्वकर्मपरित्यागके भिक्षौ अमरः । “धारयन् मस्करिव्रतम्” भट्टिः २चन्द्रे च शब्दच॰ ।

मस्ज स्नाने तु॰ पर॰ अक॰ अनिट् । मज्जति अमाङ्क्षीत् । ओदित् क्त मग्नः । ट्वित् अथुच् मज्जथुः ।

मस्त(क) न॰ मस्यति परिमात्यनेन मस-करणे त ।१ऊर्द्ध्वे त्रि॰ २शिरसि च स्वार्थे क । ३उत्तमाङ्गे पुंन॰ । [हेमच॰ ।

मस्तकस्नेह पु॰ ६त॰ । शिरःस्थितमज्जायाम् मस्तिष्के

मस्तदारु न॰ मस्यति परिमात्यनेन मस्तमुच्चं कर्म॰ । देवदारुणि भावप्र॰ । [याम् ग्रीवायाम् शब्दच॰ ।

मस्तमूलक न॰ मस्तस्य मूलमिव इवार्थे कन् । शिरोधरा

मस्तिष्क न॰ मस-क्तिन् मस्तिं परिमाणं तिष्यति भेदं सुष्कति सुष्क गतौ क पृषो॰ । मस्तकस्थे स्नेहाकारे पदार्थे (मगज) अमरः । “मांसमस्तिष्कपङ्क प्राग्भारे” प्रबोधचन्द्रोदयम् ।

मह पूजायां भ्वा॰पर॰सक॰सेट् । महति अमहीत् मेहतुः ।

मह वृद्धौ भ्वा॰ आ॰ अक॰ सेट् इदित् । मंहते अमंहिष्ट ।

मह पूजने चुर॰ उभ॰ सक॰ सेट् । महयति-ते अम-महत्-त ।

मह पु॰ मह-घञर्थे क । १उत्सवे सततानन्दजनकव्यापारे अमरः । २तेजसि मेदि॰ । ३यज्ञे पु॰ ४महिषे च पुंस्त्री॰ हेमच॰ ।

महत् त्रि॰ मह-अति । १विपुले २दृढे च स्त्रियां ङीप् महती ३राज्ये न॰ मेदि॰ । ४सांख्योक्ते महत्तत्त्वे पु॰ “प्रकृतेर्महानिति” श्रुतिः । “मनो महान् मतिर्ब्रह्मा” इत्युक्ते ५हिरण्यगर्भलिङ्गदेहे शा॰ भा॰ सर्वनामस्थाने नुम्दीर्घौ महान् महान्तौ एकार्थशब्दे परे समासे तस्यात्वं वा । महाधनम्

महती स्त्री मह-अतृ+गौरा॰ ङीष् । १वीणाभेदे अमरः २नारदवीणायाम् भरतः । “अवेक्षमाणं महतीं मुहुर्मुहुः” माघः । ३बृहत्यां ४वार्त्ताक्यां ५विपुलायां स्त्रियाञ्च राजनि॰ । समासे तोस्थाने वा । महत्याः घोषः महाघोषः इत्यादि ।

महत्तत्त्व न॰ कर्म॰ । सांख्योक्तप्रकृत्यादिचतुर्विंशतितत्त्वमध्ये प्रकृतिकार्य्ये अहङ्कारादिकारणे निश्चयात्मकवृत्तिविशिष्टे तत्त्वभेदे । [भेदे च ।

महर् अव्य॰ मह-अर । १ऊर्द्ध्वस्थे चतुर्थे लोके २व्याहृति-

महर्लोक पु॰ कर्म॰ । भूरादिषु ऊर्द्ध्वस्थे सप्तलोकान्तर्गते चतुर्थे लोके

महर्षि पु॰ कर्म॰ । परमर्षिशब्दार्थे वेदव्यासादौ त्रिका॰ । “ऋषिर्हिंसागतौ धातुर्विद्यासत्यतपःश्रुतैः । एष सन्निचयो यस्माद् ब्राह्मणस्य ततस्त्वृषिः । निवृत्तिसमकालन्तु बुद्ध्या व्यक्तमृषिस्त्वयम् । ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः । गत्यर्थादृषतेर्धातोर्नाम निर्वृत्तिकारणम् । यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता । तेनेश्वराः स्वयम्भूता ब्रह्मणो मानसाः सुताः । निवर्त्तमानैस्तैर्बुद्ध्या महान् परिगतः परम् । यस्मादृषिः परत्वेन महांस्तस्मान् महर्षयः” मत्स्यपु॰१२०अ॰ तन्निरुक्तिः

महल्लिक पु॰ “सत्त्वमुग्धोऽनुपस्थो यः स्त्रीस्वभावो महल्लिकः” शब्दमालोक्ते अन्तःपुररक्षकभेदे (खोजा) ।

महस् न॰ मह-असुन् । १तेजसि २उत्सवे च मेदि॰ ३यज्ञे शब्दर॰ । [शब्दच॰ । २स्त्रीगव्यां शब्दर॰ ।

महा स्त्री मह-अच् । (गोरणाकर्षिया) १गोपवल्ल्याम्

महाकण्टकिनी स्त्री महान्ति कण्टकान्यस्य भूम्ना इनि ङीप् (फणिमनसा) वृक्षभेदे शब्दच॰ । [१मूलके च शब्दर॰

महाकान्त पु॰ कर्म॰ । १लशुने अमरः । २राजपलाण्डौ

महाकपित्थ पु॰ कर्म॰ । १बिल्ववृक्षे त्रिका॰ । २रक्तलशुने ३चाण्डाक्यमूलके राजनि॰ ।

महाकरञ्ज पु॰ कर्म॰ । करञ्जभेदे (काँटाकरमचा) राजनि॰

महाकर्णिकार पु॰ कर्म॰ । आरग्वधे (सोंदाल) राजनि॰

महाकाय पु॰ ६ब॰ । १शिवानुचरभेदे नन्दिनि त्रिका॰ २हस्तिनि पुंस्त्री॰ स्त्रियां टाप् । ३विपुलदेहयुते त्रि॰ । कर्म॰ । ४स्थूलदेहे पु॰ ।

महाकार्त्तिकी स्त्री कार्त्तिकीमधिकृत्य “प्राजापत्यं यदा भं तथैतस्यां नराधिप ! । सा महाकार्त्तिकी प्रोक्ता” उक्तायां रोहिणीनक्षत्रयुक्तायां कार्त्तिकपौर्णमास्याम् ।

महाकाल पु॰ कर्म॰ । १सर्वसंहारके काले, २शिवे च “महाकालेन च समम्” कालिकाध्यानम् । (माकाल) ३लताभेदे रत्नमा॰ । ४भैरवभेदे च “महाकालं यजेद्देव्या दक्षिणे धूम्रवर्णकम्” इति कालीतन्त्रम् ।

महाकाव्य न॰ कवेः कर्म काव्यं कर्म॰ । सर्गबन्धरूपे महाधिकरणके ग्रन्थभेदे तल्लक्षणं साहित्यदर्पणे ६प॰ उक्तम्

महाकुम्भी स्त्री महती कुम्भीव (पाना) कट्फले राजनि॰।

महाकुल न॰ कर्म॰। "दशपुरुषविख्यातं श्रोत्रियाणां महाकुलम्" इति मनूक्ते दशपुरुषावधिवेदाध्यायिवंशे।

महाकुलीन त्रि॰ महाकुले भवः खञ्। महाकुलोद्भवे।

महाकोशफला स्त्री कर्म॰। देवदालीलतायाम् राजनि॰।

महाकोषातकी स्त्री कर्म॰। हस्तिघोषायाम् राजनि॰।

महागन्ध न॰ महान् गन्धोऽस्य। १हरिचन्दने २बोले च राजनि॰।३जलवेतसे वृक्षे पु॰ शब्दच॰। ४नागबलायां ५कविकायां च स्त्री राजनि॰। ६चामुण्डायां स्त्री हेम॰

महागुरु पु॰ कर्म॰। "त्रयः पुरुषस्यातिगुरवो भवन्ति पिता माता आचार्य्यश्च" स्मृत्युक्ते पुरुषस्य १पित्रादौ "पतिरेकोगुरुः स्त्रीणा"मित्युक्ते दत्तकन्याया २भर्त्तरि अदत्तकन्यायाः पितरि, मातरि च। "महागुरुनिपाते च काम्यं किञ्चिन्नचाचरेत्" स्मृतिः।

महागुल्मा स्त्री महान् गुल्मोऽस्याः। सोमवल्ल्याम् राजनि॰

महागुहा स्त्री महती गुहेव मूलमस्याः। पृश्निपर्ण्याम् राजनि॰। [ङीप्।२दीर्घग्रीवायुक्ते त्रि॰स्त्रियां टाप्।

महाग्रीव पुंस्त्री॰महान् ग्रीवाऽस्य। १उष्ट्रे राजनि॰ स्त्रियां

महाघोषा स्त्री घुष्यते कर्मणि घञ् कर्म॰। १कर्कटशृङ्ग्याम्। (काकड़ाशिङ्गे) मेदि॰। २कुन्दुरुक्यां शब्दच॰। महान् घोषोऽस्य अत्र वा। ३विपुलशब्दवति त्रि॰। ४हट्टे न॰ मेदि॰।

महाङ्ग पुंस्त्री॰ महदङ्गमस्य।१उष्ट्रे स्त्रियां ङीष्। २गोक्षुरके ३रक्तचित्रके च राजनि॰। ४विपुलावयवयुते त्रि॰। कर्म॰। ५विपुलाङ्गे न॰।

महाच्छद पु॰ महान् छदोऽस्य। देवताड़वृक्षे रत्नमा॰।

महाच्छाय पु॰ महती छाया यस्य। १वटवृक्षे राजनि॰। २विपुलच्छायायुक्ते त्रि॰। [राजनि॰

महाच्छिद्रा स्त्री महत् छिद्रमस्याः। महामेदायाम्

महाजटा स्त्री महती जटा यस्याः। १रुद्रजटावृक्षे राजनि॰। २विपुलजटायुते त्रि॰। कर्म॰। ३वृहत्यां, जटायाम् स्त्री।

महाजन पु॰ कर्म॰। वेदवाक्येषु श्रद्धावति जने। "महाजनो येन गतः स पन्थाः" भा॰ वं॰ यक्षप्रश्नः।

महाज(म्बु)म्बू स्त्री कर्म॰। राजजम्ब्वाम् रत्नमा॰। दीर्घान्तः भावप्र॰ "राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम्"।

महाजाली स्त्री कर्म॰। १पीतवर्णघोषायाम् अमरः। २राजकोषातक्यां राजनि॰।

महाज्यैष्ठी स्त्री "ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा। पूर्णिमा रविवारेण महाज्यैष्ठी प्रकीर्त्तिता" उक्तलक्षणायां ज्यैष्ठपौर्णमास्याम्। "महाज्यैष्ठ्यां तु यः पश्येत् पुरुषः पुरुषोत्तमम्" प्रा॰त॰लक्षणान्तरं दृश्यम्

महाज्योतिष्मती स्त्री कर्म॰। (बड़मालकाङ्गनी) लताभेदे राजनि॰। [२महति प्रभौ त्रि॰।

महाढ्य पु॰ महेन उत्सवेनाढ्यः।१कदम्बे राजनि॰। कर्म॰।

महातरु पु॰ कर्म॰। १स्नुहीवृक्षे हेमच॰। २विपुलवृक्षे च।

महातल न॰ कर्म॰। अधःस्थेषु पातालेषु मध्ये पञ्चमे पाताले शब्दमा॰। [देव्यां हेमच॰।

महातारा स्त्री कर्म॰। तन्त्रोक्ते १तारिणीभेदे २जिन-

महाताली स्त्री कर्म॰।विपुलतालीभेदे राजताल्याम् राजनि॰

महातिक्त पु॰ कर्म॰। १निम्बवृक्षे राजनि॰। २अतिशयतिक्तरसयुते त्रि॰। ३यवतिक्तायां स्त्री राजनि॰। ४पाठायां शब्दमा॰। [२अतितीक्ष्णे त्रि॰।

महातीक्ष्णा स्त्री कर्म॰। १भल्लातवृक्षे (भेला) राजनि॰

महातेजस् पु॰ महत् तेजोऽस्य।१पारदे राजनि॰। २अतितेजस्विनि त्रि॰। ३कार्त्तिकेये हला॰। ४वह्नौ पु॰शब्दच॰। ५चित्रकवृक्षे च। [महाशये।

महात्मन् त्रि॰ महान् आत्मा स्वभाव आशयो वा यस्य।

महादान न॰ कर्म॰। विनायकादिस्नानजपाङ्गके तुलापुरुषादिषोड़शदाने "अथातः संप्रवक्ष्यामि महादानस्य लक्षणम्" इत्युपक्रम्य "आद्यन्तु सर्वदानानां तुलापुरुषसंज्ञकम्" इत्यादिना षोड़शदानान्यभिधाय "विनायकादिग्रहलोकपालवस्वष्टकादित्यमरुद्गणानाम्। ब्रह्माच्युतेशार्कवनस्पतीनां स्वमन्त्रतोहोमचतुष्टयं स्यात्। जप्यानि सूक्तानि तथैव चैषामनुक्रमेणापि यथास्वरूपमित्युक्तं मात्स्ये। विस्तरस्तु मत्कृततुलादानादिपद्धतौ ज्ञेयः।

महादारु न॰ कर्म॰। देवदारुणि जटा॰।

महादेव पु॰ कर्म॰। "ब्रह्मादीनां सुराणाञ्च मुनीनां ब्रह्मवादिनाम्। तेषां महत्त्वात् देवोऽयं महादेवः प्रकीर्त्तितः" इत्युक्ते "महती पूजिता विश्वे मूलप्रकृतिरीश्वरी। तस्याः देवः पूजितश्च महादेवस्ततः स्मृतः" इत्युक्ते च शिवे। [महत्त्वम्। २वृहद्वृक्षे च।

महाद्रुम पु॰ कर्म॰।१अश्वत्थवृक्षे शब्दच॰। तस्य विष्णुरूपत्वात्

महाधन न॰ महत् मूल्यरूपं धनमस्य।१बहुमूल्ये अमरः। २सुवर्णे ३सिह्लके च मेदि॰। ४मनोज्ञवस्त्रे हेमच॰

५लशुने पु० शब्दरत्नावली। ६अतिशयधनयुते त्रि०।

महाधातु पु० कर्म०। स्वर्णे शब्दच०। [नद्याञ्च।

महानदी स्त्री। १ओड्रदेशस्थे नदीभेदे २समुद्रगामिन्यां

महानन्द पु० महान् अतिशयित् आनन्दो यत्र १मोक्षे हला०कर्म०। २अतिशयानन्दे पु० "माघमासस्य या शुक्ला नवमी लोकपूजिता। महानन्देति सा प्रोक्ते"त्युक्तायां ३माघशुक्लनवम्यां ४सुरायां शब्दनि० ५नदीभेदे च स्त्री०।

महानन्दि पु० कलौ अन्तकरस्य महापद्मनृपभेदस्य पितरि।

महानवमी स्त्री कर्म०। आश्विनशुक्लमधिकृत्य "ततोऽनु नवमी यस्मात् सा महानवमी स्मृता" इत्युक्तायाम् आश्विनशुक्लनवम्याम्।

महानस न० महदना संज्ञायाम् अच्। पाकस्थाने अमरः।

महानाटक न० दृश्यकाव्यनाटकभेदे "एतदेव यदा सर्वैः पताकास्थानकैर्युतम्। अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे"। सा० द० प०। २हनुमन्नाटके च।

महानाद पुंस्त्री० महान् नादोऽस्य। १गजे स्त्रियां ङीष्। २गर्जन्मेघे मेदि० ३सिंहे पुंस्त्री० स्त्रियां ङीष् ४कर्णे च हेमच०। ५उष्ट्रे पुंस्त्री० राजनि० स्त्रियां ङीष्। ६कण्ठशब्दे पु० शब्दा० कर्म०। ७महति शब्दे च।

महानिद्रा कर्म०। मरणे जटा० तत्र पुनः प्रत्युत्थानाभावात्तथात्वम्।

महानिम्ब पु० कर्म०। (घोडानिम) वृक्षभेदे रत्नमा०।

महानिशा स्त्री "महानिशा तु विज्ञेया मध्यमप्रहरद्वयम्" इत्युक्ते रात्रेर्मध्यमप्रहरद्वये।

महानील पु० कर्म०। १भृङ्गराजे २मणिभेदे "यत्तु वर्णस्य भूयस्त्वात् क्षीरे शतगुणे स्थितः। नीलतां तनुयात् सर्वं महानीलः स उच्यते" गरुडपु० ७२ अ०। ३नागभेदे मेदि० ४महाजम्ब्वाञ्च राजनि० ५तन्त्रभेदे न०। ६नीलापराजितायां स्त्री राजनि० गौरा० ङीष्। [महदर०।

महानुभाव पु० महाननुभाव आशयो यस्य। महाशये

महापञ्चमूलक न० बृहत्पञ्चमूले। "बिल्वोऽग्निमन्थः श्योनाकः काश्मर्य्यः पाटला तथा। सर्वैस्तु मिलितैरेतैः स्यान्महापञ्चमूलकम्" राजनि०।

महापञ्चविष "शृङ्गी च कालकूटश्च मुस्तको वत्सनाभकः। शङ्खकर्णीति योगोऽयं महापञ्चविषाभिधः" इत्युक्ते पञ्चविधे विषे।

महापत्रा स्त्री महत् पत्रमस्याः। महाजम्बूवृक्षे रत्नमा०।

महापथ पु० कर्म०। १राजमार्गे हेमच०।२हिमालयोत्तरस्थे ३स्वर्गारोहणपथे च।

महापद्म पु० कर्म०।१अष्टनागमध्ये नागभेदे हेमच० २कुबेरस्य निधिभेदे जटा० "अर्बुदमब्जं खर्वनिखर्वमहापद्मेति" लीलावत्युक्तायाम् ३अयुतकोटिसंख्यायां ४तत्संख्यान्विते न० ५नृपभेदे महानन्दिसुते च ६शुक्लपद्मे रत्नमा०।

महापातक न० "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुस्तत्संसर्गश्च पञ्चमः" इत्युक्तेषु पञ्चसु पातकेषु महापापमप्यत्र।

महापिण्डीतक पु० कर्म०। कृष्णवर्णे विपुलमदनवृक्षे राजनि०

महापीलु पु० कर्म०। मधुपीलौ राजनि० अतिमधुरत्वात्तस्य हि महत्त्वम्।

महापुराण न० न० "सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम्। कर्मणां वासना वार्त्ता मनूनाञ्च क्रमेण च। वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम्। उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक्। महापुराणं विज्ञेयमेकादशकलक्षणम्" ब्रह्मवै० ज० १३२ अ० इत्युक्तलक्षणे व्यासप्रणीते पुराणभेदे।

महापुरुष पु० कर्म०। १श्रेष्ठे नरे २नारायणे च। "वन्दे महापुरुष! ते चरणारविन्दमि"ति भागवतम्।

महापुरुषदन्ता पु० महापुरुषस्य विष्णोः दन्ता इव महत्त्वात् मूलान्यस्य। शतमूल्याम् रत्नमा०।

महापुष्पा स्त्री महत् यन्त्रपुष्पत्वेन प्रशस्तं, पत्र पेक्षया बृहत् वा पुष्पं यस्याः। अपराजितायाम् शब्दच०।

महाप्रलय पु० कर्म०। ब्रह्मणो दिनावसाने जायमानः सर्वभूतलयः प्रलयः तस्यैव स्वमानेन शतवर्षावसाने जायमानस्तु महान् प्रलयः १तस्मिन् २तदुपलक्षिते जन्यद्रव्यानधिकरणीभूते काले च। ३अन्यभावानधिकरणीभूते काले इत्यन्ये। तत्रप्रमाणाभाव इति नव्यनैयायिकाः

महाप्रसाद पु० "पादोदकञ्च निर्माल्यं नैवेद्यञ्च विशेषतः। महाप्रसाद इत्युक्त्वा ग्राह्यं विष्णोः प्रयत्नतः" इत्युक्ते १देवनैवेद्यादौ २विपुलप्रसन्नतायाञ्च।

महाप्राण पुंस्त्री० महान् बहुकालस्थायित्वात् श्रेष्ठः प्राणो यस्य। १द्रोणकाके राजनि० स्त्रियां ङीष् कर्म०। २वर्णोच्चारणस्य बाह्यप्रयत्नभेदे स च वर्ग्यद्वितीयचतुर्थवर्णानां शषसहानाञ्चोच्चारणप्रयत्नः तेषामुच्चारणे हि प्राणवायो र्भूयान् प्रयास इति तेषामपि महाप्राणत्वमुपचारात्।

महाफल पु० महत् पत्रापेक्षया बृहत् फलमस्य। १बिल्व

हत्ते रत्नमा०। २इन्द्रवारुण्यां (राखालशशा) स्त्री जटा०।

महाबल पु० महत् बलं यस्य। १वायौ २दशबले बुद्धे च त्रिका० ३महाबलयुते त्रि०। महत् बलं यस्मात् ५ब०। ४सीसके न० हेमच०। ५पीतवाट्यालके स्त्री रत्नमा०।

महाभारत पु० न० "चत्वारश्चैकतो वेदा भारतञ्चैवमेकतः। पुरा किल सुरैः सर्वैः समस्य तुलया धृतम्। चतुर्भ्यः सरहस्येभ्यो वेदेभ्योऽभ्यधिकं यदा। तदा प्रभृति लोकेऽस्मिन् महाभारतमुच्यते। महत्त्वात् भारतत्वाच्च महाभारतमुच्यते" इत्युक्तलक्षणे व्यासप्रणीते लक्षश्लोकात्मके ग्रन्थभेदे भारतशब्दे दृश्यम्।

महाभीता स्त्री कर्म०। १लज्जालुलतायाम् शब्दच०। स्पर्शमात्रेण हि सङ्कोचेन तस्या अतिभीतत्वम्। २अतिभीते त्रि०।

महाभूत न० कर्म०। सर्वेषां पञ्चात्मकतापाप्त्या स्थूलतापन्नेषु बृहत्सु पृथिव्यप्तेजोवाय्वाकाशेषु १पञ्चसु भूतेषु। "तं वेधा विदधे नूनं महाभूतसमाधिना" रघुः। २परमेश्वरे पु० "तस्यैतस्य महाभूतस्य निःश्वसितमेतत् यदृग्वेदः" इत्यादि श्रुतिः। [मत्स्यपु०।

महाभूतघट पु० षोड़शमहादानान्तर्गते षोड़शे महादाने

महाभृङ्ग पु० कर्म०। १नीलभृङ्गराजे राजनि०। [हेमच०।

महामनस् त्रि० महदुदारं मनस्तद्व्यापारोऽस्य। महाशये।

महामात्र पु० "मन्त्रे कर्मणि भूषायाम् वित्ते माने परिच्छदे मात्रा च महती येषां महामात्रास्तु ते स्मृताः" इत्युक्ते प्रधानामात्ये।

महामाया स्त्री कर्म०। अन्यस्मिन् अन्यधर्मावभासो हि माया सर्वजगन्मूलत्वात्तस्या महत्त्वम्। १जगत्कारणभूतायाम् अविद्यायां २तदधिष्ठात्र्यां दुर्गायाञ्च "महामाया हरेश्चैषा यया संमोह्यते जगत्" देवीमा०।

महामाष पु० कर्म०। राजमाषे (बरबटी) शब्दच०। माषापेक्षया तस्य हि महत्त्वात्तथात्वम्।

महामूल पु० महत् वीर्यकारित्वात् श्रेष्ठं मूलमस्य। राजपलाण्डौ राजनि०।

महामृग पुं स्त्री० महान् मृगः पशुः। १गजे हेमच० शरभे च राजनि० तयोर्हि पशुषु महत्त्वात् तथात्वम्। स्त्रियां ङीष्

महामेद पु० स्त्री ह्रस्व०। वैद्यकप्रसिद्धाष्टवर्गोक्ते ओषधिभेदे रत्नमाला। तत्रार्थे स्त्री राजनि०। "महामेदाभिधः कन्दो मोरङ्गादौ प्रजायते। शुक्लार्द्रकनिभः कन्दो लताजातः सपाण्डुरः। महामेदाभिधो ज्ञेयः" भावप्र०।

महामोह पु० महान् मोहः भ्रान्तिहेतुको वस्तुतोऽनिष्टेऽपि रागः। १संसारतद्विषयकारणरूपेऽज्ञानभेदे "तमोऽविवेको मोहः स्यादन्तःकरणविभ्रमः। महामोहस्तु विज्ञेयो ग्राम्यभोगसुखैषणा" इत्युक्ते २मैथुनादिसुखभोगेच्छारूपे अन्तःकरणवृत्तिभेदे च। वैषयिकसुखस्य वस्तुतोऽनिष्टत्वात् तथात्वम्। "दशविधो महामोहः" सां० का०। शब्दादिषु पञ्चसु दिव्यादिव्यतया दशविधेषु विषयेषु रञ्जनीयेषु राग आसक्तिः" त० कौ० उक्ते ३दशविधविषयरागे च। [४तद्युक्ते पु०।

महाम्ल न० कर्म०। १अत्यम्ले २तिन्तिड़ीफले च जटा०।

महायज्ञ पु० कर्म०। नित्यं गृहस्थकर्त्तव्ये वेदाध्ययनाग्निहोत्रपितृतर्पणभूतबलिकर्मातिथिपूजनरूपेषु पञ्चसु कर्मसु।

महारजत न० कर्म०। १काञ्चने २धुस्तूरे च अमरः। तस्य हि रञ्जकत्वात् महत्त्वम्, कर्म०। ३बृहद्रौप्ये च।

महारजन न० रञ्जत्यनेन ल्युट् कर्म०। १कुसुम्भपुष्पे अमरः २स्वर्णे च मेदि०।

महारथ पु० "एकादश सहस्राणि योधयेद्यस्तु धन्विनाम्। शस्त्रशास्त्रप्रवीणश्च विज्ञेयः स महारथः" इत्युक्ते योधभेदे

महारस पु० ह्रस्व०। १खर्जूरे २कशेरुणि ३कोषकारे मेदि० ४इक्षौ पु० काञ्जिके न० जटा०। कर्म० ५पारदे पु० राजनि०। "दरदः पारदं शस्यो वैक्रान्तं कान्तमभ्रकम्। माक्षिकं विमलश्चेति स्युरेतेऽष्टौ महारसाः" राजनि० उक्तेषु ४दरदादिषु पु०।

महाराज(जि)क पु० महान् सन् राजते वुन् पृषो० इत्त्वं वा। त्रिंशत्यधिकशतद्वयसंख्याते गणदेवभेदे।

महाराजद्रुम पु० कर्म०। आरग्वधे (सोन्दाल) राजनि०।

महारात्रि स्त्री "ब्रह्मणश्च निपाते च महाकल्पो भवेन्नृप। प्रकीर्त्तिता महारात्रिः" इत्युक्ते महाकल्पात्मके १महाप्रलये "अर्द्धरात्रात् परं यत्तु मुहूर्त्तद्वयमुच्यते। सा महारात्रिरुद्दिष्टा" तन्त्रोक्ते अर्द्धरात्रोपरि मुहूर्त्तद्वयात्मके २रात्रिकाले।

महाराष्ट्र पु० कर्म०। (महाराष्ट्र) १देशभेदे। तद्देशः कारणत्वेन अस्त्यस्याः अच् गौरा० ङीष्। २जलपिप्पल्याम् ३शाकभेदे च स्त्री राजनि०। [शुभे न०।

महारिष्ट पु० कर्म०। १गिरिजाते निम्बभेदे राजनि०। २अत्य-

महारोग पु० कर्म०। "उन्मादो राजयक्ष्मा च श्वासस्त्वग्दोष एव च। मधुमेहश्चाश्मरी च तथोदरभगन्दरौ। इत्येतेऽष्टौ महारोगा महापातकसम्भवाः" इत्युक्तेषु महापातकजन्येषु उन्मादादिषु रोगेषु। (शस्त्रावः शस्त्रावदन्त

महारौरव पु० कर्म०। "महारौरवसंज्ञस्तु ऊर्ध्वाधस्ताम्रसंपुटे। भक्ष्यते खदिराङ्गारैः पच्यते कालमव्ययम्" इत्युक्ते नरकभेदे वह्निपु०।

महार्घ त्रि० महानर्घो मूल्यं यस्य। बहुमूल्ये विश्वः।

महार्णव पु० कर्म०। महासमुद्रे।

महार्द्रक न० कर्म०। वनार्द्रके राजनि०।

महालय पु० महान् आलयो लयो यत्र। १परमात्मनि २तीर्थस्थाने ३विहारे ४कन्यास्थरविकमासकृष्णपक्षे न०। "तस्यां दद्यात् न चेद्दत्तं पितॄणां वै महालये" इति भविष्यपु०। कर्म०। ५बृहदालये।

महालक्ष्मी स्त्री कर्म०। चण्डीद्वितीयचरितदेवतारूपे "देवीं सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्" इत्युक्तलक्षणे अष्टादशभुजान्विते १दुर्गाशक्तिभेदे तन्त्रोक्ते २लक्ष्मीभेदे च।

महानीलसरस्वती स्त्री तारिणीभेदे तन्त्रसा०।

महालोध्र पु० कर्म०। लोध्रभेदे (पाठिया लोध) रत्नमा०।

महावरा पु० वृणोति विस्तृणाति वृ-अच् कर्म०। दूर्वायाम् शब्दर०। [तारभेदे।

महावराह पु० कर्म०। बृहद्वराहरूपधारिणि भगवदव-

महावरोह पु० महान् अवरोहोऽस्य। वटवृक्षे राजनि०।

महावल्ली स्त्री कर्म०। माधवीलतायाम् शब्दच०।

महावाक्य न० कर्म०। परस्परसंबद्धार्थके १वाक्यसमुदायरूपे एकवाक्ये "वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते" मीमांसकाः। वेदान्तोक्ते २ब्रह्मविद्याप्रतिपादके तत्त्वमस्याद्युपनिषद्वाक्ये ३दानादौ अभिलापवाक्ये च।

महाविद्या स्त्री कर्म०। "काली तारा महाविद्या षोडशी भुवनेश्वरी। भैरवी छिन्नमस्ता च विद्या धूमावती तथा। बगला सिद्धविद्या च मातङ्गी कमलात्मिका। एताः दश महाविद्याः" इत्युक्तासु काल्यादिषु दशसु देवीषु।

महाविष पु० ६ब०। द्विमुखसर्पे जटा०।

महाविषुव न०। रवेर्मेषसंक्रमणे। तत्संक्रमणञ्च स्वरूपतः संक्रमणं प्रमाणसिद्धस्य संक्रमणं वा। तत्र प्रमाणसिद्धसंक्रमणमयनांशानुसारेण अष्टमासाधिकषट्पञ्चाशद्वर्षैरेकैकांशं परित्यज्य ततः पश्चात्पश्चात्तरादौ स्थाने भवति इदानीं च पश्चादयनं पूर्वायने तु पूर्वपूर्वतरादौ स्थाने भविष्यति। इत्यतस्तस्य नियतस्थानत्वात् स्वरूपसंक्रमस्तु स्थिरः सर्वदैकस्थाने जायमानत्वात्। अयनसंक्रान्तिशब्दे दृश्यम्।

महावीचि पु० नास्ति वीचिः सुखं यत्र स अवीचिः कर्म०। १सुवर्णहर्त्ते, "यत्र कल्लोलेन नीयते" इत्युक्ते २नरकभेदे च।

महा(वी)वीर पु० कर्म०। १गरुडे २हनुमति ३सिंहे ४यज्ञाग्नौ ५वज्रे ६श्वेततुरङ्गे ७[illegible] च मेदि०। ८शेषजिने च ९कोकिले हेम०। १०धनुर्द्धरे ११एकवीरवृक्षे राजनि० १२महाशूरे पु० १३क्षीरकाकोलीवृक्षे स्त्री रत्नमा०। १४यज्ञसाधने मृण्मये पात्रभेदे तन्निर्माणविधिः कात्या०श्रौ०२६।१ सूत्रादौ दृश्यः।

महा(वी)वीर्य्य पु० ६ब०। १वाराहीकन्दे राजनि०। २परमात्मनि च शब्दर०। ३अतिबलयुते त्रि०। ४वनकार्पास्यां स्त्री राजनि०। ५संज्ञायां सूर्य्यपत्न्याञ्च स्त्री त्रिका०।

महावृहती स्त्री कर्म०। वार्त्ताक्याम् त्रिका०।

महावृक्ष पु० कर्म०। १स्नुहीवृक्षे सुश्रु०। २बृहत्तरौ च।

महाव्याधि पु० कर्म०। महारोगे कुष्ठादौ रोगे।

महाव्याहृति स्त्री कर्म०। वैदिके भूर्भुवःस्वरात्मके मन्त्रत्रये

महाव्रण न० कर्म०। (नालिघा) दुष्टव्रणे।

महाव्रत न० कर्म०। १अतिशयव्रते शारदीयदुर्गापूजादौ "महाव्रतं महापुण्यं शङ्कराद्यैरनुष्ठितम्" देवीपु० २द्वादशवार्षिके प्रायश्चित्तात्मके व्रतभेदे च।

महाशङ्ख पु० कर्म०। तन्त्रे वीराचारप्रसिद्धे नरकपालास्थिजाते "नरकपालास्थिखण्डेन रचिता जपमालिका। महाशङ्खमयी माला तारा विद्याजपे प्रिया" इत्युक्ते १मालाभेदे २बृहच्छङ्खे च। "पौण्ड्रं दध्मौ महाशङ्खम्" गीता। [त्रि०।

महाशठ पु० कर्म०। १राजधस्तूरे राजनि०। २अतिधूर्त्ते

महाशणपुष्पी स्त्री शणस्येव पुष्पमस्य ङीप् कर्म०। बृहच्छणपुष्प्याम् राजनि०। स्वार्थे क। तत्रैव।

महाशता स्त्री शतं मूलानि सन्त्यस्य अच् कर्म०। बृहच्छतावर्य्याम् राजनि०।

महाशतावरी स्त्री कर्म०। बृहच्छतावर्य्याम् राजनि०।

महाशय त्रि० महान् उदार आशयो यस्य। महानुभावे अमरः। [राजनि०।

महाशाखा स्त्री महती शाखास्याः। नागबलायाम्

महाशालि पु० कर्म०। रक्तशालौ हेमच०।

महाशीता स्त्री महती शीता शीतवीर्य्या। १शतमूल्याम् शब्दच०। २अतिशीतले त्रि०।

महाशुक्ति स्त्री महती शुक्ताकारत्वेन मांसस्यैव शुक्तिः।

कन्दाहेतौ गुल्मे राजनि० । [स्त्री ङीप् ।

महाशूद्र पु० कर्म० । १आभीरे (आहीर) जातिभेदे २तत्स्त्र्यां

महाश्मशान न० कर्म० । काश्याम् समूलकर्मनिर्हृतसर्वजीवानां पुनरनुत्पादनाय नाशाधारत्वात् तस्यास्तथात्वम् ।

महाश्यामा स्त्री कर्म० । १श्यामालतायां रत्नमा० । २शिंशपाभेदे राजनि० ।

महाश्रावणिका स्त्री कर्म० । (गुलगुड़ी) क्षुपभेदे राजनि०

महाश्वेता स्त्री कर्म० । १सरस्वत्याम् त्रिका० २कृष्णभूमिकुष्माण्डे च अमरः ।

महाष्टमी स्त्री कर्म० । "आश्विने शुक्लपक्षस्य भवेद् या तिथिरष्टमी । महाष्टमीति सा प्रोक्ता" इत्युक्तायामाश्विनशुक्लाष्टम्याम् । [राजनि० ।

महासर्ज पु० कर्म० । १असनवृक्षे २पनसवृक्षे च (काटाल)

महासह पु० कर्म० । १पुष्पप्रधाने कुब्जकवृक्षे राजनि० ।२माषपर्ण्याम् स्त्री ३अम्लानवृक्षे च स्त्री अमरः ।४अतिसहे त्रि०

महासान्तपन न० । कर्म० । सप्ताहसाध्ये स्मृत्युक्ते व्रतभेदे ।

महासार पु० महान् सारोऽस्य । दुर्खदिरे राजनि० ।

महासिंह पु० नित्यक० । १शरभे राजनि० २बृहत्सिंहे च

महासुगन्धा स्त्री बहु गन्धोऽहिहिंसा यस्याः कर्म० । १गन्धनाकुल्याम् राजनि० २अतिसुगन्धयुक्ते त्रि० ।

महासेन पु० महती सेनाऽस्य । १कार्त्तिकेये अमरः । २बृहत्सेनाधिपतौ च ।

महास्कन्धा स्त्री महान् स्कन्धोऽस्याः । जम्बूवृक्षे राजनि० ।

महाहास पु० कर्म० । अट्टहासे उच्चैर्हासे शब्दर० ।

महाहिगन्धा पु० अहेर्गन्धो हिंसा यस्मात् अहिगन्धो नकुलः समत्वेनास्त्यस्य अच् कर्म० । गन्धनाकुल्याम् राजनि० । [२अतिखर्वे त्रि०

महाह्रस्वा स्त्री कर्म० । १कपिकच्छ्वाम् (आलकुशी) शब्दमा०

महि(ही) स्त्री मह-इन् वा ङीप् ।१पृथिव्याम् । ङीबन्तस्तु मालवदेशस्थे २नदीभेदेऽपि ।

महिका स्त्री मह्यते मह-क्वुन् । हिमे अमरः ।

महिमन् पु० महतो भावः इमनिच् डित्त्वेन टिलोपः । १महत्त्वे २ईश्वरैश्वर्यभेदे हेमच० । [२अर्कवृक्षे च ।

म(मि)हिर पु० मह-(मिह-)वा किरच् ।१सूर्ये त्रिका० ।

महिला स्त्री मह-इलच् ।१योषिति अमरः ।२प्रियङ्गुलतायां ३रेणुकागन्धद्रव्ये राजनि० ४मत्तायां स्त्रियाञ्च शब्दर० । एलच् । महेलापि योषिति शब्दर० ।

महिष पुंस्त्री० मह-टिषच् । १स्वनामख्याते पशुभेदे, स्त्रियां ङीष् । २महिषासुरे च ।३कृताभिषेकायां राजस्त्रियां ४सैरिन्ध्र्याम् ५ओषधिभेदे च स्त्री मेदि० ङीष् । ६व्यभिचारिण्यां स्त्रियां माहिषिकशब्दे दृश्यम् ।

महिषध्वज पु० महिषो ध्वजः चिह्नं वाहनत्वेनास्य । १यमे २जिनभेदे च हेमच० महिषवाहनादयोऽप्यत्र ।

महिषमर्दिनी स्त्री महिषं महिषासुरं मर्द्दयति मृद-णिनि ङीप् ६त० । दुर्गाभेदे । [क तत्रैव ।

महिषाक्ष पु० महिषस्याक्षीव अच्समा० । गुग्गुलुभेदे । स्वार्थे

महिषासुर पु० रम्भासुरेण महिष्यामुत्पादिते असुरभेदे ।

महिषासुरसम्भव पु० महिषासुरात्तनुमेदसः सम्भवति सम्+भू-अच् । भूमिजगुग्गुलौ राजनि० । [नृपे अमरः ।

महीक्षित् पु० महीं क्षयते ईष्टे क्षि-ऐश्वर्ये क्विप् तुक् च ।

महीज न० मह्या जायते जन-ड । १आर्द्रके राजनि० । २मङ्गलग्रहे ३नरकासुरे च पु०४सीतायां स्त्री । [धरोऽप्यत्र ।

महीध्र पु० महीं धारयति धृ-क । पर्वते अमरः । अच् । मही-

महीप्राचीर न० मह्याः प्राचीरमिवावरकत्वात् । समुद्रे त्रिका० । [कम् । १पर्वते २भूमिपाले च ।

महीभृत् पु० महीं बिभर्त्ति धारयति पालयति वा भृ-

महीयस् त्रि० अतिशयेन महान् महत्+ईयसुन् टिलोपः । अतिमहति "महतो महीयान्" श्रुतिः ।

महीयमान त्रि० महीयते मही+कण्ड्वा० यक्-शानच् । १पूज्ये २श्रेष्ठे च "महीयमाना भवताऽतिमात्रम्" भट्टिः ।

महीरुह पु० मह्यां रोहति रुह-क ।१वृक्षे अमरः २शाकवृक्षे राजनि० ।

महीलता स्त्री मह्या लतेव । (केंचो) किञ्चुलुके अमरः ।

महेच्छ त्रि० महती इच्छा यस्य । महाशये अमरः ।

महेन्द्र पु० महान् इन्द्रः इन्द्रस्यापि नियन्तृत्वात् । १परमेश्वरे २महैश्वर्यवति इन्द्रे ३जम्बुद्वीपस्थपर्वतभेदे च मेदि०

महेन्द्रकदली स्त्री महेन्द्रप्रिया तद्वर्णा वा कदली । कदलीभेदे राजनि० । [दयोऽप्यत्र राजनि० ।

महेन्द्रपुरी स्त्री ६त० । अमरावत्याम् । महेन्द्रनगर्या-

महेन्द्रवारुणी स्त्री महेन्द्रश्च वरुणश्च तयोरियं प्रियत्वात् अण् देवताद्वन्द्वे उत्तरपदवृद्धिः कर्म० । (बड़माकाल) लताभेदे राजनि० । [अमरः ।

महेरणा स्त्री मह्यं गजोत्सवमीरयति ल्यु । शल्लकीवृक्षे

महेश पु० कर्म० । शिवे । महेश्वरोऽप्यत्र "महेश्वरस्त्र्यम्बक एव नापरः" इति रघुः ।

महेशबन्धु पु० ६त० । बिल्ववृक्षे शब्दच० ।

महैला स्त्री॰ कर्म॰। स्थूलैलायाम् (बड़एलाचो) राजनि॰।

महोक्ष पु॰ महान् उक्षा अच् समा॰। हहद्वृषे अमरः। "महोक्षं वा महाजं वा श्रोत्रियाय प्रकल्पयेत्" मनुः।

महोटी स्त्री महान्ति फलापेक्षया स्थूलानि उटानि पर्णा-न्यस्याः ङीप्] हहत्यां क्षुपभेदे भावप्र०।

महोत्पल पु॰ कर्म॰। १पद्मे, २सारसपक्षिणि च अमरः।

महोत्सव पु॰ कर्म॰। सन्ततसुखसम्पादकव्यापारे।

महोत्साह त्रि॰ महान् उत्साहो यस्य। अत्यन्तोद्यमयुक्ते महोद्यमोऽप्यत्र।

महोदधि पु॰ कर्म॰। समुद्रे

महोदय पु॰ महान् उदयो वृद्धिराधिपत्यं वा यत्र। १कान्यकुब्जदेशे।२तद्देशस्थे पुरभेदे न॰। ३मोक्षे पुं॰मेदि॰ ४स्वामिनि पुं॰हेमच॰। "अमार्कपाते श्रवणम्" इत्यादि लक्षणात् सूर्य्यकालोदययोगात् "किञ्चिद्दूने महोदयः" इत्युक्ते किञ्चिदूने ५योगभेदे पु॰। ६नागबलायां स्त्री राजनि॰।

महोदरी स्त्री॰ महदुदरं यस्याः। १शतमूल्याम् भावप्र॰। २हहदुदरयुक्ते त्रि॰। [त्रि॰।

महोन्नत पु॰ कर्म॰।१तालवृक्षे भावप्र॰। २अत्यन्तोन्नतियुक्ते

महोरग पु॰ कर्म॰। हहत्सर्पभेदे महोरगाकारोऽस्त्यस्य अच्। २तगरमूले न॰ रत्नमा॰।

महोल्का स्त्री कर्म॰। हहदुल्कायाम्।

महौषध न॰ कर्म॰। १शुण्ठ्याम् २लशुने ३वाराहीकन्दे वत्सनाभे ४विषे, ५भूम्याकुल्यके राजनि॰ ६पिप्पल्याम् शब्दच॰ ७अतिविषायाम् अमरः दवीर्य्यवदौषधमात्रे च।

महौषधि स्त्री कर्म॰। १दूर्वायां २कष्णाक्षुपे शब्दच॰। "सहदेवी तथा व्याघ्री बला चातिबला त्वच। शङ्खपुष्पी तथा सिंही अष्टमी च सुवर्चला। महौषध्यष्टकं प्रोक्तम्" इत्युक्ते ३देवादीनां स्नानीयद्रव्यभेदे। वा ङीप्। ४श्वेत-कण्टकार्य्यां ५ब्राह्म्यां ६कटुकायाम् ७अतिविषायाञ्च राजनि॰ ८हिलमोचिकायाम् त्रिका॰।

महौषधिगण पु॰ "पृश्निपर्णी श्यामलता भृङ्गराजः शता-शतावरी। गुडूची सहदेवी च महौषधिगणः स्मृतः" शब्दच॰उक्ते पृश्निपर्ण्यादौ ओषधिगणे। [अमित भवे।

मा शब्दे चक॰ माने सक॰ जु॰ आ॰ अनिट्। मिमीते

मा माने अदा॰ प॰ सक॰ अनिट्। माति अमासीत्।

मा माने दि॰ ङित् आ॰ सक॰ अनिट्। मायते अमास्त।

मा अव्य॰ ङिदनुबन्धात् देवादिकात् आदादिकाद्वा माधातोः क्विप्। १वारणे। धातोर्ङित्त्वेन शब्दे ङित्त्वग्रहणा-त् "न माङ्योगे" पा॰ ङिदनुबन्धधातुनिष्पन्न योगे न अडागमः तद्भिन्नयोगे तु स्यादेव "मा निषाद। प्रतिष्ठां त्वमगमः" इति रामायणम्। मा-क-टाप्। २ल-क्ष्म्याम् मेदि॰३मातरि च स्त्री। मा-सम्प॰भावे क्विप्। ४माने स्त्री शब्दर॰।

मांस न॰ मन-स दीर्घश्च। "मांस भक्षयिताऽमुत्र यस्य मांस-मिहाद्म्यहम्। इति मांसस्य मांसत्वम्" मनूक्ते प्राणि-देहस्थशोणितपरिपाकजे धातुभेदे भावप्रकाशे मांसवर्गे तद्गुणाः उक्ता दृश्याः। पाकपचनशब्दे परे समासेऽस्या-न्त्यलोपः "मांसपचन्या उखायाः" महाभाष्यम्।

मांसच्छदा स्त्री मांसं छादयति छद-णिच्-अच् ह्रस्वः। मांसरोहिण्यां लतायाम राजनि॰।

मांसज न॰ मांसात् जायते जन-ड। देहस्थे मांसजन्ये मेदसि हेमच॰। अस्थ्न्यादयश्चद्दे दृश्यम्।

मांसदलन पु॰ मांसं ग्रीष्मात्मकं मांसं दलयति दल-णिच्-ल्यु। ग्रीष्मघातकवृक्षे शब्दच॰। [राजनि॰।

मांसद्राविन् पु॰ मांसं द्रावयति णिच्-णिनि। अम्लवेतसे

मांसपेशि स्त्री इत॰। गर्भस्यावयवभेदे। वा ङीप् तत्रैव भावप्र॰। [राजनि॰।

मांसफला स्त्री मांसमिव कोमलं फलं यस्याः। वार्त्ताक्याम्

मांसमासा स्त्री मस-परिणामे घञ् मांसस्य परिणामो यस्याः ५ ब॰। माषपर्ण्याम् राजनि॰

मांसरोहिणी स्त्री मांसं रोपयति रुह-णिच् णिनि हा न पुक्। सुगन्धिद्रव्यभेदे (चामकषा)। राजनि॰।

मांसल त्रि॰ मांस+बलवत्यर्थे लच। १बलवति अमर॰। २स्थूले ३पुष्टे च। [राजनि॰।

मांसलफला स्त्री मांसलं पुष्टं फलमस्याः। वार्त्ताक्याम्

मांससार पु॰ इत॰। मेदसि राजनि॰। मांसस्य सारोऽप्यत्र

मांसहासा स्त्री मांसेन हस्यते कर्मणि घञ्। देहस्थचर्मणि शब्दर॰। [(कसाइ) अमरः।

मांसिक त्रि॰ मांसं पण्यमस्य ठक्। मांसविक्रयोपजीविनि

मांसिनी स्त्री मांसवदाकारस्तद्गन्धत्वं वाऽस्त्यस्याः इनि। जटामांस्याम् राजनि॰।

मांसी स्त्री मांसमस्त्यस्य अच् गौ॰ ङीष्। १जटामांस्याम् २ककोल्याञ्च मेदि॰ ३मांसच्छदायां राजनि॰।

मांसेष्टा स्त्री मांसमिष्टं यस्याः। वल्गुल्यायां खगभेदे राजनि॰

माकन्द पु॰ माति मा-क्विप माः परिमितः कन्दोऽस्य।

१माषे । २मासपर्ण्यां स्त्री राजनि० ३भ्रमरभेदे च स्त्री मेदि० गौरा० ङीष् । ४पीतचन्दने शब्दच० ।

माकरी स्त्री मकरस्य तदुपलक्षितकालस्य इयम् अण् । मकरस्थितरविककाले तदारब्धमाघमासस्य शुक्लसप्तम्यां "तस्मै रोगस्य शोकस्य माकरी हन्तु सप्तमी" ति० त० ।

माक्ष स्पृहायां भ्वा०पर०सक०सेट् इदित् । माङ्क्षति अमाङ्क्षीत् ।

माक्षि(क्षी)क न० मक्षिकाभिः सम्भृत्य कृतम् अण् पृषो० वा दीर्घः । १मधुनि अमरः । तत्तुल्यगुणे उपधातुभेदे २स्वर्णमाक्षिके ३रौप्यमाक्षिके च राजनि० । [राजनि०।

माक्षिकज न० माक्षिकाज्जायते जन-ड । सिक्थके (मोम)

माक्षिकफल पु० माक्षिकमिव मधुरं फलमस्य । मधुनारिकेले राजनि० ।

माक्षि(क्षी)कशर्करा स्त्री ६त० मधुजाते शर्कराभेदे राजनि०

मागध पु० मगधदेशे भवः अण् । १श्वेतजीरके मेदि० २स्तुतिपाठके अमरः क्षत्रियायां वैश्याज्जाते ३वर्णसङ्करभेदे (भाट) च । ४यूथिकायां ५पिप्पल्यां स्त्री मेदि० ङीप् । ६सूक्ष्मैलायां ७शर्करायां शब्दच० ८भाषाविशेषे च स्त्री हेमच० । ९मगधदेशजाते त्रि० ।

मागधस्वारिका स्त्री मौक्तिकावल्युक्ते स्व रिकाभेदे ।

माघ पु० मघानक्षत्रयुक्ता पौर्णमासी अण् ङीप् माघी साऽस्मिन् मासे पुनरण् । चैत्रादिके ११एकादशे चान्द्रे मासे । २तत्पौर्णमास्यां स्त्री ङीप् ३शिशुपालवधकाव्ये ४तत्कर्त्तरि च पु० । "तावद्भा भारवेर्भाति यावन्माघस्य नोदयः" इत्युद्भटः ।

माघ्य न० माघे भवं यत् । कुन्दपुष्पे अमरः ।

माङ्गल्य न० मङ्गलमेव, मङ्गलाय हितं वा ष्यञ् । १मङ्गले २मङ्गलसाधने च । [लतायाम् राजनि० ।

माङ्गल्यार्हा स्त्री माङ्गल्यमर्हति अर्ह-अच् । त्रायमाणा-

माचिका स्त्री मच-ण्वुल् । १अम्बष्ठायां राजनि० । २मक्षिकायाञ्च त्रिका० ।

माञ्जिष्ठ न० मञ्जिष्ठया रक्तमण् । १रक्तवर्णे २तद्वति त्रि०

माठर पु० मन-अरन् ठान्तादेशः ततः स्वार्थे अण् सूर्य्यस्य परिपार्श्वे मठति मठ-अरण् वा । सूर्य्यस्य १पारिपार्श्विकगणभेदे अमरः । २व्यासे मेदि० । ३विप्रे हेमच० । ४शौण्डिके त्रि० कौ० ।

माण(न)क न० मा-आनच् युट् सुट् वा । कनाम्त्यति कन्दभेदे "हरिद्रा माण(न)कं कचुः" नवपत्रिकोक्तौ ।

माणव पु० मनोरपत्यं अण् अल्पार्थे णत्वम् । १अल्पवयस्के मनुष्ये शब्दच० । स्वार्थे क । तदर्थे हारभेदे च हेम० ।

माणवीन त्रि० माणवस्येदम् खञ् । बालकसम्बन्धिनि ।

माणव्य न० माणवानां समूहः यत् । बालकसमूहे ।

माणिक्य न० मणिरिव कायति कै-क स्वार्थे ष्यञ् । (माणिक) १रक्तवर्णे रत्नभेदे, २गृहगोधिकायां स्त्री हेमच० ।

माणिबन्ध(मन्थ) न० मणिबन्ध(मन्थ) पर्वते भवः अण् । सैन्धवलवणे अमरः ।

मातङ्ग पुंस्त्री० मतङ्गस्य मुनेरयम् अण् । १गजे अमरः । २किरातजातिभेदे स्त्रियां ङीप् । ३जैनभेदे पु० हेमच० । ४दशमहाविद्याभेदे स्त्री ङीप्

मातङ्गमकर पु० मातङ्ग इव मकरो जलजन्तुः । महामत्स्यभेदे राजनि० ।

मातरपितृ स्त्री द्वि० व० माता च पिता च द्वन्द्वे मातृशब्दस्य मातरादेशः । मातापित्रोः । पक्षे मातरानङ् । मातापितृ तयोरर्थयोः द्वि० व० ।

मातरिश्वन् पु० मातरि आकाशे श्वयति वर्द्धते श्वि-कनिन् डिच्च अलुक्स० । वायौ अमरः । [इन्द्रसारथौ अमरः ।

मातलि पु० मतं लाति ला-क मतलस्तस्यापत्यम् इञ् ।

माता स्त्री मा-अतच् । जनन्याम् । "विश्वेश्वरीं विश्वमाताम्" इति दुर्गास्तवः । [२तत्पत्न्यां स्त्री गौरा० ङीष् ।

मातामह पु० मातुः पिता मातृ+डामह । १मातुः पितरि

मातुल पु० मातुर्भ्राता मातृ-डुलच् । १मातुर्भ्रातरि अमरः २तत्पत्न्यां वा ङीष् वा आनुक् च । मातुलानी मातुली मातुला च । मद-णिच्-उलच् पृषो० दस्य तः । ३धुस्तूरे ४व्रीहिभेदे ५मदनवृक्षे च मेदि० । ६सर्पभेदे हेम० ।

मातुलपुत्रक न० मातुलस्य धुस्तूरस्य पुत्र इव कायति कै-क । १धुस्तूरे अमरः । ६त० स्वार्थे क । २मातुलसुते ।

मातुलाहि पु० मातुल इवाहिः । मालुधाने सर्पे अमरः ।

मातुलुङ्ग पु० मातुलं गच्छति गम-खच् डिच्च पृषो० । १बीजपूरे भरतः । २मधुकर्कट्याम् स्त्री रत्नमा० । स्वार्थे क । ३बीजपूरे अमरः ।

मातृ त्रि० मा-तृच् । १प्रमाणकर्त्तरि २परिमाणकर्त्तरि ३जीवे ४आकाशे च मातरिश्वा । मातारौ मातारः । मा-तृ । "ब्राह्मी माहेश्वरी चण्डी वाराही वैष्णवी तथा । कौमारी चैव चामुण्डा चर्चिकेत्यष्ट मातरः" इत्युक्ते ५शिवसहचरीभेदे । ६जनन्याम् ७भूमौ ८विभूतौ शब्दर० । ९लक्ष्म्याम् हेमच० १०रेवत्याम् अमर ११स्त्री

गव्यां मेदि० १२आखुकर्ण्याम् १३इन्द्रवारुण्याम् (राखालशसा) १४जटामांस्यां राजनि०। चण्डीप्रसिद्धासु १५देवीशक्तिषु च। "मातः कोपभयाविष्टः" देवीमा०। आतिदेशिकमातरश्च ब्रह्मवै०पु०गण०ख०१५अ०उक्ता यथा "स्तन्यदात्री गर्भधात्री भक्ष्यधात्री गुरुप्रिया। अभीष्टदेवपत्नी च पितुः पत्नी च कन्यका। सगर्भजा या भगिनी पुत्रपत्नी प्रियाप्रसूः। मातुर्माता पितुर्माता सोदरस्य प्रिया तथा। मातुः पितुश्च भगिनी मातुलानी तथैव च। जनानां वेदविहिता मातरः षोडश स्मृताः"।

ब्रह्मवै० पु० जन्मख० ५८ अ० अन्यविधा उक्ता यथा "गुरुपत्नी राजपत्नी देवपत्नी तथा वधूः। पितुः स्वसा शिष्यपत्नी भृत्यपत्नी च मातुली। पितृपत्नी भ्रातृपत्नी श्वश्रूश्च भगिनीसुता। गर्भधात्रीष्टदेवी च पुंसः षोडश मातरः"। तत्रैव २५ अ० "गुरोःपत्नी राजपत्नी विप्रपत्नी च या सती। पत्नी च भ्रातृसुतयोर्मित्रपत्नी च तत्प्रसूः। प्रसूः पित्रोस्तयोर्भ्रातुःपत्नी श्वश्रूः स्वकन्यका। जननी तत्सपत्नी च भगिनी सुरभी तथा। स्वाभीष्टसुरपत्नी च धात्री कान्ता प्रदायिका। गर्भधात्री स्तनाम्नी च भयात्रातुश्च कामिनी। एता वेदप्रणीताश्च सर्वेषां मातरः स्मृताः"। अस्य रूपं मातरौ मातरः। इत्यादौ पूज्यासु गौर्य्यादिषु १६देवीशक्तिभेदेषु "गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः। शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह" शु०त०ब्रह्मपु०।

मातृका स्त्री मातेव कायति कै-क। १उपमातरि २ब्रह्माण्यादिषु चण्डीप्रसिद्धदेवीमूर्त्तिषु ३सर्वमन्त्रोत्पादकेषु अकारादिक्षकारपञ्चाशद्वर्णेषु ४मातरि च मेदि०। मातृ+स्वार्थे क। मातृशब्दार्थे।

मातृबन्धु पु० ६त०। "मातुः पितुःस्वसुः पुत्रा मातुर्मातुःस्वसुः सुताः। मातुर्मातुलपुत्राश्च विज्ञेया मातृबन्धवः" इत्युक्तेषु मातुः पितृष्वस्रीयादिषु। मातृबान्धवोऽप्यत्र।

मातृष्वसृ स्त्री ६त०। मातुर्भगिन्याम् अलुक्स० उभयत्र षत्वम्। मातुःष्वसाप्यत्र।

मातृष्वस्रेय पु० मातृष्वसुरपत्यम् ढक्। १मातुर्भगिनीसुते २तत्कन्यायां स्त्री ङीप्। छण्। मातृष्वस्रीयोऽप्यत्र।

मतृसिंही स्त्री मातुः प्रमातुः सिंहीव। वासकवृक्षे शब्दर०

मात्र न० मा-त्रन्। १साकल्ये २अवधारणे च अमरः। ३परिच्छदे ४अल्पे ५परिमाणे स्त्री अमरः। ६कर्णभूषायाम् ७वित्ते ८वर्णावयवभेदे च स्त्री मेदि०। "कालेन यावता पाणिः पर्य्येति जानुमण्डलम्। सा मात्रा कविभिः प्रोक्ता" इत्युक्ते ९ह्रस्ववर्णोच्चारणकाले च स्त्री। "एकमात्रो भवेद्ध्रस्वः"। मीयन्तेऽनया विषयाः मा-करणे ष्ट्रन्। १०इन्द्रियवृत्तौ। "मात्रास्पर्शास्तु कौन्तेय!" गीता।

मात्रापताका स्त्री छन्दोग्रन्थोक्ते मात्रावृत्तस्थलघुगुरुस्थानानुगुणे पताकाकारे चक्रे।

मात्रामर्कटी स्त्री छन्दोग्रन्थोक्ते मात्रावृत्तस्थलघुगुरुस्थानानुगुणे मर्कटीजालचक्रभेदे। [मेरुचक्रे।

मात्रामेरु पु० छन्दोग्रन्थोक्ते मात्रावृत्तस्थलघुगुरुस्थानानुगुणे

मात्रावृत्त न० मात्रया कृतं वृत्तम्। आर्य्यादौ छन्दोभेदे।

मात्सर्य्य न० मत्सरस्य भावः ष्यञ्। परगुणद्वेषे "मात्सर्य्यमुत्सार्य्य विचार्य्य धूर्य्याः" सा०द०। [मान्थति

माथ बधे सक० क्लेशे अक० भ्वा० प० सेट् इदित्।

माथ पु० मथ-घञ्। १पथि त्रिका०। २मन्थने शब्दर०।

माथुर त्रि० मथुरायां भवो मथुराया आगतो वा अण्। १मथुरानगरीभवे, २तत आगते च।

माद पु० मद-घञ्। १दर्पे २हर्षे च भरतः।

मादक त्रि० मदयति मद-णिच्-ण्वुल्। १मत्तताकारके द्रव्ये। मादयति कर्त्तरि ण्वुल्। २दात्यूहे पुंस्त्री० शब्दमा० स्त्रियां ङीष्।

मादन न० मादयति मद-णिच्-ल्यु। १लवङ्गे शब्दच०। २कामदेवे ३मदनवृक्षे च पु०। ४विजयायां राजनि० ५माकन्दायां स्त्री भावप्र०गौरा०ङीष्। ६हर्षकारके त्रि०।

मादृ(च)(श)श् त्रि० ममेव दर्शनमस्य दृश्-क्स ट क्विप् वा। मम तुल्यदर्शने मत्सदृशे। [ःअतिविषायाञ्च राजनि०।

माद्री स्त्री मद्रे भवा अण्। १पाण्डुराजस्य द्वितीयपत्न्याम्

माधव पु० मायाः धवः। १नारायणे। मधु+स्वार्थे अण्। २वसन्ते विश्वः "स माधवेनाभिमतेन सख्या" कुमारः। मधुने पुष्परसाय मद्याय वा हितः अण्। ३वैशाखे मासि तत्र बहुपुष्पसत्त्वात् तद्धितत्वम्। ४मधूकवृक्षे तत्पुष्पेण हि मद्यसम्भवः। ५अन्धकुके च राजनि०। मधुदाङ्कल्पेनाश्लुपः अण् ६वासन्तीलतायाम् स्त्री ङीप्।

माधवीलता स्त्री कर्म०। स्वनामख्यातायां लतायाम् अमरः।

माधवेष्टा स्त्री माधवे वैशाखे माधवस्य कृष्णस्य वा इष्टा। वाराहीकन्दे राजनि०। [२माधवप्रिये त्रि०।

माधवोचित न० माधवे उचितः। १कक्कोले राजनि०

माधवोद्भव पु० माधवे वैशाखे उद्भवति फलवत्त्वेन उद्+भू-अच् । (पियाल) राजादन्याम् राजनि० ।

माधूर न० मधु-राति भ्रमरेभ्यो ददाति रा-क-स्वार्थे, मधुरस्येदं वा अण् । १मल्लिकापुष्पे त्रिका० । २मधुरसम्बन्धे त्रि० ।

माधुरी स्त्री मधुरस्य भावः ष्यञ् माधुर्य्यं षित्त्वात् स्त्रीत्व पक्षे ङीष् यलोपः । १माधुर्य्ये मधुरत्वे, "मद्यस्येवतन्माधुरी धारा" इत्युद्भटः । मधुरा+स्वार्थे अण् । २मदिरायाम्

माधुर्य्य न० मधुरस्य भावः ष्यञ् । १मधुरत्वे "चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते" सा०द० उक्ते २काव्यगुणभेदे च । तद्व्यञ्जकवर्णाश्च तत्रोक्ता यथा "मूर्द्ध्नि वर्गान्त्यवर्णेन युक्ताः टठडढान् विना । रणौ लघु च तद्व्यक्तौ वर्णाः कारणतां गताः । अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा" । तच्च सम्भोगशृङ्गारादावनुगुणं यथोक्तं तत्रैव "सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात्" ३लावण्ये हेम० । "रूपं किमप्यनिर्वाच्यं तनोर्माधुर्य्यमुच्यते" उज्ज्वलमणौ तल्लक्षणमुक्तम् ।

माध्यन्दिन न० मध्यन्दिनमेव-अण् । मध्यमदिने तत्र पाठः अण् । शुक्लयजुर्वेदीयशाखाभेदे ।

माध्वीक स्त्री मधुना मधूकपुष्पेण च निर्वृत्तम् ईकक् । १मधूकपुष्पजाते मद्ये अमरः । मधु एव अण् स्वार्थे ईकक् । २द्राक्षाफले "माध्वी माध्वीक ! चिन्ता विधत्स्वेति" जयदेवः । [नारिकेले राजनि० ।

माध्वीकफल पु० माध्वीकमिव मधुरं फलमस्य । मधु-

माध्वीमधुरा पु० माध्वीकमिव मधुरा पूर्वो० कलोपः । मधुरखर्ज्जूरिकायाम् राजनि० ।

मान विचारे भ्वा० सक० सेट् स्वार्थे सन् नेट् । मीमांसते अमीमांसिष्ट अर्चायां च तत्र न स्वार्थे सन् ।

मान वार्ते वा चु० उ० पक्षे भ्वा० पर० सक० सेट् । मानयति ते मानति अमीमनत्-त अमानीत् ।

मान न० मा-ल्युट् । १परिमाणे हस्ततुलाप्रस्थादौ द्रव्यपरिच्छेदे भाषा० मानपरिभाषा कर्म्मशब्दे दृश्या । २प्रमाणे "मानाधीनामेयसिद्धि" मीमांसकाः । गानाङ्गे कालक्रियायां तालविरामोपलक्षिते ३कालव्यापारे च मेदि० । मन-घञ् । आत्मनि उत्कर्षाभिमानात्मिकायां ४चित्तसमुन्नतौ पु० अमरः । "स्त्रीणामीर्ष्याप्रकृतो मनो-ऽदिविरोधी मान उच्यते" इत्युक्ते ५अनुरक्तदम्पत्योः ६अवस्थाभेदे पु० । "त्यज मयि मानमनिदानम्" जयदेवः । ७अपमाने च ।

मानग्रन्थि पु० मानस्य ग्रन्थिर्बन्धनं यस्मात् । अपराधे हारा०

मानरन्ध्रा स्त्री मानाय कालप्रमाणज्ञानाय रन्ध्रं यस्याः । ताम्रनिर्मिते सच्छिद्रे कालज्ञानहेतौ घटीयन्त्रभेदे त्रिका० ।

मानव पु० मनोरपत्यम् अण् । १मनुष्ये अमरः । स्त्रियां जातौ ङीप् । सा च २स्वायम्भुवकन्यायाम् भारतम् । ३शासनदेवताभेदे हैम० । ४बाले पु० शब्दर० ।

मानस न० मन एव अण् । १मनसि अमरः । कैलासान्तिकस्थे ब्रह्मणा मनसा कृते २सरोवरभेदे च । मनस इदम् अण् । ३चित्तसम्बन्धिनि त्रि० ।

मानसव्रत न० मनसा कृतं मानसं कर्म० । "अहिंसासत्यमस्तेयं ब्रह्मचर्य्यमलुब्धता । एतानि मानसानि स्युर्व्रतानि" इत्युक्तेषु अहिंसादिषु । [सालयादयोऽप्यत्र

मानसौकस् पु० मानसमोको यस्य । हंसे अमरः मान०

मानिनी स्त्री मान-इनि ङीप् । १फलीवृक्षे मेदि० २मानवत्यां स्त्रियां च । ३मानयुते त्रि० ४सिंहे पु० राजनि० ।

मानुष पु० मनोरयम् अण् सुक् च । मानवे, ततो जातौ स्त्रियां ङीप् मानुषी । मानुषस्येदम् अण् । २मनुष्यसम्बन्धिनि त्रि० स्त्रियां ङीप् सा च ३चिकित्साभेदे शब्दर० ।

मानुष्य न० मानुषस्य भावः यत् । मनुष्यत्वे ।

मानोज्ञक न० मनोज्ञस्य भावः मनोज्ञा० वुञ् । मनोहरत्वे

मान्द्य न० मन्दस्य भावः ष्यञ् । १रोगे हेम० २मन्दतायाम् ।

मान्धातृ पु० मामिन्द्रं धयति धे-तृच् । "मामयं धास्यतीत्यस्मात् मान्धातासौ प्रकीर्त्तितः" इति निरुक्ते युवनाश्वराजपुत्रे नृपभेदे । [२मदन्मालायां स्त्री शब्दमा० ।

मान्य पु० मान-अर्हायां कर्मणि ण्यत् । १पूज्ये जटा० ।

मामक त्रि० मम-इदम् अण्+वुञ् ममादेशः । मत्सम्बन्धिनि खञ् । मामकीनोऽप्यत्र ।

माया स्त्री मा-यत् बा०नैपत्यम् । १कृपायाम् अमरः । २इन्द्रजालादौ ३मिथ्याबुद्धिहेतुज्ञानभेदे, ४कृपायां ५दम्भे ६लक्ष्म्यां च मेदि० । ७बुद्धमातरि स्त्री अमरः । ८ईश्वरस्योपाधौ, अघटनघटनसाधिकायां शक्तौ वेदान्त० । ९पीताम्बरे १०असुरभेदे पु०मेदि० । [(बाजीकर) शब्दर० ।

मायाकृत् पु० मायामिन्द्रजालं करोति कृ-क्विप् । मायाकरे

मायादेवीसुत पु० ६त० । बुद्धे अमरः ।

मायावत् त्रि० माया+अस्त्यर्थे मतुप् मस्य वः । १मायाविशिष्टे २कंसराजे पु० शब्दर० । ३कामपत्न्यां स्त्री ङीप् जटा० ।

मायाविन् त्रि० माया+अस्त्यर्थे विनि । १मायाकरे स्त्रियां ङीप् २बिडाले पु० राजनि० । [मायोप्यत्र ।

मायिक त्रि० मायाऽस्त्यस्य ठन् । मायाकरे जटा० । इनि

मायु पु० मा-उण् माङ्मादेशः । देहस्थे पित्ते धातौ अमरः ।

मायूर न० मयूराणां समूहः तस्येदं वा अण् ।१मयूरसमूहे ।

२मयूरसम्बन्धिनि त्रि० स्त्रियां ङीप् । [याम् राजनि० ।

मायूरी स्त्री मयूरस्येदं प्रियत्वात् अण् ङीप् । अजमोदा-

मार पु० मृ-घञ् । १मरणे । मारयति मृ-णिच्-अच् ।

२कामदेवे ३विघ्ने मेदि० । ४धुस्तूरे च शब्दच० ।

मारक पु० मृ-णिच्-ण्वुल् मृ-णिच् घञ् स्वार्थे क वा ।

१मरके मारिभये त्रिका० । (बाज) २पक्षिभेदे च ।

३नाशके त्रि० । जन्मलग्नावधिकाष्टमस्थानपतौ ४ग्रहभेदे

पु० "आयव्ययाधिपत्येन रन्ध्रेशोमारकः स्मृतः" पराशरः ।

५द्वितीयसप्तमाधीशे च मारकस्थानशब्दे दृश्यम् ।

मारकस्थान न० मारणकारणे स्थाने । "अष्टमं चायुषः

स्थानमष्टमादष्टमञ्च यत् । तयोरपि व्ययस्थानं मारक-

स्थानमुच्यते, इत्युक्ते जन्मलग्नात् सप्तमे द्वितीये च

स्थाने । [देवे अमरः ।

मारजित् पु० मारं कामं जितवान् जि-भूते क्विप् । १जिन-

मारण न० मृ-णिच्-भावे ल्युट् ।१वधे अमरः । करणे ल्युट् ।

वैरिवधसाधने तन्त्रोक्ते अभिचारकर्मभेदे च ।

मारि(री) स्त्री मृ-णिच्-इन् ।१मारणे । वा ङीप् । "मारीभये

राजभये" इति बटुकस्तवः । ङीबन्तः २दुर्गाशक्तिभेदे मेदि० ।

मारिष पु० रिष-हिंसायाम् क निषेधार्थकमाशब्देन स० ।

नाट्योक्तौ १आर्ये हिंसानिवारकतया तस्य तथात्वम् ।

२तण्डुलीयशाके च अमरः ।३दक्षमातरि स्त्री मेदि० टाप् ।

मारीच पु० तारकाराक्षसीपुत्रे रावणानुचरे १राक्षसविशेषे

२कक्कोलके ३याजकब्राह्मणे मेदि० । ४राजगजे पुंस्त्री०

जटा० स्त्रियां ङीष् ।

मारुतव्रत न० "प्रविश्य सर्वभूतानि यथा चरति मारुतः ।

तथाचरैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम्" मनूक्ते राज्ञां

धर्मभेदे । [मारुतरप्यत्र ।

मारुतात्मज पु० ६त० । १हनुमति २भीमे च इञ् ।

मारुतापह पु० मारुतं वायुदोषमपहन्ति अप+हन-ड ।

१वरुणवृक्षे राजनि० । २वायुदोषनाशके त्रि० ।

मार्कण्ड पु० मृकण्डोरपत्यम् अण् पृषो० । १मुनिभेदे

तत्कृते २लताभेदे (भुँइखखसा) स्त्री भावप्र० स्वार्थे

क । तत्रार्थे ।

मार्कण्डेय पु० मृकण्डोरपत्यं शुभ्रा० ढक् पृषो० । १मृ-

कण्डुमुनिपुत्रभेदे तेन प्रोक्तम् अण् । व्यासमपोते पक्षि-

मार्कण्डेयसंवादरूपे २महापुराणभेदे न० । तत्प्रतिपाद्य-

विषयाश्च नारदपु० पूर्वभागे ९७अ० उक्ता यथा ।

"यत्राधिकृत्य शकुनीन् सर्वधर्मनिरूपणम् । मार्कण्डेयेन

मुनिना जैमिनेः प्राक् समीरितम् । पक्षिणां धर्मसंज्ञानां

ततो जन्मनिरूपणम् । पूर्वजन्मकथा चैषां विक्रिया च

दिवस्पतेः । तीर्थयात्रा बलस्याथो द्रौपदेयकथानकम् ।

हरिश्चन्द्रकथा पुण्या युद्धमाजीवकाभिधम् । पितापुत्र-

समाख्यानं दत्तात्रेयकथा ततः । हैहयस्याथ चरितं

महाख्यानसमाचितम् । मदालसाकथा प्रोक्ता अल-

र्काचरिताञ्चिता । सृष्टिसंकीर्त्तनं पुण्यं नवधा

परिकीर्त्तितम् । कल्पान्तकालनिर्देशो यक्षसृष्टिनिरू-

पणम् । रुद्रादिसृष्टिरप्युक्ता द्वीपवर्षानुकीर्त्तनम् ।

मनूनाञ्च कथा नाना कीर्त्तिताः पापहारिकाः । तासु

दुर्गाकथात्यन्तं पुण्यदा चाष्टमेऽन्तरे । तत्पश्चात् प्रण-

वोत्पत्तिस्त्रयीतेजःसमुद्भवः । मार्त्तण्डस्य च जन्मा-

ख्या तन्माहात्म्यसमाचिता । वैवस्वतान्वयश्चापि वत्स-

प्रश्चरितं ततः । खनित्रस्य ततः प्रोक्ता कथा पुण्या

महात्मनः । अविक्षिच्चरितं चैव किमिच्छव्रतकीर्त्तनम् ।

नरिष्यन्तस्य चरितं इक्ष्वाकुचरितं ततः । तुलस्याश्चरितं

पश्चाद्रामचन्द्रस्य सत्कथा । कुशवंशसमाख्यानं सोमवंशा-

नुकीर्त्तनम् । पुरूरवःकथा पुण्या नहुषस्य कथाद्भुता ।

ययातिचरितं पुण्यं यदुवंशानुकीर्त्तनम् । श्रीकृष्णबाल-

चरितं माथुरं चरितं ततः । द्वारकाचरितञ्चाथ कथा

सर्वावतारजा । ततः साङ्ख्यसमुद्देशः प्रपञ्चासत्त्व-

कीर्त्तनम् । मार्कण्डेयस्य चरितं पुराणश्रवणे फलम्" ।

यः शृणोति नरो भक्त्या पुराणमिदमादरात् । मार्क-

ण्डेयाभिधं वत्स ! स लभेत् परमां गतिम् । यस्तु व्या-

कुरुते चैतच्छैवं स लभते पदम् । तत्प्रयच्छेल्लिखित्वा

यः सौवर्णकरिसंयुतम् । कार्त्तिक्यां द्विजवर्य्याय स लभेद्

ब्रह्मणः पदम् । शृणोति श्रावयेद् वापि यथानुक्रमणी-

मिमाम् । मार्कण्डेयपुराणस्य स लभेद् वाञ्छितं

फलम् ।

मार्कव पु० मारयति क्विप्-मारि केशरोगे कूयते कू-अच् ।

भृङ्गराजे (केशरिया) अमरः । [अपमार्गेत न ।

मार्ग संस्कारे सर्पणे च चुरा० उभ० सक० सेट् । मार्गयति

मार्ग अन्वेषणे वा चु० उभ० पक्षे भ्वा० प० सक० सेट् । मार्ग-

यति-ते मार्गति । अममार्गत् त । कमार्गीत् ।

मार्ग पु॰ मृज-घञ् कुत्वं मार्ग-अन्वेषणे वा घञ् । १पथि अमरः । तद्भेदा यथा "त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तैः कृतः । विंशद्धनुर्ग्राममार्गः सीमामार्गो दशैव तु । धनूंषि दश विस्तीर्णः श्रीमान् राजपथः स्मृतः । नृवाजिरथनागानामसम्बाधः सुसञ्चरः । धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः । त्रिकराश्चोपरथ्यास्तु द्विकराश्चोपरथ्यकाः । जङ्घापथश्चतुष्पादस्त्रिपादश्च गृहान्तरम् । वृतिपादस्त्वर्द्धपादः प्राग्वंशः पादकः स्मृतः । अवकरः परिवारः पादमात्रः समन्ततः । प्रावृट्काले तु प्राकृती कर्त्तव्या अन्यथा नहि" देवीपु॰ ।

मार्गण न॰ मार्ग-ल्युट् । १अन्वेषणे अमरः । २याचने ३प्रणये च मेदि॰ । कर्त्तरि ल्यु । ४याचके त्रि॰ ५शरे पु॰ अमरः ।

मार्गशिर पु॰ मृगशिरया युक्ता पौर्णमासी अण् सा यत्र मासे पुनरण् । चान्द्रे १अग्रहायणे मासि २तत्पौर्णमास्यां स्त्री ङीप् शब्दर॰ ।

मार्गशीर्ष पु॰ साधनं मार्गशिरवत् । १अग्रहायणे मासि । अमरः । २तत्पौर्णमास्यां स्त्री ङीप् ।

मार्गित त्रि॰ मार्ग-क्त । अन्वेषिते ।

मार्ज्ज मार्जने सक॰ ध्वनौ अक॰ चुरा॰ उभ॰ सेट् । मार्जयति-ते अममार्जत्-त ।

मार्ज्जन न॰ मृज-ल्युट् । प्रोञ्छनादिना निर्म्मलीकरणे । युच् । तत्रैवार्थे स्त्री । सा च २मुरजध्वनौ हेमच॰ । करणे ल्युट । सम्मार्जन्याम् (झाँटा) । स्त्री ङीप् अमरः ।

मार्ज्जार(ल) पुंस्त्री॰ मृज-आरन् वा रस्य लः । १बिड़ाले अमरः स्त्रियां ङीष् । २रक्तचित्रके पु॰ राजनि॰ । ३खट्टाशे च हेमच॰ । ततः संज्ञायां कन् । मयूरे ।

मार्ज्जारगन्धा स्त्री मार्ज्जारस्येव गन्धो यस्याः । मुद्गपर्णीभेदे रत्नमा॰ । स्वार्थे क अत इत्त्वम् । तत्रैव ।

मार्ज्जारी स्त्री मृज-आरक् गौरा॰ ङीष् । १कस्तूर्याम् २खट्टाशजन्तौ ३मार्जारयोषिति च मेदि॰ ।

मार्ज्जारी(ली)य पुंस्त्री॰ मार्ज्जार+(ल) स्वार्थे छ, मृज-आरीयक् रस्य लत्वम् वा । १बिड़ाले २शूद्रे च स्त्रियां टाप् ३कायशोधने पु॰ मेदि॰ ।

मार्जित पु॰ मार्ज-क्त । २शोधिते । दधि-खण्डमधुसर्पिर्मरिचादिकृते कर्पूरादिवासिते भक्ष्यभेदे स्त्री (रसा) । भरतः

मार्त्तण्ड पु॰ मृते अण्डे भवः अण् शक॰ । १सूर्ये । तस्य मृताण्डजत्वम् च "मारितञ्च यतः प्रोक्तमेतदण्डं त्वयोदित । तस्मान्मुने ! सुतस्तेऽयं मार्त्तण्डाख्यो भविष्यति" मार्क॰ पु॰ । २अर्कवृक्षे अमरः । ३शूकरे पुंस्त्री॰ मेदि॰ स्त्रियां ङीष् ।

मार्त्तिक न॰ मृत्तिकया निर्मितम् अण् । १शरावे (शरा) शब्दर॰ । २मृण्मये त्रि॰ । [शाद्वले अमरः ।

मार्दङ्गिक त्रि॰ मृदङ्गः तद्वादनं शिल्पमस्य ठक् । मृदङ्ग-

मार्द्दव न॰ मृदोर्भावः अण् । १मृदुत्वे २परदुःखासहिष्णुतायाम् ३द्रवीभावे च "अभितप्तमयोऽपि मार्द्दवं भजते कैव कथा शरीरिणाम्" रघुः । ४सङ्कीर्णजातिभेदे पुंस्त्री॰ जटा॰ । स्त्रियां ङीष् । [२नाट्योक्तौ ज्येष्ठे हेमच॰ ।

मार्ष पु॰ मृष-क ततः स्वार्थे अण् । १तण्डुलीयशाके भरतः

मार्ष्टि स्त्री मृज-क्तिन् । शोधने ।

माल पु॰ मल-संज्ञायां कर्त्तरि घञ् । "माला भिल्लाः किराताश्च सर्वेऽपि म्लेच्छजातयः" हेमच॰ उक्ते १म्लेच्छभेदे २विष्णौ पु॰ भरतः । ३देशभेदे ४क्षेत्रे मेदि॰ ५कपटे ६वने हेमच॰ ।

मालक न॰ मल ण्वुल् । १स्थलपद्मे जटा॰ । २नारिकेलपात्रभेदे पु॰ (माला) । ३निम्बवृक्षे पु॰ अमरः ।

मालकोश पु॰ रागभेदे तस्य गानसमयः शरदृतौ रात्रिशेषः ।

मालती स्त्री मां लक्ष्मीं शोभां वा लतति वेष्टते लत-अच् गौरा॰ ङीष् । १जातीलतायां २युवत्यां अमरः । ३काकमाच्यां ४नदीभेदे ५विशल्यायां ६ज्योत्स्नायां ७निशायाञ्च हेमच॰ ।

मालतीतीरज पु॰ मालत्या नदीभेदस्य तीरे जायते जन-ड । टङ्कणे (सोहागा) हेम॰ । मालतीतीरभवादयोऽप्यत्र

मालतीपत्री स्त्री मालत्यास्तन्नामकजात्या इव पत्रमस्याः । जातीपत्राम् (जैयत्री) राजनि॰ । [जातीफले राजनि॰ ।

मालतीफल न॰ मालत्यास्तन्नामकजात्याः फलम् । (जायफल)

मालभारिक त्रि॰ मालानां भारोऽस्त्यस्य ठन् पूर्वपदह्रस्वः । मालानां भारवति । [सङ्गीतदा॰ ।

मालव पु॰ । १अवन्तिदेशे (मालओयार देश) २रागभेदे च

मालविका स्त्री मालवे भवा ठक् । त्रिवृति (तेओड़ि) राजनि॰ ।

मालसी स्त्री मालं मलनं जटादिना दुष्टत्वं स्यति सो-क गौरा॰ ङीष् । १केशपुष्पिकारके वृक्षे शब्दच॰ । २रागिणीभेदे च सङ्गीतदा॰ ।

माला स्त्री मल-संज्ञायां कर्त्तरि घञ् । १श्रेण्यां हेम-

जपसंख्यार्थे रुद्राक्षादिबीजघटितायां २माल्यभेदे च ।
मालाकण्ट पु० मालाकारः कण्टः कण्टको यस्य । अपामार्गे राजनि० ।
मालाकन्द पु० मालाकारः कन्दो यस्य । मूलभेदे राजनि०।
मालाकार पुंस्त्री० मालां करोति कृ-अण् । (मांली) १वर्ण-सङ्करभेदे स्त्रियां ङीष्। २माल्यकारके त्रि० ।
मालाग्रन्थि पु०मालया ग्रन्थिरत्र । नालादूर्वायाम् राजनि०
मालातृण न० मालाकारं तृणम् । भूस्तृणे अमरः । स्वार्थे क । तत्रैव ।
मालादीपक न० अर्थालङ्कारभेदे अलङ्कारशब्दे दृश्यम् ।
मालादूर्वा स्त्री मालाकारा दूर्वा । (गांठिदूर्वा) दूर्वाभेदे राजनि० । [राजनि०
मालारिष्टा स्त्री मालाभूतमरिष्टं यस्याः ५ ब० । पाठ्याम्
मालाली स्त्री मालामलति भूषयति अल-अण् ङीप्। पृक्कायां (पिडिङ्गशाक) राजनि० स्वार्थे क । तत्रैव ।
मालिक पुंस्त्री० माला तन्निर्माणं शिल्पमस्य ठन् । १माला-कारे जातिभेदे अमरः २पक्षिभेदे पुंस्त्री० मेदि० ।स्त्रियां ङीष् । ३रञ्जके शब्दर० । ४माल्यकारके त्रि० ।
मालिका स्त्री मालैव कन् अत इत्त्वम् । १वनमल्लिकायां २ग्रीवालङ्करणे ३नदीभेदे ४पुष्पमाल्ये ५पुत्र्यां च मेदि० ६सुरायां हारा० । ७अतस्याम् शब्दच० "शशाङ्कमालि-काम्भोज" इति लक्ष्मीध्यानम् ।
मालिन् पु० माला शिल्पमस्त्यस्य इनि। १मालाकारे २माल्यवति त्रि० ३मालाकारपत्न्यां ४पञ्चदशाक्षरपादके, "ननमयययुतेयं मालिनी भोगिलोकैः" वृ० र० उक्ते ५छन्दोभेदे । ६गौर्याम् ७चम्पानगर्यां ८मन्दाकिन्यां कण्वाश्रमान्तिकस्थे ९नदीभेदे १०मातृकाभेदे च स्त्री मेदि० ङीप् । ११अग्निशिखावृक्षे दुरालभायां स्त्री शब्दच० ङीप् ।
मालु स्त्री मल-उण् ।१पत्रलतायां (पातलता)२नार्याञ्च मेदि०
मालुधान पु० मालुरिव पत्रलतेव धीयतेऽसौ धा-कर्मणि ल्युट् । (मालुयाधाप) १सर्पभेदे अमरः । २लताभेदे स्त्री ङीप् मेदि० । [२कपित्थे च राजनि० ।
मालूर पु० मां लक्ष्मीं परेषां लुनाति लू-रक् ।१बिल्वे अमरः
मालेय त्रि० मालायां साधुः ढक् । १मालाकारपत्नीपुष्पे २स्थूलैलायां स्त्री रत्नमा० ।
माल्य न० मालायै हितं यत् । १पुष्पे । स्वार्थे ष्यञ् । २पुष्पमालायाम् ।३मूर्द्धस्थायां पुष्पमालायाञ्च अमरः ।
माल्यपुष्प पु० मालायै हितं माल्यं पुष्पमस्य । १शणवृक्षे २शणपुष्प्याम् स्त्री राजनि० ङीप् । कप् । माल्य-पुष्पिका तत्रैवार्थे ।
माल्यवत् त्रि० माल्यमस्त्यस्य मतुप् मस्य वः । १माल्ययुक्ते केतुमालेलावृतवर्षयोः सीमाभूते २पर्वतभेदे ३सुकेशराक्षस पुत्रे रावणमन्त्रिणि राक्षसभेदे च । [धके त्रिका० ।
माशब्दिक त्रि० मेति शब्दं निषेधाय करोति ठक् । निषे-
माष पु०मष-संशायां कर्त्तरि घञ् । (माषकलाइ) व्रीहिभेदे "दशार्द्धगुञ्जं प्रवदन्ति माषम्" इत्युक्ते "गुञ्जाभिर्दशभिर्माष" इत्युक्ते च २परिमाणभेदे । स्वार्थे क । तत्रार्थे ।
माषकलाय पु० माषाख्यः कलायः । स्वनामख्याते व्रीहौ
माषपर्णी स्त्री माषस्येव पर्णान्यस्याः ङीप्। वनमाषे अमरः
माषभक्तबलि पु० माषमिश्रितं भक्तमेव बलिः पूजोपहार द्रव्यम् । माषमिश्रिते भक्तरूपे पूजोपहारे ।
माषवर्द्धक पु० माषं माषपरिमितं स्वर्णं वर्द्धयति छिन्ति अपहरति वृध-छेदने ण्वुल् । स्वर्णकारे शब्दमा०।
माषीण न० माषाणां भवनं क्षेत्रं खञ् । माषव्रीहिभवन योग्ये क्षेत्रे । यत् । माष्यमप्यत्र ।
मास् पु० माति परिच्छिनत्ति स्वगत्या कालम् मा-असुन् । १चन्द्रे २त्रिंशद्दिनात्मककालरूपे मासे च ।
मास पु० मासि अण् ।१चन्द्रे त्रिंशद्दिनात्मके २काले च । स च सौरसावनचान्द्रनाक्षत्रभेदाच्चतुर्विधः । मासचन्द्र-स्येदम् अण् ।३चान्द्रे मासे त सङ्क्षेपः । मस्यते परिमी-यतेऽनेन मस परिमाणे करणे घञ् । परिमाणपञ्चगुञ्जा-त्मके भरतः । स्वार्थे क । माषक तत्रैवार्थे ।
मासन न०मासं नयति नी-ड। सोमराजीलतायाम् शब्दच०।
मासप्रमित पु० मासं प्रमातुमारब्धः प्र+मा-क्त । "कालाः परिमाणे" पा० सू० । प्रतिपच्चन्द्रे ।
मासर पु०मस-परिणामे घञ् मासं परिणामं राति रा-क । भक्तमण्डे अमरः । [मासावसाने संक्रान्त्यादौ ।
मासान्त पु० मासस्य सौरस्य चान्द्रस्य वाऽन्तः अवसानम्
मासिक त्रि० मासि भवः कालाट्ठञ् । १मासभवे प्रेतो-द्देशेन मृतसजातीयतिथ्यादौ, प्रतिमासम् अमावस्यायां च कर्त्तव्ये २श्राद्धे न०। "मासि मासि स्वकीये तु एटन्तिः । "पितृणां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः" इत्यादिः ।
मास्म अव्य० मस-णिच्-बा० मप् । निवारणे ।
माह माने भ्वा० उभ० सक० सेट् । माहति ते अमाहीत् अमाहिष्ट । ममाह ममाहे । ऋदित् चङि न ह्रस्वः ।

माहाकुल त्रि० महाकुले भवः अण् महाकुलोद्भवे । खञ् माहाकुलीनोऽप्यत्र त्रि० ।

माहात्म्य न० महात्मनो भावः ष्यञ् । महिमनि महत्त्वे ।

माहिष न० महिष्या इदम् अण् ।१महिषीदुग्धादौ तांहिष-स्येदम् अण् । २तच्छृङ्गादौ त्रि० ।

माहिषिक पु० "महिषीत्युच्यते नारी या च स्याद् व्यभिचारिणी । तां दुष्टां कामयति यः स वै माहिषिकः स्मृतः" काशीपु० उक्ते १व्यभिचारिणीपतौ "महिषीत्युच्यते भार्य्या भगेनोपार्जितं धनम् । उपजीवति यस्तस्याः स वै माहिषिकः स्मृतः" विष्णुपु० व्याख्यायां श्रीधरधृतवाक्योक्ते व्यभिचारिस्त्रिया २भगोपार्जितद्रव्योपजीविनि च । [पादिते सङ्करजातिभेदे अमरः ।

माहिष्य पु० महिष्यां भवः ष्यञ् । क्षत्रेण वैश्यायामुत्-

माहेन्द्र पु० महेन्द्रस्यायम् अण् । ज्योतिषोक्ते महेन्द्रसम्बन्धिनि १दण्डभेदे । २पूर्वस्यां दिशि ३इन्द्रपत्न्यां ४गवि च स्त्री राजनि० ङीप् । [ओनव्या स्त्री अमरः ङीप् ।

माहेय पु० मह्या अपत्यम मही+ढक् । १मङ्गले २नरकासुरे च

माहेश्वर त्रि० महेश्वरादधिगतम् ततः आगत अण् ।१महेश्वरतः प्राप्ते सि०कौ० ।२यवतिक्तायां स्त्री राजनि० ङीप् तस्येदम् अण् "माहेश्वरी वृषारूढा" इत्युक्ते ३मातृभेदे ४दुर्गायाञ्च स्त्री ङीप् ।

मि क्षेपे स्वा० उभ० सक० अनिट् । मिनोति मिनुते अमासीत् अमास्त । डुव क्त्रि मप् च मित्रिमम् ।

अनु+व्याप्तिहेतुके परामर्शाधीनज्ञाने ।

उप+सादृश्यहेतुके ज्ञानभेदे ।

प्र+यथार्थज्ञाने ।

मिच्छ बाधे तुदा० पर० सक० सेट् । मिच्छति अमिच्छीत् ।

मित त्रि० मि क्त-मा-क्त । १परिमिते, २धृते ३क्षिप्ते च ।

मितङ्गम पुंस्त्री० मितं परिमितं यद्-गच्छति गम-खच् मुम् च । १गजे सि०कौ० स्त्रियां ङीप् । २परिमितगामिनि त्रि० स्त्रियां टाप् ।

मितद्रु पु० मितं द्राति द्रवति वा द्रु त्रि० । समुद्रे हेमच० ।

मितम्पच पु० मितं पचति पच खच् मुम् च । १कृपणे अमरः । २परिमितपाचके त्रि० ।

मिति स्त्री मा-मि-मा क्तिन् । १ज्ञाने, २माने, ३अवच्छेदे, ४विक्षेपे च । ज्ञानमात्रस्य मितिमात्रमेयविषयत्वमिति गुरवः ।

मि(म्ले)त न० मिद्यति स्निह्यति मिद-क्त । १क्रोधान्विते सुहृदि,

राज्ञां विद्यमानन्तरितप्रपादितरत्रिन् २राजनि तयोर्द्वयोरपि मध्यस्थत्वप्राप्त राज्यहरणरूपैककार्य्यकरत्वात् मित्रत्वम् । मि-त्र । एकतकारः ३सूर्य्ये पु० अमरः ४अर्कवृक्षे ।

मित्त्रयु पु० मित्त्रं याति या-कु । मित्त्रवत्सले हेमच० ।

मिथ वधे मेधायाञ्च सक० भ्वा० उभ० सेट् । मेथति-ते अमेथीत् अमेथिष्ट । ऋदित् चङि न ह्रस्वः । [अमरः ।

मिथस् अव्य० मिथ-असुन् । १रहसि, २अन्योन्यमित्यर्थे

मिथि पु० निमिराजपुत्रे विष्णुपु० ।

मिथिला स्त्री मिथि+अस्त्यर्थे लच् । जनकस्थापितायां मिथिराजधान्याम् । [दितस्तृतीये राज्ञी च ।

मिथुन न० मिथ-उनन् किच्च । १स्त्रीपुंसयोर्युग्मे २मेषा-

मिथ्या अव्य० मिथ-क्यप् । अयथार्थे असत्ये ।

मिथ्यादृष्टि स्त्री मिथ्या सफलस्यापि अफलत्वेन दृष्टिः । नास्तिकतायां सफलस्यापि वैदिककर्मणो निष्फलत्वज्ञाने अमरः । [क्षेमे करणे ल्युट् । शपथे भरतः ।

मिथ्यानिरसन न० मिथ्या निरस्यतेऽनेन निर्+अस-

मिथ्याभियोग पु० मिथ्याभूतेनासत्येनाभियोगः राज्ञोऽन्तिके वेदनम् अभि-युज-घञ् । शतं मे धारयतीत्यसत्यस्य राज्ञोऽन्तिके अभियोगे अमरः ।

मिथ्याभिशंसन न० मिथ्याभूतेनासत्येनाभिशंसनम् अपवादः "त्वया स्वर्णमपहृतम्" इत्यपवादकथने ।

मिथ्याभिशाप पु० मिथ्याभूतेनासत्येनाभिशापोऽपवादः । मिथ्यापवादे । [अतद्वति तद्वत्त्वेन ज्ञाने ।

मिथ्यामति स्त्री मिथ्याभूतस्य मतिः मन-क्तिन् । भ्रान्तौ-

मिथ्योत्तर न० कर्म० । व्यवहारे "मिथ्यैतत् नाभिजानामि तदा तत्र न सन्निधिः । अजातश्चास्मि तत्काले इति मिथ्या चतुर्विधम्" इत्युक्तप्रकारे, उत्तरभेदे, ("मिथ्योत्तरे पूर्ववादे")इति स्मृतिः । [ऋदित् चङि न ह्रस्वः ।

मिद बाधे मेधायाञ्च भ्वा० उ०सक०सेट् । मेदति-ते अमेदीत्

मिद स्नेहे भ्वा० आ० लुङि प० अक० सेट् । मेदते इरित् अमिदत् आदित् भावादौ क्ते मिन्नं मेदितम् ।

मिद स्नेहे वा चु० उभ०पक्षे भ्वा०अक०सेट् इदित् । मिन्दयति अमिन्दत्-त । पक्षे मिन्दति अमिन्दीत् ।

मिद स्नेहे दि० पर० अक० सेट् । मेद्यति-ते इरित् अमिदत् अमेदीत् । आदित् क्त मेदितं मिन्नम् ।

मिद स्नेहे चु० उभ० अक० सेट् । मेदयति-ते अमीमिदत्-त

मिन्मिन त्रि० सानुनासिकवाक्यकारके १रोगभेदे २तद्युते

त्रि०। "आहत्य वायुः सकफो धमनीः शब्दवाहिनीः। नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान्" अत्र च नात् ईषदर्थे नञ्। तत्र वायोर्बाहुल्ये मूकत्वम् मध्यमत्वे सानुनासिकशब्दकारकता अल्पत्वे गद्गदकरत्वमिति भेदः।

मिल श्लेषे तु०उभ० सक० सेट्। मिलति अमेलीत् अमेलिष्ट कुटादिरयमित्येके तेन अमिलीत् ल्युटि मिलनम्।

मिव सेके भ्वा० पर० सक० सेट् इदित्। मिन्वति अमिन्वीत्।

मिश ध्वनौ अक० कोपे सक० भ्वा० पर० सेट्। मेशति अमेशीत्।

मिशि(शी) स्त्री मिश-इन् वा ङीप्। १मधुरिकायां (मौरी) २शतपुष्पायां, (सुलफा) भरतः ३जटामांस्याञ्च शब्दर०। अत्र दन्त्यो०मिषि मिषी मिसि-मिसी इत्यादयः उक्तार्थेषु। तत्र पाठान्तरम्। [यति-ते अमिमिश्र(स्र)त् त।

मिश्र (स्र) योजने अद० चु० उभ० सक० सेट्। मिश्र(स्र)

मिश्र त्रि० मिश्र अच्।१संयुते उत्तरपदस्थः २श्रेष्ठार्थे। यथा आर्य्यमिश्राः। ३गजजातिभेदे पु० हेमच०। ४ज्योतिषोक्ते कृत्तिकाविशाखानक्षत्रगणे च पु०। संज्ञायां कन्। ५इन्द्रवने जटा० ६भोमरत्नवणे राजनि०।

मिश्रकावण न० मिश्रकनामकं वनं पूर्वदीर्घो णत्वञ्च। १इन्द्रोद्याने। [कायाम् राजनि०।

मिश्रपुष्पा स्त्री मिश्रं पुष्पं यस्याः अजा० टाप्। मेथि-

मिश्रवर्ण न० मिश्रचित्रो वर्णो यस्य। १कृष्णागुरुणि राजनि० २मिश्रितवर्णमात्रे त्रि०। [वार्त्ताक्यां राजनि०

मिश्रवर्णफला स्त्री मिश्रवर्णं चित्ररूपान्वितं फलं यस्याः।

मिश्रव्यवहार पु० लीलावत्युक्ते गणनाभेदे।

मिश्रिता स्त्री "मिश्रिता चैव विज्ञेया मिश्रितर्क्षैस्तु संक्रमः" इत्युक्ते १कृत्तिकाविशाखानक्षत्रकाले रविसंक्रमणे। २गौरविते न० जटा० ३मिलिते त्रि०।

मिश्रेया स्त्री मिश्र-अच् मिश्रा ईयते ई गतौ यत् एया कर्म० स० १मधुरिकायां (मौरी) अमरः। २शतपुष्यायाञ्च (सुलफा) राजनि०। [क्त्वा वेट्।

मिष सेचने भ्वा० पर० सक० सेट्। मेषति अमेषीत्। उदित्

मिष पराभिभवेच्छायाम् तु० पर० सक० सेट्। मिषति अमेषीत् मिमेष।

मिष न० मिष-क। १छले २स्पर्द्धने पु० मेदि०।

मिषिका स्त्री० मिषी+स्वार्थे क। जटामांस्याम् शब्दार्थचि०।

मिष्ट त्रि० मिष-क्त। १सिक्ते २स्पर्द्धिते च। ३मधुररसे पु० ४तद्वति त्रि० भावप्र०।

मिह सेचने भ्वा० पर० सक० अनिट्। मेहति अमिक्षत।

मिहिका स्त्री मिह-क्वुन् अत इत्वम्। नीहारे शब्दर०।

मिहिर पु० मिह-किरच्। १सूर्य्ये २अर्कवृक्षे ३वृद्धे मेदि० ४मेघे हेमच० ५वायौ, ६चन्द्रे, विक्रमादित्यसभास्थे नवरत्नमध्यस्थे पण्डितभेदे च पु०शब्द०। तच्चिन्त्यम्। "धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः। ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य" ज्योतिर्विदाभरणवाक्ये वराहः मिहिर इत्येव तत्र समासे वराहमिहिर इत्येकः "वराहमिहिरात्मजेन पृथुयशसा" तत्पुत्रकृतषट्पञ्चाशिकायामुक्तेः द्वित्वे वररुचिना सह दशसंख्यापत्तेश्च।

मी बधे दि० आ० सक० अनिट्। मीयते अमेष्ट।

मी बधे क्र्या० उ० सक० सेट्। मीनाति मीनीते अमासीत् अमास्त। ओदित् क्त मीनः।

मी गत्यां मत्याञ्च वा चु० उभ०पक्षे भ्वा०पर० सक० अनिट्। माययति ते मयति अमीमयत्-त अमैषीत्।

मीढ त्रि० मिह-क्त। मूत्रिते।

मीढुष्टम पु० मीढुस्+अतिशये तमप् नि०। शिवे।

मीढुस् पु० मिह-क्वसु नि०। शिवे।

मीन पुंस्त्री० मी-नक्।१मत्स्ये अमरः स्त्रियां ङीष्। मेषादितो द्वादशे २राशौ ३भगवदवतारभेदे च पु०।

मीनकेतन पु० मीनः केतनं यस्य। कन्दर्पे अमरः। मीनध्वजादयोऽप्यत्र। [राजनि० मीनाक्षीत्यादयोऽप्यत्र।

मीननेत्रा स्त्री मीनस्य नेत्रमिव पन्थिरस्याः। गण्डदूर्वायां

मीनाण्डा स्त्री मीनस्याण्डस्तदाकारा रेणुकाऽस्त्यस्य अच् गौ० ङीष्। शर्करायाम् राजनि०।

मीम शब्दे अक० गतौ सक० भ्वा० पर० सेट्। मीमति अमीमीत्। ऋदित् चङि न ह्रस्वः।

मीमांसक पु० मीमांसां वेत्त्यधीते वा वुन्। १मीमांसाशास्त्रज्ञे २तदध्येतरि च। मान-विचारे स्वार्थे सन् ण्वुल्। ३सिद्धान्तकारके।

मीमांसा स्त्री मान-विचारे स्वार्थे सन् अ। १विचारपूर्वकतत्त्वनिर्णये २तत्प्रतिपादकग्रन्थभेदे च स च ग्रन्थः कर्मब्रह्मविषयभेदेन द्विविधस्तत्र कर्मकाण्डविषयसंशयनिवारको ग्रन्थो जैमिनिप्रणीतः स च पूर्वमीमांसात्वेन प्रसिद्धः ब्रह्मविषयसंशयनिवारकश्चरमः स वेदान्तत्वेन प्रसिद्ध।

मील निमेषे भ्वा० पर० अक० सेट्। मीलति अमीलीत्। ऋदित् चङि वा ह्रस्वः।

मीलन न० मील ल्युट्। १सङ्कोचे २चक्षुर्मीलने च।

मीलित त्रि० मील-क्त। १अप्रफुल्ले २सङ्कुचिते च "मीलितं यदभिरामताधिके" इति काव्यप्रकाशः।

मीव स्थूलीभवने भ्वा० पर० सक० सेट्। मीवति अमीवीत्।

मु पुः मोचयति जीवान् ण्यर्थे मुच डु। १मञ्चे शब्दच० २बन्धने एका०। [पद्मरत्ने भरतः।

मुकन्दक पु०मुदः मुदे कन्दो यस्य कप् पृषो० मुदो दलोपः।

मकु पु० मुच-कु पृषो० चस्य कः।१मोचे शब्दच०२उद्धर्गे च

मुकुट पु० मकि-उट पृषो०।१शिरोभूषणे अमरः। २कुकुटी-मोटने स्त्री शब्दर० ङीप्।

मुकुन्द पु० मुकुं ददाति दा-क पृषो०मुम्। "मुकुमव्ययमानन्दं निर्वाणमोक्षवाचकम्। तद्ददाति च यो देवः मुकुन्दस्तेन कीर्त्तितः" "मुकुम् भक्तिरसप्रेमवचनं वेदसम्मतम्। यस्तद् ददाति भक्तेभ्यो मुकुन्दस्तेन कीर्त्तितः" ब्रह्मवै० जन्मख०११०अ० इति वा निरुक्तं विष्णौ।

मुकुम् अव्य०मकि उमुच् पृषो०। १निर्वाणमोक्षे २भक्तिप्रेमरसे च मुकुन्दशब्दे दृश्यम्।

मुकुर पु०मकि—उरच् पृषो०। १दर्पणे, २बकुलवृक्षे ३कुलालदण्डे, मेदि० ४मल्लिकावृक्षे, विश्वः ५कोरकवृक्षे, शब्दर०। ६कोरके च हेमच०।

मुकुल पु० न० मकि—उलच् पृषो०। १ईषद्विकसितकलिकायाम् अमरः २देहे, ३आत्मनि च धरणिः।

मुकुष्टक पु० मुकुमर्थोऽस्त्यर्गस्तं स्तकति ष्टक-अच् पृ० अत्वम्। वनमुद्गे अमरः पृषो० मुकुष्ठक तत्रार्थे।

मुकूलक पु० मकि—ऊलच् संज्ञायां कन्। दन्तिवृक्षे। राजनिघ०। [च शब्दर०।

मुक्त त्रि० मुच क्त। १त्यक्ते, २प्राप्तमोक्षे मेदि०। ३आनन्दिते

मुक्तरसा स्त्री मुक्तो रसो यस्याः। रास्नायाम् रत्नमा०।

मुक्तसङ्ग त्रि० मुक्तः सङ्गोविषयासक्तिर्येन। १त्यक्तसर्वविषयासक्ते २परिव्राजके पु०। [स्तो येन। दानशूरे।

मुक्तहस्त त्रि० मुक्तः दानाय प्रसारितः न बद्धः हस्तो यावद्

मुक्ता स्त्री मुच-क्त। १रास्नायाम् रत्नमा० २मुक्तिके (मति) रत्नभेदे च।

मुक्तापुष्प पु० मुक्तेव शुभ्रं पुष्पमस्य। कुन्दवृक्षे राजनि०।

मुक्ताप्रसू स्त्री मुक्तां प्रसूते प्र+सू-क्विप् ६त०। शुक्तौ राजनि०। [मुक्ताहारे हेमच०।

मुक्ताप्रालम्ब पु० मुक्तया मुक्ताविरचिततया प्रालम्ब्यते घञ्।

मुक्ताफल न० मुक्ता फलमिव। १मौक्तिके, २लवलीफले, (नोनाड़) ३कर्पूरे च मेदि०। ४बोपदेवकृते भक्तिप्रधाने ग्रन्थभेदे च "चतुरेण चतुर्वर्गचिन्तामणिविपश्चिता। हेमाद्रिर्बोपदेवेन मुक्ताफलमचीकरत्" तद्ग्रन्थस्य पद्यम्।

मुक्तालता स्त्री मुक्तया लतेव। मुक्ताहारे हेमच०।

मुक्तावली स्त्री मुक्तया आवली हारभेदः। १मुक्ताहारे अमरः। ६त०। २मुक्ताश्रेण्यां भाषापरिच्छेदग्रन्थटीकायां ३सिद्धान्तमुक्तावल्यां च। [मुक्तौ अमरः।

मुक्तास्फोट पु० स्फुट्यते विदीर्यते स्फोटः मुक्तायै स्फोटः।

मुक्ति स्त्री मुच क्तिन्। १मोचने २संसारबन्धनराहित्ये मतभेदेन ३आत्यन्तिकदुःखनिवृत्तौ, ४ब्रह्मस्वरूपावाप्तौ च देहेन्द्रियाभ्यामात्मनो ५सम्बन्धशून्यत्वे च।

मुक्तिमण्डप पु० मुक्तिप्रदो मण्डपः शाक०त०। १काशीस्थे २जगन्नाथक्षेत्रस्थे च मण्डपभेदे तीर्थे। [रत्नमा०।

मुक्तिमुक्त पु० मुक्तिर्मोचनं तया मुक्तोरहितः। सिह्लके

मुख न० खन-अच् डित् धातोः पूर्वं मुट् च। "मखात्खजातः खातं तस्मादाक्षुर्मुखं बुधाः" इत्युक्ते देहावयवभेदे। "ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च। गलो गलादि सकलं सप्ताङ्गं मुखमुच्यते" इत्युक्ते गलादिसप्तात्मकावयववति २वदने भावप्र०। ३गृहस्य निःसरणमार्गे नि,अमरः। ४शब्दप्रवण्डपादेः प्रवेशनिर्गमे,५आरम्भे, ६उपाये, ७नाटकादौ सन्धिभेदे मेदि० ८नाटकादिशब्दभेदे, ९आद्ये, १०प्रधाने, ११शब्दे, १२वेदे, च शब्दर०। १३अकुलकवृक्षे पु०(डेओ) शब्दच०। [राजनि०

मुखगन्धक पु० मुखस्य गन्धो यस्य सेवनात् कप्। पलाण्डौ

मुखचपला स्त्री आर्य्यावान्तरभेदे मात्राभेदे वृ०र०।

मुखज पु० ब्रह्मणो मुखाज्जायते जन-ड। १विप्रे "ब्राह्मणोऽस्य मुखमासीदि"ति श्रुतिः २वदनजातमात्रे त्रि०।

मुखदूषण पु० मुखं दूषयति सेवनात् दुर्गन्धेन दूष-णिच् ल्यु। पलाण्डौ राजनि०।

मुखधौता स्त्री धौतं मुखं यया धाव-क्त अठ् परनि०। ब्राह्मणयष्टौ (वामनहाटि) शब्दच०।

मुखनिरीक्षक त्रि० सुखमितरास्यं निरीक्षते निर्+ईक्ष ण्वुल्। १अलसे शब्दर०। स हि अन्योयदि कार्यं कुर्यात् तदानाहं करोमीत्याशयेन इतरमुखं निरीक्षमाणः स्वकार्ये न प्रवर्त्तते। इति तस्य तथात्वम्।

मुखपूरण न० मुखं पूरयति पूर-ल्यु। गण्डूषितजलादौ।

मुखप्रिय न०मुखं प्रीणाति प्री-क-उप०स०। १नवङ्गे भावप्र० २मुखरोचकमात्रे त्रि०।

मुखभूषण न० मुखं भूषयति भूष-ल्यु । १ताम्बूले । २मुख-मण्डने च ।

मुखमण्डनक पु० मुखस्य मण्डनमिव इवार्थे कन् । १तिलकवृक्षे राजनि० । कृत० । स्वार्थे क । २मुखभूषणे न० । मण्डयति–ल्यु स्वार्थे क कृत० । ३मुखभूषके त्रि० ।

मुखमोद पु० मुखं मोदयति मुद-णिच्–अण् उप०स० । शोभाञ्जने राजनि० ।

मुखर त्रि० मुखं मुखव्यापारं कथनं राति दत्ते करोतीति यावत् रा-क । १अप्रियवादिनि अमरः । २अग्रे-वादिनि च "मुखरस्तत्र हन्यते" इति हितोपदेशः । ३काके पु० स्त्री० स्त्रियां ङीष् । ४शङ्खे पु० राजनि० [माने

मुखरित त्रि० मुखर इवाचरितः । मुखर+क्विप्-क्त । शब्दाय-

मुखरोग पु० सप्ताङ्गस्य मुखस्य रोगः । सप्ताङ्गमुखस्य रोगभेदे तन्निदानादि यथा

"ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च । गलो गलादि सकलं सप्ताङ्गं मुखमुच्यते" । अथ मुखरोगाणां संख्यामाह "मुखरोगोष्ठयोर्दन्तमूले तु दश षट् तथा । दन्तेष्वष्टौ रसनायां पञ्च स्युर्नव तालुनि । कण्ठे त्वष्टा-दश प्रोक्तास्त्रयः सर्वसराः स्मृताः । एवं मुखामयाः सर्वे सप्तषष्टिर्मता बुधैः" मुखरोगाणां निदानान्याह "आनूपपिशितक्षीरदधिमाषादिसेवनात् । मुखमध्ये गदान् कुर्युः क्रुद्धा दोषाः कफोत्तराः" भावप्र० ।

मुखलाङ्गल पुंस्त्री० मुखं लाङ्गलमिव भूमिविदारकं यस्य । शूकरे जटा० स्त्रियां ङीष् ।

मुखवल्लभ पु० ६त० । १दाडिमवृक्षे शब्दमा० तत्फलस्य मुखप्रियत्वात् तस्य तथात्वम् । २मुखप्रिये त्रि० ।

मुखवासिका स्त्री मुखं वासयति अजडीकरोति सेवनात् वस-णिच्-ण्वुल् । अम्बष्ठायाम् राजनि० ।

मुखवास पु० मुखं वासयति सुरभीकरोति वासि–अण् उप०स० । १गन्धतृणे राजनि० । २कर्पूरादौ च ।

मुखवासन पु० मुखं वासयति वासि ल्यु । १मुखसौरभ-कारके गन्धे । २तद्वति त्रि० अमरः ।

मुखविष्ठा स्त्री मुखं विष्ठेव दुर्गन्धं यस्याः । तैलपायिकायां हेमच० तस्याः स्पर्शमात्रे हि द्रव्यान्तरे दुर्गन्धो भवति ।

मुखव्यादान न० वि+आ+दा-ल्युट् ६त० । मुखप्रसारणे ।

मुखशोधन न० मुखं शोधयति शुध-णिच्-ल्यु । १त्वचे (दार-चिनि) राजनि० । २कटुरसे पु० हेमच० । [राजनि० ।

मुखशोधिन् पु० मुखं शोधयति शुध-णिच्-णिनि । जम्बीरे

मुखस्राव पु० स्रवति स्रु-अच् ५त० । लालायां मुखस्यन्दि-जले राजनि० ।

मुखाग्नि पु० मुखमेवाग्नितुल्यं शापदानेन दाहकत्वात् यस्य । १विप्रे कर्म० वह्न्यात्मके २दावानले च शब्दमा० ।

मुखास्त्र पु० मुखमेवास्त्रं यस्य । कर्कटे त्रिका० । [च ।

मुख्य त्रि० मुखे आदौ भवः यत् । १प्रथमकल्पे अमरः २श्रेष्ठे

मुग्ध त्रि० मुह-क्त । १मूढे । मोहयति अन्तर्भूतण्यर्थे मुह-कर्त्तरि क्त । २सुन्दरे विश्वः । ३नायिकाभेदे स्त्री सा०द०३प०

मुच दम्भे शाठ्ये भ्वा० आत्म० सक० सेट् । मोचते अमोचिष्ट इदित्त्वपक्षम् तदर्थे । मुञ्चते ।

मुच त्यागे चुरा० उ० सक० सेट् । मोचयति ते अमूमुचत् त

मुच त्यागे तु० मुचादि० उभ० सक० अनिट् । मुञ्चति-ते लृदित् अमुचत् अमुक्त । कर्मकर्त्तरि अकर्मकः "मुच्यते सर्वपापेभ्यः" इति पुराणम् ।

मुचकुन्द पु० मुच-क्विप् मुचः कुन्द इव । १स्वनामख्याते पुष्पवृक्षे भावप्र० मान्धातृनृपपुत्रे २नृपभेदे च ।

मुज ध्वनौ अक० मार्ज्जने सक० वा चुरा० पक्षे भ्वा० पर० सेट् । माजयति ते मोजति अमूमुजत् त अमोजीत् । इदित्त्वपक्षार्थे । मुञ्जयति ते मुञ्जति अमुमुञ्जत् त अमुञ्जीत् ।

मुञ्ज पु० मुजि-अच् । (मुज) रज्जुसाधने तृणभेदे राजनि० । "मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा । दाहतृष्णा-विसर्पास्रमूत्रवस्त्यक्षिरोगजित् । दोषत्रयहरं वृष्यं मेखलासूपयुज्यते" भावप्र० । [हेमच० ।

मुञ्जकेशिन् पु० मुञ्ज इव केशाः अस्यस्य इनि । विष्णौ

मुञ्जर न० मुजि-अरन् । शालूके शब्दमा० । [मुञ्जत्रे ।

मुट मर्दने भ्वा० पर० सक० सेट् इदित् । मुण्टति अमुण्टीत् ।

मुट क्षेपे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । मोट-यति ते मोटति अमूमुटत् त अमोटीत् ।

मुट आक्षेपे मर्दने च तु० कु० पर० सक० सेट् । मुटति अमुटीत् मुमोट । [प्रमर्दने ।

मुठ पलायने भ्वा० आ० अक० सेट् इदित् । मुण्ठते

मुड केशादिच्छेदे मर्दने च भ्वा० पर० सक० सेट् इदित् । मुण्डति अमुण्डीत् । [खण्डने ।

मुड मज्जने भ्वा० आ० अक० सेट् इदित् । मुण्डते अमु-

मुण प्रतिज्ञाने तु० पर० सक० सेट् । मुणति अमोणीत् ।

मुण्ड न० मुडि-कर्मणि घञ् । १मस्तके अमरः । २बोले ३मुण्डाय-सधे च राजनि० ४दैत्यभेदे, ५राहुग्रहे पु० मेदि० ।

६नापिते जटा० ७स्थाणुवृक्षे च पु० । ८मुण्डिते त्रि० ।
९महाश्रावणिकायां १०मुण्डीरिकायाञ्च स्त्री टाप् मेदि०
२उपनिषद्भेदे “मुण्डमाण्डूक्यतित्तिरिः” ।

मुण्डक पु० मुण्डयति मुडि-णिच्-ण्वुल् ।१नापिते हेमच०।

मुण्डचणक पु० मुण्डश्चणकइव । कलाये राजनि० ।

मुण्डन न० मुडि-भावे ल्युट् । केशच्छेदे वपने हेमच० ।

मुण्डफल पु० मुण्डं शिरइव फलमस्य । नारिकेले शब्दर०।

मुण्डशालि पु० मुण्डः शूकशून्यः शालिः । निःशूके शालि
भेदे राजनि० ।

मुण्डायस न० मुण्डमयः अच् समा० । लौहभेदे राजनि०।

मुण्डितिका स्त्री मुडि-क्त स्वार्थे क अत इत्त्वम् टाप् ।
(मुण्डीरी) वृक्षभेदे रत्नमा० ।

मुण्डिन् पु० मुण्डयति मुडि-णिच्-णिनि । नापिते अमरः ।

मुण्डीरी स्त्री मुडि-ईरच् गौरा० ङीष् । स्वनामख्याते
वृक्षभेदे जटाधरः ।

मुद्गशील पु० ६२५ पृ० दर्शिते नी० ता० उक्ते दृष्टशालयोगे

मुद संसर्जने चु०उ० सक० सेट् । मोदयति ते अमूमुदत् त

मुद हर्षे भ्वा० आ०अक० सेट् । मोदते अमोदिष्ट । मुमुदे ।

मुद्(दा) स्त्री मुद-सम्प०भावे क्विप् वा टाप् ।१हर्षे अमरः ।
२दक्षिणाख्यौषधौ राजनि० ।

मुदिर पु० मुद-किरच् । १मेघे अमरः २भेके च संक्षिप्तसा०
३कामुके त्रि० मेदि० । [४जलकाके च हेमच० ।

मुद्ग पु० मुद-गक् नेट् ।१कलायभेदे(मुग) पु०मेदि० २पक्षिभेदे

मुद्गपर्णी स्त्री मुद्गस्येव पर्णमस्याः ।(मुगानी)वनमुद्गे अमरः।

मुद्गर न० मुदं गिरति गृ-अच् ।१मल्लिकाभेदे २लोष्टभेदने
(मुगुर) मेदि० । ३पुष्पप्रधानवृक्षभेदे ४कर्मारवृक्षे (काम-
राङ्गा) च पु० राजनि० । स्वार्थे क । तत्रैव ।

मुद्गल न० मुदं गिलति गॄ-अच् रस्य लः । १रोहिषतृणे
राजनि० । २गोत्रप्रवरर्षौ मुनिभेदे, ३नृपभेदे पु० ।

मुद्गष्ट पु० मुद्गं ष्टकति प्रतिबध्नाति ष्टक-ड पृषो० षत्वम् ।
वनमुद्गे अमरः । स्वार्थे क मुद्गष्टकोऽप्यत्र ।

मुद्रा स्त्री मुद-रक । १प्रत्ययकारिण्याम् (मोहर) त्रिका०
२अङ्गुलिस्थे मुद्राङ्कनयुक्ताङ्गुलीयके शब्दर० ३स्वर्णरौप्या-
दिटङ्कायाम् ४अपकारे । “मुद्रालिपिः शिल्पलिपिर्लिपि-
र्लेखनिसम्भवा । गुण्डिकाघुणसम्भूता लिपयः पञ्चधा
मताः” इत्युक्तलिपिमध्ये ५लिपिभेदे वाराहीतन्त्रम् ।
“लेखन्या लिखितं बिम्बं मुद्राभिरङ्कितञ्च यत् । शिल्पा-
दिनिर्मितं यच्च पाठ्यं धार्य्यञ्च सर्वदा” सप्तमाध्याय० ।
६तन्त्रप्रसिद्धे वीराचरसेव्ये “पृथुकास्तण्डुला भृष्टा
गोधूमचणकादयः । तस्य नाम भवेन्मुद्रा” इत्युक्ते पञ्च-
मकारान्तर्गतद्रव्यभेदे ७देवविशेषाराधनायाङ्गुल्यादिसन्नि-
वेशविशेषे तन्त्रसारः “मोदनात् सर्वदेवानां द्रावणात्
पापसन्ततेः । तस्मात् मुद्रेति सा ख्याता सर्वकामार्थ-
साधनी” “मुद्राप्रकरणमि”ति तन्त्रम् दक्षजोचे च ।

मुद्रालिपि स्त्री मुद्रया लिपिः । पञ्चधाविभक्तलिपिमध्ये
लिपिभेदे (छापार अक्षर)

मुद्रिका स्त्री मुद्रेव मुद्रा वा मुद्रा कन् । स्वर्णरौप्यादि
निर्मिते अङ्गुलिस्थे अङ्कनसाधनयोग्ये पदार्थे ।

मुद्रित त्रि०मुद्रा जाताऽस्य इतच् ।१अप्रकाशिते २अङ्किते च

मुधा अव्य० मुह-का पृषो० हस्य धः । मिथ्यार्थशब्दार्थे अमरः

मुनि पु० मन-इन् पृषो० उत्वम् ।“दुःखेष्वनुद्विग्नमनाः सुखेषु
विगतस्पृहः । वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते”
गीतोक्तलक्षणे स्थिरचित्ते वीतरागादौ जने । ते च
अगस्त्यविष्णुहारीतादयः । २सप्तसंख्यायाञ्च । ३अक्ष-
वृक्षतरौ ४जिने मेदि०।५पियालवृक्षे ६पराशरवृक्षे हेमच०
७दमनकवृक्षे राजनि० । “मननान्मुनिरुच्यते” इत्युक्ते
८मननयुते त्रि० । [राजनि० ।

मुनिखर्ज्जूरी स्त्री मुनिप्रिया खर्जूरी । खर्ज्जूरीभेदे

मुनिच्छद पु० मुनिसंख्याताः सप्तसंख्याताः छदाः प्रतिपर्व्व
यस्य । सप्तच्छदे (छातिम) राजनि० ।

मुनितरु पु० मुनिरगस्त्यनामकस्तरुः । वकवृक्षे रत्नमा० ।

मुनिद्रुम पु० मुनीनां प्रियो मुनिनामको वा द्रुमः । १श्यो-
नाकवृक्षे रत्नमा० २वकवृक्षे च राजनि० ।

मुनिपुत्रक पु० मुनेः पुत्रः संज्ञायां कन् ।१दमनवृक्षे भावप्र०
२खञ्जने च त्रिका० । वृत० । ३ऋषिसुते । [वकपुष्पे ।

मुनिपुष्प न०मुनिद्रुमस्य पुष्पं भीमो भीमसेनवदुत्तरपदलोपः ।

मुनिभेषज न० मुनीनां भेषजमिव । १हरीतक्यां २अगस्त्ये,
मुनौ, ३भोजनाभावे च मेदि० । [शेषे ।

मुनीन्द्र पु० मुनिः इन्द्र इव ।१बुद्धे अमरः । ७त० । २ऋषि-

मुन्थ गत्यां भ्वा० पर० सक० सेट् क्त्वा वेट् । मुन्थति अमुन्थीत्

मुन्था स्त्री नी०कं०ताजकप्रसिद्धे इन्थिहाशब्दार्थे । इन्थिहा-
शब्दे ९२९पृ० दृश्यम् ।

मुन्यन्न न० मुनियोग्यमन्नम् । नीवारकन्दादौ ।

मुमुक्षु त्रि० मोक्तुमिच्छुः मुच-सन्-उ । मोक्षेच्छावति ।
१संसारबन्धनाभावेच्छावति । २यतौ पु० ।

मुमूर्च्छान पु० मुच काम पृषो० दीर्घः । १मेघे २मुञ्चति त्रि०।

"द्रुपदादिव सुमूषानः" इति बन्ध्याकुपाठप्रमन्नः ।
मुमूर्षु त्रि० मर्तुमिच्छुः मृ-सन्-उ । आसन्नमरणे ।
मुर भेष्टने तु० पर० सक० सेट् । मुरति अमोरीत् ।
मुर पु० मुर-क । १दैत्यभेदे "पार्थेनाथ द्विषन् मुरम्" माघः
२वेष्टने । ३समानमस्ताते गन्धद्रव्ये स्त्री अमरः टाप् ।
मुरज पु० मुरात् वेष्टनात् जायते जन-ड । मृदङ्गे वाद्यभेदे
अमरः । स इव बन्धः । मुरजबन्धः । चित्रालङ्कारभेदे ।
मुरजफल पु० मुरज इव फलं यस्य । पनसवृक्षे त्रिका० ।
मृदङ्गफलादयोऽप्यत्र ।
मुररिपु पु० ६ त० । विष्णौ । मुरारिमुरहरमथनादयोऽप्यत्र ।
मुरला स्त्री मुरं लाति ला-क । १नर्मदायाम् । "मुरला-
मारुतोद्धूतम्" रघुः । २वंशीनाम्नि वाद्ये गौरा०ङीष् ।
मुरलीधर पु० मुरलीं धरति धृ अच् । श्रीकृष्णे मुरलीवाद-
नादयोऽप्यत्र ।
मुर्च्छ मोहे वृद्धौ च भ्वा० पर० सक० सेट् । मूर्च्छति
अमूर्च्छीत् । आदित् भावे क्त । मूर्त्तम् मूर्च्छितम् ।
मुर्मुर पु० मुर-क पृषो० द्वित्वम् । १तुषाग्नौ २कन्दर्पे सूर्याश्वे
च मेदि० । [आमन्दिट् मूर्च्छः ।
मुर्व बन्धे भ्वा० पर० सक० सेट् । मूर्वति अमूर्वीत् निष्ठा-
मुल रोपणे चु० उभ० सक० सेट् । मोलयति ते अमूमुलत् त ।
मुशटी स्त्री मुष-अटन् गौरा० ङीष् पृषो० । चित्रकण्ठे
हेमच० ।
मुष(स)ली स्त्री मुष मुस वा कलच् पृषो० लस्य यः गौरा०
ङीष् । १तालमूल्याम् २गृहगोधिकायाम् राजनि०
'संज्ञायां कन् । स्वार्थे कन् । इत्यप्याप् इत्या० ।
मुष वधे भ्वा० पर० सक० सेट् । मोषति अमोषीत् ।
मुष खेदने दिवा० पर० सक० सेट् । मुष्यति इरित् अमुषत्-
अमोषीत् पुषादित्वादिरत्वमिच्छन्ति ।
मुष स्तेये क्र्या० पर० द्विक० सेट् । मुष्णाति अमोषीत् ।
मुष(ष)(स)ल पु० मुष-कलच् पृषो० । अयोग्रे समानमस्याते
धान्यादिकण्डनसाधने पदार्थे अमरः । [रायमु०।
मुषा स्त्री० मुष क-टाप् । धातुद्रावणे पात्रभेदे (मुची)
मुषित त्रि० मुष-क्त । अपहृतद्रव्ये जने अमरः ।
मुष्क पु० मुष-कक् । १वृक्षविशेषभेदे अण्डकोषे (मण्डा-
पाद्य) २मोक्षकवृक्षे ३संहते च मेदि० ४तस्करे,
५मांसले च हेमच०। स्वार्थे क । तत्रैव । [हेमच०।
मुष्कशून्य पु० ३त०। इषपर्यादिते राजामन्तःपुररक्षके (खोजा
मुष्टि पुंस्त्री० मुष-क्तिच् । १बद्धपाणौ अमरः २पलपरिमाणे
पु० हेमच० ३कुडुपभागे च ; त्रिन् । ४मौर्य्ये स्त्री ।
मुष्टिक पु० मुष्ट्या कायति कै-क । १कंसराजमल्लभेदे । मुष्टि
मौर्य्यं प्रयोजनमस्य कन् । २स्वर्णकारे हेमच०।
मुष्टिकान्तक पु० ६त० । बलदेवे मल्लर० तस्य मुष्टिकासुर-
हननात्तथात्वम् ।
मुष्टिद्यूत न० । ३त०। कपर्दकमुष्टयाक्रीडने (परखट) मन्त्रमा०
मुष्टिन्धय पु०मुष्टिं धयति धे-खश् मुम् च । बालके त्रिका०।
मुष्टिबन्ध पु०मुष्टेर्बन्धो यत्र । १संपहे अमरः। ६त०।२मुष्टि-
बन्धने । [आमोषीत् पुषादित्वमिच्छन्ति ।
मुस खण्डने दि० पर० सक० सेट् । मुस्यति इरित् अमुसत्
मुस(ष)(श)लिन् मुस(ष)(श)ल+अस्त्यर्थे इनि । बलदेवे
अमरः । [मेध्ये अमरः ।
मुस(ष)(श)ल्य त्रि० मुस(ष)(श)लेन मेध्यः यत् । मुसल-
मुसलक पु० गी० ता० उक्ते नगांशे "मुसलके पञ्च यदा:
प्रदिष्टाः" गी० ता० ।
मुस्त संहतौ चु०उभ०सक०सेट् । मुस्तयति ते अमुमुस्तत् त ।
मुस्त पु० मुस्त अच् स्त्रीत्वे टाप् । मुस्तके (मुथा) स्वार्थे
तत्रार्थे स्त्री अमरः स्वार्थे क । अत्रैव अस्त्री०अमरः ।
भ्यायर्याविभभेदे पु० हेमच० । [भेदे अमरः ।
मुस्ताभ न० मुस्तेव भाति भा-क । (नागरमुथा) मुस्तक-
मुह मोहे वैचित्त्ये दि० उभ० अक० वेट् मुह्यति इरित्
अमुहत् आदित् मोहिता, मोग्धा, मोढा स्रीत् ।
मूढोऽसि ।
मुहिर पु० मुह किरच् । १कामे, २मूर्खे च मेदि० ।
मुहुस् अव्य० मुह-उसिक् । पौनःपुन्ये अमरः ।
मुहूर्त्त स्त्री० हुर्च्छ-क्त धातोः पूर्वं मुट् च । १द्वादशक्षणात्मके
काले, -पञ्चदशधाविभक्तस्य दिनस्य पञ्चदशभागे, द्विघटि-
न्यूनाधिकघटिकाद्वयरूपे २काले च ।
मू बन्धे भ्वा० आ० सक० सेट् । मवते अमविष्ट मुमुवे ।
मूक पु० मू-कन् । १मत्स्ये त्रिका० २दैत्यभेदे मेदि० ३दीने
हेम०वाक्शक्तिरहिते च त्रि०अमरः । [४काके हेमच० ।
मूढ़ त्रि० मुह-क्त । १मूर्खे अमरः । २बाले ३तन्द्रिते मेदि०
मूत त्रि० मू+बन्धे क्त । १बद्धे २संयते च अमरः । [मूत्रत् त
मूत्र प्रस्रावे अद० चु० उभ० सक० सेट् । मूत्रयति ते अमु-
मूत्र न० मूत्र-अच् । प्रस्रावे उपस्थात् क्षरितजले अमरः ।
मूत्रकृच्छ्र न० । रोगभेदे "व्यायामतीक्ष्णौषधरूक्षमद्य-
प्रसङ्गनित्यद्रुतपृष्ठयानात् । आनूपमत्स्याध्यशनादजीर्णात्
स्युर्मूत्रकृच्छ्राणि नृणां तथाष्टौ" भावप्र० ।

मूत्रदोष पु० मूत्रस्य दोषो यस्मात् दुष-घञ् ६त०। प्रमेहरोगे राजनि०।

मूत्रनिरोध पु० मूत्रं निरुणद्धि नि+रुध-अण्। मूत्रप्रतिबन्धकरोगे। [२कर्कोट्याञ्च राजनि०।

मूत्रफला स्त्री० मूत्रमेव फलं यस्याः। १त्रपुष्याम् (शशा)

मूत्राघात पु० मूत्रमाहन्ति आ+हन-अण्। मूत्रहननकारिणि रोगभेदे। "जायन्ते मूत्रविघातादौष्ठीलकुण्डलिकादयः। जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश" भावप्र०।

मूत्राशय पु० ६त०। नाभेरधोदेशे वस्तिनामकस्थाने भावप्र०।

मूर्ख त्रि० मुह-ख उरादेशः। १मूढे २गायत्रीरहिते ३सार्थगायत्रीरहिते च। "क्रियाहीनस्य मूर्खस्ये"ति स्मृतिव्याख्यायां निबन्धकारैस्तथार्थकतया व्याख्यानात्।

मूर्च्छना स्त्री मुर्च्छ-युच्। "स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते। मूर्च्छनामिति तां प्राहुः कवयो ग्रामसम्भवाम्" इत्युक्ते गानाङ्गभेदे "स्फुटीभवद्ग्रामविशेषमूर्च्छनाम्" माघः।

मूर्च्छा स्त्री मुर्च्छ-भावे अङ्। १मोहे अमरः। २अनिद्रावामपि वाह्येन्द्रियव्यापारशून्यावस्थायां "क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः। वेगाघातादभिघातात् हीनसत्त्वस्य वा पुनः। करणायतनेषूग्रा बाह्येष्वाभ्यन्तरेषु च। निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः" भावप्र०। ३वृद्धौ च।

मूर्च्छाल त्रि० मूर्च्छा+अस्त्यर्थे लच्। मूर्च्छाविशिष्टे अमरः।

मूर्च्छित त्रि० मूर्च्छा जातास्य तार० इतच्। १मूर्च्छायुक्ते २वृद्धे ३उच्छ्रिते च मेदि०

मूर्त्त त्रि० मुर्च्छ-क्त। १मूर्च्छान्विते अमरः। २मूढे ३कठिने च मेदि०। मूर्त्तिरस्त्यस्य अच्। ४मूर्त्तिमति न्यायोक्तेषु अपकृष्टपरिमाणवत्सु। क्षितिजलपावकपवनमनःसु च।

मूर्त्ति स्त्री मुर्च्छ-क्तिन्। १देहे २काठिन्ये, अमरः। ३प्रतिमायाञ्च हेम०।

मूर्त्तिमत् पु० मूर्त्तिरस्त्यस्य मतुप्। १देहे। २आकारयुक्ते ३काठिन्यवति च त्रि० स्त्रियां ङीप्। [आत्मजाते त्रि०।

मूर्द्धज पु० मूर्द्ध्नि जायते जन-ड। १केशे जटा०। २मस्तकमूर्द्धन्य त्रि० मूर्द्ध्नि भवः यत्। १मस्तकजाते। २शिक्षाप्रोक्तेषु ऋकारटवर्गरषवर्णेषु पु०।

मूर्द्धन् पु० मुह्यत्यस्मिन् मुह, कनिन्। मस्तके अमरः।

मूर्द्धपुष्प पु० मूर्द्ध्नि पर्णशिरसि पुष्पं यस्य। शिरीषवृक्षे शब्दमा०।

मूर्वा स्त्री मुर्व-अच्। स्वनामख्याते धनुर्गुणोपयुक्ते लताभेदे गौरा० ङीष्। मूर्व्यप्यत्र भरतः। [अमूलिष्ट।

मूल प्रतिष्ठायां भ्वा० उभ० अक० सेट्। मूलति ते अमूलीत्

मूल रोपणे चुरा० उभ० सक० सेट्। मूलयति ते अमूमुलत् त।

मूल न० मूल-क। १शिफायाम् (जड़) (शिकड़) अमरः २आद्ये ३निकुञ्जे ४नक्षत्रभेदे ५अन्तिके विश्वः ६वास्यव्याद्युपयोगिनि ७मूलधने, मेदि०। ८निजे अजयः। ९चरणे १०शूरणे शब्दमा० ११पिप्पलीमूले १२पुष्करमूले राजनि०। १३टीकादिना व्याख्येयग्रन्थे च अविरुद्धसंधिके अनविंशे नक्षत्रे अस्त्री० तिथि० शब्दर० स्त्रीत्वमप्युक्तम्।

मूलक न० मूल+संज्ञायां कन्। १कन्दभेदे (मूला) "मूलकं भक्षितं येन वरं विप्रैर्मूलकं मदिरासमम्" इति ब्रह्मपु०। २विषभेदे पु० हेमच०। [मूले रत्नमा०।

मूलकपर्णी स्त्री मूलकस्येव पर्णान्यस्याः ङीप्। शोभा०

मूलकर्मन् न० मूलेन मन्त्रौषधादिना कर्म वशीकरणादि। औषधादिना वशीकरणकर्मणि।

मूलकृच्छ्र पु० मूलेन काथितदग्धमूलेन कृच्छ्रः। "मूलकृच्छ्रः स्मृतो मूलैरिति" स्मृत्युक्ते १व्रतभेदे। तद् यस्य। २तद्वति त्रि०।

मूलज न० मूलाज्जायते जन-ड। १आर्द्रके राजनि०। २उत्पलादौ पु० हेमच०। ३मूलनक्षत्रजाते त्रि०।

मूलत्रिकोण न० "सिंहो वृषश्च मेषश्च कन्या धन्वी घटो घटः। "अर्कादीनां त्रिकोणानि मूलानि राशयः क्रमात्" रव्यादीनां क्रमेण सिंहादिषु राशिषु। तदंशाश्च "रविभौमजीवभार्गवयमैचराणां त्रिकोणभागाः स्युः। नखरविदिक्शृतिथिनवराशीन्द्वो दिग्भागकाः क्रमात्" ज्यो०त०।

मूलद्रव्य न० कर्म०। मूलधने यदवलम्ब्य वाणिज्यादिकं क्रियते तस्मिन् (पुँजि) मूलधनादयोऽप्यत्र।

मूलपर्णी स्त्री मूलमारभ्य पर्णान्यस्याः ङीप्। मण्डूकपर्ण्याम् रत्नमा०। [राजनि०।

मूलपुष्कर न० पुष्करस्य मूलं राज० पर०। पुष्करमूले

मूलपोती स्त्री पू-तच् गौ० ङीष् मूलं प्रधाना पोती। पूतिकायाम् राजनि०।

मूलप्रकृति स्त्री मूलीभूता सर्वाद्या प्रकृतिः। सांख्यमतोक्ते सर्वेषां कारणीभूते साम्यावस्थापन्ने सत्त्वरजस्तमोरूपे त्रिगुणात्मके १प्रधाने "मूलप्रकृतिरविकृतिः" सांख्यकारिका। २दुर्गायाञ्च ब्रह्मवै०पु०४०अ०। [राजनि०।

मूलफलद पु० मूलेऽपि फलं ददाति प्रकृते दा-क। पनसवृक्षे

मूलरस पु॰ मूले रसो यस्य । मोरटालतायाम् रत्नमाला ।

मूलशाकट न॰ मूलानां क्षेत्रं मूल+शाकट । मूलभवन-योग्ये क्षेत्रे शब्दार्थचि॰ । मूलशाकिनोऽप्यत्र पु॰। [राजनि॰

मूला स्त्री मूलानि बाहुल्येन सन्त्यस्याः अच्। शतमूल्याम्

मूलाधार पु॰ ६त॰ । १नाभिलिङ्गयोर्मध्ये तस्य हि शरीरस्य सकलनाडीनां मूलस्थानत्वात्तथात्वम् "मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके । मध्ये स्वयम्भूलिङ्गन्तु कोटिसूर्य्यसमप्रभम्" इत्युक्तलक्षणे त्रिकोणाकारे तन्त्रोक्ते २सुषुम्णानाडीस्थे चक्रभेदे च । [कोऽप्यत्र ।

मूलिन् पु॰ मूलमस्त्यस्य इनि । वृक्षे शब्दच॰। ठन् । मूलिक॰

मूल्य न॰ मूलाय पटादिकारणतन्त्वाद्युपादानाय इदम् यत् । तन्त्वाद्युपादानाय दीयमाने १धने अमरः । मूल—यत् । वपनयोग्ये त्रि॰ ।

मूष मुषणे भ्वा॰ पर॰ सक॰ सेट् । मूषति अमूषीत् । ऊमूष

मूष पुंस्त्री॰ मूष-क । १मूषिके रत्ना॰ स्त्रियां ङीष् । २तैजसद्रव्यद्रावणपात्रे (मुचि) अमरः ।३गवाक्षे "एकद्वित्र्यादि मूषावहने"ति कौला॰५देवताडवासे च स्त्री शब्दच॰

मूषक पुंस्त्री॰ मूष-ण्वुल् स्त्रीत्वे टाप् अत इत्त्वम् । उन्दुरौ शब्दच॰ ।

मूषकपर्णी स्त्री मूषककर्णं इव पर्णान्यस्याः । (उन्दुरकाणी) आखुकर्ण्याम् मूषिककर्ण्यादयोऽप्यत्र ।

मूषरिफ पु॰ नील॰ता॰ उक्ते इसराफाख्ये योगभेदे "शीघ्रो यदा मन्दगतेरथैकमप्यंशमत्येति तदेशराफः । कार्य्यक्षयो मूषरिफे स्ववीर्य्ये शौर्य्ये न हिल्लाजमतेन चिन्त्यम्" ।

मूषिक पुंस्त्री॰ मूष-इन् । १उन्दुरौ अमरः स्त्रीत्वे टाप् । २मूषिकपर्ण्यां स्त्री शब्दर॰३मूषायां भरतः । [शब्दर॰।

मूषिकपर्णी स्त्री मूषिककर्णं इव पर्णान्यस्याः जलजतृणभेदे

मूषी स्त्री मूष+इन् गौ॰ङीष् ।१स्वर्णादिद्रावणपात्रे (मुचो) २महामूषिके राजनि॰।

मृ प्राणत्यागे तु॰ सार्वधातुके लुङि आशीर्लिङि च आ॰ अन्यत्र पर॰ अक॰ अनिट् म्रियते । अमृत । ममार मर्त्तासि मृषीष्ट ।

मृकण्ड(ण्डु) पु॰ मुनिभेदे शब्दच॰ ।

मृक्ष संघाते भ्वा॰ प॰ सक॰ सेट् । मृक्षति अमृक्षीत् ।

मृग अन्वेषणे याचने च अद॰ चु॰ आ॰ सक॰ सेट् मृगयते अममृगत ।

मृग अन्वेषणे दिवा॰ पर॰ सक॰ सेट् । मृग्यति अमर्गीत् ।

मृग पु॰ मृग-क। १पशुमात्रे, २गजभेदे, ३नक्षत्रविशेषे पञ्चमे न चाले पु॰। अ॰पु॰मृग-भावे अच् । ४अन्वेषणे पु॰ ५याचने च मेदि॰ ६यज्ञभेदे ७मार्गशीर्षे मासि जटाधरः अच् । ८मृगमदे, भरतः ९मकरराशौ च पु॰ ज्यो॰त॰ । १०हरिणे अमरः सर्वतः जातौ स्त्रियां ङीष् ११नरभेदे "मृगे तुष्टा च चित्रिणी" रतिमञ्जरी ।

मृगगामिनी स्त्री मृग इव गच्छति गम णिनि ङीप् । १विडङ्गायाम् राजनि॰ । २मृगतुल्यगमनवति त्रि॰ स्त्रियां ङीप् । [व्याधे शब्दच॰ ।

मृगजीवन पु॰ मृगैस्तन्मांसादिविक्रयाभिर्जीवति जीव-ल्यु ।

मृगणा स्त्री मृग-युच् टाप् । नष्टद्रव्यस्यान्वेषणे अमरः ।

मृगतृष्णा स्त्री मृगाणां तृष्णेव तृष्णाहेतुत्वात् । सूर्य्यकिरणे जलभ्रान्तौ अमरः । निर्जलदेशस्थं सूर्य्यकिरणं दूरतो वीक्ष्य मृगैर्जलभ्रान्त्या तृष्णार्त्तैः सङ्क्रम्यते न च लभ्यते इति यौक्ते मरुदेशे सिकतादौ पतितरविकिरणेषु जलभ्रान्तिरिति च लोकप्रसिद्धम् । स्वार्थे क । तत्रैव ।

मृगदंशक पुंस्त्री॰ मृगं दंशति दन्श ण्वुल् । कुक्कुरे अमरः स्त्रियां जातित्वात् ङीष् । [स्त्रियां ङीप् ।

मृगधूर्त्तक पुंस्त्री॰ मृगेषु मध्ये धूर्त्तकः । शृगाले अमरः

मृगनाभि पु॰ मृगस्य नाभिः जन्महेतुर्यस्य । कस्तूर्य्याम् मृगमदे अमरः ।

मृगनेत्रा स्त्री मृगो मृगशिरो नक्षत्रं नेता प्रापकः सर्वरात्रिप्रकाशकत्वात् यत्र अच्समा॰। सौरमार्गस्य किञ्चिदधिकत्रयोविंशदिनावधिशेषपर्य्यन्तरात्रिषु ।

मृगनाभिजा स्त्री मृगस्य नाभेर्जायते जन-ड । कस्तूर्य्याम् हेमच॰। [हेमच॰मृगेशादयोऽप्यत्र २सिंहराशौ च ।

मृगपति पु॰ ६त॰। मृगाणां पशूनां पतिः स्वामी । १सिंहे

मृगप्रिय न॰ ६त॰ । पर्वततृणे राजनि॰ ।

मृगवधाजीव पु॰ मृगवधेनाजीवति आ+जीव-अच् । व्याधे अमरः मृगाजीवोऽप्यत्र ।

मृगबन्धनी स्त्री मृगोबध्यतेऽनया बन्ध—करणे ल्युट् ङीप् । मृगबन्धनार्थे जाले अमरः । करणस्य कर्त्तृत्वविवक्षायां णिनि ङीप् । मृगबन्धिनीत्यप्यत्र अमरे पाठान्तरम् ।

मृगभक्ष्या स्त्री मृगैर्भक्ष्यते भक्ष-कर्मणि ण्यत् । जटामांस्याम् राजनि॰ ।

मृगमद पु॰ मृगस्य मदो गर्वो यस्मात् । कस्तूर्य्याम् अमरः ।

मृगमदवासा स्त्री मृगमदस्येव वासः सौरभमस्याः । कस्तूरीमल्लिकायां राजनि॰ ।

मृगया स्त्री मृगं यात्यनया या—करणे क । (शीकार)

पशुवधफलके व्यापारभेदे आखेटके अमरकोषः ।

मृगयु पु० मृग–अन्वेषणे युच् । १ब्रह्मणि २शृगाले ३व्याधे च मेदि० "मृगयुरिव मृगोऽथ दक्षिणेनाम्" भट्टिः ।

मृगरसा पु० मृगो मृगमांसं तस्येव रसोऽस्याः । सहदेवीलतायाम् राजनि० ।

मृगराज पु० मृगाणां पशूनां राजा टच्समा० । १सिंहे शब्दर० । मृगेण गजेन राजते अच् । २चन्द्रे । ३सिंहराशौ च । उपचारात् ४मृगशिरानक्षत्रे च ।

मृगराटिका स्त्री मृगं रटति जीव्यत्वेन रट–अण् गौ० ङीष् स्वार्थे क । जीवन्त्यामोषधौ राजनि० । [राशौ च ।

मृगरिपु पु० ६त० । १सिंहे मृगशत्रुप्रभृतयोऽप्यत्र । २सिंह-

मृगलाञ्छन पु० मृगो लाञ्छनं यस्य ।१चन्द्रे शब्दर० । मृगाङ्कादयोऽप्यत्र उपचारात् २मृगशिरानक्षत्रे च ।

मृगवल्लभ न० ६त० । कुन्दरतृणे राजनि० ।

मृगवाहन पु० मृगो वाहनं यस्य ।१वायौ "धावन् हरिणपृष्ठस्थः" इति वायुध्यानम् ।२स्वातिनक्षत्रे च ।

मृगव्य न० मृगान् व्ययतेऽत्र व्यय-ड । मृगयायाम् अमरः ।

मृगशिरस् न० पु० । मृगस्येव शिरोऽस्य । अश्विन्यवधिके पञ्चमे नक्षत्रे मृगशिराप्यत्र स्त्री टाप् शब्दर० । मृगशीर्षन्, न० रायमु० मृगशीर्ष पु० एतावप्यत्र भरतः ।

मृगा स्त्री मृगो मृगमांसतुल्यरसोऽस्त्यस्य अच् । सहदेवीलतायाम् राजनि० ।

मृगाक्षी स्त्री मृगस्येवाक्षि तत्तुल्यं पुष्पं वा यस्याः षच्समा० ङीष् । १विशालायां २मृगतुल्यनयनवत्यां स्त्रियां च मेदि० । [जायते जन–ड । कस्तूर्याम् राजनि० ।

मृगाण्डजा स्त्री मृगस्याण्डाकारात् नाभिस्थितमांसपिण्डात्

मृगादन पुंस्त्री० मृगान् अत्ति अद-ल्यु । क्षुद्रव्याघ्रे अमरः । स्त्रियां ङीष् । मृगान्तकोऽप्यत्र ।

मृगादनी स्त्री मृग इवाद्यते अद-कर्मणि ल्युट् । १सहदेव्याम् २इन्द्रवारुण्याम् (राखालशशा) ३कर्कटीभेदे च राजनि० । [४सिंहराशौ च ।

मृगाराति पु० ६त० ।१कुक्कुरे शब्दमा० मृगशत्रौ २सिंहे च ।

मृगारि पु० ६त० । १कुक्कुरे २सिंहे ३व्याघ्रे ४रक्तशोभाञ्जने च राजनि० तस्य वने हि दस्य नामः ।५सिंहराशौ च ।

मृगाविध् पु० मृगं विध्यति व्यध+क्विप् पूर्वदीर्घः । व्याधे जटाधरः ।

मृगित त्रि० मृग–क्त । १अन्वेषिते अमरः २याचिते च ।

मृगेन्द्र पुंस्त्री० मृगः इन्द्र इव । सिंहे अमरः स्त्रियां ङीष् ।

मृगेन्द्रचटक पु० मृगेन्द्र इव हिंस्रचटकः पक्षी । श्येनपक्षिणि जटा० ।

मृगेन्द्राशी स्त्री मृगेन्द्रेण सिंहेनाश्यते भक्ष्यते अश-कर्मणि घञर्थे क गौरा० ङीष् । वासके राजनि० ।

मृगेर्वारु स्त्री मृगप्रिया इर्वारुः कर्कटी । श्वेतायामिन्द्रवारुण्याम् (शादा राखालशशा) राजनि० ।

मृगेष्ट पु० ६त० । मुद्गरके राजनि० ।

मृगेक्षणा स्त्री मृगस्य ईक्षणमिवेक्षणं पुष्पं वा यस्याः । १मृगेर्वारौ राजनि० २मृगतुल्यनेत्रायां स्त्रियां च ।

मृज शोधने भूषणे च वा चु० उभ० पक्षे अदा० सक० वेट् । मार्जयति–ते मार्ष्टि अमीमृजत्–त अममार्जत्–त अमार्जीत् आमार्क्षीत् अमृक्षत् णिच् मृजा । [मृतां" भट्टिः

मृजा स्त्री मृज–अङ् । मार्जने अमरः "शिरसा च मृजा-

मृड तोषणे क्र्या० तु० च पर० सक० सेट् । मृड्णाति मृडति अमर्डीत् ममर्ड । [आलुक् च मृडानी ।

मृड पु० मृड–क । १शिवे अमरः २तत्पत्न्याम् स्त्री ङीष्

मृण हिंसे तु० प० सक० सेट् । मृणति अमर्णीत् ।

मृणाल पुंन० मृण–कालन् । १पद्मादेर्नालस्थे मूले अमरः २वीरणमूले न० मेदि० गौरा० ङीष् । मृणाल्यपि ३विसतन्तौ स्त्री राजनि० ।

मृणालिन् स्त्री मृणालं विद्यतेऽस्य अच् मृणालं पद्मं ततः समूहे तद्युक्तदेशे वा इनि । १पद्मसमूहे २पद्मयुक्तदेशे ३तद्युक्तलतायाञ्च जटा० ।

मृत न० मृ–भावे क्त । १मरणे । २तत्तुल्यदुःखजनके याचितके द्रव्ये च अमरः । कर्त्तरि क्त । ३गतप्राणे त्रि० ।

मृतक न० मृतेन मरणेन कायति कै-क । मरणाशौचे "सूतके मृतकेऽथ वा" इति स्मृतिः ।

मृतकल्प त्रि० ईषदसमाप्तो मृतः मृत+कल्पप् । मृतप्राये ।

मृतकान्तक पुंस्त्री० मृतः शवदेहः अन्तोऽभिमतो यस्य कप् । शृगाले हारा० स्त्रियां ङीष् ।

मृतजीव पु० मृतः नष्टः सन् पुनर्जीवति जीव-अच् । तिलकवृक्षे राजनि० ।

मृतवत्सा स्त्री मृतोवत्सो यस्याः । मृतापत्यायां १स्त्रियां २स्त्रीगव्याञ्च "मृतवत्सा च या नारीति" तन्त्रम् ।

मृतसञ्जीवनी स्त्री मृतान् संजीवयति सम्+जीव-णिच्-ल्यु गौरा० ङीष् । १गोरक्षदुग्धाख्यामोषधौ राजनि० तन्त्रोक्ते २विद्याभेदे च । [मरणनिमित्तं मृतस्नाने अमरः

मृतस्नात त्रि० मृतं मरणं तन्निमित्तं स्नातः स्ना-क्त ।

मृतालक न० मृतमालयति भूषयति अल-णिच्-ण्वुल्। आढक्याम् अमरः। मृत् मृत्तिका तालः प्रतिष्ठा यस्य वा कप्। मृतालकमप्यत्र शब्दर०। सौराष्ट्रमृदि राजनि०

मृत्तिका स्त्री मृद्+तिकन् टाप्। १मृदि (माटि) वा केवलत्वेनाऽस्वत्वे अण् टाप्। २आढक्याम् राजनि०।

मृत्फली स्त्री मृदि फलमस्याः ङीप्। कुटोभवौ। (कुड़) हारा०।

मृत्यु पु० मृ-त्युक्। १यमे हेम० देहादिभ्यः २प्राणवियोगे विजातीयात्ममनःसंयोगनाशे वा ३मरणे च अमरः। "मृत्योः स मृत्युमाप्नोति" श्रुतिः अधात् मायायां जाते ४पुत्रभेदे पु० "अधर्मस्याऽथ वै माया मृत्युं भूतापहारिणम्। निकृतिश्च तथा कन्या मृत्योर्भार्याऽभवत् तने॥ अलक्ष्मीनाम तस्यां च मृत्योः पुत्राश्चतुर्दश" मार्कं०पु०।

मृत्युञ्जय पु० मृत्युं जयति जि-खच्। १महादेवे अमरः "कतिधा मृत्युकन्यानां ब्रह्मणां कोटियोजने। काले न क्षीणः शम्भुश्च सत्यरूपी च निर्गुणः। मृत्युकन्या जिता यस्मात् शिवेन गुरुणा मम। न मृत्युना जितः शम्भुः कल्पे कल्पे श्रुतौ श्रुतम्" ब्रह्मवै०प्र० ६१अ०।

मृत्युनाशक पु० मृत्युं नाशयति नाशि-ण्वुल्। १पारदे राजनि० तस्य हि रसायनक्रियादिना शोधयित्वा सेवने मृत्युनाशकत्वम्। २मृत्युनाशकमात्रे त्रि०।

मृत्युपुष्प पु० मृत्यवे स्वामिमरणाय पुष्पं यस्य। इक्षौ रत्नमा० तस्मिन् पुष्पिते हि तत्स्वामिनो नाशः।

मृत्युफला स्त्री मृत्यवे नाशाय फलं यस्याः। कदल्यां वैद्य० फलपाके हि तस्या नाशो लोकविदः। [त्रिका०।

मृत्युबीज पु० मृत्युः तदुत्पादकः एव बीजं कारणमस्य। वंशे

मृत्युसूति स्त्री मृत्यवे सूतिः प्रसवोऽस्याः। कर्कटकयोषिति प्रसवेन हि तस्या नाशः "यथा कर्कटकी गर्भमादत्ते मृत्यवे निजम्" इति पुराणम्।

मृत्(त्सा)त्स्ना स्त्री मृद्+प्रशस्तार्थे स्नच् वा। १प्रशस्तमृत्तिकायाम् अमरः। अर्शआद्यच् स्नान्तः। २आढक्याम् अमरः।

मृद क्षोदे क्र्या० प०सक० सेट्। मृद्नाति अमर्दीत् ममर्द।

मृद्(दा) स्त्री मृद्यते मृद-कर्मणि क्विप्। मृत्तिकायाम् (माटी) अमरः हलन्तत्वात् वा टाप्। मृदाप्यत्र।

मृदङ्ग पु० मृदः अङ्गम् किप्। १वाद्यभेदे अमरः। २कोषातक्यां स्त्री रत्नमा० गौरा० ङीष्।

मृदङ्गफल पु० मृदङ्ग इव फलमस्य। पनसवृक्षे शब्दर०।

मृदङ्गफलिनी स्त्री मृदङ्ग इव फलमस्त्यस्या इनि ङीप्। कोषातक्याम् राजनि०। तत्फलं वाद्याद्यस्त्यस्य अच्। मृदङ्गतुल्यफले पनसवृक्षे पु० शब्दर०।

मृदु त्रि० मृद-कु। १कोमले अमरः। स्त्रियां वा ङीप् मृद्वी मृदुः। सा च २मृदुकन्यायाम्। ३चित्रानुराधामृगशिरोरेवतीनक्षत्ररूपे नक्षत्रगणभेदे च त्रि०ज्यो०त०।

मृदुचर्मिन् पु० मृदु कोमलं चर्म त्वगस्त्यस्य ब्रीह्या०इनि। भूर्जवृक्षे राजनि०।

मृदुच्छद पु० छाद्यतेऽनेन छदः त्वक् इव०। १भूर्जवृक्षे २पर्वतजपीलुवृक्षे जटा० ३कुक्कुरवृक्षे ४शीतालवृक्षे च राजनि०।

मृदुताल स्त्री कर्म०। शीतालवृक्षे (तेडेत) राजनि०।

मृदुत्वच्(च) पु० मृदुः त्वक् त्वचा वा यस्य। भूर्जत्वचवृक्षे अमरः।

मृदुपत्र पु० मृदूनि पत्राण्यस्य। १नले राजनि०। कर्म०। २कोमलपत्रे न० इव०। ३तद्वति त्रि०। ४चिल्लीशाके स्त्री राजनि० गौरा० ङीष्। [२मृदुपर्वियुक्ते त्रि०।

मृदुपर्वक पु० मृदूनि पर्वाण्यस्य कप्। १वेत्रे राजनि०।

मृदुपुष्प पु० मृदूनि पुष्पाण्यस्य। १शिरीषवृक्षे रत्नमा० इव०। २मृदुकुसुमयुते त्रि०। कर्म०। ३कोमलपुष्पे न०।

मृदुफल न० मृदूनि फलान्यस्य। १विकङ्कते (वइचि) २मधुनारिकेले च राजनि०। ३कोमलफलयुते त्रि०। कर्म०। ४कोमलफले न०। [त्रि० अमरः।

मृदुल न० मृद-कुलच्। १जले शब्दच० २कोमलमात्रे

मृदुलोमक पु० इव०। १शशके हेमच०। २कोमललोमयुक्ते त्रि०। कर्म०। ३कोमललोम्नि न०।

मृदूत्पल न० कर्म०। १नीलोत्पले शब्दर०।२नीलपद्मे च

मृद्वीका स्त्री मृदु+ईकन्। १द्राक्षायाम् अमरः २कपिलद्राक्षायाम् राजनि०।

मृध न० मृध्यतेऽत्र घञर्थे आधारे क। युद्धे अमरः।

मृध आर्द्रीभावे भ्वा० उभ० सक० सेट् घटित् क्षा वेद। मर्धति-ते अमर्धीत् अमर्धिष्ट ममर्द ममृधे।

मृश स्पर्शने प्रणिधाने च तु० पर० सक० अनिट्। मृशति अम्राक्षीत् अमार्क्षीत् अमृक्षत् ममर्श।

मृष क्षमायाम् अद०चु०उभ०सक० सेट्। मृषयति ते अमीमृषत् त। [अमर्षिष्ट।

मृष क्षान्तौ अद०भ्वा०उभ० सक० सेट्। मर्षति ते अमर्षीत्

मृष सेचने भ्वा०पर०सक०सेट्। मर्षति अमर्षीत् उदित् क्त्वा वेट्।

मृष क्षमायां चु०उभ०सक०सेट्। मर्षयति ते अमीमृषत् त अममर्षत् त। [अस्वेदिच् उदित् क्त्वा वेट्।

मृष क्षमायां भ्वा० उभ० सक० सेट्। मर्षति ते अमर्षीत्

मृष क्षमायां चु०पक्षे दिवा०च उभ०सक०सेट्। मृष्यति ते। मर्षयति ते। मर्षितः मर्षित्वा।

मृषा अव्य०मृष-का। मिथ्यायन्दार्थे अमरः।

मृषार्थक न० मृषा अयन्नासम्भूतोऽर्थो यस्य। "कूर्मलोमतनुत्राणः शशशृङ्गधनुर्धरः" इत्यादि मिथ्यार्थकवाक्ये।

मृषालक पु० मृषालक इव मञ्जर्यामस्यस्य कप्। आम्रवृक्षे शब्दर०। [छुटो वह्निमानित्यादिवाक्यम्।

मृषावाद् पु० मृषा+वद-घञ्। मिथ्यावाक्ये जटा० यथा

मृषोद्य न० मृषा+वद-भावे क्यप्। १मिथ्याकथने तद्विद्यतेऽस्य अच्। २मिथ्यावादिनि त्रि०शब्दमा०। [त्रि०अमरः

मृष्ट न०मृज(ष)-क्त। १मरिचे राजनि०, २शुद्धे ३शोधिते च

मॄ वधे क्र्या० प० प० सक० सेट्। मृणाति अमारीत्।

मे प्रतीदाने भ्वा० आत्म० सक० अनिट्। मयते अमास्त।

मेक(ख)ल पु० मि-कलच् खलच् वा नाम्लम्। १अद्रिभेदे मे इति कलो यस्य क मध्यः। २छागे पुंस्त्री० राजनि० स्त्रियां ङीष्।

मेक(ख)लकन्यका स्त्री ६त०। नर्मदानद्याम् अमरः।

मेक(ख)लाद्रिजा स्त्री मेक(ख)लाद्रेर्जायते जन-ड। नर्मदानद्याम् हेमच०।

मेक्षण न० "द्व्यङ्गलातीमिष्यार्द्धप्रमाणं मेक्षणं भवेत्। वृत्तं वार्क्षं च पुष्पफलवदानक्रियाक्षमम्" छन्दोगप०उक्ते यज्ञपात्रभेदे। द्व्यङ्गप्रमाणं प्रादेशद्वयम्।

मेखला स्त्री मि-खलच्। "मेखला सप्तयष्टिका"उक्ते १स्त्रीकट्याभूषणभेदे अमरः। उपनयनकाले ब्रह्मचारिभार्ये मौञ्ज्यादौ २कटीसूत्रे "मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्या विप्रस्य मेखला। क्षत्रियस्य च मौर्वी वैश्यस्य शणतान्तवी" मनुः। ३खड्गादिमुष्टिधारणार्थे ४पर्वतधोभागेन बन्धे ५शैलनितम्बे मेदि० ६नर्मदायां शब्दर० ७प्रांशुपण्याम् राजनि०। होमकुण्डोपरिस्थे स्तृतवेष्टनभेदे च।

मेघ पु० मिह-घञ् कुत्वम्। धूमज्योतिःसलिलमरुतसंघातजन्ये १जलधरे २मुस्ते च अमरः।३रागभेदे शब्दच० ४रागभेदे च सं०गी०। [स्त्रियां ङीष्।

मेघजीवन पुंस्त्री० मेघो जीवनं यस्य। चातकपक्षे राजनि०

मेघज्योतिस् न०मेघजन्यं ज्योतिः वा०ब०। वज्राग्नौ अमरः

मेघनाद पु० मेघस्येव नादोऽस्य। १वरुणे २रावणस्य पुत्रे इन्द्रजिति। ६त०। ३मेघशब्दे च मेदि०।

मेघनादानुलासक पुंस्त्री० मेघस्य नादेनानुलसति अनु+लस ण्वुल्। मयूरे राजनि० स्त्रियां ङीष्। णिनि। मेघनादानुलासिन् मयूरे अमरः।

मेघनामन् पु० मेघस्य नामैव नाम यस्य। मेघवाचकशब्दवाच्ये मुस्तके अमरः।

मेघपुष्पक न० मेघस्य पुष्पमिव। जले अमरः।

मेघयोनि स्त्री० ६त०। धूमे शब्दरत्ना०।

मेघवर्णा स्त्री मेघस्येव वर्णोऽस्याः। नीलीवृक्षे शब्दच०।

मेघवर्त्मन् न०६त०। आकाशे त्रिका०। मेघवीथ्यादयोऽप्यत्र।

मेघवह्नि पु० मेघजन्यो वह्निस्तद्घर्षणजातोऽग्निः। वज्राग्नौ हेमच०। एवं मेघानलादयोऽप्यत्र।

मेघवाहन पु० मेघो वाहनमिव यस्य, मेघान् वाहयति चालयति वह-णिच् ल्यु वा। इन्द्रे अमरः।

मेघसार पु० मेघस्य कर्पूरस्य सारः। चीनकर्पूरे राजनि०।

मेघस्तनितोद्भव पु० मेघस्तनितादुद्भवति उद्+भू-अच्। विकण्टकवृक्षे राजनि०।

मेघागम पु० मेघानामागमो यत्र। वर्षाकाले वर्षर्तौ शब्दर०

मेघानन्दिन् पु० मेघेन तद्ध्वनिना आनन्दति आ+नन्द-णिनि। मयूरे अच् मेघानन्दा। बलाकायां राजनि०।

मेघान्त पु० मेघानामन्तो यत्र। शरत्काले राजनि० मेघात्ययादयोऽप्यत्र। [त्रिका०।

मेघास्थि न० मेघानामस्थीव संहतकठिनत्वात्। करकायाम्

मेचक न० मच-वुन् पृषो०। १अन्धकारे २स्रोतोऽञ्जने च मेदि० ३नीलाञ्जने राजनि०। ४मयूरचन्द्रके ५कृष्णवर्णे मेदि०। ६धूमे ७मेघे दर्शोभाञ्जने शब्दर० ८कृष्णवर्णयुते त्रि० अमरः।

मेट (ड) उन्मादे भ्वा० पर० सक० सेट् ऋदित् चङि न ह्रस्वः। मेट(ड)ति अमेटी(डी)त्।

मेट,ला स्त्री मेट-उलच्। आमलक्याम् शब्दच०।

मेढ्र पुंस्त्री० मिह-ष्ट्रन्। १मेषे स्त्रियां ङीष् २पुंशोऽसाधारणचिह्ने च पु० अमरः। [माडरयिडा) रत्नमा०।

मेढ्रशृङ्गी स्त्री मेढ्रस्येव शृङ्गं यस्याः ङीष्। मेषशृङ्ग्याम्

मेथ वधे मेधायाञ्च सक० वधे अक० भ्वा० उभ० सेट्। मेथति ते अमेथीत् अमेथिष्ट। ऋदित् चङि न ह्रस्वः।

मेथि(थी) पु० मेथ (थ)-इन्। धान्यमर्द्दनार्थं पशुबन्धनकाष्ठे (मेरकाठ) हेमच०।

मेथिका स्त्री मेथ–ण्वुल्। (मेथि) शाकभेदे राजनि०। णिनि मेथिनी। अत्रैव स्त्री ङीप्। अच् गौरा०ङीष्। मेथी अत्रैवार्थे राजनि०।

मेद् वधे मेधायाञ्च सक० भ्वा० उभ० सेट्। मेदति ते अमेदीत् अमेदिष्ट। ऋदित् चङि न ह्रस्वः।

मेदःसारा स्त्री मेदस इव सारोऽस्याः। अष्टवर्गप्रसिद्धौषधिभेदे मेदायां राजनि०।

मेदक पु० मेद–ण्वुल्। जगले (मेकोया) अमरः।

मेदज पु० मेदात् मधुकैटभासुरमेदसो जायते जन–ड। भूमिज गुग्गुलौ राजनि०। मेदोजातमात्रे त्रि०।

मेदस् न० मेद–असुन्। मांसजन्ये धातुभेदे (वसा) अच्। मेद अत्रैव पु०। [मांसे हेमच०।

मेदस्कृत् न० मेदः करोति स्वपरिपाकेण जनयति कृ–क्विप्।

मेदा स्त्री मेदः कारणत्वेनास्त्यस्याः अच्। अष्टवर्गप्रसिद्धौषधिभेदे भावप्र०।

मेदिनी स्त्री मेदः मधुकैटभमेदोऽस्त्यस्याः कारणत्वेन इनि। १वसुन्धरायाम् “मधुकैटभयोरासीन्मेदसैव परिप्लुता। तेनेयं मेदिनी देवी प्रोच्यते” इति पुराणम्। २मेदायाञ्च।

मेदुर त्रि० मिद–घुरच्। १अतिशयस्निग्धे। “मेघैर्मेदुरमम्बरम्” जयदेवः। २काकोल्यां स्त्री राजनि० टाप्।

मेदोज न० मेदसो वसातो जायते जन–ड। देहस्थे मज्जहेतौ अस्थिनामके धातौ। [षधिभेदे राजनि०

मेदोद्भवा स्त्री मेदादुद्भवति उद्+भू–अच्। अष्टवर्गप्रसिद्धौ-

मेध मेधवत् सर्वम्। मेधति ते अमेधीत् अमेधिष्ट।

मेधस् पु० मेध–असुन्। स्वायम्भुवस्य मनोः पुत्रभेदे।

मेधा स्त्री मेध–अङ्। १धारणावत्यां बुद्धौ यया बुद्धा ज्ञातस्य न विस्मरणं तत्र। नञ्दुःसुशब्दात् बहु० असिच्समा०। अमेधाः दुर्मेधाः सुमेधाः इत्यादि। आधारे घञ्। २यागे पु०। [वति त्रि० मेदि० स्त्रियां ङीप्।

मेधाविन् पु० मेधा+अस्त्यर्थे विनि। १शुकपक्षे। २मेधा-

मेधिर त्रि०मेधा+अस्त्यर्थे इरच्। मेधावति त्रिका०।

मेधिष्ठ त्रि०अतिशयेन मेधावान् इष्ठन् मतोर्लुक्। अतिशयमेधावति जने। ईयसुन् मेधीयस् तत्रार्थे स्त्रियां ङीप्

मेध्य त्रि० मेध–यत्। १पवित्रे अमरः २शुचौ च मेदि० मेधाय यज्ञाय हितः यत्। ३छागे ४खदिरे ५यवे च पुं० मेदि०। ६केतक्यां ७शङ्खपुष्प्यां ८रक्तवचायाम् ९रोचनायां, १०वन्ध्याम्, ११मण्डूक्यां १२ज्योतिष्मतीलतायाम् स्त्री राजनि०।

मेनका स्त्री मि–नक। १स्वर्वेश्याभेदे शब्दर०। मेनैव स्वार्थे क। २हिमालयपत्न्याम्। [स्यत।

मेनकात्मजा स्त्री ६त०। हैमवत्यां दुर्गायाम् मेनासुतादयो-

मेना स्त्री मि–न। हिमालयपत्न्याम् पितॄणां मानस्यां कन्यायाम्। “मेनां मुनीनामपि माननीयाम्” कुमा०।

मेनाद पुंस्त्री० मे इति नादो यस्य। १बिडाले २छागे ३मयूरे च मेदि० स्त्रियां ङीष्।

मेन्धी स्त्री मा लक्ष्मीः इध्यते यया इन्ध–घञ् गौरा०ङीष्। (मेहदी) इति ख्याते तत्पत्रमर्द्दने हि लक्ष्मीतुल्यरक्तवर्णता।

मेप गतौ भ्वा० आ० सक० सेट्। मेपते अमेपिष्ट। ऋदित् चङि न ह्रस्वः। [न्मेयविचिन्त्यः”।

मेय त्रि० मा–मि–वा यत्। १परिच्छेद्ये २ज्ञेये च “मानाधी-

मेरु पु० मि–रु। सर्ववर्षेभ्य उत्तरस्थे १पर्वतभेदे जपमालोपरिस्थे २फलबीजादिके ३करजपमालायामङ्गुलिपर्वभेदे च

मेरुक पु० मेरुरिव पीतवर्णत्वात् इवार्थे कन्। यक्षधूपे (धुना) शब्दच०।

मेरुसावर्ण पु०। चतुर्दशसु मनुषु एकादशे मनौ।

मेलक त्रि० मेलयति मिल–णिच–ण्वुल्। १मिश्रके। योटकमेदे मिल–भावे घञ् स्वार्थे क। २सङ्गे अमरः।

मेला स्त्री मिल–णिच्–अच् टाप्। १नीलीवृक्षे राजनि०। २मस्याम् ३अञ्जने ४मेलने च मेदि०। [जटा०।

मेलाम्बु पु० मेलाया मस्या अम्बुरिव। मस्याधारे (दोयात)

मेलापकाख्या स्त्री नी० ता० उक्ते यदृशादिभेदे यदृशादि-शब्दे २७५१ पृ० दृश्यम्। [चङि न ह्रस्वः।

मेव सेवने भ्वा० आ० सक० सेट्। मेवते अमेविष्ट। पवर्गादित्

मेष पुंस्त्री० मिष–अच्। (मेढा) १पशुभेदे अमरः स्त्रियां ङीष्। २चक्रमर्दवृक्षे मेदि०। ज्योतिश्चक्रस्य द्वादशांशे अश्विनीभरणीकृत्तिकानक्षत्राद्यपादात्मके ३राशिभेदे।

मेषकम्बल पु० मेषेण तल्लोम्ना निर्मितः कम्बलः। मेषलोमजाते वस्त्राकारे पदार्थे अमरः।

मेषलोचन पु० मेषस्य लोचनमिव पुष्पमस्य। १चक्रमर्दे भावप्र०। २मेषतुल्यनेत्रे त्रि० मेषनेत्रादयोऽप्यत्र।

मेषवल्ली स्त्री मेषस्य शृङ्गाकारफलयुता वल्ली शाक०त०। (गाडरशिङ्गा) लताभेदे भावप्र०।

मेषविषाणी स्त्री मेषस्य विषाणं शृङ्गमिव फलं यस्याः गौरा०ङीष् (गाडरशिङ्गा) लताभेदे रत्नमा०। स्वार्थे क अत इत्वम्। मेषविषाणिका तत्रैवार्थे।

मेषशृङ्ग पु० मेषस्य शृङ्गमिवाकारोऽस्त्यस्य अच्। १स्थावरविष

भेदे हेमच०। २अजशृङ्ग्यां (गाडरशिङ्गा) स्त्री गौरा० ङीष् रत्नमा०। [शब्दच०।

मेषा स्त्री मिष–कर्मणि घञ्। सूक्ष्मैलायाम् (गुजराटी)

मेषाक्षिकुसुम पु० मेषाक्षीव कुसुमं यस्य। चक्रमर्दे रत्नमा० मेषपुष्पादयोऽप्यत्र।

मेषाण्ड पु० मेषस्याण्ड एवाण्डोऽस्य। इन्द्रे तस्य हि दक्षयज्ञेऽण्डनाशे मेषाण्डेन तत्करणमिति पुराणप्रसिद्धम्।

मेषालु पु० मेषाणामालुरिव प्रियः। वर्वरीवृक्षे शब्दच०।

मेषी स्त्री मिष–अच् गौ० ङीष्। १जटामांस्यां २तिनिशवृक्षे च राजनि०। जातौ ङीष्। ३मेषजातिस्त्रियाम्।

मेषूरण न० लग्नावधिदशमस्थाने ज्यो० त०।

मेह पु मिह–घञ्। १प्रस्रावे हेमच० २प्रमेहरोगभेदे च अमरः। प्रमेहशब्दे दृश्यम्। अच्। ३मेषे शब्दच०।

मेहघ्नी स्त्री मेहं हन्ति हन-टक् ङीप्। हरिद्रायाम् रत्नमा० आर्द्रतत्स्वरससेवनाद्धि मेहनाश इति वैद्यकप्रसिद्धिः।

मेहन न० मिह्यतेऽनेन मिह-करणे ल्युट्। १शिश्ने अमरः। कर्मणि ल्युट्। २मूत्रे मेदि०। भावे ल्युट्। ३मूत्रोत्सर्गे।

मैत्र(त्र) न० मित्रो देवताऽस्य अण् मैत्रं पायुक्षालेदं पुनरण्। १विडुत्सर्गे "मैत्रं कर्म समाचरेत्" इति स्मृतिः। मित्रो देवताऽस्य, मित्रात आगतं तस्येदं वा अण्। २अनुराधानक्षत्रे न०। तस्य हि मित्रो देवता। ३मित्रतः प्राप्ते "मैत्रमौद्वाहिकञ्चैव" स्मृतिः। ४सुहृत्सम्बन्धिनि च त्रि०। मित्रमेव स्वार्थे प्रज्ञाद्यण्। ५मित्रे ६ब्राह्मणे च पु० त्रिका०।

मैत्रावरुण पु० मित्रस्य वरुणस्य देवताद्वन्द्वे आनङ् मित्रावरुणयोरपत्यम् अण्। अगस्त्ये। इञ्। मैत्रावरुणिरप्यत्र कल्पभेदे हि तस्य तयोः पुत्रत्वं पुराणप्रसिद्धम्।

मैत्री न० मित्रस्य भावः अण् वा ष्यञ् पक्षे ङीप् यलोपः। सौहार्दे मैत्र्यमप्यत्र न०। [त्रिका०।

मैत्रेय पु० मित्राया अपत्यम् ढक्। १मुनिभेदे २बुद्धदेवे

मैथिली स्त्री मिथिलायां भवा अण् ङीप्। १सीतायाम्। मिथिलाया राजा अण्। २मिथिलादेशाधिपे पु०।

मैथुन न० मिथुनेन स्त्रीपुंसाभ्यां निर्वृत्तम् अण्। १अग्न्याधानादौ, कर्मणि "सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने" इति स्मृतिः। अग्न्याधाने हि सपत्नीकस्यैवाधिकार इति तस्य तद्रूपत्वम्। २स्त्रीपुंसयोः सङ्गमरूपे ग्राम्यधर्मे च अमरः। [जटा०।

मैनाक पु० मेनकायां भवः अण्। हिमालयसुते पर्वतभेदे

मैरेय न० मिरायां देशभेदे ओषधिभेदे वा भवं ढक्। मिरादेशजाते १आसवे "मैरेयं धातकीपुष्पगुडधानाम्लसम्भवम्" माधवोक्ते २मद्यभेदे च न०।

मोक्ष मोक्षे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। मोक्षयति ते मोक्षति अमुमोक्षत् त अमोक्षीत्।

मोक्ष पु० मोक्ष–घञ्। १अपवर्गे २मोचने "नीविमोक्षो हि मोक्षः" सा०द०। ३पाटलिवृक्षे मेदि०। ४मरणे हेमच०।

मोघ त्रि० मुह–घ अच् वा कुत्वम्। १निरर्थके अमरः २हीने ३पाटलावृक्षे मेदि० ४विडङ्गे च स्त्री हेम० ५प्राचीरे पु० शब्दमा०। [राजनि०।

मोघपुष्पा स्त्री मोघं पुष्पमार्त्तवं यस्याः। वन्ध्यायां स्त्रियाम्

मोच न० मुच–अच्। १कदलीफले २शोभाञ्जने पु० अमरः। ३कदल्यां ४शाल्मलिवृक्षे ५नीलीवृक्षे, च स्त्री मेदि० टाप्।

मोचक पु० मुच–ण्वुल्। १मोक्षे २कदल्यां ३शोभाञ्जने च ४वैराग्यवति त्रि० हेमच० ५मुष्ककवृक्षे राजनि०।

मोचन न० मुच–णिच्–वा भावे ल्युट्। १मुक्तौ २मोचने दभ्रे ४याञ्चे च। मुच्यते रोगात् अनया मुच-करणे ल्युट्। ५कण्टकार्य्याम् स्त्री जटा० ङीप्। [राजनि०।

मोचरस पु० ६त०। शाल्मलिनिर्यासे स्वनामख्याते पदार्थे

मोचाट पु० मुच–णिच्–अच् मोचाय रोगमोचनाय अटति अट-अच्। १कृष्णजीरके २रम्भास्थ्नि ३मलयोद्भवे च मेदि०

मोटक न० मुट–ण्वुल्। श्राद्धे पितृदानार्थं १सुग्नकुशपत्रद्वये २रागिणीभेदे स्त्री सङ्गी० ङीप्।

मोटा स्त्री मुट–अच्। बलायाम् राजनि०।

मोट्टायित न० "कान्तस्मरणवार्त्तादौ हृदि तद्भावभावतः। प्राकट्यमभिलाषस्य मोट्टायितमुदीर्य्यते" उज्ज्वलमण्युक्ते स्त्रीणामभिलाषभेदे।

मोद पु० मुद–घञ्। हर्षे शब्दर०।

मोदक पु० मोदयति मुद-णिच्-ण्वुल्। १खाद्यभेदे (मोया) अमरः। शूद्रायां क्षत्रियाज्जाते २वर्णसङ्करजातिभेदे (मयरा) स्मृतिः। [राजनि०।

मोदमोदिनी स्त्री मोद इव मोदयति मुद-णिनि। जम्ब्वाम्

मोदयन्ती स्त्री मुद–णिच्-शतृ ङीप्। वनमल्लिकायाम् (काठमल्लिका) शब्दर०। [राजनि०।

मोदा स्त्री मोदयति अजान् मुद-णिच् अच्। अजमोदायाम्

मोदाढ्या स्त्री मोदः अजमोदस्तेनाढ्या। १अजमोदायाम् २हर्षयुक्ते त्रि० राजनि०।

मोदिनी स्त्री मोदयति मुद-णिच्-णिनि। १अजमोदायाम् २मल्लिकायाम् ३यूथिकायां ४कस्तूर्य्यां ५मदिरायाञ्च राजनि०।

मोरट न० मुर-अटन्। १इक्षुमूले, २अङ्कोटपुष्पे ३सप्तरात्रोषितक्षीरे च मेदि०। ४मूर्वालतायां स्त्री अमरः। ५क्षीरमोरटायां पु० राजनि०।

मोषक पु० मुष्णाति मुष-ण्वुल्। तस्करे चौरे अमरः।

मोषण न० मुष-ल्युट्। १लुण्ठने २छेदने, ३वधे च।

मोह पु० मुह-घञ्। १मूर्च्छायाम् भ्रान्तिसाधने २अज्ञाने मेदि० ३वेदान्तोक्ते अविद्याशक्तिभेदे ३दुःखे शब्दर० ४देहादिष्वात्माभिमाने च।

मोहन पु० मोहयति मुह-णिच्-ल्यु। १धुस्तूरे राजनि० कन्दर्पस्य २शरभेदे च त्रिका०। ३मोहकारके त्रि० स्त्रियां टाप्। सा च ४त्रिपुरमालीपुष्पे रत्नमा०। ५महन्मायां शब्दमा०। ६उपोदक्यां स्त्री राजनि०। ७वटपत्र्यां भावप्र० उभयत्र गौरा० ङीष्।

मोहरात्रि स्त्री ब्रह्मणो निजपरिमाणेन पञ्चाशद्वर्षे गते प्रलयभेदे "कालरात्रिर्महारात्रिर्मोहरात्रिश्च" चण्डी

मोहिनी स्त्री मुह-णिनि। १अप्सरोभेदे यस्याः शापात् ब्रह्मणोऽपूज्यत्वं तत्कथा ब्रह्मवै० ज० ख० ३३अ०। अमृतमन्थनकाले दैत्यानां मोहनाय स्त्रीरूपिणि भगवदवतारभेदे च।

मौक्तिक न० मुक्तैव स्वार्थे ठक्। मुक्तायाम् अमरः।

मौक्तिकप्रसवा स्त्री मौक्तिकं प्रसूते प्र+सू-अच्। मुक्तास्फोटे शुक्तौ राजनि०।

मौक्तिकशुक्ति स्त्री ६त०। मुक्तास्फोटे शुक्तौ राजनि०।

मौञ्जी स्त्री मुञ्जस्येयम् अण्। कटिसूत्रे त्रिरावृत्तमुञ्जलतायां मेखलायाम् मनुः। [राजनि०।

मौञ्जीपत्त्री स्त्री मौञ्ज्या इव पत्त्रमस्याः। वल्वजायाम्

मौञ्जीबन्ध पु० मौञ्ज्या मेखलाया बन्धोयत्र। १उपनयनसंस्कारे "मौञ्जीबन्धः शुभः प्राक्चैत्रे मीनगते रवाविति" ज्यो०। ल्युट् मौञ्जीबन्धन तत्रार्थे न०। "द्वितीयं मौञ्जीबन्धनम्" मनुः। ६त०। २तद्बन्धने च।

मौढ्य न० मूढस्य भावः ष्यञ्। १मोहे हेम०२बाल्ये च।

मौद्गल्य पु० मुद्गलस्य मुनेर्गोत्रापत्यं गर्गा० यञ्। मुद्गलगोत्रापत्ये मुनिभेदे। [चोले अमरः।

मौद्गीन न० मुद्गानां भवनं क्षेत्रं खञ्। मुद्गभवनयोग्ये

मौन न० मुनेर्भावः। वाग्व्यापाररहितत्वे "उच्चारे मैथुने चैव प्रस्रावे दन्तधावने। स्नाने भोजनकाले च षट्सु मौनं समाचरेत्" इति स्मृतिः।

मौनिन् त्रि० मौनमस्त्यस्य इनि। १वाग्व्यापाररहिते। २मुनौ पु० जटा०। [राजनि०।

मौनेय पु० मुनेः कश्यपपत्नीभेदस्यापत्यम् ढक्। गन्धर्वभेदे

मौरजिक त्रि० मुरजवाद्यवादनं शिल्पमस्य ठक्। मृदङ्गवादनशीले अमरः।

मौर्ख्य न० मूर्खस्य भावः ष्यञ्। १जाड्ये हेमच०२मूर्खतायाञ्च

मौर्वी स्त्री मूर्वा लता तत्तन्तुना निर्वृत्ता अण्। १धनुर्गुणे अमरः। २अजशृङ्ग्याञ्च रत्नमा०।

मौल त्रि० मूलं वेत्ति मूलादागतो वा अण्। भूम्यादेरागमादिमूलज्ञे, "यं परम्परया मौलाः सामन्ताः स्वामिनं विदु"रिति स्मृतिः २मूलादागते च।

मौलि पुंस्त्री० मूलस्यादूरभवः इञ्। १चूडायां २किरीटे ३संयतकेशेषु अमरः ४मस्तके हेमच०। ५अशोकवृक्षे पु०। ६भूमौ स्त्री मेदि० वा ङीप्।

मौषल न० मुषलस्येदम् तत्सदृशं वा अण्। १मुषलसम्बन्धिनि २मुषलतुल्यनिर्घोषे "गङ्गायां मौषलं स्नानं महापातकनाशनम्" इति पुराणम्। मुषलमधिकृत्य कृतो ग्रन्थः अण्। महाभारतान्तर्गते "मुषलं कुलनाशनम्" इत्यादिप्रतिपादके षोडशे ३पर्वणि।

मौहूर्त्त पु० मुहूर्त्तं तत्प्रतिपादकं शास्त्रं वेत्त्यधीते वा अण्। ज्योतिःशास्त्रज्ञे। ठक्। मौहूर्त्तिक तत्रैव अमरः।

म्ना अभ्यासे भ्वा०पर०सक० सेट्। मनति अम्नासीत् मम्नौ।

म्रक्ष संयोजने म्रेक्षणे च चु० उभ० सक०सेट्। म्रक्षयति ते अमम्रक्षत् त। [अम्रक्षीत्।

म्रक्ष संघाते अक० संयोजने सक० भ्वा० पर०सेट्। म्रक्षति

म्रक्षण न०म्रक्ष-भावे ल्युट्। १संयोजने २राशीकरणे ३तैले हेमच०।

म्रद मर्दे भ्वा० आ० सक० सेट्। म्रदते अम्रदिष्ट। घटा० म्रदयति। मित् अङ् म्रदा। [मृदुत्वे।

म्रदिमन् पु० मृदोर्भावः, मृदु+इमनिच् डित् ऋतोरः।

म्रदिष्ठ त्रि० अतिशयेन मृदुः इष्ठन् डित् ऋतोरः। अतिमृदुत्ववति। ईयसुन्। म्रदीयस् तत्रार्थे त्रि० स्त्रियां ङीप्।

म्रुच गतौ भ्वा० पर० सक० सेट्। म्रोचति इरित् अम्रुचत् अम्रोचीत् मुम्रोच। उदित् क्त्वा वेट्।

म्रुञ्च गतौ सर्वं म्रुचवत्। म्रुञ्चति अम्रुचत् अम्रुञ्चीत्।

म्रेट(ड) उन्मादे भ्वा० पर० सक० सेट्। म्रेट(ड)ति अम्रेटी(डी)त्। ऋदित् चङि न ह्रस्वः।

म्लक्ष चु० म्रक्षवत् सर्वम्। म्लक्षयति ते। अमम्लक्षत् त।

म्लान त्रि० म्लै कान्तिक्षये—क्त तस्य नः। १मलिने हेमच० २म्लानियुक्ते च।

म्लानि स्त्री म्लै—क्तिन्। कान्तिक्षये। [२म्लाने च त्रि०मेदि०

म्लिष्ट न० म्लेच्छ—क्त नि०। १अविस्पष्टवाक्ये २तद्वाक्ययुक्ते

म्लुच गतौ भ्वा०पर०सक०सेट्। म्लोचति। इरित् अम्लुचत् अम्लोचीत्। उदित् क्त्वा वेट्।

म्लुन्च गतौ म्लुचवत् सर्वम्। म्लुञ्चति अम्लुचत् अम्लुञ्चीत्

म्लेच्छ अपशब्दे वा चु० उभ० पक्षे भ्वा० पर० अक० सेट्। म्लेच्छयति ते म्लेच्छति अमम्लेच्छत् त अम्लेच्छीत्

म्लेच्छ पु० म्लेच्छ—घञ्। १अपशब्दे "म्लेच्छो ह वा नाम यदपशब्द" इति श्रुतिः। कर्त्तरि अच्। २पामरजातौ, ३नीचजातौ च पुंस्त्री० स्त्रियां ङीप् "गोमांसखादको यस्तु विरुद्धं बहु भाषते। सर्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते" बौधायनः। ४पापरते त्रि० मेदि०। ५हिङ्गुले न० राजनि०।

म्लेच्छकन्द पु० म्लेच्छप्रियः कन्दः शा०त०। लशुने राजनि०

म्लेच्छजाति स्त्री म्लेच्छाभिधा जातिः। गोमांसादिभक्षके किरातादिजातिभेदे अमरः।

म्लेच्छदेश पु० म्लेच्छाधारो देशः। चातुर्वर्ण्याचाररहिते देशे अमरः। "चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते। म्लेच्छदेशः स विज्ञेय आर्य्यावर्त्तस्ततःपरम्"।

म्लेच्छभोजन न० म्लेच्छैर्भुज्यते भुज—कर्मणि ल्युट्। १यावके अन्नभेदे शब्दर०। २गोधूमे पु० त्रिका०।

म्लेच्छमण्डल न० ६त०। म्लेच्छदेशे हेमच०।

म्लेच्छमुख न०म्लेच्छानां मुखमिव रक्तत्वात्। ताम्रे अमरः। म्लेच्छास्यमप्यत्र हारा०।

म्लेच्छित न० म्लेच्छ—क्त। अपशब्दे असंस्कृतशब्दे हारा०

म्लेट(ड) उन्मादे भ्वा० पर० सक० सेट्। म्लेट(ड)ति अम्लेटी(डी)त्। ऋदित् चङि न ह्रस्वः।

म्लेव सेवने भ्वा० आ० सक० सेट्। म्लेवते अम्लेविष्ट। ऋदित् चङि न ह्रस्वः। [मम्लौ म्लानः म्लानिः।

म्लै कान्तिक्षये भ्वा० पर० सक० अनिट्। म्लायति म्लासीत्

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये मकारादिशब्दार्थसङ्कलनम्।

य

यकारः व्यञ्जनवर्णभेदः स्पर्शवर्णोष्मवर्णयोर्मध्यस्थत्वात् अन्तःस्थवर्णभेदः तस्योच्चारणस्थानं तालु जिह्वाग्रेण तालुन ईषत्स्पर्शेनोच्चारणात्तदुच्चारणे ईषत्स्पर्श आभ्यन्तरप्रयत्नः "अचोऽस्पृष्टायणस्त्वीषत्" शिक्षोक्तः। बाह्यप्रयत्नाः संवारनादघोषा अल्पप्राणश्च। वर्णाभिधानेऽस्य वाचकशब्दा उक्ता यथा "यो वाणी वसुधा वायुर्विकृतिः पुरुषोत्तमः। युगान्तः श्वसनः शीघ्रो धूमार्च्चिः प्राणिसेवकः। यशस्वी भ्रमो जटी लोला वायुवेगी यशस्करी। चतुर्वर्णः जपा वालो हृदयं कपिला प्रभा। आग्नेयो व्यापकस्त्यागी मोहो वाता प्रभा सुखम्। चण्डः सर्वेश्वरी धूम्रा चामुण्डा सुमुखेश्वरी। त्वगात्मा मलयो माता वंशिनी भृङ्गिनायकः। ङे नमः शोषको मीनो धनिष्ठानवेदिनी। शिष्टः सोमः पङ्क्तिनामा पापहा प्राणसंज्ञकः"।

अस्याधिष्ठातृदेवताध्यानं यथा "धूम्रवर्णां महारौद्रीं चतुर्भुजां रक्तलोचनाम्। रक्ताम्बरपरीधानां नानालङ्कारभूषिताम्। महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिनीम्। एवं ध्यात्वा यकारन्तु तन्मन्त्रं दशधा जपेत्"। अस्य ध्येयस्वरूपं यथा "यकारं शृणु चार्वङ्गि! चतुष्कोणमयं सदा। पलालधूमसङ्काशं स्वयं परमकुण्डलीम्। पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं तथा। प्रणमामि सदा वर्णं मूर्त्तिमन्मोक्षमव्ययम्" कामधेनुतन्त्रम्। मातृकान्यासे अस्य हृदयन्यास्यता। काव्यादौ अस्य प्रथमप्रयोगे लक्ष्मीलाभः फलम् "यो लक्ष्मीं रसु दाहम्" इ०र०टी०।

य पु० या—ड। १वायौ २यशसि ३योगे, ४गतौ च ५यातरि त्रि० शब्दरत्ना०। यम-ड। ६संयमे। ७आदिलघुपैशुक्ने जलदैवते लक्ष्मीफलके यगणे च।

यकार पु० य+स्वरूपे कार। यस्वरूपे वर्णे।

यकृत् न० यं संयमं करोति कृ-क्विप् तुक् च।१कुक्षौ दक्षिणभागस्थे मांसपिण्डे अमरः। २तद्दुष्टे रोगभेदे च "अधो दक्षिणतश्चापि हृदयात् यकृतः स्थितिः। तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम्" भावप्र०।

तद्रोगनिदानादि तत्रोक्तं यथा "प्लीहामयस्य हेत्वादि समस्तं यकृदामये। किन्तु स्थितिस्तयोर्ज्ञेया वामदक्षिणपार्श्वयोः"। अस्य शूलादौ मांसे च यकृदादेशः।

यक्तदाक्षिका स्त्री यकृतद्रवात्मा स्वरूपं यस्याः कप्। तैल-पायिकायाम् (तेलापोका) शब्दच०। [इति शब्दच०।

यकृद्वैरिन् पु०यकृतो रोगभेदस्य वैरी हन्तृत्वात्। रोहितक-

यक्ष पूजायां चु० आ० सक० सेट्। यक्षयते अययक्षत।

यक्ष पु० यक्ष्यते यक्ष-कर्मणि घञ्। १देवयोनिभेदे २तदीश्वरे कुवेरे मेदि०३इन्द्रगृहे सारखतः। भावे घञ् ४पूजने च।

यक्षकर्दम पु०यक्षप्रियः कर्दम इव। "कुङ्कुमागुरुकस्तूरी कर्पूरं चन्दनं तथा। महासुगन्धमित्युक्तं नामतो यक्षकर्दमः" इत्युक्ते समभागेन मिश्रिते कुङ्कुमादौ धन्व-न्तरिः।कुङ्कुमस्थाने कक्कोलकम् [यक्षकर्दमादयोऽप्यत्र।

यक्षतरु पु० यक्षाणां वासयोग्यस्तरुः। वटवृक्षे राजनि०

यक्षधूप पु०यक्षे पूजने योग्यो धूपः।(धुना) सर्ज्जरसे अमरः

यक्षराज पु० यक्षाणां राजा टच् समा०। कुवेरे। यक्षेषु राजते राज-क्विप्। यक्षराडप्यत्र पु०।

यक्षरात्रि स्त्रि० यक्षप्रिया रात्रिः शा०त०। कार्त्तिकपूर्णिमा-रात्रौ त्रिका०। [शब्दमा०।

यक्षामलक न० यक्षाणामामलकमिव। पिण्डखर्ज्जूरफले

यक्षावास पु० ६त०। यक्षाणामावासः। वटवृक्षे राजनि०।

यक्षोडुम्बुरक न० यक्षाणामुडुम्बरमिव इवार्थे कन्। अश्वत्थफले त्रिका०। [शब्दमा०।

यक्ष्मघ्नी स्त्री० यक्ष्माणं हन्ति हन-टक् ङीप्। द्राक्षायाम्

यक्ष्मन् पु०यक्ष-मनिन्। रोगभेदे अमरः। तन्निदानादि यथा "वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात्। त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात्"। वेगोऽत्र वातमूत्र पुरीषाणां। "वातमूत्रपुरीषाणि निरुणद्धि यदा नरः" इति चरकवचनात्। क्षयात् क्षीयतेऽनेनेति क्षयः तेनातिव्यवायानशनेर्ष्यादयो धातुक्षयहेतवः क्षय शब्देनोच्यन्ते। साहसात् बलवता सम' मल्लयुद्धा दितः। विषमाशनात् "बहु स्तोकमकाले वा तज्ज्ञेयं विषमाशनम्" तस्मात्। त्रिदोषः सान्निपातिकः। हेतु-चतुष्टयात् अन्येऽपि हेतवः हेतुचतुष्टय एवान्तर्भवन्ति। यक्ष्मणः पर्य्यायाः राजयक्ष्मक्षयशोषाः। यक्ष्मादीनां शब्दानां निरुक्तिमाह "वैद्यो व्याधिमतां यस्मात् व्याधेर्यत्नेन यक्ष्यते। स यक्ष्मा प्रोच्यते लोके शब्द शास्त्रविशारदैः"। यक्ष्यते पूज्यते। "राज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः। तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः। क्रियाक्षयकरत्वात्तु क्षय इत्युच्यते बुधैः। संशोषणाद्रसादीनां शोष इत्यभि-धीयते"। संप्राप्तिमाह "कफप्रधानैर्दोषैस्तु रुद्धेषु रस वर्त्मसु। अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तराः। क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः"। कफ-प्रधानैर्दोषैः रसवर्त्मसु रुद्धेषु अनन्तराः सर्वे धातवः क्षीयन्ते ततो मानवः शुष्यति। कारणभूतस्य रसस्य क्षये कार्य्याणां रक्तादीनामनुक्रमेण क्षीयमाणत्वात्" भावप्र०।

यज देवपूजने, दाने, सङ्गतौ च भ्वा० उभ० यजादि० अनिट्। यजति ते अयाक्षीत् अयष्ट इयाज ईजतुः।

यजति पु० यज-अतिच्। यागभेदे। "यजतिषु ये यजा-महे नानुयाजेषु" श्रुतिः। तल्लक्षणं कात्या० श्रौ० १।२।६ "तिष्ठद्धोमा वषट्कारप्रदाना याज्यापुरोऽनु-वाक्यावन्तो यजतयः" सू०। "उच्यन्त इति शेषः। तिष्ठता होमो येषु ते तिष्ठद्धोमाः वषट्कारेण प्रदानं येषु ते वषट्कारप्रदानाः तथा याज्यावन्तः पुरोऽनुवाक्यावन्तश्च ये ते यजतयः उच्यन्ते" कर्कः।

यजत्र न० यज-अत्र। १अग्निहोत्रे उणादि० २तद्वति त्रि०।

यजन न० यज-ल्युट् होत्रादिना पशुक्षीराज्यादिभिः मन्त्र-पूर्वकं वह्नौ प्रक्षेपरूपे यागे।

यजनस्य व्या० वि० देवबोधं यथा "पशुक्षीराज्यपुरो-डाशसोमौषधिचरुप्रभृतिर्हविर्भिः खदिरपलाशाश्वत्थ-न्यग्रोधोडुम्बरप्रभृतिभिः समिद्भिः स्रुक्स्रुवोदूखल-मुषलकुठारखनित्रयूपदारुदर्भचर्मपात्रपवित्रभाजनादिभि-र्द्रव्योपकरणैरुद्गातृहोत्रध्वर्युब्रह्मादिभिः ऋत्विग्भिः काम्यनैमित्तिकानां पश्वादिपूर्वकाणां यथोक्तदक्षिणानां समापनं यजनम्"। ल्यु। उत्तरपदस्थः समभिव्या-हृतदेवादेर्यष्टरि त्रि०आधारे ल्युट्।२यागाधिकरणे न०। यथा देवयजनम्। [कर्मफलयुते।३महादेवमूर्त्तिभेदे च।

यजमान पु० यज-शानच्। होत्रादेर्नियोक्तरि प्रधान-

यजि पु० यज-इन्।१यष्टरि उणा०।२यागे ३यजधातौ च।

यजुर्वेद पु० यजुषां ऋक्सामभिन्नानां मन्त्राणां प्रतिपादको वेदः। वेदभेदे स च शुक्लकृष्णभेदेन द्विधा तद्विवरणं चरणव्यूहे भाग० १२।६अध्याये च दृश्यम्।

यजुस् न० यज-उसि। ऋक्सामभिन्ने पदच्छेदरहिते मन्त्रभेदे अमरः। तल्लक्षणम् "इतरगीतिवर्जितत्वेन प्रश्लिष्टपठिता मन्त्रा यजूंषि" सा० भा० उक्तम्।

यज्ञ पु० यज-भावे न। यागे अमरः। स त्रिविधः "अफला-काङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते। यष्टव्यमेवेति मनः समाधाय स सात्त्विकः। अभिसन्धाय तु फलं दम्भार्थ-

अपि चैव यत् । इज्यते भरतश्रेष्ठ ! तं यज्ञं विद्धि राजसम् ॥ विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते” गीता १७अ० । स च नानाविधः । “द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे । स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः” गीता ४अ० । पञ्चगृहस्थकर्त्तव्या यज्ञा यथा “अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्” गारुडे ११५अ० । २विष्णौ च

यज्ञपति पु० ६त० । विष्णौ “यज्ञो यज्ञपतिर्यज्वा” विष्णुस० ।

यज्ञपशु पु० इज्यते हविर्दीयतेऽत्र यागार्थकयजेर्भावे आधारे वा न यज्ञः यज्ञार्थः पशुः । १अश्वे २छागादौ च ।

यज्ञपात्र न० ६त० । यागसाधने पात्रे तच्च दर्वादि कात्या०श्रौ०उक्तं पात्रशब्दे ४२०० पृ० दर्शितम् ।

यज्ञपुरुष पु० यज्ञरूपः पुरुषः । वराहरूपे विष्णौ हेमच० । क्रतुपुरुषशब्दे २२८४पृ० दृश्यम् । [राजनि० ।

यज्ञभूषण पु० यज्ञम् भूषयति भूष-णिच्-ल्यु । श्वेतदर्भे

यज्ञयोग्य पु० यज्ञे योग्यः । १उडुम्बरवृक्षे राजनि० । तत्समिदादिभिर्हि यज्ञः साध्यते । २यागार्हे विप्रादौ च ।

यज्ञवल्ली स्त्री० यज्ञार्था वल्ली । सोमवल्ल्याम् राजनि० ।

यज्ञवराह पु० यज्ञरूपो वराहः । आदिवराहे भगवदवतारभेदे । क्रतुपुरुषशब्दे २२८४पृ० दृश्यम् । वराहदेहस्य शिवेन विदारणेन यज्ञभेदरूपत्वं सम्पादितं यथोक्तं कालिकापु० ३० अ० “विदारिते वराहस्य काये भर्गेण तत्क्षणात् । ब्रह्मविष्णुशिवा देवाः सर्वैश्च प्रमथैः सह । निश्चक्रमात् समुद्धृत्य तत् शरीरं नभः प्रति । नदिभेजुः शरीरन्तु विष्णोश्चक्रेण खण्डशः । तस्याङ्गसन्धितो यज्ञा जातास्ते वै पृथक् पृथक् । यस्माद् यस्माद् ये यज्ञास्तत् शृण्वन्तु महर्षयः । भ्रूनासासन्धिना जातो ज्योतिष्टोमो महाध्वरः । हनुश्रवणसन्ध्योस्तु वह्निष्टोमो व्यजायत ।-चक्षुर्भ्रुवोः सन्धिना तु व्रात्यष्टोमो व्यजायत । आस्युः पौनर्भवष्टोमस्तस्य पोत्रोष्ठसन्धिना । वृद्धष्टोम बृहत्ष्टोमौ जिह्वामूलादजायत । अतिरात्रं सवैराजमधोजिह्वान्तरादभूत् । अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् । स्नानं तर्पणपर्यन्तं नित्ययज्ञाश्च ताप्राः । ललाटकण्ठसन्ध्युत्था, लिङ्गातो विधयस्तथा यथाऽश्वमेधो महामेधो नरमेधस्तथैव च । प्राणिहिंसात्मकाश्चान्ये ते जाताः पादसन्धितः । राजसूयोऽथ कारीरी वाजपेयस्तथैव च । पृष्ठसन्धौ समुत्पन्ना ग्रहयज्ञास्तथैव च । प्रतिष्ठोत्सर्गयज्ञाश्च दानश्राद्धादयस्तथा । हृत्सन्धितः समुत्पन्ना सावित्रीयज्ञ एव च । सर्वेषां साधका यज्ञाः प्रायश्चित्तकराश्च ये । ते मेढ्रसन्धितो जाता यज्ञास्तस्य महात्मनः । रक्षःसत्रं सर्पसत्रं सर्वञ्चैवाभिचारिकम् । गोमेधो वृद्धजावश्च खुरेभ्यो ह्यभवन्निमे । मायेष्टिः परमेष्टिश्च गोष्पतिर्भोगसम्भवः । लाङ्गूलसन्धौ संजाता अग्निष्टोमस्तथैव च । नैमित्तिकाश्च ये यज्ञाः संक्रान्त्यादौ प्रकीर्त्तिताः । लाङ्गूलसन्धौ ते जातास्तथा द्वादशवार्षिकम् । तीर्थप्रयोगसामीपः यजुःसङ्कर्षणस्तथा । आर्कनाथर्वणश्चैव नाभिसन्धेः समुद्गताः । पञ्चोत्कर्षः चेलयज्ञः पश्चमार्गोऽतियोजनः । लिङ्गसंस्थानहेरम्बयज्ञा जाताश्च जानुनि । एवमष्टाधिकं जातं सहस्रं द्विजसत्तमाः ॥ यज्ञानां सततं लोकार्यैर्भाव्यन्तेऽधुनापि च । स्रुवस्तु पोत्रात् संजाता नासिकायाः स्रुवोऽभवत् । अन्ये स्रुक्स्रुवभेदा ये ते जाताः पोत्रनासयोः । ग्रीवाभागेन तस्याभून् प्राग्वंशो मुनिसत्तमाः ॥ इष्टापूर्त्तं यज्ञधर्मा जाताः श्रवणरन्ध्रतः । दंष्ट्राभ्योह्यभवन् यूपाः कुशा रोमाणि चाभवन् । उद्गाता च तथाध्वर्युर्होता शमित्र एव च । अग्रदक्षिणवामाङ्गपश्चात्पादेषु सङ्गताः । पुरोडाशाः सचरवो जाता मस्तिष्कसञ्चयात् । कर्णमन्त्रयुगाज्जाता यज्ञकेतुस्तथा खुरात् । मध्यभागोऽभवद्वेदी मेढ्रात् कुण्डमजायत । रेतोधारास्तथैवाज्यं स्वधामन्त्राः समुद्गताः । यज्ञाश्रयः पृष्ठभागात् हृत्पद्मात् यज्ञ एव च । तदात्मा यज्ञपुरुषो ह्यङ्गाः कक्षात् समुद्गताः । एवं यावन्ति यज्ञानां साधनानि च कर्माणि च । तानि यज्ञवराहस्य शरीरादेव चाभवन् । एवं यज्ञवराहस्य शरीरं यज्ञतामगात् । यज्ञरूपेण सकलमाप्यायितमिदं जगत् ।”

यज्ञवाट पु० ६त० । यज्ञस्थाने हेमच० ।

यज्ञवृक्ष पु० यज्ञार्थः वृक्षः । वटवृक्षे राजनि० । [राजनि० ।

यज्ञश्रेष्ठा स्त्री यज्ञेषु तत्साधनेषु श्रेष्ठा । सोमवल्ल्याम्

यज्ञसार पु० यज्ञेषु यज्ञसाधनेषु सारः श्रेष्ठः । यज्ञोडुम्बरवृक्षे राजनि० ।

यज्ञसूत्र न० यज्ञार्थं योग्यं संस्कृतं वा सूत्रं शाक०त० । यज्ञोपवीते अटा० । तल्लक्षणादि यथा “ऊर्द्ध्वन्तु त्रिवृतं सूत्रं सधवानिर्मितं शनैः । तन्तुत्रय-

मधोवृत्तं यज्ञसूत्रं विदुर्बुधाः। त्रिगुणं तद्ग्रन्थियुक्तं वेदप्रवरसम्मितम्। शिरोधरान्नाभिमध्यात् पृष्ठार्द्धपरिमाणकम्। यजुर्विदां नाभिमितं सामगानामयं विधिः। वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम्” कालिकापु०४अ०। “उपवीतमाह गोभिलः “यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा अपि वा कुशरज्जुमेव”। यज्ञोपवीतं विशिष्टविन्यासधारणकर्मतया कुरुते। किं तत्सूत्रं विशेषयति छन्दोगपरिशिष्टम् “ऊर्द्धन्तु त्रिवृतं कार्य्यं तन्तुत्रयमधोवृतम्। त्रिवृतञ्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते”। वामावर्त्तवलितं तन्तुत्रयं त्रिगुणं कृत्वा दक्षिणावर्त्तवलितं कार्य्यम् एवं त्रिवृतं त्रिवृतम् उपवीतं स्यात् एकोग्रन्थिरिति नानात्वनिषेधार्थम्। तथा च बौधायनः “कौशं सूत्रं त्रिस्त्रिवृतं यज्ञोपवीतमानाभेः”। कौशं कुशकाशोद्भवं पट्टसूत्रादिमयमित्यर्थः। सौत्रं कार्पासोद्भवम्। तथाच मनुः “कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत्। शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्”। त्रिस्त्रिवृतमित्युक्तत्वात् मनुवचनेऽपि त्रिवृन्मात्रं त्रिरावृत्तत्वेन विशेष्यम्। यत्तु पैठीनसिवचनम् “कार्पासमुपवीतं षट्तन्तु त्रिवृतं ब्राह्मणस्य। क्षौमं राजन्यस्य आविकं वैश्यस्य”। तन्नवतन्त्वसम्भवे षट्तन्तुविधायकम्। नवतन्तुत्वं व्यक्तमाह देवलः “यज्ञोपवीतं कुर्वीत सूत्राणि नवतन्तुभिः। एकेन ग्रन्थिना तन्तुर्द्विगुण स्त्रिगुणोऽथवा”। एकेन ग्रन्थिना युक्त इति शेषः। द्विगुणस्त्रिगुणोऽथ वेति तन्तुत्वेन द्विसवो त्रिसवो वा कर्त्तव्यः। द्विसवत्वं त्रिसवत्वासम्भवे। गोभिले वा शब्दो विकल्पार्थः। अपिशब्दो वस्त्रकुशरज्ज्वोः सूत्रानुकल्पत्वप्रदर्शनार्थः। एवकारोऽन्यसूत्रव्यवच्छेदार्थः। द्वितीयो वाशब्दोऽनुक्तमौञ्जवालादिसमुच्चयार्थः। तथा च निगमपरिशिष्टम् “वाससा यज्ञोपवीतानि कुरुते तदभावे त्रिवृता सूत्रेण कुशमुञ्जवालप्रतिसव रज्जुभिर्वा। वालोऽत्र गोवालः यथाह देवलः “कार्पास क्षौमगोवाल वररज्जुतृणोद्भवम्। सदा सम्भवतो धार्य्यमुपवीतं द्विजातिभिः”। तदभाव इतिकरणाद्वस्त्राभावे कुशरज्जुभिरिति बोद्धव्यम्”। श्रा०वि०।

यज्ञाङ्ग पु० यज्ञस्याङ्गं साधनत्वेनास्त्यस्य अच्। १यज्ञोडुम्बरे अमरः। २खदिरे राजनि०। ३ब्रह्मयष्टिकायाञ्च शब्दच०। ते हि समिदरण्यादिना यज्ञं सम्पादयन्ति। ४सोमवल्ल्यां स्त्री राजनि० टाप्। ६त०। ५यागाङ्गमात्रे न०।

यज्ञान्त पु० ६त०। १अवभृथे यज्ञसमाप्तौ स्नानादिक्रियाभेदे २यज्ञशेषे च हेम०।

यज्ञायज्ञीय न०यज्ञायज्ञा इत्यनेन शब्देन युक्तायामृचि गेयम् छ। १अग्निष्टोमे गेये सामभेदे ताण्ड्य० ब्रा० ४।२।२० ज्योतिष्टोमे गेये २सामभेदे च सा०सं०भा०उपोद्घाते।

यज्ञिक पु० यज्ञः यज्ञाङ्गं साध्यत्वेनास्त्यस्य ठन्। पलाशे जटा०। तत्समिदादिभिर्हि यज्ञोनिष्पाद्यते।

यज्ञिय त्रि० यज्ञाय हितः घ। १यज्ञकर्मयोग्ये अमरः। २द्वापरयुगे पु० त्रिका०।

यज्ञियदेश पु० कर्म०। यज्ञकर्मयोग्यदेशे “कृष्णसारस्तु चरति मृगो यत्र स्वभावतः। स ज्ञेयो यज्ञियोदेशः” मनूक्ते देशे। [राजनि०। २यागसम्बन्धिनि त्रि०।

यज्ञीय पु० यज्ञाय हितः तस्येदं वा छ। १यज्ञोडुम्बरे

यज्ञीयब्रह्मपादप पु० कर्म०। विकङ्कतवृक्षे (बइँचि) राजनि०। “वैकङ्कतीं स्रुचमादत्ते” इति श्रुतौ तदीयस्रुवविधानात् तस्य तथात्वम्।

यज्ञेश्वर पु०यज्ञस्य प्रवर्त्तयिता ईश्वरः। विष्णौ। [यज्ञके त्रि०

यज्ञेष्ट न० ७त०। १दीर्घरोहिततृणे राजनि०। ६ब०। २इष्ट·

यज्ञोडुम्बर पु० यज्ञार्थं उडुम्बरः। स्वनामख्याते वृक्षे शब्दर०।

यज्ञोपवीत न० यज्ञेन संस्कृतमुपवीतम्। यज्ञसूत्रे उपनयनसंस्कारेण पवित्रीकृते त्रिवृति ऊर्द्धवृते वामस्कन्धात् दक्षिणकुक्षितो लम्बमानतया धृते सूत्रभेदे। यज्ञसूत्रशब्दे दृश्यम्। [२विष्णौ च यज्ञपतिशब्दे दृश्यम्।

यज्वन् पु० यज-भूते ङ्वनिप्। विधानेन १कृतयागे अमरः।

यत ताडने उपस्कारे च चु० उ० सेट्। यातयति। अयीयतत् त। निर्+परीवर्त्ते प्रतीकृपशोधने च।

यत यत्ने भ्वा० आत्म० अक० सेट्। यतते अयतिष्ट ईदित् निष्ठायामनिट् यत्तः।

यतम त्रि० एषां मध्ये यः यद्+डतमच्। एषां मध्ये यदित्यर्थे। [यदित्यर्थे।

यतर त्रि०। अनयोर्मध्ये यः यद्+डतरच्। अनयोर्मध्ये

यतस् अव्य० यद्+तसिल्। “यस्मादित्यर्थे।

यति पु०यतते मोक्षाय यत-इन्। १परिव्राजके संन्यासिनि अमरः। यम्यते जिह्वा यत्र यम-क्तिन्। छन्दोग्रन्थादिख्याते जिह्वाया २विश्रामस्थाने उच्चारणकालविच्छेदे स्त्री। वृ०र०च “क्वचित् छन्दस्यास्ते यतिरभिहिता पूर्वकविभिः पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च” इत्याद्युक्त्या वृत्तिछन्नपदान्ते एव छन्दोग्रन्थानुसारेण जिह्वाया

विन्यासरूपोऽङ्गारचाभावरूपा। २विधवायां ३रागे ५यन्त्री च शब्दच० ६पाठविच्छेदे मेदि०। ७निवारे ८विच्छौ हेमच०। ९वाक्यान्तप्रबन्धभेदे सङ्गीतदा०। यद्+परिमाणे-डति। १०यत्परिमाणे लि० व०व०।

यतिचान्द्रायण न० यतिनैव कर्त्तव्यं चान्द्रायणं व्रतभेदः। "अष्टावष्टौ समश्नीयात् पिण्डान् मध्यन्दिने गते। नियतात्मा हविष्याशी यतिचान्द्रायणं चरन्" मनूक्ते व्रतभेदे।

यतिन् पु० यम-भावे क्त यतं यमनं यततनेन इनि। १सं-न्यासिनि परिव्राजके अमरः। २विधवायां स्त्री ङीप् शब्दरत्ना०। [शब्दर०।

यतु(तू)का स्त्री यत-उक ऊक वा। जिनपलिकावृक्षे

यत्न पु०यत-भावे नङ्।१आयासे २उद्योगे वैशेषिकोक्ते प्रवृत्ति-निवृत्तिजीवनयोनिरूपत्नैविध्यापन्ने २गुणभेदे च। स च आत्मगुणः इति नैयायिकादयः चित्तगुण इति सांख्यवे-दान्तिकाः।

यत्र अव्य० यद्+त्रल। यस्मिन्नित्यर्थे।

यत्र यत्रोपने वा चु०उभ०पक्षे भ्वा०पर०सक० सेट् इदित्। यन्त्रयति ते यन्त्रति अययन्त्रत् त अयन्त्रीत्।

यथा अव्य०यद्+प्रकारे थाल्। १येन प्रकारेणेत्यर्थे २सादृश्ये ३योग्यतायाम् ४आनुरूप्ये ५पदार्थानतिवृत्तौ च सि०कौ०।

यथाकाम अव्य० काममनतिक्रम्य अव्ययी०। १स्वाच्छन्द्ये २यथेष्टतायाम्। [स्त्रेच्छाचारिणि जने स्त्रियां ङीप्।

यथाकामिन् त्रि० यथाकामं स्वाच्छन्द्यमस्त्यस्य इनि।

यथाक्रम अव्य० क्रमस्य आनुरूप्यं तदनतिक्रमो वा अव्य-यी०। १क्रमानुरूप्ये २क्रमानतिक्रमे च।

यथाजात त्रि० जातं जन्मविशेषमनतिक्रम्य यथाजातं तद्-स्त्यस्य अच्। १मूर्खे अमरः। २नीचे जटा०।

यथातथ अव्य० तथानतिक्रम्य अनतिवृत्तौ अव्ययी०। याथार्थ्ये यस्य वस्तुनो स्वरूपं भवितुमुचितं तथारूपभावे शारा० यथावदमर्थार्थे।

यथार्थ अव्य० अर्थमनतिक्रम्य अव्ययी०। १सत्यतायाम् अर्थ-स्याव्यभिचारे सत्यस्वरूपे। अर्श आद्यच्। २सत्ये त्रि०।

यथार्ह अव्य० अर्हं योग्यतामनतिक्रम्य अव्ययी०। १यथा-योग्यत्वे ततः अर्श आद्यच्। २तत्प्रभूते पदार्थे त्रि०।

यथार्हवर्ण पु० यथार्हं यथायोग्यं वर्णयति वर्ण-अण्। चरे अमरः। [२यथाश्रुतसारे।

यथाश्रुति अव्य० श्रुतेराहरूप्यम् अव्ययी०। १श्रुतेरानुरूप्ये

यथाशास्त्र अव्य० शास्त्रस्यानुरूप्यम् अनतिक्रमो वा अव्ययी०। १शास्त्रानुसारे २शास्त्रानतिक्रमे च।

यथास्थित अव्य०यथा येन क्रमेण स्थातुं योग्यं तथास्थितम् योग्यतायाम् अव्ययी०।१सत्यतायाम् हेमच०अर्श आद्यच्। २सत्ये त्रि०। [आद्यच्। २यथार्थे त्रि०अमरः।

यथास्व अव्य० स्वस्यानतिक्रमः अव्ययी०।१याथार्थ्ये। अर्श

यथेप्सित अव्य० ईप्सितस्यानतिक्रमः अव्ययी०। १स्वाच्छन्द्ये अमरः। अर्श आद्यच्। २यथाभीष्टे त्रि० यथेष्टमप्यत्र।

यथोचित अव्य० उचितस्यानतिक्रमः अव्ययी०। १औचित्ये अमरः। अर्श आद्यच्। २उचिते त्रि०।

यद् त्रि०यज्-अदि डिच्च। (ये)१इत्येवं बुद्धिविशेषविषये। अस्य उक्तार्थे सर्वनामता। अयञ्च शब्दः तच्छब्दार्थनित्यापेक्षो उत्तरवाक्यस्थस्तु न तदपेक्षो इति काव्यप्र०, यत्तच्छब्दयो-रन्यत्र च न समानविभक्तिकत्वमतेत्याकरे स्थितम्। २यत्कादित्यर्थे अव्य०। ३गर्हायाम् ४अनङ्गतौ च मेदि०।

यदा अव्य० यद्+काले दाच्। यस्मिन् काले इत्यर्थे।

यदि अव्य० यद्+णिच्-इन् णिलोपः। १पक्षान्तरे अमरः। २सम्भावनायाम् ३गर्हायां ४विकल्पे च मेदि०।

यदु पु० ययातिनृपतेः १ज्येष्ठपुत्रे यस्य वंशे श्रीकृष्णावतारः। तस्य गोत्रापत्यमण् बहुषु तस्य लुक्। २यदुवंश्ये ३दशार्हदेशे च ब०व० हेमच०। [यदुपत्यादयोऽप्यत्र।

यदुनाथ पु० यदूनां नाथो रक्षकत्वात्। श्रीकृष्णे हेमच०।

यदृच्छा स्त्री यद्+ऋच्छ-अ-टाप्। १स्वातन्त्र्ये, २स्वैर-तायाम् अमरः। "यदृच्छालाभसन्तुष्टः" इति गीता।

यदृच्छाशब्द पु० जात्याद्यवाचके डित्यादिसंज्ञाशब्दे "अस-त्यादयतः कश्चिदर्थं जातिक्रियागुणैः। यदृच्छाशब्दवत् पुंसःसंज्ञायै जन्म केवलम्" माघः।

यद्युत अव्य० यदि च उ च वा च द्व०। यद्यर्थे पक्षान्तर-द्योतने "यद्युवाऽन्तरवत्सारस्तर्हि पयसैव" इति "यद्युवा-उभयं चिकीर्षेदिति" च गोभिलः।

यद्वा अव्य० यत् वा च द्व०। १पक्षान्तरे "यद्वाम्युदययोग्यता" भर्तृहरिः २युक्तौ संक्षिप्तसा०। [३संयमयुक्ते त्रि०हेमच०

यन्तृ पु० यम-तृच्। १सारथौ २हस्तिपके च अमरः।

यन्त्र न० यन्त्रि-अच्। १संयमने तन्त्रोक्ते देवाद्यधिष्ठाने २यन्त्रभेदे ३औषधपाकार्थपात्रभेदे, ज्योतिषशास्त्राद्यवेक्षण-साधने ४पदार्थभेदे, ५जलधारारोधकावेधकादौ (तरविन्) (भमर) पदार्थे।६पाञ्चराद्यैः संपचसाधने पदार्थे आप्ति-यन्त्रम् (कामान भड़क)।

चौषधपाकपात्रं च नानाविधं भावप्र० दर्शितं यथा वालुकायन्त्रम् “भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके । कूपिकाकण्ठपर्य्यन्तं वालुकाभिश्च पूरिते । भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते । वालुकायन्त्रमेतद्धि यन्त्रतन्त्रबुधैः स्मृतम्” ।

दोलायन्त्रम् “निदध्यादौषधं सूतं भूर्ज्जे तच्चिगुणान्तरे । रसपोटलिकां काष्ठे दृढं बद्ध्वा गुणेन हि । सन्धानपूर्णं कुम्भान्तः स्थापयन्मध्यसंस्थितम् । अधस्ताज्ज्वालयेदग्निं तत्कुम्भमानेन हि । दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि”। सन्धानं काञ्जिकादि ।

विद्याधरयन्त्रम् “स्थाल्युखालीस्थिते यत्र वक्त्रे वक्त्रं निधाय च । पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं परम् । अधःस्थाल्यां रसं क्षित्वा संनिदध्यात्तथोपरि । स्थालीमूर्द्ध्वं सम्यक् निरुध्य मृद्भस्मया । ऊर्द्ध्वस्थाल्यां जलं क्षित्वा चुल्ल्यामारोप्य यत्नतः । अधस्तात् ज्वालये-दग्निं यावत् प्रहरपञ्चकम् । स्वाङ्गशीतं ततो यन्त्राद् गृह्णीयाद्रसमुत्तमम् । विद्याधराभिधं यन्त्रमेतत्तज्ज्ञैरुदाहृतम्” ।

भूधरयन्त्रम् “वालुकाभिः समस्ताङ्गं गर्त्ते मूषां रसान्विताम् । दीप्तोपलैः संवृणुयाद्यन्त्रं भूधरनामकम्” ।

डमरुयन्त्रम् “यन्त्रं डमरुसंज्ञं स्यात्तत्स्थाल्योर्मुद्रिते मुखे” कालज्ञानार्थे ज्यो० सि० उक्ते ६ पदार्थभेदे यथोक्तं “कालसंसाधनार्थाय तथा यन्त्राणि साधयेत् । एकाकी योजयेद्बीजं यन्त्रे विस्मयकारिणि । शङ्कुयष्टिधनुश्चक्रैश्छायायन्त्रैरनेकधा । गुरूपदेशाद्विज्ञेयं कालज्ञानमतन्द्रितैः” सू०। “शङ्कुयष्टिधनुश्चक्रैः प्रसिद्धैश्छायायन्त्रैश्छायासाधकयन्त्रैरनेकधा नानाविधगणितप्रकारैर्गुरूपदेशात् स्वाध्यापकस्य शिष्योजकथनादतन्द्रितैरभ्रमैः पुरुषैः कालज्ञानं दिनगतादिज्ञानं विज्ञेयं सूक्ष्मत्वेनावगम्यम् । एतत् सर्वं सिद्धान्तशिरोमणौ भास्कराचार्य्यैः स्फुटीकृतम्

शङ्कुयन्त्रं “समतलमस्तकपरिधिर्भ्रमसिद्धो दन्तिदन्तजः शङ्कुः । तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम्” ।

यष्टियन्त्रम् “निज्याविष्कम्भार्धं वृत्तं कृत्वा दिगङ्कितं तत्र । दत्त्वाऽग्रां प्राक्पश्चात् द्विज्याहतं च तन्मध्ये । तत्-परिधौ मध्याह्ने यष्टिर्नरद्युतिसमः केन्द्रे । निज्याङ्कुला निधेया यष्ट्यग्राग्रान्तरं यावत् । यावत्या जीवा यष्ट्या द्वितीयवृत्ते धनुर्भवेत् तत्र । दिनगतशेषा नाड्यः प्राक् पश्चात् स्युः क्रमेणैवम्” ।

चक्रयन्त्रम् “चक्रं चक्रांशाङ्कं परिधौ तद्रज्ज्वादिका-धारम् । धात्री आधारात् कक्ष्या भार्द्धेऽत्र चार्धं च । तन्मध्ये सूक्ष्माक्षं क्षित्वाक्षीभिमुखनेमिकं धार्य्यम् । भूमेरुन्नतभागास्तत्राग्रच्छायया भुक्ताः । तत्राधोन्तश्च नता उन्नतलवकूपं स्युर्दलम् । द्युदलोन्नतांशभक्ताः नाड्यः स्फुटाः परैः प्रोक्ताः” ।

धनुर्यन्त्रम् “दलीकृतं चक्रमुशन्ति चापम्” इति ।

अथ ग्रन्थविस्तरभयादेतेषां निरूपणविस्तरो नचितादि-विचारश्चोपेक्षित इति मन्तव्यम् । अथ घटीयन्त्रादिभि-श्चमत्कारियन्त्रैर्न सर्वोपजीव्यं कालं सूक्ष्मं साधयेदिति कालसाधनमुपसंहरति” रङ्ग० । “तोययन्त्रकपालाद्यै-र्मयूरनरवानरैः । ससूत्ररेणुगर्भैश्च सम्यक् कालं प्रसा-धयेत्” सू०। “तोययन्त्रं च तत् कपालं च कपालाख्यं जलयन्त्रं घटाख्यं तदाद्यं प्रथमं येषां तैर्यन्त्रैर्वालु-कायन्त्रप्रभृतिभिः चापेघटीयन्त्रैर्मयूरनरवानरैः । मयू-राख्यं स्वयंवहयन्त्रं निरपेक्षं नरयन्त्रं शङ्क्वाख्यं छायायन्त्रं पूर्वोद्दिष्टं वानरयन्त्रं स्वयंवहं निरपेक्षमेतैः ससूत्ररेणुगर्भैः सूत्रवर्ज्जिता रेणवो धूलयो गर्भे मध्ये येषां तैः सूत्रप्रोताः सच्छिद्रगुञ्जाः मयूरो-दरस्था सुखात् घटिकान्तरेण पतत एव निःसरन्तीति लोकप्रसिद्धा तादृशैर्यन्त्रैरित्यर्थः । यद्वा सूत्राकारेण रेणवः सिकतायाः गर्भे उदरे यस्य तादृशं यन्त्रं वालुका यन्त्रं प्रसिद्धम् । तेन सहितैर्मयूरादियन्त्रैर्मयूराद्याकार-यन्त्रैर्वालुकायन्त्रेण चेति सिद्धोऽर्थः । चकारस्तोययन्त्र-कपालाद्यैरित्यनेन समुच्चयार्थकः । कालं दिनगतादिरूपं सम्यक् सूक्ष्मं प्रसाधयेत् । प्रकर्षेण सूक्ष्मत्वेनातिसूक्ष्म-त्वेनेत्यर्थः । आनीयादित्यर्थः । ननु मयूरादिस्वयं-वहयन्त्राणि कथं साध्यानीत्यतस्तत्साधनप्रकारा बहवो दुर्ज्ञेयाश्च सन्तीत्याह रङ्ग० ।

“पारदारामसूत्राणि शुल्वतैलजलानि च । बीजानि पांशवस्तेषु प्रयोगास्तेऽपि दुर्लभाः” सू०। “तेषु मयूरादिय-न्त्रेषु स्वयंवहार्थमेते प्रयोगाः प्रकर्षेण योज्याः । प्रक-र्षस्तु यावदभ्यसिद्धेः । ते के इत्यत आह । पारदारा-मसूत्राणीति । पारदयुक्ता आराः । तथाच सिद्धान्त-शिरोमणौ “लघुकाष्ठजसमचक्रे समसुषिराराः समा-न्तरा नेम्याम् । किञ्चिद्वक्रा योज्याः सुषिरस्यार्द्धे पृथक् तासाम् । रसपूर्णं तच्चक्रं ह्याधाराक्षस्थितं स्वयं भ्रमति”। अम्बु जलस्य प्रयोगः । अत्रापि स्वयंवाहनप्रयोगः ।

सुलभं शिल्पनैपुण्यम्। तैबजयानि तैरयुक्तजलस्य प्रयोगः। चकारात् तयोः पृथक् प्रयोगोऽपि। तथाच सिद्धान्तशिरोमणौ "उत्कीर्णनेमिमथ वा परितो यदनेन संलग्नम्। तदुपरि तावदृघाद्यं कृत्वा सुषिरे रसं क्षिपेत् तावत्। यावद्रसैकपार्श्वे क्षिप्तजलं न न्यतो याति। पिहितच्छिद्रं तदतश्चक्रं भ्रमति स्वयं जला-क्रान्तम्। ताम्रादिमयस्याङ्कुशरूपनलस्याम्बुपूर्णस्य। एकं कुण्डजलान्तर्द्वितीयमग्रं त्वधोमुखं च बहिः। युगप-न्मुक्तं चेत् कं नलेन कुण्डाद्बहिः पतति। नेम्यां बद्धा घटिकाश्चक्रं जलयन्त्रवत् तथा धार्यम्। नलकप्रच्युत-सलिलं पतितं यथा तद्घटीमध्ये भ्रमति। ततस्तत् सततं पूर्णघटीभिः समाहतम्। चक्रच्युतं तदुदकं कुण्डे याति प्रणालिकया"। इति। बीजानि केवलं तद्बीज प्रयोगः। धीवरो धूलिप्रयोगास्तैर्युक्ताः प्रयोगाः। अविसत्वात् प्रयोगेषु सुगमतरा इत्यर्थः। दुर्लभाः अप्रा-धारकत्वेन महद्भिः वर्तयमक्या इत्यर्थः। अन्यथा प्रतिकूलं कार्यवतां प्राचुर्यापत्तेः। इयं स्वयंवह-विद्या समुद्रान्तर्निवासिजनैः फिरङ्गाख्यैः सम्यग-भ्यस्तेति। कुतुकविद्यात्वादत्र विस्ताराद्धुद्योग इति संक्षेपः" रङ्ग०।

अथ कपालाख्यं जलयन्त्रम्

"ताम्रपात्रमधश्छिद्रं न्यस्तं कुण्डेऽमलाम्भसि। षष्टिर्मज्ज-त्यहोरात्रे स्फुटं यन्त्रं कपालकम्" सू० "यत् ताम्रघटितं पात्रमधश्छिद्रमधोभागे छिद्रं यस्य तत्। अमलाम्भसि निर्मलं जलं विद्यते यस्मिन् तादृशे कुण्डे इदङ्क्षायके न्यस्तं धारितं सदहोरात्रे नाक्षत्राहोरात्रे षष्टिः षष्टि-वारमेव न न्यूनाधिकं मज्जति। अधश्छिद्रमार्गेण जलागमनेन जलपूर्णतया निमग्नं भवति। तत् कपालकं घटखण्डानां कपालपदवाच्यत्वात् घटाधस्तनाधोकारं यन्त्रं घटीयन्त्रं स्फुटं सूक्ष्मम् तद्घटनं तु "शुल्वस्य दिग्भिर्विहितं पलैर्यत् षडङ्गुलोच्चं द्विगुणायतास्यम्। तदम्भसा षष्टिपलैः प्रपूर्णं पात्रं घटार्धप्रतिमं घटी स्यात्। सत्र्यंशमाषत्रयनिर्मिता या हेम्नः शलाका चतुरङ्गुला स्यात्। विद्धं तया प्राक्तननत्र पात्रं प्रपूर्यते नाडिकयाम्बुभिस्तत्" सू०। इति व्यक्तम्। भगवता तु सूक्ष्मत्वम्। अत यद्धुयन्त्रं द्विवैवाववमान. थें नान्य देवाद रङ्ग०। "नरयन्त्रं तथा साधु दिवा च विमले रवौ। छायासंसाधनैः प्रोक्तं कालसाधनमुत्तमम्" सू०।

देवताभेदे पूजाधारयन्त्राणि धारणयन्त्राणि च तन्त्रशा-स्त्रोक्तानि द्रष्टव्यानि। तल्लेखनद्रव्याणि तन्त्रोक्तानि यथा "काश्मीररोचनालाक्षामृगेभमदचन्दनैः। लिखितं हेमलेखन्या यन्त्राण्येतानि देशिकः। सौवर्णे राजते पत्रे भूर्जे वा सम्यगालिखेत्। अथ वा ताम्रपत्रे वा गुटिकीकृत्य धारयेत्। यावज्जीवं सुवर्णे स्यात् रौप्ये विंशतिवार्षिकम्। भूर्जे द्वादशवर्षाणि तदर्धं ताम्र-पट्टके"। द्रव्यभेदसर्गे तत्र तन्त्राधार्यतोक्ता यथा "भूमिस्पृष्टं मलस्पृष्टं यन्त्रं निर्माल्यवत्कृतम्। वि-दीर्णं खण्डितं मन्त्री यन्त्रं नैव च धारयेत्"।

यन्त्रक न० यन्त्रमिव इवार्थे कन्। (कुंद) हारभ्रामकयन्त्रभेदे

यन्त्रगृह न० ६त०। तैलिकयन्त्रालये (घानिघर) हेमच०।

यन्त्रगोल पु० यन्त्रमिव ज्योतिश्चक्रानतिगोलयन्त्रमिव गोलः वर्तुलः। कलायभेदे (मटर) शब्दच०।

यन्त्रण न० यन्त्र-ल्युट्। १नियमने २रक्षणे ३बन्धने च मेदि-नुप्। स्त्रीत्वाभावाद् स्त्री टाप्।

यन्त्रपेषणी स्त्री यन्त्रेणेव पिष्यतेऽनया पिष-करणे ल्युट् ङीप्। (जाँता) पेषणयन्त्रे जटा०।

यभ मैथुने भ्वा०पर०सक० अनिट्। यभति अया(य)प्सीत्।

यम उपरतौ भ्वा० पर० सक० अनिट् यच्छति अयंसीत् उदित् क्त्वा वेट्। यमित्वा यत्वा यतः।

आ+दीर्घीकरणे आत्म०। उप+विवाहे आत्म०।

यम परिवेषणे चु० उभ० सक० सेट् अ घटा०। यमयति यामयति अयीयमत् त अययामत् त।

यम पु० यम-घञ्। "अहिंसा सत्यवचनं ब्रह्मचर्यमकल्कता। अस्तेयमिति पञ्चैते यमाख्यानि व्रतानि च" इत्युक्ते १अहिंसादौ तत्र देहसाध्यम् आवश्यकमवश्यकार्यं नित्यं कार्यमिति अमरः इन्द्रियादीनां २संयमने च। यमयति अच्। प्राणिनां शुभाशुभकर्मानुसारेण दण्ड-विधायके ईश्वरनियुक्ते दक्षिणस्याः ३देवभेदे पु० अमरः। तद्व्यापकत्वात् ४काके च। आतत्त्वेन यमवच्छ्रिणि ५शनौ ६एकगर्भजायमाने यमजे त्रि० मेदि०। ७द्वित्व-संख्यायां ८यमदेवताके भरणीनक्षत्रे ज्यो०।

दिक्पालयमभेदाः चतुर्दश भविष्यपु० उक्ता यथा

"यमाय धर्मराजाय मृत्यवे चान्तकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। औदुम्बराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः"।

योगाङ्गयमाच पात० सू० भा० उक्ता यथा

“यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि” सू०। “यथाक्रमं एतेषाम् अनुष्ठानं स्वरूपञ्च वक्ष्यामः भा०। तत्र “अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः” सू०। “तत्राहिंसा सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः। उत्तरे च यमनियमास्तन्मूलास्तत्सिद्धिपरतया तत्प्रतिपादनाय प्रतिपाद्यन्ते तदवदातरूपकरणायैवोपादीयन्ते। तथाचोक्तं “स खल्वयं ब्राह्मणो यथा यथा व्रतानि बहूनि समादित्सते तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्त्तमानस्तामेवावदातरूपामहिंसां करोति”। सत्यं यथार्थे वाङ्मनसे यथादृष्टं यथानुमितं यथाश्रुतं तथा वाङ्मनश्चेति परत्र स्वबोधसंक्रान्तये वागुक्ता सा यदि न वञ्चिता भ्रान्ता वा प्रतिपत्तिवन्ध्या वा भवेत् इत्येषा सर्वभूतोपकारार्थं प्रवृत्ता न भूतोपघाताय यदि चैवमप्यभिधीयमाना भूतोपघातपरैव स्यान्न सत्यं भवेत् पापमेव भवेत् तेन पुण्याभासेन पुण्यप्रतिरूपकेण कष्टं तमः प्राप्नुयात् तस्मात् परीक्ष्य सर्वभूतहितं सत्यं ब्रूयात्। स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणं तत्प्रतिषेधः पुनरस्पृहारूपमस्तेयमिति। ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः। विषयाणामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणमपरिग्रह इत्येते यमाः” भा०।

याज्ञ० तु तस्य दशविधत्वमुक्तं यथा “ब्रह्मचर्य्यं दया क्षान्तिर्ध्यानं सत्यमकल्कता। अहिंसाऽस्तेय माधुर्य्ये दमश्चेते यमाः स्मृताः” १०५ अ०।

यमक न० शब्दालङ्कारभेदे अलङ्कारशब्दे ३८८ पृ० दृश्यम्।

यमकोटि पुंस्त्री० भूगोलस्य चतुर्थपादान्तरिते लङ्कातः पूर्वस्यां स्थितायां देवनिर्मितायां पुर्य्याम् “लङ्का कुमध्ये यमकोटिरस्याः प्राक्” इति सिद्धान्तशिरोमणिः।

यमघण्ट पु० योगविशेषे। “द्वे मघापूर्वफल्गुन्यौ पुष्याश्लेषार्कचन्द्रयोः। ज्येष्ठानुराधा भरणी चाश्विनी कुजवासरे। हस्तार्द्रा चन्द्रजे मूला पूर्वाषाढा च रेवती। जीवे शुक्रे भाद्रपच शुक्रावे स्वातिरोहिणी। शनिवारे शतभिषा श्रवणा यमघण्टकः” सारसंग्रहः।

यमदग्नि पु० जमदग्नौ मुनिभेदे।

यमज त्रि० द्वि० व०। यमौ एकदा एकत्र गर्भे सहचरौ सन्तौ जायेते जन-ड। एकदा एकगर्भजातयोः मेदि०।

यमदमन पु० स्त्र्य०। यमस्य दमना इव सर्वसाधनत्वेन हिंसकत्वात्। “कार्त्तिकस्य दिनान्यष्टौ चाद्यावधिपञ्चकञ्च। यमस्य दमना एते लघ्वाहारी स जीवति”

वैद्यकोक्ते शौरदिनयोः दशकि। यमदन्तष्ट्रोऽप्युक्तं अर्थे।

यमदूतिका स्त्री यमस्य दूतीव इवार्थे कन्। १तिन्तिडीवृक्षे अमरः। यमस्य दूत इव कायति कै-क। यमदूतक २काके पुंस्त्री० शब्दरत्ना० स्त्रियां ङीष्।

यमद्रुम पु० यमस्य द्रुमः इव। यमद्वारस्थत्वात् शाल्मलिवृक्षे तत्पुष्पकीडायमयशोभाकीर्णत्वेन हि ‘नारकिपीडनात्तस्य यमद्रुमत्वम्।

यमद्वितीया स्त्री कृत०। कार्त्तिकशुक्लद्वितीयायाम् “तथा यमद्वितीयायां यात्रायां मरणम्” ति०त०।

यमधार पु० यमसंख्याका धाराऽस्य। उभयपार्श्वे धारायुक्ते अस्त्रे (किरीच)।

[यति त्रि० | १यमे पु० मेदि०

यमन न० यम-ल्युट्। १बन्धने २उपरमे च मेदि०। यम-

यमप्रिय पु० ६त०। वटवृक्षे शब्दर०।

यमराज पु० यमानां चतुर्दशानां राजा यमनियामको राजा वा टच् समा०। प्रेतानां राजनि धर्मराजे हेमच०। यमेषु राजते राज-क्विप्। यमराडप्यत्र अमरः।

यमल न० यमं योगं लाति ला-क। १युग्मे अमरः। इन्द्रायमले २तन्त्रभेदे च। “तत्र तन्त्रःपदा यमस्य” हरिवं०।

यमलपत्र पु० यमलानि युग्मानि पत्राणि यस्य। १अश्मन्तकवृक्षे २कोविदारवृक्षे राजनि०।

यमवाहन पु० यमं वाहयति वाहनात् यमवाहनं वहति वह-णिच् क्विप्-ल्यु। महिषे हेमच०।

यमानी स्त्री यच्छति अग्निमान्द्यमनया यम-करणे ल्युट् पृषो० आनुक्। १अजमोदायाम् शब्दमा० स्वार्थे क। यमानिका तत्रैव स्त्री।

यमुना स्त्री यम-उनन्। १कालिन्द्यां नद्यां २यमभगिन्याम् सूर्य्यसुतायाम् अमरः। ३दुर्गायाञ्च देवीपु०।

यमुनाभ्राता पु० ६त०। यमे अमरः।

ययाति पु० यस्य यायोरिव यातिः पतन रथगतिर्यस्य। नहुषात्मजे राजभेदे। [मेदि०।

ययु पु० या-कु द्वित्वञ्च। १अश्वमेधीयेऽश्वे २अश्वसामान्ये च

यव पु० यु-अच्। १स्वनामख्याते शूकधान्यभेदे अमरः। “यवान्ते सर्वसस्यानां जायते पञ्चयातनम्। कोद्रवांमाषास्तिर्यन्ति अवाः कपिञ्जलाविमाः” इति मीमांसा। अङ्गुलिस्थे यवाकारे २रेखाभेदे सामुद्रकम् तत्फलकमुक्तं तत्रैव “तर्जनीमूलचक्रे यवो धुमार्थस्य लाभात्। मध्यमायां यवश्चैवाङ्गुष्ठेऽपूर्वधनप्रदः। मध्यमायां अपि यवो दृश्यते च शुभोभमा। तदानन्तर्याभूतं द्रव्यं प्राप्नोत्यङ्गुष्ठके

यवे। यत्रापि चक्रमध्ये यवपूर्णत्वं दृश्यते। तदा पितामहादीनामर्जितं लभते धनम्" इति सामुद्रकम्। ३द्वट्सर्षपात्मके परिमाणभेदे शब्दच०। [क्षेत्रे अमरः।

यवक्य न० यवानां भवनं क्षेत्रं यत् कुक् च। यवभवने

यवक्षार पु० यवजातः क्षारः। यवजातक्षारे क्षारभेदे शब्दर०

यवज पु० यवात् जायते जन–ड। १यवक्षारे रत्नमा० २यवान्याञ्च राजनि०। [राजनि०।

यवतिक्ता स्त्री यवाकारं तिक्तं फलं यस्याः। शङ्खिन्यां

यवन पु० यु–युच्। १देशभेदे सोऽभिजनोऽस्य तस्य राजा वा अण् बहुषु तस्य लुक्। २तद्देशस्थेषु जनेषु ३तद्देशोद्भवेषु ब०व०। ४वेगे ५अधिवेगयुताश्वे मेदि० ६गोधूमे ७गर्जरतृणे ८तुरष्कजातौ राजनि० ययातिशप्तस्य तत्पुत्रस्य तुर्वसोर्वंश्ये जातिभेदे च पुंस्त्री० स्त्रियां ङीष्। १०वेगवति त्रि०।

यवनद्विष्ट पु० यवनैर्द्विष्टः द्विष–क्त। गुग्गुलौ राजनि०

यवनप्रिय न० ६त०। मरिचे हेमच०।

यवनाचार्य्य पु० ताजकादिज्योतिःशास्त्रकारके पण्डितभेदे

यवनानी स्त्री यवनानां लिपिः ङीप् आनुक् च। यवनानां लिप्याम् सि० कौ०।

यवनारि स्त्री यवनस्यारिः। श्रीकृष्णे त्रिका०।

यवनाल पु० यवस्येव नाला (नाडा) यस्य। (देधान) धान्यभेदे हेमच०। [यवक्षारे हेमच०।

यवनालज पु० यवस्य नालात् काण्डात् जायते जन–ड।

यवनिका स्त्री युवन्त्यनया यु–ल्युट् ङीप् स्वार्थे क अत इत्वम्। (कानात्) जवनिकायाम् अमरः।

यवनी स्त्री यु–ल्युट् ङीप्। १यवानीनामकौषधौ मेदि०। ङीष्। २यवनभार्य्यायाञ्च। "यवनीमुखपद्मानाम्" रघुः।

यवनेष्ट न० ६त०। १सीसके हेमच०। २मरिचे ३लशुने ४पलाण्डौ ५राजपलाण्डौ ६निम्बे च पु०। खर्जूर्य्यां स्त्री राजनि० टाप्।

यवफल पु० यव इव फलमस्य। १वंशे अमरः २कुटजे यस्य फलमिन्द्रयवः। ३जटामांस्याञ्च मेदि० ४लशुने शब्दर०।

यवमध्य न० यव इव मध्यं यस्य। चान्द्रायणभेदे प्रथमदिनादामावास्यादिनमेकैकग्रासवृद्ध्या, तदुत्तरं च आपञ्चदशदिनं क्रमेणैकैकग्रासह्रास्या माससाध्ये व्रते तस्य मध्यदिवसानां हि बहुग्रासकत्वेन यवमध्यतुल्यत्वम्।

यवलास पु० यवेन लस्यते श्लिष्यते लस–घञ्। यवक्षारे शब्दच०।

यवशूक पु० यवानां शूकः कारणत्वेनास्त्यस्य अच्। यवक्षारे त्रिका० यवशूकजादयोऽप्यत्र राजनि०।

यवस न० यु–असच्। १घासे २तृणे च अमरः।

यवागू स्त्री यूयते मिश्र्यते यु–आगू। षड्गुणजलपक्वे द्रवभेदे (जाउ) अमरः। "मण्डश्चतुर्दशगुणे यवागूः षड्गुणेऽम्भसि" वैद्यकपरिभाषा।

यवाग्रज पु० यवस्याग्रात् शूकात् जायते जन–ड। १यवक्षारे अमरः। २यवान्याञ्च राजनि०।

यवानी स्त्री दुष्टो यवः ङीप् आनुक् च। (जोयान्)पदार्थे राजनि०। "यवानी पाचनी रुच्या तीक्ष्णोष्णा कटुका लघुः। दीपनी च तथा तिक्ता पित्तला शुक्रशूलहृत्। वातश्लेष्मोदरानाहगुल्मप्लीहकृमिप्रणुत्" भावप्र०।

यवापत्य न०यवस्यापत्यमिव तज्जातत्वात्। यवक्षारे राजनि०

यवाम्लज न० यवजातादम्लाज्जायते जन–ड। सौवीरके काञ्जिकभेदे राजनि०।

यवास पु० यु–आस। १दुरालभायाम् अमरः। २खदिरभेदे च शब्दमा० ३सुगन्धाभिनी तृणे स्त्री राजनि० टाप्। स्वार्थे क। यवासक तत्रैव। [तदर्थे।

यविष्ठ त्रि० अतिशयेन युवा युवन्–इष्ठन् यवादेशः। अति-

यवीयस् त्रि० अतिशयेन युवा युवन्+ईयसुन् यवादेशः। १अतितरुणे २कनिष्ठे च "अंशमंशं यवीयांसः" स्मृतिः। स्त्रियां ङीप्।

यवोत्थ न० यवादुत्तिष्ठति उद्+स्था–क। सौवीरके राजनि०।

यव्य न० यवानां भवनं क्षेत्रं यत्। यवभवनयोग्ये क्षेत्रे अमरः। युतचन्द्रावयव यत्। २चान्द्रे मासे पु०। "यव्यद्वय श्रावणादि सर्वा नद्यो रजस्वलाः" प्रा०त०।

यशःपटह पु० यशःख्यापकः पटहः शा० त०। ढक्कायाम् वाद्यभेदे अमरः। [शेषादयोऽप्यत्र।

यशःशेष त्रि० यश एव शेषोऽस्य। मृते हेमच०। कीर्त्ति-

यशद न० येन वायुना शीयते शद–अच्। (दस्ता) ख्याते धातुभेदे "यशदं रङ्गसदृशं रीतिहेतुश्च तन्मतम्। यशदं तुवरं तिक्तं शीतलं कफपित्तहृत्। चक्षुष्यं परमं मेहान् पाण्डुं श्वासञ्च नाशयेत्" भावप्र०।

यशस् न० अश–असुन् धातोः युट् च। शौर्य्यादिभूते ख्यातिपरपर्य्याये पदार्थे अमरः।

यशस्या स्त्री यशसे हिता यशस्+यत्। १जीवन्त्याम् २ऋद्धिनामौषधौ च राजनि०। ३यशःसाधने त्रि०। "धन्यं यशस्यमायुष्यम्"।

यशस्वत् त्रि॰ यशस्+अस्त्यर्थे मतुप् मस्य वः। यशोविशिष्टे

यशस्विन् त्रि॰ यशस्+अस्त्यर्थे विनि। १यशोयुते स्त्रियां ङीप्। सा च २ज्योतिष्मतीलतायां ३यवतिक्तायां राजनि॰ ४वनकार्पास्याञ्च शब्दर॰।

यशोद पु॰ यशो ददाति दा-क। १पारदे राजनि॰ २यशोदातरि त्रि॰।३नन्दगोपपत्न्यां स्त्री।"नन्दगोपगृहे जाता यशोदागर्भसम्भवा" देवीमा॰।

यष्टृ पु॰ यज-तृच्। यागकर्त्तृके।

यष्टि पु॰ यज-क्तिन् नि॰ न सम्प्रसारणम्। १ध्वजादिदण्डे २भुजाद्यवलम्बने दण्डे च मेदि॰ क्लीव॰। ३तन्त्रौ शब्दर्मा॰। ४हारलतायां ५भार्ग्यां ६मधूकायां (यष्टिमधु) स्त्री वा ङीप्। ७वृक्षभेदे च मेदि॰।

यष्टिमधु न॰यष्टौ मधु यस्य। स्वनामख्याते लताभेदे हेमा॰। कप् तत्रार्थे स्त्री अमरः।

यष्टीक न॰यष्ट्या कायति कै-क। यष्टीमधौ लताभेदे भावप्र॰

यष्टीपुष्प पु॰ यष्टीव पुष्पमस्य। पुत्रजीववृक्षे भावप्र॰।

यष्टीमधु पु॰ यष्ट्यां मधु यस्य। (यष्टिमधु) स्वनामख्याते लताभेदे राजनि॰।

यस यत्ने दिवा॰ पक्षे भ्वा॰ वा श्यन् पर॰सक॰सेट्। यस्यति यसति संयस्यति संयसति अनुयस्यति। इरित् अयसत् अयासीत् अयसीत्। यस पुषादिरित्यन्ये उदित् क्त्वा वेट्। यसित्वा यस्त्वा यस्तः।

यस्क पु॰ यस-क नेत्त्वम्। मुनिभेदे तस्य गोत्रापत्यं शिवा॰ अण्। यास्क तदपत्ये पुंस्त्री॰ निरुक्तकारके मुनिभेदे पु॰। बहुषु अणो लुक्। यस्काः।

या गतौ अदा॰ पर॰ सक॰ अनिट्। याति अयासीत् ययौ

याग पु॰यज-घञ्। मन्त्रकरणके वह्न्याद्यधिकरणके देवोद्देशेन हविस्त्यागरूपे यज्ञे अमरः। तद्भेदाः कात्यायनादिश्रौतसूत्रादौ दृश्याः।

याच याचने भ्वा॰उभ॰द्विक॰सेट्। याचति ते अयाचीत् अयाचिष्ट। ञरादित् चङि न ह्रस्वः। इर् अयु याचकः। इर् याचितम्। गौणेऽपि कर्मणि शकारादयः।

याचक त्रि॰ याच-ण्वुल्। याच्ञाकारके अमरः।

याचन न॰ याच-ल्युट्। याच्ञायाम्। युच्। याचना तत्रार्थे स्त्री।

याचनक त्रि॰ याच-ल्यु स्वार्थे क। याचके अमरः।

याचित न॰ याच-भावे क्त। याचनकर्मणि अमरः। २याच्याय। कर्मणि क्त। ३मार्गिते त्रि॰।

याचितक न॰ याचितेनाधिगतम् कन्। याच्ञया धनस्वामिनो गृहीते (चायोया) द्रव्ये अमरः।

याच्ञा स्त्री याच-नङ्। प्रार्थनायाम् अमरः।

याजक पु॰ याजयति यज-णिच्-ण्वुल्। धनादिलाभाय परार्थं यज्ञकर्तरि ऋत्विगादौ।

याजन न॰ यज-णिच्-ल्युट्। दक्षिणार्थमन्यस्य यागसम्पादने "यजनं याजनं तथा" मनुः।

याज्ञवल्क्य पु॰ १धर्मशास्त्रकर्त्तरि तत्संहिता आचारव्यवहारप्रायश्चित्तात्मकाध्यायत्रयान्विता।२शुक्लयजुःप्रवर्त्तके मुनिभेदे तत्कथा भाग॰ १२ स्क॰।

याज्ञसेनी स्त्री यज्ञसेनस्य द्रुपदराजस्यापत्यं स्त्री अत इञ् ङीप्। द्रौपद्यां पाण्डवभार्य्यायाम् हेमच॰।

याज्ञिक पु॰ यज्ञाय हितः यज्ञः प्रयोजनमस्य वा ठक्। १दर्भभेदे शब्दर॰।२याजके ऋत्विगादौ ३खदिरे ४पलाशे ५अश्वत्थे राजनि॰। ६यजमाने च।

याज्य न॰ इज्यतेऽत्र यज-बा ण्यत्।१यागस्थाने २देवप्रतिमायाञ्च "याज्यं चैलमलङ्कारम्" इति स्मृतिव्याख्यायां दायभागे "याज्यं यागस्थानं देवताप्रतिमा चेत्युक्तम्। ३याजनीये त्रि॰। करणे ण्यत्। ४ऋग्विशेषे स्त्री। तदुच्चारणविशेषः आश्व॰श्रौ॰ १।४५ सू॰ उक्तः।

यातना स्त्री चु॰ यत-युच्। तीव्रवेदनायाम् अमरः।

यातयाम त्रि॰ यातो गतो याम उचितसमयो यस्य।१जीर्णे २परिभुक्ते च अमरः।३पर्युषिते "यातयामं गतरसम्" इति गीता। ३उच्छिष्टे मेदि॰। ४पुनःपुनःप्रयुज्यमाने च "संवत्सराख्ये गवामयने प्रत्यहं बृहद्रथन्तरसाम्नोः पुनः पुनः प्रयोगात् तस्य तथात्वम् ता॰ब्रा॰ ४।२।११ भाष्ये दृश्यम्। [१गतो २गन्तव्ये त्रि॰।

यातव्य पु॰ यायतेऽसौ या-तव्य। अपायां युद्धार्थमभिगम्ये

यातायात न॰ यातञ्चायातञ्च या-भावे क्त। आ+या-भावे क्त समाहार द्व॰। गमनागमनयोः।

यातु न॰ या-तु। १राक्षसे अमरः। २गन्तरि त्रि॰ उणा॰। ३वाते पु॰ ४अध्वगे त्रि॰ सि॰ कौ॰ ५याती संक्षिप्तवाक्यत-णिच्-उच्। ६आतयितरि प्रवर्त्तयितरि च "यातयंयेति" ताण्ड्य॰ब्रा॰ "यातयतयिता प्रवर्त्तयितेति" भा॰। [राजनि॰।

यातुघ्न पु॰यातं राक्षसं गन्धेन हन्ति हन-टक्। १गुग्गुलौ

यातुधान पुंस्त्री॰ यातु इति धीयतेऽभिधीयते धा-ल्युट्। राक्षसे अमरः स्त्रियां जातौ ङीप्।

यातृ स्त्री या-तृच्। १देवरपत्न्याम् (जा) अमरः। यातरौ यातरः। तृन्। २गन्तरि त्रि०। यातारौ यातारः।

यात्रा स्त्री या-ष्ट्रन्। १जिगीषया राज्ञां गमने अमरः २गमनमात्रे ३देवोद्देशेनोत्सवभेदे रथयात्रादौ ४यापने च मेदि०। ५उपाये विश्वः यात्रादिनादिकं मु०चि० यात्राप्रकरणे दृश्यम्। [हिते गमनादौ च।

यात्रिक त्रि० यात्रायै हितम्। १उत्सवे २उपाये ३गमन-

याथातथ्य न० तथा तद्रूपत्वौचित्यम् अव्ययी० तस्य भावः ष्यञ्। यद्वस्तु यथा भवितुं युक्तं तस्य तथाभावे।

याथार्थ्य न०यथार्थस्य भावः। सत्यत्वे वास्तविकत्वे। [अमरः

यादःपति पु० यादसां जलजन्तूनां पतिः। १वरुणे २समुद्रे

यादव पु० यदोर्गोत्रापत्यमण्। १यदुवंश्ये स्त्रियां ङीप्। २तत्प्रधाने श्रीकृष्णे पु० शब्दर०। यदूनामिदम्-अण् ३गोमहिषादिके धने न०अम०।४दुर्गायां स्त्री त्रिका०ङीप्

यादस् न० या-असुन् दुक् च। जलजन्तुमात्रे अमरः।

यादसांनाथ पु० ६त० अलुक्समा०। १वरुणे शब्दा० २समुद्रे च अमरः। यादसांपत्यादयोऽप्यत्र।

यादृश(क्ष)(श्) त्रि० यस्येव दर्शनमस्य यद्+दृश-कञ् (ट) क्विप् वा। यत्सदृशे यथाविधे। टान्तात्तु स्त्रियां ङीप्।

यादृच्छिक त्रि० यदृच्छया आगतः ठक्। यथेच्छया प्राप्ते।

यान न० या-भावे ल्युट्। १गमने उपचितशक्तेः राज्ञः शत्रु-राष्ट्रादिरक्षां कृत्वा रिपोराक्रन्दनाय २गमने च अमरः। करणे ल्युट्। ३गमनसाधने रथादौ अमरः।

यापन न० या-णिच्-ल्युट्। १कालादेः क्षेपणे हेमच०। २निरसने च मेदि०।

याप्य त्रि० या-णिच्-ण्यत्। १निन्द्ये २अधमे अमरः। ३क्षेपणीये मेदि०। निःशेषमप्रतिकार्य्ये उपशमनीये ४रोगभेदे च भावप्र० तत्र तल्लक्षणादिकमुक्तं यथा "यापनीयन्तु तं विद्यात् क्रियां धारयते हि यः। क्रियायान्तु निवृत्तायां सद्यो यश्च विनश्यति। प्राप्ता क्रिया धारयति सुखिनं याप्यमातुरम्। प्रपतिष्यद्विवागारं स्तम्भो यत्नेन योजितः। साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा। घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम्"।

याप्ययान पु० याप्यं क्षेप्यं कुत्सितं वा पद्भ्यां गन्तव्यत्वात् इतर-वाह्यत्वाद्वा यानम्। (सुखासन) शिविकायाम् अमरः।

याम पु० यम-घञ्। १संयमे मेदि० २प्रहरे च अमरः। "यामो यातस्तथापि नायातः" इति सा० द०।

यामघोष पुं स्त्री०यामे घोषोऽस्य। १कुक्कुटे शब्दच० स्त्रियां ङीष्। २घटिकायन्त्रभेदे स्त्री त्रिका०।

यामल न० यमल+स्वार्थे अण्। १युगले हेमच०। २तन्त्रशास्त्रभेदे च। "सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्यप्रदीपनम्। क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च। युगधर्मश्च संख्यातो यामलस्याष्टलक्षणम्"। तच्च षड्विधम् "आदियामलं१ ब्रह्मयामलं२ विष्णुयामलं३ रुद्रयामलं४ गणेशयामलम्५ आदित्ययामलम्६ च इति वाराहीतन्त्रम्। अस्य यम्यादित्वमपि तत्रार्थे।

यामवती स्त्री यामाः बहवः त्रित्वसंख्यायुताः सन्त्यस्यां भूम्नि मतुप् मस्य वः ङीप्। १रात्रौ राजनि० २हरिद्रायाञ्च

यामातृ पु०जायां माति तृच् पृषो०। जामातृशब्दार्थे शब्दर०

यामि स्त्री यम-इञ्। १कुलस्त्रियां २भगिन्यां अन्तःस्वयादौ रभसः। "या(जा)मयो यानि गेहानीति" मनुः। ३रात्रौ शब्दर०। ४यमपत्नीभेदे वह्नि पु० "अरुन्धती वसुर्यामिर्लम्बा भानुर्मरुत्वती। सङ्कल्पा च मुहूर्ता च साध्या विश्वा च नामतः। धर्मपत्न्यो दश त्वेतास्तासपत्यानि मे शृणु"।

यामित्र न० ज्योतिषोक्ते लग्नराशिभ्यां सप्तमे स्थाने।

यामित्रवेध पु०यामित्रे सप्तमस्थाने वेधः पापग्रहसंयोगः। विवाहादौ वर्ज्ये "पापात् सप्तमगः शशी" इत्याद्युक्ते योगभेदे उपयमशब्दे १२६७ पृ० दृश्यम्।

यामिनी स्त्री यामाः त्रिसंख्याताः सन्त्यस्य बाहुल्ये इनि। १रात्रौ २हरिद्रायाञ्च अमरः। [रजनीयादयोऽप्यत्र।

यामिनीपति पु० ६त०। १चन्द्रे शब्दर० २कर्पूरे च।

यामी स्त्री यमस्येयम् यमो देवतास्या वा तस्येयं वा अण् ङीप्। १दक्षिणस्यां दिशि २यमसम्बन्धिन्यां यातनायां ३भरणीतारायां च। यामि+वा ङीप्। ४यामिशब्दार्थे च।

यामुनेष्टक न० यमुनायां भवं यामुनं तदिवेष्टकम्। सीसके जटा० तस्य तत्रत्वात् यामुनजलस्थत्वात्तथात्वम्।

याम्य पु० यामी दिक् निवासोऽस्य यत्। १अगस्त्ये २चन्दनद्रुमे च मेदि०। यमोदेवतास्य तस्येदं वा यत्। ३यमसम्बन्धिनि त्रि० ४भरणीनक्षत्रे च ज्यो० ५दक्षिणदेशस्थे त्रि०।

याम्यायन न० याम्यायाम् अयनं सूर्य्यस्य गतिः। सूर्य्यस्य दक्षिणायने तदाधारेषु रवेः कर्कसंक्रान्तितः परेषु षट्सु मासेषु च। [राजनि०।

याम्योद्भूत पु० याम्ये दक्षिणदेशे उद्भूतः। शीतस्कन्धे

यायजूक पु० यज–यङ्–ऊक । पुनःपुनःयागशीले अमरः ।

यायावर पु० देशाद्देशान्तरं याति या-यङ्-वरच् । १अश्वमेधीयाश्वे जटा० तस्य नानादेशगमनत्वात्तथात्वम् २जरत्कारुमुनौ च त्रिका० । ३भ्रमणशीले त्रि० ।

याव पु० यु-अण् स्वार्थे अण् । १अलक्ते अमरः स्वार्थे क । यावक तत्र । याव इव कन् (कुलतीकलाइ) २व्रीहिधान्यभेदे अमरः ।

यावत् त्रि० यत् परिमाणमस्य मतुप् । १यत्परिमाणे स्त्रियां ङीप् । या–वति । २साकल्ये ३अवधौ ४व्याप्तौ ५माने ६अवधारणे च अव्य०अमरः । एतच्छब्दयोगे द्वितीया ।

यावत्तावत् अव्य० यावच्च तावच्च द्व० । बीजगणितप्रसिद्धे अव्यक्तमानानयनाय कल्प्ये प्रथमे राशौ ।

यावतिथ त्रि० यावतां पूरणः यावत्+डट् इथुक् च । यावत् परिमाणपूरणे ।

यावन पु० यु-णिच्-ल्यु । सिह्लाख्यगन्धद्रव्ये अमरः ।

यावनाल पु० यवनाल एव स्वार्थे अण् । धान्यभेदे (जनार) राजनि० ।

यावनालशर पु० यवनाल इव शरः । शरभेदे राजनि० ।

यावनाली स्त्री यवनालस्य विकारः अण् ङीप् । यवनालभवायां शर्करायाम् राजनि० ।

यावशूक पु० यवशूकस्य विकारः अण् । यवक्षारे रत्नमा० ।

याष्टीक पु० यष्टिः प्रहरणमस्य ईकक् । यष्ट्या योद्धरि अमरः । [भावे घञ् । २प्रयासे ।

यास पु० यस-कर्त्तरि संज्ञायां घञ् । १दुरालभायाम् अमरः

यु मिश्रणे अमिश्रणे च अदा०पर०सक०सेट् । यौति अयावीत् ।

यु बन्धे क्र्या०उभ०सक०अनिट् । युनाति युनीते अयौषीत् अयोष्ट ।

यु निन्दने चु० आत्म० सक० सेट् । यावयते अयीयवत ।

युक्त त्रि० युज-क्त । १मिलिते मेदि० । २अभ्यासवशात् सदा सर्वविषयकज्ञानयुते योगिनि पु० भाषा० ३उचिते ४न्यायागतद्रव्यादौ च न० अमरः ५(एलानी) द्रव्यभेदे स्त्री रत्नमा० । (रक्ती) अमरः ।

युक्तरसा स्त्री युक्तो रसो यस्याः । रास्नायां (कांटा खाम-

युक्ति स्त्री युज-क्तिन् । १न्याये मेदि० । २प्रकारे ३अनुमाने ४तत्साधकलिङ्गज्ञानादौ व्यवहारसाधकविषयसाधकप्रमाणोपन्यासे तर्कप्र० व्यवहारे कानि चित् देशावस्थितानि नारदेनोक्तानि यथा "उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः । केशाकेशिगृहीतश्च युगपत् पारदारिकः । कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः । तथा कुठारहस्तश्च वनच्छेत्ता प्रकीर्त्तितः । प्रत्यक्षचिह्नैर्विज्ञेयो दण्डपारुष्यकृन्नरः । असाक्षिप्रत्यया ह्येते पारुष्ये तु परीक्षणम्" । "युक्तिरर्थावधारणम्" सा०द० उक्ते ६नाटकाङ्गविशेषे च । तत्र न्याये "श्रुत्योर्विरोधे न्यायस्तु बलवानर्थनिर्णये । युक्तिहीनविचारे तु धर्महानिः प्रजायते" मीमांसकाः ।

युग वर्जने भ्वा०पर०सक०सेट् इदित् । युङ्गति अयुङ्गीत् ।

युग न० युजि-घञ् पृषो० गलोपः । १युग्मे द्वित्वसंख्यान्विते सत्यत्रेताद्वापरकलिरूपे २कालविशेषे ३वृद्धिनामौषधे ४हस्तचतुष्कपरिमाणे ५रथाङ्गवादेरङ्गभेदे पु० (जोयाल) मेदि० । [कालचक्रभेदे अमरः ।

युगकीलक पु० ६त० । रथादियुगधारणार्थे कीलकाकारे

युगन्धर पु० युगं रथस्य युगकाष्ठं धरति धृ-खच् । रथस्य युगकाष्ठबन्धने कूबराख्ये १काष्ठभेदे अमरः । २पर्वतभेदे च शब्दर० । [अमरः ।

युगपद् अव्य० युगमिव पद्यते पद-क्विप् । एककाले इत्यर्थे

युगपत्र पु० युगमिव संहतं पत्रमस्य । कोविदारवृक्षे हेमच० वा कप् । तत्रैव । शिंशपावृक्षे स्त्री त्रिका० टाप् अत इत्त्वम् ।

युगपार्श्वग पु० युगपार्श्वे गच्छति गम-ड । दम्य सार्थं बाल्यपार्श्वे बद्धे वृषे अमरः । [न्विते अमरः ।

युगल न० युगं द्वित्वं लाति ला–क । युग्मे द्वित्वसंख्या-

युगलाख्य पु० युगलेन वराङ्गेन अङ्गलवर्णद्वयेनाख्यायते आ+ख्या-क । १बर्बरवृक्षे राजनि० २युगलनामके त्रि० ।

युगान्त पु० युगानां सत्यादीनामन्तस्तदुपलक्षितो वा कालः । १प्रलये २तत्काले च हला० ।

युग्म न० युज–मक् पृषो० जस्य गः । १द्वित्वसंख्यान्विते (जोड़ा) युगले । "युग्माग्निकृतभूतानि षण्मुन्योर्वसुरन्ध्रयोः । रुद्रेण द्वादशी युक्ता चतुर्दश्याथ पूर्णिमा । प्रतिपदाप्यमावस्या तिथ्योर्युग्मं महाफलम्" इत्युक्ते २तिथिविशेषयोगे ३समराशिषु च ४मिथुनराशौ च ज्यो० ।

युग्मपत्र पु० युग्मानि पत्राण्यस्य । १रक्तकाञ्चनवृक्षे रत्नमा० युग्मपर्णादयोऽप्यत्र । संज्ञायां कन् । २शिंशपावृक्षे स्त्री शब्दर० टाप् अत इत्त्वम् । [३वृश्चिकाल्यां च राजनि० ।

युग्मफला स्त्री युग्मानि फलानि यस्याः । १इन्द्रचिर्भट्यां

युग्य न० युगमर्हति युग+यत् । १वाहने याने । युगं वहति यत् । २युगवाहकेऽश्वादौ त्रि० अमरः ।

युच्छ प्रमादे भ्वा० पर० सक० सेट् । युच्छति अयुच्छीत् ।

युज युतौ रु० उ० सक० अनिट् । युनक्ति युङ्क्ते इरित् अयुजत् अयौक्षीत् अयुक्त युयोज युयुजे । अजन्तोपसर्गात् उदश्च परस्मात् आत्म० ।

अनु+प्रश्ने सक० आ० । अनुयुङ्क्ते अनुयोगः ।

अभि+व्यवहारेणास्कन्दने (नालिशकरा) सक० आत्म०अभियुङ्क्ते अभियोगः ।

उद्+आयोजने सक० उद्यमे अक० उद्युङ्क्ते उद्योगः ।

उप+भोजने सक० सम्बन्धभेदे अक० आत्म० उपयुङ्क्ते उपयोगः ।

नि+प्रेरणे सक०आत्म०नियुङ्क्ते । नियोगः । [पर्य्यनुयोगः ।

परि+अनु+दूषणाय प्रश्ने आत्म० सक० । पर्य्यनुयुङ्क्ते

प्र+उच्चारणे व्यवहारभेदे च सक० आत्म० प्रयुङ्क्ते प्रयोगः

प्रति+प्रतिरूपे योगे सक० आ० प्रतियुङ्क्ते प्रतियोगः ।

सम्+संयोगे सक० प० संयुनक्ति संयोगः ।

युज निन्दायां चु० आ० सक० सेट् । योजयते अयूयुजत ।

युज समाधौ दि० आत्म० अनिट् । युज्यते । युयुजे ।

युज बन्धने युतौ च वा चु० उभ० पक्षे भ्वा० पर०सक०सेट् । योजयति ते योजति । अयूयुजत् त । अयोजीत् ।

युज् त्रि० दि०युज क्विप् ।१समाधिमति । युक् युजौ । रु० युज क्विप् ।२संयोगवति त्रि०युङ् युञ्जौ युञ्जः इति भेदः चु० युज-निन्दे भावे क्विप् । ३निन्दायाम् अव्य० ।

युञ्जान पु० युज–शानच् ।१योगविशेषवति भावनासहकारेण सर्वपदार्थज्ञातरि भाषा०। २रथसारथौ ३विप्रे च मेदि०।

युत दीप्तौ भ्वा०आ०अक०सेट् । योतते । अयोतिष्ट । ऋदित् चङि न ह्रस्वः । [४हस्तचतुष्टयमाने न०मेदि०।

युत त्रि० यु–क्त । १संयुक्ते २मिलिते ३अमिलिते च ।

युतक न० यु–क्त युत-क वा ततः स्वार्थे क । १संशये २युगे ३स्त्रीवसनाञ्चले ४चरणाग्रे ५यौतके धने मेदि० । ६मैत्रीकरणे शब्दर०।७संश्रवे ८स्थूणाग्रे च नानार्थमा०। ९स्त्रीवस्त्रभेदे हेम० । १०संयुक्ते त्रि० ।

युतवेध पु० विवाहादौ वर्ज्ये चन्द्रेण सह पापग्रहयोगे उपयमशब्दे १२६७पृ० लल्लवाक्ये दृश्यम् ।

युद्ध न० युध–भावादौ क्त । १परस्पराभिघातार्थं शस्त्रादिक्षेपणव्यापारे योधने २तदाधारे संग्रामे अमरः। ज्योतिषोक्ते ग्रहाणां गतिभेदकृते योधनरूपे ३परस्परमिलनविशेषे च । ग्रहयुद्धशब्दे २७६६ पृ० दृश्यम् ।

युध युद्धे दिवा० आ० सक० अनिट् । युध्यते अयुद्ध युयुधे ।

युध्(धा) स्त्री युध–सम्प० क्विप् वा टाप् । १युद्धे योधने २संग्रामे च अमरः । [३५अ०।

युधाजित् पु० क्रोष्टुन्नृपपुत्रे माद्रीगर्भजाते नृपभेदे हरिवं०

युधान पु० युध–उणा०कान । १क्षत्रिये उणादिको० ।

युधिष्ठिर पु० युधि युद्धे स्थिरः "गविवुधिभ्यां स्थिरः"पा० षत्वम् । पाण्डवश्रेष्ठे । [अयोपीत् ।

युप विमोहे दिवा०पर०अक०सेट् । युप्यति इरित् अयुपत्

युयुधान पु० युध–कानच् द्वित्वम् । १इन्द्रे सात्यकिनामनि यादवे क्षत्रियभेदे त्रिका० ।२क्षत्रियमात्रे च संक्षिप्तसा०।

युवखलति स्त्री युवतिरेव खलतिः पुंवत् । (टाक्) रोगवत्याम् युवत्याम् । [शब्दर० ।

युवगण्ड पु० ६त० । यूनो गण्डस्थव्रणभेदे । (वयस्फोड़ा)

युव(ति)ती स्त्री युवन्+ति ङीप् वा । १यौवनवत्यां स्त्रियाम् शब्दर० । युवन्–ङीप् । यूनीत्यप्यत्र । २स्त्रीमात्रे भागुरिः ३हरिद्रायां शब्दच० ।

युवतीष्टा स्त्री युवतीनामिष्टा । स्वर्णयूथिकायाम् राजनि०।

युवन् त्रि० यु–कनिन् । १श्रेष्ठे २निसर्गबलवति मेदि० । "आषोड़शाद्भवेद् बालस्तरुणस्तत उच्यते" इत्युक्तवयस्के ३तरुणे च । "जीवति तु वंश्ये युवा" पा० उक्तैरुक्ते पौत्रादेरपत्ये ४चतुर्थादौ बालादिस्वरेषु ५स्वरभेदे ।

युवनाश्व पु० सूर्य्यवंश्ये मान्धातृपितरि नृपभेदे ।

युवराज पु० युवैव राजा टच्समा० । राजयोग्यक्रियत्कार्य्यकरे १राजपुत्रे अमरः ।२बुद्धभेदे त्रिका०। [युष्मद्

युष भजने सौ०पर०सक०सेट् । योषयति अयोषीत् । योषा

युष्मद् त्रि० सौ० युष-मदिक् । संबोध्यचेतने भवच्छब्दार्थे । उक्तार्थेऽस्य सर्वनामता त्रिषु लिङ्गेषु समरूपता च ।

यूक पुंस्त्री० यू–क्विप् क । मत्कुणे (उकुण) स्त्रीत्वे टाप् ।

यूति स्त्री यु-क्तिन् नि० दीर्घः । मिश्रीकरणे ।

यूथ न० यु–थक् पृषो० दीर्घः । सजातीयसमुदाये अमरः ।

यूथनाथ पु० ६त० । वन्यगजादीनां प्रधाने अमरः । यूथपादयोऽप्यत्र ।

यूथिका स्त्री यु–थक् पृषो० दीर्घः स्वार्थे क अत इत्त्वम् टाप् । १अम्लानके मेदि० २पाठायां राजनि०। ३यूथ्याश्च (युइ) अमरः । [अमरः ।

यूथी स्त्री यु-थक् पृषो० दीर्घः ङीप् । (युइ) पुष्पप्रधाने वृक्षे

यूप पुंन० यु-पक् पृषो० दीर्घः । १यज्ञीयपशुबन्धनकाष्ठभेदे तल्लक्षणं यज्ञपार्श्वे दृश्यम् । यागसमाप्तिचिह्नार्थे २स्तम्भे च अमरः ३जयस्तम्भे पु० उणादिको० ।

यूपकटक पु० ६त०। यज्ञपशुबन्धनकाष्ठस्य शिरःस्थे वलयाकारे काष्ठमये पदार्थे चषाले अमरः।

यूपद्रु पु० यूपाय द्रुः प्रकृतिविकृतिभावात् ४त०। खदिरवृक्षे यूपद्रुमादयोऽप्यत्र त्रिका०।

यूष वधे भ्वा० पर० सक० सेट्। यूषति अयूषीत् युयूष।

यूष पुंन० यूष-क। १मुद्गादिक्वाथे अमरः। "अष्टादशगुणे नीरे शमीधान्यस्य तोरसः। विपक्वाद्ये घनः किञ्चित् पेयातो यूष उच्यते। उक्तः स एव निर्यूहो रुचिकस्य विशेषतः"। यूषस्य प्रकारान्तरमाह "कल्कद्रव्यपलं शुण्ठीं पिप्पलीञ्चार्द्धकार्षिकीं। वारिप्रस्थेन विपचेत्तस्य यो यूष उच्यते"।
"यूषो बल्यो लघुः पाके रुच्यः कण्ठ्यः कफापहः"। अथ मुद्गयूषविधिः "मुद्गानां द्विपलं तोये षट्पलमल्लोढकोन्मिते। पादस्थं मर्दितं पूतं दाडिमस्य पलेन तत्। युक्तं सैन्धवशुण्ठ्याद्यधान्यकैः पादकार्षिकैः। कणाजीरकयोश्चूर्णान्माषकेनावचूर्णितम्। संस्कृतो मुद्गयूषोऽयं पित्तश्लेष्महरो मतः"। अथ तस्य गुणाः "मुद्गानाकृतमो यूषो दीपनः शीतलो लघुः। व्रणोर्ध्वजत्रुरुग्दाहकफपित्तज्वरास्रहृत्"। अथ मुद्गामलकयूषगुणाः "मुद्गामलकयूषस्तु भेदी पित्तानिलापहः। तृड्दाहभ्रमनः शीतो मूर्च्छाश्रमसदापहः" भावप्र०। २मल्लटावर्षे पु० शब्दर०। [खडि म त्रुसः।

येष यत्ने भ्वा० आ० अक० सेट्। येषते अयेषिष्ट। ऋदित्

योक्त्र न० युज्यतेऽनेन युज-ष्ट्रन्। ईषादण्डादौ युगबन्धनार्थे दामनि (योत) अमरः।

योग पु० युज-भावादौ घञ्। संयोगे १मेलने २उपाये ३सन्नाहादिधारणे ४ध्याने ५युक्तौ च अमरः। "योगश्चित्तवृत्तिनिरोधः" इति पातञ्जलोक्ते ६सर्वविषयेभ्योऽन्तःकरणवृत्तेर्निरोधे "संयोगं योगमित्याहुर्जीवात्मपरमात्मनोः" इत्युक्ते ७जीवात्मपरमात्मनोरैक्ये। ८अप्राप्यार्थलाभचिन्तायाम् ९देहस्थैर्य्ये १०सन्नाहादीनां प्रयोगे ११भेषजे १२विश्वासघातके १३द्रव्ये कार्मणे च मेदि०। १४समुदायशक्त्यवयवशक्त्यर्थसम्बन्धे "योगरूढं समाख्या" इति मीमांसकाः। "योगः कर्मसु कौशलम्" इत्युक्ते १५यथास्थितवस्तुनोऽन्यथात्वप्रतिपादने यथा संसारबन्धहेतोरपि कर्मणोऽबन्धमोक्षहेतुत्वम्। १६ज्योतिषोक्तेषु रविचन्द्रयोगाधीनेषु विष्कुम्भादिषु सप्तविंशतौ पदार्थेषु। तिथिवारनक्षत्राणाम् अमृतसिद्ध्यात्मानां १७दग्धस्वविशेषेषु सिद्धियोगः अमृतयोगः सर्वोदययोग इत्यादि। १८छले च "योगाधमनविक्रीतमिति" स्मृतिः। १९नैयायिके २०धने हेमच० २१चारे २४सूत्रे त्रिका०। चित्तवृत्तिनिरोधरूपयोगश्च द्विविधः। राजयोगो हठयोगश्च। तत्र राजयोगः पतञ्जलिनोक्तः। हठयोगस्तु तन्त्रशास्त्रोक्तः। तस्य प्रकारान्तरेण त्रैविध्यम् भाग० ११।२० अ० उक्तं यथा "श्रीभगवानुवाच "योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया। ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्। निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु। तेष्वनिर्विण्णचित्तानां कर्मयोगश्च कामिनाम्। यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्। न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः। तावत् कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते। स्वधर्मस्थो यजन् यज्ञैरनाशीःकाम उद्धव!। न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत्। अस्मिंल्लोके वर्त्तमानः स्वधर्मस्थोऽनघः शुचिः। ज्ञानं विशुद्धमाप्नोति मद्भक्तिञ्च यदृच्छया"। २२ज्योतिषोक्ते लग्नादिग्रहस्थितिविशेषे फलभेदयोगे यथा राजयोगः नाभसयोग इत्यादि। यात्रायां यात्रालग्नात् केन्द्रत्रिकोणस्थिते बुधजीवशुक्राणामेकस्मिन् यथोक्तं मु० चि० "एकोऽपि ज्ञेज्यसितेषु पञ्चमतपःकेन्द्रेषु योगस्तथा द्वौ चेत्तेष्वधियोग एषु सकला योगाधियोगः स्मृतः"। योगे क्षेमप्राप्यधियोगगमने "क्षेमं रिपूणां वधः"

योगक्षेम न० योगश्च क्षेमश्च समाहारः द्व०। अलब्धलाभचिन्तासहिते लब्धपरिरक्षणे "योगक्षेमं वहाम्यहम्"

योगज न० योगात् जायते जन-ड। १अगुरुचन्दने भावप्र०। २योगजातमात्रे त्रि०। ३न्यायोक्ते प्रत्यक्षसाधने अलौकिकसन्निकर्षभेदे पु०।

योगदान न० योगेन छलेन उपधिना वा दानम्। "योगदानप्रतिग्रहम्" इति स्मृत्युक्ते सोपधिके दाने।

योगनिद्रा स्त्री योगरूपा निद्रा। प्रलये परमेश्वरस्य सर्वजीवसंहारेच्छया योगरूपे १व्यापारे "योगनिद्रामुपेयुषः" देवीमा० २तदधिष्ठात्र्यां दुर्गायाञ्च।

योगपट्ट न० योगाभ्यासार्थं पट्टम्। योगिधार्य्ये पट्टवस्त्रभेदे योगपट्टकमप्यत्र। "त्रिविधं योगपट्टकमाद्यं व्याघ्राजिनोद्भवम्। द्वितीयं मृगचर्मोत्थं तृतीयं तन्तुनिर्मितम्। चतुर्मात्रप्रविस्तारं दैर्घ्ये च यवकत्रयम्" शिवात्मकेश्वरः। चतुर्मात्रं चतुरङ्गुलमात्रम् वीरमि०।

योगपीठ पुंन॰ योगयोग्यं पीठमासनम्। देवादीमासनभेदे

योगमाया स्त्री योग एव माया। भगवतो जगत्सर्जनार्थायां शक्तौ "योगमायामुपाश्रितः" इति भाग॰१०स्क॰ रासारम्भे तदधिष्ठात्र्यां २दुर्गायाञ्च।

योगरङ्ग पु॰ योगेन रङ्गोऽत्र। (नारङ्ग) जम्बीरभेदे राजनि॰

योगरूढ पु॰ योगोऽवयवशक्तिः रूढिः समुदायशक्तिः एते स्तोऽस्य अच्। अवयवशक्त्या समुदायशक्त्या च अर्थबोधके पङ्कजशब्दादौ। तत्र हि उभयशक्त्या पङ्कजनिकर्त्तृत्वरूपावयवार्थविशिष्टपद्मत्वविशिष्टस्य बोधः। उभयार्थबोधनाच्च पङ्कजाते कुमुदादौ स्थलजाते पद्मे च न तत्पदप्रयोगप्रसङ्गः।

योगरूढि स्त्री योगेन सहिता रूढिः। शब्दस्य वृत्तिभेदे यया पङ्कजनिकर्त्तृत्वविशिष्टपद्मस्य बोधः। [च हेमच॰।

योगवाहिन् पु॰योगेन वहति वह–णिनि।१पारदे २क्षारभेदे

योगाचार पु॰ बौद्धभेदे तन्मतञ्च बुद्धशब्दे ४५८१ पृ॰दृश्यम्

योगाधमन न॰ योगेन छलेनोपधिना वाऽऽधमनम्। सोपधिके छलहेतुके च बन्धकदाने। "योगाधमनविक्रीतम्" इति स्मृतिः।

योगारूढ पु॰ योगमारूढः आ+रुह–क्त। "यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते। सर्वसंकल्पसन्न्यासी योगारूढस्तदोच्यते" इत्युक्ते योगिभेदे "योगारूढस्य तस्यैव शमः कारणमुच्यते" इति गीता।

योगासन न॰ योगार्थमासनम्। १योगशास्त्रोक्ते स्वस्तिकादौ आसनभेदे हेमच॰। "अथ योगासनं वक्ष्ये यत् कृत्वा योगिवद्भवेत्। ऊर्वोः पादतलद्वन्द्वं स्वाङ्के बद्धा करद्वयम्" इति रुद्रजा॰ उक्ते २आसनभेदे च।

योगिन् त्रि॰ युज–घिनुण्। "आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुनः। सुखं वा यदि वा दुःखं स योगी परमो मतः" गीताद्युक्तयोगयुक्ते २संयोगवति च त्रि॰ स्त्रियां ङीप्। सा च तत्र ३दुर्गायां ४तच्छक्तिभेदेषु चतुःषष्टिप्रकारेषु देवताप्रतिमाशब्दे १९९५ पृ॰ दृश्यम्। "प्रतिपन्नवमी पूर्वे रामरुद्रौ च पावके। शरस्त्रयोदशी याम्ये वेदमासौ च नैरृते। षष्ठी चतुर्दशी पश्चात् वायव्यां मुनिपूर्णिमे। द्वितीया दशमी यत्र ऐशान्यां चाष्टमी कुहूः" इत्युक्तेषु पूर्वादिदिग्भेदात् ५तिथिभेदेषु तत्फलं वामे शुभकरी प्रोक्ता पृष्ठे सर्वार्थसाधिनी" ज्यो॰त॰। आवश्यकत्वे यात्रार्थभेदे तस्याः शुभत्वं समयामृते उक्तं यथा "यस्यां दिशञ्च दयं याति ततो यात्रार्द्धभुक्तिका। भ्रमन्ती तेन मार्गेण भवेत्तत्कालयोगिनी। तेन "प्राचीधनेश्वरकृतान्तकोणमेयवायव्यवारुणयमाधिपशङ्करेषु। एषु क्रमाच्चिवसति प्रतिपन्नवम्योः पृष्ठे स्थिता शुभकरी गिरिराजपुत्री"। ६मङ्गलापिङ्गलादिदशाभेदे च दशाशब्दे १४८४ पृ॰ दृश्यम्। [१दुर्गायां स्त्री ङीप्।

योगीश्वर पु॰ ६त॰।१याज्ञवल्क्यमुनौ २योगिनां श्रेष्ठे च।

योगेश्वर पु॰ ६त॰। १श्रीकृष्णे "योगेश्वर! ततो मे त्वं दर्शयात्मानमव्ययम्" गीता। २दुर्गायां च ३वन्ध्याकर्कोट्यां स्त्री भावप्र॰ ङीप्।

योगेष्ट न॰ योगाय योजनार्थमिष्टम्। सीसके अमरः।

योग्य त्रि॰ योगमर्हति यत् युज–ण्यत् वा। १योगार्हे २उचिते ३निपुणे ४शक्ते च। ५पुष्यनक्षत्रे पु॰ मेदि॰। ६ऋद्धिनामौषधे न॰ अमरः।

योग्यता स्त्री योग्यस्य भावः तल्। १सामर्थ्ये २शाब्दबोधसाधने "पदार्थे तत्र तद्वत्ता योग्यता परिकीर्त्तिता" भाषा॰ उक्ते ३तत्पदार्थे तत्पदार्थवत्तारूपे ४परस्परान्वये बाधाभावरूपे वार्थे च।

योग्या स्त्री योगमर्हति यत् युज–ण्यत् वा कृत्वम्।१अभ्यासे सूर्य्यस्त्रियाञ्च मेदि॰ २शस्त्राभ्यासे हेमच॰।

योग्यानुपलब्धि स्त्री योग्यस्य प्रत्यक्षादिना उपलब्धुमर्हस्यानुपलब्धिरग्रहणम्। न्यायाद्युक्ते अभावग्राहके साधनभेदे। तथाहि घटादिसत्त्वे तत्र घटाभावो नानुपलभ्यते तस्य प्रतियोगिनो घटादेः सत्त्वेन तत्प्रत्यक्षकारणसामग्रीसत्त्वेन तत्प्रत्यक्षस्याभावात् किन्तु घटाद्यभावो गृह्यते पिशाचाद्यभावस्य तु न प्रत्यक्षता तत्प्रतियोगिपिशाचादेर्दर्शनायोग्यत्वात्। वेदान्तिमते इयं प्रमाणान्तरम् वेदान्तप॰ दृ॰।

योजन न॰ युज–भावादौ ल्युट्। १संयोगे णिच्–ल्युट्। २संयोगकरणे। ३चतुर्षु क्रोशेषु। "स्याद् योजनं क्रोशचतुष्टयेन" "प्रथममगमदङ्गा योजने योजनेशः" इति च लीला॰। ४परमात्मनि च मेदि॰। ५अङ्गुलौ निघ॰। युज–णिच्–युच्। यस्यार्थस्य यत्रान्वयः तद्वाचकशब्दस्य तद्वाचकशब्देन ६आसत्तिसम्पादने स्त्री।

योजनगन्धा स्त्री योजनं व्याप्य गन्धो यस्याः। १कस्तूर्याम् २सीतायां ३व्यासमातरि सत्यवत्याञ्च मेदि॰। स्वार्थे कप् अत इत्वम् तत्रैवार्थे। [स्यात्। मञ्जिष्ठायाम् रत्नमा॰।

योजनपर्णी स्त्री योजनं व्याप्य पर्णान्यस्याः विस्तीर्णपर्ण-

योजनवल्ली स्त्री योजनं व्याप्य वल्लीव । मञ्जिष्ठायाम् अमरः स्वार्थे क ह्रस्वः टाप् । तत्रैव राजनि० ।

योटक त्रि० युट–ण्वुल् । १मेलके विवाहमेलकस्य उपयमशब्दे १२४८ पृ० दृश्यः ।

योत्र न० यु-ष्ट्रन् । योक्त्रे (योत) अमरः ।

योद्धृ पु० युध–तृच् । युद्धकर्त्तरि अमरः । [२युद्धे ।

योध पु० युध–अच् । १युद्धकारके अमरः । भावे घञ् ।

योधन न० युध–भावे ल्युट् ।१युद्धे । करणे ल्युट् ।२अस्त्राद्यायुधे । कर्त्तरि ल्यु । ३युद्धकर्त्तरि पु० ।

योधसंराव पु० योधस्य युद्धाय संरावः आह्वानम् ६तत्० । योधानां युद्धार्थं परस्पराह्वाने अमरः ।

योनल पु० यवस्य नल इव काण्डोऽस्य पृषो० उत्वम् । (देधान) शस्यभेदे हेमच० ।

योनि पुंस्त्री० यु–नि । १भगादीनामुत्पत्तिस्थाने आकरे मेदि० । २कारणे ३जले हेम० । ४स्त्रीणामसाधारणचिह्ने अमरः । ५तद्दैवताके पूर्वफल्गुनीनक्षत्रे ज्यो० । स्त्रीत्वे वा ङीप् । ६उत्पत्तिस्थानमात्रे त्रिका० ।

योनिज न० योनिस्थानात् जायते जन–ड । देहभेदे १जरायुजे २अण्डजे च देहे ।

योनिमुद्रा स्त्री योन्याकारा मुद्रा । तन्त्रोक्ते देवताविशेषपूजाङ्गे प्रदर्शनीये अङ्गुलीसन्निवेशविशेषे तल्लक्षणन्तु "मिथः कनिष्ठिके बद्ध्वा तर्जनीभ्यामनामिके । अनामिकोर्ध्वसंश्लिष्टे दीर्घमध्यमयोरधः । अङ्गुष्ठाग्रद्वयं न्यस्य योनिमुद्रेयमीरिता" तन्त्रसा० । २मूलबन्धरूपे योनेर्बन्धभेदे तल्लक्षणमुक्तं पदार्थादर्शे "पार्ष्णिभागान् सुसंपीड्य योनिमार्गं तथा गुदम् । अपानमूर्ध्वमाकर्षेत् मूलबन्धो निगद्यते । गुदमेढ्रान्तरं योनिस्तामाकुञ्च्य प्रबन्धयेत् । युवा भवति वृद्धोऽपि सततं मूलबन्धनात्" । (योनिस्थानमुद्रणात् योनिमुद्रात्वमस्याः) "सेयं मयोक्ता खलु योनिमुद्रा बन्धश्च देवैरपि दुर्लभोऽस्य । अनेन बन्धेन न साध्यते यद्यास्त्येव तत्साधकपुङ्गवस्य" ।

योनिरोग पु० ६तत्० । षोडशविधे भगरोगभेदे "उदावर्त्ता१तथा वन्ध्या२विप्लुता३च परिप्लुता४। वातला५ योनिजो रोगो वातदोषेण पञ्चधा । पञ्चधा पित्तदोषेण तत्रादौ लोहिताक्षरा१। प्रस्रंसिनी२ वामनी३च पुत्रघ्नी४ पित्तला५तथा । अत्यानन्दा१ कर्णिनी२ च चरणा३नन्दपूर्विका४। अतिपूर्वापि५सा ज्ञेया श्लेष्मला५च कफादिमाः। षण्ढ१ण्डिनी१२ च विवृता३ सूचीवक्त्रा४ त्रिदोषिणी५। पञ्चैता योनयः प्रोक्ताः सर्वदोषप्रकोपतः" । अथ तासां लक्षणान्याह "सफेनिलमुदावर्त्ता१ रजः कृच्छ्रेण मुञ्चति। वन्ध्या२ निरार्त्तवा ज्ञेया विप्लुता३ नित्यवेदना । परिप्लुतायां४ भवति ग्राम्यधर्मे त्वरा भृशम् । वातला५ कर्कशा-स्तब्धाशूलनिस्तोदपीड़िता । चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः" । अनिलवेदनास्तोदादयः वातलायां त्वति वातवेदना बोद्धव्या वातलेत्यन्वयात् । "सदाहं क्षरते रक्तं यस्याः सा लोहिताक्षरा१। प्रस्रंसिनी२ संसते च क्षोभिता दुष्प्रजायिनी" । क्षोभिता विमर्द्दिता स्रंसते स्वस्थानाच्च्यवते दुष्प्रजायिनी दुष्प्रजननशीला । "सतत स्त्रिरेद्वीर्य्यं वामनी३ रजसा युतम् । स्थितं हि पातयेद्गर्भं पुत्रघ्नी४ रक्तसंस्रवात्"। पुत्रशब्दोऽत्रापत्योपलक्षकः। "अत्यर्थं पित्तला५योनिर्दाहपाकज्वरान्विता । चतसृष्वपि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत्"। अत्यानन्दा१न सन्तोषं ग्राम्यधर्मेण विन्दति । कर्णिन्यां२कर्णिका योनौ श्लेष्मासृग्भ्यां प्रजायते" । कर्णिका मांसस्य कर्णिकाकारोग्रन्थिः ।"मैथुने चरणा३पूर्वं पुरुषादतिरिच्यते । अतिरिच्यते रजोमुञ्चतीत्यर्थः । बहुशश्चातिचरणा४ तयोर्वीर्य्यं न तिष्ठति"। बहुशः वारंवारमतिरिच्यते तयोः चरणातिचरणयोः ।"श्लेष्मला ५पिच्छिला योनिः कण्डूयुक्तातिशीतला। चतसृष्वपि चाद्यासु श्लेष्मलिङ्गोच्छ्रयो भवेत् । अनार्त्तवाऽस्तनी षण्ढी१ खरस्पर्शा च मैथुने"। अस्तनी ईषत्स्तनी यस्याः सा अत्र लक्ष्या षण्ढी । महामेढ्रगृहीताया बालाया अण्डिनी२ भवेत् । महामेढ्र पुरुषस्तेन गृहीतायाः बालायाः सूक्ष्मयोनिच्छिद्रायाः अण्डिनी२ अण्डवल्लम्बमाना योनिर्भवति"। विवृतां सूचीवक्त्राञ्चाह "विवृता३ च महायोनिः सूचीवक्त्राति४संवृता। त्रिदोषजामाह सर्वलिङ्गसमुत्थानं सर्वदोषप्रकोपजम् । चतसृष्वपि च द्यासु सर्वलिङ्गनिदर्शनम्" । अथासाध्यां योनिमाह ।"पञ्चासाध्या भवन्तीह योनयः सर्वदोषजाः। पञ्च षण्ढीप्रभृतयः" अथ योनिकन्दस्य निदानमाह । "दिवास्वप्नादतिक्रोधात् व्यायामादतिमैथुनात् । क्षताच्च नखदन्ताद्यै र्वाताद्याः कुपिता यथा" । यथास्वनिदानं कुपिता वातादयः । रूपमाह "पूयशोणितसङ्काशं लकुचाकृतिसन्निभम् । जनयन्ति यदा योनौ नाम्ना कन्दः स योनिजः" । लकुचाकृतिसन्निभं लकुचाकारं गुडकमस्य विशेष्यं बोध्यम्" । वातजादिभेदेन रूपमाह । "रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत् । दाहराग-

ज्वरयुतं विद्यात्‌पित्तात्मकं तु तम्‌। तिलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम्‌। सर्वलिङ्गसमायुक्तं सन्निपातात्मकं वदेत्‌"।

योषा स्त्री युष-अच्‌ टाप्‌। स्त्रियाम्‌ नारीस्‌ अमरः।

योषित्‌ स्त्री युष-इति। नारीस्‌ अमरः। इकारान्तात्‌ टाप्‌। योषिताप्यत्र शब्दर०। [प्रियमाले त्रि०।

योषित्प्रिया स्त्री ६त०। १हरिद्रायां भावप्र०। २नारी-

यौक्तिक त्रि० युक्तित आगतः ठक्‌। १युक्तिसिद्धे २योग्ये च। युक्तौ अधिकृतः ठक्‌। ३नर्मसचिवे पु० शब्दर०।

यौगिक त्रि० योगात्‌ प्रकृतिप्रत्ययार्थसम्बन्धात्‌ आगतः ठक्‌। प्रकृतिप्रत्ययसम्बन्धार्थवाचके शब्दे यथा पाचकादिशब्दः पाककर्तृवाचकः। योगाय प्रभवति ठञ्‌। २योगयोग्ये

यौट संबन्धे भ्वा० प०० सक० सेट्‌। यौटति अयौटीत्‌। ऋदित्‌ चङि न ह्रस्वः।

यौड़ यौटवत्‌ सर्वम्‌। यौडति अयौडीत्‌ ऋदित्‌।

यौतक न० युते विवाहकालेऽधिगतम्‌ वुञ्‌। विवाहकाले लब्धे धने हला०। इति दायभागानुसारिणः। वीरमि० तु "यु मिश्रणे इति धात्वनुसारात्‌ विवाहकाले एकासनोपविष्टयोर्वधूवरयोर्यद्‌ बन्धुभिर्दीयते तद्युतयोरिदं यौतकमिति व्युत्पत्त्या यौतकमित्युच्यते" इत्युक्तम्‌ अत एव निघण्टौ युतयोर्यौतकमित्युक्तम्‌। अन्ये तु विवाहे स्त्रीपुंसावेकशरीरतया मिश्रितौ भवत इति "अस्थिभिरस्थीनि मांसैर्मांसानि" इत्यादिश्रुत्या तयोक्तेः विवाहेन युतयोरिदम्‌ इत्याहुः। वस्तुतः विवाहकालोत्तरमेकासनोपविष्टयोरेव दत्तं धनं यौतकं लोकप्रसिद्धं वीरमि०उक्तं साधीयः। "मातुश्च यौतकं यत्‌ स्यात्‌ कुमारी भाग एव सः" मनुः।

यौतव न० यु-तु यौतुः तस्य भावः अण्‌।१परिमाणे अमरः।

यौतुक न० योतुर्योगकालस्तत्र लब्धं कण्‌। विवाहकाले लब्धे धने यौतकशब्दे दृश्यम्‌।

यौधाजय न० ऊहगाने १प्र० दर्शिते सामभेदे "रौरवयौधाजये वाहृते भवतः" श्रुतिः।

यौधेय पु० योध एव आयुधजीविसंघत्वात्‌ स्वार्थे ढक्‌ १योद्धरि। २उत्तरस्यदेशभेदे पु० बृ० सं० १४ अ०। युधायाः अपत्यम्‌ "द्व्यचः"पा०ढक्‌। ३युधाया अपत्ये। ततःस्वार्थे अञ्‌ शार्ङ्गर० स्त्रियां ङीप्‌। यौधेयी।

यौन त्रि०योनितः योनिसम्बन्धात्‌ आगतम्‌ अण्‌।१योनितः प्राप्ते। योनेरयमण। २वैवाहिकसम्बन्धे पु०। प्रा० वि० बौधायनः "संवत्सरेण पतति पतितेन सहाचरन्‌। याजनाध्यापनाद्‌ यौनात्‌ सद्यो हि शयनासनात्‌"। सुमन्तुः "यश्चैतैर्यौनमौखस्रौवादीनां सम्बन्धानामन्यतमेन सह सम्पर्कमियात्‌ तस्याप्येतदेव प्रायश्चित्तं विदध्यादिति"।

यौवत न० युवतीनां समूहः अण्‌। युवतिसमुदाये अमरः।

यौवन न० यूनो भावः अण्‌। १तारुण्ये "आ षोडशाद्‌ भवेद्‌ बालस्तारुण्यस्तत उच्यते। वृद्धः स्यात्‌ सप्ततेरूर्द्ध्वम्‌" इत्युक्ते २अवस्थाभेदे। [फोडा)व्रणभेदे शब्दमा०

यौवनकण्टक पुंन० यौवनस्य कण्टक इव चिह्नम्‌। (वयस्

यौवनदशा स्त्री कर्म०। तारुण्ये अवस्थाभेदे।

यौवनलक्षण न० ६त०। १स्तने २लावण्ये च मेदि०।

यौष्माक त्रि० युष्माकमिदम्‌ युष्मद्‌+अण्‌ युष्माकादेशः। युष्मत्सम्बन्धिनि। खञ्‌। यौष्माकीणोऽप्यत्र त्रि०।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य सङ्कलिते वाचस्पत्ये यकारादि- शब्दार्थसङ्कलनम्‌।

र

रकारः व्यञ्जनवर्णभेदः सर्ववर्णानां यर्णयोर्मध्यस्थत्वात्‌ अन्तःस्थवर्णः। अस्योच्चारणस्थानं मूर्द्धा। जिह्वाग्रेण मूर्द्धस्थानस्पर्शेनोच्चारणादस्य आभ्यन्तरप्रयत्न ईषत्स्पृष्टम्‌। बाह्यप्रयत्नाश्च संवारनादघोषा अल्पप्राणश्च। वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा "रो रक्तः क्रोधिनी रेफः पावकस्तैजसो मतः। प्रकाशो दर्शनो दीप्ती रततृष्णा परं बलः। भुजङ्गेशो मतिः सूर्यो धातु रक्तमकाशकः। व्यापको रेवती दानं दक्षांसो वह्निमण्डलम्‌। उग्ररेखा स्थूलदण्डो वेदकर्णोपलाम्बरा। प्रकृतिः सुगलो ब्रह्मशब्दश्च गायको वनः। श्रीकण्ठ अप्सा हृदयं सखरी त्रिपुरसुन्दरी। सविन्दुर्योनिजो ज्वाला श्रीशैलो विश्वतोमुखी"। अस्य ध्यानरूपं यथा "रेफञ्च चञ्चलापाङ्गि! कुण्डलीद्वयसंयुतम्‌। रक्तविद्युल्लताकारं पञ्चदेवात्मकं सदा। पञ्चप्राणमयं वर्णं

त्रिबिन्दुसहितं सदा” कामधेनुत० । “अस्याधिष्ठातृदेवतारूपं यथा “चतुर्भुजां महारौद्रीं रक्तास्यां रक्तलोचनाम् । रक्तवर्णामष्टभुजां रक्तपुष्पोपशोभिताम् । रक्तमाल्याम्बरधरां रक्तालङ्कारभूषिताम् । महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिकाम् । एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्”। मातृकान्यासेऽस्य दक्षांसे न्यास्यता । काव्यादौ प्रयोगे “रस्तु दाहम्” इ० र० टीकोक्तेः दाहः फलम्.।

पु० रा–ड ।१वह्नौ २वज्रे मेदि०। ३कामानले च शब्दर०। ४छन्दःशास्त्रप्रसिद्धे लघुमध्ये आद्यन्तगुरुयुते रगणे काव्यादौ तस्य प्रथमप्रयोगे मरणं फलम् अस्य देवताऽग्निः।

रंह गतौ अद० चु० उभ० सक० सेट्। रंहयति ते अररंहत् त ।

रंहस् न० रंह–असुन् । वेगे अमरः । [अरीरकत् त

रक आस्वादे प्राप्तौ च चु० उभ० सक० सेट् । राकयति-ते

रक्त न० रन्ज–करणे क्त । १कुङ्कुमे २ताम्रे ३प्राचीनामलके मेदि०। ४सिन्दूरे ५हिङ्गुले ६पद्मके राजनि० । ७शरीरस्थे रसपाकजन्ये मांसहेतौ रुधिराख्ये धातुभेदे अमरः । ८कुसुम्भे ९हिज्जले १०रोहितवर्णे च पु० ११तद्वति त्रि०अमरः । १२पराग कर्त्तरि क्त । १३अनुरक्ते मेदि० १४क्रीडारते च शब्दचि०। कर्मणि क्त । १५नील्यादिभीरञ्जिते त्रि० । करणे क्त। १६मञ्जिष्ठायां १७लाक्षायां १८गुञ्जायाञ्च स्त्री राजनि०टाप्। भावे क्त। २०रागे न०। धातुभेदरक्तस्वरूपादिकं भावप्र० उक्तं यथा “यदा रसो यकृद्याति तत्र रञ्जकपित्ततः। रागं पाकञ्च संप्राप्य स भवेद्रक्तसंज्ञकः। रक्तं सर्वशरीरस्थं जीवस्याधारमुत्तमम् । स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत्” । जीवस्याधारमुत्तममिति, यत आह। “जीवो वसति सर्वस्मिन्देहे तत्र विशेषतः । वीर्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणादिति” । वीर्ये रक्ते मले च शरीरारम्भके वाग्भटोक्तपरिमाणमिते सुखे जीवो वसति न तु दुष्टे प्रवृद्धे रक्तस्यावस्थोपदेशस्य वैयर्थ्यप्रसङ्गात्। पित्तवद्भवेत् अम्लवद्भवेदित्यर्थः। अथ रक्तस्य स्थानमाह “यकृत् प्लीहा च रक्तस्य मुख्यस्थानमनयोः स्थितम् । अन्यत्र संस्थितवतां रक्तानां पोषकं भवेत्” । अस्वक्षरयन्त्रे ५५८ पृ० दृश्यम् ।

रक्तक पु० रक्तं रुधिरमिव कायति कै–क स्वार्थे कन् वा । १बन्धूकवृक्षे २बन्धूकवृक्षे मेदि० । ३रक्तशोभाञ्जने ४रक्तैरण्डे च राजनि० । ५रुधिरे ६रक्तवस्त्रे च न० । ७अनुरागिणि मेदि० ८विनोदिनि च त्रि० ।

रक्तकन्द पु० रक्तवर्णः कन्दोऽस्य । १विद्रुमे प्रवाले हेमच० २रक्तालौ ३रक्तपलाण्डौ च राजनि० ।

रक्तकमल न० रक्तं कमलमिव । रक्तवर्णोत्पले राजनि० । पुंपो० । रक्तकम्बलमप्यत्र न० । [स्वार्थे क तत्रार्थे ।

रक्तकरवीर पु० कर्म० । रक्तवर्णपुष्पककरवीरवृक्षे राजनि०

रक्तकाञ्चन पु० कर्म० । रक्तवर्णपुष्पककाञ्चनवृक्षे शब्दच० ।

रक्तकाण्डा स्त्री रक्तः काण्डोऽस्याः । रक्तपुनर्नवायाम् राजनि० । [कैरवरक्तकोकनदे अप्यत्र न० जटा० ।

रक्तकुमुद न० कर्म० । १रक्तवर्णपुष्पककैरवे जटा० । २रक्त-

रक्तकुसुम पु० रक्तानि कुसुमान्यस्य । पारिभद्रे (पालदामादार) राजनि० । [२पुन्नागवृक्षे च रत्नमा० ।

रक्तकेसर पु० रक्ताः केसरा अस्य । १पारिभद्रे राजनि० ।

रक्तखदिर पु० सारतो रक्तवर्णः खदिरः । रक्तवर्णसारके खदिरवृक्षे राजनि० ।

रक्तगन्धक न० रक्तेन गन्धकमिव । बोले (गन्धरस) राजनि०

रक्तघ्न पु० रक्तं हन्ति हन-टक् । १रोहितकवृक्षे जटा० । २दूर्वायां स्त्री शब्दच० ।

रक्तचन्दन न० कर्म० । स्वनामख्याते चन्दनभेदे अमरः । “रक्तं (चन्दनम्) शीतं गुरु स्वादु छर्दितृष्णास्रपित्तनुत् । पित्तनेत्रहितं वृष्यं ज्वरव्रणविषापहम्” भावप्र०

रक्तचित्रक न० कर्म० । (लालचिता) क्षुपभेदे राजनि० ।

रक्तचूर्ण न० कर्म० । १सिन्दूरे हारा० २रक्तवर्णचूर्णमात्रे च

रक्तझिण्टी स्त्री कर्म० । (लालझाटि) पुष्पप्रधानवृक्षभेदे अमरः ।

रक्ततुण्ड पु० रक्तं तुण्डमस्य । १शुकपक्षिणि राजनि० । २रक्तमुखके त्रि० कप् । रक्ततुण्डक सूनागे राजनि० ।

रक्ततृणा स्त्री रक्तं तृणं यस्याः । गोमूत्रिकायाम् राजनि०

रक्तत्रिवृत् (ता) स्त्री कर्म०।(लालतेओडि) वृक्षभेदे राजनि०

रक्तदन्तिका स्त्री रक्ता दन्ता यस्याः कप् अत इत्वम् । दाडिमीस्थे दुर्गाशक्तिभेदे “भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् । रक्ता दन्ता भविष्यन्तीति”उपक्रमे” ततो मां देवताः सर्वे मर्त्यलोके च मानवाः । स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम्” देवीमा० । इति तन्नामनिरुक्तिः । [राजनि० ।

रक्तदला स्त्री रक्तानि दलान्यस्याः । नालिकायाम् (नालते)

रक्तदृश् पु० रक्ता दृक् नेत्रमस्य । कपोते । रक्तनेत्रादयोऽप्यत्र

रक्तधातु पु० कर्म० । गैरिके त्रिका० । २ताम्रे च राजनि० देहस्थे रुधिररूपे रसधातुजाते मांसधातुहेतौ ४धातुभेदे च धातुशब्दे ५५८ पृ० दृश्यम् ।

रक्तनाल पु० रक्तो नालोऽस्य । जीवशाके राजनि० ।

रक्तप पुंस्त्री० रक्तं पिबति पा-क । १राक्षसे मेदि० । स्त्रियां ङीप् । २रक्तपानकर्त्तरि त्रि० । ३जलौकायां ४डाकिन्याञ्च स्त्री मेदि० टाप् ।

रक्तपत्रिका स्त्री रक्तानि पत्राण्यस्याः कप् अत इत्त्वम् । १नाकुल्यां २रक्तपुनर्नवायाञ्च राजनि० ।

रक्तपल्लव पु० ६ब० । १अशोकवृक्षे राजनि० । कर्म० । २रक्तवर्णपल्लवे अस्त्री० । [राजनि० ।

रक्तपाकी स्त्री रक्तः पाकः फलं यस्याः ङीप् । बृहत्याम्

रक्तपाद पु० ६ब० । १रक्तपक्षिणि हेमच० । २लज्जालौ लतायां ३हंसपद्याञ्च स्त्री राजनि० ङीप् पद्भावश्च ।

रक्तपायिनी स्त्री रक्तं पातुं शीलमस्याः पा+णिनि ङीप् । जलौकायाम् (जोंक) राजनि० ।

रक्तपारद न० कर्म० । हिङ्गुले शारा० । तदर्थे पु० जटा० ।

रक्तपित्त न० रोगभेदे । तल्लक्षणादिकं भावप्र० उक्तं यथा "घर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः । तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च । पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितम्" । तीक्ष्णं मरिचादि । उष्णमग्नितापादि । क्षारोयवक्षारादिः । विदग्धं स्वगुणैः स्वकारणैः गुणैस्तीक्ष्णादिभिः । गुणैरिति बहुत्वेन तीक्ष्णोष्णलवणकटूष्णत्वादयो गृह्यन्ते विदहति दूषयति । अथ रक्तपित्तस्य सामान्यं लक्षणमाह "ततः प्रवर्त्तते रक्तमूर्द्ध्वञ्चाधो द्विधाऽपि वा" । अत्र रक्तमित्युपलक्षणम् । तेन संसृष्टं पित्तञ्च । अतएव रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व इति सुश्रुतः । रक्तञ्च तत् पित्तं चेति रक्तपित्तं रागमाप्तं पित्तं रक्तमित्युच्यते रक्तं पित्तं कर्मधारयश्च इति चरकः । उभयत्रापि न दोषः कारणत्रयात् । कारणत्रयमाह "संयोगात् दूषणात् तत्तु सामान्यात् गन्धवर्णयोः । रक्तस्य पित्तमाख्यातं रक्तपित्तं मनीषिभिः" । मार्गानाह "ऊर्द्ध्वं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः । कुपितं रोमकूपैश्च समस्तैस्तत्प्रवर्त्तते" । कुपितं पित्तम् । पूर्वरूपमाह "सदनं शीतकामित्वं कण्ठधूमायनं वमिः । लोहगन्धिश्च निश्वासो भवत्यस्मिन् भविष्यति" । विशिष्टरूपमाह "सान्द्रं सपाण्डु सस्नेहं पिच्छिलं च कफान्वितम्" । वातिकमाह "श्यावारुणं सफेनञ्च तनु रूक्षञ्च वातिकम्" । पैत्तिकमाह "रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभम् । मेचकागारधूमाभमञ्जनाभञ्च पैत्तिकम्" । मेचकम् चिक्कणं कृष्णवर्णम् । अञ्जनं स्रोतोञ्जनं तदाभम् । संसर्गविशेषेण मार्गभेदमाह "संसृष्टं लिङ्गसंसर्गात् त्रिलिङ्गं सान्निपातिकम् । ऊर्द्ध्वगं कफसंसृष्टमधोगं मारुतानुगम् । द्विमार्गं कफवाताभ्यामुभाभ्यां तत् प्रवर्त्तते" । उपद्रवानाह "दौर्बल्यं श्वासकासज्वरवमथुमदाः पाण्डुतादाहमूर्च्छा भुक्ते घोरो विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीड़ा । तृष्णा कोष्ठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनत्वं भक्तेऽविपाको विकृतिरपि भवेद्रक्तपित्तोपसर्गाः" । विकृतिः मांसप्रक्षालनाभतादिः । साध्यादिकमाह "एकदोषानुगं साध्यं द्विदोषात् याप्यमुच्यते । यत्त्रिदोषमसाध्यं स्यान्मन्दाग्नेरतिवेगवत् । ऊर्द्ध्वं साध्यमधो याप्यमसाध्यं युगपद्गतम् । व्याधिभिः क्षीणदेहस्य वृद्धस्याऽनश्नतस्तु यत्" । अथ साध्यमाह "एकमार्गं बलवतो नातिवेगं नवोत्थितम् । रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम्" । सुखे काले हिमशिशिरयोः । असाध्यमाह "मांसप्रक्षालनाभं क्वथितमिव च यत्कर्द्दमाम्भोनिभं वा मेदःपूयास्रकल्पं यकृदिव यदि वा पक्वजम्बूफलाभम् । यत् कृष्णं यच्च नीलं भृशमपि कुणपं यत्र चोक्ता विकारास्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति" । उक्ताः विकारा दौर्बल्यादयः । सुरपतिधनुषा तुल्यं नानावर्णम् । "येन चोपहतो रक्तं रक्तपित्तेन मानवः । पश्येद्दृश्यं वियच्चापि तदसाध्यमसंशयम्" । येन रक्तपित्तेनोपहतः मनुष्यः दृश्यं घटपटादिकं रक्तं पश्यति स नश्यति वियच्चापि आकाशमपीत्यर्थः । अथारिष्टमाह । "लोहितं छर्द्दयेद्यस्तु बहुशो लोहितेक्षणः । लोहितोद्गारदर्शी च म्रियते रक्तपैत्तिकः" । लोहितोद्गारदर्शी व्याधिमहिम्नोद्गारमपि लोहितं पश्यतीत्यर्थः" ।

रक्तपुष्प न० कर्म० । १रक्ते कुसुमे रक्तं पुष्पमस्य । २करवीरे जटा० ३रोहितकवृक्षे ४रक्तकाञ्चनवृक्षे ५दाड़िमवृक्षे ६रक्तवकवृक्षे रत्नमा० ७जम्बूवृक्षे ८पुन्नागवृक्षे च राजनि० ९पाक्षलीवृक्षे स्त्री जटा० टाप् । रक्तपुष्पक पलाशवृक्षे रोहितकवृक्षे च जटा० । पर्पटे शाल्मलिवृक्षे च राजनि० ।

रक्तपुष्पिका स्त्री रक्तानि पुष्पाणि यस्याः कप् अत इत्त्वम् । १लज्जालुलतायाम् शब्दच० २रक्तपुन-

नवायाम् २भूमिपाटल्यां च राजनिघण्टुः ।

रक्तपुष्पी स्त्री रक्तानि पुष्पाण्यस्याः ङीप् । १पाटलिवृक्षे (पारुल) २जवायाम् ३आवर्त्तकीलतायाम् ४नागदमन्याम् ५करुणीवृक्षे ६शङ्खपुष्प्यां च राजनि० ।

रक्तपूरक न० रक्तं रुधिरं पूरयति सेवनात् पूर–ण्वुल् । वृक्षाम्ले राजनि० । [स्थाने च राजनि० ।

रक्तप्रसव पु० रक्तवर्णः प्रसवः पुष्पमस्य । १करवीरे २रक्ता

रक्तफल पु० रक्तानि फलान्यस्य । १वटवृक्षे जटा० । २बिम्बिकायां (तेलाकुचा) स्त्री अमरः टाप् ।

रक्तबालुक न० कर्म० । सिन्दूरे हारा० रक्तबालुकाप्यत्र स्त्री

रक्तमञ्जर पु० रक्तवर्णा मञ्जरी अस्यस्य अच् । निचुलवृक्षे त्रिका० । [राजनि० ।

रक्तमूला स्त्री ६त० । लज्जालुलतायाम् । कप् । देवसर्षपे पु०

रक्तमेह पु० कर्म० । प्रमेहरोगभेदे "विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः" भावप्र० ।

रक्तमोक्षण न० ६त० । रुधिरस्रावणे ।
"वेदनोपशमार्थाय तथाऽपाकशमाय च । अचिरोत्पतिते शोथे शोणितस्रावमाचरेत्" । चरेत् कुर्य्यात् । "एकतस्तु क्रियाः सर्वा रक्तमोक्षणमेकतः । रक्तं हि वेदनामूलं तच्चेन्नास्ति न चापि रुक् । शिराभिः कठिने स्थाने शृङ्गे चात्यन्तवेदने । त्वचिस्थे विदधेच्च जलौकोभिः पदैरपि" । शोणितस्रावणप्रकारैर्दिङ्मात्रेणानाययः" भावप्र०

रक्तयष्टि स्त्री रक्तवर्णा यष्टिरस्याः । मञ्जिष्ठायाम् जटा० । कप् । रक्तयष्टिका तत्रैव ।

रक्तरेणु पु० रक्ता रेणवोऽस्य । १पलाशकलिकायाम् २सिन्दूरे च मेदि० ३पुन्नागे राजनि० ।

रक्तलशुन न० कर्म० । (लालरशुन) मूलभेदे राजनि० ।

रक्तला स्त्री रक्तं रुधिरं सेवनेनास्यस्याः अच् तत् लाति सेवनात् ला–क वा । काकजङ्घायाम् राजनि० ।

रक्तवटी स्त्री रक्तवर्णा वटीव । मसूरिकायाम् त्रिका० ।

रक्तवर्ग पु० रक्तानां वर्गः समुदायः । दाडिमकिंशुकलाक्षाबन्धूकहरिद्राद्वयनवकुसुम्भपुष्पमञ्जिष्ठाबन्धूकसमूहे समूहे राजनि० । [कर्म० । २रोहितवृक्षे पु० ३तद्वति त्रि० ।

रक्तवर्ण पु० रक्तो वर्णोऽस्य । १इन्द्रगोपकीटभेदे राजनि० ।

रक्तवर्द्धन पु० रक्तं रुधिरं वर्द्धयति भोजनात् वृध–णिच्–ल्यु । वार्त्ताकौ शब्दच० । [याम् राजनि० ।

रक्तवर्षाभू पु० वर्षायां भवति भू–क्विप् कर्म० । रक्तपुनर्नवा-

रक्त(बी)वीज पु० रक्तवर्णानि वी(बी)जान्यस्य । १दाडिमे राजनि० रक्तं रुधिरमेव वी(बी)जमुत्पत्तिः कारणं यस्य । "रक्तविन्दुर्यदा भूमौ पतत्यस्य शरीरतः । समुत्पतति मेदिन्यास्तत्प्रमाणस्तदाऽसुरः" देवीमा० उक्ते असुरभेदे [शब्दच०

रक्तवृन्ता स्त्री रक्तं वृन्तं यस्याः । शेफालिकायाम्

रक्तवृष्टि स्त्री ६त० । दैवकृतोपद्रवभेदे रुधिरवर्षणे "मत्स्यचित्रामणौ "रक्तं मस्तोद्योगो मांसास्थिवसादिभिर्नरकः । धान्यहिरण्यत्वक्फलकुसुमाद्यैर्वर्षिते भयं विद्यात्" ज्यो० त० । [शब्दे ४८७६ पृ० दृश्यम् ।

रक्तशालि पु० कर्म० । (लालधान) धान्यभेदे भावप्र० । धान्य-

रक्तशिग्रु पु० कर्म० । (लालसजना) वृक्षभेदे राजनि० ।

रक्तशीर्षक पु० रक्तं शीर्षमस्य कप् । १सरलद्रुमे रत्नमा० । २रक्तमस्तके त्रि० ।

रक्तशृङ्गिक न० रक्तं शृङ्गमिवास्यस्य ठन् । विषभेदे राजनि०

रक्तसन्ध्यक न० रक्ता सन्ध्येव कन् । रक्तवर्णे कह्लारे अमरः

रक्तसरोरुह न० कर्म० । रक्तपद्मे अमरः ।

रक्तसर्षप पु० कर्म० । (राइसर्षे) राजिकायाम् राजनि० ।

रक्तसहा स्त्री रक्तं सहते सह–अच् । रक्तम्लाने राजनि०

रक्तसार न० रक्तः सारोऽस्य । १रक्तचन्दने २अम्लवेतसे पु० राजनि० ।

रक्तसौगन्धिक न० कर्म० । (लालसुदि) रक्तवर्णकह्लारे जटा०

रक्ताकार पु० रक्तवर्ण आकारो मूर्त्तिरस्य । प्रवाले राजनि० २रक्तमूर्त्तिके त्रि० ।

रक्ताक्ष पु० रक्ते अक्षिणी यस्य षच् समा० । १पारावते २महिषे ३चकोरे राजनि० ४रक्तनेत्रवति क्रूरे जने च त्रि० ५सारसे च मेदि० । स्त्रियां जातौ सर्वत्र ङीष् ।

रक्ताङ्ग न० रक्तमङ्गं यस्य यस्माद्वा । १कुङ्कुमे २मङ्गलग्रहे ३कम्पिल्ले (कहरकरमचा) च पु० ४प्रवाले पुंन० मेदि० । ५जीवन्त्याम् ६मञ्जिष्ठायाञ्च स्त्री भावप्र० ङीप् ।

रक्ताति(ती)सार पु० रक्तमिश्रितोऽति(ती)सारः । वैद्यकप्रसिद्धे रोगभेदे । "पित्तकृत्तु यदात्यर्थं द्रव्यमश्नाति पैत्तिके । तद्दोषाज्जायते शीघ्रं रक्तातीसार उल्बणः" भावप्र० । अति(ती)सारशब्दे १०६ पृ० दृश्यम् ।

रक्ताधार पु० ६त० । देहावरके चर्मणि राजनि० ।

रक्तापह न० रक्तं रुधिरमपहन्ति अप+हन–ड । गन्धरसे बोले राजनि० ।

रक्तापामार्ग पु० कर्म० । (लाल आपाङ्) क्षुपभेदे राजनि०

रक्ताम्र पु० नित्यक० । कोशाम्रे राजनि० ।

रक्ताम्लान पु० कर्म० । रक्तमहासहाख्यतायाम् राजनि० ।

रक्तार्बुद पु० रोगविशेषे । तल्लक्षणं भावप्र० उक्तं यथा "दोषप्रदुष्टा रुधिरं शिरास्तु संकोच्य संपीड्य ततस्त्वपाकम् । सस्रावमुन्नह्यति मांसपिण्डं मांसाङ्कुरैराचितमाशुवृद्धिम् । स्रवत्यजस्रं रुधिरं प्रदुष्टमसाध्यमेतद्रुधिरात्मकन्तु । रक्तक्षयोपद्रवपीडितत्वात् पाण्डुर्भवेदर्बुदपीडितस्तु" । दोषोऽत्र पित्तं, रुधिरं शिरास्तु सङ्कोच्य संपीड्य संहतीकृत्य मांसासृजोः सर्वेष्वर्बुदेषु दुष्टत्वं, रक्तजे तु विशेषतो रक्तदुष्टिः एवं मांसार्बुदे विशेषतो मांसदुष्टिर्बोद्धव्या । ततो मांसपिण्डमुन्नह्यति उद्गतं करोति । अपाकं ईषत्पाकं यथा स्यादेवमिति क्रियाविशेषणम् । ईषत्पाकमेकदेशपाकेन । रक्तक्षयोपद्रवपीडितत्वात् रक्तक्षयोपद्रवाः सुश्रुतेनोक्ताः । तैः पीड़ितत्वात् अर्बुदपीड़ितः" । शातातपीयकर्मविपाके "रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः" इत्युक्तम् ।

रक्तार्शस् न० अर्शोरोगभेदे । तल्लक्षणं भावप्र० उक्तं यथा "रक्तोल्बणा गुदे कीलाः पित्ताकृतिसमन्विताः । वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः । तेऽत्यर्थं दुष्टमुष्णञ्च गाढविड्भिः प्रपीड़िताः । स्रवन्ति सहसा रक्तं तस्य चातिप्रवर्त्तितः । भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः । हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः । विट् श्यावं कठिनं रूक्षमधोवायुर्न वर्त्तते । तनु चारुणवर्णञ्च फेनिलञ्चासृगर्शसाम् । कट्यूरुगुदशूलञ्च दौर्बल्यं यदि चाऽधिकम् । तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम् । शिथिलं श्वेतपीतञ्च विट् स्निग्धं गुरु शीतलम् । यद्यर्शसां घनञ्चासृक् तन्तुमत् पाण्डु पिच्छिलम् । गुदं सपिच्छं स्तिमितं गुरु स्निग्धञ्च कारणम् । श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः । गुदे कीला अर्शांसि पित्ताकृतिसदृशाः । दुःखै रोगैः त्वक्पारुष्यान्नुशीतप्रार्थनादिभिः । कलुषेन्द्रियः व्याकुलसर्वेन्द्रियः । रक्तजस्यापि वातोल्बणस्य लक्षणमाह । तत्र रक्तार्शसि अनुबन्धः उल्बणत्वम् । रूक्षणं रूक्षयतीति रूक्षणं रूक्षं द्रव्यम् । पित्तोल्बणस्य लक्षणम् "रक्तोल्बणा गुदे कीलाः पित्ताकृतिसमन्विताः" इत्यादिनैवोक्तम् रक्तपित्तयोः समानलिङ्गत्वात् । कफोल्बणस्य लक्षणमाह । सपिच्छं पिच्छिलमार्द्रं स्तिमितमार्द्रवस्त्रावगुण्ठितमिव" ।

रक्तालु पु० कर्म० । (शकरकन्द) आलुभेदे राजनि० ।

रक्तिका स्त्री रक्तेव कन् अत इत्वम् । १गुञ्जायां २राजिकायां राजनि० ३परिमाणभेदे रक्तिकापरिमाणे च ।

रक्तेक्षु पु० कर्म० । (काजला) इक्षुभेदे राजनि० ।

रक्तैरण्ड पु० कर्म० । (लालभेरण्डा) एरण्डभेदे राजनि० ।

रक्तोत्पल न० कर्म० । कोकनदे लोहितवर्णे पद्मे अमरः । रक्तोत्पलमिव पुष्पमस्त्यस्य अच् । २शाल्मलिवृक्षे (शिमुल) पु० राजनि० । रक्तमुत्पलमिव । ३गैरिके न० हारा० ।

रक्तोत्पलाभ पु० रक्तोत्पलस्य कोकनदस्येवाभा यस्य । १रक्तकृपे जटा० २तद्वति त्रि० ।

रक्ष पालने भ्वा० पर० सक० सेट् । रक्षति अरक्षीत् ररक्ष । अरक्षीत् रक्षितो वर्त्तते । [समूहे अमरः ।

रक्षःसभ न० रक्षसां राक्षसानां सभा क्लीवत्वम् । राक्षस-

रक्षक त्रि० रक्ष-ण्वुल् । रक्षाकर्त्तरि स्त्रियां टाप् अत इत्वम् ।

रक्षणि(णी) स्त्री रक्ष-अनि वा ङीप् । त्रायमाणालतायाम् राजनि० । [अमरः ।

रक्षस् न० रक्ष्यते हविरस्मात् रक्ष-अपादानेऽसुन् । राक्षसे

रक्षा स्त्री रक्ष-भावे अ टाप् । १रक्षणे २तदर्थे रक्षासूत्रे च "रक्ष० ! मा चल मा चल" रक्षाबन्धमन्त्रः । रक्षति रक्ष अच् टाप् । ३लाक्षायां मेदि० । ४भस्मनि च स्त्री शब्दर० । ५रक्षके त्रि० ।

रक्षापत्र पु० रक्षार्थं पत्रमस्य । भूर्जपत्रवृक्षे राजनि० ।

रक्षित त्रि० रक्ष्यतेऽस्म रक्ष-क्त । १पालिते । २वैद्यभेदे पु० ।

रक्षिवर्ग पु० रक्षिणां वर्गः । रक्षकसैन्यादिगणे (पाहारिगण)

रक्षोघ्न न० रक्षो हन्ति हन-टक् । १काञ्जिके हेमच० । २हिङ्गुनि राजनि० । तद्गन्धस्य घ्राणसम्बन्धादि रक्षोनाशपरत्वम् । ३भल्लातकवृक्षे पु० त्रिका० । ४श्वेतसर्षपे पु० रत्नमा० । ऋग्वेदप्रसिद्धे "कृणुष्व पाजः" इत्यादिके ऋ० ४।४।१० । ५सूक्तभेदे न० । ६वचायां स्त्री । ७राक्षसघातकमात्रे त्रि० ङीप् ।

रक्षोहन् पु० रक्षो हन्ति हन+क्विप् । १गुग्गुलौ राजनि० तद्गन्धघ्राणादि रक्षोनाशपरत्वम् । २श्वेतसर्षपे पु० । ३राक्षसहन्तरि त्रि० । "रक्षोहणं बलगहनम्" यजु० ५।२१

रङ्क्षा पु० रक्ष-मङ् । त्राणे अमरः । [रङ्खते ।

रख सर्पणे भ्वा० पर० सक० सेट् इदित् । रङ्खति अरङ्खीत्

रख सर्पणे भ्वा० पर० सक० सेट् । रखति अरखीत् अराखीत् । [घटा० रखयति ।

रग शङ्कायाम् भ्वा० प० सक० सेट् । रगति इदित् अरगीत्

रग गतौ भ्वा० पर० सक० सेट् इदित् । रङ्गति अरङ्गीत् ।

रग स्वादे आप्तौ च चु० उभ० सक० सेट् । रागयति शरीरगत् न । [शररङ्क्षत् न ।

रघ दीप्तौ चु० उभ० सक० सेट् इदित् । रङ्घयति ते

रघ गतौ भ्वा० आ० सक० सेट् इदित् । रङ्घते अरङ्घिष्ट ।

रघु पु० लघ-उ लस्य रत्वम् । सूर्य्यवंश्ये दिलीपसुते १नृपतिभेदे रघोरपत्यमण् बहुषु लुक् । रघुवंश्येषु अज-प्रभृतिषु २क्षत्रियेषु ब०व० । तान् अधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां तस्य लुक् । कालिदासप्रणीते ऊनविंशतिसर्गात्मके महाकाव्यभेदे पु० ।

रघुनन्दन पु० रघून् नन्दयति नन्द-णिच् ल्यु । दशरथस्य ज्येष्ठपुत्रे १श्रीरामे त्रिका० २भरतादौ च ।

रघुनाथ पु० रघूणां नाथः रक्षकत्वात् श्रेष्ठत्वाद्वा ; श्रीरामे शब्दर० । रघुपत्यादयोऽप्यत्र ।

रघुवंश पु० ६त० । रघुकुले । तमधिकृत्य कृतो ग्रन्थः आख्यायिकायां तस्य लुक् । कालिदासप्रणीते ऊन-विंशतिसर्गात्मके महाकाव्यभेदे पु० । [पुत्रे श्रीरामे ।

रघुवंशतिलक पु० रघुवंशे तिलक इव । दशरथनृपस्य ज्येष्ठ-

रघुवर पु० रघुषु वरः श्रेष्ठः । श्रीरामे ।

रघूद्वह पु० रघुषु उद्वहः रक्षादिभारधारकः उद्+वह-अच् । दशरथनृपस्य ज्येष्ठपुत्रे श्रीरामे शब्दर० ।

रङ्क त्रि० रकि-अच् । १कृपणे २मन्दे च मेदि० । [राजनि०

रङ्कु पु० रकि-उ । १मृगविशेषे अमरः । २शबलपृष्ठे मृगे

रङ्ग पुं न० रगि-अच् । १धातुभेदे (राङ) राजनि० । रन्ज-भावे घञ् । २रागे । आधारे घञ् । ३रणभूमौ ४नाट्यस्थाने च अमरः । करणे घञ् । ५नृत्ये मेदि० । ६टङ्कणे (सो-हागा) ७खादिरसारे च राजनि० । रङ्गधातोः शो-धनप्रकारो भावप्र० उक्तो यथा “र(व)ङ्गनागौ प्रतप्तौ च गलितौ तौ निषेचयेत् । त्रिधा त्रिधा विशुद्धिः स्याद्रवि दुग्धेऽपि च त्रिधा” । तैलतक्रकाञ्जिकगोमूत्रकुलत्थक्वाथेषु प्रत्येकं त्रिधा त्रिधा । अथ रङ्गस्य मारणविधिः । “मृत्पात्रे द्राविते र(व)ङ्गे चिञ्चाश्वत्थत्वचोरजः । क्षिप्त्वा र(व)ङ्गचतुर्थांशमयोदर्व्या प्रचालयेत्” । चिञ्चा(अमिली) रजश्चूर्णम् । अयोदर्वी (करछुली) । “ततो द्वियाममात्रेण र(व)ङ्गं भस्म प्रजायते । अथ भस्मसमं तालं क्षिप्त्वाम्लेन विमर्दयेत् । ततो गजपुटे पक्त्वा पुनरम्लेन मर्दयेत् । तालेन दशमांशेन याममेकं ततः पुटेत् । एवं दशपुटैः पक्वं र(व)ङ्गं भवति मारितम् । एवं मारितस्य र(व)ङ्ग-स्य गुणाः । “रङ्गं लघु सरं रूक्षं कुष्ठमेहकफक्रिमीन् । निहन्ति पाण्डुं सश्वासं नेत्र्यमीषत्तु पित्तलम् । सिंहो गजौघन्तु यथा निहन्ति तथैव र(व)ङ्गोऽखिल-मेहवर्गम् । देहस्य सौख्यं प्रबलेन्द्रियत्वं नरस्य पुष्टिं विदधाति नूनम्” । तस्याशुद्धस्य दोषमाह “रङ्गो विधत्ते खलुशुद्धिहीनस्तथा ह्यपक्वश्च किलासगुल्मौ । कुष्ठानि-शूलं किल वातशोथं पाण्डुं प्रमेहञ्च भगन्दरञ्च । विषोपमं रक्तविकारवृन्दं वमञ्च तन्द्राञ्च कफज्वरञ्च । मेहाश्मरीविद्रधिमुख्यरोगान्नागोऽपि कुर्य्यात् कथितान् विकारान्” तद्भेदो यथा । “श्वेतं मृदु लघु स्वच्छं स्निग्धमुष्णसहं हिमम् । द्रुतपञ्चभरं कान्तं लघु श्रेष्ठमुदाहृतम् । खुरकं मिश्रकञ्चापि द्विविधं र(व)ङ्ग-मुच्यते । उत्तमं खुरकं तत्र मिश्रकं त्वहितं मतम्” । राजनि० ।

रङ्गज न० रङ्गात् रङ्गधातोर्जायते जन-ड । सिन्दूरे रत्नमा

रङ्गजीवक पु० रङ्गेण रञ्जनेन जीवति जीव-ण्वुल् । (रङ्गरेज) १शिल्पिभेदे चित्रकरे शब्दर० । २नाट्यजीविनि च

रङ्गद पु० रङ्गं रञ्जनं रागं ददाति दा-क । १टङ्कणे २ख-दिरसारे च ३स्फटर्य्यां स्त्री राजनि० ।

रङ्गदायक पु० रङ्गं ददाति दा-ण्वुल् । १कङ्कुष्ठे (काङ्कुनी) २धान्यभेदे राजनि० ।

रङ्गपत्री स्त्री रङ्गाय पत्रमस्याः ङीप् । नीलीवृक्षे राजनि० तत्पत्ररसादिना हि नीलरागसम्भवः । [वृक्षे राजनि० ।

रङ्गपुष्पी स्त्री रङ्गं पुष्पमिति पुष्प अण् गौरा० ङीष् । नीली-

रङ्गभूमि स्त्री रज्यतेऽत्र रन्ज-आधारे घञ् कर्म० । १नाट्यभूमौ शब्दर० । “रङ्गभूमिं समासाद्य” इति भा० ६प० । २मल्लभूमौ च ।

रङ्गमाता स्त्री रङ्गस्य रागस्य मातेवोत्पादिका । १लाक्षायाम् २कुट्टिन्याञ्च मेदि० । सा हि नायकयोर्वार्त्ताहरणादिद्वारा रागं वर्द्धयति ।

रङ्गलासिनी स्त्री रङ्गं रागं लासयत्युल्लासयति इत्तरसेन लस-णिच्-णिनि । शेफालिकायाम् शब्दच० ।

रङ्ग(बी)वीज न० रङ्गं वी(बी)जमुत्पत्तिसाधनं यस्य । रजते शब्दर० । कृत्रिमरूप्यस्य पारदयोगात् रङ्गजत्वम् रजतशब्दे दृश्यम् ।

रङ्गशाला स्त्री ६त० । (नाचघर) नाट्यगृहे शब्दर० ।

रङ्गाजीव पु० रङ्गं रञ्जनं नाट्यस्थानं वा आजीवति आ+जीव-अच् । (रङ्गरेज) १शिल्पिभेदे चित्रकरे अमरः । २नटे च हेमच० ।

रङ्गारि पु० रङ्गस्यारिरिव जारकत्वात्। करवीरे रत्नमा०। तद्रससंबन्धाद्धि रङ्गस्य जीर्णता वैद्यकप्रसिद्धा।

रङ्गावतारक पु० रङ्गे नाट्यस्थानेऽवतरति वेशान्तरपरिग्रहेण अव+तॄ–ण्वुल्। १नटे शैलूषे जटा०। णिनि। उक्तार्थे हेमच०। तदन्नभोजननिषेधो मनुनोक्तो यथा "कर्मारस्य निषादस्य रङ्गावतारकस्य च। सुवर्णकर्त्तुर्वेणस्य शस्त्रविक्रयिणस्तथा। त एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्त्तिताः। तेषान्त्वगस्थिरोमाणि वदन्त्यन्नं मनीषिणः। भुक्त्वातोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम्। मत्या भुक्त्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च"।

रङ्गिणी स्त्री रङ्गमिव शुभ्राणि मूलानि सन्त्यस्याः इनि। १शतमूल्याम् जटा०। २कैवर्त्तिमुस्तके च राजनि०। ३रङ्गयुक्ते त्रि०।

रङ्घस् न० रघि–असुन्। वेगे अमरे पाठान्तरम्। [त।

रच रचनायां अद०चु०उभ०सक०सेट्। रचयति ते अररचत्

रचना स्त्री रच–युच्। रचने १पुष्पपत्रादेर्विन्यासे अमरः। भावे ल्युट्। तत्रैवार्थे न०।

रज न० रन्ज–क। १स्त्रीकुसुमे शब्दर०। २परागे ३रेणौ ४गुणभेदे च पु० जान्ते शब्दच०।

रजक पुंस्त्री० रजति रन्ज–ण्वुल् नलोपः। वस्त्रादेः रागकारके जातिभेदे (धोपा) अमरः। स च तीवरकन्यायां धीवराज्जातः ब्रह्मवै०। स्त्रियां ङीष्। सा च कुलनायिका "रजकी नापिताङ्गना" तन्त्रम्।

रजत रन्ज–अतच् नलोपः। १रूप्ये अमरः। २गजे ३दन्ते ४रुधिरे ५हारे ६शैले ७स्वर्णे ८धवले च हेमच०। ९शुक्लगुणवति त्रि०।

रूप्यधातोरुत्पत्त्यादि भावप्र० उक्तं यथा

"त्रिपुरस्य वधार्थाय निर्निमेषैर्विलोचनैः। निरीक्षयामास शिवः क्रोधेन परिपूरितः। अग्निस्तत्कालमपतत्तस्यैकस्माद्विलोचनात्। ततो रुद्रः समभवद्वैश्वानर इव ज्वलन्। द्वितीयादपतन्नेत्रादश्रुबिन्दुस्तु वामकात्। तस्माद्रजतमुत्पन्नमुक्तकर्मसु योजयेत्। कृत्रिमञ्च भवेत्तद्धि वङ्गादिरसयोगतः। रूप्यन्तु रजतं तारश्चन्द्रकान्ति सितप्रभम्। गुरु स्निग्धं मृदु श्वेतं दाहे छेदे घनं क्षमम्। वर्णाढ्यं चन्द्रवत् स्वच्छं रूप्यं नवगुणं शुभम्। कठिनं कृत्रिमं रूक्षं रक्तं पीतदलं लघु। दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम्। तारं शरीरस्य करोति तापं शतं चनं सञ्चति शुक्रनाशम्। वीर्यं बलं हन्ति तनोति पुष्टिं महागदान् शोषयति ह्यशुद्धम्"।

स्थानान्तरे तत्रैव

तस्य शोधनविधिः "पत्रीकृतपत्राणि तारस्याग्नौ प्रतापयेत्। निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके। गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा। एवं रजतपत्राणां विशुद्धिः प्रजायते"। अथाशुद्धस्य रूप्यस्य दोषमाह "रूप्यं त्वशुद्धं प्रकरोति तापं विबन्धकं वीर्यबलक्षयञ्च। देहस्य पुष्टिं हरते तनोति रोगांस्ततः शोधनमस्य कुर्यात्"। अथ रूप्यमारणविधिः "भागैकं तालकं मर्द्यं याममम्लेन केनचित्। तेन भागत्रयं तारपत्राणि परिलेपयेत्। धृत्वा मूषाः पुटे रुद्ध्वा पुटेत् त्रिंशद्वनोपलैः। समुद्धृत्य पुनस्तालं दत्त्वा रुद्ध्वा पुटे पचेत्। एवं चतुर्दशपुटैस्तारं भस्म प्रजायते"। अथान्यप्रकारः "स्नुहीक्षीरेण संपिष्टं माक्षिकं तेन लेपयेत्। तालकस्य प्रकारेण तारपत्रस्य बुद्धिमान्। पुटेच्चतुर्दश पुटैस्तारं भस्म प्रजायते"। एवं मारितस्य रूप्यस्य गुणः "रौप्यं शीतं कषायञ्च स्वादु पाकरसं सरम्। वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित्। प्रमेहादिकरोगांश्च नाशयत्यचिराद्ध्रुवम्।"

रजताचल पु० रजतकल्पितोऽचलः। दानार्थं कल्पिते रजतमये पर्वते मत्स्यपु० ७७अ० तद्विधिर्दृश्यः। रजतमिव शुभ्रोऽचलः। २कैलासपर्वते रजतगिर्यादयोऽप्यत्र पु०

रजन न० रन्ज–क्युन्। १रागे सि०कौ०। २कुसुम्भे ३हरिद्रायां ४रात्रौ च स्त्री उज्ज्वलः गौरा० ङीष्।

रजनि(नी) स्त्री रज्यतेऽत्र रन्ज–कनि वा ङीप्। १रात्रौ २हरिद्रायां ३जतुकायाञ्च अमरः।

रजनीकर पु० रजनीं करोति कृ–ट रजन्यां करः किरणोऽस्य वा। १चन्द्रे शब्दर० २कर्पूरे च। [पुष्पप्रधाने वृक्षे।

रजनीगन्धा स्त्री रजन्यां गन्धो यस्याः। स्वनामख्याते

रजनीचर पुंस्त्री० रजन्यां चरति चर–ट। १राक्षसे शब्दर० स्त्रियां ङीप्। २चौरे ३यामिकभेदे च।

रजनीजल न० रजन्या जलमिव। नीहारे हारा०।

रजनीपुष्प पु० रजन्या हरिद्राया इव पुष्पमस्य। (पूतिकरमचा) करञ्जभेदे राजनि०।

रजनीमुख न० ६त०। प्रदोषे सूर्यास्तकालात् चतुर्दण्डात्मके मुहूर्त्तात्मके वा काले अमरः। प्रदोषशब्दे दृश्यम्।

रजनीहासा स्त्री रजन्यां हासो विकाशो यस्याः। शेफालिकायाम् शब्दर०।

रजस् न० रन्ज असुन् नलोपः । १कुङ्कुमे अमरः । २पुष्परेणौ ३परागे ४धूलौ मेदि० शास्त्रोक्ते चलनादियुते ५प्रकृतिगुणभेदे च "सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः" सा० का० । "सत्त्वतमसी स्वयमक्रियतया स्वस्वकार्य्यप्रवृत्तिं प्रत्यवसीदन्ती रजसोपष्टभ्येते अवसादात् प्रच्याव्य स्वकार्य्ये ते उत्साहं प्रयत्नं कार्य्येते तदिदमुक्तमुपष्टम्भकं रज इति । कस्मादित्यत उक्तं चलमिति । तदनेन रजसः प्रवृत्त्यर्थत्वं दर्शितम्" त० कौ० । ६पृथिव्यां स्त्री ङीप् निघण्टुः ।

रजस्वल त्रि० रजोऽस्त्यस्य वलच् । १रजोयुक्ते २महिषे पुंस्त्री० मेदि० स्त्रियां ङीष् । आर्त्तववत्यां स्त्रियां स्त्री टाप् अमरः ।

रजोरस न० रजस इव रसोऽनुभवोऽस्य । अन्धकारे त्रि० ।

रजोबल न० रज इव बलति । बल–अच् । अन्धकारे त्रिका०

रज्जु स्त्री सृज-उ नि० । १बन्धनसाधने दामनि अमरः (दडि) २वेणयाञ्च मेदि० ।

रञ्जक न० रञ्जयति रन्ज–णिच्–ण्वुल् । १हिङ्गुले राजनि० २प्रीतिकारके त्रि० । ३काम्पिल्लवृक्षे पु० (ङङ्करकमचा) राजनि० ।

रञ्जन न० रज्यतेऽनेन रन्ज–करणे ल्युट् । १रक्तचन्दने २हिङ्गुले ३मुञ्जतृणे राजनि० ४मञ्जिष्ठायां ५नील्यां ६गुण्डरोचनिकायां (कमलागुड़ि) स्त्री मेदि० ङीप् । ६शेफालिकायां शब्दच० । ७हरिद्रायां दर्पटद्राच स्त्री राजनि० ङीप् । भावे ल्युट् । ८रागे । णिच् कर्त्तरि ल्यु । १०रागजनके त्रि० । संज्ञायां कन् । ११कटफले पु० राजनि०

रट भाषणे भ्वा० पर० सक० सेट् । रटति अराटीत् अरटीत् रेटतुः "माघे मासि रटन्त्यापः" मल० त० ।

रटन्ती स्त्री रट–वा० भाष् ङीप् । "माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्दशी । तस्यां प्रदोषसमये पूजयेत् सुखदामामिनीम्" इत्युक्तायां माघकृष्णचतुर्दश्याम् । [रेठतुः ।

रठ भाषणे भ्वा० पर० सक० सेट् । रठति अराठीत् अरठीत्

रण गतौ भ्वा० पर० सक० सेट् । रणति अराणीत् अरणीत् रेणतुः । घटादि० । रणयति । [रेणतुः ।

रण रवे भ्वा० पर० अक० सेट् । रणति अराणीत् अरणीत्

रण पुंन० अर्द्धर्चा० रण "क्वणिरणयोः" वार्त्ति० अप् । १युद्धे अमरः । भावे अप् । २शब्दे ३क्वणे पु० मेदि० ४गतौ च पु० शब्दर० ।

रणरणक पु० रणः शब्दस्तत्प्रकारः प्रकारे द्वित्वम् ततः संज्ञायां कन् । १उद्वेगे हेमच० २अतिशये च ।

रणसङ्कुल न० रणेन सङ्कुलम् । तुमुलयुद्धे अमरः ।

रण्ड पु० रम–ड तस्य नेत्वम् । १धूर्त्ते २विफले वृक्षाङ्कविशिष्टतया ३छिन्नावयवे त्रि० संक्षिप्तसारः । ४मूषिकपर्ण्यां स्त्री अमरः । ५विधवायाञ्च स्त्री । स्वार्थे क । अफलवृक्षादौ शब्दच० ।

रण्डाश्रमिन् पु० रण्डः विफलः प्रजाहीनत्वात् आश्रमः अस्त्यस्य इनि । "चत्वारिंशद्वत्सराणां साष्टानाञ्च परे यदि । स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मतः" इत्युक्तवयसि स्त्रीवियुक्ते पुरुषे ।

रत न० रम-भावे क्त । १रमणे स्त्रीपुंसयोः सङ्गमे मैथुने अमरः । २गुह्ये च मेदि० । कर्त्तरि क्त । ३अनुरक्ते त्रि० ।

रतक्रिया स्त्री रतये रतिसुखाय वा क्रिया व्यापारः । स्त्रीपुंससङ्गमसाध्ये मैथुने ।

रतगुरु पु० ७त० । पत्यौ त्रिका० । [कामदेवपत्न्यां च मेदि० ।

रति स्त्री रम-क्तिन् । १रागे २गुह्ये ३रमणे ४तदधिष्ठात्र्यां

रतिपति पु० ६त० । कन्दर्पे अमरः । रतिकान्तादयोऽप्यत्र ।

रतिप्रिय पु० ६त० । १कामदेवे शब्दर० । ६ब० । २रमणप्रिये त्रि०

रतिबन्ध पु० रतौ बन्धः । रतिमञ्जर्य्युक्ते षोडशप्रकारे रमणबन्धभेदे "न भवन्ति यदा नार्य्यस्तुष्टा बाह्यरतेन ताः । नानाविधैस्तदा बन्धै रन्तव्या कामिभिः स्त्रियः । पद्मासनो १ नागपाशो २ लतावेष्टो ३ऽर्द्धसंपुटम् ४ । कुलिशं५ सुन्दर६श्चैव तथा केसर७ एव च । हिल्लोलो८ नरसिंहो९ऽपि विपरीत१०स्तथाऽपरः । ११क्षुब्धो वै धेनुक१२श्चैवमुत्कण्ठ१३स्तु ततः परम् । सिंहासनो१४ रतिनागो१५ विद्याधर१६स्तु षोडशः" रतिमञ्जरी । तल्लक्षणं तत्र दृश्यम् । [चिह्ने च जटा० ।

रतिमन्दिर न० ६त० । १रतिगृहे २स्त्रीणामसाधारणा-

रतिरमण पु० रतिं रमयति रम–णिच्–ल्यु । कामदेवे ।

रतिलक्ष न० रतेर्लक्षं पदम् । मैथुने हारा० ।

रतिसत्वरा स्त्री रतिं सत्वरयति सत्वरा+करोत्यर्थे णिच्-अच् । (पिड़िङ्ग) शाके शब्दच० ।

रत्न न० रमतेऽत्र रम–न तान्तादेशः । १माणिक्यादिप्रस्तरे अमरः । २स्वजातिषु श्रेष्ठे मेदि० ३माणिक्ये ४हीरके च राजनि० । तद्भेदादिकं ह०ग०प०प्र० उक्तं यथा "रत्नेन शुभेन शुभं भवति नृपाणामनिष्टमशुभेन । यस्मादतः परीक्ष्यं दैवं रत्नाश्रितं तज्ज्ञैः । द्विपहयवनितादीनां स्वगुणविशेषेण रत्नशब्दोऽस्ति । इह तु-

पुष्परत्नानामधिकारो बलपूर्वमेव। रत्नानि बलाद्दै-त्याद् दधीचितोऽन्ये वदन्ति जातानि। केचिद्भुवः स्वभावाद्वैचित्र्यं प्राहुरुपलानाम्। वज्रेन्द्रनील-मरकतकर्केतनपद्मरागरुधिराख्याः। वैदूर्यपुलकवि-मलकराजमणिस्फटिकशशिकान्ताः। सौगन्धिकगोमेद-कशङ्खमहानीलपुष्परागाख्याः। ब्रह्ममणिज्योतीरससस-कमुक्ता प्रवालानि"। [शब्दर०।

रत्नकन्दल पु० रत्नेषु कन्दल इव रक्तत्वात्। प्रवाले

रत्नकूट पु० रत्नमयः कूटः शृङ्गमस्य। पर्वतभेदे शब्दर०।

रत्नगर्भ पु० रत्नयुक्तं गर्भं मध्यं यस्य ब० ब०। १समुद्रे राजनि० २कुबेरे च त्रिका०। ३पृथिव्यां स्त्री हेमच० ४सत्पुत्रायां नार्यां च स्त्री।

रत्नद्वीप पुंन०। रत्नमयो द्वीपः। तन्त्रोक्ते सुधासमुद्रमध्य-स्थिततया ध्येये रत्नमयेऽन्तरीपे।

रत्नधेनु स्त्री रत्नकल्पिता धेनुः। महादानार्थं कल्पितायां रत्ननिर्मितायां धेन्वाम्। मत्स्यपु० २८७अ० दृश्यम्।

रत्नपारायण न० रत्नानां पारायणं साकल्येन स्थानम्। सर्वरत्नाधारे "रत्नपारायणं नाम्ना लक्ष्मा" भट्टिः।

रत्नमुख्य न० रत्नेषु मुख्यम्। हीरके अमरः।

रत्नवती स्त्री रत्नानि सन्त्यस्याः मतुप् मस्य वः। १पृथिव्याम् शब्दर०। २रत्नयुक्ते त्रि०।

रत्नसानु पु० रत्नानि सानावस्य। सुमेरुपर्वते अमरः।

रत्नसू स्त्री रत्नानि सूते सू-क्विप्। पृथिव्याम् हेमच०।

रत्नाकर पु० ६त०। १समुद्रे अमरः। रत्नोत्पत्तिस्थाने २मणिखनौ च।

रत्नाचल पु० रत्ननिर्मितः अचलः। दानार्थं कल्पिते रत्ननि-र्मिते पर्वते धान्यशैलशब्दे १८८१पृ०दृश्यम्। [भूषणभेदे।

रत्नाभरण न० रत्नघटितमाभरणम् शाक०त०। (जड़ाओ)

रत्नावली स्त्री ६त०। १रत्नसमूहे तद्घटितहारे २वत्स-राजपत्नीभेदे च रत्नावलीमधिकृत्य कृतः ग्रन्थोऽण् आख्यायिकायां तस्य लुक्। श्रीहर्षकृते चतुरङ्कात्मके ४नाटिकाभेदे। [स्त्रीत्वे वा ङीप्।

रत्नि पुंस्त्री० ऋ-कत्निच्। बद्धमुष्टिहस्तपरिमाणे अमरः।

रथ पु० रम्यतेऽनेन अत्र वा रम-क्थन्। १स्वनामख्याते यानभेदे अमरः। २देहे च "आत्मानं रथिनं विद्धि शरीरं रथमेव च" इति गीता। अत्र रूपकमित्यन्ये ३पादे ४वेतसवृक्षे विश्वः ५तिनिशवृक्षे राजनि०। यानरूपरथभेदादिकं हेमच० उक्तं यथा

"युद्धार्थे चक्रवद्याने शताङ्गः स्यन्दनो रथः। संक्री-डार्थः पुष्परथो देवार्थस्तु, मरुद्रथः। योग्यारथो वैन-यिकोऽध्वरथः पारियानिकः। कर्णीरथः प्रवहणं डयनं रथगर्भकः। अनस्तु शकटोऽथ स्याद्गन्त्री कम्बलि वाह्यकम्। अथ काम्बलवास्त्राद्यास्तैस्तैः परिवृते रथे। स पाण्डुकम्बली यः स्यात् संवीतः पाण्डु-कम्बलैः। स तु द्वैपो वैयाघ्रश्च वृतो यो द्वीपिचर्मणा।" ज्योतिर्विदाभरणे तत्करणकालादि उक्तं यथा "लोक-मैत्रवसुजिष्णुकभेषु स्यन्दनाखिलविधानमथाहुः। पैन-सद्द्युषु बलाम्बुतपःस्थैः साधुराशिगति साधुभिरङ्गे। रथचक्रभागमाह "उष्णांशुबिम्बकरकर्णयुगाश्चाहे यस्तत्त्वलयं वलयस्य। मध्यभागनिचितभ्रमपद्मादादिमध्यमनसो नव-भागम्। अपमे भवति चक्रलिरन्तः कूवरोऽङ्गुनि जयोऽथ रथाङ्गे। सन्धिमेऽर्धकृतिरन्तरसंख्यो भीति-रिष्टमनसो ननु गर्भे। अथ रथकृत्यमुहूर्त्ते "पुष्ये पुनर्वसुज्येष्ठाहुराधारेवतीद्वये। श्रवणादित्रिके हस्त-त्रितये रोहिणीमृगे। सार्के सौम्यदिने सौम्यविलग्ने रथकर्म सत्"। [अमरः

रथकड्या स्त्री रथानां समूहः रथ+कड्यच्। रथसमूहे

रथक(का)र पु० रथं करोति कृ-अच्-अण् वा। १रथ-निर्माणकारके (सूत्रधार) २वर्णसङ्करभेदे करण्यां माहिष्याज्जाते पुंस्त्री०। [अमरः।

रथकुटुम्बिन् पु० रथस्य कुटुम्बीव पालकत्वात्। सारथौ

रथगर्भक पु० रथस्य गर्भमिव इवार्थे कन्। १कर्णीरथे २स्कन्धवाह्ययाने (पालकी) हेमच०।

रथगुप्ति स्त्री रथस्य गुप्तिः शस्त्रवारणार्थं रक्षा उपचारात् तत्स्थानम्। रथस्य शस्त्रवारणार्थे गुप्तस्थाने अमरः।

रथचरण पु० रथस्य चरण इव गतिहेतुत्वात्। १रथचक्रे तन्नामनामके २चक्रवाकविहगे पुंस्त्री० शब्दर० स्त्रियां ङीष्। रथपादादयोऽप्यत्र। [हस्ते अमरः।

रथद्रु पु० रथनिर्माणाय द्रुः रथनामको वा द्रुः। तिनिश-

रथन्तर त्रि० रथेन तरति तृ-अच् मुम् च। १रथनेतरि। "अभित्वा शूर" इत्यस्यामृचि गीते २सामभेदे न०। "स्वरादिविशेषानुपूर्वीमात्रस्वरूपे ऋगक्षरव्यतिरिक्तं यत् गानम् तद्रथन्तरम्" सामार्चिकभाष्यम्। "वामदेव्यं बृहत् साम ज्येष्ठसाम रथन्तरम्" इत्युपक्रमे "पश्चिमे द्वार-पालौ तु पठेतां सामगाविति" वि० पा०।

रथयात्रा स्त्री रथेन यात्रा। आषाढ़शुक्लद्वितीयायां जग-

साधनस्य रथेन १यात्रायां २तत्र कर्त्तव्ये उत्सवभेदे च ।

रथाङ्ग न० अङ्ग्यते गम्यतेऽनेन अगि करणे घञ् इत० । १चक्रे । रथाङ्गशब्दः वाचकत्वेनास्त्यस्य अच् । २चक्रवाके पुंस्त्री० अमरः स्त्रियां ङीष् ।

रथाङ्गपाणि पु० रथाङ्गं चक्रं सुदर्शनं पाणौ यस्य । चक्रधरे विष्णौ हला० । [इक्षे शब्दर० ।

रथाभ्र पु० रथ इवाभ्रियतेऽसौ आ+भ्र-भूल० क । वेतसे ।

रथाभ्रपुष्प पु० अभ्रमिव पुष्पमस्य रथनामकोऽभ्रपुष्पः कर्म० । वेतसवृक्षे भरतः । [२रथेन युद्धकारके च हेमच० ।

रथारोहिन् पु० रथमारोहति आ+रुह णिनि । १रथिनि

रथिक पु० रथो युद्धसाधनत्वेनास्त्यस्य ठन् । १रथिनि २तिनिशवृक्षे च राजनि० । इर । रथिर । इन । रथिन । इनि । रथिन् एतेऽप्यत्र । [उपाविशत्" गीता ।

रथोपस्थ न० रथस्य उपस्थ इव । रथमध्ये । "रथोपस्थ

रथ्य पुंस्त्री० रथं वहति यत् । १रथवाहके घोटके अमरः स्त्रियां ङीष् । रथस्येदं यत् । २रथसम्बन्धिनि चक्रादौ त्रि० हेमच० । आश्वलायनः "यद्रथ्यं स्यादायोरिति चर्मण्यं प्रतिगृह्णीयात्" "रथ्यं रथसम्बन्धि चर्मण्यं लोहद्विरचत्रादिनिर्मितम्" नारा०वृ०श्रा०१।७।२भा० । रथस्य तद्गमनस्य योग्या सरणिः । ३प्रशस्तपथे अभ्यन्तरमार्गे स्त्री अमरः । रथानां समूहः यत् । ४रथसमूहे च स्त्री अमरः । ५आवर्त्तन्यां स्त्री मेदि० । ६मार्गमात्रे ७चत्वरे च स्त्री हेमच० । [रेदतुः ।

रद् उत्खाते भ्वा० प० सक० सेट् । रदति अरादीत् अरदीत् ।

रद पु० रदति उत्खनति रद-अच् । १दन्ते । भावे वा० अप् । २उत्खनने मेदि० ।

रदच्छद पु० द्वि०त० । रदान् छादयति छद-णिच्-घ सुसः । ओष्ठयोः हारा० । रदनादिच्छदादयोऽप्यत्र ।

रदन पु० रद-करणे ल्यु । १दन्ते अमरः । भावे ल्युट् । २विदारणे । [न्मत् ऊदित् वेट् रधिता रद्धा ।

रध हिंसने पाके च दि० पर० सक० । रध्यति लुदित् अर-

रन्ज रागे (वर्णान्तराधाने) सक० आसक्तौ अक० भ्वा० उभ० अनिट् । रजति ते अराङ्क्षीत् अरङ्क्त । घटा० रञ्जयति मृगरमणे तु रजयति ।

रन्ज रागे आसक्तौ दिवा० उभ० सक० अनिट् । रज्यति रज्यते अराङ्क्षीत् अरङ्क्त । घटा० रञ्जयति रजयति ।

रन्तिदेव पु० रम-संज्ञायां तिक् कर्म० । १विष्णौ मेदि० । २चन्द्रवंश्ये नृपभेदे ३कुक्कुरे च पुंस्त्री० शब्दर० स्त्रियां ङीष् ।

रन्तु पु० रम-आधारे तुन् । १वर्त्मनि २नद्याञ्च मेदि० ।

रन्धन न० रध-पाके ल्युट् नुमागमः । "पाके सुरच्छर ! रन्धनसमये" इत्युद्भटः । "रन्धनाय स्थाली" सि० कौ० ।

रन्ध्र न० रम-क्विप् ध्र-क्रू व० क कर्म० । १छिद्रे २दूषणे मेदि० ज्योतिषोक्ते ३लग्नतोऽष्टमस्थाने च । [इक्षे राजनि० ।

रन्ध्रकण्ट पु० रन्ध्रे रन्ध्रे कण्टः कण्टकोऽस्य । जालबर्बुरक-

रन्ध्रबभ्रु पु० रन्ध्रे गर्त्ते बभ्रुरिव । उन्दुरौ त्रिका० ।

रन्ध्रवंश पु० रन्ध्रबहुलो वंशः शाक० त० । (नलताँश) वंशभेदे । "वंशौ त्वम्लौ कषायौ च किञ्चित्तिक्तौ च शीतलौ । मूत्रकृच्छ्रप्रमेहार्शःपित्तदाहास्रनाशनौ । विशेषात् रन्ध्रवंशस्तु दीपनोऽजीर्णनाशकः । रुचिकृत् पाचनो हृद्यः शूलघ्नो गुल्मनाशनः" राजनि० । [रराप रेपतुः ।

रप व्यक्तवाक्ये भ्वा० प० सक० सेट् । रपति अरापीत् अरपीत्

रफ गतौ हिंसे च भ्वा० प० सक० सेट् । रफति । अरफीत् अराफीत् । इदित्यप्ययम् । रम्फति अरम्फीत् रम्फ्यते ।

रब गतौ सक० प० शब्दे अक० आ० भ्वा० सेट् इदित् । रम्बति ते अरम्बीत् अरम्बिष्ट ।

रभ औत्सुक्ये भ्वा० आ० अक० अनिट् । रभते अरब्ध रेभे आ+आरम्भे सक० । अचिट्यजादौ आर्द्धधातुके नुम् । आरम्भः आरम्भणम् । लिटि तु आरेभे ।

रभ शब्दे भ्वा० आ० अक० सेट् इदित् । रम्भते अरम्भिष्ट ।

रभस पु० रभ-असच् । १वेगे २हर्षे मेदि० ३औत्सुक्ये ४पौर्वापर्य्याविचारे च अमरः । अर्श आद्यच् । ५वेगादियुक्ते त्रि० ६कोषकारकभेदे पु० । ७महति त्रि० मेदि० ।

रम क्रीडायां भ्वा० आ० अक० अनिट् । रमते विरमति उपरमति अरंस्त उपारंसीत् । क्त्वा वेट् । णिचि रमयति । ज्वला० च रमः रामः ।

रम पु० रम-अच् । १कान्ते २अशोकवृक्षे ३कामदेवे च मेदि०

रमठ न० रम-अठन् । हिङ्गुनि स्वार्थे अण् । अत्रैव न० अमरः

रमठध्वनि पु० रमठ इतिशब्देन ध्वन्यते ध्वन-इन् । हिङ्गुनि शब्दच० ।

रमण पु० रमयति-रम-णिच् ल्यु । १कामदेवे २पत्यौ । "रमण ! त्वामनुयामि यद्यपि" कुमा० । ३गर्दभे पुंस्त्री० हेमच० स्त्रियां ङीष् । ४वृषणे शब्दच० ५महारिष्टे (निम)राजनि० । जम्बुद्वीपान्तर्गते ६रम्यकनाम्नि वर्षे च । रम-भावे ल्युट् । ७सुरते न० । करणे ल्युट् । ८पटोलमूले न० मेदि० । ९जघने न० हेमच० । रम्यतेऽनया ल्युट् ङीप् । १०नार्य्याम् ११उत्तमनार्य्याम् स्त्री

मेदि०। १२वालाल्पवृक्षे च स्त्री शब्दचन्द्रिकाकोषः।

रमणीय त्रि० रम्यतेऽत्र रम–आधारे-अनीयर्। सुन्दरे। ततो भावे वुञ्। रामणीयक तद्भावे न०।

रमति पु० रम-अतिच्। १नायके २स्वर्गे मेदि०। ३कामे शब्दर० ४काले ५कामदेवे सि०कौ०।

रमल न० ज्योतिःशास्त्रभेदे यत्र पाशकक्षेपणेन लग्ननिर्णयद्वारा प्रश्नादिफलप्रतिपादनम्।

रमा स्त्री रमयति रम-अच्। १लक्ष्म्याम् मेदि० २कल्किभार्य्यायां कल्किपु०। ३शोभायां राजनि०।

रमापति पु० ६त०। नारायणे रमानाथतत्कान्तादयोऽप्यत्र

रमाप्रिय न० ६त०। १पद्मे शब्दच०। २विष्णौ पु०।

रम्भ पु० रभि-अच् मुम्। १वेणौ २असुरभेदे च मेदि०। स च महिषासुरजनकः कालिकापु०।३कदल्याम् ५अप्सरोभेदे स्त्री मेदि० ६वेश्यायां धरणिः। ७गवां ध्वनौ हेमच०। ८गौर्य्याञ्च स्त्री शब्दर०। ९उत्तरस्यां दिशि निघण्टुः।

रम्भातृतीया स्त्री रम्भा गौरी ६त०।मार्गशीर्षशुक्लतृतीयायाम् उपचारात् तत्र कर्त्तव्ये गौरीपूजाङ्गके २व्रतभेदे च।

रम्य त्रि० रम्यतेऽत्र यत्। १सुन्दरे मेदि०, २बलकरे जटा०। ३चम्पके पु० मेदि० ४वकवृक्षे पु० शब्दच०। ५पटोलमूले न० मेदि०। संज्ञायां कन्। ६प्रधानधातौ शुक्रे न० जटा०। जम्बुद्वीपस्थेषु नवसु वर्षेषु मध्ये "दक्षिणेन सुमेरोस्तु श्वेतस्य चोत्तरेण च वायव्यं रम्यकं नाम" इत्युक्ते ७वर्षभेदे।

रम्यपुष्प पु० रम्याणि पुष्पाण्यस्य। शाल्मलीवृक्षे राजनि०।

रम्या स्त्री रम्यतेऽत्र यत्। १स्थलपद्मिन्याम् राजनि०। २रात्रौ च मेदि०। [अरयिध्वम्।

रय गतौ भ्वा०आ०सक०सेट्। रयते अरयिष्ट। अरयिढ्वम्

रय पु० रय-अच्। १वेगे अमरः। २प्रवाहे च।

रयि न० रय-इन्। १जले २धने च निघण्टुः। [५।२१

रराट न० ललाट+पृषो०। ललाटे "विष्णोरराटमसि" यजु०

रल्लक पु० रम-क्विप् सञ्ज्ञायां लुक् ला-क कर्म०। १मृगभेदे उज्ज्वलः। २कम्बले अमरः ३नेत्रलोम्नि च भूभृतिः।

रव गतौ भ्वा० पा० सक०सेट् इदित्। रण्वते अरण्विट।

रव पु० रु-ध्वनौ अप्। शब्दे अमरः।

रवण पुंस्त्री० रु-युच्।१कोकिले हि०कौ० २उष्ट्रे च हेमच० स्त्रियां ङीष्। ३कांस्ये न० हेमच०। ४शब्दकारके ५तीक्ष्णे ६चपले ७भण्डके च त्रि० शब्दर०।

रवि पु० अव-इन् रुट्च्। १सूर्य्ये शब्दर०। २अर्कवृक्षे च "अचिरात्तु प्रकाशेन अवनात् स रविः स्मृतः" मत्स्यपु० तन्नामनिरुक्तिः। ३द्वादशसंख्यायाम्।

रविज पु० रवेर्जायते जन–ड। १शनौ २सावर्णिमनौ ३वैवस्वते मनौ ४सुग्रीवे वानरे ५यमे च ६यमुनायां स्त्री रवितनयादयोऽप्यत्र। [च शब्दच०।

रविनाथ न० रविर्नाथः प्रकाशकत्वात् यस्य। १पद्मे २बन्धूके

रविनेत्र पु० रविर्नेत्रं यस्य। विष्णौ रविलोचनादयोऽप्यत्र। "चक्षुः सूर्य्यो अजायत" पुरुषसू० उक्तेस्तस्य तथात्वम्।

रविप्रिय न० ६त०। १रक्तकमले २ताम्रे च ३करवीरे पु० राजनि० ४आदित्यपत्रे ५लकुचे पु० शब्दच०।

रविरत्न न० रवेः प्रियं रत्नम् शा०त०। माणिक्ये राजनि०।

रविलोह न० रवेः प्रियं लोहं धातुः। ताम्रे राजनि०।

रश स्वने सौ० पर० अक० सेट्। रशति अराशीत् अरशीत्

रशना स्त्री अश–युच् रशादेशः। १काञ्च्याम् २जिह्वायाञ्च शब्दर०।३दामनि च "इमामगृभ्णन् रशनामृतस्य" श्रुतिः तत्रार्थे दन्त्यमध्य एवेत्यन्ये।

रश्मि पु० अश-मि धातोरुट् रश-मि वा। १किरणे २अश्वादिदामनि ३पक्ष्मे न०मेदि०।

रवेः रश्मिभेदादिकार्य्यं मत्स्यपु० १०२ अ० उक्तं यथा "तेजोभिः सर्वलोकेभ्यो आदत्ते रश्मिभिर्जलम्। समुद्राद्वायुसंयोगाद्वहन्त्यापो गभस्तयः। ततस्तु पर्य्ययात् काले परिवर्त्तन् दिवाकरः। नियच्छत्यपो मेघेभ्यः शुक्लाशुक्लैस्तु रश्मिभिः"।

कूर्मपु० ४अ० विस्तरेणोक्तं यथा "एवमेव महादेवो देवदेवः पितामहः। करोति नियतं कालं कालात्मा ह्यैश्वरी तनुः। तस्य ये रश्मयो विप्राः सर्वलोकप्रदीपकाः। तेषां श्रेष्ठाः पुनः सप्त रश्मयो ग्रहयोनयः। सुषुम्णो हरिकेशश्च विश्वकर्मा तथैव च। विश्वव्यचाः पुनश्चान्यः सम्पद्वसुरतः परः। अर्वावसुरिति ख्यातः स्वराडन्यः प्रकीर्त्तितः। सुषुम्णः सूर्य्यरश्मिस्तु पुष्णाति शिशिरद्युतिम्। तिर्य्यगूर्द्ध्वप्रचारोऽसौ सुषुम्णः परिगीयते। हरिकेशस्तु यः प्रोक्तो रश्मिर्नक्षत्रपोषकः। विश्वकर्मा तथा रश्मिर्बुधं पुष्णाति सर्वदा। विश्वव्यचास्तु यो रश्मिः शुक्रं पुष्णाति नित्यदा। सम्पद्वसुरिति ख्यातः स पुष्णाति च लोहितम्, बृहस्पतिं प्रपुष्णाति रश्मिरर्वावसुः प्रभोः। शनैश्चरं प्रपुष्णाति सप्तमस्तु स्वराट् तथा। एवं सूर्य्यप्रभावेन सर्वा नक्षत्रतारकाः। वर्द्धन्ते वर्द्धिता

नित्यं नित्यमाप्याययन्ति च। दिव्यानां पार्थिवानाञ्च नैशानाञ्चैव सर्व्वशः। आदानान्नित्यमादित्यस्तेजसा तमसां प्रभुः। आदत्ते स तु नाड़ीनां सहस्रेण समन्ततः। नादेयांश्चैव सामुद्रान् कूप्यांश्चैव सहस्रकम्। स्थावरान् जङ्गमांश्चैव यच्च कुल्यादिकं पयः। तस्य रश्मिसहस्रन्तु शीतवर्षोष्णनिस्रवम्। तासां चतुःशतं नाड्यो वर्षन्ते चित्रमूर्त्तयः। चन्दनाश्चैव वाह्याश्च केतनाभूतनास्तथा। अमृता नामतः सर्वा रश्मयो वृष्टिसर्जनाः। हिमोद्वहाश्च तामन्यो रश्मयस्त्रिशतं पुनः। वश्यो मेध्यश्च पैध्यश्च ह्रादिन्यो हिमसर्जनाः। चन्द्रास्ता नामतः सर्वाः पीताभाः स्युर्गभस्तयः। शुक्लाश्च ककुभश्चैव गावो विश्वभृतस्तथा। शुक्लास्ता नामतः सर्वास्त्रिविधा घर्म्मसर्जनाः। समं बिभर्त्ति ताभिः स मनुष्यपितृदेवताः। मनुष्यानौषधेनेह स्वधया च पितॄनपि। अमृतेन सुरान् सर्वान् त्रिभिस्त्रींस्तर्पयत्यसौ। वसन्ते ग्रीष्मके चैव शतैः सन्तपति त्रिभिः। शरद्यपि च वर्षासु चतुर्भिः स प्रवर्षति। हेमन्ते शिशिरे चैव हिममुत्सृजति त्रिभिः। वरुणो१ माघमासे तु सूर्य्यः पूषा२ तु फाल्गुने। चैत्रे३ मासि भवेदंशो धाता४ वैशाखतापनः। ज्यैष्ठमासे भवेदिन्द्र५ आषाढ़े सविता६ रविः। विवस्वान्७ श्रावणे मासि प्रौष्ठपद्यां भगः८ स्मृतः। पर्जन्यो९ऽश्वयुजि त्वष्टा१० कार्त्तिके मासि भास्करः। मार्गशीर्षे भवेन्मित्रः११ पौषे विष्णुः सनातनः। पञ्चरश्मिसहस्राणि वरुणस्यार्ककर्म्मणि। षड्भिः सहस्रैः पूषा तु देवेशः सप्तभिस्तथा। धाता ष्टभिः सहस्रैस्तु नवभिस्तु शतक्रतुः। विवस्वान् दशभिः पाति पात्येकादशभिर्भगः। सप्तभिस्तपते मित्रस्त्वष्टा चैवाष्टभिस्तपेत्। अर्य्यमा दशभिः पाति पर्जन्यो नवभिस्तपेत्। षड्भीरश्मिसहस्रैस्तु विष्णुस्तपति विश्वसृक्। वसन्ते कपिलः सूर्य्यो ग्रीष्मे काञ्चनसंप्रभः। श्वेतो वर्षासु वर्णेन पाण्डुरः शरदि प्रभुः। हेमन्ते ताम्रवर्णः स्यात् शिशिरे लोहितो रविः। ओषधीषु बलं धत्ते स्वधामपि पितृष्वथ। सूर्य्योऽमरत्वममृतत्रयं त्रिषु नियच्छति। अन्ये चाष्टौ ग्रहाः ज्ञेयाः सूर्य्येणाधिष्ठिता द्विजाः!। चन्द्रमाः सोमपुत्रश्च शुक्रश्चैव बृहस्पतिः। भौमो भानुसुतो राहुः केतुमानपि चाष्टमः। सर्वे ध्रुवे निबद्धा ये ग्रहास्ते वातरश्मिभिः। भ्राम्यमाणा यथायोगं भ्रमन्त्यनुदिवाकरम्"।

रस स्वने भ्वा० प०अक०सेट्। रसति अरासीत् अरसीत्। ररास रेसतुः।

रस आस्वादे अ०चु० उ० सक० सेट्। रसयति ते अररसत् त

रस पु० रस्यते रस–अच्। आस्वाद्ये रसनेन्द्रियग्राह्ये १मधुर्य्यादिगुणभेदे २देहस्थे भुक्ताहारेः प्रथमपरिणामे ३सारे च"ओषधीनां रसः"इति ताण्ड्यब्रा०"रसः सारः"भा०। ४धातुभेदे पारदे ५माधुर्य्यादरसवति गुड़ादौ त्रि० ६पुष्पस्य मधुनि ७अलङ्कारोक्ते विभावानुभावसञ्चारिकाभावव्यङ्ग्ये रत्यादिस्थायिभावके शृङ्गारादौ। ८विषे ९वीर्य्ये १०रागे ११द्रवे अमरः १२जले च १३गन्धरसे पुंन० मेदि० १४अम्ले च निघण्टुः।

पारदशब्दे ४२११ पृष्ठादौ रसशोधनादि दृश्यम्।

देहस्थधातुभेदरसस्वरूपादि भावप्र० उक्तं यथा "यत्साथो रसधातुर्यस्ततोऽभवदपां रसः। सहसं सकलं देहं रसतीति रसः स्मृतः।" अथ रसस्य स्वरूपमाह "सम्यक् पक्वस्य भुक्तस्य सारो निगदितो रसः। स तु द्रवः सितः शीतः स्वादुः स्निग्धश्चलो भवेत्। सारो यथा गुड़मधूकपुष्पकुलत्थशबदरीमूलादिभवः सारो मदिरा। अथ रसस्य स्थानमाह "सर्वदेहचरस्यापि रसस्य हृदयं स्थलम्। समानमरुता पूर्वं यदयं हृदये धृतः।" अथ रसस्य कर्म्माण्याह "आरस्य धमनीर्गत्वा धातून् सर्व्वानयं रसः। पुष्णाति तदनु स्वीयैर्व्याप्नोति च तनुं गुणैः।" गुणैः शीतस्निग्धपोषकत्वगुणैः शीतस्निग्धपोषकत्वैः "मन्दवह्निविदग्धस्तु कटुर्वाम्लो भवेद्रसः। स कुर्य्याद्विविधान् रोगान् विषत्वं करोत्यपि।" अलङ्कारशब्दे दृश्यम्।

अलङ्कारशास्त्रोक्तो रसो नवविधः।"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः।" सा० द० तल्लक्षणं तत्रैव यथा "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा। रसतामेति रत्यादिः स्थायी भावः सचेतसाम्"। "विभावादयो वक्ष्यन्ते। सात्त्विकाश्चानुभावरूपत्वात् न पृथगुक्ताः। व्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतः व्यक्तीकृत एव रसो न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते। तदुक्तं लोचनकारैः "रसाः प्रतीयन्त इति त्वोदनं पचतीतिवद्व्यवहार इति"। अत्र च रत्यादिपदोपादानादेव प्राप्ते स्थायित्वे पुनः स्थायिपदोपादानं रत्यादीनामपि रसान्तरेष्वस्थायित्वप्रतिपादनार्थम्। तत्र हासक्रोधादयः

शृङ्गारवीरादौ व्यभिचार्य्येव । तदुक्तम् "रसावस्थः परं भावः स्थायितां प्रतिपद्यते" इति । अथ तत्स्वरूप-कथनगर्भं आस्वादप्रकारः कथ्यते । "सत्त्वोद्रेकादखण्ड-स्वप्रकाशानन्दचिन्मयः । वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वाद-सहोदरः । लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः । स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः । रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते" इत्युक्तप्रकारो बाह्यमेयविमुखतापादकः कश्चनान्तरो धर्मः सत्त्वं तस्योद्रेक· रजस्तमसी अभिभूयाविर्भावः । अत्र च हेतुस्तथा-विधालौकिककाव्यार्थपरिशीलनम् । अखण्ड इत्येक एवायं विभावादिरत्यादिप्रकाशसुखचमत्कारात्मकः । अत्र हेतुं वक्ष्यामः । स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या । चिन्मय इति स्वरूपार्थे मयट् । चमत्कारश्चित्तविस्तार-रूपो विस्मयापरपर्य्यायः । तत्प्राणत्वञ्चास्मद्वृद्धप्रपिता-महसहृदयगोष्ठीगरिष्ठकविपण्डितमुख्यश्रीमन्नारायणपादै-रुक्तं । तदाह धर्म्मदत्तः स्वग्रन्थे

"रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते । तच्चमत्कार-सारत्वे सर्वत्राप्यद्भुतो रसः । तस्मादद्भुतमेवाह कृती नारायणो रसमिति" । "कैश्चिदिति प्राक्तनपुण्यशालिभिः तदुक्तं "पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिमिति" यद्यपि "स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः" इत्युक्तदिशा रसस्यास्वादानतिरिक्तत्वमुक्तं तथापि "रसः स्वाद्यते" इति काल्पनिकं भेदमुररीकृत्य कर्म्मकर्त्तरि वा प्रयोगः । तदुक्तम् "रस्यमानतामात्रसारत्वात् प्रकाश-शरीरादनन्य एव हि रसः" इति । एवमन्यत्राप्येवं-विधस्थलेषूपचारेण प्रयोगा ज्ञेयाः । नन्वेतावता रस-स्याज्ञेयत्वमुक्तं भवतीति व्यञ्जनायाश्च ज्ञानविशेष-त्वाद् द्वयोरैक्यमापतितम् ततश्च "स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः । यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्" इत्युक्तदिशा घटप्रदीपवद् व्यङ्ग्यव्यञ्जकयोः पार्थक्यमेवेति कथं रसस्य व्यङ्ग्यतेति चेत् सत्यमुक्तम् अत एवाहुः "विलक्षण एवायं कृतिज्ञप्तिभेदेभ्यः स्वादनाख्यः कश्चिद्व्यापारः । अत एव हि रसनास्वादनचमत्करणादयो विलक्षणा एव व्यपदेशा इति अभिधादिविलक्षणव्यापारमात्रप्रसाधन-ग्रहिलैरस्माभी रसादीनां व्यङ्ग्यत्वमुक्तं भवतीति । ननु तर्हि करुणादीनां रसानां दुःखमयत्वाद्रसत्वं न स्यादि-त्युच्यते "करुणादावपि रसे जायते यत् परं सुखम् । सचेतसामनुभवः प्रमाणं तत्र केवलम्" । आदिशब्दात् बीभत्सभयानकादयः । तथाप्यसहृदयानां मुखमुद्रणाय पक्षान्तरमुच्यते । "किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः" । न हि कश्चित् सचेता आत्मनो दुःखाय प्रवर्त्तते करुणादिषु च सकलस्यापि साभि-निवेशप्रवृत्तिदर्शनात् । अनुपपत्त्यन्तरमाह । "तथा रामायणादीनां भविता दुःखहेतुता" । "करुणरसस्य दुःखहेतुत्वात् करुणरसप्रधानरामायणादिप्रबन्धानामपि दुःखहेतुत्वप्रसङ्गः स्यात् । ननु कथं दुःखकारणेभ्यः सुखोत्पत्तिरित्याह "हेतुत्वं शोकहर्षादेर्गतेभ्यो लोक-संश्रयात् । शोकहर्षादयो लोके जायन्तां नाम लौ-किकाः । अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात् । सुखं संजायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः" । ये खलु रामवनवासादयो लोके दुःखकारणानि इत्यु-च्यन्ते त एव हि काव्यनाट्यसमर्पिता अलौकिकविभा-वनव्यापारवत्तया कारणशब्दवाच्यत्वं विहायालौकिक-विभावशब्दवाच्यत्वं भजन्ते । तेभ्यश्च सुरते दन्तघाता-दिभ्य इव सुखमेव जायते । अतश्च लौकिकशोकहर्षा-दिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते इति लोक एव प्रतिनियमः । काव्ये पुनः सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते इति नियमान्न कश्चिद्-दोषः । कथं तर्हि हरिश्चन्द्रादिचरितस्य काव्यनाट्य-योरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायन्त इत्युच्यते । "अश्रुपातादयस्तद्वद्द्रुतत्वाच्चेतसो मताः" । तर्हि कथं काव्यतः सर्वेषामीदृशी रसाभिव्यक्तिर्न जायत इत्याह "न जायते तदास्वादो विना रत्यादिवासनाम्" । वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः । तत्र यदि आद्या न स्याच्छ्रोत्रियजरन्मीमांसकादीनामपि सा स्यात् । यदि द्वितीया न स्याद् यद्रागिणामपि केषा-ञ्चिद्रसोद्बोधो न दृश्यते तन्न स्यात् । उक्तञ्च धर्म्मदत्तेन "सवासनानां सभ्यानां रसस्यास्वादनं भवेत् । निर्वा-सनास्तु रङ्गान्तःकाष्ठकुड्याश्मसन्निभाः" इति । ननु कथं रामादिरत्याद्युद्बोधकारणैः सीतादिभिः सामाजिक-रत्याद्युद्बोध इत्युच्यते "व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः । तत्प्रभावेन यस्यासन् पाथोधिप्लव-नादयः । प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते" । "ननु कथं मनुष्यमात्रस्य समुद्रलङ्घनादावुत्साहोद्बोध इत्यु-च्यते "उत्साहादिसमुद्बोधः साधारण्याभिमानतः ।

नृणामपि समुद्रादिलङ्घनादौ न दुष्यति"। रत्यादयोऽपि साधारण्येन प्रतीयन्त इत्याह साधारण्येन रत्यादिरपि तद्वत् प्रतीयते"। रत्यादेरपि स्वात्मगतत्वेन प्रतीतौ सभ्यानां व्रीडातङ्कादिर्भवेत् परगतत्वेन त्वरस्यतापातः। विभावादयोऽपि प्रथमतः साधारण्येन प्रतीयन्ते इत्याह "परस्य न परस्येति ममेति न ममेति च। तदास्वादे विभावादेः परिच्छेदो न विद्यते"। ननु तथापि कथमेवमलौकिकत्वमेतेषां विभावादीनामित्युच्यते "विभावनादिव्यापारमलौकिकमुपेयुषाम्। अलौकिकत्वमेतेषां भूषणं न तु दूषणम्"। आदिशब्दादनुभावनसञ्चारणे। तत्र विभावनं रत्यादेर्विशेषेणास्वादाङ्कुरणयोग्यतानयनम्। अनुभावनमेवम्भूतस्य रत्यादेः समनन्तरमेव रसादिरूपतया भावनम्। सञ्चारणं तथाभूतस्यैव तस्य सम्यक्चारणम्। विभावादीनां यथासङ्ख्यं कारणकार्य्यसहकारित्वे कथं त्रयाणामपि रसोद्बोधे कारणत्वमित्युच्यते "कारणं कार्य्यसञ्चारिरूपा अपि हि लोकतः। रसोद्बोधे विभावाद्याः कारणान्येव ते मताः"। ननु तर्हि कथं रसास्वादे तेषामेकः प्रतिभास इत्युच्यते "प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते। ततः संवलितः सर्वो विभावादिः सचेतसाम्। प्रपानकरसन्यायाच्चर्व्यमाणो रसो भवेत्"। यथा खण्डमरिचादीनां सम्मेलनादपूर्व इव कश्चिदास्वादः प्रपानकरसे संजायते विभावादिसम्मेलनादिहापि तथेत्यर्थः। ननु यदि विभावानुभावव्यभिचारिभिर्मिलितैरेव रसस्तत् कथं एकस्य द्वयोर्वा सद्भावेऽपि स स्यादित्युच्यते "सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत्। झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते"। अन्यसमाक्षेपश्च प्रकरणादिवशात्। यथा "दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः संक्षिप्तं निविडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव। मध्यः पाणिमितो नितम्बि जघनं पादावुदग्राङ्गुली छन्दो नर्त्तयितुर्यथैव मनसः सृष्टं तथास्या वपुः"। "अत्र मालविकामभिलषतोऽग्निमित्रस्य मालविकारूपविभावमात्रवर्णने सञ्चारिणामौत्सुक्यादीनामनुभावानाञ्च नयनविस्फारादीनामौचित्यादेवाक्षेपः। एवमन्याक्षेपेऽप्यूह्यम्। "अनुकार्य्यगतो रसः" इति वदतः प्रत्याह "पारिमित्याल्लौकिकत्वात् सान्तरायतया तथा। अनुकार्य्यस्य रत्यादेरुद्बोधो न रसो भवेत्"। सीतादिदर्शनादिजो रामादिरत्याद्युद्बोधो हि परिमितो लौकिको, नाट्यकाव्यदर्शनादेः सान्तरायश्च। तस्मात् कथं रसरूपतामियात्। रसस्यैतद्धर्मत्रितयविलक्षणधर्मकत्वात्। अनुकर्त्तृगतत्वञ्चास्य निरस्यति "शिक्षाभ्यासादिमात्रेण राघवादेः स्वरूपताम्। दर्शयन् नर्त्तको नैव रसस्यास्वादको भवेत्"। किञ्च काव्यार्थाभावने नायमपि सभ्यपदास्पदम्। यदि पुनर्नटोऽपि काव्यार्थभावनया रामादिरूपतामात्मनो दर्शयेत् तदा सोऽपि सभ्यमध्य एव गण्यते"।

द्रव्यगतमधुरादिरसकारणादिकं सुश्रुते उक्तं यथा "अथातो रसविशेषविज्ञानीयमध्यायं व्याख्यास्यामः। आकाशपवनदहनतोयभूमिषु यथासंख्यमेकोत्तरपरिवृद्धाः शब्दस्पर्शरूपरसगन्धाः। तस्मादाप्यो रसः परस्परसंसर्गात् परस्परानुग्रहात् परस्परानुप्रवेशाच्च सर्वेषु सर्वेषां सान्निध्यमस्त्युत्कर्षापकर्षौ तु ग्रहणम्। स खल्वाप्यो रसः शेषभूतसंसर्गाद्विदग्धः षोढा विभज्यते। तद्यथा मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति; ते च भूयःपरस्परसंसर्गात् त्रिषष्टिधा भिद्यन्ते। तत्र भूम्यम्बुगुणबाहुल्यान्मधुरः१। भूम्यग्निगुणबाहुल्यादम्लः२। तोयाग्निगुणबाहुल्याल्लवणः३ वाय्वग्निगुणबाहुल्यात् कटुकः४। वाय्वाकाशगुणबाहुल्यात्तिक्तः५। पृथिव्यनिलगुणबाहुल्यात् कषायः६ इति। तत्र मधुराम्ललवणा वातघ्नाः। मधुरतिक्तकषायाः पित्तघ्नाः। कटुतिक्तकषायाः श्लेष्मघ्नाः तत्र वायुरात्मनैवात्मा पित्तमाग्नेयं श्लेष्मा सौम्य इति। त एव रसाः स्वयोनिवर्द्धना अन्ययोनिप्रशमनाश्च"।

रसकर्पूर न० रसेन कर्पूरमिव। (रसकपुर) कर्पूररसे तत्पाकादिगुणा भावप्र० उक्ताः कर्पूररसशब्दे १७४२पृ० दृश्याः। [हारा०।

रसकेसर न० रसेन केसरमिव नागकेसरतुल्यगन्धित्वात्। कर्पूरे

रसगन्ध पुंन० रसे गन्धोऽस्य। १बोले गन्धरसे त्रिका०। कप् तत्रार्थे शब्दच० २गन्धके च राजनि०।

रसगर्भ न० रसो गर्भे यस्य। पित्तलधातुद्रवजे १रसाञ्जने अमरः। २हिङ्गुले च राजनि०। [राजनि०।

रसघ्न पु० रसं पारदं हन्ति हन-ठक्। टङ्कणे (सोहागा)

रसज न० रसात् भुक्ताहारात् प्रथमधातोर्जायते जन-ड। १रुधिरे शब्दच० अलङ्कारशब्दे दृश्यम्। रसात् इक्षुप्रभृतेः रसात् जायते जन-ड। २गुडे पु० राजनि०। ३मद्यकीटे च पु० हेमच०। ४रसभवादयोऽप्यत्र।

रसज्ञा स्त्री रसं जानाति अनया ज्ञा-करणे घञर्थे क।

१जिह्वायाम् रसग्रहणसाधने जिह्वाख्यानस्थेन्द्रिये अमरः। ज्ञा–क। रसज्ञातरि त्रि०।

रसज्येष्ठ पु० रसेषु ज्येष्ठः श्रेष्ठः। १मधुररसे हेमच० २शृङ्गाररसे च। [हेमच०।

रसतेजस् न० रसस्य मुख्यधातोरस्य तेजः सारः। रुधिरे

रसदालिका स्त्री रसार्थं दल्यते दल-कर्मणि घञ् गौरा० ङीष् स्वार्थे क ह्रस्वः। पुण्ड्रेक्षौ (पुंडि आख) राजनि०।

रसधातु पु० रसात्मको द्रवरूपो वा धातुः। पारदे राजनि०

रसधेनु स्त्री दानार्थं कल्पितायाम् इक्षुरसनिर्मितायां धेनौ धेनुशब्दे १६०६ पृ० दृश्यम्।

रसन न०रस-ल्युट्। १स्वादे २ध्वनौ च करणे ल्युट्। जिह्वायां च मेदि० "विरते न कृते रसने सितापि" नैषधम्।

रसना स्त्री रस्यतेऽनया रस–करणे ल्युट् संज्ञा० टाप्। १जिह्वायाम् अमरः। २रास्नायां मेदि०। ३काञ्च्यां हेमच०। ४रज्जौ च। [मिताक्षायाम् हेमच०।

रसनेत्रिका स्त्री रसो नेत्रमिव अस्त्यस्याः ठन्। मनः-

रसपाकज पु० रसपाकेन जायते जन–ड। १गुडे राजनि० २रुधिरधातौ च शब्दरत्नावली दृश्यम्।

रसफल पु० रसो जलं फले यस्याः। नारिकेलवृक्षे शब्दर०।

रसमाणिक्य न० रसेन पारदेन माणिक्यमिव तत् पाकजत्वात्। स्वनामख्याते पदार्थे।

रसराज पु० रसेषु रसो वा राजेव श्रेष्ठत्वात् रसः इव रव राजते वा। १पारदे रसनाथादयोऽप्यत्र। २रसाञ्जने च राजनि०। [मध्य वः ङीप्। पाकस्थाने अमरः।

रसवती स्त्री रस आस्वादद्रव्यमन्नादि अस्त्यस्याम् मतुप्

रसशोधन न० रसं पारदं द्रवीभूतं द्रव्यं स्वर्णादि वा शोधयति शुध–णिच्–ल्यु। १टङ्कणे (सोहागा) हेमच० ६त०। २पारदशोधने च।

रसस्थान न० रसस्य पारदस्य स्थानम्। हिङ्गुले शब्दच०।

रससिन्दूर न० रसजातं सिन्दूरम्। पारदजाते सिन्दूरभेदे तत्पाकविधिः भावप्र० उक्तो यथा

"शुद्धसूतस्य गन्धकाच्च भिषग्भागचतुष्टयम्। शुद्धगन्धस्य भागैकं तावत् कनिमगन्धकम्। अथ वा पारदाद्धार्धं शुद्धगन्धकमेव हि। तयोः कज्जलिकां कुर्याद्दिनमेकं विमर्दयेत्। मृत्तिकां वाससा सार्द्धं कुट्टयेदतियत्नतः। तथा तारमयं सम्यक् काचकूप्यां प्रक्षेपयेत्। कर्पटेन शोषयित्वा तु कूप्यां कज्जलिकां क्षिपेत्। तां कूपीं वालुकायन्त्रे स्थापयित्वा रसं पचेत्। अग्निं निरन्तरं दद्यात् यावद्दिनचतुष्टयम्। गन्धकाच्चोर्ध्वसंलग्नं सिन्दूरसदृशं रसम्"।

रसा स्त्री पाकजः रसो माधुर्यादिरूपोऽस्त्यस्याः अच्। पृथिव्याम् अमरः। [रसाञ्जने राजनि०।

रसाग्रज न० रसस्य पित्तलधातुद्रवस्याग्रात् जायते जन-ड।

रसाञ्जन न० रसजातं पित्तलधातुजमञ्जनम्। स्वनामख्याते "रीत्यान्तु ध्मायमानायां तत्किट्टन्तु रसाञ्जनम्। तदभावे तु कर्त्तव्यं दार्वीकाथसमुद्भवम्" इत्युक्ते १पदार्थे राजनि० तद्विधिश्च भावप्र० उक्तो यथा

"दार्वीकाथसमं क्षीरं पादं पक्त्वा यथा घनम्। तदा रसाञ्जनाख्यं तन्नेत्रयोः परमं हितम्। रसाञ्जनं कटु श्लेष्मविषनेत्रविकारनुत्। उष्णं रसायनं तिक्तं छेदनं व्रणदोषहृत्"।

रसाढ्य पु० रसेन मधुररसेनाढ्यः। १आम्रातके राजनि०। २रसवति त्रि०। [भागे अमरः।

रसातल न० रसायास्तलम्। पातालभेदे सप्तमे भूमेरधो-

रसाधिक पु० रसाय द्रवाय स्वर्णादिद्रावणाय अधिकः आदीयमानत्वात्। १टङ्कणे रसेनाधिका। २काकोदुम्बरिकायां स्त्री राजनि०। ३रसेनाधिके त्रि०। [रसे

रसान्तर न० अन्यो रसः मयूर० नि०। प्रकृतरसादन्यस्मिन्

रसाभास पु० रस इव आभासते आ+भास–अच्। "अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः" सा० द० उक्ते पत्न्यादिपरनायकादिगतशृङ्गारादौ रसे।

"अनौचित्यञ्चात्र रसानां भरतादिप्रणीतलक्षणानां सामग्रीरहितत्वे सत्येकदेशयोगित्वोपलक्षणपरं बोध्यं तच्च बालव्युत्पत्तये एकदेशतो दर्श्यते। "उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च। बहुनायकविषयायां रतौ तथाऽनुभयनिष्ठायाम्। प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्य्यगादिगते। शृङ्गारेऽनौचित्यं रौद्रे गुर्वादिगतकोपे शान्ते च हीननिष्ठे गुर्वाद्यालम्बने हास्ये। ब्रह्मवधाद्युत्साहेऽधमपात्रगते तथा वीरे। उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र"। [(चुक्रपालङ्क)

रसाम्ल न०रसेनाम्लम्। १वृक्षाम्ले राजनि०। २चुक्रे च भावप्र०

रसायन न० रसस्यायनमिव। १तक्रे हेमच० २कटाक्षे राजनि० ३विषभेदे वैद्यकप्रसिद्धे ४औषधभेदे च ५गरुडे ६विडङ्गे च पु० मेदि०। ६त०। ७रसस्थाने च। औषधभेदस्तत्पाकादि भावप्र० उक्तं यथा

"यज्जराव्याधिविध्वंसि वयःस्तम्भकरं तथा। चक्षुष्यं बृंहणं वृष्यं भेषजं तद्रसायनम्"। रसायनस्य फलमाह 'दीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः। देहेन्द्रियबलं कान्तिं नरो विन्देद्रसायनात्"। तद्विधिमाह "पूर्वे वयसि मध्ये वा मनुष्यस्य रसायनम्। प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा। नाविशुद्धशरीरस्य युक्तो रसायनो विधिः। न भाति वाससि क्लिष्टे रङ्गयोग इवाहितः"। "शीतोदकं पयः क्षौद्रं घृतमेकैकशो द्विशः। त्रिशः समस्तमथ वा प्राक् पीतं स्थापयेद्वयः। मण्डूकपर्ण्याः स्वरसः प्रभाते प्रयोज्य यष्टीमधुकस्य चूर्णम्। रसो गुडूच्यास्तु समूलपुष्प्याः कल्कः प्रयोज्यः खलु शङ्खपुष्प्याः। आयुःप्रदान्यामयनाशनानि बलाग्निवर्णस्वरवर्द्धनानि। मेध्यानि चैतानि रसायनानि मेध्या विशेषेण च शङ्खपुष्पी"। मण्डूकपर्णी ब्राह्मी। (बरमी) इति लोके, तदभावे मञ्जिष्ठापि ग्राह्या तस्या अपि रसायनत्वात्। "मासिकेन त्वगाक्षीर्या पिप्पल्या लवणेन च। त्रिफला सितया वापि युक्ता सिद्धं रसायनम्। सिन्धूत्थं शर्करा शुण्ठी कणामधुगुडैः क्रमात्। वर्षादिष्वभया प्राश्या रसायनगुणैषिणा। पुनर्नवस्यार्द्धपलं नवस्य पिष्टं पिबेद् यः पयसार्द्धमासम्। मासद्वयं तत्त्रिगुणं समां वा जीर्णोऽपि भूयः स पुनर्नवः स्यात्। ये मासमेकं स्वरसं पिबन्ति दिने दिने भृङ्गरजः समुत्थम्। क्षीराशिनस्ते बलवीर्ययुक्ताः समाशतं जीवनमाप्नुवन्ति। शतावरी मुण्डितिका गुडूची सहस्तिकर्णी सह तालमूली। एतानि कृत्वा समभागयुक्तान्याज्येन किं वा मधुनावलिह्यात्। जरारुजामृत्युविमुक्तदेही भवेन्नरो वीर्यबलादियुक्तः। विभाति देवप्रतिमः स नित्यं प्रभामयो भूरिविशालबुद्धिः। पीत्वाश्वगन्धां पयसार्द्धमासं घृतेन तैलेन सुखाम्बुना वा। वीर्यस्य पुष्टिं वपुषो विधत्ते बालस्य शस्यस्य यथाम्बुवृष्टिः। अयःपलं गुग्गुलुना योज्यः पलत्रयं व्योषपलानि पञ्च। पलानि चाष्टौ त्रिफलारजश्च कर्षं विडङ्ग यात्यमरत्वमेव। न केवलं दीर्घमिहायुरश्नुते रसायनं यो विधिवन्निषेवते। गतिं स देवर्षिनिषेवितां शुभां प्रपद्यते ब्रह्म तथैव चाक्षयम्"।

रसायनफला स्त्री रसायनमौषधविशेष इव फलं व्याधिघातकत्वात् यस्याः। हरितक्याम् त्रिका०।

रसायनश्रेष्ठ पु० रसायनेषु औषधभेदेषु श्रेष्ठः। पारदे राजनि०।

रसायनी स्त्री रसायनं रसस्थानमस्त्यस्याः अच् गौ० ङीष्। १गुडूच्याम् २काकमाच्यां ३महाकरञ्जे ४गोरक्षदुग्धायाम् ५मांसच्छदायाञ्च राजनि०।

रसाल न० रसमालाति आ+ला—क कर्म०। १सिह्लके २गन्धरसे मेदि०। ३शिखरिण्याम (पेयभेदे) तत्पाकविधिः शतावशब्दे २१८४ पृ० भावप्र० उक्तो दृश्यः। ४रसनायां ५दूर्वायां ६विदार्य्यां ७द्राक्षायाञ्च स्त्री मेदि०। ८आम्रे "रसालः सालः समदृश्यताऽसुना" नैषधम्। ९इक्षौ अमरः। १०पनसे शब्दर०। ११गोधूमे १२पुण्ड्रकेक्षौ च पु० राजनि०।

रसालिहा स्त्री रसां भूमिं लेढि स्पृशति लिह—क (चाकुलिया) क्षुपभेदे शब्दच०। (आंख) इक्षुभेदे राजनि०।

रसाली स्त्री रसमालाति आ+ला—क गौरा० ङीष्। (पुडि

रसाश्वासा स्त्री रसां भूमिमाश्वासयति दलैः आ+श्वस—णिच्—अण्। पलाशीलतायाम् राजनि०।

रसास्वादिन् पु० रसं पुष्परसमास्वदते आ+स्वद—णिनि १भ्रमरे शब्दमा०। २मधुरशृङ्गारादिरसास्वादके त्रि स्त्रियां ङीप्।

रसिक पुंस्त्री० रसं वेत्ति अनुभवति ठन्। १सारसपक्षिणि राजनि० २अश्वे ३गजे सारस्वतः। स्त्रियां जातित्वात् ङीष्। ४रसज्ञे त्रि०। रसोऽस्त्यस्य ठन्। ५रसवति च त्रि० मेदि०। ६रसालायाम् ७इक्षुरसे च स्त्री मेदि० ८काञ्च्याम् ९रसनायां स्त्री विश्वः।

रसित न० पु० रस—भावे क्त। १मेघादिशब्दे २विहगादिशब्दे च अमरः। कर्त्तरि क्त। ३शब्दवति कर्मणि-क्त ४आस्वादिते च त्रि०। [तत्रैव स्वार्थे क। तत्रार्थे।

रसुन पु० रस—उनन्। लशुने शब्दच०। सोमन् रसोन

रसेन्द्र पु० रस इन्द्र इव। पारदे राजनि०।

रसेश्वर पु० रसः पारद ईश्वर इव तद्देहरसजातत्वात्। १ईश्वरतुल्ये रसे। तत्प्रमाणार्थं देहस्थैर्यसम्पादनद्वारा मुक्तिहेतुत्वमस्य माहेश्वरभेदाः प्रतिपेदिरे तन्मतञ्च सर्वदर्शनसंग्रहे प्रदर्शितं यथा

"अपरे माहेश्वराः परमेश्वरतादात्म्यवादिनोऽपि पिण्डस्थैर्ये सर्वाभिमता जीवन्मुक्तिः सेत्स्यतीत्यास्थाय पिण्डस्थैर्योपायं पारदादिपदवेदनीयं रसमेव सङ्गिरन्ते रसस्य पारदत्वं संसारपरपारप्रापणहेतुत्वेन तदुक्तम्

इतःपरः ग्रन्थः पारदशब्दे ४२१२ पृष्ठे प्रदर्शितः ।
"प्रकारान्तरेणापि जीवन्मुक्तौ नेयं वाचोयुक्ति-र्युक्तिमतीति चेन्न षट्स्वपि दर्शनेषु देहपातानन्तरं मुक्तेरुक्ततया तत्र विश्वासानुपपत्त्या निर्विचिकित्स-प्रवृत्त्यनुपपत्तेः । तदप्युक्तं तत्रैव "षड्दर्शनेऽपि मुक्तिस्तु दर्शिता पिण्डपातने । करामलकवत्साऽपि प्रत्यक्षा नोपलभ्यते । तस्मात्तं रक्षयेत् पिण्डं रसैश्चैव रसा-यनैरिति" । गोविन्दभगवत्पादाचार्य्यैरपि "इति धन-शरीरभोगान् मत्वाऽनित्यान् सदैव यतनीयम् । मुक्तौ सा च ज्ञानात् तच्चाभ्यासात् स च स्थिरे देहे" इत्युक्तम् । ननु विनश्वरतया दृश्यमानस्य देहस्य कथं नित्यत्वमवसीयते इति चेन्मैवं मंस्थाः, षाट्कौशिकस्य शरीरस्यानित्यत्वेऽपि रसाभ्रकपदाभिधेयहरगौरीसृष्टिजातस्य नित्यत्वोपपत्तेः तथा च रसहृदये "ये चात्यक्तशरीरा हरगौरीसृष्टि-जान्तरं प्राप्ताः । वन्द्यास्ते रससिद्धा मन्त्रगणः किङ्करो येषामिति" । तस्माज्जीवन्मुक्तिं समीहमानेन योगिना प्रथमं दिव्यतनुर्विधेया । हरगौरीसृष्टिसंयोगजनितत्वञ्च रसस्य हरजत्वेनाभ्रकस्य गौरीसम्भवत्वेन तत्तदात्म-कत्वमुक्तम् "अभ्रकस्तव बीजन्तु मम बीजन्तु पारदः । अनयोर्मेलनं देवि ! मृत्युदारिद्र्यनाशनमिति" । अत्यल्प-मिदमुच्यते देवदैत्यमुनिमानवादिषु बहवो रससामर्थ्याद्दिव्यं देहमाश्रित्य जीवन्मुक्तिमाश्रिताः श्रूयन्ते रसेश्वरसि-द्धान्ते "देवाः केचिन्महेशाद्या दैत्याः काव्यपुरःसराः । मुनयो वालखिल्याद्या नृपाः सोमेश्वरादयः । गोविन्द-भगवत्पादाचार्य्यो गोविन्दनायकः । चर्वटिः कपिलो व्याडिः कापालिः कन्दलायनः । एतेऽन्ये बहवः सिद्धा जीवन्मुक्ताश्चरन्ति हि । तनुं रसमयीमाप्य तदात्मक-कथाचणाः" इति । अयमेवाम्नायार्थः परमेश्वरेण परमेश्वरीं प्रति प्रपञ्चितः' ।
इतःपरो ग्रन्थः पारदशब्दे ४२१२ पृ० दर्शितः ।
तत्प्रपञ्चस्तु गोविन्दभगवत्पादाचार्य्यसर्वज्ञरामेश्वरभट्टा-रकप्रभृतिभिः प्राचीनैराचार्य्यैर्निरूपित इति ग्रन्थ-भूयस्त्वभयादुदास्यते । न च रसशास्त्रं धातुवादार्थ-मेवेति मन्तव्यं देहवेधद्वारा मुक्तेरेव परमप्रयोजनत्वात् तदुक्तं रसार्णवे "लोहवेधस्त्वया देव ! यद्दत्तं परमो-षितः । । तं देहवेधमाचक्ष्व येन स्यात् खेचरी गतिः । यथा लोहे तथा देहे कर्त्तव्यः सूतकः सता । समानं कुरुते देवि ! प्रत्ययं देहलोहयोः । पूर्वं लोहे परी-क्षेत पश्चाद्देहे प्रयोजयेत्" इति । ननु सच्चिदानन्दात्मक-परतत्त्वस्फुरणादेव मुक्तिसिद्धौ किमनेन दिव्यदेहसम्पा-दनप्रयासेनेति चेत्तदेतदवार्त्तं वार्त्तं शरीरालाभे तद्वा-र्त्ताया अयोगात् । तदुक्तं रसहृदये "गलितानल्पवि-कल्पः सर्वाध्वविवर्जितश्चिदानन्दः । स्फुरितोऽप्यस्फुरित-तनोः करोति किं जन्तुवर्गस्येति । यं जरया जर्जरितं कासश्वासादिदुःखविवशञ्च । योग्यं तं न समाधौ प्रतिहतबुद्धीन्द्रियप्रसरम् । बालः षोडशवर्षो विषय-रसास्वादलम्पटः परतः । यातविवेको वृद्धो मर्त्यः कथमाप्नुयान्मुक्तिमिति" । ननु जीवत्वं नाम संसारित्वं तद्विपरीतत्वं मुक्तत्वं तथा च परस्परविरुद्धयोः कथ-मेकायतनत्वमुपपन्नं स्यादिति चेत्तदनुपपन्नं विकल्पानुप-पत्तेः मुक्तिस्तावत् सर्वतीर्थकरसम्मता सा किं ज्ञेयपदे निविशते न वा चरमे शशविषाणकल्पा स्यात् प्रथमे न जीवनं वर्जनीयमजीवतो ज्ञातृत्वानुपपत्तेः । तदुक्तं रसेश्वरसिद्धान्ते "रसाङ्कमेयमार्गोक्तो जीवमोक्षोऽस्त्यधो-मनाः । प्रमाणान्तरवादेषु युक्तिभेदावलम्बिषु । ज्ञान-ज्ञेयमिदं विद्धि सर्वतन्त्रेषु सम्मतम् । नाजीवन् ज्ञा-स्यति ज्ञेयं यदतोऽस्त्येव जीवनम्" इति । न चेदमदृष्ट-चरमिति मन्तव्यं विष्णुस्वामिमतानुसारिभिः नृपञ्चास्य-शरीरस्य नित्यत्वोपपादनात् । तदुक्तम् साकारसिद्धौ "सच्चिन्नित्यनिजाचिन्त्यपूर्णानन्दैकविग्रहम् । नृपञ्चास्य-महं वन्दे श्रीविष्णुस्वामिसम्मतम्" इति । नन्वेतत् सावयवं रूपवद्भासमानं नृकण्ठीरवाङ्गं सदिति न सङ्गच्छत इत्यादिनाक्षेपपुरःसरं सनकादिप्रत्यक्षेण "सहस्र-शीर्षा पुरुषः" इत्यादिश्रुत्या "तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम्" इत्यादिपुराणश्रवणेन प्र-माणत्रयेण सिद्धं नृपञ्चाननाङ्गं कथमसत् स्यादिति । सदादीनि विशेषणानि गर्भश्रीकान्तमिश्रैः विष्णुस्वामि-चरणपरिणतान्तःकरणैः प्रतिपादितानि । तस्माद्दृष्ट-दिव्यदेहनित्यत्वमत्यन्तादृष्टं न भवतीति पुरुषार्थकामुकैः पुरुषैरेष्टव्यम् । अत एवोक्तम् "आयतनं विद्यानां मूलं धर्मार्थकाममोक्षाणाम् । श्रेयः परं किमन्य-च्छरीरमजरामरं विहायैकमिति" । अजरामरीकरण-समर्थश्च रसेन्द्र एव तदाह "एकोऽसौ रसराजः शरीर-मजरामरं कुरुते" इति । किं वर्ण्यते रसस्य माहात्म्यं यस्य दर्शनस्पर्शनादिनापि महत् फलं भवति । तदुक्तं रसा-र्णवे "दर्शनात् स्पर्शनात्तस्य भक्षणात् स्मरणादपि । पूजना-

रसदानाच्च दृश्यते षड्विधं फलम्। केदारादीनि लिङ्गानि पृथिव्यां यानि कानिचित्। तानि दृष्ट्वा तु यत्पुण्यं तत् पुण्यं रसदर्शनादित्यादिना”। अन्यत्रापि “काशग्रादिसर्वलिङ्गेभ्यो रसलिङ्गार्चनं शिवम्। प्राप्यते येन तल्लिङ्गं भोगारोग्यामृतामरम्” इति। रसनिन्दायाः प्रत्यवायोऽपि दर्शितः “प्रमादाद्रसनिन्दायाः श्रुतायैनं स्मरेत् सुधीः। द्राक् त्यजेल्लिङ्गदेशं नित्यं निन्दया पूरिताशुभम्” इति। तस्मादस्मदुक्तया रीत्या दिव्यं देहं सम्पाद्य योगाभ्यासवशात् परतत्त्वे दृष्टे पुरुषार्थप्राप्तिर्भवति। तदा “भ्रूयुगमध्यगतं यत् शिखिविद्युत्सूर्यवज्जगद्भासि। केषाञ्चित् पुण्यदृशामुन्मीलति चिन्मयं ज्योतिः। परमानन्दैककरं परमं ज्योतिःस्वभावमविकल्पम्। विगलितसकलक्लेशं ज्ञेयं शान्तं स्वसंवेद्यम्। तस्मिन्नाधाय मनः स्फुरदखिलं चिन्मयं जगत् पश्यन्। उत्सन्नकर्मबन्धो ब्रह्मत्वमिहैव चाप्नोतीति”। श्रुतिश्च “रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवतीति”। तदित्थं भवे नान्योदुःखपरतरणोपायो रस एवेति सिद्धम्। तथाच रसस्य परब्रह्मणा साम्यमिति प्रतिपादकः श्लोकः “यः स्यात् प्रावरणाविमोचनधियां साध्यः प्रकृत्या पुनः सम्पन्नो रहते न दीव्यति परं वैश्वानरे जाग्रति। जातो यद्यपरं न वेदयति च स्वस्मात् स्वयं द्योतते यो ब्रह्मैव स दैन्यसंसृतिभयात् पायादसौ पारदः” इति।

रसोत्तम पु॰ रस उत्तमो यस्य। मुद्गे राजनि॰।

रसोद्भव न॰ रसः पारद उद्भवत्यस्मात् उद्+भू—अप् उद्भवो यस्य। १हिङ्गुले राजनि॰। ५त॰। २रसजाते त्रि॰।

रसोपल न॰ रसः पारद इव उपलीयते शुभ्रत्वात् उप+ली—ड। मौक्तिके त्रिका॰।

रस्न न॰ रसं न। द्रव्ये उज्ज्वलद॰।

रस्य न॰ रसाद्भुक्तान्नपरिणामादागतः यत्। १रुधिरे शब्दच॰ रस्यते आस्वाद्यते रस—यत्। २आस्वाद्ये त्रि॰। रस्याः, “स्निग्धाः स्थिरा हृद्याः” गीता। ३पाठायां ४रास्नायाञ्च स्त्री राजनि॰।

रह गतौ भ्वा॰ पर॰ सक॰ सेट् इदित्। रंहति अरंहीत्, “तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः” शारीरकसूत्रम्

रह त्यागे भ्वा॰ प॰ सक॰ सेट्। रहति अरहीत्।

रह त्यागे अद॰ चु॰ उभ॰सक॰सेट्। रहयति ते अररहत्-त

रहस् न॰ रह—असुन्। १निर्जने अमरः। २गोप्ये ३याथार्थ्ये ४रतभे च मेदि॰। ५निर्जने अव्य॰अमरः। रमन्तेऽस्मिन् रम-असुन् मस्य रः। ६विश्वासयोग्यदेशे उज्ज्वलद॰।

रहस्य त्रि॰ रहसि भवः यत्। १गोप्ये “रहस्यमस्याः स महद्दिति” नैषधम्। २निर्जनभवे च ३पाठायां ४रास्नायाञ्च स्त्री राजनि॰ टाप् ५नदीभेदे स्त्री मेदि॰।

रहित त्रि॰ रह—त्यागे कर्मणि क्त। वर्जिते।

रा दाने ग्रहणे च अदा॰पर॰सक॰अनिट्। राति अरासीत्।

रा स्त्री रा—सम्प॰ भावे क्विप्। १विभवे २दाने एकाक्षरकोषः। कर्मणि क्विप्। ३स्वर्णे शब्दर॰।

राका स्त्री रा—क तस्य नेत्त्वम्। १प्रतिपद्युक्तायां पूर्णिमायां सम्पूर्णेन्दुतिथौ २नदीभेदे ३नवजातरजस्कायां नार्य्यां ४कच्छुरोगे च मेदि॰। ५आङ्गिरसः कन्याभेदे अङ्गिरस्शब्दे २१६२ पृ॰ दृश्यम्।

राक्षस पु॰ रक्ष एव स्वार्थे अण्। “क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते” इति भाष्योक्तेः पुंस्त्वम्। स्वनामख्याते निकषात्मजे १जातिभेदे अमरः जातौ ङीष्। २राक्षसजातिस्त्रियाम् स्त्री। रक्षस इदम् अण्। ३राक्षससम्बन्धिनि त्रि॰स्त्रियां ङीप्। “राक्षसी रात्रिरन्यत्र” ति॰त॰। ४दंष्ट्रायां शब्दच॰ ५चण्डिकायां ६चोरनामगन्धद्रव्ये च स्त्री मेदि॰ ङीप्।

राक्षसेन्द्र पु॰राक्षस इन्द्र इव श्रेष्ठत्वात्। विश्रवसः ज्येष्ठपुत्रे निकषात्मजे रावणे त्रिका॰।

राखा स्त्री अख्यतेऽनया रख—कर्मणि—घञ् पृषो॰ ह्रस्वः अस्य रख। बाह्वावाम् अमरः।

राख शोषणे भूषणे निवारणे च सद॰ सामर्थ्ये अक॰ भ्वा॰ पर॰ सेट्। राखति अराखीत्। ऋदित् चङि न ह्रस्वः।

राग पु॰ रञ्ज—भावे घञ् नि॰ नलोपकुत्वे। १रञ्जने २रक्तादिवर्णे ३प्रीतौ ४अनुरागे ५नृपे ६गान्धारादिनामभिः प्रसिद्धे निषादादिस्वरयोनिके स्वरभेदे मेदि॰ ७चन्द्रे ८सूर्ये च शब्दर॰। करणे घञ्। ९लोहितवर्णे १०तद्विशिष्टलाक्षादौ च “तेन रक्तं रागात्” पा॰ अनुरागलक्षणम् उज्ज्वलमणिनोक्तं यथा “सुखमप्यधिकं चित्ते सुखत्वेनैव रज्यते। यतस्तु प्रणयोत्कर्षात् स राग इति कथ्यते”। स्वरभेदनिरुक्तिर्यथा “यैस्तु चेतांसि रज्यन्ते जगत्त्रितयवर्त्तिनाम्। ते रागा इति कथ्यन्ते मुनिभिर्भरतादिभिः” तेषां भेदाः संगीतदा॰ मतभेदे नाना तत्र प्रसिद्धा षड् भेदा यथा

"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः । श्रीरागश्च ततः पश्चात् वसन्तस्तदनन्तरम् । हिन्दोलश्चाथ कर्णाट एते रागाः षड़ेव तु" सङ्गीतदा० । भरतमते तु "भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा । श्रीरागो मेघरागश्च रागाः षड़िति कीर्त्तिताः" ।

रागचूर्ण पु० रागस्य रतेश्चूर्ण इव । १कामे । रागाय चूर्ण्यतेऽसौ चूर्ण–घञ् । २खदिरे च मेदि० । ३लाक्षायां राजनि० ४रागयुक्तचूर्णे पु० (फाग) शब्दच० ।

रागदालि पु० दल्यतेऽसौ दल–णिच्–इन् पृषो० हृविः रागेण रक्ततया युक्तो दालिर्वा । मसूरे राजनि० ।

रागपुष्प पु० रागयुक्तं रक्तवर्णं पुष्पमस्य । १बन्धूके २रक्ताम्लाने च ३जवायां स्त्री राजनि० ङीप् ।

रागप्रसव पु० रागयुक्तो रक्तवर्णः प्रसवोऽस्य । १बन्धूके २रक्ताम्लाने च राजनि० ।

रागयुज् पु० रागेण रक्तवर्णेन युज्यते युज–कर्मणि क्विप् । १माणिक्ये राजनि० २रक्तवर्णयुक्ते त्रि० ।

रागसूत्र न० रागयुक्तं सूत्रम् । पट्टसूत्रे २तुलासूत्रे च मेदि० । [राजनि० ३त० । रागाख्याम्ल स्त्री ।

रागाङ्गी स्त्री रागयुक्तमङ्गं यस्याः ङीप् । मञ्जिष्ठायाम्

रागिणी स्त्री रागोऽस्त्यस्या इनि । १गीताङ्गे स्वरभेदे रागपत्न्यां सङ्गीतदा० । २विदग्धनार्य्यां जटा० । ३मेनकाकन्यायां रागवति ४अनुरक्ते ५कामुके त्रि० विभ्रः रञ्ज–घिणुन् । ६रतियुक्ते च त्रि० । ६(७)धान्यभेदे मेदि० । एकैकरागे षट् रागिण्य इति षट्सु रागेषु रागिणीभेदाश्च षट्त्रिंशत् यथा

"षट्त्रिंशद्रागिणीभेदाः क्रमशः कथिता मया । धानसी१ मालसी२ चैव रामकीरी३ च सिन्धुड़ा४ । आशावरी५ भैरवी६ च मालवस्य (१) प्रिया इमाः । वेलावली१ पुरवी२ च कानड़ा३ माधवी४ तथा । कोड़ा५ केदारिका६ चापि मल्लार(२)दयिता इमाः । गान्धारी१ सुभगा२ चैव गौरी३ कौमारिका४ तथा । वेलोयारी५ च वैरागी६ श्रीरागस्य (३) प्रिया इमाः । तुड़ी१ च पञ्चमी२ चैव ललिता३ पटमञ्जरी४ । गुर्जरी५ च विभाषा६ च वसन्तस्य (४) प्रिया इमाः । मायूरी१ दीपिका२ चैव देशकारी३ च पाहिड़ी४ । वराड़ी५ मोरहाटी६ च हिन्दोलस्य(५) प्रिया इमाः । नाटिका चाथ भूपाली२ रामकेली३ गड़ा४ तथा । कामोदा५ चाथ कल्याणी६ कर्णाटस्य (६) प्रिया इमाः" ।

सङ्गीतदा० । तत्तानकालभेदाः तत्पुत्रादयश्च तत्रैव दृश्याः ।

राघ सक्तौ भ्वा० आ० अक० सेट् । राघते अराघिष्ट । ऋदित् चङि न ह्रस्वः ।

राघव पु० रघोर्गोत्रापत्यम् अण् । १रघोर्वंश्ये २तत्प्रधाने श्रीरामे च ३महामत्स्यभेदे ४समुद्रे च मेदि० ।

राङ्कव न० रङ्कोरयं विकारो वा तल्लोमजातत्वात् अण् । मृगविशेषलोमजाते वस्त्रभेदे अमरः ।

राज दीप्तौ भ्वा० उभ० अक० सेट् । राजति ते–अराजीत् अराजिष्ट फणादि० रेजतुः रराजतुः । ऋदित् चङि न ह्रस्वः ।

राजक न० राज्ञां समूहः कन् । १नृपसमुदाये अमरः । राजेव क । २नृपे पु० । राज–ण्वुल् । ३दीप्तिमति त्रि० । [भेदे जटा० ।

राजकदम्ब पु० कदम्बानां राजा राजद० परनि० । कदम्ब-

राजकल्प पु० ईषदसमाप्तो राजा राजन्+कल्पप् । राजतुल्ये । [ख्याम् राजनि० ।

राजकर्कटी स्त्री राजते राज–अच् कर्म्म० । चीनाकर्क-

राजकशेरु पु० कशेरूणाम् राजा राजद० । भद्रमुस्तायाम् राजनि० । [र्य्यादौ ।

राजकीय त्रि० राज्ञ इदम् छ कुक् च । राजसम्बन्धिका-

राजकुमार पु० राज्ञः कुमारः । अप्राप्तवयस्के युवराजकार्य्यानारूढ़े राजपुत्रे । [क्याम् जटा०

राजकुष्माण्ड पु० राज्ञः कुष्माण्ड इव प्रियत्वात् । वार्त्ता-

राजकोषातकी स्त्री राजप्रिया कोषातकी । (घियाभिङ्गा) लताभेदे मदनविनोदः ।

राजक्षवक पु० क्षवत्यनेन क्षु–अप् राजते राज–अच् कर्म० स्वार्थे क । राजसर्षपे (राइसर्षा) राजनि० ।

राजखर्जूरी स्त्री राजप्रिया खर्जूरी । खर्जूरीभेदे (पिण्डखेजुर) राजनि० । [२शाकभेदे राजनि० ।

राजगिरि पु० राजाश्रमो गिरिः । १मगधस्थे पर्वतभेदे

राजघ त्रि० राजानं हन्ति हन–क नि० । १राजहन्तरि, २तीक्ष्णे च जटा० "रराज नीरजनया स राजघः" नैष०

राजजम्बू स्त्री राज्ञः जम्बूरिव । १पिण्डखर्जूरे मेदि० राजते अच् कर्म० । २महाजम्बाम् राजनि० ।

राजज(य)क्ष्मन् पु० राज्ञः चन्द्रस्य क्षयकारको य(य)क्ष्मा । रोगभेदे यक्ष्मन्शब्दे दृश्यम् "राज(य)क्ष्मेव रोगाणाम्" माघः । [हन्ते २प्यारग्वधे च राजनि० ।

राजतरु पु० तरूणां राजा राजद० परनि० । १कर्णिकार-

राजताल पु॰ राज्ञस्ताल इव प्रियः । १गुवाकवृक्षे शब्दर॰ । स्त्रीत्वमपि तत्र ङीप् । "राजतालीवनध्वनिः" रघुः ।

राजदन्त पु॰ दन्तानां राजा परनि॰ । ऊर्द्ध्वपङ्क्तिस्थे मध्यवर्त्तिदन्तद्वये हेमच॰ । [तुल्ये राजकल्पे ।

राजदेशीय पु॰ ईषदसमाप्तो राजा राजन्+देशीयर् । राज-

राजधुस्तूरक पु॰ धुस्तूराणां राजा राज॰ पर॰ स्वार्थे क । वृहद्धुस्तूरे राजधुस्तूरकोऽप्यत्र पु॰ राजनि॰ ।

राजधर्म्म पु॰ राज्ञो धर्म्मः । राज्ञामवश्यकर्त्तव्ये प्रजापालनादौ कर्म्मणि । तमधिकृत्य कृतो ग्रन्थः अण् । भारतशान्तिपर्वान्तर्गते व्यासप्रणीते ग्रन्थभेदे । राजधर्माश्च तत्र मानवे ७ अ॰ च उक्ता द्रष्टव्याः ।

राजधानी स्त्री राजा धीयतेऽस्यां धा—आधारे ल्युट् ङीप् । राजावासे महानगर्य्याम् शब्दर॰ । [धान्ये राजनि॰ ।

राजधान्य न॰ धान्येषु राजा राज॰ पर॰ । (श्यामः) श्यामाक-

राजन् पु॰ राज-कनिन् रञ्जयति रन्ज—कनिन् नि॰ वा । १नृपे, "राजा प्रकृतिरञ्जनात्" रघुः । २चन्द्रे, ३प्रभौ, ४क्षत्रिये, ५यक्षे ६इन्द्रे, च मेदि॰ । उत्तरस्थपदः पूर्वपदस्य च समभिव्याहृतपदार्थश्रेष्ठवाचकः । यथा राजमाषः मृगराज इत्यादि । ७पृथुनृपे च । "पित्रा न रञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः । अनुरागात्ततस्तस्य नाम राजेत्यभाषत" विष्णुपु॰ ।

राजनीति स्त्री राज्ञां नीतिः । १राजकर्त्तव्ये सामाद्युपाये, २उपचारात् तत्प्रतिपादके शास्त्रे च । सा च कामन्दकीयनीतिशास्त्रादौ द्रष्टव्या ।

राजन्य पु॰ राज्ञोऽयम् यत्, जातौ नलोपः । राज—अन्य वा । १क्षत्रिये अमरः । २राजपुत्रे ३अग्नौ, उणादिको॰ ५क्षीरिकावृक्षे चजटा॰ । [समूहे अमरः ।

राजन्यक न॰ राजन्यानां क्षत्रियाणां समूहः वुञ् । क्षत्रिय-

राजन्वत् त्रि॰ प्रशस्तो राजाऽस्त्यस्य प्राशस्त्ये मतुप् मस्य वः न नलोपः । सुन्दरराजयुते देशे अमरः अन्यत्र राजवत् इत्येव । [२मधुरपटोल्यां राजनि॰ ।

राजपटोल पु॰ राजप्रियः पटोलः । १पटोले रत्नमा॰ ।

राजपट्ट पु॰ राज्ञः पट्ट इव । मणिभेदे त्रिका॰ ।

राजपथ पु॰ पथां राजा राजगमनयोग्यो वा पन्थाः अच् समा॰ । "धनूंषि दश विस्तारे श्रीमान् राजपथः स्मृतः । नृवाजिरथनागानामसंबाधः सुसञ्चरः" इत्युक्ते राजमार्गे देवीपु॰ । [वर्णपलाण्डौ राजनि॰ ।

राजपलाण्डु पु॰ पलाण्डूनां राजा श्रेष्ठत्वात् राजद॰ । रक्त-

राजपीलु पु॰ राजप्रियः पीलुः । महापीलुवृक्षे राजनि॰ ।

राजपुत्र पु॰ राज्ञश्चन्द्रस्य, नृपस्य वा पुत्रः । १बुधग्रहे शब्दर॰ २नृपकुमारे ३वर्णसङ्करभेदे (रजपुत) "वैश्यादम्बष्ठकन्यायां राजपुत्रस्य सम्भवः" इति पराशरः । ४महाराजचूतवृक्षे राजनि॰ ।

राजपुत्री स्त्री राज्ञश्चन्द्रस्य पुत्रीव । १कटुतुम्ब्याम् २रेणुकायां ३नृपरीतौ, ४जातौ ५छुछुन्दर्य्यां च । ५मालत्याश्च राजनि॰ । ६त॰ । ६नृपकन्यायाम् । संज्ञायां कन् । ७धराटिखगे जटा॰ ।

राजपुष्प पु॰ राजा चन्द्र इव शुभ्रत्वात् पुष्पमस्य । नागकेसरवृक्षे शब्दच॰ । २करुणीवृक्षे स्त्री राजनि॰ ङीप् ।

राजफणिज्झक पु॰ राज॰ अच् कर्म॰ । नागरङ्गवृक्षे शब्दमा॰

राजफल न॰ राजप्रियं फलमस्य । १पटोले त्रिका॰ । २राजप्रियं फलमस्याः । ३जम्ब्वाम् स्त्री राजनि॰ टाप् ।

राजबदर न॰ राज्ञो बदरमिव प्रियत्वात् । १रक्तामलके २लवणे च मेदि॰ बदराणां राजा राजद॰ प॰ । ३उत्तमकोलौ पु॰ राजनि॰ । [भादाल] लताभेदे अमरः ।

राजबला स्त्री राज—अच् राजं बलं यस्याः ५ब॰ । (गन्ध-

राजभद्रक पु॰ राज्ञो भद्रं यस्मात् कप् । १कुठे (कुड़) २निम्बे च राजनि॰ ३पारिभद्रवृक्षे भावप्र॰ ।

राजभूय न॰ राज्ञो भावः राजन्+भू—क्यप् । राज्ञोऽसाधारणधर्मे राजत्वे ।

राजभोग्य न॰ राज्ञा भोक्तुं योग्यम् भुज—ण्यत् कुत्वम् । १जातीकोषे २पियालवृक्षे पु॰ शब्दच॰ । ३नृपतेर्भोग्यवस्तुमात्रे त्रि॰ ।

राजमार्ग पु॰ राजयोग्यः मार्गः । १राजपथे राजनि॰ ।

राजमाष पु॰ माषेषु कलायेषु राजा श्रेष्ठत्वात् राजद॰ पर॰ । १माषभेदे हेमच॰ । (बरबटी) २व्रीहिभेदे राजनि॰ ।

राजमुद्ग पु॰ मुद्गेषु राजा राज॰ प॰ नि॰ । (सुगानि) मुद्गभेदे ।

राजरङ्ग न॰ राजयोग्यं रङ्गम् । रजते शब्दर॰ ।

राजराज पु॰ राज्ञामपि राजा प्रभूतधनत्वात् टच् समा॰ । १कुवेरे, अमरः । २सार्वभौमनृपे, ३चन्द्रे च मेदि॰ ।

राजर्षि पु॰ राजा ऋषिरिव श्रेष्ठत्वात् संयतत्वाच्च । १राजश्रेष्ठे, २यतात्मनि नृपे च । [भेदे पुंस्त्री॰ ।

राजवंश्य त्रि॰ राजवंशे भवः यत् । १राजवंशोद्भवे । २जाति-

राजवर्त्मन् न॰ राजयोग्यं वर्त्म । १राजयोग्यवर्त्मनि राजपथे हेमच॰ । ६त॰ । राज्ञः २कर्त्तव्यकर्म्मणि च ।

राजवल्लभ पु॰ ६त॰ । १प्रियाले २राजबदरे ३राजाम्रे

राजनि० द्रव्यगुणप्रतिपादके तन्नामविदग्धते ४पल्वभेदे च । ५राज्ञः प्रिये त्रि० । [(उच्छा) लताभेदे रत्नमा० ।

राजवल्ली स्त्री राजते राज–अच राजा वल्ली कर्म० ।

राजवत् त्रि० राजा राजाऽस्त्यस्मिन् मतुप् मस्य वः । राजमात्रवति देशे अमरः ।

राजवीजिन् त्रि० राजा वीजी कारणं यस्य । राजवंश्ये ।

राजवृक्ष पु० वृक्षाणां राजा राजद० परनि० । १आरग्वधे (सोन्दाल) अमरः । राजप्रियो वृक्षस्तत्फलवीजजातलड्डुकस्य राजप्रियत्वात् । २प्रियाले मेदि० ३लङ्कास्थायिवृक्षे (लङ्कासिज) शब्दच० । [शब्दमा० ।

राजशण पु० राज–अच् राजः शणः कर्म० । पट्टे (पाट)

राजशाक पु० शाकानां राजा राज० परनि० । वास्तूकशाके राजनि० । [त्रिका० ।

राजशृङ्ग न० राज्ञां शृङ्गमिव ऊर्ध्वस्थितत्वात् । राजच्छत्रे

राजस त्रि० रजसा निर्मितः अण् । रजोगुणात् जाते १कर्मेन्द्रियादौ "येनास्मिन् कर्मणा लोके ख्यातिमाप्नोति पुष्कलाम् । न च शोचत्यसम्पत्तौ तद्विज्ञेयन्तु राजसम्" इत्युक्ते ख्यात्यै क्रियमाणे २कर्मणि च । रजः अस्त्यस्य अण् । ३रजःप्रधाने । सर्वेषां वस्तूनां त्रिगुणात्मकत्वेऽपि "भूयस्त्वात्तद्व्यपदेशः" इत्युक्तेः कस्यचित् तत्प्रधानत्वेन व्यपदेशः । ४दुर्गायां स्त्री ङीप् शब्दमा० ।

राजसभ न० राज्ञां नृपाणां सभा । नृपसमाजे अमरः ।

राजसर्षप पु० सर्षपाणां राजा श्रेष्ठत्वात् राजद० । (राइ-सर्षा) १सर्षपभेदे हेमच० । "तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते" उक्ते २परिमाणभेदे च विश्वः ।

राजसारस पुंस्त्री० राजा सारस इव । मयूरे शब्दमा० स्त्रियां ङीष् ।

राजसूय पु० राज्ञा सूयते सू–कर्मणि क्यप् । राजमात्रकर्त्तव्ये यज्ञभेदे शब्दच० । "राजा राजसूयेन यजेत" श्रुतिः ।

राजस्व न० राज्ञे देयं स्वं कररूपम् धनम् । १राजदेये करे हेम० । २राजधने च । [हेमदुग्धधत्तूरे राजनि० ।

राजस्वर्ण पु० स्वर्णानां धुस्तूराणां राजा० राजद० परनि०

राजहंस पुंस्त्री० हंसानां राजा श्रेष्ठत्वात् राजद० पर० । रक्तवर्णचञ्चुचरणयुक्ते श्वेतपक्षके हंसभेदे अमरः । २कलहंसे च मेदि० । उभयार्थे स्त्रियां ङीष् । राजा हंस इव सारग्रहणात् । ३नृपश्रेष्ठे । [नगरपुष्पे राजनि० ।

राजहर्षण न० राज्ञः नृपान् हर्षयति हृष–णिच्–ल्यु ।

राजातन पु० राजार्थमातनोति फलबीजम् आ+तन–अच् । (चीरञ्जीति) ख्याते पीलुहेतुफलके प्रियाले शब्दमा० ।

राजादन पु० राज्ञा अद्यते तत्फलबीजजातलड्डुकः अद–कर्मणि ल्युट् । १प्रियालवृक्षे अमरः । यस्य फलबीजं (चिरञ्जि) तेन हि लड्डुकं कृत्वा राज्ञा भुज्यते । २क्षीरिण्यां (खीरिटु) ३किंशुके च मेदि० । ४कोविदार्यां स्त्री ङीप् भरतः । [राजनि० । ५तन्दुलीये । ६नृपस्नानकाले च

राजान्न न० अन्नानां राजा राजद० । १अन्नदेशजधान्यभेदे

राजाम्र पु० आम्राणां राजा श्रेष्ठत्वात् राजद० १आम्रभेदे "राजाम्रं तुवरं स्वादु विशदं शीतलं गुरु । ग्राहि हृद्यं विबन्धाध्मवातघ्नं कफपित्तनुत्" भावप्र० । [राजनि० ।

राजाम्ल पु० अम्लानां राजा श्रेष्ठत्वात् राजद० । अम्लवेतसे

राजार्क पु० अर्काणां राजा श्रेष्ठत्वात् राजद० । श्वेतार्कवृक्षे (सादा आकन्द) राजनि० ।

राजार्ह न० राजानमर्हति अर्ह–अण् । १अगुरुचन्दने २राजयोग्ये त्रि० राजनि० ३जम्ब्वां स्त्री मेदि० । [मदनवि० ।

राजालाबू स्त्री राजते राजा अलाबूः कर्म० । मिष्टालाबुवाम्

राजावर्त्त पु० राजानमावर्त्तयति अनुकूलयति आ–वृत–णिच् अण् । १उपरत्नभेदे राजनि० । २विराटदेशीयहीरके हेमच० ।

राजाहि पु० नित्यक० । द्विमुखसर्पे शब्दर० ।

राजि(जी) स्त्री राज–इन् वा ङीप् । १श्रेण्याम् पङ्क्तौ २रेखायां च मेदि० । स्वार्थे क । रेखायाम् । राजते राज–ण्वुल् । राजिका राजसर्षपे स्त्री मेदि० ।

राजिकाफल पु० राजिकाया इव फलमस्य । श्वेतसर्षपे राजनि० ।

राजि(जी)फला स्त्री राजिभूतानि श्रेणिभूतानि फलानि यस्याः । १चीनाकर्कट्याम् राजनि० २पटोले पु० राजनि०

राजिल पुंस्त्री० राज–इलच् । डुण्डुभसर्पे (ढोंड़ासाप) अमरः स्त्रियां ङीष् ।

राजीव न० राजी दलराजी अस्त्यस्य व । १पद्मे अमरः । "राजीवराजीवशलोलभृङ्गमिति" माघः । २हरिणभेदे ३मत्स्यभेदे च पुंस्त्री० मेदि० "राजीवसिंहतुरण्डांश्च" मनुः । ४गजे त्रिका० ५सारसपक्षिणि च पुंस्त्री० अमरः सर्वत्र जातौ स्त्रियां ङीष् ।

राजेन्द्र पु० राजा इन्द्र इव श्रेष्ठत्वात् । "चतुर्यौजनपर्य्यन्तमधिकारी नृपो भवेत् । यो राजा तच्छतगुणः स एव मण्डलेश्वरः । तस्माद्दशगुणो राजा राजेन्द्रः" इत्युक्ताधिकारवति भूपतिभेदे ब्रह्मवै० ज०ख० ८६अ० ।

राज्ञी स्त्री राज्ञः पत्नी ङीप् स्वयं वा राजते राज–कनिन् ङीप् वा। (राणी) १राजपत्न्याम् २स्वयं राजकर्मकर्त्र्यां ३सूर्य्यपत्न्यां मेदि० ४कांस्ये हेमच०।

राज्य न० राज्ञो भावः कर्म वा राजन्+यत् नलोपः। १राजकर्मणि २राजभावे च ३जनपदे शब्दर०। "सकलाधिपत्यं राज्यं स्यात् साम्राज्यं दशकाञ्चने। शतकोट्यां महेशानि! महासाम्राज्यमुच्यते" वरदातन्त्रोक्ते ४सकलग्रामाधिपत्ये च। [प्रजापालनादौ।

राज्यधुरा स्त्री ६त० अच्समा०। राज्यभारे राजकर्मणि

राज्याङ्ग न० ६त०। स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलप्रकृतिरूपेषु सप्तसु राज्यस्योपायेषु। "परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते। अमात्यराष्ट्रे दुर्गञ्च कोषो दण्डश्च पञ्चमः। एताः प्रकृतयस्तद्वत् विजिगीषोरुदाहृताः। एताः पञ्च तथा मित्रं सप्तमं पृथिवीपतिः। सप्तप्रकृतिकं राज्यमित्युवाच बृहस्पतिः। पौरश्रेणी तदङ्गं च प्रवदन्ति मनीषिणः" शब्दर०।

राटि पु० रट–इन्। (लड़ाइ) १विग्रहे अमरः। २युद्धे स्त्री हेमच० वा ङीप्। पृषो० टस्य डत्वम्। राडिरप्यत्रार्थे

राढ़ पु० रुह–घञ् पृषो० ढत्वम्। देशभेदे (राढ़) स्वार्थे क तत्रैव।

राढ़ा स्त्री रुह–घञ् पृषो० ढत्वम्। पुरीभेदे "गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढा पुरीति" प्रबोधचन्द्रोदयः।

राढ़ीय त्रि० राढे निवासोऽस्य "वृद्धाच्छः" पा० छ। राढदेशोद्भवे।

रात्रि(त्री) स्त्री रा–त्रिप् वा ङीप्। १रजन्यां सन्ध्यास्तमयादारभ्य सूर्य्यदर्शनपर्य्यन्तमदर्शनयोग्ये काले २हरिद्रायाञ्च शब्दर०। "मासेन तु मनुष्याणां पितृणां तदहर्निशम्। कृष्णे दिनं तेषां शुक्ले रात्रिः प्रकीर्त्तिता" उक्ते ३पितॄणां शुक्लपक्षरूपे काले "उत्तरायणे दिनं प्रोक्तं रात्रिः स्यात् दक्षिणायने" इत्युक्ते ४देवानां दक्षिणायनरूपे काले च।

रात्रिकर पु० रात्रिं करोति कृ–अच्। रात्रौ करः किरणोऽस्य वा। १चन्द्रे हेमच० २कर्पूरे च।

रात्रि(त्री)चर पुंस्त्री० रात्रौ चरति चर–ट अच् वा। राक्षसे अमरः। १ जातित्वेऽपि न स्त्रीत्वे ङीप्। २निशाचारिणि त्रि० टान्तत्वात् स्त्रियां ङीप्।

रात्रिजागर पुंस्त्री० रात्रौ जागर्त्ति जागृ–अच्। १कुक्कुरे हेमच० स्त्रियां ङीप् २निशायामप्यवर्त्ते ९।१ ७त०।

१रात्रौ जागरणे पु०। [कीटभेदे राजनि०।

रात्रिजागरद पु० रात्रौ जागरं ददाति दा–क। मशके

रात्रिपुष्प न० रात्रौ पुष्प्यति पुष्प–अच् ७त०। उत्पले राजनि०। [हारा०। २कर्पूरे च।

रात्रिमणि पु० रात्रौ मणिरिव दीप्तिमत्त्वात्। १चन्द्रे

रात्रिवासस् न० रात्रेर्वास इवाच्छादकम्। १अन्धकारे शब्दमा० रात्रौ परिधेयं वासः शाक०। २रात्रौ परिधेये वस्त्रे च।

रात्रिविगम पु० ६त०। १रजन्यवसाने तदुपलक्षिते २प्रभातकाले च शब्दमाला।

रात्रिविश्लेषगामिन् पु० रात्रौ विश्लेषं विच्छेदं गच्छति गम–णिनि। चक्रवाके राजनि० तत्र स्त्रियां स्त्री ङीप्। [अच्। कुक्कुटे शब्दच० स्त्रियां ङीप्।

रात्रिवेद पुंस्त्री० रात्रिं रात्रिशेषं वेदयति स्वरेण विद–णिच्

रात्रिसत्र न० रात्रिषु त्रयोदशाहादिदिनेषु विहितं सत्रम्। त्रयोदशाहादिषु विहिते यागभेदे तत्र चार्थवादिकं फलं प्रतिपादितम् न विश्वजिन्न्यायात् स्वर्गफलमिति जै० ४।३।१७।१८ सूत्रे समर्थितम्। "यद्यपि रात्रिशब्देन चैव ज्योतिरथैष गौरित्यादिवाक्येन विहितानि सोमयागकर्माण्युच्यन्ते द्वादशाहादूर्ध्वभाविनस्त्रयोदशरात्रचतुर्दशरात्रादयश्च सत्रविशेषाः रात्रिसत्त्रपदवाच्याः त्रयोदशसंख्याका रात्रयो यस्मिन् सत्रविशेषे स त्रयोदशरात्र इति व्युत्पत्तेः तथापि बहुवचनान्तरात्रिशब्देन रात्रिसत्त्रमुच्यते "एता विंशतिं रात्रीः इति श्रवणात्" त० बो०। "फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात्" जै० सू०। निर्देशादर्थवादेन फलस्य निर्देशात् फलमर्थवादोक्तम् स्यादिति आत्रेय आह अश्रुतौ यत्रार्थवादादिषु फलाश्रुतिस्तत्रानुमानं स्वर्गफलकल्पनम्" इ०। "निर्देशात्तु प्रतिष्ठैव फलत्वेन विधीयते" तथा च प्रतिष्ठाकाम आयुषा यजेत प्रतिष्ठाकामो ज्योतिषा यजेत" इत्यादिश्रुतिपदघटिता एव विषयः कल्पतरौ वाचनात् न तु स्वर्गकामादिपदघटिताः" तत्त्वबो०। रात्रिसत्त्रन्यायोऽपि आर्थवादिकफलन्यायार्थः।

रात्रिहास पु० रात्रौ हास इव शुभ्रत्वात्। श्वेतोत्पले शब्दच०

रात्र्यन्ध त्रि० रात्रावन्धः दृष्टिक्षययुक्तः। १निशादृष्टिशून्ये काकादौ। २रात्रौ रोगजातदृष्टिशून्ये (रातकाणा) च।

राद्ध त्रि० राध–कर्त्तरि कर्मणि वा क्त। १सिद्धे २पक्वे च हेम०

राद्धान्त पु० राद्धः सिद्धः अन्तो निर्णयो यस्मात् ६ब०। संशयविषये वादिदर्शितपक्षनिराकरणपूर्वकस्वपक्षप्रतिपादके १सिद्धान्ते अमरः।

राध सिद्धौ अक० निष्पादने पाके च सक० स्वादि० दिवा० च पर० अनिट्। राध्नोति राध्यति अरात्सीत् अरात्त रेधतुः रराधतुः। शुभाशुभालोचने च। तद्योगे शुभाशुभज्ञापिनः सम्प्रदानता। "गर्गो राध्यति रामाय" वोपदेवः। अप+दोषकरणे "यन्मत्तमपराध्यति" म० घः।

राध पु० राधा विशाखा तत्समीपस्था अनुराधा च तद्युक्ता पौर्णमासी अण् ङीप् राधी सा यत्र मासे पुनरण्। १चान्द्रे वैशाखे मासि। तादृशे २पक्षे ३शुक्लवर्णे च कार्त्तिकशब्दे दृश्यम्। ४तत्पूर्णिमायां स्त्री ङीप्।

राधन न० राध–ल्युट्। १साधने २प्राप्तौ मेदि०। ३तोषे च हेम०। राध–णिच्-युच्। पूजने स्त्री टाप्।

राधस् न० राध–असुन्। धने निघण्टुः।

राधा स्त्री राध–अच्। १विशाखानक्षत्रे रिरंसया कृष्णदेहत्वेनाविर्भूते गोलोकस्थे परमेश्वराद्धाङ्गरूपे २शक्तिभेदे तत्रैव श्रीदामशापात् वृन्दावने जातायां वृषभानुसुतायां ३प्रधानगोपिकायाम् ४कर्णस्य पालयित्र्यां मातरि च। ५वैशाखपौर्णमास्यां स्त्री ङीप्। [दयोऽप्यत्र

राधाकान्त पु० राधायाः कान्तः। श्रीकृष्णे राधावल्लभा-

राधातनय पु० राधायास्तनयः। कर्णे स हि कन्यावस्थायां स्थितायाः कुन्त्याः गर्भजातस्तया च त्यक्तः राधया सूतपत्न्या पालित इति भारतप्रसिद्धम्। [पालितत्वात् ढक्। कर्णे

राधेय पु० राधाया अपत्यम् पुत्रत्वेन परिग्रहेण तत्-

राम पु० रम–कर्त्तरि घञ् ण वा। १परशुरामे २दशरथज्येष्ठपुत्रे श्रीरामे ३बलरामे च "भार्गवो राघवो गोपजश्चो रामाः प्रकीर्त्तिता" वह्निपु०। रामशब्दनिरुक्तिः "राशब्दो विश्ववचनो मश्चापीश्वरवाचकः। "विश्वानामीश्वरो यो हि तेन रामः प्रकीर्त्तित" ब्रह्मवै० का०ख० ११०अ०। ४मनोहरे ५सिते ६असिते च त्रि० मेदि०। ७वास्तूकशाके ८कुष्ठे (कुड़) न० मेदि० ९तमालपत्रे न० राजनि०।

रामकर्पूरक पु० रामं मनोहरं कर्पूरमिव यत्र। सौगन्धिके स्वनामख्याते तृणभेदे शब्दर०।

रामगिरि पु० रामाश्रितः गिरिः। चित्रकूटपर्वते स हि रामेण वनवासगमनकाले प्रथममाश्रितः।

रामचन्द्र पु० रामश्चन्द्र इवाह्लादकत्वात्। दशरथज्येष्ठपुत्रे श्रीरामे शब्दर०। [मदनवृक्षे (मयनागाछ) भावप्र०।

रामच्छर्दनक पु०राममभिरामं छर्दयति छृद–णिच्–ण्वुल्।

रामजननी स्त्री ६त०। १वसुदेवपत्न्यां रोहिण्यां २जमदग्निपत्न्यां रेणुकायां ३दशरथपत्न्यां कौशल्यायाञ्च।

रामठ न०रमठ+स्वार्थे अण्। हिङ्गुनि अमरः। तत्तुल्यगन्धके २अङ्कोटकवृक्षे रत्नमा०। नाडीहिङ्गुनि स्त्री राजनि० ङीप्।

रामण न० रमयति रम-णिच् ल्यु पृषो० वृद्धिः। १गिरिनिम्बे २तिन्दुके च (तँद) राजनि०।

रामणीयक न० रमणीयस्य भावः रमणीयमेव वा योपधत्वात् वुञ्। १रमणीयत्वे "मणिद्वारावलिरामणीयकम्" नैष० २रमणीये च।

रामतरुणी स्त्री रामा अभिरामा तरुणीव। (सेवोती) १पुष्पवृक्षे राजनि० ६त०। २सीतायां ३रेवत्याञ्च।

रामदूत पु० रामस्य दूतः वार्त्ताहरः। हनूमति स हि रामवार्त्तां वह्नातः सीताया आजहार।

रामदूती स्त्री रामा अभिरामा दूतीव गन्धद्वारा प्रचारात्। तुलसीभेदे (रामतुलसी) शब्दच०।

रामनवमी स्त्री रामस्य जन्माधारो नवमी। चैत्रशुक्लनवम्याम्। "चैत्रे मासि नवम्यान्तु जातो रामः स्वयं हरिः" अगस्त्यसंहिता। "प्राप्ते श्रीरामनवमीदिने मर्त्त्यो विमूढधीः। उपोषणं न कुरुते कुम्भीपाकेषु पच्यते" ति० त०।

रामपूग पु० रामः अभिरामः पूगः। गुवाकभेदे त्रिका०।

रामवाण पु० रसभेदे भावप्र०।

"पारदामृतलवङ्गगन्धकं भागयुग्ममरिचेन मिश्रितम्। तत्र जातिफलमर्द्धभागिकं तिन्तिडीफलरसेन मर्दितम्। वह्निमान्द्यदशवक्त्रनाशनो रामवाण इति विश्रुतो रसः। संग्रहग्रहणिकुष्ठकर्णकामवातखरदूषणं जयेत्। दीयते तु खलु मानतः सदा एव जठराग्निदीपनः। रोचकः कफकुलान्तकारकः श्वासकासवमिजन्तुनाशनः" भावप्र०।

रामभद्र पु० राम इव भद्रः मङ्गलदायकत्वात्। श्रीरामे "रामेति रामचन्द्रेति रामभद्रेति वा स्मरन्निति" पद्मपु०।

रामलवण न० कर्म०। शाम्भरिलवणे रत्नमा०।

रामवल्लभ न० रामस्य वल्लभं प्रियम्। १भूर्जपत्रे राजनि० तद्धि रामेण वनवासाश्रमे प्रियतया धृतम्। २तत्प्रिये त्रि०। [बाणक्षेप्तृत्वात् मनोहरः।

रामशर पु० कर्म०। शरवणभेदे राजनि० स हि काण्डद्वारा

रामसख पु० ६त० टच्। सुग्रीवे वानरराजे शब्दच०।

रामा स्त्री रमतेऽनया रम-करणे घञ्। १गीतादिकलाभिज्ञायां नार्य्यां २नारीमात्रे भावप्र० ३नद्याम् ४हिङ्गुनि मेदि० ५हिङ्गुले पु० ६श्वेतकण्टकार्य्यां ७गृहकन्यायां ८अशोके

६गोरोचनायां १०बालायां ११गैरिकेच स्त्री शब्दच० ।

रामायण न०। रामस्यायनं चरितमधिकृत्य कृतो ग्रन्थोऽच् । रामचरितप्रतिपादके वाल्मीकिकृते महाकाव्यभेदे तच्च सप्तकाण्डात्मकम् ब्रह्मलोके कोटिश्लोकात्मकं मनुष्यलोके च चतुर्विंशतिसाहस्रं पञ्चशतसर्गयुतम् ।

तत्प्रतिपाद्यविषयाश्च गरु०पु० १४८ अ० उक्ता यथा "मनोरिक्ष्वाकुवंशेऽभूद् वंशे राजा रघुः स्मृतः । रघोरजस्ततो जातो राजा दशरथो बली । तस्य पुत्राश्च चत्वारो महाबलपराक्रमाः । कौशल्याया-मभूद्रामो भरतः कैकयीसुतः सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रायां बभूवतुः । रामो भक्तः पितुर्मातुर्विश्वामित्रा-दवाप्तवान् । अस्त्रग्रामं यतो यक्षीं ताड़कां प्रजघान ह । विश्वामित्रस्य यज्ञे तु सुबाहुं न्यवधीद्बली । जन-कस्य क्रतुं गत्वा उपयेमेऽथ जानकीम् । ऊर्म्मिलां लक्ष्मणो वीरो भरतो माण्डवीं सुताम् । शत्रुघ्नो वै कीर्त्तिमतीं कुशध्वजसुते च ते । पित्रादिभिरयोध्यायां गत्वा रामादयः स्थिताः । युधाजित् मातुलश्च शत्रुघ्न-भरतौ गतौ । गतयोर्नृपवर्य्येण राज्यं दातुं समुद्य-तम् । रामाय ज्येष्ठपुत्राय कैकेय्या प्रार्थितं तदा । चतुर्दश समावासो वने रामस्य वाञ्छितः । रामः पितृ-हितार्थन्तु लक्ष्मणेन च सीतया । राज्यं च तृणवत् त्यक्त्वा शृङ्गवेरपुरं गतः । रथं त्यक्त्वा प्रयागञ्च चित्र-कूटं गिरिं गतः । रामस्य तु वियोगेन राजा स्वर्गं स-माश्रितः । संस्कृत्य भरतश्चागात् मार्गगणान्वितः । अयोध्यान्तु समागत्य राज्यं कुरु महामते ! । स नैच्छत् पादुके दत्त्वा राज्याय भरताय तु । विसर्ज्जितोऽथ भरतो रामराज्यमपालयत् । नन्दिग्रामे स्थितो भक्त्या अयोध्यां नाविशद् व्रती । रामोऽपि चित्रकूटाच्च अत्रे-राश्रममाययौ । नत्वा सुतीक्ष्णं चागस्त्यं दण्डकारण्य-मागतः । तत्र सूर्पनखा नाम राक्षसी सहसागता । निकृत्य कर्णौ नासे च रामेणाथ पराहिता । तत्प्रेरितः खरश्चागाद् दूषणस्त्रिशिरास्तथा । चतुर्दशसहस्रेण रक्ष-सान्तु बलेन च । रामोऽपि प्रेषयामास बाणैर्यमपुरञ्च तान् । राक्षस्या प्रेरितोऽथागात् रावणो हरणाय हि । मृगरूपं स मारीचं कृत्वाग्रेऽथ त्रिदण्डधृक् । सीतया प्रेरितो रामो मारीचं प्रजघान ह । म्रिय-माणः स च प्राह हा सीते ! लक्ष्मणेति च । सीतोक्तो लक्ष्मणोऽप्यागाद्रामपार्श्वं ददर्श तम् । एवाप राक्षसी माया नूनं सीता हृतेति सः । रावणोऽन्तरमासाद्य अङ्के-नादाय जानकीम् । जटायुषं विनिर्भिद्य ययौ लङ्कां ततो बली । अशोकवृक्षच्छायायां रक्षितां तामधारयत् । आगत्य रामः शून्याञ्च पर्णशालां ददर्श ह । शोकं कृत्वाथ जानक्या मार्गणं कृतवान् प्रभुः । जटायुषञ्च संस्कृत्य तदुक्तो दक्षिणां दिशम् । गत्वा सख्यं ततश्चक्रे सुग्रीवेण च राघवः । सप्ततालान् विनिर्भिद्य किष्कि-न्ध्याधीश्वरम् । सुग्रीवं कृतवान् राम ऋष्यमूके स्वयं स्थितः । सुग्रीवः प्रेषयामास वानरान् पर्वतोप-मान् । सीतायाः मार्गणे कर्त्तुं पूर्वादौ सुमहाबलान् । प्रतीचीमुत्तरां प्राचीं दिशं गत्वा समागताः । दक्षिणान्तु दिशं ये च मार्गयन्तोऽथ जानकीम् । वनानि पर्वतान् द्वीपान् नदीनां पुलिनानि च । जानकीं ते अपश्यन्तो मरणे कृतनिश्चयाः । सम्पातिवचनात् ज्ञात्वा हनूमान् कपिकुञ्जरः । शतयोजनविस्तीर्णं पुप्लुवे मकरालयम् । अपश्यज्जानकीं तत्र अशोकवनिकास्थिताम् । भर्त्सितां राक्षसीभिश्च रावणेन च रक्षसा । भव भार्य्येति वदता चिन्तयन्तीञ्च राघवम् । अङ्गुलीयं कपिर्दत्त्वा सीतां कौशल्यमब्रवीत् । रामस्य तस्य दूतोऽहं शोकं मा कुरु मैथिलि ! । अभिज्ञानञ्च मे देहि येन रामः करिष्यति । तत् श्रुत्वा प्रददौ सीता वेणीरत्नं हनूमते । यथा रामो नयेत् शीघ्रं तथा वाच्यं त्वया गते । तथेत्युक्त्वा तु हनुमान् वनं दिव्यं बभञ्ज तत् । हत्वाक्षं राक्षसांश्चा-न्यान् दशनं स्वयमागतः । स्ववारन्द्राजिता चायैद्दा रावणमब्रवीत् । रामदूतोऽस्मि हनुमान् देहि रामाय मैथिलीम् । एतत् श्रुत्वा प्रकुपितो दीपयामास पुच्छकम् । कपिर्ज्वलितलाङ्गूलो लङ्कां देहे महाबलः । दग्ध्वा लङ्कां समायातो रामपार्श्वं स वानरः । जग्ध्वा फलं मधुवने दृष्टा सीतेत्यवेदयत् । मणिरत्नञ्च रामाय रामो लङ्कां ययौ पुरीम् । ससुग्रीवः सहनुमानङ्गदाद्यैः सलक्ष्मणः । विभीषणोऽपि संप्राप्तः शरणं राघवं प्रति । लङ्कैश्वर्ये ह्यभ्यषिञ्चद्रामस्तं रावणानुजम् । रामो नलेन सेतुञ्च कृत्वाब्धौ चोत्क्रुतायतम् । सुवेलावस्थितश्चैव पुरीं लङ्कां ददर्श ह । अथ ते वानरा वीरा नीलाङ्गदनला-दयः । धूम्रधूम्राक्षधूम्रेन्द्राजाम्बवत्प्रमुखास्तदा । मैन्द-द्विविदमुख्यास्ते पुरीं लङ्कां बभञ्जिरे । राक्षसांश्च महा-कायान् कालाञ्जनचयोपमान् । रामः सलक्ष्मणो हत्वा सकपिः सर्वराक्षसान् । विद्युज्जिह्वञ्च धूम्राक्षं देवा-

न्तकनरान्तकौ। महोदरमहापार्श्वौ अतिकायं महाबलम्। कुम्भं निकुम्भं मत्तञ्च मकराक्षं अकम्पनम्। प्रहस्तं वीरसन्मत्तं कुम्भकर्णं महाबलम्। रावणं ब्रह्मणश्चास्त्रेणा हत्वाद्यै राघवो वशी। निकृत्य बाहुशृङ्गाणि रावणन्तु व्यपातयत्। सीतां शुद्धां गृहीत्वाथ विमाने पुष्पके स्थितः। सवानरः समायातो ह्ययोध्यां प्रवरां पुरीम्। तत्र राज्यं चकाराथ पुत्रवत् पालयन् प्रजाः। दशाश्वमेधानाहृत्य गयाशिरसि पातनम्। पितृणां विधिवत् कृत्वा दत्त्वा दानानि राघवः। पुत्रौ कुशलवौ दृष्टा तौ च राज्येऽभ्यषेचयत्। एकादशसहस्राणि रामो राज्यमकारयत्। शत्रुघ्नो लवणं हत्वा शैलूषं भरतः स्थितः। अगस्त्यादिमुनीनाञ्च सत्यमित्तञ्च रक्षसाम्। स्वर्गं गतो जनैः सार्द्धं सयोध्यस्थैः कृतान्तकः"। अन्यदपि व्यासप्रणीते पद्मपु० अध्यात्मरामायणं वाल्मीकिकृतमद्भुतरामायणं चास्ति।

रामालिङ्गनकाम पु० रामाणाम् स्त्रीणामालिङ्गनस्य कामोऽत्र। रक्तम्लाने राजनि०।

रामोपाख्यान न० ६त०। १रामस्योपाख्याने। तदधिकृत्य कृतो ग्रन्थः अण्। २भारतवनपर्वान्तर्गते तदुपाख्यानप्रतिपादकेऽवान्तरपर्वणि च। [वंशभवे दण्डभेदे।

राम्भ पु० रम्भो वेणुस्तस्य विकारोऽण्। व्रतभेदे धार्य्ये

राल पु० रा-कलच्। शालवृक्षनिर्य्यासे (धुना) भावप्र०। "रालो हिमो गुरुस्तिक्तः कषायो ग्राहको हरेत्। दोषास्रस्वेदवीसर्पज्वरव्रणविपादिकाः। ग्रहभग्नाग्निदग्धांश शूलातीसारनाशनः" भावप्र०।

रालकार्य्य पु० रालः कार्य्यो यस्य। शालवृक्षे राजनि०।

राव पु० रु-घञ्। शब्दे हारा०।

रावण पु० रवणस्यापत्यम् शिवा० अण्। रावयति शत्रून् णिच्-ल्यु वा। लङ्काधिपतौ विश्रवसः पुत्रे राक्षसे।

रावणगङ्गा स्त्री रावणनिर्म्मिता गङ्गा नदी। सिंहलदेशस्थे नदीभेदे गरुड़पु० ७ अ०।

रावणारि पु० ६त०। श्रीरामे जटा० रावणान्तकादयोऽप्यत्र।

रावणि पु० रावणस्यापत्यम् इञ्। मेघनादाख्ये रावणस्य ज्येष्ठपुत्रे हेमच०। [घञि न हृस्वः।

राश शब्दे भ्वा० आ० अक० सेट्। राशते अराशिष्ट अरिदिष्ट

राशि पु० अश्नुते व्याप्नोति अश्-इञ् धातोरुडागमश्च। धान्यादीनां १पुञ्जे अमरः। ज्योतिश्चक्रस्य द्वादशांशे २मेषादौ. "दशत्रे राशिप्रविष्टये" इति लीलावतीप्रसिद्धे ३व्यक्ताव्यक्तगणभेदे यथा त्रैराशिकपञ्चराशिकादिशब्दे।

राशिचक्र न० राशिघटितं चक्रं वृत्तम्। मेषादिद्वादशराशियुक्ते गोलाकारे वायुवशेन पूर्वतः पश्चात् अनिशं संभ्रम्यमाणे ज्योतिर्मये "सप्तविंशतिभिर्ज्योतिश्चक्रं स्तिमितवायुगम्" इत्युक्ते ज्योतिश्चक्रे खगोलशब्दे दृश्यम् मन्त्रशुद्ध्यङ्गराशिचक्रे तत्र चक्रशब्दे २८०पृष्ठे दृश्यम्।

राशिभोग पु० राशीनां स्वस्वगत्या ग्रहैर्भोगः भुज-घञ् कुत्वम्। रव्यादीनां स्वस्वगत्यनुसारेण राशिषु गतिभेदे। खगोलशब्दे दृश्यम्।

राशी(शि)कृत पु० अराशिः राशिः कृतः राशि+अभूततद्भावे च्वि तदर्थे समासो वा। (ढेरी) पुञ्जीकृते एकत्रस्थीकृते।

राष्ट्र न० राज-ष्ट्रन्। जनपदे 'गौड़ं राष्ट्रमनुत्तमम्" इति प्रबोधचन्द्रोदयः। २उपद्रवे अमरः।

राष्ट्रिका स्त्री राज-ष्ट्रन् गिन्त्वात् ङीष् स्वार्थे क। कण्टकारिकायाम् अमरः।

राष्ट्रिय पु० राष्ट्रे भवः घ। नाट्योक्तौ १राजश्याले। ख राष्ट्रीय तत्रार्थे। उभावपि २राष्ट्रभवे त्रि०।

रास शब्दे भ्वा०आ०अक० सेट्। रासते अरासिष्ट ऋदित् चङि न हृस्वः। ररासे। अयं तालव्यान्त इत्यन्ये।

रास पु० रस-घञ् रास-घञ् वा। १शब्दे, २ध्वनौ शृङ्खलावन्धवत् द्वयोर्द्वयोर्मध्यस्थित्या ३क्रीड़ाभेदे, ४कोलाहले च मेदि०।

रासक न०दृश्यकाव्यभेदे "नाट्ये रासकमेकाङ्कं बहुतालसयस्थिति। उदात्तनायकं तद्वत् पीठमर्द्दोपनायकम्। हास्योऽङ्गयत्र सशृङ्गारो नारी वासकसज्जिका। मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च। केचित् प्रतिमुखं सन्धिमिह नेच्छन्ति केवलम्" सा०द०।

रासभ पुंस्त्री० रास-अभच्। गर्द्दभे अमरः स्त्रियां ङीष्।

रासभवन्दिनी स्त्री रासभस्य वन्दिनीव। मल्लिकायाम् शब्दच०।

रासमण्डल न० रासार्थं शृङ्खलावन्धवत् द्वयोर्द्वयोर्मध्यस्थित्या क्रीड़ाभेदार्थं मण्डलं मण्डलाकारेण भ्रमणं यत्र। १गोलोकस्थे रासक्रीड़ाधारस्थाने। तत्रत्य मण्डलप्रमाणञ्च ब्रह्मवै० जन्मख० ८४ अ०। श्रीकृष्णस्य तदुत्सवाङ्गे २मण्डपभेदे च।

रासयात्रा स्त्री ६त०। कार्त्तिकपौर्णमास्यां भगवदुत्सवभेदे ब्रह्मवै० प्र० २५ अ०। भगवद्रासश्च भा० १०स्क० २८अध्यादौ दृश्यः।

रासिवास पु० ६त० अलुक् स० । १गोष्ठ्यां, २राबे, ३शृङ्गारे ४रसविशो, ५रवाशरे, ६घनोजागरे च मेदि० । ७उत्सवे शब्दच० ८परिहासे जटा० ।

रासेश्वरी स्त्री ६त० । राधिकायाम् ।

रास्ना स्त्री रस-घन् । १स्वनामख्यातायां लतायाम् (कांटा आमरूल) । तत्पर्य्यायगुणा भावप्र० उक्ता यथा "रास्ना युक्तरसा रसा सुवहा रसना रसा । एलापर्णी च सुरसा सुस्निग्धा श्रेयसी तथा । रास्नाऽऽमपाचनी तिक्ता गुरूष्णा कफवातजित् । शोथश्वाससमीरास्रवातशूलोदरापहा । कासज्वरविषाशीतिवातिकामयसिध्महृत्" भावप्र० २नाकुल्यां भावप्र० तत्पर्य्यायगुणा उक्ता यथा "नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली । नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी । नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् । भोगिलूतावृश्चिकाखुविषज्वरकृमिव्रणान्" ।

राहु पु० रह-उण् । १त्यागे, २त्यक्तरि, ज्योतिषमते सूर्य्यकिरणसम्पर्काभावेन जायमानपृथिवीच्छायारूपे ३तमसि तदधिष्ठातरि ४ग्रहभेदे, ५सिंहिकासुते दानवे च । तमःशब्दे दृश्यम् ।

राहुच्छत्त्र न० राहोर्ग्रहस्य छत्त्रमिव । आर्द्रके राजनि० ।

राहुदर्शन न० राहोर्दर्शनं यत्र । चन्द्रसूर्य्ययोरुपरागरूपे १ग्रहणे "स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने" इति ति०त० । तेन उपरोक्ते एव चन्द्रे सूर्य्ये च तस्य दृश्यता नान्यदा तस्य छायारूपत्वात् ।

राहुमूर्द्धभिद् पु० राहोः सिंहिकासुतस्य मूर्द्धानं भिनत्ति भिद्-क्विप् । विष्णौ । अमृतपानकाले देवपङ्क्तौ देवरूपेण स्थित्वाऽमृतं पिबन्तं दृष्ट्वा विष्णुस्तस्य शिरश्चिच्छेदेति भाग० ८।८ अ० ।

राहुरत्न न० राहोः प्रियं रत्नम् । गोमेदमणौ राजनि० ।

राहुस्पर्श पु० राहोः स्पर्शो स्वाधिष्ठितभूच्छायाद्वारा यत्र । चन्द्रसूर्य्ययोः उपरागरूपे ग्रहणे हलायुधः ।

राह्वच्छिष्ट पु० ६त० । लशुने त्रिका० ।

राह्वमृष्ट पु० ६त० । लशुने जटा० ।

रि गतौ तु० पर० सक० अनिट् । रियति अरैषीत् रिराय ।

रिक्त न० रिच-क्त । १शून्ये २वने मेदि० । ३निरर्थके च त्रि० शब्दर० । स्वार्थे क । तत्रैव त्रि० ।

रिक्तभाण्ड न० रिक्तं भाण्डम् । तैलादिशून्ये भाण्डे ।

रिक्तहस्त त्रि० रिक्तो धनादिशून्यो हस्तो यस्य । १निर्धने, भूरिदानादिना २व्ययितधने च । [तिथिषु ज्यो०त० ।

रिक्ता स्त्री रिच-क्त । उभयपक्षयोश्चतुर्थीनवमीचतुर्दशी-

रिक्थ न० रिच-थक् । १धने अमरः । २पिताद्युपार्ज्जितस्यापातवस्ये दाये च "स्वामी रिक्थक्रयसंविभागेत्यादि" गौतमस्मृतिः ।

रिक्थग्राहिन् त्रि० रिक्थं दायं गृह्णाति । ग्रह-णिनि । दायहारिणि पुत्रादौ । अच् । रिक्थग्राहोऽप्यत्र ।

रिक्थिन् त्रि० रिक्थं प्राप्यत्वेनास्त्यस्य इनि । दायहारिणि दायादे "उभयोरप्यसौ रिक्थी" इति मनुः ।

रिख वर्णने भ्वा० पर० सक० सेट् इदित् । रिङ्खति अरिङ्खीत् । अनिदिदयमित्येके रेखति अरेखीत् ।

रिग गतौ भ्वा०पर०सक०सेट् इदित् । रिङ्गति अरिङ्गीत् ।

रिङ्गण न०रिगि-ल्युट् । स्खलने । रिङ्ग ल्युट् । रिङ्गणमप्यत्र

रिच सम्पर्के वियोगे च वा चु०उभ० पक्षे भ्वा०पर०सक०सेट् । रेचयति ते रेचति । अरीरिचत् त अरेचीत् ।

रिच विरेके (खालिकरण पुरीषोत्सर्गे) रुधा०उभ०सक०अनिट् । रिणक्ति रिङ्क्ते इरित् अरिचत् अरैक्षीत् अरिक्त ।

अति+अतिक्रम्य स्थिते आधिक्येन स्थितौ अक० । अतिरेकः ।

वि+अति भेदे तदसत्त्वे तदभावरूपे पदार्थे च व्यतिरेकः ।

रिज भर्जने भ्वा० आ०सक० सेट् । रेजते अरेजिष्ट ।

रिपु पु० रप-उन् पृषो० । १शत्रौ अमरः । २चोरनामगन्धद्रव्ये राजनि० । ज्योतिषोक्ते लग्नापेक्षया ३षष्ठस्थाने च । देहस्थेषु षट्सु ४कामक्रोधादिषु । "कामः क्रोधश्च मोहश्च मात्सर्य्यं मदलोभकौ । देहस्था रिपवश्चेति" पुरा० ।

रिपुघातिनी स्त्री रिपुं हन्ति हन-णिनि । (कुँचुइ) लताभेदे शब्दच० । २शत्रुघातके त्रि० । [२नृपभेदे पु० ।

रिपुञ्जय त्रि० रिपुञ्जयति जि-खच् मुम् । १शत्रुजयिनि,

रिन्फ बधे तु० प० सक० सेट् । रिम्फति अरिम्फीत् रिम्फत

रिप्फ पु० रिन्फ-अच् पृषो० । लग्नापेक्षया द्वादशे स्थाने ज्यो०

रिफ कुत्सने सौ० पर० सक० सेट् । रेफति अरेफीत् ।

रिफ हिंसायां निन्दायां योधने च सक० दानाचानाम् अक० तु० पर० सेट् । रिफति अरेफीत् ।

रिवि गत्यां भ्वा०पर०सक०सेट् इदित् । रिम्वति अरिम्वीत् ।

रिभ रवे भ्वा० पर० अक० सेट् । रेभति अरेभीत् ।

रिव गतौ भ्वा०पर०सक०सेट् इदित् । रिण्वति अरिण्वीत् ।

रिश हिंसायां तु०पर०सक०अनिट् । रिशति अरिक्षत् ।

रिश्य(ष्य) स्त्री रिश्य(ष्य)ते रिश(ष)-क्यप् । मृगभेदे त्रिका० स्त्रियां योपधत्वात् टाप् । ऋष्यशब्दार्थे शब्दर० ।

रिष वधे भ्वा०पर०सक०सेट् । रेषति अरेषीत् । रिरेष ।
रिष्ट न० रिष-क्त । १मङ्गले २अशुभे ३पापे च अमरः । भावे क्त । ४नाशे, ५अशुभादिमति त्रि० । उपचारात् । ६खड्गे, ७रक्षोविशेषे च पु० मेदि० । स्वार्थे क । तत्र ।
रिष्टि स्त्री० रिष-रिश-वा क्तिन् । १अशुभे, २शस्त्रभेदे खड्गे पु०मेदि०। क्तिच् । ३रक्षे पु०। सा च इ०जा०दृश्याः
रिह वधे भ्वा० पर० सक० सेट् । रेहति अरेहीत् ।
री क्षरणे दि० आ० अक० अनिट् । रीयते अरेष्ट ओदित् निष्ठातस्य नः । रीणः । [रयति अरैषीत् ।
री गतौ वधे च सक० रवे अक० क्र्या० प्रा० अनिट् । रि-
रीठा स्त्री री-ठक् ठस्य नेत्वम् । रीठाकरञ्जे "रीठाकरञ्ज-स्तिक्तोष्णः कटुगन्धश्च वातजित् । कण्डूतिकुष्ठविष-जित् कफविस्फोटनाशनः" राजनि० ।
रीठाकरञ्ज पु० कर्म० । स्वनामख्याते वृक्षे राजनि० ।
रीढा स्त्री रिह-क्त नि० ढत्वभावः । अवज्ञायाम् अमरः ।
रीण त्रि० री-क्त । क्षरिते स्रुते अमरः ।
रीति स्त्री री क्तिच् ।१पित्तले । क्तिन् ।२प्रभावे,३क्षरणे अमरः ४लौहकिट्टे, मेदि० । ५द्रव्यस्वभावादिमत्त्वे रमा० । ६सी-मायां, ७गतौ, ८स्वभावे, हेमच० अलङ्कारोक्ते ९गौ-ड्यादिरचनाभेदे च "गौडीपाञ्चालवैदर्भ्यो रीतयः परि-कीर्त्तिताः" सा० द० । [तन्मार्गे स्त्री शब्दर०
रीतिक न०रीत्या पित्तलेन कायति कै-क । पुष्पाञ्जने राजनि०
रीतिपुष्प न० रीतेः पुष्पमिव । कुसुमाञ्जने अमरः ।
रीव ग्रहणे, संवरणे च भ्वा०उभ० सक० सेट् । रीवति ते अरीवीत् अरीविष्ट । ऋदित् चङि न ह्रस्वः ।
रु ध्वनौ अदा०पर०सक०सेट् । रौति-रवीति अरावीत्-अरा-वीत् । क्विपि नित्यं टीट् रुरावि । [ररविषे ।
रु वध-गत्योः च भ्वा० आ० सक० अनिट् । रवते अरोष्ट ।
रुक्प्रतिक्रिया स्त्री रुजः प्रतिक्रिया प्रतिकारः प्रति+कृ-भावे श कृत० । चिकित्सायाम् अमरः ।
रुक्म न० रुच्-मन् नि० कुत्वम् । १काञ्चने, २धत्तूरे; अमरः ३लौहे, मेदि० ४नागकेसरे च राजनि० ।
रुक्मकारक पु० रुक्मं तन्निमित्तभूषणं करोति कृ० ण्वुल् । स्वर्णकारे अमरः ।
रुक्मिन् त्रि० रुक्मं विद्यतेऽस्य इनि । १स्वर्णयुक्ते २भीष्मक-राजज्येष्ठपुत्रे पु०राजभेदे भाग०।०।५२ । ३रुक्मि-राजकन्यायां श्रीकृष्णपत्न्यां स्त्री ङीप् ।
रुक्ष त्रि०रुक्ष-रुष ।१अचिक्कणे २निःस्नेहे ३कठोरे च अमरः
रुग्ण त्रि०रुज-क्त । १रोगान्विते राजनि० २भग्ने च अमरः
रुच प्रीतौ प्रकाशे च भ्वा० आ० अक० सेट् । रोचते लुङि उ० अरुचत् अरोचिष्ट । एतद्योगे प्रीयमाणस्य सम्प्र-दानता "नारदाय रोचते कलहः" सि०कौ० ।
रुचक न० रुच-क्वुन् । १वर्त्तकाकारे, माङ्गल्ये २द्रव्ये, ३अश्वभूषणे, ४माल्ये ५सौवर्चले, ६उत्कटे त्रि० मेदि० ७आसादादरसे, शब्दच० ८रोचनायाम्, ९विडङ्गे न० हेमच० १०लवणे न० हारा० । ११बीजपूरे, १२दन्ते, १३निष्के पु० १४कपोते च पुंस्त्री०मेदि० स्त्रियां ङीष् । १५सर्पपालभेदे च ।
रुच्(चा) स्त्री रुच सम्प० क्विप् वा टाप् । १दीप्तौ, २शो-भायां, ३प्रकाशे, ४शारिकाख्यपक्षिणि च शब्दर० ।
रुचि(ची) स्त्री रुच-कि वा ङीप् । १अनुरागे २आसङ्गे ३स्पृहायाम् ४अभिलाषे ५किरणे अमरः । ६शोभायां मेदि० ७बुभुक्षायां हेमच० ८गोरोचनायां च राजनि० । ९प्रजापतिभेदे पु०मार्क०पु०।१०आलिङ्गनभेदे कामशास्त्रम् ।
रुचिर त्रि० रुचिं राति ददाति रा-क । १मनोहरे सुन्दरे १मधुरे च अमरः । २मूलके ३कुङ्कुमे ४लवङ्गे च न० ५गोरोचनायां स्त्री राजनि० ।
रुचिराञ्जन पु० अज्यतेऽनेन अन्ज-करणे ल्युट् रुचिरः शोभायुक्तोऽञ्जनः । शोभाञ्जने (सजिना) राजनि० ।
रुच्य त्रि०रुचये हितः यत् ।१सुन्दरे २रुचिकरे च अमरः । २सौवर्चले न० राजनि०। ३पत्यौ पु०हेमच०। ४कतकवृक्षे ५शालिधान्ये च पु० राजनि० ।
रुच्यकन्द पु० रुच्यः रुचिकरः कन्दो मूलमस्य । शूरणे (ओल) राजनि० । [निष्ठातस्य नः । रुग्णः ।
रुज भञ्जने तु०प०सक०अनिट् । रुजति अरौक्षीत् ओदित्
रुज हिंसायां चु० उभ०सक०सेट् । रोजयति ते अरूरुजत् त रोगकर्तृकस्यास्य योगे कर्मणि षष्ठी । रुजयति चौरस्य रोगः
रुज्(जा) स्त्री रुज-सम्प० क्विप् वा टाप् रुज-अङ् वा । १रोगे २भङ्गे मेदि० रुज-क । ३मेष्यां हेमच० । ४कुष्ठे च (कुड़) राजनि० । एतद्योगे कर्मषष्ठ्या न समासः ।
रुजाकर न० रुजां रोगं करोति कृ-अच् । १कर्मरङ्गफले (कामराङ्गा) शब्दच० २रोगकारके त्रि० । ३व्याधौ पु० हेमच० ।
रुट चौर्य्ये भ्वा० पर०सक०सेट् इदित् । रुण्टति अरुण्टीत् ।
रुट रोषे सक० दीप्तौ अक०चु० उभ० सेट् । रोटयति ते अरूरुटत् त ।

रुट दीप्तौ अक० प्रतिघाते सक० च भ्वा० आ० सेट् । रोटते लृदित् लुङि उभ० अरुटत् अरोटिष्ट रुरुटे ।

रुठ उपघाते भ्वा०पर०सक०सेट् । रोठति अरोठीत् ।

रुठ प्रतीघाते भ्वा० आ० सक० सेट् । रोठते लृदित् लुङि उभ० अरुठत् अरोठिष्ट रुरुठे ।

रुठि गतौ चौर्य्ये सक० मन्दीभावे खञ्जीभावे च अक० भ्वा० पर०सेट् इदित् । रुण्ठति अरुण्ठीत् । [कबन्धे जटा० ।

रुण्ड पु० रुठि–अच् पृषो० ठस्य डः । १मूर्द्धशून्यदेहे

रुत न० रु–क्त । रवे पशुपक्षिप्रभृतीनां शब्दे अमरः ।

रुद रोदने अश्रुविमोचने अदा० पर० अक० सेट् रुदा०सार्व-धातुके इडादौ इट् रोदिति इरित् अरुदत् अरोदीत् ।

रुदादि पु० सार्वधातुके इडादौ इड्निमित्ते शब्दगणे स च गणः "रोदितिः स्वपितिश्चैव श्वसितिः प्राणितिस्तथा । जक्षितिश्चैव विज्ञेयो रुदादिः पञ्चको गणः" ।

रुदन्ति(न्ती)का स्त्री रुद–शतृ गौरा०ङीष् । संज्ञायां कन् वा । क्षुद्रक्षुपभेदे राजनि० "चणपत्रसमं पत्रं क्षुपश्चैव तथाकृतिः । शिशिरे जलबिन्दूनां स्रवन्तीति रुदन्तिका । रुदन्ती वह्निकृद्वश्या पित्तघ्नी च रसायनी" राजव० ।

रुदित न० रुद–भावे क्त । १क्रन्दने अमरः । कर्त्तरि क्त । २कृतरोदने त्रि० । रोधे च ।

रुद्ध त्रि० रुध–क्त । आवरणादिना वेष्टिते अमरः २कृतगति-

रुद्र पु० रोदिति रुद–रक् । १शिवमूर्त्तिभेदे "सोऽरोदीत् यद-रोदीत् तत् रुद्रस्य रुद्रत्वम्" श्रुत्युक्ते २वह्नौ च । "अजैक-पादहिर्बुध्नो विरूपाक्षः सुरेश्वरः । जयन्तो बहुरूपश्च त्र्यम्बकोऽप्यपराजितः । वैवस्वतश्च सावित्रो हरो रुद्रा इति स्मृताः" ३रुद्रसूक्तेषु एकादशसु शिवमूर्त्तिभेदेषु च०स० यजु०१६अ०उक्तेषु "नमस्ते! रुद्र मन्यवे" इत्यादिषु ४रुद्र-गणाय च । ५एकादशसंख्यायाम् ६आर्द्रानक्षत्रे च ।

रुद्रचण्डी स्त्री रुद्रयामलोक्ते देवीमाहात्म्यप्रतिपादकग्रन्थे

रुद्रज पु० रुद्रात् जायते जन–ड । १शिववीर्य्यजाते पारदे राजनि० २कार्त्तिकादौ च ।

रुद्रजटा स्त्री रुद्रस्य जटेव पिङ्गत्वात् जटिलत्वाच्च । १ख्या-नामख्याते लताभेदे राजनि० "कटू रुद्रजटा श्वासकास-हृद्रोगनाशिनी । भूतरक्षोनाशिनी च" रुद्रलताप्यत्र ।

रुद्रपत्नी स्त्री ६त० । १दुर्गायाम् २अतस्याञ्च (मसिना) रत्नमा० ।

रुद्रप्रिया स्त्री ६त० १हरीतक्याम् २दुर्गायाञ्च शब्दर० ।

रुद्रविंशति स्त्री रुद्रस्वामिका विंशतिः । प्रभवादिषु षष्टिवर्षेषु अन्तिमेषु विंशतिवर्षेषु । प्रभवादिशब्दे ४४७२ पृ० दृश्यम् ।

रुद्रसावर्णि पु० चतुर्दशसु मनुषु द्वादशे मनौ मार्क० पु० ।

रुद्राक्रीड़ न० रुद्रस्याक्रीडा यत्र । श्मशाने त्रिका० ।

रुद्राक्ष पु० रुद्रस्याक्षि कारणत्वेनास्त्यस्य अच् । स्वनामख्याते वृक्षे तन्माहात्म्यादि नि०सि० उक्तं यथा

लैङ्गे "विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया । पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः । तस्मान्मृदापि कर्त्तव्य ललाटे वै त्रिपुण्ड्रकम्" रुद्राक्ष-विशेषाः शिवरहस्ये "एकवक्त्रः, शिवः साक्षाद् ब्रह्म-हत्यां व्यपोहति । अवध्यत्वं प्रतिस्रोतो वह्निस्तम्भं करोति च । द्विवक्त्रो२ हरगौरी स्याद् गोवधाद्यघनाश-कृत् । त्रिवक्त्रो३ ह्यग्निजन्माथ पापराशिं प्रणाशयेत् । चतुर्वक्त्रः४ स्वयं ब्रह्मा नरहत्यां व्यपोहति । पञ्चवक्त्र५स्तु कालाग्निरगम्याभक्ष्यपापहृत् । षड्वक्त्र६स्तु गुहो ज्ञेयो भ्रूणहत्यादि नाशयेत् । सप्तवक्त्र७स्त्वनन्तः स्यात् स्वर्ण-स्तेयादिपापहृत् । विनायकोऽष्टवक्त्रः८ स्यात् सर्वानृत-विनाशकृत् । भैरवो नववक्त्र९स्तु शिवसायुज्यकारकः । दशवक्त्रः१० स्मृतो विष्णुर्भूतप्रेतभयापहः । एकादशमुखो ११रुद्रो नानायज्ञफलप्रदः । द्वादशास्य१२स्तथादित्यः सर्वरोगनिबर्हणः । त्रयोदशमुखः १३ कामः सर्वकाम-फलप्रदः । चतुर्दशास्यः१४ श्रीकण्ठो वंशोद्धारकरः परः" इति । तथा "विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः । स याति नरकान् घोरान् यावदिन्द्राश्चतु-र्दश । पञ्चामृतं पञ्चगव्यं स्नानकाले प्रयोजयेत् । रु-द्राक्षस्य प्रतिष्ठायां मन्त्रं पञ्चाक्षरं तथा । त्र्यम्ब-कादिमन्त्रं च तथा तत्र प्रयोजयेत्" तथा "अष्टोत्तरशतं धार्य्यं चतुःपञ्चाशदेव वा । सप्तविंशतिमाला वा ततो हीनाधमा स्मृता" । प्रजापतिः "मोक्षार्थी पञ्चविंशत्या धनार्थी त्रिंशता जपेत् । पुष्ट्यर्थी पञ्चत्रिंशत्या पञ्च-दशाभिचारके । सप्तविंशतिरुद्राक्षमालया देहसं-स्थया । यत् करोति नरः पुण्यं सर्वं कोटिगुणं भवेत् । यो ददाति द्विजेभ्यश्च रुद्राक्षं भुवि सम्मुखम् । तस्य प्रीतो भवेद्रुद्रः स्वपदं च प्रयच्छति" । पदार्थादर्शे वोपदेवः "रुद्राक्षान् कण्ठदेशे दशन३२परिमितान् मस्तके विंशती द्वे ४० षट् षट् कर्णप्रदेशे करयुगलकृता द्वादशद्वादशैव । बाह्वोरिन्दोः१६कलाभिर्नयनयुगकृतयुग्मं त्वेकमेकं शिखायां वक्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकण्ठः" ।

रुद्राणी स्त्री रुद्रस्य पत्नी रुद्र+ङीप् आनुक् च। शिवपत्न्याम् दुर्गायाम् अमरः।

रुद्रारि पु० रुद्रः अरिर्यस्य। कामदेवे। [च

रुद्रावास पु० ६त०। १कैलासे २काशीग्रामे काशीख०। ३श्मशाने

रुध कामे दि०आ०सक०अनिट प्रायेणानुपूर्वः। अनुरुध्यते अन्वरुद्ध। [अरुधत् अरौत्सीत्

रुध आवरणे रु० उभ०द्वि० अनिट्। रुणद्धि रुन्धे इरित्

रुधिर न० रुध-किरच्। शरीरस्थे रसपाकजन्ये १धातुभेदे २कुङ्कुमे अमरः। ३मङ्गलग्रहे ४रक्तवर्णे च पु० मेदि० ५तद्वर्णवति त्रि०। ६मणिभेदे न०। तदुद्भवादि यथा "हुतभुग्रूपमादाय दानवस्य यथेप्सितम्। नर्मदायां निचिक्षेप किञ्चिल्लीनादि भूतले। तत्रेन्द्रगोपकलितं शुकरक्तवर्णं संस्थानतः प्रकटपीलुसमानमात्रम्। नानाप्रकारविहितं रुधिराख्यरत्नमुद्भूय तस्य खलु सर्वसमानमेव। मध्यं तु पाण्डुरमतीव विशुद्धवर्णं तच्चेन्द्रनीलसदृशं पटलं तवे स्यात्। ऐश्वर्यभृत्यजननं कथितं तदेव पक्वञ्च तत् किल भवेत् कुरुविन्दजन्यम्" गरु०पु०७८अ०।

रुप आकुलीकरणे दि०पर सक० सेट्। रुप्यति इरित् अरुपत् अरोपीत्।

रुमण्वत् पु० लवण+अस्त्यर्थे मतुप् मस्य वः आसन्दीवदित्यादिना नि०। लवणाकरे पर्वतभेदे हि०को०।

रुमा स्त्री रु-मक्। १सुग्रीववानरभार्य्यायाम् २लवणस्थाने देशभेदे च मेदि०

रुरु पु० रु-क्रु। मृगभेदे अमरः।

रुबु पु० रु-बु। १एरण्डवृक्षे रत्नमा० स्वार्थे क। २रक्तैरण्डे पु० राजनि० रु-उकक्। रुबुकोऽप्यत्र।

रुश हिंसायां तु०पर०सक०अनिट्। रुशति अरुक्षत्।

रुष वधे भ्वा०पर०सक०सेट्। रोषति अरोषीत्।

रुष क्रोधे दि०पर०अक०सेट्। रुष्यति इरित् अरुषत् अरोषीत्

रुष क्रोधे चु०उभ०अक०सेट्। रोषयति ते अरूरुषत् त।

रुष(षा) स्त्री रुष-सम्प० क्विप् वा टाप्। क्रोधे हेमच०।

रुषित त्रि० रुष-क्त वा इट्। क्रोधयुक्ते इडभावपक्षे रुष्टोऽप्यत्र [रोहः रुहः।

रुह उद्भवे भ्वा०पर०अक०अनिट। रोहति अरुक्षत्। उभया०

रुह त्रि० रुह-क। १जाते २दूर्वायां स्त्री अमरः उत्तरपदस्थः तत्प्रादुर्भूते त्रि० यथा भूरुहः वारिरुहम्।

रूक्ष पारुष्ये कठोरतायाम् निःस्नेहे च अद० चु०उभ०अक० सेट्। रूक्षयति ते अरुरूक्षत् त।

रूक्ष त्रि० रूक्ष-अच्। १अचिक्कणे २स्नेहशून्ये च ३वृक्षे पु० हेमच०। ४दन्तीवृक्षे स्त्री राजनि०।

रूक्षगन्ध पु० रूक्षो गन्धो यस्य। गुग्गुलौ राजनि०।

रूक्षदर्भ पु० नित्यकर्म०। खरदर्भे कुशभेदे राजनि०।

रूक्षपत्र पु० रूक्षं पत्रमस्य। शाखोटकवृक्षे राजनि०।

रूक्षप्रिय पु० रूक्षं प्रीणाति प्री-क। रूक्षभोजके राजनि०।

रूढ त्रि० रुह-क्त। १जाते, २प्रसिद्धे च मेदि०। रूढिरस्त्यस्य अच्। प्रकृतिप्रत्ययार्थमनपेक्ष्य समुदायशक्त्यार्थबोधके ३शब्दे। यथा घटः गौरित्यादि। शब्दश० प्र०

रूढि स्त्री रुह-क्तिन्। १जन्मनि, २प्रसिद्धौ, प्रकृतिप्रत्ययार्थमनपेक्ष्य शब्देन समुदायशक्त्यार्थस्य ३बोधने ४शब्दशक्तिभेदे च "शब्दात्मिका सती रूढिर्भवेद्योगापहारिणी। कल्पनीया तु लभते नात्मानं योगबाधतः" कुमारभट्टः। शब्दात्मिका क्लृप्ता शक्तिर्योगबाधिका, कल्पनीया तु योगबाध्या" इत्यर्थः।

रूप रूपान्वितकरणे चुरा० उभ० सक० सेट्। रूपयति ते अरुरूपत् त। नि+प्रमाणोपन्यासेन स्वरूपादिकथने।

रूप न० रूप-क भावे अच् वा। १स्वभावे, २सौन्दर्ये, ३पशौ, ४नाम्नि, ५शब्दे, ६ग्रन्थावृत्तौ, ७दृश्यकाव्ये नाटकादौ ८श्लोके ९आकारे च मेदि०। शब्दधातूनां विभक्तियोगेन १०निष्पन्नशब्दे, ११शुक्लादिवर्णे च १२तद्वति त्रि०। उत्तरपदस्थः सदृशार्थे त्रि० यथा पितृरूपस्तनयः मातृरूपा कन्या। १३एकसंख्यान्विते न० "रूपं भजेत् स्यात् परिपूर्त्तिकालः" लीलावती। "रूपाण्यङ्कं शोधयेदन्यपक्षात् रूपाण्यन्यस्येतरस्माच्च पक्षादिति" बीजगणितोक्तेः १४अव्यक्तराशिवर्णरहितव्यक्तसंख्यान्विते च। आकारवर्णरूपस्य षोडश भेदाः तत्र परिमाणकृता रूपाकारस्य ह्रस्वदीर्घचतुरस्रवृत्तेति पञ्च भेदाः। वर्णस्य शुक्लकृष्णनीलपीतरक्तहरितेति षड् भेदाः स्पर्शकृताः आकारभेदाः कठिनचिक्कणश्लक्ष्णपिच्छिलमृदुदारुणेति षड् भेदाः इति षोडशविधा भा० शा० उक्ताः। वैशेषिकमते "चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम्। चक्षुषः सहकारि स्यात् शुक्लादिकमनेकधा" भाषा०। तच्च उद्भूतानुद्भूतभेदेन द्विविधम् "उद्भूतरूपं नयनस्य गोचरः" भाषोक्तेः उद्भूतरूपस्यैव प्रत्यक्षविषयता न परमाण्वादिगतानुद्भूतस्य। तच्च पृथिव्यप्तेजसां गुणः "रूपद्रवत्वप्रत्यक्षयोगि स्यात् प्रथमं त्रिकम्" भाषा०उक्तेः। सौन्दर्यरूपस्य लक्षणमुज्ज्वलमणावुक्तं यथा "अङ्गान्यभूषितान्येव केनचित् भूषणा-

दिना। येन भूषितवद्भाति तद्रूपमिति कथ्यते"।

रूपक न० रूपयति रूप-ण्वुल्। १अभिनयप्रदर्शके दृश्यकाव्यभेदे, "रूपारोपात्तु रूपकम्" तद्दृश्यं काव्यं नटैरामादिस्वरूपारोपात् रूपकमित्युच्यते" सा०द०। तच्च दशविधम् "नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः। ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश" सा०द०। दशरूपकग्रन्थेऽस्य विवृतिः। रूपमस्त्यस्य कन्। २मूर्त्ते त्रि० मेदि० रूप+स्वार्थे क। ३पशुादि वर्णे, ४आकारे च ५अर्थालङ्कारभेदे, सा०द० अलङ्कारशब्दे ४०२पृ० दृश्यम्। ६गुञ्जात्रयपरिमाणे "षड्यावी प्रोच्यते गुञ्जा तास्तिस्रो रूपकं भवेत्" शुक्रनी०।

रूपतन्मात्र न० सांख्यमतादिप्रसिद्धे तेजःपदार्थारम्भके सूक्ष्मभूतभेदे तन्मात्रशब्दे ३२२६ पृ० दृश्यः।

रूपधारिन् त्रि० रूपं धारयति धारि-णिनि। १रूपवति, २सौन्दर्यान्विते, ३वेशान्तरग्राहिणि नटे च।

रूपवत् त्रि० रूप+अस्त्यर्थे मतुप् मस्य वः। १शुक्लादिरूपविशिष्टे, २सौन्दर्ययुक्ते ३आकारविशिष्टे च।

रूपाजीवा स्त्री रूपं सौन्दर्यमाजीवो जीविका यस्याः। वेश्यायाम् अमरः।

रूपिका स्त्री रूपमस्त्यस्य ठन्। श्वेतार्कवृक्षे रत्नमा०।

रूप्य न० रूपाय आहन्यते स्वर्णादि यत्। अलङ्कारादिनिर्माणाय आहन्यमाने १स्वर्णे २रजते च अमरः। स्वार्थे यत्। ३रजतमात्रे रजतशब्दे ४७८८ पृ० दृश्यम्। ४सुन्दरे त्रि० मेदि०।

रूप्याध्यक्ष पु० रूप्येषु अध्यक्षः। कोषाध्यक्षे अमरः।

रूष भूषादिना चित्रीकरणे अद०चु०उभ०सक० सेट्। रूषयति ते अरुरूषत् त।

रूषक पु० रूष-ण्वुल्। १वासके वृक्षे जटा०। २भिन्नी- [सारके त्रि०।

रूषित त्रि० रूष-क्त। १भूषणादिभिर्भूषिते, २अचिक्कणोलते च अमरः।

रे अव्य० रा-डे। नीचादेः सम्बोधने हेमच०।

रैक शङ्कायां भ्वा० आ० स० सेट्। रेकते अरेकिष्ट। ऋदित् चङि न ह्रस्वः।

रेक पु० रिच-घञ्। १विरेचने। रेक-अच्। २शङ्कायां, ३नीचे मेदि० ४भेके पुंस्त्री० शब्दर०। स्त्रियां ङीष्। रेक-भावे घ। ५सन्देहे स्त्री शब्दच० टाप्।

रेकणस् न० रिच-असुन् नुम् तेन कुत्वं नुट्। धने निघ०।

रेखा स्त्री लिख-अच् लस्य रः। १लेखे, २लवे, ३आभोगे, बिन्दुपुञ्जकृते दण्डाकारे ४चिह्नभेदे (दाग्) (कषा) विश्वः। ५सुमेरुलङ्कयोर्मध्यस्थस्थलगतस्थलभेदे च।

रेखागणित न० रेखायाः गणनं प्रमाणस्वरूपादि यत्र। जगन्नाथपण्डितकृते गणितग्रन्थभेदे क्षेत्रशब्दे तत्परिभाषादिकं २३८९ पृ० उक्तम्।

रेखापुर न० भुवो मध्यस्थलस्थः पुरम्। "राक्षसालयदेवौकःशैलयोर्मध्यसूत्रगाः। रोहितकमवन्ती च तथा सन्निहितं सरः" सू०सि० उक्ते पुरे। "राक्षसालयं लङ्का देवानां ओकःरूपः पर्वतो मेरुः तयोर्मध्ये ऋजुसूत्रं तत्र स्थिता देशा रेखाख्याः लङ्काटक्षिणस्थलस्यास्तनुपयुक्तास्तत्र मनुष्यागोचरत्वादिति नोक्ताः। ग्रामनामान्युदाहरति। रोहीतकमिति। यथा रोहीतकं नगरमवन्त्युज्जयिनी सन्निहितं सरः कुरुक्षेत्रम्। चकारादन्येऽपि नगराणि परस्परं सन्निहिततया ज्ञेयानि" रङ्ग०।

रेचक न० रेचयति रिच-णिच्-ण्वुल्। १कङ्कुष्ठे राजनि० २यवक्षारे, पु० त्रिका०। ३जयपाले, ४तिलकवृक्षे पु० राजनि०। ५पुरीषनिःसारके त्रि०। कोष्ठगतजलनिःसारयन्त्रे न० (पिचकिरी) राजनि०। ५कोष्ठस्थवायोर्निःसारके व्यापारभेदे कुम्भकशब्दे २११४ पृ० दृश्यम्।

रेचन न० रिच्-ल्युट्। १मलभेदनेन तन्निःसारणे। २कोष्ठात् वायोर्नासिकया निःसारणे च।

रेचनक पु० रिच्यतेऽनेन ल्युट् संज्ञायां कन्। १काम्पिल्लवृक्षे। करणे वा ङीप्। रेचनी तत्रार्थे शब्दर०। २दन्तीवृक्षे ३कालाञ्जन्यां राजनि०। ४श्वेतत्रिवृतायाम् स्त्री मेदि० टाप्। ५काम्पिल्लवृक्षे स्त्री शब्दर०।

रेची स्त्री रेचयति अच् गौ० ङीष्। १काम्पिल्लवृक्षे २अङ्कोठे च राजनि०।

रेज दीप्तौ भ्वा० आत्म० अक० सेट्। रेजते अरेजिष्ट। ऋ- [दित् चङि न ह्रस्वः।

रेजते स्त्री रज+अते। उत्तरस्यां दिशि निघण्टुः।

रेट याचने वाचि च द्वि० भ्वा० उभ० सेट्। रेटति ते अरेटीत् अरेटिष्ट। ऋदित् चङि न ह्रस्वः।

रेणु पुंस्त्री० री-णु। १परागे २धूलौ च अमरः। ३रेणुकायां स्त्री ४पर्पटे पु०। ५गांशी च राजनि०।

रेणुका स्त्री रेणुना कायति कै-क। मरिचाकृतौ १गन्धद्रव्ये अमरः "रेणुका कटुका पाके तिक्तानुष्णा कटुः कटुः। पित्तला दीपनी मेध्या पाचनी गर्भपातिनी। बलासवातश्लेष्मघ्नी तृट्कण्डूविषदाहहृत्" भावप्र०। २जमदग्निपत्न्यां ३परशुराममातरि च।

रेणुकासुत पु० ६त० । परशुरामे रेणुकात्मजादयोऽप्यत्र ।
रेणुरूषित पु० रेणुभिः रूषितः । १गर्द्दभे त्रिका० स्त्रियां ङीप् । २धूलिधूसरे त्रि० ।
रेणुसार पु० रेणुरिव सारोऽस्य । १कर्पूरे त्रिका० । कप् । तत्रैवार्थे । [भावप्र० ।
रेतजा स्त्री रेत इव जायते जन–ड गृणो० । बालुकायां
रेतस् न० री–असुन् तुट् च । पुंसो रक्तादिपरिपाकजन्ये देहस्थे मज्जोद्भवे चरमधातौ १शुक्रे शिववीर्य्ये २पारदे च मेदि० । [मेदि० ।
रेत्र न० री–त्र । १रेतसि २पीयूषे ३पटवासे ४सूतके च
रेप शब्दे अक० गतौ सक० भ्वा० आत्म० सेट् । रेपते अरेपिष्ट ऋदित् चङि न ह्रस्वः ।
रेप त्रि० रेप–अच् । १निन्दिते २क्रूरे ३कृपणे च मेदि० ।
रेफ पु० र+इफ । १रकारात्मके वर्णे । रिफ–अच् । २कुत्सिते त्रि० अमरः । [४कृपणे च शब्दर० ।
रेफस् त्रि० रेप–असुन् पस्य फः । १क्रूरे २अधमे, ३दुष्टे
रेब(व) गतौ सक० प्लुतौ अक० भ्वा० आ० सेट् । रेब(व)ते अरेबि(वि)ष्ट । ऋदित् चङि न ह्रस्वः ।
रेभ शब्दे भ्वा०आत्म०अक०सेट् । रेभते अरेभिष्ट । ऋदित् चङि न ह्रस्वः । [२बलरामश्वशुरे राजभेदे हरिवं० ।
रेवत पु० रेव–अतच् । १जम्बीरे जटा० २आरग्वधे शब्दच०
रेवती स्त्री रेवतस्यापत्यमण् रेवत्यादीति निर्देशात् न वृद्धिः । १रेवतराजकन्यायां बलदेवपत्न्याम् । रेव–अतच् गौ० ङीप् । अश्विन्यवधितः सप्तविंशतिसंख्याते २नक्षत्रे, ३तत्संख्यायां, ४मातृकाभेदे मेदि० ५स्त्रीगव्याम् अजयपा० ६नदीभेदे, ७दुर्गायाञ्च देवीपु० । ८रेवतीपदघटितायाम् ऋचि च "एतस्यैव रेवतीषु वारवन्तीयम्" श्रुतिः । ९पशुमनुपत्न्याम् । [३६२१पृ० दृश्यम् ।
रेवतीभव पु० ७त० । शनैश्चरे हेमच० । भगदैवतशब्दे
रेवतीरमण पु० रेवतीं रमयति रम–णिच् ल्यु । बलरामे । ६त० । रेवतीशादयोऽप्यत्र । [श्रुतौ दृश्यम् ।
रेवत्यादि पु० अपत्यार्थे ठक्प्रत्ययनिमित्ते शब्दगणे । पा०ग०
रेवन्त पु० रेव–झच् । १गुह्यकाधिपतौ २सूर्य्यपुत्रभेदे च वह्निपु० ।
रेवा स्त्री रेव–अच् । १नर्मदाख्यनद्याम् अमरः । २कामपत्न्यां ३नीलीवृक्षे च मेदि० ४दुर्गायां देवीपु० ।
रेष हेषायां (घोटकशब्दे) भ्वा० आत्म० अक० सेट् । रेषते अरेषिष्ट । ऋदित् चङि न ह्रस्वः ।
रै शब्दे भ्वा० पर० अक० अनिट् । रायति अरासीत् ।

रै पु० रा–डै । १धने २स्वर्णे अमरः । ३शब्दे शब्दर० अस्य हलादौ सुपि आत्वम् राभ्यामित्यादि । [धात्वादौ ।
रैत्य त्रि० रीतेः पित्तलस्य विकारः रीति+ष्यञ् । पित्तलमये
रैवत पु० रेवत्या नद्या अदूरो देशः अण् । द्वारिकासमीपस्थे १पर्वतभेदे २स्वर्णालुके, ३शिवे मेदि० । ४दैत्यभेदे धरणिः । रेवत्यां भवः अण् । ५चतुर्दशसु मनुषु पञ्चमे मनुभेदे । [illegible] च । [रैवतकक्षे न० राजनि० ।
रैवतक पु० रैवत एव स्वार्थे क । १रैवतपर्वते हेमच० २पा-
रोक न० रु–कन् तस्य नेत्त्वम् । १छिद्रे अमरः "तन्त्रे रोकं च योवक्ष्येति" ति०त० । २नौकायाम् ३चले त्रि० मेदि० रुच–घञ् नि० कुत्वम् । क्रयकाले मूल्यदानेन क्रयात्मके ४क्रयभेदे ५दीप्तौ च पु० मेदि० ।
रोग पु० रुज–घञ् । १धातुवैषम्यजाते व्याधौ राजनि० २कुष्ठौषधे च (कुड़) मेदि० । [च २रोगनाशके त्रि० ।
रोगघ्न न० रोगं हन्ति हन–टक् । १औषधे, २वैद्यकशास्त्रे
रोगराज पु० ६त० टच् समा० । राजयक्ष्मव्याधौ राजनि० ।
रोगलक्षण न० रोगो लक्ष्यते ज्ञायतेऽनेन लक्ष–करणे ल्युट् । रोगज्ञापके धातुवैषम्यद्योतके चिह्नभेदे निदाने राजनि० "रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता । रोगा दुःखस्य दातारो ज्वरप्रभृतयो हि ते । ते च स्वाभाविकाः केचित्केचिदागन्तवः स्मृताः । मानसाः केचिदाख्याताः कथिताः केऽपि कायिकाः । तत्र स्वाभाविकाः शरीरस्वभावादेव जाताः क्षुत्पिपासानिद्राजरामृत्युप्रभृतयः अथ वा स्वभावादुत्पत्तेर्जाताः स्वाभाविकाः सहजा इति यावत् । ते च जन्मान्धत्वादयः । आगन्तवोऽभिघातादिजनिताः । अथ वा जन्मोत्तरभाविनः कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यशोकविषादेर्ष्यासूयामात्सर्य्यप्रभृतयः । अथ वा उन्मादापस्मारमूर्च्छाभ्रममोहतमःसंन्यासप्रभृतयः । कायिकाः पाण्डुरोगप्रभृतयः "कर्म्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे । कर्म्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः स्मृताः" । तत्र कर्म्मजा व्याधयः यत्प्राक्तनन्दुष्कर्म्म प्रबलन्तदुपभोगनाश्यम् प्रायश्चित्तनाश्यं वा ततो जाताः यत्तु दुष्टवातादिदोषेण जनितास्तथा "यथाशास्त्रन्तु निर्णीतो यथाव्याधि चिकित्सितः । न शमं याति यो व्याधिः स ज्ञेयः कर्म्मजो बुधैः" । दोषजाः । मिथ्याहारविहारप्रकुपितवातपित्तकफजाः । ननु मिथ्याहारविहारयोरपि प्राक्तनदुष्कृतेन [illegible]

एव। ततो दोषजेष्वपि प्राक्तनं दुष्कर्मैव कारणम् तत् कथं दोषजा इत्युच्यते। दोषजेष्वपि वस्तुतः व्याधिकारणं दुष्कर्म वर्त्तत एव किन्तु तत्र मिथ्याहारविहारदूषिता दोषा हेतवो दृश्यन्त इति दोषजा इत्युच्यन्त इति समाधिः। कर्मदोषोद्भवाः "स्वल्पदोषा गरीयांसोऽधर्मास्ते कर्मदोषजाः"। अत्र कारणं दुष्कर्म प्रबलं यतो दोषाल्पत्वेऽपि व्याधेर्गरीयस्त्वं तत्कर्मक्षयादेव क्षीणं भवति। दोषाः स्वल्पा अपि निदानत्वेनोक्ता दृश्यन्त एवेति दोषाणां कारणता मन्यन्त इति। "कर्मक्षयात् कर्मजता दोषजाः स्वस्वभेषजैः। कर्मदोषोद्भवा यान्ति कर्मदोषक्षये क्षयम्"। दोषजाः स्वस्वभेषजैरिति दोषसंम्यादिकारणं दुष्कर्म तद्भेषजानां द्रव्यव्ययादिजनितदुःखभोगेन कटुतिक्तकषायाद्युद्वेगभक्षणादिजनितदुःखभोगेन च क्षयं यान्ति। येषां दुष्टा हेतवो दोषास्ते स्वस्वभेषजैः क्षयं यान्तीत्यर्थः। "साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः स्मृताः। सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते"। याप्यलक्षणाद्य 'यापनीयन्तु हत्तायां वद्यो यश्च क्रियश्यति। प्राप्ताःक्रिया धारयति हृद्धिनं याप्यमातुरम्। प्रपतिष्यदिवागार स्तम्भो यत्नेन योजितः। साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा। घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम्"। अक्रियावतां चिकित्सारहितानाम्। अस्योपद्रवस्य लक्षणम्। "रोगारम्भकदोषस्य प्रकोपादुपजायते। योऽन्यो विकारः स बुधैरुपद्रव इहोदितः"।

रोगशिला स्त्री रोगाय तच्छित्तये शिला। मनःशिलायाम् राजनि०। [क्विप् रोगहन्। रोगहन्तरि-वैद्यादौ त्रि०।

रोगह न० रोगं हन्ति हन-ड। १औषधे शब्दच०। हन-

रोगहर त्रि० रोगं हरति हृ-अच्। व्याधिनाशके द्रव्यादौ तत्र हन्तृत्वादौ लक्षणम्।

रोगहारिन् पु० रोगं हरति हृ-णिनि। १चिकित्सके अमरः। २रोगनाशके त्रि०।

रोगितरु पु० रोगिप्रियस्तरुः शाक०। अशोकवृक्षे राजनि०।

रोगिन् त्रि० रोग+अस्त्यर्थे इनि रुज-घिनुण् वा। व्याधियुक्ते राजनि० स्त्रियां ङीप्।

रोचक त्रि० १रुचिकारके। २क्षुधायां हेमच०। ३कदल्यां शब्द०। ४राजपलाण्डौ ५अवदंशे (चाटनि) च राजनि० ६कर्मिणि कर्मभेदे शिल्पः।

रोचन पु० रुच-ल्यु रोचयति वा ल्यु। १कूटशाल्मलिवृक्षे २श्वेतशोभाञ्जने, ३पलाण्डौ ४दाडिमे च राजनि० ५करञ्जे, ६अङ्कोठे, ७आरग्वधे च मेदि० ८उत्तमायां नार्यां ९रक्तकह्लारे स्त्री मेदि० टाप्। ११रुचिकारके त्रि०।

रोचनक पु० रोचनाय रुचिजननाय कायति कै-क। जम्बीरे राजनि०। [जम्बीरभेदे २चिर्भट्यां स्त्री राजनि०

रोचनफल पु० रोचनं रुचिकरं फलमस्य। १बीजपूरके अ-

रोचनी स्त्री रोचयतीति कर्त्तरि ल्युट् गौरा० ङीष्। १मनःशिलायाम् हेमच० २गोरोचनायां ३आमलक्याम, राजनि० ४श्वेतत्रिवृति, ५गन्धद्रव्यभेदे च (गुडारोचना) अमरः। [२रुचियुक्ते त्रि०।

रोचमान पु० रुच-शानच्। १अश्वग्रीवास्थरोमावर्त्ते त्रिका०।

रोचिष्णु त्रि० रुच-इष्णुच्। १दीप्तिशीले २रुचिशीले च।

रोचिस् न० रुच-इसुन्। प्रभायाम् अमरः।

रोची स्त्री रोचयति रुच्-णिच्-अच् गौरा० ङीष्। हिलमोचिकायाम् शब्दर०।

रोटिका स्त्री रुट-ण्वुल्। गोधूमादिचूर्णनिर्मिते पिष्टकभेदे (रुटी) भावप्र० कृतान्नवर्गे २१८१ पृ० दृश्याम्।

रोड अनादरे भ्वा०पर०सक०सेट्। रोडति अरोडीत् रुरोड ऋदित् चङि न ह्रस्वः।

रोदन न० रुद-ल्युट्। १क्रन्दने २अश्रुणि मेदि०। करणे ल्युट् ङीप्। ३दुरालभायाम् अमरः। संज्ञायां कन् अत इत्वम्। रोदनिका ४यवासायाम् अमरः।

रोदस् न० रुद-असुन्। १स्वर्गे २भूमौ च अमरः। गौरा० ङीष् रोदसीत्यप्यत्र। २द्यावाभूम्योः स्त्री द्वि०व० अमरः। ३पृथिव्यां निघण्टुः। [भरतः।

रोध पु० रुध-घञ्। १रोधने २आवरणे च ३नदीतीरे

रोधन त्रि० रुणद्धि रुध-ल्यु। १रोधकर्त्तरि। भावे ल्युट्। २प्रतिबन्धे न०।

रोधस् न० रुध-असुन्। नद्यादिकूले अमरः।

रोधवक्रा स्त्री रोधेन तीरेण वक्रा। नद्यां निघण्टुः। रोधोवक्राऽप्यत्र त्रिका०।

रोध्र न० रुध-रन्। १पापे २अपराधे ३लोध्रवृक्षे पु० मेदि०।

रोध्रपुष्प पु० रोध्रस्य लोध्रस्येव पुष्पमस्य। मधूकवृक्षे (मौल) राजनि०। [धातकीवृक्षे (धाइफुल) राजनि०।

रोध्रपुष्पिणी स्त्री रोध्र इव पुष्प्यति पुष्प विकासे णिनि।

रोप पु० रुह-णिच्-हस्य पः कर्मणि अच्। १बाणे अमरः भावे अच्। २रोपणे धान्यादेर्ज्जननाय ३अङ्कुरारोपणे च मेदि० ४छिद्रे न० शब्दच०।

रोपण न० रुह–णिच्–हस्य पः ल्युट्। १जनने २अञ्जनभेदे रुप-ल्युट्। ३विमोहने ४अन्यथाभूतस्य वस्तुनोऽन्यथा ज्ञाने। अञ्जनभेदप्रकारादि भावप्र० उक्तं यथा "त्रिफलायाः रसकं पिष्ट्वा सम्यक् संप्लाव्य वारिणा। स्वच्छोदकं ततः कालं सर्वं त्यजेदूर्द्ध्वमधोगतम्। शुष्कस्य तस्य सर्वं पर्पटीसन्निभं भवेत्। विचूर्ण्य भावयेत् सम्यक् त्रिवेलं त्रिफलारसैः। कर्पूरस्य रसं तत्र दशमांशेन निक्षिपेत्। अञ्जयेन्नयने तेन नेत्राखिलगदच्छिदः"।

रोपणीवर्त्ति स्त्री नेत्राञ्जनवटीभेदे भावप्र० तत्प्रकार उक्तो यथा "अशीतिस्तिलपुष्पाणि षष्टिः पिप्पलितण्डुलाः। जातीपुष्पाणि पञ्चाशन्मरिचानि च षोडश। सूक्ष्मं पिष्ट्वाम्बुना वर्त्तिः कृता कुसुमिकाभिधा। तिमिरार्जुनशुक्राणां नाशिनी मांसवृद्धिनुत्। एतस्या अञ्जने प्रोक्ता मात्रा वह्नचतुरेणुका"। (कुसुमिका वटी)।

रोपित त्रि० रुह-णिच्-हस्य पः क्त। १वृक्षादेर्जननाय कृताङ्कुरारोपणे अन्यत्राश्रिते अन्यरूपेण निर्दिष्टे यथा मुखं चन्द्र इत्यादौ मुखस्य चन्द्ररूपेण निर्देशः।

रोमक न० रोमेव निविडं कायति कै-क। (रुम) १नगरे सु०सि०। २पांशुलवणे ३अयस्कान्ते च राजनि०।

रोमकन्द पु० रोमभिर्युक्तः कन्दो मूलमस्य। पिण्डालौ राजनि०।

रोमकपत्तन न० कर्म०। (रुम) नगरभेदे सू०सि०।

रोमकूप पु० रोम्णां कूप इव। रोमाधारे विवरे "न रोमकूपौघमिषाज्जगत्कृता" नैषधम्।

रोमकेसर न० रोमभिः केसरः सिंहघटेव। चामरे त्रिका०

रोमगुच्छ न० रोमभिर्गुच्छं स्तबकमिव। रोमसमुदायात्मके चामरे स्वार्थे क। अत्रैवार्थे हेमच०।

रोमन् न० रु-मनिन्। देहजाते अङ्कुराकारे केशतुल्ये पदार्थे (रोयाँ) अमरः।

रोमन्थ पु० रोमं मथ्नाति मन्थ-अण् पृषो० नलोपः। भुक्तस्य घासादेः पशुभिरुद्गीर्य्य चर्वणे। रोमन्थमभ्यस्यति क्यङ्। रोमन्थायते।

रोमभूमि स्त्री ६त०। चर्मणि राजनि०।

रोमलता स्त्री रोमाणि लतेव। रोमराजौ हेमच०।

रोमविकार पु० ६त०। रोमोद्गमे रोमाञ्चे हला०।

रोमश त्रि० रोमाणि सन्त्यस्य श। १प्रचुररोमयुक्ते २मेषे पुंस्त्री० हेमच० स्त्रियां ङीष्। ३पिण्डालौ ४शूकरे पुंस्त्री स्त्रियां ङीष्। ५कुम्भराशौ पु०(पाला) राजनि०।

रोमहर्ष पु० रोम्णः हर्ष इव तद्व्यञ्जकत्वात्। रोमाञ्चे हर्षशीतज्वरादिभिः रोमकूपे जायमाने कण्टकाकारे पदार्थे हारा०। ल्युट्। रोमहर्षणमप्यत्र अमरः।

रोमहर्षण पु० रोमाणि हर्षयति हृष णिच् ल्यु। १विभीतकवृक्षे मेदि० २लोमहर्षणे मुनिभेदे च। [अमरः।

रोमाञ्च पु० रोम्णामञ्चः उद्गमः अञ्च-अच्। रोमहर्षे

रोमाञ्चित त्रि० रोमाञ्चः जातोऽस्य तार० इतच्। जातपुलके त्रिका०। [बस्त्रायाञ्च शब्दमा०।

रोमाली स्त्री ६त०। १रोमावलौ तद्युक्तकाधने ताहृग्व्याय-

रोमालु पु० रोमयुक्त आलुः शाक०। १पिण्डालौ राजनि० रोम+आलुच्। २रोमवति त्रि०। [वृक्षे राजनि०।

रोमालुविटपिन् स्त्री रोमालुः रोमयुक्तः विटपी। कुम्भी-

रोमावलि(ली) स्त्री ६त०।१रोमपङ्क्तौ २नाभेरूर्ध्वस्थरोमपङ्क्तौ तदुपलक्षिते ३ताद्रृग्व्यायस्त्रायाञ्च हेमच०।

रोमोद्गम पु० रोम्णामुद्गमः उद्-गम घञ्। रोमहर्षे हला०। रोमोद्भेदादयोऽप्यत्र।

रोरुदा स्त्री रुद-यङ् भावे अ टाप्। अतिशयरोदने।

रोल पु० रु-लच्। पानीयामलके शब्दच०।

रोलम्ब पुंस्त्री रौति रु विच् रोः सन् लम्बते गच्छति लम्ब-अच् कर्म०, रोल अम्बच् वृक्षस्य वो वा। भ्रमरे त्रिका० स्त्रियां ङीष्।

रोष पु० रुष-घञ्। क्रोधे अमरः।

रोषण पु०रुष-युच्। १पारदे, २निकषप्रस्तरे, मेदि०। ३ऊषरभूमौ ४क्रोधशीले त्रि० हेमच०।

रोह पु० रुह-अच्। १अङ्कुरे हेमच० २रोहणकर्त्तरि त्रि०।

रोहण पु० रुह्यतेऽसौ रुह ल्युट्। १पर्वतभेदे जटा०। भावे ल्युट्। २प्रादुर्भावे न०। करणे ल्युट् ३शुक्रे राजनि०

रोहन्त पु० रुह-झच्। १वृक्षभेदे, २वृक्षमात्रे च। ३लताभेदे, ४लतायाञ्च स्त्री उणादि० गौरा० ङीष्।

रोहि पु० रुह इन्। १बीजे, २वृक्षे च उणादि०। ३धार्मिके त्रि० सि० कौ०।

रोहिण न० रुह-इनन्। पञ्चदशधा विभक्तदिनस्य नवमे भागे "कुर्य्यादारोहिणं बुधः" इति श्रुतिः। रोहिणी देवताऽस्य अण्। रोहिणमप्यत्र। २वटवृक्षे, ३रोहितकवृक्षे ४भूतृणे च पु० राजनि०।

रोहिणी स्त्री रुह-इनन् गौरा०ङीष्। १स्त्रीगव्याम् अमरः अश्विन्यवधिके चतुर्थे २नक्षत्रे ज्यो० ३वसुदेवपत्न्यां-बलभद्रमातरि, ४विद्युति, ५कटुरोहिण्यां, ६सोमवल्के

च मेदि० । रोहित+स्त्रियां ङीप् तस्य नत्वे णत्वम् । ७रक्तवर्णवत्यां स्त्रियाम् । सा च ८हरितक्याम्, ९काश्मर्य्याम्, १०मञ्जिष्ठायाञ्च राजनि० । ११दशमिकन्यायां काशिखा० "अष्टवर्षा भवेद् गौरी नववर्षा च रोहिणी" इत्युक्तायां नववर्षायां १२कन्यायां १३गलरोगभेदे भावप्र० "रोहिणीनामकगलरोगाणां नामानि संख्याश्चाह "रोहिणी पञ्चधा प्रोक्ता कण्ठशालूक एव च । अधिजिह्वश्च वलयोऽलासनामैकवृन्दकः । ततो वृन्दः शतघ्नी च गिलायुः कण्ठविद्रधिः । गलौघः स्वरघ्नश्च मांसतालकमेव च । विदारी कण्ठदेशे तु रोगाः स्युरेकविंशतिः ।" तत्र पञ्चानामपि रोहिणीनां सामान्यसंप्राप्तिमाह 'गलेऽनिलः पित्तकफौ च मूर्च्छितौ प्रदूष्य मांसञ्च तथैव शोणितम् । गलोपसंरोधकरैस्तथाङ्कुरैर्निहन्त्यसून् व्याधिरियं हि रोहिणी" । अनिलः मूर्च्छितः प्रवृद्धः कफपित्ते च मूर्च्छिते पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः न तु त्रयोऽपि मूर्च्छिताः" पृथग्दोषजाया अभिधास्यमानत्वात् । तत्र वातजायालक्षणमाह "जिह्वासमन्तात् भृशवेदनास्तु मांसाङ्कुराः कण्ठविरोधिनः स्युः । सा रोहिणी वातकृता प्रदिष्टा वातात्मकोपद्रवगाढयुक्ता" । जिह्वासमन्तात् जिह्वायाः सर्वतः । "वातात्मकोपद्रवगाढयुक्ता स्तम्भादिभिरतिशयेन युक्ता । पित्तजामाह "क्षिप्रोद्गमा क्षिप्रविदाहपाका तीव्रज्वरा पित्तनिमित्तजाता" । श्लेष्मजामाह "स्रोतोनिरोधिन्यपि मन्दपाका गुर्वी स्थिरा या कफसम्भवा तु । स्रोतोऽत्र कण्ठस्रोतः । सन्निपातजामाह "गम्भीरपाकिन्यनिवार्य्यवीर्य्या त्रिदोषलिङ्गा त्रिभवा भवेत् सा" । रक्तजामाह स्फोटैश्चिता पित्तसमानलिङ्गा साध्या प्रदिष्टा रुधिरात्मिका तु" । रक्तजेतरासंचारकालावधिमाह "सद्यस्त्रिदोषजा हन्ति त्र्यहात् कफसमुद्भवा । पञ्चाहात् पित्तसम्भूता सप्ताहात् पवनोत्थिता" । [माघादयोऽप्यत्र ।

रोहिणीपति पु० ६त० । १चन्द्रे, २वसुदेवे च रोहिणी-

रोहिणीव्रत न० रोहिणीयुक्ताष्टम्यां व्रतम् । रोहिण्युपलक्षितायां भाद्रकृष्णाष्टम्यां कर्त्तव्ये उपवासरूपे व्रते । जन्माष्टमीशब्दे २२२०पृ० दृश्यम् । [२४२२ पृ० दृश्यम् ।

रोहिणीशकट न० ६त० । व्योमस्थे ताराभेदे शकटाकारे

रोहित पु० रुह-इतन् । १सूर्य्ये मेदि० २वर्णभेदे च ३मत्स्यभेदे पु० उज्ज्वल० ४लताभेदे ५मृग्याञ्च स्त्री ङीप् मेदि० ।

रोहित न० रुह इतच् । १रुधिरे २कुङ्कुमे ३ऋजौ इन्द्रचापे मेदि० । ४रोहितकवृक्षे पु० शब्दमाला० ५मत्स्यभेदे पुंस्त्री० स्त्रियां ङीप् मेदि० । "रक्तोदरो रक्तपुच्छो रक्ताक्षो रक्तपक्षतिः । कायपक्षो भवन्वेषो रोहितः कथितो बुधैः । रोहितः सर्वमत्स्यानां वरो वृष्योऽर्दितार्त्तिजित् । कषायानुरसः स्वादुर्वातघ्नो नातिपित्तकृत् । ऊर्द्ध्वजत्रुगतान् रोगान् हन्याद्रोहितमुण्डकम्" भावप्र० । ६रक्तवर्णे पु० ७तद्वति त्रि० अमरः । स्त्रियां ङीप् तस्य नत्वे णत्वम् । ८वज्रिशाणने धनुर्भेदे त्रिकाण्ड० । स्वार्थे क । रोहितक स्वार्थे ९वृक्षभेदे अमरः ।

रोहिताश्व पु० रोहितो वर्णभेद अश्व इव गतिसाधनम् यस्य । वह्नौ त्रिकाण्डशेषः ।

रोहितेय पु० रोहित एव स्वार्थे ढ । रोहितकवृक्षे रत्नमा०

रोहिन् पु० रोहति पुनःपुनश्छिन्नोऽपि प्रादुर्भवति रुह-णिनि । १रोहितकवृक्षे २वटवृक्षे ३अश्वत्थवृक्षे च । मेदि० । ४रोहणवति त्रि० स्त्रियां ङीप् ।

रोहिष पु० रुह-इषन् । शब्दमालाते मृगभेदे मेदि० ।

रौक्ष्य न० रूक्षस्य भावः ष्यञ् । १पारुष्ये २अस्निग्धतायाञ्च ।

रौचनिक त्रि० रोचनया रक्तः ठञ् । रोचनया रक्ते ।

रौच्य पु० । त्रयोदशे मनुभेदे मत्स्यपु० ९ अ० ।

रौट(ड़) अनादरे भ्वा० पर० सक० सेट् । रौट(ड़)ति अरौ(रो)टीत् । ऋदित् चङि न ह्रस्वः ।

रौद्र न० रुद्रो देवतास्य अण् । १सूर्य्यतापे, २उष्णस्पर्शे च । ३तद्वति मेदि० ४भीषणे च त्रि० ५रसभेदे अमरः । "रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः । आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम् । मुष्टिप्रहारपातनविकृतच्छेदावदारणैश्चैव । संग्रामसम्भ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढा । भ्रूविभङ्गोष्ठनिर्दंशबाहुस्फोटनतर्जनाः । आत्मावदानकथनमायुधोत्क्षेपणानि च । अनुभावास्तथाक्षेपक्रूरसन्दर्शनादयः । उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः । मोहामर्षादयस्तत्र भावाः स्युर्व्यभिचारिणः" सा० द० ।

६यमायां ७इन्द्रजटायाञ्च स्त्री ङीप् मेदि० ।

रौप्य न० रूप्यमेव अण् । रजते राजनि० ।

रौम न० रुमायां लवणखनिभेदे भवः अण् । साम्भरिलवणे । स्वार्थे क । तत्रैवार्थे अमरः ।

रौरव पु० रोरुवतेऽत्र रु-यङ्-लुक्-टिप् तेन प्राप्यः तस्यायं वा अण् । १नरकभेदे अमरः । २भयङ्करे, ३धूर्त्ते, ४घोरे च त्रि० शब्दर० । ५सामभेदे न० । तच्च साम आरण्यगाने

३भ० दर्शितम् । “रौरवयौधाजवे वाऽहते रथे भवतः” ता०ब्रा० । रौरवनरकस्वरूपादिकञ्च मार्कपु० १०अ० “रौरवे कूटसाक्षी तु याति यश्चानृतो नरः । तस्य स्वरूपं गदतो रौरवस्य निबोध मे । योजनानां सहस्रे द्वे रौरवो हि प्रमाणतः । जानुमात्रप्रमाणश्च ततः श्वभ्रः सुदुस्तरः । तत्राङ्गारचयोपेतं कृतञ्च धरणीतलम् । जाज्वल्यमानतीव्रेण तापिताङ्गारभूमिकम् । तन्मध्ये पापकर्माणं विसृजन्ति यमानुगाः । स दह्यमानस्तीव्रेण वह्निना तत्र धावति । पदे पदे च पादोऽस्य शीर्यते जीर्यते पुनः । अहोरात्रेणोद्धरणं पादन्यासं स गच्छति । एवं सहस्रं विस्तीर्णे योजनानां विमुच्यते” ।

रौहिण पु० रुह-इनन् स्वार्थे अण् । १चन्दनवृक्षे त्रिका० । २रौहिणशब्दार्थे च ।

रौहिणेय पु० रोहिण्यां भवः ढक् । १बुधग्रहे, २बलरामे, च अमरः । ३मरकतमणौ न० राजनि० ४गोवत्से पुंस्त्री मेदि० ५वनेचरे पु० भगदेवतशब्दे ४६११ पृ० दृश्यम् ।

रौहिष न० रुह-इषन् स्वार्थेऽण् । १कत्तृणे मेदि० २मृगभेदे पुंस्त्री० अमरः । ३रोहितमत्स्ये च शब्दच० । ४दूर्वायां, ५रोहितभूम्याञ्च स्त्री ङीप् ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य सङ्कलिते वाचस्पत्ये रकारादि- शब्दार्थसङ्कलनम् ।

ल

लकारो व्यञ्जनवर्णभेदः । तस्योच्चारणस्थानं दन्तमूलम् । अयोर्यवर्णयोर्मध्यस्थत्वादयमन्तःस्थवर्णः । अस्योच्चारणे आभ्यन्तरप्रयत्नः जिह्वाग्रेण दन्तमूलस्य ईषत्स्पर्शस्तेनास्य ईषत्स्पृष्टता । बाह्यप्रयत्नाश्च संवारनादघोषाः अल्पप्राणश्च । मातृकान्यासेऽस्य ककुदि न्यस्तता । काव्यादौ प्रथमप्रयोगे व्यसनं फलम् । “व्यसनमथ लवौ” वृ०र०टी । तस्य स्वरूपं यथा “लकारं चञ्चलापाङ्गि ! कुण्डलीमयसंयुतम् । पीतविद्युल्लताकारं सर्वरत्नप्रदायकम् । पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा । त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा । आत्मादितत्त्वसहितं वर्णं तुष्टि-भावय पार्वति” कामधेनुतन्त्रम् । तत्पर्य्यायाः वर्णाभिधाने उक्ता यथा “लः इन्द्रः पूतना पृथ्वी माधवी शक्रवाचकः । बलानुजः पिनाकीशो व्यापको मांससंज्ञकः । परात्मा ककुद्वक्त्रः कलगो नादोऽमृतं दिवि । लवणं वारुणीपीतभिक्षा वाणी क्रियाऽजिता । ज्वालिनी वेगिनीनादः प्रद्युम्नः शोषणो हरिः । त्रिधातन्त्रात्मको श्वेतो मेरुगिरि वसोरवः” । तस्याधिष्ठातृध्येयस्वरूपं यथा “चतुर्भुजां पीतवस्त्रां रक्तपङ्कजलोचनाम् । वरदां भीमां सर्वालङ्कारभूषिताम् । योगीन्द्रसेवितां नित्यां योगिनीं योगरूपिणीम् । चतुर्वर्गप्रदां देवीं नागहारोपशोभिताम् । एवं ध्यात्वा लकारन्तु तन्मन्त्रं दशधा जपेत्” वर्णोद्धारतन्त्रम् ।

ल पु० ला-क । १इन्द्रे मेदि० तन्त्रोक्ते भूमिदैवतके २मन्त्रभेदे न० ३एकलघुके वर्णे । लङादिदशसु लकारादितिङ्प्रत्ययेषु “लः कर्मणि च भावे चाकर्मकेभ्यः” पा० ।

लक आस्वादे प्राप्तौ च चु० उभ०सक० सेट् । लाकयति ते अलीलकत् त ।

लकच पु० लक-बा० अचन् । लिकुचवृक्षे (माँदार) शब्दर० ।

लकुच पु० लक-उचन् । (माँदार) वृक्षभेदे अमरः । “लकुचः क्षुद्रपनसो लिकुचो डहुरित्यपि । आमं लकुचमुष्णञ्च गुरु विष्टम्भकृत्तथा । मधुरञ्च तथाम्लञ्च दोषत्रितयरक्तकृत् । शुक्राग्निनाशनञ्चापि नेत्रयोरहितं स्मृतम् । सुपक्वं तत्तु मधुरमम्लं वातपित्तकृत् । वह्निशुक्रकरं रुच्यं हृद्यं विष्टम्भकञ्च तत्” भावप्र० । “लकुचं गुरु विष्टम्भि स्वाद्वम्लं रक्तपित्तकम् । श्लेष्मकारि समीरघ्नमुष्णं शुक्राग्निनाशनम्” वैद्यक० ।

लक्तक पु० लक-क्त नि० संज्ञायां कन् । १अलक्तके (आलता) शब्दर० । २जीर्णवस्त्रखण्डे (नेकड़ा) अमरः ।

लक्तकर्मन् पु० रक्तं करोति कृ-मनिन् । रक्तवर्णलोध्रे [शब्दच० ।

लक्तिका स्त्री गोधायां निघण्टुः ।

लक्ष दर्शने अङ्कने च चु०उभ०सक०सेट् । लक्षयति ते अल- [लक्षत् त ।

लक्ष न० लक्ष-अच् । १पदे २चिह्ने ३व्याजे ४शरव्ये च । ५दशायुतसंख्यायां स्त्री०न० मेदि० ।

लक्षक त्रि० लक्षयति लक्षणयार्थम् लक्ष-ण्वुल् । लक्षणयार्थबोधके शब्दे । तल्लक्षणं श० प्र० उक्तं यथा “वाच्यार्थस्य सम्बन्धवति यत्तत्तु यद्भवेत् । तत्र तल्लक्षकं नाम तच्छक्तिविधुरं यदि” । “वाच्यार्थसम्बन्धवति यन्नाम शक्तिर्नैव तात्पर्य्यात् लक्षकं यदि तद्वाच्यार्थे

शक्तिशून्यं भवेत्। सैन्धवादयश्च शब्दास्तुरगादिसम्बन्धिनि लवणादाविव तुरगादावपि शक्ता एव। गङ्गादयस्तु तीरादावसङ्केतिताः तत्सम्बन्धेन तीरादिशक्तत्वेन गृहीता एव तीराद्यन्वयं बोधयन्तीति तत्र लक्षका एव शक्तत्वे पूर्वपूर्वप्रयुक्तत्वापत्तेः तस्य तद्व्याप्यत्वात् कथञ्चित्तीरादिसम्बन्धित्वेन गृहीतादपि गङ्गादिपदात्तीरादेरन्वयबोधेन तीराद्यशक्तत्वे सति तत्सम्बन्धितामात्रेण न लक्षणा गङ्गागङ्गायां घोष इत्यादावपि गङ्गागङ्गेतिभागस्य निरूढलक्षणायाः सत्त्वेन वैयर्थ्याभावप्रसङ्गाच्च। एतेन तीराद्यशक्तत्वे सति तीरादिपरत्वं तीरादिसम्बन्धानुभावकत्वं वा तल्लक्षकत्वमित्यपि प्रत्युक्तम् अपभ्रंशस्यापि लक्षकत्वापाताच्च नचेष्टापत्तिः शक्तिलक्षणान्यतरवृत्तिमत्त्वे तस्य साधुतापत्तेः पदसाधुतायां वृत्तिमत्त्वस्यैव तन्त्रत्वात्। किञ्चानुभावकत्वं तदा घोषादिपदसाकाङ्क्षस्य गङ्गादिपदस्य तीरलक्षकता न स्यात् तेन तीरसम्बन्धिनो नीरस्यानुभवानर्जनात् स्वरूपयोग्यत्वन्तु गङ्गायामिति वाक्यस्य दुर्वारं तस्याप्याधेयताधर्मिकनीरानुभवं प्रति नीरार्थकनामोत्तर सप्तमीत्वेन तथात्वात् नीराधेयत्वस्य च तीरसम्बन्धित्वानपायात्।" अधिकं लक्षणाशब्दे दृश्यम्।

लक्षण न॰ लक्ष्यतेऽनेन लक्ष-करणे ल्युट्। १ इतरभेदानुमापके चिह्ने "लक्षणाऽपि पदार्थानां नान्तं यान्ति पृथक्त्वतः। लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः"। यथा पृथिव्या गन्धो लक्षणं स हि पृथिवीं परस्मात् भिन्नतया अनुमापयति। तच्च द्विविधम् "स्वरूपं तटस्थं द्विधा लक्षणं स्यात् स्वरूपे प्रविष्टं स्वरूपाद्बहिर्भिन्नम्" इत्युक्तेः स्वरूपलक्षणं तटस्थलक्षणं च यथा आकाशो विभुः सच्चिदानन्दो ब्रह्मेति स्वरूपलक्षणम्। काकवत् गृहम् जगज्जन्मादिकर्तृ ब्रह्मेति तटस्थलक्षणम्। २ स्वरूपे यथा नटलक्षणं वस्तु ३ नाम्नि व्यवहारोपयोगिनि ४ चिह्ने च मेदि॰। कर्त्तरि ल्यु ५ स्वरूपप्रतिपादके "चोदनालक्षणार्थो धर्मः" इति जैमिनिसूत्रम् चोदना विधिवाक्यमेव लक्षणं स्वरूपज्ञापिका यस्य तादृशोऽर्थः धर्म इति तदर्थः। ६ शब्दसाधुताप्रतिपादके व्याकरणादिसूत्रे च न॰ "लक्षणं त्वभिधानानाम्" अमरः। कर्मणि ल्युट्। ७ प्रतिपाद्ये यथा "इत्थं द्वादशलक्षणीति" माधवीयन्यायमालायां द्वादशानां लक्षणानां प्रतिपाद्यविषयाणां समाहारः इति तदर्थः। लक्ष युच्। शब्दनिष्ठे शक्यार्थसम्बन्धेनार्थबोधकतारूपे "मुख्यार्थबाधे तद्योगे ययान्योऽर्थः प्रतीयते। रूढेः प्रयोजनाद्वापि लक्षणा शक्तिरर्पिता" इत्युक्ते वृत्तिभेदे स्त्री। यथा गङ्गायां घोषः प्रतिवसतीत्यादौ गङ्गाशब्दस्य जलप्रवाहरूपे स्वार्थेऽन्वयासम्भवात् तत्सम्बद्धतीरादिबोधकता। ८ लक्ष्मणे रामानुजे पु॰ १० सारसपक्षिणि पुंस्त्री॰ तत्र स्त्रियां राजनि॰ स्त्री टाप्। लक्षणाभेदादिकं शब्दशक्तिप्रकाशिकायामुक्तं यथा

"जहत्स्वार्थाजहत्स्वार्थानिरूढाधुनिकादिकाः। लक्षणा विविधा ताभिर्लक्षकं स्यादनेकधा"। काचिल्लक्षणा शक्यावृत्तिरूपेण बोधकतया जहत्स्वार्थेत्युच्यते यथा तीरत्वादिना गङ्गादिपदस्य। काचिच्छक्यलक्ष्योभयवृत्तिना शक्यवृत्तिनैव वा रूपेणानुभावकत्वादजहत्स्वार्था यथा द्रव्यत्वादिना नीलघटत्वादिना च घटपदस्य। काचिच्छक्यतावच्छेदकीभूतरूपेण पूर्वपूर्वप्रत्यायकत्वात् निरूढा यथा आरण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरण्यादिपदस्य। काचिच्च पूर्वपूर्वं तादृप्येणाप्रत्यायकत्वादाधुनिकी यथा घटत्वादिना पटादिपदस्य। आदिना शक्यसदृशत्वप्रकारेण बोधकतया गौण्युपगृह्यते यथा अग्निर्माणवक इत्यादावग्निसदृशत्वादिना अग्न्यादिपदस्य। तदेवं विविधलक्षणावत्त्वात् लक्षकं नामापि जहत्स्वार्थादिभेदादनेकविधमित्यर्थः। स्यादेतत् यदि तीरादिलक्षकतया गङ्गादिपदस्य ज्ञानं तीराद्यनुभवे भवेद्धेतुर्भवेदप्युक्तमेव लक्षकानां विभागः नत्वेतदस्ति तीराद्यन्वयबोधं प्रति तीरादिशक्तत्वेनैव पदज्ञानस्य लाघवेन हेतुतया लक्षकाणामननुभावकत्वात् गुरुणामग्नौ शैत्य स्पृशेदित्यादौ शक्येन दहनादिनेव गङ्गायां घोष इत्यादौ लक्षितेन तीरादिना स्वार्थसंगृहीतासंसर्गकस्यैव सप्तम्यर्थाधेयत्वादेरन्वयबोधप्रसिद्धत्वादिति चेन्न प्रकृत्यर्थविभक्त्यर्थस्यैव प्रत्ययार्थस्य धर्म्यन्तरेऽन्वयबुद्धेर्व्युत्पन्नतया तीराद्यविशेषितस्य सुखाधेयत्वादेर्घोषादावन्वयबोधायोगात्। न च शक्तस्यैव पदस्य साकाङ्क्षपदान्तरोपस्थाप्यार्थान्वितस्वार्थधर्मिकान्वयबोधं प्रति हेतुत्वादन्वयबुद्धौ लक्ष्यार्थस्याप्रवेशः, कुन्ताः प्रविशन्तीत्यादौ लक्षकस्य कुन्तधरादेरन्वयविशेष्यत्वानुपपत्तेः कुमतिः पशुरित्यादौ शक्यलक्ष्यार्थयोरन्वयबोधस्याप्यनुभविकत्वाच्च। तथा च शक्तेरिव भक्तेरपि ज्ञानमनुभावकं भवत्येव कार्य्यतावच्छेदकस्य सङ्कोचाच्च न व्यभिचारः" सा च लक्षणा विस्तरस्तु सा॰ द॰ २ प॰ दृश्यः।

लक्षित त्रि० लक्ष-कर्मणि क्त । १लक्षणया बोधितेऽर्थे, २ज्ञाते, ३अनुमिते च कर्त्तरि क्त । ४लक्षणाश्रये लक्षक-शब्दे च ।

लक्षितलक्षणा स्त्री लक्षणाभेदे यथा द्विरेफपदेन भ्रमर-शब्दस्य लक्षणयोपस्थापिताद्रेफद्वययुक्तभ्रमरपदादभिधयैव भृङ्गोपस्थितिः । अत्र न रूढिरस्ति प्रकृते तु रूढिप्रयो-जनाभावान्नेयार्थत्वं दृषणमेव लक्षितलक्षणेति वाच्यम्” । यत्र लक्षिताच्छब्दादर्थाभिधानं तत्रैव लक्षितलक्षणायाः परिभाषितत्वात्” सा० द० टी० ।

लक्ष्मन् न० लक्ष-मनिन् । १चिह्ने २प्रधाने च अमरः । स्वार्थे अण् पृषो० न वृद्धिः । ३सारसपक्षिणि पुंस्त्री० हेमच० ३दशरथपत्न्याः सुमित्रायाः ४ज्येष्ठात्मजे च पु० । ५श्वेतकण्टकार्य्यां हेमच० स्त्री टाप् ६सारसपक्षिस्त्रियाम् ७ओषधभेदे च स्त्री मेदि० टाप् ।

लक्ष्मी स्त्री लक्ष-ई-सुट् च । १विष्णोःपत्न्याम् अमरः । २शोभायां, ३कान्तौ, ४सम्पत्तौ, ५ऋद्ध्योषधे, ६वृद्धिना-मौषधे, ७फलिनीवृक्षे च मेदि० ८स्थलपद्मिन्याम् ९हरि-द्रायां, १०मुस्तायां, ११शुक्तायां १२वृक्षे च राजनि० १३पीडायां १४वीरयोषिति च शब्दच० ।

लक्ष्मीपूजाकालादि स्कान्दपु० उक्तं यथा

“पौषे चैत्रे तथा भाद्रे पूजयेयुः स्त्रियः श्रियम् । सिंहे धनुषि मीने च स्थिते सहस्ररश्मिने । प्रत्यब्दं पूजये-ल्लक्ष्मीं शुक्लपक्षे गुरोर्दिने । नापराह्णे न रात्रौ च नासिते न त्र्यहस्पृशि । द्वादश्यां चैव नन्दायां रिक्ता-यास्तु निरंशके । त्रयोदश्यां तथाष्टम्यां कमलां नैव पूजयेत् । न पूजयेत् शनौ भौमे न बुधे नैव भार्गवे । पूजयेत्तु गुरोर्वारे चाभावे रविसोमयोः । गुरुवारे हि पूर्णा च यत्नेन यदि लभ्यते । तत्र पूज्या तु कमला धनपुत्रविवर्द्धिनी । न कुर्यात् प्रथमे मासि नैव कुर्य्यादिसर्जनम् । न घटीं चाद्देशत्र नैव भित्तौ प्रदापयेत् । पौषे च दशमी शस्ता चैत्रे पञ्चमी तथा । नभस्ये पूर्णिमा ज्ञेया गुरुवारे विशेषतः । आढकं धान्यसंपूर्णं नानाभरणभूषितम् । सुगन्धिशुक्लपुष्पैश्च शुक्लपक्षे विशेषतः । पौषे तु पिष्टकं दद्यात् परमान्नञ्च चैत्रके । पिष्टकं परमान्नञ्च नभस्ये तु विशेषतः । गुरु-वारसमायुक्ता नभस्ये पूर्णिमा शुभा । कमलां पूजये-त्तत्र पुनर्जन्म न विद्यते । एकेन कमलेनैव कमलां पूजयेद् यदि । इह लोके सुखं प्राप्य परत्र केशवं व्रजेत्” । लक्ष्मीचरित्रे तु “न कृष्णपक्षे रिक्तायां दशमी द्वादशीषु च । अश्वत्यादिचतुष्के च लक्ष्मीपूजां न का-रयेत्” । दशमीनिषेधः पौषातिरिक्तपरः प्रागुक्तैक-वाक्यत्वात् । दीपान्वितामावास्यायां तत्पूजादिकं दीपान्वित-शब्दे ३६०७पृ० दृश्यम् । कोजागरलक्ष्मीपूजा कोजा-गरशब्दे २२६२ पृ० दृश्या । माघशुक्लपञ्चम्यां श्री-पूजनं “पञ्चम्यां श्रीरपि श्रियम्” ति० त० विहितम् । “पञ्चम्यां श्रियं पूजयेत्”कल्पश्रुतिरपि तत्परा । मह०पु० ११४ अ० लक्ष्म्यास्त्यागकारणतोक्ता यथा

“कुचेलिनं दन्तमलोपधारिणं बह्वाशिनं निष्ठुरवाक्य-भाषिणम् । सूर्य्योदये चास्तमये च शायिनं विमुञ्चति श्रीरपि चक्रपाणिनम् । नित्यं छेदस्तृणानां धरणि-विलिखनं पादयोरल्पमार्ष्टिर्दन्तानामल्पशौचं वसनमलि-नता रूक्षता मूर्द्धजानाम् । द्वे सन्ध्ये चापि निद्रा विवसनशयनं ग्रासहासातिरेकः स्वाङ्गे पीठे च वाद्यं निधनमुपनयेत् केशवस्यापि लक्ष्मीः । तस्या भाजनहेतुता तत्रोक्ता यथा “शिरः सुधौतं चरणौ सुमार्जितौ वरा-ङ्गनासेवनमल्पभोजनम् । अनग्नशायित्वमपर्वमैथुनं चिरप्रनष्टां श्रियमानयन्ति षट् । यस्य कस्य तु पुष्पस्य पाण्डरस्य विशेषतः । शिरसा धार्य्यमाणस्य अलक्ष्मीः प्रतिहन्यते । दीपस्य पश्चिमाच्छाया छाया शय्यासनस्य च । रजकस्य तु यत्तीर्थमलक्ष्मीस्तत्र तिष्ठति” ।

लक्ष्मीकान्त पु० ६त० । १विष्णौ, २राजनि च लक्ष्मी-पत्यादयोऽप्यत्र । “विहाय लक्ष्मीपतिलक्ष्म कार्मुकम्” किरा० । लक्ष्मीपतिस्तु लवङ्गे पूगवृक्षे च विश्वः ।

लक्ष्मीजनार्द्दन न० शालग्रामभेदे । तस्य लक्षणं यथा “एक-द्वारे चतुश्चक्रं नवीननीरदोपमम् । लक्ष्मीजनार्द्दनं ज्ञेयं रहितं वनमालया” ब्रह्मवै० प्र० ।

लक्ष्मीनारायण पु० शालग्रामभेदे तस्य लक्षणं यथा “एक-द्वारे चतुश्चक्रं वनमालाविभूषितम् । नवीननीरदाकारं लक्ष्मीनारायणाभिधम्” ब्रह्मवै० प्र० ।

लक्ष्मीनृसिंह न० शालग्रामभेदे तस्य लक्षणं यथा “द्विचक्रं विस्तृतास्यञ्च वनमालासमन्वितम् । लक्ष्मीनृसिंहं वि-ज्ञेयं गृहिणाञ्च सुखप्रदम्” ब्रह्मवै० प्र० ।

लक्ष्मीपुत्र पु० ६त० । १कामदेवे, २अश्वे मेदि० ३कुशे लवे च शब्दच० । ५गन्धर्वभेदे ।

लक्ष्मीफल पु० लक्ष्म्यै फलमस्य । श्रीफले बिल्वद्रुमे राजनि० ।

लक्ष्मीवत् पु० लक्ष्मीः शोभाऽस्त्यस्य मतुप् मस्य वः । १पनसे

यन्त्रच० । २नीयुक्ते त्रि० अमरः स्त्रियां ङीप् । ३श्वेतरोहितकद्ये पु० राजनि० ।

लक्ष्मीसहज पु० लक्ष्म्या सह क्षीराब्धौ जायते जन-ड । १चन्द्रे, शब्दच० २उच्चैःश्रवसि ३कर्पूरे च ।

लक्ष्य न० लक्ष-यत् । १वेधार्थमुद्दिश्यमाने शरव्ये अमरः । २लक्षणाबोध्येऽर्थे ३उद्देश्ये, ४ज्ञेये, ५अनुमेये च त्रि० ।

लक्ष्यासन न० हठयो० उक्ते आसनभेदे । "अथ लक्ष्यासनं वक्ष्ये विख्यातं योगिपुङ्गवम् । गुल्फदेशे स्वहस्ताभ्यां तथा- भ्यामन्यवेद भुवि" ।

लख गतौ भ्वा० पर०सक० सेट् । लखति । अलखीत्-अला- खीत् । इदित्ययम् लङ्खति अलङ्खीत् ।

लग स्वङ्गीभावे अक०गतौ सक०भ्वा०प०सेट् । लङ्गति अलङ्गीत्

लग सङ्गे भ्वा० पर० सक० सेट् । लगति एदित् अलगीत् घटा० लगयति । "क्लेश तस्या लगति च पश्चात्" नैष० ।

लग आस्वादे प्राप्तौ च सक०चु०उभ०सेट् । लागयति ते अली- लगत् त ।

लगित त्रि० लग-क्त । संसक्ते ।

लगुड(ल)(र) पु० लग-उलच् अस्य रो वा । दण्डाकारे काष्ठनिर्मिते पदार्थे (लाठी) अमरः ।

लग्न न० लस्ज-क्त तस्य नः । १मेषादिराशीनामुदये अमरः । २लज्जिते त्रि० । लग-क्त पृषो० । ३संसक्ते त्रि० । ४स्तुतिपाठके पु० त्रिका० । लग्न इव इवार्थे कन् । ५प्रतिभुवि । (जामिन) "प्रातको वित्तहीनः स्यात् लग्नको वित्तवान् यदि" इति स्मृतिः । मेषादिराश्युदय- रूपलग्नपदार्थस्य देशभेदे कालमानं खगोलशब्दे २४५२। ५३पृ०दर्शितम् । इष्टकाले लग्नसाधनम् १८०२पृ०दृश्यम् ।

लग्निका स्त्री लग्ने व कन् पृषो० । अदृष्टरजस्कायां स्त्रियाम् अमरटीका ।

लघ अभोजने शीघ्रातिक्रमे गतौ च भ्वा०आ०सक०सेट् इदित् । लङ्घते अलङ्घिष्ट । "कपोतिनीवस्तमपुतलङ्घ" महाना० ।

लघ शोषे भ्वा० पर० सक०सेट् इदित् । लङ्घति अलङ्घीत् ।

लघ प्रकाशे चु०उभ०स०सेट् इदित् । लङ्घयति ते अललङ्घत् त

लघ आस्वादने चु०उभ०सक०सेट् । लाघयति-ते अलीलघत्-त

लघट्(टि) पु०लघि-शोषे "लङ्घेर्नलोपश्च" उणा०अटिः इकार उच्चारणार्थः उज्ज्वल० पारायणे तु न तथा । वायौ ।

लघिमन् पु० लघोर्भावः इमनिच् टिच । १लघुत्वे लाघवे, येनोर्द्धगतिसञ्चारः । २ऐश्वर्य्यभेदे च ।

लघिष्ठ त्रि० अतिशयेन लघुः इष्ठन् टिच । अतिशय- लघुत्वयुक्ते । ईयसुन् । लघीयानप्यत्र स्त्रियां ङीप् ।

लघु न० लघि-कु नि०नलोपः । १शीघ्रे अमरः । २कृष्णागुरुणि मेदि० । ३वीरणमूले राजनि० । ४पृक्कानामौषधौ स्त्री मेदि० । ५निःसारे, ६लाघवगुणान्विते, ७स्वल्पे, ८मनोहरे च त्रि० मेदि० । व्याकरणोक्ते ह्रस्वसंज्ञके ९अकारादौ वर्णे, ज्योतिषोक्तेषु "पुष्याश्विहस्ता लघुः" इत्युक्तेषु १०पुष्यादिनक्षत्रेषु च पु० । ११लघुतावत्यां स्त्रियां स्त्री वा ङीप् । तत्करोति णिच् लघयति ।

लघुकाय पुंस्त्री० लघुः कायो यस्य । १छागे त्रिका० स्त्रियां योपधत्वात् टाप् । कर्म० २क्षुद्रशरीरे पुंन० ।

लघुकाश्मर्य्य पु० नित्यकर्म० । कट्फले वृक्षे राजनि० ।

लघुचिर्भिटा स्त्री नि०कर्म० वननेर्वारौ कर्कटीभेदे राजनि० ।

लघुदन्ती स्त्री कर्म० । क्षुद्रदन्तीवृक्षे ।

"दन्तीद्वयं सरं पाके रसे च कटुदीपनम् । गुदाङ्कुराश्म- शूलास्रकण्डूकुष्ठविदाहहृत् । तीक्ष्णोष्णं हन्ति पि- त्तास्रं कफशोथोदरक्रिमीन्" "क्षुद्रदन्तीफलन्तु स्यान्म- धुरं रसपाकयोः । शीतलं स्तम्भविण्मूत्रं गलगोद कफापहम्", भावप्र० ।

लघुद्राक्षा स्त्री कर्म० । काकलीद्राक्षायाम् राजनि० ।

लघुनामन् पु० लघुवर्णयुक्तं नाम वाचकशब्दो यस्य । अ- गुरुचन्दने शब्दच० ।

लघुपत्रक पु० लघूनि क्षुद्राणि पत्राण्यस्य कप् । (गुडारो- चना) लताभेदे शब्दच० । अत भावे ङीप् । लघुपत्री स्त्री २अश्वत्थवृक्षे राजनि० ।

लघुपुष्प पु० लघु पुष्पं यस्य । भूमिकदम्बे राजनि० । [ङीष् ।

लघुबदर पु० कर्म० १क्षुद्रकोले । २भूबदर्य्याम् स्त्री राजनि०

लघुब्राह्मी स्त्री कर्म० । क्षुद्रब्राह्म्याम् राजनि० ।

लघुमन्थ पु० । अग्निमन्थः मन्थः पूर्वपदलोपः कर्म० । क्षुद्रा- ग्निमन्थे राजनि० ।

लघुलय न० लघु शीघ्रं लीयते ली-अच् । वीरणमूले अमरः

लघुसदाफला स्त्री सदा फलं यस्याः कर्म० । क्षुद्रोदुम्बरि- कायाम् (छोट डुमुर) राजनि० ।

लघुहेमदुग्धा स्त्री कर्म० । क्षुद्रोदुम्बरे (छोट डुमुर) राजनि०

लघूदुम्बरिका स्त्री कर्म० । क्षुद्रोदुम्बरभेदे राजनि० ।

लङ्का स्त्री लक-अच् टाप् च । स्वनामख्यातायां १पुर्य्याम् । सा च भूगोलस्य याम्ये भूतलपादविवरे जलग्रमध्ये स्थिता" सि० शि० । २शाखायां ३वेश्यायां ४शाखा- यास्त्र विशेषः ।

लङ्काधिप पु० ६त० । १रावणे लङ्कानाथादयोऽप्यत्र । २कुवेरे च । [पृक्कायां (पिड़िङ) शाकभेदे शब्दच० ।

लङ्का(यि)पिका स्त्री लङ्कामयतं व्याप्नोति वा ण्वुल् ।

लङ्कास्थायिन् पु० लङ्कायां तिष्ठति स्था णिनि । (लङ्कासिज) द्रुमभेदे शब्दच० । २लङ्कावासिनि त्रि० ।

लङ्कोपिका स्त्री लङ्कायामुप्यते वप-ण्वुल् पृषो० । पृक्कायाम् । (पिड़िङशाक) शब्दर० ।

लङ्घन न० लघि-ल्युट् । १अभोजने, २अतिक्रम्य गमने, ३क्रमणे, ४प्लवने च मेदि० । ५कर्षणे च भावप्र० लङ्घनस्य लक्षणलक्षणगुणादिकमुक्तं यथा "ज्वरी लङ्घनं कुर्यादित्याह चरको वाग्भटश्च "आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् । विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत्" । तथा "ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम् । ज्वरान्ते भेषजं दद्याज्ज्वरमुक्ते विरेचनम् । त्रिविधं त्रिविधे दोषे तत्समीक्ष्य प्रयोजयेत् । दोषोऽपि लङ्घनं पथ्यं मध्ये लङ्घनपाचनम् । प्रभूते शोधनं तत्र मूलादुन्मूलयेन्मलान्" । चक्रदत्तश्च "तरुणं तु ज्वरं पूर्वं लङ्घनेन क्षयं नयेत् । आमदोषमविज्ञाय लङ्घयेत्तं यथाविधि । वातः पचति सप्ताहात् पित्तन्तु दशभिर्दिनैः । श्लेष्माद्वादशभिर्घस्रैः पच्यते वदतांवर ! । लङ्घनं लङ्घनीयस्तु कुर्याद्दोषाद्यपेक्षतः । त्रिरात्रमेकरात्रं वाऽहोरात्रमथ वा ज्वरे । निवातसेवनात् स्वेदाल्लङ्घनादुष्णवारिणः । पाचनादामज्वरे क्षीणे पश्चादौषधमाचरेत्" । आत्रेयेणोक्तम् "ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम् । ज्वरान्ते भेषजं दद्याज्ज्वरमुक्ते विरेचनम् । दोषशेषस्य पाकार्थमग्नेः सन्धुक्षणाय च । लङ्घितश्चाप्यदोषश्चेत् यवागूपानमाचरेत् । शालिषष्टिकमुद्गानां यूषं वा शस्तमाचरेत् । पञ्चकोलेन संसिद्धां यवागूं मध्यलङ्घने । अत्यर्थं लङ्घितं दृष्ट्वा तस्य सन्तर्पणं हितम् । द्राक्षादाडिमखर्जूरपियालैः सपरूषकैः । तर्पणार्थस्य कर्तव्यं तर्पणं ज्वरशान्तये" । अत्र लङ्घनशब्देनानशनमुच्यते । यत आह सुश्रुतः "आनद्धास्तिमितैर्दोषैर्यावन्तं कालमातुरः । तावत्त्वनशनं कुर्यात्ततः संसर्गमाचरेत् । आनद्धास्तिमितैर्दोषैः सम्यक् । संसर्गम् औषधाद्युपक्रमम्" । यत आह चरकः "चतुःप्रकारा संशुद्धिः पिपासा मारुतातपौ । पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् । चतुःप्रकारा संशुद्धिर्वमनञ्च विरेचनम्" । निरूहवस्तिशिरोविरेचनानि मत्वनुशासनं तस्य दंहणत्वात् । अत्र लङ्घनं कर्षणमित्यर्थः । सुश्रुतः "शरीरबाधकरं यद्द्रव्यं कर्म वा पुनः । तं लङ्घनमिति ज्ञेयं दंहणं तु पृथग्विधम्" । लङ्घनात्कर्षणादन्यत् शरीरपोषकमित्यर्थः" ।

लछ चिह्नकरणे भ्वा० पर० सक० सेट् । लच्छति अलच्छीत् ।

लज व्रीडायाम् भ्वा० आ० अक० सेट् । लजते अलजिष्ट ।

लज तिरस्कारे भ्वा० पर० सक० सेट् इदित् । लञ्जति अलञ्जीत्

लज अन्तर्द्धाने चुरा० उ० सक० सेट् । लाजयति-ते अलीलजत् त ।

लज भाषणे हिंसायां दाने च सक० सामर्थ्ये वासे च अक० चुरा० उभ० सेट् इदित् । लञ्जयति-ते अललञ्जत् त ।

लज भासने अद० चु० उभ० सक० सेट् । लजयति-ते अललजत् त

लजकारिका स्त्री लजं लज्जां करोति कृ-ण्वुल् अत इत्त्वम् । लज्जालुलतायाम् हेमच० ।

लज्जा स्त्री लस्ज-भावे अ । अकार्यप्रवृत्तौ परदर्शने दुष्टत्वधिया ततो निवृत्तिसाधने चित्तवृत्तिभेदे अमरः ।

लज्जालु स्त्री लस्ज-आलुच् । १लताभेदे शब्दच० । २लज्जावति त्रि० ।

"लज्जालुः स्यात् शमीपत्रा समङ्गाञ्जलिकारिका । रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि । लज्जालुः शीतला तिक्ता कषाया कफपित्तजित् । रक्तपित्तमतीसारं योनिरोगं विनाशयेत्" भावप्र० । [विशिष्टे ।

लज्जाशील त्रि० लज्जां शीलयति शील-अण् । लज्जा-

लज्जिरी स्त्री लज्जा+अस्त्यर्थे इरच् गौरा० ङीष् । लज्जालुलताभेदे राजनि० । [त ।

लञ्ज भासने अद० चु० उभ० सक० सेट् । लञ्जयति ते अललञ्जत्

लञ्ज पु० लञ्ज-अच् । १पदे २कच्छे च हेमच० । ३पुच्छे जटा० संज्ञायां कन् अत इत्त्वम् । लञ्जिका वेश्यायाम् हेमच० ।

लट बालभावे अक० उक्तौ द्वि० भ्वा० पर० सेट् । लटति । अलाटीत्-अलटीत् । [विश्वः ।

लट पु० लट-बा० घञर्थे क । १प्रमादवचने २दोषे च

लटक पु० लट-वुन् । दुर्जने उणादिकोषः ।

लटपर्ण न० लटं दुष्टं पर्णमस्य । त्वचे (दारचिनि) राजनि०

लटा स्त्री लट-क । (नाटाकरमचा) १करञ्जभेदे, २वाद्यभेदे, ३ग्रामचटके, मेदि० ४कुसुम्भे हेमच० । ५भ्रमरके च भरतः । ६लावके खगे पुंस्त्री० जातिभेदे पुंस्त्री० ७रागभेदे पु० सङ्गी० ।

लड विलासे भ्वा० पर० अक० सेट् । लडति अला(ड)डीत्

लड उत्पीड़ने सक० जिह्वाधावने अक० भ्वा० पर० सेट् । लडति अलाडीत्-अलडीत् घटा० । लडयति ।

लड अवलम्बपालने चु०उभ०सक०सेट् । लाडयति-ते अलील-डत् त ।

लड व्याप्तौ चु०उभ०सक०सेट् । लाडयति-ते अलीलडत् त ।

लड भाषणे द्विक० वा चु० उभ०पक्षे भ्वा० पर० सेट् इदित् । लण्डयति-ते लण्डति । अललण्डत्-त अलण्डीत् ।

लड उत्क्षेपणे वा चुरा० उभ०पक्षे भ्वा०पर०सक०सेट् इदित् । लण्डयति-ते लण्डति । अललण्डत्-त अलण्डीत् ।

लड क्षेपणे अद०चु०उभ०सक० सेट । लडयति ते अललडत् त

लड्डुक पु० लड-डु तस्य नेत्त्वम् स्वार्थे क । तैलादिपक्वे गोधूमादिचूर्णनिर्मिते (लाड्ु) मिष्टान्नभेदे "पृथुलड्डुकसतीति नैषधम् स्त्रीत्वमप्यस्य ।

लण्ड पु० लडि रन् । (लण्डन) इति ख्याते देशभेदे ।

लत आघाते भी०पर०सक०सेट् । लतति अलातीत् अलतीत् ।

लता स्त्री लत-अच् । शाखारहिते १गुडूच्यादौ अमरः । २शाखायां ३प्रियङ्गौ ४पृक्कायाम् ५असनपत्र्यां च अमरः । ६ज्योतिष्मत्यां ७लताकस्तूरिकायां ८माधवीलतायां ९दूर्वायाञ्च मेदि० । १०कैवर्त्तिकायां ११सारिवौषधौ च राजनि० ।

लताकरञ्ज पु० लतारूपः करञ्जः । करञ्जभेदे राजनि० ।

लताकस्तूरिका स्त्री लतायां कस्तूरीव सुगन्धत्वात् इवार्थे कन् । कस्तूरीगन्धयुक्तफलयुतायां लतायाम् राजवल्ल० । "लताकस्तूरिका तिक्ता हृद्या शीताश्मरोगहृत्" ।

लताजिह्व पुंस्त्री०लतेव जिह्वा यस्य । सर्पे शब्दमा० स्त्रियां ङीष् ।

लतातरु पु० लतेव दीर्घतरुः । १तालवृक्षे २नागरङ्गवृक्षे च शब्दच० । ३शालवृक्षे राजवल्ल० । लताद्रुमादयोऽप्यत्र ।

लतापनस पु० लतायां पनसमिव स्थूलं फलमस्य । (तरमुज) लताभेदे त्रिका० । [शब्दच० ।

लतापृक्का स्त्री लतेव विस्तीर्णा पृक्का । (पिड़िङ्ग) शाकभेदे

लताफल न० लतायां फलमस्य । पटोले ।

लतामरुत् स्त्री लतायां मरुत् वायुर्यस्याः । पृक्कायां शब्दच० तद्गन्धसेवने हि वायुवृद्धिरिति वैद्यकप्रसिद्धम् ।

लतायष्टि स्त्री लतापि यष्टिरिव । मञ्जिष्ठायाम् शब्दमा० ।

लतायावक न० लताया यावकमिव । प्रवाले हारा० ।

लतार्क पु० लतयाऽर्क इव । हरितपलाण्डौ अमरः ।

लतावेष्ट पु० "बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा स्त्रियं रमेत् । बहुविकृताङ्गं योनौ लतावेष्टमुच्यते" रतम० उक्ते आलिङ्गनभेदे । [वेष्टितकं तथा" शब्दमा० ।

लतावेष्टितक न० आलिङ्गनभेदे । "उद्घृष्टपीडितं लता-

लप कथने भ्वा०पर० द्विक० सेट् । लपति । अलापीत्-अलपीत् । ऋदित् चङि न ह्रस्वः ।

लपन न० लप्यते उच्यतेऽनेन लप-करणे ल्युट् । १मुखे अमरः । भावे ल्युट् । २कथने च । [न० अमरः ।

लपित त्रि० लप-कर्मणि क्त । १कथिते । भावे क्त । २कथने

लप्सिका स्त्री खाद्यभेदे [illegible] २१८१ पृ० दृश्यम् ।

लब आलम्बने सक० शब्दे अक० भ्वा० आत्म० सेट् इदित् । लम्बते अलम्बिष्ट ।

लब्ध त्रि० लभ-कर्मणि क्त । १प्राप्ते अमरः । २नायिकाभेदे स्त्री जटा० । भावे क्त । प्राप्तौ ३लाभे न० । "अलब्धाधिकं लब्धम्" गीता० स्मृति ।

लब्धवर्ण पु० लब्धो वर्णो वर्णनं प्रशंसा ज्ञानवत्त्वेन येन । पण्डिते अमरः ।

लभ शब्दे अक०भ्वा०आत्म०सेट् इदित् । लम्भते अलम्भिष्ट ।

लभ प्राप्तौ सक० भ्वा० आत्म० अनिट् । लभते । अलब्ध । ड्वित् लब्धिमः । षित् लभा । अशब्लिटजादावार्द्धधातुके नुम् । आलम्भः उपालम्भः । अनुपसर्गात् घञि तु न लाभः । खलि च सर्वथा दुर्लभः ।

आ+स्पर्शे वधे च उप+ज्ञानभेदे उप+आ+तिरस्कारे ।

लभस न० लभ-असच् नि०नुम् । वाजिबन्धने उज्ज्वल० ।

लभ्य त्रि०लभ-कर्मणि यत् । १प्राप्ये मेदि० २न्याय्ये अमरः

लमक पु० रम-वुन् रस्य लः । १निर्लज्जे जारे त्रिका० ।

लम्पट पु० रम-अटन् पुक् च रस्य लः । परस्त्रीषु १लोलुपे मेदि० । २आसक्ते च ।

लम्ब पु० लबि-अच् । १नर्त्तके २कान्ते ३अङ्गे च उणा० । ४उत्कोचे हेमच० अङ्कशास्त्रोक्ते त्रिभुजादिक्षेत्रे भुज-कर्णयोर्मध्यस्थे लम्बमाने ५[illegible] च "आबाधाभुजसंयोगादन्तरमूलं प्रजायते लम्बः । लम्बगुणं भूम्यर्द्धं स्पष्टं त्रि-भुजे फलं भवति" लीला० । ७दीर्घे ८लम्बमाने च त्रि० ।

लम्बकर्ण पु० लम्बः कर्णो यस्य । १छागे मेदि० २अङ्कोटवृक्षे पु० ३हस्तिनि ४राक्षसे च पुंस्त्री०शब्दच० ५श्येनपक्षिणि राजनि० । ६लम्बश्रोत्रयुते त्रि० । कर्म० । ७लम्बमाने श्रोत्रे पु० । शशके स्त्रियां जातित्वात् ङीष् ।

लम्बकेश त्रि० लम्बः दीर्घः केशो यस्य । दीर्घकेशयुक्ते कुशमये

विटरे। "आवर्त्तकेशो भवेत् ब्रह्मा लम्बकेशस्तु विष्टरः। दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः" सं० त०। "केशोऽलापम्" रघु०। २दीर्घकेशयुक्ते त्रि०। कर्म०। ३दीर्घे केशे च पु०।

लम्बदन्ता स्त्री लम्बोदीर्घः दन्त इव बीजकण्टको यस्य। १सिंहलद्वीपभवपिप्पल्याम् राजनि०। २दीर्घदन्तयुक्ते त्रि० कर्म०। ३दीर्घे दन्ते पु०।

लम्बन न० लबि–ल्यु। नाभिदेशपर्य्यन्तं १लम्बमाने माल्यादौ अमरः। भावे ल्युट्। २आलम्बने न०।

लम्बबीजा स्त्री लम्बं दीर्घं बीजं यस्याः। सिंहलदेशजातपिप्पल्याम् राजनि०।

लम्बा स्त्री लम्बते लबि–अच्। १तिक्ततुम्ब्यां (तितलाउ) २लक्ष्म्यां ३गौर्य्याञ्च मेदि० ४दक्षकन्याभेदे ५हिमालयकन्याभेदे च हरिवं०।

लम्बोदर पु० लम्बं दीर्घमुदरं यस्य। १गणेशे अमरः। २तारानाम्न्यां देव्यां स्त्री गौरा० ङीष्। ३दीर्घोदरान्विते त्रि०।

लम्बो(म्बौ,ष्ठ पु० स्त्री० लम्बौ ओष्ठौ यस्य। उष्ट्रे त्रिका०। स्त्रियां ङीष्। [अलम्बिष्ट पर्य्यायध्वम्।

लय गतौ भ्वा० आत्म० सक० सेट्। लयते अलयिष्ट।

लय पु० ली–अच्। १संश्लेषे २विनाशे ३नृत्यगीतवाद्यानामेकतानताख्ये साम्ये च मेदि०। लीयतेऽत्र। सर्वभूताधारके ४परब्रह्मणि शब्दर० ५ईश्वरे च। तालस्य भेदाश्च "द्विपदी खाद्यवर्तिका भङ्गका विसर्वविष्टका। वामनुरवतांश्चैव खण्डधारा फङ्क्कुकः। जम्भाहिकावर्त्तिका च चण्डकः सुरिकस्तथा। कथितस्तदनन्तरोऽर्द्धचन्द्रसोऽथ नर्त्तकः। लयः मध्यन्दीरवनाबतष्टमन्दघटीत्यपि। कादम्बचर्चरी चट्टा मिश्रोऽर्द्धपतिना ततः। अतिचित्रः समयश्च वर्त्तितोऽर्द्धद्वयस्तथा। आनिबस्तु टक्करकस्ततश्चित्रविचित्रकौ। आन्द्री विकृतधारा च कुसुमोऽथ विलोलकः। रमणीयस्तथैव करकण्टकसंज्ञकः। चत्वारिंशदिमे प्रोक्ता लया लयविशारदैः। येन यज्ञो भगवान् जये जीनो जनार्दनः" सङ्गीतदा०।

लर्व गतौ भ्वा० पर० सक० सेट्। लर्वति अलर्वीत्।

लल इच्छायां चु०उभ०सक०सेट्। लालयति–ते अलीललत् त।

लल इच्छायां अद० चु०उभ०सक०सेट्। ललयति ते अललत् त।

ललज्जिह्व पु० ललन्ती आस्वाद्यास्वादनाय चलन्ती जिह्वा यस्य उस्य वः। १कुक्कुरे, २उष्ट्रे, ३हिंस्रजन्तौ त्रि० मेदि० स्त्रियां जातित्वात् ङीष्। ४चञ्चलजिह्वायुक्ते त्रि०। स्त्रियां टाप्।

ललन न० लड–ल्युट्, डस्य लः। १लालने। २केलौ हेमच० ३वाते ४शालवृक्षे ५प्रियालवृक्षे च पु० राजनि०। कर्तरि ल्यु। ६जिह्वायां ७नार्य्याञ्च स्त्री मेदि०।

ललनाप्रिय पु० कर्म०। १कदम्बे। २हीवेरे न० राजनि०। ३जिह्वाप्रिये, ४रमणीवल्लभे च त्रि०।

ललन्तिका स्त्री लड–झच् स्वार्थे क अत इत्वम् डस्य लः। नाभिदेशपर्य्यन्तं लम्बमाने १माल्यादौ अमरः। २गोधायां शब्दच०।

ललाट न० लड–अच् डस्य लः ललमटति अट–अण्। चक्षुषाधःस्थेऽङ्गभेदे (कपाल) अमरः।

ललाटन्तप पु० ललाटं तापयति तप–णिच् खच्–मुम्। १सूर्य्ये त्रि०को०। २ललाटतापके त्रि० "ग्रीष्मे ललाटन्तपनिष्ठुरांशुरा" नैषधम्।

ललाटपट्ट पु० ललाटं पट्टमिव विस्तीर्णत्वात्। मयूरव्यं० ललाटे ललाटफलकादयोऽप्यत्र।

ललाटिका स्त्री ललाटे आबध्यते ठन्। १ललाटभूषणे (टीका) अमरः २ललाटस्थे चिह्ने च।

ललाम न० लल–अच् तममति अम–अण्। १प्रधाने, २ध्वजे ३शृङ्गे ४बालधौ ५चिह्ने ६भूषायां ७रम्ये ८तिलके ९घोटके १०प्रभावे च मेदि०। मान्तत्वमप्यस्य रुद्रः।

ललामक न० ललामं तिलकमिव स्वार्थे कन्। ललाटपर्य्यन्तं सम्यग्लम्बिते माल्यभेदे अमरः।

ललित न० लल–क्त। १शृङ्गारानुगुणे चेष्टाभेदे "सुकुमारतयाऽङ्गानां विन्यासो ललितं भवेत्" सा० द०। २सुन्दरे, ३ईप्सिते च त्रि० अमरः ४स्वरभेदे पु० सङ्गी०। लड–क्त डस्य लः। ५लालने न०। ६कस्तूर्य्यां ७नार्य्यां च स्त्री राजनि०। ८नदीभेदे सा च नदी कालिकापु० ८१ अ० उक्ता। ९दुर्गायाम् "या दुर्गा सैव ललिता" पद्मपु० पाता०। १०राधासखीभेदे च।

ललितासप्तमी स्त्री ललिताप्रिया सप्तमी। ललितापूजाङ्गे १भाद्रशुक्लसप्तम्याम्, तद्दिनकर्त्तव्ये २व्रतभेदे च।

लव पु० लू–अप्। १लेशे २विनाशे ३छेदने ४श्रीरामपुत्रे मेदि० ५कालपरिमाणभेदे काष्ठाद्वये हेमच० ६गोलाङ्गूललोम्नि, ७बाले केशे च ८जातीफले न० शब्दच०। ९लवङ्गे १०लामज्जके ११ईषदर्थे राजनि०। १२लावपक्षिणि पुंस्त्री० राजनि०।

लवङ्ग न० लू-अङ्गच् । स्वनामख्याते द्रव्ये अमरः । "लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमम् । दीपनं पाचनं रुच्यं कफपित्तास्रनाशनम् । तृष्णां छर्दिं तथाध्मानशूलमाशु विनाशयेत् । कासं श्वासं च हिक्कां च क्षयं क्षिपति तद्ध्रुवम्" भावप्र० । स्वार्थे क तत्रैव शब्दर० ।

लवङ्गकलिका स्त्री लवङ्गं कलिकेव । लवङ्गे राजनि० ।

लवण पु० लू-ल्युट् पृषो० णत्वम् । १रसभेदे "लवणः शोधनो रुच्यः पाचनः कफपित्तदः । पुंस्त्वशातहरः कायशैथिल्यमृदुताकरः । चक्षुर्नाशास्रजलदः कपोलगलदाहकृत् । सोऽतियुक्तोऽक्षिपाकास्रपित्तकोठक्षतादिकृत् । वलीपलितखालित्यं कुर्य्यादर्पत्तृट्प्रदः" भावप्र० । तत्प्रधाने २सैन्धवसौवर्चलविड़ादिरूपे पदार्थे च न० । तदुत्पत्तिस्थाने ३सिन्धुदेशे ४समुद्रे ५मधुदैत्यसुते असुरभेदे च पु० । ६लवणरसयुक्ते मेदि० ७लावण्यवति च त्रि० ८नदीभेदे ९दीप्तौ च स्त्री मेदि० ।

लवणकिंशुका स्त्री लवणरसान्वितं किंशुकं पलाशं यस्याः । महाज्योतिष्मत्याम् राजनि० । [राजनि०

लवणक्षार पु० लवणमयः क्षारः । लवणसंयुक्ते क्षारे

लवणखनि स्त्री ६त० । साम्भरिलवणोत्पत्तिस्थाने हेमच० ।

लवणधेनु स्त्री दानार्थं कल्पितायां लवणनिर्म्मितायां धेनौ वराहपु० । [धान्यशैलशब्दे १९८१पृ० दृश्यम् ।

लवणाचल पु० दानार्थं कल्पिते अचलाकारे लवणस्तूपे ।

लवणाब्धि पु० लवणमयोऽब्धिः । लवणमधुरसमुद्रे । लवणसमुद्रादयोऽप्यत्र । [(करकचलवण) राजनि० ।

लवणाब्धिज न० लवणाब्धेर्जायते जन-ड । सामुद्रलवणे

लवणोत्तम न० लवणेषु उत्तमम् । सैन्धवलवणे रत्नमा० ।

लवणोद पु० लवणमयमुदकं यस्य उदादेशः । लवणसमुद्रे अमरः ।

लवन न० लू-भावे कर्म्मणि च ल्युट् । १छेदने अमरः (कोना काटा) २हले स्त्री शब्दच० ङीप् । [हले राजनि० ।

लवली स्त्री० लवं छेदं लाति ला-क गौ० ङीष् । (नोयाड़)

लवित्र न० लूयतेऽनेन लू-इत्र । १दात्रे अमरः ।

लश(ष)(स) शिल्पयोगे चु०उभ०सक०सेट् । लाश(ष)(स)यति ते अललाश(ष)(स)त् त ।

लशु(सु)न न० अश-उनन् लशन् वा धातोरादेर्लश्च । (रशुन) । रसोने भावप्र० ।

तस्योत्पत्तिगुणादि भावप्र० उक्तं यथा

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् । अरिष्टो म्लेच्छकन्दः स्यात् यवनेष्टो रसोनकः । यदामृतं वैनतेयो जहार सुरसत्तमात् । तदा ततोऽपतद्बिन्दुः स रसोनोऽभवद्भुवि । पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्जितः तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः । कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः । नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः । बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः । रसोनो बृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः । रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः । भग्नसन्धानकृत् कण्ठ्यो गुरुः पित्तास्रवृद्धिदः । बलवर्णकरो मेधाहितो नेत्र्यो रसायनः । हृद्रोगजीर्णज्वरकुक्षिशूलविबन्धगुल्मारुचिकासशोफान् । दुर्नामकुष्ठानलसादजन्तुसमीरणश्वासकफांश्च हन्ति । मद्यं मांसं तथाम्लञ्च हितं लशुनसेविनाम्" । दीर्घनध्यः शब्दर० ।

लष स्पृहायां दिवा० भ्वा०च उभ०सक०सेट् । लष्यति-ते लषति ते अलषीत् अलाषीत् अलषिष्ट ललाष लेषे ।

लस श्लेषे क्रीडायां दीप्तौ च अक०भ्वा०पर०सेट् । लसति अलासीत् अलसीत् ।

लसा स्त्री लसति लस-अच् । हरिद्रायाम् हारा० ।

लसिका स्त्री लस अच् टाप् अत इत्त्वम् । लालायां शब्दच० ।

लस्ज व्रीडायां भ्वा०आ०अक०सेट् । लज्जते अलज्जिष्ट । ईदित् निष्ठायामनिट् ओदित् निष्ठातस्य नः । लग्नः ।

लस्त त्रि० लस-क्त नि० इडभावः । १श्लिष्टे, क्रीडिते, २शिल्पयुक्ते च । संज्ञायां कन् । धनुर्मध्यभागे पु० अमरः

लहरि(री) स्त्री लेन-हृ-इन् येन ह्रियते ऊर्द्ध्वगमनाय हृ-कर्म्मणि इन् वा ङीष् । महातरङ्गे हेमच० ।

ला आदाने अदा० पर० सक० अनिट् । लाति अलासीत् ।

लाक्षणिक त्रि० लक्षणया बोधयति ठक् । १लक्षणया अर्थबोधके शब्दे । अस्त्यर्थे ठन् स्वार्थे अण् । २लक्षणयुक्ते च ।

लाक्षण्य त्रि० लक्षणं वेत्ति ष्यञ् । १शुभाशुभलक्षणज्ञे । अस्त्यर्थे वा० ष्यञ् । २लक्षणयुक्ते ।

लाक्षा स्त्री लक्ष्यतेऽनया लक्ष-अच् पृषो० वृद्धिः । (ला)ख्याते पदार्थे अमरः । २रञ्जनद्रव्ये ।

लाक्षातरु पु० लाक्षायोनिस्तरुः । (ला) द्रव्यसाधने वृक्षे शब्दच० । लाक्षावृक्षादयोऽप्यत्र ।

लाक्षादितैल न० लाक्षादिभिः पक्वं तैलम् शा०त० । वैद्यकप्रसिद्धे तैलभेदे तच्च द्विविधं स्वल्पं बृहच्चेतिभेदात् तत्र स्वल्पं यथा "लाक्षा हरिद्रा मञ्जिष्ठाकल्कैस्तैलं विपाचितम् ।

तद्गुणेनारनालेन दाहशीतज्वरापहम्”। बृहत् यथा “लाक्षारसाढके प्रस्थं तैलस्य विपचेत् भिषक्। मस्तुषड्गुणसंयुक्तं पिष्टा चात्र समावपेत्। शतपुष्पां हरिद्रां च मूर्वां कुष्ठं हरेणुकाम्। कटुकां मधुकां रास्नामश्वगन्धां च दारु च। मुस्तकं चन्दनं चैव पृथगक्षसमानकैः। द्रव्यैरेतैश्च संसिद्धमभ्यङ्गात् मारुतापहम्। विषमाख्यान् ज्वरान् सर्वानाश्वेवं प्रशमं नयेत्। कासं श्वासं प्रतिश्यायं कण्डूं दौर्गन्ध्यगौरवम्। त्रिकपृष्ठग्रहं शूलं गात्राणां स्फुटनं तथा। पापालक्ष्मीप्रशमनं सर्वग्रहनिवारणम्। अश्विभ्यां निर्मितं सम्यक् तैलं लाक्षादिकं महत्” सुखबोधः। [राजनि०

लाक्षाप्रसाद पु० लाक्षायां प्रसादो यस्य। पट्टिकालोध्रे

लाक्षाप्रसाधन न० प्रसाध्यते भूष्यतेऽनेन ल्युट् लाक्षा तद्रूप एव प्रसाधनमस्य। २रक्तलोध्रे अमरः।

लाक्षारस पु० लाक्षानिःसृतो रसः द्रवः। अलक्तकरसे।

लाख शोषे भूषणे दाने वारणे च सक० सामर्थ्ये अक०भ्वा० पर०सेट्। लाखति अलाखीत् ऋदित् चङि न ह्रस्वः।

लाघ सामर्थ्ये भ्वा० आ० अक०सेट्। लाघते अलाघिष्ट। ऋदित् चङि न ह्रस्वः।

लाघव न० लघोर्भावः अण्। १लघुत्वे आरोग्ये च राजनि०

लाङ्गल न० लगि-कलच् पृषो० वृद्धिः। स्वनामख्याते १भूमिकर्षके पदार्थे अमरः। २लिङ्गे त्रिका० ३पुष्पभेदे ४तालवृक्षे ५गृहदारुणि च मेदि०। [(ईष) अमरः।

लाङ्गलदण्ड पु० ६त०। लाङ्गलमध्यस्थे काष्ठमये दण्डे

लाङ्गलपद्धति स्त्री लाङ्गलखाता पद्धतिः रेखा। सीतायाम् लाङ्गलखातक्षेत्रस्थभूमिरेखायाम् अमरः।

लाङ्गलिकी स्त्री लाङ्गलमिवाकारोऽस्त्यस्याः ठन् गौ० ङीष् (विषलाङ्गला) १वृक्षभेदे अमरः। तत्र भवः अण् २विषभेदे पु० हेमच०।

लाङ्गलिन् पु० लाङ्गलं प्रहरणसाधनत्वेनास्त्यस्य इनि। १बलरामे शब्दर०। लाङ्गलदण्ड इव दीर्घः आकारोऽस्त्यस्य इनि। २नारिकेलवृक्षे अमरः।

लाङ्गली स्त्री लाङ्गलाकारः पुष्पमस्त्यस्याः अच् गौरा०ङीष् (काँचड़ा) शाकभेदे अमरः।

लाङ्गूल न० लगि-ऊलच् पृषो०। पशूनां शाखादर्शिनि रोम पुच्छे भारचन्द्री २शेफे मेदि० ३कुसूले त्रिका०।

लाङ्गूलिका स्त्री लाङ्गूलाकारोऽस्त्यस्याः ठन्। पृश्निपर्ण्याम् राजनि०। [तदाकारपुष्पयुते २वृषभौषधे च राजनि०।

लाङ्गूलिन् पु० लाङ्गूलमस्त्यस्य इनि। १वानरे शब्दच०

लाछ लक्षणे भ्वा०पर०सक०सेट् इदित्। लाञ्छति अलाञ्छीत्। [इदयम्। लाञ्जति अलाञ्जीत्।

लाज भर्त्सने भ्वा०पर०सक०सेट्। लाजति अलाजीत्। इदि

लाज न० लाज-अच्। १उशीरे २आर्द्रतण्डुले पु० मेदि०। ३भृष्टधान्ये (खइ) पु०ब०व०अमरः। स्त्रीत्वमप्यत्र मेदि०।

लाञ्छन न० लाञ्छ्यते लाछि-कर्मणि ल्युट्। १चिह्ने २नामनि च मेदि० भावे ल्युट्। ३अङ्कने।

लाट पु० लट-संज्ञायां घञ्। १देशभेदे २वस्त्रे अमरः ३जीर्णालङ्कारे शब्दर०। ४विदग्धपुरुषे च सा०द०।

लाटानुप्रास पु० अलङ्कारोक्ते शब्दालङ्कारभेदे अनुप्रासशब्दे १७८४पृ० अलङ्कारशब्दे च ३८८ पृ० दृश्यम्।

लाड क्षेपे अद०चु०उभ०सक०सेट्। लाडयति ते।

लाभ पु० लभ्यते लभ-कर्मणि घञ्। १मूलधनादितोऽधिके लभ्यमाने धने अमरः। भावे घञ्। २प्राप्तौ।

लामज्जक न० लायते ला-क्विप् लाः आदीयमानः मज्जा सारो यस्य कप्। वीरणमूले अमरः।

लालन न० चु०लल-ल्युट्। स्नेहपूर्वकपालने।

लालसा स्त्री लस-स्पृहायां यङ् लुक् भावे अ। १अतिप्रयेच्छायाम् अमरः। २गर्भिणीदोहदे हेमच०। ३याच्ञायां औत्सुक्ये च मेदि०। कर्त्तरि अच्। ५लोभे त्रि० हेमच०।

लाला स्त्री चु०लल-णिच् अच्-टाप्। मुखजजलवने अमरः

लालाटिक त्रि० ललाटं प्रभोर्भाग्यं पश्यति ठञ्। १प्रभुभाग्योपजीविनि कार्याक्षमे अमरः। ललाटात् ललाटस्थभाग्यात् आगतः तस्येदं वा ठण्। २भाग्याधीने त्रि० “प्राप्तिस्तु लालाटिकी” इत्युद्भटः। ३ललाटसम्बन्धिनि त्रि०।

लालाविष पु० लालायां विषमस्य। १लूतादौ कीटे हेमच० कीटशब्दे २०५९ पृ० दृश्यम्। [हेमच०।

लालास्राव लालां स्रावयति स्रु-णिच्-अण्। लूताकीटे

लालित्य न०. ललितस्य भावः ष्यञ्। १सौन्दर्ये २मनोहरत्वे “नैषधे पदलालित्यम्” इत्युद्भटः।

लाव पुंस्त्री० लू-कर्त्तरि संज्ञायां घञ्। १पक्षिभेदे अमरः। स्त्रियां ङीष्। स्वार्थे क। तत्रैव भावे घञ्। २छेदने।

लावण न० लवणेन संस्कृतम् अण्। लवणसंस्कृते औषधादौ

लावणिक न० लवणेन संस्कृतम् ठण्। १लवणेन संस्कृतौषधादौ हेमच०। लवणं पण्यमस्य ठण्। २लवणविक्रयोपजीविनि वणिग्भेदे च।

लावण्य न॰ लवणस्य भावः ष्यञ्। लवणत्वे "मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते" उज्ज्वलमणुक्ते देहसौन्दर्यभेदे च।

लासिका स्त्री लस–ण्वुल्। नर्त्तक्याम् अमरः। पृषो॰ लासकीत्यप्यत्र तट्टीका।

लास्य न॰ लस–ण्यत्। १नृत्ये अमरः। २वाद्यनृत्यगीतत्रिके मेदि॰। "स्त्रीनृत्यं लास्यमुच्यते" इत्युक्ते ३स्त्रीनृत्ये च। स्वार्थे ष्यञ्। तत्रैव।

लिकुच पु॰ लकुच–पृषो॰ इत्वम्। (माँदार) वृक्षे अमरः।

लिक्षा(क्षा) स्त्री लिष–गतौ क्स षड्कपत्वानि पृषो॰ वा कत्व। १यूकाण्डे शब्दर॰। "जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः। तैश्चतुर्भिर्भवेल्लिक्षा" २इत्युक्ते परिमाणभेदे च।

लिख लेखने तुदा॰पर॰सक॰सेट्। लिखति अलेखीत्। कुटादिरप्ययम् तेन लिखनमिति भिदम्।

लिख गतौ भ्वा॰पर॰सक॰सेट् इदित्। लिङ्खति अलिङ्खीत्

लिखन न॰ क्ली॰ लिख–भावादौ ल्युट्। १लेखने २लिपौ च

लिखित न॰ लिख–भावे क्त। १लेखने। आधारे क्त। २लिपौ अमरः। विवादे अर्थसाधके ३पत्रे च "प्रमाणं लिखितं भुक्तिः" स्मृतिः। लेख्यशब्दे दृश्यम्। ४स्मृतिकारके शङ्खमुनिभ्रातरि मुनिभेदे पु॰।

लिग गतौ भ्वा॰पर॰सक॰सेट् इदित्। लिङ्गति अलिङ्गीत्।

लिग चित्रीकरणे चुरा॰उभ॰सक॰सेट् इदित्। लिङ्गयति ते अलिलिङ्गत् त।

लिङ्ग पु॰ लिगि–अच्। १चिह्ने २असाधारणचिह्ने उपस्थेन्द्रिये अमरः। ३अनुमानसाधने हेतौ ४सांख्योक्ते प्रधाने तस्यात्मविवेकहेतुत्वात् तथात्वम् ५शिवमूर्त्तिभेदे मेदि॰ ६व्याप्ये ७व्यक्ते शब्दगते पदसाधुताप्रयोजके ८धर्मभेदे त्रिका॰ ९अर्थप्रकाशनसामर्थ्ये च। "सामर्थ्यं च लिङ्गमिति" मीमांसकाः।

शब्दधर्मलिङ्गं चास्माभिः शब्दार्थरत्ने निरूपितं यथा "लिङ्गत्वञ्च प्राकृतगुणगतावस्थात्मको धर्म एव तद्विशेषश्च पुंनपुंसकत्वादिः। तथा हि सर्वेषां त्रिगुणप्रकृतिकार्यं तया शब्दानामपि तथात्वेन गुणगतविशेषावस्थाटेषु लिङ्गविशेष इति कल्प्यते स च विशेषः शास्त्रे इत्यमभ्यधायि। "विकृतसत्त्वादीनां तुल्यरूपेणावस्थानात् नपुंसकत्वं सत्त्वस्याधिक्ये पुंस्त्वम् अल्पत्वे (रज आधिक्ये) स्त्रीत्वमिति"। एवञ्च लिङ्गस्य शब्दधर्मत्वेऽपि शब्देन

तदर्थाभेदारोपात् अस्ति बाधके अर्थेऽपि साक्षात् तत्पारतन्त्र्येण वा सत्त्वं तस्य विशेषणत्वम् शाब्दबोधे शब्दभानस्येष्टत्वाच्च शब्दस्य नामार्थतावत् तद्गतलिङ्गस्यापि नामार्थतौचित्यात् "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते" इति हर्युक्तेः "शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा। नो चेत् श्रोत्रादिभिः सिद्धोऽप्यसावर्थोऽवभासते" हर्युक्तेश्च शब्दानां नामार्थतावगतेः। तथा प्रातिपदिकार्थाभेदविवक्षायां तु श्रोत्रादिभिरेव सिद्धः ज्ञातः सन् अर्थे प्रकारतया भासते इति तदर्थः। युक्तञ्चैतत् पुंलिङ्गः शब्द इति व्यवहारात् "स्वमोर्नपुंसकादिति" पा॰सूत्रे शब्दस्यैव नपुंसकत्वव्यपदेशात् दारानित्यादौ पुंस्त्वान्वयबाधाच्च लिङ्गस्य शब्दधर्मत्वमन्यथैतेषु लिङ्गाद्यनन्वयापत्तेर्व्यवहारस्त्रनिर्देशासङ्गत्यापत्तेश्च। तथा अर्थभेदाच्छब्दभेदवत् लिङ्गभेदादपि शब्दभेद इति कल्प्यते प्रागुक्तधर्मविशेषरूपभेदकसद्भावात्। उक्तञ्च भाष्ये "एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वमिति"। एवञ्च तटादिशब्दानामनेकलिङ्गत्वव्यवहारः समानानुपूर्वीकत्वेनैव वस्तुतस्तेषां भिन्नानामेव भिन्नलिङ्गत्वमिति दिक्"।

अर्थप्रकाशनसामर्थ्यरूपलिङ्गन्तु द्वितीयादिश्रवणे तत्तन्मन्त्रप्रकाश्यार्थे विनियोगसाधकं यथा "बर्हिर्देवसदनं दामीति" अत्र दामीति पदस्य दा लवने इत्यस्माद्धातोः सिद्धस्य छेदनप्रकाशनसामर्थ्यात् बर्हिरित्यस्य चास्तृतदर्भप्रकाशनसामर्थ्यात् दर्भच्छेदने समुदायमन्त्रस्य विनियोगोऽवगम्यते" तत्त्वबोध॰। प्रत्यक्षद्वितीयाश्रवणे तु लैङ्गिकविनियोगस्त्यज्यते "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" जै॰ सू॰। यथा "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" श्रुतिः ऐन्द्री च ऋक् "कदाचन स्तरीरसि नेन्द्र ! दाशुषे" अस्य मन्त्रस्य इन्द्रप्रकाशनसामर्थ्यम् तदेतत् निरूपितं तत्त्वबोधन्याम् "तथा हि गार्हपत्यमिति द्वितीयारूपप्रत्यक्षश्रुत्या गार्हपत्याग्निगतं क्रियाजन्यप्रीतिफलाश्रयत्वरूपं कर्मत्वं साक्षाद्बोधितं तथा च तस्य देवतात्वं श्रुतिप्राप्तं क्रियाजन्यप्रीतिभागित्वेनोद्देश्यस्यैव देवतात्वादिति गार्हपत्याग्नेरुपस्थानस्य शेषितावगम्यते ऐन्द्र्येति तृतीयया ऋचः करणत्वबोधनादुपस्थानशेषत्वमवगम्यते मन्त्रलिङ्गेनेन्द्रस्यापि शेषत्वमित्युभयोरुपस्थानं देवतात्वञ्चावगम्यते। तथा च विरोधः न ह्यन्यप्रकाशकमन्त्रेणान्योपस्थानं

र्बिद्द्रतमिति तदपरीहाराय मन्त्रस्येन्द्रपदे विधिवाक्यस्थगार्हपत्यपदे वा एकत्र लक्षणावश्यकी। तत्र गार्हपत्यपदस्य इन्द्रे न लक्षणा गार्हपत्यदेवतात्वस्य लिङ्गानिरपेक्षश्रुतिप्राप्तत्वात् इन्द्रदेवतात्वन्तु लिङ्गेन विलम्बबोध्यम्। तथा हि इन्द्रप्रकाशनसामर्थ्यान्यथानुपपत्त्या इन्द्रमुपतिष्ठते इति कल्प्यते इति इन्द्रस्य देवतात्वं विलम्बेनगम्यमिति शीघ्रबोधकत्वेन श्रुतिरेव बलवतीति लिङ्गं दुर्बलम्। अतएव न समुच्चयः न वा इन्द्रस्यैवेति नियमः लिङ्गस्य दुर्बलत्वेन इन्द्रोपस्थानस्याप्राप्तत्वात्। एवञ्च श्रुतितोऽग्न्युपस्थाने विधेः कयमित्याकाङ्क्षायामैन्द्र्येति। ततश्च मन्त्रस्येन्द्रप्रकाशकत्वात् तेनाग्न्युपस्थानानुपपत्तेः न ह्यन्योपस्थापकमन्त्रेणान्यस्योपस्थानं युक्तमित्यनुपपत्त्या मन्त्रस्येन्द्रपदस्य इदि परमैश्वर्य्ये इति धात्वनुसारादैश्वर्य्यगुणयोगादग्नौ लक्षणा" "यावदेव हि मन्त्रार्थो मन्त्रेण प्रतिपाद्यते। मन्त्रार्थं मन्त्रतो बुद्धा पश्चात्कर्म्म निरूप्यते। मन्त्राकाङ्क्षावशेऽप्यैन्द्र्येत्यस्य श्रुतिकल्पना। श्रुत्या प्रत्यक्षया पूर्वं गार्हपत्यार्थतां गते। लिङ्गस्य हि प्रमाणत्वं मन्त्राकाङ्क्षानिबन्धनम्। तावच्च श्रुतिर्विरुध्यन्ती ह्यविरोधेन गच्छति। विरोधे च श्रुतिर्लिङ्गं बलीयस्त्वेन बाधते"। लिङ्गं यथा गच्छति प्रमो०। १० वाच्योऽङ्गे महत्तत्त्वे देवशब्दे २७५४ पृ० दृश्यम्। ११ सप्तदशावयवे लिङ्गदेहे। "सप्तदशैकं लिङ्गम्" सा० सू० "सूक्ष्मशरीरमध्याधाराधेयभावेन द्विविधं भवति तत्र सप्तदश मिलित्वा लिङ्गशरीरं तच्च सर्गादौ समष्टिरूपमेकमेव भवतीत्यर्थः। एकादशेन्द्रियाणि पञ्च तन्मात्राणि बुद्धिश्चेति सप्तदश। अहङ्कारस्य बुद्धावेवान्तर्भावः। चतुर्थसूत्रवक्ष्यमाणप्रमाणादेतान्येव सप्तदशलिङ्गं मन्तव्यम्। न तु सप्तदश एकं चेत्यष्टादशतया व्याख्येयम् उत्तरसूत्रेण व्यक्तिभेदस्योपपाद्यतयात्र लिङ्गैकत्वे एकशब्दस्य तात्पर्य्यावधारणात्। "कर्म्मात्मा पुरुषो योऽसौ बन्धमोक्षैः स युज्यते। स सप्तदशकेनापि राशिना युज्यते च सः" इति मोक्षधर्म्मादौ लिङ्गशरीरस्य सप्तदशत्वसिद्धेश्च सप्तदशावयवा अत्र सन्तीति सप्तदशको राशिरित्यर्थः। राशिशब्देन स्थूलदेहस्यावयवित्वं निराकृतम् अवयविरूपेण द्रव्यान्तरकल्पनायां गौरवात्। स्थूलदेहस्य चावयवित्वमेकतादिप्रत्ययानुरोधेन कल्प्यत इति। अत्र च लिङ्गदेहे बुद्धिरेव प्रधानेत्याशयेन लिङ्गदेहस्य भोगः प्रागुक्तः। मनोऽहङ्कारयोश्चान्तःकरणस्यैव वृत्तिभेदः। अतो लिङ्गदेहे प्राणपञ्चकस्याप्यन्तर्भाव इत्यस्य सप्तदशावयवकस्य शरीरत्वं स्वयं वक्ष्यति "लिङ्गशरीरनिमित्तक इति सनन्दनाचार्य्यः" इति सूत्रेण। अतो भोगायतनत्वमेव मुख्यं शरीरलक्षणम्। तदाश्रयतया त्वन्यत्र शरीरत्वमिति पश्चाद्व्यक्तीभविष्यति। चेष्टेन्द्रियार्थाश्रयः शरीरमिति तु न्यायेऽपि तस्यैव लक्षणं कृतमिति" भा०। "तदधिष्ठानाश्रये देहे तद्वादात् तद्वादः" सा० सू०। "तस्य लिङ्गस्य तदधिष्ठानमाश्रयो यत्सूक्ष्मपञ्चभूतपञ्चकं तस्याश्रये षाट्कौशिकदेहे तद्वादो देहवादस्तद्वादात् तस्याधिष्ठानशब्दोक्तस्य देहस्य वादादित्यर्थः लिङ्गसम्बन्धादधिष्ठानस्य देहत्वमधिष्ठानाश्रयत्वाच्च स्थूलस्य देहत्वमिति पर्य्यवसितोऽर्थः"। अधिष्ठानशरीरं च सूक्ष्मं पञ्चभूतात्मकं वक्ष्यते तथा च शरीरत्रयं सिद्धम्" "वासना भूतसूक्ष्मं च कर्म्मविद्ये तथैव च। दशेन्द्रियं मनोबुद्धिरेतल्लिङ्गं विदुर्बुधाः" इति वाशिष्ठादिवाक्येभ्यः। अत्र लिङ्गशरीरप्रतिपादनेनैव पुर्य्यष्टकमपि व्याख्येयमित्याशयेन बुद्धिधर्म्माणामपि वासनाकर्म्मविद्यानां पृथगुपन्यासः। भूतसूक्ष्मं चात्र तन्मात्रा, दशेन्द्रियाणि च ज्ञानकर्म्मेन्द्रियभेदेन पुरद्वयमित्याशयः। यत्तु मायावादिनो लिङ्गशरीरे तन्मात्रस्थाने प्राणादिपञ्चकं प्रक्षिपन्ति पुर्य्यष्टकं चान्यथा कल्पयन्ति तदप्रामाणिकमिति" भा०। वेदान्तिमते "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" इत्युक्तं सप्तदशावयवं लिङ्गशरीरमिति भेदः।

लिङ्गक पु० लिङ्गेन कायति कै—क। कपित्थवृक्षे शब्दच०।

लिङ्गपुराण पु० व्यासप्रणीते महापुराणभेदे लिङ्गपुराणप्रतिपाद्यविषया यथा "ब्रह्मोवाच "शृणु पुत्र! प्रवक्ष्यामि पुराणं लिङ्गसंज्ञितम्। पठतां शृण्वताञ्चैव भुक्तिमुक्तिप्रदायकम्। यच्च लिङ्गाभिधे तिष्ठन् वह्निलिङ्गे हरोऽभ्यधात्। मह्यं धर्म्मादिसिद्ध्यर्थमग्निकल्पकथाश्रयम्। तदेव व्यासदेवेन भागद्वयसमाचितम्। पुराणं लिङ्गमुदितं बह्वाख्यानविचित्रितम्। तदेकादशसाहस्रं हरमाहात्म्यसूचकम्। परं सर्वपुराणानां सारभूतं जगत्त्रये। पुराणोपक्रमे प्रश्नः सृष्टिसंक्षेपतः पुरा। तत्र पूर्वभागे "योगाख्यानं ततः प्रोक्तं कल्पाख्यानं ततः परम्। लिङ्गोद्भवस्तदर्च्चा च कीर्त्तिता हि ततःपरम्। सनत्कुमारशैलादिसंवादश्चाथ पावनः। ततो दधीचिचरितं युगधर्म्मनिरूपणम्। ततो भुवनकोषाख्या

स्र्य्यं सोमान्वयस्ततः। ततश्च विस्तरात् सर्गस्त्रिपुराख्यानकं तथा। लिङ्गप्रतिष्ठा च ततः पशुपाशविमोचनम्। शिवव्रतानि च तथा सदाचारनिरूपणम्। प्रायश्चित्तान्यरिष्टानि काशीश्रीशैलवर्णनम्। अन्धकाख्यानकं पश्चाद्वाराहचरितं पुनः। नृसिंहचरितं पश्चाज्जलन्धरवधस्ततः। शैवं सहस्रनामाथ दक्षयज्ञविनाशनम्। कामस्य दहनं पश्चात् गिरिजायाः करग्रहः। ततो विनायकाख्यानं नृत्याख्यानं शिवस्य च। उपमन्युकथा चापि पूर्वभाग इतीरितः। उत्तरभागे विष्णुमाहात्म्यमम्बरीषकथा ततः। सनत्कुमारनन्दीशसंवादश्च पुनर्मुने। शिवमाहात्म्यसंयुक्तस्नानयागादिकं ततः। सूर्य्यपूजाविधिश्चैव शिवपूजा च मुक्तिदा। दानानि बहुधोक्तानि श्राद्धप्रकरणन्ततः। प्रतिष्ठा तत्र गदिता ततोऽघोरस्य कीर्त्तनम्। व्रजेश्वरी महाविद्या गायत्रीमहिमा ततः। त्र्यम्बकस्य च माहात्म्यं पुराणश्रवणस्य च। एतस्योपरिभागस्ते लैङ्गस्य कथितो मया। व्यासेन हि निबद्धस्य रुद्रमाहात्म्यसूचिनः। लिखित्वैतत् पुराणन्तु तिलधेनुसमन्वितम्। फाल्गुन्यां पूर्णिमायां यो दद्याद्भक्त्या द्विजातये। यः पठेच्छृणुयाद्वापि लैङ्गं पापापहं नरः। स भुक्तभोगो लोकेऽस्मिन्नन्ते शिवपुरं व्रजेत्। लिङ्गानुक्रमणीमेतां पठेद् यः शृणुयात् तथा। तावुभौ शिवभक्तौ तु लोकद्वयभोगिनौ। जायेतां गिरिजाभर्त्तुः प्रसादान्नात्र संशयः" नार०पु०१०२अ०।

लिङ्गवर्द्धिनी स्त्री लिङ्गं पुरुषचिह्नभेदं वर्द्धयति वृध-णिच्-णिनि। अपामार्गे शब्दच०।

लिङ्गवृत्ति पु० लिङ्गं संन्यासादिवेषधारणमेव वृत्तिः जीविका यस्य। जीविकार्थमन्याश्रमचिह्नादिधारिणि कपटपरिव्राजके अमरः।

लिङ्गिन् त्रि० लिङ्गमस्त्यस्य इनि। १चिह्नवति, २जीविकार्थसंन्यासादिचिह्नवति. ३प्रशस्तलिङ्गयति गजे च पु० जटा०। ४लिङ्गज्ञानविषये साध्ये ५पक्षे च। "तल्लिङ्गालिङ्गिज्ञानपूर्वम्" सा० का० व्याख्याने लिङ्गिपदस्यावर्त्तनीयं तेन लिङ्गमस्यास्तीति पक्षधर्मताज्ञानमपि दर्शितम्" त० कौ०। [गुरिया) लताभेदे राजनि०।

लिङ्गिनी स्त्री लिङ्गमिवाकारोऽस्त्यस्याः इनि ङीप्। (पंच-

लिङ्गोपहित पु० लिङ्गेन हेतुना उपहितः विशिष्टः। व्याप्यानुमानाङ्गहेतुयुक्ते पक्षे। आचार्य्यमते लिङ्गोपहित एव पक्षो लैङ्गिकस्य साध्यस्य भानम्। तथा हि वह्निव्याप्यो हि धूमो वह्नेर्लिङ्गं भवति पक्षे वह्नेर्भानम् वह्निव्याप्यधूमवान् पर्वत इति परामर्शोत्तरं जायमानानुमाने ज्ञानलक्षणया तादृशपक्षभानस्यावश्यकत्वात्। तथा च वह्निव्याप्यधूमवान् पर्वतो वह्निमान् इत्येव तत्रानुमानप्रकारः। [अलिपत् अलिपत अलिप्त।

लिप लेपने, तुदा० उभ० मुचा० सक० अनिट्। लिम्पति ते

लिपि(पी) स्त्री लिप-इक् वा ङीप्। १लिखिताक्षरके पत्रे, अमरः २लेपने च। [लेखके अमरटी०।

लिपिक(का)र पु० लिपिं करोति कृ-अच् अण् वा।

लिप्त त्रि० लिप-क्त। १भुक्ते, २कृतचन्दनादिलेपे अमरः ३मिलिते मे०कौ० ४विषदिग्धे च मेदि०। ज्योतिषोक्ते राशेः षष्टिभागात्मके कलारूपे ५भागे स्त्री। "लिप्तार्द्धहीनं यदि पूर्व्वमेतत्" इति नी० ताजकम्। स्वार्थे क अत इत्त्वम्। लिप्तिका दण्डात्मककाले।

लिप्तक पु० कुत्सितं लिप्तम् कन्। विषाक्तशल्ये अमरः।

लिप्सा स्त्री लभ सन्-भावे अ। १लाभेच्छायाम् २इच्छायां अमरः। "लिप्साभ्रमे तृतीयवर्णके द्रव्यार्जननियमस्य क्रत्वर्थत्वमापादितं गुरुणा" मिता०। [२चौरे च शब्दर०।

लिम्पाक पु० लिप-षाकन् मुम् उणा०। १जम्बीरभेदे (पातिलेबु)

लिवि(वी) लिप-इक् पृषो० पस्य वः वा ङीप्। लिपिशब्दार्थे अमरः। लिविकरादयोऽपि लिपिकराद्यर्थे।

लिश अल्पे अल्पीभावे च दि० अक० आत्म०अनिट्। लिश्यते अलिक्षत।

लिश गतौ तु० पर० सक० अनिट्। लिशति अलिक्षत्।

लिह आस्वादने अदा० उभ० सक० अनिट्। लेढि लीढे। अलिक्षत् त। [ओदित् निष्ठातस्य नः। लीनः।

ली श्लेषे दिवा० आ० अक० अनिट्। लीयते अलेष्ट।

ली श्लेषे क्र्या०प्वा० पर० सक० अनिट्। लिनाति अलैषीत्।

ली द्रावणे वा चुरा० उभ० सक० सेट् पक्षे भ्वा० पर० अनिट्। लीनयति ते लाय(प)यति ते एतम् लयति। अद्रावणे लोहं विलाययतीत्येव। प्रलम्भने अभिभवे पूजायाञ्च सक०आत्म०। तत्र नित्यमात्वं पुक्। जटाभिर्लापयते पूजामधिगच्छतीत्यर्थः। श्येनो वर्त्तिकामुल्लापयते अभिभवतीत्यर्थः। बालमुल्लापयते वञ्चयतीत्यर्थः। अलीलयत् त अलील(प)यत् त। अलैषीत्। अलासीत्।

लीढ त्रि० लिह-आस्वादे क्त। १आस्वादिते, २स्पृष्टे च।

लीला स्त्री ली-क्विप् लियं लाति ला-क। १केलौ, २विलासे ३शृङ्गारादिजातचेष्टायाम् मेदि०। "अप्राप्तवल्लभसमा-

गमनादिकायाः, मध्याःप्रगल्भ निजाङ्ग-चिह्नप्रियद्युतिका, आलापवेशगतिहास्यविलोकनाद्यैः प्राणेश्वरानुकृतिमाकलयन्ति लीलाम्” उज्ज्वलमण्युक्ते ४प्रियानुकरणे च ।

लीलावती स्त्री लीला+अस्त्यर्थे मतुप् मस्य वः । १विलासवत्यां स्त्रियां, भास्कराचार्य्यस्य २पुत्र्यां, तत्कृते ३अङ्कग्रन्थभेदे मण्डनाचार्य्यस्य ४भार्य्यायां तन्नामके न्यायशास्त्रप्रसिद्धे “नाथः स्तनतीत्यादिके” न्यायमतसिद्धपदार्थप्रतिपादके ५ग्रन्थभेदे, पुराणप्रसिद्धे ६वेश्याभेदे च ।

-ति॰ त॰ मतुप्पु॰ । [२देवकने च त्रिका॰ ।

लीलोद्यान न॰ लीलार्थमुद्यानम् । १क्रीडार्थे आरामे,

लुक्कायित त्रि॰ लुच्यते लुञ्च-अपनयने क्विप् लुक् कायो यस्य तादृश इवाचरति लुक्काय+क्विप्-क्त । अन्तर्हितदेहे

लुज कथने अद्दधातोरर्थे च चुरा॰ उभ॰सक॰ सेट् इदित् । लुञ्जयति ते अलुलुञ्जत् त ।

लुञ्चित त्रि॰ लुञ्च-णिच्-क्त । अपसारिते दूरीकृते ।

लुट दीप्तौ अक॰ प्रतिघाते सक॰ भ्वा॰ आत्म॰ सेट् । लोटते ऋदित् लुङि उभ॰ अलुटत् अलोटिष्ट ।

लुट हरणे भ्वा॰पर॰सक॰सेट् इदित् । लुण्टति अलुण्टीत् ।

लुट दीप्तौ चु॰उभ॰सक॰सेट् । लोटयति ते अलूलुटत् त ।

लुट विलोडने, हरणे च दिवा॰ सक॰ पर॰सेट् । लुट्यति अलुटत् । ऋदित् चङि वा ह्रस्वः ।

लुट विलोडने सम्बन्धे च दिवा॰ सक॰पर॰सेट् । लुट्यति अलोटीत् । अत्रार्थे भ्वादिरपि । लोटति ।

लुट गतौ चौर्य्ये च सक॰ अङ्गीभावे आलस्ये च अक॰ भ्वा॰ पर॰ सेट् इदित् । लुण्टति अलुण्टीत् ।

लुठ प्रतिघाते भ्वा॰ आ॰ लुङि उभ॰ सक॰ सेट् । लोठते । अलुठत् अलोठिष्ट । ऋदित् चङि न ह्रस्वः ।

लुठ उपघाते भ्वा॰ पर॰ सक॰ सेट् । लोठति अलोठीत् ।

लुठ लोठे तु॰ कु॰ प॰ अक॰ सेट् । लुठति अलुठीत् ।

लुठ चौर्य्ये चु॰ उभ॰सक॰सेट् । लोठयति ते अलूलुठत् त ।

लुठन न॰ कु॰ लुठ-ल्युट् । अश्वादेर्भूम्यादौ श्रमापनयनार्थं पुनः पुनरङ्गचालने (लोटा) त्रिका॰ ।

लुठित त्रि॰ लुठ-क्त । भूमौ कृतभूरिदेहपरावर्त्तने ।

लुड मन्थने भ्वा॰पर॰सक॰सेट् । लोडति अलोडीत् ।

लुड संवृतौ सक॰ क्षेपे अक॰ तु॰ कु॰ पर॰ सेट् । लुडति अलुडीत् । लुडनम् ।

लुण्ट अवसाय चौर्य्ये च वा चु॰ उभ॰ पक्षे भ्वा॰ पर॰ सक॰ सेट् । लुण्टयति ते लुण्टति अलुलुण्टत् त अलुण्टीत् । कर्म्मणि लुण्ट्यते ।

लुण्टक पु॰ लुण्ट-ण्वुल् (नटिया) शाकभेदे राजनि॰ ।

लुण्टाक त्रि॰ लुटि-षाकन् । चौरे स्त्रियां ङीष् ।

लुण्ठक त्रि॰ लुठि-ण्वुल् । चौरे ।

लुण्ड चौर्य्ये चु॰उ॰सक॰सेट् । लुण्डयति ते अलुलुण्डत् त

लुथ वधे सक॰ क्लेशे अक॰ भ्वा॰ पर॰ सेट् इदित् । लुन्थति अलुन्थीत् ।

लुन्च अपनयने भ्वा॰पर॰सक॰सेट् । लुञ्चति अलुञ्चीत् ।

लुप छेदने विमोहने च तु॰मुचा॰उभ॰सक॰ अनिट् । लुम्पति ते अलुपत् अलुप्त । ऋदित् चङि वा ह्रस्वः । अलूलुपत् त अलुलोपत् त । [अलोपीत् मित्यमङ् इत्यन्ये ।

लुप आकुलीभावे दिवा॰ पर॰ अक॰ सेट् । लुप्यति अलुपत्

लुप्त न॰ लुप-क्त । १अपहृतधने । २छिन्ने ३नष्टे त्रि॰ ।

लुब अर्दने वा चु॰ उभ॰ पक्षे भ्वा॰ पर॰ सक॰सेट् इदित् । लुम्बयति ते लुम्बति । अलुलुम्बत् त अलुम्बीत् ।

लुब्ध पु॰ लुभ-क्त । १व्याधे । २लम्पटे शब्दर॰ ३लोलुपे च मेदि॰ । स्वार्थे क । तत्रैव । लुब्ध इव कायति कै-क । लुब्धक व्याधाकारताराभेदे खगोलशब्दे २४२२पृ॰दृश्यम् ।

लुभ विमोहने तु॰ पर॰ अक॰ सेट् । लुभति अलोभीत् ।

लुभ आकाङ्क्षायां दि॰ पर॰ सक॰ सेट् । लुभ्यति । इरित् अलुभत्-अलोभीत् ।

लुल विमर्दने भ्वा॰ पर॰ सक॰ सेट् । लोलति । अलोलीत् ।

लुलाप पुंस्त्री॰ लुल मजथं क तमाप्नोति आप्-अण् । महिषे अमरः स्त्रियां ङीप । [लुलितपतत्त्रिमालम्” भट्टिः ।

लुलित त्रि॰ लुल क्त । १आन्दोलिते, २चालिते च “अथ

लुष चौर्य्ये भ्वा॰ पर॰ सक॰ सेट् । लोषति अलोषीत् ।

लुष हिंसायां भ्वा॰ पर॰ सक॰ सेट् । लोषति अलोषीत् ।

लुह आकाङ्क्षायां भ्वा॰ पर॰ सक॰ अनिट् । लोहति अलुक्षत् । [लावीत् ।

लू छेदने क्र्या॰प्वा॰ उभ॰ सक॰ सेट् । लुनाति लुनीते अ-

लूता स्त्री लू-तक् । कीटभेदे (माकड़सा) अमरः । स्वार्थे क अत इत्वम् । तत्रैव । २पिपीलिकायां ३रोगभेदे (मर्म्मप्रणे) मेदि॰ ।

लून त्रि॰ लू-क्त निष्ठातस्य नः । छिन्ने अमरः ।

लूम न॰ लू-मक् । लाङ्गूले अमरः । [लूपत् ।

लूष वधे स्तेये च चु॰ उभ॰ सक॰ सेट् । लूषयति ते अलू-

लेख पु॰ लिख्यते पूजार्थं चित्रादिपटेऽसौ लिख-कर्म्मणि घञ् । १देवे अमरः । भावे घञ् २लेखने । कर्म्मणि घञ्

३लेख्ये त्रि० मेदि०। आधारे घञ्। ४लेखनाधारे पत्रे "निद्रारितेऽर्थे लेखेन" इति माघः।

लेखक पुं० लिख-ण्वुल्। लिपिकरे अमरः। लेखकलक्षणादि मत्स्यपु० १८९ अ० उक्तं यथा "सर्वदेशाक्षराभिज्ञः सर्वशास्त्रविशारदः। लेखकः कथितो राज्ञः सर्वाधिकरणेषु वै। शीर्षोपेतान् सुसम्पूर्णान् समश्रेणिगतान् समान्। अक्षरान् वै लिखेद् यस्तु लेखकः स वरः स्मृतः। उपायवाक्यकुशलः सर्वशास्त्रविशारदः। बह्वर्थवक्ता चाल्पेन लेखकः स्याद् नृपोत्तम!। वाक्याभिप्रायतत्त्वज्ञो देशकालविभागवित्। अनाहार्य्यो नृपे भक्तो लेखकः स्याद् नृपोत्तम"। "समदृक्तुल्यदृष्टीताश्चौ बहुश्रुतो जिताक्षरः। सर्वशास्त्रसमालोकी प्रकटो नाम लेखकः" चाणक्यः राजलेखकलक्षणं तु पत्रकौमुद्यामुक्तं यथा "ब्राह्मणो मन्त्रणाभिज्ञो राजनीतिविशारदः। नानालिपिज्ञो मेधावी नानाभाषासमन्वितः। मन्त्रणाचतुरो धीमान् नीतिशास्त्रार्थकोविदः। सन्धिविग्रहभेदज्ञो राजकार्य्ये विचक्षणः। सदा राज्ञो हितान्वेषी राजसन्निधिसंस्थितः। कार्य्याकार्य्यविचारज्ञः सत्यवादी जितेन्द्रियः। अल्पवादी शुद्धात्मा धर्मज्ञो राजधर्मवित्। एवमादिगुणैर्युक्तः स एव नृपलेखकः। नृपानुवर्त्ती सततं नृपविश्वासरक्षकः। नृपतेर्हितकाम्येषी स एव राजलेखकः"। "लेखकानपि कायस्थान् लेख्यकृत्ये विचक्षणान्" पराशरेणोक्तं कायस्थस्य लेखकत्वं विवादान्तर्गतविषयलेखने एव न पुस्तकादौ अब्राह्मणलिखितपुस्तकस्य पाठनिषेधात्।

लेखन न० लिख-ल्युट्। १पत्रादौ वर्णादिविन्यासे, २छर्दने च। आधारे ल्युट्। ३भूर्जपत्रे मेदि०। लिख्यतेऽनया ल्युट्। ४काशे राजनि० ५लेखनसाधने (कलम) स्त्री ङीप्। "मस्याधारं लेखनीञ्च" इति ति०त०। ६रोगोत्सारणार्थशस्त्रभेदे स्त्री ७अञ्जनाङ्गव्यापारभेदे ८चूर्णभेदे च न०। ९लेखनसाधनवर्त्तिभेदे स्त्री भावप्र० तत्र लक्षणक्रियां तत्साधनलेखनीप्रमाणञ्चोक्तं यथा "लेखनं क्षारतिक्ताम्लरसैरञ्जनमुच्यते। नेत्रवर्त्मशिराजालकोषस्रृङ्गाटकस्थितम्। मुखनासाक्षिभिर्दोषमुत्क्लिश्य स्रावयेच्च तत्"। तद्वर्त्तिमानं तत्रैव "एरण्डमात्रा वर्त्तिस्तु लेखनी स्यात् प्रमाणतः। चूर्णं तु लेखनं द्वैर्द्विशलाकं प्रदीयते। तत्र शलाकास्वरूपादि तत्रैव "मुखे मुकुलमाकारा कलायपरिमण्डला। अष्टाङ्गुला शलाका स्यादश्मजा धातुजाऽथ वा" कलायपरिमण्डला कलायवद् वर्तुला। "ताम्रलोहाश्मसंजाता शलाका लेखने मता"। चन्द्रोदयाख्या लेखनी वर्त्तिस्तत्रोक्ता यथा "शङ्खनाभिविभीतस्य मज्जा पथ्या मनःशिला। पिप्पली मरिचं कुष्ठं वचा चेति समांशकम्। छागक्षीरेण संपिष्य वर्त्तिं कुर्य्यात् यवोन्मिताम्। एरण्डमात्रां संपिष्य जलैः कुर्य्याद्यथाञ्जनम्। तिमिरं मांसवृद्धिञ्च काचं पटलमर्बुदम्। रात्र्यन्धं वार्षिकं पुष्पं वर्त्तिश्चन्द्रोदया हरेत्"। रसक्रिया लेखनी तत्रैवोक्ता यथा "तुत्थमाक्षिकसिन्धूत्थसिताशङ्खमनःशिला। गैरिकं सिन्धुफेनञ्च मरिचं चेति चूर्णयेत्। संयोज्य मधुना कुर्य्यादञ्जनार्थं रसक्रियाम्। वर्त्मरोगार्मतिमिरकाचशुक्रहरीं पराम्"। चूर्णलेखनञ्च तत्रोक्तं यथा "दक्षाण्डत्वक्शिलाकाचशङ्खचन्दनसैन्धवैः। अञ्जनं हरते नित्यं सर्वानक्षिगदान् बलात्" दक्षः कुक्कुटः"। अक्षरलेखनीप्रमाणादि योगिनीतन्त्रोक्तं यथा "वंशसूच्या लिखेद् यस्तु तस्य हानिर्भवेद् ध्रुवम्। ताम्रसूच्या तु विभवो भवेच्च तत्क्षयो भवेत्। महालक्ष्मीर्भवेन्नित्यं सुवर्णस्य शलाकया। हरकस्य सूच्या वै नातिवृद्धिः प्रजायते। तथा अग्निमयैर्देवि! पुत्रपौत्रधनागमः। रैत्येन विपुला लक्ष्मीः कांस्येन मरणं भवेत्। अष्टाङ्गुलप्रमाणेन दशाङ्गुलेन वाथ वा। चतुरङ्गुलसूच्या वा यो लिखेत् पुस्तकं शुभे!। तत्तदक्षरसंख्याते स्वल्पायुर्याति वै दिने।"

लखनिक पुं० लेखनं शिल्पमस्य ठन्। लिपिकरे मेदि०।

लेखर्षभ पुं० लेख ऋषभ इव श्रेष्ठत्वात्। इन्द्रे अमरः।

लेखहार पुं० लेखं हरति हृ-अण्। १पत्रवाहके। ण्वुल्। लेखहारकोऽप्यत्र।

लेखा स्त्री लिख-अ टाप्। १रेखायां, २पङ्क्तौ च। आधारे संज्ञायां घञ् टाप्। ३लिपौ मेदि०।

लेख्य त्रि० लिख-ण्यत्। १लेखनीये। २व्यवहारे स्वस्वाधिवेदके पत्रभेदे न०। तल्लक्षणादि वीरमि० उक्तं यथा "अथ लेख्यं निरूप्यते। तत्र बृहस्पतिः "वाचिकानामेष निर्दिष्टः संख्यानगणनानियमः। लिखितस्याधुना वच्मि विधानमनुपूर्वशः। षाण्मासिकेऽपि समये भ्रान्तिः सञ्जायते नृणाम्। धात्राक्षराणि सृष्टानि पत्रारूढान्यतः पुरा। राजलेख्यं स्थानकृतं स्वहस्तलिखितं तथा। लेख्यन्तु त्रिविधं प्रोक्तं भिन्न-

युक्त्वा पुनः । आगमदानक्रयाधानसंविद्दासकृतादिभिः । सप्तधा लौकिकं लेख्यं त्रिविधं राजशासनम्" । मरीचि-रपि "स्थावरे विक्रयाधाने विभागे दान एव च । लिखितेनाप्नुयात् सिद्धिमविसंवादमेव च" विभागो दायभागः आधानमाधीकरणम् संवित्समयः आदिपदेन विशुद्ध्यादिपरिग्रहः । भागपत्रादीनां लक्षणमाह बृहस्पतिः "भ्रातरः संविभक्ता ये स्वरुच्या तु परस्परम् । विभागपत्रं कुर्वन्ति भागलेख्यं तदुच्यते । भूमिं दत्त्वा तु यत्पत्रं कुर्य्याच्चन्द्रार्ककालिकम् । अनाच्छेद्यमनाहार्य्यं दानलेख्यन्तु तद्विदुः । गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम् । पत्रं कारयते यत्तु क्रयलेख्यं तदुच्यते । जङ्गमं स्थावरं बन्धं दत्त्वा लेख्यं करोति यः । गोप्यभोग्यक्रियायुक्तमाधिलेख्यं तदुच्यते । ग्रामे देशे च यत्कुर्य्यात् सत्यलेख्यं परस्परम् । राजाविरोधिधर्म्मार्थं संवित्पत्रं वदन्ति तत् । वस्त्रान्नहीनः कान्तारे लिखितं कुरुते तु यः । कर्म्माणि ते करिष्यामि दासपत्रं तदुच्यते । धनं वृद्ध्या गृहीत्वा तु स्वयं कुर्य्याच्च कारयेत् । उद्धारपत्रं तत् प्रोक्तमृणलेख्यं मनीषिभिरिति" । विशुद्धिपत्रमुक्तं कात्यायनेन "अभिशापे समुत्तीर्णे प्रायश्चित्ते कृते बुधैः । विशुद्धिपत्रं देयं तेभ्यः साक्षिसमन्वितम्" । सन्धिपत्रमप्याह स एव "उत्तमेषु समस्तेषु अभिशापे समागते । वृत्तानुवादलेख्यं यत् तज्ज्ञेयं सन्धिपत्रकम्" । अन्याधिपत्रमाह प्रजापतिः "धनी धनेन तेनैव परमाधिं नयेद्यदि । कृत्वा तदाधिलिखितं पूर्वं चास्य समर्पयेत्" । पूर्व्वमाधिपत्रम् । सीमापत्रमप्याह कात्यायनः "सीमाविवादे निर्णीते सीमापत्रं विधीयते" इति । ऋणशोधने कृते ऋणपत्रनाशादौ सति प्राप्तिपत्रमुत्तमर्णेनाधमर्णाय देयमित्याह याज्ञवल्क्यः "दत्त्वर्णं पाटयेल्लेख्यं शुद्ध्यै वान्यत्तु कारयेत्" । अत्र लौकिकं सप्तविधं लेख्यं स्वकृतान्यकृतभेदेन द्विविधं नारदेनोक्तम् "लेख्यन्तु द्विविधं प्रोक्तं स्वहस्तान्यकृतं तथा" । स्वकृते साक्षिनियमोऽन्यकृते तन्नियम इत्याहोत्तरार्द्धेन स एव "असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोरिति" । असाक्षिमदपोल्लसः । याज्ञवल्क्यः "विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितञ्च यत् । तत्प्रमाणं स्मृतं सर्वं बलोपधिकृतादृते । इत्यपिशब्दः प्रयुक्तबलोपधिकृतत्वपर्य्युदासः सर्वलेख्यविषयो न स्वकृतमात्रविषयः । तथा च मनुः "बलाद्भुक्तं बलाद्दत्तं बलाद्यच्चापि लेखितम् । सर्वान् बलकृतानर्थानकृतान्मनुरब्रवीत्" । नारदोऽपि "मत्ताभियुक्तस्त्रीबालबलात्कारकृतञ्च यत् । तदप्रमाणं लिखितं भयोपधिकृतं तथेति" । अन्यकृते विशेषान्तरमाह योगीश्वरः "यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परम् । लेख्यन्तु साक्षिमत्कार्य्यं तस्मिन् धनिकपूर्वकम् । समामासतदर्द्धाहर्नामजातिस्वगोत्रकैः । सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम्" । धनिकनामपूर्वकमित्यनेनोत्तमर्णनामोपरि लेख्यमधमर्णनाम तदध इत्यर्थः । एतदधमर्णपत्रादिविषयमन्यत्राऽसम्भवात् । समामासादि यथा शकाब्दमन्यत्रापि सब्रह्मचारिकं बह्वृचादिशाखाप्रयुक्तगुणनाम बह्वृचः कठ इत्यादि । वसिष्ठोऽपि "कालं निवेश्य राजानं स्थानं निवसनं तथा । दायकं ग्राहकञ्चैव पितृनाम्ना च संयुतम् । जातिं स्वगोत्रं शाखाञ्च द्रव्यमाधिं सवृद्धिकम् । ऋद्धिं ग्राहकहस्तञ्च विदितार्थौ च साक्षिणौ" । स्थानं जनपदः । निवसनं पुरग्रामादिकं ग्राहकोऽधमर्णः । तन्निवेशनप्रकारमाह योगीश्वरः "समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत् । मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितमिति" । साक्षिणामित्यनेन द्वयोरप्यनुमानात् अवरत्वनियमो नाधिक्ये तु नियमस्तु न भवत्येवेति । अत्र साक्षिलेखकाभ्यां स्वहस्तचिह्नं कार्य्यमित्याह स एव "साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम् । अत्राहममुकः साक्षी लिखेयुरिति ते समाः । उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत्" । समा इत्यनेन पुरुषसाम्ये सङ्ख्यावैषम्यं वैषम्यानियमाय विवक्षितम् । अथवा इत्याकारकस्य लेखस्य वैषम्यस्य सामान्येन एव साक्षिषु प्राप्तेर्नोपादेयः । अलिपिसाक्षिणोः सर्वथा लिप्यनभिज्ञत्वे नारद आह "अलिपिज्ञ ऋणी यः स्यात् स्वमतं स तु लेखयेत् । साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः इति ।

त्रिविधं राजशासनमित्युक्तम् तत्त्रैविध्यं विविनक्ति बृहस्पतिः "दत्त्वा भूम्यादिकं राजा ताम्रपट्टे पटेऽथ वा । शासनं कारयेद्धर्म्यं स्थानवंशादिसंयुतम् । मातापित्रोरात्मनश्च पुण्यायामुकसूनवे । दत्तं मयामुकायाद्य दानं सब्रह्मचारिणे । चन्द्रार्कसमकालीनं पुत्रपौत्रान्वयानुगम् । अनाच्छेद्यमनाहार्य्यं सर्वभागविवर्जितम् । दातुः पालयितुः स्वर्ग्यं हर्त्तुर्नरकमेव च । षष्टिं

षष्टिवर्षसहस्राणि दानाच्छेदफलं लिखेत्। ज्ञातं मयेति लिखितं सन्धिविग्रहलेखकैः। समुद्रं वर्षमासादिधनाध्यक्षाक्षरान्वितम्। एवंविधं राजकृतं शासनं समुदाहृतम्। देशादिकं यस्य राजा लिखितेन प्रयच्छति। सेवाशौर्यादिना तुष्टः प्रसादलिखितं तथा। पूर्वोत्तरक्रियावादनिर्णयान्ते यदा नृपः। प्रदद्याज्जयिने लेख्यं जयपत्रं तदुच्यते"। ब्रह्मचारिणे अमुकशाखाध्यायिने। सर्वभागविवर्जितम् सकलराजपुरुषादिदण्डगरहितम्। योगीश्वरः शासनपत्रमाह "भूमिं दत्त्वा निबन्धं वा कृत्वा लेख्यन्तु कारयेत्। आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः। पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिह्नितम्। अभिलेख्यात्मनोऽवंश्यानात्मानञ्च महीपतिः। प्रतिग्रहपरीमाणं दानच्छेदोपवर्णनम्। स्वहस्तकालसम्पन्नं शासनं कारयेत् स्थिरमिति"। इयन्ति पर्णक्रमुकभारादाविति पर्णक्रमुकादीन्यस्मै देयानीति राज्ञो नियतदानात्तानिबन्धं कारयेत् सन्धिविग्रहाद्यधिकारिद्वारेत्यर्थात्। तथा च व्यासः "राज्ञा तु स्वयमुद्दिष्टः सन्धिविग्रहलेखकः। ताम्रपट्टे पटे वापि प्रलिखेद्राजशासनमिति"। प्रतिगृह्यत इति प्रतिग्रहो भूम्यादिस्तत्परीमाणं प्रतिग्रहपरीमाणं उपसर्गस्य दीर्घो बाहुलकः। दीयत इति दानम् भूम्यादि तस्य च्छेदः क्षेत्रादेर्मर्यादा तदुपवर्णनं तन्निर्देशम्। आत्मवंश्यादीनभिलिख्येत्यन्वयः। इदञ्च साधुशब्दैरेव लेखनीयं न लौकिकवत्तदनियमः। तथा च संग्रहकारः "राजा स्वहस्तचिह्नेन राजादेशेन संयुतम्। युक्तं राजाभिधानेन सचिह्नं राजमुद्रया। सुशिष्टपदशब्दोक्तिसम्पूर्णावयवाक्षरम्। शासनं राजदत्तं स्यात् सन्धिविग्रहलेखकैः"। अन्तिमपादोत्तरं लिखितमिति शेषः। तस्मिंश्च लौकिके देशभाषादिप्रतिषेधो नेत्याह नारदः "देशाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणम्। तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरमिति"। शासने राज्ञा स्वहस्तेनैव स्वमस्मतं लेख्यमित्यप्याह व्यासः "सन्निवेश्य प्रमाणञ्च स्वहस्तेन लिखेत्स्वयम्। मतम्मेऽमुकपुत्रस्य अमुकस्य महीपतेः"। सन्निवेशं प्रमाणञ्चेत्यस्य पूर्ववाक्ये प्रलिखेदित्यत्रान्वयः तयो राजस्वहस्तलिखनानियमात्। इदञ्च राज्ञा प्रतिग्रहीत्रे समर्पणीयमित्याह विष्णुः "पटे वा ताम्रपट्टे वा लिखितं स्वमुद्राङ्कमागामिनृपतिपरिज्ञानार्थं दद्यादिति"। अथ एव दत्तापहारदोषप्रतिपादनमपि भाविनृपप्रत्यायनार्थं तत्रावश्यकमित्यप्याह व्यासः "षष्टिवर्षसहस्राणि दानच्छेदफलं तथा। आगामिनृपसामन्तबोधनार्थाभिलेखयेत्" इति। षष्टिवर्षसहस्राणीत्यादि पुराणवाक्यप्रसिद्धन्दानाच्छेदयोः दानापहारयोः स्वर्गादिनरकादिफलं लेखयेदित्यर्थः।"

लेख्यपत्त्र पु॰ लिख्यतेऽत्र ण्यत् लेख्यं पत्रं यस्य। १तालवृक्षे भरतः। कर्म॰। २लेख्ये पत्रे न॰ [लिपते अलेपिष्ट।

लेप गमने भ्वा॰ आत्म॰ सक॰ सेट् ऋदित् चङि न ह्रस्वः।

लेप पु॰ लिप लेपे-वा घञ्। १भोजने, २लेपने च मेदि॰। कर्मणि घञ्। ३सुधायाम् (कलिचुन) विश्वः। ४पिण्डदत्तपिण्डशेषे "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः" स्मृतिः। [पलगण्डे पु॰ अमरः।

लेपक त्रि॰ लिम्पति लिप-ण्वुल्। १लेपनकर्त्तरि २जातिभेदे

लेपन न॰ लिप-ल्युट्। (लेपा) इति ख्याते १व्यापारे। कर्मणि ल्युट्। २तुरुष्कनामगन्धद्रव्ये राजनि॰।

लेय पु॰ सिंहराशौ ज्यो॰ त॰।

लेलिहा स्त्री सर्वदेवजीवन्यासाङ्गे मुद्राभेदे तल्लक्षणं यथा "तर्जनीमध्यमाऽनामाः समं कुर्यादधोमुखीः। अनामायां क्षिपेत् वृद्धामृज्वीं कृत्वा कनिष्ठिकाम्। लेलिहा नाम मुद्रेयं जीवन्यासे प्रकीर्त्तिता" तन्त्रसा॰।

लेलिहान पु॰ लिह यङ् लुक् ताच्छील्ये चानश्। १शिवे शब्दर॰ २सर्पे पुंस्त्री॰ हेमच॰। ३पुनःपुनर्लेहनकर्त्तरि त्रि॰ तारादेवतापूजाङ्गे अङ्गुल्यादिसन्निवेशविशेषरूपे ४मुद्राभेदे स्त्री। तल्लक्षणं यथा "वक्त्रं विस्फारितं कृत्वाप्यधो जिह्वां च चालयेत्। पार्श्वस्थं हस्तयुगलं लेलिहानेति कीर्त्तिता" तन्त्रसा॰। [२अल्पत्वे च।

लेश पु॰ लिश अल्पीभावे घञ्। १सूक्ष्मे २लवे अमरः।

लेष्टु पु॰ लिश–तुन्। लोष्टे अमरः। [लोष्टुभेदनेऽप्यत्र।

लेष्टुघ्न पु॰ लेष्टुं हन्ति हन–क। लोष्टभेदके मुद्गरे शब्दच॰।

लेह पु॰ लिह–घञ्। १आहारे २आस्वादे जिह्वया रसादानव्यापारभेदे (चाटा) च हेमच॰। भावे ल्युट्। लेहनमप्यत्र न॰।

लेहिन पु॰ लिह–इनन्। टङ्कणे (सोहागा) हेमच॰।

लेह्य त्रि॰ लिह ण्यत्। जिह्वया १आस्वाद्ये। २अमृते न॰ शब्दच॰।

लैङ्ग न॰ लिङ्गमधिकृत्य कृतो ग्रन्थः अण्। अष्टादशसु महापुराणेषु एकादशे १महापुराणे। लिङ्गं तदाकारः

अस्त्यस्याः फलेषु अच् ङीप्। १लिङ्गिनीवृक्षे स्त्री राजनि०तस्येदमण्। २लिङ्गसम्बन्धे त्रि० स्त्रियां ङीप्।

लैङ्गिक त्रि० लिङ्गेनानुमापकादिना व्यापादितस्तत आगतो वा ठञ्। लिङ्गादिभिः १कल्पिते २अनुमिते साध्ये लिङ्गोपहितलैङ्गिकभानमित्याचार्य्याः। अर्थप्रकाशसामर्थ्यलिङ्गेन कल्पिते ३मन्त्रादीनां तत्तत्कर्मादिविनियोगे च।

लोक दीप्तौ चु०उभ०सक०सेट्। लोकयति ते अलुलुकत् त।

लोक दर्शने भ्वा०आ०सक०सेट्। लोकते अलोकिष्ट लुलोके। ऋदित् चङि न ह्रस्वः। अलुलोकत् त।

लोक पु० लोक्यतेऽसौ लोक–घञ्। १भुवने भुवनशब्दे दृश्यम्। २जने च अमरः। भावे घञ्। ३दर्शने।

लोककान्ता स्त्री ६त०। १ऋद्धिनामौषधे राजनि० २लोककामिनि ३लोकप्रिये च त्रि०। [अमरः।

लोकजित् पु० सार्वं लोकाचारं जितवान् जि–क्विप्। बुद्धे

लोकपाल पु० लोकान् पालयति पा–णिच् अण्। १लोकपालके नृपे, २इन्द्रादिदिक्पाले, ३विनायकादिषु पञ्चसु। ४लोकरक्षकमात्रे त्रि०। लोकनाथादयोऽप्यत्र।

लोकबान्धव पु० लोकानां बान्धवः सर्वकर्मप्रवर्त्तकत्वात्। सूर्य्ये जटा०। [लोकबहिर्भूते।

लोकबाह्य त्रि० बहिश्चरति बहिस्+ष्यञ् टिलोपश्च ५त०।

लोकमातृ स्त्री लोकानां मातेव रक्षित्री। १लक्ष्म्याम् अमरः ६त०। लोकानां मातरि त्रि०।

लोकलोचन पु०लोकोऽलोच्यतेऽनेन लुच ल्युट्। सूर्य्ये शब्दर० लोकस्य लोचनमिव। सूर्य्ये न०। लोकनेत्रादयोऽप्यत्र न०

लोकायत न० लोकेषु आयतम् विस्तीर्णम् अनायाससाध्यत्वात्। चार्वाकमतसिद्धधर्मे शब्दच०।

लोकायतिक पु०लोकायतं तन्मतम् अस्त्यस्य ठन्। चार्वाके।

लोकालोक पु० न लोक्यतेऽसौ लोकः न लोक्यतेऽसौ कर्म०। स्वनामख्याते सूर्य्यकिरणसम्पर्कसीमापर्वते। तस्य च पार्श्वयोरातपानातपसम्बन्धात् तथात्वम्।

लोकेश पु० ६त०। १ब्रह्मणि अमरः। २नृपतौ ३पारदे च राजनि०४बुद्धभेदे त्रिका०। [न ह्रस्वः। अलुलोचत् त।

लोच दीप्तौ चु०उभ०सक० सेट्। लोचयति ते ऋदित् चङि

लोच दर्शने भ्वा० आत्म० सक० सेट्। लोचते अलोचिष्ट ऋदित् चङि न ह्रस्वः।

लोचक न० लोच–ण्वुल्। १मांसपिण्डे, २अक्षितारके ३कज्जले ४स्त्रीणां ललाटाभरणे, ५नीलवस्त्रे, ६कर्णपूरे, ७कदल्यां, ८मूर्खायां ९निर्बुद्धौ भ्रूश्लथचर्मणि मेदि० ११सर्पकञ्चुके शब्दर०।

लोचन न०लोच्यतेऽनेन लोच–करणे ल्युट्। १नेत्रे अमरः। भावे ल्युट्। २दर्शनक्रियायाम्। युच्। ३दर्शने ४आलोचने च स्त्री टाप् अमरः। ५महाप्राणिकीटे स्त्री राजनि० ङीप्।

लोचनहिता स्त्री ६त०। तुत्थाञ्जने (तुँते) राजनि०।

लोचमस्तक पु० लोचवत् लोचं मस्तकं यस्य। मयूरशिखायाम् अमरः।

लोट(ड) उन्मादे भ्वा० पर० सक० सेट्। लोट(ड)ति। अलोटी(डी)त्। ऋदित् चङि न ह्रस्वः।

लोणा स्त्री लवणमस्त्यस्याः भक्षणसमये अपेक्ष्यत्वेन अच्। १क्षुद्राम्लिकायाम् राजनि०। लोणाम्लाप्यत्र स्त्री राजनि०

लोणार न० लवणमृच्छति कारणत्वेन ऋ–अण् उप०स०। पृषो० लवणभेदे क्षारभेदे राजनि०।

लोत न० लू–तन्। १चोरितधने, लोप्त्रे (इमाल) जटाधरः २चिह्ने त्रि० कौ०। ४नेत्राम्बुनि त्रिका० ५लवणे च

लोत्र न० लू-ष्ट्रन्। १अश्रुजले, २चोरितधने च संक्षिप्तसा०।

लोध पु० रुध–अच् रस्य लः। स्वनामख्याते वृक्षे रत्नमा०।

लोध्र पु० रुध–रन् रस्य लः। (लोध) ख्याते वृक्षे अमरः। "लोध्रो ग्राही लघुः शीतश्चक्षुष्यं कफपित्तहृत्। कषायो रक्तपित्तासृग्ज्वरातीसारशोथहृत्" भावप्र०।

लोप पु० लुप–भावे घञ्। १विनाशे २छेदने, ३आकुलीभावे, ४व्याकरणोक्ते अदर्शनरूपे नाशे च। लोपयति स्त्रीणां रूपगर्वम् अच्। २अगस्त्यमुनिपत्न्यां स्त्री जटा०।

लोपापक पुंस्त्री० लोपमदर्शनमाप्नोति द्रुतम् आप–ण्वुल्। शृगाले शब्दमा० स्त्रियाम् अजा० टाप् अत इत्त्वम्।

लोपामुद्रा स्त्री मुदं राति रा–क कर्म०। अगस्त्यमुनिपत्न्याम् अमरः।

लोप्त्र न०लुप–ष्ट्रन्। स्तेयधने स्त्रीत्वमपीच्छन्ति तत्पक्षे ङीप्।

लोभ पु० लुभ–आकाङ्क्षायां भावे घञ्। परद्रव्येषु आतत्यिताभिलाषे "परवित्तादिकं दृष्ट्वा नेतुं यो हृदि जायते। अभिलाषो द्विजश्रेष्ठ! स लोभः परिकीर्त्तितः" पद्मपु०।

लोभिन् त्रि०लुभ–णिनि। परद्रव्येषु अतितृष्णावति जटा०।

लोभ्य पु० लुभ-कर्मणि यत्। १मुद्गे हेमच०। २लोभनीयपदार्थे त्रि०। [अमरः। तत्प्रधाने २लाङ्गूले न० जटा०।

लोम न० लू–मन्। देहजाते केशाकारे १रोमाख्ये द्रव्ये

लोमकर्ण पुंस्त्री लोमयुक्तौ कर्णौ यस्य शाक०। शशके

हेमच० तत्कर्षस्य लोमशत्वात्तथात्वम् स्त्रियां ङीप्।

लोमकूप पु० लोम्नां कूप इव। रोमाधारे १छिद्राकारे गर्त्ते [रूपभेदे शब्दार्थ०

लोमघ्न न० लोमानि हन्ति हन-टक्। (टाक) रोगभेदे।

लोमन् पु० लू-मनिन्। देहस्थे केशतुल्ये (रो-या) पदार्थे अमरः।

लोमपाद पु० लोमयुक्तौ पादावस्य शा०त०। अङ्गदेशस्थे

लोमश पु० लोमानि बाहुल्येन सन्त्यस्य श। १मुनिभेदे २मेषे ३लोमयुक्ते त्रि० मेदि०। ४काकजङ्घायां ५जटामांस्यां, ६वचायाम् ७शुकशिम्ब्याम् ८महामेदायां ९काशीशे १०शाकिनीभेदे च स्त्री मेदि० ११शणपुष्प्याम् १२अतिबलायां च स्त्री विश्वः। १३मांसायां स्त्री राजनि०। [राजनि०

लोमशकाण्डा स्त्री लोमश इव काण्डोऽस्याः। कर्कट्याम्

लोमशपर्णिका स्त्री लोमशानीव पर्णानि यस्याः कप् अत इत्वम्। माषपर्ण्याम् शब्दच०। [राजनि०

लोमशपुष्पक पु० लोमशमिव पुष्पमस्य कप्। शिरीषवृक्षे

लोमशातन न० लोमानि शातयति शद-णिच् तान्तादेशः ल्यु। लोमपातने औषधभेदे गरु० पु० १८९ अ० तदौषधमुक्तं यथा "हरितालशङ्खचूर्णं कदलीदलभस्मना। एतद्द्रव्येण चोद्वर्त्य लोमशातनमुत्तमम्। ब्रध्नं हरितालञ्च तण्डुलाश्च फलानि च। क्षाररससमायुक्तं लोमशातनमुत्तमम्। सुधा च हरितालञ्च शङ्खश्चैव मनःशिला। तैलेनैव पचेत्कल्कं छागमूत्रेण पेषयेत्। तदुद्वर्त्तनमात्रेण लोमशातनमुत्तमम्"।

लोमहर्षण न० लोम्नां हर्षणं हर्षजनकव्यापार इव उद्भेद इति यावत्। १रोमाञ्चे। लोमानि हर्षयति उत्तमश्लोककथया हृष-णिच-ल्यु। व्यासशिष्ये सूतवंश्ये स्वनामख्याते २पौराणिके पु० "प्रख्यातो व्यासशिष्योऽभूत् सूतो वै लोमहर्षणः। पुराणसंहितां यस्मै ददौ व्यासो महामुनिः" विष्णुपु०।

लोमहृत् पु० लोमानि हरति हृ-क्विप् तुक् च। १हरिताले हेमच०। लोमशातनशब्दे तस्य तथात्वं दृश्यम्।

लोल त्रि० लोड-अच् डस्य लः। १सतृष्णे २चञ्चले च अमरः च ३जिह्वायां ४लक्ष्म्याञ्च स्त्री मेदि०।

लोलार्क पु० काशीस्थे अर्कमूर्त्तिभेदे काशीख० ४६ अ०।

लोलिका स्त्री लोडयति सेवने दन्तान् लोड-ण्वुल् डस्य लः। १चाङ्गेर्याम् (चुकोपालङ्) जटा०।

लोलित त्रि० लुल-विमर्दे णिच् क्त। चालिते।

लोलुप(भ) त्रि० लुभ-यङ्-अच् पृषो० भस्य वा पः। अतिलोभयुक्ते अमरः। [शब्दोऽदिष्ट।

लोष्ट संहतौ राशीकरणे भ्वा० आ० सक० सेट्। लोष्टते

लोष्ट पुंन० लोष्ट-अच्। १मृत्पिण्डे (ढेला) अमरः। २लौहमले राजनि०।

लोष्टघ्न पु० लोष्टं हन्ति मर्दयति हन-क। लोष्टभेदने मुद्गरादौ भरतः। [भेदनसाधके मुद्गरादौ भरतः।

लोष्टभेदन पु० लोष्टं भिनत्ति विमर्दयति भिद-ल्यु। लोष्ट-

लोष्टु पु० लोष्ट-उन्। लोष्टे हेमच०।

लोह पुंन० लू-विच् लोमं जहाति हा-क। १धातुभेदे अमरः। २धातुमात्रे मेदि० ३रुधिरे राजनि०, ४अगुरुचन्दने न० अमरः। धातुभेदस्वरूपादि भावप्र० उक्तं यथा "अथ लोहस्योत्पत्तिनामलक्षणगुणाः "पुरा लोमिलदैत्यानां निहतानां सुरैर्युधि। उत्पन्नानि शरीरेभ्यो लोहानि विविधानि च। लोहोऽश्मा शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी। गुरुताद्दृढतोत्क्लेदकफदाहस्य कारिता। अश्मदोषः सुदुर्गन्धो दोषाः सप्तायसस्य तु। लोहं तिक्तरसं शीतं मधुरं तुवरं गुरु। रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्। कफं पित्तं गरं शूलं शोथार्शःप्लीहपाण्डुताः। मेदोमेहक्रिमीन् कुष्ठं तत्किट्टं तद्वदेव हि। पाण्डुत्वकुष्ठामयशूलदं भवेत् हृद्रोगशूलौ कुरुतेऽश्मरीञ्च। नानारुजाश्चापि तथा प्रकोपं करोति हृल्लासमशुद्धलोहम्। जीर्णेऽपि लोहे मदकारि चायसं भेदशुद्धिमदवर्जितं ध्रुवम्। पाटवं भजते शरीरके दारुणां हृदि रुजाश्च यच्छति। कूष्माण्डं तिलतैलञ्च माषान्नं राजिकां तथा। मद्यमम्लरसञ्चापि त्यजेल्लोहस्य सेवकः"। तत्र सारलोहस्य लक्षणं गुणाश्च "समाभङ्गे शिखराकाराण्यङ्गान्यङ्गेन भेदयेत्। लोहे सुवर्ण रूप्याणि तत्सारमभिधीयते। लोहसारो ह्ययं हन्यादुग्रहणीमतिसारकम्। अर्शःशोफजं वातं शूलञ्च परिणामजम्। छर्दिञ्च पीनसं पित्तं श्वासं कासं व्यपोहति"। अथ कान्तलोहस्य लक्षणं गुणाश्च। "यत्पात्रेण प्रसरति जले तैलबिन्दुः प्रतप्ते हिङ्गुर्गन्धं त्यजति च निजं तिक्ततां निम्बकल्कः। तप्तं दुग्धं भवति शिखराकारकं नैति भूमिं कृष्णाङ्गः स्यात् सजलचणकः कान्तलोहं तदुक्तम्। गुल्मोदरार्शःशूलाममामवातं भगन्दरम्। कामलाशोथकुष्ठानि क्षयं कान्तमयो हरेत्। प्लीहान-

मज्जिपित्तञ्च यच्चापि शिरोरुजम्। सर्व्वान् रोगान् विजयते कान्तलोहं न संशयः। बलं वीर्य्यं वपुःपुष्टिं कुरुतेऽग्निं विवर्द्धयेत्। अथ किट्टस्य "ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते। लोहसिंहानिका किट्टं सिंहानञ्च निगद्यते। यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्"। अथ लोहस्य दोषशान्तये शोधनमभिधीयते "पत्तलीकृतपत्राणि लोहस्याग्नौ प्रतापयेत्। निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके। गोमूत्रे च कुलत्थानां कषाये च त्रिधात्रिधा। एवं लोहस्य पत्राणां विशुद्धिः संप्रजायते"। अथ लोहस्य मारणविधिः "शुद्धलोहभवं चूर्णं पातालगरुडीरसैः। मर्द्दयित्वा पुटेदग्नौ दद्यादेवं पुटद्वयम्। पुटत्रयं कुमार्य्याश्च कुठारच्छिन्निकारसैः। पुटषट्कं ततो दद्यादेवं तीक्ष्णमृतिर्भवेत्"। अन्यच्च। "त्रिपेद्द्वादशमांशेन दरदं तीक्ष्णचूर्णतः। मर्द्दयेत् कन्यकाद्रावैर्यामयुग्मं ततः पुटेत्। एवं सप्तपुटैर्मृत्युं लोहचूर्णमवाप्नुयात्। सत्याऽनुभूतो योगीन्द्रैः क्रमोऽन्यो लोहमारणे। कथ्यते रामराजेन कौतूहलधियाऽधुना। सूतकाद्द्विगुणं गन्धं दत्त्वा कुर्य्याच्च कज्जलीम्। द्वयोः समं लोहचूर्णं मर्द्दयेत् कन्यकाद्रवैः। यामयुग्मं ततः पिण्डं कृत्वा ताम्रस्य पात्रके। घर्मे धृत्वा रुवुकस्य पत्रैराच्छादयेद्बुधः। यामद्वयाद्भवेदुष्णं धान्यराशौ न्यसेत्ततः। दत्त्वोपरि शरावञ्च त्रिदिनान्ते समुद्धरेत्। पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत्। दाडिमस्य दलं पिष्ट्वा तद्रसं यवाशिषा। तद्रसेनायसञ्चूर्णं यत्नीयात् प्लावयेदपि। आतपे शोधयेत्तच्च पुटेदेवं पुनः पुनः। एकविंशतिवारैस्तन्म्रियते नात्र संशयः। एवं सर्व्वाणि लोहानि स्वर्णादीन्यपि मारयेत्"। एवं मारितलोहस्य गुणाः "लोहं तिक्तं सरं शीतं कषायं मधुरं गुरु। रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्। कफं पित्तं गरं शूलं शोफार्शःप्लीहपाण्डुताः। मेदोमेहकृमीन् कुष्ठं तत्किट्टं तद्वदेव हि। गुञ्जामेकां समारभ्य यावत् स्युर्नव रक्तिकाः। तावल्लोहं समश्नीयाद्यथादोषानलं नरः। कुष्माण्डं तिलतैलञ्च माषान्नं राजिकां तथा। मद्यमम्लरसञ्चैव वर्ज्जयेल्लोहसेवकः" भावप्र०। "यदा तु चायसे पात्रे पक्वमश्नाति वै द्विजः। स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते" मत्स्यपु०। "अयःपात्रे पयःपानं गव्यं शिवाक्षमेव च। मद्यादिकं मधु गुड़ं नारिकेलोदकं तथा। फलं मूलञ्च यत् किञ्चिदभक्ष्यं मनुरब्रवीत्" ब्रह्मवै०।

लोहकण्टक पु० लोहमिव कठिनः कण्टको यस्य। १मदनवृक्षे शब्दच०। २लोहमयकण्टके च।

लोहकार पु० लोहं तन्मयं शस्त्रादि करोति कृ-अण्। कर्म्मकारे। ण्वुल्। लोहकारकोऽप्यत्र। "गोपालात् तन्तुवाय्यां वै कर्म्मकारोऽभवत् सुतः" पराशरोक्ते जातिभेदे पुंस्त्री०।

लोहकिट्ट न० ६त०। लोहमले। (लोहार गु)। राजनि०

लोहचूर्ण न० ६त०। (लोहाचुर) ख्याते १पदार्थे २लोहमले राजनि०।

लोहज न० लोहात् लोहाभ्यां वा जायते जन-ड। १लोहमले राजनि० २धातुद्वयजे कांस्ये च हेमच०।

लोहद्राविन् पु० लोहानि धातुद्रव्याणि द्रावयति द्रु-णिच्-णिनि। १टङ्कणे (सोहागा) राजनि०। २धातुद्रावके त्रि०। [अमरः स्त्रियां ङीप्।

लोहपृष्ठ पुंस्त्री० लोहमिव कठिनं पृष्ठमस्य। कङ्कपक्षिणि

लोहमारक पु० लोहं मारयति जारयति मृ-णिच्-ण्वुल्। १शालिञ्चशाके त्रिका०। [२लोहमारके त्रि०।

लोहल पु० लोहमिव लाति ला-क। १अव्यक्तशब्दे अमरः

लोहवर न० लोहेषु सर्व्वधातुषु मध्ये वरम्। स्वर्णे वैद्य०।

लोहश्लेषण न० लोहानि स्वर्णादीनि श्लेषयति योजयति श्लिष-णिच्-ल्यु। टङ्कणे (सोहागा) हेमच०।

लोहसङ्कर न० लोहानां धातुद्रव्याणां सङ्करो यत्र। मिश्रितधातौ १रीत्यादौ २वर्त्तलोहे च राजनि०।

लोहाभिसा(हा)र पु० लोहं शस्त्रमभिसार्य्यते अभिह्रियतेऽत्र अभि+सृ-(हृ)-घञ् आधारे घञ्। राज्ञां युद्धयात्रादौ शस्त्रनीराजनाविधौ अमरः।

लोहार्गल पु० १तीर्थभेदे वराहपु०। २लोहकीले च।

लोहित न० रुह-इतच् रस्य लः। १कुङ्कुमे २रक्तचन्दने ३रक्तगोशीर्षकभेदे वैद्य०। ४पत्तङ्गे ५हरिचन्दने शब्दच०। ६हरिकुङ्कुमे ७रुधिरे च राजनि० ८युद्धे हेमच०। ९नदभेदे १०मर्दने ११रक्तवर्णे च पुंमेदि०। १२रक्तगुणवति त्रि०। १३मृगभेदे १४रोहितमत्स्ये १५सर्पे १६देशभेदे भरतः। १७मङ्गले शब्दच० १८रक्तशाली १९रक्तशाके राजनि०। २०वनभेदे २१सरोवरभेदे ब्रह्मपुत्रशब्दे दृश्यम्। सर्व्वत्र जातौ स्त्रियां ङीप्। वर्णे तु स्त्रीत्वे ङीप् तस्य नः। लोहिनी लोहितवर्णयुतस्त्रियाम्। रुह-इतन् रस्य लः। रोहणकर्त्तरि स्त्रियां टाप्।

लोहितक न० लोहितमिव कायति कै-क। १पित्तले राजनि०। लोहित+स्वार्थे कन्। २पद्मरागमणौ पु० हेमच०। ३मङ्गलग्रहे पु० शब्दमाला।

लोहितचन्दन न०कर्म०। १कुङ्कुमे अमरः २रक्तचन्दने च।

लोहितपुष्पक पु० लोहितानि रक्तानि पुष्पाण्यस्य कप्। दाडिमवृक्षे भावप्र०। २रक्तवर्णपुष्पयुते त्रि०।

लोहितमृत्तिका स्त्री कर्म०। १गैरिके (गेरिमाटी) रत्नमा० २रक्तमृदि च।

लोहिता स्त्री रुह-इतच् रस्य लः। १वराहक्रान्तायां शब्दच० २रक्तपुनर्नवायां राजनि०। ३रक्तवर्णायां स्त्रियाञ्च।

लोहिताक्ष पु०लोहिते अक्षिणी यस्य षच् समा०। १विष्णौ शब्दच० २कोकिले च पुंस्त्री० शब्दच०। ३रक्तनेत्रयुते त्रि० स्त्रियां ङीष्। [स्मिल्लश्चके च राजनि०।

लोहिताङ्ग पु०लोहितमङ्गमस्य। १मङ्गलग्रहे अमरः २का-

लोहितानन पुंस्त्री० लोहितमाननमस्य। १नकुले राजनि० स्त्रियां ङीष्। २रक्तमुखे त्रि० स्त्रियां टाप्। [त्रिका०।

लोहितायस् न० लोहितं वर्णमेति इण्-असुन्। ताम्रे

लोहितायस न० लोहितमयः अच् स०। १ताम्रे २रक्त-वर्णायोजातिभेदे च।

लोहोत्तम न० लोहेषु धातूत्तमम्। स्वर्णे हेमच०।

लौकायतिक न० लोकायतं चार्वाकशास्त्रं वेत्त्यधीते वा ठक्। चार्वाकमताभिज्ञे।

लौकिक त्रि० लोके विदितः प्रसिद्धो हितो वा ठञ्। १लोकविदिते २लोकप्रसिद्धे। ३लोकहिते च।

लौकिकाग्नि पु० कर्म०। विधानेन संस्कारशून्ये वह्नौ।

लौड उन्मादे भ्वा० पर० सक० सेट्। लौडति अलौडीत्। ऋदित् चङि न ह्रस्वः। [२धातुमात्रे च।

लौह पु०लोहमेव स्वार्थे अण्। (लोया) १धातुभेदे भरतः।

लौहज न० लोहात् लोहाभ्यां जायते वा जन-ड।१मण्डूरे रत्ना०। धातुद्वयजे कांस्यपित्तलादौ च।

लौहभाण्ड पु० लोहस्य विकारः अण् कर्म०। (हामान-दिस्ता) २लौहमये पात्रभेदे शब्दच०। ३लौहमयपात्र-मात्रे न०।

लौहमल न० लोहस्येदमण् कर्म०। लोहकिट्टे राजनि०।

लौहित्य न०लोहितस्य भावः ष्यञ् स्वार्थे ष्यञ् वा। १रक्त-वर्णे २रक्तत्वे"लोहितात् सरसो जातो लौहित्यश्च ततो ऽभवत्" उक्ते ३महानदभेदे।"तीर्णलौहित्ये"रघुः।

ल्वी श्लेषे क्र्या० प्वा० पर० सक० अनिट्। ल्विनाति अल्वै-षीत्।

ल्वी गतौ क्र्या० प्वा० पर० सक० अनिट्। ल्विनाति अल्वै- [षीत्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये लकारादिशब्दार्थ-सङ्कलनम्।

व

वकारः व्यञ्जनवर्णभेदः। स च स्पर्शोष्मवर्णयोरन्तःस्थितत्वात् अन्तःस्थवर्णभेदः अस्योच्चारणस्थानं दन्तौष्ठौ "दन्त्योष्ठ्यो वः स्मृतो बुधैः" शिक्षोक्तेः। अस्योच्चारणे जिह्वा-ग्रेण दन्तोष्ठयोरीषत्स्पर्शात् ईषत्स्पृष्टता आभ्यन्तर-प्रयत्नः। बाह्यप्रयत्नाश्च विवारनादघोषा अल्पप्राणश्च। अस्य दन्त्योष्ठ्यत्वात् दन्त्यत्वं क्वचिच्च ओष्ठ्यत्वमाश्रित्य कार्य्यभेदस्तेन संवुवर्त्तीत्यादौ ओष्ठ्यत्वमाश्रित्य उः अप-परः। दन्त्यत्वमाश्रित्य च अनुस्वारस्थाने अनुनासिको वो वा पक्षे अनुस्वारस्थितिः। अस्य मातृकान्यासे वाम-स्कन्धे न्यस्यता। काव्यादौ प्रयोगे "व्यसनमथ वरौ"इ० र० टी० उक्तेः व्यसनं फलम्। वर्णाभिधाने अस्य वा-चकशब्दा उक्ता यथा "वो वाणो वारुणी कृष्मा वरुणो मेदसंज्ञकः। षड्गीर्वो ज्वालिनी वक्त्रं कलसो वारिवाचकः। उत्कारी शाखिनी शान्ता बालः स्थिरश्च सागरः शुचिः। इन्द्रधारा च वामांसः करमूलं च न-र्त्तकः। जगद्धात्री मारिणी च देवोऽभिकोऽनिरुद्धकः। गिरिराजो निवृत्तात्मा व्यङ्ग्या नन्दिनी करः" अस्य ध्येयस्वरूपं यथा "वकारं चञ्चलापाङ्गि! कुण्डली मोक्षमव्ययम्। पञ्चप्राणमयं वर्णं त्रिशक्तिसहितं सदा। त्रिबिन्दुसहितं वर्णमात्मादितत्त्वसंयुतम्। पञ्चदेवमयं वर्णं पीतविद्युल्लतोपमम्। चतुर्वर्गप्रदं वर्णं सर्वसिद्धि-प्रदायकम्"कामधेनुत०"अस्याधिष्ठातृध्येयरूपं यथा"कुन्द-पुष्पप्रभां देवीं द्विभुजां पङ्कजेक्षणाम्। शुक्लमाल्याम्बर-धरां रत्नहारोज्ज्वलां पराम्। साधकाभीष्टदां सिद्ध

शिविरदां सिद्धसेविताम्। एवं ध्यात्वा वकारं तु तन्मन्त्रं दशधा जपेत्” वर्णोद्धारतन्त्रम्।

व पु॰ वा—ड। १वायौ २वरुणे ३सान्त्वने ४मन्थने मेदि॰ ५राहौ ६कल्याणे ७अवर्त्ति ८वसतौ ६समुद्रे च शब्द॰ च॰ १०व्याघ्रे ११वसने १२शालूके। १३वन्दने च एकाक्षरको॰। १४सादृश्ये अव्य॰ मेदि॰ “शात्वं व यशः पशुः” रघुः। १५वरुणे न॰ मेदि॰। १६वरुणबीजे मान्तमव्ययम्।

वंश पु॰ वमति उद्गिरति वम-श तस्य नेत्त्वम्। १पुत्रपौत्राद्यपत्यवर्गे २तृणजातिभेदे (बाँश) अमरः।

“वंशः सरो हिमः स्वादुः कषायो वस्तिशोधनः। छेदनः कफपित्तघ्नः कुष्ठास्रव्रणशोथजित्। तत्करीरः कटुः पाकरसे रूक्षो गुरुः सरः। कषायः कफकृत् स्वादुर्विदाही वातपित्तलः। तद्यवास्तु सरा रूक्षाः कषायाः कटुपाकिनः। वातपित्तकरा उष्णा बद्धमूत्राः कफापहाः” भावप्र॰। ३पृष्ठावयवे ४वर्गे च मेदि॰ ५इक्षौ ६सालवृक्षे च राजनि॰। ७वाद्यभेदे पुंस्त्री॰ धरणिः स्त्रीत्वे गौरा॰ ङीष् “वंशीकुलेन वंशियेन” इति छन्दारनचम्पूः। तद्विवृतिर्यथा

“तालेन राजते गीतं तालो वादित्रसम्भवः। गरीयस्तेन वादित्रं तच्चतुर्विधमुच्यते। ततं शुषिरमानद्धं घनमित्यं चतुर्विधम्। ततं तन्त्रीगतं वाद्यं वंशाद्यं शुषिरं तथा। चर्मावनद्धमानद्धं घनं तालादिकं मतम्”। तत्र शुषिरं यथा “वंशोऽथ पारी मधुरी ती शङ्खकाहला। तोडही मुरली बुक्का शृङ्गिका स्वरनाभयः। शृङ्गं कापालिकं वंशचर्मवंशस्तथा परः। एते शुषिरभेदास्तु कथिताः पूर्वसूरिभिः। वर्त्तुलः सरलश्चैव पर्वदोषविवर्जितः। वैणवः खादिरो वापि रक्तचन्दनजोऽथ वा। श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽपि वा। राजतस्ताम्रजो वापि लौहजः स्फाटिकोऽथ वा। कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभितः। शिल्पविद्याप्रवीणेन वंशः कार्य्यो मनोहरः। वंशेनैव मतःप्रीतिः मतङ्गमुनिनोदितम्। ततोऽन्येऽपि तदाकारा वंशा एव प्रकीर्त्तिताः। तत्र त्यक्त्वा शिरोदेशादधोऽङ्गुलिमितमङ्गुलम्। फुत्काररन्ध्रं कुर्वीत मितमङ्गुलिपर्वणा। पञ्च कुल्लानि संत्यज्य ताररन्ध्राणि कारयेत्। कुर्य्यात्तथान्यरन्ध्राणि सप्तसंख्यानि कौशलात्। बदरीबीजतुल्यानि संत्यज्याद्धाङ्गुलम्। प्रान्तयोर्न्यसनं कार्य्यं स्वराद्यैनादहेतवे। सिक्थकेन कला देया तेन सुस्वरता भवेत्। पञ्चाङ्गुलोऽयं वंशः स्यादेकैकाङ्गुलिवर्द्धितः। षडङ्गुलानि नाम्ना स्यात् यावदष्टादशाङ्गुलम्। फुत्कारताररन्ध्रस्य यावदङ्गुलिमन्तरम्। तदेव नाम वंशस्य वांशिकैः परिकीर्त्त्यते। एकाङ्गुलोद्भवाङ्गुलश्च त्र्यङ्गुलचतुरङ्गुलः। अतितारतरत्वेन वांशिकैः समुपेक्षितः। त्रयोदशाङ्गुलो वंशोऽपरः पञ्चदशाङ्गुलः। निन्दितो वंशतत्त्वज्ञैस्तथा सप्तदशाङ्गुलः। महानन्दस्तथानन्दो विजयोऽथ जयस्तथा। चत्वार उत्तमा वंशा मतङ्गमुनिसम्मताः। दशाङ्गुलो महानन्दोनन्द एकादशाङ्गुलः। द्वादशाङ्गुलमानस्तु विजयः परिकीर्त्तितः। चतुर्दशाङ्गुलमितो जय इत्यभिधीयते। ब्रह्मा रुद्रो रविर्विष्णुः क्रमादत्र व्यवस्थिताः। नैविड्यं प्रौढताचापि सुस्वरत्वञ्च शीघ्रता। माधुर्य्यमिति पञ्चामी फुत्कृतेषु गुणाः स्मृताः। शीत्कारबहुलः स्तब्धो विस्वरः स्फुटितो लघुः। अमधुरश्च विज्ञेयाः षड्दोषाः फुत्कृते क्रमात्। इथा प्रयोगबाहुल्यमल्पता गीतवादने। एभिर्दोषैर्युतोऽतीव निन्दितो वांशिको मतः। स्थानकादिनयाभिज्ञो गमकाढ्यः स्फुटाक्षरः। शीघ्रहस्तः कलाभिज्ञो वांशिको दक्ष उच्यते। प्रयुक्तिर्वद्युक्तिश्च युक्तिश्चेत्यङ्गुले गुणाः। सुस्थानत्वं सुस्वरत्वमङ्गुलीसारणक्रिया। समस्तगमकज्ञानं रागरागाङ्गवेदिता। क्रियाभाषाविभाषासु दक्षता गीतवादने। स्वस्थाने चापि दुःस्थाने नादनिर्माणकौशलम्। गातॄणां स्थानदातृत्वं तद्दोषाच्छादनं तथा। वांशिकस्य गुणा एते मया संक्षिप्य दर्शिताः” सङ्गीतदा॰।

वंशक पु॰ वंश इव कायति कै—क। (सोमशाडा) १इक्षुभेदे रत्नमा॰ २मत्स्यभेदे (राउत) शब्दमा॰। ३अगुरुचन्दने न॰ हारा॰। [वंशरोचनायाम् राजनि॰।

वंशकर्पूररोचना स्त्री कर्पूरमिव रोचते रुच—ल्यु ६त॰।

वंशचोरी स्त्री वंशस्य चोरनिशाव्यस्या अच् गौरा॰ ङीष्। वंशरोचनायाम् राजनि॰।

वंशज पु॰ वंशात् जायते जन—ड। १वंशहवजाते यवाकारे वेणुयवे राजनि॰ २सत्कुलजाते त्रि॰। ३वंशरोचनायां स्त्री टाप् शब्दर॰। [राजनि॰।

वंशतण्डुल पु॰ ६त॰। वेणुजाते तण्डुलाकारे वेणुयवे

वंशधर त्रि॰ वंशं धरति। कुलाविच्छेदकारके सन्ताने। धृ—णिच् ल्यु। वंशवर्द्धनोऽप्यत्र।

वंशनेत्र न॰ वंशस्येव नेत्रमस्य। इक्षुमूले राजनि॰।

वंशपत्र पु० वंशस्य पत्रमिव पत्रमस्य । १नलनामके तृणे राजनि०। हेम०। २वंशदले न० । कप तत्रैव । ३नाडी-हिङ्गौ स्त्री राजनि० गौरा० ङीष् ।

वंशपत्रपतित न० सप्तदशाक्षरपादके छन्दोभेदे । "दिङ्मुनि वंशपत्रपतितं भरनभनलगैः" छन्दो०।

वंशपीत पु०वंशपत्रमिव पीतः । कणगुग्गुलौ राजनि०।

वंशपुष्पा स्त्री वंशस्य पुष्पमिव पुष्पमस्याः । सहदेवीलतायाम् राजनि० ।

वंशपूरक न० वंशस्येव पूरकं यस्य । इक्षुमूले राजनि० ।

वंशरो(लो)चना स्त्री वंशेषु रोचते रुच-ल्यु वा रस्य लः । वंशपर्वस्थिते श्वेतवर्णे कर्पूराकारे द्रव्ये । (वंशलोचन) । "वंशजा बृंहणी वृष्या बल्या स्वाद्वी च शीतला । तृष्णाकासज्वरश्वासक्षयपित्तास्रकामलाः । हरेत् कुष्ठं व्रणं पाण्डुं कषायवातकृच्छ्रजित् भावप्र० ।

वंशशर्करा स्त्री वंशस्य शर्करेव । (वंशलोचन) पदार्थे राजनि० । [हेमच० ।

वंशशलाका स्त्री० वंशस्य शलाकेव कठिनत्वात् । वीरणमूले

वंशस्तनित न० । द्वादशाक्षरपादके वंशस्थविलापरपर्याये छन्दोभेदे शब्दा: । [वंशस्थविलं जतौ जरौ छन्दो०

वंशस्थविल न० । द्वादशाक्षरपादके छन्दोभेदे । "वदन्ति

वंशाग्र न० वंशस्य अग्रं मूलम् । वंशाङ्कुरे (कोँड़)राजनि०

वंशाङ्कुर पु० ६त० । (कोँड़) इति ख्याते पदार्थे राजनि०

वंशिक न० वंशोऽस्त्यस्य ठन् वंश इव वा कन् । १अगुरुचन्दने अमरः २वंश्यां स्त्री शब्दच० टाप् ।

वंशीधर पु० वंशीं वंशजवाद्यभेदं धरति धृ-अच् । श्रीकृष्णे

वंश्य त्रि० वंशे सत्कुले जातः यत् । सत्कुलजाते ।

वक कौटिल्ये भ्वा० गतौ भ्वा०आ०आ०सेट् इदित् । वङ्कते अवङ्किष्ट ।

वक पुंस्त्री० वकि-अच् पृषो० नलोपः । स्वनामख्याते विहगे अमरः स्त्रियां ङीष् । २स्वनामख्याते पुष्पवृक्षे "अगस्तिकुसुमं शीतं चातुर्थकनिवारकम् । नक्तान्ध्यनाशनं तिक्तं कषायं कटुपाकि च । पीनसश्लेष्मपित्तघ्नं वातघ्नं मुनिभिर्मतम्" भावप्र०। ३औषधादिपाचनयन्त्रभेदे "जलकच्छपपातालदोलाभूधरवालुकाः । वकाद्या यन्त्रभेदाः स्युर्धन्वन्तरिसुपूजिताः" शब्दच०। अस्य लक्षणं यथा "दीर्घकण्ठकाचकुप्या गिलयेत् स्वल्पभाण्डकम् । तिर्य्यक् कृत्वा पचेत् चुल्ल्यां वकयन्त्रमिति स्मृतम् ।" वैद्यकम् । ४कुवेरे ५राक्षसभेदे मेदि० यो भीमेन हतः भा०व० १४

अ० । श्रीकृष्णेन हते दैत्यभेदे च भाग०१०।११ अ० ।

वकजित् पु० वकं जितवान् जि-क्विप् ६त० । १श्रीकृष्णे २भीमसेने च वकान्तकादयोऽप्यत्र ।

वकधूप पु० वक इव शुभ्रो धूपः । कृकधूपे अमरः ।

वकपञ्चक न० । कार्त्तिकशुक्लपक्षस्यैकादश्यादितिथिपञ्चके । तत्र मत्स्यादकैरपि मत्स्यत्यागेन व्रताचरणात् तथात्वम्

वकपुष्प पु० वक इव कुटिलं पुष्पमस्य । स्वनामख्याते पुष्पवृक्षे शब्दच० ।

वकवृत्ति पु० वकस्येव स्वार्थपरा वृत्तिश्चेष्टा यस्य । "अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः" इत्युक्तलक्षणे परःस्वके जने ।

वकव्रतचर पु० वक इव व्रतं चारयति चर-अच् । "अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च वकव्रतधरो द्विजः" इत्युक्ते स्वार्थसाधनतत्परे वञ्चके विप्रादौ । [व्रतधरे ।

वकव्रतिन्(क) पु० वकव्रत+अस्त्यर्थे इनि ठन् वा । वक-

वकुल पु० वकि-कुलच् नलोपः । १स्वनामख्याते पुष्पवृक्षे अमरः । २कटुकायां स्त्री राजनि० टाप् । काकोल्यां ङीप् पृषो० । वकुलोऽपि वकुले पु० । "वकुलो मधुरश्चैव शिशिरोऽसरकस्तथा । वकुलस्तुवरोऽनुष्णः कटुः पाके रसे गुरुः । कफपित्तविषश्वित्रकृमिदन्तगदापहः" भावप्र० । अस्य ओष्ठ्यादित्वमित्यन्ये ।

वक्क गतौ भ्वा०आत्म०सक०सेट् । वक्कते अववक्किष्ट ।

वक्तव्य त्रि० वच-तव्य । १कुत्सिते २हीने ३दुष्टे च मेदि० "दिवा वक्तव्यता पात्रे" स्मृतिः । ४कथनीये च । भावे क्त । ५कथने ६दूषणे च न० ।

वक्तृ त्रि० उचितं वक्ति वच-तृच् । १उचितवक्तृवाग्मिनि अमरः स्त्रियां ङीप् । २पण्डिते पु० मेदि० ।

वक्त्र न० वक्त्यनेन वच-करणे ष्ट्रन् । १मुखे अमरः । २तगरमूले शब्दर० । ३वसनभेदे मेदि०। वक्त्रं "नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम्" वृ० र० उक्ते ४छन्दोभेदे च ।

वक्त्रभेदिन् पु० वक्त्रं भिनत्ति भिद-णिनि । १तिक्तरसे हेमच० । २मुखविदारके त्रि० स्त्रियां ङीप् ।

वक्त्रवास पु० वक्त्रं वासयति सुरभीकरोति वासि-अण् उप० स० । १नागरङ्गे हेमच०। ६त० २मुखगन्धे पु० ।

वक्त्रशोधिन् पु० वक्त्रं शोधयति शुध-णिच्-णिनि । १जम्बीरे २मुखशोधके ३ताम्बूलादौ त्रि० स्त्रियां ङीप् ।

वक्रासव पु० वक्रस्यासव इव । अधररसे त्रिका० ।

वक्र न० वकि–रन् पृषो० नलोपः । १नदीवङ्के अमरः २शनैश्चरे पु०मेदि० ३मङ्गलग्रहे पु०हेम० ४रुद्रे ५त्रिपुरासुरे पु० धरणिः ६पर्वटे कुटिलगतौ च स्त्री । ७तद्वति त्रि० । ग्रहाणां वक्रगतिकारणं अगगतिशब्दे उक्तम् । सामान्यतः ज्यो० त० उक्तं यथा “वक्राः स्युः पञ्च षष्ठेऽर्के अतिवक्रा नगाष्टगे । नवमे दशमे चैव जायते वक्रगा गतिः । द्वादशैकादशे सूर्ये भजन्ते शीघ्रतां पुनः । रविस्थित्यं गकलिं शावधेः संख्यान कल्प्यते । न तु राश्यन्तरसञ्चारात् पञ्चमादिनिरूपणम् । राशुचेन्न तदा वक्रौ” ।

वक्रकण्ट पु० वक्रः कुटिलः कण्टः कण्टकोऽस्य । बदरवृक्षे राजनि० । ततः संज्ञायां कन् । खदिरवृक्षे राजनि० ।

वक्रखड्ग पु० कर्म० । करवाले राजनि० ।

वक्रग्रीव पुंस्त्री० वक्रा ग्रीवा यस्य । १उष्ट्रे त्रिका० स्त्रियां ङीष् । २कुटिलग्रीवायुते त्रि० स्त्रियां टाप् ।

वक्रपुच्छ पुंस्त्री० वक्रं पुच्छं यस्य । १कुक्कुरे त्रिका० स्त्रियां ङीष् । वक्रलाङ्गूलादयोऽप्यत्र ।

वक्रपुष्प न० वक्राणि पुष्पाण्यस्य । १वकवृक्षे शब्दर० २पलाशवृक्षे च राजनि० । [वृक्षे राजनि० ।

वक्रशल्या स्त्री वक्रं शल्यमिव पत्रादि यस्याः । कुटुम्बिनी-

वक्राङ्ग पुंस्त्री० वक्राण्यङ्गान्यस्य । १हंसे स्त्रियां ङीष् । २कुटिलावयवयुते त्रि० स्त्रियां वा ङीप् । कर्म० ३कुटिले देहे न० ।

वक्रिमन् पु०वक्रस्य भावः इमनिच् । कौटिल्ये “वचितवक्रिम प्रेक्षितम्” मालतीमाधवम् । पृषो० । अदन्तोऽप्यत्र ।

वक्रोक्ति स्त्री कर्म० । १कुटिलोक्तौ “अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद्यदि । अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा” सा० द० उक्ते २अर्थालङ्कारभेदे ३काकुवचने च ।

वक्ष रोषे भ्वा० पर० सक० सेट् । वक्षति अवक्षीत् ।

वक्षस् न० वह–असुन् सुट् च । १हृदये २उरसि च अमरः ।

वक्षः(क्ष)स्थल न० वक्षःस्थलमिव वा विसर्गलोपः । प्रशस्तवक्षसि । [सा०द० ।

वक्षोज पु०वक्षसि जायते जन–ड । १स्तने “वक्षोजयोर्मन्दता”

वक्षोरुह पु० वक्षसि रोहति रुह-क । स्तने त्रिका० ।

वख गतौ भ्वा० पर० सक० सेट् इदित् । वङ्खति अवङ्खीत् अनिदित्त्वमप्यत्र वखति अवखीत् अवाखीत् ।

वग खञ्जे भ्वा०पर०अक०सेट् इदित् । वङ्गति अवङ्गीत् ।

वगाह पु० अव+गाह–घञ् अवातो लोपः । अवगाहने ।

वघ गतौ निन्दायाम् आरम्भे च सक०जवे अक० भ्वा०आत्म० सेट् इदित् । वङ्घते अवङ्घिष्ट ।

वङ्क पु० वकि–अच् । १नदीवक्रे भरतः । २पल्ययने (पालान) स्त्री त्रिका० टाप् ।

वङ्क्रि स्त्री वकि–रि । १पार्श्वास्थि हेमच० । २वाद्यभेदे पुंन० उणादिको० । ३गृहदारुणि पुंन० सि०कौ० ।

वङ्ग न० वगि–अच् । धातुभेदे (राङ्) रङ्गशब्दे दृश्यम् । “रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं प्रिये ! वङ्गदेश इति प्रोक्तः” उक्ते देशभेदे पु०ब०व० । ४चन्द्रवंश्ये नृपभेदे पु० शब्दर० । ४वार्त्ताकौ ५कार्पासे च पु० मेदि० ।

वङ्गज न०वङ्गात् धातोः जायते जन–ड । १सिन्दूरे रत्नमा० २वङ्गदेशजाते त्रि० ।

वङ्गन पु० वगि–ल्यु । वार्त्ताकौ शब्दर० ।

वङ्गशुल्बज न० वङ्गशुल्वाभ्यां रङ्गताम्राभ्यां जायते जन–ड । रङ्गताम्रमिश्रितजाते कांस्ये धातौ हेमच० ।

वङ्गसेन पु० वङ्गमिव शुभ्रा सेना पुष्पमस्य । वकवृक्षे त्रिका०

वङ्गारि पु० ६त० । हरिताले हेमच० तस्य वङ्गधातुजारणात्मकत्वात् ।

वङ्क्षण पु० वक्ष-ल्युट् पृषो०णत्वम् । ऊरुसन्धौ (कुचकी) अमरः

वच सन्देशे सक०कथने द्विक० चुरा०उभ० सेट् । वाचयति ते

वच कथने अदा० द्विक० पर० अनिट् । वक्ति । “न हि वचिरन्तिपरः प्रयुज्यते” अभियुक्तोक्तेरस्य न अन्ति” अवोचत् त । उवाच ऊचतुः वक्ता उक्तः ।

अनु+उक्तस्य पुनःकथने अनुवादे ।

निर्+अवयवार्थकथने निरुक्तिः निर्वचनम् ।

प्र+प्रकर्षेण कथने व्याख्यानार्थमुक्तस्य कथने प्रवचनम् ।

वचन न० वच-ल्युट् । १कथने २वाक्ये अमरः ३शुण्ठ्याम् शब्दच० कर्त्तरि ल्यु । व्याकरणोक्ते संख्यार्थके सुप्तिङ्स्वरूपे प्रत्यये च । “सदृशं त्रिषु लिङ्गेषु विभक्तिवचनेषु च” । [णिनि । वचने स्थिते वशीभूते अमरः ।

वचनग्राहिन् त्रि०वचनं गृह्णाति तदनुसारेणाचरति ग्रह–

वचनीय त्रि० वच–अनीयर् । १कथनीये २निन्दनीये लोकापवादे न० “वचनीयमिदं व्यवस्थितम्”कुमारः ।

वचनेस्थित त्रि० वचने वाक्ये तदुपदिष्टाचारे तिष्ठति स्था–क अलुक्स० । वाक्यप्रतिपालके वशीभूते अमरः । [मेदि०

वचर पुंस्त्री०वच–अरन् । १कुक्कुटे स्त्रियां ङीष् । २शठे त्रि०

वचस् न० वच–असुन् । वाक्ये वाक्पदार्थे अमरकोषः ।

वचसांपति पु० ६त० अलुक्स० । दृहस्पतौ दीपिका ।

वचस्कर त्रि० वचः करोति कृ–अच् कस्कादि० । वाक्यप्रतिपालके भृत्ये ।

वचा स्त्री वच–अच् । (वच) इति ख्याते द्रव्ये ।

"वचोग्रगन्धा कटुका तिक्तोष्णा वान्तिवह्निकृत् । विवन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधनी । अपस्मारकफोन्मादभूतजन्त्वनिलान् हरेत्" । (खुरासानी वचा)। "पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा । हैमवत्युदिता तद्वत् गुणं हन्ति विशेषतः ।" अथ (महाभरी) वचा। सा तु लोके (कुलीवञ्च इति) नामान्तरम् । "सुगन्धाप्युग्रगन्धा च विशेषात् कफकासनुत् । सुस्वरकरी रुच्या हृत्कण्ठमुखशोधिनी" । अपरा सुगन्धा स्थूलग्रन्थिर्यस्याः लोके मञ्जाभरा इति वाग । "स्थूलग्रन्थिः सुगन्धान्या ततो हीनगुणा स्मृता" । (चोपचीनीति) लोके प्रसिद्धा । तस्या गुणाः "द्वीपान्तरवचा कद्वी तिक्तोष्णा वह्निदीप्तिकृत् । विवन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधनी । वातव्याधीनपस्मारमुन्मादतनुवेदनाम् । व्यपोहति विशेषेण फिरङ्गामयनाशिनी" भावप्र० ।

वज गतौ भ्वा० पर० सक० सेट् । वजति । अवाजीत्–अवजीत् ववाज । [ति अवीवजत् त ।

वज मार्गसंस्कारे गतौ च चुरा० उभ० सक० सेट् । वाजयति

वज्र पुंन० वज–रन् । १हीरके २इन्द्रस्यास्त्रभेदे च । तच्च दधीचिमुन्यस्थितो जातम् भाग०६।१०अ० उक्तम् ३बालके ४धात्र्याम् न०मेदि० ५काञ्जिके जटा० ६वज्रपुष्पे शब्दर०। ७योगभेदे ८अस्त्रभेदे न०भावप्र०ज्योतिषोक्ते विष्कुम्भादिषु सप्तविंशतौ योगेषु मध्ये पञ्चदशे योगभेदे च न० । ९कोकिलाक्षवृक्षे १०श्वेतकुशे पु०राजनि०। ११श्रीकृष्णस्य प्रपौत्रे यदुवंश्ये नृपभेदे च पु० भाग०। १२वेज्रपुष्पके भावप्र० । हीरकवज्रलक्षणादि ह०स० ८०अ० उक्तं यथा "रत्नानि बलाद्दैत्याद्दधीचितोऽन्ये वदन्ति जातानि । केचिद्भुवः स्वभावाद्वैचित्र्यं प्राहुरुपलानाम् । इत्युपक्रमे ।"

"वेण्वातटे विशुद्धं शिरीषकुसुमोपमं च कौशलकम् । सौराष्ट्रकमाताम्रं कृष्णं सौर्पारकं वज्रम् । ईषत्ताम्रं हिमवति मतङ्गजं वल्लपुष्पसङ्काशम् । आपीतं च कलिङ्गे श्यामं पौण्ड्रेषु सम्भूतम् । ऐन्द्रं षडश्रि शुक्लं याम्यं सर्पास्यरूपमसितं च । कदलीकाण्डनिकाशं वैष्णवमिति सर्वसंस्थानम् । वारुणमबलागुह्योपमं भवेत् कर्णिकारपुष्पनिभम् । शृङ्गाटकसंस्थानं व्याघ्राक्षिनिभं च हौतभुजम् । वायव्यं च यवोपममशोककुसुमप्रभं समुद्दिष्टम् । स्रोतः खनिः प्रकीर्णकमित्याकरसम्भवस्त्रिविधः । रक्तं पीतं च शुभं राजन्यानां सितं द्विजातीनाम् । शैरीषं वैश्यानां शूद्राणां शस्यतेऽसिनिभम् । सितसर्षपाष्टकं तण्डुलो भवेत्तण्डुलैस्तु विंशत्या । हे कस्य मूल्यं द्विलक्षमिति चैतत् । पादत्र्यंशार्धोनं त्रिभागपञ्चांशषोडशांशाश्च । भागश्च पञ्चविंशः शतिकः साहस्रिकश्चेति । सर्वद्रव्याभेद्यं लघ्वम्भसि तरति रश्मिवत् स्निग्धम् । तडिदनलशक्रचापोपमं च वज्रं हितायोक्तम् । काकपदमक्षिकाकेशधातुयुक्तानि शर्कराविद्धम् । द्विगुणाश्रि दग्धकलुषत्रस्तविशीर्णानि न शुभानि । यानि च बुद्बुददलिताग्रचिपिटवासीफलप्रदीर्घाणि । सर्वेषां चैतेषां मूल्याद्भागोऽष्टमो हानिः । वज्रं न किञ्चिदपि धारयितव्यमेके पुत्रार्थिनीभिरबलाभिरवन्ति तज्ज्ञाः । शृङ्गाटकत्रिपुटधान्यकवत् स्थितं यच्छ्रोणीनिभं च शुभदं तनयार्थिनीनाम् । स्वजनविभवजीवितक्षयं जनयति वज्रमनिष्टलक्षणम् । अशनिविषभयारिनाशनं शुभमुरुभोगकरं च भूभृताम् ।"

हीरकोत्पत्त्यादि गारुडे ६८अ० उक्तं यथा

"तस्या(वलस्या)स्थिलेशो निपपात येषु भुवः प्रदेशेषु कथञ्चिदेव । वज्राणि वज्रायुधनिर्जिगीषोर्भवन्ति नानाकृतिमन्ति तेषु । हैमातङ्गसौराष्ट्राः पौण्ड्रकालिङ्गकोशलाः । वेण्वातटाः ससौवीरा वज्रस्याष्टाविहाकराः । आताम्रा हिमशैलजाश्च शशिभा वेण्वातटीयाः स्मृताः सौवीरे त्वसिताब्जमेघसदृशास्ताम्राश्च सौराष्ट्रजाः । कालिङ्गाः कनकावदातरुचिराः पीतप्रभाः कोशले श्यामाः पुण्ड्रभवा मतङ्गविषये नात्यन्तपीतप्रभाः । अत्यर्थं लघु वर्णतश्च गुणवत् पार्श्वेषु सम्यक् समं रेखाबिन्दुकलङ्ककाकपदकत्रासादिभिर्वर्जितम् । लोकेऽस्मिन् परमाणुमात्रमपि यत् वज्रं क्वचिद्दृश्यते तस्मिन् देव ! समाश्रयो ध्रुवमितस्तीक्ष्णाग्रधारं यदि । वज्रेषु वर्णयुक्त्या देवानामपि परिग्रहः प्रोक्तः । वर्णेभ्यश्च विभागः कार्यो वर्णाश्रयादेव । हरितपीतपिङ्गश्यामाताम्राः स्वभावतो रुचिराः । हरिदच्यवरुणवह्निपितृपतिमरुतां स्वकाश्चाः । विप्रस्य

चक्रायुधद्स्फटिकावदातः स्यात् क्षत्रियस्य शशबभ्रु-त्रिकोणनाभः । वैश्यस्य कान्तकदलीदलसन्निकाशः शूद्रस्य धौतकरवालसमानदीप्तिः । द्वौ वज्रवर्णौ पृथिवी-पतीनां सद्भिः प्रतिष्ठौ न तु सार्वजन्यौ । यः स्याज्जवा-विद्रुमभङ्गशोणो यो वा हरिद्रारससन्निकाशः । ईश-त्वात् सर्ववर्णानां गुणवत् सार्ववर्णिकम् । कामतो धारयेद्राजा नत्वन्योऽन्यत् कथञ्चन । अधरोत्तरवृत्त्या हि व्याडेन स्याद्वर्णसङ्करः । मतः कष्टतरो वज्रो वर्णानां सङ्करो मतः । न च मार्गविभागमात्रवृत्त्या विदुषा वज्रपरिग्रहो विधेयः । गुणवद्गुणसम्पदां विभूति-र्विपरीतो व्यसनोदयस्य हेतुः । एकमपि यस्य शृङ्गं विदलितमवलोक्यते विशीर्णं वा । गुणवदपि तन्न धार्यं वज्रं श्रेयोऽर्थिभिर्भवने । स्फुटिताग्रविशीर्ण-शृङ्गदेशं मलवर्णैः पृषतैरुपेतमध्यम् । न हि वज्रधृतोऽपि वज्रमाशु प्रियमन्याश्रयतां हतां न कुर्यात् । यस्यैकदेशः क्षतजावभासो यदा भवेल्लोहितवर्णचित्रम् । न तत्र कुर्याद्धि यमाश्रमाशु स्वच्छन्दमृत्योरपि जीवितान्तम् । कोटयः पार्श्वानि धाराश्च षड़ष्टौ द्वादशेति च । उत्तुङ्ग-समतीक्ष्णाग्रा वज्रस्याकरजा गुणाः । षट्कोटिशुद्ध-ममलं स्फुटतीक्ष्णधारं वर्णान्वितं लघु सुपार्श्वमपेत दोषम् । इन्द्रायुधांशुविसृतिस्फुरितान्तरीक्षमेवंविधं भुवि भवेत् सुलभं न वज्रम् । तीक्ष्णाग्रं विमलमपेत सर्वदोषं धत्ते यः प्रयततनुः सदैव वज्रम् । हद्धिस्तं प्रतिदिनमेति यावदायुः स्त्रीसम्पत्सुतधनधान्यगो-पशूनाम् । व्यालवह्निविषव्याधितस्कराम्बुभयानि च । दूरात्तस्य निवर्त्तन्ते कर्माण्याथर्वणानि च । यदि वज्रमपेत सर्वदोषं बिभृयात्तण्डुलविंशतिं गुरुत्वे । मणिशास्त्र-विदो वदन्ति तस्य द्विगुणं रूपकलक्षमग्र्यमूल्यम् । त्रिभागहीनार्द्धतदर्द्धशेषं त्रयोदशं त्रिंशदतोऽर्द्धभागाः । अशीतिभागोऽथ शतांशभागः सहस्रभागोऽल्पसमान-दोष. । यत्तण्डुलैर्द्विरादिभिः कृतस्य वज्रस्य मूल्यं प्रथमं प्रदिष्टम् । द्वाभ्यां क्रमाद्धानिमुपागतस्य त्वेकावसानस्य विनिश्चयोऽयम् । न चापि तन्तण्डुलैरेव वज्राणां धारण-क्रमः । अष्टाभिः सर्षपैर्गौरैस्तण्डुलं परिकल्पयेत् । यत्तु सर्वगुणैर्युक्तं वज्रं तरति वारिणि । रत्नवर्ग-समस्तेऽपि तस्य धारणमिष्यते । स्वनेनापि हि दोषेण वज्रमाश्रयेण दूषितम् । स्वमूल्याद्दशमं भागं वज्रं लभति मानवः । प्रकटानेकदोषस्य स्वल्पस्य महतोऽपि वा । स्वमूल्याच्छतशोभागो वज्रस्य न विधी-यते । स्फुटदोषसमङ्कारे वज्रं यद्यपि दृश्यते । रत्नानां प्रतिकर्मार्थं मूल्यं तस्य भवेल्लघु । प्रथमं गुणसम्पदा-भ्युपेतं प्रतिबद्धं समुपैति तच्च दोषम् । स्वजनाभरणेन तस्य राज्ञो गुणहीनोऽपि मणिर्न भूषणाय । नार्य्या वज्रमधार्य्यं गुणवदपि सुतप्रसूतिमिच्छन्त्या । अन्यत्र दीर्घचिपिटस्यादृगुणैर्विनाकृताञ्च । अयसा पुष्परागेण तथा गोमेदकेन च । वैदूर्य्यस्फटिकाभ्याञ्च काचैश्चापि पृथग्विधैः । प्रतिरूपाणि कुर्वन्ति वज्रस्य कुशलाजनाः । परीक्षा तेषु कर्त्तव्या विद्वद्भिः सुपरीक्षकैः । क्षारो-ल्लेखनशाणाभिस्तेषां कार्य्यं परीक्षणम् । पृथिव्यां यानि रत्नानि ये चान्ये लोहधातवः । सर्वाणि विलि-खेद्वज्रं तच्च तैर्न विलिख्यते । गुरुता सर्वरत्नानां गौरवाधारकारणम् । वज्रे तद्वैपरीत्येन सूरयः परि-चक्षते । जातिभिरजातिं विलिखन्ति वज्रकुरुविन्दाः । वज्रैर्वज्रं विलिखति नान्येन विलिख्यते वज्रम् । वज्राणि मुक्तामणयो याश्च काश्चन जातयः । न तेषां प्रतिबद्धानां भा भवत्यूर्द्ध्वगामिनी । तिर्य्यक्क्षततत्वात् केषाञ्चित् कथञ्चिद्यदि दृश्यते । तिर्य्यगालिख्यमानानां सा पार्श्वे-ष्वपि हन्यते । यद्यपि विशीर्णकोटिः सबिन्दुरेखान्वितो विवर्णो वा । तदपि धनधान्यपुत्रान् करोति सेन्द्रा-युधो वज्रः । सौदामिनीविस्फुरिताभिराम राजा यथोक्तं कुलिशं दधानः । पराक्रमाक्रान्तपरप्रतापः समस्तसामन्तभुवं भुनक्ति" । २विद्युदग्नौ तन्निवारक-त्वेन यथा "प्रचण्डपवनाघाते मेघेषु स्तनितेषु यः । त्रिःपठेज्जैमिनीयोऽस्मि प्राङ्मुखो वाप्युदङ्मुखः । तस्य मा भूद्भयं घोरं विद्युतोयोऽवसीदति आ०त० धृतब्रह्म-पुराणम् । "मुनेः कल्याणमित्रस्य जैमिनेश्चापिकीर्त्तनात् । विद्युदग्निभयं नास्ति पठिते च गृहोदरे" । "लिखिते च गृहोदरे" इति वा पाठः । जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च । पुलस्त्यः पुलहश्चैव पञ्च ते वज्र-वारकाः" पुराणम् ।

तत्पर्य्यायादि भावप्र० उक्तं यथा

"हीरकः पुंसि वज्रोऽस्त्री चन्द्रो मणिवरश्च सः । स तु श्वेतः स्मृतो विप्रो लोहितः क्षत्रियः स्मृतः । पीतो वैश्योऽसितः शूद्रश्चतुर्वर्णात्मकश्च सः । रसायने मतो विप्रः सर्वसिद्धिप्रदायकः । क्षत्रियो व्याधिवि-ध्वंसी जरामृत्युहरः स्मृतः । वैश्यो धनप्रदः प्रोक्त

क्षया देहस्य दार्ढ्यकृत् । सूक्ष्मो नाशयति व्याधीन् वयः स्तम्भं करोति च । पुंस्त्रीनपुंसकानीह लक्षणीयानि लक्षणैः । सुवृत्ताः फलसंपूर्णास्तेजोयुक्ता बृहत्तराः । पुरुषास्ते समाख्याता रेखाविन्दुविवर्जिताः । रेखाविन्दुसमायुक्ताः षड्स्रास्ते स्त्रियः स्मृताः ।" षड्स्राः षट्कोणाः । "त्रिकोणाश्च सुदीर्घास्ते विज्ञेयाश्च नपुंसकाः । तेषु स्युः पुरुषाः श्रेष्ठा रसबन्धनकारिणः । स्त्रियः कुर्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदाः । नपुंसकास्त्ववीर्य्याः स्युरकामाः सत्त्ववर्जिताः । स्त्रियः स्त्रीभ्यः प्रदातव्याः क्लीवं क्लीवे प्रयोजयेत् । सर्वेभ्यः सर्वदा देयाः पुरुषाः वीर्य्यवर्द्धनाः । अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा । पाण्डुतामङ्गपूरत्वञ्च तस्मात् संशोध्य मारयेत् ।" तच्छोधनविधिर्यथा

"कुलत्थकोद्रवक्वाथे दोलायन्त्रे विपाचयेत् । व्याघ्रीकन्दगतं वज्रं त्रिदिनं तद्विशुध्यति" । व्याघ्री कण्टकारिका । अन्यः शोधनविधिः । "गृहीत्वाभिनवं शुभे वज्रं व्याघ्रीकन्दोदरे क्षिपेत् । माहिषीविष्ठया लिप्ता करीषाग्नौ विपाचयेत् । त्रियामायां चतुर्यामं यामिन्यन्तेऽश्वमूत्रके । सेचयेत्पाचयेदेवं सप्तरात्रेण शुद्ध्यति ।" अथ वज्रस्य मारणविधिः "हिङ्गुसैन्धवसंयुक्ते क्षिपेत् क्वाथे कुलत्थजे । तप्तं तप्तं पुनर्वज्रं भवेद्भस्म त्रिसप्तधा" । अन्योऽस्य मारणप्रकारः "मेषशृङ्गभुजङ्गास्थिकूर्म्मपृष्ठाम्लवेतसम् । शशदन्तं समं पिष्ट्वा वज्रीक्षीरेण गोलकम् । कृत्वा तन्मध्यगं वज्रं म्रियते ध्मातमेव हि ।" मारितस्य वज्रस्य गुणाः "आयुःपुष्टिं बलं वीर्य्यं वर्णं सौख्यं करोति च । सेवितं सर्वरोगघ्नं मृतं वज्रं न संशयः ।" तद्भेदा तद्गुणाश्च भावप्र० उक्ता यथा

"पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतम् । विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः । ते निपेतुर्धनस्थानाच्छिखरेषु महीभृताम् । तेभ्य एव समापन्नं तत्तद्गिरिषु चाभ्रकम् । तद्वज्रं वज्रजातत्वादभ्रमम्बररवोद्भवात् । गगनात् स्खलितं यस्माद्गगनञ्च ततो मतम् । विप्रक्षत्रियविट्शूद्रभेदात्तत् स्याच्चतुर्विधम् । क्रमेणैषां सितं रक्तं पीतं कृष्णञ्च वर्णतः । प्रशस्यते सितन्तारं रक्तं तत्तु रसायने । पीतं हेमनि, कृष्णन्तु गदेषु द्रुतयेऽपि च । पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्विधम् । मुञ्चत्यग्नौ विनिःक्षिप्तं पिनाकन्दलसञ्चयम् । अज्ञानाद्भक्षणं तस्य महाकुष्ठप्रदायकम् । दर्दुरं त्वग्निनिःक्षिप्तं कुरुते दर्दुरध्वनिम् । गोलकान् बहुशः कृत्वा स स्यान्मृत्युप्रदायकः । नागन्तु नागवद्वह्नौ फुत्कारं परिमुञ्चति । तद्भक्षितमवश्यन्तु विदधाति भगन्दरम् । वज्रन्तु वज्रवत्तिष्ठेत्तन्नाग्नौ विकृतिं व्रजेत् । सर्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत् । अभ्रमुत्तरशैलोत्थं बहुसत्त्वं गुणाधिकम् । दक्षिणाद्रिभवं स्वल्पसत्त्वमल्पगुणप्रदम् । अभ्रं कषायं मधुरं सुशीतमायुष्करं धातुविवर्द्धनञ्च । हन्यात् त्रिदोषं व्रणमेहकुष्ठप्लीहोदरग्रन्थिविषक्रिमींश्च । रोगान् हन्ति दृढयति वपुर्वीर्य्यवृद्धिं विधत्ते तारुण्याढ्यं रमयति शतं योषितां नित्यमेव । दीर्घायुष्कान् जनयति सुतान् विक्रमैः सिंहतुल्यान् मृत्योर्भीतिं हरति सततं सेव्यमानं मृताभ्रम् ।

वज्रकण्टक पुं० वज्रमिव कठिनं कण्टकमस्य । १स्नुहीवृक्षे जटा० । २कोकिलाक्षे राजनि० । [राजनि०

वज्रचर्मन् वज्रमिव कठिनं चर्म यस्य । गण्डके खड्गिनि

वज्रतुण्ड पुं० वज्राकारं तुण्डमस्य । १गरुडे २मशके त्रिका० ३मशके ४गृध्रे च राजनि० ।

वज्रदन्त पुं० वज्रमिव कठिनो दन्तोऽस्य । १शूकरे २मूषिके च शब्दमा० वज्रदशनादयोऽप्यत्र ।

वज्रद्रु पुं० वज्राकारो द्रुः । स्नुहीवृक्षे अमरः । वज्रद्रुमादयोऽप्यत्र । [वज्रच्छदादयोऽप्यत्र ।

वज्रधर पुं० वज्रं धरति धृ-अच् । १इन्द्रे हला० २पेचके च

वज्रनिर्घोष पुं० ह्रत० । वज्रस्तनितशब्दादौ उणा० वज्रनिष्पेषोऽप्यत्र । [वज्रहस्तादयोऽप्यत्र ।

वज्रपाणि पुं० वज्रं पाणौ यस्य । १इन्द्रे २पेचके च त्रिका०

वज्रपुट न० वज्रमिव कठिनं पुटमस्य । औषधपाचनपात्रभेदे

वज्रपुष्प न० वज्रमिव पुष्पम् । तिलपुष्पे अमरः ।

वज्रपुष्पा स्त्री वज्रमिव पुष्पं यस्याः । शतपुष्पायाम् राजनि०

वज्रमय त्रि० वज्रात्मकम् मयट् । अतिकठिने स्त्रियां ङीप् ।

वज्रमूली स्त्री वज्रमिव कठिनं मूलमस्याः ङीप् । माषपर्ण्याम् राजनि० । [वज्रारलतायाम् हारा० ।

वज्रवल्ली स्त्री वज्रमिव कठिना वल्ली । (हाड़जोड़ा) अस्थि-

वज्रबीजक पुं० वज्रमिव कठिनं बीजमस्य कप् । लताकरञ्जे राजनि० । [राजनि० ।

वज्रवृक्ष पुं० वज्रमिव कठिनो वृक्षः । सेहुण्डवृक्षे (सेओड़ा)

वज्रा स्त्री वज्र-टाप् । १गुडूच्याम् २स्नुह्याञ्च मेदि० ३दुर्गायां देवीपु० ४स्नुहीभेदे ङीबन्तोऽपि मेदि० ।

वज्राकृति पु० वज्रस्येवाकृतिरस्य । जिह्वामूलीयसंज्ञके वर्णभेदे ।

वज्राङ्गी स्त्री वज्रमिवाङ्गं यस्याः । गवेधुकाधान्यभेदे (गड़गड़े) शब्दच० २लताभेदे (हाड़जोड़ा) भावप्र० ।

वज्रास्थिशृङ्खला स्त्री वज्रमिवास्थि शृङ्खला बन्धनं यस्याः । कोकिलाक्षवृक्षे राजनि० । [२गुडे मेदि० ।

वज्रिन् पु० वज्रमस्त्यस्य इनि । १इन्द्रे अमरः २मेघके च ।

वञ्चक पु०स्त्री०वञ्च–णिच्–ण्वुल् । १शृगाले अमरः स्त्रियां ङीष् २गृहबभ्रौ च । ३खले ४प्रतारके च त्रि० मेदि० ।

वञ्चन न० वञ्च–ल्युट् । प्रतारणे अन्यथास्थितस्य वस्तुनोऽन्यथारूपेण कथनादिनाऽन्यस्य बोधोत्पादने । युच् । वञ्चनाप्यत्र स्त्री ।

वञ्चित त्रि० वञ्च–क्त । वञ्चनायोगे शब्दर० ।

वञ्जुल पु० वञ्च–उलच् पृषो० चस्य जः । १तिनिशवृक्षे २अशोकवृक्षे अमरः । ३वेतसवृक्षे मेदि० ४स्थलपद्मवृक्षे शब्दच० । ५पक्षिभेदे च हारा० । ६बहुदुग्धायां गवि स्त्री हेमच० । ७वक्रे त्रि० वञ्जुलप्रियः ।

वञ्जुलद्रुम पु० वञ्जुलाख्यः द्रुमः । अशोकवृक्षे राजनि० ।

वञ्जुलप्रिय पु०वञ्जुलं वक्रं प्रीणाति प्री–क । वेतसे रत्नमा० ।

वट वेष्टने भागे च अद०चुरा०उभ०सक०सेट् । वटयति ते । अववटत् त । [ववटतुः ।

वट वेष्टने भ्वा० पर० सक०सेट् । वटति । अवटीत् अवाटीत्

वट विभाजने वा चुरा०उभ०पक्षे भ्वा०पर०सक०सेट् इदित् । वण्टयति ते वण्टति । अववण्टत् त अवण्टीत् ।

वट कथने भ्वा० पर० द्विक० सेट् घटा० । वटयति अवाटीत् अवटीत् । ववटतुः ।

वट स्तेये वो०पर०सक०सेट् इदित् । वण्टति अवण्टीत् ।

वट पु० वट–अच् । १स्वनामख्याते वृक्षे अमरः २गुणनिर्मितरज्जौ च त्रि० । (वँटे) मेदि० ।

वटवृक्षस्य वहुरूपत्वमश्वत्थशब्दे ५१७ पृ० उक्तम् ।

"वटः शीतो गुरुर्ग्राही कफपित्तव्रणापहः । वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषहृत्" भावप्र० । ३साम्ये हेमच० । ४कपर्दे ५गोले ६भक्ष्यभेदे (वड़ा) मेदि० ।

वटक पु० वट–क्वुन् । पिष्टकभेदे (वड़ा) भावप्र० कृतान्नशब्दे २१८२पृ० दृश्यम् ।

वटपत्र पु० वटस्येव पत्रमस्य । १सितार्जकवृक्षे राजनि० । २पाषाणभेदीलतायां स्त्री ङीप् भावप्र० । "वटपत्री कषायोष्णा योनिमूत्रगदापहा" इति तद्गुणाश्चोक्ताः

रत्नमा० टाप् । [त्रि० शब्दर० ।

वटर पुं०स्त्री० १कुक्कुटे स्त्रियां ङीष् । २शठे ३चञ्चले ४चौरे

वटी स्त्री वट–अच् गौरा०ङीष् । १रज्जौ अमरः गोलाकारे (वड़ी) पदार्थे भावप्र० स्वार्थे क तत्रैः । वटिकाप्यत्र "वटिका अथ कथ्यन्ते तन्नाम गुटिका वटी । मोदको वटिका पिण्डी गुडो वर्त्तिस्तथोच्यते । लेहवत् साध्यते वह्नौ गुडो वा शर्करा वा । गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्मिता वटी ।" तत्र वह्निसिद्धे गुडादौ । "कुर्य्यादवह्निसिद्धेन क्वचिद्गुग्गुलुना वटी" । द्रवेण मधुना वापि गुटिकां कारयेद्बुधः । सिता चतुर्गुणा देया वटीषु द्विगुणो गुडः । चूर्णे चूर्णसमः कार्य्यो गुग्गुलुर्मधु तत्समम् ।" तत्समम् चूर्णसमम् "द्रवं तु द्विगुणं देयं मोदकेषु भिषग्वरैः" । द्रवं द्रवरूपद्रव्यम् । "कर्षप्रमाणं तन्मात्रां बलं दृष्ट्वा प्रयुज्यते" । बलमिति बालादेरप्युपलक्षणम्" । महीवटाख्ये २वृक्षभेदे राजनि० ।

वटु पु० वट–उ । १माणवके २ब्रह्मचारिणि च हेमच० ।

वटुक पु० वट–उक । १बालके शब्दर० २भैरवभेदे च तन्त्रम्

वठ असहायकरणे भ्वा० आत्म० अक० सेट् इदित् । वण्ठते अवण्ठिष्ट । [ववठतुः ।

वठ सामर्थ्ये भ्वा०पर०अक०सेट् । वठति । अवाठीत् अवठीत्

वठर पु० वठ–अरन् । १मूर्खे शब्दादि० २अम्बष्ठे हेमच० ३शठे ४मन्दे च त्रिका० ।

वड विभजने चुरा० उभ० सक० सेट् इदित् । वण्डयति ते अववण्डत् त । [अवण्डिष्ट ।

वड वेष्टने विभागे च भ्वा० आ० सक० सेट् इदित् । वण्डते

वड आरोहणे भ्वा० पर० सक० सेट् । वडति अवाडीत् अवडीत् । ववडतुः ।

वडभि(भी) स्त्री वड्यते आरुह्यतेऽस्मिन् वड–अभि वा ङीप् । १गृहचूडायाम् (चाल) अमरः २प्रासादाग्रभागे च (चिलेकर) रत्नमा० ।

वडा स्त्री वड–अच् । स्वनामख्याते पिष्टकभेदे शब्दच० ।

वडिश न० वड–इन् वडिं श्यति शो–क । मत्स्यधारणार्थे वक्रलौहकण्टकयुक्ते पदार्थे अमरः । "वडिशेन आमीरिवामात्" शब्दावलयम् ।

वड्र त्रि० वल–रक् लस्य डः । बृहति (वड़) अमरः ।

वण शब्दे भ्वा० पर० सक० सेट् । वणति अवाणीत् अवणीत् । ऋदित् चङि वा ह्रस्वः ।

वण्ट विभाजने अद० चुरा० उभ० सक० सेट् । वण्टयति

ते व्यवहृत न । [१बलतोहारे च । (वेंठो) शब्दमा०
वण्ट पु० वण्ट-अच् । १भागे २दात्रादेः धारकस्थाने(बाँट)
वण्टक पु० वण्ट-वञ् स्वार्थे क । १भागे अमरः
ण्वुल् । २विभाजके त्रि० [१बलतोहारे च मेदि०।
वण्ठ त्रि० वण-ठ तस्य नेत्त्वम् । १खर्वे (बेंटे) ।२कुन्तायुधे
वण्डर पु० वठि-अरन् । १खनिकारके २कुक्कुरलाङ्गूले
३करीरकोषे ४तालस्य पल्लवे ५पयोधरे च मेदि०। अयं
औणादिरपि तदर्थे ।
वण्ड त्रि०वडि-अच् ।१बलतोहारे २हस्तपादाद्यङ्गविकले (बेंडे)
३अनावृतमेढ़्रे हेमच० ४पांसुलायां स्त्रियां स्त्री मेदि० ।
वण्डाल पु० वडि-आलच् । १युद्धभेदे २नौकायां खनित्रे
च मेदि० । [मार्गे शब्दर०राजवत् नृपवत् इत्यादि ।
वत् अव्य० वा-डति । सादृश्ये अमरः वतिप्रत्ययान्तोऽप्य-
वत अव्य० वन-क्त । १खेदे २अनुकम्पायाम् ३हर्षे ४वि-
स्मये ५आमन्त्रणे च अमरः ।
वतंस पु० अव+तन्स-घञ् अवालोपः । १कर्णभूषणभेदे
२शेखरे ३शिरोभूषणे मेदि० ४भूषणमात्रे च ।
वतण्ड पु० अव+तडि-अच् अवालोपः । मुनिभेदे गणादि० ।
वतोका स्त्री अवगतं तोकं यस्याः प्रा०ब०अवालोपः। अपत्य-
हीनायां स्त्रियाम् अमरः ।
वत्स न० वद-स । १वक्षःस्थले अमरः । २वत्सादिविषये हि-
म० । ३वत्सरे पु० अमरः । ४चन्द्रवंशे राजभेदे च पु० ।
वत्सक न० वत्स इव इवार्थे कन् । १पुष्पकासीसे राजनि०
२कुटजे अमरः । ३इन्द्रयवे च राजनि० ।
वत्सकबीज न०वत्सकस्य कुटजस्य बीजम्। इन्द्रयवे राजनि०
वत्सतर पुंस्त्री० क्षुद्रः वत्सः अल्पत्वे तरप् । १क्षुद्रवत्से
दम्यादिदमनकाले तद्वादौ अमरः स्त्रियां ङीप् । वत्सतरी
वत्सनाभ पु० वत्सान् पशुविशेषान् नभ्यति हिनस्ति नभ-
अण् वत्सस्य नाभिराकारोऽस्त्यस्य अच् वा । स्थावरे
विषभेदे अमरः । तल्लक्षणादि भावप्र० उक्तं यथा
"सिन्दुवारसदृक्पत्रोवत्सनाभ्याकृतिस्तथा । यत्
पार्श्वे न तरोर्वृद्धिर्वत्सनाभः स भाषितः । तस्य सामान्य
गुणा यथा । "विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि
च । आग्नेयं वातकफहृद्योगवाहि मदावहम्" ।
व्यवायि सकलकायव्यापनपूर्वकपाकगमनशीलम् । वि-
काशि ओजसःशोषणपूर्वकं सन्धिबन्धविश्लेषकरणशी-
लम् । आग्नेयम् अधिकाग्नेयं योगवाहि संसर्ग-
गुणग्राहकम् मदावहं तमोगुणाधिक्येन बुद्धिविध्वंस-
कम् । "तदेव युक्तियुक्तं तु प्राणदायि रसायनम् ।
योगवाहि त्रिदोषघ्नं बृंहणं वीर्यवर्द्धनम् । ये दुर्गुणा
विषेऽशुद्धे ते स्युर्हीना विशोधनात् । तस्माद्विषं प्रयो-
गेषु शोधयित्वा प्रयोजयेत्" भावप्र० ।
वत्सपत्तन न० वत्सस्य वत्सराजस्य पत्तनम् । वत्सदेश-
स्थायां कौशाम्ब्यां नगर्याम् हेमच० ।
वत्सपाल पु० वत्सान् पालयति पाल-अण् । १श्रीकृष्णे
२बलदेवे च । [इत्यम् ।
वत्सर पु० वस-सरन् । द्वादशमासात्मके काले अब्दशब्दे
वत्सराज पु०चन्द्रवंश्ये नृपभेदे । "वत्सराजचरितम्" रत्ना०
वत्सरान्तक पु० वत्सरस्यान्तं करोति अन्त+णिच्-ण्वुल् ।
फाल्गुनमासे राजनि० वत्सरस्य चैत्रादिकत्वात् फाल्गु-
नस्य तदन्तकालत्वात्तथात्वम् ।
वत्सल त्रि० वत्सं लाति ला-क । १स्नेहयुक्ते २वात्सल्ये
रसे पु० ३वदति त्रि० ४विष्णौ पु० विष्णुस० ।
वत्साक्षी स्त्री वत्सस्याक्षीव अक्षि पत्रमस्याः । गो-
डुम्बायाम् (गोमक) जटा० ।
वत्सादनी स्त्री वत्सैरद्यते प्रियत्वेन अद-ल्युट् ङीप् ।
१गुडूच्याम् अमरः । वत्सः अदनमस्य । २वृके पुंस्त्री०
राजनि० स्त्रियां ङीप् । [अवन्दिष्ट ।
वद स्तुतौ अभिवादने सक० भ्वा० आ० सेट् इदित् । वन्दते
वद वाक्ये सन्देशे च भ्वा० उभ० सक० सेट् । वदति ते
अवादीत् अवदिष्ट । ज्ञानयत्नादावात्मनेपदीत्यन्ये ।
वद वाचि भ्वा० पर० सक० सेट् यजा० । वदति अवादीत्
उवाद ऊदतुः उदितः ।
भासने उपसान्त्वने आत्म० भासे वादते भासमानो
वदतीत्यर्थः भयादुपवदते सान्त्वयतीत्यर्थः । ज्ञानादावपि
च आत्म०। तत्र ज्ञाने शास्त्रे वदते । यत्ने क्षेत्रे वदते ।
विमतौ क्षेत्रे विवदन्ते । उपच्छन्दने उपवदते प्रार्थयते
इत्यर्थः सि०कौ० । व्यक्तवाचां समुच्चारणे आत्म०
सम्प्रवदन्ते विप्राः । अति+मर्यादातिक्रमेणोक्तौ प०
अतिवदति । अनु+उक्तस्य पर्यायान्तरेण कथने अनुवादः
अकर्मकात् व्यक्तवाचामनुवादे तु आत्म० अनुवदते कठः
कलापस्य" सि०कौ० अव्यक्तवाचि तु प० अनुवदति वीणा
सकर्मकात्तु पर० उक्तमनुवदति । विप्रलापोक्तौ व्यक्तायां
वाचि वा आत्म० विप्रवदन्ते न्ति वैद्याः । [विशेषविधिः
अप+निन्दायाम् । अपवादः । विशेषविधाने च अपवादः
परि+निन्दायां मिथ्यादूषणे च पर०। परिवदति परिवादः।

प्रति+विरुद्धतयोक्तौ पर० प्रतिवदति प्रतिवादः प्रतिवादी प्रत्युत्तरोक्तौ च ।

वि+विरुद्धोक्तौ पक्षप्रतिपक्षपरिग्रहेणोक्तौ आत्म० विवदन्ते पण्डिताः वादिप्रतिवादिनश्च ।

वद वाचि सन्देशे च सक० चुरा० उभ० सेट् । वादयति ते अवीवदत् । अभि+प्रणामे ।

वद त्रि० वदति वद–अच् । वक्तरि अमरः ।

वदन न० उद्यतेऽनेन वद–करणे ल्युट् । १मुखे अमरः । २वचनेन्द्रिये भावे ल्युट् । ३कथने न० । [अमरः ।

वदा(द)न्य पु० वद–अन्य पृषो० वा दीर्घः । भूरिदानशीले

वदाम न० वद–आमन् । (वादाम) वातादे फलभेदे भावप्र० । "वातादो वातवैरी स्यान्नेत्रोपमफलस्तथा । वातादः उष्णः सुस्निग्धो वातघ्नः शुक्रकृद्गुरुः । वातादमज्जा मधुरो वृष्यः पित्तानिलापहः । स्निग्धोष्णः कफकृत् श्रेष्ठो रक्तपित्तविकारिणाम्" भावप्र० ।

वदाल पुंस्त्री० वद–आल । पाठीनमत्स्ये (बोयाल) त्रिका० स्त्रियां ङीष् । स्वार्थे क तत्रार्थे । [अमरः ।

वदावद पु० अत्यन्तं वदति वद–अच् नि० । बहुवक्तरि

वधू स्त्री उह्यते पितृगेहात् पतिगृहं वह–ऊ धुकच् । १भार्य्यायाम् २नवोढ़ायां ३पुत्रभार्यायाम् अमरः । ४शठ्याञ्च मेदि० । अस्य श्रोण्यादित्वमित्यन्ये

वधूजन पु० कर्म०। नारीजने त्रिका० ।

वधूटी स्त्री अल्पा वधूः टी। अल्पवयस्कायाम् नार्य्यां "गोपवधूटी दुकूलेति" भाषापरि०। [नीत् अवनीत् ववनतुः ।

वन सेवने सक० शब्दे अक० भ्वा० पर०सेट् । वनति अवा-

वन व्यापारे भ्वा० पर० सक० सेट् । वनति अवानीत् अवनीत् । ज्वला०वनः वानः । घटा०वनयति । [निष्ट ।

वन याचने द्विक० तना० आ० सेट् क्त्वा वेट् । वनुते अव-

वन उपकारे उपतापे च सक० शब्दे अक० वा चु० उभ० पक्षे भ्वा० पर० सेट् । वानयति ते वनति । अवीवनत् त । अवनीत् अवानीत् ।

वन न० स्त्री वन–अच् । १वृक्षसमुदायात्मके अरण्ये अमरः स्त्रीत्वे ङीष् । "सुवनी मन्मथदतपिकापि का" नैष०। २जले ३निवासे ४आलये च मेदि० । ५प्रस्रवणे हेमच०।

वनकदली स्त्री ७त० । काष्ठकदल्याम् राजनि० ।

वनकन्द पु० वनजातः कन्दः । अरण्यजाते शूरणे राजनि०

वनकार्पासी स्त्री वनोद्भवा कार्पासी । (वनकापास) क्षुपभेदे रत्नमा० ।

वनकोलि पु० वनोद्भवः कोलिः । (वनकुल) वृक्षे ।

वनचन्दन न० वनजातं चन्दनम् शा०त० । १अगुरुचन्दने २देवदारुणि च विश्वः ।

वनचन्द्रिका स्त्री वने चन्द्रिकेव । मल्लिकायाम् राजनि० ।

वनचम्पक पु० ७त० । (वनचाँपा) चम्पकभेदे राजनि० ।

वनच्छाग पु० वने जातश्छागः । (वनछागल) १छागभेदे राजनि० । वने छाग इव । २शूकरे पुंस्त्री० शब्दमा० स्त्रियां ङीष् ।

वनज न० वने जलेऽरण्ये वा जायते जन–ड । १पद्मे २मुस्तकभेदे ३वनशूरणे पु० राजनि० ४गजे विश्वः । ५अश्वगन्धायां ६गन्धपत्रायां ७वनकार्पास्यां ८वनोपोदक्याम् ९मिश्रेयायां १०ऐन्द्र्यां स्त्री राजनि० । ११मुद्गपर्ण्यां च स्त्री मेदि० । १२वनजातमात्रे त्रि० ।

वनतिक्त पु० वनेषु वनजातेषु मध्ये तिक्तः । १हरीतक्याम् शब्दमा० । २पाठायां (आकनादि) च स्त्री रत्नमा० । स्वार्थे क तत्रैव अमरः ।

वनदीप पु० वनस्य दीप इव । वनचम्पके राजनि० ।

वनपल्लव पु० वनमिव निबिड़ पल्लवोऽस्य । शोभाञ्जने जटा० ।

वनपुष्पा स्त्री वनमिव बहुलं पुष्पं यस्याः । शतपुष्पायाम् राजनि० । [पूरकः । वनबीजपूरके राजनि० ।

वनपूरक पु० पूरकः बीजपूरकः पूर्वपदलोपः वनोद्भवः

वनप्रिय पुंस्त्री० वनं वनस्थं प्रीणाति प्री–क । १कोकिले स्त्री मेदि० स्त्रियां योपधत्वात् टाप् २अरण्यप्रियमात्रे त्रि० । ३त्वचे न० राजनि० ।

वनभुज पु० वनं भुङ्क्ते भुज–क्विप् । १ऋषभे २तस्यामोषधे शब्दच० । [अमरः ।

वनमक्षिका स्त्री वनोद्भवा मक्षिका । दंशे कीटभेदे (डाँश)

वनमल्ली स्त्री वनोद्भवा मल्ली । अरण्यमल्लिकायाम् शब्दर० ।

वनमाला स्त्री "आजानुलम्बिनी माला सर्वर्त्तुकुसुमोज्ज्वला । मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्त्तिता" इत्युक्तायां मालायाम् ।

वनमालिन् पु० वनमालाऽस्त्यस्य इनि । १श्रीकृष्णे अमरः २वाराहीलतायाम् स्त्री मेदि० ङीप् ३द्वारकापुर्य्यां स्त्री त्रिका० । [४मुद्गपर्ण्यां स्त्री राजनि०गौरा० ङीष् ।

वनमुद्ग पु० वनोद्भवः मुद्गः । १मुद्गभेदे (मुगानि) अमरः ।

वनमूर्द्धजा स्त्री वनस्य मूर्द्धजं पल्लवमिवास्त्यस्याः अच् । (काकड़ाशिङ्गा) कर्कटशृङ्ग्याम् राजनि० ।

वनमोचा स्त्री वनोद्भवा मोचा । काष्ठकदल्याम् राजनि० ।

वनलक्ष्मी स्त्री वनस्य लक्ष्मीरिव तदधिष्ठानत्वात्। कद-
लयाम् राजनि०। [राजनि०।

वनवर्वर पु० वनोद्भवः वर्वरः। कृष्णार्जके। (वनवाबुइ) इति

वनवासिन् पु० वनं वासयति सुरभीकरोति वासि-णिनि।
१मुष्कवृक्षे २वाराहीकन्दे ३शाल्मलीकन्दे ४नील-
महिषकन्दे ५ऋषभनामौषधे च राजनि०। वने वसति
वस-णिनि। ६वनवासकर्त्तरि त्रि० स्त्रियां ङीप्।

वनवीज पु० वीजो वीजपूरकः उत्तरपदलोपः ७त०। वन-
वीजपूरे राजनि०। [राजनि०।

वनवृन्ताकी स्त्री वनस्य वृन्ताकी वार्त्ताकी। वृहत्याम्

वनव्रीहि पु० वनस्य व्रीहिः। नीवारे (उड़िधान) हेमच०।

वनशूकरी स्त्री वनस्य शूकरीव रोमशत्वात्। १कपिकच्छ्वाम्
राजनि०।७त०। २वनवराहे पु०।३वनशूकरयोषिति स्त्री।

वनशृङ्गाट पु० वनस्य शृङ्गाट इव कण्टकावृतत्वात्। गोक्षुरे
अमरः। स्वार्थे क। तत्रैवार्थे। [शब्दच०।

वनशोभन न० वनं जलं शोभयति शुभ-णिच् ल्यु। पद्मे

वनसङ्कट पु० सम्+कट-अच् ६त०। मसूरे शब्दच०।

वनसरोजिनी स्त्री वनस्य सरोजिनी पद्मिनीव शोभाकर
त्वात्। वनकार्पास्याम् शब्दर०।

वनस्पति पु० वनस्य पतिः नि० सुट्। पुष्पं विना जाय-
मानफले १अश्वत्थादौ वृक्षे अमरः। २वृक्षमात्रे मेदि०।

वनहास पु० वनस्य हास इव प्रकाशकत्वात्। काशतृणे
राजनि०।

वनाखु पु० वने आखुरिव। शशके त्रिका०।

वनाखुक पु० अव+नख-उकञ् अवालोपः। मुद्गे त्रिका०।

वनाटु पु० वनमटति अट-उन्। १वर्णायां नीलमक्षिका-
याम् शब्दच०। २अपानदेशे उज्ज्व०।

वनामल पु० वनस्यामल आमलक इव। करमर्दे शब्दमा०।

वनाम्र पु० वनस्य आम्र इव : कोशाम्रे राजनि०।

वनायु पु० वन-आयुच्। प्रशस्तघोटकोद्भवदेशभेदे (आरव)
राजनि०। [(आरवि) शब्दर०।

वनायुज पु० वनायुदेशे जायते जन-ड। प्रशस्तघोटके

वनारिष्टा स्त्री वनस्य न रिष्टं यस्याः। वनहरिद्रायाम्
राजनि०। [गुडूचीलतायाम् हारा०।

वनालिका स्त्री वनमलति भूषयति अल-ण्वुल्। हस्ति-

वनि पु० वन-इन्। १अग्नौ सि०कौ० २राशौ उज्ज्वल०।
३याचने पु० ४याचके त्रि०। [रक्षायां स्त्रियाञ्च मेदि०।

वनिता स्त्री वन-याचने कर्मणि वा०क्त।१योषिति २अनु-

वनिन् पु०वनम् आश्रयतयाऽस्त्यस्य इनि। वानप्रस्थाश्रमयुक्ते

वनिष्णु त्रि० वन-इष्णुच्। याचके।

वनीपक वनीयक+पृषो० यस्य पः। याचके उज्ज्वल०।
"कृपण इव नवनीपकोपसेवितपर्वतः श्लेषात्" मध्यता च

वनीयक स्त्री वन-इन् आत्मनो वनिं याचनमिच्छति क्यच्
ण्वुल्। याचके अमरः पृषो० यलोपः। वनीकोऽप्यत्र
सारसुन्दरी।

वनेक्षुद्रा स्त्री ७त० अलुक्स०। करञ्जे रत्नमा०।

वनेचर त्रि० वने चरति चर-ट अलुक्स०। अरण्य-
चारिणि व्याधादौ स्त्रियां ङीप्।

वनेसर्ज पु० सृजति-सृज-अच् ७त० अलुक्स०। असनवृक्षे
रत्नमा०। [कार्पास्याम् रत्नमा० २वनजाते त्रि०।

वनोद्भवा स्त्री वन एव उद्भवति उद्+भू-अच् ७त०। १वन-

वनौकस् पु० वनमेव ओकः स्थानं यस्य। १वानरे अमरः।
२वनवासिनि त्रि०।

वनृच प्रतारणे भ्वा०पर०सक०सेट् क्त्वा वेट्। वञ्चति अवञ्चीत्

वन्दन न० वदि-ल्युट्। १स्तवने २प्रणामे च। युच्।
वन्दनाप्यत्र, स्त्री। ३वदने न० शब्दच०।

वन्दनीय त्रि० वदि-अनीयर्। १नमनीये २स्तवनीये च
३पीतभृङ्गराजे पु०राजनि०।४गोरोचनायां स्त्री त्रिका०।

वन्दा स्त्री वदि-कर्मणि घञ्। (परगाछा) लताभेदे अमरः
२भिक्षुक्यां ३लताभेदे च मेदि०।

वन्दाका स्त्री वदि-आकन्। वन्दायाम् शब्दच०। गौरा०
ङीष् तत्रार्थे स्त्री शब्दर०। तत्रार्थे पु० भावप्र०
"वन्दाकः शीतलस्तिक्तः कषायो मधुरो रसे। मङ्गल्यः
कफवातास्ररक्षोव्रणविषापहः"।

वन्दारु त्रि० वदि-आरु। वन्दनशीले शब्दर०।

वन्दि(न्दी) स्त्री वदि-इन् वा ङीप्। १कारावद्धमनुष्यादौ
(कएदी) शब्दर०।२वन्दने ३स्तुतौ च।४सोपानके उणा०।

वन्दिग्राह पु० वन्दिमिव-गृह्णाति ग्रह-अ। बलावष्टम्भेन
घातके (डाकाइत) मिता०। "वन्दिग्राहांस्तथा वाजि-
कुञ्जराणां च हारिणः" मनुः।

वन्दिपाठ पु० ६त०। स्तुतिपाठे त्रिका०।

वन्दिन् पु० वन्दते स्तौति वदि-णिनि। राजादेः १स्तुति-
पाठके अमरः। [भावप्र० ३वन्दायां शब्दच०।

वन्द्य त्रि० वदि यत्। १वन्दनीये। २गोरोचनायाम् स्त्री

वन्द्र न० वन्द-रन्। कल्याणे सि०कौ०।२पूजके त्रि०उणादि०

वन्य न० वने भवः यत्। १त्वचे (दारचिनि) राजनि०।

२वनमूरणे ३वाराहीकन्दे ४देवनले पु० राजनि० । ५वन-जातमात्रे त्रि० । ६मुद्गपर्ण्यां ७गोपालकर्कट्यां ८गु-ञ्जायां ९मिश्रेयायां १०भद्रमुस्तायां ११मत्स्यपत्नायां स्त्री राजनि० । वनानामरण्यानां जलानां वा समूहः यत् । १२जलसमूहे १३वनसमूहे च स्त्री मेदि० ।

वप बीजवपने तन्तुवयने मुण्डने च सक० भ्वा० उभ० अनिट् यजा० । वपति ते अवाप्सीत् अवप्त उवाप ऊपतुः । ङित् उप्त्रिमः । पित्रादिपिण्डदाने "पिण्डनिर्वपनं चरेत्" स्मृतिः ।

वपन न० वप-ल्युट् । १केशमुण्डने २बीजाधाने ३तन्त्वा-धाने च मेदि० । "प्रयागे भास्करक्षेत्रे पितृमातृ-वियोगतः । आधाने सोमपाने च वपनं षट्सु स्मृतम्" प्रा० त० ।

वपनी स्त्री उप्यतेऽनया अत्र वा वप-ल्युट् ङीप् । १नापि-तास्त्रे २तन्तुशालायां (तान्तघर) हेमच० ३तन्तुवयन-यन्त्रभेदे (माकु) च ।

वपा स्त्री वप-अच् । १मेदसि (चर्वि) "वपाया हविषः" इति श्रुतिः । २छिद्रे च अमरः ।

वपुन पु० वप-उनन् । देवतायां शब्दर० ।

वपुषा स्त्री वप-वा उषन् । हवुषायाम् भावप्र० ।

वपुष्टमा स्त्री अतिशयेन वपुः प्रशस्ताकृतिः तमप् अत्वम् । १पद्मचारिण्याम् लतायाम् जटा० । २काशीपतिकन्यायां ३जनमेजयपत्न्यां च ।

वपुस् न० उप्यन्ते देहान्तरभोगसाधनबीजीभूतानि कर्माण्यत्र वप-उसि । १शरीरे अमरः । २प्रशस्ताकारे च मेदि० ।

वप्तृ पु० वप-तृच् । १जनके २कवौ च मेदि० ३बीजादि-वापके त्रि० ।

वप्र पुंन० उप्यतेऽत्र रन् । १दुर्गनगरादौ परिखाया उद्धृत-मृत्तिकास्तूपे अमरः । २क्षेत्रे ३रेणौ ४तटे मेदि० । ५सीसके न० हेमच० । ६जनके ७प्राचीरे पु० विश्वः । ८प्रजापतौ च पु० संक्षिप्तसा० । ९मञ्जिष्ठायां स्त्री राजनि० । [१०समुद्रे च संक्षिप्तसा० ।

वप्रि पु० वप-रि । १क्षेत्रे केदारे सि० कौ० । २दुर्गतौ

वभ्र गतौ भ्वा० पर० सक० सेट् । वभ्रति अवभ्रीत् ।

वम उद्गारे भ्वा० पर० सक० सेट् । वमति अवमीत् । ट्वित् वमथुः । ज्वला० वमः वामः । वमयति वामयति उप-सृष्टस्य नित्यं ह्रस्वः । फणा० वेमतुः ववमतुः । उदित् वमित्वा वान्त्वा वान्तः ।

वमथु पु० वम-अथुच् । वमने उद्गिरणे अमरकोषः ।

वमन न० वम ल्युट् । १मर्दने २छर्दने मेदि० ३आहुतौ विश्वः ४निःसारणे च "स्वर्गाभिष्यन्दवमनम्" कुमारः । ५शणे पु० । ६जलौकायां स्त्री राजनि० गौरा० ङीष् ।

वमि स्त्री वम-इन् । १छर्दौ छर्दिशब्दे २९८० पृ० दृश्यम् । २अग्नौ पु० मेदि० ३धूर्त्ते त्रि० शब्दर० ।

वमित पु० वम-णिच् क्त । कृतोद्गारे । [यि(ट्)ध्वम् ।

वय गतौ भ्वा० आ० सक० सेट् । वयते अवयिष्ट । ऋद-

वयस् न० अज-असुन् वीभावः । १विहगे २बाल्याद्यवस्था-याम् अमरः "वयोऽतिपातोद्गतवातेति" नैष० । ३यौवने च विश्वः ।

वय(यः)स्थ पु स्त्री० वयसि यौवने तिष्ठति स्था-क खर्परे शरि वा विसर्गलोपः । १तरुणे २विभीतक्यां स्त्री अमरः । "वयस्था नागराद्भागात्" वैद्यकम् । ३आमलक्यां ४हरी-तक्यां ५सोमवल्ल्यां स्त्री अमरः । ६गुडूच्यां ७सूक्ष्मैलायां ८काकोल्याम् ९ब्राह्मौ स्त्री मेदि० । १०शाल्मलौ स्त्री हेमच० । ११क्षीरकाकोल्याम् भावप्र० १२अत्यम्लपर्ण्यां १३मत्स्याक्ष्यां १४युवतौ च स्त्री राजनि० ।

वयस्य पु० वयसा तुल्यः यत् । १समानवयस्के अमरः । २सख्यां स्त्री अमरः ।

वयुन न० वय-उनन् । १ज्ञाने भाग० १०।८० श्रीधरः । २देवागारे त्रिका० । देवागारे पु० उणादि० ।

वयोधस पु० वयो यौवनं धत्ते धा-असुन् । तरुणे उणा० ।

वयोरङ्ग न० वयसा रङ्गमिव । सीसके राजनि ।

वर ईप्से अद० चु० उभ० सक० सेट् । वरयति ते अववरत् त ।

वर न० व्रियते वृ-कर्मणि अप्, वरि-अच् वा । १कुङ्कुमे २मना-गभीष्टे अमरः "वरं प्राणान् परित्यक्ष्ये" इति तन्त्रम् । भावे अप् अच् वा । ३इच्छायाम् ४याचने ५आवरणे ६वेष्टने च । वृ-कर्मणि अप् । ७अभीष्टे ८श्रेष्ठे च त्रि० अमरः । ९जारे १०जामातरि शब्दर० ११गुग्गुलौ शब्दच० १२पत्यौ च पु० हेमच० । "तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः" इत्युक्ते १३पदार्थे ।

वरक पु० वृ-वुन् । १वनमुद्गे हेमच० २पर्पटे ३शस्य-धान्यभेदे (चीना) च राजनि० । ४पोताच्छादनवस्त्रे न० हारा० ।

वरचन्दन न० कर्म० । १कालीये २देवदारुणि च मेदि० ।

वरट न० वृ-अटन् । १कुन्दपुष्पे शब्दर० २कीटभेदे (बोलता) ३हंसे पुंस्त्री० मेदि० । स्त्रियाम् अजादि० टाप् अमरः ।

ङीप् मेदि०। ४कुङ्कुमबीजे भावप्र०। सा च ५गन्धोल्यां मेदि०।

वरण न० वृ-ल्युट्। कन्यादिदानाय जामात्रादेरभ्यर्थनानुकूले १व्यापारभेदे २वेष्टने मेदि०। ऋत्विगादेः क्रियासु नियोगाय ३पूजनादौ ५उष्ट्रे पुंस्त्री० जटा०। ६प्राकारे ७वरुणवृक्षे च। (वाँको) ख्याते ८पदार्थे च ९काशीस्थे नदीभेदे स्त्री शब्दर०। वरुणशब्दे दृश्यम्।

वरण्ड पु० वृ-अण्डच् (वयसफोड़ा) १मुखरोगभेदे भावप्र० कुड्यार्थे अध्यवेदौ च मेदि०।

वरण्डक पुंन० वृ-अण्डच् संज्ञायां क। १वरण्डशब्दार्थे २वर्तुले मेदि०। ३भित्तौ हेमच०। ४विशाले ५कम्पे ६भीते च त्रि० शब्दर०।

वरण्डालु पु० वरण्ड इवालुः। एरण्डवृक्षे त्रिका०।

वरतिक्त पु० वरः श्रेष्ठस्तिक्तो रसो यस्य। कुटजवृक्षे राजनि०। २पाठायाम् (आकनादि) स्त्री राजनि० स्वार्थे क तत्रैव।

वरत्रा स्त्री वृ-अत्रन्। हस्तिकक्ष्यारज्जौ अमरः।

वरत्वच पु० वरा त्वचा यस्य। १निम्बवृक्षे रत्नमा०। २श्रेष्ठत्वग्युते त्रि०।

वरद त्रि० वरं ददाति दा-क। १अभीष्टदातरि अमरः। २प्रसन्ने च मेदि० ३तच्चिह्नसूचके हस्तादिविन्यासरूपे मुद्राभेदे न० "अभयं वरदञ्चैव" ध्यानाध्यानम्। ४कन्यायाम् स्त्री मेदि०। ५अश्वगन्धायाम् स्त्री भावप्र० ६आदित्यभक्तायां स्त्री राजनि० ७दुर्गायाञ्च स्त्री।

वरदाचतुर्थी स्त्री माघशुक्लचतुर्थ्याम्। तामधिकृत्य "चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता" ति०त० भविष्यपु०।

वरदारु पु० दा-उन् ६त०। भूमीसहे वृक्षे राजनि०।

वरपर्ण पु० वराणि पर्णान्यस्य। क्षीरकञ्चुकीवृक्षे रत्नमा०।

वरप्रदा स्त्री वरं प्रददाति दा-क। लोपामुद्रायां हेमच०। २वरप्रदातरि त्रि०।

वरफल पु० वरं फलमस्य। १नारिकेले वृक्षे शब्दच०। कर्म०। २श्रेष्ठे फले न०। [द्रव्ये शब्दच०।

वरमुखी स्त्री वरं मुखं यस्याः ङीप्। रेणुकानामगन्ध-

वरम् अव्य० वृ-अमु। ईषदभीष्टे मेदि०।

वरम्वरा स्त्री वरं वृणोति वृ-खच् मुम्। (चाकुलिया) चिक्रपर्ण्याम् शब्दच०। २पतिंवरायां कन्यायाञ्च।

वररुचि त्रि० वरा रुचिर्यस्य। १श्रेष्ठप्रीतियुते। २पाणिनिसूत्रवार्त्तिककारे कात्यायनमुनौ त्रिका०। ३विक्रमादित्य-सभास्थे पण्डितभेदे च। नवरत्नशब्दे १९८२पृ०दृश्यम्।

वरल पु० वृ-अलच्। १वरटे त्रिका० २कीटभेदे शब्दमा०। स्त्रियां गौरा० ङीष् वरटायां स्त्री जटा० अजा० टाप्।

वरलब्ध पु० वरः उत्कर्षः पुष्पेषु लब्धो येन परनि०। १चम्पके त्रिका० २प्राप्तवरे त्रि०।

वरवर्णिनी स्त्री वरः श्रेष्ठो वर्णः प्रशंसाऽस्त्यस्याः इनि। उत्तमस्त्रियाम् अमरः। २लाक्षायां ३हरिद्रायां ४रोचनायां ५फलिन्यां ६साध्व्यां स्त्रियां मेदि०। ७गौर्यां ८लक्ष्म्यां ९पार्वत्यां च शब्दर०।

वरवाह्लीक न० कर्म०। कुङ्कुमे अमरः।

वरा स्त्री वृ-अच्। हरितक्यामलकीवयस्थारूपे फलत्रिके मेदि०। २रेणुकानामगन्धद्रव्ये शब्दच०। ३गुडूच्याम् ४मेदायां ५ब्राह्म्याम् ६विडङ्गे ७पाठायाम् ८हरिद्रायाञ्च राजनि०।

वराक पु० वृ-षाकन्। १शिवे मेदि०। २युद्धे न० हेमच०। ३अवरे त्रि०शब्दर०। ४शोचनीये च त्रि० मेदि० स्त्रियां ङीप्।

वराङ्ग न० कर्म०। १मस्तके। व्रियते आव्रियते गुप्यते वृ-अप्। २गुह्ये अमरः। ३योनौ ४गुडत्वचि च त्रिका०। ६ब०। ५गजे पुंस्त्री० त्रिका० स्त्रियां ङीष् ६विष्णौ विष्णुस०। ७कामदेवे च पु०। ८श्रेष्ठावयवयुक्ते त्रि०। ८हरिद्रायाम् स्त्री राजनि०। गौरा० ङीष्। संज्ञायां कन्। गुडत्वचि (दारचिनि) न० अमरः।

वराङ्गिन् पु० वराङ्गमस्त्यस्य इनि। १अम्लवेतसे रत्नमा०। २श्रेष्ठाङ्गयुते त्रि० स्त्रियां ङीप्।

वराट पु० वरमल्पमटति अट-अण्। १कपर्दे राजनि०। २रज्जौ च पु० रत्नको०। स्वार्थे क। तत्रार्थे "वराटकानां दशकद्वयं यत्" लीला० अट-ण्वुल्। वराटक पद्मबीजाधारे कोषे पु० अमरः। [शब्दमा०।

वराटकरजस् पु० वराटक इव रजोऽस्य। नागकेशरे वृक्षे

वराण पु० वृ-आनच्। १इन्द्रे त्रिका०। २वरुणवृक्षे शब्दर०।

वरादन न० वरैर्नृपैरद्यते अद-ल्युट्। राजादने (पियाशाल) शब्दच०।

वराम्र पु० वरः आम्र इव। करमर्दे रत्नमा०।

वरारोह पु० वर आरोहो मध्यं यस्य। १हस्तिनि त्रिका० २प्रशस्तनितम्बवत्यां स्त्रियां स्त्री अमरः।

वरालिका स्त्री वरानामालिर्यस्याः कप्। दुर्गायां त्रिका०।

वराशि पु० वरमावरणमश्नुते अश-इन्। स्थूलवस्त्रे अमरः।

वरासन न० वराय वरणीयायास्यते क्षिप्यते अस–ल्युट्। १जवापुष्पे शब्दमा०। कर्म०। २उत्तमे आसने न०। वरं पतिमस्यति अस–ल्यु। ३षिड्गे जारे पु०। वरान् श्रेष्ठानपि अस्यति दूरीकरोति ल्यु। ४द्वारपाले च पु० विश्वः। [२चक्रधरे च धरणिः।

वरासि पु० वरोवावरणीयोऽसिः ... ।

वराह पुंस्त्री० वराय अभीष्टाय मुस्तादिलाभाय आहन्ति खनति भूमिम् आ+हन–ड। १शूकरे अमरः स्त्रियां ङीष्। २यज्ञवराहाख्ये भगवतोऽवतारभेदे पु० ३पर्वत-भेदे ४मुस्तके ५मानभेदे मेदि०। ६शिशुमारे ७वाराही-कन्दे पु० राजनि० ८अष्टादशद्वीपमध्ये द्वीपभेदे च।

"गन्धर्वो वरुणः सौम्यो वराहः कङ्क एव च। कुमु-दश्च करेरुश्च नागो भट्टारकस्तथा। चन्द्रेन्द्र मलयाः शङ्ख यवाङ्कुश गभस्तिमान्। ताम्राङ्कश्च कुमारी च तस्मै द्वीपा दशाष्टभिः" शब्दमा०।

वराहकन्द पु० वराहप्रियः कन्दः शा०त०। स्वनामख्याते कन्दभेदे राजनि०। [शब्दर०।

वराहकान्ता स्त्री वराहाणां कान्ताऽभीष्टा। वराहकन्दे

वराहक्रान्ता स्त्री वराहेण क्रान्तेव। १लज्जालुकतायाम् शब्दच० २वाराह्यां (चामरालु) सुभूतिः।

वराहिका स्त्री वराहो भक्षकत्वेनास्त्यस्याः ठन्। कपि-कच्छ्वाम् राजनि०।

वराही स्त्री वराहो भक्षकत्वेनास्त्यस्या अच् गौरा० ङीष्। १भद्रमुस्तायाम् २वराहकन्दे च राजनि०।

वरिवस् न० वृ+असुन् दुट् च। १पूजने २धने च निघण्टुः।

वरिवसि(सि)त त्रि० वरिवः पूजनं करोति क्यच्–क्त वा स्वलोपः। पूजिते अमरः। [२शुश्रूषायाम् अमरः।

वरिवस्या स्त्री वरिवस्+तत्करोत्यर्थे क्यच्–भावे अ। १पूजने

वरिष्ठ त्रि० अतिशयेन उरुः इष्ठन् वरादेशः। १उरुतमे २तित्तिरिविहगे पुंस्त्री० स्त्रियां ङीष् ३नागरङ्गवृक्षे पु०र जनि०। ४ताम्रे न० अमरः। ५मरिचे न० मेदि० ६वरुणे अजयः। ७आदित्यभक्तायां स्त्री राजनि०।

वरी स्त्री वरी शतावरी पूर्वपदलोपः। १शतावर्याम् अमरः २सूर्यपत्न्याञ्च त्रिका०।

वरीयस् त्रि० अतिशयेन उरुः श्रेष्ठः ईयसुन् वरादेशः। १उरुतमे विष्कम्भादिषु मध्ये २अष्टादशे योगभेदे पु० ज्यो०त०। [३श्रमे अमरः।

वरी(री)वर्द्द पु० ... ।

वरुट पुंस्त्री० म्लेच्छजातिविशेषे स्त्रियां ङीष्। "पुलिन्दा नाहला निष्ठ्याः शबरा वरुटा भटाः। माला भिल्लाः किरातास्च सर्वेऽपि म्लेच्छजातयः" हेमच०।

वरुड पु० वृ–उडन्। अन्त्यजजातिभेदे स्त्रियां ङीष्। "रजकश्चर्मकारश्च नटो वरुड एव च" मनुः।

वरुण पु० वृ–उनन्। पश्चिमाशापतौ १जलेशे स्वनामख्याते देवभेदे अमरः। २जले मेदि० ३सूर्य्ये च विश्वः। ५द्वीप-भेदे वराहशब्दे दृश्यम्। ६काशीस्थे नदीभेदे स्त्री। काशीस्थनदीभेदस्योत्पत्त्यादिकं वामनपु० ३अ० उक्तं यथा "प्रयागे वसते नित्यं योगशायी तु विश्रुतः। चरणाद्द-क्षिणात्तस्य विनिर्याता सरिद्वरा। विश्रुता वरु(र)णेत्येवं सर्वपापहरा शुभा। सव्यात् पादात् द्वितीया च असि-रित्येव विश्रुता। ते उभे च सरिच्छ्रेष्ठे लोकपूज्ये बभूवतुः। तयोर्मध्ये तु यो देशस्तत्क्षेत्रं योगशा-यिनः। त्रैलोक्यप्रवरं तीर्थं सर्वपापप्रमोचनम्। न तादृशोऽस्ति गगने न भूम्यां न रसातले। तत्रास्ति न-गरी पुण्या ख्याता वाराणसी शुभा"।

७स्वनामख्यातवृक्षभेदे पु०अमरः "वरुणः पित्तलो भेदी श्लेष्मकृच्छ्राश्ममारुतान्। निहन्ति गुल्मवातास्र क्रिमींश्चोष्णोऽग्निदीपनः। कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः" भावप्र०।

वरुणात्मजा स्त्री वरुणस्य जलस्यात्मजेव जन्यत्वात्। जल-भवे मद्ये अमरः। [पत्न्याम् जटा०।

वरुणानी स्त्री वरुणस्य पत्नी ङीष् आनुक् च। वरुण-

वरुत्र न० वृ–उत्र। उत्तरीयवस्त्रे सि० कौ०

वरूथ न० वृ–ऊथन्। तनुत्राणे हेमच० २चर्मणि मेदि०। ३रथगुप्तिस्थाने परप्रहाररक्षार्थमावृते स्थाने पु०अमरः।

वरूथिनी स्त्री वरूथोऽस्त्यस्याः इनि। सेनायाम् अमरः।

वरेण्य न० वृ–एन्य। १कुङ्कुमे राजनि० २प्रधाने ३प्रार्थ-नीये च त्रि० अमरः। [वारेन्द्र विप्रभेदे।

वरेन्द्री स्त्री गौडदेशे त्रिका०। साभिजनोऽस्य अण्।

वरोट न० वराण्युटानि दलान्यस्य। मरुवकपुष्पे अमरः।

वरोल पुंस्त्री०वृ–ओल। वरटे कीटभेदे त्रिका०। स्त्रियां ङीष्

वर्कर पु० वृक–अरन्। १तरुणपशौ अमरः २मेषशावके भ-रतः ३छागमात्रे पुंस्त्री० स्त्रियां ङीष् ४परिहासे मेदि०

वर्ग पु० वृज–घञ्। १सजातीयसमूहे अमरः। यथा मनुष्य-वर्गः पशुवर्गः। समानधर्मिभिः प्राण्यप्राणिभिः कृते २वृन्दे च यथा कवर्गः चवर्गः। अत्र कत्वचत्वादिना

३सजातीयत्वेऽपि स्यात्तथात्वमपि । ३ग्रन्थपरिच्छेदे यथा सर्गवर्गः पातालवर्गः । ४अङ्कशास्त्रोक्ते समानाङ्कद्वयस्य परस्परगुणने यथा द्विकस्य चत्वारि, त्रिकस्य नव, चतुष्कस्य षोडश इत्यादि । "स्याच्चोऽन्त्यवर्गे" "वर्गं मूलं यदं कृतिम्" इति च लीला०। वृज–घञ् ।५त्यागे । ग्रन्थपरिच्छेदाश्च बहुविधाः यथा "सर्गोवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः। उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम् । स्थानं प्रकरणं पर्वाह्निकञ्च ग्रन्थसन्धयः" त्रिका०।

वर्गप्रकृति बीजगणितोक्ते गणनाप्रकारभेदे तत्र दृश्यम् ।

वर्गमूल न० वर्गस्य समद्विघातात्मककृतेः मूलम् । अङ्कशास्त्रप्रसिद्धे समाङ्कद्वयेन कृताङ्कसङ्ख्यायाः यन्मूलं घातसाधनं तत्र । यथा षोडशानां चत्वारि नवानां त्रयः चतुर्णां द्वौ इत्यादि ।

वर्गोत्तम पु० वर्गेषु षट्सु क्षेत्रादिषु उत्तमः नवांशः । "चराणां प्रथमे चांशे स्थिराणां पञ्चमे तथा । द्व्यात्मकानाञ्च नवमे वर्गोत्तम इति स्मृतः" इति ज्योतिषोक्ते त्रिंशांशकालकराशिनवांशभेदे ।

वर्च दीप्तौ भ्वा० आत्म० अक० सेट् । वर्चते अवर्चिष्ट ।

वर्चस् न० वर्च–असुन् । १रूपे २शुक्रे ३तेजसि ४विष्ठायाञ्च मेदि०।५चन्द्रपुत्रे पु० "रोहिण्यामभवद्यस्तु वर्चस्वी येन चन्द्रमा" वह्निपु०। स्वार्थे क । विष्ठायाम् अमरः ।

वर्चस्विन् त्रि० वर्चस्+अस्त्यर्थे विनि । तेजस्विनि स्त्रियां ङीप् ।

वर्जन न० वृज ल्युट् । १त्यागे २हिंसायां च ३मारणे मेदि०

वर्ण स्तुतौ विस्तारे शुक्लादिवर्णकरणे उद्योगे दीपने च अदु० चु० उभ० सक० सेट् । वर्णयति ते अववर्णत् त ।

वर्ण वर्णने चु० उभ० सक०सेट् । वर्णयति ते अववर्णत् त ।

वर्ण न० वर्ण–अच् ।१कुङ्कुमे न० २स्वर्णे ३व्रते ४शुक्लादिरूपे ५अकाराद्यक्षरे ६भेदे ७गीतक्रमे ८चित्रे ९तालभेदे १०अङ्गरागे पु० हेमच०। ११गजचित्रकम्बले पु० अमरः १२यशसि १३गुणे १४स्तुतौ पु०मेदि०। भेदे रूपे अक्षरे पु० न० मेदि० । १५ब्राह्मणादिजातौ पु० अमरः । "चातुर्वर्ण्यं मया सृष्टम्"गीता ।

तत्र विप्रादिवर्णानां सृष्टिः तद्धर्माश्च मनुना उक्ता यथा "लोकानान्तु विवृद्ध्यर्थं मुखबाहूरुपादतः । ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्त्तयत्"। "मुखबाहूरुपज्जानां पृथक् कर्माण्यकल्पयत् । अध्यापनमध्ययनं यजनं याजनन्तथा" "ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत" यजु० ३१ ११ तेषां ब्राह्मणस्य श्रैष्ठ्ये कारणं मनुनोक्तं यथा "ऊर्द्ध्वं नाभेर्मेध्यतरः पुरुषः परिकीर्त्तितः । तस्मान्मेध्यतमं त्वस्य मुखमुक्तं स्वयम्भुवा । उत्तमाङ्गोद्भवात् ज्यैष्ठ्यात् ब्रह्मणश्चैव धारणात् । सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः" वर्णधर्माश्च जातिधर्मशब्दे ३१०५ पृ० दृश्याः ।

तत्र अक्षररूपवर्णोत्पत्तिक्रमः तद्भेदाश्च शब्दार्थरत्नेऽस्माभिरुक्ता यथा

"अथ वर्णोत्पत्तिप्रकारस्तावदभिधीयते । चेतनेन ज्ञातार्थविवक्षया तद्बोधकशब्दनिष्पादनाय प्रेरितमन्तःकरणं मूलाधारस्थितमनलं चालयति तच्चालितश्चानलः तत्स्थस्यानिलस्य चालनाय प्रभवति तच्चालितेन चानिलेन तत्रैव सूक्ष्मरूपेणोत्पादितः शब्दः परा वागित्यभिधीयते । ततोनाभिदेशपर्य्यन्तं चलितेन तेन तद्देशसंयोगादुत्पादितः शब्दः पश्यन्तीति व्यपदिश्यते एतद्द्वयस्य सूक्ष्मसूक्ष्मतरतया ईश्वरयोगिमात्रगम्यता नास्मदीयश्रुतिगोचरता । ततस्तेनैव हृदयदेशं परिसरता हृदयसंयोगेन निष्पादितः शब्दो मध्यमेत्युच्यते सा च स्वकर्णपिधानेन ध्वन्यात्मकतया सूक्ष्मरूपेण कदाचिदस्माकमपि समधिगम्या । ततो मुखपर्य्यन्तमागच्छता तेन कण्ठदेशं प्राप्य आहत्य मूर्द्धानं तत्प्रतिघातेन परावृत्य च मुखविवरे कण्ठादिषु तत्तत्स्थानेषु स्वाभिघातेनोत्पादितः शब्दो वैखरीत्युच्यते । तदुक्तं शिक्षायाम् "आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णान् जनयते तेषां विभागः पञ्चधा मतः । स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः" इति । संस्काररूपेण स्वगतानर्थान् बुद्ध्या बुद्धिवृत्त्या समेत्य विषयीकृत्येर्थः । तथा । "प्राणापानान्तरे देवी वाग्वै नित्यं हि तिष्ठति । स्थानेषु विहते वायौ कृतवर्णपरिग्रहा । वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धिनी । केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी । प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्त्तते । अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवान्तः परा वागनपायिनीति" भारतेऽप्युक्तम् । अत्र प्राणापानान्तरे इत्यधिकरणनिर्दे-

र्भादाकाशस्थायिता नित्यमित्यभिधानात् यावत्प्रलय-पर्य्यन्तस्थायिता प्राणापानादेरपि तथैव नित्यत्वाभ्युप-गमात् । न तु क्षणिकता मध्ये उत्पत्तिविनाशकल्पने गौरवात् शब्दार्थयोर्नित्यसम्बन्धस्वीकारादनित्येन शब्देन नित्यार्थसम्बन्धस्वीकारेऽयुक्तत्वापत्तेश्च । नित्यत्वेऽपि तेषां व्यञ्जकसद्भावाभावाभ्यां प्रत्ययाप्रत्ययावित्यन्यत्र विस्तरः । स्थानेषु कण्ठताल्वाद्यष्टस्थानेषु वायौ मूलाधारस्थे विहते विवक्षाप्रेरितमनोनियुक्ताग्निसंक्षोभाद्वलिते इत्यर्थः । ततवर्णपरिग्रहा वर्णभावापन्ना, तत्र स्थाने-ष्विति व्यवहितेनान्वितम् । प्राणवृत्तिनिबन्धिनीत्यनेन प्राणवृत्तेर्वायोरुत्तरोद्गपर्य्यन्तगमनमभिहितं, केवलमित्य-नेन कण्ठताल्वादिस्थानानपेक्षाभिहिता । उदग्रपा-टानेत्यनेन हृदयस्थानगमनमुक्तं बुद्धेर्हृदयस्थत्वात् । सर्वतः संहृतक्रमेत्यनेन हृदयस्थानगमनानपेक्षाभि-हिता । अविभागेत्यनेन मध्यमाया विभागरूपविशे-षस्य वर्णविधानेनाधिगमात् पश्यन्त्यास्तु तद्व्युदासः । अनपायिनी स्वस्थानादचलिता प्राणापानान्तरे मूला-धारस्थितेति यावत् । अतो यथाप्रदर्शितं परादीनां विभागं प्रतिपादयतीदं महाभारतीयमतं विस्तरेण ।"

अभिघातस्थानानि चाष्टविधानि सामान्यतो वेदित-व्यानि "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु चेति" शिक्षा-तदुक्तेः । वर्णाश्च मतभेदेन त्रिषष्टिश्चतुःषष्टिर्वा शिक्षा-यामभिहिता वेदितव्याः । यथा "चतुःषष्टिस्त्रिषष्टिर्वा वर्णाः सम्भवतो मताः । स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः । यादयश्च स्मृता ह्यष्टौ चत्वा-रश्च यमाः स्मृताः । अनुस्वारो विसर्गश्च ᳲकᳲपौ चापि पराश्रितौ । दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव चेति" । अस्यार्थः अ इ उ ऋ इत्येषां ह्रस्वदीर्घप्लुताः कालकृता द्वादश भेदाः ऌकारस्यैको भेदोऽस्य दीर्घाभावात् प्लुतस्तूत्तरं प्रतिपादितः । एचां चतुर्णां ह्रस्वाभावात् दीर्घप्लुतभेदेनाष्टौ भेदाः इत्येकविंशतिः स्वराः । स्पर्शाः कादयो मावसानाः पञ्चविंशतिः । यादयो हान्ता अष्टौ । यमाः वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये पूर्वसदृशाः प्रातिशाख्ये प्रसिद्धाश्चत्वारो वर्णाः । यथा पलिक्ँक्नी चख्ँख्नतुः । अग्ँग्निः । पतिघ्ँघ्नौ-त्यादौ । अनुस्वारादयश्चत्वारः स्पष्टाः । ᳲकᳲपौ चापि पराश्रितावित्युक्तिस्तु कखयोः पफयोरेकविधः पफयोः परयोरन्यविधः कण्ठ्योष्ठ्यत्वभेदादिति ज्ञाप-नाय । दुःस्पृष्टः ईषत्स्पृष्टः ऌकारः । "अतोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलस्तथा" इत्यनेन प्रतिपादितस्य यणपदाभिधेयवरवो धर्मस्य ईषत्स्पृष्टत्वस्य ऌकारे कथ-नात् ऌकारस्य स्वरत्वयण्त्वोभयधर्मसमावेशात् द्विवि-धता इति त्रिषष्टिर्भेदाः । ऌकारस्य प्लुतत्वे चतुः-षष्टिर्भेदाः । एवं वर्णानां सामान्यतो भेदे बोधिते एतेषामुत्पत्तिस्थानानि बाह्याभ्यन्तरप्रयत्नभेदाश्च प्रद-र्श्यन्ते । तत्र स्थानानि "हकारं पञ्चमैर्युक्तमन्त-स्थाभिश्च संयुतम् । औरस्यन्तं विजानीयात् कण्ठ्य-माहुरसंयुतम् । कण्ठ्यावहाविचुयशास्तालव्या ओष्ठ-जावुपू । स्युर्मूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः । जिह्वामूले तु कुः प्रोक्तः दन्त्योष्ठ्यो वः स्मृतो बुधैः । ए ऐ तु कण्ठ्यतालव्यावोऔ कण्ठ्योष्ठजौ स्मृतौ । अर्द्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत् । ओकारौकारयोस्तद्वदिति" । "अनुस्वारयमानाञ्च नासिका स्थानमुच्यते । अयोगवाहा विज्ञेया आश्रयस्थान-भागिन इति शिक्षोक्तानि वेदितव्यानि । यद्यपि सर्वेषां वर्णानामुच्चारणे कण्ठव्यापार आवश्यकस्तथापि चकाराद्युच्चारणे ताल्वादिव्यापारोऽप्यपेक्षित इति तन्मा-त्रमात्रकृतत्वेन वर्णानां वैलक्षण्यम् । "जिह्वामूले तु कुः प्रोक्तः" इति पाणिनिशिक्षाभिधानात् कवर्गस्य कण्ठ्यत्वव्यवहारस्तु कण्ठशब्दस्य कण्ठमूलपरतया भाक्त एव तवर्गस्य दन्तमूलीयत्वेन दन्त्यत्ववत् अन्यथा भगवद्भाष्य तदनुच्चारापत्तेः । जिह्वामूलीयस्य आश्र-यस्थानभागित्वेन तदाश्रयस्य कोरपि जिह्वामूलस्थान-त्वौचित्यात् । दन्त्योष्ठ्योव इत्यादावुभयोरेव प्रत्येकं वकारस्थानत्वं न तु समुदितयोः तथा सति दन्तोष्ठ्य इत्येव परिशिष्येत । अतएवास्य दन्त्योष्ठ्योभयकार्य्यनि-मित्तता एवमन्येऽपि द्रष्टव्यम् । यमानां प्रातिशाख्य-प्रसिद्धानां कुँ खुँ गुँ घुँ इत्याकारकाणां पूर्वोदितानां यमसंज्ञा-बोधितानाञ्च नासिकापि स्थानमधिकमुपदिश्यते । तथा च यमेत्यपि लक्षणम् । "अमोऽनुनासिका नह्रौ" इत्युक्तेः। ङकाररकाराभिन्नानाममानां नासिका स्थानत्वाभिधानात् नासामनुगतः स्थानत्वेनेत्यनुनासिकशब्दव्युत्पत्त्या ने-सिकास्थानत्वप्राप्तेश्च । तत्र नह्रावित्ति पुनः हकार-रकारयोः पर्य्युदासः । "मुखनासिकावचनोऽनुनासिकः" इति पा० सूत्रे मुखपदस्य कण्ठादितत्तत्स्थानपरतया

यणानामुभयस्थानत्वम् । अयोगवाहा विसर्गो जिह्वामूलीयोपध्मानीययोरपि विसर्गविशेषरूपत्वेनाश्रयस्थानभागित्वम् । आश्रयस्थानभागित्वञ्च यमाश्रित्यैते उच्चार्य्यन्ते तत्स्थानभागित्वमतः विसर्गस्य कखयोः परयोर्जिह्वामूलोच्चार्य्यमाणयोराश्रयत्वेन तत्स्थानभागित्वात् जिह्वामूलीयरूपान्वर्थनामता बोद्धव्या । पफयोः परयोरोष्ठोच्चार्य्यमाणयोराश्रयत्वेनोपध्मानीयता । उप पश्च आध्मायते अनेन स्थानेनेति व्युत्पत्तेः उपध्मान शब्द ओष्ठवचनः । तत्स्थानयोगत्वादन्वर्थनामतावसेया । अतएव "कौमुद्यां जिह्वामूलीयस्य जिह्वामूलमुपध्मानीयस्योष्ठावित्युक्तम् । यद्यपि पूर्वेषां वर्णानामाकाशस्थानत्वं करणत्वञ्च कण्ठादीनां तदुत्पत्तौ उक्तं तथापि तेषां स्थानत्वव्यवहारो वर्णाभिव्यञ्जकताल्वादौ सर्वजनकवायुसंयोगाधारे वर्णाधारत्वारोपेण आप्त एव । तत्तत्स्थानेषु जिह्वाग्रादिसम्बन्धेन वर्णोत्पत्त्या जिह्वाग्रादिस्थिते तत्सम्बन्धजनकप्रयत्नविशेषे आभ्यन्तरप्रयत्नवाच्ये स्पृष्टतादावेव करणत्वव्यवहारः समुचित । वर्णाभिव्यक्त्यनन्तरभाविनस्तु आन्तरतम्यपरीक्षोपयुक्ताः कण्ठविवरविकाशादेराश्रयीभूतदेशावच्छिन्नकार्य्यस्य जनका बाह्या यत्ना गुणशब्देनोच्यन्ते इत्यादिकं शेखरादौ स्पष्टम् । आभ्यन्तरप्रयत्नास्तु वर्णोत्पत्तेः प्रागभाविनो बाह्यास्तु तदुत्पत्तेः पश्चाद्भाविन इति विवेकः । तथाहि नाभिदेशात् प्रयत्नप्रेरितः प्राणवायुरूर्द्ध्वमाक्रामन्नुरःप्रभृतीनि स्थानान्याहन्ति उत्पादयति च ततो वर्णान् तदभिव्यञ्जकध्वनींश्च तत्र वर्णोत्पत्तेः प्राक् जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं ताल्वादिकं यदा सम्यक् स्पृशन्ति तदा स्पृष्टता प्रयत्नो यदा ईषत् स्पृशन्ति तदा ईषत्स्पृष्टता समीपावस्थाने संवृतता दूरावस्थाने विवृतता इत्येवमाभ्यन्तरप्रयत्नभेदात् वर्णानां भेदाः । अतएव इचवर्गयशानां तालुस्थानत्वाविशेषेऽपि चवर्गोच्चारणे कर्त्तव्ये तालुस्थानेन सह जिह्वाग्रादीनां सम्यक् स्पर्शः, यकारोच्चारणे तु ईषत् स्पर्शः शकारेकारोच्चारणे दूरतोऽवस्थानमिति । एतेषां चाभ्यन्तरत्वं ओष्ठप्रभृतिकाकलीजनकवायवस्थानपर्य्यन्तरूपाभ्यन्तर्गततत्तत्स्थानेषु जिह्वाग्रादीनां स्पर्शादिचतुष्टयरूपाभ्यन्तरकार्य्यकारित्वात् वर्णोत्पत्त्यव्यवहितप्रागभावित्वाच्च बोध्यम् । विवारसंवारौ तु गलबिलस्य विकाशाविकाशात्मकौ बाह्यौ प्रयत्नौ विवृतसंवृताभ्यां भिन्नावेव तयोः समीपदूरावस्थानात्मकत्वादिति विवेक्तव्यम् । ते चाभ्यन्तराः प्रयत्नाः तेषां वर्णानाम् इत्येतत्तावदधीयते । कादिमावसानानां स्पृष्टता अतएव तेषां सम्यक्स्पर्शवत्त्वेन स्पर्शपदवाच्यता । यणः ईषत् स्पृष्टता । तेषाञ्च स्पृष्टविवृतयोर्मध्यस्थितत्वेन लौकिकव्यवहारेष्वपि यकारादीनां वर्णानाञ्च मध्यस्थितत्वेन अन्तःस्थवर्णत्वम् अन्तःस्थाभिश्च संवृतमित्युक्तेरन्तःस्थाशब्दः आदन्तः । शषसहानाम् अचाञ्च विवृतता । शषसहानाञ्च ऊष्मशब्दाभिधेयवायुप्रधानत्वात् ऊष्मशब्दवाच्यता । अचाञ्च स्वयं राजमानत्वात् उदात्तादिस्वरवत्त्वाच्च स्वराभिधेयता । "अचः स्वयं विराजन्ते" इत्युक्तेः "उदात्तश्चानुदात्तश्च स्वरितश्च स्वराश्रयः । ह्रस्वो दीर्घः प्लुतश्चेति कालतो नियमा अचि" इत्युक्तेश्च । तत्र ह्रस्वस्य संवृतता । "संवृतं मात्रिकं ज्ञेयं विवृतन्तु द्विमात्रकम्" इत्युक्तेः ह्रस्वस्यैकमात्रतया प्रयोगे संवृतता प्रक्रियादशायान्तु विवृततैव । तत्र मूलं "अचोऽस्पृष्टा यणस्त्वीषत् नेमस्पृष्टाः शलस्तथा । शेषाः स्पृष्टा हलः प्रोक्ताः" इति शिक्षावाक्यमेव बोध्यम् । अत्राचः स्पर्शाभावरूपविवृतत्ववन्तः यणः यवरलास्त्वीषत् स्पृष्टा इत्यर्थः नेमइत्यर्द्धवाची । शलः शषसहा नेमस्पृष्टा अर्द्धस्पृष्टा अर्थादर्द्धविवृताः । "स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्" इत्येकवाक्यत्वात् । एते च स्थानप्रयत्नाः सवर्णसंज्ञायामुपयुक्ताः बाह्यप्रयत्नास्तु आन्तरतम्यपरीक्षायामेवोपयोगिन इति "तुल्यास्यप्रयत्नं सवर्णमिति" पा०सूत्रभाष्यादौ स्पष्टम् । तेन तकारस्थाने विवारश्वासघोषाल्पप्राणरूपबाह्यप्रयत्नसाम्येन चकारटकारादेशः "स्थानेऽन्तरतमः" इति पा०सूत्रभाष्ययोः स्पष्टम् । बहुसमानधर्मत्वमेवान्तरतम्ये हेतुरिति बोध्यम् ।" "बाह्याःप्रयत्नास्त्वष्टविधाः काकलकाधःस्थगलबिलस्य सङ्कोचविकाशश्वासोत्पत्तिध्वनिविशेषघोषाल्पघोषप्राणाल्पत्वमहत्त्वरूपकार्य्यकरा यथाक्रमं विवारसंवारश्वासनादघोषाल्पघोषाल्पप्राणमहाप्राणनामानो मन्तव्याः । प्रयत्नप्रेरितो वायुर्वर्णानभिव्यञ्जन् यत्नविशेषेण गलबिलविकाशादीनपि सम्पादयति अतो गलबिलविकाशादिकरत्वादाश्रयीभूतदेशकार्य्यकरत्वात् चैते बाह्या इति । ते च "खयां यमाः खयः +क ᳶपौ विसर्गः शर एव च । एते श्वासानुप्रदाना अघोषाश्च विवृण्वते । कण्ठमन्ये तु घोषाः स्युः संवारा नादभागिनः । अयुग्मा वर्गयमगा यणश्चा-

"स्वादयः स्मृताः" इति सिद्धान्तकौमुद्युक्तशिक्षावचनात् । वर्णा स्थाने जाता ये यथाः पूर्वोक्ताः प्रातिशाख्ये प्रसिद्धाः । अयः, मरः भवषहाः । एते भाषानुप्रदाना अघोषाः कथं विहन्यते च । अन्ये एतद्भिन्नाः सर्वे वर्णा घोषसंवारनादवाह्यप्रयत्नवन्तः । वर्गीयप्रथमतृतीय-प्रथमवर्णाः प्रथमतृतीयवर्णजातयमाश्च पूर्वोक्ताः अयश्च एते अल्पप्राणाः तद्भिन्नाः सर्वे महाप्राणा इति विवेकः ।" "तथा उदात्तानुदात्तस्वरितरूपास्त्रिविधाः स्वरा ह्रस्वदीर्घप्लुतकालभेदाच्च स्वराणां विशेषाधाने हेतवो वेदितव्याः । तथा हि "विभागः पञ्चधा मतः" इत्युपक्रम्य "स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः" इति स्वरकालस्थानप्रयत्नानुप्रदानाभिधेयबाह्यप्रयत्नान् वर्णविभाजकान् पञ्च भावान्यतो निर्दिश्य विभाजकता उदात्तश्चानुदात्तश्चेत्यादिना अन्त्येव स्वरकालयोर्विभा-जकताऽभिहिता । तत्र ताल्वादिषु स्थानेषूर्द्ध्वभागे निष्पन्नोऽजुदात्तः नीचैर्भागे निष्पन्नोऽनुदात्तः प्रथमतद्-उदात्ततयोच्चार्य उत्तरार्द्धमनुदात्ततयोच्चार्यमाणः स्व-रितः इति "उच्चैरुदात्तः नीचैरनुदात्त समाहारः स्वरितः तस्य आदित उदात्तमर्द्धह्रस्वमिति" पाणिनि-सूत्रजातेभ्यः । तदेवं परस्परविभाजकस्थानवाह्या-भ्यन्तरप्रयत्नस्वरकालकृतविशेषात् वर्णानां परस्परविशेष-रूपता । सर्वे हि वर्णाः पुरुषाणामिव विशिष्टविशेषं विभिन्नताभाजो भवन्तीति ।"

विवाहोपयोगिनि नक्षत्रविशेषकृते १६वर्णकूटे उपवम शब्दे वर्णकूटोक्ती १२४८ पृ॰ दृश्यम् ।

वर्णक न॰ वर्णयति वर्ण–ण्वुल् । १हरिताले रत्नमा॰ २अनुलेपनयोग्ये अमरः ३पिष्टे ४पट्टे वा चन्दनादौ द्रव्ये च । ५किङ्करादौ पुंस्त्री॰ भरतः ६मण्डने शब्दर॰ । एकस्यैव स्वमारेः पद्यान्तरव्याख्यानरूपे ७ग्रन्थभेदे न॰ "विप्राणां तृतीयवर्णके"मिता॰ । ८चारणे पु॰मेदि॰ ।

वर्णकूपिका स्त्री वर्णानामक्षराणां लेखनाय कुहूः कूपः कूपी सेव कन् । मस्याधारे त्रिका॰ ।

वर्णचारक पु॰ वर्णं शुक्लादिरूपं चारयति चर–णिच्–ण्वुल् । चित्रकरे शब्दमा॰ ।

वर्णज्येष्ठ पु॰ वर्णेषु ज्येष्ठः प्रथमस्रष्टत्वात् । १ब्राह्मणे विप्रे । स्वर्णाभेदवा २श्रेष्ठवर्णयुते त्रि॰ । "वर्णज्येष्ठा च या नारी" स्मृतिः ।

वर्णतूलि(ली) स्त्री वर्णानां लेखनसाधनं तूलिः । लेखन्याम् शब्दर॰स्वार्थे क । अस्त्र [जटा॰।२वर्णप्रदे त्रि॰

वर्णद न॰ वर्णं ददाति दा–क । १कालीयके गन्धद्रव्ये ।

वर्णदात्री स्त्री वर्णं रूपं ददाति दा–तृच् ङीप् । १हरिद्रायाम् राजनि॰ २वर्णदातरि त्रि॰ ।

वर्णदूत पु॰ वर्णा एव दूतो यत्र । लिपौ त्रिका॰ ।

वर्णधर्म पु॰ ६त॰ । विप्रादीनामसाधारणे धर्मे यथा विप्रस्य याजनाध्यापनप्रतिग्रहादिः । क्षत्रियस्य प्रजापालनादिः पु॰ जातिधर्मशब्दे दृश्यम् ।

वर्णमातृ स्त्री ६त॰ । वर्णानां मातेव । लेखन्यां हारा॰ ।

वर्णमातृका स्त्री सरस्वत्यां शब्दच॰ ।

वर्णमाला स्त्री ६त॰ १जातिमालायां २अक्षरश्रेण्यां ३अन्त्यगिकर्मणि पञ्चाशद्वर्णात्मकमालाभेदे । अक्षमाला शब्दे ४२५पृ॰ दृश्यम् ।

वर्णरेखा स्त्री वर्णान् लिख्यन्तया लिख करणे घञ् टाप् वः । कठिन्यां (खड़ि) त्रिका॰ ।

वर्णवती स्त्री वर्ण+मतुप् मस्य वः । १हरिद्रायां जटा॰ । २वर्णविशिष्टे त्रि॰स्त्रियां ङीप् ।

वर्णविलोडक पु॰ १लोकचौरे २सन्धिचौरे मेदि॰

वर्णसङ्कर पु॰ सम्+कृ–अप् वर्णतः सङ्करः । विप्रादिभ्यो वर्णेभ्योऽनुलोमजाते प्रतिलोमजाते मूर्द्धावसिक्तादौ मागधादौ च जातिभेदे "जायते वर्णसङ्करः" गीता । जातिशब्दे ३०९१ तद्भेदादिकं दृश्यम् ।

वर्णसि पु॰ वर्ण–असिच् । जले उणादि॰ ।

वर्णा स्त्री प्रशस्तवर्णोऽस्त्यस्याः फलपुष्पादौ अच् । आढक्याम् शब्दच॰ । [लेखन्याम् शब्दच॰ ।

वर्णाङ्का स्त्री वर्णा अक्षराणि अङ्क्यन्तेऽनया अङ्कि–करणे घञ् ।

वर्णात्मन् पु॰ वर्णं आत्मा स्वरूपं यस्य । ध्वन्यात्मकादिलक्षणे अकाराद्यक्षरे शब्दभेदे जटा॰ ।

वर्णार्ह पु॰ वर्णं स्तुतिमर्हति अर्ह–अच् । मुद्गे राजनि॰ ।

वर्णिका स्त्री वर्णा अक्षराणि लेख्यन्तेऽनया वर्ण्यन्तेऽनया ठन् । १लेखन्याम् २कठिन्यां हारा॰ ३मस्यां त्रिका॰ ।

वर्णित त्रि॰ वर्ण–क्त । १स्तुते अमरः २कृतवर्णने ३रूपान्तरमापादिते च ।

वर्णिन् पु॰ वर्णोऽस्त्यस्य इनि । १चित्रकरे २लेखके ३ब्रह्मचारिणि मेदि॰ । "अथाह वर्णी विदितो महेश्वरः" कुमारः । ४विप्रादिजातौ च "वर्णिनां हि वधो यत्र" स्मृतिः । [हरिद्रायाम् अमरः ।

वर्णिनी स्त्री वर्णः अस्त्यस्याः प्राशस्त्ये इनि ङीप् ।

वर्णु पु० वर्ण-उन् । १नदभेदे उणादि० २आदित्ये संक्षिप्त० ।

वर्त्तक पु० वृत-ण्वुल् । (भाटइ) १पक्षिभेदे वर्त्तकाप्यत्र । २अश्वस्य खुरे च अमरः । ३वर्त्तलोहे न० हेमच० ।

वर्त्तन न० वृत-ल्युट् । १वृत्तौ २स्थितौ अमरः । णिच्-भावे ल्युट् । २स्थापने णिच् करणे ल्युट् । ३जीवनोपाये स्त्री ङीप् । ४तर्कुपीठे न० मेदि० । ल्यु । ६वर्त्तिमति वर्त्तिष्णौ च त्रि० अमरः । ७वामने त्रि० मेदि० । ८ताधारप्रवर्त्तके न० शब्दर० ।

वर्त्तनी स्त्री वर्त्त्यते पादाभ्याम् वृत-णिच् आधारे ल्युट् । १पथि २पेषणे शब्दर० । पृषो० ह्रस्वः पूर्वदेशे त्रिका० ।

वर्त्तमान पु० वृत-शानच् । कालभेदे शब्दप्रयोगाधारे कार्य्यापरिसमाप्ते १काले २तत्कालवर्त्तौ त्रि० ।

वर्त्तमानकालश्च चतुर्विधः । यथा "प्रवृत्तोपरतश्चैव वृत्ताविरत२ एव च । नित्यः प्रवृत्तः३ सामीप्यो४ वर्त्तमानश्चतुर्विधः । क्रमेणोदाहरणानि । मांसं न खादति आदौ प्रवृत्तं मांसभोजनं निवर्त्तयतीत्यर्थः । इह कुमाराः क्रीड़न्ति २तदानीन्तनक्रीड़नाभावेऽपि पूर्वक्रीड़ानां बुद्धौ वर्त्तमानत्वात् । पर्वतास्तिष्ठन्ति ३नित्यप्रवृत्तत्वात् । किन्तु पर्वतानां स्थितत्वेन वर्त्तमानत्वेऽपि भूतभविष्यत्कालाभ्यां सम्बन्धविवक्षया पर्वतास्तस्थुः स्थास्यन्ति इत्यपि स्यात् । सामीप्यो४ द्विविधः । भूतसामीप्यो भविष्यत्सामीप्यश्च यथा कदा आगतोऽसि इति प्रश्ने अध्वखेदादेर्वर्त्तमानत्वात् एषोऽहमागच्छामि इति आगतोऽपि वदति । भविष्यत्सामीप्यो यथा । कदा गमिष्यसि इति प्रश्ने एषोऽहं गच्छामि इति गमने क्रियमाणोद्यमोऽपि वदति" दुर्गादासः ।

वर्त्तरूक पु० १नदीभेदे २काकलीभेदे ३जलावर्त्ते मेदि० । ४द्वारपाले त्रिका० । [आवर्त्तनयोग्ये लौहभेदे ।

वर्त्तलोह न० वर्त्त्यते वृत-णिच्-कर्म्मणि अच् कर्म० ।

वर्त्ति (र्त्ती) स्त्री वृत-इन् वा ङीप् । १लेखे २नयनाञ्जने ३गात्रानुलेपने ४दीपदशायां ५भिषजां निर्म्मेयौषधभेदे (बाति) "कतकस्य फलं शङ्खः सैन्धवं त्र्यूषणं वचा । फेणो रसाञ्जनं क्षौद्रं विडङ्गानि मनःशिला । एषां वर्त्तिर्हन्ति काचं तिमिरं पटलं तथा" गरुड़पु० १९८अ० । ६दीपे च मेदि० ।

वर्त्तिक पुंस्त्री वृत-तिकन् । (बटेर) १विहगभेदे राजनि० स्त्रियां ङीप् । वर्त्मनि वर्त्तते वृत-अच् वर्त्तः तत्र साधुः ठन् वा अत्र । (भाटइ) २खगे अमरः । ३अजशृङ्ग्यां स्त्री० राजनि० ४दीपदशायां स्त्री सा च पञ्चविधा यथा "पद्मसूत्रभवा दर्भगर्भसूत्रभवाऽथ वा । शाणजा बादरी वापि फलकोषोद्भवाथ वा । वर्त्तिकादीपकार्य्येषु सदा पञ्चविधा स्मृता" कालिकापु० ६८अ० ।

वर्त्तिन् त्रि० वृत-णिनि । वर्त्तनशीले ।

वर्त्तिष्णु त्रि० वृत-इष्णुच् । वर्त्तनशीले ।

वर्त्तिष्यमाण पु० वृत-शानच् लृटः सद्वेति सत् । भविष्यत्काले । २तद्वृत्तौ त्रि० ।

वर्त्तुल त्रि० वृत-उलच् । १गोलाकारे पदार्थे अमरः । २गृञ्जने न० राजनि० । ३कलायभेदे पु० शब्दमा० । ४तर्कुपीठ्याम् स्त्री हारा० ५गजपिप्पल्याम् स्त्री राजनि० ङीप् ।

वर्त्मन् न० वृत-मनिन् । १पथि अमरः २आचारे "आ मनोर्वर्त्मनः" रघुः ३नेत्रच्छदे च मेदि० । अक्षिशब्दे ४५पृ० दृश्यम् । वर्त्मलक्षणं तद्गतरोगभेदाश्च सुश्रुते उक्ता यथा

"द्व्यङ्गुलं सर्वतः सार्द्धं भिषङ्नयनबुद्बुदम् । सुवृत्तं गोस्तनाकारं सर्व्वभूतगुणोद्भवम् । पलं भुवोऽग्नितो रक्तं वातात् कृष्णं सितं जलात् । आकाशादश्रुमार्गाश्च जायन्ते नेत्रबुद्बुदे । दृष्टिञ्चात्र तथा वक्ष्ये यथा ब्रूयाद्विशारदः । नेत्रायामत्रिभागन्तु कृष्णमण्डलमुच्यते । कृष्णात् सप्तममिच्छन्ति दृष्टिं दृष्टिविशारदाः । मण्डलानि च सन्धींश्च पटलानि च लोचने । यथाक्रमं विजानीयात् पञ्च षट् च षडेव च । पक्ष्मवर्त्मश्वेतकृष्णदृष्टीनां मण्डलानि तु । अनुपूर्व्वन्तु ते मध्याश्चत्वारोऽन्त्या यथोत्तरम् । पक्ष्मवर्त्मगतः सन्धिर्वर्त्मशुक्लगतोऽपरः । शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतोऽपरः । ततः कनीनकगतः षष्ठश्चापाङ्गगः स्मृतः । द्वे वर्त्मपटले विद्यात् चत्वार्य्यन्यानि चाक्षिणि । जायन्ते तिमिरं येषु व्याधिः परमदारुणः ।"

"पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः । सिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः । विवर्द्ध्य मांसं रक्तञ्च तदा वर्त्मव्यपाश्रयान् । विकारान् जनयन्त्याशु नामतस्तान्निबोधत । उत्सङ्गिन्यथ कुम्भीका पोथक्यो वर्त्मशर्करा । तथार्शोवर्त्म शुष्कार्शस्तथैवाञ्जननामिका । बहुलं वर्त्म यच्चापि व्याधिर्वर्त्मावबन्धकः । क्लिष्टकर्दमवर्त्माख्यौ श्याववर्त्म तथैव च । प्रक्लिन्नमपरिक्लिन्नं वर्त्म वातहतन्तु यत् । अर्बुदं निमिषञ्चापि शोणितार्शश्च यत् कृतम् । लगणो बिसनामा च

पक्ष्मकोपस्तथैव च। एकविंशतिरित्येते विकारा वर्त्मसंश्रयाः। नामभिस्ते समुद्दिष्टा लक्षणैस्तान् प्रचक्ष्महे। पिडकाभ्यन्तरमुखी बाह्यातो वर्त्मसंश्रया। विज्ञेयोत्सङ्गिनी१ नाम तद्रूपपिडकान्विता। कुम्भीकबीजप्रतिमाः पिडकाः पक्ष्मवर्त्मनोः। आध्मायन्ते तु भिन्ना याः कुम्भीकपिडकास्तु ताः। कण्डूदाहान्विता गुर्व्यो रक्तसर्षपसन्निभाः। पिडकाश्च रुजावत्यः पोथक्यः३ इति संज्ञिताः। पिडकाभिः सुसूक्ष्माभिर्घनाभिरभिसंवृता। पिडका या खरा स्थूला सा ज्ञेया वर्त्मशर्करा४। सूक्ष्माः खराश्च वर्त्मस्थास्तदर्शोवर्त्म५ कीर्त्यते। दीर्घोऽङ्कुरः खरः स्तब्धो दारुणो वर्त्मसम्भवः। व्याधिरेष समाख्यातः शुष्कार्श६ इति संज्ञितः। दाहतोदवती ताम्रा पिडका वर्त्मसम्भवा। मृद्वी मन्दरुजा सूक्ष्मा ज्ञेया साऽञ्जननामिका७। वर्त्मोपचीयते यस्य पिडकाभिः समन्ततः। सवर्णाभिः समाभिश्च विद्याद्बहलवर्त्म८ तत्। कण्डूमताल्पतोदेन वर्त्मशोफेन यो नरः। न समं छादयेदक्षि भवेद्बन्धः९ स वर्त्मनः। मन्दरुग्वेदनं ताम्रं तद्वर्त्म सममेव च। अकस्माच्च भवेद्रक्तं क्लिष्टवर्त्म१० तदादिशेत्। क्लिष्टं पुनः पित्तयुक्तं विदहेच्छोणितं यदा। तदा क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमम्११। यद्वर्त्म बाह्यतोऽन्तश्च श्यावं शूनं सवेदनम्। दाहकण्डूपरिक्लेदि श्याववर्त्मेति१२ तन्मतम्। अरुजं बाह्यतः शूनमन्तःक्लिन्नं स्रवत्यपि। कण्डूनिस्तोदभूयिष्ठं क्लिन्नवर्त्म१३ तदुच्यते। यस्य धौतानि धौतानि सम्बध्यन्ते पुनः पुनः। वर्त्मान्यपरिपक्वानि विद्यादक्लिन्नवर्त्म१४ तत्। विमुक्तसन्धि निश्चेष्टं वर्त्म यस्य निमील्यते। एतद्वातहतं१५ विद्यात् सरुजं यदि वाऽरुजम्। वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम्। विज्ञेयमर्बुदं१६ पुंसां सरक्तमवलम्बितम्। निमेषणीः सिरा वायुः प्रविष्टो वर्त्मसंश्रयाः। चालयेदतिवर्त्मानि निमेषः१७ स गदो मतः। छिन्नाश्छिन्ना विवर्द्धन्ते वर्त्मस्था मृदवोऽङ्कुराः। दाहकण्डूरुजोपेतास्तेऽर्शःशोणितसम्भवाः१८। अपाकः कठिनः स्थूलो ग्रन्थिर्वर्त्मभवोऽरुजः। सकण्डूः पिच्छिलः कोलप्रमाणो लगणः१९स्तु सः। शूनं यद्वर्त्म बह्वीभिः सूक्ष्माभिश्छिद्रैः समन्वितम्। बिसमन्तर्जलमिव बिसवर्त्मेति२० तन्मतम्। पक्ष्माशयगता दोषास्तीक्ष्णाग्राणि खराणि च। निर्वर्त्तयन्ति पक्ष्माणि तैर्घृष्टञ्चाक्षि दूयते। उत्पाटितैः पुनः शान्तिः पक्ष्मभिश्चोपजायते। वातातपानलद्वेषी पक्ष्मकोपः२१ स उच्यते।" तच्चिकित्सा तत्र दृश्या।

वर्त्मनि स्त्री वृत-अनि सुट् च। पथि उणा०।

वर्द्ध छेदने पूरणे च चु० उभ० सक० सेट्। वर्द्धयति ते अववर्द्धत त।

वर्द्ध पु० वृध-अच्। १ब्राह्म्याम् (बामनहाटि) जटा० वर्द्ध-भावे अच्। २पूरणे ३छेदे च।

वर्द्धक पुं० वृध-ण्वुल्। १ब्राह्मणयष्टी (बामनहाटी) अमरः वृध-वा वर्द्ध-ण्वुल्। २पूरके ३छेदके ४वृद्धिकारके च त्रि०।

वर्द्धकि पु० वर्द्ध-छेदने अच् कम-डि कर्म०। त्वष्टरि (छुतार) अमरः। जातिभेदे शब्दर०।

वर्द्धकिन् पु० वर्द्धकः शब्दोऽस्त्यस्य इनि। त्वष्टरि (छुतार)

वर्द्धन न० वृध-वर्द्ध-भावे ल्युट्। १छेदने २पूरणे च मेदि०। वृध णिच्-ल्यु। ३वृद्धिकारके त्रि०। "करोमि जितवर्द्धनम्" भट्टिः। वृध-ल्यु। ४वृद्धियुक्ते त्रि०।

वर्द्धनी स्त्री वर्द्धतेऽनया वृध-णिच्-ल्युट् ङीप्। १संमार्जन्याम् २खर्व्यां मेदि०। ३करकपात्रभेदे च (बदना) जटा०।

वर्द्धमान पु० वृध-शानच्। १एरण्डवृक्षे अमरः। २वृद्धिशीले त्रि०। ३शरावे स्तूपालभेदे ४विष्णौ ५पद्यभेदे च मेदि०। ६जिनभेदे हेमच०। ७वालना गृहभेदे हला०। ८देशभेदे वृ० स० १४अ० कूर्मविभागशब्दे दृश्यम्। ९नगरभेदे च। १०वृद्धियुक्ते त्रि०।

वर्द्धापन न० वर्द्धं छेदं करोति वर्द्ध+णिच्-आप् च ततो भावे ल्युट्। नाडीच्छेदनकाले संस्कारभेदे त्रि०त० रघु०।

वर्द्धित न० वर्द्ध-क्त। १छेदिते २पूरिते ३प्रसृते च।

वर्द्धिष्णु त्रि० वृध-इष्णुच्। वृद्धिशीले।

वर्ध्र न० वृध-ष्ट्रन्। १चर्मणि उणादिको०। २चर्मरज्जौ स्त्री भरतः ङीप्।

वर्पस् न० वृ-असुन् पुक्। रूपे निघण्टुः।

वर्फ गतौ वधे च भ्वा० पर० सक० सेट्। वर्फति अवर्फीत्।

वर्म्मकण्टक पु० वर्म्म इव कण्टकोऽस्य। पर्पटे राजनि०।

वर्म्मकषा स्त्री वर्म्म-कषति अच्। (चामकषा) सप्तलायाम् शब्दर०।

वर्म्मन् न० वृ-मनिन्। १कवचे वर्म्माणि अमरः। २क्षत्रियोपाधौ पु०। "वर्म्मान्तं क्षत्रियस्य तु" शातातपः।

वर्म्महर पु० वर्म्म हरति हृ-अच्। सन्नाहधारणयोग्यावस्थाभेदे तरुणे। "वर्म्महरः कुमारः" रघुः।

वर्म्मि पु० वृ-बा० मिन्। (बान) मत्स्यभेदे राजनि०।

वर्म्मित त्रि० वर्म्म करोति णिच्-क्त। १कृतकवचे २उद्युक्ते च

वर्य्य त्रि० वृ-यत्। १प्रधाने श्रेष्ठे च अमरः। २कामदेवे

३पतिम्बरायां कन्यायां अमरः । ४कन्यामाले च स्त्री ।

वर्वणा स्त्री वरिति वणति शब्दायते वण–अच् । (भनभने) मक्षिकाभेदे अमरः । अयमोष्ठ्यादिरित्यन्ये ।

वर्वर न० वृ–अरच् नुट् च । १हिङ्गुले २पीतचन्दने ३शाखोटे च राजनि० । ४पामरे ५मूर्खे च त्रि० । "अतत्त्वनिष्ठाश्च वर्वरा" इत्युद्भटः । ६केशभेदे (बाबरी) ७देशभेदे कण्टार्जके (कावकाबुर) वृक्षे च पु० राजनि० । ८मक्षिकाभेदे पुंस्त्री० शब्दर० (भाङ्र) १०वृक्षे स्त्री टाप् ङीप् वा "वर्वरी कवरी तुङ्गी खरपुष्पाजगन्धिका । पर्णासस्तत्र कृष्णे तु कठिञ्जरकुठेरकौ । कावपाराः वराक्ष मलूकः कृष्णमल्लिका । तत्र शुक्लोऽर्जकः प्रोक्तो वटी-पत्रस्ततोऽपरः । वर्वरीत्रितयं रूक्षं शीतं कटु विदाहि च । तीक्ष्णं रुचिकरं हृद्यं दीपनं लघुपाकि च । पित्तलं कफवातास्रकृमिविषापहम्" भावप्र० । संज्ञायां कन् । वर्वरिका चन्दनभेदे पुष्पभेदे स्त्री मेदि० ।

वर्वरीक पु० वृ–ईकन् फर्फरीका० नि० । १शाकभेदे २कुटिलकेशे उणा० । ३वनवर्वरिकायां (बाबुइतुलसी) शब्दच० ४महाकाले हेमच० ।

वर्वा स्त्री वृ-व तस्य नेत्त्वम् । (बाबुइ) तृणभेदे शब्दच० ।

वर्वुर पु० वृ-उरच् नुट् च । (बाबला) वृक्षभेदे राजनि० । ओष्ठ्यादिरित्यन्ये ।

वर्ष पु० वृष–भावे घञ् कर्त्तरि अच् वा । १वृष्टौ २जम्बुद्वीपांशभेदे पुंन० अमरः ।
"लङ्कादेशाद्धिमगिरिरुदग्घेमकूटोऽथ तस्मात् तस्याप्यन्यो निषध इति ते सिन्धुपर्यन्तदैर्घ्याः । एवं सिद्धादुदगपि पुरात् शृङ्गवच्छुक्लनीला वर्षाण्येषां जगुरिह बुधा अन्तरे द्रोणिदेशान् । भारतवर्षमिदं ह्युदगस्मात् किन्नरवर्षमतो हरिवर्षम् । सिद्धपुराच्च तथा कुरु तस्मात् दृग्यिह हिरण्मयरम्यकवर्षे । माल्यवान् यमकोटिपत्तनाद्रोमकाच्च किल गन्धमादनः । नीलशैलनिषधावधी च तावन्तराचमनयोरिलावृतम् । माल्यवज्जलधिमध्यवर्ति यत् तत्तु भद्रतुरगं जगुर्बुधाः । गन्धशैलजलराशिमध्यगं केतुमालकमिलाकलाविदः । निषधनीलसुगन्धसुमाल्यकैरवनिलावृतमावृतमाबभौ । अमरवैभिक्तवायवमाकुलं रुचिरवाखनचित्तमहीतलम्" सि० शि० । "अत्र भूगोलस्यार्धमुत्तरं जम्बूद्वीपम् । तस्य क्षाराब्धेश्च सन्धिनिरक्षदेशः । तत्र लङ्का रोमकं सिद्धपुरं यमकोटिरिति पुरचतुष्टयं भूपरिधिचतुर्थांशान्तरे किल कल्पितम् । तेभ्यः पुरेभ्यो वक्ष्यां दिशि मेरुः सोत्तरा । अतो लङ्काया उत्तरतो हिमवान् नाम गिरिः पूर्वापरसिन्धुपर्यन्तदैर्घ्योऽस्ति । तस्यान्तरे हेमकूटः । सोऽपि समुद्रपर्यन्तदैर्घ्यः । तथा तदुत्तरे निषधः । तेषामन्तरे द्रोणिदेशा वर्षसंज्ञाः । तत्रादौ भारतवर्षम् । तदुत्तरं किन्नरवर्षम् । ततो हरिवर्षमिति । एवं सिद्धपुरादुत्तरतः शृङ्गवान् नाम गिरिः । ततः श्वेतगिरिः । ततो नीलगिरिरिति । तेऽपि सिन्धुपर्यन्तदैर्घ्याः । तेषामन्तरे च वर्षाणि । तत्रादौ कुरुवर्षम् । तदुत्तरे हिरण्मयम् । ततो रम्यकमिति । अथ यमकोटेरुत्तरतो माल्यवान् नाम गिरिः । स तु निषधनीलपर्यन्तदैर्घ्यः । तस्य जलधेश्च मध्ये भद्राश्वं वर्षम् । एवं रोमकादुत्तरतो गन्धमादनः । तस्य जलधेश्च मध्ये केतुमालवर्षम् । एवं निषधनीलमाल्यवद्गन्धमादनैरावृतमिलावृतं नाम नवमं वर्षम् । सा स्वर्गभूमिः । अतएव देवक्रीडास्थानानि" । ३द्वादशमासात्मके काले ४जम्बुद्वीपे च पु० मेदि० । कर्त्तरि अच् । ५मेघे पु० हेमच० ६प्रभवादिषु षष्टिवत्सरेषु पु० ।

वर्षकरी स्त्री वर्षं तदुद्यमं करोति रवेण कृ-ट । झिल्लिकायां हेमच० । [१वर्षोपले ।

वर्षकेतु पु० वर्षस्य हृष्टेः केतुरिव । १रक्तपुनर्नवायाम् राजनि०

वर्षकोष पु० वर्षस्य कोष इव । १दैवज्ञे शब्दर० । २मासे हेमच० । [४वर्षणे संक्षिप्तसा० ।

वर्षणि स्त्री वृष–अनि । १कृतौ २वर्त्तने उणा० । ३कर्तौ

वर्षपर्वत पु० वर्षाणां चिह्नभूतः सीमाभूतो वा पर्वतः । "हिमवान् हेमकूटश्च निषधो मेरुरेव च । चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्वताः" इत्युक्तेषु पर्वतेषु हारा० । द्वीपभेदेऽन्येऽपि वर्षपर्वता कुलपर्वतशब्दे २११२ पृ० दर्शिताः । सि० शि० उक्ता जम्बूद्वीपपर्वता वर्षशब्दे दर्शिताः । तत्र नाममात्रे भेदः कल्पभेदात् ।

वर्षपाकिन् पु० वर्षेण पाकोऽस्त्यस्य इनि । आम्रातवृक्षे हेमच० तस्य हि मुकुलोद्गमात् प्रायेण वत्सरानन्तरफलपाकः । [राजनि० ।

वर्षपुष्पा स्त्री वर्षकाले पुष्पमस्याः । सहदेवीलतायाम्

वर्षप्रिय पुंस्त्री० वर्षः प्रियोऽस्य । चातकपक्षिणि स्त्रियां योपधत्वात् टाप् ।

वर्षवर पु० वर्षं रेतोवर्षणं वृणोति आवृणोति वृ–अच् । "ये त्वस्वपण्याः सततमालीनाः स्त्रीस्वभाविनः । जात्या न दुष्टाः कार्येषु ते वै वर्षवराः स्मृताः" इत्युक्तलक्षणे

राजामलःपुररक्षके वराके (खोजा) अमरः । "मह वर्षवरैरिति" रत्नावली ।

वर्षवृद्धि पु० वर्षस्य वृद्धिरधिकता यस्मात् । १जन्मतिथौ २तद्दिनकर्त्तव्ये पूजादौ च । "युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया । रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता" ति०त० । "तत्कृत्यं च मलमासे न कर्त्तव्यं चान्द्रमासीयत्वेन वात्सरिकत्वात् न च सौरमासीयं तथात्वे तत्तिथेः कदाचिदप्राप्तौ तदर्थं तत्कृत्यलोपापत्तेः न चेष्टापत्तिः "प्रतिसंवत्सरं चैव कर्त्तव्यश्च महोत्सवः" ब्रह्मपु० प्रतिसंवत्सरं तद्विधानात् ति० त० रघु० । अधिकं जन्मतिथिशब्दे दृश्यम् ।

वर्षा स्त्री ब०व० । वर्षन्ति मेघा यत्र । श्रावणभाद्राख्ये मासद्वये ऋतौ "नभश्च नभस्यश्च वार्षिकावृतू" यजु०श्रुतिः "वर्षासु च मघासु च" मनुः ।

वर्षाङ्गी स्त्री वर्षासु अङ्गमस्याः । पुनर्नवायाम् शब्दर० ।

वर्षापगम पु० वर्षाणामपगमो यत्र । १शरत्काले हेम० । २वर्षासमाप्तौ ।

वर्षाभव पु० वर्षासु भवति भू-अच् । रक्तपुनर्नवायाम् राजनि० ।

वर्षाभू पु० वर्षासु भवति भू-क्विप् । १भेके अमरः २इन्द्रगोपे राजनि० ३महीलतायाम् मेदि० ४पुनर्नवायां ५भेक्याञ्च स्त्री मेदि० अमरे भेक्याम् गौरा० ङीष् वर्षाभ्वीत्येव ६वर्षाभवमात्रे त्रि० । [ङीष् ।

वर्षामद पुंस्त्री० वर्षासु माद्यति मद-अच् । मयूरे स्त्रियां

वर्षिष्ठ त्रि० अतिशयेन वृद्धः इष्ठन् वर्षादेशः । अतिशयवृद्धे

वर्षीयस् त्रि० अतिशयेन वृद्धः वृद्ध+ईयसुन् वर्षादेशः । अतिवृद्धे अमरः स्त्रियां ङीप् ।

वर्षुक त्रि० वृष-उकञ् । वर्षणशीले । [अमरः ।

वर्षोपल पु० वर्षस्य वृष्टेरुपलः प्रस्तर इव । करकेषु (शिल)

वर्ष्मन् न० वृष-मनिन् । १देहे २प्रमाणे च अमरः । ३अतिसुन्दरे त्रि० । [अववर्हत त ।

वर्ह वधे सक० दीप्तौ अक० चु० उभ० सेट् । वर्हयति-ते

वर्ह उत्कर्षे भ्वा० आ० अक० सेट् । वर्हते अवर्हिष्ट ।

वर्ह न० वर्ह-अच् । मयूरपिच्छे अमरः अस्य पुंस्त्वमपि "कं हरेदेष वर्हः" विक्रमो०प्रयोगात् । २ग्रन्थिपर्णे इति भरतः । ३पत्रे शब्दर० ।

वर्हि(र्हिः)कुसुम न० वर्हिःवह्निरिव कुसुममस्य पृषो० वा सलोपः । ग्रन्थिपर्णे शब्दमा० ।

वर्हिःपुष्प न० वर्हिः वह्निरिव पुष्पमस्य । ग्रन्थिपर्णे भरतः

वर्हिःशुष्मन् पु० वर्हिं कुशः शुष्म बलमस्य । १वह्नौ अमरः कुशेन हि वह्निरुद्दीप्यते ।

वर्हि(र्हिः)ष्ठ न० वर्हिरिव तिष्ठति स्था-क वा विसर्गलोपः षत्वम् । ह्रीबेरे अमरः । [इनि । वर्हीत्यप्यत्र ।

वर्हिण पुंस्त्री० वर्हमस्त्यस्य इन । १मयूरे अमरः स्त्रियां ङीष् ।

वर्हिर्ज्योतिस् पु० वर्हिषा कुशेन ज्योतिरस्य । वह्नौ हेम० ।

वर्हिर्मुख पु० वर्हिर्वह्निर्मुखं यस्य । देवे अमरः । तद्द्वारैव हि देवा हविरश्नन्ति ।

वर्हिषद् पु० ब०व० वर्हिषि विप्रपार्श्वस्थेऽग्नौ सीदन्ति वर्हिस् सद-क्विप् पृषो० । पितृगणभेदे "अग्निष्वात्ता वर्हिषदः सोमपा आज्यपास्तथा" मनुः । [वह्नौ ।

वर्हिष्केश पु० वर्ह-दीप्तौ इसुन् वर्हिः दीप्तिमान् केशो यस्य

वर्हिस् स्त्री वृहि-इसुन् नि० नलोपश्च । १वह्नौ मेदि० "वर्हिषि रजतं न देयम्" श्रुतिः । २ग्रन्थिपर्णे ३चित्रके च (चिते) अमरः । ३कुशे पु०न० "वर्हिर्देवसदनम्" श्रुतिः वर्ह-दीप्तौ इसुन् । ४दीप्तियुक्ते त्रि० । [वा घटा० ।

वल संवरणे भ्वा०आत्म०सक०सेट् । वलते अवलिष्ट । ववले

वल न० वल्यतेऽनेन वल-क । सैन्ये रायमु० बलशब्दार्थे च ।

वलक्ष पु० वल-क्विप् अक्ष-अच् कर्म० । १धवले वर्णे २तद्वति त्रि० अमरः ।

वलन न० वल-भावे ल्युट् । १सम्वरणे सि०शि० उक्ते दृक्कर्मादिसंस्काराङ्गे २कदम्बयाम्योत्तरयोरन्तर तत्स्वरूपादिकं तत्रोक्तं प्रदर्श्यते

"वलाजाद्योर्हि संपाते विषुवत्क्रान्तिवृत्तयोः । स्यातां याम्योत्तरे भिन्ने परक्रान्त्यन्तरे च ते । आयनं वलनं तत्र जिनांशज्याधकं ततः । एकैवायनसंधौ तु तयोः स्यादृग्दिशोत्तरा । स्वक्षैव तद्वशात् प्राची तत्र नो वलनं ततः । तदन्तरेऽल्पपातेन खेटकोटिक्रमज्यया । जिनज्याघ्नी द्युजीवाप्तायनदिग्वलनं भवेत् । एवमेव हि संपाते विषुवत्स्वमहत्तयोः । उन्मण्डलं भवेत् तत्र विषुवद्दृग्दिशोत्तरा । क्षितिजं समवृत्तस्य पलज्या च तदन्तरम् । क्षितिजेऽक्षज्यया तुल्यमाक्षं वलनं ततः । तयोरैकैव याम्योदङ्न मध्ये वलनं ततः । नतक्रमज्यया साध्यमन्तरे त्वनुपाततः । नतं खाद्वाहतं भक्तं द्युदलेनाप्तभागकैः । क्रमज्याक्षज्यया क्षुण्णा द्युज्याभक्ताक्षजं भवेत् । प्राक् सौम्यं पश्चिमे याम्यं तत्रापैक्यान्तरात् स्फुटम् । एवमेव च संपातो यः क्रान्तिसमवृत्तयोः । पदमं तत्र तत्कालवलनैक्यान्तरं स्फुटम् ।

अपतः पृष्ठतस्तस्मात् क्रान्तिवृत्ते त्रिभेऽन्तरे। तयोर्याम्योत्तरैकत्वात् तत्र नो वलनं स्फुटम्। न स्पष्टवलनाभावस्तत्र स्यादुत्क्रमज्यया। क्रमज्यया ततः कार्यं दाक्षार्थं कथ्यते पुनः। सर्वतः क्रान्तिवृत्ताणां ध्रुवे योगो भवेद्यतः। विषुवन्मण्डलप्राच्या ध्रुवे याम्या तथोत्तरा। सर्वतः क्षेपवृत्तानां ध्रुवाभ्भिन्नवशान्तरे। योगः कदम्बसंज्ञोऽयं ज्ञेयो वलनबोधकृत्। तत्रापि मण्डलप्राच्या याम्या सौम्या च दिक् सदा। कदम्बभ्रमवृत्तं च बध्नीयात् परितो ध्रुवात्। गोले तु जिनतुल्यांशैस्तत्र ज्या क्रान्तित्रिज्यनी। सर्वतः समवृत्तात्र याम्योदक्कुजसंगमे। तत्तिर्यग्यतवृत्ताणां योगः स समसंज्ञकः। समध्रुवकदम्बानामुपरि द्युचरान्सवेत्। वृत्तानि वृत्तरूपाणि वलनानि तदन्तरे। अयनं वलनं मध्ये स्यात् समध्रुववृत्तयोः। कदम्बध्रुववृत्तान्तरायनं च त्रिभे ग्रहात्। कदम्बसमवृत्तान्तः स्फुटं सर्वदिग्यं च तत्। अथ वा परितः खेटात् खाङ्कभागान्तरे न्यसेत्। त्रिज्यावृत्तं ततस्तत्र विषुवत्समवृत्तयोः। मध्येऽक्षवलनं विद्याद्विषुवत्क्रान्तिवृत्तयोः। अन्तरं चायनं क्रान्तिसमवृत्तान्तरे स्फुटम्। तत्रापमण्डलं प्राची तस्या याम्योत्तरः परः। वलनानयने क्षेपः क्षिप्तो यैस्ते कुबुद्धयः। नक्रादिस्थे कदम्बस्य स्यातां याम्योत्तरे समम्। आयनं वलनं तस्मान्नायनादौ प्रजायते। ततो भ्रमति गोले च मकरादिर्यथा यथा। तथा तथा भ्रमत्येष कदम्बो निजमण्डले। कुम्भादावथ मीनादौ याम्योदग्वलयस्थिते। जायते वलनं तद्वत् सौम्यवृत्तकदम्बयोः। अन्तरं त्रिज्यनीरूपं कदम्बभ्रममण्डले। अयनाद्गतकालांशक्रमक्रान्तिसमा हि सा। उत्क्रमज्या यतो बाणः त्रिज्यनी तु क्रमज्यका। सत्रिभार्कात् क्रमक्रान्तिज्यातो वलनमायनम्। यैस्तूत्क्रमक्रान्त्या भ्रान्त्या तैर्नीयितं हि तत्। युक्त्यानयैव विज्ञेयमक्षजं च क्रमज्यया। परोक्तिरन्यथा ब्रूयाद्बुधः परान् न प्रदूषयेत्। तथैव दूषणं तत्र न दोषोऽतोऽन्यदूषणे। उत्क्रमज्यानिरासोऽयमन्यथा वाथ कथ्यते। जिनांशैर्जिनवृत्ताख्यं कदम्बात् परितो न्यसेत्। क्रान्तियाम्योत्तरं वृत्तं कदम्बद्वयकीलयोः। प्रोतं कृत्वा चलं न्यस्तं दृग्वृत्तान्ते स्याद् ध्रुवोपरि। दृग्वृत्तान्ताश्रितेऽथ तैरेव चलति ध्रुवात्। जिनवृत्ते तदंशानां तत्र ज्या क्रान्तित्रिज्यनी। आयनं चैव वलनं द्युज्याप्ते जायते ग्रहात्। परध्रुवान्तरे यस्माद्द्युज्या चापांशकाः सदा। त्रिज्यावृत्ते ततो देयं तत्रातः परिणाम्यते। एवमस्यांशकैर्वृत्तं समान्त्यात् परितो न्यसेत्। समकीलकयोः प्रोतं तथा याम्योत्तरं चलम्। तत्तत्खेटोपरि न्यस्तं यैरंशैः खार्धतो नतम्। समवृत्तेऽक्षवृत्ते च तैरेव स्यान्नतं ध्रुवात्। समवृत्तनतांशज्याद्युज्यापरिणताक्षजम्। द्युज्याप्ते वलनं प्राग्वत् त्रिज्याप्ते परिणाम्यते। उपपत्त्यानया सम्यक् समवृत्तनतांशजम्। वलनं स्यात् तथा वच्मि स्वाहोरात्रनतादपि। अपाग्रतवयोर्योगः समदिक्कोऽन्यथान्तरम्। तत्त्रिज्यावर्गविश्लेषपदभक्ताक्षांशत्रिज्यनी। नतात्तदाद्यया युक्ता वलनं पलजं स्फुटम्। नतं स्वाहाहतं भक्तं द्युदलेनाग्रभागकैः। क्रमज्याद्यज्यया युक्ता स्पष्टं वा द्युज्यया कृता। द्युज्यावृत्तापवृत्तैक्ये न्यसेद्वा रविमण्डलम्। बिम्बाप्ते वलनं तद्वद् यदन्तरं वृत्तयोस्तयोः। बिम्बान्तबिम्बमध्योत्थक्रान्तिकोट्योरुदन्तरम्। अर्केन्दोर्भोग्यखण्डघ्नं बिम्बार्धं तत्तदंशकृते। जिनज्याघ्नं त्रिभज्याप्तमेवं स्यादन्तरं हि तत्। बिम्बार्धघ्नत् त्रिभज्याप्तमेवं त्रिज्या नतं भवेत्। ग्राह्यहारकबिम्बार्धत्रिज्यानाशे कृते सति। भोग्यखण्डं जिनांशज्यागुणं तत्त्वाश्विभाजितम्। सत्रिभार्कात् क्रमक्रान्तेस्तत् तुल्यं जायतेऽथ वा। क्रमक्रान्तेरिदं सौख्य भ्रान्तिं त्यजत नाविधाः!। नानितं छत्रवद्बिम्बं तिर्यक् क्रान्तिस्तु सा समा। अत्र द्युज्यानुपातो दृक्स्थिरीकरणाय सः" सू०। "अथ वलनेषु दक्षर्षिव चोत्क्रमज्यानिराकरणाय मूलस्थलेऽपि बहूक्तं तथापि किञ्चिद्विशिष्यते। विषुवद्वृत्तं समवृत्तं प्रकल्प्य दक्षिणोत्तरवृत्तस्य मध्ये आयनवलनस्योपपत्तिप्रतीत्यर्थं पृथग्दर्शयेत्। अपमण्डलप्राच्यपराया एकः कदम्बा द्याम्या अन्यः सौम्या दिक्। एवं विषुवद्वृत्तप्राच्यपराया ध्रुवौ। यदा मकरादिर्याम्योत्तरवृत्ते तदैव कदम्बोऽपि। अतो विषुवत्क्रान्तिवृत्तयोरैक्येन याम्योदक्। तथा दक्षिणोत्तरवृत्तस्य कुम्भादिष मध्ये स्वाहोरात्रवृत्ते पञ्चगुणाङ्कचन्द्रा १६९५ असवो वर्त्तन्ते। ते पञ्चहृताः कालांशाः स्युः २२।१५। अथ कुम्भादिर्यावद् याम्योत्तरवृत्तं नीयते तावत् कदम्बो निजमण्डले चक्रांशाङ्कितताश्वाङ्गैरेव कालांशै २२। १५ दक्षिणोत्तरवृत्तसंपातात् प्रचलन् लभ्यते। कदम्बयाम्योत्तरवृत्तयोरन्तरं वलनम्। सा च तदंशानां कदम्बवृत्ते ज्या। अतः क्रमज्या।

उत्क्रमज्या तु चापरूपा भवति। कदम्बवृत्ते या ज्या सा क्रान्तिज्या। अतस्तेषामंशानां क्रमक्रान्तिज्या वलनम्। अथ वैकल्पोयैः क्रमक्रान्तिज्या त्रिज्यागुणा द्युज्या-हृता तथापि सैव भवति। अथ वाऽन्यप्रकारेणोत्क्रमज्या-निराकरणं द्युज्यानुपातश्च प्रतिपाद्यते। क्रान्तिवृत्तेऽ-र्कस्थानेऽर्कबिम्बं मुद्रिकाकारं विन्यस्य बिम्बपरिधौ यत्र अहोरात्रवृत्तं लग्नं यत्र च क्रान्तिवृत्तं तयोरन्तरं यद्दक्षिणोत्तरं तत् तत्र बिम्बे प्राच्यपरयोर्वलनम्। तत्रार्कक्रान्तिबिम्बार्धकलायुतस्यार्कस्य क्रान्तेश्चान्तरम्। अतस्तस्यानयनम्। रविदोर्ज्यायां क्रियमाणायां यल्लो-म्यखण्डं तेन भागार्धकला गुण्याः शरहिदस्रैः २२५ भोज्याः। फलं दोर्ज्ययोरन्तरं स्यात्। तत्र तावत् स्फुटभोग्यखण्डस्यानायानुपातः। यदि त्रिज्यातुल्यायां कोटौ प्रथमं खण्डं शरहिदस्रा भोग्यखण्डं तदाभिम-तायामस्यां किमिति फलं स्फुटं भोग्यखण्डम्। तेन गुणितं बिम्बार्धं शरहिदस्रैर्भोज्यम्। एवं स्थिते शर-हिदस्रमितयोर्गुणहारयोर्नाशे कृते बिम्बार्धस्य कोटिज्या गुणस्त्रिज्या हरः। फलं दोर्ज्ययोरन्तरम्। ततः क्रान्त्यर्थमनुपातः। यदि त्रिज्यया जिनज्या लभ्यते तदानेन दोर्ज्यान्तरेण किमिति। फलं क्रान्त्यन्तरम्। तद्बिम्बव्यासार्धवृत्ते वलनम्। अथान्योऽनुपातः। यदि बिम्बव्यासार्धवृत्ते एतावद्वलनं तदा त्रिज्याव्यासार्धवृत्ते किमिति। अत्र त्रिज्यातुल्ययोर्गुणहारयोस्तथा बिम्बा-र्धमितयोश्च तुल्यत्वान्नाशे कृते कोटिज्याया जिनांशज्या गुणस्त्रिज्या हरः। फलं कोटिक्रमक्रान्तिज्या। तत् त्रिज्यावृत्ते वलनम्। एवं विषुवद्वृत्तस्थित एव ग्रहे। यतो भूमध्यात् क्रान्तिवृत्तस्थबिम्बमध्यं प्रति यत् सूत्रं नीयते तत् त्रिज्याग्रं दण्डवत्। तदुपरिस्थं बिम्बं छत्रवत् समन्तात् सममेव। यत् तत्परितस्त्रिज्याग्रं यत्र च वलनज्या देया तदपि भूसममेव स्थितम्। अत-स्तत्र यथागतमेव वलनम्। यदा किल मेषान्ते ग्रह-स्तदा तत्क्रान्त्या स्वस्तिकादुत्तरे गतं बिम्बं स्यात्। त्रिज्याग्रं तदा कर्णरूपम्। बिम्बमध्यात् स्वस्तिकं ध्रुवयष्ट्यन्तं द्युज्या। सा तत्र कोटिः। क्रान्तिज्या भुजः। यथा किञ्चित् कर्णस्थित्या धृते दण्डे छत्रमपि तत्सम्मुखीन्यां दिशि कर्णरूपं भवति। तत्र वलनज्यापि कर्णरूपिण्या भवितव्यम्। यत् पूर्वमानीतं क्रान्त्यन्तरं तत्स्वस्तिकप्रतिरूपं तत् कोटिरूपं जातम्। तस्य कर्ण-करणायानुपातः। यदि द्युज्याकोट्या त्रिज्या कर्णस्तदा-ऽनया किमिति। पूर्वं कोटिज्याया जिनज्या गुण-स्त्रिज्या हरः। इदानीं त्रिज्या गुणो द्युज्या हरः। अत्रापि त्रिज्यातुल्ययोर्गुणहारयोर्नाशे कृते कोटिज्या जिनज्यागुणा द्युज्यया भक्ता वलनं स्यादित्युपपन्नम्। द्युज्ययानयैव विशेयमत्रजं च क्रमज्ययेति। यथायनवल-नानार्थं ध्रुवात् परितो जिनभागैः कदम्बभ्रमवृत्तं निबद्धं तथा याम्योत्तरक्षितिजयोर्यः संपातः स सम-मण्डलः। तस्मादक्षांशैः परितोऽक्षवलनज्ञानार्थं वृत्तं बध्नीयात्। तत् किलाक्षवलयसंज्ञम्। तदपि भगोल-स्थम्। तत्राक्षवलनोपपत्तिर्दर्शनीया। तद्यथा मध्यगेऽर्के समचिह्नं प्रति नीयमानं वृत्ताकारं सूत्रं ध्रुवचिह्नलग्नं याति। अतस्तत्र विषुवत्सम-मण्डलयोरैक्ये याम्योत्तरा वलनाभाव इत्यर्थः। अथ यदि दिनार्धोनितं सूर्यं कृत्वा समचिह्नात् सूर्यं प्रति नीयमानं सूत्रं यत्र समवृत्ते लगति तत्स्वस्तिक-योर्मध्ये यावन्तोऽंशास्तावन्त एवाक्षवृत्ते समसूत्रध्रुवयो-र्मध्ये भवन्ति। यतस्तत्समवृत्तानुकारं वृत्तम्। तेषां भागानामक्षवलये यावती क्रमज्या तावदेव समसूत्रध्रु-वयोरन्तरम्। अथ क्षितिजस्थेऽर्के क्षितिजमेव सम-सूत्रम्। तत्राक्षवृत्ते च नतांशा नतांशाः। तैर्या ज्याऽक्ष-वलयेऽक्षज्यातुल्या स्यात्। अतः समसूत्रगतैर्नतांशै-र्वलनं साधयितुं युज्यते। ते तु महाप्रयासेन साध्यन्ते। न तु सुखेन। अतस्तज्ज्ञानार्थं स्थूलोऽनुपातः कृतार्थं कृतः। यदि दिनार्धतुल्येन स्वाहोरात्रनतेन नवतिः समसूत्रवलनतांशा लभ्यन्ते तदिष्टेन किमिति। लब्ध-नतांशानां या क्रमज्या साऽक्षज्याहृते परिणाम्यते। यदि त्रिज्यावृत्ते एतावती ज्या तदाक्षज्यावृत्ते किय-तीति। लब्धं किल वलनज्या स्यात्। परं सा द्युज्या-ग्रे, न त्रिज्याग्रे। यतः समसूत्रध्रुवयोरन्तरं तत्। ग्रहध्रुवयोर्मध्ये द्युज्याचापांशा एव वर्तन्ते। यदि द्युज्याग्रवृत्ते एतावती तदा त्रिज्याग्रवृत्ते कियतीति। एवं सति पूर्वत्रैराशिके त्रिज्या हरः। इदानीं गुणः। तुल्यत्वात् तयोर्नाशे कृते नतांशज्याया अक्षज्या गुणो द्युज्या हरः। फलं स्थूला वलनज्या स्यात्। अथ सूक्ष्माप्युच्यते। धृतचक्राद्योऽर्कस्य शङ्कुः शङ्कु-तलमग्रा च साध्या। अग्राशङ्कुतलयोः समदिशोरैक्या-न्यथान्तरं च किल बाहुः पूर्वं प्रतिपादित एव।

दृङ्मण्डलयोरन्तरं लग्नार्धं दक्षिणोत्तरं बाहुवल्यं स्यात्। यथा विषुवद्वृत्तादुत्तरतो दक्षिणतो वा क्रान्तिज्यान्तरे द्युज्यावृत्तं तथा समवृत्तादपि बाहु-वशादुत्तरतो दक्षिणतो वा बाहुवल्येऽन्तरे उपवृत्तं कल्प्यम्। तदपि भाग्यैरङ्कम्। बाहुवर्गोनत्रिज्या-वर्गस्य पदं तस्मिन् वृत्ते द्युज्यावद्व्यासार्धम्। अथ द्युज्यावृत्तोपवृत्तयोर्यौ प्रकृपद्यात्सम्पातौ तयोर्जीवावद् यत् सूत्रं निबध्यते तस्यार्धमुपवृत्ते नतांशानां ज्या। देशाहोरात्रवृत्तनतांशानां भुजज्या। अथ तदानय-नम्। नताङ्गानां या भुजजीवा सा द्युज्यावृत्ते परि-णाम्यते। यदि त्रिज्यावृत्ते एतावती तदा द्युज्यावृत्ते कियतीति। एवमुपवृत्तनतांशज्या भवति। ततो यद्युप-वृत्तव्यासार्धे एतावती तदा त्रिज्याव्यासार्धे कियतीति। ततो द्युज्याप्ये एतावती वलनज्या तदा त्रिज्याप्ये कियतीति। अत्र प्रथमेऽनुपाते त्रिज्या हरो द्युज्या गुणः। द्वितीयेऽनुपाते त्रिज्या गुणो द्युज्या हरोऽत-स्तुल्यत्वात् तयोर्नाशे कृते नताङ्गानां भुजज्याकर्णीवया गुणितोपवृत्तव्यासार्धेन भक्ता वा स्फुटा वलनज्या स्यात्। अत उक्तमन्यान्तरवयोर्योग इत्यादि। अथ दृष्टान्तः। यत्र किल वृषभान्तक्रान्तिवल्योऽक्षः २०। २८ तत्र वृषभान्तस्थोऽर्को दिनार्धे खस्वस्तिके भवति। तदा क्रान्तिवृत्तं दृङ्मण्डलाकारं स्यात्। खस्वस्तिकोऽर्को राशिपञ्चकं सिंहान्तः। स च तदा क्षितिजे वर्त्तते। तत् प्राक्परयोरन्तरं क्षितिजे प्रत्यक्षं वलनं दृश्यते। सा च सिंहान्तस्यापा। तत् कथं स्थितेदृक्कर्कोत्क्रम-क्रान्तिर्वलनम्। अतोऽसत्। असदानयनं विना नेद-मपाद्य वलनमुत्पद्यत इत्यर्थः। अथान्यो महान् दृष्टान्तः। यत्र देशे षट्षष्टिभागाः ६६ अक्षः। तत्र मेषादौ क्षितिजस्थे सर्वेऽपि राशयः समकालमेव क्षितिजस्था भवन्ति। तदा क्रान्तिवृत्तमेव क्षितिज भवतीत्यर्थः। तत्र मेषादौ वृषभादौ मिथुनादौ वा स्थिते रवौ परमं त्रिज्यातुल्यमेव स्फुटं वलनं स्यात्। अतः क्रान्तिवृत्तप्राग्युत्तरा जाता। तथा विक्षेपाभावे एति तदा रवेर्दक्षिणस्यां दिशि स्थः। चन्द्रस्योत्तर-स्थामित्यर्थः। एतदुक्तं भवति। तत्र देशे तस्मिन् काले तस्य त्रिज्यातुल्यस्य वलनस्यान्यथानुपपत्त्या कदायमेव वलनानयनं समीचीनम्। तत्र देशेऽक्षज्या ३१४०। मेषादिगे रवौ द्युज्या ३४३८। चरज्यावत् ०। क्षितिजस्थेऽर्के नतघटिकाः १५। आयनवलनचापांशाः २४। आक्षवलनचापांशाः ६६। स्फुटवलनस्य चा-पांशाः ९०। वृषादिगे रवौ द्युज्या ३२६६। चरज्या-वत् १६७०। नतघटिकाः १६। २९। आयनवलन-चापांशाः २१। ४। अक्षजस्य ६८। ५६। स्फुटवल-नस्य चापांशाः ९०। मिथुनादिगे द्युज्या ३२१८। चरासवः २४६५। नतघटिकाः २४। १७। आयन-वलनांशाः २१। १२। अक्षजस्य ७७। ३८। स्फुटस्य ९०। एवं सर्वत्र।"

वलभि(भी) स्त्री वल्यते आच्छाद्यते वल—अभि वा ङीप्। वडभीशब्दार्थे गोपानस्याम् अमरटी०।

वलय पुंन० वल-अयन्। १हस्तपादकटकादौ अमरः। उत्तरपदस्थः तदाकारवेष्टने यथा भूवलयम्। ३वेष्टन-भूमौ ४गोले च। ५गलरोगभेदे भावप्र० "वलाश एवा-यतमुन्नतञ्च शोथं करोत्यन्नगतिं निवार्य। तं सर्वथैवा-प्रतिकार्यवीर्यं विवर्जनीयं वलयं वदन्ति"। ६वेलायां ७कङ्कणे जटा०। [अमरः।

वलयित त्रि० वलयमिव आचरितम् वलय+क्विप्—क्त। वेष्टिते

वला स्त्री वल—अच्। (वेड़ेला) ओषधिभेदे राजनि०। २बलाशब्दार्थे च। [अमा० टाप्।

वलाक पुंस्त्री० वल—आकन्। बकपक्षिणि अमरः स्त्रियां

वलाहक पु० वारि वहति पृषो०। १मेघे २मुस्तके च अमरः। ३पर्वते दैत्यभेदे ५नागभेदे मेदि० श्रीकृष्णस्य हयभेदे "कृष्णस्य सदानन्दः सारथिश्चास्य दारुकः। तुरङ्गाः शैव्यसुग्रीवमेघपुष्पवलाहकाः" त्रिका०।

वलि पु० वल—इन्। उपहारद्रव्ये ओमज्यादिलमित्यन्ये।

वलिर त्रि० वल—भजार्थे क वलसंवरणमस्त्यस्य इरन्। केकरे अमरः।

वलिश न० वलिना उपहारद्रव्येण श्यति मत्स्यान् शो—क। वडिशशब्दार्थे। [पटसे जटा०।

वलीक न० वल्यते संव्रियतेऽनेन ईकन्। वनीकशब्दार्थे

वलूक न० वल—वा ऊक। १अम्बरे २पक्षिभेदे त्रि०को०।

वल्क भाषणे चु०उभ०द्वि०सेट्। वल्कयति ते अववल्कत् त।

वल्क न० वल—संवरणे क कस्य नेत्वम्। १वृक्षादीनां त्वचि वल्कले २मत्स्यानां त्वचि शल्के (आँइस) मेदि०।३खण्डे च विश्वः। ४पट्टिकालोध्रे पु० राजनि०।

वल्कतरु पु० वल्कप्रधान तरुः शा०त०। गुवाकवृक्षे राजनि०।

वल्कद्रुम पु० वल्कप्रधानो द्रुमः। भूर्जपत्रवृक्षे राजनि०।

वल्कल न० वल-कलन् कस्य नेत्त्वम्। १त्वचे (दारचिनि) वृक्षे राजनि० २त्वचि (छाल) पुंन० अमरः। ३शिला-वल्कायां स्त्री राजनि०।

वल्कलोध्र पु० वल्कप्रधानो लोध्रः। पट्टिकालोध्रे राजनि०।

वल्ग गतौ प्लुतगतौ च भ्वा० पर० सक० सेट्। वल्गति अवल्गीत्। [हेमच०

वल्गा स्त्री वल्ग-अच्। (लागाम) अश्वमुखस्थे रज्जुभेदे

वल्गित न० वल्ग-भावे क्त। १अश्वस्य गतिभेदे प्लुतगतौ अमरः। २गमने ३वक्रभाषणे च।

वल्गु पु० वल-संवरणे उ-गुक् च। १छागे २मनोहरे त्रि० मेदि०। स्वार्थे कन्। वल्गुक चन्दने वने पणे च न०। चारुणि सुन्दरे च त्रि० अजयः। वल्गो-ष्ट्रादित्वमित्यन्ये।

वल्गुपत्र पु० वल्गूनि पत्राणि यस्य। वनमुद्गे शब्दर०।

वल्गुला स्त्री वल्ग-उल। १वागुच्यां सोमराज्यां २खगभेदे राजनि० संज्ञायां कन्। वल्गुलिका तैलपायिकायां हेमच०

वल्भ भक्षणे भ्वा० आत्म० सक० सेट्। वल्भते अवल्भिष्ट।

वल्मिकि पु० वल-इकि सुट् च। कीटविशेषकृते मृत्तिका-कूपे (उईर ढिपि) शब्दर०। वल इक सुट् च। वल्मिक तत्रार्थे भरतः।

वल्मीक पुंन० वल-ईक सुट् च। क्षुद्रकीटकृतमृत्कूपे अमरः तन्मृदा शौचनिषेधो विष्णुपु० उक्तो यथा "वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा। शौचाव-शिष्टां गेहाच्च नादद्यात् लेपसम्भवाम्"। देवप्रतिमायाः शिल्पिदोषशान्तये तन्मृदा प्रतिमाक्षालनं विहितं यथा "वल्मीकमृत्तिकाभिश्च गोमयेन शुभाम्भसा। क्षालयेत् शिल्पिसंस्पर्शदोषाणामुपशान्तये" देवप्र० त०। तेन देवमूर्त्तीनां स्नापनमपि देवप्र० त० विहितं यथा "स्नापयेत् प्रथमं देवं तोयैः पञ्चविधैरपि। पश्चात्ततः पञ्चगव्यैः पञ्चमृत्पिण्डकैरपि। मृत्तिका करिदन्तस्य पर्वताग्रस्य च। कुशवल्मीकसम्भूता मृत्पञ्चक-मुदीरितम्" देवप्र० त०। तद्गर्भभूते प्राचेतसे स्वनाम-ख्याते रामायणकर्त्तरि २मुनिभेदे ३रोगभेदे च पुंस्त्री०। तद्रोगनिदानादि भावप्र० उक्तं यथा "ग्रीवांसकक्षाकरपाददेशे सन्धौ गले वा त्रिभिरेव दोषैः। ग्रन्थिः स वल्मीकवदक्रियाणां जातः क्रमे-णैव गतप्रवृद्धिः। मुखैरनेकैस्स्रुतितोदवद्भिः विसर्पवत् सर्पति चोन्नताग्रो। वल्मीकमाहुर्भिषजो विकारम् निष्प्रत्यनीकं चिरजं विशेषात्"। वल्मीकवदिवनेन प्र-चुरशिखरत्वमुन्नतत्वमवगाढमूलत्वञ्च सूच्यते निष्प्रत्यनीक-मुपचारायोग्यम्"। ततः भवार्थे इञ्। वाल्मीकि वल्मीकभवे प्राचेतसे मुनौ शब्दरत्ना०।

वल्मीकशीर्ष न० वल्मीकस्य शीर्षमिव। स्रोतोऽञ्जने राजनि०

वल्मीककूट न० वल्मीकं कूटमिव यत्र० (?)। वल्मीके हेमच०

वल्यु(ल्यू)ल छेदने पवित्रताकरणे च अद० चुरा० उभ० सक० सेट्। वल्यु(ल्यू)लयति ते अववल्यु(ल्यू)लत् त।

वल्ल संवरणे भ्वा० आत्म० सक० सेट्। वल्लते अवल्लिष्ट।

वल्ल पु० वल्ल घञ्। १गुञ्जात्रयपरिमाणे "वल्लस्त्रिगुञ्ज" लीला० २गुञ्जाद्वये वैद्यकम् ३सार्द्धगुञ्जामाने "गोधूमद्वितयोन्मिता तु कथिता गुञ्जा तया सार्द्धया वल्लः" राजनि०।

वल्लकी स्त्री वल्ल-क्वुन् गौरा० ङीष्। १वीणायाम् अमरः। २सल्लकीवृक्षे च राजनि०।

वल्लभ पु० वल्ल-अभच्। १दयिते २अध्यक्षे अमरः। ३उत्त-माश्वे च मेदि०। ४दयितायां स्त्री हेमच०।

वल्लभपाल पु० वल्लभं पालयति पाल-अण्। अश्वपाले

वल्लर न० वल्ल अरन्। १कृष्णागुरुणि मेदि० २गहने ३कुञ्जे च राजनि०। ४मञ्जर्यां शब्दर०।

वल्लरि(री) स्त्री वल्ल-अरि वा ङीप्। १मञ्जर्याम् अमरः। २मेथिकायां ३चित्रमूले च राजनि०।

वल्लव पुंस्त्री० वल्लु-घञ् तं वाति वा-क। १गोपे अमरः स्त्रियां ङीष्। २पाचके अमरः ३भीमसेने मेदि०।

वल्लि(ल्ली) स्त्री वल्ल-इन् वा ङीप्। १लतायाम् अमरः। २पृथिव्याञ्च शब्दच० दीर्घान्तस्तु ३अजमोदायां मेदि० ४कैवर्त्तिकायाम् ५द्रव्ये च राजनि०।

वल्लीज न० वल्ल्यां जायते-जन-ड। मरिचे राजनि०।

वल्लीदूर्वा स्त्री वल्लीरूपा दूर्वा। मालादूर्वायाम् राजनि०।

वल्लीबदरी स्त्री वल्लीरूपा बदरी। भूमिबदर्याम् राजनि०।

वल्लीमुद्ग पु० वल्लीप्रधानः मुद्गः। वनमुद्गे (मुगानि) राजनि०

वल्लीवृक्ष न० वल्लीव दीर्घो वृक्षः। शालवृक्षे राजनि०।

वल्लर न० वल्ल-उरन्। १कुञ्जे २मञ्जर्यां ३क्षेत्रे ४निर्जन-स्थाने ५शाद्वले हेमच०। ६गहने च मेदि० वल्ल-अरन्। वल्लर तत्रार्थे न० शब्दर०।

वल्लूर त्रि० वल्ल-ऊरन्। ख्यातपादिना १शुष्कमांसे अमरः २शूकरमांसे मेदि० ३वनक्षेत्रे ४वाहने ५ऊषरभूमौ च हेमच०।

वल्ल्या स्त्री वल्ल-यत्। धात्रीवृक्षे राजनि०।

वल्वज पु० वलते भुवं वेष्टयति वल-क्विप् तादृशः सन् वजति गच्छति वज-अच् । १उलपे तृणभेदे अमरः । (बागुइ) २मत्स्यभेदे स्त्री राजनि० ।

वल्ह दीप्तौ चु० उभ० अक० सेट् । वल्हयति ते अववल्हत् त

वल्ह उत्कर्षे भ्वा० आ० अक० सेट् । वल्हते अवल्हिष्ट ।

वव पु० बा ड प्रकारे द्वित्वम् । ज्योतिषोक्ते तिथ्यर्द्धात्मके प्रथमे करणे । अस्य च्योत्पत्त्यादित्वमित्यन्ये ।

वश कान्तायाम् अदा० पर० सक० सेट् । वष्टि उष्टः उशन्ति । अवट् अवाशीत् अवशीत् उवाश ऊशतुः ।

वश पुंन० वश-भावे अप्, कर्त्तरि अच् वा । १आयत्तत्वे २प्रभुत्वे च आयत्ते त्रि० शब्दर० ।

वशंवद त्रि० वशं वशकरं मधुरं, वशोऽहमिति वा वदति वद-खच् मुम् च १प्रियवाक्यवादिनि २मधुरवादिनि (तवाहं वशः) इति ३वादिनि च । [करणे ।

वशक्रिया स्त्री वशस्य क्रिया करणं कृ-भावे श । वशी-

वशग त्रि० वशं गच्छति गम-ड । वशीभूते ।

वशवर्त्तिन् त्रि० वशे वर्त्तते वृत-णिनि । वशीभूते ।

वशा स्त्री वश-अच् । १वन्ध्यायां २योषायां ३सुतायां ४क-५रिण्यां स्त्रीगव्यां च मेदि० । अनेन जातेः समासे परनि० गोवशा । [नन्दने स्त्री ।

वशिक त्रि० वशोऽस्त्यस्य ठन् । १शून्ये अमरः २अगुरु-

वशित्व न० वशिनो भावः त्व । १स्वातन्त्र्ये २ईश्वरस्य ऐश्वर्य-भेदे च । तल् । वशिताप्यत्र स्त्री । [स्वतन्त्रे च ।

वशिन् त्रि० वशोऽस्त्यस्य इनि । १जितेन्द्रिये २स्वाधीने

वशिर न० वश-इरन् । १सामुद्रलवणे अमरः । २गजपिप्पल्याम् ३चव्ये च पु० राजनि० ।

वशिष्ठ अतिशयेन वशी इष्ठन् इनेर्लुक् । अतिशयवशिते-न्द्रियतायुक्ते मुनिभेदे ।

वशीकरण न० अवशः वशः क्रियतेऽनेन वश-च्वि-कृ-ल्युट् । तन्त्रायुक्ते वशतापादके मणिमन्त्रादौ ।

वशीर पु० वश-ईरन् । गजपिप्पल्याम् जटा० ।

वश्य न० वश-यत् । १लवङ्गे शब्दर० । २आयत्ते त्रि० अमरः

वष वधे भ्वा० पर० सक० सेट् । वषति अवषीत् अवाषीत् । ववषतुः ।

वषट् अव्य० वह-डषटि । देवोद्दे त्यागे अमरः ।

वषट्कार पु० वषट्+कृ-घञ् । देवो यष्टव्यानद्दपे यज्ञे वषडिति करणे यजुर्वि द कात्य शाख्य दयम् ।

वषट्कृत त्रि० वषट् कृतं यस्य हुते अमरः ।

वष्क गतौ भ्वा० आत्म० सक० सेट् । वष्कते अवष्किष्ट ।

वष्कय पु० वष्क-अयन् । एकहायने वत्से अमरः ।

वष्कयणी स्त्री वष्कयमेकहायनवत्सं नयति स्थानान्तरं णी-ड गौरा० ङीष् णत्वम् । चिरप्रसूतायां गवि अमरः । जातौ समासेऽस्य परनि० गोवष्कयणी ।

वष्कयिणी स्त्री वष्कय एकहायनो वत्सोऽस्त्यस्या इनि । चिरप्रसूतायां गवि अमरः वष्कयणीति वा पाठः । "वष्कयिण्यास्त्रिदोषघ्नं तर्पणं बलकृत्पयः" भावप्र० ।

वस स्नेहे छेदने वधे च सक० चु० उभ० सेट् । वासयति ते अवीवसत् त । अधि+गन्धादिनासंस्कारे सक० ।

वस स्तम्भे दिवा० पर० सक० सेट् । वस्यति इरित् अवसत् अवासीत् उदित् क्त्वा वेट् ।

वस निवासे भ्वा० पर० अक० अनिट् यजा० । वसति अवात्सीत् उवास ऊषतुः उषितः उषित्वा । अधि+अनु+उप—आ+वा वसतेराधारस्य कर्मता अधिवसति वैकुण्ठं हरिः सि० कौ० अनुवसति उपवसति आवसति । उप+ अभोजने तत्र नाधारस्य कर्मता "एकादश्यामुपवसेत्" इत्यादि ।

वस आच्छादने अदा० आ० सक० सेट् । वस्ते अवसिष्ट ।

वस वासने सुरभीकरणे अद० चु० उभ० सक० सेट् । वसयति ते अववसत् त ।

वसति(ती) स्त्री वस-अति वा ङीप् । १वासे २यामिन्याम् "वसतीरुषित्वा" रघुः । ३निकेतने मेदि० ४स्थाने च ५शिविरे त्रि० को० ।

वसतीवरी स्त्री व० व० सोमपरमायीषु अप्सु । "अग्नीषो-मीयस्य वपामार्जनान्ते वसतीवरीग्रहणं स्यन्दमानाना-मनस्तमिते" कात्या० श्रौ० ८ ९ ७ "सोमार्था आपो वसतीवरीशब्देनोच्यन्ते" कर्क० । अत्र सोमाभिषवोप-युक्तानां वसतीवरीसंज्ञानामपां ग्रहणमभिधीयते वेददी० यजु० ६ २२ ।

वसन न० वस-आच्छादने कर्मणि ल्युट् । १वस्त्रे अमरः । भावे ल्युट् । २छादने मेदि० वस-वासे आधारे ल्युट् । ३निवासे ४स्त्रीकटीभूषणे च शब्दर० ।

वसन्त पु० वस-झ । मधुमाधवात्मके ऋतुभेदे "मधुश्च माधवश्च वासन्तिकावृतू" यजु श्रुतिः । २अतिसारे शब्दर० ३नाट्ये विदूषकोपाख्ये । ४रागभेदे च ।

"आन्दोलिता च देशाख्या लोला प्रथममञ्जरी । मन्दारी चेति रागिण्यो वसन्तस्य सदानुगाः" इत्युक्ता अस्य रागिण्यः षट् इत्यन्ये रागिणीभेदे इत्याः ।

अस्य गानकालः। "श्रीपञ्चमीं समारभ्य यावत् स्वाप-यनं हरेः। तावद्वसन्तरागस्य गानमुक्तं मनीषिभिः" सङ्गीतदा०। ४तालविशेषे। "जयमङ्गलगन्धर्वमकरन्द-त्रिभङ्गमाः। रतितालो वसन्तश्च जगझम्पोऽथ गारुगिः" वसन्तताले कर्त्तव्यो नगणो मगणस्तथा।" सङ्गीतदा०।

वसन्तक पु० वसन्ते कायति कै–क। श्योनाकवृक्षे शब्दमा०

वसन्तकुसुम पु० वसन्ते कुसुमं यस्य। सेलुवृक्षे शब्दमा०।

वसन्तकुसुमाकर पु० प्रमेहरोगनाशके औषधभेदे। "प्रवालरसमौक्तिकाम्बरमिदं चतुर्भागभाक् पृथक् पृथ-गथ मृते रजतहेमतो द्व्यं शके। अयोभुजगरङ्गकं त्रि-कमकं विमर्द्याखिलं शुभेऽहनि विभावयेत् भिषगिदं धिया सप्तधा। द्रवैर्वृषनिशेक्षुजैः कमलमालतीपुष्पजैः पयःकदलिकन्दजैर्मलयजैर्घनाम्बुद्भवैः। वसन्तकुसुमा-करोरसपतिर्हि वल्लोऽमितः समस्तमदहृद्भवेत् सित सि-तानुपानैरयम्" रसयोगतरङ्गिणी। [राजनि०।

वसन्तजा स्त्री वसन्ते जायते जन–ड। माधवीलतायाम्

वसन्ततिलक न० "ज्ञेयं वसन्ततिलकं तभजा जगौ गः" छन्दो० उक्ते चतुर्दशाक्षरपादके छन्दोभेदे

वसन्तदूत पु० वसन्तस्य दूत इव। १कोकिले २आम्रवृक्षे ३पञ्चमरागे च त्रिका०। ४माधवीलतायाम् ५पाटलीवृक्षे स्त्री मेदि० गौ० ङीष्। ६गणिकारिकायां ७पिक्यांश्च स्त्री ङीष् राजनि०।

वसन्तद्रु पु० वसन्तस्य द्रुः। आम्रवृक्षे शब्दर० तत्काले तस्य जायमानमुकुलत्वात् तथात्वम् वसन्तदूतादयोऽप्यत्र।

वसन्तसख पु० वसन्तस्य सखा अच्समा०। कामदेवे हला०

वसा स्त्री वस–अच्। १मांसजाते देहस्थे धातुभेदे मेदसि अमरः। असृक्करशब्दे ५५८पृ० दृश्यम्। २मांसरोहिण्यां लतायाञ्च राजनि०। [त्रिका०।

वसाढ्य पु'स्त्री० वसाभिः आढ्यः। प्रचुरमेदस्के शिशुमारे

वसि पु० वस–इन्। वसने उणा०। [धरणिः।

वसिर न० वस–इरन्। १सामुद्रलवणे २गजपिप्पल्यां च

वसिष्ठ पु० वसिष्ठ+पृषो०। ब्रह्मणः मानसपुत्रेषु सप्तर्षिषु मुनिभेदे भा० अनु० अन्योऽपि तन्निरुक्तिर्यथा "वसि-ष्ठोऽस्मि वसिष्ठोऽस्मि वसे वासगृहेष्वपि। वसिष्ठत्वाच्च वासाच्च वसिष्ठ इति विद्धि माम्"।

वसु न० वस–उ। १धने २रत्ने अमरः ३वृद्ध्यौषधे ४श्यामे मेदि०। ५जले त्रिका० ६जले च त्रिका०। ७बकवृक्षे दस्सर्थे ८वह्नौ १०रश्मौ ११गणदेवताभेदे च पु०अमरः। "धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः" भा० आ० ६६अ०। १२अष्टसङ्ख्यायाञ्च १३मधुरे १४शुष्के च त्रि० हेमच०। १५दीप्तौ १६वृद्ध्यौषधौ च स्त्री शब्दच०। १७वसुदेवता के धनिष्ठानक्षत्रे पु० ज्यो०त०। १८चेदिराजाख्ये देवभेदे

वसुक पु० वसुना स्वर्णनाम्ना कायति कै–क। १अर्कवृक्षे अमरः। २बकवृक्षे च मेदि०।

वसुकीट पु० वसूनि धने कीट इव। याचके शब्दा०।

वसुच्छिद्रा स्त्री वसवश्छद्रानि पुष्पे छिद्राण्यस्याः। ऋद्धा-मेदायाम् रत्नमा०। [देवे क्षत्रियभेदे अमरः।

वसुदेव पु० वसुना दीव्यति दिव–अच्। श्रीकृष्णजनके या-

वसुदेवभू पु० वसुदेवात् भवति भू-क्विप्। श्रीकृष्णे वसुदेव-सुतादयोऽप्यत्र। [दधाति धा–क वा। पृथिव्याम् अमरः

वसुधा स्त्री वसूनि धीयन्तेऽस्यां धा अर्थे आधारे क, वसूनि

वसुधारा स्त्री वसोश्चेदिराजस्य प्रियार्थं धारा घृतादिस्रव-सन्ततिः। माङ्गल्येषु चेदिराजवसुद्देशेन दीयमानायां घृतादिधारायाम्।

"कुड्यलग्नां वसोर्धारां सप्त वारान् घृतेन तु। कारयेत् पञ्च वारान् वा नातिनीचां न चोच्छ्रिताम्। आयुष्मा-निति शान्त्यर्थं जप्त्वा तत्र समाहितः। षडभ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत्" छन्दोगप०।

२जिनशक्तिभेदे हेमच०। ३कुवेरपुर्य्यां शब्दमा०।

वसुन्धरा स्त्री वसूनि धारयति धृ-खच् मुम् हस्वश्च। पृथि-व्याम् अमरः।

वसुप्राण पु० वसुर्दीप्तिः प्राण इव यस्य। वह्नौ शब्दर०।

वसुमती स्त्री वसूनि सन्त्यस्यां मतुप्। पृथिव्याम् अमरः।

वसुरोचिस् पु०वसुने धनाय रोचते रुच-इसुन्। यज्ञे सि०कौ०

वसुल पु० वसु दीप्तिं लाति ला–क। देवे त्रिका०।

वसुहट्ट पु० वसूनां दीप्तीनां हट्ट इव। बकवृक्षे जटा०।

वस्त बधे गतौ च सक० याचने द्वि० चु० उभ० सेट्। वस्त-यति ते अववस्तत् त। [अमरः स्त्रियां ङीष्।

वस्त पु'स्त्री वस्यते बध्यते यज्ञार्थं वस्त–कर्मणि घञ्। छागे

वस्तक न० वस्त इव कायति कै–क। कृत्रिमलवणे हेमच०।

वस्तकर्ण पु० वस्तस्य कर्णः पत्राकारेऽस्त्यस्य अच्। शालवृक्षे राजनि०।

वस्तगन्धा स्त्री वस्तस्येव गन्धोऽस्याः। अजगन्धायाम् राजनि०। [राजनि०।

वस्तमोदा स्त्री वस्तस्येव मोदो यस्याः। अजमोदायाम्

वस्ति पु० वस्ते आच्छादयति मूत्रम् वस–तिच्। नाभेरधो-भागे मूत्राधारे १स्थाने २वाहे च ३वस्त्रदशायां पुंस्त्री अ०क० अमरः (पिचकारी) औषधदानार्थे द्रव्यभेदे पु० तद्विधिः भावप्र०

"वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परम्। यः स्नेहो दीयते सः स्यादनुवासननामकः। कषायक्षीरतैलैर्यो निरूहः स निगद्यते। वस्तिभिर्दीयते यस्मात्तस्माद्वस्तिरिति स्मृतः।" वस्तिभिः मृगादीनां मूत्राशयैः "तत्रानुवासनाख्यो हि वस्तिर्यः सोऽत्र कथ्यते। अनुवासनभेदश्च मात्रावस्तिरुदीरितः। पलद्वयन्तस्य मात्रा तस्मादर्द्धोऽपि वा भवेत्। अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिली। नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी। नास्थाप्या नानुवास्याश्च जीर्णोन्मादतृडर्द्दिताः। शोषमूर्च्छारुचिभयश्वासकासक्षयातुराः। नेत्रं कार्य्यं सुवर्णादिधातुभिर्वा म-वेणुभिः। नलैर्दन्तैर्विषाणाग्रैर्मणिभिर्वा विधीयते।" नेत्रं नाड़ी तथा चोक्तं विश्वप्रकाशे "नेत्रं मन्थगुणे वस्त्रे तरुमूले विलोचने। नेत्रवस्त्रे च नाड्याञ्च नेत्रो नेतरि भेद्यवदिति"। "एकवर्षात्तु षड्वर्षं यावन्मानं षडङ्गुलम्। ततो द्वादशकं यावन्मानं स्यादष्टसम्मितम्। ततः परं द्वादशभिरङ्गुलैर्नेत्रदीर्घता। मुद्गच्छिद्रं कलायाभं छिद्रं कोलास्थिसन्निभम्। यथासङ्ख्यं भवेन्नेत्रं श्लक्ष्णं गोपुच्छसन्निभम्। गोपुच्छसन्निभं मूले तस्मात् क्रमात् क्रमात् कृशम्"। मुद्गच्छिद्राद्प्रमाणं नेत्रं क्रमेण षड्वर्षो यद्वा दशवर्षो यद्वा तदूर्द्धं वर्षीयसोयाः। "आतुराङ्गुष्ठमानेन मूले स्थूलं विधीयते। कनिष्ठिकापरीणाहमग्रे च गुटिकामुखम्।" परिणाहोऽत्र स्थौल्यम् "तन्मूले कर्णिके द्वे च कार्य्ये भागाच्चतुर्थकात्।" कर्णिका गवादिकर्णवत् "योजयेत्तत्र वस्तिञ्च बन्धद्वयविधानतः। मृगाजशूकरगवां महिषस्यापि वा भवेत्।" वस्तिरिति शेषः। "मूत्रकोषस्य वस्तिस्तु तदलाभे तु चर्म्मणः। कषायरक्तः स मृदुर्वस्तिः स्निग्धो दृढोऽहितः। व्रणवस्तेस्तु नेत्रं स्यात् श्लक्ष्णमष्टाङ्गुलोन्मितम्। मुद्गच्छिद्रं गृध्रपक्षनालिका परिणाहि च। शरीरोपचयं वर्णं बलमारोग्यमायुषः। कुरुते परिवृद्धिञ्च वस्तिः सम्यगुपासितः। दिवा शीते वसन्ते च स्नेहवस्तिः प्रदीयते। ग्रीष्मवर्षाशरत्काले रात्रौ स्यादनुवासनम्। न चातिस्निग्धमशनं भोजयित्वानुवासयेत्। मदं मूर्च्छाञ्च जनयेद्द्विधा स्नेहः प्रयोजितः।" द्विधा भोजने वस्तौ च। "रूक्षं भुक्तवतोऽत्यन्तं बलं वर्णञ्च हापयेत्। युक्तस्नेहमतो जन्तुं भोजयित्वानुवासयेत्"। युक्तस्नेहं यथोचितस्नेहं भोज्यं भोजयित्वेत्यर्थः। "हीनमात्रावुभौ वस्ती नातिकार्य्यकरौ स्मृतौ। अतिमात्रौ तथानाहक्लमातीसारकारकौ" उभौ वस्ती अनुवासननिरूहाख्यौ। "उत्तमा स्यात्पलैः षड्भिर्मध्यमा स्यात्पलैस्त्रिभिः। पलाद्धेन हीना स्यादुक्ता मात्रानुवासने। शताह्वासैन्धवाभ्याञ्च देयं स्नेहे च चूर्णकम्। तन्मात्रोत्तममध्यान्त्या षट्चतुर्द्वयमाषकैः। विरेचनात्सप्तरात्रे गते जातबलाय च। भुक्तान्नायानुवास्याय वस्तिर्देयोऽनुवासनः। अथानुवास्यं स्वभ्यक्तमुष्णाम्बुस्वेदितं शनैः। भोजयित्वा यथाशास्त्रं कृतचङ्क्रमणं ततः। उत्सृष्टानिलविण्मूत्रं योजयेत् स्नेहवस्तिना" उष्णाम्बुस्वेदितम् उष्णाम्बुना स्नापितम्। "सुप्तस्य वामपार्श्वेन वामजङ्घाप्रसारिणः। कुञ्चितापरजङ्घस्य नेत्रं स्निग्धे गुदे न्यसेत्। बद्ध्वा वस्तिमुखं सूत्रैः वामहस्तेन धारयेत्। पीड़येद्दक्षिणेनैव मध्यवेगेन धीरधीः। जृम्भाकासक्षवादींश्च वस्तिकाले न कारयेत्। त्रिंशन्मात्रामितः कालः प्रोक्तो वस्तेस्तु पीड़ने। ततः प्रणिहिते स्नेहे उत्तानो वाग्यतो भवेत्। स्वजानुनः करावर्त्तं कुर्य्याच्छोटिकया पुनः। एषा मात्रा भवेदेका सर्व्वत्रैवेष निश्चयः। निमेषोन्मेषणं पुंसामङ्गुल्या छोटिकाथ वा। गुर्व्वक्षरोच्चारणं वा मात्रेयं स्मृता बुधैः। प्रसारितैः सर्व्वगात्रैर्यथावीर्य्यं प्रसर्पति" यथावीर्य्यं स्नेहादि। "ताड़येत्तलयोरेनं त्रींस्त्रीन्वारान् शनैः शनैः। स्फिजोश्चैव तथा श्रोण्यौ शय्याञ्चैवोत्क्षिपेत्ततः। स्फिजोश्चैनं स्वपाणिभ्यां पूर्ववत्ताड़येद्बुधः। शय्याञ्च पदतस्तस्य त्रीन् वारानुत्क्षिपेत्ततः। जाते विधाने तु तत कुर्य्यान्निद्रां यथासुखम्। सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु। उपद्रवं विना शीघ्रं स सम्यगनुवासितः। जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः। लघ्वन्नं भोजयेत्कामं दीप्ताग्निस्तु नरो यदि। अनुवासिताय दातव्यमितरेऽह्नि सुखोदकम्। धान्यशुण्ठीकषायं वा स्नेहव्यापत्तिनाशनम्"। सुखोदकमुष्णोदकं व्यापत्तिर्व्याधिः। "अनेन विधिना षड्वा सप्त चाष्टौ नवापि वा। विधेया वस्तयस्तेषामन्ते चैव निरूहणम्। दत्तस्तु प्रथमो वस्तिः स्नेहयेद्वस्तिवङ्क्षणौ। द्वितीयस्तु मू

द्वितीयमनिलं जयेत् । बलं वर्णञ्च स जयेत्तृतीयस्तु प्रयोजितः । चतुर्थपञ्चमौ दत्तौ स्नेहयेतां रसासृजौ । षष्ठो मांसं स्नेहयति सप्तमो मेद एव च । अष्टमो नवमश्चापि मज्जानञ्च यथाक्रमम्" । यथाक्रममिति वचनादष्टमोऽस्थि स्नेहयेत् । "एवं शुक्रगतान् दोषान् द्विगुणः साधु साधयेत् ।" अष्टादशदिवसावधिकवस्तिफलम् "अष्टादशाष्टादशकाह्निनान् यो ना निषेवते । स कुञ्जरबलोऽश्वस्य जवतुल्योऽमरप्रभः । रूक्षाय बहुवाताय स्नेहवस्तिं दिने दिने । दद्याद्वैद्यस्तथान्येषामग्न्याबाधभयात्त्र्यहात् । स्नेहोऽल्पमात्रो रूक्षाणां दीर्घकालमनत्ययः ।" अनत्ययः अबाधः । "तथा निरूहः स्निग्धानामल्पमात्रः प्रशस्यते । अथ वा यस्य तत्कालं स्नेहो निर्याति केवलः । तस्याप्यल्पतरो देयो न हि स्निग्धेऽवतिष्ठते ।" अवतिष्ठते दत्तः स्नेह इति शेषः "अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः । तदाङ्गसदनाध्माने शूलं श्वासश्च जायते । पक्वाशये गुरुत्वञ्च तत्र दद्यान्निरूहणम् । तीक्ष्णं तीक्ष्णौषधैर्युक्तं फलवर्त्तिमथापि वा । यथानुलोमनो वायुर्मलः स्नेहश्च जायते । तथा विरेचनं दद्यात्तीक्ष्णं नस्यञ्च शस्यते । यस्य नोपद्रवं कुर्य्यात् स्नेहवस्तिरनिःसृता । सर्वोऽल्पो वावृतो रौक्ष्यादुपेक्ष्यः स विजानता । अनायातन्त्वहोरात्रे स्नेहं संशोधनैर्हरेत् । स्नेहवस्तावनायाते नान्यः स्नेहो विधीयते । गुडूच्येरण्डपूतीकभार्गीभिर्वृषरोहिषम् । शतावरीं सहचरं काकनासां पलोन्मिताम् । यवमाषातसीकोलकुलत्थान् प्रसृतोन्मितान् । चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणशेषेण तेन च । दशैतैस्त्वाढकं तैलं पयसोऽन्मितैः पलोन्मितैः । अनुवासनमेतद्धि सर्ववातविकारनुत् ।" पूतीकः करञ्जः रोहिषं दीर्घवृन्तकविशेषः । काकनासा (काकाठोठी) प्रसिद्धम् पवदयम् । "षोढा सप्त व्यापदस्तु जायते वस्तिकर्मणः । दूषितान् सशुदायेन तांश्चिकित्सेत्तु सुश्रुतात् । सशुदायेन सन्तुषितनेत्रादिसामग्र्या । "नानाहारविहारांश्च परिहारांश्च लक्षणः स्नेहपानवसाः कार्य्या नात्र कार्य्या विचारणा ।"

वस्तिकर्माढ्य पु वस्तिकर्मणा तच्छोधनव्यापारेणाढ्यः । अरिष्टवृक्षे शब्दच० ।

वस्तिमल न० ६त० । मूत्रे हेमच० ।

वस्तु न० वस-तुन् । १द्रव्ये २पदार्थे लिङ्गा० ३स्वल्पद्रव्ये च ।

वस्तुक न० वस्तु+इवार्थे कन् । १वास्तुके शाकभेदे २श्वेतचिल्लीशाके च स्त्री राजनि० ।

वस्त्य न० वस्तौ साधु यत् । गृहे अमरः ।

वस्त्र न० वस-ष्ट्रन् । परिधानाद्युपयुक्ते कार्पासादौ वसने । वस्त्रधारणगुणाः यथा "स्नातस्यानन्तरं सम्यग्वस्त्रेण तनुमार्जनम् । कान्तिप्रदं शरीरस्य कण्ड्वादोषनाशनम् । कौषेयं चित्रवस्त्रञ्च रक्तवस्त्रं तथैव च । वातश्लेष्महरं तत्तु शीतकाले विधारयेत् ।" कौषेयं पट्टाम्बरं तसरवस्त्रञ्च । "मेध्यं सुशीतं पित्तघ्नं काषायं वस्त्रमुच्यते । तद्धारयेदुष्णकाले तच्चापि लघु शस्यते ।" काषायं (कोकटी) इति लोके । कषायरागरक्तं वा । "शुक्लन्तु शुभदं वस्त्रं शीतातपनिवारणम् । न चोष्णं न च वा शीतं तत्तु वर्षासु धारयेत् । यशस्यं काम्यमायुष्यं श्रीमदानन्दवर्द्धनम् । स्वच्छं वशीकरं हृद्यं नवं निर्मलमम्बरम् ।" काम्यं कामोद्दीपकम् । "कदापि न जनैः सन्धार्य्यं मलिनमम्बरम् । तत्तु कण्डूकृमिकरं ग्लान्यलक्ष्मीकरं परम् ।" अलक्ष्मीरशोभा दारिद्र्यं वा ।" भावप्र०

वस्त्रपरिधानविधिर्यथा भृगुः "विकच्छोऽनुत्तरीयश्च नग्नश्चावस्त्र एव च । श्रौतं स्मार्त्तं तथा कर्म न नग्नश्चिन्तयेदपि । विकच्छः परीधानाद् गलितकच्छः । तथा च "परीधानाद्बहिः कच्छा निबद्धा ह्यासुरी भवेत्" स्मृतिः "वामे पृष्ठे तथा नाभौ कच्छत्रयमुदाहृतम् । एभिः कच्छैः परीधत्ते यो विप्रः स शुचिः स्मृतः" । बौधायनः "नाभौ धृतञ्च यद्वस्त्रमाच्छादयति जानुनी । अन्तरीयं प्रशस्तं तदच्छिन्नमुभयोस्तयोः ।" प्रचेताः "दशा नाभौ प्रयोजयेत्" स्मृतिः "न स्यात् कर्मणि कञ्चुकीति" । उत्तरीयधारणं चोपवीतवत् "यथा यज्ञोपवीतञ्च धार्य्यते च द्विजोत्तमैः । तथा सन्धार्य्यते यत्नादुत्तराच्छादनं शुभम्" स्मृतेः । अत्र यथा द्विजोत्तमैः सव्यापसव्यत्वादिना उपवीतं धार्य्यते तथा उत्तराच्छादनमपि द्विजोत्तमैरिति प्रदर्शनमात्रम् प्रागुक्तभृगुवचनेन सर्वेषां द्विवस्त्रताप्रतीतेः" पारस्करः "एकचेलाशो भवति तस्य उत्तरार्द्धेन प्रच्छादयतीति" आ० त० रघु० । वस्त्रपरीधानकालादि "नक्षत्रानुराधवसुतिष्यविशाखहस्ताश्विनीत्तराग्निपवनादितिरेवतीषु । जन्मर्क्षजीवबुधशुक्रदिनोत्सवादौ धार्य्यं नवं वसनमीश्वरदेवलग्नौ ।" ज्यो० त० । "स्वर्णं चाल्पधनं,

श्चः शशिदिने, क्षयः सदा भूमिजे, वस्त्राणां बहुता बुधे, सुरगुरौ विद्यागमः सम्पदः। नानाभोगयुतप्रमोदशयनं विद्याङ्गना भार्गवे, शौरौ स्युः खलु रोगशोककलहा वस्त्रे धृते नूतने" कर्मलोचनम्। वस्त्र क्षारसंयोगनिषिद्धदिनानि यथा। "सन्ध्याकृष्णचतुर्दशीषु द्वादश्यां श्राद्धवासरे। वस्त्राणां क्षारसंयोगाद्दहत्यासप्तमं कुलम्।" श्रा०त०।

परकीयवस्त्रधारणनिषेधो यथा "आसनं वसनं शय्या जायापत्यं कमण्डलुः। आत्मनः शुचिरेतानि न परेषां कदाचन"। ईषद्धौतादिवस्त्रस्य पश्चिमाग्राद्रिप्रसारितवस्त्रस्य च अधौतत्वं यथा, "ईषद्धौतं स्त्रिया धौतं यद्धौतं रजकस्य तु। अधौतं तद्विजानीयाद्दक्षिणपश्चिमे।" कर्मलोचनम्। सत्यतपाः "प्राक्प्रसृदग्रं वा धौतं वस्त्रं प्रसारयेत्। पश्चिमाग्रं दक्षिणाग्रं पुनः प्रक्षालनात् शुचि" अग्राग्रं दशा इत्यर्थः। प्रचेताः "अयं धौतेन कर्त्तव्या क्रिया धर्म्या विपश्चिता। न च रजकधौतेन नाधौतेन भवेत् क्वचित्। पुनर्मिलितकेनैव सजातिधावकेन च। द्विजवर्गेण यद्धौतं तत् पवित्रमिति स्थितिः"। स्नानोत्तरं उष्णीषवस्त्रस्य धार्य्यत्वं यथा उष्णीषधारणं शिरोजलापनयनाय। तेन स्नानानन्तरं धार्य्यम्। तथा च महाभारतम् "आप्लुताङ्गमपि कृत्वा क्षिप्तेन जलेन च मूर्द्धनि। राजहंसनिभं प्राप्य उष्णीषं शिथिलार्पितम्। जलक्षयनिमित्तं वै वेष्टयाम् मूर्द्धनि" । शिथिलार्पितम् अगाढ़कम्। निषिद्धवस्त्राणि यथा भारते "न स्यूतेन न दग्धेन पारक्येण विशेषतः। मूषिकोत्कीर्णजीर्णेन कर्म कुर्य्याद्विचक्षणः।" नारसिंहे "न रक्तमुल्वणं वासो न नीलञ्च प्रशस्यते। मलाक्तञ्च दशाहीनं वर्जयेदम्बरं बुधः।" उल्वणम् उत्कटरक्तविशेषम्। आचाररत्ने उशना "दशाहीनेन वस्त्रेण कुर्य्यात् कर्माण्यभावतः"। विष्णुधर्मोत्तरे "वस्त्रं नान्यधृतं धार्य्यं न रक्तं मलिनं तथा। जीर्णं वाऽपदशञ्चैव श्वेतं धार्य्यं प्रयत्नतः। उपानहं नान्यधृतां ब्रह्मसूत्रञ्च धारयेत्। न जीर्णमलवद्वासा भवेच्च विभवे सति।" योगियाज्ञवल्क्यः "स्नात्वैवं वाससी धौते अक्लिष्टे परिधाय च। प्रक्षाल्योरू मृदाऽऽद्भिश्च हस्तौ प्रक्षालयेत्ततः। अभावे धौतवस्त्राणां शाणक्षौमाविकानि च। कुतपो योगपट्टं वा द्विवासा येन वा भवेत्। अधौतेन च वस्त्रेण नित्यनैमित्तिकीं क्रियाम्। कुर्वन् फलं न चाप्नोति दत्तं भवति निष्फलम्"। कुतपो नेपालकम्बलः। तन्त्रापवादः "दाक्षे पट्टसूत्रे च सूचीविद्धं न दुष्यति" विधानपा० "नीलीरक्तं न दुष्यति" इति मिता०पाठः। तदुत्तरात् पूर्वं स्नानवस्त्र निष्पीड़ने निषेधो यथा "निष्पीड़यति यः पूर्वं स्नानवस्त्रन्तु तर्पणात्। निराशास्तस्य गच्छन्ति देवाः पितृगणैः सह"। जाबालिः "स्नानं कृत्वार्द्रवासास्तु विण्मूत्रं कुरुते यदि। प्राणायामत्रयं कृत्वा पुनः स्नानेन शुध्यति। नार्द्रमेकञ्च वसनं परिदध्यात् कथञ्चन"। हारीतः "आर्द्रञ्च सप्तवाताहृतमपि शुद्धमिति"। संक्रान्त्यादौ वस्त्रनिष्पीड़ननिषेधो यथा षट्त्रिंशन्मतनिगमौ "संक्रान्त्यां पञ्चदश्याञ्च द्वादश्यां श्राद्धवासरे। वस्त्रं न पीड़येत्तत्र न च क्षारेण योजयेत्" ति०त०

वस्त्रकुट्टिम न० वस्त्रनिर्मितं कुट्टिमं यत्र। १वस्त्रगृहे (तांबु) २छत्रे त्रिका०। [निर्मिते गृहे त्रिका०।

वस्त्रगृह न० वस्त्रनिर्मितं गृहम् शाक०। (तांबु) वस्त्र-

वस्त्रग्रन्थि पु० ६त० नीव्याम् त्रिका०।

वस्त्रपुत्रिका स्त्री वस्त्रनिर्मिता पुत्रिका। वस्त्रनिर्मितपुत्तलिकायाम् शब्दमा०। [२शाकरसहस्ते च राजनि०।

वस्त्रभूषणा स्त्री वस्त्रस्य भूषणं यस्याः ५ब०। १मञ्जिष्ठायाम्

वस्त्रयोनि स्त्री ६त०। त्वक्फलकृमिरोमादौ अमरः।

वस्त्ररञ्जन पु० वस्त्रं रञ्जयति रन्ज-णिच्-ल्यु। कुसुम्भे राजनि०।

वस्न न० वस-नन्। १वेतने २मूल्ये ३वस्त्रे ४द्रव्ये च विश्वः ५धने ६मृत्यौ च अमरटीकायां रमानाथः। मूल्ये पु० अमरः।

वस्नसा स्त्री वस्नं स्यति सो-क। स्नायौ अमरः।

वस्वौकसारा स्त्री वसुनामोकस्य सारो यत्र। १इन्द्रनगर्य्याम् २इन्द्रनद्यां ३कुबेरपुर्य्यां ४कुबेरनद्याञ्च हेम०।

वह दीप्तौ चु० उभ० सक० सेट् इदित्। वंहयति ते अववंहत्।

वह प्रापणे भ्वा० उभ० द्विक० यजा० अनिट्। वहति ते अवाक्षीत् अवोढ़ उवाह ऊहे अहुः। अस्य प्रधानकर्मण्येव लकारादयः।

वह पु० उह्यतेऽनेन वह-अच्। १वृषस्कन्धदेशे अमरः। वह-कर्त्तरि अच्। २घोटके ३वायौ ४पथि त्रिका० ५नद्यां स्त्री हेमच०।

वहत पु० वह-अतच्। १वृषे २पान्थे च उणादिकोषः

वहति पु० वह–अति । १वायौ उज्ज्व० । २गवि ३सचिवे च मेदि० । [४गमने च ।

वहन न० वह–भावे ल्युट् । १पुरभेदे त्रिका० २प्रापणे ।

वहन्त पु० वह–झ । वायौ सि०कौ० २बाले उज्ज्व० ।

वहल पु० वह–कलच् । १पोते हारा० २दृढे त्रि० हेम० ।

वहलगन्ध न० वहलो दृढो गन्धो यस्य । शम्बरचन्दने राजनि० ।

वहलचक्षुस् पु० वहलानि चक्षूंषीव पुष्पाण्यस्य । मेषशृङ्ग्यां (गाड़रशिङ्गा) रत्नमा० । [राजनि० ।

वहलत्वच पु० वहला दृढा त्वचा यस्य । श्वेतलोध्रे

वहला स्त्री वहलानि पुष्पादीनि सन्त्यस्य अर्श आद्यच् । १शतपुष्पायां राजनि० । २स्थूलैलायां भावप्र० ।

वहित्र न० वह–इत्र । १पोते जलयाने त्रिका० । स्वार्थे क । अत्रैवार्थे ।

वहिरङ्ग न० वहिः प्रकृतेर्वाह्यमङ्गं यस्य । व्याकरणोक्ते प्रत्ययादिनिमित्तके प्रकृत्यवयवादिकार्य्ये । "असिद्धं वहिरङ्गमन्तरङ्गे" व्या० परिभाषा ।

वहिरिन्द्रिय न० वहिर्देशादुद्वाह्यस्य पदार्थस्य ग्राहकमिन्द्रियम् । शब्दादिवाह्यविषयग्राहकेषु श्रोत्रादिषु ।

वहिर्द्वार न० वहिःस्थं द्वारम् । तोरणे अमरः ।

वहिर्मुख त्रि० वहिः वाह्यविषये मुखं प्रवणता यस्य । वाह्यविषयासक्तमनस्के विषयासक्ते १जने २विमुखे च ।

वहिस् अव्य० वह–इसुन् । वाह्ये अमरः ।

वहेड़क पु० वह–अच् वहः एड़क इव ईहत् काण्डो यस्य । विभीतकवृक्षे (वहेड़ा) राजनि० ।

वह्नि पु० वह–नि । १अग्नौ २चित्रकवृक्षे अमरः ३भल्लातके ४निम्बूके राजनि० । तन्त्रोक्ते ५रकारे च । "वगाद्यं वह्निसंस्थम्" इति श्यामास्तोत्रम् । वह्निभेदादिकं यथा "जृम्भको दाहकश्चैव विभ्रमश्चमशोभनाः । आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च । अन्वाहार्य्यो गार्हपत्य इत्येते दश वह्नयः" । अन्यैरन्यथोक्तानि यथा "पावको रञ्जकश्चैव क्लेदकः स्नेहकस्तथा । धारको बन्धकश्चैव द्रावकाख्यश्च सप्तमः । व्यापकः पावकश्चैव श्लेष्मको दशमः स्मृतः" । शरीरस्थवह्नेः नामानि यथा "वह्नयो दोषदुष्येषु संलीना दश देहिनः" । दोषदुष्याश्च यथा "वातपित्तकफा दोषाः दुष्याः स्युः सप्तधातवः" म० ति० । श्रुत्याग्नयो यथा "गार्हपत्यो दक्षिणाग्निस्तथैवाहवनीयकः । एतेऽग्नयस्त्रयो मुख्याः शेषाश्चोपसदस्त्रयः" वह्नि०पु० । तत्र निषिद्धकर्माणि यथा "नाशुद्धोऽग्निं परिचरेत् न देवान् कीर्त्तयेदृषीन् । न चाग्निं लङ्घयेद्धीमान् नोपदध्यादधः क्वचित् । न चैनं पादतः कुर्य्यात् मुखेन न धमेद्बुधः । अग्नौ न निःक्षिपेदग्निं नाद्भिः प्रशमयेत्तथा । न वह्निं मुखनिश्वासैर्ज्वालयेन्नाशुचिर्बुधः । स्वमग्निं नैव हस्तेन स्पृशेन्नाप्सु चिरं वसेत् । नापक्षिपेन्नोपधमेत् न सूर्पेण च पाणिना । मुखेनाग्निं समिन्धीत मुखादग्निरजायत" कूर्मपु० १५ अ० । अग्निवैकृत्यं तस्य शान्तिश्च यथा "अनग्निर्दीप्यते यत्र राष्ट्रे यस्य निरिन्धनः । न दीप्यते चेन्धनवान् स राष्ट्रः पीड्यते नृपैः । प्रज्वलेदप्सु मांसं वा तथार्द्रञ्चापि किञ्चन । प्रासाद तोरणद्वारं नृपवेश्म सुरालयम् । एतानि यत्र दह्यन्ते तत्र राजभयं भवेत् । विद्युता वा प्रदह्यन्ते तत्रापि नृपतेर्भयम् । धूमवानग्निजो यत्र तत्र विद्यान्महद्भयम् । विनाग्निं विस्फुलिङ्गाश्च दृश्यन्ते यत्र कुत्रचित् । त्रिरात्रोपोषितश्चात्र पुरोधाः सुसमाहितः । समिद्भिः क्षीरवृक्षाणां सर्षपैस्तु घृतेन च । दद्यात् सुवर्णञ्च तथा द्विजेभ्यो गाश्चैव वस्त्राणि तथा भुवञ्च । एवं कृते पापमुपैति नाशं यदग्निवैकृत्यभवं द्विजेन्द्र" वह्निपु० १०५ अ० । ६तद्देवताके कृत्तिकानक्षत्रे ज्योतिषम् ।

वह्निकरी स्त्री वह्निं देहस्थवह्निं करोति उद्दीपयति कृ–ट ङीप् । १धातकीवृक्षे (धाइफुल) शब्द० । २वह्न्युद्दीपके त्रि० । [दाहागुरुणि राजनि० ।

वह्निकाष्ठ न० वह्नेर्दीप्तदाहायानुकूलं काष्ठम् शा० त० ।

वह्निगन्ध पु० वह्नौ दाहकाले गन्धो यस्य । यक्षधूपे शब्दच० ।

वह्निगर्भ पु० वह्निर्गर्भे यस्य । १वंशे २शमीवृक्षे स्त्री शब्दर० ।

वह्निज्वाला स्त्री वह्नेर्ज्वालेव पीडाकारकत्वात् । १धातकीवृक्षे राजनि० ६त० । २वह्निशिखायाम् ।

वह्निदीपक पु० वह्निं देहस्थवह्निं सेवनाद्दीपयति दीप–णिच्–ण्वुल् वह्निरिव दीप्यति दीप–ण्वुल् वा । १कुसुम्भे शब्दर० । २अग्न्युद्दीपके त्रि० । ३अजमोदायाम् स्त्री राजनि० । [ङीष् । जटामांस्याम् रत्नमा० ।

वह्निनी स्त्री वह्निं तत्कान्तिं नयति नी–ड गौरा० ।

वह्निपुष्पी स्त्री वह्निरिव तापकं पुष्पं यस्याः ङीप् । धातकीवृक्षे राजनि० ।

वह्निभोग्य न० ६त० । घृते शब्दप० ।

वह्निमन्थ पु० वह्नौ वह्निजननाय मथ्यतेऽसौ मन्थ–कर्मणि घञ्। १गणिकारीवृक्षे जटा०। ६त०। २वह्नेर्मन्थने राजनि०। (तत्रैव न०।

वह्निमित्र पु० वह्निर्मित्रं यस्य। १वायौ शब्दच० ६त०।

वह्निरेतस् पु० वह्नौ निषिक्तं रेतो येन। १शिवे वह्नौ हि निषिक्तात् शिववीर्यात् गङ्गादिसंक्रमेण कार्त्तिकेयोत्पत्तिः पुराणप्रसिद्धम्। ६त०।२काञ्चने च। [राजनि०।

वह्निलोहक न० वह्नेः प्रियं लोहं धातुः स्वार्थे क। कांस्ये

वह्निवधू स्त्री ६त०।१अग्निभार्य्यायां स्वाहायाम् २स्वाहान्तके मन्त्रे च। वह्निजायादयोऽप्यत्र।

वह्निवर्ण न०वह्नेरिव वर्णोऽस्य। रक्तोत्पले शब्दच०। [त्रिका०

वह्निवल्लभ पु० वह्नेर्वल्लभ उद्दीपकत्वात्। सर्जरसे (धुना)

वह्निवीज न० वह्नेर्देहस्थवह्नेर्बीजमिव उद्दीपकत्वात्। १जीरके ६त०। वह्निदेवताके तन्त्रोक्ते २रकारे च। ३निम्बूके राजनि० ४ हेमच०।

वह्निशिख न० वह्नेरिव रक्तत्वात् शिखाऽस्य। १कुसुम्भे अमरः। २कलिकार्य्यां ३अग्निकारीवृक्षे ४धातक्याञ्च स्त्री राजनि० ६त०। ५अग्निशिखायां स्त्री। [राजनि०।

वह्निसख पु० ६त०। १वायौ। देहस्थवह्नेर्दीपके २जीरके

वह्य न० वह–यत्। १शकटे २वाहनमात्रे च हेमच०। ३मुनिपत्न्यां स्त्री उणा०।

वा उखाप्तौ अक० गतौ सेवने च सक० चुरा० उभ० सेट्। वापयति ते अवीवपत् त। [वाति अवासीत्।

वा गमने हिंसने (सूचने) च अदा० पर० सक० अनिट्।

वा अव्य० वा–का। १विकल्पे २सादृश्ये ३अवधारणे ४समुच्चये अमरः। एष्वर्थेषु यथाक्रमं उदाहृतं यथा (विकल्पे) यथैवा ब्रीहिभिर्वा यजेत। (उपमाने) शिस्रो वाधो मण्डलं गोर्वा रङ्कः” इत्ये (अवधारणे) “सा वा शम्भोस्तदीया वा मूर्त्तिर्जलमयी मम”न तृतीयेत्यर्थः। (समुच्चये) वायुर्वा दहनो वा।५वितर्के ६पादपूरणे च मेदि० [जटा०

वांशिक पु० वंशो तद्वादनं शिल्पमस्य ठक्। वंशीवादनशीले

वांशी स्त्री वंशे भवः अण् ङीप्। वंशरोचनायाम् राजनि०

वाक पु० वच–घञ्। १वचने “नमोवाकं प्रशास्महे” उत्तररामचरितम्। पृषो० साधुत्वम्। ग्रन्थभेदे “वाकोवाक्येतिहासेत्यादि” छान्दोग्यम्। “वाकोवाक्यम् उक्तिप्रत्युक्तिरूपम्” भा०। बकस्येदम् तेषां समूहो वा अण्। २बकसम्बन्धिनि त्रि०। ४बकसंघे न० अमरः।

वाकुची स्त्री वाति क्विप् वाः कुच–शब्दे क गौरा०ङीष्

कर्म०। (हाकुच) १ओषधिभेदे २सोमराज्यां राजनि०।

वाक्कीर पु० वाचा कीलकवाचा कीर इव प्रियत्वात्। स्यालके शब्दर०।

वाक्छल न० गौत० सूत्रोक्ते छलभेदे “अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पनम् वाक्छलम्” गौ० सू०। वक्त्रा एकार्थशक्तबोधतात्पर्य्यकशब्दस्य प्रयुक्तस्यार्थान्तरबोधतात्पर्य्यकत्वकल्पना वाक्छलम्” वृत्तिः। यथा नेपालादागतोऽयं नवकम्बलवत्त्वात् इत्युक्ते कुतोऽस्य नवसंख्यकाः कम्बला इत्युक्तिः।

वाक्पति पु० ६त०। १बृहस्पतौ अमरः २पुष्यनक्षत्रे च वाचः पतिरिव। ३निर्दोषोद्धतवचनयुक्ते शब्दरत्ना०।

वाक्पथ पु० वाचः पन्थाः विषयः अच्समा०। वाक्यविषये

वाक्पारुष्य न० वाचा कृतं पारुष्यम्। १वाक्यकृते पारुष्ये तद्विषये २विवादभेदे च। तद्विवृतिः वीरमि०धृता यथा “तस्य च स्वरूपमाह नारदः “देशजातिकुलादीनामाक्रोशं न्यङ्गसंयुतम्। यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते” इति। आक्रोशः आक्षेपः सन्दर्भमिति यावत् अत्यन्तप्रियाः गौड़ा इति देशाक्रोशः। अत्यन्तलोलुपा ब्राह्मणा इति जात्याक्रोशः। “क्रूरचरिता वैश्वामित्रा इति कुलाक्षेपः। न्यङ्गं निकृष्टाङ्गमवद्यश्च तदुभययुक्तं यदुद्वेगजननार्थं वाक्यं तद्वाक्पारुष्यमित्यर्थः। तस्य त्रैविध्यमाह स एव “निष्ठुराश्लीलतीव्रत्वादपि तत् त्रिविधं स्मृतम्। गौरवानुक्रमात्तस्य दण्डोऽपि स्यात् क्रमाद्गुरुः” इति” निष्ठुरादीनां स्वरूपमाह स एव “साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम्। पतनीयैरुपाक्रोशैस्तीव्रमाहुर्मनीषिणः” इति। धिङ्मूर्ख! जाल्म! इत्यादि साक्षेपमाक्षेपं निष्ठुरम्। न्यङ्गसंयुतं अवद्यभगिन्यादिगमनसंयुतम् अश्लीलम्। पतनीयैः सुरापानादिभिरुपाक्रोशैस्तीव्रं वाक्पारुष्यमित्यर्थः। कात्यायनोऽपि “यस्त्वसत्यं पितरकैः परमाक्षिपति कश्चित्। अभूतैर्वाथ भूतैर्वा निष्ठुरा वाक् स्मृता तु सा। न्यग्भावकरणं वाचा क्रोधात्तु कुरुते यदा। हस्तदेशकुलानान्तु अश्लीला सा बुधैः स्मृता। महापातकयोक्त्री च राजद्वेषकरी च या। जातिभ्रंशकरी वाच तीव्रा सा प्रथिता तु वाग्गिति।” कल्पतरौ न्यङ्गावगूरणमिति पठित्वा निकृष्टाङ्गप्रकाशनेन तिरस्करणमिति व्याख्यातम्। न्यग्भावकरणमिति तु माधवादिसम्मतः पाठः। प्रथमसाहसोत्तमभेदेन त्रैविध्यमाह बृहस्पतिः “दे

ग्रामकुलादीनां क्षेपः पापेन योजनम्। द्रव्यं विना तु प्रथमं वाक्पारुष्यं तदुच्यते। भगिनीमातृसम्बन्धमुपपातकशंसनम्। पारुष्यं मध्यमं प्रोक्तं वाचिकं शास्त्रवेदिभिः। अभक्ष्यापेयकथनं महापातकदूषणम्। पारुष्यमुत्तमं प्रोक्तं तीव्रं मर्माभिघट्टनमिति।" द्रव्यं विनेत्यत्र द्रव्यशब्दोऽभिधेयपरः। तेनोच्यमानार्थव्यतिरेकेणैव विषमभिधानं वाक्पारुष्यमित्यर्थः इति कल्पतरौ। द्रव्यं विना द्रव्यवैशिष्ट्यं विनेति मदनरत्ने। अभिघट्टनं उत्पाटनम्। निष्ठुराक्रोशे दण्डमाह याज्ञवल्क्यः "सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम्। क्षेपं करोति चेद्दण्ड्यः पणानर्द्धत्रयोदशानिति। अन्यथास्तोत्रमिन्दास्तुतिः। न्यूनाङ्गाः करादिरहिताः। न्यूनेन्द्रियाः नेत्रादिरहिताः। रोगिणः कुष्ठ्यादयः अर्द्धत्रयोदशान् अर्द्धाधिकद्वादशपणानित्यर्थः। एतत् सवर्णविषयम्। अतएव बृहस्पतिः "समजातिगुणानान्तु वाक्पारुष्ये परस्परम्। विनयोऽभिहितः शास्त्रे पणा अर्द्धत्रयोदशाः" इति। "विष्णुरपि "समवर्णाक्रोशे द्वादश पणान्दण्ड्य इति"। परस्परमिति शेषः। मनुनारदावपि "समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे। वादेष्ववचनीयेषु तदेव द्विगुणं भवेदिति"। शङ्खलिखितावपि "समवर्णव्यतिक्रमे द्वादशपणा यथाक्रमविशिष्टाक्षेपेषु विशिष्टस्य चतुर्विंशतिरविशिष्टस्यातिक्रमे च विशिष्टस्य ततोऽर्द्धमिति। अत्र द्वादशपणार्द्धद्वादशयोरुत्कृष्टापकृष्टत्वेन व्यवस्था। कात्यायनोऽपि "यो गुणान् कीर्त्तयेत् क्रोधान्निर्गुणे वा गुणस्तताम्। अन्यसंज्ञानियोक्ता च वाग्दुष्टं तन्नरं विदुरिति" "नारदोऽपि "दुष्टस्यैव तु यो दोषान् कीर्त्तयेत् क्रोधकारणात्। अन्यायदेशवादी च वाग्दुष्टं तन्नरं विदुरिति" "अत्र क्रोधकारणादित्यनेन दुष्टपरित्यागार्थं दोषकीर्त्तने न दोष इति सूचितम्। अतएवोक्तं कात्यायनेन "यत्र स्यात्परिहारार्थं पतितस्तेन कीर्त्तितः। वचनात्तत्र न स्यात्तु दोषो दण्डं विभावयेदिति" "वचनात् दोषकीर्त्तनात्। यत्राभियोगादौ पातित्यादिकं साधयेत्तत्रापि वर्णनाद्दोषो न स्यादिति यत्र विभावयेदित्यस्यार्थ उक्तः स्मृतिचन्द्रिकायाम्। अत्रापि दण्डपारुष्यन्यायेन युगपत्प्रवृत्तयोर्दण्डतुल्यत्वं अयुगपत्प्रवृत्तयोः पूर्वप्रवृत्तस्य दण्डाधिक्यमिति द्रष्टव्यम्। जातिगुणकृते विशेषे दण्डवैषम्यमाह बृहस्पतिः "समानयोः समो दण्डोन्यूनस्य द्विगुणो दमः। "उत्तमस्याधिकः प्रोक्तो वाक्पारुष्ये परस्परमिति"। हीनस्योत्तमाक्षेपे द्विगुणः उत्तमस्य हीनाक्षेपेऽर्द्धपरिमितो दण्ड इत्यर्थः। याज्ञवल्क्योऽपि "अर्द्धोऽधमेषु द्विगुणः परस्त्रीषूत्तमेषु च। दण्डप्रणयनं कार्यं वर्णजात्युत्तराधरैरिति" "अर्द्धः सार्द्धद्वादशपणात्मक इत्यर्थः पूर्ववाक्ये "पञ्चविंशतिको दम" इति पञ्चविंशतेः [illegible]ात्। वर्णा ब्राह्मणादयः। जातयो मूर्द्धावसिक्तादयः। ते च ते उत्तराधराश्च वर्णजात्युत्तराधरास्तैरन्योन्याक्षेपे क्रियमाणे दण्डस्य प्रणयनमूहनीयं ज्ञातव्यम्। उत्तराधरभावमालोच्य दण्डः कल्पनीय इत्यर्थः। तमेव कल्पनीयं दण्डं प्रदर्शयति मनुः "शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति। वैश्योऽध्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति। विप्रः पञ्चाशतं दण्ड्यः क्षत्रियस्याभिशंसने। वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दम इति।" बृहस्पतिरपि क्षिपन् विप्रादिकं दद्यात् पञ्चाशत्पणिकं दममिति"। शङ्खलिखितावपि "आक्रोशे ब्राह्मणस्य क्षत्रियः पणशतं दण्ड्यः, शतार्द्धं वैश्यस्य पञ्चविंशतिं शूद्रस्येति"। बृहस्पतिरपि। "विप्रः शतार्द्धं दण्ड्यस्तु क्षत्रियस्याभिशंसने। विशस्तथार्द्धं चाथशूद्रस्यार्द्धत्रयोदश। शूद्रस्यासमुदितो विनयोऽनपराधिनः। गुणहीनस्य पारुष्ये ब्राह्मणो नापराप्नुयात्। वैश्यस्तु क्षत्रियाक्रोशे दण्डनीयः शतम्भवेत्। तदर्द्धं क्षत्रियो वैश्यं क्षिपन् विनयमर्हति। शूद्राक्रोशे क्षत्रियस्य पञ्चविंशतिको दमः। वैश्यस्य चैतद्द्विगुणः शास्त्रविद्भिरुदाहृतः। वैश्यमाक्षारयन् शूद्रो दाप्यः स्यात् प्रथमं दमम्। क्षत्रियं मध्यमञ्चैव विप्रमुत्तमसाहसमिति।" जिह्वाच्छेदनरूपोऽत्रोत्तमसाहसो द्रष्टव्यः। तथा च स एव "धर्म्मोपदेशकर्त्ता च वेदाद्याहरणान्वितः। आक्रोशकस्तु विप्राणां जिह्वाच्छेदेन दण्ड्यते" इति शूद्र इत्यनुषङ्गः। आपस्तम्बोऽपि "जिह्वाच्छेदनं शूद्रस्यार्य्यं धार्म्मिकमाक्रोशतः" इति। गौतमोऽपि "शूद्रो द्विजातीनभिसन्धायाभिहत्य च वाग्दण्डपारुष्याभ्यामङ्गमोच्यो येनोपहन्यादिति"। अभिसन्धाय बुद्धिपूर्वं वाचातिक्रम्य अभिहत्य उपेत्य दण्डेन ताडयित्वा अङ्गमोच्यो येनाङ्गेनाभिहन्यते तेन वियोजनीय इत्यर्थः। गुर्व्वाद्याक्रोशे त्वाह शङ्खलिखितौ तथाऽधिकतान् विप्रान् गुरुं च निधीनवत्युत्तनं ताडनं वा गोमयानुलेपनं

ऽङ्गारोहणं दर्पहरणं वा दण्डो वेति। दण्डः कार्षापणशतरूपः। अतएव विष्णुः "गुरूनाक्षारयन् कार्षापणशतमिति"। पुत्रादिभिर्मात्रादीनामाक्रोशे दण्डमाह मनुः "मातरं पितरं जायां भ्रातरं श्वशुरं गुरुम्। आक्षारयन् शतन्दाप्यः पन्थानञ्चाददद्गुरोरिति"। भ्रातरं ज्येष्ठभ्रातरम्। एतच्च वाक्पराधेषु मात्रादिषु निरपराधायां जायायामिति मिताक्षरायामभाणि। शस्त्राद्यधिक्षेपे दण्डमाह वृहस्पतिः "क्षिपन् शस्त्रादिकं दद्यात् पञ्चाशत्पणिकं दममिति।" बाह्वादिच्छेदन निष्ठुरभाषाभिभाषणे दण्डमाह याज्ञवल्क्यः "बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः। शत्यस्तदर्द्धिकः पादनासाकर्णकरादिष्विति।" बाह्वादिविनाशे वाचिके करिष्यामीति वाचा प्रतिपादिते शत्यः शतपरिमितो दण्डः। पादादिभङ्गं करिष्यामीत्याक्षेपे पञ्चाशत्परिमितो दण्ड इत्यर्थः। एवंवादिनोऽशक्तस्य दमपथा दण्डनीया इत्याह स एव "अशक्तस्तु वदन्नेवं दण्डनीयः पणान्दशेति।" यः पुनः शक्तोऽशक्तस्य बाह्वादिभङ्गाक्षेपं करोति न केवलं स दण्ड्यः किन्तु अशक्तक्षेमार्थं प्रतिभुवमपि दापनीय इत्याह स एव "तथा शक्तः प्रतिभुवन्दाप्यः क्षेमाय तस्य त्विति"। अश्लीलभाषणे दण्डमाह स एव "अभिगन्तास्मि भगिनीं मातरं वा तवेति ह। शपन्तन्दापयेद्राजा पञ्चविंशतिकं दममिति।" तीव्राक्रोशे दण्डमाह स एव "पतनीय कृते क्षेपे दण्डमुत्तमसाहसम्। उपपातकयुक्ते तु दाप्यः प्रथमसाहसमिति।" पतनीयैः पातित्यहेतुभिर्ब्रह्महत्यादिभिः। उपपातकानि गोवधादीनि। मनुरपि "ब्राह्मणक्षत्रियाभ्यान्तु दण्डः कार्य्यो विजानता। ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः। विट्शूद्रयोस्त्वेवमेव स्वजातिं प्रति तत्त्वतः। छेदवर्जं प्रणयनं दण्डस्येति विनिश्चयः। पापोपपातककारो महापातकशंसकाः। आद्यमध्योत्तमान्दण्डान्दद्युस्ते यथाक्रममिति।" विष्णुरपि "परस्परपतनीये क्षेपे कृते तूत्तमसाहसं उपपातकयुक्तन्तु मध्यमम् त्रैविद्यवृद्धानां क्षेपे जातिपूगानाञ्च ग्रामदेशयोः प्रथममिति"। देशाद्याक्रोशे दण्डमाह वृहस्पतिः "देशादिकं क्षिपन्दाप्यः प्रथमं साहसोद्गम। पापेन योजयन् दर्पाद्दाप्यः प्रथमसाहसम्। एष दण्डः समाख्यातः पुरुषापेक्षया मया। समन्यूनाधिकत्वेन कल्पनीयो मनीषिभिरिति।" याज्ञवल्क्योऽपि "मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोरिति।" राज्ञ आक्रोशे दण्डमाह नारदः "अवक्रुश्य च राजानं वर्त्मनि स्वे व्यवस्थितम्। जिह्वाच्छेदाच्छुद्धिः सर्वस्वहरणेन वेति।" याज्ञवल्क्योऽपि "राज्ञोऽनिष्टप्रवक्तारन्तस्यैवाक्रोशकन्तथा। तन्मन्त्रस्य च भेत्तारञ्छित्त्वा जिह्वां प्रवासयेदिति।" सत्यदोषाभिधानेऽपि वाक्पारुष्यदण्डोऽस्त्येव तथा च नारदः "पतितं पतितेत्युक्त्वा चौरं चौरेति वा पुनः। वचनात्तुल्यदोषः स्यान्मिथ्याद्विर्दोषतां व्रजेदिति।" मनुनारदावपि "काणं वाप्यथ वा खञ्जमन्यं वापि तथाविधम्। तथ्येनापि ब्रुवन्दाप्यो दण्डं कार्षापणावरमिति।" विष्णुरपि "काणखञ्जादीनान्तथ्यवाद्यपि कार्षापणद्वयमिति।" एतच्च दुर्वृत्तविषयमिति माधवीये विद्यारण्यश्रीपादैरभ्यधायि। मिथ्यावदनशीलानां दण्डमाह कात्यायनः "अनृतास्वानशीलानाञ्जिह्वाच्छेदो विशोधनमिति।" हारीतोऽपि "मिथ्याभाषिणां सेवकानाम् राजा जिह्वाञ्छिन्द्यादुद्दण्डयेद्वेति" सेवको भृत्यकः। कश्चिद्वाक्पारुष्यकृतोऽर्द्धदण्डमाहोशनाः "मोहात् प्रमादात्संहर्षात् प्रीत्या वोक्तं मयेति यः। नाहमेवं पुनर्वक्ष्ये दण्डार्द्धं तस्य कल्पयेदिति।"

वाक्य न॰ वच–ण्यत् चस्य कः। "वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" इत्युक्ते १पदसंघे सा॰द॰। २स्वार्थबोधसमाप्ते पदसमुदाये वैयाकरणाः। [अवाङ्क्षीत्।

वाक्ष स्पृहायां भ्वा॰ पर॰ सक॰ सेट् इदित्। वाङ्क्षति

वागीश पु॰ वाचामीशः। १वृहस्पतौ "वागीशाद्याः सुमनसः" इति न्यायमाला। २सरस्वत्यां स्त्री "वागीशा हृदये यस्य" इति भाग॰टीकोपक्रमे श्रीधरः। ३पुष्यर्क्षे च

वागीश्वर पु॰ ६त॰। १वृहस्पतौ २गुरौ च ३तत्पत्न्यां स्त्री ङीप् "वागीश्वरीमतुल्यतां फुल्लेन्दीवरलोचनाम्। वागीश्वरेण संयुक्ताम्" इति तन्त्रम्। ४सरस्वत्यां स्त्री ङीप् ५मञ्जुघोषे पु॰ त्रिका॰। [सोमराज्याम् अमरः।

वागुजी स्त्री वाचा गुज्यते ध्वन्यते गुज–क गौरा॰ ङीष्।

वागुरा स्त्री वा–हिंसने उरच् मुट् च। मृगयार्थं मृगबन्धनपाशादौ अमरः। [यस्य। व्याधे।

वागुरावृत्ति पु॰ वागुरा मृगबन्धनपाशादिरेव वृत्तिर्जीविका

वागुरिक पु॰ वागुरा प्रहरणं यस्य वागुरयाचरति वा ठक्। व्याधे अमरः।

वाग्गुद पुंस्त्री॰ पक्षिभेदे त्रिका॰ गुडहरके तज्जातिप्राप्ति-

मन्तुनोक्ता “गोधा गां वागगुदो गुडम्” इत्येति शेषः

वाग्गुलि पु० राज्ञां ताम्बूलदातरि रत्नमाला ।

वाग्डम्बर पु० ६त० । १वाक्यस्तोमे २वक्तृवशाक्ये च ।

वाग्दण्ड पु० वाचो वागिन्द्रियस्य दण्डः संयमनम् । १मित-२भाषणे २वाक्यसंयमे च ।

वाग्दत्ता स्त्री वाचा दत्ता । विधिना वाक्यमात्रेण दातुं कृतसङ्कल्पायां कन्यायाम् “वाचा दत्ता मनोदत्तेति उद्वा०त०

वाग्दरिद्र त्रि० ६त० । मितभाषिणि शब्दमा० ।

वाग्दान न० ६त० । कन्याया वाङ्मात्रेण दाने “ततो वाग्दानपर्यन्तं यावदेकाहमेव च” शु०त० ।

वाग्दुष्ट त्रि० वाचा दुर्वचनेन दुष्टः । शुद्धेऽपि वस्तुन्यशुद्धरूपतया कथनेन दूषिते । “वाग्दुष्टं भावदुष्टं च वर्जयेदिति” स्मृतिः ।

वाग्देवता स्त्री वाचां देवता । सरस्वत्यां “वाग्देवताचरितचित्रितचित्तसद्मा” जयदेवः । वाग्देव्यादयोऽप्यत्र ।

वाग्मिन् त्रि० वाच्+अस्त्यर्थे ग्मिनि चस्य कः तस्य लोपः । १प्रशस्तवाक्यवक्तरि अमरः । २वृहस्पतौ पु० मेदि० । ४विष्णौ पु० विष्णुस० । [२निर्वेदे ३कल्ये अव्ययः ।

वाग्य त्रि० वाचं यच्छति यम-ड । १वाग्दरिद्रे शब्दमा०

वाग्यत त्रि० वाक् वागिन्द्रियव्यापारो यता येन । मौनधारिणि मुनौ अमरः “वाग्यतस्त्रिषवणं चरेत्” स्मृतिः ।

[वा]ग्यम त्रि० वाचं तद्व्यापारं यच्छति यम-अच् । मुनौ अमरः ।

[वा]ग्मती स्त्री “हिमाद्रेस्तुङ्गशिखरात् प्रोद्भूता वाङ्मती नदी” इत्युक्ते नदीभेदे । सा च मिथिलादेशसन्निकृष्टतया वहति ।

[वा]ङ्मय त्रि० वाक्स्वरूपम् मयट् चस्य कः तस्य ङः । १वाक्यस्वरूपे शास्त्रे । २वाक्यजनिते पापभेदे च । “पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्वशः । असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्” मनुः । तथा “परुषवचनमपवादः पैशुन्यमनृतं वृथालापो निष्ठुरवचनम् वाङ्मयानि षट् । परेषां देशजातिकुलविद्याशिल्परूपवृत्ताचारपरिच्छदशरीरकर्मजीविनां प्रत्यक्षदोषवचनं परुषम् । “यस्मिन्नुक्ते क्रोधसन्तापभावसंजननं स्वयः । परुषं तत्र विज्ञेयं यस्मान्नान्यत् तथाविधम् । चक्षुष्मानिति कुम्राणं चाण्डालं ब्राह्मणेति च । प्रशंसानिन्दनं द्वेषात् परुषाद्भिन्नमिष्यते” । तेषामेव परुषवचनानामपरोक्षमुदाहरणम् अपवादः । गुरुन्पतिबन्धुभ्रातृमित्रलक्षाणे सर्वोपघातार्थं दोषोपाख्यानं पैशुन्यम् । अनृतं द्विविधं असत्यमसंवादश्चेति “देशराष्ट्रप्रसङ्गाच्च परार्थपरिजल्पनात् । नर्महासप्रसङ्गाच्च भाषणं व्यर्थभाषणम् । गुह्याङ्गमैथुनस्थानां भाषणं निष्ठुरं विदुः । यदन्यद्वा वचो नीचस्त्रीपुंसोर्मिथुनाश्रयम् । इत्येवं षड्विकल्पस्य दुष्टवाक्यस्य भाषणात् । इह चामुत्र च क्रूरमनर्थं प्रतिपद्यते” । प्रशंसयानिन्दनं प्रशंसानिन्दनम् । अत्र चतुर्विधवद्विधयोरविरोधः । समत्वासमत्वभेदानादरेण पारुष्यापवादयोरैक्यात् निष्ठुरस्य परुषान्तर्भावाच्च । असम्बद्धप्रलापव्यर्थभाषणयोः पर्यायत्वाच्चार्थान्तरम्” ति०त० ।

वाङ्मुख न० ६त० उपन्यासे प्रथमवाक्योपक्रमे अमरः ।

वाचंयम त्रि० वाचां यच्छति वाचा+यम-ख मुम् ह्रस्वश्च । १मितभाषिणि । २मौनावलम्बिनि मुनौ पु० अमरः ।

वाच पुंस्त्री० वच-णिच-अच् । (वाचा) इति ख्याते मत्स्यभेदे राजवल्लभः स्त्रियां ङीप् ।

वाचक त्रि० वक्ति अभिधाशक्त्या बोधयति वच-ण्वुल् । “साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः” इत्युक्ते १शब्दभेदे २कथके त्रि० । वाचयति वच-णिच्-ण्वुल् । ३पुराणादिपाठके पु० “वाचकः पूजितो येनेति” पुरा० “ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात् । श्रुत्वान्यवर्णजाद्राजन् ! वाचकान्नरकं व्रजेत्” । तथा “देवाग्रेऽग्रतः कृत्वा ब्राह्मणानां विशेषतः । पश्चिमं शिखिनं कुर्याद्वाचकः कुरुनन्दन ! । पुनर्वक्रीत तत्फलं न मुक्त्वा धारयेत् कश्चित् । हिरण्यं रजतं गावः तथा कांस्योपदोहनाः । दत्त्वा तु वाचकायेह श्रुतस्याप्नोति तत् फलम्” । कांस्योपदोहनाः कांस्यक्रोडाः “वाचकः पूजितो येन प्रसन्नास्तस्य देवताः” । तथा “श्रुत्वा पर्वसमाप्तिञ्च पूजयेद्वाचकं बुधः । आत्मानमपि विक्रीय य इच्छेत् सुफलं कृतम्” । तथा “विस्पष्टमद्रुतं शान्तं स्पष्टाक्षरपदं तथा । कलस्वरसमायुक्तं रसभावसमन्वितम् । बुध्यमानः सदाह्यर्थं ग्रन्थार्थं कृत्स्नशो नृप ! । ब्राह्मणादिषु सर्वेषु ग्रन्थार्थं चार्पयेत् नृप ! । य एवं वाचयेद् ब्रह्मन् स विप्रो व्यास उच्यते” । तथा “सप्तस्वरसमायुक्तं काले काले विशाम्पते ! । प्रदर्शयन् रसान् सर्वान् वाचयेद्वाचको नृप” ति०त० ।

वाचकलक्षणादि हेमा० दा० नन्दिपु० उक्तं यथा

“वाचको ब्राह्मणः प्राज्ञः श्रुतशास्त्रो महामनाः । अभ्यस्ताक्षरविन्यासो हस्तशास्त्रविशारदः । शब्दार्थवित्

प्रमत्तश्च विनीतो मेधया युतः। नीतिज्ञो वाक्यकुशलः सर्वशास्त्रविशारदः” इत्युपक्रमे एवंविधाः नतो वाच्यं वाचकेन विपश्चिता। तपःप्रभावजं सर्वं स्वर्गादिफलसाधकम्। सर्वैर्विबोध्य वै वाच्यमध्यायादि च यद् भवेत्। ऋग्वोक्तियुक्तसंक्षोभं धारावर्त्तेन (वेगेन) वाचयेत्। प्रराम वशितैर्वाक्यैर्वाचयेत् इहवक्रमे। नानाहस्तानुरूपेण वाचिकेन च वाचयेत्। सर्वाध्याये समाप्ते च कथापर्य्यन्त एव वा। प्रथमसत्त्वसंयोगे कुर्य्यादिति विरामणम्। समाप्तौ वाचको भीष्म! ब्रूयादेवं विचक्षणः। अवधार्य्यं जगच्छान्तिमन्ते शान्त्युदकं सृजेत्। स्वस्तं स्वस्तं ब्रूयादस्तु व्याख्यातमित्यदः। लोकः प्रवर्त्ततां धर्मे राजा चास्तु सदा जयी। धर्म्मवान् धनसम्पन्नो गुरुवान् निरामयः। इति प्रोच्य यथाऽऽसनं गन्तव्यं च विभावतः।

वाचन न०वच-णिच्-स्वार्थे वा णिच्-ल्युट्। १पठने २कथने च युच्। पठने स्त्री। [पापादौ।

वाचनिक त्रि० वचनेन निर्वृत्तम् ठक्। वाक्यनिष्पादिते

वाचस्पति पु० ६त०अलुक्समा०। १बृहस्पतौ।२पुष्यनक्षत्रे च

वाच(चा) स्त्री उच्यतेऽसौ अनया वा वच-क्विप् नि० वा टाप्। १वाक्ये अमरः २वागिन्द्रिये च।

वाचाट त्रि० वाक्+कुत्सायां वाङ्बहुत्वेऽस्त्यर्थे आटच् अत्वात् न कः। कुत्सितबहुभाषिणि अमरः। आलच्। वाचालोऽप्यत्र।

वाचिक त्रि० वाचा कृतम् वाच्+ठक् अत्वात् न कः। वाक्यनिष्पादिते पापादौ वाङ्मयशब्दे दृश्यम्। २वाक्यरत्नभेदे। “आलापश्च विलापश्च संलापश्च प्रलापकः। अनुलापोऽपलापश्च सन्देशश्चातिदेशिकः। अपदेशोपदेशौ च निर्देशो व्यपदेशकः। कीर्त्तिता वचनारम्भा द्वादशामी मनीषिभिः” उज्ज्वलमणिः। [नैर्मल्ये च।

वाचोयुक्ति स्त्री ६त० अलुक्स०। १वाचायुक्तिवृत्तौ २वाक्य-

वाच्य न० वच-भावे ण्यत् न कः। १दूषणे २प्रतिपादने धरणिः। ३वचने च। कर्म्मणि ण्यत्। ४दूष्ये ५प्रतिपाद्ये अभिधया बोध्यार्थे च सा० द०।

“नचास्तत्वबहुत्वाभ्यां प्रयोगार्था विधिप्रत्ते। वाच्यवाचकभावोऽयमपपादादिशब्दवत्। विनीतवेऽप्यसमस्तो वद्यमस्तैः प्रयुज्यते। तथापि वाच्यकृतस्य भावते शकटाङ्गवत्” म०त०भट्टशा०। [भावे-ल्यु। वाञ्छा।

वाछ कामे भ्वा०पर०सक०सेट् इदित्। वाञ्छति अवाञ्छीत्।

वाज न० वज-घञ्। १पक्षे २घृते ३जले ४यज्ञे च मेदि०। ५शरपक्षे अमरः ६वेगे पु० ७निस्वने ८पक्षे पु० मेदि० १०मुनौ पु०विश्वः। [कात्या०श्रौ०तत्प्रकारादि दृश्यम्।

वाजपेय पुंन० वाजमन्नं घृतं वा पेयमत्र। यागभेदे

वाजपेयिन् पु० वाजपेय+अस्त्यर्थे इनि। १वाजपेययागकर्त्तरि उपचारात् २तद्यज्ञे च।

वाजसन पु० वाजमन्नं सनोति ददाति सन-ल्युट्। १विष्णौ विष्णुस०। २शिवे भा० आनु० १७अ०।

वाजसनि पु० राजस्य अन्नस्य सनिर्दानं येन। सूर्य्ये “आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः” इत्युक्तेः अस्य वृष्टिद्वारा अन्नदातृत्वात् तथात्वम्।

वाजसनेय पु० वाजसनेः सूर्य्यस्य आमः ठक्। याज्ञवल्क्ये “आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते” बृहदारण्य० श्रुतिः। अस्यार्थः। “आदित्यादधीतान्यादित्यानि शुक्लानि शुद्धानि। इयमत्र आख्यायिका। व्यासशिष्यो वैशम्पायनो याज्ञवल्क्यादिभ्यः स्वशिष्येभ्यो यजुर्वेदमध्यापयत्। तत्र दैवात् केनापि हेतुना क्रुद्धो वैशम्पायनो याज्ञवल्क्यं प्रत्युवाच मदधीतं त्यजेति। स योगसामर्थ्यात् मूर्त्तां विद्यां विधायोद्ववाम। वान्तानि यजूंषि गृह्णीतेति गुरुणा आज्ञप्ता वैशम्पायनशिष्यास्तित्तिरयो भूत्वा यजूंष्यभक्षयन्। तानि यजूंषि बुद्धिमालिन्यात् कृष्णानि जातानि। ततो दुःखितो याज्ञवल्क्यः सूर्य्यमाराध्यान्यानि शुक्लानि यजूंषि प्राप्तवान्। तानि च जाबालगौधेयकाण्वमाध्यन्दिनादिभ्यः पञ्चदशशिष्येभ्यः पाठितवान्” वेददी०। “एवं स्तुतः स भगवान् वाजिरूपधरो रविः। यजूंष्ययातयामानि मुनयेऽदात् प्रसादतः। यजुर्भिरकरोच्छाखा दशपञ्चशतैर्विभुः। जगृहुर्वाजसनयाः। काण्वमाध्यन्दिनादयः” भाग० १२।६।६७ श्लो०

वाजसनेयिन् पु० ब०व०। वाजसनेयेन प्रोक्तमधीयते इनि। यजुर्वेदशाखाभेदाध्यायिषु विप्रादिषु। २तद्दृष्टरीत्या कर्मादिषु सूत्रेषु च “सूत्रा वाजसनेयिनः” म०भा०व०।

वाजिदन्त पु०वाजिनां दन्त इव पुष्पमस्य। १वासके रत्नमा० कप्। वाजिदन्तक तत्रैव।

वाजिन् पु० वाजः वेगः पक्षो वा अस्त्यस्य इनि। १घोटके २वासके ३वाणे ४च मेदि०। ५वेगवति त्रि० स्त्रियां ङीप्। सा च ६ऋषभगन्धायाम् ७मेदक्याम् स्त्री

राजनि० । ७देवभेदे पु० । वाजिनशब्दे दृश्यम् ।

वाजिन पु० वाजिभ्यो देयम् अण् । आमिक्षानिःसृतजले "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इति श्रुतिः ।

वाजिपृष्ठ पु० वाजिन इव पृष्ठमस्य । अम्लानवृक्षे शब्दच० ।

वाजिभक्ष पु० भक्ष्यते भक्ष–कर्मणि घञ् ६त० । चणके राजनि० । [मुद्गे राजनि० ।

वाजिभोजन पु० वाजिभिर्भुज्यते भुज–कर्मणि ल्युट् ।

वाजीकरण न० अवाजी वाजीव क्रियतेऽनेन वाजिन्+च्वि कृ-ल्युट् । "यद्द्रव्यं पुरुषं कुर्य्यात् वाजिवत् सुरतक्षमम् । तद्वाजीकरणं ख्यातम्" इत्युक्ते वीर्य्यवृद्धिकरणे औषधभेदे । सुश्रुते दृश्यम् ।

वाञ्छा स्त्री वाछि–अ । इच्छायाम् इष्टसाधनताधीजन्येऽभीष्टविषये चित्तवृत्तिभेदे अमरः ।

वाट पु० वट–घञ् । १पथि २वृतिस्थाने च मेदि० गौरा० ङीष् ४वास्तुभूमौ ५कुट्यां स्त्री मेदि० । ६वाट्यालके शब्दर० ।

वाटिका स्त्री वट–ण्वुल् । १वास्तुभूमौ (बेड़िबाबा) २क्षुपे ३हिङ्गुपत्र्यां च शब्दच० । [क्षुपभेदे रत्नमा० ।

वाट्या स्त्री वाट्यै हिता तत्र साधुर्वा यत् । (बेड़ियाला)

वाट्याल पु० वाटीमलति भूषयति अल–अण् । (बेड़ियाला) क्षुपभेदे शब्दर० गौरा० ङीष् तत्रैव स्त्री । ण्वुल् । वाट्यालक तत्रैवार्थे पु० शब्दर० । [अवाडिष्ट ।

वाडृ आप्लावे भ्वा० आ० अक० सेट् चङि न ह्रस्वः । वाडते

वाढ न० वह–क्त नि० । १अतिशये २तद्युक्ते त्रि० अमरः । प्रशो० श्रम् । वाढम् ३प्रतिज्ञायां ४स्वीकारे च अव्य० अमरः ।

वाण पु० वण–घञ् । १शरे अमरः २गवां स्तने ३दैत्यभेदे ४केवले मेदि० ५वह्नौ त्रिका० ६काण्डावयवे विश्वः ७भद्रमुञ्जे राजनि० कादम्बरीग्रन्थकारके कविभेदे च "पञ्चबाणस्तु बाणः" इति प्रसन्नराघवम् । ८नीलझिण्ट्यां पुंस्त्री० अमरः । अश्मोत्र्यादित्वमित्यन्ये । [शब्दर० ।

वाणपुर न० ६त० । शोणितपुरे (कोटरी) पुराख्ये पुरभेदे

वाणवार पु० वाणं परसन्धानं वारयति वृ–अण् । योधादेर्वाहाकारे सन्नाहे कवचे शब्दच० ।

वाणहन् पु० वाणं तन्नामासुरं हतवान् हन–ताडने भूते क्विप् । श्रीकृष्णे वाणजिदादयोऽप्यत्र ।

वाणि स्त्री वण–इण् वा ङीप् । १वयने अमरः २वयनदण्डे देमनि हेम० । ५वाक्ये ६तद्देवतायाम् अमरः ङीप् ।

वाणिनी स्त्री वण–णिनि ङीप् । १नर्त्तक्यां २छेके ३मत्तस्त्रियाम् हेमच० । वाण+अस्त्यर्थे इनि । ४शरयुते त्रि० ।

वात गतौ सेवायां सुखीकरणे च सक० अद०.च०उभ०सेट् । वातयति ते अववातत् त ।

वात पु० वा–क्त । स्पर्शमात्रविशेषगुणके भूतभेदे १पवने अमरः । अनिलशब्दे १६४पृ० दृश्यम् । २देहस्थे धातुभेदे च । ३गन्तरि त्रि० । जारे ५लम्पटनायके च "प्रभातवाता हतीति" भट्टिः । ६वातजन्ये रोगभेदे भावप्र० यथा "कषायकटुतिक्तकप्रमितरूक्षलघ्वशनतः पुरःपवनजागरप्रतरणाभिघातश्रमैः । हिमादनशनात् तथा निरूहणात् धातुक्षयात् मलादिरयधारणात् मदनशोकचिन्ताभयैः । अतिव्यवायश्रमोल्लङ्घनात् गदकृतातिमांसक्षयादतीव वमनात् अथामतिविरेचनादामतः । पयोदसमये दिनस्वपदयोस्तृतीयांशयोर्जरामतिगतेऽशिते शिशिरसंज्ञकालेऽपि च । देहे स्रोतांसि रिक्तानि पूरयित्वाऽनिलो बली । करोति विविधान् रोगान् सर्वाङ्गैकाङ्गसंश्रयान्" । प्रमितरूक्ष वैपरीत्ये प्रायशस्तेन अपरिमितमित्यर्थः । प्रकर्षेण मितमल्पत्वं वा लघ्वशनम् अतिस्वल्पं भोजनादि । कतिचिदन्नानि सर्वाण्यपि वातलानि यत आह गुणरत्नमालायाम् "नीवारस्त्रिपुटः सतीनचणकः श्यामाकमुद्गाढकीनिष्पावाश्च मकुष्टकश्च वरटामसूरयवकः कोद्रवः" । एते वातकरा इति शेषः । नीवारः प्रसाधिका (चीना) इति लोके । त्रिपुटः (खेसारी) । सतीनः कलायः । निष्पावो राजमाषः । (वरवटी) इति लोके । मकुष्टकः (माठा) इति लोके । वरटा वरटिका (वरई) इति लोके । मसूरयवकः (मसूरी) इति लोके । पुरःपवनः प्राग्वातः, आमतः आमेन मार्गावरणात् । यत उक्तम् "वायोर्द्धातुक्षयात् कोपो मार्गस्यावरणेन चेति" । पयोदसमये वर्षासु । जरामतिगतेऽशिते भुक्तेऽजीर्णतां गते । देहे स्रोतांसीत्यादिना संप्राप्तिरुक्ता । कषायादिभिर्हेतुभिर्वर्षादौ समये हेतुमते बली अनिलः प्रवृद्धो वायुः करोति विविधान् रोगान् । ते रोगाः कथ्यन्ते "शिरोग्रहोऽन्नद्वेषत्वं तृष्णात्यर्थं हनुग्रहः । जिह्वास्तम्भो गद्गदत्वं मिन्मिनत्वञ्च मूकता । वाचालता प्रलापश्च रसानामनभिज्ञता । बाधिर्य्यं "कर्णनादश्च स्पर्शाज्ञत्वं तथार्दितम् । मन्यास्तम्भोऽत्र कथितो दाढ्यशोषपरातुकः । अर्दिता येन जिह्वाची अड्डवात उदीरितः ।

आध्मानञ्च प्रत्याध्मानं वाताष्ठीला प्रत्यष्ठीला ।"तूणी च प्रतितूणी च वस्तिवैगुण्यमेव च । आटोपः पार्श्वशूलञ्च त्रिकशूलं तथैव च । मूकश्च मूकत्वं मूत्रनिग्रहो मल-गाढता । पुरीषस्याप्रवृत्तिश्च गृध्रसी च ततः परम् । कलापखञ्जता चापि खञ्जता पङ्गुता तथा । क्रोष्टुशीर्षक-खल्ल्यौ च वातकण्टक एव च । पादहर्षो पाददाह आक्षेपो दण्डकाभिधः । वातपित्तकृताक्षेपस्तथा दण्डा-पतानकः । अभिघातकृताक्षेप आयामो द्विविधः स्मृतः । आन्तरश्च तथा बाह्यो धनुर्वातश्च कुब्जकः । अपतन्त्रोपतानश्च पक्षाघातोऽखिलाङ्गकः । कम्पस्तम्भो व्यथातोदो भेदश्च स्फुरणं तथा । रौक्ष्यं कार्ष्यञ्च कार्ष्ण्यञ्च शैत्यं लोमाञ्च हर्षणम् । अङ्गमर्दोऽङ्ग-विभ्रंशः शिरासङ्कोच एव च । अङ्गशोषश्च भीरुत्वं मोहश्चञ्चलचित्तता । निद्रानाशः स्वेदनाशो बलहानि-स्तथैव च । शुक्रक्षयो रजोनाशो गर्भनाशः परि-श्रमः । एत एशीतिसंख्यारोगा योगेन रूढितः । वातव्याधीतिनामानो मुनिभिः परिकीर्त्तिताः" । एत एव शिरोग्रहादय एव । योगेन वातेन वाताद्वा व्या-धिर्वातव्याधिरिति निरुक्त्या तदा वातज्वरादिष्वपि प्रसङ्गः स्यादत आह रूढितः प्रसिद्धितः शिरोग्रहा-दयोऽशीतिरेव वातव्याधिसंज्ञाः प्रसिद्धा न तु वातज्वरा-दयः" । तल्लक्षणादिकं तत्र दृश्यम् ।

वातक पु॰ वात इव चञ्चलः इवार्थे कन् । १अशनपर्ण्याम् स्वार्थे क । २जारे च ।

वातकर्म्मन् न॰ वातानां कर्म । अपानेन मरुत्त्यागे पर्द्दने ।

वातकिन् त्रि॰ वातोऽस्त्यस्य इनि कुक् च । वातरोगयुक्ते अमरः स्त्रियां ङीप् ।

वातकेतु पु॰ वातस्य केतुरिव । धूलौ रजसि त्रिका॰ ।

वातगुल्म पु॰ वातेन गुल्म इव । १वात्ले त्रिका॰ । २वात-निमित्ते गुल्मरोगभेदे गुल्मशब्दे २६२६ पृ॰ दृश्यम् ।

वातघ्नी स्त्री वातं रोगभेदं हन्ति—हन-टक् ङीप् । १शाल-पर्ण्याम् (शालपानि) २अश्वगन्धायां ३शिमुडीक्षुपे च राजनि॰ ।

वातचक्र न॰ वृ॰स॰ २७अ॰उक्ते पूर्वादिवातानां कालभेदेन शुभाशुभसूचके वहनभेदे

"पूर्वः पूर्वसमुद्रवीचिशिखरप्रस्फालनाघूर्णितश्चन्द्रार्कांशु-सटाभिघातकलितो वायुर्यदाकाशतः । नैकान्तस्थित-मेघपटलां शारद्यधान्यार्धितां वासन्तीकृतसस्यशालि-ततनुं विद्यात्तदा मेदिनीम् । यदाग्नेयो वायुर्मलय-शिखरास्फालनपटुः प्लवत्यस्मिन्योगे भगवति पतङ्गे प्रवसति । तदा नित्योद्दीप्ता ज्वलनशिखराशिस्फुततनुः स्वगात्रोष्मोच्छ्वासैर्वमति वसुधा भस्मनिवहम् । तालो-पमलतावितानतरुभिः शाखाग्रगानर्तयन् योगेऽस्मिन् प्लवति ध्वनन्दुतपदो वायुर्यदा दक्षिणः । सर्वोद्योग-समुन्नताश्च गजवत्ताल्वङ्कुशैर्घट्टिताः क्षोणायां इव म-न्दवारिकणिकाम्मुञ्चन्ति मेघास्तदा । तुङ्गैर्जालवलीवय-कुलनिचयान् व्याघूर्णयन् सागरे भानोरस्तमये प्लवत्य-विरतो वायुर्यदा नैर्ऋतः । क्षुत्तृष्णाहृतमानुषास्थिशकल-प्रस्तारभारस्फुटा मत्ता प्रेतवधूरिवोग्रचपला भूमिस्तदा लक्ष्यते । यदा रेणूत्पातैः प्रविकटसटाटोपचपलः प्र-वातः पश्चार्धे दिनकरकरापातसमये । तदा सस्योपेता प्रवरनृपवरावद्धसमरा धरा स्थाने स्थानेऽप्यविरतवसामांस-रुधिरा । आषाढीपर्वकाले यदि किरणततेरस्तकालोप-पन्नो वायव्यो बद्धवेगः प्लवति वनरिपुः पन्नगादानुकारी । आनीयाद्वारिधाराप्रमुदितमुदितां उन्नमत्कूजकण्ठां सद्योद्भ्रान्तैकचिह्नां सुखसकलतया भाग्यवेगाभिनोदैम् । मेरुपत्तमरीचिमण्डलतले पीम्नावसाने रवौ वात्याम्भो-दिकदम्बगन्धसुरभिर्वायुर्यदा चोत्तरः । विद्युद्भ्रान्ति-समस्तकान्तिकलनामत्तास्तदा तोयदा उन्मत्ता इव न-ष्टचन्द्रकिरणां गां पूरयन्त्यम्बुभिः । ऐशानो यदि शीतलोऽमरगणैः संसेव्यमानो भवेत् पुन्नागागुरुपारि-जातसुरभिर्वायुः प्रनष्टध्वनिः । आपूर्णोदकयौवना वसुमती सम्पन्नसस्याकुला धर्मिष्ठाः प्रणतारयो नृप-तयो रक्षन्ति वर्षास्तदा" ।

वाततूल न॰ वातेन उड्डीयमानं तूलम् । (वुडिरसुता) आकाशे उड्डीयमाने सूत्रे हारा॰ । [२धूलौ ।

वातध्वज पु॰ वातो ध्वज इव यस्य १मेघे शब्दमा॰ । ६त॰ ।

वातपोथ पु॰ वातं रोगभेदं पुष्यति हिनस्ति पुथ-अण् । पलाशवृक्षे अमरः । [मृगे (वाघोटा) अमरः ।

वातप्रमी पुंस्त्री॰ वातं प्रमिणोति प्र+मा-ई किच । १शीघ्रगे

वातमज पुंस्त्री॰ वातमनुलक्ष्य अजति अज-अच् स्वभावः । मृगभेदे जटा॰ स्त्रियां ङीष् । [जटा॰ स्त्रियां ङीष् ।

वातमृग पुंस्त्री॰ वाताद्गतो मृगः शाक॰ । शीघ्रगे मृगभेदे

वातरक्त न॰ वातजं दुष्टं रक्तम् रुधिरं यत्र । रोगभेदे

"लवणाम्लकटुक्षारस्निग्धोष्णाजीर्णभोजनैः । क्लिन्न-शुष्काम्बुजानूपमांसपिण्याकमूलकैः । कुलत्थमाषनि-

आवशाकादिपरुहेतुभिः । दध्यारनालसौवीरशुक्ततक्रसुरासवैः । विरुद्धाध्यशनक्रोधदिवास्वप्नप्रजागरैः । प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम् । स्थूलानां सुखिनाञ्चापि प्रकुप्येद्वातशोणितम् । हस्त्यश्वोष्ट्रैर्गच्छतश्चाश्नतश्च विदाह्यन्नं सविदाहाशनस्य"। क्षारो यवक्षारादिः । अजीर्णभोजनैः अजीर्णाद् भोजनैः अतिमात्रभोजनैरित्यर्थः । क्लिन्नादीनि मांसस्य विशेषणानि । क्लिन्नं शटितम् । शुष्कमातपे शोषितम् । अम्बुजं मत्स्यादिमांसम् । आनूपं गौड़ादिपूर्वदेशजं मांसम् । पिण्याकं तिलखलिः । मूलकं प्रसिद्धमेव । निष्पावः (बोड़ा) शाकम् । शाकं पत्रशाकम् । आदिशब्देन हलाशादीनि फलशाकानि गृह्यन्ते । पललं शटितत्वादिदोषरहितमपि मांसं वातशोणितं प्रकोपयेत् । शटितादि तु मांसं विशेषतो वातशोणितं प्रकोपयेत् । आरनालं सन्धानभेदः । शुक्तं सन्धानभेदः । सौवीरं सन्धानभेदः । तक्रं चतुर्थांशजलयुक्तं वस्त्रपूतं दधि । सुरा सन्धानभेदः । आसवः सन्धानभेदः । विरुद्धं क्षीरमत्स्यादि । अध्यशनम् । "अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते"। अतिजागरोऽपि । प्रायशः बाहुल्येन । सुकुमाराणाम् अल्पतरकायव्यापाराणाम् । अथ वा । मिथ्याहारविहारिणाम् अयथाहारविहाराभ्यां स्थूलानां सुखिनाञ्च रक्तवृद्ध्या हस्त्यश्वोष्ट्रैर्गच्छतः यतो वायुर्विवर्द्धते रुधिरञ्चाधो गच्छति । हस्त्यादय उपलक्षणानि । पद्भ्यामप्यतिचलतः । अश्नतः विदाह्यन्नम् । विदाहि निष्पावकुलत्थसर्षपशाकादि । सविदाहाशनस्य । सविदाहेऽशनं यस्य भुक्ते विदग्धे तदुपरि भुञ्जानस्येत्यर्थः । अध्यशनशब्दोक्तमप्येतद्वचनं विदग्धाजीर्णभोजनस्य विशेषतो हेतुत्वार्थम् । पश्चात् वातशोणितं प्रकुप्येदित्यनेनान्वयः । एतेषां कारणानां मध्ये केनचिद्वायुः केनचिदुभयमपि प्रकुप्येत् । संप्राप्तिमाह "तस्य रक्तं विदह्याशु तद्दुष्टं सत्त्वं पादयोश्चीयते तु । तत् संपृक्तं वायुना दूषितेन तत्प्राबल्यादुच्यते वातरक्तम्"। पूर्वोक्तैर्हेतुभिः तस्य च मत्तं रक्तं विदहति अत्र दहधातुरविवक्षितकर्मकः । तेन विदहति विदग्धं भवतीत्यर्थः तच्च दुष्टरक्तम् । अत एव अधोगतम् पादयोश्चीयते सञ्चितं भवति । तद्रुधिरं दूषितेन वायुना संपृक्तं मिलितं वातरक्तम् उच्यते । ननु चैतस्य संप्राप्तिवक्ता सुश्रुतेन "शोणितं दूषितमपि तत्र वायोर्मार्गं संरुध्याशु वातः । क्रुद्धोऽत्यर्थं मार्गरोधात् स वायुरत्युद्रिक्तं दूषयेद्रक्तमाशु"। अत्र प्रथमं रक्तस्य दुष्टत्वतो रक्तवातमिति व्यपदेष्टुमुचितं भवतीत आह तत्प्राबल्यादिति । तत्र वातस्य दोषत्वेन प्राधान्याद्वातरक्तमिति व्यपदिश्यते । पूर्वरूपमाह "स्वेदोऽत्यर्थं न वा कार्ष्ण्यं स्पर्शाज्ञत्वं क्षतेऽतिरुक् । सन्धिशैथिल्यमालस्यं सदनं पिडकोद्गमः । जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु । निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेव च । कण्डूः सन्धिषु रुग्भूत्वा भूत्वा नश्यति चासकृत् । वैवर्ण्यं मण्डलोत्पत्तिर्वातासृक्पूर्वलक्षणम्"। अथाधिकवातस्य रक्तस्य लक्षणमाह "वातेऽधिकेऽधिकं तत्र शूलस्फुरणतोदनम् । शोथस्य रौक्ष्यं कृष्णत्वं श्यावतावृद्धिहानयः । धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक् । शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः"। तत्र पादयोः शूलादिकमधिकम् यत आह सुश्रुतः "स्पर्शोद्विग्नौ तोदभेदप्रशोषौ स्वापोपेतौ वातरक्तेन पादाविति"। अत्र सुप्तिः स्पर्शाज्ञता । अधिकरक्तं वातरक्तमाह "रक्ते शोथोऽतिरुक् तोदस्ताम्रश्चिमिचिमायते । स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः"। अधिकपित्तं तदाह "पित्ते विदाहः संमोहः स्वेदो मूर्च्छा मदस्तृषा । स्पर्शाक्षमत्वं रुग्रागः शोथपाको भृशोष्णता"। विदाहश्च पादयोरेव बोद्धव्यः यत आह सुश्रुतः "पित्तासृग्भ्यां दह्यमानौ भवेतामत्युष्णौ रक्तशोथौ मृदू च"। पादाविति शेषः । अधिककफं तदाह "कफे स्तैमित्यगुरुता सुप्तिः स्निग्धत्वशीतता"। सुप्त्यादयः पादयोरेव यत आह सुश्रुतः "कण्डूमन्तौ श्वेतशीतौ सशोथौ पीनस्तब्धौ श्लेष्मदुष्टे तु रक्ते"। अप्रतिक्रियमाणवातरक्तस्य उपद्रवानाह "अस्वप्नारोचकश्वासमांसकोथशिरोग्रहाः । मूर्च्छा च मदरुक् तृष्णाज्वरमोहप्रवेपकाः । हिक्कापाङ्गुल्यवीसर्पपाकतोदभ्रमक्लमाः । अङ्गुलीवक्रतास्फोटदाहमर्मग्रहार्बुदाः" मांसकोथो मांसगलनम् । असाध्यत्वादिकमाह "एतैरुपद्रवैर्वर्ज्यं मोहेनैकेन वापि यत् । असम्पूर्णोपद्रवं याप्यं साध्यं स्यान्निरुपद्रवम् । एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम् । त्रिदोषजमसाध्यं स्याद्यस्य च स्युरुपद्रवाः"।

वातरक्तघ्न पु० वातरक्तं रोगभेदं हन्ति हन–टक् । कुक्कुरद्रौ (कुकुरसोङा) शब्दच० ।

वातरक्तारि पु० ६त० । (गुलञ्च) ख्यातायां लतायाम् [शब्दच० ।

वातरङ्ग पु० वातस्येव वततं रङ्गचलनमस्य । अश्वत्थवृक्षे अमरः ।

वातरायण पु०वा–क्विप तस्मात् रप् वातरमयनं यस्य चलम् । १उन्मत्ते २प्रयोजनशून्ये पुरुषे ३काण्डे ४करपाले ५कूटे ६शरसंक्षेपे मेदि० । ७सरलद्रुमे च शब्दर० ।

वातरूष पु० वातेन रूष्यते रूष–घञ् । १वातुले २उत्कोचे ३इन्द्रचापे च मेदि० ।

वातर्षि पु० वातस्य ऋषिर्वतः । १वायुकोणनिर्मितमार्गे त्रिका० ६त० । २वायुवाही वर्त्मनि ।

वातल पु० वातं रोगभेदं लाति ला–क । १चणके शब्दच० । २वायुकारके द्रव्ये त्रि० ।

वातव्याधि पु० वातेन देहस्थधातुभेदेन जनितो व्याधिः माध० । वातरोगे वातशब्दे दृश्यम् ।

वातशीर्ष न० वातस्य शीर्षमिव । वस्तौ राजनि० ।

वाताटः पु० वात इवाटति अट–अच् । १सूर्य्याश्वे त्रिका० २वातमृगे शब्दर० ।

वाताण्ड पु० मुष्करोगविशेषे तस्य लक्षणं यथा "इवथो दुष्टवेदायुः सेवया यस्य वंदतः तस्य मुष्कचयल्पेको रोगो वाताण्डसंज्ञकः" माधवकरः ।

वाताद पु० वाताय वातनिवृत्तयेऽद्यतेऽसौ अद–घञ् । (बादाम) फलप्रधानवृक्षे भावप्र० ।

वातापि पु०अगस्त्यनाशिते इल्वलभ्रातरि असुरभेदे । "वातापिर्भक्षितो येनवातापिश्च महासुरः । समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु" इति भोजनान्ते पाठ्यमन्त्रः ।

वातापिसूदन पु० वातापिं सूदयति छिनत्ति सूद–ल्यु । अगस्त्ये मुनौ त्रिका०भा०व०१९८०अ० तत्कथा दृश्या ।

वातामोदा स्त्री वातेनामोदो यस्याः । कस्तूर्याम् शब्दमा० ।

वातायन न० वातस्यायनं गतिर्येन । १गवाक्षे अमरः । वातस्येव शीघ्रमयनं गतिरस्य । २अश्वे ३स्त्री: त्रिका० स्त्रियां ङीष् ।

वातायु पु० वातमयते अय–उण् । हरिणे अमरः

वातारि पु० वातस्य रोगभेदस्यारिः । १एरण्डवृक्षे २शतमूल्यां ३शेफालिकायां ४यवान्यां ५भार्ग्याम् ६स्नुह्यां ७विडङ्गे च ८स्नुहिवृक्षे ९भल्लातके १०अजमोदायाम् ११पञ्चमूलीद्रव्ये च राजनि० ।

वाताश्व पु० वात इव शीघ्रगोऽश्वः । वातगामिनि अश्वे हये त्रिका० ।

वाति पु० वा–क्तिच् । १वायौ २सूर्य्ये ३चन्द्रे च रभसः ।

वातिक पु० वातादागतः ठक् । देहस्थधातुजन्ये रोगभेदे राजनि० ।

वातिग पु० वातिं वायुं गच्छति गम–ड । १वार्त्ताकौ २धातुवादिनि त्रि० मेदि० गम–अच । वातिगमोऽप्यत्र शब्दर०

वातिङ्गण पु० वातिं देहस्थवातं सेवनात् गमयति गम–खच् मुम् च । वार्त्ताकौ त्रिका० ।

वातीय न० वाताय वातनिवृत्तये हितः छ । काञ्जिके शब्दच०

वातुल पु० वातानां समूहः उलच् । वातसमूहे भरतः ।

वातूलि पुंस्त्री० वा–उलि वृट् च । (वादुड़) ख्याते खगे शब्दा० ।

वातूल त्रि० वात+मत्वर्थे ऊलच् । १वातरोगयुक्ते उन्मत्ते अमरः । समूहार्थे ऊलच् । २वातसमूहे न० भरतः ।

वातोना स्त्री वातमूनयति ऊन–अण् । १गोजिह्वाक्षुपे राजनि० वातेनोनः । २वायुहीने त्रि० ।

वात्या स्त्री वातानां समूहः यत् १वातसमूहे अमरः "वितत्य वात्याभवचक्रकमात् नैष० ।

वात्सक न० वत्सानां समूहः वुञ् । वत्ससंघे अमरः ।

वात्सल्य न० वत्सलस्य भावः ष्यञ् । पुत्रादिस्नेहात्मके रसभेदे अलङ्कारकौ० "यशोदा वत्सले स्मृता" ।

वात्स्य पु० वत्सस्यापत्यं यञ् । गोत्रप्रवर्त्तके मुनिभेदे ।

वात्स्यायन पु० वत्सस्य गोत्रापत्यं युवा वत्स+यञ् ततो यूनि फक् । १मुनि वत्सगोत्रापत्ये । २न्यायसूत्रभाष्यकारके पक्षिलस्वामिनि मुनौ पं त्रिका० ।

वाद पुं स्त्री वद–घञ् । १तत्त्वबुभुत्सया वचने "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः" न्यायसूत्रोक्ते विचारात्मके वाक्यभेदे । "वादः प्रवदतामहम्" गीता ।

वादन न० वद–णिच्–कर्मणि ल्युट् । १ढक्कादिवाद्ये भावे ल्युट् । ढक्कादिताडनरूपे २व्यापारे ।

वादर न० बदराया: कार्पास्याः विकारः अण् । कार्पाससूत्रनिर्मिते वस्त्रादौ । बदरशब्दस्य कोषग्रादित्वमित्यन्ये ।

वादरङ्ग पु० वादरं पट्टवस्त्रमिवपत्रादिव्याप्त्या गच्छति गम–खच् डिच्च । अश्वत्थवृक्षे त्रिका० ।

वादयत त्रि० वादं (वादे) रतः रम–क्त । कुतर्कादिना विवादकारके ।

वाद्दला स्त्री वातं वायुं राति ददाति रा—क पृषो० तस्य दः [कादम्बिन्याम् शब्दर०।

वा(बा)दरायण पु० व(बा)दरीप्रधानं स्थानं वा(बा)दरं तदयनं स्थानं यस्य। नित्यं व(ब)दरिकाश्रमवासिनि वेदव्यासे। स्वार्थे इञ्। वा(बा)दरायणिरप्यत्र शब्दच०। अपत्ये इञ्। वा(बा)दरि व्यासपुत्रे शुकदेवे। [मधुयष्टौ शब्दच।

वाद्दल न० वातं लाति गृह्णाति ला—क पृषो० तस्य दः।

वादाम न० वातमम्मति हिनस्ति अम—अण् पृषो० तस्य मः। स्वनामख्याते फलभेदे भावप्र०।

वादि त्रि० वद—इन्। विदुषि उणादिकोषः। [शब्दर०।

वादिर न० वद—णिच्—किरच्। व(ब)दरीवृक्षफलके हले

वादित्र न० वद—णिच्—इत्र। मृदङ्गादिवाद्ये अमरः।

वादिन् त्रि० वदति वद—णिनि। १वक्तरि २अर्थिनि ३वादकथाकर्त्तरि विचारस्थले ४प्रथमपक्षप्रतिपादके च।

वाद्य न० वद-णिच्-यत्। वादनीये मृदङ्गादौ अमरः। संगीतसारे ततादिभेद उक्तास्तत

ततं यथा "अलावनी ब्रह्मवीणा किन्नरी लघुकिन्नरी। विपञ्ची वल्लकी ज्येष्ठा चित्रा घोषवती जया। हस्तिका कुब्जिका कूर्म्मी सारङ्गी परिवादिनी। त्रिसवी शतचन्द्री च नकुलौष्ठी च ढंसवी। औडुम्बरी पिनाकी च निबन्धः शुष्कलस्तथा। गदावारणहस्तश्च रुद्रोऽथ स्वरमण्डलः। कपिलासी मधुस्यन्दी घोषेत्यादि ततं भवेत्"। अलावनी यथा "कनिष्ठिकापरिध्याद्रि मध्यच्छिद्रेण संयुतः। दशवितस्तिमितो दण्डः खादिरो वैणवोऽथ वा। अधःकरभमानञ्च अलावुस्थानाभियोजितः। नवाङ्गुलादधश्छिद्रोपरि चन्द्रार्द्धसन्निभाम्। निवेश्य तुम्बिकां मल्लालुकपट्टं निवेशयेत्। द्वादशाङ्गुलविस्तारं दृढ़कं मनोहरम्। तुम्बिकावेधमध्येन दण्डच्छिद्रे च निर्गताम्। अलावुमध्यगां दोरीं कृत्वा कल्पान्तु कारिकाम्। तथा संवेष्ट्य तन्मध्ये कारिकां भ्रामयेत्ततः। यथा कोणस्वराश्रायुस्तत्र च रभोपरि। पञ्चाङ्गुलिषु संलग्नां तां स्वराश्च प्रकाशयेत्। वेणुनाऽन्तर्निर्मिता पट्टसूत्री स्यात् कलनाथ वा। यथा सूक्ष्मा दृढ़ा तत्र तन्त्री देया विचक्षणैः। एतल्लक्षणसंयोगिन्यलावनी प्रकीर्त्तिता। चिन्तुना भ समुपेतं वस्त्रं निःक्षिप्य वर्त्तयेत्। मध्यमानामिकाभ्याञ्च वाद्या दक्षिणपाणिना। तारे मन्द्रे च घोषे च त्रिस्थाने विन्दुरिष्यते। तुम्बीमूलं समुत्पन्न वामाङ्गुष्ठेन धारयेत्। ततस्ताभिस्तु सर्वाभिः स्वरव्यक्तिर्विधीयते। निषादो दक्षिणः पार्श्ववर्त्तितस्तत्र पञ्चमः स्वरः। अलावन्यां स्थिता ध्येयाः सप्त षड्जादयः स्वराः। रागव्यक्तिर्यथा रागे भवेत् षड्जादिभेदतः। अंशन्यासविभेदाश्च तथात्रापि विधीयते। इयमलावनी प्रोक्ता मनःश्रवणरञ्जनी। प्रत्यहा शारदा देवी वीणाक्रमेण संस्थिता"। शुषिरं संगीतशास्त्रे उक्तम्। आनद्धं यथा

"आनद्धे मर्द्दलः श्रेयान् इत्युक्तं भरतादिभिः। मुरजपटहढक्काविश्वकोदर्पवाद्यं पणवघनसरूपालापजाश्चालिमल्यः। करटकमठभेरी स्यात् कुडुक्का हुडुक्का झनसमुरलिझल्लीढुक्कलीदौण्डिमाना। डमरटमकिमडुः कुण्डलीस्तुङ्गनामा स्वनभितठवाद्यं दुन्दुभी च रञ्ज। अपरञ्च हुडुकी स्यात् दर्दुरं चाप्युपाङ्गं प्रघटितचतुरङ्गं वाद्यमित्यं अमत्याम्। त्रिपुरमथनकर्त्तुस्ताण्डवे तत् प्रयाके ततमथ शुषिरम्यानद्धमित्थं घनञ्च। मर्द्दलः खादिरः श्रेष्ठो हीनः स्यादन्यद्रुजः। रक्तचन्दनजो वाद्यो गभीरध्वनिरञ्जकः। सार्द्धहस्तप्रमाणन्तु दैर्घ्यमस्य विधीयते। त्रयोदशाङ्गुलं वामस्य वा द्वादशाङ्गुलम्। दक्षिणञ्च भवेद्धीनमेकेनाद्धाङ्गुलेन वा। करणामध्यवदनो मध्ये चैव पृथुर्भवेत्। गव्यचर्मीयो भवेत् गजस्तञ्चर्म करणं मतम्। मृत्तिकानिर्मितश्चैव कण्ठः परिकीर्त्तितः। घातयेत् चरकिं वाद्ये वादनार्थञ्च मर्द्दले। विभूतिर्गैरिकं भक्तं बन्धुकेन च संयतम्। यद्वा चिपीटकं देयं जीवनीसम्मिश्रितम्। सर्वमेकत्र पिष्ट्वा यो सरक्षिरक्ष्यते। वामास्ये पूरिकां कृत्वा लेपं दद्याच्च दक्षिणे। एवं मर्द्दलकः प्रोक्तः सर्ववाद्योत्तमो मतः। अस्य संयोगमासाद्य सर्वं वाद्यञ्च शोभते। एतदङ्गे वीणकाले दशमाङ्गुलं विदुः"। मर्द्दलः त्रयोदशाङ्गुलवामसुखो द्वादशाङ्गुलदक्षिणमुखः। एकादशाङ्गुलवामकः दशाङ्गुलदक्षिणमुखः मर्द्दलहुडुक्कारयं भेदः। घनं यथा। "चतुरस्रं चिरकालं द्विविधं घनवाद्यकम्। लौहादृढ्यहृदयं चिरन्तं तालकमयम्। करतालः कांस्यतालो जयघण्टाऽथ शुक्तिका। कम्पिका पट्टवाद्यञ्च पट्टलीयं च घर्घरम्। झरझातालश्च मञ्जीरकर्त्तरी उहर इत्यपि। द्वादशैतौ मुनीन्द्रेण कथिता घनसंज्ञकाः। त्रयोदशाङ्गुलव्यासौ एककांस्यविनिर्मितौ। मध्यस्थौ समाकारौ तन्मध्ये रज्जुगुम्फितौ।

पद्मिनीपत्रवदग्रौ कराभ्यां रज्जुबन्धितौ । करनाबावुभौ वाद्यौ पाटैर्भरतकैरिति । यद्वा त्रयोदशवरव्याम वकबकोन्मितम् । वकपञ्चकगम्भीरं मध्ये च वकवप्रकम् । निम्नतं वर्त्तुलं निम्नं यवन्नयमितं ततः । पृष्ठतो मध्यदेशे च बिलबिम्बसमाकृति । शष्यपर्णीनिर्दग्धपुष्पकाष्ठविनिर्मितम् । संरक्ताङ्गुलि वर्णिगन्धदीर्घमधुरध्वनिम् । घनाङ्कवारि संरक्तं दृढं पुष्टं मनोहरम् । काश्मीरादिसमुद्भूतं तालवाद्यकर्णीनिभः । तनाद् दक्षिणं तालं ततो हीनस्य वामकम् । कुर्वीत तद्द्वयं वीर्य्यं तत्र त्वक्कुणयोर्गतम् । वामहस्तस्तालकस्य मध्यतं दक्षिणादितम् । तिर्य्यगङ्गुलितलादस्य परिध्वंसेन तालयेत् । तालादौ वादयेत्तैव मृतदीर्घबगुद्रुतैः" । अन्येषां लक्षणं विस्तरभयान्नोक्तम् । "दक्षिणस्याः बहुभाषायाः वादिन्त्रीमिलविन्दयोः । जाम्बवत्या नाग्नजित्या चम्पकाभद्रयोरपि । कल्याणाष्टमहिषीणां पुरोडाशमहोत्सवे । ततं सुषिरमानद्धं घनञ्च युगपज्जनाः । अवादयन् सर्वस्यातमिति पौराणिकी स्तुतिः । ततं वाद्यन्तु देवानां गन्धर्वाणाञ्च सौषिरम् । आनद्धं राक्षसानान्तु किन्नराणां घनं विदुः" सङ्गीतदा०

वाद्यभाण्ड न० कर्म० । वादनीयपात्रे ।

बा(वा)ध विघाते भ्वा०आत्म०सक०सेट् । बा(वा)धते अबा(वा)धिष्ट । ऋदित् न ह्रस्वः ।

ब(वा)ध पु० बा(वा)ध-घञ् । १प्रतिरोधे २प्रतिबन्धे न्यायोक्ते साध्याभावबत्त्वेन ज्ञाते ३हेत्वाभासभेदे । भावे च । बा(वा)धायाम् ४पीड़ायाञ्च स्त्री अमरः ल्युट् । बा(वा)धनमप्यत्रार्थे न० शब्दच० ।

वाधूक्य न० वध्वां वाधु सन् कुक् च । विवाहे त्रिका० ।

वार्ध्रीणस पु० वार्ध्री नस+पृषो० । वार्ध्रीणसे खड्गिनि च ।

वान न० वन-घञ् । १शुष्कफले अमरः । २शुष्के त्रि०मेदि० । वनस्येदं तत्र भवो वा अण् । ३वनसम्बन्धिनि त्रि० । ४तत्संघे न० । वे-भावकर्मादौ ल्युट् । ५सीवनकर्मणि ६वटे । वा-भावादौ ल्युट् । ७गतौ मेदि० । ८जलस्रुतवातोर्म्मौ ९हरङ्गायां १०सौरभे हेमच० ११गोचारजे १२तत्क्षीरे राजनि० । १३वर्त्तिकाञ्जने स्त्री जटा० ।

वानप्रस्थ पु० वाने वनसमूहे प्रतिष्ठति स्था-क । १मधूकवृक्षे २पलाशवृक्षे । वनप्रस्थ एव स्वार्थे अण् । "गृहस्थस्तु यदा पश्येत् वलीपलितमात्मनः । पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वा" इत्युक्ते ३आश्रमभेदे मेदि० । स च द्विविधः पचमानः अपचमानश्च । तत्र पचमानः अग्न्युपक्रमः । अपचमानस्तु दन्तोलूखलिकः ।

तस्य धर्मो यथा "भूत्वा मूलफलाशित्वं स्वाध्याय तप एव च । संविभागो यथान्यायं धर्मोऽयं वनवासिनः । तपस्यति योऽरण्ये यजेद्देवान् जुहोति च । स्वाध्याये चैव निरतो वनस्थस्तापसो मतः । तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् । सन्न्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः" गारुड़े ४९अ० । याज्ञवल्क्य उवाच "वानप्रस्थाश्रमं वक्ष्ये तत् शृण्वन्तु महर्षयः । पुत्रेषु भार्य्यां निःक्षिप्य वनं गच्छेत् सहैव वा । वानप्रस्थो ब्रह्मचारी साग्निः सोपासनः क्षमी । अफालकृष्टेनाग्नीश्च पितृदेवातिथींस्तथा । भृत्यांस्तु तर्पयेत् श्मश्रुजटालोमभृदात्मवान् । दान्तः स्त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात् । स्वाध्यायवान् ध्यानशीलः सर्वभूतहिते रतः । अह्नो मासस्य षण्णां वा कुर्य्याद्वापरिग्रहम् । कृत्वा त्यजेदाश्वयुजे भवेत् कालं व्रतादिना । पक्षे मासे तु वाश्नीयाद्दन्तोलूखलिको भवेत् । चान्द्रायणी स्वपेद्भूमौ कर्म कुर्य्यात् फलादिना । ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः । आर्द्रवासास्तु हेमन्ते योगाभ्यासाद्दिनं नयेत् । १०२ अ० । "जटित्वमग्निहोत्रित्वं भूशय्याऽजिनधारणम् । वने वासः पयोमूलनीवारफलवृत्तिता । प्रतिग्रहान्निवृत्तिश्च त्रिःस्नानं व्रतधारिता । देवतातिथिपूजा च धर्मोऽयं वनवासिनः । २१५ अ० । "एवं गृहाश्रमे स्थित्वा द्वितीयभागमायुषः । वानप्रस्थाश्रमं गच्छेत् सदारः साग्निरेव च । निःक्षिप्य भार्य्यां पुत्रेषु गच्छेद्वनमथापि । दृष्ट्वाऽपत्यस्य चापत्यं जर्जरीकृतविग्रहः । शुक्लपक्षस्य पूर्वाह्णे प्रशस्ते चोत्तरायणे । गत्वारण्यं नियमांस्तपः कुर्य्यात् समाहितः । फलमूलानि पक्वानि नित्यमाहारमाहरेत् । यताहारो भवेत्तेन पूजयेत् पितृदेवताः । पूजयेदतिथिं नित्यं स्नात्वा चाभ्यर्चयेत् सुरान् । ग्रामादानीय वाश्नीयादष्टौ ग्रासान् समाहितः । जटाश्च बिभृयान्नित्यं नखरोमाणि नो त्यजेत् । स्वाध्यायं सर्वदा कुर्य्यात् नियच्छेद्वाचमन्यतः । अग्निहोत्रञ्च जुहुयात् पञ्च यज्ञान् समाचरेत् । मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा । चीरवासा भवेन्नित्यं स्नायात् त्रिषवणं शुचिः । सर्व-

भूतानुकम्पी स्यात् प्रतिग्रहविवर्जितः। दर्शेन पौर्णमासेन यजेत नियतं द्विजः!। ऋक्षेष्ट्या आग्रयणे चैव चातुर्मास्यानि चाहरेत्। उत्तरायणञ्च क्रमशो दक्षस्यायनमेव च। वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः। पुरोडाशं चरुं चैव द्विविधं निर्वपेत् पृथक्। देवताभ्यश्च तद्धुत्वा वन्यं मेध्यतरं हविः। शेषं समुपभुञ्जीत लवणञ्च स्वयं कृतम्। वर्जयेन्मधुमांसादि भौमानि कवकानि च। भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च। न फालकृष्टमश्नीयात् उत्सृष्टमपि केनचित्। न ग्रामजातान्यार्त्तो वा पुष्पाणि च फलानि च। श्रावणे चैव विधिना वह्निं परिचरेत् सदा। न द्रुह्येत् सर्वभूतानि निर्द्वन्द्वो निर्ममो भवेत्। न नक्तं किञ्चिदश्नीयात् रात्रौ ध्यानपरो भवेत्। जितेन्द्रियो जितक्रोधस्तत्त्वज्ञानविचिन्तकः। ब्रह्मचारी भवेन्नित्यं न पत्नीमपि संश्रयेत्। यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत्। तद्व्रतं तस्य लुप्येत प्रायश्चित्ती भवेत् द्विजः। तत्र यो जायते गर्भो न संस्पृश्यो द्विजातिभिः। न हि वेदाधिकारोऽस्य तद्वंश्येऽप्येवमेव हि। अधः शयीत सततं सावित्रीजपतत्परः। शरण्यः सर्वभूतानां संविभागपरो भवेत्। परीवादं मृषावादं निद्रालस्ये च वर्जयेत्। एकाग्निरनिकेतः स्यात् प्रोक्षितां भूमिमाश्रयेत्। मृगैः सह चरेद्वासं तैः सहैव च संवसेत्। शिलायां शर्करायां वा शयीत सुसमाहितः। सद्यःप्रक्षालको वा स्यात् माससञ्चयिकोऽपि वा। षण्मासनिचयो वा स्यात् समानिचय एव वा। नक्तञ्चाथ समश्नीयात् दिवा वाहृत्य शक्तितः। चतुर्थकालिको वा स्यात् स्याद्वा चाष्टमकालिकः। चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्त्तयेत्। पक्षे पक्षे समश्नीयात् यवागूं क्वथितां तथा। पुष्पमूलफलैर्वापि केवलैर्वर्त्तयेत् सदा। स्वाभाविकैः स्वयंशीर्णैर्वैखानसमते स्थितः। भूमौ वा परिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम्। स्थानासनाभ्यां विहरेत् न क्वचिद्धैर्यमुत्सृजेत्। ग्रीष्मे पञ्चतपाश्च स्यात् वर्षास्वभ्रावकाशिकः। आर्द्रवासास्तु हेमन्ते क्रमशो वर्द्धयंस्तपः। उपस्पृश्य त्रिषवणं पितॄन् देवांश्च तर्पयेत्। एकपादेन तिष्ठेत मरीचीन्वा पिबेत् सदा। पञ्चाग्निर्धूमपो वा स्यादूष्मपः सोमपोऽथ वा। पयः पिबेत् शुक्लपक्षे कृष्णपक्षे तु गोमयम्। शीर्णपर्णाशनो वा स्यात् कृच्छ्रैर्वा वर्त्तयेत् सदा। योगाभ्यासरतो वा स्याद्रुद्राध्यायी भवेत् सदा। अथर्वशिरसोऽध्येता वेदान्ताभ्यासतत्परः। यमान् सेवेत सततं नियमांश्चाप्यतन्द्रितः। कृष्णाजिनी सोत्तरीयः शुक्लयज्ञोपवीतवान्। अथ चाग्नीन् समारोप्य स्वात्मनि ध्यानतत्परः। अनग्निरनिकेतः स्यान्मुनिर्मोक्षपरो भवेत्। तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत्। गृहमेधिषु चान्येषु द्विजेषु वनवासिषु। ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन्। प्रतिगृह्य पुटेनैव पाणिना शकलेन वा। विविधाश्चोपनिषद आत्मसंसिद्धये जपेत्। विद्याविशेषान् सावित्रीं रुद्राध्यायं तथैव च। महाप्रास्थानिकञ्चासौ कुर्य्यादनशनन्तु वा। अग्निप्रवेशमन्यद्वा ब्रह्मार्पणविधौ स्थितः। ये तु सम्यगिममाश्रमं शिवमाश्रयन्त्यशिवपुञ्जनाशनम्। ते विशन्ति परमैश्वरं परं यान्ति चैव जगतोऽस्य संस्थितिम्” कूर्मपु० २६ अ०

वानर पुंस्त्री० वानं वनसम्बन्धिफलादिकं राति गृह्णाति रा—क। स्वनामख्याते पशुभेदे अमरः स्त्रियां ङीष्।

वानरप्रिय पु० ६त०। क्षीरिवृक्षे रत्नमा०।

वानराघात पु० वानराणामाघातो यत्र। लोध्रवृक्षे शब्दच०

वानरी स्त्री वानरस्य प्रियम् भक्ष्यत्वात् अच् ङीप्। १शूकशिम्ब्याम् शब्दर०। वानर+स्त्रियां ङीष्। २वानरयोषिति। [२वानराधीशे वानरनाथादयोऽप्यत्र।

वानरेन्द्र पु० वानर इन्द्र इव। १सुग्रीवे शब्दर० ६त०।

वानल पु० वानं वनभावं निविडतां लाति ला—क। (वाबुइ) तृणभेदे शब्दच०।

वानस्पत्य पु० वनस्पतेरयम् प्रतिरूपः पुष्पाज्जातफलत्वात्। पुष्पजातफलके आम्रादौ वृक्षे अमरः।

वानायु पु० वनायु+स्वा०। देशभेदे (आरव) शब्दर०।

वानायुज पुंस्त्री० वानायुदेशे जायते जन—ड। घोटकभेदे च (आरवी) अमरः स्त्रियां ङीष्। [अमरः।

वानीर पु० वन—ईरन् स्वार्थेऽण्। १वेतसे २वञ्जुलवृक्षे

वानीरक पु० वानीर इव इवार्थे कन्। मुञ्जतृणे राजनि०

वानेय न० वने जले भवः ढक्। कैवर्त्तीमुस्तके अमरः।

वान्त त्रि० वम—क्त। उद्गीर्णे ‘‘वान्ताशीन्युच्यते बुधैः’’ उद्भटः।

वान्तिहृत् पु० वान्तिं वमनरोगं हरति हृ—क्विप्। (मयना) ख्याते वृक्षे शब्दच०। [राजनि०

वान्तिदा स्त्री वान्तिं छर्दिं ददाति दा—क। कट्वीरायाम्

वाप पु० वप—घञ्। १तन्त्वादेर्वीजादेश्च २वपने ३मुण्डने च।

वापदण्ड पु० उप्यतेऽनेन वप–करणे घञ् कर्म०। वेमनि तन्तुवपनदण्डे अमरः। [२धान्यभेदे न० राजनि०।

वापित त्रि० वप–णिच्–क्त। १बीजाकृते २मुण्डिते मेदि०।

वापि(पी) स्त्री वप–इञ् वा ङीप्। "इष्टात् दशगुणा वापी" इत्युक्तलक्षणे १जलाशयभेदे जलाशयशब्दे दृश्यम् २जलाशयमात्रे च "वापीं स्वादुधियो गताश्च" इति काव्यप्र०। "यो वापीमथ वा कूपं देशे वारिविवर्जिते। खानयेत् स दिवं याति विन्दौ विन्दौ शतं समाः" कल्पतरौ वायुपु०। तज्जलगुणाः "वाप्यं गुरु कटुक्षारं पित्तकृत् कफवातजित्" राजवल्लभ। "वापीकूपतडागं वा प्रासादं वा निकेतनम्। न कुर्याद् द्विजातस्तु अनन्तानिलनैरृते। आग्नेय्यां सलिलस्थाने नैरृते क्रूरकर्मकृत्। वायव्यां बलविन्नाशः पीयमाने जले प्रिये!। आलयस्य परपदे भागे वापीकूपतडागकम्। अग्निदाहः सदा कुर्यात् वंशानुपहतस्य पदाम्। नैरृते पीयमानस्तु आत्मनो दुःखदो भवेत्। कन्यापि तज्जलं पीत्वा पतिं त्यक्षति वामतः" देवीपु०।

वापीह पुंस्त्री० वाप्यां तत्रस्थजलं जहाति हा–क। चातके विहगे त्रिका० स्त्रियां ङीष्।

वाप्य न० वाप्यां भवः यत्। १कुष्ठौषधे अमरः। २वापनीये वप–ण्यत्। ३वपनीये च त्रि०।

वाम न० वा–मन्। १धने मेदि० २वास्तूके जटा०। ३मनोहरे ४प्रतिकूले ५सव्यभागस्थे त्रि० मेदि०। ६अधमे त्रि० त्रिका० ७पयोधरे न०। ८कामदेवे ९महादेवे तन्त्रोक्ते वेदाचारविरुद्धे १०मद्यादिपानरूपाचारे च पु० कुलाचारशब्दे २१२४पृ० दृश्यम्। ११स्त्रीभावे स्त्री अमरः १२दुर्गायां स्त्री। "वामं विरुद्धरूपन्तु विपरीतन्तु गीयते। वामेन सुखदा देवी वामा तेन मता बुधैः" देवीपु० ४५अ०। "वामान्तु वामदा वित्त्यभावाच्चापि पूजयेत्। स्मशानभैरवीं देवीमुग्रतारां तथैव च। उच्छिष्टभैरवीं चण्डीं तारां त्रिपुरभैरवीम्। एतास्तु वामभावेन यजेत् त्रिपुरभैरवीम्। सर्वत्र पितृदेवादौ यथाश्रुति दक्षिणः। देवी च दक्षिणा यस्मात् दक्षिणस्तत्र चोच्यते। या पुनः पूज्यमाना तु देवादीनां तु पूर्वतः। सव्यभागं समं पश्येत् वामा तु परिकीर्तिता" कालिकापु० ७७अ०।

वामदेव पु० कर्म०। महादेवमूर्तिभेदे अमरः।

वामन त्रि० वम–णिच्–ल्युट्–अच् वा। १दक्षिणदिग्गजे अमरः। २खर्वे ३अङ्कोटवृक्षे ४बलिवञ्चनार्थं प्रादुर्भूते हरेरवतारभेदे मेदि० तत्कथा हरिवं० २६१ अ० दृश्या। पार्श्वनियतस्य कामिकवृत्तिकारके ५पक्षिभेदे च। ६ह्रस्वे त्रि० अमरः स्त्रियां ङीप्। "वामनीं मूर्तिमादधे"।

वामलूर पु० वामं लुनाति लू–रक्। वल्मीके अमरः।

वामलोचना स्त्री वामे सुन्दरे लोचने यस्याः। स्त्रीभेदे अमरः।

वामवेध पु० वामः प्रतिकूलो वेधः। ज्योतिषोक्ते गोचरस्य ग्रहाणां स्वस्वराश्यवधिकस्थानविशेषस्य परस्परभेदकृते योगभेदे "वामवेधविधिना त्वशोभना शोभना" इति ज्योतिषम् गोचरशब्दे २६८१ पृ० दृश्यम्।

वामाचार पु० वामः वेदादिविरुद्धः आचारः। तन्त्रोक्ते मद्यमांसादिसेवनरूपे आचरणे। कुलाचारशब्दे दृश्यम्

वामापीडन पु० वामं यथा तथा आपीड्यते भूषयतेऽनेन आ+पीड–ल्युट्। पीलुवृक्षे शब्दच०।

वामावर्त्त त्रि० वामेनावर्त्तते आ–वृत–अच्। १वाममार्गेणावर्त्तिनि पदार्थे। भावे घञ्। २वाममार्गेणावृत्तौ पु०।

वामिल त्रि० वाम+मत्वर्थे स्वार्थे वा इलच्। १दाम्भिके २वामे च मेदि०।

वामी स्त्री वम–गौरा० ङीष्। १अश्वायाम् "अयोद्धवामीजनशार्द्धूलार्थैः" रघुः। २शृगाल्यां ३रासभ्यां ४करभ्यां च मेदि०। [४युवत्यां नार्य्याम्।

वामोरू स्त्री वामौ सुन्दरौ ऊरू यस्याः ऊङ्। प्रशस्ता-

वाय पु० वे–घञ्। वयने (बोना)। [वायदण्डे द्विरूपकोषः।

वायदण्ड पु० वायतेऽनेन वे–करणे घञ् कर्म०। वेमनि

वायवी स्त्री वायोरियं अण् स्त्रियां ङीप् यलोपः। १वायुसम्बन्धिन्यां स्त्रियां २वायव्यां ३उत्तरपश्चिमायां दिशि च जटा०।

वायव्य त्रि० वायुर्देवताऽस्य वायु+यत्। १वायुदेवताके पश्वादौ "वायव्यं श्वेतमालभेत" श्रुतिः। २वायुसम्बन्धिनि च

वायस त्रि० वय गत अच्। १काके वायं वयनं स्यति सो–क। २अगुरुवृक्षे ३श्रीवासे च मेदि०।

वायसविद्यिक त्रि० वायसविद्यां वेत्ति ठक्। काकचेष्टाभेदेन शुभाशुभाभिज्ञे।

वायसादनी स्त्री वायसैः काकैरद्यते अद–ल्युट् ङीप्। १काकतुण्ड्यां २महाज्योतिष्मत्यां राजनि०।

वायसाराति पु० ६त०। पेचके अमरः।

वायसी स्त्री वायसस्य प्रियत्वात्। १काकोदुम्बरिका-

याम २काकमाच्यां च मेदि० ३महाज्योतिष्मत्यां ४काकनासायां ५काकतुण्ड्यां च राजनि० ।

वायसेक्षु पु० वायसानामिक्षुरिव प्रियः । काशतृणे राजनि०

वायसोली स्त्री वायसमोलति ओल–उन्मेषे अच् उप० स० गौरा० ङीष् । काकमाच्याम् शब्दर० । स्वार्थे क तत्रैव ।

वायु पु० वा–उण् । १स्पर्शगुणके पञ्चभूतमध्ये भूतभेदे उत्तरपश्चिमविदिगधिपतौ २देवभेदे ३देहस्थधातुभेदे च अनिलशब्दे १६४ पृ० दृश्यम् ।

वायुगुल्म पु० वायुना गुल्म इव । जलभ्रमे त्रिका०

वायुदारु पु० वायुना दीर्यतेऽसौ दृ–उण् । मेघे त्रिका० ।

वायुपुत्र पु० ६त० । १हनुमति २भीमे च वायुसुतादयोऽप्यत्र

वायुफल न० वायुना फलति प्रतिफलति फल–अच् । १इन्द्रचापे २करकायां च मेदि० ।

वायुभक्ष पुंस्त्री० वायुं भक्षति भक्ष–अण् । १सर्पे राजनि० । स्त्रियां ङीष् । ल्युः । वायुभक्षणोऽप्यत्र । वायुभुक्षोऽप्यत्र । वायुभक्ष्य तत्रार्थे पुंस्त्री० स्त्रियां टाप् । [शब्दर० ।

वायुवर्त्मन् न० । वायोर्वर्त्म सञ्चारमार्गो यत्र । आकाशे

वायुवाह पु० वायुना उह्यते वह–घञ् । धूमे हेमच० ।

वायुवाहिनी स्त्री वायुं देहस्थवायुं वाहयति सञ्चारयति वह–णिच–णिनि । वायुसञ्चारिण्यां देहस्थशिरायाम् नाडीशब्दे १६१६ पृ० दृश्यम् । [भरतः ।

वायुसख पु० वायोः सखा सहचरः अच्समा० । अग्नौ

वायुसखि पु० वायुः सखा यस्य । वह्नौ अमरः ।

वाय्वास्पद न० ६त० । वायुसञ्चारस्थाने आकाशे शब्दभ० ।

वार् न० वृ–क्विप् । अप्सु अमरः ।

वार पु० वृ-घञ् । १समूहे २अवसरे अमरः । ३स्वयोग्यकाले (पाला) "वारोऽस्त्राजनकः" भा० द्रो० । ४द्वारे ५शिवे ६कुब्जवृक्षे ७बाणे मेदि० । वार+स्वार्थे अच् । ८जलसमूहे न० सूर्यादिग्रहाधिकृते ९दिने पु० यथा रविवारः रविस्वामिकं दिनम् । तदानयनञ्च सू० सि०

"मन्दादधः क्रमेण स्युश्चतुर्था दिवसाधिपाः । वर्षाधिपतयस्तद्वत् तृतीयाश्च प्रकीर्त्तिताः । ऊर्द्ध्वक्रमेण शशिनो मासानामधिपाः स्मृताः । होरेशाः सूर्यतनयादधोऽधःक्रमशस्तथा ।" सू० "शनेः कक्षाशादधःकक्षाक्रमेण चतुर्थसङ्ख्याका ग्रहा दिनाधिपतया वारेश्वरा भवन्ति । यथा शनिरविचन्द्रभौमबुधगुरुशुक्रा इति । वर्षेश्वरा ग्रहाधिपयतनवर्षदिनात्मकस्य स्वामिनश्चन्द्रान्दादधः क्रमेण तृतीयसङ्ख्याका ग्रहा उक्ताः । चः समुच्चयार्थे । तत्क्रमश्च यथा शनिभौमशुक्रचन्द्रगुरुसूर्यबुधा इति । चन्द्रात् कक्षायादूर्द्ध्वकक्षाक्रमेण ग्रहा मासानां त्रिंशद्दिनात्मकानां स्वामिनः कथिताः । तत्क्रमश्च चन्द्रबुधशुक्ररविभौमगुरुशनय इति । शनेः कक्षायादधोधः क्रमतः अधःक्रमेण होरेशाः "होरेति नाम भमन्त्र चार्धम्" इत्युक्तलक्षणानां मासात्मकहोराणां दिने द्वादश रात्रौ द्वादशेत्यहोरात्रे चतुर्विंशतिहोराणामित्यर्थः । होरा सार्धदिनाडिका । इति षष्टिघटिकात्मकेऽहोरात्रे चतुर्विंशतिहोराणामिन्यो स्वामिनस्तथा शनेश्चरवदस्यवहिताः कथिताः । यथा तत्क्रमः शनिगुरुभौमरविशुक्रबुधचन्द्रा इति । अत्र शनेः सर्वोर्द्ध्वस्थत्वाच्चन्द्रस्य सर्वाधः स्थत्वात् तावतामध ऊर्ध्वं क्रमः क्रमेणोक्तः अन्यथा इष्टावधित्वाभ्युपगमे विनिगमनाविरहापत्तेः । न तु शनेरारम्भावधित्वेन सृष्ट्यादौ दिनवर्षहोराणां स्वामित्वं न वा चन्द्रस्याद्यावधित्वेन सृष्ट्यादौ मासेशत्वं पूर्वखण्डोक्तामीनतदीशैर्विरोधापत्तेः । अत्रोपपत्तिः । होराद्युपलक्षणानां क्रान्तिवृत्तेऽधःक्रमेण मेषादीनां सप्ताकादूर्ध्वकक्षान्येऽधः क्रमेण होरेशत्वं युक्तम् । अहोरात्रे चतुर्विंशतिहोराः । सप्ततष्टावयो होरेशा ततः चतुर्थो होरेशो द्वितीयदिनारम्भे स एव प्रथमहोरेशत्वात् द्वितीयदिने होरेशः तत्सुतरत्वापि । एवमेतद्वारक्रमेण सावनवर्षे त्रयो वारा अधिका इति पूर्ववर्षेशादधिमवर्षेशाऽधःकक्षाक्रमेण तृतीय उत्तरोत्तरम् । एवं सावनमासे द्वौ वारौ वारक्रमेण मासेश्वराधिकाविति कक्षोर्ध्वक्रमे वारक्रमेणैकान्तरितत्वात् कक्षोर्ध्वक्रमेण मासेश्वर उत्तरोत्तरमित्युपपन्नं मन्दादिश्लोकद्वयम्" रङ्गनाथः ।

वारप्रवृत्तिश्च देशभेदात् भिन्नकालीना यथोक्तं शि० शि० "अर्कोदयादूर्ध्वमधश्च ताभिः प्राच्यां प्रतीच्यां दिशि वारप्रवृत्तिः । ऊर्ध्वं तथाऽधश्च पलाभिरामोरयाद्युदयतोऽष्टसम्मेलककाले" मू० । "प्राच्यां ताभिर्घटीभिर्दिनवारप्रवृत्तिरर्कोदयादूर्ध्वम् भवति प्रतीच्यां तु तस्मादधः । यतो लङ्कोदये वारादिरत एव च वाराद्युत्तरगोलस्थे चरोर्ध्वघटिकाभिरूर्ध्वम् यतस्तदा उन्मण्डलं क्षितिजादूर्ध्वम् । दक्षिणे त्वधः अतस्तदोदयादधः वारप्रवृत्तिः" प्रमिताः "भवति तमोभूतेऽस्मिन् सृष्ट्यादौ भास्करादिभिः

स्फुटैः। यतः दिनप्रवृत्तिर्दिनवारोऽर्कोदयात् तत्र तु”। श्रीपतिरपि “स्फुटेर्युखे ध्वान्तनवेऽपि विम्बे प्रवेष्टु स्फुटे विनपूर्वकेण। दिनप्रवृत्तिरप्येश्वरस्य वारस्य तथातुदयप्रवृत्तिः। लङ्कोदयाद्यात् प्रथमपरतः पूर्वदेशे च पश्चात् अथोत्राभिर्घटीभिः सविनुरुदयतो वासरे वा प्रवृत्तिः। एषा सूर्योदयात् प्राक् चरगकल-भवेद्यास्तुभियोत्यगोले पश्चात् तैः सौम्यगोले युतिवियुति-यथास्वंभयोः स्फुटकालः”। अन्योऽप्याह “केचिद्वारं सवितुरुदयात् प्राङ्करन्यो दिनार्द्धात् भानोरस्तसमय-समयादूर्ध्वरे केचिदेवम्। वारस्यादिं यवनन्वपतिर्दिङ्-मुहूर्ते निशाया वाटाचार्यः कथयति पुनर्वार्द्धरात्रे स्व-तन्त्रे”। एवं मतभेदे व्यवस्था मलमा० उक्ता यथा “द्वे तिथ्यन्ताबेकवारे यत्र च स्यात् दिनक्षयः” कूर्मपु० “एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा। तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलम्” वशिष्ठः। कौमेंउरापराधिकत्वनेकवाक्यतया सावनदिनवत् वारप्र-वृत्तिः सूर्योदयावधिरेव सूर्यसि० “स्फुटकानां परिच्छेदो दिनमासाद्यपालया। मध्यमग्रहभुक्तिश्च सावनेन प्रको-र्त्तिता”। अत्र दिनाधिपस्य रव्यादेर्भोग्यं दिनं वार-रूपं सावनगणनयांक्तम् यत्तु “रेखापूर्वापरयोः इत्या-दिना ज्योतिषे वारप्रवृत्तिरुक्ता तत् ज्योतिषशास्त्रो-क्तकाहोराज्ञानार्थम्”। वाराणां कार्यविशेषविधा-नार्थं संज्ञाभेदा यथा “चरः सौम्यो गुरुः क्षिप्रो मृदुः शुक्रो रविर्ध्रुवः। शनिश्च दारुणो ज्ञेयो भौम उग्रः शशी समः। चरक्षिप्रैः प्रयातव्यं प्रवेष्टव्यं मृदुध्रुवैः। दारुणोग्रैश्च योद्धव्यं मिश्रैर्युक्ता-क्रुष्टिः”। इति सामान्यतोऽभिधाय “नृपाभिषेको-ऽग्निकार्यञ्च सूर्यवारे प्रशस्यते। सोमे तु लेपनं च कुर्वीतैव गृहादिकम्। सेनापत्यं शौर्ययुक्तं शस्त्राभ्यासः कुजे तथा। सिद्धिकार्यञ्च मन्त्रञ्च यात्रां चैव बुधे तथा। पठनं देवपूजा च वस्त्रं द्याभरणं गुरौ। कन्यादानं गजारोहः शुक्रे स्यात् इभयः स्त्रिया। स्थाप्यं गृहप्रवेशश्च गजवन्ध गमने शुभः” गरुड़पु० ६१ अ०

वारक त्रि० वारयति वृ-णिच्-ण्वुल्। १प्रवृत्तिनिरोधके। २अश्वभेदे ३अश्वगतिविशेषे च पु० मेदि०। ४कष्ट-स्थाने ५ह्रीवेरे न० हेमच०।

वारकिन् पु० वारकः अस्त्यस्य इनि। १विरोधे २पर्णा-शनाशिन (वादर) ३समुद्रे ४पत्नौ च मेदि०।

वारकीर पु० वारे कीर इव। १श्यालके त्रिका० वार-ग्राहके ३वाड़वे ४यूकायां ५वेणिवेधिन्यां ६नीराजितहये च मेदि०।

वारङ्ग पु० वृ० वृ-अङ्गच्। खड्गादिमुष्टौ (मुट) त्रि०को०।

वारट न०पु० वृ-अटच्। १क्षेत्रे त्रिका० २क्षेत्रसमूहे शब्दर० ३हंस्यां स्त्री हेमच० टाप्।

वारण न०पु०-वृ-ल्युट्। प्रवृत्तिप्रतिरोधे १निषेधे मेदि० २हस्त्यादिवारणे च जटा०। ३गजे पुंस्त्री० अमरः स्त्रियां ङीष्। ४वाणवारे कवचे पुंन० शब्दच०।

वारणबुषा स्त्री वारणं पुष्णाति पुष-क पृषो० पस्य बः। कदल्याम् अमरः।

वारणवल्लभा स्त्री ६त०। कदल्याम् त्रिका०।

वारमुख्या स्त्री वारे वेश्याद्वन्दे मुख्या। वङ्गजनवत्-रतायां वेश्यायाम् अमरः।

वारंवारम् अव्य० वृ-णमुल् द्वित्वम्। पौनःपुन्ये।

वारयितृ पु० वृ० वृ-तृच्। १पत्यौ हला०। २वारण-कर्त्तरि त्रि०।

वारयोषा स्त्री वारस्य जनसमूहस्य योषा साधारणत्वात्। वेश्यायाम्। ६त०। वारवध्वादयोऽप्यत्र हेमच०।

वारलीक पु० वार्जलम् अलीकं यत्र। (वावुइ उलवी) तृणे शब्दर०। [कवचे अमरः।

वारवाण पुंन० वार्यते वृ-घञ् वारो वार्यो वाणो यस्य।

वारवाणि स्त्री वारं समूहं वणते वण-इण् वा ङीप्। वेश्यायाम् त्रिका०। [२कदल्यां शब्दर०।

वारवुषा स्त्री वारं जलसंघं वर्षत्यत्र वृष-क। १धान्ये

वारवेला स्त्री ६त०। सूर्यादिदिनविशेषे वर्ज्यकालभेदे “अर्कतुर्यमिन्दौ सप्तमं भौमे द्वितीयं बुधे पञ्चमं गुरावष्टमं शुक्रे तृतीयं शनौ षष्ठं भास्करादि-यामार्द्धं”। प्रभवति हि वारवेला न शुभा शुभकार्यकर-णाय ज्यो०त०। [त्रि कजुक् समा०। समुद्रे शब्दर०।

वारांनिधि स्त्री वारां जलराशीनां निधिराधारः नि+धा-

वाराणसी स्त्री वरणा च असी च सोमादिनाम्न्यत्र अण् पृषो० काशीपुर्यां हेम०। पर्वा०वाराणस्यपत्र। वरणासन्दे ४८४८४० उपन्न्। [राजनि०। २वराहक्रान्तायाम् त्रि०।

वाराह पु० वराहस्येदं प्रियत्वात् अण्। १स हार्यधृतिकरवे

वाराहकर्णी स्त्री वराहस्येव वाराह इव कर्णः पत्र-मस्याः ङीप्। अश्वगन्धायाम् राजनि०।

वाराहपत्री स्त्री वाराहस्य कृष्णस्य इव पत्रमस्याः ङीप अश्वगन्धायाम् राजनि०।

वाराहाङ्गी स्त्री वाराहस्येवाङ्गमस्याः ङीप्। दन्तीवृक्षे भावप्र०।

वाराही स्त्री वराहस्येयम् अण् ङीप्। अष्टमातृकामध्ये १वराहशक्तौ "यज्ञवाराहमतुलं रूपं या बिभ्रती हरेः। शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम्" देवीमा० "वाराही नारसिंही च" [illegible]। २योगिनीभेदे हट्टबल्लिकेश्वरपु०। ३वराहक्रान्तायाम् अमरः ४वराहयोषिति च ५[illegible] राजनि०।

वाराहीकन्द पु०(चामराल) ख्याते कन्दभेदे "वाराहीकन्द एवान्यैश्चर्मकारालुको मतः। अनूपे स भवेद्देशे वराहइव लोमवान्" भावप्र०।

वारि न० वृ–इञ्। १जले अमरः २ह्रीवेरे च हेमच०। वार्य्यतेऽनया वृ–णिच्–इन् वा ङीप्। ३गजबन्धन्याम् अमरः। "वार्य्यर्गलाभङ्ग इव प्रवृत्तः" रघुः। ४वाचि ५सरस्वत्याम् च स्त्री ङीबन्तः ६कलश्यां धरणिः ७वन्दौ च मेदि०।

वारिकण्टक पुंन० वारिणः कण्टक इव। शृङ्गाटके जटा०।

वारिकर्णी स्त्री वारिणि कर्ण इव पत्रमस्याः ङीप्। १कुम्भ्याम् (पाना) शब्दर० स्वार्थे क। तत्रैव।

वारिकर्पूर पुंस्त्री वारिणि कर्पूर इव। इल्लिशमत्स्ये त्रिका० स्त्रियां ङीष्।

वारिकुब्ज पु० वारिणि कुब्ज इव वक्राकृतित्वात्। शृङ्गाटके शब्दर०। स्वार्थे क। तत्रैव त्रिका०।

वारिकृमि पु० ६त०। जलौकायां त्रिका० [कायाम् त्रिका०।

वारिचत्वर पु० वार्य्येव चत्वररूपमस्याधारत्वात्। कुम्भि-

वारिचर पुंस्त्री० वारिषु चरति चर–अच्। १मत्स्ये २जलचरजन्तुमात्रे त्रि० स्त्रियां ङीष्। [शैवाले त्रिका०

वारिचामर न० वारिणश्चामरमिव शोभाहेतुरूपाकृतित्वात्।

वारिज न० वारिणि जायते जन–ड। १पद्मे २लवङ्गे ३गौरसुवर्णे ४लवणभेदे च राजनि०। ५शङ्खे हेमच० ६शम्बूके पु० शब्दच०। ७जलजातमात्रे त्रि०।

वारितस्कर पु० वारिणः तस्कर इवापहारकत्वात्। १सूर्य्ये २मेघे शब्दमा०। ३मुस्तके च।

वारित्रा स्त्री वारि त्रायते त्रै–क। छत्रे त्रिका०।

वारिद न० वारि ददाति दा–क। १मेघे २मुस्तके च अमरः। ३जलदातरि त्रि० ४वालायां स्त्री शब्दच०।

वारिधि पु० वारीणि धीयन्तेऽस्मिन् धा–आधारे कि। १समुद्रे शब्दर० वारिनिध्यादयोऽप्यत्र जलाधारे २घटादौ च

वारिपर्णी स्त्री वारिणि पर्णान्यस्याः ङीप्। कुम्भिकायाम् (पाना) अमरः।

वारिपालिका स्त्री वारीणि पालयति आस्तरणेन पाल–ण्वुल्। कुम्भिकायाम् (पाना) शब्दमा०।

वारिपृश्नी स्त्री वारिणि पृश्निः पर्णमस्याः ङीप्। कुम्भिकायाम् (पाना) शब्दमा०। [त्रिका०।

वारिबदरा स्त्री वारिसमीपभवा बदरेव। प्राचीनामलके

वारिबालक न० वारिणो बालक इव। ह्रीबेरे जटा०।

वारिभव न० वारिणो नेत्रजलाय वारिणि वा भवति प्रभवति वा भू–अच्। १स्रोतोऽञ्जने राजनि०। २जलभवमात्रे त्रि०

वारिमसि पु० वारि जलं मसिरिव नीलतापादकं यस्य। १मेघे त्रिका० २मुस्तके च। [(पाना) त्रिका०।

वारिमूली स्त्री वारिणि मूलमस्याः ङीप्। कुम्भ्याम्

वारिरथ पु० वारिणि रथ इव गमनसाधनत्वात्। भेलके त्रिका०

वारिराशि पु० वारीणां राशयोऽत्र। १समुद्रे त्रिका०। ६त०। २जलसमूहे च। [२जलजातमात्रे त्रि०।

वारिरुह न० वारिणि रोहति रुह–क। १पद्मे राजनि०

वारिवदन न० वारियुक्तं वदनं यस्मात्। प्राचीनामलके तत्सेवने हि मुखे वारिनिस्रावः।

वारिवर न० वारि वृणोति वृ–अच्। करमर्द्दके जटा०।

वारिवल्लभा स्त्री वारि वल्लभमस्याः जनकत्वात्। विदार्य्याम् राजनि०। [च अमरः। त्रि। वारिवाहोऽप्यत्र [illegible]।

वारिवाह पु० वारीणि वहति वह–अण्। १मेघे २मुस्तके

वारिश पु० वारिणि समुद्रजले शेते शी–ड। विष्णौ त्रिका०।

वारीश पु० ६त०। १समुद्रे २वरुणे च। वारिनाथा-दयोऽप्यत्र।

वारु पु० वारयति रिपून् वारि-उण्। विजयकुञ्जरे जटा०।

वारुण न० वरुणस्येदम् अण्। १जले २वरुणसम्बन्धिनि त्रि०। स देवताऽस्य अण्। ३वरुणदेवताके त्रि०। ४शततारके न०।

वारुणि पु० वरुणस्यापत्यम् इञ्। अगस्त्यमुनौ त्रिका०।

वारुणी स्त्री वरुणो देवताऽस्य वरुणस्येदं वा अण् ङीप्। १पश्चिमदिशि २मदिरायाम् हेमच०। ३शतभिषातारायां ४गण्डदूर्वायाम् ५दूर्वायां मेदि०। ६इन्द्रवारुण्यां राजनि० ७वरुणस्त्रियां ८शतभिषानक्षत्रयुक्तचैत्रकृष्णत्रयोदश्यां च स्कान्दपुराणे। "वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी। गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा" वारुणं शतभिषा। "शनिवारसमायुक्ता सा महावारुणी स्मृता। गङ्गायां यदि लभ्येत कोटि

सूर्य्यग्रहैः समा । शुभयोगसमायुक्ता शनौ शतभिषा यदि । महामहेति विख्याता त्रिकोटिकुलमुद्धरेत्" "अत्र संज्ञाविधेः सार्थकत्वाय निमित्तत्वेन वारुणक्ष-तिथ्युक्तेस्तावन्मात्रं महावारुणीमहामहावारुण्योरप्युक्ते-रुन्नीते श्राद्धे पार्वणादिवंशादौ वत् पौर्णमासामावा-स्ययोः पञ्चदश्याञ्च ति०त०। अत्र च दर्शादित्वात् सावन-दिनमेव ग्राह्यम् "सूतकानां परिच्छेदो दिनमासाब्दपा-स्तथा । मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तितः" सू०सि०-उक्तेः । कौर्मदायभागयोः "द्वौ तिथ्यन्तावेकवारे यत्र स्यात् स दिनक्षयः" । वशिष्ठः "एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा । तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलम्" इत्येतयोर्वचनयोरेकवाक्यतयापि तथावगम्यते । रवापूर्वपरयोरित्यादिकन्तु ज्योतिःशास्त्रोक्तं चान्द्रादिमानार्थमिति । अत्र "संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्रसूर्य्ययोः । पुष्ये स्नात्वा च गङ्गायां कुलकोटीः समुद्धरेत्" । इति ब्रह्माण्डपुराणवत् इत्यत्र त्रिकोटिकुलोद्धरणवि-धानात् ततोऽधिकेषु वारुण्यादिषूत्तरोत्तरगुरुषु महा-महावारुण्यादिषु यत् त्रिकोटिकुलोद्धरणफलं तदुत्-कृष्टगततारतम्येनातिरिक्तम् "यं यं क्रतुमधीते च तस्य तस्याप्नुयात् फलम्" याज्ञवल्क्योक्ताध्ययनात् यथा तत्तद्यागकरणेऽधिकफलम् अतएव शिष्टाचा-रादरोऽपि तथेति । नन्वत्र "स्नानं कुर्वन्ति यामा-र्द्धं चन्द्रे शतभिषां गते । षष्ठजन्म भवेयुस्ता दुर्भगा विधवाध्रुवम् । "त्रयोदश्यां तृतीयायां दशम्याञ्च विशेषतः । शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथ-ञ्चन" इति मत्स्योक्ताभ्यामस्त्रीणां शूद्रा-दीनाञ्च स्नाननिषेध इति वाच्यम् "भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः । तन्निषिद्धं दशम्यादौ नित्य नैमित्तिके न तु" इति हेमाद्रिधृतवचनेन रागप्रा-प्तस्नान एव निषेधात् नक्तेऽपि तथाकल्पनात् । अत्र त्रयोदश्यां पूर्वायां पूर्वाह्णोत्तरकाले नक्षत्रादिसत्त्वे परदिने पूर्वोक्त तिथिनक्षत्रलाभेऽपि पूर्वदिन एव स्नानम् । तथा च कालमाधवीये नारदीयम् "आदि-त्योदयवेलाया आरभ्य षष्टिनाडिकाः । तिथिस्तु सा हि शुद्धा स्यात् सार्द्धतिथ्यां ह्ययं विधिः" अत्र पूर्वतिथेः शुद्धत्वाभिधानात् तत्परतिथेरशुद्धत्वाभिधानं प्रतीयते । रात्रावपि वारुण्यादिषु गङ्गायां स्नानम् । "दिवा रात्रौ च सन्ध्यायां गङ्गायाञ्च प्रयत्नतः । स्नात्वाऽश्वमेधजं पुण्यं गृहेऽप्युद्धृततज्जलैः" । स्कन्दपुराणे देवलः "महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् । तस्यां स्नानं न कर्त्तव्यं काम्यनैमित्तिकादृते" । अत्र महा-निशायामपि काम्यनैमित्तिकं स्नानं प्रतीयते" । ति०त० रघु०

वारेन्द्री स्त्री देशभेदे (वारेन्द्रभूमि) (राजशाही) बङ्गदेश प्रदेशभेदे ।

वार्च्च त्रि० वारि चरति चर-ड । जलचरे हंसादौ ।

वार्ष्टिक पु० वर्षस्तद्वेतनं शिल्पमस्य ठञ् । वेधके शब्दच०

वार्त्त न० वृत्ति+अण् । १आरोग्ये २असारे ३निरामये ४वृत्तियोगे च त्रि० अमरः । ५दुर्गायां "पश्वादिपालनाद्देवी कृषिकर्मान्तकारणात् । वर्त्तनाहारणाद्वापि वार्त्ता सैव प्रगीयते" देवीपु० । ६वृत्तौ कृषिकर्मणि ७जनश्रुतौ अमरः । ८वृत्तान्ते ९वातिङ्गणे मेदि० । १० कालवृत्तान्ते भूतनाशने च स्त्री "अस्मिन् महामोहमये कटाहे सूर्य्याग्निना रात्रिदिनेन्धनेन । मासर्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्त्ता" इति भा०व० यक्षप्रश्नः ।

वार्त्तीक पु० वार्त्तमारोग्यमाकयति गमयति आक–विच्–अण् । वार्त्ताकौ त्रिका० । भावप्र० स्त्रीत्वमप्युक्तं ङीप्

वार्त्ताकु स्त्री वार्त्तमारोग्यमाकयति गमयति आक–विच्–उण् । इन्ताके (बेगुन) शब्दच० । "वह्निप्रदा वातन-नाशिनी १ शुक्रप्रदा २ शोणितवर्द्धिनी ३ च । हृद्याव-वाताद्यविनाशिनी च ५।६।७। वार्त्ताकुरेवं गुणसप्त-युक्ता । सा बाला कफवातघ्नी पक्वा क्षारपित्तला । महाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी । अङ्गारपक्वा वार्त्ताकुः किञ्चित् पित्तकरी मता । कफमेदोऽनिलघ्न-हरा परा लघुतरा परा" राजव० । "इन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम् । ज्वरवातबलासघ्नं दीपनं शुक्रलं लघु । तद्बालं कफपित्तघ्नं वृद्धं पित्त-करं गुरु । इन्ताकं पित्तलं किञ्चिदङ्गारोपरिपाचि-तम् । कफमेदोऽनिलामघ्नमत्यन्तं लघु दीपनम् । तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम् । अपरं श्वेत-इन्ताकं कुक्कुटाण्डसमं भवेत् । तदर्शःसु विशेषेण हितं हीनञ्च पूर्वतः" भावप्र० । तत्रार्थे पु० त्रिका० ।

वार्त्तायन पु० वार्त्ताया अयनं येन । प्रवृत्तिज्ञे चरे हेमच० ।

वार्त्तावह पु० वार्त्तामावहति आ+वह–अण् । १कृषि-वाणिज्याजीविनि वणिग्भेदे अमरः २वृत्तान्तवाहके त्रि०

वार्त्तिक न० वृत्तावेव कृतो ग्रन्थः ठक् । "उक्तानुक्त-

दुरन्तार्थव्यत्ययकारि त वार्त्तिकम्” इत्युक्ते ग्रन्थानुक्तादुर्योक्तिव्यक्तारके ग्रन्थभेदे हेमच० । वार्त्तायां तद्वरणे नियुक्तः ठक् । २चरे त्रि० । वृत्तिः कृष्यादिः प्रयोजनमस्य ठञ् । ३वैश्ये ४वर्त्तिकाखगे पुंस्त्री० स्त्रियां ङीष् । राजनि० ५वार्त्ताकौ शब्दर० । ६खगभेदे (बटेर) स्त्री हारा० ।

वार्दर न० वारे जलाय दीर्य्यते दृ–अप् । १दक्षिणावर्त्तशङ्खे २कार्पासिकायाम् ३आम्रबीज ४भारत्यां मेदि० ५कृमिजे ६आम्रबीजे च । वारेव दरम् । ७जले च विश्वः ।

वार्द्दल न० वार्दल्यतेऽत्र दल–आधारे क । १दुर्दिने २मस्याधारे पु० मेदि० ।

वार्द्धक न० वृद्धानां समूहः तस्य भावः कर्म वा वुञ् । १वृद्धसमूहे वृद्धस्य २भावे ३कर्मणि च मेदि० ।

वार्द्धक्य न० वृद्धस्य भावः कर्म वा ष्यञ् कुक् च । वृद्धत्वे अमरः । [त्रिका० ।

वार्द्धि पु० वारि जलानि धीयन्तेऽत्र धा–कि उप० । समुद्रे

वार्द्धिभव न० वार्द्धौ समुद्रे भवति भू–अच् । समुद्रलवणे राजनि० । २समुद्रभवमात्रे त्रि०

वार्द्धुषि पु०वृद्ध्या जीवति दृत्र वृद्धेर्ध्युषिभावः । वृद्ध्याजीवे अमरः । स्वार्थे क तत्रैव । “समार्घं धान्यमादाय महार्घं यः प्रयच्छति । स वै वार्द्धुषिको नाम सर्वधर्मबहिष्कृतः” स्मृतिः । वृद्धिस्त वृद्धिग्रन्थे वक्ष्यते तत्रोक्तानयमातिक्रमेण अनापदि आपत्स्वयंहारा वा स्वाध्यायेन यो व्यवहरति तस्यैव प्रायश्चित्तम् आपदि तु स्वयं करणे नियमातिक्रमे च न दोषः” प्रा० वि० ।

वार्द्धुषिन् त्रि० वृद्धि+स्वार्थे इनि प्रकृतेः नि० वार्द्धुषिभावः । वृद्ध्याजीविनि भा०आ० ४८२६ श्लो० ।

वार्द्धुष्य न० वार्द्धुषेर्भावः ष्यञ् । धान्यादेर्वर्द्धनोपाये (वाड़िदेवा) त्रिका० ।

वार्द्धीनस पुंस्त्री० वारि जलानि धयति धा–क्विप् वार्द्धीः नासा नासिका यस्य नसादेशः । १गण्डके त्रिका० स्त्रियां ङीष् । “त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् । वार्द्धीनसः प्रोच्यतेऽसौ हव्ये कव्ये च सत्कृतः” इत्युक्ते २छागभेदे “वार्द्धीनसस्य मांसेन तृप्तिर्द्वादशवार्षिकी” मनुः । ३पक्षिभेदे च “रक्तपादो रक्तशिरा रक्तचञ्चुर्विहङ्गमः । कृष्णो वर्णेन च तथा पक्षी वार्द्धीनसो मतः” मार्क०पु०श्राद्धकल्पम् । वाचिदामाकं कलिकापु० ६६अ० उक्तो यथा “नीलग्रीवो रक्तशीर्षः कृष्णपादः सितच्छदः । वार्द्धीनसः स्यात् पक्षीयो मम विष्णोरतिप्रियः” । पृषो० वार्ध्रीणसोऽप्यत्र ।

वार्भट पुंस्त्री०वारि भट इव कुम्भीरे त्रिका० स्त्रियां ङीष् ।

वार्म्मण न० वर्मणां समूहः अण् न टिलोपः । कवचसमूहे अमरः । [समूहे शब्दर० ।

वार्मिण न० ...णां समूहः अण् न टिलोपः । कवच-

वार्मुच् पु० वारि जलानि मुञ्चति मुच–क्विप् । १मेघे शब्दर० २मुस्तके च ।

वार्शिला स्त्री वारजाता शिला शाक० । करकायां शब्दच० ।

वार्षक न० पृथिवीभागभेदे । “दशधा विभजन् क्षेत्रमकरोत् पृथिवीमिमाम् । इक्षुकुल्यादिद्वायादौ मध्यदेशमवाप्तवान् । कोष्ठे वार्षकं क्षेत्रं रघुहस्तिर्बभूव ह” हरिवं० ।

वार्षिक त्रि० वर्षे वर्षासु वा भवः ठञ् । १वत्सरभवे २वर्षाकालभवे च । ३त्रायमाणलतायां न० मेदि० तदर्थे स्त्री राजनि० स्त्रीत्वे ङीप् । ४वर्षे वर्षे कर्त्तव्यायां पूजायां स्त्री ङीप् । “शरत्काले महापूजा क्रियते या च वार्षिकी” देवीमा० । [अमरः ।

वार्हत न० वृहत्याः फलम् अण् तस्य न लुप् । वृहतीफले

वार्हद्रथ(थि) पु० वृहद्रथस्यापत्यम् अण् इञ् वा । वृहद्रथराजपुत्रे जरासन्धे नृपे त्रिका० अपत्यः शब्दर० ।

वार्हस्पत्य न० वृहस्पतिना प्रोक्तमधीते तद्वेत्त्यत्वात् यक् । १चार्वाके रत्नमा० । तेन प्रोक्तं तद्वेद वा । यक् । २नीतिशास्त्रे ३दोहागमे च । ४वृहस्पतिसम्बन्धिनि त्रि० । ५वर्षभेदे गुरुवर्षशब्दे २६१८पृ०दृश्यम च दैवताऽण् यक् । ४तद्देवताके त्रि० ६पुष्यनक्षत्रे न० मेदिनीकोऽण् । वार्हस्पत्य तत्सम्बन्धिनि त्रि० स्त्रियां ङीप् ।

वालव पु० वल–घञ् वालबलम् याति गच्छति वा–क । तिथ्यर्द्धात्मके द्वितीये करणे ज्यो०त० । [वृक्ष अव्यय न०

वाल्क न० वल्केन निर्वृत्तम् अण् । वल्कजातवस्त्रे । वा-

वाल्मिकि पु० वल्मीके भवः इञ् पृषो० । रामायणप्रत्यक्कर्त्तरि मुनिभेदे द्विरूपको० ।

वाल्मीक(कि) पु० वल्मीके भवः अण् इञ् वा । भार्गवे प्राचेतसे मुनिभेदे जटा० । [अमरः ।

वावदूक त्रि० वद–यङ् लुक्–ऊकञ् । बहुवदनशीले वक्तरि

वावय पु० वय–यङ्लुक्–अच् । (वावुइ) तुलसीभेदे शब्दच०

वावृत संभक्तौ दि० आत्म० सक० सेट् क्त्वा वेट् । वावृत्यते अवावर्त्तिष्ट । “ततो वावृत्यमाना सा” भट्टिः ।

वावृत्त त्रि० वावृत–क्त । वृतवरणे ।

वाश तिरश्चां शब्दे अक० आह्वाने सक० दि० आत्म० सेट्। ऋदित् चङि न ह्रस्वः। वाश्यते अवावाशिष्ट। "उदाश्र-वानः शिवरम्" भट्टिः।

वाशा स्त्री वां वायुमात्तं श्यति शो–क। वासके शब्दर०। स्वार्थे क ह्रस्वे अत इत्त्वम्। वाशिका तत्रार्थे शब्दच०।

वाशित न० वाश–भावे क्त। १तिरश्चां शब्दे अमरः २आह्वाने च।

वाशिता स्त्री वाश–क्त। १करिण्याम् २स्त्रीमात्रे च अमरः

वा(वा)शिष्ठ न० वशि(शि)ष्ठस्येदम् अण् तेन प्रोक्तं वा अण्। वशिष्ठप्रणीते १उपपुराणभेदे २योगशास्त्रभेदे च। ३वशि(शि)ष्ठसम्बन्धिनि त्रि०। ४गोमत्यां नद्यां स्त्री हेमच० ङीप्। [मेदि०।

वास्र न० वाश–रक्। १गृहे २चतुष्पथे च। ३दिवसे पु०

वाष्प(स्प) पु० बा-प न(ह)क् च। १ऊष्मणि २लौहे मेदि० ३अश्रुजले च अमरः। संज्ञायां कन्। ४मारिषशाके (नटिया) पुंस्त्री० शब्दर० वा गौ०ङीष्। वाष्पी+(स्पी)-स्वार्थे क। वाष्पि(स्पि)काप्यत्र अमरः।
"मारिषो वाष्पको मार्षः श्वेतो रक्तश्च स स्मृतः। मारिषो मधुरः शीतो विष्टम्भी पित्तहृद्गुरुः। वातश्लेष्मकरो रक्तपित्तहृद् विषमाग्निजित्। रक्तमर्षो गुरुर्नातिसारी मधुरः सरः। श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः" भावप्र०। [अववासत् त।

वास सुरभीकरणे अद० चु० उभ० सक० सेट्। वासयति ते

वास पु० वस–निवासे आच्छादने वा आधारकर्मादौ घञ्। १गृहे २वस्त्रे ३अवस्थाने हेमच०। वास-अच्। ४वासके शब्दर०। तत्रार्थे स्त्रीत्वमपि तत्र टाप्। ५सुगन्धे च। स्थानभेदेऽवस्थाननिषेधो यथा
"तस्मात् सङ्कीर्णवृत्तेषु वासो मम न रोचते। पुंसो ये नाभिनन्दन्ति वृत्तेनाभिजनेन च। न तेषु च वसेत् प्राज्ञः श्रेयोऽर्थी पापबुद्धिषु। ये त्वेनमभिजानन्ति वृत्तेनाभिजनेन च। तेषु साधुषु वस्तव्यं सवासः श्रेयसे मतः" मात्स्ये २८अ०। "धार्मिकैराहृते ग्रामे न व्याधिबहुले भृशम्। न शूद्रराज्ये निवसेन्न पाषण्डजनैर्वृते। हिमवद्विन्ध्ययोर्मध्यं पूर्वपश्चिमयोः शुभम्। मुक्त्वा समुद्रयोर्देशं नान्यत्र निवसेद् द्विजः। अर्द्धक्रोशा-यदोद्भूतं वर्जयित्वा द्विजोत्तमः। नान्यत्र निवसेत् पुण्यं नाल्पजपापवर्जितौ। न संवसेच्च पतितैर्न चण्डालैर्न पुक्कसैः। न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः" कूर्मपु० १५अ०। "धनिनः श्रोत्रियो राजा नदी वैद्यश्च पञ्चमः। पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत्" चाणक्यः

वासक पु० वास–ण्वुल्। स्वनामख्याते वृक्षे "येन तेन प्रकारेण वासकः कासनाशकः" इति वैद्यकम्
"वासकः कासहृत् स्वर्यः कफपित्तास्रनाशनः। तिक्तस्तुवरको हृद्यो लघुः शीतस्तृडर्त्तिहृत्। श्वासकासज्वरच्छर्दिमेहकुष्ठक्षयापहः" भावप्र०। २रागाङ्गविशेषे यथा "मनोहरोऽथ कन्दर्पस्तारनन्दन एव च। चत्वारो वासकाः प्रोक्ताः शङ्करेण स्वयं पुरा"। केषाञ्चिन्मते नामान्तरम्। "विनोदो वरटश्चैव नन्दः कुमुद एव च। चत्वारो वासकाः प्रोक्ता गीतशास्त्रविशारदैः" सङ्गीतदा०।

वासकसज्जा स्त्री "कुरुते मण्डनं या तु सज्जिते वासवेश्मनि। सा तु वासकसज्जा स्यात्" इत्युक्तलक्षणे नायिकाभेदे वाससज्जाप्यत्र सा० द०।

वासकर्णी स्त्री वासं देववासं कर्णयत्यत्र कर्ण–आधारे अच् गौरा० ङीष्। यज्ञशालायाम् शब्दर०।

वासगृह न० वासयोग्यं गृहम् शाक०। मध्यगृहे अमरः।

वासत पुंस्त्री० वास–अतच्। गर्दभे शब्दर०। स्त्रियां ङीष्।

वासतेयी स्त्री वसतये हिता ढक्। १रात्रौ त्रि०। २वसतियोग्ये त्रि० "वनेषु वासतेयेषु" भट्टिः। स्त्रियां ङीप्।

वासन न० वास–ल्युट्। १सुरभीकरणे २धूपने ३वारिधान्याम् ४वस्त्रे मेदि० ५वासस्थाने शब्दर० ६ज्ञाने च धरणिः वस–णिच्–ल्युट्। ७निक्षेपाधारे निक्षेपार्थे मुद्राङ्किते पात्रे च। "वासनस्थमनाख्याय समुद्रं यन्निधीयते" नारदः। "वासनं निक्षेपाधारभूतं सम्पुटादिकं समुद्रपञ्चप्रादियुक्तम्" व्य०त० रघु०। वस–णिच् भावे ल्युट्। ८क्षेपणे च।

वासना स्त्री वासि–युच्। १प्रत्याशायां २ज्ञाने मेदि० ३स्मृतिहेतौ संस्कारे जटा०। ४सुरभीकरणे च। मिथ्याज्ञानजन्ये ५संस्कारभेदे दोषशब्दार्थे। ६ध्यावयविज्ञानानामेकसन्तानवर्त्तिनां तत्तत्प्रवृत्तिविज्ञानजननशक्तौ बौद्धाः। ७गणितशास्त्रप्रसिद्धे पक्षस्पष्टीकरणाद्युपयोगिनि संस्कारभेदे च।

वासन्त पुंस्त्री० वसन्तस्येदम् वसन्ते भवः वा अण्। वसन्तप्रिये १उष्ट्रे मेदि०। २कोकिले च राजनि० स्त्रियां ङीष्। वसन्तभवे ३मलयवायौ ४मुद्गे त्रिका०। ५कृष्णमुद्गे हेमच०। ६मदनवृक्षे च शब्दर०। ७तत्कालभवे त्रि०।

स्त्रियां ङीप् सा च ८यूथ्यां ९माधवीलतायां धरणिः। १०पाटलायां विश्वः ११नवमल्लिकायां भावप्र०। "वासन्ती शीतला लघ्वी तिक्ता दोषत्रयाञ्जित्" भावप्र०। १२वसन्तकाले कर्त्तव्यदुर्गापूजायाम्। भविष्यपु० "मीनराशिस्थिते सूर्य्ये शुक्लपक्षे नराधिप!। सप्तमीं दशमीं यावत् पूजयेदम्बिकां सदा" भविष्योत्तरे "चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये। पूजयेद्विधिवद्दुर्गां दशम्यान्तु विसर्जयेत्" कालकौमुद्यां च वाह्निः "चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये। पूजयेद्विविधैर्द्रव्यैर्नववस्त्रैस्तथा। नानाविधैश्च बलिभिर्मेषाद्यैर्दोषवर्जितैः। विचित्राभरणैः पार्थ! पट्टवस्त्रादिभिस्तथा। एवं यः कुरुते पूजां वर्षे वर्षे विधानतः। ईप्सितान् लभते कामान् पुत्रपौत्रादिकान्नृप!" इति। अत्र नित्यपदप्रयोगवदसङ्केतात् भविष्यपुराणवचने मीनराशिस्थित इति मीनस्थरव्यारब्धचान्द्रमासीयतिथिपरम्। सौरस्यारब्धत्वे कदाचित् सप्तम्यादितिथित्रयाभावात् तद्वर्षे तत्कृत्यलोपः स्यात् न चेष्टापत्तिः भविष्यपुराणे सदापदोपादानात् जावालिवचने वर्षे वर्षे इत्युपादानाच्च नित्यत्वम्। एतद्विस्तृतं कालविवेके। एवं जावालिविशेषवचनपरार्द्धे पुत्रादिरूपफलश्रवणात् काम्यत्वञ्च। ततश्च काम्यतया पूजने कृते प्रसङ्गान्नित्यसिद्धिः। "सिताष्टम्यान्तु चैत्रस्य पुष्पैस्तत्कालसम्भवैः। अशोकैरपि यः कुर्य्यात् मन्त्रेणानेन पूजनम्। न तस्य जायते शोको रोगो वाप्यथ दुर्गतिः" इति कालिकापुराणवचनात् केवलाष्टमीकल्प उक्तः। चैत्रमासमधिकृत्य "नवम्यां पूजयेद्देवीं महिषासुरमर्द्दिनीम्। कुङ्कुमागुरुकस्तूरीधूपान्नध्वजतर्पणैः। दमनैर्दरपत्रैश्च विजयाख्यपदं लभेत्" इत्यनेन केवलनवमीकल्प उक्तः। व्यवस्था तु शारदीयपूजाप्रकरणोक्ता ग्राह्या। विशेषस्तत्र बोधनप्रक्रिया नास्ति बाधितायाः बोधनासम्भवात् इति प्रागविस्तृतम्। होमादिकञ्च पूर्ववज्ज्ञेयमिति दिक्" दुर्गोत्सवविवेकः। तत्कालपूज्यत्वात् दुर्गापि वासन्तीत्युच्यते।

वासयोग पु० वासेन गन्धेन योगो यत्र (आबिर) चूर्णभेदे अमरः। [पु०मेदि०।

वासर पुंन०। वस-अरण्। १दिवसे अमरः। २नागभेदे

वासव पु० वसुरेव स्वार्थेऽण् वसूनि सन्त्यस्य अण् वा। १इन्द्रे वसोरपत्यम् स्त्री अण् ङीप्। २व्यासमातरि मत्स्यगन्धायाम् स्त्री हेमच०। ३धनिष्ठानक्षत्रे न० उणा०

वासवदत्ता स्त्री वासवदत्तामधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां तस्य लुक्। १वासवदत्ताचरिताख्यापके ग्रन्थभेदे शब्द०। २इन्द्रदत्ते त्रि०। [भेदे राजनि०।

वासस् न० वस-आच्छादने असि णित्। १वस्त्रे अमरः २पत्र-

वासाखण्ड न० चक्रदत्तोक्ते औषधभेदे "तुलामादाय वासायाः पचेदष्टगुणे जले। तेन पादावशेषेण पाचयेदाढकं भिषक्। चूर्णानामभयानाञ्च खण्डाच्छुद्धं तथा शतम्। द्वे पले पिप्पलीचूर्णात् सिद्धशीते च माक्षिकात्। कुडवं पलमात्रन्तु चातुर्जातं सचूर्णितम्। लिह्या विलोडितं खादेद्रक्तपित्ती क्षतक्षयी। कासश्वासपरीतश्च यक्ष्मणा च प्रपीडितः"

वासाखण्डकुष्माण्डक न० चक्रदत्तोक्ते औषधभेदे "पञ्चाशच्च पलं स्विन्नं कुष्माण्डात् प्रस्थमानतः। पाद्यं पलशतं खण्डं वासाक्वाथाढके पचेत्। मुस्ता-धात्री-शुभाभार्गी-त्रिसुगन्धैश्च कार्षिकैः। ऐलेयविश्व-धन्याकमरिचैश्च पलांशिकैः। पिप्पलीकुडवञ्चैव मधुमानीं प्रदापयेत्। कासं श्वासं क्षयं हिक्कां रक्तपित्तं हलीमकम्। हृद्रोगमम्लपित्तञ्च पीनसञ्च व्यपोहति"

वासागार न० वासयोग्यमगारम् शाक०। वासयोग्ये गृहे गृहमध्ये त्रिका०।

वासाघृत न० चक्रदत्तोक्ते घृतभेदे "वासां सशाखां सपलाशमूलां कृत्वा कषायं कुसुमानि चास्याः। प्रदाय कल्कं विपचेद् घृतं तत् सक्षौद्रमाश्वेव निहन्ति रक्तम्"।

वासाद्यघृत न० चक्रदत्तोक्ते घृतभेदे "वासां गुडूचीं त्रिफलां त्रायमाणां यवासकम्। पक्त्वा तेन कषायेण पयसा द्विगुणेन च। पिप्पलीमुस्तमृद्वीकचन्दनोत्पलनागरैः। कल्कीकृतैश्च विपचेत् घृतं जीर्णज्वरापहम्"। [उणादि०।

वासि(सी) स्त्री वस-इञ् वा ङीप्। १कुठारभेदे (वाइस)

वासित त्रि० वास-क्त। १सुरभीकृते अमरः। वाश-क्त प्रभो०। २रुते न०मेदि०। ३ज्ञानमात्रे हेमच०। ४खगशब्दे विश्वः ५करिण्यां ६स्त्रीमात्रे स्त्री अमरे पाठान्तरम् वा गौरा० ङीप्। ७ख्याते ८वस्त्रवेष्टिते च त्रि०धरणिः।

वासिनी स्त्री वासोऽस्त्यस्याः इनि। शुक्लझिण्ट्याम् शब्दच०। [नक्षत्रे च उणादिको०।

वासु पु० वस-उण्। १विष्णौ त्रिका०। २विश्वरूपे ३पुनर्वसु-

वासुकि पु० वसुना निरत्नेन कायति कै–क स एव स्वार्थे अण् । १सर्पराजे “भगिनी वासुकेस्तथा” मनसास्तोत्रम् ।

वासुदेव पु० वसुदेवस्यापत्यम् अण् । १विष्णौ अमरः । अस्यापि तत्र नामनिरुक्तिः विष्णुपु० दर्शिता यथा “सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततः स वासुदेवेति विद्वद्भिः परिपठ्यते” । विष्णुस० भाष्ये तु द्विधा पठितयोः वासुदेवशब्दयोर्द्विधा व्युत्पत्तिर्दर्शिता तत्र प्रथम वसुदेवापत्यरूपार्थिका द्वितीया यथा “वसति वासयति वा वासुः दीव्यति क्रीडति जिगीषते व्यवहरति द्योतते स्तूयते मुमुक्षुभिर्वा गच्छतीति वा देवः । वासुश्चासौ देवश्च वासुदेवः । ‘छादयामि जगद्विश्वं भूत्वा (भानुः) सूर्य्य इवांशुभिः । सर्वभूताधिवासश्च वासुदेवस्ततः स्मृतः” “वसनात् सर्वभूतानां वसुत्वाद् देवयोनितः । वासुदेवस्ततो वेद्यो योगिभिस्तत्त्वदर्शिभिः” भा० स्म० । स च चतुर्व्यूहस्य नारायणाख्यस्य परमात्मनः अंशभेदः इति वैष्णवाः तन्मते

“एकांशेन जगत् सर्वं व्याप्य नारायणः स्थितः । चतुर्धा संस्थितो व्यापी सगुणो निर्गुणोऽपि वा । एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवाऽमला । वासुदेवाभिधाना सा गुणातीता सुनिष्कला । द्वितीया कालसंज्ञान्या तामसी शेषसंज्ञिता (सङ्कर्षणाख्या) । निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः । सत्त्वोद्रिक्ता तृतीयाऽन्या प्रद्युम्नेति च संज्ञिता । जगत् स्थापयते सर्वं सा विष्णुप्रकृतिर्ध्रुवा । चतुर्थी वासुदेवस्य मूर्त्तिर्ब्राह्मी प्रकीर्त्तिता । राजसी चानिरुद्धाख्या प्राद्युम्नी सृष्टिकारिका । यः स्वपित्यखिलं हत्वा प्रद्युम्नेन सह प्रभुः । नारायणाख्यो ब्रह्मासौ प्रजासर्गकरो हि सः । या सा नारायणतनुः प्रद्युम्नाख्या मुनीश्वराः ! । तया संमोहयेद्विश्वं सदेवासुरमानुषम् । सैव सर्वजगत्सूते प्रकृतिः परिकीर्त्तिता । वासुदेवो ह्यनन्तात्मा केवलो निर्गुणो हरिः । प्रधानं पुरुषः कालस्तत्त्वत्रयमनुत्तमम् । वासुदेवात्मकं नित्यमेतत् विज्ञाय मुच्यते” कूर्मपु० ४२ अ० ।

वासुदेवप्रियङ्करी स्त्री ६त० । १शतावर्य्याम्, राजनि० ।

वासुरा स्त्री वस–उरच् । १स्त्रीजातौ २रजन्यां ३रात्रौ ४भूमौ च हेमच० ।

वासू स्त्री वस–ऊ । नाट्योक्तौ बालायाम् स्त्रियाम् अमरः ।

वास्तव न० वस्त्वेव अण् । सत्यभूते पदार्थे । [पदार्थे ।

वास्तविक त्रि० वस्तुनो निर्वृत्तम् ठक् । सतःसिद्धे सत्यभूते

वास्तव्य त्रि० वसति वस-तव्य नि० । वासकर्त्तरि, १वासयोग्ये स्थाने, २वसतौ च न० ।

वास्तु पु०न० वस-तुण् । वासयोग्यभूमौ अमरः । स्य च लक्षणादि २६१२पृ० दृश्यम् । स्वार्थे क । समानार्थे गृहे राजनि० । तदर्थे न० भावप्र० ।

वास्तूक न० वास्तु स्वार्थे क पृषो० दीर्घः । (वेतुया) १शाके भावप्र० २चिल्लीशाके स्त्री गौरा० ङीष् राजनि० ।

“वास्तूकं वास्तुकं च स्यात् क्षारपत्रश्च शाकराट् । तदेव तु हस्तिवास्तूकं स्यात् गौडवास्तूकम् । प्रथमो यवमध्ये स्यात् वास्तु शाकवतः स्मृतम् । वास्तूकद्वितयं स्वादु क्षारं पाके कटूदितम् । दीपनं पाचनं रुच्यं लघु शुक्रबलप्रदम् । सरं प्लीहास्रपित्तार्शःकृमिदोषत्रयापहम्” भावप्र० । [स्थिति २वासयोग्ये च ।

वास्तेय त्रि० वस्ति:दम् वस्तये हितं वा ढञ् । १वस्तिसम्ब-

वास्तोष्पति पु० ६त० अलुक् समा० । १इन्द्रे, अमरः २वास्तुभूमिपतौ च । [रुद्रे अमरः ।

वास्त्र पु० वस्त्रेणाच्छन्नः रथः अण् । वस्त्रेण सम्बृताच्छादिते

वास्नेय पु० वास्नाय हितं ढक् । नामवैशरे रत्ना० ।

वाह यत्ने भ्वा० आ० अक० सेट् ऋदित् चङि न ह्रस्वः । वाहते अवावाहिष्ट ।

वाह पुंस्त्री० वहत्यनेन वहो वा भारादिना वा वह-घञ् । १अश्वे “वाहो भारचतुष्टयम्” इत्युक्ते २परिमाणभेदे च अमरः । ३भुजे ४वायौ पु० ५वृषे च मेदि० पस्त्रा० गत्वरः स्त्रियां जातित्वे ङीष् । अमरः वाहद्विषादयोऽप्यत्र ।

वाहद्विषत् पु० वाहाय द्वेष्टि द्विष-शतृ ६त० । महिषे

वाहन न० वाहयति वह-णिच्-ल्युट् । रथादौ याने । देवभेदे वाहनभेदो यथा “विष्णुब्रह्मशिवैर्देवैर्धियते या जगन्मयी । शितप्रेतो महादेवो ब्रह्मा लोहितपङ्कजः । हरिर्हरिस्तु विज्ञेयो वाहनानि महौजसः । स्वमूर्त्त्या वाहनत्वन्तु तेषां यस्मान्न युज्यते । तस्मान्मूर्त्त्यन्तरं कृत्वा वाहनत्व गतास्त्रयः । यस्मिन् यस्मिन् महामाया प्रीत्या याति सततं शिवा । तेन तेनैव रूपेण वाहनान्यभवंस्त्रयः” कालिकापु० ५७अ० । देवदानवानां वाहनानि यथा । पुलस्त्य उवाच “शृणुष्व कथयिष्यामि सर्वेषामपि नारद ! । वाहनानि समासेन एकैकस्यानुपूर्वशः । देवकुञ्जरवरोत्पन्नं महाकायं महागजम् । श्वेतवर्णं महावीर्य्यं देवराजस्य वाहनम् । रुद्रोत्थःशुक्लवर्णं भीमं कम्बलवर्णं महोत्कटम् । पौण्ड्रकं नाम वाहनं

धर्मराजस्य नारद ! । वसुमानवसम्भूतं श्यामं अश्वधि- ष्ठितम् । मिथुनारं दिव्यगात्तं वाहनं वरुणस्य च । रौद्रं शकटचक्राख्यं गेयाकारनरोत्तमम् । अम्बिका- मादसम्भूतं वाहनं धनदस्य तु । एकादशानां रुद्राणां वाहनानि महामुने । गन्धर्वाश्च महावीर्या भुजगेन्द्राः सुदारुणाः । श्वेतानि वीरभद्राणि ह्यायद्युक्तयानि च । रथं चन्द्रमसश्चाद्य हंसहंसवाहनम् । हयोढ़ रथवाहाश्च आदित्या मुनिसत्तम ! । कुञ्जरस्थाश्च वसवो यक्षाश्च नरवाहनाः । किन्नरा भुजगारूढा हयारूढौ तथाश्विनौ । सारङ्गाधिष्ठिता ब्रह्मन् ! मरुतो घोर- दर्शनाः । शुकारूढाश्च कवयो गन्धर्वाश्च पदातिनः । आरुह्य वाहनान्येवं स्वानि स्वान्यमरोत्तमाः । सम्रद्य निर्ययुर्हृष्टा युद्धाय सुमहौजसः" वामनपु० ९अ० । निघण्टौ देवभेदे वाहननामभेदा उक्तास्तत्र दृश्याः ।

वाहस पु० वाहं गतिं स्यति सो-क । १अजगरे अमरः । २सुनिषण्णके (सुसनि) शाके ३परिमाणे च मेदि० ।

वाहिक पु० वह-णिच्-ठन् । १ढक्कायां २गोवाहे (वरदे) ३शकटादौ धरणिः । ४भारवाहके त्रि० "गोवाहिकः" शा० ट० । [पृष्ठो० । गजकुम्भस्याधोभागे अमरः ।

वाहित्थ न० वहतीति णिनि वाही-तस्मिन् तिष्ठति स्था-क

वाहिनी स्त्री वाहोऽस्त्यस्याः इनि ङीप् । १सेनायां, २हस्त्यश्वादिसंख्याभेदान्विते सैन्यभेदे अक्षौहिणीशब्दे १६८पृ०दृश्यम् । वहति वह-णिनि । २नद्याम् अमरः । "वाहिन्यः पार्श्वमेता न जहति भवतः" काव्यप्रकाशः ।

वाहिनीपति पु० ६त० । १सेनापतौ अमरः । २समुद्रे च शब्दच० ।

वाहीक पु० वह-ईकण् । १अश्विके जातिभेदे (जाट) । २देशभेदे च हेमच० ।

"वाहीकदेशं मद्रांश्च कुत्सयन् वाक्यमब्रवीत् । पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तराश्रिताः । तान् धर्मबाह्यानशुचीन् वाहीकान् परिवर्जयेत् । शाकलं नाम नगरमापगा नाम निम्नगा । जर्त्तिका नाम वाहीकास्तेषां वृत्तं सुनिन्दितम्" भा० कर्ण० ४० अ० ।

वाह्य न० वाह्यं चालनमर्हति यत्, वह-ण्यत् वा । १अश्वादौ याने हेमच० । वहिर्भवः ष्यञ् टिलोपः । २वहिर्भवे त्रि० । ३एतत्पयन्ते श्रोत्रादित्वमित्यन्ये ।

वाह्येन्द्रिय न० वाह्यपदार्थानां शब्दादीनां ग्रहणयोग्य- मिन्द्रियम् शाक०। शब्दादिग्राहके श्रोत्रादौ इन्द्रिये ।

वाह्लि(ह्ली)क पु० । वह्-लिण् स्वार्थे क । १देशभेदे भरतः । तद्देशजाते-कुङ्कुमे, २हिङ्गुनि न० मेदि० ।

वि अव्य० वा-कि । १नियोगे, २निग्रहे, ३निश्चये, ४असहने, ५निपाते, ६हेतौ, ७अव्याप्तौ, ८ईषदर्थे, ९परिभवे, १०अवलम्बने, ११ज्ञाने मेदि० १२विशेषेण गतौ, १३आ- लस्ये, १४पालने च शब्दच० । १५विहगे पु० अमरः । स्वरते अस्यार्थभेदास्तत्क्रमेणोदाहृतं यथा "विमानावियोगातिशयश्रमोहेशवाक्यसपैशुन्याचरणम्- वेषदर्शाभिक्षुल्वानवन्ताऽऽस्तुस्वास्थ्यदर्शनेषु" । विचित्र१ विमुक्तः२ विकीर्णः३ वितटा नदी४ विमनस्कः५ । विन्दुः६ विवदति७ विगायति८ विक्षतः९ विभूषितः१० विलोपितः११ विशुद्धः१२ विभ्रान्तः१३ विदष्टः१४ विश्रान्तः विलोकयति१५" । [गतिसङ्ख्यापूर्व्वते तस्मिन् ।

विंश त्रि०विंशतेः पूरणः विंशति+ड तिलोपः । येन विं-

विंशक न०विंशतेरवयवः कुन् तिलोपः । विंशतिसंख्यायाम् । विंशतिरधिका दीयतेऽस्मिन् शते आयो लाभो वृद्धिर्वा- कुन् । प्रतिशतं विंशत्यधिकलाभादौ "वाहुल्या विंशकं शतम्" इति याज्ञ० ।

विंशति स्त्री द्वे दशतौ नि०। १द्विदशकसंख्यायां, तद्युक्तार्थे च नित्यैकव०। सङ्ख्याविशेषार्थे तु द्वि०व०व० । द्वे विंशती त्रिंशो द्विंशतयः इति ।

विंशतिक त्रि० विंशतिमर्हति कन् । विंशतिसंख्यायोग्ये ।

विंशतितम त्रि० विंशतेः पूरणः तमप् । विंशशब्दार्थे स्त्रियां ङीप् । [संख्यायाम् ।

विंशिन् पु० विंशति+संख्यायां डिन् तिलोपः । विंशति-

विक न० विरूद्धं विगतं वा कं जलं सुखं वा यस्य । सद्यःप्रसूताया गोःक्षीरे पेयूषे शब्दच० । २विगतसुखे ३विगतजले च त्रि० ।

विकङ्कट पु०वि+कङ्कि-अटन् । गोक्षुरे शब्दमाला० । "विकङ्कटफलं पक्वं मधुरं सर्वदोषनुत्" भावप्र० ।

विकङ्कत पु० वि+कङ्क अतच् । (वंइचि) १वृक्षे अमरः २अतिबलायां स्त्री राजनि० ।

विकच पु० विगतः कचो यस्य । १क्षपणे बुद्धसंन्यासिनि । विशिष्टः कचो यत्र । २ध्वजे केतौ मेदि० । वि+कच- अच् । ३विकसिते अमरः । ६त० । ४केशशून्ये त्रि०मेदि० । ५महाश्रावणिकायाम् स्त्री राजनि० ।

विकट पु० वि+कट-अच् । १विस्फोटके शब्दरत्ना० २शाक- दृण्यरूपे च राजनि० । वि+कटच् । ३विशाले त्रि० मेदि० । ४विकृते त्रि० त्रिका० ५सुन्दरे त्रि० विश्वः ६दन्तुरे त्रि०

धरणिकोषः ७मायादेव्यां स्त्री त्रिकाण्डशेषः ।

विकण्टक पु॰विगतः कण्टकोऽस्य । १यवासे जटा॰ । २कण्टकहीने त्रि॰ । [कर्त्तरि युच् तत्कर्त्तरि त्रि॰]

विकत्थन न॰ वि+कत्थ-ल्युट् । आत्मश्लाघायाम् हेमच॰ ।

विकर्त्तन पु॰ वि+कृत ल्यु । १सूर्य्ये २अर्कवृक्षे च अमरः ।

विकर पु॰वि+कृ-अच् । १रोगे शब्दच॰, २खड्गहस्तदेशे हेमच॰

विकर्मस्थ पु॰ त्रि॰ विकर्मणि निन्दिताचारे तिष्ठति स्था-क । कुत्सिताचाररते विष्णु पु॰ ।

विकर्ष पु॰ वि+कृष-कर्मणि घञ् । शरे वाणे त्रिका॰ ।

विकल त्रि॰ विगता कला यस्य । १विह्वले, २स्वभावहीने त्रिका॰। ३कलाहीने च । ४ऋतुमत्यां स्त्रियां स्त्री टाप्। गौरा॰ वा ङीष । विभक्ता कला यया प्रा॰ब॰व॰। ५कलाषष्टिभागे स्त्री "विकलानां कला षष्ट्या" ज्यो॰त॰। [धिकाङ्गे अमरः।

विकलाङ्ग त्रि॰ स्वभावहीनमङ्गमस्य । स्वभावतो न्यूना-

विकल्प पु॰ विभिन्नः कल्पः । १भ्रान्तिज्ञाने २कल्पने मेदि॰ ३विविधकल्पने ४संशयारोपणे, ५पक्षतः प्राप्तौ च । विकल्पश्च द्विविधः व्यवस्थितः ऐच्छिकश्च । सोऽप्या-काङ्क्षादिरहे युक्तः तथा च भविष्ये "व्यतिषाक्ते विकल्पस्तु आकाङ्क्षापूरणे सति" । इच्छाविकल्पेऽष्ट-दोषः यथा "प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पना । प्रत्युज्जीवनहानिभ्यां प्रत्येकमष्टदोषता" । व्रीहिभिर्य-जेत यवैर्यजेत" इति श्रूयते । तत्र व्रीहिप्रयोगे प्रतीत-यवप्रामाण्यपरित्यागः । अप्रतीतयवाप्रमाण्यपरि-कल्पनम् । इदन्तु पूर्वस्मात् पृथक् वाक्यम् अन्यथा प्रयुक्त-येऽपि यागसिद्धिः स्यात् । अतएव विकल्पे न उभयम् शास्त्रार्थ इत्युक्तम् । प्रयोगान्तरे यवे उपादीयमाने परित्यक्तयवप्रामाण्योज्जीवनं स्वीकृतयवाप्रामाण्य-हानिरिति चत्वारो दोषाः । एवं व्रीहावपि चत्वारः इत्यष्टौ दोषा इच्छाविकल्पे । तथा चोक्तम् । "एवमेवाष्ट-दोषाश्च यद् व्रीहियववाक्ययोः । विकल्प आश्रितस्तत्र गतिरन्या न विद्यते" इति । विविधं कल्प्यते इति वि-कल्पः । तस्मादष्टदोषभिया उपोष्य द्वे तिथी इत्यत्र न इच्छाविकल्पः किन्तु व्यवस्थितविकल्पः" एका॰ त॰ रघु॰। पातञ्जलोक्ते ६चित्तवृत्तिभेदे यथा "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" सू॰। "स न प्रमाणोपारोही न विप-र्ययोपारोही वस्तुशून्यत्वेऽपि शब्दज्ञानमाहात्म्य निबन्धनो व्यवहारो दृश्यते । तद् यथा चैतन्यं पुरुषस्य स्वरूपमिति यदा चितिरेव पुरुषः तदा किमत्र केन व्यपदिश्यते भवति च व्यपदेशे वृत्तिः यथा चैत्रस्य गौ-रिति । तथा प्रतिषिद्धवस्तुधर्मो निष्क्रियः पुरुषः । तिष्ठति वाणः स्थास्यति स्थित इति गतिनिवृत्तौ धात्वर्थ-मात्रं गम्यते । तथानुत्पत्तिधर्मा पुरुष इति उत्पत्ति-धर्मस्याभावमात्रमवगम्यते न पुरुषान्वयी धर्मः तस्माद्वि-कल्पितः स धर्मस्तेन चास्ति व्यवहार इति । भा॰ "ननु शब्दज्ञानानुपाती चेदागमप्रमाणान्तर्गतो विकल्प प्रसज्येत निर्वस्तुकत्वे वा विपर्ययः स्यादित्यत" आह । स नेति । न प्रमाणविपर्ययान्तर्गतः कस्मात् यतो वस्तुशून्यत्वेपीति प्रमाणान्तर्गतिं निषेधयति । शब्द-ज्ञानमाहात्म्यनिबन्धन इति विपर्ययान्तर्गतिम्" । त-दुक्तं भवति कश्चिदभेदे भेदमारोपयति कश्चित् पुनः भिन्नानामभेदं ततो भेदस्याभेदस्य च वस्तुतोऽभावात् तदाभासो विकल्पो न प्रमाणं नापि विपर्ययो व्यव-हाराविसंवादादिति । शास्त्रप्रसिद्धमुदाहरणमाह तद् यथेति । किं विशेष्यं केन व्यपदिश्यते विशेष्यते, नाभेदे विशेष्यविशेषणभावो न हि गवा गौर्विशेष्यते । किन्तु भिन्नेन चैत्रेण तदिदमाह । भवति च व्यप-देशे वृत्तिः । व्यापदेश्यव्यापदेशकयोर्भावो व्यपदेशो वि-शेषणविशेष्यभाव इति यावत् तस्मिन् वृत्तिर्वाक्यस्य, यथा चैत्रस्य गौरिति । शास्त्रीयमेवोदाहरणान्तरं स-मुच्चिनोति तथेति प्रतिषिद्धवस्तुनः पृथिव्यादेः धर्मः परिस्पन्दो यस्य स तथोक्तः कोऽसौ निष्क्रियः पुरुषः । न खलु साङ्ख्यीये राद्धान्तेऽभावो नाम कश्चिदस्ति वस्तु धर्मो येन पुरुषो विशेष्येतेत्यर्थः । क्वचित् पाठं प्रति-षिद्धवस्तुधर्मा इति तस्यार्थः प्रतिषेधव्याप्त्या प्रति-षिद्धाभावो न वस्तुधर्माणां तद्व्यपता भावाभावयोरसम्-ब्धात्स च तथा प्रतीतिरिति । लौकिकमुदाहरणमाह तिष्ठति वाण इति । उपति भिनत्तीत्यत्र पूर्वापरीभूतया पाकादिक्रियथैव स्थानक्रियया वाणाश्रितया वाणस्य व्यपदेश इति गतिनिवृत्तौ धात्वर्थमात्रं गम्यते । गतिनिवृत्तिरेव तावत् कल्पिता तस्या अभावरूपत्वम् । तत्रापि पूर्वापरीभाव इत्यहो कल्पनापरम्परेत्यर्थः । अभावः कल्पितो भाव इव चानुगत इव च सर्वपुरुषेषु ग-म्यते न पुरुषाद् व्यतिरिक्तो धर्मः कश्चिदित्युदाहरणा-न्तरमाह । तथानुत्पत्तिधर्मेति । प्रमाणविपर्यया-भ्यामन्या न विकल्पवृत्तिरितिवादिनो बहवः प्रति-पेदिरे तदुपनिबोधनायोदाहरणप्रपञ्च " विव॰ ।

ज्ञाने प्रकारताद्युपविषयताभेदे यथा सविकल्पकं सप्रकारताकं ज्ञानम्। निर्विकल्पकं निष्प्रकारताकं ज्ञानमित्यादि दर्शितमत्र तत्र कश्चित् सत्यं कश्चिदसत्यम्। यथा "साध्यदृष्टान्तयोर्धर्मविकल्पात्" गौ० सू० इतो दृश्यम्।

विकल्पसम पु० गौ० उक्ते जात्युत्तरभेदे। स च कस्यचित् धर्मस्य कचिद्व्यभिचारदर्शनेन धर्मत्वाविशेषात् प्रकृतहेतोः प्रकृतसाध्यं प्रति व्यभिचारापादनरूपः यथा शब्दोऽनित्यः कृतकत्वादित्यत्र कृतकत्वस्य गुरुत्वव्यभिचारदर्शनात् गुरुत्वस्यानित्यत्वव्यभिचारदर्शनात् अनित्यत्वस्य मूर्त्तत्वव्यभिचारदर्शनात् धर्मत्वाविशेषात् कृतकत्वमप्यनित्यत्वं व्यभिचरेदिति" वृत्तिः। वा०भाष्ये तु "साधनधर्मयुक्ते दृष्टान्ते धर्मान्तरविकल्पात् साध्यधर्मविकल्पं प्रसजतो विकल्पसमः। यथा क्रियाहेतुगुणयुक्तं किञ्चिद् गुरु यथा लोष्टः किञ्चिद् लघु यथा वायुः। एवं क्रियाहेतुगुणयुक्तं किञ्चित् क्रियावत् स्यात् यथा लोष्टः। किञ्चिदक्रियं यथात्मा। विशेषो वा वाच्यः" इत्युक्तम्।

विकश्व(स्व)र त्रि० वि+कश(स)-वरच्। १प्रकाशशीले अमरः २रक्तपुनर्नवायाम् राजनि०।

विकषा(सा) स्त्री विशेषेण कष्यतेऽसौ कष(स) घञर्थे क। १मञ्जिष्ठायाम् अमरः। २मांसरोहिण्यां राजनि०।

विक(खि)सित त्रि० वि+कस(ख)-क्त। प्रकाशयुक्ते।

विकार पु० वि+कृ घञ्। प्रकृतेरन्यरूपे परिणामे। "विकारश्च यदात्मकं द्रव्यं मृदा सुवर्णं वा तस्यात्मनोऽन्यथे पूर्वो व्यूहो निवर्त्तते व्यूहान्तरं चोपजायते। तं विकारमाचक्षते" वा० भा० २।२ ५६ सूत्रे उक्तः। स्वरूपत्यागेन रूपान्तरापत्तिरूपः। स्वरूपस्य विनाशे अविनाशे वा द्रव्यान्तरारम्भकत्वरूपः यथा दुग्धादेर्दध्यारम्भकत्वम् बीजादेरङ्कुरारम्भकत्वरूपो वा" गौ०सू०वृत्त्युक्तो वा। स्वरूपनाशोऽपि विकारो भावविकारशब्दे दृश्यः। काष्ठादेरवयवनाशेन तस्योत्पादनात् तत्रापि काष्ठविकार एव कर्मन्‌शब्दे विकार्यनिरूपणे दृश्यम्।

विकार्य्य त्रि० वि+कृ-ण्यत्। १विकारजन्ये द्रव्ये व्याकरणोक्ते कर्मभेदे कर्मन्‌शब्दे १७११ पृ० दृश्यम्।

विकाल पु० विरुद्धः देवपैत्रादिकर्मानर्हः कालः। १रात्री नामकवेलायाम् २दिवसान्त्यकाले त्रिका०।

विकालिका स्त्री विगतः कालोऽनया कप् अत-इत्त्वम्। कालज्ञापके घटीयन्त्रभेदे (ताँबी) ताम्रकूपी त्रिका०।

विकाश न० विरुद्धः काशः। १रहसि २विभिन्ने काशे प्रकाशे च अमरः। [अमरः।

विकाशिन् त्रि० वि+काश-णिनि। प्रकाशशीले विकस्वरे

विकिर पुंस्त्री० वि+कॄ-क। १विहगे अमरः स्त्रियां ङीष्। २वृक्षे त्रिका०। विकीर्य्यन्ते घञर्थे क। ३विघ्नोपशान्तये उत्क्षिप्यमाणे तण्डुलादौ "नाशयन्तु च विघ्नानि भवन्तु दुष्टोरगाः। विकिरा इति सन्दिष्टा सर्वविघ्नोपनाशनाः" तन्त्रसा०। ४अग्निदग्धादीनां पिण्डनिर्वपने "असंस्कृतप्रमीतानां योगिनां कुलयोषिताम्। उच्छिष्टं भागधेयं स्यात् दर्भेषु विकिरश्च यः" श्रा० त०।
"पिण्डनिर्वपरहितं यत्तु श्राद्धं विधीयते। स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते" श्रा०त०।

विकिरण न० वि+कॄ-ल्युट् नि० इत् रपरत्वम्। १क्षेपणे २हिंसने, ३ज्ञाने च। ४अर्कवृक्षे पु० अमर०। ६ब०। ५किरणशून्ये त्रि०।

विकीर्ण त्रि० वि+कॄ-क्त। विक्षिप्ते।

विकुर्वाण त्रि० वि+कृ शानच्। हर्षहेतुना जातरोमहर्षादौ अमरः। २विकृतिप्राप्ते च। [११ अ०।

विकुक्षि पु० सूर्य्यवंश्ये इक्ष्वाकुराजपुत्रे नृपभेदे हरिवं०।

विकुस्र पु० वि+कुस-रक्। चन्द्रे उणादिकोषः।

विकूणिका स्त्री वि+कूण-ण्वुल् स्वार्थे क अत इत्त्वम्। नासायां हेमच०।

विकृत त्रि० वि+कृ-क्त। १बीभत्से २मलिनीकृते, ३रोगयुक्ते ४विकारयुते।
"सोमानेत्र्यादिभिर्वेष नोच्यते मे निदर्शितम्। अकृत चेष्टयैवेदं विकृतं तद्विदुर्बुधाः" उज्ज्वलनीलम्। ५संवत्-भेदे न० प्रभवादिषु दृष्टवर्षितं पृ० प्रभवादिशब्दे ४४७४पृ० तदानयनं दर्शितम्। "सर्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्च जायते। शिरोव्यथाऽक्षिरोगाश्च मा-चादि विकृते जनाः" ज्यो०त०। त्वष्टृशब्दे २६१२ पृ० दृश्यम्। [क्तिच् भिन्नं ङीप्। ६रोगे ७छिन्ने हेमच०।

विकृति स्त्री वि+कृ-क्तिन् वा। १विकारशब्दार्थे अमरः।

विकेशी स्त्री विगतः केशो यस्याः ङीष्। १केशशून्यायां स्त्रियां २पटवर्त्तौ च धरणिः। ३महीरूपस्य शिवस्य पत्न्याम् "उर्वी अलं मही विकेशी सुराकाशजेन च। दीक्षितो ब्राह्मणः सोमः इत्येतास्तनवः क्रमात्। सुवर्चला तथैवोषा विकेशी चापरा शिवा। स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमम्। सूर्य्यादीनामिमाः पत्न्यो रुद्राद्यैर्नामभि वृषः" मार्क० पु०।

विक्रोश पु० उक्काद्धरपुत्रभेदे भाग० ९ स्क० २१ अध्याये दृश्यम् ।

विक्रु पु० विक्रयति वि+क्रय-उ । अरिग्राहके त्रिका० ।

विक्रम पु० विशेषेण क्रामति वि+क्रम-अच् । १त्रि-विक्रमे, २विष्णौ, "मेधावी विक्रमः क्रमः" विष्णु स० । ३विक्रमादित्यनृपे "रत्नानि वै वररुचिर्नव विक्रमस्य" ज्योतिर्विदाभरणम् । भावे घञ् । ४क्रमणे मेदि० । करणे घञ् । ५चरणे, त्रिविक्रमः । ६शौर्यातिशये, ७सामर्थ्ये च राजनि० । षष्टिवर्षमध्ये "अवर्षं मधु गन्धञ्च मधुदं विक्रमे प्रिये !" इत्युक्तलक्षणे वत्सर-भेदे मेदि० । प्रभवादिशब्दे ४४७४ पृ० दृश्यम् ।

विक्रमादित्य पु० विक्रमेणादित्य इव । स्वनामख्याते नृपभेदे विक्रमार्कोऽप्यत्र "नो दुष्टः श्रुत एव वा क्षितितले श्रीविक्रमार्कोपमः" मिता० ।

विक्रमिन् पु० वि+क्रम-णिनि । १सिंहे, राजनि० २विष्णौ विष्णु स० । ३विक्रमयुक्ते त्रि० स्त्रियां ङीप् ।

विक्रय पु० वि+क्री-अच् । मूल्यग्रहणेन परस्वत्वापादके व्यापारे अमरः ।

विक्रये विहिताविहितपण्यान्यपि यथा "धनाढ्यिगन्धैर्लिप्तताम्रपूर्वाः नेष्टाः क्रये विक्रयणे प्रशस्ताः । पौष्णाग्नि चित्राशतविन्दुवाताः क्रये हिता विक्रयणे निषिद्धाः" । ज्योतिःसारः । क्रयविक्रयनिर्णयो यथा "मूल्यं दास्यामीति नियमं कृत्वा गृहीत्वापि क्रयसिद्धिः । तथाच विवादचिन्तामणौ कात्यायनः "पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत् । ऋतुत्रयस्योपरिष्टात् तद्धनं वृद्धिमाप्नुयात्" । अतएव बृहस्पतिः "गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम् । पत्रं कारयते यत्तु क्रयलेख्यं तदुच्यते" । क्रयविक्रये समयविशेषाभ्यन्तरे पश्चात्तापात् सिद्धिः । यथाह मनुः "क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् । सोऽन्तर्दशाहे तद्द्रव्यं दद्याच्चैवाददीत वा" । एतद्याज्ञवल्क्योक्तेतरपरम् । यथा याज्ञवल्क्यः "दशैकपञ्चसप्ताहमासत्र्यहार्द्धमासिकम् । बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणं" । अत्र बृहस्पतिः "क्रीतोऽदीक् पण्यदोषस्तु यदि संजायते क्वचित् । विक्रेतुः प्रतिदेयन्तत् क्रेता मूल्यमवाप्नुयात्" । अतस्तद्द्रव्यपरीक्षणकालात् । कात्यायनः "अविज्ञातन्तु यत् क्रीतं दुष्टं पश्चाद्विभावितम् । क्रेता तत् स्वामिने देयं पण्यं कालेऽन्यथा न तु" । बीजे वाहकपरीक्षाकालाभ्यन्तरे । परीक्षिते तु बृहस्पतिः "परीक्षेत स्वयं पण्यं अन्येषाञ्च प्रदर्शयेत् । परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेत्" । अत्र विशेषयति नारदः "क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी । विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाह्न्यविक्षतम् । द्वितीयेऽह्नि ददत् क्रेता मूल्यात्त्रिंशांशमाहरेत् । द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तत्" । आहरेत् दद्यात् विक्रेत्रे इति शेषः । द्विगुणं त्रिंशांशस्य । याज्ञवल्क्यः "राजदैवोपघातेन पण्ये दोषमुपागते । हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः" । नारदः "उपहन्येत वा पण्यं दह्येतापह्रियेत वा । विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः । दीयमानं न गृह्णाति क्रीतं पण्यन्तु यः क्रयी । स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः" प्राय० त० । "न्यासं कृत्वा परत्राधिं कृत्वा चाधिं करोति च । विक्रयं वा क्रिया तत्र सर्वथा वञ्चना परा" । न्यासं कृत्वा आधिं करोति आधिं कृत्वा वा विक्रयं करोति । विक्रयपदं सम्बन्धं सबलात् दानं बहुवति तत्र परा क्रिया सिद्धेत्यर्थः । एवञ्च विक्रेतृदातोर्मरणादिना आध्यनुसारे विक्रयदाने तत्कर्त्तृतुल्यस्वत्वजननात् तत्र तत्क्रेतृप्रतिग्रहीतृभ्यामाध्युद्धारः कार्यः इति । न च "स्थावरस्य समस्तस्य गोत्रसाधारणस्य च । नैकः कुर्यात् क्रयं दानं परस्परमतं विना । विभक्ता अविभक्ता वा सपिण्डाः स्थावरे समाः । एको ह्यनीशः सर्वत्र दानाधमनविक्रये" इति व्यासवचनाभ्यामेकस्य दानवन्धकविक्रयानधिकारः इति वाच्यं यथेष्टविनियोगार्हत्वरूपस्य स्वत्वस्य द्रव्यान्तर इवात्राप्यविशेषात् वचनस्य स्वामित्वेन दुष्टतपुरुषस्थावरविक्रयादिना कुटुम्बविरोधादधर्मज्ञापनार्थनिषेधकं न तु विक्रयाद्यनिष्पत्त्यर्थमिति" दायभागः । एवञ्च "स्थावरे विक्रयो नास्ति कुर्यादाधिमनुज्ञया" इति स्थावरस्य केवलविक्रयप्रतिषेधात् एवं "भूमिं यः प्रतिगृह्णातीत्यादिवचने दानप्रशंसादर्शनाच्च विक्रयेऽपि कर्त्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपेण स्थावरविक्रय इति" विज्ञानेश्वरः । वस्तुतस्तु स्थावरविक्रयनिषेधः अविभक्तस्थावरविषयः । तथापि यदि विक्रयं विना अवस्थितिर्न भवति तदा विक्रयः कर्त्तव्यः । पूर्वपुरुषार्जितगृहोद्धारे विशेषयति मिताक्षरायाम् "स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्जितम् । असम्भूय सुतान् सर्वान् न दानं न च विक्रयः" इ-

स्यादि। अथापवादमाह "एकोऽपि स्थावरे कुर्य्याद्दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः" दायतत्त्वे रघु०। द्रव्यविशेषविक्रयनिषेधो यथा स्मृतिः "विक्रीणन् मद्यमांसानि ह्यभक्ष्यस्य च भक्षणम्। कुर्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात्। कपिलाक्षीरपानेन ब्राह्मणीगमनेन च। वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेत्" कालिकापु०। "विक्रयं सर्ववस्तूनां कुर्वन् शूद्रो न दोषभाक्। मधु चर्म सुरां लाक्षां त्यक्त्वा मांसञ्च पञ्चमम्" मनुः। "सद्यः पतति मांसेन लाक्षया लवणेन च। त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात्। अयज्ञो भेषजस्यार्थे यज्ञहेतोस्तथैव च। यद्यवश्यन्तु विक्रेयास्तिला धान्येन तत्समाः" प्रायश्चि० त०। "गवां विक्रयकारी च गवां गोष्ठे कृषिं भवेत्" इति यमवचनम्। "गोवधोऽयाज्यसंयाज्यपारदार्य्यात्मविक्रयाः। तडागारामदारापत्यस्य च विक्रयः। व्रात्याध्ययनादानमपण्यानाञ्च विक्रयः" मनुः।

विक्रयानुशय पु० विक्रयस्यानुशयः पश्चात्तापः। विक्रीतपदार्थस्य परावृत्तिफलके १अनुतापे तन्निमित्ते २विवादभेदे

विक्रयिक पु० विक्रयः अस्त्यस्य ठन्। विक्रेतरि अमरः।

विक्रयिन् त्रि० वि+क्री-ताच्छील्ये इनि। विक्रयशीले स्त्रियां ङीप्। [भावे क्त। १विक्रमे।

विक्रान्त पु० वि+क्रम-क्त। १सिंहे राजनि० २शूरे च अमरः।

विक्रिया स्त्री वि+कृ-भावे श। १विकारे अन्यथास्थितस्य वस्तुनोऽन्यथा परिणामे।

विक्रीयासम्प्रदान न० विक्रीय न सम्प्रदानं क्रेत्रे यत्र। अष्टादशविवादान्तर्गते विवादविशेषे तत्स्वरूपादिकं वीरमि० उक्तं यथा

"अथ विक्रीयासम्प्रदानाख्यव्यवहारपदम्। तत्स्वरूपमाह नारदः "विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते। विक्रीयासम्प्रदानं तद्विवादपदमुच्यते इति" तत्र विक्रेयद्रव्यस्य द्वैविध्यषड्विधत्वे क्रमेणाह स एव "लोकेऽस्मिन् द्विविधं पण्यं जङ्गमं स्थावरं तथा। षड्विधस्तस्य च बुधैर्दानादानविधिः स्मृतः। गणितन्तुलितं मेयं क्रियया रूपतः श्रियेति"। दानं विक्रयः आदानं क्रयः। गणयित्वा यस्य क्रयः तद्गणितम्। गणितं संख्येयं क्रमुकफलादिकम् एवं तुलिमादिकं तुलितन्तुलाधृतं हेमचन्दनादिकम्। मेयं व्रीह्यादिकम् क्रियया वाहनदोहनादिरूपया युक्तमिति शेषः। रूपतः रूपेण युक्तं वस्तु पण्याङ्गनादि। श्रिया दीप्त्या युक्तं पद्मरागादिकम्। यदा विक्रेता मूल्यं गृहीत्वा याचमानाय क्रेत्रे विक्रीतं वस्तु न ददाति तदा यत्कर्त्तव्यं तदाह स एव "विक्रीय पण्यं मूल्येन क्रेतुर्यो न प्रयच्छति। स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियाफलमिति" यो गृहीतमूल्यो विक्रेता अजातानुशयाय क्रेत्रे प्रार्थयमानाय नार्पयति तत्र पण्यं यदि स्थावरात्मकं तदा क्षयेण वर्द्धितमसौ दाप्यः। यदा तु जङ्गमात्मकं तदा क्रियाफलेन वर्द्धितम् इत्यर्थः। विक्रयानन्तरं जात उपभोगोऽत्र क्षयः क्रियाफलं दोहनादिक्रियाफलं क्षीरादिकम्। इदञ्च क्रयकालापेक्षया अर्पणकाले मूल्याधिक्ये वेदितव्यम्। मूल्यह्रासे त्वन्यथाभिधानात्। तथा च स एव "अर्घश्चेदपचीयेत सोदयम्पण्यमावहेदिति"। अर्वाक् चेदपचीयेतेति वस्त्वन्तरे पाठः। अर्वाक् विक्रीतस्य क्रेत्रे समर्पणात् पूर्वं अपचीयेत हीनमूल्यं भवेत्सोदयम्पण्यमावहेत्। विक्रयकाले यावन्मूल्यं गृहीतं तावता मूल्येनार्पणसमये मूल्यह्रासवशाद्यावदुपचयवर्द्धितं लभ्यते तावद्दद्यादित्यर्थः। यदा तु मूल्यसाम्यं तदा पण्योपचयरूपलाभस्याभावात् "निवेशं हविशेषस्य क्रयं विक्रयमेव च। याच्यमानमदत्तश्चेद्वर्द्धते पञ्चकं शतमिति" वचनोक्तवृद्धिवर्द्धितम्पण्यं दाप्यः। अतएव याज्ञवल्क्यः "गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति। सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते" इति। गृहीतमूल्यम्पण्यं विक्रेता यदि प्रार्थयमानाय स्वदेशवणिजे क्रेत्रे न समर्पयति तत्र पण्यं यदि क्रयकाले बहुमूल्यं कालान्तरे अल्पमूल्येनैव लभ्यते तदा सोदयं वृद्ध्या सहितं विक्रेता क्रेत्रे दापनीयः। यदा मूल्यह्रासवशतः पण्यस्योदयो नास्ति किन्तु क्रयकाले यावता मूल्येन लभ्यं यावत्पण्यमिति प्रतिपन्नं तावदेव तदा तत्पण्यमादाय तस्मिन् देशे विक्रीतस्य यो लाभस्तेनोदयेन सहितं दापनीयः वचनस्यायमर्थः। चतुर्थश्च तु यो देशान्तरात् क्रयार्थमागत्य क्रीणाति तस्मै देशान्तरे तत्पण्यविक्रये यो लाभस्तेन सहितं तत्पण्यं दापनीय इत्यर्थः। देशान्तरलाभसहितपण्यदानस्य चैवकत्वादाय साम्य एव किन्तु मूल्यस्य ह्रासेऽपीत्याह नारदः "स्थायिनामेष नियमो दिग्लाभं दिग्विचारिणामिति"।

स्वामिनां विक्रेतृदेयस्वामिनाम् एव नियमः स्थावरस्य च दाय इत्यादिवचनोक्तो नियम इत्यर्थः। विष्णुर्विक्रेतृदण्डमप्याह "गृहीतमूल्यं यः पण्यं क्रेतुर्नैव दद्यात्तस्य सोदयं दाप्यो राज्ञा च पणशतं दण्ड्यः" इति। एतच्चानुशयरहितक्रेतृविक्रेतृविषयमिति मदनरत्ने। यस्तु विक्रीयानुशयवशान्नार्पयति यश्च क्रीत्वाऽनुशयवशान्न गृह्णाति तौ प्रत्याह कात्यायनः "क्रीत्वा प्राप्तं न गृह्णीयाद्यो न दद्याददूषितम्। स मूल्याद्दशभागन्तु दत्त्वा स्वद्रव्यमाप्नुयात्"। अप्राप्तेऽपि क्रियाकाले क्षते नैव प्रदापयेत्। एष धर्मो दशाहात्तु परतोऽनुशयो नास्तीति"। अदूषितं असादिनेति शेषः। दोह्यवाह्यादिपण्यस्य दोहनवाहनादिरूपः कालोऽस्य क्रियाकालस्तस्मिन्नप्राप्ते सति अपहतेऽदाने वा क्षते सति न दशमभागं प्रदापयेत् किन्तु तदर्घ्यमेव स्वीयं द्रव्यं प्राप्नुयादिति। एष धर्मो दशाहात्प्राग्वेदितव्यः तत ऊर्द्ध्वमनुशयो न कर्त्तव्यः। विक्रीयासम्प्रदानतो यदि क्रीतं पण्यं विक्रेतुः पार्श्वे स्थितं तस्य यदि नाशः स्यात्तदा विक्रेतुरेव हानिरित्याह याज्ञवल्क्यः "राजदैवोपघातेन पण्ये दोषमुपागते। हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः" इति। अत्र याचितस्येति विशेषणोपादानात् याचनाभावे न विक्रेतुर्हानिरित्यवगम्यते। नारदोऽपि "उपहन्येत वा पण्यं दह्येतापह्रियेत वा। विक्रेतुरेव सोऽनर्थो विक्रीयासम्प्रयच्छतः" इति। यथा याचितस्याप्रयच्छतो विक्रेतुर्हानिस्तथा दीयमानं पण्यमगृह्णतः क्रेतुरपीत्याह स एव "दीयमानं न गृह्णाति क्रीतं पण्यञ्च यः क्रयी। स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः" इति। अप्रयच्छतः विक्रेतुर्यो दोषः स एवास्य भवेदित्यन्वयः। क्रेतुर्दोषाभिधानस्य फलं पण्यस्य मूल्यं क्रेत्रे विक्रेता न प्रत्यर्पयेदिति। दीयमानं न गृह्णातीति वदता दीयमानग्रहणे न मूल्यहानिरिति दर्शितम्। प्रयोजनान्तरं क्रेत्रा न याचितं विक्रेत्रा च न समर्पितं आत्मनोदासीनत्वात् द्वयोः समा हानिः। क्रेतृविक्रेत्रोरपि याचनार्पणवैशिष्ट्येन सापराधत्वादित्युक्तं देवभट्टैः स्मृतिपञ्जिकायाम्। याज्ञवल्क्योऽपि "हानिश्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेदिति" क्रेतृदोषः दीयमानस्याग्रहणम्। यत्र पुनर्ज्ञातानुशयः क्रेता विक्रेता दीयमानञ्च गृह्णाति तत्राह नारदः "दीयमानं न गृह्णाति क्रीत्वा पण्यञ्च यः क्रयी। विक्रीणानस्तदन्यत्र विक्रेता नापराप्नुयादिति"। क्रयी ज्ञातानुशय इति शेषः। याज्ञवल्क्योऽपि "विक्रीतमपि विक्रेयं पूर्वक्रेतर्यगृह्णतीति"। यस्तु दुष्टं पण्यं दर्शयित्वा सदोषं विक्रीणीते यश्चान्यहस्ते विक्रीतं तत्क्रेत्रनुमत्यभावे स्वाम्यन्यत्र विक्रीणीते तयोः समानो दण्ड इत्याह नारदः "निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति। स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव तु। तथान्यहस्ते विक्रीय योऽन्यस्मै तत्प्रयच्छति। द्रव्यन्तद्द्विगुणं दाप्यो विनयं तावदेव तु"। याज्ञवल्क्योऽपि "अन्यहस्ते च विक्रीतं दुष्टं वाऽदुष्टवद्यदि। विक्रीणीते दमस्तस्य मूल्यात्तु द्विगुणो भवेदिति" बुद्धिपूर्वविषयमेतत्। "ज्ञात्वा सदोषं यः पण्यं विक्रीणीते विचक्षणः। तदेव द्विगुणं दाप्यस्तत्समं विनयं तथेति" बृहस्पतिनोक्तत्वात्। अबुद्धिपूर्वके विक्रये तु क्रयपरावर्त्तनमेव। अन्यत्रापि विषयविशेषे परावर्त्तनमाह बृहस्पतिः "मत्तोन्मत्तेन विक्रीतं हीनमूल्यं भयेन वा। अस्वतन्त्रेण मूढेन त्याज्यन्तस्य पुनर्भवेदिति"। एतत्सर्वं दत्तमूल्ये पण्ये द्रष्टव्यम्। अत एव नारदः। "दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्त्तितः" इति। यत्र पुनर्मूल्यं न दत्तं तत्रापि स एवाह "अदत्तेऽन्यत्र समयान्न विक्रेतुरतिक्रमः" इति। अदत्तमूल्ये तु पण्ये वाङ्मात्रेण क्रये कृते न परावर्त्तनीयत्वनियमादिसमयाभावे सति प्रवृत्तौ निवृत्तौ न कश्चिद्दोष इत्यर्थः। यत्र पुनर्वाङ्मात्रक्रयपरिहारार्थं विक्रेतुर्हस्ते क्रेत्रा किञ्चिद्द्रव्यं दत्तं तत्र क्रेतृदोषवशेन क्रयाविघ्नौ त्वाह व्यासः "सत्यङ्कारं च यो दत्त्वा यथाकालं न दृश्यते। पण्यं भवेन्निसृष्टं तद्दीयमानमगृह्णतः" इति। निसृष्टं भवेत् उत्सृष्टं भवेदित्यर्थः। अत्र पण्यद्रव्यस्योत्सर्गः सत्यङ्कारद्रव्योत्सर्गोऽभिमतः। अन्यथा वाङ्मात्रक्रयकर्तृतुल्यत्वेन विक्रेतुः सत्यङ्कारद्रव्यप्राप्तिकल्पनमन्यत्र विक्रयाद्यपराधनिमित्तकं सत्यङ्कारद्रव्यस्य द्वैगुण्येन प्रतिदानं न स्यात्। अत्रापि विक्रीतमविक्रेयमित्यनुसन्धेयम्। अस्मिन्नेव विषये विक्रेतृदोषवशेन क्रयादिनिवृत्तौ त्वाह याज्ञवल्क्यः "सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेदिति" सत्यङ्कारः सत्यापनं कृतस्य क्रयस्य रक्षतामरणमिति यावत्। "क्रीय सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियाम्" इत्यमर

कोऽभिधानात्। इत्थं राय हतं इत्यादितं बलत्कार-हतं पूर्य्यत्वं कर्त्तुं यद्विकेतुङ्क्तो हतमित्यर्थः"।

विक्रेय त्रि० वि+क्री-यत्। विक्रयणीये द्रव्यादौ। [२व्याकुलत्वे

विक्लव त्रि० वि+क्लु-अच्। १व्याकुलीकृते अमरः। भावे ष्यञ्

विक्लित्ति स्त्री वि+क्लिद-क्तिन्। जवतेजःसंयोगव्यापार-जन्यद्रवत्वे पूर्व्वावयवसंयोगनाशाऽनन्तरविरुद्धसंयोगापत्तौ।

विक्लिन्न त्रि० वि+क्लिद-क्त। १आर्द्रे २शीर्णे ३जीर्णे च मेदि०। ४विक्लेदयुक्ते। [शब्दे च वैद्यकम्।

विक्षाव पु० वि+क्षु घञ्। १शब्दे अमरः। २कासादिरोगजात-

विक्षिप्त त्रि० वि+क्षिप-क्त। १विशेषेण क्षिप्ते २योगशास्त्रोक्ते चित्तस्य भूमिभेदे न०। तयोक्तं पातञ्जलभाष्यविव-रणयोः "क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः। तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनी-भूतः समाधिर्न योगपक्षे वर्त्तते" भा०। "क्षिप्तं सदैव रजसा तेषु तेषु विषयेषु क्षिप्यमाणम् अत्यन्तमस्थिरं, मूढन्तु तमःसमुद्रेकान्निद्रावृत्तिमत्। विक्षिप्तं क्षिप्ता-द्विशिष्टं विक्षिप्तं विशेषोऽस्य स्थेयबहुलस्य कादाचित्कः स्थेमा वा चाह्लादः स्थेमबहुलता सांसिद्धिकी वा अभ्य-साद्व्याधिस्त्यानाद्यन्तरायजनिता वा" विव०।

विक्षीर पु० विशिष्टं विगतं वा क्षीरमस्य। १अर्कवृक्षे राजनि० २विगतक्षीरे त्रि०।

विक्षेप पु० वि+क्षिप-घञ्। १त्यागे २प्रेरणे ३दूरीकरणे च। "चित्तस्य विक्षेपा नवविधाः पात० सूत्रभाष्ययोर्दर्शितास्ते च चित्तविक्षेपशब्दे २८४१पृ० अन्तरायशब्दे च दृश्याः। वेदान्तसिद्धचित्तविक्षेपाः २०० पृ० उक्ताः। विमण्डले यत् पदस्थानं तस्य क्रान्तिवृत्तात् यत् तिर्य्य-गन्तरं स विक्षेपः" सि०शि० उक्ते ४शरे च। "भूभाभासर्द्धरचना इव विम्बगवेषणम्। इत्यक्षाश्वा-नसोऽस्य विक्षेपो द्विविधानि वै" सा० द० उक्ते स्त्रीणां ५यौवनालङ्कारभेदे ६कथाविच्छेदरूपे निग्रहस्थानभेदे "कार्य्यव्यासङ्गात् कथाविच्छेदो विक्षेपः" गौ०सू० "यत्र कर्त्तव्यं व्यासज्य कथां व्यवच्छिनत्ति। इदं मे करणीयं विद्यते तस्मिन्नवसिते कथयिष्यामि इति विक्षेपो नाम निग्रहस्थानम्। एकनिग्रहावसानायां कथायां स्वयमेव कथान्तरं प्रति-पद्यते इति" वा०भा०। "असम्भवत्कार्य्यान्तरकत्वेनारोपितं कार्य्यं व्यासङ्गस्तस्मात् कथाविच्छेदरूपा" वृत्तिः।

विक्षेपशक्ति स्त्री विक्षेपस्य जनिका शक्तिः। वेदान्तोक्ते अविद्याशक्तिभेदे। "विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्ज्वौ स्व-शक्त्या सर्पादिकमुद्भावयति एवमज्ञानमपि स्वावृतात्मनि स्वशक्त्या आकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम्। तदुक्तम् "विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजे-दिति"। वेदान्तसा०।

विखु त्रि० विगता नासिका यस्य खादेशः। गतनासिके। अमरः। खादेशः। विख्योऽप्यत्र त्रिका०।

विखुर पुंस्त्री० १राक्षसे त्रिका० स्त्रियां ङीष्। २चौरे संक्षिप्त०

विख्यात विशेषेण ख्यातः प्रसिद्धः वि+ख्या-क्त। प्रसिद्धे

विगणन न० विशेषेण गणनम् गण-ल्युट्। ऋणशोधनार्थे सङ्ख्यागणने।

विगत त्रि० वि+गम-क्त। १प्रभारहिते अमरः। २विशेषगते शब्द० ३अपगते च हेमच०। ६त०। ४आगतौ न०। "विगतं विगतम्" भट्टिः। [छायायां स्त्रियाम् शब्दरत्ना०।

विगतार्त्तवा स्त्री विगतमार्त्तवं रजो यस्याः। गतरज-

विगन्धक पु० विरुद्धः गन्धोऽस्य कप्। १इङ्गुदीवृक्षे राजनि०। २हपुषायां स्त्री० टापि अत इत्वम्।

विगम पु० वि+गम-घञ्। १नाशे, २अपाये च।

विगर्हण न० वि+गर्ह-ल्युट्। निन्दने।

विगर्हित त्रि० वि+गर्ह-क्त। १निन्दिते २निषिद्धे च। भावे-क्त। ३निन्दायाम् न०।

विगाढ त्रि० वि+गाह-क्त। १स्नाते, २कृतावगाहने च।

विगान न० वि+गै-ल्युट्। निन्दायाम् हेमच०।

विगीत त्रि० वि+गै-क्त। निन्दिते।

विगीति स्त्री वि+गै-क्तिन्। निन्दायाम्।

विगुण त्रि० विरुद्धो गुणोऽस्य। गुणरहिते।

विगूढ त्रि० वि+गुह क्त। १गर्हिते, २गुप्ते च मेदि०।

विगृहीत त्रि० वि+ग्रह-क्त। १गृहीते, व्याकरणोक्ते वि-ग्रहवाक्यस्थे २पदे च।

विग्र त्रि० विगता नासिकाऽस्य ग्रादेशः। विगतनासिके अमरः

विग्रह पु० वि+ग्रह-अच्। १देहे, २विस्तारे, ३युद्धे पुंन० अमरः। ४समासादिवृत्तिसमानार्थकवाक्यभेदे, ५विशेष-ज्ञाने च "अविग्रहा गतादिस्था यथा प्रादिकर्मणि" हरि०।

विघटिका स्त्री विभक्ता घटिका यया प्रा०व०। घटिकाषष्टिभागे पलात्मके काले राजनि०। वि+घट-ण्वुल्। २वियोजिते त्रि०

विघटित त्रि॰ वि+घट-क्त। १वियोजिते २विशेषेण रचिते च

विघट्टित त्रि॰ वि+घट्ट-क्त। १चालिते २वियोजिते च।

विघस पु॰ वि+अद-घञ्। भोजनशेषे मेदि॰ २आहारे च शब्दच॰। ३सिक्थके न॰ राजनि॰। ४देवपैत्रदत्तशेषे

विघसाशिन् त्रि॰ विघसं देवतादिदत्तावशेषमन्नादि अश-णिनि। देवपैत्रकार्य्यानन्तरं तदवशिष्टभोजिनि।

विघात पु॰ वि+हन-क्त। १व्याघाते २आघाते च।

विघातिन् त्रि॰ वि+हन-णिनि। १निवारके। २नाशके, ३नाशप्रतियोगिनि च "नित्यश्चायं वह्निनिमित्तो विघाती" इति व्याकरणका॰। ण्वुल्। विघातकोऽप्यत्र।

विघ्न पु॰ वि+हन-क। १व्याघाते अन्तराये अमरः। २क-ण्टपाकफलायां शब्दच॰। [गणेशे शब्दर॰।

विघ्ननायक पु॰ विघ्नानामुत्पत्त्यनुत्पत्त्योः नायकः। विघ्नेशे

विघ्नकारिन् त्रि॰ विघ्नं करोति कृ-णिनि। १घोरदर्शने २विघ्नकर्त्तरि च मेदि॰। स्त्रियां ङीप्। [ऽप्यत्र।

विघ्ननाशक पु॰ ६त॰। गणेशे शब्दच॰ ण्वुल्। विघ्ननाशनादयो-

विघ्नराज पु॰ विघ्ने राजते राज-अच्। गणेशे अमरः। ६त॰। विघ्नेशादयोऽप्यत्र।

विघ्नहारिन् पु॰ विघ्नं हरति हृ-णिनि। गणेशे त्रिका॰।

विघ्नित त्रि॰ विघ्नो जातोऽस्य इतच्। कृतविघ्ने।

विघ्नेशानकान्ता स्त्री ६त॰। श्वेतदूर्वायाम् राजनि॰।

विच पृथक्करणे रु॰ जु॰ वा उ॰ अक॰ अनिट्। विनक्ति वि-वेक्ति विङ्क्ते विविक्ते। इरित् अविचत् अवैक्षीत्।

विचकिल पु॰ विच+क विल-क कर्म॰। १मदनवृक्षे। २मल्लीभेदे मेदि॰। [३नागदन्त्यां स्त्री राजनि॰ टाप्।

विचक्षण पु॰ वि+चक्ष-ल्यु न ख्यादेशः। १पण्डिते अमरः

विचक्षुस् त्रि॰ वि+चक्ष-उसि न ख्यादेशः। १विमनस्के त्रिका॰। विगतं चक्षुर्यस्य। २नेत्रशून्ये त्रि॰। [चयने च।

विचयन न॰ वि+चि-ल्युट्। १अन्वेषणे शब्दच॰। २पुष्पादि-

विचर्चिका स्त्री वि+चर्च-ण्वुल्। पामनि रोगभेदे अमरः। सा च क्षुद्रकुष्ठविशेषः। "एकं कुष्ठं स्मृतं पूर्वं गजचर्म ततः स्मृतम्। ततश्चर्मदलं प्रोक्तं ततश्चापि विचर्चिका। विपादिकाभिधा चैव पामा कच्छुस्ततः परा। ततो दद्रुश्च विस्फोटः किटिभञ्च ततः परम्। ततश्चालसकं प्रोक्तं शताह्वञ्च ततः परम्। क्षुद्रकाणि चैतानि कथितानि भिषग्वरैः। सकण्डूः पिड़का श्यावा बहुस्रावा विच-र्चिका" पिड़का क्षुद्रपिड़का। "दाल्यते त्वक् खरा रूक्षा-जानोर्घ्यां विचर्चिका। पादे विपादिका सैव स्यान-

भेदाद्विचर्चिका"। "केचिद्विचर्चिकातो विपादिकां भिन्नां प्राहुः" भावप्र॰। कुष्ठशब्दे २१५४पृ॰ दृश्यम्।

विचार पु॰ वि+चर-घञ्। १तत्त्वनिर्णये सन्दिग्धे वस्तुनि प्रमाणेन तत्त्वपरीक्षायां २तदनुगुणे वाक्यस्तोमे च। "विपरीतोद्भावकपरविजिगीषया न्यायप्रयोग इति" केचित् प्राहुः। यथा पदार्थानुमानस्थले पर्वतो वह्नि-मान् धूमवत्त्वादित्यादि। अत्र च पर्वते वह्नौ साधनीये प्रतिवादिना च पर्वतो न वह्निमानित्यादि विपरीतवाक्ये प्रयुक्ते मध्यस्थस्य संशयो जन्यते। तन्निरासार्थं वादिना पर्वतो वह्निमानित्यादिप्रतिज्ञादिघटितवाक्यप्रयोगरूपः विचारः क्रियते इति। ४विगतचारो यस्मात् प्रा॰ब॰। चार-शून्ये च "विचारदृक्चारदृगप्यवर्त्तत"।

विचारण न॰ वि+चर-णिच्-ल्युट्। १विचारे शब्दर॰। युच्। तत्रैव स्त्री अमरः। २मीमांसाशास्त्रे हेमच॰

विचारित त्रि॰ विचारो जातोऽस्य इतच्। कृतविचारे।

विचाल त्रि॰ वि+चल-कर्त्तरि ण। १अभ्यन्तरे २अन्त-राले हेमच॰। वि+चल-णिच् भावे अच्। ३अन्यथा स्थितस्य वस्तुनो विशेषरूपतापादने "अधिकरणविचाले च" पा॰ "द्रव्यस्य संख्यान्तरापादने संख्याया धा स्यात्। एकं राशिं पञ्चधा कुरु" सि॰कौ॰। [ङीप्।

विचि(ची) पुंस्त्री विच-इक्। तरङ्गे भरतः। स्त्रीत्वपक्षे वा

विचिकित्सा स्त्री वि+कित स्वार्थे सन् अ। सन्देहे अमरः।

विचित्र न॰ विशेषेण चित्रम्। १कर्बुरवर्णे। २तद्वति त्रि॰ शब्दच॰ ३आश्चर्य्ये त्रि॰। ४मृगेर्वारौ स्त्री राजनि॰। ५अर्थालङ्कारभेदे न॰ अलङ्कारशब्दे ४०२ पृ॰ दृश्यम्। संज्ञायां कन्। भूर्जपत्रवृक्षे पु॰ राजनि॰।

विचित्रवीर्य्य पु॰ शान्तनुनृपात्मजे नृपभेदे भा॰आ॰१॰६अ॰

विचित्राङ्ग पुंस्त्री॰ विचित्रमङ्गं यस्य। (चिते) १व्याघ्रभेदे शब्दच॰ २मयूरे पुंस्त्री॰ शब्दर॰ उभयत्र स्त्रियां ङीष्। ३आश्चर्य्यदेहे त्रि॰।

विचेतस् त्रि॰ विरुद्धं दुष्टं विशिष्टं वा चेतो यस्य। १दुष्ट-चित्ते २विशिष्टचित्ते च। ३दुर्मनस्के हेमच॰।

विचेष्टित त्रि॰ विगतं चेष्टितमस्य। १चेष्टाशून्ये, वि+चेष्ट-भावे क्त। २विशेषेण चेष्टायाम् न॰।

विच्छ दीप्तौ चु॰उभ॰सक॰सेट्। विच्छयति ते अविविच्छत् त

विच्छ गतौ तु॰ पर॰ स्वार्थे आय, आयपक्षे उ॰सक॰ सेट्। विच्छायति विच्छायते विच्छति। अविच्छायीत् अविच्छा-यिष्ट अविच्छीत्।

विच्छन्दक पु० विशिष्टः छन्दो यत्र कप्। ईश्वरगृहे अमरः "उपर्युपरि यद्वेश्म तद्विच्छन्दकसंज्ञितम्"।

विच्छाय न० वीनां पक्षिणां छाया नपुंसकत्वम्। पक्षि समूहच्छायायाम् अमरः। विगता छाया यस्य। २छाया-रहिते त्रि० मेदि०। ३विशिष्टकान्तियुते मणौ भरतः।

विच्छित्ति स्त्री वि+छिद-क्तिन्। १अङ्गरागे २हारभेदे ३विच्छेदे मेदि०। ४छेदे ५विनाशे ६स्त्रीणां चेष्टाभेदे च। "स्तोकाप्याकल्परचना विच्छित्तिः कान्तिपोषकृत्" सा०द०

विच्छिन्न त्रि० वि+छिद-क्त। १विभक्ते २समालब्धे च मेदि० ३कुटिले हेमच०। भावे-क्त। ४छेदने न०।

विच्छेद पु० वि+छिद-भावे घञ्। १वियोगे २सन्ततिरा हित्ये ३विभागे च।

विज पृथक्करणे जु० उभ० सक० अनिट्। वेवेक्ति वेविक्ते इरित् अविजत् अवैक्षीत् अविक्त।

विज भये कम्पे च रु० पर०अक०सेट्। विनक्ति अविजीत्। ईदित् ओदित् विग्नः। [ईदित् ओदित् क्त-विग्नः।

विज भये कम्पे च तु०आ०अ०अनिट्। विजते अविजिष्ट।

विजन त्रि० विगतो जनो यस्मात् प्रा०ब०। निर्जने अमरः।

विजनन न० वि+जन-ल्युट्। १गर्भमोचने प्रसवे हेमच० २उद्भवे शब्दच०।

विजपिल न० विज-क पिल-क कर्म०। पङ्के उणादिकोषः।

विजन्मन् त्रि० विरुद्धं जन्म यस्य। जारजे।

विजय पु० वि+जि-कर्त्तरि अच्। १अर्जुने मेदि०। "अभिप्रयामि संग्रामे यदहं युद्धदुर्मदान्। नाजित्वा विनिवर्त्तामि तेन मां विजयं विदुः" भा० वि० ४४अ०। २विमाने हेमच० ३यमे च। ४विष्णोरनुचरभेदे। जय-शब्दे ३०९० पृ० दृश्यम्। तच्छब्दशब्दे दर्शिते ५रूपभेदे ६कल्किपुत्रभेदे कल्किपु० १२अ०। भावे अच्। जये ८परिभवपूर्वकप्रकर्षे च।

विजयकुञ्जर पु०विजयाय कुञ्जरः। राजवाहनगजे त्रिका०।

विजया स्त्री १आश्विनशुक्लपक्षीयदशम्याम् २उमायाः सखीभेदे वामनपु० ४अ० "कथयतु विजया" इति मुद्राराक्षसम्। ३दुर्गायां हेमच० "विजित्य पद्मनाभानं दैत्यराजं महाबलम्। विजया तेन सा देवी लोके चैवापराजिता" देवीपु०४५अ०। ४जयन्त्यां ५शेफालिकायां ६मञ्जिष्ठायां ७शमीभेदे, ८अग्निमन्थे राजनि०। ९भङ्गायाम् (सिद्धि) हेमच० तत्पर्यायगुणादि भावप्र० उक्तं यथा "भङ्गा गञ्जा मातुलानी मादिनी विजया जया। भङ्गा कफहरी तिक्ता ग्राहिणी पाचनी लघुः। तीक्ष्णोष्णा पित्तल॰ मोहमदवाग्वह्निवर्द्धिनी" भावप्र०। अष्टद्वादशीमध्ये "यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत्। तदा सा तु महापुण्या द्वादशी विजया स्मृता" इत्युक्ते १०द्वादशीभेदे "शुक्लपक्षस्य सप्तम्यां सूर्यवारो यदा भवेत्। सप्तमी विजया नाम" इत्युक्ते सप्तमीभेदे च। ११यमभार्य्यायां १२हरितक्यां जटा०। १३वचायां रत्नमा०। १४अस्त्रविद्याभेदे "विद्याप्रयैन विजयां जयाञ्च" भट्टिः।

विजल्प पु०"व्यक्तयाऽसूयया गूढमानमुद्रान्तरालया। अघ-द्विषि कटाक्षोक्तिर्विजल्पो विदुषां मतः" उज्ज्वलम-ण्युक्ते वाक्यभेदे।

विजात त्रि० विरुद्धं जातः। १जारजाते विशेषेण जाता। २जातापत्यायां स्त्रियां स्त्री हेमच०। धर्म्मविवर्त्तिनि।

विजातीय त्रि० विभिन्नां जातिं धर्ममर्हति छ। विभिन्न-

विजिगीषा स्त्री विजेतुमिच्छा वि+जि-सन् भावे अ। १श्लोदरपूरणेच्छया निन्दनीयकर्मादौ प्रवृत्तौ २तन्निन्दा-ऽसहने रमा० ३विजयेच्छायाञ्च। उ। विजिगीषु जयेच्छावति त्रि० शब्दच०।

विजिगीषाविवर्जित त्रि ३त०। औदरिके अमरः।

विजिन(ल) न० विज-इनच् इलच् किञ्च। सरसव्यञ्जने "पाकस्य परिपाकस्य व्यञ्जने तु भवेत् त्रयम्। तैलपाक-सुसंस्कारे प्रयत्नसुपसंस्कृतम्। विजिनं काञ्जिकञ्च विजिलं पिच्छिलञ्च तत्" शब्दर०।

विजुल पु० विज-उलच् किच्च। शाल्मलीकन्दे राजनि०।

विजृम्भण न० वि जृभि-ल्युट्। १विकाशे २मुखविकाशहेतु-भूते वायुव्यापारभेदे (हाइतोला)। अ विजृम्भा स्त्री।

विजृम्भित त्रि० वि+जृभि-क्त। १विकशिते मेदि० २जृम्भा-युक्ते भावे क्त। ३प्रकाशे ४चेष्टायां ५जृम्भायां च मेदि०।

विज्जन न० विद्--वेधनं जनयति जन-अच्। वाणे त्रिका०

विज्जल न० व्यध-ताड़े क्विप् विदा जडयति जडि-अच् डस्य लः। १वाणे त्रिका०। २विजिले हेमच०।

विज्जुल न० विज-उलच् जुट्। त्वचे (दारचिनि) राजनि०

विज्जुलिका स्त्री विज्जुल+संज्ञायां कन् कापि अत इत्त्वम्। जतुकायां राजनि०। [विज्जुले पु० राजनि०।

विज्ञ त्रि०विशेषेण जानाति वि+ज्ञा-क।१प्रवीणे अमरः।२श-

विज्ञात त्रि० वि+ज्ञा-क्त। १ख्याते अमरः। २ज्ञाते च।

विज्ञान न० वि+ज्ञा ल्युट्। १ज्ञाने २कर्म्मणि मेदि० ३शि-

ख्यातिज्ञाने अमरः। ४वेदान्तोक्ते अविद्याहत्तिभेदे च। ५बौद्धमतसिद्धे आलयरूपे ज्ञाने च। "चतुर्दशानां विद्यानां धारणं हि यथार्थतः। विज्ञानमितरत् विद्यात् येन धर्मो विवर्द्धते" कूर्मपु० १४अ० उक्ते ६चतुर्दशविद्याज्ञाने च।

विज्ञानमयकोष पु० विज्ञानात्मकः कोष इवावरकत्वात्। ज्ञानेन्द्रियपञ्चकसहिते बुद्धिपदार्थे।

विज्ञानस्कन्ध पु० बौद्धमतसिद्धेषु रूपविज्ञानवेदनासंज्ञासंस्काररूपेषु स्कन्धेषु आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहे।

विज्ञानिक त्रि० विज्ञानमस्त्यस्य ठन्। विज्ञानयुक्ते भरतः।

विज्झोली स्त्री विज-उल-पृषो०। पङ्क्तौ त्रिका०।

विट आक्रोशे सक० शब्दे अक० भ्वा० पर० सेट्। वेटति अवेटीत्।

विट पु० विट क। १विट्खदिरे सारे अमरः। २शृङ्गारसनायकानुचरे "सम्भोगहीनसम्पद् विटस्तु धूर्त्तः कलैक देशज्ञः। वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम्" सा०द०। ३धूर्त्ते, "विट! विटपममुं ददस्व तस्यै" माघः ४पर्वतभेदे ५लवणभेदे ६खदिरभेदे ७मूषिके च मेदि०। ८नारङ्गवृक्षे शब्दमाला।

विटङ्क न० वि+टकि-अच्। कपोतपालिकायां प्रासादाद्यग्रस्थे काष्ठनिर्मिते कपोतावासस्थाने। (पायराखोप) अमरः।

विटप पुंन०। विटं विस्तारं वा पाति पिबति वा पा-क।१शाखायां,२पल्लवविस्तारे अमरः।३स्तम्बे ४पङ्क्तौ च शब्दर० ५विटपालके ६तद्पर्यायिनि च मेदि० "पिबति च पाति च यासकौ रहस्त्वात् विट! विटपममुं ददस्व तस्यै" माघः। ७आदित्यपत्रे पु० राजनि०। ८हेमकन्दस्कन्धान्तरस्थाने हेमच० ९विटाधिपे मेदि०। [वृक्षे राजनि०।

विटपिन् पु० विटप+अस्त्यर्थे इनि। १वृक्षे अमरः। २वट-

विटप्रिय पु० ६त०। मुद्गरवृक्षे राजनि०।

विटमाक्षिक पु० विटप्रियः माक्षिकः। धातुभेदे हेमच०।

विटि(टी) स्त्री विट-कि वा ङीप्। पीतचन्दने शब्दमाला।

विट्खदिर पु० विड्वित् दुर्गन्धः खदिरः। (गुयेबावला) वृक्षे अमरः। [अमरः स्त्रियां ङीप्।

विट्चर पुंस्त्री विष-विड् वां चरति चर-अच्। ग्राम्यशूकरे

विट्पति पु० विश्यते विश-क्विप् विशः कन्यायाः पतिः। जामातरि जटाधरः। [पक्षिभेदे जटा०।

विटमारिका स्त्री विड्वित् दुर्गन्धः शारिका। (गुयेशालिक)

विठ आक्रोशे भ्वा० पर० सक० सेट्। वेठति अवेठीत्।

विड न० विड-क। लवणभेदे अमरः। "विडं सक्षारमूर्द्ध्वाधःकफवातानुलोमनम्" ऊर्द्ध्वं कफमधोवातं सञ्चारयतीत्यर्थः। "दीपनं लघु तीक्ष्णोष्णं रूक्षं रुच्यं व्यवायि च। विबन्धानाहविष्टम्भशूलगौरवशूलनुत्" भावप्र०।

विडङ्ग पुं०न०विड-अङ्गच्।१स्वनामख्याते औषधभेदे अमरः। "विडङ्गं कटु तीक्ष्णोष्णं रूक्षं वह्निकरं लघु। शूलाध्मानोदरश्लेष्मक्रिमिवातविबन्धनुत्" भावप्र०। २अभिज्ञे त्रि० मेदि०।

विडम्बन न०वि-डबि+ल्युट्। १तिरस्करणे २अनुकरणे च। युच्। विडम्बनाप्यत्र स्त्री। "स्वयञ्च तेऽन्या पुरतो विडम्बनेति" कुमारः।

विडाल पुंस्त्री विड-कालन्। स्वनामख्याते १पशुभेदे अमरः स्त्रियां ङीष्। २नेत्रपिण्डे मेदि० ३नयनौषधभेदे च भावप्र० ४विदार्य्यां स्त्री राजनि० ङीष्। संज्ञायां कन्। हरिताले न०। स्वार्थे क। विडाले पशौ पु० स्त्री०। संज्ञायां कन्। नेत्रौषधभेदे तद्विधिः भावप्र० उक्तो यथा "विडालको बहिर्लेपो नेत्रे पक्ष्मविवर्जिते। तस्य मात्रा परिज्ञेया मुखालेपविधानवत्"। मुखालेपस्तु "अङ्गुलस्य चतुर्थांशो मुखालेपः कनिष्ठकः। मध्यमस्तु त्रिभागः स्यादुत्तमोऽर्द्धाङ्गुलो भवेत्"। स्थितिकालोऽपि तस्योक्तो यावत् कल्को न शुष्यति। तेनापि शुष्कहीनः स्यात्तया दूषयति त्वचम्"। स च "यष्टीगैरिकसिन्धूत्थदार्वीतार्क्ष्यैः समांशकैः। जलपिष्टैर्बहिर्लेपः सर्वनेत्रामयापहः"। तार्क्ष्यं रसाञ्जनम्। "रसाञ्जनेन वा लेपः पथ्याबिल्वदलैरपि। वचाहरिद्राविश्वैर्वा तथा नागरगैरिकैः"।

विडालपदक न० कर्षपरिमाणे भावप्र० कर्षशब्दे १७७४ पृ० दृश्यम्। [शब्दे २४१४ पृ० दृश्यम्।

विडीन न०वि+डी-क्त। पक्षिणां गतिभेदे जटा० खगगति-

विडुल पु० विड-कुलच्। वेतसवृक्षे हेमच०

वि(डो)डौजस् पु० विष-क्विप् विट् व्यापकमोजो यस्य पृषो० वा औत्। इन्द्रे अमरः।

विड्गन्ध न० विष इव गन्धोऽस्य। विड्लवणे रत्नमाला।

विड्लवण न० विड्वित् दुर्गन्धं लवणम्। स्वनामख्याते लवणभेदे रत्नमाला।

विड्वराह पुंस्त्री० विट्प्रियो वराहः शाक०। १ग्राम्यशूकरे जटा०।स्त्रियां ङीष्। "ढक्कनं विड्वराहस्य" इति श्रुतिः।

वितंस पु० वि+तन्स-कञ् । पक्षिणां बन्धनसाधने रज्ज्वादौ प्रभृतौ भरतः ।

वितण्डा स्त्री वि+तडि-भावे अ । स्वपक्षाव्यवस्थापनेन परपक्षमात्रनिराकरणे कथाभेदे अमरः । २कम्बीशाके ३हाहुये ४करव्यां मेदि० ५दर्व्यां शब्दरा० ।

वितण्डाकथालक्षणं गौ० सू० उक्तं यथा "स प्रतिपक्षस्थापनाहीनो वितण्डा" सू० "स जल्पो वितण्डा भवति किंविशेषणः । प्रतिपक्षस्थापनया हीनः । यौ तौ समानाधिकरणौ विरुद्धौ धर्मौ पक्षप्रतिपक्षावित्युक्तौ तयोरेकतरं वैतण्डिको न स्थापयतीति परपक्षप्रतिषेधेनैव प्रवर्त्तत इति । अस्तु तर्हि प्रतिपक्षहीनो वितण्डा यद्वै खलु तत्परप्रतिषेधलक्षणं वाक्यं स वैतण्डिकस्य पक्षः न त्वसौ साध्यं कञ्चिदर्थं प्रतिज्ञाय स्थापयतीति तस्मात् यथान्यासमेवास्तु" वा०भा० ।

वृत्तौ तु सूत्रमन्यथा व्याख्यातं यथा

"समप्राप्तां वितण्डां लक्षयति स इति । यद्यपि तन्त्रत्वेन जल्पो न परामष्टुं शक्यते जल्पस्य स्थापनाद्वयवतः प्रतिपक्षस्थापनाहीनत्वस्य विरुद्धत्वात् तथापि स्थापनाद्वयवत्त्वं विहाय जल्पैकदेशः परामृश्यते प्रतिपक्षो द्वितीयपक्षः तथाच प्रतिपक्षस्थापनाहीना विजिगीषुकथा वितण्डेति । न च स्वपक्ष स्थापनीयाभावात् कथमियं कथा प्रवर्त्ततामिति वाच्यम् परपक्षखण्डनेन जयस्यैवोद्देश्यत्वात् । परे तु परपक्षखण्डनेनैव स्वपक्षस्थापनादेव सिद्धिस्तत्साधनाभावेऽपि न प्रवृत्त्यनुपपत्तिरिति वदन्ति" ।

वितथ त्रि० वि+तन-कथन् । मिथ्याभूते पदार्थे अमरः । स्वार्थे यत् । वितथ्य तत्रैव । [उणादिको०

वितद्रु स्त्री वि+तम-रु दान्तादेशः । पञ्चावदेशस्थे नदीभेदे

वितरण न० वि+तॄ-ल्युट् । दाने अमरः ।

वितर्क पु० वि+तर्क-भावे अच् । १सन्देहे २ऊहे च मेदि० । ३ज्ञानस्थचके शब्दर० । ४अर्थालङ्कारभेदे अलङ्कारशब्दे ४०२ पृ० दृश्यम् ।

वितर्दि स्त्री वि+तर्द-इन् वा ङीप् । वेदिकायाम् अमरः । पृषो० वितर्द्धिरप्यत्र स्त्री भरतः वा ङीप् ।

वितल न० विशेषेण तलम् । पातालभेदे शब्दर० । पातालशब्दे ४२९९ पृ० दृश्यम् ।२तलशून्ये त्रि० ।

वितस्ति पुंस्त्री० वि+तस-क्तिच् । द्वादशाङ्गुलपरिमाणे विस्तृतस कनिष्ठाङ्गुष्ठान्तपरिमाणे अमरः ।

वितान न० वि+तन-कर्मभावादौ घञ् । १वृत्तिभेदे मेदि० २अवसरे विश्वः । ३यज्ञे ४विस्तारे अमरः ५चन्द्रातपे पुंन० ६तुच्छे ७मन्दे च त्रि०अमरः । ८शून्ये त्रि० धरणिः । स्वार्थे क । चन्द्रातपे ।०संज्ञायां कन् । माडहके राजनि० । ९गार्हपत्याहवनीयाद्यग्नीनां विस्तारे । वितानेन निर्वृत्तः ठक् । वैतानिक वितानसाध्ये अग्न्याधेयप्रभृतौ त्रि० "अग्न्याधेयप्रभृतीन्याह वैतानिकानि" आश्व० श्रौ० २सू० । "वितानेषु भवानि वैतानिकानि वितानसाध्यानीत्यर्थः । वितानशब्दोऽत्र सूत्रे आहवनीयाद्यग्नीनां विस्तारवचनः" नारा० । वितायन्तेऽग्नयोऽस्मिन् वि+तन० आधारे घञ् । १०अग्निहोत्रादिकर्मणि । "अथैतस्य समाम्नायस्य विताने योगापत्तिं व्याख्यास्यामः" आ० श्रौ० १सू० । "विततः अग्नयो यस्मिन्निति श्रौतकर्मजातमग्निहोत्रादि वितानशब्देनोच्यते" नारा० । तत्र साधु ठक् । वैतानिक अग्निहोत्रादिकर्मसाधने अग्नौ पु० । "वैतानिकेऽग्नौ कुर्वीत" मनुः ।

वितानमूलक न० वितानाय मूलमस्य कप् । उशीरे राजनि० ।

वितुन्न न० वि+तुद क्त । १सुनिषण्णके अमरः संज्ञायां कन् । २धान्यके ३शैवाले च न० अमरः । ४भूम्यामलक्यां स्त्री राजनि० । संज्ञायां कन् । ५तामलक्यां पु० अमरः ।

वित्त त्यागे अद० चु० उभ० सक० सेट् । वित्तयति ते अविवित्तत् त वित्तापयतीत्यपि ।

वित्त न० वित्तयते त्यज्यते वित्त-घञ् । १धने अमरः । विद-क्त वा दस्य न नः । २ख्याते, ३विचारिते ४ज्ञाते हेमच० ५लब्धे च त्रि० ।

वित्ति स्त्री विद-क्तिन् । १ज्ञाने २लाभे ३विचारे च मेदि० ।

वित्तेश पु० ६त० । कुबेरे ।

वित्सन पु० विद-लाभे क्विप् तां सनोति सन-दाने अच् वृषभे शब्दच० । [कुबेरादि ।

विथ याचने भ्वा० आ० द्विक० सेट् अकि न लुक्षः । वेथते

विथुर पु० विथ-उरच् किच्च । १चौरे २राक्षसे च उणा० ।

विथ्या स्त्री विथ-यत् । गोजिह्वायाम् शब्दच० ।

विद सुखाद्यनुभवे आख्याने, वादे च सक० वासे अक० चु० उभ० सेट् । वेदयति ते अवीविदत् त ।

विद लाभे तु० उभ० सक० अनिट् मुचादि । विन्दति ते । लृदित् अविदत् अवित्त । विवेद विविदे । वित्तं वित्तम् ।

विद वीमांसे रुधा० आ० सक० अनिट् । विन्ते अवित्त ।

विद भावे, दिवा० आ० अक० अनिट् । विद्यते अवित्त ।

विद् ज्ञाने अदा० पर० सक० सेट् । वेत्ति-वेद । अवेदीत् ।

विद् पु० विद-क्विप् । १पण्डिते अमरः २बुधग्रहे च ज्यो० ।

विद पु० विद-क । १पण्डिते अमरः २बुधग्रहे च ज्यो० ।

विदंश पु० विदश्यतेऽनेन वि+दन्श करणे घञ् । अवदंशे (चाटनि) राजनि० ।

विदग्ध त्रि० वि+दह-क्त । १नागरे त्रिका० २निपुणे राजनि० ३पण्डिते च शब्दच० । ४नायिकाभेदे स्त्री रसमञ्जरी । परकीयाशब्दे ४२२२ पृ० दृश्यम् । ५विशेषेण दग्धे त्रि० ।

विदथ पु० विद-कथच् । १योगिनि, २कृतिनि च मेदि० ।

विदर न० वि+दॄ-अप् ।(फणिमनसा) इति शब्दर० । भावे अप् २विदरीकरणे पु० शब्दर० । मा०व० । ३विगतभये त्रि० ।

विदर्भ पुं स्त्री० विगताः दर्भाः कुशा यतः । देशभेदे कुण्डिन-नगरे (वडनागपुर) ।

विदल त्रि० विशेषेण दल्यते दल-कर्मणि क । १द्विधाभूते २दाडिमफलके ३वंशादिपात्रे ४स्वर्णादेरवयवे च न० । ५कलायादौ न० अमरभरतौ ६रक्तकाञ्चने ७पिष्टके न० शब्दच० । ८सिहुति (तेओडि) स्त्री राजनि० । मा०व० । ९दलशून्ये त्रि० ।

विदा स्त्री विद-अङ् । १ज्ञाने २बुद्धौ च मेदि० ।

विदादि पु०अपत्यादौ "विदादिभ्योऽञ्" पा०उक्तप्रत्ययनिमित्ते शब्दगणे स च गणः पा० गणसूत्रे दृश्यः ।

विदार पु० वि+दॄ-णिच् भावादौ अच् । १विदारणे २जलो-च्छ्वासे च मेदि० । ३युद्धे हेमच० । ४द्विधाकरणे ।

विदारक पु०वि+दॄ-णिच्-ण्वुल् । १जलमध्यस्थतरुशिलादौ अमरः । २विदारणकर्त्तरि त्रि० ३शुष्कनद्यादेर्जलधारण-योग्ये गर्त्ते न० शब्दाचरेः । ४जलवत्कके शब्दर० ।

विदारण न०वि+दॄ णिच्-भावादौ ल्युट् ।१भेदने २विडम्बे च मेदि० । ३मारणे शब्दर० । ४युद्धे पुं स्त्री० मेदि० । ५कर्णिकारवृक्षे पु० शब्दच० ।

विदारिणी स्त्री वि+दॄ-णिनि ङीप् । काश्मर्याम् राजनि०

विदारी स्त्री वि+दारि+कर्मणि अच् गौ० ङीष् । १शाल-पर्ण्याम् । (शालपान) मेदि० ।२भूमिकुष्माण्डे च अमरः "विदारी वातपित्तघ्नी बल्या वृष्या रसायनी" राजनि० । ३कण्ठरोगभेदे भावप्र० "सदाहतोदं श्वयथुं सुताम्र-मन्तर्गले पूतिविशीर्णमांसम् । पित्तेन विद्यात् वदने विदारीं पार्श्वे विशेषात् स तु येन शेते" स तु पुरुषो येन पार्श्वेन विशेषात् बाहुल्येन शेते तस्मिन् पार्श्वे सा विदारी भवतीत्यर्थः ।

विदारीगन्धा स्त्री विदार्याः भूमिकुष्माण्डस्येव गन्धो यस्याः । शालपर्ण्याम् (शालपान) अमरः ।

विदारु पु० वि+दॄ-उन् । १कृकलासे २कृकवाके हेमच० ।

विदाहिन् न० वि+दह-णिनि । दाहजनकद्रव्ये ।

विदित त्रि० विद-क्त । १ज्ञाते अमरः २प्रार्थिते च मेदि० ३कवौ पु० जटा० । भावे क्त । ४विख्यातौ ४अवगमे शब्दच० ५ज्ञाने च । तदस्त्यस्य अच् । ६ज्ञातरि त्रि० । "विदितः समाययाविति" किरा० ।

विदिश् स्त्री विगता दिशौ । दिशोर्मध्ये अग्निनिरृति-वाय्वीशानकोणचतुष्टये अमरः ।

विदु पु० विद-कु । हस्तिकुम्भमध्यभागे अमरः ।

विदुर त्रि० विद-कुरच् । १नागरे २धीरे ३कौरवाणां म-न्त्रिणि दासीगर्भजाते धर्म्मावतारभेदे च मेदि० भा०आ० १०६अ० । ४ज्ञातरि च अमरः ।

विदुल पु० विद-कुलच् । १वेतसे २जलवेतसे मेदि० ३गन्ध-रसे च रत्नमा० । ४क्षत्रियभेदे भा० उ० १३२ अ० ।

विदूर न० विशिष्टं दूरम् । १अतिदूरे २तत्रस्थे पदार्थे त्रि० "विदूरे केयूरे कुरु" इति सा०द० ३परि० । ३वैदूर्य्यमणि-समुत्पत्तिस्थाने पु० "विदूरभूमिर्नवमेघशब्दात्" कुमारः ।

विदूरज न० विदूरे देशभेदे जायते जन-ड । वैदूर्य्यमणौ ।

विदूरथ पु० १द्वादशमनोः पुत्रभेदे २पौरवे नृपभेदे विष्णुपु० १२अ०

विदूराद्रि पु० विदूरे देशेऽद्रिः पर्वतः । पर्वतभेदे । यत्र वैदूर्य्यमणिरुत्पद्यते ।

विदूषक पु० विदूषयति वि+दूष-णिच्-ण्वुल् । १शृङ्गाररस-सहायभेदे २परनिन्दके त्रि० मेदि० । "शृङ्गाररस सहाया विटचेटविदूषकाद्याः स्युः । भक्ता नर्म्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः । कुसुम-वसन्ताद्यभिधः कर्म्मवपुर्वेशभाषाद्यैः । हास्यकरः, कल-हरतिर्विदूषकः स्यात् स्वकर्म्मज्ञः" सा० द० ३प० ।

विदेश पु० विभिन्नो देशः । देशान्तरे "को विदेशः सविद्या-नाम्" चाणक्यः ।

विदेह पु० विगतो देहः देहसम्बन्धो यस्य । १जनकाख्ये नृपे "असमाप्ते ततो यज्ञे वशिष्ठवाणमहिपः । तं दृष्ट्वा कुपितः प्राह प्रत्याख्यातोऽस्मि पार्थिव ! । यस्मात् तस्मात् शमेयं त्वां विदेहस्त्वं भविष्यसि" वह्निपु० । तदीये २जनपदे च स च देशः मिथिलादेश इति ख्यातः । कूर्म्मविभागे ह०सं०१४अध्यायः । कूर्म्मविभागशब्दे दृश्यम् । ३तद्देशस्थेषु ब०व०च ४वैदेहसस्त्रियां ४देहसम्बन्धशून्ये

च त्रि॰ ४मिथिलायां स्त्री हेमच॰ । ५देहशून्ये देवे पात॰ सूत्रभाष्यादौ देवस्य विदेहत्वं समर्थितं यथा भवप्रत्ययो विदेहप्रकृतिलयानाम्” सू॰ ।

“स खल्वयं द्विविध उपायप्रत्ययो भवप्रत्ययश्च तत्रोपायप्रत्ययो योगिनां भवति” भवप्रत्ययो विदेहप्रकृतिलयानाम्” विदेहानां देवानां भवप्रत्ययः ते हि स्वसंस्कारमात्रोपयो(भो)गेन चित्तेन कैवल्यपदमनुभवन्तः स्वसंस्कारविपाकं तथाजातीयकमतिवाहयन्ति” भाष्यम् । “भवन्ति जायन्तेऽस्यां जन्तव इति भवोऽविद्या स खल्वयं भवः प्रत्ययः कारणं यस्य निरोधसमाधेः स भवप्रत्ययः । तत्र तयोर्मध्ये उपायप्रत्ययो योगिनां मोक्षमाणानां भवति विधेयविधानेन हेयस्य तदनुसम्बन्धं निषेधति । केषां तर्हि भवप्रत्ययः । इत्यत्र सूत्रेणोत्तरम् । विदेहाश्च प्रकृतिलयाश्च तेषामित्यर्थः । तद्व्याचष्टे विदेहानां देवानां भवप्रत्ययः भूतेन्द्रियाणामन्यतममात्मत्वेन प्रतिपन्नानामुपासनया तद्वासनावासितान्तःकरणाः पिण्डपातानन्तरमिन्द्रियेषु भूतेषु वा लीनाः संस्कारमात्रावशेषतया षाट्कौशिकशरीररहिताः विदेहाः ते हि संस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तः प्राप्नुवन्तः विदेहाः । अप्रवृत्तिकत्वस्य कैवल्येन सादृश्यम् । साधिकारसंस्कारशेषता च वैरूप्यम् । संस्कारमात्रोपभोगेनेति क्वचित् पाठः तस्यार्थः संस्कारमात्रमेवोपभोगो यस्य न तु चित्तवृत्तिरित्यर्थः । प्राप्तावधयः संस्कारविपाकं तथाजातीयकमतिवाहयन्ति अतिक्रामन्ति पुनरपि संसारे विशन्ति तथा च वायुप्रोक्तं “दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः । भौतिकास्तु शतं पूर्णम्” विवरणम् । तेषां देवानां मध्ये यस्य विवेकसाक्षात्कारस्तस्य कैवल्यप्राप्तिः “यो यो देवानां प्रत्यबुध्यत स विमुच्यते” इति श्रुतेः । मीमांसावित्रे देहशून्ये ५अचेतने मन्त्रात्मके देवे च । अविपश्चच्छब्दे ४५१ पृ॰ दृश्यम् ।

विदेहकैवल्य न॰ कर्म॰ । ‘न तस्य प्राणा उत्क्रामन्ति इहैव समवनीयन्ते” श्रुत्युक्ते जीवन्मुक्तस्य देहपातानन्तरं निर्वाणमोक्षे ।

विदेहकैवल्यनिष्पत्तिप्रकारादि शा॰ सू॰ भाष्ययोरुक्तं यथा “भोगेन त्वितरे क्षपयित्वा सम्पद्यते” सू॰ । अनारब्धकार्ययोः पुण्यपापयोर्विद्यासामर्थ्यात् क्षय उक्तः इतरे त्वारब्धकार्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्म सम्पद्यते “तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये” इति । “ब्रह्मैव सन् ब्रह्माप्येति” इति चैवमादिश्रुतिभ्यः । ननु सत्यपि सम्यग्दर्शने यथा प्राग् देहपाताद्भेददर्शनं द्विचन्द्रदर्शनन्यायेनानुवृत्तमेव पश्चादप्यनुवर्त्तेत न, निमित्ताभावात् उपभोगशेषक्षपणं हि तत्रानुवृत्तिनिमित्तं न च तादृशमत्र किञ्चिद् कारणम् । ननु परः कर्माशयोऽभिनवमुपभोगमारप्स्यते न, तस्य दग्धबीजत्वात् । मिथ्याज्ञानावष्टम्भं हि कर्मान्तरं देहपाते उपभोगान्तरमारभते तच्च मिथ्याज्ञानं सम्यग्दर्शनेन दग्धमिति साध्वेतत् आरब्धकार्यक्षये विदुषः कैवल्यम्” भा॰ । तत्रैव ४पादे च सू॰भाष्ययोरुक्तं यथा “सम्पद्याविर्भावः स्वेनशब्दात्” सू॰ “एवमेवैष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते” श्रुतिविषयवाक्यं तत्र पूर्वपक्षं दर्शयित्वा सिद्धान्तितं भाष्यकृता यथा “केवलेनैवात्मनाविर्भवति न धर्मान्तरेणेति कुतः ? स्वेन रूपेणाभिनिष्पद्यते इति स्वशब्दात्” भा॰ । “मुक्तः प्रतिज्ञानात्” सू॰ । “योऽत्राभिनिष्पद्यते इत्युक्तः स पूर्वबन्धविनिर्मुक्तः शुद्धेनैवात्मनावतिष्ठते” कुतः? प्रतिज्ञानात् । “एतं त्वेव ते भूयोऽनुव्याख्यास्यामि” इति प्रतिज्ञातम् “अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः” इति चोपन्यस्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः” इति (श्रुतिः) भा॰ । “अविभागेन दृष्टत्वात् सू॰ । “अविभक्त एव परेणात्मना मुक्तोऽभिनिष्पद्यते कुतः? दृष्टत्वात्” “यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति” एवं मुनेर्विजानतः आत्मा भवति गौतम !” इत्येवमादीनि मुक्तस्वरूपनिरूपणपराणि वाक्यान्यविभागमेव दर्शयन्ति नदीसमुद्रादिनिदर्शनानि च” भा॰ । विवेकचू॰ अप्युक्तं यथा “पात्राभ्यन्तरपाषाणकटाम्बराद्या इन्मा भवन्ति हि सदैव यथा तथैव । देहेन्द्रियासुमनआदिसमस्तदृश्यम् ज्ञानाग्निदग्धमुपयाति परात्मभावम् । विलक्षणं यथा ध्वान्तं लीयते भानुतेजसि । तथैव सकलं दृश्यं ब्रह्मात्मनि विलीयते । घटे नष्टे यथा व्योम व्योमैव भवति स्फुटम् । तथैवोपाधिविलये ब्रह्मैव ब्रह्मवत् स्वयम् । क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले । संयुक्तमेकतां याति तथात्मन्यात्मविन्मुनिः । एवं विदेहकैवल्यं सन्मात्रत्वमखण्डितम् । ब्रह्मभावं प्रपद्यैष यतिर्नावर्त्तते पुनः । सदात्मैकत्वविज्ञानदग्धाऽविद्यादिवर्ष्मणः । अमुष्य ब्रह्मभूतत्वात् ब्रह्मणः कुत उद्भवः” ।

"विद्वांश्च विमुच्यते" न तस्य प्राणा उत्क्रामन्ति इहैव समवलीयन्ते" इत्याद्याः श्रुतयश्चात्र प्रमाणम् ।

विद्ध त्रि० व्यध-क्त । १छिद्रिते अमरः । २क्षिप्ते ३सदृशे ४बाधिते मेदि० ५ताडिते च ।

विद्धकर्णी स्त्री० विद्धः कर्णं इव पत्रमस्याः । पाठायाम् (आकनादि) द्विरूपकोषः । स्त्रीत्वमपि तत्रैव अमरः । ङीप् । स्वार्थे क । तत्रार्थे स्त्री शब्दर० । [पदार्थे त्रि० ।

विद्यमान पु० विद-शानच् । १वर्त्तमानकाले, २तद्वृत्तौ

विद्या स्त्री विद-क्यप् । १ज्ञाने । २तत्त्वसाक्षात्कारे "विद्यया अमृतमश्नुते" इति श्रुतिः । ३दुर्गायां शब्दच० ४गणिकारिकावृक्षे शब्दच० । तन्त्रोक्ते ५देवीमन्त्रे च । "शतलक्षप्रजप्तापि तस्य विद्या न सिध्यतीति" श्यामारहस्यः ।

६विद्याहेतौ शास्त्रे "अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश । आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः । अर्थशास्त्रं चतुर्थञ्च विद्या ह्यष्टादशैव ताः" शा० त० विष्णुपु० । विद्याभेदे देवताभेदाः हेमा० व्र० विष्णुधर्मोत्तरे उक्ता यथा "ऋग्वेदस्य स्मृतो ब्रह्मा यजुर्वेदस्य वासवः । सामवेदं तथा विष्णुः शम्भुश्चाथर्वणो भवेत् । शिक्षा प्रजापतिर्ज्ञेया कल्पो ब्रह्मा प्रकीर्त्तितः । सरस्वती व्याकरणं निरुक्तं वरुणः प्रभुः । छन्दो विष्णुस्तथैवाग्निर्ज्योतिषं भगवान् रविः । मीमांसा भगवान् सोमो न्यायमार्गः समीरणः । धर्मश्च धर्मशास्त्राणि पुराणञ्च तथा मनुः । इतिहासं प्रजाध्यक्षो धनुर्वेदः शतक्रतुः । आयुर्वेदस्तथा साक्षाद्देवो धन्वन्तरिः प्रभुः । कलावेदो महादेवी नृत्यशास्त्रं महेश्वरः । वसुन्धरः पञ्चरात्रं रुद्रः पाशुपतं तथा । पातञ्जलमनन्तश्च सांख्यञ्च कपिलो मुनिः । अर्थशास्त्राणि सर्वाणि धनाध्यक्षः प्रकीर्त्तितः । कलाशास्त्राणि सर्वाणि कामदेवो जगद्गुरुः । अन्यानि यानि शास्त्राणि यत्कर्माणि प्रचक्षते । स एव देवता तस्य शास्त्रं कर्म च देववत्" । श्रुतौ तु विद्याभेदः द्विविधः पराऽपराभेदात् उक्तः । यथा ब्रह्मावगमः सा परा "यथाऽक्षरमधिगम्यते सा परेतिश्रुतेः" । ऋग्वेदादिलक्षणा अपरा सा च अध्ययनाध्यापनरूपा ।

विद्याचन(ण) त्रि० विद्यया ख्यातः । विद्या+चन(ण) विद्यया विख्याते । [ख्याते ।

विद्याचुञ्चु पु० विद्यया विख्यातः विद्या+चुञ्चु । विद्यया

विद्यादल पु० विद्यायै शानाय दलतेऽसौ । भूर्जवृक्षे शब्दच०

विद्यादान न० ६त० । १अध्यापने २पुस्तकादिदाने च । "विद्यादानस्य अध्यापनेन व्याख्यया विविक्तार्पणेन च भवतीति व्यो०त०रघु० । तत्राध्यापनविधिः स्मृतौ यथा "योऽधीत्यार्थिभ्यो विद्यां न प्रयच्छेत् स काको राज्याचिन् स्यात् श्रेयसो द्वारमपाहनुयात् अनध्यापने दोषश्रवणात् तस्यावश्यकत्वं गम्यते । "अष्टवर्षं माणवकमुपनयीत तमध्यापयीत" इत्यादिस्मृतौ च अध्यापनाविधिलाभः । व्याख्यानादिविधिलाभस्तु "अज्ञानतिमिरोऽपेतान् छन्दोरूपटवान्वितान् । निरामयान् यः कुरुते शास्त्राञ्जनशलाकया । इह कीर्त्तिं राजपूज्यां लभते सद्गतिं च सः" व्यो०त० । तत्रैव पुस्तकादिदानस्यापि वक्ष्यमाणप्रमाणात् तत्र ज्ञानरूपविद्यादानप्रकारः हेमा०दा०वह्निपु०उक्तो यथा "वाजपेयसहस्रस्य सम्यगिष्टस्य यत् फलम् । तत्फलं समवाप्नोति विद्यादानान्न संशयः । तस्माद्देवालये नित्यं धर्मशास्त्रस्य वा श्रुतेः । पठनं कारयेत् राजन् ! यदीच्छेत् धर्ममात्मनः । गोभूहिरण्यवासांसि शयनान्यासनानि च । प्रत्यहं तेन दत्तानि भवन्ति नृपसत्तम ! । धर्माधर्मौ न जानाति लोकोऽयं विद्यया विना । तस्मात् सदैव धर्मात्मन् ! विद्यादानरतो भवेत् । वेदशास्त्ररहस्यज्ञो यदि नैव नृपोत्तम ! । ततोऽज्ञानतमोऽन्धस्य कावस्था जगतो भवेत् । ब्रह्मादयः सुराः सर्वे ऋषयो दग्धकिल्विषाः । मनुष्याः पितरश्चैव विद्यादाने प्रतिष्ठिताः । चतुर्युगानां राजेन्द्र ! एकसप्ततिसंख्यया । वेदशास्त्रप्रदः स्वर्गे पूज्यते सुरसत्तमैः । इत्युपक्रमे "दानं विशेषफलदं जगतीह नान्यद् विद्यां विहाय वदनाम्बुजताधिवासाम् । गोभूहिरण्यगजवाजिरथादि सर्वं तां यच्छतां किमिति भूप ! भवेन्न दत्तम्" । तत्रैव नन्दिपु० "अध्यापयेच्छुभान् शिष्यानभिजातान् सुमेधसः । एवं विद्याप्रदानं हि सर्वदानोत्तमोत्तमम् । सर्वदा सर्वदानानामयं हि प्रवर उत्तमः । अनेन विधिना दत्त्वा विद्यां पुण्यधरो नरः" ।

स्वयंविद्यादानासामर्थ्ये व्या० त० भविष्यपु० उक्तं यथा "अध्यापकस्य यो वृत्तिं दत्त्वाऽध्यापयति द्विजान् । किं न दत्तं भवेत्तेन धर्मकामार्थमिच्छता" । तदङ्गभूतपुस्तकादिदानमपि विद्यादानं हेमा० दा० उक्तं यथा नन्दिपु० "विद्या च स्वल्पा दानानां शृणुतोऽस्य विधिं बुधः । श्रुत्वा विद्यास्तु विविधाः गुरुणा भाविताः तथा । सत्पात्रेभ्यस्तु तां दद्यात् विशेषात् गृहाश्रमिषु उप

योग्यञ्च यद् यस्य तत्तस्य प्रतिपादयेत्"। ततः पुस्तकलेखनप्रकारस्तद्दानविधिश्च विस्तरेणोक्तस्तत्र द्रष्टव्यः। विद्योपयोगिद्रव्यादिदानेऽपि विद्यादानं भवति यथोक्तं हेमा० दा० देवीपु० "आत्मवित्तानुसारेण विद्यादानं करोति यः। असाध्यं फलमाप्नोति आयतत्वं न संशयः। स्त्री तथानेन विधिना विद्यादानफलं लभेत्। भर्त्रा चैवाभ्यनुज्ञाता विधवा च तदुद्दिशेत्"। विधानमाह "विद्यार्थिने सदा दद्याद् वस्त्राभ्यङ्गञ्च भोजनम्। कल्पिकामुदकं दीपं यस्मात्तैलं विना न सः। लेखनीघटितं तीक्ष्णं मसीपात्रन्तु लेखनीम्। दत्त्वा तु लभते वत्स! विद्यादानमनुत्तमम्। पुस्तकास्तरणं दत्त्वा सुप्रमाणं सुशोभनम्। विद्यादानमवाप्नोति सत्यमत्र बुद्धिमान्। यस्मकं स्वासनञ्चैव दद्यादासनमथापि वा। विद्यावाचनशीलाय दत्तं भवति राज्यदम्। अञ्जनं नेत्रपादानां दत्तं विद्यापरायणे। भूमिर्दत्तस्य लोकस्य स्वर्गराज्यफलप्रदम्। यस्य भूम्यां स्थितो नित्यं विद्यादानं प्रवर्त्तयेत्। तस्यापि भवति स्वर्गस्तत्प्रभावान्न संशयः"। "येऽपि पत्रं मसीपात्रं लेखनीं सम्पुटादिकम्। दद्युः शास्त्राभियुक्ताय तेऽपि विद्याप्रदायिनाम्। यान्ति लोकान् शुभान् मर्त्याः पुण्यभाजो नराधिप!"। नन्दिपु० "विद्यादानमवाप्नोति प्रदानात् पुस्तकस्य च। शिल्पानि शिक्षयेद् यस्तु पौण्डरीकफलं लभेत्। शिल्पभाण्डप्रदानेऽपि तद्विद्यादानजं फलम्। आश्रितेषु प्रवृत्तस्य तथा कृत्वा निवारणम्। विद्यादानफलं प्रोक्तं नात्र कार्य्या विचारणा। पापवृत्तस्य च तथा दत्त्वा चैव परां मतिम्। विद्यादानफलं प्राप्य स्वर्गलोके महीयते। येन जीवति भाण्डेन तस्मै तद्भाण्डदायकः। सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते" विष्णुधर्मो०। तत्रैव स्कन्दपु० विद्यादानोपक्रमे "पुस्तकास्तरणं दत्त्वा वहनं तत्प्रमाणतः। तदासनं वितानं वा शिवलोके महीयते। यः श्रीपर्णसमुद्भूतं निम्नखातं सुलक्षणम्। दद्यात् सम्पुटकं कृत्वा चर्म्मणा वापि निर्म्मितम्। शिवज्ञानाभियुक्ताय तदध्ययनहेतुना। सुखस्य फलकं वापि विद्यादानफलं लभेत्। यः सौवर्णं सुसम्पूर्णं सर्वरत्नोपशोभितम्। सपिधानं समङ्कं विद्याकोषसमाश्रयम्। कारयेद्वापि रौप्यं वा ताम्रं वा चतुरस्रकम्। कांस्यारकूटं लौहं वा दारुवंशादिनिर्म्मितम्। सकषायातिरक्तेन चर्म्मणाभिनवेन वा। प्रच्छादिता

मण्डयेत् विद्यादाने नवं गृहम्। सुदृढं कटकोपेतं दृढस्तम्भनिवेशनम्। कुर्य्यात्तालकसंयुक्तं विद्यावर्त्तिकरण्डकम्। एवं वित्तानुसारेण कारयित्वा गृहं नृपः। विद्यासिंहासनं तत्र संपूज्य विधिवद्बुधः। तस्मिन् पुण्याहशब्देन विद्याकोषगृहं न्यसेत्। गृहं यः शिवविद्यायाः कुर्य्यादायतनं शुभम्। स मुक्तः पातकैः सर्वैर्विद्यादानफलं लभेत्। विद्यामण्डलकं कृत्वा विद्याव्याख्यानमण्डपे। तत्राभ्यर्च्य शिवां विद्यां तद्व्याख्यां शृणुयात्ततः। सोऽपि याति शिवस्थानं कार्य्यकालसमन्वितम्। अनेन विधिना ज्ञानं यः शृणोति प्रवक्तृतः। स साम्राज्यश्रियं सौख्यं देहान्ते मुक्तिमाप्नुयात्"। तत्रैव देवीपु० "तस्मात् सर्वप्रयत्नेन विद्या देया सदा नरैः। इहैव कीर्त्तिमाप्नोति मृतो याति परां गतिम्। यस्तु देव्या गृहे नित्यं विद्यादानं प्रवर्त्तयेत्। स भवेत् सर्वलोकानां पूज्यः पूज्यपदं व्रजेत्"। वराहपु० "लेखयित्वा तु शास्त्रं देयं गुणवते सदा। तपस्विने, धर्मरते मतिपालनतत्परे। वस्त्रयुग्मेन संवीतं पुस्तकं प्रतिपादयेत्। वाचकं पूजयेच्चापि वस्त्रालङ्कारभूषणैः। अनेनैव विधानेन विद्यादानफलं लभेत्"।

विद्याधन न० विद्यया लब्धं धनम्। विद्यया लब्धे "उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्वकम्। विद्याधनन्तु तद्विद्यात्" इति, "शिष्यादार्त्विज्यतः प्राप्तं सन्दिग्धप्रश्ननिर्णयात्। स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत्। विद्याधनन्तु तत् प्राहुः" इति "शिल्पिष्वपि हि धर्मोऽयम्" इत्युपक्रम्य "परं निरस्य वादेन विद्यया द्यूतपूर्वकम्"। विद्याधनं तु तद्विद्यादित्युक्ते च धने।

विद्याधनविभागे विशेषः "विद्याधनं तु यद् यस्य तत्तस्यैव धनं भवेत्। कुटुम्बं बिभृयाद् भ्रातुर्यो विद्यामधिगच्छतः। भागो यवीयसां तत्र यदि विद्यानुपालिनः" दायभा०। दायतत्त्वे तु "भागं विद्याधनात्तस्मात् स लभेताश्रुतो सन्" इति पाठः। दायभा० नारदवाक्ये "देयं वैद्येन तत्समम्" पाठः। "परभक्तोपयोगेन विद्या प्राप्ताऽन्यतस्तु या। तया लब्धं धनं यत्तु विद्याप्राप्तं तदुच्यते" दाय०त० कात्यायनः। "अन्यतः पितृमातृकुलव्यतिरिक्तात्" रत्न०। "नाविद्यानां तु वैद्येन देयं विद्याधनात् क्वचित्। समविद्याधिकानां न देयं वैद्येन तद्धनम्" "कुले विनीतविद्यानां भ्रातॄणां

-पिहितोऽपि वा। शौर्य्यप्राप्तं तु यद्वित्तं तद्विभाज्यं बृहस्पतिः" दायत०।

विद्याधर पु० विद्यां मन्त्रादिकं धरति धृ-अच्। १देवयोनिभेदे अमरः। २विद्याधारके त्रि०।

विद्यारम्भ पु० ६त०। पञ्चमवर्षे शिशोः कर्त्तव्ये विद्याया आरम्भे तत्कालादि० ज्यो० त० उक्तं यथा "संप्राप्ते पञ्चमे वर्षे अप्रसुप्ते जनार्दने। षष्ठीं प्रतिपदञ्चैव वर्ज्जयित्वा तथाष्टमीम्। रिक्तां पञ्चदशीं चैव सौरिभौमदिनं तथा। एवं सुनिश्चिते काले विद्यारम्भं तु कारयेत्। पूजयित्वा हरिं लक्ष्मीं देवीञ्चापि सरस्वतीम्। स्वविद्यासूत्रकारांश्च स्वाञ्च विद्यां विशेषतः" विष्णु ध०। "लघुचरशिरमूलाधोमुखत्वाष्ट्रपौष्णश्रविष्ठ च हरिबोधे शुक्रजीवार्कवारे। उदितवति च जीवे केन्द्रकोणेषु सौम्यैरपठनदिनवर्जं पाठयेत् पञ्चमेऽब्दे" दीपिका। "विद्यारम्भे गुरुः श्रेष्ठो मध्यमौ भृगुभास्करौ। मरणं शनिभौमाभ्यामविद्या बुधसोमयोः" मदनपा०। "विद्यारम्भः सुरगुरुसितश्रेष्ठमीष्टार्थदायी वर्द्धं चायुश्चिरमपि करोत्यंशुमान् मध्यमोऽत्र। नीहारांशौ भवति जडता पञ्चता भूमिपुत्रे छायासूनावपि च मुनयः कीर्त्तयन्त्येवमाद्याः" रवेर्गुरोर्भृगोर्लग्ने तद्वर्गेऽर्केऽप्यीन्दुवर्जितः। गुर्वकेन्द्रे उच्चगे च विद्यारम्भः प्रशस्यते"। "प्राङ्मुखो गुरुरासीनो वरुणाभिमुखं शिशुम्। अध्यापयेत्तु प्रथमं द्विजाशीर्भिः समन्वितम्। बृहस्पतिः। तद्विधिः कृत्यतत्त्वे दृश्यः। अविद्या बुधसोमयोरिति धनुर्विद्याविषयम् यथोक्तं दीपिकायाम् "अदितिसुतयमार्कस्वातिचित्राग्निपैत्र्यध्रुवहरिवसुमूलाश्वोऽन्त्यमाद्यान्त्यभेषु। शशिनिशिबुधवारे विष्णुबोधे शिवौ वे शुभमयतिथियोगे चापविद्याप्रदानम्" तत्राक्षरग्रहणे विद्यारम्भे च बलगुविरोधयुक्तोऽत्याह" पी० धा० नृसिंहः "शुभाः पापाश्च रन्ध्रस्थाः सर्वे नेष्टाः सदा ग्रहाः। आरब्धावक्रमेस्थाः पापाः सर्वे शुभावहाः। शुभाः केन्द्रत्रिकोणस्थाः धनभ्रातृगताः शुभाः। सर्वे लाभे प्रशस्ताः स्युरक्षरग्रहणे शिशोः"। अक्षरग्रहणं विद्याग्रहणम्" उभयत्रापि उत्तरायणस्यैव ग्राह्यता। "उदग्गते भास्वति पञ्चमेऽब्दे" वशिष्ठोक्तेः।

विद्युत् स्त्री विद्योतते वि+द्युत-क्विप्। १तडिति अमरः २सन्ध्यायाञ्च विगताद्युः यस्य प्रा०ब०। ३निष्प्रभे त्रि० मेदि०। विद्युतश्च चतुर्विधाः "अरिष्टनेमिपत्नीनामरिष्टानाञ्च चा-रूप। चतुष्पुत्राश्च विद्युद्वत्यश्च विद्युतः स्मृताः"। तासु "वाताय कपिला विद्युदातपाय च लोहिता। पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्" ज्यो०। आन्तरिक्षोपद्रवविद्युत्कारणञ्च श्रीपतिनोक्तं यथा "निर्घातोल्काघनसुरधनुर्विद्युतश्च क्रमात् संहत्य रन्ते स्वनगरपरीवेषपूर्वास्तथान्ये" "सुघनजलधिमध्ये वाडवोऽग्निः स्थितोऽस्मात् सवितृभरनिमग्नात् विद्युतश्चत्स्फुलिङ्गाः"। तदग्निपातस्वरूपमग्निपातस्य च कारणञ्च "आकाशाद्दैद्युतं तेजः पार्थिवांशकमिश्रितम्। वात्यावद्भ्रमदाघाते प्रतिकूलानुकूलयोः। वायोस्तत् पतति प्रायो ह्याकाशमाप्यवर्षणे। यतः प्रावृषि नैवैते पांशवः प्रसरन्ति हि। तत् मेघा पार्थिवं चाप्यं तैजसं तत्समुत्थितम्। ततो निर्भरदाहैश्च भूमिस्थैरनुभूयते"।

विद्युत्प्रिय न० ६त०। विद्युदाकर्षके कांस्ये धातौ हेमच०।

विद्युन्माला स्त्री अष्टाक्षरपादके छन्दोभेदे। "मो मो गो गो विद्युन्माला" छन्दोम०। [प्रसिद्धे २राक्षसभेदे च।

विद्युन्मालिन् पु० राक्षसभेदे भाग०१।७ अ०। १रामायण-

विद्रु न० व्यध-रक् दान्तादेशः। छिद्रे शब्दच०।

विद्रधि पु० वेधनेन विद् हृदयं दधाति दध-कि पृषो०। रोगभेदे। तन्निदानादि भावप्र० उक्तं यथा "तत्र विद्रधेः सम्प्राप्तिपूर्वकं सामान्यं लक्षणमाह। "त्वग्रक्तमांसमेदांसि प्रदूष्यास्थिसमाश्रिताः। दोषाः शोथं शनैर्घोरं जनयन्त्युच्छ्रिता भृशम्। महामूलं रुजावन्तं वृत्तं चाप्यथ वायतम्। स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः" अस्थिसमाश्रिता दोषा इति बाहुल्यमाश्रित्योक्तं विद्रधेर्भेदार्थम्। यतो ब्रध्नशोथे दोषाणामस्थिसमाश्रयनियमो नास्ति इति ब्रध्नशोथात् दारुणम्। आयतन्दीर्घम्। षड्विधत्वं विवृणोति। "यथा दोषैः पृथक् सर्वैश्च क्षतेनाप्यसृजा तथा। षण्णां तेषां तु लक्षणं सम्प्रवक्ष्यते" अथ विशिष्टानि लक्षणानि। तत्र वातिकस्य लक्षणमाह "कृष्णोऽरुणो वा विषमो भृशमत्यर्थवेदनः। चित्रोत्थानप्रपाकश्च विद्रधिर्वातसम्भवः" विषमो भृशम् अत्यन्तं अत्यर्थं महान्। चित्रोत्थानप्रपाकः चिरादिविलम्बादुत्थानमुद्गतिः प्रपाकश्च यस्य सः। अथ पैत्तिकमाह "पक्वोदुम्बरसङ्काशः श्यावो वा ज्वरदाहवान्। क्षिप्रोत्थानप्रपाकश्च विद्रधिः पित्तसम्भवः"। अथ श्लैष्मिकमाह। "शरावसदृशः पाण्डुः शीतः स्निग्धोऽल्पवेदनः। चिरोत्थान

प्रायश्च विद्रधिः कफसम्भवः। तनुपीतासिताश्चैषामास्रावाः क्रमशो मताः"। अथ सान्निपातिकमाह। "नानावर्णरुजास्रावो घाटालो विषमो महान्। विषमं पच्यते चापि विद्रधिः सान्निपातिकः"। नाना अनेकविधाः वर्णाः कृष्णरक्तपाण्डुरूपाः। रुजा तोददाहकण्ड्वादिरूपाः स्रावाः तनुपीतसिताः यस्य सः। घाटालः घाटाकोटिः घाटाकोटिर्घाटालः अत्युच्छ्राय इत्यर्थः। विषमः निम्नोन्नतः। विषमं पच्यते चिराचिरगम्भीरोत्तानोद्धनूनर्द्धभेदेन विषमं यथा स्यात्तथा पच्यते। अथाभिघातजस्यागन्तोः विद्रधेः सम्प्राप्तिपूर्वकं लक्षणमाह। "तैस्तैर्भावैरभिहते क्षते वाऽपथ्यकारिणाम्। क्षतोष्मा वायुविक्षिप्तः सरक्तं पित्तमीरयेत्। ज्वरस्तृष्णा च दाहश्च जायते तस्य देहिनः। आगन्तुर्विद्रधिर्ज्ञेयः पित्तविद्रधिलक्षणः"। तैस्तैर्भावैः काष्ठलोष्ट्रपाषाणादिभिः अभिहते यदा रक्तस्रावो भवति। तथाभिहते क्षते क्षते वा अथ वा खड्गशस्त्रादिभिः क्षते यथा रक्तस्रावो भवति तथा क्षते क्षते क्षतोष्मा। अत्र क्षतशब्देन क्षतमात्रमुच्यते तेनाभिहतक्षतयोरुभयोरप्यूष्मा वायुना विक्षिप्तः अभिघातात् क्षते रक्तक्षयात् कुपितेन वायुना प्रक्षिप्तः। ईरयेत् कोपयेत्। अथ रक्तजमाह "कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाज्वरः। पित्तविद्रधिलिङ्गस्तु रक्तविद्रधिरुच्यते"। अधिष्ठानविशेषेण लिङ्गविशेषं बोधयितुमाभ्यन्तरान् विद्रधीनाह "आभ्यन्तरानतस्तूर्द्ध्वं विद्रधीन् परिचक्षते। गुर्वसात्म्यविरुद्धान्नशुष्कसङ्कीर्णभोजनात्। अतिव्यवायव्यायामवेगाघाताद्विदाहिभिः। पृथक् सम्भूय वा दोषाः कुपिता गुल्मरूपिणम्। वल्मीकवत्समुन्नद्धमन्तः कुर्वन्ति विद्रधिम्। गुदे वस्तिमुखे नाभ्यां कुक्षौ वङ्क्षणयोस्तथा। वृक्कयोः प्लीह्नि यकृति हृदि वा क्लोम्नि चाप्यथ। एषां लिङ्गानि जानीयाद्बाह्यविद्रधिलक्षणैः"। सम्भूय वा मिलित्वा वा। समुन्नद्धं समन्तादुन्नतम्। स्थानविशेषेण रूपविशेषमाह "गुदे वातनिरोधस्तु वस्तौ कृच्छ्राल्पमूत्रता। नाभ्यां हिक्कां तृष्णां च कुक्षौ मारुतकोपनम्। कटिपृष्ठग्रहस्तीव्रो वङ्क्षणोत्थे तु विद्रधौ। वृक्कयोः पार्श्वसङ्कोचः प्लीह्न्युच्छ्वासावरोधनम्। सर्वाङ्गप्रग्रहस्तीव्रो हृदि कासश्च जायते। श्वासो यकृति हिक्का च क्लोम्नि पेपीयते पयः" [illegible] "नाभेरुपरिजाः पक्वा यान्त्यूर्द्ध्वमितरे त्वधः" कर्णादिजाताः यान्ति द्वाराणि ऊर्ध्वमातायां, इतरे वस्त्यादिजाः अधः गुदात्। नाभिजस्तूभाभ्यां मार्गाभ्याम्। तथा च हारीतः "ऊर्द्ध्वं प्रभिन्नेषु मुखाद्द्वाराभ्यां प्रवर्त्ततेऽसृक्सहितो हि पूयः। अधः प्रभिन्नेषु तु पायुमार्गाद् द्वाभ्यां प्रवृत्तिस्त्विह नाभिजेषु" अथ साध्यत्वादिकमाह "अधःस्रुतेषु जीवेत्तु स्रुतेषूर्द्ध्वं न जीवति। हृन्नाभिवस्तिवर्ज्येषु तेषु भिन्नेषु बाह्यतः। जीवेत्कदाचित् पुरुषो नेतरेषु कदाचन"। हृन्नाभिवस्तिवर्ज्येषु प्लीहक्लोमादिजाः तेषु बाह्यभिन्नेषु न जीवेत् हृदादीनां मर्मत्वात्। अतएव भोजः "असाध्यो मर्मजो ज्ञेयः पक्वाऽपक्वश्च विद्रधिः। सन्निपातोत्थितोऽप्येवं पक्व एव हि वक्षजः। त्वगजो नाभेरधोजश्च साध्यो यश्च समीपजः। अपक्वश्चैव पक्वश्च साध्यो नोपरि नाभितः। आध्मानं बद्धनिष्यन्दं छर्दिहिक्कातृषान्वितम्। रुजाश्वाससमायुक्तं विद्रधिर्नाशयेन्नरम्" अथ बाह्यविद्रधीनां साध्यासाध्यत्वमाह "साध्या विद्रधयः पञ्च विवर्ज्यः सान्निपातिकः। आमपक्वविदग्धत्वं तेषां ज्ञेयञ्च शोथवत्" शोथवत् वक्ष्यमाणव्रणशोथवत्।

विद्रधिनाशन पु॰ विद्रधिं नाशयति नश-णिच्-ल्यु। १शोभाञ्जने शिका॰। [२वरणे च मज्जमा॰।

विद्र(द्रा)व पु॰ विद्रु-अप् घञ् वा। १पलायने अमरः

विद्रुत त्रि॰ वि+द्रु-क्त। १प्राप्तद्रवे २पलायिते च अमरः।

विद्रुम पु॰ विशिष्टो द्रुमः। १प्रवालरत्ने २वृक्षे मेदि॰।

विद्रुमलता स्त्री विद्रुमस्य लतेव। नलीनामगन्धद्रव्ये मेदि॰ स्वार्थे क अत इत्त्वम्। विद्रुमलतिका तत्रैव। [द्रुमे विद्रुमि

विद्वत्कल्प त्रि॰ ईषदसमाप्तो विद्वान् विद्वस्+कल्पप्। ईष॰

विद्वत्तम पु॰ अतिशयेन विद्वान् विद्वस्+तमप्। अतिपण्डिते तरप्। विद्वत्तरोऽप्यत्र। [विद्वज्जन

विद्वद्देशीय त्रि॰ ईषदसमाप्तो विद्वान् विद्वस्+देशीयर्।

विद्वस् त्रि॰ विद-क्वसु। १प्राज्ञे स्त्रियां ङीप् सम्प्र॰ "विदुषी मूर्द्धनि सा बिभर्त्ति यान्" नैष॰। २पण्डिते पु॰ ३आत्मज्ञानयुक्ते। [क। विद्विषोऽप्यत्र।

विद्विष् पु॰ विशेषेण द्वेष्टि वि+द्विष-क्विप्। शत्रौ अमरः।

विद्वेष पु॰ वि+द्विष-घञ्। वैरिभावे शत्रुतायाम् अमरः।

विद्वेषण न॰ वि+द्विष-णिच्-ल्युट्। तन्त्रोक्ते अभिचारकर्मभेदे येन शत्रूणां परस्परविद्वेषो भवति तस्मिन् व्यापारे। वि+द्विष-ल्युट्। २विद्वेषे। [विधति। अवेधीत्

विध विधाने छिद्रकरणे छेदने च तु॰ पर॰ सक॰ सेट्।

विध पुंस्त्री विध-क अप् वा। १विधाने २गजभक्ष्यान्ने ३प्रकारे

४ वेधे पुष्कलो रभसः । छेदने मेदि० । ७ कर्म्मणि च स्त्री हेमच० । तस्यार्थे वेधने च स्त्री त्रिका० ।

विधवा, स्त्री विगतो धवो यस्याः । मृतपतिकायां स्त्रियाम् इत्यमरः ।

विधवाधर्म्माश्च शु॰त॰ उक्ता यथा विष्णुसं॰ "मृते भर्त्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा" । ब्रह्मचर्य्यं मैथुनवर्ज्जनं ताम्बूलादिवर्ज्जनञ्च यथाह प्रचेताः "ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् । यतिश्च ब्रह्मचारी च विधवा च विवर्ज्जयेत्" । अभ्यञ्जनमायुर्वेदोक्तम्" रघु० । काशीख॰ विस्तरेण ४अ॰ उक्ता यथा

"अनुयाति न भर्त्तारं यदि दैवात् कदाचन । तथापि शीलं संरक्ष्यं शीलभङ्गात् पतत्यधः । तद्वैगुण्यादपि स्वर्गात् पतिः पतति नान्यथा । तस्याः पिता च माता च भ्रातृवर्गस्तथैव च । पत्यौ मृते च या योषिद्वैधव्यं पालयेत् क्वचित् । सा पुनः प्राप्य भर्त्तारं स्वर्गभोगान् समश्नुते । विधवाकवरीबन्धो भर्त्तृबन्धाय जायते । शिरसो वपनं तस्मात् कार्य्यं विधवया सदा । एकाहारः सदा कार्य्यो न द्वितीयः कदाचन । त्रिरात्रं पञ्चरात्रं वा पक्षव्रतमथापि वा । मासोपवासं कुर्य्याद्वा चान्द्रायणमथापि वा । कृच्छ्रं पराकं वा कुर्य्यात् तप्तकृच्छ्रमथापि वा । यवान्नैर्वा फलाहारैः शाकाहारैः पयोव्रतैः । प्राणयात्रां प्रकुर्व्वीत यावत् प्राणः स्वयं व्रजेत् । पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम् । तस्माद्भूशयनं कार्य्यं पतिसौख्यसमीहया । नैवाङ्गोद्वर्त्तनं कार्य्यं स्त्रिया विधवया क्वचित् । गन्धद्रव्यस्य सम्भोगो नैव कार्य्यस्तया पुनः । प्रत्यहं तर्पणं कार्य्यं भर्त्तुः कुशतिलोदकैः । तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्व्वकम् । विष्णोस्तु पूजनं कार्य्यं पतिबुद्ध्या न चान्यथा । पतिमेव सदा ध्यायेद्विष्णुरूपधरं परम् । यद्यदिष्टतमं लोके यच्च पत्युः समीहितम् । तत्तद्गुणवते देयं पतिप्रीणनकाम्यया । वैशाखे कार्त्तिके माघे विशेषनियमाञ्चरेत् । स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः । वैशाखे जलकुम्भाश्च कार्त्तिके घृतदीपकाः । माघे तिलेन्धनोत्सर्गः स्वर्गलोके महीयते । प्रपा कार्य्या च वैशाखे देवे देया गलन्तिका । उपानद्व्यजनं चापि सूक्ष्मवासांसि चन्दनम् । सकर्पूरन्तु ताम्बूलं पुष्पदामं तथैव च । जलपात्राण्यनेकानि तथा पुष्पगृहाणि च । पानानि च विचित्राणि द्राक्षारम्भाफलानि च । देयानि द्विजमुख्येभ्यः पतिर्मे प्रीयतामिति । ऊर्जे यवान्नमश्नीयादेकान्नमथ वा पुनः । वृन्ताकं शूरणञ्चैव शूकशिम्बीञ्च वर्ज्जयेत् । कार्त्तिके वर्ज्जयेत्तैलं कार्त्तिके वर्ज्जयेन्मधु । कार्त्तिके वर्ज्जयेत् कांस्यं कार्त्तिके चापि सन्धितम् । कार्त्तिके मौननियमे चारुघण्टां प्रदापयेत् । पत्रभोजी कांस्यपात्रं घृतपूर्णं प्रयच्छति । भूमिशय्याव्रते देया शय्या श्लक्ष्णा सतूलिका । फलत्यागे फलं देयं रसत्यागे च तद्रसः । धान्यत्यागे च तद्धान्यमथ वा शालयः स्मृताः । धेनुं दद्यात् प्रयत्नेन सालङ्कारां सकाञ्चनाम् । एकतः सर्व्वदानानि दीपदानं तथैकतः । कार्त्तिके दीपदानस्य कलां नार्हन्ति षोडशीम् । किञ्चिदभ्युदिते सूर्य्ये माघस्नानं समाचरेत् । यथाशक्त्या च नियमान्माघे स्नानं समाचरेत् । पक्वान्नैर्भोजयेद्विप्रान् यतीनपि तपस्विनः । लड्डुकैः फाणितैश्चापि वटकैरिण्डरिकादिभिः । घृतपक्वैः समरिचैः शुचिकर्पूरवासितैः । गर्भे शर्करया पूर्णैर्नेत्रानन्दैः सुगन्धिभिः । शुष्केन्धनानां भारांश्च दद्याच्छीतापनुत्तये । कञ्चुकं तूलगर्भञ्च तूलिकां सोपधानिकाम् । मञ्जिष्ठारूपवासांसि तथा तूलवतीं पटीम् । ऊर्णामयानि वासांसि यतिभ्योऽपि प्रदापयेत् । जातीफललवङ्गैश्च ताम्बूलानि बहून्यपि । कम्बलानि च चित्राणि निवातानि गृहाणि च । मृदुलाः पादरक्षाश्च सुगन्ध्युद्वर्त्तनानि च । घृतकम्बलपूजाभिर्महास्नानपुरःसरम् । संस्थाप्य शाम्भवं लिङ्गं पूजयेद्दृढभक्तितः । कृष्णागुरुप्रभृतिभिर्गर्भागारे प्रधूपनैः । तूलवर्त्तिप्रदीपैश्च नैवेद्यैर्विविधैस्तथा । भर्त्तृस्वरूपो भगवान् प्रीयतामिति चोच्चरेत् । एवंविधैश्च विधवा विविधैर्नियमैर्व्रतैः । वैशाखान् कार्त्तिकान् माघानेवमेवातिवाहयेत् । नाधिरोहेदनड्वाहं प्राणैः कण्ठगतैरपि । कञ्चुकं न परीदध्याद्वासो न विकृतं वसेत् । अपृष्ट्वा सुतान् किञ्चिन्न कुर्य्याद्भर्त्तृतत्परा । एवं चर्य्यापरा नित्यं विधवापि शुभा मता । इति धर्म्मसमायुक्ता विधवापि पतिव्रता । पतिलोकानवाप्नोति न भवेत् क्वापि दुःखिता" । ब्रह्मवै॰ ज॰ ख॰ ८३अ॰ कश्चिद्विशेष उक्तो यथा

"ब्राह्मणी पतिहीना या भवेन्निष्कामिणी सदा । एकभक्ता दिनान्ते सा हविष्यान्नरता सदा । न धत्ते दिव्यवस्त्रञ्च गन्धद्रव्यं सुतैलकम् । स्रजञ्च चन्दनं चैव शङ्खं सिन्दूरभूषणम् । त्यक्त्वा मलिनवस्त्रा स्यात् नित्यं नारा-

वर्णं चरेत्"। "पुत्रहस्य च पुरुषं सदा पश्यति धर्मतः। निराशं न च भुञ्जीत मा न कुर्य्यादिमव व्रजम्। एकादश्यां न भोक्तव्यं कृष्णशुक्लात्मकेऽपि हि। क्षीरान्नस्य भक्षणात् निवृत्तौ पापभक्षणा। अघोरायाञ्च प्रेतायां चन्द्रसूर्य्योपरागयोः। अष्टद्रव्यं परित्यज्य भुञ्जीत परमेव च। ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम्। सन्यासिनां च गोमांससुरातुल्यं श्रुतौ श्रुतम्। रक्तशाकं मसूरञ्च जम्बीरं पर्णमेव च। अलाबूर्वर्त्तुलाकारा वर्ज्जनीया यतेरपि। पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम्। यानमारोहणं कृत्वा विधवा नरकं व्रजेत्। न कुर्य्यात् केशसंस्कारं गात्रसंस्कारमेव च। केशबन्धो जटारूपा न क्षौरं तीर्थकं विना। तैलाभ्यङ्गं न कुर्वीत न हि पश्यति दर्पणम्। मुखञ्च परपुंसां च यात्रां नृत्यं महोत्सवम्। नर्त्तकं गायकञ्चैव सुवेशं पुरुषं शुभम्"।

विधातृ पु० वि+धा-तृच्। १प्रजापतौ ब्रह्मणि अमरः। २कामदेवे मेदि०। ३मदिरायां राजनि०। ४भृगुमुनिपुत्रभेदे भाग०। ५विधानकर्त्तरि त्रि० स्त्रियां ङीप्। सा च ६पिप्पल्यां शब्दर०। ७धर्मे पु० "द्वौ धाता च विधाता च पौरावौ मनसो पती। द्वौ नाकारौ त्रिलोकेऽस्मिन् धर्माधर्मौ प्रकीर्त्तितौ" अग्निपु०। [२मरीच्यादौ च।

विधातृभू पु० विधातुर्भवति भू-क्विप्। १नारदमुनौ त्रिका०।

विधातृआयुस् पु० विधातुरायुः प्रमाणं यस्मात्। सूर्य्ये शब्दच० सूर्य्यक्रियां विना वत्सरादिमानाभावात् सूर्य्यस्य तथात्वम्। हेम०। तस्य वयःकाले २महाकल्पे च। तदायुःकालश्च आयुःशब्दे ७६२ पृ० दृश्यः।

विधान न० वि+धा ल्युट्। १करणे २सम्पत्तौ। ३विधौ, जटा० ४गजभक्ष्यान्ने च हारा० संज्ञायां कन्। व्यथायां न० शब्दर०। [३ वि त्रि०।

विधानज्ञ पु० विधानं जानाति ज्ञा-क। १पण्डिते। २विधि-

विधायक त्रि० वि+धा-ण्वुल्। विधानकर्त्तरि।

विधि पु० वि+धा-कि। १गजान्नकवले ब्रह्मणि, २भाग्ये ३क्रमे अमरः "विधीविधिनिसंख्यानेष्वधीविधयो विधि शब्दच० अन्ने प्रवर्त्तनारूपे ४नियोगे तज्जनके ५वाक्ये हेम०। ६विष्णौ हलायु० ७कर्मणि त्रिका०। ८गजभक्ष्यान्ने जटा०। ९वैद्ये राजनि०। १०अप्राप्तप्रापकरूपे वाक्यभेदे, व्याकरणोक्ते ११सूत्रभेदे। तत्र व्याकरणविधिर्निरूप्यते। "संज्ञा च परिभाषा च विधिर्नियम एव च। अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणमित्युक्तेः षड् विधिभेदाः तत्र "तुल्यास्यप्रयत्नं सवर्णम्" पा० सवर्णसंज्ञा परिभाषा तच्छब्दे ४२४६पृ० लक्षा। अप्राप्तप्रापको विधिः यथा "अकः सवर्णे दीर्घः" पा० इत्यादि। अत्र सवर्णे परे पूर्वस्य दीर्घस्याप्राप्तेस्तत्प्रापकत्वात् तथात्वम्। स च द्विविधः धर्मोत्पादकोऽभावरूपश्च। तत्र धर्मोत्पादक उक्तः अभावोऽपि द्विविधः लोपरूपो निषेधरूपश्च तत्र "लोपोऽभ्यासस्येति" पा० नाशरूपः। "नाभ्यस्ताच्छतुरित्यादौ" निषेधरूपः। सामान्यप्राप्तस्य विशेषावधारको नियमः यथा "रात्सस्यैव" पा० इत्यादि। अन्यधर्मस्यान्यत्रारोपणविधिरतिदेशविधिः यथा पुंवद्भावादिः। पूर्वसूत्रस्थपदादेरन्यत्रोपस्थितिरधिकारविधिः। स च त्रिविधः "सिंहावलोकितं चैव मण्डूकप्लुतमेव वा। गङ्गाप्रवाहवच्चापि ह्यधिकारस्त्रिधा मतः"। अधिकारशब्दे १२७पृ० दृश्यम्। विधिश्च विनियोगरूपतया मन्त्र० प्र० निरूपितो यथा

"नेह कर्त्तव्यं विधानम्। आख्यातमात्रस्य तद्बोधसमर्थत्वात् किन्तु प्रवर्त्तकचिकीर्षायां यत्प्रकारकज्ञानस्य हेतुत्वं स तथा, तादृशञ्च कृतिसाध्यत्वमिष्टसाधनत्वम् बलवदनिष्टाननुबन्धित्वञ्च प्रत्येकमेव, यागपाकादिधर्मितावच्छेदकयागादिधर्मिकचिकीर्षोत्पत्त्या तत्र प्रवृत्तेः। एवञ्च यजेतेत्यादौ यागः कृतिसाध्यः इष्टसाधनं बलवदनिष्टाननुबन्धी चेत्याकारको बोधः" अधिकं तत्र दृश्यम्। मीमांसकमते विधिस्वरूपोदाहरणं लौगाक्षिभास्करेण दर्शितं यथा

"तत्राज्ञातार्थज्ञापको वेदभागो विधिः। स च तादृशप्रयोजनवदर्थविधानेनार्थवान्। तादृशं चार्थं प्रमाणान्तरेणाप्राप्तं विधत्ते। यथाग्निहोत्रं जुहुयात् स्वर्गकाम इति विधिर्मानान्तरेणाप्राप्तस्वर्गप्रयोजनवद्धोमं विधत्ते। अग्निहोत्रहोमेन स्वर्गं भावयेदिति वाक्यार्थबोधः"। "यत्र तु कर्म मानान्तरेण प्राप्तं, तत्र तदुद्देशेन गुणमात्रं विधत्ते। यथा दध्ना जुहोतीत्यत्र होमस्याग्निहोत्रं जुहुयादित्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानं दध्ना होमं भावयेदिति। यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते। यथा सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात् सोमविशिष्टयागविधानम्। सोमपदे मत्वर्थलक्षणया सोमवता यागेनेष्टं भावयेदिति वाक्यार्थबोधः। न चात्रविधाने वाक्यभेदः प्रस-

समुच्चयस्याविधानात् । न च ज्योतिष्टोमेन स्वर्गकामो यजेतेति विधिप्राप्तोद्देशेन सोमरूपगुणविधानमेवास्तु सोमेन यागं भावयेदिति, किं मत्वर्थलक्षणयेति वाच्यम् । तस्याधिकारविधित्वेनोत्पत्तिविधित्वासम्भवात् । ननूद्भिदा यजेत पशुकाम इत्यत्रैव ज्योतिष्टोमेनेत्यत्राप्युत्पत्त्यधिकारविधित्वमस्त्विति चेन्न, दृष्टान्ते उत्पत्तिवाक्यान्तराभावेनान्यथानुपपत्त्या तथात्वाश्रयणात् । किन्तु ज्योतिष्टोमेनेत्यत्रोभयविधित्वे तेनैव यागस्य फलसम्बन्धोऽपि बोधनीय इति गुरुतरो वाक्यभेदस्तद्वरं सोमपदे मत्वर्थलक्षणया विशिष्टविधानम् । स च विधिश्चतुर्विधः उत्पत्तिविधिर्विनियोगविधिः, अधिकारविधिः, प्रयोगविधिश्चेति । तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः । यथाग्निहोत्रं जुहोतीति । अत्र च विधौ कर्मणः करणत्वेनान्वयः अग्निहोत्रहोमेनेष्टं भावयेदिति । ननु यागस्य द्वे रूपे द्रव्यं देवता च । तयोश्च रूपाश्रवणे अग्निहोत्रं जुहोतीति कथमुत्पत्तिविधिः अग्निहोत्रपदस्य तु तत्प्रख्यन्यायेन नामधेयत्वादिति चेन्न, रूपाश्रवणेऽप्यस्योत्पत्तिविधित्वात् । अन्यथा दध्ना जुहोतीति अयमप्युत्पत्तिविधिः स्यात् । तथा चाग्निहोत्रं जुहोतीति वाक्यमनर्थकं स्यात् । अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः । यथा दध्ना जुहोतीति । स हि तृतीयया प्रतिपन्नाङ्गभावं दध्नो होमसम्बन्धं विधत्ते दध्ना होमं भावयेदिति । गुणविधौ च धात्वर्थस्य साध्यत्वेनैवान्वयः । क्वचिदाश्रयत्वेनापि यथा दध्नेन्द्रियकामस्य जुहुयादित्यत्र दधिकरणत्वेनेन्द्रियं भावयेत् तच्च किंनिष्ठमित्याकाङ्क्षायां सन्निधिप्राप्तहोमाश्रयत्वेनान्वेति । एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि । एतत्सहकृतेनानेन विधिनाङ्गत्वं परोद्देश्यप्रवृत्तकृतिव्याप्यत्वरूपं पारार्थ्यापरपर्य्यायं ज्ञाप्यते" ततः तत्सहकारीणि श्रुत्यादीनि निरूपितानि तत्र द्रष्टव्यानि "तदेवं निरूपितानि सङ्क्षेपतः श्रुत्यादीनि षट् प्रमाणानि । एतत्सहकृतेन विनियोगविधिना समिदादिभिरुपकृत्य "दर्शपूर्णमासाभ्यां यजेत" इत्येवं रूपेण यानि विनियुज्यन्ते तान्यङ्गानि द्विविधानि सिद्धरूपाणि, क्रियारूपाणि चेति । तत्र सिद्धानि जातिद्रव्यसंख्यादीनि तानि च दृष्टार्थान्येव । क्रियारूपाणि च द्विविधानि । गुणकर्माणि प्रधानकर्माणि च । एता-न्येव सन्निपत्योपकारकाणि आरादुपकारकाणीति चोच्यते । कर्माङ्गद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकम् । यथावघातप्रोक्षणादि तच्च दृष्टार्थमदृष्टार्थं दृष्टादृष्टार्थं चेति । दृष्टार्थमवघातादि अदृष्टार्थं प्रोक्षणादि । दृष्टादृष्टार्थं पशुपुरोडाशयागादि । स हि द्रव्यत्यागांशेनादृष्टं देवतोद्देशेन च देवतास्मरणं दृष्टं करोति । द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म त्वारादुपकारकम् । यथा प्रयाजादि । आरादुपकारकञ्च परमापूर्वोत्पत्तावेवोपयुज्यते । सन्निपत्योपकारकन्तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपेऽप्युपयुज्यते । इदमेव चाश्रयिकर्मेत्युच्यते । तदेवं निरूपितः सङ्क्षेपतो विनियोगविधिः । प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः । स चाङ्गवाक्यैकतापन्नः प्रधानविधिरेव । स हि साङ्गं प्रधानमनुष्ठापयन्विलम्बे प्रमाणाभावादविलम्बापरपर्य्यायं प्रयोगप्राशुभावं विधत्ते । न च तदविलम्बेऽपि प्रमाणाभाव इति वाच्यं विलम्बे ह्यङ्गप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तिः विलम्बेन क्रियमाणयोः पदार्थयोः इदमनेन सहकृतमिति साहित्यव्यवहाराभावात् । स चाविलम्बो नियते क्रमे आश्रीयमाणे भवति । अन्यथा हि किमेतदनन्तरमेतत् कर्त्तव्यमेतदनन्तरं वेति प्रयोगविक्षेपापत्तेः । अतः प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते । अत एवाङ्गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्षणम्" ।

'तदेवं संक्षेपतो निरूपितः षड्विध क्रमनिरूपणेन प्रयोगविधिः । कर्मजन्यफलस्वाम्यबोधको विधिरधिकारविधिः । फलस्वाम्यं च कर्मजन्यफलभोक्तृत्वम् । स च यजेत स्वर्गकाम इत्यादिरूपः, स ह्युद्दिश्य यागं विदधतानेन स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते "यस्याहिताग्नेरग्निर्गृहान्दहेत् सोऽग्नये क्षामवतेऽष्टाकपालं पुरोडाशं निर्वपेत्" इत्यादिना दाहादौ निमित्ते कर्म विदधता निमित्तवतः कर्मजन्यपापक्षयरूपफलस्वाम्यं प्रतिपाद्यते । एवम् "अहरहः सन्ध्यामुपासीत" इत्यादिना शुचिविहितकालजीविनः सन्ध्योपासनाजन्यप्रत्यवायपरिहाररूपफलस्वाम्यं बोध्यते । तच्च फलस्वाम्यं तस्यैव योऽधिकारविशिष्टः । अधिकारश्च एष यद्विधिवाक्ये पुरुषविशेषणत्वेन श्रूयते यथा काम्ये कर्मणि फलकामना । नैमित्तिके कर्मणि निमित्तनिश्चयः ।

नित्ये सन्ध्योपासनादौ शुचिविहितकालजीवित्वम् अत-एव "राजा राजसूयेन स्वाराज्यकामो यजेत" इत्यनेन विधिवाक्येन स्वाराज्यमुद्दिश्य राजसूयं विदधता न स्वराज्यकाममात्रस्य फलभोक्तृत्वं प्रतिपाद्यते किन्तु राज्ञः सतः स्वाराज्यकामस्यैव राजसूयस्यापि अधिकारिविशेषणत्वेन श्रवणात् । क्वचित्तु पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणं यथाध्ययनविधिसिद्धा विद्या क्रतुविधीनामर्थज्ञानापेक्षत्वेनाध्ययनविधिसिद्धार्थज्ञानवन्तं प्रत्येव प्रवृत्तेः । एवमग्निसाध्यकर्मसु आधानसिद्धाग्निमता अग्निसाध्यकर्मणामग्न्यपेक्षत्वेन तद्विधीनामाधानसिद्धाग्निमन्तं प्रत्येव प्रवृत्तेः । एवं सामर्थ्यमपि आम्नातान्यर्थं ब्रुवतां शक्तिः सहकारिणीति न्यायात् समर्थं प्रत्येव विधिप्रवृत्तेः । तदेवं निरूपितो विधिः" । विधिरसायने च विधिभेदोऽन्यथा दर्शितो यथा
"विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते" तत्तच्छब्दे विशेषो दृश्यः । १२अर्थालङ्कारभेदे च । अलङ्कारशब्दे ४०१ पृ० दृश्यम् ।

विधिज्ञ त्रि० विधिं क्रमं जानाति ज्ञा-क । विधानक्रमज्ञे ।

विधित्सा स्त्री विधातुमिच्छा वि+धा-सन् भावे अ । विधानेच्छायाम् ।

विधिदेशक पु० विधिं विधानं दिशति दिश+ण्वुल् । विधिदर्शिनि १सदस्ये अमरः २गुरौ च ।

विधिवत् अव्य० विधिमर्हति विधि+वति । विध्यनुसारे

विधु पु० व्यध-कु । १चन्द्रे २कर्पूरे ३विष्णौ मेदि० । ४ब्रह्मणि शब्दर० । ५यक्षुरे ६राक्षसे विश्वः । ७वायौ ८युधि च संक्षिप्तसा० ।

विधुत त्रि० वि+धु-क्त १कम्पिते । २त्यक्ते च अमरः ।

विधुनन न० वि+धु-णिच्-नुक् च । चालने जटा० ।

विधुन्तुद पु० विधुं तुदति तुद-खश् मुम् च । राहौ अमरः

विधुपञ्जर पु० विधोः पिञ्जर इव । १खड्गे शब्दर० ।

विधुर त्रि० विगता धूः संज्ञत्वात् समा० । १विश्लिष्टे अमरः । २विकले च मेदि० । विगता धूः । ३वैकल्ये ४विश्लेषे च न० त्रिका० । ५रसालायां स्त्री मेदि० ।

विधुवन न० वि+धु-ल्युट् । कम्पने अमरः ।

विधूत त्रि० वि+धू-क्त । १कम्पिते २त्यक्ते च हेमच० । "विधूतपाप्मा [illegible]" श्रुतिः ।

विधेय त्रि० वि+धा-यत् । १विधातुं योग्ये २वचनस्थे आयत्ते अमरः । ३विधिना बोध्ये च । ४उद्देश्यप्रकारतया ज्ञायमाने विशेषणविषयतायुते पदार्थे यथा पर्वतो वह्निमानित्यादौ वह्निर्विधेयः । पर्वतोऽयादौ पाककृतिः आख्यातार्थस्य विधेयतयैव बोधस्याङ्गीकारात् । विधेयता तु विशेषणविषयता अनुवाद्यभिन्नविषया "अनुवाद्यमनुक्त्वा च न विधेयमुदीरयेत्" इति आलङ्कारिकनियमः । प्रत्ययादिप्रमितविशेष्यतावच्छेदकताभिन्ना विशेष्यतानिरूपिता च सेत्यन्ये ।

विधेयाविमर्श पु० विधेयस्याविमर्शो यत्र । अविमृष्टविधेयांशरूपे काव्यदोषभेदे दोषशब्दे २७३२ पृ० तत्र उदाहरणादिकं दृश्यम् ।

विध्याभास पु० अर्थालङ्कारभेदे सा० द० अलङ्कारशब्दे ४०१ पृ० दृश्यम् ।

विध्वंस पु० वि+ध्वन्स-घञ् । नाशे ।

विनत त्रि० वि+नम-क्त । १प्रणते २भुग्ने ३शिक्षिते च मेदि० । गरुडमातरि ४कश्यपपत्नीभेदे ५पिटकाभेदे च स्त्री मेदि । [नताश्रजः दयोऽप्युभयत्र ।

विनतासूनु पु० ६त० । १अरुणे २गरुडे च जटा० । वि-

विनद पु० विशेषेण नदति नद-अच् । (क्षातियान) इति ख्याते वृक्षभेदे शब्दच० । [राजनि० ।

विनम्रक न० विशेषेण नम्रमिव इवार्थे कन् । तगरपुष्पे

विनय पु० वि+नी-भावे अच् । १शिक्षायां २प्रणामे ३अनुनये च मेदि० । वि+नी-कर्त्तरि अच् । ३विनययुक्ते, जने, विनयश्च शास्त्रज्ञानजन्यसंस्कारभेदः इन्द्रियसंयमो वा । ४निभृते, ५क्षिप्ते, ६जितेन्द्रिये च । ७वणिग्जने पु० अमरः । ८दण्डे अव्य० त० । ९शाक्यादौ स्त्री मेदि० ।

विनयग्राहिन् त्रि० विनयं शिक्षां गृह्णाति ग्रह णिनि । वचनस्थिते आयत्ते अमरः । स्त्रियां ङीप् ।

विनयस्थ त्रि० विनये तिष्ठति स्था-क । वचनग्राहिणि आयत्ते हेमच० ।

विनशन न० वि+नश-ल्युट् । १विनाशे । विनश्यति अदर्शनं गच्छति सरस्वत्यत्र वि-नश-आधारे ल्युट् । २कुरुक्षेत्रस्थे तीर्थभेदे त्रिका० । "हिमवद्विन्ध्ययोर्मध्यं यत् प्राग् विनशनादपि" मनुः । स च सरस्वत्यन्तर्धानदेश एव प्रभासतीर्थसन्निकृष्टनिषादपुरसमीपस्थः यथोक्तं भा० व० १३०अ० ।
"एषा सरस्वती रम्या दिव्या चौघवती नदी । एतद्विनशनं नाम सरस्वत्या विशाम्पते! । द्वारं निषादराष्ट्रस्य येषां दोषात् सरस्वती । प्रविष्टा पृथिवीं वीर! मा निषादा हि

नां विदुः"। "पुंक्षपक्षमस्यां दीक्षा सरस्वतीविनशने" कात्या०श्रौ० २४।६।१०। "सरस्वतीविनशने सरस्वती यत्र द्वश्यतां प्रभाते सारस्वतसत्रार्थं दीक्षा भवति" कर्कः। "यत्र सरस्वत्यन्तर्भवति तद्विनशनमुच्यत" इत्योम्नस्वामिनः। "सरस्वती नाम नदी प्रत्यक्स्रोता प्रस्रवति तस्याः प्राग् परभागौ सर्वलोकप्रत्यक्षौ मध्यमस्तु भागो भूम्यन्तर्निमग्नः प्रवहति नादौ केनचिद् दृश्यते तद्विनशनमुच्यत" इति लाट्या० १०।१५।१ माधवाचार्य्यः।

विनष्ट त्रि० वि+नश–क्त। १नाशप्रतियोगिनि २पतिते च "विनष्टे शाप्यमरणे पितुर्यरतस्य हि" नारदः। "विनष्टे पतिते" दायभा०।

विना अव्य० वि+ना। १वर्ज्जने २अन्तरेणेत्यर्थे च। एतद्योगे २द्वितीया तृतीया पञ्चमी च। [२रहिते च त्रिका०।

विनाकृत त्रि० विनेति कृतम् विना+कृ–क्त। १त्यक्ते

विनाडिका स्त्री विभक्ता नाडिका यया। "दश गुर्वक्षरः प्राणः षड्भिः प्राणैर्विनाडिका। तत्षष्ट्या तु भवेन्नाडी" सू० सि० उक्ते दण्डषष्टिभागात्मके पलरूपे काले।

विनायक पु० वि+नी–ण्वुल्। १गणेशे २बुद्धे अमरः ३विघ्ने ४गुरौ च। हेम०। ५गरुडे मेदि०। ६गरुडपत्न्यां स्त्री शब्दमा० टाप् कापि अत इत्वम्।

विनायकश्च कर्मविघ्नसिद्ध्यर्थमीश्वरेण नियुक्तः देवभेदः यथोक्तं याज्ञवल्क्येन "विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः। गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा" "कर्मणां पुरुषार्थसाधनानां विघ्नसिद्ध्यर्थं स्वरूपफलसाधनत्वविघातसिद्ध्यर्थं नियोजितो नियुक्तः" मिता०। तेनोपसृष्टस्य लक्षणान्याह स एव "तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत। स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति। काषायवाससश्चैव क्रव्यादांश्चाधिरोहति। अन्त्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते। व्रजन्नपि तथात्मानं मन्यतेऽनुगतं परैः" तस्य प्रत्यक्षलक्षणान्याह स एव "विमना विफलारम्भः संसीदत्यनिमित्ततः। तेनोपसृष्टो लभते न राज्यं राजनन्दनः। कुमारी च न भर्त्तारमपत्यं गर्भमङ्गना। आचार्य्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा। वणिग्लाभं न चाप्नोति कृषिं चापि कृषीवलः"। तच्छान्तिविधिश्च तत्रोक्तो दृश्यः। 'विनायका विघ्नकारा महोग्राः" रक्षामन्त्रः।

विनारुहा स्त्री विना मूलं विना रोहति रुह–क। त्रिपर्णिकायां राजनि०।

विनाश पु० वि+नश–घञ्। १ध्वंसे २अदर्शने च।

विनाशोन्मुख त्रि० विनाशाय उन्मुख उद्यतः। १नष्टप्राये २पक्वे च अमरः। [पिधाने शब्दच०।

वि(वी)नाह पु० वि+नह–घञ् वा उपसर्गदीर्घः। कूपमुख-

विनिद्र त्रि० विगता निद्रा यस्य। १प्रकाशिते शब्दमा०। २निद्राहीने च। तस्य भावः। त्व। विनिद्रत्व प्रबोधे न० हेमच०।

विनिपात पु० वि+नि+पत–घञ्। १निपाते २दैवादिकृते व्यसने मेदि० ३अपमाने च हेमच०।

विनिमय पु० वि+नि+मि–अच्। परिवर्त्ते १स्वद्रव्यदानेन द्रव्यान्तरग्रहणे शब्दच०। २बन्धके च शब्दमा०।

विनियोग पु० वि+नि–युज–घञ्। क्रियासु प्रवर्त्तने "अनेनेदन्तु कर्त्तव्यं विनियोगः प्रकीर्त्तितः" इत्युक्ते २अनुष्ठानक्रमविधाने च "आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव चेति" योगियाज्ञ०। [देवगणभेदे पु० वाङ्गप०।

विनिर्भय त्रि० विनिर्गतं भयं यस्मात्। १भयशून्ये साध्व-

विनीत त्रि० वि+नी–क्त। १विनययुक्ते २कृतदण्डे ३निभृते अमरः ४अपनीते ५निभृते च। ६जितेन्द्रिये ७हृते च मेदि०। ८सुशिक्षिताश्वे अमरः। ९मदनवृक्षे च पु० १०शिक्षितवृषादौ राजनि० ११वणिजि पु० मेदि०।

विनीय पु० वि+नी–क्यप्। १कल्के २पापे च ल्यप् शिक्षयित्वेत्याद्यर्थे अव्य०।

विनेतृ त्रि० वि+नी–तृच्। १शिक्षके २नृपे पु० मेदि०।

विनेय त्रि० वि+नी–यत्। १शिक्षणीये २प्राप्ये च।

विनोक्ति स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ४०१पृ० दृश्यम्।

विनोद पु० वि+नुद–घञ्। १कौतुके त्रिका०। २क्रीड़ायां ३अपनयने च। ४गृहभेदे "दीर्घं नयोदयवसाः प्रमारतो द्वौ प्रथितौ। विनोद एव द्वारापि त्रिंशत्कोष्ठं भवेत्" युक्तिक०।

विन्ध्य पु० विध–यत् पृषो० मुम् च। १पर्वतभेदे अमरः। २व्याधे च। ३लवलीवृक्षे स्त्री मेदि०। ४सूक्ष्मैलायां हेमच०। ५व्यासान्त्ये नृपभेदे पु० अनुविन्ध्यशब्दे १८६ पृ० दृश्यम्।

विन्ध्यवासिनी स्त्री विन्ध्येऽचले वसति वस–णिनि ङीप्। यशोदागर्भजातायां दुर्गायाम्। "सह्यप्रासादोऽपि तां (यशोदागर्भजकन्याम्) स्मृत्वा विन्ध्यं वेगाज्जगाम च। तत्र गत्वा तयोवाच तिष्ठस्वात्र महावने। पूज्यमाना सुरैर्नित्यं ख्याता त्वं विन्ध्यवासिनी" वामनपु० ५३अ०। 'ततश्च नामभिरन्यापि विन्ध्याचलनिवासिनी" देवीमा०।

२व्याधिहनी पु० शब्दच०। विन्ध्यस्थोऽप्यत्र जटा०।

विन्ध्याचल पु० कर्म०। विन्ध्यपर्वते।

विन्ध्याटवी स्त्री विन्ध्यस्था अटवी। विन्ध्यपर्वतस्थे वनभेदे।

विन्ध्यावली स्त्री बाणासुरमातरि त्रिका०।

विन्न त्रि० विद–कर्मणि क्त। १विचारिते २प्राप्ते अमरः। ३ज्ञाते ४स्थिते च विश्वः। [शब्दच०।

विन्याक पु० वि+नि+अक–घञ्। वित्रवृक्षे (कातियान)

विन्यास पु० वि+नि+अस–घञ्। १स्थापने २रचने तन्त्रोक्ते मन्त्राद्युच्चारणपूर्वकं हृदयादिषु अङ्गुल्यादीन् समर्पणभेदे च।

विप क्षेपे चु० उभ० सक० सेट्। वेपयति–ते अवीविपत् त।

विपक्त्रिम त्रि० विपाकेन निर्वृत्तः वि+पच–क्त्रि मप्‌। विपाकाधीनजाते "विपक्त्रिमज्ञानगतिर्मनस्वी" भट्टिः।

विपक्ष त्रि०विरुद्धः पक्षो यस्य। १शत्रौ अमरः। २प्रतिकूलपक्षावलम्बिनि च। विरुद्धः पक्षः प्रा० स०। ३प्रतिकूले पक्षे विवादे अविदसुनिश्चितपक्षस्य विरुद्धे ४पक्षे च।

विपञ्ची स्त्री वि+पचि–अच् गौरा० ङीष्। १वीणायाम् अमरः। २केलौ मेदि०। स्वार्थे क ह्रस्वः। विपञ्चिका तत्रैव।

विपण पु० वि+पण–घञर्थे क। विक्रये अमरः।

विपणि(णी) पुंस्त्री० वि+पण–इन् स्त्रीत्वपक्षे वा ङीप्। १पण्यविक्रयशालायाम् (हाटचाला) २हट्टे च अमरः। क्रये मेदि०।

विपणिन् पु० वि+पण–शा०इनि। विक्रेतरि वणिजि जटा०

विपत्ति स्त्री वि+पद–क्तिन्। १आपदि अमरः। २नाशे ३यातनायाञ्च मेदि०। "यस्मिन् दायो गते भानौ विपत्तिं यान्ति मानवाः" म० त०।

विपथ पु० विरुद्धः पन्थाः अच्समा०। निन्दितमार्गे अमरः

विपद्(दा) स्त्री वि+पद–सम्प० क्विप् वा टाप्। १विपत्तौ ज्यो० उक्ते जन्मतारातः तृतीयद्वादशैकविंशतिसंख्याके नक्षत्रे च "विपत्तारे गुडं दद्यात्" ज्यो०त०।

विपन्न त्रि० वि+पद–क्त। १विपद्युक्ते मेदि० २नष्टे च शब्दच०। ३सर्पे पुंस्त्री० मेदि० स्त्रियां ङीष्।

विपरीत त्रि०वि+परि+इण–क्त। १प्रतिकूले जटा०। २व्यत्यक्रमे च ३कामुक्यां स्त्री ४नारीणां पुरुषायितरतभेदे "मकाकालेन च यत्नं विपरीतरतातुराम्" कर्पूरस्तवः। "पादमेकमुरौ कृत्वा द्वितीयं कटिसंस्थितम्। नारीषु रमते कामी विपरीतस्तु बन्धकः" रतिम० उक्ते ५रतिबन्धभेदे। संज्ञायां कन्। "पादमेकमुरौ कृत्वा द्वितीयं स्कन्धसंस्थितम्। कामिनीं कामयेत् कामी बन्धः स्याद् विपरीतकः" स्मरदीपिकोक्ते रतिबन्धभेदे।

विपर्णक पु० विगतानि पर्णान्यस्य कप्। १पुष्पप्रधाने पलाशवृक्षे शब्दच०। २अल्पपत्रके त्रि०।

विपर्य्यय पु० वि+परि+इण–अच्। १व्यतिक्रमे। २अतस्मिंस्तद्बुद्धौ च। पात० उक्ते ३चित्तवृत्तिभेदे "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" पात० सू०।

"संशयोऽपि विपर्य्ययत्वमतद्रूपप्रतिष्ठानत्वात् तस्य तद्धर्मिकभावाभावगोचरतया एकार्थे अतद्रूपप्रतिष्ठत्वान्नपायात्। स कस्मात् न प्रमाणम्?। यतः प्रमाणेन बाध्यते भूतार्थविषयत्वात् प्रमाणस्य, तत्र प्रमाणेन बाधनमप्रमाणस्य दृष्टम्। तद्यथा द्विचन्द्रदर्शनं सद्विषयेणैकचन्द्रदर्शनेन बाध्यते" भा०। "स च पञ्चविधः अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः" पात० सू०। इति पञ्च विपर्य्ययाः। इत्यादि भा०। [इत्ते च

विपर्य्यस्त त्रि०वि+परि+अस–क्षेपे क्त। १व्यतिक्रान्ते २परा-

विपर्य्यास पु० वि+परि+अस–घञ्। १वैपरीत्ये २व्यतिक्रमे ३उत्क्षेपे च। ४विपर्य्यये भ्रान्तौ च।

विपल न०विभक्तं फलं येन प्रा०ब०। पलषष्टिभागे कालभेदे। "लग्नदण्डपलं द्विघ्नं तत्संख्यं क्रमतः भवम्। विपलं च रवेर्भोग्यमेव कल्पनमत्रवै" ज्यो०त०। [पण्डिते अमरः।

विपश्चित् पु० विप्रकृष्टं चेतति वि+प्र+चित–क्विप् पृषो०।

विपाक पु० वि+पच–भावे घञ्। १पाके २स्वेदे च। कर्मणि घञ्। ३कर्मफलपरिणामे जात्यायुर्भोगरूपे पदार्थे। "सति मूले तद्विपाको जात्यायुर्भोगाः" पात०सू० "सत्सु क्लेशेषु (अविद्यादिषु) कर्माशयो विपाकारम्भी भवति नोच्छिन्नक्लेशमूलोऽपि। यथैव तुषावनद्धाः शालितण्डुलाः अदग्धबीजभावाः प्ररोहसमर्था भवन्ति नापनीततुषा दग्धबीजभावा वा तथा क्लेशावनद्धः कर्माशयो विपाकप्ररोही भवति नापनीतक्लेशो न प्रसंख्यानदग्धबीजभावो वेति। स च विपाकस्त्रिविधो जातिरायुर्भोगश्चेति" भा०।

विपाश्(शा) स्त्री विगतः पाशो वशिष्ठस्य यस्याः। स्वनामख्याते नदीभेदे अमरः। विपाशयति विमुक्तपाशं वशिष्ठं करोति विपाश+णिच्–क्विप्। तत्रार्थे अमरः। तस्याख्यानात्मकथा भा०आ०१७७अ०। "अथ पाशैस्तदात्मानं गाढं बद्ध्वा महामुनिः (वशिष्ठः) तस्या जले महानद्या निमज्ज्य सुदुःखितः। अथ छित्त्वा नदी पाशांस्तस्यारिबलसूदन!।

स्यकस्य तत्कापि कृत्वा विपाशं समपादकृत् । उत्ततार ततः पाशैर्विमुक्तः स महाऋषिः । विपाशेति च नामास्य नद्याश्चक्रे महात्मनः" "शतद्रोर्विपाशायुजः सिन्धुनद्याः सुधीतं वसु स्वादु सर्वामयघ्नम् । लघ्वं निर्मलं दीपनं पाचनञ्च प्रदत्ते बलं बुद्धिमेधायुरघ्र्यं" राजनि० ।

विपिन न० वप-इनन् पृषा० । वने अमरः ।

विपुल त्रि० वि+पुल-विस्तारे क । १विस्तीर्णे अमरः । २अगाधे ३मेरुपश्चिमस्थे भूधरभेदे पु० मेदि० ४मेरौ ५हिमालये च धरणिः । ६आर्य्याछन्दोभेदे स्त्री । "सन्धिं त्र गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः । यस्यास्तां पिङ्गलनागा विपुलामिति समाख्याति" वृ०र० । विपुलाचलश्च मेरोर्विष्कम्भपर्वतभेदो यथोक्तम् विष्णु पु० "मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतम् । इलावृतं महाभाग ! चत्वारः अत्र पर्वताः । विष्कम्भा रचिता मेरोर्योजनायुतमुच्छ्रिताः । पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः । विपुलः पश्चिमे भागे सुपार्श्वश्चोत्तरे स्मृतः" तत्र चिह्नवृक्षादिकं तत्रोक्तं यथा "कदम्बास्तेषु जम्बूश्च पिप्पलो वटश्च एव च । एकादशशतायामाः पादपा गिरिकेतवः । वनं चैत्ररथं पूर्वं दक्षिणा गन्धमादनम्२ । वैभ्राजं पश्चिमे तद्वदुत्तरे नन्दनं४ स्मृतम् । अरुणोदं१ महाभद्रं२ शीतमेदं३ च मानसम्४ । सरांस्येव च चत्वारि देवभोग्यानि सर्वदा" । धान्यशैलशब्दे दर्शितं दानार्थं कल्पिते तिलमये ७तद्दानकपर्वते हेमा०दा० ।

विपुलास्रव स्त्री विपुल इव आस्रवति आ+स्रु-अच् । घृतकुमारीवृक्षे राजनि० ।

विपूय पु० वि+पू-कर्मणि नि० क्यप् । मुञ्जे शब्दच० ।

विप्र पु० वप-रन् पृषो० अत इत्त्वम् वि+प्रा पूर्त्तौ-क वा । १ब्राह्मणे अमरः "जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते" प्रा०वि०वाक्यम् २अश्वत्थे राजनि० ३विशेषेण पूरके त्रि० ।

विप्रकार पु० वि+प्र+कृ-घञ् । १अपकारे अमरः । २तिरस्कारे हेमच० । [खले । ठगदृशे राजनि० ।

विप्रकाष्ठ न० विशेषेण प्राति प्रा-क विप्रं पूरकं काष्ठं

विप्रकर्ष पु० वि+प्र+कृष-घञ् । दूरत्वे शब्दा० ।

विप्रकृत त्रि० वि+प्र+कृ-क्त । १अपकृते, २तिरस्कृते च "तस्मिन् विप्रकृताः काले" कुमारः । [तलेऽर्थे अमरः ।

विप्रकृष्ट त्रि०वि+प्र+कृष-क्त । दूरस्थे शब्दा० । स्वार्थे क ।

विप्रचित्ति पु० वि+प्र+चित-क्तिच् । दानवभेदे ।

विप्रतिपत्ति स्त्री वि+प्रति+पद-क्तिन् । १विरोधे "परस्परं मनुष्याणां स्वार्थे विप्रतिपत्तिषु" स्मृतिः । २संशयजनके वाक्ये "व्याहतमेकार्थकं विप्रतिपत्तिः" गौ० सू० व्याघातो विरोधोऽसहभाव इति । अस्त्यात्मा नास्त्यात्मेत्यपरः" वा० भा० । ३विरुद्धकोटिद्वयोपस्थापके शब्दे च वादिना पर्वतो वह्निमान् प्रतिवादिना च पर्वतो वह्न्यभाववान् इति प्रातिस्विके मध्यस्थस्य पर्वतो वह्निमान् नवेति संशय उदेति अतस्तस्य संशयाधायकत्वात्तथात्वम् । स च विरुद्धार्थप्रतिपादकवाक्यद्वयात्मकः पर्वतो वह्निमान्नवेति संशयापादकः । "विपरीतायां निन्दितायां च ४प्रतिपत्तौ ५विज्ञतायामपूर्वे च "शब्देऽविप्रतिपत्तिः" कात्या० श्रौ० अप्रतिपत्तिरपूर्वः" प्रतिनिधिशब्दे ४४४१पृ० दृश्यम् । [विरोधे च ।

विप्रतिपन्न त्रि० वि+प्रति+पद-क्त । १संदेहयुक्ते २कृत-

विप्रति(ती)सार पु०वि+प्रति+सृ-घञ् वा दीर्घ । १अनुतापे, अनुशये, २रोषे च मेदि० ।

विप्रयुक्त त्रि०वि+प्र+युज-क्त । १वियुक्ते, २विरहिणि च

विप्रयोग पु० वि+प्र+युज-घञ् । १विप्रलम्भे अमरः २विरोधे ३विसंवादे ४वियोगे च । ५राशिग्योर्विच्छेदे ।

विप्रलब्ध त्रि० वि+प्र+लभ-क्त । वञ्चिते, हेमच० "प्रियः कृत्वाऽपि सङ्केतं यस्या नायाति सन्निधिम् । विप्रलब्धेति सा ज्ञेया" सा० द० उक्तलक्षणे नायिकाभेदे स्त्री ।

विप्रलम्भ पु०वि+प्र+लभ-घञ् मुम् च । १विसंवादे, २वञ्चने, ३विरहे च अमरः । "यूनोरयुक्तयोर्भावो युक्तयोर्वाथ वा मिथः । अभीष्टालिङ्गनादीनामनवाप्तौ प्रहृष्यते । स विप्रलम्भो विज्ञेयः" उज्ज्वलमण्युक्ते ४शृङ्गाररसभेदे ।

विप्रलाप पु० वि+प्र+लप-घञ् । १विरोधोक्तौ परस्परविरुद्धार्थकथने अमरः । २अनर्थकवाक्ये हेमच० ।

विप्रलोभिन् पु० विप्रलोभयति वि+प्र+लुभ+णिच्-णिनि । किङ्किरातवृक्षे, अशोकवृक्षे । राजनि० ।

विप्रश्निका स्त्री विशेषेण प्रश्नोऽस्याः ५ब० कप् अत इत्त्वम् । दैवज्ञायां स्त्रियाम् अमरः । [धीनतायाम् ।

विप्रसात् अव्य०विप्रस्याधीनं करोति विप्र+साति । विप्राधि-

विप्रस्व न० ६त० । विप्रस्वामिके धने ।

विप्रिय पु० विरुद्धं प्रियं वि+प्री-क वा । १अपराधे हेमच० । २अप्रिये च "कृतवानसि विप्रियं न मे" कुमारः प्रादि० ६ब० । विगतप्रिये त्रि० ।

विप्रुष् स्त्री० ब० व०वि+प्रुष-क्विप् । १बिन्दुषु २वेदपाठकाले मुखनिर्गतजलबिन्दुषु अमरः ।

"नोच्छिष्टा विप्रुषश्छाया गौरश्वः सूर्यरश्मयः । रजो भूर्वायुरग्निश्च सर्वमेध्यानि निर्दिशेत्" शु०त०। आचमनकाले मुखनिःसृतानां तासां नोच्छिष्टदोषजनकता यथाह "नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गं नयन्ति याः । दन्तवद् दन्तसक्तेषु जिह्वास्पर्शेऽशुचिर्भवेत्" कूर्म०उ० १४अ० ।

विप्रोषित त्रि० वि+प्र+वस-क्त । गतप्रवासे ।

विप्लव पु० वि+प्लु-अप् । १परचक्रपतिराष्ट्रादितो भये २राष्ट्रोपद्रव च अमरः । [प्लावे च ।

विप्लाव पु०वि+प्लु-घञ् । अश्वस्य १गतिभेदे २समन्तात् जल-

विप्लुत त्रि०वि+प्लु-क्त । १व्यसनयुक्ते हेमच० २उपद्रुते च "अविप्लुतब्रह्मचर्यः" स्मृतिः [तक्यां स्त्री० राजनि०।

विफल त्रि०विगत फलमस्य ।१निरर्थके २फलरहिते च ३के-

विबध पु० विगतो वधो हननं गतिर्यस्मात् । संस्कृतधान्यतण्डुलादौ "निबद्धविबधासारेति"ति माघः पृषो०, दीर्घः वीवध तत्रार्थे विश्वः । [कारके रोगभेदे अमरः ।

विबन्ध पु० विबध्नाति मलम् वि+बन्ध-अच् । मलबन्ध-

विबुध पु० वि+बुध-क । १पण्डिते मेदि० २देवे अमरः "विबुधसखः" भट्टिः । ३चन्द्रे च हेमच० ।

विभक्त त्रि० वि+भज-क्त । १पृथक्कृते २विभिन्ने कृतविभागे च ३भावे क्त । ४विभागे ५भेदे न० । "पञ्चमी विभक्ते" पा०। यस्य विभागः कृतः ५तादृशे धने "अविभक्तं स्थावरं यत् सर्वेषामेव तत् भवेत् । विभक्तं स्थावरं ग्राह्यं नान्योदर्यैः कथञ्चन" यमवचनम् । तदस्यास्ति अच् । येन धनस्य विभागःकृतस्तस्मिन् ६जने. तत्र । विभक्तधर्मादिकं दायभागादौ दर्शितं यथा

"भ्रातॄणां जीवतोः पित्रोः सहवासो विधीयते । तदभावे विभक्तानां धर्मस्तेषां विवर्द्धते" "विभक्तानां स्वमातृधनेन वैदिककरणात्तत्रात्वधर्मत्वेन तद्वृद्धिः" दाय०त० रघु० । "दानग्रहणपश्वन्नगृहक्षेत्रपरिग्रहाः । विभक्तानां पृथग् ज्ञेयाः पाकधर्मागमव्ययाः । साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च । विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परम् । येषामेताः क्रिया लोके प्रवर्त्तन्ते स्वरिक्थतः । विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान्" नारद० "भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि । प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तद् भवेत्" याज्ञ०। "भ्रातॄणामविभक्तानां भोगं नैव प्रदापयेत्" कात्या० "भ्रातृणामविभक्तानामेको धर्मः प्रवर्त्तते । विभागे सति धर्मोऽपि भवेत् तेषां पृथक् पृथक्" कात्या० "अविभक्ता विभक्ता वा कुर्युः श्राद्धं दैविकम् । मघासु च ततोऽन्यत्र नाधिकारः पृथग् विना" श्रा० त० धृतवचनम् । "बहवः स्युर्यदा पुत्राः पितुरेकत्रवासिनः । सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम् । द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्" शु० त० । "अविभक्ता विभक्ता वा सपिण्डाः स्थावरे समाः । एको ह्यनीशः सर्वत्र दानाधमनविक्रये" नारदः । "एतत् दुर्वृत्तपुरुषविक्रयविषयमिति" दाय०त० रघु० ।

विभक्ति स्त्री वि+भज-क्तिन् । १विभागे "संख्यात्वव्याप्यसामान्ये शक्तिमान् प्रत्ययस्तु यः । सा विभक्तिर्द्विधा प्रोक्ता सुप् तिङ् चेति प्रभेदतः" श०श०प्र०उक्तलक्षणे २प्रत्ययभेदे च । "सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु" "विशेष्यस्यैव यल्लिङ्गं विभक्तिवचने च । ते तानि सर्वाणि योज्यानि विशेषणपदेष्वपि" व्या० का० ।

विभव पु० वि+भू-अप् । १धने २मोक्षे सर्वमूर्त्तसंयोगरूपे ३ऐश्वर्ये मेदि० । षष्टिसंवत्सरमध्ये "सुभिक्षं क्षेममारोग्यं सर्वे व्याधिविवर्जिताः । प्रयान्ति मानवास्तत्र बहुशस्या वसुन्धराः । हृष्टाः पुष्टाः जनाः सर्वे विभवेऽब्दे वरानने । इत्युक्तफलके ४वर्षभेदे पु० ।

विभा स्त्री वि+भा- क्विप् १किरणे हेमच० २शोभायां ३प्रकाशे च राजनि० ।

विभाकर पु० विभां प्रकाशं करोति कृ-अच् । १सूर्ये २अर्कवृक्षे च । ३चित्रकवृक्षे अमरः, ४अग्नौ मेदि० ।

विभाग पु० वि+भज-भावे घञ् । १भागे पूर्वस्वाम्यस्वत्वनाशोत्तरं तत्सम्बन्धाधीनजातस्वत्वस्य २व्यञ्जके व्यापारभेदे दायभागादि । सामान्यधर्मयुतानां बहूनां परस्परविरुद्धतद्व्याप्यधर्मे प्रकारैर्था । ५प्रतिपादने शीलचणः । वैशेषिकोक्ते ४गुणभेदे तल्लक्षणविभागादि कणा० सू० । उ० दर्शितं यथा

"एतेन विभागो व्याख्यातः" कणा० सू० । "विभागे संयोगोत्पत्तिप्रकारमतिदिशन्नाह संयोगवद्विभागोऽप्यन्यतरकर्मज १उभयकर्मजो २विभागजश्च ३श्येनकर्मणा स्थाणुश्येनविभागः १संयुक्तयोर्मल्लयोर्मेषयोर्वा कर्मभ्यां तदुभयविभागः २कपाले कर्मोत्पन्नव्यपेक्षितकपालोत्पत्तिकः अपेक्षणीयान्तराभावात तदुक्तं "संयोगविभागयोरनपेक्षकारणं कर्म इति विभागे जनकीये प्रागभावः" सं-

योगे च जननीये पूर्वसंयोगनाशवामेक्षणोः इति चेन्न क्षोत्पत्त्यनन्तरोत्पत्तिकभावभूतापेक्षत्वस्य कर्मणो निरपेक्षत्वात्। विभागजस्तु विभागो द्विविधः कारणमात्रविभागजकारणाकारणविभाग१भेदात् कारणाकारणविभागजकार्य्याकार्य्यविभाग२भेदाच्च तत्र कारणमात्रविभागात् कारणाकारणविभागो यथा कपालद्वयविभागात् कपालाकाशविभागः १कारणाकारणविभागाच्च कार्य्याकार्य्यविभागो २यथाऽङ्गुलीतरुविभागाद्धस्ततरुविभागस्ततः शरीरतरुविभाग इति। ननु विभाग एव न प्रमाणं संयोगाभाव एव विभागव्यवहारादिति चेन्न संयोगाभावोऽत्यन्ताभावश्चेत् गुणकर्म्मणोरपि विभागव्यवहारप्रसङ्गात् द्रव्ययोर्वर्त्तमानः संयोगात्यन्ताभावो विभक्तप्रत्ययहेतुरिति चेत्समवायविभ्वोरपि प्रसङ्गात् अकार्य्यकारणभूतयोर्द्रव्ययोरिति चेत् हिमवद्विन्ध्ययोरपि स्यात् भवत्येव तत्रेति चेन्न आत्मनो गुणकर्म्मणोरपि भावात् अन्योन्यमधिकृत्य व्यवहारस्य चिन्त्यमानत्वात् संयोगविनाशो विभाग इति चेत् एकतरसंयोगिनाशेन नष्टे संयोगे तद्व्यवहारप्रसङ्गात् संयोगिनोर्विद्यमानयोरिति चेत् एकसंयोगनाशानन्तरं पुनः संयुक्तयोः कुण्डलावयवयोः संयोगदशायामपि विभक्तप्रत्ययप्रसङ्गात् यावत्संयोगनाशस्तथेति चेदेकसंयोगनाशे तदभावप्रसङ्गात् तत्र यावदर्थाभावात्। तस्मादस्ति विभागोऽर्थान्तरम् स च गुणः विरोधिगुणान्तरनाश्यः विरोधिनं समानाधिकरणं गुणमन्तरेण सत्याश्रये गुणनाशानुपपत्तेः कर्म्मैव संयोगनाशकं स्यादिति चेन्न विरोधिनो गुणस्य गुणनाशकत्वात्। किञ्च यत्राङ्गुलीहस्तभुजशरीराणां व्यस्तकर्म्मणा तत्संयोगस्तत्राङ्गुलीमात्रे समुत्पन्नेन कर्म्मणाऽङ्गुलीतरुसंयोगनाशसमयेऽपि हस्ततरुभुजतरुशरीरतरुसंयोगानामनाशप्रसङ्गात् हस्तादीनामक्रियत्वात् अङ्गुलीकर्म्मणश्च व्यधिकरणत्वात् व्यधिकरणस्यापि कर्म्मणः संयोगनाशकत्वे क्वचिदप्युत्पन्नेन कर्म्मणा युगपदेव सर्वसंयोगनाशापत्तेः। त्वन्मते तत्र का गतिरिति चेत् अङ्गुलीतरुविभागेन जनितो हस्ततरुविभागो हस्ततरुसंयोगनाशक इत्यभ्युपगमात्। व्यधिकरणेनाङ्गुलीकर्म्मणैव हस्ततरुसंयोगनाशोऽस्तु न चातिप्रसङ्गः स्वाश्रयाश्रितपरम्परासंयोगस्यैव व्यधिकरणकर्म्मनाश्यत्वाभ्युपगमादिति परेण यदुक्तं तदपि न युक्तं विरोधिनः समानाधिकरणस्यैव सर्वत्र नाशकत्वानुभवात् नाशकान्तरेण तदुपरिलम्भादनुपपत्तेः। शब्दविभागो च विभागजन्यौ तत्र विभागस्य शब्दासमवायिकारणत्वं न मन्यामहे न हि वंशे पाट्यमाने दले च चरणयन्त्रचारम्भे दलान्तरे चोपरिकण्यमाने यः शब्दो जायते तत्र दलाकाशविभागादन्यदसमवायिकारणं पश्यामः। न च दलदलनदह्यमानस्फुटद्बीजवतीकारे विभागातिरिक्तमसमवायिकारणं पश्यामः। कारणाकारणविभागाच्च कार्य्याकार्य्यविभागमनुमन्यामहे कथमन्यथा हस्तकर्म्मजनिताङ्गुलीतरुसंयोगभुजतरुसंयोगशरीरतरुसंयोगानामङ्गुलीमात्रोत्पन्नकर्म्मणाऽङ्गुलीतरुविभागे सति अङ्गुलीतरुसंयोगनाशे सत्यपि हस्ततरुसंयोगादीनां नाशः तत्र हि विभागजविभागपरम्परैव तत्तत्संयोगनाशिकेत्युक्तत्वात् कारणद्वयविभागपूर्वके तु कारणाकारणविभागे न संप्रत्ययः यतोवंशदले यदुत्पन्नं कर्म तेन दलान्तरविभागवदाकाशादिविभागस्यापि जननसम्भवात् यावद्भिः कर्म तद्दलं संयुक्तमासीत् तावद्भिस्तत्कर्म्मणा विभागस्य दर्शनात् नखाङ्गुल्युत्पन्नेन कर्म्मणाऽङ्गुल्यन्तरविभागवदाकाशादिदेशेभ्योऽपि विभागा न जन्यन्ते। कमलदले चोत्पन्नेन कर्म्मणा दलान्तरविभागवदाकाशादिदेशेभ्यो वा न विभागा आरभ्यन्ते द्रव्यारम्भकसंयोगाविरोधिनः यतनमपि विभागानेकं कर्मारभताम्। यत्तु कर्म द्रव्यारम्भकसंयोगविरोधिनं विभागमारभते न तत् द्रव्यारम्भकसंयोगाविरोधिनमपि यच्च द्रव्यारम्भकसंयोगाविरोधिनं तद् द्रव्यारम्भकसंयोगविरोधिनमिति ब्रूमः। कुत एतदिति चेत् कार्य्यवैचित्र्येण कारणवैचित्र्यस्यावश्यकत्वात्। ननु कर्म्मणि वैचित्र्यमाश्रयत्वं तथा चैकं कर्म द्रव्यारम्भकसंयोगविरोधिनं विभागं जनयतु यथा विकसत् कमलकुड्मलादावपरञ्च द्रव्यारम्भकसंयोगविरोधिनमविरोधिनञ्चोभयमिति मैवं कार्य्यविरोधो हि कारणवैचित्र्यकल्पनामूलं स च विरोधः एकस्य द्रव्यारम्भकसंयोगप्रतिद्वन्द्वित्वेन अपरस्य तु तदप्रतिद्वन्द्वित्वेनेति तथैव वैचित्र्यस्यापि कल्पनौचित्यात् तस्मादिदं वंशदले वर्त्तमानं कर्म दलद्वयविभागमात्रं जनयति स च विभागोऽग्रे आकाशादिदेशाद्विभागं द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विनं विभागमारभते तस्य च निरपेक्षस्य विभागजनने कर्म्मत्वापत्तिरिति द्रव्यनाशविशिष्टं कालमपेक्षते। ननु तदानीमपि कर्म्मैव तज्जनयतु अतीतकालत्वात् विभागजनने कर्म्मणः कोत्पत्त्यनन्तर एव काले तस्येदं विभागेन जनिते विभागान्तरे कर्म

प्रदेशान्तरसंयोगमपि न जनयेत्, न संयोगजननं प्रति-
कर्म्मणोऽनतीतकालत्वात् अन्यथा कर्म न नश्येदेव तस्यो-
त्तरसंयोगमात्रनाश्यत्वात् । सोऽयं विभाग उत्तरसंयोग
नाश्यः क्षणत्रयस्थायी कश्चिदाश्रयनाशनाश्यः तद्-
यथा तन्तोरवयवेंऽशौ कर्म ततोऽनन्तरमंशुद्वयविभागस्तदैव
तन्त्वन्तरे कर्म ततोंऽशुद्वयविभागेन तन्त्वारम्भकसंयोग-
नाशस्तन्तुकर्म्मणा च विभागस्ततो द्रव्यारम्भकसंयोगना-
शात्तन्तुकर्म्मणो नाशकस्याभावात् तन्त्वन्तरकर्म्मजन्यविभाग-
नाशः । तन्त्वेवं तन्त्वन्तरोत्पन्नस्य कर्म्मणो न नाशः स्या-
द्विनाशकाभावात्, उत्तरसंयोगेन हि तन्नाश्यं त विभागे
च नष्टे नोत्तरसंयोग इति चेन्न तन्तौ यत् कर्मो-
त्पन्नं तेन यथा विनश्यदवस्थतन्त्वोर्विभागो जनि-
तस्तथा तदंश्वोरपि विभागो जननीयः सोऽप्यार-
म्भकसंयोगविरोध्येव तेनांशुतन्तुविभागेन तन्त्वाकाश-
विभागस्तेन चोत्तरसंयोगस्तेन ततः कर्मनाशः । यद्वा-
यत्र तन्तौ यदा कर्म तदांशावपि तदैव कर्म तच्च कर्म-
विनश्यदवस्थतन्तुतदवयवाकाशादिदेशाद्युगपदेव विभा-
गानारभते सर्वेषां विभागानामारम्भकसंयोगविरोधि-
त्वात् तथा च कारणांशुरकारणस्थाकाशादि तद्विभागात्
कार्य्यस्य तन्तोरकार्य्येणाकाशादिना यो विभाग उत्पन्न-
स्तदनन्तरोत्पत्तिकेन संयोगेन तन्तुसमवेतस्य कर्म्मणो
विनाश इति । कश्चिद्द्वाभ्यां तद् यथा तन्तुवीरणयोः
संयोगे सति तन्त्ववयवेंऽशौ कर्म वीरणे च कर्मेत्येकः
कालः अंशुकर्म्मणाऽन्यतरविभागस्तेन च संयोगस्य
तन्त्वारम्भकस्य विनाशः वीरणकर्म्मणा च तन्तुवीरण-
विभागस्तन्तुवीरणसंयोगनाशश्च तन्त्वारम्भकसंयोगनाशा-
नन्तरं तन्तुनाशस्तन्तुवीरणसंयोगनाशानन्तरं वीरणस्य
प्रदेशान्तरसंयोगस्ताभ्यामाश्रयनाशसंयोगाभ्यां विभाग-
नाशः" उप० वृत्तिः । कर्म्मणि घञ् । ५अंशे खण्डे च ।

विभाज्य त्रि० विभक्तुमर्हति वि+भज–ऋहलोर्ण्यत् ।
विभागयोग्ये विभजनीये धनादौ ।
"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा । शौर्य्य-
प्राप्तं तु यद्वित्तं विभाज्यं तद्बृहस्पतिः" ।

विभाण्डक पु० ऋष्यशृङ्गपितरि मुनिभेदे रामा० ।

विभाण्डी स्त्री० विभाण्ड+गौरा० ङीष् । आवर्त्तकीलतायां
राजनि० ।

विभात न० वि+भा–क्त । प्रभाते शब्दरत्ना० ।

विभाव पु० वि+भू–घञ् । १परिचये अलङ्कारोक्ते रस-
स्योद्दीपके २आलम्बनादौ "रत्याद्युद्बोधका लोके
विभावाः काव्यनाट्ययोः । आलम्बनोद्दीपनाख्यौ तस्य
भेदाविमौ स्मृतौ" । ये हि लोके रामादिगतरति-
हासादीनामुद्बोधकारणानि सीतादयस्त एव काव्ये
नाट्ये च निवेशिताः सन्तः विभाव्यन्ते आस्वादा-
ङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा
एभिरिति विभावा उच्यन्ते" सा० द० ३प० ।
"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा" सा०३प० ।

विभावना स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ४०४पृ० दृश्यम् ।

विभावरी स्त्री वि+भा–क्वनिप् ङीप् वनो र च । १रात्रौ
अमरः । २हरिद्रायां ३कुट्टन्याम् ४वक्रयोषिति ५वि-
वादवत्स्त्रियां मेदि० । ६मुखरस्त्रियाम् शब्दर० । ७मेदा-
ख्ये च रत्नमा० ।

विभावसु विभायुक्ता वसवोऽस्य । १सूर्य्ये २अर्कवृक्षे ३वह्नौ
४चित्रकवृक्षे अमरः । ५चन्द्रे ६हारभेदे च हेमच० ।

विभाषा स्त्री विरुद्धा भाषा वि+भाष–अ वा । व्याकरणोक्ते
प्राप्तिकप्राप्तिफलके "नवेति विभाषा" इत्युक्तलक्षणे
विकल्पविधाने । [भक्ते च ।

विभिन्न त्रि० वि+भिद–क्त । १प्रकाशिते २विदलिते ३वि-

विभीतक पु० विशेषेण भीत इव इवार्थे कन् । (वयड़ा)
वृक्षे अमरः । "विभीतकं स्वादुपाकं कषायं कफपित्तनुत् ।
उष्णवीर्य्यं हिमस्पर्शं भेदनं कासनाशनम् । रूक्षं
नेत्रहितं केश्यं कृमिवैस्वर्य्यनाशनम् । विभीतमज्जा
तृट्छर्दिकफवातहरो लघुः । कषायो मदकृच्चाथ धात्री-
मज्जापि तद्गुणः" भावप्र० । कामावे विभीतोऽप्यत्र ।

विभीषण पु० विशेषेण भीषयते शत्रून् भी–णिच्–षुक् च
ल्यु । १रावणभ्रातरि राक्षसे रामा० । २नलतृणे
राजनि० ३भयकारके त्रि० । [ण्वुल् । भयप्रदर्शने

विभीषिका स्त्री वि+भी–णिच्–षुक् च धात्वर्थनिर्देशे

विभु पु० वि+भू–डु । सर्वमूर्त्तसंयुक्ते १आकाशादौ २महादेवे
३ब्रह्मणि च मेदि० । ४भृत्ये त्रिका० । ५विष्णौ शब्दमा०
६व्यापके ७नित्ये द्रव्यहेदे हेमच० ।८दृढे त्रि०अजयः ।
१०परममहत्त्वयुते त्रि०मुक्ता० ।

विभूति स्त्री वि+भू–क्तिन् । १भस्मनि "अणिमा लघिमा
प्राप्तिः प्राकाम्यं महिमा तथा । ईशित्वं च वशित्वञ्च
तथा कामावसायिता" इत्युक्ते २ऐश्वर्य्ये च । ऐश्वर्य्य-
शब्दे १५४८ पृ० दृश्यम् ।

विभूषा स्त्री वि+भूष–अ । १शोभायां हेमच० २भूषणे च ।

विभ्रम पु० वि+भ्रम–घञ्। १स्त्रीणां शृङ्गाराङ्गे चेष्टाभेदे "विभ्रमस्त्वरयाऽकाले भूषास्थानविपर्य्ययः" इत्युक्ते २त्वरया भूषास्थानवैपरीत्ये च "यथाप्रदेशं विभ्रमलक्षणानाम्" कुमारः। विशेषेण ३भ्रान्तौ मेदि० ४शोभायां ५सन्देहे हेमच०। ७भ्रमणे शब्दरत्ना०। "चित्तवृत्त्यनवस्थानं शृङ्गारात् विभ्रमो भवेत्" उक्ते ८शृङ्गाराच्चित्तवृत्त्यनवस्थाने। "क्रोधं स्मितञ्च कुसुमाभरणादि यान्त्या तर्जनञ्च सखीव विभवलनञ्च। आक्षिप्य कान्तवचनं वचनं सखीभिर्निष्कारणोत्थितगतं वद विभ्रमं तत्" इत्युक्ते स्त्रीणां ९चेष्टाभेदे च। स्वार्थे अण्। १वार्द्धक्यावस्थायां स्त्री शब्दरत्ना०।

विभ्राज् त्रि० वि+भ्राज–क्विप्। भूषणादिना दीप्ते अमरः

विमत त्रि० वि+मन–क्त। विरुद्धमतियुक्ते १विषमे २सन्दिग्धे च। [व्याकुलचित्ते अमरः।

विमनस्(स्क) त्रि० विक्षिप्तं मनो यस्य वा कप्। चिन्तादिना

विमर्द पु० विमृद्यतेऽसौ वि+मृद–घञ्। (कालकासुन्दिया) १वृक्षे रत्नमा०। संज्ञायां कन्। चक्रमर्द्दके राजनि०। भावे घञ्। २मर्द्दने ३कुङ्कुमादिमर्द्दने च।

विमर्शन न० वि+मृश–ल्युट्। १परामर्शे न्यायोक्ते साध्यव्याप्यहेतुमत्त्वेन पक्षनिश्चये २वितर्के च हेम०। घञ् विमर्श तत्रैवार्थे पु०।

विमर्ष पु० वि+मृष–घञ्। १विचारे जटा० २नाटकाङ्गसन्धिभेदे च। स च "अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति। मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः। इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते" इति विभज्य "यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः। शापाद्यैः सान्तरायश्च स विमर्श इति स्मृतः" इति सा० द० लक्षितः। तदङ्गानि च तत्रोक्तानि यथा "अपवादोऽथ सम्फेटो व्यवसायो द्रवो द्युतिः। शक्तिःप्रसङ्गश्छेदश्च प्रतिषेधो विरोधनम्। प्ररोचना प्रहर्षं स्यादादानं छादनं तथा"।

विमल त्रि० विगतो मलो यस्मात्। १स्वच्छे निर्मले अमरः। विगतो मलो यस्याः ५ब०। (चामकषा) २सप्तलायाम् अमरः। जगन्नाथक्षेत्रस्थे ३देवीभेदे स्त्री तन्त्रसा०। ४दुर्गामूर्त्तिभेदे देवीपु०। ५उपरसभेदे न० राजनि०। ६जिनदेवे पु० ७चारुणि त्रि० शब्दर०। "चेतसा मत्प्रसक्तेन दानं यद् विमलं स्मृतम्" गरुडपु० उक्ते दशाभिसन्धिके दानभेदे न०।

विमातृ स्त्री विरुद्धा माता। मातृसपत्न्याम्। "मातुः पितुः कनीयांसं न नमेद्वयसाधिकः। नमस्कुर्य्यात् गुरोः पत्नीं भ्रातृजायां विमातरम्" म० त० स्मृतिः। तत्रैव कूर्म्मसारे "स्त्रियो नमस्या वृद्धाश्च वयसा पत्युरेव ताः"। "यतः पत्युर्वयसा ताः स्त्रियो वृद्धाः अतः कनिष्ठा अपि अपि नमस्याः" म०त०रघु०। [अमरः।

विमातृज पु० विमातुर्जायते जन–ड। सापत्ने भ्रातरि

विमान पुंन० वि+मन–घञ् वि+मा–ल्युट् वा। १देवयाने रथे अमरः। २सार्वभौमगृहभेदे च ३यानमात्रे ४अश्वे पु० मेदि० ५परिमाणे च न०।

विमार्ग पु० विरुद्धो मार्गः। १कुपथे २निन्दिताचारे च।

विमुख त्रि०विरुद्धमनुकूलं मुखमस्य।१वहिर्मुखे २निवृत्ते च

विमुद्र त्रि० विगता मुद्रा मुकुलीभावो यस्य। १विकसिते हेमच०। २मुद्रारहिते च।

विम्ब पुंन०। वी+वन् मुमागमौ। १दर्पणादौ भासमानप्रतिविम्बाश्रये २कमण्डलौ च संक्षिप्तसा०। ३सूर्य्यादिमण्डले अमरः। ४कृकलासे पुंस्त्री०मेदि०स्त्रियां ङीष्। विम्बायाः फलम् अण् तस्य लुप्। ५विम्बिकाफले न०।

विम्बजा स्त्री विम्बं फलं जायतेऽस्याः जन–ड १विम्बिकालतायां (तेलाकुचा) शब्दच०।

विम्बट पु० विम्बमटति अट–अच् शक०। सर्षपे शब्दच०।

विम्बा(म्बी) स्त्री विम्बमस्त्यस्याः अच् वा गौरा० ङीष्। (तेलाकुचा) १लताभेदे शब्दर० "विम्बीफलं स्वादु शीतं गुरु पित्तास्रवातजित्। स्तम्भनं लेखनं रुच्यं विबन्धाध्मानकारकम्" भावप्र०। स्वार्थे क कापि अत इत्त्वम् तत्रार्थे। सूर्य्यादिमण्डले पु०न० नात इत्त्वम्।

वियत् न० वि+यम–क्विप् मलोपे तुक्। आकाशे अमरः।

वियद्गङ्गा स्त्री वियत्स्था गङ्गा शाक०। स्वर्गगङ्गायां मन्दाकिन्याम् अमरः।

वियद्भूति स्त्री वियतो भूतिरिव। अन्धकारे त्रिका०।

वियन्मणि पु० वियतो मणिरिव प्रकाशकत्वात् भूषकत्वाद्वा द्युमणौ सूर्य्ये हारा०।

वियम पु० वि+यम–घञ्। १संयमे अमरः। २दुःखे भीरस्वामी। पक्षे वृद्धिः। वियाम तत्रार्थे।

वियात त्रि० वि+या–क्त याति अच् वा। १धृष्टे २निर्लज्जे च अमरः। तस्य भावः ष्यञ्। वैयात्य निर्लज्जत्वे न० "वैयात्यमुररतेष्वपि" माघः।

वियोग पु० वि+युज–घञ्। १विच्छेदे हेमच० ६त०

२पक्षियोगे च गणितप्रसिद्धे ३राश्योर्व्यवकलने च ।

वियोगिन् पु० वि+युज–घिनुण् । १चक्रवाके पक्षिणि शब्दच० । २विच्छेदवति । ३पक्षियोगवति च त्रि० । स्त्रियां ङीप् "वियोगिनीमैक्षत दाडिमीमसौ" नैष० ।

विरक्त त्रि० वि+रन्ज–क्त । १विच्छिन्ने २अननुरक्ते ३दुर्भगायां स्त्रियां स्त्री त्रिका० ।

विरङ्ग पु० वि+रन्ज–घञ् । कङ्कुष्ठे राजनि० ।

विरचित त्रि० वि+रच–क्त १कृते २निर्मिते च । [अमरः ।

विरजस्तमस त्रि० विगते रजस्तमसी यतः । सत्त्वगुणप्रधाने

विरजस्(स्का) स्त्री विगतं रजो यस्याः वा कप् । १गतार्त्तवायां स्त्रियाम् जटा० । २रजोगुणहीने त्रि० ।

विरजा स्त्री विशेषेण रज्यतेऽत्र रन्ज–घञर्थे क । १दूर्वायां हारा०गोलोकस्थे २राधासखीभेदे तच्छापाज्जायमाने ३नदीभेदे च ब्रह्मवै० ज० ख० २५ अ० । ४कपित्थानीहक्षे रत्नमा० । ५ययातिमातरि कूर्मपु० २० अ० । सा च नदी उत्कलदेशस्था जगन्नाथक्षेत्रस्था "उत्कले नाभिदेशश्च विरजाक्षेत्रमुच्यते । विमलाऽत्र महादेवी जगन्नाथस्तु भैरवः" पीठनिर्णयः । तत्र मुण्डनोपवासौ न कार्यौ "मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः । वर्जयित्वा गयां गङ्गां विशालां विरजां तथा" प्रा०त० ।

विरञ्च(ञ्चि) पु० वि+रच–ल्युट् इन् वा नुम् च । जगत्स्रष्टरि ब्रह्मणि हेम० । [शब्दर० ।

विरण न० विशिष्टो रणो मूलमस्य । उशीरे (वेणारमूल)

विरत त्रि० वि+रम–क्त । निवृत्ते । [पारामावे च अमरः ।

विरति स्त्री वि+रम–क्तिन् । १निवृत्तौ २विषयसेवात्या-

विरल त्रि० वि+रा–कलन् । १अवकाशे २विच्छिन्ने अमरः । ३अनिविडे च । ४दध्नि न०राजनि० ।

विरलजानुक त्रि० ६ब० । वक्रजानुके हेमच० ।

विरलद्रवा स्त्री ६ब० । यवाग्वां यवाग्वां जटा० ।

विरह पु० वि+चु० रह–अच् । १विच्छेदे २अभावे शृङ्गाररसस्य विप्रलम्भाख्ये ३अवस्थाभेदे च हेमच० ।

विरहित त्रि० वि+रह–क्त । १त्यक्ते २हीने च ।

विरहिन् त्रि० वि+रह णिनि । १विरहयुते स्त्रियां ङीप् । सा च २भर्त्तौ शब्दमा० ।

विरहोत्कण्ठिता स्त्री "आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः । तदनागमदुःखार्त्ता विरहोत्कण्ठिता तु सा" सा०द०१५० लक्षिते नायिकाभेदे ।

विराग पु० वि+रन्ज–घञ् । १रागाभावे । विगतो रागो यस्य । २रागशून्ये त्रि० । "विषयेष्वतिसंरागो मानसो मल उच्यते । तेष्वेव तु विरागो हि नैर्मल्यं समुदाहृतम्" प्रा० त० । वैराग्यशब्दे दृश्यम् ।

विराज् पु० विशेषेण राजते क्विप् । १क्षत्रिये ब्रह्माण्डात्मकस्थूलदेहाभिमानिनि २आदिपुरुषे ३छन्दोभेदे च । वेदे द्वाभ्यामक्षराभ्यां गायत्र्यादीनां समस्तावधिकत्वे विराट् छन्दो भवति छन्दःशब्दे २९७८ पृ० कात्यायनवाक्यं दृश्यम् । "समष्टिरूपस्य स्थूलशरीराभिमानी चेतनः विराट् संज्ञो वेदान्तादौ प्रसिद्धः तस्योत्पत्तिः तद्रूपञ्च भागवतादौ दृश्यम् । अच् । विराजोऽपि समष्टिस्थूलाभिमानिनि चेतने । ४स्वायम्भुवमनौ च । "ततः कालेन महता तस्य पुत्रोऽभवन्मनुः । स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम्" मत्स्यपु०३अ० । "मानवे तु स्वायम्भुवस्य विराट्पुत्रत्वमभिहितम् । यथा "द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् । अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभुः । तपस्तप्त्वाऽसृजद्यन्तु स स्वयं पुरुषो विराट् । तं मां वित्तास्य सर्वस्य स्रष्टारं द्विजसत्तमाः !" । [च । भा० विराटपर्वणि दृश्यम् ।

विराट पु० विशिष्टो राटो यत्र । १देशभेदे, तद्देशाधिपे २नृपे

विराध पु० राक्षसभेदे । स च तुम्बुरुनामा गन्धर्वः कुबेरशापात् राक्षसत्वमाप्तः रामेण मोचितः तत्कथा वह्निपु० "तुम्बुरुनामि गन्धर्वः प्रविष्टो राक्षसीं तनुम् । अभिशापादहं घोरं प्राप्तो वैश्रवणेन वै" ।

विराधन न० वि+राध–ल्युट् । पीडायाम् । शब्दर० ।

विराम पु० वि+रम–घञ् । १अवसाने, २विरतौ, ३निवृत्तौ च जटा० । ४मध्ये त्रिका० ५व्याकरणोक्ते परवर्णाभावे च ।

विराल पुस्त्री० वि+डल–घञ् डस्य रः । बिडाले पशुभेदे अमरः स्त्रियां ङीष् । [२विगतरवे त्रिका० ।

विराव पु० वि+रु–घञ् । १शब्दे अमरः । प्रादि० ६ब० ।

विरिञ्च पु० वि+रिच–अच् नुम् च । १विष्णौ २जगत्स्रष्टरि वेधसि, ३शिवे च शब्दर० । इन् विरिञ्चि तत्रैवार्थे अमरः ।

विरुद्ध त्रि० वि+रुध–क्त । १विरोधयुक्ते २हेत्वाभासभेदे "अनैकान्तो विरुद्धश्चेत्यादिना विभज्य "यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः" भाषा०लक्षितः । "एवकारेण साध्यवत्त्वावच्छेदेन हेत्वभाव इति सूचितम् तच्च साध्यव्यापकाभावप्रतियोगित्वं तदर्थः सि०मुक्ता०" गाजल १४७ पृ० अन्यथा वाच्यतो यथा "सिद्धान्तमभ्युपेत्य

तद्विरोधी विरुद्धः" 'तं (सिद्धान्तं) विरुणद्धीति तद्विरोधी अभ्युपगतं सिद्धान्तं व्याहन्तीति। यथा सोऽयं विकारो व्यक्तेरपैति नित्यत्वप्रतिषेधात् अपेतोऽप्यस्ति विनाशप्रतिषेधात् न नित्यो विकार उपपद्यते इत्येवं हेतुर्व्यक्तेरपेतोऽपि विकारोऽस्तीत्यनेन स्वसिद्धान्तेन विरुध्यते। कथं? व्यक्तिरात्मलाभः अपायः प्रच्युतिः यद्यात्मलाभात् प्रच्युतो विकारोऽस्ति नित्यत्वप्रतिषेधो नोपपद्यते यत् व्यक्तेरपेतस्यापि विकारस्यास्तित्वं तत् खलु नित्यत्वमिति। नित्यत्वप्रतिषेधो नाम विकारस्यात्मलाभप्रच्युतेरुपपत्तिः। यद् आत्मलाभात् प्रच्यवते तदनित्यं दृष्टं यदस्ति न तदात्मलाभात् प्रच्यवते। अस्तित्वं चात्मलाभात् प्रच्युतिरिति विरुद्धावेतौ न सह सम्भवतः। स चायं हेतुर्यत्सिद्धान्तमाश्रित्य प्रवर्त्तते तमेव व्याहन्तीति" वा० भा०।

वृत्तौ त्विदमन्यथा व्याख्यातं यथा "क्रमप्राप्तं विरुद्धं लक्षयति सिद्धान्तमिति अत्र च सिद्धान्तं साध्यं प्रतिज्ञायां हि सिद्धस्य पक्षस्यान्ते साध्यमभिधीयते तथा च साध्यमभ्युपेत्य उद्दिश्य प्रयुक्तस्तद्विरोधी साध्याभावव्याप्य इति फलितार्थः। यथा वह्निमान् ह्रदत्वादिति। एतस्य साध्याभावानुमितिसामग्रीत्वेन साध्यानुमितिप्रतिबन्धो दूषकताबीजम्। न च सत्प्रतिपक्षाविशेषः तत्र हेत्वन्तरं साध्याभावसाधकम्। इह तु हेतुरेव साध्याभावसाधकः साध्यसाधकत्वेन त्वयोपन्यस्त इत्युक्तिविशेषोद्भावकत्वेन विशेषात्"। इदन्तु नावश्यं विरुद्धोदाहरणम् व्यभिचारादेः सत्त्वात्। किन्तु उपाधेयसङ्करेऽप्युपाधेरसङ्करादित्युक्तेरस्य दूषकताबीजसत्त्वाच्चोदाहरणत्वं बोध्यम्।

विरुद्धमतिकृत् पु० "विपरीतार्थधीर्यस्मात् विरुद्धमतिकृन्मतम्" उक्ते काव्यदोषभेदे १७६४पृ० दृश्यम्। [रिते च मेदि०।

विरूढ त्रि० विशेषेण रोहति वि+रुह-क्त। १जाते २अङ्कु-

विरूप त्रि० विकृतं रूपमस्य। १दुष्टरूपयुक्ते २निन्दिते च। ३पिप्पलीमूले न० राजनि०। ४अतिविषायां, ५दुरालभायाञ्च स्त्री० राजनि०।

विरूपाक्ष पु० विरूपे विकटे अक्षिणी यस्य षच् समा०। १महादेवे अमरः। २विकटनेत्रे त्रि०।

विरूपिन् त्रि० विकृतं रूपमस्यास्ति इनि। १कुरूपे त्रिका०। २आहकजन्तौ पु० राजनि०। [रुह०। २अतिरेके च।

विरेक पु० वि+रिच-घञ्। १मलादेरधोनिःसरणे, य-

विरेचन न० वि+रिच-णिच्-ल्युट्। १मलादेर्निःसारणे, तद्विधिः भावप्र० उक्तो यथा

"स्निग्धस्विन्नाय वान्ताय दद्यात्सम्यग्विरेचनम्। अवान्तस्य त्वधःस्रस्तो ग्रहणीं छादयेत्कफः। मन्दाग्निं गौरवं कुर्य्याज्जनयेद्वा प्रवाहिकाम्। अथ वा पाचनैरामं बलासं परिपाचयेत्। ऋतौ वसन्ते शरदि देहशुद्धौ विरेचयेत्। अन्यदात्ययिके कार्य्ये शोधनं शीलयेद्बुधः"। आत्ययिके प्राणसङ्कटे। "पित्ते विरेचनं युञ्ज्यादामोद्भूते गदे तथा। उदरे च तथाध्माने कोष्ठशुद्धौ विशेषतः। दोषाः कदाचित् कुप्यन्ति जिता लङ्घनपाचनैः। शोधनैः शोधिता ये तु न तेषां पुनरुद्भवः। बालो वृद्धो भृशं स्निग्धः क्षतक्षीणो भयान्वितः। श्रान्तस्तृषार्त्तः स्थूलश्च गर्भिणी च नवज्वरी। नवप्रसूता नारी च मन्दाग्निश्च मदात्ययी। शल्यार्दितश्च रूक्षश्च न विरेच्या विजानता। जीर्णज्वरी गरव्याप्तो वातरोगी भगन्दरी। अर्शःपाण्डूदरग्रन्थिहृद्रोगारुचिपीडिताः। योनिरोगप्रमेहार्त्ता गुल्मप्लीहव्रणार्दिताः। विद्रधिच्छर्दिविस्फोटविसूचीकुष्ठसंयुताः। कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः। प्लीहशोथाक्षिरोगार्त्ताः कृमिक्षारानिलार्दिताः। शूलिनो मूत्रघातार्त्ता विरेकार्हा नरा मताः। बहुपित्तो मृदुः प्रोक्तो बहुश्लेष्मा च मध्यमः। बहुवातः क्रूरकोष्ठो दुर्विरेच्यः स कथ्यते। मृद्वी मात्रा मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा। क्रूरे तीक्ष्णा मता द्रव्यैर्मृदुमध्यमतीक्ष्णकैः। मृदुर्द्राक्षापयश्चञ्चुतैलैरपि विरेच्यते। मध्यमस्त्रिवृतातिक्ताराजवृक्षैर्विरेच्यते। क्रूरः स्नुक्पयसा हेमक्षीरीदन्तीफलादिभिः"। चञ्चुतैलम् एरण्डतैलम्। राजवृक्षः (बनबहेरा) हेमक्षीरी (चोक) दन्तीफलम् इहद्दन्तीफलम् जयपालेति प्रसिद्धम्। "मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफान्तक। वेगैर्विंशतिभिर्मध्या हीनोक्ता दशवेगिका। द्विपलं श्रेष्ठमाख्यातं मध्यमं च पलं भवेत्। पलार्द्धञ्च कषायाणां कनीयस्तु विरेचनम्। कल्कमोदकचूर्णानां कर्षमध्वाज्यलेहतः। कर्षद्वयं पलं वापि वयोरोगाद्यपेक्षया। पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभिः पिबेत्। त्रिफलाक्वाथगोमूत्रैः पिबेद्व्योषं कफार्दितः। त्रिवृत्सैन्धवशुण्ठीनां चूर्णमम्लैः पिबेन्नरः। वातार्दितो विरेकाय जाङ्गलानां रसेन वा। एरण्डतैलं त्रिफला-

काथेन द्विगुणेन वा। युक्तं पीतं पयोभिर्वा न चिरेण विरेच्यते"। शीघ्रमेव विरेच्यत इत्यर्थः "त्रिवृता कौटजं बीजं पिप्पलीविश्वभेषजम्। समृद्वीकारसक्षौद्रं वर्षाकाले विरेचनम्। त्रिवृद्दुरालभामुस्तशर्करोदीच्यचन्दनम्। द्राक्षाम्बुना सयष्ट्याह्वशीतलञ्च घनात्यये"। उदीच्यम्बाला घनात्यये शरदि। "पिप्पली नागरं सिन्धुं श्यामां त्रिवृतया सह। लिह्यात् क्षौद्रेण शिशिरे वसन्ते च विरेचनम्"। श्यामा (कृष्णाधाबड) (त्रिवृता शर्करा तुल्या ग्रीष्मकाले विरेचनम्। अभयामरिचं शुण्ठीविड़ङ्गामलकानि च। पिप्पली पिप्पलीमूलं त्वक्पत्रं मुस्तमेव च। एतानि समभागानि दन्ती तु त्रिगुणा भवेत्। त्रिवृताष्टगुणा ज्ञेया षड्गुणा चात्र शर्करा। मधुना मोदकान् कृत्वा कर्षमात्रान् प्रमाणतः। एकैकं भक्षयेत्प्रातः शीतञ्चानु पिबेज्जलम्। तावद्विरेच्यते जन्तुर्यावदुष्णं न सेवते। पानाहारविहारेषु भवेन्नियन्त्रणः सदा। विषमज्वरमन्दाग्निपाण्डुकासभगन्दरान्। पृष्ठपार्श्वोरुजघनजङ्घोदररुजं जयेत्। स्नेहाभ्यङ्गञ्च रोगं च दिनमेकं सुधीस्त्यजेत्। सततं शीलनादेव पलितानि प्रणाशयेत्। अभया मोदका ह्येते रसायनपराः स्मृताः"। इति अभयादिमोदकः "पीत्वा विरेचनं शीतजलैः संसिच्य चक्षुषी। सुगन्धि किञ्चिदाघ्राय ताम्बूलं शीलयेद्बुधः। निर्वातस्थो न वेगांश्च धारयेन्न शयीत च। शीताम्बु न स्पृशेत् क्वापि कोष्णनीरं पिबेन्मुहुः। बलासौषधपित्तानि वायुर्वान्ते यथा व्रजेत्। रेकात्तथा मलं पित्तं भेषजञ्च कफो व्रजेत्। दुर्विरिक्तस्य नाभेस्तु स्तब्धता कुक्षिशूलरुक्। पुरीषवातसङ्गश्च कण्डूमण्डलगौरवम्। विदाहोऽरुचिराध्मानं भ्रमश्छर्दिश्च जायते। तं पुनः पाचनैः स्नेहैः पक्त्वा स्निग्धन्तु रेचयेत्। तेनास्योपद्रवा यान्ति दीप्ताग्नेर्लघुता भवेत्। विरेकस्यातियोगेन मूर्च्छा भ्रंशो गुदस्य च। शूलं कफातियोगः स्यान्मांसधावनसन्निभम्। मेदोनिभं जलाभासं रक्तञ्चापि विरेच्यते। तस्य शीताम्बुभिः सिक्त्वा शरीरं तण्डुलाम्बुभिः। मधुमिश्रैस्तथा शीतैः कारयेद्वमनं मृदु। सहकारत्वचः कल्को दध्ना सौवीरकेण वा। पिष्टा नाभिप्रलेपेन हन्त्यतीसारमुल्वणम्। सौवीरं तु यवैरामैः पक्वैर्वा निस्तुषैः कृतैः"। सौवीरं सन्धानम् "अजाजीरं रसस्यापि वैमुकिरं हारिणं तथा। शालिभिः षष्टिकैस्तुल्यैर्मुद्गरैर्वापि भोजयेत्। वर्त्तिकालावविकिरकपिञ्जलकतित्तिराः। चकोरकुक्कुराद्याश्च विष्किराः समुदाहृताः"। कपिञ्जलः इति ख्यातो लोके कपिशतित्तिरः। क्रकरः। (करट) इति लोके। हरिणस्ताम्रवर्णः मृगः। "शीतैः सपाकिभिर्द्रव्यैः कुर्य्यात् संग्राहकं भिषक्। लाघवे मनसस्तुष्टावनुलोमङ्गतेऽनिले। सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेन्निशि। इन्द्रियाणां बलं बुद्धेः प्रसादो वह्निदीप्तता। धातुस्थैर्य्यं वयःस्थैर्य्यं भवेद्रेचनसेवनात्। प्रवातसेवां शीताम्बु स्नेहाभ्यङ्गमजीर्णताम्। व्यायामं मैथुनञ्चैव न सेवेत विरेचितः। शालिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत् कृताम्। जाङ्गलविष्किराणां वा रसैः शाल्योदनं हितम्। राजीवः पृषतश्चैव जाङ्गलाः शरभादयः"। विरेचयति वि+रिच-णिच्-ल्यु। २पीलुवृक्षे पु० राजनि०। ३भेदकमात्रे त्रि०। ण्वुल् विरेचक तत्रार्थे त्रि०।

विरेफ पु० वि+रिफ-अच्। नदमात्रे धनञ्जयः। प्रादि०ब० २रकारवर्णशून्ये त्रि०। [२सूर्य्यकिरणे पु० हेमच०।

विरोक पु० न० वि+रुच-घञ् चस्य कः। १छिद्रे त्रिका०।

विरोचन पु० वि+रुच-युच्। १सूर्य्ये २अर्कवृक्षे अमरः। ३बलिपितरि प्रह्लादतनयेऽसुरभेदे ४चन्द्रे ५वह्नौ च मेदि०। विरोचयति वि+रुच-णिच्-ल्यु। ६रोहितकवृक्षे ७श्योनाकवृक्षे ८पूतकरञ्जे च पु० राजनि०। ९रुचिकारके त्रि०।

विरोध पु० वि+रुध-घञ्। १वैरे २विरुद्धतायाम् न्यायोक्ते साध्याभावसामानाधिकरण्यरूपे ३हेतुदोषे यथा वह्निमान् जलादित्यत्र जलरूपहेतोर्वह्निना सामानाधिकरण्यं नास्ति अतस्तस्य दुष्टत्वम्। ४अर्थालङ्कारभेदे अलङ्कारशब्दे ४०४ पृ० दृश्यम्। ५विपरीतार्थकत्वे च। "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्" जैमि० प्रभवादिषु "विषमस्थं जगत् सर्वं विरोधे भयसंप्लवम्। विकारः सर्वतोऽपायः" इत्युक्तफलके ६वर्षभेदे।

विरोधन न० वि+रुध-ल्युट्। वैरे अमरः।

विरोधिन् पु० वि+रुध-णिनि। १रिपौ अमरः। षष्टिसंवत्सरमध्ये "जायते मानुषे कष्टं विरोधिनि न संशयः" इत्युक्तफलके २वत्सरभेदे च। ३विरोधकारके त्रि०।

विरोधाभास पु० विरोधः इवाभासते आ+भास-अच्। अर्थालङ्कारभेदे अलङ्कारशब्दे ४०४ पृ० दृश्यम्।

विरोधोक्ति स्त्री परवचनविरोधिवचने अमरः।

विशद् पु॰ वि+शद-अच्। १शुभ्रवर्णे २तद्वति त्रि॰ अमरः। ३विमले हेम॰। ४व्यक्ते च त्रि॰ मेदि॰। [मीमांसा।

विशय पु॰ वि+शी-अच्। संशये "विशयो विशयश्चैवेति"

विशर पु॰ वि+शॄ-अप्। १वधे अमरः। प्रादि॰ब॰। २विगतबाणे त्रि॰।

विशल्यकृत् पु॰ विशल्यं तत्प्रहारवेदनानिवृत्तिं करोति कृ-क्विप्। (ह्रापरमाली) १वृक्षे रत्नमा॰। २विशल्यकारके त्रि॰।

विशल्यकरणी स्त्री विशल्यं क्रियतेऽनया कृ-ल्युट् ङीप्। ओषधिभेदे "पूर्वं तु कथिता याऽसौ वीर! जाम्बवता तव। दक्षिणे शिखरे जातां महौषधिमिहानय। विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा। संजीवकरणीं वीर! सन्धानीञ्च महौषधिम्" रामा॰ लङ्का॰ १०२स॰।

विशल्या स्त्री विगतं शल्यं तत्प्रहारवेदना यस्याः ५ब॰। १अग्निशिखावृक्षे २दन्तीवृक्षे ३गुडूच्याम् अमरः ४त्रिपुटायाम् ५अजमोदायाञ्च राजनि॰।

विशसन न॰ वि+शस-हिंसने ल्युट्। १मारणे अमरः। करणे ल्युट्। २खड्गे पु॰ त्रिका॰। "असिर्विशसनः खड्गः" खड्गपूजामन्त्रः।

विशस्त त्रि॰ वि+शस-अविनये न इट् अन्यत्र इट्। इट् सि॰ कौ॰। इटि विशसित। मारिते त्रि॰।

विशस्तृ पु॰ वि+शस-तृच् न इट्। चण्डाले संक्षिप्त॰।

विशाकर पु॰ विशाकः विगतशाकः सन् राजते राज-बा॰ ड। भद्रवृक्षे (बड़ाविल) शब्दच॰। तस्य शाकशून्यत्वात् तथात्वम्।

विशाख पु॰ विशिष्टा शाखाऽस्य। १कार्त्तिकेये २धन्विनां वितस्त्यन्तराखपादावस्थाने अमरः। ३पुनर्नवायां राजनि॰ ४याचके च मेदि॰। ५स्कन्दांशजाते देवभेदे तन्नामनिरुक्तिः भा॰व॰२२६अ॰ उक्ता यथा "वज्रप्रहारात् स्कन्दस्य सञ्जातः पुरुषोऽपरः। युवा काञ्चनसन्नाहः शक्तिधृग् दिव्यकुण्डलः। यद्वज्रवेशनाज्जातो विशाखस्तेन कीर्त्तितः"। ६स्कन्दानुजभ्रातरि "अग्नेः पुत्रः कुमारस्तु श्रीमान् शरवनालयः। तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः" भा॰ आ॰ ६६अ॰। ७शिवे भा॰आ॰१७अ॰।

विशाखज पु॰ विशिष्टा शाखा यस्य तथा सन् जायते जनक। नारङ्गे शब्दच॰ [शब्दमालोक्ते धन्विनामवस्थानभेदे।

विशाखल न॰ "विशाखान्तरविन्यस्ते पादयुग्मे विशाखलम्"

विशाखा स्त्री विशिष्टा शाखा प्रकारो यस्याः। १बहुपञ्चतारात्मकेऽश्विन्यवधिके षोडशे नक्षत्रे अमरः। "विशाखयोर्मध्यगतः सम्पूर्ण इव चन्द्रमा" रामा॰ प्रयोगात् तस्य द्विवचनान्ततेत्यन्ये। "बहुपुत्रो विशिखाख्य" भा॰ अ॰ ६ उक्तेर्बहुत्वं बहुतारात्मकत्वेनेति बोध्यम्। अशोषाशब्दे ४९७ पृ॰दृश्यम्। २कठिल्लके मेदि॰।

विशाय पु॰ वि+शी-पर्य्याये घञ्। प्रहरिणां पर्य्यायेण शयने अमरः।

विशारण न॰ वि+शॄ-स्वार्थे णिच्-ल्युट्। मारणे हेमच॰।

विशारद पु॰ विशालं ददाति दा-क लस्य रः। १बकुलवृक्षे २क्षुद्रदुरालभायां स्त्री राजनि॰। ३पण्डिते पु॰ ४प्रगल्भे त्रि॰ अमरः ५श्रेष्ठे च त्रि॰ अजयः।

विशाल त्रि॰ वि+शालच्। १विस्तीर्णे २वृहति च अमरः। ३मृगभेदे ३खगभेदे पुंस्त्री॰ मेदि॰ स्त्रियां ङीप्। ४नृपभेदे पु॰ ५वृक्षभेदे शब्दर॰। ६इन्द्रवारुण्याम् स्त्री अमरः। ७माहेन्द्रवारुण्याम् ८उपोदक्यां च स्त्री राजनि॰। ९उज्जयिनीनगर्य्यां स्त्री मेदि॰। १०नदीभेदे च स्त्री "विशालां विरजां तथा" सुचक्षुनीयवाक्ययुदासः विरजाशब्दे दृश्यः। [२वृक्षत्वे शब्दर॰

विशालता स्त्री विशालस्य भावः तल्। १पार्श्वविस्तारे अमरः

विशालतैलगर्भ पु॰ विशालं विस्तीर्णं तैलं गर्भे फलमध्ये यस्य। अङ्कोटवृक्षे राजनि॰। [अमरः।

विशालत्वच् पु॰ विशाला त्वक् यस्य। सप्तच्छदवृक्षे।

विशालपत्र पु॰ विशालं पत्त्रमस्य। १कासालौ, २श्रीतालवृक्षे च राजनि॰।

विशालाक्ष पु॰ विशाले अक्षिणी यस्य षच्समा॰। १महादेवे, २गरुडे, ३विष्णौ च ४वृहन्नेत्रे, त्रि॰ मेदि॰। ५पार्वत्यां ६नागदन्त्यां च स्त्री राजनि॰ ङीष्। ७वरस्त्रियां स्त्री विश्वः। ८योगिनीभेदे स्त्री। [राजनि॰।

विशाली स्त्री॰ वि+शालच् गौरा॰ ङीष्। अजमोदायाम्।

विशिख पु॰ विशिष्टा विगता वा शिखा यस्य प्रादि॰ ब॰। १शरवृक्षे राजनि॰। २वाणे अमरः। ३तोमरे च मेदि॰। ४शिखारहिते त्रि॰। ५खनित्र्यां ६नालिकायाम ७रथ्यायाञ्च स्त्री॰ मेदि॰।

विशिप न॰ विश-इपक्। मन्दिरे उणादिको॰ [युक्ते च।

विशिष्ट त्रि॰ वि+शिष-क्त। १युक्ते २विलक्षणे ३विशेषण-

विशिष्टबुद्धि स्त्री ६त॰। विशेषणवतो विशेष्यस्य ज्ञाने यथा घट इत्यादिकं ज्ञानम् अत्र घटत्वस्य विशेषणतया भास-

भानस्य घटे विशिष्य भानम् एतत्कारणस्य विशेषणज्ञानं तदनुरोधेनैव अयं घट इत्यादिप्रत्यक्षविशिष्टं तत्कारणस्य घटत्वज्ञानस्य पूर्वं सत्त्वार्थं घटघटत्वे इति निर्विकल्पकज्ञानमपि भवतीत्यङ्गीकृतं नैयायिकैः।

विशिष्टवैशिष्ट्यज्ञान ६त०। विशेषणविशिष्टे वैशिष्ट्यस्य संसर्गस्य ज्ञाने यथा रूपवान् घट इत्यादि ज्ञानं तत्र घटत्वविशिष्टे रूपादेः संसर्गस्य भानम्। तच्च द्विविधम् विशेषणोपलक्षितप्रतियोगिकवैशिष्ट्यावगाहि विशेषणविशिष्टप्रतियोगिकवैशिष्ट्यावगाहि च। आद्ये विशेषणज्ञानासंसर्गयोः कारणता द्वितीये तु विशेषणतावच्छेदकप्रकारकविशेषणज्ञानस्य कारणता। यथाकारणं च तयोर्बोधवैलक्षण्यम्। तत्र क्वचित् विशेष्ये यद्विशेषणं तत्रापि विशेषणान्तरमिति रीत्या ज्ञानं जायते यथा दण्डवान् पुरुष इति ज्ञानम् अत्र ज्ञाने पुरुषांशे दण्डो दण्डांशे दण्डत्वं विशेषणतया भासते। तत्र विशेष्यकोपस्थितिः प्रयोजिका। क्वचिदेकत्र द्वयमिति रीत्या बोधः। यथा दण्डवान् पुरुष इति ज्ञानम् अत्र च ज्ञाने एकदा व्यक्तौ पुरुषे पुरुषत्वं दण्डश्चोभयं विशेषणतया भासते न तु विशेषणविशेष्यतावच्छेदकभावेन। क्वचित् विशिष्टवैशिष्ट्यावगाहि ज्ञानं भवति यथा दण्डवान् पुरुष इति ज्ञानमत्र च ज्ञाने विशेषणतावच्छेदकप्रकारकं विशेषणज्ञानं कारणम्। तत्र दण्डरूपविशेषणावच्छिन्नप्रतियोगिकवैशिष्ट्यरूपः संसर्गः पुरुषांशे संसर्गतया भासते। अतएव विशेषणविशिष्टसंसर्गावगाहि तदिति उपलक्षितज्ञानात् विशेषः। क्वचिच्च विशिष्टज्ञानं यथा अयं दण्डीति ज्ञानम् अत्र च ज्ञाने इदमर्थे विशेष्ये दण्डात्मकविशेषणप्रतियोगिकः संसर्गः संसर्गतया भासते उपलक्षणे तु न तत्प्रतियोगिकतया संसर्गस्य भानमिति भेदः। विशिष्टवैशिष्ट्यशाब्दबोधे त्वयं भेदः व्युत्पत्तिवैचित्र्येण उद्देश्यतावच्छेदकविधेयतावच्छेदकयोः पारतन्त्र्येण परस्परं प्रयोज्यप्रयोजकभावेनान्वयः। यथा धनवान् सुखीत्यत्र धनप्रयोज्यत्वस्य सुखे, सुरापः पततीत्यत्र सुरापानस्य पतने प्रयोज्यत्वस्यान्वयः।

विशिष्टाद्वैत न० रामानुजाद्युक्ते प्रकृतिविशिष्टस्य ब्रह्मणोऽद्वयत्वे। रामानुजशब्दे दृश्यम्।

विशिष्टाभाव पु० ६त०। विशेषणविशिष्टस्याभावे स च कश्चित् विशेषणाभावप्रयुक्तः कश्चिच्च विशेष्याभावप्रयुक्तः कश्चिदुभयाभावप्रयुक्तः।

विशीर्ण त्रि० वि+शॄ-क्त। १शुष्के, २जरावस्थापन्ने।

विशीर्णपर्ण पु० विशीर्णं पर्णमस्य। निम्बवृक्षे राजनि०।

विशुद्ध त्रि० वि+शुध-क्त। १दोषरहिते, २निर्मले च। तन्त्रोक्ते कण्ठस्थे ३चक्रभेदे चक्रशब्दे २८०८पृ० दृश्यम्

विशुद्धाद्वैत न० ६त०। वल्लभाचार्य्यमतप्रसिद्धे दोषरहितस्य ब्रह्मणोऽद्वयत्वे।

विशुद्धि स्त्री० वि+शुध-क्तिन्। १शोधने २दोषराहित्ये च।

विशृङ्खल त्रि० विगता शृङ्खला पद्धतिर्यस्याः। परिपाटीशून्ये

विशेष पु० वि+शिष-घञ्। १प्रभेदे, २प्रकारे, जटा०। ३व्यक्तौ हेमच०। ४तिलके, हारा०। "अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्तितः" इति भाषा०उक्ते ५पदार्थभेदे "अन्ते अवसाने तिष्ठतीति अन्त्यः यदपेक्षया विशेषो नास्तीत्यर्थः। घटपटादीनां त्र्यणुकपर्य्यन्तानां तत्तदवयवभेदात् परस्परं भेदः। परमाणूनां भेदको विशेष एव स तु स्वत एव व्यावृत्तः तेन तत्र विशेषान्तरापेक्षा नास्तीति" सि०मुक्ता०। अयञ्च नित्यद्रव्ये समवायेन तिष्ठति "तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः" भाषायां चकारेण नित्यद्रव्येषु विशेषसम्बन्धस्य समवायतायाः ग्रहणात्। "द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" कणा० सू० उद्दिश्य वर्णितं यथा "अन्यत्रान्त्येभ्यो विशेषेभ्यः" सू०। "अन्त्या विशेषा नित्यद्रव्यवृत्तयो येऽभिहितास्तान् वर्जयित्वा सामान्यविशेषाभिधानमित्यर्थः। अन्ते अवसाने भवन्तीत्यन्त्याः यतो न व्यावर्त्तकान्तरमस्तीत्याचार्य्याः उत्पादविनाशयोरन्तेऽवसाने भवन्तीत्यन्त्यानि नित्यद्रव्याणि तेषु भवन्तीत्यन्त्या विशेषाः इति वृत्तिकृतः ते हि विशेषा एव व्यावृत्तबुद्धिहेतवः न तु सामान्यरूपा अपि" उप०वृ०। नित्यैकमात्रवृत्तय इति फलितार्थः। "अन्योन्याभावविरोधिसामान्यरहितः समवेतो विशेषः" सर्व०कौ०माधवः। ६व्याप्यधर्मे। यथा नीलघटः इत्यादौ घटत्वव्याप्यधर्मः नीलत्वादिविशिष्टघटत्वादिः। ७तिलकाकारभेदे च अलङ्कारशब्दे ४०५ पृ० दृश्यम्।

विशेषक पुंन० विशेषयति वि+शिष-णिच्-ण्वुल्। १ललाटकृते तिलके अमरः। २विशेषकर्त्तरि त्रि० मेदि० "त्रिभिर्विशेषकम्" इत्युक्ते एकवाक्यतापन्ने ३श्लोकत्रये न०। ४तिलकवृक्षे राजनि०।

विशेषगुण पु० कर्म०। "बुद्ध्यादिषट्कं रूपादिचतुष्कं

ष्टे उभावने। स्वाभाविकद्रवत्वञ्च अदृष्टे शब्द एव च" भाषा० उक्तेषु गुणभेदेषु ।

विशेषण न० विशिष्यतेऽनेन वि+शिष-ल्युट् । भेदकधर्मे गुणक्रियादौ यथा नीलम् उत्पलं चलो गौरित्यादौ गुणक्रियादिर्भेदकधर्मः ।

विशेषणञ्च त्रिविधं व्यावर्त्तकं विधेयं हेतुगर्भञ्च । तत्राद्यं नीलो घट इत्यादौ नीलः, द्वितीयं पर्वतो वह्निमान्" अत्र वह्निर्विधेयविशेषणम् । "व्यक्तारो ह्ययमेव मे यदरयः" इत्यादौ व्यक्तारोविधेयः । तृतीयं यथा सुरापः पततीत्यादौ सुरापानं हेतुगर्भविशेषणम् । तस्य भावः तल् । विशेषणताप्रकारताख्यविषयताभेदे स्वरूपसम्बन्धविशेषे च स्त्री । स च तत्पदजन्यबोधविषयत्वेन शक्तिविषयत्वरूपः । अभावप्रत्यक्षे सन्निकर्षभेदे च । यथा घटाभाववद् भूतलमित्यादि चाक्षुषप्रत्यक्षे भूतलांशे घटाभावस्य विशेषणता सन्निकर्षः । "विशेषणतया तद्वदभावानां ग्रहो भवेत्" भाषा० । सा च नानाविधा यथोक्तं

"यद्यपि विशेषणता नानाविधा तथाहि भूतलादौ घटाभावः संयुक्तविशेषणतया गृह्यते, संख्यादौ रूपत्वाद्यभावः संयुक्तसमवेतविशेषणतया, संख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया, शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया । कत्वादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया । एवं कत्वावच्छिन्नाभावे खत्वाभावादिकं विशेषणविशेषणतया । एवं घटाभावादौ पटाद्यभावः संयुक्तविशेषणविशेषणतया । एवमन्यदप्यूह्यं तथापि विशेषणतात्वरूपेणैकैव सा गण्यते । अन्यथा षोढा सन्निकर्ष इति प्राचां प्रवादो व्याहन्येतेति" सि० मुक्ता० । "प्रत्यक्षं समवायस्य विशेषणतया भवेत्" भाषा० उक्तः समवायप्रत्यक्षसन्निकर्षभेदे च ।

विशेषणासिद्ध पु० विशेषणेनासिद्धः । हेत्वाभासभेदे यो हेतुः विशेषणविशिष्टः सन् पक्षे न तिष्ठति तादृशे हेतौ यथा शब्दो नित्यः द्रव्यत्वे सत्यचाक्षुषत्वात् इत्यादौ द्रव्यत्वरूपविशेषणस्य शब्दे बाधात् तथात्वम् ।

विशेषविधि पु० विशेषे विधिः । सामान्यविशेषयोर्मध्ये विशेषगोचरे विधाने यथा ब्राह्मणेभ्यो दधि दीयतां कौण्डिन्याय तक्रमित्यत्र कौण्डिन्यस्य ब्राह्मणविशेषत्वेन तद्विषये दधिदानापवादेन तक्रदानविधिः । "अल्पः गात् विषयो यस्य स विशेषविधिर्मतः" व्या०का० । [क्ते च ।

विशेषित त्रि० वि+शिष-णिच्-क्त । १भेदिते २विशेषणयुक्ते

विशेषोक्ति स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ४०५ पृ० दृश्यम् ।

विशेष्य त्रि० विशिष्यते भेद्यते गुणादिभिरसौ वि+शिष-कर्मणि ण्यत् । गुणादिभिर्भेद्ये १व्यवच्छेद्ये पदार्थे २धर्मिणि च । तस्य भावः तल् । विशेष्यता विषयताविशेषे स च तज्ज्ञानीयधर्मिनिष्ठप्रकारतानिरूपितः संसर्गविषयताभिन्नः विषयताविशेषः इति प्राञ्चः । तत्र समानाधिकरण्या प्रकारता विशेष्यता च एकैवेति अनदोषः । तयोर्भिन्नत्वम् अवच्छेद्यावच्छेदकभावश्चेति गदाधरः । यथा घटाभाववद् भूतलमित्यादौ घटनिष्ठप्रकारतानिरूपिता या अभावनिष्ठा विशेष्यता सैव तदवच्छेद्या वा या अभावनिष्ठा प्रकारता तन्निरूपिता भूतलनिष्ठविशेष्यतेति प्राञ्चः । स्वरूपसम्बन्धविशेष इत्यन्ये ।

विशेष्यासिद्ध पु० स्वरूपासिद्धे हेत्वाभासभेदे । यो हेतुः स्वघटकविशेष्यस्वरूपः पक्षे न तिष्ठति तादृशे हेतौ यथा शब्दो नित्योऽचाक्षुषत्वे सति द्रव्यत्वादित्यादौ अत्र अचाक्षुषत्वविशिष्टं द्रव्यत्वं हेतुः तत्र विशिष्यं द्रव्यत्वं शब्देऽसिद्धमिति स्वरूपासिद्धो हेतुः ।

विशोक पु० विगतः शोकः यस्मात् यस्य वा । १अशोकवृक्षे राजनि० । २शोकरहिते त्रि० । योगशास्त्रोक्ते ३चित्तवृत्तिभेदे स्त्री । "विशोका वा ज्योतिष्मती" पात०सू० । "विशोका विविधविषयतीति" विवरणम् ।

विशोधनी स्त्री विशुध्यतेऽनया शुध-ल्युट् ङीप् । १दन्तीवृक्षे राजनि० । भावे ल्युट् । २शोधने न० । वि+शुध-ल्यु । ३शोधनकारके त्रि० । "प्रायश्चित्तं विशोधनम्" स्मृतिः ।

विशोधिन् त्रि० वि+शुध-णिच्-णिनि । १शोधनकारके २नागदन्त्यां राजनि० स्त्री ङीप् ।

विश्न पु० विश-दीप्तौ भावे नङ् । दीप्तौ सि०कौ० । [अमरः

विश्र(श्रा)णन न० वि+श्रण-णिच्-ल्युट् वा वृद्धिः । दाने

विश्रब्ध त्रि० वि+श्रन्भ-क्त । विश्वस्ते "विश्रब्धं परिचुम्ब्यजातपुलका" शा०द० । २शान्ते ३अनुद्धते त्रि० हेमच० ४गाढ़े त्रि० मेदि० । [हतव्यापारस्यावसाने च भरतः ।

विश्र(श्रा)म पु० वि+श्रम-घञ् वा वृद्धिः । १विरामे प्र-

विश्रम्भ पु० वि+श्रन्भ-घञ् । १विश्वासे अमरः । २प्रणये ३केलिकलहे मेदि० ४वधे च विश्वः ।

विश्राव पु० वि+श्रु-घञ् । १प्रसिद्धौ अमरः २ख्यातौ च ।

विश्रुत पु०वि+श्रु-क्त ।१विख्याते अमरः ।२विशेषेण श्रुते च

विश्लिष्ट त्रि० वि+श्लिष-क्त । १वियुक्ते २शिथिले च ।

विश्लेष पु० वि+श्लिष-घञ् । १वियोगे २शैथिल्ये च मेदि० ।

विश्व न० विश-व । १जगति संसारे । २तदभिमानिनि जीवे पु० । व्यस्तस्थूलदेहे प्रवेशात्तस्य तथात्वम् वेदान्तसारे उक्तम् । ३श्राद्धदेवविशेषे पु० ब० व० । ४सकले त्रि० ५तदर्थेऽस्य सर्वनामता । श्राद्धदेवाश्च दशविधाः गणदेवताभेदाः यथोक्तम् "वसुसत्यौ क्रतुदक्षौ कालकामौ धुरिः कुरुः । पुरूरवा माद्रवाश्च विश्वे देवाः प्रकीर्त्तिताः" देवशब्दे ३७५७ पृ० दृश्यम् । ५नागरे विश्वः ६दक्षकन्याभेदे विश्वदेवमातरि स्त्री मत्स्यपु० ५अ० । ७अतिविषायां स्त्री अमरः । ८शतावर्य्यां स्त्री राजनि० ९विंशपलपरिमाणे स्त्री । "गुञ्जाः पञ्चशतिः सोमो दशस्र तत्पलं भवेत् । विश्वा विंशत्पलं प्रोक्तं" ज्योतिस्मृती । अयं परिमाणभेदः कांसवणिक्प्रसिद्धः । १०विष्णौ न० विष्णु स० । ११देहे न० चक्रशब्दे २८०८पृ०दृश्यम् ।

विश्वकद्रु पु० विश्वकं द्रवति द्रु-डु । १मृगयाकुशलकुक्कुरे अमरः । २शब्दे पु० ३खले त्रि० मेदि० ।

विश्वकर्म्मन् पु० विश्वेषु कर्म व्यापारो यस्य । १सूर्य्ये २देवशिल्पिनि अमरः । ३मुनिभेदे मेदि० ४परमेश्वरे च ।

विश्वकृत् पु० विश्वं करोति कृ-क्विप् । १विश्वकर्मणि २परमेश्वरे च

विश्वकेतु पु० विश्वे केतवोऽस्य । अनिरुद्धे अमरः ।

विश्व(ष्व)क्सेन विषु(ष्व)ची सेना यस्य । १विष्णौ अमरः २प्रियङ्गुवृक्षे स्त्री ३विष्णोर्निर्माल्यधारके तदीयगणभेदे "निर्माल्यधारी विष्णोस्तु विश्व(ष्व)क्सेनश्चतुर्भुजः" कालिकापु० ८२अ० । ४त्रयोदशमनौ मत्स्यपु० ९अ० । समध्य एवैश्वर्येषु पा० सम्मतः भरतस्तु समध्यतामाह तन्मूलं चिन्त्यम् । [च राजनि० ।

विश्वगन्ध न० विश्वतो गन्धोऽस्य । १बोले गन्धरसे २पलाण्डौ

विश्वगन्धा स्त्री विश्वे सकला गन्धा यस्याम् । पृथिव्याम् शब्दच० । [राजनि० ।

विश्वग्रन्थि स्त्री विश्वतो ग्रन्थिर्यस्याः । हंसपदीलतायाम्

विश्व(ष्व)च् अव्य० विषु विश्वं वा अञ्चति क्विप् पृषो० विश्वस्य विषुः ततः सप्तम्याद्यर्थे अपि तस्य लुक् । १सर्वत इत्यर्थे । अवेरभावे । २सर्वत्रगामिनि त्रि० स्त्रियां विषूची भत्वे विषू(षू)च इत्यादि । अद्र्यागमे विष्वद्र्यच् उक्तार्थे । भत्वे विश्वद्रीच इत्यादि । समध्यतां भरत आह तन्मूलं मृग्यम् ।

विश्वचक्र न० द्वादशे महादानभेदे मत्स्यपु० तद्विधिर्यथा "अथातः संप्रवक्ष्यामि महादानमनुत्तमम् । विश्वचक्रमिति ख्यातं सर्वपातकनाशनम् । तपनीयस्य शुद्धस्य विश्वचक्रन्तु कारयेत् । श्रेष्ठं पलसहस्रेण तदर्द्धेन तु मध्यमम् । तस्यार्द्धेन कनिष्ठं स्याद्विश्वचक्रमुदाहृतम् । अन्यद्विंशत्पलादूर्द्ध्वमशक्तोऽपि निवेदयेत् । षोड़शारं ततश्चक्रं भूमिनेम्यष्टकावृतम् । नाभिपद्मे स्थितं विष्णुं योगारूढं चतुर्भुजम् । शङ्खचक्रस्य पार्श्वे तु देव्यष्टकसमावृतम् । द्वितीयावरणे तद्वत् पूर्वतो जलशायिनम् । अत्रिर्भृगुर्वशिष्ठश्च ब्रह्मा काश्यप एव च । मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः । रामो रामश्च रामश्च बुद्धः कल्की च ते दश । तृतीयावरणे गौरी मातृभिर्वसुभिर्युता । चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च । पञ्चमे पञ्च भूतानि रुद्राश्चैकादशैव तु । लोकपालाष्टकं षष्ठे दिङ्मातङ्गास्तथैव च । सप्तमेऽस्त्राणि सर्वाणि मङ्गल्यानि च कारयेत् । अन्तरान्तरतो देवान् विन्यसेदष्टमे पुनः । तुलापुरुषवत् शेषं समन्तात् परिकल्पयेत् । ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम् । विश्वचक्रं ततः कुर्य्यात् कृष्णाजिनतिलोपरि । तथाष्टादश धान्यानि रसाश्च लवणादयः । पूर्णकुम्भाष्टकञ्चैव वस्त्राणि विविधानि च । माल्येक्षुफलरत्नानि वितानं चापि कल्पयेत् । ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो गृही । होमाधिवासनान्ते तु गृहीतकुसुमाञ्जलिः । इममुच्चारयेन्मन्त्रं त्रिः कृत्वा तु प्रदक्षिणम् । नमो विश्वमयायेति विश्वचक्रात्मने नमः । परमानन्दरूपी त्वं पाहि नः पापकर्दमात् । तेजोमयमिदं यस्मात् सदा पश्यन्ति योगिनः । हृदि तत्त्रिगुणातीतं विश्वचक्रं नमाम्यहम् । वासुदेवस्थितञ्चक्रं चक्रमध्ये च माधवम् । अन्योन्याधाररूपेण प्रणमामि स्थिताविह । विश्वचक्रमिदं यस्मात् सर्वपापहरं परम् । आयुधञ्चाधिवासश्च भवादुद्धर मामितः" ।

विश्वजित् पु० विश्वं जयति जि-क्विप् । १विष्णौ २सर्वस्वदक्षिणके यज्ञभेदे "विश्वजिता यजेत" श्रुतिः । ३तदधिकारेऽश्रुतफलत्वे स्वर्गफलकल्पकन्यायभेदे मीमां० ।

विश्वदेवा स्त्री विश्वतो दीव्यति दिव-अच् । १गुलञ्चकेशुकायाम् (गोरक्षचाकुलिया) जटा० । २नागबलायां ३रक्तपुष्पदलोत्पले च रत्नमाला । कर्म० । ४विश्वाख्यदेवगणे पु० ।

विश्वधारिणी स्त्री विश्वं धारयति धृ-णिनि । पृथिव्याम्

विश्वपर्णी स्त्री विश्वतः पर्णान्यस्याः । भूम्यामलक्यां राजनि०

विश्वप्सन् पु० विश्वं प्साति भक्षति प्सा-कनिन् । १सर्वभक्षके वह्नौ

२चन्द्रे हेमच० । ३देवे ४विश्वकर्मणि ५भूमौ संक्षिप्तसा० ६छाये शब्दर० ।

विश्वभेषज न० विश्वेषां भेषजम् । शुण्ठ्याम् अमरः ।

विश्वमदा स्त्री विश्वस्य मदो यस्याः । अग्निजिह्वाभेदे शब्दमा० ।

विश्वम्भर पु० विश्वं बिभर्त्ति भृ-खच् मुम् च । १इन्द्रे अमरः २विष्णौ च । ३पृथिव्यां स्त्री ।

विश्वरूपक न० विश्वं रूपमस्य कप् । कृष्णागुरुणि राजनि० ।

विश्वरेतस् पु० विश्वं रेतोरेतोकार्यं यस्य । चतुर्मुखे ब्रह्मणि हेमच० । [कपाले त्रिका० ।

विश्वरोचन पु० विश्वान् रोचयति रुच-णिच्-ल्यु । नाडी-

विश्ववेदस् पु० विश्वं वेत्ति विद-असुन् । १इन्द्रादौ देवे २सर्वज्ञे च । [(फणिमनस) २हस्ते पु० शब्दच० ।

विश्वसार न० विश्वेषां सारम् । १तन्त्रभेदे । संज्ञायां कन् ।

विश्वसृज् पु० विश्वं सृजति सृज-क्विन् । चतुर्मुखे ब्रह्मणि अमरः । हलादौ कुः विश्वसृक् विश्वसृग्भ्यामित्यादि

विश्वस्त त्रि० वि+श्वस-क्त । १जातविश्वासे । २विधवायां स्त्रियां स्त्री अमरः । वा इट् । विश्वसित त्रि०जातविश्वासे

विश्वस्था स्त्री विश्वतः तिष्ठति स्था-क । शतावर्य्याम् राजनि०

विश्वाची स्त्री विश्वमञ्चति अन्च-क्विप् । १अप्सरोभेदे वह्निपु० । २वाहुरोगभेदे भावप्र० तल्लक्षणादि० तत्रोक्तं यथा "अथ विश्वाचीलक्षणमाह "तलं प्रत्यङ्गुलीनां या कण्डरा बाहुपृष्ठतः । बाह्वोः कर्मक्षयकरी वि-श्वाची सा निगद्यते" । कण्डरा महास्नायुः तलं हस्त-स्याधोभागः तलशब्दोऽत्र उपरिवाचकः यथा भूमितल-मिति । तेनायमर्थः बाहुपृष्ठतः बाह्वोः पृष्ठं बाहुपृष्ठ-मारभ्य तलं प्रतिहस्ततलं यावत्प्रत्यङ्गुलीनां काण्डरावाः सङ्कोचः बाह्वोः प्रसारणाकुञ्चनादिकर्म-क्षयकरी भवति सा इह वातव्याधिषु विश्वाचीत्युच्यते बाह्वोरिति द्वित्वं उभयपरम् । एकस्मिन्नपि बाहौ विश्वाची भवति" भावप्र० ।

विश्वात्मन् पु० विश्वमात्मा यस्य । विष्णौ विष्णुस० ।

विश्वधामन् पु० विश्व दधाति धारयति धा-मनिन् विश्व पूर्वदीर्घः । देवे त्रि०का० ।

विश्वानर पु० अग्निजनके मिभेदे वैश्वानरशब्दे दृश्यम् ।

विश्वामित्र पु० विश्वं मित्रमस्य पूर्वपददीर्घः । गाधिसुते स्वनामख्याते ब्रह्मर्षिभेदे हरिवं०२८अ० ।

विश्वामित्रप्रिय पु० ६त० । १नारिकेले शब्दर० २स्वामिकार्तिकेये च

विश्वा(श्व)राज् पु० विश्वेषु राजते राज-क्विप् । १विश्वेषां राजनि । २परमेश्वरे च तस्य हलादावेव रूपमन्यत्र विश्वराजावित्यादि । [भेदे २राज्ञो स्त्री मेदि० ।

विश्वावसु पु० विश्वेषां वसु यस्मात् पृषो० दीर्घः । १गन्धर्व-

विश्वास पु० वि+श्वस-घञ् । इदमित्थमेवेत्याकारे १चित्त-वृत्तिभेदे प्रत्यये अमरः । २श्रद्धायाञ्च "नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम् । विश्वासो नैव कर्त्तव्यः" चाणक्यः

विश्वेदेव पु० ब०व० कर्म० अलुक्स० । "क्रतुर्दक्षो वसुः सत्यः कामः कालस्तथा धुरिः । रोचनोमाद्रवाश्चैव तथा चान्यः पुरूरवाः । विश्वे देवा भवन्त्येते दश श्राद्धेषु पूजिता" इत्युक्ते श्राद्धदेवभेदे । २वह्नौ पु० संक्षिप्त० ।

विश्वेश पु० ६त० । शिवे, विश्वेशरादयोऽप्यत्र ।

विश्वौषध न० विश्वेषु रोगेषु औषधम् । शुण्ठ्याम् । राजनि०

विष व्याप्तौ जु० उभ० सक० अनिट् । वेवेष्टि वेविष्टे इरित् अविषत् अविक्षत् त । विष्णुः ।

विष विप्रयोगे क्र्या० पर० सक० अनिट् । विष्णाति अविक्षत्

विष सेचने भ्वा०पर०सक०अनिट् । वेषति अविक्षत् । [पतिः ।

विष् स्त्री विष-क्विप् । १विष्ठायाम् अमरः २कन्यायां च विट्-

विष न० विष-क । १जले अमरः २पद्मकेशरे, रायमुकुटः । ३गन्धरसे बोले ४वत्सनाभे-विषे च ५गरलमात्रे पुंन० राजनि० । ६भल्लातके पु० अमरः । गरलरूपविषस्य नाम लक्षणादिकं भावप्र०उक्तं यथा "विषं तु गरलः क्ष्वेडः तस्य भेदाननुदाहरे । वत्सनाभः सहारिद्रः सक्तु-कश्च प्रदीपनः । सौराष्ट्रिकः शृङ्गिकश्च कालकूटस्तथैव च । हालाहलो ब्रह्मपुत्रो विषभेदा अमी नव" । तत्र वत्सनाभस्य स्वरूपनिरूपणम् । "सिन्दुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा । यत्पार्श्वे न तरोर्वृद्धिर्वत्सनाभः स भाषितः" । अथ हारिद्रस्य स्वरूपनिरूपणम् "हरिद्रातुल्यमूलो यो हारिद्रः स उदाहृतः" । अथ सक्तुकस्य स्वरूपम् "यद्ग्रन्थिः सक्तुनेनेव पूर्णमध्यः स सक्तुकः" । अथ प्रदीपनस्य स्वरूपम् "वर्णतो लो-हितो यः स्याद्दीप्तिमान् दहनप्रभः । महादाहकरः पूर्वैः कथितः स प्रदीपनः" । अथ सौराष्ट्रिकस्य स्वरू-पम् "सुराष्ट्रविषये यः स्यात् स सौराष्ट्रिक उच्यते" । अथ शृङ्गिकस्य स्वरूपम् "यस्मिन् गोशृङ्गके बद्धे दुग्धं भवति लोहितम् । स शृङ्गिक इति प्रोक्तो-द्रव्यतत्त्वविशा-रदैः" । अथ कालकूटस्य स्वरूपम् "देवासुररणे देवै-र्हतस्य पृथुमालिनः । दैत्यस्य रुधिराज्जातस्तरुरश्वत्थ-सन्निभः । निर्यासः कालकूटोऽस्य मुनिभिः परिकी-

र्त्तितः। सोऽहिच्छत्रे शृङ्गवेरे कोङ्कणे मलये भवेत्"। अथ हालाहलस्य स्वरूपम् "गोस्तनाभफलो गुच्छस्तालपत्रच्छदस्तथा। तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः। असौ हालाहलो ज्ञेयः किष्किन्धायां हिमालये। दक्षिणाब्धितटे देशे कोङ्कणेऽपि च जायते"। अथ ब्रह्मपुत्रस्य स्वरूपम् "वर्णतः कपिलो यः स्यात्तथा भवति सारतः। ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले। ब्राह्मणः पाण्डुरस्तेषु क्षत्रियो लोहितप्रभः। वैश्यः पीतोऽसितः शूद्रो विष उक्तश्चतुर्विधः। रसायने विषं विप्रं क्षत्रियं देहपुष्टये। वैश्यं कुष्ठविनाशाय शूद्रं दद्याद् वधाय हि"। (एते च स्थावरविषाः) तेषां शोधनविधिः तत्रैव स्थानान्तरे "गोमूत्रे त्रिदिनं स्थाप्यं विषं तेन विशुध्यति। रक्तसर्षपतैलाक्तं तथा धार्य्यञ्च वाससि। ये गुणा गरले प्रोक्तास्ते स्युर्हीना विशोधनात्। तस्मादिदं प्रयोगे तु शोधयित्वा प्रयोजयेत्"। अथ विषस्य गुणाः "विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च। आग्नेयं वातकफहृत् योगवाहि मदावहम्"। व्यवायि सकलकायगुणव्यापनपूर्वकपाकगमनशीलम्। विकाशि ओजःशोषणपूर्वकसन्धिबन्धशिथिलीकरणशीलम्। आग्नेयम् अधिकाग्न्यंशम्। योगवाहि संसर्गिगुणग्राहकम्। मदावहं तमोगुणप्राधान्येन बुद्धिविध्वंसकम्। "तदेव युक्तियुक्तन्तु प्राणदायि रसायनम्। योगवाहि परं वातश्लेष्मजित् सन्निपातहृत्"। अथोपविषाणां निरूपणम् "अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकः। गुञ्जाहिफेनो धत्तूरः सप्तोपविषजातयः"। एतेषां शोधनं चिन्त्यं गुणास्तत्र तत्र द्रष्टव्याः"।

तत्र विषस्य द्वैविध्यमाह "स्थावरं जङ्गमञ्चैव द्विविधं विषमुच्यते। दशाधिष्ठानमाद्यं तु द्वितीयं षोडशाश्रयम्"। स्थावरविषस्य दशाश्रयानाह "मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सारमेव च। निर्य्यासो धातवः कन्दः स्थावरस्याश्रया दश"। तद्यथा मूलविषं करवीरादि। पत्रविषं विषपत्रिकादि, फलविषं कर्कोटकादि, पुष्पविषं वेत्रादि, त्वक्सारनिर्य्यासविषाणि करम्भादीनि क्षीरविषं स्नुह्यादि धातुविषं हरितालादि कन्दविषं वत्सनाभसक्तुकादि। जङ्गमविषस्य षोडशाश्रयानाह "दृष्टिनिःश्वासदंष्ट्रा च नखमूत्रमलानि च। शुक्रं लालानखस्पर्शः सदंशं चावमर्दितम्। गुदास्थिपित्तशूकाणि दश षट् जङ्गमाश्रयाः"। तद्यथा दृष्टिनिःश्वासविषाः दिव्याः सर्पाः, दंष्ट्राविषाः भौमसर्पाः दंष्ट्रानखविषा व्याघ्रादयः, मूत्रपुरीषविषाः गृहगोधिकादयः शुक्रविषा मूषिकादयः, लालाविषाः उच्चिटिङ्गादयः, लालास्पर्शमूत्रपुरीषार्त्तवशुक्रमुखसन्दंशदंष्ट्रास्पर्शावमर्दितगुदपुरीषविषाश्चित्रशीर्षादयः, अस्थिविषाः सर्पादयः, पित्तविषाः शकुलमत्स्यादयः, शूकविषाः भ्रमरादयः। स्थावरविषाणां सामान्यानां कार्य्याण्याह। तत्र मूलविषस्य कार्य्यमाह "उद्वेष्टनं मूलविषैर्मोहः प्रलपनं तथा"। पत्रविषस्य कार्य्यमाह "जृम्भणं वेपनं श्वासो नृणां पत्रविषैर्भवेत्"। फलविषस्य कार्य्यमाह "मुष्कशोथः फलविषैर्दाहोद्वेगश्च भोजने"। पुष्पविषस्य कार्य्यमाह "भवेत् पुष्पविषैश्छर्दिराध्मानं मूर्च्छनं तथा"। त्वक्सारनिर्य्यासकार्य्याण्याह "त्वक्सारनिर्य्यासविषैरुपभुक्तैर्भवन्ति हि। आस्यदौर्गन्ध्यपारुष्यशिरोरुक्कफसंश्रयाः"। क्षीरविषकार्य्यमाह "फेनागमः क्षीरविषैर्विड्भेदो गुरुजिह्वता"। धातुविषकार्य्यमाह "हृत्पीडनं धातुविषैर्मूर्च्छा दाहश्च तालुनि। प्रायेण कालघातीनि विषाण्येतानि निर्दिशेत्"। एतानि मूलविषाणि न च कालघातीनि कालान्तरे मारकाणि। कन्दविषस्य कार्य्यमाह। "कन्दजान्युग्रवीर्य्याणि यान्युक्तानि त्रयोदश। सर्वाण्येतानि कुशलैर्ज्ञेयानि दशभिर्गुणैः। स्थावरं जङ्गमं वापि कृत्रिमं चापि यद्विषम्। सद्यो निहन्ति तत् सर्वं गुणैश्च दशभिर्युतम्"। तान् दशगुणानाह "रूक्षमुष्णं तथा तीक्ष्णं सूक्ष्ममाशु व्यवायि च। विकाशि विशदञ्चैव लघ्वपाकि च ते दश"। तैर्गुणैर्विषस्य कार्य्यमाह "तद्रौक्ष्यात् कोपयेद्वायुमौष्ण्यात् पित्तं सशोणितम्। तैक्ष्ण्यान्मतिं मोहयति मर्म्मबन्धान् छिनत्ति हि। शरीरावयवान् सौक्ष्म्यात् प्रविशेद्विकरोति च। आशुत्वादाशु तत् प्रोक्तं व्यवायात् प्रकृतिं हरेत्। विकाशित्वात् क्षपयति दोषान् धातून्मलानपि। अतिरिच्यते वैशद्यात् दुश्चिकित्स्यं च लाघवात्। दुर्जरं चाविपाकित्वात् तस्मात् क्लेशयते चिरम्"। विषदिग्धशस्त्रहतस्य लक्षणमाह "सद्यः पाकं याति यस्य क्षतं तत् स्रवेद्रक्तं पच्यते चाप्यभीक्ष्णम्। कृष्णीभूतं क्लिन्नमत्यर्थपूति क्षतान्मांसं शीर्य्यते यस्य चापि। तृष्णातापौ दाहमूर्च्छे च यस्य दिग्धं विद्धं तं मनुष्यं व्यवस्येत्। लिङ्गान्येतान्येव कुर्य्यादमित्रैर्दत्तः स्नेहो वा व्रणे यस्य चापि"। पच्यते चाप्यभीक्ष्णं पुनः पुनः

पाकमेति तापः बहिःस्थितः, दाहोऽभ्यन्तरे। यः कुर्य्यादित्यत्र सर्वत्र कर्त्तृपदं बोद्धव्यम्। प्रायेण राजादीनामन्नादौ शत्रवो विषं ददति। तेषां ज्ञानार्थं लक्षणमाह "इङ्गितज्ञो मनुष्याणां वाक्चेष्टामुखवैकृतैः। जानीयाद्विषदातारमेभिर्लिङ्गैश्च बुद्धिमान्। न ददात्युत्तरं पृष्टो विवक्षुर्मोहमेति च। अपार्थं बहु सङ्कीर्णं भाषते चापि मूढवत्। अङ्गुलीः स्फोटयेदुर्व्वीं विलिखेच्च प्रहसेदपि। वेपथुश्चास्य भवति त्रस्तश्चैकैकमीक्षते। विवर्णवक्त्रः क्षामश्च नखैः किञ्चिच्छिनत्ति च। आलभेतासकृद्दीनः करेण च शिरोरुहान्। निर्यियासुरपद्वारैः वीक्षते च पुनः पुनः। वर्त्तते विपरीतं च विषदाता विचेतनः"। इङ्गितमभिप्रायसूचकम् आकारं मुखवैकृतं मुखवैवर्ण्यादि एभिर्लिङ्गैर्वक्ष्यमाणैः न ददात्युत्तरं पृष्टः स्वीयासत्कर्म्मजनितव्यामोहात् सङ्कीर्णम् अस्फुटं भयजनितपर्व्वव्यथापनोदायाङ्गुलीः स्फोटयेत् प्रहसेत्। अचेतावपि क्षामः दग्धसमानवर्णः, आलभेत स्पृशेत् विपरीतं यथा स्यादेवं वर्त्तते। जङ्गमविषाणां सामान्यानां कार्य्यमाह "निद्रां तन्द्रां क्लमं दाहं सपाकं लोमहर्षणम्, शोथं चैवातिसारं च कुरुते जङ्गमं विषम्"। जङ्गमेषु तीक्ष्णतरेषु सर्पानाह "वातपित्तकफात्मानो भोगिमण्डलराजिलाः। यथाक्रमं समाख्याता द्व्यन्तरा द्वन्द्वविषाः। फणिनो भोगिनो ज्ञेया संख्यातास्तेऽत्र विंशतिः। मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः। षट् ते मण्डलिनो ज्ञेया ज्वलनार्कविषाः स्मृताः। स्निग्धा विविधवर्णाभिस्तिर्य्यगूर्द्ध्वं च राजिभिः। विचित्रा इव ये भान्ति राजिलास्ते हि तेऽपि षट्"। एते यथाक्रमं वातपित्तकफात्मानः द्व्यन्तराः द्वे अन्तरे भेदौ येषां ते द्व्यन्तराः यथा भोगिनो मण्डलिन्यां जाताः इत्यादि। भोगिप्रभृतिकृतदंशदेशलक्षणमाह "दंशो भोगिकृतः कृष्णः सर्व्ववातविकारकृत्। पीतो मण्डलिनः शोथो मृदुः पित्तविकारवान्। राजिलोत्थो भवेद्दंशः स्थिरशोथश्च पिच्छिलः। पाण्डुः स्निग्धोऽतिसान्द्रासृक् सर्व्वश्लेष्मविकारवान्"। देशविशेषे कालविशेषे च दष्टस्यासाध्यत्वमाह "अश्वत्थदेवायतनश्मशानवल्मीकसन्ध्यासु चतुष्पथेषु। याम्ये च पित्र्ये परिवर्ज्जनीया ऋक्षे नरा मर्म्मसु ये च दष्टाः"। याम्ये भरण्यां पित्र्ये मघायाम् "दर्व्वीकराणां विषमाशु हन्ति सर्व्वाणि चोष्णे द्विगुणीभवन्ति"। उष्णे उष्णसंयोगे। दर्व्वीकरलक्षणमाह "रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः। ज्ञेया दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः"। अपरेषु येषु विषमाशु मारकं भवति तानाह "अजीर्णपित्तातपपीडितेषु बालेषु वृद्धेषु बुभुक्षितेषु। क्षीणे क्षते मेहिनि कुष्ठजुष्टे रूक्षे बले गर्भवतीषु चापि। शस्त्रक्षते यस्य न रक्तमस्ति राज्यो लताभिश्च न सम्भवन्ति। शीताभिरद्भिश्च न रोमहर्षो विषाभिभूतं परिवर्ज्जयेत्तम्। जिह्मं मुखं यस्य च केशशातो नासावसादश्च सकण्ठभङ्गः। कृष्णश्च रक्तः श्वयथुश्च दंशे हन्वोः स्थिरत्वञ्च विवर्ज्जनीयम्"। केशशातः आकर्षणात्, नासावसादः नासायाः नतत्वं कण्ठभङ्गः ग्रीवाधारणाशक्तिः हन्वोः स्थिरत्वं हनुद्वयस्तम्भः। अपरञ्च "वर्त्तिर्घना यस्य निरेति वक्त्राद्रक्तं स्रवेदूर्द्ध्वमधश्च यस्य। दंष्ट्रानिपाताश्चतुरश्च पश्येद् यस्यापि वैद्यैः परिवर्ज्जनीयः"। वर्त्तिः रुधिरस्य, यस्य च नासाश्रवणलिङ्गगुदादिभ्यो रक्तं स्रवेत् "उन्मत्तमत्यर्थमुपद्रुतं वा हीनस्वरं वाप्यथ वा विवर्णम्। सारिष्टमत्यर्थमवेगिनञ्च जह्यान्नरं तत्र न कर्म्म कुर्य्यात्"। अत्यर्थमुपद्रुतं वा ज्वरातिसारादिभिरतिशयेनोपद्रुतं हीनस्वरं वक्तुमक्षमं विवर्णं कृष्णवर्णं सारिष्टं नासाभङ्गादियुक्तम्। अवेगिनं वेगो विषवेगः। (लहरि) इति लोके तद्रहितम्। स्थावरं जङ्गमं च विषमेव जीर्णत्वादिभिः कारणैः दूषीविषसंज्ञां लभते तदाह "जीर्णं विषघ्नौषधिदूषितं वा दावाग्निवातातपशोषितं वा। स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति"। जीर्णम् अतिपुराणं विषघ्नौषधिदूषितं विषघ्नीभिरोषधीभिर्वीर्य्यहीनीकृतं स्वभावतो वा गुणविप्रहीनं स्वभावादेव दशानां गुणानां मध्ये एकद्वित्र्यादिगुणहीनम्। दूषीविषस्य कार्य्यमाह "वीर्य्याल्पभावान्न निपातयेत् तत् कफान्वितं वर्षगणानुबन्धि। तेनार्द्दितो भिन्नपुरीषवर्णो विगन्धिवैरस्ययुतः पिपासी। मूर्च्छां भ्रमं गद्गदवाग्वमिञ्च विचेष्टमानोऽरतिमाप्नुयाद् वा"। न निपातयेत् न मारयति कफान्वितं कफेन मन्दीकृततीक्ष्णादिगुणं वर्षगणानुबन्धि कफेनाग्निमान्द्यादीषत्पाकाच्चिरस्थायि तथा दूषीविषजदुष्टरोगवतां भिन्नपुरीषवर्णश्च भिन्नपुरीषोत्कृतमलः भिन्नवर्णो विवर्णः। विचेष्टमानः विरुद्धां चेष्टां कुर्व्वन् मूर्च्छादीन् व्याधीन् लभते। स्थानविशेषोत्थिते दूषीविषे चिह्नविशेषमाह। "आमाशयस्थे कफवात-

रोगी पक्वाशयस्थेऽनिलपित्तरोगी। भवेत् समुद्ध्वस्तशिरोरुहाङ्गो विलूनपक्षश्च यथा विहङ्गः"। समुद्ध्वस्तशिरोरुहाङ्गः समुद्ध्वस्ताः शिरोरुहाः केशाः अङ्गरुहः लोमानि यस्य सः एतदपि लिङ्गं पक्वाशयस्थे दूषीविषे बोद्धव्यम् "स्थितं रसादिष्वथ तद्यथोक्तान् करोति धातुप्रभवान् विकारान्"। तत् दूषीविषं यथोक्तान् सुश्रुते व्याधिसमुद्देशीयोक्तान्। दूषीविषस्य प्रकोपसमयमाह "कोपं तु शीतानिलदुर्दिनेषु यात्याशु पूर्वं शृणु तस्य रूपम्"। कुपितस्य दूषीविषस्य पूर्वरूपमाह "निद्रा गुरुत्वञ्च विजृम्भणञ्च विश्लेषहर्षावथ वाङ्गमर्दः"। विश्लेषः गात्रशैथिल्यं हर्षः रोमाञ्चः। रूपमाह "ततः करोत्यन्नमदाविपाकावरोचकं मण्डलकोठजन्म। मांसक्षयं पाणिपदाङ्गशोथं मूर्च्छां तथा छर्द्दिमथातिसारम्। दूषीविषं श्वासतृषौ ज्वरांश्च कुर्य्यात् प्रवृद्धिं जठरस्य चापि" अन्नमदः अन्ने भुक्ते धूस्तूरफलेनेव मदः। अविपाकः अजरस्य। दूषीविषभेदेन विकारानाह "उन्मादमन्यज्जनयेत्तथान्यदानाहमन्यत् क्षपयेच्च शुक्रम्। गाद्गद्यमन्यज्जनयेच्च कुष्ठं तांस्तान्विकारांश्च बहुप्रकारान्"। अन्यत् दूषीविषं तांस्तान् विकारान् विसर्पविस्फोटादीन्। दूषीविषस्य निरुक्तिमाह "दूषितं देशकालान्नदिवास्वप्नैरभीक्ष्णशः। यस्मात् सन्दूषयेद्धातून् तस्माद्दूषीविषं स्मृतम्"। देशः अनूपादिः कालः दुर्द्दिनादिः अन्नं कुलत्थतिलमसूरादि धातुदूषकत्वाद्दूषीविषम्। दूषीविषस्य साध्यत्वादिकमाह "साध्यमात्मवतः सद्यो याप्यं संवत्सरोत्थितम्। दूषीविषमसाध्यं स्यात् क्षीणस्याहितसेविनः"। कृत्रिमं विषं द्विविधम् एकं सविषं दूषीविषसंज्ञम् अपरमविषं गरेव गरसंज्ञं तथा च काश्यपसंहितायाम् "संयोगजञ्च द्विविधं द्वितीयं विषमुच्यते। दूषीविषं तु सविषमविषङ्गर उच्यते"। संयोगजं कृत्रिमं विषं द्वितीयं स्वाभाविकं तच्च द्विविधम्। तत्र दूषीविषमभिधाय गरं दर्शयितुमाह "सौभाग्यार्थं स्त्रियः स्वेदरजोनानाङ्गजान् मलान्। शत्रुप्रयुक्तांश्च गरान् प्रयच्छन्त्यन्नमिश्रितान्"। गरकार्य्यमाह "तैः स्यात् पाण्डुः कृशोऽल्पाग्निर्ज्वरश्चास्योपजायते। मर्म्मप्रधमनाध्मानं हस्तयोः शोथसम्भवः। जठरग्रहणीरोगा यक्ष्मा गुल्मक्षयो ज्वरः"। तैः गरैः स्वेदरजःप्रभृतिभिः ज्वरश्चास्योपजायत इति अपाकात्। मर्म्मप्रधमनं मर्म्मव्यथा क्षयो धातुक्षयः। लूतानां जन्तुविशेषाणामुत्पत्तिं निरुक्तिं च सुश्रुताह "यस्मात् लूनं तृणं प्राप्ता मुनेः प्रस्वेदविन्दवः। तेभ्यो जातास्ततो लूता इति ख्यातास्तु षोडश"। अत्र सुश्रुतः "विश्वामित्रो नृपवरः कदाचिदृषिसत्तमम्। वशिष्ठं कोपयामास गत्वाऽऽश्रमपदं किल। कुपितस्य मुनेस्तस्य ललाटात् स्वेदविन्दवः। अपतद्दर्शनादेव ह्यधस्तात्तृणसंचये। लूने तृणे महर्षेस्तु धेन्वर्थे सम्भृतेऽपि च। ततो जातास्त्विमे घोरा नानारूपा महाविषाः। तासामष्टौ कष्टसाध्या वर्ज्यास्तावन्त्य एव हि"। तत्र त्रिमण्डलप्रभृतयोऽष्टौ कष्टसाध्याः सौवर्णिकप्रभृतयोऽष्टावसाध्याः। तासां सामान्यानां दंशलक्षणमाह "ताभिर्दष्टे दंशकोथः प्रवृत्तिः क्षतजस्य च। ज्वरो दाहोऽतिसारश्च गदाः स्युश्च त्रिदोषजाः। पिडका विविधाकारा मण्डलानि महान्ति च। शोथा महान्तो मृदवो रक्ताः श्यावाश्चलास्तथा। सामान्यं सर्वलूतानामेतद्दंशस्य लक्षणम्"। दंशकोथः दंशमध्ये पूतिभावः। "दंशमध्ये तु यत्कृष्णं श्यावं वा जालकावृतम्। दग्धाकृति भृशं पाकं क्लेदशोथज्वरान्वितम्। दूषीविषाभिर्लूताभिस्तद्दष्टमिति निर्दिशेत्"। सौवर्णिकादयोऽष्टावसाध्या प्राणहरास्तासां लक्षणमाह "शोथः श्वेताः सिता रक्ताः पीताश्च पिडकाः ज्वरः। प्राणान्तिको भवेद्दाहः श्वासहिक्काशिरोग्रहः"। आखुदूषीविषलक्षणमाह "आदंशाच्छोणितं पाण्डुमण्डलानि ज्वरोऽरुचिः। लोमहर्षश्च दाहश्चाप्याखुदूषीविषार्द्दिते" प्राणहरमूषकविषकार्य्यमाह "मूर्च्छाङ्गशोथवैवर्ण्यक्लेदशब्दाश्रुतिज्वराः। शिरोगुरुत्वं लालास्रक्छर्द्दिश्चासाध्यमूषकात्। अङ्गशोथोऽत्र मूषकाकारो बोद्धव्य इति। तन्त्रान्तरे कृकलासदष्टस्य लक्षणमाह "शोषस्य कार्ष्ण्यमथ वा नानावर्णत्वमेव च। मोहोऽथ वर्चसो भेदो दष्टस्य कृकलासकैः"। वृश्चिकविषस्य लक्षणमाह "दहत्यग्निरिवादौ तु भिनत्तीवोर्द्ध्वमाशु च। वृश्चिकस्य विषं याति पश्चाद्दंशेऽवतिष्ठते"। असाध्यस्य वृश्चिकदष्टस्य लक्षणमाह "दष्टोऽसाध्यैस्तु हृद्घ्राणरसनोपहतो नरः। मांसैः पतद्भिरत्यर्थं वेदनार्त्तो जहात्यसून्"। असाध्यैर्वृश्चिकैस्तेषामेवानुवृत्तेः हृदादिषु उपहतः हृदादिकार्य्यरहितो भवति अत्यर्थं वेदनार्त्त इत्यन्वयः। कणभदष्टस्य लक्षणमाह "विसर्पः श्वयथुः शूलं ज्वरश्छर्द्दिरथापि वा। लक्षणं कणभैर्दष्टे दंशश्चैवावशीर्य्यते"। कणभः कीटविशेषः। उच्चिटिङ्गदष्टस्य लक्षणमाह "हृष्टरोमोच्चिटिङ्गेन स्तब्धलिङ्गो-

भयार्त्तिमान्। दष्टः शीतोदकेनेव सिक्तान्यङ्गानि मन्यते"। कृष्णलोमा अधिकतरकृष्णरोमा उच्चिटिङ्ग (चींटा) कीटविशेषः। सविषमण्डूकदष्टस्य लक्षणमाह "एकदंष्ट्रार्दितः शूनः सरुजः पीतकः सतृट्। सनिद्रश्च दंशान् दष्टोमण्डूकैः सविषैर्भवेत्"। एकदंष्ट्रार्दितः स्वभावादेकयैव दंष्ट्रया दष्टो भवति। मत्स्यविषस्य कार्य्यमाह "मत्स्यास्तु सविषा कुर्युर्दाहं शोथं रुजं तथा"। जलौकाविषकार्य्यमाह "कण्डूं शोथं ज्वरं मूर्च्छां सविषास्तु जलौकसः"। कुर्य्युरिति शेषः। गृहगोधिकाविषकार्य्यमाह "विदाहं श्वयथुं तोदं प्रस्वेदं गृहगोधिकाः"। कुर्य्युरिति शेषः। शतपदीविषकार्य्यमाह "दंशे स्वेदं रुजं दाहं कुर्य्याच्छतपदीविषम्" शतपदी (गिजाई) इति लोके। मशकविषकार्य्यमाह "कण्डूमान्मशकैरीषच्छोथः स्यान्मन्दवेदनः"। असाध्यमशकलक्षणमाह "असाध्यकीटसदृशमसाध्यं मशकक्षतम्"। असाध्यकीटसदृशं असाध्यैः कीटैर्लूतादिभिः क्षतं यत् क्षतं तत् सदृशवेदनम्। मक्षिकादंशलक्षणमाह "सद्यः संस्राविणी श्यावा दाहमूर्च्छाज्वरान्विता। पिड़का मक्षिका दंशे तासान्तु स्थगिका चहृत्"। तासामित्यादि तासां कृष्णतोक्तानां षण्णां मक्षिकाणां मध्ये स्थगिकानाम्नी शीघ्रं प्राणं हरतीत्यर्थः। व्याघ्रादिविषाणां कार्य्यमाह "चतुष्पाद्भिर्द्विपाद्भिर्वा नखैर्दन्तैश्च यत् क्षतम्। शूयते पच्यते तत्तु स्रवति ज्वरयत्यपि"। चतुष्पाद्भिः व्याघ्रादिभिः द्विपाद्भिः वनमनुष्यादिभिः शूयते शूनो भवति। विषोज्झितस्य लक्षणमाह "प्रसन्नदोषं प्रकृतिस्थधातुमन्नाभिकामं सममूत्रविट्कम्। प्रसन्नवर्णेन्द्रियचित्तचेष्टं वैद्योऽवगच्छेदविषं मनुष्यम्"। प्रसन्नदोषं प्रकृतिस्थदोषं शेषं सुगमम्"। [वन्ध्याकर्कोट्याम् राजनि०

विषकण्टकिनी स्त्री विषयुक्तं कण्टकमस्त्यस्याः इनि।

विषकण्ठ पु० विषं कण्ठे यस्य। शिवे। [शब्दच०।

विषघा स्त्री विषं हन्ति हन–ड नि० कुत्वम्। गुडूच्याम्

विषघातिन् पु० विषं हन्ति हन–णिनि। १शिरीषवृक्षे शब्दमाला। २विषनाशके त्रि०।

विषघ्न पु० विषं हन्ति हन–टक्। १शिरीषवृक्षे शब्दच०। २यवासे ३विभीतके राजनि०। ४चम्पकवृक्षे च जटा०। ५हिलमोचिकायां(हेलेञ्चा)स्त्री ङीप्। ६इन्द्रवारुण्याम् ७वनवर्वरायाम् ८भूम्यामलक्याम् ९रक्तपुनर्नवायाम् १०हरिद्रायाम् ११वृश्चिकाल्याम् १२महाकरञ्जे च १३भ- जम्भफलायां स्त्री राजनि० ङीप्। १४विषनाशके त्रि०।

विषजिह्व पु० विषयुक्ता जिह्वेव पत्रमस्याः। देवताड़वृक्षे रत्नमा०। [शब्दर०। स्त्रियां ङीष्।

विषज्वर पुंस्त्री० विषमिव प्राणहन्ता ज्वरो यस्य। १महिषे

विषण्ड न० विशेषेण षण्डम्। मृणाले शब्दर०।

विषतिन्दु पु० विषयुक्तस्तिन्दुः। १कुपीलौ भावप्र०। २कारस्करवृक्षे राजनि०। [वर्षे पु०। ३तद्वति त्रि० अमरटीका।

विषद न० वि+षद–अच्। १पुष्पकासीसे राजनि०। २शुक्ल-

विषदंष्ट्रा स्त्री विषयुक्ता दंष्ट्रा। १सर्पदंष्ट्रायाम्। विषस्य दंष्ट्रेव नाशकत्वात्। २सर्पकङ्कालीलतायां रत्नमा०।

विषदन्तक पुंस्त्री० विषं दन्ते यस्य कप्। १सर्पे शब्दच० स्त्रियां ङीष्। [चकोरखगे हेमच० स्त्रियां ङीष्।

विषदर्शनमृत्युक पुंस्त्री० विषस्य दर्शनेन मृत्युरस्य कप्।

विषद्रुम पु० विषयुक्तो द्रुमः। कारस्करवृक्षे राजनि०।

विषधर पुंस्त्री० विषं धरति धृ–अच्। १सर्पे अमरः स्त्रियां ङीष्। "विषधरविषमं वनं भविता" उद्भटः।

विषधर्म्मन् पु० विषस्येव धर्मोऽस्य अनिच्‌समा०। (आलकुषी) लतायाम् शब्दच०। [वृक्षे हारा०। २विषनाशके त्रि०।

विषनाशन पु० विषं नाशयति नश–णिच्–ल्यु। १शिरीष-

विषनाशिनी स्त्री विषं नाशयति नाशि–णिनि ङीप्। सर्पकङ्कालीलतायां शब्दच०।

विषनुद् पु० विषं नुदति नुद–क्विप्। श्योनाकवृक्षे शब्दच०।

विषपुष्प न० विषमिव नीलं पुष्पमस्य। १नीलपद्मे शब्दमा० २कर्दनवृक्षे (मनफल) रत्नमा० कप्। मदनवृक्षे भावप्र०।

विषम त्रि० विगतो विरुद्धो वा समः। १असमे २अयुग्मे (वियोड़) ३उन्नतानते ४दारुणे ५सङ्कटे च "भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम्" इत्युक्ते ६पद्यभेदे न०। "ओजोऽथ युग्मं विषमः समश्च" ज्यो०त०उक्ते ७मेषमिथुनाद्यसमराशौ पु०। ८तालभेदे पु० "चतुर्विधः परिज्ञेयस्तालः कङ्कणनामकः। पूर्णः१ खण्डः२ सम३श्चैव विषम४श्चैव कथ्यते। नचतुष्कं गणौ पूर्णे१ खण्डे२ विन्दुद्वयं गुरुः। यगणस्तु समे ज्ञेयस्तमयट्गणो विषमे भवेत्" सङ्गीत०। विषमादागतः विषमय, रूप्यप्, विषमरूप्य छ, विषमीय विषमादायते त्रि० सि०कौ०। [वृक्षे(छातिम) अमरः।

विषमच्छद पु० विषमाणि अयुग्मानि सप्त छदाः यस्य। सप्त-

विषमज्वर पु० विषम उग्रो ज्वरः। ज्वरभेदे। यथोक्तं भावप्र० "तत्र विषमज्वरस्य निदानलक्षणपूर्विकां संप्राप्तिमाह

"दोषोऽल्पोऽहितसम्भूतो ज्वरोत्सृष्टस्य वा पुनः। धातुमन्यतमं प्राप्य करोति विषमज्वरम्"। अस्यार्थः ज्वरोत्सृष्टस्य ज्वरेण त्यक्तस्य। अहितहेतुमाह। दोषः अल्पः, ज्वरोत्सृष्टस्य त्यक्तस्यापि। विषमहेतुमाह। अहितसम्भवाहारविहारादि तेन सम्भूतः संपूर्णोजातः अन्यतमं धातुं रसरक्तादिकम् प्राप्य दूषयित्वा पुनर्विषमज्वरं करोति ज्वरोत्सृष्टस्य वेति वाशब्देनेति बोध्यते। प्रथमतो विषमज्वरो भवति यत उक्तम्। "आरम्भाद्विषमो यस्तु"इत्यादिकम् रसादिकन्धातुं दूषयित्वा कं विषमज्वरं करोति इत्यपेक्षायामाह "सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः। मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जागतः पुनः। कुर्य्याच्चातुर्थिकं घोरमन्तकं रोगसङ्करम्"। अन्तकमिव मारकत्वात्। अथ विषमज्वरस्य सामान्यं लक्षणमाह "यः स्यादनियतात् कालात् शीतोष्णाभ्यां तथैव च। वेगतश्चापि विषमोज्वरः स विषमः स्मृतः"। यः स्यादनियतात् कालादित्यस्यायमर्थः। यथा वातिकोज्वरः सप्त दिनानि, पैत्तिको दश दिनानि, श्लैष्मिको द्वादशदिनानि, दोषाणां प्राबल्ये वातिकश्चतुर्दशदिनानि, पैत्तिको विंशतिदिनानि, श्लैष्मिकश्चतुर्विंशतिदिनानि स्यात्। तथा विषमज्वरो नियतं कालं व्याप्य न स्यादित्यर्थः। शीतोष्णाभ्यां तुल्याभ्यां स्यात्। "वेगतश्चापि विषमः कदाचिदतिवेगवान्"। कदाचिच्चाल्पवेगः। विषमज्वरस्य भेदानाह "सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ"। तत्र सन्ततस्य लक्षणमाह "सप्ताहं वा दशाहं वा द्वादशाहमथापि वा। सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते"। त्रिकालो वातिकादिभेदात्। सन्तत्या नैरन्तर्य्येण अविसर्गी अपरित्यागी। ननु त्यक्तानुबन्धित्वं विषमत्वमिति विषमलक्षणम् तदत्र न घटत इति कथमयं विषमेषु पठ्यते"। घटत एवेति न दोषः। यत उक्तं चरकेण "विसर्गं द्वादशे कृत्वा दिवसे व्यक्तलक्षणम्। दुर्लभोपशमः कालं दीर्घमेवानुवर्त्तते" इति। यत्तु खरनादेनोक्तम् 'ज्वराः पञ्च तु ये प्रोक्ताः पूर्वं सन्ततकादयः। चत्वारः सन्ततं हित्वा ज्ञेयास्ते विषमज्वराः'' इति तच्चिरेण त्यागाभिप्रायेण। सततलक्षणमाह "अहोरात्रे सततको द्वौ कालावनुवर्त्तते"। द्वौ कालौ कश्चिदपेक्षाकालं रात्रिकालम्। यतो दोषाणामहोरात्रे प्रत्येकं द्वौ द्वौ प्रकोपकालौ। यत उक्तं वाग्भटेन "वयोऽहोरात्रिभुक्तानामन्तमध्यादिगाः क्रमादिति"। अन्येद्युष्कलक्षणमाह। "अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्तते"। एककालं दोषापेक्षया एककालमपि न द्वितीयं, प्रथमकाले हृद्येव दोषस्थितेः। तृतीयकचतुर्थकयोर्लक्षणमाह। "तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः"। तृतीयेऽह्नि इत्यागमनदिनं गृहीत्वा यत उक्तम् "दिनमेकमतिक्रम्य यो भवेत् स तृतीयकः। दिनद्वयमतिक्रम्य यः स्यात् स हि चतुर्थकः" इति। अत्राह सुश्रुतः "कफस्थानविभागेन यथासङ्ख्यं करोति हि। सततान्येद्युष्कत्र्याख्यचतुर्थकान् प्रलेपकान्। अहोरात्रादहोरात्रात् स्थानात् स्थानं प्रपद्यते। दोष आमाशयं प्राप्य करोति विषमज्वरम्"। अस्यार्थः आमाशयोरःकण्ठशिरःसन्धयः पञ्च कफस्थानानि एषु तिष्ठन् दोषो यथासङ्ख्यं सततादीन् करोति। तत्र आमाशये स्थितो दोषः सततं करोति द्वौ कालौ, अहोरात्रे कालद्वये दोषप्रकोपात्। हृदये स्थितो दोष आमाशयमागत्य अन्येद्युष्कं करोति एककालं नैकस्मादेकस्मिन्नेवाहोरात्रे दोष आमाशयमागत्य अन्येद्युष्कं करोति। तत्र द्वौ दोषप्रकोपकालौ एकस्मिन् काले हृदये तिष्ठत्यपरस्मिन्नामाशय इति। कण्ठे स्थितो दोषोऽहोरात्रात् हृदयमायाति। तृतीये दिने आमाशयमागत्य स्वप्रकोपकाले तृतीयकं ज्वरं करोति एककालं न तु द्वौ कालौ स्वभावात्। एवमेव शिरःस्थितो दोषः अहोरात्रात् कण्ठमायाति ततः पुनरहोरात्रात् हृदयमायाति चतुर्थे दिने आमाशयमागत्य स्वप्रकोपकाले चतुर्थकं ज्वरं करोति एककालमत्र द्वौ कालौ स्वभावादेव। ननु दोषस्यागमनक्रमेण निजस्थानगमनक्रमात् कथं तृतीयचतुर्थदिवसयोर्ज्वरागमनम्। उच्यते। दोषा हि प्रकोपसमये वेगवत्तया लाघवात् स्वस्थानन्तु वेगादिन एव याति। यत आह "दोषः प्रकोपकाले हि वेगवत्त्वेन लाघवात्। वेगवाहर एवायं स्वस्थानमधिगच्छति"। सन्धिषु स्थितः प्रलेपकं करोति। यद्यप्यामाशयेऽपि सन्ति तेषु स्थितः प्रलेपकं सर्व्वदा करोति "निवृत्तः पुनरायाति विषमो नियते दिने। स्वभावः कारणं तत्र मन्यन्ते मुनिपुङ्गवाः"। स्वभावस्य कारणत्वे कफस्थानविभागनिरपेक्षाश्चतुर्थकादिविपर्य्यया अपि ज्वराः कुत्सकाले प्रभवन्ति 'व्याधिप्रेते यथा भूमि बीजं काले

प्रतीक्षति। अधिशेते तथा धातून् दोषः काले प्रकुप्यति"। सुश्रुतोऽप्याह "स चापि विषमं देहं न कदाचित् प्रमुञ्चति। ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते। वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते। धात्वन्तरेषु लीनत्वात् सौक्ष्म्याच्चैवोपलभ्यते"। द्विदोषोल्वणस्य तृतीयकस्य लक्षणमाह "कफपित्तात् त्रिकग्राही पृष्ठाद्वातकफात्मकः। वातपित्ताच्छिरोग्राही त्रिविधः स्यात् तृतीयकः"। त्रिकग्राही वेदनया त्रिकं गृह्णातीत्यर्थः। ननु कफपित्तात् त्रिकग्राही वेदनया त्रिकव्यापी त्रिकं तु वातस्थानं तत्कथं तद्गृह्णीतः पित्तकफौ अन्यस्थानगत्वेन दुर्बलत्वात् दुर्बलौ च कथं वेगं कुरुतः, दोषाणां स्थाननियमः न तु कुपितानां तथा च सुश्रुतः "कुपितानां हि दोषाणां शरीरे परिधावताम्। यत्र सङ्गः खवैगुण्यात् व्याधिस्तत्रोपजायते"। एवमन्यस्थानगत्वेन चतुर्थको वाच्यः। वातकफात्मकः पृष्ठात् अथवा पृष्ठं व्याप्य भवतीत्यर्थः। "ल्यब्लोपे कर्मण्यधिकरणे च" पा०वा० पञ्चमी। कफोल्वणस्य वातोल्वणस्य चतुर्थकस्य लक्षणमाह "चतुर्थको दर्शयति प्रभावं द्विविधं ज्वरः। जङ्घाभ्यां श्लैष्मिकः पूर्वं शिरसोऽनिलसम्भवः। मध्यकायस्तु गृह्णाति पूर्वं यस्तु स पित्तजः। विषमज्वर एवान्यश्चतुर्थकविपर्ययः"। श्लैष्मिकः श्लेष्मोल्वणः। तथा अनिलसम्भवो वातोल्वणः सन्ततादीनां त्रिदोषजत्वम्। यत उक्तं चरके "प्रायशः सन्निपातेन पञ्च स्युर्विषमज्वराः" इति। प्रायशोग्रहणादेकदोषजा द्विदोषजा अपि भवन्तीति जेज्जटः। पूर्वं प्रथमं जङ्घाभ्याम् अथवा जङ्घे व्याप्य पश्चात् सकलं शरीरं व्याप्नोति। एवमुल्वणवातजः शिरसः पूर्वं अथवा शिरो व्याप्य सकलं शरीरं व्याप्नोतीत्यर्थः। "विषमज्वर एवान्यश्चातुर्थकविपर्ययः। अस्थिमज्जगतो दोषश्चातुर्थकविपर्ययः। जायते त्रिमला सेवी विषमज्वर एव सः"। अन्यः सन्ततादिपञ्चकादपरः चातुर्थकविपर्ययाख्यो ज्वरः सोऽपि विषमज्वर एव वैद्येन ज्ञातव्यः। स किं धातुस्थ इत्यपेक्षायामाह अस्थीत्यादि। तत्र चातुर्थकविपर्ययस्य लक्षणमाह "स मध्ये ज्वरयत्यह्नी आद्यन्ते च विमुञ्चति"। चतुर्थकविपर्ययः इत्युपलक्षणम् सन्ततादिविपर्ययोऽपि बोद्धव्यः। यथा अहोरात्रे द्वौ कालौ त्यजति शेषं सर्वमहोरात्रं तिष्ठतीति सततविपर्ययः। अहोरात्रे एककालं त्यजति शेषं सर्वमहोरात्रं तिष्ठति अन्येद्युष्कविपर्ययः मध्ये एकं दिनं ज्वरयति आद्यावन्तौ च मुञ्चतीति तृतीयकविपर्ययः। एते विषमज्वरोपलक्षकाः अन्ये रात्रिज्वरादयोऽपि विषमज्वरा बोद्धव्याः यथा "समौ वातकफौ यस्य क्षीणपित्तस्य देहिनः। रात्रौ प्रायो ज्वरस्तस्य दिवा हीनकफस्य तु"। प्रायः बाहुल्येन। सन्ततादीनां शीतपूर्वत्वे दाहपूर्वत्वे च हेतुमाह "त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरम्। तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च"। शीतं शीतसहितम्। प्रशान्तयोः प्रशान्तवेगयोः अन्तः अभ्यन्तरे। "करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च। तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः"। अन्ततः हस्तपादादितः। शीतादिदाहादिज्वरयोः त्रिदोषजत्वमाह "द्वावेतौ दाहशीतादिज्वरौ संसर्गजौ स्मृतौ। दाहपूर्वस्तयोः कष्टः सुखसाध्यतमोऽपरः"। संसर्गजौ सान्निपातिकौ। कष्टः कष्टसाध्यः। विषमज्वरविशेषमाह "विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते। तेनार्द्धं शीतलं देहमर्द्धमुष्णं प्रजायते"। अन्नरसे विदग्धे आहारजे रसे दुष्टे, देहे श्लेष्मपित्ते व्यवस्थिते दुष्टे स्थिते। तेन हेतुना शीतलं कफेन उष्णं पित्तेन, अर्द्धत्वं चार्द्धनारीश्वराकारेण नरसिंहाकारेण वा। "काये दुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः। तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयोः"। अन्ते हस्तपादादौ। "काये श्लेष्मा यदा दुष्टः पित्तं चान्ते व्यवस्थितम्। शीतत्वं तेन गात्रे स्यादुष्णत्वं हस्तपादयोः"। विषमज्वरविशेषस्य प्रलेपकस्य लक्षणमाह "प्रलिम्पन्निव गात्राणि घर्मेण गौरवेण च। मन्दज्वरविलेपी च स शीतः स्यात् प्रलेपकः"। गौरवेण उपलक्षितः। मन्दज्वरविलेपी मन्दत्वेनास्य विशेषः सदा सम्यक् लिम्पतीति मन्दज्वरविलेपी। अयं विषमज्वरः। तथा च सुश्रुतः "प्रलेपकाख्यो विषमः प्रायशः क्षयशोषिणाम्। ज्वराश्च विषमाः सर्वे प्रायः क्लेशाय शोषिणाम्"।

विषमनयन पु० विषमाणि अयुग्मानि त्रीणि नयनान्यस्य। त्रिनेत्रे शिवे। विषमनेत्रादयोऽप्यत्र।

विषमर्दनी स्त्री विषं मृद्यतेऽनया मृद-ल्युट् ङीप्। गन्धनाकुल्याम्। स्वार्थे क। विषमर्दनिकाऽप्यत्रैव राजनि०।

विषमस्थ त्रि० विषमे उन्नतानते दुर्गे वा तिष्ठति स्था-क। १उपद्रवप्राप्ते २दुर्गस्थे ३उन्नतानतदेशस्थे च।

विषमशिष्ट न० विषमं शिष्टं शासनम्। अनुचितशासने।
विषमायुध पु० विषमाणि अयुग्मानि पञ्च आयुधानि बाणा यस्य। पञ्चशरे कामे हला०विषमेष्वादयोऽप्यत्र। [राजनि०
विषमुष्टि पु०विषं मुष्णाति मुष–क्तिच्। क्षुपभेदे (विषडोडि)
विषमृत्यु पु०विषात् विषदर्शनात् मृत्युरस्य। चकोरखगे जटा०
विषय पु० विषिण्वन्ति स्वात्मकतया विषयिणं निरूपयन्ति संबध्नन्ति वा वि+षि–अच्। इन्द्रियगोचरे १शब्दादौ २देशे च अमरः। ३भोगसाधने "विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः"। "सिन्धुर्हिमादिर्विषयो मतः"। "प्राणादिस्तु महावायुपर्यन्तो विषयो मतः" भाषा०। "अत्र विषयः भोगसाधनं सर्वमेव हि कार्यमदृष्टाधीनं यद्यत् कार्यं यददृष्टाधीनं तत् तदुपभोगं साक्षात्परम्परया जनयत्येव न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति तेन द्व्यणुकादिब्रह्माण्डान्तं सर्वमेव विषयो भवतीत्यर्थः" सि० मुक्ता०। "विषिण्वन्ति विषयिणं बध्नन्ति स्वेन रूपेण निरूपणीयं कुर्वन्तीति विषयाः पृथिव्यादयः सुखादयश्च अस्मदादीनामविशेषाश्च तन्मात्रलक्षणाः योगिनामूर्ध्वस्रोतसां च विषयाः" सांख्य०त० कौ०। ४नित्यसेविते अमरः। ५अव्यक्ते ६शुक्रे च अजयपालः। ७कान्तादौ ८उपभोग्ये शब्दरत्ना० ८नियामके "विषयो हि निःशेषार्थैर्निर्णीतिर्बन्धनार्थकः। विशेषेण सिनोतीति विषयोऽतो नियामकः" भट्टका०। ९आरोपाश्रये "आरोपान्या तु यत्रोक्ता विषयी विषयस्तथा। विषयान्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका" काव्यप्र०। १०विचारार्हवाक्ये अधिकरणावयवभेदे "विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्। निर्णयश्चेति सिद्धान्तः शास्त्रेऽधिकरणं स्मृतम्" मीमांसा। [ज्ञनि०।
विषयाज्ञान न० विषयाणां न ज्ञानं यत्र। तन्द्रायाम् रा-
विषयिन् न० विषयोऽस्त्यस्य इनि। १ज्ञाने "विषयी यस्य तस्यैव" भाषा०। २इन्द्रिये च। ३विषयासक्ते त्रि०मेदि०। ४राज्ञि ५कामदेवे पु० मेदि०। विषयिणो भावः तल्। विषयिता ज्ञाननिष्ठे विषयनिरूपिते पदार्थभेदे स्वरूपसम्बन्धभेदे च स्त्री०। सा च त्रिविधा विशेष्यनिरूपिता विशेष्यिता, विशेषणनिरूपिता प्रकारिता, संसर्गनिरूपिता संसर्गिता इति गदाधरादयः। गदाधरमते विषयितैव प्रतिबध्यकतावच्छेदिका। जगदीशमते विषयतैवेति भेदः।
विषरूपा स्त्री विषं सूक्ष्मविषं रूपयति अतिक्रामति रूप—क। अतिविषायाम् (आतइच) राजनि०। [राजनि०
विषलता स्त्री विष-व्याप्तौ अच् कर्म०। इन्द्रवारुण्याम्।
विषविद्या स्त्री विषाय तन्निवृत्तये विद्या। विषमन्त्रज्ञाने
विषविधि पु० दिव्यभेदे दिव्यशब्दे ३५८६ पृ० दृश्यम्।
विषवैद्य पु० विषे विषापहारे वैद्यश्चिकित्सकः। विषमन्त्रविद्यायुते अमरः। [राजनि०।
विषशालूक पु० विषस्य शालूकः। पद्मकन्दे
विषशृङ्गिन् पु० विषं शृङ्गमिवास्यस्य इनि। भृङ्गरोले हारा०। [हेमच० स्त्रियां ङीप्।
विषसूचक पुंस्त्री० विषं सूचकं हिंसकमस्य। चकोरखगे
विषसृक्वन् पु० विषं सृक्वे यस्य। भृङ्गरोले त्रिका०।
विषहन्त्री स्त्री विषं हन्ति हन-तृच् ङीप्। १अपराजितायाम् राजनि०। २विषहारके त्रि०।
विषहरी स्त्री विषं हरति हृ—अच् गौरा० ङीष्। १मनसादेव्यां ब्रह्मवै०। २विद्याभेदे तन्त्रसा०। [जनि०।
विषहा स्त्री विषं हन्ति हन—ड। देवदालीलतायाम् रा-
विषा स्त्री विषं सविषविषं नाशकत्वेनास्त्यस्याः अच्। (आतइच) १अतिविषायाम् अमरः २बुद्धौ च उणादि०
विषाण न० विष—बा० कानच्। १पशुशृङ्गे २हस्तिदन्ते ३कुष्ठौषधे मेदि०। ४वराहदन्ते हेमच०५क्षीरकाकोल्याम् ६अजशृङ्ग्यां स्त्री मेदि० गौरा० ङीष्। सा च ७वृश्चिकाल्यां स्त्री राजनि०। ८तिन्तिड्यां स्त्री शब्दच०।
विषाणिका स्त्री विषाणमस्त्यस्याः ठन्। १मेषशृङ्ग्याम् (माड़ाशिङ्गा) रत्नमा०। २कर्कटशृङ्ग्याम् ३आवर्तक्यां ४सातलायां राजनि०।
विषाणिन् पु० विषाणमस्त्यस्य इनि। १शृङ्गिणि २हस्तिनि च अमरः। ३शृङ्गाटके ४ऋषभौषधे च पु० राजनि०।
विषाद पु०वि+षद—घञ्। १अवसादे हेमच० २जडतायाञ्च।
विषादनी स्त्री विषाय तन्निवृत्तये अद्यतेऽसौ अद—ल्युट्। पलाशीलतायाम् राजनि०। [२विषहरे त्रि०।
विषान्तक पु० विषस्यान्तक इव। १शिवे हेमच० ६त०।
विषापहा स्त्री विषमपहन्ति अप+हन-ड। १मुष्ककवृक्षे राजनि०। २इन्द्रवारुण्यां ३निर्विषायां राजनि०। ४नागदमन्यां शब्दच०। ५अर्कमूलायाम् (ईशरमूल) ६सर्पकङ्कालिकायां रत्नमा०। [ङीप्।
विषार पुंस्त्री० विषमृच्छति ऋ—अण्। सर्पे शब्दच० स्त्रियां
विषाराति पु० ६त०। १कृष्णधुस्तूरे राजनि०। २विषमाधवे च।

विषारि पु॰ ६त॰। १हलकरञ्जे २महाचञ्चुशाके च राजनि॰

विषास्य पु॰ विषमास्ये यस्य। १सर्पे शब्दच॰ विषाननादयो-ऽप्यत्र। विषाक्तनिवाद्यमत्राः। २भल्लातके स्त्री शब्दच॰।

विषु अव्य॰विष-कु। १साम्ये भरतः। २नानारूपे रामाश्रमः

विषुव न॰ विषु दिनरात्र्योः साम्यं वाति वा-क। १सम-रात्रिंदिनकाले अमरः। अयनांशक्रमणे २रवेः तुला-मेषराशिसंक्रान्तिभेदे च

"मृगकर्कटसंक्रान्ती द्वे उदग्दक्षिणायने। विषुवती तुलामेषे गोलमध्ये तथापरा" ज्यो॰त॰। "भचक्रनाभौ विषुवद्द्वितयं समसूत्रगम्। अयनद्वितयं चैव चतस्रः प्रथितास्तु ताः" सू॰ सि॰। "भचक्रनाभौ भगोलस्य ध्रुवद्वयाभ्यां तुल्यान्तरेण मध्यभागे विषुवद्द्वितयं समसूत्रगं परस्परं व्यासतुल्यान्तरितं ध्रुवमध्ये विषुवद्वृत्त-स्थानात् तद्वृत्ते क्रान्तिवृत्तभागौ यौ लग्नौ तौ क्रमेण पूर्वापरौ विषुवत्सञ्ज्ञौ मेषतुलाद्यौ चेत्यर्थः" रङ्ग॰ कालभेदे विषुवत्क्रमणारम्भांशभेदः अयनसंक्रान्तिशब्दे दर्शितः तत्सम्बन्धात्॰संक्षिप्य कालभेदे विषुवारम्भाद्युक्तं यथा "मेषसंक्रमतः पूर्वं पश्चात्तदादिनान्तरे। प्राति-लोम्येन साम्येन विषुवारम्भणं भवेत्। त्रयोदशदिने सौरे चैत्रे शकतिथौ १५२०शके। विषुवारम्भणं तत्र समं मानं दिवानिशोः। ततः प्रतिदिनं वेला सपादत्रिपला-त्मिका। वर्द्धते मेषविंशांशपर्यन्तं स्थूलमार्गतः। तथाच्चैतान्तपर्यन्तं पादोनत्रिपलात्मिका। ताद्दशा-र्द्रान्तपर्यन्तं पलैकप्रमिता मता। ततः कर्कटविंशांश-पर्य्यन्तं प्रत्यहक्रमात्। सपादपलमानेन वेला तु त्रुट्यति निश्चितम्। ताद्दग्भाद्रान्तपर्यन्तं पादोनत्रि-पलात्मिका। दिवामानं दशघटीयुक्ता रात्रेः प्रमा-णकम्। वैशाखादौ दिवामानं रात्रिमानं तुलादिषु। षट्पञ्चाशद्घटीरानेषं ततः स्यात् द्वादशांशके। पुनस्तद्वत् वर्द्धतद्वत् तत एकादशादिके"। [विषुवमप्यत्रार्थे।

विषुवत् न॰विषु साम्यं दिवानिशोरस्त्यस्मिन् मतुप् मस्य वः।

विषौषधी स्त्री ६त॰। नागदन्त्याम् रत्नमा॰।

विष्क हिंसायां चु॰ आ॰सक॰ सेट्। विष्कयते अविविष्कत दर्शने उभ॰ सेट्। विष्कयति ते अविविष्कत् त।

विष्कम्भ पु॰ वि+स्तम्भ-अच्। स्थ्यचन्द्रयोगजातयोग-मध्ये प्रथमे १योगे ज्यो॰त॰ २विस्तारे ३प्रतिबन्धे ४रूप-कनाटकाङ्गभेदे "वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः। संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः। मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः। शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यम-कल्पितः" सा॰द॰। ५योगिनां बन्धभेदे मेदि॰ ६वृक्षे अजयः ७अरट्ठम्भके अमरः। ८कीलकादौ च भरतः। ९पर्वतभेदे विपुलशब्दे दृश्यम्।

विष्कल पुंस्त्री॰ विषं विष्ठां कलयति कलि-अच् पृषो॰। ग्राम्यशूकरे राजनि॰ स्त्रियां ङीष्।

विष्किर पुंस्त्री॰ विकिरति वि+कॄ-क सुट् च। १विहगे अमरः स्त्रियां ङीष्। २विहगभेदे भावप्र॰ "वर्त्त-कालावविकिरकपिञ्जलकतित्तिराः। कुलिङ्गकुक्कुटा-द्याश्च विष्किराः समुदाहृताः। विकीर्य भक्षयन्त्येते यस्मात्तस्माद्धि विष्किराः। कपिञ्जल इति प्राज्ञैः कथितो गौरतित्तिरः"। कुलिङ्गः (चटर) इति लोके। "वि-ष्किरा मधुराः शीताः कषायाः कटुपाकिनः। बल्या वृष्यास्त्रिदोषघ्नाः पथ्यास्ते लघवः स्मृताः"।

विष्टप न॰ विश-कपन् तुट् च। भुवने अमरः।

विष्टब्ध त्रि॰ वि+स्तम्भ-क्त। प्रतिरुद्धे अवरुद्धे

विष्टम्भ पु॰ वि+स्तम्भ-घञ्। १प्रतिबन्धे २आनाहे रोग-भेदे च आनाहशब्दे ७२८ पृ॰ दृश्यम्। [जगके च।

विष्टम्भिन् त्रि॰वि+स्तम्भ-णिनि। १प्रतिबन्धके २रोगविशेष॰

विष्टर पु॰ वि+स्तृ-अप् षत्वम्। "ऊर्द्धकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः" इति "यामावर्त्तस्तु विष्टर" इति च स्मृत्युक्ते दर्भतते १आसनभेदे २आसनमात्रे ३वृक्षे ४कुशमुष्टौ च अमरः। [विष्णौ अमरः।

विष्टरश्रवस् पु॰ विष्टरः कुशमुष्टिरिव श्रवसी कर्णौ यस्य।

विष्टरुहा स्त्री विष्टा भूमौ प्रविष्टा सती रोहति रुह-क। अपर्णेतक्यां राजनि॰। [शब्दे २८२८ पृ॰ दृश्यम्।

विष्टार पु॰ वि+स्तॄ-घञ् षत्वम्। पङ्क्तिच्छन्दोभेदे छन्दः-

विष्टि स्त्री विष-क्तिन् क्तिच् वा। वेतनं विना भारादिव-हनकर्म्मणि १कर्मणि अमरः। २वेतने ३कर्मणि ४प्रेषणे ५तिथ्यर्द्धात्मककरणमध्ये सप्तमे करणे विभ्रः। भद्राशब्दे ४६२७पृ॰ दृश्यम्। ६प्रेषणे हेमच॰। ७कर्मकरे भृत्ये ८वेतनं विना कर्मकरे च त्रि॰ मेदि॰।

विष्ठल न॰विप्रकृष्टं स्थलम् प्रा॰स॰षत्वम्। दूरस्थस्थले सि॰कौ॰

विष्ठा स्त्री विविध तिष्ठति स्था-क षत्वम्। १उदरे शब्दमाला २पुरीषे अमरः।

विष्णु स्त्री विष-व्यापने नुक्। १व्यापके परमेश्वरे अमरः

"यस्मात् विश्वमिदं सर्वं तस्य शक्त्या महात्मनः। तस्मा-देवोच्यते विष्णुर्विशधातोः प्रवेशनात्" इत्युक्तेः विश-प्रवेशे नु पृषो० इत्यपि बोध्यम्। २यज्ञे ३शुद्धे ४वसुदेवतायां धनिष्ठः। ५धर्मशास्त्रकारके मुनिभेदे च "मन्वत्रिविष्णुहारीते"ति याज्ञ० ६तद्दैवते श्रवणनक्षत्रे ज्यो०त०।

विष्णुकन्द पु० विष्णुप्रियः कन्दः शा०त०। मूलभेदे राजनि०

विष्णुक्रान्ता स्त्री ३त० विष्णुस्तद्वर्णः क्रान्तो वा यया। अ-पराजितायाम् अमरः तस्याः विष्णुतुल्यवर्णत्वात् विष्णु-परिक्रान्तत्वाच्च तथात्वम्।

विष्णुगुप्त पु० १चाणक्ये मुनौ स्वयमेव मातृशासनत्वेन पश्चिमत्वेन प्रसिद्धः त्रिका०। ३त०। विष्णुना गुप्ते कन्यादौ २देवादौ ३कन्दभेदे राजनि०।

विष्णुतैल न० वैद्यकप्रसिद्धे तैलभेदे तच्च द्विविधं स्वल्प-बृहद्भेदात् तत्तैलपाकप्रकारः भैषज्यरत्ना० उक्तो यथा तत्र स्वल्पविष्णुतैलम् "शालपर्णी पृश्निपर्णी बलागोर-क्षतण्डुलाः। एरण्डस्य च मूलानि बृहत्योः पूतिकस्य च। शतावरी सहचरी पचेदेतैः पयोन्वितैः। तैलप्रस्थं पयोदत्त्वा गव्यं वाऽजं चतुर्गुणम्। अस्य तैलस्य पक्वस्य शृणु वीर्यमतः परम्। वातार्त्ता नरनागाश्च पीत्वा दृढतनुत्वचः। कृतपार्श्वशूले शाखाच्छे गलगण्डे-ऽर्दिते च ये। शर्कराश्मरिपाण्डुत्वकामलादोषभेदके। क्षीणेन्द्रियेऽन्त्रवृद्धौ च जराजर्जरिते हितम्। स्त्रीणा-मप्रसूतीनाञ्च गर्भस्थितिकरं परम्। एतदष्टकरं तैलं विष्णुना परिकीर्त्तितम्"। तण्डुलः गोरक्षतण्डुलः। छहल्वोड इतीकटाख्यौः। पूतिकं नाटाकरञ्जः। सहचरी झिण्टी। अत्र क्वाथान्तराभावात् क्षीरस्य चतु-र्गुणं जलं कश्चिद्ददाति। "स्वरसक्षीरमाङ्गल्यैः पाको यत्रेरितः क्वचित्। जलं चतुर्गुणं तत्र वीर्याधानार्थ-मावपेत्" इति परिभाषावचनात्। क्वचिदिति पाठात् क्वाथान्तररहिते केवलक्षीरादिसहिततैलादिपाके ज्ञातव्यं न तु सर्वत्र। "एलाचन्दनकुङ्कुमागुरुमुराकङ्कोल-मांसी शटी श्रीवासच्छदपत्रिपर्णयष्टिभृङ्गो वीलुलोमी-रकम्। कस्तूरीनखपूतिकेलजलमुङ्कुमेथीलवङ्गादिकम्। गन्धद्रव्यमिदं प्रदेयमखिलं श्रीविष्णुतैलादिषु"। अथ बृहद्विष्णुतैलम् "बलधरमश्वगन्धा जीवकर्षभकौ शटी। काकोली क्षीरकाकोली जीवन्ती मधुयष्टिका। मधूरिका देवदारु पद्मकाष्ठं शैलेयकम्। मांसी चैला त्वचं कुष्ठं रक्त-चन्दनमेव च। मञ्जिष्ठा कमनाभिश्च श्वेतचन्दनकु-ङ्कुमम्। पृथ्वी कुन्दुरु खोटिस ग्रन्थिकस्य नखी तथा। एतेषां पालिकैर्भागैस्तैलस्यापि तथाढकम्। शतावरी रसतमं दुग्धस्यापि समं भवेत्। विष्णुतैलवरं श्रेष्ठं सर्ववातविकारनुत्। ऊर्द्ध्ववाते ह्यधोवाते कफपित्ते एव च। शिरोमध्यगता ये च मन्यास्तम्भे गलग्रहे। यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला। ये वात प्रभवा रोगा ये च पित्तसमुद्भवाः। सर्वांस्तान्नाशयत्याशु सूर्यस्तम इवोदितः"।

विष्णुदैवत(त्य) त्रि० विष्णुर्दैवतं(त्यं) यस्य। विष्णुदेवताके कृष्यादौ "इदन्तु सर्वदैवत्यं यदुक्तं द्विजोत्तमाः!। अशक्येयं विष्णुदैवत्यं सर्वं वा विष्णुदैवतम्" स्मृ० त० विष्णु०। २श्रवणनक्षत्रे च।

विष्णुधर्म पु० विष्णूपासनायोग्यो धर्मः शाक०। विष्णूपा-सनोचिते १नियमभेदे उपचारात् तत्प्रतिपादके २ग्रन्थे च

विष्णुधर्मोत्तर न० विष्णुधर्म उत्तरः प्रधानः वक्तव्यत्वेन यस्य। संहिताभेदे।

विष्णुपद न० विष्णोः पदमिव व्यापकत्वात्। १आकाशे अ-मरः। ६त०। २क्षीराब्धौ मेदि०। ३पद्मे च हेमच० ४विष्णोश्चरणे कर्म०। ५विष्णुरूपस्थाने च "तद्विष्णोः परमं पदम्" श्रु० विष्णुक्रमम्।

विष्णुपदी स्त्री० विष्णुपदं कारणत्वेनास्त्यस्याः अच् गौरा० ङीष्। १गङ्गायाम् "निर्गता विष्णुपादाग्रात् तेन विष्णुपदी स्मृता" ब्रह्मवै० प्र०८अ०। २वृषसिंहवृश्चिक-कुम्भराशौ रवेः संक्रान्तौ च। "वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी स्मृता" "पुण्यायां विष्णुपद्याञ्च प्राक्पश्चादपि षोडश" ज्यो०त०। "अयने कोटिगुणितं लक्षं विष्णुपदीषु च" ति०त० "तदन्तरेषु संक्रान्तिद्वितयं द्वितयं पुनः। नैरन्तर्यात् तु संक्रान्तेर्ज्ञेयं विष्णुपदीद्वयम्" सू०सि०। "तदन्तरेषु विषुवायनान्तरालेषु। अप्रान्तरालानां चतुः-स्थाने सद्भावात् बहुवचनम्। संक्रान्तिद्वितयं द्वितयं पुनारम्भादिभागे पञ्चाभाक्रमणं वारद्वयं भवति तदन्तराले राश्यादिभागौ द्वौ भवत इत्यर्थः। तथा हि मेषाख्यविषुवकर्क्यायनयोरन्तराले वृषमिथुनयोरादौ। कर्कतुलयोरन्तराले सिंहकन्ययोरादौ। तुलामकरयोर-न्तराले वृश्चिकधनुषोरादौ। मकरमेषयोरन्तराले कुम्भ-मीनयोरादौ इति। एवं विषुवानन्तरं संक्रमणद्वयमन-न्तरमयनं तदनन्तरं संक्रान्तिद्वयं तदनन्तरं विषुवमन-न्तरं संक्रान्तिद्वयमनन्तरमयनमित्यादि पौनःपुन्येन

ष्वेयमित्यर्थः। संक्रान्तिद्वयमध्ये प्रथमसंक्रान्तौ विशेषमाह। मेरन्तरोदिति। निरन्तरतया सम्भूतायाः संक्रान्तेः षडशीत्यादिविष्णुपदीद्वयं तदन्तराल इत्यर्थः" रघु०।

विष्णुपुराण न० व्यासप्रणीते महापुराणभेदे तत्प्रतिपाद्यविषयाश्च वृहन्नारदीये ९४ अ० उक्ता यथा "शृणु वत्स! प्रवक्ष्यामि पुराणं वैष्णवं महत्। त्रयोविंशतिसाहस्रं सर्वपातकनाशनम्। यत्रादिभागे निर्दिष्टाः षडंशाः शक्तृजेन ह। मैत्रेयायादिमे तत्र पुराणस्यावतारिका"। तत्र प्रथमभागस्य प्रथमांशे "आदिकारणसर्गश्च देवादीनाञ्च सम्भवः। समुद्रमथनाख्यानं दक्षादीनां कथान्वयः। ध्रुवस्य चरितं चैव पृथोश्चरितमेव च। प्राचेतसं तथाख्यानं प्रह्लादस्य कथानकम्। पृथुराज्याधिकाराख्यः प्रथमोऽंश इतीरितः। पातालनरकाख्यानं सप्तसर्गनिरूपणम्। सूर्य्यादिचारकथनं पृथग्लक्षणसंगतम्। चरितं भरतस्याथ मुक्तिमार्गनिदर्शनम्। निदाघऋतुसंवादो द्वितीयोऽंश उदाहृतः"। प्रथमभागस्य तृतीयांशे "मन्वन्तरसमाख्यानं वेदव्यासावतारकम्। नरकोद्धारकं कर्म गदितञ्च ततः परम्। सगरस्यौर्वसंवादे सर्वधर्मनिरूपणम्। श्राद्धकल्पं तथोद्दिष्टं वर्णाश्रमनिबन्धने। सदाचारश्च कथितो मायामोहकथा ततः। तृतीयोऽंशोऽयमुदितः सर्वपापप्रणाशनः"। प्रथमभागस्य चतुर्थांशे "सूर्य्यवंशकथा पुण्या सोमवंशानुकीर्त्तनम्। चतुर्थेऽंशे मुनिश्रेष्ठ! नानाराजकथाचितम्"। प्रथमभागस्य पञ्चमांशे "कृष्णावतारसंप्रश्नो गोकुलीया कथा ततः। पूतनादिवधो बाल्ये कौमारेऽघादिहिंसनम्। कैशोरे कंसहननं माथुरं चरितं तथा। ततस्तु यौवने प्रोक्ता लीला द्वारवतीभवा। सर्वदैत्यवधो यत्र विवाहाश्च पृथग्विधाः। यत्र स्थित्वा जगन्नाथः कृष्णो योगेश्वरेश्वरः। भूभारहरणं चक्रे परस्वहननादिभिः। अष्टावक्रीयकाख्यानं पञ्चमोऽंश इतीरितः"। प्रथमभागस्य षष्ठांशे "कलिजं चरितं प्रोक्तं चातुर्विध्यं लयस्य च। ब्रह्मज्ञानसमुद्देशः खाण्डिक्यस्य निरूपितः। केशिध्वजेन चेत्येषः षष्ठोऽंशः परिकीर्त्तितः"। तस्य द्वितीयभागे "अतःपरन्तु सूतेन शौनकादिभिरादरात्। पृष्टेन चोदिताः शश्वद्विष्णुधर्मोत्तराह्वयाः। नानाधर्मकथाः पुण्या व्रतानि नियमा यमाः। धर्मशास्त्रं चार्थशास्त्रं वेदान्तं ज्योतिषं तथा। वंशाख्यानं प्रकरणात् स्तोत्राणि मनवस्तथा। नानाविद्याश्रयाः प्रोक्ताः सर्वलोकोपकारकाः। एतद्विष्णुपुराणं वै सर्वशास्त्रार्थसंग्रहः" तत्फलश्रुतिः "वाराहकल्पवृत्तान्तं व्यासेन कथितं त्विह। यो नरः पठते भक्त्या यः शृणोति च सादरम्। तावुभौ विष्णुलोकं हि व्रजेतां भुक्तभोगकौ। तल्लिखित्वा च यो दद्यादाषाढ्यां घृतधेनुना। सहितं विष्णुभक्ताय पुराणार्थविदे द्विज!। स याति वैष्णवं धाम विमानेनार्कवर्च्चसा। यश्च विष्णुपुराणस्य समनुक्रमणीं द्विज!। कथयेच्छृणुयाद्वापि स पुराणफलं लभेत्"।

विष्णुमाया स्त्री ६त०। विष्णोः परमेश्वरस्य माया। १अघटनघटनपटीयस्याम् ईशस्याविद्यायाम् २तदधिष्ठात्र्यां दुर्गायाञ्च।

विष्णुयशस् पु० कल्किपितरि कल्किपु०।

विष्णुरथ पु० विष्णोः रथ इव गतिहेतुत्वात्। १गरुडे अमरः। ६त०। २विष्णोः रथे च।

विष्णुरात पु० विष्णुना रातः विष्णुर्वा राता जीवनमस्य रा—क्त वा। परीक्षिद्राज्ञि स हि गर्भस्थ एव अश्वत्थामास्त्रेण दग्धो मृतः सन् गर्भान्तरस्थविष्णुना पुनर्जीवितः तत्कथा भा० आश्व० ७०अध्याये। तस्याख्यानिरुक्तिः भाग०१।१२ अ० यथा "दैवेनाप्रतिघातेन शुक्ले (वंशे) संस्थामुपेयुषि। रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना। तस्मान्नाम्ना विष्णुरातो लोके ख्यातिं गमिष्यति"।

विष्णुवल्लभा स्त्री ६त०। १तुलस्याम् राजनि०। २अग्निशिखावृक्षे च शब्दच०। ३लक्ष्म्याम्।

विष्णुवाहन पु० विष्णुं वाहयति स्थानान्तरं नयति वह—णिच्—ल्यु। गरुडे हेमच०।

विष्णुवाह्य पु० विष्णुर्वाह्योऽस्य। गरुडे शब्दच०।

विष्फार पु० वि+स्फुर—णिच्—अच् आत् षत्वम्। धनुर्ज्याकर्षणशब्दे टङ्कारे अमरः।

विष्य त्रि० विषेण वध्यः विष+यत्। विषेण वध्ये अमरः।

विष्वक्सेनप्रिया स्त्री ६त०। १लक्ष्म्याम् (चामर आलु) २वाराह्याम् अमरः।

विष्वाणन न० वि+अन—ल्युट् षत्वम्। भोजने जटा०।

विष्वाण पु० वि+अन—घञ् षत्वम्। भोजने हेमच०।

विस न० वि+सो—क। मृणाले अमरः। वादित्वमित्यन्ये

विस उत्सर्गे दि०पर०सक०सेट्। विस्यति अवेसीत्।

विसंवाद पु० वि+सम्+वद–घञ्। १विप्रलम्भे अमरः। २वचने अन्यथा स्थितस्य वस्तुनोऽन्यथा कथनादौ च।

विसकुसुम न० विसयुक्तं कुसुमम्। पद्मे राजनि०।

विसङ्कट पु० विशिष्टः सङ्कटो यस्मात्। १सिंहे शब्दच० २इङ्गुदीवृक्षे च राजनि०। [समूहे च त्रिका०।

विसनाभि स्त्री विसं नाभिरिव यस्याः। १पद्मिन्याम् २पद्म०

विसर पु० वि+सृ–अप्। १समूहे अमरः। २विस्तारे च मेदि०

विसर्ग पु० वि+सृज–घञ्। १दाने २त्यागे ३मलत्यागे ४विसर्जनीयाख्ये ५वर्णभेदे ६अश्वग्रस्थापनभेदे ७मोक्षे हेमा०। ८प्रलये ९विशेषसृष्टौ शब्दरत्ना० "विसर्गविसर्गादिनवलक्षणलक्षितमिति" श्रीधरः।

विसर्जन न० वि+सृज–ल्युट्। १दाने अमरः २त्यागे च। वि+सृज–णिच् ल्युट्। ३प्रेरणे मेदि०।

वि(वी)सर्प पु० वि+सृप–घञ् वा दीर्घः। १ रोगभेदे तल्लक्षणादि भावप्र० उक्तं यथा तत्र विसर्पविप्रकृष्टनिदानं संख्यां निरुक्तिञ्चाह "लवणाम्लकटूष्णादिसेवनाद्दोषकोपतः। विसर्पः सप्तधा ज्ञेयः सर्वतः परिसर्पणात्" आदिशब्दात् दधिशुक्तहरितशाकमद्यसुरासौवीरप्रभृतीनां ग्रहणम्। सप्तधात्वं निरुक्तिं च "वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः। चत्वार एते वीसर्पा वक्ष्यन्ते द्वन्द्वजास्त्रयः। आग्नेयो वातपित्ताभ्यां ग्रन्थ्याख्यः कफवातजः। यस्तु कर्दमको घोरः स पित्तकफसम्भवः"। विसर्पदोषदूष्याणि संख्यामाह "रक्तं लसीकात्वङ्मांसं दूष्यं दोषास्त्रयो मलाः। विसर्पाणां समुत्पत्तौ हेतवः सप्त धातवः"। त्रयो मलाः वातपित्तकफाः दोषा दूषका इत्यर्थः। अन्यथा दोषास्त्रया इत्यत्र पुनरुक्तिदोषो लगिष्यते। वातिकस्य लक्षणमाह "तत्र वातात् परीसर्पो वातज्वरसमव्यथः। शोफस्फुरणनिस्तोदभेदायामार्त्तिहर्षवान्"। परीसर्पो विसर्पः। वातज्वरसमव्यथः शिरोरुग्दाहशोषशूलादियुक्तः। भेदः विदारणेनेव व्यथा। आयामः आकर्षणेन व्यथा।

पैत्तिकमाह "पित्ताद्द्रुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः"। द्रुतगतिः शीघ्रप्रसरणशीलः। अथ श्लैष्मिकमाह "कफात्कण्डूयुतः स्निग्धः कफज्वरसमानरुक्"। सान्निपातिकमाह "सन्निपातसमुत्थश्च सर्वरूपसमन्वितः"। वातपैत्तिकमाह "वातपित्ताज्ज्वरच्छर्दिमूर्च्छातीसारतृड्भ्रमैः। अस्थिभेदोऽग्निसदनतमकारोचकैर्युतः। करोति सर्वमङ्गञ्च दीप्ताङ्गारावकीर्णवत्। यं यं देशं विसर्पश्च विसर्पति भवेत् स सः। शान्ताङ्गारासितो नीलो रक्तो वा स्फुपचीयते। अग्निदग्ध इव स्फोटैः शीघ्रगत्वाद्द्रुतश्च सः। मर्मानुसारी वीसर्पः स्याद्वातोऽतिबलस्ततः। व्यथेताङ्गं हरेत् संज्ञां निद्राञ्च श्वासमीरयेत्। हिक्काञ्च स गतोऽवस्थामीदृशीं लभते नरः। क्वचिच्छर्मारतिग्रस्तो भूमिशय्यासनादिषु। चेष्टमानस्ततः क्लिष्टो मनोदेहश्रमोद्भवाम्। दुःप्रबोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते"। स्फोटैः स्फुपचीयत इत्यन्वयः। "मर्मानुसारी उदरहृदयानुसारी हरेत् विसर्प इत्यन्वयः हिक्कां हिक्काम् ईरयेत् उपर्युपरि प्रेरयेत्। मनोदेहश्रमोद्भवां निद्रां मरणरूपाम्। अश्नुते प्राप्नोति। वातश्लैष्मिकं ग्रन्थिविसर्पमाह "कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम्। रक्तं वा वृद्धरक्तस्य त्वक्शिरास्नायुमांसगम्। दूषयित्वा तु दीर्घाणुवृत्तस्थूलखरात्मनाम्। ग्रन्थीनां कुरुते मालां रक्तानां तीव्ररुग्ज्वराम्। श्वासकासातिसारास्यशोषहिक्कावमिभ्रमैः। मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाग्निसदनैर्युतः। इत्ययं ग्रन्थिवीसर्पो वातश्लेष्मप्रकोपजः"। कफेन स्वहेतुदुष्टेन पवनोऽपि स्वहेतुदुष्टः। तेनायं वातश्लैष्मिकः। तं कफं बहुधा भित्त्वा रक्तं वा दूषयित्वेत्यन्वयः। त्वगादिकगमिति रक्तस्य विशेषणम्। अथ पित्तश्लैष्मिकं कर्दमाख्यं विसर्पमाह "कफपित्ताज्ज्वरस्तम्भनिद्रातन्द्राशिरोरुजाः। अङ्गावसादविक्षेपप्रलापारोचकभ्रमाः। मूर्च्छाग्निहानिर्भेदोऽस्थ्नां पिपासेन्द्रियगौरवम्। आमोपवेशनं लेपः स्रोतसाञ्च विसर्पति। प्रायेणामाशयं गृह्णन्नेकदेशं न चातिरुक्। पीडकैरवकीर्णोऽतिपीतलोहितपाण्डुरैः। स्निग्धोऽसितो मेचकाभो मलिनः शोफवान् गुरुः। गम्भीरपाकः प्राज्योष्मा स्पृष्टः क्लिन्नोऽवदीर्यते। पङ्कवच्छीर्णमांसश्च स्पष्टस्नायुशिरागणः। शवगन्धी च वीसर्पः कर्दमाख्यमुशन्ति तम्"। स च सर्पति एकदेशमित्यन्वयः। पीडकैः पीडाकारिभिः। अवकीर्णः व्याप्तः। असितः कृष्णः। मेचकः कृष्णवर्णः। प्राज्योष्मा प्रचुरोष्मा। स्पृष्टः क्लिन्नोऽवदीर्यते। स्पृष्टः सन्नार्द्रो भवति विदीर्यते। पङ्कवत् कर्दमवर्णवत् यत्र सः। शीर्णमांसः गलितमांसः। अत एव स्पष्टस्नायुशिरागणः। सान्निपातिकमाह "सन्निपातसमुत्थस्तु सर्वरूपसमन्वितः"। अथ क्षतजं विसर्पमाह "बाह्यहेतोः क्षतात् क्रुद्धः सरक्तं पित्तमीरयन्। विसर्पं मारुतः कुर्यात् कुलत्थसदृशैश्चितम्। स्फोटैः शोथज्वररुजादाहाढ्यं श्यावशोणितम्"।

बाह्यहेतोः शस्त्रनखप्रहारव्याघ्रदन्तनखाद्यागन्तुहेतोः। श्या- वशोणितं कृष्णवर्णरक्तम्। उपद्रवानाह "ज्वरातिसारौ वमथुस्त्वङ्मांसदरणं क्लमः। अरोचकविपाकौ च विसर्पा- णामुपद्रवाः"। साध्यत्वादिकमाह "सिध्यन्ति वातकफ- पित्तकृता विसर्पाः सर्वात्मकः क्षतकृतश्च न सिद्धिमेति। पित्तात्मकोऽञ्जनवपुश्च भवेदसाध्यः कृच्छ्राश्च मर्मसु भवन्ति हि सर्व एव"।

विसर्पण न० वि+सृप-ल्युट्। प्रसारे अमरः।

विसल न० विस-कलच्। पल्लवे त्रिका०। [मरः स्त्रियां ङीप्।

विसार पु स्त्री० विसरति सर्पति वि+सृ-ण। मत्स्ये अ-

विसारिन् त्रि० वि+सृ-णिनि। १प्रसरणशीले २मत्स्ये पु० ३माषपर्ण्यां स्त्री राजनि० ङीप्।

विसिनी स्त्री विसानां समूहः तद्युक्तो देशो वा इनि। १पद्मसमूहे २पद्मलतायाञ्च ३मृणाले राजनि०।

विसूचिका स्त्री विशिष्टा सूचीव इवार्थे कन्। रोगभेदे तस्य निरुक्तिर्यथा "सूचीभिरिव गात्राणि तुदन् सन्ति- ष्ठतेऽनिलः। यस्याजीर्णेन सा वैद्यैर्विसूचीति निगद्यते। तस्य निदानमाह "न तां परिमिताहारा लभन्ते वि- दितागमाः। मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः। विदितागमा ज्ञातायुर्वेदाः। तस्या लक्षणमाह "मूर्च्छा- तिसारो वमथुः पिपासा शूलं भ्रमोद्वेष्टनजृम्भदाहाः। वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः"। उद्वेष्टनं हस्तपादयोः, शिरसोभेदः शिरः- शूलम्। तस्या उपद्रवानाह "निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता। अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः। अमी उपद्रवा घोराः अमी निद्रानाशा- दय उपद्रवाः सर्वेषामेव रोगाणां घोराः भयङ्कराः। विसूच्याः पञ्च दारुणाः विसूच्यास्तु पञ्चापि यदि स्युस्तदा दारुणाः प्राणभयङ्कराः। तस्या अरिष्टमाह "यः श्यावदन्तौष्ठनखोऽल्पसंज्ञश्छर्द्यर्दितोऽभ्यन्तरयातनेत्रः। क्षामस्वरः सर्वविमुक्तसन्धिर्यायान्नरः सोऽपुनरागमाय"। सर्वविमुक्तसन्धिः सर्वे विमुक्ताः शिथिलीभूताः सन्धयो यस्य सः" भावप्र०।

विसृत त्रि० वि+सृ-क्त। विस्तीर्णे अमरः। [स्त्रियां ङीप्।

विसृत्वर त्रि० वि+सृ-क्वरप्। प्रसरणशीले अमरः।

विसृमर त्रि० वि+सृ-क्मरच्। विसरणशीले अमरः।

विसृष्ट त्रि० वि+सृज-क्त। १प्रेरिते "रथवे विसृष्टः" इति रघुः। २विक्षिप्ते जटा० ३त्यक्ते च।

विस्त पु०न० विस-उत्सर्गे क्त नि० न इट्। १सुवर्णकर्षे २अ- शीतिरत्तिकापरिमाणे च अमरः।

विस्तर पु० वि+स्तॄ-अप्। १शब्दसमूहे अमरः। २वाक्यबहुत्वे ३विस्तारे ४प्रणये ५समूहे च। आधारे अप्। ६पीठे शब्दरत्ना०।

विस्तार पु० वि+स्तॄ-संज्ञायां कर्त्तरि घञ्। १विटपे भावे घञ्। २विस्तीर्णतायाम् समासवाक्यस्थे ३पदसमूहे च अमरः। ४स्तम्बे मेदि०।

विस्तीर्ण त्रि० वि+स्तॄ-क्त। १विपुले २विस्तारयुक्ते ३विशाले च जटा०। [शब्दच०।

विस्तीर्णपर्ण न० विस्तीर्णानि पर्णान्यस्य। मानके कन्दभेदे

विस्तृत त्रि० वि+स्तृ-क्त। विस्तारयुक्ते।

विस्फुलिङ्ग पु० विस्फुरति वि+स्फुर-ड तादृशं लिङ्ग- मस्य। १वह्निकणे २विषभेदे च हेमच०।

विस्फोट पु० विस्फोटयति वि+स्फुट-णिच्-अच्। (विस- फोड़ा) व्रणभेदे स्वार्थे क। स्फोटकभेदे "विस्फोटकभया- पहा" शीतलास्तोत्रम्। तद्रोगनिदानादि भावप्र० उक्तं यथा "तत्र विस्फोटस्य विप्रकृष्टं निदानपूर्विकां संप्राप्तिमाह "कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्षारैरजीर्णाध्यशनातपैश्च। तथर्तुदोषेण विपर्ययेण कुप्यन्ति दोषाः पवनादयस्तु। त्वचमाश्रित्य ते रक्तं मांसास्थीनि प्रदूष्य च। घोरान् कुर्वन्ति विस्फोटान् सर्वान् ज्वरपुरःसरान्"। ऋतुदोषेण ऋतुहेतुकशीतोष्णादीनामतियोगेन। विपर्ययेण ऋतु- चिताहारविहारवैपरीत्येन। त्वचमाश्रित्य त्वचि विस्फो- टान् कुर्वन्तीत्यर्थः। ज्वरपुरःसरान् ज्वरपूर्वान्। पूर्व- रूपमाह "अग्निदग्धा इव स्फोटाः सज्वरा रक्तपित्तजाः। क्वचित् सर्वत्र वा देहे विस्फोटा इति ते स्मृताः"। रक्तपित्तजाः एतेन सर्वेषु विस्फोटकेषु रक्तपित्तयोः प्र- धानकारणत्वम् यथा शूलेषु वातस्य, तथा वातानुगति- रपि बोद्धव्या। तथा च भोजः "यदा रक्तञ्च पित्तञ्च वातेनानुगतं त्वचि। अग्निदग्धनिभान् स्फोटान् कुरुतः सर्वदेहगान्"। अथ वातिकमाह "शिरोरुक्शूलभूयिष्ठं ज्वरतृट्पर्ववेदनम्। सकृष्णवर्णता चेति वातविस्फोट- लक्षणम्"। शूलं तोदरूपम्। अथ पैत्तिकमाह "ज्वर- दाहरुजापाकस्रावतृष्णासमन्वितम्। पीतलोहितवर्णञ्च पित्तविस्फोटलक्षणम्"। श्लैष्मिकमाह "छर्द्यरोचकजा- ड्यानि कण्डूकाठिन्यपाण्डुताः। यश्चारुक् च चिरात् पाकः स विस्फोटः कफात्मकः"। जाड्यम् जड़स्वभा-

नाम्। कफपैत्तिकमाह "कण्डूदाहो ज्वरश्छर्दिरेतैस्तु कफपैत्तिकः"। अथ वातपित्तजमाह "वातपित्तकृतोयस्तु तत्र स्यात्तीव्रवेदना"। वातश्लैष्मिकमाह "कण्डूः स्तैमित्यगुरुभिर्जानीयात् कफवातिकम्"। सान्निपातिकमाह "मध्ये निम्नोन्नतान्तश्च कठिनः स्वल्पपाकवान्। दाहरागतृषामोहच्छर्दिमूर्च्छारुजाज्वराः। प्रलापो वेपथुर्मूर्च्छा सोऽसाध्यश्च त्रिदोषजः"। मोहो विपरीतं ज्ञानम् मूर्च्छा सर्वथा ज्ञानशून्यता। रक्तजमाह "वेदितव्याश्च रक्तेन पैत्तिकेन च हेतुना। गुञ्जाफलसमा रक्ता रक्ताभा विद्राहिनः। न ते सिद्धिं समायान्ति सिद्धैर्योगशतैरपि"। पैत्तिकेन हेतुना पित्तस्य हेतुना कट्वादिना रक्तपित्तस्य तुल्यत्वात् सिद्धैर्योगशतैरपि ते सिद्धिं न च मायान्ति। विस्फोटकभेदानाह "एते चाष्टविधा वाह्या आन्तरोऽपि भवेदयम्। तन्निमग्नत्वं या तीव्रा ज्वर तृष्णाभिजायते। यस्मिन् वहिर्गते स्वास्थ्यं न धातव्य वहिर्गतिः। तत्र वातिकविस्फोटक्रिया कार्या विजानता" तस्योपद्रवानाह "तृट्श्वासमांससङ्कोचदाहहिक्कामदज्वराः। विसर्पमर्मसंरोधास्तेषामुक्ता उपद्रवाः"। मांससङ्कोचः मांसस्य गठितम्। मर्मसंरोधो मर्मव्यथा। तेषां विस्फोटानां केचिदुपद्रवाणां लक्षणान्तरं पठन्ति "हिक्काश्वासाऽरुचिस्तृष्णा साङ्गमर्दो हृदिव्यथा। विसर्पज्वरहृल्लासाः विस्फोटानामुपद्रवाः"। साध्यत्वादिकमाह "एकदोषोत्थितः साध्यः कृच्छ्रसाध्यो द्विदोषजः। सर्वरूपान्वितो घोरो ह्यसाध्यो भूर्युपद्रवः"। २गुल्मभेदे "स्फोटाः श्यावारुणाभासा विस्फोटास्तु तनुत्वचः" भावप्र०।

विस्मय पु० वि+स्मि—अच्। १आश्चर्ये अमरः। २अद्भुतस्थायिभावके रसभेदे सा०द०। "विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु। विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः" सा०द०। ३दर्पे मेदि०४सन्देहे शब्दर०। [अमरः।

विस्मयान्वित त्रि० ३त०। १विस्मययुक्ते २आश्चर्ययुक्ते च

विस्मापन पु० वि+स्मि—णिच्-अच-ल्युट् वा पुक् च ल्यु। १कुहके २कामदेवे च। ३गन्धर्वपुरे न० मेदि०। भावे विस्मापनमप्यत्र।

विस्मित पु० वि+स्मि—क्त। विस्मययुक्ते।

विस्मृत त्रि० वि+स्मृ—क्त। स्मरणाविषये अमरः।

विस्मृति स्त्री वि+स्मृ—क्तिन्। स्मरणाभावे।

विस्र न० विस—रक्। आमगन्धौ १चिताधूमादौ २अपक्वमांसगन्धे भरतः। ३आमगन्धे च

विस्रंस पु० वि+स्रन्स—भावे-घञ्। १पतने २स्खलने च।

विस्रगन्धा स्त्री विस्रो गन्धोऽस्याः। हपुषायाम् राजनि०।

विस्रगन्धि पु० विस्रस्येव गन्धोऽस्य इत्‌समा०। हरिताले हेमच०। [च अमरः।

विस्रम्भ पु० वि+स्रन्भ—घञ्। १विश्वासे २प्रणये ३परिचये

विस्रम्भिन् त्रि० वि+स्रन्भ—णिनि। १विश्वासयुक्ते २प्रणयिनि च।

विस्रसा स्त्री वि+स्रन्स—क। जरायाम् अमरः। [जनि०।

विस्रा स्त्री विस्रमामगन्धोऽस्त्यस्याः अच्। हपुषायाम् रा-

विहग पुंस्त्री० विहायसा गच्छति गम—ड नि०। १पक्षिणि अमरः स्त्रियां ङीप्। २वाणे ३सूर्य्ये ४चन्द्रे ५मेघे च पु० शब्दरत्ना०। ६ग्रहादौ पु० धरणिः।

विहङ्गम पुंस्त्री०विहायसा गच्छति गम—खच् नि०। पक्षिणि अमरः स्त्रियां ङीप्। २भारयष्टौ स्त्री (वाँक) शब्दच०।

विहङ्गराज पु० ६त०•टच् समा०। गरुडे हला० "विहङ्गराजाङ्गरुहैरिवायतैः" माघः। [१हिंसायाञ्च मेदि०।

विहनन न०विहन्यते वि+हन—ल्युट्। १तूलपिञ्जने २विघ्ने

विहर पु०वि+हृ—अप्। विहारे ल्युट्। विहरण तत्रैव न०।

विहसित न० वि+हस—क्त। मध्यमहास्ये अमरः।

विहस्त त्रि० विगतो हस्तो हस्तावलम्बनं यस्य। १व्याकुले अमरः। २पण्डिते मेदि० ३षण्ढे च पु० शब्दच०। प्रा० ६ब०। ४हस्तशून्ये त्रि०।

विहा अव्य० वि+हा—क्वा। स्वर्गे सि०कौ०।

विहापित न० वि+हा—णिच्-क्त। दाने अमरः।

विहायस् पु०न० वि+हा—असुन् नि० युक्। १आकाशे २पक्षिणि पु० अमरः। स्वार्थे अच्। विहायसमप्याकाशे न० खगे पु०। आदन्तमव्ययम् आकाशे हेमच०।

विहार पु० वि+हृ—घञ्। क्रीडार्थं पादाभ्यां १गमने अमरः २भ्रमणे ३स्कन्धे ४लीलायां ५बौद्धदेवालये मेदि० ६वैजन्ते च शब्दमा० ७बिन्दुरेखकखगे पुंस्त्री०शब्दच०।

विहित त्रि० वि+धा—क्त। १कृते विधिना २बोधिते च।

विहीन त्रि० वि+हा—क्त। १त्यक्ते २वर्जिते च।

विहृत न० वि+हृ—भावे क्त। १विहारे २स्त्रीणां चेष्टाभेदे हेमचन्द्रे "लीलाविलासो विच्छित्तिर्विब्बोकः किलकिञ्चितम्। मोट्टायितं कुट्टमितं ललितं विहृतं तथा। विभ्रमश्चेत्यलङ्काराः स्त्रीणां स्वाभाविका दश" विहृतमित्यत्र पाठः" सा०द० स्त्रीणां सात्त्विकस्वाभाविकालङ्कारमध्ये विकृतमित्येव पठितम् "वक्तव्यकालेऽप्य-

वचो ग्राह्या विरुतं मतमिति" कल्पितम् विरुतशब्दे ४८८१पृ० दर्शितेन उज्ज्वलमणिवाक्येन लक्षितविरुतस्य तुल्यार्थत्वात् अतस्तत्र विरुतमित्येव पाठो युक्तः।

विहेठन न० वि+हेठ-भावे ल्युट्। १हिंसायां २मर्दने ३विडम्बने मेदि० ४विबाधायां त्रिका०। [२विलोने च हेमच०।

विह्वल त्रि० वि+ह्वल-अच्। १भयादिना व्याकुले अमरः।

वी कान्तौ जनने च अक० गतौ व्याप्तौ क्षेपे भोजने च सक० अदा० पर० अनिट्। वेति अवैषीत्।

वीक पु० अज-कक् व्यादेशः। १वायौ २खगे च उज्ज्वल०। ३मनसि संक्षिप्तसा०। [४प्रकाशे च अमरः।

वी(वि)काश पु० वि+काश-घञ् वा दीर्घः। १रहसि

वीक्षण न० वि+ईक्ष-करणे ल्युट्। १नेत्रे। भावे ल्युट्। २दर्शने।

वीक्षा स्त्री वि+ईक्ष-अच्। १[illegible]। भावे अ। २गतिभेदे ३ज्ञाने ४आश्चर्यभेदे ५दृष्टौ च शब्दच०।

वीचि(ची) पुंस्त्री० वे-डीचि स्त्रीत्वे वा ङीप्। १तरङ्गे अमरः २अवकाशे ३सुखे मेदि०। ४अल्पे हेमच०। ५किरणे च जटाध०।

वीचितरङ्ग पु० वीचेरिव तरङ्गो यत्र। वीचितो यथा उत्तरोत्तरं तरङ्गजननमेवं स्वजन्यजन्यादिरूपेण प्रसारविषये न्यायभेदे न्यायशब्दे ४१६८पृ० दृश्यम्। [हेमच०।

वीचिमालिन् पु० वीचीनां मालाऽस्त्यस्य इनि। समुद्रे

वीज व्यजने अद० चुरा० उभय० सक० सेट्। वीजयति तं अवीवीजत्-त। "वीज्यते स हि संसुप्तः" इति कुमारः।

वीज न० वी-क्विप् जन-ड कर्म०। १कारणे २शुक्रे अमरः। ३अङ्कुरे ४तत्त्वावधाने मेदि०। ५मज्जनि राजनि०। ६अव्यक्तगणितभेदे "पूर्वं प्रोक्तं व्यक्तमव्यक्तवीजं प्रायः प्रश्ना नो विना व्यक्तयुक्त्या। ज्ञातुं शक्या मन्दधीभिर्नितान्तं यस्मात्तस्माद् वच्मि वीजक्रियाञ्च। ७मन्त्रभेदे तन्त्रसा०। "वीजन्ते मातरेतत् त्रिपुरहरवधु! त्रिः कृतं ये जपन्ति" कर्पूरस्तवः। ८धान्यादेः फलादौ च।

वीजक पु० वीजेन कायति कै-क। १मातुलुङ्गे जटा० २पीतसारे (विजयासार) भावप्र०।

वीजकृत् न० वीजं शुक्रवृद्धिं करोति कृ-क्विप्। माषी करणे राजनि०। [विराटके अमरः।

वीजकोश पु० वीजानां कोश इवाधारः। १वीजाधारे

वीजगर्भ पु० वीजानि गर्भे यस्य। पटोले राजनि०।

वीजगुप्ति स्त्री वीजानां गुप्तिर्यस्याः। शिम्बायाम् राजनि०।

वीजन न० वीज-भावे ल्युट्। १व्यजने। करणे ल्युट्। २चामरादौ ३वस्तुनि पु० ४चक्रवाके ५जीवञ्जीवविहगे च पुंस्त्री० सारस्वतः। स्त्रियां ङीप्।

वीजपादप पु० वीजप्रधानः पादपः। १भल्लातकवृक्षे राजनि० वीजजातः पादपः शा०त०। २वीजजाते वीजप्ररोहिवृक्षे च। [मेदि०।

वीजपुष्प न० वीजात् पुष्पं यस्य। १मरुवके २मदनवृक्षे च

वीजपूर पु० पूर्य्यते पूर+घञ् ३त०। (टावा लेवु) जम्बीरभेदे वीजपूर्णोऽप्यत्र।
"वीजपूरफलं स्वादु रसेऽम्लं दीपनं लघु। रक्तपित्तहरं कण्ठजिह्वाहृदयशोधकम्। श्वासकासारुचिहरं हृद्यं तृष्णाहरं स्मृतम्"। तद्भेदमधुकर्कटी गुणा यथा "वीजपूरोऽपरः प्रोक्तो मधुरा मधुकर्कटी। मधुकर्कटिका स्वाद्वी रोचनी शीतला गुरुः। रक्तपित्तक्षयश्वासकासहिक्काभ्रमापहा" भावप्र०।

वीजपर्णिका स्त्री वीजस्य शुक्रस्य पेशिकेव; अण्डकोषे राजनि०। [राजनि०।

वीजफलक पु० वीजानि फले यस्य कप्। वीजपूरे जम्बीरे

वीजमातृका स्त्री वीजानां मातेव इवार्थे कन्। पद्मवीजे हारा०।

वीजरत्न न० वीजं रत्नमिवास्य। माषकलाये हेमच०।

वीजरुह पु० वीजेन रोहति रुह-क। वीजमात्रजाते धान्यादौ "कुरण्टाद्या अग्रवीजा मूलजास्तूत्पलादयः। पर्वयोनय इक्ष्वाद्याः स्कन्धजाः शल्लकीमुखाः। शाल्यादयो वीजरुहाः संमूर्च्छजास्तृणादयः। स्युर्वनस्पतिकायस्य षडेते मूलजातयः" हेमच०।

वीजरेचन न० वीजं रेचयति रिच-णिच्-ल्यु। वीजेषु मध्ये रेचके जयपालवीजे राजनि०।

वीजवपन न० वीजानि उप्यन्तेऽत्र वप-आधारे ल्युट्। १क्षेत्रे। भावे ल्युट्। २वीजस्य उत्पादनार्थं क्षेत्रे वपने च। तद्दिनादि दीपिकायामुक्तं यथा "पूर्वाग्नियाम्यफणिपित्र्यविशाखभेषु रिक्ताष्टमीविगतचन्द्रतिथिं विहाय। हृत्स्वाङ्गनामीनमृदुदये चिक्रनाकिंचारे शशीन्दुयोगकरणेषु हलप्रवाहः। हलप्रवाहवदुवीजवपनस्य विधिः स्मृतः। चित्रायाश्च शुभे केन्द्रे स्थिरसंमतलोदये। हेमवारिविलिप्तस्य वीजस्योद्धरतः शुचिः। इस्ते चित्ते निधाय च स्वयं सुष्टिलयं वपेत्। ततः कान्योन्यप्रावृषाद्धे मत्तकोऽद्रुमाभवः। प्राङ्मुखः कलशं दद्यात् इमं मन्त्र

मुदीरयेत्। त्वं वै वसुन्धरे! सीते बहुपुष्पफलप्रदे। नमस्ते मे शुभं नित्यं कृषिं मेधां शुभे कुरु!। रोहन्तु सर्वशस्यानि काले देवः प्रवर्षतु। कर्षकास्तु भवन्त्वग्र्या धान्येन च धनेन च”। “उप्त्वा बीजन्तु तत्रैव भोक्तव्यं बान्धवैः सह”। पराशरः “वैशाखे वपनं श्रेष्ठं मध्यमं रोहिणीरवौ। अतः परस्मिन्नधम न जातु श्रावणे शुभम्”। स्वविषयेऽधिकं दृश्यम्। ज्योतिषे “पूर्वभाद्रपदामूलं रोहिण्युत्तरफल्गुनी। विशाखा शतभिषा चाथ धान्यादिरोपणे वरा। सदोत्था रजनी नीली पुत्रवित्तैर्वियुज्यते। स्वयंजाते पुनस्ते द्वे पालयन् नैव दुष्यति। आरामे गृहमध्ये वा मोहात् सर्षपमावपन्। पराभवं रिपुर्याति सत्वाधनधनक्षयम्। निशा नीली पलाशश्च चिञ्चा श्वेतापराजिता। कोविदारश्च सर्वत्र सर्वं निघ्नन्ति मङ्गलम्”। निशा हरिद्रा कोविदारको रक्तकाञ्चनः। “हेमाम्भसा हृतबीजं स्नातो मन्त्रेण रोपयेत्। वसुधेति च शीतेति पुण्यदेति धरेति च। नमस्ते शुभगे! नित्यं द्रुमोऽयं वर्द्धतामिति” ज्यो॰त॰ “एतेषु श्रुतिवारुणादितिविशाखोडूनि भौमं विना बीजोप्तिर्गदिता शुभा शशुभतोऽष्टाग्नीन्दुरामेन्दवः। रामेन्द्वग्नियुगान्यसच्छुभकरार्ण्युप्तौ फलेऽर्कोज्झिता-द्राहोर्भात् नवाष्टभानि मुनिभिः प्रोक्तान्यसत् सन्ति च” मु॰चि॰। “एतेष्विति। श्रुतिः श्रवणः वारुणं शतता-रका अदितिः पुनर्वसुः विशाखा प्रसिद्धा एतैरुडुभिर्नक्षत्रैर्विनैतेषु पूर्वोक्तनक्षत्रेषु मूलमघानुराधाज्येष्ठाश्रवणधनिष्ठास्वातीषु पञ्चदशनक्षत्रेषु बीजोप्तिर्बीजवपनं शुभम्। उक्तञ्च रत्नमालायाम् “हस्ताश्विपुष्योत्तररोहिणीषु चित्रानुराधामृगरेवतीषु। स्वातौ धनिष्ठासु मघासु मूले बीजोप्तिरुत्कृष्टफलप्रदिष्टा”। वसिष्ठेनाप्येतावन्त्येव नक्षत्राण्युक्तानि “धातृद्वये कौणपपैत्रपुष्ये हस्तत्रये त्र्युत्तरमैत्रभेषु। पौष्णे धनिष्ठाद्वयवारुणीभे बीजोप्तिरुत्कृष्टफलप्रदा स्यादिति”। कौणपो मूलं नारदेनाप्युक्तानि “मृदुध्रुवक्षिप्रभेषु पितृवायुवसूडुषु। समूलभेषु बीजोप्तिरत्युत्कृष्टफलप्रदा”। कश्यपेनापि “वसुवायुभनैरृत्यक्षिप्रध्रुवमृदूडुषु। सौम्यं स्वात्यथ बीजोप्तिरत्युत्कृष्टफलप्रदा”। अत्र मघा नोक्ता। अथ भौमो मङ्गलवारो निषिद्धः अर्थात् सूर्यचन्द्रबुधगुरुशुक्रशनीनां वारेषु बीजोप्तिः शुभा। अत्र विनाभागे द्वितीया दामेन्दुश्रुतिशारदभेषु कुजे बीजोप्तिरपेक्षारतस्त्व-उक्तत्वात् नेष्टा कृषिरित्यतो नकारोऽत्रानुवर्त्तते तेन बीजोप्तिर्नेष्टेत्यर्थः। अत्र कालविशेषनिषेधो राजमार्त्तण्डे “रवौ रौद्राद्यपादस्थे भूमेः संजायते रजः। तस्माद्दिनत्रयं तत्र बीजवापं परित्यजेत्” इति। अथ बीजोप्तौ फणिचक्रमुच्यते। अशुभतो न विद्यन्ते गावः किरणा यस्यासावगुः यस्य स्वरूपाभावः तस्य कुत्सिता किरणाः तादृशोऽगू राहुस्तस्य भं नक्षत्रं तस्मादित्यर्थः। राह्वधिष्ठितनक्षत्रादष्टौ भानि असदशोभनानि ततस्त्रीणि शुभानि तत एकमशुभं ततस्त्रीणि शुभानि ततोऽप्येकमशुभं ततस्त्रीणि शुभानि ततोऽप्येकमशुभं ततस्त्रीणि शुभानि ततश्चत्वार्यशुभानि। एवं बीजोप्तौ सप्तविंशतिनक्षत्राणां शुभाशुभत्वमुक्तं उक्तञ्च नारदेन “भवेद्भत्रितयं मूर्ध्नि धान्यनाशाय राहुभात्। गले त्रयं कज्जलाय वृद्धौ द्वादश चोदरे। निस्तण्डुलत्वं लाङ्गूले भचतुष्टयमीरितम्। नाभौ बहिःपञ्चके स्यादुर्बीजोप्ताविति चिन्तयेदिति। राहुर्यस्मिन् ऋक्षेऽस्ति तस्मान्नक्षत्रत्रयं मूर्ध्नि मस्तके स्थाप्यं धान्यनाशकरं भवति। ततस्त्रयं गले स्थाप्यं कज्जलाय श्यामिकासंपादकं स्यात्। ततो द्वादश भानि बहिर्नक्षत्ररहितानि उदरे स्थाप्यानि तानि धान्यवृद्धये स्युः ततो नक्षत्रचतुष्टयं पुच्छे निस्तण्डुलत्वकरं स्यात् ततोऽवशिष्टं बहिर्नक्षत्रपञ्चकं धान्यनाशकरं स्यात्। रत्नमालायामपि “मूर्ध्नि त्रीणि गले त्रयं च जठरे धिष्ण्यानि च द्वादश स्यात् पुच्छे च चतुष्टयं बहिरतो भानां स्थितं पञ्चकम्। इत्थं कज्जलमद्र-हविरधिकानिस्तण्डुलत्वं क्रमात् प्रादीतिप्रभवं भयं च फणिभाद्बीजोप्तिकाले स्फुटम्” इति। अत्र केचित् फणिभात् सूर्यनक्षत्रादिति व्याचख्युस्तत्र युक्तिः “सूर्यभादुरगः स्थाप्यः” इति स्वरोदयवाक्यैकवाक्यभावात्। तत्र नारदवाक्ये साक्षाद्राहुभादित्युक्तत्वात् “राहुधिष्ण्यात् समारभ्य धिष्ण्येष्वष्टसु निष्फलमिति” कश्यपोक्तेश्च। “सूर्यभादुरगः स्थाप्यः” इति तु स्वरोदयवचनं देशभेदव्यवस्थितम्। बीजवापने लग्नशुद्धिमाह वसिष्ठः “भवरिपुसहजे पापैस्त्रिकोणकेन्द्रस्थितैश्च शुभैः। कथितेषु च धिष्ण्येष्वपि शुभलग्ने बीजवापनं कार्यमिति” पी॰धा॰।

बीजतुच्छ पु॰ बीजमात्रादुत्पन्नो वृक्षः। वटनरट्ठे राजनि॰।

बीजसञ्चय पु॰ बीजानां वपनयोग्यधान्यादीनां सञ्चयः सं-चहः सम्+चि—अच्। वपनयोग्यधान्यादिसंचये।

"कृत्तिकाविशाखादितिस्वातिरेवत्यां श्रवणद्वये । स्थिरे लग्ने गुरौ शुक्रे वीजं धार्य्यं स्तनापरं । माघे वा फाल्गुने वापि सर्वबीजानि सञ्चयेत् । शोषयेत्तापयेद्रौद्रे रात्रौ चापि निधापयेत् । ततश्च पुटिकां बद्ध्वा शोषयेच्च पुनःपुनः । स्थापयेच्च प्रयत्नेन यथा भूमिस्तु न स्पृशेत् । दीपाग्निना च संस्पृष्टं वन्ध्या चोपहतञ्च यत् । वर्ज्जनीयं तथा वीजं यत् स्यात् कीटसमन्वितम्" ज्यो० त० ।

वीजसू पु० वीजं सूते सू-क्विप् । पृथिव्याम् हेमच० ।

वीजस्थापन ६त० । धान्यादिस्थापने तन्मुहूर्त्तादिकं ज्यो० त० उक्तम् "याम्याग्निरुद्राहिविशाखपूर्वमाहेन्द्रमित्रेतरभैः शुभाहे । धान्यादिसंस्थापनमेव शस्तं चरागस्थिरद्व्यङ्गलग्नोदयेषु । सौम्यादितिमघाश्लेषानुराधोत्तरेषु च कारयेत् । मीने लग्ने शुभे चन्द्रे निधने क्रूरवर्जिते । वेष्टव्यं कोष्ठके धान्यं गर्गो वदति सर्वदा" ।

वीजाकृत त्रि० वीजेन सह कृष्टम् डाच्+कृ-क्त । वीजेन सह कृष्टे क्षेत्रे ।

वीजाम्ल न० वीजेनाम्लमिव । वृक्षाम्ले राजनि० ।

वीजिन् पु० वीजमस्त्यस्य इनि । १उत्पादके पितरि हेमच० २वीजविशिष्टे त्रि० स्त्रियां ङीप् । [त्रिका० ।

वीजोदक न० वीजमिव कठिनत्वादुदकं यत्र । करकायां

वीज्य त्रि० विजेषु रज्यः वि+यज-क्यप् वा । कुलीने अमरः

वीटि(टी) स्त्री वि+इट-इन् वा ङीप् । (पानेर वीड़ा) सज्जिततामूले । स्वार्थे क । वीटिका तत्रैव । "कञ्चुलिकाग्रन्थौ च "तद्वीटिकासंस्पृशि" सा० द० ।

वीणा स्त्री अज-नक् वीभावः पृषो० णत्वम् । स्वनामख्याते वाद्यभेदे अमरः । वाद्यशब्दे दृश्यम् । २विद्युति मेदि० ।

वीणादण्ड पु० ६त० । वीणायाः स्थितालाबूपरिस्थे काष्ठदण्डे अमरः । [वादके अमरः ।

वीणावाद त्रि० वीणां वादयति वद-णिच्-अण् । वीणा-

वीत न० वि-इण्-क्त । १युद्धासमर्थे हस्त्यश्वादिसैन्ये अमरः २अङ्कुशकर्मणि मेदि० । ३न्यायादुक्ते अनुमानभेदे च । अवीतशब्दे ४६९ पृ० दृश्यम् । ४शान्ते ५गते च त्रि० हेमच० ।

वीतंस पु० वि+तनस्-घञ् दीर्घः । १मृगपक्षिणां बन्धोपकरणे दामसन्ततौ अमरः । २तेषां विहारवेष्टनावरणे मेदि० ।

वीतन पुं० वीतं गतं तनोति तन-अच् पृषो० दीर्घः । कण्ठपार्श्वद्वये "कृकाटिका कन्धरा मध्यं कण्ठपार्श्वौ तु वीतनौ" हेमच० ।

वीतशोक पु० पु० वीतः विगतः शोको यस्मात् यस्य वा । १अशोकवृक्षे शब्दच० । २शोकहीने त्रि० ।

वीति स्त्री वी-क्तिन् । १गतौ २दीप्तौ ३भोजने ४प्रजनने ५धारणे च मेदि० ।

वीतिहोत्र पु० वीतये पुरोडाशादिभक्षणाय हूयन्ते देवा अत्र हु-आधारे त्रल् । १वह्नौ अमरः २सूर्य्ये मेदि० ।

वीथि(थी) स्त्री विथ-इन् वा ङीप् । १पङ्क्तौ २श्रेण्यां ३गृहाङ्गे ४वर्त्मनि ५दृश्यकाव्यभेदे च मेदि० ।

तल्लक्षणादि सा० द० ६प० उक्तं यथा "वीथ्यामेको भवेदङ्कः कश्चिदेकोऽत्र कल्प्यते । आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितः । सूचयेद् भूरिशृङ्गारं किञ्चिदन्यान् रसानपि । मुखनिर्वहणे सन्धी अर्थप्रकृतयोऽखिलाः" । कश्चिदित्युत्तमो मध्यमोऽधमो वा । शृङ्गारबहुलत्वाच्चास्याः कैशिकीवृत्तिबहुलत्वम् । "अस्यास्त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः । उद्घात्यकावलगिते प्रपञ्चस्त्रिगतं छलम् । वाक्केल्यधिबले गण्डमवस्यन्दितनालिके । असत्प्रलापव्याहारमृदवानि च तानि तु" । तत्रोद्घात्यकावलगिते प्रस्तावनाप्रस्तावे सोदाहरणं लक्षिते "मिथो वाक्यमसद्भूतं प्रपञ्चो हास्यकृन्मतः" । यथा विक्रमोर्वश्याम् । वल्लभीस्थविदूषकचेट्योरन्योन्यवचनम् "त्रिगतं स्फोटनेकार्थयोजनं श्रुतिसाम्यतः" । यथा तत्रैव राजा "सर्वक्षितिभृतां नाथ ! दृष्टा सर्वाङ्गसुन्दरी । रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया" । नेपथ्ये तत्रैव प्रतिशब्दः । राजा कथं दृष्टेत्याह । अत्र प्रश्नवाक्यमेवोत्तरत्वेन योजितम् "नटादित्रितयविषयमेवेदमिति" कश्चित् "प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य छलनाच्छलम्" यथा वेण्यां "भीमार्जुनौ" "कर्त्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रम् । कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः कास्ते दुर्य्योधनोऽसौ कथयत न रुषा द्रष्टुमभ्यागतौ स्वः" "अन्ये त्वाहुश्छलं किञ्चित् कार्य्यमुद्दिश्य कस्यचित् । उदीर्य्यते यद्वचनं वञ्चनाहास्यरोषकृत्" । "वाक्केलिर्द्वित्रिसम्बन्धो द्वित्रिप्रत्युक्तितो भवेत्" । द्वित्र्युपलक्षणं यथा "भिक्षो ! मांसनिषेवणं प्रकुरुषे किं तेन मद्यं विना मद्यञ्चापि तव प्रियं प्रियमहो वाराङ्गनाभिः सह । वेश्याप्यर्थरुचिः कुतस्तव धनं द्यूतेन चौर्य्येण वा चौर्य्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य

कान्ता गतिः"। "केचित् प्रक्रान्तवाक्यस्य साकाङ्क्षस्यैव निर्वृत्तिर्नालिरित्याहुः"। अन्ये च "अनेकस्य प्रश्नस्यैकमुत्तरम्"। "अन्यान्यवाक्याधिक्योक्तिः स्पर्द्धयाधिबलं मतम्"। यथा मम प्रभावत्यां वज्रनाभः "अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया। लीलयोन्मूलयिष्यामि भुवनद्वयमद्य वः"। प्रद्युम्नः। अरेरे असुरापसद! कृतमनुना बहुप्रलापेन मम खलु "अद्य प्रचण्डभुजदण्डसमर्पितोरुकोदण्डनिर्गलितकाण्डसमूहपातैः। आस्तां समस्तदितिजक्षतजोक्षितेयं क्षोणिः क्षणेन पिशिताशनलोभनीया"। "गण्डं प्रस्तुतसम्बन्धिभिन्नार्थं सत्वरं वचः"। यथा वेण्यां "राजा" अध्यासितुं तव चिराज्जघनस्थलस्य पर्याप्तमेव करभोरु! ममोरुयुग्मम्"। अनन्तरं प्रविश्य कञ्चुकी। "देव भग्नं भग्नमित्यादि"। अत्र रथकेतनभङ्गार्थं वचनमूरुभङ्गार्थे सम्बन्धे सम्बद्धम्। "व्याख्यानं स्वरसोक्तस्यान्यथावस्यन्दितं भवेत्"। यथा छलितरामे सीता। जाद काल्लं क्खु अओज्झाए गन्तव्वं तहिं सो राआ विणएण पणमिदव्वो। लवः। अथ किमावाभ्यां राजोपजीविभ्यां भवितव्यं। सीता। जाद सो तुह्माणं पिदा। लवः। किमावयोः रघुपतिः पिता। सीता। सासङ्कं मा अण्णधा संकध ण क्खु तुह्माणं सअलाए ज्जेव पुहवीए त्ति"। "प्रहेलिकैव हास्येन युक्ता भवति नालिका"। संवरणकार्य्युत्तरं प्रहेलिका। यथा रत्नावल्यां "सुसङ्गता "सहि जस्स कदे तुमं। सं चित्तफलअस्स"। अत्र त्वं रसः कृते आगतेत्यर्थः संवृतः। "असत्प्रलापो यद्वाक्यमसम्बद्धं तथोत्तरम्। अगृह्णतोऽपि मूर्खस्य पुरो यच्च हितं वचः"। तत्राद्यं यथा मम प्रभावत्याम् प्रद्युम्नः सहकारवल्लीमवलोक्य सानन्दम्" अहो सा कथमिहैव। "अलिकुलमञ्जुलकेशी परिमलबहुला रसावहा तन्वी। किसलयपेशलपाणिः कोकिलकलभाषिणी प्रियतमा मे"। एवमसम्बद्धोत्तरेऽपि। तृतीयं यथा वेण्यां दुर्योधनं प्रति गान्धारीवाक्यम्। "व्याहारो यत्परस्यार्थे हास्यक्षोभकरं वचः"। यथा मालविकाग्निमित्रे। लास्यप्रयोगावसाने मालविका निर्गन्तुमिच्छति। "विदूषकः। मा दाव उवदेससुद्धा गमिस्ससि इत्युपक्रमे गणदासः। विदूषकं प्रति आर्य्य! उच्यतां यस्त्वया क्रमभेदो लक्षितः। विदूषकः। पढमं बम्हणपूआ भोदि सा इमाए लङ्घिदा। मालविका

"स्मरते" (तव इति पाठान्तरम्) इत्यादिना नायकस्य विदूषकनायिकादर्शनप्रयुक्तेन हास्यलोभकारिणा वचसा व्याहारः। "दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत्"। क्रमेण यथा "प्रियजीवितता क्रौर्य्यं निःस्नेहत्वं कृतघ्नता। भूयस्तद्दर्शनादेव ममैते गुणतां गताः। तस्यास्तद्रूपसौन्दर्य्यं भूषितं यौवनश्रिया। सुखैकायतनं जातं दुःखायैव ममाधुना"। इति चाङ्गानि नाटकादिषु सम्भवन्त्यपि वीथ्यामवश्यं विधेयानि। विस्पष्टतया नाटकादिषु विनिविष्टान्यपीहोदाहृतानि नानारसानाञ्चात्र मालारूपतया स्थितत्वाद्वीथीयम्" सा० द० ६प०।

वीथ्यङ्ग पु० वीथ्या इवाङ्गमस्य। १दृश्यकाव्यभेदे। हेम०। २तदङ्गे वीथिशब्दे दृश्यम्। [संक्षिप्तसा०।

वीध्र त्रि० वि–इन्ध–रक्। १निर्मले २नभसि ३वायौ ४वह्नौ

वीनाह पु० वि–नह घञ् दीर्घः। कूपादिमुखबन्धनसाधने (पाट) ख्याते पदार्थे अमरः।

वीप्सा स्त्री वि+आप–सन्–अच् ईत्–अ अभ्यासलोपश्च। व्याप्तौ

वीव्र शौर्य्ये अद० चु० आत्म० अक० सेट्। वीवयते अविवीवत।

वीभ शौर्य्यच्छेदके वधमे विकत्थने च भ्वा० आत्म० अक० सेट्। ऋदित् चङि न ह्रस्वः। वीभते अवीभिष्ट।

वीर न० वीर–अच्। १शृङ्गिणि २नडे मेदि० ३मरिचे ४पद्म-मूले ५काञ्जिके ६उशीरे ७आर्द्रके राजनि०। ८शौर्य्यविशिष्टे शूरे त्रि० अमरः। ९जिने १०नटे पु० हेमच०। ११विष्णौ पु० विष्णुस०। तन्त्रोक्ते १२कुलाचाररते त्रि० कुलाचारशब्दे पु० दृश्यम्। १३तण्डुलीये १४वराहकन्दे १५लताकरञ्जे १६करवीरे १७अर्जुने पु० राजनि०। १८यज्ञाग्नौ भरतः धीरहा। १९उत्तरे २०सुभटे च मेदि०। २१श्रेष्ठे त्रि० हेमच०। २२पत्यौ २३पुत्रे च "अवीरा निष्पति सुता" अमरः। २४रसभेदे "उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः। महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः। आलम्बनविभावास्तु विजेतव्यादयो मताः। विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः। अनुभावास्तु तत्र स्युः सहायान्वेषणादयः। सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः। स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्द्धा स्यात्"। स च वीरः। दानवीरो धर्मवीरो दयावीरो युद्धवीरश्चेति चतुर्विधः" सा० द० ३प०।

वीरक पु० वि+ईर–ण्वुल्। करवीरे राजनि०।

वीरण न० वि+ईर–ल्यु। उशीर (वेणारमूल) शब्दच०।

वीरतर न॰ वि+ईर–अच् तत॰, वीर+श्रा तरप्। १वीरणे अमरः। २शूरतरे च।

वीरतरु पु॰ वि+ईर–अच् कर्म॰। १अर्जुनवृक्षे अमरः। २कोकिलाक्षे ३भल्लातके (भेला) ४विल्वभेदे च राजनि॰ वीरवृक्षादयोऽप्यत्र।

वीरपत्नी स्त्री वीरः पतिर्यस्याः वा नुक् ङीप् च। वीरभार्य्यायाम् अमरः। पक्षे वीरपति तत्रार्थे।

वीरपत्रा स्त्री वीरयति वीर–अच् तथाभूतं पत्रं यस्याः। विजयायाम् भङ्गे राजनि॰।

वीरपान(ण) न॰ वीराणां पानं वा णत्वम्। युद्धाय युद्धखेदापनुत्तये वा सुरापानादौ अमरः।

वीरभद्र पु॰ वीरो भद्रोऽस्य। १अश्वमेधीयेऽश्वे २वीरेषु भद्रे ३वीरणे मेदि॰। ४शिवगणभेदे तदुत्पत्तिकथा काशीख॰ ८९ अ॰। "महावीरोऽपि रे भद्र! मम सर्वगणेष्विह। वीरभद्राख्यया हि त्वं प्रथितिं परमां व्रज। कुरु मे सत्वरं कर्म दक्षयज्ञक्षयं नय"। स्वार्थे क। वीरभद्रक वीरणे जटा॰।

वीरभार्य्या स्त्री ६त॰। वीरपत्न्याम् अमरः।

वीरमातृ स्त्री ६त॰। वीरस्य जनन्याम् अमरः।

वीररजस् न॰ वीर इव रजः रक्तत्वात्। सिन्दूरे राजनि॰।

वीररेणु पु॰ वीरयति वीरो रेणुर्विमर्दनं यस्य। भीमसेने त्रिका॰।

वीरवत् त्रि॰ वीरोऽस्त्यस्य मतुप् मस्य वः। १वीरयुते स्त्रियां ङीप्। "वीरवती न भूमिः" भट्टिः। सा च २मांसरोहिण्यां भावप्र॰।

वीरवत्सा स्त्री वीरो वत्सो यस्याः। वीरमातरि जटा॰।

वीरबाहु पु॰ विष्णौ विष्णुस॰।

वीरविप्लावक पु॰ "वीरविप्लावको यज्वन् धनैः शूद्रसमाहृतैः" हेमच॰ उक्ते शूद्रगृहीतधनेन होमकर्त्तरि।

वीरवृक्ष पु॰ नित्यकर्म॰। १भल्लातकवृक्षे अमरः। २अर्जुनवृक्षे हेमच॰ ३विल्वभेदे। राजनि॰ (देधान) ४धान्यभेदे रत्नमाला।

वीरसू स्त्री वीरं सूते सू+क्विप्। वीरमातरि अमरः।

वीरसेन पु॰ वीरा सेना यस्य। १नलराजजनके नृपभेदे भा॰ व॰ ५२ अ॰। २आरुकवृक्षे न॰ राजनि॰।

वीरहन् पु॰ वीरयति शौर्य्यान्वितं करोति वीर+णिच् अच्। वीरो यज्ञाग्निस्तं हतवान् हन–क्विप्। नष्टाग्नौ द्विजे अमरः। २विष्णौ विष्णुस॰।

वीरा स्त्री वि+ईर–अच्, वीर–अच् वा वीर+अस्त्यर्थे अच् वा। १सुरानामगन्धद्रव्ये २क्षीरकाकोल्याम् ३आमलक्याम् ४एलबालुकायां ५पतिपुत्रवत्यां स्त्रियां ६रम्भायां ७विदार्य्याम् ८दुग्धिकायाम् ९क्षीरविदार्य्यां १०मत्स्यां मेदि॰। ११काकोल्यां १२महाशतावर्य्यां १३घृतकुमार्य्याम् १४ब्राह्म्याम् १५अतिविषायां १६मदिरायाञ्च राजनि॰। १७शिंशपावृक्षे (शिशु) रत्नमा॰।

वीराल्ल पु॰ वीरयति शौर्य्यान्वितं करोति वीर+णिच्–अच् कर्म॰। दक्षरेतसि राजनि॰। [भयङ्करे युद्धक्षेत्रे अमरः।

वीराशंसन न॰ वीरैराशस्यतेऽत्र आ+शन्स–आधारे ल्युट्।

वीरासन न॰ वीरस्येवासनम् "एकपादमथैकस्मिन् विन्यस्योरुसंस्थितम्। इतरस्मिन् तथा पश्चात् वीरासनमितीरितम्" इत्युक्ते आसनभेदे तन्त्रम्। २भित्त्याद्यनवलम्बनेन स्थितौ "रात्रौ वीरासनं वसेत्" मनुव्या॰ कुल्लू॰।

वीरुध्(धा) स्त्री वि+रुध–क्विप् दीर्घः वा टाप्। विस्तृतायां लतायाम् अमरः।

वीरेश्वर त्रि॰ ६त॰। १वीरपतौ काशीस्थे २शिवलिङ्गभेदे पु॰ तदाविर्भावकथा काशीख॰ ८२ अ॰ दृश्या।

वीरोज्झ पु॰ वीरो यज्ञाग्निस्तमुज्झति यथाकालमननुष्ठानेन उज्झ–अण्। प्रातःसायं होमाकर्त्तरि हेमच॰।

वीरोपजीविक पु॰ वीरः यज्ञाग्निस्तत्साध्यमग्निहोत्रादि उपजीविका यस्य। दम्भार्थमग्निहोत्रानुष्ठायिनि हेमच॰

वीर्य्य न॰ वीर–यत्, वीरस्य भावो यत् वा। १देहस्थे चरमधातौ शुक्रे २पराक्रमे ३बले ४प्रभावे अमरः। ५तेजसि मेदि॰ ६दीप्तौ ७द्रव्यनिष्ठे रसविपाकादि शक्तिरूपे प्रभावभेदे सुश्रुतः "वीर्य्यं प्रधा॰ नमिति कस्मात्तदग्रेनौषधकर्मनिष्पत्तेः। इहौषधकर्माण्यूर्द्ध्वाधोभागोभयभागसंशोधनसंशमनसंग्राहकाग्निदीपनप्रपीडनलेखनवृंहणरसायनवाजीकरणश्वयथुकरणविलयनदहनदारणमादनप्राणघ्नविषप्रशमनानि वीर्य्य॰ प्राधान्याद्भवन्ति। तच्च वीर्य्यं द्विविधमुष्णं शीतं चाग्नीषोमीयत्वाज्जगतः। केचिदष्टविधमाहुरुष्णं शीतं स्निग्धं रूक्षं विशदं पिच्छिलं मृदु तीक्ष्णं चेत्येतानि वीर्य्याणि स्वबलगुणोत्कर्षादूसमभिभूयात्मकर्म कुर्वन्ति यथा तावन्महत् पञ्चमूलं कषायं तिक्तानुरसं वातं शमयेदुष्णवीर्य्यत्वात् तथा कुलत्थः कषायकटुकत्वात्, पलाण्डुः स्नेहभावाच्च मधुरश्चेक्षुरसो वातं वर्द्धयति शीतवीर्य्यत्वात्। कटुका पिप्पली पित्तं शमयति मृदुशीतवीर्य्यत्वादम्लभाव॰

मत्स्यकं लवणं सैन्धवञ्च । तिक्ता काकमाची पित्तं वर्द्धय-त्युष्णवीर्य्यत्वान्मधुरा मत्स्याश्च । कटुकं मूलकं श्लेष्माणं वर्द्धयति स्निग्धवीर्य्यत्वात् । अम्लं कपित्थं श्लेष्माणं शमयति रूक्षवीर्य्यत्वान्मधुरं क्षौद्रञ्च । तदेतन्निदर्शनमा-त्रमुक्तम् । भवन्ति चात्र ये रसा वातशमना भवन्ति यदि तेषु वै । रौक्ष्यलाघवशैत्यानि न ते हन्युः समीर-णम् । ये रसाः पित्तशमना भवन्ति यदि तेषु वै । तै-क्ष्ण्योष्ण्यलघुताश्चैव न ते तत्कर्म्मकारिणः । ये रसाः श्लेष्मशमना भवन्ति यदि तेषु वै । स्नेहगौरवशैत्यानि बलासं वर्द्धयन्ति ते" । "तस्माद्वीर्य्यं प्रधानमिति" । द्रव्यगतवीर्य्यं रसाद्यनुगुणशक्तिविशेषरूपम् तच्च चि-न्त्याचिन्त्यक्रियाहेतुत्वेन द्विविधम् । तत्र चिन्त्यक्रिया-हेतुः प्रभावापरपर्य्यायो द्रव्याणां रसाद्यननुरूपकार्य्य-करणशक्तिः यथोक्तं "भूतप्रभावातिशयो द्रव्ये पाके रसे स्थितः । चिन्त्याचिन्त्यक्रियाहेतुर्वीर्य्यं धन्वन्तरेर्मतम्" शब्दर० । भावप्र० वीर्य्यप्रभावयोर्भेद उक्तो यथा "द्रव्ये रसो गुणो वीर्य्यं विपाकः शक्तिरेव च । प-दार्थाः पञ्च तिष्ठन्ति स्वं स्वं कुर्वन्ति कर्म्म च" इति सामान्यतः द्रव्यगतान् पञ्च पदार्थानुक्त्वा रसगुणानुक्त्वा च "उष्णशीतगुणोत्कर्षात् बुधैर्वीर्य्यं द्विधा स्मृतम् । यत् सर्व्वमग्निषोमीयं दृश्यते भुवनत्रयम्" वाग्भट्टोक्तिमुक्त्वा च "विपाकञ्च दर्शयित्वा प्रभावो कथितो यथा "रसादि-साम्ये यत्कर्म्म विशिष्टं तत्प्रभावजम् । दन्ती रसाद्यैस्तु-ल्यापि चित्रकस्य विरेचनी । मधूकस्य च मृद्वीका घृतं क्षीरस्य दीपनम् । प्रभावस्तु यथा धात्री लकुचस्य रसादिभिः । समापि कुरुते दोषत्रितयस्य विनाशनम् । क्वचित्तु केवलं द्रव्यं कर्म्म कुर्य्यात् प्रभावतः । ज्वरं हन्ति शिरोबद्धा सहदेवीजटा यथा" । तथा नानौषधियोगे ऽत्र प्रति क्षणात् गवान्नपायो न तु तत्र रसादिहे-तुविचारः कर्त्तव्यः यत आह सुश्रुतः "अमी सामान्य-चिन्त्यानि प्रसिद्धानि स्वभावतः । आगमेनोपयोज्यानि भेषजानि विचक्षणैः । प्रत्यक्षलक्षणफलाः प्रसिद्धाश्च स्व-भावतः । नौषधीर्हेतुभिर्विद्वान् परीक्षेत कदाचन । विरुद्धगुणसंयोगे भूयसाल्पं हि जीयते । रसं विपाकस्तौ वीर्य्यं प्रभावस्तान् व्यपोहति" इत्यन्तेन रसगुणवीर्य्य-विपाकवीर्य्यप्रभावस्वरूपाण्युक्तानि । अतस्तयोर्भेदो युक्तः ।

वीर्य्यवत् त्रि० वीर्य्यमस्त्यस्य मतुप् मस्य वः । १बलवति प्र-ल्पच० २वीर्य्ययुक्ते च "वीर्य्यवन्त्यौषधानीव" कुमारः ।

वीहार पु० विह्रियतेऽत्र वि+हृ-आधारे घञ् दीर्घः । १बुद्ध-मन्दिरे शब्दच० ।

वुग योगे भ्वा०पर०सक०सेट् इदित् । वुङ्गति अवुङ्गीत् ।

वुट वधे चुरा०उभ०सक०सेट् इदित् । वुण्टयति अवुवुण्टत् त

वृ आवरणे चु० उभ०सक० सेट् । वारयति ते अवीवरत् त ।

वृ सेवायां क्र्या०आ०सक०सेट् । वृणीते "वृणते हि विमृश्य-कारिणम्" किरा० । अवरीष्ट अवरिष्ट अवृत ।

वृ वरणे भ्वा०उभ०सक०सेट् । वरति ते अवारीत् अवरि(री)ष्ट

वृ वरणे स्वादि० क्र्या० च उभ०सक० सेट् । वृणोति वृणुते वृणाति वृणीते अवारीत् अवारिष्ट अवरीष्ट अवृत ।

वृंहित न० वृहि-क्त । करिगर्जने अमरः ।

वृक आदाने भ्वा०आत्म०सक० सेट् । वर्कते अवर्किष्ट ।

वृक पु० वृक-क । १कुक्कुराकारे हरिणघातके व्याघ्रभेदे । (घोग) २काके उणादि० । ३बकवृक्षे शब्दच० । ४शृगाले हारा० । ५क्षत्रिये पुंस्त्री० ६अनेकद्रव्यजन्ये धूपे ७सरल-द्रवे रत्नमा० उदरस्थे ८वह्निभेदे वृकोदरः । ९अम्बष्ठायां स्त्री वा गौरा० ङीष् । वर्णेन जातौ स्त्रियां ङीष् ।

वृकदंश पुंस्त्री० वृकं दशति दन्श-अच् । १कुक्कुरे हेमच० । स्त्रियां ङीष् ।

वृकधूप पु० वृक्यते वृक-घञर्थे क कर्म० । नानाद्रव्यमिश्रिते दशाङ्गादौ धूपे अमरः । २सरलद्रवे च(टारपिन्)अमरः

वृकधूर्त्त पुंस्त्री० वृक इव धूर्त्तः । शृगाले हारा० स्त्रियां ङीष् । [त्रिवृति (तेओड़ि) रत्नमा० ।

वृकाक्षी पु० वृकस्येवाक्षि पुष्पमस्य षच् समा० ङीष् ।

वृकाराति पु० ६त० । कुक्कुरे राजनि० वृकारिप्रादयोऽप्यत्र ।

वृकोदर पु० वृकनामाग्निरुदरे यस्य । "यस्य तीक्ष्णो वृको नाम जठरे हव्यवाहनः । मया दत्तः स धर्मात्मा तेन वायो वृकोदरः" भा०आ० ६१ अ० उक्ते भीमे "स्वयमूचे वचनं वृकोदरः" किरा० ।

वृक्ण त्रि० ओव्रश्च-क्त । छिन्ने अमरः ।

वृक्ष वरणे भ्वा०आत्म०सक०सेट् । वृक्षते अवृक्षिष्ट ।

वृक्ष पु० व्रश्च-क्स । छेदनेऽपि जायमाने द्रुमे । वृक्षार्हं यत् । वृक्ष्य वृक्षार्हे । [स्त्रियां ङीष् ।

वृक्षचर पुंस्त्री० वृक्षे चरति चर-ट । वानरे धनञ्जयः

वृक्षच्छाय न० ६त० । बहूनां वृक्षाणां छायायाम् ।

वृक्षधूप पु० वृक्षोऽपि धूपस्तत्साधनम् । सरलद्रुमे राजनि० ।

वृक्षनाथ पु० ६त० । वटवृक्षे शब्दर० । [शब्दच० ।

वृक्षपाक पु० वृक्षस्य पाकः शिशुरिव जटिलत्वात् । वटवृक्षे

वृक्षभवन न० ७त०। वृक्षस्थे कोटरे शब्दरत्नावली।
वृक्षभक्षा स्त्री वृक्षो भक्ष्यो वेष्टकत्वात् भोजनीय इव यस्याः। वन्दायाम् (परगाछ) भावप्र०।
वृक्षभेदिन् पु० वृक्षं भिनत्ति भिद–णिनि। वृक्षभेदके १अस्त्रभेदे अमरः। २टङ्के हेमच०। [शब्दच०।
वृक्षहृद्भू पु० वृक्षस्य हृदि भूमौ भवति भू–क्विप्। अम्लवेतसे
वृक्षरुहा स्त्री वृक्षे रोहति रुह–क। १वन्दायाम् अमरः २अमृतस्रवायाञ्च राजनि०।
वृक्षवाटिका स्त्री वृक्षैर्वाटीव संहतत्वात् स्वार्थे कन्। अमात्यगणिकोपसेव्ये गृहसमीपस्थे उपवने अमरः।
वृक्षादन पु० वृक्षमत्ति भिनत्ति अद–ल्यु। १कुठारास्त्रे (नेहानि) अमरः। वृक्षान्तरमत्ति भिनत्ति। २अश्वत्थवृक्षे ३मधुच्छत्रे ४कुठारे च मेदि०। ५पियाले धरणिः। ६वृक्षविदारके त्रि० ७वन्दायां स्त्री गौरा० ङीष्।
वृक्षाम्ल न० वृक्षजातमम्लम्। (तेतुल) १वृक्षजाताऽम्लप्रधाने वृक्षे अमरः। २चुक्राम्ले च।
"वृक्षाम्लमामकम्लोष्णं वातघ्नं कफपित्तलम्। पक्वन्तु गुरु संग्राहि कटुकं तुवरं लघु। अम्लोष्णं रोचनं रूक्षं दीपनं कफवातनुत्। तृष्णार्शोग्रहणीगुल्मशूलहृद्रोगजन्तुजित्" भावप्र०।
वृक्षार्हा स्त्री० वृक्षेषु अर्हा पूज्या। महामेदायां राजनि०।
वृक्षाश्रयिन् पु० वृक्षमाश्रयति आ+श्रि–इनि। १खगे २क्षुद्रोलूके राजनि०।
वृक्षोत्पल पु० वृक्षे उत्पलमिव। कर्णिकारवृक्षे रत्नमा०।
वृच वृतौ रु०पर०सक०सेट्। वृणक्ति। अवर्चीत्। ईदित् निष्ठा अनिट् वृक्तः।
वृज त्यागे अदा०आत्म०सक०सेट् ईदित्। वृङ्क्ते अवर्जिष्ट नेदिदध्ययम्। वृक्ते अवर्जिष्ट ईदित् निष्ठा अनिट् वृक्तः।
वृज त्यागे वा चु० उभ० पक्षे भ्वा०पर०सक० सेट्। वर्जयति ते वर्जति। अववर्जत्–अवीवृजत्। अवर्जीत् ईदित्। वर्जितः भ्वा० निष्ठा अनिट्। वृक्तः।
वृज वृतौ, त्यागे च रु०पर०सक०सेट्। वृणक्ति। अवर्जीत्। ईदित् निष्ठा अनिट्। वृक्तः।
वृजन न० वृज्यतेऽत्र वृज–क्यु। १पापे उणादि० २आकाशे सि०कौ०। ३केशे पु० ४कुटिले त्रि० उणादि०।
वृजिन न० वृज–इनच् किच्च। १पापे अमरः। २भुग्ने त्रि० हेमच०। ३केशे पु० ४कुटिले त्रि० मेदि०।
वृण भक्षणे तना०उभ०सक० सेट्। वृणोति वर्णीति वृणुते अवर्णीत् अवर्णिष्ट। उदित् क्त्वा वेट्। [अववर्त्तत् त।
वृत दीप्तौ चु० उभ० सक० सेट्। वर्त्तयति ते अवीवृतत् त
वृत वर्त्तने भ्वा० आत्म० लुङि लृटि लृङि च उभ० अक० सेट्। वर्त्तते। अवृतत् अवर्त्तिष्ट लृटि लृङि च पर० नेट् वर्त्स्यति वर्त्तिष्यते। सनि च तथा विवर्त्तिषते, विवृत्सति। उदित् क्त्वा वेट्।
वृतु संभक्तौ, वरणे च दि० आत्म० सक० सेट्। वृत्यते अवर्त्तिष्ट। उदित् क्त्वा वेट्। [धातुपाठः।
वृत् त्रि० वृत+भूते–क्विप्। वृत्ते अतीते "वृत् वृतादि" पा०
वृत त्रि० वृ–क्त। १प्रार्थिते २वर्त्तुले ३कन्यादौ प्रार्थनादिना कृतनियोगे ४स्वीकृते च अमरः। [राजनि०।
वृतपत्रा स्त्री वृतम् आवृतं पत्रं यस्याः। पुत्रदात्र्यां लतायां
वृति स्त्री वृ–क्तिन्। वेष्टने (बेड़) "वृतिञ्च तत्र कुर्वीत" याज्ञ०
वृतिङ्कर पु० वृतिङ्करोति कृ–खच्। विकङ्कते (वइचि) शब्दच०
वृत्त न० वृत–भावे क्त। "गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः। प्रवर्त्तनं हितानाञ्च तत्सर्वं वृत्तमुच्यते" इत्युक्ते १चरित्रभेदे २पद्यभेदे "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा। वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्। सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा छन्दो० ३वृत्तौ च। वृत–कर्त्तरि क्त। ४अतीते ५दृढे ६वर्त्तुले ७कृतावरणे च त्रि० भरतः। ८अधीते ९मृते मेदि० १०जाते च त्रि० ११कूर्मे पु० राजनि०। १२रेणुकायां १३प्रियङ्गौ १४रोहिण्यां १५भिञ्झिरिष्टलतायां स्त्री राजनि०। तत्र वर्त्तुलाकारवस्तु यथा "वृत्तानि बालुनारङ्गकाम्रजम्बीरमोदकाः। रथचक्रालावुककुम्भकुष्माण्डकादयः। कर्णपाशभुजापाशकटचापघटाननम्। मुद्रिकापरिखायोगपट्टहाराङ्गदादयः" कविकल्प० १६गोलाकारे क्षेत्रभेदे न० लीला०क्षेत्रशब्दे २४००पृ० दृश्यम्।
वृत्तगन्धि न० वृत्तस्य पद्यभेदस्य इव गन्धो लेशोऽस्य इत् समा०। "भवत्युत्कलिकाप्रायं समासाढ्यं दृढाक्षरम्। वृत्तैकदेशसम्बन्धात् वृत्तगन्धि पुनः स्मृतम्" इत्युक्ते गद्यभेदे
वृत्ततण्डुल पु० वृत्तो वर्त्तुलस्तण्डुलोऽस्य। यावनाले राजनि०।
वृत्तनिष्पाविका स्त्री वृत्ता वर्त्तुला निष्पाविका। नखनिष्पाव्याम् राजनि०।
वृत्तपर्णी स्त्री वृत्तानि पर्णान्यस्याः ङीप्। १महाश्वपुष्पिकायाम् २पाठायाञ्च (आकनादि) राजनि०।
वृत्तपुष्प पु० वृत्तानि वर्त्तुलानि पुष्पाण्यस्य। १शिरीषवृक्षे २कदम्बे ३वानीरे ४कुब्जके ५मुद्गरे च राजनि०।

वृत्तफल न० वृत्तं फलमस्य । १मरीचे २दाड़िमे ३वदरे च । ४कर्कोट्याम् ५आमलक्याञ्च स्त्री टाप् राजनि०।

वृत्तमल्लिका स्त्री वृत्ता मल्लिकेव । १श्वेतार्के २मोदिन्यां लतायां च राजनि०। [स्त्री राजनि० ।

वृत्तबीज पु० वृत्तानि बीजान्यस्य । १शिम्बायाम् २आढ़क्याम्

वृत्तस्थ त्रि० वृत्ते गुरुपूजादौ चरित्रे तिष्ठति स्था-क । वृत्तस्थोऽपि गुरुपूजादिचरित्ररते ।

वृत्तान्त पु० वृत्तो जातोऽन्तो निर्णयो यस्मात् । १संवादे २वाचिकसंदेशे च अमरः । २प्रक्रियायां ३कार्त्स्न्ये ४प्रस्तावे च मेदि०। ५अवसरे ६भावे ७एकान्ते च विश्व० ।

वृत्ति स्त्री० वृत-क्तिन् । १वर्त्तने २स्थितौ ३विवरणे च मेदि० । करणे क्तिन् ४जीविकायाम् अमरः । ५कौशिकीसात्वतीभारत्यारभट्याख्ये नाटकरचनाभेदे "शृङ्गारे कौशिकी, वीरे सात्वत्यारभटी पुनः । रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती । चतस्रो वृत्तयो ह्येताः सर्वनाट्यस्य मातृकाः" सा० द०। ६वेदान्तोक्ते अन्तःकरणादेः परिणामभेदे च । अन्तःकरणवृत्तिश्च प्रमयोजनादिश्च वेदा०प०दर्शितं यथा तड़ागोदकं छिद्रात् निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमप्यन्तःकरणं चक्षुरादिद्वारा घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते स एव परिणामो वृत्तिरित्युच्यते । अनुमित्यादिस्थले तु अन्तःकरणस्य न वह्न्यादिदेशगमनं वह्न्यादेश्चक्षुराद्यसन्निकर्षात्" वे०प०। इन्द्रियजन्यवृत्तेश्चावरणभङ्गार्था तत्त्वार्थो इति मतद्वैधं यथोक्तं तत्रैव वे०प० । "सा चान्तःकरणवृत्तिरावरणाभिभवार्थेत्येकं मतम् तथा हि अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटभानप्रसक्तौ घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतन्त्रमवस्थापदवाच्यमभ्युपगन्तव्यम् । एवं सति न सर्वदा घटादेर्भानप्रसङ्गः । अनावृतचैतन्यस्यैव भानप्रयोजकत्वात् तस्य चावरणस्य सदातनत्वे कदाचिदपि घटभानं न स्यादिति तद्भङ्गो वक्तव्यः तद्भञ्जकश्च न चैतन्यमात्रं तत्प्रकाशकस्य तदनिवर्त्तकत्वात् नापि वृत्त्युपहितचैतन्यं, परोक्षस्थलेऽपि तन्निवृत्त्यापत्तेरिति परोक्षव्यावृत्तवृत्तिविशेषस्य तदुपहितचैतन्यस्य वा आवरणभञ्जकत्वमित्यावरणाभिभवार्था वृत्तिरित्युच्यते । सम्बन्धार्था वृत्तिरित्यपरं मतम् । तन्नाविद्योपाधिकोजीवोऽपरिच्छिन्नः स च घटादिप्रदेशे विद्यमानोऽपि घटाद्यपरोक्षवृत्तिविरहदशायां न घटादिकमवभासयति घटादिना सम्बन्धाभावात् तत्तदाकारवृत्तिदशायां तु भासयति तदा सम्बन्धसत्त्वात्" । अतएवोक्तं "बुद्धिवृत्तिचिदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्येत् आभासात्तु घटः स्फुरेत्" इदञ्च प्रथममताभिप्रायम् अन्तःकरणवृत्तीनां भेदादिकं पातञ्जलादिदर्शितमन्तःकरणशब्दे १८५ पृ० दृश्यम् । "ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता" वे०सा०। ७जीविकोपायवृत्तिहरणे दोषो यथा "स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः । स कृतघ्न इति ज्ञेयः फलं तत्र शृणुष्व भूमिप ! । यावन्तो रेणवः सिक्ता विप्राणां नेत्रबिन्दुभिः । तावद्वर्षसहस्रञ्च कुम्भीपाके स तिष्ठति । तप्ताङ्गारञ्च तद्भक्ष्यं पानञ्च तप्तमूत्रकम् । तप्ताङ्गारे च शयनं ताड्यते यमकिङ्करैः । तदन्ते च महापापी विष्ठायां जायते कृमिः । षष्टिवर्षसहस्राणि देवमानेन भारत ! । ततो भूमिविहीनश्च प्रजाहीनश्च मानवः । दरिद्रः कृपणो रोगी शूद्रो निन्द्यस्ततः शुचिः" ब्रह्मवै० प्र० ४८अ० ।

वृत्तिकर्षित त्रि० वृत्त्या कर्षितः । १विपन्ने २अवसन्ने वृत्तिके च । [२घटे पु० स्त्री राजनि० स्त्रियां ङीप् ।

वृत्तिस्थ त्रि० वृत्तौ तिष्ठति स्था-क । १सत्कर्मानुष्ठायिनि

वृत्र पु० वृत-रक् । १अन्धकारे २रिपौ त्वष्टृसुते ३दानवभेदे ४मेघे ५पर्वतभेदे मेदि०। ६इन्द्रे विश्वः । ७शब्दे शि०को०

वृत्रद्विष् पु० ६त० । इन्द्रे हेमच० । वृत्ररिप्वादयोऽप्यत्र ।

वृत्रहन् पु० वृत्रं हतवान् हन-क्विप् । इन्द्रे अमरः ।

वृथा अव्य० वृ-थाल् किच्च । निरर्थके अमरः ।

वृथादान न० कर्म० । १निष्फलदाने स्मृतिप्रदर्शिते देवपित्राद्यर्थभिन्नेषु कार्येषु २दानभेदे च ।

"देवपितृविहीनं यद्दीयतेऽश्वः कदोत्तमः । दृष्याद्युत्तीर्णमार्गेण वेदाग्निपरित्यागिने । अन्यायोपार्जितं दानं सर्वं ब्रह्मघ्ने तथा । गुरवेऽप्यनृतज्ञाय कोपात् पतिताय च । कृतघ्नाय च यद्दत्तं सर्वदा ब्रह्मविद्विषे । याचकाय च सर्वस्य दस्युःप्रत्ययी तथा । परिचारकाय स्वत्वाय सर्वेन्त पिशुनाय च । एतानि तु राजेन्द्र ! वृथादानानि षोडश" वह्निपु० । "आयनार्थं च यद्दत्तं तदप्रविधनपि शुभनीयकर्म्मा इत्युन्नयेन दत्त सबदत्तं मोक्षमप्रकारमपि प्रजाश्वर्तमर्थेन दत्तमोक्षं भवति । नारदेन च "दत्तं चाप्रविप्रे-मोक्षपदत्तं मोक्षभाजाम्" इति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विहतं यथा

"पश्यमल्यं भतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः। स्त्री-गुरुक्रान्तुग्रहार्थञ्च दत्तं दानविदो विदुः। अदत्तन्तु भय-क्रोधशोकवेगरुजान्वितैः। तथोत्कोचपरिहासव्यत्यास-च्छलयोगतः। बालमूढास्वतन्त्रार्त्तमत्तोन्मत्तापवर्जितम्। कर्त्ता ममेदं कर्मेति प्रतिलाभेच्छया च यत्। अपात्रे पात्रमित्युक्ते कार्य्ये वा धर्म्मसंहिते। यद्दत्तं स्यादवि-ज्ञानाददत्तमिति तत् स्मृतम्" मिता० अदत्तशब्दे दृश्यम्।

वृथामांस न० वृथाभूतं मांसम् शा०क०। देवाद्युद्देशेन हतपशूनां मांसे।

वृद्ध न० वृध–क्त। १शैलजनामगन्धद्रव्ये अमरः। २वृद्धदारके वृक्षे पु० राजनि०। ३वृद्धियुक्ते त्रि० ४गतयौवने वृद्धा-वस्थायुक्ते। बाल्यादिवयःकालभेदश्च भावप्र० उक्तो यथा "बाल्यादेरवधिमाह सुश्रुतः "वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा। ऊनषोडशवर्षस्तु नरो बालो निगद्यते। त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथान्न-भुक्। दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्द्वयम्। तदु-त्तरं स्यादन्नाशी एवं बालस्त्रिधा मतः। मध्यो षोडश-सप्तत्योर्मध्यमः कथितो बुधैः। चतुर्धा मध्यमं प्राहुर्वा त्रिंशतो मतः। चत्वारिंशत् समा यावत्तिष्ठेद्वीर्य्यादि-पूरितः। ततः क्रमेण क्षीणः स्याद् यावद् भवति स-प्ततिः"; वीर्य्यादीत्यादिशब्देन रसादिसर्वधात्विन्द्रिय-बलोत्साहा उच्यन्ते। क्षीणः सर्वधात्विन्द्रियबलोत्-साहैर्हीनः "ततस्तु सप्ततेरूर्द्ध्वं क्षीणधातुरसा-दिकः। क्षीयमाणेन्द्रियबलः क्षीणरेता दिने दिने। वलीपलितखालित्ययुक्तः कर्मसु चाक्षमः। कासश्वासा-दिभिः क्लिष्टो वृद्धो भवति मानवः। बाल्ये विवर्द्धते श्लेष्मा पित्तं स्यान्मध्यमेऽधिकम्। वार्द्धक्ये वर्द्धते वायु-र्विचार्य्यैतदुपक्रमेत्"। उपक्रमेत् चिकित्सेत्। तन्त्रा-न्तरे च "वलवृद्धिरन्ध्रविमेधा त्वगृद्धिः शुक्रविक्रमौ। बुद्धिः कर्मेन्द्रियं चतो जीवितं दशतो ह्रसेत्"। ५पण्डिते पु० मेदि०।

वृद्धकाक पु० कर्म०। द्रोणकाके हेमच०।

वृद्धगङ्गा स्त्री कर्म०। नदीभेदे "अस्ति नाटकशैले तु सरो-मानससन्निभम्। यत्र पार्श्वे मेरुपुत्र्या जलक्रीड़ां सदा हरः। कुरुते नरशार्दूल! स्वर्णपङ्कजशोभिते। तस्य पश्चान्मध्यपूर्वभागेभ्यश्च सरिच्चयम्। अवतीर्णं प्रयात्येव दक्षिणं सागरं प्रति। तस्य पश्चिमभागे तु नदी दिक्करिकाह्वया। दिग्गजाः स्नेहसंजाताः तेन दिक्करिका कृता। मध्यभागात् स्नुता या तु शङ्करेणावतारिता। वृद्धगङ्गाह्वया सा तु गङ्गेव फलदायिनी। या निःसृता पूर्वभागात् तस्माच्छिखरान्तरात् नदी। स्वर्णपोषेति विख्याता सा गङ्गासदृशी फले" कालिकापु० ८२अ०।

वृद्धदारक पु० वृद्धं दारयति दृ–णिच्–ण्वुल्। वीरताड़वृक्षे अच्। वृद्धदार तत्रार्थे राजवल्लभः। "रसायनो वृद्ध-दारः योषशातासवातजित्"।

वृद्धदारु न० वृद्धं दारयति दृ–णिच्–उण्। वृद्धदारकवृक्षे राज-निं० "वृद्धदारुद्वयं शौल्यं पिच्छिलं कफवातनुत्। बल्यं कासामयमेदोघ्नं द्वितीयं स्वरवीर्य्यदम्" राजनि०। [ऋमसः।

वृद्धनाभि त्रि० वृद्धा नाभिरस्य। (गाँड़) वृद्धनाभियुक्ते

वृद्धप्रपितामह पु० वृद्धः प्रपितामहात् राज०। प्रपिता-महजनके। [महस्य पितरि।

वृद्धप्रमातामह पु० वृद्धः प्रमातामहात् राज०। प्रमाता-

वृद्धबला स्त्री वृद्धं बलं यस्याः ५ब०। महासमङ्गायाम् राजनि०। तस्याबलवृद्धिकरत्वात्तथात्वम्।

वृद्धविभीतक पु० वृद्धः विभीतक इव। आम्रातके शब्दमा०

वृद्धश्रवस् पु० वृद्धेभ्यः शृणोति श्रु–असुन्, वृद्धं श्रवो यशो यस्येति वा। इन्द्रे अमरः। [हारा०

वृद्धसूत्रक न० कर्म० संज्ञायां कन्। इन्द्रतूले (वुड़िरसुता)

वृद्धा स्त्री वृध–क्त। १गतयौवनायां स्त्रियाम्। २अङ्गु-ष्ठे शब्दच०। ३महाश्रावणिकायां राजनि०।

स्त्रीणां वयःकालविभागो यथा "आषोडशाद्भवेद्बाला तरुणी त्रिंशता मता। पञ्च-पञ्चाशतः प्रौढा वृद्धा भवति तत्परम्" इति कालि-दासः। "बालेति गीयते नारी यावद्वर्षाणि षोडश। ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि। तदूर्द्ध्वमधि-रूढा स्यात् पञ्चाशद्वत्सरावधि। वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्जिता" भावप्र०। तस्याः सम्भोगे दोषो यथा "बाला तु प्राणदा प्रोक्ता युवती प्राणहारिणी। प्रौढा करोति वृद्धत्वं वृद्धा मरणमादिशेत्। निदाघशरदो-र्बाला प्रौढा शीतवसन्तयोः। हेमन्ते शिशिरे योग्या न वृद्धा कापि शस्यते। नार्वाक् तु षोडशादब्दात् सप्तत्याः परतो न च। आयुष्कामो नरः स्त्रीभिः संभोगं कर्त्तु-मर्हति। पञ्चपञ्चाशतो नारी सप्तसप्ततिकः पुमान्। द्वावेतौ न प्रसूयेते प्रसूयेते विपर्य्ययम्" राजवल्लभः। "शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि। प्रभाते

सेवनं निद्रा सद्यः प्राणहराणि षट्" चाणक्यनीतिसारः।

वृद्धि स्त्री वृध–क्तिन्। १समृद्धौ २अभ्युदये मेदि० ३सम्पत्तौ ४कलन्तरे च। वृध–कर्त्तरि क्तिच्। ५औषधिविशेषे ऋद्धिशब्दे १४४७ पृ० तल्लक्षणादि द्रष्टव्यम्।

(कोरन्द) ६रोगविशेषे तन्निदानादि भावप्र० उक्तं यथा "तत्र वृद्धेर्निदानं संख्याञ्चाह "दोषास्रमेदोमूत्रान्त्रैः सवृद्धिः सप्तधा गदः। मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलः। वृद्धिं करोति कोषस्थः फलकोषाभिवाहिनीम्। कृत्वा दुष्टगतिर्वायुर्धमनीः शुष्कगामिनीः। तत्र वातिकमाह "वातपूर्णदृतिस्पर्शो रूक्षो वातादहेतुरुक्"। अहेतुरुक् अत्रार्थे नञ्। तेन स्वल्पादपि विप्रकृष्टात् कारणात् रुक् पीड़ा यत्र सः। अथ पैत्तिकमाह "पक्कोदुम्बरसङ्काशः पित्ताद्दाहोष्मपाकवान्"। दाहः अभ्यन्तरः ऊष्मा वहिस्तप्तता। अथ श्लैष्मिकमाह "कफाच्छीतो गुरुः स्निग्धः कण्डूमान् कठिनोऽल्परुक्"। अथ रक्तजमाह "कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्तजः"। कृष्णस्फोटावृत इति पैत्तिकोद्भवः। मेदोजमाह "कफवन्मेदसो वृद्धिर्मृदुस्तालफलोपमः"। नीलवर्णश्च। मूत्रजमाह "मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः। अम्भोभिः पूर्णदृतिवत् क्षोभं याति सरुङ्मृदुः। मूत्रकृच्छ्रमधः कुर्य्यात् चलयन् फलकोषयोः"। चलयन् फलकोषयोरधः मूत्रकृच्छ्रं मूत्रेण व्यथां कुर्य्यादित्यर्थः। अथान्त्रवृद्धिमाह "वातकोपिभिराहारैः शीततोयावगाहनैः। धारणेरणभाराध्वविषमाङ्गप्रवर्त्तनैः। क्षोभणैः क्षोभितोऽन्यैश्च क्षुद्रान्त्रावयवं यदा। पवनो विगुणीकृत्य स्वनिवेशादधो नयेत्। कुर्य्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा"। धारणम् उपस्थितस्य वेगस्य। ईरणम् अनुपस्थितस्य वेगस्य प्रेरणम्। विषमाङ्गप्रवर्त्तनं वक्रत्वेनाङ्गमोटनम्। अन्यानि क्षोभणानि बलवद्विपहुङ्कारधनुराकर्षणादीनि तैः क्षोभितः सन्दुष्य सञ्चालितः पवनः यदा क्षुद्रान्त्रावयवं विगुणीकृत्य स्वनिवेशादधो नयेत्। तदा वङ्क्षणसन्धिस्थः अन्त्रवृद्धिरोगः। तस्यावस्थामाह "उपेक्ष्यमाणस्य मष्कवृद्धिमाध्मानरुक्स्तम्भवतीं च कुर्य्यात्। प्रपीड़ितोऽन्तःस्वनवान् प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तम्"। तत्राध्मानमुदरे रुक् वृषणयोः स्तम्भो गात्रे तद्युक्तां कुर्य्यादित्यर्थः। भोजोऽप्याह "अन्त्रं विगुणमादाय वातो नयति वङ्क्षणम्। वङ्क्षणात् तद्गजायुक्तं फलकोषं प्रपद्यते" इति। स मुष्कवृद्धिरोगः अन्तः उदरे प्रध्मापयन् आगमनमार्गं निरुद्धं कुर्वन् एति आयाति। अथासाध्यमाह स कीदृक् आदित्याकाङ्क्षायामाह "यस्मान्त्रावयवान्त्रेयो मुष्कयोर्वातसञ्चयात्। अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः"। वातवृद्धिसमाकृतिरिति योऽन्त्रवृद्धिरोगः सोऽसाध्या वातवृद्धिसमाकृतिः"। अन्त्रवृद्धिशब्दे २०८ पृ० चस्त्रनाक्तं द्रष्टव्यम् नीतिज्ञयादित्रिवर्गान्तर्गते ७वर्गघटकपदार्थे "क्षयः स्थानञ्च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्" अमरः। "कृषिर्वणिक् पथो दुर्गं सेतुः कुञ्जरबन्धनम्। करादानं सैन्यानाञ्च विनाशनम्"। एतेषामष्टानामन्यतमस्य क्षयं स्थानं वृद्धिश्चेत्यर्थः। ऋणान्तरे (सुद) वृद्धिस्वरूपभेदादिकं वीरमि० उक्तं यथा नारदः "वृद्धिश्चतुर्विधा प्रोक्ता पञ्चधाऽन्यैः प्रकीर्त्तिता। षड्विधाऽन्यैः समाख्याता तत्त्वतस्तां निबोधत" इति। षड्विधा मे इति क्वचित् पाठः तत्र मे मते। तान् प्रकारान् स एवाह "कायिका१ कालिका२ चैव चक्रवृद्धिरतोऽपरा३। कारिता४ शिखा५ वृद्धिर्भोगलाभश्च६ तथैव चेति"। एतेषां स्वरूपमाह "कायिका कर्मसंयुक्ता मासग्राह्या तु कालिका। वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना कृता। प्रत्यहं गृह्यते या तु शिखावृद्धिस्तु सा स्मृता। गृहाद्युपभोगः फलं क्षेत्राद् भोगलाभः प्रकीर्त्तितः" इति। कायिका कर्मसंयुक्ता यत्र बन्धकीकृतस्य गवाश्वादेर्दोहनवाहनादिकं कर्म वृद्धित्वेन परिकल्पितं तत्र सा कायिकेत्यर्थः। तथा च व्यासः "दोह्यवाह्यकर्मयुता कायिका समुदाहृतेति"। मदनरत्ने तु भोग्याधित्वया स्थापितस्य यो दोहनवाहनादिकर्मरूपोभोगस्तत्फलिका या वृद्धिः सा कायिकेत्युक्तम्। मासग्राह्या तु कालिका प्रतिमासं लभ्या या वृद्धिः सा कालिकेत्यर्थः। "प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका मतेति" नारदवचनात्। वृद्धेर्वृद्धिश्चक्रवृद्धिः। वृद्धेरपि प्रतिमासं मूलभावेन पुनर्वृद्धिरित्यर्थः। "वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति" नारदवचनात्। कारिता ऋणिना कृता। ऋणिनाऽधमर्णेन स्वेच्छया कृता वृद्धिः कारितेत्यर्थः। "वृद्धिः सा कारिता नाम यर्णिकेन स्वयं कृतेति" नारदवचनात्। अधमर्णकारितैव वृद्धिर्ग्राह्या नोत्तमर्णकारिता तथा च बृहस्पतिः "ऋणिकेन तु या वृद्धिरधिका सम्प्रकल्पिता। आपत्कालकृता नित्यं दातव्या सा तु का-

रिता । अन्यथा कारिता वृद्धिर्न दातव्या कथञ्चनेति" । उत्तमर्णप्रलोभनार्थम् आपत्काले शास्त्रोक्ताद्धिका स्वयं कल्पिता कारिता या सा वृद्धिर्दातव्या न पुनरनेवंविधा धनिकेन कारिता दातव्येत्यर्थः । "प्रत्यहं गृह्यते या तु शिखावृद्धिस्तु सा स्मृता" । प्रतिदिनवर्द्धमानशिखासादृश्याच्छिखावृद्धिरिति व्यपदिश्यत इत्यर्थः । किं पुनः शिखावृद्धेरन्यद्वृद्धेरित्याकाङ्क्षायां बृहस्पतिरेवाह "शिखेव वर्द्धते नित्यं शिरश्छेदान्निवर्त्तते । मूले दत्ते तथैवैषा शिखावृद्धिस्तु सा स्मृतेति" । प्रत्यहं गृह्यत इति च धर्मपद्धतिश्रुतदिनसंख्यया वृद्धिग्रहणकालोपलक्षणम् । तथा च कात्यायनः "प्रतिकालन्तु दाप्येत शिखावृद्धिस्तु सा स्मृतेति" । "गृहात्तोषः फलं सस्याद् भोगलाभः प्रकीर्त्तितः" । बन्धीकृताद् गृहात्क्षेत्रादिजनितः सन्तोषः । क्षेत्रात् सस्यादिफलस्य भोगलाभाख्यो वृद्धिप्रकार इत्यर्थः । गृहक्षेत्रग्रहणं स्थावरात्मकभोग्याधेरुपलक्षणार्थम् । अतएव कात्यायनः "आधेर्भोगस्त्वशेषो यो वृद्धये परिकल्पितः । प्रयोगे यत्र चैवं स्यात् आधिभोगः स उच्यते" इति । यस्मिन् ऋणादानप्रयोगे स्थावराधित्वेन परिकल्पिता या वृद्धिस्तत्र सा वृद्धिराधिभोग इत्युच्यते इत्यर्थः । अपराकोटौ "गृहात् तोषः शदः क्षेत्रादिति पाठः" । तोषो भाटक इति कल्पतरौ । शदः सस्यादिफलम् । वृद्धेः परिमाणं दर्शयति मनुः "वशिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्द्धिनीम् । अशीतिभागं गृह्णीयात् मासाद्वार्द्धुषिकः शते" इति । निष्पन्ने शते प्रयुक्ते मासस्य सपादनिष्कपरिमितां वृद्धिं वार्द्धुषिको वृद्ध्यर्थं गृह्णीयादित्यर्थः । एतत् सबन्धकविषयम् । अतएव याज्ञवल्क्यः "अशीतिभागो वृद्धिः स्यात् मासि मासि सबन्धके । वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथेति" । सबन्धके प्रयुक्तस्य द्रव्यस्याशीतितमो भागो वृद्धिः पच्यते प्रयुक्ते शते सपादः पणः प्रतिमासं वर्द्धत इत्यर्थः । अन्यथा बन्धकरहिते वर्णक्रमात् ब्राह्मणादिवर्णक्रमेण द्वित्रिचतुःपञ्चकं शतं मास्यं भवति । द्वौ वा त्रयो वा चत्वारो वा इति द्वित्रिचतुःपञ्चा अस्मिन् शते वृद्धिर्दीयते इति द्वित्रिचतुःपञ्चकं शतम् । "तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते" पा० कन् । तथा चायमर्थः । बन्धकरहिते पणशतं प्रति प्रतिमासं ब्राह्मणात् पणद्वयं क्षत्रियात् पणत्रयं वैश्यात् पणचतुष्टयं शूद्रात् पणपञ्चकं ग्राह्यम् । तत् तु मनुनोक्तम् । "द्विकं शतं वा गृह्णीयात् सतां धर्ममनुस्मरन्निति" तदुभयमपि स्थितविकल्पविषयम् । अतएव व्यासः "सबन्धे भाग आशीतः षाष्टभागः सलग्नके । निराधाने द्विकशतं मासलाभ उदाहृतः" इति । सबन्धे आधिसहिते । आशीतः अशीतितमः । षाष्टः षष्टितमः । लग्नकः प्रतिभूः । निराधाने बन्धकरहिते । आधानपदं प्रतिभुवोऽप्युपलक्षणम् । कल्पतरौ षाष्टभाग इति पठित्वा सलग्नके अशीतितमो भागः स्वकीयाष्टमहितो मासवृद्धिरित्युक्तम् "द्विकं त्रिकं चतुष्कञ्च पञ्चकञ्च शतं समम् । मासस्य वृद्धिं गृह्णीयाद् वर्णानामनुपूर्वशः" इति । द्विकं द्वौ वृद्धिर्दीयते यस्मिन् धने तत् तथा । एवं त्रिकादावपि सममात्रं प्राप्य नाधिकम् । विष्णुरपि "अथोत्तमर्णोऽधमर्णकाद्यथादत्तमर्थं गृह्णीयात् । द्विकं त्रिकं चतुष्कं पञ्चकं शतं वर्णानुक्रमेण प्रतिमासमिति" । धनविशेषेऽप्याह याज्ञवल्क्यः "कान्तारगास्तु दशकं सामुद्रा विंशकं शतमिति" । अत्र गृहीत्वा कान्तारं महावनं लङ्घयन्तीति कान्तारगा दुर्गमवनान्तरोपयानादिक्रयकारिणः पणशतस्य दशकं प्रतिमासं दशपणान् दद्युरित्युत्तरवाक्यस्थानुषङ्गः । समुद्रान्तरन्तीति सामुद्राः समुद्रगन्तारः प्रतिमासं विंशकं शतं दद्युरित्यर्थः । कारितायान्तु न नियम इत्याह स एव "दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिष्विति" । सर्वे च ब्राह्मणादयोऽधमर्णाः सबन्धकेऽबन्धके वा सर्वासु जातिषूत्तमर्णभूतासु स्वयमङ्गीकृतां वृद्धिं दद्युरित्यर्थः । द्रव्यविशेषे वृद्धिविशेषमाह स एव "सन्ततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा । वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परेति" । पशुस्त्रीणां माहिषीस्त्रीप्रभृतीनां वृद्ध्यर्थं प्रयुक्तानां सन्ततिरेव वृद्धिः । रसस्य तैलादेरष्टगुणा । वस्त्रस्य चतुर्गुणा धान्यानान्त्रिगुणा । हिरण्यानां द्विगुणा परेति प्रत्येकं सम्बध्यते । परा परमा । अतःपरमधिका वृद्धिर्नास्तीत्यर्थः । न च स्त्र्यादीनाम् ऋणत्वेन दानस्य सम्भवतीति वाच्यम् । तत्पोषणाद्युपकारस्य तत्पुष्टसन्तत्याद्यर्थिनो दानसम्भवात् । यत्र तन्तु भारवाहनसेवार्थिनः । बृहस्पतिरपि "हिरण्ये द्विगुणा वृद्धिस्त्रिगुणा वस्त्रकुप्यके । धान्ये चतुर्गुणा प्रोक्ता शदवाह्यलवेषु च । उक्ता पञ्चगुणा शाके बीजेक्षौ षड्गुणा स्मृता । लवणस्नेहमद्येषु वृद्धिरष्टगुणा मता । गुडे मधुनि चैवोक्ता प्रयुक्ते चिरकालिके"

इति । कुप्यं त्रपुसीसकादिकम् । शदः क्षेत्रफलम् । तच्च गोबलीवर्दन्यायाद्धान्यव्यतिरिक्तं पुष्पमूलफलादिकम् । वाह्योऽश्वादिः । लवो मेषोर्णाचमरीकेशादिः । अत्र चिरकालशब्देन प्रतिश्रुतायाः अशीतिभागायाः वृद्धेर्यस्मिन् समये द्वैगुण्यादिव्यापकत्वं सम्भवति । ततोऽधिकः कालो गृह्यते । यत्तु "धान्ये शदे लवे वाह्ये" इत्यादिमनुनोक्तं तत्प्रत्यर्पणसमये समृद्धाधमर्णविषयम् । षाड्गुण्यनिषेधपरमिति मदनरत्ने । यत्तु वशिष्ठवचनम् "द्विगुणं हिरण्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः । पुष्पमूलफलानि च तुलाधृतमष्टगुणमिति" तत्त्रिगुणमेव धान्यादिकं दातव्यमिति यत्र देशे स्थितिस्तद्विषयम् । दरिद्राधमर्णविषयं वा एवमन्यत्रापि न्यूनाधिकपरमवृद्धिप्रतिपादकानि वचनानि देशविशेषविषयतया दरिद्रादिविषयतया वा व्यवस्थापनीयानि । व्यासोऽपि "वदन्त्यष्टगुणान् काले लवस्नेहरसासवानिति" स्नेहस्तैलादिः । रसः क्षीरादिः । कात्यायनोऽपि "तैलानाञ्चैव सर्वेषां मद्यानां मधुसर्पिषाम् । वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य चेति" । विष्णुरपि "हिरण्यस्य द्विगुणा वृद्धिस्त्रिगुणा वस्त्रस्य धान्यस्य चतुर्गुणा रसस्याष्टगुणा सन्ततिः स्त्रीपशूनामिति" । व्यासोऽपि "शाकधान्यशणोर्णानां षड्गुणा परिकीर्त्तितेति । वशिष्ठोऽपि "वज्रशुक्तिप्रवालानां हेम्नश्च रजतस्य च । द्विगुणा तिष्ठते वृद्धिः कृतकालानुसारिणीति" । शुक्तिशब्देनात्र मुक्ताफलं लक्ष्यते वज्रसाहचर्यात् । अतएव कात्यायनः "मणिमुक्ताप्रवालानां सुवर्णरजतस्य च । तिष्ठतो द्विगुणा वृद्धिः फलकौटाविकस्य चेति" । कीटकोटोद्भवम् पट्टसूत्रादि । आविकं कम्बलादिकम् । वसिष्ठोऽपि "ताम्रायःकांस्यरीतीनां त्रपुणः सीसकस्य च । त्रिगुणा तिष्ठतो वृद्धिः कालाच्चिरकृतस्य तु" इति । रीतिरारकूटम् । देशभेदेन परां वृद्धिं दर्शयति नारदः "ऋणानां सार्वभौमोऽयं विधिर्वृद्धिकरः स्मृतः । देशाचारस्थितिस्त्वन्या यत्रर्णमवतिष्ठते । द्विगुणं त्रिगुणञ्चैव तथान्यस्मिंश्चतुर्गुणम् । तथाष्टगुणमन्यस्मिन् तत्तु देशेऽवतिष्ठते" इति । यत्र वृद्धिविशेषो न श्रूयते तत्र द्विगुणैव ग्राह्येत्याह विष्णुः "अनुक्तानां द्विगुणेति" अयञ्च द्वैगुण्यादिरूपो वृद्ध्युपरमः सकृत्प्रयोगे सकृदाहरणे वेदितव्यः तथा च मनुः "कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहितेति" । उपचयार्थं प्रयुक्तं द्रव्यं कुसीदं तस्य वृद्धिः कुसीदवृद्धिर्द्वैगुण्यं नात्येति नातिक्रामति । यदि सकृदाहिता सकृत् प्रयुक्ता पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणेन तस्मिन्नेव वा पुरुषे रेकसेकाभ्यां प्रयोगान्तरकरणे द्वैगुण्यमतिक्रम्य पूर्ववद्वर्द्धत एवेत्यर्थः । द्वैगुण्यग्रहणं त्रैगुण्यादीनामुपलक्षणम् । सकृदाहृतेति पाठे यदि प्रतिमासं प्रतिवत्सरं वा न गृह्यते किन्तु सकृद् गृह्यते तदा द्वैगुण्यन्नातिक्रामतीत्यर्थः । गौतमोऽपि "चिरस्थाने द्वैगुण्यं प्रयोगस्येति" । प्रयोगस्येत्येकवचननिर्देशात् प्रयोगान्तरकरणे द्वैगुण्यातिक्रमः चिरस्थान इति निर्देशात् शनैः शनैर्वृद्धिग्रहणे द्वैगुण्यातिक्रमो भवतीति सूचितम् । उक्तस्य वृद्ध्युपरमस्य कश्चिद् द्रव्यविशेषेऽपवादमाह बृहस्पतिः "तृणकाष्ठेष्टकासूत्रकिण्वचर्मास्थिवर्मणाम् । हेतिपुष्पफलानाञ्च वृद्धिस्तु न निवर्त्तते" । किण्वं सुराद्रव्योपादानकारणभूतो मलविशेषः चर्म शरादिनिवारकफलकः, वर्म कवचम् । हेतिरायुधम् । पुष्पफलयोर्वृद्धेरनिवृत्तिः प्रतिदानवेलायामत्यन्तसमर्थाधमर्णविषया देशविशेषविषया वा वेदितव्या । अन्यथा त्रिगुणवृद्धिप्रतिपादकव्यासवचनविरोधः स्यात् । विष्णुरपि "किण्वकार्पाससूत्रचर्मायुधेष्टकाङ्गाराणामक्षयेति" । कार्पासे तु षड्गुणवृद्धिविधायकव्यासवचनविरोधः पूर्ववत्परिहरणीयः । वशिष्ठोऽपि "दन्तचर्मास्थिशृङ्गाणां मृण्मयानान्तथैव च । अक्षया वृद्धिरेतेषां पुष्पमूलफलस्य च" इति । अक्षया मूलप्रतिपादनाभावे शतगुणापि वर्द्धत एवेत्यर्थः । भिक्षावृद्ध्यादीनामनुदरमाह बृहस्पतिः "भिक्षावृद्धिर्हाधिकाया भोगलाभं तथैव च । धनी तावत् समादद्याद् यावन्मूलं न शोधितम्" । न शोधितम् प्रतिदत्तमधिकेनेत्यर्थः कश्चिदनङ्गीकृतापि वृद्धिर्भवतीत्याह विष्णुः "यो गृहीत्वा ऋणं पूर्वं श्वो दास्यामीति सामकम् । न दद्याल्लोभतः पश्चात्तदहाद् वृद्धिमाप्नुयात्" इति । श्व इति प्रतिश्रुतस्य प्रतिदानकालावधेरुपलक्षणम् । सममेव सामकम् अवृद्धिकमिति यावत् । योऽमुकस्मिन् दिने सममेवाहं त्वदीयं धनं पूर्णं समर्प्य दास्यामीति प्रतिज्ञाय ऋणं गृहीत्वा पश्चाल्लोभादिवशं कुर्यात् सोऽवधिदिनमारभ्य वृद्धिं दद्यादित्यर्थः । कालावध्यनङ्गीकारेण गृहीतस्य धनस्य षण्मासादूर्द्ध्वं वृद्धिर्भवतीत्याह नारदः "न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित् । अना-

कारितमप्यूर्द्ध्वं वत्सरार्द्धाद्विवर्द्धते” इति । अनाकारिता अनङ्गीकृता । प्रीतिदत्तानां प्रतियाचनप्रतिदानदिनानिर्द्देशस्य न्यूनत्वानामिति शेषः । अनाकारितेत्यादेरयमर्थः । वृद्धिमकृत्वा गृहीतमपि षण्मासादूर्द्ध्वं प्रीतिदत्तं वृद्धिं प्राप्नोतीति । प्रतियाचितस्य प्रीतिदत्तस्याऽदाने वृद्धिविशेषमाह कात्यायनः “प्रीतिदत्तस्य वर्द्धेत यावन्न प्रतियाचितम् । याच्यमानमदत्तञ्चेद्वर्द्धते पञ्चकं शतम्” इति । पञ्चकं पञ्चाधिकम् प्रतियाचनदिनमारभ्य पणशतस्य पणपञ्चकं प्रतिमासं वर्द्धते इत्यर्थः । याचितकं गृहीत्वा अप्रतिदत्त्वैव देशान्तरगमने विशेषमाह कात्यायनः “यो याचितकमादाय तमदत्त्वा दिशं व्रजेत् । ऊर्द्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्” इति । इदञ्चाप्रतियाचितविषयम् । प्रतियाचिते याचितकमदत्त्वा यदि देशान्तरं गच्छति तदा विशेषमाह स एव “कृतोद्धारमदत्त्वा यो याचितस्तु दिशं व्रजेत् । ऊर्द्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयात्” इति । कृतोद्धारं याचितकं गृहीत्वा याचितोऽप्यदत्त्वेत्यन्वयः । देशान्तरगमनाभावे तु याचितकालमारभ्य याचितकस्य वृद्धिविशेषमाह स एव “स्वदेशेऽपि स्थितो यस्तु न दद्यात् याचितः क्वचित् । तं ततो कारितां वृद्धिमनिच्छन्तञ्च दापयेत्” इति । ततः प्रतियाचनकालादारभ्येत्यर्थः । एतत्कञ्चिदवधिमपरिकल्प्य याचञ्चाप्राप्ते ज्ञेयम् । अवधिं स्वीकृत्य तदतिक्रमे त्वतिक्रमदिनमारभ्य तद्धनस्य वृद्धिर्ज्ञेया । “तदूर्द्ध्वं वृद्धिमाप्नुयादिति” न्यायसाम्यात् । गृहीतपण्यो मूल्यमदत्त्वा देशान्तरगमने वृद्धिविशेषमाह स एव “पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत् । ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयात्” इति । एतच्चाप्रतियाचितविषयम् । प्रतियाचने त्वेतस्य निक्षिप्तवृद्धिशेषन्यायात् तद्दिनमारभ्य प्रतिमासं शते पञ्चकं वर्द्धेत इत्यप्याह स एव “निःक्षिप्तं वृद्धिशेषञ्च क्रयविक्रय एव च । याच्यमानमदत्तञ्चेद्वर्द्धते पञ्चकं शतम्” इति । नन्वकृतायां वृद्धौ परिमाणविशेषस्यानुक्तेः किं परिमाणं ग्राह्यमिति चेत् । अशीतिभागो वृद्धिः स्यादित्यादि याज्ञवल्क्याद्युक्तपरिमाणं ग्राह्यमिति ब्रूमः । अतएव विष्णुः “वृद्धिं दद्युर्वत्सरातिक्रमे यथाभिहितामिति” । वत्सरातिक्रम इति यत्र यदतिक्रमे वृद्धिरुक्ता तस्योपलक्षणम् । यथाभिहितां धर्मशास्त्र इति शेषः । धर्मशास्त्रे यथोक्तां तथाविधामित्यर्थः । ननु यथाभिहितामित्यस्यार्थिप्रत्यर्थिनोरन्यतरेण मध्यस्थेन वाभिहितां दद्यादित्यर्थः कस्मान्न भवति अतिप्रसङ्गापत्तेः । “कृतानुसारादधिका व्यतिरिक्ता न सिद्ध्यति । कुसीदपथमाहुस्तं पञ्चकं शतमर्हतीति मनूक्तेश्च । अस्यार्थः । शास्त्रविधिनियमितशास्त्रकृतवृद्ध्यनुसारी यो वृद्धिग्रहणे लौकिकानां समाचारः तस्मादधिका वृद्धिरुत्तमर्णेरकृतवृद्धौ न सिद्ध्यति यतः सा व्यतिरिक्ता धर्मशास्त्रवाह्या । अतएव कुसीदपथमाहुस्तन्न धर्मपथमिति । पञ्चकं शतमर्हतीति प्रतियाचितविषयमिति स्मृतिचन्द्रिकायाम् । पूर्वोक्ताच्छास्त्रानुसारादधिकाऽधमर्णेनाकृता वृद्धिर्न सिध्यति । यतः कुसीदपथमाहुस्तम् । यदा तु व्यवहारावष्टम्भादुत्तमर्णोऽधिकमधमर्णेनाकारितं लाभमिच्छति तदा ब्राह्मणे पञ्चकं शतं ग्रहीतुमर्हति न ततोऽधिकमधमर्णाकारितमित्यर्थमाह रत्नाकरः । अकृतवृद्धेरपवादमाह नारदः “पण्यमूल्यं भृतिर्न्यासो दण्डो यश्च प्रकल्पितः । वृथादानाक्षिकपणा वर्द्धन्ते नाविवक्षिताः” इति । पण्यस्य वस्त्रादेर्मूल्यम् । भृतिर्वेतनम् । न्यासो निक्षेपः । वृथादानं वेश्यादिभ्यः प्रतिश्रुतम् । आक्षिकपणो द्यूतद्रव्यम् । अविवक्षिताः । अत्र पण्यमूल्यस्य वृद्धेरभावोक्तिः प्रवासप्रतियाचनयोरभावे वेदितव्या अन्यथा पूर्वोक्तकात्यायनवचनेन विरोधः स्यात् । न्यासस्य च वृद्ध्यभाववचनं प्रतियाचनाभावे “न वृद्धिः स्त्रीधने लाभे निःक्षिप्ते च यथास्थिते । सन्दिग्धे प्रातिभाव्ये च यदि न स्यात् स्वयं कृतम्” इति संवर्त्तवाक्ये यथास्थितमिति विशेषणोपादानात् व्यक्त्यन्यथाकरणाभावे च ज्ञातव्यम् । तथा च निक्षिप्तं वृद्धिशेषञ्चेत्यादि पूर्वोक्तकात्यायनवचनविरोधो न । कात्यायनोऽपि “वर्मशस्त्रावसद्यूते पण्यमूल्ये च सर्वदा । स्त्रीशुल्केषु न वृद्धिः स्यात् प्रातिभाव्यागतेषु च” इति । सर्वदेत्यनेन प्रतियाचनादेः परस्तादपि वृद्धिरकृता नास्तीत्युक्तम् । यद्यपि सर्वदेति सर्वशेषत्वात् पण्यमूल्येऽपि प्रतियाचनादेः परस्तादकृतवृद्ध्युपरमः प्रतिभाति । तथापि पूर्वोक्तकात्यायनवचनविरोधात् न तच्छेषता सर्वदेत्यस्य । एवञ्च पूर्वोक्त एव परिहारः । एवं वर्ण्णोऽपि वृद्ध्यभावोक्तिः प्रतियाचनाभावे तथा च न तच्छेषतापि । एवञ्च न पूर्वोक्तान्यवृद्धिप्रतिपादकवसिष्ठादिवचनविरोधः । अन्यत्रापि वृद्ध्यभावं व्यास आह “प्रातिभाव्यमृक्थमनन्दी-

स्य द्विगुणतः। न वर्धते प्रयतस्य दमः शुल्कं प्रतिश्रुतम्” इति। भुक्तवस्त्रमित्यनेन स्थापितस्य गुप्ताधेर्वस्त्रालङ्कारादेरुपभोगे वृद्धिर्न भवतीत्युक्तम्। अतएव गौतमः “भुक्ताधिर्न वर्द्धते वस्त्रालङ्कारादिरिति” अगृहीतस्य द्विगुणतः प्रतिदातुमिच्छोरधमर्णादुत्तमर्णो वृद्धिलोभादिवशान्न यदा गृह्णाति तदा तस्य ततापि वृद्धिस्तद्दिनादारभ्य न देयेत्यर्थः। तथा च याज्ञवल्क्यः “दीयमानं न गृह्णाति प्रयुक्तं यत् स्वकं धनम्। मध्यस्थस्थापितं तत्स्याद् वर्द्धते न ततःपरम्” इति। मध्यस्थस्थापितमिति विशेषणेनाधमर्णो यदि स्वनिकटे स्थापयति तदा भवत्येव वृद्धिरिति”। ६यौवेयमन्वद्रव्ये पु०। १०धने च राजनि०।

वृद्धिका स्त्री वृद्धि+स्वार्थे क। वृद्धिनामकौषधे शब्दच०।

वृद्धिजीविका स्त्री वृद्धिस्तद्रूपा जीविका। ऋणदानादिषु प्रयुक्तधनेभ्यो लब्धोपजीविकायाम्।

वृद्धिश्राद्ध न० वृद्ध्यै अभ्युदयाय श्राद्धम्। पुत्रादीनां संस्काराङ्गे पार्वणविधिके नान्दीश्राद्धे नान्दीश्राद्धशब्दे दृश्यम्

वृद्धोक्ष पु० कर्म० अच् समा०। जरद्गवे अमरः।

वृद्ध्याजीव त्रि० वृद्धिम् अधमर्णतः प्रयुक्तद्रव्याधिकलाभमाजीवति आ+जीव—अच्। वार्द्धुषिके अमरः।

वृध दीप्तौ चु० उभ० अक० सेट्। वर्द्धयति ते अवीवृधत् त अववर्द्धत् त।

वृध वृद्धौ भ्वा० आत्म० लुङि लृटि लृङि च उभ० अक० सेट् वृता०। वर्द्धते अदित् अवृधत् अवर्द्धिष्ट ववृधे वर्त्स्यति वर्द्धिष्यते। उदित् क्त्वा वेट्।

वृधसान पुंस्त्री० वृध—आन असुक् च। मनुष्ये सि०कौ०। स्त्रियां ङीष्। [उणादि०।

वृधसानु पु० वृध—आनु असुक् च। १पुरुषे २पत्रे ३क्रतौ च

वृन्त न० वृ—क्त नि० मुम् च। (बोँटा) फलपत्रादिबन्धने अमरः

वृन्ताक पुंस्त्री० वृन्तमकति अक—अण्। वार्त्ताकौ शब्दच०। स्त्री राजनि० स्त्रीत्वे गौरा० ङीष्।

वृन्तिता स्त्री वृन्तं जातमस्याः तार० इतच्। कटुकायां शब्दच०

वृन्द न० वृणुते वृणुते वा—वृञ—वृङ वा दन् नि०। १समूहे अमरः। २दशार्बुदसंख्यायां ज्योति० ३केदारकन्यायां ४तुलस्यां स्त्री शब्दच०। ५राधिकायां स्त्री वृन्दावनम्।

वृन्दार त्रि० वृन्दमृच्छति ऋ—अण्। मनोहरे शब्दच०।

वृन्दारक पु० वृन्देन कायति कै—क। १देवे अमरः। स्वार्थे क। २मुख्ये ३मनोहरे च त्रि० ४यूथपतौ पु०ब्याडि०।

वृन्दावन स्त्री वृन्दायाः तपस्यार्थं तत्क्रीडार्थं वा वनम् शा० त०। मथुरासन्निकृष्टे वैष्णवे १तीर्थभेदे गोलोकस्थे धामभेदे च “कमलांशा तस्य (केदारस्य) कन्या नाम्ना वृन्दा तपस्विनीत्युपक्रमे “वृन्दा यत्र तपस्तेपे तत्तु वृन्दावनं स्मृतम्। वृन्दया यत्र कृता क्रीड़ा तेन वा मुनिपुङ्गव!। राधाषोड़शनाम्नां च वृन्दा नाम श्रुतौ श्रुतम्। तस्याः क्रीडावनं रम्यं तेन वृन्दावनं स्मृतम्” ब्रह्मवै० जन्म० १७अ०। “नित्यं वृन्दावनं धाम ब्रह्माण्डोपरि संस्थितम्। पूर्णब्रह्मसुखैश्वर्यं नित्यमानन्दमव्ययम्। वैकुण्ठादि तदंशांशं स्वयं वृन्दावनं भुवि। गोलोकैश्वर्यं यत्किञ्चित् गोकुले तत् प्रकीर्त्तितम्। वैकुण्ठादिवैभवं यत् द्वारकायां प्रकाशयेत्। यद्ब्रह्म परमैश्वर्यं नित्यं वृन्दावनाश्रयम्। तस्मात् त्रैलोक्यमध्ये तु पृथ्वी धन्येति विश्रुता। यत् माथुरकं धाम विष्णोरेकान्तवल्लभम्। अस्मात्परमधिकं नामधेयं माथुरमण्डलम्। निगूढं परमं स्थानं पुर्य्यभ्यन्तरसंस्थितम्। सहस्रपत्रकमलाकारं माथुरमण्डलम्। विष्णुचक्रं परिभ्रामधाम वैष्णवमद्भुतम्। कर्णिकापत्रविस्तारं रहस्यक्रममीरितम्। प्रधानं द्वादशारण्यं माहात्म्यं कथितं क्रमात्। भद्र१श्री२लौह३भाण्डीर४महा५तालख६दीरकाः७। बहुलं८कुमुदं९ काम्यं१०मधु११वृन्दावनं१२ तथा। द्वादशैता वने संख्याः कालिन्द्याः सप्त पश्चिमे। पूर्वे पञ्च वनं प्रोक्तं तत्रास्ति गुह्यमुत्तमम्। महावनं गोकुलाख्यं रम्यं मधुवनं तथा। पूर्वे तु पञ्च भद्राद्यास्तालाद्याः सप्त पश्चिमे। अन्यच्चोपवनं प्रोक्तं कृष्णक्रीड़ारसस्थलम्। कदम्बखण्डिकं नन्दवनं नन्दीश्वरं तथा नन्दनानन्दखण्डञ्च पालाशाशोककेतकम्। सुगन्धिमादकैलमन्मृतं भोजनस्थलम्। सुखप्रसाधनं वत्सहरणं शेषशायनम्। श्यामपूर्व दधिग्रामं चक्रभानुपुरं तथा सङ्केतं विपदस्थैव बालक्रीडञ्च धूसरम्। कामद्रुमं सुरोवीरसुतस्तस्यापि नन्दनम्। इत्यमेव वने संख्यास्त्रिंशच्चोपवने स्मृता। पूर्वोक्तं द्वादशारण्यं प्रधानं वनमुत्तमम्। तस्योत्तरे चतुर्थस्य वनस्य समुदाहृतम्। नानाविधरसक्रीडानानालीलामयस्थलम्। दलविस्पष्टविस्ताररहस्यक्रममीरितम्। सहस्रपत्रकमलं गोकुलाख्यं महत् पदम्। तस्योपरि स्वर्णपीठे मणिमण्डपमण्डितम्। तत्र तत्र क्रमाद्दिक्षु विदिक्षु दलमीरितम्। यद्दलं दक्षिणे प्रोक्तं परं गुह्योत्तमोत्तमम्। तस्मिन्

दले महापीठं निगमागमदुर्गमम्। योगीन्द्रैरपि दुष्प्राप्यं सर्वात्मा यत्र गोकुले। द्वितीयं दलमाग्नेयं तद्रहस्य द्विधा तथा। निकुञ्जककुटीवीरकुटीरौ तद्दले स्थितौ। पूर्वदलं तृतीयं यत् प्रधानं स्थानमुच्यते। गङ्गादिसर्वतीर्थानां सर्वाख्यातमुखं भवेत्। चतुर्थदलमैशान्यां सिद्धपीठे प्रतिष्ठितम्। कामयकृतना गोपी तत्र कृष्णपतिं लभेत्। वस्त्रालङ्कारहरणं तद्दले समुदाहृतम्। उत्तरे पञ्चमं प्रोक्तं दलं सर्वदलोत्तमम्। द्वादशादित्यमत्रैव दलञ्च कर्णिकासमम्। वायव्यन्तु दलं षष्ठं तत्र कालीह्रदः स्मृतः। दलोत्तमोत्तमञ्चैव प्रधानस्थानमुच्यते। सर्वोत्तमदलं श्रेष्ठं पश्चिमे सप्तमं दलम्। यज्ञपत्नीगणानाञ्च तदीप्सितवरप्रदम्। अघासुरस्य निर्वाणं चक्रे सिद्धप्रदर्शितम्। ब्रह्ममोहनमत्रैव दलं ब्रह्मह्रदावहम्। नैर्ऋत्यान्तु दलं प्रोक्तमष्टमं व्योमघातनम्। शङ्खचूड़वधस्तत्र नानाक्रीड़ारसस्थलम्। सुतनष्टदलं प्रोक्तं वृन्दारण्यान्तरस्थितम्। श्रीमद्वृन्दावनं धन्यं यमुनायाः प्रदक्षिणम्। सिद्धविद्यमधिष्ठाता इष्टो गोपीश्वराभिधः। सहायो षोड़शदलं श्रिया पूर्वं तदोदितम्। सर्वेषु दिक्षु यत् प्रोक्तं प्रादक्षिण्याद् यथाक्रमम्। महत् पदं महद्धाम प्रधानं षोड़शं दलम्। प्रथमैकदलं श्रेष्ठं माहात्म्यं कर्णिकासमम्। तस्मिन् मधुवनं प्रोक्तं तत्र प्रादुरभूत् स्वयम्। चतुर्भुजो महाविष्णुः सर्वकारणकारणम्। तत्राधिष्ठितदेवं सुनिश्रेष्ठ! सनातनम्। दलं द्वितीयमाख्यातं किञ्चिल्लीलारसस्थलम्। खदिरारण्यमत्रैव दलञ्च समुदाहृतम्। सर्वश्रेष्ठदलं प्रोक्तं माहात्म्यं कर्णिकासमम्। तत्र गोवर्द्धने रम्ये नित्यानन्दरसाश्रये। कर्णिकायां महालीला तल्लीलारससागरे। यत्र कृष्णो नित्यवृन्दाकाननस्य पतिर्भवेत्। कृष्णो गोविन्दतां प्राप्तः किमन्यैर्बहुभाषितैः। दलं तृतीयमाख्यातं सर्वश्रेष्ठोत्तमोत्तमम्। चतुर्थदलमाख्यातं महाद्भुतरसस्थलम्। हरिर्यस्य पतिः साक्षात् स्थितं गोवर्द्धनं स्वयम्। कदम्बखण्डी तत्रैव पूर्णानन्दरसाश्रयः। स्निग्धं हृद्यं प्रियं रम्यं दलञ्च समुदाहृतम्। नन्दीश्वरदलं रम्यं तत्र नन्दालयः स्मृतः। कर्षणाद्दलमाहात्म्यं पञ्चमं दलमुच्यते। अधिष्ठाता गोपालो धेनुपालस्ततः परम्। दलं षष्ठं यदाख्यातं तत्र नन्दवनं स्मृतम्। सप्तमं बकुलारण्यं दलं रम्यं प्रकीर्त्तितम्। दलाष्टमं तालवनं तत्र धेनुवधः स्मृतः। नवमं कुमुदारण्यं दलं रम्यं प्रकीर्त्तितम्। काम्यारण्यं दलं हृद्यं दशमं सर्वकारणम्। ब्रह्मप्रसादनं तत्र विष्णुवृन्दं प्रदर्शितम्। कृष्णक्रीड़ारसस्थानं प्रधानं दलमुच्यते। दलमेकादशं प्रोक्तं भक्तानुग्रहकारणम्। निर्माणं सेतुबन्धस्य नानारसमयस्थलम्। भाण्डीरं द्वादशदलं वनं रम्यं मनोहरम्। कृष्णक्रीड़ारसस्तत्र श्रीदामादिभिरावृतः। त्रयोदशदलं श्रेष्ठं तत्र भद्रवनं स्मृतम्। चतुर्दशदलं प्रोक्तं सर्वसिद्धिप्रदं स्थलम्। श्रीवनं तत्र रुचिरं सर्वैश्वर्य्यस्य कारणम्। कृष्णलीलामयदलं श्रीकीर्त्तिकान्तिवर्द्धनम्। पञ्चदशं दलं श्रेष्ठं तत्र लोहवनं स्मृतम्। कथितं षोड़शदलं माहात्म्यं कर्णिकासमम्। महावनं तत्र गीतं तत्रास्ति गुह्यमुत्तमम्। बालक्रीड़ारसस्तत्र वत्सपालैः समावृतः। पूतनादिवधस्तत्र यमलार्जुनभञ्जनम्। अधिष्ठाता तत्र बालगोपालः पञ्चमाब्दिकः। नाम्ना दामोदरः प्रोक्तः प्रेमानन्दरसार्णवः। दलं प्रसिद्धमाख्यातं सर्वश्रेष्ठदलोत्तमम्। कृष्णक्रीड़ा च किञ्जल्के शृङ्गारदलमुच्यते। सिद्धिप्रधानं किञ्जल्कं दलञ्च समुदाहृतम्" पद्मपु० पा०ख०

वृन्दिष्ठ त्रि० अतिशयेन वृन्दारको मुख्यः इष्ठन् वृन्दादेशः। अतिशयमुख्ये "वृन्दिष्ठमासीत् वसुधाधिपानाम्" इति भट्टिः। ईयसुन् वृन्दीयानप्यत्र त्रि० स्त्रियां ङीप्।

वृश वृतौ दिवा०पर०सक० सेट्। वृश्यति अवृशत् अवशीत् पुषादित्वमित्येके तेन अवृशदित्येव।

वृश पु० वृश-क। १वासकवृक्षे भरतः। २आर्द्रके पुंस्त्री० शब्दच०। स्त्रियां ङीष्। ३ओषधिभेदे स्त्री उणादि०।

वृश्चिक पु० व्रश्च-किकन्। (विछा) १कीटभेदे राजनि०। कीटशब्दे दृश्यम्। २शूककीटे (शुयापोका) अमर०। ३मेषादितः अष्टमे राशौ ज्यो०। ४ओषधिभेदे मेदि०। ५मदनवृक्षे ६कर्कटे ७गोमयकीटे च भरतः। दनाद्धि संक्षिप्तसारः।

वृश्चिकराशिश्च २१६०० कलात्मकस्य राशिचक्रस्य १२६०० कलोपरि १८०० कलात्मकः विशाखाशेषपादानुराधाज्येष्ठानक्षत्रात्मकः स च शीर्षोदयः श्वेतवर्णः जलराशिः उत्तरदिक्पतिः कफप्रकृतिः जलमध्यः बहुपुत्रः बहुस्त्रीसङ्गः छिद्रप्रवर्णः विप्रवर्णः सौम्यः अङ्गुलाकृपः समराशिः स्थिरः पुष्करदंशः सरीसृपजातिः प्राच्यः" बृहज्जातके दृश्यम्।

वृश्चिकप्रिया स्त्री वृश्चिकस्य शुककीटस्य प्रिया । पूतिकायाम् शब्दच० ।

वृश्चिककर्णी स्त्री वृश्चिकस्य कर्ण इव पत्रं यस्याः । आखुकर्ण्याम् राजनि० । [भेदे राजनि० ।

वृश्चिका स्त्री वृश्चिकः तद्विषमस्त्यस्या अच् । (बिछाती) क्षुप-

वृश्चिकाली स्त्री वृश्चिक इवालति पर्याप्नोति स्पर्शने वेदनायै अच् गौरा० ङीष् । (बिछाती) क्षुपभेदे रत्नमा० ।

वृश्चिपत्री स्त्री वृश्चिक इव पत्रं विषाक्तमस्य पृषो० कलोपः ङीप् । वृश्चिकाल्याम रत्नमा० ।

वृश्चीर पु० व्रश्च-कीरच् । श्वेतपुनर्नवायाम् रत्नमा० ।

वृष सेचने सक० भ्वा० पर० प्रजननसामर्थ्ये ऐश्वर्ये अक० सेट् । वर्षति अवर्षीत् । उदित् क्त्वा वेट् ।

वृष प्रजननसामर्थ्ये ऐश्वर्ये चुरा० आत्म० सक० सेट् । वर्षयते अवीवृषत-अववर्षत ।

वृष पु० वृष-क । १वृषभे पुङ्गवे अमरः २मेषादितो द्वितीये राशौ ज्यो०त० । ३पुरुषभेदे ४एकादशमहूर्त्ताकालीने ५इन्द्रे ६धर्मे गरुडपु० ८१अ० । ७शृङ्गिमाले ८मूषिके ९शुक्र-युक्ते १०वास्तुस्थानभेदे ११वासकवृक्षे मेदि० । १२शत्रौ जटा० । १३कामे १४बलयुक्ते त्रि०विश्वः १५ऋषभनामौ-षधौ राजनि० । १६मयूरपिच्छे १७श्रीकृष्णे च त्रिका० । वृषराशिश्च २१६०० कलात्मकस्य राशिचक्रस्य१८००कलो-परि १८०० कलात्मकः । कृत्तिकाशेषत्रिपादरोहिणीमृग-शिरार्द्धात्मकः स च सौम्यः अङ्गना समः स्थिरः पुष्क रांशः चतुष्पाद् निशाबली याम्यः दिशारचरः शुक्लः दक्षिणदिगीशः रात्रिवंशः पृष्ठोदयः शीतस्वभावः वातप्रकृतिः सुन्दरभूस्वामी श्वेतवर्णः वैश्यजातिः मध्य-शब्दकरः मध्यमस्त्रीसङ्गः मध्यमप्रजश्च इत्यादि० मूलं दृश्यम् । पुरुषविशेषलक्षणञ्च "बहुगुणबद्ध-वक्षः शीघ्रकामो वताद्धः ,सकलरुचिरदेहः सत्यवादी वृषो ना" रतिम० उक्तम् । १८अरिष्टासुरे स हि वृषाकारेण वृन्दावने गोकुलने प्रवृत्तः कृष्णेन हतः । तत्-कथा हरिवं० ७८अ० । वृषस्य शुभाशुभलक्षणं गोलक्ष-णशब्दे १७१८ पृष्ठादौ दर्शितम् । वृषादि०आद्युदात्तः ।

वृषकर्णी स्त्री वृष इव सुदर्शनः कर्णोऽस्या ङीप् । (सुदर्शन गुलञ्च) ख्यातायां लतायाम रत्नमा० ।

वृषगन्धा स्त्री वृषस्य गन्धो लेशो यत्र । वृद्धदारकाख्यायां राजनि० ।

वृषण पु० वृष-क्यु । १अण्डकोषे अमरः । २वीर्यान्विते त्रि० "स्थूललिङ्गो दरिद्रः स्यात् दुःखो वृषणोभवेत् । विषमे

स्त्रीचपलो वै नृपः स्यात् वृषणे समे प्रलम्बवृषणोऽ-ल्पायुर्निर्द्रव्यो मणिभिर्भवेत्" गरुडपु० ६४अ० ।

वृषणश्व पु० कर्म० शक० ; सामर्थ्ययुक्ते इन्द्राश्वे त्रिका० ।

वृषण्वत् त्रि० वृषन्+मतुप् मस्य वः न नलोपः णत्वम । वर्षणयुते स्त्रियां ङीप् । [पकरणे रथादौ जटा० ।

वृषण्वसु त्रि० वृषा वसु यस्य न नलोपः णत्वम् । इन्द्रस्यो-

वृषदंशक पुंस्त्री० वृषान् मूषिकान् दशति दन्श-ण्वुल् । विडाले अमरः स्त्रियां ङीष् ।

वृषध्वज पु०वृषो वृषभो मूषिको धर्मो वा ध्वजो यस्य । १शिवे अमरः वृषकेतनादयोऽप्यत्र । २गणेशे ३पुण्यकर्मयुते च विश्वः । [गौरा० ङीष् । नागरमुस्तायाम् ।

वृषध्वाङ्क्षी स्त्री वृषो बलवान् ध्वाङ्क्षः काको यस्याः ५त० ।

वृषन् पु० वृष-कनिन् । १इन्द्रे २कर्णे ३दुःखे ४वेदनाभ्याने मेदि० । ५वृषे ६अश्वे च हेमच० ।

वृषनाशन पु० वृषान् मूषिकान् नाशयति नश-णिच् ल्यु । १विडङ्गे शब्दमा० । २अरिष्टरूपवृषनाशके श्रीकृष्णे हरिवं० ७८अ० ।

वृषपर्णी स्त्री वृषस्य मूषिकस्य कर्ण इव पर्णमस्याः । (उन्दूरकाणी) १आखुकर्ण्याम् रत्नमा० । २सुदर्शनीवृक्षे राजनि० ।

वृषपर्वन् पु० वृषे पर्व उत्सवो यस्य । १शिवे २दैत्यभेदे च । वृषं बलकरं पर्व यस्य । ३भृङ्गारवृक्षे ४केशरौ च विश्वः ।

वृषभ पु० वृष-अभच् किच्च । १वृषे २श्रेष्ठे ३वैदर्भीरीतिभेदे मेदि० । ४जिनभेदे हेमच० । ५कर्णच्छिद्रे ६ऋषभनामौषधे च उणादि० । [दयोऽप्यत्र ।

वृषभगति पु० वृषभेण गतिरस्य । शिवे हारा० वृषभयाना-

वृषभध्वज पु० वृषभो ध्वजोऽस्य । शिवे वृषभकेतनादयोऽप्यत्र

वृषभाक्षी स्त्री वृषभस्य अक्षीव पुष्पमस्याः षच् समा० ङीष् । इन्द्रवारुण्याम् राजनि० ।

वृषभानु(नु) पु० राधिकायाः पितरि । ब्रह्मवै० ज० १७अ० ।

वृषभानु(नु)सुता स्त्री ६त० । राधिकायाम् । [त्रिका० ।

वृषभासा स्त्री वृषा इन्द्रेण भासते भास-अच् । अमरावत्यां

वृषल पु० वृष-कलच् । १शूद्रे २लशुने ३घोटके ४चन्द्रगुप्ते नृपे च मेदि० । ५अधार्मिके जटा० ।

वृषली स्त्री "पितुर्गेहे च नारी रजः पश्यत्यसंस्कृता । भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता" इत्युक्तायां पितृगेहे दृष्टरजस्कायामनूढायां कन्यायाम् । वृषल+भार्यायां जातौ वा ङीष् । २वृषलजातिस्त्रियां

२तत्स्त्र्यायाञ्च । "सप्ताहा वृषलीपतिः" इति "वृषली-फेनपीतस्य" इति च मनुः ।

वृषलोचन पु० वृषस्येव लोचनं यस्य । १मूषिके । हेम० । २वृषनेत्रे न० । ६त० । ३वृषतुल्यनेत्रे त्रि० ।

वृषवाहन पु० वृषो वाहनमस्य । शिवे वृषभवाहनादयोऽप्यत्र

वृषशत्रु पु० ६त० । श्रीकृष्णे त्रिका० वृषान्तकादयोऽप्यत्र

वृषस्यन्ती स्त्री वृषेण जननमिच्छति वृष+जाभार्थे क्यच् सुक् च शतृ-ङीप् । कामुक्याम् अमरः "कामुकी सा वृषस्यन्ती" भट्टिः । [पाठान्तरम् अमरः । २कपिकच्छ्वां हेमच० ।

वृषा स्त्री वृषः मूषिकस्तदाकारः पर्णोऽस्त्याः अच् । १मूषिकप०

वृषाकपायी स्त्री वृषाकपेः पत्नी ङीप् ऐङ् च । १लक्ष्म्यां २गौर्य्याम् अमरः । ३स्वाहायां ४शच्यां ५जीवन्त्यां ६शतावर्य्याञ्च मेदि० ।

वृषाकपि पु० वृषं धर्मं न कम्पयति न+कपि-इन् नलोपः । १महादेवे २विष्णौ ३अग्नौ मेदि० ४इन्द्रे क्षीरस्वामी ।

वृषाकर पु० वृषस्य सामर्थ्यस्याकरः । माषे राजनि० ।

वृषाङ्क पु० वृषः अङ्कोऽस्य । १शिवे २भल्लातके ३षण्डे च ४साधौ पुण्यवति च मेदि० ।

वृषाहार पुंस्त्री० वृषो मूषिक आहारो यस्य । विडाले हारा०

वृ(वृ)षि(षी) स्त्री वर्य्यादित्वे भुवन्तोऽस्यां सीदन्ति सद-एट् भुवः वृ आदेशः ङीप् पृषो० अन्तःस्थादित्वे वृषि वा ङीप् । व्रतिनां कुशमयासनभेदे अमरः ।

वृषोत्सर्ग पु० उत्+सृज-घञ् ६त० । मृताद्युद्देशेन तत्पुत्रादिभिः क्रियमाणे विधानेन वृषस्य त्यागे तद्विधिर्यथा शु०त० "कालविवेके अग्निपु० "एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः । प्रेतलोकं परित्यज्य स्वर्गलोकं स गच्छति । आद्यश्राद्धे त्रिपक्षे वा षष्ठे मासि च वत्सरे । वृषोत्सर्गस्य कर्त्तव्यो यावत् स्यात् सपिण्डता । सपिण्डीकरणादूर्द्ध्वं कालोऽन्यः शास्त्रचोदितः" । यस्य प्रेतस्येति सामान्यश्रुतेः पितृभिन्नस्यापि वृषोत्सर्गः प्रतीयते । त्रिपक्षोऽत्र चान्द्रः श्राद्धे तथादर्शनात् श्राद्धप्रदीपे जातू० "ऊर्द्ध्वं त्रिपक्षात् यत् श्राद्धं मृताहन्येव तद्भवेत्" । अत्र पूर्वमृततिथिमादाय त्रिपक्षगणना मासिकानां मृततिथौ विधानात् त्रिपक्षश्राद्धमपि मृताहे कार्य्यम् । अत्र वत्सर इत्युपादानात् विष्णुधर्मोत्तरीये मृताह इति पदं पूर्वसंवत्सरमृततिथिपरम् । तद्यथा वृषोत्सर्गमधिकृत्य विष्णुः "विपुवद्द्वितये चैव मृताहे बान्धवस्य च । मृताहो यस्य यस्मिन् वा तस्मिन्नहनि

कारयेत्" यस्य बान्धवस्य पित्रादेर्यस्मिन्नहनि मृताहः तत्तिथौ कर्त्तव्यमित्यर्थः । (तत्तिथिश्च प्रथमादिकला-ह्रासवृद्ध्यन्यतरक्रियया सजातीयतिथित्वेन त्रिपक्षश्राद्धे पक्षान्तरत्वेऽपि न क्षतिः) । छन्दोगप० "वृषोत्सर्गविधिं व्याख्यास्यामः "कार्त्तिक्यां पौर्णमास्यां रेवत्याश्वयुज्यां दशाहे गते संवत्सरेऽतीते वा" । अत्र मृततिथिमादाय वत्सरगणना दशाहवदित्यविरोधः । एकादशाह इति आद्यश्राद्ध इति च अशौचान्तद्वितीयदिनपरम् । अशौचान्तात् द्वितीयेऽह्नीत्युपक्रमे "वृषोत्सर्गश्च कर्त्तव्यो देया च कपिला शुभा" मत्स्यपु०गरुडवाक्यत्वात् । प्रेतवृषोत्सर्गे वृद्धिश्राद्धं न कार्य्यम् "नार्वाक् संवत्सरात् वृद्धिर्वृषोत्सर्गे विधीयते । सपिण्डीकरणादूर्द्ध्वं वृद्धिश्राद्धं विधीयते" छन्दोगवचनात् । वृषलक्षणमाह कर्मप्र०कात्या० "अव्यङ्गो जीववत्सायाः पयस्विन्याः सुतो बली । एकवर्णो द्विवर्णो वा यो वा स्यादष्टकासुतः । यूथाद्वसतरो यस्तु वर्णो वा नीलषण्ड वा । समावरान् सप्त परान् उत्सृष्टस्तारयेद्वृषः" । अष्टकासुतः अष्टकातिथिषु जातः "वृष एव स मोक्तव्यो न सन्धार्य्यो गृहे वसन्" मत्स्यपु० । वत्सतरीविशेषमाह कात्या० "अपतो लोहिता पत्नी पार्श्वाभ्यां नीलपाण्डुरे । पृष्ठतश्च भवेत् कृष्णा वृषभस्य च मोक्षणे । चतस्रो वत्सिका भद्रा द्वे वा सम्भवतोऽपि वा । चतुर्षु सर्वाङ्गसंपूर्णं कन्या वा वत्सिका भवेत्" देवीपु०च० । अत्र सम्भवत इत्युक्त्या एकयापि वत्सतर्य्या वृषोत्सर्गः सिध्यति । "अङ्कित्वोत्सृज्यते पूर्वं गाथामुक्त्वा सर्वतः । तप्तेन शामतश्चक्रं याम्ये शूलं समालिखेत् । धातुना हेमतारेण आयसेनाथवाऽङ्कयेत्" देवीपु० । प्रेतोद्देश्यकवृषोत्सर्गस्तु मलमासादावपि कर्त्तव्यः "अशौचान्तेऽपि कर्त्तव्य वृषोत्सर्गादिकं बुधैः । मलिम्लुचादिदोषस्तु न ग्राह्यस्तत्र कर्हिचित्" शु०त० धृतवाक्यात् । काम्यमाधवीये कालादर्शे च मलमासे कर्त्तव्यतानिषेधस्य प्रकरणस्य प्रवृत्तं यथा "आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रयः" । अत्र काम्येति विशेषणात् नित्यस्य न निषेधः "अशौचान्तात् द्वितीयेऽह्नि यस्य नोत्सृज्यते वृषः । न तस्य निष्कृतिर्दृष्टा दशैः श्राद्धशतैरपि" इत्युक्तेस्तस्य नित्यत्वम् चन्द्रधेनुवत्स्वेदृश्यम् ।

वृष्टि स्त्री वृष-क्तिन् । १वर्षणे अमरः । कर्मणि क्तिन् । मेघादिभिः २सिच्यमाने जले । तत्कारणं यथा "शृण्वन्तु परमार्थञ्च किमिन्द्रादुद्वृष्टिरेव च । सर्य्याद्धि

जायते तोयं तोयात् शस्यानि शाखिनः। तेभ्योऽन्नानि फलान्येव तेभ्यो जीवन्ति जीविनः। सूर्य्यपरस्य नीरस्य काले तस्मात् समुद्भवः। सूर्य्यो मेघादयः सर्वे विधात्रा ते नियोजिताः। यत्राब्दे यो जलधरो गजश्च सागरोमरुत्। शस्याधिपो नृपो मन्त्री विधात्रा ते निरूपिताः। जलाढ़कानां शस्यानां तथानाश्च निरूपितम्। अब्देऽब्देऽस्त्येव तत् सर्वं कल्पे कल्पे युगे युगे। हस्ती समुद्रादादाय करेण जलमीप्सितम्। दद्याद्वनाय तद्द्याद्दातेन प्रेरितो घनः। स्थाने स्थाने पृथिव्याञ्च काले काले यथोचितम्। ईश्वरेच्छय.वि॰ भूतं नूनं सत्प्रतिबन्धकम्। भूतं भव्यं भविष्यञ्च सन्तत् क्षुद्रञ्च मध्यमम्। धात्रा निरूपितं कर्म केन तात! निवार्य्यते” ब्रह्मवै॰जन्म॰२१अ॰। “अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिः वृष्टे-रन्नं ततः प्रजा” गीता। आसन्नवृष्टिसूचकानि यथा “मयूराः स्तनयित्नूनां शब्देन हृषिता जगुः। केकायन्ति प्रतिवने सततं वृष्टिसूचकाः। मेघांवृत्तकानां मधुरवातकानां मनोहरः। श्रूयतामनिलक्तानां वृष्टि-सन्निधिसूचकः। गगने शक्रचापेन क्षतं सामस्तमा-स्पदम्। धारासारशरैस्तापं छेत्तुं प्रति यथोद्गतः” कालिकापु॰ १५अ॰।

वृष्टिघ्नी स्त्री वृष्टिं हन्ति कारणत्वेन जहाति हन–क ङीप्। सूक्ष्मैलायाम् शब्दच॰।

वृष्टिजीवन त्रि॰ वृष्टिः वृष्टिजलमेव जीवनं पालनोपायो यस्य। १वृष्टिजलमात्रोपजीविनि चातके। २देवमातृके देशे हेमच॰। [हारा॰। ३वृष्टिभवे त्रि॰।

वृष्टिभू पु॰ वृष्टौ तदुपलक्षिते काले भवति भू–क्विप्। १भेके

वृष्टिवैकृत न॰ ६त॰। उपद्रवसूचके वृष्टिविकारे यथोक्तं वृ॰ स॰ ४६अ॰

“दुर्भिक्षमनावृष्ट्यामतिवृष्ट्यां क्षुद्भयं सपरचक्रम्। रोगो ह्यऋतुभवायां नृपवधोऽनभ्रजातायाम्। शीतोष्णविपर्य्यासे नो सम्यगृतुषु च समस्तेषु। षण्मासाद्राष्ट्रभयं रोगभयं दैवजनितं च। अन्यतौ सप्ताहं प्रबन्धवर्षे प्रधाननृपमरणम्। रक्ते शस्त्रोद्योगो मांसास्थिवसा-दिभिर्मरकः। धान्यहिरण्यत्वक्फलकुसुमाद्यैर्वर्षितैर्भयं विद्यात्। अङ्गारपांशुवर्षे विनाशमायाति तन्नगरम्। उपला विना जलधरैर्विकृता वा प्राणिनो यदा वृष्टाः। छिद्रं चाप्यतिवृष्टौ सस्यानामीतिसञ्जननम्। क्षीरघृत-क्षौद्राणां दध्नो रुधिरोष्णयोर्वा वर्षे। देशविनाशो ज्ञेयोऽसृग्वर्षे चापि नृपयुद्धम्। यद्यमलेऽर्के छाया न दृश्यते दृश्यते प्रतीपा वा। देशस्य तदा सुमहद्भयमा-यातं विनिर्द्देश्यम्। व्यभ्रे नभसीन्द्रधनुर्दिवा यदा दृश्यतेऽथ वा रात्रौ। प्राच्यामपरस्यां वा तदा भवत् क्षुद्भयं सुमहत्। सूर्य्येन्दुपर्जन्यसमीरणानां योगः स्मृतो वृष्टिविकारकाले। धान्यान्नगोकाञ्चनदक्षिणाश्च देयास्ततः शान्तिमुपैति पापम्”।

वृष्णि पु॰ वृष–नि किच्च। १यादववंशे नृपभेदे शब्दच॰। २श्रीकृष्णे ३मेघे अमरः। ४चण्डे ५पाषण्डे च त्रि॰ शब्दर॰।

वृष्णिगर्भ पु॰वृष्णिः यादवकुलं गर्भो यस्य। श्रीकृष्णे हारा॰

वृष्य पु॰ वृषाय हितो यत् वृष–क्यप् वा। १माषे हेमच॰। २शुक्रवृद्धिकारके त्रि॰ भावप्र॰। ३वाजीकरणे न॰ ४आमलक्यां ५शतावर्य्यां ५ऋषभनामौषधौ च स्त्री राजनि॰। ७ऋद्धिनामौषधौ रत्नमा॰। [राजनि॰।

वृष्यकन्दा स्त्री वृष्यः शुक्रवर्द्धकः कन्दो यस्याः। विदार्य्याम्

वृष्यगन्धिका स्त्री वृष्यः शुक्रवर्द्धको गन्धो यस्याः कप् अत इत्त्वम्। अतिबलायाम् राजनि॰। कबभावे वृष्यगन्धा वृद्धदारके स्त्री शब्दच॰। [वृष्यवल्लिका तत्रैव स्त्री।

वृष्यवल्ली स्त्री कर्म॰। १विदार्य्याम् राजनि॰। स्वार्थे क वृष्यः।

वृह दीप्तौ वा चु॰ उभ॰सक॰ पक्षे भ्वा॰ पर॰ इदित्। वृंह-यति ते अववृंहत् त। वृंहति अवृंहीत्।

वृह वृद्धौ शब्दे च अक॰ भ्वा॰ पर॰ सक॰ सेट्। वर्हति इरित् अवृहत् अवर्हीत्। [इदित्। वृंहति अवृंहीत्

वृह ध्वनौ हस्तिध्वनौ वृद्धौ च भ्वा॰पर॰ पर॰अक॰ सेट्।

वृह वृद्धौ भ्वा॰पर॰सक॰ सेट्। वर्हति अवर्हीत्।

वृह उद्यमे तु॰पर॰अक॰वेट्। वृहति। अवर्हीत्-अवृक्षत्।

वृह वृद्धौ भ्वा॰आत्म॰ सक॰ सेट् इदित्। वृंहते अवृंहिष्ट।

वृहच्चञ्चु पु॰ वृहती चञ्चुरिव मञ्जरी यस्य। महाचञ्चुशाके राजनि॰। [१फलपूरं शब्दचि॰। २उदारचित्तयुते त्रि॰।

वृहच्चित्त पु॰ वृहत् उदारं चित्तं यस्मात् ५ब॰। यस्य वा ६ब॰।

वृहच्छल्क पु॰ वृहत् शल्कोऽस्य। चिङ्गटमत्स्ये जटा॰।

वृहत् त्रि॰ वृ॰वृह–अति। महति अमरः स्त्रियां गौरा॰ङीप्।

वृहती स्त्री वृहत्+गौरा॰ ङीप्। १महत्यां स्त्रियां २क्षुद्र-वार्त्ताक्याम् राजनि॰। ३वारिधान्यां ४वाचि ५कण्टका-रिकायाम् मेदि॰। ६नवाक्षरपादके छन्दोभेदे वृ॰र॰। संज्ञायां कन् वृहत्कः। उत्तरीयवस्त्रे स्त्री अमरः।

बृहतीपति पु० बृहतीनां वाचां पतिः। बृहस्पतौ हेमच०।

बृहत्कन्द पु० बृहत् कन्दो यस्य। १गृञ्जने रत्नमा०। २विष्णुकन्दे च राजनि०।

बृहत्काय पु० कर्म०। (खामड़ा) वृक्षभेदे हारा०।

बृहत्कालशाक पु० कर्म०। (बड़ कालकासुन्दे) शाकभेदे त्रिका०।

बृहत्कुक्षि पु० बृहत् कुक्षिर्यस्य। तुन्दिले (भुँडे) अमरः।

बृहत्ताल पु० कर्म०। हिन्ताले राजनि०।

बृहत्तिक्ता स्त्री कर्म०। पाठायाम् (आकनादि) राजनि०।

बृहत्तृण पु० बृहत् तृणं यत्र। वंशे शब्दच०।

बृहत्त्वच् पु० बृहती त्वक् यस्य। (छातियान) वृक्षे रत्नमा०।

बृहत्पत्र पु० बृहत् पत्रमस्य। १हस्तिकन्दे (हातिकान्दा) राजनि०। २त्रिपर्णिकायां स्त्री राजनि०।

बृहत्पाटलि पु० पु० पट–कलि कर्म०। धुस्तूरवृक्षे त्रिका०।

बृहत्पाद त्रि० बृहत् पादो मूलमस्य। वटवृक्षे शब्दच०।

बृहत्पालिन् पु० बृहतः पालयति पालि–णिनि। वनजीरके राजनि०।

बृहत्पीलु पु० कर्म०। महापीलौ राजनि०।

बृहत्फला स्त्री बृहत् फलं यस्याः। १कटुतुम्ब्याम् २महेन्द्रवारुण्यां ३कुष्माण्ड्यां ४महाजम्ब्वां च राजनि०।

बृहत्साम न० कर्म०। "त्वामिद्धि हवामहे" इत्यस्यामृचि गीयमाने साम्नि "बृहत्साम तथा साम्नाम्" गीता।

बृहदश्व पुंस्त्री० बृहदश्वमस्य। गजे शब्दच० स्त्रियां ङीष्।

बृहदम्ल पु० कर्म०। (कामराङ्गा) वृक्षे शब्दच०।

बृहदेला स्त्री कर्म०। स्थूलैलायाम् राजनि०।

बृहद्गृह पु० कारूषदेशे त्रिका०। स च हिमालयस्य पश्चाद्विषयस्थो मालवदेशपश्चिमतः।

बृहद्गोल न० कर्म०। (तरमुज) लताफले शब्दच०।

बृहद्दल न० बृहत् दलमस्य। १पट्टिकालोध्रे २हिन्ताले च राजनि०।

बृहद्दल न० कर्म०। महाकाले त्रिका०। [च अमरः।

बृहद्भानु पु० बृहद्भानुः किरणो यस्य। १अग्नौ २चित्रकवृक्षे

बृहद्रथ पु० बृहत् रथोऽस्य। १इन्द्रे २यज्ञपात्रभेदे ३मन्त्रभेदे च। [जनि०।

बृहद्राविन् पु० बृहत् रौति–रु–णिनि। क्षुद्रोलूके रा-

बृहद्वल्क पु० बृहत् वल्कमस्य। पट्टिकालोध्रे राजवल्लभः।

बृहद्वात पु० बृहत् वातो धातुभेदो यस्मात् ५ब०। (देधान) धान्ये रत्नमाला।

बृहद्वारुणी स्त्री कर्म०। महेन्द्रवारुण्याम् राजनि०।

बृहद्वीज पु० बृहत् वीजमस्य। आम्रातके शब्दच०।

बृहन्नल पु० बृहत् नलो यस्य। महापोटगले मेदि०।

बृहन्नला(डा) पुंस्त्री० बृहत् नलो यस्य वा लस्य डः। अर्जुने हेमच० विराटपर्वणि तत्कथा दृश्या।

बृहस्पति पु० बृहत्याः वाचः पतिः पृषो० नि०। १जीवे देवाचार्ये अमरः २ग्रहभेदे सू० सि० खगोलशब्दे तत्कक्षादिमानं तद्रूपादि च ग्रहयज्ञशब्दे दृश्यम्। बृहस्पतिना च बौद्धधर्मः प्रवर्त्तितो यथाह मत्स्यपु० २४अ० "ततो बृहस्पतिः शक्रमकरोद्बलदर्पितम्। ग्रहशान्तिविधानेन पौष्टिकेन च कर्मणा। गत्वाथ मोहयामास रजिपुत्रान् बृहस्पतिः। जिनधर्मं समास्थाय वेदबाह्यं स वेदवित्। वेदत्रयीं परिभ्रष्टांश्चकार धिषणाधिपः। वेदबाह्यान् परिज्ञाय हेतुवादसमन्वितान्। जघान शक्रो वज्रेण सर्वान् धर्मबहिष्कृतान्"। बृहस्पतिसवः यज्ञभेदः।

बॄ वरणे क्र्या० प० सक० सेट्। बृणाति बृणीते अवारीत् अवरिष्ट-अवरीष्ट-अवूर्ष्ट। ववरतुः।

वे सूतौ भ्वा० उभ० यजा० सक० अनिट्। वयति ते अवासीत् अवास्त वा वयादेशः उवाय ऊयतुः ऊवतुः।

वेग पु० विज–घञ्। १प्रवाहे हेमच०। २जवे अमरः ३महाकालफले मेदि० ४रेतसि हेमच०। ५मूत्रविष्ठादिनिःसारणयत्ने ६न्यायोक्ते संस्कारभेदे च "रूपादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः"। "क्षितिर्जलं तथा तेजः पवनो मन एव च। परापरत्वमूर्तत्वक्रियावेगाश्रया अमी" भाषा० तस्य क्षित्यादिगुणतोक्ता। "स्वभावतः प्रवृत्तानां मलादीनां जिजीविषुः। न वेगं धारयेद्धीरः कामादीनाञ्च धारयेत्" राजनि०।

वेगसर पुंस्त्री० वेगेन सरति सृ–ट। वेगगामिन्ये १अश्वतरे हेमच०। स्त्रियां ङीष्। २वेगगामिमात्रे त्रि० स्त्रियां ङीप्। [२वेगवति त्रि० अमरः स्त्रियां ङीप्।

वेगिन् पु० वेग+अस्त्यर्थे इनि। १श्येनविहगे राजनि०।

वेचा स्त्री विच–पृथक्त्वे अच्। वेतने हला०।

वेजानी स्त्री विज–अच् तमानयति आ–नी–ड गौरा० ङीष्। कोमराज्याम् शब्दच०।

वेड न० विड–अच्। १चन्द्रनिस्यन्दद्रवस्रवे हेमच० २नौकायां स्त्री हेमच०।

वेडमिका स्त्री रोटिकाभेदे भावप्र० कृतान्नशब्दे दृश्यम्।

वेण निशामने वाद्यादाने गतौ ज्ञाने चिन्तायाञ्च भ्वा० उभ०

सक० सेट्। वेणति ते। अवेणीत् अवेणिष्ट। ऋदित् चङि न ह्रस्वः।

वेण पु० वेण–अच्। १वर्णसङ्करजातिभेदे "वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते" मनुः। २पृथुराजपितरि नृपभेदे "तत्पुत्रेण तु जातेन वेणोऽपि ३नदीभेदे स्त्री। त्रिदिवं ययौ" विष्णुपु०। दन्त्यान्तत्वमप्यन्ये।

वेणि(णी) स्त्री वेण–इन् वा ङीप्। १केशरचनाभेदे अमरः २अजस्रमूहे जटा०। ३तत्प्रवाहे हेमच०। ४देवताडवृक्षे अमरः। ५नदीभेदे तदुत्पत्तिकथा पद्मोत्तर० १५६अ०। ६गङ्गायमुनासरस्वतीमेलनस्थाने च। प्रयागशब्दे दृश्यम्।

वेणीर पु० वेण–ईरन्। अरिष्टवृक्षे (निम) शब्दच०।

वेणु पु० वेण–उण्। १वंशे अमरः। २तद्विकारे वंशीवाद्ये च शब्दच०। "मा पूरय वेणुम्" इत्युद्भटः। ३नृपभेदे मेदि०।

वेणुक न० वेणुरिव वेणोर्विकारो वा कन्। तोत्त्रे हेमच० (पाचनवाड़ि)।

वेणुकर्कर पु० वेणुरिव कर्करः। करीरवृक्षे त्रिका०।

वेणुज पु० वेणुतो जायते जन–ड। १वेणुजाते यवाकारे तण्डुले राजनि०। २वंशजाते दण्डादौ त्रि०।

वेणुध्म पु० वेणुं वंशीं धमति ध्मा–क। वेणुवादके अमरः।

वेणुन न० वेण–उनन्। मरिचे रत्नमा०।

वेणुपत्री स्त्री वेणोरिव पत्त्रमस्याः। वंशपत्रीवृक्षे रत्नमा०।

वेणुयव पु० वेणुजातो यव इव। १वंशजाते २तण्डुलाकारे पदार्थे राजनि०। [ण्वुल्। वेणुवादक तत्रैव त्रि०।

वेणुवाद त्रि० वेणुं वादयति वद–णिच्–अण्। वेणुवादके

वेणुवीज न० ६त०। वेणुजाते यवाकारे पदार्थे राजनि०।

वेतन न० अज–तनन् वीभावः। १कृतकर्मणो मूल्ये अमरः। भृतिशब्दे दृश्यम्। २जीवनोपाये हेमच०।

वेतनानपाकर्मन् न० ६त०। व्यवहारभेदे तत्स्वरूपादिकं वीरमि० उक्तं यथा नारदः "भृतानां वेतनस्योक्तो दानादानविधिक्रमः। वेतनस्यानपाकर्म तद्विवादपदं स्मृतम्"। वेतनं कर्ममूल्यं तस्यानपाकर्म भृत्याय समर्पणं समर्पितस्य वा परावर्त्तनम्। तत्र समर्पणे विशेषमाह स एव "भृत्याय वेतनं दद्यात् कर्मस्वामी यथाक्रमम्। आदौ मध्येऽवसाने तु कर्मणो यद्विनिश्चितम्"। तुभ्यमेतावद्दं दास्यामीति यद्वेतनं परिभाषतो निश्चितं तत्त्रिधा विभज्य कर्मण आदिमध्यान्तेषु त्रिषु कालेष्वन्यतमकाले वा दद्यादित्यर्थः। एतद्वेतावद्वेतनं दास्यामीति भाषायाः असत्त्वे त्वाह स एव "भृतावनिश्चितायां तु दशभागमवाप्नुयुः। लाभं गोवीर्य्यशस्यानां वणिग्गोपकृषीवलाः" इति। दशभागं दशमभागं गोवीर्य्यं पाल्यमानगवादिभवपयोदध्यादि। यदि कर्मस्वामी भृत्याय दशमभागं न प्रयच्छति तदाऽसौ राज्ञा दाप्य इत्याह याज्ञवल्क्यः "दाप्यस्तु दशमभागं वाणिज्यपशुशस्यतः। अनिश्चित्य भृतिं यस्तु कारयेत् स महीक्षिता" इति। यस्तु स्वामी वेतनपरिच्छेदमकृत्वैव भृत्यं कर्म कारयति स तस्मात् वाणिज्यपशुशस्यलक्षणात् कर्मणः सकाशात् यल्लब्धं तस्य दशमं भागं भृत्याय महीक्षिता राज्ञा दापनीय इत्यर्थः। यत्तु "त्रिभागं पञ्चभागं वा गृह्णीयात् सीरवाहकः" इति बृहस्पतिवचनं तद्बह्वायाससाध्याकृष्टक्षेत्रविषयम्। व्यवस्थितविकल्पश्चायम्। कथमत्र व्यवस्थेत्याकाङ्क्षायामाह स एव "भक्ताच्छादभृतः सीरी भागं गृह्णीत पञ्चमम्। जातशस्यात् त्रिभागं तु प्रगृह्णीयादथाऽभृतः" इति। अशनाच्छादनाभ्यां भृतः सीरवाहो कृष्टविकृष्टक्षेत्रजातशस्यात् पञ्चमभागं गृह्णीयात्। ताभ्यामभृतस्तु तृतीयं भागमित्यर्थः। अथ वा यत्रैतावद्दास्यामीति नास्ति परिभाषा तत्र बृहस्पत्युक्तं द्रष्टव्यम् "वस्तुद्रव्यानकुशला देशकालार्थदर्शिनः। निश्चयेयुर्भृतिं यान्तु सा स्यात् प्रागकृता तदा" इति। एतावद्दास्यामीति परिभाषितेऽपि कश्चित्ततो न्यूनमपि स्वामिनाऽपरिकल्पितं देयं क्वचित्ततोऽधिकमपि देयमित्याह याज्ञवल्क्यः "देशं कालञ्च योऽतीयाल्लाभं कुर्य्याच्च योऽन्यथा। तत्र स्यात् स्वामिनश्छन्दोऽधिकं देयं कृतेऽधिके" इति। यो भृत्यः स्वाम्यनुज्ञां विना स्वातन्त्र्येण वाणिज्यादिकर्मणः फलसाधकत्वापादकं देशं कालं चातिक्रामति लाभं वा बहुतरं व्ययेन स्वल्पं करोति तस्मै पूर्वपरिभाषितभृतिमध्ये स्वामी स्वेच्छानुसारेण किञ्चिद् दद्यात्। यस्तु स्वातन्त्र्येण बहुलाभं करोति तस्मै परिभाषितमूल्यादधिकं किञ्चिद्देयं स्वामिना पारितोषिकमित्यर्थः। अनेकभृत्यसाध्यकर्मणि वेतनार्पणप्रकारमाह स एव "यो यावत् कुरुते कर्म तावत् तस्य तु वेतनम्। उभयोरप्यसाध्यं चेत् साध्ये कुर्य्याद् यथाश्रुतम्" इति। उभयोरपीत्यपिना बहूनां ग्रहणम् अस्मिन् पट्टादौ कृते भवतामेतावद्दास्यामीति परिभाषिते द्वित्रिभिरारब्धं कर्म यदि व्याध्यादि-

यास्तु समापितं तदा तेषु यो यावत् कर्म करोति तस्मै तत्कर्मानुसारेण मध्यस्थपरिकल्पितं वेतनं देयम्। न तु साम्येन दानञ्च परिसमाप्त्यभावाददानम्। यदि तैः समापितं तदा यथा परिभाषितं देयञ्च तु प्रत्येकं तत्सर्वं दातव्यं नापि कर्मानुसारेण परिकल्प्य दातव्यमित्यर्थः। यस्तु वेतनं गृहीत्वा समर्थोऽपि न कर्म करोति तं प्रत्याह वृहस्पतिः "गृहीतवेतनः कर्म न करोति यदा भृतः। समर्थश्चेद्दमं दाप्यो द्विगुणं तच्च वेतनम्" इति। दमं यथाशक्त्यनुसारेण राज्ञा दाप्यः। गृहीतञ्च वेतनं द्वैगुण्येन स्वामिने दद्यादित्यर्थः। नारदोऽपि "भृतिं गृहीत्वाऽकुर्वाणो द्विगुणां भृतिमावहेत्" इति। याज्ञवल्क्योऽपि "गृहीतवेतनः कर्म त्यजन् द्विगुणमावहेत्" इति। अस्मिन्नेव विषये यावता वेतनेन भृतत्वमङ्गीकृतं तावदेव स्वामिने देयञ्च तु राज्ञे दण्डमित्यर्थः। यदाङ्गीकृतां भृतिं दत्त्वा बलात्कारयितव्य इत्याह नारदः "कर्माकुर्वन् प्रतिश्रुत्य कार्यो दत्त्वा भृतिं बलात्" इति। प्रतिश्रुत्येति प्रारम्भस्याप्युपलक्षणार्थम् अतएव कात्यायनः "कर्मारम्भं तु यः कृत्वा सिद्धं नैव तु कारयेत्। बलात्कारयितव्योऽसावकुर्वन् दण्डमर्हति" इति। कियद्द्रव्यं दण्ड्य इत्यपेक्षायामाहतुर्मनुबृहस्पती "प्रतिश्रुत्य न कुर्याद् यः स कार्यः स्याद् बलादपि। स चेन्न कुर्यात् तत्कर्म प्राप्नुयाद् द्विशतं दमम्" इति। द्विशतं कार्षापणद्विशतमित्यर्थः। यत्तु मनुवचनम् "भृतोऽनार्त्तो न कुर्याद् यो दर्पात् कर्म यथोदितम्। स दण्ड्यः कृष्णलान्यष्टौ न देयं तस्य वेतनम्" इति। तदल्पदण्डत्वादल्पाविद्धिविषयमिति स्मृतिचन्द्रिकायाम्। बहुमूल्यकर्माकरणविषयमिति मदनरत्ने। किञ्चिन्मूल्यकर्माकरणे त्वाह स एव "यथोक्तमार्त्तः सुस्थो वा यस्तत्कर्म न कारयेत्। न तस्य वेतनं देयमल्पोनस्यापि कर्मणः" इति। सुस्थो वा कर्म कारयेदिति वदता सुस्थेऽपि स्वयं कर्तृत्वनियमो नास्तीति दर्शयति। आर्त्तो यदि स्वास्थ्यप्राप्त्यनन्तरं स्वाङ्गीकृतं कर्म करोति तदार्त्तिदोषाभावतया कालक्षेपेऽपि भृत्यदोषाभावाद्वेतनमसौ निर्विवादं लभत इत्याह स एव "आर्त्तस्तु कुर्यात् स्वस्थः सन् यथाभाषितमादितः। सुदीर्घस्यापि कालस्य तल्लभेतैव वेतनम्" आदितः आदौ यथाभाषितं यथाप्रतिज्ञातं तथा कुर्यादित्यर्थः। सुदीर्घस्यापि कालस्य अत्ययेऽपीति शेषः।

यस्तु कालविशेषावधिकं कर्म प्रतिज्ञाय तत्कालापूर्त्तावेव कर्म त्यजति तं प्रत्याह नारदः "कालेऽपूर्णे त्यजन् कर्म भृतेर्नाशमवाप्नुयात्"। अत्र दण्डमप्याह विष्णुः "भृतकश्चापूर्णे काले त्यजन् सकलमेव मूल्यं जह्यात् राज्ञे च पणशतं दद्यादिति"। मूल्यं वेतनम्। स्वामिदोषात्त्यागे तु यावति काले कर्म कृतं तत्कालानुसारेण कल्पितं वेतनं लभत इत्याह नारदः "स्वामिदोषादपक्रामन् यावत् कृतमवाप्नुयात्" इति। स्वामिदोषो विनाऽपराधं निष्ठुरभाषणादिः। अत्र दण्डमप्याह विष्णुः "स्वामी चेद्भृतकमपूर्णे काले जह्यात् तस्य सर्वमेव मूल्यं दद्यात् पणशतञ्च राज्ञेऽन्यत्र भृतदोषादिति"। स्वामिद्रव्यस्य भृत्यदोषेण नाशे यत् कर्त्तव्यं तदाह स एव। "तद्द्रव्येण यद्विनश्येत्तत् स्वामिने देयमन्यत्र दैवोपघातादिति"। दैवोपघातो राजकृतस्याप्युपलक्षणम्। स्वामिने देयं मूल्यद्वारेणेति शेषः। अत्र दोषविशेषे विशेषमाह वृहन्मनुः "प्रमादान्नाशितं दाप्यः समं द्विर्द्रोहनाशितम्" इति। प्रमादान्नाशितमनवधानतानाशितं सममेव दद्यात्। द्रोहनाशितं तीव्रप्रयत्नादिना द्रोहेण नाशितं द्विर्दाप्यो द्विगुणं दाप्य इत्यर्थः। भृत्यदोषाभावे यदन्यत एव नष्टं तन्न देयमित्याह स एव "न तु दाप्यो हृतं चौरैर्दग्धमूढं जलेन वेति"। ऊढं नीतम्। यस्तु वाहको वाह्यं द्रव्यं प्रमादालस्यादिना स्वदोषेण नाशयति तं प्रत्याह नारदः "भाण्डं व्यसनमागच्छेद्यदि वाहकदोषतः। दाप्यो यत्तत्र नश्येत् दैवराजकृताद्दृते" इति। भाण्डं वहनीयं द्रव्यं घटादि व्यसनं नाशम्। अत्र भाण्डवाहकयोर्ग्रहणं बलीवर्दकृषीवलयोरुपलक्षणमिति मदनरत्ने। अत्रापि "प्रमादान्नाशितं दाप्यः समं द्विर्द्रोहनाशितमिति" वृहन्मनूक्तो विशेषोऽवगन्तव्यः। यस्तु वाहकः स्वदोषेण प्रस्थानविघ्नं करोति स द्विगुणां भृतिं दाप्य इत्याह कात्यायनः "विघ्नं यो वाहको दाप्यः प्रस्थाने द्विगुणां भृतिम्" इति। विघ्नं करोतीति शेषः। वाहकग्रहणं प्रदर्शनार्थं न तु विवाहतन्त्रे नायुधीयादेरपि विघ्नकारिणोऽप्येतदिति मन्तव्यम्। अतएव नारदः "द्विगुणां तु भृतिं दाप्यः प्रस्थाने विघ्नमाचरन्" इति सामान्येनोक्तवान्। याज्ञवल्क्योऽपि "प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम्" इति। एतच्च भृत्यान्तरसम्पादनकालाभावविषयम्। अङ्गीकृतकर्मकरणस्यापि यदा सहा-

चान्तराभावेन प्रस्थानविघ्नापादकत्वं तदा त्वाह स एव "प्रक्रान्ते सप्तमम्भागञ्चतुर्थं पथि सन्त्यजन्। भृतिमर्द्धपथे सर्वां प्रदाप्यस्त्याजकोऽपि च" इति। प्रक्रान्ते कर्मणि स्वाङ्गीकृतं कर्म त्यजन् भृत्यो भृतेः सप्तमम्भागं दाप्यः। गमने प्रारब्धे पथि त्यजन् भृतेश्चतुर्थं भागम्। अर्द्धपथे त्यजन् सर्वां भृतिमित्यर्थः। त्याजकोऽपि चेत्यस्यायमर्थः गमनारम्भानन्तरं स्वामी यदि त्याजयति तदा पूर्वोक्तक्रमेण भृत्याय सप्तमभागादिकं दापनीय इति। एतच्चाव्याधितादिविषयम् व्याधितस्यापराधाभावात्। यत्तु स्वामिना त्याजने चतुर्भागदापनमुक्तं तदविक्रीतभाण्डस्वामिविषयम्। विक्रीतभाण्डस्वामिना यत् कर्त्तव्यं तदाह वृहन्मनुः "पथि विक्रीय तद्भाण्डं वणिक् भृत्यं त्यजेद् यदि। [illegible] तस्यापि देयं स्याद् भृतेरर्द्धं लभेत सः" इति। पथि भाण्डस्य चौरादिभिः प्रतिरोधे राजादिभिरपहृते स्वामिनः कर्त्तव्यमाह कात्यायनः "यदा च पथि तद्भाण्डं नाश्येत ह्रियेत वा। यावानध्वा गतस्तेन प्राप्नुयात्तावतो धनम्" इति। तेन भारवाहकस्वीकृतेन यानादिना। भाण्डनेतारं प्रत्याह नारदः "अनयन् भाटयित्वा तु भाण्डवान् यानवाहनम्। दाप्यो भृतिचतुर्भागं सर्वामर्द्धपथे त्यजन्" इति। यानं शकटादि वाहनम् अश्वादि। अयमर्थः यो यानादिना भाण्डनयनं कर्तुं परकीयं यानादिकं भाटयित्वा प्रापणादिकार्योपाधिकं परिक्रयं कृत्वा तन्न नयति स यानस्वामिने परिकल्पितस्य भाटकस्य चतुर्थांशं दाप्यः। यस्तु नीत्वाऽर्द्धमार्गे त्यजति स सर्वां भृतिं दाप्य इति। यस्तु शकटादिकं भाटयित्वा तमेवोपकारमूल्यमादाय देशान्तरं गच्छति भाटकं च न प्रयच्छति तं प्रत्याह वृद्धमनुः "यो भाटयित्वा शकटं नीत्वा चाऽन्यत्र गच्छति। भाटं न दद्याद्दाप्यः स्यादनूढस्यापि भाटकम्" इति। अनूढस्यापि अकृतोपकारस्यापीत्यर्थः। यस्तु कृते कार्ये गमनान्तरं वाहनादेः समर्पणं न करोति तस्य समर्पणपर्यन्तभाटकदानमाह कात्यायनः "हस्त्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः। नार्पयेत् कृतकृत्यः संस्तावद्दाप्यः स भाटकम्। गृहवार्यापणादीनि गृहीत्वा भाटकेन यः। स्वामिने नार्पयेद् यावत्तावद्दाप्यः स भाटकम्" इति। वारिशब्देन तदाधारभूतं पात्रं लक्ष्यते। नार्पयेत् कृतकृत्यः [illegible]। परभूमौ गृहनिर्माणाय भाटकदातारं प्रत्याह नारदः "परभूमौ गृहं कृत्वा स्तोमं दत्त्वा वसेत्तु यः। स तद्गृहीत्वा निर्गच्छेत् तृणकाष्ठेष्टकादिकम्" इति। स्तोमम्भाटकम्। स्तोमाप्रदानेऽप्याह स एव "स्तोमाद्विना वसित्वा तु परभूमावनिश्चितम्। निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात् कथञ्चन। यान्येव तृणकाष्ठानि इष्टका विनिवेशिताः। विनिर्गच्छंस्तु तत् सर्वं भूमिस्वामिनि वेदयेत्" इति। स्वामिने निवेदयेदित्यर्थः। अनिश्चितमिति वदता तृणकाष्ठादिप्रत्यर्पणपरिभाषाविहीनविषयमेतदिति दर्शितम्। परिभाषाविषये तु यथा परिभाषितं कर्त्तव्यम्। भाटके गृहीतानां जलपात्रादीनां भङ्गे नाशे च विशेषमाह स एव "स्तोमवाहीनि भाण्डानि पूर्णकालान्युपानयेत्। गृहीतुराहरेद्भग्नं नष्टञ्चान्यत्र संप्लवात्" इति। स्तोमवाहीनि भाटकगृहीतानि पूर्वपरिभाषितभाटकानि तत्स्वामिनं प्रापयेदिति पूर्वार्द्धार्थः। भग्नमेकदेशेन विकृतं, नष्टम् कार्त्स्न्येन विकृतम्। संप्लवः परस्परसङ्घर्षः तद्भिन्नप्रकारेण यद्भग्नं नष्टं च तद्भाटकगृहीतुर्भवति। संप्लवेन तु यद्भग्नं नष्टं तद्भाटकदात्रा पूर्ववत् कृत्वा मूल्यद्वारेण वा देयमित्यर्थः। व्याधितस्य भृत्यस्य स्वामिना पथि त्यागे दण्डमाह कात्यायनः "त्यजेत् पथि सहायं यः श्रान्तं रोगार्त्तमेव वा। प्राप्नुयात् साहसं पूर्वं ग्रामे त्र्यहमपालयन्" इति। स्वाम्यनुज्ञातेन भृत्येनापराधे कृते सोऽपराधः स्वामिन एवेत्याह बृहस्पतिः "प्रभुणा विनियुक्तः सन् भृतको विदधाति यत्। तदर्थमशुभं कर्म स्वामी तत्रापराध्नुयात्" इति। स्वामी कृतकर्मणे भृतकाय यदि न वेतनं ददाति तदाऽसौ राज्ञा दापनीयः इत्याह स एव "कृते कर्मणि यः स्वामी न दद्याद्वेतनं भृते। राज्ञा दापयितव्यः स्याद् वेतनस्यानुरूपतः" इति। वेश्यातदुपभोक्तृविषये नारद आह "शुल्कं गृहीत्वा पण्यस्त्री नेच्छन्ती द्विगुणं वहेत्। अनिच्छन् शुल्कदातापि शुल्कहानिमवाप्नुयात्" इति। एतदव्याधितादिविषयम्। व्याधितादिविषये त्वाह बृहस्पतिः "व्याधिता सश्रमव्यग्रा राजकार्यपरायणा। आमन्त्रिता च नागच्छेदवाच्या वडवा स्मृता" इति। आमन्त्रिता आहूता। वडवा दासी तद्ग्रहणमन्यपण्यस्त्र्युपदर्शनार्थम्। उपभोक्तारं प्रत्याह नारदः "अप्रयच्छंस्तथा शुल्कमनुभूय पुमान् स्त्रियम्। अक्रमेण तु सङ्गच्छेद् घातदन्तनखादिभिः। अयोनौ यः समाक्रा-

मेट् बहुभिरपि कामयेत्। शुल्कं सोऽष्टगुणं दाप्यो विनयं तावदेव तु" इति। वेश्यायास्त्वपराधे दण्डादिकं मत्स्यपुराणे दर्शितम् "गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति। तां दमं दापयेद्द्यादितरस्यापि भाटकम्" इति। इतरस्य दत्तशुल्कस्य। तत्रैव विशेषान्तरमुक्तम् "अन्यमुद्दिश्य वेश्यां यो नयेदन्यस्य कारणात्। तस्य दण्डो भवेद्राज्ञः सुवर्णस्य च माषकम्। नीत्वा भोगस्य यो दद्याद् दाप्यो द्विगुणवेतनम्। राजा च द्विगुणं दण्डं तथा धर्मो न हीयते। बहूनां व्रजतामेकां सर्वे तद् द्विगुणं धनम्। तस्यै दद्युः पृथक् राज्ञे दण्डञ्च द्विगुणम्परम्" इति। अत्र निर्णेतृनाह नारदः "वेश्याःप्रधाना यास्तत्र कामुकास्तद्गृहोषिताः। तत्समुत्थेषु कार्य्येषु निर्णयं संशये विदुः" इति।

वेतस पु॰ अज-असुन् तुक् च वीभावः। (बेत) वृक्षभेदे अमरः। स्त्रीत्वमपि शब्दच॰ तत्र गौरा॰ ङीष्।

वेतसाम्ल पु॰ वेतस एव अम्लः। अम्लवेतसे जटा॰।

वेतस्वत् त्रि॰ वेतसाः सन्त्यत्र भूम्ना वेतस+ड्मतुप्। बहुवेतसयुक्ते देशे अमरः।

वेताल पु॰ अज-विच् वीभावः तत-अल् कर्म॰। १मन्त्रविशेषे २भूताधिष्ठितशवभेदे अमरः ३शिवानुचरे भैरवभेदे कालिकापु॰। ४द्वारपाले च शब्दर॰।

वेतालभट्ट पु॰ विक्रमादित्यसभास्थे नवरत्नान्तर्गते कविभेदे

वेत्तृ त्रि॰ विद-तृच्। १ज्ञातरि २वोढ़रि ३लब्धरि च राजनि॰

वेत्र पु॰ अज-त्रल् वीभावः। (वेत) वेतसवृक्षे राजनि॰।

वेत्रकीय त्रि॰ वेत्र+छ-कुक् च। १वेत्रसमूहे २तद्युक्तदेशादौ च सि॰ कौ॰।

वेत्रधर पु॰ वेत्रं धरति धृ-अच्। १द्वारपाले हला॰ २वेत्रयष्टिधारमात्रे त्रि॰।

वेत्र(त्रा)वती स्त्री वेत्राः बाहुल्येन सन्त्यस्याः मतुप् मस्य वः वा दीर्घः। १मालवदेशस्थे नदीभेदे "शरावती वेत्रवती चन्द्रभागा सरस्वती"। २छत्ताधरमातरि वराहपु॰।

वेत्रासन न॰ वेत्रनिर्मितमासनम्। वेत्रनिर्मिते आसने (मोड़ा)

वेत्रासुर पु॰ सिन्धुद्वीपात्मजेऽसुरभेदे वराहपु॰।

वेथ याचने भ्वा॰ आत्म॰ द्वि॰ सेट् ऋदित् चङि न ह्रस्वः। वेथते अवेथिष्ट।

वेद पु॰ विद-अच् घञ् वा। १विष्णौ विष्णुसं॰। २ज्ञाने ३आत्मज्ञाने तत्साधने धर्मब्रह्मप्रतिपादके मन्त्रब्राह्मणात्मके ग्रन्थभेदे ४[illegible] चरणे च मेदि॰। ५वृत्ताङ्के नानार्थमा॰ ६कुशमुष्टिकृते पदार्थभेदे "वेदं कृत्वा वेदिं कुर्य्यात्" श्रुतिः वेदयति विद-अच् णिच्-अच् विद-क्वसु वा। ७ज्ञापके दर्शादि च त्रि॰, "वेदोऽसि येन त्वं देव! वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः" यजु॰ २।२१ "पत्नी वेदं प्रस्तृणाति वेदोऽसीति "हे कुशमुष्टिनिर्मितपदार्थ! त्वं वेदोऽसि ज्ञानाद्यात्मकोऽसि यद्वा वेत्तीति वेदः ज्ञातासि। देवेभ्यो देवानां वेदोऽभवः ज्ञापकोऽभूः" वेददी॰। तत्र अपौरुषेयं वाक्यं वेद इति मीमांसकाः। पौरुषेयत्वे पूर्वपक्षं दूषयित्वाऽपौरुषेयत्वं माधवेनोपन्यस्य समर्थितं यथा "समयबलेन सम्यक्परोक्षानुभवसाधनं वेद इति" वेदलक्षणस्य मन्वादिस्मृत्यादावतिव्याप्तिमाशङ्क्य "अपौरुषेयत्वे सतीति विशेषणाददोष इति चेत् वेदस्यापि परमेश्वरनिर्मितत्वेन पौरुषेयत्वात् शरीरधारिजीवनिर्मितत्वाभावादपौरुषेयत्वमिति चेत् "सहस्रशीर्षा पुरुषः" इत्यादिश्रुतिभिरीश्वरस्यापि शरीरित्वात्। कर्मफलरूपशरीरधारिजीवनिर्मितत्वाभावमात्रेणापौरुषेयत्वं विवक्षितमिति चेत् न जीवविशेषैरग्निवाय्वादित्यैर्वेदानामुत्पादितत्वात्। "ऋग्वेद एवाग्नेरजायत, यजुर्वेदो वायोः, सामवेद आदित्यादिति श्रुतेः" (ईश्वरस्याग्न्यादिप्रेरकत्वेन निर्मातृत्वं द्रष्टव्यम्)। ततः मन्त्रब्राह्मणात्मकत्वं वेदलक्षणमुक्त्वा 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इत्यापस्तम्बवचनं प्रमाणतयोपन्यस्तं तत्र मन्त्रलक्षणमुक्त्वा तदितरत् ब्राह्मणमित्युक्तम्। तत्रैवोत्तरम् "अस्त्वेवमपि वेदस्य पौरुषेयत्वेन विप्रलम्भकवाक्यवदप्रामाण्यं स्यात् पौरुषेयत्वं च १पादे पूर्वपक्षत्वेन जैमिनिरसूत्रयत् यथा "वेदांश्चैके सन्निकर्षं पुरुषाख्येति" सू॰ "एके वादिनो वेदान् प्रति सन्निकर्षं मन्यन्ते। यथा रघुवंशादयः कालिदासप्रणीता इदानीन्तनास्तथा वेदोऽपि न तु वेदा अनादयः अतएव वेदकर्तृत्वेन पुरुषा आख्यायन्ते वैयासिकं भारतं वाल्मीकीयं रामायणमित्यत्र यथा भारतादिकर्तृत्वेन व्यासादय आख्यायन्ते तथा काठकं कौथुमं तैत्तिरीयमित्येवं तत्तद्वेदशाखाकर्तृत्वेन कठादीनामाख्यातत्वात् वेदाः पौरुषेयाः। ननु नित्यानामेव सतां वेदानामुपाध्यायसम्प्रदायप्रवर्त्तकत्वेन कठकादिसमाख्याः स्यादित्याशङ्क्य युक्त्यन्तरं सूत्रयति "अनित्यदर्शनाच्चेति" सू॰ अनित्याजननमरणवन्तो बर्बरादयो वेदार्थाः श्रूयन्ते "बबरः प्रावाहणिरकामयत" कुसुरुविन्द

श्रोत्रग्राह्यकिरणाभावादित्याह" तथा सति वर्णादिभ्यः पूर्वमभावादनित्या वेदाः। विमतं वेदवाक्यं पौरुषेयं वाक्यत्वात् कालिदासादिवाक्यवत् इत्यनुमानञ्च चकार" इति पूर्वपक्षे सिद्धान्तयति। "उक्तं तु शब्दपूर्वत्वम्" सू० "तुशब्दो वेदानामनित्यत्वं वारयति। शब्दस्य वेदरूपस्य कठादिपुरुषेभ्यः पूर्वत्वमनादित्वम् प्राचीनैव सूत्रैरुक्तम्। "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः" इत्यत्र औत्पत्तिकशब्देन सर्वेषां शब्दानां वेदानां तदर्थानां तदुभयसम्बन्धस्य च नित्यत्वं प्रतिज्ञाय उत्तराभ्यां शब्दाधिकरणवाक्याधिकरणाभ्यामुपपादितम्। का तर्हि काठकाद्याख्यायागतिरित्याशङ्क्य संप्रदायप्रवर्त्तनात् सेयमुपपद्यते" इत्युत्तरमाह "आख्याः प्रवचनादिति" सू० "अस्तिवमाख्याविषायागतिः (एवं प्रवचनरूपा संप्रदायप्रवर्त्तनेत्यर्थः") ववराद्यनित्यदर्शनं यदुक्तं तत्र किमित्युत्तरमित्याशङ्क्याह "परं तु श्रुतिसामान्यमात्रम्" सू० यत्परं ववरादिकं तत् तच्छब्दसामान्यमेव। न तु मनुष्यो ववरनामकोऽत्र विवक्षितः ववरध्वनियुक्तप्रवहणस्वभावस्य वायोरत्र वक्तुं शक्यत्वात्। पूर्वपक्षोक्तस्य वाक्यत्वहेतोः पराकृतेः। तस्मान्नास्ति वेदस्य पौरुषेयत्वम्। अत्र संग्राहकश्लोकौ "पौरुषेयं न वा वेदवाक्यं स्यात् पौरुषेयता। काठकादिसमाख्यानात् वाक्यत्वाच्चान्यवाक्यवत्। समाख्यानं प्रवचनात् वाक्यत्वं तु पराकृतम्। तत्कर्त्रनुपलम्भेन स्यात्ततोऽपौरुषेयता"। ननु भगवता बादरायणेन वेदस्य ब्रह्मकार्यत्वं सूत्रितं "शास्त्रयोनित्वादिति"। ऋग्वेदादिशास्त्रकारणत्वात् ब्रह्म सर्वज्ञमिति सूत्रार्थः (तदेतस्य महाभूतस्य निःश्वसितं यदृग्वेदो यजुर्वेद इत्यादि" श्रुतिः "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा" स्मृतिश्चात्र मूलम्) वाढं नैतावता पौरुषेयत्वं भवति मनुष्यनिर्मितत्वाभावात्। ईदृशमपौरुषेयत्वमभिप्रेत्य व्यवहारदशायामाकाशादिवन्नित्यत्वं बादरायणेनैव देवताधिकरणे सूत्रितम् "अतएव च नित्यत्वमिति"। वेदा०प० पौरुषेयत्वापौरुषेयत्वे अन्यथा निरुक्ते "यथा ननु कर्त्तृकत्वाभावेऽपि वियदादिवदादिमत्त्वेन परमेश्वरकर्तृकतया पौरुषेयत्वादपौरुषेयत्वं वेदानामिति तव सिद्धान्तो भज्येतेति चेन्न न तादृक्पुरुषेणोच्चारणमात्रत्वं पौरुषेयत्वं पुरुषतेऽपि पौरुषेयत्वापत्तेः (पाठ्यमान वेदानामिति शेषः) नापि पुरुषाधीनोत्पत्तिमत्त्वं पौरुषेयत्वं नैयायिकाभिमतपौरुषेयत्वानुमानेऽस्मादादीनां विरुद्धसाधनापत्तेः किन्तु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं तथा च सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदसमानानुपूर्वीकं वेदं विरचितवान् न तु तद्विजातीयं वेदमिति न सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वं वेदस्य, भारतादीनान्तु सजातीयोच्चारणमनपेक्ष्यैवोच्चारणमिति तेषां पौरुषेयत्वम्"। शब्दचिन्तामणिकृता तु वेदलक्षणमन्यथा निरूप्य पौरुषेयत्वमीदृशमेव समर्थितं यथा "अथ वेदः पौरुषेयो वाक्यत्वात् भारतादिवत् इति चेत् कोऽयं वेदः अनुगतधर्माभावेन तस्य शाखाशाखानार्थत्वात् तथा हि न सुख्यवेदप्रयोगविषयो वेदः कृत्स्नाध्ययनात् नापि शाखासमुदायः तस्य वेदनिरूप्यत्वात् समुदायस्याप्रतिपादकत्वेन वाक्यत्वासिद्धेः। नापि स्वर्गकामो यजेतेत्यादिवाक्यं स्मृतिभारतादेरपि तथात्वात्" इत्यादि वेदलक्षणे पूर्वपक्षमुक्त्वा पौरुषेयत्वसाध्ये तथाह "पौरुषेयत्वं न तदर्थधीजन्यत्वं तदुच्चारणधीप्रभवत्वं वा अध्यापकाध्येतृधीजन्यत्वेन सिद्धसाधनात् स्वतन्त्रपुरुषप्रणीतजातीयत्वं यदि साध्यं तदा भारते स्मृतौ च वाक्यत्वमनैकान्तिकम्" इत्यादिना। अत्रोत्तरमुक्तं यथा "शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं वेदत्वम्। ईश्वरप्रमाया अजन्यत्वात् वेदार्थस्यानुमानविषयत्वेऽप्यनुमानादेर्वेदोपजीवकतया स्मृतीनां भारतादिभागस्य च वेदसमानार्थकत्वेऽपि शब्दजन्यधीजन्यत्वात् वेदादर्थं प्रतीत्यैव तत्प्रणयनात्" (अग्निर्हिमस्य भेषजमित्यादिवेदवाक्यसंग्रहाय सत्यन्तं लक्षणाप्रविष्टसत्यन्तं तु अदृष्टार्थकतावाच्छ्रुत्यज्ञापनार्थमिति बोध्यम्)। मथुरानाथेनैतद्विवृतं तत्र दृश्यम्। साध्यं च पौरुषेयत्वं सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वमिति निर्णीतमधिकं तत्र दृश्यम्।

वेदाश्च चत्वारः तेषां शाखाविभागश्चरणव्यूहे उक्तः तत्र ऋग्वेदशाखाविभागः ऋग्वेदशब्दे १४११ पृ० दर्शितः। "यजुर्वेदस्य षडशीतिर्भेदा भवन्ति। तत्र चरकाणां द्वादश भेदा भवन्ति। चरकाः१ आह्वरकाः२ कठाः३ प्राच्यकठाः४ कपिष्ठलकठाः५ औपमन्यवाः६ आटककठाः७ चारायणीयाः८ वारायणीयाः९ वार्त्तान्तवेयाः१० श्वेताश्वतराः११ (श्वेताश्वेततरा इति वा पाठः)। मैत्रायणीयाः१२श्चेति। तत्र मैत्रायणीयानां सप्त भेदा भवन्ति। मानवाः१ दुन्दुभाः२ चैकेयाः३ वाराहाः४ हा-

रिद्रवेयाः५ श्यामाः६ श्यामायनीयाः७ चेति । तेषामध्ययनम् अष्टौ यजुःसहस्राण्यधीत्य शाखापारो भवति । तान्येव द्विगुणान्यधीत्य पदपारो भवति । तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति । षडङ्गान्यधीत्य षडङ्गविद्भवति । शिक्षा१ कल्पो२ व्याकरणं३ निरुक्तं४ छन्दो५ ज्योतिष६मित्यङ्गानि । तत्र प्राच्योदीच्यां नैरृत्यां निरुक्त्यः । तत्र वाजसनेयानां सप्तदश भेदा भवन्ति । जाबालाः१ बौधेयाः२ काण्वाः३ माध्यन्दिनाः४ शापेयीयाः५ तापायनीयाः६ कापालाः७ पौण्ड्रवत्साः८ आवटिकाः९ परमावटिकाः१० (परमावटिकापि पाठः) । पाराशरीयाः११ वैनेयाः१२ औधेयाः१४ गालवाः१५ वैजवापाः१६ कात्यायनीयाश्च१७। प्रतिपदमनुपदं छन्दो भाषा धर्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानि । उपज्योतिषम् । शाङ्कलक्षणम् । प्रतिज्ञानुवाक्यम् । परिसङ्ख्याचरणम् । आर्षकल्पः । प्रवराध्यायश्च । यज्ञम् । क्रतुः । संख्यानः । आगमः । अनुवाकः होत्रकम् । (पाश्चात्यहौत्रकमपि पाठः) । पशवः । उक्थानि । कूर्मलक्षणमित्यष्टादश परिशिष्टानि । द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके । इत्युक्तं परिसंख्यातमेतत् सकलं शुक्रियम् । ग्रन्थाश्च परिसंख्याता ब्राह्मणस्य चतुर्गुणम् । आदावारभ्य वेदान्तं ब्रह्मणाहूतपूर्वकम् । वेदमध्याय एतेषां कामान्ते तु समारभेत्" । तत्र तैत्तिरीयकाणां द्विभेदा भवन्ति । औख्याः१ (उखाख्योऽपि पाठः) । खाण्डिकेयाश्चेति२ । तत्र खाण्डिकेयानां पञ्च भेदा भवन्ति । आपस्तम्बी१ बौधायनी२ सत्याषाढी३ हिरण्यकेशी४ औधेयाश्चेति५ (औधेयी च पाठः) । तत्र कठानामुपगानविशेषाः । चतुश्चत्वारिंशदुपग्रन्थाः । मन्त्रब्राह्मणयोर्वेदस्तत्र पठ्यते । यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः" ।

सामवेदस्य किल सहस्रभेदा आसीत् । अनध्यायेषु तेऽप्यभिहताः प्रनष्टाः । तेषां वार्तान्तरीयाः वात्स्यायनीयाः सात्यमुग्र्याः शाखायनीयाः भालविनः प्राचीनयोग्या राणायनीयाश्च नव भेदा भवन्ति (राणायनीयाः प्राचीनयोग्या इति वा पाठः) । शौल्काः । कालेयाः । महाकालेयाः लाङ्गलाः । कौथुमाः जैमिनीयाश्चेति । तेषामध्ययनम् अष्टौ सामसहस्राणि सामानि च चतुर्दश अष्टौ शतानि दशोत्तराणि दशसप्त वालखिल्याः सषुपर्णप्रैष्य । एतत् सामगणं स्मृतम् । अथर्ववेदस्य नव भेदा भवन्ति । पैप्पलाः१ । दान्ताः२ । प्रदान्ताः३ । स्नाताः४ । स्नौताः५ । ब्रह्मदावलाः६ । शौनकी७ देवदर्शती८ । चरणविद्याश्चेति९ । (दाता प्रदाता श्रोता ब्रह्मदीपी वेदशी इति भाष्ये नामान्तरम्) तेषामध्ययनं पञ्च कल्पानि भवन्ति । नक्षत्रकल्पो विधानकल्पो विधिविधानकल्पः संहिता शान्तिकल्पश्चेति । सर्वेषामेव वेदानामुपवेदा भवन्ति । ऋग्वेदस्यायुर्वेदः । यजुर्वेदस्य धनुर्वेद उपवेदः । सामवेदस्य गान्धर्ववेद उपवेदः । अथर्ववेदस्य शस्त्रशास्त्राणि भवन्ति" । "यजुर्वेदतरोः शाखाः सप्तविंशन्महामतिः । वैशम्पायननामासौ व्यासशिष्यश्चकार वै । शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात् । याज्ञवल्क्यस्तु तस्याभूद् ब्रह्मरातसुतो द्विजः । शिष्यः परमधर्मज्ञो गुरुवृत्तिपरः सदा । ऋषिर्योऽद्य महामेरोः समाजे नागमिष्यति । तस्य वै सप्तरात्रन्तु ब्रह्महत्या भविष्यति । पूर्वमेव मुनिगणैः समयोऽयं कृतो द्विज ! । वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्ततः । स्वस्रीयं बालकं सोऽथ पदा स्पृष्टमघातयत् । शिष्यानाह भोः शिष्याः ब्रह्महत्यापहं व्रतम् । चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा । अथाह याज्ञवल्क्यस्तं किमेभिर्भगवन् ! द्विजैः । क्लेशितैरल्पतेजोभिश्चरिष्येऽहमिदं व्रतम् । ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामतिम् । मुच्यतां यत् त्वयाऽधीतं मत्तो विप्रावमन्यसे । निस्तेजसो वदस्येतान् यस्त्वं ब्राह्मणपुङ्गवान् । तेन शिष्येण नार्थोऽस्ति ममाज्ञाभङ्गकारिणा । याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम् । ममाप्यलं त्वयाधीतं यन्मया तदिदं द्विज !" । श्रीपराशर उवाच "इत्युक्त्वा रुधिराक्तानि सरूपाणि यजूंषि सः । छर्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः । यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज । जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ते ततः । ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितैस्तु यैः । चरकाध्वर्यवस्ते तु चरणान्मुनिसत्तम ! । याज्ञवल्क्योऽपि मैत्रेय ! प्राणायामपरायणः तुष्टाव प्रयतः सूर्य्यं यजूंष्यभिलषंस्ततः" । श्रीयाज्ञवल्क्य उवाच "नमः सवित्रे

द्वाराय मुक्तेरमिततेजसे। ऋग्यजुःसामभूताय त्रयीधाम्नते नमः"। श्रीपराशर उवाच "इत्येवमादिभिस्तेन स्तूयमानः स्तवै रविः। वाजिरूपधरः प्राह व्रियतामभिवाञ्छितम्। याज्ञवल्क्यस्ततः प्राह प्रणिपत्य दिवाकरम्। यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ" श्रीपराशर उवाच "एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः। अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः। यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम!। वाजिनस्ते समाख्याताः सूर्य्योऽश्वः सोऽभवद्यत। शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम्। काण्वाद्याः सुमहाभाग! याज्ञवल्क्यप्रवर्त्तिताः" विष्णु पु० ३अंशे ५अ०। सामवेदस्य संहिता यथा "सामवेदतरोः शाखा व्यासशिष्यः स जैमिनिः। क्रमेण येन मैत्रेय! बिभेद शृणु तन्मम। सुमन्तुश्चास्य पुत्रोऽभूत् सुत्वानस्यास्य वै सुतः। अधीतवन्तावेकैकां संहितां तौ महामती। सहस्रसंहिताभेदं सुकर्मा तत्सुतस्ततः। चकार तञ्च तच्छिष्यौ जगृहाते महाव्रतौ। हिरण्यनाभः कौशल्यः पौष्यिञ्जिश्च द्विजोत्तमः। उदीच्याः सामगाः शिष्यास्तस्य पञ्चशताः स्मृताः। हिरण्यनाभात्तावत्यः संहिता वै द्विजोत्तम!। गृहीतास्तेऽपि चोच्यन्ते पण्डितैः प्राच्यसामगाः। लोकाक्षिः कुथुमिश्चैव कुशीदिर्लाङ्गलिस्तथा। पौष्यिञ्जिशिष्यास्तद्भेदैः संहिता बहुलीकृताः। हिरण्यनाभशिष्यश्च चतुर्विंशतिसंहिताः। प्रोवाच कृतिनामासौ शिष्येभ्यः सुमहामतिः। तैश्चापि सामवेदोऽसौ शाखाभिर्बहुलीकृतः"। अथर्ववेदस्य संहिता यथा। "अथर्वाणमथो वक्ष्ये संहितानां समुच्चयम्। अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः। शिष्यमध्यापयामास कबन्धं सोऽपि तं द्विधा। कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवान्। वेददर्शस्य शिष्यास्तु मोदो ब्रह्मबलिस्तथा। शौल्कायनिः पिप्पलादस्तथान्यो मुनिसत्तमः। पथ्यस्यापि त्रयः शिष्याः कृता यैर्द्विज संहिताः। जाजलिः कुमुदादिश्च तृतीयः शौनको द्विज। शौनकस्तु द्विधा कृत्वा ददावेकान्तु बभ्रवे। द्वितीयां संहितां प्रादात् सैन्धवायनसंज्ञिने। सैन्धवो मुञ्जिकेशश्च भिन्दन् वेदं द्विधा पुनः। नक्षत्रकल्पो वेदानां संहितानां तथैव च। चतुर्थः स्यादाङ्गिरसः शान्तिकल्पश्च पञ्चमः। श्रेष्ठास्त्वाथर्वणामेते संहितानां विकल्पकाः"। विष्णुपु० ३अंशे ६अ०।

हेमाद्रि दा०ख० देवीपु० ७अ० वेदविभागोऽन्यथोक्तो यथा "किं वेदरूपं मानञ्च उपाङ्गसंख्याभेदतः। अङ्गानि चैव वेदानां तत्त्वो ब्रूहि सनातन!"। ब्रह्मोवाच "ओङ्कारप्रभवा वेदा गायत्री वेदसम्भवा। षडङ्गास्ते समाख्याता सहोपाङ्गास्तथैव च। छन्दोलक्षणसंयुक्ता मातङ्गागभेदजाः स्मृताः। एकएव भवेद्वेदश्चतुर्वेदः पुनः कृतः। शाखार्थमल्पयुक्तानां ग्रहणायातिविस्तरात्। संविभक्ता मया वत्स! ऋग्यजुःसामाथर्वकाः। तत्र भेदास्तु ऋग्वेदे दश चैव प्रकीर्त्तिताः। आश्वयाः साङ्ख्यचर्चाश्च श्रावका चर्चकास्तथा। आरणीयावक्रमाथाः षट्क्रमाःबहुक्रमाः। दशधा चेति समासेन पुनरेकैव पारणा। शाखाश्च त्रिविधा भूप! शाकला-याष्क-माण्डुकाः। तेषामध्ययनं प्रोक्तं मण्डलानि च सप्ततिः। ऋचीनां वरसङ्ख्या तु चतुर्विंशच्छतानि च। ऋचां दश सहस्राणि ऋचां पञ्च शतानि च। ऋचामशीतिः पादश्च एतत् पारणमुच्यते। ऋग्वेदे तु भवेत्संख्या यजुर्वेदस्य श्रूयताम्। षडशीतिर्विभेदेन मया भिन्नाः शिवाश्रया। दशधा चरकास्तत्र चरकाह्वारिद्रवीयाः, कठाः प्राच्यकठाश्चैव कपिष्ठलकठास्तथा। नारायणीयाः श्वेताश्च श्वेताश्वतरमैत्रायणाः। पुनः सप्त विभेदेन मैत्रायणाः प्रकीर्त्तिताः। मानवा दुन्दुभा वाराहाः छागेया ह्वारिद्रवीयाः, श्यामाः श्यामायनीयाश्च तेषामध्ययनमुच्यते। अष्टादश सहस्राणि पाठा वेदविदोऽविदन्। द्विगुणं पदपारीयास्त्रिगुणं क्रमपारगाः। षडङ्गानि यदाधीते स षडङ्गविदुच्यते। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोज्योतिषम्। षडङ्गानि भवन्त्येतान् उपाङ्गानि शृणुष्व भोः। प्रतिपदमनुपदं छन्दो भाषासमन्वितम्। मीमांसा-न्यायतर्कश्च उपाङ्गाः परिकीर्त्तिताः। परिशिष्टाश्च संख्याता अष्टादश शृणुष्व तान्"। यूपलक्षणं छागलक्षणं प्रतिज्ञानुवाकसङ्ख्या-चरणव्यूह-श्राद्ध-कल्पसूक्तानि परिषदृग्यजुर्षमिष्टकापूरणं प्रवराध्यायोक्थशास्त्रं क्रतुसंख्या निगमा यज्ञपार्श्वं होतकम्। व्रतं प्रसवोत्थानकूर्मलक्षणसंयुतम्। कथिताः परिशिष्टास्तु ह्यूनविंशतिसंख्यया। कठानां पुनरप्यन्याश्चत्वारिंशच्चतुर्युतान्। प्राच्योदीच्या निरुक्ताश्च वाजसनेयास्तु पञ्च च। दशभेदविभक्ताश्च कृष्णा मुनिपुङ्गव। [illegible] जाबाला-बौधेयाःकाण्वामाध्यन्दिनाश्च शापेयाः। [illegible] कापालाख्याः प्रोष्ठ्यवः रत्नारविकाः। परमा[illegible] [illegible]गारा

स्तथा बौधायनीयाः । अयोध्या अयोधेयाश्च तेषामध्ययनानि च । द्विदशक्षे शतन्यूने वेदे वाजसनेयके । ऋग्गणीयं प्रसंख्यातस्ततोऽन्यानि यजूंषि च"। एतत्प्रमाणं यजुषां हि केवलम् "सखिलं सशुक्रं परिसंख्यातं ब्राह्मणम् । चतुर्गुणन्तु जानीयात्तैत्तिरीया द्विधा पुनः । ऋचेयाः खाण्डिकेयाश्च खाण्डिकाः पञ्चधा पुनः । कालेया बौधायनीया हिरण्यकेशास्तथैव च । भारद्वाजाश्चान्याश्च तेषां भेदाः प्रकीर्त्तिताः । अध्ययनं सौत्रिकञ्चैव प्रवचनीयं तथापरम् । सामवेदस्तु विस्तीर्णः सहस्रभेदशः पुरा । अनध्यायेष्वधीयानाः तदा इन्द्रेण धीमता । वज्रेण निहताः शेषांस्तान्मध्ये शृणु सत्तम ।। राणायनीयाः कौथुमास्तत्र भेदान् पुनः शृणु । राणायनीयाः सप्तैव तुपाद्यास्तपतांवर । कालेया महाकालेया लाङ्गलवेद्युताः । कौथुमानामपि सप्त असुरावासरायणाः । प्रज्ञातावैनभृत्याश्च परियोग्याः परिकायणाः । अध्ययनमपि तेषान्तु यथावत् कथितं शृणु । अष्टौ सामसहस्राणि सामानि च चतुर्दश । अष्टौ शतानि नवतीः दश सवालखिल्यकाः । सरहस्यानि प्रख्याय एतं सामगणं विदुः । अथो अथर्ववेदस्य नव भेदा भवन्ति हि । पिप्पलादा वर्त्तदाश्च भूतायनाः कातयस्तथा । जज्वला ब्रह्मवेदाश्च शौनकी कनखी तथा । वेदस्पर्शीरविद्या तेषामध्ययनं शृणु" । पञ्चकल्पा भवन्ति "नक्षत्रकल्पो वैतानः संहिताविधिः आङ्गिरसम् । शान्तिकल्पश्च अथर्वणो भवन्ति च । ऋग्वेदस्यात्रेयं गोत्रं वायुदैवं विदुर्बुधाः । काश्यपस्तु यजुर्वेदं रुद्रदैवन्तु तं विदुः । सामवेदोऽपि गोत्रेण भारद्वाजः पुरन्दरम् । अधिदैवं विजानीयात् वैतानन्तु अथर्वणः" ।

वेदगर्भ पु॰ वेदो गर्भे यस्य । सर्ववेदस्य प्रथमं कर्त्तरि १हिरण्यगर्भे २विप्रे च हेमच॰। ३विष्णौ विष्णुस॰ ।

वेदन न॰ विद–ल्युट् । १ज्ञाने २सुखदुःखाद्यनुभवे ३विवाहे च "सवर्णस्य दया ग्राह्या शूद्रयोत्कृष्टवेदने" इति मनुः । युच् । वेदनापि अत्रार्थेषु स्त्री । सा ५ वैद्यमते स्कन्धपञ्चकान्तर्गतस्कन्धभेदे बौद्ध॰ [illegible]

वेदनिन्दक पु॰ ६त॰ । १ [illegible] २बौद्धे च ।

वेदपारग पु॰ वेदानां पारमन्तं सीमां गच्छति गम–ड । समस्तवेदाध्यायिनि । [वेदरहस्याध्यायम ।

वेदमातृ स्त्री ६त गायत्र्यां मन्त्रभेदे तस्याः समाप्तपाठे न

वेदवत् पु॰ वेदोऽभ्यस्तत्वेनास्त्यस्य मतुप् मस्य वः । १वेदाभ्यासरते द्विजे । २कुशध्वजराजकन्यायां सीतादिरूपेणाभिभूतायां स्त्री ।"कृते युगे वेदवती कुशध्वजसुता शुभा । त्रेतायां रामपत्नी सा सीतेति जनकात्मजा । तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा । त्रिहायणीति सा प्रोक्ता विद्यमाना युगत्रये" ब्रह्मवै॰प्र॰१२ अ॰ ।

वेदवास पु॰ ६त॰ । ब्राह्मणे तस्य तत्पाठतदुक्ताचाराश्रयत्वात् तथात्वम् वेदावासादयोऽप्यत्र । [दश्च त्रि॰ ।

वेदविद् पु॰ वेदं वेत्ति विद–क्विप् । १विष्णौ विष्णुस॰ २वे-

वेदव्यास पु॰ वेदान् व्यस्यति विभिन्नशाखत्वेन पृथक् करोति वि+अस–अण् । पराशरपुत्रे सत्यवतीगर्भजे १मुनिभेदे तथा भूतेषु अन्येषु २मुनिषु च ।

युगभेदे तद्भेदाश्च विष्णु पु॰ ३अं ३अ॰ उक्ता यथा पराशर उवाच "यस्मिन् मन्वन्तरे व्यासा ये ये तांस्तान् निबोध मे । यथा च भेदः शाखानां व्यासेन क्रियते मुने ।। अष्टाविंशतिकृत्वो वै वेदा व्यस्ता महर्षिभिः । वैवस्वतेऽन्तरे तस्मिन् द्वापरेषु पुनःपुनः । वेदव्यासा व्यतीता वै अष्टविंशतिसत्तमाः । चतुर्धा यैः कृतो वेदो द्वापरेषु पुनःपुनः । द्वापरे प्रथमे व्यस्ताः स्वयं वेदाः स्वयम्भुवा१। द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः२ । तृतीये चोशना३व्यासश्चतुर्थे तु बृहस्पतिः४ । सविता५ पञ्चमे व्यासो मृत्युः६ षष्ठे स्मृतः प्रभुः । सप्तमे च तथैवेन्द्रो७ वशिष्ठ८श्चाष्टमे स्मृतः । सारस्वत९श्च नवमे त्रिधामा१० दशमे स्मृतः । एकादशे च त्रिवृषो११ भरद्वाज१२स्ततःपरम् । त्रयोदशे चान्तरीक्षो१३ धर्म्मो१४ चापि चतुर्दशे । त्र्यारुण१५ पञ्चदशे षोडशे तु धनञ्जयः१६ । कृतञ्जयः१७ सप्तदशे ऋणज्यो१८ऽष्टादशे स्मृतः । ततो व्यासो भरद्वाजो१९ भरद्वाजात्तु गौतमः२० । गौतमादुत्तरं व्यासो हर्य्यात्मा२१ योऽभिधीयते । अथ हर्य्यात्मनो वेणः स्मृतो वाजश्रवास्तु२२ यः । सोमो सुष्मायणस्तस्मात् तृणबिन्दु२३रिति स्मृतः । ऋक्षोऽभूद्भार्गवस्तस्मात् वाल्मीकि२४र्योऽभिधीयते । तस्मादस्मत् पिता शक्तिः२५ व्यासस्तस्मादहं२६(पराशरः) मुने ! । जातुकर्णो२७ऽभवन्मत्तः (पराशरादनन्तरम्) कृष्णद्वैपायन२८ स्ततः । (ततो जातूकर्ण्यात्परम अष्टाविंशतिमे युगे)"अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः । एकोवेदश्चतुर्धा तु तैः कृतो द्वापरादिषु । भविष्ये द्वापरे चैव द्रौणिर्व्यासो भविष्यति । व्यतीते मम पुत्रेऽस्मिन् कृष्णद्वैपायने मुने"।

वेदस् पु॰ विद–असुन् । वसादि [illegible] दाः विश्ववेदाः ।

वेदाङ्ग न० वेदस्याङ्गमिव । "शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः । ज्योतिषामयनञ्चैव वेदाङ्गानि षड़ेव तु" इत्युक्तेषु शिक्षादिषु षट्सु शास्त्रेषु । तेषामङ्गविशेषरूपत्वं शिक्षायामुक्तं यथा
"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते । शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते" ।

वेदादि पु० वेदस्यादिरिव तत्पाठे प्रथमोच्चार्य्यमाणत्वात् । प्रणवे

वेदाधिप पु० ६त० । "ऋग्वेदाधिपतिर्जीवो यजुर्वेदाधिपो भृगुः । सामवेदाधिपो भौमः शशिजोऽथर्ववेदपः" इत्युक्तेषु जीवादिषु २विष्णौ च विष्णु स० ।

वेदान्त पु० ६त० । वेदशिरोभागे ब्रह्मप्रतिपादके उपनिषद्रूपे १ग्रन्थभेदे तदुपकारके २शारीरकसूत्रभाष्यादौ च उत्तरामीमांसाशब्दे १०८७पृ० दृश्यम् । शारीरकसूत्रस्य शङ्कराचार्य्यैः स्वमतानुसारेण व्याख्यातं तत्र रामानुजपूर्णप्रज्ञयोस्तन्मतं प्रदर्शितं शाङ्करमतानुसारि मतञ्च सिद्धान्तबिन्दुप्रदर्शितञ्च सङ्क्षेपोऽत्र प्रदर्श्यते "वेदान्तिमते सामान्यतः द्विविध एव पदार्थः दृग्दृश्यश्च तत्रैव सर्वपदार्थान्तर्भावात् । तत्र दृक्पदार्थ आत्मा । स च सर्वदैकरूपोऽप्यौपाधिकभेदात् त्रिविधः ईश्वरः जीवः साक्षी चेति । तत्र कारणीभूताज्ञानोपाधिरीश्वरः । अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानोपहितो जीवः । जीवेश्वरानुगतसर्वानुसंधातृ चैतन्यं साक्षी । तत्रेश्वरोऽपि त्रिविधः स्वोपाधिभूताविद्यागतसत्त्वादिगुणत्रयभेदेन विष्णुब्रह्मरुद्रभेदात् । तत्र कारणीभूतसत्त्वगुणावच्छिन्नो विष्णुः पालयिता । तथा रज उपहितो ब्रह्मा स्रष्टा । हिरण्यगर्भस्तु महाभूतकारणत्वाभावान्न ब्रह्मा । तथापि स्थूलभूतस्रष्टृत्वेन क्वचिद् ब्रह्मेत्युपचर्य्यते । तथा तम उपहितो रुद्रः संहर्त्ता । इयन्त्वेव तस्य चतुर्भुजचतुर्मुखाद्याः पुमाकाराः श्रीभारतीभवान्याद्याश्च स्त्र्याकारा मत्स्यकूर्मादयोऽप्यवतारा लीलयैवाविर्भवन्ति । तथा जीवोऽपि त्रिविधः स्वोपाधिजाग्रदाद्यवस्थात्रयभेदेन विश्वतैजसप्राज्ञभेदात् । तत्राविद्यान्तःकरणस्थूलशरीरावच्छिन्नो जाग्रदभिमानी विश्वः । स एव स्थूलशरीराभिमानरहित उपाधिद्वयोपहितः स्वप्नावस्थाभिमानी तैजसः । अयमेव शरीरद्वयान्तःकरणोपाधिरहितोऽन्तःकरणसंस्कारावच्छिन्नोऽविद्यामात्रोपहितः सुषुप्त्यवस्थाभिमानी प्राज्ञः । साक्षी तु सर्वानुसन्धाता सर्वानुगतस्तुरीयाख्य एकविध एव ।
अविद्यातत्कार्य्यात्मकप्रपञ्चो दृश्यपदार्थः तस्याधारसाक्षिकत्वेऽपि व्यवहारिकत्वाभ्युपगमाच्च स्वप्नादिवदतात्त्विकत्वम् । दृश्योऽपि त्रिविधः अव्याकृतमूर्त्तामूर्त्तभेदात् । तत्र चिदाभाससहिताऽविद्या मूर्त्तामूर्त्तप्रपञ्चस्य सबीजशक्तिरनादिरव्याकृतमित्युच्यते । इयञ्चाव्याकृताख्याऽविद्येश्वरोपाधिः । सा च स्वयं जडाप्यजडेन चिदाभासेनोज्ज्वलिता पूर्वपूर्वसंस्कारजीवकर्मभ्यां प्रयुक्ता सती शब्दस्पर्शरूपरसगन्धाश्रयाण्याकाशवायुतेजोजलपृथिव्यात्मकानि पञ्च सूक्ष्ममहाभूतानि जनयति । तत्र पूर्वपूर्वभूतभावापन्नाया एवाविद्याया उत्तरोत्तरभूतं प्रतिकारणत्वात् पूर्वपूर्वभूतगुणानामुत्तरोत्तरभूतेष्वनुप्रवेशाद् भूतानामेकैकवृद्धिभूतगुणशालित्वं तथा आकाशस्य शब्दो गुणः, वायोः शब्दस्पर्शौ, तेजसः शब्दस्पर्शरूपाणि, जलस्य तानि रसश्च, पृथिव्यास्तानि गन्धश्चेति । आकाशस्यैव दिग्व्यवहारजनकत्वेन दिशो न पृथक्पदार्थता । कालस्य चिज्जडसम्बन्धरूपतया तदाधाराविद्यात्मकतया च न पार्थक्यम् । तानि च सूक्ष्माणि पञ्च भूतान्यपञ्चीकृतानि कारणभेदाच्च सत्त्वरजस्तमोगुणात्मकानि सत्त्वरजोंऽशप्राधान्येन ज्ञानक्रियाशक्त्यात्मकमेकं स्वकार्य्यं [illegible]रूपमिव मिलित्वा जनयन्ति । तच्च [illegible] ज्ञानशक्तिप्राधान्येऽन्तःकरणं तदपि द्विविधं मनोबुद्धिभेदात् चतुर्विधं मनोबुद्ध्यहङ्कारचित्तभेदादित्यन्ये । तदेव क्रियाशक्तिप्राधान्ये प्राणः । स च पञ्चधा प्राणादिभेदात् । एवमेकैकभूतज्ञानक्रियाशक्तिभेदात् प्रत्येकं ज्ञानकर्मेन्द्रियद्वयं जायते । यथाकाशात् श्रोत्रवाचौ, वायोस्त्वक्पाणी, तेजसश्चक्षुःपादौ, अद्भ्यो रसनापायू, पृथिव्या घ्राणोपस्थौ चोत्पद्येते । तत्र शब्दस्पर्शरूपरसगन्धग्राहकाणि श्रोत्रत्वक्चक्षुःरसनाघ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि वचनादानगतिविसर्गानन्दजनकानि वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि । एतच्च सर्वं मिलित्वा सप्तदशकं लिङ्गशरीरम् । तच्च ज्ञानशक्तिप्राधान्येन समष्टौ हिरण्यगर्भ इति क्रियाशक्तिप्राधान्येन समष्टौ सूत्रमिति प्रोच्यते । अयं मूर्त्तपदार्थः कार्य्यत्वात् । समष्टिव्यष्टिजीवोपाधिसूक्ष्मभूतानि तु भोगावहं शरीरं भोग्यविषयञ्चान्तरेण भोगं जनयितुमसमर्थानीति जीवकर्मवशात्तानि स्वोत्पाद्यं पञ्चीकृतानि स-

न्ति। तथा हि सर्वाणि भूतानि स्वस्वार्द्धांशे स्वेतरभूतानां चतुर्णामष्टमांशैश्चतुर्भिर्योजनात् सर्वाण्येव पञ्चात्मकानि। स्वांशाधिक्याच्चाकाशादिव्यवहारः। तानि च पञ्चीकृतानि महाभूतानि भूतान्यानि मिलित्वैकं कार्य्यमिन्द्रियाणामधिष्ठानं जनयन्ति। तदेव स्थूलशरीरमित्युच्यते। तत्र सत्त्वप्रधानं दैवं शरीरं रजःप्रधानं मानवं तमःप्रधानं तिर्य्यगादिस्थावरान्तानाम्। सर्वेषां देहानां पाञ्चभौतिकत्वेऽपि चित्ते रूपाद्यामिव भूतानां कश्चिन्न भूतातिरेको न विरुध्यते। विनया अपि चतुर्दशभुवनाख्या घटादयश्च सत्त्वरजस्तमोऽंशतारतम्येन तेभ्य एव भूतेभ्यो जायन्ते। एतच्च सर्वं ब्रह्माण्डं विराडिति चोच्यते। सर्वं च सृष्टिप्रलयादिकं स्वप्नसृष्टिप्रलयवद्वास्तवमपि अनादिवासनादार्ढ्यात् व्यवहारक्षममिति मायिकत्वेऽपि न तुच्छत्वप्रसङ्गः”। अन्यदाकरे दृश्यम्। [शास्त्रसं० जटा०।

वेदान्तिन् त्रि० वेदान्तो ज्ञेयत्वेनास्त्यस्य इनि। वेदान्तज्ञे।

वेदाभ्यास पु० ६त०। “वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः। तद्दानञ्चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा” इत्युक्तेषु वेदपाठविचारानुशीलनतन्मन्त्रजपपाठनेषु।

वेदि न० विद+इन्। १प्रज्ञायाम् (आकरादि)२परिष्कृतायां भूमौ स्त्री अमरः वा ङीप्। “मध्येन सा वेदिविलग्नमध्या” कुमारः। ३पण्डिते पु० ४अङ्गुलिमुद्रायां स्त्री मेदि०। ५मध्यहस्तपरिमिताकारवर्त्तिकास्तूपे च “प्राग्द्वारवेदिविनिवेशितपूर्णकुम्भाः” रघुः। ६भूमिस्थे देशभेदे यथा अन्तर्वेदिः उत्तरवेदिः दक्षिणवेदिरित्यादि। वेदिश्च डमरुकाकारपरिच्छिन्नावनी पशुबन्धनार्थं होमीयद्रव्यासादनार्थं वा कृतसंस्कारा परिष्कृता चतुरस्रादिरूपा भूमिः। तत्रादावाद्यङ्गभूतदर्शपूर्णमासयोर्वेदिलक्षणं हेमा० दा० उक्तं यथा “मध्यपोत्तमयोर्वेदौ मण्डपस्य त्रिभागतः। चतुर्हस्तोच्छ्रितिस्त्वाकृतिसमप्रचितोऽपि वा। नवसप्तकरा वा इष्टकाभिः प्रकल्पयेत्”। वैदिककर्मार्थवेदिलक्षणादिकं कात्या०श्रौ०२।६।१सूत्रादौ उक्तं यथा “अपरेणाहवनीयं वेदिं खनति” कात्या०श्रौ० “त्र्यङ्गुलखाताम्” सू० “त्र्यङ्गुलं खातमस्याः” कर्क०। “व्याममात्रीं पश्चात्” सू० “अपरस्यां दिशि तिर्य्यक्प्रमाणेन चतुररत्निमात्रीं कुर्य्यात्”। “त्र्यरत्निं प्राचीम्” सू० “त्र्यरत्निं प्राचीम् पूर्वापरायतां दीर्घाम्। पुरस्तात् (पूर्वपार्श्वे) तिर्य्यक्प्रमाणं यद्यपि नोक्तम्, तथाप्यरत्नि मात्रम-

मेव दर्शनात् कुर्यात्”। “अपरिमितां वा” सू० “यस्मिन् पक्षे पक्षे दार्शेषापरिमितयज्ञौ श्रुतिवाक्यानुसरणादपरिमाणशालिनी अपरिमिता वा अपरिमितैष्टका वेति च। अन्ये तु अपरिमितं प्रमाणाङ्गं य इत्युक्तत्वात् पूर्वोक्तपरिमाणादनियमेनाधिकपरिमाणवाचकः” कर्क०। “प्राक् प्रवणामुदक्प्रवणां वा” सू० “प्रवन्तेऽस्मिन्नापोऽनेन वेति प्रवणं नीचम्, प्रवर्त्तते वा यत्रोदकमस्मिन्निति तदेव निम्नम्” कर्क०। “मध्यसंगृहीताम्” सू० “तत्साधनप्रकारश्च परिशिष्टे उक्तः “आनीय रज्जुं पूर्वार्द्धात् पश्चार्द्धं यावदेव तु। द्विगुणीकृत्य तां रज्जुमन्ते तस्यास्तु शङ्कौ। आयम्य च मानेन तया रज्ज्वाष्टभागया। या दृश्यस्त्रितीयेन भागेनालिखसंपर्हाविति” कश्चित् “वेदिश्रोण्यंसयोर्मध्ये तया रज्ज्वाष्टभागयेति पाठः” कर्क०। “अग्निमभितोऽंसौ” सू० “अंसौ आग्नेयैशानकोणावाहवनीयमुभयतो भवतः अंसयोर्मध्ये आहवनीयो भवतीत्यर्थः अतोऽंसावपि वेदेरेवावयवौ श्रोणिवत् खननसारणादयश्च वेदिसम्बन्धाः संस्कारास्तयोरपि प्रवर्त्तन्ते। षडरत्निं रज्जुं मित्वा द्वितीयारत्न्यन्ते लक्षणं श्रोण्यङ्कनार्थम् ततोऽरत्नेश्चतुर्थे भागे लक्षणं कर्षणार्थम् ततोऽरत्न्यन्ते प्राच्यन्ताङ्कनार्थम् ततश्चतुर्थभागोने(ऽरत्नौ) अंसाङ्कनार्थम् ततः सार्द्धेऽरत्नौ पाश इति अयं च पाशोऽविपर्य्यासेन साधनोपायः विपर्यासपक्षे तु षडरत्निं रज्जुमुभयतः पाशौ कृत्वा प्रथमं सार्द्धारत्न्यन्ते अंसाङ्कनार्थम् ततोऽर्द्धारत्नौ श्रोण्यङ्कनार्थम् ततोऽरत्नेश्चतुर्थे भागे आकर्षणार्थम् अरत्निद्वये च प्राच्यन्ताङ्कनार्थमिति। अपरिमितपक्षाश्रयणे च प्राचीप्रमाणं पुरस्तात्तिर्य्यक्प्रमाणं च तुल्यम् पश्चात्तिर्य्यक्प्रमाणं प्राचीप्रमाणं तृतीयभागेनाधिकमिति बुद्ध्या कल्पनीयम्। तत्र च प्राचीप्रमाणां रज्जुं द्विगुणां कृत्वा रज्जोर्मूलात् पुरस्तात्तिर्य्यक्प्रमाणा मध्ये मूलरज्जोरन्तिमचतुर्भागस्यादौ आकर्षणार्थं लक्षणमिति”। अथ खननप्रमाणे पक्षान्तरमाह “आमूलच्छेदनादोषधीनाम्” सू० “प्राक् प्रवणामुदक्प्रवणां वा। समानूपरूतानुतिष्ठेन यावल्लोऽसाहुयन्ते चाध्यात्मिवते वा। कस्मिन् पक्ष एव विशेषमाह” कर्क० “ओषधीनां मूलान्युच्छेत्तवै ब्रूयात्” सू० “इमं प्रैषमध्वर्य्युरग्नीधं प्रति ब्रूयात्। मूलानि च भूमिमध्ये दूरमपि यावत् गच्छन्ति तावत्पर्य्यन्तम्” कर्क०। “आहार्य्यं पुरीषं उत्करात्” सू० “मागतुमार्जनादेः सकाशादि [अप-

चात्वालात् पुरीषमानीय वेदिमध्ये प्रक्षेपणीयम् एतच्च पुरुषार्थम् प्रणयने काष्ठादिवत् अतश्च विकृतौ न भवति। निष्कामेष्वापि वेदिः पुरीषवत्येव कार्या वेदिपुरीषं सर्वत्र तिष्ठति न ततो निष्कामन्ते वचनाभावात्। अतश्च वेदिः नाङ्गुः खल्वीकरणीया किन्तु पांसुलैव कार्या” कर्क०। “वेदिं परिगृह्य वितृतीयेऽग्नीदुत्तरत उत्करं करोति” सू० “अम्नाह्वानीयधिनयनानन्तरं प्रथमं वेदिमानमध्वर्युः करोति यथोक्तम् “ततोऽग्नीदूर्ध्वं वेदि-मध्यपतितं तृणपुरीषादिकमपनाय्य वेदेरुत्तरतः परिसमूह्य नापचारितस्य तृणपुरीषादुत्करं राशिं करोति उत्कीर्यत इत्युत्करः। वितृतीयं च वेदेः प्रकृतत्वात्तदीयमेव गार्हपत्याहवनीयान्तरालं वितृतीयं च शुल्वकृतोक्तम् गार्हपत्याहवनीययोरन्तरं षोढा सप्तधा वागन्तुसमं त्रेधा विभज्यापरवितृतीयलक्षणेन दक्षिणायस्य तथिमाग्निं विपर्यस्योत्तरत उत्कर इत्येकः प्रकारः। अपि वान्तर त्रिभागोनया रज्ज्वा पूर्वार्द्धे समचतुरस्रं कृत्वा श्रोण्यामग्निविपर्यासोत्तरांस उत्कर इति विपर्यासस्यैव पूर्वतृतीयलक्षणेनोत्तरत आदध्येदिति प्रथमे प्रकारे गार्हपत्याहवनीययोरन्तरत्रिभागोनया रज्ज्वापरार्द्धे समचतुरस्रं कृत्वा तस्य चतुरस्रस्योत्तरांसे उत्कर इति द्वितीय प्रकारः। चात्वालोत्करावन्तरेण यथा संनिहितौ हि चात्वालोत्करः पूर्वे वितृतीये भवतीति” कर्क०। तत्करण प्रकारस्तत्तत्पद्धतौ द्रष्टव्यः।

वेदिका स्त्री वेदिरिव इवार्थे कन्। मङ्गलकर्मार्थं गृह-द्वारादौ चतुरस्रादिमृत्तिकास्तूपाकारेण निर्मिते भूखण्डे वितर्द्धौ अमरः। [हेमच०।

वेदिजा स्त्री वेद्याः होमवेदितो जायते जन-ड। द्रौपद्याम्

वेदितृ त्रि० विद-तृच् इट् च। ज्ञातरि हेमच०।

वेदिन् पु० विद-णिनि। १पण्डिते शब्दर०। २हिरण्यगर्भे च। ३ज्ञातरि त्रि० स्त्रियां ङीप्।

वेध पु० विध-घञ्। (बेँदा) १वेधने २उत्खाने (चाड़ा) “परिधिनवमभागः शूकधान्येषु वेधः” इति लीला०। विवाहादौ वर्ज्ये नक्षत्रविशेषस्थितग्रहभेदकृतसंसर्गे च। उपयमशब्दे ज्यो०त० च दृश्यम् “वेधं सर्वत्र वर्जयेत्”।

वेधक पु० विध-ण्वुल्। १कर्पूरे त्रिका०। २अम्लवेतसे ३धन्याके न० राजनि० ४वेधकर्त्तरि त्रि०।

वेधनी स्त्री विध्यतेऽनया विध-ल्युट् ङीप्। (भोमरी) १मणिरत्नादिवेधसाधने अस्त्रभेदे। स्वार्थे क। तदर्थे २मेथिकायां ३हस्तिकर्णवेधनास्त्रे त्रिकाण्डशेषः।

वेधमुख्य पु० ७त०। १कर्पूरे राजनि०। संज्ञायां क। २हरिद्राद्रके अमरः।

वेधस् पु० वि+धा-असुन् गुणः। १हिरण्यगर्भे नामाख्यादि २विष्णौ अमरः। ३सूर्य्ये ४श्वेतार्कवृक्षे शब्दच०। ५पण्डिते त्रि०: ६सूर्यवंश्ये नृपभेदे वह्निपु०।

वेधित त्रि० वेधो जातोऽस्य तार० इतच्। १विद्धे २छिद्रिते अमरः। [२मेथिकायां राजनि०।

वेधिनी स्त्री विध-णिनि। १जलौकायाम् (जोँक) शब्दर०।

वेन्ना स्त्री वन-न उपधाया इत्व। नदीभेदे “विनदीं पिञ्जलां वेन्नां(णाम्) तुङ्गवेणां(णां) महानदीम्” भा०भी०९अ०।

वेप कम्पने भ्वा०आत्म०अक०सेट्। वेपते अवेपिष्ट। ऋदित् चङि न ह्रस्वः। ष्वित्। वेपथुः।

वेपथु पु० वेप-अथुच्। कम्पे अमरः।

वेपन पु० वेप-ल्युट्। कम्पने शब्दच०।

वेपस् न० वेप-असुन्। अनवद्ये उणादिकोषः।

वेमन् पु० वे-मन् न आत्वम्। वापदण्डे शब्दच०। मनिन् न आत्। वेमन् अत्रैवार्थे पु०न० अमरः।

वेर न० अज-रन् वीभावः। १देहे २वार्त्ताकौ ३कुङ्कुमे च अमरः। संज्ञायां कन्। ४कर्पूरे हारा०।

वेल चलने भ्वा०पर०सक०सेट्। वेलति अवेलीत्। ऋदित् चङि न ह्रस्वः। [अत न।

वेल कालोपदेशे च० तु० उ०सक० सेट्। वेलयति ते अविवे-

वेल न०वेल-अच्। १उपवने हेमच०। २काले समये ३मर्य्यादायां ४समुद्रकूले च स्त्री “वेलाकूले विभावरी परिक्षीणा” भट्टिः। ५होरात्मके कालभेदे “चतुर्विंशति वेलाभिरहोरात्रं प्रचक्षते” अग्निपु०। ६सहजरुग्विकारे ७अक्लिष्टमरणे दत्तगे ८ईश्वरभोजने च मेदि० अक्लोष्ठादित्वमित्यन्ये अस्मार्थे।

वेलाकूल न० ताम्रलिप्तदेशे त्रिका०। [अवेल्लीत्।

वेल्ल चालने भ्वा०पर०सक०सेट् ऋदित् चङि न ह्रस्वः। वेल्लति

वेल्ल पु०न०वेल्ल-अच्। १विडङ्गे अमरः। घञ्। २चलने पु०

वेल्लज पु० वेल्ल-अच्-तथाभूतः सन् जायते जन-ड। मरिचे अमरः।

वेल्लन न० वेल्ल-ल्युट्। १अश्वादेर्भूमौ लुण्ठने २काष्ठनिर्मिते पदार्थे (बेलुन) आयप्र० ३भाजाद्यूर्वायां स्त्री राजनि०।

वेल्लन्तर पु० वेल्लं तरति तॄ-अच्। वीरतरौ “वेल्लन्तरोऽथ भवति वीरतरुः प्रसिद्धः श्वेतासितारुणविलोहितनील-

पुष्प । आम्रातितुल्यकुसुमः शमितश्लेष्मवातः स्यात्क-
ण्ठकी च जलदेशजश्च एष वृक्षः । वेल्लन्तरो रसे पाके
तिक्तस्तु ग्राहकफापहः । मूत्राघातं शर्करां च वाहिनी योनि-
मूत्रानिलार्त्ति हृत्" भावप्र० । [जटा० ।

वेल्लहल पु० वेल्लं ह्लनयति ह्लन–अच्–पृषो० । केलिनागरे

वेल्लि स्त्री वेल्ल–इन् । लतायां शब्दर० ।

वेल्लित न० वेल्ल–भावे क्त । १गमने मेदि० । कर्त्तरि क्त ।
२कम्पिते ३कुटिले च त्रि० अमरः ।

वेल्लि(ल्ली) स्त्री वेल्ल–इन् वा ङीप् । लतायाम् शब्दच० ।
स्वार्थे कन् वेल्लिका । (वेकुठ) वृक्षे शब्दच० ।

वेवी कान्तौ गतौ व्याप्तौ क्षेपे भोजने च सक० प्रजनने अक०
अदा०आत्म०सेट् जक्षादि० छान्दस एवायम् । वेवीते
अवेविष्ट । अस्य क्वचिदपि गुणवृद्धी न स्तः ।

वेश पु० विश–घञ् । अलङ्कारादिना कृतरूपान्तरे १नेपथ्ये च
कर्णे च अमरः । २वेश्याग्टहे ३गृहमात्रे मेदि०४प्रवेशे

वेशधारिन् पु० वेशं धारयति धृ–णिनि । छद्मेन रूपान्त-
रधारिणि १अद्भुतपक्षिप्रभृतौ शब्दच० । २वेशकारके
नटादौ च । शब्दि० ।

वेशन्त पु० विश–झच् । १क्षुद्रसरोवरे अमरः । २वह्नौ उ०

वेशर पु० वेशं राति रा–क । अश्वतरे त्रिका० ।

वेशमन् न० विश–मनिन् । गृहे अमरः ।

वेशमभू स्त्री ६त० । गृहकरणयोग्ये स्थाने अमरः ।

वेश्य न०विश–ण्यत् वेशाय हितं वा यत् । १वेश्यालये मेदि०
२पाठायाम् (आकनादि) ३वारयोषिति च स्त्री अमरः ।
"पतिव्रता चैकपत्नी द्वितीये कुलटा स्मृता । तृतीये
धर्षिणी ज्ञेया चतुर्थे पुंश्चली स्मृता । वेश्या च पञ्चमे
षष्ठे युङ्गी च सप्तमेऽष्टमे । तत ऊर्द्ध्वं महावेश्या सा-
ऽस्पृश्या सर्वजातिषु । यो द्विजः कुलटां गच्छेद्धर्षिणीं
पुंश्चलीमपि । युङ्गीं वेश्यां महावेश्यामवटोदं प्र-
याति सः । शताब्दं कुलटागामी धर्षिणीगामी चतुर्गु-
णम् । षड्गुणं पुंश्चलीगामी वेश्यागामी गुणाष्टकम् ।
युङ्गीगामी दशगुणं वसेत्तत्र न संशयः । महावेश्या-
गामी शतगुणं वसेत् । तत्रैव सर्वगामी चेत्येवं
माह पितामहः । तत्रैव यातनां भुङ्क्ते यमदूतेन ता-
डितः । तत्र तिन्तिडिः कुलटागामी धर्षिणीगामी च वायसः ।
[illegible] पुंश्चलीगामी वेश्यागामी वृकस्तथा । युङ्गी-
गामी च शूकरश्च सप्तजन्मानि भारते । महावेश्यागामी ह-
[illegible] मान्यनिवासः" ब्रह्मवै०प्र०ख०२८अ०

वेष पु० विष–अच् घञ् वा । भूषणादिना १रूपान्तरकरणे
२वेश्याजनालये च भरतः ।

वेषण पु० विष–करणे ल्युट् । १कासमर्दे (कालकासुन्दे)
हारा० । २धन्याकवृक्षे स्त्री रत्नमा० । [अवि(वे)वेष्टत् त ।

वेष्ट वेष्टने भ्वा०आत्म०सक०सेट् । वेष्टते अवेष्टिष्ट । चङि व

वेष्ट पु० वेष्ट–घञ् अच् वा । १वेष्टने २श्रीवेष्टे राजनि०
३वृक्षनिर्यासे च (आटा) वैद्यकम् ।

वेष्टक न०वेष्ट–ण्वुल् । (पागड़ी)१उष्णीषे शब्दर०।२कुष्माण्डे
राजनि० । ३प्राचीरे पु०हेमच० । ४वेष्टनकारके त्रि० ।

वेष्टन न० वेष्ट–करणे ल्युट् । १कर्णशष्कुल्याम् २उष्णीषे
३मुकुटे च ४गुग्गुलौ शब्दच० । भावे ल्युट् । ५वृतौ
मेदि० ।

वेष्टवंश पु० वेष्ट–अच् कर्म० । (वेड़वांश) वंशभेदे शब्दच० ।

वेष्टसार पु० वेष्टस्य सारः । श्रीवेष्टे राजनि० ।

वेष्टित त्रि०वेष्ट–क्त । प्राचीरादिना १आवृते अमरः । २रुद्धे
४लासके ५करणान्तरे न० मेदि० । [अवेसीत् ।

वेस गतौ भ्वा०पर०सक०सेट् ऋदित् चङि न ह्रस्वः । वेसति

वेसन न० वेस–ल्युट् । "दालयचणकानान्तु भिस्तुषा यन्त्र-
पेषिताः । तच्चूर्णं वेसनं प्रोक्तम्" इत्युक्ते १चण-
कादिद्विदलचूर्णे २गमने च ।

वेसर पु० वेस–अरन् । अश्वतरे हेमच० ।

वेसवार पु० वेसं वारयति वृ–अच् । (बाटना) पिष्टधान्या-
कमरिचादौ अमरः । "निरस्थि पिशितं पिष्टं स्विन्नं गुड-
घृतान्वितम् । कृष्णमरिचसंयुक्तं वेसवार इति स्मृतम्"
इत्युक्ते २भक्ष्यभेदे अस्य गुणाः "वेसवारो गुरुः स्निग्धो
बलोपचयवर्द्धनः" राजवल्लभः । अस्य मध्यान्तं दमध्यान्तं
वा रायमुकुट आह । [अवेहिष्ट ।

वेह यत्ने भ्वा० आत्म० अक० सेट् चङि न ह्रस्वः । वेहते

वेहत् स्त्री वि+हन अति नलोपः । गर्भोपघातिन्यां स्त्रि-
याम् अमरः । जात्या समासे परनि० । गोवेहत् सि०कौ०

वेहार पु०वि+हृ–घञ् पृषो० । स्वनामख्याते देशभेदे [ह्रस्वः

वेह्ल गतौ भ्वा०पर०सक० सेट् । वेह्लति अवेह्लीत् चङि न

वै शोषे भ्वा०पर०सक० सेट् अनिट् । वायति अवासीत् ।
ओदित् निष्ठातस्य नः । वानः निर्वाणः ।

वै अव्य० वा–डै । १पादपूरणे २अनुनये ३सम्बोधने अमरः ।

वैकक्ष न० विशेषेण कक्षति व्याप्नोति अच् । तिर्य्यक्कण्ठाव-
लम्बिनि हारभेदे हेमच० । पुन् । वैकक्षक उत्तरीय प्रा-
वीतावारेण धृते वस्त्रभेदे अमरः ।

वैकङ्कत पु० विकङ्कत+स्वार्थेऽण् । (बँचि) १वृक्षभेदे । तस्येदमण् । २विकङ्कतसम्बन्धिनि त्रि० । [२पक्षभवे च ।
वैकल्पिक त्रि० विकल्पेन प्राप्तः तत्र भवो वा ठक् । १पक्षप्राप्ते
वैकल्य न० विकलस्य भावः ष्यञ् । विकलत्वे ।
वैकुण्ठ पु० विकुण्ठायां भवः अण् विविधा कुण्ठा माया यस्य स्वार्थेऽण् वा । १विष्णौ २इन्द्रे मेदि० ३श्वेतार्जके राजनि० "चाक्षुषस्यान्तरे देवो वैकुण्ठः पुरुषोत्तमः । विकुण्ठायामसौ जज्ञे दैवतैः सह" विष्णुपु० "विविधा कुण्ठा गतेः प्रतिहतिस्तस्याः कर्त्ता इति वैकुण्ठः । जगदारम्भे विश्लिष्टानि भूतानि परस्परं संश्लेषयन् तेषां गतिं प्रत्यबध्नादिति वा वैकुण्ठः । "माया संश्लेषिताभूमिरद्भिर्व्योम्ना च वायुना । वायुश्च तेजसा सार्द्धं वैकुण्ठत्वं ततो मम" भा०शान्तिप० । विष्णुस० भा० । "कुण्ठं जडस्य विश्लेषं विशिष्टस्य करोति या । विकुण्ठां प्रकृतिं वेदाश्चत्वारश्च वदन्ति ताम् । गुणाश्रयेण भगवान् तस्यां जातः स्वसृष्टये । परिपूर्णतमं तेन वैकुण्ठश्च विदुर्बुधाः" । ४विष्णुधामभेदे "उपरिष्टात् चितेरष्टौ कोटयः सत्यमीरितम् । सत्यादुपरि वैकुण्ठो योजनानां प्रमाणतः । भूर्लोकात् परिसंख्यातः कोटिरष्टादश प्रभो ! । यत्रास्ते श्रीपतिः साक्षात् सर्वेषामभयप्रदः" पद्मपु० स्व० ६अ० ।
वैकृत न० विकृतस्य भावः अण् । १विकारे २बीभत्सरसे तदालम्बनमांसशोणितादौ विकृतित आगतः अण् । ३विकृतितो जाते त्रि० "वैकृतास्तु तथा देवाः" ।
वैक्रान्त न० स्वार्थे अण् । मणिभेदे विक्रान्तशब्दे दृश्यम् ।
वैखरी स्त्री विशेषेण खं राति रा—क स्वार्थे अण् । अर्थबोधके कण्ठादिषूच्चार्य्यमाणे वर्णात्मके शब्दविशेषे । वर्णशब्दे ४८५० पृ० दृश्यम् ।
वैखानस पु० वि+खन—ड खम्—असुन् कर्म० स्वार्थे अण् । वानप्रस्थे तापसभेदे "वैखानसेभ्यः श्रुतरामवार्त्ताः" भट्टिः
वैगुण्य न० विगतो विरुद्धो वा गुणोऽस्य तस्य भावः ष्यञ् । यत्र यदुचितं तस्य १रूपान्तरतापादने २अन्यायत्वे ३असम्पन्नत्वे च । [अधमत्वे च ।
वैचित्र्य न० विचित्रस्य भावः ष्यञ् । १नानारूपत्वे २विस्म·
वैजयन्त पु० विजयते वि+जि—झ स्वार्थे अण् । १इन्द्रप्रासादे अमरः । २इन्द्रे मेदि० । ३गृहे शब्दच० । ४इन्द्रध्वजे मेदि० । ५अग्निमन्थवृक्षे राजनि० ६पताकायाम् स्त्री अमरः । ७वैजयन्तीवृक्षे च स्त्री मेदि० ।

वैजिक न० बीजेन निर्वृत्तं ठक् । १शिग्रुतैले मेदि० । बीजाय हितम् स्वार्थे ठक् वा । २कारणे । ३आत्मनि शब्दमा० तस्येदं बीजादागतं वा ठञ् । ४सद्योजाताङ्कुरे मेदि० ५बीजसम्बन्धिनि त्रि० ।
वैज्ञानिक पु० विज्ञानाय साधु ठक् । १निपुणे अमरः । विज्ञानमधिकृत्य कृतो ग्रन्थः ठक् । २बौद्धागमे ३तदध्येतरि ४तत्सम्बन्धिनि च त्रि० ।
वैडालव्रत न० विडालस्येदम् अण् तदिव व्रतम् "यस्य धर्म्मध्वजो नित्यं शक्रध्वज इवोच्छ्रितः । प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम्" इत्युक्ते प्रकाशेन धर्म्माचरणेन गुप्तपापाचारे ।
वैडालव्रतिक पु० वैडालव्रतमस्त्यस्य ठन् । छलेन धर्मचारिणि छद्मतापसे त्रिका० । इनि । वैडालव्रतिन् तत्रार्थे "छद्मना चरितं तच्च व्रतं रक्षांसि गच्छति । अलिङ्गी लिङ्गिवेशेन यो लिङ्गमुपजीवति । स लिङ्गिनां हरेत् पापं तिर्य्यग्योनौ च जायते" । वैडालव्रतिनः पापाः सर्वधर्म्मविनाशकाः । सद्यः पतन्ति पापेषु कर्म्मणस्तस्य तत् फलम्" कूर्मपु० ५अ० ।
वैणव न० वेणूनां फलम् अण्, तस्य न लुप् तस्येदं वा अण् । १वेणुफले वेणुयवे अमरः । २वेणुसम्बन्धिनि त्रि० स्त्रियां ङीप् ।
वैणविक त्रि० वेणोर्विकारः अण् वैणवं वेणुवाद्यं शिल्पमस्य ठक् । वंशीवादके अमरः । [अमरः ।
वैणिक त्रि० वीणा तद्वादनं शिल्पमस्य ठक् । वीणावादके
वैणुक न० वेणोर्विकारः ठक् । १गजचालनार्थे लोहमुखे वंशदण्डे अमरः । वेणुस्तद्वादनं शिल्पमस्य ठक् । २वेणुवादके त्रि० शब्दच० । [ऋषिभेदे जटा० ।
वैण्य(न्य) पु० वेण(न)स्यापत्यम् यञ् । १वेणसुते पृथुनामके
वैतंसिक त्रि० वितंसेन मृगपक्ष्यादिबन्धनोपायेन चरति ठक् मांसविक्रयोपजीवके व्याधे अमरः । [मल्लादौ अमरः ।
वैतनिक त्रि० वेतनेन जीवति ठक् । वेतनोपजीवके कर्मकरे
वैतरणि(णी) स्त्री वितरणेन दानेन लङ्घ्यते अण् ङीप् वा पृषो० ह्रस्वः । यमद्वारस्थे नदीभेदे "नदी वैतरणी नाम दुर्गन्धा रुधिरावहा । उष्णतोया महावेगा अस्थिकेशतरङ्गिणी" प्रा०वि० अमदर्म्मः । तस्या उत्पत्त्यादि कालिकापु० १८अ० उक्तं यथा
"यमेश्वरोऽपि भूतेशमासाद्यान्तर्हितस्तदा । साध्वृष्टिं दुराधर्षीमवजग्राह मायया । यदा स नायकस्तान्यान् सञ्चारयितुमक्षमः । तदा महागिरौ छिन्ना साम्यात्वे

जलधारके । लोकालोकस्य निकटे जलधाराह्वयो गिरिः । पुष्करद्वीपपृष्ठस्थस्तोयसागरपश्चिमे । स तु सर्वप्रमाणेन मेरुपर्वतसन्निभः । तस्मिन् विन्यस्तवान् वाष्पान् न धर्त्तुं क्षम ईशितुः । विदीर्णस्तैस्तु वाष्पौघैर्मग्नमध्योऽभवद्द्रुतम् । ते वाष्पाः पर्वतं भित्त्वा विविशुस्तोयसागरम् । सागरोऽपि ग्रहीतुं तान्न शशाक खरानति । ततस्तु सागरं मध्ये भित्त्वा वाष्पाः समागताः । तोयधेः प्राग्भवां वेलां स्पर्शमात्राद्बिभेद ताम् । विभिद्य वेलां ते वाष्पाः पुष्करद्वीपमध्यगाः । नदी वैतरणी भूत्वा पूर्वसागरगाऽभवत् । जलधारस्य वेगेन संसर्गात् सागरस्य च । अवाप्य सौम्यतां किञ्चिद् वाष्पास्ते नाभिदन् क्षितिम् । तद्वाष्पव्याकुला पृथ्वी विदीर्णा स्यान्न चेच्छनिः । अवलम्बाङ्ग तान् वाष्पान् सोऽपि कम्प्योऽभवद्धठात् । शनैश्चरेण तं वोढुमसमर्थेन कोतकैः । क्षिप्ते विदारितः सोऽसौ जलधारो महागिरिः । विभिद्य पर्वतं यस्मीर्वाष्पास्ते सागरं ययुः । वैवस्वतपुरद्वारे योजनद्वयविस्तृता । अद्यापि तिष्ठत्यापगा हरलोतकसम्भवा । भित्त्वा वेलां ततः पृथ्वीं विभिद्याशु तरङ्गिणीम् । चक्रुर्वैतरणीं नाम्ना पूर्वसागरगामिनीम् । नानायानविमानेन न द्रोण्या स्यन्दनेन च । तर्त्तुं शक्या सा तु नदी तप्ततोया विभीषणा । दुःखेन तां तु पृथिवी बिभर्त्ति महताधुना । सदा चोर्द्ध्वं गतैर्वाष्पैर्विक्षिपन्ति नभश्चरान् । तस्या उपरि नो यान्ति देवा अपि भयाद्धरात् । यमद्वारं समाहृत्य योजनद्वयविस्तृता । निम्नं वहति संपूर्णा भीषयन्ती जगत्त्रयम्" २पितृकन्याभेदे "अयज्वानश्च यज्वानः पितरो ब्रह्मणः स्मृताः । अग्निष्वात्ता बर्हिषदो द्विधा तेषां व्यवस्थितिः । तेभ्यः स्वधा, स्वधा जज्ञे मेनां वैतरणीं तथा" कूर्मपु० १२अ० । वितरत्यनया तृ-करणे ल्युट् ङीप् । आसन्नमृत्युकाले दातव्यायां ३गवि च "आसन्नमृत्युना देया गौः सवत्सा च पूर्ववत् । तदभावे च गौरेका नरकोद्धारणाय वै । तदा यदि न शक्नोति दातुं वैतरणीञ्च गाम् । शक्तोऽन्योऽकृत् तदा दत्त्वा श्रेयो दद्यान्मृतस्य च" । पूर्ववत् हेमशृङ्गादिना अस्य मृतस्य चेति चकारश्रवणात् एकादशाहेऽपि वैतरणीदानाचारः" शु०त०रघु०। "यमद्वारे महाघोरे तप्ता वैतरणी नदी । तां तु तर्त्तुं ददाम्येनां कृष्णां वैतरणीञ्च गाम्" शु०त० ।

वैतस पु० वेतस एव स्वार्थे अण् । अम्लवेतसे जटा० ।

वैतानिक पु० वितानमर्हति ठक् । १श्रौतविधिनाऽग्निस्थापने २वितानसम्बन्धिनि च "दाहादूर्द्ध्वमशौचं स्यात् यस्य वैतानिको विधिः" स्मृतिः । वितानशब्दे ४८६९दृश्यम् ।

वैतालिक त्रि० विविधस्तालः मङ्गलगीतादिशब्दस्तेन व्यवहरति ठक् । मङ्गलस्तुत्यादिभिः राज्ञां प्रबोधकारके मागधादौ अमरः ।

वैतालीय पु० मात्रावृत्तभेदे । "षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः । न समाऽत्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः" वृ०र० ।

वैदग्ध न०स्त्री विदग्धस्य चतुरस्य भावः अण् वा स्त्रीत्वं पक्षे ङीप् । १चातुर्य्ये २भङ्गौ च । ष्यञ् । वैदग्ध्यमप्यत्र न० ।

वैदर्भ पु० विदर्भाणां जनपदानां राजा अण् । १विदर्भदेशाधिपे २वाक्यस्य कौटिल्ये न० "माधुर्य्यव्यञ्जकैर्वर्णै रचना ललितात्मिका । अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरुच्यते" इत्युक्ते ३काव्यरचनाभेदे स्त्री सा०द० ङीप् । विदर्भे भवा अण् । ४नलराजपत्न्यां दमयन्त्याम् स्त्री ङीप् । ५अगस्त्यपत्न्यां ६रुक्मिणीमहिषीभेदे च स्त्री हरिवं० ।

वैदल न० विदलस्य विकारः अण् । १भिक्षुकस्य भिक्षापात्रभेदे अमरः । २पिष्टकभेदे पु० शब्दच० ।

वैदिक पु० वेदं वेत्त्यधीते वा ठञ् । १वेदज्ञे ब्राह्मणे वेदेषु विहितः ठक् । २वेदोक्ते कर्मणि त्रि० । स्त्रियां ङीप् "वैदिकी तान्त्रिकी सन्ध्या यथानुक्रमयोगतः" तन्त्रम् ।

वैदुष्य न० विदुषो भावः विद्वस्+ष्यञ् सम्प्र० । पाण्डित्ये ।

वैदूर्य्य न० विदूरे गिरौ भवः ष्यञ् । कृष्णपीतवर्णे बिडालनेत्रतुल्य वर्णे मणिभेदे केतुरत्ने (लहसुनिया) राजनि० "मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादिकम् । मणिरत्नं सरं शीतं कषायं स्वादु लेखनम् । चाक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम्" राजवल्लभः । तच्छायालक्षणं यथा "एकं वेणुपलाशकोमलरुचा मायूरकण्ठत्विषा मार्जारेक्षणपिङ्गलच्छविजुषा ज्ञेयं त्रिधा च्छायया । यद्गात्रं गुरुतां दधाति नितरां स्निग्धन्तु दोषोज्झितं वैदूर्य्यं विशदं वदन्ति सुधियः स्वच्छञ्च तच्छोभनम् । तस्य कुलक्षणं यथा "विच्छायं मृच्छिलागर्भं लघु रूक्षञ्च सक्षतम् । सत्रासं परुषं कृष्णं वैदूर्य्यं दूरतो नयेत्" । तत्परीक्षा यथा । "घृष्टं यदात्मना स्वच्छं स्वच्छायां निकषाश्मनि । स्फुटं प्रदर्शयेदेतद्वैदूर्य्यं जात्यमुच्यते" । राजनि० "वैदूर्य्यपुष्परागाणां कर्केतभीष्मके वदे । परीक्षां ब्रह्मणा प्रोक्तां व्यासेन कथितां द्विज ! । कल्पान्तकालक्षुभिताम्बुराशिनिर्ह्रादकल्पाद्दितिजस्य नादात् ।

वैदूर्य्यं तत्पदमनेकवर्णं शोभाभिरामं द्युतिवर्णवीजम्। अविदूरे विदूरस्य गिरेरुत्तुङ्गरोधसः। कामभूतिकसीमानमनु तस्याकरोऽभवत्। तस्य नादसमुत्थत्वादाकरः सुमहागुणः। अभूदुत्तरितो लोके लोकत्रयविभूषणः। तस्यैव दानवपतेर्निनदानुरूपप्रावृट्पयोदरवदर्शितचारुरूपाः। वैदूर्य्यरत्नमणयो विविधावभासास्तस्मात् स्फुलिङ्गनिवहा इव संबभूवुः। पद्मरागमुपादाय मणिवर्णा हि ये स्थिताः। सर्वांस्तान् वर्णः शोभाभिर्वैदूर्य्यमनुगच्छति। तेषां प्रधानं शिखिकण्ठनीलं यद्वा भवेद्वेणुदलप्रकाशम्। चाषाग्रपत्रप्रतिमश्रियो ये न ते प्रशस्ता मणिशास्त्रविद्भिः। गुणवान् वैदूर्य्यमणिर्योजयति स्वामिनं वरभाग्यैः। दोषैर्युक्तो दोषैस्तस्माद् यत्नात्परीक्षेत। गिरिकाचशिशुपालौ काचस्फटिकाश्च भूमिनिर्भिन्नाः। वैदूर्य्यमणेरेते विजातयः सन्निभाः सन्ति। शिष्याभावात् काचं लघुभावाच्छैशुपालकं विद्यात्। गिरिकाचमदीप्तित्वात् स्फटिकं वर्णोज्ज्वलत्वेन। यदिन्द्रनीलस्य महागुणस्य सुवर्णसंख्याकलितस्य मूल्यम्। तदेव वैदूर्य्यमणेः प्रदिष्टं पलद्वयोन्मापितगौरवस्य। जात्यस्य सर्वेऽपि मणेस्तु यादृक् विजातयः सन्ति समानवर्णाः। तथापि नानाकरणानुमेयभेदप्रकारः परमः प्रदिष्टः। सुखोपलक्ष्यश्च सदा विचार्य्यो ह्ययं प्रभेदो विदुषा नरेण। स्नेहप्रभेदो लघुता मृदुत्वं विजातिलिङ्गं खलु सार्वजन्यम्। कुशलाकुशलैः प्रयुज्यमानाः प्रतिबद्धाः प्रतियत्नक्रिया प्रयोगैः। गुणदोषसमुद्भवं लभन्ते मणयोऽर्घान्तरमूल्यमेव भिन्नाः। क्रमशः समतीतवर्त्तमानाः प्रतिबद्धा मणिबन्धनेन यस्मात्। यदि नाम भवन्ति दोषहीना मणयः षड्गुणमाप्नुवन्ति मूल्यम्। आकरान् समतीतानामुदधेस्तीरसन्निधौ। मूल्यमेतत् खनीनान्तु न सर्वत्र महीतले। सुवर्णो भतुना यस्तु प्रोक्तः षोडशमाषकः। तस्य सप्ततिभोभागः संज्ञारूपं करिष्यति। शाणचतुर्भागमानो माषकः पञ्चकृष्णलैः। पलस्य दशमो भागो धरणः परिकीर्त्तितः। इति मानविधिः प्रोक्तो रत्नानां मूल्यनिश्चये"। गारुड़े ७३ अ॰। "सितस्य धूम्रच्छायमीषत्कृष्णसितं भवेत्। वैदूर्य्यनाम तद्रत्नं रत्नविद्भिरुदाहृतम्। ब्रह्मक्षत्रियविट्शूद्रजातिभेदाच्चतुर्विधाः। सितनीलो भवेद्विप्रः सितरक्तस्तु बाहुजः। पीतनीलस्तु वैश्यः स्यात् नील एव हि शूद्रकः"। अथ गुणाः "मार्ज्जारनयनप्रख्यं रसोमपतिमं हि वा। कान्तिलं निर्म्मलं व्यङ्गं वैदूर्य्यं देवभूषणम्। सुतारं घनमत्यच्छं कान्तिलं व्यङ्गमेव च। वैदूर्य्याणां समाख्याता एते पञ्च महागुणाः"। "उद्गिरन्निव दीप्तिं योऽसौ सुतार इतीर्य्यते। प्रमाणतोऽल्पं गुरु यद् घनमित्यभिधीयते। कलङ्कादिविहीनं तदच्छमिति कीर्त्तितम्। ब्रह्मसूत्रकलाकारयुक्तो यत्र दृश्यते। कान्तिलं नाम तद्रत्नं सर्वसम्पत्तिकारकम्। विशिष्टाङ्गन्तु वैदूर्य्यं व्यङ्गमित्यभिधीयते। कर्करं कर्कशं त्रासः कलङ्का देह इत्यपि। एते पञ्च महादोषा वैदूर्य्याणामुदीरिताः। शर्करायुक्तमिव यत् प्रतिभाति च कर्करम्। स्पर्शेऽपि यत्तज्ज्ञेयं च कर्कशं बन्धुनाशनम्। भित्त्वभ्रान्तिकरस्त्रासः स कुर्य्यात् कुलसंक्षयम्। विरुद्धवर्णो यस्याङ्गे कलङ्कः क्षयकारकः। मलदिग्ध इवाभाति देहो देहविनाशनः। जयति यदि सुवर्णत्यागहीनो यदा वा बहुविधमणिहारो भूपतिर्वा यतिर्वा। तदपि धृतदोषं जातु वैदूर्य्यरत्नं प्रतिहतफलरूपः पातमेषत्यवश्यम्"। युक्तिकल्पतरुः।

वैदेह पु॰ विशेषेण देह उपचयो यस्य स्वार्थे प्रज्ञाद्यण् विदेहे भवः अण् वा। १वणिग्जने भरतः। शूद्रात् वैश्यजाते २जातिभेदे पुंस्त्री॰ मेदि॰ स्त्रियां ङीष्। ठक्। वैदेहिकोऽपि वणिजि। विदेहानां राजा अण्। ३विदेहराजे जनके नृपे।

वैदेही स्त्री विदेहेषु मिथिलादेशेषु भवा अण्। १सीतायाम् जनकात्मजायाम् २हरिद्रायाम् ३पिप्पल्यां ४वणिक्स्त्रियाञ्च मेदि॰।

वैद्य पु॰ विद्याऽस्त्यस्य अण्। १पण्डिते "नाविद्यानान्तु वैद्येन देयं विद्याधनात् क्वचित्" दायभा॰। २भिषजि अमरः। तदुपकारके ३वासकवृक्षे च मद्न॰। वैद्योत्पत्तिश्च "वैद्योऽश्विनीकुमारेण जातश्च विप्रयोषिति। वैद्यवीर्य्येण शूद्रायां बभूवुर्बहवो जनाः। ते च ग्रामगुणज्ञाश्च मन्त्रौषधिपरायणाः। तेभ्यश्च जाताः शूद्रायां ते व्यालग्राहिणो भुवि"। शौनक उवाच "कथं ब्राह्मणपत्न्यान्तु सूर्य्यपुत्रोऽश्विनीसुतः। अहो केन विपाकेन वीर्य्याधानं चकार सः"। सौतिरुवाच "गच्छन्तीं तीर्थयात्रायां ब्राह्मणीं रविनन्दनः। ददर्श कामुकीं कान्तः पुष्पोद्याने मनोहरे। तया निवारितो यत्नात् बलेन बलवान् सुरः। अतीव सुन्दरीं दृष्ट्वा वीर्य्याधानं चकार सः। द्रुतं तत्याज गर्भं सा पुष्पोद्याने मनोरमे

सद्यो बभूव पुत्रश्च तप्तकाञ्चनसन्निभः । सपुत्रा स्वामिनो गेहं जगाम व्रीडिता तदा । स्वामिनं कथयामास यज्जातं वाटिकास्थलम् । विप्रोरोषेण तत्याज तञ्च पुत्रं स्वकामिनीम् । सरिद्बभूव योगेन सा च गोदावरी स्मृता । पुत्रं चिकित्साशास्त्रञ्च पाठयामास यत्नतः । नानाशिल्पञ्च मन्त्रञ्च स्वयं स रविनन्दनः । विप्रश्च ज्योतिर्गणनाद् वेदनाच्च निरन्तरम् । वेदधर्मपरित्यक्तो बभूव गणको भुवि" । ब्रह्मवै०पु० १० अ० । नरकभोगान्ते वैद्यजन्म यथा "यः करोत्यपहारञ्च देवब्राह्मणयोर्धनम् । पातयित्वा स्वपुरुषान् दश पूर्वान् दशापरान् । स्वयं याति च धूमान्धं धूमध्वान्तसमन्वितम् । धूमक्लिष्टो धूमभोगी वसेत्तत्र चतुर्युगम् । ततो मूषिकजातिश्च शतजन्मानि भारते । ततो नानाविधाः पक्षिजातयः कृमिजातयः । ततो नानाविधाः वृक्षजातयश्च ततो नरः । भार्य्याहीनो वंशहीनः शबरो व्याधिसंयुतः । ततो भवेत् स्वर्णकारः स सुवर्णवणिक् ततः । ततो भुवनसेवी च ब्राह्मणो गणकस्ततः । विप्रो दैवज्ञोपजीवी वैद्यजीवी चिकित्सकः" । "लाक्षालोहादिव्यापारी रसादिविक्रयी च यः । स याति नागवेष्टञ्च सर्पैर्वेष्टित एव च । वसेत् सर्पलोममानाब्दं तत्रैव नागदंशितः । ततो भवेत् स गणको वैद्यश्च सप्तजन्मसु । गोपश्च कर्म्मकारश्च शङ्खकारस्ततः शुचिः" । ब्रह्मवै०पु० २८ अ० । राजवैद्यस्य लक्षणं यथा "परं पारङ्गतो यः स्यादष्टाङ्गे तु चिकित्सिते । अनाहार्य्यः स वैद्यः स्याद्धर्मात्मा च कुलोद्गतः । प्राणाचार्य्यः स विज्ञेयो वचनं तस्य भूभुजः । राजन् ! राज्ञा सदा कार्य्यं यथाकार्य्यं पृथग्जनैः" । मात्स्ये १८६ अ० । "चिकित्सां कुरुते यस्तु स चिकित्सक उच्यते । स च यादृक् समीचीनस्तादृशोऽपि निगद्यते । तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती । लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः । प्रत्युत्पन्नमतिर्धीमान् व्यवसायी प्रियंवदः । सत्यधर्मपरोयश्च वैद्य ईदृक् प्रशस्यते" । दृष्टकर्म्मा दृष्टा परेण कृता चिकित्सा येन सः । स्वयं कृती स्वयं चिकित्साकुशलः । लघुहस्तः सिद्धिमद्धस्तः । निषिद्धवैद्यो यथा "कुचेलः कर्कशः स्तब्धः ग्रामीणः स्वयमागतः । पञ्च वैद्या न पूज्यन्ते धन्वन्तरिसमा अपि" । कर्कशः अप्रियवादी । स्तब्धः साभिमानः । ग्रामीणः अव्यवहाराजपतयः । अथ वैद्यस्य कर्म आह "व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः । एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः" भावप्र० "सत्यत्रेताद्वापरेषु युगेषु ब्राह्मणाः किल । ब्राह्मणक्षत्रियविट्शूद्रकन्यका उपयेमिरे । तत्र वैश्यसुतायां ये जज्ञिरे तनया अमी । सर्वे ते सुनयः ख्याता वेदवेदाङ्गपारगाः । तेषां मुख्योऽमृताचार्य्यस्तस्याम्बाकुले हि यत् । अम्बष्ठ इत्ययमाख्यातस्ततो जातिप्रवर्त्तनात् । परे सर्वेऽपि चाम्बष्ठा वैश्याब्राह्मणसम्भवाः । जननीतो जनुर्लब्ध्वा यज्जाता वेदसंस्कृतेः । अम्बष्ठास्तेन ते सर्वे द्विजा वैद्याः प्रकीर्त्तिताः । अथ रुक्प्रतिकारित्वाद्भिषजस्ते प्रकीर्त्तिताः । सत्ये वैद्याः पितृतुल्यास्त्रेतायाञ्च तथा स्मृताः । द्वापरे चाम्बवत् प्रोक्ताः कलौ वैश्योपमाः स्मृताः" कुलच० । आयुर्वेदशब्दे दृश्यम् ।

वैद्यक न० वैद्यं चिकित्सकमधिकृत्य कृतो ग्रन्थः कन् । आयुर्वेदे "ऋग्यजुःसामाथर्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः । विचिन्त्य तेषामर्थञ्चैवायुर्वेदं चकार सः । कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः । स्वतन्त्रां संहितां तस्माद् भास्करश्च चकार सः । भास्करश्च स्वशिष्येभ्य आयुर्वेदं स्वसंहिताम् । प्रददौ पाठयामास ते चक्रुः संहितास्ततः । तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च । व्याधिप्रणाशबीजानि साध्वि ! मत्तो निशामय । धन्वन्तरिर्दिवोदासः काशीराजोऽथाश्विनौ । नकुलः सहदेवार्की च्यवनो जनको बुधः । जावालो जाजलिः पैलः करथोऽगस्त्य एव च । एते वेदाङ्गवेदज्ञाः षोडश व्याधिनाशकाः । चिकित्सातत्त्वविज्ञानं नाम तन्त्रं मनोरमम् । धन्वन्तरिश्च भगवांश्चकार प्रथमे सति ।। चिकित्सादर्पणं नाम दिवोदासश्चकार सः । चिकित्साकौमुदीं दिव्यां काशीराजश्चकार सः । चिकित्सासारतन्त्रञ्च भ्रमघ्नं चाश्विनीसुतौ । तन्त्रं वैद्यकसर्वस्वं नकुलश्च चकार सः । चकार सहदेवश्च व्याधिसिन्धुविमर्दनम् । ज्ञानार्णवं महातन्त्रं यमराजश्चकार सः । च्यवनो जीवदानञ्च चकार भगवानृषिः । चकार जनको योगी वैद्यसन्देहभञ्जनम् । सर्वसारं चन्द्रसुतो जावालस्तन्त्रसारकम् । वेदाङ्गसारं तन्त्रञ्च चकार जाजलिर्मुनिः । पैलो निदानं करथस्तन्त्रं सर्वधरं परम् । द्वैधनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः । चिकित्साशास्त्रबीजानि तन्त्राण्येतानि षोडश । व्याधिप्रणाशबीजानि बलाधानकराणि च । अधीत्य

ज्ञानमन्थानैरायुर्वेदपयोनिधिम् । ततश्चन्तस्य दहरन् नवनीतानि कोविदाः । एतानि क्रमशो दृष्टा दिव्यां भास्करसंहिताम् । आयुर्वेदसर्ववीजं सर्वं जानामि सुन्दरि !" ब्रह्मवै॰ पु॰ १६अ॰ ।

वैद्यनाथ पु॰ देशविशेषे "करवीरे महालक्ष्मीरुमा देवी विनायके । अरोगा वैद्यनाथे तु महाकाले महेश्वरी" मात्स्ये । "वैद्यनाथं समारभ्य भुवनेशान्तगं शिवे ! । तावदङ्गाभिधो देशो यात्रायां न हि दुष्यति" शक्तिसङ्गमतन्त्रे ७प॰ । २भैरवविशेषे "हार्दपीठं वैद्यनाथे वैद्यनाथस्तु भैरवः । देवता जयदुर्गाख्या नेपाले जानुनी मम" तन्त्रचूडा॰ । ३शिवलिङ्गभेदे "हरिद्रानगरे यत्र वैद्यनाथो महेश्वरः । तत्राधयो विल्वदलः स्वर्णदलः उदाहृतः" वृहद्धर्मपु॰ ११अ॰ । "झारखण्डे वैद्यनाथो वक्रेश्वरस्तथैव च । वीरभूमौ सिद्धिनाथो राढे च तारकेश्वरः" इति महालिङ्गेश्वरतन्त्रे ।

वैद्यबन्धु पु॰ ६त॰ । आरग्वधवृक्षे शब्दर॰ ।

वैद्यमातृ स्त्री वैद्यस्य मातेव । १वासके अमरः तस्य वैद्यजीविकाप्रयोजकरोगशान्तिकरत्वेन तत्पोषकत्वात् तन्मातृतुल्यत्वम् ।

वैद्यसिंही स्त्री वैद्यस्य सिंहीव । वासकवृक्षे शब्दच॰ ।

वैद्या स्त्री वैद्यः पाल्यत्वेनास्त्यस्याः अच् । काकोल्याम् शब्दच॰ ।

वैध त्रि॰ विधित आगतः अण् । विधिप्रतिपाद्ये ।

वैधहिंसा स्त्री कर्म॰ । वेदविहितहिंसायाम् "या वेदविहिता हिंसा नियताऽस्मिंश्चराचरे । अहिंसामेव तां विद्याद् वेदाद् धर्मो हि निर्बभौ" मनुः । अत्र नियतेत्युपादानात् नित्ये पश्विष्ट्यादौ हिंसाया अहिंसात्वं न तु काम्येऽपीति सम्प्रदायविदः । पिष्टपशुमीमांसायाञ्च तथैवोक्तं "कुर्यात् घृतपशुं सङ्गे कुर्यात् पिष्टपशुं तथा" मनुना सङ्गे कामनायां पिष्टपशूनामेव विधानात् । विशेषतः कलौ "मांसदानं तथा श्राद्धे" "अश्वालम्भं गवालम्भम्" इति च कलिवर्ज्यप्रकरणे काम्यबलिदानादिनिषेधः । हिंसाया अनर्थसाधनत्वेऽपि वैधहिंसाया अर्थसाधनत्वम् वेद्यश्रोतसंस्कारभेदेन विषस्येवेति बोध्यम् । ति॰त॰मतभेदेन च वैधहिंसा उभयरूपत्वं निरूपितं यथा "मा हिंस्यात् सर्वाभूतानि" इत्यत्र सर्वशब्दस्य व्यापकार्थपरतया एतद्विधिमनुरुन्ध्य "वायव्यं श्वेतमालभेत" इत्यादिविधेर्विषयान्तरगत्या वैधातिरिक्तविषयत्वं सर्वा सर्वाणि छन्दसि वेत्यनेन तत्पदसिद्धम् । यदपि नानादर्शनटीकाकृद्भिर्वाचस्पतिमिश्रैस्तत्त्वकौमुद्यामभिहितं "न च मा हिंस्यात् सर्वा भूतानि" इति सामान्यशास्त्रं विशेषशास्त्रेण "अग्नीषोमीयं पशुमालभेत" इत्यनेन बाध्यते इति वाच्यं विरोधाभावात् विरोधे हि बलीयसा दुर्बलं बाध्यते । न चास्ति विरोधः भिन्नविषयत्वात् । तथा हि मा हिंस्यादिति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न पुनरक्रत्वर्थत्वमपि । अग्नीषोमीयं पशुमालभेतेत्यनेन तु पशुहिंसायाः क्रत्वर्थत्वमुच्यते न त्वनर्थहेतुभावस्तथा सति वाक्यभेदप्रसङ्गात् । न चानर्थहेतुत्वक्रतूपकारकत्वयोः कश्चिदस्ति विरोधः । हिंसा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्चोपकरिष्यतीत्यन्तेन, तदपि सांख्यनये । मीमांसकमते तु विरोध एव तथा हि गुरुनये न खलु सर्वभूतहिंसाभावविषयकं कार्य्यम् इति निषेधविध्यर्थस्य बाधं विना अग्नीषोमीयपश्वालम्भनविषयकं कार्य्यमिति भावविध्यर्थ उपपद्यते । भट्टनये तु अङ्गे यथा तथास्तु । न च मुख्यपशुयागे पुरुषार्थपशुहिंसनस्यार्थसाधनत्वमनर्थसाधनत्वञ्चोपपद्यते विरोधात् । वस्तुतस्तु अङ्गेऽपि विरोधोऽस्त्येव कुतो ? विधेरेष स्वभावो यत् स्वविषयस्य साक्षात् परम्परया वा पुरुषार्थसाधनत्वमवगमयति अन्यथाऽङ्गानां प्रधानोपकारकत्वमपि नाङ्गीक्रियेत । अर्थसाधनत्वं बलवदनिष्टाननुबन्धीष्टसाधनत्वम् अनर्थसाधनत्वं बलवदनिष्टसाधनत्वं न चानयोरेकत्र समावेश इति । अतएवोक्तं "तस्मादुयज्ञे वधोऽवधः" इति । नन्वेवं "श्येनेनाभिचरन् यजेत" इत्यत्र श्येनस्य शत्रुवधरूपेष्टसाधनत्वमवगतम् "अभिचारो मूलकर्म च" इति मनुना उपपातकगणमध्ये पाठादनिष्टसाधनत्वमवगतम् । तदेतत् कथमुपपद्यतामिति चेन्मैवं "आततायिनमायान्तं हन्यादेवाविचारयन्" इत्येतद्वाक्यतया आततायिस्थले इष्टसाधनत्वम् अनाततायिस्थले तूपपातकत्वेन बलवदनिष्टसाधनत्वमित्यविरोध इति गुरुचरणाः" ।

वैधात्र पु॰ विधातुरपत्यम् अण् । सनत्कुमारादौ १मुनिभेदे अमरः । २ब्राह्म्यां (ब्रामनहाटि) स्त्री राजनि॰ ।

वैधृति पु॰ विगता धृतिर्यस्मात् पृषो॰ वृद्धिः । विष्कम्भादिषु मध्ये १अन्तिमे योगे । सूर्य्यचन्द्रयोः क्रान्तिसाम्येनानीते अयपर्यन्ते २यज्ञभेदे तत्र वैधृतशब्दोऽपि यथोक्तं

सू०सि० "एकायनगतौ स्यातां सूर्याचन्द्रमसौ यदा। तद्युते मण्डले क्रान्त्योस्तुल्यत्वे वैधृताभिधः"। पातशब्दे ४२८८ पृ० विस्तरो दृश्यः। उपग्रहशब्दे १२६५ पृ० दृश्यम्। [मूर्खे अमरः।

वैधेय त्रि० विधीयतेऽसौ वि+धा–यत् ततः स्वार्थे अण्।

वैधर्म्य न० विरुद्धो धर्मो यस्य तस्य भावः ष्यञ्। १विरुद्धधर्मत्वे २अन्यायत्वे च। [मसह्यवैदनम्" इति कुमारः।

वैधव्य न० विधवाया भावः ष्यञ्। पतिविरहे "नरवैधव्य-

वैनतेय पु० विनतायाः अपत्यं ढक्। १गरुड़े अमरः २अरुणे च मतृस्पु०। [हेमच०।

वैनयिक त्रि० विनये रतः ठक्। शास्त्रज्ञानादिना विनयरते

वैनायिक पु० विनायं खण्डनमधिकृत्य कृतो ग्रन्थः ठक्। १बौद्धागमे त्रिका० उपचारात् २तदभिज्ञे त्रि०।

वैनाशिक पु० विनाशमधिकृत्य कृतो ग्रन्थः ठक्। सर्वेषां क्षणभङ्गुरताप्रतिपादके १बौद्धागमे २तदभिज्ञे त्रि०। विनाशाय हितम् ठक्। ज्योतिषोक्ते षड्गाड़ीचक्रस्थे जन्मनक्षत्रावधिकयोविंशे ३नक्षत्रे ४क्षपिके ५परतन्त्रे च त्रि० ६ऊर्णनाभे पु० मेदि०।

वैनीतक पु०न०। विशेषेण नीतं नयनं तेन कायति कै–क स्वार्थं अण्। परम्परया वाहने शिविकादौ अमरः।

वैपरीत्य न० विपरीतस्य भावः ष्यञ्। १विपर्यये हेमच०। २लज्जालौ लतायां स्त्री राजनि०।

वैभव न० विभोर्भावः अण्। १विभुत्वे २विभूतौ।

वैभ्राज न० विभ्राज इदम् अण्। देवोद्यानभेदे त्रिका०। तच्च मेरोः पश्चिमविष्कम्भविपुलपर्वतस्थं विपुलशब्दे ४९१० पृ० दृश्यम्। [२तथाभूतभगिन्यां स्त्री ङीप्।

वैमात्र पु० विमातुरपत्यम् अण्। १सापत्ने भ्रातरि अमर

वैमात्रेय पु० विमातुरपत्यं ढक्। १सापत्ने भ्रातरि अमरः २तथाभूतभगिन्यां स्त्री ङीप्।

वैमुख्य न० विमुखस्य भावः ष्यञ्। विमुखत्वे।

वैमेय पु० वि+मि–यत् स्वार्थे अण्। विनिमये हेमच०।

वैयधिकरण्य न० व्यधिकरणस्य भावः ष्यञ्। असमानाधिकरणत्वे। [भिन्ने।

वैयाकरण त्रि० व्याकरणं वेत्त्यधीते वा अण्। व्याकरणा-

वैयाघ्र पु० व्याघ्रचर्मणा परिवृतो रथः अण्। व्याघ्रचर्मपरिवृते रथे अमरः।

वैयाघ्रपद्य पु० व्याघ्रपदस्यापत्यं यञ्। गोत्रकारके मुनिभेदे "वैयाघ्रपद्यगोत्रायेति" भीष्मतर्पणमन्त्रः।

वैयात्य न० वियातस्य भावः ष्यञ्। निर्लज्जत्वे "वैयात्यं सुरतेष्वपि" माघः। [शुकदेवे।

वैयासकि पु० व्यासस्यापत्यम् इञ् अकङ् च। व्यासस्यापत्ये

वैयासिकी स्त्री व्यासेन प्रोक्ता ठञ् ङीप्। व्यासप्रणीतायां संहितायाम्।

वैर न० वीरस्य भावः अण्। विरोधे विद्वेषे अमरः। "वैरं पञ्चसमुत्थानं मुनिभिः परिकीर्त्तितम्। स्त्रीकृतं वास्तुजं वाग्जं ससापत्न्यापराधजम्"। तत्र स्त्रीकृत कृष्णचैद्ययोः। वास्तुजं कुरुपाण्डवयोः। वाग्जं द्रोणद्रुपदयोः। सापत्नं नैसर्गिकमहिनकुलयोः। अपराधजं पूजनीब्रह्मदत्तयोः।

वैरकर त्रि० वैरं करोति कृ–ट। विरोधकारके।

वैरक्त्य न० विरक्तस्य भावः ष्यञ्। विरागे।

वैरङ्गिक त्रि० विरङ्गं विरागं नित्यमर्हति ठञ्। विरागार्हे हेमच०। वैरागिक तत्रार्थे सि०कौ०।

वैरनिर्यातन न०वैरस्य वैरकृतापकारस्य निर्यातनम् निर्+यत–णिच् ल्युट्। वैरकृतापकारप्रतीकारे अमरः।

वैरप्रतीकार पु० ६त०। वैरकृतापकारस्य तुल्यरूपापकारकरणेन तस्य शोधने वैरप्रतिक्रियाप्यत्र स्त्री।

वैरशुद्धि स्त्री ६त०। वैरप्रतीकारे अमरः।

वैराग्य न० विरागस्य भावः ष्यञ्। १विषयवासनाराहित्ये ऐहिकामुष्मिकविषयरागराहित्ये च।

वैराग्यस्य मोक्षहेतुत्वादि विवेकचूड़ामणौ दर्शितं यथा "मोक्षस्य हेतुः प्रथमो निगद्यते वैराग्यमत्यन्तमनित्यवस्तुषु। ततः शमश्चापि दमस्तितिक्षा न्यासः प्रसक्ताखिलकर्मणां भृशम्। ततः श्रुतिस्तन्मननं सतत्त्वध्यानं चिरं नित्यनिरन्तरं मुनेः। ततो विकल्पं परमेत्य विद्वानिहैव निर्वाणसुखं समृच्छति। यद्बोद्धव्यं तवेदानीमात्मानात्मविवेचनम्। तदुच्यते मया सम्यक् श्रुत्वात्मन्यवधारय। मज्जास्थिमेदःपलरक्तचर्मत्वगाह्वयैर्धातुभिरेभिरन्वितम्। पादोरुवक्षोभुजपृष्ठमस्तकैरङ्गैरुपाङ्गैरुपयुक्तमेतत्। अहं ममेति प्रथितं शरीरं मोहास्पदं स्थूलमितीर्य्यते बुधैः। नभोनभस्वद्दहनाम्बुभूमयः सूक्ष्माणि भूतानि भवन्ति तानि। परस्परांशैर्मिलितानि भूत्वा स्थूलानि च स्थूलशरीरहेतवः। मात्रास्तदीया विषया भवन्ति शब्दादयः पञ्च सुखाय भोक्तुः। य एषु मूढ़ा विषयेषु बद्धा रागोरुपाशेन सुदुर्दमेन। आयान्ति निर्यान्त्यध ऊर्द्ध्वमुच्चैः स्वकर्मदूतेन जवेन

नीताः। शब्दादिभिः पञ्चभिरेव पञ्च पञ्चत्वमापुः स्व गुणेन बद्धाः। कुरङ्गमातङ्गपतङ्गमीनभृङ्गा, नरः पञ्चभिरञ्चितः किम्?। दोषेण तीव्रो विषयः कृष्णसर्पविषादपि। विषं निहन्ति भोक्तारं द्रष्टारं चक्षुषाप्ययम्। विषयाशा महापाशात् यो विमुक्तः सुदुस्त्यजात्। स एव कल्पते मुक्त्यै नान्यः षट्शास्त्रवेद्यापि। आपातवैराग्यवतो मुमुक्षून् भवाब्धिपारं प्रतियातुमुद्यतान्। आशाग्रहो मज्जयतेऽन्तराले निगृह्य कण्ठे विनिवर्त्य वेगात्। विषयाख्यग्रहो येन सुविरक्त्यसिना हतः। स गच्छति भवाम्भोधेः पारं प्रत्यूहवर्जितः। विषमविषयमार्गैर्गच्छतो नष्टबुद्धेः प्रतिपदमभियातो मृत्युरप्येष सिद्धिः। हितसुजनगुरूक्त्या गच्छतः स्वस्य युक्त्या प्रभवति फलसिद्धिः सत्यमित्येव विद्धि। मोक्षस्य काङ्क्षा यदि वै तवास्ति त्यजातिदूराद्विषयान् विषं यथा। पीयूषवत्तोषदयाक्षमार्जवप्रशान्तिदान्तीर्भज नित्यमादरात्"।

वैराट त्रि॰विराटस्येदम् अण्। १विराटसम्बन्धिनि। वीर इव अटति अट-अच् स्वार्थे अण्। २इन्द्रगोपकीटे हेमच॰।

वैरातङ्क पु॰ वीरस्य अर्जुनस्यातङ्काय शङ्कायै साधु—अण्। अर्जुनवृक्षे राजनि॰। [तृत्युपकारके २वैरानुगते च।

वैरानुबन्धिन् त्रि॰वैरं विद्वेषमनुबध्नाति णिनि। १विद्वेषा

वैरिन् त्रि॰ वैरमस्त्यस्य इनि। शत्रौ अमरः।

वैरूप्य न॰ विरूपस्य भावः ष्यञ्। १विरूपत्वे २अननुरूपत्वे ३अयथाभावे ४वस्तुनोविकारभेदे च।

वैरोच(न)नि पु॰ विरोचनस्यापत्यम् शिवाद्यण् इञ् वा। १अग्निपुत्रे २सूर्यपुत्रे ३बलिराजपुत्रे दानवभेदे च ४बुद्धभेदे ५सिद्धगणे शब्दर॰।

वैलक्षण्य न॰विलक्षणस्य भावः ष्यञ्। विलक्षणत्वे वैशिष्ट्ये

वैलक्ष्य न॰ विलक्षस्य भावः ष्यञ्। १लज्जायाम् अमरः २स्वभाववैलक्षण्ये च "वैलक्ष्यहेतोर्गतिमेतदीयाम्" नैष॰।

वै(ब)वधिक त्रि॰ वी(ब)वधेन धान्यादिसंग्रहेण व्यवहरति ठक्। वार्त्तावहे नैगमे (टोकानि) अमरः।

वैवर्ण्य न॰ विवर्णस्य भावः ष्यञ्। विवर्णत्वे मालिन्ये।

वैवस्वत पु॰विवस्वतोऽपत्यम् तस्येदं वा अण्। १यमे अमर॰ २अग्नौ ३रुद्रभेदे च जटा॰। ४तत्सम्बन्धिनि त्रि॰ "वैवस्वतकरक्रिया" इत्युद्भटः। ५दक्षिणदिशि स्त्री ङीप्। ६सप्तमे मनुभेदे "मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः। सप्तमो वर्त्तमानोऽयस्तदपत्यानि मे शृणु!। इक्ष्वाकुर्न भगश्चैव धृष्टः शर्यातिरेव च। नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते। करूषश्च पृषध्रश्च दशमो वसुमान् स्मृतः। मनोर्वैवस्वतस्यैते दश पुत्राः परन्तप!। आदित्या वसवो रुद्रा विश्वे देवा मरुद्गणाः। अश्विनौ ऋभवो राजन्! इन्द्रस्तेषां पुरन्दरः। कश्यपोऽत्रिर्वशिष्ठश्च विश्वामित्रश्च गोतमः। जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः। अत्रापि भगवज्जन्म कश्यपाददितेरभूत्। आदित्यानामवरजो विष्णुर्वामनरूपधृक्। संक्षेपतो मयोक्तानि सप्त मन्वन्तराणि ते" भाग॰ ८।१३अ॰।

वैवाहिक त्रि॰ विवाहाय हितं साधु वा ठक्। १विवाहयोग्ये "वैवाहिकीं तिथिं पृष्टाः" इति कुमारः। २विवाहेन सम्बद्धे कन्यापुत्रयोः श्वशुरे ३विवाहसम्बन्धिनि च त्रि॰ "पञ्चमे सप्तमे वापि येषां वैवाहिकी क्रिया" स्मृतिः।

वैशम्पायन पु॰ व्यासशिष्ये भारतवक्तरि मुनिभेदे। स च व्यासादिष्टः जनमेजयाय भारतं श्रावितवान् यथोक्तं भा॰आ॰१अ॰"जनमेजयेन पृष्टः सन् ब्राह्मणैश्च सहस्रशः। शशास शिष्यमासीनं वैशम्पायनमन्तिके। स सदस्यैः सहासीनः श्रावयामास भारतम्। कर्मान्तरेषु यज्ञस्य चोद्यमानः पुनःपुनः"। स च यजुर्वेदे तस्य शिष्यः यथाह "अथ शिष्यान् प्रजग्राह चतुरो वेदपारगान्। जैमिनिञ्च सुमन्तुञ्च वैशम्पायनमेव च। पैलं तेषां चतुर्थञ्च पञ्चमं मां महामुनिः। ऋग्वेदश्रावकं पैलं जग्राह स महामुने!। यजुर्वेदप्रवक्तारं वैशम्पायनमेव च" कौर्मपु॰ ४९ अ॰। [सके च।

वैशस न॰विशसस्य भावः स्वार्थे वा अण्। १हिंसने २हिं-

वैशाख पु॰ विशाखानक्षत्रयुक्ता पौर्णमासी वैशाखी सा यत्र मासे पुनः अण्। स्वनामख्याते चैत्रतो द्वितीये १चान्द्रमासे २शाकवर्षभेदे च कात्तिकशब्दे १९४९ पृ॰ दृश्यम्। चान्द्रवैशाखलक्षणं तु मेषस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तत्रिंशत्तिथित्वम्। मेषस्थरविके ३सौरतन्मासे "तुलामकरमेषेषु प्रातःस्नानं विधीयते। हविष्यं ब्रह्मचर्यञ्च महापातकनाशनम्"। तन्मासस्य ४पौर्णमास्यां स्त्री ङीप्। विशाखा प्रयोजनमस्य अञ्। ५मन्थानदण्डे पु॰ ६धनुर्द्धराणामवस्थानभेदे न॰अमरः। [वशग्राभिषक्ते नायकभेदे रसम॰।

वैशिक पु॰वेशे वेश्यालये उपचारात् वेश्यायां प्रसृतः ठक्।

वैशिष्ट्य न॰ विशिष्टस्य भावः ष्यञ्। विशेष्यविशेषण-

सम्बन्धिनि विशिष्टबुद्धिनियामके १सम्बन्धे २भेदे च।

वैशेषिक न० विशेषं पदार्थभेदमधिकृत्य कृतो ग्रन्थः ठञ्। कणादप्रणीते १शास्त्रभेदे। तदधीते अण्। २काणादशास्त्राभिज्ञे त्रि०। तस्येदम् अण्। ३काणादशास्त्रसम्बन्धिनि त्रि०। [शेषत्वात्तद्वादः" शा०सू०।

वैशेष्य न० विशेषस्य भावः ष्यञ्। १वैशिष्ट्ये २भेदे च "वै-

वैश्य पुंस्त्री विशति उपभुङ्क्ते विश—क्विप् स्वार्थे ष्यञ्। वर्णभेदे ब्रह्मण ऊरुजाते जातिभेदे अमरः स्त्रियां टाप्। "विशत्याशु पशुभ्यश्च कृष्यादानरुचिः शुचिः। वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः" पद्मपु०स्व०२६अ०।

वैश्यवृत्ति स्त्री ६त०। कृषिवाणिज्यादौ "वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम्। वार्त्तायां नित्ययुक्तः स्यात् पशूनाञ्चैव रक्षणे। प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून्। ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः। न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति। वैश्ये चेच्छति नान्येन रक्षितव्याः कथञ्चन। मणिमुक्ताप्रवालानां लोहानां तान्तवस्य च। गन्धानाञ्च रसानाञ्च विद्यादर्घबलाबलम्। बीजानामुप्तिविच्च स्यात् क्षेत्रदोषगुणस्य च। मानयोगञ्च जानीयात् तुलायोगांश्च सर्वशः। सारासारञ्च भाण्डानां देशानाञ्च गुणागुणान्। लाभालाभञ्च पण्यानां पशूनां परिवर्द्धनम्। भृत्यानाञ्च भृतिं विद्याद् भाषाश्च विविधा नृणाम्। द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च। धर्मेण च द्रव्यवृद्धावातिष्ठेद् यत्नमुत्तमम्। दद्याच्च सर्वभूतानामन्नमेव प्रयत्नतः" मनुः। "वैश्यस्य च प्रवक्ष्यामि यो धर्मो वेदसम्मतः। दानमध्ययनं शौचं यज्ञश्च धनसञ्चयः। पालयेच्च पशून् वैश्यः पितृवद्धर्ममर्जयन्। विकर्म तद्भवेदन्यत् कर्म यत् स समाचरेत्। रक्षया स हि तेषां वै महत् सुखमवाप्नुयात्। प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे प्रजाः। ब्राह्मणेभ्यश्च राज्ञे च सर्वाः परिददे प्रजाः। तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्। षण्णामेकां पिबेद्धेनुं शताच्च मिथुनं भवेत्। लब्धाच्च सप्तमं भागं तथा शृङ्गे कलखुरे। शस्यानां सर्वबीजानि एषा सांवत्सरी भृतिः" शान्तिप०६०अ०।

वैश्रवण पु० विश्रवसोऽपत्यम् अण् विश्रवणादेशः। कुबेरे अमरः। [वैश्रवणावासादयोऽप्यत्र।

वैश्रवणालय पु० ६त०। १वटवृक्षे हेमच० २कुबेरपुर्याञ्च।

वैश्वदेव पु० विश्वेभ्यो देवेभ्यो देयो बलिः अण्। वैश्वदेवोद्देशेन दीयमाने बलौ।

वैश्वानर पु० विश्वेषां नराणामयम् कुक्षिस्थत्वात् अण् पूर्वदीर्घः। १वह्नौ २चित्रकवृक्षे। ३चेतने च विश्वानरस्यापत्यम् अण्। अग्निलोकाधिपे ४वह्नौ काशीख०१०अ० तत्कथा दृश्या। सर्वदेहाभिमानिनि ५सर्वान्तर्यामिनि परमेश्वरे तदुपासनप्रकारः छान्दो० ६प्र० दर्शितो यथा "एष वै रयिरात्मा वैश्वानरः" इत्युपक्रमे "तान् होवाचैते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वांसोऽन्नमत्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति" "तान् यथोक्तवैश्वानरदर्शनवतो ह उवाच। एते यूयं वै खल्वित्यनर्थकौ यूयं पृथगिवापृथक् सन्तमिममेकं वैश्वानरं विद्वांसोऽन्नमत्थ परिच्छिन्नात्मबुद्ध्या एतद्धस्तिदर्शन इव जात्यन्धाः। यस्त्वेतमेवं यथोक्तावयवैर्द्युमूर्द्धादिभिर्विशिष्टमेवं प्रादेशमात्रं प्रादेशैर्द्युमूर्द्धादिभिः पृथिवीपादान्तैरध्यात्मं मीयते ज्ञायत इति प्रादेशमात्रम्। मुखादिषु वा करणेष्वकर्तृत्वेन मीयत इति प्रादेशमात्रः। द्युलोकादिपृथिव्यन्तप्रदेशपरिमाणो वा प्रादेशमात्रः। प्रकर्षेण शास्त्रेणादिश्यन्त इति प्रादेशा द्युलोकादय एव तत्परिमाणः प्रादेशमात्रः। शाखान्तरे तु "मूर्द्धादिचुबुकप्रतिष्ठः" इति प्रादेशमात्रं कल्पयन्ति। इह तु न तथाभिप्रेतः। "तस्य ह वा एतस्यात्मनः" इत्याद्युपसंहारात्। प्रत्यगात्मतयाऽभिविमीयतेऽहमिति ज्ञायत इत्यभिविमानस्तमेतमात्मानं वैश्वानरं विश्वान्नरान्नयति पुण्यपापानुरूपां गतिम्। सर्वात्मैष ईश्वरो वैश्वानरो विश्वो नर एव वा सर्वात्मत्वात्। विश्वैर्वा नरैः प्रत्यगात्मतया प्रविभज्य नीयत इति वैश्वानरः। तमेवमुपास्ते यः सोऽदसमन्नादी सर्वेषु लोकेषु द्युलोकादिषु सर्वेषु भूतेषु चराचरेषु सर्वेष्वात्मसु शरीरेन्द्रियमनोबुद्धिषु तेषु ह्यात्मकल्पनाव्यपदेशः प्राणिनामन्नमत्ति। वैश्वानरवित् सर्वात्मा सन्नन्नमत्ति। न यथाज्ञः पिण्डमात्राभिमानः सन्नित्यर्थः"।

वैषम्य न० विषमस्य भावः ष्यञ्। विषमत्वे वैलक्षण्ये।

वैषयिक त्रि० विषयेण निर्वृत्तः ठक्। विषयनिर्वृत्ते सुखादौ।

वैष्टुत न० विष्टुत्या निर्वृत्तम् अण्। १होमभस्मनि हेमच०। २विष्टुतिसाध्ये यागादौ त्रि०। [४विष्णौ च संक्षिप्तसा०।

वैष्ट न० विष—ष्ट्रन् षित्। १पिष्टपे उणादि० २स्वर्गे ३वायौ

वैष्णव त्रि० विष्णुर्देवताऽस्य तस्येदं वा अण्। १विष्णूपासके २विष्णुसम्बन्धिनि च स्त्रियां ङीप्। ३वैष्णव्यां शक्तौ "वैष्णवी समरे चैनम्" देवीमा०। "गायत्री वैष्णवी ज्ञेया" स्मृतिः। ४विष्णुधामनि न०। विष्णुमधिकृत्य कृतो ग्रन्थः अण्। ५महापुराणभेदे न०विष्णुपुराणशब्दे ४९२६ पृ० दृश्यम्।

वैसारिण पुंस्त्री० विसरति वि+सृ–णिनि स्वार्थे अण्। मत्स्ये अमरः स्त्रियां जातित्वात् ङीष्।

वैहार्य्य त्रि० विहारं परिहासमर्हति ष्यञ्। परिहासार्हे श्यालकादौ "यथा बालेषु नारीषु वैहार्य्येषु तथैव च। सङ्गरेषु निपातेषु तथापद्व्यसनेषु च। अन्टतं नोक्तपूर्वं मे" भा०ड० १२१अ०।

वैहासिक पु० विहासेऽभिरतस्तं करोति वा ठक्। नाटकादौ प्रसिद्धे शृङ्गाररसनायकसहचरे १विदूषके हेमच० (भाँड़) इति २ख्याते लोके च।

वोड्र पुंस्त्री० वा–बा० उड्र। १गोनससर्पे (बोडासाप) विक्रमादि०। २मत्स्यभेदे मेदि०। स्त्रियां जातित्वात् ङीष्। सा च ३पलचतुर्थांशे (बुडि) मेदि०। [मन्त्रः।

वोढु पु० वह–तृन्। मुनिभेदे "वोढुः पञ्चशिखस्तथा" तर्पण-

वोढृ त्रि० वह–तृच्। १वाहके २स्थानान्तरप्रापके "भागीरथी निर्झरशीकराणां वोढा" कुमारः। ३पाणिग्राहके पु० "पितृसद्मा वोढ़रेव ते" स्मृतिः। ४भारवाहके ५सूढे च त्रि० शब्दच०। ६वृषभे पु० राजनि० ७सुते पु० मेदि०। [अवस्यातोलोपः। आर्द्रे त्रिका०।

वोद त्रि० अवविक्लुतमुदकं यत्र प्रा०ब० उदकस्योदादेशः

वोदाल पुंस्त्री०वोद आर्द्रः सन् अलति अल–अच्। मत्स्यभेदे (बोयाल) शब्दर० स्त्रियां ङीष्।

वोरक पु०अवनतं लेखनकार्य्ये उरो यस्य प्रा०ब०कप् अवस्यातो लोपः पृषो० सलोपः। लेखके त्रिका०। [इभे त्रिका०।

वोरट पु० वोदृति रटन्ति भृङ्गा अत्र रट–घञर्थे क। कुन्द-

वोरव पु० वा–उर वोरं वाति वा–क। (बोरो) धान्यभेदे "वोरवस्तु बुधैः प्रोक्तस्त्रिदोषस्य प्रकोपणः। मधुराम्लविपाकश्च व्रीहिः पित्तकरो गुरुः" राजवल्लभ०।

वोल पु० वा–उलच्। गन्धरसे गन्धद्रव्यभेदे। "वोलस्तु कटुतिक्तोष्णः कषायो रक्तदोषहृत्। कफापस्मारमयान् हन्ति प्रदरादिरुजापहः" राजवल्लभः। स्वार्थे क। तत्रार्थे पु० अमरः।

वोल्लाह पुंस्त्री० श्वेतकेसरवाला पुच्छे अश्वे हेमच०।

वौशि स्त्री उभयचरशब्दे ११६१पृ० दर्शिते जन्मकाले सूर्य्यात् द्वितीयस्थे विचन्द्रग्रहे। तदपेक्षया द्वादशस्थे तु वेशी।

वौषट् अव्य० वह–डौषट्। देवोद्देशेन हविस्त्यागे अमरः।

व्यंशक पु० विशिष्टोऽंशोऽवयवोऽस्य। पर्वते त्रिका०।

व्यंसक पु० विगतोंऽसः स्कन्धो यस्य कप्। १धूर्त्ते हेमच० २स्कन्धशून्ये। "मयूरव्यंसकादयश्च" पाणिनिसूत्रम्।

व्यंसित त्रि० वि+अंस–क्त। १वञ्चिते २प्रतारिते त्रिका०।

व्यक्त त्रि०वि+अन्ज–क्त। १स्फुटे २प्रकाशिते मेदि०। ३प्राज्ञे अमरः। ४स्थूले "व्यक्ताव्यक्तज्ञविज्ञानात्" सा० का०। ५विष्णौ पु० विष्णुस०। [साक्षिणि त्रिका०।

व्यक्तदृष्टार्थ पु० व्यक्तं स्फुटं दृष्टोऽर्थो येन। साक्षाद्द्रष्टरि

व्यक्तरूप पु०व्यक्तानि स्थूलानि भूतान्येव रूपं यस्य। विष्णौ विष्णुस०। तस्य विराड्रूपेण सर्वभूतात्मकत्वात्तथात्वम्।

व्यक्ति स्त्री वि+अन्ज–क्तिन्। १प्रकाशे क्तिच्। २जने हेम०। पृथगात्मतारूपे एकैकविशेषे च अमरः। अभिव्यक्तिशब्दे दृश्यम्। [विशिष्टमग्रं यस्य। ३विष्णौ पु० विष्णुस०।

व्यग्र त्रि०विगतमग्रं यस्य। १व्याकुले २व्यासक्ते च अमरः।

व्यङ्ग न०विगतं विकलं वाङ्गं प्रादिकर्म०। १विकलाङ्गे विगतमङ्गं यस्य। २अङ्गहीने त्रि० ३भेके पुंस्त्री० मेदि० स्त्रियां ङीष्। ४मुखरोगभेदे तन्निदानादि माधवनिदाने उक्तं यथा "क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः। सहसा मुखमागत्य मण्डलं विसृजत्यतः। नीरुजं तनुकं श्यावं मुखे व्यङ्गं तमादिशेत्"।

व्यङ्ग्य त्रि० वि+अन्ज–ण्यत्। १व्यञ्जनया वृत्त्या बोध्येऽर्थे "वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः। व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः" सा०द० २प्रकाश्ये च। [विचीत् विस्वाच विविचतुः व्यचाः।

व्यच व्याजे अक०सम्बन्धे सक०तु०कु०पर०सेट्। विचति अ-

व्यजन न० वि+अज–ल्युट् न व्यादेशः। तालवृन्ते अमरः। "मूर्च्छादाहश्रमहरं व्यजनानिलः। तालव्यजनजो वायुस्त्रिदोषशमनो लघुः। वंशव्यजनजो वायू रूक्षोष्णो वातपित्तकृत्। वेत्रवस्त्रकेकिपुच्छव्यजनोत्थस्त्रिदोषहृत्। चामरव्यजनजो वायुर्मक्षिकादिनिवारकः। तेजस्कारोऽसौ विज्ञेयो विद्वद्भिर्भिषजां वरैः" राजव०।

व्यञ्जक पु० वि+अन्ज–णिच्–ण्वुल्। १हृद्गतभावादिप्रकाशके अभिनये अमरः। २व्यङ्ग्यार्थबोधके शब्दे च सा०द० व्यञ्जनशब्दे दृश्यम्। ३प्रकाशकमात्रे त्रि०।

व्यञ्जन न० विशेषेणाज्यते वि+अन्ज–ल्युट् १सूपशाकादौ

ओदनभोजनोपकरणे राजनि०। "व्यञ्जनं शाकमत्स्याद्यं हृद्यं दध्यन्नं दुग्धकम्। दुग्धेन येन येनेह व्यञ्जनं तत्सामान्ययोः। तत्र तत्र तथोक्तं तत्तद्दोषैर्विभावयेत्" राजव०। वि+अन्ज–णिच्–ल्युट्। २चिह्ने ३श्मश्रुणि ४अवयवे ५दिने मेदि०। ६कपकले ७अर्द्धमात्राकालेनोच्चार्य्ये ककारादौ च वर्णविशेषे "व्यञ्जनं चार्द्धमात्रकम्" शिक्षा०। ८अलङ्कारशास्त्रोक्ते शब्दस्य वृत्तिभेदे च युच्। तल्लक्षणं यथा "विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपरः। सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च। अभिधालक्षणामूलाच्छब्दस्य व्यञ्जना द्विधा" सा० द०। तत्र अभिधामूला तच्छब्दे २६० पृ० दृश्या।

"लक्षणामूलामाह "लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्। यया प्रत्याय्यते सा स्यात् व्यञ्जना लक्षणाश्रया"। (गङ्गायां घोषः) इत्यादौ जलमयाद्यर्थबोधनादभिधायां विरतायां तटाद्यर्थबोधनाच्च लक्षणायां विरतायां यया शीतत्वपावनत्वाद्यतिशयादिर्बोध्यते सा लक्षणामूला व्यञ्जना। एवं शाब्दीं व्यञ्जनामुक्त्वाऽऽर्थीं व्यञ्जनामाह "वक्तृबोद्धव्यवाक्यानामन्यसंनिधिवाच्ययोः। प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च। वैशिष्ट्यादन्यमर्थं या बोधयेत् साऽर्थसम्भवा"। व्यञ्जनेति सम्बध्यते। तत्र वक्तृवाक्यबोद्धव्यप्रकाशवैशिष्ट्ये यथा मम "कालो मधुः कुपित एव च पुष्पधन्वा धीरा वहन्ति रतिखेदहराः समीराः। केलीवनीयमपि वञ्जुलकुञ्जमञ्जुर्दूरे पतिः कथय किं करणीयमद्य"। अत्रैतं देशं प्रति शीघ्रं प्रच्छन्नकामुकस्त्वया प्रेष्यतामिति सखीं प्रति कयाचित् द्योत्यते। बोद्धव्यवैशिष्ट्ये यथा "निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि! दूति! बान्धवजनस्याज्ञातपीडागमे वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्"। अत्र तदन्तिकमेव गतासीति विपरीतलक्षणया लक्ष्यम्। तच्च रन्तुमिति व्यङ्ग्यं प्रतिपाद्यदूतीवैशिष्ट्याद्बोध्यते। अन्यसन्निधिवैशिष्ट्ये यथा "उअ णिच्चल णिप्फन्दा भिसिणीपत्तम्मि रेहइ बलाआ। णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्ति व्व"। अत्र बलाकाया निस्पन्दत्वेन विश्वस्तत्वं तेनास्य देशस्य विजनत्वमतः सङ्केतस्थानमेतदिति कयापि संनिहितप्रच्छन्नकामुकं प्रत्युच्यते। 'अत्रैव स्थानविशेषस्थत्वरूपार्थवैशिष्ट्यं प्रबोधनम्। "भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते"। इत्युक्तप्रकारायाः काकोर्भेदा आकराद्‌बोध्याः। एतद्वैशिष्ट्ये यथा "गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम्। अलिकुलकोकिलललिते नैष्यति सखि! सुरभिसमयेऽसौ"। अत्र नैष्यति अपि तु एष्यत्येवेति काक्वा व्यज्यते। चेष्टावैशिष्ट्ये यथा "सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया। हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्"। अत्र सन्ध्या सङ्केतकाल इति पद्मनिमीलनादिचेष्टया कयाचित् द्योत्यते। एवं वक्त्रादीनां व्यस्तसमस्तानां वैशिष्ट्ये बोध्यम्। "त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता"। अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्वा अप्यनन्तरोक्ता व्यञ्जनास्त्रिविधाः। तत्र वाच्यार्थस्य व्यञ्जना यथा "कालो मधुः" इत्यादि। लक्ष्यार्थस्य यथा "निःशेषच्युतचन्दनम्" इत्यादि। व्यङ्ग्यार्थस्य यथा "उअ णिच्चलेत्यादि"। प्रकृतिप्रत्ययव्यञ्जनत्वन्तु प्रपञ्चयिष्यते "शब्दबोध्यो व्यनक्त्यर्थं शब्दोऽप्यर्थान्तराश्रयः। एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता"। यतः शब्दो व्यञ्जकत्वेऽर्थान्तरमपेक्षते अर्थोऽपि शब्दं, तदेकस्य व्यञ्जकत्वे अन्यस्य सहकारिताऽवश्यमङ्गीकार्या। "अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः। शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा"। अभिधोपाधिको वाचकः। लक्षणोपाधिको लक्षकः। व्यञ्जनोपाधिको व्यञ्जकः" सा० द० २प०।

व्यञ्जित त्रि० वि+अन्ज–णिच्–क्त। १प्रकाशिते "अव्यञ्जितहर्षलक्षणः" कुमारः। २व्यञ्जनावृत्त्या बोधितेऽर्थे च।

व्यडम्बक पु० अवि–अम्ब–ण्वुल् विशेषेण न डम्बकः। एरण्डवृक्षे अमरः। [मेदि०।

व्यतिकर पु० वि+अति–कॄ–अप्। १व्यतिषङ्गे २व्यसने च

व्यतिक्रम पु० वि+अति+क्रम–घञ् न वृद्धिः। १विपर्यये "विवाहे च व्यतिक्रमः" रघु०। २निषेधतोऽतिक्रमे च।

व्यतिरिक्त त्रि० वि+अति+रिच–क्त। भिन्ने "न तदव्यतिरिक्तसाधनम्" इति कुमारः।

व्यतिरेक पु० वि+अति+रिच–घञ्। १विशेषेण अतिक्रमे २अभावे ३विशेषार्थे इत्यमरः।

४०४ पृ० व्याप्यव्यापकयोः तदभावतदभावरूपे साहचर्यानाख्ये पदार्थभेदे साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपे लाङ्गभेदे च।

व्यतिरेकिन् त्रि० वि+अति+रिच–णिनि। व्यतिरेके स्थाः

व्याप्यव्यापकीभूताभावप्रतियोगित्वरूपव्याप्तिहेतुके १अनुमानभेदे "तत्रानुमानं त्रिविधं केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्" चिन्तामणिः। यथा पृथिवी इतरभिन्ना गन्धवत्त्वात् इत्यादि। व्यतिरेकिदृष्टान्तश्च यन्नैवं तन्नैवमित्यादि। २व्यतिक्रमणे च। स्त्रियां ङीप्।

व्यतिषक्त त्रि० वि+अति+षन्ज–क्त। १मिलिते २व्याप्ते च।

व्यतिषङ्ग पु० वि+अति+षन्ज–घञ्। परस्परमेलने।

व्यति(ती)हार पु० वि+अति+हृ–घञ् वा दीर्घः। परीवर्त्ते हेमच०। २परस्परैककालीनक्रियाकरणे।

व्यतीत त्रि० वि+अति+इण्–क्त। अतीते "व्यतीतकालस्त्वहमभ्युपेतः" इति रघुः।

व्यतीपात पु० वि+अति+पत–घञ् दीर्घः। १महोत्पातभेदे २अपमाने मेदि० विष्कम्भादिषु मध्ये १७योगभेदे ज्यो०त० "श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके। यद्यमा रविवारेण व्यतीपातः स उच्यते" इत्युक्ते ४तिथ्यादियोगभेदे च पाततत्त्वे ४२९७पृ० दर्शिते ५अर्कवि० चन्द्र क्रान्तिसाम्यजे योगविशेषरूपे पुण्यकालभेदे

"व्यतीपातमयं चारं नक्षत्राणामितयं तथा। एतद् भयविवर्जितयं सर्वकर्मसु वर्जयेत्" ज्यो०वि० "व्यतीपातानां त्रयं योगवियोगात्मको क्रान्तिसाम्यरूपौ द्वौ व्यतीपातौ विष्कुम्भादिषु क्रान्तिसाम्यान्तरेण व्यतीपातयोरेव भेदः न पृथक्। पञ्चाङ्गान्तर्गतयोगान्तर्गत व्यतीपातश्चेति त्रयम्" इत्यु०। भविष्यपु० "चतुर्दश्यां यदा सोमो व्यतीपातेन चार्द्रया। तदा पुण्यतमः कालो देवानामपि दुर्लभः। तदा यः स्नाति गङ्गायां भक्त्या तत् फलमाप्नुयात्। यत्र तत्र विपन्नोऽपि गङ्गामरणमाप्नुयात्" प्रा०त० उक्ते ६तिथ्यादियोगभेदे। "निरंशं दिवसं विष्टिं व्यतीपातश्च वैधृतिम्। केन्द्रं चापि शुभैर्हीनं पापाङ्कमपि वर्जयेत्। परिघस्य त्यजेदर्द्धं शुभकर्म ततःपरम्। गण्डव्याघातयोः षट् च नव शूलवज्रयोः। वैधृतिं व्यतीपातौ च समस्तं परिवर्जयेत्"। अस्य प्रतिप्रसवश्च भीमपराक्रमे "न विष्कम्भो न वा गण्डो न व्यतीपातवैधृती। चन्द्रताराबले प्राप्ते दोषामच्छन्त्यसंशयम्। नवग्रहारण्यो विष्टिः शनैश्चरदिनं तथा। व्यतीपातोऽपि दुष्टश्च यत्रार्को दक्षिणे स्थितः। यदि विष्टिव्यतीपातौ दिनं चाप्यशुभं भवेत्। कथ्यतेऽमृतयोगेन भास्करेण तमो यथा" ज्यो० त०। [अमरः।

व्यत्यय पु० वि+अति+इण्–अच्। १अतिक्रमे २विपर्य्यये च

व्यत्यास पु० वि+अति+अस–घञ्। विपर्य्यये अमरः।

व्यथ भये चलने दुःखानुभवे च भ्वा०आत्म०अक०सेट्। व्यथते अव्यथिष्ट मित् घटा०। व्यथयति मित् अङ् व्यथा।

व्यथा स्त्री व्यथ–भावे अङ्। १पीडायाम् २दुःखे च अमरः।

व्यध ताडने दि०पर०सक०अनिट्। विध्यति अव्यात्सीत्। विद्धः। विविधतुः। [१भेदने च।

व्यध पु० व्यध–अप्। १वेधे अमरः भावे अप्। २शस्त्रीकरणे

व्यध्व पु० विरुद्धः अध्वा अत्समा०। कुपथे अमरः।

व्यय वये चुरा०उभ०सक०सेट्। व्याययति-ते अविव्ययत्-त।

व्यपदेश पु०वि+अप+दिश–घञ्। १कथने २संज्ञायां त्रिका०। ३कापट्ये हेमच०। ४कुलव्यवहारे च।

व्यपदेशिन् त्रि० निमित्तसद्भावाद् विशिष्टोऽपदेशो मुख्यो व्यवहारोऽस्यास्ति इति। मुख्यव्यवहारविषये पदार्थे "व्यपदेशिवदेकस्मिन्" व्या० प०। व्यपदेशेन मुख्यं गच्छते इति यति। कार्य्यं प्रति एकाङ्गस्वत्वावेऽपि तत् कार्य्यं कर्त्तव्यमिति तदर्थः। [१उत्पाटने।

व्यपरोपण न० वि+अप+रुह–णिच्–ल्युट् हस्य पः। १छेदने

व्यपरोपित त्रि० वि+अप+रुह–णिच्–क्त हस्य पः। १छिन्ने २उत्पाटिते च। [२अङ्गीकारे ३निह्नवे च।

व्यपाकृति स्त्री वि+अप+आ+कृ–क्तिन्। १निराकरणे

व्यपाश्रय पु० वि+अप+आ+श्रि–अच्। आश्रये।

व्यपेक्षा स्त्री वि+अप+ईक्ष–अ। अपेक्षायां व्याकरणोक्ते परस्पराकाङ्क्षणे च।

व्यभिचार पु० वि+अभि+चर–घञ्। १निन्दिताचारे २स्त्रियाः परपुरुषसंगे ३पुंसः परस्त्रीसङ्गमे न्यायादिप्रसिद्धे ४हेतुदोषभेदे च।

हेतुदोषभेदश्च अनैकान्तरूपः। "साधारणासाधारणानुपसंहारित्वान्यतमत्वं च अनैकान्तिकत्वम्" सि० मु० "आद्यः साधारणस्तु स्यादसाधारणको मतः। तथैवानुपसंहारी त्रिधा नैकान्तिको भवेत्" भाषा०। "साधारणः साध्यवदन्यवृत्तिर्हेतुः। तेन च व्याप्तिग्रहप्रतिबन्धः क्रियते। असाधारणः साध्यासमानाधिकरणो हेतुः। तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते। सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः। अत्र तु हेत्वन्तरेणेति विशेषः। साध्याभावसाधक एव साध्यसाधकत्वेन उपन्यस्त इत्यसत्प्रतिपक्षितोद्भावकत्वात् विशेषः। सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः। अनैकान्तिकतायामव्यभिचारत्वेनोप-

स्थितिकालीनसाध्याभावव्याप्यवत्त्वेनोपस्थितविषयकतया इत्यन्ते । अत्र च परस्पराभावव्याप्यवत्ताज्ञानात् परस्परानुमितिप्रतिबन्धः फलम्” सि॰मु॰ । मणिकृता तु साध्यवदन्यावृत्त्यत्वे सति साध्याभाववदन्यावृत्तित्वम्” अनैकान्तिकत्वमिति लक्षितम् ।

व्यभिचारिन् पु॰ वि+अभि+चर–णिनि । १शृङ्गारोक्ते रसप्रादुर्भावाङ्गे निर्वेदादौ सञ्चारिभावे त्रयस्त्रिंशद्भेदात्मके सा॰द॰ उक्तं यथा “विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः । स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः । निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्थाः । औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसन्त्रासलज्जा हर्षासूयाविषादाः सधृतिचपलता ग्लानिचिन्तावितर्काः” इति विभज्य लक्षिता यथा “तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः१ स्वावमानना । दैन्यचिन्ताश्रुनिःश्वासवैवर्ण्योच्छ्वसितादिकृत् । आवेगः२ सम्भ्रमस्तत्र वर्षजे पीडिताङ्गता । उत्पातजे स्रस्तताङ्गे धूमाद्याकुलताग्निजे । राजविद्रवादेस्तु शस्त्रनागादियोजनम् । गजादेः स्तम्भकम्पादिः पांश्वाद्याकुलतानिलात् । इष्टाद्धर्षाः शुचोऽनिष्टाज्ज्ञेयाश्चान्ये यथायथम् । दौर्गत्याद्यैरनौजस्यं दैन्यं३ मलिनतादिकृत् । खेदोरत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः४ । सम्मोहानन्दसम्भेदो मदो५ मद्योपयोगजः । अमुना चोत्तमः शेते मध्यो हसति गायति । अधमप्रकृतिश्चापि परुषं वक्ति रोदिति । अप्रतिपत्तिर्जडता६ स्यादिष्टानिष्टदर्शनश्रुतिभिः । अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र । शौर्यापराधादिभवं भवेच्चण्डत्वमुग्रता७ । तत्र स्वेद-शिरःकम्पतर्जनाताडनादयः । मोहो८ विचित्तता भीतिदुःखावेगानुचिन्तनैः । मूर्छनाज्ञानपतनभ्रमणादर्शनादिकृत् । निद्रापगमहेतुभ्यो विबोधः९ चेतनागमः । जृम्भाङ्गभङ्गनयनमीलनाङ्गावलोककृत् । स्वप्नो१० निद्रामुपेतस्य विषयानुभवस्तु यः । कोपावेगभयग्लानिसुखदुःखादिकारकः । मनःक्षेपस्त्वपस्मारो११ ग्रहाद्यावेशनादिजः । भूपातकम्पप्रस्वेदफेनलालादिकारकः । गर्वो१२ मदः प्रभावश्रीविद्यासत्कुलतादिजः । अवज्ञासविलासाङ्गदर्शनाविनयादिकृत् । शराद्यैर्मरणं१३ जीवत्यागोऽङ्गपतनादिकृत् । आलस्यं१४ श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत् । निन्दाक्षेपापमानादेरमर्षो१५ऽभिनिविष्टता । नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्जनादिकृत् । चेतःसम्मीलनं निद्रा१६ श्रमक्लममदादिजम् । जृम्भाक्षिमीलनोच्छ्वासगात्रभङ्गादिकारकम् । भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था१७ । व्यापारान्तरसक्त्यन्यथाभाषणविलोकनादिकरी । इष्टानवाप्तेरौत्सुक्यं१८ कालक्षेपासहिष्णुता । चित्ततापत्वरास्वेददीर्घनिःश्वसितादिकृत् । चित्तसम्मोह उन्मादः१९ कामशोकभयादिभिः । अस्थानहासरुदितगीतप्रलपनादिकृत् । परक्रौर्यात्मदोषाद्यैः शङ्का२०ऽनर्थस्य तर्कणम् । वैवर्ण्यकम्पवैस्वर्यपार्श्वालोकास्यशोषकृत् । सदृशज्ञानचिन्तादेर्भ्रूसमुन्नयनादिकृत् । स्मृतिः२१ पूर्वानुभूतार्थविषयज्ञानमुच्यते । नीतिमार्गानुसृत्यादेरर्थनिर्धारणं मतिः२२ । स्मेरता धृतिसन्तोषौ बहुमानश्च तद्भवाः । व्याधि२३र्ज्वरादिर्वाताद्यैर्भूमीच्छोत्कम्पनादिकृत् । निर्घातविद्युदुल्कादेस्त्रासः२४ कम्पादिकारकः । धार्ष्ट्याभावो व्रीडा२५ वदनानमनादिकृद् दुराचारात् । हर्ष२६स्त्विष्टावाप्तेर्मनःप्रसादोऽश्रुगद्गदादिकरः । असूया२७ऽन्यगुणर्द्धीनामौद्धत्यादसहिष्णुता । दोषोद्घोषभ्रूविभेदावज्ञाक्रोधेङ्गितादिकृत् । उपायाभावजन्मा तु विषादः२८ सत्त्वसंक्षयः । निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत् । ज्ञानाभीष्टागमाद्यैस्तु सम्पूर्णस्पृहता धृतिः२९ । सौहित्यवचनोल्लाससहासप्रतिभादिकृत् । मात्सर्यद्वेषरागादेश्चापल्यं३० त्वनवस्थितिः । तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः । रत्यायासमनस्तापक्षुत्पिपासादिसम्भवा । ग्लानि३१र्निष्प्राणताकम्पकार्श्यानुत्साहतादिकृत् । ध्यानं चिन्ता३२ हितानाप्तेः शून्यताश्वासतापकृत् । तर्को३३ विचारः सन्देहाद् भ्रूशिरोऽङ्गुलिनर्त्तकः । रत्यादयोऽप्यनियते रसे स्युर्व्यभिचारिणः । शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः । शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः । इत्याद्यन्यत् समुन्नेयं स्वयम्भावितबुद्धिभिः” । न्यायोक्ते २व्यभिचाररूपदोषवति हेतुपदार्थे च । ३परपुरुषगामिन्यां स्त्रियां स्त्री ङीप् । “हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् । परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम्” । “सोमः शौचं ददौ तासां गन्धर्वश्च शुभां गिरम् । पावकः सर्वभक्षत्वं मेध्या वै योषितो ह्यतः” इति तु स्त्रीसामान्यविषयम् । “व्यभिचाराद्दृतौ शुद्धिर्गर्भे त्यागो विधीयते । गर्भभर्तृवधे तासां तथा महति पातके” गरुडपु॰ ९५अ॰। तस्याः परित्यागादि हेतुमाह हारीतः

"गर्भिणीमधोवर्णगां शिष्यसुतगामिनीं पापव्यसनासक्तां धनधान्यक्षयकरीं वर्जयेत्"। यमः "स्वच्छन्दगा हि या नारी तस्यास्त्यागो विधीयते। न चैव स्त्रीवधः कार्य्यो न चैवाङ्गवियोजनम्"। बृहस्पतिः "हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेत्"। विशेषयति मिताक्षरायां स्मृतिः "ब्राह्मणक्षत्रियविशां भार्य्याः शूद्रेण सङ्गताः। अप्रजातास्ता विशुद्ध्यन्ति प्रायश्चित्तेन नेतराः"। एतत् बलात्कारविषयम् उद्वा० त०।

व्यय गतौ त्यागे अद०चु०उभ०सक० सेट्। व्यययति ते अवव्ययत् त। [व्ययिष्ट अव्ययिढ्म् (ध्वम्)।

व्यय गतौ भ्वा० उभ० सक० सेट्। व्ययति ते अव्ययीत् अ-

व्यय नाशे चु० उभ०सक० सेट्। व्याययति ते अविव्ययत् त।

व्यय पु० वि+इण–अच्। १विगमे २धनादेस्त्यागे शब्दर०। ज्योतिषोक्ते लग्नात् ३द्वादशस्थाने च ज्यो०त०।

व्यर्थ त्रि०विगतोऽर्थः प्रयोजनं वाऽस्य। १निष्प्रयोजने २विफले जटा० ३अर्थशून्ये च।

व्यलीक न० वि+अल–ईकन्। १अकार्य्ये २वैलक्ष्ये मेदि० ३अपराधे हेमच० ४अप्रिये ५अनृते च अमरः। ६तद्वति त्रि०। ७प्रतारणायां हला० ८गतिविपर्य्यये भरतः।

व्यवकलन न० वि+अव–कल–ल्युट्। १वियोजने हेमच० २विगमने ३हीनतासम्पादने च "व्यवकलनमार्गेऽपि कुशला" लीला०।

व्यवकलित त्रि० वि+अव+कल–क्त। वियोजित। [त्रिका०।

व्यवच्छिन्न त्रि० वि+अव+छिद–क्त। १छिन्ने २विशेषि

व्यवच्छेद पु० वि+अव+छिद–घञ्। १पृथक्करणे २विशेषकरणे ३मोचने च ४बाणमुक्तौ हेमच०।

व्यवधा स्त्री वि+अव+धा–अङ्। व्यवधाने अमरः।

व्यवधान न० वि+अव+धा–ल्युट्। १तिरोधाने २द्रव्यान्तरेण द्रव्यान्तरस्याच्छादने च हेमच०। [३आच्छादके च

व्यवधायक त्रि० वि+अव+धा–ण्वुल्। १व्यवधानकर्त्तरि

व्यवधि पु० वि+अव+धा–कि। व्यवधाने शब्दच०।

व्यवसाय पु०वि+अव+सो–घञ्। १उद्यमे "मरणव्यवसायबुद्धिम्" कुमारः। २वणिग्विक्रियायाम् ३अनुष्ठाने ४अवधारणे च "व्यवसायात्मिका बुद्धिः" गीता। ५विष्णौ विष्णुस०।

व्यवस्था स्त्री वि+अव+स्था–अङ्। १शास्त्रविहितस्य विषयान्तरपरिहारेण विषयविशेषे स्थापने २शास्त्रमर्य्यादायाम्।

व्यवस्थान न०वि+अव+स्था–ल्युट्। १व्यवस्थायाम्। कर्त्तरि ल्यु। २विष्णौ पु० विष्णुस०।

व्यवस्थित त्रि० वि+अव+स्था–क्त। विषयान्तरपरिहारेण विषयविशेषे अवस्थिते १शास्त्रविहिते पदार्थे २अवस्थितमात्रे च।

व्यवस्थितविभाषा स्त्री कर्म०। व्याकरणोक्ते विषयान्तरपरिहारेण विषयविशेषेऽवस्थितरूपे विकल्पे।

व्यवहर्त्तृ त्रि० वि+अव+हृ–तृच्। व्यवहारकर्त्तरि।

व्यवहार पु० वि+अव+हृ–घञ्। १अर्थविशेषबोधनाय शब्दविशेषप्रयोगे २ऋणादानादिष्वष्टादशसु विवादेषु ३स्नानभोजनादौ च

विवादरूपव्यवहारलक्षणं वीर० मि० उक्तं यथा

"अथ कोऽयं व्यवहारः प्रमाणतर्कोपलक्षः पक्षप्रतिपक्षपरिग्रहः इति चेन्न वादादेरपि तत्त्वापत्तेः। लिखितादिः प्रमाणविशेषः परिगृह्यत इति चेत् तत्रापि तत्प्रवृत्त्यविरोधात्। अनुमानाद्यबहिर्भावाच्च तेषामव्यावर्त्तकत्वात्। अतएवान्यविरोधेन असम्बन्धितया कथनमित्यपि परास्तम्। प्रमाणान्तर्भावेण स्वरूपनिरूपणानौचित्याच्च कथनादेर्व्यवहारपदवाच्यत्वे "व्यवहारान् नृपः पश्येदित्याद्यनन्वयाच्च। उच्यते। ऋणादानादिलौकिकार्थविषया कथैव व्यवहारः। कथाव्यपदेशाभावस्तु शास्त्रीयपदार्थविषयत्वात् अधिकरणादिव्यपदेशो यथा वैदिकार्थविषयकथायामन्यथात्वव्यवहारव्यपदेशः। अतएव यथावर्णं हेत्वाभासनिग्रहस्थानादियोजनमपि युक्तम्। तच्च तत्र तत्र प्रदर्शयिष्यते। चतुष्पात्त्वमपि तस्य तदविरोध्येवोपपादयिष्यते। यत्तु गोपालेन तत्त्वनिर्णयेषु कथात्वाद्वादत्वमेवास्येति मिश्रमतत्वेनोपन्यस्य जयभङ्गफलकत्वात् स्थापनावत्त्वाच्च जल्प एवायमिति तन्निरस्तम्। तस्यैकविधत्वमयुक्तम्। यथातत्त्वाभियोगभेदेन उभयरूपत्वस्यैव युक्तत्वात्। वैतण्डिकस्य व्यवहारायोग्यत्वादस्य वितण्डात्मकत्वमसङ्गतमपि। अन्यविरोधेन असम्बन्धितया कथनमिति विज्ञानयोगिवचोऽप्येवं सति नायुक्तम्। न च पश्येदित्यनन्वयः निर्णयार्थकथनतया सर्वनिबन्धृभिस्तद्व्याख्यानात्। "स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः। आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्" याज्ञवल्क्यवचनं यद्यपि व्यवहारपदान्यृणादानादीनि सामान्येन वक्ति तथापि व्यवहारसामान्यलक्षणमपि समानसन्निधिसंवेद्यतया ततः प्रतीयते। तस्यायमर्थः स्मृत्याचाराद्विधर्मप्रमाणातिक्रान्तरीत्याऽन्यैरभिभूतः पुरुषो-

राजादिभ्यो व्यवहारदर्शिभ्यो यद्यावेदयति तर्हि तदाऽऽवेद्यमानस्वत्वप्राद्युर्व्यवहारस्य पदं विषयः। इति प्रसिद्धस्य ऋणादानादिलक्षणत्वेन मन्वाद्युक्तमुपचितप्रमिति। एवञ्चार्थितस्यार्थित्वसाधर्म्यकस्य प्रत्यर्थित्वतयोर्विवादश्च व्यवहार इति प्रतीयते। इदमेव च मिताक्षरायामन्यविरोधेनेत्यादिना निष्कृष्टमुक्तम्। अन्यविरोधेनेत्यनुक्ते प्रश्नोत्तरादिरूपेण स्वसम्बन्धिकथनमपि व्यवहारः स्यात्। स्वसम्बन्धितयेत्यनुक्ते एकसम्बन्धितया साक्षिणां कथनमन्यविरोधि भवत्येवेत्यस्याप्यर्थित्वापत्तिरतः स्वसम्बन्धितयेति। इदं चोत्तरचतुष्टयेऽप्यनुगतम्। न च सम्प्रतिपत्तावव्याप्तिः तत्रापि साध्यतया वादिना निर्दिष्टस्य मिथ्यात्वतया निर्देशे तद्विरोधपर्यवसानात् अन्यथोत्तरत्वभङ्गप्रसङ्गात्। यत्रापि द्वावपि भाषावादिनौ तत्रापि परस्परविरोधावश्यम्भावान्नाव्याप्तिः। इदं चाग्रे व्यक्तीभविष्यति। यत्तु कात्यायनेनोक्तम् "प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये न्यायविस्तरे। साध्यमूलस्तु यो वादो व्यवहारः स उच्यते" इति एतच्च व्यवहारविषयव्यवहारस्वरूपोक्तिपरतया, माधवीयपारिजातादिष्वेवं व्याख्यातम् "विहिताचरणनिषिद्धवर्जनादिप्रयत्नसाध्ये धर्माख्ये वस्तुनि विच्छिन्ने विप्लुते सतीति व्यवहारहेतुरुक्तः धर्मान्तर्विप्लवस्यैव व्यवहारहेतुत्वात्। तथा च नारदः "मनुः प्रजापतिर्यस्मिन् काले राज्यमबूभुजत्। धर्मैकतानाः पुरुषास्तदासन् सत्यवादिनः। तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः। नष्टे धर्मे मनुष्येषु व्यवहारः प्रवर्त्तते" इति। बृहस्पतिरपि "धर्मप्रधानाः पुरुषाः पूर्व्वमासन्नहिंसकाः। लोभद्वेषाभिभूतानां व्यवहारः प्रवर्त्तते" इति। न्यायेत्यादिना व्यवहारस्वरूपमुक्तम्। तत्र माधवीयव्याख्यानम्। न्यायः शिष्टसम्मतिपन्नं लौकिकमाचरणं तस्य विस्तरः इदं युक्तमिदमयुक्तमिति उपपत्तिपुरःसरो निर्णयः। तस्मिन् विषयभूते तत्प्रवर्त्तकोऽर्थिप्रत्यर्थिनोः साध्यमूलः साध्यमृणादानादिपदं तन्मूलस्तद्विषयको यो विवादः स व्यवहार इति। मदनरत्ने तु न्यायः प्रमाणन्तस्य विस्तरः प्रदर्शनं तस्मिन् विषय इति। साध्यमूलेत्यादि तुल्यम्। मदनरत्नाकरस्मृतिचन्द्रिकाविवादरत्नाकरैः सर्वमेवेदं वचनं व्यवहारस्वरूपपरतयापि व्याख्यातम्। प्रयत्नसाध्ये कर्तव्याङ्गं पराभिमर्षेण लोपया भोक्तुमशक्ये स्वत्वादौ सति न्यायः प्रमाणं विस्तार्यते प्रपञ्च्यते यस्मिन् तस्मिन् धर्माधिकरणे यदेष साध्यमूलेत्यादि पूर्ववत्। तेनापि प्रागुक्तमेव विवक्षितमतस्तस्य लक्षणत्वे नातीव यतितव्यम्। वयन्तु सर्वं सप्तम्यन्तसामानाधिकरण्येन व्याचक्ष्महे। विहितानुष्ठानादिगोचरप्रयत्नसाध्ये धर्माख्ये न्यायविस्तरे नीयतेऽर्थोऽनेनेति न्यायः प्रमाणं श्रुतिस्मृत्यादि विस्तार्यते प्रवर्त्ततेऽस्मिन् स्मृत्यादिप्रमेय इत्यर्थः। विच्छिन्ने प्रमाणापरिज्ञानतात्पर्यानवधारणादिना लुप्ते सति। यद्वा। धर्म आख्यायतेऽनेनेति धर्माख्यो धर्मप्रतिपादक इति यावत्। न्यायविस्तरे प्रमाणप्रपञ्चे स्मृतिस्मृत्यादौ प्रमादादिना विच्छिन्ने लुप्तप्राये सति साध्यमूलेत्यादि गतार्थमिति। हारीतः "स्वधर्मस्य यथा प्राप्तिः परधर्मस्य वर्जनम्। न्यायेन क्रियते यत्तु व्यवहारः स उच्यते" इति। न्यायेन प्रमाणेन। एतस्यापि पूर्वोक्त एव तात्पर्य्यम्। तन्निरुक्तिर्भेदाश्च तत्र दर्शिता यथा

"निरुक्तिमपि व्यवहारपदस्यास्य मेधार्थमुपदर्शयति। सा च कात्यायनेनोक्ता "वि नानार्थेऽव सन्देहे हरणं हार उच्यते। नानासन्देहहरणाद् व्यवहार इति स्मृत" इति। अथ व्यवहारभेदानाह नारदः "सोत्तरोऽनुत्तरश्चेति स विज्ञेयो द्विलक्षणः। सोत्तरोऽभ्यधिको यत्र विलेखपूर्वकः पणः" इति। यदि पराजयेऽहं तदा पराजयदण्डाभ्यधिकमेतावद्दास्ये दास्यामीति यत्र लेखनपूर्वकं प्रतिज्ञायते स सोत्तर इत्यर्थः। तद्रहितोऽनुत्तर इत्यर्थादुक्तं भवति। स एव भयादयप्रकारनिबन्धनानन्तरभेदानुद्दिश्य विभक्तवान् यथा "चतुष्पाच्च चतुःस्थानश्चतुःसाधन एव च। चतुर्हितश्चतुर्व्यापी चतुष्कारी च कीर्त्तितः। त्रियोनिर्द्व्यभियोगश्च द्विद्वारो द्विगतिस्तथा। अष्टाङ्गोऽष्टादशपदः शतशाखस्तथैव च। धर्मश्च व्यवहारश्च चरित्रं राजशासनम्। चतुष्पाद्व्यवहारोऽयमुत्तरः पूर्वसाधकः। तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु। चरित्रं तु स्वीकरणे राजाज्ञायान्तु शासनम्। सामाद्युपायसाध्यत्वाच्चतुःसाधन उच्यते। चतुर्णामपि वर्णानां रक्षणाच्च चतुर्हितः। कर्त्तारं साक्षिणश्च सभ्यान् राजानमेव च। व्याप्नोति पादशो यस्माच्चतुर्व्यापी ततः स्मृतः। धर्मस्यार्थस्य यशसो लोकपङ्क्तेस्तथैव च। चतुर्ण्णां करणादेष चतुष्कारी प्रकीर्त्तितः। कामात् क्रोधात् लोभात्

त्रिभ्यो यस्मात् प्रवर्त्तते । त्रियोनिः कीर्त्यते तेन त्रय- मेतद्विवादकृत् । इत्यभियोगस्तु विज्ञेयः शङ्कातत्त्वाभि- योगतः । शङ्काऽसताम्तु संसर्गात्तत्त्वं होढाभिदर्शनात् । पक्षद्वयाभिसम्बन्धात् द्विगतिः समुदाहृतः । पूर्ववाद- स्तयोः पक्षः प्रतिपक्षस्तदुत्तरः । भूतच्छलानुसारित्वात् द्विगतिः समुदाहृतः । भूतन्तत्त्वार्थसंयुक्तं प्रमादाभिहितं छलम् । राजा१ सपुरुषः सभ्यः२ शास्त्रं३ गणकलेख- कौ४ ५ । हिरण्य६मग्नि७रुदक८मष्टाङ्गः समुदाहृतः । ऋणादानं१ ह्युपनिधिः२ सम्भूयोत्थान३मेव च । दत्तस्य पुनरादान४मशुश्रूषा५भ्युपेत्य च । वेतनस्यानपाकर्म६ तथैवास्वामिविक्रयः७। विक्रीयासम्प्रदानं८ च क्रीत्वानु- शय९एव च । समयस्यानपाकर्म१० विवादः क्षेत्रज११ स्तथा । स्त्रीपुंसयोश्च सम्बन्धो१२ दायभागो१३ऽथ सा- हसः१४ । वाक्पारुष्यं१५ तथैवोक्तं दण्डपारुष्य१६मेव च । द्यूतं१७प्रकीर्णकं१८ चैवे त्यष्टादशपदः स्मृतः । क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते" इति ।

व्यवहारपद न० ६त० । व्यवहारविषये ।

व्यवहारमातृका स्त्री व्यवहारस्य विवादनिर्णयस्य मातेव पोषकत्वात् परिच्छेदकत्वाद्वा इवार्थे कन् । व्यवहार- निर्णयार्थं प्राड्विवाकादिकार्य्ये क्रियासमुदाये "व्यवहारान् नृपः पश्येत्" इत्युक्तो व्यवहारः सोऽय- मित्थं चतुष्पाच्चतुःस्थानकल्पनया विवादेषु ऋणादानादि- षूपदर्शितो वर्णितः "तत्र प्रत्यर्थिनोऽग्रतो लेख्यम्" इति भाषापादः प्रथमः । "श्रुतार्थस्योत्तरं लेख्यम्" इत्युत्तर- पादो द्वितीयः । "ततोऽर्थी लेखयेत्सद्यः" इति क्रि- यापादस्तृतीयः । "तत्सिद्धौ सिद्धिमाप्नोति" इति सा- ध्यसिद्धिपादश्चतुर्थः । यथोक्तम् "परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु । वाक्यान्न्यायाद्व्यवस्थानं व्यवहार उदाहृतः । भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः । आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयते" इति । सम्प्रति प्रत्युत्तरे तु साधनानिर्देशात्तत्प्रार्थस्यासाध्यत्वाच्च न साध्य सिद्धिलक्षणः पादोऽस्तीति द्विपात्त्वमेव । उत्तराभिधाना- नन्तरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रिया स्यादिति परा- मर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वे- नानभिधानात् व्यवहर्त्तृसम्बन्धाभावाच्च न व्यवहारपाद- त्वमिति स्थितम् इति व्यवहारमातृका । एवं सर्वव्य- वहारोपयोगिनीं व्यवहारमातृकामभिधायाधुना कश्चित्त व्यवहारविषये कञ्चिद्विशेषं दर्शयितुमाह" मिता० ।

व्यवहारिक त्रि०व्यवहारः प्रयोजनतयाऽस्त्यस्य ठन् । १व्य- वहारयोग्ये लोकप्रसिद्धे घटपटादौ स्त्रियां ङीप् । २इङ्गुदवृक्षे ३लोकयात्रायां ४सम्मार्ज्जन्यां स्त्री मेदि० ।

व्यवहारिकसत्ता स्त्री कर्म० । १व्यवहारोपयिके सत्त्वे वे- दान्तकल्पिते ब्रह्मभिन्नपदार्थमात्रस्य वस्तुतोऽसत्त्वेऽपि व्यवहारयोग्ये सत्त्वे येन घटादि व्यवह्रियते । तत्का- र्य्यकरणोपयोगित्वेन कल्पिते घटादेरर्थक्रियाकारित्व- लक्षणे २सत्त्वे च ।

व्यवहार्य्य त्रि० वि+अव+हृ-ण्यत् । इदमित्थमेवेत्येवंरूपेण १व्यवहारविषये येन सह भोजनादिकमेकपङ्क्तौ क्रि- यते २तस्मिंश्च जने ।

व्यवहित त्रि० वि+अव+धा-क्त । व्यवधानवति पदार्थे ।

व्यवाय पु०वि+अव्+इण-घञ् । १ग्राम्यधर्मे मैथुने अमरः । २अन्तर्द्धाने च ३तेजास न० मेदि०। ४शुद्धौ पु० जटा०।

व्यवायिन् त्रि० वि+अव+इण-णिनि । ग्राम्यधर्मकारके स्त्रियां ङीप् ।

व्यसन न० वि+अस-ल्युट् । १विपत्तौ २भ्रंशे कामजाते कोपजाते च स्त्रीभोगमद्यपानादौ ३दोषे ४दैवादिकृते उपद्रवे च ५पापे ६निष्फलोद्यमे मेदि० ।

"व्यसनान्याह मनुः कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः । वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु । मृगया१क्षो२ दिवास्वप्नः३ परीवाद४स्स्त्रियो५ मदः६ । तौर्य्यत्रिकं७।८।९ वृथाट्या१० च कामजो दशको गणः । पैशुन्यं१ साहसं२ द्रोहः३ ईर्षा४ऽसूया५र्थदूषणम्६ । वाग्दण्डजञ्च पारुष्यं७।८ क्रोधजोऽपि गणोऽष्टकः" । तौर्य्यत्रिकं नृत्यगीतवाद्यानि त्रीणीति इति । पैशु- न्यमविज्ञातपरदोषाविष्करणम् । साहसं साधोर्बन्धना- दिना निग्रहः । द्रोहो जिघांसा । ईर्षा अन्यगुणास- हिष्णुता । असूया परगुणेषु दोषाविष्करणम् । अर्थ- दूषणम् अर्थानामपहरणं देयानामदानञ्च" मल०रघु० ।

व्यसनार्त्त त्रि० व्यसनेनार्त्तः । २दैवाद्युपद्रवयुक्ते ।

व्यसनिन् त्रि० व्यसनमस्यास्ति इनि । १व्यसनयुक्ते कामजा- दिमद्यपानादिरूपदोषयुक्ते २दैवाद्युपद्रुते च हेमच० ।

व्यसु त्रि० विगताः असवो यस्य । १मृते "प्रेते जातो भवेद्- व्यसुः" ज्योतिषम् ।

व्यस्त त्रि० वि+अस-क्त । १व्याकुले २व्याप्ते मेदि० ३विभक्ते च "व्यस्तरात्रिंदिवस्य ते" कुमारः । ४विपरीते "एतद्- व्यस्तं महाघोरम्" ति०त०। "व्यस्तविधिर्विलोमे" लीला०

५सङ्घटितपदार्थमध्ये एकैकस्मिन् । "एते व्यस्ता समस्ता वा" विश्वामित्रः । ६समस्तभिन्ने च भावे क्त । ७व्यतिक्रमे त्रि०

व्याकरण पु० व्याक्रियन्ते व्युत्पाद्यन्ते अर्थवत्तया प्रतिपाद्यन्ते शब्दा येन वि+आ+कृ-करणे ल्युट् । वेदाङ्गे शब्दसाधुताबोधके १शास्त्रभेदे वेदान्तोक्ते नामरूपाभ्यां २जगतोविकाशने च

"अथ व्याकरणं वक्ष्ये कात्यायन ! समासतः । सिद्ध-शब्दविवेकाय बालव्युत्पत्तिहेतवे । सुप्तिङन्तं पदं ख्यातं सुपः सप्त विभक्तयः । स्वौजसः प्रथमा प्रोक्ता सा प्रातिपदिकार्थके । सम्बोधने च लिङ्गादावुक्ते कर्मणि-कर्त्तरि । अर्थवत् प्रातिपदिकं धातुप्रत्ययवर्ज्जितम् । अमौट्शसो द्वितीया स्यात् तत्कर्म क्रियते च यत् । द्वितीया कर्मणि प्रोक्ता उक्तानुक्ताविभेदतः । टाभ्यां-भिसस्तृतीया स्यात् करणे कर्त्तरीरिता । येन क्रियते तत्करणं तत्कर्त्ता यः करोति सः । ङेभ्यांभ्यसश्चतुर्थी स्यात् सम्प्रदाने च कारके । यस्मै दित्सा धारयते रोचते सम्प्रदानकम् । पञ्चमी स्यात् ङसिभ्यांभ्योह्यपादाने च कारके । यतोऽपैति समादत्ते अपादानं भयं यतः । ङसोसामश्च षष्ठी स्यात् स्वामिसम्बन्ध उच्यते । ङ्योस्सुपश्च सप्तमी स्यात् सा चाधिकरणे भवेत् । आधारश्चाधिकरणं रक्षार्थानां प्रयोगतः । ईप्सितं चानीप्सितं यत्तदपादानकं स्मृतम् । पञ्चमी पर्य्यपाङ्योग इतरर्त्तेऽन्यदिङ्मुखे । एनब्योगे द्वितीया स्यात् कर्मप्रवचनीयकैः । लक्षणवीप्सेत्थंभूतेऽभिभागे च परिप्रती । अनुरत्तेषु सहार्थे च हीनेऽनूपो च कीर्त्तितौ । द्वितीया च चतुर्थी स्याच्चेष्टायां गतिकर्मणि । अप्राणे हि विभक्ती द्वे मन्यकर्मण्यनादरे । नमःस्वस्तिस्वधास्वाहालंवषट्-योग ईरिता । चतुर्थी चैव तादर्थ्ये तुमर्थाद्भाववाचिनः । तृतीया सहयोगे स्यात् कुत्सितेऽङ्गे विशेषणे । काले भावे सप्तमी स्यादेतैर्योगे च षष्ठ्यपि । स्वामीश्वराधिपतिभिः साक्षिदायादसूतकैः । निर्द्धारणे द्वे विभक्ती षष्ठी हेतुप्रयोगके । स्मृत्यर्थकर्मणि तथा करोतेः प्रतियत्नके । हिंसार्थानां प्रयोगे च कृति कर्मणि कर्त्तरि । न कर्त्तृकर्मणोः षष्ठी निष्ठादौ प्रतिपादिता । द्विविधं प्रातिपदिकं प्रातिपदिकमव्ययम् । भ्वादिर्ष्वादिसिङो सः स्वाङ्गकारा दश वै स्मृताः । तिप्तस्झयः प्रथमो मध्यः सिप्थस्थास उत्तमः । मिब्वस्मसः परस्मै तु पदानाञ्चात्मनेपदम् । तातांझप्रथमो मध्यमस्थासाथांध्वं तथा । उत्तम इड्वहिमहो ङितः कर्त्तरि धातुतः । नाम्नि प्रयुज्यमानेऽपि प्रथमः पुरुषो भवेत् । मध्यमो युष्मदि प्रोक्त उत्तमः पुरुषोऽस्मदि । भ्वाद्या धातवः प्रोक्ताः सनाद्यन्तास्तु धातवः । लडीरितो वर्त्तमाने स्मेनातीते च धातुतः । भूतानद्यतने लिट् च लङ्ङाशिषि च धातुतः । विध्यादावेवानुमतौ लिङ्विधिर्मन्त्रणे भवेत् । निमन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु तथाऽऽशिषि । लिङ्तीते परोक्षे स्याल्लङ् लुङ्, लृट् लृङ् भविष्यति । अनद्यतने लुट् च भविष्यति च धातुतः । धातोर्लृङ् क्रियातिपत्तौ लिङर्थे लोट् प्रकीर्त्तितः । कृतास्त्वपि वर्त्तन्ते भावे कर्मणि कर्त्तरि । शतृ शानच् तव्यण्यत् यदनीयर् क्य तृजादयः" गारुडे २०९अ० ।

व्याकुल त्रि० वि+आ+कुल-क । रोगादिना इतिकर्त्तव्यतानिश्चयविहीने अमरः । [प्रकटीकृते ।

व्याकृत त्रि० वि+आ+कृ-क्त । १कथिते २नामरूपाभ्यां

व्याकृति स्त्री वि+आ+कृ-क्तिन् । १भक्तौ हेमा० २प्रकाशने । करणे क्तिन् । ३व्याकरणे च । श व्याक्रिया तत्रार्थे "व्याक्रियाव्यञ्जनीया वा जातिः कापीह साधुता" हरिका०

व्याक्रोश(ष) त्रि० वि+आ+क्रुश(ष) अच् व्यागतः कोशा-(षा)त् प्रा० स० वा । १प्रफुल्ले अमरः "व्याकोशे(षे)न्दीवराक्षी" इति तन्त्रम् । [इहपे १मन्त्रभेदे २कथने च ।

व्याख्या स्त्री वि+आ+ख्या-अङ् । विवरणात्मके शब्दसमू-

व्याख्यात त्रि० वि+आ+ख्या-क्त । १कथिते २विवृते च ।

व्याघात त्रि० वि+आ+हन-घञ् । १अन्तराये २प्रहारे मेदि० ३अर्थालङ्कारभेदे अलङ्कारशब्दे ४०५पृ० दृश्यम् । ४प्रतिबन्धे "व्याघातावधिरायतः" कुसुमाञ्जलिः । विष्कम्भादिसप्तविंशतियोगमध्ये ५त्रयोदशे योगे च ।

व्याघ्र पुंस्त्री० वि+आ+घ्रा-क । १जन्तुभेदे अमरः स्त्रियां ङीष् । २रक्तैरण्डे ३करञ्जे च पु० मेदि० । [त्रिंश० ।

व्याघ्रदल पु० व्याघ्रस्य पाद इव दलमस्य । एरण्डवृक्षे श-

व्याघ्रनख न० व्याघ्रस्य नखोऽस्त्यस्य आकारे अच् । १नखीनामगन्धद्रव्ये अमरः । व्याघ्रस्य नख इव दलान्यस्य । २स्नुहीवृक्षे शब्दच० । ३कन्दभेदे । ४नखघाते च मेदि० ६त० । ५व्याघ्रस्य नखे ।

व्याघ्रनायक पुंस्त्री० व्याघ्रं नयति स्थानान्तरं प्रापयति पश्चात् क्रोशनेन नी-ण्वुल् । शृगाले (फेउ) राजनि० तस्य पश्चात्क्रोशनेन व्याघ्रस्य स्थानान्तरप्रापकत्वेन तथात्वं स्त्रियां ङीष् ।

व्याघ्रपाद्(द्) पु० व्याघ्रस्य पाद इव मूलमस्य वा अन्त्यलोपः। १विकङ्कतवृक्षे अमरः। २मुनिभेदे च ३विकङ्कटवृक्षे राजनि०। [अमरः। ६त०। २व्याघ्रलाङ्गूले च।

व्याघ्रपुच्छ पु० व्याघ्रस्य पुच्छमिव दलमस्य। १एरण्डवृक्षे

व्याघ्राट पुंस्त्री० व्याघ्र इवाटति अट-अच्। भरद्वाजखगे अमरः स्त्रियां ङीष्। [याम् अमरः।

व्याघ्रादनी स्त्री व्याघ्रेणाद्यते अद-ल्युट् ङीप्। भिटता-

व्याघ्रास्य पुंस्त्री० व्याघ्रस्येवास्यं यस्य। विडाले शब्दच०। स्त्रियां टाप्।

व्याघ्री स्त्री व्याघ्रनखाकारः कण्टकोऽस्त्यस्याः अच् गौरा० ङीष्। १कण्टकारिकायाम् अमरः। जातौ ङीष्। २व्याघ्रयोषिति।

व्याज पु० वि+अज+घञ् वीभावाभावः। १कपटे वञ्चनाफले २असत्यव्यवहारे कारणान्तरेण ३प्रवृत्तस्य कारणान्तरत्वेनोद्भावनरूपे अपदेशे च अमरः।

व्याजनिन्दा स्त्री ३त०। १कपटनिन्दायाम् २अर्थालङ्कारभेदे च अलङ्कारशब्दे ४०४ पृ० दृश्यम्।

व्याजस्तुति स्त्री० ३त०। १कपटस्तुतौ २अर्थालङ्कारभेदे च अलङ्कारशब्दे दृश्यम्। [अलङ्कारशब्दे ४०४पृ०दृश्यम्।

व्याजोक्ति स्त्री ३त०। १छलेनोक्तौ २अर्थालङ्कारभेदे च

व्याड पु० वि+आ+अड-अच्। १मांसभक्षके व्याघ्रादौ पशौ २सर्पे अमरः। ३इन्द्रे शब्दच०। ४वञ्चके त्रि० रायमु०।

व्याडायुध न० व्याडस्य व्याघ्रस्यायुधं नख इवास्त्यस्य अच्। व्याघ्रनखाख्ये गन्धद्रव्ये अमरः [च २मुनिभेदे त्रिका०,

व्याडि पु० व्याकरणस्य संग्रहाख्यग्रन्थकारके १कोषकारके

व्यात्युक्षी स्त्री वि+अति+उक्ष-भावे व्यतिहारे णच् स्वार्थे अण् ङीप्। परस्परसेचनरूपे जलक्रीडाभेदे।

व्यादिश पु० वि+आ+दिश-क। १विष्णौ विष्णुस०। २विशेषेण आदेशके त्रि०।

व्याध पुंस्त्री० व्यध-ण। मृगहिंसके क्षत्रियात् शर्वस्त्रिपत्न्यां जाते १सङ्कीर्णजातिभेदे पुंस्त्री० स्त्रियां ङीष्। "मापितात् गोपकन्यायां सर्वस्त्री तस्य योषिति। अस्माद् बभूव व्याधश्च बलवान् मृगहिंसकः" ब्रह्मवै०ब्र० १०अ०। २दुष्टे त्रि० मेदि०। भावे घञ्। ३वेधने ४पीडने च।

व्याधभीत पुंस्त्री० व्याधाद्भीतः भी-क्त। मृगे शब्दच०। स्त्रियां ङीष्। [वज्रे हेमच०।

व्याधाम पु० व्याधेन पीडनेन अमयति अम-णिच्-अच्।

व्याधि पु० वि+आ+धा-कि। १रोगे व्याधिश्च योगान्तराय-भेदः चित्तविक्षेपशब्दे २९४१ पृ० दृश्यम्। २कुष्ठरोगे अमरः। ३कामकृते नायकयोरवस्थाभेदे सा०द०।

व्याधिघात पु० व्याधिं हन्ति-हन-अण्। आरग्वधे (सोन्दाल) अमरः। [अमरः।

व्याधित त्रि० व्याधिर्जातोऽस्य तार० इतच्। व्याधियुक्ते

व्याधिहन्तृ पु० व्याधिं हन्ति हन-तृच्। १वाराहीकन्दे राजनि० २रोगनाशके त्रि० स्त्रियां ङीप्।

व्याधु(धू)त त्रि० वि+आ+धु-(धू)-क्त। कम्पिते शब्दर०।

व्यान पु० वि+अन-घञ्। देहस्थे सर्वशरीरव्यापके प्राणादिमध्ये वायुभेदे "विष्वगननवान् वायुर्व्यान इत्यभिधीयते" वेदान्तमतम् "व्यानो व्यानयत्यन्नं सर्वव्याधिप्रकोपनः। महारक्तसमुत्थो ह्यानोपादानकारणम्। स चाक्षिकर्णयोर्मध्ये कट्यां वै गुल्फयोरपि। प्राणे गलेऽस्फिगुद्देशे तिष्ठत्यत्र निरन्तरम्। स्वाम्बयत्यधरं वक्त्रं गात्रनेत्रे प्रकोपनः" पदार्थादर्शः।

व्यापक त्रि० विशेषेणाप्नोति वि+आप-ण्वुल्। १अधिकदेशवृत्तौ "व्यापकत्वात् परापि स्यात्" भाषा०। न्यायोक्ते स्वाधिकरणवृत्त्यभावाप्रतियोगिनि च २पदार्थे ३तन्त्रोक्ते सर्वाङ्गसम्बन्धिनि न्यासभेदे पु० "अङ्गुलिव्यापकन्यासौ" तन्त्रसा०। ४आच्छादके त्रि० अमरः। [च अमरः।

व्यापन्न त्रि०वि+आ+पद-क्त। १मृते हेमच० २विपद्युक्ते

व्यापाद पु० वि+आ+पद-घञ्। १द्रोहचिन्तने हेमच०।

व्यापादन न०वि+आ+पद-णिच्-ल्युट्। १मारणे हेमच० २परानिष्टचिन्तने अमरः।

व्यापार पु० वि+आ+पृ-घञ्। "व्यापारो भावना सैवोत्पादना सैव च क्रिया" हर्युक्तायां १भावयितुः उत्पादनक्रियायाम्। वणिजो २व्यवसाये च। करणजन्ये करणजन्यक्रियाजनके ३पदार्थे यथा दात्ररूपकरणजन्यः तज्जन्यच्छेदजनकः छेद्यसंयोगादिः एवमिन्द्रियस्य व्यापारः विषयसंयोगः। "विषयेन्द्रियसंयोगो व्यापारः सोऽपि षड्विधः" भाषा०। एवं यागादेः व्यापारः अदृष्टम्। व्यापारवत् कारणं करणमिति। "क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्" हरिकारिका।

व्यापारिन् त्रि० व्यापारोऽस्त्यस्य इनि। १व्यापारवति करणादौ "न हि व्यापारेण व्यापारिणोऽन्यथा सिद्धिः"। २व्यवसायवति वणिग्जने पु०। [३राजपौ पु० विष्णुस०।

व्यापिन् त्रि० वि+आप-णिनि। १व्यापके स्त्रियां ङीप्।

व्यावृत त्रि० वि+आ+वृ-क्त। १व्यापारयुक्ते २कर्मसचिवे हेमच०।

व्याप्त त्रि० वि+आप+-क्त। १पूर्णे हेमच०। २समाक्रान्ते ३ख्याते च मेदि०। ४स्थापिते ५व्याप्तियुते च "समेन यदि नो व्याप्तः" उदयनाचार्य्यः।

व्याप्ति स्त्री वि+आप-क्तिन्। १ऐश्वर्य्यभेदे न्यायमते तद्भाववति अविद्यमानत्वरूपे २पदार्थे यथा वह्नेरभाववति जलादौ धूमो नास्तीति धूमादौ वह्नेर्व्याप्तिः। "व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः। अथ वा हेतुमन्निष्ठविरहाप्रतियोगिना। साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते" भाषा०। प्रमेयत्वऽव्याप्त्या द्वितीयलक्षणमुक्तम्। प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति द्वितीयलक्षणार्थः। व्याप्तिश्च द्विविधा अन्वयव्याप्तिर्व्यतिरेकव्याप्तिश्च तत्रान्वयव्याप्तिः पूर्वोक्ता। "साध्याभावव्यापकत्वं हेत्वभावस्य यत् भवेत्" भाषा० उक्ता अपरा सा च साध्याभावव्यापकीभूताभावप्रतियोगितारूपा। तत्रान्वयव्याप्तिज्ञाने व्यभिचारज्ञानाभावः सहचारज्ञानञ्च कारणम्। व्यतिरेकव्याप्तिज्ञाने च साध्याभावे हेत्वभावस्य सहचारज्ञानं व्यभिचारज्ञानाभावश्च कारणम्। "व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा। हेतुर्व्याप्तिग्रहे, तर्कः क्वचिच्छङ्कानिवर्त्तकः। द्वैविध्यन्तु भवेत् व्याप्तेरन्वयव्यतिरेकतः" भाषा०। धूमो यदि वह्निव्यभिचारी स्यात् तदा वह्निजन्यो न स्यादित्यादितर्केण व्यभिचारशङ्का निवर्त्त्यते इत्याकरे दृश्यम्। उपाधिस्तु व्यभिचारोन्नायकतया व्याप्तिज्ञानविघटकतया अनुमितिविरोधी उपाधिशब्दे १२४८ पृ० दृश्यम्।

व्याप्य त्रि० वि+आप-ण्यत्। १व्याप्ते २अल्पदेशवृत्तौ "व्याप्यत्वादपरापि च" भाषा०। ३अनुमितिसाधने लिङ्गे न० ४साधनमात्रे ५कुष्ठौषधौ च अमरः।

व्याम पु० वि+अम-घञ्। तिर्य्यक्पार्श्वतो विस्तृतयोर्बाह्वोरन्तरालपरिमाणे हेमच०।

व्यायत त्रि० वि+आ+यम-क्त। १दीर्घे २व्यापृते ३दृढे ४अतिशये च मेदि०। भावे-क्त। ५दैर्घ्ये ६आयामे च न० मेदि०।

व्यायाम पु० वि+आ+यम-घञ्। १श्रमे २श्रमसाधने व्यापारे ३पौरुषे ४दुर्गसञ्चारे ५विषमे मेदि० ६मल्लानां श्रमकारके व्यापारे (कुस्ति) ७व्यामपरिमाणे च हेमच०।

व्यायोग पु० वि+आ+युज-घञ्। दृश्यकाव्यभेदे सा०द० तल्लक्षणमुक्तं यथा "ख्यातेतिवृत्तोव्यायोगः स्वल्पस्त्रीजनसंयुतः। हीनोगर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः। एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः। कैशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः। राजर्षिरथवा दिव्यो भवेद्धीरोद्धतश्च सः। हास्यशृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनो रसाः" यथा सौगन्धिकाहरणधनञ्जयविजयादि"।

व्याल पुंस्त्री० वि+आङ्-अड-घञ् डस्य लः। १सर्पे २हिंसकपशौ अमरः। स्त्रियां ङीष्। ३दुष्टगजे च मेदि० ४चित्रके व्याघ्रे पुंस्त्री० राजनि० स्त्रियां ङीष्। नृपे पु० ५मधुरेशः। ६शठे त्रि० अमरः ७क्रूरे त्रि०। [राजनि०।

व्यालगन्धा स्त्री व्यालस्येव गन्धो लेशोऽस्याः। नाकुल्याम्

व्यालग्राह पु० व्यालान् सर्पान् गृह्णाति ग्रह-अण्। (साপুড়ে) सर्पधारिणि भरतः। णिनि। अत्रैव शब्दर०। "व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्" शु०त० काशीख०। [सर्पकङ्कालयाम् राजनि०।

व्यालजिह्वा स्त्री व्यालस्य सर्पस्य जिह्वेव पत्रमस्याः। महा

व्यालदंष्ट्र पु० व्यालस्य व्याघ्रस्य दंष्ट्रेव कण्टकमस्य। गोक्षुरे राजनि०। [लदक्षोऽप्यत्र।

व्यालनख पु० व्यालस्य व्याघ्रस्य नखइव। गन्धद्रव्यभेदे व्या-

व्यालपत्रा स्त्री व्यालस्य पाद इव पत्रमस्याः। एर्वारी कर्कटीभेदे राजनि०।

व्यालम्ब पु० विशेषेण आलम्बते वि+आ+लवि-अच्। १रक्तैरण्डे वैद्यकम्। विशेषेण २लम्बमाने त्रि०।

व्यालायुध न०व्यालस्य व्याघ्रस्यायुधं नख इव। १नखीनामगन्धद्रव्ये मधुरेशः। २व्यालनखाख्ये गन्धद्रव्ये पु०राजनि०

व्यावक्रोशी स्त्री वि+अव+क्रुश-णच् स्वार्थे अण् ङीप्। परस्पराक्रोशे। [मिरुपटके शब्दर०।

व्यावर्त्त पु० विशेषेण आवर्त्तते वि+आ+वृत-अच्। ना-

व्यावहारी स्त्री वि+अव+हृ-णच् स्वार्थे अण् ङीप। परस्परहरणे। [स्परहसने।

व्यावहासी स्त्री वि+अव+हस-णच् स्वार्थेऽण् ङीप्। पर-

व्याहृत त्रि० वि+आ+हृत-क्त। १हते हेमच० २निहत्ते च "व्याहतगतिरुद्याने" कुमारः।,

व्याहृत्ति स्त्री वि+आ+हृत-क्तिन्। निवारणे।

व्यास पु० व्यस्यति वेदान् वि+अस-घञ्। १पराशरसुते मुनिभेदे व्यासश्च नारायणस्य पञ्चकलावतारभेदः यथोक्त

ब्रह्मवै०पु० ४अ० “व्यासः पुराणसूत्रञ्च पप्रच्छ वाल्मिकिं यदा। मौनीभूतः स सस्मार त्वामेव जगदम्बिकाम्। तदा चकार सिद्धान्तं त्वद्वरेण मुनीश्वरः। संप्राप निर्मलं ज्ञानं भ्रमान्धध्वंसदीपकम्। पुराणसूत्रं श्रुत्वा स व्यासः पञ्चकलोद्भवः। त्वां सिषेवे प्रदध्यौ च शतवर्षञ्च पुष्करे। तदा त्वत्तोवरं प्राप्य स कवीन्द्रो बभूव ह। तदा वेदविभागञ्च पुराणञ्च चकार ह”। स च कल्याकाले सत्यवत्यां पराशराज्जातः कालोनशब्दे १८८१पृ०दृश्यम् वेदव्यासशब्दोक्तेषु मुनिभेदेषु च २समासादिसमानार्थके विग्रहवाक्ये ४विस्तारे अमरः वृत्तक्षेत्रस्य मध्यस्थरेखायाम् “व्यासे भनन्दाग्निहते” लीला० क्षेत्रशब्दे २४०१ पृ० दृश्यम्। “यएवं वाचयेद्विप्रो स ब्रह्मन्! व्यास उच्यते” इत्युक्ते ५पुराणपाठके विप्रे च ६मानभेदे शब्दर०। [वामे च।

व्यासक्त त्रि० वि+आ+सन्ज–क्त। १आसक्ते तत्परे २संव्यासक्तौ च। [२निषिद्धे च।

व्यासङ्ग पु०वि+आ+सन्ज–घञ्। १कार्य्यान्तरत्यागेनैकपरत्वे

व्यासिद्ध त्रि० वि+आ+सिध–क्त। १राजाज्ञयावरुद्धे मेदि०

व्याहत त्रि० वि+आ+हन–क्त। व्याघातयुक्ते।

व्याहार पु० वि+आ+हृ–घञ्। १वाक्ये २उक्तौ अमर.।

व्याहृति स्त्री वि+आ+हृ–क्तिन्। १उक्तौ २भूर्भुवःस्वरादिषु सप्तसु भूर्भुवःस्वरादिलोकसप्तात्मकेषु मन्त्रभेदेषु च सप्त लोकाः पुनरेताः सप्त व्याहृतय एवेति योगियाज्ञवल्क्येन प्रतिपादितम् यदाह “भूराद्याश्चैव सत्यान्ता सप्त व्याहृतयस्तथा। लोकास्ता एव सप्तैते उपर्य्युपरिसंस्थिताः”। तथा“सप्त व्याहृतयः प्रोक्ताः पुरा य स्तु स्वयम्भुवा। ता एव सप्त छन्दांसि लोकाः सप्त प्रकीर्त्तिताः” यया च वासनया सप्त व्याहृतयः सप्त लोकाः सा च वासना योगियाज्ञवल्क्येनैवं निरुक्त्या विविच्य प्रतिपादिताः यदाह “भवन्ति चास्मिन् भूतानि स्थावराणि चराणि च। तस्माद्भूरिति विज्ञेया प्रथमा व्याहृतिः स्मृता। भवन्ति भूयो भूतानि उपभोगक्षये पुनः। कल्पान्ते उपभागाय भुवस्तस्मात् प्रकीर्त्तिता। शीतोष्णवृष्टितेजांसि जायन्ते तानि वै सदा। आश्रयः प्रकीर्तनाच्च स्वर्लोकः स उदाहृतः। अधरोत्तरलोकेभ्यो महांस्तु परिपालितः। हृदयं सर्वलोकानां महत्त्वेन निगद्यते। कल्पदाहप्रलीनास्तु प्राणिनस्तु पुनः पुनः। जायन्ते तु पुनः सर्गे जनस्तेन निगद्यते। सनकाद्यास्तपःसिद्धा ये चान्ये ब्रह्मणः सुताः। अधिकारनिवृत्ताश्च तिष्ठन्त्यस्मिंस्ततस्तपः। सत्यन्तु सप्तमो लोको ब्रह्मणस्तदनन्तरम्। सर्वेषाञ्चैव लोकानां मूर्ध्नि संतिष्ठते सदा। ज्ञानकर्मसु निष्ठानां तथा सत्यस्य भाषणात्। प्राप्यते चोपभोगार्थं प्राप्य न च्यवते पुनः। तत् सत्यं सप्तमो लोकस्तस्मादूर्द्ध्वं न विद्यते”। [च हेमच०।

व्युत्क्रम पु०वि+उद्+क्रम–घञ्। १क्रमवैपरीत्ये २अतिक्रमे

व्युत्थान न० वि+उद्+स्था–ल्युट्। १विरोधकरणे २स्वातन्त्र्यकरणे मेदि० ३प्रतिरोधने ४योगशास्त्रोक्ते समाध्यवस्थाप्रच्यवे हेमच० ५नृत्यभेदे शब्दच०। ६विशेषेण उत्थाने च। वि+उद्+स्था–क्तिन्। व्युत्थितिरप्यत्र स्त्री।

व्युत्पत्ति स्त्री वि+उद्+पद–क्तिन्। १विशेषेण उत्पत्तौ शास्त्रजन्ये शब्दार्थज्ञानादिरूपायां संस्कारभेदे २शब्दानामर्थावबोधकशक्तौ च।

व्युत्पन्न त्रि० वि+उद्+पद–क्त। १व्युत्पत्तियुक्ते शब्दे ततसंस्कारयुक्ते २पुरुषे च। ३विशेषेणोत्पन्ने च।

व्युदस्त त्रि० वि+उद्+अस–क्त। निराकृते।

व्युदास पु० वि+उद्+अस+घञ्। निराकरणे।

व्युष्ट त्रि० वि+उष–क्त वा० इडभावः। १दग्धे २पर्युषिते ३प्रभाते च ४फले ५दिवसे च न० हेमच०।

व्युष्टि स्त्री वि+उष–क्तिन्। १समृद्धौ २स्तुतौ ३फले च मेदि० व्युष्टिद्विरात्रं यागभेदः शुक्लरोहादि।

व्यूढ त्रि०वि+वह–क्त। १निवेशनविशेषेण स्थापिते व्यूहयुक्ते सैन्यादौ “व्यूढां द्रुपदपुत्रेण” गीता। २विन्यस्ते ३संहते अमरः “व्यूढोरस्को वृषस्कन्धः” रघुः। ४पृथुले त्रि० मेदि० ५परिहिते ६विवाहिते च त्रि० “व्यूढा काचन कन्यका” प्रबोधचन्द्रोदयः। [कवचे अमरः।

व्यूढकङ्कट त्रि० व्यूढःपरिहितः कङ्कटः वर्म येन। सन्नद्ध-

व्यूत त्रि०वि+वे–क्त। तन्तुभिर्ग्रथिते। [पटार्थे अमरः।

व्यूति स्त्री वि+वे–क्तिन्। १वस्त्रादिवयनकर्मणि२तद्वेतने(बानि)

व्यूह पु० वि+ऊह–घञ्। १समूहे २निर्माणे च ३सम्यक्तर्के ४देहे ५सैन्ये ६युद्धार्थं सैन्यसन्निवेशनविशेषे अमरः। “समस्तस्य तु सैन्यस्य विन्यासः स्थानभेदतः। स व्यूह इति विख्यातो युद्धेषु पृथिवीभुजाम्। व्यूहभेदाश्च चत्वारो दण्डोभोगस्तु मण्डलम्। असंहतश्च निर्णीता नीतिसारादिसम्मताः। अन्येऽपि प्रकृतिव्यूहाः क्रौञ्चचक्रादयः क्वचित्। तिर्य्यग्वृत्तिश्च दण्डः स्याद् भोगोऽन्वावृत्तिरेव च। मण्डल सर्वतो वृत्तिः पृथग्वृत्तिरसं-

हतः” शब्दर०। शुक्रनीतिसारे तद्भेदादिकमुक्तं यथा “नद्यद्रिवनदुर्गेषु यत्र यत्र भयं भवेत्। सेनापतिस्तत्र तत्र गच्छेद् व्यूहकृतैर्बलैः। यायाद् व्यूहेन महता मकरेण पुरोभये। श्येनेनोभयपक्षेण सूच्या वा धीरवक्त्रया। पश्चाद्भये तु शकटं पार्श्वयोर्वज्रसंज्ञकम्। सर्वतः सर्वतोभद्रं चक्रं व्यालमथापि वा। यथादेशं कल्पयेद्वा शत्रुसेनाविभेदकम्। व्यूहरचनसङ्केतान् वाद्यभाषासमीरितान्। स्वसैनिकैर्विना कोऽपि न जानीयात् तथाविधान्। नियोजयेच्च मतिमान् व्यूहान् नानाविधान् सदा। अश्वानाञ्च गजानाञ्च पदातीनां पृथक् पृथक्। उच्चैः संश्रावयेद् व्यूहसङ्केतान् सैनिकान् नृपः। वामदक्षिणसंस्थो वा मध्यस्थो वाऽग्रसंस्थितः। श्रुत्वा तान् सैनिकैः कार्य्यमनुशिष्टं यथा तथा। सम्मीलनं प्रसरणं परिभ्रमणमेव च। आकुञ्चनं तथा यानं प्रयाणमपयानकम्। पर्य्यायेण च साम्मुख्यं समुत्थानञ्च लुण्ठनम्। संस्थानं चाष्टदलवच्चक्रवद्गोलतुल्यकम्। सूचीतुल्यं शकटवदर्द्धचन्द्रसमन्तु वा। पृथग्भवनमल्पाल्पैः पर्य्यायैः पङ्क्तिवेशनम्। शस्त्रास्त्रयोर्धारणञ्च सन्धानं लक्ष्यभेदनम्। मोक्षणञ्च तथाऽस्त्राणां शस्त्राणां परिघातनम्। द्राक् सन्धानं पुनः पातो ग्रहो मोक्षः पुनः पुनः। स्वगूहनं प्रतीघातः शस्त्रास्त्रपदविक्रमैः। द्वाभ्यां त्रिभिश्चतुर्भिर्वा पङ्क्तितो गमनं ततः। तथा प्राग्भवनं चापसरणं तूपसर्जनम्। अपसृत्यास्त्रसिद्ध्यर्थमुपसृत्य विमोक्षणम्। प्राग्भूत्वा मोचयेदस्त्रं व्यूहस्थः सैनिकः सदा। आसीनः स्याद्विमुक्तास्त्रः प्राग्वा चापसरेत् पुनः। प्रागासीनं तूपसृतो दृष्ट्वा स्वास्त्रं विमोचयेत्। एकशो द्विशो वापि सङ्घशो बोधितो यथा। क्रौञ्चानां खे गतिर्यादृक् पङ्क्तितः सम्प्रजायते। तादृक् सञ्चारयेत् क्रौञ्चव्यूहं देशबलं यथा। सूक्ष्मग्रीवं मध्यपुच्छं स्थूलपक्षन्तु पङ्क्तितः। बृहत्पक्षं मध्यगलपुच्छं श्येनं मुखे तनु। चतुष्पान्मकरो दीर्घस्थूलवक्त्रद्विरोष्ठकः। सूची सूक्ष्ममुखो दीर्घसमदण्डान्तररन्ध्रयुक्। चक्रव्यूहश्चैकमार्गो ह्यष्टधा कुण्डलीकृतः। चतुर्दिक्ष्वष्टपरिधिः सर्वतोभद्रसंज्ञकः। अमार्गश्चाष्टवलयी गोलकः सर्वतोमुखः। शकटः शकटाकारो व्यालो व्यालाकृतिः सदा। सैन्यमल्पं बृहद्वापि दृष्ट्वा मार्गं रणस्थलम्। व्यूहैर्व्यूहेन व्यूहाभ्यां सङ्करेणापि कल्पयेत्”।

व्यूहपार्ष्णि पु० ६त०। युद्धार्थमवस्थानविशेषेण स्थितसैन्यानां पश्चाद्भागे अमरः।

व्यृद्धि स्त्री विरुद्धा ऋद्धिः। विरुद्धसम्पत्तौ तत्रार्थे अव्ययी० दुर्य्यवनम् यवनानां विरुद्धसम्पत्तौ सि०कौ०।

व्ये संवृतौ वृतौ च भ्वा० उभ०सक० अनिट् यजा०। व्ययति ते अव्यासीत् अव्यास्त विव्याय विव्यतुः। उतः।

व्यो अव्य० व्ये-डो। १लौहे ओकारः २बीजे च

व्योकार पु० व्यो+कृ-अण्। लौहकारके अमरः।

व्योमकेश पु० व्योमेव केशो यस्य। शिवे महादेवे अमरः।

व्योमकेशिन् पु० व्योमाकारः केशोऽस्त्यस्य इनि। महादेवे

व्योमचारिन् पु० व्योम्नि चरति चर-णिनि। १विहगे २देवे ३पक्षचलादौ च ४आकाशगामिनि त्रि० व्योमचारिपुरं शोभनगरम्।

व्योमधूम पु० व्योम्नः धूमइव नीलत्वात्। मेघे त्रिका०।

व्योमन् न० व्ये-मनिन् पृषो०। १आकाशे अमरः। २अभ्रके (धातु) राजनि०। ३जले च ४सूर्य्याङ्गाश्रये मेदि०।

व्योममण्डल न० व्योम मण्डलमिव। मण्डलाकारे १आकाशे। व्योम्नो मण्डलमिव। २पताकायाम् शब्दच०।

व्योममुद्गर पु० व्योम्नो मुद्गर इव आघातहेतुत्वात्। गगनात् अकस्मादुत्थिते वायोर्निर्घाते हारा०। [अमरः।

व्योमयान न० ७त०। आकाशगमनयोग्ये वाहने विमाने

व्योष न० वि+उष-अच्। शुण्ठीमरीचपिप्पलीरूपे त्रिकटुनि अमरः।

व्रज गतौ भ्वा०पर०सक०सेट्। व्रजति अव्राजीत्। [जत्।

व्रज संस्कारे गतौ च चु०उ०सक०सेट्। व्राजयति ते अविव्र-

व्रज पु० व्रज-घञर्थे क। १समूहे अमरः। २गोष्ठे ३पथि मेदि० मथुरासमीपस्थे देशभेदे च

मात्स्ये “व्रजमण्डलभूगोलं शेषनागफणाम्बरम्। कुमाराख्यं महापीठं सर्वेषां मध्यसंस्थितम्। तस्योपरिस्थितं लोकं सर्वस्थानं महाफलम्। कृष्णलीलाविहारार्थसुस्थानविराजितम्। चतुरष्टकद्४क्रोशेन परिपूर्णविराजितम्। अस्य प्रदक्षिणां कुर्वन् धनधान्यसुखं लभेत्। दानाश्चीवासतो लोको विष्णुलोकमवाप्नुयात्। आवसन् म्रियते चेत्तु पुनर्जन्म न विद्यते। पुण्यं लक्षगुणं लब्ध्वा कृतेऽस्मिन् व्रजमण्डले। कृष्णेन निर्मितास्तीर्थाः सार्द्धद्वयसहस्रकाः”। तत्रादौ वनोपवनप्रतिवनाधिवनान्यष्टचत्वारिंशत् तानि चतुरष्टक्रोशपरिमाणस्थितानि चतुर्भागशोऽभ्यन्तरस्थितानि क्रमश आह।

पाद्मे "वनानि द्वादशान्यत्र यमुनोत्तरदक्षिणे। महावनं१ महाश्रेष्ठं वरं काम्यवनं२ शुभम्। कोकिलाख्यं तृतीयञ्च३ तुर्यं तालवनं४ तथा। पञ्चमं कुमुदाख्यञ्च५ षष्ठं भाण्डीरसंज्ञकम्६। नाम्ना छत्रवनं७ श्रेष्ठं सप्तमं परिकीर्त्तितम्। अष्टमं खदिरं८ प्रोक्तं नवमं लोहजं वनम्९। नाम्ना भद्रवनं१० श्रेष्ठं दशमं बहुपुण्यदम्। एकादशं समाख्यातं बहुलावनसंज्ञकम्११। नाम्ना बिल्ववनं१२ श्रेष्ठं द्वादशं कामनाप्रदम्। इति द्वादशसंज्ञानि वनानि शुभदानि च"। द्वादशोपवनान्याह वाराहे "आदौ ब्रह्मवनं१ नाम द्वितीयं त्वप्सरोवनम्२। तृतीयं विह्वलं३ नाम कदम्बाख्यं४ चतुर्थकम्। नाम्ना स्वर्णवनं५ श्रेष्ठं पञ्चमं परिकीर्त्तितम्। सुरभीवननामाऽपि षष्ठमाह्लादवर्द्धनम्६। श्रेष्ठं प्रेमवनं७ नाम सप्तमं शुभदं नृणाम्। मयूरवननामाऽपि चाष्टमं परिकीर्त्तितम्८। मानेङ्गितवनं९ श्रेष्ठं नवमं मानवर्द्धनम्। शेषशायिवनं१० श्रेष्ठं दशमं पापनाशनम्। एकादशं समाख्यातं नारदाख्यं११ शुभोदितम्। द्वादशं परमानन्दवनं१२ सर्वार्थदायकम्। इति द्वादशसंज्ञानि वनान्युपवनानि च"। द्वादशप्रतिवनानि भविष्ये "आदौ रङ्कवनं१ श्रेष्ठं पुरसंज्ञाविराजितम्। वार्त्तावनं२ द्वितीयञ्च करहाटं३ तृतीयकम्। चतुर्थं काम्यनामाऽपि४ वनं कामप्रदं नृणाम्। वनमञ्जननामाऽपि५ पञ्चमं स्त्रीशुभप्रदम्। नाम्ना कर्णवनं६ श्रेष्ठं षष्ठं स्वप्नवरप्रदम्। कृष्णाक्षिपलकं७ नाम वनं रूपसमोदितम्। नन्दप्रेक्षणकृष्णाख्यं वनं नन्दनमष्टमम्८। वनमिन्द्रवनं९ नाम नवमं कृष्णपूजितम्। शिक्षावनं१० शुभं प्रोक्तं दशमं नन्दभाषितम्। चन्द्रावलीवनं११ श्रेष्ठमेकादशमुदाहृतम्। नाम्ना लोहवनं१२ श्रेष्ठं द्वादशं शुभदं नृणाम्। इति प्रतिवनान्याहुर्मार्गे वामे च दक्षिणे। इति द्वादशसंज्ञास्ते देवावासफलप्रदाः"। द्वादशाधिवनान्याह विष्णुपु० "मथुरा१ प्रथमं नाम राधाकुण्डं२ द्वितीयकम्। नन्दग्राम३स्तृतीयश्च गूढस्थानं४ चतुर्थकम्। पञ्चमं ललिताग्रामं५ वृषभानुपुरं६श्च षट्। सप्तमं गोकुलं स्थान७मष्टमं बलदेवकम्८। गोवर्द्धनवनं९ श्रेष्ठं नवमं कामनाप्रदम्। वनं जावटं१० नाम दशमं परिकीर्त्तितम्। मुख्यं वृन्दावनं११ श्रेष्ठमेकादशं प्रकीर्त्तितम्। सङ्केतवटकं१२ स्थानं वनं द्वादशं कीर्त्तितम्। इति द्वादशसंज्ञानि वनान्यधिवनानि च। वनानामधिपाः प्रोक्ता व्रजमण्डलमध्यगाः। एषां नैव विलोकेन वनयात्रा च निष्फला। एषाञ्च दर्शनेनैव वनयात्रा शुभप्रदा। आदौ लोलां यदा पश्येद्वनयात्रां ततश्चरेत्। सर्वान् कामानवाप्नोति विष्णुलोकमवाप्नुयात्। सर्वत्र विजयी भूयाद्वनयात्राप्रभावतः"।

व्रजनाथ पु० ६त०। श्रीकृष्णे व्रजपालादयोऽप्यत्र। [श्रीकृष्णे

व्रजमोहन पु० व्रजान् व्रजस्थान् मोहयति मुह-णिच्-ल्यु।

व्रजवर पु० व्रजानां तत्स्थानां वरः प्रार्थनीयः। श्रीकृष्णे।

व्रजवल्लभ पु० ६त०। श्रीकृष्णे।

व्रजाङ्गना स्त्री ६त०। व्रजस्य स्त्रियां गोप्याम्।

व्रज्या स्त्री व्रज-क्यप्। १पर्य्यटने २गमने ३जिगीषोर्युद्धार्थं प्रयाणे च अमरः।

व्रण शब्दे भ्वा०पर०सक०सेट्। व्रणति अव्राणीत् अव्रणीत्।

व्रण अङ्गक्षतौ अद०चु०उ०सक०सेट्। व्रणयति ते अवव्रणत् त

व्रण पु० न० चु० व्रण-अच्। क्षते अमरः। तत्स्वरूपनिदानादि भावप्र० उक्तं यथा "व्रणो द्विधा परिज्ञेयो दोषजागन्तुभेदतः। दोषजो दुष्टदोषैः स्यादन्यः शस्त्रादिसम्भवः"। तत्र वातिकस्य लक्षणमाह "स्तब्धः कठिनसंस्पर्शो मन्दस्रावो महारुजः। तुद्यतः स्फुटितश्यावो व्रणो मारुतसम्भवः"। स्तब्धः अचलः। पैत्तिकमाह "तृष्णामोहज्वरक्लेददाहदुःखावदारणैः। व्रणं पित्तकृतं विद्यात् स्रावैर्गन्धैश्च पूतिकैः"। क्लेदः आर्द्रता। दुःखं व्यथारूपम्। अवदारणं व्रणे विदारणवत् पीडा। श्लैष्मिकमाह "बहुपिच्छो गुरुः स्निग्धस्तिमितो मन्दवेदनः। पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः"। बहुपिच्छः बहुपिच्छिलः। अल्पसंक्लेद ईषदार्द्रः। रौधिरं द्वन्द्वजं सान्निपातिकमाह "रक्तो रक्तस्रुतीरक्ताद् द्वित्रिजः स्यात् तदन्वयः"। तदन्वयः द्वित्रिदोषलिङ्गसम्बन्धः। शुद्धव्रणलिङ्गमाह "जिह्वातलाभोऽतिमृदुः श्लक्ष्णः स्निग्धोऽल्पवेदनः। सुव्यवस्थो निरास्रावः शुद्धव्रण इति स्मृतः। जिह्वातलाभः तलशब्दोऽत्र स्वरूपार्थः तेन जिह्वावद्रक्तः। सुव्यवस्थः उच्चनतारहितः। दुष्टव्रणलिङ्गमाह "पूतिपूयातिदुष्टासृक्स्राव्युत्सङ्गी चिरस्थितिः। दुष्टव्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्य्ययः"। उत्सङ्गी कोटरवान्। अतिगन्धादिः आदिशब्देन स्राववेदनावैवर्ण्यादयः संगृह्यन्ते। संरोहिव्रणस्य लिङ्गमाह "कपोतवर्णप्रतिमा यस्यान्ताः क्लेदवर्जिताः। स्थिराश्च पिडका-

वन्तो रोहन्तीति तमादिशेत्"। कपोतवर्णप्रतिमः पाण्डुधूसरः। स्थिराः विदीर्णतारहिताः। पिडकावन्तः संरोहणार्थो ये मांसाङ्कुरास्तद्युक्ताः। संरूढलिङ्गमाह "रूढवर्त्मानमग्रन्थिमशूनमरुजं व्रणम्। त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्दिशेत्"। रूढवर्त्मानं संरूढव्रणमार्गम्। समतलं अनिम्नम्। सुखसाध्यत्वादिकमाह "त्वङ्मांसजः सुखे देशे तरुणस्यानुपद्रवः। धीमतोऽभिनवः काले सुखे साध्यः सुखं व्रणः"। सुखे देशे मर्मरहिते। अनुपद्रवः ज्वरतृष्णाश्वासकासारोचकादिरहितः। धीमतः पथ्यसेविनः। सुखे काले हेमन्ते शिशिरे च। "गुणैरन्यतरैरेभिर्हीनः कृच्छ्रो व्रणः स्मृतः। सर्वैर्विहीनो विज्ञेयस्त्वसाध्यो निरुपक्रमः"। एभिस्त्वङ्मांसजत्वादिभिः। निरुपक्रमः अनुपक्रान्तः चिरमुपेक्षित इति यावत्। "वसामेदोऽस्थिमज्जानं मस्तुलुङ्गञ्च यः स्रवेत्। आगन्तुजो व्रणः सिध्येन्न सिध्येद्दोषसम्भवः"। मस्तुलुङ्गं मस्तकाभ्यन्तरस्नेहः "कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम्। व्रणाः कृच्छ्रेण सिध्यन्ति येषां चापि व्रणे व्रणः"। अरिष्टमाह "दह्यन्ते चान्तरत्यर्थं बहिःशीताश्च ये व्रणाः। दह्यन्ते बहिरत्यर्थं भवन्त्यन्तश्च शीतलाः। प्राणमांसक्षयश्वासकासारोचकपीडिताः। प्रवृद्धपूयरुधिरा व्रणा ये चापि मर्मसु। क्रियाभिः सम्यगारब्धा न सिध्यन्ति च ये व्रणाः। चिकित्सेन्नैव तान् वैद्यः संरक्षन्नात्मनो यशः। मद्यागुर्वाज्यसुमनःपद्मचन्दनचम्पकैः। सगन्धा दिव्यगन्धाश्च मुमूर्षोर्व्रणाः स्मृताः"। मर्मसु वायुनाभिहृदयादिषु। सुमना जातिः। दिव्यगन्धाः पारिजातादिगन्धाः। अथागन्तुव्रणस्य निदानमाह "नानाधारामुखैः शस्त्रैर्नानास्थाननिपातितैः। भवन्ति नानाकृतयो व्रणास्तांस्तान्निबोध मे"। नाना धारा मुखानि येषां तैः शस्त्रैः अर्द्धचन्द्रखड्गभल्लकुन्तशरादिभिः। नानाकृतयः बह्वाकृतयः। ता आकृतीराह "छिन्नं भिन्नं तथा विद्धं क्षतं पिच्चितमेव च। घृष्टमाहुस्तथा षष्ठं तेषां वक्ष्यामि लक्षणम्"। तत्र छिन्नस्य लक्षणमाह "तिर्यक्छिन्न ऋजुर्वापि यो व्रणस्त्वायतो भवेत्। गात्रस्य पातनं तद्धि छिन्नमित्यभिधीयते"। यो व्रणः तिर्यक्छिन्नः खड्गादिकृततिर्यक्छेदयुतः। ऋजुर्वापि अथवा खड्गादिकृतरक्तो व्रणः आयतः दीर्घः। आयत इति तिर्यक्छिन्नस्य ऋजोश्च विशेषणम्। गात्रस्य पातनं गात्रस्यैकदेशस्य छेदेन पृथक्करणं वा छिन्नमित्यभिधीयते। भिन्नमाह "शक्तिकुन्तेषुखड्गाग्रविषाणैराशयो हतः। यत् किञ्चित् प्रस्रवेत्तद्धि भिन्नमित्यभिधीयते"। आशयः कोष्ठः। कोष्ठभेदस्य लक्षणमाह "स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च। हृदुण्डुकः फुफ्फुसश्च कोष्ठ इत्यभिधीयते। तस्मिन् भिन्ने रक्तपूर्णे ज्वरो दाहश्च जायते। मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति। मूर्च्छा श्वासस्तृडाध्मानमभक्तच्छन्द एव च। विण्मूत्रवातसङ्गश्च स्वेदस्रावोऽक्षिरक्तता। लोहगन्धित्वमास्यस्य गात्रदौर्गन्ध्यमेव च। हृदि शूलं पार्श्वयोश्च विशेषणाभिधीयते"। तस्मिन् कोष्ठे। भिन्ने शक्त्यादिभिः। रक्तपूर्णे कोष्ठे तस्मादस्राद्भिन्नात् स्रुतेन रक्तेन पूर्णे वा ज्वरादयो जायन्ते। आमाशये पक्वाशये च रक्तपूर्णे लक्षणभेदमाह "आमाशयस्थे रुधिरे रुधिरं छर्दयत्यपि। आध्मानमतिमात्रञ्च शूलञ्च भृशदारुणम्। पक्वाशयगते रक्ते रुजा गौरवमेव च। अधःकाये विशेषेण शीतता च भवेदिह"। रुजा शूलम्। गौरवं पक्वाशये। अधःकाये नाभेरधोदेशे विशेषेण गौरवमित्यन्वयः। शीतता च भवेदिह इह नाभेरधोदेशे शीतता च स्यात् सा च व्याधिस्वभावात्। विद्धमाह "सूक्ष्मास्यशल्याभिहतं यदङ्गं त्वाशयं विना। उत्तुण्डितं निर्गतं वा तद्विद्धमिति निर्दिशेत्"। आशयं विना कोष्ठं विना। उत्तुण्डितं अनिर्गतशल्यम्। निर्गतं वा निर्गतशल्यं वा। सशल्यस्य व्रणस्य लक्षणमाह। "श्यावं सशोथं पिडकायुतञ्च मुहुर्मुहुःशोणितवाहनञ्च। मृदूद्गतं बुद्बुदवच्च मांसं व्रणं सशल्यं सरुजं वदन्ति"। मुहुर्मुहुःशोणितवाहनं यदा यदा शल्यं चलितं तदा तदा रुधिरं वहति। उद्गतं उत्थितमुखम्। कोष्ठस्थितस्य शल्यस्य लक्षणमाह "त्वचोऽतीत्य सिरादीनि भित्त्वा वा परिहृत्य वा। कोष्ठे प्रतिष्ठितं शल्यं कुर्यादुक्तानुपद्रवान्"। त्वचः सप्तापि अतिक्रम्य उक्तानुपद्रवान् आटोपानाहौ व्रणमुखेनान्नपुरीषदर्शनञ्च। असाध्यस्य कोष्ठस्थरक्तस्य पुरीषस्य लक्षणमाह "कोष्ठान्तर्लोहितं पाण्डु शीतपादकराननम्। शीतोच्छ्वासं रक्तनेत्रमानद्धञ्च विवर्जयेत्"। आनद्धं आनाहवन्तम्। क्षतमाह "नातिच्छिन्नं नातिभिन्नमुभयोर्लक्षणान्वितम्। विषमं व्रणमङ्गे यत्तत् क्षतं परिकी-

र्त्तितम्"। नातिच्छिन्नं नातिदीर्घघातम्। नातिभिन्नं नातिगम्भीरघातम्। उभयोश्छिन्नभिन्नयोः विषमं प्रणमङ्गं यत् यदङ्गमङ्गवैषम्यकरम्। पिच्चितमाह "प्रहारपीड़नाभ्यान्तु यदङ्गं पृथुतां गतम्। सास्थि तत् पिच्चितं विद्यान्मज्जरक्तपरिप्लुतम्"। प्रहारो मुद्गरादिना। पीड़नं कपाटादिना। पृथुतां चिपिटताम्। घृष्टमाह "घर्षणादपि घाताद्वा यदङ्गं विगतत्वचम्। उष्मास्रावान्वितं तत्तु घृष्टमित्यभिधीयते। घर्षणात् कर्कशेष्टकापाषाणादिभिः। मांसशिरास्नायुसन्ध्यस्थिमर्मसु क्षतेषु सामान्यलक्षणमाह "भ्रमः प्रलापः पतनं प्रमोहो विचेष्टनं ग्लानिरथोष्णता च। स्रस्ताङ्गता मूर्च्छनमूर्द्ध्ववातस्तीव्रा रुजो वातकृताश्च तास्ताः। मांसोदकाभं रुधिरञ्च गच्छेत् सर्वेन्द्रियार्थोपरमस्तथैव। दशार्द्धसंख्येष्वथ विक्षतेषु सामान्यतो मर्मसु लिङ्गमुक्तम्"। पतनं भूमौ। विचेष्टनं विरुद्धं चेष्टनं हस्तपादादिप्रक्षेपणादिकम्। मूर्च्छनं इन्द्रियमोहः। प्रमोहो मनोमात्रमोहः। तीव्रा रुजो वातकृताश्च तास्ताः दण्डापतानकादयः। रुधिरञ्च गच्छेत् मेहनभगगुदास्यघ्राणेभ्यः स्रवेत्। सर्वेन्द्रियार्थोपरमः इन्द्रियाणां कार्य्यनाशः। अथ मर्मशिरास्नायुसन्ध्यस्थ्नां विद्धानां पृथग्लक्षणमाह "सुरेन्द्रगोपप्रतिमं प्रभूतं रक्तं स्रवेत्तत्क्षतजश्च वायुः। करोति रोगान् विविधान् यथोक्तान् शिरासु विद्धास्वथ वा क्षतासु"। सुरेन्द्रगोपो वार्षिकलोहितकीटविशेषः। (वीरबहुटी) इति लोके प्रसिद्धः। प्रभूतं बहु। रोगान् शिरोभितापान्धताक्षेपकादीन्। विद्धासु शरादिना। क्षतान् खड्गादिना। "कौब्ज्यं शरीरावयवावसादः क्रियास्वशक्तिस्तुमुला रुजा च। चिराद्व्रणो रोहति यस्य चापि तं स्नायुविद्धं पुरुषं वदन्ति। कौब्ज्यं विद्धस्याङ्गस्य वक्रता। तुमुला महती"। "शोथातिवृद्धिस्तुमुला रुजश्च बलक्षयः सर्व्वत एव शोथः। क्षतेषु सन्धिष्वचलाचलेषु स्यात् सन्धिकर्म्मोपरमश्च लिङ्गम्"। सर्व्वत एव शोथः सर्व्वसन्धीन् व्याप्य शोथः। उपरमः नाशः। "घोरा रुजो यस्य निशादिनेषु सर्व्वास्ववस्थासु न चैति शान्तिम्। भिषग्विपश्चिद्विदितार्थसूत्रस्तमस्थिविद्धं पुरुषं प्रवक्ति"। सर्व्वास्ववस्थासु शयनासनादिकासु। विदितार्थसूत्रैः ज्ञातशल्यतन्त्रः। अथ मर्म्मशिरादिष्वविद्धलिङ्गानि पृथगभिधाय मर्म्मशिरादीनां विद्धानां पृथग्लिङ्गान्यतिदेशेनाह "यथास्वमेतानि विभावयेच्च लिङ्गानि मर्म्मस्वपि ताड़ितेषु"। यथास्वं शिरादीनां विद्धानाम् एतानि लिङ्गानि पृथगुक्तानि लिङ्गानि चकारात् भ्रमप्रलापादीनि च। मर्म्मस्विव शिरादिषु ताड़ितेषु विद्धेषु विभावयेत् जानीयात्। सर्व्वव्रणानामुपद्रवानाह "विसर्पः पक्षघातश्च शिरास्तम्भोऽपतानकः। मोहोन्मादौ व्रणे पीड़ा ज्वरस्तृष्णा हनुग्रहः। कासश्छर्दिरतीसारो हिक्का श्वासः सवेपथुः। षोड़शोपद्रवाः प्रोक्ता व्रणानां व्रणचिन्तकैः"। अथाग्निदग्धस्य निदानमाह "तत्राग्निर्द्विविधो ज्ञेयः स्नेहरूक्षप्रभेदतः। स्नेहस्तत्र तु तैलादि रूक्षं लोहादि कथ्यते"। अग्निदग्धं चतुर्विधमाह "अग्निदग्धं चतुर्द्धा स्यात् प्लुष्टं दुर्दग्धमेव च। सम्यग्दग्धं तथातिदग्धञ्च परिकीर्त्तितम्"। तेषां लक्षणमाह "यद्विवर्णमतिप्लुष्टं तत्प्लुष्टमभिधीयते। तीव्रदाहो व्यथावन्तो यत्र स्फोटा भवन्ति हि। चिरेण ते प्रशाम्यन्ति तद्दुर्दग्धमुदाहृतम्। तालवर्णमगम्भीरं दाहपीड़ासमन्वितम्। सुसंस्थितञ्च कथितं सम्यग्दग्धं भिषग्वरैः। त्वङ्मांसं यत्र दग्धं स्याद्विश्लेषो वपुषस्तथा। शिरास्नाय्वस्थिसन्धीनां तं वदन्त्यतिदग्धकम्। अत्यर्थं वेदनादाहो ज्वरस्तृण्मूर्च्छया सह। स्याद्व्रणस्तु चिराद्रोहेत् रूढ़ो याति विवर्णताम्"। दुष्टव्रणनाड़ीव्रणशब्दयोस्तद्भेदौ दृश्यौ। व्रणशब्दनिरुक्तिः सुश्रुते उक्ता यथा "वृणोति यस्माद्रूढ़ेऽपि व्रणवस्तुं न नश्यति। आदेहधारणात्तस्मात् व्रण इत्युच्यते बुधैः"। सुश्रुतोक्ता विशेषाः द्विव्रणशब्दे व्रणास्रावशब्दे च दृश्याः।

व्रणकृत् पु० व्रणं करोति कृ–क्विप्। १भल्लातके रत्नमा०। २व्रणकारके त्रि०। [२व्रणघातके त्रि०।

व्रणद्विष् पु० व्रणं द्वेष्टि द्विष–क्विप्। १ब्राह्मणयष्टिकायाम्

व्रणशोथ पु० ६त०। व्रणस्य स्फीतताकारके रोगभेदे तल्लक्षणादि भावप्र० उक्तं यथा

"पृथक् समस्तदोषोत्था रक्तजागन्तुजौ तथा। व्रणशोथाः षड़ेते स्युः संयुक्ताः शोथलक्षणैः" शोथलक्षणैः पूर्व्वोक्तैः। विशिष्टरूपमाह "विषमं पच्यते वातात् पित्तोत्थश्चाचिरस्थिरम्। कफजः पित्तवच्छोथो रक्तागन्तुसमुद्भवौ"। अपक्वस्य व्रणशोथस्य लक्षणमाह "मन्दोष्मताऽल्पशोथत्वं काठिन्यं त्वक्सवर्णता। मन्दवेदनया चाऽपि शोथस्यामस्य लक्षणम्"। तत्र पच्यमानस्य लक्षणमाह "द-

ह्यते दहनेनेव क्षारेण च प्रपच्यते। पिपीलिकागणेनेव दश्यते छिद्यते तथा। भिद्यते चैव शस्त्रेण दण्डेनेव च ताड्यते। पीड्यते पाणिनेवान्तः सूचीभिरिव तुद्यते। सोषचोषो विवर्णः स्यादङ्गुल्येवावपीड्यते। आसने शयने स्थाने शान्तिं वृश्चिकविद्धवत्। न गच्छेदाततः शोथो भवेदाध्मातवस्तिवत्। ज्वरस्तृष्णाऽरुचिश्चैतत् पच्यमानस्य लक्षणम्"। छिद्यते द्विधा क्रियत इव। भिद्यते विदार्य्यत इव। सोषो दाहः। चोषः पार्श्वस्याग्निनेव सन्तापः ताभ्यां युक्तः सोषचोषः. त्वक्सङ्कोचादाततः वस्तिर्मूत्राशयचर्म्मपुटो वा। पक्वस्य लक्षणमाह "वेदनोपशमः शोथो लोहितोऽल्पो न चोन्नतः। प्रादुर्भावो वलीनाञ्च तोदः कण्डूर्मुहुर्मुहुः। उपद्रवाणां प्रशमो निम्नता स्फुटनन्त्वचाम्। वस्ताविवाम्बुसञ्चारः स्याच्छोथेऽङ्गुलिपीडिते। पूयस्य पीडयेदेकमन्तमन्ते च पीडिते। बुभुक्षा व्रणशोथस्य भवेत् पक्वस्य लक्षणम्"। वेदनोपशमः दाहादिदुःखोपशमः। अल्पलोहित इत्यन्वयः। न चोन्नतः पच्यमानापेक्षया। उपद्रवाणां ज्वरादीनाम्। निम्नता स्वरूपतोऽङ्गुलिपीडनाद्वा अवनतत्वम्। स्फुटनम् किञ्चिद्विदारणम्। वस्ताविवेत्यादि शोथेऽङ्गुलीपीडिते सति अङ्गुलिपीडितदेशादन्यदेशे अम्बुसञ्चारः किञ्चित्। वस्तौ चर्म्मपुटके। एवम् अन्यैकदेशे पीडिते एकमन्तमपरमन्तमापूर्य्य पीडयति। एकदोषारब्धेऽपि शोथे पाककाले सर्वदोषसम्बन्धमाह "नर्तेऽनिलाद्रुङ्न विना न पित्तं पाकः कफञ्चापि विना न पूयः। तस्माद्धि सर्वे परिपाककाले पचन्ति शोथांस्त्रिभिरेव दोषैः"। पचन्ति पाकं प्राप्नुवन्ति। एवशब्दोऽत्राप्यर्थः अव्ययानामनेकार्थत्वात्। पाके मतान्तरमाह "कालान्तरे नाभ्युदितन्तु पित्तं कृत्वा वशे वातकफौ प्रसह्य। पचत्यतः शोणितमेष पाको मतः परेषां विदुषां द्वितीयः"। वशे कृत्वा हीनीकृत्य शोणितं कर्म पूर्वत्र कफात् पूयोऽत्र शोणितात् पूय इति भेदः। गम्भीरपाके शोथे पाकज्ञानार्थं लक्षणान्तरमाह सुश्रुतः "कफजेषु च शोथेषु गम्भीरं पाकमेत्यसृक्। पक्वलिङ्गं ततः स्पष्टं यतः स्याच्छोथशीतता। त्वक्सावर्ण्यं रुजोऽल्पत्वं घनस्पर्शत्वमश्मवत्"। कफजेषु च शोथेषु गम्भीरमसृक् पाकमेति तत्र कथं पाकज्ञानमित्याह तत्र ततः कारणात् पक्वलिङ्गं स्पष्टम्। यतः पच्यमानावस्थान्तर्गतरागदाहव्यथाघनान्तरे शोथशीतादयो भवन्ति। घनस्पर्शत्वं स्पर्शे व्यथायुतत्वम्। अन्तर्निहितस्य पूयस्य दोषमाह "कक्षं समासाद्य यथैव वह्निर्वातेरितः सन्दहति प्रसह्य। तथैव पूयोऽप्यविनिःसृतस्तु मांसं सिराः स्नायु च खादतीह"। कक्षं तृणवनम्। शोथस्यामपक्वलक्षणज्ञानाज्ञाने भिषजां गुणदोषावाह "आमं विदह्यमानञ्च सम्यक्पक्वन्तु यो भिषक्। जानीयात् स भवेद्वैद्यः शेषास्तस्करवृत्तयः"। विदह्यमानं विपच्यमानम्। तस्करवृत्तयः तेषां तस्कराणामिव द्रव्यलाभमात्रप्रयोजनं भवति। न तु धर्म्मयशोमैत्रीलाभः "यश्छिनत्त्याममज्ञानाद्यश्च पक्वमुपेक्षते। श्वपचाविव विज्ञेयौ तावनिश्चितकारिणौ"।

व्रणास्राव पु॰ ६त॰। सुश्रुतोक्ते व्रणस्य पूयादिक्षरणे। तद्विज्ञानं च तत्रोक्तं यथा

"अथातो व्रणास्रावविज्ञानीयमध्यायं व्याख्यास्यामः। त्वङ्मांससिरास्नाय्वस्थिसन्धिकोष्ठमर्म्माणीत्यष्टौ व्रणस्थानानि। अत्र सर्वव्रणसन्निवेशः। तत्राद्यैकवस्तुसन्निवेशी त्वग्भेदी व्रणः सुप्रचरः शेषाः स्वयमवदीर्य्यमाणा दुरुपचाराः। तत्रायतश्चतुरस्रो वृत्तस्त्रिपुटक इति व्रणाकृतिसमासः। शेषास्तु विकृताकृतयो दुरुपक्रमा भवन्ति। सर्व एव व्रणाः क्षिप्रं संरोहन्त्यात्मवतां सुभिषग्भिश्चोपक्रान्ताः। अनात्मवतामज्ञैश्चोपक्रान्ताः प्रवृद्धत्वाद्दोषाणाम्। तत्रातिसंवृतोऽतिविवृतोऽतिकठिनोऽतिमृदुरुत्सन्नोऽवसन्नोऽतिशीतोऽत्युष्णः कृष्णरक्तपीतशुक्लादीनां वर्णानामन्यतमवर्णो भैरवः पूतिपूयमांससिरास्नायुप्रभृतिपूर्णः पूतिपूयास्राव्युन्मार्ग्युत्सङ्गमनोज्ञदर्शनगन्धोऽत्यर्थं वेदनावान् दाहपाकरागकण्डूशोथपिडकोपद्रुतोऽत्यर्थं दुष्टशोणितास्रावी दीर्घकालानुबन्धी चेति दुष्टव्रणलिङ्गानि। तस्य दोषोच्छ्रायेण षट्त्वं विभज्य यथास्वं प्रतीकारे प्रयतेत। अत ऊर्द्ध्वं सर्वास्रावान् वक्ष्यामः। तत्र घृष्टासु छिन्नासु वा त्वक्षु स्फोटेषु भिन्नेषु विदारितेषु वा सलिलप्रकाशो भवत्यास्रावः किञ्चिद्विस्रः पीतावभासश्च। मांसगतः सर्पिःप्रकाशः सान्द्रः श्वेतः पिच्छिलश्च। सिरागतः सद्यश्छिन्नासु सिरासु रक्तातिप्रवृत्तिः पक्वासु च तोयनाडीभिरिव तोयागमनं पूयस्रावश्चात्र तनुर्विच्छिन्नः पिच्छिलोऽवलम्बी श्यावोऽवश्यायप्रतिमश्च। स्नायुगतः स्निग्धो घनः सिङ्घाणकप्रतिमः सरक्तश्च। अस्थिगतोऽस्थ्न्यभिहते स्फुटिते भिन्ने दोषावदारिते वा दोषाव-

च्छिन्नत्वादस्थिनिःसारं शुक्तिधौतमिवाभाति। आस्रावश्चात्र मज्जमिश्रः सवसाधरः स्निग्धश्च। सन्धिगतश्च पीड्यमानो न प्रवर्त्तते आकुञ्चनप्रसारणोन्नमनविनमनप्रधावनोत्कासनप्रवाहणैश्च स्रवति। आस्रावश्चात्र पिच्छिलोऽवलम्बी सफेनपूयरुधिरोन्मथितश्च। कोष्ठगतोऽसृङ्मूत्रपुरीषपूयोदकानि स्रवति। मर्मगतस्त्वगादिष्ववरुद्धत्वान्नोच्यते। तत्र त्वगादिगतानामास्रावाणां यथाक्रमं पारुष्यश्यावावश्यायदधिमस्तुक्षारोदकमांसधावनपुलाकोदकसन्निभत्वानि मारुताद्भवन्ति। पित्तात्तु मेदोगोमूत्रभस्मशङ्खकषायोदकमाध्वीकतैलसन्निभत्वानि। पित्तवद्रक्तादतिविस्रत्वञ्च। कफान्नवनीतकासीसमज्जपिष्टतिलनारिकेलोदकवराहवसासन्निभत्वानि। सन्निपातात्तु नारिकेलोदकैर्वारुकरसकाञ्जिकमस्तुदारुकोदकप्रियङ्गुफलयकृन्मुद्गयूषवर्णत्वानीति। “कोष्ठौ चात्र भवतः। पक्वाशयाद्भाव्यस्तु पुलाकोदकसन्निभः। क्षारोदकनिभः स्रावो वल्यो रक्ताशयादृषवत्। आमाशयात् कलायाम्भोनिभश्च त्रिकसन्धिजः। स्रावानेतान् परीक्ष्यादौ ततः कर्माचरेद्भिषक्”। अत ऊर्द्ध्वं सर्वव्रणवेदना वक्ष्यामः। तोदनभेदनताडनच्छेदनायमनमन्थनविक्षेपचुमुचुमायननिर्दहनावभञ्जनस्फोटनविदारणोत्पाटनकम्पनविविधसूचीविद्धवविश्लेषणपूरणस्तम्भनस्वप्नाकुञ्चनाङ्कुशिकाः सञ्चरन्ति। अनिमित्तविविधवेदनाप्रादुर्भावो वा मुहुर्मुहुर्यत्रागच्छन्ति वेदनाविशेषास्तं वातिकमिति विद्यात्। ओषचोषपरिदाहधूमायनानि यत्र गात्रमङ्गारावकीर्णमिव पच्यते यत्र चोष्माभिवृद्धिः क्षते क्षारावसिक्तवच्च वेदनाविशेषास्तं पैत्तिकमिति विद्यात्। पित्तवद्रक्तसमुत्थं जानीयात्। कण्डूर्गुरुत्वं सुप्तत्वमुपदेहोऽल्पवेदनत्वं स्तम्भः शैत्यञ्च यत्र तं श्लैष्मिकमिति विद्यात्। यत्र सर्वासां वेदनानां समुत्पत्तिस्तं सान्निपातिकमिति। अत ऊर्द्ध्वं व्रणवर्णान् वक्ष्यामः। भस्मकपोतास्थिवर्णः परुषोऽरुणः कृष्ण इति मारुतजस्य। नीलः पीतो हरितः श्यावः कृष्णो रक्तः कपिल इति रक्तपित्तसमुत्थयोः। श्वेतः स्निग्धः पाण्डुरिति श्लैष्मिकस्य। सर्ववर्णोपेतः सान्निपातिकश्च इति। भवति चात्र “न केवलं व्रणेषूक्तो वेदनावर्णसंग्रहः। सर्वशोथविकारेषु व्रणवल्लक्षयेद्भिषक्”।

व्रणहृ पुं० व्रणं हन्ति हन-ड। १एरण्डवृक्षे २गुडूच्याम् स्त्री शब्दच०।

व्रणाग्र पु०व्रणमग्राति अग्र-अण्। १वोले गन्धरसे २श्रग-न्धवृक्षे च राजनि०।

व्रत न० व्रज–घ जस्य तः। १भक्षणभेदे पयोव्रतादि० २पुण्य-साधने ३उपवासादिनियमभेदे च

व्रतञ्च सम्यक्सङ्कल्पजनितानुष्ठेयक्रियाविशेषरूपं तच्च प्रवृत्तिनिवृत्त्युभयरूपं तत्र द्रव्यविशेषभोजनपूजादिकं प्रवृत्तिरूपम् उपवासादिकञ्च निवृत्तिरूपं तच्च नित्यं नैमित्तिकं काम्यञ्च। नित्यमेकादश्यादिगतम् नैमित्तिकं चान्द्रायणादिगतं काम्यं तत्तत्तिथ्युपवासादिरूपं “व्यस्तके व्रतसाधनं कर्म कर्त्तव्यमधिकारिणा। निष्कामेण सदा वीर ! काम्यं कामान्वितेन च” भविष्यपु०। सम्यक् व्रतम् कल्पादिना संबाधनं यथाविहितं साधनं यत्र। अधिकारिणा अर्थिना समर्थेन विदुषा चेत्यर्थः। तत्र व्रतारम्भकालः हेमा०व्र० दर्शितो यथा

अथ व्रतारम्भकालः। तत्र सत्यव्रतः “उदयस्था तिथिर्या हि न भवेद्दिनखण्डभाक्। सा खण्डा न व्रतानां स्यादारम्भे च समापने” इति। एतद्व्रतिरिक्तायामखण्डायां प्रारम्भमाह वृद्धवसिष्ठः “अखण्डव्यापिमार्त्तण्डा यद्यखण्डा भवेत्तिथिः। व्रतप्रारम्भणन्तस्यामनष्टगुरुशुक्रयुग्मिति”। तिथिवैशिष्ट्यनष्टगुरुशुक्रयुक् अनस्तमितगुरुशुक्रयुक्ता तस्यां व्रतप्रारम्भणीयमित्यर्थः, इदमुपलक्षणम्। गुरुशुक्रयोर्बाल्ये वार्द्धक्येऽपि व्रतप्रारम्भणीयमित्यर्थः। तथा च वृद्धगर्गसंहितायां “अग्न्याधानं प्रतिष्ठाञ्च यज्ञदानव्रतानि च। वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः। माङ्गल्यमभिषेकञ्च मलमासे विवर्जयेत्। बाले वा यदि वा वृद्धे शुक्रे वाप्यस्तगे गुरौ। मलमास इवैतानि वर्जयेद्देवदर्शनम्” इति। गार्ग्योऽपि “नामाद्यप्राशनश्चौडं विवाहं मौञ्जिबन्धनम्। निष्क्रमं जातकर्मापि काम्यं वृषविसर्जनम्। अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे। उद्यापनमुपारम्भं व्रतानां नैव कारयेत्” इति। लल्लः “नीचस्थे वक्रसंस्थे ह्यतिचरणगते बालवृद्धास्तगे वा संन्यासो देवयात्रा व्रतचरणविधिः कर्णवेधस्तु दीक्षा। मौञ्जीबन्धोऽथ चूडा परिणयनविधिर्वास्तुदेवप्रतिष्ठा वर्ज्याः सद्भिः प्रयत्नात् त्रिदशपतिगुरौ सिंहराशिस्थिते च” इति। नीचत्वञ्च ज्योतिःशास्त्रे “अर्कादितुङ्गमजगोमकराः क्रमात् स्युः। लोकर्किमीनवणिजोत्तगमञ्च नीचम्” इति। उच्चस्थानात् सप्तमं नीचमित्यर्थः। तथा च

नीचस्थे गुरौ मकरगते द्रष्टव्यः । शौनकः "पूर्त्तारामविवाहव्रतग्रहणं चौराद्यपर्व्वमथ विद्यादेवविलोकनोपनयनं दीक्षापरीक्षा व्रतम् । स्नानं तीर्थगमं दवं सुरतडागादानप्रतिष्ठापनम् । सिंहस्थे विबुधार्चिते न शुभदं कर्त्तुं तथा स्वर्गगे" । अवस्थान्तु सिद्धान्ते "रविणास्तमितस्त्वेषां यत्रायामस्त उच्यते । ततोऽर्व्वाक् वार्द्धकं विद्यादूर्द्ध्वं बाल्यं प्रकीर्त्तितम्" इति । एतयोरवधिः ज्योतिःशास्त्रेऽनेकविधो दर्शितः "बालः शुक्रो दिवसदशकं पञ्चकञ्चैव वृद्धः पश्चादस्तङ्गत उदितः पञ्चमोऽर्द्धः क्रमेण । जीवो वृद्धः शिशुरपि सदा पक्षमेकं हि तौ द्वौ प्रोक्तौ दिवसदशकञ्चापरैः सप्तरात्रम्" इति । एतेषां पक्षाणां व्यवस्था देशान्तरविषया आपद्विषया वा । तथा च मार्त्तण्डः "शुक्रो गुरुः प्राक् परतश्च बालो [illegible] दशाहानि [illegible] सप्तरात्रम् । वङ्गेषु हूणेषु च षट् च पञ्च शेषे च देशे त्रिदिनं वदन्ति" इति । वराहमिहिरोऽपि "बहवो दर्शिताः काला ये बाल्ये वार्द्धकेऽपि च । आद्यास्तत्राधिकाः श्रेष्ठा देशभेदादुतापदि" इति ।

व्रतानां मानसादिभेदस्तत्र दर्शितो यथा

वराहपुराणे "अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्मषम् । एतानि मानसान्याहुर्व्रतानि व्रतधारिणाम् । एकभक्तं तथा नक्तमुपवासादिकञ्च यत् । तत्सर्व्वं कायिकं पुंसां व्रतं भवति नान्यथा" । उपवासोऽत्राहोरात्राभोजनम्, आदिशब्दादयाचितादि । तथा "किञ्चिद् व्रत वा क्रियते पूज्यते यत् त्रिलोचन ! । विप्रेभ्यो दीयते सर्व्वमेतज्जन्मान्तरेः फलम्" ।

व्रतभेदफलादिकं तत्रोक्तं यथा गरुडपुराणे

"तपोगतिर्हि भूतानां तप एव परायणम् । तपसा विजिता लोकास्तपसा निर्वृतिः सताम् । तपसा धूतपाप्मानो निर्वाणं परमं गताः । तपसा परमायुश्च शान्तिं चापि तथाप्नुयात् । तपसा विन्दते लोकानविनाशानपि पूरुषः । तपसा परब्रह्मन्ति निर्व्वाणमपि शाश्वतम् । तपसा चैन्द्रिकीं सिद्धिं विपुलामपि विन्दति । लभन्ते च सुतादींस्तु तपसा मर्त्त्यजातयः । सन्ततञ्च धनञ्चायुस्तपसश्च नरा भुवि । व्रतोपवासनियमैः शरीरोत्तापनं तपः । अश्नंस्तु दिवा तिष्ठेदुपविष्टस्तथा निशि । एतद्वीरासनं प्रोक्तं महापातकनाशनम् । एकभक्तेन नक्तेन तथैवायाचितेन च । उपवासेन दैवेन पादकृच्छ्रः प्रकीर्त्तितः" । कूर्म्मपुराणे "व्रतोपवासनियमैर्होमैर्ब्राह्मणतर्पणैः । आराधय महायोगैर्योगिनां हृदि संस्थितम्" । ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव द्विजोत्तम ! अर्च्चयन्ति महादेवं यज्ञदानसमाधिभिः । व्रतोपवासनियमैर्होमैः स्वाध्यायतर्पणैः । तेषां वै रुद्रसायुज्यं सामीप्यञ्चातिदुर्लभम् । सलोकता च सारूप्यं जायते तत्प्रसादतः" । गरुडपुराणे "धुन्धुमारस्तु राजर्षिर्लेभे पुत्रशतं पुरा । दानेन नियमैश्चैव तपसा च व्रतेन च । सगरो नाम राजर्षिर्दिक्षु सर्व्वासु विश्रुतः । पुत्राणाञ्च शतं प्राप्तं तेन राज्ञा महात्मना । तथा दशरथो राजा व्रतेषु निरतः सदा । यज्ञदानतपोयोगैः सन्तुष्टः पुरुषोत्तमः । स्वयं पुत्रत्वमापेदे तस्य राज्ञो महात्मनः । जनको नाम राजर्षिस्तपोव्रतनिधिः स्मृतम् । ऐश्वर्य्यमतुलं प्राप्य योगिनां गतिमाप्तवान् । एवमेव महाराज ! राजानो ब्राह्मणास्तथा । ऐश्वर्य्यमतुलं प्राप्नुवन्ति वै व्रतवैभवात् । अतः कुरुष्व सततं तपःसंयममात्मवान् । व्रतोपवासनिरतस्तोयानि जपसत्तम !" । तथा "विनिग्रहश्चेन्द्रियाणां कुर्व्वीत नियमात्मवान् । उपवासजपध्यानतीर्थस्नानादिकैरपि । व्रतैर्यज्ञेन दानेन तपसा तीर्थसेवया । अनेकजन्मसंसिद्धिमेनःक्षपयति द्विजः" । व्रतादीनां चातुर्व्वर्ण्यसाधारणत्वाभिधानात् द्विजपदञ्चात्र वर्णमात्रोपलक्षणार्थम् । न चैवं सति शूद्रस्य यज्ञेऽनधिकारादुपक्रमवाक्यविरोध इति वाच्यम् । यज्ञेरनेकार्थत्वेन देवतापूजाद्यर्थसम्भवात् । "कायिकं मानसञ्चैव वाचिकञ्च त्रिधा व्रतम् । यथोदानं तपश्चैव वदतस्तच्छृणुष्व मे । अहिंसा व्रतचर्य्या च तपः कायिकमुच्यते । वाचिकं सत्यवचनं भूतद्रोहविवर्ज्जितम् । मानसं मनसः शान्तिः सर्व्ववैराग्यलक्षणम्" । आदित्यपुराणे "व्रतोपवासान् सततु यो विप्रस्ते दारिद्र्यपाशं स भिनत्ति पापी । व्रतोपवासेषु रतस्य पुंसश्चैवापदः शान्तिमुपयन्ति तज्ज्ञाः" ।

व्रतसामान्यधर्म्मास्तदधिकारिणश्च तत्र दर्शिता यथा

स्कन्दपुराणे "निजवर्णाश्रमाचारनिरतः शुद्धमानसः । व्रतेष्वधिकृतो राजन्नन्यथा विफलः श्रमः । अलुब्धः सत्यवादी च सर्व्वभूतहिते रतः । व्रतेष्वधिकृतो राजन्नन्यथा विफलः श्रमः । श्रद्धावान् पापभीरुश्च मददम्भविवर्जितः । व्रतेष्वधिकृतो राजन्नन्यथा विफलः श्रमः । समः सर्व्वेषु भूतेषु शिवभक्तो जितेन्द्रियः । व्रतेष्वधिकृतो राजन्नन्यथा विफलः श्रमः । पूर्व्वं निश्चित्य पौरवार्थं

यथावत् कर्म्मकारकः । अवेदनिन्दको धीमानधिकारी व्रतादिषु” । महाभारते “आनृशंस्यं तपश्चैव सत्यमक्रोध एव च । स्वेषु दारेषु सन्तोषः शौचं नित्यानसूयता । आत्मज्ञानं तितिक्षा च धर्म्मः साधारणो नृप!” देवलोऽपि “व्रतोपवासनियमैः शरीरोत्तापनैस्तथा । वर्णाः सर्व्वेऽपि मुच्यन्ते पातकेभ्यो न संशयः” इति । तदेवं वचनसन्दर्भैर्वोक्तनियमवतां चतुर्णामपि वर्णानां स्त्रीशूद्रसाधारण्येन व्रतेष्वधिकार इति प्रतिपाद्यते । तथा च भारते(गीता) “मामुपाश्रित्य कौन्तेय! येऽपि स्युः पापयोनयः । स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्” इति । तत्रायं परोविशेषो यत् स्त्रीणां भर्त्तुराज्ञां विना न स्वातन्त्र्येण व्रतादिष्वधिकार इति । तथा च मार्कण्डेयपुराणे “नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाप्युपोषणम् । भर्त्तृशुश्रूषयैवैता लोकानिष्टान् व्रजन्ति हि । यद्देवेभ्यो यच्च पित्रादिकेभ्यः कुर्य्याद्भर्त्ताभ्यर्च्चनं सत्क्रियाञ्च । तस्यार्द्धं वै सा फलं नान्यचित्ता नारी भुङ्क्ते भर्त्तृशुश्रूषयैव । धर्म्मार्थकामसंसिद्धौ भवेद्भर्त्तुः सहायिनी” । आदित्यपुराणे “नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् । पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते । पत्युरभ्यधिकं नारी नोपवासव्रतञ्चरेत् । अनायुष्यं द्विजश्रेष्ठ! प्रत्युतस्यास्तदुच्यते । देवताराधनं कुर्य्यात् कामं वा प्राकृतोत्तमः । नारी पतिव्रता नाम प्राप्यानुज्ञान्तु भर्त्तृतः । नारी खल्वननुज्ञाता पित्रा भर्त्रा सुतेन वा । विफलं तद्भवेत्तस्या यत्करोत्यौर्द्ध्वदैहिकम्” । पित्रेति कन्यात्वे । भर्त्रेति सौभाग्यदशायाम् । सुतेनेति वैधव्यदशायाम् । और्द्ध्वदैहिकं व्रतादि । “अथ वा सर्व्वतः व्रतञ्च पतिपूजनतत्परा । केशवाराधनं कुर्य्यात् साध्वी स्त्री पुरुषर्षभ! । तेनैव स्वर्गमाप्नोति यत् किञ्चिन्मनसेच्छति । अफलं सर्व्वमेव स्यात् भर्त्तुराज्ञां विना व्रतम् । केशवाराधनं यच्च तथापि सफलं स्त्रियः” । हरिवंशे “व्रतोत्सवधर्म्मचरणं यच्चा नित्यमनुष्ठितम् । पुण्यकानां विधिस्तस्याः पुराणे परिकीर्त्तितः । दानोपवासपुण्यानि व्रतान्यप्यरुन्धति! । निःफलान्यव्रतीनां हि पुण्यकानि तथा शुभे” । पुण्यकानि व्रतानि । “या नार्च्चयन्ति भर्त्तारं योषिद्दुष्टाश्च याः स्त्रियः । योनिदोषात् पुण्यफलं नाप्नुवन्ति निरयङ्गताः । साध्व्यो लम्भयन्ति सुव्रताः पतिदेवताः । अनन्यधर्म्मनिरताश्च सतां पन्थानमाश्रिताः । अवाग्दुष्टाः शौचयुक्ताः धृतिमत्यः शुचिव्रताः । सततं साधुवादिन्यो धारयन्ति जगत् सदा । व्याधितः पतितो वापि निर्द्धनो वा कथञ्चन । न वक्तव्यः स्त्रिया भर्त्ता धर्म्म एष सनातनः । अकार्य्यकारिणं वापि निर्गुणं स्त्री पतिं तथा । तारयत्येव साध्वी सा तथात्मानं शुभानने! । योनिदुष्टस्त्रियो नास्ति प्रायश्चित्तं कृतैव वा । शास्त्रे विहितं सद्भिः प्रायश्चित्तं पुरातनैः । भर्त्तुश्छन्देन कर्त्तव्यं व्रतकं सर्व्वदा स्त्रिया । उपवासोऽपि वा सत्ये! काङ्क्षन्त्या तु शुभां गतिम् । युगान्तरसहस्रेषु न स्त्री सा लभते गतिम् । तिर्य्यग्योनिसहस्रेषु पच्यते योनिविभ्रमात् । यदि ज्ञानात् मानुष्यं स्त्री लभेद्व्रती सती । चण्डालयोनौ दुर्मेधा जायते कुक्कुरानना । भर्त्ता देवः सदा स्त्रीणां स्त्रीभिर्दृष्टः सनातने । यस्मा हि तुष्यते भर्त्ता सा सती धर्म्मचारिणी । कौतूहलकृतानान्तु स्त्रीणां लोको न शोभनः । भर्त्तर्य्येव मनो यासां सद्भावेन व्यवस्थितम् । कर्म्मणा मनसा वाचा पतिं नातिचरन्ति याः । तासां पुण्यफलं सौम्ये! पुण्यकैः समुदाहृतम् । पुण्यकानां विधिं सम्यक् स्त्रीणां प्रति शोभने! । निबोध च हि सर्व्वं हि दृष्टोऽयं तपसा मया । स्नात्वा स्त्री प्रातरुत्थाय पतिं विज्ञापयेत् सती । उपवासार्थमथ वा व्रतकार्य्यं कृतव्रते! । मृदा कराभ्यां चरणौ सततं वस्तकञ्च च । स्फटिकौदुम्बरं पात्रं प्रकुर्य्यं साक्षतं तथा । गोशृङ्गं दक्षिणाविष्णुं प्रतिगृह्णीत तज्जलम् । ततो भर्त्तुः सती दद्यात् स्नातस्य प्रयतस्य च । आत्मनाऽप्य निषेव्य ततः शिरसि तज्जलम् । लोकोक्ते सर्व्वतीर्थेषु स्नानमेतदुदाहृतम् । उपवासेषु सर्व्वेषु व्रतकेषु च । स्नानमेतद्धि सामान्यं स्त्रीणां तु वारा भामिनि! । अरुन्धति! मया दृष्टं तपसा फलतोऽधिकम् । अमूल्यं विद्धि सवनमायवस्य तथाविधम् । स्वयं प्रक्षालनं चापि पादयोरनुशब्दितम्” । अनुशब्दितं व्रतोपयोगितया कथितम् । “अश्रुप्रपातो रोषश्च कलहस्य मतिः सति! । उपवासात् व्रताद्वापि पद्योभ्रंशयति स्त्रियम् । शुक्लमेव सदा वासः पवित्रं चन्द्रसन्निभे! । अन्तर्व्वासोऽपरश्चैव उपवासव्रते तथा । पादुकार्य्यश्च वै कार्य्यः सर्व्वदा व्रतके सति । उपवासेऽपि च विधिरेष एव प्रकीर्त्तितः । अञ्जनं रोचनञ्चापि गन्धान् सुमनसस्तथा । व्रतके चोपवासे च नित्यमेव विवर्ज्जयेत्” । रोचनं हस्तादिना, मद्योत्वालीकरणम् । “दन्तकाष्ठ

शिरःस्नानमुद्वर्त्तनमथापि वा । विवर्ज्जितो मदं सर्व्वं शौचार्थन्तु विधीयते । तिलामलकपर्णैश्च श्रीफलेन समाचरेत् । स्नानञ्च शिरसः सदा मन्त्राभिमन्त्रितैर्जलैः । शिरसोऽभ्यञ्जनं सौम्ये ! नैवमेतत् प्रशस्यते । न पादयोर्न गात्रस्य कर्त्तव्येनेति स्थितिः स्मृता । गोयानमुष्ट्रयानञ्च कथञ्चिदपि नाचरेत् । खरयानञ्च सततं व्रते चाप्युपवासके । नदीजलं प्रस्रवणं सरः वै सोमनन्दिनि ! शुभे तड़ागे वाप्यादौ विस्तीर्णे जलजावृते । गत्वा स्नानं प्रयत्नन्तु सदैव खलु सर्व्वथा । अलाभे त्वस्वस्था स्त्री घटस्नानं समाचरेत् । नवैश्च कुम्भैः स्नातव्यं विधिरेष सनातनः । स्नानञ्च कार्य्यं शिरसा तपःफलमवाप्नुयात्" । भविष्यत्पुराणे "क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः । देवपूजाग्निहवनं सन्तोषः स्तेयवर्ज्जनम् । सर्व्वव्रतेष्वयं धर्म्मः सामान्यो दशधा स्थितः" । अत्र क्षमादीनां स्वतन्त्रतया चतुर्व्वर्गसाधनत्वेन विहितानां व्रताङ्गतयाऽभिधानं खादिरं वीर्य्यकामस्येत्यादिवत् संयोगपृथक्त्वन्यायादुपपन्नम् । मत्स्यपुराणे "तस्मात् कृतोपवासेन स्नानमभ्यङ्गपूर्व्वकम् । वर्ज्जनीयं प्रयत्नेन रूपघ्नं तत्परं नृप !" । यदुक्तं गरुड़पुराणे "गन्धालङ्कारवस्त्राणि पुष्पमालानुलेपनम् । उपवासे न दुष्यन्ति दन्तधावनमञ्जनम्" इति यच्च व्यासोक्तम् "दन्तधावनपुष्पादि व्रतेऽपि न दुष्यति" । तदेतत् सभर्त्तृकोपवासविषयम् । भविष्यत्पुराणे "अञ्जनञ्च सताम्बूलं सिन्दूरं रत्नवाससी । विधवायास्तूपवासेऽपि वैधव्यकरं परम् । विधवा यतिमार्गेण कुमारी वा यदृच्छया" पद्मपुराणे "गर्भिणी सूतिकादिश्च कुमारी चाथ रोगिणी । यदा शुद्धा तदान्येन कारयेत् प्रयता स्वयम्" । गर्भिण्यादिरुपवासे कर्त्तव्ये नक्तं कुर्य्यात् । सूतकादिभिरशुद्धा अन्येन व्रतं कारयेत् । प्रयता शुद्धा, स्वयं कुर्य्यात्, पुंसोऽप्येष विधिः लिङ्गस्याविवक्षितत्वात् तदेवं स्त्रीणां कन्यादशायां पित्रादेराज्ञया, विवाहितानां भर्त्तुराज्ञया, विधवानां पुत्राद्याज्ञयैव व्रताधिकारो नान्यथेति विधम्" । अग्निपुराणे "व्रीहिषष्टिकमुद्गाश्च कलायाः सतिलं पयः । श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः । कूष्माण्डालावुवार्त्ताकुपालङ्क्यो ज्योत्स्निकां त्यजेत् । चरुभैक्ष्यं सक्तुकणाः शाकं दधि घृतं मधु" । श्यामाकाः शालिनीवारा शाकं मूलपत्रादिकम् । "हविष्यव्रतनक्तादावग्निकार्य्यादिकं हितम् । मधु मांसं विहायान्यद् व्रते च हितमीरितम्" । ति॰त॰ । दयादीनामुपवासगुणतयातदङ्गत्वम् एका॰त॰ दर्शितं यथा व्रते गुणानाह गोतमः "दया सर्व्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहा चेति" । दयादिलक्षणान्याह बृहस्पतिः "परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा । आत्मवद्वर्त्तितव्यं हि दयैषा प्रकीर्त्तिता" । परे उदासीने । आपत्सु रक्षितव्यन्त्विति कल्पतरौ पाठः । आत्मवदित्यस्यार्थमाह दक्षः "यथैवात्मा परस्तद्वद्द्रष्टव्यः सुखमिच्छता । सुखदुःखानि तुल्यानि यथात्मनि तथा परे" । बृहस्पतिः "बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित् । न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता । न गुणान् गुणिनो हन्ति स्तौति मन्दगुणानपि । नान्यदोषेषु रमते साऽनसूया प्रकीर्त्तिता । अभक्ष्यपरिहारस्तु संसर्गश्चाप्यनिन्दितैः । स्वधर्मे च व्यवस्थानं शौचमेतत् प्रकीर्त्तितम् । शरीरं पीड्यते येन सुशुभेनापि कर्म्मणा । अत्यन्तं तन्न कुर्व्वीत अनायासः स उच्यते । प्रशस्ताचरणं नित्यमप्रशस्तविवर्ज्जनम् । एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः । स्तोकादपि च दातव्यमदीनेनैव चात्मना । अहन्यहनि यत् किञ्चिदकार्पण्यं हि तत् स्मृतम् । यथोत्पन्नेन सन्तोषः कर्त्तव्योऽप्यल्पवस्तुना । परस्य चिन्तयित्वार्थं साऽस्पृहा परिकीर्त्तिता" । देवीपुराणम् । "तद्ध्यानं तज्जपः स्नानं तत्कथाश्रवणादिकम् । उपवासकृतो ह्येते गुणाः प्रोक्ता मनीषिभिः" ।

व्रतकालविवेकोऽत्र विशेष उक्तो यथा "दीर्घकालानुपालनीयतत्तत्तिथिकर्त्तव्यताकलापोपहितनियतसङ्कल्पविषयो व्रतमिति व्रतलक्षणम् । व्रतानां सङ्कल्पसम्भवत्वमाह मनुः "सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः । व्रता(पुंस्त्वमार्षम्)नियमधर्म्माश्च सर्व्वे सङ्कल्पजाः स्मृताः" । व्रतारम्भप्रतिष्ठाकालमाह ज्योतिषम् "गुरोर्भृगोरस्तबाल्ये वार्द्धक्ये सिंहगे गुरौ । गुर्व्वादित्ये दशाहे च पक्षिणीवाहर्विंशके । दिने, प्राप्यायनायातातिचारिगुरुवत्सरे मासाधिगन्तृजीवस्य चातिचारे त्रिपक्षके । कल्याद्य कृत सप्ताहे नीचस्थेऽथ मलिम्लुचे । भानुतत्कृते चापि चैव राहुयुते गुरौ । पौषादिकचतुर्मासे चरचाङ्कितवर्ज्जिते । हर्षेनाद्या चैकदिने द्वितीयेन दिनत्रये । तृतीयेन तु सप्ताहे मासस्थानि जिजीविषुः । विद्यारम्भं कर्णवेधं चूड़ापनयनोद्वहान् । तीर्थयानमनारम्भं तथा

नादिष्टरेवच । परीक्षारामयज्ञांश्च पुरश्चरणदीक्षणे । व्रतारम्भप्रतिष्ठे च स्वर्णाद्याप्रवेशने । प्रतिष्ठारम्भणे देवकूपादेर्वर्जयन्ति च । द्वात्रिंशद्दिवसानन्ते जीवस्य भार्गवस्य च । द्वादशप्रतिपत्तस्य पादान्ते द्वादश क्रमात् । पक्षात् प्राक् पश्चयोः पक्षं गुरोर्बार्द्धक्यबाल्यते । पक्षं वृद्धो महान्ते तु भार्गवोऽसौ दशाह्निकः । पादान्ते तु दशाहानि वृद्धो बालो दिनत्रयम्" । सिंहस्थ गुरौ विशेषस्तु ज्योतिःकौमुद्याम् "गङ्गाया उत्तरे तीरे गिरिराजस्य दक्षिणे । सिंहस्थं मकरस्थञ्च गुरुं यत्नेन वर्जयेत्" इति । अथ व्रतानुष्ठानं तत्र देवलः "अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः । सूर्य्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत्" । अत्र प्रातर्व्रतमाचरेदित्यन्वयः तत्राहारमभुक्त्वा इति पूर्व्वदिने एकभक्तं कृत्वा इत्यर्थकम् दिवारात्रभोजनद्वयस्यैवान्तरनिषेधे कतरस्याव-शीयमानत्वात् । स्वगृहीतव्रताकरणे छागलेयः "यो गृहीत्वा व्रतं मोहात् नाचरेत् काममोहितः । जीवन् भवति चाण्डालो मृतः श्वा चैव जायते" । अत्र प्रायश्चित्तमाह मात्स्यपुराणम् "क्रोधात् मोहात् प्रमादाद्वा व्रतभङ्गो भवेद्यदि । उपवासत्रयं कुर्य्यात् कुर्य्याद्वा केशमुण्डनम् । प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत्" । वाशब्दः समुच्चये तेन मुण्डनञ्च कुर्य्यादित्यर्थः । प्रमादात् व्रताकरणे प्रतिप्रसवमाह देवलः "सर्व्वभूतभयं व्याधिः प्रमादो गुरुशासनम् । अव्रतघ्नानि कथ्यन्ते सकृदेतानि शास्त्रतः" । आरम्भानन्तरमशौचं न प्रतिबन्धकम् "व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्च्चने जपे । आरब्धे सूतकं न स्यादनारब्धे तु सूतकम्" विष्णूक्तेः । व्रतारम्भः सङ्कल्प एव तत्रैवोक्तः । आरब्धव्रतस्य समापनं विना मरणे तत्फलप्राप्तिरपीत्याहाङ्गिराः "यो यदर्थं चरेद्धर्ममसमाप्य मृतो यदि । स तत्पुण्यफलं प्रेत्य प्राप्नोति मनुरब्रवीत्" । प्रेत्य परलोके । अशक्तौ जलादिपाने दोषाभावमाह बोधायनः "अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्" । गर्भिण्यादौ विशेषमाह मात्स्यपुराणम् "गर्भिणी सूतिका नक्तं कुमारी च रजस्वला । यदा शुद्धा तदान्येन कारयेत् क्रियते सदा" । अशुद्धा पूजादिकं कारयेत् कायिकमुपवासादिकं सदा अशुद्धा शुद्धा वा स्वयं कुर्य्यात् । उपवासाशक्तौ नक्तं कुर्व्वीत । "उपवासेष्वशक्तानां नक्तं भोजनमिष्यते" इति वचनात् । व्रतदिने वर्ज्यान्याह हा-रीतः "पतितपाषण्डनास्तिकसम्भाषानृताभिधानादिकमुपवासदिने वर्जयेत्" । तथा कूर्म्मपुराणम् "दक्ष्यामा-न्यकं स्मृतिं पतितञ्च रजस्वलाम् । न स्पृशेन्नाभिभाषेत नेक्षेत हरिवासरे" । व्रतानुष्ठानकालश्च तत्तत्तिथि-विहितपूजाप्रधानकालपूर्व्वाह्णे प्राप्ततिथिग्राह्यता यथा नरसिंहपुराणम् "दैवकार्य्यन्तु पूर्व्वाह्णे मनुष्याणाञ्च मध्यमे । अपराह्णे पितॄणाञ्च कार्य्याण्येतानि यत्नतः" इति तथा श्रुतिरपि "पूर्व्वाह्णो वै देवानां मध्यन्दिनं मनुष्याणा-मिति" । उभयदिने पूर्व्वाह्णलाभे विशेषवचनं विना युग्मादिवचनाद्व्यवस्था" । संक्रान्तिनिमित्तं तत्तत्संक्रान्तिपुण्य-काल एव कार्य्यम् । "रवेः सङ्क्रमभागो यः स कालो रविसंक्रमः" इत्युक्तेः संक्रान्तिकालस्यातिसूक्ष्मत्वेन कर्म्मा-नर्हतया संक्रान्तिपदस्य लक्षणया तत्परत्वात् । अत्र तु "वृश्चिकस्य तु संक्रान्त्यां पुत्रकामा व्रतं चरेत्" इति भविष्यपुराणीयेन कार्त्तिकेयव्रतस्य संक्रान्तिविहितत्वे-ऽपि "सायंकाले समारोप्य प्रातःकाले विसर्जयेत्" इति भविष्यपुराणीयेन पूजाया रात्रिमात्रकर्त्तव्यत्वाभिधा-नात् तदङ्गोपवासस्य चाहोरात्रसाध्यतया पुण्यकाले तदसम्भवात् तद्युक्ताहोरात्र एव कर्त्तव्यत्वम् । अतश्च सम्पूर्णाहोरात्रात् परं वृश्चिकसंक्रान्तौ परदिने पूर्व्वयाम-द्वयस्य पुण्यकालत्वेन तद्युक्ताहोरात्र एव कार्त्तिकेयव्रतं कर्त्तव्यम् दिवा तदङ्गस्नानादेः व्रतत्वेन प्रातरारम्भार्ह-त्वात् तदङ्गोपवासस्य प्रातरारम्भार्हत्वाच्च । अन्यान्यव्रतेषु युग्मवचनेन शुक्लपक्षकृष्णपक्षादिभेदेन वा तिथिविवेकोक्ता व्यवस्थाऽनुसरणीया ।

व्रतप्रतिष्ठाकालश्च पूर्व्वोक्तेन "गुर्व्वोर्गोरस्तबाल्ये वार्द्धक्ये सिंहगे गुरौ" इत्यादिवचनेनोक्तगुरुशुक्रास्तमयादिभिन्नः शुद्धसमय एव कालः । तत्र "सर्व्वेषूक्तेषु कर्त्तव्या प्रतिष्ठा विधिना बुधैः । फलार्थिभिरप्रतिष्ठं यस्मान्निष्फलमुच्यते" इति हयशीर्षपञ्चरात्रीयवचनेऽकरणे निष्फलत्वश्रुतेः प्रतिष्ठा नित्या सा च न व्रताङ्गं किन्तु कर्म्मान्तरम् । "समाप्ते तु व्रते कार्य्या प्रतिष्ठा तदनन्तरम्" ब्रह्मपुराणात् । इत्थञ्च तद्दिनेऽशौचादौ यथा न व्रतानुष्ठानं तथा समयाशुद्धावपि नानुष्ठानम् । यत्तु "समाप्ते तु व्रते तत्र प्रतिष्ठा तदनन्तरम् । न कालनियमस्तत्र विप्रे परावृद्दिके" इति तदसम्पूर्णदिवसे समयाशुद्धावपि प्रतिष्ठाविधायकं वचनं तत् कामधेनु-कल्पतरुकारादिभिरलिखितत्वादनादरम् । अथ व्रत

मासपक्षादिकालविशेषनियन्त्रितं काम्यं तस्यैव प्रतिष्ठा यत् पुनर्नित्यं कालविशेषानियन्त्रितन्तस्य न तस्य प्रतिष्ठा पूर्वोक्त हयशीर्षीये काम्यफलार्थिभिरित्यनेन काम्यस्यैव प्रतिष्ठाविधानात् कालविशेषानियन्त्रिते तदसम्भवात्" ।

व्रतभेदाश्च नानापुराणोक्तास्तत्र हेमा० व० खण्डोक्ता अकारादिवर्णाद्यक्षरपूर्वकशब्दानुसारेणात्र कर्त्तव्यकालसहिताः प्रदर्श्यन्ते तेषामितिकर्त्तव्यता च तत्र द्रष्टव्या ।

अक्षयतृतीयाव्रतं भविष्योत्तरोक्तम् । "वैशाखस्य सितामेकां तृतीयामक्षयां शृणु । तस्यां स्नानं जपो होमः स्वाध्यायः पितृतर्पणम् । दानञ्च क्रियते किञ्चित् तत् सर्वं स्यादिहाक्षयम् । आदिः कृतयुगस्येयं युगादिस्तेन कथ्यते । सर्व्वपापप्रशमनी सर्व्वसौख्यप्रदायिनी" ।

अक्षयफलावाप्तिफलकाक्षयतृतीयाव्रतं विष्णुधर्म्मोत्तरोक्तम् । "वैशाखशुक्लपक्षे तु तृतीयायामुपोषितः । अक्षयं फलमाप्नोति सर्व्वस्य सुकृतस्य तु । सा तथा कृत्तिकोपेता विशेषेण तु पूजिता । तत्र दत्तं हुतं जप्तं सर्व्वमक्षयमुच्यते । अक्षया सा तिथिस्तस्यास्तस्यां सुकृतमक्षयम् । अक्षतैः पूजितो विष्णुस्तेन सा त्वक्षया स्मृता । अक्षतैस्तु नरः स्नातो विष्णोर्द्दत्त्वा तथाऽक्षतान् । सक्तून् सुसंस्कृतांश्चैव हुत्वा चैव तथाक्षतान् । विप्रेषु दत्त्वा तानेव तथा सक्तून् सुसंस्कृतान् । पक्वान्नन्तु महाभाग ! फलमक्षयमश्नुते । एकामप्युक्तां कृत्वा च तृतीयां भृगुनन्दन ! । एतावत्तु तृतीयानां सर्व्वासान्तु फलं लभेत्" ।

अखण्डैकादशीव्रतं वामनपु० उक्तम् । "मासि चाश्वयुजे ब्रह्मन् ! यदा पद्मजसन्निधिः । नाभ्यां निर्य्याति जगतामीशितुश्चक्रधारिणः । तस्मिन् रम्ये शुभे काले या शुक्लैकादशी भवेत् । तस्यां सम्यग्यजेद्विष्णुं येन खण्डं प्रपूर्य्यते" । येन विष्णुप्रपूजनेन खण्डमसम्पूर्णं धर्म्मादिभिः परिपूर्णम्भवतीत्यर्थः" ।

अग्निचतुर्थीव्रतं विष्णुधर्म्मोत्तरोक्तम् । "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव ।। चतुरात्मा हरिः प्रोक्तश्चत्वारश्च हुताशनाः । आहिताग्निर्द्विजो यस्य विद्यतेऽग्निचतुष्टयम् । सोपवासश्चतुर्थ्यान्तु शुक्लपक्षस्य फाल्गुने । अभ्यर्च्य चतुरात्मानं वासुदेवमतन्द्रितम् । तथा दद्याद् द्विजेन्द्राय तिलप्रस्थानि षोडश । सुवर्णञ्च सुवर्णस्य वस्त्रं चतुर्णामपि" ! सुवर्णं कर्षन्यूनम् "एवं संवत्सरं कृत्वा व्रतमेतदतन्द्रित । सर्व्वकामसमृद्धस्य यज्ञस्य फलमश्नुते" ।

अघोराख्यचतुर्द्दशीव्रतं भविष्योत्तरे "भाद्रे चासिते पक्षे अघोराख्या चतुर्द्दशी । तामुपोष्य नरो याति शिवलोकमयत्नतः" ति०त० ।

अङ्गारकचतुर्थीव्रतं मत्स्यपु० उक्तम् । "चतुर्थ्यङ्गारकदिने यदा भवति भारत ! । मृदा स्नानं तदा कुर्य्यात् पद्मरागविभूषितः । अग्निर्मूर्द्धा दिवो मन्त्रं जपंस्तिष्ठेदुदङ्मुखः । शूद्रस्तूष्णीमपन् जोषमास्ते भोगविवर्जितः" ।

अचलासप्तमीव्रतं भविष्योत्तरोक्तम् । "माघस्य सितसप्तम्यां सर्व्वकामफलप्रदम् । रूपसौभाग्यजननं स्नानं कुरु वरानने ! । कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलम् । रात्र्यन्ते चालयेत्स्वं दत्त्वा शिरसि दीपकम् । माघस्य सितसप्तम्यामचलाख्यास्थितश्च यत् । एकभक्तेन चान्विष्टेत् षष्ठ्यां सम्पूज्य भास्करम् । सप्तम्यां च व्रजेत् प्रातः सुगम्भीरजलाशयम्" ।

अदारिद्र्यषष्ठीव्रतं स्कन्दपु० उक्तम् । "षष्ठी नाम तिथिर्यास्या सामान्या दैवतैरपि । एकभक्तेन नक्तेन तथैवायाचितेन च । उपवासेन दानेन तैलक्षारविवर्जितः । अयं हि भगवान् देवो भास्करस्य परद्युतिः । येन षीड्येव हन्येत तदशुद्धं चराचरम् । लोपतीयं व्रतं दिव्यमिह लोके फलप्रदम् । यस्मिन् कृते व्रते चैव दरिद्रो न भवेत् कुले । षष्ठीतिथिं समुद्दिश्य ब्राह्मणस्य च भोजनम् । शाल्योदनञ्च पयसि कृत्वा च शर्करायुतम् । वाकुल्यघृतसंयुक्तं वर्षमेकं प्रदापयेत् । कुले तस्यैव ये जाता ये भविष्यन्ति मानवाः । इह तस्यैव ये सन्ति तान् दारिद्र्यं न गच्छति" ।

अनघाष्टमीव्रतं भविष्योत्तरोक्तम् । "कृष्णाष्टम्यां मार्गशीर्षे दाम्भसं दर्भनिर्म्मितम् । अनघं चानघीञ्चैव लक्षणैः समन्वितम् । स्थापयित्वा शुभे देशे गोमयेनानुलेपिते । स्नात्वा समर्च्चयेत् पुष्पैः सुगन्धैश्चानुलेपनैः । अन्देवोक्तमन्त्रैश्च दशकं मनसा स्मरन् । अनघं वासुदेवन्तु पत्नीं तस्याश्रियं तथा । प्रद्युम्नादिसुतान् सर्वान् हरिवंशे यथोदितम् । वर्षमेकं ततः कृत्वा इदं तदनघं व्रतम्" ।

अनङ्गत्रयोदशीव्रतं भविष्योत्तरोक्तम् । "अनङ्गो भगवान् शम्भुस्तेजोमूर्त्तिरगोचरः । स एव देवो येनाख्यां तेनानङ्गत्रयोदशी । प्रसिद्धा समनुप्राप्ता लोके सर्व्वफलप्रदा । मार्गशीर्षेऽमले पक्षे त्रयोदश्यां समाहितः । स्नानं नद्यां तडागे वा गर्त्ते वा कूपतोऽपि वा । कृत्वाभ्यर्च्य महादेवं विधानाच्छशिभूषणम् । लिङ्गं स्वायम्भुवं भूतमसारे

यत्प्रतिष्ठितम् । तदनङ्गमिति प्रोक्तं पूजयेद्रतितो व्रती" । एतद् व्रतं तदवधि वर्षसाध्यम् ।

अनङ्गत्रयोदशीव्रतं कालोत्तरोक्तम् । "चैत्रशुक्लत्रयोदश्यामनङ्गं तु पटे लिखेत् । नीलदूर्वाङ्कुरश्यामं हस्तमात्रं प्रमाणतः । रतिप्रीत्युभयोपेतं पौष्पचापकचापधृक् । पटेषु सुस्थितः कार्य्यः सर्व्वैरप्सरसां गणैः" ।

अनन्तचतुर्द्दशीव्रतं भविष्योक्तम् "अनन्तव्रतमस्त्यन्यत्त्रिपावनमनुत्तमम् । सर्व्वपापहरं नृणां स्त्रीणां चैव युधिष्ठिर ! । शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे भवेत् । तस्यानुष्ठानमात्रेण सर्व्वपापाद्व्यपोहति" ।

अनन्ततृतीयाव्रतं पद्मपु॰ उक्तम् । "इत्युपावहिता देवि ! तवैवानन्तपुण्यकृत् । नराणामथ नारीणामाराधनमनुत्तमम् । नभस्ये वाथ वैशाखे मार्गशीर्षेऽथ वा पुनः । शुक्लपक्षे तृतीयायां स्नातः सन् गौरसर्षपैः । गोरोचनाऽथ गोमूत्रं मुस्तागोमयकं दधि । चन्दनेन च संमिश्र ललाटे तिलकं न्यसेत् । सौभाग्यारोग्यकृद्यस्मात् सदा च ललिताप्रियम् । प्रतिपक्षतृतीयायां पुमान् वाथ सुवासिनी । धारयेद्रक्तवस्त्राणि कुसुमानि सितानि च" ।

अनन्तद्वादशीव्रतं विष्णुरहस्योक्तम् । "द्वादश्यां शुक्लपक्षे च मासि भाद्रपदे नरः । नैवेद्यगन्धपुष्पाद्यैरर्च्चयेज्जलशायिनम् । स चाऽऽत्मदेहिकर्म्मस्थान् पापस्थान् पतिताक्षरान् । ज्ञात्वा अनन्तानन्तेति शतमष्टोत्तरं बुधः । व्रजंस्तिष्ठन् स्वपन् भुञ्जन् बुध्यन् प्रस्खलिते क्षुते । वेदनार्त्तः स्मरेन्नित्यमनन्तं मनसा गिरा । व्रतमेतद्विधानेन कुर्य्यात् संवत्सरं नरः" ।

अनन्तपञ्चमीव्रतं स्कन्दप्रभासोक्तम् । "यो नरः पूजयेद् नागं पञ्चम्यां फाल्गुने सिते । पञ्चोपचारविधिना मिताहारो जितेन्द्रियः । न तं दशन्ति फणिनो दश वर्षाणि पञ्च च । विषं न क्रमते तस्य कुले मातृकुलेऽपि च । तस्मात् तं पूजयेद् यत्नात् पञ्चम्यां च विशेषतः" ।

अनन्तफलसप्तमीव्रतं भविष्योक्तम् । "शुक्लपक्षे तु सप्तम्यां मासि भाद्रपदेऽच्युत ! । प्रणम्य शिरसा देवं पूजयेत् सप्तवाहनम् । पुष्पधूपादिभिर्वीरः कृतदानाञ्च तर्पणैः" । कृतदानां ब्राह्मणादीनाम् । "पायसादिभिराखापमकर्षयितात्मवान् । विप्राय दक्षिणां दत्त्वा नक्तं भुञ्जीत वाग्यतः । तिष्ठन् व्रजन् प्रस्थितश्च क्षुतप्रस्खलितादिषु । आदित्यनामस्मरणं कुर्य्यादुच्चारणं तथा । अनेनैव विधानेन मासान् द्वादश वै क्रमात् । उपोष्य पारणे पूर्व्वं सप्तम्यां जगद्गुरुम् । पुष्पेण प्रयतेनेह प्रणमेत् पुष्पमाल्यवान् । एवं यः पुरुषः कुर्य्यादादित्याराधनं शुचिः । नारी वा सर्व्वमभ्येत्य सानन्त्यं फलमश्नुते" ।

अनोदनसप्तमीव्रतं भविष्योक्तम् । "शुक्लपक्षे तु वैशाखे षष्ठ्यां सम्यगुपोषितः । पूजयेद् भास्करं भक्त्या पुष्पधूपादिलेपनैः । येन तत् पूजयेद्देवं स विधिः कथ्यते तव । तदा वैश्रवणो येन विधिनाऽपूजयन्नृप । दन्तखाद्यं भवेद् यत्र तदोदनमिति स्मृतम् । भक्ष्यं चूष्यं तथा लेह्यमोदनाख्यैः प्रकीर्त्तितम् । तोयं चाऽनोदनं प्रोक्तं तस्मात् तत्परिवर्जयेत् । तत् परिवर्जयेदिति तच्छब्देन ओदनः परामृश्यते तस्मादोदनमेव वर्जयेन्न तु पेयमपि तस्यानोदनत्वात्" । "इत्येषानोदना नाम सप्तमी भरतर्षभ ! । यामुपोष्य नरो भक्त्या धनधान्यमवाप्नुयात्" ।

अपराजितासप्तमीव्रतं भविष्यपु॰ "मासि भाद्रपदे शुक्ला सप्तमी या गणाधिप ! । अपराजितेति विख्याता महापातकनाशिनी । चतुर्थ्यामेकभक्तन्तु पञ्चम्यां नक्तमादिशेत् । उपवासस्तथा षष्ठ्यां सप्तम्यां पारणं भवेत् । पारणान्यत्र चत्वारि कथितानि मनीषिभिः । पुष्पाणि करवीराणि तथा रक्तञ्च चन्दनम् । धूपक्रिया गुग्गुलुना नैवेद्यं गुड़पूपकाः । नभस्यादिषु मासेषु विधिरेष प्रकीर्त्तितः" । इदं व्रतं वर्षसाध्यम् ।

अमावस्याव्रतं कूर्म्मपु॰ उक्तम् । "अमावस्यामनुप्राप्य ब्राह्मणाय कुटुम्बिने । यत् किञ्चित् वेदविदुषे दद्यादुद्दिश्य शङ्करम् । प्रीयतामीश्वरः सोमो महादेवः सनातनः । सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति" ।

अभीष्टसप्तमीव्रतं विष्णुधर्म्मोत्तरोक्तम् । सप्तम्याम् इत्युपक्रमे "पूजयित्वा शतद्रांश्च दीपांश्च तदा नरः । पातालांश्च महाभाग ! भुवमाप्नोत्यभीप्सिताम्" ।

अमुक्ताभरणसप्तमीव्रतं भविष्योक्तम् । "भद्रे ! भाद्रपदे मासि सप्तम्यां सकलाशये । स्नात्वा शिवं मण्डलके लेखयित्वा तथाम्बिकाम् । भक्त्या सम्पूज्य समयं कुर्य्याद्बद्ध्वा करे गुणम् । यावज्जीवं मयात्मा तु शिवस्य विनिवेदितः" ।

अरुन्धतीव्रतं स्कान्दपु॰ उक्तम् । "अरुन्धतीव्रतं वक्ष्ये सदा सौभाग्यदायकम् । येन चीर्णेन वै सम्यक् नारी सौभाग्यभाजनम् । जायते रूपसम्पन्ना पुत्रपौत्रसमन्विता । वसन्तर्त्तौ समासाद्य तृतीयायां सुरर्षभ ! । स्नानं कृत्वा

तु विधिवच्चिरात्रोपोषिता सती। शिवभानि च चत्वारि समाहृत्य यतव्रता। पूजयेत् पुष्पताम्बूलैश्चन्दनैश्च तथाक्षतैः”।

अर्कव्रतं भविष्योक्तम्। “सप्तम्यां च तथा षष्ठ्यां पक्षयोरुभयोरपि। योऽब्दमेकं नक्तभोजी नियतात्मा जितेन्द्रियः। यत्पुण्यं परमं प्रोक्तं सततं सत्रयाजिनाम्। सत्यवादिषु यत् पुण्यं यत् पुण्यं तीर्थगामिनाम्। तत्फलं सकलं प्राप्य मम लोकमुपैति सः”।

अर्कसप्तमीव्रतं ब्रह्मपु० उक्तम्। “अर्कसंपुटसंयुक्तमुदकप्रसृतिं पिबेत्। क्रमाद् दश चतुर्विंशमेकैकं क्षिपते पुनः। द्वाभ्यां संवत्सराभ्यां तु समाप्य नियमोभवेत्। सर्वकामप्रदा ह्येषा प्रसीदत्यर्कसप्तमी”।

अर्कसम्पुटसप्तमीव्रतं भविष्यपु० “फाल्गुनामलपक्षस्य षष्ठ्यां सम्यगुपोषितः। पूजयेद्भास्करं स्नात्वा पुष्पगन्धानुलेपनैः। अर्कपुष्पैर्महाबाहो! गुग्गुलेन सुगन्धिना। सितेन भूषयन् देवं चन्दनेन दिवाकरम्। गुडौदनञ्च नैवेद्यं पक्वान्नं नियतं रवेः। एवं पूज्य दिवा भानुं रात्रौ तस्याग्रतः स्वपेत्”।

अर्काष्टमीव्रतं भविष्योत्तरोक्तम्। “यदाष्टम्यां शुक्लपक्षे रविवारोऽभिजायते। उपोष्या सा प्रयत्नेन तेनैव विधिना नृप!। अर्चयेद्देवदेवेशं सह देव्या महेश्वरम्। विशेष एव एवात्र शिवस्य नयनेस्थितम्। भानुं सम्पूजयेद् भक्त्या गन्धपुष्पाक्षतैः शुभैः। शिवञ्च सितपुष्पैस्तु रक्तपुष्पैस्तथाम्बिकाम्। रक्तैरक्तसितैर्दिव्यैर्भक्ष्यमानर्चयेद्विभुम्। कुङ्कुमेनार्चयेद्देवीं चन्दनेन महेश्वरम्”।

अर्द्धश्रावणिकव्रतं ब्रह्माण्डपु० उक्तम्। “प्राप्ते तु श्रावणे मासि शुक्लपक्षे मनोहरे। संस्थाप्य पार्वतीं देवीं पूजयेद्भक्तियुक्ततः। मासं यावन्नियमतः संस्मरन् पार्वतीं हृदि। श्वेतार्घ्यैः श्वेतकुसुमैः श्वेतचन्दनकेन च। गन्धधूपैश्च नैवेद्यैर्यथाकालोद्भवैः फलैः। अर्घ्यं दद्यात् फलेनैव कुसुमाक्षतचन्दनैः। नमोऽर्द्धश्रावणि! देवि! सर्वपापक्षयङ्करि!। गृहाणार्घ्यं हि देवेशि! शङ्करेण समं मम”।

अर्द्धोदयव्रतं स्कन्दपु० उक्तम्। “माघामायां व्यतीपात आदित्ये विष्णुदैवते। अर्द्धोदयं तमित्याहुः सहस्रार्कसमप्रभैः समम्। पुराकृतं वशिष्ठेन वामदेवेन सुव्रत!। सनकाद्यैर्मनुष्यैश्च सर्वैरभिवाञ्छितैरप्युतैः। अन्यैः शतसहस्रैश्च दृष्टं भवति कुम्भज!। दानानां यज्ञतीर्थानां फलं येन कृतं भवेत्। माघमासे कृष्णपक्षे पञ्चदश्यां रवेर्दिने। वैष्णवेन च ऋक्षेण व्यतीपाते सुदुर्लभे”। वैष्णवर्क्षं श्रवणम् “पूर्वाह्णे सङ्गमे स्नात्वा शुचिर्भूत्वा समाहितः। सर्वपापविशुद्ध्यर्थं नियमस्थो भवेन्नरः। त्रिदैवत्यं व्रतं देवाः करिष्ये भुक्तिमुक्तिदम्। भवन्तु सन्निधौ मेऽद्य त्रयोदेवास्त्रयोऽग्नयः”।

अलवणतृतीयाव्रतं भविष्योक्तम्। “एवंविधा प्रिययुक्ता शुचिर्नक्तभोजना सती। सोपवासा तृतीयायां लवणं परिवर्जयेत्”। सोपवासेति व्रतारम्भे द्वितीयायां कृतोपवासा तृतीयायां लवणं परिवर्जयेत् “या संस्थाप्येत वै भक्त्या व्रतमाचरत्यन्तिकम्। गौरी ददाति सन्तुष्टा सुदृढं सौभाग्यमेव च। लावण्यलवणं हृद्यं श्लाघ्यं पुंसां मनोऽनुगम्। पतिं मनोरमं नारी भर्त्ता भार्यां मनोरमाम्। गौरीव्रतेन लभते राजन्! लवणवर्जनात्”

अविघ्नविनायकचतुर्थीव्रतं वराहपु० “अथ विघ्नहरं राजन्! कथयामि तवानघ!। येन सम्यक् कृतेनेह न विघ्नमुपजायते। चतुर्थ्यां फाल्गुने मासि ग्रहीतव्यं व्रतान्त्विदम्। नक्ताहारेण राजेन्द्र! तिलान्नं पारणं स्मृतम्”। पारणं नक्तभोजनम् “तदेव वह्नौ होतव्यं ब्राह्मणाय च तद्भवेत्। चतुर्मासव्रतस्यैव कृत्वेत्थं पञ्चमे तथा। सौवर्णं राजतं वापि कृत्वा विप्राय दापयेत्”।

अवियोगतृतीयाव्रतं कालिकापु० उक्तम्। “अवैधव्यप्रदं स्त्रीणामवियोगव्रतन्त्विदम्। मार्गशीर्षे सिते पक्षे स्नाता शुक्लाम्बरान्विता। दृष्ट्वा चन्द्रं द्वितीयायां नक्तं भुञ्जीत पायसम्। आचम्य च शुचिर्भूत्वा दन्तधावनमाचरेत्। सुदान्विता समस्कृत्य विज्ञाप्य परमेश्वरम्”।

अवियोगद्वादशीव्रतं भविष्यपु० “शुक्ले प्रौष्ठपदे मासि द्वादश्यां समुपोषितः। स्नात्वा जलाशये कल्ये शुक्लाम्बरधरः शुचिः। स्नानान्ते मण्डलं कृत्वा गोमयेनातिशोभनम्। गोधूमचूर्णैस्तन्मध्ये सलक्ष्मीकं जनार्दनम्। लेखयित्वा हरं गौरीं सावित्रीं ब्रह्मणा सह। राज्ञा (चन्द्रेण) सह रविं राजंस्त्रैलोक्योद्द्योतकारकम्। गन्धपुष्पैस्तथा धूपैर्नैवेद्यैर्भक्तितोऽर्चयेत्। अवियोगव्रतं पार्थ! कन्येयानेन तत्कृतः। अवियोगाद्दृढमना शिरसाधाय केशवम्”।

अव्यङ्गसप्तमीव्रतं भविष्यपु० “शुक्लपक्षे तु सप्तम्यां मासि भाद्रपदेऽच्युत!। प्रणम्य शिरसा देवं पूजयेत सप्तवाहनम्। पुष्पधूपादिभिर्वीर! कृतपाणिः तर्पयेत्।

पायसाद्यैर्द्विजान् भक्त्या भोजयेद्विजितात्मवान् । विप्राय दक्षिणां दत्त्वा नक्तं भुञ्जीत वाग्यतः । तिष्ठन् व्रजन् प्रस्खलंश्च क्षुतप्रस्खलितादिषु । आदित्यनामकरणं कुर्य्याद्रुद्धारणं तथा । अनेनैव विधानेन मासान् द्वादश वै क्रमात् । उपोष्य पारणे पूर्णे समभ्यर्च्य जगद्गुरुम् । पुण्येन श्रवणेनेह प्रणमेत् पुष्टिमाप्नुयात् । एवं यः पुरुषः कुर्य्यादादित्याराधनं शुचिः । नारी वा स्वर्गमभ्येत्य सानन्त्यं फलमश्नुते" । शुक्लपक्षे समभ्यर्च्य पुष्पधूपादिभिः शुचिः । श्रावणे मासि सप्तम्यां देवाग्र्यं सप्तवाहनम् । प्राप्येह विपुलं देवं धर्मानन्तरमव्ययम् । अमूत्र लोकमायाति दिव्यं खगपतेः शुभम्" । इत्यादि

अशून्यशयनद्वितीयाव्रतं भविष्यपु० "चातुर्मास्ये भवेद्राजन् ! वर्षायां व्रतमुत्तमम् । श्रावणस्य द्वितीयायां कृष्णपक्षे नराधिप ! । श्रावणादिकार्त्तिकान्तं कुर्य्यात् तद् व्रतमुत्तमम् । पुष्पं धूपञ्च नैवेद्यं दीपमाल्यं विशेषतः" । "ततो भाद्रपदे मासि यवदानं ददाति च । ततश्चाश्विद्वितीयायां शय्यादानं विशेषतः । न तस्य शून्यं शयनमपुत्रो न भवेन्नरः । ततश्च कार्त्तिके मासि द्वितीयायां नराधिप ! । शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च । उपहारं भगवते दद्यात् सर्वं प्रयत्नतः" इत्यादि ।

अशोकत्रिरात्रव्रतं भविष्योत्तरोक्तम् । "तच्छृणु त्वमशोकाख्यं त्रिरात्रव्रतमुत्तमम् । मासि मार्गशिरे चैव ज्यैष्ठे भाद्रपदे तथा । शुक्लपक्षे पञ्चगव्यप्राशनेकभक्तन्तु कारयेत् । ततः प्रातःसमुत्थाय स्नानं कुर्य्यात् ततो व्रती" ।

अशोकपूर्णिमाव्रतं विष्णुधर्मोत्तरोक्तम् । "अशोकपूर्णिमामेतां शृणुष्व गदतो मम । उपोष्य यस्यां नरः शोकं नाप्नोति स्त्री तथापि वा । फाल्गुनामलपक्षस्य पौर्णमास्यां नृपोत्तम ! । मृज्जलेन नरः स्नात्वा दत्त्वा शिरसि वै मृदम् । मृत्प्राशनं ततः कृत्वा कृत्वा च स्थण्डिलं मृदा । पुष्पैर्गन्धैः समभ्यर्च्य भूधरं नाम नामतः । धरणीञ्च तथा देवीमशोकेति च कीर्त्तयेत् । यथा विशोका धरणिः कृतकृत्या जनार्दनात् । तथा मां सर्वशोकेभ्यो मोचयाशेषधारिणि !" ।

अशोकप्रतिपद्व्रतं भविष्योत्तरोक्तम् "आश्वयुक्शुक्लपक्षस्य प्रथमेऽह्नि दिनोदये । अशोकं पूजयेत् वृक्षं प्ररूढशुभपल्लवम् । प्ररूढैः सप्तधान्यैश्च शुभकैर्मोदकैः शुभैः । फलैः कालोद्भवैर्दिव्यैर्नारिकेलैः सदाडिमैः । धूपदीपादिना तत्र पूजयेत्तरुमुत्तमम् । अशोकं पाण्डवश्रेष्ठ ! शोकं नाप्नोति कुत्रचित् । पितृभ्रातृपतिश्वश्रूसुतजामातृणां तथा" ।

अशोकाष्टमीव्रतं लिङ्गपुराणोक्तम् "अशोककलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ । चैत्रे मासि तथाष्टम्यां न ते शोकमवाप्नुयुः" । अत्र पुनर्वसुयोगः प्राशस्त्यार्थः । कूर्मपुराणेऽपि "अशोकस्याष्टकलिका मन्त्रेणोक्तेन भक्षयेत् । शोकं नैवाप्नुयान्मर्त्त्यो ह्यपवासनपि जायते" । "शुक्लाष्टम्यां तु संप्राप्ते मासि भाद्रपदे तथा । दूर्वाप्रतानसम्वेतमुत्तराशाभिगामिनम् । पूजयेद्दृष्टहृष्टमानीय गन्धमाल्यानुलेपनैः । फलमूलैस्तथा चैव दीपं धूपैर्विसर्जयेत् । अग्निपक्वं तथा सर्वं निवेद्य च कथञ्चन । भोक्तव्यञ्च तथा ब्रह्मन् ! वह्निपक्वविवर्जितम् । दूर्वाङ्कुरस्यां सम्पूज्य विधिना यौवने प्रियम् । यौवनं स्थिरमाप्नोति यत्र यत्राभिजायते । अष्टमीषु च सर्वासु पूजनीयाप्यशोकिका । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । तस्मिन्नहनि या भुङ्क्ते नक्तमिन्दुविवर्जिते । भवत्यथो विशोका सा यत्र यत्राभिजायते । अष्टमीषु च सर्वासु नचेच्छक्नोति वै, सुने । प्रोष्ठपद्यामतीतायां या स्यात् कृष्णाष्टमी द्विज ! । तस्यामवश्यं कर्त्तव्यं देवीं पूज्य यथाविधि" । इदं व्रतान्तरम् ।

अहिंसाव्रतं पद्मपु० "वर्जयित्वा पुमान्मांसमब्दान्ते गोप्रदो भवेत् । तद्वद्धेमसृगं दत्त्वा सोऽश्वमेधफलं लभेत् । अहिंसाव्रतमित्युक्तं कल्पान्ते भूपतिर्भवेत्" ।

आग्नेयव्रतं भविष्योत्तरोक्तम् । "सप्तनवम्यां भक्तेन पूजयेद्विन्ध्यवासिनीम् । पुष्पैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि । पूजयित्वा ततो विद्यात् पञ्चरं सुकसंयुतम् । हेमं विप्राय दद्याद् यः स वाग्मी जायते नरः । सहृष्टेन नक्तेन अग्निलोकप्रदायकम्" ।

आशासंक्रान्तिव्रतं स्कन्दपु० "सङ्क्रान्तिदिवसे पुण्ये प्रारभेन्नियमं व्रते । पद्ममष्टदलं कृत्वा कुङ्कुमेन तु भास्करम् । पूजयेन्मन्त्रमुच्चार्य्य विधिवद्गुरुसन्निधौ । आशा तेजस्करी यत्ते प्रभादीप्तियशस्करी । आशां सर्वगां देव ! मम देहि नमोऽस्तु ते । पूज्यैवं कुङ्कुमेनाथ दद्याद्विप्राय भोजनम् । उद्यापने तु चन्द्रांशु सौवर्णं सरथं तथा । एकचक्रञ्च सप्ताश्वमरुणेन समन्वितम् । यः कुर्य्याद्विधिनानेन आशासंक्रान्तिमुत्तमाम् । तथाशाऽस्खलिता लोके सर्वं तस्य जायते" ।

आदित्यव्रतं भविष्यपुराणोक्तम् "योऽब्दमेकं प्रकुर्वीत नक्तं

हि महिते नरः । ब्रह्मचारी जितक्रोधो ममार्च्चनपरः खग ! । संवत्सरान्तमासाद्य महुक्तांश्च द्विजोत्तमान् । भोजयित्वा व्रती ब्रूयात् प्रीयतां मे दिवाकरः । एवं भक्तिसमायुक्तो मम लोकं स गच्छति । स च मानुषतं लोकं ध्रुवं मत्प्रसाद्भास्करः । ये त्वादित्यदिने प्राप्ते श्राद्धं कुर्व्वन्ति मानवाः । सप्तजन्मानि ते प्राप्ताः सम्भवन्ति विरोगताम् । वैराग्यमिह वै प्राप्य मम लोकं व्रजन्ति ते । उपवासन्तु कुर्व्वन्ति ये त्वादित्यव्रते सदा । जपन्ति तु महाश्वेतामीप्सितं लभते फलम् । विशेषादादित्यदिने जपमानो खगाधिप ! । षडक्षरं महाश्वेतं जपन् वैरोचनं पदम्" ।

आदित्यशयनव्रतं आदित्यपु० "आदित्यशयनं नाम यथावच्छङ्करार्च्चनम् । येषु नक्षत्रयोगेषु पुराणज्ञाः प्रचक्षते । यदा हस्तेन सप्तम्यामादित्यस्य दिनं भवेत् । सूर्य्यस्य वाथ संक्रान्तौ वा तिथिः सर्व्वकामिकी । उमामहेश्वरस्यार्च्चामर्च्चयेत् सूर्य्यनामभिः । सूर्य्यार्च्चां शिवलिङ्गञ्च उभयं पूजयेत्ततः । उमापते रवेर्वापि न भेदः क्वचिदिष्यते । यस्मात् तस्मान्नृपश्रेष्ठ ! गृहे शम्भुं समर्च्चयेत्" इत्यादि ।

आदित्यनन्दादिव्रतं भविष्यपु० "द्वादश्यां शुभे वारो आदित्यस्य महात्मनः । नन्दो भद्रस्तथा सौम्यः कामदः पुत्रदस्तथा । जयो जयन्तो विजय आदित्याभासुपार्श्वितः । हृदयो रोगहा चैव महारोगविनाशनम् । मालतीकुसुमानीह श्वेतचन्दनमुत्तमम् । धूपं गुग्गुलुश्रेष्ठेन नैवेद्यं पूपमेव तु । दत्त्वा पूपांस्तु विप्राय ततो भुञ्जीत वाग्यतः" ।

आनन्दव्रतं मत्स्यपु० "चैत्रादिचतुरो मासान् जले कुर्य्यादयाचितम् । व्रतान्ते मणिकं दद्यादन्नवस्त्रसमन्वितम् । तिलपात्रं हिरण्यञ्च ब्रह्मलोके महीयते । कल्पान्ते भूपतिर्नाम्ना ह्यानन्दव्रतमुच्यते" ।

आनन्तपञ्चमीव्रत भविष्यपु० "पञ्चमी दयिता राजन् ! नागानां नन्दवर्द्धिनी । पञ्चम्याः किल नागानां भवतीत्युत्सवो महान् । वासुकिस्तक्षकश्चैव कालियो मणिभद्रकः । धृतराष्ट्रो रैवतः कर्कोटकधनञ्जयौ । एते प्रयच्छन्त्यभयं प्राणिनां प्राणदाः सदा । पञ्चम्यां स्नापयन्तीह नागान् क्षीरेण ये नराः । तेषां कुले प्रयच्छन्ति अभयं प्राणदक्षिणाम्" ।

आनन्दानवमीव्रतं भविष्यपु० "आनन्दा नन्दिनी नन्दा महानन्दा महीपते ! । तथाद्या नवमी पुण्या पञ्चमी महती स्मृता । फाल्गुनामलपक्षस्य नवमी या महीपते ! । आनन्दा सा महापुण्या सर्व्वपापहरा शुभा । कृत्वैकभक्तं पञ्चम्यां षष्ठ्यां नक्तं तथा नृप ! । अयाचितन्तु सप्तम्यामुपवासः परेऽहनि । य एवं पूजयेद्दुर्गां नवम्यां विधिवन्नृप ! । सोपवासोऽर्च्चयेद्देवीं धूपं दद्यात् तथागुरुम् । मासैश्चतुर्भिराद्यीयं द्वितीयं पारणं शृणु ! । आद्यीयम् आद्यम् "भोजयेद् विप्रकन्याश्च नवम्यां ब्रह्मचर्य्यस्थितः । मासि मासि महाबाहो ! यथा शक्त्या यथाविधि । आषाढ़े श्रावणे मासि मासि भाद्रपदे तथा । तथाश्वयुजे मासि पूज्या भगवती विभो ! । कृत्वैकभक्तं पञ्चम्यां षष्ठ्यां नक्तं तथा नृप ! । अयाचितं तु सप्तम्यामुपवासः परेऽहनि । सोपवासो नवम्यां तु पूजयेद्विधिवच्छिवाम् । सोऽश्वमेधफलं प्राप्य विष्णुलोके महीयते" ।

आयुधव्रतं विष्णुधर्म्मोत्तरोक्तम् । "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतन्तव । शङ्खचक्रगदापद्मचतुरात्मा प्रकीर्त्तितः । वासुदेवः स्मृतः शङ्खः चक्रं सङ्कर्षणस्तथा । प्रद्युम्नश्च गदा पद्ममनिरुद्धो जगद्गुरुः । श्रावणादिषु मासेषु वहिःस्नातस्तु नक्तभुक् । तेषान्तु पूजनं कुर्य्यात् प्रतिमासमनुक्रमात् । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । ततस्तु कार्त्तिकस्यान्ते समाप्ते तु तथा व्रते । ब्राह्मणान् भोजयेच्छक्त्या दद्याच्छक्त्या च दक्षिणाम् । कांस्यपात्रञ्च सघृतं ससुवर्णं तथैव च । कृत्वा व्रतं मासचतुष्टयस्य प्राप्नोति लोकं त्रिदशेश्वरस्य । मानुष्यमासाद्य तथैव पश्चात् वसुन्धरेशो भवतीह वीरः" ।

आरोग्यव्रतं विष्णुधर्म्मोत्तरोक्तम् । "प्रोष्ठपद्यामतीतायां प्रतिपत्प्रभृति क्रमात् । यादवञ्च दिवाऽश्वीनामनिरुद्धं प्रपूजयेत् । पूर्व्वोक्तेन विधानेन यावदाश्वयुजी भवेत्" । पूर्व्वोक्तेन रूपावाप्तिव्रतोक्तेन "सारसैरर्च्चयेद्देवं जातीपुष्पैर्दिने दिने" । सारसैः कमलैः "घृतेन जुहुयाद् वह्निं घृतं दद्याद् द्विजातये । भोजनं गोरसप्रायं तथा विप्रांश्च भोजयेत् । त्रिरात्रोपोषितः सम्यगाश्वयुज्यान्ततो नरः" ।

अपरं वराहपु० "अथापरं महाराज व्रतमारोग्यसंज्ञितम् । कथयामि परं पुण्यं सर्व्वपापप्रणाशनम् । तथैव माघमासस्य सप्तम्यां समुपोषितः । पूजयेद्भास्करं देवं विश्वरूपं सनातनम् । आदित्य ! भास्कर ! रवे ! भानो ! सूर्य्य ! दिवाकर ! । प्रभाकरेति संपूज्यो देवः सर्व्वेश्वरो विभुः । षष्ठ्यां चैव कृताहारः सप्तम्यामुपवासकृत् । अष्टम्याञ्चैव भुञ्जीत एष एव विधिः क्रमः । अनेन वत्सरं

पूर्व्वं विधिना योऽर्च्चयेद्रविम् । तस्यारोग्यं धनं धान्यमिह जन्मनि जायते । परत्र च सुखं स्थानं यद्गत्वा न निवर्त्तते"।

आरोग्यदशमीव्रतं गरुडपु० "व्रतमेतन्महाबुद्धे ! कार्य्यमारोग्यमिच्छता । सर्व्वकार्य्यार्थमेतद्धि वपुषा जीवितं चिरम् । उपवासश्च कर्त्तव्यो नवम्यामिह सुव्रत ! दशम्यां तु कृतस्नानो मण्डलायतनं हरिम् । देवैरिन्दिरया सार्द्धं ध्यात्वा च जगतां पतिम् । शङ्खचक्रगदापद्मशार्ङ्गासिधरमुत्तमम्" । इन्दिरया लक्ष्म्या "फलैर्धूपैश्च पुष्पैश्च पायसेन समर्च्चयेत्" ।

आयुर्व्रतं गरुडपु० "व्रतमत्यन्तजननमायुःप्रदमनाकुलम् । सर्व्वसौख्यप्रदं भद्रं तादृग्व्रतमिहोच्यते । चतुर्द्दश्यां शुचिः स्नात्वा दन्तधावनपूर्व्वकम् । पौर्णमास्यान्तथा कृत्वा देवपूजां समाचरेत् । मण्डलं चतुरस्रन्तु कारयेत् कुसुमाक्षतैः । तस्मिन् श्रीशं श्रियं देवीमर्च्चयेत् सुसमाहितः"।

आयुःसंक्रान्तिव्रतं स्कन्दपु० "अथान्यां सम्प्रवक्ष्यामि आयुःसंक्रान्तिमुत्तमाम् । संक्रान्तिदिवसे पूज्य पूर्व्ववच्च दिवाकरम् । कांस्यं क्षीरघृतं दद्यात् सहिरण्यं स्वशक्तितः । मन्त्र एव पृथग्दाने पूजा चैव प्रकीर्त्तिता । सक्षीरं सुरभोजातं पीयूषसमरूपदक् । आयुरारोग्यमैश्वर्य्यं मम देहि द्विजार्पितम् । अनेन विधिना सम्यक् सर्व्वं दद्यादतन्द्रितः" ।

आशादित्यव्रतं स्कन्दपु० "मासमाश्वयुजं प्राप्य यदादित्यदिनं भवेत् । तदा व्रतमिदं ग्राह्यं नरैस्त्रीभिर्विशेषतः । यावत् संवत्सरं तावद्विधिनानेन पुत्रक ! । गोमयेन क्षितौ कुर्य्यात् मण्डलं वर्त्तुलं पुनः । रक्तपुष्पैरक्षताद्यैरर्घ्यं तत्र प्रदापयेत् । यथाशा विमलाः सर्व्वाः सूर्य्य ! भास्करभानुभिः । तथाशां सफलां मेऽद्य कुरु नित्यं मयार्च्चितः । एवं यः कुरुते सम्यक् व्रतमेतदनुत्तमम् । आशादित्येति विख्यातं तस्य पुण्यफलं महत् । इत्यादि

आश्रमव्रतं विष्णुधर्म्मोत्तरोक्तम् । "इदमन्यत् प्रवक्ष्यामि चतुर्म्मूर्त्तिव्रतं तदा । चैत्रमासस्य पक्षे तु सोपवासो जितेन्द्रियः । चतुर्थ्यां वासुदेवस्य कृत्वा संपूजनं शुभम् । काञ्चनं दक्षिणां दद्यात् द्विजाय ब्रह्मचारिणे । तथा चतुर्थं देवं पूजयित्वा जगद्गुरुम्"

आषाढ़व्रतानि महाभारते "आषाढ़मेकभक्तेन स्थित्वा मासमतन्द्रितः । बहुधान्यो बहुधनो बहुपुत्रश्च जायते । आषाढमेकभक्तेन पूजयेद्विष्णुतत्परः" ।

इन्द्रपौर्णमासीव्रतं भविष्योत्तरोक्तम् । "विधिवत्संपूज्य इन्द्रत्वान्युपवासी विभूषणैः । पौर्णमास्यामवाप्नोति सौख्यमिन्द्रव्रतादिह" ।

ईशानव्रतं कालिकापु० "अथो पौषस्य चतुर्द्दश्यां गुरोर्द्दिने । पूजयेद्विधिनानेन विष्णुं सार्द्धं निबोध मे । ब्रह्माणः पश्चिमे भागे वामे विष्णुं वै हरिम् । खखोल्कं दक्षिणे रौद्रमीश्वरं प्राग्दिशि स्थितम्" । खखोल्कमर्कम्

ईश्वरव्रतं भविष्यपु० "ईश्वरस्य चतुर्द्दश्यां सर्व्वैश्वर्य्यसमन्वितः । बहुपुत्रो बहुधनस्तथा स्यान्नात्र संशयः । मूलमन्त्रस्य संख्याभिरङ्गमन्त्राश्च कीर्त्तिताः । पूर्व्ववत्पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः । गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते । पूजाऽथाद्येन शाठ्येन कृतापि तु फलप्रदा । आज्यधारासमिद्भिश्च दधिक्षीराद्यमाक्षिकैः । पूर्व्वोक्तफलदो होमः कृतः शान्तेन चेतसा" । एतद्व्रतं वैश्वानरप्रतिपद्व्रतवद्व्याख्येयम्" ।

उदकसप्तमीव्रतं भविष्यपु० "उदकप्रसृतं पीत्वा क्रियते या तु सप्तमी । सा ज्ञेया सुखदा वीर ! सदैवोदकसप्तमी" ।

उभयद्वादशीव्रतं भविष्योत्तरोक्तम् । "श्रेष्ठं व्रतानां सर्व्वेषामुभयद्वादशीव्रतम् । तत्तेऽहं संप्रवक्ष्यामि समाहितमनाः शृणु ! । ततोऽपराह्ने सन्तर्प्य कृतमध्याह्निकः शुचिः । प्राप्यास्यां वेदविदुषः पुराणज्ञात् जितेन्द्रियात् । संपूज्य देवदेवेशान्दन्तधावनपूर्व्वकम् । कुर्य्याच्च नियमं पार्थ गुरुदेवाग्निसन्निधौ । एकादश्यां निराहारः स्थित्वाहमपरेऽहनि । भोक्ष्यामि पुण्डरीकाक्ष ! शरणं मे भवाच्युत ! । इत्युक्त्वाथ गुरुं नत्वा पूजयित्वा जनार्द्दनम् । भूमौ स्वपेज्जितक्रोधः गन्धादिविषयोज्झितः । अनेन विधिना मासि तस्मिन् कृष्णामुपोषयेत् । द्वादश्यां पुरुषव्याघ्र ! ध्यायन् चतुर्भुजं विभुम् । प्राग्वत्सर्व्वं ततः कृत्वा ब्राह्मणाय निवेदयेत्" । इदञ्च व्रतं मार्गशीर्षादिकार्त्तिकान्तद्वादशमाससाध्यं तत्र उभयपक्षयोः कार्य्यम् ।

उभयनवमीव्रतं भविष्यपु० "योऽब्दमेकं प्रकुर्व्वीत नवम्यां नक्तमादरात् । इह भोगानवाप्याग्र्यान् परत्र च दिवं व्रजेत् । पौषे मासे च सम्प्राप्ते यः कुर्य्यान्नक्तभोजनम् । जितेन्द्रियः सत्यवादी कामक्रोधविवर्ज्जितः । पक्षयोर्न्नवमीं यत्नादुपवासेन पालयेत्" । इदं व्रतं वर्षसाध्यम् ।

उभयसप्तमीव्रतं भविष्यपु० "पौषे मासे च सप्तम्यां यः कुर्य्यान्नक्तभोजनम् । जितेन्द्रियः सत्यवादी स्नातो गोमूत्रगोरसैः । पक्षयोः सप्तमीं यत्नादुपवासेन यो नयेत् ।

शिवस्यार्च्चयेद्भानुं शाण्डिल्येयस्य सुव्रत !"। तदवधिवर्षसाध्यम्। व्रतान्तरं विष्णुधर्म्मोत्तरोक्तम् "अनेनैव विधानेन प्रतिमासन्तु यो नरः। सप्तमीद्वितयं कुर्य्याद्यावत् संवत्सरं रवेः। सोऽश्वमेधमवाप्नोति सूर्य्यलोकं च गच्छति। कुलमुद्धरते राजन् ! सर्व्वान् कामानुपाश्नुते"।

उमामाहेश्वरतृतीयाव्रतं भविष्योत्तरोक्तम्। "लोके हितार्थं पार्व्वत्या उमामाहेश्वरव्रतम्। समाख्यातं पुरा पार्थ ! नाद्यापि प्रथितं भुवि। मार्गशीर्षे सिते पक्षे तृतीयायां समाहिता। कृतोपवासा राजेन्द्र ! सर्व्वभोगविवर्जिता। संवेष्ट्य श्वेतवस्त्रेण शिवं रक्तेन चाम्बिकाम्। पश्चाद्रूपं दहेन्नारी भक्तिभावेन भाविता। भोजयेच्छिवभक्तांश्च ब्राह्मणान् वेदपारगान्। भक्तेभ्यो दक्षिणां दद्याद्भक्त्या शाठ्यविनाकृताम्"। कृतोपवासा सङ्कल्पितोपवासा "हैमीसमां रजतपिण्डमयं महेशम् रौप्ये सुवृषभे समुपस्थितौ तौ। संपूज्य रक्तसितवस्त्रयुगोपगूढौ नारी भवत्यविधवा सुतसौख्ययुक्ता। पौर्णमास्याममावास्यां चतुर्द्दश्यष्टमीषु च। नक्तमब्दन्तु कुर्व्वीत हविष्यैर्ब्रह्मचारिणी। उमामहेशप्रतिमां हेम्ना कृत्वा सुशोभनाम्। राजतीं वापि कर्व्वीत स्नापयित्वा घृतादिभिः। गन्धपुष्पैरलङ्कृत्य वस्त्रयुग्मैश्च शोभनैः। शय्याभोज्यैरथोष्णैश्च वितानध्वजचामरैः। भोजयेच्छिवभक्तांश्च दीनानाथान् प्रतर्पयेत्"। व्रतान्तरं शिवधर्म्मोत्तरोक्तम्। "अष्टम्याञ्च चतुर्द्दश्यां नियतब्रह्मचारिणी। वर्षमेकं न भुञ्जीत महीभोगजिगीषया। वर्षान्ते प्रतिमां कृत्वा पूर्व्ववद्विधिमाचरेत्। स्नानार्घ्यैः सद्व्रतं प्राप्य पूर्व्वोक्तांस्तु गुणान् लभेत्"। कृत्वाप्युमामहेश्वर प्रतिमा कर्त्तव्या। पूर्व्ववदिति पूर्व्वव्रतोक्तवदित्यर्थः। देवीपु० व्रतान्तरं "यदीच्छसि सुमतीत्मिह जन्मान्यथापरे। कन्या कुर्य्याद्द्विजश्रेष्ठ ! विष्णुना कथितं व्रतम्। सर्व्वपापहरं पुण्यं सर्व्वकामफलप्रदम्। उमामहेश्वरं नाम कर्त्तव्यं विधिना यथा। प्रौष्ठाश्विने तथा माघे ष्टगे भाग्ये १२८य वा सुते ! मैत्रे ।७शाक्ते १८८य वा कार्य्यमष्टम्याञ्च शाङ्करे ६। व्रतान्तरं महासंहितोक्तम्। "उमामाहेश्वरं नाम या च स्त्री कुरुते व्रतम्" इति प्रक्रमे "उमामाहेश्वरी कार्य्या प्रतिमा काञ्चनोद्भवा। त्रिकर्षस्य तदर्द्धस्य कर्षस्यापि मितस्य च। वित्तशाठ्यं न कर्त्तव्यं सर्व्वथा फलकाम्यया। स्नापयेत् श्वेतवस्त्राद्ये राजते वृषभे शुभे। व्याघ्राजिने सुविस्तीर्णे संस्थाप्याभ्यर्च्य यत्नतः। सोपवासा च कुर्व्वीत चतुर्द्दश्यां समाहिता। शैवं साष्टशतं होमं गौर्य्यां होमञ्च यत्नतः। प्राप्ते प्रभातसमये स्नात्वा संपूज्य पूर्व्ववत्। आहूय वेदविद्वांसं ब्राह्मणं पूज्य भक्तितः। अर्च्चयेत् प्रतिमां शम्भोः कर्म्मदोषापशान्तये। वाक्येन ब्राह्मणं तोष्य ततः पारणमाचरेत्"।

उल्कानवमीव्रतं भविष्योत्तरोक्तम्। "उल्काख्या नवमी राजन् ! कथयामि निबोध ताम्। या काश्यपेन कथिता तारकस्यार्त्तिनाशिनी। अश्वयुक्शुक्लपक्षे या नवमी लोकविश्रुता। नद्यां स्नात्वा समभ्यर्च्य पितृदेवान् यथाविधि। पश्चात् संपूजयेद्देवीं चामुण्डां भैरवप्रियाम्। पुष्पैर्धूपैः सनैवेद्यैः मांसमत्स्यसुरासवैः। पूजयित्वा स्तवं कुर्य्यान्मन्त्रेणानेन मानवः"। सौरपु० "व्रतेन येन देवेन्द्र ! प्रसीदत्याशु पार्व्वती। तच्चोल्कानवमीसंज्ञं शृणु ! सर्व्वफलप्रदम्। तस्यां नवम्यां शर्व्वाणी महिषादीन् महासुरान्। जघान समरे शत्रून् तेन सा नवमी प्रिया। अश्वयुक्शुक्लस्य नवम्यां प्रयतात्मवान्। स्नात्वाभ्यर्च्य पितॄन् देवान् मनुष्यांश्च यथाक्रमम्। जपेत् पश्चान्महादेवीं महिषासुरघातिनीम्। पुष्पैर्धूपैः सनैवेद्यैः पयोदधिफलादिभिः। भक्त्या संपूजयित्वैवं देवीं समापयेत्ततः"।

ऋतुव्रतं विष्णुधर्म्मोत्तरोक्तम्। "अथातः संप्रवक्ष्यामि पञ्चमूर्त्तेरर्च्चनं परम्। वसन्ते पूजयेन्नित्यं द्वौ मासौ मुनिपुङ्गव !। फलैः पुष्पैः कषायैस्तु ग्रीष्मे पैष्टैश्च पूजयेत्। मधुरेण महाराज ! प्रावृट्काले ऋतुं यजेत्। अनेन पूजयेन्नित्यं शरदं लवणेन च। कटुकेन च हेमन्तं तिक्तेन शिशिरं तथा। नक्ताशनस्तथा तिष्ठेत् पञ्चकं वर्जयेद्रसम्। ब्राह्मणान् भोजयेच्चापि प्रभूतवसनादिभिः। संवत्सरमिदं कृत्वा व्रतं परमपावनम्। अश्वमेधमवाप्नोति राजसूयञ्च विन्दति। चैत्रे समारभ्य सिते तु षष्ठीं संपूजयेदृतुस्त्वृतुषट्कमेवम्। कृतोपवासः स नरो यथोक्तं लभेत् फलं शाश्वतमेव शीघ्रम्"।

ऋषिपञ्चमीव्रतं ब्रह्माण्डपु० "शृणु राजन् ! प्रवक्ष्यामि व्रतानामुत्तमं व्रतम्। ऋषिपञ्चमीति विख्यातं सर्व्वपापहरं परम्। नभस्ये शुक्लपक्षे तु यदा भवति पञ्चमी। नद्यादिषु तदा स्नानं कृत्वा नियममेव च। विधाय नित्यकर्म्मादि गत्वा द्वारवतीमृषीन्। स्नापयेद्विधिवद्भक्त्या पञ्चामृतरसैः शुभैः"। द्वारवतीं, अग्निहोत्रशालां धूमनिर्गमद्वारैर्बहुभिर्युतत्वात्। ऋषयोऽत्र सप्तर्षयः।

एकभक्तव्रतं विष्णुधर्मोक्तम् । "चैत्रं विष्णुपरो मासमेकभक्तेन यः क्षिपेत् । सुवर्णमणिमुक्ताढ्यं गार्हस्थ्यं समवाप्नुयात् । अहिंस्रः सर्वभूतेषु वासुदेवपरायणः । नमोऽस्तु वासुदेवायेत्यहन्यष्टशतं जपेत् । अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात् । यस्तु संवत्सरं पूर्णमेकभक्तो भवेन्नरः । अहिंस्रः सर्वभूतेषु वासुदेवपरायणः । नमोऽस्तु वासुदेवायेत्यहन्यष्टशतं जपेत् । पौण्डरीकस्य यज्ञस्य ततः फलमाप्नुयात् । दश वर्षसहस्राणि स्वर्गलोके महीयते । तत्क्षयादिह चागत्य माहात्म्यं प्रतिपद्यते" ।

ऐश्वर्य्यतृतीयाव्रतं विष्णुधर्मोक्तम् । "तृतीयायां तथाभ्यर्च्य ब्रह्मविष्णुमहेश्वरान् । पृथक् पृथक् नाममन्त्रैर्नैवेद्यादि निवेदयेत् । त्रीन् लोकांश्च तदा नाम सम्यक् संपूजयेन्नरः । ऐश्वर्य्यं महदाप्नोति गतिमग्र्याञ्च विन्दति" ।

कदलीव्रतं भविष्योत्तरोक्तम् । "शुक्ले पक्षे चतुर्दश्यां मासि भाद्रपदे नृप ! । देयमर्घ्यं वरस्त्रीभिः फलैर्नानाविधैस्तथा । विरूढैः सप्तधान्यैश्च दीपालक्तकचन्दनैः । दधिदूर्वाक्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः । जातीफलैः पूगफलैर्लवङ्गकदलीफलैः । तस्मिन्नहनि दातव्यं स्त्रीभीरम्याभिरर्घ्यकम् । मन्त्रेणानेन चैवार्घ्यं तच्छृणुष्व नराधिप ! । चित्तस्था कदली नित्यं कदली कामदायिनी । शरीरारोग्यलावण्यं देहि देवि ! नमोऽस्तु ते" ।

कन्दुचतुर्थीव्रतं देवीपु० "माघमासे तु सम्प्राप्ते चतुर्थी कन्दुसंज्ञिता । सोपोष्या तु सुरश्रेष्ठ ! ततो राज्यं भविष्यति । सर्वोपहारसम्पन्नं सर्वोपस्करमाहरेत् । कन्दुपक्वं फलं शाकं लवणं गुडशर्करा । वस्त्रं कुस्तुम्बरी जीरं धान्यानि विविधानि च । दातव्यानि रघुश्रेष्ठ ! कन्यकानान्तु भक्तितः" ।

कपिलाषष्ठीव्रतं स्कन्दपु० "प्रौष्ठपदोऽसिते पक्षे षष्ठी भौमेन संयुता । व्यतीपातेन रोहिण्या सा षष्ठी कपिला स्मृता" । प्रौष्ठपदो, भाद्रपदश्च चात्र दर्शान्तो ग्राह्यः, रोहिणीयोगस्य तत्रैव सम्भवात्" ।

"द्वितीया (अन्या) तु महापुण्या दुर्लभा व्रतिनः क्वचित् । षष्ठी संवत्सरस्यान्ते सा पुनस्तेन संयुता । चैत्रवैशाखयोर्मध्ये सिते पक्षे शुभोदया । वैशाखेऽपि च राजेन्द्र ! द्वारवत्यां परा स्मृता । यदि हस्ते सहस्रांशुस्तदा कार्य्यं व्रतं बुधैः । अस्यां चैव हुतं दत्तं यत्किञ्चित् प्रतिपादितम् । तस्य सर्वस्य पुण्यस्य संख्यां वक्तुं न शक्यते । यस्मिन् काले भवेदेतैर्गुणैः षष्ठी युता तदा । पञ्चम्यामेकभक्तन्तु कुर्य्यात्तत्र विचक्षणः । षष्ठ्यां प्रातः समुत्थाय कृत्वादौ दन्तधावनम्" इत्यादि ।

करणव्रतं ब्रह्माण्डपु० "शृणु राजन् ! प्रवक्ष्यामि करणव्रतमुत्तमम् । ववाख्यं बालवञ्चैव कौलवन्तैतिलङ्करम् । वणिजं विष्टिरित्याहुः करणानि पुराविदः । माघमासे तु सम्प्राप्ते शुक्लपक्षे यदा भवेत् । ववाभिधानकरणमुपवासस्तदा भवेत् । एवं सप्त विधेयानि ववाख्यान्यथ सप्तमे । ववे तु करणे प्राप्ते पूर्वं पूर्वं समाचरेत् । ब्राह्मणान् भोजयेत्तत्र सप्तसंख्यान् सदक्षिणम् । अथैवं बालवादीनि विष्ट्यन्तानि यथाक्रमम् । उषित्वा सप्त सप्तैव पूर्वोक्तविधिना नृप ! । समापयेद्व्रतं भूरिगोभूहेमादिदानतः । एवंकृते व्रते राजन् ! राजसूयाश्वमेधयोः । समस्तं फलमाप्नोति सुखं कीर्त्तिं महाश्रियम्" ।

कमलसप्तमीव्रतं पद्मपु० "अतःपरं प्रवक्ष्यामि व्रतं कमलसप्तमीम् । यस्य संकीर्त्तनादेव तुष्यतीह दिवाकरः । वसन्तामलसप्तम्यां स्नातः सन् गौरसर्षपैः । तिलपात्रे तु सौवर्णं निधाय कमले रविम् । वस्त्रोपवीताभरणगन्धपुष्पैरथार्चयेत्" ।

कल्किद्वादशीव्रतं धरणीव्रतोक्तम् "तद्वद्भाद्रपदे मासि शुक्लपक्षे तु द्वादशीम् । सङ्कल्प्य विधिना देवमर्चयेत् परमेश्वरम् । नमोऽस्तु कल्किने पादौ हृषीकेशाय वै कटिम् । म्लेच्छप्रध्वंसनायोरू जगन्मूर्त्तिं तथोदरम् । श्रीकण्ठायेति कण्ठन्तु खड्गपाणीति वै भुजौ । स्वनाम्ना शङ्खचक्रे तु विश्वमूर्त्ते तथा शिरः । एवमभ्यर्च्य मेधावी प्रागवत्तस्याग्रतो घटम् । विन्यस्य कल्किनं देवं सौवर्णं तत्र धारयेत्" ।

कल्पवृक्षव्रतं पद्मपु० "त्र्यहं पयोव्रते स्थित्वा काञ्चनं कल्पपादपम् । पलादूर्द्ध्वं यथाशक्त्या तण्डुलं सूर्पसंस्थितम्" । सूर्पं द्रोणद्वयम् "दत्त्वा ब्रह्मपदं याति कल्पवृक्षव्रतं स्मृतम्" ।

कल्याणसप्तमीव्रतं पद्मपु० "सौरधर्मं प्रवक्ष्यामि पार्थ ! कल्याणसप्तमीम् । तस्या विधानं वक्ष्यामि यथावदनुपूर्वशः । यदा तु शुक्लसप्तम्यामादित्यस्य दिनं भवेत् । सा तु कल्याणिनी नाम विजया च निगद्यते । प्रातर्गव्येन पयसा स्नानमस्यां समाचरेत् । शुक्लाम्बरधरः पद्ममक्षतैः परिकल्पयेत् । प्राङ्मुखोऽष्टदलं मध्ये तद्वत्तस्य

सकर्णिकम् । सर्व्वेष्वपि दलेष्वीशं विन्यसेत् पूर्व्वतः क्रमात्” इत्यादि ।

काञ्चनपुरीव्रतं गरुड़पु० “काञ्चनाख्या पुरी नाम व्रतं त्रैलोक्यपावनम् । शुक्लतृतीया कृष्णा च एकादश्यथ पूर्णिमा । संक्रान्तिर्वा महाभागे कुहूर्वा चाष्टमी तिथिः । पर्व्वस्वेतेषु दातव्या काञ्चनाख्या पुरी शुभा” ।

कामव्रतं भविष्यपु० “पुष्यादितस्त्रयोदश्यां कृत्वा नक्तं मधौ मधौ । अशोकवाहनं दद्यादिक्षुयुक्तं दशाङ्गुलम् । विप्राय वस्त्रसंयुक्तं प्रद्युम्नः प्रीयतामिति । वर्षं विष्णुपुरे स्थित्वा विशोकः स्यात् पुमान् नृप ! । एतत् कामव्रतं नाम सदा शोकविनाशनम्” ।

कामदासप्तमीव्रतं भविष्योत्तरोक्तम् । “फाल्गुनामलपक्षस्य सप्तम्यां च घनाघन ! । उपोषितो नरो नारी समभ्यर्च्य तमोपहम् । सूर्य्यनाम जपन् भक्त्या भावयुक्तो जितेन्द्रियः । तिष्ठन्नुपविशंश्चैव सूर्य्यमेवानुकीर्त्तयेत् । ततोऽन्यदिवसे प्राप्ते अष्टम्यां नियतो रविम् । स्नात्वा सम्यक् समभ्यर्च्य दद्याद्विप्राय दक्षिणाम्” ।

कामदेवव्रतं विष्णुधर्म्मोक्तम् । “शुक्लपक्षे महाराज ! त्रयोदश्यामुपोषितः । पूजयेत् कामदेवन्तु वैशाखात् प्रभृति प्रभो ! । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । दद्याद्व्रतान्ते विप्राय गन्धवस्त्रयुगं तथा” । “कृत्वा व्रतं वत्सरमेतदिष्टमासाद्य नाकं सुचिरं मनुष्यः । मानुष्यमासाद्य भवत्यरोगः सुखान्वितो रूपसमन्वितश्च” ।

कामधेनुव्रतं वह्निपु० “कार्त्तिकः खलु मासो वै सर्व्वदेवमयो महान् । कृष्णपक्षे विशेषेण तत्र पञ्च दिनानि तु । पुण्यानि तेषु यद्दत्तमक्षयं सर्व्वकामिकम्” इत्युपक्रमे अमावस्यादिषु तत्र विशेषस्तूक्ता “नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा । निर्गता मथ्यमानाब्धौ ऊचः स्नानं शुभप्रदम्” । कामधेनोराविर्भावभावितस्वदेहात् अतः प्रागुक्तमित्यर्थः “तत्र स्नात्वा समभ्यर्च्य धेनुं पूज्य प्रयत्नतः । गोदानफलमाप्नोति नरो विगतकल्मषः । एकादश्यामुपोष्याथ नरो दिनचतुष्टयम् । रवन स्नापयेद्विष्णुं गव्येन पयसापि वा । नक्ताशी गोरसैर्द्रव्यैः पूजयेन्मधुसूदनम् । गन्धपुष्पैः सुनैवेद्यैर्वस्त्रालङ्कारकाञ्चनैः । तस्याग्रतश्च कामधेनुं [illegible] सवैभवन्तु । विप्राय वै सर्व्वगुणाय यत्र कृत्वा व्रतं तत्क्रमतो हरेस्तु” ।

कामव्रतं पद्मपु० “कामं पूज्य त्रयोदश्यां सुरूपो जायते ध्रुवम् । रतीं रूपवतीं भार्य्यां लभेत् कामांश्च पुष्कलान् । मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः” ।

कामषष्ठीव्रतं वराहपु० “कामव्रतं महाराज ! शृणु मे गदतोऽधुना । येन कामाः समृध्यन्ते मनसा चिन्तिता अपि । षष्ठ्यां फलाशनो यस्तु वर्षमेकं व्रतं चरेत् । माघमासे सिते पक्षे पञ्चम्यां नक्तभोजनः । षष्ठ्यान्तु प्राशयेद्धीमान् ! फलमेकन्तु पार्थिव ! । ततो भुञ्जीत यत्नेन वाग्यतः शुक्लमोदनम् । ब्राह्मणैः सह राजेन्द्र ! अथ वा केवलं फलम् । तमेकं दिवसं स्थित्वा सप्तम्यां पारणं नृप ! । अग्निकार्य्यं च कुर्वीत गुहरूपेण केशवम् । पूजयित्वा विधानेन वर्षमेकं व्रतं चरेत्” ।

कामावाप्तिव्रतं विष्णुधर्म्मोत्तरोक्तम् । “कृष्णपक्षे चतुर्दश्यां महाकालमथार्च्चयेत् । तस्मात्काममवाप्नोति यथेष्टं नात्र संशयः” ।

कार्त्तिकमासव्रतं नारदोक्तम् । “माहात्म्यमभिधास्यामि मासस्यास्य वरानने ! । येन ते जायते भक्तिर्भक्त्या येनार्च्यते हरिः । कार्त्तिके कृच्छ्रसेवी यः प्राजापत्यरतोऽपि वा । षड्द्वादशाहं पक्षं वा मासं वा वरवर्णिनि ! । क्षपयित्वा नरो याति तद्विष्णोः परमं पदम् । एकभक्तोऽथ वा नक्ते तथा सुभ्रु ! अयाचिते । कृते नरैर्दशाप्राप्तिर्भवेद्वै दीपमालया । तस्मिन् हरिदिनं पुण्यं तथा वै भीष्मपञ्चकम् । प्रबोधनीं नरः कृत्वा जागरेण समन्विताम् । न मातुर्जठरे याति अपि पापान्वितो नरः” ।

कार्त्तिकेयषष्ठीव्रतं भविष्योत्तरम् “मार्गशीर्षे सिते पक्षे षष्ठी भरतसत्तम ! । पुण्या पापहरा ज्ञेया शिवगीता गुहप्रिया । निहत्य तारकं षष्ठ्यां गुहस्तारकराजवत् । रराज तेन दयिता कार्त्तिकेयस्य सा तिथिः । स्नानदानादिकं कर्म्म तस्यामक्षय्यमुच्यते । येऽस्यां पश्यन्ति गाङ्गेयं दक्षिणाशां समाश्रितम् । ब्रह्महत्यादिपापेभ्यो मुच्यन्ते नात्र संशयः । तस्मादस्यां सोपवासः कुमारं पर्णसम्भवम् । राजतञ्च महाराज स्वर्णमयञ्चाथ दारुजम् । कारयित्वार्थसारेण कामामर्षविवर्जितः । अपराह्णे ततः स्नात्वा सम्यगाचम्य बुद्धिमान् । पद्मासनस्थं गाङ्गेयं ध्यायंस्तिष्ठेत्स यन्त्रितः” ।

कालरात्रिव्रतं कालिकापु० “साधु भक्तोऽसि धर्म्मज्ञ ! कालरात्रिव्रतं मम । शृणु ! वक्ष्याम्यहन्तेऽद्य कर्त्तव्यं विधिवद्यथा । मासि चाश्वयुजेऽष्टम्यां शुक्लपक्षे जितेन्द्रियः । सत्यवाक् स्थिरचित्तात्मा निरमस्यां

भवेत्सुधीः । कालीव्रतमिदं ख्यातं कर्त्तव्यं वरकुलोद्भवैः" । कालरात्रि काली ।

कालाष्टमीव्रतं वामनपु॰ "नभस्ये मासि च तथा या स्यात् कृष्णाष्टमी शुभा । युक्ता मृगशिरेणैव सा तु कालाष्टमी स्मृता । तस्यां सर्व्वेषु लिङ्गेषु तिथौ स्वपिति शङ्करः । वसन्तसन्निधाने तु तत्र पूजाऽक्षया स्मृता" । इदं व्रतं भाद्रादिवर्षसाध्यम् ।

कीर्त्तिव्रतं पद्मपु॰ "अश्वत्थं भास्करं गङ्गां प्रणम्यैकत्र वाग्यतः । एकभक्तं नरः कुर्य्यादष्टम्यां वै विमत्सरः । व्रतान्ते विप्रमिथुनं पूज्य धेनुत्रयान्वितम् । वृक्षं हिरण्मयं दद्यात् सोऽश्वमेधफलं लभेत् । दिवि देवविमानस्थो गीयतेऽप्सरसाङ्गणैः । एतत्कीर्त्तिव्रतं नाम भूतिकीर्त्तिप्रदायकम्" ।

कुक्कुटीव्रतं भविष्योक्तं २०६२ पृ॰ ति॰त॰ द्रष्टव्यम् ।

कुबेरतृतीयाव्रतं भविष्यपु॰ "तृतीयायान्तु वित्तेशं वित्ताढ्यो जायते ध्रुवम्" । पूजयित्वेति शेषः "क्रयादिव्यवहारे च लाभो दिव्यगुणो भवेत्" ।

कुमारषष्ठीव्रतं कालोत्तरोक्तम् । "चैत्रशुक्लात् समारभ्य व्रतार्थमधुनोच्यते । उपोष्य विधिना षष्ठीं विशेषात् षण्मुखं यजेत्" ।

कुम्भीव्रतं स्कन्दपु॰ "एकादश्यां कार्त्तिकस्य शुक्लपक्षे तु कारयेत् । कुम्भ्यादिनरकेभ्यस्तु उद्धरेत् स्वमशेषतः । प्रयत्नात् कार्त्तिके मासि विष्णोरग्रे तु जागरम् । सुपुष्कलैकादश्यां रात्रौ विशेषाद्दर्शयन्ति च । चतुरस्रं चतुर्द्वारं गोमयेनोपलिप्य च । चतुर्भिः शालिगोधूमवर्णकैरुपशोभितम् । स्नात्वा नारायणं पूज्य स्थण्डिले प्रतिमासु च । हुत्वा दिशां बलिं दत्त्वा विधानमवधारयेत् । दीपमालान्वितं गन्धपुष्पाद्यैः पूजयेत्ततः । कुम्भीं देव मयीं ध्यात्वा मुच्यते सर्वकिल्बिषैः" ।

कूर्म्मद्वादशीव्रतं धरणीव्रतोक्तम् "पौषमासस्य या पुण्या द्वादशी शुक्लपक्षतः । तस्यां प्रागिव सङ्कल्पं कुर्य्यात् स्नानादिकाः क्रियाः । निवर्त्याराधयेद्देवमेकादश्यां जनार्द्दनम् । पृथङ्मन्त्रैर्हि जन्मेऽ ! देवदेवं जनार्द्दनम् । कूर्म्माय पादौ प्रथमन्तु पूज्य नारायणायेति कटिं हरेस्तु । सङ्कर्षणायेत्युदरं हरेस्तु उरो विशोकाय भवाय कण्ठम् । सुबाहवे चैव भुजौ शिरश्च नमो विशालाय रथाङ्गशङ्खौ । स्वनाममन्त्रैश्च सुधूपगन्धैर्नानानिवेद्यैर्विविधैः फलैश्च । अभ्यर्च्य देव कलशं तदग्रे संस्थाप्य माल्याम्बुतदामकण्ठम् । तं रत्नगर्भन्तु पुरैव कृत्वा सर्वक्षितो हेममयञ्च देवम् । समन्दरं कूर्म्मरूपेण कृत्वा संस्थापयेत्ताम्रपात्रे घृतञ्च । पूर्णे घटे पर्य्यय सन्निवेश्याथो ब्राह्मणायैव सर्वं तु दद्यात्" । घृतञ्च पूर्णं ताम्रपात्रे समन्दरं कूर्म्मरूपं निधाय घटोपरि निवेश्य प्रभाते दद्यादित्यर्थः" ।

कृच्छ्रव्रतानि विष्णुरहस्ये "सुपुण्ये कार्त्तिके मासि देवर्षिपितृसेविते । क्रियमाणे व्रते नृणां स्वल्पेऽपि स्यान्महाफलम् । अतश्च संवत्सरः पुण्यस्तस्मादृषिभिः पूजितः । वर्षाणां कार्त्तिकः पुण्यः कार्त्तिकाद्भीष्मपञ्चकम् । नैवेद्यं पुष्पधूपञ्च अर्चनं सुविलेपनम् । दत्त्वैककार्त्तिके विष्णोः फलं सांवत्सरं लभेत् । अतः कार्त्तिकमासाद्य सदैव शुभकाङ्क्षिभिः । हरिमुद्दिश्य कर्त्तव्यं यथाशक्त्या सुकरं व्रतम् । कार्त्तिकस्यासिते पक्षे वायुभक्षश्चतुर्दशीम् । समुपोष्य नरो भक्त्या पूजयेद्गरुडध्वजम् । उपवासस्तु कर्त्तव्यो वारिमध्ये स्थितेन च । जलकृच्छ्रमिदं कृत्वा विष्णुलोकं व्रजेन्नरः । दशम्यां पञ्चगव्याशी एकादश्यामुपोषितः । अर्च्चयेच्चाच्युतं देवं नियतश्च व्रतञ्चरेत् । कार्त्तिकस्यासिते कृत्वा नरो देवव्रतञ्चरेत् । दामोदरं समभ्यर्च्य देवो वैमानिको भवेत् । अपः क्षीरं दधि घृतं सप्तम्यादिचतुर्दिनम् । कार्त्तिकस्यासिते पीत्वा एकादश्यामुपोषितः । कृच्छ्रं पैतामहं नाम कुर्व्वन् संपूजयेद्धरिम् । प्राप्नोति परमं विष्णोः स्थानं त्रैलोक्यपूजितम् । त्रिरात्रं पयसः पानमुपवासपरस्य च । षष्ठ्यादौ कार्त्तिके शुक्ले कृच्छ्रो माहेन्द्र उच्यते" इत्यादि ।

कृच्छ्रचतुर्थीव्रतं स्कन्दपु॰ "मार्गशीर्षे शुभे मासि सिते पक्षे तु षण्मुखम् । चतुर्थ्यां नियमं धृत्वा विघ्नेशं पूज्य भक्तितः । पुष्पैर्गन्धैश्च नैवेद्यैः लड्डुकैश्च सुसंस्कृतैः । पक्वैस्तिलापिष्टैश्च तथा मोदकैः प्रभुम् । पूजयित्वा विधानेन प्रार्थयेत्तत्र मानवः" ।

कृत्तिकाव्रतं भविष्योत्तरोक्तम् । "कार्त्तिक्यां पौर्णमास्यान्तु गृह्णीयात् कृत्तिकाव्रतम् । षट् मासांस्तु व्रतं यावदिदं सञ्चिन्त्य चेतसि । पारणे पारणे चापि पुराणज्ञे द्विजोत्तमे । उद्यापनं प्रयच्छेत यथा विभवसारतः । कृत्तिकासु स्वयं सोमः कृत्तिकासु वृहस्पतिः । यदा स्यात् सोमवारेण सा महाकार्त्तिकी स्मृता । ईदृशी बहुभिर्वर्षैर्बहुपुण्यैर्न लभ्यते । तस्याप्रि न दृष्टा नेया य-

दीक्षेच्छेय आत्मनः । अन्यापि कार्त्तिकी पार्थ ! कृमुपोष्या विधानतः । तस्या विधानं राजेन्द्र ! शृणुष्वैकाग्रमानसः । कार्त्तिके शुक्लपक्षस्य पौर्णमास्यां दिनोदये । नक्तेन नियमं कुर्य्याद्दन्तधावनपूर्ब्बकम् । उपवासेन वा शक्त्या ततः स्नात्वा जलाशये" इत्यादि ।

कृष्णचतुर्द्दशीव्रतं भविष्यपु० "बालवृद्धातुराणाञ्च भोगिनां स्त्रीषु वालिशे । विधानन्तेषु वक्ष्यामि शृणुते ते यथा सुत ! । भूतायां फाल्गुने कुर्य्यात् कृष्णपक्षेऽतिभक्तितः । दरिद्राणामनाथानामक्षमाणां विशेषतः । सर्व्वकामप्रदं कृष्णचतुर्द्दश्यां शिवव्रतम् । रात्रौ विशेषपूजा तु महास्नपनसंयुता । महादीपद्वयं देयं शतमष्टोत्तरं पुनः । घृतं गुग्गुलं धूपं शिवं पशुपतिं यजेत् । खण्डखाद्यान्यनेकानि भक्ष्याणि विविधानि च । यथा समर्पयेत् भक्त्या वित्तशाठ्यं विना सुत ! । रात्रौ जागरणं कार्य्यं शिवस्याग्रे शिवं जपेत्" । शिवधर्म्मोक्तम् "नारी चोपवसेदब्दं कृष्णामेकाञ्चतुर्द्दशीम् । वर्षान्ते प्रतिमां कृत्वा शालिपिष्टमयीं शुभाम् । गीतानुलेपनैर्माल्यैः पीतवस्त्रैस्तु पूजयेत् । पूर्व्वोक्तमखिलं कृत्वा शिवाय विनिवेदयेत्" ।

कृष्णद्वादशीव्रतं वराहपु० "एकभक्तेन नक्तेन तथैवायाचितेन च । उपवासेन दानेन न निर्द्वादशिको भवेत् । मार्गशीर्षस्य मासस्य श्रुतं सर्व्वं त्वया बुध ! । अन्यीयान्मादिमासेवं कुर्य्यात् संवत्सरं व्रती । नामानि देवदेवस्य केशवस्य पृथक् पृथक् । कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्द्दनः । उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः । योगेशः पुण्डरीकाक्षो मासनामान्यनुक्रमात्" । विष्णुधर्म्मोत्तरोक्तम् "मघान्तु समतीतायां द्वादशी या भवेन्नृप ! । ततः प्रभृति कर्त्तव्यं व्रतमेतदुपोषिता । द्वादशीषु च कृष्णासु नाम कृष्णस्य कीर्त्तयेत् । तेनैव नाम्ना कर्त्तव्यौ जपहोमौ तथैव च । तिलैर्निवेदनं कार्य्यं होमः कार्य्यस्तथा तिलैः । पौषन्तु समतीतायां कृष्णा या द्वादशी भवेत् । तस्यां व्रतावसाने तु तिलान् दद्याद् द्विजातिषु । सुवर्णञ्च महीपाल ! रक्तवस्त्रं तथैव च । संवत्सरमिदं कृत्वा व्रतं मनुजपुङ्गव ! । तिर्य्यग्योनिं न चाप्नोति स्वर्गलोकञ्च गच्छति । यावज्जीवं व्रतमिदं यः करोति समाहितः । न स दुःखमवाप्नोति नारकं मनुजोत्तम ! । यत्र वैतरणी दुर्गा क्षुरधारा सपर्व्वता । पापानां यातना यत्र तत्रासौ न गमिष्यति" ।

कृष्णव्रत पद्मपु० "एकादश्यां तु नक्ताशी मत्स्यं विनिवेदयेत्" । 'विप्रायेति शेषः 'कृत्वा मत्स्यं च सौवर्णं स विष्णोः पदमाप्नुयात् । एतत् कृष्णव्रतं नाम कल्पान्ते सुखलाभकृत्" ।

कृष्णषष्ठीव्रतं भविष्योत्तरोक्तम् । "कृष्णषष्ठ्यां प्रयत्नेन कृत्वा नक्तं विधानतः । मासो मार्गशिरस्यादावंशुमानिति पूजयेत् । विधिवत् प्राश्य गोमूत्रमनाहारो निशि स्वपेत् । अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः" । इत्यादि तदवधिवर्षसाध्यमिदम् ।

कृष्णाष्टमीव्रतं देवीपु० "कृष्णाष्टम्यां विधानं वै निखिलं क्रियते यथा । क्रमेण मे तथा ब्रूहि तत् कर्त्तव्यं सुरेश्वर" । ईश्वर उवाच "हेमन्ते त्वथ सम्प्राप्ते मासि मार्गशिरे तथा । नक्तं कृत्वा शुचिर्भूत्वा गोमूत्रं प्राशयेन्निशि" । नक्तं कृत्वा नक्तमनुकल्पम् "आहरेद्वाशनं यत्र यथान्नञ्च तथाशयेत् । तेन नक्तं समुद्दिष्टं प्राशिता प्राशितेन च" इति । तेन नक्तं समुद्दिष्टं प्राशितेन चेति क्वचित्प्राशितेन क्वचिदप्राशितेनेत्यर्थः । "कृष्णाष्टम्यां विधानं वै शङ्करं पूज्य भक्तितः । अतिरात्रस्य यज्ञस्य फलमष्टगुणं भवेत् । स्मरेच्च शङ्करं नाम सायं रात्रौ दिवा यथा" इत्यादि । तदवधि वर्षसाध्यम् "कृष्णाष्टम्यां चैत्रमासे स्नातो नियतमानसः । कृष्णमभ्यर्च्य पूजाञ्च देवक्यां कुरुते तु यः । निराहारो जपन्नाम कृष्णस्य जगतः पतेः । उपविश्य जपन् स्नातः च्युतप्रस्खलितादिषु । पूजायाञ्चापि कृष्णस्य सप्तवारान् प्रकीर्त्तयेत् । पापिष्ठिनो विकर्म्मस्थान् नालपेन्नैव नास्तिकान् । प्रभाते वाम्बुना स्नातो दद्याद्विप्राय दक्षिणाम् । भुञ्जीत कृतपूजश्च कृष्णस्यैव जगत्पतेः" इत्यादि । इदं तदवधि वर्षसाध्यम् । भविष्योत्तरोक्तम् । "कृष्णाष्टमीव्रतं पार्थ ! शृणु पापहरं परम् । धर्म्मस्य जननं लोके रुद्रप्रीतिकरं परम् । मार्गशीर्षेऽथ वै मासि दन्तधावनपूर्ब्बकम् । उपवासस्य नियमं कुर्ब्बन्नक्तस्य च व्रती" । समर्थासमर्थभेदेन व्यवस्थितो विकल्पः । इत्यादि तदवधि वर्षसाध्यमिदम् । व्रतान्तरं कृष्णाष्टमीशब्दे द्रष्टव्यम् ।

कृष्णैकादशीव्रतं विष्णुधर्म्मोत्तरोक्तम् । "एकादशी तथा कृष्णा फाल्गुने मासि भार्गव ! । छन्दोदेवस्य कर्त्तव्या पूजा धर्म्मभृताम्बर । पूजनाच्छन्ददेवस्य येनायं गुणवर्जितम् । न प्राप्नोति तथा प्रीतिं गुणवन्तं न संशयम्" ।

कोकिलाव्रतं भविष्योत्तरोक्तम् । "आषाढपौर्णमास्यान्तु सन्ध्याकाले ह्युपस्थिते । सङ्कल्पयेन्मासमेकं श्रावणीप्रभृति

द्यहम् । स्नानं करिष्ये नियता ब्रह्मचर्य्ये स्थिता सती । भोक्ष्यामि नक्तं भूशय्यामुरिष्ये प्राचिनान्त्याम् । इति सङ्कल्प्य पुरुषो नारी वा ब्राह्मणान्तिके । प्राच्यानुप्रान्ततः प्राज्ञे सर्वसामग्रिसंयुतः” इत्यादि ।

कोटीश्वरीतृतीयाव्रतं स्कन्दपु० “शृणु भद्रे ! परं गुह्यं सर्वकामफलप्रदम् । दुर्भगायाश्च नारीणां सौभाग्यकरणं परम् । कोटीश्वरीति विख्यातं व्रतः कोटीश्वरीव्रतम् । तृतीया शुक्लपक्षे तु माघि भाद्रपदे भवेत् । तस्यां व्रतं तु संप्राप्य यावद्वर्षचतुष्टयम् । उपवासेन कर्त्तव्यं वर्षे वर्षे तु सुन्दरि ! । लक्षसंख्यानां तण्डुलानां तिलानां वा सुलोचने ! । लक्षमेकं विरच्याथ स्थापेत् पर्याप्य शोभने । क्षीरसंमिश्रितैः कार्य्या देव्यामूर्त्तिः सुलोचना । कृत्वा तु पुष्पप्राकारं पुष्पमालाभिरलङ्कृतम् । संस्थाप्य पार्वतीं देवीं पूजयेद्भक्तिभावितः” इत्यादि ।

कौमुदीव्रतं विष्णुरहस्योक्तम् । “मासि चाश्वयुजे शुक्ल एकादश्यामुपोषितः । कुर्य्यात् तु व्रतं श्रेष्ठं कौमुदाख्यं महाफलम् । अहिंसकः शुचिर्भूत्वा धौतवासा जितेन्द्रियः । द्वादश्यामर्चयेद्‌ स्नात्वा वासुदेवं जगद्गुरुम्” ।

क्षेमव्रतं विष्णुधर्म्मोत्तरोक्तम् । “यक्षाणां राक्षसानाञ्च चतुर्दश्याञ्च पूजनम् । कृत्वा क्षेममवाप्नोति क्रियासाफल्यमेव च” ।

गणपतिचतुर्थीव्रतं भविष्यपु० “चतुर्थ्यान्तु महाराज ! निराहारो व्रतान्वितः । दत्त्वा तिलान्नं भुङ्क्ते यः स्वयं भुङ्क्ते तिलोदकम्” । दिवा निराहारो रात्रौ भुङ्क्ते इति विरोधपरिहारः । वर्षद्वये समाप्ते तु व्रतस्य तु यदा भवेत् । विनायकस्तस्य तुष्टो ददाति फलमीप्सितम्” ।

गन्धव्रतं शिवधर्म्मोक्तम् “पौर्णमास्यामुपवसेदृदमेकं सुयन्त्रितः । वर्षान्ते सर्वगन्धाढ्यां प्रतिमां विनिवेदयेत् । सुविचित्रैर्महायानैर्दिव्यगन्धविभूषितैः । युगकोटिशतं साग्रं शिवलोके महीयते” ।

गलन्तिकाव्रतं शिवरहस्योक्तम् “पवित्रतोययुक्तैर्यः कुम्भैः पौषे शिवोपरि गालयेद्‌ यः पयोधारां स ब्राह्मपदमश्नुते” ।

गायत्रीव्रतं गरुड़पु० “अथोत्तमं परं ब्रह्मव्रतं शृणु ! भद्रदम् । चतुर्दश्यां महाभाग ! सर्वरोगार्त्तिशान्तये । ज्वरगुल्मप्लीहमूत्रकृच्छ्रातिसारसंयुतः । मर्त्त्यैर्नित्यमिदं कार्य्यं तदार्त्तिप्रशान्तये । स्नात्वा तु श्वेतवस्त्रः सर्वकामविवर्जितः । आदित्यमुपतिष्ठेत गायत्र्यष्टशतं जपन् शुद्धः । उदयात् पूर्वमारभ्य यावदस्तं गतो रविः । निराहारो जितक्रोधो तावत्तिष्ठेत् समाहितः । एवावसाने देवमर्च्चयेत् पुरुषोत्तमम् । उपोष्य विधिवत् स्नात्वा तथा पर्वणि सुव्रतः” । पर्वणि, पौर्णमास्याम् । एतच्च शुक्लचतुर्दशीव्रतं, पुराणे शुक्लपक्षस्य व्रतप्रकरणे पठितत्वात् ।

गुड़तृतीयाव्रतं भविष्यपु० “गुडपूपास्तु दातव्या मासि भाद्रपदे तु या । तृतीया पावनेनापि वामदेवस्य प्रीतये” ।

गुणावाप्तिव्रतं विष्णुपु० “अतःपरं प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव । द्विधा तु देवदेवस्य मूर्त्तिर्भवति यादव । घोरा सौम्या शिवा चान्या घोरा भवति पावका । शिवा चाग्निपतिर्यस्मादग्नीषोमात्मकं जगत् । द्विधा घोरा विनिर्दिष्टा द्विधा सौम्या ततः पुनः । घोरा वह्निश्च सूर्य्यश्च सौम्या सोमजलाधिपौ । तेषां च पूजनं कार्य्यं प्रतिपत्प्रभृति क्रमात् । शुक्लपक्षात् तथारभ्य फाल्गुनस्य द्विजोत्तम ! । आदित्यं पूजयेद्राजन् ! प्रथमेऽह्नि परः शुचिः । द्वितीयेऽह्नि तथा वह्निं तृतीयेऽह्नि जलाधिपम् । चतुर्थेऽह्नि शशाङ्कञ्च यथाशक्त्या नरोत्तमः” ।

गुरुव्रतं भविष्योक्तम् “अनुराधासु चाचार्य्यं देवानां पूज्य भक्तितः । पूर्वोक्तक्रमयोगेन कृत्वा नक्तान्यथाचरेत् । हैमं हेममये पात्रे स्थापयेच्च बृहस्पतिम् । पीताम्बरयुगच्छन्नं पीतयज्ञोपवीतकम् । पादुकाच्छत्रसहितं सदण्डं सकमण्डलुम् । संपूज्य पुष्पनिकरैर्धूपैर्दीपाक्षतादिभिः । सकलाद्योपहारञ्च द्विजाय प्रतिपादयेत्” ।

गुर्वष्टमीव्रतं भविष्यपु० “मासि भाद्रपदे राजन् ! शुक्लपक्षे यदाष्टमी । गुरुवारेण संयुक्ता सा तिथिर्भद्रदर्शिनी । सम्पूर्णा सर्वपापघ्नी प्रेतयोनिविनाशनी । कृत्वैकाशयनं सम्यक् दन्तधावनपूर्वकम् । एकभक्तेन राजेन्द्र ! तस्यां देवो बृहस्पतिः । स्नानं नद्यां तडागे वा गृहे वा नियमात्मना । सौवर्णं कारयेच्चैव राजतं वा नरोत्तम ! तस्याभावे यथाशक्त्या श्रीखण्डेनापि कारयेत्” ।

गुह्यकद्वादशीव्रतं भविष्योत्तरे “द्वादश्यां गुह्यकारण्यं फलाक्षतसंयुतैः । हैमं विप्राय वै दद्यादुपवासपरायणः । एतद्वै गुह्यकं प्रोक्तं व्रतं पापहरं शुभम्” ।

गृहपञ्चमीव्रतं भविष्योत्तरे “सर्वौषध्युदकस्नातः पञ्चम्यां पूज्य पङ्कजम् । सर्वोपकारदानञ्च यः करोति गृहाश्रमे । गृहाटोद्भवं पूर्णं शिवां स्थालीस पञ्चमीम्” ।

गृहाटः पेषणयन्त्रमुदूखलं धान्यकण्डनम्। "उदकुम्भश्च पूर्णश्च एतेषामष्टकञ्च यत्। एतानि गृहिणां गेहे प्रस्थाप्य पुरुषोत्तम!। उपस्करव्रते नारी न सीदति कदाचन। एतद्गृहव्रतं नाम सर्वसौख्यप्रदायकम्"।

गोपद्मत्रिरात्रव्रतं भविष्योक्तम् "पार्थ! भाद्रपदे मासि शुक्लपक्षे दिनोदये। तृतीयायां चतुर्थ्यां वा श्रद्धया परिवत्सरम्। उपवासेन भुञ्जीयात् व्रत नाम्ना तु गोपदम्। स्नात्वा नरोऽथ नारी वा पुष्पधूपविलेपनैः। दध्ना च घृतमिश्रेण पिष्टकैर्वनमालया। अभ्यर्चयेद्गवां शृङ्गे सपुच्छे चैव भारत!। दद्याद्यथाशक्तिकं भक्त्या वासः पूर्वापराह्णयोः। अनग्निपक्वं भुञ्जीयात् तैलक्षारविवर्जितम्"।

गोपालनवमीव्रतं गरुडपु० "नभा समुद्रगामिन्यां नद्यां स्नानमाचरेत्। शुचौ तत्पुलिने तीरे सिकताभिरलङ्कृते। वसुदेवसुतं विष्णुं गोपीगणनिषेवितम्। वनमालाचितोरस्कं वन्यपुष्पैरलङ्कृतम्। बर्हिबर्हकृतापीडं पीतकौषेयवाससम्। समानवेषैरबलैः क्रीडद्भिरितरेतरम्। वृतं गोपकुमारैश्च लीलाकुञ्चितमूर्द्धजम्। ध्यात्वा देवं परं विष्णुं सर्वलोकेश्वरेश्वरम्। वन्यपुष्पैश्च गन्धाद्यैः पूजयित्वा यथाविधि"।

गोमयादिसप्तमीव्रतं भविष्यपु० "यः क्षिपेद्गोमयाहारः द्वादश सप्तमीः क्रमात् ।राजेन्द्र! यावकाहारः शीर्णपर्णाशनोऽपि वा। क्षीराशी वैश्वभक्तो वा भिक्षाहारोऽथवा पुनः। जलाहारोऽथवा भूत्वा पूजयित्वा दिवाकरम्। पुष्पोपहारैर्विविधैः पद्मसौगन्धिकोत्पलैः। नानाप्रकारैर्गन्धैश्च धूपैर्गुग्गुलचन्दनैः। शर्करापायसाद्यैश्च विचित्रैश्च विभूषणैः। अर्चयित्वा नरश्रेष्ठ! हिरण्याद्यादिभिर्नरः। यथोक्तफलमाप्नोति क्रतुभिर्भूरिदक्षिणैः। तदत्र प्राप्यते वीर! सप्तम्यां केवलं रवेः"।

गौरीचतुर्थीव्रतं पद्मपु० "उमाचतुर्थ्यां माघे तु शुक्लायां योगिनीगणैः। नागभक्षयित्वा रुद्रा च भूयः आस्नात् स्वकैर्गुणैः। तस्मात् सा तत्र सम्पूज्या नरैः स्त्रीभिर्विशेषतः। कुन्दपुष्पैः प्रयत्नेन सम्यग्भक्त्या समाहितैः। कुङ्कुमालक्तकाभ्याञ्च रक्तसूत्रैः सकङ्कणैः। अन्यैः पुष्पैस्तथा धूपैर्दीपैर्बलिभिरेव च। गुडार्द्रकाभ्यां पयसा लवणाभ्याञ्च पालकैः। पूज्याः स्त्रियश्च विधवास्तथा विप्राश्च साधवः। सौभाग्यवृद्धये पश्चात् भोक्तव्यं बन्धुभिः सह" इति।

गौरीव्रतं कालीमहोक्तम् "पौलोमस्तपो- वन्ध्ये स्त्रीणां सौभाग्यवर्द्धनम्। चैत्रशुक्लतृतीयायां गौरीव्रतं समाचरेत्। उपोष्य तु प्रयत्नेन विधानमिदमाचरेत्"।

गोवत्सद्वादशीव्रतं भविष्योत्तरे "संप्राप्ते कार्त्तिके मासि शुक्लपक्षे नृपोत्तम!। द्वादश्यां कृतसङ्कल्पः स्नात्वा पुण्ये जलाशये। नरो वा यदि वा नारी नक्तं सङ्कल्प्य चेतसि। ततो मध्याह्नसमये कृत्वा देवार्चनादिकम्। प्रतीक्षेतागमं भक्त्या गवां गोष्ठानतत्परः। सवत्सां तुल्यवर्णाञ्च शीलिनीं गां पयस्विनीम्। चन्दनादिभिरालिप्य पुष्पमालाभिरर्चयेत्"।

गोविन्दद्वादशीव्रतं विष्णुरहस्ये "द्वादश्यां भोजयेद्विप्रान् तेभ्यो दद्याच्च दक्षिणाम्। प्रतिमासं तिथौ तस्याङ्गोभ्यो दद्याद्यथाशक्तिकम्। गवां क्षीरेण संयुक्तं दध्ना वाऽथ घृतेन वा। चरुपात्रे च समश्नीयाद्वारत्रयं व्रती। संवत्सरमुपोष्यैव गोविन्दद्वादशीं नरः। पुनर्गोभ्यो यथा भक्त्या भूयो दद्याद्यथाशक्तिकम्। गोविन्दद्वादशीं यां तु उपोष्य विधिवन्नरः। प्राप्नोति विधिवद्दत्त्वा गोसहस्रस्य यत् फलम्"।

चण्डिकाव्रतं भविष्योत्तरोक्तम् "अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि। योऽब्दमेकं न भुञ्जीत चण्डिकाराधने रतः। स याति परमं स्थानं यत्र सा चण्डिका स्थिता"।

चतुर्दशीजागरणव्रतं कालिकापु० "कार्त्तिके शुक्लभूतायां हरं स्नाप्य घृतादिभिः"। शुक्लभूतायां शुक्लचतुर्दश्याम् "समालभ्य न्यसेद्भूयः सौवर्णं वा प्रपञ्चकम्। सुरभिभिस्ततः पुष्पैरभ्यर्च्य गुग्गुलं दहेत्। नैवेद्यञ्च पुनर्दत्त्वा बलिं बाह्ये विनिःक्षिपेत्। वितानं दीपमादर्शं वस्त्रयुग्मं ध्वजांस्तथा। धूपोत्क्षेपञ्च घण्टाञ्च दत्त्वा देवाय शम्भवे। प्रदक्षिणं ततः कुर्य्याद्धृष्टतुष्टैरवश्य हि। ततस्तत्रोपविष्टाश्च जागरं परिकल्पयेत्"।

चतुर्दशीव्रतं भविष्योत्तरे "चतुर्दश्यां निराहारः समभ्यर्च्य त्रिलोचनम्। पुष्पधूपादिनैवेद्यै रात्रौ जागरणेन च। पञ्चगव्यं निशि प्राश्य स्वपेद्भूमौ विमत्सरः"।

चतुर्दश्यष्टमीनक्तव्रतं भविष्योत्तरे "शृणु! नक्तोपवासस्य विधानं पाण्डुनन्दन!। येन विज्ञानमात्रेण नरो मोक्षमवाप्नुयात्। येषु केषु च मासेषु शुक्लपक्षे चतुर्दशीम्। ब्राह्मणं भोजयित्वा तु प्रारभेत् श्रुतितो व्रतम्। मासि मासि भवन्ति द्वे अष्टमी च चतुर्दशी। शिवार्चनरतो भूत्वा शिवध्यानैकमानसः। चतुर्थं भाजनं कृत्वा भुञ्जीयान्नक्तभोजनम्। उपवासात्परं भैक्ष्यं भैक्ष्या

नृपरनयाचितम् । अयाचितात् परं नक्तं तस्मादन्नेन भोजयेत् । देवैश्च भुक्तं पूर्व्वाह्ने मध्याह्ने मुनिभिस्तथा । अपराह्ने च पितृभिः सन्ध्यायां गुह्यकादिभिः । सर्व्ववेलामतिक्रम्य नक्तभोजी सदा भवेत् । हविष्यभोजनं स्नानं सत्यमाहारलाघवम् । अग्निकार्य्यमधःशय्यां नक्तभोजी सदा भवेत्" ।

चतुर्म्मास्य(चातुर्म्मास्य) व्रतं भविष्योत्तरे "शृणु पार्थ ! प्रवक्ष्यामि गोविन्दशयनव्रतम् । कटिदानं समुत्थानं चतुर्म्मासीव्रतक्रमम् । मिथुनस्थे सहस्रांशौ स्थापयन्मधुसूदनम् । तुलां प्राप्ते महाराज ! पुनरुत्थापयेच्च तम् । अधिशयिते च देवे एष एव विधिक्रमः । नान्यथा स्थापयेत् कृष्णं नान्यथोत्थापयेत्तथा । आषाढ़स्य सिते पक्षे एकादश्यामुपोषितः । स्थापयेत् प्रतिमां विष्णोः शङ्खचक्रगदाधराम् । काञ्चनीं राजतीं ताम्रमयीं पित्तलजां तथा । पीताम्बरधरां सौम्यां पर्य्यङ्के चास्तृते शुभे । शुक्लवस्त्रपटच्छन्ने सोपधाने सुपूजिते । प्रभावेण ततो विष्णोः कृताञ्जलिपुटस्तथा । चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि । इमं करिष्ये नियमं निर्व्विघ्नं कुरु मेऽच्युत ! । स्त्री वा नरो वा मद्भक्तो धर्म्मार्थं सुदृढ़व्रतः । गृह्णीयान्नियमानेतान् दन्तधावनपूर्व्वकान् । तेषां फलानि वक्ष्यामि तत्कर्त्तॄणां पृथक् पृथक् । मधुस्वरो भवेद्राजा ! पुरुषो गुड़वर्ज्जनात् । तैलस्य वर्ज्जनादेव सुन्दराङ्गः प्रजायते । कटुतैलपरित्यागाच्छत्रुनाशमवाप्नुयात् । मधूकतैलत्यागेन सौभाग्यमतुलं लभेत् । योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् । कटुकाम्लतिक्तमधुक्षारकषायरसम् । यो वर्ज्जयेत् स वैरूप्यं दौर्गन्ध्यं नाप्नुयात् क्वचित् । ताम्बूलं वर्ज्जयेत् भोगी रक्तकण्ठश्च जायते । घृतत्यागाच्च लावण्यं सर्व्वस्निग्धतनुर्भवेत् । फलत्यागाच्च मतिमान् बहुपुत्रश्च जायते । शाकपत्राशनाद्रोगी अपक्वादमलो भवेत् । पादाभ्यङ्गपरित्यागाच्छिरोऽभ्यङ्गं विवर्ज्जयेत् । दीप्तिमान् दीपदानेन सोऽपि स्याद्रूपतिर्भवेत् । दधिदुग्धैकनियमी गोभक्तो गोपतिर्भवेत् । इन्द्रातिथित्वमाप्नोति स्थालीपाकस्य वर्ज्जनात् । लभते सन्ततिं दीर्घां तैलपक्वस्य वर्ज्जनात् । भूमौ प्रस्तरशायी च विप्रो मुनिवरो भवेत् । सदा मौनी सदा योगी मधुमांसस्य वर्ज्जनात् । निर्व्याधिर्नीरुगोजस्वी सुरामद्यं विवर्ज्जयन् । एवमादिपरित्यागात् धर्म्मः स्यात् कुरुनन्दन ! । एकान्तरोपवासेन ब्रह्मलोके महीयते । धारणान्नखरोम्णाञ्च गङ्गास्नानफलं लभेत् । मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत् । अयं चातुर्म्मास्यव्रतारम्भो गुर्व्वस्तमयादावपि कार्य्यः । यदाह वृद्धगर्गः "न शैशवस्य मौढ्यञ्च शुक्रगुर्व्वोर्न बाधते" । "पञ्चकं चिन्तयेन्नादौ चातुर्म्मास्यविधौ नरः । पादाभिवन्दनाद्विष्णोर्लभेद्गोदानजं फलम् । भूमौ भुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् । नमो नारायणायेति जपन्नुपवासफलं लभेत् । विष्णुपादाब्जसंस्पर्शाद्दिनपापात् प्रमुच्यते । पादोदकाभिषेकाद्वै गङ्गास्नानं दिने दिने । पर्णेषु च नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् । नित्यं शास्त्रसमाख्यानाल्लोकान् यस्तु प्रबोधयेत् । व्यासस्तुष्यति तस्याशु विष्णुलोकं स गच्छति । कृत्वा प्रदक्षिणं विष्णोर्लोकमप्सरसां लभेत् । तोयाम्बुस्नापनादिव्यानिर्म्मलं देहमाप्नुयात् । पञ्चगव्याशनात् पार्थ ! चान्द्रायणफलं लभेत् । अयाचितेन प्राप्नोति पुत्रान् धन्यानशेषतः । षष्ठान्नकालभोक्ता यः कल्पस्थायी भवेद्दिवि" । षष्ठान्नकालभोक्ता उपवासद्वयान्तरितैकभक्तः "शिलोञ्छलेन भुञ्जानः प्रयागस्नानमाप्नुयात् । विष्णुदेवकुले कुर्य्यादुपलेपनमार्ज्जने । कल्पस्थायी भवेद्राजा स नरो नात्र संशयः । प्रदक्षिणशतं यस्तु करोति स्तुतिपाठकः । हंसयुक्तविमानेन स तु विष्णुपुरं व्रजेत् । गीतवाद्यकरो विष्णोर्गान्धर्व्वं लोकमाप्नुयात् । यामद्वयं जलत्यागान्न रोगैरभिभूयते । गुड़व्रती नरो दद्यादन्ते ताम्रभाजनम् । सर्व्वत्रायं नृपश्रेष्ठ ! व्रतस्यायं विधिः" ।

चतुर्म्मूर्त्तिचतुर्थीव्रतं विष्णुधर्म्मोत्तरोक्तम् "इदमन्यत् प्रवक्ष्यामि चतुर्म्मूर्त्तिव्रतं तव । वासुदेवांशकात् जाताः सर्व्वे देवगणा नृप ! । अधिकेन तु शेषेण साध्या जातास्तथा सुराः । वर्णार्थि चाक्रिकांशेन चतुरात्मा हरिः स्मृतः । नरो नारायणश्चैव हरिः कृष्णश्च वीर्य्यवान् । चतुरात्मा हरिर्जातो धर्म्मपुत्रस्य यादव ! । आदित्येषु तु यावुक्तौ मित्रावरुणसंज्ञकौ । तावेव नाम्नी जानीहि हरिकृष्णौ च यादव । आदित्येषु यावुक्तौ धर्म्मविष्णू सुरोत्तमौ । तावेव विश्वसाध्येषु नरनारायणौ पुनः । चैत्रशुक्लचतुर्थ्यान्तु सोपवासस्तु पूजयेत् । देवेशं चतुरात्मानं विश्वं भक्त्या नराधिप ! । व्रतमेतन्नरः कृत्वा पूर्णे द्वादशवत्सरम् । न दुर्गतिमवाप्नोति मोक्षोपायञ्च विन्दति" ।

चतुर्य्युगव्रतं विष्णुधर्म्मोक्तम् "इदमन्यत् प्रवक्ष्यामि चतुर्य्युगव्रतं तव । कृतादिकं चतुर्य्युगं पूजयेत् सुसमाहितः । प्रथमे

चैत्रशुक्लस्य दिने पूज्यं कृतं युगम्। श्वेतेन वस्त्रयुग्मेन गन्धमाल्यादिना तथा। चैत्रशुक्लसमारम्भे प्रथमेऽहनि पूजयेत्। कृतं शुक्लेन वर्णेन गन्धमाल्यादिना द्विज!। द्वितीयेऽहनि रक्तेन तथा त्रेतान्तु पूजयेत्। तृतीयेऽहनि पीतेन द्वापरं पूजयेद् बुधः। चतुर्थेऽहनि कृष्णेन तिष्यं संपूजयेद् युगम्। शिवार्द्धकैः कुङ्कुमेन तथैव च हरिद्रया। तथैवामलकैः स्नानमथ वै दिवसक्रमात्। क्षीरेण प्राशयात्तान्तु कुर्य्यात् प्रत्यहमेव च। कृत्वा व्रतं वत्सरमेतदेकं चतुर्युगं मोदति नाकपृष्ठे। संपूज्य देवं युगमूर्त्तिसंज्ञं चतुर्युगं याति महीं समग्राम्"।

चन्द्रव्रतं वराहपु० "चन्द्रव्रतं पञ्चदश्यां शुक्लायां नक्तभोजनम्। दश पञ्च च वर्षाणि व्रतमेतत् समाचरेत्। अश्वमेधसहस्राणि राजसूयशतानि च। इष्टानि तेन राजेन्द्र! एतद्व्रतं समाचरेत्"। पद्मपु० "चान्द्रायणस्यान्तः कृत्वा हैमचन्द्रं निवेदयेत्। चन्द्रव्रतमिदं प्रोक्तं चन्द्रलोकप्रदायकम्"।

चन्द्ररोहिणीशयनव्रतं पद्मपु० "रोहिणीचन्द्रशयनं सोम व्रतमिहोत्तमम्। तस्मिन्नारायणस्यार्च्चामर्च्चयेदिन्दुनामभिः। यदा सोमदिने शुक्ला भवेत्पञ्चदशी क्वचित्। अथ वा ब्रह्मनक्षत्रं पौर्णमास्यां प्रजायते। तदा स्नानं नरः कुर्य्यात् पञ्चगव्येन सर्षपैः"।

चन्द्रार्कव्रतं विष्णुधर्मोत्तरोक्तम् "अमावास्यान्तवेलायां सोपवासो नरोत्तम!। पद्मद्वये पूजयन्ति चन्द्रादिकरायिणौ। आदित्यमण्डलके प्रथमं षोडशारके। आदित्यं सर्व्वरक्तेन चन्द्रं शुक्लेन यादव!। माल्यादिना महाभाग! होमयेत् तिलतण्डुलान्। घृतक्षीरयुतान् राजन्! तथार्च्चयेद्यथाविधि। व्रतान्ते ब्राह्मणेन्द्राय! कनकं प्रतिपादयेत्। रजतं वा महाभाग! यथाशक्ति विमत्सरः। कृत्वा व्रतं वत्सरमेतदिष्टं दद्याच्च दीपान् विधिवत् प्रभूतान्। चान्द्रं पदं प्राप्य विवर्द्धते सदा धनान्वितः स्यात् त्रिदिवे इहैव"।

चम्पाषष्ठीव्रतं स्कन्दपु० "यदि लभ्येत जीवेऽपि दैवेन नृपसत्तम!। षष्ठी भाद्रपदे शुक्ला वैधृतेन समन्विता। विशाखा भौमयोगेन वा चम्पेतीह विश्रुता। देवासुरमनुष्याणां दुर्लभा पापहारिणी। कृते त्रेतायां पञ्चाशद्वायनी द्वापरे पुनः। चत्वारिंशत् कलौ त्रिंशद्वायनी दुर्लभा ततः"।

चान्द्रायणव्रतं कूर्म्मपु० "अथ शुक्लचतुर्दश्यां पौर्णमासी समाहितः। चान्द्रायणव्रतं मासं चाचरेत् सर्व्वपापजित्। पूर्णेन्दुपौर्णमास्यान्तु पूजयेत् प्रत्यहं जलैः"।

चित्रभानुसप्तमीव्रतं भविष्यपु० "सप्तम्यां पूज्य देवेशं चित्रभानुं दिवाकरम्। रक्तैश्च गन्धकुसुमैर्महदारोग्यमाप्नुयात्"।

चैत्रभाद्रमाघतृतीयाव्रतं भविष्योत्तरे "चैत्रे मासि तृतीयायां दन्तधावनपूर्व्वकम्। उपवासस्य नियमान् गृह्णीयाद्भक्तिभावतः। अञ्जनं च सताम्बूलं सिन्दूरं रक्तवाससी। वर्जयेत् सोपवासापि अवैधव्यकरं परम्। विधवा गतिमार्गेण कुमारी च यदृच्छया। कुर्य्यात्तथार्च्चनविधिं श्रूयतामत्र च क्रमः। विधिर्भाद्रपदे प्रोक्तः सर्व्वसौख्यप्रदायकः। सप्तधान्यविधानेन शूर्पस्थां पूजयेदुमाम्"

चैत्रशुक्लप्रतिपद्विहितं तिलकव्रतम् भविष्यपु० "वसन्ते किंशुकाशोकशोभिते प्रतिपत्तिथिः। शुक्ला तस्यां प्रकुर्वीत स्नानं नियममास्थितः। नारी नरो वा राजेन्द्र! संतर्प्य पितृदेवताः। नद्यास्तीरे तडागे वा गृहे वा तदभावतः। पिष्टातकेन विलिखेद्वत्सरं पुरुषाकृतिम्। ततः प्रभृत्यनुदिनं तिलकालङ्कृतं सुखम्। धार्य्यं संवत्सरं यावच्छशिनेव नभस्तलम्। एवं नरो वा नारी वा व्रतमेतत् समाचरेत्। सदैव पुरुषव्याघ्र! भोगान् भुवि भुनक्त्यसौ"।

जयन्तीसप्तमीव्रतं भविष्यपु० "माघस्य शुक्लपक्षे तु सप्तमी या त्रिलोचना। जयन्ती नाम सा प्रोक्ता पुण्या पापहरा तथा। उपोष्या येन विधिना शृणु तं पार्वतीप्रिय! पारणानि तु चत्वारि कथितानि च पण्डितैः। पञ्चम्यामेकभक्तन्तु षष्ठ्यां नक्तं प्रकीर्त्तितम्। उपवासस्तु सप्तम्यामष्टम्यां पारणं भवेत्" इत्यादि इदं वर्षसाध्यम्।

जयपौर्णमासीव्रतं भविष्यपु० "पौर्णमासी महाराज! सोमस्य दयिता तिथिः। पूर्णमासो भवेद् यस्यां पूर्णमासी ततः स्मृता। तस्यां तु स्रोतसि स्नात्वा सन्तर्प्य पितृदेवताः। आलिख्य मण्डले सोमं नक्षत्रैः सहितं विभुम्। पूजयेत् कुसुमैर्धूपैर्नैवेद्यैर्घृतपाचितैः। शुक्लवस्त्रैर्दक्षिणाभिः पूजयित्वा समापयेत्। शाकाहारेण मुन्यन्नैर्नक्तं भुञ्जीत वाग्यतः" इत्यादि।

जयासप्तमीव्रतं भविष्यपु० "माहात्म्यमपि वक्ष्यामि षष्ठ्यास्तव भारत!। जयेति या च विख्याता तिथिनां जयदा-

यिनी। यथाज्जया जयाशब्दं कुर्वन्ति व्रतिनो बुधाः। परिपूर्णं व्रतं यस्यां सा ज्ञेया जयपञ्चमी। जया च विजया चैव जयन्ती पापनाशिनी” जया, कार्त्तिकशुक्लपञ्चमी”।

जयावाप्तिव्रतं विष्णुधर्मोत्तरोक्तम् “आश्वयुज्यामतीतायां प्रतिपत्प्रभृतिक्रमात्। पूर्ववत् पूजयेद्देवं लोकनाथं त्रिविक्रमम्”। पूर्ववदिति रूपावाप्तिव्रतवत् “त्रिरात्रान्ते तु कार्त्तिक्यां यथाह भक्तवत्सलम्। सर्वगन्धधरं कृत्वा भक्त्या रत्नैरलङ्कृतम्। कृत्वा व्रतं मासमिदं यथोक्तं प्राप्नोति लोकं सुचिरं स्ववीर। तस्मीन्न्र कालं सुचिरं मनुष्यः प्राप्नोति सर्वत्र जयं त्रिलोक्याम्”।

जयासप्तमीव्रतं भविष्यपु० “जया च विजया चैव जयन्ती चापराजिता। महाजया च नन्दा च भद्रा चाभा प्रकीर्त्तिता। शुक्लपक्षस्य सप्तम्यां नक्षत्रं पञ्चतारकम्। यदा भवेत् तदा ज्ञेया जयानाम्नीति सप्तमी”। पञ्चतारकमिति रोहिण्यश्लेषामघाहस्ताश्च। तस्यां दत्तं हुतं जप्तं तर्पणं देवपूजनम्। सर्वं शतगुणं प्रोक्तं पूजाऽत्रापि दिवाकर। कृष्णे शुक्लेऽथ भाद्रे शुक्ला वा सप्तमी परा”। रुद्रः सूर्यः “वर्षमेकन्तु कर्त्तव्यं विधिनानेन भास्करम्। सौवर्णं कारयेद्भक्त्या द्विभुजं पद्मधारिणम्। पारणत्रितयं तस्यां क्रियते गोपतेः पुरः”।

जातिस्मरव्रतं भविष्योत्तरे “ज्यैष्ठे मासि च कर्त्तव्यं त्रयोदश्यान्तु पाण्डव !। नियमश्च गृहीतव्य आचार्ये तु श्रद्धया ततः। एकैकभक्तं द्वादश्यामुपवासमथाचरेत्। मण्डपं कारयेत् तत्र सपताकं मनोहरम्। तत्र जातिः प्रकर्त्तव्या जात्यादिभवधारतः। रौप्यपुष्पाणि कार्याणि मण्डपान्ते निधापयेत्। तत्र देवास्त्रयः पूज्या ब्रह्मविष्णुमहेश्वराः। सपत्नीकाः शुभैः पुष्पैः फलैश्च विविधैस्तथा”।

जामदग्न्यद्वादशीव्रतं धर्म्मोत्तरोक्तम् “वैशाखस्यैवमेवन्तु शंकल्पविधिना नरः। नदत् स्नानं सदा कृत्वा ततो देवालयं व्रजेत्। तत्राराध्य हरिं भक्त्या एभिर्मन्त्रैर्विचक्षणः। जामदग्न्याय पादौ तु उदरं सर्वधारिणे” इत्यादि।

ज्ञानावाप्तिव्रतं विष्णुधर्मोक्तम् “भगवन् ! कर्मणा केन तु विमुक्तो भवेन्नरः। एतदेव महाप्राज्ञ मनुष्यत्वमुदाहृतम्”। मार्कण्डेय उवाच। “चैत्र्यान्तु समतीतायां यावन्मासं दिने दिने। पूर्ववत् पूजयेद्देवं नरसिंहमपराजितम्”। पूर्ववदिति चैत्रमासोक्तरूपावाप्तिव्रतवदेकभक्तपरिहः स्नानभूषणादिकं कर्त्तव्यमित्यर्थः। “होमश्च मत्यहं कुर्यात् तथा सिद्धार्थकैर्नृप !। ब्राह्मणान् भोजयेच्चात्र तथा त्रिमधुरं नृप !”। त्रिमधुरं मधुघृतशर्कराः “वैशाख्यां कनकन्दद्यात् त्रिरात्रोपोषितो नरः। स्नानाद्याग्निपटन्त्येतद्व्रतं बुद्धिविवर्द्धनम्। कृत्वा व्रतं मासमिदं यथोक्तमासाद्य नाकं सुचिरं मनुष्यः। मानुष्यमासाद्य तु बुद्धियुक्तो ज्ञानेन युक्तश्च तथा भवेच्च”।

ज्येष्ठाव्रतं भविष्योत्तरे “मासि भाद्रपदे शुक्लपक्षे ज्येष्ठा यदा भवेत्। रात्रौ जागरणं कृत्वा गीतवादित्रनिःस्वनैः। एवंविधविधानेन एभिर्मन्त्रैः सुपूजयेत्। एह्येहि त्वं महाभागे ! सुरासुरनमस्कृते !। ज्येष्ठे त्वं सर्वदेवानां मत्समीपे सदा भव”।

ज्यैष्ठव्रतानि महाभारते “ज्येष्ठामूलन्तु वै मासमेकभक्तस्तु यः क्षिपेत्। ऐश्वर्यमतुलं श्रेष्ठं पुमान् स्त्री वाभिजायते”। विष्णुधर्मे “कृष्णार्पितमना ज्यैष्ठमेकभक्तेन यः क्षिपेत्। अहिंसः सर्वभूतेषु वासुदेवपरायणः”।

तपश्चरणसप्तमीव्रतं भविष्योत्तरे “श्रुणुष्वावहितो भूत्वा युधिष्ठिर ! तपोव्रतम्। मार्गशीर्षादिमासेषु कर्त्तव्यं भूतिमिच्छता। तस्मिन् स्थितो व्रते विप्रो बह्वृचो वेदपारगः। ब्रह्मवित् कृष्णसप्तम्यां दद्यादर्घ्यं महीतले। ऋग्वेदसर्गाश्रितमं पठित्वा सूक्तं वरुभम्” इत्यादि।

तपोव्रतं पद्मपु० “माघे निशाद्रंवासाः स्यात् सप्तम्यां गोप्रदो भवेत्। स्वर्गलोकमवाप्नोति तपोव्रतमिहोच्यते”।

ताम्बूलसंक्रान्तिव्रतं स्कन्दपु० “अथान्यां सम्प्रवक्ष्यामि ताम्बूलाख्यामनुत्तमाम्। विधानं पूर्ववत् कुर्य्याद्दान्यसंक्रान्तिवत्तत्। ताम्बूलचन्दनाद्यश्च प्रदद्यात्तां द्विजोत्तमात्। यावत् संवत्सरं पूर्णं रात्रौ रात्रौ ततः परम्। ताम्बूलं भक्षयेद् विप्रान् कारयेन्नैव नान्तरम्। वत्सरान्ते तु कमलं कृत्वा चैव तु काञ्चनम्। पत्रकोशश्च कुर्वीत तथा पूगीफलाश्रयम्” इत्यादि।

तारकद्वादशीव्रतं भविष्योत्तरे “कथं तत् कृष्ण ! कर्त्तव्यं तारकद्वादशीव्रतम्। पापोऽपि सद्गतिं प्राप्तो यत्प्रभावात् खगध्वज !”। कृष्ण उवाच “मार्गशीर्षे सिते पक्षे गृहीत्वा द्वादशीव्रतम्। अकल्पिते जले स्नानमपराह्णे समाचरेत्। पूजयेद् भास्करं भक्त्या कृत्वा देवार्चनं तथा”।

तिथिनक्षत्रवारव्रतानि कालोत्तरे “नक्षत्रतिथियोगेन तिथीनां वारयोगतः। पुनरेव प्रवक्ष्यामि व्रतानि तु यथाक्रमम्। रोहिण्याष्टमीयोगो यदा भवति सौम्यके। विशेषपूजा कर्त्तव्या प्रसवामेव यत्नतः। पुण्ये

शुक्लचतुर्द्दश्यां गुरुयोगो यदा भवेत् । अथ वा सोमसंयोगो विशेषात् पूज्य शङ्करम् । पायसं घृतसंयुक्तं शिवाय विनिवेदयेत् । धूपदीपोपहाराद्यैः पूर्ववत् पूजयेच्छिवम् । प्राशनन्तु घृतं कार्य्यं सर्वकामप्रदं व्रतम् । आदित्यरेवतीयोगचतुर्द्दश्यां यदा भवेत् । अष्टम्यां वा तथा योगो शिवं संपूज्य पूर्ववत् । तिलास्तु प्राशने शस्ता आदित्यव्रतमीरितम् । आरोग्यं जायते तस्य पुत्रबन्धुगणैः सह । रोहिणीचन्द्रयोगश्च चतुर्द्दश्यां यदा भवेत् । अष्टम्यां सोमभयोगात् तदा चन्द्रव्रतं चरेत् । प्रागुक्तेन विधानेन शिवं संपूज्य यत्नतः । दधिक्षीरन्तु नैवेद्यं प्राशनं क्षीरमेव च । कीर्त्तिमारोग्यमैश्वर्य्यं प्राप्नुयाच्छाश्वतं वचः । अश्विनीभौमसंयोगचतुर्द्दश्यां यदा भवेत् । अष्टम्यां भरणीयोगस्तदा भौमव्रतं चरेत् । सम्पूज्य परया भक्त्या शिवं वस्त्रोपचारतः । रक्तोत्पलप्राशनन्तु साम्राज्यं प्राप्नुयाच्छुभम् । रोहिणीबुधसंयोगचतुर्द्दश्यां यदा भवेत् । अष्टम्यां वा समासेन बुधव्रतं समाचरेत् । शिवा पूज्या विधानेन महास्नानपुरःसरम् । महावर्त्तिसमीपे तु प्राशनं पायसंहृतम् । पुत्रार्थदाराश्च यशो वर्द्धते तस्य नान्यथा । रेवतीगुरुसंयोगचतुर्द्दश्यां यदा भवेत् । अष्टम्यां तिष्यसंयोगाद् गुरुव्रतं तदा चरेत् । प्राशनं कपिलाज्यन्तु शर्क्करासमन्वितम् । वाग्मीशत्वमवाप्नोति व्रतस्यास्य प्रभावतः । श्रवणं भार्गवयुतं चतुर्द्दश्यां यदा भवेत् । शुक्रव्रतं तदा विद्धि पुनर्वस्वष्टमी यदा । संपूज्य परमेशानं यथाविभवविस्तरैः । प्राशनं मधु चैशान कर्त्तव्यं संयतात्मना । महाफलमवाप्नोति व्रतस्यास्य प्रभावतः । भरणीशनियोगस्तु चतुर्द्दश्यां यदा भवेत् । आर्द्रायोगस्तथाष्टम्यां तदा शनिव्रतं चरेत् । शिवं संपूज्य विधिवत् प्राशनं वस्तुनेव च । शनिरेकादशस्थो हि फलं यच्छति शोभनम् । विरूपं नश्यते वत्स ! तदर्थं व्रतमाचरेत् । हेमकुम्भशतानाञ्च कम्बलानां क्रमेण च । वस्त्रस्य तीक्ष्णलोहस्य क्रमाद् यत्नेन दापयेत् । यथा सम्भवतो वत्स ! आचार्य्याय प्रयत्नतः" ।

तिथियुग्मव्रतं यमस्मृतौ "द्वे अष्टम्यौ तु मासस्य चतुर्द्दश्यौ तु द्वे तथा । अमावस्यापौर्णमास्यौ सप्तम्यौ द्वादशीद्वयम् । संवत्सरमभुञ्जानः सततञ्च जितेन्द्रियः । ब्रह्मचर्य्यं फलं यच्च यत्फलं सत्रयाजिनाम् । स्नातकाभि फलं यच्च तदवाप्नोत्यभोजनात्"

तिन्दुकाष्टमीव्रतं भविष्यपु० "ज्यैष्ठे मासि द्विजश्रेष्ठ ! शुक्लाष्टम्यां त्रिलोचनम् । यः पूजयति देवेशमीशलोकं व्रजेन्नरः । ज्यैष्ठे मासि तथाषाढ़े श्रावणे च तथा परे । पूजयेच्चतुरो मासान् नीलोत्पलकदम्बकैः । त्रिपुरान्तकरं शम्भुं त्र्यम्बकान्धकसूदनम् । गन्धानाञ्च कदम्बेन पूजयेत् गुग्गुलेन च । टेम्बुरुकफलं विप्र ! प्राशयेत् कायशोधनम्" टेम्बुरुकन्तिन्दुकफलम्" ।

तिलदाहीव्रतं स्कन्दपु० "विधिना केन कर्त्तव्यं तिलदाहीव्रतोत्तमम् । कस्मिन्मासे तिथौ चैव विधिना केन तच्चरेत्" श्रीभगवानुवाच "पौषमासे च या कृष्णा तिथिरेकादशी शुभा । तामुपोष्य तदा स्नानं कृत्वा नारायणं जपेत्" इत्यादि ।

तिलद्वादशीव्रतं विष्णुधर्म्मोक्तम् "माघमासे तु सम्प्राप्ते आषाढ़र्क्षं भवेद् यदि । मूलं वा कृष्णपक्षस्य द्वादश्यां नियतव्रतः । गृह्णीयात् पुण्यफलदं विधानं तस्य मे शृणु ! । देवदेवं समभ्यर्च्य सुस्नातः प्रयतः शुचिः । कृष्णनाम्ना तु सम्पूज्य एकादश्यां महामतिः । उपोषितो द्वितीयेऽह्नि पुनः सम्पूज्य केशवम् । संस्तूय नाम्ना तेनैव कृष्णाख्येन पुनः पुनः । दद्यात्तिलांस्तु विप्राय कृष्णो मे प्रीयतामिति । स्नानप्राशनयोः शस्तास्तथा कृष्णतिला मुने ! । विष्णुप्रीणनमन्त्रेण समाप्ते वर्षपारणे । कृष्णकुम्भास्तिलैः सार्द्धं पक्वान्नेन च संयुताः । कृष्णोपानद्युगैः सार्द्धं संवीता रत्नगर्भिणः । ब्राह्मणानां प्रदेयास्ते यथावन्मासंख्यया" इत्यादि । विष्णुधर्म्मे व्रतान्तरम् "माघ्यान्तु समतीतायां श्रवणेन तु संयुता । द्वादशी या भवेत् कृष्णा प्रोक्ता सा तिलद्वादशी । तिलैः स्नानं तिलैर्होमं नैवेद्यं तिलमोदकैः । दीपेच तिलतैलेन तथा देयं तिलोदकम् । तिलाश्च देया विप्रेषु तस्मिन्नहनि पार्थिव ! । उपवासदिने राजन् ! ज्ञातव्याश्च तथा तिलाः । उपोषितेनापरेऽह्नि होतव्याश्च विशेषतः । इत्थनघ प्रदातव्यं ब्राह्मणेषु तथानघ ! । तिलप्रस्थं तदा कृत्वा सोपवासो जितेन्द्रियः । न दुर्गतिमवाप्नोति नात्र कार्य्या विचारणा" इत्यादि ।

तीव्रव्रत सौरपु० "अथाष्टमचरणौ भित्त्वा शिवचैत्ये वसेन्नरः । देहान्ते शिवसायुज्यं लभते नात्र संशयः" ।

तुरगसप्तमीव्रतं विष्णुधर्म्मोत्तरे "चैत्रमासस्य सप्तम्यां शुक्लपक्षे नराधिप ! । गोमयेनोपलिप्ते तु सदा कुर्य्यात्तु मण्डलम् । तन्मध्ये पद्मकं कर्त्तव्यं वर्णकैः शुभैः

कृतोपवासस्तन्मध्ये भास्करं पूजयेन्नरः। व्रते समाप्ते दातव्यास्तुरगा ब्राह्मणाय तु। प्राप्याश्वमेधस्य फलं यथावल्लोकानवाप्याथ पुरन्दरस्य। उपोष्य राजन्! सुचिरञ्च कालं सायुज्यमायाति दिवाकरस्य”।

तुष्टिप्राप्तितृतीयाव्रतं विष्णुधर्म्मोत्तरे “तृतीया श्रावणे कृष्णा या च श्रवणसंयुता”। श्रावणोऽत्र पौर्णमास्यन्तो मासो ग्राह्यः अतःश्रवणकृष्णतृतीयायाः श्रवणयुक्तत्वं न दुर्घटम्। “तस्यां संपूज्य गोविन्दं तुष्टिमग्र्यामवाप्नुयात्”।

तेजःसंक्रान्तिव्रतं स्कन्दपु॰ “अथान्यां सम्प्रवक्ष्यामि तेजःसंक्रान्तिमुत्तमाम्। संक्रान्तिवासरं प्राप्य स्नानं कृत्वा विचक्षणः। शालितण्डुलसंयुक्तं कांस्यं कारयेच्छुभम्। तन्मध्ये दीपकं स्थाप्य प्रज्वलन्तं स्वतेजसा। तन्मुखे मोदकं स्थाप्य ब्राह्मणाय निवेदयेत्। अर्घ्यञ्च पूर्ववत् कार्य्यमेकभक्तन्तु पूर्ववत्। संवत्सरे तु संपूर्णे कुर्य्यादुद्यापनं बुधः” इत्यादि।

त्रयोदशद्रव्यवर्ज्जनसप्तमीव्रतं भविष्योत्तरे “भानोर्दिने सिते पक्षे अतीते चोत्तरायणे। सप्तोर्द्धिभिस्तिलयवान् सह मापमुद्गगोधूमसमांसमधुमैथुनकांस्यपात्रैः। अभ्यञ्जनाञ्जनशिलातलचूर्णितानि षष्ठीव्रती परिहरेद्दहनोप-सिद्धं। देवान् पितॄन् मुनिगणान् सजलाञ्जलीभिः सन्तर्प्य पूज्य गगनाङ्गनहंसदीपम्। हुत्वानले तिलयवान् बहुशोऽष्टशतान् भूमौ स्वपेत् हृदि निधाय दिनेशबिम्बम्। यानि त्रयोदशदिनैरिह वर्ज्जितानि द्रव्याणि तानि परिहृत्य दिने च षष्ठ्याम्। संप्राश्य पुण्यचयकानिह वर्षमेकं प्राप्नोति भारत! पुमान् मनसेप्सितानि”।

त्रिगतिसप्तमीव्रतं भविष्यपु॰ “सप्तम्यां शुक्लपक्षे तु फाल्गुन्यां यो यजेन्नरः। जपेद्दत्रवीति नाम भक्त्या पुनः पुनः। देवार्च्चनं वाष्टशतं कृत्वैवं तु जपेच्छुचिः। स्नातः प्रस्थानकाले तु उत्थाने स्खलिते क्षुते। पाण्डवाग्र्यान्! पतितांश्चैव तथैवान्त्यावसायिनः। नालापयेत् तथा भानुमर्च्चयेच्छ्रद्धयान्वितः। इदञ्चोच्चारयेन्मानोमन्त्रं ध्यानतत्परः। हंस हंस कृपालो! त्वं अगतीनां गतिर्भव। संसारार्णवमग्नानां त्राता भव दिवाकर। एक भक्तोपवासं कृत्वा नियतमानसः। पूर्वोक्तं एव वाप्यन्येद्युः समन् प्राश्यार्जुनीयकम्” आर्जुनीयकं, गोमय-प्राशनम्

त्रिविक्रमतृतीयाव्रतं विष्णुधर्म्मोत्तरे “एकपक्षे तृतीयायां सोपवासो जितेन्द्रियः। मण्डलत्रितयं कुर्य्याद् वर्णकेन पृथक् पृथक्। मण्डलं दक्षिणं भागे श्वेतं कार्य्यात् ततो नरः। रक्तं मध्ये रवेः कुर्य्यात् तादृक्श्वेतं प्रशस्य तु। विष्णोः पदत्रयं तेषु पूज्यं स्यात् मण्डलेन तु। भूमौ तु प्रथमं पादं द्वितीयं स्वर्गमण्डले। तृतीये तु ध्रुवे देवे पूजयेत् प्रयतः शुचिः”।

व्रतान्तरं विष्णुधर्म्मोत्तरे “द्वितीयञ्च प्रवक्ष्यामि शृणु! त्रैविक्रमं व्रतम्। भूमिस्तु प्रथमः पादः अन्तरिक्षं तथा परः। तृतीयो दिवि विज्ञेया देवदेवस्य चाक्रिणः। भुवः पतिः स्मृता वह्निरन्तरिक्षस्य चानलः। दिवांपतिस्तथा सूर्य्यस्तस्य विष्णोः पदत्रयम्। ज्यैष्ठेशुक्लतृतीयायां सोपवासा जितेन्द्रिय। कल्ये कुरुजले स्नाता वह्निं संपूजयेन्नरः। एतत् संवत्सरं कृत्वा नरस्त्रैविक्रमं व्रतम्। सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते”।

व्रतान्तरं विष्णुधर्म्मोत्तरे “वक्ष्यामि ते महाभाग! तव त्रैविक्रमव्रतम्। तृतीयं मनुशार्दूल! तन्मे निगदतः शृणु!। ज्यैष्ठे शुक्लतृतीयायां नरः समुपोषितः। भुवः सम्पूजनं कुर्य्याद् गन्धमाल्यानुलेपनैः। दीपैः रत्नैश्च विविधैर्दद्याद्विप्रेषु दक्षिणाम्। बीजपूर्णानि पात्राणि सहिरण्यानि भक्तितः। पूजैवमन्तरिक्षस्य माघमासे विधीयते। दक्षिणा तत्र दातव्या तथा वासायुगं द्विजे। दिवः पूजा च कर्त्तव्या श्रावणे प्रागुदेव तु। छत्रञ्चोपानहं युग्मं दक्षिणा तत्र दापयेत्। एवं मासत्रयेणेह पारणं प्रथमं भवेत्। मासत्रयेण चान्येन ततो मासत्रये पुनः। ततो मासत्रये चान्यः स्वमन्यच्च चान्यथा। विद्धि नित्यं धर्म्मस्य पारणानां चतुष्टयम्” इत्यादि।

त्रिविक्रमत्रिरात्रव्रतं विष्णुरहस्ये “यस्त्रिरात्रव्रतं कुर्य्यात् समुद्दिश्य जनार्दनम्। कुलानां शतमादाय स याति भवनं हरेः। नवम्यादिसिते पक्षे मार्गशीर्षस्य च। प्रारभेत त्रिरात्राख्यं व्रतं तु विधिवत् व्रती। श्रद्दधानो जितक्रोधो नित्यस्नायी क्षमान्वितः। अभ्यर्चयेत् सदा विष्णुं कर्म्मणा मनसा गिरा। अष्टोत्तरसहस्रन्तु शतं वानुदिनं जपेत्। अष्टम्यामेकभक्ताशी दिनत्रयमुपावसेत्। एकादश्यां शुचिः स्नातो वासुदेवार्च्चने रतः। द्वादश्यां पूजयेद्देवं गन्धमाल्यविलेपनैः। नैवेद्यधूपदीपाद्यैर्गीतवाद्यैश्च केशवम्। अनेन विधिना कृत्वा त्रिरात्राख्यं व्रतं नरः। निवेदयेत् ततो भक्त्या विप्रेभ्यः

धिना व्रतम्। संप्राप्ते कार्त्तिके मासि व्रतमेतदनुत्तमम्”। प्रतिमासं त्रिरात्रद्वयमिति पञ्चाशता मासैः यत् तत्त्वाधिमासद्वतयोमासद्वयर्षैर्वर्षैरिति कार्त्तिके समाप्तिः।

त्रिविक्रमव्रतं विष्णुधर्म्मोत्तरे “करोति केशवप्रीत्यै कार्त्तिकं मासमाप्नुवान्। पूर्व्वे वयसि यत्तेन जानताऽजानतापि वा। पापमाचरितं तस्मात् मुच्यते नात्र संशयः। अनेनैव विधानेन मार्गशीर्षेऽपि माधवम्। समभ्यर्च्चैकभक्तं वै वर्षिभ्यो यः प्रयच्छति” इत्युपक्रमे। “त्रैमासिकं व्रतमिदं यः करोति नरेश्वर !। स विष्णुप्रीणनात् पापैर्बहुभिः परिमुच्यते। द्वितीये वत्सरे राजन् ! मुच्यते चोपपातकैः। तद्वत् तृतीयेऽपि कृतं महापातकनाशनम्। व्रतमेतत्सरैः त्रीभिस्त्रिभिर्मासैरनुष्ठितम्। त्रिभिः संवत्सरैश्चैव प्रददाति फलं नृणाम्। त्रिभिर्मासैस्त्रयवस्थाभिस्त्रिविधात् पातकान्नृप !। त्रीणि नामानि देवस्य मोचयन्ति त्रिवार्षिकैः। यतस्ततो व्रतमिदं त्रिविक्रममुदाहृतम्। सर्व्वपापप्रशमनं केशवाराधनं परम्”।

सौरत्रिविक्रमव्रतं भविष्योत्तरे “समभ्यर्च्य जगन्नाथं देवमर्कमथापि वा। एकमश्नाति यो भक्तं द्वितीयं ब्राह्मणार्पणम्। करोति भास्करप्रीत्यै कार्त्तिकं मासमाप्नुवान्। पूर्व्वे वयसि यत्तेन जानताऽजानताऽपि वा। पापमाचरितं तस्मात् मुच्यते नात्र संशयः। व्रतमेतत्सरैस्त्रीभिस्त्रिभिर्मासैरनुष्ठितम्। त्रिभिः संवत्सरैश्चैव प्रददाति फलं नृणाम्। त्रिभिर्मासैस्त्रयवस्थास्तु त्रिविधात् पातकान्नृप !। त्रीणि नामानि देवस्य मोचयन्ति त्रिवार्षिकात्। यतस्ततो व्रतमिदं त्रिविक्रममुदाहृतम्। सर्व्वभूतप्रशमनं भास्कराराधनं परम्”।

त्र्यम्बकव्रतं पद्मपु० “चतुर्द्दश्यान्तु नक्ताशी समान्ते गोयुगप्रदः। स शैवं पदमाप्नोति यजन्त्र्यम्बकं व्रतम्”।

दशादित्यव्रतं ब्रह्माण्डपुरा० “वक्ष्ये सौरव्रतं पुण्यं दुष्टग्रहान्तकरं परं। दयाकरं हि भूतानां मनोरथकरं परं। भानुवारे सिते पक्षे दशम्यां चैव नारद !। प्रातः कालेऽथ मध्याह्ने स्नानं कुर्य्याद्यथाविधि” इत्यादि।

दशावतारव्रतं विष्णुपु० “एकादश्यां निराहारो द्वादश्यां पुरुषोत्तमम्। अर्च्चयेद् ब्राह्मणमुखे स गच्छेत्परमं पदम्। एषा तिथिर्वैष्णवी स्याद्द्वादशी शुक्लपक्षगा। तस्मामाराधयेद्देवं प्रयत्नेन जनार्द्दनम्”।

दाम्पत्याष्टमीव्रतं भविष्यपु० “कार्त्तिके मासि विप्रेन्द्र ! पुत्रकामो नरोत्तमे। अष्टम्यां कृष्णपक्षस्य पूजयेद्विधिवद्द्विज। उमाञ्च तां सतीं देवीं विधिवद्वृषकेतन !। य एतद् कुरुते भक्त्या उमामहेश्वर व्रतम्। वर्षमेकमिदं विप्रेन्द्र ! स याति परमां गतिम्”। वर्षमेकं संवत्सरम् “चतुर्भिः पारणैरेवं वर्षमेकमिह कीर्त्तितं बुधैः। प्रथमन्तु त्रिभिर्मासैः पारणं कार्त्तिकादिभिः। कार्त्तिके मार्गशीर्षे तु पौषे मासि तथा परे। ऋतुकालस्य पुष्पैस्तु फलैर्भक्ष्यैरनेकशः”।

दिवाकरव्रतं भविष्यपु० “आदित्यवारं हस्तेन युक्तं प्रगृह्णीत पाण्डव !। ततः प्रत्यादित्यदिनं सप्त वारान् प्रपूजयेत्। एकभक्तेन नक्ताशी ब्राह्मणान् पूजयेत् दिवा। दक्षिणां तु यथा शक्त्या दद्यात् विप्राय भक्तितः”

दीप्तिव्रतं पद्मपु० “सम्वत्सरं दीपप्रदो यस्तु समां तैलञ्च वर्जयेत्। समान्ते दीपकान् दद्याच्छक्त्या शुभञ्च काञ्चनम्। वस्त्रयुग्मञ्च विप्राय स तेजस्वी भवेदिह। रुद्रलोकमवाप्नोति दीप्तिव्रतमिदं स्मृतम्”।

दुर्गन्धदौर्भाग्यनाशनत्रयोदशीव्रतं भविष्योत्तरे “ज्यैष्ठे मासि सिते पक्षे त्रयोदश्यां युधिष्ठिर !। स्नात्वा पुष्पनदीतीरे पूजयेत्कुमरेश्वरम्” इत्यादि।

दुर्गानवमीव्रतं भविष्यपु० “नवम्यां तु सिते पक्षे नियतः संयतेन्द्रियः। मासि चाश्वयुजे वीर ! कार्त्तिके कार्त्तिकोत्तरे। पुत्रे च पूजयेद् दुर्गां जातिपुष्पैर्विधानतः। धूपार्थं गुग्गुलं दद्यान्नैवेद्यं गुडपूपकान्। दुर्गेति नाम जप्तव्यं प्रयतोऽष्टशतं नृप !। माघे च फाल्गुने मासि चैत्रे चैत्रोत्तरे नृप !। शुक्लपक्षे तु अष्टम्यामुपवासपरायणः” इत्यादि वर्षसाध्यम्।

दुर्गाव्रतं देवीपु० “देवीव्रतं प्रवक्ष्यामि सर्व्वकामप्रसाधनम्। श्रावणे शुक्लपक्षे तु अष्टम्यां वायुभोजनः। स्नात्वा साञ्जपुटीभूत्वा जितक्रोधः क्रियान्वितः। देवीं संस्नाप्य तोयेन पुनः क्षीरेण वारिणा। ततो गुग्गुलधूपञ्च चरुकन्तु दापयेत्” इत्यादि तदवधिवर्षसाध्यम्।

दूर्व्वागणपतिचतुर्थीव्रतं सौरपु० “चीर्णमेतद् व्रतं सर्व्वैः पुराकल्पे षडानन !। चतुर्थी या भवेदुक्ता नभोमासस्य पुण्यदा। तस्यां व्रतमिदं कुर्य्यात् कार्त्तिक्यां वा षडानन !। गजाननं चतुर्बाहुमेकदन्तं विपाटितम्। तथा हैममयीं दूर्व्वां तदाधारे व्यवस्थिताम्”। तदाधारे, विघ्ननाशने “संस्थाप्य विघ्नहन्तारं कलसे ताम्रभाजने। वेष्टितं रक्तवस्त्रेण सर्व्वतो भद्रमण्डले। पूजयेच्च कुसुमैः पत्रिकाभिश्च पञ्चभिः। बिल्वपत्रमपामार्गः शमी दूर्व्वा हरिप्रिया। सोपीतत्रा तु हरन्तेव !

ततो राज्यं भविष्यति । सर्वोपहारसम्पन्नं सर्वोपस्करमाहरेत् । कन्दपक्वं फलं शाकं लवणं गुडशर्करा । रसवद् गुडमयी क्षीरं धान्यानि विविधानि च । दारव्याणि रघुश्रेष्ठ ! वस्त्रकाण्डांस्तु भक्तितः" ।

दूर्वात्रिरात्रव्रतं पद्मपु॰ "शृणु ! दूर्वात्रिरात्रस्य विधिं चातुर्य्येण सुव्रत ! । मासि भाद्रपदे चैव शुक्लपक्षे त्रयोदशीम् । त्रिरात्रं समुपोष्यन्तु यावत् पूर्णा तिथिर्भवेत् । उमामहेश्वरं देवं सावित्रीं धर्म्ममेव च । दूर्वामूले तु संस्थाप्य मण्डपं कारयेत्ततः" इत्यादि ।

दूर्वाष्टमीव्रतं भविष्यपु॰ "ब्रह्मन् ! भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः । पूजयेच्छङ्करं भक्त्या यो नरः श्रद्धयान्वितः । स याति परमं स्थानं यत्र देवस्त्रिलोचनः । गणेशं पूजयेद्यस्तु दूर्वया यो हि तं मुने ! । कृत्वोपवासं शुक्लायामष्टम्यां पूजयेच्छिवम् । दूर्वासमेतं विप्रेन्द्र ! दध्यक्षतफलैः शुभैः" । व्रतान्तरं दूर्वाष्टमीशब्दे दृश्यम् ।

देवमूर्त्तिव्रतं विष्णुधर्म्मोत्तरोक्तम् "ईशानस्य तथा वह्नेर्विष्णोर्याम्यं समीरणम् । जानीहि यदुशार्दूल ! देवमूर्त्तिचतुष्टयम् । तेषान्तु रूपनिर्माणं कृत्वा तान् पूजयेद् बुधः । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । चैत्रके महाभाग ! प्रतिपत्प्रभृतिक्रमात् । कौपनादेयताडागकासारैः स्नानमाचरेत् । दध्ना तिलैर्यवैर्होमो घृतेन च तथा भवेत् । कर्पूरं कुङ्कुमञ्चैव तथैवागुरुचन्दनम् । ब्राह्मणेषु प्रदातव्यं तथा राजन् ! दिनक्रमात् । दिनत्रयं तथाऽश्नीयात् सायं प्रातरयाचितम् । दिनमेकन्तु नाश्नीयात् व्रतचारी नरोत्तमः । एवं संवत्सरं कृत्वा व्रतं पुरुषोत्तम । सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते" ।

देवव्रतं [illegible]पु॰ "[illegible] तु गवा सार्द्धं कुटुम्बिने । हैमशृङ्गं त्रिशूलञ्च दद्याद्विप्राय वाससी । प्रदद्य भक्त्या [illegible] प्रीयतां शिवशङ्करौ । एतद्देवव्रतं नाम महापातकनाशनम् । यस्तु संवत्सरं पूर्णमेकभक्तो भवेन्नरः । अहिंसः सर्वभूतेषु वासुदेवपरायणः । नमोऽस्तु वासुदेवायेत्यहन्यहनि जपेत् । पौण्डरीकस्य यज्ञस्य ततः फलमवाप्नुयात् । दश वर्षसहस्राणि स्वर्गलोके महीयते । तत्क्षयादिह चागत्य मानुष्यं प्रतिपद्यते" । कालोत्तरे व्रतान्तरं "बृहस्पति[illegible]ष्टम्यां यदा भवेत् । उपोष्य पूजयेत्तस्यां देवदेवं महेश्वरम् । महास्नानप्रकारेण महार्घपुरःसरम् । कुङ्कुमागरुचन्दनेन शुक्लपुष्पैः प्रपूजयेत् । धूपस्तु सफलो देयः मधुना चन्द्रसंयुतः । सितवस्त्राणि वस्त्रञ्च आचार्याय प्रदापयेत् । जातीफलैः प्राशनञ्च रात्रौ जागरणं हितम् । एतद्देवव्रतं नाम आयुःश्रीकीर्त्तिवर्द्धनम्" ।

देवीव्रतं पद्मपु॰ "पयोव्रतं पञ्चदश्यां व्रतान्ते गोयुगप्रदः । रुद्रलोकमवाप्नोति देवीव्रतमुदाहृतम्" देवीपु॰ व्रतान्तरं "क्षीराशी कार्त्तिके यस्तु देव्या भक्तिरतो नरः । शाकयावकभक्षायी प्रातःस्नायी शिवारतः । पूजयेत्तिलहोमञ्च मधुक्षीरघृतादिभिः । कार्य्यस्तु देवीमन्त्रेण शृणु पुण्यफलं हरे" इत्यादि ।

द्वादशसप्तमीव्रतं भविष्योत्तरे "माघमासात् समारभ्य शुक्लपक्षे युधिष्ठिर ! । सप्तम्यां व्रतसङ्कल्पो वर्षमेकं व्रती भवेत्" मासभेदे नियमभेदास्तत्रोक्ता दृश्याः ।

द्वादशसाध्यतृतीयाव्रतं विष्णुधर्म्मोत्तरे "मनोऽनुमन्ता प्राणश्च नरयानश्च वीर्य्यवान् । चित्तिर्हयो नयश्चैव हंसो नारायणस्तथा । प्रभवो विष्णुर्विश्वश्च साध्या द्वादश जज्ञिरे । तृतीयायां महाभाग ! पूजयेत्तानुपोषितः" । प्रत्येकतृतीयायां यावद्वर्षं सोपवास इति शेषः ।

द्वादशादित्यव्रतं विष्णुधर्म्मोत्तरे "धाता मित्रोऽर्य्यमा पूषा शक्रोऽंशो वरुणो भगः । त्वष्टा विवस्वान् सविता विष्णुर्द्वादशकस्तथा । पूजयेद् द्वादशादित्यान् शुक्लपक्षे उपोषितः । मार्गशीर्षाद्यथारभ्य द्वादश्यां नियतव्रतः" ।

द्वादशीव्रतं कूर्म्मपु॰ "एकादश्यां निराहारो द्वादश्यां पुरुषोत्तमम् । अर्च्चयेद् ब्राह्मणमुखे स गच्छेत्परमं पदम् । एषा तिथिर्वैष्णवी स्याद् द्वादशी शुक्लपक्षगा । तस्यामाराधयेद्देवं प्रयत्नेन जनार्दनम्" ।

द्वीपव्रतं विष्णुधर्म्मोत्तरे "अथातः संप्रवक्ष्यामि द्वीपव्रतमनुत्तमम् । चैत्रशुक्लात्तथारभ्य प्रत्यहं दिनसप्तकम् । जम्बूशाककुशक्रौञ्चशाल्मलिद्वीपसंज्ञितम् । गोमेदं पुष्करञ्चैव प्रत्यहं पूजयेत् क्रमात् । नित्यमेव सदा स्नानं बहिरेव समाचरेत् । अधःशायी भवेन्नित्यं तद्वद् दिनसप्तकम्" इत्यादि ।

धनसंक्रान्तिव्रतं स्कन्दपु॰ "धनसंक्रान्तिमाहात्म्यं शृणु स्कन्द ! विधानतः । यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः । संक्रान्तिवासरं प्राप्य शुचिर्भूत्वा समाहितः । कलशं निर्व्रणं स्वच्छं वारिपूर्णं निधापयेत् । सुवर्णयुक्तं कृत्वा प्रतिमासन्तु दापयेत् । विधिनानेन वर्षान्ते प्रीयतां मे दिवाकरः" ।

धर्म्मावाप्तिव्रतं धर्म्मशिरोमणौ "[illegible] । वर्षेण येन धनवान्

पुत्रो भवेत् । पुत्रवान् देवलोकेषु पूज्यो भवति मानवः"। इति ब्रह्मे "श्रावण्यां समतीतायां प्रतिपत्प्रभृति क्रमात्। पूर्व्ववत् पूजयेद्विष्णुं देवं सङ्कर्षणं विभुम्" इत्यादि।

धन्यव्रतं वराहपु० "अथातः सम्प्रवक्ष्यामि धन्यव्रतमनुत्तम !। येन सद्यो भवेद्धन्यो ह्यधन्योऽपि हि यो भवेत् । मार्गशीर्षेऽमले पक्षे प्रतिपद् या तिथिर्भवेत्। तस्यां नक्तं प्रकुर्व्वीत रात्रौ विष्णुञ्च पूजयेत्" इत्यादि ।

धराव्रतं पद्मपु० "यो विंशतिपलादूर्द्ध्वं महीं कृत्वा तु फाल्गुनीम् । दिनं पयोव्रतं दद्याद्रुद्रलोके महीयते । धराव्रतमिदं प्रोक्तं सप्तकल्पशतानुगम्" । दिनं देवानामुत्तरायणम्। पयोव्रतमित्यनन्तरं कृत्वेत्यनुषङ्गः। रुद्रो देवता धरादानं पारणम्" इत्यादि.

धर्म्मव्रतं विष्णुधर्म्मोत्तरे "शुक्लपक्षे दशम्यां तु सोपवासस्तु मानवः । धर्म्मं सम्पूजयेद् देवं सर्व्वलोकसुखावहम्" ।

धान्यव्रतं स्कन्दपु० "अथातः संप्रवक्ष्यामि धान्यव्रतमनुत्तमम्। यत् कृत्वा हि नरो राजन् ! सर्व्वकामानवाप्नुयात् । अयने विषुवे चैव स्नानं कृत्वा विचक्षणः । व्रतस्य नियमं कुर्य्याद्ध्यात्वा देवं दिवाकरम् । रविं ध्यात्वा ततो दद्याद्धान्यप्रस्थं द्विजातये । प्रतिमासं पुनस्तद्वत् पूज्यो देवः सहस्रपात् । एवं सदा प्रदातव्यं धान्यप्रस्थं द्विजन्मने । एवं संवत्सरे पूर्णे कुर्य्यादुद्यापनक्रियाम्" ।

धान्यसप्तमीव्रतं भविष्यपु० "संपूज्य सितसप्तम्यां भानुं धान्यानि सप्त च । ददाति नक्तभुक् गार्हं स्वरूपेण समन्वितम्" । गार्हं गृहस्योपकरणम् "स तारयति सप्तान्यान् कुल्यानात्मानमेव च । सुत ! धान्यव्रतं नाम व्रतं धान्यसुखप्रदम्" ।

धामत्रिरात्रव्रतं पद्मपु० "त्रिरात्रोपोषितो दद्यात् फाल्गुन्यां भवनं शुभम् । आदित्यलोकमाप्नोति धामव्रतमिदं स्मृतम्" ।

धाराव्रतं भविष्योत्तरोक्तम् "चैत्रारम्भात् पिबेत्तोयमजस्रधारां प्रपातयेत् । वर्षान्ते घृतसंपूर्णान्दद्याद्वर्द्धनिकां नवाम् । एतद्धाराव्रतं नाम सर्व्वोद्वेगहरं परम् । कान्तिसौभाग्यजननं सपत्नीदर्पनाशनम्" ।

ध्वजनवमीव्रतं भविष्योत्तरे "पौषस्य शुक्लपक्षे तु नवमी शङ्करी स्मृता । तस्यां स्नात्वा शुभैः पुष्पैरर्च्चनीया हरेः स्वसा । कुमारी भगवान् देवी सिंहस्यन्दनगामिनी । ध्वजान् नानाविधान् कृत्वा पुरतस्तस्य पूजयेत् । माल्यतोक्षप्रदैर्दीपैर्गन्धधूपविलेपनैः । बलिभिः पशुभिर्मेध्यैः सुरामांससुगन्धनैः । दधिचन्दनचूर्णैश्च फलैर्नानाविधार्च्चितैः । देवीं स्वर्णमयीं कृत्वा सिंहारूढां चतुर्भुजाम् । खड्गशक्तिधरां शूलधरां नेत्रत्रयान्विताम्" । (पूजयेत्)

ध्वजव्रतं विष्णुधर्म्मोत्तरोक्तम् "चैत्रे तु प्रत्यहं मासि गरुडं पूजयेन्नरः । पीतेन गन्धनैवेद्यमाल्यवस्त्रादिना द्विज ! । वैशाखे च तथा मासि तालं संपूजयेत्सदा । नीलेन गन्धनैवेद्यमाल्यवस्त्रादिना द्विज ! । ज्यैष्ठे च प्रत्यहं मासि मकरं पूजयेत् सदा । श्वेतेन गन्धनैवेद्यमाल्यवस्त्रादिभिर्द्विज ! । ध्वजं संपूजयेद्देवं मास्याषाढे यथाविधि । रक्तेन गन्धनैवेद्यमाल्यवस्त्रादिना द्विज ! । बहिःस्नानं तथा कुर्य्याद्वह्निसंपूजनं तथा । नित्यञ्च कुर्य्याद्धर्म्मज्ञ ! तथा ब्राह्मणभोजनम् । पारणार्थं तथा कुर्य्यान्नक्तं तैलविवर्ज्जितम् । अधःशायी तथा च स्याद् ब्रह्मचारी सदा भवेत् । व्रतमेतन्नरः कुर्य्यात् सम्यङ्मासचतुष्टयम् । ब्राह्मणान् पूजयेद्भक्त्या आषाढे चरमेऽहनि । वस्त्राण्युक्तानि धर्म्मज्ञ ! दद्याद्विप्रेषु दक्षिणाम् । कृत्वैकं पारणं राजन् ! स्वर्गलोके महीयते । द्वितीयं पारणं कृत्वा शक्रलोके महीयते । तृतीयं पारणं कृत्वा ब्रह्मलोके महीयते । कृत्वा तुर्य्यं पारणन्तु रुद्रलोके महीयते । विष्णुलोकमवाप्नोति कृत्वा द्वादशपारणम् । ध्वजव्रतं द्वादश वत्सराणि कृत्वा नरा भार्गववंशमुख्य ! । सायुज्यमायाति जनार्द्दनस्य देवस्य विष्णोः परमेश्वरस्य" ।

नक्तचतुर्थीव्रतं स्कन्दपु० "विनायकचतुर्थ्यास्तु व्रतं वक्ष्यामि तेऽनघ ! । धन्यं यशस्यमायुष्यं समीहितफलप्रदम् । विघ्नापशमनायालं सर्व्वसिद्धिप्रदायकम् । प्रियं गणपतेर्नित्यमृषिभिश्चाप्युपासितम् । मार्गशुक्लचतुर्थ्यान्तु ग्राह्यं व्रतमिदं महत् । नक्ताहारेण विप्रेन्द्र ! तिलान्नं पारणं स्मृतम् । तदेव वह्नौ होतव्यं ब्राह्मणाय ददेत् सदा । भद्यां भदे वा नैवेद्यं विघ्नराजाय संयमी । पूजयेत् गणपतिं रात्रौ गन्धैः पुष्पैर्यथाक्रमम्"

नक्षत्रपुरुषव्रतं मत्स्यपु० "नक्षत्रपुरुषं नाम परं नारायणार्च्चनम् । पादौ हि कुर्य्याद्विधिवद्विष्णुनामानि कीर्त्तयेत् । प्रतिमां वासुदेवस्य मूलर्क्षादभिपूजयेत् । चैत्रमासं समासाद्य कृत्वा ब्राह्मणवाचनम् । मूले नमो विश्वधराय पादावनन्तदेवाय च रोहिणीषु । जङ्घे च पूज्ये वरदाय चैव द्वे जानुनी चाश्विकुमारऋक्षे । पूर्व्वोत्तराषाढयुगे च पादौ नमः पिशाचेशमभिपूजनीयः" इत्यादि ।

नक्षत्रार्थव्रतं देवीपु० "अतःपरं प्रवक्ष्यामि रूपसौभाग्यकारकम्। नक्षत्रविधिना वत्स ! यथा तुष्यति शङ्करो। मृगादारभ्य मूलेन पादौ जानुस्तथा पुरा। पूजयेत्सोपवासस्तु नक्षत्रान्ते तु पारणम्। यवान्नं हविषा सिद्धं ब्राह्मे जङ्घे प्रपूजयेत्" इत्यादि।

नदीव्रतं विष्णुधर्मोत्तरे "चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम्। ह्लादिनीं नलिनीञ्चैव पावनीं चैव पूजयेत्। सीतां चक्षुं तथा सिन्धुं तथा भागीरथीं क्रमात्। बहिःस्नानं तथा कुर्य्यान्नित्यं नक्ताशनो भवेत्। जले च जुहुयात् क्षीरं शान्तात्मा च दिने दिने। क्षीरपूर्णाश्च दातव्या वारिधान्यो द्विजातिषु। क्षीराशनश्च तिष्ठेत तत्तथा दिनसप्तकम्। एवं संवत्सरं कृत्वा पूर्णे संवत्सरे नरः। द्विजातिषु ततो दद्याद्व्रतस्य फलं शुभम्। फाल्गुनस्यासिते पक्षे सप्तम्यां दिवसे क्रमात्। तं लोकमवाप्नोति नरो यत्र पायसकर्द्दमाः" इत्यादि।

नन्दव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे महाराजं त्रयोदश्यामुपोषितः। फाल्गुनात्तु समारभ्य नित्यं संपूजयेन्नरः"। महाराजन्तु धनदम्। "गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा। सुवर्णं ब्राह्मणेन्द्राय व्रतान्ते प्रतिपादयेत्। कृत्वा व्रतं वत्सरमेतदिष्टं पक्षेषु राजन् ! सुचिरं ह्युपोष्य। मानुष्यमासाद्य धनान्वितः स्यात् सौभाग्ययुक्तश्च तथा विरोगः"।

नन्दादिव्रतं भविष्योत्तरे "यस्त्वादित्यपदेशस्य वारो देवस्य सुव्रतः। पूजयेत् स प्रियो नित्यं ख्यातो गोश्रुतिभूषणः (शिवः)। यस्तु संपूजयेन्नित्यं पतङ्गं पन्नगाधिपम्। गन्धपुष्पादिधूपैस्तु स्तोत्रैर्वा विविधैस्तथा। सोपवासो गणश्रेष्ठ ! आदित्यग्रहणे शुचिः। जपमानो महाश्वेतां सशाखोक्तमहाधिपम्। ब्राह्मणान् भोजयित्वा तु ततो भुञ्जीत वाग्यतः। आदित्यग्रहयुक्तेऽस्मिन् वारे त्रिपुरसूदनः। तत्र कर्म कृतं पुण्यं तत्सर्वं शुभदं भवेत्"।

नन्दाव्रतं देवीपु० "मासे नभसि संप्राप्ते नक्ताहारो जितेन्द्रियः। प्रातःस्नायी सदाध्यायी अग्निकार्य्यपरायणः। देवीं संपूजयेद्वत्स ! बिल्वपुन्नागचम्पकैः। धूपन्तु गुग्गुलं दद्यान्नैवेद्यं घृतपाचितम्। क्षीरान्नं दधिभक्तञ्च अथवा शाकयावकम्। जपञ्च कुर्य्यान्मन्त्रस्य सहस्रमथवा शतम्। देव्यास्तत्र समर्प्यैतत् यावत् पूर्णं व्रतम्भवेत्"।

नन्दसप्तमीव्रतं भविष्योत्तरे "या तु मार्गशिरे मासि शुक्लपक्षे तु सप्तमी। नन्दा सा कथिता वीर ! सर्वानन्दकरी शुभा। पञ्चम्यामेकभक्तं तु षष्ठ्यां नक्तं प्रकीर्त्तितम्। सप्तम्यामुपवासञ्च कीर्त्तयन्ति मनीषिणः। मालतीकुसुमानीह सुगन्धं चन्दनं तथा। कर्पूरागुरुसंमिश्रं धूपञ्चात्र विनिर्द्दिशेत्। दध्योदनं सघृतञ्च नैवेद्यं भास्करप्रियम्। तदेव दद्याद्विप्रेभ्यो ह्यश्नीयाच्च स्वयं यथा"।

नयनप्रदसप्तमीव्रतं भविष्यपु० "यो मार्गशीर्षे सितसप्तमेऽह्नि हस्तसंयोगे जगतः प्रसूतिम्। संपूज्य भानुं विधिनोपवासी स्रग्गन्धधूपान्नवनोपहारैः। गृहीतगव्यं प्रतियत्नपूजादानादियुक्तं व्रतमब्दमेकम्" इत्यादि।

नरकपूर्णिमाव्रत विष्णुधर्मोत्तरोक्तम् "प्रतिमासन्तु नामानि पञ्चदश्यां जगत्पतेः। कृतोपवासः सुस्नातः पूजयित्वा जगद्गुरुम्। उच्चारयन्नरो याति सुसुखेनैव गच्छति। यद्वा मासगतं नाम प्रीयतामिति कीर्त्तयेत्। केशवं मार्गशीर्षे तु पौषे नारायणं तथा। माधवं माघमासे तु गोविन्दमपि फाल्गुने। चैत्रे विष्णुञ्च वैशाखे कीर्त्तयेन्मधुसूदनम्। ज्यैष्ठे त्रिविक्रमं देवं तथाषाढे च वामनम्। श्रीधरं श्रावणे मासि हृषीकेशं ततःपरम्। नाम भाद्रपदे तद्वत् ध्यायते पुण्यकाङ्क्षिभिः। तदश्वयुजे मासि पद्मनाभेति कीर्त्तयेत्। दामोदरं कार्त्तिके च सर्वान्तरति दुर्गतिम्। एवं मासक्रमेणैव यदि दातुं न शक्यते। तदा संवत्सरस्यान्ते दद्यात्रैव समागतम्"।

नरसिंहचतुर्द्दशीव्रतं नरसिंहपु० "वैशाखशुक्लपक्षे तु चतुर्द्दश्यां समाचरेत्। मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम्। वर्षे वर्षे तु कर्त्तव्यं मम सन्तुष्टिकारकम्। महागुह्यमिदं श्रेष्ठमानुषैर्भवभीरुभिः। तेनैव क्रियमाणेन सहस्रद्वादशीफलम्। जायते मत्सखा वच्मि मानुषाणां महात्मनाम्। स्वातीनक्षत्रयोगेन शनिवारेण संयुते। सिद्धियोगस्य संयोगे वणिजे करणे तथा। पुण्यसौभाग्ययोगेन लभ्यते दैवयोगतः। सर्वैरेतैस्तु संयुक्तं हत्याकोटिविनाशनम्। एतदन्यतरे योगे तद्दिनं पापनाशनम्। केवलं तत् प्रकर्त्तव्यं मद्दिने व्रतमुत्तमम्। अन्यथा नरकं याति यावच्चन्द्रदिवाकरौ। यथा यथा प्रवृत्तिः स्यात्पातकस्य कलौ युगे तथा तथा प्रणश्यन्ति तद्व्रतस्य प्रभावतः। मद्व्रतस्य प्रभावेन मतिर्न स्याद् दुरात्मनाम्। विचार्य्येत्थं प्रकर्त्तव्यं माधवे मासि मद्व्रतम्"।

नरसिंहत्रयोदशीव्रतं नरसिंहपु० "गुरुवारे त्रयोदश्यामपराह्णे जलप्लुतः। तर्पयित्वा देवपितॄन् सर्व्वैश्च तिलतण्डुलैः। नरसिंहं समभ्यर्च्च्य यः करोत्युपवासकम्। सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते"।

नरसिंहव्रतं वह्निपु० "अथाष्टमीव्रतं ब्रह्मन्! प्रोच्यमानमिदं शृणु!। भवविध्वंसनं नॄणां सर्व्वार्त्तिहरणं परम्। राजा वा राजपुत्त्रो वा यदि चेद्रिपुनाशनम्। तदाऽष्टम्यान्तु सुस्नातो यवाभस्म प्रचारयेत्। कुर्य्यादष्टदलं पद्मं तण्डुलैर्वा प्रसूनकैः। कर्णिकायामथैतस्य नरसिंहाकृतिं चरेत्" इत्यादि।

नवम्याद्युपवासव्रत मत्स्यपु० "नवमी चाष्टमी चैव पौर्णमासी चतुर्द्दशी। यो भुङ्क्ते देवि! नैतेषु सुपर्व्वसु नरः समाम्। गाणपत्यं स लभते निःसपत्नमनिन्दितम्"।

नवरात्रिव्रतं देवीपु० "सौभाग्यार्थं स्त्रिया कार्य्यमार्य्यैश्च धनकाङ्क्षिभिः। महाव्रतं महापुण्यं शङ्कराद्यैरनुष्ठितम्। कर्त्तव्यं सुरराजेन्द्र! देवीभक्तिसमन्वितैः। कन्यासंस्थे रवौ शक्र! शुक्लादारभ्य नन्दिकाम्"। नन्दिकाम् प्रतिपदम् "अयाचीत्वथवैकाशी नक्ताशीत्वथ वा पुनः। प्रातःस्नायी जितद्वन्द्वस्त्रिकालं शिवपूजकः। जपहोमसमायुक्तः कन्यका भोजयेत् सदा। अष्टम्यां नवमेऽहानि दारुजानि शुभानि च। एकं वा द्विविभागेन कारयेत् सुरसत्तम!। तस्मिन् देवी प्रकर्त्तव्या हैमी वा राजती च वा। युद्धकालक्षणोपेतखड्गशूलेन पूजयेत्। सर्व्वोपहारसम्पन्नैर्वस्त्ररत्नफलादिभिः। कारयेद्रथदोलादिप्रजाश्च बलिदैविकीम्" इत्यादि।

नागदष्टोद्धरणपञ्चमीव्रतं भविष्योत्तरे "उपोष्य पञ्चमीं सम्यक् नागानां बलवर्द्धनम्। अथैकमेकं यावच्च विधानं शृणु भारत!। वर्षैकं संवत्सरम् "मासि भाद्रपदे राजन्! शुक्लपक्षे तु पञ्चमी। सापि पुण्यतमा प्रोक्ता याद्यांशो गतिकाव्यया। चतुर्थ्यामेकभक्तञ्च तस्यां नक्तं प्रकीर्त्तितम्"। तस्यां पञ्चम्यामुपोष्येति दिवा भोजनवर्ज्जनात् 'कुर्य्याच्चान्द्रमसं नागमथ वा कलधौतजम्। अथ दारुमयं भव्यं मृण्मयं वाप्यशक्तितः। चान्द्रमसं सौवर्णं कलधौतं रूप्यमयम्। पञ्चम्यामर्च्चयेद् भक्त्या नागं पञ्चफणं तथा। करवीरैस्तथा पद्मैः जातीपुष्पैः सुगन्धिभिः। गन्धैर्धूपैः सनैवेद्यैः स्नाप्य क्षीरादिभिर्नृप!। ब्राह्मणान् भोजयेत्पश्चात् घृतपायसमोदकैः। अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च। तथा कर्क्कोटकं नागं नागमश्वतरं नृप!। धृतराष्ट्रं शङ्खपालं कालियं तक्षकं तथा। पिङ्गलञ्च महानागं मासि मासि क्रमाद् यजेत्"।

नागपञ्चमीव्रतं भविष्यपु० "नागाविद्धा तु पञ्चम्यां न विषैरभिभूयते। स्त्रियं च लभते पुंसः परमां श्रियमाप्नुयात्। मूलमन्त्राः षडङ्गाभिरङ्गमन्त्राश्च कीर्त्तिताः। पूर्व्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः"। तिथीश्वरोऽत्र नागः गन्धपुष्पोपहारश्च यथाशक्ति विधीयते। पूजाऽभावेन भावेन कृतापि तु फलप्रदा। आज्यधाराभिरद्भिश्च दधिक्षीरान्नमाक्षिकैः। पूर्व्वोक्तफलदो होमो यतः शान्तेन चेतसा। एतद्व्रतं वैश्वानरप्रतिपद्व्रतवद् व्याख्येयम्"।

नागव्रतं कूर्म्मपु० कार्त्तिकशुक्लपक्षमुपक्रम्य "तिथौ युगाद्यायान्तु समुपोष्य यथाविधि। शङ्खपालादिनागानां शेषस्य च महात्मनः। पूजा कार्य्या पुष्पगन्धक्षीराप्यायनपूर्व्वकमिति"। युगाद्यायास्तृतीयां प्रातर्मध्याह्नव्यापिन्याश्च कर्त्तव्यम्" तथा च स्कन्दपुराणे "प्रातर्मध्यन्दिने तत्र तत्रोपोष्य फणीश्वरान्। क्षीरेणाप्याय्य पञ्चम्यां पारयेत् प्रयतो नरः। विषाणि तस्य नश्यन्ति न तं हिंसन्ति पन्नगाः"।

नानाफलपूर्णिमाव्रतं विष्णुधर्म्मोत्तरे "प्राप्य पञ्चदशीं राम! तथा शुक्लाञ्च कार्त्तिकीम्। आरामस्तम्भभित्तिं वै सुमेरौ च समालिखेत्। तस्य द्वारि गृहे चाशु नानावर्णैस्तु वर्णिकम्। गृहोपकरणं शक्त्या तयोश्चैवाभितो लिखेत्। पीतं यद्यास्वाद्य सकटीसखनाशिकम्। ततस्तौ पूजयेन्नारी स्नात्वा भर्त्तृपरा शुचिः"।

नामतृतीयाव्रतं भविष्योत्तरे "उपवासस्य नियमं गृह्णीयाद् भक्तिभाविता। देवीं संवत्सरं यावत् तृतीयायामुपोषिता। प्रतिमासं करिष्यामि पारणञ्चापरेऽहनि। तदविघ्नेन मे यातु समाप्तिं व्रतमुत्तमम्। शरणं त्वां प्रपन्नास्मि दौर्भाग्यादुद्धरस्व माम्। एवं सङ्कल्प्य विधिवत् कौन्तेय! कृतनिश्चया। भक्त्या नारी ध्यानपरा स्नानं कृत्वा जितेन्द्रिया। नद्यां तडागे वाप्यां वा गृहे वा नियतेन्द्रिया। पूजयेत् पार्व्वतीं नाम्ना रात्रौ प्राश्य कुशोदकम्। प्रभाते भोजयेत् विप्रान् शिवभक्तान् विशेषतः। पौषे मासे तृतीयायां गिरिजां नाम पूजयेत्। गोमूत्रं प्राशयेद्रात्रौ प्रभाते भोजयेद् द्विजान्" इत्यादि। भविष्यपु० व्रतान्तरम् "गौरी

काली२ उमा३ भद्रा४ दुर्गा५ कान्तिः६ सरस्वती७ । मङ्गला८ वैष्णवी९ लक्ष्मीः१० शिवा११ नारायणी१२ क्रमात् । मार्गतृतीयामारभ्य पूजयेत् स्वर्गभाक् भवेत्" । मार्गशीर्षतृतीयामारभ्य प्रतिमासमेकैकेन नाम्ना पूजयेदित्यर्थः "अर्द्धनारीश्वरं रुद्रमथ वा उमाशङ्करम् । पूजयेद्विधिवन्नारी अवियोगमवाप्नुयात्" ।

कामद्वादशीव्रतं विष्णुरहस्ये "मार्गशीर्षे शुभे मासि शुक्लपक्षे यतव्रतः । प्रथमञ्चैव गृह्णीयात् द्वादशीं विधिवन्नरः । कारयेच्च हरेर्यज्ञमाचार्य्योक्तविधानतः । अर्च्चयित्वा हरिं तत्र वक्ष्यात्तुष्टां द्विजन्मनः" इत्यादि ।

कामनवमीव्रतं भविष्यपु० "नवम्यां शुक्लपक्षे तु कृते नक्ते विशेषतः । मासि चाश्वयुजे वीर ! दुर्गादेवीति पूजयेत् । बिल्वपत्रैस्तथाब्जैश्च होमपुष्पैस्तु सर्व्वशः । गुग्गुलेनाथ दुग्धेन भक्ष्यभोज्यैरनेकशः । परमान्नेन रक्तेन महिषाजैर्विघातितैः । प्रबोधनं तथा कुर्य्याद्देव्या वै भक्तिमाचरन् । भोजयित्वा नवम्यां तु ब्राह्मणान् तु कन्यकाः । ब्राह्मणानां सुस्त्रियश्च यथा भवति शक्तितः । पञ्चगव्यं ततः प्राश्य नक्तं भुञ्जीत वाग्यतः । य एवं पूजयेदत्र दुर्गां भक्त्या समन्वितः । सोऽश्वमेधसहस्रस्य फलं प्राप्य दिवं व्रजेत् । काम्यमाश्विनवत् सर्व्वं कार्त्तिकेऽपि हि पाण्डव ! । कृत्वोपवासमष्टम्यां मासि मार्गशिरे नृप ! । नवम्यां पूजयेद्देवीं भक्त्या भगवतीं बुधः" इत्यादि । वर्षसाध्यमिदम् ।

कामसप्तमीव्रतं भविष्योत्तरे "चैत्रात् प्रभृति कर्त्तव्या सर्व्वदा कामसप्तमी । धातेति मधुमासे तु पूजनीयो दिवाकरः । अर्य्यमेति च वैशाखे ज्यैष्ठे मित्रः प्रकीर्त्तितः । आषाढ़े वरुणो ज्ञेय इन्द्रो नभसि कथ्यते । विवस्वांश्च नभस्ये तु पर्ज्जन्योऽश्वयुजि स्मृतः । पूषा कार्त्तिकमासे च मार्गशीर्षे तु कथ्यते । भगः, पौषे विवस्वांश्च त्वष्टा माघे तु कथ्यते । विष्णुस्तु, फाल्गुने मासि पूज्यो वन्द्यश्च भास्करः । सप्तम्यां चैव सप्तम्यां भोजयेद्भोजकान् बुधः" ।

निक्षुभार्कसप्तमीव्रतं प्रथमं भविष्यपु० "सूर्य्यभक्ता तु या नारी ध्रुवं सा पुरुषो भवेत् । स्त्री चैवाप्युत्तमं भावं यत् कृत्वा लभते शृणु । निक्षुभार्कव्रतं भानोः सदा प्रीतिविवर्द्धनम् । अवियोगकरं वीर ! धर्म्मकामार्थसाधकम् । सप्तम्यामथ षष्ठ्यां वा संक्रान्तौ भानवे दिने । हविषा हविषा होमं सोपवासः समाचरेत् । निक्षुभार्कस्य चैवार्च्चां कृत्वा स्वर्णमयीं शुभाम् । राजतीं वाथ वार्क्षीं वा स्नापयेच्च घृतादिभिः" । निक्षुभा सूर्य्यपत्नी तया सहितोऽर्कः । द्वितीयम् "या नार्य्युपवसेद्देवं कृष्णामेकान्तु सप्तमीम् । सा गच्छेत् परमं स्थानं भानोरमिततेजसः । वर्षान्ते प्रतिमां कृत्वा शालिपिष्टमयीं शुभाम् । पीतानुलेपनैर्माल्यैः पीतवस्त्रैः प्रपूजयेत् । पूर्व्वोक्तं निखिलं कृत्वा भास्कराय निवेदयेत् । सर्व्वभूमौ महीपालो जातचामीकरप्रभः । वर्षकोटिसहस्राणि सूर्य्यलोके महीयते" । तृतीयम् "सप्तम्यां या निराहारा भवेद्वद्नियान्विता । गजं पिष्टमयं कृत्वा वर्षान्ते विनिवेदयेत् । विधाय राजतं पद्मं सुवर्णकृतकर्णिकम् । भक्त्या विन्यस्य तत्पृष्ठे सर्व्वं पूर्व्ववदाचरेत् । कामतोऽपि कृतं पापं भ्रूणहत्यादि यद्भवेत् । तत् सर्व्वं गजदानेन क्षीयते नात्र संशयः" । चतुर्थम् "कृष्णपक्षे तु माघस्य सप्तम्यां या दृढ़व्रता । वर्षैकमुपवासेन सर्व्वभोगविवर्ज्जिता । वर्षान्ते सर्व्वगन्धोत्थं निक्षुभार्कं निवेदयेत्" ।

निर्ज्जलैकादशीव्रतं भविष्योक्तम् "वृषस्थे मिथुनस्थेऽर्के शुक्ला ह्येकादशी भवेत् । ज्यैष्ठे मासि प्रयत्नेन सोपोष्या जलवर्ज्जितैः । स्नाने चाचमने चैव वर्ज्जयित्वोदकं बुधः । उपभुञ्जीत दैवाद्यद्व्रतभङ्गोऽन्यथा भवेत् । उदयादुदयं यावद्वर्ज्जयित्वा जलं बुधः । अप्रयत्नादवाप्नोति द्वादश्यां द्वादशीपरः । ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत् । जलं सुवर्णं दत्त्वा तु द्विजातिभ्यो यथाविधि । भुञ्जीत कृतकृत्यस्तु ब्राह्मणैः सहितो वशी । एवं कृते तु यत् पुण्यं भीमसेन ! शृणुष्व तत् । संवत्सरस्य या मध्ये एकादश्यो भवन्त्युत । तासां फलमवाप्नोति अत्र मे नास्ति संशयः" ।

नीराजनद्वादशीव्रतं भविष्योत्तरे "कार्त्तिके शुक्लपक्षस्य द्वादश्यां रजनीमुखे । समुत्थिते विनिद्रे तु देवे दामोदरे तथा । दोषान्ते नरनाथाभिरम्ये स्त्री वा नृपान्तिके । अर्च्चयित्वा नवं विष्णुं स्तुत्वा मन्त्रैर्द्विजोत्तमैः । सार्द्धं मानतपुष्पाभिर्दीपिकाभिर्हुताशनम् । कृत्वा महाजनाः सर्व्वे हरिं नीराजयेच्छनैः । पुष्पैरभ्यर्च्चितं देवं समालभ्य च चन्दनैः । बदरैः कर्व्वरैश्चैव त्रपुसैरिक्षुभिस्तथा । गन्धैः पुष्पैरलङ्कारैर्वस्त्रै रत्नैश्च पूजितैः । तस्यैवानुगतां लक्ष्मीं ब्रह्माणं चण्डिकां तथा । आदित्यं शङ्करं गौरीं यक्षं गणपतिं ग्रहान् । मातरः

पितरो गावः सर्वा नीराजयेत् क्रमात् । गवां नीराजनं कुर्य्यात् महिष्यादेश्च मण्डलम् । भ्रामयेत्ताश्च यत्नैर्घण्टावादनवादनैः" ।

नृसिंहद्वादशीव्रतं धरणीव्रतोक्तम् "तद्वत्तु फाल्गुने मासि कृष्णपक्षे तु द्वादशी । उपाष्य प्रोक्तविधिना हरिमाराधयेद्बुधः । नरसिंहाय पादौ तु गोविन्दायोदरं तथा । कटिं विश्वभुजे तद्वदनिरुद्धाय चोदरम् । कण्ठन्तु शितिकण्ठाय पिङ्गकेशाय वै शिरः । असुरध्वंसनायेति चक्रायोद्धात्मने तथा । शङ्खमित्येव सम्पूज्य गन्धपुष्पफलैस्तथा । रत्नगर्भं घटे स्थाप्य तं संपूज्य विधानतः । द्वादश्यां वेदविदुषे ब्राह्मणाय निवेदयेत् । एवं कृते फलं प्राप्तं यत् पुरा पार्थिवेन च" इत्यादि ।

पञ्चवह्निव्रतं पद्मपु० "प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रदः । वैश्वानरपुरं याति व्रतं वैश्वानरन्त्विदम् । पृथिव्यां भाजनं कृत्वा यो भुङ्क्ते पञ्चवह्निषु । अहोरात्रेण चैकेनातिरात्रफलमश्नुते" ।

पञ्चवटपूर्णिमाव्रतं भविष्योत्तरे "पञ्च पञ्चदशीः स्थित्वा एकभक्तेन मानवः । संपूज्य पूर्णिमां देवीं लिखितां चन्द्रमादिना" । पूर्णिमाप्रतिमा तु परिभाषायां द्रष्टव्या । "ततः पञ्च घटान् पूर्णान् पयोदधिघृतेन च । मधुना सितखण्डेन ब्राह्मणायोपपादयेत् । मनोरथान् पूरयस्व यथा त्वं पूर्णिमा ह्यसि । पञ्चकुम्भप्रदानेन भूतानां तुष्टिरस्तु मे । इत्यनेन नमस्कृत्य सर्वान् कामानवाप्नुयात् । एतत् पञ्चवटं नाम व्रतं तुष्टिप्रदायकम्" ।

पञ्चपिण्डिकागौरीव्रतं स्कन्दपु० नागरख० "नभस्ये च सिते पक्षे तृतीयादिवसे स्थिते । प्रातरुत्थाय पश्चाच्च भक्षयेत् दन्तधावनम् । ततश्च नियमं कुर्य्यादुपवाससमुद्भवम् । गौरीनाम समुच्चार्य्य श्रद्धापूतेन चेतसा । ततो निशागमे प्राप्ते कृत्वा गौरीचतुष्टयम् । मृण्मयं यावत्पञ्चैव तदिहैकमनाः शृणु ! । एका गौरी प्रकर्त्तव्या पञ्चपिण्डा यथाविधि । प्रहरे प्रहरे प्राप्ते तासु पूजां रेत्" ।समाप

पञ्चमहापातकनाशनद्वादशीव्रतं भविष्यपु० "यत् कृत्वा मुच्यते जन्तुर्नरः पञ्चपातकात् । पञ्चपातकिनः प्रेतान् पितॄंस्तारयते तथा । निशाकरादयश्चैव पूर्णिमादेवता इमाः । जगन्नाथो महीधारी देवेन्द्रो देवकीसुतः । चतुर्भुजो गदापाणिः सुरभीशः सुलोचनः । सर्वगतश्चक्रपाणिः शूरचापधरालयः । नीलश्च द्वादश इमा देवताः परिकीर्त्तिताः । स्वाहाकारान्वितैरेतैश्चतुर्थ्यन्तैश्च नामभिः । आश्विनादौ देवतानां पूजां च कुरुते व्रती । श्रावणादेव कुर्वीत द्वादश्यां परिकीर्त्तिता । पूर्णिमायान्तु देवेभ्यः पायसं जुहुयात्ततः । अमावास्यां देवतानां तिलक्षुद्रगुडोदकम् । पञ्च रत्नानि देयानि पञ्चपातकशान्तये । पञ्चमूर्त्तिं स्वर्णमयीं पञ्चामृतसमन्विताम् । भोजयेद्ब्राह्मणान् राजन् ! पञ्चद्वादशसंख्यया" ।

पञ्चमहाभूतपञ्चमीव्रतं विष्णुधर्मोक्तम् "अतःपरं प्रवक्ष्यामि पञ्चमूर्त्तेस्तथार्च्चनम् । पृथिव्यापस्तथातेजो वायुराकाशमेव च । एता वै देवदेवस्य कथिताः पञ्च मूर्त्तयः । चैत्रे तु पञ्चमीं शुक्लां समासाद्य विचक्षणः । उपवासो हरिं देवं पञ्चात्मानं समर्च्चयेत् । पञ्चमण्डलकाः कार्य्याः पञ्चभिर्वर्णकैः पृथक् । पार्थिवं मण्डलं कार्य्यं नीलवर्णं महीपते ! । वारुणञ्च तथा श्वेतं रक्तमाग्नेयमिष्यते । पीतं भवति वायव्यं कृष्णमाकाशदैवतम् । समानवर्णगन्धैश्च पुष्पैस्तानर्च्चयेत् पृथक् । गन्धाश्च धूपदीपाश्चैवंयथालाभमरिन्दम ! । यवैर्माषैस्तिलैश्चैव हपायसेन च" ।तेन

पञ्चमूर्त्तिव्रतं विष्णुधर्मोत्तरे "अथापरं प्रवक्ष्यामि पञ्चमूर्त्तिव्रतं तव । शङ्खचक्रगदापद्मं पृथिवीश्च महाभुज ! । गन्धैर्मण्डलिकां कृत्वा पञ्च पञ्चसु पूजयेत् । चैत्रशुक्लादिमां प्राप्य पञ्चमीप्रभृति नरः । सोपवासो बहिःस्नातस्तथा शुक्लाम्बरः शुचिः । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । सर्व्वेषां पूजनं कृत्वा जुहुयाज्जातवेदसि । सर्वेषामेव देवानां नामभिस्तु तथा पृथक् । ब्राह्मणान् भोजयेच्चात्र तदा च घृतभोजनम् । संवत्सरमिदं कृत्वा व्रतान्ते वस्त्रपञ्चकम् । पञ्च वेदविदां दद्यात् पञ्चवर्णं नराधिप ! । व्रतेनानेन चीर्णेन राजसूयफलं लभेत्" ।

पञ्चाग्निसाधनरम्भातृतीयाव्रतं भविष्योत्तरे "भद्रे कुरुष्व यत्नेन रम्भाव्रतमनुत्तमम् । मनोऽभिलषितं काम्यं येन प्राप्नोति शङ्करम् । ज्यैष्ठशुक्लतृतीयायां स्नाता नियमतत्परा । कुरु ! पार्श्वेषु पञ्चाग्नीन् ज्वालामालाकुलाकृतीन् । गार्हपत्यं दक्षिणाग्निं सभ्याहवनीयकम् । पञ्चमं भास्करं तेज इत्येते पञ्च वह्नयः । एतेषां मध्यमा भूत्वा तिष्ठ पूर्वमुखी सती । चतुर्भुजं ध्यायमानं पद्मजापरिसंस्थितम् । मृगाजिनस्तनकृतां जटावल्कलधारिणीम् । सर्वाभरणभूषाढ्यां देवीमभिमुखं कुरु !" ।

पत्रव्रतं भविष्योत्तरे "ताम्बूलभक्षणादौ वा गौरीपत्रं ददाति च"। गौरीपत्रं ताम्बूलपत्रम् "पूगचूर्णसमायुक्तं स्त्रियो वा पुरुषस्य वा। वर्षस्यान्ते तु सौवर्णं फलपत्रन्तु राजतम्। मुक्ताफलमयं चूर्णं सम्पूर्णं वा प्रयच्छति। न सा प्राप्नोति दौर्भाग्यं न दौर्गन्ध्यं मुखस्य वा। एतत्पत्रव्रतं नाम गौरीलोकप्रदायकम्"।

पदार्थव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे दशम्यां तु सोपवासस्तथा नरः। मार्गशीर्षे तथारभ्य यावत् संवत्सरं भवेत्। गन्धमाल्यनमस्कारधूपदीपान्नसम्पदा। दिक्पालपूजनं कुर्य्याद् दिशां संपूजनं तथा। गां वत्सरान्ते दद्याच्च तथैव च पयस्विनीम्। ब्राह्मणाय महाभाग! तथा च मनुजोत्तम!। एतद्व्रतं नरः कृत्वा यत्र क्वचन गच्छति। तत्रेष्टं काममाप्नोति पुत्रेष्टिफलमश्नुते। वाणिज्यसक्तश्च नरः सुसिद्धिं यायात् तथान्यो विजिगीषवश्च। विद्यार्थिनो वा रिपुनाशनं वा हितं पदार्थव्रतमेतदिष्टम्"।

पद्मनाभद्वादशीव्रतं "तद्दाश्वयुजे मासि द्वादशीं शुक्लपक्षिणीम्। बहुपत्रैरभ्यर्चयेद्देवं पद्मनाभं सनातनम्। पद्मनाभाय पादौ तु कटिं वै पद्मयोनये। उदरं सर्वदेवाय पुष्कराक्षाय वै उरः। अव्ययाय तथा बाहू प्राग्वदस्त्राणि पूजयेत्। प्रभवाय शिरः पूज्य प्राग्वदग्रे घटं न्यसेत्। तस्मिन् हेममयं देवं पद्मनाभं तु विन्यसेत्"। पद्मनाभस्तु दक्षिणाधोहस्तादारभ्य सव्येन च शङ्खपद्मगदाचक्रधारी कार्य्यः"।

पयोव्रतं पद्मपु० "वर्षमेकं भवेद्यस्तु पञ्चदश्यां पयोव्रतः"। पञ्चदश्याममावास्यायां पुराणान्तरसंवादात् "वर्षान्ते ब्राह्मणे दद्यात् यत्र पञ्च पयस्विनीः। वासांसि च पिधानानि जलकुम्भयुतानि च। स याति वैष्णवं लोकं पितॄणां तारयेच्छतम्। जन्मान्तरे भवेद्राजा! पयोव्रतमिदं स्मृतम्"।

पर्वनक्तव्रतं भविष्यपु० "योऽब्दमेकं प्रकुर्वीत नक्तं पर्वसु पर्वसु"। पर्व पञ्चदशी "ब्रह्मचारी जितक्रोधः शिवार्चनरतः सदा। वत्सरान्ते च विप्रेन्द्र! शिवभक्तान् समाहितान्। भोजयित्वा ततो ब्रूयात् प्रीयतां भगवान् प्रभुः। एवंविधिसमायुक्तः शिवलोकस्य गच्छति"

पर्व्वपालनव्रतं पद्मपु० "पृथिवीभाजने भुङ्क्ते नित्यं पञ्च यो नरः। अतिरात्रफलं देवि! संहोरात्रेण विन्दति"। पृथिवीभाजने भूभागस्थं निधायेत्यर्थः शिवोऽत्र देवता"।

पातालव्रतं विष्णुधर्मोत्तरे "चैत्रमासं समारभ्य कृष्णपक्षे दिने दिने। पातालपूजनं कुर्य्यात् प्रतिपत्प्रभृतिक्रमात्। रौक्मं भौमं शिलाभौमं पातालं नीलस्फटिकम्। रक्तभौमं पीतभौमं श्वेतकृष्णादरपि। सुवर्णैर्गन्धमाल्यैश्च नैवेद्येन च भूरिणा। एतद्दीपप्रदानेन वह्निसन्तर्पणेन च। एवं नक्ताशनः कृत्वा व्रतं संवत्सरं सदा। व्रतावसाने दद्यात्तु दीपकान् द्विजवेश्मसु"।

पात्रव्रतं नरसिंहपु० "उपोष्यैकादशीं शुक्लां माघमासेऽथ पूर्णिमाम्। कुर्य्याद्विधिमिमं सम्यक् यदा तस्य व्रजेत् पदम्। तद्विष्णुपदप्रदञ्चैतद् व्रतं सौभाग्यदायकम्। पुरा वैश्यदस्यैव विधिना चरितं त्विदम्। घृतस्नानप्रकारं समयुक्तं गुणान्वितम्। पूजयेद्भूमिकालोऽथ पादुकाद्यैः सुभावितः। रक्तमाज्ययुतञ्चाथ पात्रं नौकाञ्च गामपि। अभावे च तथा हेम्नः कर्षार्द्धेन तु राजतम्। वस्त्रयुग्मं नवं सूक्ष्मं पुष्पप्रकरचित्रितम्। आच्छाद्य तत्र तत् पात्रं शुचौ देशे निवेशयेत्। ततो जागरणं कुर्य्यात् गीतवाद्यादिमङ्गलैः। प्रभाते तु नयेत् पात्रं हरेरायतनं महत्। स्नाप्य क्षीरादिभिर्देवं विष्णुं सम्पूज्य वै स्वयम्। निवेदयेत्तु तत्पात्रं प्रीयतामित्युदीरयेत्"।

पापनाशिनीसप्तमीव्रतं भविष्यपु० "शुक्लपक्षस्य सप्तम्यां यदा हस्तर्क्षो भवेत्। तदा पुण्यतमा प्रोक्ता सप्तमी पापनाशिनी"। करो, हस्तः अयं हि योगो बहुले श्रावणे मासि सम्भवति। "तस्यां सम्पूज्य देवेशं चित्रभानुं जगद्गुरुम्। सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः। यश्चोपवासं कुरुते तस्यां नियतमानसः। सर्वपापविनिर्मुक्तः सूर्य्यलोके महीयते। दानं यद्दीयते किञ्चित् समुद्दिश्य दिवाकरम्। होमो वा क्रियते तत्र तत् सर्वञ्चाक्षयं भवेत्। वरश्च सप्तमी कृष्णा तेनोक्ता पापनाशिनी। तस्यां समभ्यर्च्य रविं याति सौमनसं पुरम्"।

पापमोचनव्रतं सौरपु० "विल्वकुञ्जं समाश्रित्य द्वादशाहं समोजनम्। यः कुर्य्याद् भ्रूणहाद् पापान्मुक्तो भवति नारद!"।

पापान्त्यसंक्रान्तिव्रतं स्कन्दपु० "अशून्यपापसंक्रान्तिं शृणु स्कन्द! विधानतः। संक्रान्त्यां नियतो भूत्वा तिलैः श्वेतैः समन्वितैः। तारकं वर्द्धमानञ्च प्रतिमासं निवे

द्र्पयेत्" । वर्द्धमानः प्रत्यय । "अन्नेपानेन तु चा-यान्द्रिमासमन्वितः । तिष्ठो मास्मात्तु पापेभ्यस्तव देव प्रसादतः । त्वन्तु मां रक्ष देवेश ! वाङ्मनःकायकल्म-षात् । उद्यापने च देवस्य सौवर्णमानकेन तु । द्वि-भुजा प्रतिमा कार्य्या रजतेनाथ कारयेत्" ।

पालीचतुर्द्दशीव्रतं भविष्योत्तरे "मासि भाद्रपदे पक्षे शुक्ले-भूतितिथौ नृप ! । तदा भक्त्या प्रदातव्यं वस्त्रागा-र्घ्यं कृत्तमम् । ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैः स्त्रीभिस्तथैव च । फलपुष्पैस्तथा वस्त्रैर्दीपाक्षतकचन्दनैः । विरूढैः सप्तधान्यैश्च दधिपिष्टाम्बुचन्दनैः । अनग्निपाकसिद्धैश्च क्षीरतण्डुलमिश्रितैः । खर्ज्जूरैर्नारिकेलैश्च बीजपूरैस्त्र्यपै-स्तथा" । आहर्षं (आता) फलविशेषः "द्राक्षादाडिमपू-गैश्च पुष्पैश्चापि प्रपूजयेत् । संवत्सरशुभफलिकातिबलां वि-मालां पालीमुपेत्य बहुभिस्तनुभिः कृतालीम् । ये पूजयन्ति वरदां सहितं समुद्रे तेषां गृहे भवति भूतिरनर्थगाधा" ।

पाशुपतव्रतं वह्निपु० "शिवं ये पूजयिष्यन्ति दास्यं दास्यन्ति सुव्रताः । सर्व्वपापविनिर्मुक्ता दिवमेष्यन्ति ते द्विजाः । यथा पशुपतिर्नित्यं हत्वा सर्व्वमिदं जगत् । न लि-प्यते पुनः सोऽपि यो नित्यं व्रतमाचरेत् । इह जन्म कृतं पापं पूर्व्वजन्मकृतञ्च यत् । व्रतं पाशुपतं नाम कृत्वा हन्ति द्विजोत्तम ! द्वादश्यामेकभक्ताशी त्रयोदश्या-मयाचितम् । चतुर्द्दश्यां तथा नक्तं उपवासं परेऽहनि" । कालसंहितोक्तम् "रहस्यं वत् प्रवक्ष्यामि सर्व्वपापनिकृ-न्तनम् । व्रतं पाशुपतं श्रेष्ठं मया च शिरसि (वेदे) स्तुतम् । काजस्यैनपौर्णमासी देयः शिवपरिग्रहः ! क्षेत्रारामादिरन्यो वा प्रशस्तः शुभलक्षणः । तत्र पूर्व्व-त्रयोदश्यां सुस्नातस्तु कृताह्निकः । लब्धकार्य्यं समा-चार्य्यं संपूज्य प्रणिपत्य च । पूजां यथाविधिं कृत्वा शुक्लाम्बरधरः स्वयम् । शुक्लयज्ञोपवीती च शुक्लमा-ल्यानुलेपनम् । दर्भासने समासीनो दर्भमुष्टिं प्रगृह्य च । प्राणायामत्रयं कृत्वा प्राङ्मुखोवाऽप्युदङ्मुखः । ध्यात्वा देवञ्च देवीञ्च भूतविज्ञानवर्त्मना । व्रतमेतत् करो-मीति भवेत्सङ्कल्प्य दीक्षितः । यावत् शरीरपातञ्च द्वादशाब्दमथापि वा । तदर्द्धं वा तदर्द्धं वा मास-द्वादशकन्तु वा । तदर्द्धं वा तदर्द्धं वा मासमेकमथापि वा । दिनद्वादशकं वाथ व्रतसङ्कल्पनं विधिः" । व्रतान्तरं महाव्यपोहनं लिङ्गपु० "कृत्वा कनीयसं लिङ्गं स्नाप्य चन्दनवारिणा । चैत्रमासादि विप्रेन्द्राः शिवलिङ्गव्रतं

शुभम् । कृत्वा हैमं शुभं पद्मं कर्णिकाकेशरान्वितम् । नवरत्नैस्तु खचितमष्टपत्रं यथाविधि । कर्णिकायां न्य-सेल्लिङ्गं स्फाटिकं पीठसंयुतम् । तत्र भक्त्या यथा-न्यायमर्च्चयेद्बिल्वपत्रकैः" ।

पितृव्रतं विष्णुधर्म्मोत्तरे "अतःपरं प्रवक्ष्यामि सप्तमूर्त्तिव्रतं तव । चैत्रमासादथारभ्य प्रतिपत्प्रभृति क्रमात् । सुभा-स्वरा बर्हिषदोऽप्यग्निष्वात्तास्तथैव च । क्रव्यादाश्चोपहूता-श्चैव आज्यपाश्च सुकालिनः । पूजयेत् प्रत्यहं राजन् ! गन्धमाल्यानुलेपनैः । नैवेद्यं कृशरं कुर्य्यात् तिलानग्नौ च होमयेत् । कृशरं भोजयेद्विप्रान् तिलान् दद्याच्च दक्षिणाम् । नक्ताशनस्तथा तिष्ठेद्धविष्याशी नराधिप ! संवत्सरमिदं कृत्वा व्रतं पुरुषसत्तम ! । व्रतावसाने दद्यात्तु रजतस्य फलं द्विजे । व्रतेनानेन चीर्णेन सप्त-लोकगतिर्भवेत् । त्रिदशैः पूज्यमानस्तु कामचारी विहङ्गमः" । [कार्य्यम् ।

पिपीतकीद्वादशीव्रतं ति० त० उक्तं वैशाखशुक्लद्वादश्यां पुण्डरीकप्राप्तिव्रतं विष्णुधर्म्मोत्तरे "द्वादश्यां देवदेवेशं पू-जयित्वा जनाधिपम् । पुण्डरीकमवाप्नोति वत्सरं याद-साम्पतिम्" ।

पुत्रकामव्रतं पद्मपु० "नभस्यमासस्य तु पौर्णमास्याम् । भार्य्याद्वितीयः सहसा स एव पुत्रेष्टिमाद्यौ समहेऽपि कृत्वा । गच्छेत्ततः सर्व्वसमृद्धियुक्तो होमैः सजाप्यैर्व-लिना च रुद्रम् । शैलेन्द्रकन्यागजवक्त्रयुक्तम् सत्त्वावशक्त्या च वार्च्चयित्वा । संपूज्य विप्रानथ देवपूर्व्वान् कृतोप-वासो जितरोषदोषः । ततः सहायानपि भोजयित्वा भार्य्यासु पश्चात् स्वयमत्र भुङ्क्ते । दम्पाञ्च भार्य्यामथ गोपयित्वा प्रदक्षिणीकृत्य गुहां सगुह्याम् । गृहांस्तु गच्छेत्परिपूर्णकामो हृष्टः प्रहृष्टः कृतभोजनश्च । क-थाश्च दिव्यास्तत्र नन्दिनीश्च भार्य्यां ततः श्रावणयोः प्रयुक्ताम् । क्षीरोदनं त्रिदिनं भोजयेत्तु वन्ध्यान्तु भार्य्या-मपि पुत्रकामाम् । ततो गृहे सर्व्वसमृद्धिकामः वत्सरं भार्य्यां प्रयतो विधाय । उमां शिवं नन्दिनं चार्च्चयित्वा ततो भवेत् पुत्रवती च वन्ध्या" । व्रतान्तरं हरिवंशकान्त्यां कार्त्तिकपूजारूपम् ।

पुत्रप्राप्तिषष्ठीव्रतं विष्णुधर्म्मोत्तरे "वैशाखमासादारभ्य षष्ठ्यां स उपोषितः । भवन्तं पूजयेत् षष्ठ्यां संवत्सरमतन्द्रितः । पुत्रार्थी प्राप्नुयात् पुत्रान् धनकामो धनी भवेत् । स्वर्गार्थी प्राप्नुयात् स्वर्गमपि रुद्रो रमात्मजः । सोम्येच

च मदीयेन ये लोमद्रन्ति नराः प्रभो !। लोकद्वयेऽपि ते कामान् प्राप्नुवन्ति मनःप्रियान्। कुमारश्च तथा स्कन्दो विशाखश्च गुहस्तथा। चतुरात्मा विनिर्दिष्टो भगवान् क्रौञ्चसूदनः। तमभ्यर्च्य नरः षष्ठ्यां पुमान् प्राप्नोत्यभीप्सितान्"।

पुत्रप्राप्तिव्रतं देवीपु० "ब्रह्मणा यो विधिः शक्र कथितो विजयावहः। जयेति पूर्णिमा तात ! श्रावणस्य शुभावहा"। शक्र उवाच "विजया या समाख्याता सर्वकामप्रसिद्धये। तामहं श्रोतुमिच्छामि तत्त्वतः सुरसत्तम !"। ब्रह्मोवाच "पुत्रार्थं राज्यविद्यार्थं यशःसौभाग्यतोऽपि वा। विजयार्थं ग्रामकामो जयां कुर्वीत पूर्णिमाम्। हैमं वा राजतं वापि खड्गं वा अथ पादुके। प्रतिमां वापि कुर्वीत सर्वलक्षणसंयुताम्"। शाक्तव्यां इति शेषः "तामादाय शुभे कक्षे शुक्लवस्त्रविभूषिताम्। यवशाल्यङ्कुरोपेतां पानपात्रविभूषिताम्। दीर्घां सुशोभनां वस्त्रैः कल्पयेत्तत्र विन्यसेत्"।

पुत्रसप्तमीव्रतं वराहपु० "मासि भाद्रपदे प्राप्ते शुक्लपक्षे सुरेश्वरः !। सप्तम्यामुपवासेन पुत्रप्राप्तिप्रदं व्रतम्। षष्ठ्यां चैव तु संकल्प्य सप्तम्यां पूजयेद्धरिम्"।

पुत्रीयव्रतं विष्णुधर्मोत्तरे "प्रोष्ठपद्यामतीतायां कृष्णपक्षाष्टमी तु या। सोपवासो नरोऽष्टम्यां योषिद्वा तनयार्थिनी। स्नाता सरसि धर्मज्ञा तोयेऽवाप्यथ सारसे। पूजनं वासुदेवस्य यथा कुर्यात्तथा शृणु।"।

पुत्रीयसप्तमीव्रतं विष्णुधर्मोत्तरे "मार्गशीर्षे शुभे मासि शुक्लपक्षे द्विजोत्तम !। पुत्रीयां सप्तमीं राम ! स्नायात् प्रयतः शुचिः। अथ वा पुत्रकामश्च विधिना येन तत् शृणु"। पुत्रीयां पुत्रदाम्। "हविष्याशी शिरःस्नानं कृत्वा भास्करपूजनम्। अधःशायी द्वितीयेऽह्नि मोक्षगोदकेन तु। स्नात्वा संलिप्य च तथा शुभे देशे तु मण्डलम्। तत्राष्टपत्रकमलं विन्यसेत् वर्णकैः शुभैः। तस्यैव कर्णिकामध्ये भास्करं चन्दनेन तु। रक्तेन पूजयेद्देवं गन्धमाल्यानुलेपनैः"।

पुत्रोत्पत्तिव्रतं आदित्यपु० "कुरु संवत्सरं स्नानं श्रवणे श्रवणे मुने ! सोऽपि पुत्रानवाप्ताष्टौ चचार श्रद्धयान्वितः। पाराशर्यः सुतं लेभे व्रतस्यास्य प्रभावतः। त्वमन्योऽपि राजेन्द्रस्तावत् सिद्धिमवाप्नुयात्। पुत्रान् पौत्रांश्च लभते सप्तद्वात्रिंशत्पन्नुने"।

पुरश्चरणसप्तमीव्रतं स्कान्दपु० नागरखण्डे "माघमासे वरे पक्षे मकरस्थे दिवाकरे। सप्तम्यां सूर्यवारेण व्रतमेतत् समाचरेत्। पाषण्डैः पतितैः सार्द्धं तस्मिन्नहनि वर्जयेत्। षष्ठ्यां तथा नृपश्रेष्ठ ! प्रभाते दन्तधावनम्। मन्त्रेणानेन पानाद्यं कर्त्तव्यो नियमो नृप !। पुरश्चरणजात् पापात् सप्तम्यां दिवसाधिप !। उपवासं करिष्यामि अद्य त्वं शरणं मम। ततोऽपराह्णसमये स्नात्वा धौताम्बरः शुचिः। प्रतिमां पूजयेद्भक्त्या दिनाधिपसमुद्भवाम्। रक्तैः पुष्पैर्महावीरपाटौ सम्पूजयेत्ततः"।

पुष्पद्वितीयाव्रतं भविष्यपु० "कार्त्तिके शुक्लपक्षे तु द्वितीयायां नराधिप ! पुष्पाहारो वर्षमेकं वसेत् सुनियतात्मवान्"। कार्त्तिकशुक्लपक्षद्वितीयायां व्रतमारभ्याग्यापि शुक्लपक्षद्वितीयास्वेव वर्षपर्य्यन्तं पुष्पाहारव्रतं कुर्य्यादित्यर्थः। "कालप्राप्तानि यानि स्युर्हविष्यकुसुमानि तु। भुञ्जीत तानि दत्त्वा तु ब्राह्मणेभ्यो नराधिप !"। हविष्यकुसुमानि पूजार्हाणि भक्षणे चाविरुद्धानि अश्विनौ चात्र नामभन्त्रेण पूजनीयौ तयोः फलदातृत्वेन श्रवणात्। "सुवर्णस्य च पुष्पाणि यस्त्र चास्मै ददाति यः। व्रतान्ते तस्य सन्तुष्टौ देवौ त्रिभुवनेश्वरौ। दत्तः कामांस्तथा दिव्यान्विमानमपि तैजसम्। सुचिरं देवनारीभिर्लोके रमन्तोऽश्विनौ"।

पूर्णिमाव्रतं विष्णुधर्मोत्तरे "या प्रेरयति कर्माणि लोकेषु द्विजसत्तम !। तस्याः संपूजनं कार्य्यं शुक्लपञ्चदशी सदा। माल्यानुलेपनैः शुक्लैर्धूपेन च सुगन्धिना। रक्तवस्त्रप्रदानेन दीपदानेन चाथ वा। नैवेद्यैश्च तथा भक्ष्यैरपूपैश्च तथैव च। पूजयित्वा च तां देवीं भोक्तव्यं निशि भार्य्यया। यदि पञ्चदशीं सर्वां न शक्नोति कथञ्चन। देव्याः संपूजनं कार्य्यं अवश्यमपि कार्त्तिके। उमान्तु पूजयेद्या तु सा तु नारी पतिव्रता। सदा धर्मरता नारी लोके भवति भार्गव !"। वह्निपु० व्रतान्तरम् "श्रावण्यां पौर्णमास्याञ्च सोपवासो जितेन्द्रियः। प्राणायामशतं कृत्वा मुच्यते सर्वकिल्बिषैः"।

पृथिवीपञ्चमीव्रतं विष्णुधर्मोत्तरे "पञ्चम्यां पृथिवीं शुक्ले देवीं संपूजयेन्नरः। तामवाप्नोति यत्नेन नात्र कार्य्या विचारणा"।

पौरन्दरपञ्चमीव्रतं भविष्योत्तरे "तिलपिष्टमयं कृत्वा गजं हेमविभूषितम्। कक्षाद्युयुतं तद्दारोहणसमन्वितम्"। तदादिति अनन्तव्रतोक्तमत्र गजस्वरूपं स्मर्यते। "नवकमावायहितं चामरादीकधारिणम्। दर्शनाय-

वह्निनेत्रं रक्तवस्त्रयुगावृतम् । ताम्रपात्रं कुण्डके वा शतदन्ताग्रमोदकम् । प्रदद्यात् द्विजदम्पत्योः पूज्य माल्यविभूषणैः । कर्णाभरणकं दद्यात् वस्त्रञ्च मलवर्जितम् । कान्तारतारकं ह्येतत् कथितं हि युधिष्ठिर ! । कान्तारगिरिदुर्गेषु तारयत्यपि दुःखितान् । इह लोके परे चैतद्व्रतं कार्य्यं विचारणा । ये कुर्वन्ति दिने पुण्ये व्रतं पौरन्दराह्वयम् । तेषां पौरन्दरे लोके वासः स्यात् सुचिरं नृप !" दिने पुण्ये, पञ्चम्यां प्रकरणवशात् ।

प्रकृतिपुरुषद्वितीयाव्रतं विष्णुधर्मोत्तरे "पुरुषः प्रकृतिश्चोभौ जगत् सर्वं प्रकीर्त्तितम् । अग्नीषोमात्मकं सर्वं तथा तत्र प्रकीर्त्तितम् । वासुदेवश्च लक्ष्मीश्च तावेव परिकीर्त्तितौ । चैत्रशुक्लद्वितीयायां सोपवासो जितेन्द्रियः । पौरुषेण च सूक्तेन वह्निं संपूजयेन्नरः" । सोपवास इति प्रतिपदि कृतोपवासो द्वितीयायां वह्निं पूजयेदित्यर्थः उपरिष्टाच्च क्षीरघृतभोजनस्य विहितत्वात् "गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । लक्ष्मीञ्च वरदां देवीं पूजयेदुदकं हरिम् । श्रीसूक्तेन च धर्मज्ञ ! तथार्च्चन्नतुलोत्तमम्" । हरिसोमौ वह्निं जलकुम्भञ्च प्रतिष्ठाप्य पुरुषमग्निं वासुदेवञ्चैकोपरि पूजयेत्" इत्यादि ।

प्रजापतिव्रतं "अथ वटोर्व्रतम्" इत्युपक्रमे "नैतेतोद्यन्तमादित्यमित्यादिकमुक्तम्" ।

प्रतिपत्क्षीरपाणव्रतं भविष्यपु० "कार्त्तिक्यामथ सप्तम्यां वैशाख्यां वा युगादिषु । नियमोपवासं प्रथमं चाहयेत विधानवित्" । कार्त्तिके वैशाखे वा मासि प्रतिपत्तिथौ व्रतस्यारम्भः । युगादितिथिव्रतस्य माघवैशाखभाद्रपद कार्त्तिकेष्वन्यतमे आरम्भः "या तिथिनियमं कर्त्तुं शक्या समनुगच्छति । तस्यां तिथौ विधानं यत्तन्निबोध जनाधिप ! । नियमोपवासं प्रथमं चाहयेद्विधिवन्नरः । यदा वै प्रतिपद्यादौ व्रतह्नीयान्नियमं नृप ! । चतुर्द्दश्यां कृताहारः सङ्कल्पं परिकल्पयेत् । अमावास्यां न भुञ्जीत त्रिकालं स्नानमाचरेत् । पवित्राणि जपेन्नित्यं गायत्रीं शिरसा सह । अर्च्चयित्वा विधानेन गन्धमाल्यैर्हिजोत्तमान् । शक्त्या क्षीरं प्रदद्यात्तु अश्नाने प्रीयतां विभुः । ततो भुञ्जीत गोक्षीरमनेन विधिना नृप ! । एष एव विधिः प्रोक्तः सर्वासु तिथिषु नृप" ।

प्रतिमाव्रतं कालोत्तरे "अधुना तु प्रवक्ष्यामि प्रतिमाव्रतमुत्तमम् । महास्नानं महावर्त्तिदीपमाल्यान्वितं तथा । विलेपनं कुङ्कुमेन धूपं वै गुग्गुलेन तु । शतेनाष्टोत्तरेणैव नैवेद्यं पयसा घृतम् । तालमात्रा चतुर्विंशत् त्रिनेत्रा च चतुर्भुजा । शूलासियुगधनुश्शोभा नानाभरणभूषिता । शालिपिष्टमयी कार्य्या वृषपृष्ठे च शोभना । चामरैर्वीज्यमानन्तु शिवं तत्र प्रकल्पयेत् । दर्पणञ्चैव ताम्बूलं व्यजनं पादुकासनम् । वैजयन्तीध्वजं यानमाचार्य्याय प्रयत्नतः । मासि मासि प्रकर्त्तव्यं चतुर्द्दश्यां दिने दिने । कार्त्तिकन्तु समारभ्य यावदाश्वयुजावधि । एतद्व्रतोत्तमं नाम प्रतिमाव्रतमीरितम्" ।

प्रदोषव्रतं भविष्यपु० "त्रयोदश्यान्तथा रात्रौ सोपहारं त्रिलोचनम् । दृष्ट्वेशं प्रथमे यामे मुच्यते सर्व्वपातकैः" ।

प्रभाव्रतं पद्मपु० "पक्षोपवासी यो दद्याद्विप्राय कपिलाद्वयम् । ब्रह्मलोकमवाप्नोति देवासुरसुपूजितः । तदन्ते राजराजः स्यात् प्रभाव्रतमिदं स्मृतम्" ।

प्राजापत्यव्रतं पद्मपु० "कृच्छ्रान्ते गोयुगं दद्यात् भोजनं शक्तितः पदम् । विप्राणां शाङ्कर याति प्राजापत्यमिदं स्मृतम्" शाङ्करं पदं यातीत्यन्वयः । कृच्छ्रशब्दे द्रष्टव्यम् ।

प्राप्तिव्रतं पद्मपु० "वत्सरं त्वेकभक्ताशी सभक्ष्यफलकुम्भदः । शिवलोके वसेत्कल्पं प्राप्तिव्रतमिदं स्मृतम्" ।

फलव्रतं पद्मपु० "महाफलानि यस्त्यक्त्वा चतुर्मास्यां द्विजातये । हैमानि कार्त्तिके दद्यात् गोयुगेन समं नरः । सितवस्त्रयुगेनाथ सम्यग्जल्पघृतेन च । एतत् फलव्रतं नाम सर्व्वकामफलप्रदम्" ।

फलतृतीयाव्रतं पद्मपु० प्रभासख० "फलतृतीयां या नारी कुरुते तत्र भाविता । वर्षमेकं सिते पक्षे देवीं पूज्य विधानतः । फलानि ब्राह्मणे दद्यादभीष्टानि च यानि तु । फलानि वर्जयेत् नक्तमश्नाति सुरसुन्दरि ! । निष्पावानाढकीं मुद्गान् माषांश्चैव कुलत्थकान् । मसूरान् राजमाषांश्च गोधूमांस्त्रिपुटांस्तथा । चणकान् वर्त्तुलान् वापि मुकुटान् शक्तितोऽस्ति यः । नरो वा यदि वा नारी यावज्जीवं व्रतं चरेत् । तस्याः पुण्यफलं वक्ष्ये कथ्यमानं शृणुष्व मे । धनं धान्यं गृहे तस्य न कदाचित् क्षयं व्रजेत् । दुःखिता दुर्भगा दीना सदा जन्मनि नो भवेत् । कथानकञ्च श्रोतव्यं देव्याः साक्षात्समुद्भवम् । कृतपातकनाशाय सर्वकामसमृद्धये" ।

फलषष्ठीव्रतं भविष्योत्तरे "अन्यामपि प्रवक्ष्यामि फलषष्ठीं शुभां तथा । यामुपोष्य नरः पार्थ निःशङ्कः फलभाग्भवेत् । मार्गशीर्षे सिते पक्षे पञ्चम्यां नियमस्थितः

कृत्वा दन्तधावनं तु स्वपेद्रात्रौ जितेन्द्रियः । ततः प्रभाते विमले कारयित्वा तु काञ्चनम् । कमलञ्च फलान्येकं स्वशक्त्या शाठ्यवर्जितः । ततस्तु सङ्गमे स्नातो मध्याह्ने कृतनित्यकः । आगत्य भवनं देवं पूजयित्वा जगद्गुरुम् । कृत्वा तु कमलं पात्रे सफलं शर्करान्वितम् । षोडशारे स्वर्णमये वा यथाशक्त्या नरोत्तम ! । पूजयेत् पुष्पधूपाद्यैर्नैवेद्यैर्विविधैः फलैः” इत्यादि ।

फलसंक्रान्तिव्रतं स्कन्दपु० “अथान्यामपि ते वच्मि फलसंक्रान्तिमुत्तमाम् । संक्रान्तिवासरं प्राप्य स्नानं कृत्वा तु पूर्ववत् । संपूज्य पूर्ववद्भानुं पुष्पधूपादिना तथा । शकरासहितं पात्रं फलाष्टकसमन्वितम् । संक्रान्तिवासरं प्राप्य ब्राह्मणाय निवेदयेत् । तदन्ते तु रविं कुर्य्यात् सुवर्णेन च नारद ! । कुम्भस्योपरि संस्थाप्य गन्धपुष्पैः प्रपूजयेत् । फलाष्टकं ततो दद्याद् भक्ष्यभोज्यसमन्वितम्” ।

फलसप्तमीव्रतं भविष्यपु० “अथ भाद्रपदे मासि सिते पक्षे महीपते ! । कृत्वोपवासं सप्तम्यां विधिवत् पूजयेद्रविम् । माहेश्वरेण विधिना पूजयेदत्र भास्करम् । अष्टम्यां तु पुनः प्रातः पूजयित्वा दिवाकरम् । दद्यात् फलानि विप्रेभ्यो मार्त्तण्डः प्रीयतामिति । खर्ज्जूरं नारिकेलञ्च मातुलङ्गफलानि च । ब्राह्मणान् भोजयित्वा तु फलाहारः स्वयं भवेत् । पूर्वमेकन्तु सम्प्राश्य तदूर्द्ध्वं फलमादरात् । मन्त्रेण भरतश्रेष्ठ ! ततः शेषाणि भक्षयेत्” । पद्मपु० “अन्यामपि प्रवक्ष्यामि नाम्ना तु फलसप्तमीम् । यामुपोष्य नरः पापैर्विमुक्तः स्वर्गभाग्भवेत् । मार्गशीर्षे शुभे मासि पञ्चम्यां नियतव्रतः । षष्ठ्यामुपोष्य कमलं कारयित्वा तु काञ्चनम् । शर्करासंयुतं दद्यात् ब्राह्मणाय कुटुम्बिने । रूपन्तु काञ्चनं कृत्वा फलस्यैकस्य धर्मवित् । दद्याद्विकालवेलायां भानुर्मे प्रीयतामिति । भक्त्या तु विप्रान् संपूज्य सप्तम्यां क्षीरभोजनम् । कृत्वा कुर्य्यात् फलत्याग यावत् स्यात् कृष्णसप्तमी । तामुपोष्य विधिं कुर्य्यादनेनैव क्रमेण तु । तद्वद्धेमफलं दद्यात् सुवर्णकमलान्वितम् । शर्करापात्रसंयुक्तं वस्त्रमाल्याविभूषितम् । संवत्सरमनेनैव विधिनोभयसप्तमीम् । उपोष्य दद्यात् क्रमशः सूर्य्यमन्त्रमुदीरयेत्” इत्यादि ।

फाल्गुनव्रतं महाभारते “भगदैवन्तु यो मासमेकभक्तेन निःक्षिपेत् । ऐश्वर्य्यमतुलं श्रेष्ठं पुमान् स्त्री वा प्रपद्यते । स्त्रियो वल्लभतां यान्ति तस्याश्चैव भवन्ति ते” । विष्णुधर्मे “क्षपयेदेकभक्तेन शुक्लपक्षं च फाल्गुने” । शुचिः विष्णुपूजापरः “सौभाग्यं स्वजनानाञ्च सर्वेषामेव चोत्ततिः । अहिंसः सर्वभूतेषु वासुदेवपरायणः । नमोऽस्तु वासुदेवायेत्यष्टाष्टशतं जपेत् । व्रतान्तेषु यजस्व ततः फलमवाप्नुयात्” ।

वाणिज्यलाभव्रतं विष्णुधर्मोत्तरे “काम्यं कर्म समाचक्ष्व वाणिज्यं येन सिध्यति । कश्चित्तु वहुलाश्चैव कर्मणा केन वाप्नुते” । पुष्कर उवाच “मूलेनोपोषितः कुर्य्यादिदं कर्म पुरोहितः । उपोषितस्य धर्मज्ञ ! यजमानस्य नित्यशः । पात्राद्ये पूर्वाषाढासु प्राङ्मुखं स्नापयेन्नरम् । युग्मैर्वैतसमूलैश्च शङ्खमुक्ताफलैस्तथा । रत्नैश्च यथालाभं कनकेन तथैव च । अकालमलैः कलशैश्चतुर्भिर्भृगुनन्दन ! । कृत्वैतत् सिद्धिमाप्नोति वाणिज्ये नात्र संशयः । समुद्रयाने च तथा कर्षणे च न सीदति । नीलानि सप्त वासांसि दक्षिणा चात्र शस्यते । शङ्खं सुवर्णं रूप्यञ्च तथा मुक्ताफलानि च । हलं कलं द्विजेभ्यस्तु सर्वमेतद्विधीयते” ।

बुद्धद्वादशीव्रतं धरणीव्रते “एवमेव श्रावणे तु मासि संकल्प्य द्वादशीम् । अर्च्चयेत्परमेशानं गन्धपुष्पनिवेदनैः । बुद्धाय पादौ संपूज्य श्रीधरायेति वै कटिम्” । “एवमभ्यर्च्च्य मेधावी तस्याग्रे पूर्ववद्घटम् । स्थापयेत्तत्र सौवर्णं बुद्धं कृत्वा विचक्षणः” । बुद्धस्वरूपमुक्तं पुराणान्तरे “बुद्धस्तु द्विभुजः कार्य्यो ध्यानस्तिमितलोचनः” इति । “तमभ्यर्च्च्य तु संपूज्य ब्राह्मणाय निवेदयेत् । अनेन विधिना पूर्वं द्वादशी समुपोषिता । शुद्धोदनेन, बुद्धोऽभूत् स्वयं पुत्रो जनार्दनः । महतीञ्च श्रियं प्राप्तः पुत्रपौत्रसमन्वितः । भक्त्या राज्यश्रियं सोऽथ गतिं परमिकां गतः” ।

बुधव्रतं भविष्योत्तरे “विशाखासु बुधं प्राप्य सप्त नक्तानि चाचरेत् । बुधं हेममयं कृत्वा स्थापितं कांस्यभाजने । शुक्लमाल्याम्बरधरं शुक्लगन्धानुलेपनम् । गुडोदनोपहारन्तु ब्राह्मणाय निवेदयेत्” ।

बुधाष्टमीव्रतं भविष्योत्तरे “शृणु पाण्डव ! यत्नेन बुधाष्टम्यां विधिं शुभम् । यदा यदा सिताष्टम्यां बुधवारो भवेद्यदि । तदा तदैव सा कार्य्या एकभक्ताशनैर्नृभिः । स्नात्वा नद्यां तु पूर्वाह्णे गृहीत्वा करकं नवम् । जलपूर्णं सहेम नं कृत्वा खाद्यैः समन्वितम् । दद्याद्द्विजाय तं गत्वा गृहं चैव क्रमशस्तु । अष्टम्यष्टविधानेन विचित्रान्नैः पृथक् पृथक् । प्रथमा मोदकैर्भक्ष्यैः द्वितीया धानकैस्तथा । तृतीया घृतपूरैश्च चतुर्थी वटकैरपि ।

पञ्चमी शुष्कखर्जूरैः षष्ठी मोदकैः शुभैः । अशोकवर्त्तिभिः शुभ्रैः सप्तमी चातिवाहयेत् । अष्टमी च चितापूर्वैः सक्तवेष्टैर्युधिष्ठिर ! । एवं क्रमेण कर्त्तव्याः षड्ऋतुफलजलजैः । सहैकेन स्थितैर्भोज्यं भोक्तव्यं प्रीतिपूर्व्वकम् । उपाख्यानान्तमासाद्य भोजनं सहसा त्यजेत् । तावदेव हि भोक्तव्यं यावत् सा कथ्यते कथा । ततोभूत्वा बुधस्याग्रे आचम्य च समाहितः । विप्राय वेदविदुषे वाचकाय प्रदापयेत् । शाश्वतं सहिरण्यं च आरकूटमयं शुभम् । अर्च्चितं चर्च्चितं गन्धैः पुष्पैर्धूपैः सुगन्धिभिः । पीतवस्त्रैः समाच्छन्नं बुधं सोमात्मजं तथा । माषकेण सुवर्णस्य तदर्द्धेन वा कृतम्" इत्यादि ।

ब्रह्मव्रतं भविष्यपु० "ब्रह्माणञ्च द्वितीयायां संपूज्य ब्रह्मचारिणम् । भोजयित्वा तु विधिना सर्व्वासां पारगो भवेत् । मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः । पूर्व्ववत् सम्प्रयत्नतः कर्त्तव्यश्च तिथीश्वरः" । तिथीश्वरो ब्रह्मा ।

ब्रह्मकूर्च्चव्रतं ब्रह्माण्ड० "उपोषितश्चतुर्दश्यां पञ्चदश्यामनन्तरम् । पञ्चगव्यं समश्नीयाद्धविष्याशी त्वनन्तरम् । ब्रह्मकूर्च्चमिदं कुर्य्यादुक्तमयमनाय वै । पक्षान्ते त्वथ वा कार्य्यं मासमध्येऽथ वा पुनः । ब्रह्मकूर्च्चं नरः कुर्य्यात् पौर्णमासीषु यः सदा । तस्य पापं क्षयं याति दुर्भुक्तादि न संशयः । मासेन द्विजवरः कृत्वा ब्रह्मकूर्च्चं समाहितः । सर्व्वपापविनिर्मुक्तो यथेष्टाङ्गतिमाप्नुयात् । ब्रह्मभूतममावास्यां पौर्णमास्यां तथैव च । योगभूतं परिचरन् केशवं महदाप्नुयात्" ।

ब्राह्मण्यप्राप्तिव्रतं विष्णुधर्म्मोत्तरे "इदमन्यत् प्रवक्ष्यामि चतुर्म्मूर्त्तिव्रतं तव । भक्तानामपवर्गस्य साधकं यदूत्तम ! । चतुरात्मा विनिर्दिष्टो वासुदेवो जगत्पतिः । तेषान्तु रूपनिर्माणं कृत्वा तानर्च्चयेद् बुधः । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । आद्येऽह्नि चैत्रशुक्लस्य यजेत त्रिदशेश्वरम् । द्वितीयेऽह्नि यमं देवं तृतीये सलिलाधिपम् । चतुर्थेऽह्नि धनाध्यक्षं प्रत्यहं स्नानमाचरेत् । नदीप्रदेशमासाद्य देवदिक्प्रक्रमात् । यथेहितैस्तथाज्येन होमः स्यात् तिलतण्डुलैः । रक्तं पीतं तथा कृष्णं श्वेतं वस्त्रं दिनक्रमात् । शुभमेतद् व्रतं कृत्वा पूर्णं संवत्सरं नरः । नाकलोकमवाप्नोति यावदाभूतसंप्लवम्" ।

ब्रह्मव्रतं पद्मपु० "ब्रह्माण्डं काञ्चनं कृत्वा तिलराशिसमन्वितम् । त्र्यहं तिलप्रदो भूत्वा वह्निं सन्तर्प्य च द्विजान् । संपूज्य विप्रदम्पत्यं माल्यवस्त्रविभूषितम् । शक्तितस्त्रिपलादूर्द्ध्वं विश्वात्मा प्रीयतामिति । पुण्येऽह्नि दद्यात् स परं ब्रह्म यात्यपुनर्भवम् । एतद् ब्रह्मव्रतं नाम निर्वाणफलदं नृणाम्" ।

ब्रह्मसावित्रीव्रतं भविष्योत्तरे "श्रूयतां पाण्डवश्रेष्ठ ! सावित्रीव्रतमादरात् । कथयामि यथा चीर्णं तया सत्या युधिष्ठिर ! ।" इत्युपक्रमे "त्रयोदश्यां भाद्रपदे दन्तधावनपूर्व्वकम् । त्रिरात्रं नियमं कुर्य्यादुपवासस्य भक्तितः । अशक्ता च त्रयोदश्यां नक्तं कुर्य्याज्जितेन्द्रिया । अयाचितं चतुर्दश्यां पौर्णमास्यामुपोषणम् । नित्यं स्नात्वा महानद्यां तड़ागे निर्झरेऽपि वा । विशेषतः पूर्णमास्यां स्नानं सर्षपमृत्तिकैः । गृहीत्वा वालुकां पात्रे प्रस्थमात्रां युधिष्ठिर ! । अथ वा धान्यमादाय यवशालितिलादिकम् । ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टिते । सावित्रीप्रतिमां कृत्वा ब्रह्मणश्चैव शोभनम् । सौवर्णीं मृण्मयीं वापि स्वशक्त्या रौप्यनिर्मिताम् । रक्तवस्त्रयुगं दद्यात् सावित्र्या, ब्रह्मणः सितम् । सावित्रीं ब्रह्मणा सार्द्धमेवं भक्त्या प्रपूजयेत्" इत्यादि ।

ब्राह्मण्यावाप्तिव्रतं प्रभासख० "ज्यैष्ठ्यां पौर्णमास्यान्तु दम्पती यस्तु भोजयेत् । परिधाय यथा भक्त्या दौर्भाग्यैर्मुच्यते नरः । गन्धपुष्पोपहारैश्च पौर्णमास्यान्तु योऽर्च्चयेत् । ब्राह्मण्यं जायते तस्य सप्तजन्मनि सुन्दरि !" ।

भर्त्तृप्राप्तिव्रतं भविष्यपु० "वसन्ते शुक्लपक्षस्य द्वादशी या भवेच्छुभा । तस्यामुपोष्य विधिवत् सश्रीकं हरिमर्च्चयेत् । पर्य्यङ्कास्तरणं कृत्वा नानास्तरणसंयुतम् । तत्र लक्ष्म्या युतं देवं रौप्यं कृत्वा निवेदयेत् । तस्योपरि ततः पुष्पैर्मण्डपं कारयेद् बुधः । नृत्यवादित्रगीतैश्च जागरं तत्र कारयेत् । एवं कृत्वा प्रभाते तु दापयेद् ब्राह्मणाय तम् । वेदवेदाङ्गयुक्ताय संपूर्णाङ्गाय धीमते । ब्राह्मणांश्च तथा भोज्य व्रतमेतत् समाप्यते । व्रतस्यान्ते ततो विष्णुर्भर्त्ता वै भवति ध्रुवम्" ।

भद्रकालीव्रतं विष्णुधर्म्मोत्तरे "नवम्यां सोपवासस्तु भद्रकालीं प्रपूजयेत् । शुक्लपक्षे महाराज ! कार्त्तिकात् प्रभृति क्रमात् । गन्धमाल्यनमस्कारधूपदीपान्नसम्पदा । संवत्सरान्ते संपूज्य व्रतान्ते ब्राह्मणाय तु । वस्त्रयुग्मं नरो दत्त्वा यथेष्टं काममाप्नुयात् । विधिना पूजयेत् कन्यां भद्रकालीं नराधिप ! । नवम्यामाश्विने मासि शुक्लपक्षे

नरोत्तम !" । पुष्कर उवाच "पूर्वोत्तरे तु दिग्भागे विलेत् वास्तुमनोहरे । भद्रकालीं न्यसेत्तत्र चित्रवस्त्रैरलङ्कृताम् । भद्रकालीं पटे कृत्वा तत्र सम्पूजयेद् द्विज !"।

भद्रचतुष्टयव्रतं भविष्यपु० "शृणु राजन्नवहितो भद्राणां विस्तरं परम् । कथयिष्ये न कथितं यन्मया कस्यचित् पुरा । शुक्ला मार्गशिरस्यादौ चतस्रस्तिथयो वराः । द्वितीया च तृतीया च चतुर्थी पञ्चमी तथा । एकभक्ताशनस्तिष्ठेत् प्रतिपदि जितेन्द्रियः । प्रभाते तु द्वितीयायां कृत्वा यत् करणीयकम् । प्रहरे वै समधिके गते स्नानं समाचरेत् । मृण्मयं तु संग्रह्य मन्त्रैरेभिर्विचक्षणः" । "स्नात्वा चैव ततो नाम द्वितीयादौ चतुर्दिने । नमः कृष्णाच्युतानन्तहृषीकेशेति च क्रमात् । चतुर्दिने द्वितीयादिदेवमभ्यर्चयेद् व्रती । प्रथमेऽङ्कि स्मृता पूजा पादयोश्चक्रपाणिनः । नाभिपूजा द्वितीयेऽह्नि कर्त्तव्या विधिवन्नरैः । पुरद्विषस्तृतीयेऽह्नि पूजां वक्षसि विन्यसेत् । चतुर्थेऽह्नि जगद्धातुः पूजां शिरसि विन्यसेत्" इत्यादि ।

भद्रातृतीयाव्रतं पद्मपु० "कार्त्तिकादि तृतीयायां प्राश्य गोमूत्रयावकम् । नक्तञ्चरेदब्दमेकं तदन्ते गोप्रदो भवेत् । गौरीलोके वसेत् कल्पं ततो राजा भवेदिह । एतद्धि भद्राव्रतं नाम सर्वकल्याणकारकम्" ।

भद्रासप्तमीव्रतं भविष्यपु० "शुक्लपक्षे तु सप्तम्यां यदा हस्तः सवितुर्भवेत् । तदा प्राप्यमशेषेण सदा तां भद्रतां व्रजेत् । सवितृनक्षत्रं हस्ता । "चतुर्थ्यामेकभक्तन्तु पञ्चम्यां नक्तमादिशेत् । षष्ठ्यामयाचितं प्रोक्तं उपवासस्ततः परम्" । "अनेन विधिना यस्तु कुर्य्याद्वै भद्रसप्तमीम् । भद्रा ददाति सप्तम्यां भद्रं तस्य व्रतं भवेत् । तस्य भद्राः सर्व एव गच्छन्ति ज्ञातयः सदा । तदंशक्तः फलं तस्यां विधिना येन दीयते । व्योमभद्रमिति प्रोक्तं देवचिह्नं मनोरमम् । शालिपिष्टमयं प्रोक्तं चतुःकोणं मनोरमम् । गव्येन सर्पिषा युक्तं खण्डशर्करयान्वितम् । चतुर्जातकचूर्णेन द्राक्षाभिश्च विशेषतः" ।

भवानीतृतीयाव्रतं स्कन्दपु० "आलेपनञ्च यः कुर्य्यात् तृतीयायां शिवालये । समान्ते धेनुदो याति भवानीव्रतमित्युत" ।

भवानीव्रतं लिङ्गपु० "पौर्णमास्याममावस्यां वर्षमेकमतन्द्रिता । उपवासरता नारी नरो वा द्विजसत्तमाः ! । वर्षान्ते सर्वगन्धाढ्यां प्रतिमाञ्च निवेदयेत् । सा भवान्यास्तु सायुज्यं सारूप्यं वाथ सुव्रता । लभते नात्र सन्देहः सत्यं सत्यं मुनीश्वराः !"

भाद्रपदव्रतं महाभारते "प्रौष्ठपादन्तु यो मासमेकाहारो भवेन्नरः । धनाढ्यस्फीतमतुलमैश्वर्य्यं प्रतिपद्यते । राजसूयस्य यज्ञस्य फलं दशगुणं लभेत्" ।

भानुव्रतं पुष्पपु० "सप्तम्यां नक्तभुक् दद्यात् समान्ते गां सकाञ्चनाम् । सूर्य्यलोकमवाप्नोति भानुव्रतमिदं स्मृतम्" ।

भास्करव्रतं कालिकापु० "कृतोपवासः षष्ठ्यान्तु सप्तम्यां यस्तु मानवः । करोति विधितः श्राद्धं भास्करः प्रीयतामिति । सर्वरोगविनिर्मुक्तः स्वर्गलोकमवाप्नुयात्" ।

भीमद्वादशीव्रतं पद्मपु० "यद्यष्टम्यां चतुर्दश्यां द्वादशीष्वथ भारत ! । अन्येष्वपि दिनर्क्षेषु न शक्तस्त्वमुपोषितुम् । ततः पुण्यामिमां भैमीं सर्वपापप्रणाशनीम् । उपोष्य विधिमानेन गच्छ विष्णोः परं पदम् । माघमासस्य दशमी यदा शुक्ला भवेत्तदा । घृतेनाभ्यञ्जनं कृत्वा तिलैः स्नानं समाचरेत् । तथैव विष्णुमभ्यर्च्य नमो नारायणेति च" इत्यादि । "शृणु राजन् ! प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् । यामुपोष्य न दुःखानां भाजनं भजते जनः । माघमासे सिते पक्षे द्वादशी पावनी स्मृता । तस्यां जलार्द्रवसन उपोष्य सुखभाग् भवेत्" । "भीमाख्या द्वादशी चेति ख्यातख्यातिं नरा यतः । एषा पुलस्त्यमुनिना कथिता कुरुनन्दन ! । यश्चैनां कथितां यत्नात् कुर्य्याद्वा भक्तिभावतः । सर्वपापविनिर्मुक्तो विष्णुलोके महीयते । दरिद्रेणापि वा पार्थ ! वित्तशाठ्यं विवर्जयेत् । विष्णुभक्तेन कर्त्तव्या संसारभयभीरुणा । भीमेन या किल पुरा समुपोषितस्माद्राजन् गतवृस्थिरसुशीतलवारिधारा । तां द्वादशीं त्रिदशवेद्यसुखां चरेद् यः सम्यक् समाचरति याति स विष्णुलोकम्" ।

भीमव्रतं पद्मपु० "मासोपवासी यो दद्याद्धेनुं विप्राय शोभनाम् । स ईश्वरपदं याति भीमव्रतमिदं स्मृतम्" ।

भीष्मपञ्चकव्रतं नारदपु० "प्रवक्ष्यामि महापुण्यं व्रतं व्रतवतां वर ! । भीष्मेणैतद्यतः प्राप्तं व्रतं पञ्चदिनात्मकम् । सकाशाद्वासुदेवस्य तेनोक्तं भीष्मपञ्चकम् । व्रतस्यास्य गुणान्वक्तुं कः शक्तः केशवादृते । व्रतञ्चैतन्महापुण्यं महापातकनाशनम् । अतो नरैः प्रयत्नेन कर्त्तव्यं भीष्मपञ्चकम् । कार्त्तिकस्यामले पक्षे स्नात्वा सम्यग्यतव्रतः । एकादश्यान्तु गृह्णीयाद् व्रतं पञ्चदिनात्मकम् । प्रातः स्नात्वा विधानेन मध्याह्ने च तथा व्रती । नद्यां निर्झरगर्त्ते वा समादाय च गोमयम् । यवव्रीहितिलैः सम्यक्

पितॄन् सन्तर्पयेत् क्रमात्। स्नात्वा मौनं ततः कृत्वा धौतवासा दृढव्रतः”। इत्यादि “अर्च्चयित्वा हृषीकेशमेकादश्यां समाहितः। त्रिःप्राश्य गोमयं सम्यक् एकादश्यामुपावसेत्। गोमूत्रं मन्त्रवद्भूयो द्वादश्यां पूजयेद् व्रती। क्षीरञ्चैव त्रयोदश्यां चतुर्दश्यां तथा दधि। संप्राश्य कायशुद्ध्यर्थं लङ्घनीयञ्चतुर्द्दिनम्”। प्राशनं, होममन्त्रेण। “पञ्चमे तु दिने स्नात्वा विधिवत् पूज्य केशवम्। भोजयेद् ब्राह्मणान् भक्त्या तेभ्यो दद्याच्च दक्षिणाम्। तथोपदेष्टारमपि पूजयेद् वस्त्रभूषणैः। ततो नक्तं समश्नीयात् पञ्चगव्यपुरःसरम्। एवं सम्यक् समाप्यं स्यात् यथोक्तं व्रतमुत्तमम्। सर्व्वपापहरं पुण्यं प्रख्यातं भीष्मपञ्चकम्। जन्मप्रभृति यन्मांसं त्यक्त्वा पुण्यमवाप्नुयात्। तत्फलं समवाप्नोति संत्यज्य भीष्मपञ्चके। मद्यपो यः पिबेन्मद्यं जन्मतोमरणान्तिकम्। तद्भीष्मपञ्चके त्यक्त्वा समाप्नोत्यधिकं फलम्”।

भूभाजनव्रतं पद्मपु० “संवत्सरन्तु यो भुङ्क्ते नित्यमेव ह्यतन्द्रितः। निवेद्य पितृदेवेभ्यः पृथिव्यामेकराज्भवेत्” यो भुङ्क्ते पृथिव्यामित्यन्वयः।

भूमिव्रतं कालोत्तरे “शुक्लपक्षे चतुर्दश्यां यदा तिथ्यार्कसङ्गमः। पूजयेत् पूर्व्वविधिना उपवासेन शूलिनम्”। पूर्व्वविधिना विल्वव्रतोक्तेनेत्यर्थः। “कुङ्कुमेनाङ्गरागन्तु गन्धपुष्पैः प्रपूजयेत्। पायसं घृतसंयुक्तं कुर्य्यात् प्रस्थप्रमाणतः। भूमिदानं प्रकर्त्तव्यं शिवभक्ताय यत्नतः। अनेन व्रतमुख्येन पृथ्वीपालत्वमाप्नुयात्। एतद्भूमिव्रतं नाम पृथ्वीपालस्तु कारयेत्”।

भोगसंक्रान्तिव्रतं स्कान्दपु० “वक्ष्येऽहं भोगसंक्रान्तिं सर्व्वलोकविवर्द्धनीम्। संक्रान्तिवासरं प्राप्य योषितस्तु समाह्वयेत्। कुङ्कुमं कज्जलञ्चैव सिन्दूरं कुसुमानि च। सुगन्धीनि च सर्व्वाणि ताम्बूलं शशिसंयुतम्”। शशिसंयुतं कर्पूरसंयुतम् “तण्डुलान् फलसंयुक्तान् प्रदद्याच्च विचक्षणः। अन्यान्यपि हि वस्तूनि भोगसाधनकानि च। दद्यात् प्रहृष्टमनसा मिथुनेभ्यः प्रयत्नतः। भोजयित्वा यथा शक्त्या वस्त्रयुग्मं प्रदापयेत्। एवं संवत्सरस्यान्ते हविः सम्पाद्य पूर्व्ववत्। स्वर्णपट्टीं रौप्यपरां सर्व्वोपस्करसंयुताम्। धेनुं च दक्षिणां दद्यात् सपत्नीकद्विजातये। एवं यः कुरुते भक्त्या भोगसंक्रान्तिमादरात्। स्यात् सुखी सर्व्वभर्त्त्येषु भोगी जन्मनि जन्मनि”।

भोगावाप्तिव्रतं विष्णुधर्म्मोत्तरे “ज्यैष्ठ्यान्तु समतीतायां प्रतिपत्प्रभृतिक्रमात्। पूर्व्ववत् पूजयेद्देवं विश्वरूपधरं हरिम्”। अत्रापि पूर्व्ववदिति रूपावाप्तिव्रतवदित्यर्थः। ‘कृत्वा व्रतान्ते च तथा त्रिरात्रं दत्त्वा सुयुक्तं शयनं द्विजाय। स्वर्लोकमासाद्य चिरं नरेन्द्र! मानुष्यमासाद्य च भोगवान् स्यात्”।

भौमवारव्रतं स्कान्दपु० “भौमोऽयमीश्वरः पुत्रः पृथिव्यां जनितो महान्। रूपेणैव सदा रम्यो वरदानादिशोभनाम्। अस्यैव दिवसे प्राप्ते ताम्रपात्रं सुशोभनम्। परिपूर्णं गुडेनैव वर्षमेकं प्रदापयेत्”।

भौमव्रतं भविष्योत्तरे “स्वात्यामङ्गारकं दृष्ट्वा क्षपयेन्नक्तभोजनः। सप्तमे त्वथ संप्राप्ते स्थापितं ताम्रभाजने। हैमं रक्ताम्बरच्छन्नं कुङ्कुमेनानुलेपनम्। नैवेद्यं शुभ्रकसारं पूज्य पुष्पाक्षतादिभिः। मन्त्रेणानेन तं दद्यात् ब्राह्मणाय कुटुम्बिने”। पद्मपु० “ग्रहाणामधिपं भौमं पूजयेद्भौमवासरे। मङ्गलो भूमिपुत्त्रश्च ऋणहर्त्ता धनप्रदः। स्थिरासनो महाकायः सर्व्वकामार्थसाधकः। लोहितो लोहिताक्षश्च सामगानां कृपाकरः। धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः। अङ्गारको यमश्चैव सर्व्वरोगापहारकः। सृष्टिकर्त्ता प्रहर्त्ता च सर्व्वकामफलप्रदः। एतानि कुजनामानि प्रातरुत्थाय यः पठेत्। ऋणं न जायते तस्य धनं प्राप्नोत्यसंशयम्। त्रिकोणञ्च सदा कार्य्यं मध्ये छिद्रं प्रकल्पयेत्। कुङ्कुमेन सदा लेख्यं रक्तचन्दनकेन च। कोणे कोणे प्रकल्प्यानि त्रीणि नामानि भूमिप!। आरं वक्रं भूमिजञ्च रक्तगन्धैश्च पूजयेत्”।

मङ्गलाव्रतं देवीपु० “आश्विने चाथ माघे वा चैत्रे वा श्रावणेऽपि च। कृष्णादारभ्य कर्त्तव्यं व्रतं शुक्लावधिं चरेत्”। शुक्लावधिं शुक्लपक्षावधिम्। एतच्चोक्तमासेष्वेव वक्ष्यमाणप्रकारेण कृष्णाष्टम्यामारभ्य शुक्लाष्टमीं यावत् कर्त्तव्यम् “अष्टमीमाश्विनीं कृष्णामेकभक्तेन कारयेत्। मङ्गलारूपिणीं देवीमथ वा रुरुघातिनीम्। पूजयेन्नवभेदेन गन्धमाल्यनिवेदनैः। नवभेदेन नवकृत्वो गन्धचर्व्वणेन। “कन्यका भोजयेद् वत्स! देवीभक्त्या च मानवान्। अथ वा नवरात्रञ्च सप्तपञ्चत्रिकं हि वा। एकभक्तेन नक्तेनायाचितोपोषितैः क्रमात्”। नवरात्रमेकभक्तेन सप्त नक्तेन पञ्चायाचितेन त्रिरुपवासेनेति क्रमः। अष्टमीमन्ते कृत्वा नवादिगणन पूर्व-

त्रासमर्थस्तते पश्चात् ''चापयेताश्विने यज्ञ ! यावत्कृष्णा तु अष्टमी । पूजयेन्मङ्गलां तत्र मण्डले विधिवत्कृते । सर्वसम्भारसम्पन्ने सर्वसिद्धिविधायके । सर्वकामानवाप्नुयात्'' इत्यादि ।

मङ्गल्यसप्तमीव्रतं गरुड़पु० ''मङ्गल्यं परमिच्छन्ती मङ्गलायतनं हरिम् । अर्चयेद्विनता देवं सप्तम्यां समुपोषिता । माङ्गल्यं परमिच्छन्ती व्रतेनानेन चाप्नुयात् । पुमानपि यशः कीर्त्तिं बलमायुश्च विन्दति'' ।

मत्स्यद्वादशीव्रतं धरणीव्रते ''मार्गस्य शुक्लपक्षे तु दशम्यां नियतात्मवान् । स्नात्वा देवार्चनं कृत्वा अग्निकार्य्यं यथाविधि । शुचिवासाः प्रसन्नात्मा हव्यं चान्न सुसंस्कृतम् । भुक्त्वा पञ्चपदं गत्वा पुनः शौचं तु पादयोः । कृत्वाऽष्टाङ्गुलमानन्तु क्षीरवृक्षसमुद्भवम् । भक्षयेद्दन्तकाष्ठं तु तत्र चाचम्य यत्नतः । स्पृष्ट्वा खानि तथाद्भिश्च चिरं ध्यात्वा जनार्द्दनम्'' । खानीन्द्रियाणि ''शङ्खचक्रगदापाणिं पीतवस्त्रं किरीटिनम् । प्रसन्नवदनं देवं सर्वलक्षणलक्षितम् । ध्यात्वा जलं गृहीत्वा तु भानुरूपं जनार्द्दनम् । दद्यार्घ्यं दापयेत् पश्चात् करतोयेन मानवः । एवमुच्चारयेद्वाचं तस्मिन् काले महामुने ! । एकादश्यां निराहारो भूत्वाहमपरेऽहनि । भोक्ष्यामि पुण्डरीकाक्ष ! शरणं मे भवाच्युत ! । तेषां मध्ये शुभं पीठं स्थापयेद्वस्त्रसंयुतम् । तस्मिंश्च रौप्यं सौवर्णं ताम्रं वा दारवं तथा । अलाभतस्तोयपूर्णं कृत्वा पात्रं ततो न्यसेत्'' । अलाभतः सौवर्णादीनामलाभे दारवमपि कार्य्यमित्यर्थः ''सौवर्णं मत्स्यरूपेण कृत्वा देवं जनार्द्दनम् । वेदवेदाङ्गसंयुक्तं श्रुतिस्मृतिविभूषणम्'' । तोयपूर्णं पात्रं कृत्वा तत्र मत्स्यरूपं जनार्द्दनं न्यसेदित्यन्वयः ''तत्रानेकविधैर्भक्ष्यैः फलैः पुष्पैश्च शोभितम् । गन्धैरन्नैश्च धूपैश्च अर्चयित्वा यथाविधि । रसातलगता वेदा यथा देव त्वयाऽऽहृताः । मत्स्यरूपेण तद्वन्मां भवानुद्धर केशव ! । एवमुच्चार्य्य तस्याग्रे जागरं तत्र कारयेत् । यथाविभवसारेण प्रभाते विमले तथा । चतुर्णां ब्राह्मणानां च चतुरो दापयेत् घटान्'' ।

मदनद्वादशीव्रतं मत्स्यपु० ''चैत्रे मासि सिते पक्षे द्वादश्यां नियतव्रतः । स्थापयेदव्रणं कुम्भं सिततण्डुलपूरितम् । नानाफलयुतं तद्वदिक्षुदण्डसमन्वितम् । सितवस्त्रयुगच्छन्नं सितचन्दनचर्चितम् । नानाभक्ष्यसमोपेतं सहिरण्यं स्वशक्तितः । ताम्रपात्रं गुड़ोपेतं तस्योपरि निवेशयेत् । तदभावे कुथां कुर्य्यात् कामकेशवयोर्नरः । कामनाम्ना हरेरर्च्चां स्नापयेद् गन्धवारिणा । शुक्लपुष्पाक्षततिलैरर्चयेदिति केशवम् । अनेन विधिना सर्वं मासि मासि समाचरेत् । उपवासी त्रयोदश्यामर्चयेद् विष्णुमव्ययम् । फलमेकञ्च सम्प्राश्य द्वादश्यां भूतले स्वपेत् । ततस्त्रयोदशे मासि घृतधेनुसमन्विताम् । शय्यां दद्याद् द्विजेन्द्राय सर्वोपस्करसंयुताम् । काञ्चनं कामदेवं च शुक्लां गाञ्च पयस्विनीम् । वासोभिर्द्विजदाम्पत्यं पूज्य शक्त्या विभूषणैः । सर्वं गन्धादिकं दद्यात् प्रीयतामित्युदीरयेत्'' ।

मधुकतृतीयाव्रतं भविष्योत्तरे ''फाल्गुनस्य सिते पक्षे तृतीयायामुपोषिता । स्नाता स्थिता ब्रह्मचर्य्ये ततोऽन्यस्मिन् दिने पुनः । व्रजेन्मधुवनं, गौरीं पूजयेत् मधुमानसा । मन्त्रेणानेन ध्यायन्ती पार्वतीप्रतिमां शुभाम् । मृगाजिनावृतकुचां जटामुकुटशोभिताम् । गोधारथगतां देवीं रुद्रध्यानपरायणाम् । पूजयेत् गन्धकुसुमैर्दीपालक्तकचन्दनैः । पर्य्यङ्कलम्बमुखराशिकुलोपगीतं दत्त्वा फलाक्षतयुतं मधुपादपस्य । गौरीव कामसदृशा भवतीह नारी'' इत्यादि ।

मनोरथद्वादशीव्रतं पद्मपु० ''फाल्गुनामलपक्षस्य एकादश्यामुपोषितः । नरो वा यदि वा नारी समभ्यर्च्य जगत्पतिम् । हरेर्नाम जपन् भक्त्या सप्त वारान् जनेश्वर ! । उत्तिष्ठन् प्रस्वपंश्चैव हरिमेवाशु कीर्त्तयेत् । ततः प्रभाते विमले द्वादश्यां नियता हरिम् । स्नात्वा सम्यक् समभ्यर्च्य दत्त्वा विप्राय दक्षिणाम् । हरिमुद्दिश्य चैवाग्नौ घृतहोमं समाचरेत् । फाल्गुनश्चैत्रवैशाखौ ज्यैष्ठमासश्च पार्थिव ! । चतुर्भिः पारणं मासैरेभिर्निष्पादितं भवेत् । रक्तपुष्पैश्च चतुरो मासान् कुर्वीत चार्चनम् । जातीपुष्पाणि धूपश्च शस्तः सर्जरसेन तु । प्राश्य दर्भोदकं चात्र शाल्यन्नं च निवेदयेत् । स्वयमेव तदश्नीयाच्चैवं पूर्ववदाचरेत् । कार्त्तिकादिषु मासेषु गोमूत्रं कायशोधनम् । सुगन्धं स्वेच्छया धूपं पूजां भृङ्गारकेण च'' । भृङ्गारको माकन्दः ''कृसरं चात्र नैवेद्यं भुञ्जीयात्तच्च वै स्वयम् । प्रतिमासञ्च विप्राय दातव्या दक्षिणा तथा । प्रीणनं देवदेवस्य पारणे पारणे गते'' वर्षसाध्यमिदम् ।

मनोरथपूर्णिमाव्रतं विष्णुधर्मोत्तरे ''कार्त्तिक्यान्तु तथारभ्य संपूर्णं शशलक्षणम् । पूजयेदुदये राजन् ! सदा नक्ता-

ग्नो भवेत् । चावधं मण्डलं कृत्वा चन्दनेनानुलेपितम् । द्विदिग्गनक्षत्रसहितं ततः सोमन्तु पूजयेत्" । तथा चैव्यवचनकृतम् "कृत्तिकारोहिणीयुक्तं कार्त्तिके मासि पूजयेत् । सौम्याद्रीसहितं राजन् ! मासि सौम्ये तथैव च । आदित्यपुष्यसहितं मासि पौषे च यादव ! । मघाश्लेषयुतं माघे फाल्गुने शृणु पार्थिव ! । आर्य्यम्णेनाऽथ सावित्रैः सहितं पूजयेद्विभुम् । चित्रास्वातियुतश्चैत्रे वैशाखे शृणु पार्थिव ! । विशाखया च मैत्रेण युतं संपूजयेत्तथा । ज्येष्ठामूलयुतं ज्यैष्ठे आषाढे सविश्वोत्तरे । श्रावणे श्रवणोपेतं वारुणेन श्रविष्ठया । तथा भाद्रपदे पौष्णा शत्राहिबुध्नसंयुतम् । अश्विनी भरणीयुक्तं तथाचाश्वयुजे विभुम्" इत्यादि ।

मनोरथसंक्रान्तिव्रतं स्कन्दपु० "अतः परं प्रवक्ष्यामि संक्रान्तिष मनोरथान् । गुडेन पूर्णकुम्भञ्च वस्त्रञ्च स-र्वाङ्गतः । संक्रान्तिवासरे दद्याद्ब्राह्मणाय कुटुम्बिने । एवं संवत्सरे पूर्णे सम्यक्प्रोद्यापनं शुभम् । गुडेन पर्वतं कार्य्यं वस्त्रैश्चैव भूषितम् । अयने चोत्तरे दद्याद्वित्तशाठ्यं न कारयेत् । यं यं प्रार्थयते कामं तं तं प्राप्नोति पुष्कलम् । सर्वपापविनिर्मुक्तः सूर्य्यलोके महीयते" ।

मन्दारषष्ठीव्रतं भविष्योत्तरे "शृणु पार्थ ! प्रवक्ष्यामि सर्वपापप्रणाशिनीम् । सर्वकामप्रदां पुण्यां षष्ठीं मन्दारसंज्ञिताम् । माघस्यामलपक्षे तु पञ्चम्यां लघुभुक् नरः । दन्तकाष्ठं ततः कृत्वा षष्ठीमुपवसेद्बुधः ।" — सर्वभोगविहीनस्तु षष्ठीमुपवसेन्नरः । प्राप्याहुर्वा द्विजश्रेष्ठान् मन्दारं प्राशयेन्निशि" इत्यादि ।

मन्दारसप्तमीव्रतं पद्मपु० "अथातः सम्प्रवक्ष्यामि सर्वपापप्रणाशिनीम् । सर्वकामप्रदां पुण्यां नाम्ना मन्दारसप्तमीम् । माघस्यामलपक्षे तु पञ्चम्यां लघुभुक् नरः । दन्तकाष्ठं ततः कृत्वा षष्ठीमुपवसेद्बुधः । विप्रान् सम्यग् भोजयित्वा तु मन्दारं प्राशयेन्निशि । ततः प्रभाते उत्थाय कुर्य्यात् स्नानं पुनर्द्विजान् । भोजयेच्छक्तितः कृत्वा मन्दारकुसुमाष्टकम्" । मन्दारोराजार्कः "सौवर्णं पुरतस्तद्वत् पद्महस्तं शुभोज्ज्वलम् । पद्मं कृष्णतिलैः कृत्वा ताम्रपात्रेऽष्टपत्रकम् । हैमं मन्दारकुसुमं स्थाप्य मध्ये च पूजयेत्" इत्यादि वर्षभाष्यम् ।

मरीचसप्तमीव्रतं भविष्यपु० "तथा संपूज्य देवेशं मातुः सम्प्रदं नृप । । भोजयित्वा यथाशक्ति ब्राह्मणांश्च विशेषतः । सप्तम्यां प्राशयेच्चापि मरीचं मनुजाधिप । गृहीत्वा मरीचशतमव्रणं सुदृढं परम् । मरीचं प्राशयेद्राजन् मन्त्रेणानेन वा स्मरन्" इत्यादि ।

मरुत्सप्तमीव्रतं विष्णुधर्मोत्तरे "चैत्रस्य शुक्लपक्षे तु सम्यक् षष्ठ्यामुपोषितः । सप्तम्यामर्चनं कुर्य्यान्मरुतां तत्र तत्र च । तत्र त्वेकोनगतं सप्तमण्डलं नृप ! कारयेत् । षष्ठी तथा कार्य्यसमा सप्तमण्डलकान्विता" । इत्यादि वर्षभाष्यम्

मल्लद्वादशीव्रतं भविष्योत्तरे "मल्लैर्विशेषतः कार्य्यास्तथान्यैरपि भक्तितः । पूजयन्ति क्रमेणैव मासि मासि तनूधन । मार्गशीर्षादिभिः पार्थ ! पूजयेन्मासनामभिः । पारणे पारणे दद्यान्मल्लिकानि द्विजातये । गन्धैः पुष्पैस्तथा दीपैर्गीतवाद्यैर्मनोहरैः । मल्लयुद्धैश्च विविधैर्जागरं कारयेन्निशि । घृतदानैः क्षीरदानैर्दधिदानैः पृथक् पृथक् । सर्वत्र देवदेवेशः कृष्णो मे प्रीयतामिति । एवमेव विधिः प्रोक्तो मन्त्रदानसमन्वितः । द्वादशीयं मयाद्यापि क्रियते वत्सवृद्धये । मल्लानां जयदा यस्मान्मल्लद्वादशिसंज्ञिता । तस्मान्मल्लैः प्रकर्त्तव्या मल्लयुद्धजयार्थिभिः । अन्येषामपि कौन्तेय ! सर्वार्थजयदायिनी । इमां चीर्त्वा पापसङ्घैर्मुच्यते नात्र संशयः । भक्तोरपादपतले मिलितैर्महद्भिर्मल्लैरनाकुलबाहुबलं नियुक्तैः । सम्पूजितः सपदि यत्र तिथौ तत्र सा द्वादशी भुवि मता वरमल्लसंज्ञा" ।

महाजयासप्तमीव्रतं भविष्यपु० "शुक्लपक्षे तु सप्तम्यां यदा संक्रमते रविः । महाजया तदा स्याद्वै सप्तमी भास्करप्रिया । स्नानं दानं जपो होमः पितृदेवाभिपूजनम् । सर्वं कोटिगुणं प्रोक्तं तपनेन महौजसा । यस्तस्यां मानवो भक्त्या घृतेन स्नापयेद्रविम् । सोऽश्वमेधफलं प्राप्य ततः सूर्य्यपदं व्रजेत्" ।

महातपोव्रतं महाभारते "मासि मासि त्रिरात्राणि कृत्वा तु नियतेन्द्रियः । गणाधिपत्यं प्राप्नोति निःसपत्नमनाविलम् । यस्तु संवत्सरं पूर्णमेकाहारो भवेन्नरः । अतिरात्रस्य यज्ञस्य स वै फलमुपाश्नुते । दशवर्षसहस्राणि स्वर्गलोके महीयते । तद्व्ययादिह चागत्य माहात्म्यं प्रतिपद्यते । यस्तु संवत्सरं पूर्णं चतुर्थं भक्तमश्नुते । अहिंसानिरतो नित्यं सत्यवाग्विजितेन्द्रियः । वाजपेयस्य यज्ञस्य स फलं समुपाश्नुते । त्रिंशद्वर्षसहस्राणि वर्षाणां दिवि मोदते । अष्टमेन तु भक्तेन जीवेत् संवत्-

सरं नरः । गवां मेधस्य यज्ञस्य फलं प्राप्नोति मानवः । हंससारसयुक्तेन विमानेन स गच्छति । पञ्चाशत्तु सहस्राणि वर्षाणि दिवि मोदते । पक्षे पक्षे गते राजन् ! योऽश्नीयाद्दर्शमेव तु । षण्मासानशनं तस्य भगवानङ्गिराब्रवीत् । षष्टिवर्षसहस्राणि दिवमावसते स च । अश्नीयाद्यं द्वितीये पक्षे यस्तु सर्वदिनेष्विति । वीणानां वल्लकीनाञ्च वेणूनाञ्च विशाम्पते !। सुघोषैर्मधुरैः शब्दैः स सुप्तः प्रतिबुध्यते । संवत्सरमिहैकन्तु मासि मासि पिबेत् पयः । फलं विश्वजितस्तात ! प्राप्नोति स नरोत्तमः । सिंहव्याघ्रप्रयुक्तेन विमानेन स गच्छति । शतश्चाष्टौ सुरकन्या रमयन्ति च तन्नरम् । सप्ततिञ्च सहस्राणि वर्षाणां दिवि मोदते । मासादूर्द्ध्वं नरव्याघ्र ! नोपवासो विधीयते" ।

महाफलद्वादशीव्रतं विष्णुरहस्ये "पौषे कृष्णे विशाखासुयुक्ता चैकादशी भवेत् । तस्यां संपूजयेद्विष्णुमुपोष्य विमत्सरः । सुगन्धपुष्पनैवेद्यैर्वस्त्रभूषणसम्भवैः । मासानुमासम्पूजयेत् विधिना जगतीपतिम् । प्राशनञ्चाय शुद्ध्यर्थं कार्य्यं मासक्रमेण तु । गोमूत्रमुदकं सर्पिः शाकञ्च कामतः परम् । ततो दूर्वादधिव्रीहितिलांश्चैव यवांस्तथा । जलमर्ककरैस्तप्तं दर्भांश्च क्षीरमेव च । द्वादश्यां भोजयेद्विप्रान् दधिक्षीरगुडौदनैः । मासक्रमेण विप्रेभ्यो दद्यात् सम्यक्कृते व्रते । हैमं तिलव्रीहियवसुवर्णसंयुतं घटम् । मोदकैश्च युतं कुम्भमात्रपक्वन्तु पायसम् । फाल्गुनं चन्दनं मासाः [illegible] दक्षिणाः । व्रतमेतन्महापुण्यं दृष्टादृष्टफलप्रदम् । कर्त्तव्यं धर्मनिरतैर्विष्णुपूजनतत्परैः । व्रतमेतन्नरः कृत्वा विप्राणां प्रवरे कुले । सुजन्मा जायते धीमान् वेदवेदाङ्गपारगः" ।

महाफलव्रतं भविष्यपु० "शृणु कौरव ! कर्माणि तिथिषूक्ताश्रितानि तु । श्रुत्वैव पापहानिः स्यात् कृत्वानन्तं फलं लभेत । क्षीराशनः प्रतिपदि । पुष्पाहारो द्वितीयायाम् । लवणवर्जितं तृतीयायाम् । तिलाशी चतुर्थ्याम् । क्षीराशनः पञ्चम्याम् । फलाशनः षष्ठ्याम् । शाकाशनः सप्तम्याम् । बिल्वाहारोऽष्टम्याम् । पिष्टाशनो नवम्याम् । अनग्निपक्वाहारो दशम्याम् । एकादश्यामुपवासः । घृताशनो द्वादश्याम् । पायसाहारस्त्रयोदश्याम् । यावकाहारश्चतुर्दश्याम् । गोमूत्राहारः कुशोदकप्राशनः पौर्णमास्याम् सर्व मासनामधिः ।

फलानि प्राशनान्येवं विधिपूर्वमुदाहृतम् । क्षीरं प्रतिपदायान्तु सर्वासु च विधीयते" ।

महत्तमव्रतं स्कन्दपु० "वैदिकेन विधानेन व्रतं पुण्यं महत्तमम् । कस्मिंस्तिथौ तु कर्त्तव्यं विधानं तद्वदस्व मे" । स्कन्द उवाच "मासि मासि भाद्रपदे शुक्ले च प्रतिपत्तिथौ । नैवेद्यन्तु पचेन्मौनी षोड़शत्रिगुणानि च । फलानि पिष्टपक्वानि दद्याद्विप्राय षोड़श । देवाय षोड़शैतानि दातव्यानि प्रयत्नतः । भुञ्जते षोड़श तथा व्रतस्य नियमाश्रयात् । सौवर्णं कारयेद्देवं यथा शक्त्या हिरण्मयम्" इत्यादि ।

महाराजव्रतं स्कन्दपु० "यदागस्त्य ! चतुर्दश्यामाद्री भाद्रपदाय वा । सितायामसितायां वा न विशेषो यथागपि । तदा लब्धैकभूर्भूत्वा त्रयोदश्यां यथाविधि । सर्वव्रतं महाराजं तदा संकल्पयेन्नरः । चतुर्दश्यां ततः कुर्य्यात्तिलगोमूत्रगोमयैः । स्नात्वाथ गन्धगव्येन स्नानं शुद्धात्मना ततः । शिवसंकल्पमन्त्रस्य ततो दशशतं पठेत्" । शिवसंकल्पमन्त्रो यज्जाग्रतो दूरमित्यादिर्यजुःशाखाप्रसिद्धः "पञ्चाक्षरस्तु शूद्रस्य जन्मकोटिकृतैस्ततः । मुच्यते पातकैः सर्वैस्तत्कृत्वा नात्र संशयः" ।

महालक्ष्मीव्रतं स्कन्दपु० "महाराज ! निबोधेदं महालक्ष्मीव्रतं शुभम् । भद्र ! भाद्रपदे मासि शुक्लाष्टम्यां नरोत्तम !। तुलाख्यं महालक्ष्मीमेकभक्तं प्रकल्प्य च । कुङ्कुमाक्तं सूत्रं षोड़शग्रन्थिसंयुतम् । तन्तुभिस्तत्प्रमाणैश्च दक्षिणे करे दृढम् । दूर्वाक्षतदलाङ्कानि षोड़शैव तु षोड़श । पुनरेवाश्विने मासि कृष्णाष्टम्यां दिने शुभे । उत्सवं कारयेद्व्यासस्योपवसतादितम्" ।

महाव्रतं कालिकापु० "महाव्रतमयो रक्षो येनारोहति तत् पदम् । सुरासुरमुनीनाञ्च दुर्लभं विधिना शृणु । सर्वस्याश्वयुजस्यान्ते पायसञ्च घृतप्लुतम् । नक्तं भुञ्जीत शुद्धात्मा चन्दनञ्चैव चाभ्यितम्" । आश्वयुजस्यान्ते कार्त्तिके । पर्वणि अमावस्यायां कार्त्तिकान्त इत्यर्थः । ऐक्षव इक्षुरसः । लिङ्गपु० "अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि । वर्षमेकं ततो भुक्त्वा नक्तं यः पूजयेच्छिवम् । सर्वयज्ञफलं प्राप्य स याति परमाङ्गतिम्" । विष्णुधर्मोत्तरे "सोमभूतं हरिं देवं चातुर्मास्यमुपोषितम् । अर्चयेत् पौर्णमास्यान्तु सोऽश्वमेधफलं लभेत्" । योगभूतं सकलम् "ब्रह्मभूतममावास्यां पूजयेत्तामुपोषितः । राजसूयमवाप्नोति कुलमुद्धरति स्वकम्" ।

ब्रह्मभूतं निरञ्जनम् "ब्रह्मभूतममावास्यां पौर्णमास्यां तथैव च । योगभूतं परिचरन् केशवं महदाप्नुयात् । अक्षय्यं प्रीतिमाप्नोति मासपक्षांस्तयोः सदा । पूजितः सोपवासेन भक्त्या देववरो हरिः । महाव्रतमिदं ख्यातं सर्व्वकल्मषनाशनम् । संवत्सरमिदं कृत्वा नाकपृष्ठे महीयते" इत्यादि ।

रथाङ्गसप्तमीव्रतं भविष्यपु० "माघस्य शुक्लपक्षे तु पञ्चम्यां कुरुनन्दन ! । एकभक्तं समाख्यातं षष्ठ्यां नक्तमुदाहृतम् । सप्तम्यामुपवासन्तु केचिदिच्छन्ति सुव्रत ! । षष्ठ्यां केचिदुपन्नीह सप्तम्यां पारणं किल । कृतोपवासः षष्ठ्यान्तु पूजयेद्भास्करं बुधः । रक्तचन्दनमिश्रैस्तु करवीरैः समाहितैः । गुग्गुलेन महाबाहो ! तथान्नेन च सुव्रत ! । पूजयेद्देवदेवेशं ग्रहेशं भास्करं रविम्" । भास्करं सुव्रतमित्यर्थः "एवं हि चतुरो मासान् माघादीन् पूजयेद्रविम् । प्राशनञ्चापि शुद्ध्यर्थं प्रोक्तं गोमयस्य च । स्नानञ्च गोमयेनेह कर्त्तव्यमात्मशुद्धये । ब्राह्मणान् दिव्यभोगांश्च भोजयेच्चापि शक्तितः" । दिवि देवकुले भवाः दिव्याः इतरे भौमाः । "ज्येष्ठादिष्वपि मासेषु श्वेतचन्दनमुच्यते । श्वेतानि चापि पुष्पाणि शुभगन्धान्वितानि वै । कृष्णागुरु तथा धूपं नैवेद्यं पायसं स्मृतम् । तेनैव ब्राह्मणान् साधून् भोजयेच्च महामते ! । प्राशयेत् पञ्चगव्यन्तु स्नानं तेनैव सुव्रत ! । कार्त्तिकादिषु मासेषु अगस्तिकुसुमैः स्मृतम् । पूजनं कुरुशार्दूल ! धूपश्चापराजितः । नैवेद्यं गुडपूपाश्च तथैवेक्षुरसः स्मृतः । तेनैव ब्राह्मणान् प्राज्ञो भोजयेच्च स्वशक्तितः । कुशोदकं प्राशयेच्च स्नानञ्च कुरु शुद्धये । तृतीयपारणान्ते तु माघे मासि महाराज ! । भोजनं तत्र दानञ्च द्विगुणं समुदाहृतम् । रथश्च पञ्चा च कर्त्तव्या शक्तितो बुधैः । रथस्य चापि यात्रा तु रथयात्रा तु सुव्रत ! । देवस्य या पुरे कार्य्या कर्त्तव्या विभवे सति । दानं न्यर्थं रथस्येह अशोक विभवे सति । इत्येषा कथिता पुण्या रथाङ्गसप्तमी शुभा । अप्नोति महाख्याता महापुण्या महोदया । नामतोऽथ धन पुत्रान् कीर्त्तिं विद्यां समश्नुते" ।

महेश्वरव्रतं विष्णुधर्म्मोत्तरे "शुक्लपक्षाद्यारभ्य फाल्गुनस्य नराधिप ! । पूजयेत्तु चतुर्द्दश्यां सोपवासो महेश्वरम् । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । व्रतान्ते गां तथा दत्त्वा वह्निष्टोमफलं लभेत् । एतदेव व्रतं कृत्वा शुक्लपक्षे तु वत्सरम् । पौण्डरीकमवाप्नोति कुलमुद्धरते स्वकम् । चतुर्द्दशीद्वयेनैतत् कृत्वा संवत्सरं नरः । मासि मासि यथाशक्त्या सर्व्वान् कामानवाप्नुते । प्राप्याद्य कामांश्च महेश्वरस्य तत्रापि कालं सुचिरन्तु राजन् ! । सायुज्यमायाति महेश्वरस्य सर्व्वेश्वरस्याप्रतिमस्य तस्य" ।

महेश्वराष्टमीव्रतं विष्णुधर्म्मोत्तरे "शुक्लपक्षात्तथारभ्य सौम्याष्टम्यां नराधिप ! । पूजयेत् सोपवासस्तु देवदेवं त्रिलोचनम्" । सौम्याष्टम्यां मार्गशीर्षाष्टम्याम् "लिङ्गे वाप्यथ चार्च्चायां चमसे यदि वा स्थले । घृतक्षीराभिषेकेन स्नानेन विविधेन वा । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । गीतेन नृत्यवाद्येन वह्निसन्तर्पणेन च । ब्राह्मणानाञ्च पूजाभिर्यथावन्मनुजोत्तम ! । व्रतावसाने दत्त्वा तु तथा धेनुं पयस्विनीम् । पौण्डरीकमवाप्नोति स्वर्गलोकञ्च गच्छति" ।

महोत्सवव्रतं स्कन्दपु० "शालिपिष्टमयैर्दीपैः पञ्चभिर्नवभिस्तथा । कुर्य्यादारात्रिकं शम्भोः स्वर्णपात्रैः समुज्ज्वलैः । विचित्रवस्त्रपूजा च कर्त्तव्या महती शिवे । पुष्पमण्डपिकां चित्रां रचितामोल्लसत्प्रभाम् । महोत्सवेन विधिवद्गेयं तूर्य्यरवेण च । विविधैर्भक्ष्यभोज्यैश्च नैवेद्यश्चोपकल्पयेत् । सम्यक् सम्पादनीया स्यात् रथयात्रा पिनाकिनः । प्रेक्षणीयैस्तथा नृत्यैर्वाद्यैर्यन्त्रैश्च शोभनैः । पूजयेच्छिवभक्तांश्च विप्रानन्यांश्च भक्तितः । प्रीयतां शिव इत्युक्त्वा नक्तं भुञ्जीत च स्वयम् । वर्षे वर्षे प्रकर्त्तव्यं एतच्चैवोत्सवं महत् । शिवभक्तैस्तथान्यैश्च कीर्त्तिश्रेयोविवृद्धये" ।

माघस्नानव्रतं भविष्योत्तरे "एतस्मात् कारणात् पुत्र ! माघस्नानं विधीयते । षडन्यज्जनि दातव्यास्तिलाः शर्करयान्विताः । त्रिभागस्तु तिलानां हि चतुर्थः शर्करान्वितः । अनयाप्त्या वरारोहे सर्व्वं मासं नयेद्व्रती । अन्ते मे प्रीयतां देवो विष्णुमूर्त्तिर्निरञ्जनः । माघावसाने सुभगे ! षड्रसं सम्प्रदापयेत् । दम्पत्योर्वाससी शुक्ले सप्तधान्यसमन्वितम् । त्रिंशत्तु मोदका देयाः कृतास्तिलमयाः शुभाः । मरिचैर्निर्म्मिताः स्वच्छाः शाटकानि च दापयेत्" ।

मातृनवमीव्रतं भविष्योत्तरे "मातरश्चैव संपूज्याः यथाशक्त्या प्रयत्नतः । तदग्रे शिवभक्तांस्तु ब्रतापाङ्ग्ये विशेषतः । एवं कृत्वा विधानेन सर्व्वं जयमाप्नुयात्" ।

दत्त्व पक्षे मातृणामन्यभिधाय चक्रम् "नवम्यां पूजयेद् यस्तु मातृ चामुण्डे सदा । षष्ठ्यञ्चितमभावत्र भवते नात्र संशयः" ।

मातृव्रतं वराहपु० "मातृणामष्टमी दत्ता ब्रह्मणा तिथिरुत्तमा । एताः समापयेद्भक्त्या निराहारो नरः सदा । तस्य ताः परितुष्टास्तु क्षेमारोग्यं ददत्यपि" ।

मार्गशीर्षव्रतं महाभारते "मार्गशीर्षन्तु यो मासमेकभक्तेन संक्षिपेत् । भोजयेत्तु द्विजान् भक्त्या मुच्यते व्याधिकिल्विषैः । सर्वकल्याणसम्पूर्णः सर्वदुःखविवर्जितः । उपोष्य व्याधिरोहितो वीर्यवानभिजायते । कृषिभागी बहुधनो बहुधान्यश्च जायते" ।

मार्त्तण्डसप्तमीव्रतं भविष्यपु० "मार्त्तण्डसप्तमीं कृष्ण ! कथयाम्यां वच्मि तेऽनघ ! । पौषमासे सिते पक्षे सप्तम्यां समुपोषितः । सम्यक् संपूज्य मार्त्तण्डं मार्त्तण्ड इति वै जपन् । पूजयेत् कृतपं भक्त्या श्रद्धया परयान्वितः" । कृतपः सूर्यः "पुष्पधूपोपहाराद्यैरुपवासैः समाहितः । मार्त्तण्डेति जपन्नाम पुनस्तद्गतमानसः । विप्राय दक्षिणां दद्याद् यथाशक्त्या खगध्वज । द्वितीयेऽह्नि पुनः स्नात ! तन्नैवाभ्यर्च्य नं रवेः । तेनैव नाम्ना संबोध्य दत्त्वा विप्राय दक्षिणाम् । ततो भुञ्जीत गोदोहसमुद्भवमन्वितम् । एवमेवाखिलान् मासान् उपोष्य प्रयतः शुचिः । दद्याद्वार्षिकं विद्वान् प्रतिमासञ्च यत्नतः । पारिते च पुनर्वर्षे यथापूर्वं गवाह्निकम् । दत्त्वा परगते भूयः शृणु यत् फलमश्नुते । सर्वकृत्याः पञ्चगावः षष्ठ्य हेमसद्रः । प्रतिमासं द्विजातिभ्यो दत्त्वा यत् फलमश्नुते । तदाप्नोत्यखिलं सम्यग्व्रतमेतदुपोषितः । तस्य लोकमवाप्नोति मार्त्तण्डो यत्र तिष्ठति" ।

मासव्रतं देवीपु० "मार्गे रसोत्तमं दद्याद् घृतं पौषे महाफलम्" । रसोत्तमं लवणम् "तिलान्माघे मुनिश्रेष्ठ ! सप्त धान्यानि फाल्गुने । विचित्राणि च वस्त्राणि चैत्रे दद्याद् द्विजातये । वैशाखे द्विज ! गोधूमान् ज्यैष्ठे तोयभृतं घटम् । आषाढे चन्दनं देयं सकर्पूरं महाफलम् । नवनीतं नभोमासि छत्रं प्रौष्ठपदे मतम् । गुडशर्करयाश्विने तण्डुलानाश्विने मुने ! । दीपदानं महापुण्यं कार्त्तिके यः प्रयच्छति । सर्वकामानवाप्नोति क्रमेण तु यदाहृतम्" ।

मासोपवासव्रतं विष्णुधर्मोत्तरे "आश्विनस्यामले पक्षे एकादश्यामुपोषितः । व्रतमेतत्तु गृह्णीयाद् यावत् त्रिंशद्दिनानि तु । वासुदेवं समुद्दिश्य मासिकं ... नरः । मासस्योपवसेद्यस्तु स मुक्तिफलभाग्भवेत् । ... स्नापयेद्भक्त्या विलिप्तं कुसुमैः शुभैः । मालतीन्दीवरैः पद्मैः कमलैः सुगन्धिभिः । कुङ्कुमोशीरकर्पूरैर्विविधैः वरचन्दनैः । नैवेद्यधूपदीपाद्यैरर्चयेत जनार्दनम्" इत्यादि ।

मुक्तिद्वारसप्तमीव्रतं भविष्यपु० "अश्वमेधादियज्ञानां सहस्रकोटयर्बुदैरपि । तत् फलं लभ्यते पुंसा मुक्तिद्वारव्रतेन यत् । योगमार्गमनभ्यस्य यथेष्टाचारवानपि । अत्र युक्तो व्रतवापि व्रतेनानेन मुच्यते । सप्तमीं प्राप्य हस्तेन दन्तधावनमाचरेत् । नमोऽर्कायेत्युदीर्याथ अर्ककाष्ठेन भक्तिमान् । अथ वा पुष्पकाष्ठेन जलेनाप्लावनं तथा । कृत्वा पवित्रं देशानां मध्ये चाकसमित् स्थितम् । रक्तचन्दनपङ्केन विलेपोमयशालिना । प्राङ्मुखे षोडशदलं समर्णदलकर्णिकम्" इत्यादि ।

मुखव्रतं पद्मपु० "मुखवासं परित्यज्य समान्ते गोप्रदो भवेत् । यक्षाधिपत्यमाप्नोति मुखव्रतमिहोच्यते" ।

मुनिव्रतं विष्णुधर्मोत्तरे "सप्तम्यां मुनिशार्दूल ! दृष्टानभ्यर्चयेन्मुनीन् । स्वाध्यायफलमाप्नोति तद्वाग्मफलमश्नुते" ।

मृगशीर्षव्रतं पद्मपु० "श्रावणे मासि कृष्णे च शङ्करः प्रथमेऽहनि । त्रिपर्वणा त्रिशल्येन त्रिमुखेन शरेण च । मुखानि त्रीणि चिच्छेद यज्ञस्य मृगरूपिणः । तैः शिरोभिस्त्रिपत्रं वरः प्राप्तोऽथ शङ्करात्" । त्रिशल्येन त्रिमुखेन शल्यरूपत्रिमुखेनेत्यर्थः । मृगरूपिणश्छिन्नमुखमृगरूपिण इत्यर्थः "स्त्रीभिः पूज्यानि तानीति न मनुष्यैः कदाचन । मृगशीर्षं ततः कृत्वा लिङ्गाकारन्तु काञ्चनम् । सौरेण तपनीयं वै पूजनीयं यथाविधि । अर्घैः पुष्पैश्च धूपैश्च नैवेद्यैर्विविधैरपि । शाकैः सौवर्चलाभिश्च कृतैः पिष्टमयैः शुभैः" । सौवर्चलाभिः घृतसौमिश्रपिष्टविकृतिभिः । "कांस्यभाजनवाद्यैश्च पश्चात् कार्यञ्च भोजनम्" ।

मेघपालीतृतीयाव्रतं भविष्यपु० "अश्वयुक्शुक्लपक्षे च तृतीयायां युधिष्ठिर ! । मेघपाली प्रदातव्या भक्त्या स्त्रीभिर्नभिरथा । अर्घैः विरूढैर्गोधूमैः सप्तधान्यसमन्वितैः । तिलतण्डुलमिश्रैश्च दातव्या धर्मनिष्ठमः" । युधिष्ठिर उवाच "कीदृशी सा भगवती मेघपाली जनार्दन ! । लक्षणं कीदृशं तस्याः को मन्त्र इति मे वद" । श्रीकृष्ण उवाच "ताम्बूलसदृशैः पत्रैरक्ता वल्ली

समञ्जरी। वाटीषु या न मार्गेषु प्रोक्षिता पर्वतेषु वा। यत्र वा दृश्यते राजन्! शुचौ देशे समुत्थिता। सेचयन्ती समभ्यर्च्या फलैः पुष्पैस्तथाक्षतैः। खर्ज्जूरैर्नारिकेलैश्च नारङ्गैर्दाडिमैस्तथा। बीजपूरैः कपित्थैश्च सप्तधान्यैर्विरूढकैः"।

मौनव्रतं स्कान्दपु० "नभसश्च व्यतिक्रान्ते नभस्ये च प्रवर्त्तिते"। नभाः, श्रावणः, नभस्यो भाद्रपदः तौ चात्र पूर्णिमान्तौ ग्राह्यौ। "एवं कालक्रमेणैव श्रावणी पूर्णिमा गता। तद्दिनं प्राप्य विप्रर्षेत्यग्रेऽभिधानात्। "व्रतमेतत् तु कर्त्तव्यं षोडशैव दिनानि तु। एतच्छ्रुत्वा ततो देवी प्रहृष्टा वाक्यमब्रवीत्"। पार्वत्युवाच "किं विधानं पुरा प्रोक्तं व्रतं मौनव्रतात्मकम्। तत्समस्तं समाचक्ष्व प्रसादं कुरु मे प्रभो!"। ईश्वर उवाच "तद्दिनस्य च सम्प्राप्य सभार्य्यः सह बान्धवैः। गत्वा प्रभातसमये स्नानार्थं जलसन्निधौ। तडागे वा नदीदेशे गत्वा प्रस्रवणेऽथ वा। स्नानं कार्य्यं तदा सर्वैः शिवध्यानपरायणैः। दूर्वाकाण्डं समुत्पाट्य षोडशग्रन्थिसंयुतम्। तत्सूत्रञ्च करे न्यस्य स्त्रिया वामे [illegible]। एवंविधानं कर्त्तव्यं यावत् स्यात् प्रतिपद्दिनम्। तद्दिने चैव संप्राप्ते समाप्त्यर्थं व्रतस्य तु। मौनेनैवानयेत्तोयं मौनात् गोधूमपेषणम्। मौनेनैव च कर्त्तव्यं नैवेद्यं भोजनादिकम्। सर्वोपस्करमादाय गत्वा जलसन्निधौ। स्नानं कार्य्यं तदा तत्र नित्यकर्म्म ततः परम्। देवर्षिमनुजानाञ्च पितॄणाञ्चैव तर्पणम्। पश्चाद्देवाधिदेवेशं मन्त्रैः सम्पूजयेत् ततः"।

यमचतुर्थीव्रतं कूर्मपु० "भरण्यान्तु चतुर्थ्यान्तु शनैश्चरदिने यमम्। पूजयन् सप्तजन्मोत्थैर्मुच्यते पातकैर्नरः"।

यमद्वितीयाव्रतं भविष्योत्तरे "कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर!। यमो यमुनया पूर्वं भोजितः स्वगृहे सदा। द्वितीयायां महोत्सर्गे नारकीयाश्च तर्पिताः। पापेभ्योऽपि विमुक्तास्ते मुक्ताः सर्वनिबन्धनात्। आशितातिसन्तुष्टाः स्थिताः सर्वे यदृच्छया। तेषां महोत्सवो वृत्तो यमराष्ट्रसुखावहः। अतो यमद्वितीया सा प्रोक्ता लोके युधिष्ठिर! अस्यां निजगृहे पार्थ! न भोक्तव्यमतो बुधैः। स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम्"।

यमव्रतं भविष्यपु० "दशम्यां यमराडिष्टः सर्वव्याधिहरो ध्रुवम्। मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः। पूर्ववत् पद्मपत्रस्थः कर्त्तव्यश्च विधीश्वरः"। इदं व्रतं वैश्वानरप्रतिपद्व्रतवद्व्याख्येयम्। कूर्मपु० "उपोषितश्चतुर्दश्यां कृष्णपक्षे समाहितः। यमाय धर्मराजाय मृत्यवे चान्तकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। प्रत्येकं तिलसंयुक्तान् दद्यात् सप्तोदकाञ्जलीन्। स्नात्वा नद्याञ्च पूर्वाह्णे मुच्यते सर्वपातकैः"। महाभारते "यजिष्णुः पञ्चमीं षष्ठीं यमान् यो भोजयेद् द्विजान्। अष्टमीमथ कौन्तेय! शुक्लपक्षे चतुर्दशीम्। उपोष्य व्याधिरहितो रूपवानिति जायते"। विष्णुधर्मोत्तरे "यत्र क्वचन नद्याञ्च यत्र कृष्णा चतुर्दशी। अनर्काभ्युदिते काले देवं सम्पूजयेद् यमम्। धूम्रवर्णं चित्रगुप्तं कालपाशञ्च यादव!। मृत्युं स्वर्गञ्च धर्मज्ञं गन्धमाल्यादिसम्पदा। यमोद्धार इत्युक्त्वा तिलांश्च जुहुयात् ततः। नमो यमायेति तथा स्त्रीशूद्रस्य विधीयते। कृसरं भोजयेद्विप्रान् यथाशक्ति नरोत्तमः। दद्याद् व्रतान्ते विप्राय तथैव च पयस्विनीम्। कृत्वा व्रतं वत्सरमेतदिष्टं न याति राजन्! नरकं मनुष्यः। पापक्षयं प्राप्य स याति नाकं मानुष्यमासाद्य स धर्मवान् स्यात्"।

यमादर्शनत्रयोदशीव्रतं भविष्योत्तरे "पूर्वाह्णे मार्गशीर्षादौ वर्षमेकं निरन्तरम्। त्रयोदश्यां सौम्यदिने सूर्याङ्गारकवर्जिते। मम नाम्ना द्विजानष्टौ पञ्च चैव समाह्वयेत्। पुराणवेदतत्त्वज्ञान् स्वाचारांस्तत्प्रदर्शनान्। सूर्य्यैकशरणात् साधून् सर्वभूतहिते रतान्। शुचौ देशे शुभे पट्टे प्राङ्मुखानुपवेशयेत्। [illegible]युतान् भक्त्या यत्नेनाभ्यञ्जयेत तान्। त्रयोदश्यां त्रयोदश्यां ये करिष्यन्ति भूतले। एकभक्तेन नक्तेन उपवासेन वा पुनः। यमादर्शननाम्ना वै व्रतं सर्वव्रतोत्तमम्। ते सर्वपापनिर्मुक्ता विमानेनार्कवर्चसा। यास्यन्तीन्द्रपुरीं रम्यामप्सरोगणसंवृताम्"।

युगादिव्रतम् आदिपु० "वैशाखस्य तृतीयायां श्रीसमेतं जगद्गुरुम्। नारायणं पूजयेथाः पुष्पधूपविलेपनैः। वस्त्रालङ्कारसम्भारैर्नैवेद्यैर्विविधैस्तथा। ततस्तस्याग्रतो धेनुर्लवणस्याढकेन तु। कार्य्या कुरुकुलश्रेष्ठ! चतुर्भागेन वत्सकम्। अजिनस्योपरि स्थाप्य कल्पयित्वा विधानतः। शास्त्रोक्तक्रमयोगेन ब्राह्मणायोपपादयेत्। श्रीधरः श्रीपतिः श्रीमान् श्रीशः संप्रीयतामिति। अनेन विधिना दत्त्वा धेनुं विप्राय भारत!। गोसहस्रप्रदानस्य फलं प्राप्नोत्यसंशयम्। तथैव कार्त्तिके मासि नवम्यां

ऽनन्तगुणं नरः। स्नात्वा नद्यां तडागे वा देवखातेऽथ वा पुनः। उमासहायं वरदं नीलकण्ठमथार्चयेत्। पुष्पधूपादिनैवेद्यैर्दीपगन्धादिभिस्तथा। धेनुं तिलमयीं दद्यात् पुराणोक्तविधानतः। रुद्रमूर्त्तिर्नीलकण्ठः प्रीयतामिति कीर्त्तयेत्। तदत्र प्राप्यते पुण्यं पार्थ! न केन वर्ण्यते। दत्त्वा तिलमयीं धेनुं शिवलोकमवाप्नुयात्। महोदधौ समुद्रे वा पितॄन् तत्र समर्चयेत्। पितॄन् पायसदानेन सुमनोभिर्हुतेन च। भोजयेद्ब्राह्मणान् भक्त्या वेदवेदाङ्गपारगान्। पितॄनुद्दिश्य दातव्या त[illegible]कांस्यदोहना। प्रत्यक्षा गौर्महाभाग! तरुणी सुपयस्विनी। पिता पितामहश्चैव तथैव प्रपितामहः। मातामहप्रभृतयस्तथैवान्ये त्रयो मम। प्रीयन्तां गोप्रदानेन इति दत्त्वा विसर्जयेत्। कृतेनानेन राजेन्द्र! यत् पुण्यं प्राप्यते पुनः। तदन्येन न शक्यन्तु वक्तुं वर्षशतैरपि। पुत्रांश्च पौत्रांश्च धनं सर्वं सुमहदीप्सितम्। इहैवाप्नोति पुरुषः परत्र च परां गतिम्। चतुर्दश्यान्तु माघस्य पूजयित्वा पितामहम्। सावित्र्या सहितं देवं वेदवेदाङ्गभूषितम्। नवनीतमयीं धेनुं कलशैर्नानाविधैर्युताम्। सहिरण्यां सवत्सान्तु ब्राह्मणाय निवेदयेत्। कीर्त्तयेत् प्रीयतां सोऽद्य पद्मयोनिः पितामहः। यत्स्वर्गे यच्च पाताले यन्मर्त्त्ये किञ्चिद्दुर्लभम्। तदवाप्नोत्यसन्दिग्धं पद्मयोनेः प्रसादतः। यानि चान्यानि दानानि दीयन्ते स्वल्पकान्यपि। युगादिषु महाराज! अक्षयाणि भवन्ति हि। वित्तहीनः स्वशक्त्या यो ददाति स्वल्पकं वसु। तदक्षयतां याति नात्र कार्या विचारणा''।

युगावतारव्रत भविष्यपु॰ ''माघि प्रोष्ठपदे वत्स! कृष्णपक्षे त्रयोदशी। अवतीर्णं युगं तस्यां त्रेतायान्तु समाहित!''। त्रेतायां विनिवृत्तायां एतस्यां तिथौ युगमवतीर्णमिति सम्बन्धः अर्थाद् द्वापरमिति भाव्यते ''गोमूत्रं गोमयं दूर्वां समादाय च मृत्तिकाम्। स्रोतोदके तडागे वा तिथौ तस्यां समाहितः। कृतेनानेन समवाप्नोति गयायास्तु न संशयः। युगादौ यस्तिलो-दकं प्रापयेद्गतकल्मषम्। तथोरजलैः पुण्यैः स यात्यैशानीं पुरीम्। स्नातोऽथ विधिनाऽऽपूजितोऽथ समस्ततः। युगादौ युगकर्त्ता तु नृणां मुक्तिप्रदो हरिः। अतो वै सर्वयत्नेन युगादौ जगतीपतिः। पूजनीयो जनैर्नित्यं सर्वदुःखहरो हरिः''।

योगव्रतं भविष्योत्तरोक्तम् ''विष्कुम्भादिषु योगेषु सर्वदेवार्चनो नरः। यो ददाति क्रमात् पार्थ! एतत्सर्वं चतु-र्थम्। यवगोधूमचणकं निष्पावाञ्छालितण्डुलान्। लवणं दधि दुग्धञ्च वस्त्रं कनकमेव च। कम्बलं गोरथं उपानद्युगलं तथा। कर्पूरं कुङ्कुमञ्चैव चन्दनं कुसुमानि च। कोऽहं नाम्ना [illegible] दीयन्ते इति युधिष्ठिर!। ज्ञातः स्वशक्त्या विधिवत् सर्वपापैः प्रमुच्यते। न वियोगमवाप्नोति योगव्रतमिदं स्मृतम्''।

योगेश्वरद्वादशीव्रतं धरणीव्रते ''श्रृणुष्व भद्रिके राजन्! कार्त्तिकैकादशी तथा। उपोष्य विधिना येन सर्वेषां प्राप्नुयात् फलम्। प्राग्विधानेन संकल्प्य तद्वत् स्नानं समाचरेत्।—विशेषेणार्चयेद्देवं नारायणमकल्मषम्''

रक्षाबन्धपौर्णमासीव्रतं भविष्योत्तरे ''सम्प्राप्तेऽस्मिन् पार्थ! शार्दूले धरणीतले। संप्राप्ते श्रावणे मासि पौर्णमास्यां दिनोदये। स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः। ततो देवान् पितॄंश्चैव तर्पयेत् परमाम्भसा। उपाकर्मादि चैवोक्तमृषीणाञ्चैव तर्पणम्। कुर्वीत ब्राह्मणः श्राद्धं देवानुद्दिश्य सुव्रत!। शूद्राणां मन्त्ररहितं स्नानं दानञ्च शस्यते। ततोऽपराह्णसमये रक्षापोटलिकां शुभाम्। कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषिताम्। वस्त्रैर्विचित्रैः कार्पासैः क्षौमैर्वा मलवर्जितैः। दूर्वादर्भसहितैर्विप्रा दुरितोपशमनाय। उपलिप्ते गृहोद्देशे दत्तचतुष्के न्यसेत् कुम्भम्। पीठं तस्योपरि विन्यसेत् राजामात्यैर्युतस्तत्र सुमुहूर्ते। वेश्याजनेन सहितो मङ्गलशब्दैः सुहृष्टैर्हृष्टैः। रक्षाबन्धः कार्यः शान्तिध्वनिना नरेन्द्रस्य। देवद्विजातिशस्त्राण्यश्वाद्यैः रक्षाभिरर्चयेत् प्रथमम्। ततस्तु पुरोधा नृपतेः रक्षां बध्नीत मन्त्रेण'' इत्यादि।

रथनवमीव्रतं भविष्यपु॰ ''कार्त्तिकाश्वयुजे मासि कृष्णपक्षे नराधिप!। नवम्यामुपवासन्तु दुर्गादेवीं प्रपूजयन्। पुष्पधूपोपहारैस्तु ब्राह्मणानाञ्च तर्पणैः। पूजयित्वा रथं कृत्वा नानावस्त्रोपशोभितम्। शोभितं स्रग्मालाभिः छत्रचामरदर्पणैः। नानाप्रकारपताकाभिश्चिह्नैर्युक्तं मनोरमम्। कृत्वा स्वर्णमयीं दुर्गां सिंहवाहनशोभिताम्। विन्यस्य रथमध्ये तु पूजयेत् कन-काञ्चनम्। तं रथं राजमार्गेण शङ्खभेर्य्यादिनिस्वनैः। भ्रामयित्वा तु नयेत् दुर्गालयं नृप!। तत्र जागरपर्यन्तं प्रदीपाद्युपशोभितम्। नानामहोत्सवैर्दि

मृदङ्गानैश्च वाद्यकैः । जागरं कारयेत्तत्र पूजयानश्च चण्डिकाम् । प्रभाते स्नपनं कृत्वा तद्भक्तानाञ्च भोजनम् । रथं शोभासमायुक्तं भगवत्यै निवेदयेत्” ।

रथसप्तमीव्रतं भविष्योत्तरे “शुक्लपक्षे तु माघस्य षष्ठ्यामामन्त्रयन् व्रती । स्नानं शुक्लतिलैः कार्य्यं नद्यभावे तु कुत्रचित् । विमले सलिले राजन् ! विधिवद्वर्णधर्म्मतः । देवादीन् पूजयित्वा तु गत्वा सूर्य्यालयं ततः । सूर्य्यं सम्यक् नमस्कृत्य पुष्पधूपाक्षतैः शुभैः । आगत्य भवनं पश्चात् पञ्च यज्ञांश्च निर्व्वपेत् । संभोज्यातिथिभृत्यांश्च बालवृद्धाश्रितान् स्वयम् । विद्यमाने दिनेऽप्योयाह्नागवतस्तैलवर्जितम् । रात्रौ विप्रं समाहूय विधिज्ञं वेदपारगम् । संपूज्य नियमं कुर्य्यात् सूर्य्यमाधाय चेतसि । सप्तम्यान्तु निराहारो भूत्वा भोगविवर्जितः । भक्ष्येऽहस्यां जगन्नाथ निर्व्विघ्नं तन्मे कुरु ! । इत्युच्चार्य्य स्वपन्नेव ! तोयं तोयेषु निक्षिपेत् । ततो विसर्ज्य तं विप्रं स्वपेद्भूमौ जितेन्द्रियः । ततः प्रातः समुत्थाय कृतावश्यः शुचिर्नरः । कारयित्वा रथं दिव्यं किङ्किणीजालमालिनम् । सर्व्वोपस्करसंयुक्तं रत्नैः सर्व्वाङ्गभूषितम् । काञ्चनं राजतञ्चाथ ह्यसारथिसंयुतम् । ततो मध्याह्नसमये कृतस्नानादिको व्रती । अतीव्यं गत्वैश्यमाथस्तु पापरूपालापवर्जितम् । सौरसूक्तं जपन् प्राज्ञः समागच्छेत् समालयम्” ।

रथाङ्गसप्तमीव्रतं भविष्यपु० “माघे मासि महादेव ! सिते पक्षे जितेन्द्रियः । षष्ठ्यामुपोषितो भूत्वा गन्धपुष्पोपहारकैः । पूजयित्वा दिनकरं रात्रौ तस्याग्रतः स्वपेत् । विबुद्धस्तु सप्तम्यां भक्त्या भानुं समर्च्चयेत् । ब्राह्मणान् भोजयेद्भक्त्या वित्तशाठ्यं विवर्जयेत् । घृतपक्वैर्मोदकैश्च तथैव गुडपूपकैः । प्रथमं वत्सरे पूर्व्वं सप्तम्यां कारयेद् व्रतः । देवदेवस्य वै यात्रां पूर्व्वोक्तविधिना तथा ।” पूर्व्वोक्तः विधिना नानातिथिपक्षसप्तमीरथयात्राविधिसेवधः । “कृच्छ्रपादं व्रतं कुर्य्यादृष्यादृक् रवि तथा । पद्येभक्त्या जगन्नाथं स याति परमां गतिम् । अतीयायामिकभक्तं चतुर्थ्यां नक्तमुच्यते । अयाचितन्तु पञ्चम्यां षष्ठ्याञ्चैव उपोषितः । सप्तम्यां पारणं कुर्य्यात् दद्यादैयं रथे स्थितम् । पूजयित्वा च विधिना भक्त्या देवं त्रिलोचनम् । सौवर्णन्तु रथं कृत्वा ताम्रपात्रो परिस्थितम् । रथसप्तम्यां न्यसेद्धीमान् पूजितं सविभिमपयम्” ।

रम्भात्रिरात्रव्रतं स्कन्दपु० “शुक्लपक्षे त्रयोदश्यां मासि ज्यैष्ठे च सुव्रत ! । त्रिरात्रं व्रतमुद्दिश्य भक्त्या तां कदलीं शुभाम् । स्नात्वा चैव शुचिर्भूत्वा व्रती सिन्दूरकुङ्कुमैः । सूत्रेण वेष्टयेद्भक्त्या गन्धपुष्पादि दापयेत् । रात्रौ कुर्व्वीत नक्तं च अवटमेकं समाहितः । तथैव कदलीवृक्षं नित्यमेव प्रसेचयेत् । ज्यैष्ठे मासि ततः प्राप्य द्वादश्याञ्चैव सुव्रत ! । नद्यां वाथ तडागे वा सिद्धं संपूज्य चाक्षतैः । स्नात्वा च पूजयेन्नान्दस्तुमादेहार्द्धधारिणम् । एकभक्तं ततः कृत्वा नियमं कारयेद् व्रते । भाग्योऽहं त्रिदिनं लङ्घ्य सम्यगिष्टा सुरेश्वरीम् । त्वत्प्रसादात् व्रतं मेऽस्तु निर्व्विघ्नेन महेश्वरि ! । रम्भायाः स्थण्डिलं कृत्वा विचित्रञ्च सुशोभनम् । रम्भाया निकटे स्थित्वा गीतवाद्यसमन्वितम् । मण्डपं कारयेत्तत्र पुष्पमालाविभूषितम् । वितानेन च संयुक्तं सर्व्वशोभासमन्वितम् । मध्ये कुर्व्वीत कदलीं फल आदि संयुताम् । राजतीं शोभनाकारां जातरूपफलान्विताम् । वस्त्रयुग्मन्ततो दद्यात् सर्व्वालङ्कारभूषिताम्” ।

रविव्रतं भविष्यपु० “माघमासि समुद्युक्तस्त्वभ्यर्च्य योऽर्च्चयद्रविम् । भवेत् माघमासिकं पुण्यं मासेनैव न संशयः” ।

रसकल्याणिनीतृतीयाव्रतं मत्स्यपु० “अन्यामपि प्रवक्ष्यामि तृतीयां पापनाशनीम् । रसकल्याणिनीमेतां पुराकल्पविदो विदुः । माघमासे तु सम्प्राप्य तृतीयां शुक्लपक्षतः । प्रातर्गव्येन पयसा तिलैः स्नानं समाचरेत् । स्नापयेन्मधुना देवीं तथैवेक्षुरसेन च । गन्धोदकेन च पुनः पूजनं कुङ्कुमेन वै । दक्षिणाङ्गानि सम्पूज्य ततो वामानि पूजयेत्” । “अनेन विधिना देवीं मासि मासि सदार्च्चयेत् । लवणं वर्जयेन्माघे फाल्गुने च गुडं पुनः । तवराजं तथा चैत्रे वर्ज्यञ्च मधु माधवे । पानकं ज्यैष्ठमासे तु तथाऽऽषाढे च जीरकम् । श्रावणे वर्जयेत् क्षीरं दधि भाद्रपदे तथा । घृतमाश्वयुजे तद्वदूर्ज्जे वर्ज्याथ मर्जिका” । ऊर्ज्जे, कार्त्तिके । मर्जिका, रसाला लोके शिखरिणीति प्रसिद्धा । “धान्यकं मार्गशीर्षे तु पौषे वर्ज्याथ शर्करा । व्रतान्ते करकं पूर्णमेतेषां मासि मासि च । दद्याद्विकालवेलायां भक्ष्यपात्रेण संयुतम्” ।

राघवद्वादशीव्रतं धरणीव्रते “ज्यैष्ठमासेऽप्येवमेव संकल्प्य विधिना नरैः । अर्च्चयेत् परमं देवं पुष्पैर्नानाविधैः शुभैः । नमो रामवायेत्युक्त्वा पादौ पूर्व्वं समर्च्चयेत् । एव-

मध्यञ्च विधिवत् घृतकुम्भं प्रकल्पयेत् । प्राग्वद्वस्त्रयुगच्छन्नौ सौवर्णौ रामलक्ष्मणौ" इत्यादि ।

राजराजेश्वरव्रत कालोत्तरे "बुधस्वात्यात्मिकोयोगो यदाष्टम्यां प्रजायते । उपोषितस्तु विधिना महास्नानपुरःसरम् । सम्पूजयेद्दिक्पालमङ्गरागं चतुःसमम् । महावर्त्तिद्वय दाचदीपं साष्टोत्तरं शतम् । मधुकुङ्कुमधूपन्तु सितपुष्पैस्तु पूजयेत् । खण्डखाद्यान्यनेकानि नैवेद्यानि प्रकल्पयेत् । आचार्य्याय शिरस्त्राणं चैवयदुकूटादिकम । रसनाकुण्डले चैव कङ्कणं मुद्रिकाद्वयम् । वाहनन्तु गजञ्चैव तदभावाद्धयोत्तमम् । सम्पूज्य परया भक्त्या चरुञ्च शर्कराघृतम् । राजराजेश्वरपदं प्राप्नुयाच्छ्रीमसङ्घया । राजराजेश्वरं तेन व्रतमेतत् प्रकाशितम्" ।

राज्यतृतीयाव्रतं विष्णुधर्म्मोत्तरे "ज्यैष्ठे शुक्लतृतीयायां निराहारो नरः शुचिः । त्रिमूर्त्तिपूजनं कृत्वा तृतीयायां यथाविधि" । त्रिमूर्त्तिपूजनं तिसृणां मूर्त्तीनां वायुसूर्य्यचन्द्रमसां पूजनम् । "कूपनदतडागाद्यैर्मिश्रैः प्रातः शुचिर्जलैः । प्रत्यूषे पूजयेद्वायुमनुलिप्ते शुभस्थले । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । होमं कुर्य्याद्यवैस्तु घृतैर्वस्त्रं दद्याद् द्विजातये । मध्याह्ने पूजयेद्वह्नौ तथा सूर्य्यमतन्द्रितः । तिलांश्च जुहुयाद्वह्नौ दद्याद्विप्रेषु काञ्चनम् । सूर्य्यास्तगमनवेलायां जले चन्द्रञ्च पूजयेत्" । जले चन्द्रमसमभिध्याय पूजयेदिति । वह्नावभिध्याय मध्याह्ने सूर्य्यं प्रपूजयेदिति यावत् "घृतेन होमं कुर्वीत रजतं दक्षिणा स्मृतम् । नक्तं भुञ्जीत धर्म्मज्ञः तैलहीनं ततो नरः । पूर्णं संवत्सरं कृत्वा व्रतमेतदतन्द्रितः । स्वर्गलोकमवाप्नोति सहस्रं परिवत्सरम् । मानुष्यमासाद्य ततो राजा भवति भूतले । व्रतं कृत्वा महाभाग ! पूर्णं संवत्सरत्रयम् । पञ्चवर्षसहस्राणि स्वर्गलोके महीयते" ।

राज्यद्वादशीव्रतं विष्णुधर्म्मे "भूतभावार्च्चितो राजन् ! द्वादशीं राज्यदां शिवाम् । यामुपोष्य नरो लोके राज्यमाप्नोत्यकण्टकम् । मार्गशीर्षस्य मासस्य शुक्लपक्षे नराधिप ! । दशम्यां प्रयतः शुद्धः स्नानमभ्यङ्गपूर्वकम् । हविष्यभुक् प्रयतात्मा दन्तधावनपूर्वकम् । उपवासस्य सङ्कल्पं शौभूतस्य च कारयेत् । देवाग्रे कुशस्तीर्णामेकवस्त्रोत्तरच्छदाम् । अध्यासीत महीं तत्र तां रात्रीं संयतो नयेत् । द्वितीयेऽह्नि ततः कार्य्यादह्नि स्नानमतन्द्रितः । पूजनं चैव देवस्य सर्व्वसूक्तेन कारयेत्" इत्यादि ।

राज्याप्तिदशमीव्रतं विष्णुधर्म्मोत्तरे "क्रतुर्दक्षो वसुः सत्यः कालः कामोध्वनिस्तथा । कुरवान् मनुजो विप्रो रोचमानश्च ते दश । विश्वेदेवाः समाख्याता दशात्मा केशवो विभुः । तस्य सम्पूजनं कार्य्यं सितपक्षे नराधिप ! । आरभ्य कार्त्तिकान्मासाद्दशम्यां नृपपुङ्गव ! । मण्डलेष्वथ पुण्येषु यदि वाञ्छसि यादव ! । गन्ध,माल्य, नमस्कार, दीप, धूपान्न- सम्पदा" । अस्मां प्रतिमा सा च यथासम्भवं सुवर्णादिधातुमयी विधेया "व्रतान्ते कनकं दद्याद् यथाशक्ति द्विजातये । कृत्वा व्रतं केवलमेतदिष्टं प्राप्नोति तेषां सुचिरन्तु लोकान् । तस्मोऽत्र लोके पुरुषोत्तमस्य राजा भवेद् ब्राह्मणपुङ्गवो वा" ।

रामनवमीव्रतं अगस्त्यसंहितोक्तम् "चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ । उदये गुरुगौरांश्वोः स्वोच्चस्थे ग्रहपञ्चके । मेषे पूषणि सम्प्राप्ते लग्ने कर्कटकाह्वये । आविरासीत् सकलया कौशल्यायां परः पुमान् । तस्मिन् दिने तु कर्त्तव्यमुपवासव्रतं सदा । तत्र जागरणं कुर्य्याद्रघुनाथपरो भुवि । प्रातर्दशम्यां कृत्वा तु सन्ध्याद्याः कालिकीः क्रियाः । संपूज्य विधिवद्रामं भक्त्या वित्तानुसारतः । ब्राह्मणान् भोजयेद् भक्त्या दक्षिणाभिश्च तोषयेत् । गोभूतिलहिरण्याद्यैर्वस्त्रालङ्करणैस्तथा । रामभक्तान् प्रयत्नेन प्रीणयेत्परया मुदा । एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतम् । अनेकजन्मसिद्धानि पातकानि बहून्यपि । भस्मीकृत्य व्रजत्येव तद्विष्णोः परमं पदम्" ।

राशिव्रतं भविष्यपु० "कार्त्तिक्यां नक्तभुक् दद्यान्मेषं हेमविनिर्म्मितम् । मार्गशीर्षे वृषं षष्ठ्योन्मिथुनं तद्वदेव हि" इत्यादि । एवं क्रमेण यो दद्याद्राशीन् वस्त्रविभूषिताम् । पौर्णमास्यां पौर्णमास्यां कौन्तेय ! सदक्षिणम् । एतद्राशिव्रतं नाम ग्रहोपद्रवनाशनम् । सर्व्वाशापूरकं तद्वत्सोमलोकप्रदायकम्" ।

रुक्मिण्यष्टमीव्रतं स्कान्दपु० "मासि मार्गशिरे कृष्णपक्षेऽष्टम्यां षडानन ! । रुक्मिण्यष्टमिसंज्ञा सा सर्व्वकामफलप्रदा । तस्यां प्रातः शुचिर्भूत्वा नारी नियमकारिणी । वर्षे च प्रथमे कुर्य्याद्देवदारं गृहं सदा । गृहोपकरणं सर्व्वं तस्मिंश्चिन्त्य सादरम् । वेदीन् लेपकाराद्यैश्चतार्दीव रसांस्तथा । वस्त्रैः ज्ञातैस्तथा

दत्तैस्तिलैश्च निर्मितास्तथा । कार्य्याः पुत्तलिकास्तत्र तासां नामानि मे शृणु ॥ कृष्णश्च रुक्मिणी चैव बलदेवश्च रेवती । प्रद्युम्नश्चैव तद्भार्य्या अनिरुद्ध उषा तथा ॥ देवकीवसुदेवादीन् सर्वांस्तत्र प्रकल्पयेत् । ततोऽनुपूजयेत् सर्वान् गन्धपुष्पाक्षतादिभिः ॥ चन्द्रोदये तु सञ्जाते दद्यादर्घ्यन्तदिन्दवे । ''अर्घ्यं दत्त्वा तु भुञ्जीत मित्रस्वजनबन्धुभिः ॥ ततः प्रभातसमये कुमार्य्यै तद्गृहं शुभम् । दद्यात् प्रीतेन मनसा सर्व्ववस्तुप्रपूरितम् ॥ ततो द्वितीये वर्षे तु कुर्य्याद् द्विगुणमन्दिरम् । पूर्ववत् पूरितं कृत्वा कुमार्य्यै विनिवेदयेत् ॥ ततस्तृतीये वर्षे तु कृत्वा त्रिगुणमन्दिरम् । सम्पूर्णं पूर्ववत् कृत्वा कुमार्य्यै विनिवेदयेत् ॥ ततश्चतुर्थे वर्षे तु कृत्वा गृहचतुष्टयम् । पञ्चमेऽब्दे पञ्चद्वारं षष्ठे षड्गृहसंयुतम् ॥ कृत्वा दद्यात् प्रयत्नेन कुमार्य्यै तच्च मन्दिरम् । ततस्तु सप्तमे वर्षे कुर्य्यात् सप्तापणं शुभम् ॥ सप्तद्वारं गृहं कृत्वा सुधाधवलितं महत् । शय्यां तूलीं यानं च कशोपानहमेव च ॥ आदर्शं चामरञ्चैव छत्रमोपूरकं तथा । कांस्यभाजनपात्राणि ताम्राणि तु महान्ति च ॥ नानाविधानि वस्त्राणि तथैवाभरणानि च । गृहोपकरणं सर्वं गृहे निक्षिप्य सर्वतः ॥ कृष्णञ्च रुक्मिणीञ्चैव प्रद्युम्नञ्च मनोहरम् । कृत्वा सुवर्णमयान् भक्त्या पीतवस्त्रावगुण्ठितान् ॥ पूजयित्वोपवासेन रात्रिजागरणेन च । ततः प्रभातसमये तद्गृहे समुपागतम् ॥ सपत्नीकं द्विजं पूज्य वस्त्रालङ्कारभूषणैः । तस्मै तद्गृहं दद्याद्गृहस्थाय कुटुम्बिने'' ।

रुद्रव्रतं पद्मपु० ''यस्त्वेकभक्तेन समां क्षिपेद्वर्षं तु शान्तिमान् । धेनुं तिलमयीं दद्यात् स पदं याति शाङ्करम् ॥ एतद्रुद्रव्रतं नाम पापशोकविनाशनम्'' ॥ ज्यैष्ठे पञ्चतपाः सायं हेमधेनुप्रदो दिवम् । यात्यष्टमीचतुर्दश्यो रुद्रव्रतमिदं स्मृतम्'' । अष्टमीचतुर्दश्याविति च चत्वारि दिनानि पञ्चाग्निसाधनं तच्चतुर्थे दिने सायं सवत्सधेनुं दद्यात्'' ।

रूपनवमीव्रतं भविष्यपु० ''पौषे मासि महाबाहो ! चतुर्दन्तं गजं शुभम् । कृत्वा रूप्यमयं भक्त्या न्यस्य पात्रे हिरण्मये ॥ इन्द्राण्यै विधिवद्दद्यान्नानाभरणविभूषितम् । एवं पूजयते भक्त्या इन्द्राणीं विधिवत्ततः । स ऐरावतमारूढः सोमलोके महीयते'' ।

रूपसत्रव्रतं विष्णुधर्मोत्तरोक्तम् ''फाल्गुन्यां समतीतायां कृष्णपक्षाष्टमी तु या । मनूषां तां तु संप्राप्य व्रतं गृह्णीत मानवः । उपोषितव्यं नक्षत्रं नक्षत्रं च दैवतम् । वरुणञ्च तथा चन्द्रं पूजयेद्विधिना नरः । पूजयेद्देवदेवञ्च भगवन्तं जनार्द्दनम् ! उपोष्याङ्गानि देवस्य प्रयत्नेन च पूजयेत् । ततोऽग्निहवनं कृत्वा पूजयित्वा तथा गुरुम् । उपवासस्तु कर्त्तव्यो द्वितीयेऽहनि पार्थिव ! उपोष्य ऋक्षे विगते स्नात्वा संपूज्य केशवम् । कृत्वाग्निहवनं भक्त्या पूजयित्वा द्विजोत्तमान् । हविष्यान्नञ्च भोक्तव्यं शृणु चाङ्गक्रमं मम । पादयोः कथितं मूलं प्राजापत्यन्तु जङ्घयोः । अश्विनौ जानुयुगलं ऊरुद्वन्द्वे च पार्थिव ! । मघिते द्वे तथाषाढे गुह्यञ्च कथितं स्मृतं । पूर्व्वोत्तरे च फाल्गुन्यौ कृत्तिका च कटिर्भवेत् । पार्श्वयोः कुक्षियुतयोर्वब-त्रितयं सदा । उभे प्रोष्ठपदे राजन् ! रेवती च तथा भवेत् । उरोऽनुराधास्तु पृष्ठं धनिष्ठा तु प्रकीर्त्तितम् । भुजौ ज्ञेयौ विशाखाख्यौ हस्तौ प्रोक्तौ तथा करौ । अङ्गुल्यश्च तथा प्रोक्ता राजसिंह ! पुनर्वसौ । अश्लेषायां नखाः प्रोक्ता ज्येष्ठायां नृप ! कन्धरः । श्रवणे श्रवणौ ज्ञेयौ मुखं पुष्ये प्रकीर्त्तितम् । दन्ताः स्वातौ शतभिषा हनुः प्रोक्ता तथा नृपः ! मघायां नासिके प्रोक्ते मृगशीर्षे च लोचने । चित्रा ललाटे विज्ञेया भरण्यास्तु तथा शिरः । शिरोरुहाश्चार्द्रायां व्रतस्यान्ते नराधिप ! । वेदयुक्तावसाने तु व्रतं परिसमाप्यते'' ।

रूपसंक्रान्तिव्रतं स्कन्दपु० ''अथान्यदपि ते वच्मि रूपसंक्रान्तिसत्तमम् । संक्रान्तिवासरे स्नानं तैलं कृत्वा विचक्षणः । हैमपात्रे घृतं कृत्वा हिरण्येन समन्वितम् । स्वरूपं वीक्ष्य तत्पात्रं ब्राह्मणाय निवेदयेत् । एकभक्तं ततः कृत्वा भक्त्या चैव समन्वितम् । व्रतान्ते काञ्चनं दद्याद्घृतधेनुसमन्वितम् । अश्वमेधसहस्राणां फलमाप्नोति मानवः'' ।

रूपावाप्तिव्रतं विष्णुधर्मोत्तरे ''फाल्गुन्यां समतीतायां प्रतिपत्प्रभृति क्रमात् । यावच्चैत्री महाराज ! तावत् स्नातो दिने दिने । वह्निः संपूजयेद्देवं केशवं भोगशायिनम् । एकभक्ताशनो नित्यमधःशायी तथा भवेत् । त्रिरात्रोपोषितः पूजां चैत्र्यां कुर्य्यात्तथैव च । स्वशक्त्या रजतं दद्याद्वस्त्रयुग्मं तथैव च । रूपार्थिनो व्रतमिदं मयोक्तं व्रतोत्तमं नित्यमदीनसत्त्वम् । कृत्वा तु नारी मनुजश्च राजन् गान्धर्व्वभावाद्वा च रूपवान् स्यात्'' ।

रोहिणीद्वादशीव्रतं भविष्योत्तरे ''मासि श्रावणे वापि

कृष्णपक्षे समाहितः। एकादश्यां शुचिर्भूत्वा स्नात्वा सर्वौषधीजलैः। मासपूर्णेन राजेन्द्र! कुर्य्यादिन्दुरिकायतम्। मोदकांश्च तथा पञ्च घृतपक्वान् सुनिर्मलान्। आत्मोपयोगमुद्दिश्य ततो गत्वा जलाशयम्। दुष्टग्राहादिरहितं पद्मोपेतजलैर्वृतम्। तस्यैव पुलिने रम्ये जलान्ते गोमयादिना। कृत्वा मण्डलकं वृत्तं पिष्टकादिभिरर्च्चितम्। अर्च्चितं गन्धकुसुमैर्धूपदीपाक्षतैः शुभैः। तत्र चन्द्रं लिखेत् पार्श्वे रोहिण्या सहितं भुवि। अर्च्चयीत शुभार्थेन मन्त्रेणानेन भक्तितः। एवं सुसार्घ्यं तद्दत्त्वा तज्जलं स्वयमाविशेत्"। "कण्ठान्तं जलमात्रं वा आजानुफलान्तमेव वा। ध्यायतं सोमराजस्य रोहिणीसहितं विभुम्। जलस्थमेव भुञ्जीत स्वयमिन्दुरिकायतम्। सा रोहिणी यथिष्ठिता विहृता हिता च यत् कारणं शृणु नरेन्द्र! निवेदयामि। सत्पिष्टमावर्च्चितैन्दुरिकायतं यद्भुक्तं जले गङ्गहृतेन फलं तदेव"।

रोहिणीव्रतं स्कन्दपु० "रोहिणी जन्मनक्षत्रं वासुदेवस्य चक्रिणः। ताम्रकलशमयीं कृत्वा पञ्चरत्नेन संयुताम्। स्नापयेद्रसयुक्तेन पुष्पधूपैः प्रपूजयेत्। कालांकुरफलैर्दिव्यैर्नैवेद्यैस्तथार्च्चितैः। द्वितीयेऽह्नि समाप्यैतद्ब्राह्मणायोपपादयेत्। श्रोत्रियाय सुरूपाय भिक्षुकाय कुटुम्बिने। अथ नक्तेन भुञ्जीत रोहिण्या दर्शने कृते। एवंविधं व्रतं दिव्यं दिवि देवाश्च चक्रिरे। वर्षे वर्षे समायाते देवाश्चाद्यापि कुर्वते। यं यं काममभिध्यायन् तं तमाप्नोत्यसंशयम्।

लक्षणाष्टमीव्रतं मत्स्यपु० "अस्ति वत्स! व्रतस्यैकं तिथिनक्षत्रयोगतः। नभस्ये मासि राजेन्द्र! यदार्द्रा जायते तदा। व्रतमेतद्विधातव्यमुमामाहेश्वरं भुवि। आरोग्यैश्वर्य्यसौभाग्यरूपसम्पत्प्रदायकम्। कारयित्वा यथाशक्ति सौवर्णं मिथुनं तयोः। गौरीगिरिशयोर्भक्त्या नक्तं सहस्रत्र पूजयेत्। नभस्ये वैकुण्ठाष्टम्यामेवं यः कुरुते व्रतम्। लक्षणार्द्रेतिविख्यातमिदं तस्य फलं शृणु। सर्वपापविशुद्धात्मा सर्वैश्वर्य्यसमन्वितः। भुक्त्वा भोगान् सुखेनेन ततः कालविपर्य्यये। राजा भवति धर्मात्मा बलवीर्य्यसमन्वितः। माघार्द्रासंयुताष्टमी भवति या कृष्णा नभस्ये तदा सौवर्णं मिथुनं शिवागिरिशयो रूपं तयोर्विधेः। पूर्वं विरचयेद्ददाति गुरवे सार्द्धं रसैर्भोजनं भुक्त्वा सोमयुतोत्सवं पदतपो धर्मोर्थसम्भावनम्"।

लक्ष्मीनारायणव्रतं विष्णुधर्मोत्तरे "पञ्चदश्यां शुक्लपक्षे फाल्गुनस्य नरोत्तम!। पाषण्डपतितांश्चैव तथैवान्त्यावसायिनः। नास्तिकान् भिन्नवृत्तांश्च पापिनश्चापि नालपेत्। नारायणे गतमनाः पुरुषो नियतेन्द्रियः। तिष्ठन् व्रजन् प्रस्खलंश्च स्तुत्वा चापि जनार्दनम्। कौन्तेय सत्क्रियाकाले सर्वं कृत्वा पुनः पुनः। लक्ष्म्या समन्वितं देवमर्च्चयेत जनार्दनम्। सन्ध्याव्युपरमे चन्द्रस्वरूपं हरिमीश्वरम्। रात्रिश्च लक्ष्मीं सञ्चिन्त्य स्वस्वगर्भेण चिन्तयेत्। नीर्निशा चन्द्ररूप! त्वं वासुदेव! जगत्पते!। मनोऽभिलषितं देव! पूरयस्व नमोनमः। मन्त्रेणानेन दत्त्वार्घ्यं देवदेवस्य भक्तितः। नक्तं भुञ्जीत मौनेन तैलक्षारविवर्जितम्। तथैव चैत्रवैशाखे ज्यैष्ठे च मुनिसत्तम!। अर्च्चयेच्च यथाप्रोक्तं मासि मासि च तद्दिने। निष्पादितं भवेदेकं पारणं दालभ्य! भक्तितः। द्वितीयं तत्र वक्ष्यामि पारणन्तत् निबोध मे। आषाढे श्रावणे मासि मासि भाद्रपदे तथा। तथैवाश्वयुजेऽभ्यर्च्च्य श्रीधरस्य श्रिया सह। सम्यक् चन्द्रमसन्दत्त्वा भुञ्जीतार्च्य यथाविधि। द्वितीयमेतदाख्यातं तृतीयं पारणं शृणु। कार्त्तिकादिषु मासेषु तथैवाभ्यर्च्च्य केशवम्। भूत्या समन्वितं दद्याच्छशाङ्कायाहृष्य निशि। भुञ्जीत च यथाख्यातं तृतीयमपि पारणम्। प्रतिपूज्य ततो दद्यात् ब्राह्मणेऽभ्यर्च्च्य दक्षिणाम्। प्रतिमासं च वक्ष्यामि प्राशनं कायशुद्धये। प्रथमं चतुरो मासान् पञ्चगव्यमुदाहृतम्। कुशोदकं तथैवान्यदुक्तं मासचतुष्टयम्। गीतवाद्यादिकं रात्रौ तथा कृष्णकथाः शुभाः। कारयेद्देवदेवस्य पारणे पारणे गते। जनार्दनं सलक्ष्मीकमर्च्चयेत् प्रथमं तथा। सश्रीकं श्रीधरं तद्वत्तृतीयं भूतिकेशवम्। एवं संपूज्य विधिवत् सपत्नीकं जनार्दनम्। नाप्नोतीष्टवियोगार्त्तिं पुमानाप्यपि वा पुनः"।

लक्ष्मीपञ्चमीव्रतं यमपु० "लक्ष्मीमभ्यर्च्च्य पञ्चम्यामुपवासी भवेन्नृपः। समान्ते हेमकमलं दद्याद्धेनुसमन्वितम्। स वैष्णवं पदं याति लक्ष्मीर्जन्मनि जन्मनि। एतल्लक्ष्मीव्रतं नाम दुःखशोकविनाशनम्"।

ललितातृतीयाव्रतं भविष्योत्तरे "माघमासे सिते पक्षे तृतीयायां यतव्रता। पादौ प्रक्षाल्य हस्तौ च सुखस्थैव समाहितः। जपतश्च नियमं दन्तधावनपूर्वकम्। मध्याह्ने तु नदीं गत्वा तिलैरामलकैः शुभैः। स्नात्वोचीर्णं जलात् शुक्ले वाससी परिधाय च। तमन्येव

धूपदीपैश्च नैवेद्यैः कुङ्कुमादिभिः । अर्चयीत तथा तथा देवीं त्वां भक्त्या भक्तिवत्सले ! ” इत्यादि ।

ललिताव्रतं स्कान्दपु० “शृणु त्वमनवद्याङ्गि ! ललिताराधनक्रियाम् । आश्विनस्य सिते पक्षे दशम्यां नक्तभोजनम् । प्रतिमां हेममयीं दिव्यां सर्वालङ्कारभूषिताम् । वापी कार्या शुभे देशे तन्मध्ये वेदिका शुभा । हस्तमात्रा वितस्त्यर्द्धा दशधान्यसमन्विता । वेदीकोणेषु संस्थाप्या स्वर्णमयः पञ्च देवताः । विष्णुं जलेन तन्मध्ये देवी स्थाप्या प्रयत्नतः । अव्रणं सजलं कुम्भं ताम्रपात्रसमन्वितम् । तत्र स्वर्णमयी देवी स्थाप्या च ललिता शुभा । चन्द्रन्तु रोहिणीयुक्तं राजतं कारयेत् पुरः । दक्षिणे क्षीरदं स्थाप्य वामतो विघ्ननाशनम् । मूलमन्त्रेण गायत्र्या सर्वं तत्र प्रपूजयेत्” इत्यादि ।

ललिताषष्ठीव्रतं भविष्योत्तरे “भद्र ! भाद्रपदे मासि शुक्लषष्ठ्यां सुसंयता । नारी स्नात्वा प्रभाते च शुक्लमाल्याम्बरप्रिया । सुवेशाभरणोपेता भूत्वा संगृह्य वालुकाः । नवे वेणुमये पात्रे गृहं गच्छेद्वराङ्गना । लोपयाथ प्रयत्नेन तत्र देवीं प्रपूजयेत् । कृत्वा पञ्चगुणं रक्तं पुष्पमालाविचित्रितम् । तत्र संस्थाप्य तां देवीं पुष्पैः सम्पूजयेत्ततः” । तां देवीमिति जलान्तरगतां वालुकामानीय वंशपात्रे -कुपिण्डाकृतिं वालुकामयीं पूजयेदिति “ध्यात्वा तु ललितां देवीं तपोवननिवासिनीम् । पङ्कजं करवीरञ्च नेपालीं मालतीं तथा” । नेपाली पुष्पविशेषः, गृहीत्वा पूजयेदितिशेषः । नीलोत्पलं केतकीञ्च संगृह्य तगरं वरम् । एकैकाष्टशतं ग्राह्यमष्टाविंशतिरेव वा । अक्षताः कलिका गृह्य ताभिर्देवीं समर्चयेत्” ।

लावण्यावाप्तिव्रतं विष्णुधर्मोत्तरोक्तम् “कार्त्तिक्यां समतीतायां प्रतिपत्प्रभृतिक्रमात् । पटे वा यदि वार्चायां प्रद्युम्नं पूजयेद्विभुम् । वह्निःस्नानं ततः कुर्यान्नक्तमश्नीत वाग्यतः । एकभक्तं महाराज ! हविष्यं प्रयतः सदा । मार्गशीर्षं ततः प्राप्य त्रिरात्रोपोषितः शुचिः । सम्पूज्य देवं प्रद्युम्नं हुत्वाग्नौ घृतमेव च । भोजयेद्ब्राह्मणांश्चात्र भोजनं लवणोत्कटम् । चूर्णितस्य ततः प्रस्थं लवणस्य द्विजातये । महारजतरक्तञ्च वस्त्रयुग्मं तथा गुरोः । दद्याच्च कनकं राजन् ! कांस्यपात्रं तथैव च । मासेन लावण्यकरं प्रदिष्टं व्रतोत्तमं नाकमतिमद्भुतम् । न केवलं यादव ! सर्वकामान् नरस्य दद्यात्स्वर्गफलमनन्तम्” ।

लोकव्रतं विष्णुधर्मोत्तरोक्तम् “अतःपरं प्रवक्ष्यामि तव लोकव्रतं शुभम् । यास्तु व्याहृतयस्तत्र सप्त लोकाः प्रकीर्त्तिताः । आचरेत् प्रत्यहं स्नानं वह्निर्नित्यमतन्द्रितः । चैत्रशुक्लात्समारभ्य क्रमेण दिनसप्तकम् । गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । एकरात्रोपवासञ्च क्रमेणैवं समाचरेत् । महाव्याहृतिभिर्होमस्तिलैः कार्यो दिने दिने । संवत्सरान्ते दद्याच्च तथा विप्रेषु दक्षिणाम् । सुवर्णं सप्तकदाश्च कांस्यधेनुस्तथैव च । संवत्सरमिदं कृत्वा व्रतं पुरुषसत्तम ! । सर्वलोकवरः श्रीमान् स्वेच्छया स्यान्नराधिपः” ।

वटसावित्रीव्रतं स्कान्दपु० धर्मराजवरप्रदानानन्तरं सावित्र्युवाच “मदीयन्तु व्रतं देव ! भक्त्या नारी चरिष्यति । भर्त्तुः साभिहिता साध्वी समस्तफलभागिनी” । धर्मराज उवाच “नारी वा विधवा वापि अपुत्रा पतिवर्जिता । सभर्त्तृका सपुत्रा वा कार्यं व्रतमिदं शृणु । ज्यैष्ठमासे तु संप्राप्ते पौर्णमास्यां पतिव्रता । स्नात्वा चैव शुचिर्भूत्वा वटं सिञ्चेदमृतकैः । सूत्रेण वेष्टयेद्भक्त्या गन्धपुष्पाक्षतैः शुभैः । नमो वैवस्वतायेति भ्रमयन्ती प्रदक्षिणम् । रात्रौ कुर्वीत नक्तञ्च अवटमेकं समाहिता । तथैव वटवृक्षञ्च पक्षे पक्षे च पूजयेत् । संप्राप्ते च पुनर्ज्येष्ठे लघुभुक् द्वादशीं निदेत् । दन्तानां धावनं कृत्वा नियमं कारयेत्ततः । त्रिरात्रं लङ्घयित्वा च चतुर्थे दिवसे शुभम् । चन्द्रायार्घ्यं प्रदत्त्वा च पूजयित्वा च तां सतीम् । मिष्टान्नानि यथाशक्त्या पूजयित्वा द्विजोत्तमान् । भोक्ष्येऽहन्तु जगद्धात्रि ! निर्विघ्नं कुरु मे शुभे । नियममन्त्रः “कृत्वा वंशमये पात्रे वालुकाप्रस्थमेव च । सप्तधान्ययुतं पात्रं प्रस्थैकेन द्विजोत्तम ! । वस्त्रद्वयोपरि स्थाप्य सावित्रीं ब्रह्मणा सह । हैमीं कृत्वा तयोः प्रीत्यै त्रिरात्रमुपवासयेत् । न्यग्रोधस्य तले तिष्ठेद्यावत्सैव दिनत्रयम् । लोकपालैश्च सावित्रीं यत्नेन सह कारयेत् । रौप्यपर्य्यङ्कमारोप्य रथोपरि निवेशयेत् । पश्चाद्वै यथाशक्त्या रथं रौप्यमयं शुभम् । तथा च काष्ठभारे च वटे चैव सविस्तरम् । एवञ्च मिथुनं कृत्वा पूजयेद्व्रतमत्परा । वर्त्तुलं मण्डलं कृत्वा गोमयेन तपोधन ! । पञ्चामृतेन स्नपनं गन्धपुष्पोदकेन च । चन्दनागुरुकर्पूरैर्माल्यवस्त्रविभूषणैः । संपूज्य तत्र सावित्रीं मण्डले स्थापयेद्बुधः । पीतपिष्टेन पद्मञ्च अथ वा चन्दनेन च । न्यसेत्तेन ततो देवीं कमले कमलासनाम् ।

अनेन विधिना स्नात्वा पूजयेद्गतमत्सरा” इत्यादि ।

वरचतुर्थीव्रतं स्कन्दपु० “चतुर्थ्यां मार्गशीर्षे तु शुक्लपक्षे नृपोत्तम ! प्रारभ्य प्रतिमासञ्च चतुर्थ्यां गणनायकम् । संपूज्य विधिना कुर्य्यादेकभक्तं समाहितः । अक्षारल- वणं त्वेवं पूर्णसंवत्सरे ततः । द्वितीये वत्सरे चाथ नक्तं प्रतिचतुर्थि च । कुर्य्याद्गणेशमभ्यर्च्य तृतीयेऽया- चितं तथा । एवमेव प्रकुर्वीत चतुर्थे स्यादुपोषणम् । ततश्चतुर्थं संपाद्य तदुद्यापनमाचरेत् । इदं वरचतु- र्थ्याख्यं व्रतं सर्वार्थसाधकम्” ।

वरव्रतं पद्मपु० “सप्तरात्रोषितो दद्यात् घृतकुम्भं द्विजातये । वरव्रतमिदं प्रोक्तं ब्रह्मलोकप्रदायकम्” ।

वराटिकासप्तमीव्रतं भविष्यपु० “या काचित् सप्तमी प्रोक्ता ततो वक्ष्यामि शोभनम् । वराटिकात्रयक्रीतं यत् कि- ञ्चित् प्राशयेन्नरः । अनेन देहि मूल्येन यद्भक्ष्यं तच्च भक्षयेत् । अभक्ष्यं वापि भक्ष्यं वा नात्र कार्य्या विचारणा । अनेन विधिना कार्य्या वराटाख्य- सप्तमी” ।

वराहद्वादशीव्रतं वराहपु० “एवं माघे सिते पक्षे द्वादशी धरणीधृतः । वराहस्य तु फाल्गुन्यां पुण्यां परम- धार्म्मिकः । प्रागुक्तेन विधानेन सङ्कल्प्य स्नानमेव च । कृत्वा देवं समभ्यर्च्य एकादश्यां विचक्षणः । पुष्पै- र्नैवेद्यगन्धैश्च हर्षयित्वाच्युतं नरः । पश्चात्तस्याग्रतः कु- म्भञ्जलपूर्णन्तु विन्यसेत् । एवं विधानतो दत्त्वा हरिं वाराहरूपिणम् । ब्राह्मणाय च तद् दद्यात् फलं तस्य निशामय । इह जन्मनि सौभाग्यं श्रीः कान्तिस्तुष्टि- रेव च । ज्ञानवान् वित्तवान् भोगी सद्गुणः पुत्रवान् भवेत्” ।

वरुणव्रतं पद्मपु० “निशि कृत्वा जले वासं प्रभाते गोप्रदो भवेत् । वारुणं लोकमाप्नोति वरुणव्रतमुच्यते” ।

वसुव्रतं विष्णुधर्म्मोत्तरे “ध्रुवोऽध्रुवश्च सोमश्च आपश्चैवानि- लोऽनलः । प्रत्यूषश्च प्रभासश्च अष्टौ ते वसवः स्मृताः । अष्टात्मा वासुदेवोऽयं प्रभावेनोदयेन च । अष्टम्यां पूजयेद्द- स्तु सोपवासो नराधिप ! । चैत्रमासादथारभ्य शुक्ल- पक्षात्तु यादव ! । सम्पूज्येऽष्टाष्टकाशीषु जपेश्च मनुजा- धिप ! । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । वह्निः- स्नानेन राजेन्द्र ! तथाधःशयनेन च । व्रतान्ते तु सदा दद्याद्धेनुं विप्राय शक्तितः” । पद्मपु० “यशोधवलधर्म्मी दद्यात् मणिकनकान्विताम् । दिनं पयोव्रती तिष्ठेत् स याति

परमं पदम् । एतद्वसुव्रतं नाम पुनरावृत्तिदुर्लभम्” ।

वस्त्रत्रिरात्रव्रतं भविष्योत्तरोक्तम् “चैत्रे तु शुद्धेर्देवं त्रिभिः प्रयतमानसः । त्रिरात्रं तत्र नक्ताशी नद्यां स्नात्वा द्विजातये । पयस्विनीरजाः पञ्च प्रदद्यात् स सुवर्णकाः । न जायते पुनरसौ जीवलोके कदाचन । एतद्वस्त्रव्रतं प्रोक्तं सर्वव्याधिविनाशनम्” ।

वह्निव्रतं विष्णुपु० “कृष्णपक्षे पञ्चदश्यां चैत्रादारभ्य या- दव ! । वह्निसंपूजनं कृत्वा गन्धमाल्यान्नसम्पदा । तिलहोमस्तथा कुर्य्यात्तस्मात् वह्नेर्नराधिप ! । संवत्स- रान्ते दद्याच्च सुवर्णं ब्राह्मणाय च । कृत्वा व्रतं वत्सर- मेतदिष्टं प्राप्नोति वित्तं सतत यशश्च । धर्म्मे मतीरूप- मनुत्तमञ्च कामान् यथेष्टान् पुरुषप्रधानः” ।

वामनद्वादशीव्रतं धरणीव्रते “एवमेव मुने ! मासि चैत्रे सं- कल्प्य द्वादशीम् । उपोष्य धारयेद्भक्त्या देवदेवं जना- र्द्दनम् । वामनायेति पादौ तु विष्णवे कटिमर्च्चयेत् । वासुदेवाय जठरं उरः सङ्कर्षणाय च । कण्ठं विश्व- भृते पूज्य शिरो वै व्योमरूपिणे । बाहू विश्वजिते पूज्य स्वनाम्ना शङ्खचक्रके । अनेन विधिनाभ्यर्च्य देवदेवं जनार्द्दनम् । प्राग्वत्तेनोदरं कुम्भं सयुग्मं पुरतो न्यसेत्” । युग्मं वस्त्रयुग्मम् । “प्रागुक्तपात्रे संस्थाप्य वामनं काञ्चनं बुधः । यथाशक्ति कृतं शुभ्रं सितयज्ञोप- वीतिनम् । कुण्डिकां स्थापयेत् पार्श्वे छत्रिकापादुके तथा । अक्षमालाञ्च संस्थाप्य यष्टिकां च विशेषतः । एतैरुपस्करैर्युक्तं प्रभाते ब्राह्मणाय तु । दापयेत् प्रीयतां विष्णुः क्षुद्ररूपीति कीर्त्तयेत् । मासनाम्ना तु तु संयुक्तं प्रादुर्भावाभिधानकम् । प्रीयतामिति सर्व्वत्र विधिरेष प्रकीर्त्तितः । मासनाम्ना मार्गशीर्षादिमास- केशवादिनाम्ना प्रादुर्भावाभिधानकं मत्स्यरूपी कूर्म्मरूपी- त्येवमादि” ।

वायुव्रतं विष्णुधर्म्मोत्तरे “शुक्लपक्षे चतुर्दश्यां ज्यैष्ठादारभ्य यादव ! । वायुं सम्पूजयेद्देवं सोपवासो जितेन्द्रियः । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । संवत्सरान्ते दा- तव्यं वस्त्रयुग्मं द्विजातये । कृत्वा व्रतं वत्सरमेतदिष्ट- मासाद्य लोकं सुचिरं मरुत्त्वः । सुखानि भुक्त्वा सुचिरं महीपो मानुष्यमासाद्य भवेत्पुरोगः” ।

वारिव्रतं पद्मपु० “चैत्रादिचतुरो मासान् जले कुर्य्यादया- चितम् । ज्यैष्ठाषाढ़े तथा माघे पौषे वा राजसत्तम ! । व्रतान्ते मणिकं दद्यादन्नवस्त्रसमन्वितम् । तिलपात्रं

हिरण्यस्य ब्रह्मलोके महीयते । तदन्ते राजराजः स्यात् वारिव्रतमिहोच्यते" ।

वासुदेवद्वादशीव्रतं धरणीव्रते "आषाढेऽप्येवमेवन्तु सङ्कल्प्य विधिना ततः । अर्चयेत्परमं देवं गन्धपुष्पैर्विधानतः । वासुदेवाय पादौ तु कटिं सङ्कर्षणाय च । प्रद्युम्नायेति जठरमनिरुद्धाय वै उरः । चक्रपाणये च भुजौ कण्ठं भूपतये तथा । स्वनाम्ना शङ्खचक्रे तु पुरुषायेति वै शिरः । एवमभ्यर्च्य मेधावी प्राग्वत्तस्याग्रतो घटम् । विन्यसेद्वस्त्रयुग्मं तु तस्योपरि ततो न्यसेत् । काञ्चनं वासुदेवं तु चतुर्बाहुं सनातनम् । तमभ्यर्च्य विधानेन गन्धपुष्पादिभिः क्रमात् । प्राग्वत्तु ब्राह्मणे दद्याद्वेदवादिनि सुव्रते" इत्यादि ।

विजयाद्वादशीव्रतम् आदित्यपु॰ "पुष्यर्क्षेण समायुक्ता शुक्ला वै द्वादशी भवेत् । सा प्रोक्ता वासुदेवेन सर्वपापप्रणाशिनी । येऽर्चयन्ति नरास्तस्यां भक्त्या देवं जनार्दनम् । समुपोष्य विमुच्यन्ते पापैस्ते शतजन्मजैः । कर्मणा मनसा वाचा यत्पापं समुपार्जितम् । तत् क्षालयति गोविन्दस्तिथौ तस्यां समर्चितः । स्नानं जपोऽथ वा होमः समुद्दिश्य जनार्दनम् । नरैर्यत् क्रियते तस्यां तदनन्तफलं भवेत् । यस्मान्नाशयते जन्तोः पापं जन्मशतोद्भवम् । पुष्यर्क्षैकादशी तस्मात् प्रोक्ता पापप्रणाशिनी । एवमेव पुरा प्राह भानुः सारथिनं प्रति" । भानुरुवाच "द्वादशी या परा ब्रह्म ! पुष्येणैव च संयुता । उपोष्या तु प्रयत्नेन द्वादशी पापनाशनी । पुष्येण द्वादशीयुक्ता शुक्ला वै फाल्गुनस्य च । विजया द्वादशी प्रोक्ता स्वयं सा विष्णुना पुरा । तस्यां दत्तं तपस्तप्तं कोटिकोटिगुणोत्तरम् । एकादश्यां निराहारो द्वादश्यां विष्णुमर्चयेत् । रौप्यसौवर्णपात्रे वा दारुवंशमयेऽपि वा । आच्छाद्य पात्रं वासोभिरहतैः सुपरीक्षितैः । मार्गेण वेदजैश्चैव विधिः स्याच्छक्त्यपेक्षया । तिलाढकेन विस्ताद्यैः प्रस्थेन कुटजेन वा । अलाभे चैव गोधूमैः फलं तुल्यं तिलैर्भवेत्" । ब्रह्मवैवर्त्ते "मासि भाद्रपदे शुक्ले पक्षे यदि हरेर्दिनम् । बुधश्रवणयोगश्च प्राप्यते तत्र पूजितः । प्रयच्छति सुतान् कामान् वामनो मनसि स्थितान् । विजया नाम सा प्रोक्ता तिथिः प्रीतिकरी हरेः । सङ्गमः सर्वतीर्थानां सङ्गमे तत्र जायते । शुक्ला भाद्रपदे स्वर्गे कृष्णा कलुषसंक्षयम् । गङ्गायमुनयोः शुक्ले नर्मदावारिदसङ्गमे । सरस्वत्यदृषद्योश्चैव सङ्गमे पापनाशने । ब्रह्मपुत्रलौहित्याभ्यामेकत्र धारेऽथ वा द्विज ! अन्येषु सङ्गमेष्वेव स्वयमायाति वामनः । तत्र सम्पूजितोऽथासौ जायते प्रेतमोक्षदः । दध्योदनसमायुक्तां वारिधानीं प्रदापयेत् । पूजय त्वं जगन्नाथं वामनः प्रीयतामिति । महापुण्यप्रदा ह्येषा सङ्गमे विजया तिथिः । सर्वपापक्षयो नूनं जायते च उपोषणात् । गृहीत्वा नियमं प्रातर्गत्वा नद्यादिसङ्गमे । सौवर्णं वामनं कृत्वा सौवर्णमाषकेण वा । यथा शक्त्या तु विन्यस्य कुम्भोपरि जगत्पतिम् । पूर्णपात्रे स्थापयित्वा मन्त्रैरेतैः प्रपूजयेत् । एवं कृते तु विजयाव्रतेऽस्मिन् विजयादिने । न दुर्लभतरं किञ्चिदिह लोके परत्र च । दुर्लभा विजया नृणां दुर्लभस्तत्र सङ्गमः" । अग्निपु॰ "विधानं शृणु राजेन्द्र ! यथादृष्टं मनीषिभिः । यथोक्तं नियमं कुर्य्यादेकादश्यामुपोषितः । दन्तकाष्ठं प्रभक्ष्यादौ वाग्यतो नियतेन्द्रियः । श्रवणद्वादशीयोगे समुपोष्य जनार्दनम् । अर्चयित्वा विधानेन अहं भोक्ष्ये परेऽहनि । नदीनां सङ्गमे स्नायादर्चयेत् यत्र वा मनः । सौवर्णं रत्नसंयुक्तं द्वादशाङ्गुलसाङ्गनम् । पीतवस्त्रैः शुभैर्युक्तं भृङ्गारं निर्व्रणं नवम् । हिरण्मयेन पात्रेण अर्घ्यपात्रं प्रकल्पयेत् । दध्यक्षतफलैश्चैव सहिरण्यं सचन्दनम् । नमस्ते पद्मनाभाय नमस्ते जलशायिने । तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे । मायावी वामनः श्रीशः सोमात्मा तु जगत्पतिः । एवं सम्पूजयित्वा तु द्वादश्यामुदये रवेः । भृङ्गारसहितं वस्त्रं संवत्सरं प्रपूजयेत् । वामनः प्रतिगृह्णातु वामनोऽहं ददामि तम् । वामनं सर्वतोभद्रं विजयार्थं निवेदयेत् । जलधेनुं तथा दद्याच्छत्रं चैव तु पादुके । सहिरण्यानि वस्त्राणि धेनुं चानडुहं नृप ! । यत्किञ्चिद्दीयते तत्र तदानन्त्याय कल्पते । श्रवणद्वादशीयोगे सम्पूज्य गरुड़ध्वजम् । दत्त्वा दानं द्विजातिभ्यो वियोगे पारणं ततः । सिंहस्थिते तु मार्तण्डे श्रवणस्थे निशाकरे । श्रवणद्वादशी ज्ञेया न स्याद्भाद्रपदादृते । दशम्येकादशी यत्र चानुपोष्या भवेत्तिथिः । श्रवणेन तु संयुक्ता सा शुभा सर्वकामदा" । श्रवणेन युक्तायां दशम्यां चाप्युपोष्येर्थः । "पारणं तिथिवृद्धौ तु द्वादश्यामुदुसंक्षयात् । हरो कुर्य्यात्त्रयोदश्यां तत्र दोषो न विद्यते" । द्वादशीमध्ये नक्षत्रे द्वादश्यां पारणम् अधिके त्रयोदश्यामित्यर्थः" ।

विजयासप्तमीव्रतं भविष्योत्तरे "शुक्लपक्षे तु सप्तम्यां यदादित्यदिनं भवेत्। सप्तमी विजया नाम तत्र दत्तं महाफलम्। स्नानं दानं जपो होम उपवासस्तथैव च। सर्वं विजयसप्तम्यां महापातकनाशनम्। प्रदक्षिणं यः कुरुते फलैः पुष्पैर्दिवाकरम्। स सर्वगुणसम्पन्नं पुत्रं प्राप्नोत्यसंशयम्। प्रथमा नारिकेरैस्तु द्वितीया बीजपूरकैः। तृतीया त्वक्षनारङ्गैश्चतुर्थी कदलीफलैः। पञ्चमी ऋजुकुष्माण्डैः षष्ठी पक्वैश्च तैन्दुकैः। इन्नाकैः सप्तमी ज्ञेया शतेनाष्टोत्तरेण तु। मौक्तिकैः पद्मरागैस्तु तिलैः कर्कटकैस्तथा। गोमेदैर्जम्बद्रव्यैः शतेनाष्टाधिकेन तु। इक्षुदण्डैर्बदरैर्बिल्वैः करमर्दैः सचिर्भटैः। आम्रातकैश्च जम्बीरैर्जम्बूकर्कटिकैः फलैः। पुष्पैर्धूपैः फलैः पत्रैर्मोदकैश्च तथार्चितैः। एभिर्विजयसप्तम्यां भानोः कुर्य्यात् प्रदक्षिणम्। अन्यैः फलैश्च कालोत्थैरखण्डैर्व्रणवर्जितैः। रवेः प्रदक्षिणं देयं फलेन फलमादिशेत्। नारी वा कुरुते या तु सापि तत्फलभागिनी। नित्यं महीतलजयप्रतिपादयित्री या सप्तमी मुनिवरैः प्रवरा तिथीनाम्। सा भानुपादकमलार्चनचिन्तकानां पुंसां सदैव विजया विजयं ददाति"। भविष्योत्तरे "माघे मासि सिते पक्षे सप्तम्यां कुरुनन्दन!। निराहारो रविं भक्त्या पूजयेद्विधिना नृप!। पूर्वोक्तेन जपेज्जप्यं देवस्य पुरतः स्थितः। शुद्धैकाग्रमना राजन्! जितक्रोधो जितेन्द्रियः"। इत्यादि "एवं संवत्सरं यावत् कुर्य्याद्विजयसप्तमीम्। स जयेदखिलाञ्छत्रून् सूर्य्यलोकं स गच्छति"। भविष्यपु० "शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो भवेद्यदि। सप्तमी विजया नाम तत्र दत्तं महाफलम्। स्नानं दानं जपो होम उपवासस्तथैव च। सर्वं विजयसप्तम्यां महापातकनाशनम्। पञ्चम्यामेकभक्तं स्यात् षष्ठ्यां नक्तं प्रचक्षते। उपवासस्तु सप्तम्यामष्टम्यां पारणं भवेत्। उपवासपरः षष्ठ्यां प्रयतस्य पूजयेद्रविम्"। उपवासपरः विजयसप्तम्यामुपवासं करिष्यन्। "गन्धपुष्पोपहारैश्च भक्त्या श्रद्धासमन्वितः। प्रकल्प्य पूजां भूमौ च देवस्य पुरतः स्वपेत्। जपमानस्तु गायत्रीं सौरसूक्तमथापि वा। मन्त्रवरं वा महाश्वेतं षडक्षरमथापि वा। विबुद्धस्त्वथ सप्तम्यां कृत्वा स्नानं गणाधिपम्। ग्रहेशं पूजयित्वा तु होमं कृत्वा विधानतः। ब्राह्मणान् भोजयेत् पश्चाद्भक्त्या च गणनायकम्। शाल्योदनमपूपांश्च खण्डवेष्टांश्च शक्तितः। दत्त्वा तु दक्षिणां भक्त्या ततो विप्रान् विसर्जयेत्। इत्येषा कथिता देव! पुण्या विजयसप्तमी। यामुपोष्य नरो गच्छेत् परं वैरोचनं पदम्।

विजयासप्तमीवद्व्रतं भविष्यपु० "नैमित्तिकान् ततो वक्ष्ये यज्ञांश्चात्र समाहितः। सप्तम्यां ग्रहणे चैव संक्रान्तिषु विशेषतः"। नैमित्तिकान् ततो वक्ष्ये इत्यनेन श्लोकेन ग्रहणसंक्रान्तिषु साधारण्येन यज्ञप्रतिज्ञा कृता सप्तमीयज्ञं तावदाह शुक्लपक्षस्येत्यादिना "शुक्लपक्षस्य सप्तम्यां हविर्भुक्तं कदा दिवा। सम्यगाचम्य सन्ध्यायां वरुणं प्रणिपत्य च"। वरुणोऽत्र सूर्य्यः "इन्द्रियाणि तु संयम्य स तं ध्यात्वा स्वपेद्बुधः। दर्भशय्यागतो रात्रौ प्रातः स्नातः सुसंयुतः। सर्वस्यादौ तथैवान्ते पूर्ववद्वरुणं यजेत्। जुहुयाद्वरुणस्याग्निं सूर्य्याग्निं परिकल्प्य वै। सूर्य्याग्निकरणं वक्ष्ये तर्पणं च समासतः। अस्त्रेणोङ्कारसंक्षिप्य सावित्र्याभ्युक्ष्य पावके"। अस्त्रेण अस्त्रमन्त्रेण सावित्र्या सूर्य्यगायत्र्या एतच्च सर्वं निक्षुभासप्तम्यामेवाभिहितं वेदितव्यम्। "प्रक्षिप्यास्तीर्य्य दर्भांश्च देशे भूमौ यथेप्सितम्। प्रागग्रैरुदगग्रैश्च पात्राण्यासाद्य चक्रवत्। पवित्रं द्विकुशं कृत्वा साग्रं प्रादेशसम्मितम्। तेन पात्राणि संप्रोक्ष्य संशोध्य च विलोड्य च। उदग्भागस्थिते पात्रे साग्निना चोल्मुकेन च। पर्य्यग्निकरणं कृत्वा ततश्चोत्पवनं त्रिधा। परिस्तीर्य्य स्रुचादींश्च दर्भैः सम्प्रोक्षितैश्च तैः। जुहुयात् प्रोक्षिते वह्नौ तत्रार्कं पूर्ववद्यजेत्। भूमौ स्थितेन पात्रेण विस्तरेण तु पाणिना। वामेन यदुशार्दूल! नान्तरिक्षे तु हूयते"। अन्तरिक्षे स्रिकादौ "दक्षिणेन स्रुचौ दत्त्वा जुहुयात्पावकं बुधः। हृदयेन क्रियाः सर्वाः कर्त्तव्याः पूर्वचोदिताः"। हृदयेन हृदयमन्त्रेण "अनेन हुत्वा सन्तर्प्य दद्यात् पूर्णाहुतिं ततः। वरुणायादरान्माघे सप्तम्यां वरुणं यजेत्। यथाशक्त्या तु विप्रेभ्यः प्रदद्यात् खण्डवेष्टकान्। दद्याच्च दक्षिणां भक्त्या प्राप्यते यागजं फलम्। एवञ्च फाल्गुने सूर्य्यं चैत्रे चैवांशुमालिनम्। वैशाखे मासि धातारं इन्द्रं ज्यैष्ठे यजेद्रविम्। आषाढे श्रावणे मासि भगं भाद्रपदे तथा। आश्विने चापि पर्ज्जन्यं त्वष्टारं कार्त्तिके यजेत्। मार्गशीर्षे तु मित्रञ्च पौषे विष्णुं यजेद्यदि। संवत्सरेण यत् प्रोक्तं फलमिहा दिने दिने। तत् सर्वं प्राप्नुयात् क्षिप्रं भक्त्या श्रद्धा-

समन्वितः । एवं संवत्सरे पूर्णे कृत्वा वै काञ्चनं रथम् । सप्तभिर्वाजिभिर्युक्तं नानारत्नोपशोभितम् । आदित्यप्रतिमां मध्ये सुवर्णेन कृतां शुभाम् । रत्नैरलङ्कृतां कृत्वा हेमपद्मोपरिस्थिताम् । तस्मिन् रथवरे कृत्वा सारथिं चाग्रतः स्थितम् । वृतं द्वादशभिर्विप्रैः क्रमान्मासाधिपात्मभिः । सर्वकल्पसमाचार्यं पूजयित्वा यथार्थतः" । मासाधिपाः प्रतिमासोक्ताः सूर्याः । अतस्तद्भक्तिभावितैर्द्वादशभिर्विप्रैः सहितमाचार्यं पूजयेदित्यर्थः ।

विद्याप्रतिपद्व्रतं गरुड़पु० "अथ त्वं प्रतिपत्कृत्यं शृणु सम्पत्कर व्रतम् । यत् कृत्वाथ श्रियं विन्देदुर्लभं मानुषैरिह । शालितण्डुलसंसिद्धे मण्डले चतुरस्रके । श्रीयं श्रियमथावाह्य पूजयेत् सपुरःसरम् । अम्भःसदसैः पद्मैरयुतैस्तां प्रपूजयेत्" । अम्भःसदलैः विकसितैः "सहस्रैर्वा यथायोगं पयसा पायसेन च । ततश्च विधिनाभ्यर्च्य पार्श्वे देवीं सरस्वतीम् । अथातः पूजयेदिन्दुं गुरुं पश्चाद्वन्यधीः । परिवारनियोगेन तांश्च सत्कारयेदथ" । प्रार्थनामन्त्रः "मम विद्यां प्रदिशतु देवो वागीश्वरो हरिः । विद्याधिदैवतं देवी विद्यां दिशतु मे स्थिराम् । सरस्वती प्रदिशतु वागृद्धिमतिशालिनीम्" इत्यादि । "यस्त्वेवं कुरुते विष्णो विद्वान् विद्याव्रतमन्यधीः । समस्तविद्यानिपुणो वैष्णवं पदमश्नुते" ।

विद्यावाप्तिव्रतं विष्णुधर्मोत्तरे "पौषयान्तु समतीतायां प्रतिपत्प्रभृतिक्रमात् । प्राग्वत् पूजयेद्देवं तुरङ्गशिरसं हरिम्" प्राग्वदिति रूपावाप्तिव्रतोक्तविधिवत् तुरङ्गशिरसं हयग्रीवम् । "तिलांश्च जुहुयाद्वह्नौ तिलैर्देवं समर्चयेत् । निराहारोपोषितो माषं तिलान् कनकमेव च । दद्याद्ब्राह्मणमुख्याय सम्यक्प्रयतमानसः । सुवस्त्रान् यज्ञोपवीतांश्च प्रभूतमपि चन्दनम् । कृत्वा व्रतं मासमिदं यथोक्तं विद्यान्वितः स्यात् पुरुषः सदैव । स्वर्लोकमासाद्य सुखानि भुक्त्वा कामानभीष्टान् पुरुषोऽश्नुते च" ।

विधानद्वादशसप्तमीव्रतम् आदित्यपु० "निरुक्तसप्तमीनान्तु शृणु नारद ! निर्णयम् । यः शान्तिमधिगच्छेत स्वर्गात् सर्वैर्विभवैः । शान्तानां सर्वपापानां शान्तनां नन्दतां विदुः । तत्रोपवासविधिना धारणं य उपासते । चैत्रमासे तु सप्तम्यामग्निष्टोमफलं लभेत् । वैशाखमासे सप्तम्यां पर्जन्यं यस्तु पूजयेत् । चातुर्मास्यस्य दशस्य फलं प्राप्नोति नात्र वै । विभा विभावसोर्दृष्टा भासो व्याप्तिदीप्तिषु । विभानाम निरुक्तस्य स्वयमेव विभावसोः । सप्तम्यां ज्यैष्ठमासन्तु वरुणं यः समर्चयेत् । आप्तोर्यामदशानान्तु फलं विन्दति मानवः । अमृतार्थे यदा देवा जयशब्देन निर्ययुः । पूजयन्ति जयां देवास्ततस्तस्याश्च तत् स्मृतम् । आषाढमासे सूर्यन्तु सप्तम्यां पूजयेन्नरः । अश्वमेधमवाप्नोति कुलञ्चैव समुद्धरेत् । सप्तम्यां निर्जिता देवैरसुरा दानवास्तथा । समाराध्य सुरैः सेन्द्रैः संग्रामे तारकामये । त्रैलोक्ये विजयप्राप्ते तस्माद्विजयसप्तमी । यः पूजयति मां भक्त्या तस्मिन्नहनि मानवः । स्नात्वा सम्यगुपस्पृश्य शुक्लवासाः कृताञ्जलिः । सदा यज्ञोपवीती च ब्रह्मचारी जितेन्द्रियः । अक्रोधनो ह्यचपलः स्थिरचित्तः समाहितः । ध्यायमानस्तथा साम्ब ! तत्परः सजितेन्द्रियः" इत्यादि ।

विभूतिद्वादशीव्रतं मत्स्यपु० "शृणु राजन् ! प्रवक्ष्यामि विष्णोर्व्रतमनुत्तमम् । विभूतिद्वादशी नाम सर्वाभरणभूषिता । कार्त्तिके चाथ वैशाखे मार्गशीर्षेऽथ फाल्गुने । आषाढे वा दशम्यान्तु शुक्लायां लघुभुङ्नरः । कृत्वा सायन्तनीं सन्ध्यां गृह्णीयान्नियमं बुधः । एकादश्यां निराहार समभ्यर्च्य जनार्दनम् । द्वादश्यां द्विजसंयुक्तः करिष्ये भोजनं ततः । तदविघ्नेन मे यातु साफल्यं मधुसूदन ! । ततः प्रभाते चोत्थाय कृत्वा स्नानजपं शुचिः । पूजयेत् पुण्डरीकाक्षं शुक्लमाल्यानुलेपनैः" ।

वि(बि)ल्वत्रिरात्रव्रतं स्कन्दपु० "ज्यैष्ठे मासि च संप्राप्ते पूर्णिमायां द्विजोत्तम ! । ज्येष्ठाऋक्षदिने कुर्यात् सिद्धार्थैः स्नानमुत्तमम् । श्रीवृक्षं सिञ्चयेत् पश्चाद्गन्धपुष्पैश्च पूजयेत् । वत्सरन्त्वेकभक्तन्तु हविष्यान्नेन कारयेत् । श्वशूकरखरादीनां दर्शने भोजनं त्यजेत् । अनेन विधिना सम्यक् मासि मासि समाचरेत् । ततः संवत्सरे पूर्णे गत्वा वि(बि)ल्वसमीपतः । गृहीत्वा वालुकां पात्रे प्रस्थमात्रं महामुने ! । अथ वा धान्यमादाय यवशालितिलादिकम् । ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टयेत् । उमामहेश्वरं हैमं शक्त्या कुर्य्यात् सुभूषितम्" इत्यादि ।

विशोकद्वादशीव्रतं पद्मपु० "पुण्ये चाश्वयुजे मासि विशोकद्वादशीव्रतम् । यस्मात् शोकदौर्गत्यभाजनं न नरो भवेत् । दशम्यां लघुभुक् रात्रौ कृत्वा वै दन्तधावनम् । उदङ्मुखो प्राङ्मुखो वा सङ्कल्पमनुदीरयेत् । एकादश्यां निराहारः समभ्यर्च्य तु केशवम् । श्रियं च जगतां भूतिं भोक्ष्येऽमोऽन्यपरेऽहनि । एवं नियम-

नास्थाय सुप्त्वा रात्रौ जितेन्द्रियः । प्रभाते विमले गत्वा मध्याह्ने तु जलाशयम् । स्नानं सर्व्वौषधैः कुर्य्यात् पञ्चगव्यजलेन च । शुक्लमाल्याम्बरधरः समभ्येत्य गृहं ततः । पूजयेज्जगतां नाथं लक्ष्मीदयितमुत्तमं” इत्यादि ।

विशोकषष्ठीव्रतं भविष्योत्तरे “विशोकषष्ठीमधुना वक्ष्यामि मनुजोत्तम ! । यामुपोष्य नरः शोकं न कदाचिदिह स्पृशेत् । माघे कृष्णतिलैः स्नानं पञ्चम्यां शुक्लपक्षतः । कृताहारः कृशरया दन्तधावनपूर्व्वकम्” । कृशरया, तिलतण्डुलाद्येन “उपवासव्रतं कृत्वा ब्रह्मचारी भवेन्निशि । ततः प्रातः समुत्थाय कृतस्नानजपः शुचिः । कृत्वा तु काञ्चनं पद्ममर्कोऽयमिति पूजयेत् । करवीरेण रक्तेन रक्तवस्त्रयुगेन च । यथा विशोकं भुवनमुदितं त्वयि जायते । तथा विशोकता मे स्यात्त्वद्भक्तेः प्रतिजन्मनि । एवं सम्पूज्य षष्ठ्यान्तु द्विजान् भक्त्या प्रपूजयेत् । सप्तम्यां संप्राश्य गोमूत्रं समुत्थाय ततः शुचिः । सम्पूज्य विप्रान् दानेन गुडपात्रेण संयुतम् । वस्त्रेणाच्छाद्य गुरवे सर्व्वमेतन्निवेदयेत्” इत्यादि ।

विशोकसंक्रान्तिव्रतं स्कन्दपु० “अतःपरं प्रवक्ष्ये विशोकसंक्रान्तिमुत्तमाम् । अयने विषुवे पुण्ये व्यतीपातो भवेद्यदि । एकभक्तं नरः कुर्य्यात्तिलैः स्नानन्तु कारयेत् । काञ्चनं भास्करं कृत्वा यथाविभवशक्तितः । स्नापयेत्पञ्चगव्येन गन्धपुष्पैः सुपूजयेत् । वेष्टयेद्रक्तवस्त्राभ्यां ताम्रपात्रे निधापयेत्” इत्यादि ।

विशोकसप्तमीव्रतं भविष्यपु० “विशोकसप्तमीं तद्वत् वक्ष्यामि मुनिपुङ्गव ! । यामुपोष्य नरः शोकं न कदाचिदिहाश्नुते । माघे कृष्णतिलैः, स्नातः पञ्चम्यां शुक्लपक्षतः । कृताहारः कृशरया दन्तधावनपूर्व्वकम् । उपवासव्रतं कृत्वा ब्रह्मचारी भवेन्निशि । ततः प्रभाते चोत्थाय कृतस्नानजपः शुचिः । कृत्वा तु काञ्चनं पद्ममर्कोऽयमिति पूजयेत् । करवीरैश्च पुष्पैश्च रक्तवस्त्रयुगेन च । यथा विशोकं भुवनं त्वयैवादित्य ! सर्व्वदा । तथा विशोको मे चास्तु त्वद्भक्तेः प्रतिजन्मनि । एवं संपूज्य षष्ठ्यां तु भक्त्या संपूजयेद् द्विजान् । सुप्त्वा संप्राश्य गोमूत्रमुत्थाय कृतनित्यकः । संपूज्य विप्रं यत्नेन गुडपात्रसमन्वितम् । सदक्षं वस्त्रयुक्तं / ब्राह्मणाय निवेदयेत् । अतैललवणं भुङ्क्ते सप्तम्यां मौनसंयुतः । ततः पुराणश्रवणं कर्त्तव्यं भूतिमिच्छता । अनेन विधिना सर्व्वमुभयोरपि पक्षयोः कुर्य्यात् यावत् पुनर्माघशुक्लपक्षस्य सप्तमीम् ।

व्रतान्ते कलशं दद्यात् सुवर्णकमलान्वितम्” ।

विश्वव्रतं भविष्यपु० “एकादश्यां यथोद्दिष्टा विश्वेदेवाः प्रपूजिताः । प्रजां पशून् धनं धान्यं प्रयच्छन्ति महीं तथा । मूलमन्त्रः स्वसंज्ञाभिरङ्गमन्त्राः प्रकीर्त्तिताः । पूर्व्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः । गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते । पूजाऽशाठ्येन शाठ्येन कृतापि तु फलप्रदा । आज्यधारासमिद्भिश्च दधिक्षीराज्यमाक्षिकैः । पूर्व्वोक्तफलदो होमः कृतः शान्तेन चेतसा” । एतद्व्रतं वैश्वानरप्रतिपद्व्रतवद्व्याख्येयम्” ।

विश्वरूपव्रतं कालोत्तरे “रेवतीशनियोगस्तु सिताष्टम्यां यदा भवेत् । भूतायां वा महासेन ! तदा जातमिदं शृणु ! महास्नानं प्रकर्त्तव्यं नित्यकृत्यादनन्तरम् । चन्द्रं चैवाङ्गरागन्तु रत्नपूजान्तु कल्पयेत् । सितपद्मानि देयानि भूषणानि बहून्यपि । चन्द्रमेवं दहेद्धूपं नैवेद्यं पायसं कृतम् । श्वेताम्बरयुगं सौम्यं शिवाय विनिवेदयेत् । अथाष्टमं कुङ्कुमस्य आचार्य्याय प्रदापयेत् । ऋग्यजुःसामाथर्व्वाणः प्रत्यक्षकुञ्जरं तथा । राज्यार्थी लभते राज्यं यावदाहूतसंप्लवम् । पुत्रार्थी लभते पुत्रान् वायुतुल्यपराक्रमान् । भोगार्थी लभते भोगान् विद्यातत्त्वेन शाश्वतान् । यान् यान् कामयते कामान् तांस्तान् कामानवाप्नुयात् । विश्वरूपमनन्तं च व्रतमेतदुदाहृतम् । कुशोदकप्राशनन्तु रात्रौ जागरणं ततः” ।

विष्टिव्रतं भविष्योत्तरे विष्टिस्वरूपमुक्त्वा “एवमेषा समुत्पन्ना विष्टिरिष्टविनाशिनी । तस्माद्दूरेण कौन्तेय ! वर्ज्जनीया फलार्थिना । येनोपवासविधिना व्रतेन च युधिष्ठिर ! । पूजिता तोषमायाति तदेव कथयामि ते । यस्मिन् दिने भवेद्भद्रा तस्मिन्नहनि भारत ! । उपवासस्य नियमं कुर्य्यान्नारी नरोऽथ वा । यदि रात्रौ भवेद्विष्टिरेकभक्तं दिनद्वयम् । कार्य्यं तेनोपवासः स्यादिति पौराणिको विधिः । प्रहरस्योपरि यदा स्याद्विष्टिः प्रहरद्वयम् । उपवासस्तदा कार्य्य एकभक्तमतोऽन्यथा । सर्व्वौषधिजलस्नानं सुगन्धामलकैरथ । नद्यान्तडागेऽथ गृहे स्नानं सर्व्वं प्रशस्यते । देवान् पितॄन् समभ्यर्च्च्य ततो दर्भमयीं शुभाम् । विष्टिं कृत्वा पुष्पधूपैर्नैवेद्यादिभिरर्च्चयेत् । होमन्तु नामभिर्विष्टेः ,शतमष्टोत्तरं नृप ! । भुञ्जीत दत्त्वा विप्राय तिलान् पायसमेव च । सतैलं कृशरं भुक्त्वा पश्चाद्भुञ्जीत कामतः । छायासूर्य्यसुते ! देवि ! विष्टिरिष्टार्थनाशिनि ! । पूजितासि यथाशक्त्या

भद्रे ! भद्रप्रदा भव । उपोष्य विधिनानेन दश सप्त यथा क्रमात् । उद्यापनं ततः कुर्य्यात् पूर्व्ववत् पूज्य भामिनीम् । स्थापयित्वायसे पीठे कृशरान्नं निवेद्य च । परिधाय कृष्णवस्त्रयुगं मन्त्रेण तं पुनः । ब्राह्मणाय पुनर्द्दद्यात् लौहतैले तिलांस्तथा । कृष्णां सवत्सां गामेकान्तथैव कृष्णकम्बलाम् । दक्षिणाञ्च यथाशक्त्या दत्त्वा भद्रां विसर्जयेत् । य एवं कुरुते पार्थ ! सम्यग्भद्राव्रतं नरः । विघ्नं न जायते तस्य कार्य्यारम्भे कथञ्चन" ।

विष्णुदेवकीव्रतं विष्णुधर्म्मोत्तरे "प्रथमे कार्त्तिकस्याह्नि सम्प्राप्ते देवकि ! स्वयम् । पञ्चगव्यकृतस्नानः पञ्चगव्यकृताशनः । वाणपुष्पैः समभ्यर्च्य वासुदेवमजं विभुम् । दत्त्वा च चन्दनं धूपं परमान्नं निवेदयेत् । घृतं निवेदयेद्विप्रे दद्याच्च ततो व्रतम् । अद्यप्रभृत्यहं मासं विरतः प्राणिनां वधात् । असत्यवचनात्स्तेयान्मधुमांसादिभक्षणात् । स्वपन् विबुध्यन् गच्छंश्च स्मरिष्याम्यहमच्युतम् । परापवादं पैशून्यं परपीडाकरन्तथा । सर्व्वास्त्वदेवतायत्ननिन्दामन्यस्य वा भुवि । न वक्ष्यामि जगत्यस्मिन् पश्यन् सर्व्वगतं हरिम् । अशक्तो वाऽधिशक्तोऽपि यस्मिन् वोढुं यशस्विनि ! । कुर्व्वीत नियमं तस्य त्यागाधर्म्मोपहृद्वये । कृत्वैवं पुरतो विष्णोर्मिह तिं पापतः शुभे । नैवेद्यं स्वयमश्नीयान्मौनी नित्यमुदङ्मुखः । मार्गशीर्षे तथा मासि जातीपुष्पैर्जनार्द्दनम् । समभ्यर्च्य पुनर्धूपं चन्दनञ्च निवेदयेत् । परमान्नञ्च देवाय विप्राय च पुनर्घृतम् । दत्त्वा तथैव चाश्नीयान्नियमो योऽस्य रोचते । तथैव नक्तं भुञ्जीत नैवेद्यं कुलनन्दिनि ! । सर्व्वेष्वेव चतुर्मासं पञ्चगव्यादिकं समम् । पुष्पधूपोपहारेषु विशेषो दक्षिणासु च । स्नानप्राशनयोः साम्यं तथैव नक्तभोजनम् । अर्च्चयेत् प्रतिमासञ्च यैः पुष्पैस्तानि मे शृणु ! । ये च धूपाः प्रदातव्या नैवेद्यास्तु यत्तथा । वाणैश्च जातिकुसुमैः तथैव च सुकुन्दकैः । कुन्दातिमुक्तकै रक्तै रक्तचीरैश्च रक्तकैः । सितैः शुभ्रैर्म्मल्लिकायास्तथा मल्लिकया नतः । दधिपद्माभकैतक्याः पद्मरक्तोत्पलेन च । क्रमेणाभ्यर्च्चितो विष्णुर्द्ददाति मनसि स्थितम् । कार्त्तिके मार्गशीर्षे च धूपं पौषे च चन्दनम् । माघफाल्गुनचैत्रेषु दद्याद्विष्णोस्तथाऽगुरुम् । वैशाखादिषु मासेषु त्रिषु देवकि ! भक्तितः । कर्पूरं देवदेवाय गुग्गुलं श्रावणादिषु । कार्त्तिकादिषु मासेषु परमान्नं शुभे ! त्रिषु । कासारं माघपूर्व्वेषु वर्षास्त्रञ्च ततस्त्रिषु । एवं तिलान् जलघटं हिरण्मयञ्च या व्रती । प्रतिमासं तथा दद्याद् ब्राह्मणाय शुभव्रते ! । यथोक्तनियमानाञ्च ग्रहणं प्रतिमासिकम् कुर्व्वन् जगत्पतिर्विष्णुः प्रीयतामिति मानवः । योऽपि द्व्यष्टवर्षा व्रतमेतद् यथाविधि । करोति मासान् सकलान् अवाप्नोति मनोरथान् । व्रतेनाराधितो विष्णुरनेन जगतःपतिः । ददात्यभिमतान् कामान् क्षिप्रकालेन भामिनि ! । धन्यं यशस्यमायुष्यं सौभाग्यारोग्यदन्तथा । व्रतमेतत् प्रियतरं व्रतेभ्योऽव्यक्तजन्मनः" ।

विष्णुपदव्रतं विष्णुधर्म्मोत्तरे "व्याचष्ट दुःखक्षयदं व्रतं विष्णुपदत्रयम् । सर्व्वारम्भविनिष्पत्तिकारकं पापनाशनम् । संसारोच्छेदकैर्धीरैर्यदिष्टं स्थिरबुद्धिभिः । तदहं तव राजेन्द्र ! व्रतानामुत्तमोत्तमम् । कथयामि समाचष्ट यथापूर्व्वं समासतः । आषाढ़े मासि राजेन्द्र ! पूर्व्वाषाढ़ासु पार्थिव ! । समभ्यर्च्य जगन्नाथमच्युतं नियतः शुचिः । पुष्पैर्धूपैस्तथा हृद्यैर्गन्धैः सागुरुचन्दनैः । यथाविभवतश्चान्यै रत्नैर्वासोभिरेव तु । चीराब्धिहस्थितं तद्वदूर्व्वं विष्णुपदत्रयम् । समभ्यर्च्य यथाशक्त्या केशवस्याग्रतो न्यसेत् । यवांश्च दद्याद्विप्राय श्रीपतिः प्रीयतामिति । नक्तं भुञ्जीत राजेन्द्र ! हविष्यान्नं सुशोभनम् । तथैवोत्तराषाढ़ासु श्रावणे मासि मानवः । तद्वदेवाभ्यर्च्य गोविन्दं तथा विष्णुपदत्रयम् । विप्रायाज्यं घृतं दत्त्वा प्रीणयित्वा भुवःपतिम् । भुञ्जीत गोरसप्रायं मानवो मौनमास्थितः । स्त्री वा राजेन्द्र ! पूर्व्वासु तथा भाद्रपदासु वै । फाल्गुने फाल्गुनीपूर्व्वा भवेदिति यदा नृप ! । त्रिविक्रमं तदा देवं पूर्व्वोक्तविधिनार्च्चयेत् । पदत्रयन्तु देवस्य समभ्यर्च्य तु पार्थिव ! । हिरण्मयं दक्षिणां दद्यात् स्वर्गतिः प्रीयतामिति । नक्तं भुञ्जीत राजेन्द्र ! आज्यपाकविवर्जितम् । एष एवोत्तरायोगे चैत्रे मासि विधिः स्मृतः । अपुत्रो लभते पुत्रमपतिर्लभते पतिम् । समागमं प्रवासाच्च तथा प्राप्नोति बान्धवैः । भद्रमैश्वर्य्यमारोग्यं सौभाग्यं चानुरूपताम् । प्राप्नुयाद्दिखिलानेतान् पूजयित्वा पदत्रयम् । यान् यान् कामान्नरः स्त्री वा हृदयेनाभिवाञ्छति । तांस्तानाप्नोति निष्कामो विष्णुलोकं प्रपद्यते । पूर्व्वं कृत्वापि पापानि नरः स्त्री वा नराधिप ! । पदत्रयव्रतं कृत्वा मुच्यते सर्व्वकिल्विषैः" ।

विष्णुप्राप्तिद्वादशीव्रतं भविष्यपु॰ "द्वादश्यामुपवासन्तु ये वै कुर्व्वन्ति ते नराः । मासिव प्रतिपद्यन्ते मम भक्तिपरा-

यथाः । कृत्वा चैवोपवासन्तु गृहीत्वा च जलाञ्जलिम् । नमो नारायणायेति आदित्यं चावलोकयेत् । यावन्तो विन्दवः केचित् पतन्त्यञ्जलितो जलात् । तावद्वर्षसहस्राणि स्वर्गलोके महीयते । तथैव तस्यां द्वादश्यां कृत्वा कर्म यथाविधि । पाण्डुरैश्चैव पुष्पैस्तु मृष्टैर्गन्धैश्च धूपनैः । य एवं कारयेद्भूमे ! तस्यापि शृणु यां गतिम्" इत्यादि ।

विष्णुव्रतं भविष्यपु० "द्वादश्यां विष्णुमुद्दिश्य सर्वदा विजयी भवेत् । पूज्यश्च सर्वलोकानां यथा गोपतिगोचरः" । गोपतिः सूर्यो गोचरो मेषराश्यादिस्थः स च गोपतिगोचरो विष्णुः "मूलमन्त्राः षडङ्गाभिरङ्गमन्त्राश्च कीर्त्तिताः । पूर्ववत् पञ्चपञ्चाशः कर्त्तव्यश्च तिथीश्वरः । गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते । पूजाऽर्थाद्येन साध्येन कृतापि तु फलप्रदा । आज्यधाराभिषिक्तश्च दधिक्षीरासनाशिभिः पूर्वोक्तफलदो होमः कृतः शान्तेन चेतसा" । एतत्तु व्रतं वैश्वानरप्रतिपद्व्रतवद्व्याख्येयम् । पद्मपु० "द्वादश द्वादशीर्यस्तु समाप्योपोषयेन्नरः । गोयुतञ्च काञ्चनं विप्रानर्च्चयेद्भक्तितः । परं पदमवाप्नोति विष्णुव्रतमिदं स्मृतम्" । विष्णुधर्म्मोत्तरे "विष्णुव्रतमिति ख्यातं दर्शितं विष्णुना स्वयम् । पौषशुक्लद्वितीयादि कृत्वा मासचतुष्टयम् । षण्मासारम्भमार्गं गृह्णीयात् परमं व्रतम् । पूर्वं सिद्धार्थकैः स्नानं ततः सर्व्वौषधैः स्मृतम् । पञ्चगव्येन तृतीयेऽह्नि सर्व्वौषध्या ततःपरम् । नाम्ना कृष्णाच्युतास्येन तथा तं तेन पूजयेत् । तथैव च चतुर्थेऽह्नि हृषीकेशं च केशवम् । देवमभ्यर्च्य पुष्पैश्च गन्धैर्धूपानुलेपनैः । उदकुम्भतलस्थाश्चेन्दोर्दद्यादर्घ्यं समाहितः । पुष्पैः फलैः फलैश्चैव सर्वधान्यैश्च भक्तितः । दिनक्रमेण चैतानि चन्द्रनामानि कीर्त्तयेत् । शशी चन्द्रः शशाङ्कश्च निशापतिरिति क्रमात् । नक्तं भुञ्जीत सततं यावत्तिष्ठति चन्द्रमाः । अस्तङ्गते न भुञ्जीत व्रतभङ्गभयाच्छुभे ! । एवं सर्वेषु मासेषु प्रोक्तान्येव यशस्विनि ! । कर्त्तव्यं वै व्रतञ्चैतं द्वितीयादिचतुर्दिनम् । विप्राय दक्षिणां दद्यात् पञ्चम्यां च यशस्विनि ! । एवं समापयेन्मासैः षड्भिः समवधारणम् । पारणान्ते च देवस्य प्रीणनं भक्तितः शुभैः । सप्तमासात्रा तु कर्त्तव्यं मिष्टाद्यं विसर्जयेत् । आषाढादिद्वितीयासु चतुर्मासेषु तत्प्रिये ! । पारणं वै सप्तम्याञ्च भूषणाद्यं सुखप्रदम्" ।

वृषव्रतं पद्मपु० "कार्त्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाचरेत् । वैष्णवं पदमवाप्नोति वृषव्रतमिदं स्मृतम्" ।

वेदव्रतं विष्णुधर्म्मोत्तरे "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतन्तव । विद्याकामेन यत्कार्य्यं नरेण सुविपश्चिता । बहिःस्नानं नरः कृत्वा कृतऋग्वेदपूजनः । ऋग्वेदं शृणुयान्नित्यं मासत्रयमतन्द्रितः । चैत्रादारभ्य धर्म्मज्ञ ! नित्यं नक्ताशनो भवेत् । ततो नृपवर ! प्राप्ते ज्यैष्ठस्य चरमेऽहनि । वासोयुगं हिरण्यञ्च तथा धेनुं पयस्विनीम् । घृतपूर्णं कांस्यपात्रं सहिरण्यन्तु दक्षिणाम् । आषाढादिषु मासेषु यजुर्वेदव्रतं चरेत् । आश्विनादिषु मासेषु सामवेदव्रतं चरेत् । तथाथर्व्वव्रतं नाम पौषादिषु विधीयते । सर्वेषु सर्वं कर्त्तव्यमृग्वेदव्रतकीर्त्तितम् । वेदात्मनो वासुदेवस्य पूजां कृत्वा नरो द्वादशवत्सराणि । विष्णोर्लोकं याति लोकैर्विशिष्टं यस्मिन् प्राप्ते सर्वदुःखं जहाति" । वेदपाठार्थं वेदव्रतं विधानपा० द्रष्टव्यम् ।

वेश्याव्रतं पद्मपु० "अथाप्यन्यत् व्रतं सम्यक् उपदेक्ष्यामि तत्त्वतः । अविचारेण सर्वाभिरनुष्ठेयश्च तत् पुनः । संसारोत्तारणायालमेतद्वेदविदो विदुः । यदा सूर्य्यदिने हस्तः पुष्योऽथवा पुनर्वसुः । भवेत् सर्वौषधीस्नानं सम्यक्कारी समाचरेत् । तदा पञ्चशरस्यापि सन्निधानमिहेष्यते । अर्च्चयेत् पुण्डरीकाक्षमनङ्गस्यापि कीर्त्तनम् । तस्मादिष्टाय दातव्यं हृष्टेच्छः प्रीयतामिति । यथेच्छाहारभुक्तञ्च तमेव द्विजसत्तमम् । रत्यर्थं कामदेवोऽयमिति चित्तेन धारयेत् । यद्यदिच्छति विप्रेन्द्रस्तत्तत् कुर्य्याद्विलासिनी । सर्वभावेन चात्मानमर्पयेत् स्मितभाषिणी । एवमादित्यवारेण सदा तद्व्रतमाचरेत् । तण्डुलप्रस्थदानादि यावन्मासास्त्रयोदश । ततस्त्रयोदशे मासि संप्राप्ते तस्य कामिनी । विप्रस्योपस्करैर्युक्तां शय्यां दद्यात् सलक्षणाम् । सोपधानकविश्रामां स्वास्तरावरणां शुभाम् । दीपकोपानहच्छत्रपादुकासनसंयुताम् । सपत्नीकमलङ्कृत्य हेमसूत्राङ्गुलीयकैः । सूक्ष्मवस्त्रैः सकटकैर्धूपमाल्यानुलेपनैः । कामदेवं सपत्नीकं गुडकुम्भोपरिस्थितम्" । कामदेवरूपन्तु मदनत्रयोदशीव्रतोक्तं निश्चेयम् । "ताम्रपात्रासनगतं हेमसूत्रपटावृतम् । सकांस्यभाजनोपेतमिक्षुदण्डसमन्वितम् । दद्यादथोक्तविधिना तथैकां गां पयस्विनीम्" ।

वैतरणीव्रतं भविष्योत्तरे "एकादशी तिथिः कृष्णा मार्गशीर्षगता च या । तामारभ्य नरः सम्यक् गृह्णी-

याज्ञिकर्म्म शुचिः। एकादशी तिथिः कृष्णा नाम्ना वैतरणी शुभा। या व्रतेन मया कार्य्या वर्षं मन्त्रपरायणः। मध्याह्ने तु नरः स्नात्वा नित्यं निर्व्वर्त्तितक्रियः। रात्रौ सुरभिमानीय कृष्णामर्च्चेत् यथाविधि। पूर्व्वोक्तिमन्त्रैरपि धारया कृष्णा गोऽर्चिप्रभृतये।' अत्र पादादितः पूज्या पश्चात् पादद्वयावधि। गोपुच्छन्तु समाचाद्य कुर्य्यात् वै पितृतर्पणम्। ततः पूजा प्रकर्त्तव्या मामादद्दविधानतः। गात्रेव चन्दना कुङ्कुमचन्दनेनानुलेपयेत्। गन्धतोयेन चरणौ शृङ्गे प्रक्षाल्य भक्तितः। ततोऽनुपूजयेद्भक्त्या पुष्पैर्गन्धादिवासितैः। मन्त्रैः पुराणसम्प्रोक्तैर्यथास्थानं यथाविधि"। "मार्गशीर्षादिके मासं यावन्मासचतुष्टयम्। अन्यमासचतुष्कन्तु यावकाशनमेव च। श्रावणादिषु मासेषु चतुर्ष्वद्याच्च पायसम्। तदन्नं तस्योभागाः गोगुरुस्वायमेव च। नैवेद्यं हि मया दत्तं सुरभी प्रीयतामिति। द्वितीयं गुरवे दद्यात् तृतीयं स्वयमेव च। मासास्मासं प्रकुर्व्वीत मासद्वादशकं व्रतम्। उद्यापनमतः कुर्य्यात् पूर्णे संवत्सरे तदा। सम्यक् बहुविधा भार्य्यादम्पत्योः परिधानकम्। सवत्सां कृष्णवर्णां तु धेनुः कार्य्या पयस्विनी। सौवर्णीं सुरभीं कृत्वा स्थापयेत् तु तिलोपरि। सुरभीं पूजयेन्मन्त्रैः पूर्व्वोक्तैर्भक्तिसंयुतः। ततस्तु गुरवे दद्यात् सर्व्वं तत्र समापयेत्। नारी वा पुरुषो वापि व्रतस्यास्य प्रभावतः। राज्यं बहुविधं भुक्त्वा स्वर्गलोके महीयते। भारो लोकस्य दातव्यः कार्य्योऽसौ द्रोणसम्मितः। वैतरण्याः समाप्त्यर्थं ब्राह्मणाय कुटुम्बिने"।

वैनायकचतुर्थीव्रतं भविष्योत्तरे "चतुर्थ्यां नक्तभुग्द्यादब्दान्ते हेमवारणम्"। वारणः, करी। "व्रतं वैनायकं नाम सर्व्वविघ्नोपशान्तिदम्"।

वैशाखव्रतानि पद्मपु० "वैशाखे पुष्पकुम्भं वर्जयित्वा तु गोप्रदः। विष्णुलोकमवाप्नोति ततो राजा भवेदिह"। महाभारते "निरन्तरैकभक्तेन वैशाखं यो जितेन्द्रियः। नरो वा यदि वा नारी ज्ञातीनां श्रेष्ठतां व्रजेत्"। विष्णुधर्म्मोत्तरे "यः क्षिपेदेकभक्तेन वैशाखं पूजयेद्धरिम्। नरो वा यदि वा नारी ज्ञातीनां श्रेष्ठतां व्रजेत्। अहिंसः सर्व्वभूतेषु वासुदेवपरायणः। नमोऽस्तु वासुदेवायेत्यष्टाक्षरं जपेत्। अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात्"।

वैश्वानरप्रतिपद्व्रतं भविष्योत्तरे "अग्निजिह्वा कृत्वा च प्रतिपद्यामिति स्मृतम्। हविषा सर्व्वधान्यानि प्राप्नुयादक्षतं धनम्"। इष्ट्वा पूजयित्वा। प्रतिपद्यां प्रतिपदि। इति स्मृतं कामानुसारेण हिरण्यरेतस्कतया विदितम्। हविषा घृतेन। सर्व्वधान्यानि हुत्वेत्यन्वयः। "मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः। पूर्व्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः"। मूलमन्त्राः प्रधानमन्त्राः अङ्गमन्त्राः परिवारदेवतामन्त्राः अग्नये हृदयाय नम इत्येवमादयः। स्वसंज्ञाभिः ओं अग्नये नम इत्यादिपूजायाम्। ओं अग्नये स्वाहा इत्यादि होमे। पूर्व्ववत् सूर्य्यव्रतवत्। पद्ममध्यस्थः कर्णिकायां स्वमूर्त्त्या पत्रेषु परिवारमूर्त्त्या स्थितः। तिथीश्वरोऽत्र वह्निः। स च स्रक्स्रुवधारी त्रिलोचनो रक्ताङ्गश्चतुर्भुजः दक्षिणे शूलं तदपरे ज्वाला। चतुःशृङ्गतया अक्षपात्रहस्तायाः स्वाहायाः स्कन्धे च न्यस्तकरोऽपरो वरः। चत्वारः शुका रथस्य वोढारः। वायुः सारथिरित्येवं विष्णुधर्म्मोत्तराभिहितो वेदितव्यः। "गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते। पूजाऽशाठ्येन शाठ्येन सतापि तु फलप्रदा। अशाठ्येन अकपटेन शाठ्येनेति स्तुतिः। "आज्यधारासमिद्भिश्च दधिक्षीरान्नमाक्षिकैः। पूर्व्वोक्तफलदो होमो विहितः शान्तचेतसा"। आज्यधारादिभिः षड्भिः पृथक्कृतो होमः पूर्व्वोक्तफलदो धनदः। माक्षिकं मधु। आदौ पूजा ततो घृताक्तधान्यहोमस्ततो आज्यधारादिहोमः"।

वैश्वानरव्रतं पद्मपु० "यश्चैत्रनन्दरेंदिमे वर्णादिचतुरस्तु तत्। घृतधेनुप्रदोऽन्ते च स परं ब्रह्म गच्छति। वैश्वानरव्रतं नाम सर्व्वपापप्रणाशनम्"।

वैष्णवव्रतं पद्मपु० "आषाढादिचतुर्मासान् प्रातःस्नायी भवेन्नरः। विप्राय भोजनं दत्त्वा कार्त्तिक्यां गोप्रदो भवेत्। घृतकुम्भं तथा दद्यात् सर्व्वकामानवाप्नुयात्। वैष्णवव्रतमित्युक्तं विष्णुलोकप्रदायकम्"।

व्यतीपातव्रतं वराहपु० "शुभे व्यतीपातदिने विगाहयेत् च पञ्चगव्येन महानदीजलम्। उपावसेद् "व्यमानजापकैः जपेत्तु शुद्धो व्यतिपात! ते नमः। छादिते ताम्रपात्रेण शर्करापूरिते घटे। काञ्चनाज्जे प्रतिष्ठाप्य हैममष्टभुजेश्वरम्"। अष्टभुजं अष्टादशभुजम् उत्पत्तिवाक्ये व्यतीपातमूर्त्तेरष्टादशभुजत्वात् उत्पत्तिवाक्यानुसारत्वाच्च विनियोगवाक्यस्य यथा भगवद्गीतासु "चत्वारोऽनयस्तथेति" चत्वारश्चतुर्दश। "गन्धपुष्पाक्षतैर्धूपदीपवस्त्रनिवेदनैः।

भक्ष्यैर्भोज्यैः फलैश्चित्रैर्मासि मार्गशिरेऽर्चयेत्। नमस्तेऽस्तु व्यतीपात ! सूर्य्यसोमसुत ! प्रभो !। यद्दानादि कृतं किञ्चित् तदनन्तमिहास्तु मे। इत्युक्त्वा पञ्चरत्नाढ्यं सपुष्पाक्षतमञ्जलिम्। प्रक्षिप्य तत्क्षणादेव सर्व्वपापक्षयो भवेत्। यदि द्वितीयेऽपि दिने व्यतीपातो भवेन्नहि !। तदा पूर्व्वोपवासस्तु दद्यात्तत् सकलं गुरोः। पारणं व्यतिपातान्ते कुर्य्यात् संप्राश्य गोमयम्। अथैकस्मिन्नेव दिने व्यतीपातो भवेद् यदि। तत्रैवाह्नि तदा दत्त्वा उपवासं समाचरेत्। कुर्य्यादेवं मासि मासि व्यतीपातस्तथोदय। व्यतीपाते तु संप्राप्ते कुर्य्यादुद्यापनं बुधः। व्यतीपाताय स्वाहेति षोडशाक्षसमन्वितम्। आज्यक्षीरतिलानाञ्च होतव्यं वै शतं शतम्"। नारदीयपु० "व्यतीपातव्रतस्यास्य विधानं शृणु तत्त्वतः। माघे वा फाल्गुने वापि श्रावणेऽश्विनेऽपि वा भवेत्। व्यतीपातो दिने यस्मिन् प्रारभेद्व्रतमुत्तमम्। तिलैः पूर्णं शरावञ्च सगुड़ं गुरवेऽर्पयेत्। एवं द्वितीये दातव्यं तृतीये तु समापयेत्। घृतं पायसञ्चैव दातव्यं चोत्तरोत्तरम्। एवं संवत्सरस्यान्ते देवस्यार्च्चान्तु कारयेत्। शङ्खचक्रगदापाणिं पद्महस्तं हिरण्मयम्। वस्त्रयुग्मेन संवेष्ट्य पूजयेद्गरुड़ध्वजम्। गोक्षीरेण च संपूर्णं कांस्यभाजनमुत्तमम्। स्थाप्य देवदेवस्य स्थानन्तत्रैव कल्पयेत्। शय्या च सन्निभो तस्य स्थाप्या देवमतुष्टरन्। अनन्तशायिनं देवमनन्तफलदं शुभम्। कन्यया सहान्वितं विष्णुं भक्त्या संपूजयेद्व्रतम्। वैदिकेनैव मन्त्रेण जातीपुष्पैः समर्चयेत्। पायसेनैव नैवेद्यं शर्करासंयुतेन च। दत्त्वा निवेद्यं देवस्य प्रार्थनं प्रार्थयेद्व्रती"।

व्योमव्रतं भविष्यपु० अगस्त्यार्घ्यदानानन्तरम् "सितचन्दनतोयेन व्योम स्थाप्य विलिप्य च। कर्णिकाकल्पितैः पद्मैः संपूज्य प्रक्षिपत्य च"। कर्णिकाकल्पितैः कर्णिकामण्डितैः 'बकुले विमले सौम्ये निश्छिद्रे पुष्पिते सति"। पुष्पिते विकसिते। "मध्ये केसरजालस्य व्योम स्थाप्य सुशोभनम्। अङ्कुरपर्णपात्रन्तु सर्व्वगन्धसमन्वितम्। अर्घ्ये सम्प्रापयित्वा च भास्करस्य सुरोत्तम !। पूजयेत् करवीरैस्तु तथा रक्तैश्च चन्दनैः। धूपञ्च गुग्गुलं दद्यात् प्रणम्य शिरसा रविम्। कुङ्कुमं पूर्व्वपार्श्वे तु दद्याद्व्योम्नः समाहितः। दक्षिणे चागुरुं दत्त्वा पश्चिमे चन्दनं सितम्। चतुःसमञ्चोत्तरे तु दद्याद्व्योमविचक्षणः। दद्यान्मध्ये शुभं पुष्पं रक्तचन्दनमादरात्। पूजयेद्विविधैः पुष्पैस्तथा चागुरुचन्दनैः। धूपं कृष्णागुरुं दद्यात् घृतं वापि सुगुग्गुलुम्। याशंसि च सुसूक्ष्माणि विशेषाणि निवेदयेत्। पायसं घृतसंयुक्तं घृतदीपांश्च दापयेत्। सर्व्वं निवेद्य मन्त्रेण ततो गच्छेत् प्रदक्षिणम्। प्रणम्य शिरसा भानुमस्त्रार्येनं समापयेत्। सर्व्वोपचारसंयुक्तं बलिं देवाय चाहरेत्। खखोल्काय इति मन्त्रेण सूर्य्यायामिततेजसे। अनेन विधिवद्देवमभ्यर्च्चयित्वा पुरा रविम्। अहं मत्प्राप्तवानश्वः प्रसादाद्भास्करस्य तु"।

व्योमषष्ठीव्रतं भविष्यपु० "भाजनं तत्र संपूर्णं मधुना च समन्वितम्। दद्यात् कृष्णतिलानां तु प्रस्थमेकन्तु मागधम्। त्रितयं तण्डुलानां च पृथक् प्रस्थं च कारयेत्"। भाजनं प्रस्थचतुष्टयपूरणीयं पात्रं त्रितयं प्रस्थत्रयम् पृथगिति घृतमधुतिलतण्डुलपात्राणि पृथक् कुर्य्यात्। "गन्धपुष्पैस्तथा धूपैर्नानावाद्यैर्विशेषतः। ततः संपूजयेत् सूर्य्यं नानावाद्यसमन्वितम्। सूर्य्यं गगनस्थम्। "पूजयेच्च ततो व्योम बलिं दिक्षु प्रपूजयेत्। व्योमदेवस्य पृष्ठे चैव सर्व्वभूतानि योजयेत्। व्योमदेवपृष्ठे तत्र यत्र व्योम प्रतिष्ठितम्"। व्योमनिर्माणं विष्णुधर्म्मोत्तरात् "चतुरस्रं भवेन्मूले तत्र वृत्तं महाभुजम्। ततोऽन्यत् चतुरस्रञ्च प्रथमे संस्थितं शुभम्। भद्रपीठमये प्रोक्तो व्योमभागस्तुरीयकः। तस्मै वैश्वानरोऽयाश्च मध्यभागः प्रकीर्त्तितः। भद्रपीठपदस्थश्च तत्र पद्मं निवेशयेत्। शुभाष्टदलं तन्मध्ये कर्णिकायां दिवाकरः। पत्राष्टके न्यसेत्तस्य दिक्पालान् सर्व्वतो दिशम्"। "य एवं कुरुते षष्ठ्यां सन्ध्याकाले बलिं रवेः। स सूर्य्यलोकमासाद्य मोदते शाश्वतीः समाः"।

व्रतराजतृतीयाव्रतं देवीपु० "तृतीयायान्तु शुक्लायां नित्यं हस्तयुगे शुभे। रोचनासितकर्पूरैः शिवोमां पूजयेत्ततः। हेमरत्नध्वजैर्वत्स ! मन्त्रयुग्ममुदीरयेत्। सर्व्वकामफलदं यत्तत् पूर्व्वमुदाहृतम्। ततो जपार्च्चनं होमं कर्त्तव्यं द्विजसत्तम !। अवियोगाय नारीणां व्रतराजं सदा हितम्। सहेमपुष्परत्नाढ्यं वस्त्रं दापयेत्तु तत्र। महापुण्यं महाभाग्यं सर्व्वकामप्रदायकम्। सुतस्याद्वियोगस्तु न भवेत्तेन भो द्विज !। न व्याधिर्नोपवर्गोत्र यावत्तन्तुरवो भवेत्। तावद्देवीशपालोके शाश्वते मोदते चिरम्"।

शक्रव्रतं विष्णुधर्म्मोत्तरे “आश्वयुज्यां समुद्भूतन्तु पौर्णमास्यां नरो भुवि । सोपवासः सुरेन्द्रस्य देवं संपूजयेत्तथा । शचीमैरावतं वज्रं मातलिञ्च नराधिपः । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । संवत्सरान्ते कनकस्य दत्त्वा प्राप्नोति लोकं स पुरन्दरस्य । मानुष्यमासाद्य नरेन्द्रपूज्यो राजा भवेद्वा द्विजपुङ्गवो वा” । पद्मपु० “आकाशशायी शय्यां दद्याद्धेनुमन्ते पयस्विनीम् । शक्रलोकमवाप्नोति शक्रव्रतमिदं स्मृतम्” ।

शङ्करनारायणव्रत देवीपु० “कथितं शङ्करोमाख्यं व्रतं मनसि वाञ्छितम् । श्रोतुमिच्छाम्यहन्तात विष्णुशङ्करसंज्ञितम्” । मनुरुवाच “यथा उमेश्वरन्तात तथा कार्य्यमिदं व्रतम् । किन्तु पीतानि वासांसि केशवाय प्रकल्पयेत् । गन्धपुष्पं तथा धूपं सुगन्धञ्च जनार्द्दने । कार्य्यं पूजनकाले लड्डुकादिरसं दधि । एवन्तौ पूजयित्वा तु प्रतिमास्वालेख्येऽपि वा । आहूय ब्राह्मणौ वत्स ! वेदवेदाङ्गपारगौ । यती वा व्रतसम्पन्नौ जटाकाषायधारिणौ । तौ भोजयेद्विधानेन शूलपाणिजनार्द्दनौ । समाप्य विधिना वत्स ! सर्वकामप्रसाधकौ । भूषाञ्च दक्षिणां विष्णोर्मौक्तिकं शङ्कराय च । दत्त्वानुव्रजतो लोकौ क्रमाद्द्वेत्स्यते ततः” ।

शङ्करार्कव्रतं कालिकापु० “अथ चानेन मार्गेण शुभां तामेव चाष्टमीम् । समाप्यादित्ययोगेन प्राग्विधानेन वा नरः । किन्तु दक्षिणनेत्रस्थं भास्करञ्चार्चयेद्बुधः । पद्मरागेण हैमेन योज्यो दं लेपनं शृणु । नेत्रे न्यस्य ललाटाधः कुङ्कुमं रक्तचन्दनम् । हस्तन्तु योज्य मध्ये तु चरं पूर्ववदर्च्चयेत्” । अर्द्धचन्द्राकारं तन्मध्ये हस्तञ्च कृत्वा हेमनिबद्धं पद्मरागं हस्तमध्ये निधाय सूर्य्यरूपेण कुर्य्यादित्यर्थः । “अभावे पद्मरागादेर्हैम सर्वन्तु योजयेत् । रुद्रबीजं परं पूतं यतस्तच्चैव सर्वदा । शुक्लमाल्याम्बरं वस्त्रं नैवेद्यं च हुताशनम् । शेषः पूर्वविधानेन कर्त्तव्यो विधिविस्तरः । किन्तूपोष्य प्रकुर्वीत सप्तम्यां विजितेन्द्रियः । शङ्करार्कयुतं पूज्य चरं गव्यञ्च पारयेत्” ।

शनिव्रतं भविष्योत्तरे “अतो यमस्य दिवसे स्नानमभ्यङ्गपूर्वकम् । कार्य्यं देवस्य विप्राय तैलमभ्यङ्गहेतवे । यस्तु संवत्सरं यावत् प्राप्ते शनिदिने नरः । तैलं ददाति विप्राणां यथाशक्त्यन्वजनम तु । ततः संवत्सरस्यान्ते प्राप्ते तस्य दिने पुनः । लोहपट्टार्पितं सौरिं तैलकुम्भे विनिक्षिपेत् । लौहे वा मृण्मये चाथ कृष्णवस्त्रयुगान्वितम्” इत्यादि ।

शर्करासप्तमीव्रतं पद्मपु० “शर्करासप्तमीं वक्ष्ये सर्वकल्मषनाशिनीम् । आयुरारोग्यमैश्वर्य्यं ययानन्त्यं प्रजायते । माधवस्य सिते पक्षे सप्तम्यां श्रद्धयान्वितः । प्रातःस्नात्वा तिलैः शुक्लैः शुक्लमाल्यानुलेपनः । स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिकम् । तस्मिन्नियमः सवितृ ... धूपं पुष्पं निवेदयेत् । स्थापयेदव्रणं कुम्भं शर्करापात्रसंयुतम् । शुक्लवस्त्रेण संवेष्ट्य शुक्लमाल्यानुलेपनैः । सहिरण्यं यथाशक्त्या मन्त्रेणानेन पूजयेत्” इत्यादि ।

शाकसप्तमीव्रतं भविष्यपु० “सप्तम्यां सोपवासस्तु रात्रौ भुङ्क्ते तु यो नरः । कृतोपवासः षष्ठ्यां तु पञ्चम्यामेककालभुक् । दत्त्वा तु संस्कृतं शाकं भक्ष्यभोज्यैः सुसंस्कृतम् । देवाय ब्राह्मणेभ्यश्च रात्रौ भुञ्जीत वाग्यतः । यावज्जीवं नरः कश्चिद्व्रतमेतच्चरिष्यति । तस्य श्रीर्विजयश्चैव त्रिवर्गश्च विवर्द्धते । अतः स्वर्गमवाप्नोति विमानवरमास्थितः” । “शाकं सुसंस्कृतं कृत्वा भक्ष्यभोज्यसमन्वितम् । दत्त्वा विप्रे यथाशक्त्या पश्चाद्भुङ्क्ते निशि व्रती । कार्त्तिके शुक्लपक्षस्य प्रारब्धोऽयं कुरुनन्दन ! । चतुर्भिरपि मासैस्तु पारणं प्रथमं स्मृतम् । अगस्ति कुसुमैश्चात्र पूजा कार्य्या विभावसोः” । कार्त्तिकशुक्लसप्तम्यामारभ्य प्रतिमासं कुर्वता पुनर्मासचतुष्टयम् यावत् शुक्लसप्तमी तस्यां तस्याञ्च पारणं कार्य्यम् । एकस्मिन् वर्षे वारत्रयं पारणं भवति एवमेव वर्षान्तरेषु तादृशं व्रतं यावज्जीवं कर्त्तव्यम्” ।

शान्ताचतुर्थीव्रतं भविष्यपु० “माघमासि तथा शुक्ला या चतुर्थी महीपते ! । सा सर्वशान्तिदा नित्यं शान्तिं कुर्य्यात् सदैव हि । स्नानं दानं तपः कर्म सर्वमस्यां कृतं विभो ! । भवेत् सहस्रगुणितं प्रसादाद्दन्तिनः सदा । कृत्वोपवासं यस्तस्यां पूजयेद्विघ्ननायकम् । तस्यां होमादिकं कर्म भवेत् साहस्रिकं नृप ! । लवणं गुडपूर्णञ्च दद्यात्तत्र भारत ! । दत्त्वा भक्त्या तु विप्रेभ्यः फलं साहस्रिकं लभेत्” ।

शान्तितृतीयाव्रतं गरुडपु० “तृतीयायां महाभाग ! अन्यस्य व्रतं शृणु । येनानन्तभवारण्येन स्वपयति द्विज ! । चक्षुःपीडादिकैरन्यैरुपसर्गैः प्रपीडितः । अस्यां शान्तिं प्रकुर्वीत व्रतचारी व्रतानुगः । स्थण्डिलं रचयित्वा तु नरो नीलोत्पलनिभैः । चक्राब्जं मण्डलं कुर्य्याद्विकसित-

तण्डुलैः । तत्र चावाहयेद्देवं नरसिंहाकृतिं विभुम् । प्रसन्नमधरोदारवीक्षणव्यापितार्त्तिकम् । सर्व्वभयविध्वंसकरं पुरुषं हरिम् । अभयं भयतप्तानां ददतं ददतं वरम्” इत्यादि । “होमाच्च द्विगुणं प्राक्तर्पणं मन्त्रनिश्चयः । तस्य तद्द्विगुणं प्राक्तर्पण एष विधिक्रमः । नियोगारम्भसमये नियमान् प्रतिपादयेत् । स्वयं चाहरहः कुर्व्वन् नक्तकालं समापयेत्” । नियमान् मौनादीन् । स्वयञ्चाहरहः पूर्व्वं नक्तकालं समापयेत् । स्वयं होमतर्पणजपान् अहरहः प्रतिदिनं संख्या च सङ्कल्पितहोमसंख्यापेक्षया । “हविष्याशी जितक्रोधो यतवाक्कायमानसः । नित्यं त्रिःषवणं स्नायात् सदाचाररतो मुनिः । न चान्तकथोऽनन्निर्ब्रह्मचारी जितश्रमः” । यस्त्वेतत् कुरुते मर्त्त्यः श्रद्धाभक्तिसमन्वितः । स सर्व्वार्त्तिविनिर्मुक्तो शान्तिमाप्नोति नैष्ठिकीम्” ।

शान्तिपञ्चमीव्रतं भविष्यपु० “तद्वदुत्तरपदे मासि पञ्चम्यां श्रद्धयान्वितः । यत्नात्तिखन्नरो नागान् कृष्णवर्णादिवर्णकैः । पूजयेद्गन्धपुष्पैस्तु सर्पिर्गुग्गुलुपायसैः । तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः । आसप्तमकुलात्तस्य न भयं नागतो भवेत् । तस्मात् सर्व्वप्रयत्नेन नागान् संपूजयेद्बुधः । तथैवाश्वयुजे मासि पञ्चम्यां कुरुनन्दन ! । कृत्वा कुशमयान्नागानिन्द्राण्या सह पूजयेत् । यस्त्वस्यां विधिवन्नागान् शुचिर्भक्त्या समन्वितः । पूजयेत् कुरुशार्द्दूल ! तस्य शेषादयो नृप ! । नागाः प्रीता भवन्तीह शान्तिमाप्नोति वा विभो ! । प्रशान्तिलोकमासाद्य मोदते शाश्वतीः समाः” ।

शान्तिव्रतं वराहपु० “शान्तिव्रतं प्रवक्ष्यामि शृणुष्वैकमना नृप ! । येन चीर्णेन शान्तिः स्यात् सर्व्वदा गृहमेधिनः । पञ्चम्यां शुक्लपक्षस्य कार्त्तिके मासि पार्थिव ! । आरभ्य वर्षमेकन्तु भुञ्जीयादम्लवर्जितम् । नक्तन्तु पूजयेद्देवं हरिं शेषोपरिस्थितम् । एवं यः कुरुते भक्त्या व्रतमेतन्नराधिप ! । तस्य शान्तिर्भवेन्नित्यं नागेभ्यश्चाभयं तथा । शेषाहिभोगशयनस्थमपांप्रसूतिं सम्पूज्य यत्र पुरुषं पतगेन्द्रकेतुम् । येनस्त्वमत्स्यमधुरं स्थितपञ्चमीषु तेषां न नागजनितं भयमस्ति किञ्चित्” ।

शाम्भरायणीव्रतं भविष्योत्तरे “तस्मात् पार्थ ! प्रयत्नेन प्रतिमासं समाहितः । मासि मासस्यच्युतं पूज्य भवेयासम्भ्रान्तया । ये शाम्भरायणिकथाचरितव्रतेन पर्व्वाणि सप्त विधिना सुधियो नयन्ति । ते स्वर्गलोकमधिगम्य सुताधिनाथाः कल्पायुतं सुतशतैरपि न च्यवन्ति” ।

शिवाचतुर्थीव्रतं भविष्योत्तरे “लवणैर्धान्यकैर्युक्तं जीरकं मरिचानि च । हिङ्गुं शुण्ठीं हरिद्राञ्च सर्व्वं परिकरं तथा । चतुर्थ्यामेवभक्ताशी सकृद्दत्त्वा कुटुम्बिने । स्त्रीषु सप्तसु तथा शिवाङ्गानि भारत ! । एतच्छिवाव्रतं नाम सर्व्वसौभाग्यप्रदायकम्” ।

शिवचतुर्द्दशीव्रतं मत्स्यपु० “शृणुष्वावहितो ब्रह्मन् वक्ष्ये माहेश्वरं व्रतम् । त्रिषु लोकेषु विख्यातं नाम्ना शिवचतुर्द्दशी । मार्गशीर्षे त्रयोदश्यां सितायामेकभोजनः । प्रार्थयेद्देवदेवेशं त्वामहं शरणङ्गतः । चतुर्द्दश्यां निराहारः समभ्यर्च्य च शङ्करम् । सुवर्णवृषभं कृत्वा भोक्ष्येऽहमपरेऽहनि । एवं नियमकृत् सुप्त्वा प्रातरुत्थाय मानवः । कृतस्नानजपः पश्चादुमया सह शङ्करम् । पूजयेत् कमलैः शुक्लैः गन्धधूपानुलेपनैः” । “पञ्चदश्यां ततः पूज्य विप्रान् भुञ्जीत वाग्यतः । तद्वत् कृष्णचतुर्द्दश्यामेतत् सर्व्वं समाचरेत् । चतुर्द्दशीषु सर्व्वासु कुर्य्यात् पूर्व्ववदर्च्चनम् । ये तु मासविशेषास्तु तान्निबोध क्रमादिह । मार्गशीर्षादिमासेषु क्रमादेतदुदीरयेत्” । मासविनान्यपिति शेषम् इत्यादि ।

शिवनक्तव्रतं भविष्यपु० “कृष्णाष्टमीं तु नक्तेन कृत्वा कृष्णचतुर्द्दशीम् । इह भोगानवाप्नोति परत्र शिवसंस्थितिम्” ।

शिवरथव्रतं विष्णुधर्म्मोत्तरे “कृत्वैकभक्तं हेमन्ते माघमासे तु यन्त्रितः । माघान्ते च रथं कुर्य्याच्छिवस्योपशोभितम् । श्वेतैश्चतुर्भिः संयुक्तं वृषभैः समलङ्कृतम् । शोभितं ध्वजमालाभिश्चित्रचामरदर्पणैः । तन्दुलाढकपिष्टेन लिङ्गं कृत्वा सवेदिकम् । विन्यस्य रथमध्ये तु पूजयेत् कृतलक्षणम् । तद्रात्रौ राजमार्गे च शङ्खभेर्य्यादिभिः स्वनैः । भ्रामयित्वा ततः पश्चाच्छिवायतनमानयेत् । तत्र जागरपूजाभिः प्रदीपाद्युपशोभितैः । प्रेक्षणीयप्रदानैश्च क्षपयेत शनैर्निशाम् । प्रभाते स्नापनं कृत्वा तद्भक्तानाञ्च भोजनम् । दीनान्धकृपणानाञ्च यथाशक्त्या च दक्षिणाम् । रथं शोभासमायुक्तं शिवाय विनिवेदयेत् । भुक्त्वा च बान्धवैः सार्द्धं प्रणम्येशं व्रजेत्” ।

शिवरात्रिव्रतं स्कान्दपु० नागरखण्डे “माघस्य कृष्णपक्षीय तिथिश्चैव चतुर्द्दशी । तस्या रात्रिः समाख्याता शिव-

रात्रावितरि दिवा ॥ अस्यां सर्व्वेषु लिङ्गेषु सदा संक्रमते हरः। विशेषादमरैः सर्व्वैः ख्याता सैवं कलेश्वरे। माघमासस्य कृष्णायां चतुर्द्दश्यां सुरेश्वर!। अहं यास्यामि भूपृष्ठे रात्रौ नैव दिवा कलौ। लिङ्गेषु च समस्तेषु चलेषु स्थावरेषु च। प्रपूजयेत् सम्पदिच्छुः सर्व्वपापविशुद्धये। तस्यां रात्रौ हि मे पूजां यः करिष्यति मानवः। मन्त्रैरेतैः सुरश्रेष्ठ! विपाप्मा स भविष्यति"। स्कन्दपु० "माघमासे तु या कृष्णा फाल्गुनादौ चतुर्द्दशी। सा तु पुण्या तिथिर्ज्ञेया सर्व्वपापविनाशिनी। शान्तात्मा क्रोधहीनस्तु तपस्वी ज्ञानदायकः। तस्मै देयमिदं देवि! गुरुपादानुगे सदा। अन्यथा यो ददातीदं स दाता नरकं व्रजेत्। वर्षे वर्षे महादेवि! नरो नारी पतिव्रता। वीक्षयामि जगत् सर्व्वं यो मां भक्त्या प्रपूजयेत्। शिवमन्त्रैर्जपं कृत्वा होममर्च्चनदीपनम्। जागरं शिवरात्र्यान्तु शिवं पश्येत् समाहितः। मम भक्तो नरो देवि! शिवरात्रेरुपोषकः। गणत्वमक्षयं दिव्यमक्षयम् शिवशासनम्। सर्व्वं कृत्वा तु भजते भोगानमृतमक्षयान्। एवं द्वादश वर्षाणि शिवरात्रेरुपोषकः। यो मां जागरते रात्रिं मनुजः स्वर्गमाप्नुयात्। अकृत्वा मां न जानाति व्रतमेतदुदाहृतम्। शिवस्य पूजयित्वा यो जागर्त्ति च चतुर्द्दशीम्। मातुः पयोधररसं न पिबेत् स कदाचन। यदीच्छेच्छाश्वतान् भोगान् दिवि देवसमः पुमान्। आगमोक्तविधिं कृत्वा प्राप्नोति सकलं फलम्"।

शिवलिङ्गव्रतं शिवधर्म्मोत्तरे "सितचन्दनतोयेन स्नाप्य लिङ्गं विलेप्य च। श्वेतैर्विकसितैः पद्मैः संपूज्य प्रणिपत्य च। पङ्कजे विमले सौम्ये निश्छिद्रे पुष्पिते घने"। सौम्ये रम्ये "मध्ये केसरजालस्य स्थाप्य लिङ्गं कनीयसम्। अङ्गुष्ठमात्रं विधिवत् सर्व्वगन्धमयं शुभम्। स्थाप्य दक्षिणमूर्त्तौ तु बिल्वपत्रैः समर्च्चयेत्। एवं योऽर्च्चयते लिङ्गं पद्मे गन्धमयं शुभम्। सर्व्वपापविनिर्म्मुक्तः शिवमेवाभिगच्छति। एतद्व्रतोत्तमं गुह्यं शिवलिङ्गं महाव्रतम्। भक्तस्य ते मयाख्यातं न देयं यस्य कस्यचित्"।

शिवव्रतं कालोत्तरे "अतःपरं प्रवक्ष्यामि व्रतानान्तु यथाक्रमम्। अष्टम्यान्तु चतुर्द्दश्यां पक्षयोरुभयोस्तथा। उपोष्य संयतो भूत्वा त्रिविधेनान्तरात्मना। ततोऽपराह्ने शुचिना विशेषात् पूजयेच्छिवम्। पूर्व्वोक्तेन विधानेन जपहोमादिमाचरेत्। पूजयेत् परया भक्त्या गुडशाकपायसादिकैः। ततस्तु पञ्चगव्येन प्राशयेत् कुशत्रयम्। अनन्तरोपसंस्पृश्य हविष्यान्नेन वर्त्तनम्। अनेन विधिना यस्तात् यावज्जीवं व्रतं चरेत्। पिता पितामहश्चैव तथैव प्रपितामहः। वसन्ति शिवलोकेषु शिवव्रतप्रभावतः। एतच्छिवव्रतं नाम व्रतानामुत्तमोत्तमम्"। तत्रैवान्यत्र "पौषमासे तु सम्प्राप्ते पक्षयोरुभयोः सुत!। चतुर्द्दश्यामथाष्टम्यां पौर्णमास्यामथापि वा। नित्यं निर्व्वर्त्त्य विधिवत् ततः काम्यं समाचरेत्। विशेषपूजा तत्रैव कर्त्तव्या शुद्धचेतसा। नैवेद्यं चाढकप्रस्थं खण्डक्षीराज्यसंस्कृतम्। रुद्रसंख्यांस्तु वै विप्रान् भोजयेच्चैव दक्षयेत्। वितस्तिमात्रां प्रकृतिं शालिपिष्टेन निर्म्मिताम्। सघण्टाङ्कुरचामरां कृतभूषान्तु कारयेत्। शिवाय तु प्रदातव्या कपिला गुरवे ततः। सर्व्वाङ्गनसमायुक्ता व्रतपुण्यमतः शृणु!"। वर्षाख्यम् "अनेन विधिना माघे खड्गं पिष्टमयं शिवे। समर्प्य च विधानेन चक्रवर्त्तिपदं लभेत्। फाल्गुने तु तथा चक्रं निवेद्य तत्पदं लभेत्। चैत्रे शिवं पिष्टमयं निवेद्य च शिवाग्रतः। स तुष्यति ब्रह्महत्यां शिवलोकमवाप्नुयात्। वैशाखे चापि दण्डाग्रं शिवस्याग्रे निवेदयेत्। हस्त्यश्वं पिष्टकं कार्य्यं पूजान्ते तु निवेदयेत्। मुच्यते सर्व्वपापेभ्यो रुद्रलोके महीयते। ज्यैष्ठे पिष्टमयं खड्गं शिवाय विनिवेदयेत्। मुच्यते तु कृतघ्नत्वाद्रुद्रलोके तु गच्छति। आषाढ़े पिष्टजं पात्रं शिवाय विनिवेदयेत्। मुच्यते दुष्कृतैः सर्व्वैरिह जन्मनि सञ्चितैः। ध्वजं पिष्टमयं यस्तु शिवस्याग्रे निवेदयेत्। श्रावणे तु विधानेन सोऽक्षयं मोक्षमाप्नुयात्। मासे भाद्रपदे यस्तु गदां पिष्टमयीं ददेत्। निधीशत्वं स सम्प्राप्य शिवलोके महीयते। मासि चाश्वयुजे शूलं दद्याद्वै पिष्टसम्भवम्। शिवाय पुरतो देव भ्रूणहत्यां व्यपोहति। कार्त्तिके तु गदाचक्रं शिवस्याग्रे निवेदयेत्। सप्तजन्मकृतं पापं दहत्यग्निरिवेन्धनम्। मासे वै मार्गशीर्षे तु कमलं पिष्टसम्भवम्। शिवाय विधिना देयं सर्व्वैश्वर्य्यमवाप्नुयात्। सर्व्वेषाञ्चैव नक्तन्तु व्रतानां कीर्त्तितं मया। नित्यपूजान्तु निर्व्वर्त्त्य काम्यपूजान्तु कारयेत्"। तत्रैवान्यत्र "अश्वं वै मार्गशीर्षे तु यस्तु पिष्टमयं ददेत्। शिवं सम्पूज्य विधिवत् सूर्य्यलोके महीयते। दिव्यं वर्षसहस्रन्तु तदन्ते स्यान्महीपतिः। पौषे पिष्टमयी दन्ती शिवस्याग्रे निवेद्यते। त्रिःसप्तकुलसंयुक्तः शिवलोके महीयते।

दिव्यं वर्षसहस्रन्तु तदन्ते स्यान्महीपतिः। चक्रवर्त्ती महावीरः सर्व्वैश्वर्य्यसमन्वितः। माघे चाम्बरथं यस्तु शिवाय विनिवेदयेत्। उद्धरेत्सोऽपि नरकात् स्वपितॄन् रौरवादितः। शिवलोके तु वसति दिव्यवर्षायुतत्रयम्। तदन्ते तु महीं कृत्स्नां न च खण्डां भुनक्ति सः। फाल्गुने हययूथन्तु पिष्टोत्थं रुद्रसंख्यया। निवेद्य तु शिवस्याग्रे त्रैलोक्याधिपतिर्भवेत्। दिव्यं वर्षसहस्रन्तु तदन्ते स्यान्महीपतिः। चक्रवर्त्ती महावीरः सर्व्वैश्वर्य्यसमन्वितः। चैत्रे गृहमिन्दुमयं दासदासीसमन्वितम्। गृहोपकरणैर्युक्तं विचित्राङ्गणचर्च्चितम्। पूजान्ते परया भक्त्या शिवाय विनिवेदयेत्। दिव्यवर्षशतान्यष्टौ रुद्रलोके महीयते। जातिस्मरस्तदन्ते तु चक्रवर्त्तित्वमाप्नुयात्। त्रीन् वैशाखसंज्ञे तु सप्तव्रीहिशरावकान्। शिवाय पुरतो दद्यात् पूजान्ते प्रीतचेतसा। स याति शिवसायुज्यं बन्धुभिः सहितो नरः। पलानां द्वे शते यस्तु गुग्गुलन्तु दहेत् सुधीः। ज्यैष्ठे मासि शिवस्याग्रे पूजान्ते भक्तिसंयुतः। त्रिःसप्तकुलसंयुक्तः शिवलोके महीयते। तदन्ते पृथिवीं भुङ्क्ते न च खण्डां ससागराम्। बलिमण्डलकं कार्य्यं आषाढ़े शूलपाणिनः। नानाभक्ष्यैर्विरचितं नानाभक्ष्यसमन्वितम्। नानाचित्रसमाकीर्णं कर्त्तव्यं बलिमण्डलम्। संपूज्य परमेशानं ततस्तस्य निवेदयेत्। पितॄन् पितामहांश्चैव उद्धृत्य प्रपितामहान्। पुत्त्रपौत्त्रसमायुक्तः शिवलोके महीयते। दिव्यवर्षसहस्राणि तदन्ते पृथिवीपतिः। श्रावणे मासि देवस्य विमानं पुष्पसम्भवम्। पूजावसाने दातव्यं विचित्ररचनाकुलम्। वर्षायुतप्रमाणन्तु रुद्रलोके महीयते। योगीशो जायते शान्तो येन मोक्षं व्रजेत्तु सः। मासि भाद्रपदे यस्तु रुद्रपूजां चरेत् तदा। गुग्गुलं प्रथमं धूपं सुरदारु ततो दहेत्। बिल्वबीजं घृतं तद्वत् तथा नानाघृतान्वितम्। पञ्चमं ह्यगुरुं दद्यात् धूपं सर्व्वात्मना विभोः। मासमेकन्दहेद्यस्तु नैरन्तर्य्येण भक्तितः। याति सायुज्यतां शम्भोः सपुत्त्रः सहबान्धवः। यस्त्वर्कपत्त्रपुटकं पूरयेत् क्षीरसर्पिषा। मासमश्वयुजं शम्भोर्नैरन्तर्य्येण भक्तितः। तस्य पुण्यफलं वक्तुं न शक्तोऽस्मि षड़ानन!। तत्कुले पतिता ये तु छिन्नाछिन्नाहता पुनः। ते प्रयान्ति महाभागा रुद्रलोके ह्यनामयम्। वर्षायुतायुतं साग्रं तदन्ते तु नरेश्वराः। जायन्ते शिवभक्ताश्च ज्ञानिनो वीतकल्मषाः। शिवदीक्षां समासाद्य ते यान्ति परमाङ्गतिम्। वस्त्राहृतमिक्षुरसं पुटकन्तु शिवाग्रतः। पूजान्ते दापयेद्यस्तु मासि प्राप्ते च कार्त्तिके। देहान्ते रुद्रलोके तु मोदते सह बान्धवैः। व्रतान्ते चैव संपूज्य शिवभक्तान् यथाविधि। हेमवस्त्रान्नपानैश्च वित्तशाठ्यं विना सुत!"। पद्मपु० "आषाढ़ादिचतुर्मास्यां वर्जयेन्नखकृन्तनम्। वृन्ताकभक्षणञ्चैव मधुसर्पिर्घटान्वितम्। कार्त्तिक्यान्तु पुनर्हैमं ब्राह्मणाय निवेदयेत्। रुद्रलोकमवाप्नोति शिवव्रतमनुत्तमम्"।

शिवाचतुर्थीव्रतं भविष्यपु० "शिवा शान्ता सुखा राजन्! चतुर्थी त्रिविधा स्मृता। मासि भाद्रपदे शुक्ला शिवा लोकेषु पूजिता। तस्यां स्नानं तथा दानमुपवासो जपस्तथा। क्रियमाणं शतगुणं प्रसादाद्दन्तिनो नृप!। गुड़लवणघृतानां दानं शुभकरं स्मृतम्। गुड़पूपास्तथा वीर! पुण्यं ब्राह्मणभोजनम्। चतुर्थ्यां नरशार्दूल! पूजयेत सदा स्त्रियः। गुड़लवणपूपाभिः श्वश्रूश्वशुरमातरः। ताः सर्वा सुभगा, स्युर्वै विघ्नेशस्यानुमोदनात्। कन्यकाश्च विशेषेण विधिनानेन पूजयेत्"।

शिवोपवीतव्रतं शिवधर्म्मोत्तरे "पौर्णमास्यां तथाषाढ्यां शिवं संपूज्य यत्नतः। उपवीतं शिवे दद्याच्छिवभक्तांश्च भोजयेत्। पुनरेव च कार्त्तिक्यां पूज्य शम्भुं समापयेत्। यतीनां दक्षिणां दत्त्वा छत्रवस्त्रादिपूर्व्विकाम्। यः कुर्य्यात् सकृदप्येवं चातुर्मास्यं पवित्रकम्। कल्पकोटिसहस्राणि रुद्रलोके महीयते"।

शीलतृतीयाव्रतं पद्मपु० "अनग्निपक्वमश्नाति तृतीयायान्तु यो नरः। गां दत्त्वा शिवमभ्येति पुनरावृत्तिदुर्लभम्। इहदानन्दकृत् पुंसां शीलव्रतमिदं स्मृतम्"।

शीलावाप्तिव्रतं विष्णुधर्म्मोत्तरे "भगवन्! कर्म्मणा केन शीलवान् पुरुषो भवेत्। कुलजातिश्रुतेभ्यस्तु शीलमेव विशिष्यते"। मार्कण्डेय उवाच "आषाढ़ायामतीते तु मासमेकं दिने दिने। पूर्व्ववत् पूजयेद्देवं वराहमपराजितम्। घृतेन स्नापयेद्देवं घृतेन जुहुयाद्धरिम्। घृतं द्विजेभ्यो दद्याच्च घृतमेव निवेदयेत्। त्रिरात्रोपोषितः पौष्यां घृतपात्रेण च द्विजम्। पूजयेच्च सुवर्णेन यथाशक्ति नराधिप!। कृत्वा व्रतं मासमिदं यथोक्तमासाद्य नाकं सुचिरं मनुष्यः। मानुष्यमासाद्य च शीलवान् स्यात् प्राप्नोति पुष्टिं चिरजीवितञ्च"।

शुक्रव्रतं भविष्योत्तरोक्तम् "शुक्रं ज्येष्ठाय संप्राप्य पूजये-

नक्तभोजनः । पूर्वोक्तक्रमयोगेण द्विजसन्तर्पणेन तु । सप्तमे त्वथ संप्राप्ते सौवर्णं कारयेत्सुतम् (शुक्रम्) । रौप्ये वा कांस्यपात्रे वा स्थापयित्वा भृगोः सुतम् । संपूज्य परया भक्त्या श्वेतवस्त्रानुलेपनैः । रूपे तस्य प्रदातव्यं पायसं घृतसंयुतम्" ।

शुद्धिव्रतं वह्निपु० "एवं या द्वादश मासानुपोष्यैकादशीं बुधः । स यः करोति शुद्धात्मा कृतकृत्यः सुखी भवेत् । सुनामद्वादशी पूज्या नाम्ना द्वादशभिस्तथा । द्वादश धेनवो देया हरिः कामान् प्रयच्छति । दिवि देवाः स देवेन्द्राः कृत्वा कर्माण्यनेकशः । पश्चादाराधयन्तीह हरिं शुद्धिव्रतेन हि" ।

शुभद्वादशीव्रतं वराहपु० "शृणु राजन् ! महाभाग ! शुभव्रतमनुत्तमम् । येन सम्प्राप्यते विष्णुः शुभेनैव न संशयः । मासि मार्गशिरे पुण्ये प्रथमाद्दात् समाचरेत् । एकभक्तं सिते पक्षे यावत् स्याद्दशमी तिथिः । ततो दशम्यां मध्याह्ने स्नात्वा केशवमर्चयेत् । भुक्त्वा सङ्कल्पतः प्राग्वद् द्वादश्यां शुद्धमानसः । केशवेति हरिं पूज्य दद्यात्तत्प्रीतये तिलान् । सहिरण्यं तथा कृष्णद्वादश्यां प्रयतो नृप ! । तामप्येवमुषित्वा च यवान् दद्याद् द्विजातये । कृष्णायेति हरिर्वाच्यो दाने होमे तथार्चने । चातुर्मास्यामथैवन्तु क्षपित्वा राजसत्तम ! । चैत्रादिषु पुनस्तद्वदुपोष्य प्रयतः शुचिः । सक्तुपात्राणि विप्राणां सहिरण्यानि दापयेत् । श्रावणादिषु मासेषु तद्वद्गोविन्दमर्चयेत् । त्रिषु मासेषु यावत्तु कार्त्तिकः स्यादिहागतः । तमप्येवं क्षपयित्वा दशम्यां प्रयतः शुचिः । अर्चयित्वा हरिं भक्त्या मासनाम्ना विचक्षणः" ।

शुभसप्तमीव्रतं पद्मपु० "अन्यामपि प्रवक्ष्यामि शोभनां शुभसप्तमीम् । यामुपोष्य नरो रोगात् शोकदुःखात् प्रमुच्यते । शुक्ले चाश्वयुजे मासि कृतस्नानजपः शुचिः । वाचयित्वा द्विजान् शान्तानारभेच्छुभसप्तमीम् । कपिलां पूजयेद्भक्त्या गन्धमाल्यानुलेपनैः । नमामि सूर्यसम्भूतामशेषभुवनालयाम् । त्वामहं शुभकल्याणशरीरां सर्वसिद्धये । अथाहृत्य तिलप्रस्थं ताम्रपात्रे कृतं नवम् । काञ्चनं वृषभं तद्वद्वस्त्रमाल्यगुडान्वितम् । फलैर्नानाविधैर्भक्ष्यैः सर्वोपस्करसंयुतैः । दद्याद्विकालवेलायामर्यमा प्रीयतामिति । पञ्चगव्यं तु संप्राश्य स्वपेद्भूमौ विमत्सरः । ततः प्रभाते सुस्नातो भक्त्या सन्तर्पयेद् द्विजान् । अनेन विधिना दद्यात् मासि मासि सदा नरः । वाससी वृषभं हैमं तद्वच्छन्दोऽश्वपूजनम् । तत्परान्ते च शयनमिक्षुदण्डगुणान्वितम् । सोपधानकविश्रामभाजनासनसंयुतम् । ताम्रपात्रे तिलप्रस्थं सौवर्णवृषभैर्युतम् । दद्याद्वेदविदे सर्वं विश्वात्मा प्रीयतामिति" ।

शूलदानव्रतं शिवधर्मोत्तरे "अमावस्यां निराहारः अष्टमेकं नियमान्वितम् । शूलं पिष्टमयं कृत्वा वर्षान्ते विनिवेदयेत् । शिवाय राजतं पद्मं सौवर्णकृतकर्णिकम् । भक्त्या च विन्यसेत् मूर्ध्नि शेषं पूर्ववदाचरेत् । कामतोऽपि कृतं पापं भ्रूणहत्यादिकञ्च यत् । तत् सर्वं शूलदानेन नश्यत्येव न संशयः । महापद्मविमानेन नरो नारीसमन्वितः । युगकोटिशतं साग्रं शिवलोके महीयते" ।

शैलव्रतं विष्णुधर्मोत्तरे "अथातः संप्रवक्ष्यामि तव शैलव्रतं शुभम् । महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि । विन्ध्यश्च पारिपात्रश्च सप्तैते कुलपर्वताः । चैत्रशुक्लमारभ्यात् प्रत्यहं दिनसप्तकम् । तेषां संपूजनं कृत्वा बहिःस्नानं समाचरेत् । गन्धमाल्यनमस्कारधूपदीपान्नसम्पदा । यत्नैर्होमं तथा कुर्याद् दद्याद्विप्रे यवानपि । नित्यं यवान्नमश्नीयात् कुर्यात् संवत्सरं व्रतम् । तस्यावसाने दद्यात्तु यवप्रस्थांश्च विंशतिम् । वाचकाय द्विजेन्द्राय सुवर्णं काञ्चनस्य तु" ।

शैवनक्षत्रपुरुषव्रतं विष्णुधर्मोत्तरे "उपवासेष्वशक्तानां नक्तं भोजनमिष्यते । यस्मिन् व्रते तदप्यत्र श्रूयतामिदं महत् । शिवनक्षत्रपुरुषं शिवभक्तिमतां नृणाम् । तस्मिन्नशक्तयोः च पुराणज्ञाः प्रचक्षते । फाल्गुनस्यामले पक्षे यदा हस्तः प्रजायते । तदा ग्राह्यं व्रतं चैतत्तक्तेनाभ्यर्च्य शूलिनम् । शिवायेति च हस्तेन पादौ संपूजयेद्विभोः" ।

शैवमहाव्रतं विष्णुधर्मोत्तरे "प्रतिमासं प्रवक्ष्यामि शैवव्रतमनुत्तमम् । धर्मकामार्थमोक्षाढ्यं नरनार्यादिदेहिनाम् । पौषे मासे तु सम्प्राप्ते यः कुर्यान्नक्तभोजनम् । सत्यवादी जितक्रोधः शालिगोधूमगोरसैः । पक्षयोरष्टमीं यत्नादुपवासेन वर्त्तयेत् । त्रिसन्ध्यमर्चयेदीशमग्निकार्यञ्च भक्तितः" । वर्षाध्यम् "त्रिस्नानञ्चाग्निहवनं भूशय्या नक्तभोजनम् । पक्षयोरुपवासेन चतुर्दश्यष्टमीं क्षिपेत् । इत्येवमादिनियमैराचरेत शिवव्रतम् । शिवभक्ता तु या नारी ध्रुवं वा पुरुषो भवेत् । स्त्रीत्वमत्युत्तमं वा चेत् काङ्क्षते स्वयमाद् व्रतम्" ।

शैवोपवासव्रतं भविष्यपु० "चतुर्द्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः । योऽब्दमेकं न भुञ्जीत शिवार्च्चनरतो नरः । यत् पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनाम् । तत् पुण्यं सकलं तस्य शिवलोकञ्च गच्छति" ।

शौर्य्यव्रतं वराहपु० "अतःपरं प्रवक्ष्यामि शौर्य्यव्रतमनुत्तमम् । येन भीरोरपि महत् शौर्य्यं भवति तत्क्षणात् । मासि चाश्वयुजे शुद्धा नवमी समुपोषिता । सप्तम्यां कृतसङ्कल्पः स्थित्वाष्टम्यां निरोदनः । नवम्यां प्राशयेत् पिष्टं प्रथमं भक्तितो नृप ! । ब्राह्मणान् भोजयेद्भक्त्या देवीञ्चैव तु पूजयेत् । दुर्गां देवीं महाभागां महामायां महाप्रभाम् । एवं संवत्सरं यावदुपोष्य विधिवन्नृप ! । व्रतान्ते भोजयेद्दीनान् यथाशक्त्या कुमारकान् । हेमवस्त्रादिभिः स्नातान् पूजयित्वा तु भक्तितः । पश्चात् क्षमापयेत्तांस्तु देवी मे प्रीयतामिति । एवं कृत्वा भ्रष्टराज्यो लभेद्राज्यं न संशयः । अविद्यो लभते विद्यां भीरुः शौर्य्यञ्च विन्दति" ।

महाव्रतं पद्मपु० "तत्वाधेयनं मक्षोत्पतः वैमवश्च च । स सर्व्वपापनिर्मुक्तः शिवलोके महीयते । राजा भवति सम्भूतः सार्व्वभौमो महेश्वरः । एतत् महाव्रतं नाम बहुकल्याणकारकम्" ।

श्रवणद्वादशीव्रतं भविष्योत्तरे "एकादशी यदा शुक्ला श्रवणेन समन्विता । विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा । एकादश्यां चोपवासो रात्रौ संपूजयेद्धरिम् । रौप्यसौवर्णपात्रे वा ताम्रवंशमयेऽपि वा । आच्छाद्य पात्रं वासोभिरच्छितैः पञ्चवर्णितैः । मार्गचर्मेण गव्येन भक्त्या वा शक्त्यपेक्षया । तिलाढकेन विन्यस्य प्रस्थेन कुडवेन वा । अभावे वसनोपमैः फलैः सुरतिकैर्भवेत् । पुष्पैर्गन्धैः फलैर्धूपैः कालोत्थैरर्च्चयेद्धरिम् । नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्घृतौदनैः । अविरतवाद्यवादेन वहिरक्षश्च कारयेत् । अन्येऽपि तु व्रतस्थं भक्त्या शतगुणोत्तरम् । भक्तिमन्त्रगुणोपेतं कोटिकोटिगुणोत्तरम् । एभिर्मन्त्रपदैस्तत्र पूजयेद्गरुडध्वजम् । उपहारैर्नरेन्द्र ! शुचिर्भूत्वा समाहितः" । "एषा व्युष्टिः समाख्याता एकादश्यां मया तव । पूर्व्वमेव समाख्याता द्वादशी श्रवणान्विता । उपोष्यैकादशीं पश्चाद् द्वादशीमप्युपोषयेत् । न चात्र विधिलोपः स्यादुभयोर्द्देवता हरिः" । एकादश्यां द्वादश्यां चान्यतरस्यां वा श्रवणयुक्तायां श्रवणयुक्तोपवासेनैव व्रतस्यविधिः एकस्मिन् मते पूर्व्वस्यां तिथिमुपोष्य पश्चादपारयित्वा नान्योपोष्या इति यो विधिलोपः स एकदेवताकत्वेन न भवतीत्यर्थः । "बुध श्रवणसंयुक्ता द्वादशी सङ्गमोदकम् । स्नानं दध्योदनं तस्य गुणनायः परो विधिः । सगरेण ककुत्स्थेन धुन्धुमारेण गाधिना । एतैश्चान्यैश्च राजेन्द्र ! कामाय द्वादशीव्रतम् । या द्वादशी बुधयुता श्रवणेन सार्द्धं सा वै जयेति कथिता ऋषिभिर्नभस्ये । तामादरेण समुपोष्य नरोऽक्षरत्वमाप्नोति पार्थ ! अणिमादिगुणोपपन्नम्" । विष्णुधर्म्मोत्तरे "उपवासासमर्थानां किं स्यादेकमुपोषितम् । महाफलं महादेव ! तन्ममाचक्ष्व पृच्छतः" । हंस उवाच "या राम ! श्रवणोपेता द्वादशी महती तु सा । तस्यामुपोषितः स्नातः पूजयित्वा जनार्द्दनम् । प्राप्नोत्ययत्नाद् धर्म्मज्ञ ! द्वादशद्वादशीफलम् । दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे । वस्त्रसंवेष्टितं दत्त्वा छत्रोपानहमेव च । न दुर्गतिमवाप्नोति जातिमग्र्याञ्च विन्दति । अक्षय्यं स्थानमाप्नोति नात्र कार्य्या विचारणा । श्रवणद्वादशीयोगे बुधवारो भवेद् यदि । अत्यन्तमहती नाम द्वादशी सा प्रकीर्त्तिता । स्नानं जप्यं तथा दानं होमः श्राद्धं सुरार्च्चनम् । सर्व्वमक्षयमाप्नोति तस्यां भृगुकुलोद्वह ! । तस्मिन् दिने तथा स्नातो यत्र कचन सङ्गमे । स्वर्गङ्गास्नानजं राम ! फलं प्राप्नोत्यसंशयम् । श्रवणे सङ्गमाः सर्व्वे परपुष्टिप्रदाः सदा । विशेषात् द्वादशीयुक्ते बुधयुक्ते विशेषतः । तथैव द्वादशी प्रोक्ता बुधश्रवणसंयुता । तृतीया च तथा प्रोक्ता सर्व्वकामफलप्रदा । तथा तृतीया धर्म्मज्ञ ! तथा पञ्चदशी शुभा" ।

श्रीपञ्चमीव्रतं गरुडपु० "यदिन्द्रेण पुरा चीर्णं श्रीवियुक्तेन पार्थिव ! । श्रीसम्वृद्धिकरं तद्धि शृणु श्रीपञ्चमीव्रतम् । मार्गशीर्षे सिते पक्षे पञ्चम्यां पद्मगोत्सवे । उपवासस्य नियमं कुर्य्यात् पद्मां करेद्धृदि । स्वर्णरौप्यां यथा शक्त्या ताम्रां वस्त्रकाष्ठजामथ । चित्रपटगतां देवीं लक्ष्मीं भूपाल ! कारयेत् । पद्मासनां पद्महस्तां पद्मां पद्मदलेक्षणाम् । दिग्गजेन्द्रैः स्नाप्यमानां काञ्चनैः कलशोत्तमैः" । लक्ष्मीरूपनिर्माणन्तु विष्णुधर्म्मोत्तरोक्तं वेदितव्यम् । तद्यथा "सम्यस्थिता श्रीः कर्त्तव्या गङ्गाम्बुजकरा शुभा । सुखासिता महाभाग ! पद्मे पद्मकरा शुभा । द्विभुजा चारुसर्व्वाङ्गी सर्व्वाभरणभूषणा । द्वौ च मूलकरौ मूर्द्ध्नि कार्य्यौ विद्याधरौ शुभावितौ । ततो

यामद्वये याते निम्नगायां तडागे वा । स्नानं कुर्य्यादसंभ्रान्तः भक्तिमदुपचारतः । देवान् पितॄंश्च सन्तर्प्य ततो देवगृहं व्रजेत् । तत्रस्थां पूजयेद्देवीं पुष्पैस्तत्कालसम्भवैः । फलानि च यथालाभं विरूढं धान्यसप्तकम् । ततः सुवासिनी पूज्या कुङ्कुमैः कुसुमेन च । भोजयेन्मधुरान्नेन प्रणिपत्य विसर्जयेत् । ततस्तु तण्डुलप्रस्थं घृतपात्रेण संयुतम् । ब्राह्मणाय प्रदातव्यं वा श्रीर्मे प्रीयतामिति । निर्वर्त्तितद्वयेनैव ततो भुञ्जीत वाग्यतः । मासानुमासं कर्त्तव्यं विधिमानेन भारत ! ! श्रीर्लक्ष्मीः कमला सम्पत् पद्मा नारायणी तथा । पद्मा धृतिः स्थितिः पुष्टिस्तुष्टिः सिद्धिः रमा क्रमात् । मासानुमासं राजेन्द्र ! प्रीयतामिति कीर्त्तयेत् । वस्त्रमण्डपिकां कृत्वा पुष्पगन्धादिवासिताम् । शय्यायां स्थापयेल्लक्ष्मीं सर्व्वोपस्करसंयुताम् । सौभाग्याष्टकसंयुक्तां नेत्रपट्टावृतस्तनीम् । सप्तधान्यसमोपेतां रसधातुसमन्विताम् । पादुकोपानहच्छत्रभाजनासनसंयुताम् । देवीं संपूज्य विधिवद् ब्राह्मणाय कुटुम्बिने । व्यासाय वेदविदुषे यद्वा वा रोचते स्वयम् । सोपस्करां सवत्साञ्च धेनुं दत्त्वा क्षमापयेत् । यः पञ्चमीव्रतमिदं चरितं सुरारेर्भक्त्या समाचरति पूज्य जलधेस्तनूजाम् । राज्यश्रियं स भुवि भव्यजनोपभोग्यं भुक्त्वा प्रयाति भवनं मधुसूदनस्य । माहात्म्यमपि वक्ष्यामि पञ्चम्यास्तव भारत ! । जयेति या च विख्याता व्रतिनां जयदायिनी । यस्याञ्जया जयामन्त्रं करोति व्रतिनो बुधाः ! । परिपूर्णं व्रतं यस्यां वा सैवा जयपञ्चमी । जया च विजया चैव जयन्ती पापनाशिनी" । यथा, कार्त्तिकशुक्लपञ्चमी "मन्त्रेण यदा युक्ता शुक्लपक्षे तु पञ्चमी । उत्तराफाल्गुनी यस्यामिन्दुवारसमागमः । आरभेत नरस्तस्यां व्रत पूर्व्वमुपोषितः । धर्म्मिकमन्त्रासी ब्रह्मचारी जितेन्द्रियः । धृतिमान् कृतसङ्कल्पो भवेच्छ्रियमवाश्वरः । ततः कल्यं समुत्थाय स्नात्वा नियतमानसः । धृतसङ्कल्पया पत्न्या कुर्य्याद् बिल्वस्य चार्च्चनम् । बिल्वमूले ततः कुर्य्याद् वेदिं पुष्पाक्षतैर्युताम् । स्थापयेत् कलसानष्टौ तस्यामष्टसु दिक्षु वा । तन्मध्ये बिल्वमूले तु स्थापयेन्महाघटम् । सौवर्णं राजतं ताम्रं मार्त्तिकं वा शुभान्वितम्" इत्यादि ।

श्रीप्राप्तिव्रतं विष्णुधर्म्मोत्तरोक्तं "श्रीविहीनस्य लोकेऽस्मिन् जीवितस्यापि किं फलम् । तस्माद्व्रतं समाचक्ष्व येन स्याच्छ्रीयुतो नरः" । मार्कण्डेय उवाच "चैत्रास्यां समतीतायां प्रतिपद्गच्छति क्रमात् । पूर्व्ववत् पूजयेद्देवं श्रीधरार्थं दिने दिने" । पूर्व्ववदिति चैत्रादिरूपावाप्तिव्रतवत् । "पुष्पमूलैः फलैश्चैव जुहुयादक्षतानि च । बिल्वांश्च वह्नौ सततं गोरसैर्भोजयेद् द्विजान् । त्रिरात्रोपोषितो भक्त्या कनकं प्रतिपादयेत् । वस्त्रयुग्मञ्च राजेन्द्र ! तेन साफल्यमश्नुते । कृत्वा व्रतं मासमिदं यथोक्तमासाद्य मासं रुचिरं मनुष्यः । मनुष्यभावाच्च विशुद्धतेजाः श्रिया युतः स्याज्जगति प्रधानम्" ।

श्रीवृक्षनवमीव्रतं भविष्योत्तरे "तस्माद्भाद्रपदे चैव शुक्लपक्षे कुरूत्तम ! । नवम्यामर्च्चयेद्भक्त्या ईषत्सूर्य्योदयेऽनघ ! । श्रीवृक्षं विविधैरन्नैरनग्निपतितैः फलैः । तिलपिष्टान्नगोधूमैर्धूपगन्धानुलेपनैः । ईशस्यानुचराकान्त ! श्रीतरो वै नमस्तुते । मन्त्रेणानेन राजेन्द्र ! पूजयेद्भक्तिसंयुतः । सप्रदक्षिणतोऽभ्यर्च्च्य श्रीवृक्षं प्रणिपत्य च । ब्राह्मणान् भोजयेद्भक्त्या श्रीदेवी प्रीयतां मम । ततो भुञ्जीत मौनेन तैलाहारविवर्ज्जितम् । अनग्निपक्वं स्थाल्यां दधिधान्यफलं शुभम् । एवं यः कुरुते पार्थ ! श्रीवृक्षाभ्यर्च्चनं नरः । नारी च दुःखशोकाभ्यां मुच्यते नात्र संशयः" ।

श्रीव्रतं विष्णुधर्म्मोत्तरे "चैत्रशुक्लस्य पञ्चम्यां पूजयित्वा तथा श्रियम् । सकृद्दिवाशु यादेतत् फलं संवत्सरोदितम्" । "अथातः संप्रवक्ष्यामि श्रीव्रतं नाम ते व्रतम् । चैत्रशुक्लतृतीयायां स्नानमभ्यङ्गपूर्व्वकम् । कृत्वा शुक्लाम्बरो राजन् कुङ्कुमाल्यानुलेपनः । तिष्ठेद् दन्तोदनाहारो भूमौ स्वापमियां च ताम् । चतुर्थ्याञ्च तथा स्नानं बहिरेव समाचरेत् । पञ्चम्याञ्च विशेषेण शुक्लाम्बरधरः शुचिः । लक्ष्मीं संपूजयेत् पद्मैः कृतकैरकृतकैरपि वा । शुक्लेन गन्धमाल्येन घृतदीपेन चाप्यथ" इत्यादि ।

षष्ठीव्रतं ब्रह्मपु० "कृतोपवासः पञ्चम्यां षष्ठ्यां योऽर्च्चयते रविम् । नियमव्रतचारी च रवेर्भक्तिसमन्वितः । सप्तम्यां वा महाभाग ! सोऽश्वमेधफलं लभेत्" । विष्णुधर्म्मोत्तरे "षष्ठ्याञ्च शुक्लपक्षस्य ये नरा भौमवासरे । व्रतञ्चरन्ति यत्नेन तथा तासां पृथक् पृथक् । न तेषां दुर्लभं किञ्चित् भविष्यति सुरोत्तम ! । द्वियोगे हि गुणं तेषां फलं स्कन्द ! भविष्यति । त्रियोगे पूजनं कृत्वा मासेषु सुरसत्तम ! । अक्षयं जायते पुण्यं नात्र कार्य्या विचारणा" ।

संवत्सरव्रतं विष्णुधर्म्मोत्तरे "इदमन्यत् प्रवक्ष्यामि पञ्च-

मूर्त्तिव्रतं तव। संवत्सरः स्मृतो वह्निस्तथार्कः परिवत्सरः। इदापूर्वस्तथा सोमो ह्यनुपूर्वः प्रजापतिः। उत्पूर्वश्च तथा प्रोक्तो देवदेवो महेश्वरः। तेषां मण्डलविन्यासः मासस्यैव विधीयते”। पञ्चवर्णैरिति नीलश्वेतरक्तपीतकृष्णैः मण्डलविन्यासः कर्त्तव्यः “प्रागवत् प्रपूजनं कार्यं होमः कार्यो यथाविधि। तिलैर्व्रीहियवैश्चैव घृतेन सितसर्षपैः। तल्लिङ्गैरथ वा मन्त्रैर्नामभिः प्रत्यहं क्रमात्। नक्ताशनस्तथा तिष्ठेत् प्राग्वद्दिवसपञ्चकम्। चैत्रशुक्लं समारभ्य पञ्चमीप्रभृतिक्रमात्। संवत्सरान्ते वर्षेत व्रतमेतत् समाचरेत्। पूजावसाने दातव्याः सुवर्णाः पञ्च यादव!। चतुर्वेदविदे देयं शाखाभेदेन यादव!। एकैकं पञ्चकं देयं यथाशास्त्रमिदं भवेत्। वह्नेर्लोकमवाप्नोति कामचारी विहङ्गमः”।

षट्पाटकव्रतं वराहपु० “शृणुष्वैकमना भद्रे! षट्पाटकमिदं व्रतम्। कथयामि महापूर्वं ब्रह्मणा कथितं मम। मासस्य कार्त्तिकस्यापि शुक्लप्रतिपदि व्रतम्। गृहीयादेवमनन्तु कृत्वा दन्तादिशोधनम्। सायं सङ्कल्पमाधाय द्वितीयायामुपावसेत्। तृतीयायामपि तथा चतुर्थ्यां पारणं भवेत्। शिवं संपूजयेद्भक्त्या उपवासद्वयेऽपि च। यत्र विनोपचारेण रात्रौ दद्यात्ततो भुवि। स्वपेत् प्रातः समुत्थाय स्नात्वा देवं समर्चयेत्”।

सन्तानदव्रतं भविष्योत्तरोक्तम् “कार्त्तिक्यामुपवासी यः कन्यां दद्यात् स्वलङ्कृताम्। स्वकीयां परकीयां वा नदीसङ्गमके शुभे। एतत् सन्तानदं नाम व्रतं सुगतिदायकम्”।

सन्तानाष्टमीव्रतं विष्णुधर्मोत्तरे “कृष्णाष्टम्यां चैत्रमासे स्नातो नियतमानसः। कृष्णमभ्यर्च्य पूजाञ्च देवक्याः कुरुते च यः। निराहारो नरः पश्चात् कृष्णस्य जगतः पतेः। उपोषितो जपन्मन्त्रं रात्रौ प्रयतमानसः। पूजायाञ्चापि कृष्णस्य सप्त वारान् प्रकीर्त्तयेत्। पाषण्डिनो विकर्मस्थान् वैडालान् बकनास्तिकान्। प्रभाते च ततः स्नातो दत्त्वा विप्राय दक्षिणाम्। भुञ्जीत व्रत पूजस्तु कृष्णस्यैव जगत्पतेः। वैशाखज्यैष्ठयोश्चैव पारणं हि त्रिमासिकम्। उपोष्य देवदेवेशं घृतेन स्नापयेद्धरिम्। आषाढे श्रावणे चैव मासि भाद्रपदे तथा। उपोषितो द्वितीयं वै पारणं पूर्ववद्भवेत्। आश्विने कार्त्तिके सौम्ये तृतीयं पारणं तथा। पौषे माघे फाल्गुने च चतुर्थं त्रिमासकम्!। पारणे पारणे पूर्वं घृतेन स्नापयेद्धरिम्। ब्राह्मणेभ्यो घृतं दद्यात्तथैव प्रतिपारणम्। कृत्वा व्रतं नाकमनुप्रयाति मानुष्यमासाद्य च निर्वृतः स्यात्। सन्तानवृद्धिञ्च तथाश्नुतेऽसौ यावन्महीं सागरमेखलान्ताम्।

सप्तर्षिव्रतं विष्णुधर्मोत्तरे “चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम्। मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम्। वशिष्ठञ्च महाभागं पूजयेत् दिवसक्रमात्। कालोद्भवैः फलैः पुष्पैः गोरसैश्च फलान्वितैः। आचरेत् प्रत्यहं स्नानं बहिर्नक्ताशनो भवेत्। महाव्याहृतिभिर्होमं तिलैर्नित्यं समाचरेत्। तर्पयेद्ब्राह्मणांश्चात्र फलमूलैश्च गोरसैः। वारिधान्यश्च दातव्याः क्षीरपूर्णा द्विजातिषु। एवं संवत्सरं कृत्वा व्रतान्ते चाऽऽहिताग्नये। दद्यात् कृष्णाजिनं राजन्! यथापूर्वं मयेरितम्। व्रतमेतन्नरः कृत्वा भोगोपायस्य विन्दति”।

सप्तसारस्वतव्रतं विष्णुधर्मोत्तरोक्तम् “चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम्। सुप्रभां काञ्चनाक्षीञ्च विशालां मानसोद्भवाम्। मेघनादां सुवेणुञ्च तथैव विमलोदकाम्। नित्यं संपूजयेद्भक्त्या बहिःस्नानं समाचरेत्। तासाञ्च प्रत्यहं नाम्ना दध्ना होमं समाचरेत्। ब्राह्मणान् भोजयेच्चात्र दध्ना युक्तं सुभोजनम्। घृतोदनं तथाश्नीयात्सकृदेव तथा निशि। एवं संवत्सरं कृत्वा व्रतं सारस्वतं नरः। तत्रोष्य सुचिरं कालं मानुष्ये जायते यदा” इत्यादि।

सप्तसुन्दरकव्रतं भविष्योत्तरोक्तम् “एकभक्ता च सप्ताहं गौरिक्षीरेण भोजयेत्। संपूज्य पार्वतीं भक्त्या गन्धपुष्पविलेपनैः। ताम्बूलसिन्दूरवरैर्नारिकेलफलेन च। प्रीयतां कुमुदा देवी प्रणिपत्य विसर्जयेत्। एवैवां पूजयेद्देवीं सप्ताहं यावदेव तु। पुनश्च सप्तमे प्राप्ते ताः सप्तैव निमन्त्रयेत्। षड्भ्यः सम्भोजयित्वान्नं यथाशक्त्या विभूषणैः। भूषयित्वा माल्यवस्त्रैः कर्णवेष्टाङ्गुलीयकैः। कुमुदा माधवी गौरी भवानी पार्वती उमा। अम्बिका चेति संपूज्या दर्पणं दापयेत् पृथक्। ब्राह्मणं पूजयेत्त्वेकं वाच्यं सम्पन्नमस्तु मे। सप्तसुन्दरकं नाम व्रतं पापहरं शुभम्। कृत्वा प्राप्नोति सौन्दर्यं सौभाग्यमतुलं तथा”।

समुद्रव्रतं विष्णुधर्मोत्तरे “अथातः संप्रवक्ष्यामि समुद्रव्रतमेव ते। चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम्। लवणं क्षीरं घृतं दधिमण्डं सुरोदकम्। तथैवेक्षुरसोद

स्वादुदम्भेन पूजयेत् । आचरेत् प्रत्यहं स्नानं शुचिर्भूत्वा तथा वाग्यतः । घृतेन होमं कुर्वीत सम्प्राप्य प्रदापयेत् हविष्याशी भवेन्नक्तं कुर्य्यात् संवत्सरं व्रतम् । संवत्सरान्ते दद्याच्च तथा धेनुं पयस्विनीम् । व्रतेनानेन चीर्णेन सप्तसागरमेखलाम् । भुनक्ति वसुधां राजा । सप्तजन्मान्तराणि तु" ।

सम्पूर्णव्रतं भविष्योत्तरे "संपूर्णं नाम तत्रापि व्रतं सम्यक् फलप्रदम् । यच्चीर्णं नरनारीभिर्य्यावत् संपूर्णकारकम् । अवश्यन्तच्च कर्त्तव्यं संपूर्णफलकाङ्क्षिभिः । किञ्चिन्न्यूनं प्रमादेन यद्व्रतं व्रतिनां भवेत् । तत् संपूर्णं भवेत् सर्वं व्रतेनानेन पाण्डव ! । उपद्रवैर्बहुविधैर्महामोहाच्च पार्थिव ! । यन्न्यूनं किञ्चिदेव स्यात् व्रतं विघ्नविनायकैः । तत् संपूर्णं भवेत् सर्वं सत्यं सत्यं न संशयः । काञ्चनं रौप्यकं रूपं शिल्पिना तु घटापयेत् । भग्नव्रतस्य योदेवस्तत् स्वरूपं सुनिर्मितम् । रूपं स्त्रीपुंसयोर्वापि प्रारब्धं तद्व्रतं किल । न च निष्पादितं विघ्नैर्दैवात् सर्वं तथा स्थितम् । द्विभुजं पङ्कजाक्षं सौम्यं प्रहसिताननम्" । द्विभुजादीनि स्त्रीपुंसयोरूपस्य विशेषणम् तत्र रूपमग्नातेषु व्रतेषु, जन्मान्तरकृतानां विघ्नितानाञ्च ज्ञातव्ये तत्परीदं प्रायश्चित्तमिति । "निष्पादितं शिल्पिना च तस्मिन्नेव दिने पुनः । तथाऽन्यस्मिन् पुनः प्राप्ते ब्राह्मणो विधिना स्वके । स्नापयेत् पयसा दध्ना घृतक्षीररसाम्बुभिः । गन्धचन्दनपुष्पैस्तु पूजयेत् कुसुमादिना । तोयपूर्णस्य कुम्भस्य मुखे विन्यस्य चन्दनैः । धूपदीपाक्षतैर्वस्त्रैर्नानावस्तूपहारकैः । अर्घ्यं दद्याच्च तन्नाम्ना मन्त्रेणानेन पाण्डव ! । उपवासेन हीनस्य प्रायश्चित्तं कृताञ्जलेः । शरणञ्च प्रपन्नस्य कुरुष्वाद्य दयां पुनः । परत्र भयभीतस्य भग्नवर्ज्यव्रतस्य च । कुरु प्रसादं संपूर्णमस्तु मे त्वत्प्रसादतः" ।

सम्भोगव्रतं भविष्यपु० "द्वे पञ्चम्यौ हि मासस्य द्वे च प्रतिपदौ नरः । सोपवासः समभ्यर्च्य यजेत श्रियया सह । खगनिबद्धचित्तस्तु रतिप्रीतिविवर्जितः" । खगनिबद्धचित्तः सूर्य्यध्यानपरः "श्रमस्व कृतिशीलस्य तस्य पुण्यफलं शृणु । दिव्यं वर्षसहस्रं तु दिव्यं वर्षशतं तथा । ततस्तु भावयत्येनं महादेवं न संशयः" ।

सर्पपञ्चमीव्रतं भविष्यपु० "पयोव्रतन्तु पञ्चम्यां दत्त्वा नागं द्विजातये । सौवर्णं सर्पजनितं भयं तस्य न जायते । एतत् सर्पव्रतं प्रोक्तं सर्पभीतिकरं परम्" ।

सर्पविषापहपञ्चमीव्रतं स्कन्द० प्रभासख० "श्रावणे मासि पञ्चम्यां शुक्लपक्षे वरानने ! । आरभ्यो भवतो वेश्याः गोमयेन विलोलिताः । कृत्वा च कौमुमाद्यागारदिग्दाक्षीं च प्रपूजयेत् । धृतोदकाभ्यां पयसा स्नापयित्वा वरानने ! । गोधूमैः पयसा पूज्य सज्ज्याद्यैर्विविधैस्तथा । पूजयेत् विधिवद्देवि ! दधिदूर्वाङ्कुरैः क्रमात् । गन्धपुष्पोपहारैश्च ब्राह्मणानाञ्च तर्पणम् । अथ वा श्रावणे मासि पञ्चम्यां श्रद्धयान्वितः । अधावेच्च नरो नागान् कृष्णवर्णादिवर्णकैः । गुरुकल्पान् तथा वीथ्यां कन्दके विलिखेत् बुधः । पूजयेद्गन्धधूपैश्च पयसा पायसेन च । तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः । आसप्तमात् कुलं तस्य न भयं नागतो भवेत् । प्रजप्यते तत्र मन्त्रो विषस्य प्रतिषेधकः । तस्य प्रजपमात्रे तु न विषं क्रमते सदा" ।

सर्वकामव्रतं विष्णुधर्मोत्तरोक्तम् "अङ्गारकं तथा सूर्यं निर्ऋतिं वा खगेश्वरम् । पवनं वेश्वरं स्कन्दं कपालकर्णिकिङ्किणीम् । तस्य वैकादशान् यस्तु देवान् त्रिभुवनेश्वरान् । एकादश्यां सोपवासः सोमं सम्पूजयेत्तथा । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । मार्गशीर्षादयारभ्य यावत् संवत्सरं भवेत् । संवत्सरान्ते दद्याच्च ब्राह्मणाय पयस्विनीम् । कृत्वा व्रतं वत्सरमेतदिष्टं चक्रस्वमाप्नोति नरस्तु राजन् ! । रुद्रेच वर्षं सुचिरं वसित्वा कामानमाप्नोति मनोऽभिरामान् । तथा सर्वगतान् रुद्रान् सदा सर्वत्र पूजयेत् । सर्वकामानवाप्नोति सर्वगानपराजितान्" । विष्णुधर्मोत्तरे "माघमासे चतुर्दश्यां कृष्णपक्षे विशेषतः । तथा पितृगणान् राजन् ! क्षीणचन्द्रे च पूजयेत् । सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते । श्राद्धं कृत्वा तथा राजन् ! सर्वकामानवाप्नुयात्" ।

सर्वकामाप्तिव्रतं विष्णुधर्मोत्तरे "कार्त्तिकाद्यर्चयेद्देवं कार्त्तिकीप्रभृतिक्रमात् । यावत् स्यात् कार्त्तिकी भूयो नरसिंहमुपोषितः । अनुलेपनपुष्पाद्यैः सर्वरत्नैः सदैव तु । व्रतावसाने दद्यात्तु गां तथा श्वेतां द्विजातये । श्वेतवत्सयुतां चैव रजतञ्च तथा नृप ! । उपोषितः सदा कुर्य्याद्व्रतं स्नानानुवर्जितः" ।

सर्वव्रतं गौरेयपु० "मन्वन्तरयुता शुभ्रा शान्तपक्षे त्रयोदशी । तस्यामुपोष्य विधिवत् सम्पूज्य गिरिजापतिम् । महाकुमारादिभिः सार्द्धं भवति मानवः" ।

सर्वौषधिसप्तमीव्रतं भविष्यपु० "कृष्णपक्षे तु माघस्य सर्वौष

सप्तमीं स्मृतु। वाञ्छतोऽत्र समाप्नोति सर्व्वान् कामान् नराधिप!॥ पावकाद्भिरिराज्यायमकुर्व्वन् भानुतत्परः। पूजयेत् प्रयतो देवमेकाग्रमतिरंशुमम्। माघादि पारणं मासैः षड्भिः शुच्यन्तकं स्मृतम्"। शुच्यन्तकम् आषाढ़ान्तकम्। "मार्त्तण्डः प्रथमं नाम द्वितीयोऽर्कः प्रकीर्त्तितः। तृतीयं चित्रभानुस्तु विभावसुरतःपरम्। भगेति पञ्चमो ज्ञेयः षष्ठो हंसः प्रकीर्त्तितः। पूर्व्वेषु षट्सु मासेषु स्नानप्राशनयोस्तिलाः। श्रावणादिषु मासेषु पञ्चगव्यमुदाहृतम्। स्नाने च प्राशने चैव प्रशस्तं पापनाशनम्। प्रतिमासन्तु देवस्य कृत्वा पूजां यथाविधि। विप्राय दक्षिणां दद्यात् श्रद्दधानः समन्वितः। पारणान्ते च देवस्य स्नापनं भक्तिपूर्व्वकम्। कुर्व्वीत शक्त्या विधिवद्रविं भक्त्या दिवस्पतिम्"।

सर्व्वाप्तिव्रतं विष्णुधर्म्मोत्तरोक्तम् "इदमन्यत् प्रवक्ष्यामि चतुर्म्मूर्त्तिव्रतं तव। बलं ज्ञानं तथैश्वर्य्यं शक्तिश्च यदुनन्दन!॥ विख्यातं देवदेवस्य तस्य मूर्त्तिचतुष्टयम्। यदेव रूपं कृष्णस्य बलमोक्तं तथैव तु। रूपं ज्ञानस्य ते प्रोक्तं नारसिंहं तथा नृप!॥ वराहरूपं तथैश्वर्य्यं कथितन्तु मया तव। पूर्व्वं वक्त्रं तस्य वासुदेवमुखं भवेत्। दक्षिणं वदनं ज्ञानं देवं सङ्कर्षणं विदुः। ऐश्वर्य्यं पश्चिमं वक्त्रं रौद्रं पापहरं तथा। वाराहञ्च तथा वक्त्रमनिरुद्धं प्रकीर्त्तितम्। त्रिरात्रोपोषितश्चैते पूर्व्वं संपूजयेन्नृप। शुक्लपक्षप्रतिपदि वैशाखे मासि दक्षिणम्। ज्यैष्ठे च पश्चिमं वक्त्रमाषाढ़े च तथोत्तरम्। भक्ष्योपयोगि दातव्यं चैत्रे मासि द्विजातये। रसोपयोगि दातव्यं वैशाखे यादवोत्तम!॥ योगोपयोगि दातव्यं ज्यैष्ठे मासि द्विजातये। यज्ञोपयोगि दातव्यं आषाढ़े तथैव च। व्रतमेतन्नरः कृत्वा पूर्णमासचतुष्टयम्। पारणं प्रथमं कृत्वा स्वर्गलोके महीयते। श्रावणादिषु मासेषु द्वितीयं पारणं भवेत्। दशवर्षसहस्राणि स्वर्गं भुक्त्वा यथोदितम्। सौभाग्यादिषु भोगेषु तृतीयं पारणं भवेत्। तृतीयं पारणं कृत्वा भोजयेद्ब्राह्मणाञ्छुचिः। भोजनं गोरसप्रायं खण्डीकाशर्करायुतम्। प्राप्ते द्वितीये व्रतपारणे तु प्राप्नोति देवस्य सलोकतां सः। स्वर्गेन्द्रलोके च यथोक्तकालं भुङ्क्ते सुखं सर्व्वसमृद्धिकामः"।

सर्षपसप्तमीव्रतं भविष्यपु० "संपूज्य विधिवद्देवं पुष्पधूपादिभिर्नृप!। गन्धार्च्चितं ततः पश्चान्नैवेद्यं भक्तितो न्यसेत्। कुसुमानां प्रवरा जातिर्धूपानां विजयः परः। गन्धानां कुङ्कुमं श्रेष्ठं लेपानां रक्तचन्दनम्। दीपदाने घृतं श्रेष्ठं नैवेद्यं मोदकं परम्। एतैस्तुष्यति देवेशः सान्निध्यं चापि गच्छति। एवं संपूज्य विधिवत् कृत्वा चापि प्रदक्षिणम्। प्रणम्य शिरसा देव! देवदेवं दिवाकरम्। उपविष्टस्ततः पश्चाद्देवेरभिमुखस्थितः। एव सिद्धार्थकं कृत्वा हस्ते पानीयसंयुतः"। सिद्धार्थकं पश्चाद्दिव्यमनाः 'कामं यथेष्ट' हृदये कृत्वा तं वाञ्छितं नरः। पिबेत् सप्तोत्तरान् विप्रमस्तान् दशनैः स्पृशेत्"। दानाभिरिति शेषः "द्वितीयायान्तु सप्तम्यां द्वौ गृहीत्वा तु सत्तम!॥ तृतीयायां तु सप्तम्यां पातव्यास्त्रय एव हि। चतुर्थ्यां चापि चत्वारः पञ्चम्यां पञ्च एव च। षट् पिबेच्चापि षष्ठ्यां तु इतीयं वैदिकी श्रुतिः। सप्तम्यां वारिसंयुक्तान् सप्त चैव पिबेन्नरः"। वारिमध्ये सूत्रवाची षष्ठीकस्य वक्ष्यमाणत्वात् "उदकप्रभृतिं यावत् पञ्चगव्येन सप्तमी। एवं तोयेन सहितं द्वौ चापि घृतसंयुतौ। तृतीयं मधुना सार्द्धं दध्नापि च चतुष्टयम्। युक्तास्तु पयसा पञ्च षट् च गोमयसंयुताः। पञ्चगव्येन वै सप्त पिबेत् सिद्धार्थकान् द्विज!। अनेन विधिना यस्तु कुर्य्यात् सर्षपसप्तमीम्। बहुपुत्रो बहुधनः सिद्धार्थश्चापि सर्व्वदा। इह लोके नरो भूत्वा प्रेत्य याति विभावसुम्"।

सागरव्रतं विष्णुधर्म्मोत्तरोक्तम् "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव। निबोधस्व तु मासेषु श्रावणाद्येषु यादव!। चतुःसागरचिह्नानि पूर्णकुम्भांस्तु पूजयेत्। चतुरात्मा हरिर्ज्ञेयः सागरात्मा विचक्षणैः। स्नानं समाचरेन्नित्यं नदीतोयेन यादव!॥ होमञ्च प्रत्यहं कुर्य्यात् सततं तैलवर्जितम्। कार्त्तिक्यामथ सम्प्राप्ते पूजयित्वा द्विजोत्तमान्। तैलं दत्त्वा तु विप्राय नाकपृष्ठे महीयते। सर्व्वकामसमृद्धस्य यज्ञस्य लभते फलम्"।

साध्यव्रतं विष्णुधर्म्मोत्तरोक्तम् "मनोमनस्तथा प्राणो नरो जानश्च वीर्य्यवान्। चीतिर्हयोऽनयश्चैव हंसो नारायणस्तथा। विभुश्चापि प्रभुश्चैव साध्या द्वादश कीर्त्तिताः। पूजयेच्छुक्लपक्षे तान् द्वादश्यां मार्गशीर्षतः। कृत्वा व्रतं वत्सरमेतदिष्टं प्राप्नोति तेषां तु स सलोकमेव। तस्मोऽत्र कालं सुचिरं महर्द्धी राजा भवेद् द्विजपुङ्गवो वा"।

सामव्रतं पद्मपु० "घृतेन स्नापनं कृत्वा वेणवस्य पिबस्य च। सत्सणो मासरश्चापि मौञ्जी सम्योदरस्य च। पञ्चतैन शुभं कुर्य्यात् दद्यात् सामगवक्षसे। सभाम्ने पञ्चवक्त्रं विज्ञेयं सामगम्"। तथा पञ्च। "पञ्चधरा-

कुलं दद्याच्छिवलोके महीयते । साम गायत्रश्चैतत् सामव्रतमिहोच्यते" ।

सारस्वतपञ्चमीव्रतं पद्मपु॰ "सम्यक् पृष्टं त्वया राजन् ! शृणु सारस्वतं व्रतम् । यस्य सङ्कीर्त्तनादेव तुष्यतीह सरस्वती । यो यद्भक्तः पुमान् कुर्य्यादेतद्व्रतमनुत्तमम् । तद्वासरादौ संपूज्य विप्रानेतत् समारभेत् । अथवादित्यवारेण पञ्चतारावलेन च । पायसं भोजयित्वा तु कुर्य्यात् ब्राह्मणवाचनम् । शुक्लवस्त्राणि दद्याच्च सहिरण्यानि शक्तितः । गायत्रीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः । एभिर्मन्त्रपदैः पश्चात् सर्वं कुर्य्यात् कृताञ्जलिः । एवं संपूज्य गायत्रीं वीणाक्षमणिधारिणीम् । शुक्लपक्षेऽक्षतैर्भक्त्या सकमण्डलुपुस्तकाम् । मौनव्रतेन भुञ्जीत सायं प्रातश्च धर्म्मवित् । पञ्चम्यां प्रतिपक्षे च पूजयित्वा सुवासिनीः । तस्यां तु तण्डुलप्रस्थं घृतपात्रेण संयुतम् । क्षीरं दद्यात् हिरण्यञ्च गायत्री प्रीयतामिति । सन्ध्यायोश्च तथा मौनमेतत् कुर्व्वन् समारभेत् । नान्तरा भोजनं कुर्य्यात् यावन्मासास्त्रयोदश । समाप्ते तु व्रते दद्यात् भोजनं शुभतण्डुलैः । पूर्णं सवस्त्रयुग्मन्तु गां सवत्सां सुशोभनाम् । विप्राय वेदविदुषे । वाचकायाथ पार्थिव ! अनेन विधिना यस्तु कुर्य्यात् सारस्वतं व्रतम् । विद्यावान् धनयुक्तश्च रक्तकण्ठश्च जायते । सरस्वत्याः प्रसादेन व्यासवत् स कविर्भवेत् । नारी वा कुरुते या तु सापि तत्फलभागिनी" ।

सारस्वतव्रतं पद्मपु॰ "सन्ध्यामौनं नरः कृत्वा समान्ते घृतकुम्भकम् । वस्त्रयुग्मं तिलान् घण्टां ब्राह्मणाय निवेदयेत् । लोकं सारस्वतं याति पुनरत्रैव जायते । एतत् सारस्वतं नाम रूपविद्याप्रदायकम्" ।

सार्वभौमव्रतं वराहपु॰ "सार्वभौमव्रतं चान्यत् कथयामि समासतः । येन सम्यक्कृतेनाशु सार्वभौमो भवेन्नरः । कार्त्तिकस्य तु मासस्य दशमी शुक्लपक्षगा । तस्यां नक्ताशनो मर्त्त्यो दिक्षु शुद्धबलिं हरेत्" । शुद्धबलिः पवित्रद्रव्यैः पूजोपहारः । "विचित्रैः कुसुमैर्भक्ष्यैः पूजयेच्च द्विजांस्तथा । सर्वा भवत्यः सिध्यन्तु मम जन्मनि जन्मनि । एवमुक्त्वा बलिं तासु दत्त्वा शुद्धेन चेतसा । ततोऽद्विपन्ने भुञ्जीत दध्यन्नञ्च सुसंस्कृतम् । सर्वं पश्चाद्भवेदस्य एवं संवत्सरं नृपः । यः करोति व्रतो नित्यं तस्य दिग्विजयो भवेत्" ।

दिनव्रतीव्रतं विष्णुधर्मोत्तरे 'मार्कण्डेय उवाच सप्तम्यां नराधिप ! । सौवर्णकन्तु सप्तम्यां कमलैः पूजयेद्रविम् । षष्ठ्यां वा सप्तमे वापि शुक्लैः पुष्पैर्यथाविधि । चन्दनेन तु शुक्लेन वटकैः पूरकेण च" ।

विहारार्ककादिसप्तमीव्रतं भविष्यपु॰ "वैनतेय ! शृणुष्व त्वं विधानं सप्तमीव्रतम् । एतद्धि परमं गुह्यं रवेराराधनं परम् । विहारार्कैस्तु प्रथमा द्वितीया चार्कसम्पुटैः । तृतीया मरिचैः कार्य्या चतुर्थी निम्बसप्तमी । षड्युता पञ्चमी कार्य्या षष्ठी च फलसप्तमी । सप्तम्यनोदना वीर ! सप्तमी परिकीर्त्तिता" । षड्युता इति विहारार्कादिषड्भिः प्रकारैर्युता" । इत्येताः सप्तसप्तम्यः कर्त्तव्या भूतिमिच्छता । अथ चानुक्रमेणासामाहरणं कथयाम्यहम् । माघे वा मार्गशीर्षे वा कार्य्या शुक्ला तु सप्तमी । न च स्वाद्विषमश्नीयः पञ्चमासकृतो भवेत्" । कार्त्तिकवर्जादन्यस्मिन् मासि पक्षे च कार्य्येत्यर्थः" इत्यादि

सिद्धिविनायकचतुर्थीव्रतं स्कन्दपु॰ "नभस्यमासे तु शुक्लायां चतुर्थ्यां पूजयेन्नृप ! । यदा सोत्पद्यते भक्तिर्माघे पूज्यो गणाधिपः । प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप ! । सहभक्त्या गणनाथस्य स्वर्णरौप्यां तथाकृतिम् । कृत्वा पूजां प्रयत्नेन स्नाप्य पञ्चामृतैः पृथक्" इत्यादि ।

सुकलत्रप्राप्तिव्रतं विष्णुधर्मोत्तरे "यत्नं परिसमासाद्य नारीह सुखमेधते । दुःशीलेऽपि हि कामार्थी नारी प्राप्नोति भर्त्तरि । अनाहारा जगन्नाथं सर्वलोकेश्वरं हरिम् । कथमाप्नोति चेन्नारी सर्वलोकगुणान्वितम् । सुकलत्रयुतत्वाद्व्रतमच्युततुष्टिदम् । कर्त्तव्यं कथनं तस्य श्रूयतां वरवर्णिनि ! । यच्चीर्त्वा सर्वनारीणां श्रेयः प्राप्नोत्यसंशयम् । ऐहिकञ्च सुखं प्राप्य मृता स्वर्गसुखान्यपि । अनुमाप्य स्वपितरौ मातरञ्च कुमारिका । पूजयेत्तु जगन्नाथं भक्त्या पापहरं हरिम् । त्रिषूत्तरेष्वथर्क्षेषु पतिकामा कुमारिका । माधवायेति वै नाम जपेन्नित्यमतन्द्रिता । प्रियङ्गुणा रक्तपुष्पैर्मधूकैः कुसुमैस्तथा । समभ्यर्च्याच्युते दद्यात् कुङ्कुमेनानुलेपनम् । सर्वौषधिभिः सुस्नाता तमाराध्य जगत्पतिम् । नमोऽस्तु माधवायेति होमयेन्मधुसर्पिषा । सदैवमुत्तरायोगे समभ्यर्च्य जनार्दनम् । शोभनं पतिमाप्नोति प्रेत्य स्वर्गञ्च गच्छति । अतिबाल्ये च यत्किञ्चित् तथा पापमनुष्ठितम् । तथाविधपाते बालात् शाविनी चैव जायते । कल्पदेवेन तन्वापि ! पुत्रं प्राप्य वदिष्यसि । अद्य प्र-

त्वयाद्भद्रे! नारायणपरायणा। चतुर्मासव्रतोपोषणं कार्यं यथाशक्त्या च वै हरेः। पारणान्ते महाभागे! भोजयेद् ब्राह्मणोत्तमान्"।

सुखत्रिरात्रव्रतं विष्णुधर्मोत्तरे "नवहस्त्यगद्दिवसं प्राप्य त्रिरात्रोपोषितो नरः। मार्गशीर्षात्तथारभ्य पूजयेत्तु त्रिविक्रमम्। त्रिवर्णैः कुसुमैर्देवं त्रिभिः प्रयतमानसः"। त्रिवर्णैः श्वेतपीतरक्तैः "तथोऽनुलेपना देयास्त्रिप्रकारं धूपमेव च"। त्रिप्रकारं गुग्गुलुदारुकश्रीवेष्टकाः "बलिं त्रिमधुरं दद्यात् तथैव दीपान्नरोत्तम!। यवैस्तिलैस्तथा होमः कर्त्तव्यः सर्पिषान्वितैः। दद्यात्त्रितोऽहस्तु तथा द्विजेभ्यः ताम्रं सुवर्णं रजतञ्च राजन्!। न केवलं सुखदं व्रतन्तु यथेष्टकामाप्तिकरं प्रदिष्टम्"।

सुकृतद्वादशीव्रतं विष्णुधर्मोत्तरे "तथेयं द्वादशी यस्मात् स्मृता सुकृतकर्मणाम्। यामुपोष्य द्विजश्रेष्ठ! न याति नरकं नरः। फाल्गुनामलपक्षस्य एकादश्यामुपोषितः द्वादश्यां च द्विजश्रेष्ठ! पूजयेन्मधुसूदनम्। एकादश्यां समुत्तिष्ठन् विष्णोर्नामानुकीर्त्तनम्। पूजायां वासुदेवस्य कुर्वीत सुसमाहितः"।

सुखव्रतं भविष्यपु० "कृष्णाष्टमीं तु नक्तेन यस्तु कृष्णां च सप्तमीम्"। उपवसेदिति शेषः "इहैव सुखमाप्नोति परत्र च शुभां गतिम्"। विष्णुधर्मोत्तरे "देवानां मानवानां वा तत्पक्षाये तथा परे। तेषां संपूजनं कृत्वा चतुर्दश्यां सुखी भवेत्"। भविष्यपु० चतुर्थी तु चतुर्थी तु यदाङ्गारकसंयुता। उपोष्य तत्र तत्रैव प्रदेयो विधिवत् कुजः। उपोष्य नक्तेन विभो! चतस्रः कुजसंयुताः। चतुर्थ्यान्तु चतुर्थ्यान्तु विधानं शृणु यादृशम्"। एकचतुर्थीशब्दः तिथिविशेषवचनः, अपरस्तु संख्यापर इति "दशसौवर्णिके सुवर्णं दशार्द्धमथापि वा। सौवर्णपात्रे रौप्ये वा भक्त्या ताम्रमयेऽपि वा। त्रिंशत्पलानि पात्राणि विंशत्यर्द्धपलानि च। विंशत्कर्षाणि वा वीर! अतोहीनं न कारयेत्। शक्त्या वित्तस्य भक्त्या च पात्रे ताम्रमयेऽपि वा। प्रतिष्ठाप्य कुजपात्रे रक्तवस्त्रेण वेष्टयेत्। पुष्पमण्डपिकां कृत्वा दिव्यैर्धूपैस्तु धूपिताम्। तत्रस्थमर्चयेद्देवं पूर्वमन्त्रैः क्रमेण तु"।

सुखषष्ठीव्रतं विष्णुधर्मोत्तरे "षष्ठीनां पूजनं कृत्वा षष्ठ्यां सुखमवाप्नुयात्"।

सुखसुप्तिव्रतं आदित्यपु० "अमावास्यान्तु देवाय कार्त्तिके मासि केशवम्। अभयं प्राप्य सुप्तास्तु सुखात् यो द-सातुषु। लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्ता भुजोदरे। चतुर्भुजस्य कान्ते ब्रह्मा सुप्तस्तु पङ्कजे। अतोऽर्थं विधिवत् कार्या जनैः सुखसुप्तिका। दिवा तत्र न भोक्तव्यमृते बालातुरान् जनान्। प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात्। दीपवृक्षाश्च दातव्याः शक्त्या देवगृहेषु च। चतुष्पथे श्मशानेषु नदीपर्वतवेश्मसु। वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च। वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः। दीपमालापरिक्षिप्ते प्रदेशे तदनन्तरम्। ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षितान्। अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना। स्निग्धैः सुग्धैर्विदग्धैश्च बान्धवैर्भृत्यैः सह। शङ्करस्तु पुरा द्यूतं ससर्ज सुमनोहरम्। कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि सुव्रत!। जितश्च शङ्करस्तत्र जयं लेभे च पार्वती। अतोऽर्थं शङ्करो दुःखी उमा नित्यं सुखोषिता। तस्माद् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः। तस्मिन् भवेज्जयो यस्य तस्य संवत्सरं शुभम्। पराजये विरुद्धन्तु लब्धनाशस्ततो भवेत्। श्रोतव्यं गीतवाद्यादि स्वनुलिप्तैः स्वलङ्कृतैः। विशेषतश्च भोक्तव्यं प्रशस्तैर्बान्धवैः सह। तस्यां निशायां कर्त्तव्यं शय्यास्थानं सुशोभनम्। गन्धपुष्पैस्तथा वस्त्रैरत्नैर्माल्यैरलङ्कृतम्। दीपमालापरिक्षिप्तं तथा धूपेन धूपितम्। दयिताभिश्च सहितैर्नेया सा च सुखेक्षिया। नवैर्वस्त्रैश्च संपूज्य द्विजसम्बन्धिबान्धवान्" इत्यादि।

सुगतिव्रतं पद्मपु० "नक्ताशी त्वष्टमीषु स्यात् वत्सरान्ते तु गोप्रदः। पौरन्दरपदं याति सुगतिव्रतमुच्यते"।

सुगतिद्वादशीव्रतं विष्णुधर्मोत्तरे "एकादश्यां शुक्लपक्षे फाल्गुने मासि यो नरः। जपन् कृष्णेति देवस्य नाम भक्त्या पुनः पुनः। देवार्च्चनं चाष्टशतं कृत्वैतत्तु जपेच्छुचिः। स्थाने प्रस्थानकाले च उत्थाने स्खलिते क्षुते। पाषण्डान्! पतितांश्चैव तथैवान्त्यावसायिनः। नालपेत्तु तथा देवमर्च्चयेच्छ्रद्धयान्वितः। इदञ्चोदाहरेत् मन्त्रं मनसाधाय तत्परः। चैत्रवैशाखयोश्चैवं तद्वज्ज्यैष्ठे च पूजयेत्। मर्त्यलोके गतिं श्रेष्ठां दाल्भ्य! प्राप्नोति वै नरः। उत्क्रान्तिकाले कृष्णस्य स्मरणञ्च तथाप्नुयात्। आषाढ़े श्रावणे चैव मासि भाद्रपदे तथा। तथैवाश्वयुजे देवमनेन विधिना नरः। उपोष्य संपूज्य तथा

केशवेति च कीर्त्तयेत् । गोमूत्रप्राशनात् पूतः स्वर्गलोके महीयते । आराधितस्य जगतामीश्वरस्य महात्मनः । उत्क्रान्तिकाले स्मरणं केशवस्य तथाप्नुयात् । क्षीरस्य प्राशनं श्रेष्ठं विधिनेदं यथोदितम् । कार्त्तिकादि यथान्यायं कुर्य्यान्मासचतुष्टयम् । तेनैव विधिना ब्रह्मन् ! तत्र विष्णुं प्रकीर्त्तयेत् । स याति विष्णुसालोक्यं विष्णुं स्मरति तत्क्षये । प्रतिमासं द्विजातिभ्यो दद्याद्दानं यथेच्छया । सुगतिद्वादशीमेतां श्रद्दधानश्च यो नरः । उपोष्येति तथा नारी प्राप्नोति त्रिविधां गतिम्"।

सुजन्मद्वादशीव्रतं विष्णुधर्म्मोत्तरे "पौषे मासि सिते पक्षे द्वादश्यां शक्रदैवते । नक्षत्रयोगगे विष्णुं प्रथमं तु समर्च्चयेत् । ततः प्रभृति विप्रेन्द्र ! मासि मासि जनार्द्दनम् । उपोषितः पूजयेत यावत् संवत्सरं गतम् । मासे च मासे विधिनोदितेन तस्यां तिथौ दानमिति ब्रवीमि । प्राश्यं यथावद्विधिवत् क्रमेण तदुच्यमानं निखिलं निबोध । घृतं तथा व्रीहियवं हिरण्यं यवाश्च मुद्गाश्चणकाश्च पानम् । छत्रं पयोऽन्नं गुड़फाणिताद्यं सुचन्दनं वस्त्रमनुक्रमेण । एकैकमासोक्तमथैकदानं गोमूत्रमश्नो हतनामशाकम् । दुग्धं दधि व्रीहियवं तिलांश्च सूर्य्यांशुतप्तं जलमम्बु दार्भम्"।

सुजन्मावाप्तिव्रतं विष्णुधर्म्मोत्तरे "मेषसंक्रमणे भानोः सोपवासो नरोत्तम ! । पूजयेद्भार्गवं देवं रामं भक्त्या यथाविधि । वृषसंक्रमणे प्राप्ते तथा कृष्णञ्च पूजयेत् । तथा मिथुनसंक्रान्तौ पूजयेद्भोगशायिनम् । तथा कुलीरसंक्रान्तौ वराहमपराजितम् । नरसिंहं तथा देवं सिंहसंक्रमणे विभुम् । कन्यासंक्रमणे देवं तथाश्वशिरसं यजेत् । तुलासंक्रमणे कूर्म्मं पूजयेत् भक्तिभावतः । अलिसंक्रमणे कल्किं देवं संपूजयेत् नरः । धनुःसंक्रमणे बुद्धं देवमभ्यर्च्चयेत् बुधः । तथा मकरसंक्रान्तौ रामं दशरथात्मजम् । कुम्भसंक्रमणे राजन् ! रामं यादवनन्दनम् । मीनसंक्रमणे मत्स्यं वासुदेवन्तु पूजयेत् । पटे वा यदि वार्च्चायां गन्धमाल्याद्यसम्पदा । प्रादुर्भावस्य नाम्ना च च होमं कुर्वीत पार्थिव ! । व्रतान्ते जलधेनुन्तु सलोपानत्समन्विताम् । वस्त्रयुग्मयुतां दद्यात् प्रतिमासं सकाञ्चनाम् । रात्रौ तु दीपमालाभिर्देवदेवं प्रपूजयेत् । कृत्वा व्रतं वत्सरमेतदिष्टं म्लेच्छेषु तिर्य्यक्षु न चापि जन्म । प्राप्नोत्यवाप्नोति चिरञ्च नाकं कामांस्तथाप्नोति मनोऽभिरामम्"।

सुदर्शनषष्ठीव्रतं गरुड़पु० "अथ षष्ठ्यान्तु राजन्यः समुपोष्य यथाविधि । चक्राकारं जलं कृत्वा कर्णिकायां सुदर्शनम् । दलेषु लोकपालानामायुधानि समर्च्चयेत्"। चक्राब्जं चक्रनाभिघटिताब्जम् ।"स्वान्यायुधानि पुरतः प्रतिष्ठाप्य प्रपूजकः । रक्तचन्दनसिद्धार्थरक्तपद्माङ्कुरैरपि । रक्तवस्त्रैः सुगन्धाद्यैर्भूषणादिभिरर्च्चयेत्" इत्यादि ।

सुनामद्वादशीव्रतं वह्निपु० "शृणुष्वैकमना भूप ! सुनामद्वादशी शुभा । सर्व्वपापहरा रम्या भुक्तिमुक्तिप्रदायिका । मनसा च चिकीर्षन्ति द्वादशीं ये नरोत्तमाः । तेऽपि घोरं न पश्यन्ति पुनः संसारसागरम् । आद्यं सर्व्वव्रतानां तु वैष्णवानां नृपोत्तम ! । नरैर्नित्यमिदं कर्त्तव्यं विष्णोस्तुष्टिकरं परम् । मार्गशीर्षे शुभे मासि शुक्लपक्षे यतव्रतः । प्रथमञ्चैव गृह्णीयाद् द्वादशीं विधिवन्नरः । मनोवाक्कायचेष्टाभिः सुविशुद्धो जितेन्द्रियः । दशम्यां नियतः स्नात्वा प्रणिपत्य जनार्द्दनम् । हविष्याशकृताहारः शुचिर्भूत्वा भवेद्व्रती । उपविष्टे शुचौ देशे भक्षयेद्दन्तधावनम् । उपोष्यैकादशीं सम्यक् पूजयित्वा जनार्द्दनम् । सुनामद्वादशीं देव ! अहं भोक्ष्ये परेऽहनि । एवं सङ्कल्प्य नियमं प्रणम्य गरुड़ध्वजम् । दशम्यामेकभक्ताशी संयतः संवसेन्निशाम् । एकादश्यां ततः प्रातरेकचित्तः समाहितः । पूर्व्वं संपूजयेत् सूर्य्यं ततो देवं प्रपूजयेत्" वर्षसाध्यमिदम् ।

सुरूपद्वादशीव्रतम् उमामहेश्वरसंवादे "पौषमासं तु संप्राप्य पुष्यर्क्षं तु सुशोधयेत् । तस्यां रात्रौ संयतात्मा ध्यात्वा विष्णुं सनातनम् । श्वेता गौरेकवर्णा च तस्या ग्राह्यञ्च गोमयम् । अन्तरिक्षात् प्रपतितं शुचिर्मौनसमास्थितः । तस्याः कृत्वाऽऽहुतीनाञ्च शतमष्टोत्तरं तिलैः । प्रतीच्यैकादशीं कृष्णामुपवासपरायणैः । भाव्यं नियमसंयुक्तैर्विशेषात् संयतात्मभिः । स्नात्वा नद्यां तड़ागे वा विष्णुमेवाथ चिन्तयेत् । सौवर्णकं हरिं कृत्वा रौप्यं वाम स्वशक्तितः । तिलपात्रोपरिस्थे च न्यसेत् कुम्भे सद्रव्यके" इत्यादि । "एवं यः कुरुते देवि ! सुरूपद्वादशीव्रतम् । नरो वा यदि वा नारी तस्य पुण्यं शृणुष्व मे । दौर्भाग्यं नश्यते तस्य अपि जन्मान्तरार्जितम् । अपि भुक्तस्य सम्पर्को जायते कारणान्तरात् । तथापि न भवेद् दुःखं वैरूप्यं तस्य जन्मनि" ।

सूर्य्यव्रतं विष्णुधर्म्मोत्तरे "भिरसोपपनं कृत्वा योऽर्च्चयेत

दिवाकरम्। तपनस्तोषमायाति वह्निष्टोमञ्च विन्दति। अपूपैः सगुडैर्भक्त्या तथा लवणपाचितैः। सहिरण्यैः समभ्यर्च्य अग्निष्टोमफलं लभेत्। सूर्य्याग्नि यस्तु नक्ताशी संपूजयति भास्करम्। इष्टान् कामानवाप्नोति सूर्य्यलोकञ्च गच्छति"। कालोत्तरे "आश्विन्यादित्यवारे तु यदि शुक्ला चतुर्दशी। स्नानं विशेषतः कार्य्यं शिवस्य परमात्मनः। घृताङ्गरागं रोचनया रक्तपुष्पैः प्रपूजयेत्। कपिलाज्यं तथा क्षीरं नैवेद्यं परिकल्पयेत्"। पद्मपु० "माघमास्युषसि स्नानं कृत्वा दम्पत्यमर्चयेत्। भोजयित्वा यथाशक्त्या माल्यवस्त्रविभूषणैः। सौभाग्यपदमाप्नोति शरीरारोग्यमुत्तमम्। सूर्य्यलोकप्रदं नूनं सूर्य्यव्रतमिदं स्मृतम्"। भविष्यपु० "कृत्वैकभक्तं हेमन्ते माघमासमतन्द्रितः। मासान्ते च रथं कुर्य्याच्चित्रवस्त्रोपशोभितम्। श्वेतैश्चतुर्भिर्युक्तन्तु तुरगैः समलङ्कृतम्। श्वेतध्वजपताकाभिः छत्रचामरदर्पणम्। ततस्तु बाहुकपिष्टेन कृत्वा भानुं नराधिप!। विन्यस्य तं रथमध्ये संज्ञया सह भूपते! तं रात्रौ राजमार्गेण शङ्खभेर्य्यादिभिः स्वनैः। भ्रामयित्वा शनैः पश्चात् सूर्य्यायतनमानयेत्। तत्र चातुरूपिष्टेन प्रदीपाद्युपशोभितम्। प्रेक्षणीयप्रदानैश्च क्षपयित्वा शनैः शनैः। प्रभाते स्नपनं कृत्वा पयसा वा घृतेन वा। दीनान्धकृपणानाञ्च यथाशक्त्या च दक्षिणाम्। रथं संवाहनोपेतं भास्कराय निवेदयेत्। भुक्त्वा च ब्राह्मणैः सार्द्धं प्रणम्यार्कं गृहं व्रजेत्"। सौरधर्मोत्तरे "शृणु राजन्! प्रवक्ष्यामि यद्गुह्यं व्रतमुत्तमम्। सर्वकामप्रदं पुंसां कुष्ठादिव्याधिनाशनम्। भानोस्तुष्टिकरं राजन्! भुक्तिमुक्तिप्रदायकम्। तस्य देवस्य वक्ष्यामि व्रतं राजन्! सविस्तरम्। पूजार्घ्यं प्राशनं दानं नैवेद्यं शृणु तत्त्वतः। सर्वतीर्थेषु यत् पुण्यं सर्वयज्ञेषु यत्फलम्। सर्वदानेन तपसा यत् पुण्यं समवाप्यते। प्रातःस्नानेन यत् पुण्यं यत् पुण्यं रविवासरे। मार्गशीर्षादिमासेषु द्वादशस्वपि भूपते!। सूर्य्यव्रतं करिष्यामि यावद्वर्षं दिवाकर!। व्रतं संपूर्णतां यातु त्वत्प्रसादात् प्रभाकर!" इत्यादि।

सूर्य्यनक्तव्रतं मत्स्यपु० "तथादादित्यवारेण सदा नक्ताशनो भवेत्। यदा हस्तेन संयुक्तमादित्यस्य च वासरम्। उत्पद्यते यदा भक्तिर्भानोरुपरि शाश्वती। तदादित्यदिने कुर्य्यादेकभक्तं विमत्सरः। तदारभ्य सदा कार्य्यं नक्तमादित्यवासरे। नक्तमादित्यवारेण भोजयित्वा द्विजोत्तमान्। ततोऽस्तमनये भानो रक्तचन्दनपङ्कजम्। विलिख्य द्वादशदलं पूज्य सूर्य्येति पूर्वतः"। "एतेनैव विधानेन वर्षमेकन्तु यो नरः। नक्तमादित्यवारेण कुर्य्यात् स नीरुजो भवेत्। धनधान्यसमायुक्तः पुत्रपौत्रसमन्वितः। मर्त्त्ये स्थित्वा चिरं कालं सूर्य्यलोकमवाप्नुयात्"।

सूर्य्यषष्ठीव्रतं भविष्योत्तरे "मासि भाद्रपदे शुक्ले एकभक्ताशनो भवेत्। दन्तधावनपूर्वन्तु षष्ठ्यामुपवसेन्नरः। गौरसर्षपकल्केन स्नायात् कायविशुद्धये। रोचनाकृष्णगोमूत्रमुस्ताचन्दनगोमयम्। दधिचालानुरूपेण ललाटे तिलकं न्यसेत्। शिवाङ्घ्रिपद्मलेपेन सौभाग्यारोग्यसंयुतः। स्रजं कुङ्कुमताम्बूलं सिन्दूरं रक्तवाससी। वितरेत् सोपवासा हि नारी पञ्चमहाफलम्। विधवा तु विरक्तापि कुमारी शुक्लवाससी। ततः षष्ठ्यां भानुं पूजयेत् शीतलोदकैः। अपराह्णे ततः स्नात्वा शुचिर्नियतव्रतः। प्रतिमां स्नपयेद्भानोः पञ्चगव्येन वारिणा। रक्तचन्दनपङ्केन कुङ्कुमेन समालभेत्। चम्पककुसुमैरक्तैः करवीरैः प्रपूजयेत्"।

सूर्य्यसप्तमीव्रतं विष्णुधर्मोत्तरे "चैत्रे शुक्लस्य पक्षे तु सम्यक् षष्ठ्यामुपोषितः। सप्तम्यामर्च्चनं कुर्य्याद्दिवाकरस्य भूपते!। बहिःस्नानं नरः कृत्वा गोमयेनोपलेपिते। लेपयेत् स्थण्डिलं सम्यक् ततो गौरकदा नृप!। अष्टदलकमलं वर्णकैस्तु समं लिखेत्" इत्यादि।

सोमद्वितीयाव्रतं पद्मपु० "दद्यात्स्मितद्वितीयायां सिन्धोर्लवणभोजनम्। समाप्ते गोप्रदो याति शिवाय शिवमन्दिरम्" विप्राय सिन्धोर्लवणभोजनं दद्यादित्यन्वयः। सोमश्चास्य देवता सोमव्रतमिदं स्मृतमिति सोमस्य देवतात्वं गम्यते। "कल्पान्ते राजराजस्य सोमव्रतमिदं स्मृतम्"।

सोमव्रतं कालोत्तरे "चन्द्राष्टम्यां रोहिण्यां स्नात्वा चन्द्रव्रतञ्चरेत्। शिवं सम्पूज्य विधिवत् स्नानैः पञ्चामृतादिभिः। विलेपनन्तु चन्द्रेण चन्दनेन तु वा हितम्। शुक्लवस्त्रैस्तथा पुष्पैः पूजयेत् परमेश्वरम्। नैवेद्यं क्षीरकुम्भन्तु सितशर्करया युतम्। प्राशनं चन्द्रमेवात्र रात्रौ जागरणं हितम्। आयुःकामैः सदा कार्य्यं कीर्त्तिश्रीसाधने हितम्। इति चन्द्रव्रतं नामोद्धारदानेन जायते"। कालिकापु० "वारे सोमस्य चाष्टम्यां पक्षयोरुभयोः शिवम्। अर्च्चयेत्। द्विभिना चन्द्रचूडाख्यं माहात्म्येन चन्द्रकम्"। पक्षोभौ यतोऽयत्र पक्षे नियमोऽष्टमीसोमवारयोः संयो-

गमात्तं विवर्जितं, प्राश्यान्नं चाश्यवस्त्रसमन्वितम् । "दक्षिणाद्यैर्हरन्ध्यायेद्दामोदरन्तु हरिं विभुम्" । इत्यादि "अष्टम्यां पितरावर्च्य विधिनानेन सुव्रत !" । पितरौ तावेव देवीदेवौ "वत्सरान्तु तदन्ते तु कर्त्तव्यं यथिवोधत । प्रागुक्तविधिना पूज्य सितं पीतं युगद्वयम् । दद्याद्वितानके चैव पताकाघण्टिके तथा । धूपसञ्चारणे चापि दीपवृक्षौ सुशोभिनौ" । भविष्यपु० "ताम्रपात्रं पयःपूर्णं कृत्वा तत्स्थञ्च शङ्करम् । प्रच्छाद्योपरिवस्त्रेण गन्धपुष्पार्चितं महत् । शिवभक्ते द्विजे दद्याद्भोजयित्वा विधानतः । प्राच्यां समुदिते सोमे प्रतीच्याञ्च रवौ गते । पौर्णमास्यां तु वैशाख्यां स्वच्छपात्रं शिवाय तु । प्रीयतां मे महादेवः सोममूर्त्तिर्जगत्पतिः । तच्च विप्राय तत्पात्रमर्चयेद्भक्तितः शनैः । एवं सोमव्रतं नाम कृत्वा सोमान्तिकं व्रजेत्" ।

सोमवारव्रतं भविष्योत्तरे "तदश्विनात्तु संप्राप्य सोमवारं विचक्षणः । नक्तोक्तविधिना सर्वं कुर्य्यात् पूजादिकं विभोः । सप्तमे तु ततः प्राप्ते दत्त्वा ब्राह्मणभोजनम् । कांस्यपात्रे तु संस्थाप्य सोमं रजतसम्भवम्" । सोमरूपन्तु चतुर्दशीस्थमहाराजव्रतोक्तं वेदितव्यम् "पात्रे कृत्वा सोमराज श्वेतवस्त्रैः प्रपूजितम् । पादुकोपानहच्छत्रभाजनासनसंयुतम् । होमं घृततिलैः कुर्य्यात् सोमनाम्ना तु मन्त्रवित् । समिधोऽष्टोत्तरशतमष्टाविंशतिरेव वा । होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन तु" इत्यादि ।

सोमाष्टमीव्रतं स्कान्दपु० "वारे सोमस्य चाष्टम्यां पक्षयोरुभयोरपि । विधिवच्चन्द्रचूड़ाभं सोमं सम्पूजयेच्छिवम्" । सोमं उमासहितम् रूपन्तु कृष्णाष्टम्यामेव व्याख्यातम् । "तिलसर्षपकल्केन स्नातोऽमलजलाशये । स्वगृहे चायतने वापि शिवैकाहितमानसः । ब्रह्मकूर्चेन देवेशं प्राशयित्वा ततो व्रती" । ब्रह्मकूर्चं पञ्चगव्यम् "वामादियाममन्त्रैश्च देवं देवीं तथार्चयेत् । चन्दनेनेन्दुयुक्तेन दक्षिणाद्यैर्विलेपयेत्" इत्यादि ।

सौख्यव्रतं भविष्यपु० "एकादश्यां माघमासे चतुर्दश्यष्टमीषु च । एकभक्तेन यो दद्यात् चेलकान्यर्जुनानि च । उपानहौ कम्बलञ्च पात्रं छिन्नं तथोदकम् । करपात्रादिकं वत्स ! यथाशक्त्यार्थिने नृप ! । आर्त्तत्राणपरो नित्यमश्वमेधफलं लभेत् । एतत्सौख्यव्रतं नाम आर्त्तत्राणकरं परम्" ।

सौगन्ध्यव्रतं पद्मपु० "वर्जयेद् यस्तु पुष्पाणि हेमन्तशिशिरौ व्रती । पक्षत्रयञ्च फाल्गुन्यां कृत्वा शक्त्या च काञ्चनम् । दद्याद्वैकालवेलायां प्रीयेतां शिवकेशवौ । शिरःसौगन्ध्यजननं सदानन्दप्रदं नृणाम् । कृत्वा परं पदं याति सौगन्ध्यव्रतमुत्तमम्" ।

सौभाग्यतृतीयाव्रतं वराहपु० "अतःपरं महाराज ! सौभाग्यकरणं व्रतम् । शृणु येनाशु सौभाग्यं स्त्रीपुंसामभिजायते । फाल्गुनस्य तु मासस्य तृतीया शुक्लपक्षतः । उपोषितेन नक्तेन शुचिना सत्यभाषिणा । सश्रीकञ्च हरिं पूज्य रुद्रं वा उमया सह" इत्यादि । गरुड़पु० "फाल्गुनादितृतीयायां लवणं यस्तु वर्जयेत् । समाप्ते शयनं दद्यात् गृहं सोपस्करान्वितम्" । समाप्ते वत्सरान्ते "संपूज्य विप्रमिथुनं भवानी प्रीयतामिति । गौरीलोकप्रदं नित्यं सौभाग्यव्रतमुच्यते" ।

सौभाग्यव्रतं भविष्यपु० "पौर्णमास्यां तु यः सोमं पूजयेद् भक्तिमान्नरः । सौभाग्यञ्च भवेत्तस्य इति मे निश्चिता मतिः । मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः" इत्यादि ।

सौभाग्यशयनव्रतं मत्स्यपु० "तथैवान्यत् प्रवक्ष्यामि सर्वकामफलप्रदम् । सौभाग्यशयनं नाम यत् पुराणविदो विदुः" । इत्युपक्रमे "वसन्तमासमासाद्य तृतीयायां जनप्रियाम् । शुक्लपक्षस्य पूर्वाह्णे तिलैःस्नानं समाचरेत् । तस्मिन्नहनि सा देवी किल विश्वात्मना सती । पाणिग्रहणकैः मन्त्रैरुद्वूढा वरवर्णिनी । तया सहैव देवेशं तृतीयायां समर्चयेत्" इत्यादि । "एवं संवत्सरं यावत् तृतीयायां सदा मनो ! । प्राशने दानमन्त्रे च विशेषोऽयं निबोध मे । गोशृङ्गोदकमाद्यं स्यात् वैशाखे गोमयं पुनः । ज्यैष्ठे मन्दारकुसुमं बिल्वपत्रं शुचौ स्मृतम् । श्रावणे दधि सम्प्राश्य नभस्ये च कुशोदकम् । क्षीरमाश्वयुजे मासि कार्त्तिके पृषदाज्यकम्" । पृषदाज्यं दधिमिश्रं घृतम् "मार्गशीर्षे तु गोमूत्रं पौषे सम्प्राशयेद् घृतम् । माघे कृष्णतिलांस्तद्वत् पञ्चगव्यञ्च फाल्गुने । ललिता विजया भद्रा भवानी कुमुदा शिवा । वासुदेवी तथा गौरी मङ्गला कमला सती । उमा च दानकाले तु प्रीयतामिति कीर्त्तयेत् । मल्लिकाऽशोककमलकदम्बोत्पलमालतीम् । कुब्जकं करवीरञ्च बाणमम्लानकुङ्कुमम् । सिन्दुवारञ्च सर्वेषु मासेषु क्रमशः स्मृतम्" इत्यादि ।

(भाग्यसङ्क्रान्तिव्रत स्कन्दपु० "दशम्यां प्रवक्ष्यामि सौ-

धान्यसंक्रान्तिमुत्तमाम् । शृणु नारद ! यत्नेन धनैश्वर्य्यप्रदायिनीम् । अयने विषुवे युक्ते व्यतीपातेन भानुना । संक्रान्तिदिवसे कुर्य्यादेकभक्तं विमत्सरः । पूर्व्वं स्नातुमभ्यर्च्य तथा चैव सुवासिने । सौभाग्याष्टकसंयुक्तं वस्त्रयुग्मं सयोषिते । विप्राय वेदविदुषे भक्त्या तत् प्रतिपादयेत् । एवं संवत्सरे पूर्णे कृत्वा ब्राह्मणभोजनम् । पर्व्वतं लवणं कृत्वा यथाविभवसारतः । काञ्चनं कमलं कृत्वा भास्करञ्चैव कारयेत् । गन्धपुष्पादिना पूज्य विप्राय प्रतिपादयेत्" ।

सौभाग्यावाप्तिव्रतं विष्णुधर्म्मोत्तरे "माघ्यान्तु समतीतायां प्रतिपत्प्रभृतिक्रमात् । पटे वा यदि वार्च्चायां कृष्णं संपूजयेत् सदा । पूर्व्वोक्तं सकलं कुर्य्याद् विधिं भाल नराधिप !" । पूर्व्वोक्तमिति चैत्रमाससम्बन्धिरूपावाप्तिव्रतोक्तमित्यर्थः । "नित्यं समाचरेत् स्नानं तथा गन्धप्रियङ्गुणा । चरुं प्रियङ्गुणा कुर्य्याद्धोमं कुर्य्यात् प्रियङ्गुणा" । प्रियङ्गुः कङ्गुसदृशगन्धद्रव्यम् "फाल्गुन्यान्तु ततो दद्यात् त्रिरात्रोपोषितो नरः । वस्त्रे च देये नृप ! कुङ्कुमाक्ते आढ्कस्य पात्रञ्च तथैव कांस्यम् । सौभाग्यदं ह्येतदनुत्तमन्तु व्रतं मयैतत्कथितं नृवीर ।" ।

सौरनक्तव्रतं नृसिंहपु० "हस्तयुक्ते वार्कदिने सौरनक्तव्रतं चरेत् । स्नात्वाभ्यर्च्य तु विप्रांश्च वै निरोगो जायते नरः" ।

सौरसप्तमीव्रतं पद्मपु० "यत्रोपवासी सप्तम्यां समान्ते हेमपङ्कजम् । गावश्चैव यक्तितो दद्याद्धोमान्ते घटसंयुताः । एतत् सौरव्रतं नाम सूर्य्यलोकप्रदायकम्" ।

स्त्रीपुत्रकामावाप्तिव्रतं भविष्यपु० "एकभक्तेन या नारी वार्षिकन्तु क्षपेन्नृप ! । क्षमाहिंसादिनियमैः स्नाता ब्रह्मचारिणी । गुडान्नमिश्रं शाल्यन्नं भास्कराय निवेदयेत् । पुष्पाणि करवीराणि गुग्गुलं साज्यमादरात् । सप्तम्याञ्चाथ षष्ठ्यां वा उपवासरतिर्भवेत् । पक्षयोरुभयोरेव श्रद्धया परयान्वितः । इन्द्रनीलप्रतीकाशैर्विमानैः सार्व्वकामिकैः । नारी युगशतं साग्रं सूर्य्यलोके महीयते" वर्षसाध्यमिदम् ।

स्नेहव्रतं पद्मपु० "आषाढ़ादिचतुर्म्मासानभ्यङ्गं वर्ज्जयेन्नरः । पारिते च पुनर्दद्यात्तिलतैलयुतं घटम् । भोजनं पायसाज्यञ्च स याति भवनं विभोः । लोकप्रीतिकरं ह्येतत् स्नेहव्रतमिहोच्यते" ।

हयपञ्चमीव्रतं शालिहोत्रे "अमराद्धमृताज्जातो वातरंहा मनोजवः । उच्चैःश्रवाः पूजनीयश्चैत्रशुक्लस्य पञ्चमी । तत्रैव पूज्या गन्धर्व्वांस्तुरङ्गाणान्तु बान्धवाः । पत्रवाचराः केचित् केचित् पक्षैश्च संयुताः । भीमश्चित्ररथश्चैव विख्यातः सर्व्वविदयस । तथा शालिशिराः श्रीमान् प्रद्युम्नश्च महायशाः । नारदश्च कलिन्दश्च गन्धर्व्वश्च हाहा हूहूः । तथाङ्कस्तुम्बुरुश्चैव तथा चित्ररथः प्रभुः । चित्राङ्गदश्च विख्यातश्चित्रसेनश्च वीर्य्यवान् । चित्रपूर्णश्च वदरी पर्णांशश्च महायशाः । ब्रह्मचारी रतिगुणः सुपर्णोऽतिबलस्तथा । विश्वावसुः सुरेन्द्रश्च गन्धर्व्वोऽमितपराक्रमः । इत्येते पूजनीयाः स्युर्गीतैरुच्चावचैः शुभैः । मोदकैः पोलिकाभिश्च परमान्नेन चाक्षतैः । दध्ना गुड़ेन पयसा शालिपिष्टेन भूरिशः । धूपैर्माल्यैस्तथा दीपैर्द्विजानां स्वस्तिवाचनैः । एवं हि पूजिताः सम्यक् तुरगाणां हि बान्धवाः । बलमायुः प्रयच्छन्ति संग्रामेष्वपराजयम् । आरोग्यं परमां पुष्टिस्तथैव च विधीयते" ।

हरतृतीयाव्रतं स्कन्दपु० "माघे शुक्लतृतीयायामुपवासन्तु कारयेत् । रात्रौ समारभ्याहृत्य गौरीयागस्य मण्डपे । अष्ट पत्रं लिखेत् पद्मं मण्डपे मुनिपुङ्गव ! । उमामहेश्वरं तत्र पूजयेत् सुसमाहितः । पूर्व्वपत्रे न्यसेद् गौरीमाग्नेय्यां ललितां न्यसेत् । दक्षिणे तु उमां नाम नैरृत्यां च सुधां तथा । पश्चिमे वामदेवीन्तु वायव्यां कुलगौरिकाम् । उत्तरे तु सुभगान्तु ऐशान्यां गिरिजां तथा । उमामहेश्वरं मध्ये गन्धपुष्पैः प्रपूजयेत् । भृङ्गारञ्चैव संस्थाप्य तण्डुलैः परिपूरयेत् । एवं कृत्वा विधानेन मुने ! वर्षचतुष्टयम् । आराधनन्तु देव्याश्च सौभाग्यजननं परम् । उद्यापनं ततः कुर्य्यात् तस्मिन्नेव ततो दिने । उमामहेश्वरं हैमं स्वच्छन्दे मञ्चके स्थितम् । वस्त्रैर्गन्धैश्च धूपश्च दीपमाल्यादिभिस्तथा । भक्ष्यैर्नानाविधैः सम्यक् पूज्य भक्त्या ततो मुने ! । तद्वद्गुरुं सभार्य्यञ्च पूजयेद् द्विजसत्तमम् । गाञ्चैव गुरवे दद्यात् वस्त्रालङ्कारसंयुताम् । मिथुनानीह चत्वारि भोजयेत् सुसमाहितः । उमामहेश्वरं हैमं दत्त्वा भक्त्या क्षमापयेत्" ।

हरव्रतं भविष्यपु० "अष्टम्यां पूजितो देवी गोश्रुताभरणो हरः । स्थानं ददाति विपुलां कान्तिं ख्यातिं बलं तथा" । गोश्रुताभरणः चक्षुःश्रवोभूषः शिव इत्यर्थः । "दृष्ट्वा स्नानदत्यैव पापघ्नः पापपूजतः । मूलमन्त्रः स्वशाभि

रक्तपुष्पाश्च कीर्त्तिताः। पूर्ववत् पद्मपत्रस्थः कर्त्तव्यश्च शिवोऽपर। गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते"। हरिव्रते दशाङ्क० "त्रैलोक्यगामिनी देवी लक्ष्मीर्मेऽस्तु सदा प्रिया। द्वादशी च तिथिर्मेऽस्तु कामरूपी च जायते"। अपि च एतोक्तं वचनम् "दृतायनो भवेद्यस्तु द्वादश्यां तत्परायणः। स स्वर्गवासी भवति पुमान् स्त्री वा विशेषतः"।

हरिकालीव्रतं भविष्योत्तरे "शुक्ले भाद्रपदस्यैव तृतीयायां समाचरेत्। सप्तधान्यैः सवैरूढैः कृत्वा विहितमादृते। खर्जूरैर्नारिकेलैश्च कदलैर्मधुरैस्तथा। मातुलाङ्गकुशनैः शालाक्षैर्लाङ्गलैस्तथा। गन्धैः पुष्पैः फलैर्धूपैर्नैवेद्यैर्मोदकादिभिः। प्रीणयित्वा समासाद्य पद्मरागेण भाविता। घण्टावाद्यादिभिर्गीतैः शुभैर्दिव्यैः कथानकैः। पूजनीया महाराज! मन्त्रेणानेन भक्तितः। हरेर्नाम्नः महाव्यक्ते! हरिकालि! हरिप्रिये!। सर्वदा मन्मूर्त्तिस्थे! प्रणतार्त्तिहरे! नमः। इत्थं संपूज्य तां देवीं दद्याद्विप्राय दक्षिणाम्। कृत्वा जागरणं रात्रौ प्रभाते किञ्चिदुद्गते। रात्रौ सुवासिनीभिश्च सा नेया तु जलाशये। ततो जलाशये रम्ये मन्त्रेणैव विसर्जयेत्। अर्चिता च मया भक्त्या गच्छ देवि! सुरालयम्। मम सौभाग्यलाभाय पुत्रलाभाय च। एवं यः पाण्डवश्रेष्ठ! हरिकालीव्रतं चरेत्। प्रतिवर्षं विधानेन नारी वा भक्तितत्परा। भीत्वा दत् फलमाप्नोति तदन्येन न लभ्यते"।

परिशिष्टम्।

शिवरात्रिव्रतं स्कन्दपु० प्रभासख० "फाल्गुनस्य सिते पक्षे एकादश्यामुपोषितः। स्नात्वा नद्यां तड़ागे वा वाप्यां कूपे ह्रदेऽपि वा। गत्वा गिरौ वने वापि यत्र सा प्राप्यते शिवा। क्षीरोदे मथ्यमाने तु यदा वृक्षः समुत्थितः। आमर्द्देवदैत्यानां तेन सामलकी स्मृता। अस्मिन् वृक्षे स्थिता नित्यं सदा पितृगणैर्नृप!। शिवालक्ष्मीस्थितो वृक्षः सेव्यते सुरसत्तमैः। देवैर्ब्रह्मादिभिः सर्वैः सोऽसौ देवगणः स्मृतः। तत्र गत्वा हरिः पूज्यो दृष्टपूर्वोऽथ वा शिवा। पूज्या पुष्पैः शुभैरात्रौ कार्य्यं जागरणं नरैः। दशाधिकशतैः कार्यौ फलैर्नाना: प्रदक्षिणा। प्रदक्षिणीकृत्य ततो भोक्तव्यं तु फलं नरैः। करकं जलपूर्णं तु कर्त्तव्यं पात्रसंयुतम्। रात्रिशेषन्तु कर्त्तव्यं कथाश्रवणतत्परैः। मुच्यन्ते देहिनः पापैः कलिजैः कायसम्भवैः। देहान्ते ये नराः पूर्वं पूज्यन्ते हरिमन्दिरम्"।

एतानि व्रतानि प्रायेण हेमाद्रिव्रतखण्डोक्तानि प्रसङ्गागतान्यपि कानिचिदुक्तानि। अन्यान्यपि व्रतानि तत्रोक्तानि द्रष्टव्यानि नैमित्तिकानि प्राजापत्यादीनि व्रतानि तु तत्तच्छब्दे उक्तानि द्रष्टव्यानि। [२विस्तारे च अमर।

व्रतति स्त्री प्र+तन–क्तिन् पृषो० वा ङीप्। १लतायाम्।

व्रतभिक्षा स्त्री व्रताङ्गं भिक्षा। उपनयनकालविहितभिक्षायां तद्विधिः संस्कारतत्त्वे दर्शितो यथा "अथ भैक्ष्यञ्चरति"। अथ मन्त्रकृष्णोमादित्योपस्थानमग्निप्रदक्षिणञ्च शंसति। 'प्रतिगृह्योपसितं दण्डमुपस्थाय च भास्करम्। प्रदक्षिणं परीत्याग्निं चरेद्भैक्ष्यं यथाविधि" इति मनुवचनात्। "भिक्षासमूहं भैक्ष्यं तच्चरति आहरति इत्यर्थः। 'मातरमेवाग्रे ये चान्ये सुहृदो यावन्तो वा सन्निहिताः स्युः"। याचते इत्यध्याहार्यम्। सुहृदः स्निग्धहृदयः स्वस्रादयः तथाच मनुः "मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्। भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत्"। सन्निहितासु देशस्थासु न तु प्रतिगृहं गत्वा। (भवति! भिक्षां देहीति) ब्राह्मणभिक्षा प्रयोगः, तथा च मनुः "भवत्पूर्वं चरेद्भैक्ष्यमुपनीतो द्विजोत्तमः। भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम्"। "आदिमध्यावसानेषु भवच्छब्दोपलक्षिता। ब्राह्मणक्षत्रियविशां भैक्ष्यचर्या यथाक्रमम्" इति याज्ञवल्क्यवचनाच्च। आचार्य्याय भैक्ष्यं प्रणिपत्य वेदयति (समर्पयति) भोरिति"। "आचार्य्याय निवेद्य प्रतिगृह्णीयादिति" श्रुत्यन्तरवचनात्। भैक्ष्यं भोरिति निवेदनमन्त्रः। भैक्ष्यस्य संस्कारार्थत्वात् आचार्य्याय निवेद्य स्वयं तदेव भुञ्जीत। तथा च मनुः "समाहृत्याथ तद्भैक्ष्यं यावदन्नममायया। निवेद्य गुरवेऽश्नीयात् आचाम्य प्राङ्मुखः शुचिः"। आचार्य्यश्च माणवकाय भैक्ष्यं प्रदाय कर्मशेषं समापयेत्"।

व्रतसंग्रह पु० ६त०। व्रतग्रहणार्थं कतटीक्षायाम्। हेमच०

व्रतादेश पु० आदिश्यतेऽत्र आ+दिश आधारे ल्युट्। उपनयने तत्र हि आचार्येण माणवकस्य व्रतमादिश्यते।

व्रतिन् पु० व्रतमस्त्यस्य इनि। १व्रतधारके २यजमाने च। अमरः।

व्रश्च छेदे तु०पर०सक०जदित् वेट् । वृश्चति अव्रश्चीत् अव्राक्षीत् ।

व्रश्चन पु० वृश्च्यतेऽनेन व्रश्च-ल्यु । (छेनि) १स्वर्णादिच्छेदनार्थे अस्त्रभेदे अमरः । भावे ल्युट् । २छेदने न० अमरः ।

व्रात पु० वृ-अतच् पृषो० । समूहे अमरः ।

व्रातीन त्रि० व्रातेन चरति ख । संघजीविनि । “व्रातीनव्यालदीप्रास्त्रः” भट्टिः ।

व्रात्य पु० व्रातात् समूहात् च्यवति यत् । अव्यवहार्य्ये, संस्कारहीने, जातिमात्रोपजीविनि, “अत ऊर्द्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः । सावित्रीपतिता व्रात्या भवन्त्यार्य्यविगर्हिताः” मनुः । तत्र प्रायश्चित्तं मिता०उक्तं यथा तत्र व्रात्यतायां मनुनेदमुक्तम् “येषां द्विजानां सावित्री नानूच्येत यथाविधि । तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेदिति” । यच्च यमेनोक्तम् “सावित्रीपतिता यस्य दश वर्षाणि पञ्च च । सशिखं वपनं कृत्वा व्रतं कुर्य्यात् समाहितः । एकविंशतिरात्रञ्च पिबेत् प्रसृतियावकम् । हविषा भोजयेच्चैव ब्राह्मणान् सप्त पञ्च वा । ततो यावकशुद्धस्य तस्योपनयनं स्मृतम्” इति । तदुभयमपि याज्ञवल्कीयमासपयोव्रतविषयम् । यत्तु वशिष्ठेनोक्तम् “पतितसावित्रीक उद्दालकव्रतञ्चरेत् । द्वौ मासौ यावकेन वर्त्तयेन्मासं पयसा पक्षमामिक्षयाष्टरात्रं घृतेन षड्रात्रमयाचितेन त्रिरात्रमब्भक्षोऽहोरात्रमुपवसेदश्वमेधावभृथं गच्छेद्व्रात्यस्तोमेन वा यजेतेति” । तत्रेयं व्यवस्था यस्योपनयने आषष्ठाब्देन तत्कालातिक्रमस्तस्य याज्ञवल्कीयव्रतानामन्यतमत् शक्त्यपेक्षया भवति अनापद्यतिक्रमे तु मानवं त्रैमासिकम् । तत्रैव षोडश-वर्षादूर्द्ध्वमपि कियत्कालातिक्रमे उद्दालकव्रतम् व्रात्यस्तोमो वेति । येषान्तु पित्रादयोऽप्यनुपनीतास्तेषामापस्तम्बोक्तम् “यस्य पिता पितामहावनुपनीतौ स्यातान्तस्य संवत्सरं त्रैविद्यकं ब्रह्मचर्य्यम् । यस्य प्रपितामहादेर्नानुस्मर्यते उपनयनन्तस्य द्वादश वर्षाणि त्रैविद्यकं ब्रह्मचर्य्यमिति” ।

व्रात्यस्तोम पु० व्रात्ययोग्यः स्तोमः । यज्ञभेदे “स च यज्ञश्चतुर्विधः” कात्या० श्रौ० २२।४।१ सूत्रादौ दर्शितो यथा

“व्रात्यस्तोमाश्चत्वारः” सू० “व्रात्यस्तोमसंज्ञकाश्चत्वारः क्रतवो भवन्ति व्रात्याः प्रसिद्धा एव त्रिपुरुषं पतितसावित्रीकाः । प्रायश्चित्तार्थत्वाच्च लौकिकेऽग्नौ भवन्ति न श्रौतैराधानं प्रयुज्यते अतदङ्गत्वात् तदुक्तमाचार्य्येण स्वपतौष्टिं प्रकृत्य लौकिक इति । “द्वितीय उक्थ्यः” सू० “व्रात्यगणस्य ये सम्पादयेयुस्ते प्रथमेन यजेरन्” सू० सम्पादनं च गायननर्त्तकादीनाम् तेषां प्रथमेऽधिकारः । ये व्रात्या नृत्यगीतवाद्यशस्त्रधारणादौ स्वयं प्रवीणाः सन्त उपदेष्टारो भूत्वा स्वां विद्यां व्रात्यसमूहस्य सम्पादयेयुः शिक्षेयुः पाठयेयुः ते प्रथमेन यजेरन् । “द्वितीयेन निन्दिता नृशंसाः” सू० । नृशंसत्वेन ये निन्दितास्तेषां द्वितीयेऽधिकारः” सं० । ये नृशंसा निन्दितास्त्वभिमनुष्यैरभिशंसनेन पापाध्यारोपणेन निन्दिताः गर्हिताः ज्ञातिभिर्वहिष्कृताः ते द्वितीयेन यजेरन्” कर्कः “तृतीयेन कनिष्ठाः” सू० कनिष्ठाः लघवः । “ज्येष्ठाश्चतुर्थेन” सू० अधिक्रियन्ते । ज्येष्ठशब्दार्थमाह “अपेतप्रजननाः स्थविरास्तदाख्यास्तेषां ये नृशंसतमः स्यादुद्रव्यवत्तमो वानूचानतमो वा तस्य गार्हपत्ये दीक्षेरन्” सू० । “स गृहपतिः कर्त्तव्यः” सं० । अपगतप्रजननेन्द्रियसामर्थ्या यौवनापगमे । निर्वीर्य्यप्रजनाः स्थविरा वृद्धास्तदाख्याः । नृशंसतमः अत्यन्तं क्रूरकर्मा” भा० ।

[अव्रैषीत् ।

व्री वृतौ क्र्या० प्वा० पर० सक० अनिट् । व्रि(व्री)णाति

व्री गतौ दिवा० आ०सक० अनिट् । व्रीयते अव्रेष्ट । ओदित् व्रीणः ।

[अव्रीडीत् ।

व्रीड् क्षेपे दिवा० पर० अक० लज्जायां सक० सेट् । व्रीड्यते

व्रीड पु० व्रीड्-घञ् । लज्जायाम् । अ । तत्रैव स्त्री अमरः ।

व्रीस वधे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । व्रीसयति ते व्रीसति ।

व्रीहि पु० व्री-हि किच्च । १धान्यभेदे २आशुधान्ये च अमरः । तद्भेदादिकं भावप्र० उक्तं यथा

“वार्षिकाः कण्डिताः शुक्लाः व्रीहयश्चिरपाकिणः । कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि । शालामुखो जतुमुख इत्याद्याः व्रीहयः स्मृताः । कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतण्डुलः । पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते । कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्डक उच्यते । शालामुखः कृष्णशूकः कृष्णतण्डुल उच्यते । लाक्षावर्णं मुखं यस्य ज्ञेयो जतुमुखस्तु सः । व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिताः । अल्पाभिष्यन्दिनो बद्धवर्च्चस्काः षष्टिकैः समाः । कृष्णव्रीहिर्वरस्तेषां तस्मादल्पगुणाः परे” । ततः अस्त्यर्थे व्रीह्या० इनिठनौ । व्रीहिन् व्रीहिक तद्विशिष्टे त्रि० बिल्वा० प्राग्दीव्यतीये अवयवार्थे अण् । व्रैह तदवयवे ।

व्रीहिकाञ्चन पु० व्रीहिषु काञ्चनं तद्रूपमस्त्यस्य अच्। मसूरे त्रिका०। [धान्ये) सुपभेदे राजनि०।

व्रीहिपर्णी स्त्री व्रीहीणामिव पर्णान्यस्याः ङीष्। (शाल-

व्रीहिभेद पु० ६त०। १धान्यभेदे (चिना) अमरः। २धान्यविशेषे च। [पुरोडाशे। अन्यत्र विल्वा० अण्।

व्रीहिमय पु० व्रीहेर्विकारः पुरोडाशः मयट्। व्रीहिविकारे

व्रीहिराजिका पु० व्रीहिषु राजिकाकारे अस्त्यस्याः अच्। कङ्गुधान्ये (काङ्नी) मेदि०।

व्रीहिश्रेष्ठ पु० व्रीहिषु श्रेष्ठः। शालिधान्ये राजनि०।

व्रीह्यगार न० ६त०। धान्यस्थापनस्थाने कुसूले त्रिका०।

व्रीह्यादि पु० विकाराद्यर्थे इनिठन्प्रत्ययनिमित्ते पा०ग०सू० उक्ते शब्दगणे स च "व्रीहि माया शाला शिखा माला मेखला केका अष्टका पताका चर्मन् कर्मन् वर्मन् दंष्ट्रा संज्ञा वडवा कुमारी नौ वीणा बलाका यवखद नौकुमारी (शीर्षान्नञ)" "नौकुमार्य्योरिकारौ गणे द्विधा पाठः" सि०कौ०। "अत इनिठनौ" "व्रीह्यादिभ्यश्च" पा०व्रीही व्रीहिकः। "न च सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते किं तर्हि शिखामालासंज्ञादिभ्य इनिः यवखदादिभ्यः ठन्। अन्येभ्य उभयम्" सि०कौ०।

व्रुड संवरणे सक० संघाते मज्जने च अक० तु० कुटा० पर० सेट्। व्रुडति अव्रुडीत्।

व्रूस वधे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। व्रूसयति ते व्रूसति। [क्षेत्रादौ।

व्रैहेय त्रि० व्रीहीणां भवनं क्षेत्रम् ढक्। व्रीहिभवनयोग्ये

व्ली गतौ वृतौ च क्र्यादि० पा० प०सक० अनिट्। (वि)व्लीनाति अव्लैषीत्।

परिशिष्टम्।

वज्र पु० सामवेदप्रसिद्धे यज्ञभेदे सि०कौ०।

विजया स्त्री शच्यादिषु मातृषु मातृभेदे

विजयाभिनन्दन पु० कलियुगीयशककर्त्तृ नृपभेदे शकशब्दे दृश्यम्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य
संकलिते वाचस्पत्याभिधाने वकारादिशब्दार्थसङ्कलनम्।

श

शकारः ऊष्मवर्णभेदः। अस्योच्चारणस्थानं तालु। तदुच्चारणे चाभ्यन्तरप्रयत्नः विवृतम्। बाह्यप्रयत्ना विवारश्वासाघोषा महाप्राणश्च। अस्य ध्येयस्वरूपम् "शकारं परमेशानि! शृणु वर्णं शुचिस्मिते!। रक्तवर्णप्रभाकारं स्वयं परमकुण्डली। चतुर्वर्गप्रदं देवि! शकारं ब्रह्मविग्रहम्। पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं प्रिये। रजःसत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा। त्रिशक्तिसहितं वर्णमात्मादितत्त्वसंयुतम्" कामधेनुतन्त्रम्। अस्य वाचकशब्दा योगिनीतन्त्रोक्ता यथा "शः श्वेतः कामरूपी कामरूपो महामतिः। श्रीकण्ठनामा कुमारोऽस्थि श्रीकण्ठो वृषकेतनः। सप्तम: शयनं शान्ता सुभगा विस्फुलिङ्गिनी। मृत्युर्देवो महालक्ष्मीर्महेन्द्रः कुलकौलिनी। वाक्कण्ठो वियदन्तं हृदन्तोऽङ्कुशः स्वनः। वामोरुः पुण्डरीकाक्षः कान्तिः कल्याणवाचकः"। मातृकान्यासेऽस्य हृदादिदक्षकरे न्यास्यता। काव्यादौ प्रथमप्रयोगे सुखं फलम्। "शः सुखं वस्तु-खेदम्" वृ० र० टी०। [शब्दर०।

श न० शो–ड। १मङ्गले त्रिका०। २महादेवे, ३शस्त्रे च पु०

शंयु त्रि० शमस्त्यस्य शम्+युस्। शुभान्विते त्रिका०।

शंव त्रि० शमस्त्यस्य शम्+व। १शुभयुक्ते त्रिका०। २मूसलाग्रलोहे २वज्रे च पु० धरणिः।

शंवर न० शं वृणोति शम्+वृ–अच्। जले अमरः।

शंसा स्त्री शन्स–अ। १वाक्ये। २वाञ्छायां मेदि०। ३प्रशंसायाञ्च शब्दर०। [३कथिते ४स्तुते च।

शंसित त्रि० शन्स–क्त। १निश्चिते हला०। २हिंसिते।

शंस्य त्रि० शन्स–ण्यत्। १हिंस्ये २स्तुत्ये ३वाच्ये च।

शक त्रासे अक० संशये सक० भ्वा० आ० सेट् इदित्। शङ्कते अशङ्किष्ट।

शक क्षमायां सक० दि० उभ० सेट्। शक्यति ते अशाकीत्–अशकीत् अशकिष्ट "शक्योऽस्य मन्युर्भवता विनेतुम्" रघुः।

शक सामर्थ्ये स्वा० प० अक० इरित् सेट्। शक्नोति अशकत्–अशाकीत्। पुषादिरित्येके तेन अशकदित्येव।

शक पु० शक–अच्। १जातिभेदे स च व्रात्यक्षत्रियः १९०७पृ० दृश्यम। २देशभेदे स्वराज्यारम्भवत्सराङ्कप्रवर्त्तके ३नृपभेदे ४तदीये वत्सरे च। कलियुगे शककर्त्तृषु षट्सु युधिष्ठिरः विक्रमादित्यः शालिवाहनश्चेति त्रयो गता

विजयाभिनन्दनादयस्त्रयो भविष्यन्ति। तथा हि कलौ षट् शककर्त्तारः तन्नामादि ज्योतिर्वि० १०अ० उक्तं यथा "कलौ भविष्यन्त्यथ भारतावनौ महीभुजो बाहुमतोऽप्यनेकशः। शकास्तथैषामभिषेचनादिकं हितं सदोदीरितकालसाधितम्। धराधिभूर्मिश्रशकादिनातिजस्तदासनस्थोऽभिजनैर्नमस्कृतः। सुतः स राजाधिजनैः प्रतिष्ठितो न मन्त्रभेदाद्यभिषेचनोचितः। निहन्ति यो भूतलमण्डले शकान् सपक्षकोट्यज्जदसमान् कलौ। स राजपुत्रः शककारको भवेत् नृपाधिराज्ये ह्युतयाककर्त्तृ वा"। (तत्र शककारकस्य विक्रमादित्यस्य हननात् शालिवाहनस्य शककर्त्तृत्वम्) "युधिष्ठिरो विक्रमशालिवाहनौ नराधिनाथौ विजयाभिनन्दनः। इमेऽतु नागार्जुनमेदिनीविभुर्बलिः क्रमात् षट् शककारकाः कलौ"। तत्प्रवृत्तिकालांस्तत्राह "युधिष्ठिरात् वेदयुगाम्बराग्नयः (२०४४) शराग्निविधु (१३५) ऽभ्रखखाष्टभूमयः १८०००। ततोऽयुतं १००००. खखचतुष्टयं क्रमात् धराद्विगष्टाविति (८२१) शाकवत्सराः। युधिष्ठिरोऽभूत् विहस्तिनापुरे तथोज्जयिन्यां पुरि विक्रमाह्वयः। शालेः प्रभूमौ इति शालिवाहनश्चाचलकूटे विजयाभिनन्दनः। नागार्जुनो रोहितके क्षितौ बलिर्भविष्यतीन्द्रो भृगुकच्छपत्तने। शकप्रवृत्तिस्तदनन्तरं भवेत्तदा भविष्यन्त्यवनीभृतोऽर्कतः"। अत्र युधिष्ठिरात् प्राक् कलौ शककर्त्रन्तराभावात् कलियुगारम्भकालादेव तस्य शककाल उक्तः वराहसंहितायां १२ अ० तु तद्राज्यावधित एव तच्छककाल इत्यभिप्रायेण "आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ। षड्द्विकपञ्चद्वियुतः (२५२६) शककालस्तस्य राज्ञश्च" तेन कलेः (५१८) वर्षेषु गतेषु युधिष्ठिरस्य राज्यप्रवृत्तिः। षट् कर्त्तृवत्सरसमष्टिश्च इति न कलिमानसंख्याविरोधः अतएव ज्योतिर्विदाभरणग्रन्थे ग्रन्थकृतैव "वर्षैः सिन्धुरदर्शनाम्बरगुणैर्याते कलौ सम्मिते" इति कलियुगस्यैव ३०६८ वर्षेषु गतेषु ग्रन्थकरणमुक्तम्।

युधि०	२०४४
विक्र०	१३५
शालि०	१८०००
विजया०	१००००
नागा०	४०००००
बलि०	८२१
	३२२०००

शकट पु० न० शक–अटन्। १यानभेदे (गाड़ि) अमरः। २असुराधिष्ठिते नन्दानयस्थे शकटविशेषे शकटभञ्जनः शब्दः। ३द्विसहस्रपलपरिमाणे हेमच०। स्वल्पार्थे ङीप्। क्षुद्रशकटे स्वार्थे क। शकटिका तत्रैव स्त्री।

शकटहन् पु० शकटमसुराधिष्ठितशकटभेदं हतवान् हन–भूते क्विप्। श्रीकृष्णे तत्कथा हरिवं० ६२अ०।

शकटाह्वा स्त्री शकटाकारत्वात् तदाह्वा यस्याः। रोहिणी॰ नक्षत्रे तस्याः शकटाकारचतुस्ताराात्मकत्वेन तथात्वम्।

शकान्धु पु० ६त० शकन्धु॰। पररूपनिपातः शकानां कूपे।

शकल पु० न० शक–कलक्। १खण्डे २एकभागे। ३त्वचि ४वल्कले मेदि० ५शल्के (আঁস) च न०।

शकलिन् पु० शकलं शल्कमस्यास्ति इनि। मत्स्ये अमरः।

शकाब्द पु० शककर्त्तृनृपसंबन्धी अब्दः। १शकप्रवर्त्तकनृपराज्यावधिवत्सरे २तत्संख्यायाञ्च।

शकार पु० "मदमूर्खताभिमानी दुष्कुलतैश्वर्यसंयुक्तः। सोऽयमनूढाभ्राता राज्ञः श्यालः शकार उद्दिष्टः" सा०द० उक्तलक्षणे १राज्ञोऽनूढभार्याभ्रातरि। श+स्वरूपे–कार। शस्वरूपे २वर्णे च।

शकारि पु० शकानां म्लेच्छजातिभेदानामरिः। विक्रमादित्ये

शकुन न० शक–उनन्। १शुभाशुभसूचकनिमित्ते–बाहुस्पन्दनकाकादिदर्शनादौ। दुःशकुनशब्दे ३६१४पृ० दृश्यम् २पक्षिमात्रे ३पक्षिभेदे गृध्रे च पुंस्त्री० मेदि०।

शकुनज्ञ त्रि० शकुनं जानाति ज्ञा–क। १निमित्ताभिज्ञे २ज्येष्ठ्यां स्त्री त्रिका०।

शकुनि पु० शक–उनि। १पक्षिमात्रे अमरः। २चिल्लपक्षिणि हेमच०। ३सुवलराजपुत्रे दुर्य्योधनमातुले च। ३श्यामापक्षिणि स्त्री ङीप् राजनि०। ४बवादिषु करणभेदे पु० ५दुःसहनृपपुत्रे पु० मार्कण्डेयपु०। विकुक्षिनृपपुत्रभेदे पु० वह्निपु०।

शकुनिप्रपा स्त्री० ६त०। पक्षिणां पानीयशालायाम् हारा०।

शकुन्त पु० शक–उन्त। १पक्षिमात्रे। २भासपक्षिणि ३कीटभेदे च मेदि०।

शकुन्तला स्त्री० शकुन्तैः लायते ला–घञर्थे–क। मेनकागर्भजातायां विश्वामित्रसुतायाम् सा च जातमात्रा मात्रोत्सृष्टा शकुन्तलालिता पश्चात् कण्वमुनिना प्रतिपालिता दुष्मन्तनृपेण गान्धर्वविधिना व्यूढेति "निर्जने तु वने यस्मात् शकुन्तैः परिपालिता। शकुन्तलेति नामास्याः कृतं चापि ततो मया" भा० आ० ७२अ०। शकुन्तलामधिकृत्य कृतो ग्रन्थः। अण् आख्यायिकायां तस्य वा लुक्। कालिदासप्रणीते शकुन्तलाधिकारेण कृते २नाटकभेदे प्र अणाऽदर्शि तु शाकुन्तल तत्रार्थे न०।

शकुन्तलात्मज पु० ६त० । शकुन्तलासुते भरतनृपे हेमचन्द्र० ।

शकुन्ति पु० शक-उन्ति । १पक्षिमात्रे अमरः । २भासपक्षिणि उणादिकोषः ।

शकुल पुंस्त्री० शक-उलच् । मत्स्यभेदे (शउल) अमरः । स्त्रियां ङीष् । [याम् राजनि० ।

शकुलाक्षी पु० शकुलस्याक्षीव अच् समा० ङीष् । गण्डदूर्वा०

शकुलादनी स्त्री० शकुलैरद्यते अद-ल्युट् । कट्की) शाकभेदे अमरः । २जटामांस्यां, ३जलपिप्पल्यां, कट्फले च विश्वः । [(गडुइ) मत्स्ये । अमरः ।

शकुलार्भक पु० शकुलस्यार्भक इव क्षुद्रत्वात्तदाकारत्वाद्वा ।

शकृत् न० शक-ऋतन् । विष्ठायाम् अमरः ।

शकृत्करि पु० शकृत् किरति कॄ-इन् । १गवादीनां २वत्से २वत्सायां स्त्री ङीप् ।

शकृद्द्वार न० ६त० । मलद्वारे अपानस्थाने हेमच० ।

श(क्क)र पु० शक-क्विप् तं-अच् कर्म० शक-करप् वा । १वृषे मेदि० । चतुर्दशाक्षरपादके २छन्दोभेदे । ३नदीभेदे ४मेखलायाञ्च स्त्री ङीप् । ५अङ्गुलौ सि०कौ० । पृषो० शर्करीत्यपि चतुर्दशाक्षरपादके छन्दसि ।

शक्त त्रि० शक-क्त । समर्थे हेमच० ।

शक्ति स्त्री शक-क्तिन् । १सामर्थ्ये २स्त्रीदेवतायां देवीमूर्त्तौ । न्यायाद्युक्ते कारणनिष्ठे कार्य्योत्पादनयोग्ये ३धर्मभेदे । ३शब्दनिष्ठे अर्थबोधकतारूपे बोध्यत्वप्रकारकेच्छाविषयत्वरूपे वृत्तिभेदे शर्वलाख्ये ४अस्त्रभेदे च अमरः । मीमांसकमते शक्तिः पदार्थान्तरम् यथोक्तम् अनुमा०चि० । "स्यादेतत् ईश्वरवत् कार्य्येणैव शक्तिरप्यनुमीयते तथा हि, यादृशादेव करानलसंयोगाद्दाहो जायते तादृशादेव सति प्रतिबन्धके न जायते अतो यदभावात् कार्य्याभावस्तदङ्गादावभ्युपेयं तेन विना तदभावात् यत्कार्य्यानुपपत्तेर्व्यतिरेकत्वेन शक्तिसिद्धिः" । न्यायमते तन्निरासस्तत्रैव ईश्वरवादप्यन्ये दर्शितो यथा

"तृणारणिमणिफूत्कारादिव्यक्तीनामानन्त्येन प्रतिव्यक्ति भावहेतुजानन्तशक्तिस्वीकारे गौरवं तावदनन्तव्यक्तिजन्यावान्तरवह्निव्यक्तिषु जातित्रयकल्पने लाघवमिति तदेव कल्प्यते । न च जातौ योग्यानुपलब्धिबाधः गोमयप्रभववृश्चिकयोर्वा पाटलत्वकपिलत्ववदवान्तरजात्यस्य प्रत्यक्षसिद्धत्वात् तृणजन्यनानावह्निषु तृणजन्यवह्नीनामन्तरं वह्नित्वव्याप्यानुगतबुद्धिरस्ति जातिविषया । तृणजन्यत्वेनोपाधिनाऽभावितिचेन्न बाधकं विनानुगतबुद्धेस्तद्दृक्षुद्रजातिविषयत्वनियमात् । न च गोमयवृश्चिकप्रभववृश्चिकजातिपरम्परायामनुगतजात्यापत्तिः गोमयजन्यवृश्चिकप्रभवत्वजातेः सत्त्वात् शक्तिमात्रे च दाहस्पर्शवानवयवः तत्संयोगः सेवनादिच कारणानि न तु तृणादिकं विनापि, तदुत्पत्तिप्रसङ्गः विशेषसामग्रीमादायैव साध्यसामग्र्याजनकत्वात्" ।

एवमाधेयशक्तिरपि मीमांसकमतेन पूर्वपक्षीकृत्य तत्र निरस्ता यथा तत्र प्रोक्षणप्रतिष्ठायवद्ययोर्दर्शितम् अधिकं किञ्चिदत्र प्रदर्श्यते यथा

"कामिनीचरणाभिघातदोहदादिभिरशोकपुष्पोत्कर्षदर्शनादपि नाधेयशक्तिः समयविशेषावच्छिन्नचरणदोहदादिसंयोगध्वंसस्यैव कारणत्वात् चरणाभिघाताकृष्टभागान्तर्जनितदृष्टादेव वा तदुपपत्तेः कालान्तरे पुष्पाद्युत्कर्षात् । दुःखावयवोपचयावश्यम्भावेन वृक्षभेदावश्यकत्वात् । नापि ताम्रकांस्यादावम्लभस्मसंयोगादिजन्यशुद्धिरूपा आधेयशक्तिः तत्संयोगध्वंसस्य संयोगसमानकालीनास्पृश्यस्पर्शादिप्रतियोगिकयावदनादिसंसर्गाभावसहितस्य शुद्धिपदार्थत्वात् । भस्मादिसंयोगजनितः कांस्याद्युपभोक्तृनिष्ठः संस्कार एव शुद्धिरित्यन्ये । अभिमन्त्रितपयःपल्लवादावपि समयविशेषावच्छिन्नाभिमन्त्रणध्वंस एव व्याध्युपनायकः तत्तन्मन्त्रदेवतासन्निधिरेव वा । कलमबीजादीनामापरमाण्वन्तभङ्गे तत्र जात्यन्तरजात्यभावे नियतकलमजातीयादिसिद्धिरपि । परमाणुपाकजविशेषादेव कार्य्यवृत्तिरूपादि सजातीयस्य पूर्वरूपादिविजातीयस्य परमाणौ पाकजरूपादेरभ्युपेतत्वात् यथा हि कमलबीजं यवादिजात्या व्यावर्त्त्यते तथा तत्परमाणवोऽपि पाकजैरेव । एवं माघकर्षणजनितात् परमाणुपाकपरम्पराविशेषादेव हैमन्तिकशस्योत्पत्तिः । एतेन ताम्बारसावसेकादयो व्याख्याताः । निमित्तविशेषजनितपाकजात्तत्फलविशेषः यथा हारीतमांसं हारिद्रानलसाधितमुपयोगात् सद्यो व्यापादयति नान्यथा साधितमित्यादि । यत्र च तोयतेजोवायुषु न पाकजो विशेषस्तत्रोत्कर्षानुत्कर्षद्रवकठिनत्वादयो विशेषास्तत्तदुपनायकादृष्टविशेषादेव । तुलादौ चाधिवासपूर्वकतुलारोहणसामग्री तुल्यस्य सत्यासत्यप्रतिज्ञासहिता प्राचीनाधर्माधर्मफले तज्जयभङ्गौ जनयति । यद्वा अयं निष्पापः पापवान् वेति तुलारूढाभिशस्तध्यानविशेषसहिता सा तथा, तदाहुः, "तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः" इति

अथ वा प्रतिज्ञाशुद्धग्रन्थौ अपेक्ष्य तया सत्यधर्मौ अन्वेते ताभ्यां जयपराजयौ सत्यासत्यप्रतिज्ञाभियुक्ततुलारोहणस्येष्टानिष्टफलत्वेनार्थतो विधिनिषेधात्। अभियुक्तः सत्यप्रतिज्ञो विजयकामस्तुलामारोहेदित्यसत्यप्रतिज्ञो न तुलामारोहेदिति श्रुतेरध्ययनात्। यद्वा तया देवतासन्निधिः क्रियते ताश्च कर्मानुरूपलिङ्गमभिव्यञ्जयन्ति"। तत्र च शक्तिपदार्थस्वरूपादिकमुक्तं यथा

"कस्तर्हि शक्तिपदार्थः कारणत्वं तच्च स्वस्वव्याप्येतरसकलसंपत्तौ कार्य्याभावव्यापकाभावप्रतियोगित्वम्। अथ वा यत्र कार्य्याभावव्याप्यता इतराभावावच्छिन्ना तत्कारणबीजे अङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते इतरसमवधाने सति बीजादङ्कुरसत्त्वात्, किन्त्वितराभावेनावच्छिद्यते इतराभावावच्छिन्ना तत्कारणबीजे अङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते इतराभावे बीजस्याङ्कुराभावनियमात्। शिलाशकलेऽङ्कुराभावव्याप्यता शिलात्वेनैवावच्छिद्यते। यद्वा अन्यासमवधानावच्छिन्नकार्य्यानुत्पत्तिव्याप्यत्वं कारणत्वं, रासभादेः कार्य्याभावव्याप्यता अन्यासमवधानस्य वैयर्थ्येनानवच्छेदकत्वात्। अनन्यथासिद्धनियतपूर्ववर्त्तिजातीयत्वं वा तत्त्वम्। अन्यथासिद्धत्वं त्रिधा येन सहैव यस्य यं प्रति पूर्ववर्त्तित्वमवगम्यते, यथा घटं प्रति दण्डरूपस्य,(१) अन्यं प्रति पूर्ववर्त्तित्वे ज्ञाते एव यं प्रति यस्य पूर्ववर्त्तित्वमवगम्यते यथा शब्दं प्रति पूर्ववर्त्तित्वे ज्ञात एव ज्ञानं प्रत्याकाशस्य(२)। अन्यत्र क्लृप्तनियतपूर्ववर्त्तिन एव कार्य्यसम्भवे तत्सहभूतत्वम्(३) यथा गन्धवति गन्धोत्पादादौ गन्धं प्रति तत्प्रागभावस्य नियतपूर्ववर्त्तित्वकल्पनात् पाकजस्थले गन्धं प्रति रूपादिप्रागभावादीनामन्यथासिद्धत्वम् एतत्त्रितयव्यतिरेके नियतपूर्ववर्त्तित्वं कारणत्वम्। यागापूर्वयोस्तु यागपूर्ववर्त्तित्वेऽवगते न स्वर्गस्य। माने तत्र अन्यस्य पूर्ववर्त्तित्वेऽवगते जनकस्य पूर्वभावोऽवगम्यते तत्र जन्येन जनकस्यान्यथासिद्धिः। यत्र च जनकस्य तथात्वेऽवगते जन्यस्य पूर्वभावावगतिस्तत्र तद्द्वारा तस्य जनकत्वमेव। दण्डसंयोगभ्रमणयोस्तु युगपदेव पूर्वभावित्वपक्षः। स्वजनकान्तरोत्पत्तिसमयसमवधाने सत्यपि यस्याभावात् कार्य्यं न जायते सति च जायते तज्जातीयं प्रति तदनन्यथासिद्धम्। अनन्यथासिद्धनियतपूर्ववर्त्तित्वं कारणत्वमित्यन्ये तत्र ईश्वरतद्बुद्ध्यादीनामसंग्रहात् तद्व्यतिरेकस्य तत्समवधान-व्यतिरेकस्य वाऽभावात्। कार्य्यस्यान्यथानुपपद्यमानतावच्छेदकत्वं वाऽनन्यथासिद्धम्। नन्वेवमतिरिक्तशक्तौ साधकबाधकप्रमाणाभावात्तत्त्वं संशयः न च साधकाभावस्य बाधकत्वं बाधकाभावस्य साधकत्वादिति चेन्न साधकाभावेन वह्न्यादावन्यत्र सिध्यतीन्द्रियधर्माभावसाधने बाधकं बाधकाभावेनातीन्द्रियधर्मसाधने गौरवमिति साधकाभावात्तदभाव एव सिध्यतीति"।

"इच्छा क्रिया तथा ज्ञानं गौरी ब्राह्मी तु वैष्णवी। त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति" गोरक्षसं०। सत्त्वरजस्तमोगुणत्रयाधीने ईश्वरस्य क्रमेण ज्ञानेच्छाक्रियारूपे ७शक्तित्रये। "एषा त्रिशक्तिरुद्दिष्टा नरसिंहान्तगामिनी। एषा श्वेता परा सृष्टिः सात्त्विकी ब्रह्मसंस्थिता। एषैव रक्ता रजसि वैष्णवी परिकीर्त्तिता। एषैव कृष्णा तमसि रौद्री देवी प्रकीर्त्तिता। परमात्मा यथा देव एक एव त्रिधार्पितः। प्रयोजनवशाच्छक्तिरेकैव त्रिविधाऽभवत्" वराहपु०। प्रकृतिशक्तिश्च ईश्वरस्य सृष्टिकर्त्तृत्वप्रवर्त्तिता "शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्" आनन्दल०। तन्त्रोक्ते ५पीठाधिष्ठातृदेवताभेदे देवभेदे पीठशक्तयो भिन्नास्तन्त्रसारादौ उक्ताः। राज्ञां प्रभावोत्साहमन्त्रजाते ६सामर्थ्ये च अमरः। ८गौर्य्यां मेदि० ८कच्छुरायां शब्दचा०।

वृत्तिभेदशक्तिश्च अर्थबोधानुकूलः पदपदार्थसम्बन्धः स च इदं पदममुमर्थं बोधयतु, अस्मात् शब्दादयमर्थो बोद्धव्य इत्येवंरूपः इच्छात्मकः सङ्केतः, घटादिपदार्थविशेष्यक घटादिपदजन्यबोधविषयताप्रकारकेच्छाविषयो वा। मीमांसकास्तु अभिधा नाम पदार्थान्तरं सङ्केतग्राह्यं शक्तिरित्याहुः। पदपदार्थयोः सम्बन्धान्तरं शक्तिरिति शाब्दिकाः। सा च शक्तिस्त्रिविधा रूढिर्योगः योगरूढिश्चेति तत्राद्या घटादिपदेषु, द्वितीया पाचकादिपदेषु, तृतीया पङ्कजादिपदेषु। प्राभाकरमते शक्तिर्द्विविधा अनुभाविका स्मारिका च तत्राद्या कार्य्यत्वान्विते, द्वितीया तु जातौ। तत्र गवादिपदानां जात्याकृतिविशिष्टव्यक्तौ शक्तिरिति नैयायिकाः। व्यक्तावेव शक्तिरिति नव्याः। जात्याकृतिव्यक्तिषु तिसृषु शक्तिरिति वैयाकरणाः। जातावेव शक्तिर्व्यक्तिभानं त्वाक्षेपादिति भाट्टादयः। जातौ व्यक्तौ चोभयत्र शक्तिः किन्तु जात्यंशे ज्ञाता व्यक्त्यंशे स्वरूपसती प्रत्याय्यिकेति। कार्य्यान्वितव्यक्तौ शक्तिरिति प्राभाकराः। धातोस्तु फलावच्छिन्नव्यापारे शक्तिरिति

नैयायिकाः। फल एव शक्तिरिति मण्डनादयः। व्यापारे शक्तिरिति रत्नकोषकृत्। आख्यातस्य कृतौ शक्तिरिति नैयायिकाः। कर्त्तरि शक्तिरिति शाब्दिकाः। व्यापारमात्रे शक्तिरिति मीमांसकाः। चतुर्विधविषयत्वात् तस्याश्चातुर्विध्यं शब्दश०प्र० अलङ्कारिमते दर्शितं यथा

"जातिद्रव्यगुणस्पन्दैर्धर्मैः सङ्केतवत्तथा। जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः"। गोगवयादीनां गोत्वादिजात्या, पन्नाचादीनां तालूबधनादिद्रव्येण, धवलपिशुनादीनां पुण्यहेत्वादिगुणेन चलचपलादीनाञ्च स्पन्दानां कर्मणावच्छिन्नशक्तिमत्त्वाच्चातुर्विध्यमेव रूढानामिति तदुक्तं दण्डाचार्यैः "शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः। चातुर्विध्यादमीषान्तु शब्द उक्तश्चतुर्विधः" इति।

तदेतन्निराकृतं तत्रैव "तदेतज्जडमूकमूकादीनामन्ययूथ्यादीनाञ्च शब्दानामपरिग्रहापत्त्या परित्यक्तमस्माभिः"।

शक्तिग्रह पु० ६त०। शक्तेः अर्थबोधकताहेतुज्ञाने।

शक्तिग्राहक पु० शक्तिं गृह्णाति ग्रह–ण्वुल्। १कार्त्तिकेये शक्तिं ग्राहयति बोधयति ग्रह-णिच् ण्वुल्। "शक्तिग्रहं व्याकरणोपमानात् कोषाप्तवाक्याद् व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः" इत्युक्ते शक्तिबोधके २हेतौ। शक्तिग्रहप्रकारश्च शब्दशक्तिप्रकाशिकायां दर्शितो यथा

"सङ्केतस्य ग्रहः पूर्वं वृद्धस्य व्यवहारतः। पश्चादेवोपमानाद्यैः शक्तिधीपूर्वकैरपि"। प्रथमं बालेषु सङ्केतग्रहोदयस्य व्युत्पन्नशब्दाधीनव्यवहारादेव सम्भवात् तथाहि गामानयेति केनचित् पुरुषेण नियुक्तः कश्चन व्युत्पन्नस्तद्वाक्यतोऽर्थं प्रतीत्य गवानयनं करोति तच्चोपलभमानो बाल इदं गवानयनं स्वगोचरप्रवृत्तिजन्यं चेष्टात्वात् मदीयस्तनपानादिवदित्यनुमाय सा गवानयनप्रवृत्तिः स्वविषयधर्मिककार्य्यताज्ञानजन्या प्रवृत्तित्वात् मदीयप्रवृत्तिवदिति प्रवृत्तेर्गवानयनधर्मिककार्य्यताज्ञानजन्यत्वं प्रसाध्य गवानयनगोचरतज्ज्ञानमसाधारणहेतुकं कार्य्यत्वात् घटवदित्येवमनुमिन्वानः समुपस्थितत्वात् प्रकृतवाक्यमेव तदसाधारणकारणत्वेनावधारयति तदनन्तरञ्च गवादिपदानां प्रत्येकमावापोद्वापेन गवादिषु अनयत्वमवगत्याभिप्रायत्वे गवादिहस्ते तदस्वरूपत्वं कलयति। एवञ्च कश्चिदुप-मानाच्छक्तिग्रहो यथा गवादिपदशक्तिधीशालिना गोसादृश्यातिदेशवाक्यात् गवयपदवाच्यत्वबोधोत्तरं गवयत्वजात्यवच्छिन्ने गोसादृश्यग्रहात् गवयो गवयपदवाच्य इत्याकारः। कश्चिच्च व्याकरणात् यथा कर्मणि द्वितीया कर्त्तरि परस्मैपदमित्यनुशासनात् कर्मत्वादौ द्वितीयादेः। कश्चित् कोषादपि यथा "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति"। "हरोमः पिशरो जडः। चर्पे तोदः षट्पितृपिङ्गलौ भ्रमाकुले" इत्यादि कोषेभ्यः शैत्यादौ शुक्लादिशब्दस्य। कश्चिद्विवरणादपि यथा पचति पाकं करोतीति विवरणार्थकवाक्यात् कृत्यादौ तिङादेः। कश्चित् प्रसिद्धार्थशब्दसामानाधिकरण्यादपि यथा नीरूपस्पर्शवान् वायुर्निस्पर्शमूर्त्तिमत्त्वेन इत्यादौ रूपशून्यस्पर्शवदादिषु वाय्वादिपदस्य। वायुत्वादिजातेरतीन्द्रियत्वेन स्वरूपतस्तदवच्छिन्नशक्त्यनुपस्थित्या तत्र शक्तिग्रहासम्भवात् यथा वा "वत्तकन्यामकुञ्चितां कन्यां दद्यात् कुक्कुटः स्मृतः" इत्यादावुक्तरीत्या कन्यादानादिषु कुक्कुटादिपदस्य। सहकारतरौ मधुरं रौति पिक इत्यादिकन्तु न युक्तमुक्तमेष शक्तिग्रहस्योदाहरणं तिङर्थे धर्मिण्यभेदेन नामार्थान्वयस्याव्युत्पन्नत्वात् प्रत्यक्षसिद्धकोकिलत्वजात्यवच्छिन्न एव वाचकेन पिकशब्दस्य शक्तिग्रहच्छेदात्। कश्चिद्वाक्यशेषादपि यथा यवपदस्य कङ्गुमत्यौ म्लेच्छानां दीर्घशूके च शिष्टानां व्यवहारादेकमात्रशक्तेः परिच्छेत्तुमशक्यत्वात् नानार्थत्वस्य चान्याय्यत्वात् यवमयश्चरुर्भवतीति श्रुतौ यवपदस्यार्थसन्देहे "वसन्ते सर्वशस्यानां जायते पत्रशातनम्। मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः" इति विश्वयोकाङ्क्षया प्रवर्त्तमानाद्वाक्यशेषाद्दीर्घशूक एव यवपदस्य शक्तिग्रहः। यथा वा स्वर्गकामोऽश्वमेधेन यजेतेत्यादिविधिशेषीभूतेभ्यः "यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्" इत्यादिवाक्येभ्यः स्वरादिपदस्य"।

शक्तिधर पु० शक्तिं धरति धृ–अच्। १कार्त्तिकेये २सामर्थ्यधरे त्रि० "शक्तिधरः कुमारः" इति रघुः। भृ–क्विप् ६त०। शक्तिभृदादयोऽप्यत्र।

शक्तिपर्ण पु० शक्तिरिव पर्णं यस्य। सप्तपर्णे जटा०।

शक्तिपाणि पु० शक्तिः पाणौ यस्य। कार्त्तिकेये हेमा०। शक्तिहस्तादयोऽप्यत्र। [शक्त्रा बोद्धरि।

शक्तिहेतिक पु० शक्तिर्हेतिः प्रहरणमस्य यस्य वा कप्।

श(स)क्तु पु० वंश० श(स)च–तुन् (छातु) चणकादिचूर्णे

अमरः। शतावशब्दे २१८५ पृ० तद्भेदादि दृश्यम।

शक्तुफला(ली) स्त्री शक्तव इव सूक्ष्माणि फलान्यस्याः वा ङाप्। शमीवृक्षे शब्दच०। [भेदे

शक्ति(क्त्रि) पु० वशिष्ठमुनेः पुत्रे पराशरस्य पितरि मुनि-

शक्तु त्रि० शक-त्तु। प्रियभाषिणि अमरः।

शक्य त्रि० शक-यत्। १शक्तियुक्ते २शक्त्या बोध्येऽर्थे। ३समर्थनीये। ४साधयितुं योग्ये च।

शक्यतावच्छेदक त्रि० ६त०। शक्यपदार्थस्यासाधारणधर्मे येन धर्मेण अर्थस्य शब्दसङ्केतविषयता तस्मिन् धर्मे। यथा घटशब्दः घटत्ववन्तं पदार्थं बोधयति अतस्तदसाधारणधर्मो घटत्वं घटशब्दस्य शक्यतावच्छेदकम्।

शक्र पु० शक-रक्। १इन्द्रे अमरः। २कुटजवृक्षे ३अर्जुनवृक्षे मेदि०। ४ज्येष्ठानक्षत्रे ५पेचके च। इन्द्रस्य चतुर्दशविधत्वम् मन्वन्तरभेदेन इन्द्रशब्दे दर्शितमतः तत्संख्यासाम्यात् ६चतुर्दशसंख्यायाम्।

शक्रगोप पु० शक्रं शक्रधनुर्गोपायति समवर्णत्वात् गुप-अण्। इन्द्रगोपे कीटे जटा०।

शक्रज पु० शक्रात् जायते जन-ड। १काके त्रिका०। २इन्द्रजन्ये त्रि०। शक्रजातादयोऽप्यत्र।

शक्रजित् पु० शक्रं जितवान् जि-क्विप् तुक् च। १रावणात्मजे मेघनादे राक्षसे। २इन्द्रजेतरि त्रि०।

शक्रधनुस् न० ६त०। मेघव्याप्तने धनुराकारे सूर्यकिरणसम्पर्कजे पदार्थभेदे (रामधनुक) अमरः।

शक्रध्वज पु० ६त०। भाद्रशुक्लद्वादश्यां पूज्ये इन्द्रदैवते ध्वजाकारे पदार्थे। इन्द्रध्वजशब्दे ८३६ पृ० दृश्यम्।

शक्रनन्दन पु० ६त०। अर्जुने जटा०। २इन्द्रनन्दके त्रि०।

शक्रपर्य्याय पु० शक्रस्य पर्य्यायो नाम नाम यस्य मध्यपदलोपः। १कुटजवृक्षे रत्नमाला ६त०। इन्द्रस्य २वाचकशब्दे च।

शक्रपादप पु० ६त०। १देवदारुवृक्षे अमरः। २कुटजवृक्षे राजनि०। [अमरः। स्वार्थे क। तत्रैव रत्नमा०।

शक्रपुष्पी स्त्री शक्रस्येव पुष्पमस्याः ङीप्। अग्निशिखावृक्षे

शक्रभवन न० ६त०। स्वर्गे त्रिका०। शक्रावासादयोऽप्यत्र।

शक्रभूभवा स्त्री शक्ररूपभुवि भवति भू-अच्। इन्द्रवारुण्याम् शब्दच०। [२इन्द्रजनन्याम् अदित्याम्।

शक्रमातृ स्त्री शक्रस्य मातेव। १भार्ग्याम् राजनि०। ६त०।

शक्रमूर्द्धन् पु० शक्रस्येव शिखावान् मूर्द्धा यस्य। १वल्मीके त्रिका०। ६त०। २इन्द्रमस्तके। शक्रशीर्षादयोऽप्यत्र।

शक्रवल्ली स्त्री शक्रप्रिया वल्ली। इन्द्रवारुण्याम् राजनि०।

शक्रवाहन पु० शक्रं वाहयति वह-णिच्-ल्यु। मेघे शब्दच० इन्द्रवाहनादयोऽप्यत्र।

शक्रवीज न० शक्रस्य कुटजस्य वीजम्। इन्द्रयवे राजनि०।

शक्रशाखिन् पु० शक्रनामकः शाखी। कुटजवृक्षे भावप्र०।

शक्रसारथि पु० ६त०। इन्द्रसारथौ मातलौ।

शक्रसुत पु० शक्रस्य सुतः। १वालिनामके वानरराजे हलायु०। २इन्द्रपुत्रे अर्जुने च।

शक्रसुधा स्त्री शक्रस्य सुधेव। पालङ्क्याम् शब्दच०।

शक्रसृष्टा स्त्री ६त०। हरीतक्याम् त्रिका०।

शक्राख्य पु० शक्रस्येवाख्या यस्य। १पेचके त्रिका०।

शक्राणी स्त्री शक्रस्य पत्नी ङीष् आनुक् च। पुलोमजायामिन्द्रपत्न्याम् शब्दमा०।

शक्राशन न० शक्रेणाश्यते अश-कर्मणि ल्युट्। भङ्गायाम् "शक्राशनन्तु तीक्ष्णोष्णं मोहकृत् कुष्ठनाशनम्। बलमेधाग्निद श्लेष्मदोषहारि रसायनम्" राजव०।

शक्राशन पु० शक्रं तद्यागमश्नुते व्याप्नोति अश-ल्यु। कुटजवृक्षे शब्दच०। [संक्षिप्तसारः।

शक्ति पु० शक-क्तिन्। १मेघे २वज्रे ३गजे ४पर्व्वते च

शक्रोत्थान न० शक्रस्य तद्ध्वजस्य उत्थानम्। भाद्रशुक्लद्वादश्यां कर्त्तव्ये १शक्रध्वजस्योत्थाने तदुपलक्षिते २उत्सवे च। इन्द्रध्वजशब्दे ८४६पृ० दृश्यम्।

शक्व पु० शक-वन्। गजे सि० कौ०।

शङ्क पु० शक-अच् वा+नुम्। शकटादिवाहकवृषे हारा०।

शङ्कर पु० शं करोति कृ-अच्। १महादेवे २कल्याणकरे त्रि० ३शिवपत्न्यां स्त्री ङीप्। ४सा च मञ्जिष्ठायां शब्दच०। ५शम्यां राजनि०। [शुभत्वात्। २कर्पूरे राजनि०।

शङ्करावास पु० ६त०। १कैलासाचले। शङ्करस्यावास इव

शङ्का स्त्री शकि-अ। १भये २वितर्के मेदि० ३संशये च।

शङ्कित त्रि० शङ्का जातास्य तार० इतच्। १भीते त्रिका० २सन्दिग्धे ३वितर्किते च।

शङ्कु पु० शकि-उण्। १स्थाणौ। २मत्स्यभेदे। ३शल्यास्त्रे अमरः। ४कीलके। ५दशकोटिसंख्यायाम् ६तत्संख्याते। ७महादेवे। ८ककुदे मेदि०। ९पर्णशिराजाले १०मेढ्रे हेमच०। ११नखीनामगन्धद्रव्ये जटा०। १२छायापरिमाणार्थं काष्ठादिनिर्मिते, "अङ्गुलैर्द्वादशैरुच्छ्रया काष्ठी हस्तकुमानिका। शङ्कुसंज्ञा भवेत्सैव तच्छायां परिकल्पयेत्" इत्युक्ते १३कीलभेदे च ज्यो०त०। १४जनमेजयपुत्रभेदे भा० आ० ६५ अ०। १५नवरत्नान्त-

गीतकविभेदे। दिक्साधनार्थं सू० सि० शङ्कुश्च दर्शितो यथा

"शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे। तत्र शङ्कुङ्गुलैरिष्टैः समं मण्डलमालिखेत्। तन्मध्ये स्थापयेच्छङ्कुं कल्पनाद्द्वादशाङ्गुलम्। तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्वापरार्द्धयोः। तत्र बिन्दू विधायोभौ वृत्ते पूर्वापराभिधौ। तन्मध्ये तिमिना रेखा कर्त्तव्या दक्षिणोत्तरा। याम्योत्तरदिशोर्मध्ये तिमिना पूर्वपश्चिमा। दिङ्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि"। तत्र दिक्साधनोपक्रमे प्रथममम्बुसंशुद्धे अम्बुवत् समीकृते शिलाप्रदेशे अपि वाथ वा तदभावेऽन्यत्र वज्रलेपे चत्वरादौ सुघट्टनादिना समस्थाने कृते शङ्क्वङ्गुलैः शङ्कुस्थाङ्गुलविभागमानैरिष्टैरभीष्टसंख्याकाङ्गुलैर्व्यासार्द्धरूपैर्वृत्तमवक्रमात् लिखेत्। सर्वतः केन्द्राद्वृत्तपरिधिरेखा तुल्या स्यात् तथेत्यर्थः। ततस्तन्मध्ये तस्य वृत्तस्य केन्द्ररूपमध्ये कल्पनया द्वादशसंख्याकाङ्गुलानि तुल्यानि यस्मिंस्तं द्वादशविभागाङ्कितमित्यर्थः। शङ्कुं समतलमस्तकपरिधिकाष्ठदण्डं स्थापयेत्। ततः पूर्वापरार्द्धयोर्दिनस्य प्रथमद्वितीयभागयोस्तच्छायाग्रं स्थापितशङ्कोश्छायान्तप्रदेशो मण्डलपरिधौ यस्मिन् विभागे स्पृशेत्। दिनस्य प्रथमविभागेऽनुक्षणं छायाह्रासात् वृत्ते यत्र प्रविशति दिनस्यापरार्द्धे छायावृद्धिवशाद्वृत्तं यत्र निर्गच्छतीत्यर्थः। तत्र निर्गमनप्रवेशस्थानयोरुभौ द्वौ बिन्दू पूर्वापरसंज्ञौ क्रमेण वृत्ते परिधिरेखायां कृत्वा तन्मध्ये पूर्वापरबिन्द्वन्तरमध्ये तिमिना मत्स्येन रेखा कार्य्या सा दक्षिणोत्तररेखा भवति। मत्स्यस्तु बिन्द्वन्तरालप्रमितेन व्यासार्द्धेन बिन्दुद्वयकेन्द्रकल्पनेन वृत्तद्वयं निष्पाद्य वृत्तद्वयसंयोगाभ्यां वृत्तद्वयपरिधिविभागाभ्यामन्तर्गतं मत्स्याकारं स्थानं भवति। तत्रैकः संयोगो मुखं बाह्यवृत्तमार्गमार्जनेनापरसंयोगस्तु पुच्छमितरवृत्तभागद्वयसम्मार्जनेन मुखपुच्छावध्यृज्वी रेखा दक्षिणोत्तररेखा। तत्र बिन्दोः सव्यं रेखाग्रं दक्षिणा दिक्। पश्चिमबिन्दोः सव्यं रेखाग्रमुत्तरा दिक्। अनन्तरं पूर्ववृत्तं मत्स्यश्च सम्मार्जनीयः। शङ्कुरपि तत्स्थानान्निष्कास्य इति केवला दक्षिणोत्तररेखा स्थितेति तात्पर्य्यम्। दक्षिणोत्तरदिशोर्मध्यस्थाने तिमिना दक्षिणोत्तररेखामितेन व्यासार्द्धेन दक्षिणोत्तरस्थानाभ्यां पूर्ववत् प्रत्येकं वृत्तं विधाय पूर्ववत् सिद्धेन मत्स्येनेत्यर्थः। पूर्वपश्चिमा रेखा कार्य्या। तत्र पूर्वबिन्दोरासन्नं रेखाग्रं पूर्वा पश्चिमबिन्दोरासन्नं रेखाग्रं पश्चिमेति मत्स्यसम्मार्जने केवला पूर्वापररेखापि सिद्धा। अथ रेखासंयोगस्थानात् दिक्साधनोपक्रमोक्तं पूर्ववृत्तमुल्लिखेत्। तद्वृत्तपरिधौ यत्र रेखा लग्ना तत्र दिगिति तद्वृत्तमध्यस्य दिक्चतुष्टयं वृत्ते सिद्धम्। तद्वत् यथा दक्षिणोत्तराभ्यां पूर्वापरा साधिता तत्प्रकारेणेत्यर्थः। एवकारोऽन्यप्रकारनिरासार्थकः। हि निश्चयेन। विदिशः कोणदिशो दिशां पूर्वादिसिद्धदिशां ये मध्यमत्स्या मध्यवर्त्तितदिग्द्वयान्तरोत्पन्ना मत्स्यास्तैः संसाध्याः सम्यक्प्रकारेण साध्याः। रेखावृत्तसंयोगस्थत्वेन ज्ञेयाः" रङ्गना०।

छायाशब्दे २९८६ पृ० दृश्यम्।

शङ्कुकर्ण पु० शङ्कुरिव कर्णावस्य। १गर्दभे त्रिका०। २दानवभेदे हरिवं० २४०। ३स्कन्दानुचरभेदे भा० ४७ अ०।

शङ्कुतरु पु० शङ्कुयोग्यस्तरुः। शालवृक्षे शब्दर०। शङ्कुवृक्षादयोऽप्यत्र।

शङ्कुला स्त्री शकि—उलच्। १उत्पलपत्रिकायाम् संक्षिप्तसा० पूगच्छेदकास्त्रभेदे (जाँति) शङ्कु लाक्षकः इति सि०कौ०।

शङ्कोच(चि) पु० शकि—ओच-(ओचि) वा। मत्स्यभेदे जटा०।

शङ्ख पुन० शम—ख। १कम्बाख्याते समुद्रजाते पदार्थे अमरः। २ललाटास्थ्नि, ३निधिभेदे, ४नखीनामगन्धद्रव्ये मेदि०, ५कर्णसमीपस्थे—अस्थ्नि, ६नागभेदे, ७हस्तिदन्तमध्ये त्रिका०। ८दशनिखर्वसंख्यायां, ९तत्संख्याते च। तत्र शङ्खचूडास्थितस्तदुत्पत्तिः ब्रह्मवै० प्रकृ० १८अ० उक्ता यथा

"अथ शम्भुर्हरेः शूलं जग्राह दानवं प्रति। ग्रीष्ममध्याह्नमार्त्तण्डशतमानवदुत्तमम्। शूलञ्च भ्रमणं कृत्वा पपात दानवोपरि। चकार भस्मसात्तञ्च सरथञ्चावलीलया। स शिवस्तेन शूलेन दानवस्यास्थिजालकम्। प्रक्षिप्य च प्रेरयामास लवणोदे च सागरे। अस्थिभिः शङ्खचूडस्य शङ्खजातिर्बभूव ह। नानाप्रकाररूपा च शश्वत् पूता सुरार्चने। प्रशस्तं शङ्खतोयञ्च देवानां प्रीतिदं परम्। तीर्थतोयस्वरूपञ्च पवित्रं शम्भुना विना। शङ्खशब्दो भवेद्यत्र तत्र लक्ष्मीश्च सुस्थिरा। स स्नातः सर्वतीर्थेषु यः स्नातः शङ्खवारिणा। शङ्खे हरेरधिष्ठानं यतः शङ्खस्ततो हरिः। तत्रैव वसतं लक्ष्मीर्दूरीभूतममङ्गलम्। स्त्रीणाञ्च शङ्खध्वनिभिः

शूद्राश्च विशेषतः। शीता दृष्टा याति शङ्खोः स्वक-
मन्यत् स्वस्थानतः" १०मुद्राभेदे तन्त्रसा०।
११प्रस्तरभेदे। युक्तिकल्पतरौ तल्लक्षणादि यथा "क्षी-
रोदकूलेऽपि सुराष्ट्रदेशे तदन्यतोऽपि प्रभवन्ति शङ्खाः।
स्वच्छवर्णाः शशिशुभ्रभासः सुसूक्ष्मरन्ध्रा गुरवो म-
हान्तः। ते वामदक्षिणावर्त्तभेदेन द्विविधा मताः।
दक्षिणावर्त्तशङ्खस्तु कुर्य्यादायुर्यशोधनम्। तेनैव शिरसा
यस्तु श्रद्दधानः प्रतीच्छति। वारि हित्वा स पापानि
पुण्यमाप्नोति मानवः। वृत्तत्वं स्निग्धतास्वच्छत्वं शङ्खस्येति
गुणत्रयम्। आवर्त्तभङ्गदोषो हि छेदयागादिनश्यति।
ब्रह्मादिजातिभेदेन स पुनश्चतुर्विधः"।
"ये स्निग्धमसृणाकारा वृहन्तो लघवस्तथा। ब्राह्मणाः
प्रस्तराश्ञेयाः सर्वकर्मसु शोभनाः। ये दृढाङ्गाः सुगुरव-
स्तथांशांशविभागिनः। अथ तानः क्षत्रियाश्ञेयाः कर्क-
शाङ्गास्तथैव च। मृदवो गुरवो ये तु ये च्छेदेनैव
रचिताः। ते वैश्याः स्वविभक्तांशा युज्यन्ते सर्वकर्मसु।
ये कर्कशाहताश्चाव कर्कशा ये प्रतिष्ठिताः। येऽत्यन्तगुरवः
स्निग्धास्ते शूद्राः प्रस्तराधमाः। इति प्रोक्तमशेषेण
सम्यक् पाषाणलक्षणम्। विचार्य्य मतिमान् कार्य्ये नि-
योक्तव्यं विचक्षणैः"।

शङ्खक न० शङ्खस्य विकारः वुन्। १शङ्खजाते वलयाकारे पदार्थे मेदिनि० २शिरोरोगे पु० तस्य लक्षणादि यथा "पित्तरक्तानिलादुष्टाः शङ्खदेशे विमूर्च्छिताः। तीव्र रुग्दाहरोगं हि शोथं कुर्वन्ति दारुणम्। सशिरो- विषवद्वेगान्निरुध्याशु गलं तथा। त्रिरात्राज्जी- वितं हन्ति शङ्खको नाम नामतः। त्र्यहाज्जीवि- तभैषज्यं प्रत्याख्येयस्य कारयेत्"। पित्तरक्तानिला इत्यत्र कफोऽपि योज्यः "क्षतानुतापः कफपित्तरक्तै- रिति" सुश्रुतवचनात्। विमूर्च्छिताः प्रवृद्धाः त्रिरात्रात् त्रिरात्रमध्ये मारयति" भावप्र०।

शङ्खकार पु० शङ्खं तद्विकारं वलयाकारं पदार्थं करोति कृ-अण्। वर्णसङ्करजातिभेदे (शाँखारी)। स तु शूद्रागर्भे विश्वकर्मतो जातः ब्रह्मवै०। [कायां त्रिका०।

शङ्खचरी स्त्री शङ्खं ललाटास्थि चरति चर-ट। ललाटि-

शङ्खचर्चा स्त्री शङ्खस्य चर्चा भूषा यतः। ललाटिकायां शब्दर०। [पुष्णं कृमिहरं परम्" राजव०।

शङ्खचूर्ण न० हत०। शङ्खजाते चूर्णे। "शङ्खचूर्णं कटु क्षार-

शङ्खद्रावक पु० औषधविशेषे। तद्रूपाकादि यथा "अर्क-

क्षुद्री तथा चिञ्चा तिलापामार्गचित्रकम्। यवाक्षाः भस्मसमं वस्त्रपूतं जलं हरेत्। मृद्वग्निना पचेत्तत्तु क्षार- लवणताङ्गतम्। लवणेन समौ ग्राह्यौ द्वौ क्षारौ टङ्कणं तथा। समुद्रफेनगोदन्तकाशीशं सोरका तथा। द्विगुणं पञ्चलवणं मातुलुङ्गरसेन च। काचकूप्यान्तु सप्ताहं वासयेदस्तुयोगतः। शङ्खचूर्णपलं दत्त्वा वारुणी यन्त्रमुद्धरेत्। सर्वधातून् हरेच्छीघ्रं वराटीशङ्खका- दिकान्। उदरादिकरोगाणां सद्यो हि नाशकः परः" भैषज्यर० "योगिनीभैरवाभ्यासं बलिमादौ प्रदापयेत्। पश्चात् यन्त्रस्य कर्त्तव्यमेवाह परमेश्वरी। रसः शङ्खद्रवो नाम शम्भुदेवेन भाषितः। गुह्याद् गुह्यतमं गुह्यमिदानीं कथ्यते मया। शङ्खचूर्णं यव- क्षारं सर्जिकाक्षारटङ्कणम्। समञ्च पञ्चलवणं स्फ- टिकारी नवादरः। काचकूप्यां ततः क्षिप्त्वा वारुणी यन्त्रमुद्धरेत्। यामार्द्धं द्रावयत्येष शङ्खशुक्तिवरा- टकान्। अर्शांसि नाशयेत् षट् च मूत्रकृच्छ्राश्मरीं तथा। उदराष्टविधं हन्ति गुल्मप्लीहोदराणि च। अजीर्णं नाशयेच्छीघ्रं ग्रहणीञ्च विसूचिकाम्। भुक्त- शेषे च भोक्तव्यो माषमात्रो रसोत्तमः। क्षणमात्रा- द्भवेत् भस्म पुनर्भोजनमिच्छति। प्रत्यहं भोजनान्ते च संसेव्योऽयं रसोत्तमः। न दन्तानां भयं क्वापि सत्यं सत्यं वदाम्यहम्। न देयं यस्य कस्यापि सदा गोप्यञ्च कारयेत्। रसः शङ्खद्रवो नाम वैद्यानामुपकारकः"।

शङ्खद्राविन् पु० शङ्खं द्रावयति द्रु-णिच्-णिनि। अम्ल- वेतसे राजनि०।

शङ्खधरा स्त्री धृ-अच् हत०। हिलमोचिकायाम् रत्नमा०।

शङ्खध्म पु० शङ्खं धमति ध्मा-क। शङ्खवादके। क्विप्। शङ्खध्मा इत्यप्यत्र।

शङ्खनख पु० शङ्खस्य नख इव। १क्षुद्रशङ्खे (जोङ्ड़ा) अमरः। २नखीनामगन्धद्रव्ये शब्दर० स्त्रीत्वमपि तत्र ङीप्।

शङ्खपुष्पी स्त्री शङ्खस्य इव पुष्पमस्याः ङीप्। (शङ्खाली) वृक्षे राजनि०। "शङ्खपुष्पी तु तीक्ष्णोष्णा मेध्या कृमिविषापहा"। राजवल्लभः "शङ्खपुष्पी सरा मेध्या कृष्णा मानसरोगनुत्। रसायनी कषायोष्णा स्मृति- कान्तिबलाग्निदा। दोषापस्मारभूतास्रकुष्ठकृमिविष- प्रणुतः" भावप्र०। [हेमच०।

शङ्खभृत् पु० शङ्खं बिभर्त्ति भृ-क्विप् तुक् च। विष्णौ

शङ्खमुख पुंस्त्री० शङ्ख इव मुखमस्य । कुम्भीरे हेमच० । स्त्रियां ङीष् । [चक्रा) क्षुपभेदे शब्दच० ।

शङ्खिका स्त्री शङ्खस्तदाकारं पुष्पमस्त्यस्याः ठन् । (चोरका-

शङ्खिन् पु० शङ्ख+अस्त्यर्थे इनि । १विष्णौ, २समुद्रे च मेदि० ।

शङ्खिनी स्त्री शङ्खस्तदाकारं पुष्पमस्त्यस्याः इनि । १चोर-पुष्प्याम्, अमरः । २श्वेतपर्णासे ३विश्वः । ४श्वेतबुह्णायां ५श्वेतवुह्मायां, ६यवतिक्तायां, राजनि० । ७स्त्रीभेदे, ८उपदेवताभेदेः, (शाकिन्नी) ९शङ्खवत्यां स्त्रियाञ्च । स्त्रीभेदलक्षणं रतिमञ्जर्य्यामुक्तं यथा

"दीर्घा सुदीर्घनयना वरसुन्दरी या कामोपभोगरसिका गुणशीलयुक्ता । रेखात्रयेण च विभूषितकण्ठदेशा सम्भोगकेलिरसिका किल शङ्खिनी सा" । "शशके पद्मिनी तुष्टा चित्रिणी रमते मृगे । वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हये" । "पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी । शङ्खिनी क्षारगन्धा स्यात् मदगन्धा च हस्तिनी" । [राजनि० ।

शङ्खिनीफल पु० शङ्खिन्या इव फलमस्य । शिरीषवृक्षे

शङ्खिनीवास पु० ६त० । शाखोटकवृक्षे शब्दच० ।

शच गतौ भ्वा० आत्म०सक० सेट् इदित् । शञ्चते, अशञ्चिष्ट ।

शच वाचि भ्वा० आत्म० सक० सेट् । शचते अशचिष्ट ।

शचि(ची) स्त्री शच-इन् वा ङीप् । १इन्द्रपत्न्याम् अमरः । २करणान्तरे मेदि० ।

शचीपति पु० ६त० । इन्द्रे अमरः । शचीभर्त्रादयोऽप्यत्र ।

शट(ठ) श्लाघायां चु० भा० सक० सेट् । शाट(ठ)यते अशीशट(ठ)त । [शटति । अशाटीत् अशटीत् ।

शट शादे अक० रोगजनने गतौ भेदे च सक० पर० भ्वा०

शट पु० शटति रुजति दन्तं शट-अच् । १कन्दे सि०कौ० । २सिंहकेसरे ३जटायाञ्च स्त्री अमरः टाप् ।

शटि(टी) स्त्री शट-इन् वा ङीप् । (वन आदा) ख्यातनाम-ख्याते ओषधिभेदे

"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका । गन्धारिका गन्धवधूर्वधूः पृथुपलाशिका । भवेद्गन्धपलाशी तु कषाया ग्राहिणी लघुः । तिक्ता तीक्ष्णा च कटुकाऽनुष्णाऽस्यमलनाशिनी । शोथकासव्रणश्वासशूलाध्मानपहा परा" भावप्र० ।

शट्टक न० शट-क्विप् टक-अच् कर्मधा० । घृतजलमिश्रितशालिचूर्णे । "शालिचूर्णं घृतं तोयं मिश्रितं शट्टकं वदेत्" भावप्र० ।

शठ वधे सक० कैतवे क्लेशे च अक० भ्वा० पर० सेट् । शठति अशाठीत् अशठीत् ।

शठ श्लाघ्ये चु०पर०सक०सेट् । शाठयति ते अशीशठत् त ।

शठ दुष्टवचने अद०चु०उभ०सक०सेट् । शठयति ते अशशठत् त

शठ न० शठ-अच् । १तगरे २कुङ्कुमे ३चौहे च राजनि० । ४धुस्तूरे ५मध्यस्थपुरुषे च पु० । "प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम् । व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः" विष्णुपु० उक्ते ६धूर्त्ते त्रि० मेदि० ७नायकभेदे पु० तल्लक्षणं यथा

"शठोऽयमेकत्र बद्धभावो यः । दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति" सा० द० ।

शठता स्त्री शठस्य भावः तल् । शाठ्ये वञ्चनायाञ्च । [राजनि०

शठम्बा स्त्री शठ-अच् अबि-अच् कर्म० शक० । अम्बष्ठायाम्

शड संघाते रोगे च अक० भ्वा० पर० सेट् इदित् । शण्डति अशण्डिष्ट । [शणार्थे शेषादः ।

शण दाने भ्वा० पर०सक० सेट् । शणति अशाणीत् अशणीत्

शणं पु० शण-अच् । ख्यातनामख्याते क्षुपभेदे हेमच० ।

शणघण्टिका स्त्री शणः घण्टेव तत्तुल्यरवफलकत्वात् इवार्थे कन् । घण्टारवतुल्यफलायाम् शणपुष्प्यां राजनि० ।

शणपर्णी स्त्री शणस्येव पर्णान्यस्याः ङीप् । अश्वनपर्ण्याम् राजनि० । [शणे स्वार्थे क । तत्रैव ।

शणपुष्पी स्त्री शणस्येव पुष्पमस्याः ङीप् । (झनझने) वन-

शणसूत्र न० शणाज्जातं सूत्रम् । शणजाते जाले अमरः ।

शणालुक पु० शण इवालुकः । आरेवतवृक्षे (सोणालु) शब्दर०

शणिका स्त्री शणस्तत्पुष्पमस्त्यस्याः ठन् । शणपुष्प्यां राजनि०

शण्ड न० शडि-अच् । १पद्मादिसमूहे शब्दर० । २नपुंसके ३वृषे च द्विरूपको० । [तस्यापत्यं गर्गा० यञ् शाण्डिल्य ।

शण्डिल पु० शडि-इलच् । शाण्डिल्यस्य पितरि मुनिभेदे

शण्ढ न० शण-ढ तस्य नेत्वम् । १अन्तःपुररक्षके कृत्रिमक्लीबे २क्लीबमात्रे भरतः । ३वृषे मेदि० ४वन्ध्यपुरुषे जटा० ५उन्मत्ते धनञ्जयः ।

शत न० एक०व० शो-डतच् । १ख्यातनामख्यातसंख्यायाम् २बहुसंख्यायां ३तत्संख्याते च । स्वार्थे क । तत्रैव न० शतवाचकशब्दाश्च धार्त्तराष्ट्राः१ शतभिषा तारा२ पुरूचायुषम्३ रावणाङ्गुलिः४ पद्मदलं५ इन्द्रयज्ञः६ अश्वियोजनम्७ कविकल्पलता । [अवयवे कन् । २शतसंख्यायां न० ।

शतक त्रि० शतं परिमाणमस्य कन् । १शतसंख्यायुक्ते ।

शतकुम्भ पु० शतं कुम्भा यत्र । स्वर्णखनिपर्वतभेदे भरतः ।

शतकोटि पु० शतं कोटयोऽग्राणि यस्य । १वज्रे अमरः । शतगुणिता कोटिः शाक० । २शतगुणितकोटिसंख्यायां स्त्री ।

शतक्रतु पु० शतं क्रतवोऽस्य । इन्द्रे अमरः ।

शतग्रन्थि स्त्री शतं ग्रन्थयोऽस्य । दूर्वायाम् राजनि० ।

शतघ्नी स्त्री शतं हन्ति हन-टक् । १अस्त्रभेदे "अयःकण्टकसंछन्ना शतघ्नी महती शिला" विजयरक्षितः । २वृश्चिकाल्यां ३करञ्जे च मेदि० ।

शततम त्रि० शतस्य पूरणः तमप् । शतसंख्यापूरणे ।

शततारा स्त्री शतगुणिता ताराः शाक० । शतभिषानक्षत्रे ।

शतदन्तिका स्त्री शतं दन्ता इव सन्त्यस्य ठन् । नागदन्त्याम् राजनि० ।

शतद्रु पु० शतधा द्रवति-द्रु-कु नि० । नदीभेदे तन्नामनिरुक्तिर्यथा "शोके बुद्धिं तदा चक्रे नचैकत्र व्यतिष्ठत । सोऽगच्छत् पर्वतांश्चैव सरितश्च सरांसि च । दृष्ट्वा स(वशिष्ठः) पुनरेवाथ नदीं हैमवतीं तदा । चण्डग्राहवतीं भीमां तस्याः स्रोतस्यपातयत् । सा तमग्निसमं विप्रमनुचिन्त्य सरिद्वरा । शतधा विद्रुता यस्माच्छतद्रुरिति विश्रुता । ततः स्थलगतं दृष्ट्वा तत्राप्यात्मानमात्मना । मर्त्तुं न शक्यामीत्युक्त्वा पुनरेवाश्रमं ययौ" भा० आ० १७७ अ० ।

शतधा स्त्री शतं ग्रन्थीन् धत्ते धा-क १दूर्वायाम् । शत+प्रकारे धाच् । २शतप्रकारे अव्य० ।

शतधामन् पु० शतं धामानि यस्य । विष्णौ जटा० ।

शतधार पु० शतं धारा अग्राणि यस्य । १वज्रे त्रिका० । २शतधारायुक्ते त्रि० "वसोः पवित्रमसि शतधारम्" यजुर्वेदः १।४६ । [२स्वर्गे च विश्वः ।

शतधृति पु० शतं धृतयोऽस्य । १इन्द्रे २ब्रह्मणि मेदि०

शतपत्र न० शतं बहूनि पत्राणि सुमसदलान्यस्य । १पद्मे अमरः । २मयूरे ३सारसखगे ४दार्वाघाटखगे मेदि० ५राजकीरे हेमच० ।

शतपत्री स्त्री शतं पत्राणि दलान्यस्याः ङीप् । (सेवोति) पुष्पवृक्षभेदे । स्वार्थे क । तत्रैव । [शात्मकग्रन्थभेदे ।

शतपथ पु० शतं पन्थानो यत्र अच्समा० । यजुर्वेदीयब्राह्म-

शतपथिक त्रि० शतपथं वेत्त्यधीते वा ठन् । शतपथब्राह्मणात्मकग्रन्थाध्यायिनि ।

शतपद न० शतं पदानि यत्र । ज्योतिषोक्ते नक्षत्रपादानुसारेण नामकरणोपयोगिअवकहडाचक्रे १चक्रभेदे चक्रशब्दे २८१७ पृ० दृश्यम् । शतं पादाः यस्याः पाद्भावः समा० ङीप् पद्भावः । शतपदी २कीटभेदे (काणकोटार) स्त्री अमरः । ३शतमूल्यां राजनि० । [रत्नमा० ।

शतपद्म न० शतदलयुक्तं पद्मम् । १शतदलकमले २श्वेतपद्मे च

शतपर्वन् पु० शतं पर्वाणि ग्रन्थयो यस्य । १वंशे अमरः २इक्षुभेदे च "शतपर्वा भवेत् किञ्चित् कोशकारगुणान्वितः । विशेषात् किञ्चिदुष्णश्च सक्षारः पवनापहः" भावप्र० । ३कटुकायां राजनि० । ४वचायां ५दूर्वायां च स्त्री ६भार्य्यायां मेदि० । ७कोजागरपूर्णिमायां शब्दरत्ना० । कप् । तात्र मेदि० ८यवे शब्दर० ।

शतपाद् स्त्री शतं पादा अस्याः पाद्भावः । कीटभेदे (काणकोटार) जटा० । [जटा० । २जलौकायां च शब्दर० ।

शतपादिका स्त्री शतं पादा मूलान्यस्याः कप् । १काकोल्यां

शतपुष्पा स्त्री शतं पुष्पाणि यस्याः । (सुल्फा) १शाकभेदे (मौरी) २क्षुपभेदे च । कप् । तत्रैव ।

"शतपुष्पा कटुः स्निग्धा तिक्तोष्णा कफवातजित् । रुच्या वस्तिहिता नेत्र्या बद्धविट् कृमिशुक्रकृत् । संग्राहिशीतला तिक्ता दाहनुत् वातला लघुः" भावप्र० । किरातार्जुनीयग्रन्थकारके भारविकवौ पु० त्रिका० । [राजनि० ।

शतप्रसूना स्त्री शतं प्रसूनानि यस्याः । (सुल्फा) शाके

शतप्रास पु० शतं प्रासा इव फलानि यस्य । करवीरवृक्षे अमरः

शतभिषज् स्त्री शतं भिषज इव ताराः यत्र । शततारात्मके अश्विन्यादिषु चतुर्विंशे नक्षत्रे । शतभिषाप्यत्र स्त्री

शतभीरु स्त्री शतं बहवो वियोगिनो भीरवो यस्याः ५त० । मल्लिकायाम् अमरः तद्दर्शने हि बहुवियोगिनां कामोद्दीपनात् ततो भीरुत्वम् । [२मेचके च ।

शतमख पु० शतं मखा यज्ञा यस्य । १इन्द्रे हलायुधः ।

शतमन्यु पु० शतं मन्यवो यज्ञा यस्य शते दैत्येषु मन्युः क्रोधो वा यस्य । १इन्द्रे अमरः । २मेचके च ।

शतमान पु०न० शतेन मीयते मि-ल्युट् । १रूप्यपले २आढके ३तत्परिमिते च अमरः । [चिकित्सके ।

शतमारिन् पु० शतं मारयति मृ-णिच्-णिनि । विशिष्ट-

शतमुखी पु० शतं मुखानि यस्याः ङीप् । १संमार्जन्यां २शतमुखयुक्ते त्रि० ।

शतमूला स्त्री शतं मूलान्यस्याः टाप् । १दूर्वायां २खनामख्यातायां लतायाञ्च ङीबन्तः अमरः । [भेदे अमरः ।

शतयष्टिक पु० शतं यष्टयो गुच्छा यस्य । शतगुच्छके हार-

शतरुद्रीय न०शतं रुद्रानधिकृत्य कृतो ग्रन्थः छ । १शुक्लयजुर्वेदोक्ते "नमस्ते रुद्र ! मन्यव इत्यादिके रुद्राध्याये ।

शतरूपा स्त्री शत रूपाण्यस्याः। १ब्रह्मणः पत्न्यां २तत्कन्यायां सावित्र्यां च "ततः स्वं देहसम्भूतामात्मजामित्यकल्पयत्। शतरूपा च सा ख्याता सावित्री च निगद्यते। सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप। दृष्ट्वा तां व्यथितस्तावत् कामबाणार्दितो विभुः। उपयेमे स विश्वात्मा शतरूपामनिन्दिताम्। ततः कालेन महता ततः पुत्रोऽभवन्मनुः। स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम्" मात्स्ये ३अ॰।

शतवीर्य्या स्त्री शतं वीर्य्याणि यस्याः ५ब॰। १श्वेतदूर्वायाम् २शतावर्य्यां ३कपिलद्राक्षायां च राजनि॰।

शतवेधिन् पु॰ शतं विध्यति विध–णिनि। अम्लवेतसे अमरः

शतसहस्र न॰ शतगुणितं सहस्रं शाक॰। लक्षसंख्यायाम्।

शतसाहस्र त्रि॰ शतं सहस्राणि परिमाणमस्य अण् उत्तरपदवृद्धिः। लक्षसंख्याते।

शतह्रदा स्त्री शतं ह्रदाः शब्दायस्याः पृषो॰ ह्रस्वः। १विद्युति अमरः। २वज्रे मेदि॰ ३दक्षकन्याभेदे वह्निपु॰

शताक्षी स्त्री शतमक्षीणीव पुष्पाण्यस्याः षच् समा॰ ङीष्। १रात्रौ २शतपुष्पायाम्। शब्दच॰ ३दुर्गायाञ्च "भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि। मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा। ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन्। कीर्त्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः" देवीमाहात्म्ये। [हरण्ये च राजनि॰।

शताङ्ग पु॰ शतमङ्गान्यवयवायस्य। १रथे अमरः २तिनिश-

शतानन्द पु॰ शतमानन्दयति अण्। गोतमपुत्रे अहल्यागर्भजे १मुनिभेदे। स च जनकराजपुरोहितः। २देवकीनन्दने मेदि॰ ४ब्रह्मणि हेमच॰ ५विष्णुरथे त्रिका॰। ६शतजनानन्दके त्रि॰।

शतानीक पु॰ शतमनीकानि यस्य। १व्यासशिष्ये मुनिभेदे २चन्द्रवंश्ये नृपभेदे मेदि॰। ३सुदासराजपुत्रे भाग॰ ९ १२ अ॰।

शतार न॰ शतमराण्यस्य। वज्रे त्रिका॰।

शतारुस् न॰ शतं अरूंषि यत्र। कुष्ठभेदे "रक्तं श्यावं सदाहार्त्ति शतारुः स्याद् बहुव्रणम्" भावप्र॰।

शतायुस् त्रि॰ शतमायुर्वर्षाण्यस्य। शतवर्षमितवयस्के "शतायुर्वै पुरुषः" श्रुतिः।

शतावरी स्त्री शतमावृणोति आ+वृ–अच् गौरा॰ ङीष्। १शतमूल्याम् अमरः। "शतावरी गुरुः शीता तिक्ता स्वाद्वी रसायनी। मेधाग्निपुष्टिदा स्निग्धा नेत्र्या गुल्मातिसारजित्। शुक्रस्तन्यकरी बल्या वातपित्तास्रशोथजित्" भावप्र॰। २इन्द्रभार्य्यायां शब्दच॰। ३शट्यां त्रिका॰। [वर्त्तते णिनि। तत्रैव। शतावर्त्तिन्।

शतावर्त्त पु॰ शतमावर्त्ता यस्य। विष्णौ हेमच॰। शतधा

शताह्वा स्त्री शतं शतमूली शतपुष्पा चेति आह्वा यस्याः मध्यपदलोपः। १शतमूल्यां राजनि॰ २शतपुष्पायाञ्च जटा॰

शतिक त्रि॰ शतेन क्रीतः, तस्य विकारः तस्येदं वा ठन्। १शतेन क्रीते पदार्थे। २तद्विकारे ३तत्सम्बन्धिनि च। शतमस्मै वृद्धिः आयः लाभः शुल्कम् उपदा वा दीयते ठन्। ४वृद्ध्यादिरूपेण शतदानसम्प्रदाने। पक्षे यत् शत्य तत्रार्थे। [व्येण क्रीतादौ शतिकशब्दार्थे।

शत्य त्रि॰ शतेन क्रीतः शतिकशब्दवत् यत्। शतसंख्यातद्र॰

शत्रु पु॰ शद–त्रुन्। १रिपौ राज्ञां २विजयानन्तरस्थे नृपे अमरः ३ज्योतिषोक्ते लग्नावधिकषष्ठस्थाने ४कामादिषु च। ५शातके त्रि॰। [लक्ष्मणानुजे २रिपुनाशके त्रि॰।

शत्रुघ्न पु॰ शत्रून् हन्ति हन–क। दशरथात्मजे सुमित्रागर्भजे

शद शातने शीर्णतायां भ्वा॰पर॰अक॰अनिट् लृदित्। शीयते अशदत्। शत्स्यति

शद गतौ भ्वा॰पर॰सार्वधातुके आत्म॰ सक॰अनिट्। शीयते

शद पु॰ शद–अच्। फलमूलादौ सिद्धान्तकौ॰।

शद्रि पु॰ शद–क्रि। १मेघे २जिष्णौ मेदिनी॰ ३गजे उणा॰

शद्रु त्रि॰ शद–क्रु १पतनकर्त्तरि २गन्तरि च।

शनकावलि(ली) स्त्री शनैः कायति कै–क पृषो॰ तेषामावलिर्यत्र वा ङीप्। गजपिप्पल्यां शब्दच॰।

शनपर्णी स्त्री शणस्येव पर्णान्यस्याः पृषो॰ णस्य नः। कटुक्याम् शब्दच॰।

शनि पु॰ शो–अनि किच्च। १सूर्य्यपुत्रे छायागर्भजाते ग्रहभेदे "शनिर्विहङ्गोऽनिलधन्वबन्ध्या मूढाङ्गना धातुःमशोऽस्थिरश्च। क्रूरः प्रतीचीपतिरोऽतिवृद्धोऽकरः त्रिनीट् दीर्घदुर्नीललोहम्"। नील॰ ताज॰। "मन्दोऽलसः कपिलदृक्कृशदीर्घगात्रः स्थूलद्विजः परुषरोमकचोऽनिलात्मा" वृहज्जा॰। २तत्स्वामिकदिने च "शनौ बन्ध्यां विजानीयात्" ज्यो॰ त॰। [वारे।

शनिवार पु॰ शनिस्वामिकोवारः। सूर्य्यादिवारमध्ये सप्तमे

शनैश्चर पु॰ शनैश्चरति चर–अच्। शनिग्रहे तस्य ग्रहाणां मध्ये सर्वोपरिकक्षास्थितत्वात् बहुकालेनैकैकराशिभोगात् मन्दगामित्वम्। [अमरः।

शनैस् अव्य॰शण–डैस् पृषो॰ हुक् च। मन्दे २अवेध्ये च

शंस हिंसायां स्तुतौ कथने च भ्वा० पर० सक० सेट् क्त्वा वेट्। शंसति अशंसीत्। [शप्यति ते अशाप्सीत्।
शप आक्रोशे वा भ्वा० पक्षे दिवा० उभ० सक० अनिट्। शपति ते
शपथ पु० शप-अथन्। सत्यताकरणाय दिव्यभेदकरणे यथा एतत् यदि मिथ्या स्यात् तदा मे एतदनिष्टं स्यादित्यादि
शपन पु० शप-ल्युट्। १शपथे अमरः। २गालौ त्रिका०।
शप्त त्रि० शप-क्त। १अभिशापप्राप्ते २उलपाख्ये तृणभेदे पु० शब्दच०। [च मेदि०।
शफ न०शम-अच् पृषो० मस्य फः। १गवादीनां खुरे २वृक्षमूले
शफर पुंस्त्री० शफं राति रा-क। (पुंटी) मत्स्यभेदे अमरः स्त्रियां ङीष्।
शफराधिप पु० ६त०। इल्लिशमत्स्ये त्रिका०। [शब्दत् ते।
शब्द शब्दकरणे अ०चु०उभ० सक० सेट्। शब्दयति ते अश-
शब्द पु० शब्द-घञ्। १ध्वन्यात्मके २वर्णात्मके च श्रोत्रेन्द्रियग्राह्ये आकाशस्य गुणभेदे।
शब्दग्रह पु० शब्दं गृह्णाति ग्रह-अच्। १श्रोत्रेन्द्रिये कर्मणि अप् ६त०। २शब्दग्रहणे।
शब्दतन्मात्र न० कर्म०। सांख्यमतसिद्धे आकाशकारणे सूक्ष्मभूतभेदे तन्मात्रशब्दे ३२२८ पृ० दृश्यम्।
शब्दन त्रि० शब्द-ल्यु। शब्दकारके अमरः।
शब्दब्रह्मन् न०शब्दात्मकं ब्रह्म। १वेदात्मके २स्फोटात्मके च नित्ये शब्दरूपे ब्रह्मणि। [१वाणभेदे २अर्जुने त्रिका०।
शब्दभेदिन् पु०शब्दानुसारेण भिनत्ति लक्ष्यम् भिद-णिनि।
शब्दवेधिन् पु० शब्दानुसारेण विध्यति लक्ष्यं विध-णिनि। १वाणभेदे २अर्जुने च धनञ्जयः।
शब्दशक्ति स्त्री ६त०। शब्दानामर्थबोधकतारूपे अभिधालक्षणादौ वृत्तिरूपे सामर्थ्ये।
शब्दाधिष्ठान न० ६त०। कर्णे हेमच०।
शब्दानुशासन न० अनुशिष्यतेऽनेन अनु+शास-ल्युट् ६त०। शब्दसाधुतासाधके व्याकरणे। "अथ शब्दानुशासनम्" महाभाष्यम्।
शब्दालङ्कार पु० शब्दमात्रकृतोऽलङ्कारः। अलङ्कारशास्त्रप्रसिद्धेऽनुप्रासादौ अलङ्कारे। अलङ्कारशब्दे तद्भेदादिकं दृश्यम्।
शब्दित त्रि० शब्द-क्त। आहूते।
शम शान्तौ अक० शान्तीकरणे सक० दि० शमा० पर० सेट्। शाम्यति इरित् अशमत्-अशमीत्। उदित् क्त्वा वेट्। शान्तः। शमयति शामयति।

शम आलोचने चु० उभ० सक० सेट्। शामयति ते शमयति ते अशीशमत् त।
शम पु० शम-घञ्। १शान्तौ अन्तरिन्द्रियदमने अमरः। २मोक्षे त्रिका० ३पाणौ रामाश्रमः। ४उपचारे राजनि०।
शमथ पु० शम-अथच्। १शान्तौ अमरः। २मन्त्रिणि मेदि०।
शमन पु० शमयति शम-णिच्-ल्यु। लोकानां पुण्यापुण्यफलदातृत्वेन दण्डकारके १यमे अमरः। शम-णिच्-भावे ल्युट्। २शान्तीकरणे न०। ३यज्ञार्थपशुघाते अमरः ४चर्वणे धरणिः ५हिंसायां हेमच० ६मृगभेदे शब्दच०।
शमनस्वसृ स्त्री ६त०। यमुनायाम् अमरः।
शमल न०शम-कलच्। १विष्ठायाम् अमरः। २पापे संक्षिप्त०।
शमि(मी) स्त्री शम-इन् वा ङीप्। (शांइ) १वृक्षभेदे "शमी तिक्ता कटुः शीता कषाया रेचनी लघुः। कफकासश्वासकुष्ठार्शःकृमिजित् कथिता" भावप्र०। २शिम्बायाम् (शुंटि) हेमच०। ३वाकुच्यां मेदि०।
शमिन् त्रि० शाम्यति शम-णिनि। शान्ते।
शमीक पु०शम-बा० ईक। मुनिभेदे। [२विप्रे च शब्दच०।
शमीगर्भ पु० शमीगर्भं आधारत्वेनास्त्यस्य अच्। १वह्नौ
शमीधान्य न० शमी शिम्बेव धान्यम्। शिम्बायुक्ते माषमुद्गादौ धान्ये अमरः।
"शमीजाः शिम्बिजाः शिम्बा तराः कथ्यास्ते वैदलाः। वैदला मधुरा रूक्षाः कषायाः कटुपाकिनः। वातलाः कफपित्तघ्ना बद्धमूत्रमला हिमाः। ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारकाः"। मुद्गमसूरयोरनाध्मानकारित्वमन्यवैदलापेक्षया न तु सर्वथा एतयोरपि किञ्चिदाध्मानकारित्वदर्शनात्" भावप्र० "शूकधान्यं शमीधान्यं समातीतं प्रशस्यते। परतो वातकृद्रूक्षं प्रायेणाभिनवं गुरु। यवगोधूममाषाश्च तिलाश्चाभिनवा हिताः। पुराणा विरसा रूक्षा न तथार्थकरा मताः" राजवल्लभः।
शमीपत्री स्त्री शम्या इव पत्राण्यस्याः ङीप्। लज्जालुलतायां जटा०।
शमीर पु० अल्पा शमी अल्पार्थे र "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" इति भाष्योक्तेः पुंस्त्वम्। क्षुद्रायां शम्याम् अमरः।
शम्पा स्त्री शं पाति पा-क। विद्युति अमरः।
शम्पाक पु०शं शिवं पाके फले वा यस्य। १आरग्वधे अमरः। २विपाके ३यावके च हेमच०।
शम्ब गतौ भ्वा० पर० सक० सेट्। शम्बति अशम्बीत्।

शम्ब पु॰ शम्ब-अच्। १वज्रे २मूलजालप्रस्थितलौहे मेदि॰। ३लौहकाञ्च्यां हेमच॰। ४अनुलोमकर्षणे भरतः। ५दरिद्रे च संक्षिप्तसा॰ ६भाग्यवति त्रि॰ रामाश्रमः।

शम्बर न॰ शम्ब-अरन्। १जले २धने ३व्रते रत्नमा॰। ४चित्रे च ५बौद्धव्रतभेदे हेमच॰। ६मृगभेदे ७दैत्यभेदे पु॰ मेदि॰ ८मत्स्यभेदे ९पर्वतभेदे १०जिनभेदे पु॰ विश्वः। ११युद्धे पु॰ १२श्रेष्ठे त्रि॰ धरणिः १३चित्रकवृक्षे १४लोध्रे १५अर्जुनवृक्षे च पु॰ राजनि॰। [राजनि॰।

शम्बरकन्द पु॰ शम्बरः श्रेष्ठः कन्दो यस्य। वाराहीकन्दे

शम्बरचन्दन न॰ ६त॰। शम्बरपर्वतजाते चन्दनभेदे राजनि॰

शम्बरसूदन पु॰ शम्बरमसुरं सूदयति छिनत्ति चु॰ सूद-ल्यु। कामदेवे हला॰ तद्धननकथा हरिवं॰ १६२।१६४ अ॰ दृश्या।

शम्बरारि पु॰६त॰। कामदेवे अमरः। शम्बररिपादयोऽप्यत्र।

शम्बरी स्त्री शम्बरं जलं बाहुल्येनास्त्यस्या अच् गौरा॰ ङीष्। १आखुपर्ण्यां मेदि॰। २मायायां शब्दर॰।

शम्बल पु॰न॰शम्ब-कलच्। १कूले २पाथेये ३मत्सरे च मेदि॰

शम्बाकृत त्रि॰ शम्बं कृष्टमप्यनुलोमममाकृष्यते शम्ब+कर्ष-णार्थे डाच्+कृ-क्त। अनुलोमेन द्विराकृष्टे कृष्टे क्षेत्रे अमरः।

शम्बु(म्बू) पुंस्त्री॰ शम्ब-उन् कू वा। १जलशुक्तौ (शामुक) हेमच॰ स्वार्थे क। तत्रार्थे। संज्ञायां कन्। गजकुम्भान्तभागे च। रामायणप्रसिद्धे शूद्रतापसे, शङ्खे हेमच॰ दैत्यभेदे च पु॰।

शम्भ त्रि॰ शमस्त्यस्य शम्+भ। कल्याणयुक्ते।

शम्भल पु॰ शम्भं कल्याणदायकं तीर्थं लाति-ला क। १ग्रा-मभेदे यत्र कल्की भविष्यति तस्मिन्। २कुट्टिन्यां स्त्री अमरः गौरा॰ ङीष्।

शम्भु पु॰ शम्+भू-डु। १महादेवे अमरः। २ब्रह्मणि ३हट्टे मेदि॰ ४विष्णौ हला॰ ५सिद्धे शब्दर॰। ६श्वेतार्के शब्दर॰ [म्भुसुतादयोऽप्यत्र।

शम्भुतनय पु॰ ६त॰। १गणेशे २कार्त्तिकेये च शब्दमा॰ श-

शम्भुप्रिया स्त्री ६त॰। १आमलक्यां हेमच॰ २दुर्गायाञ्च।

शम्भुवल्लभ न॰६त॰। १श्वेतपद्मे राजनि॰ २महादेवप्रिये च

शम्या स्त्री शम-यत् टाप्। १युगकीलके अमरः। २दक्षहस्त-दत्तताडभेदे संगीतदा॰। [४निद्रायां ५पणे च विश्वः।

शय पु॰ शी-अच्। १हस्ते अमरः। २सर्पे ३शय्यायां मेदि॰

शयण्ड पु॰ शी-अण्डच्। १अजगरसर्पे २मत्स्यौ ३निद्राशीले त्रि॰ हेमच॰। ४वराहे ५मत्स्ये च पुंस्त्री॰संक्षिप्तसारः।

शयन न॰ शी-ल्युट्। १निद्रायां २शय्यायाम् अमरः ३मै-थुने च मेदि॰।

देवभेदे शयनकालभेदादि वामनपु॰ १६अ॰ उक्तं यथा "मिथुनाभिगते सूर्ये शुक्लपक्षे तपोधन!। एकादश्यां जगत्स्वामिशयनं परिकल्पयेत्। शेषाहिभोगपर्य्यङ्कं कृत्वा संपूज्य केशवम्। कृत्वोपवीतकञ्चैव सम्यक् संपूज्य च द्विजान्। अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः। लब्ध्वा पीताम्बरधरं स्वस्ति निद्रां समानयेत्। त्रयोदश्यां ततः कामः स्वपते शयने शुभे, कदम्बानां सुगन्धानां कुसुमैः परिकल्पिते। चतुर्दश्यां ततो यक्षाः स्वपन्ति सुखशीतले। सुवर्णपङ्कजकृते सुखास्तीर्णोपधानके। पौर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे। वैयाघ्रे च जटाभारं समुद्ग्रथ्यान्यचर्मणा। ततो दिवाकरे राशिं संप्रयाति च कर्कटम्। ततोऽमराणां रजनी भवते दक्षिणायनम्। ब्रह्मा प्रतिपदि तथा नीलोत्पलदलेऽनघ!। तल्पे स्वपिति देवानां दर्शयन् मार्गमुत्तमम्। विश्वकर्मा द्वितीयायां तृतीयायां गिरेः सुता। विनायकश्चतुर्थ्यान्तु पञ्चम्यामपि धर्मराट्। षष्ठ्यां स्कन्दश्च स्वपिति सप्तम्यां भगवान् रविः। कात्या-यनी तथाष्टम्यां नवम्यां कमलालया। दशम्यां भुजगे-न्द्राश्च स्वपन्ति वायुभोजनाः। एकादश्यान्तु कृष्णायां साध्या ब्रह्मन् स्वपन्ति हि। एष क्रमस्ते गदितो नि-शायां शयने मुने!। स्वपत्सु तेषु देवेषु प्रावृट्कालः समाययौ"।

अथ लोकानां शयनप्रकारादि प्रदर्श्यते

"उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च। भृत्यैः परिवृतो भुक्त्वा नातितृप्तोऽथ संविशेत्। शुचिं देशं विविक्तन्तु गोमयेन तु लेपयेत्। प्रागुदक्प्रवणं चैव संस्वपेत सदा बुधः। प्राक्शिराश्च स्वपेन्नित्यं तथा वै दक्षिणाशिराः। स्वपेदुदक्शिरा नैव तथा प्रत्यक्शिरा न च। न चान्तर्द्धानहीने तु न तिर्यक् च कदाचन। शून्यालये श्मशाने तु एकवृक्षे चतुष्पथे। महादेवगृहे चापि मातृवेश्मनि न स्वपेत्। न यक्ष-नागायतने स्कन्दस्यायतने तथा। दर्भेषु च विना दीक्षां न स्वपेच्च कथञ्चन। धान्यगोहे च विप्राणां गुरूणाञ्च तथोपरि। नाशुचौ पर्णकीर्णे तु नाशुचिर्नाशिरस्-तथा। दिने सन्ध्यौ न नग्नश्च नोत्तरापरमस्तकः।

नाकाशे पर्वते शून्ये न च चैत्यद्रुमे तथा । न तु द्वारेऽश्मशाकीर्णे नार्द्रपादस्त्वधावितः । पालाशे शयने नैव वङ्गदारुकृते न च । न दग्धे विद्युता चैव वह्निस्पृष्टे जले तथा । न स्वपेत् सन्ध्ययोर्नित्यं न शिवस्थासने कटे । एवं स्वपन् नरो नित्यं सुखस्येह परत्र भाक् । व्यत्यये च भवेद्दुःखी मृतो नरकमश्नुते" वह्निपु० । सति सूर्य्ये शय्या न पातनीया सूर्य्योदयात् पूर्वमुत्तोलनीयेत्याह स्मृतिः "भास्करादृष्टशय्यानि नित्याग्निसलिलानि च । सूर्य्यावलोकिदीपानि लक्ष्म्या वेश्मानि भाजनम् । आसनं वसनं शय्या जायापत्यं कमण्डलुः । आत्मनः शुचिरेतानि न परेषां कदाचन" । न कदाचन इत्यनुमतिं विना अन्यथाऽऽतिथ्यानुपपत्तेः स्मृ० । व्यासः "शुचौ देशे विविक्ते तु गोमयेनोपलिप्तके । प्रागुदक्प्रवणे चैव संविशेत्तु सदा बुधः । माङ्गल्यं पूर्णकुम्भञ्च शिरःस्थाने निधापयेत् । वैदिकैर्गारुडैर्मन्त्रै रक्षां कृत्वा स्वपेत्ततः" । गर्गः "स्वगेहे प्राक्शिराः शेते श्वाशुरे दक्षिणाशिराः । प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः" मार्कण्डेयपु० "प्राक्शिरःशयने विद्यात् धनमायुश्च दक्षिणे । पश्चिमे प्रबलां चिन्तां हानिं मृत्युं तथोत्तरे" तथा "नमस्कृत्याव्ययं विष्णुं समाधिस्थः स्वपेन्निशि" मार्कण्डेयपु० "शून्यागारे श्मशाने च एकवृक्षे चतुष्पथे । महादेवगृहे चापि शर्कराकोष्ठपांशुषु । धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि । न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम् । नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः । नाकाशे सर्वशून्ये च न च चैत्यद्रुमे तथा" । न स्वपेदित्यर्थः आ० त० । "भुक्त्वा च विधिवन्मन्त्रैर्हिजो भुक्तावशिष्टकम् । सुहृद्बान्धवजनः स्वपेत् शुष्कपदो निशि । नोत्तराभिमुखः स्वप्यात् पश्चिमाभिमुखो न च । न चाकाशे न नग्नो वा नाशुचिर्नासने क्वचित् । न शीर्णायान्तु खट्वायां शून्यागारे न चैव हि । नापि वंशे च पालाशे शयने वा कदाचन" कौर्म्मपु० १८अ० "कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही । गच्छेत् शय्यां सयन्त्राञ्च अथवा दारुनिर्मिताम् । शाल्मलस्य कदम्बस्य नीपमन्दारकस्य च । किंशुकस्य वटस्याथ तथा कुशमयस्य च । आरोहणात् भवेत् पापं तस्मात्तेषु न च स्वपेत् । प्ररोह शय्यां स्तवे वा अर्पणे परमेश्वरि ! । न शुक्रे नापवित्रे च न हये न च भूतले । तूलिकायां तथा वस्त्रे शय्या-भावे स्वपेद्गृही । स्वपेन्न पट्टवस्त्रे च कलङ्की कम्बलेषु च" मत्स्यपु० ४४प० । "श्वासानष्टौ समुत्तानस्तान् द्विःषड्पार्श्वे च दक्षिणे । ततस्तद्द्विगुणान् ३२ वामे पश्चात् स्वप्यात् यथासुखम् । वामदिशायामनलो नाभेरूर्द्ध्वेऽस्ति जन्तूनाम् । तस्मात्तु वामपार्श्वे शयीत भुक्तप्रपाकार्थम्" भावप्र० । [तत्रैव ।

शयनीय न० शी-आधारे अनीयर् । शय्यायाम् स्वार्थे क ।

शयनैकादशी स्त्री ६त० । आषाढ़शुक्लैकादश्याम् ।

शयालु त्रि० शी-आलुच् । निद्राशीले अमरः । २अजगरे, ३कुक्कुरे च पु० हारा० । [द्रायां न० ।

शयित त्रि० शी-कर्त्तरि क्त । १निद्रिते । भावे-क्त । नि-

शयु पु० शी-उ । १अजगरे सर्पे अमरः । उणत् । शयुनोऽप्यत्र उणादिको० ।

शय्या स्त्री शी-आधारे क्यप् । १खट्वायाम् अमरः । भावे क्यप् । २शयने ३गुम्फने मेदि० । "त्रिदोषशमनी खट्वा तूली वातकफापहा । भूशय्या बृंहणी वृष्या काष्ठपट्टी तु वातला" । "भूशय्या वातलातीव रूक्षा पित्तास्रनाशिनी । सुशय्याशयनं हृद्यं पुष्टिनिद्राधृतिप्रदम् । श्रमानिलहरं वृष्यं विपरीत मतोऽन्यथा" भावप्र० । शयनविधानं यथा "कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही । गच्छेत् शय्यामस्फुटितामेव दारुमयीं नृप ! । नाविशालां न वै भग्नां नासमां मलिनां न च । न च जन्तुमयीं शय्यामधिगच्छेदनास्तृताम्" । विष्णुपु० ३अंशे ११अ० ।

शर न० शॄ-अच् । १जले २वाणे ३दधिदुग्धाग्रसारे पु० मेदि० ४इक्षुसाधने तृणभेदे पु० । "भद्रमुञ्जः शरो वाणस्तेजनश्चक्षुवेष्टनः । मुञ्जो मुञ्जातको वाणः स्थूलदर्भः सुमेधसः । मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा । दाहतृष्णाविसर्पास्रमूत्रवस्त्यक्षिरोगजित् । दोषत्रयहरं वृष्यं मेखलासूपयुज्यते" भावप्र० । भावे अप् । ५हिंसायाम् ।

शरकाण्ड पु० ६त० । १शरस्तम्बे २तन्निमित्तवाणे च ।

शरज न० शरात् दधिदुग्धसारात् जायते जन-ड । १हैयङ्गवीने हेमच० शरवणे जाते २कार्त्तिकेये पु० । अग्निकुमारशब्दे ५४प्र० दृश्यम् ।

शरजन्मन् पु० शरवणे जन्म यस्य । कार्त्तिकेये अमरः ।

शरट पु० शॄ-अटन् । १कृकलासे अमरः २कुसुम्भशाके च भरतः

शरण न० शॄ-ल्युट् । १गृहे २रक्षके अमरः । ३रक्षणे ४वधे

मेदि०। ५घातके शब्दच०। ६प्रसारण्यां स्त्री शब्दर०टाप्।

शरणागत त्रि० शरणमागतः आ+गम–क्त। शरणापन्ने।

शरणापन्न त्रि० शरणमापन्नः आ+पद क्त। शरणमागते।

शरणार्थिन् त्रि० शरणमर्थयते अर्थ–णिनि। शरणकामे।

श(स)रणि(णी) स्त्री शृ(सृ)–अनि वा ङीप्। १पथि, आवल्याञ्च २प्रसारण्यां शब्दर०। ३जयन्त्याञ्च स्त्री शब्दर०। ४पृथ्व्याम् अजयः।

शरण्ड पु० शॄ–अण्डच्। १खगे कामुके शब्दरत्ना०। २धूर्त्ते ३सरटे ४भूषणभेदे मेदि०। ५चतुष्पादि संक्षिप्तसा०।

शरण्य त्रि० शरणाय साधुः यत्। १शरणागतत्राणकरणयोग्ये २दुर्गायां स्त्री।

"विपाग्निभयघोरेषु शरणं शरणाद् यतः। शरण्या तेन सा देवी पुराणे परिपठ्यते" देवीपु०।

शरण्यु पु० शॄ–अन्यु। १मेघे २वाते च त्रिका०। [शब्दर०

शरत्कामिन् पु० शरदि कामयते कम–णिनि। कुक्कुरे

शरत्पद्म न० शरदिज शुभ्रं पद्मम्। श्वेतपद्मे राजनि०।

शरत्पर्वन् न० ७त०। कोजागरपूर्णिमानिमित्तोत्सवे जटा०।

शरद् स्त्री शॄ–अदि। १वत्सरे, २आश्विनकार्त्तिकमासात्मके ऋतौ च अमरः। तद्वारिगुणा भावप्र० उक्ता यथा "वर्षासु चाभसं वारि सेवेतौद्भिदमेव वा। सर्वं शरदि हेमन्ते तडागं सारसन्तु वा"। शारदं चानभिष्यन्दि लघु तत् परिकीर्त्तितम्। हैमन्तिकजलं स्निग्धं बल्यं वृष्यं हितं गुरु" राजव०। तत्रोत्तरवायुसेवनं हितं यथा "वसन्ते दक्षिणो वातो भवेत् वर्षासु पश्चिमः। उत्तरः शारदे काले पूर्वो हेमन्तशैशिरे" राजनि०। ऋतुशब्दे दृश्यम्। "शरदृतुः वैद्यकमते भाद्राश्विनमासात्मकः। तत्र वर्णनीयानि चन्द्रपटुता जलशुक्लता अगस्त्यः हंसः वृषः" कविकल्प०।

शरधि पु० शरा धीयन्तेऽत्र धा–आधारे कि। तूणे हेमच०

शरपुङ्खा स्त्री शरस्येव पुङ्खो यस्याः। नीलीवृक्षाकृतौ काण्डपुङ्खाख्ये "शरपुङ्खा यकृत्प्लीहगुल्मव्रणविषापहा। तिक्ता कषाया कासास्रज्वरश्वासहरी लघुः" भावप्र०।

शरभ पु० शृ–अभच्। "अष्टपादूर्द्धनयन ऊर्द्ध्वपादचतुष्टयः" इत्युक्तलक्षणे १मृगभेदे अमरः। २करभे, ३वानरभेदे अमरः। ३उष्ट्रे च जटा०। ४शिशुपालपुत्रभेदे भा० आश्व० ८३ अ०। ५दानवभेदे भा० आ० ६५ अ०। "अष्टपादूर्द्धनयनः शरभो वनगोचरः। तं सिंहं हन्तुमागच्छन्मुनेस्तस्य निवेशनम्। तं मुनिः शरभं चक्रे बलोत्कटपरिन्तपम्। ततः स शरभो वन्यो मुनेः शरभमपतः। दृष्ट्वा बलिनमत्युग्रं द्रुतं तस्मादृक्षद्गात्। स एवं शरभस्थाने संन्यस्तो मुनिना तदा। मुनेः पार्श्वगतो नित्यं शरभः सुखमाप्तवान्। ततः शरभसन्त्रस्ताः सर्वे मृगगणास्तदा। दिशः सम्प्राद्रवन् राजन्! भयाज्जीवितकाङ्क्षिणः। शरभोऽप्यतिसंहृष्टो नित्यं प्राणिवधे रतः। फलमूलाशनं कर्त्तुं नैच्छत् स पिशिताशनः। ततो रुधिरतर्षेण बलिना शरभोऽन्वितः। इयेष तं मुनिं हन्तुमकृतज्ञः श्वयोनिजः। ततस्तेन तपःशक्त्या विदितो ज्ञानचक्षुषा। विज्ञाय स महाप्राज्ञो मुनिः श्वानं तमुक्तवान्। श्वा त्वं द्वीपित्वमापन्नो द्वीपी व्याघ्रत्वमागतः। व्याघ्रान्नागो मदपटुर्नागः सिंहत्वमागतः। सिंहस्त्वं बलमापन्नो भूयः शरभतां गतः। मया स्नेहपरीतेन विसृष्टो न कुलान्वयः। यस्मादेवमपापं मां पाप! हिंसितुमिच्छसि। तस्मात् स्वयोनिमापन्नः श्वैव त्वं हि भविष्यसि। ततो मुनिजनद्वेष्टा दुष्टात्मा प्राकृतोऽबुधः। ऋषिणा शरभः शप्तस्तद्रूपं पुनराप्तवान्" भा० शा० ११७अ०।

शरभू पु० शरे शरवणे भवति भू–क्विप्। कार्त्तिकेये हेमच०

शरमय त्रि० शरस्य विकारः मयट्। शरजाते पदार्थे।

श(स)रयु(यू) स्त्री शृ–(सृ)–अयु वा ऊङ्। अयोध्यानगरीनिकटवाहिन्यां नद्याम्। तस्यां भवः अण् नि०। शा(सा)रव तत्र भवे त्रि० अमरः।

श(स)रल त्रि० शृ(सृ)–अलच्। १सुगमे, २अकुटिलचित्ते (सरल) ३वृक्षभेदे च। [त्तिकेये।

शरवणोद्भव पु० शरवणम् उद्भवः उत्पत्तिस्थानमस्य। का-

शरव्य न० शरवे वाणक्षेपाय हितं शरु+यत्। लक्ष्ये, शरेण वेधनायोद्देश्ये अमरः।

शराटि(टी)(लि) स्त्री शरमनन्तम् अटति अट–इन् पृषो० टस्य डो लो वा। (शराल) पक्षिभेदे अमरः।

शराभ्यास पु० ६त०। वाणमोचनशिक्षायाम् अमरः।

शरारु त्रि० शृ–आरु। हिंस्रे अमरः। [अण् धनुषि जटा०

शरारोप पु० शराः आरोप्यन्तेऽत्र आ+रुह–णिच्।

शराव पु० शरं दध्यादिसारमवति अव–अण्। १मृण्मये पात्रभेदे, (शरा) अमरः। २कुडवद्वयपरिमाणे च वैद्यकम्।

शरावती स्त्री शराः सन्त्यस्याम् मतुप् मस्य वः पूर्वदीर्घश्च। नदीभेदे अमरः।

शराश्रय पु० ६त०। तूणे हेमच०।

शरासन पु० शराः अस्यन्तेऽनेन अस–ल्युट् । १धनुषि अमरः । शराणामासनम् । २तूणे च ।

शरिमन् पु० शॄ–उणा० इमनिच् । प्रसवे सि० कौ०

शरी स्त्री शीर्य्यते शॄ-ई । एरकाख्ये भावप्र० ।

शरीर न० शॄ–ईरन् । प्रतिक्षणं शीर्य्यमाणे १देहे । तस्य अङ्गप्रत्यङ्गभेदा भावप्र० उक्ता यथा "गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकः । प्रकृतिः सविकारा च तत् सर्वं गर्भसंज्ञकम् । कालेन वर्द्धितो गर्भो यदाङ्गोपाङ्गसंयुतः । भवेत्तदा स मुनिभिः शरीरीति निगद्यते" । अङ्गोपाङ्गसंयुक्तः व्यक्ताङ्गोपाङ्गः । "तस्य त्वङ्गान्युपाङ्गानि ज्ञात्वा सुश्रुतशास्त्रतः । मस्तकादभिधीयन्ते शिशवः ! शृणुत यत्नतः । आद्यमङ्गं शिरः प्रोक्तं तदुपाङ्गानि कुन्तलाः । तस्याननं मस्तुलुङ्गं च ललाटं भ्रूयुगं तथा । नेत्रद्वयं तयोरन्तर्वर्त्तते द्वे कनीनिके । दृष्टिद्वयं कृष्णगोलौ श्वेतभागौ च वर्त्मनी । पक्ष्माण्यपाङ्गौ शङ्खौ च कर्णौ तच्छष्कुलीद्वयम् । पालिद्वयं कपोलौ च नासिका च प्रकीर्त्तिता । ओष्ठाधरौ च सृक्किण्यौ मुखं तालु हनुद्वयम् । दन्ताश्च दन्तवेष्टाश्च रसना चिबुकङ्गलः । द्वितीयमङ्गं ग्रीवा तु यया मूर्द्धा विधार्य्यते । तृतीयं बाहुयुगलं तदुपाङ्गान्यथ ब्रुवे । तस्योपरिगतौ स्कन्धौ प्रगण्डौ भवतस्त्वधः । कफोणियुग्मं तदधः प्रकोष्ठयुगलं तथा । मणिबन्धौ ततो हस्तौ तयोश्चाङ्गुलयो दश । नखाश्च दश ते ख्याता दश च्छेद्याः प्रकीर्त्तिताः । चतुर्थमङ्गं वक्षस्तु तदुपाङ्गान्यथ ब्रुवे । स्तनौ पुंसस्तथा नार्य्या विशेष उभयोरयम् । यौवनागमने नार्य्याः पीवरौ भवतः स्तनौ । गर्भवत्याः प्रसूतायास्ताविव क्षीरपूरितौ । हृदयं पुण्डरीकेण सदृशं स्यादधोमुखम् । जाग्रतस्तद्विकसति स्वपतस्तु निमीलति । आशयस्तत्तु जीवस्य चेतनास्थानमुत्तमम् । अतस्तस्मिंस्तमोव्याप्ते प्राणिनः प्रस्वपन्ति हि" । चेतनास्थानमुक्तमभिव्यक्त्यभिप्रायः "वेदकोमनसाप्य च सर्वं, द्रव्यगुणवेदिना" इत्युक्तवता चरकेण सकलं शरीरं चेतनास्थानमुक्तम् तदपेक्षया हृदयं विशेषतश्चेतनास्थानमिति "कक्षयोर्वक्षसः सन्धी जत्रुणी समुदाहृते कक्षे उभे समाख्याते तयोः स्यातां च वङ्क्षणौ । उदरं पञ्चममङ्गं षष्ठं पार्श्वद्वयं मतम् । पृष्ठवंशं तु तथा समस्तं सप्तमं स्मृतम् । उपाङ्गानि च कथ्यन्ते तानि जानीहि यत्नतः । शोणितज्जायते प्लीहा वामतो हृदयादधः । रक्तवाहिशिराणां स मूलं ख्यातो महर्षिभिः । हृदयाद्वामतोऽधश्च फुप्फुसो रक्तफेनजः । अधो दक्षिणतश्चापि हृदयाद् यकृतः स्थितिः । तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम् । अधस्तु दक्षिणे भागे हृदयात् क्लोम तिष्ठति । जलवाहिशिरामूलं तृष्णाच्छादनकं मतम्" । क्लोम तिलकम् एतत्तु वातरक्तजम् । अत्र वृद्धवाग्भटः "रक्तादग्निवशपक्वात्कालीयकसमुद्भव" इति "मेदःशोणितयोः साराद्वृक्कयोर्युगलं भवेत् । तौ तु पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः । उक्ताः शाखास्त्रयो व्यामाः पुंसामन्त्राणि सूरिभिः । अर्द्धव्यामेन हीनानि योषितोऽन्त्राणि निर्द्दिशेत् । उण्डुकञ्च कटी चापि त्रिकं बस्तिश्च वङ्क्षणौ । कफराणां प्ररोहः स्यात् स्थानं तद्वीर्य्यमूत्रयोः । स एव गर्भस्याधानं कुर्य्याद्गर्भाशये स्त्रियाः । शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्त्तिता । तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता । वृषणौ भवतः सारात्कफासृङ्मांसमेदसाम् । वीर्य्यवाहिशिराधारौ तौ मतौ पौरुषावहौ । गुदस्य मानं सर्वस्य सार्द्धं स्याच्चतुरङ्गुलम् । तत्र स्युर्वलयस्तिस्रः शङ्खावर्त्तनिभास्तु ताः । प्रवाहिणी भवेत् पूर्वा सार्द्धाङ्गुलमिता मता । उत्सर्जनी तु तदधः सा सार्द्धाङ्गुलसम्मिता । तस्याधः संवरणी स्यादेकाङ्गुलसमा मता । अर्द्धाङ्गुलप्रमाणं तु बुधैर्गुदमुखं मतम् । मलोत्सर्गस्य मार्गोऽयं पायुर्देहे विनिर्मितः । पुंसः प्रोक्तौ स्फिचौ यौ तु तौ नितम्बौ च योषितः । तयोःकुकुन्दरे जातौ सक्थिनी लिङ्गमप्यथ । तदुपाङ्गानि च ऊरू जानुनी पिण्डिकाद्वयम् । जङ्घे द्वे घुण्टिके पार्ष्णीतले च प्रपदे तथा । पादाङ्गुल्यश्च दश तासां नखा दश" ।

शरीरक पु० शरीरं कायति आत्मत्वेनाभिमन्यते कै–क । जीवे । स्वार्थे कन् । शारीरकोऽप्यत्र ।

शरीरज पु० शरीरात् जायते जन–ड । १रोगे २कामदेवे ३पुत्रे च धरणिः । ४देहजातमात्रे त्रि० ।

शरीरावरण न० शरीरमावृणोति आ+वृ–युच् । देहव्यापिनि १चर्म्मणि राजनि० । २देहावरके त्रि० । ल्युट् । ३देहाच्छादने न० । [जटा० ।

शरीरिन् पु० शरीरमात्माभिमानाश्रयत्वेनास्त्यस्य इनि । जीवे

शरु पु० शॄ–उन् । १क्रोधे २वज्रे मेदि० । ३बाणे हेमच० । ४आयुधे च संक्षिप्तसा० ।

शरेष्ट पुं० शृणाति कामिनं शृ—अच् शरः कामः तस्य इष्ट इष—क्त । आम्रे जटा० ।

शर्करक पुं० शर्करायाः रसः अच् इत्यभावः शर्करः रस इव कायति मधुरत्वात् कै-क । मधुरजम्बीरे राजनि० ।

शर्करजा स्त्री शर्करात् जायते जन-ड । सिताखण्डे राजनि०

शर्करा स्त्री शृ—करन् अस्य नेत्वम् । १खण्डविकारे (चिनि) अमरः । २उपलखण्डे ३कर्परखण्डे च (खापरा) मेदि० । शर्कराः सन्त्यस्य मतुप् तस्य लुक् । ४बहुशर्करायुते देशे अमरः । ५रोगभेदे अश्मरीशब्दे ४६५ पृ० दृश्यम् । ६शकले च मेदि० । शर्कराभेद गुणा राजनि० उक्ता यथा "स्निग्धा पञ्चकशर्करा हितकरी क्षीणे क्षयेऽरोचके चक्षुष्या बलवर्द्धनी सुमधुरा वृष्या च वंशेक्षुजा । इष्या तृप्तिबलप्रदा श्रमहरा श्यामेक्षुजा शीतला स्निग्धा कान्तिकरीरसालजनिता रक्तेक्षुजा पित्तजित्" "याश्माश्मी हिमोत्पन्ना हिमाली हिमशर्करा । क्षुद्रशर्करिका क्षुद्रा गुड़जा जलबिन्दुजा । हिमजा शर्करा शीता प्रोक्ता तिक्ताऽतिपिच्छला । वातघ्नी सारिका रुच्या दाहपित्तास्रदायिनी । "शीतलान्याकर्करजा माध्वी च मधुशर्करा । माक्षिका शर्करा प्रोक्ता सिताखण्डश्च खण्डकः । सिताखण्डोऽतिमधुरश्चक्षुष्यश्छर्दिनाशनः । कुष्ठव्रणकफश्वासहिक्कापित्तास्रदोषनुत् । यवासशर्करा त्वन्या सुधामोदकमोदकः । तवराजः खण्डसारः खण्डजा खण्डमोदकः" । "मत्स्यण्डीकाः खण्डसिता धुर्याश्चैता यथोत्तरम् । विमलाः शीतलाः स्निग्धाः गुर्व्यः स्वादुतराः सराः । इष्यास्तु चाक्षत क्षीणरक्तपित्तानिलापहाः । मत्स्यण्डी पाचनी बल्या कषाया वातजित् गुरुः । खण्डं गुरु सरं रुच्यं वातघ्नं बलपुष्टिदम् । सितोपला सरा गुर्वी वातघ्नी न कफप्रदा" । पथ्यापथ्यविवेकः "शर्करा ज्वरपित्तासृङ्मूर्च्छाच्छर्दितृषापहा । तृष्णाघ्नस्वरराजस्तु ज्वरदाहास्रपित्तनुत् । चषिका फाणितगुड़खण्डमत्स्यण्डिकासिताः । निर्मला उत्तरो ज्ञेयाः शीतवीर्या यथोत्तरम् । यथा यथैषां वैमल्यं भवेच्छैत्यं तथा तथा" राजवल्लभः । "खण्डन्तु सिकताकारं सुश्वेतं शर्करा सिता । सिता सुमधुरा रुच्या वातपित्तास्रदाहजित् । मूर्च्छाच्छर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी । भवेन्मधुसिता शीता रक्तपित्तहरी गुरुः । छर्द्यतीसारतृड्दाहरक्तजित्तुवरा हिमा । यथा यथैषां नैर्मल्यं मधुरत्वं तथा तथा । स्नेहलाघवशैत्यानि रसत्वञ्च तथा तथा" भावप्र० गुणग्रन्थे ।

शर्कराचल पुं० दानार्थं कल्पिते शर्कराकृते पर्वते । तद्विधिः हेमा० दा० पद्मपुराणे उक्तो यथा "अथातः संप्रवक्ष्यामि शर्कराचलमुत्तमम् । यस्य प्रदानाद्विष्णुर्कंरुद्रास्तुष्यन्ति सर्वदा । अष्टभिः शर्कराभारैरुत्तमः स्यान्महाचलः । चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधमः स्मृतः । भारेण चार्द्धभारेण कुर्याद् यः स्वल्पवित्तवान् । विष्कम्भपर्वतान् कुर्यात् तुरीयांशेन मानवः । धान्यपर्वतवत्सर्वमासाद्यामरसंयुतम् । मेरोरुपरि तद्वच्च स्थाप्य हेमतरुत्रयम् । मन्दारः पारिजातश्च तृतीयः कल्पपादपः । एतद्वृक्षत्रयं मूर्ध्नि सर्वेष्वपि निवेशयेत् । हरिचन्दनसन्तानौ पूर्वपश्चिमभागयोः । निवेश्यौ सर्वशैलेषु विशेषाच्छर्कराचले । मन्दारे कामदेवश्च प्रत्यग्वक्त्रः सदा भवेत् । गन्धमादनशृङ्गे च धनदः स्यादुदङ्मुखः । प्राङ्मुखो वेदमूर्त्तिश्च हंसः स्याद्विपुलाचले । हैमी सुपार्श्वे सुरभी दक्षिणाभिमुखी भवेत् । धान्यपर्वतवत् सर्वमावाहनमखादिकम्" ।

शर्कराधेनु स्त्री दानार्थं कल्पिते शर्कराकृते धेन्वाकारे स्तूपभेदे हेमा०दा० स्कन्दपुराणोक्ततद्विधिर्यथा "तद्वच्च शर्कराधेनुं राजन् ! कुर्यात् यथार्थतः । अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे । धेनुः शर्करया राजन् ! सदा भारचतुष्टयम् । उत्तमा कथ्यते सद्भिश्चतुर्थांशेन वत्सकः । तदर्द्धं मध्यमा प्रोक्ता चतुर्थांशेन कन्यसा । तद्वद्वत्सं प्रकुर्वीत चतुर्थांशेन मानवः । अथ वा धेनुतः कुर्याद्दशांशेन तु वत्सकम् । स्वशक्त्या कारयेद्धेनुं यथास्थानं न पीड़येत् । सर्ववीजानि संस्थाप्य चतुर्दिक्षु समन्ततः । सौवर्णमुखशृङ्गाणि मौक्तिकैर्नयनानि च । गुड़ेन च मुखं कार्यं जिह्वा पिष्टमयी तथा । कम्बलं पट्टसूत्रेण घण्टाभरणभूषिता । इक्षुपादा रौप्यखुरा नवनीतमयस्तना । प्रशस्तपत्रश्रवणा सितचामरभूषिता । पञ्चरत्नसमायुक्ता दर्भरोमसमन्विता । कांस्योपदोहना सम्यक् गन्धपुष्पैः समन्विता । ईदृकविधानसंयुक्तां वस्त्रैराच्छादितां तथा । गन्धपुष्पैरलंकृत्य ब्राह्मणाय निवेदयेत्" ।

शर्करार्बुद पुं० रोगभेदे तल्लक्षणं भावप्र० उक्तं यथा "प्राप्य मांसं शिराः स्नायुं मेदः श्लेष्मा तथानिलः । ग्रन्थिं करोत्यसौ भिन्नो मधुसर्पिर्वसानिभम् । स्रवत्यास्रावमत्यर्थं तत्र वृद्धिं गतोऽनिलः । मांसं विशोष्य

पचितां शर्करां जनयत्यतः। दुर्गन्धिक्लिन्नमत्यर्थं नानावर्णं ततः सिराः। स्रवन्ति सहसा रक्तं तं विन्द्याच्छर्करार्बुदम्”। शर्करा बालुकातुल्या” भावप्र०।

शर्करावत् त्रि० शर्कराः सन्त्यस्मिन् मतुप् मस्य वः। बहुशर्करायुक्तदेशे।

शर्करासप्तमी स्त्री वैशाखशुक्लपक्षसप्तम्याम्। तद्विधानं मत्स्यपु० ७२अ० उक्तं यथा “शर्करासप्तमीं वक्ष्ये तद्वत् कलुषनाशिनीम्। आयुरारोग्यमैश्वर्यं ययानन्तं प्रजायते। माधवस्य सिते पक्षे सप्तम्यां शुक्लपक्षतः। प्रातःस्नात्वा तिलैः शुक्लैः शुक्लमाल्यानुलेपनैः। स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिकम्। तस्मै नमः सवित्रे तु गन्धपुष्पं निवेदयेत्” इत्यादि।

शर्करोदक न० शर्करामिश्रितमुदकम्। (चिनिर पाना) शर्करामिश्रिते जले तत्करणप्रकारगुणादिकं भावप्र०उक्तं यथा “जलेन शीतलेनैव घोलिता शुभ्रशर्करा। एलालवङ्गकर्पूरमरिचैश्च समन्विता। शर्करोदकनाम्नैतत् प्रसिद्धं विदुषां मतम्। शर्करोदकमाख्यातं शुक्रलं शिशिरं सरम्। बल्यं रुच्यं लघु स्वादु वातपित्तप्रणाशनम्। मूर्च्छाच्छर्दितृषादाहज्वरशान्तिकरं परम्” भावप्र०

शर्करिक त्रि० शर्कराः सन्त्यस्य ठक्। बहुशर्करायुक्तदेशे इलच्। शर्करिल-तत्रैव उभयत्रामरः,

शर्द्ध पु० शृध-घञ्। अपानवायूत्सर्गे। ल्युट्। तत्रैव न०।

शर्द्धञ्जह पु०शर्द्धमपानवायूत्सर्गं जहाति हा–खश् मुम्च। माषे। तद्भोजने हि अपानवायुर्निःसरतीति तस्य तथात्वम्।

शर्ब हिंसायां गतौ च भ्वा०पर०सक०सेट्। शर्बति अशर्बीत्।

शर्मद त्रि० शर्म ददाति दा-क। १सुखदायके २विष्णौ पु० विष्णुसं०।

शर्मन् शृ–मनिन्। १सुखे २तद्वति त्रि० ३ब्राह्मणोपाधौ पु०। “शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः। भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्” यमः। “शर्मान्तं ब्राह्मणस्य स्यात् वर्मान्तं क्षत्रियस्य तु। धनान्तञ्चैव वैश्यस्य दासान्तं चान्त्यजन्मनः” शातातपः।

शर्मरा स्त्री शर्म-राति रा–क। १दारुहरिद्रायां २वस्त्रभेदे पु० धरणिः ३सुखदायके त्रि०।

शर्य्या स्त्री शृ–यत्। रात्रौ वाचस्पतिः।

शर्य्याति पु० वैवस्वतमनोः पुत्रभेदे।

शर्ष हिंसे भ्वा० पर० सक० सेट्। शर्षति अशर्षीत्।

शर्व पु० शर्व–अच्। १महादेवे हेमच०। २विष्णौ विष्णुस०।

शर्वर पु० शर्व–अरन्। १कामदेवे २तमसि न० उणादि०। ३सन्ध्यायाञ्च सं०क्षिप्तसा० ४स्त्रियां मेदि०।

शर्वरी स्त्री शॄ–वनिप् ङीप् वनो र च। १रात्रौ अमरः। शर्वरीशश्चन्द्रः। २हरिद्रायां विश्वः। [हेमच०।

शर्वला स्त्री शर्व–वञ्च शर्वं लाति ला-क। तोमरास्त्रे

शर्वाणी स्त्री शर्वस्य पत्नी ङीष् आनुक् च। भवान्यां हेमच०

शल श्लाघने भ्वा० आत्म० सक० सेट्। शलते अशलिष्ट। अशलिढ्(ध्व)म् शेषे [उणादि० शलः शालः।

शल गतौ भ्वा० पर० सक० सेट्। शलति अशालीत्।

शल श्लाघायां चु० आत्म०सक०सेट्। शालयते अशीशलत।

शल वेगे भ्वा० पर० सक० सेट्। शलति अशालीत्।

शल न० शल–अच्। १शल्लकीलोम्नि (सजारुकाँटा) अमरः २भृङ्गिणि ३चेत्रभेदे ४ब्रह्मणि च पु० मेदि० ५कुन्तास्त्रे त्रिका० ६उष्ट्रे पुंस्त्री० हेमच० स्त्रियां ङीष्।

शलक पु० शल–वुन्। (माकडसा) कीटभेदे त्रिका०।

शलङ्ग पु० शल–अङ्गच्। १लोकपाले २लवणभेदे उणादि०।

शलभ पु० शल–अभच्। कीटभेदे पतङ्गे अमरः।

शलल न० स्त्री शल–कलच्। शल्लकीलोम्नि (सजारुकाँटा) अमरः। स्त्रीत्वे गौरा० ङीष्।

शलाका स्त्री शल–आकन्। १शल्ये २मदनद्रुमे (मयना) ३शारिकायां ४शल्लक्यां ५शरे मेदि० ६आलेख्यतूलिकायां हेमच०। ७अस्थ्नि च शब्दच०। सुश्रुतोक्ते शूकाद्युद्धारणार्थे यन्त्रभेदे शल्यशब्दे दृश्यम्।

शलाकापरि अव्य०अव्ययी०। शलाकापातनक्रीडायां पराजये

शलाकापुरुष पु० हेमचन्द्रोक्ते वीराणां त्रिषष्टिदेवपुरुषभेदे

शलाटु त्रि० शल–आटु। १अपक्वफले अमरः। २मूलभेदे उणादि० ३बिल्वे च पु० राजनि०।

शलालु पु० शल–आलुच्। सुगन्धिद्रव्यभेदे सि०कौ०।

शलालुक त्रि० शलालुना क्रीतं ठन्। शलालुद्रव्येण क्रीते पदार्थे स्त्रियां ङीष्।

शल्क न०शल–क कस्य नेत्त्वम्। १खण्डे २शकलवल्कले अमरः। ३मत्स्यत्वचि च (आँस) कोषान्तरम्। [त्वचि च सि०कौ०

शल्कल न०शल–कलन् कस्य नेत्त्वम्। १मत्स्यवल्कले २छल-

शल्कलिन् पु० शल्कलमस्त्यस्य इनि। मत्स्ये शब्दर०

शल्किन् पु० शल्कमस्त्यस्य इनि। मत्स्ये हेमच०।

शल्पदा स्त्री शल–अच् तादृशं पदं मूलं यस्याः। मेदायामोषधौ राजनि०।

शल्भ प्रशंसायां भ्वा०आ०सक० सेट् । शल्भते अशल्भिष्ट ।

श(शा)ल्मलि पु० शल-मलच् स्वार्थे इन् इञ् वा । शाल्मलिवृक्षे (शिमुल) द्विरूपकोषः स्त्रीत्वमपि तत्र वा ङीप् तत्रार्थे ।

शल्य न० शल-यत् । १वाणे २तोमरे ३शङ्कौ मेदि० ४वंशकठिकायां विश्वः । ५दुःखहेतौ ६दुर्वाक्ये शब्दर० ७पापे त्रिका० "शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोहलोष्ठास्थिवालनखपूयास्रावान्तर्गर्भशल्योद्धारणार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधानं व्रणविनिश्चयार्थञ्च" सुश्रुतोक्ते ८चिकित्साङ्गे तन्त्रभेदे ९अस्थ्नि ज्यो०त०। वास्तुभूमिस्थ शल्यज्ञानं प्रश्नाक्षरेण यथा भवति तथोक्तं ज्यो०त०

"सुनिश्चितां मन्दिरभूमिमादौ निखाय तोयावधि शोधयेत्ताम् । कुर्य्यादिशल्यामथ वा समानं खात्वाथ वा प्रश्नवशाद्विधिज्ञः । दूर्वाप्रवालाक्षतपुष्पपाणिः शुचिः शुचिं दैवविदं समेत्य । पृच्छेद्विनीतो मधुरस्वरेण शल्यस्य तत्त्वं भवने तदीयः । ततः प्रश्नादिमो वर्णः सम्भाव्यो शल्यतोऽथ वा । क्रमात् पुष्पापगादेवफलानां ब्राह्मणादिभिः । प्रणवो धरणी धारिणी करी तदनन्तरम् । न भूमौ नम इत्येष मन्त्रो वह्निप्रियान्तकः" वह्निप्रिया स्वाहा "मन्त्रेणानेन कठिनीमभिमन्त्र्य विभाजयेत् । नवधा सदनक्षेत्रं तथा यथाविलेखयेत् । अकचत एहाः शपवा नव चेत् प्रश्नाक्षराणि जायन्ते । प्रागादिकोष्ठनवके वर्णास्ते शल्यमाख्यान्ति । प्रश्ने अकारः पुरतो नरास्थि ब्रवीति शल्यं मरणप्रदायि । आग्नेयदिक्कोणगतेष्टकन्तु प्रदं ककारः खरशल्यमग्नौ । याम्ये चकारः श्रवणास्थिनेत्र प्रभोर्विनाशं प्रकरोति शल्यम् । रक्षोदिशि श्वास्थि टकस्थितानां मनुष्ययं वक्ति सुनिश्चितं तः । एः पाशिदिश्यस्थि शिशोर्ब्रवीति मृत्युं प्रवासात् टङ्कमेव शल्यम् । कोपायुकोणे नरकूपमस्थि दारिद्र्यमित्रक्षयकारि धत्ते । अनपदिशि शकारः प्राह विप्रास्थि वित्तक्षयकृच्च पकारो वक्ति चक्षास्थि शम्भौ । तदिह कुलविनाशं गोधनानाञ्च हानिं वितरति टङ्कनाथस्यापि शुभस्य देवैः । यो मध्यभागे भजितं कपालं कारायसं चाह कुलक्षयाय । यत्रादृपाशान्यधुना प्रमाणं सर्वत्र तथ्यं कथयामि शल्ये । इन्द्रस्योजलेशाने शल्यं सार्द्धकरे कटौ । वह्न्यन्तककुबेरेषु पुरुषे मध्यवातयोः" । देवीपु० "पुरुषाधःस्थितं शल्यं न गृहे दोषदं भवेत् । प्रासादे दोषदं शल्यं भवेत् यावज्जलान्तकम् । दृष्टारम्भेऽतिबहूतिः स्यात्स्यक्तं यदि जायते । शल्यं त्वपनयेत्तत्र प्रासादे भवनेऽपि वा" । १०मदनवृक्षे ११श्वाविधि च पु० अमरः १२नकुलमातुले मद्राधिपे नृपभेदे पु० १३सीम्नि १४शलाकायां पु० हेमच० १५बिल्ववृक्षे पु० १६मदवृक्षभेदे राजनि० । १७मत्स्यभेदे पु० त्रिका० ।

शल्यक पु० शल्य इव कायति कै-क । १मदनवृक्षे (मयना) शब्दच० । २शल्लकीमृगे च पुंस्त्री० स्त्रियां ङीष् राजनि० ।

शल्यलोमन् न० शल्यमिव लोम । शल्लकीलोम्नि राजनि० ।

शल्यारि पु० ६त० । शल्यनृपहन्तरि युधिष्ठिरे तद्धननकथा भा० शल्य० दृश्या ।

शल्ल गतौ भ्वा० पर० सक० सेट् । शल्लति अशल्लीत् ।

शल्ल न० शल्ल-अच् । १त्वचि २भेके पु० शब्दच० । स्वार्थे क त्वचि न० । ३लोध्रवृक्षे पु० जटा० । (सजारु) ४पक्षिभेदे स्त्री गौरा० ङीष् । सा च ५गजभक्ष्यवृक्षे अमरः ।

शल्लकीद्रव पु० शल्लक्या द्रव इव स्वादुत्वात् । सिह्लके जटा०

शल्व पु० शल-व । शाल्वदेशे उणा० । [अशवीत् ।

शव विकारे गतौ च भ्वा०पर०सक० सेट् । शवति अशावीत्

शव पु०न० शव-अच् । मृतदेहे गतप्राणे १देहे अमरः । २जले न० मेदि० ।

शवकाम्य न० शवः काम्यो यस्य । कुक्कुरे शब्दर० ।

शवयान न० शववाहनं यानम् शाक० । मृतदेहवाहनार्थे तल्पे हारा० ।

शवर न० शव-अरन् । १म्लेच्छजातिभेदे अमरः । २पानीये २शिवे च पु० मेदि० ३तत्पत्न्यां स्त्री ङीष् । ४शास्त्रभेदे ५हस्ते पु० शब्दादिको० मीमांसाभाष्यकारके ६विद्वद्भेदे । [शब्दर० ।

शवरथ पु० शववाहनार्थं रथः शाक० । शववाहनार्थे याने

शवरलोध्र पु० शवरप्रियः लोध्रः । श्वेतलोध्रे रत्नमा० ।

शवरालय पु० ६त० । शवरावासस्थाने अमरः ।

शवल पु० शव-कलन् । १कर्बुरवर्णे २तद्वति त्रि० अमरः । ३तद्वर्णयत्यां धेनौ स्त्री अमरः ।

शवसान पु० शव--आनच् सुक् च । पथिके सि०को० ।

शश प्लुतगतौ भ्वा०पर०सक०सेट् । शशति । अशाशीत्-अशशीत्

शश पुंस्त्री० शश-अच् । पशुभेदे (खरगोश) अमरः । स्वार्थे क । तत्रैव ।

"शशः शीतो लघुग्राही रूक्षः स्वादुः सदा हितः वह्निकृत् कफपित्तघ्नो वातसाधारणः स्मृतः । ज्वर

तिस्रारशोषाश्चश्वासामयहरश्च च" भावप्र०। श्राद्धे तन्मांसदाने फलभेदः श्रा० त० उक्तो यथा "ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम्। मासवृद्ध्याभितृप्यन्ति दत्तैरिह पितामहाः" तन्मांसं विष्णवे देयं यथोक्तं "शार्गं मांसं तथा छागं शाशं समनुपठ्यते। एतानि मे प्रियाणि स्युः प्रशस्तानि वसुन्धरे!"। वराहपु० २चन्द्राङ्करूपेऽङ्गे धरणिः। ३बोले ४बोध्रे ५नरभेदे मेदि०। तल्लक्षणं यथा "मृदुवचनसुशीलः कोमलाङ्गः सुवेशः सकलगुणनिधानं सत्यवादी शशोऽयम्" रतिम०।

शशक पुंस्त्री० शश--स्वार्थे क। (खरगोश) पञ्चनखेषु भक्ष्ये पशुभेदे "शशकः शल्लकी गोधा खड्गी कूर्मश्च पञ्चमः। भक्ष्यान् पञ्चनखेष्वाहुरुष्ट्रांश्चैकतोदतः" मनुः।

शशधर पु० शशं मृगभेदं धरति धृ-अच्। १चन्द्रे २कर्पूरे च अमरः। भृ--क्विप् शशभृदादयोऽप्यत्र।

शशलाञ्छन पु० शशः मृगभेदो लाञ्छनं यस्य। १चन्द्रे २कर्पूरे च शशाङ्कादयोऽप्यत्र।

शशबिन्दु पु० १राजभेदे २विष्णौ च मेदि०।

शशशिम्बिका स्त्री शश इव शिम्बी तथा कायति कै-क। जीवन्त्यां राजनि०। [यमुनयोर्मध्यस्थे देशभेदे त्रिका०।

शशस्थली स्त्री शशयाययोर्मध्या स्थली। अन्तर्वेद्यां गङ्गा-

शशाण्डुलि स्त्री अडि--उलि हृस्व०वा ङीप्। कर्कटीभेदे राजनि०। "शशाण्डुली तिक्तकटुश्च कोमला कटुत्वयुक्ता मधुरा कफापहा। पाके तु साऽम्ला मधुरा विदाहकृत् कफे तु पथ्या रुचिकृच्च दीपनी" राजनि०। [ल्यु। तत्रैव।

शशाद पु० शशमत्ति अद- अण्। श्येनविहगे राजनि०।

शशिकला स्त्री ६त०। १चन्द्रस्य षोडशभागे "गुरुनिधनमनुलघुरिह शशिकला" छन्दोम० उक्तलक्षणे २पञ्चदशाक्षरपादके छन्दोभेदे। [मणौ पु० राजनि०।

शशिकान्त न० शशी कान्तो यस्य। १कुमुदे २चन्द्रकान्त-

शशिन् पु० शशोऽस्त्यस्य इनि। १चन्द्रे २कर्पूरे च शब्दमा०।

शशिप्रभ न०शशिना सह तुल्येव वा प्रभा यस्य। १कुमुदे।२मुक्तायां राजनि०। ६त० ३ज्योत्स्नायां जटा०। [दयोऽप्यत्र।

शशिभूषण पु० शशी भूषणं यस्य। १महादेवे शशिमण्डना-

शशिलेखा स्त्री शशिनो रेखा इव यः। १चन्द्रकलायां शशिनो लेखेव कुटिलतासदृशत्वात्। २गुडूच्यां मेदि०। "म्रौ म्यौ यौ चेत् भवेतां सप्ताष्टकैश्चन्द्रलेखा" छन्दोम० उक्तलक्षणे ३पञ्चदशाक्षरपादके छन्दोभेदे। [राजनि०।

शशिवाटिका स्त्री शशिनो वाटीव इवार्थे कन्। पुनर्नवायां

शशिशेखर पु० शशी शेखरं यस्य। महादेवे हला०। शशिमौल्यादयोऽप्यत्र।

शशोर्ण न० ६त०। शशस्य लोम्नि अमरः। [अमरः।

शश्वत् अव्य० शश- वति। १नैरन्तर्ये २पुनःपुनरित्यर्थे च

शष वधे भ्वा० पर० सक० सेट्। शषति अशाषीत् अशषीत्।

शष्कुल पु० शष-कुलच् कस्य नेत्वम्। (कहरवरमछा) १मत्स्ये २अपूपभेदे स्त्री शब्दच० गौरा० ङीष्। ३कर्णरन्ध्रे "अवलम्बितकर्णशष्कुली" नैष०। ४मत्स्यभेदे च भावप्र० दन्त्यमध्योऽप्ययमत्रार्थे। [मेदि०।

शष्प न० शष--पक्। १बालतृणे घासे अमरः २प्रतिभाक्षये पु०

शस वधे भ्वा० पर० सक० सेट् उदित् क्त्वा वेट्। शसति। अशासीत् अशसीत्।

शंस आशिषि भ्वा० आत्म० सक० इदित् सेट्। प्रायेणाङ्पूर्वः। आशंसते आशंसिष्ट।

शंस स्तुतौ भ्वा० पर०सक०सेट् इदित्। शंसति अशंसीत्।

शसन न० शस--वधे ल्युट्। यज्ञार्थं पशुहनने।

शस्त न० शन्स--क्त। १कल्याणे २तनौ अमरः। ३स्तुते ४प्रशस्ते च त्रि०मेदि०। ५देहे न०त्रिका० अंगुल्यां कन्। ६अङ्गुलित्राणे शब्दच०।

शस्त्र न० शस--ष्ट्रन्। १लौहे २खड्गादौ अस्त्रे च हेमच० स्वार्थे क। तत्रैव। तत्र सूक्ष्मसंख्यमस्त्रं शस्त्रमिति भेदः शंस--त्रन्। ३अगीते मन्त्रभेदे त्रिलिङ्गशास्त्रज्ञानां स-षडादि सुश्रुतोक्तं यथा

"अथातःशस्त्रावचारणीयमध्यायं व्याख्यास्यामः विंशतिः शस्त्राणि। तद्यथा मण्डलाग्रकरपत्रवृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधारसूचीकुशपत्राटीमुखशरारीमुखान्तर्मुखत्रिकूर्चककुठारिकाव्रीहिमुखारावेतसपत्रकवडिशदन्तशङ्क्वेषण्य इति। तत्र मण्डलाग्रकरपत्रे स्यातां छेदने लेखने च। वृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधाराणि छेदने भेदने च। सूचीकुशपत्राटीमुखशरारीमुखान्तर्मुखत्रिकूर्चकानि विस्रावणे। कुठारिकाव्रीहिमुखारावेतसपत्रकाणि व्यधने सूची च। वडिशो दन्तशङ्कुश्चाहरणे। एषण्येषणे आनुलोम्ये च। सूच्यः सीवने इत्यष्टविधे कर्मण्युपयोगः शस्त्राणां व्याख्यातः। तेषामथ यथायोगग्रहणसमासोपायः कर्मसु वक्ष्यते। तत्र वृद्धिपत्रं वृन्तफलसाधारणे भागे गृह्णीयाच्छेदनान्येवं सर्वाणि। वृद्धिपत्रं मण्डलाग्रञ्च किञ्चिदुत्तानपाणिना लेखने बहुशोऽवचार्यं इत्यादि

विस्रावणानि विशेषेण बालवृद्धसुकुमारभीरुनारीणां राज्ञां राजपुत्राणाञ्च त्रिकूर्च्चेन विस्रावयेत्। तत्र प्रच्छादितहस्तमध्यप्रदेशिनीभ्यां व्रीहिमुखम्। कुठारीञ्च वामहस्तन्यस्तामितरहस्तमध्यमाङ्गुष्ठविष्टब्धयाभिहन्यात्। आराकरपत्रैषण्यो मूले। शेषाणि तु यथायोगं गृह्णीयात्। तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः। तत्र नखशस्त्रैषण्यावष्टाङ्गुले सूच्यो वक्ष्यन्ते। बडिशो दन्तशङ्कुश्चानताग्रे तीक्ष्णकण्टकप्रथमयवपत्रमुखे। एषणी गण्डूपदाकारमुखी। प्रदेशिन्यग्रपर्व्वप्रमाणा मुद्रिका। दशाङ्गुला शरारीमुखी सा कर्त्तरीति कथ्यते। शेषाणि तु षडङ्गुलानि। तानि सुग्रहाणि सुलोहानि सुधाराणि सुरूपाणि सुसमाहितमुखाग्राण्यकरालानि चेति शस्त्रसम्पत्। तत्र वक्रं कुण्ठं खण्डं खरधारमतिस्थूलमत्यल्पमतिदीर्घमतिह्रस्वमित्यष्टौ शस्त्रदोषाः। अतो विपरीतगुणमाददीतान्यत्र करपत्रात्तद्धि खरधारमस्थिच्छेदनार्थम्। तत्र धारा भेदनानां मासूरी। लेखनानामर्द्धमासूरी। व्यधनानां विस्रावणानाञ्च कैशिकी। छेदनानामर्द्धकैशिकीति। तेषां पायना त्रिविधा क्षारोदकतैलेषु तत्र क्षारपायितं शरशल्यास्थिच्छेदनेषु। उदकपायितं मांसच्छेदनभेदनपाटनेषु तैलपायितं सिराव्यधनस्नायुच्छेदनेषु। तेषां निशानार्थं श्लक्ष्णशिला माषवर्णा। धारासंस्थापनार्थं शाल्मलीफलकमिति। भवति चात्र "यदा सुनिशितं शस्त्रं रोमच्छेदि सुसंस्थितम्। सुगृहीतं प्रमाणेन तदा कर्म्मसु योजयेत्"। अनुशस्त्राणि तु त्वक्सारस्फटिककाचकुरुविन्दजलौकाग्निक्षारनखगोजीशेफालिकाशाकपत्रकरीरबालाङ्गुल्य इति। "शिशूनां शस्त्रभीरूणां शस्त्राभावे च योजयेत्। त्वक्सारादि चतुर्वर्गं छेद्ये भेद्ये च बुद्धिमान्। आहार्य्यच्छेद्यभेद्येषु नखं शक्येषु योजयेत्। विधिः प्रवक्ष्यते पश्चात् क्षारवह्निजलौकसाम्। ये स्युर्मुखगता रोगा नेत्रवर्त्मगताश्च ये। गोजीशेफालिकाशाकपत्रैर्विस्रावयेत्तु तान्। एषण्यभावे तु बालाङ्गुल्यङ्कुरा हिताः। शस्त्राण्येतानि मतिमान् शुद्धशैक्यायसानि तु। कारयेत्कर्म्मणैः प्राज्ञं कर्म्मारं कर्म्मकोविदम्। प्रयोगज्ञस्य वैद्यस्य सिद्धिर्भवति नित्यशः। तस्मात्परिचयः कार्य्यः शस्त्राणामादितः सदा"। [राजनि०।

शस्त्रकोषतरु पुं० शस्त्रकोषस्य हितस्तरुः। महापिण्डीवृक्षे

शस्त्रजीविन् पुं० शस्त्रेण जीवति जीव-णिनि। शस्त्रव्यापारेण युद्धादिना हेतिजीविनि हेमच०।

शस्त्रपाणि पुं० शस्त्रं पाणौ यस्य। १शस्त्रधारके २आततायिभेदे च "शस्त्रपाणिर्धनापहः" इति स्मृतिः।

शस्त्रमार्ज्ज पुं० शस्त्रं मार्ष्टि मृज-अण् (शिकलकर) शस्त्रमार्ज्जनकरे शिल्पिभेदे अमरः।

शस्त्रहत त्रि० ३त०। १शस्त्रघातेन मृते "पक्षिपशुमृगैर्ये तु दंष्ट्रिशृङ्गिनखैर्हताः। पतनानशनप्रायैर्जलाग्निविषबन्धनैः। मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः" देवीपु० परिभाषिते २खड्गादिहते च। तस्याशौचादि शुद्धित० उक्तं यथा "शस्त्रघाते त्र्यहादूर्द्ध्वं यदि कश्चित् प्रमीयते। अशौचं प्राकृतं तत्र सर्व्ववर्णेषु नित्यशः" आहुः "क्षतेन म्रियते यस्तु तस्याशौचं भवेद्द्विधा। आसप्ताहात् त्रिरात्रं स्यात् दशरात्रमतःपरम्"। अत्र शस्त्रघातपरं अतितरशस्त्रघातपरं पारिभाषिकशस्त्रघातपरञ्च। न च शास्त्रीयव्यवहारेऽन्तरङ्गत्वेन पारिभाषिकस्यैव ग्रहणं युक्तमितिवाच्यम् आद्ये पारिभाषिकापारिभाषिकशस्त्रघातग्रहणवदत्रापि तथा युक्तत्वात् पारिभाषिकत्वादेव न प्रकरणनियमः" शु० त० रघु०।

शस्त्रहतचतुर्दशी स्त्री शस्त्रहतोद्देश्यकश्राद्धाङ्गं चतुर्दशी। गौणाश्विनकृष्णपक्षचतुर्दश्यां तत्र कर्त्तव्यं श्राद्धति० दर्शितं यथा

"अथ शस्त्रहतचतुर्दशी। विष्णुः युद्धहतानां श्राद्धकर्म्मणि चतुर्दशी प्रशस्ता"।

शस्त्रयुद्धहतानामेवेति न नियमार्थम् ब्रह्मपुराणे "प्रायाऽनशनशस्त्राग्निविषोद्बन्धनिनां तथा। चतुर्दश्यां तु कर्त्तव्यं तृप्त्यर्थमिति निश्चयः" प्रायो महापथगमनम्। वायुपुराणे "युवानस्तु गृहे यस्य मृतास्तेषान्तु दापयेत्। शस्त्रेण च हता ये वै तेषां दद्याच्चतुर्दशीम्"। युवान एव पुत्रादयो मृता इत्यर्थः। मरीचिः 'विषशस्त्रश्वापदाहितिर्य्यग्ब्राह्मणघातिनाम्। चतुर्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता"। ब्राह्मणकर्त्तृकघातोऽस्यास्तीति ब्राह्मणघाती तेषां, "ये च ब्राह्मणैर्हताः" इति ब्रह्मपुराणवचनात् न तु कृतब्रह्मघातस्य पतितत्वात्। अन्येषाम् अशस्त्रादिहतानाम् एतच्च शस्त्रहतश्राद्धं विष्ण्वादिभिः श्राद्धप्रकरणलिखनात् सकलकृष्णपक्षसाधारणम् पित्रादीनामेव पार्व्वणविधिप्रकरणात् पार्व्वणविधिना कार्य्यं "सपि-

सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते। तत्र तत्र त्रयं कुर्य्याद्वर्जयित्वा मृताहनि" इति यमवचनाच्च। ननु "अन्येषान्तु विगर्हिता" इति श्रवणात् कथं त्रिपुरुषिकपार्वणविधिः न यस्य पुरुषास्त्रय एव शस्त्रहतास्तस्य त्रिपुरुषिकविधिरुपपद्यत एव यस्य द्वौ शस्त्रहतौ एको वा तेनापि द्विपुरुषिकैकपुरुषिकमेव पार्वणं कर्त्तव्यं यथा मनुः "पिता यस्य तु वृत्तः स्याज्जीवेद्वापि पितामहः। पितुः स नाम संकीर्त्त्य कीर्त्तयेत् प्रपितामहम्" तथा हारीतः "पितामहोऽपि जीवेद् पितर्य्येव समापयेत्"। नन्वेकोद्दिष्टमात्रं श्रूयते यथाह गार्ग्यः "सपिण्डीकरणादूर्द्ध्वं मृते कृष्णचतुर्दशीम्। प्रतिसंवत्सरादन्यदेकोद्दिष्टं न कारयेत्" यमः "सपिण्डीकरणादूर्द्ध्वं यत् पितृभ्यः प्रदीयते। एकोद्दिष्टविधानेन प्रदेयं शस्त्रघातिने" भविष्यपुराणे "समत्वमागतस्यापि पितुः शस्त्रहतस्य च। चतुर्दश्यां तु कर्त्तव्यमेकोद्दिष्टं न पार्वणम्। चतुर्दश्यां तु यत् श्राद्धं सपिण्डीकरणे कृते। एकोद्दिष्टविधानेन प्रदेयं शस्त्रघातिने" उच्यते। एषां वचनानाममूलत्वात् समूलत्वेऽपि पार्वणाप्रसक्तिविषयकाण्येतानि विष्ण्वादिवचनेषु पार्वणावगतेः। आमाटीनान्तु शस्त्रहतानाम् एकोद्दिष्टविधिना कार्य्यम्। "अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये। तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणम्" इत्यापस्तम्बवचने पार्वणनिषेधात्। तत्र न सकलकृष्णपक्षसाधारणं विष्ण्वादिवचने श्राद्धशब्दस्य पार्वणपरत्वोक्तेः। किन्त्वाश्विनमासीयकृष्णपक्षविषयम्। ब्रह्मपुराणे "प्रायागमनेत्यादिना सकलकृष्णपक्षसाधारणं श्राद्धमभिधायाभिधाने "तर्पणीयाश्चतुर्दश्यां लुप्तपिण्डोदकक्रियाः" इति पुनरभिधानं तच्छस्त्रहतश्राद्धादिविषयम् अतएव तत्रैव "अमावास्यायां पितरः पूज्या नान्दीमुखा अपीति" वृद्धप्रपितामहादीनामपि श्राद्धं दर्शितम्। इयञ्च चतुर्दश्याः शस्त्रहतश्राद्धनिन्दा आश्विनमासीयकृष्णपक्षश्राद्धादिकव्यतिरिक्तसामान्यकृष्णपक्षविहितश्राद्धकाम्यश्राद्धविषया प्रकरणभेदेन श्राद्धकर्मभेदात् सामान्यविशेषन्यायाच्च इतरथा चतुर्दश्यां संक्रान्तिश्राद्धेऽपि शस्त्रहतनिन्दाप्रसङ्गात् अतएव "कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीमिति" मनुवचनेऽपि चतुर्दशीवर्जनं पक्षश्राद्धादिव्यतिरिक्तविषयम्। ननु पश्वादिहतानां श्राद्धनिषेधः श्रूयते यथा कात्यायनः "शस्त्रविप्रहतानाञ्च शृङ्गिदंष्ट्रिसरीसृपैः। आत्मनस्त्यागिनाञ्चैव श्राद्धमेषां न कारयेत्"। एतत् बुद्धिपूर्वकमृतानामेव। प्रमादमृतानाञ्च श्राद्धादिकमाह अङ्गिराः "अथ कश्चित् प्रमादेन म्रियतेऽग्न्युदकादिभिः। अशौचं तस्य कर्त्तव्यं कर्त्तव्या चोदकक्रिया"। अबुद्धिपूर्वकमपि शृङ्ग्यादिभिः क्रीडां कुर्वतां मृतानां न कर्त्तव्यम्। ब्रह्मपुराणे "शृङ्गिदंष्ट्रिनखिव्यालविषवह्निस्त्रिया जलैः। आदरात् परिहर्त्तव्यः कुर्वन् क्रीडां मृतस्तु यः"। परिहर्त्तव्यः श्राद्धादौ। शास्त्रानुमत्या बुद्धिपूर्वकमृतानामपि कर्त्तव्यम्। गर्ग्यः "नष्टशौचव्रतिर्लुप्तप्रत्याख्यातभिषक्क्रियः। आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनादिभिः। तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः। तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमिष्यते"। एवं क्रीडाव्यतिरेकेणाऽबुद्धिपूर्वमृताः शास्त्रानुमत्या च बुद्धिपूर्वकमृता अपि श्राद्धार्हाः। कथम् लुप्तपिण्डोदकत्वम् इति चेन्नीचमिति ब्रूमः बुद्धिपूर्वकमृते पिण्डोदकक्रियालोपात्"।

शस्त्राभ्यास पु० ६त०। शस्त्रप्रयोगशिक्षायां त्रिका०। [अनि०।

शस्त्रायस शस्त्रयोग्यमयः अच्समा०। लौहभेदे (इस्पात) रा-

शस्त्रिन् त्रि० शस्त्रमस्त्यस्य इनि। शस्त्रविशिष्टे।

शस्त्री स्त्री स्वल्पं शस्त्रं ङीप्। छुरिकायाम् मेदि०।

शस्प न० शस–प। बालतृणे घासे अमरे पाठान्तरम्।

शस्य न० शस-यत्। वृक्षादीनां फले "शस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते" इत्युक्ते क्षेत्रस्थे धान्यादौ च शस्य इत्यादित्वमपि नवशस्यसम्भोगनक्षत्राणि ज्यो० त० उक्तानि यथा "अनुराधा मृगशिरो रेवती चोत्तरात्रयम्। हस्ता चित्रा यथा पुष्या श्रवणा च पुनर्वसुः। रोहिणी नवशस्यादिनवद्रव्याशनादिषु। प्रशस्तं नवपीठादिसम्भोगे चाहविद्धवदेत्"।

शस्यध्वंसिन् पु० शस्यं ध्वंसयति ध्वन्स–णिच्–णिनि। १तुवरके (ठँद) शब्दच० २शस्यनाशके त्रि०।

शस्यमञ्जरी स्त्री ६त०। अभिनवधान्यादिशीर्षे अमरः।

शस्यशूक न० धान्यादेः शीर्षे अमरः। [अमरः।

शस्यसम्बर पु० शस्यं संवृणोति सम्+वृ–अच्। सालवृक्षे

शस्यारु पु० शस्यमृच्छति ऋ–उण्। क्षुद्रशमीवृक्षे शब्दच०।

शाक पु०न० शक–घञ्। १पत्रपुष्पादौ अमरः २वृक्षभेदे पु० (सेगुण) द्वीपे च ३शक्तौ ४शिरीषवृक्षे पु० शब्दरत्ना०। ५स्वराज्यावधि वत्सरप्रवर्त्तके राजभेदे ६तदीये वत्सरे च पु० मेदि०। शक्नोति सामर्थ्यं शो–क तस्य नेत्वम्।

"मूलपत्रे करीराग्रे फलकाण्डाधिरूढकम् । त्वक्पुष्पं कवकञ्चैव शाकं दशविधं स्मृतम्" इत्युक्तेषु ७६ शाकादीनां पर्य्यायेषु न० । तत्र १मूलं मूलकादेः । २पत्रं वास्तूकादेः । ३करीरं वंशादेः । ४अग्रं वेत्रादेः । ५फलं कुष्माण्डादेः । ६काण्डं उत्पलादेः । ७अधिरूढं तालास्थिमज्जादेः । ८त्वक् मातुलुङ्गादेः । ९पुष्पं कोविदारादेः । १०कवकं छत्रिकादेः । भावप्र० । अन्यचोक्तं यथा "पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा । शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम्" । "प्रायः शाकानि सर्व्वाणि विष्टम्भीनि गुरूणि च । रूक्षाणि बहुवर्च्चांसि सृष्टविण्मारुतानि च । शाकं भिनत्ति वपुरस्थि निहन्ति नेत्रं वर्णं विनाशयति रक्तमथापि शुक्रम् । प्रज्ञाक्षयं च कुरुते पलितञ्च नूनम् हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः" । द्वीपभेदे मत्स्यपु० १२१ अ० तत्प्रमाणाद्युक्तं यथा

"शाकद्वीपस्य वक्ष्यामि यथावदिह निश्चयम् । कथ्यमानं निबोधध्वं शाकं द्वीपं द्विजोत्तमाः ! । जम्बूद्वीपस्य विस्ताराद्द्विगुणस्तस्य विस्तरः । विस्ताराद्द्विगुणश्चापि परीणाहः समन्ततः । तेनावृतः समुद्रोऽयं द्वितीयो लवणोदकः । तत्र पुण्या जनपदा चिराच्च म्रियते जनः । कुत एव च दुर्भिक्षं क्षमातेजोयुतेष्विह । तत्रापि पर्व्वताः शुभ्राः सप्तैव मणिभूषिताः । शाकद्वीपादिषु त्वेषु सप्त सप्त नगास्त्रिषु । ऋज्वायताः प्रतिदिशं निविष्टाः पर्व्वतोत्तमाः । रत्नाकराद्रिनामानः सानुमन्तो महाचिताः । समोदिताः प्रतिदिशं द्वीपविस्तारमानतः । उभयत्रावगाढौ च लवणक्षीरसागरौ । शाकद्वीपे तु वक्ष्यामि सप्त दिव्यान् महाचलान् । देवर्षिगन्धर्व्वयुतः प्रथमो मेरुरुच्यते । प्रागायतः स सौवर्ण उदयो नाम पर्व्वतः । तत्र मेघास्तु वृष्ट्यर्थं प्रभवन्त्यपयान्ति च । तस्यापरेण सुमहान् जलधारो महागिरिः । स वै चन्द्रः समाख्यातः सर्व्वौषधिसमन्वितः । तस्मान्नित्यमुपादत्ते वासवः परमञ्जलम् । नारदो नाम चैवोक्तो दुर्गशैलो महाचितः । तत्राचलौ समुत्पन्नौ पूर्व्वं नारदपर्व्वतौ । तस्यापरेण सुमहान् श्यामो नाम महागिरिः । यत्र श्यामत्वमापन्नाः प्रजाः पूर्व्वमिमाः किल । स एव दुन्दुभिर्नाम श्यामपर्व्वतसन्निभः । शब्दमृत्युः पुरा तस्मिन् दुन्दुभिस्ताडितः सुरैः । रत्नमालान्तरमयः शाल्मलश्चान्तरालकृत् । तस्यापरेण रजतो महानस्तोगिरिः स्मृतः । स वै सोमक इत्युक्तो देवैर्यत्रामृतं पुरा । सम्भृतञ्चाहृतञ्चैव मातुरर्थे गरुत्मता । तस्याःपरे चाम्बिकेयः सुमनाश्चैव स स्मृतः । हिरण्याक्षो वराहेण तस्मिन् शैले निषूदितः । आम्बिकेयात् परो रम्यः सर्व्वौषधिनिषेवितः । विभ्राजस्तु समाख्यातः स्फाटिकस्तु महान् गिरिः । यस्माद्विभ्राजते वह्निर्विभ्राजस्तेन स स्मृतः । सैवेह केशवेत्युक्तो यतो वायुः प्रवाति च । तेषां वर्षाणि वक्ष्यामि पर्व्वतानां द्विजोत्तमाः । शृणुध्वं नामतस्तानि यथावदनुपूर्व्वशः । द्विनामान्येव वर्षाणि यथैव गिरयस्तथा । उदयस्योदयं वर्षं जलधारेति विश्रुतम् । नाम्ना गतभयं नाम वर्षं तत् प्रथमं स्मृतम् । द्वितीयं जलधारस्य सुकुमारमिति स्मृतम् । तदेव शैशिरं नाम वर्षं तत् परिकीर्त्तितम् । नारदस्य च कौमारं तदेव च सुखोदयम् । श्यामपर्व्वतवर्षं तदनीचकमिति स्मृतम् । आनन्दकमिति प्रोक्तं तदेव मुनिभिः शुभम् । सोमकस्य शुभं वर्षं विज्ञेयं कुसुमोत्करम् । तदेवासितमित्युक्तं वर्षं सोमकसंज्ञितम् । आम्बिकेयस्य मैनाकं क्षेमकञ्चैव तत् स्मृतम् । तदेव ध्रुवमित्युक्तं वर्षं विभ्राजसंज्ञितम् । द्वीपस्य परिणाहश्च ह्रस्वदीर्घत्वमेव च । जम्बूद्वीपेन संख्यातं तस्य मध्ये वनस्पतिः । शाको नाम महावृक्षः प्रजास्तस्य महानुगाः । एतेषु देवगन्धर्व्वाः सिद्धाश्च सह चारणैः । विहरन्ति रमन्ते च दृश्यमानाश्च तैः सह । तत्र पुण्या जनपदाश्चातुर्व्वर्ण्यसमन्विताः । तेषु नद्यश्च सप्तैव प्रतिवर्षं समुद्रगाः । द्विनाम्ना चैव ताः सर्व्वा गङ्गा सप्तविधा स्मृता । प्रथमा सुकुमारीति गङ्गा शिवजला शुभा । मुनितप्ता च नाम्नैषा नदी सम्परिकीर्त्तिता । सुकुमारी तपःसिद्धा द्वितीया नामतः सती । नन्दा च पावनी चैव तृतीया परिकीर्त्तिता । शिविका च चतुर्थी स्यात् द्विविधा च पुनः स्मृता । इक्षुश्च पञ्चमी ज्ञेया तथैव च पुनः कुहूः । वेणुका चामृता चैव षष्ठी सम्परिकीर्त्तिता । सुकृता च गभस्ती च सप्तमी परिकीर्त्तिता । एताः सप्त महाभागाः ! प्रतिवर्षं शिवोदकाः । भावयन्ति जनं सर्व्वं शाकद्वीपनिवासिनम् । अभिगच्छन्ति ताश्चान्या नदनद्यः सरांसि च । बहूदकपरिस्रावा यतो वर्षति वासवः । तासान्तु नामधेयानि परिमाणं तथैव च । न शक्यं परिसंख्यातुं पुण्यास्ताः सरिदुत्तमाः । ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते ।

एते शाल्मलजाः प्रोक्ताः प्रमोदा ये च वै शिवाः। आनन्दाश्च सुखाश्चैव क्षेमकाश्च नरैः सह। वर्णाश्रमाचारयुता देशास्ते सप्त विश्रुताः। आरोग्या बलिनश्चैव सर्वे मरणवर्जिताः। अवसर्पिणी न तेष्वस्ति तथैवोत्सर्पिणी पुनः। न तत्रास्ति युगावस्था चतुर्युगकृता क्वचित्। त्रेतायुगसमः कालस्तथा तत्र प्रवर्त्तते। शाकद्वीपादिषु ज्ञेयं पञ्चस्वेतेषु सर्वशः। देशस्य तु विचारेण कालः स्वाभाविकः स्मृतः। न तेषु सङ्करः कश्चित् वर्णाश्रमकृतः क्वचित्। धर्मस्य चाव्यभीचारादेकान्तसुखिनो जनाः। न तेषु माया लोभो वा ईर्ष्यासूया भयं कुतः। विपर्ययो न तेष्वस्ति तद्वै स्वाभाविकं स्मृतम्। कालो नैव च तेष्वस्ति न दण्डो न च दाण्डिकः। स्वधर्मेण च धर्मज्ञास्ते रक्षन्ति परस्परम्”।

शाकचुक्रिका स्त्री शाकेषु मध्ये चुक्रिका। चिञ्चायां राजनि०।

शाकट न० शकटाय हितम् अण्। १शकटसम्बन्धियुगादौ २शकटयोरुपरि च मेदि०। ३श्लेष्मातके वृक्षे राजनि०। ४धवद्रुमे च पु० रत्नमा०।

शाकटायन पु० व्याकरणकारके मुनिभेदे “इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः। पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः” कविकल्पद्रुमः।

शाकटिक पु० शकटेन चरति ठञ्। शकटेन गन्तरि।

शाकटीन पु० शकटः परिमाणमस्य खञ्। विंशतितुलापरिमाणे हेमच०। [शाकटशाकिनादयोऽप्यत्र।

शाकतरु पु० शाकाख्यः तरुः। (सेगुण) वृक्षे शब्दच०।

शाकपत्र पु० शाकस्येव पत्रमस्य। शिग्रुवृक्षे राजनि०।

शाकपार्थिव पु० वर्षे हितम् ठक् शाकप्रधानो पार्थिवः। मध्यपदलोपिसमासे सिद्धा०। [च। तत्रैव सिद्धा०।

शाकबिल्व पु० शाकोऽपि बिल्व इव। वार्त्ताकौ जटा०श्चार्थे

शाकम्भरी स्त्री शाकैर्बिभर्त्ति भृ-खच् मुम् च। “भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः। शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि” देवीमा० निरुक्तायाम् १दुर्गायाम् ।२रोमकाख्यलवणाकरनगर्यां न० तत्र भवं छ। शाकम्भरीय लवणभेदे न० “शाकम्भरीयं कथितं गडाख्यं रोमकं तथा। गडाख्यं लघु वातघ्नमत्युष्णं भेदि पित्तलम्। तीक्ष्णं व्यवायि सूक्ष्माभिष्यन्दि कटुपाकि च” भावप्र०।

शाकयोग्य पु० शाके तद्गुणे योग्यः। धन्याके राजनि०।

शाकराज पु० शाकेषु राजते अच्, शाकानां वा राजा टच् समा०। वास्तूकशाके राजनि०।

शाकल पु० न०व० शकलेन ऋषिणा प्रोक्तमधीयते अण्। १शकलर्षिप्रोक्तशाखादिपन्वाध्येतृषु। तेषां संघोऽङ्को घोषो वा पुनरण् वुञ् वा। शाकल शाकलक वा। १तत्समूहे २तदङ्के ३तद्घोषे च पु०। सङ्घः परस्परा सम्बन्धः” सि०कौ०।

शाकलिक त्रि० शकलच्छेदं ठक् कात्या० वार्त्ति०। शकलसम्बन्धिनि पशौ अण् शाकल तत्रार्थे। [शाके सिद्धा०।

शाकवीर पु० शाकेषु वीरः वीर्याधायकत्वात्। १वास्तूक-

शाकशाकट न० शाकस्य क्षेत्रं शाकटच्। शाकक्षेत्रे। शाकटिनच् शाकशाकटिन अत्रार्थे हेमच०।

शाकश्रेष्ठ पु० शाकेषु श्रेष्ठः। १वास्तूकशाके शब्दर०। २जीवन्त्यां ३वार्त्ताकौ स्त्री हेमच०। [क्षुपे राजनि०।

शाकाङ्ग न० शाकस्य तद्गुणस्याङ्गमुपयोगि। १मरिचे २कोशी-

शाकाम्ल न० शाकमेवाम्लम्। वृक्षाम्ले राजनि०।

शाकाम्लभेदन न० शाकरूपम् अम्ल भिनत्ति भिद्-ल्यु। १चुक्रे (चुकोपालङ्) राजनि०। [वृक्षे राजनि०।

शाकालाबु स्त्री शाकप्रधानालाबुः। अलाबुभेदे राजालाबु

शाकाष्टका स्त्री शाकेन कर्त्तव्या अष्टका। गौणफाल्गुनकृष्णाष्टम्याम् अष्टकाशब्दे ५१६ पृ० दृश्यम्।

शाकिनी स्त्री शाकमस्त्यस्याः उत्पद्यत्वेन इनि। १शाकभवनयोग्यायां भूमौ शाकवाटिकायाम् २देवीगणचरीभेदे च। “डाकिनी योगिनी चैव खेचरी शाकिनी तथा। दिक्षु पूज्या इमा देव्यः सुसिद्धिफलदायिकाः” काल्या०कल्प०। कण्ठदेशस्थे विशुद्धाख्ये चक्रे स्थितायां ३देवीशक्तौ च “विशुद्धाख्ये महाचक्रे षोड़शस्वरसंयुते। सदाशिवं शाकिनीञ्च विन्यसेत् पूर्ववत्ततः” तन्त्रसा०।

शाकुच पु० शक-बा० उचन्। परतापके शब्दमा०।

शाकुन पु० शकुनं शुभाशुभसूचकं निमित्तमधिकृत्य कृतो ग्रन्थः अण्। शकुनज्ञानसाधने ग्रन्थे (काकचरित)। “शुभाशुभज्ञानविनिर्णयाय्यो हेतुर्नृणां यः शकुनः स उक्तः। गतिस्वरालोकनभावचेष्टां संकीर्त्तयाम्योदिपदादिकानाम्। लोकोऽसुना शाकुनसंज्ञकेन ज्ञानेन विज्ञातसमस्तकर्मा। नापायकूपे पतति प्रसर्पन् शास्त्रं हि दिव्या दृगतीन्द्रियेषु” वसन्तराजः।

शाकुनिक पु० शकुनेन पक्षिवधादिना जीवति ठञ्। पक्षिघातके अमरः।

शाकुन्तलेय पु० शकुन्तलाया अपत्यं ढक्। दुष्मन्तात्मजे शकुन्तलाभंजे भरते नृपे जटा० ।

शाक्त त्रि० शक्तिर्देवताऽस्य अण्। तन्त्रोक्ते शक्तिदेवतोपासके तस्य प्रशंसा मुण्डमालात० २पटले उक्ता "स्वर्गे मर्त्ये च पाताले नास्ति शाक्तात् परः प्रियः। सौराणां गाणपत्यानां वैष्णवानां तथैव च। शैवानां चैव शाक्तस्य क्रमशः क्रमशः प्रिये!" "शाक्ता एव द्विजाः सर्वे न शैवा न च वैष्णवाः। उपासते यतो देवीं गायत्रीं परमाक्षराम्" निरोत्तत० २पटले। "शक्त्याराधनं कृत्वा नान्यस्याराधनं चरेत्। अन्यस्य चरणाद्देवि! योगिनी शापमाप्नुयात्" गन्धर्वत०। "तर्जन्या रजतं धार्यं स्वर्णं धार्यमनामया। एष एव क्रमः शाक्तो न दर्भो वनचारिणः" ह्याचार०। [अमरः।

शाक्तीक पु० शक्तिः प्रहरणमस्य ईकक्। शक्त्या योद्धरि

शाक्य पु० शक-घञ् तत्र साधुः यत्। बुद्धे।

शाक्यशब्दनिरुक्तिरन्यथोक्ता यथा

"शाकवृक्षप्रतिच्छन्नं वासं यस्मात् प्रचक्रिरे। तस्मादिक्ष्वाकुवंश्यास्ते भुवि शाक्या इति स्मृताः" भरतधृतवचनम्। इक्ष्वाकुवंश्याविका पितृशप्ताः केचिदिक्ष्वाकुवंश्या गौतमवंशजकपिलमुनेराश्रमे योगाभ्यासाय शाकवृक्षे कृतवासाः शाक्या इति ख्यातिमापन्नाः।

शाक्यमुनि पु० शाक्यो मुनिः। बुद्धभेदे अमरः।

शाक्यसिंह पु० शाक्यवंशे सिंह इव। बुद्धभेदे अमरः।

शाक्र त्रि० शक्रस्येदं स देवताऽस्य वा अण्। १इन्द्रसम्बन्धिनि २इन्द्रदेवताके हविरादौ। स्त्रियां ङीप्। शक्रस्य तुल्यपराक्रमः अस्त्यस्याः अण्। ३शक्रतुल्यपराक्रमायां दुर्गायाम् "इन्द्राक्षी इन्द्रजननी शाक्री शक्रपराक्रमा" देवीपु०।

शाक्वर पु० शक-ष्वरप् स्वार्थे अण्। वृषे हेमच०।

शाख व्याप्तौ भ्वा० पर० सक० सेट् ऋदित् चङि न ह्रस्वः। शाखति अशाखीत्।

शाख पु० शाख-अच्। कृत्तिकापुत्रे स्कन्दानुजे १कुमारानुचरगणभेदे "अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत। तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजाः" मत्स्यपु०५अ०। २ग्रन्थपरिच्छेदे सर्गस्थानीये ग्रन्थांशभेदे शब्दच०। वृक्षस्यांशभेदे (डाल) स्त्री अमरः। ३पक्षान्तरे ४राष्ट्रे ५वेदैकदेशे च स्त्री मेदि०। ६अन्तिके विश्वः। ७देहांशभेदे च।

शाखाकण्ट पु० शाखाव्यापी कण्टः कण्टको यस्य। स्नुही वृक्षे राजनि०। [पुरे अमरः। शाखापुरादयोऽप्यत्र

शाखानगर न० शाखेव नगरम्। मूलनगरसमीपस्थे क्षुद्र-

शाखापित्त पु० शाखासु पित्तं यतः। पाणिपादादिदेहशाखादाहे राजनि०। [स्त्रियां ङीष्।

शाखामृग पुंस्त्री० शाखास्थो मृगः पशुः। वानरे अमरः।

शाखाम्ला स्त्री शाखास्वप्यम्ला। वृक्षाम्ले राजनि०।

शाखारण्ड पु० शाखायां वेदशाखायां रण्डः तद्विहितकर्मानाचरणात्। स्वशाखात्यागेनापरशाखोक्तकर्मकर्त्तरि हेमच०। [राजनि०।

शाखाल पु० शाखाः बाहुल्येन सन्त्यस्य अच्। वानीरवृक्षे

शाखाशिफा स्त्री शाखारूढा शिफा मूलम् शाक०। वटादीनां शाखाजाते १मूले अमरः। २शिफामारभ्य शाखायुतायां गुडूच्यादिलतायाम् भरतः।

शाखिन् पु० शाखाऽस्त्यस्य इनि। १वृक्षे अमरः। २वेदैकदेशवति, ३नृपभेदे, ४म्लेच्छभेदे च मेदि०।

शाखोट पु० शाख-व्याप्तौ ओटन् (शेओड़ा) वृक्षे स्त्रियां स्वार्थे क। तत्रैव।

शाङ्खिक पुंस्त्री० शङ्खस्तद्विकारवलयनिर्माणं शिल्पमस्य ठञ्। जातिभेदे (शाँखारी) अमरः स्त्रियां ङीष्। [रत्नमा०।

शाङ्कुष्ठा स्त्री शङ्कति शो-क शः अङ्कुष्ठ इव यस्याः। गुञ्जायां

शाट पु० शट-घञ्। वस्त्रे अमरः। स्त्रीत्वमपि गौरा० ङीष्।

शाटक पु०न० शट-ण्वुल्। वस्त्रे अमरः स्त्रीत्वमपि टाप्।

शाट्यायन पु० १मुनिभेदे, तेन प्रोक्तम् अण्। २प्रकृतहोमकर्मणि वैगुण्यसमाधानार्थं विहिते होमभेदे श०भ०रत्नः।

शाठ्य न० शठस्य भावः ष्यञ्। शठतायाम्। [चङि न ह्रस्वः।

शाड श्लाघायां भ्वा० आ० सक० सेट्। शाडते अशाडिष्ट ऋदित्

शाण न० शणेन निर्वृत्तम् अण्। शणसूत्रनिर्मिते १वस्त्रादौ शण-दाने(तेजने) घञ्। (कष्टिपाथर) २कषपाषाणे ३अस्त्रादीनां निकषणे तीक्ष्णकरणयन्त्रभेदे मेदि० ४करपत्रे (करात) विश्वः। ५माषचतुष्कमाने भावप्र०।

शाणाजीव पु० शाणमाजीवति आ+जीव-अण्। अस्त्रतीक्ष्णताकारके शिल्पिनि हेमच०।

शाणि पु० शण-इण्। १पट्टवस्त्रे शब्दच०। शणेन निर्वृत्ता इञ् वा ङीप्। २शणनिर्मिते पट्टिकावस्त्रे ३छिद्रवस्त्रे च हेमच० ४कृतकटाक्षादिसूचनायां शब्दर०। ५वस्त्रमयरूपे (ताँबु) मेदि०।

शाणित त्रि० शण-दाने (तेजने) णिच्-क्त। तीक्ष्णीकृते।

शाणीर न० शण-बा० ईरच्। शोणनदमध्यस्थतटे विश्वः।

शाण्डिल्य त्रि० शण्डिलस्यापत्यम् यञ्। गोत्रप्रवर्त्तके भक्तिशास्त्रकारके १मुनिभेदे मेदि०। भक्तिशब्दे तन्मतं दिङ्मात्रं दर्शितम्। तत्प्रियत्वात् २बिल्वे अमरः ३वह्निभेदे च मेदि०।

शात न०शो-क्त। १सुखे २तद्वति त्रि०अमरः। ३क्षिते ४कृशे त्रि० विश्वः। ५दुर्बले ६निशिते च त्रि० मेदि०। ७धुस्तूरे पु०अमरः। [अमरः २धुस्तूरे ३करवीरे च पु० मेदि०।

शातकुम्भ न० शतकुम्भे गिरौ भवः अण्। १हिरण्ये

शातकौम्भ न० शतकुम्भे भवम् अण् द्विपदवृद्धिः। १हिरण्ये २धुस्तूरे च द्विरूपकोषः।

शातन न० शो-णिच्-तुक् च ल्युट्। १तनूकरणे २विनाशने च "वसन्ते सर्वशस्यानां जायते पत्रशातनम्" इति अधिकरणमाला। [चन्द्रप्रकाशे शब्दच०।

शातपत्रक पु० शतपत्त्रमिव कायति कै-क स्वार्थे अण्।

शातभीरु पु० शाता दुर्बलाः पान्था भीरवो यस्याः ५ब०। १मल्लिकाभेदे रत्नमाला। [शि०को०।

शातमान त्रि० शतमानेन क्रीतम् अण्। शतमानेन क्रीते

शातला स्त्री शातं कार्श्यं लाति ला-क। (चामकषा) द्रव्ये भरतः।

शातातप पु० स्मृतिकारके मुनिभेदे। तेन प्रोक्तं छ। शातातपीय तत्प्रोक्ते कर्मविपाकग्रन्थे।

शात्रव पु० शत्रुरेव स्वार्थेऽण्। १रिपौ अमरः। तस्य भावः तेषां संघो वा अण्। २वैरे ३रिपुसमूहे च न०।

शाद पु० शद-घञ्। १कर्दमे २हरिततृणे च अमरः।

शादहरित पु०शादेन हरितस्तद्वर्णयुक्तः। शाद्वले देशे अमरः

शाद्वल पु०शादाः सन्त्यत्र ड्वलच्। बहुलहरिततृणयुक्ते देशे अमरः। [अशीशांसीत् अशीशांसिष्ट।

शान तेजने भ्वा० उभ०सक०सेट् स्वार्थे सन्। शीशांसति ते

शान पु० शान-अच् शो निशाने इत्युक्तेरनित्यः सन्। अस्त्रादीनां तीक्ष्णताकारके यन्त्रभेदे भरतः।

शानी स्त्री शान-इन् ङीप्। इन्द्रवारुण्यां शब्दच०

शान्त त्रि० शम-क्त। १शमयुक्ते २अभियुक्ते च शम-णिच्-क्त त्रि०। ३शान्तिं गमिते त्रि०। ४निर्वेदस्थायिभावके रसभेदे पु० मेदि०। ५लोमपादराजकन्यायाम्, ऋष्यशृङ्गपत्न्यां ६शमीभेदे च स्त्री राजनि०।
शान्तरसनिरूपणं सा०द० ३प० यथा
"शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः। कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः। अनित्यत्वादिनाऽशेषवस्तुनिःसारता तु या। परमात्मस्वरूपं वा तस्यालम्बनमिष्यते। पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः। महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः। रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः। निर्वेदहर्षस्मरणमतिभूतदयादयः। निरहङ्काररूपत्वाद्दयावीरादिरेष नो"। दयावीरादौ हि जीमूतवाहनादौ अन्तरा मलयवत्याद्यनुरागादेरन्ते च विद्याधरचक्रवर्त्तित्वाद्याप्तेर्दर्शनादहङ्कारोपशमो न दृश्यते। शान्तस्तु सर्वप्रकारेणाहङ्कारप्रशमैकरूपत्वान्न तत्रान्तर्भावमर्हति। अतश्च नागानन्दे शान्तरप्रधानत्वमपास्तम्"। ननु "न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा। रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रमाणः" इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षणायां प्रादुर्भावात् तत्र सञ्चार्य्यादीनामभावात् कथं रसत्वमित्युच्यते। "युक्तवियुक्तदशायामवस्थितो यः शमः स एव यतः रसतामेति तदस्मिन् सञ्चार्य्यादेः स्थितिश्च न विरुद्धा"। यश्चास्मिन् सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः। उक्तं हि "यच्च कामसुखं लोके यच्च दिव्यं महासुखम्। तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्। सर्वाकारमहङ्काररहितत्वं व्रजन्ति चेत्। अत्रान्तर्भावमर्हन्ति दयावीरादयस्तदा"। आदिशब्दात् धर्मवीरदानवीरदेवताविषयरतिप्रभृतयः"। [नव" इति तत्पर्यायमन्त्रः।

शान्तनव पु० शान्तनोरपत्यम् अण्। भीष्मे "भीष्मः शान्त-

शान्तनु पु० द्वापरयुगभवे चन्द्रवंश्ये प्रतीपराजपुत्रे नृपभेदे

शान्तम् अव्य० शान्ति+बा० डमु। निवारणे मेदि०।

शान्ति स्त्री शम-क्तिन्। १कामक्रोधादिजये २विषयेभ्यो मनसो निवारणे अमरः। ३उपद्रवनिवारणे ४निवारणे च "यत्किञ्चिद्वस्तु संप्राप्य स्वल्पं वा यदि वा बहु। या तुष्टिर्जायते चित्ते सा शान्तिः कथ्यते बुधैः" पद्मपु० क्रियायो० उक्ते ५सन्तोषभेदे ६दुर्गायाम् "सर्वदा सर्वेशत्वात् शान्तिस्वाच्छान्तिरुच्यते" देवीपु०। ७पूजाहोमजपदानादिद्वारा गोचरविरुद्धादिस्थग्रहदोषस्य दुःस्वप्नादिसूचितैहिकानिष्टहेतुपापनिवृत्तौ च "यथा शस्त्रप्रहाराणां कवचं विनिवारकम्। तथा दैवोपघातानां शान्तिर्भवति वारणम्" मलमासतत्त्ववाक्यम्। सा च मलमासेऽपि कार्य्या नैमित्तिकत्वात् "नैमित्तिकानि काम्यानि निपतन्ति यथा यथा। तथा तथैव कार्य्याणि

"न चास्तु विधीयते" इति म० त० वाक्यात् । अद्भुतादिशान्तिश्च हेमाद्रिशान्तिकाण्डे शान्तिमयूखादौ द्रष्टव्या ।

शान्तिक त्रि० शान्तये हितं ठक् । शान्तिसाधने होमादौ तत्करणशुद्धकालादिकं सु० चि० उक्तं पी० ध० यथा "क्षिप्रध्रुवान्त्यचरमैत्रमघासु शस्तं स्याच्छान्तिकञ्च सह मङ्गलपौष्टिकाभ्याम् । खेऽर्के विधौ सुखगते तनुगे गुरौ, नो मौढ्यादिदुष्टसमये, शुभदं निमित्ते" । "अथ शान्तिकपौष्टिकादिकृत्येषु मुहूर्त्तं वसन्ततिलकेनाह । क्षिप्रेति क्षिप्रादीनि नक्षत्राणि प्रसिद्धानि तेषु पौष्टिकं मङ्गलं विनायकशान्त्यादि शान्तिकं दुष्टफलदमूलनक्षत्राद्युत्पन्नशान्त्यादि एतानि कर्माणि कार्य्याणि उक्तञ्च दीपिकायाम् । "मित्रादित्यमघोत्तराश्रवणभिषक्स्वातीविरञ्च्यच्युतस्थगोधीश्वरपुष्यपौष्णरविषु स्फीते तथारेत्विपि । रिक्तां पर्व विहाय सौम्यदिवसे शस्ते सखां भूबये सर्वैः शान्तिकपौष्टिकं निगदितं गर्गादिभिर्विश्ववात्" अथ लग्नशुद्धिः तत्रार्के सूर्य्ये खे दशमे सति विधौ चन्द्रे सुखगते चतुर्थस्थे गुरौ तनुगे लग्नस्थे सति शान्त्यादिकं कर्म कार्य्यं उक्तञ्च रत्नमालायाम् । "पूर्णे चन्द्रे केन्द्रसंगेऽर्केऽम्बर(१०)स्थे लग्ने जीवे, वाक्पतेर्वासरे च । श्रीमत्यायुष्याणि कार्य्याणि कार्य्याणीति" नोतश्शान्तिकादि मौढ्ये गुरुशुक्रयोरस्तादिके बाल्यवार्द्धके सिंहस्थगुर्वादिरूपे दुष्टसमयेऽपि न शुभदम् । तथा निमित्ते केत्वाद्युत्पातदर्शने सति शुभदं उक्तञ्च दीपिकायाम् । शान्तिकर्माणि कुनीतिरोगे नैमित्तिके तथा । गुरुभार्गवमौढ्येऽपि दोषस्तत्र न विद्यते" । उक्तञ्चैतत् "यतोऽस्तीदं शान्तिकं नैमित्तिकम् "अनिमित्तकृता शान्तिर्निमित्तायोपजायते इति वचनात् । तत्र निमित्ते रोगरूपे केत्वाद्युत्पातान्तरदर्शनरूपे च भवति नैमित्तिकं तत्र बहुदिनव्यापके गुरुशुक्रास्तादिदोषेऽप्यवश्यं विधेयं यतो जन्मान्तरीयदुरदृष्टरूपकमिदं निमित्तमुत्पन्नं तस्य शान्त्या निराशादशुभादृष्टस्यापि निरासः । बहुदिनप्राप्ये निर्दुष्टे काले क्रियमाणं शान्तिकं किञ्चिद्दूरदुष्टनाशकं यद्यपि भवति तथापि तावद्भिर्दिनैर्दुरदृष्टस्य प्राबल्याद् दुःखप्राप्तिः यथाल्पोऽप्यग्निरल्पेनैव जलेन शान्तो भवति तथा बहलनगरदाहको महत्प्रवृद्धैर्बहुभिर्युगपद् गृहीतजलपूर्णघटैरेकदेशनिवारितोऽपि बहलोऽग्निर्न निवार्यते इत्यर्थः सर्वथा मौढ्यादिदोषं विनैव यथा कथञ्चित्कथितप्रकारेण दिनशुद्धिमङ्गीकृत्य शान्तिकाद्यवश्यं विधेयम्" ।

शाप पु० शप—घञ् । (अनिट् भूवादिन्येवम्) १आक्रोशरूपे २शपथे च मेदि० ।

शापास्त्र पु० शाप एवास्त्रं यस्य । मुनौ त्रिका० ।

शाब्दबोध पु० शब्देन निर्वृत्तः अण् कर्म० । अन्वयबोधे शब्दज्ञानजन्ये पदार्थधीरूपव्यापारके ज्ञानभेदे न्यायमतम् । शाब्दत्वं अनुमितित्वव्याप्यं जातिभेदः तद्बोधप्रकारादि भाषा० उक्तं यथा "पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः । शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी । अन्यथा शक्यसम्बन्धतात्पर्य्यानुपपत्तितः । आसत्तियोग्यताकाङ्क्षातात्पर्य्यज्ञानमिष्यते" । भाषा० सि० मु० विवृतमेतत् यथा

"शाब्दबोधप्रकारं दर्शयति । पदज्ञानन्त्विति । न तु ज्ञायमानं पदं करणम् पदाभावेऽपि मौनिश्लोकादौ शाब्दबोधात् । पदार्थधीरिति । पदजन्यपदार्थस्मरणं व्यापारः । अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः । तत्रापि वृत्त्या पदजन्यत्वं बोध्यम् । अन्यथा घटादिपदात् समवायसम्बन्धेन यदाकाशस्मरणं जायते तदाकाशस्यापि शाब्दबोधापत्तेः । वृत्तिः शक्तिलक्षणान्यतरः सम्बन्धः । अतएव शक्तिज्ञानस्योपयोगः । पूर्वं शक्तिग्रहाभावे पदज्ञानेऽपि तत्सम्बन्धेन स्मरणानुपपत्तेः । पदज्ञानस्य सम्बन्धिज्ञानविधयार्थस्मारकत्वम् । शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः । सा चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा । आधुनिके नाम्नि शक्तिरस्त्येव । "एकादशेऽहनि पिता नाम कुर्य्यात्" इतीश्वरेच्छायाः सत्त्वात् । आधुनिके तु सङ्केते न शक्तिरिति सम्प्रदायः । नव्यास्तु ईश्वरेच्छा न शक्तिः किन्त्विच्छैव । तेन आधुनिकसङ्केतेऽपि शक्तिरस्तीति वदन्ति" ।

शाब्दिक पु० शब्दं शब्दसाधुताज्ञापकं शास्त्रं वेत्त्यधीते वा ठक् । व्याकरणशास्त्रभिज्ञे ।

शामित्र न० शम—णिच् इत्र । १पशुबन्धने । शमितुः कर्म—अण् । यज्ञार्थपशुहननकर्तृभावे २तद्धनने च ।

शामीन न० शम—ईनञ् । १भस्मनि २शुचि स्त्री ङीप् सि० कौ०

शाम्बरी स्त्री शम्बरेण निर्वृत्ता अण् ङीप् । मायायाम् इन्द्रजालादौ अमरः । [जटा० ।

शाम्बविक त्रि० शम्बूः पण्यमस्य ठक् । शाङ्खिके (शाँखारी)

शाम्बु(म्बू)क पु० श(म्बु)म्बूक+स्वार्थे अण् । शम्बूके (शामुक) भरतः ।

शाम्भव पु॰ शम्भोरयम् अण्। १गुग्गुलौ २कर्पूरे ३शिवमल्लिकायां राजनि॰। ४विषभेदे शब्दच॰ ५शम्भुपुत्रे पु॰ ६देवदारुणि च न॰ र जनि॰ ७शिवसम्बन्धिनि ८तदुपासके च त्रि॰। ९दुर्गायां स्त्री "शाम्भवी कुपिता नश्येति" तन्त्रम्।

शा(सा)यक पु॰ शो(सो) वा-ण्वुल्। १वाणे खड्गे च जटा॰

शार दौर्बल्ये अद॰ चु॰ उभ॰ सक॰ सेट्। शारयति-ते अशशारत् त।

शार न॰ शार-अच्, शृ-घञ् वा। १कर्बूरवर्णे २तद्वति त्रि॰ अमरः ३वायौ पु॰ अमरः ४द्यूतोपकरणे मेदि॰।

शारङ्ग पुंस्त्री॰ शारं कर्वुरमङ्गं यस्य शक॰। १चातकपक्षिणि २हरिणे ३गजे ४भृङ्गे ५मयूरे च। रायमुकुटः जातित्वात् स्त्रियां ङीष्। ६हिंसे ७वाद्ययन्त्रभेदे स्त्री ङीप् शब्दार्थचि॰।

शारद न॰शरदि भवम्-ऋत्वण्। १श्वेतपद्मे राजनि॰। २काशे ३वकुले ४हरिन्मुद्गे च पु॰ राजनि॰। ५शरत्कालभवे त्रि॰ स्त्रियां ङीप्। शारदं श्वेतपद्ममस्त्यस्याः अच्। ६सरस्वत्यां स्त्री त्रिका॰। ७नूतने ८अप्रतिभे त्रि॰ मेदि॰। ९शालीने त्रि॰ विश्वः। १०दुर्गायां स्त्री टाप् "शरत्काले पुरा यस्मात् नवम्यां बोधिता सुरैः। शारदा सा समाख्याता पीठे लोके च नामतः" ति॰त॰। ११वानरभेदे शब्दर॰। १२तोयपिप्पल्यां १३सप्तच्छदे स्त्री मेदि॰ ङीप् एवं १४कोजागरपूर्णिमायां स्त्री शब्दरत्ना॰ शरत्कालीने पूजादौ त्रि॰स्त्रियां ङीप्। "शारदी चण्डिकापूजा त्रिविधा परिकीर्त्तिता। सात्त्विकी राजसी चैव तामसी चेति तां शृणु" भविष्यपु॰। [भवे १श्राद्धे २रत्कालजे रोगे पु॰

शारदिक न॰ शरदि भवं श्राद्धं रोगो वा ठञ्। शरत्काले

शारदीय त्रि॰ शरदि भवः छण्। १शरत्काले कर्त्तव्ये उत्सवादौ तथाभूतायां दुर्गापूजायां स्त्री "अदूरे जगदम्बायाः शारदीयो महोत्सवः"। "शारदीया महापूजा चतुःकर्ममयी शुभा" ति॰त॰।

शारि(री) स्त्री शृ-इञ् वा ङीप्। १पाशकादिगुटिकायां २द्यूतोपकरणे च मेदि॰। ३पक्षिभेदे च "शारीं चरन्तीं सखि। मारयेति" नैषधम्। ४युद्धार्थगजपर्याणे ५व्यवहारभेदे मेदि॰। ६कपटे धरणिः। स्वार्थे क। पक्षिभेदे शोणाशादने च हेमच॰।

शारिफल पु॰ न॰शारेः फलमिवाधारः। शारिफलके पाशकक्रीडासाधने २द्रव्ये (छक) अमरः स्वार्थे क। तत्रैव।

शारिवा स्त्री शारिरिव वनति वन-ड। श्यामालतायाम् अमरः। "एकं वै शारिवामूलं सर्वव्रणविशोधनम्" वैद्य॰।

शारिशृङ्खला स्त्री शारेः शृङ्खलेव। पाशकभेदे तद्भेदाश्च 'चतुरी तित्तिड़ी द्यूतं पञ्चमी शारिशृङ्खला। नव पीठी चाष्टकाष्ठी नयः स्यात्जयपुत्रकः। एते पाशकभेदाः स्युर्जयकोलाहलोऽपि च" शब्दर॰।

शारीर त्रि॰ शरीरस्येदम् अण्। १देहसम्बन्धे सुखदुःखादौ तत्रोद्भवस्य पुनः अण्। २वृषे पु॰ मेदि॰। शरीरमात्मत्वेनाभिमन्यते अण्। ३जीवे। स्वार्थे क। तत्रार्थे। शारीरं जीवं दुःखं वा अधिकृत्य कृतो ग्रन्थः कन्। व्याख्याते वेदान्तसूत्रे चिकित्साङ्गे सुश्रुतग्रन्थाद्येकदेशे च शारीरञ्च दुःखं रोगादिकं यथोक्तं विष्णुपु॰ ६५अ॰। "आध्यात्मिकोऽपि द्विविधः शारीरो मानसस्तथा। शारीरो बहुभिर्भेदैर्भिद्यते श्रूयताञ्च सः। शिरोरोग प्रतिश्यायज्वरशूलभगन्दरैः। गुल्मार्शःश्वयथुश्वास छर्द्यादिभिरनेकधा। तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः। भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि" सुश्रुतान्तर्गतशारीरकस्थानञ्च तत्र दृश्यम्।

शारीरिक त्रि॰ शरीरे भवः ठक्। देहजाते दुःखादौ।

शारुक त्रि॰ शॄ-उकञ्। हिंसके।

शार्कर त्रि॰ शर्करा अस्त्यस्य अण्। १शर्करायुक्ते देशे शर्कराया विकारः अण्। २फाणिते ३दुग्धफेणे च पु॰ मेदि॰। शर्करीछन्दोऽस्य अण्। शर्करीछन्दोयुक्ते ४मन्त्रादौ।

शार्ङ्ग त्रि॰ शृङ्गस्य विकारः अण्। १शृङ्गजाते पदार्थे। २विष्णुधनुषि ३धनुमात्रे च पु॰ मेदि॰ ४आर्द्रके न॰ राजनि॰। [त्रिकाण्डे त्रि॰।

शार्ङ्गिन् पु॰ शार्ङ्गः अस्त्यस्य इनि। १विष्णौ अमरः। २धनुर्धरे

शार्दूल पुंस्त्री॰ शॄ-ऊलच् दुक् च। १व्याघ्रभेदे अमरः। २पशुभेदे ३शरभे ४राक्षसभेदे च मेदि॰ उत्तरपदस्थः। ५श्रेष्ठार्थे अमरः। ६पक्षिभेदे धरणिः ७चित्रके राजनि॰। स्त्रियां सर्वत्र जातित्वे ङीष्।

शार्दूलललित न॰ अष्टादशाक्षरपादके छन्दोभेदे तल्लक्षणं यथा "सः मो जः सतसा दिनेशऋतुभिः शार्दूलललितम्" छन्दोम॰।

शार्दूलविक्रीड़ित न॰ ऊनविंशत्यक्षरपादके छन्दोभेदे तल्लक्षणं यथा "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीड़ितम्" छन्दोम॰।

शार्वर न॰ शर्वर्या इदं अण्। १गाढान्धकारे

२चातके च त्रि० मेदि०। ३रात्रिसम्बन्धिनि त्रि०। "शार्वरस्य तमसो निषिद्धये" किरा० भवार्थे तु कालाट्ठञ् शार्वरिक इत्येव रात्रिभवे। [शयालिष्ट।

शाल कथने भ्वा०आत्म०सक० सेट् चङि न ह्रस्वः। शालते

शाल पु० शल-घञ्। १मत्स्यभेदे २प्राकारे स्वनामख्याते ३वृक्षभेदे अमरः। ४वृक्षमात्रे राजनि० दन्त्यादिस्तु वृक्षमात्रे "रसालः सालः समदृश्यतासुना" इति नैषधम्। ५नटभेदे शब्दच०। ६शालिवाहननृपे विश्वः।

शालग्राम पु० शालानां वृक्षाणां ग्रामः समूहो यत्र। १पर्वतभेदे तत्र जातः अण्। तत्र जाते २विष्णोर्मूर्त्तिभेदे गण्डकशब्दे २५११ पृ० दर्शिते गण्डक्या एकदेशस्य अभेदजाते ३विष्ण्वादिदेवचक्रयुक्तशिलाभेदे च तदुत्पत्तिर्वर्णभेदेन तन्नामभेदाश्च यथा "कीटयोनिं प्रपद्येथा" इति गण्डक्याः सुरान् प्रतिशापे "तेन कर्मविपाकेन जडा त्वया नदी भवेति" देवानां गण्डकीं प्रति शापे च जाते विष्णुना तत्समाधानायोक्तं यथा

"शृणु ब्रह्मन्! महादेव! शृणु देव! गजानन!। मद्गणौ ब्राह्मणौ ग्राहमातङ्गौ शापतोऽत्र वै। भविष्यतस्तयोर्मोक्षं भविष्यामि कलेवरम्। शीर्णं भविष्यति यदा तच्छ्रोमव्याससंभवाः पाषाणान्तर्गताः कीटा वज्राख्याः प्रभविष्यथ" इति "अद्यैव गण्डकी पुण्या गङ्गातुल्या महानदी। गण्डक्यां गिरिराजस्य दक्षिणे दशयोजनम्। विस्तीर्णं तन्महाक्षेत्रं पुण्यक्षेत्रं महीतले। चक्रतीर्थमिति ख्यातं त्रिषु लोकेषु विश्रुतम्। शालग्रामगता देवा देवो द्वारावतीं गतः। उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः। सर्वदेवप्रीतिकरा भुक्तिमुक्तिप्रदायिनः। भवन्त्वश्मा तु पाषाणास्तेतदन्तर्गता सुराः। प्रार्थितं वः विना सर्वे वज्रकीटा भवन्त्विति। अनेनैव तु गण्डक्याः पुत्रत्वं भवतामपि। भविष्यति तदन्यच्च चिह्नं तद्दैवतोद्भवम्। विज्ञाय येऽर्चयिष्यन्ति प्रीयतां वा च देवता" इति विष्णूक्तौ ब्रह्मणा तद्वचनस्य प्रश्ने विष्णूक्तिर्यथा

"नीलवर्णा शिला पूज्या ब्राह्मणाद्यैः सुखाप्तये। स्निग्धा शिला मन्त्रसिद्धिं कृष्णाऽसिद्धिं करोति च। मेचका कीर्त्तिदः श्वेताप्यादरत् सा यशोऽधरा। पाण्डुरपार्श्वप्रदनैः वक्षिना पापशोकरी। पीता पुत्रफलं दद्याद्रक्तवर्णा सुतान् हरेत्। नीला संदिशते लक्ष्मीं धूम्राभा हरते मतिम्। रोगप्रदा रक्तवर्णा सिन्दूराभा महाकलिम्। दारिद्र्यकारिणी वक्रा समा सर्वार्थसाधिका। स्थूला निहन्ति चैवायुः सूक्ष्मा स्वल्पमतिं हरेत्। पूजाफलं वाञ्छतया निष्फला लाञ्छनं विना। कपिला चित्तवैकल्यं नेत्ररोगश्च कर्बुरा। भग्ना भङ्गकरी श्रेया वङ्कचक्रापमानदा। लक्षणान्तरहीना च दैवचक्रा वियोगदा। बृहन्मुखी कलहिनी बृहच्चक्रा सुतान् हरेत्। संलग्नचक्रा त्वसुखं बद्धचक्रा महागदम्। भग्नचक्रा तु दारिद्र्यं सर्वनाशं त्वधोमुखी। कुठारिकं व्याघ्रमुखी विषमा विविधापदः। चिकतावर्त्तनाभिश्च विकारान् कुरुते बहून्। वंशच्छेदो गृहस्थानां भारधिंद्रा प्रजायते। रेखाक्ता दुःखदात्री च यथा सूक्ष्मा तथा सुखम्। यथा स्निग्धा तथा लक्ष्मीस्तद्विभेदानतः शृणु। लक्ष्मीहरिः१ स विज्ञेयो यत्र पद्मं सचक्रकम्। केवला वनमाला च गृहस्थानामभीष्टदा। वासुदेवः२ स विज्ञेयो यद्द्वारे चक्रयुग्मकम्। निरन्तरं समं चापि स श्वेतः पापनाशनः। सङ्कर्षणः३ स विज्ञेयः प्राक्पश्चाच्चक्रयुग्मकम्। संलग्नपूर्वभागस्थं महारत्नं सुशोभनम्। प्रद्युम्नः४ सूक्ष्मचक्रं स्याच्छिद्रं दीर्घं सुविस्तरम्। सुषिरान्तर्बहिश्छिद्रः पीत पुष्पप्रदायकः। अनिरुद्धस्तु५ नीलाभो वर्तुलश्चातिशोभनः। रेखाद्वयं तु तद्द्वारि पृष्ठं पद्मेन लाञ्छितम्। केशवः६ स तु विज्ञेयस्त्वेकं वा द्वयमेव वा। प्राग्वा पश्चाच्च चक्रं स्यात् चतुष्कोणः स भाग्यकृत्। नारायणः७ श्यामवर्णो नाभौ चक्रं तथोन्नतम्। दीर्घरेखासमायुक्तं दक्षिणे सुषिरं पृथु। हरिरूपाद शिला सा स्यात् यथा ऊर्द्ध्वं सुखं भवेत्। हरिवद्द दृश्यते द्वारं भुक्तिमुक्तिप्रदा तु सा। परमेष्ठी८ स विज्ञेयः पद्मचक्रान्वितस्तु यः। बिल्वाकृतिश्च शुक्राभः पृष्ठे च सुषिरं महत्। विष्णुस्तु१० कृष्णवर्णः स्यात् स्थूलचक्रे सुशोभने। द्वारोपरि तथा रेखा दृश्यते मध्यदेशतः। नारसिंहस्तु११ कपिलः पृथुचक्रो बृहन्मुखः। त्रयो वा पञ्च वा यत्र बिन्दवो गृहिणां न सन्। कपिलनारसिंहस्तु१२ गुडलाक्षानिभो भवेत्। स्थूलचक्रद्वयं मध्ये द्वारे रेखा सुशोभना। महानृसिंहो१३ विज्ञेयः पूर्वोक्तैर्लक्षणैर्युतः। रेखाश्च केशराकारा मुखं दीर्घं भयानकम्। लक्ष्मीनृसिंहो१४ विज्ञेयश्चतुश्चक्रः सबिन्दुकः। पूर्वोक्तलक्षणैर्युक्तो वनमालाविभूषितः। वराहोऽथो१५ शक्तिलिङ्गे चक्रे च विषमे तथा। इन्द्रनीलनिभः स्थूलस्त्रिरेखाला-

ञ्छितो भवेत् । पृथ्वीवराहनाम्नी१६ सा या वराहाकृतिः शिला । आभुग्ना चैव रेखैका गतराज्यप्रदायिका । मत्स्याख्या१७ सा शिला ज्ञेया बिन्दुत्रयविभूषिता । कांस्यद्वारा स्वर्णनिभा दीर्घा सा भुक्तिलक्षिता । कूर्माख्या१८ तु शिला पृष्ठे वर्त्तुला चोन्नता भवेत् । हरितं वर्णमायाता कौस्तुभेन च चिह्निता । शिलाकूर्म१९ स विज्ञेयः कूर्माकारस्तु यो भवेत् । चक्राङ्किता तथा हत्ता पूजिता सा पदप्रदा । हयग्रीवो२० ऽङ्कुशाकारो रेखा चक्रसमीपगा । बहुबिन्दुसमायुक्तं पृष्ठं नीरदनीलभम् । ज्ञेयः सौम्यहयग्रीवो२१ हयग्रीवासमा शिला । दीर्घया लेखया युक्ता रेखा वा तादृशी भवेत् । हयशीर्षः२२ स विज्ञेयो मुखं यस्य हयाकृति । पद्माकृति भवेद्वापि साक्षमालं शिरस्तथा । वैकुण्ठः२३स्तिलवर्णाभश्चक्रमेकं तथा ध्वजम् । द्वारोपरि तथा रेखा पद्माकारा सुशोभना । श्रीधरस्तु२४ तथा देवश्चिह्नितो वनमालया । कदम्बकुसुमाकारो रेखा पञ्चकभूषितः । वामनः२५ स तु विज्ञेयो योऽतिह्रस्वश्च वर्त्तुलः । अतसीकुसुमप्रख्यो बिन्दुनोपरिशोभितः । दधिवामननामा२६ तु आह्वीश्चक्रसंयुतः । महाद्युतिरतिह्रस्वः सुभिक्षक्षेमदायकः । सुदर्शन२७स्तथा देवः श्यामवर्णो महाद्युतिः । वामपार्श्वे तथा चक्रं रेखैकैव तु दक्षिणे । सहस्रार्जुननामा२८ऽसौ नानारेखामयो भवेत् । चक्राकारा यत्नपङ्क्तिः स नष्टद्रव्यदायकः । स्थूलदामोदरो२९ यस्य मध्ये चक्रं प्रतिष्ठितम् । दूर्वाभो द्वारसंकीर्णः पीतरेखो धनप्रद । राधादामोदरो३० ज्ञेय आह्वीश्चक्रद्वयान्वितम् । नातिदीर्घेतुखं मध्ये सम्यग्रेखा स भोगदः । दामोदरः३१ स विज्ञेयो यश्चक्रद्वयवाञ्छितः । स्वच्छं भवेच्छ्रवणं पूजितः सुखदः सदा । अनन्तो३२ बहुवर्णः स्यान्नागभोगेन चिह्नितः । अनेकचक्रसंभिन्नः सर्वकामफलप्रदः । पुरुषोत्तमनामा३३ऽसौ यस्य दिक्षु विदिक्षु च । अङ्गुल्याख्यानि दृश्यन्ते पुरुषार्थफलप्रदः । योगेश्वरः३४ स विज्ञेयो लिङ्गं यस्य शिरोगतम् । ब्रह्महत्यादिपापानां नाशको योगसिद्धिदः । पद्मनाभ३५स्तथा रक्तः पङ्कजच्छत्रसंयुतः । तुलस्या पूजितो नित्यं दरिद्रस्त्वीश्वरो भवेत् । रश्मिजाली हिरण्याक्ष३६श्चन्द्राभः स्फटिकोपमः । अथ वा जायते नानास्वर्णरेखाभिरन्वितः । गरुड़३७ स तु विज्ञेयो मध्ये पञ्चहयान्विते । सदीर्घा दृश्यते रेखा स

सर्पविषनाशकः । जनार्दनः३८ स विज्ञेयः केवलानि स्फुटानि च । यस्योदरे तु चक्राणि चत्वारि पितृतृप्तिदम् । लक्ष्मीनारायणो३९ ज्ञेयो वनमालाङ्कितोदरः । स्वच्छहारश्च चक्रो भुक्तिमुक्तिप्रदायकः । हृषीकेशः४० स विज्ञेयो योऽर्द्धचन्द्राकृतिर्भवेत् । तमभ्यर्च्य लभेत् स्वर्गं विषयांश्च समीहितान् । लक्ष्मीनरहरि४१र्ज्ञेयः कृष्णवर्णः सबिन्दुकः । वामपार्श्वे समे चक्रे गदहस्ताभीष्टदायकः । त्रिविक्रमस्तु४२ विज्ञेयः गम्भीरवर्णो महाद्युतिः । वामपार्श्वे चक्रयुग्मनेवरेखा तु दक्षिणे । कृष्णा४३ ज्ञेया शिला कृष्णा सचक्रा वा पिचण्डिका । प्रदक्षिणावर्त्तकृतवनमालाविभूषिता । चतुर्मुखः४४ स विज्ञेयो द्वे चक्रे मध्यदेशतः । चतस्रः पार्श्वगा रेखा वेदशास्त्रागमप्रदः” सेहतं० । शिवादिशिलाभेदास्तत्रैवोक्ता यथा शिवोक्तिः “शालग्रामा मतास्वरूपाः शृणु तेषान्तु लक्षणम् । यत्सेवनाच्छ्रेयोऽस्मिन् लोके परत्र च । शिवनाभः१ स विज्ञेयः शिलिङ्गाकारतो यतः । स्वयम्भुलिङ्गाकृतिमान् सर्वसिद्धिविधायकः । त्र्यम्बकः२ स तु विज्ञेयो बिन्दुत्रयविभूषितः । शूलाकारा तथा रेखा गतपुत्रप्रदायकः । धूर्जटिः३ स तु विज्ञेयो यत्र रेखा जटासमा । तिस्रो यत्र प्रदृश्यन्ते सोऽर्च्चितो ज्ञानदायकः । शम्भुस्तु४ पाण्डुरो ज्ञेयो बिन्दुः कृष्णस्तु मस्तके । बिल्वपत्रार्पणैरसौ पूजितः शोकशङ्करः । ईश्वरः५ स तु विज्ञेयो रक्ता बिन्दुस्तु मस्तके । एकचक्रो द्विचक्रो वाप्यन्तरेऽपस गोष्पदम् । मृत्युञ्जयः६ स विज्ञेयस्त्वपमृत्युविनाशकः । अधश्चक्रं तदूर्द्ध्वं तु रेखा त्रिशूलवान् । चन्द्रशेखर७नामाऽसावर्द्धचन्द्राकृतिस्तु के । मध्ये चक्रद्वयं यस्य सेवनाद्रोगनाशनम् । रुद्रः८ स एव विज्ञेयः कपिलो मूर्द्धि लक्षितः । चक्रमध्ये भवेद्रेखा सारवेद्युपसन्निभम्” । “शालग्रामानथो वक्ष्ये शक्तिकीटसमुद्भवान् । येषां पूजनतो देवी भवानी सुप्रसीदति । श्रीविद्या१ सा तत्र चक्रमूर्द्धं छत्रं प्रदृश्यते । वाच्ये घण्टाङ्कितो मूर्द्धा स्निग्धा श्यामाभिनेष्टदा । महाकाली२ तु सा ज्ञेया योनिचिह्नसमन्विता । छिद्राढ्या सर्वशिला त्रिकोणेनाङ्किता च या । यदायुधाकृतिश्चोर्द्धं तां देवीं तत्र निर्दिशेत् । देवीशिला सचक्रा या दक्षमार्गेण तां यजेत् । सा चिता वाममार्गेण लोकद्वयसुखावहा । या चक्ररहिता देवीशिलां तां वामतोऽर्चयेत्” ।

“सौरी शिला दुर्लभैव प्रायः कलियुगे पुनः । स्फटिकाभा भवेत् सा तु धर्मं नित्यं विमुञ्चति । गणेशः स तु विज्ञेयः सव्यशुण्डाङ्कितो भवेत् । शुण्डाकारा शिला वापि गजाननसमापि वा । यस्या मध्ये महच्चक्रं सूक्ष्मचक्रस्य यद्भुवि । सा शिला तस्य दिक्पस्य सेव्या वह्निवि राज्यदा । अर्द्धचन्द्राकृतिर्यस्य दृश्यते मण्डलम् । सा तु चन्द्रशिला प्रोक्ता रक्तयुक्ता भौमशिला मता । धात्वाकारेण चिह्नेन ज्ञेया बुधशिला सुराः ।। दीर्घेण चतुरस्रेण युक्ता गुरुशिला मता । पञ्चकोणा तु शुक्रस्य ध्वजाकारा शनेर्मता । सर्पाकारा तु राहोः स्यात् केतोस्तु ध्वजरूपिणी” मेरुतं० ।

तुलसीं प्रति भगवदुक्तिः “अहञ्च शैलरूपी च गण्डकीतीरसन्निधौ । अधिष्ठानं करिष्यामि भारते तव शापतः । वज्रकीटाश्च कृमयो वज्रदंष्ट्राश्च तत्र वै । तच्छिलाकुहरे चक्रं करिष्यन्ति मदीयकम् । एकद्वारे चतुश्चक्रं वनमालाविभूषितम् । नवीननीरदाकारं लक्ष्मीनारायणाभिधम्१ । एकद्वारे चतुश्चक्रं नवीननीरदोपमम् । लक्ष्मीजनार्द्दनं२ ज्ञेयं रहितं वनमालया । द्वारद्वये चतुश्चक्रं गोष्पदेन समन्वितम् । रघुनाथाभिधं३ ज्ञेयं रहितं वनमालया । अतिक्षुद्रं द्विचक्रन्तु नवीननीरदोपमम् । दधिवामनं४ विज्ञेयं गृहिणाञ्च सुखप्रदम् । अतिक्षुद्रं द्विचक्रञ्च वनमालाविभूषितम् । श्रीधरं देवि ! विज्ञेयं श्रीप्रदं गृहिणां सदा । स्थूलञ्च वर्त्तुलाकारं रहितं वनमालया । द्विचक्रं स्फुटमत्यन्तं ज्ञेयं दामोदराभिधम्६ । मध्यमं वर्त्तुलाकारं द्विचक्रं बाणविक्षतम् । रणरामाभिधं८ ज्ञेयं शरतूणसमन्वितम् । सूक्ष्मं चतुर्द्दशचक्रं नवीनजलदप्रभम् । अनन्ताख्यं९ विज्ञेयं चतुर्वर्गफलप्रदम् । मध्यमं सप्तचक्रञ्च छत्रतूणसमन्वितम् । राजराजेश्वरं१० ज्ञेयं राजसम्पत्करं नृणाम् । चक्राकारं द्विचक्रञ्च सश्रीकं जलदप्रभम् । सगोष्पदं मध्यमञ्च विज्ञेयं मधुसूदनम्११ । सुदर्शनं१२ चैकचक्रं गुप्तचक्रं गदाधरम्१३ । द्विचक्रं हयवक्त्राभं हयग्रीवं१४ प्रकीर्त्तितम् । अतीव विस्तृतास्यञ्च द्विचक्रं विकटं सति ! । नरसिंहाभिधं१५ ज्ञेयं सद्यो वैराग्यदं नृणाम् । द्विचक्रं विस्तृतास्यञ्च वनमालासमन्वितम् । लक्ष्मीनृसिंहं१६ विज्ञेयं गृहिणाञ्च सुखप्रदं सदा । द्वारदेशे द्विचक्रञ्च सश्रीकञ्च समं स्फुटम् । वासुदेवं१७ विज्ञेयं सर्वकामफलप्रदम् । प्रद्युम्नं१८ सूक्ष्मचक्रञ्च नवीननीरदप्रभम् । सुषिरे छिद्रबहुलं गृहिणाञ्च सुखप्रदम् । द्वे चक्रे चैकलग्ने तु पृष्ठे यत्र तु पुष्कलम् । सङ्कर्षणन्तु१९ विज्ञेयं सुखदं गृहिणां सदा । अनिरुद्धन्तु२० पीताभं वर्त्तुलमतिशोभनम् । सुखप्रदं गृहस्थानां प्रवदन्ति मनीषिणः” ब्रह्मवै० प्र० १९ अ० ।

“शालग्रामशिलाद्वारगतलग्नद्विचक्रधृक् । शुक्लाभो वासुदेवाख्यः१ सोऽव्यात् यः श्रीगदाधरः । लग्नद्विचक्रो रक्ताभः पूर्व्वभागे तु पुष्कलः । सङ्कर्षणो२ऽथ प्रद्युम्नः३ सूक्ष्मचक्रस्तु पीतकः । सुदीर्घशुषिरश्छिद्रः सोऽनिरुद्धस्तु४ वर्त्तुलः । नीलो द्वारि त्रिरेखश्च अथ नारायणो५ऽसितः । मध्ये गदाकृती रेखा नाभिचक्रमहोन्नतः । पृथुचक्रो नृसिंहो(६)ऽथ कपिलोऽव्यात् त्रिबिन्दुकः । अथ वा पञ्चबिन्दुस्तत्पूजनं ब्रह्मचारिणाम् । वराहः७ शक्तिलिङ्गोऽव्यात् विषमस्थद्विचक्रकः । नीलस्त्रिरेखः स्थूलोऽथ कूर्म्ममूर्त्तिः८ सबिन्दुमान् । कृष्णः स वर्त्तुलावर्त्तः पातु चोन्नतपृष्ठकः । श्रीधरः९ पञ्चरेखोऽव्यात् वनमाली गदान्वितः । वामनो१० वर्त्तुलो ह्रस्वः वामचक्रः सुरेश्वरः । नानावर्णोऽनेकमूर्त्तिर्नागभोगी त्वनन्तकः११ । स्थूलो दामोदरो१२ नीलो मध्ये चक्रः स नीलकः । संकीर्णद्वारकः सोऽव्यादथ ब्रह्मा१३ सुलोहितः । सुदीर्घरेखाशुषिर एकचक्राम्बुजः पृथुः । पृथुच्छिद्रः स्थूलचक्रः कृष्णो विष्णुस्तु१४ बिन्दुमान् । हयग्रीवो१५ऽङ्कुशाकारः पञ्चरेखः सकौस्तुभः । वैकुण्ठो१६ मणिरत्नाभः एकचक्राम्बुजोऽसितः । मत्स्यो१७ दीर्घाम्बुजाकारो द्वाररेखश्च पातु वः । वामचक्रो द्वाररेखः श्यामो योऽव्यात् त्रिविक्रमः१८ । एकेन लक्षितो योऽव्यात् गदाधरो सुदर्शनः१९ । एकद्वारे चतुश्चक्रं वनमालाविभूषितम् । स्वर्णरेखासमायुक्तं गोष्पदेन विराजितम् । कदम्बकुसुमाकारं लक्ष्मीनारायणं विदुः” गरुड़ पु० ४५ अ० । पुराणान्तरेष्वपि लक्षणान्तराणि उक्तानि द्रष्टव्यानि । तत्र लक्षणभेदस्तु विकल्पार्थः । वैराहपु० भूमिं प्रति वराहोक्तिः “गृहे लिङ्गद्वयं नार्च्यं शालग्रामद्वयं तथा । द्वे चक्रे द्वारकायास्तु नार्च्यं सूर्य्यद्वयं तथा । शालग्रामशिला भग्ना पूजनीया सचक्रिका । खण्डिता स्फुटिता वाऽपि शालग्रामशिला शुभा । शालग्रामो न स्प्रष्टव्यो हीनवर्णैर्वसुन्धरे ! । स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मतः । मोहात् यः

संस्पृशेत् शूद्रो योषिद्वापि कदाचन । स पतेन्नरके घोरे यावदाहूतसंप्लवम् । यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुन्धरे ! । दूरादेवास्पृशन् पूजां कारयेत् सुसमाहितः" । तत्पूजने तत्स्पर्शे च स्त्रीणां नाधिकार "न जातुचित् स्त्रियाः कार्यं शालग्रामस्य पूजनम् । भर्तृहीनाऽथ सुभगा स्वर्लोकाकाङ्क्षितैषया । मोहात् स्पृशेत्तु महिला जन्मशीतगुणान्विता । हित्वा पुण्यसमूहं तु सत्वरं नरकं व्रजेत्" ब्रह्मवै॰ पा॰ २०अ॰ ।

"अभक्ष्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम् । शालग्रामशिलास्पर्शात् पावनं तत् भवेत् सदा" ।

"दद्यात् भक्ताय यो देवि ! शालग्रामशिलां नरः । सुवर्णसहितां, पृथ्वी सपर्वतवनान्विता । सप्तद्वीपा भवेद्दत्ता सत्पात्रे च वसुन्धरे ! । शालग्रामशिलायास्तु मूल्यमुद्घाटयेत् क्वचित् । विक्रेता क्रयकर्त्ता वा नरके वै पतेत् ध्रुवम्" वराहपु॰ ।

तस्याकारादिभेदे फलभेदो यथा

"छत्राकारे भवेद्राज्यं वर्त्तुले च लभेत् श्रियम् । दुःखञ्च शकटाकारे शूलाभे मरणं भवेत् । विकृतास्ये च दारिद्र्यं पिङ्गले हानिरेव च । भग्नचक्रे भवेद्व्याधिर्विदीर्णे मरणं ध्रुवम्" । तत्स्पर्शेन मिथ्यादिव्यादिकरणादौ दोषो यथा "शालग्रामशिलां धृत्वा मिथ्यावाक्यं वदेत्तु च । स याति कूर्मदंष्ट्रञ्च यावद्वै ब्रह्मणो वयः । शालग्रामशिलां धृत्वा स्वीकारं यो न पालयेत् । स प्रयात्यसिपत्रञ्च लक्षमन्वन्तरावधि । तुलसीपत्रविच्छेदं शालग्रामे करोति यः । तस्य जन्मान्तरे कान्ते ! स्त्रीविच्छेदो भविष्यति । शालग्रामञ्च तुलसीं शङ्खञ्चैकत्र एव च । यो रक्षति स च ज्ञानी स भवेत् श्रीहरिप्रियः" ब्रह्मवै॰प्र॰ १८॰अ॰ । "शालग्रामो हरेर्मूर्त्तिर्जगत्त्राणञ्च भारतम् । कल्पैर्दशसहस्रान्ते याति त्यक्त्वा हरेः पदम्" ब्रह्मवै॰प्र॰ ६अ॰ । "शालग्रामाः समाः पूज्याः समेषु द्वितयं न हि । विषमा नैव पूज्याः स्युरेकैव विषमेष्वपि" पद्मपु॰पा॰२०अ॰ । "शालग्रामशिलारूपी यत्र तिष्ठति केशवः । तत्र देवाऽसुरा यक्षा भुवनानि चतुर्दश" पद्मपु॰ । "अत्र सर्वेषामविच्छिन्नादत्र तेषां पूजा प्रतीयते तत्रावाहनविसर्जने न स्तः "शालग्रामे स्थावरे वा नावाहनविसर्जने" इति राघवभट्टधृतवाक्यात्" दीक्षा॰ रघु॰ ।

४क्षेत्रभेदे न॰ तन्नामकारणं वराहपु॰ उक्तं यथा

"अथ दीर्घेण कालेन स(शालङ्कायनः)ऋषिः संशितव्रतः । तप्यमानो यथान्यायं पश्यते शालमुत्तमम् । विश्राम कुरुते तत्र द्रष्टुकामोऽथ मां (हरिम्) मुनिः । मायया मम मूढात्मा यत्नो द्रष्टुं न सोऽभवत् । ततः पूर्वेण पार्श्वेन तस्य शालस्य सुन्दरि ! । वैशाखमासद्वादश्यां मद्दर्शनमुपागतः । दृष्ट्वा मां तत्र स मुनिस्तपस्वी संशितव्रतः । तुष्टाव वैदिकैः सूक्तैः प्रणम्य च पुनःपुनः । ततोऽहं स्तूयमानो वै ऋषिमुख्येन सुन्दरि ! । प्राप्तोऽस्मि परमां प्रीतिं तमवोचं ततो मुनिम् । अस्मात्क्षेत्रे महाभाग ! स्थित्वा त्वं तपसां निधे ! । पुत्रेण परमप्रीतो मत्क्षेत्रे मत्समो भव । अन्यच्च गुह्यं वक्ष्यामि शालङ्कायन ! तच्छृणु । तव प्रीत्या प्रवक्ष्यामि येनैतत् क्षेत्रमुत्तमम् । शालग्राममिति ख्यातं तन्निबोध मुने ! शुभम् । योऽयं वृक्षस्त्वया दृष्टः सोऽहमेव न संशयः" वराहपु॰ ।

शालग्रामगिरि पु॰ पर्वतभेदे वराहपु॰ "कथयिष्यामि ते गुह्यं शालग्राममिति श्रुतम् । तस्मिन् क्षेत्रे हरो देवो मत्स्वरूपेण संयुतः । शालग्रामे गिरौ तस्मिन् शिलारूपेण तिष्ठति । अहं तत्रैव तिष्ठामि शिलारूपेण नित्यदा । तस्मिन् शिलाः समस्तास्तु मत्स्वरूपा न संशयः । पूजनीयाः प्रयत्नेन किं पुनश्चक्रलाञ्छिताः । लिङ्गरूपेण तु हरस्तत्र देवालये गिरौ । शिवनाभाः शिलास्तत्र चक्रनाभास्तथा शिलाः । सोमेश्वराधिष्ठितस्तु शिवरूपो गिरिः स्मृतः । शालग्रामगिरिर्विष्णुरहं सोमेश्वराभिधः" वराहपु॰ ।

शालङ्कायन पु॰ ऋषिभेदे शालग्रामशब्दे दृश्यम् ।

शा(सा)लज पु॰ शा(सा)लात् जायते जन-ड । सर्जरसे (धुना) शब्दर॰ ।

शालनिर्य्यास पु॰ ६त॰ । सर्जरसे (धुना) रत्नमा॰ ।

शालपर्णी स्त्री शालस्येव पर्णान्यस्याः ङीप् । (शालपानी) वृक्षभेदे राजनि॰ । "शालपर्णी गरच्छर्दिज्वरश्वासातिसारजित् । शोषदोषत्रयहरी बृंहण्युक्ता रसायनी । तिक्ता विषहरी स्वादुः क्षतकासकृमिप्रणुत्" भावप्र॰ ।

शालभञ्जिका स्त्री शालेन भज्यते निर्मीयते भन्ज-ण्वुल् । १काष्ठनिर्मितपुत्तलिकायां, २वेश्यायाञ्च जटा॰ ।

शालव पु॰शालः तत्रिधौ इव वर्त्तते बहिर्गच्छति वल-ट । लोध्रे शब्दर॰ ।

शालवेष्ट पु॰ शालस्य वेष्ट इव । सर्जरसे (धुना) त्रिका॰ ।

शालसार पु॰ शालस्य सारः । १हिङ्गुनि शालेषु सारः । वृक्षश्रेष्ठे त्रिका॰ ।

शाला स्त्री शाल–अच् । १गृहे अमरः । इयस्य २स्कन्ध-शाखायाञ्च । ३गृहैकदेशे (चाल) मेदि० ।

शालाङ्क पु० पाणिनौ मुनौ जटा० । [यशासे हेमच० ।

शालाजिर पु० न० शालायामाजिरमिवाकारोऽस्यस्य अच् ।

शालाञ्चि पु० शाल इवाञ्चति अञ्च–इन् । शाकभेदे (शाञ्चि) शब्दच० ।

शालातुरीय पु० शालातुरे भवः । तद्ग्रामवासिनि पाणिनि-मुनौ जटा० शालोत्तरीय इति पाठान्तरम् ।

शालानी स्त्री शालमानयति आ+नी–ड गौरा० ङीष् । विदार्य्याम् शब्दच० । [स्त्रियां ङीप् ।

शालामृग पुंस्त्री० शालायां गृहे मृग इव । शृगाले हारा० ।

शालावृक पुंस्त्री० शालायां गृहे, शाखायां वा वृक इव वा । १कुक्कुरे २शृगाले अमरः । ३विडाले ४मृगे राजनि० ५वानरे च शब्दच० सर्वत्र स्त्रियां ङीष् ।

शालि पु० शल+इञ् । कलमादिधान्ये, २षष्टिकादिधान्ये, अमरः । ३गन्धमार्ज्जारे च मेदि० । शालिभेदादिकं "कण्डनेन विना शुक्लाः हैमन्ताः शालयः स्मृताः" इत्यादि भावप्र० उक्तम् । धान्यशब्दे दृश्यम् ।

शालिका स्त्री शालिरिव कायति कै–क । विदार्य्याम् ।

शालिञ्च पु० शालिं चलति चल–ड पृषो०त्वम् । शाकभेदे शब्दर०

शालिनीकरणम् अशालीनः शालीनः लज्जितः क्रियते-ऽनेन श लीन+च्वि–कृ–करणे ल्युट् । तिरस्कारे त्रिका० ।

शालिपर्णी स्त्री शालेरिव पर्णान्यस्याः ङीप् । माषपर्ण्याम् राजनि० ।

शालिपिष्ट न० शालेः पिष्टमिव शुभ्रत्वात् । स्फटिके त्रिका०

शालिवाहन पु० विक्रमादित्यं हत्वा शकाब्दप्रवर्त्तके नृप-भेदे शककर्तृशब्दे दृश्यम् ।

शालिहोत्र पुंस्त्री० शालयो हूयन्तेऽत्र हु–त्रन् । १घोटके त्रिका० स्त्रियां ङीष् । २अश्वशास्त्रप्रवर्त्तके नृपभेदे पु० राजनि० ।

शाली स्त्री शाल–अच् गौरा० ङीष् । कृष्णजीरके राजनि०

शालीन त्रि० शालाप्रवेशमर्हति ख । १धृष्टे अधृष्टे, अमरः । २मिश्रेयायां स्त्री राजनि० ।

शालु न० शाल–उण् । १शालूके शब्दर० । २कषायद्रव्ये, ३चोरनामगन्धद्रव्ये च मेदि० । ४भेके पु० ५गृहे हेमच० । [तदर्थे अमरः । २जातीफले राजनि० ।

शालु(लू)क न० शाल–ऊकञ् । कुमुदादिमूले शब्दर० ऊकञ् ।

शालूर पुंस्त्री शाल–ऊरच् । १भेके अमरः स्त्रियां ङीष् ।

शालेय पु० शालायां भवः ढक् । १मधुरिकायाम् अमरः । २मिश्रेयायां स्त्री राजनि० टाप् ।

शालोत्तर पु० ग्रामभेदे । [जटा० ।

शालोत्तरीय पु० शालोत्तरे ग्रामे भवः छ । पाणिनिमुनौ

शाल्मल पु० शाल–मलच् । (शिमुल) १वृक्षे शब्दर० २तद्वि-ह्नितद्वीपभेदे च विष्णु पु०

"शाल्मल्यस्याधीशो वपुष्मांस्तत्सुतान् शृणु । तेषान्तु नामसंज्ञानि सप्त वर्षाणि तानि वै । श्वेतोऽथ हरित-श्चैव जीमूतो लोहितस्तथा । वैद्युतो मानसश्चैव सुप्र-भश्च महामुने ! । शाल्मलेन समुद्रोऽसौ द्वीपे-नेक्षुरसोदकः । विस्तरो द्विगुणेनायं सर्वतः संवृतः स्थितः । तत्रापि पर्वताः सप्त विज्ञेया रत्नयोनयः । वर्षाभिव्यञ्ज-कास्ते तु तथा सप्तैव निम्नगाः । कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः । द्रोणो यत्र महौषध्यः स चतुर्थो महीधरः । कङ्कस्तु पञ्चमः षष्ठो महिषः सप्तमस्तथा । कुकुद्मान् पर्वतवरः सरिन्नामानि मे शृणु । योनितो या वितृष्णा च चन्द्रा शुक्ला विमोचनी । निवृत्तिः सप्त-मी तासां स्मृतास्ताः पापशान्तिदाः । श्वेतञ्च लोहित-ञ्चैव जीमूतं हरितं तथा । वैद्युतं मानसञ्चैव सु-प्रभं नाम सप्तमम् । सप्तैतानि तु वर्षाणि चातुर्वर्ण्ययु-तानि वै । शाल्मलेऽपि च ये वर्णा वसन्त्येते महामुने ! । कपिलाश्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक् । ब्रा-ह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव यजन्ति तम् । भगवन्तं समस्तस्य विष्णुमात्मानमव्ययम् । वायुभूतं मखश्रेष्ठै-र्यज्विनो यज्ञसंस्थितम् । देवानामत्र सान्निध्यमतीव सुमनोरमे । शाल्मलश्च महावृक्षो नाम निर्वृतिका-रकः । एष द्वीपः समुद्रेण सुरोदेन समावृतः" ।

शाल्मलि(ली) पुंस्त्री० शाल–मलिच् वा स्त्रीत्वे वा ङीप् । (शिमुल) १वृक्षे २मोचरसे हेमच० । शाल्मलिगुणादिकं भावप्र० उक्तं यथा "शाल्मली शीतला स्वाद्वी रसे पाके रसायनी । श्ले-ष्मला स्निग्धबीजा च वृष्या रक्तपित्तजित् । शाल्मली-पुष्पशाकन्तु घृतसैन्धवसाधितम् । प्रदरं नाशयत्येव दुःसाध्यञ्च न संशयः । रसे पाके च मधुरं कषायं शीतलं गुरु । कफपित्तास्रजित् ग्राहि वातलं च प्रकी-र्त्तितम् । ३नरकभेदे यत्र शाल्मलीकण्टकैर्नारकिणः पीड्यन्ते नरकशब्दे दृश्यम् । [राजनि० ।

शाल्मलिक पु० शाल्मलिरिव कायति कै–क । रोहितद्रुमे

शाल्मलीकन्द पु० ६त०। तद्वृक्षमूले राजनि०। [राजनि०।
शाल्मलीफल पु० शाल्मल्या इव फलमस्य। तेजःफलवृक्षे
शाल्मलीवेष्ट पु० शाल्मलीं वेष्टयति वेष्ट–अण्। शाल्मली-निर्यासे मोचरसे रत्नमा०। ण्वुल्। तत्रैव। [इत्यन्यम्।
शाल्व पु० शाल–व। १देशभेदे हेमच०। तस्य २नृपे च भारते
शाल्वण पु० "काकोल्यादिः स वातघ्नः सर्वाम्लद्रव्यसंयुतः। सानूपोदकमांसस्तु सर्वस्नेहैः समन्वितः। स चोष्णः स्वल्पलवणः शाल्वणः परिकीर्त्तितः" सुश्रुतोक्ते औषधभेदे।
शाव पु० शव–घञ्। १शिशौ शब्दर०। स्वार्थे क। तत्रैव शवस्येदम् अण्। २शवसम्बन्धे त्रि० "त्रिरात्रं शावमाशौचम्" इति स्मृतिः।
शावर पु० शावयति विकारयति शव–णिच् अरन्। १पापे २अपराधे ३लोध्रद्रुमे च मेदि०। शबरेण प्रोक्तमण्। ४शबरस्वामिकृते मीमांसाभाष्ये। शबरस्येदम् अण्। ५शबरसम्बन्धिनि त्रि०।
शावरभेदाख्य न० शावरभेदस्याख्येव आख्यास्य। स्वार्थे अण्। ताम्रे हेमच०। तस्य तत्स्पर्शात्वर्णत्वात्तथात्वम्।
शावरी स्त्री शबरस्य प्रिया अण् ङीप्। १शूकशिम्ब्यां मेदि०। २विद्याभेदे तन्त्रसा०। [ङीप्।
शाश्वत त्रि० शश्वद् भवः अण्। सतते नित्ये अमरः स्त्रियां
शाष्कुल त्रि० शष्कुलमिव मांसं भक्ष्यमस्य अण्। मांसाशिनि हेमच०। [अमरः।
शाष्कुलिक न० शष्कुलीनां समूहः ठञ्। शष्कुलीसमूहे
शास आशीर्वादे अदा० आत्म० सक० सेट् क्त्वा वेट्। प्रायेणाङ्पूर्वः। आशास्ते आशासिष्ट "इद कविभ्यः पूर्वेभ्योनमोवाकं प्रशास्महे" उत्तरचरितोक्तेरन्यपूर्वोऽपि।
शास शासने अदा० पर० द्विक० सेट् क्त्वा वेट्। शास्ति अशासत्
शासन न० शास–ल्युट्। निकृष्टस्य हितसाधनादौ १प्रवर्त्तने २राजदत्तभूमौ ३राजलेख्यभेदे ४शास्त्रौ च मेदि०।
शासनहर पु० शासनं हरति हृ–अच्। आज्ञाकारके दूते।
शासितृ त्रि० शास–तृच् इट्। शासनकर्त्तरि।
शास्तृ त्रि० शास–तृच् इडभावः। १शासनकर्त्तरि त्रिका०। २बुद्धे अमरः ३उपाध्याये ४नृपे ५पितरि शब्दरत्ना०।
शास्त्र न० शिष्यतेऽनेन शास–ष्ट्रन्। १हितानुशासने ग्रन्थे शास्त्रं च वेदमूलकं सद्भिरादरणीयं नान्यत् यथोक्तं "अतो वेदविरुद्धार्थशास्त्रोक्तं कर्म संत्यजेत्। स्वबुद्धिरचितैः शास्त्रैः प्रतार्य्येह च प्राकृतान्। निन्दन्ति ये यशो मार्गं बोधनाशाय केवलम्। निन्दन्ति देवतावेदांस्तपो निन्दन्ति सद्द्विजान्। तेन ते निरयं यान्ति शुभशास्त्रनिषेवणात्। श्रुतिस्मृतिसदाचारविहितं कर्म शाश्वतम्। स्वं स्वं धर्मं प्रयत्नेन श्रेयोऽर्थीह समाचरेत्। स्वबुद्धिरचितैः शास्त्रैर्मोहयित्वा जनं नराः। तेन ते निरयं यान्ति युगानां सप्तविंशतिम्" पद्मपु० १७ अ०। "पुराणं भारतं वेदधर्मशास्त्राणि यानि च। आयुषः क्षपणायैव धर्मतश्चैव आचरेत्। पुत्रदारादिसंसारः पुंसां संमूढचेतसाम्। विदुषां शास्त्रसंसारः सद्योगाभ्यासविघ्नकृत्। इदं ज्ञेयमिदं ज्ञेयं यः सर्वं ज्ञातुमिच्छति। अपि वर्षशतेनापि शास्त्रान्तं नाधिगच्छति। विज्ञायाक्षरतन्मात्रं जीवितञ्चापि चञ्चलम्। विहाय शास्त्रजालानि पारलौकिकमाचरेत्। पण्डितोऽपि हि मूर्खोऽसौ शक्तियुक्तोऽप्यशक्तिकः। यः संसाराच्च आत्मानं समुत्तारयितुं क्षमाः" वह्निपु०। तामसग्रन्थे २२७१ पृ० दृश्यम्।
"बहुशास्त्रालोकनेऽपि सारादानं षट्पदवत्" सांख्यप०सू०
शास्त्रकृत् पु० शास्त्रं करोति कृ–क्विप्। मन्वादिषु ऋषिषु त्रिका०।
शास्त्रगत पु० शास्त्रे गत इव। प्रघटाविदि त्रि०।
शास्त्रचारण पु० शास्त्रं चारयति प्रचारयति चर–णिच्–ल्यु। शास्त्रोक्ताचरणप्रचारकर्त्तरि शब्दर०।
शास्त्रतत्त्वज्ञ त्रि० शास्त्रतत्त्वं जानाति ज्ञा–क। १शास्त्रतात्पर्य्यवेत्तरि २ज्योतिषज्ञे शब्दर०।
शास्त्रदर्शिन् त्रि० दृश–णिनि ६त०। शास्त्रज्ञे शब्दर०। शास्त्रविदादयोऽप्यत्र।
शास्त्रशिल्पिन् त्रि० शास्त्रं तज्ज्ञानं शिल्पमिवाऽस्यास्य इनि। १शास्त्रज्ञानोपजीविनि २काश्मीरदेशे पु० त्रिका०।
शास्त्रिन् त्रि० शास्त्रं वेत्त्यधीते वा इनि। शास्त्रज्ञे।
शास्त्रीय त्रि० शास्त्रेण विहितः छ। शास्त्रोक्ते धर्मादौ।
शास्य त्रि० शास–ण्यत्। अनुशासनीये शिष्यादौ।
शि तेजने स्वा० उभ० सक० अनिट्। शिनोति शिनुते अशैषीत् अशेष्ट।
शिंशपा स्त्री शिवं पाति पा–क पृषो०। (शिशु) वृक्षे अमरः "शिंशपा कटुका तिक्ता कषाया शोफकारिणी। उष्णवीर्या हरेन्मेदःकुष्ठश्वित्रवमिक्रमीन्। वस्तिरुग्व्रणदाहास्रबलासगर्भपातिनी" भावप्र०।
शिक्रु त्रि० शिच्–क्रु कस्य नेत्त्वम्। आलस्यशायिनि त्रिका०।

शि(सि)क्थ न० शिच–थक् कुक् च पृषो० सस्य शो वा । (मोम) मधूच्छिष्टे अमरः । स्वार्थे क । तत्रैव ।

शिक्य न० शि–यत् कुक् च । (सिका) रज्जुकृते पदार्थे शब्दर० ।

शिक्यित त्रि० शिक्यं शिक्यस्थं करोति शिक्य+णिच्–कर्मणि क्त । शिक्याधारे स्थापिते पदार्थे ।

शिक्ष अभ्यासे भ्वा० आ० सक० सेट् । शिक्षते अशिशिक्षिष्ट ।

शिक्षा स्त्री शिक्ष–भावे अ । १अभ्यासे २वर्णानामुच्चारणप्रदर्शके वेदाङ्गे ३ग्रन्थभेदे अमरः । ४विद्योपादाने शब्दच० । "वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा तथा च तैत्तिरीया उपनिषदारम्भे समामनन्ति । शिक्षां व्याख्यास्यामः । वर्णः स्वरः मात्रा बलं साम सन्तान इत्युक्तः शीक्षाध्याय इति" उ०भा० । "अथ शिक्षां प्रवक्ष्यामि पाणिनीयमतं यथा । शास्त्रानुपूर्वं तद्विद्याद् यथोक्तं लोकवेदयोः । प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः । पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् । त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः । प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा । स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः । यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः । अनुस्वारो विसर्गश्च+क+पौ चापि पराश्रितौ । दुःस्पृष्टश्चेति विज्ञेय ऌकारः प्लुत एव च । आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् । प्रातःसवनयोगन्तं छन्दोगायत्रमाश्रितम् । कण्ठे माध्यन्दिनयुतं मध्यमं त्रैष्टुभानुगम् । तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् । सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः । स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः । इति वर्णविदः प्राहुर्निपुणं तन्निबोधत । उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः । ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि । उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ । स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः । अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च । ओभावश्च विवृत्तिश्च श–ष–सा रेफ एव च । जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः । यद्योभावप्रसन्धानमुकारादि परं पदम् । स्वरान्तं तादृशं विद्याद् यदन्यद्व्यक्तमूष्मणः । हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम् । औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् । कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू । स्युर्मूर्धन्या ऋटुरषा–दन्त्या ऌ–तु–ल–साः स्मृताः । जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः । एऐ तु कण्ठतालव्यावोऔ कण्ठोष्ठजौ स्मृतौ । अर्द्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत् । ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् । संवृतं मात्रिकं ज्ञेयं विवृतन्तु द्विमात्रिकम् । घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः । स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम् । तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च । अनुस्वारयमानाञ्च नासिका स्थानमुच्यते । अयोगवाहा विज्ञेया आश्रयस्थानभागिनः । अलाबुवीणानिर्घोषो दन्त्यमूलस्वराननु । अनुस्वारस्तु कर्त्तव्यो नित्यं ह्रोः शषसेषु च । अनुस्वारो विवृत्यस्तु विरामे चाक्षरद्वये । द्विरोष्ठ्यौ तु विगृह्णीयाद् यत्रौकारवकारयोः । व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् । भीतापतनभेदाभ्यां तद्वत् वर्णान् प्रयोजयेत्" । "अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलस्तथा । शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः । यमोऽनुनासिका न ह्रौ नादिनो हझषः स्मृताः" । "ईषन्नादा यणो जश्च श्वासिनश्च खफादयः । ईषच्छ्वासांश्चरो विद्यात् गोर्धामैतत् प्रचक्षते । दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि । छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते । शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते" । "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् । "अनक्षरं हतायुष्यं विस्वरं व्याधिपीडितम् । अक्षता शस्त्ररूपेण वज्रं पतति मस्तके । हस्तहीनन्तु योऽधीते स्वरवर्णविवर्जितम् । ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति" पाणिनिशिक्षा । नारदशिक्षाव्यासशिक्षादयो ग्रन्थाः सन्ति विस्तरभयान्नोक्ताः ।

शिक्षाकर पुं० शिक्षां करोति कृ–अच् । १व्यासे शब्दमा० २शिक्षकशिक्षाकर्त्तरि ।

शिक्षागुरु पुं० विद्यादातरि ।

शिक्षित त्रि० शिक्षा जाताऽस्य तार० इतच् शिक्ष–क्त वा । १कृताभ्यासे २निपुणे ३विज्ञे च अमरः ।

शिखिताघस पु० शिखितान्यघराणि येन । १छागे २शिखादातरि पुरौ च त्रिका० ।

शिख गतौ भ्वा०पर०सक०सेट् इदित् । शिङ्खति अशिङ्खीत् ।

शिखण्ड पु० शिखामण्डति अम–ड तस्य नेत्त्वम्, वृत० । शक० वा । १मयूरपिच्छे अमरः । २चूड़ायाञ्च मेदि० ।

शिखण्डक पु० शिखण्ड इव कन् । १काकपक्षे अमरः । (काकजुल्फी) स्त्रीत्वमपि तत्र । सा च २चूड़ायाञ्च हेमच० । [स्त्रियां ङीप् ।

शिखण्डिक पुंस्त्री० शिखण्डोऽस्त्यस्य ठन् । कुक्कुटे हेमच०

शिखण्डिन् पु० शिखण्डोऽस्त्यस्य इनि । १मयूरे २द्रुपद-राजस्य पुत्रभेदे मेदि० । ३मयूरपुच्छे ४कुक्कुटे ५वाणे च हेमच० । ६गुञ्जायां ७स्वर्णयूथिकायां राजनि० । ८विष्णौ विष्णु स० ९यूथिकायां स्त्री ङीप् मेदि० ।

शिखर न० शिखा अस्त्यस्य अरच् अालोपः । १पर्वताग्रे २अग्रमात्रे च । ३वृक्षाग्रे पुंन० अमरः । ४पुलके ५कु-न्दाद्यादौ पक्वदाडिमबीजाभे ६रत्नभेदे ७अग्रभागे मेदि० । ८कोटौ त्रिका० । ९मूर्वायां स्त्री शब्दच० ।

शिखरवासिन् त्रि०शिखरे वसति वस–णिनि ७त० । पर्वता-ग्रवासिनि स्त्रियां ङीप् । “देवी शिखरवासिनी” चण्डी० सा च हिमाचलवासिन्यां २दुर्गायां त्रिका० ।

शिखरिन् पु० शिखाऽस्त्यस्य इनि । १पर्वते २वृक्षे ३अपा-मार्गे मेदि० ४कोट्टे ५कोयष्टौ हेमच० । ६वन्दाके ७कु-न्दुरुके ८बालबाले ९वर्वटीलतायां राजनि० । १०रसा-लायां मार्जभेदे स्त्री । ११सप्तदशाक्षरपादके छन्दोभेदे स्त्री “रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी” वृ०र० १२मल्लिकायां १३रोमावल्यां १४नारीरत्ने च स्त्री मेदि० सर्वत्र ङीप् । [(कुकुरचूड़ा) क्षुपभेदे रत्नमा० ।

शिखलोहित पु०शिखाऽस्त्यस्य अच् तथाभूतः सन् लोहितः ।

शिखा स्त्री शी–खक् तस्य नेत्त्वम् उणा० । १अग्निज्वालायां २मस्तकमध्यकेशपुञ्जे च अमरः । “मुण्डयेत् सर्वं नामानि कर्णोपस्थशिखां बहिः” प्रा०त० । ३शाखायां ४बर्हिचूड़ायां ५लाङ्गलिक्याम् ६अग्रमात्रे ७चूड़ा-मात्रे ८प्रपदे च मेदि० । ९प्रधाने शिफायां १०ज्वाले हेमच० । ११कामज्वरे शब्दच० ।

“शिखी शिखी कर्म कुर्वीत् मत्वा शिखावत एव कर्म-ण्यधिकारः तथापि बद्धशिखस्य कर्मण्यधिकारः न मुक्त-शिखस्य यथोक्तं गायत्र्या तु शिखां बद्ध्वा नैरृत्यां लक्ष्मरक्षतः । त्रुटिकात् ततो धृत्वा ततः कर्म समा-रभेत्” । “निबद्धशिख आसीनो द्विज आचमनं चरेत् । कृत्वोपवीतं सव्येऽंसे वाङ्मनःकायसंयतः” । मुक्तशि-खस्याचमने दोषो यथा “शिरः प्रावृत्य कण्ठं वा मुक्त-कच्छशिखोऽपि वा । अकृत्वा पादयोः शौचमाचान्तो-ऽप्यशुचिर्भवेत्” आ०त० ।

शिखाकन्द न० शिखेव कन्दोऽस्य । गृञ्जने राजनि० ।

शिखातरु पु० शिखाया दीपशिखायास्तरुरिव । दीपवृक्षे (देलको) त्रिका० ।

शिखाधर पुंस्त्री० शिखां चूड़ां धरति धृ–अच् । १मयूरे रत्नमा० स्त्रियां ङीष् । २शिखाधारके त्रि० स्त्रियां टाप् । ३मञ्जुघोषे पु० त्रिका० ।

शिखामूल न०शिखेव मूलमस्य । गृञ्जने (गाजर) राजनि०

शिखालु पु०शिखाऽस्त्यस्य आलुच् । मयूरशिखावृक्षे राजनि०

शिखावत् पु० शिखा ज्वालाऽस्त्यस्य मतुप् मस्य वः । १वह्नौ २चित्रकवृक्षे च अमरः । ३केतुग्रहे शब्दच० । ४शिखायुते त्रि०स्त्रियां ङीप् । सा च ५मूर्वायां शब्दच०

शिखावर पु० शिखां वृणोति वृ–अच् । पनसवृक्षे शब्दच०

शिखावल पुंस्त्री० शिखाऽस्त्यस्य वलच् । १मयूरे अमरः । स्त्रियां ङीष् । २मयूरशिखावृक्षे स्त्री राजनि० टाप् ।

शिखावृद्धि स्त्री प्रतिदिनघाटकवृद्धौ हविमन्दे दृश्यम् ।

शिखिकण्ठ न० शिखिनो मयूरस्य कण्ठस्तद्वर्णोऽस्त्यस्य अर्श आद्यच् । तुत्थे (तुँते) रत्नमा० ।

शिखिग्रीव पु शिखिनो मयूरस्य ग्रीवा तद्वर्णोऽस्त्यस्य अच् । तुत्थे (तुँते) अमरः ।

शिखिध्वज शिखिनो वह्नेर्ध्वज इव । १धूमे त्रिका० । शिखी मयूरो ध्वजो यस्य । २कार्त्तिकेये शब्दच० ।

शिखिन् पु०शिखा अस्त्यस्य इनि । १मयूरे २वह्नौ ३चित्र-कवृक्षे अमरः । ४केतुग्रहे ५कुक्कुटे ६वृक्षे ७वृषे ८शरे च मेदि० । ९अश्वे हेमच० १०अजमोदायां रत्नमा० ११पर्वते १२ब्राह्मणे १३शितावरे १४मेथिकायां राजनि० १५शि-खायुक्ते त्रि० १६मयूरशिखावृक्षे राजनि०स्त्री ङीप् ।

शिखिप्रिय पु०शिखिनं प्रीणयति प्री–क । क्षुद्रबदरे राजनि० ।

शिखिमण्डल पु० शिखिनां मण्डलमिव यत्र । वरणवृक्षे शब्दर० । [अजमोदायां राजनि० ।

शिखिमोदा स्त्री शिखिनः अजमोदा इव मोदो यस्याः ।

शिखियूप पु०शिखी शिखावान् यूप इव । कोकारिषि मृगे राजनि० । [कुष्माण्डे शब्दर०

शिखिवर्द्धक पु० शिखिनं वर्द्धयति वृध–णिच्–ण्वुल् ।

शिखिवाहन पु॰ शिखी मयूरो वाहनं यस्य । कार्त्तिकेये अमरः ।

शिखिव्रत न॰ "प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रदः । वैश्वानरपदं याति शिखिव्रतमिदं स्मृतम्" मत्स्यपु॰ १२८ अ॰ उक्ते वह्निपददायके व्रतभेदे ।

शिग्रु पु॰ शि-रक् गुक् च । (सजिना) १वृक्षे २शाकमात्रे च अमरः । "शोभाञ्जनो नीलशिग्रुस्तीक्ष्णगन्धो जनप्रियः । सुखमोदः कृष्णशिग्रुर्बहुल्यो हरिताञ्जनः । शोभाञ्जनस्तीक्ष्णकटुः स्वादूष्णः पिच्छिलस्तथा । जन्तुवातार्त्तिशूलघ्नश्चक्षुष्यो रोचनः परः । श्वेतशिग्रुः सतीक्ष्णः स्वाद्युग्रमङ्कुः सिताङ्कुरः । मधुकः श्वेतमरिचो रोचनो मधुशिग्रुकः । श्वेतशिग्रुः कटुस्तीक्ष्णः शोफानिलनिबर्हणः । मुखव्याधिहरो रुच्यो दीपनो मुखजाड्यनुत् । रक्तको रक्तशिग्रुः स्यान्मधुरो बहुलच्छदः । [illegible] वैशरी सिंहो मनारिच प्रकीर्त्तितः । रक्तशिग्रुर्महावीर्यो मधुरश्च रसायनः । शोफाध्मानसमीरार्त्तिपित्तश्लेष्मापहारकः" राजनि॰ ।

शिग्रुज न॰ शिग्रुतो जायते जन-ड । श्वेतमरिचे शोभाञ्जनबीजे अमरः कृत॰ । शिग्रुबीजमप्यत्र शब्दच॰ ।

शिघ आघ्राणे भ्वा॰ पर॰ सक॰ सेट् इदित् । शिङ्घति अशिङ्घीत् ।

शिङ्घाण न॰ शिघि-आनच् पृषो॰ णत्वम् । १काचपात्रे २लौहमले ३नासिकामले श्लेष्मणि च मेदि॰ । स्वार्थे क । नासिकामले न॰ ।

शिज अस्फुटध्वनौ इदित् वा चु॰ उभ॰ पक्षे अदा॰ आत्म॰ अक॰ सेट् । शिञ्जयति ते शिङ्क्ते अशिशिञ्जत् त अशिञ्जिष्ट । भ्वादिरयं पर॰ इत्येके तेन शिञ्जति अशिञ्जीत्

शिञ्जा स्त्री शिजि-भावे अ । १भूषणशब्दे शब्दर॰ । शिजि-अच् । २धनुर्गुणे हेमच॰ ।

शिञ्जित न॰ शिजि-भावे क्त । भूषणध्वनौ अमरः ।

शिञ्जिनी स्त्री शिञ्जति शिजि-णिनि । धनुर्गुणे अमरः । २नूपुरे हेमच॰ ।

शिट अनादरे भ्वा॰पर॰सक॰ सेट् । शेटति अशेटीत् ।

शिण्डाकी स्त्री खाद्यद्रव्यभेदे यथा "शिण्डाकी राजिकायुक्तैः स्यान्मूलकदलद्रवैः । सर्षपस्य दलैर्वापि शालिपिष्टकसंयुतैः । शिण्डाकी रोचनी गुर्वी पित्तश्लेष्मकरी स्मृता" राजनि॰ ।

शित त्रि॰ शो-क्त । १दुर्बले २शाणिते च मेदि॰ ३क्षये त्रिका॰; [४गोधूमे त्रिका॰ ।

शितद्रु पु॰ शतं द्रवति द्रु-कु-नि॰ । (सतलज) नदीभेदे अमरः ।

शितशूक पु॰ शितस्तीक्ष्णः शूकोऽस्य यस्य । १यवे अमरः ।

शिति पु॰ शि-क्तिच् । १भूर्जपत्रवृक्षे २शुक्लवर्णे ३कृष्णवर्णे च मेदि॰ ४तद्वर्णवति त्रि॰ । ५सारे पु स्त्री॰ शब्दर॰ ।

शितिकण्ठ पु॰ शितिः नीलः कण्ठो यस्य । १शिवे अमरः २दात्यूहविहगे पुंस्त्री॰ त्रिका॰ स्त्रियां ङीष् ।

शितिचार पु॰ शितिः सन् चरति चर-संज्ञायां कर्त्तरि ट वा । (सुषनि) शाकभेदे जटा॰ ।

शितिच्छद पु॰ शितिः शुभ्रः छदो यस्य । हंसे शब्दर॰ ।

शितिसारक पु॰ शितिः शुभ्रः सारो यस्य कप् । तिन्दुकवृक्षे राजनि॰ ।

शिथिल त्रि॰ श्लथ-किलच् पृषो॰ । १श्लथे २अदृढे संयोगभेदे ३मन्दे च । शिथिलसंयोगश्च प्रश्रयः । "प्रश्रयः शिथिलाख्यो यः संयोगस्तेन कथ्यते" भाषा॰ "प्रश्रयोऽवयवावच्छेदेनावयवान्तरसंयोगित्वाद्यविवर्त्तमानः संयोगः प्रचयः" इति दीनकरी यथा तूलकादौ ।

शिनि पु॰ शि-निक् । यदुवंश्ये क्षत्रियभेदे यस्य सात्यकिर्नप्ता

शिपि पु॰ शी-क्विप् तां पाति पा-कि पृषो॰ ह्रस्वः । १रश्मौ २जले न॰ "शैत्यात् पवनयोगाच्च शिपि वारि प्रचक्षते । तत्पानाद्रश्मयश्चैव शिपयो रश्मयो मताः । तेषु प्रवेशात् विश्वेशः शिपिविष्ट इहोच्यते" व्यासः ।

शिपिविष्ट पु॰ ७त॰ । १खलतौ २दुश्चर्मणि च ३महेश्वरे अमरः । ४विष्णौ शिपिशब्दे दृश्यम् । "नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः" विष्णुस॰ । पृषो॰ शिपिविष्ट तत्रार्थे रमानाथः ।

शिप्र पु॰ शि-रक् पुक् च । १सरोवरभेदे २नदीभेदे स्त्री । "एवं विवाह्य विधिवत् गौर्वर्णा मानसाचले । अवस्थतो गिरिशस्तु मोदमाप तथा च ह । तत्र यत् पतितं तोयं मानसाचलकन्दरे विवाहावभृतार्थं च माल्यवद्वसुभातले । ब्रह्मविष्णुमहादेवपार्ष्णिभिः समुदीरितम् । तत्तोयं सप्तधा भूत्वा पतितं मानसाचलात् । हिमाद्रेः कन्दरे शाखा सरस्याश्च पृथक् पृथक् । तत्तोयं पतितं शिप्रे देवभोग्ये सरोवरे । तेन शिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम्" कालिका॰ २२अ॰ ।

"ततो हिमवतः प्रस्थे प्रतीच्यां तत्पुरस्य च । शिप्रं नाम सरः पूर्वं ददृशुर्हिमवादयः । तद्दृष्ट्वा स्नानपानाद्य सुखयन्नादय सराः । उपविष्टाः यथान्यायं

हरस्याथ चक्रेश्वरम्। तं शिप्रसंज्ञकासारं मनोज्ञं सर्वदेहिनाम्। शीतामलजलं सर्वैर्गुणैर्मानससम्मितम्। दृष्टा क्षणं हरस्तस्मिन् सौत्सुक्योऽभूद्वेक्षणे, शिप्रां नाम नदीं तस्माद्विःसृतां दक्षिणोदधिम्। गच्छन्तीं दृष्टवांस्तो पावयन्तीं जगज्जनान्। तत्रैव १८ अ०।

शिफा स्त्री शि-फक्। वृक्षाणां १जटाकारे मूले। (शिकड़) अमरः। २नद्यां ३मांसिकायां ४मातरि मेदि०। ५शतपुष्पायां ६हरिद्रायां राजनि०। ७पद्मकन्दे मुकुटः। जटाकारे मूले पु० विद्याविनोदः।

शिफाक पु० शिफेव इवार्थे कन्। पद्ममूले शब्दच०।

शिफाकन्द पु० शिफेव कन्दः। पद्ममूले अमरः।

शिफाधर पु० शिफा अधरा यस्मात्। शाखायां शब्दच०।

शिफारुह पु० शिफायां रोहति रुह-क। वटवृक्षे राजनि०

शिमुड़ी स्त्री (चकोनि) ख्याते क्षुपभेदे राजनि०।

शि(सि)म्बा स्त्री शाम्यति शमति वा शम-षम-वा बा० उम्बच् पृषो०। (छिमी) ख्याते १पदार्थे शब्दच०। २चक्रमर्दे पु० शब्दच०।

शि(म्बि)म्बी स्त्री शम-बि नि० वा ङीप्। १शिम्बायां (शिम) लतायां हेमच० "महापापकरी शिम्बी" ति०त०। २एरकायाञ्च भावप्र०। स्वार्थे क। तत्रैव।

शिम्बीधान्य न० शिम्बीजातं धान्यं शा०त०। मुद्गादौ धान्यभेदे भावप्र०। [शब्दर० कप् तत्रैव।

शिम्बीपर्णी स्त्री शिम्बीव पर्णमस्याः ङीप्। मुद्गपर्ण्यां

शिर न०शॄ-क। १मस्तके जटा० "पिण्डं दद्यात् गयाशिरे" वायुपु०। २पिप्पलीमूले मेदि०। ३शय्यायाम् ४अजगरे च संक्षिप्तसा०।

शिरःफल पु०शिर इव फलमस्य। नारिकेले त्रिका०। [शब्दच०

शिरःशूल न० शिरसः शूलमिव तापकत्वात्। शूलरोगभेदे

शिरज पु० शिरे जायते जन-ड। केशे शब्दच०।

शिरस् न० शॄ-असुन् नि०। १मस्तके २शिखरे अमरः। ३प्रधाने ४सेनाग्रे मेदि०।

शिरसिज पु० शिरसि जायते जन ड वा अलुक् समासः। केशे जटाध० लुकि शिरोजोऽप्यत्र। [केशे शब्दच०।

शिरसिरुह पु० शिरसि रोहति रुह-क वा अलुक् समा०।

शिरस्क न०शिरसि कायति प्रकाशते कै-क। शिरस्त्राणे हेमच०

शिरस्त्र न० शिरस्त्रायते त्रै-क। शिरोरक्षके उष्णीषे अमरः

शिरस्त्राण न० शिरस्त्रायते अनेन त्रै-करणे ल्युट्। शिरोरक्षके उष्णीषे हेमच०।

शिरस्य पु०शिरसि भवः यत्। १निर्मलकेशे अमरः २शिरोभवमात्रे त्रि०। [अस्य दन्त्यादित्वमपीत्यन्ये।

शिरा स्त्री शॄ-क। नाड्यां (शिर) मेदि०। शॄ-किरच् सिरा।

शिरापत्र पु०शिरेव पत्रं यस्य। हिन्तालवृक्षे राजनि०।

शिराल न० शिरोऽस्त्यस्य लच्। १कर्मरङ्गे शब्दच०। तत् फलस्य शिरायुक्तत्वात्तथात्वम्। २शिरायुक्ते त्रि०।

शिरालक पु० शिरामलति पर्याप्नोति अल-ण्वुल्। (छाड़योड़ा) वृक्षभेदे शब्दच०।

शिरावृत्त न० शिरेव वर्त्तते वृत-क्त। सीसके राजनि०।

शिरि पु० शॄ-कि। १खड्गे २शरे ३हिंस्रे त्रि० उणादि०। ४शलभे सि०कौ०।

शिरीष पु० शॄ-ईषन् किच्च। ख्याते वृक्षे अमरः। "शिरीषो मधुरोऽनुष्णस्तिक्तश्च तुवरो लघुः। दोषशोथविसर्पघ्नः कासव्रणविषापहः" भावप्र०।

शिरीषपत्रिका स्त्री शिरीषस्येव पत्रमस्याः कप् कापि अत इत्वम्। श्वेतकिणीवृक्षे राजनि०।

शिरोगृह न० शिरःस्थगृहपरिसरं गृहम्। (चिलेघर) चन्द्रशालायां हेमच०।

शिरोग्रह पु०"रक्तमाश्रित्य पवनः कुर्यात् मूर्द्धधराः शिराः। रूक्षाः सवेदनाः कृष्णाः सोऽसाध्यः स्याच्छिरोग्रहः" भावप्र० उक्ते वातरोगभेदे "स्कन्धरा ग्रीवागताः स पवनः शिरोग्रहः स्यादित्यन्वयः" भावप्र०। [हेमच०।

शिरोधरा स्त्री शिरो मस्तकं धरति धृ-अच्। ग्रीवायां

शिरोधि स्त्री शिरो धीयतेऽत्र धा-कि। ग्रीवायाम् अमरः

शिरोमणि पुंस्त्री० शिरसि धार्य्यो मणिः शा०त०। शिरोधार्य्ये रत्ने चूड़ामणौ शब्दच०। स्त्रीपक्षे वा ङीप्। शिरोरत्नादयोऽप्यत्र न०।

शिरोमर्म्मन् पु० शिरसि मर्म यस्य। शूकरे हेमच०।

शिरोरुजा स्त्री शिरो रुजति व्यथयति रुज-क। १सप्तच्छदवृक्षे त्रिका०। ६त०। २मस्तकरोगे च।

शिरोरुह पु० शिरसि रोहति रुह-क। केशे अमरः।

शिरोरोग पु० ६त० सुश्रुतोक्ते मस्तकरोगभेदे तल्लक्षणं यथा "अथातः शिरोरोगविज्ञानीयमध्यायं व्याख्यास्यामः। शिरो रुजति मर्त्यानां वातपित्तकफैस्त्रिभिः३। सन्निपातेन४ रक्तेन५ क्षयेण६ क्रिमिभि७स्तथा। सूर्य्यावर्त्ताद८नन्तवाता९र्द्धावभेदक१०-शङ्खकैः११। एकादशप्रकारस्य लक्षणं सम्प्रवक्ष्यते। यस्यानिमित्तं शिरसो रुजश्च भवन्ति तीव्रा निशि चातिमात्रम्। बन्धोपतापैश्च भवेद्विशेषः शिरो-

ऽभितापः स समीरणेन१। यस्योष्णमङ्गारचितं यथैव भवेच्छिरो धूप्यति चाक्षिनासम्। शीतेन रात्रौ च भवेच्छमश्च शिरोऽभितापः स तु पित्तकोपात्२। शिरोगलं यस्य कफोपदिग्धं गुरु प्रतिष्टब्धमथो हिमञ्च। शूनाक्षिकूटं वदनं च यस्य शिरोऽभितापः स कफप्रकोपात्३। शिरोऽभितापे त्रितयप्रवृत्ते४ सर्वाणि लिङ्गानि समुद्भवन्ति। रक्तात्मकः५ पित्तसमानलिङ्गः स्पर्शासहत्वं शिरसो भवेच्च। वसाबलासक्षतसम्भवानां शिरोगतानामिह संक्षयेण। क्षयप्रवृत्तः६ शिरसोऽभितापः कष्टो भवेदुग्ररुजोऽतिमात्रम्। संस्वेदनच्छर्दनधूमनस्यैरसृग्विमोक्षैश्च विवृद्धिमेति। निस्तुद्यते यस्य शिरोऽतिमात्रं सम्भक्ष्यमाणं स्फुरतीव चान्तः। घ्राणाच्च गच्छेत् सलिलं सरक्तं शिरोऽभितापः कृमिभिः७ स घोरः। सूर्योदयं या प्रति मन्दमन्दमक्षिभ्रुवं रुक् समुपैति गाढम्। विवर्द्धते चांशुमता सहैव सूर्यापवृत्तौ विनिवर्त्तते च। शीतेन शान्तिं लभते कदाचिदुष्णेन जन्तुः सुखमाप्नुयाच्च। तं भास्करावर्त्तमुदाहरन्ति सर्वात्मकं कष्टतमं विकारम्। दोषास्तु दुष्टास्त्रय एव मन्यां संपीड्य घाटां च रुजां सुतीव्राम्। कुर्वन्ति साक्षिभ्रुवशङ्खदेशे स्थितिं करोत्याशु विशेषतस्तु। गण्डस्य पार्श्वे तु करोति कम्पं हनुग्रहं लोचनजांश्च रोगान्। अनन्तवातं८ तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारम्। यस्योत्तमाङ्गार्द्धमतीव जन्तोः सम्भेदतोदभ्रमशूलजुष्टम्। पक्षाद्दशाहादथवाप्यकस्मात्तस्यार्द्धभेदं१० त्रितयाद्व्यवस्येत्। शङ्खाश्रितो वायुरुदीर्णवेगः कृतानुयात्रः कफपित्तरक्तैः। रुजः सुतीव्राः प्रतनोति मूर्ध्नि विशेषतश्चापि हि शङ्खयोस्तु। सुकष्टमेनं खलु शङ्खकाख्यं११ महर्षयो वेदविदः पुराणाः। व्याधिं वदन्त्युद्गतमृत्युकल्पं भिषक्सहस्रैरपि दुर्निवारम्"।

शिरोवल्ली स्त्री शिरसा वल्लीव। मयूरचूडायां शब्दच०।

शिरोवृत्त न० शिर इव वृत्तं वर्त्तुलम्। मरिचे राजनि०।

शिरोवृत्तफल पु० शिरोवृत्तं मरिचमिव फलमस्याः। रक्तापामार्गे भावप्र०। [त्रिका० स्नुह्। तत्रैव न०।

शिरोवेष्ट पु० वेष्ट-घञ् शिरसो वेष्टः। (पागड़ी) उष्णीषे

शिल उञ्छे कणश आदाने तुदा० पर० सक० सेट्। शिलति अशेलीत्।

शिल न० शिल-क। छेदीतशस्यात् क्षेत्रात् कणशोमञ्जर्यादानरूपायां १वृत्तौ उञ्छशब्दे १०७० पृ० दृश्यम्।

२पाषाणे ३द्वाराधःस्थितकाष्ठखण्डे च (गोबराट) स्त्री अमरः। ४स्तम्भशीर्षे ५मनःशिलायां स्त्री मेदि० ६कर्पूरे राजनि०। [पाषाणभेदकवृक्षे स्त्री राजनि०।

शिलागर्भज: पु० शिलाया गर्भे जायते संज्ञायां कः।

शिलाकर्णी स्त्री शिलेव कर्णमस्य ङीप्। शल्लकीवृक्षे शब्दच०

शिलाकुट्टक पु० शिलां कुट्टयति कुट्ट-ण्वुल्। १पाषाणभेदके अस्त्रभेदे शब्दच०। शिलया कुट्टति विदलीकरोति। २अश्मकुट्टके वानप्रस्थभेदे।

शिलाज न० शिलातो जायते जन-ड। १शैलेये गन्धद्रव्ये शब्दच०। २लौहे राजनि०।

शिलाजतु न० शिलाजातं जतु। १पर्वतजाते उपधातुभेदे अमरः। तदुत्पत्त्यादिकं भावप्र० उक्तं यथा

"निदाघे घर्मसन्तप्ता धातुसारं धराधराः। निर्यासवत् प्रमुञ्चन्ति तच्छिलाजतु कीर्त्तितम्। सौवर्णं राजतं ताम्रमायसं तच्चतुर्विधम्। शिलाजत्वद्रिजतु च शैलनिर्यास इत्यपि। गैरेयमश्मजञ्चापि गिरिजं शैलधातुजम्। शिलाजं कटु तिक्तोष्णं कटुपाकं रसायनम्। छेदि योगवहं हन्ति कफमेदोऽश्मशर्कराः। मूत्रकृच्छ्रं क्षयं श्वासं वातार्शांसि च पाण्डुताम्। अपस्मारं तथोन्मादं शोथकुष्ठोदरकृमीन्। सौवर्णन्तु जवापुष्पवर्णं भवति तद्रसात्। मधुरं कटुतिक्तञ्च शीतलं कटुपाकि च। राजतं पाण्डुरं शीतं कटुकं स्वादुपाकि च। ताम्रं मयूरकण्ठाभं तीक्ष्णमुष्णञ्च जायते। लौहं जटायुपक्षाभं तत्तिक्तं लवणं भवेत्। विपाके कटुकं शीतं सर्वश्रेष्ठमुदाहृतम्"। [ङीप्। कालाञ्जनीवृक्षे राजनि०।

शिलाञ्जनी स्त्री शिला अज्यतेऽनया अन्ज-करणे-ल्युट्

शिलाटक पु० शिलेव अटति शिलामटति वा अट-ण्वुल्। १अट्टे २बिले च मेदि०।

शिलात्मज न० शिलाया आत्मज इव। लौहे राजनि०।

शिलात्मिका स्त्री शिलेव आत्मा यस्य कप्। (मूचि) मूषायां शब्दच०।

शिलाददु्र पु० शिलाया दद्रुरिव। शैलेये गन्धद्रव्ये राजनि०

शिलाधातु पु० शिलाया धातुरिव धातुरिव शुक्लत्वात्। १श्वेतोपले (खड़ी) त्रिका०। २पीतवर्णे गैरिकभेदे च राजनि०। [प्रस्तरखण्डभेदे शब्दच०।

शिलापुत्र पु० शिलायाः पुत्र इव। (नोड़ा) पेषणसाधने

शिलापुष्प न० शिलायाः पुष्पमिव। शैलेये गन्धद्रव्ये राजनि०।

शिलाभव न० शिलायां भवति भू-अच् ७त०। शैलेये गन्धद्र

शिलाभेद पु० शिलामपि भिनत्ति भिद–अण्। १पाषाण-भेदिद्रव्ये रत्नमा० २पाषाणभेदकास्त्रे च।

शिलारम्भा स्त्री शिलेव रम्भा। काष्ठकदल्यां राजनि०।

शिलावल्का स्त्री शिलेव कठिनः वल्को यस्याः। (शिलावाक) इति प्रसिद्धे वृक्षभेदे शिलावल्कगणयन राजनि०। [लिका०।

शिलाव्याधि पु० शिलाया व्याधिरिव। शैलेये गन्धद्रव्ये

शिलासन न० शिला आसनं यस्य। शैलेये गन्धद्रव्ये शब्दर० २शिलानिर्मिते आसने च।

शिलासार न० शिलायाः सार इव। लौहे हेमच०।

शिलि पु० शिल-कि। १भूर्जपत्रवृक्षे शब्दमा०। द्वाराधःस्थे २काष्ठे (गोबराट) स्त्री शब्दर०। ३भेक्यां ४कलाक-पुष्पे ५शम्यगीर्षे च मेदि० स्त्री ङीप्।

शिलिन्द पुंस्त्री० शिलिं ददाति दा–क पृषो०। स्वनामख्याते मत्स्यविशेषे "शिलिन्दः श्लेष्मलो बल्यो विपाके मधुरो गुरुः। व्यामवातकरो हृद्यो वातपित्तहरो मतः" राजवल्लभः। स्त्रियां ङीष्।

शिलीन्ध्र न० शिलीं धरति धृ–क पृषो० मुम्। १कदली-पुष्पे २कवके च मेदि० ३शिलाटायां विश्वः। [द्वारा०।

शिलीन्ध्रक न० शिलीन्ध्र इव स्वार्थे–कन्। गोमयच्छत्राके

शिलीपद पु० शिली द्वाराधःस्थकाष्ठमिव पदमस्मात्। रोग-भेदे (गोद) शब्दर० पृषो०। श्लीपदमप्यत्र न० भावप्र०। तन्निदानादि भावप्र० उक्तं यथा
"पुराणोदकभूयिष्ठाः सर्वर्तुषु च शीतलाः। ये देशा-स्तेषु जायन्ते श्लीपदानि विशेषतः"। विशेषत इति वचनेनान्यत्रापि श्लीपदं भवतीति बोध्यते। अथ श्ली-पदस्य सामान्यलक्षणमाह "यः सज्वरोवङ्क्षणजो भृशार्त्तिः शोथो नृणां पादगतः क्रमेण। तत् श्लीपदं स्यात्करकर्णनेत्रशिश्नोष्ठनासास्वपि केचिदाहुः"। तत्त्रि-विधम् वातिकं पैत्तिकं श्लैष्मिकञ्चेति। तत्र तेषां क्रमेण लक्षणान्याह "वातजं कृष्णरूक्षं हि स्फुटितं तीव्र-वेदनम्। अनिमित्तरुजश्चास्य बहुशो ज्वर एव च। पित्तजं पीतसङ्काशं दाहज्वरयुतं भृशम्। श्लैष्मिकन्तु भवेत् स्निग्धं तथा पाण्डु रसं स्थिरम्। त्रीण्यप्येतानि जानीयात् श्लीपदानि कफात् पुनः। गुरुत्वञ्च मह-त्त्वञ्च यस्मान्नास्ति विना कफात्"। अथासाध्यमाह "यन्मीकमिव सञ्जातं कण्टकैरुपचीयते। अब्दात्मकमा-हतन्तु वर्जनीयं विशेषतः। यत् श्लैष्मिकाहारविहार-जातं शीतं तथाभरिकफस्य हेतुः। शास्त्रमग्राह्यमत्रं

विद्ध्यं अब्दमुत्कृष्टमपि विवर्जनीयम्" अचिकित्स्यत्वादिति शेषः। [२युक्ते ४जडीभूते च शब्दर०।

शिलीमुख पु० शिलीव मुखमस्य। १भ्रमरे २वाणे अमरः।

शिलोच्चय पु० शिलानामुच्चयो यत्र। पर्वते अमरः।

शिलोञ्छ पु० शिलेनोञ्छः उञ्छ–घञ्। धान्यक्षयस्थानात् कणशः शेषात्तचयने।

शिलोत्थ न० शिलाया उत्तिष्ठति उद्–स्था–क। शैलेये गन्धद्रव्ये राजनि०। शिलोद्भवादयोऽप्यत्र।

शिल्प न० शिल–पक्। चित्रकलादिकर्मसु अमरः। २स्रुचि मेदि०। तदारम्भमुहूर्तः मु०चि० उक्तो यथा
"मृदुध्रुवक्षिप्रचरे ज्ञे गुरौ वा स्वा०लग्नगे। विधौ सुजीववर्गस्थे शिल्पारम्भः प्रशस्यते"।

शिल्पकारिन् त्रि० शिल्पं चित्रादिकलां करोति कृ–णिनि। चित्रादिकर्त्तरि।

शिल्पका स्त्री शिल्पमिव कायति कै–क। तृणभेदे राजनि०

शिल्पशाला स्त्री ६त०। चित्रकरादीनां चित्रकरणगृहे अमरः

शिल्पशास्त्र न० शिल्पज्ञापनं शास्त्रम्। वास्तुविद्यादिज्ञा-पके शास्त्रे।

शिल्पिन् त्रि० शिल्पं वेत्त्यधीते वा इनि। १चित्रादिकर्म-करे अमरः। २कोवदलौषधौ स्त्री मेदि० ङीप्।

शिव न० शी–वन् पृषो०। १मङ्गले अमरः। २सुखे ३जले उणादि०। ४सैन्धवे सामुद्रे च ५लवणे ६श्वेतटङ्कणे च राजनि०। ७मङ्गलवति त्रि० ८महादेवे पु० अमरः। एवं ९मोक्षे १०कीलपदे ११वालुके १२गुग्गुलौ १३वेदे १४पुण्डरीकद्रुमे १५कृष्णधुस्तूरे १६पारदे राजनि०। १७देवे शब्दर० १८लिङ्गे उणादि० १९विष्कुम्भादिषु मध्ये विंशतितमे योगे च पु० ज्यो०त०। "शिवमद्वैतं तुरीयं मन्यन्ते" श्रुत्युक्ते २०अद्वैतब्रह्मणि न०।

शिवक पु० शिव–इव इवार्थे कन्। १कीलके अमरः गवां गात्रकण्डूयनार्थे गोष्ठे निखाते २काष्ठे च भरतः।

शिवकाञ्ची स्त्री ६त०। पुरीभेदे।

शिवघर्म्मज शिवघर्म्माज्जायते जन–ड। मङ्गलग्रहे
"पुरा दक्षविनाशाय कुपितस्य त्रिशूलिनः। अपतत् भीमवक्त्रस्य स्वेदबिन्दुर्ललाटजः" इत्यादिना वीरभद्रोत्-पत्तिमुक्त्वा तस्यैव मङ्गलग्रहरूपतामाह "शान्तिप्रदानात् सर्वेषां ग्रहाणां प्रथमो भव। ये त्वाम्यन्ते जनाः पूजां करिष्यन्ति मतं मम। अङ्गारक इति ख्यातिं गमिष्यति धरात्मज!" मत्स्यपु० ९४अ०।

शिवज्ञान न॰ मत्सनेदे . तच्चभेदेन माहेन्द्रादियोगज्ञापके शास्त्रभेदे "माहेन्द्रे विजयो नित्यमस्ते कार्य्ययोग- नम् । वक्रे कार्य्यविलम्बः स्यात् शून्ये च मरणं भवेत् । शैवाखादिन्वावधानमेकभावेन संवदेत् । बहूतादि दिवा- रात्रौ चतुर्मासं यथाक्रमम् । यामनामं दिवामाने ज्ञेयं सर्वत्र साधके । तत्प्रमाणेन ज्ञातव्यं दण्डमान विचक्षणैः । रात्रिमानप्रमाणेन ज्ञेयं दण्डप्रमाणकम् । न वारतिथिनक्षत्रं न योगः करणं तथा । शिवज्ञानं समासाद्य सर्वं सुनिश्चितकारणम् । आद्रादिमार्गपर्य्यन्त सम्प्रचारे समादिशेत् । शून्यचक्रादियोगं हि पौषादि- ष्वेतत्तथा" ज्योति॰ ।

शिवचतुर्द्दशी स्त्री शिवप्रिया चतुर्द्दशी । फाल्गुनकृष्णचतु- र्द्दश्याम् । व्रतचन्द्रे शिवचतुर्द्दशीव्रत दृश्यम् ।

शिवताति स्त्री शिव+तातिल् । मङ्गलकरस्वरायां हेमच॰

शिवदारु न॰ शिवो देवदार्वादिकं दारु । देवदारुवृक्षे राजनि॰

शिवदूती स्त्री शिवो दूतो यस्याः । १दुर्गामूर्त्तिभेदे त्रिका॰ २योगिनीभेदे च "यदा जघान जगतां रक्तबीजं हिताय वै । महादेवी महामाया तदास्याः कायतः स्मृता । दूत प्रस्थापयामास शिवं शुम्भाय चाम्बिका । तेन सा शिवदूतीति देवैः सर्वैः प्रगीयते" कालिकापु॰ ६०अ॰ । "यः शिवाविरुतं श्रुत्वा शिवदूतीं शिवप्रदाम् । प्रणमेत् साधको भक्त्या तस्य कामाः करे स्थिताः" तत्रैव "ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा । कौमारी वैष्णवी चैव वाराही पञ्चमी तथा । नारसिंही तथैवेन्द्री शिवदूती तथाष्टमी । एताः पूज्या महाभागाः योगिन्यः कामदायिकाः" तत्रैव । "कौषिक्याः हृदयाद्देवी निःसृता ध्यायतो हरेः । शिवदूतीति विख्याता शिवायतसुसंस्तुता" वचनैः ।

शिवद्रुम पु॰ शिवप्रियः द्रुमः । बिल्ववृक्षे राजनि॰ ।

शिवद्विष्टा स्त्री ६त॰ । केतक्यां राजनि॰ ।

शिवधर्म्म न॰ शिवस्य तदुपासनार्थो धर्मो यत्र । उपपुराणभेदे "चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्" कूर्म्मपु॰ ।

शिवधातु पु॰ ६त॰ । पारदे पारदशब्दे दृश्यम् ।

शिवनाभि पु॰ शिवस्य नाभिरिव । शिवलिङ्गभेदे "शिवनाभि मयं लिङ्गं प्रतिपूज्यं महर्षिभिः । ... सर्वलिङ्गे भ्यस्तस्मात् पूज्यं विधानतः" वीरमि॰ । अच् समा॰ । शिवनाभः शालग्रामशिलाभेदे शालग्रामशब्दे दृश्यम् ।

शिवपुरी स्त्री ६त॰ । काश्यां हेमच॰ शिवनगर्य्यादयोऽप्यत्र ।

शिवप्रिय न॰ ६त॰ । १रुद्राक्षे २महादेवबल्लभे त्रि॰ राजनि॰ । ३वकवृक्षे जटा॰ । ४धुस्तूरे ५स्फटिके च पु॰ राजनि॰ । ६दुर्गायां स्त्री शब्दमा॰ । [अर्जुनवृक्षे राजनि॰ ।

शिवमल्लक पुं॰ शिवः कल्याणकरः मल्ल इव कायति कै-क ।

शिवमल्ली स्त्री शिवस्य मल्लीव प्रियत्वात् । वकवृक्षे अमरः ।

शिवरात्रि स्त्री शिवप्रिया तदुपासनार्था रात्रिः । माघातः परस्यां कृष्णचतुर्दश्याम् । तद्रात्रौ हि शिवपूजनव्रता- दिकं क्रियते इति तस्याः रात्रेस्तत्प्रियत्वम् । २तद्दिव- सकर्त्तव्ये व्रते च । तद्विधानकालादि ति॰त॰ उक्तं यथा कालमाधवीये स्कान्दे नागरखण्डम् "माघमासस्य शेषे या प्रथमे फाल्गुनस्य च । कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्त्तिता" । अत्रैकस्यास्तिथे- र्माघीयत्वफाल्गुनीयत्वे मुख्यगौणचान्द्राभ्याम् अविरुद्धे । ततस्तु माघ्यनन्तरा चतुर्दशी शिवरात्रिः । अस्यामुप- वासः प्रधानम् "न स्नानेन न वस्त्रेण न धूपेन न चार्चया । तुष्यामि न तथा पुष्पैर्यथा तत्रोपवासतः" इति महेशोक्तेः । स्कान्दे "तस्यां रात्रौ प्रकर्त्तव्यं शिवप्रीणनतत्परैः । प्रहरे प्रहरे स्नानं पूजा चैव विशेषतः" । अत्र वीप्सया प्रहरचतुष्टयसाध्यं प्रती- यते । नरसिंहाचार्य्यधृतेश्वरसंहितायाम् "शैवो वा वैष्णवो वापि यो वा स्यादन्यपूजकः । सर्वं पूजाफलं हन्ति शिवरात्रिबहिर्मुखः" । संवत्सरप्रदीपे "दु- ग्धेन प्रथमे स्नानं दध्ना चैव द्वितीयके । तृतीये च तथाज्येन चतुर्थे मधुना तथा" । ईशानसंहितायाम् "माघे कृष्णचतुर्दश्यां रविवारो यदा भवेत् । भौमो वापि भवेद्देवि ! कर्त्तव्यं व्रतमुत्तमम् । शिवयोगस्य योगेन तद्भवेदुत्तमोत्तमम् । शिवरात्रिव्रतं नाम सर्वपाप- प्रणाशनम् । आचाण्डालात् मनुष्याणां भुक्तिमुक्तिप्रदाय- कम् । नागरखण्डे "उपवासप्रभावेण बलादपि च जागरात् । शिवरात्रेस्तथा तस्य लिङ्गस्यापि प्रपूजया । अक्षयान् लभते लोकान् शिवसायुज्यमाप्नुयात्" । पाद्मे "वर्षे वर्षे महादेवि ! नरो नारी पतिव्रता । शिव- रात्रौ महादेवं काम भक्त्या प्रपूजयेत्" । ईशानसंहि- तायाम् "एवमेव व्रतं कुर्य्यात् प्रतिसंवत्सरं व्रती । द्वादशाब्दिकमेतद्धि चतुर्विंशाब्दिकं तथा सर्वान् कामानवाप्नोति प्रेत्य चेह च मानवः" । हेमा- द्रिधृता स्मृतिः "प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतु- र्दशी" । प्रदोषमाह वत्सः "प्रदोषोऽस्तमयादूर्द्ध्वं घटि-

काद्दयिष्यति" । अर्द्धमन्वन्तरम् । वायुपुराणे "प्रयोदश्यस्तगे सूर्य्ये चतसृष्वपि नाडिषु । भूतविद्धा तु या तत्र शिवरात्रिव्रतञ्चरेत्" । ईशानसंहितायाम् "माघे कृष्णचतुर्द्दश्यामादिदेवो महानिशि । शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः । तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः अर्द्धरात्रादधश्चोर्द्ध्वं युक्ता यत्र चतुर्द्दशी । व्याप्ता सा दृश्यते यस्यां तस्यां कुर्य्यात् व्रतं नरः" । अत्र "महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः" इति देवलोक्ता महानिशा ग्राह्या । घटिका एकदण्डः । एवञ्च यद्दिने प्रदोषनिशीथोभयव्यापिनी चतुर्द्दशी तद्दिने व्रतम् उभयव्याप्तत्वराभावात् । कालमाधवीयोऽप्येवम् । एतेन परदिने उभयव्यापित्वेऽपि पूर्व्वदिवसीयरात्रिद्वितीययामप्रभृतिचतुर्द्दशीमत्त्व बहुप्रहरव्यापित्वेन पूर्व्वदिन एव व्रतमिति निरस्तम् यदा तु पूर्व्वद्युर्निशीथमात्रव्याप्तिः परेद्युः प्रदोषमात्रव्याप्तिस्तदा पूर्व्वद्युर्व्रतं प्रधानकालव्याप्तत्वरोधात् । "पूर्व्वद्युरपरेद्युर्वा महानिशि चतुर्द्दशी । व्याप्ता सा दृश्यते यस्यां तस्यां कुर्य्यात् व्रतं नरः" इतीशानसंहितावचनाच्च । एतद्विषय एव भविष्यपु० "अर्द्धरात्रात् पुरस्तात्तु जयायोगो भवेद्यदि । पूर्व्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैः" । विष्णुधर्म्मोत्तरे "जयन्ती शिवरात्रिश्च कार्य्ये भद्रजयान्विते । कृत्वोपवासं तिथ्यन्ते तदा कुर्य्याच्च पारणम्" । तिथ्यन्तेपारण जयन्तीमात्रपरं तत्र चतुर्द्दश्यामेव तत् "ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै । पूजितानि भवन्तीह भूतायां पारणे कृते" इति स्कान्दात् । "दिनमानप्रमाणेन या तु रात्रौ चतुर्द्दशी । शिवरात्रिस्तु सा ज्ञेया चतुर्द्दश्यान्तु पारणम्" इति गौतमीयाच्च । यदा तु पूर्व्वदिने न निशीथव्याप्तिः परदिने प्रदोषमात्रव्यापिनी तदा परा ग्राह्या प्रदोषव्यापिनीति प्रागुक्तत्वात् तिथेस्तत्कालव्यापित्वाच्च । एतद्विषय एव लिङ्गपुराणम् "शिवरात्रिव्रतं भूतां कामविद्धां विवर्ज्जयेत् । एके नैवोपवासेन ब्रह्महत्यां व्यपोहति" । अत्रामावस्यायामेव पारणम् "शिवाऽघोरा तथा प्रेता सावित्री च चतुर्द्दशी । कुहूयुक्तैव कर्त्तव्या कुह्वामेव हि पारणम्" । इति वचनात् । तदयं संक्षेपः । यद्दिने प्रदोषनिशीथोभयव्यापिनी चतुर्द्दशी तद्दिने व्रतम् । यदा तु पूर्व्वद्युर्निशीथव्यापिनी परेद्युः प्रदोषमात्रव्यापिनी तदा पूर्व्वद्युर्व्रतम् । यदा तु न पूर्व्वद्युर्निशीथव्याप्तिः परदिने प्रदोषव्यापिनी तदा परदिने । पारणन्तु परदिने चतुर्द्दशीलाभे चतुर्द्दश्यां, तदलाभे अमावास्यायाम्" ति०त०रघु० ।

शिवलिङ्ग न०, ६तत्० । शिवस्य लिङ्गाकारे प्रस्तरादिमये पदार्थे तदाविर्भावपूज्यतादिकं यथा

"भवाथ गत्वा मदनो ददर्श दारुकेवनम् । दृष्ट्वा प्रहर्त्तुं कामोऽथ ततः स प्राद्रवद्धर । ततो दारुवनं घोरं मदनाभिद्रुतो हरः । विवेश ऋषयो यत्र सपत्नीका व्यवस्थिताः । ते चापि ऋषयः सर्व्वे दृष्ट्वा मूर्द्ध्ना नताभवन् । ततस्तान् प्राह भगवान् भिक्षां मे प्रति दीयताम् । ततस्ते मौनिनस्तस्थुः सर्व्व एव महर्षयः । तदाश्रमाणि पुण्यानि परिचक्राम नारद ! । तं प्रविष्टं तदा दृष्ट्वा भार्गवात्रेययोषितः । प्रक्षोभमगमन् सर्व्वा हीनसत्त्वाः समन्ततः । ऋते त्वरुन्धतीमेकामनसूयाञ्च भाविनीम् । एताभ्यां भर्त्तृपूजासु कृतं वै सुस्थिरं मनः । ततः संक्षुभिताः सर्व्वा यत्र याति महेश्वरः । तत्र प्रयान्ति कामार्त्ता मदविह्वलितेन्द्रियाः । त्यक्त्वाश्रमाणि शून्यानि स्वानि ता मुनियोषितः । अनुजग्मुर्यथा मत्तं करिण्य इव कुञ्जरम् । ततस्तु ऋषयो दृष्ट्वा भार्गवाङ्गिरसो मुने ! । क्रोधान्विताब्रुवन् सर्व्वे लिङ्गोऽस्य पततां भुवि । ततः पपात देवस्य लिङ्गं पृथ्वीं विदारयत् । अन्तर्द्धानं जगामाथ त्रिशूली नीललोहितः । ततः स पतितो लिङ्गो विभिद्य वसुधातलम् । रसातलं विवेशाशु ब्रह्माण्डं चोर्द्ध्वतोऽभिनत् । ततश्चचाल पृथिवी गिरयः सरितो नगाः । पातालभुवनाः सर्व्वे जङ्गमाऽजङ्गमाः स्थिताः । संक्षुब्धान् भुवनान् दृष्ट्वा भूर्लोकादीन् पितामहः । जगाम माधवं द्रष्टुं क्षीरोदं नाम सागरम् । तत्र दृष्ट्वा हृषीकेशं प्रणिपत्य च भक्तितः । उवाच देव ! भुवनाः किमर्थं क्षुभिता विभो ! । अथोवाच हरिर्ब्रह्मन् शार्व्वो लिङ्गो महर्षिभिः । पतितस्तस्य भारार्त्ता सञ्चचाल वसुन्धरा । ततस्तदद्भुततमं श्रुत्वा देवः पितामहः । तत्र गच्छाम देवेश एवमाह पुनः पुनः । ततः पितामहो देवः केशवश्च जगत्पतिः । आजगाम तदुद्देशं यत्र लिङ्गं भवस्य तत् । ततोऽनन्तं हरिर्लिङ्गं दृष्ट्वारुह्य खगेश्वरम् । पातालं प्रविवेशाथ विस्मयात् त्वरितो विभुः । ब्रह्मा पद्मविमानेन ऊर्द्ध्वमाक्रम्य सर्व्वतः । नैवान्तमलभद् ब्रह्मा विस्मितः पुनरागतः । विष्णुर्गत्वाथ पातालं सप्तलोकपरायणः । चक्रपाणिर्विनिष्क्रान्तो लेभेऽन्तं न महाद्युते !" इत्युपक्रमे "हर उवाच

नदर्शयन्ति सिद्धा मम लिङ्गं कुरोत्तमौ !। तदेतत् प्रतिगृह्णीयां नान्यथेति कथञ्चन। ततः प्रोवाच भगवानेवमस्त्विति केशवः। ब्रह्मा स्वयञ्च जग्राह लिङ्गं कनकपिङ्गलम्। ततश्चकार भगवांश्चातुर्वर्ण्यं हरार्च्चने। शास्त्राणि चैषां मुख्यानि नानोक्तिविदितानि च। आद्यं शैवं१ परिख्यातमन्यत् पाशुपतं२ मुने!। तृतीयं कालवदनं३ चतुर्थञ्च कपालिकम्४। शैव आसीत् स्वयं शक्तिर्वशिष्ठस्य प्रियः सुतः। तस्य शिष्यो बभूवाथ गोपायन इति श्रुतः। महापाशुपतश्चासीद्भारद्वाजस्तपोधनः। तस्य शिष्योऽप्यभूद्राजा ऋषभः सोमकेश्वरः। कालास्यो भगवानासीदापस्तम्बस्तपोधनः। तस्य शिष्योऽभवद्वैश्यो नाम्ना क्राथेश्वरो मुने। महाव्रती च धनदस्तस्य शिष्यश्च वीर्य्यवान्। कुन्दोदर इति ख्यातो जात्या शूद्रो महातपाः। एवं स भगवान् ब्रह्मा पूजनाय शिवस्य च। कृत्वा तु चातुराश्रम्यं स्वमेव भवनं गतः। गते ब्रह्मणि शर्वोऽपि ततः संहृत्य तं तदा। लिङ्गं चित्रवनं, सूक्ष्मं प्रतिष्ठाप्य चचार ह"। वामनपु० ६ अ०। एकगृहे लिङ्गद्वयार्च्चननिषेधो यथा "गेहे लिङ्गद्वयं नार्च्यं शालग्रामद्वयं तथा। द्वे चक्रे द्वारकायास्तु नार्च्यं सूर्य्यद्वयं तथा"। तन्निर्म्माल्यभक्षणविधिनिषेधौ यथा "अभक्ष्यं शिवनिर्म्माल्यं पत्रं पुष्पं फलं जलम्। शालग्रामशिलायोगात् पावनं तद्भवेत् सदा"। "लिङ्गपूजां विना देवि! अन्यपूजां करोति यः। विफला तस्य पूजा स्यादन्ते नरकमाप्नुयात्। तस्माल्लिङ्गं प्रयत्नेन प्रथमं परिपूजयेत्"। तत्पूजनप्रशंसा यथा "यद्गृहे लिङ्गपूजायां रहितं सततं प्रिये!। तद्गृहं पतितं मन्ये विष्ठाभूमिसमं स्मृतम्"। "ब्रह्मा विट् क्षत्रियो देवि! यदि लिङ्गं न पूजयेत्। तत्क्षणात् परमेशानि! स च चाण्डालतां व्रजेत्। शूद्रश्च परमेशानि! सदा शूकरवत् प्रिये!। पूजयेत् परमेशानि! चत्वारो ब्रह्मणादयः। शिवार्च्चनन्तु पूजासु यदुक्तं हि वर्जितं सदा। विष्ठागर्त्तसमं देवि! तद्गृहं विद्धि पार्व्वति!। शाक्तो वा वैष्णवो वापि शैवो वा परमेश्वरि!। आदौ लिङ्गं समभ्यर्च्य बिल्वपत्रैर्वरानने!। पश्चादन्यं महेशानि! शिवं प्राच्य प्रपूजयेत्। शिवपूजां विना देवि! अन्यपूजां करोति यः। स एव रसनाहीनः कुम्भीरो जायते प्रिये!। निर्माय पार्थिवं लिङ्गं रुद्रं संहाररूपिणम्। आशुतोषं सदाशिवं शङ्करं वृषभध्वजम्। निर्माय पार्थिवं लिङ्गं विधिवत् पूजयेत् शिवम्। शिवपूजा महेशानि! यद्गृहे सततं प्रिये!। काशीपुरं महेशानि! तद्गृहं वरवर्णिनि!। शिवलिङ्गं प्रपूज्याथ सर्वपूजाफलं लभेत्"। चतुर्विधलिङ्गं यथा "चतुर्द्धा पार्थिवं लिङ्गं कृतस्थाभेदेन पार्व्वति!। शुक्लं रक्तं तथा पीतं कृष्णञ्च परमेश्वरि!। शुक्लन्तु ब्राह्मणे शस्तं, क्षत्रिये रक्तमिष्यते। पीतं च वैश्यजातौ तु कृष्णं शूद्रे प्रकीर्त्तितम्। चान्द्रमसं महेशानि! सर्वजातिषु शस्यते"। लिङ्गार्च्चनतन्त्रे ३।२।३ प०। अस्य पञ्च वक्त्राणि यथा "तत् सर्वं शृणु चार्व्वङ्गि पार्थिवस्य मुखं प्रिये!। विभाव्य मुखपञ्चं हि शिवस्य वरवर्णिनि!। सद्योजातं वामदेवमघोरञ्च ततः परम्। तत्पुरुषं तथेशानं पञ्चवक्त्रं प्रकीर्त्तितम्। सद्योजातञ्च वै शुक्लं शुद्धस्फटिकसन्निभम्। पीतवर्णं तथा सौम्यं वामदेवं मनोहरम्। कृष्णवर्णमघोरञ्च सर्वं भीमविवर्द्धनम्। रक्तं तत्पुरुषं देवं दिव्यमूर्त्तिं मनोहरम्। श्यामलञ्च तथेशानं सर्वदेवशिवात्मकम्। चिन्तयेत् पश्चिमे चाद्यं द्वितीयन्तु तथोत्तरे। अघोरं दक्षिणे देवं पूर्वे तत्पुरुषं तथा। ईशानो मध्यतो ध्येयं चिन्तयेत् भक्तितत्परः"। तत्रैव ६ पटलः। अथ रौद्रलिङ्गलक्षणम्, वीरमित्रोदयधृते "नदीसमुद्भवं रौद्रमन्योन्यस्य विघर्षणात्। नदीवेगात् समं स्निग्धं संजातं रौद्रमुच्यते"। मत्स्येऽपि "सरित्प्रवाहसंस्थानं बाणलिङ्गसमाकृति। तदन्यदपि बोद्धव्यं रौद्रलिङ्गं सुखावहम्। नदीषु नर्मदायाञ्च बाणलिङ्गसमाकृति। तदन्यदपि बोद्धव्यं लिङ्गं रौद्रं भविष्यति। रौद्रलिङ्गं तथाख्यातं बाणलिङ्गसमाकृति। श्वेतं रक्तं तथा पीतं कृष्णं विप्रादिपूजितम्। स्वभावात् कृष्णवर्णं वा सर्वजातिषु सिद्धिदम्। नर्मदासम्भवं रौद्रं बाणलिङ्गपदेरितम्"। दैवलिङ्गमधिकृत्य सिद्धान्तशेखरे "करसंपुटसंस्पर्शं शृङ्गाटेन्दुभूषितम्। रेखाकोटरसंयुक्तं निम्नोन्नतसमन्वितम्। दीर्घाकारञ्च यल्लिङ्गं ब्रह्मभागादिवर्जितम्"। अथ गोललिङ्गलक्षणम् "लिङ्गं गोलमिति प्रोक्तं गोलकं प्रोच्यतेऽधुना। कुष्माण्डस्य फलाकारं नागरङ्गफलोपमम्। काकडिम्बफलाकारं गोललिङ्गमितीरितम्"। अथार्षलिङ्गलक्षणम्। तत्रैव "नानाकोलफलाकारं ब्रह्मसूत्रविवर्जितम्। मूले स्थूलन्तु तल्लिङ्गं कपित्थफलसन्निभम्। तालस्य वा फलाकारं अग्रे स्थूलं यद्भवेत्। मध्ये स्थूलं परं लिङ्ग

स्तुषिलिङ्गमुदीरितम्”। लिङ्गं च द्विविधमकृत्रिमं कृत्रिमञ्च अकृत्रिमं स्वयम्भुवाणलिङ्गादि स्वयम्भूतम्। कृत्रिमं धातुलिङ्गादिनिर्म्मितम्। सिद्धान्तशेखरे “तल्लिङ्गं द्विविधं ज्ञेयमचलञ्च चलं तथा। प्रत्येकं त्रिविधं ज्ञेयं लिङ्गं तदुभयात्मकम्। प्रासादे स्थापितं लिङ्गमचलं तच्छिलादिजम्। स्थापितमचलं गेहे स्थिरं लिङ्गमयोजिते। अन्यथा तत्र स्थितं लिङ्गं स्वयम्भु दैवपालितम्। आर्षञ्च मानसं लिङ्गं तेषां लक्षणमुच्यते। नानाच्छिद्रसुसंयुक्तं नानावर्णसमन्वितम्। अदृष्टमूलं यल्लिङ्गं कर्कशं भुवि दृश्यते। तल्लिङ्गन्तु स्वयम्भूतमपरं लक्षणच्युतम्। स्वयम्भुलिङ्गमित्युक्तं तच्च नानाविधं मतम्। शङ्खाभमस्तकं लिङ्गं वैष्णवं तदुदाहृतम्। पद्माभमस्तकं ब्राह्मं छत्राभं चान्द्रमुच्यते। शिरोयुग्मं तथाग्नेयं त्रिपदं याम्यमीरितम्। खड्गाभं नैर्ऋतं लिङ्गं वारुणं कलशाकृति। वायव्यं ध्वजवल्लिङ्गं कौबेरन्तु गदान्वितम्। ईशानस्य त्रिशूलाभं लोकपालादि निःसृतम्। स्वयम्भुलिङ्गमाख्यातं सर्वशास्त्रविशारदैः”। मत्स्यसूक्ते “इदा लिङ्गं महेशस्य स्वयम्भूतस्य पार्वति!। सर्वदोषविनिर्मुक्तः परे ब्रह्मणि लीयते”। एतेषां पूजाफलन्तु तत्रैव “विशेषाच्चैकलं स्वर्गं भुक्तये चाहुमज्जतः। पार्थिवं भुक्तये प्रोक्तं मुक्तये चाहुमज्जतः। एवं वै दारुजं ज्ञेयं धातुलिङ्गं तथा पुनः। श्रिरलक्ष्मीप्रदं ज्ञेयं हैमं राज्यप्रदञ्च तत्। पुत्रवृद्धिकरं ताम्रं राजपायुःप्रवर्द्धनम्” अन्यञ्च “पारदञ्च महाभूत्यै सौभाग्याय च मौक्तिकम्। चान्द्रकान्तं मृत्युजित् स्फाटिकं सर्वकामदम्”। वी॰मि॰धृतकालोत्तरेऽपि “सर्वा फलप्रदा भूमिर्मध्यमध्यादेव हि। अनन्ताद्याः स्मृता ह्यष्टौ मध्यमो विद्युदुज्ज्वलाः। रात्रौ प्रकाशकाः सर्वे विनाशापातकारिणः। नानावर्णास्तु विज्ञेया रक्तैर्गन्धैश्च रूपतः। वज्राद्याः स्फाटिकाद्याश्च गुडाशादिविनिर्म्मितम्। सर्वकामप्रदं पुंसां लिङ्गं तात्कालिकं मतम्”। लक्ष्मणसमुच्चये “गान्धं सौभाग्यदं लिङ्गं पौष्पं मुक्तिप्रदायकम्”। तथा “नानाशुष्कोद्भवं लिङ्गं नानाकामप्रदायकम्। धेनुकं गुडदं लिङ्गं सौभाग्याय च वाचकम्। वल्मीकोत्थं तु पाषाणं भाव्यं शत्रुनाशावहम्। तात्कालिकं दरिद्रस्य कृत्वा भक्त्या समर्चयेत्”। तथा “कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च। कुङ्कुमस्य त्रयश्चैव शशिना च चतुःसमम्।

एतद्वै गन्धलिङ्गन्तु कृत्वा संपूज्य भक्तितः। शिवसायुज्यमाप्नोति बन्धुभिः सहितो नरः। कार्यं पुष्पमयं लिङ्गं इयमन्यसमन्वितम्। नवखण्डां धरां भुक्त्वा तस्येशोऽधिपतिर्भवेत्। रजोभिर्निर्म्मितं लिङ्गं यः पूजयति भक्तितः। विद्याधरपदं प्राप्य पश्चात् शिवसमो भवेत्। श्रीकामो गोशकृल्लिङ्गं कृत्वा भक्त्या प्रपूजयेत्। अम्लेन कापिलेनैव गोमयेन प्रकल्पयेत्। कार्यं च यदिदं लिङ्गं यवगोधूमशालिजम्। श्रीकामः पुष्टिकामश्च पुत्रकामस्तदर्च्चयेत्। सिताखण्डमयं लिङ्गं कार्यमारोग्यवर्द्धनम्। वश्ये लवणजं लिङ्गं तच्च त्रिकटुकान्वितम्। तस्यद्भस्मजं लिङ्गं संपूज्य बुद्धिवर्द्धनम्। लवणेन च सौभाग्यं पार्थिवं सर्वकामदम्। कामदं तिलपिष्टोत्थं तुषोत्थं मारणे स्मृतम्। भस्मोत्थं सर्वफलदं गुडोत्थं प्रीतिवर्द्धनम्। गन्धोत्थं शुभदं भूरिशर्करोत्थं सुखप्रदम्। वंशाङ्कुरं वंशकरं गोमयं सर्वरोगदम्। केशास्थिसम्भवं लिङ्गं सर्वशत्रुविनाशनम्। लोमजे मारणे पिष्टसम्भवं लिङ्गमुत्तमम्। दारिद्र्यदं द्रुमोद्भूतं पैष्टं स्मरणप्रदम्। दधिदुग्धोद्भवं लिङ्गं कीर्त्तिलक्ष्मीसुखप्रदम्। धान्यदं धान्यजं लिङ्गं फलोत्थं फलदं भवेत्। पुष्पोत्थं दिव्यभोगायुःसम्यक् धात्रीफलोद्भवम्। नवनीतोद्भवं लिङ्गं कीर्त्तिसौभाग्यवर्द्धनम्। दूर्वाकाण्डसमुद्भूतमपमृत्युविनाशनम्। कर्पूरसम्भवं लिङ्गं कषायैर्मुक्तिसिद्धिदम्। आयस्कान्तं च सिद्धौ तु ज्ञेयं सामान्यसिद्धिषु” गरुडपु॰। “सर्वं मणिमयं श्रेष्ठं तत्र वाञ्छितसिद्धये। पद्मलिङ्गं महाभूत्यै सौभाग्याय च मौक्तिकम्। पुष्टिमूलं महानीलं ज्योतिर्हीरकसम्भवम्। सर्पकं कुलसम्पत्त्यै तैजसं सूर्यकान्तजम्। चन्द्रापीडं मृत्युजिते स्फाटिकं सर्वकामदम्। प्रवालाख्यमणिजं शत्रुक्षयार्थं मौक्तिकं तथा। आयस्यं हीरकं ज्ञेयं रोगघ्नं गौरिकोद्भवम्। शुभकरं पुष्पलं तीर्थं वैदूर्यं शत्रुदर्पहृत्। नीलं लक्ष्मीप्रदं ज्ञेयं स्फाटिकं सर्वकामदम्”। सारसंग्रहे “महाभुक्तिप्रदं हैमं राजतं भूतिवर्द्धनम्। आरकूटं तथा कांस्यं रत्नं सामान्यमुक्तिदम्। त्रपुसीसायसं लिङ्गं शत्रूणां नाशने हितम्। कीर्त्तिदं कांस्यजं लिङ्गं राजतं पुत्रवर्द्धनम्। पैत्तलं भुक्तिमुक्त्यर्थं मिश्रजं सर्वसिद्धिदम्” कालोत्तरतन्त्रम्। तत्रैव शिवनारदसंवादे “पितॄणां मुक्तये लिङ्गं पूज्यं रजतसम्भवम्। हैमजं सत्यलोकस्य प्रा-

प्रये पूजयेत् पुमान् । पूजयेत्ताम्रजं लिङ्गं पुष्टिकामो हि मानवः” । मत्स्यसूक्ते “ताम्रलिङ्गं कलौ नार्च्यं रैत्यस्य सीसकस्य च । रक्तचन्दनलिङ्गस्य शङ्खकांस्यायसं तथा” । मातृकाभेदतन्त्रे १२पटले “पार्थिवे शिवपूजायां सर्वसिद्धियुतो भवेत् । पाषाणे शिवपूजायां द्विगुणं फलमीरितम् । स्वर्णलिङ्गे च पूजायां शत्रूणां नाशनं मतम् । सर्वसिद्धीश्वरो रौप्ये फलं तस्माच्चतुर्गुणम् । ताम्रे पुष्टिं विजानीयात् कांस्ये च धनसंचयः । गङ्गा-यास्तु शतगुणं लाक्षायां रोगवान् भवेत् ॥ स्फाटिके सर्वसिद्धिः स्यात् तथा मारकते प्रिये ! । लौहलिङ्गे रिपोर्नाशं कामदं भस्मलिङ्गकम् । वालुकायां कार्यसिद्धि-र्गोमये रिपुनाशनम् । सर्वलिङ्गस्य माहात्म्यं धर्मकामा-र्थमोक्षदम् । संस्कारेण विना देवि ! पाषाणादौ न पूजयेत्” । “मृत्तिकातोलकं ग्राह्यमथ वा तोलकद्वयम् । एतदन्यस्य कुर्वीत कदाचिदपि पार्वति !” मातृकाभेदतन्त्रे ७प० । “मृत्तिकातोलकं ग्राह्यमथ वा तोलकद्वयम् । शिव-लस्य प्रमाणेन घटनं कारयेद् बुधः । अङ्गुष्ठपर्वमानन्तु कृत्वा लिङ्गं प्रपूजयेत्” विश्वसारतन्त्रम् । शिवलोक-रचनञ्च कालोत्तरे “लिङ्गे वेद्यां तथा पीठे समस्त-निपातनात् । समस्तैव विजानीयात् शिवलोकरण-स्थितम्” । मांसभक्षादीनां मृत्तिकाभेदेन पूजाफल-प्रशंसा तत्रोक्ता यथा “शुक्लं हि पार्थिवं लिङ्गं निर्माय यस्तु पूजयेत् । स एव विप्रो देवेशि ! त्रिवर्गफलभाग्-भवेत् । क्षत्रियस्तु वरारोहे ! रक्तं निर्माय पार्थि-वम् । पूजयेत् सततं यस्तु त्रिवर्गफलभाग्भवेत् । पीतं तु पार्थिवं देवि ! निर्माय यस्तु पूजयेत् । स च वैश्यो महेशानि ! त्रिवर्गफलभाग्भवेत् । कृष्णं हि पार्थिवं लिङ्गं निर्माय यस्तु पूजयेत् । स शूद्रः परमेशानि ! त्रिवर्गफलभाग्भवेत् । शिलादौ च महेशानि ! स्थूलञ्च फलदायकम् । अङ्गुष्ठमानं देवेशि ! यदा हेमाद्रिमान-कम् । क्रमेण देवदेवेशि ! फलं बहुविधं स्मृतम् । स्थूलात् स्थूलतरं लिङ्गं रत्नाच्च परमेश्वरि ! । पूजना-दारभ्यापि फलं बहुविधं स्मृतम्” । स्थूलतरमिति पार्थिवलिङ्गेतरपरम् मृत्तिकातोलकं ग्राह्यमित्या-दिवचनात् । शिलास्फाटिकमरकतादीनां पञ्चसूत्रीकर-णक्रम लैङ्गे “शिवलिङ्गस्य यन्मानं तन्मानं दश मध्ययोः । योन्यग्रमपि तन्मानं तदधोऽपि तथा भवेत्” । “लिङ्गस्य चार्द्धविस्तारः परिणाहोऽपि तादृशः । लिङ्गस्य द्विगुणा वेदी योनिस्तदर्द्धसंमिता । कुर्वीताकृतको स्थूलं न कदाचिदपि क्वचित् । इत्यादि-शिवनिर्माणे मानमित्याकलय्य भवेत्” । तन्त्रान्तरम् । लिङ्गशब्दव्युत्पत्तिर्यथा “आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका । आलयः सर्वदेवानां लयना-ल्लिङ्गमुच्यते” स्कन्दपु० ।

“एकहस्तेन निर्माय पार्थिवं लिङ्गमर्चयेत् । तल्लिङ्ग-पूजनस्य फलमाप्नोत्यसंशयम् । तदेव स्यादर्द्धगुणं वाम-हस्तेन निर्मितम् । कदाहरणकेशादिशोधनञ्चैव पा-र्थिवा । “एवं कृते तु गृहिणां संसारात् स विमु-क्तिः । दशाधिकैर्विंशतिपलैर्मृद्भिः शैवं प्रयत्नतः । लिङ्गं निर्माय देवेशि ! पूजयेद्भक्तिसंयुतः” तन्त्रसारः ।

शिवलोक पु० ६त० । कैलासनामके स्थाने ।

शिववल्लभ त्रि० ६त० । १महादेवप्रिये २शतपत्र्यां स्त्री राजनि० । [२श्वेतवह्न्यां च राजनि० ।

शिववल्ली स्त्री० शिवप्रिया वल्ली शा०त० । १लिङ्गिनीलतायां

शिववाहन न० शिवं वाहयति वह–णिच्–ल्यु । वृषभे राजनि० । [२शिवस्य शुक्रे च ।

शिववीज न०६त० । १पारदे राजनि० । शिववीर्यादयोऽप्यत्र ।

शिवशेखर पु० शिवस्य शेखर इव । १धुस्तूरे राजनि० । २वकपुष्पे च जटा० ।

शिवसुन्दरी स्त्री ६त० । दुर्गायां तन्त्रसा० ।

शिवा स्त्री शो–वन् नि० । १मङ्गलवत्यां स्त्रियां २दुर्गायां “शिवा मुक्तिः समाख्याता योगिनां मोक्षदायिनी । शिवायै यां यजेद्देवीं शिवा लोके ततः स्मृता” देवीपु० ४५अ० । ३मुक्तौ ४शृगाले ५हरीतक्यां ६शमीवृक्षे ७ता-मलक्याम् अमरः । ८आमलक्यां मेदि० । ९हरिद्रायां १०दूर्वायां ११गोरचनायाञ्च राजनि० १२शृगाल्याम् अमरः । [राजनि० ।

शिवाटिका स्त्री शिवायाटति अट–ण्वुल् । वंशपत्र्यां

शिवात्मक न० शिवो मङ्गल आत्मा यस्य कप् । १सैन्धवे लवणे राजनि० । २शिवरूपे त्रि० ।

शिवानी स्त्री शिवं कल्याणमानयति आ+नी–ड गौरा० ङीष् । १जयन्तीवृक्षे शब्दच० २दुर्गायाञ्च ।

शिवाप्रिया पु० ६त० । १छागे त्रि० २तस्याः प्रियमात्रे त्रि० ।

शिवापीड़ पु० ६त० । वकवृक्षे राजनि० । [राजनि० ।

शिवाफला स्त्री शिवाया इव फलं यस्याः । शमीवृक्षे

शिवाबलि पु० शिवाभ्यो देयो बलिः शा०त० । तन्त्रसा-

रविहिते सन्ध्यायां शिवाभ्यो देये मांसादिबलौ तद्विधिस्तन्त्रसारे द्रष्टव्यः ।

शिवाराति पुं॰ शिवाया शृगालस्यारातिः । कुक्कुरे शब्दमा॰ ॥ शिवशिवयोर्द्वेष्टरि च ।

शिवारुत न॰ रुत॰ । शृगालीशब्दे दिग्भेदे तस्य शुभाशुभफलं वसन्तराजशाकुने उक्तं यथा

"शोभनं शुभफलाभिलक्षणं कथ्यते त्ववितथं शिवारुतम् । शान्तदीप्तककुभां विशेषतो स्थानमत्र च सदोपयुज्यते । दग्धा दिगुक्ता दिननाथयुक्ता विवस्वताप्ता भवति प्रदीप्ता । सा धूमिता यां सविता प्रयातः शेषा दिशन्ताः किल पञ्च शान्ताः । दग्धा दिगैशी ज्वलिता दिगैन्द्री सधूमिता चानलदिक्क्रमेण । आद्ये दिनस्य प्रहरे प्रवृत्ते महेशदेवोऽश्रुतादिषु । शिवा रटन्ती कुरुते नराणां संत्रासकालव्ययबन्धनानि । शक्रो द्वितीये प्रहरस्य भागे समुत्पतेऽनलदावदिक्षु । शिवा रटन्ती कुरुते इत्यादि । आग्नेये तृतीये प्रहरे दिनस्य कृतान्तवैवस्वतवारिदिक्षु । शिवा रटन्ती कुरुते इत्यादि । समागतेऽर्कः प्रहरे तुरीये प्रेतपरक्षःपतिपाशिदिक्षु । शिवा रटन्ती कुरुते इत्यादि । आद्ये निशायाः प्रहरे प्रवृत्ते रक्षोऽधिपादःपतिवातदिक्षु । शिवा रटन्ती कुरुते इत्यादि । ततो द्वितीयप्रहरे रजन्यास्तोयाधिनाथानिलसोमदिक्षु । शिवा रटन्ती कुरुते इत्यादि । यामिन्यास्तृतीयेऽपि च यामवत्याः समीरदोषाकरशम्भुदिक्षु । शिवा रटन्ती कुरुते इत्यादि । समागते रात्रितुरीययामे निशाकरेशानसुरेशदिक्षु । शिवा रटन्ती कुरुते इत्यादि । इतीरितं दिक्त्रययामयोगात् फलं विरुद्धं विरुतैः शिवायाः । अथोऽथ दिक्पञ्चकयामयोगात् फलानि पुंसां क्रमतः शुभानि । कृतान्तरक्षोवरुणानिलेन्दुदिक्ष्वाद्ययामे रविते: शृगाल्याः । स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धिलाभः सुभिक्षं प्रियलोकसङ्गः । रक्षःप्रचेतोऽनिलसोमशम्भुदिक्षु द्वितीये प्रहरे रुतेन । स्यादिष्टवार्त्ताश्रुतिरित्यादि । जलेशवातेन्दुशिवामरेशदिक्षु रवेण प्रहरे तृतीये । स्यादिष्टवार्त्ताश्रुतिरित्यादि । समीरसोमेशसुरेशवह्निदिक्षु स्वरेण प्रहरे चतुर्थे । स्यादिष्टवार्त्ताश्रुतिरित्यादि । शशाङ्करुद्रेन्द्रकृतायकाशदिक्ष्वारवैः पञ्चमयामभागे । स्यादिष्टवार्त्ताश्रुतिरित्यादि । ईशानशक्राग्निकृतान्तरक्षोदिक्षु स्वरेण प्रहरे च षष्ठे । स्यादिष्टवार्त्ताश्रुतिरित्यादि । इन्द्राग्निकालाशरपाशपाशिदिक्ष्वारवैः सप्तमयामकाले । स्यादिष्टवार्त्ताश्रुतिरित्यादि । अत्रान्तकरक्षःपाशिवात- दिक्ष्वष्टमे च प्रहरे रवेण । स्यादिष्टवार्त्ताश्रुतिरित्यादि । "एकादिकानां निधनाष्टमानां शिवारुतानामधुना यदर्थम् । प्राच्यादिकास्वष्टसु दिक्षु शेषं यद्यत् फलं तत्तदुदीरयामः । धनान्यभीष्टाग्निसभीष्टलाभं ध्रुवं ततोऽर्थस्य फलं शुभस्य । भयं प्रतापं सकलस्य सौख्यमेकादिशब्दैः कुरुते प्रशान्ते । भयान्यनिष्टश्रुतिरर्थहानिरिष्टैर्वियोगो महती च भीतिः । स्याद्विग्रहाग्निर्मरणञ्च दीप्ते त्वेकादिना चेत् क्रतसप्तकेन । ऐशान्यां निनादे प्रथमेऽर्थलाभो भवेद्द्वितीये निधिदर्शनञ्च । कन्यां तृतीये लभते चतुर्थे त्वध्वागमं पञ्चमकेऽथ सिद्धिम् । षष्ठे रवे क्षुभ्यति भूमिनाथो भीः सप्तमे स्यादिफलोऽष्टमस्तु । प्राचोऽग्निभागे प्रथमे द्वितीये नराधिपः क्षुभ्यति भीस्तृतीये । वातश्चतुर्थे नगरस्य शब्दे शिवाकृते पञ्चमके च शुभम् । वदन्ति तज्ज्ञाः कलहञ्च षष्ठे भीः सप्तमे स्यादिफलोऽष्टमस्तु । याम्ये शुभं स्यादशुभं द्वितीये याम्ये महाव्याधिभयं तृतीये । स्वरे चतुर्थे स्वजनागमः स्यात् पुत्रा भवेत् पञ्चम फेरवतेषु । जायेत कन्या रटिते च षष्ठे भीः सप्तमे स्यादिफलोऽष्टमस्तु । प्राग्वस्य यातो दिशि राक्षसानामाद्ये द्वितीयेऽपि च गोकुलस्य । मृत्युस्तृतीये द्विचतुष्पदानां हानिश्चतुर्थेऽपि च पञ्चमेऽत्र । चौराद्भयं राजभयञ्च षष्ठे भीः सप्तमे स्यादिफलोऽष्टमस्तु । शब्दे शिवाया वरुणस्य भागे आद्ये भयं हानिरथ द्वितीये । स्याद्राजदूतागमनं तृतीये वादश्चतुर्थे खलु चौरभीतिः । स्यात् पञ्चमे राजभयञ्च षष्ठे भीः सप्तमे स्यादिफलोऽष्टमस्तु । वायव्यभागे भयमेकशब्दे भयातिरेको भवति द्वितीये । दृष्टिस्तृतीये महती चतुर्थे मेघागमे वर्षति पञ्चमे च । क्रोधं विधत्ते नृपतेश्च षष्ठे भीः सप्तमे स्यादिफलोऽष्टमस्तु । दिश्युत्तरस्यां विहिते विरावे म्रियेत कश्चित् प्रथमे द्वितीये । महाभयं, विप्रवधस्तृतीये चलं चतुर्थे खलु दृश्यते च । विट् पञ्चमे षष्ठरवे च शूद्रा भीः सप्तमे स्यादिफलोऽष्टमस्तु । राहोश्च या दर्शनमाद्यशब्दे चेतो द्वितीये च तथोत्तरेण । ललूकापपातस्त्विह दुर्दिनञ्च चतुर्थं भद्रं खलु पञ्चमे च । षष्ठो भवेद्वैरिजनेन षष्ठे भीः सप्तमे स्यादिफलोऽष्टमस्तु । आद्ये भवेद्दुर्दिनमीशदेशे दृष्टिर्द्वितीये च रवे शिवायाः । वातस्तृतीये त्वशनिश्चतुर्थे म्रियेत कश्चित् खलु पञ्चमे च । लभेत

पृथ्वीं निनदे च षष्ठे भीः सप्तमे स्यादिफलोऽष्टमस्तु" "क्षेमलाभपुनरागमनानां निश्चयं समधिगम्य विशङ्कः । येन याति पथिकः परदेशं तं शिवारुतभवं प्रथयामः । यं यं देशं गन्तुमभ्युद्यतानां पुंसां यस्यामुच्चरन्ती शृगाली । शान्तायां वा सिद्धये वाञ्छितानां दीप्तायान्तु स्यादभीष्टक्षयाय । प्राचीं दिशं सम्मुखभानुबिम्बं प्रतिष्ठमानस्य नरस्य यस्य । शब्दं शृगाली पुरतः करोति बन्धं वधं वा प्रकरोति तस्य । प्राचीदिगीशाभिमुखस्य पुंसः प्रस्थानकामस्य शिवा यदाल्या । शिवेऽर्थनाशाय च दक्षिणा स्याद्वामा पुनर्वाञ्छितकार्य्यसिद्ध्यै । प्रत्यङ्मुखां चलितस्य पूर्वां शिवा विरावं पुरतस्य यस्य । करोति पृष्ठे प्रकरोति तस्य सर्वप्रकाराभिलाषसिद्धिम् । प्रस्थायिनो यस्य च दक्षिणायां शिवा रुतं मुञ्चति दक्षिणेन । आदित्यहन्ता यदि नो तदानीं ध्रुवं भवेत्तस्य महीपतित्वम् । वैवस्वताशाचलितस्य यस्य दिवाकरस्तिष्ठति दक्षिणेन । शिवा च वामा कुरुते विरावं सम्पद्यते तस्य समस्तमिष्टम् । पुमान् यदा याम्यककुप्प्रयायी करोति शब्दं पुरतः शृगाली । आस्ते विवस्वानपि सम्मुखश्चेत् भवेत् तदानीमचिरेण मृत्युः । नरस्य याम्यां ककुभं यियासोः शृगालभार्या यदि पृष्ठभागे । फेत्कारमामुञ्चति मानवस्य मृत्युश्च पुत्रे च भवत्यवश्यम् । दिशं प्रतीचीं व्रजतः शृगाली नरस्य वस्राभिमुखी विरौति । शान्तास्थिता शान्तफलप्रदात्री दीप्तास्थिता दीप्तफलं तनोति । प्रचेतसीं सञ्चलितस्य काश्चित् शृगालिका जल्पति दक्षिणेन । यदा तदानीं बहूननर्थान् करोति चार्थानपि हन्ति पुंसः । दिशं प्रचेतःपरिपाल्यमानां नरस्य यस्य व्रजतः शृगाली । वामा विरावं प्रकरोति शान्ता भवन्त्यभिप्रेतफलानि तस्य । यो वारुणीं याति दिशं मनुष्यः शृण्वन् शिवायारटितानि पृष्ठे । गतस्य तस्याशु कृतापभीतिरसंशयं स्याद् द्रविणव्ययश्च । यक्षोत्तरायां चलितस्य पुंसः प्राच्यां शिवा मुञ्चति फेत्कृतानि । भानुः प्रतीच्यां विहितस्थितिश्चेदपेक्षितं सिध्यति तत्क्षणेन । सम्यगुदीचीं चलितस्य पृष्ठे शिवा विरावं पुरश्च यस्य । आस्ते च मध्ये नभसो विवस्वांस्तस्यार्थहानिर्भरत्वं प्रदिष्टम् । कुवेरकाष्ठां प्रति यः प्रयाति ज्वालामुखी चाभिमुखी विरौति । तस्याध्वगस्याभिमतार्थसिद्धिर्भवेन्न सम्पत् पुनरागमश्च । तिष्ठति तीव्रकरो दिशि यस्यां फेत् कुरुते यदि तत्र शृगाली । तद्व्रजतः पथिकस्य भवेतां निश्चयतो धनजीवितनाशौ । दक्षिणतः प्रथमं यदि पश्चाद् वामगता पथिकस्य शृगाली । फेत् कुरुते कुरुते तदवश्यं क्षेमधनाप्तिसुखागमनानि । अथास्य शान्तां ककुभं नरस्य वामा शृगाली यदि वा रटन्ती । तदार्थलाभं वितरत्यवश्यप्रमदं स्वं दक्षिणतो रटन्ती । वामा प्रदीप्ते ककुभः प्रदेशेऽलाभं तथानर्थमुपादिशन्ति । शिवा रटन्ती पथि दक्षिणा तु विपत्यनर्थानथसङ्कटे तु । शान्ते दिगन्ते यदि वा प्रदीप्ते पृष्ठे प्रयाणे प्रतिषेधयित्री । शब्दायमाना तु शिवा पुरस्तात् निमज्जयत्यापदगाधसिन्धौ । वामेऽपसव्ये पुरतोऽथ पृष्ठे पुंसः शिवा जल्पति यत्र तत्र । धावन्ति चौराः प्रथमे विरावे द्वयोर्भवेत्तस्करदर्शनञ्च । अपादरोऽर्थागमनं तृतीये तुर्य्ये क्षतिः पञ्चमकेऽर्थलाभः । दाक्षिण्यसेवादिफलाय षष्ठे भीः सप्तमे स्यादिफलोऽष्टमस्तु । हाहारवं मुञ्चति क्रूरभावा हाहं तु तस्यास्तदुदाहरन्ति । अपसरा वा पथि या यियासोः सा हिमकारापि मनोरथाप्त्यै । रूपस्य यात्रासमये पुरस्तात् प्रयाति चेद्वर्त्मनि वेदयन्ती । कुर्य्याच्छिवा वैरिपराभवं तज्जयश्रियश्चाभिमतं विदध्यात् । कार्य्यान्तरेष्वप्यनुगम्यमाना श्रेयःप्रदा शान्तदिशि प्रदिष्टा । शिवा प्रदीप्ते तु दिशि प्रदेशे समारटन्ती महते भयाय । भयोत्तमे दीप्तदिशि प्रदीप्तैर्नादैर्न चाँ हन्ति भयानि देवी । महान्ति सर्वाण्यपि, शान्तनादा शान्तस्थिता सर्वभयप्रदात्री । यदा च नद्युत्तरमा नराणां शब्दं शृगाली कुरुते कदाचित् । तदुद्भवे तत्परिरक्षणीयं महद्भयं भावि नरेश्वरेभ्यः" । "स्थानस्थितानामपि योगमालां नैमित्तिकानामुपदिश्यते तु । शिवाविरावैरशिवं शिवञ्च सुनिश्चितार्थं सुनिशम्यतेन । करोति फे फे इति सर्वदिक्षु यदा तदा स्थानविघातमुच्चैः । शिवा विधत्ते क्षुधिता स्वसंख्यान् रौद्रान् स्वरान् मुञ्चति चेदुपेताम् । निरन्तरं रौति शिदिक्षु दिक्षु समन्ततश्चाप्यवराहुरा चेत् । अपत्यमोहेन यदा शृगाली न्यस्तस्पृहा वा कथितेह तज्ज्ञैः । स्थित्वा प्रदीप्ते ककुभो विभागे ज्वालामुखी फेत्कुरुतेऽतिरौद्रम् । ग्रामस्य तस्य प्रकरोति नाशं तस्याग्रे या तिष्ठति यस्य मध्ये । ग्रामस्य मध्यं समवाप्य यस्य ज्वालामुखी मुञ्चति फेत्कृतानि । स शून्यतां गच्छति निश्चयेन लोकस्य वा स्यादसुखं प्रभूतम् । ग्रामान्तिके सप्तदिनानि यावत् महाभयोत्पादितफेत्कृतानि । विरौति चेत्तत् कुरुते शृगाली तदाधिलोकस्य भयं

प्रभूतम्। मध्याह्निने यावदहानि पञ्च शिवा समीपे नगरस्य यस्य। विरौति घातं विदधाति तस्य भयस्य वह्निप्रभवं प्रभूतम्। पश्चार्द्धरात्रार्द्धे कथञ्चिदेषा क्रूरारवा व्याहरते शृगाली। यस्यान्तिके तं बहवो हठेन मुष्णन्ति चौरा जनसन्निवेशे। स्थानस्य यस्योपगता समीपं दिनानि पञ्चोच्चरति प्रभाते। स्वरेण रौद्रेण शृगालभार्य्या स्यात्तत्र हानिर्महती नराणाम्। सुरक्षितस्यापि मनुष्यलक्षैर्ग्रामस्य शीघ्रं हरणं विधत्ते। नयं दिनानां दिवसावसाने शिवा रटन्ती परुषस्वरेण। दिक्षारटन्ती सकलाश्च रौद्रं भ्रमन्त्यखिला परितः पुरश्चेत्। शृगालभार्य्या खलु तद्ब्रवीति युद्धं महत्तत्र महाभिघातम्। ज्वालां शिखाञ्चातिरौद्रमदा समाकुला धावति या समन्तात्। कौमारकं या जनयत्यकस्मात् कुर्य्यात्क्रिया सा युवराजघातम्। रोमोद्गमं या जनयत्यकस्मात् फेरुत्यतिक्रूररवा नराणाम्। मूत्रं पुरीषन्तु तुरङ्गमाणां सा सर्वदा स्यादशिवा शिवेह। तरङ्गिणीरोधसि सौम्यरूपांस्त्रीन् पञ्च वा मुञ्चति या निनादान्। शिवां शिवां तां न्वपतिस्तदानीं वन्देत देवीमभिवन्दनीयाम्। श्मशानभूमौ दिनमध्यभागे मध्ये रजन्याः खलु तत्प्रदेशे। या रौति तस्यै बलिमर्घ्ययुक्तं भक्त्या प्रदद्यात् यदि भद्रमिच्छेत्। सर्वेषु कार्य्येषु समुद्यतेषु बलिः शिवायाः विनिवेदनीयः। गृह्णाति यस्मिन् विषयेऽभ्युपेत्य देवी बलिं जल्पति तत्र सिद्धिम्"। "कथ्यते बलिविधानमिदानीं शाकुनागममतेन शिवायाः। दिव्यमन्त्रपरिबाधितदोषं साधिताखिलसमुद्यतकार्य्यम्। शून्यालयं रुद्रगृहं श्मशानं चतुष्पथं मातृगृहं जलान्तम्। सन्ध्यासु निस्त्वरमेवमाद्या बलिप्रदानाय मताः प्रदेशाः। तेषाञ्च मध्यादुचितप्रदेशे विशोधितं मण्डलकं विदध्यात्। पौराणिकश्लोकपरीक्षितायाः सम्यङ् गोर्गोमयमन्तरीक्षात्। अत्यन्तजीर्णदेहाया वन्ध्यायाश्च विशेषतः। रोगार्त्तनवसूतायाः न गोर्गोमयमाहरेत्। तस्मिन् विचित्रं विततं विदध्यात् पिष्टातकेनाष्टदलं सरोजम्। संपूजयेत् तत्र सुराधिपादीन् क्रमेण सर्वानपि लोकपालान्। मध्ये ततः पञ्चभिरभ्युपेता शिवान्विता पिष्टमयी प्रशस्ता। पूज्या शिवा तत्र सुभक्तियोगात् प्रभूतपुष्पाक्षतधूपदीपैः। माल्यगुडौदनमाषकुलत्थं यावकपूपलिकामिषमद्यैः। संस्तिरत नरायणमात्रं मुहुमता। बलिकर्मापि कार्य्यं। प्राप्याष्टमीं वामचतुर्दशीं वा संमन्त्र्य मन्त्रेण च तत्र तत्त्वः। बलिं शिवाया निशि निश्चयेन दद्यात्सुभक्त्या यदि भद्रमिच्छेत्"।

शिवालय न० शिव आलीयतेऽत्र आ+ली–अच्। १श्मशाने हारा०। हृत०। २रक्ततुलस्यां शब्दर०। ३महादेवगृहे च पु०।

शिवालु पु० शिवायालति अल–उन्। शृगाले राजनि०।

शिवास्मृति स्त्री शिवायाः स्मृतिर्यस्याः ५ब०। जयन्तीवृक्षे शब्दच० तन्नामोच्चारणे हि जयन्तीनामकदुर्गायाः स्मरणमिति तस्यास्तथात्वम्।

शिवाह्लाद पु० शिवमाह्लादयति आ+ह्लाद–णिच्–अण्। १बकवृक्षे राजनि०। हृत०। २तत्सन्तोषे च।

शिवाह्वा स्त्री शिवस्येवाह्वा यस्याः। रुद्रजटावृक्षे राजनि०। हृत०। २महादेवाह्वाने च।

शिवि पु० शी–वि नि० न गुणः। १हिंस्रपशौ त्रिका०। २भूर्जवृक्षे ३उशीनरराजसुते नृपभेदे च मेदि०।

शिविका स्त्री शिवं करोति शिव+णिच्–ण्वुल् अत इत्त्वम्। यानभेदे (डुली) अमरः।

शिविर न० शी+किरच् वुक् च। कटके सैन्यनिवासस्थाने। शिविरलक्षणमुक्तं यथा "शिविरं परिखायुक्तमुच्चैःप्राकारवेष्टितम्। युक्तद्वादशद्वारञ्च सिंहद्वारपुरस्कृतम्। युक्तं चित्रैर्विचित्रैश्च सन्निभैश्च कपाटकैः। निषिद्धवृक्षरहितं प्रसिद्धैश्च पुरस्कृतम्। सुलक्षणं चन्द्रवेधं प्राङ्गणञ्च तथैव च"। तत्र विहितनिषिद्धवृक्षादि यथा "आश्रमे नारिकेलस्य स्थितिश्चापि धनप्रदः। शिविरस्य यदीशाने पूर्वे पुत्रप्रदस्तरुः। सर्वत्र मङ्गलार्हश्च तरुराजो मनोहरः। रसालवृक्षः पूर्वस्मिन्नृणां सम्पत्प्रदस्तथा। शुभप्रदश्च सर्वत्र सुरकारो! निशामय। बिल्वश्च पनसश्चैव जम्बीरो बदरी तथा। प्रजाप्रदश्च पूर्वस्मिन् दक्षिणे धनकस्तथा। सम्पत्प्रदश्च सर्वत्र यतो हि वर्द्धते गृही। जम्बुवृक्षश्च दाडिम्बः कदल्याम्रातकस्तथा। बन्धुदश्च पूर्वस्मिन् दक्षिणे मित्रदस्तथा। सर्वत्र शुभदश्चैव धनपुत्रशुभप्रदः। हर्षप्रदो गुवाकश्च दक्षिणे पश्चिमे तथा। ईशाने सुखदश्चैव सर्वत्रैव निशामय। सर्वत्र चम्पकः शुद्धो भुवि भद्रप्रदस्तथा। अलाबुश्चापि कुष्माण्डं मायाम्बुश्च सुकाशकः। खर्जुरी कर्कटी चापि शिविरे मङ्गलप्रदाः। बालूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदाः।। खताफलञ्च शुभदं सर्वं सर्वत्र निश्चि-

नम्। प्रशस्तं कथितं कान्ते! निषिद्धञ्च निशामय। वन्यवृक्षा निषिद्धाश्च शिबिरे नगरेऽपि च। वटो निषिद्धः शिबिरे नित्यं चौरभयं ततः। नगरेषु प्रविष्टश्च दर्श-नात् पुण्यदस्तथा। हे कान्ते! तिन्तिडीवृक्षो यत्नात् परिवर्जयेत्। करेण धनहानिः स्यात् प्रजाहानिर्भवेत् ध्रुवम्। शिबिरेऽतिनिषिद्धश्च नगरे किञ्चिदेव च। न निषिद्धः प्रविष्टश्च ग्रामेषु नगरेषु च। इक्षुश्च चणका-दीनां धान्यस्य मङ्गलप्रदम्। ग्रामेषु नगरे चापि शिबिरे च तथैव। इक्षुदण्डश्च शुभदः सततं शुभदस्तथा। क्रमुकश्च शिरीषश्च कदम्बश्च शुभप्रदाः॥ कञ्ची हरिद्रा शुभदा शुभदार्द्रकजातया। हरीतकी च शुभदा ग्रा-मेषु नगरेषु च। न चाम्ली भद्रदा नित्यं तथा चाम-लकी ध्रुवम्। गजानामपि शुभदमश्वानाञ्च तथैव च। कल्याणसुत्रैःश्चवतां वासो स्थापनकारिणाम्। न शुभप्रदमन्येषामुष्ट्रकारणं परम्। वानराणां नरा-णाञ्च गर्दभानां गवामपि। कुक्कुराणां शृगालानां मार्जाराणामभद्रकम्। भेटकानां शूकराणां सर्वेषाञ्च शुभप्रदम्। ईशाने चापि पूर्वस्मिन् पश्चिमे च तथोत्तरे। शिबिरस्य जलं भद्रमन्यत्राशुभमेव च। दीर्घे प्रस्थे समानञ्च न कुर्य्यान्मन्दिरं बुधः। चतुरस्रे गृहे कान्ते! गृहिणां धननाशनम्। दीर्घप्रस्थः परिमितो नैलाङ्के-नापि संस्कृतः। शून्येन रहितं भद्रं शून्यं शून्यप्रदं नृणाम्। प्रस्थे हस्तद्वयात् पूर्वं दीर्घे हस्तत्रयं तथा। गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च। न मध्य-देशे कर्त्तव्यं किञ्चिन्न्यूनाधिके शुभम्। चतुरस्रं चन्द्र-वेधं शिबिरं मङ्गलप्रदम्। अभद्रं सूर्य्यवेधञ्च प्राकारस्य तथैव च। शिबिराभ्यन्तरे भद्रा स्थापिता तुलसी नृणाम्। धनपुत्रप्रदात्री च पुण्यदा हरिभक्तिदा। प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत्। मालती यूथिका कुन्दो माधवी केतकी तथा। नागेश्वरं मल्लिका च काञ्चनं बकुलं शुभम्। अपराजिता च शुभदा तेषा-मुद्यानमीप्सितम्। पूर्वे च दक्षिणे चैव शुभदं नात्र संशयः। अर्द्धं षोडशहस्तेभ्यो नैवं कुर्य्याद् गृहं गृही। ऊर्द्ध्वं विंशतिहस्तेभ्यः प्राकारं न शुभ-प्रदम्। कुम्भकारं तैलकारं स्वर्णकारञ्च हीरकम्। वाटीमूले ग्राममध्ये न कुर्य्यात् स्थायिनं बुधः। ब्राह्मणं क्षत्रियं वैश्यं सच्छूद्रं गणकं शुभम्। भट्टं वैद्यं पुष्प-कारं स्थापयेत् शिबिरान्तिके। प्रस्थे च परिमाणानां शतहस्तं प्रशस्तकम्। परितः शिबिराणाञ्च गम्भीरं दशहस्तकम्। सङ्केतपूर्वकञ्चैव परिखाद्वारमीप्सितम्। मनोरमञ्च मित्रस्य गम्यमेव सुखेन च। शाल्मलीनां तिन्तिडीनां हिन्तालानां तथैव च। निम्बानां सिन्धु-वाराणां उडुम्बराणामभद्रकम्। धुस्तूराणां वटानाञ्चा-प्येरण्डानामवाञ्छितम्। एतेषामतिरिक्तानां शिबिरे काननमीप्सितम्। इक्षञ्च वज्रहस्तकं दूरतो वर्जयेद् बुधः। पुत्रदारधनं हन्यादित्याह कमलोद्भवः" ब्रह्म-वै० ख० १०२अ०।

शिवेष्ट पु० ६त०। १बकुले २दूर्वायां स्त्री राजनि०। ३महादेवप्रिये त्रि०। [याप्ययाने हारा०।

शिवीरथ शिवेर्भुजङ्गस्य ई: शोभा यत्र तादृशो रथः।

शिशिर न० शश–किरच् नि०। १हिमे माघफाल्गुनमास-द्वयात्मके २ऋतुभेदे अमरः। तत्र ऋतौ वर्णादिवस्तु नि "करीषः धूमः कुन्दः पद्मदाहः शिशिरोत्कर्षः" कविक०ल० ३शीतले स्पर्शे च न० ४तद्वति त्रि० अमरः। [च।

शिशु पु० शो-कु सन्वद्भावः द्वित्वम्। १बालके अमरः २स्वल्पे

शिशुक पुंस्त्री० शिशुरिव इवार्थे कन्। १जलजन्तुभेदे (शुशुक) राजनि० स्त्रियां ङीप्। २बालके मेदि०। ३वृक्षभेदे हेमच० "[illegible] शिशुस्तावत् यावदष्टौ समा वयः। स हि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शकः। भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथाऽनृते। तस्मिन् काले न दोषः स्यात् स यावन्नोपनीयते" मनुः। [शिन्दमा०।

शिशुगन्धा स्त्री शिशुः स्वल्पो गन्धो यस्याः। मल्लिकाभेदे

शिशुचान्द्रायण न० "चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः। चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम्" मनूक्ते व्रते। [ताऽप्यत्र स्त्री।

शिशुत्व न० ६त०। शिशोर्भावः त्व। वाल्ये तल्। शिशु-

शिशुपाल पु० चेदिदेशीयराजभेदे दमघोषात्मजे त्रिका०।

शिशुपालहन् पु० शिशुपालं हतवान् हन–भूते क्विप्। श्रीकृष्णे हेमच०।

शिशुमार पुंस्त्री० शिशुं मारयति मृ–णिच्। १जलजन्तुभेदे अमरः स्त्रियां ङीप्। गगनस्थे २ताराचक्रभेदे च "शिशुमारस्तु यः प्रोक्तः स ध्रुवो यत्र तिष्ठति। सन्नि-वेशञ्च तस्यापि शृणुष्व मुनिसत्तम!। यदह्ना कुरुते पापं दृष्ट्वा तन्निशि मुच्यते। तावत्यश्चैव तारास्ताः शिशुमारा-श्रिता दिवि। तावन्त्येव तु वर्षाणि जीवत्यभ्यधिकानि च। उत्तानपादस्तस्याथ विज्ञेयो ह्युत्तरो हनुः। यज्ञो-

ऽन्तरश्च विज्ञेयो धर्मो मूर्द्धानमाश्रितः। हृदि नारायणश्चास्ते अश्विनौ पूर्वपादयोः। वरुणश्चार्य्यमा चैव पश्चिमे तस्य सक्थिनी। शिश्ने संवत्सरस्तस्य मित्रोऽपानं समाश्रितः। पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोऽथ ततो ध्रुवः। तारकाः शिशुमारस्य नास्तमेति चतुष्टयम्" विष्णुपु॰ २अं॰ १२अ॰। भाग॰ २३अ॰ अन्यथोक्तं यथा "केचिदेतत् ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति। यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति। पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः यस्य दक्षिणावर्त्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे नक्षत्राणि उपकल्पयन्ति। दक्षिणानि तु सव्ये यथा शिशुमारस्य कुण्डलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति। पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः। पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योराद्राश्लेषा च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामपार्श्वयोस्त्रिषु युञ्जीत। तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्वे प्रातिलोम्येन प्रतियुञ्जीत। शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत्। उत्तराहनावगस्त्यः अधराहनौ यमः मुखे चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः। एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपम् अहरहः सन्ध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत"।

शिशुवाह पुस्त्री॰ शिशुं वहति वह-ण्वुल्। वनच्छागे हेमच॰ स्त्रियां ङीष्। शिशुवाहोऽस्य। शिशुवाह्य तत्रार्थे त्रिका॰

शिश्न पु॰ शश-नक् नि॰। मेढ्रे पुंश्चिह्नभेदे अमरः।

शिश्विदान त्रि॰ श्विद्-कानच् द्वित्वम्। पापकारके अमरः

शिष वधे भ्वा॰ पर॰ सक॰ सेट्। शेषति अशेषीत्।

शिष परिशेषीकरणे वा चु॰ उभ॰ पक्षे भ्वा॰ पर॰सक॰सेट्। शेषयति ते शेषति अशिशिषत् त अशेषीत्। [शेषः।

शिष विशेषे रुधा॰पर॰सक॰अनिट्। शिनष्टि लृदित् अशिषत्

शिष्ट त्रि॰ शास-क्त शिष-क्त वा। १शान्ते २वेदवाक्ये विश्वासयुते ३सुबोधे ४धीरे च "न पाणिपादचपलो न नेत्रचपलो मुनिः। न च वागङ्गचपल इति शिष्टस्य लक्षणम्" भा॰आनु॰ "धर्मो नातिगतो येस्तु वेदः स परिवृंहितः। ते शिष्टा ब्रह्मणा प्रोक्ता नित्यमात्मगुणान्विताः" कूर्म॰ उप॰ २४अ॰। "विशेषशब्दनिष्ठस्तु शेषः शिष्टः प्रकीर्त्त्यते। मन्वन्तरेषु ये शिष्टाः इह तिष्ठन्ति धार्मिकाः। मनुः सप्तर्षयश्चैव लोकसन्तानकारणात्। तिष्ठन्तीह च धर्मार्थं तान् शिष्टान् परिचक्षते। तैः शिष्टैः स्थापितो धर्मः स्थाप्यते वै युगे युगे" मत्स्यपु॰ १२० अ॰। ५कृतशासने ६अवशिष्टे च।

शिष्टाचार पु॰ शिष्टानामाचारः। [illegible] "ततः स्मार्त्तः स्मृतो धर्मो वर्णाश्रमविभागशः। एवं वै द्विविधो धर्मः शिष्टाचारः स उच्यते। त्रयी वार्त्ता दण्डनीतिः प्रजा वर्णाश्रमेज्यया। शिष्टैराचर्य्यते यस्मात् शिष्टाचारः स शाश्वतः। दानं सत्यं तपोऽलोभो विद्येज्या पूजनं दमः। अष्टौ तानि चरित्राणि शिष्टाचारस्य लक्षणम्। शिष्टमाचरन्त्येनं मनुः सप्तर्षयश्च ये। मन्वन्तरेषु सर्वेषु शिष्टाचारस्ततः स्मृतः। श्रुतिस्मृतिभ्यां विहितो धर्मो वर्णाश्रमात्मकः। शिष्टाचारविरुद्धस्तु धर्मः स साधुसम्मतः" मत्स्यपु॰ १२५अ॰। "आचारश्चैव साधूनामिति" मनुना तस्य धर्मे प्रामाण्यमुक्तं स च वेदाविरुद्ध एव प्रमाणम् श्रुतिस्मृत्योर्भिन्नविषयत्वे सदाचारेण तत्र धर्मनिर्णयः। श्रुतिविरोधे स्मृतेरप्रामाण्यवत् स्मृतिविरोधे सदाचारस्य न धर्मनिर्णायकत्वम्। तेन दाक्षिणात्यानां मातुलकन्याविवाहस्य शिष्टैराचर्य्यमाणत्वेऽपि न प्रमाणता। तदेतत् "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानं" जैमि॰ सूत्रेण निर्णीतम्। वशिष्ठेनापि "तदभावे शिष्टाचारः प्रमाणम्" इत्युक्तम्। ततश्च शिष्टाचारेण मूलस्मृतिरनुमीयते यथा होलकाद्याचारात्। ततः स्मृत्या मूलश्रुतिरनुमातव्येति अधिकरणमाला। अत एव अविगीतशिष्टाचारपरम्पराप्राप्तं ग्रन्थादौ मङ्गलाचरणं मङ्गलवादादौ व्यवस्थापितम्।

शिष्टि स्त्री शास-क्तिन्। १आज्ञायां २शासने अमरः। ३ताड़ने च "शिष्यशिष्टिरवधेन" स्मृतिः।

शिष्य त्रि॰ शास-क्यप्। १शिक्षणीये २छात्रे अमरः ३उपदेश्ये च। शिष्यलक्षणादि तन्त्रसा॰ उक्तं यथा

"शान्तो विनीतः शुद्धात्मा श्रद्धावान् धारणक्षमः। समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो यती। एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा। गुरुता शिष्यता वापि तयोर्वत्सरवासतः" तथा चोक्तं सारसंग्रहे "सद्॰

गुरुः स्वाश्रितं शिष्यं वर्षनात्म प्रतीक्षयेत् । वर्षैकेन भवेद्योग्यो विप्रोगुणसमन्वितः । वर्षद्वयेन राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः । चतुर्भिर्वत्सरैः शूद्रः कथिता शिष्ययोग्यता" तत्रैव "राज्ञि चामात्यजो दोषः पत्नी पापं स्वभर्त्तरि । तथा शिष्यार्जितं पापं गुरुः प्राप्नोति निश्चितम्" देव्यागमे शिववाक्यं "गुरुशय्यासनं यानं पादुकोपानहं पीठम् । स्नानोदकं तथा छायां लङ्घयेन्न कदाचन । गुरोरग्रे पृथक् पूजामौद्धत्यञ्च विवर्जयेत् । दीक्षां व्याख्यां प्रभुत्वञ्च गुरोरग्रे परित्यजेत्" ।

अथ निषिद्धशिष्याः अगस्त्यसंहितायामुक्ता यथा "अलसा मलिनाः क्लिष्टाः दाम्भिकाः कृपणास्तथा । दरिद्रा रोगिणो रुष्टा रागिणो भोगलालसाः । असूयामत्सरग्रस्तास्तथा परुषवादिनः । अन्यायोपार्जितधनाः परदाररताश्च ये । अहम्मताश्च ये कष्टदस्तयः पिशुनाः खलाः । बह्वाशिनः क्रूरचेष्टा दुरात्मानश्च निन्दिताः । इत्येवमादयोऽप्यन्ये पापिष्ठाः पुरुषाधमाः । एवंभूताः परित्याज्या शिष्यत्वेनोपकल्पिताः । पापिने क्रूरचेष्टाय कृपणाय तथैव च । दीनायाचारशून्याय मन्त्रद्वेषकराय च । निन्दकाय च मूर्खाय तीर्थद्वेषपराय च । भक्तिहीनाय देवेशि ! न देया मन्त्रकस्य च" "आचारे स्थापयेद्यस्तु स आचार्य उदाहृतः । य आचार्यपराधीनस्तद्वाक्यं धार्यते हृदि । शासने स्थिरवृत्तिश्च शिष्यः सद्भिरुदाहृतः । एवं लक्षणसंयुक्तं शिष्यं सद्गुणान्वितम् । अध्यापयेद्विधानेन मन्त्ररत्नमनुत्तमम्" पद्मपु०उ० २५ अ० ।

शि(सि)ह्लक पु० सिह–क्वुन् नि० सस्य शो वा । (शिलारस) गन्धद्रव्यभेदे शब्दच० । स्वार्थे क । तत्रैव अमरः ।

शी शयने अदा०आत्म०अक० सेट् । शेते शेरते अशयिष्ट । शीङ् वर्त्तमाने क्त शयितः । शयित्वा ।

शी स्त्री शी–भावे क्विप् । १शयने २शान्तौ च शब्दर० ।

शीक सेके सर्पणे च भ्वा०आत्म० सक० सेट् । शीकते अशीकिष्ट । ऋदित् चङि न ह्रस्वः ।

शीक आमर्षे सेके च वा चु०उभ०पक्षे भ्वा०पर०सक० सेट् । शीकयति ते शीकति अशीशिकत्-त अशीकीत् ।

शीकर न० शीक–अरन् । १सरलद्रवे २वायौ पु० मेदि० । ३जलकणे अमरः ।

शीघ्र न० शिघि–रक् पृषो० । १विलम्बाभावे २त्वरिते च ३तद्वति त्रि० अमरः । ४दन्तीवृक्षे स्त्री राजनि० ।

शीघ्रचेतन पुंस्त्री० शीघ्रा चेतना यस्य । १कुक्कुरे शब्दमा० स्त्रियां ङीष् । २द्रुतचेतनायुते त्रि० ५त० । ४अर्कटके पु० । ५अतिबलायां स्त्री राजनि० । [शब्दच० ।

शीघ्रजन्मन् पु०शीघ्रं जन्म यस्य । करञ्जभेदे (काँटाकरमचा)

शीघ्रपुष्प पु० शीघ्रं पुष्पं यस्य । वकवृक्षे राजनि० ।

शीघ्रवेधिन् पु० शीघ्रं विध्यति विध–णिनि । शीघ्रलक्ष्यवेधनकर्त्तरि हेमच० ।

शीत न०श्यै–क्त स्पर्शे सम्प्र०। १शीतले स्पर्शे २जले शब्दमा० ३हिमे च अमरः ४त्वचे राजनि० ५बहुवारवृक्षे ६वेतसवृक्षे च पु० अमरः । ७असनपर्ण्यां शब्दर०। ८पर्पटे ९निम्बे १०कर्पूरे राजनि०। ११हिमर्त्तौ च पु०१२शीतस्पर्शयुते त्रि० अमरः । १३अलसे त्रि० मेदि० । १४क्वथिते शब्दच० ।

शीतक पु०शीतमिव करोति कृ–ड । १दीर्घसूत्रिणि आलस्यहेतुना कार्याकरणाय शीतबाधामभिनीय २सुस्थिते मेदि० । शीत+स्वार्थे क । ३शीतपदार्थे ४शीतकाले मेदि० ५वृश्चिके शब्दमा० ६असनपर्ण्यां शब्दर० ।

शीतकर पु० शीतः शीतलः करो यस्य । १चन्द्रे २कर्पूरे च शीतकिरणादयोऽप्यत्र त्रि० । शीत करोति कृ–अच् । ३शीतकारके ।

शीतकाल पु०६त० । हिमर्त्तौ मार्गशीर्षमासद्वयात्मके काले

शीतकुम्भ पु० शीतं स्कुभ्नाति स्कुभ–अच् नि०। १करवीरे रत्नमा०। २जलजवृक्षभेदे स्त्री राजनि० गौरा० ङीष् ।

शीतकृच्छ्र पु० "त्र्यहं शीतं पिबेत् तोयं त्र्यहं शीतं पयः पिबेत् । त्र्यहं शीतं घृतं पीत्वा वायुभक्षपरस्त्र्यहम्" यमोक्ते व्रते ।

शीतक्षार न० कर्म० । श्वेतटङ्कणे राजनि० ।

शीतगन्ध न०शीतः शीतलः गन्धो यस्य । श्वेतचन्दने राजनि०

शीतगु पु० शीता गावः किरणाः यस्य । १चन्द्रे २कर्पूरे च

शीतचम्पक पु०शीतश्चम्पक इव । १दर्पणे २प्रदीपे च मेदि०

शीतपर्णी स्त्री शीत पर्णं यस्याः ङीप् । अर्कपर्णिकायां रत्नमा० ।

शीतपल्लवा स्त्री शीतः पल्लवो यस्याः । भूमिजम्ब्वां रत्नमा०

शीतपाकिनी स्त्री शीते पाकोऽस्त्यस्याः इनि ङीप । काकोल्यां शब्दच० ।

शीतपाकी स्त्री शीतेन पाको यस्याः ङीप् । १वाट्यालके शब्दच० । २काकोल्यां राजनि० ।

शीतपुष्प पु० शीतं शीतवीर्यकरं पुष्पं यस्याः । १शिरोषवृक्षे

राजनि० २अतिबलायां स्त्री टाप् । शैलेये न० चर्क्र-वृक्षे पु० राजनि० ।

शीतप्रभ पु० शीतस्य हिमस्येव प्रभा यस्य । कर्पूरे राजनि०

शीतप्रिय पु० ६त० । पर्पटे राजनि० । [च राजनि० ।

शीतफल पु० शीतं शीतवीर्यकरं फलमस्य । १उदुम्बरे २शेलौ

शीतबला स्त्री शीतं बलं वीर्यं यस्याः ५ब० । महासम-ङ्गायां राजनि० । [च शब्दर० ।

शीतभानु पु० शीताः शीतला भानवोऽस्य । १चन्द्रे २कर्पूरे

शीतभीरु स्त्री ५त० । १मल्लिकायाम् अमरः । २शीतभीते त्रि०

शीतमञ्जरी स्त्री शीतकाले मञ्जरी यस्याः न कप् । शेफा-लिकायां राजनि० ;

शीतमयूख पु० शीता मयूखा यस्य । १चन्द्रे २कर्पूरे च मेदि० । शीतमरीच्यादयोऽप्यत्र शब्दर० ।

शीतमूलक न० शीतं शीतवीर्यकरं मूलमस्य कप् । १उशीरे (वेणारमूल) राजनि० । २शीतलमूलयुते त्रि० ।

शीतरश्मि पु० शीता रश्मयोऽस्य । १चन्द्रे २कर्पूरे च ज्यो०त

शीतल पु० शीतं लाति ला-क शीतमस्त्यस्य लच् वा । १शी-तस्पर्शे २तद्वति त्रि० । ३मलयोद्भवे चन्दने न० ४शैलेये-५पुष्पकासीसे च मेदि० । ६पद्मके ७मौक्तिके राजनि० । ८वीरणमूले न० शब्दच० । ९असनपर्ण्याम् अमरः । १०क-र्णिकारवृक्षे ११चम्पके १२राले १३चन्द्रे १४कर्पूरे पु० राजनि० । [पु० राजनि० ।

शीतलक न० शीतलमिव इवार्थे कन् । १श्वेतोत्पले २मरुवके

शीतलच्छद पु० शीतलः शीतलस्पर्शवान् छदोऽस्य । १चम्पके-राजनि० । कर्म० । २शीतले पत्रे पु० ।

शीतलजल न० शीतलं जलं यस्मात् ५ब० । १उत्पले राजनि० । कर्म० । २शीतले वारिणि न० ।

शीतलवातक पु० शीतलो वातो धातुभेदो यस्मात् कप् । असनपर्ण्यां शब्दच० । तत्सेवने हि वायोः शीतलता ।

शीतला स्त्री १देवीभेदे "नमामि शीतलां देवीं रासभस्थां दिगम्बरीम् । मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम्" स्कान्दपु० । सा च विस्फोटकभेदनाशिनी । २अश्मजहक-भेदे रत्नमा० तत्र ङीप् । ३कुट्टिम्बिनीवृक्षे ४आराम-शीतलायां ५वालुकायां स्त्री राजनि० टाप् ।

शीतवल्क पु० शीतः शीतकरः वल्कोऽस्य । उदुम्बरे राजनि०

शीतवीर्य्यक पु० शीतं शीतलकर वीर्यं यस्मात् ५ब० । कप् । १प्लक्षवृक्षे राजनि० । २शीतलवीर्य्यकरे त्रि० ।

शीतशिव न० शीतं शीतलमपि शिवम् । १सैन्धवलवणे २शैले-यगन्धद्रव्ये अमरः । ३मिश्रेयायां ४शमीवृक्षे च स्त्री राजनि० ५सक्तुफलवृक्षे मेदि० ६मधुरिकायां पु० अमरः ।

शीतसह पु० शीतं सहते सह-अच् । १पीलुवृक्षे शब्दच० । २नीलसिन्धुवारे ३वासन्त्यां स्त्री राजनि० टाप् ।

शीता स्त्री श्यै-क्त सम्प्र० । १लाङ्गलपद्धतौ भरतः २राम-पत्न्यां शब्दच० ३अतिबलायां ४कुट्टिम्बिन्यां ५दूर्वायां ६शिल्पिकातृणे राजनि० ।

शीतांशु पु० शीताः अंशवो यस्य । १चन्द्रे २कर्पूरे च राजनि

शीताङ्गी स्त्री शीतमङ्गमस्याः ङीष् । १हंसपदीवृक्षे रा-जनि० २शीतलदेहयुते त्रि० स्त्रियां ङीष ।

शीताद पु० शीतमाद्रियते आ+दा-क । दन्तमूलगते रोगभेदे दन्तरोगशब्दे २४६६ पृ० दृश्यम् ।

शीतार्त्त त्रि० शीतेन ऋतः । शीतालौ जटा० ।

शीतालु त्रि०शीत+असह्यार्थे आलुच् । शीतबाधायुक्ते जटा० ।

शीतावला स्त्री शीतमाबलयति आ+बल-णिच्-अच् । महासमङ्गायां राजनि० ।

शीताश्मन् पु० कर्म० । चन्द्रकान्तमणौ राजनि० ।

शीतीभाव पु० शीत+अभूततद्भावे च्वि-भू-भावे घञ् । मोक्षे त्रिका० । तत्र तापत्रयशून्यत्वात्तथात्वम् ।

शीतोत्तम न० शीतमुत्तमं यत्र । जले शब्दच० ।

शीत्कार पु० शीदित्यस्य कारः शीत्+कृ-घञ् । स्त्रीणां रति काले अव्यक्ते ध्वनिभेदे जटा० । [अमरः ।

शी(सी)त्य त्रि०शी(सी)ताम् अर्हति यत् । हलकृष्टे क्षेत्रादौ

शीधु पु०न० । शी-धुक् । इक्षुरसजाते मद्यभेदे अमरः ।

शीधुगन्ध पु० शीधोरिव गन्धोऽस्य । बकुलवृक्षे त्रिका० ।

शीन त्रि० श्यै-क्त सम्प्र० तस्य नः । १घनीभूते घृतादौ २मूर्खे ३अजगरे च पु० मेदि० । [शीभते अशीभिष्ट ।

शीभ कत्थने भ्वा० आत्म०सक० सेट् ऋदित् चङि न ह्रस्वः ।

शीर पुं०स्त्री० शी-रक् । अजगरसर्पे शब्दच० स्त्रियां ङीष ।

शीरिन् पु० शीरस्तदाकारोऽस्त्यस्य । हरिदर्भे राजनि० ।

शीर्ण त्रि० शॄ-क्त । १कृशे २शुष्कताप्राप्ते च मेदि० ३स्थौ-णेयके भावप्र० ।

शीर्णपत्र पु० शीर्णं पत्रमस्य । १कर्णिकारवृक्षे शब्दच० । २निम्बे ३पट्टिकालोध्रे च राजनि० ४विशीर्णपत्रयुक्ते त्रि० । कर्म० । ५विशीर्णे पर्णे न० ।

शीर्णपर्ण पु० शीर्णं पर्णमस्य । १निम्बे राजनि० २विशी-र्णपत्रयुक्ते त्रि० कर्म० । ३विशीर्णे पत्रे न० ।

शीर्णपाद पु० शीर्णः पादोऽस्य भाद्रपापात् । शनैश्चरे

त्रिका० तत्कथा छायाशब्दे २९८६ पृ० दृश्या। शीर्णाङ्घ्रि पञ्चतयोऽप्यत्र।

शीर्णपुष्पी स्त्री शीर्णं पुष्पमस्याः ङीप्। अवाक्पुष्प्यां शब्दच० वा कप्। शीर्णपुष्पिका तत्रैव।

शीर्णमाला स्त्री शीर्णानां माला यत्र। १पृश्निपर्ण्यां शब्दच०। कर्म०। २विशीर्णे माल्ये।

शीर्णवृन्त न०शीर्णं वृन्तमस्य। (तरमुज) फलवृक्षे शब्दच०।

शीर्वि त्रि० शॄ–क्विन् न वृद्धिः। १अपकारके २हिंसके च सि०कौ०।

शीर्ष न० शिरस्+पृषो० शीर्षादेशः शॄ–क सुक् च वा। १मस्तके अमरः। २कृष्णागुरुणि राजनि०। यमादौ शीर्षः शीर्ष्णौ इत्यादि।

शीर्षक न० शीर्षं कायति कै–क। १शिरस्त्राणे (टोपर) २शिरोऽस्थि राजनि०। ३जयपराजयपत्रव्यवहारभेदे "शीर्षकस्थेऽभियोक्तरि" याज्ञ० स्मृतिः। स्वार्थे क। ४शीर्षके न०। तेन कायति कै–क। ५राहुग्रहे शब्दर०

शीर्षच्छेद्य(दिक) त्रि० शीर्षच्छेदमर्हति यत् ठञ् वा। वध्ये "शीर्षच्छेद्यमतोऽहं त्वाम्" भट्टिः।

शीर्षण्य पु० शीर्षं बध्यते शीर्ष+यत् शीर्षन्नादेशः। १शिरस्त्राणे अमरः। शीर्षे भवः यत्। २विशदकेशे पु०अमरः ३विशदकेशयुते त्रि०।

शीर्षरक्ष न० शीर्षं रक्षति रक्ष–अण्। शिरस्त्राणे हारा०।

शील समाधौ भ्वा० पर०सक० सेट्। शीलति अशीलीत्। "सरसीः परिशीलितुं मया" नैषधम्। समाधिरत्र मैथा तत्र सक० प्रवृत्तिभेदो वा तत्र अक० क्तात् वर्त्तमाने क्त। [शीलयति ते अशिशीलत् त।

शील अभ्यासे अतिशायने च चुरा० उभ० सक० सेट्।

शील न० शील–अच्। १स्वभावे २वृत्ते मेदि० ३चरित्रभेदे ४अजगरसर्पे पुंस्त्री०शब्दच० स्त्रियां ङीप्। सद्वृत्तशीलञ्च त्रयोदशविधं हारीतोक्तं यथा "ब्रह्मण्यता१ देवपितृभक्तता२ सौम्यता३ अपरोपतापिता४ अनसूयता५ मृदुता६ अपारुष्य७ मैत्रता८ प्रियवादिता९ कृतज्ञता१० शरण्यता११ कारुण्यता१२ प्रशान्तिश्चेति १३त्रयोदशविधं शीलम्। ४रागद्वेषपरित्यागे भट्टो० गोविन्दराजः। ५कौण्डिन्यमुनिपत्न्यां स्त्री।

शीलन न० शील–ल्युट्। १अभ्यासे २अतिशायने ३प्रवर्त्तने च

शीलित त्रि० शील–क्त। १अभ्यस्ते २पीर्ये च त्रिका०।

शीवन् पु० शी–क्वनिप्। अजगरसर्पे सि०कौ०

शुक गतौ भ्वा० पर० सक० सेट्। शोकति अशोकीत्।

शुक न० शुक–क। १ग्रन्थिपर्णे अमरः। २वस्त्रे ३वस्त्राञ्चले ४शिरस्त्राणे हेमच०। ५व्यासस्रुते "पराशरकुलोत्पन्नः शुको नाम महायशाः। व्यासादरण्यां संभूतो विधूमोऽग्निरिव ज्वलन्" वह्निपु०। (शुया) इति ख्याते ६खगभेदे पु० स्त्री स्त्रियां ङीष्। शुकदर्शनशुभादिकं वसन्तराजशाकुने उक्तं यथा "वामः पठन् राजशुकः प्रयाणे शुभं भवेद् दक्षिणतः प्रवेशे। वनेचराः काष्ठशुकाः प्रयाहः सुर्सिद्धिदाः संमुखमापतन्तः"। ७रावणमन्त्रिभेदे ८शिरीषवृक्षे (घेयाकाँटा) ९वृक्षे रत्नमा० १०कश्यपपत्न्यास्ताम्रायाः, कन्याभेदे स्त्री ङीष्। "काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम्। ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुताः" भा०आ० ६६अ०।

शुकच्छद न०शुकस्य छद इव छदो दलमस्य। ग्रन्थिपर्णे जटा०

शुकजिह्वा स्त्री शुकस्य जिह्वेव पर्णमस्याः। (शुयाठोँटी) वृक्षे रत्नमा०। [इयोऽप्यत्र।

शुकतरु पु० शुकप्रियस्तरुः। शिरीषवृक्षे रत्नमा०। शुकद्रुमा-

शुकदेव पु० व्यासपुत्रे मुनिभेदे। [शुकजिह्वाशब्दे रत्नमा०।

शुकनामन् पु० शुकः शुकजिह्वा नामास्य मध्यपदलोपः।

शुकनाशन पु० शुकं नाशयति नश–णिच्-ल्यु। दद्रुघ्ने वृक्षे राजनि०।

शुकनास पु० शुकस्य नासेव पत्रमस्याः। श्योनाकवृक्षे अमरः। २शुकतुल्यनासायुक्ते त्रि०। ३कादम्बरीग्रन्थप्रसिद्धे तारापीडनृपमन्त्रिभेदे पु०। [शब्दच०।

शुकपिण्डी पु० शुकानां प्रिया पिण्डीव। शुकशिम्ब्यां

शुकपुच्छ पु० शुकस्य पुच्छ इव। १गन्धके हेमच०। हृत०। २शुकस्य पुच्छे पु०। [राजनि०।

शुकपुष्प पु० शुकइव हरित् पुष्पमस्य। १शिरीषवृक्षे

शुकप्रिय पु० ६त०। १शिरीषवृक्षे भावप्र०। २जम्ब्वां स्त्री राजनि०।

शुकफल पु०शुकइव फलमस्य। अर्कवृक्षे राजनि०। [शब्दच०

शुकबर्ह न० शुकस्येव बर्होऽस्य। गन्धद्रव्यभेदे (गँठियाला)

शुकवल्लभ पु० ६त०। १दाडिमवृक्षे राजनि० ६त०। तस्य २प्रिये त्रि०। [शब्दर०।

शुकशि(सि)म्बी स्त्री शुकइव शि(सि)म्बी। कपिकच्छ्वां

शुकादन पु० शुकैरद्यते अद–ल्युट्। दाडिमे शब्दच०।

शुकानना स्त्री शुकस्याननमिव पत्रमस्याः। (शुयाठोँटी) वृक्षे रत्नमा०

शुक्तोदर न० शुक्तस्योदरमिव । १तालीशपत्रे राजनि० । ६त० । २शुक्तस्योदरे च ।

शुक्त न० शुच–क्त । १मांसे शब्दच० । २काञ्जिके हारा० । ३अतिपूतद्रवद्रव्यभेदे "कन्दमूलफलादीनि सस्नेहलवणानि च । यद्द्रव्ये अभिषूयन्ते तच्छुक्तमभिधीयते" "शुक्तं तीक्ष्णोष्णलवणं पित्तकृत् कटुकं लघु । रूक्षं तस्युदरानाह्याथाभींविषकृन्तनुत्" राजनि० "शुक्तं यन्मधुरं कालवशादम्लत्वमागतम्" इत्युक्ते ४पदार्थे च । शुक्तभक्षणनिषेधो यथा "अपूपाश्च करम्भाश्च धानावटकसक्तवः । शाकं मांसमपूपं च सूपं कृशरमेव च । यवागूः पायसञ्चैव यच्चान्यत् स्नेहसम्भवम् । सर्वं पर्युषितं भक्ष्यं शुक्तञ्च परिवर्जयेत्" यमः । तत्प्रतिप्रसवो यथा "दधि शुक्तेषु भोक्तव्यं सर्वञ्च दधिसम्भवम्" मनुः । ६निष्ठुरे त्रि० मेदि० ७पूते ८संश्लिष्टे त्रि० विश्वः । ९श्लिष्टे १०निर्जने शब्दच० ११चुक्रिकायां स्त्री शब्दर० ।

शुक्ति स्त्री शुच–क्तिन् । १जलजन्तुभेदे (झिनुक) राजनि० २कपालखण्डे ३शङ्खे ४गन्धनखे ५नख्याम् ६अर्शोरोगे ७अश्वावर्त्तके मेदि० । ८नेत्ररोगभेदे हेमच० । चक्षूरोगशब्दे २८४४ पृ० दृश्यम् । ९कर्षद्वयपरिमाणे शब्दमा० १०चतुष्कर्षमाने वैद्यकम् । ११चुक्रियायाञ्च शब्दर० ।

शुक्तिका स्त्री शुक्तिरिव कन् । (झिनुक) १शुक्तास्फोटे जटा०

शुक्तिज न० शुक्तौ जायते जन–ड । मुक्तायां हेमच० ।

शुक्तिमत् पु० शुक्तिरस्त्यस्य मतुप् । १कुलाचलपर्वतभेदे २नदीभेदे स्त्री ङीप् ।

शुक्र न० शुच–रक् नि० कुत्वम् । १मज्जजाते २चरमधातौ अमरः । ३नेत्ररोगभेदे २८४४ पृ० दृश्यम् । ५दैत्यगुरौ ग्रहभेदे अमरः । ६अग्नौ ७चित्रकवृक्षे ८ज्येष्ठमासे अमरः विष्कम्भादिषु योगेषु मध्ये ९चतुर्विंशे योगे च ज्यो०त० । धातुभेदशुक्रस्योत्पत्तिकारणस्वरूपादिकं भावप्र० उक्तं यथा "रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते । मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रस्य सम्भवः" । "ततः स्थूलो भागो रसो मासेन पुंसां शुक्रं स्त्रीणामार्त्तवं शुक्रञ्च भवति । उक्तञ्च सुश्रुते 'एवं मासेन रसः शुक्रो भवति' 'स्त्रीणाञ्चेति' । चकारात् स्त्रीणामपि शुक्रं भवति । अतएवोक्तं सुश्रुते "योषितोऽपि स्रवत्येव शुक्रं पुंसः समागमे । तत्र गर्भस्य किञ्चित्तु करोतीति न चिन्त्यते" । गर्भस्य शुक्रस्य विकृतस्य तु गर्भस्य कारणं तदपि भवति । अत उक्तम् "यदा नार्यावुपेयातां वृषस्यन्त्यौ कथञ्चन । मुञ्चन्त्यौ शुक्रमन्योऽन्यमनस्थि तत्र जायते" इति । एतेन स्त्रीणां सप्तमो धातुरार्त्तवं शुक्रमपि इति बोधितम् आशयाधिक्यवत् । "स्त्रीणां गर्भोपयोगि स्यादार्त्तवं सर्वसम्मतम् । तासामपि बलं वर्णं शुक्रं पुष्टिं करोति हि" । एवं रस एव केदारकुल्यान्यायेन सर्वान् धातून् पूरयन् मासेन सप्तदशोत्तरेण शुक्रमार्त्तवं च भवतीति सिद्धान्तः । एवं सति आद्यन्नमिति वक्तव्यमेव । ततो मांसं ततो रक्तोत्पत्तेरनन्तरं मांसं जायते रसादेवेत्यर्थः । मांसान्मेदः प्रजायत इति । मांसादनन्तरं मेदः प्रजायते रसादेवेत्यर्थः । मेदसोऽस्थि जायते रसादेवेत्यर्थः । एवं ततो मज्जा अपि शुद्धं शुक्रं सम्भवतीत्यर्थः । रसः शरीरे त्रिधा सञ्चरति । तथा चोक्तम् "रसः शरीरे शब्दार्चिर्जलसन्तानवत् त्रिधा । सञ्चरत्यनुरूपोऽयं नित्यमेव हि देहिनाम्" । अस्यायमभिप्रायः । पुरुषास्तीक्ष्णाग्नयो मध्यमाग्नयो मन्दाग्नयश्च भवन्ति । तत्र तीक्ष्णाग्नीनां स रसः शब्दसन्तानवत् शीघ्रं सञ्चरति । मध्यमाग्नीनामर्चिःसन्तानवन्मध्यवेगेन चरति मन्दाग्नीनां जलसन्तानवन्मन्दं चरति । तेन मासेन रसः शुक्रं भवतीति यदुक्तम् तन्मध्यवेगेन चरति । मन्दाग्नीनां जलसन्तानवन्मन्दं चरति । तेन मासेन रसः शुक्रं भवतीति यदुक्तं तन्मध्यमाग्नीनधिकृत्योक्तम् । दीप्ताग्नीनान्तु रसः किञ्चिन्न्यूनेन मासेन शुक्रं भवति । मन्दाग्नेः किञ्चिदधिकेन मासेनेति सिद्धान्तः । तर्हि वाजीकरणानामौषधीनां किं प्रयोजनमित्याह "वाजीकरिण्य ओषध्यः स्वप्रभावगुणोत्कर्षात् । विरेचयन्ति ताः शुक्रं विरेकिद्रव्यवन्नृणाम्" । वाजीकरिण्यः याभिः ओषधीभिः पुरुषः शुक्राधिक्यात् स्त्रीषु वाजिवत् सामर्थ्यं प्राप्नोति ताः वाजीकरिण्यः स्वप्रभावगुणोत्कर्षात् । तत्र काश्चिदोषध्यः स्वप्रभावाधिक्यात्, काश्चित् स्वगुणाधिक्यात्, काश्चित् स्वप्रभावगुणाधिक्यात् । तत्र सङ्कल्पपादक्षेपविशिष्टकान्तासङ्गादयः स्वप्रभावाधिक्यात् शुक्रं विरेचयन्ति । घृतक्षीरादयः स्वगुणाधिक्यात् । स्निग्धत्वाधिक्यात् माषादयः स्वप्रभावस्निग्धत्वादिगुणाधिक्यात् । वाजीकरण्य इति बहुवचनमाद्यार्थानुवर्त्तनम् । बल्यं बृंहणं जीवनीयगणादयः तद्वद्बोद्धव्याः । विरेचयन्ति स्वप्रभावगुणाधिक्यात् शीघ्रमेव रसाद्युत्पादनपूर्वकं शुक्रं जनयित्वा प्रवर्त्तयन्ति । यत आह "दुग्धं

नाभाव भल्लातफलमज्जाभवानि च। अनेकानि निम्नान्ते रञ्जनानि च रेतसः'। ननु बालानां कथं शुक्रं न दृश्यते इत्यत आह "बालानां शुक्रमस्त्येव किन्तु सौक्ष्म्यान्न दृश्यते। पुष्पाणां मुकुले गन्धो यथा सन्नपि नाप्यते। तेषां तदेव तादृग्गन्धो पुष्टत्वाद्व्यक्तिमेति हि। कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा। रोमराज्यादयः पुंसां नारीणामपि यौवने। जायतेऽत्र च यो भेदो ज्ञेयो व्याख्यानतः स च"। व्याख्यानं यथा पुंसां रोमराजीश्मश्रुप्रभृतयः नारीणान्तु रोमराजीस्तनस्तन्यार्त्तवप्रभृतयः। ननु, चतुरंशो वृद्धस्य धातुवृद्धिं कथं न करोतीत्याह "वार्द्धके वर्द्धमानेन वायुना रसशोषणात्। न तथा धातुवृद्धिः स्यात्ततस्तस्यानिलं जयेत्"। अथ शुक्रस्य स्वरूपमाह "शुक्रं सौम्यं सितं स्निग्धं बलपुष्टिकरं स्मृतम्। गर्भबीजं वपुःसारो जीवस्याश्रय उत्तमः"। जीवस्याश्रय उत्तम इत्याह "जीवो वसति सर्वस्मिन् देहे तत्र विशेषतः। वीर्य्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणात्"। अथ गर्भसञ्जननशुक्रस्य लक्षणमाह "स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च। शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभञ्च तत्"। अथ शुक्रस्य स्थानमाह "यथा पयसि सर्पिस्तु गूढश्चेक्षौ रसो यथा। एवं हि सकले काये शुक्रं तिष्ठति देहिनाम्"। अत्र सर्पिर्दृष्टान्तो बहुशुक्रेऽल्पमथनेन सर्पिःशुक्रयोर्बाभावात्। इक्षुरसदृष्टान्तस्तु स्वल्पशुक्रे पुंसि अतिपीडनेनेक्षुरसशुक्रयोर्बाभावात्। अथ शुक्रस्य क्षरणमार्गमाह "द्व्यङ्गुले दक्षिणे पार्श्वे बस्तिद्वारस्य चाप्यधः। मूत्रस्रोतःपथे शुक्रं पुरुषस्य प्रवर्त्तते"। डल्लणभट्टोऽप्याह "सप्तमी शुक्रधरा द्व्यङ्गुले दक्षिणे पार्श्वे बस्तिद्वारस्य चाप्यधोमूत्रमार्गमाश्रिता सकलशरीरव्यापिनी शुक्रं प्रवर्त्तयतीति। सप्तमी कला। अथ शुक्रक्षरणकारणमाह "तत्सर्वदेहस्थितं शुक्रं प्रसन्नमनसस्तथा। स्त्रीषु व्यायच्छतश्चापि हर्षात्तत् सम्प्रवर्त्तते"। स्त्रीषु रतरूपं व्यायामं कुर्वतः। अन्यच्च "शुक्रं कामेन कामिन्या दर्शनात् स्पर्शनादपि। शब्दसंश्रवणात् ध्यानात् संयोगाच्च प्रवर्त्तते"।

दैत्यगुरोः शुक्रनामकारणं काशीख० १७अ० उक्तं यथा "नन्दिनाऽपहृते शुक्रे गिलिते च पिनाकिना" इत्युपक्रमे "तेन शब्देन महता शुक्रः शम्भूदरे स्थितः। छिद्रान्वेषी भ्रमन् सोऽथ विनिकेतो यथानिलम्। सप्त लोकान् सपातालान् रुद्रदेहे विलोकयन्। ब्रह्मनारायणेन्द्राणां सादित्याप्सरसां तथा। भुवनानि विचित्राणि कुक्षौ प्रमथाकुरम्। स वर्षाणां शतं क्रान्तो भवस्य परितो भ्रमन्। ततः स ददृशे रन्ध्रं शुचेरन्ध्रं खलो यथा। शाम्भवेनाथ योगेन शुक्ररूपेण भार्गवः। चस्कन्द च मनामापि ततो देवेन भाषितः। जठराग्निगते शुक्रे देवोऽपि सुतरां स्थिरः। भूयः श्रेयो भवेद्यस्मै न स्थितो जठरे द्विजः। शुक्रवन्निःसृतो यस्मात्तस्मात्त्वं भृगुनन्दन। कर्मणानेन शुक्रोऽपि मम पुत्रोऽसि गम्यताम्"।

शुक्रपक्षरूपादि बृहज्जातके ग्रहयोन्यध्याये उक्तं दृश्यम्। तत्कक्षादिमानं खगोलशब्दे २४२९पृ० दृश्यम्।

शुक्रकर पु० शुक्रं वीर्यं करोति कृ-अच्। मज्जधातौ हेमच० अस्थिकरशब्दे ५५८पृ० दृश्यम्। वीर्य्यकारके त्रि०।

शुक्रभुज् स्त्री शुक्रं भुङ्क्ते भुज-क्विप्। मयूरजातिस्त्रियां शब्दच०। [अस्थिकरशब्दे तद्धेतुता दृश्या।

शुक्रभू पु० भवत्यस्मात् भू-अपादाने क्विप्। मज्जधातौ शब्दच०।

शुक्रला स्त्री शुक्रं लाति ला-क। [illegible] भरतः।

शुक्रशिष्य पु० ६त०। दैत्ये असुरे अमरः।

शुक्रिय त्रि० शुक्रो देवताऽस्य तस्येदम् वा घ। १शुक्रसम्बन्धिनि २तद्दैवते यजुर्वेदीये "अपं पात्रमि"त्यादिके षट्त्रिंशत्तमे श्यान्त्यध्याये न०।

शुक्ल न० शुच-लक् कुत्वम्। १रजते मेदि०। २नवनीते शब्दच०। ३अक्षिरोगभेदे चक्षूरोगशब्दे २८४४पृ० दृश्यम्। ४श्वेतवर्णे ५श्वेतवर्णयुते त्रि० अमरः। ६शुद्धे च त्रि०। ७विष्कम्भादिषु योगभेदे मेदि०। ८श्वेतैरण्डे राजनि०। १०शुक्लपक्षे ज्यो०त०। "तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि। चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः" षट्त्रिंशन्मतम्। शुक्लवर्णपदार्थास्तु कविकल्पलतायां कतिचित् उक्ता यथा "सुधांशुरुच्चैःश्रवाः शम्भुः कीर्त्तिर्ज्योत्स्ना शरद्घनाः। प्रासादसौधतगरमन्दारदुहिकादयः। सूर्य्येन्दुकान्तकर्पूरकरका रजतं हली। निर्मोकभस्महिमक्षीरचन्दनं करका हिमम्। हारोर्णनाभतन्त्वस्थि स्वर्गङ्गाभरद्वाजकम्। शेषाहिः शर्करा दुग्धं दधि गङ्गा सुधा जलम्। स्फटिकाक्षतहंसबककैरवचामरम्। रम्भागर्भं पुण्डरीकं केतकीभक्तनिर्झराः। लोध्रसिंहध्वजच्छत्त्रं चूर्णशुक्तिकपर्दिका। सुरेभकुसुमनक्षत्रदन्तपुण्योमनोगुणाः। कैलासकाशकापालिहासशशक-

कुञ्जराः । नारदः पारदः कुन्दस्फटिकास्फटिकादयः" ।

शुक्लकण्ठ पुंस्त्री० शुक्लः कण्ठो यस्य । दात्यूहखगे शब्द-
माला । स्त्रियां ङीष् ।

शुक्लकन्द पु० शुक्लः कन्दो यस्य । १महिषकन्दे २अतिवि-
षायां स्त्री राजनि० । कर्म० । ३श्वेते कन्दे ।

शुक्लक्षीरा स्त्री शुक्लं क्षीरं निर्यासो यस्याः । काकोल्यां
राजनि० । [जटा० ।

शुक्लकर्मन् त्रि० शुक्लं शुद्धं कर्म यस्य । पवित्रे शुभचरित्रे

शुक्लकुष्ठ न० कर्म० । श्वेतकुष्ठे (धवल) । [निर्यासयुते त्रि० ।

शुक्लदुग्ध पु० शुक्लं दुग्धमस्य । १शृङ्गाटके शब्दच० २श्वेत-

शुक्लधातु पु० कर्म० । कठिन्यां (खड़ि) हेमच० २श्वेतधातौ च

शुक्लपक्ष पु० कर्म० । १दर्शानुगुणचन्द्रकलाक्रियापञ्चदशकात्मके
चान्द्रमासार्द्धे श्वेतपक्षे २बके पुंस्त्री० । स्त्रियां ङीष् ।

शुक्लपुष्प पु० शुक्लं पुष्पमस्य । १कुलाकवृक्षे २कुन्दवृक्षे ३मरु-
वके च रत्नमा० । ४श्वेतपुष्पयुते त्रि० । ५नागदन्त्यां ६श्वे-
तकुम्भ्यां स्त्री रत्नमा० ङीप् । कर्म० । ७शुभ्रे पुष्पे न० ।

शुक्लपृष्ठक पु० शुक्लं पृष्ठमस्य कप् । सिन्धुकवृक्षे शब्दच० ।

शुक्लयजुस् न० कर्म० । इषेत्वेत्यादि चत्वारिंशदध्यायात्मके
यजुर्वेदभेदे । [२तद्वति त्रि० । ३तथाभूतवृक्षे पु० राजनि० ।

शुक्लरोहित पु० वर्णोऽवर्णेनेति कर्म० । १श्वेतरक्ते वर्णे

शुक्लला स्त्री शुक्लं लाति ला–क । जटायां रत्नमा० ।

शुक्लवायस पुंस्त्री० कर्म० । १बके त्रिका० २श्वेतकाके च ।
स्त्रियां ङीष् ।

शुक्लशाल पु० कर्म० । १गिरिनिम्बे राजनि० २श्वेतवर्णवृक्षे च

शुक्ला स्त्री शुक्ल+अर्श आद्यच् टाप् । १सरस्वत्यां त्रिका० ।
२शर्करायां शब्दच० । ३काकोल्यां ४विदार्य्यां ५स्नुह्यां
राजनि० । ६श्वेतवर्णवत्यां स्त्रियाञ्च ।

शुक्लाङ्गी स्त्री शुक्लमङ्गमस्याः ङीष् । १शेफालिकायां रा-
जनि० । २श्वेताङ्गयुक्ते त्रि० । [स्त्रियां ङीष् ।

शुक्लापाङ्ग पुंस्त्री० शुक्लः अपाङ्गो यस्य । मयूरे हेमच० ।

शुक्लाम्ल न० कर्म० । चुक्रशाके राजनि० ।

शुक्लार्म्मन् न० नेत्ररोगभेदे भावप्र० ४४२८पृ० दृश्यम् ।

शुक्लिमन् पु० शुक्लस्य भावः इमनिच् । श्वेतवर्णे ।

शुक्लोपला स्त्री कर्म० व अस्त्यस्याः अच् । शर्करायां रत्नमा०

शुङ्ग पु० शम–ग तस्य नेत्त्वं नि० अत उत्त्वञ्च । १वटवृक्षे
२आम्रातके ३शूके च मेदि० । ४पर्कटीवृक्षे ५धान्या-
दिशूके च स्त्री राजनि० ।

शुङ्गाकर्म्मन् न० शुङ्गैः वटपल्लवैः या वस्यक् कर्म० यत्र ।
गर्भमात्रसंस्कारभेदे "पुंसवने चन्द्रनाम्ना शुङ्गाकर्मणि
शोभनः" ति०त० । [२शुङ्गवति त्रि० ।

शुङ्गिन् पु० शुङ्गोऽस्त्यस्य इनि । १वटवृक्षे २प्लक्षवृक्षे जटा०

शुच शोके क्लेदे च दिवा० उभ० अक० सेट् । शुच्यति ते
इरित् अशुचत्-अशोचीत् अशोचिष्ट ईदित् शुक्तः ।
अनु+किञ्चिद्दुःखेन पश्चात्तापे सक० । अनुशोचति ।

शुच शोके भ्वा० पर० सक० सेट् । शोचति अशोचीत् ।

शुच् स्त्री शुच–क्विप् । शोके अमरः । वा टाप् । तत्रैव ।

शुचि पु० शुच–कि । १वह्नौ २चित्रकवृक्षे ३आषाढमासे
४शृङ्गाररसे अमरः । ५ज्यैष्ठमासे मेदि० ६शुद्धाचरणे
७ग्रीष्मे ऋतौ ८शुद्धमन्त्रिणि मेदि० । १०अग्निभेदे
"पावकः पवमानश्च शुचिरग्निश्च ते त्रयः । निर्मथ्यः
पवमानः स्यात् वैद्युतः पावकः स्मृतः । यश्चाग्नौ तपते
सूर्यः शुचिरग्निस्त्वसौ स्मृतः" कूर्मपु० १२अ० । ११श्वेत-
वर्णे १२तद्वति त्रि० अमरः । शुचित्वञ्च शौचं शुद्धता
वैदिककर्मार्हत्वप्रयोजकः संस्कारविशेषः । "शुचिस्तत्-
कालजीवी कर्म कुर्यात्" स्मृतौ शौचस्य कर्माङ्गत्वं, स च
स्नानादिजन्यः पुण्यभेदो वा । १३सूर्ये च "तपनस्तापन-
श्चैव शुचिः सप्ताश्ववाहनः" सूर्यस्तवः । १४अर्कवृक्षे
१५काश्यपपत्न्यास्ताम्रायाः कन्याभेदे स्त्री "षट्सुतास्तु महा-
सत्त्वास्ताम्रायाः परिकीर्त्तिताः । शुकी श्येनी च भासी
च सुग्रीवी शुचिगृध्रिके" गरुडपु० ६अ० । १६शुद्धे
१७अनुपहते त्रि० मेदि० ।

शुचिद्रुम पु० कर्म० । अश्वत्थवृक्षे राजनि० ।

शुचिमल्लिका स्त्री कर्म० । नवमल्लिकायां राजनि० ।

शुच्य स्नाने अक० अभिषवे मन्थने पीड़ने सन्धाने च सक० भ्वा०
पर० सेट् ईदित् निष्ठा अनिट् । शुच्यति अशुच्यीत् ।

शुटीर पु० शौटीर+पृषो० । वीरे त्रिका० ।

शुठ गतिविघाते भ्वा० पर० अक० सेट् । शोठति अशोठीत् ।

शुठ आलस्ये चु० उभ० अक० सेट् । शोठयति ते अशूशुठत् त ।

शुठ शोधने वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् इदित् ।
शुण्ठयति ते शुण्ठति अशुशुण्ठत् त अशुण्ठीत् ।

शुण्ठि(ण्ठी) स्त्री शुठि–इन् वा ङीप् । (शुंट) शुष्कार्द्रके
"शुण्ठी रुच्यामवातघ्नी पाचनी कटुका लघुः । स्नि-
ग्धोष्णा मधुरा पाके कफवातविबन्धनुत् । वृष्या स्वर्य्या
च निश्वासशूलकासहृदामयान् । हन्ति श्लीपदशोथार्श-
आनाहोदरमारुतान्" । ...

शुण्ठ्र न० शुठि-रक् । शुण्ठ्याम् शब्दच० ।

शुण्ड पु० शुन–ड तस्य नेत्त्वम् । १मत्तगजमदे हेमच०। २गजहस्ते पुंस्त्री० स्त्रीत्वे टाप् । ३मद्यपानगृहे ४वेश्यायाः ५सुरायां ६जलहस्तिन्याञ्च स्त्री मेदि० । ७नलिन्यां विश्वः । ८कुट्टिन्याञ्च स्त्री शब्दमा० ।

शुण्डापान न० शुण्डा सुरा पीयतेऽत्र पा–आधारे ल्युट् । १मद्यपानगृहे अमरः । ६त० । २मद्यपाने च ।

शुण्डार पु० शुण्डा अस्त्यर्थे र । १शौण्डिके शब्दच० २हस्तिनि च । अपकर्षे र । ३अपकृष्टशुण्डायाम् स्त्री । टाप् । शुण्डाल हस्तिनि धनञ्जयः । [शब्दच०।

शुण्डिन् पु० शुण्डाऽस्त्यस्य इनि । १हस्तिनि २शौण्डिके

शुण्डिमूषिका स्त्री शुण्डिनी मूषिकेव । छुछुन्दर्यां (छुँच) राजनि० । [(छातिछुँड़ा) इति राजनि० ।

शुण्डी स्त्री शुण्डाकारोऽस्त्यस्याः अच् गौरा० ङीष् ।

शुद्ध न० शुध–क्त । १सैन्धवलवणे २मरिचे च राजनि० । ३केवले ४निर्दोषे ५पवित्रे मेदि० । ६शुभ्रे च त्रि० ।

शुद्ध्यशुद्धी शास्त्रगम्ये संस्काररूपे यथोक्तं "शुद्ध्यशुद्ध्योः संस्काररूपत्वेन एकपुरुषस्यैकदोभयस्थिति र्घटते । शुद्धेर्भावरूपत्वे अशुद्धेस्तदभावरूपत्वे नैतत् विरोधात् । अतएव मनुः "ततः श्राद्धमशुद्धो ऽ कुर्य्यादेकादशे तथा । कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः" अशुद्धौ चतुर्थाद्यादौ । कथमशुद्धौ श्राद्धं ? आशौचयोरधिकारिविशेषणत्वादत आह कर्तुस्तात्कालिकी शुद्धिरिति । श्राद्धविधानाक्षेपात् तत्कालविहिता शुद्धिः कल्प्यते "स पुनरशुद्धः कर्मान्तरे" श्रा०वि० । शुद्धितत्त्वे च "एवं शुद्धेर्भावरूपत्वे अशौचस्य तदभावरूपत्वे विरोधः तथात्वे अशौचसङ्करोऽपि न स्यात् । एकस्मिन् शुद्ध्यभावरूपे अशौचे सत्यपरस्य तद्रूपस्य तदानीं तत्पुरुषीयशुद्धिरूपप्रतियोग्यन्तराभावात् अनुपपत्तेः । तस्मात् शुद्ध्यशुद्ध्योर्भावरूपत्वम् ।

पद्मपु० उत्त०ख०१६अ० कतिचिदशुद्धा उक्ताः । तद्विपर्य्यये शुद्धता यथा

"जातके सूतकेऽस्नाते अशौचोभिः क्षते तथा । अपवित्रो द्विजातीनां देहः सन्ध्यादिकर्मसु । अपूतस्तूत्सर्गे नरो मूत्रपुरीषयोः । अस्पृश्यस्पर्शने चैव ब्रह्मयज्ञजपादिषु । रक्तपाते नखश्मश्रुदन्तशस्त्रादिभिः क्षते । विप्रादेरशुचिः कायः शस्त्रास्त्रैः कण्टकादिभिः । भुक्त्वा चास्नानतोच्छिष्टेऽपवित्रः कृतमैथुने । शयने ब्राह्मणादीनां शरीरं क्षुरकर्मणि । ज्वरादिभिश्चतुःषष्टिरोगैर्युक्तं द्विजन्मनाम् । चतुरष्टकं पूजादानहोमजपादिषु । धूमोद्गारे वमौ श्राद्धपतितान्नादिभोजनैः । तथा च रेतःस्खलने सर्वदेहाऽपवित्रता । अपवित्रं द्विजातीनां वपुः स्याच्छ्वदर्शने । गर्हितदानग्रहणे पतिते पातकादिभिः । अशौचान्तेन शुद्धिः स्यात् जातके सूतकेऽपि च । सर्ववर्णाश्रमादीनां तनोः सन्ध्यादिकर्मसु । सूतकादिभिरेव स्नानापनेयतेति । अशौचशब्दे द्रव्यशुद्धिशब्दे च दृश्यम् । [कोष ।

शुद्धजङ्घ पुंस्त्री शुद्धा जङ्घा यस्य । गर्दभे त्रिका० स्त्रियां

शुद्धमांस न० २१८२पृ० दृश्यतां शब्ददर्शिते पक्वमांसभेदे [शब्दच०।

शुद्धवल्ली स्त्री कर्म० । १गुडूच्यां शब्दच० २पवित्रायां लतायाञ्च

शुद्धान्त पु० शुद्धः निर्दोषः अन्तः पर्य्यन्तो यस्य । १अन्तःपुरे उपचारात् तत्र स्थितायां २राजयोषिति पुंस्त्री० "शुद्धान्तसम्भोगनितान्ततुष्टे" इति नैषधम् । शुद्धं शुद्धिः ६त० ३अशौचान्ते ।

शुद्धापह्नुति स्त्री कर्म० । "शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः" चन्द्रालोकोक्ते अर्थालङ्कारभेदे ।

शुद्धि स्त्री शुध–क्तिन् । १मार्जने अमरः० २नैर्मल्यसम्पादने ३वैदिककर्मयोग्यतासम्पादकसंस्कारभेदे च । ४दुर्गायां "अरण्याश्चिन्तनाद्यापि शोध्यते येन पातकात् । तेन शुद्धिः समाख्याता देवी सद्गनकौशिता" देवीपु०तन्नामनिरुक्तिः

शुद्धोदनसुत पु० बौद्धभेदे हेमच० ।

शुध शौचे शोधने अक० निःसंशयभवने अक० च दि० पर० अनिट् । शुध्यति अशुधत् । "भक्तो हरः शुध्यति यद्गुणः स्यादिति" बोवा० ।

शुन गतौ तु० पर० सक० सेट् । शुनति अशोनीत् ।

शुन पु० शुन–क । कुक्कुरे । त्रि । तत्रैव वाचस्पतिः ।

शुनःशेफ पु० शुन इव शेफोऽस्य अलुक्समा० । विश्वामित्रशिष्ये मुनिभेदे । [राजनि० ।

शुनक पु० शुन इव कन् । १मुनिभेदे स्वार्थे क । २कुक्कुरे

शुनकचञ्चुका स्त्री शुनकस्येव चञ्चुः पत्रं यस्याः कप् । क्षुद्रचञ्चुक्षुपभेदे राजनि० ।

शुनकचिल्ली स्त्री शुनकप्रिया चिल्ली । शाकभेदे राजनि० ।

शुनासीर पु० शुनः नासीरं यस्य पृषो० । १इन्द्रे २पेचके च पृषो० तस्य रूपत्रयम् द्विरूपकोषे उक्तं यथा "शुनाशीरो दितारातिः सुनाशीरो द्विदन्तकः । तारकादिदैत्यनाश्यः शुनाशीरश्च दृश्यते" ।

शुनी स्त्री शुन+स्त्रियां ङीप् । १कुक्कुरयोषिति अमरः ।

२काम्बोज्यां लतायां राजनिघण्टुकोषः ।

शुनीर पु० शुनी+समूहार्थे र । कुक्कुरीसमूहे त्रिका० ।

शुन्ध शुद्धौ अक० शोधने सक०चु० उभ० सेट् । शुन्धयति ते अशुशुन्धत् त ।

शुन्ध शुद्धौ अक० शुद्धीकरणे सक० भ्वा० उभ० सेट् । शुन्धति ते अशुन्धीत् अशुन्धिष्ट । "आपः शुन्धन्तु मैनसः" इति सन्ध्यामन्त्रः ।

शुन्ध्यु पु० शुन्ध–युच् तस्य न अनादेशः । वायौ उणा० ।

शुन्भ दीप्तौ अक० मर्द्दने सक० तु० पर० सेट् । शुम्भति अशुम्भीत् "प्राणप्राप्तनिशुम्भाम्भवधत्" इति वो०प० ।

शुन्य न० शुनीनां समूहः यत् । १कुक्कुरीसङ्घे त्रिका०।शून्य+पृषो० । २रिक्ते जटा० । [अशोभीत् ।

शुभ दीप्तौ अक० हिंसने सक०तु०तुदा० पर० सेट् । शुभति

शुभ दीप्तौ भ्वा०आ०अक०सेट् । शोभते शुभदित् अशुभत् शुशुभे

शुभ न०शुभ–क । १मङ्गले २शुभयुक्ते त्रि० अमरः । ३पद्म-काष्ठे राजनि० ४विष्कम्भादिषु मध्ये त्रयोविंशयोगे पु० ५खेचरपुरभेदे न० मेदि० । [शुभंयुः" इति भट्टिः ।

शुभंयु त्रि०शुभम्+अस्त्यर्थे युस् । शुभान्विते अमरः "त्वितिपः

शुभगन्धक न०शुभो गन्धोऽस्य कप् । १बोले राजनि० २शुभगन्धयुते त्रि० । [कन्द्राधिकचन्द्रे पापग्रहायुक्ते बुधे च ।

शुभग्रह पु०शुभः शुभदायकः ग्रहः । १सौम्यग्रहे २गुरौ शुक्रे

शुभङ्कर त्रि०शुभं करोति कृ–खच् मुम् च । २मङ्गलकारके ३दुर्गायां स्त्री शब्दमा० ङीप् । [१मङ्गलदातरि त्रि०।

शुभद पु० शुभं ददाति दा–क । १अश्वत्थवृक्षे राजनि० ।

शुभदन्ती स्त्री शुभा दन्ता यस्याः ङीष् । १सुदत्यां स्त्रियां २पुष्पदन्तदिग्गजयोषिति च मेदि० ।

शुभपत्री स्त्री० शुभानि पत्राण्यस्याः ङीप् । (शालपान) स्वार्थे वा कप् । शुभपत्रिका तत्रार्थे राजनि० ।

शुभम् अव्य० शुभ–बाहु० । मङ्गले "शुभंयुः" ।

शुभवासन पु० शुभं वासयति सुवास् वासि–ल्यु । सुखवासने द्रव्ये शब्दच० ।

शुभसूचनी स्त्री देवीभेदे (सुवचनी) "रक्ता पद्मपलाशाक्षी त्रिनयना चामीकरालङ्कृता पीनोत्तुङ्गकुचा दुकूलवसना हंसाधिरूढा परा । ब्रह्मानन्दमयी कमण्डलुकराभीतिप्रदा शिवा ध्येया सा शुभसूचनी त्रिजगतामम्बापदुद्धारिणी" । सा च स्त्रीभिः पूज्या ।

शुभा स्त्री शुभ–क । १शोभायां २कान्तौ ३इच्छायां मेदि० । ४रोचनायां ५गोरोचनायां ६प्रियङ्ग्वां ७शमीवृक्षे श्वेत-दूर्वायां राजनि० । ८देवसभायां शब्दच० १०उमासखीभेदे शब्दच० । [सखीभेदे स्त्री शब्दमा० ।

शुभाचार त्रि०शुभ आचारोऽस्य । १शोभनाचारयुते २उमा-

शुभाञ्जन पु० शुभ–क शुभम् अञ्जनं यस्मात् ५ब० । शोभाञ्जनवृक्षे शब्दर० ।

शुभ्र न०शुभ–रक् । १अभ्रके मेदि० २रौप्ये ३कासीसे ४शुभ्रवर्णे राजनि० । ५चन्दने शब्दच० । ६श्वेतवर्णे पु० ७तद्वति त्रि० अमरः ।

शुभ्रकर पु० शुभ्राः कराः अस्य । १चन्द्रे २कर्पूरे च । शुभ्र-किरणशुभ्रांशुप्रभृतयोऽप्यत्र । [जयोषिति अमरः

शुभ्रदन्ती स्त्री शुभ्रो दन्तो यस्याः ङीप् । पुष्पदन्तदिग्ग-

शुभ्रालु पु० कर्म० । १महिषकन्दे राजनि० । २श्वेतालौ च ।

शुभ्रि पु० शुभ–क्रि । चतुर्मुखे ब्रह्मणि सि०कौ० ।

शुम्भ पु० शुम्भ–अच् । दानवभेदे । शुम्भश्च ब्रह्मादपुत्त्र-विरोचनात्मजगवेष्ठिनः पुत्रः एकः "विरोचनश्च प्राह्रादिः पञ्च तस्यात्मजाः स्मृताः । गवेष्ठी कालनेमिश्च जम्भो बाष्कल एव च । शुम्भश्चैव निशुम्भश्च विश्वरेणो महौजसः । गवेष्ठिनः सुता द्वौ तें" वह्निपु० । अपरश्च "कश्यपस्य दनुर्नाम भार्य्यासीत् द्विजसत्तम ! । तस्यास्तु द्वौ सुतावास्तां सहस्राक्षाद्बलाधिकौ । ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः" वामनपु० । देवीमाहा० अपरोऽपि देव्या निहतः । तदन्योऽपि तत्रैव १२अ० "शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ । ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी" इत्युक्तः ।

शुम्भमर्दिनी स्त्री शुम्भं मर्द्दयति मृद–णिनि । दुर्गायां हेमच० । हन–णिनि । शुम्भघातिनी शब्दच० ।

शुम्भपुरी स्त्री ६त० । (शम्भलपुर) एकचक्राख्ये पुरे त्रिका० ।

शुर मारणे स्तम्भने च दि०आ०सक०सेट् । शूर्यते अशोरिष्ट ।

शुल्क त्यजने, सर्जने, वर्जने च चु०उभ०सक० सेट् । शुल्कयति ते अशुशुल्कत् त ।

शुल्क पु०न० शुल्क्यते अतिसृज्यते कर्मणि घञ् । १घट्टादिदेये राजकरे मेदि० २राजग्राह्यकरभेदे अमरः । वरपश्चात् कन्यापक्षीयैः ३ग्राह्ये धने ४स्त्रीधनभेदे "भगिनीशुल्कं सोदर्य्याणाम्" इति स्मृतिः । सम्भोगार्थं स्त्रीभ्यः देये ५धने "अशुल्कोपहृतायास्तु पिण्डदावोढुरेव ते" इति स्मृति ६पणे च । [द्रव्यकरादानस्थाने ।

शुल्कस्थान न०६त० । (घाटि) २घट्टे भूपानां क्रयविक्रययोग्य

शुल्ब न० शुल्व–कर्म० पृषो० । १ताम्रे २रज्जौ च अमरटीका ।

शुल्व माने दाने च, चु० उभ० सक० सेट् । शुल्वयति ते अशु-
शुल्वत् त । [४आचारे ५यज्ञकार्य्ये च मेदि०।

शुल्व न० शुल्व-अच् । १ताम्रे २रज्जौ च अमरः ३जलसमीपे

शुल्वारि पु० ६त० । १गन्धके हेमच० तस्य ताम्रादिजारक-
त्वात् तथात्वम् ।

शुश्रू स्त्री मातरि "शिशोः शु [illegible] ः" भा०शा०अ०

शुश्रूषण न० श्रु-सन्-ल्युट् । शब्दच० । युच् ।
तत्रैव स्त्री २श्रवणेच्छायाञ्च । [च ।

शुश्रूषा स्त्री श्रु-सन्-अ । १श्रवणेच्छायाम् २उपासने ३कथने

शुष शोषणे दि०पर०सक०अनिट् । शुष्यति लृदित् अशुषत् ।

शुष पु० शुष-क । १गर्त्ते २बिले च अजयपालः ।

शुषि स्त्री शुष-कि । १शोषणे २बिले च मेदि० ।

शुषिर न० शुष-किरच् । १छिद्रे २वंशाद्यादिवाद्ये ३सच्छिद्रे
त्रि० अमरः ४मूषिके पुंस्त्री० मेदि० स्त्रियां ङीष् ।
५अग्नौ पु० विश्वः । ६चित्रकवृक्षे ७नद्यां स्त्री धरणिः ।
धनलोनामगन्धद्रव्ये स्त्री अमरः । [२शोषणे न० ।

शुष्क त्रि० शुष+क्त । आतपादिना १कृतशोषणे । भावे क्त ।

शुष्कपत्र न० शुष्कं पत्रमस्य । (नालता) १शाकभेदे ।
"शुष्कपत्रं पयोमिश्रं पित्तश्लेष्मज्वरापहम् । तत्
शुष्कपत्रं जलदोषनाशनं विशेषतः पित्तकफज्वरापहम् । जलस्य तस्यापि च पित्तकारकम् सुरोचनं व्यञ्ज-
नयोषकारकम्" राजवल्लभः । कर्म० । २शुष्के पर्णे न० ।

शुष्कमांस न० कर्म० । आतपादिना शुष्कमांसे तद्गुणा
भावप्र० उक्ता यथा "त्रिदोषकृत् व्याधिकरं शुष्कं शूल-
करं गुरु" मांसमित्यनुषङ्गः ।

शुष्करेवती स्त्री मातृकाभेदे "अधिस्थया तथा कालो सृष्टा
पूर्वं महात्मना । तया तद्रुधिरं पीतमन्धकानां म-
हात्मनाम् । या चास्मिन् कथिता लोके नामतः शुष्क
रेवती" दक्षिपु० १५४अ० ।

शुष्कल न० शुष्कं शोषणं लाति ला-क । १शुष्कमांसे ।
शुष-कलन् किच्च । २आमिषे उणादि० ।

शुष्कवृक्ष पु० कर्म० । धवहृक्षे राजनि० ।

शुष्कवैर न० शुष्क फलशून्यं वैरम् । उद्देश्यशून्ये कलहे ।

शुष्कव्रण पु० कर्म० । (घँटा) क्षियारूपे व्रणे त्रिका० ।

शुष्काक्षिपाक पु० नेत्ररोगभेदे तल्लक्षणं भावप्र०उक्तं यथा
"यत् कूणितं दारुणरूक्षवर्त्म सन्दह्यते चाविलदर्शनं
यत् । सुदारुणं यत्प्रतिबोधने च शुष्काक्षिपाकोपहत
नदाक्षि" । कूणितं सङ्कोचितं उद्गृतमिति यावत् । दारु-
णरूक्षवर्त्म दारुणं विकृतं रूक्षं च वर्त्म यस्य तत् ।
इदमलक्षणाविशेषणं सन्दह्यते सदाहं भवति । आविल-
दर्शनम् आविलस्य अनच्छस्य दर्शनं येन तत् । तत्प्रति-
बोधने उद्घाटने, सुदारुणम् अतिशयेन विकृतम्" ।

शुष्काङ्ग पु० शुष्कमङ्गमस्य । १धवहृक्षे (धगाछ) २शुष्काङ्ग-
युते त्रि० स्त्रियां ङीप् । सा च ३गोधिकायां शब्दच०

शुष्कार्द्रक न० शुष्कमार्द्रकम् । शुण्ठ्यां (शुँठ) शब्दच० ।

शुष्म न० शुष-मन् किच्च । १तेजसि मेदि० २पराक्रमे
हेमच० । ३सूर्य्ये पु० मेदि० ४अग्नौ त्रिका० ५चित्रकवृक्षे
६वायौ ७पक्षिणि संक्षिप्तसा० ८वर्च्चसि च पु० भरतः ।

शुष्मन् न० शुष-कनिन् । १तेजसि जटा० । २शौर्य्ये हेमच०
३अग्नौ ४चित्रकवृक्षे च पु० अमरः ।

शूक पु० न० श्वि-कक् सम्प्र० । (शुँया) १तीक्ष्णाग्रे अमरः ।
२शिखायां ३दयायां मेदि० ४सविषजलमलोद्भवे जन्तुभेदे
भावप्र० तद्दोषाधिकारेण तज्जातरोगास्तत्र दर्शिता यथा
"अथ शूकदोषाधिकारः । तत्र शूकदोषस्य निदानमाह
"अक्रमाच्छेफसो वृद्धिं योऽभिवाञ्छति मूढधीः ।
व्याधयस्तस्य जायन्ते दश चाष्टौ च शूकजाः" । अक्र-
मात् अनुचितवृद्धिक्रमात् । अनुचिता च वृद्धिः भूरिवि-
कारजनकस्य योगेन शूकजाः शूकोजलशूकः स-
विषो जलजन्तुविशेषः स तु जलमलोद्भवः जलवृश्चिक
इत्यादिकः । तथा शूकप्रधानो लिङ्गवृद्धिकरो वात्स्या-
यनाद्युक्तो रोगः शूक उच्यते । शूकदोषा दश चाष्टौ
च भवन्ति । तेष्वादौ सर्षपिकामाह "गौरसर्षपसंस्थाना
शूकदुर्भगहेतुका । पिडका श्लेष्मवाताभ्यां ज्ञेया सर्षपिका
तु सा । शूकदुर्भगहेतुका शूकदुष्टयोनिनिमित्ता च ।
अष्ठीलिकामाह "कठिना विषमैर्भुग्नैर्वायुनाष्ठीलिका२
भवेत्" । अष्ठीला लौहकारस्य भाण्डविशेषः (निहार)
इति लोके । तथा कठिनेत्यष्ठीलिका विषमैर्भुग्नैरिति
वक्ष्यमाणमुकविशेषणम् । विषमैर्ह्रस्वदीर्घैः । भुग्नैः
वक्रैः । ग्रथितमाह "शूकैर्यत् पूरितं शश्वद्ग्रथितं३
नाम तद्भवेत्" । यल्लिङ्गं सदा शूकैः पूरितं तद्ग्रथि-
तत्वाद्ग्रथितम् । कुम्भिकामाह "कुम्भिका४ रक्तपि-
त्तात् स्याज्जाम्बवास्थिनिभा सिता" कुम्भिका कुम्भीफल-
तुल्यत्वात् । अलजीमाह "अलजी५ स्यात्तथा यादृक्-
प्रमेहपिडका तथा । सा च रक्ताऽसिता स्फोटाचिता
च कथिता बुधैः" । एषा रक्तपित्तनिमित्ता ज्ञेया ।
मृदितमाह "मृदितं६ पीडितं यत्तु संरब्धं वातकोपतः ।

शूकदोषे जाते पीडितं यद्यत् संरब्धम् शथोथं भवति तल्लिङ्गं मृदितमुच्यते। संमूढपिडकामाह "पाणिभ्यां भृशसंमूढे संमूढपिडका७ भवेत्"। शूकदोषे जाते पाणिभ्यां भृशसंमूढे पिषिते लिङ्गे"। अत्रापि वातकोप इत्यनुवर्त्तते। अथावमन्थमाह "दीर्घा बह्व्यश्च पिडका दीर्य्यन्ते मध्यतस्तु याः। सोऽवमन्थः८ कफासृग्भ्यां वेदना रोमहर्षकृत्"। दीर्घा दीर्घाङ्कुराः। पुष्करिकामाह "पिडका पिडकाव्याप्ता पित्तशोणितसम्भवा। पद्मकर्णिकसंस्थाना९ ज्ञेया पुष्करिकेति सा"। पिडकाव्याप्ता पार्श्वतः क्षुद्रपिडकाव्याप्ता। अतएव पद्मकर्णिकसंस्थाना। स्पर्शहानिमाह "स्पर्शहानिन्तु१० जनयेच्छोणितं शूकदूषितम्" अत्र स्पर्शाज्ञत्वमेव लक्षणम्। उत्तमामाह "मुद्गमाषोपमा रक्ता रक्तपित्तोद्भवा च या। उत्तमाख्या पिडका११ शूकाजीर्णसमुद्भवा"। शतपोनकमाह "छिद्रैरणुमुखैर्लिङ्गं चितं यस्य समन्ततः। वातशोणितजो व्याधिः विज्ञेयः शतपोनकः१२"। शतपोनकश्चालनी तत्तुल्यत्वाच्छतपोनकः। त्वक्पाकमाह "वातपित्तकृतो ज्ञेयस्त्वक्पाको१३ ज्वरदाहकृत्"। शोणितार्बुदमाह "कृष्णैः स्फोटैः सरक्ताभिः पिडकाभिर्निपीडितम्। लिङ्गं वास्तुरुजाश्चोग्रा ज्ञेयं तच्छोणितार्बुदम्१४"। वास्तुरुजः स्फोटपिडकाधिष्ठानवेदनाः। अथ मांसार्बुदमाह "मांसदुष्टं विजानीयादर्बुदं मांससम्भवम्१५"। मांसपाकमाह "शीर्यन्ते यस्य मांसानि यस्य सर्वाश्च वेदनाः। विद्यात्तं मांसपाकन्तु१६ सर्वदोषकृतं भिषक्"। शीर्य्यन्ते गलन्ति। सर्वाश्च वेदनाः वातपित्तकफजाः। अथ विद्रधिमाह "विद्रधिः१७ सन्निपातेन यथोक्तमभिनिर्दिशेत्"। यथोक्तं सान्निपातिकविद्रधिलक्ष्म कथयेत्। तिलकालकमाह "कृष्णानि चित्राण्यथवा शुक्लानि सविषाणि तु। पतन्ति पातयन्त्याशु मेढ्रं निरवशेषतः। कालानि भूत्वा मांसानि शीर्य्यन्ते यस्य देहिनः। सन्निपातसमुत्थांश्च तान् विद्यात्तिलकालकान्१८"। चित्राणि नानावर्णानि। शुक्लानि शुक्लवर्णानि यस्माः क्षोभन्तीति वत्। सविषाणि सविषशूकाख्यजन्तुविशेषकृतत्वात्। शीर्य्यन्ते गलन्ति। कृष्णतिलतुल्यत्वात्तिलकालकाः। अथासाध्यमाह "तत्र मांसार्बुदं यच्च मांसपाकश्च यः स्मृतः। विद्रधिश्च न सिध्यन्ति ये च स्युस्तिलकालकाः"। [२८दे च जेदि०।

शूकक पु॰ शूकैः जलजन्तुभेदैः कायति कै—क। १प्रावृट्काले

शूककीट पु॰ शूकाकाररोमयुक्तः कीटः शा॰त॰ (शुंया पोका) कीटभेदे अमरः। स हि शूकाभरोमवान्।

शूकधान्य न॰ शूकयुक्तं धान्यम् शाक॰। यवादौ धान्ये अमरः। "व्रीह्यादिकं यदिह शूकसमन्वितं स्यात् तद् शूकधान्यमथ मुद्गमकुष्ठकादि। शिम्बीनिगूढमिति तद् प्रवदन्ति शिम्बीधान्यं तृणोद्भवमथो तृणधान्यमन्यत्। तत्र त्रिदोषशमनं लघु शूकधान्यं तेजोबलातिशयवीर्य्यविवृद्धिदायि। देशे देशे शूकधान्येषु संख्या ज्ञातुं शक्या नो नरैर्दैवतैर्वा" राजनि॰। "शूकधान्यं शमीधान्यं समातीतं प्रशस्यते। पुरतो वातकृद्रूक्षं प्रायेणाभिनवं गुरु" राजवल्लभः। [शब्दच॰।

शूकपिण्डी स्त्री शूकस्य पिण्डीव। शूकशिम्ब्याम्

शूकर पुंस्त्री॰ शू इत्यव्यक्तं शब्दं करोति कृ—अच् शूक+ अस्त्यर्थे र वा। स्वनामख्याते पशौ अमरः स्त्रियां ङीष्।

शूकरकन्द पु॰ शूकर इव रामयः कन्दोऽस्य। वाराही-कन्दे राजनि॰।

शूकदंष्ट्रक पु॰ गुदभ्रंशे क्षुद्ररोगभेदे "सदाहो रक्तपर्यन्तस्त्वक्पाकी तीव्रवेदनः। कण्डूमान् ज्वरकारी च स स्याच्छूकरदंष्ट्रकः" भावप्र॰ तल्लक्षणमुक्तम्।

शूकरपादिका स्त्री शूकरस्येव पादाः मूलान्यस्याः कप् अत इत्त्वम्। कोलशिम्ब्यां राजनि॰।

शूकराक्रान्ता स्त्री शूकरेणाक्रम्यते स्म आ+क्रम-क्त ३त॰। वराहक्रान्तायां शब्दच॰।

शूकरी स्त्री शूकर आक्रामकत्वेनास्त्यस्याः अच् गौरा॰ ङीष्। १वराहक्रान्तायां शब्दच॰। शूकर+जातौ ङीष्। २तज्जातिस्त्रियाञ्च। [शब्दच॰।

शूकरेष्ट पु॰ ६त॰। १कसेरुनामकन्दे राजनि॰। २वराहप्रिय-

शूकवती स्त्री शूकलोमयुक्ताः पत्रास्त्यस्याः मतुप् मस्य वः ङीप्। १कपिकच्छ्वां शब्दच॰। २शूकयुते त्रि॰ स्त्रियां ङीप्।

शूकशिम्बा स्त्री शूकयुक्ता शिम्बा शाक॰। कपिकच्छ्वां शब्दच॰।

शूकशिम्बि(म्बी) पु॰ शूकयुक्ता शिम्बिः शाक॰ वा ङीप्। कपिकच्छ्वां शब्दच॰।

शूका स्त्री शूकोऽस्त्यस्याः अच्। कपिकच्छ्वां शब्दच॰।

शूकापुट पु॰ तृणमणिभेदे हारा॰। [शब्दर॰।

शूतिपर्ण पु॰ श्वि—क्तिच् शूति स्फीतं पर्णं यस्य। आरग्वधे

शूद्र पुंस्त्री॰ शुच—रक् पृषो॰ चस्य दः दीर्घश्च। १चतुर्थे वर्णे स्त्रियां टाप्। शूद्रा शूद्रजातिस्त्रियाम्। पुंयोगे ङीष्। शूद्री शूद्रभार्य्यायाम्। शुचा द्रवति द्रु-ड पृषो॰। २शोकेन द्रवणगतियुक्ते शूद्राधिकरणशब्दे दृश्यम्।

अथ शूद्रधर्म्मादि "विप्रपादार्च्चनं नित्यं शूद्रधर्म्मो विधीयते । तद्द्वेषी तद्धनग्राही शूद्रश्चाण्डालतां व्रजेत् । षष्टिः कोटिसहस्राणि शतजन्मानि शूकरः । श्वापदः शतजन्मानि शूद्रो विप्रधनापहा । यः शूद्रो ब्राह्मणीगामी मातृगामी स पातकी । कुम्भीपाके पच्यते स यावद्‌ ब्रह्मणः शतम् । कुम्भीपाके तप्ततैले दष्टः सर्पैरहर्निशम् । शब्दञ्च विकृताकारं कुरुते यमताडनात् । ततश्चाण्डालयोनिः स्यात् सप्तजन्मसु पातकी । सप्तजन्मसु सर्पश्च जलौकाः सप्तजन्मसु । जन्मकोटिसहस्रञ्च विष्ठायां जायते कृमिः । योनिक्रिमिः पुंश्चलीनां स भवेत् सप्तजन्मसु । गवां व्रणक्रिमिः स्याच्च पातकी सप्तजन्मसु । योनौ योनौ भ्रमत्येवं न पुनर्जायते नरः" ब्रह्मवै० पु० ८३अ० । "द्विजानां पादशुश्रूषा शूद्रैः कार्य्या सदा त्विह । पादप्रक्षालनं गन्धैर्भोज्योच्छिष्टप्रमार्ज्जनम् । ते तु कृत्वा सदा येन तेभ्यो भूयः पितामहः । शुश्रूषार्थं मया यूयं तुरीये तु पदे कृताः । द्विजानां क्षत्त्रियाणां वैश्यानाञ्च महद्विधाः । त्रिभ्यः शुश्रूषणा कार्य्या इत्यशादीद्वचस्तदा" पाद्मे स्व०ख० १६अ० । "शुश्रूषैव द्विजातीनां शूद्राणां धर्म्मसाधनम् । कारुकर्म्म तथाऽऽजीवः पाकयज्ञोऽपि धर्म्मतः" गारुडे ४९अ० । "तथा मद्यस्य पानेन ब्राह्मणीगमनेन च । वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेत्" इति शूद्रकमलाकरधृतपराशरवाक्यम् । ब्राह्मणस्य तदन्नभोजननिषेधो यथा "शूद्रान्नं ब्राह्मणोऽश्नन् वै मासं मासार्द्धमेव वा । तद्योनावभिजायेत सत्यमेतद्विदुर्बुधाः । अथोदरस्थशूद्रान्नो मृतः श्वा चैव जायते । द्वादश दश चाष्टौ च गृध्रशूकरपुक्कसाः । उदरस्थितशूद्रान्नो ह्यधीयानोऽपि नित्यशः । जुह्वन् वापि जपन् वापि गतिमूर्द्ध्वां न विन्दति । अमृतं ब्राह्मणस्यान्नं क्षत्त्रियान्नं पयः स्मृतम् । वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम् । तस्मात् शूद्रं न भिक्षेत यज्ञार्थं सद्द्विजातयः । श्मशानमिव यच्छूद्रस्तस्मात्तं परिवर्ज्जयेत् । कन्यानामथ वा भिक्षां कुर्य्याज्ज्ञातिविवर्ज्जितः । अशूद्राणां गृहे कुर्व्वन् तत्पापेन न लिप्यते । पितुर्मात्रन्वयं जातो निहतो मद्यपायिनः । द्विजभक्तो व्रतिस्मृतिः शूद्रः स च परिकीर्त्तितः" इत्यपराशरः ।

शूद्रकर्त्तव्याचारतत्त्वे मत्स्यपुराणम्

"एवं शूद्रोऽपि सामान्यं वृद्धिश्राद्धन्तु सर्व्वदा । नमस्कारेण मन्त्रेण कुर्य्यादामान्नवद्‌बुधः । दानप्रधानः शूद्रः स्यादित्याह भगवान् प्रभुः । दानेन सर्व्वकामाप्तिरस्य संजायते यतः" । ततो दानमेवापेक्षितं न तु भोजनमपि । सामान्यं सर्व्वजनकर्त्तव्यत्वेन प्रतिमासकृत्यपक्षादिविहितश्राद्धम् आभ्युदयिकञ्च एवं द्विजातिवत् शूद्रोऽपि कुर्य्यादित्यन्वयः । नमस्कारेण मन्त्रेण न तु पठितमन्त्रेण । आमान्नवदित्यनेन अपक्वान्नविधानस्यातिदेशः "स्विन्नमपक्वमाहृतम्" इति सामवेदेन स्विन्नस्यैवापक्वत्वाभिधानात् तण्डुलस्य प्रदत्तं न तु स्विन्नस्य हारीतेन कण्डनभर्ज्जनयोः पृथक्त्वमुक्तं यथा "शादीपनतापनखण्डनभर्ज्जनपचनादिभिः पक्वमिति" । अस्यार्थः शादीपनं काष्ठानां, तापनं तोयादेः, खण्डनं धान्यादेर्भर्ज्जनं यवादेः, पचनं तण्डुलादेः इति पञ्चधा कृता इति कल्पतरुः । अतएव स्विन्नधान्येन श्राद्धं क्रियते । "तण्डुलानि तैलेन पायसं दधिसक्तवः । द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि" इति कूर्म्मपुराणवचने शूद्रकर्त्तृकतण्डुलादेर्भोज्यत्वाभिधानेन श्राद्धे देयत्वमुक्तम् । तण्डुलञ्च कायपीडां विना चैवपात्रेण यदुक्तं पक्वम् । पायसं पाकेन काठिन्यविकारापन्नं दुग्धं पक्वापक्वे दुग्धविकृतिनिर्द्देशापत्तेः तथा चामरः "परमान्नन्तु पायसः" इति । "दिने मध्योदये प्राप्ते पाकेन भोजयेद्द्विजान् । अयं विधिः प्रयोक्तव्यः शूद्राणां मन्त्रवर्ज्जितः" इति प्रायश्चित्तप्रसिद्धवराहपुराणवचनमपि तण्डुलपक्वपरम् एवन्तु एतद्वचनं सच्छूद्रपरं मैथिलोक्तं हेयम् । एवञ्च आममांसस्यापि श्राद्धे देयत्वं वाचस्पतिमिश्रानुमतमनुसन्धेयम् । तत्र द्रव्यदेवतादानार्थं ब्राह्मणेन मन्त्राः पाठ्याः "अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्ज्जितः । अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते" इति वराहपुराणात् अयं आह्निककृत्यतावादिविधिः शूद्रकर्त्तृकमन्त्रपाठरहितः शूद्रस्य मन्त्रपाठानधिकारित्वात् यदमन्त्रस्येति पुनर्व्वचनं तद्ब्राह्मणापेक्षार्थं परिभाषार्थञ्च तच्च तत्कर्म्मसम्बन्धिमन्त्रेण विप्रकर्त्तृकसङ्कल्पितब्राह्मणो गृह्यते तेन ब्राह्मणेन तत्र मन्त्राः पठनीया इति तात्पर्य्यं तत्र यजुर्व्वेदिका मन्त्राः तथा च स्मृतिः "आपस्तम्बमथ सर्व्वत्र शूद्रा वाजसनेयिनः । तस्माच्छूद्रः स्वयं कर्म्म यजुर्व्वेदीव कारयेत्" । आपस्तम्बमेव सूत्रकल्पमेव यजुर्व्वेदसम्बन्धिसूत्रादिना "चतुर्णामपि वर्णानां यानि प्रोक्तानि वेधसा । धर्म्मशास्त्राणि राजेन्द्र शृणु तानि नृपोत्तम ॥ विशेषतस्तु शूद्राणां पावनानि मनीषिभिः

अष्टादश पुराणानि चरितं राघवस्य च । रामस्य कुरुशार्दूल धर्म्मकामार्थसिद्धये ॥ तथोक्तं भारतं वीर ! पाराशर्य्येण धीमता । वेदार्थं सकलं योज्य धर्म्मशास्त्राणि च प्रभो !" इति भविष्यपुराणवचनात्तेषां पौराणिकादिर्विधिः । योज्य योजयित्वा । अत्र च "श्राद्धं वेदमन्त्रवर्ज्जं शूद्रस्य इति वचने वेदेत्युपादानात् श्राद्धे पुराणमन्त्राः शूद्रेण पठनीया इति मैथिलोक्तं तन्न वराहपुराणे शूद्राणां मन्त्रवर्ज्जित इत्यनेन मन्त्रमात्रनिषेधात् मत्स्यपुराणे नमस्कारेण मन्त्रेण इत्युपादानाच्च पौराणिकस्यापि श्राद्धे निषेधः प्रतीयते । एवं स्नानेऽपि "ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते । तूष्णीमेव हि शूद्रस्य सनमस्कारकं मतम्" इत्यनेन नमस्कारविधानात् पञ्चयज्ञेऽपि । "शूद्रश्च द्विजशुश्रूषया तथा जीवनवान् भवेत् । शिल्पैर्वा विविधैर्जीवेत् द्विजातिहितमाचरन् । भार्य्यारतिः शुचिर्भृत्यभर्त्ता श्राद्धक्रियारतः । नमस्कारेण मन्त्रेण पञ्च यज्ञान् न हापयेत्" इति नमस्कारमात्रविधानात् श्राद्धादिषु पौराणिकमन्त्रनिषेधः । ततश्च स्नानश्राद्धतर्पणपञ्चयज्ञेतरत्र शूद्रस्य पौराणिकमन्त्रपाठः प्रतीयते । अत्र "षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले" इति मनुवचनात् "चूड़ा कार्य्या यथाकुलम्" इति याज्ञवल्क्यवचनाच्च संस्कारमात्रे कुलधर्म्मानुरोधेन कालान्तरस्य नामविशेषोच्चारणस्याभिधानाच्च शूद्रादीनां नामकरणे अन्नप्राशनादिकपद्धतियुक्तनामकरणस्य च प्रतीतेर्द्विजवर्ज्जे शूद्राणां पद्धतियुक्तनामाभिधानं क्रियते इति" । शूद्रस्याचमने देवलीयेन श्लोके अतं सकृत्पिबेत् न पिबेत् तथा च याज्ञवल्क्यः "हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः । शुध्येरन् स्त्री च शूद्रश्च सकृत् स्पृष्टाभिरन्ततः" । अन्ततो हृदयादिसमीपेन ओष्ठेन अन्तरान्तरमपकर्षात् अतएव स्पृष्टाभिरित्युक्तं न तु भक्षिताभिरिति "स्त्रीशूद्रः शुध्यते नित्यं स्पर्शनाच्च करोष्ठयोः" इति ब्रह्मपुराणवचनाच्च । याज्ञवल्क्यः "प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्" अत्र द्विजशब्दोपादाने ब्राह्मतीर्थोपादानात् स्त्रीशूद्रयोर्न तेनाचमनम् एवमेव मिताक्षरायां व्याख्यातं मरीचिना "स्त्रियाश्चैदर्शिकं तीर्थं शूद्रजातेस्तथैव च । सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः" इति । एतदनन्तरम् इन्द्रियादिस्पर्शनन्तु ब्राह्मणवदेव प्रमाणान्तरन्तु वाजसनेयिब्राह्मण-[illegible]म्" आ०त० रघु० ।

शूद्रकर्म्मन् न० शूद्रस्य शास्त्रविहितं कर्म्म । शूद्रकर्त्तव्ये द्विजसेवादौ शूद्रत्वादमोऽस्यत्र ।

शूद्रप्रिय पु० ६त० । पलाण्डौ राजनि० ।

शूद्राधिकरण शूद्रस्य विद्यायामधिकारोऽस्ति नवेति सन्देहे नाधिकार इति निर्णायके शारीरकसूत्रोक्ते अधिकरणभेदे तच्चाधि[illegible] तत्र दर्शितं यथा "शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि" सू० "यथा मनुष्याधिकारनियममपोह्य देवादीनामपि विद्यास्वधिकार उक्तस्तथैव द्विजात्यधिकारनियमापवादेन शूद्रस्याप्यधिकारः स्यादित्येतामाशङ्कां निवर्त्तयितुम् इदमधिकरणमारभ्यते । तत्र शूद्रस्याप्यधिकारः स्यादिति तावत् प्राप्तम्, अर्थित्वसामर्थ्ययोः सम्भवात्, "तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः" इतिवत् शूद्रो विद्यायामनवक्लृप्त इति निषेधाश्रवणात् । यच्च कर्म्मस्वनधिकारकारणं शूद्रस्यानग्नित्वं न तद्विद्यास्वधिकारस्यापवादकम् । न ह्याहवनीयादिरहितेन विद्या वेदितुं न शक्यते । भवति च लिङ्गं शूद्राधिकारस्योपोद्बलकं, संवर्गविद्यायां हि जानश्रुतिं पौत्रायणं शुश्रूषुं शूद्रशब्देन परामृशति "अह हारेत्वा शूद्र ! तवैव सह गोभिरस्तु" इति । विदुरप्रभृतयश्च शूद्रयोनिप्रभवा अपि विशिष्टविज्ञानसम्पन्नाः स्मर्य्यन्ते । तस्मादधिक्रियते शूद्रो विद्यास्वित्येवं प्राप्ते ब्रूमः । न शूद्रस्याधिकारो वेदाध्ययनाभावात् । अधीतवेदो हि विदितवेदार्थो वेदार्थेष्वधिक्रियते, न च शूद्रस्य वेदाध्ययनमस्ति, उपनयनपूर्व्वकत्वाद्वेदाध्ययनस्य उपनयनस्य च वर्णत्रयविषयत्वात् । यत्त्वर्थित्वं न तदसति सामर्थ्येऽधिकारकारणं भवति । सामर्थ्यमपि न लौकिकं केवलमधिकारकारणं भवति शास्त्रीयेऽर्थे शास्त्रीयस्य सामर्थ्यस्यापेक्षितत्वात् शास्त्रीयस्य च सामर्थ्यस्याध्ययननिराकरणेन निराकृतत्वात् । यच्चेदं शूद्रो यज्ञेऽनवक्लृप्त इति तत् न्यायपूर्व्वकत्वाद्विद्यायामप्यनवक्लृप्तत्वं द्योतयति न्यायस्य साधारणत्वात् । यत् पुनः संवर्गविद्यायां शूद्रशब्दश्रवणं लिङ्गं मन्यसे न तल्लिङ्गम्, न्यायाभावात् । न्यायोक्ते हि लिङ्गदर्शनं द्योतकं भवति, न चात्र न्यायोऽस्ति कामञ्चायं शूद्रशब्दः संवर्गविद्यायामेवैकस्यां शूद्रमधिकुर्य्यात् तद्विषयत्वात् न सर्व्वासु विद्यासु, अर्थवादस्थत्वात् न तु क्वचिदप्ययं शूद्रमधिकर्त्तुं शक्नोति । शक्यते चायं शूद्रशब्दोऽधिकृतविषये योजयितुम् । कथमित्युच्यते । "कं वर एनमेतत् सन्त

सयुग्वानमिव रैक्कमात्थेति अस्माद्धंसवाक्यादात्मनोऽनादरश्रुतवतो जानश्रुतेः पौत्रायणस्य शुगुत्पेदे तामृषी रैक्कः शूद्रशब्देनानेन सूचयाम्बभूवात्मनः परोक्षज्ञानस्य ख्यापनायेति गम्यते, जातिशूद्रस्यानधिकारात्। कथं पुनः शूद्रशब्देन शुगुत्पन्ना सूच्यते इति, उच्यते, तदाद्रवणात् शुचमभिदुद्राव शुचा वाभिदुद्रुवे शुचा वा रैक्कमभिदुद्रावेति शूद्रावयवार्थसम्भवात् रूढार्थस्य चासम्भवात्। दृश्यते चायमर्थोऽस्यामाख्यायिकायाम्"।

शूद्रार्त्ता स्त्री शूद्रेणार्त्ता पीड़िता। प्रियङ्गौ शब्दच०।

शूद्रावेदिन् स्त्री शूद्रां विन्दति विद–णिनि उप०। शूद्रजातिस्त्रिया विवाहकर्त्तरि। "शूद्रावेदी पतत्यत्रेः" मनुः "कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः। शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते। ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः" इति मनुना कामतश्चातुर्वर्ण्यविवाहे विहितेऽपि शूद्रावेदीत्यस्याधिकदोषार्थता द्विजातिस्त्रीलाभे शूद्रस्त्रीविवाहनिषेधार्थता च। स च विवाहः युगान्तरविषयः कलौ असवर्णस्त्रीविवाहनिषेधात् कलिशब्दे १८०२ पृ० दृश्यम्।

शूद्रान्न न०६त०। शूद्रस्वामिकान्ने तच्च द्विजैरभक्ष्यम् यथा हारीतः "शूद्रान्नेन तु भुक्तेन उदरस्थेन यो मृतः। स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चाधिगच्छति" अं०त० धृत वाक्यं शूद्रान्नं शूद्रस्वामिकान्नं रघु०। "आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते" इति तत्पक्वान्नस्य सर्वथा निषेधादत्र अपक्वमेव शूद्रस्वामिकान्नं गृह्यते। तद्दत्तमपि भोजनकाले तद्गृहावस्थितं तदपि शूद्रान्नं तदाहाङ्गिराः "शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि। निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्" तेन शूद्रवेश्मस्थितक्षीरदध्यादिकमपि शूद्रान्नं पारिभाषिकमिति बोध्यम्। निवृत्तेन शूद्रान्नानिवृत्तेन। तदपीति अपिशब्दात् शालाद्युत्पन्नतण्डुलादि न तु तद्दत्तकपर्दकादिना क्रीतमपि। स्वगृहागते शूद्रान्ने अङ्गिराः "यथा यतस्ततो ह्यापः शुद्धिं यान्ति नदीं गताः। शूद्राद्विप्रगृहेष्वन्नं प्रविष्टन्तु सदा शुचि" प्रविष्टं स्वत्वापादकप्रतिग्रहादिनेति शेषः। अतएव पराशरः "तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः। द्विजातिकरसंस्पृष्टं सर्वं तद्धविरुच्यते"। स्पृशति प्रतिगृह्णातीति कल्पतरुः। अत्र संप्रोक्ष्य ग्राह्यमित्याह विष्णुपु० "संप्रोक्ष्य प्रतिगृह्णीयाच्छूद्रान्नं गृहमागतम्" तच्च पात्रान्तरे ग्राह्यमित्याहाङ्गिराः "स्वपात्रे यत्तु विन्यस्तं शूद्रो यच्छति नित्यशः। पात्रान्तरगतं ग्राह्यं दुग्धं स्वगृहमागतम्"। एतेन स्वगृहमागतस्यैव शुद्धत्वं प्रतीयते तत्रचैतादृशमपि मुमूर्षुणा शूद्रान्नं सर्वथा न भोक्तव्यम् प्रागुक्तहारीतवचने तन्निन्दाश्रवणात्" शु०त०। "नाद्यात् शूद्रस्य विप्रोऽन्नं मोहाद्वा यदि वान्यतः। स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि। षण्मासान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम्। जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते। ब्राह्मणक्षत्रियविशां शूद्रस्य च मनीषिणः। यस्यान्नेनोदरस्थेन मृतस्तद्योनिमाप्नुयात्" व्यासवाक्यम् "आर्द्धिकः कुलमित्रञ्च गोपालो दासनापितौ। एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्। कुशीवलः कुम्भकारः क्षेत्रकर्मक एव च। एते शूद्रेषु भोज्यान्ना दत्त्वा स्वल्पपणं बुधैः। पायसं स्नेहपक्वञ्च यावकञ्चैव सक्तवः। पिण्याकश्चैव तैलञ्च शूद्राद् ग्राह्यं द्विजातिभिः" कूर्मपु० ७त० भागे १६अ०। "कन्दुपक्वानि तैलेन पायसं दधिसक्तवः। द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि"। "कुलमित्रादीनां भोज्यान्नता तु कलीतरपरा। शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम्। भोज्यान्नता गृहस्थस्य तीर्थसेवाऽतिदूरतः" पराशरेण कलौ वर्ज्यप्रोक्तेः शूद्रोऽपि ब्राह्मणद्वारा पक्वान्नेन नैवेद्यं दातुमर्हति वृषोत्सर्गाङ्गचरुपाकादिवत् तत्रापि तस्याधिकार इति ति०त० दुर्गोत्सवप्रकरणे रघुनन्दनेन व्यवस्थापितम् तत्र दृश्यम्।

शूद्रासुत पु० शूद्रायाः द्विजातिभिः ऊढायाः सुतः। द्विजातिजाते शूद्रजातिस्त्रियाः सुते पुत्रभेदे।

शूना स्त्री श्वि–अधिकरणे–क्त सम्प्र०दीर्घः। १प्राणिवधस्थाने हला०। "पञ्च शूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्" मनुः। तद्दोषनिवृत्तये कार्य्या मनुना पञ्च यज्ञा विहिता यथा "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्। पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः। स गृहेऽपि वसन्नित्यं शूनादोषैर्न लिप्यते"। (चालनिय) २अधोजिह्वायां हारा०।

शून्य त्रि०शूनायै प्राणिबधाय हितम् रहस्यस्थानत्वात् यत्। १निर्जनस्थाने मेदि०। २आकाशे शब्दच०। ३बिन्दुमात्रे हेमच०। ४अभावे च अमरः। ५असम्पूर्णे ६[illegible] ७तुच्छे च त्रि० अमरः। [२शून्यभव्ययुक्त त्रि०।

शून्यमध्य पु० शून्यमाकाशो मध्ये यस्य । १नले राजनि० ।
शून्यवादिन् पु० शून्यमभावमात्रं सर्वकारणतया वदति
वद–णिनि । बौद्धभेदे बुद्धशब्दे ४५८१ पृ० दृश्यम् ।
शून्या स्त्री शून्यमन्तरमस्याः अच् । १नल्यां विश्वः । २महा-
कण्टकिन्याम् । (फणिमनसा) राजनि० । [ईदित् शूर्यः
शूर हिंसे स्तम्भे च दि०आ०सक०सेट् । शूर्यते अशूरिष्ट ।
शूर विक्रमे अद० चु० उभ० सक० सेट् । शूरयति ते
अशुशूरत् त ।
शूर पु० शूर–अच् । १वीरे विक्रमवति अमरः । २वसुदेव-
नामके यादवे मेदि०। ३सूर्ये त्रिका० ४अर्कवृक्षे ५सिंहे
६शूकरे पुंस्त्री० स्त्रियां ङीष् । ७चित्रकवृक्षे ८शाले
९निकुचे १०मसूरे च पु० राजनि० ।
शूरण पु० शूर–ल्यु । (ओल) १मूलभेदे अमरः “शूरणो
दीपनो रूक्षः कषायः कण्डुकृत् कटुः । विष्टम्भी
विशदो रुच्यः कफार्शःकृन्तनो लघुः । विशेषादर्शसे
पथ्यः प्लीहगुल्मविनाशनः । सर्वेषां कन्दशाकानां शूरणः
श्रेष्ठ उच्यते । दद्रूणां रक्तपित्तानां कुष्ठानां न हितो
हि सः । सन्धानयोगसंप्राप्तः शूरणो गुणसत्तमः”
भावप्र० । २श्योणाकवृक्षे च शब्दमाला । [च ।
शूरसेन पु०शूरा सेना यत्र, यस्य वा । १देशभेदे २नृपभेदे
शूर्प माने चु०उभ० सक० सेट् । शूर्पयति ते अशुशूर्पत् त ।
शूर्प पु०शूर्प्यते धान्यादिकमनेन शूर्प–घञ् । (कुला) धान्या-
दिस्फोटके १वंशमयपात्रे २द्रोणद्वयपरिमाणे च शब्दच० ।
शूर्पकर्ण पुंस्त्री० शूर्पे इव कर्णौ यस्य । १गजे त्रिका० ।
स्त्रियां ङीष् । २शूर्पश्रुतिरप्यत्र हारा० ।
शूर्पणखा(खी) स्त्री शूर्पे इव नखा यस्याः णत्वम् वा ङीष् ।
रावणभगिन्यां शब्दमा० । [शब्दच० ।
शूर्पपर्णी स्त्री शूर्पे इव पर्णान्यस्याः ङीप् । शिम्बीभेदे
शूर्पवात पु० ६त० । शूर्पजवायौ फुत्कफाले त्रिका० ।
शू(सू)र्म्म पु०शृ–उ ऊर्मिरस्त्यस्याः अच् पृषो०सस्य शः । लौ-
हप्रतिमायाम् अमरः । [लौहादिप्रतिमायां शब्दच० ।
शू(सू)र्मि(र्मी) स्त्री शृ–उ ऊर्मिः यस्याः वा सत्वम् वा ङीप् ।
शूल रुजायां भ्वा०पर० सक० सेट् । शूलति अशूलीत् ।
शूल पु०न० शूल–क । १रोगभेदे २त्रिशूले च अमरः । ३व्य-
थायां ४मृत्यौ ५शूलोक्ते अयःफाले धरणिः । ६चिह्ने
मेदि० । ७योगभेदे विष्कम्भादिषु नवमे योगे च पु० ।
८विक्रये तत्र “अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः ।
केशशूलाः स्त्रियो राजन् ! भविष्यन्ति युगक्षये” भा०व०

१८८ अ०। चक्रशब्दे ८५४ पृ० दृश्यम् । शूलरोगभेद नि-
दानादिकं भावप्र० उक्तं यथा
“अथ शूलाधिकारः । तत्र शूलस्य सविप्रकृष्टं निदान-
माह “दोषैः पृथक्समस्तामद्वन्द्वैः शूलोऽष्टधा भवेत् ।
सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः(कर्त्ता)” । अथ वा-
तिकस्य विप्रकृष्टं निदानं सम्प्राप्तिपूर्वकं लक्षणञ्चाह “व्या-
यामयानादतिमैथुनाच्च प्रजागराच्छीतजलातिपानात् ।
कलायमुद्गाढककोरदूषादत्यर्थरूक्षाध्ययनाभिघातात् । क-
षायतिक्तातिविरूढजान्नविरुद्धवल्लूरकशुष्कशाकैः । विट्-
शुक्रमूत्रानिलवेगरोधाच्छोकोपवासादतिहास्यभाषात् ।
वायुः प्रवृद्धो जनयेद्धि शूलं हृत्पृष्ठपार्श्वत्रिकवस्तिदेशे ।
जीर्णे प्रदोषे च घनागमे च शीते च कोपं समुपैति
गाढम् । मुहुर्मुहुश्चोपशमप्रकोपौ विण्मूत्रसंस्तम्भनतोद-
भेदैः । संस्वेदनाभ्यञ्जनमर्दनाद्यैः स्निग्धोष्णभोज्यैश्च
शमं प्रयाति” । व्यायामो मल्लयुद्धादिः यानं तुरगरथादि
मैथुनं स्त्रीसेवा प्रजागरो रात्रौ, एषामतियोगात् शीत-
जलप्रभूतपानात् कलायस्त्रिपुटः आढकः तुवरी
कोरदूषः कोद्रवः । अतिरूक्षद्रव्यसेवा, अध्ययनं भुक्तस्यो-
परि भोजनम् अभिघातो लोष्टादिभिः, कषायतिक्तरस-
सेवा विरूढजान्नम् विरूढमङ्कुरितमन्नम् कलायच-
णकादि तज्जमन्नं भक्ष्यम् । वल्लूरकं शुष्कमांसम् । तस्य
शूलस्य देशमाह हृदादिषु तत्र हृच्छूलस्य पृथगपि
लक्षणं पठन्ति “कफपित्तावरुद्धस्तु मारुतो रसमूर्च्छितः ।
हृदिस्थः कुरुते शूलमुच्छ्वासरोधकम् । स हृच्छूल
इति ख्यातो रसमारुतकोपजः” । अथ पार्श्वशूलस्यापि
लक्षणमाह “कफं निगृह्य पवनः सूचीभिरिव निस्तु-
दन् । पार्श्वस्थः पार्श्वयोः शूलं कुर्य्यादाध्मानसंयुतम् ।
तेनोच्छ्वसिति वक्त्रेण नरोऽन्नञ्च न काङ्क्षति । निद्राञ्च
नाप्नुयादेव पार्श्वशूलः प्रकीर्त्तितः” । वस्तिशूलस्यापि
लक्षणमाह “रोधात् कुपितो वायुर्वस्तिं संश्रित्य ति-
ष्ठति । वस्तेर्ध्वनि नाड़ीषु ततः शूलोऽस्य जायते ।
विण्मूत्रवातसंरोधी वस्तिशूलः स उच्यते” । प्रकृत-
मनुसरति जीर्णे भुक्ते प्रदोषे रात्र्यागमे रात्रि-
भवशीतेन वातप्रकोपात् । घनागमे वर्षासु मेघोदये
च तथैव । पैत्तिकमाह “क्षारातितीक्ष्णोष्णविदाहि-
तैलनिष्पावपिण्याककुलत्थयूषैः । कट्वम्लसौवीरसुरावि-
कारैः क्रोधानलायासरविप्रतापैः । ग्राम्यातियोगाद-
शनैर्विदग्धैः पित्तं प्रकुप्याशु करोति शूलम् । तृण्मोह

दाहार्त्तिकरं हि नाभ्यां संस्वेदमूर्च्छाभ्रमशोषयुक्तम्। मध्यन्दिने कुप्यति चार्द्धरात्रे निदाघकाले जलदात्यये च। शीते च शीतैः समुपैति शान्तिं सुस्वादुशीतैरपि भोजनैश्च"। निष्पावो राजमाषः। सौवीरं कञ्जिकभेदः। सुराविकारैः "परिपक्वान्नसन्धानसमुत्पन्ना सुरा मता"। तस्या विकारैः। रविप्रतापः आतपः। व्यायामातियोगो मैथुनाधिक्यम्। विदाहीत्युक्तापि यवनैर्विदग्धैरिति बोधयति अविदाहिवस्तुनोऽपि पित्तवशाद्विदाहित्वं भवति। जलदात्यये शरदि। शीतैर्वातादिभिः। श्लैष्मिकमाह "आनूपवारिजकिलाटपयोविकारैर्मांसेक्षुपिष्टकृशरातिलशष्कुलीभिः। अन्यैर्बलासजनकैरपि हेतुभिश्च श्लेष्मा प्रकोपमुपगम्य करोति शूलम्। हृल्लासकाससदनारुचिसम्प्रसेकैरामाशये स्तिमितकोष्ठशिरोगुरुत्वैः। भुक्ते सदैव हि रुजं कुरुतेऽतिमात्रम् सूर्योदयेऽथ शिशिरे कुसुमागमे च"। आनूपं बहुलजलदेशजं मांसम्। वारिजं शम्बूकादि "पक्वं दध्ना समं क्षीरं विज्ञेया दधिकूर्चिका। तक्रेण तक्रकूर्ची स्यात्तयोः पिण्डः किलाटकः"। पयोविकारः पायसादिः पिष्टं माषादिः। अन्यैः गुर्वादिभिः। स्तिमितमार्द्रपटावगुण्ठितमिव यत्कोष्ठं शिरश्च तयोर्गुरुत्वैः सह। सूर्योदय इति त्रिधा विभक्तदिवसप्रथमभागस्योपलक्षणम्। शिशिरे तत्र कफस्यातिसञ्चयात्। कुसुमागमे वसन्ते। द्वन्द्वजमाह "द्विदोषलक्षणैरेतैर्विद्याच्छूलं द्विदोषजम्। सर्वेषु देशेषु च सर्वलिङ्गं विद्याद्भिषक् सर्वभवं हि शूलम्। सुकष्टमेनं विषवज्रकल्पं विवर्जनीयं प्रवदन्ति तज्ज्ञाः"। सर्वेषु देशेषु हृत्पृष्ठपार्श्वत्रिकवस्तिनाभ्यामाशयेषु। सर्वभवं त्रिदोषजम्। आमजमाह "आटोपहृल्लासवमीगुरुत्वस्तैमित्यमानाहकफप्रसेकैः। कफस्य लिङ्गेन समानलिङ्गमामोद्भवं शूलमुदाहरन्ति"। आमाशये जाते पश्चाद्दोषसम्बन्धः अतएवास्य शूलस्याष्टमत्वमुक्तम्। तच्च प्रथममामाशये भवति पश्चात् सम्बन्धिभिर्दोषैर्वस्तिनाभिहृत्पार्श्वकुक्षिषु भवति यथा दोषसम्बन्धः। आमशूलस्य दोषविशेषेण देशविशेषमाह "वातात्मकं वस्तिगतं वदन्ति पित्तात्मकञ्चापि वदन्ति नाभ्याम्। हृत्पार्श्वकुक्षौ कफसन्निविष्टं सर्वेषु देशेषु च सन्निपातात्"। हृत्पार्श्वकुक्षौ हृत्पार्श्वाभ्यां सहिते कुक्षौ। कफसन्निविष्टं कफेनाविष्टम् "वक्षो हृत्कटिपार्श्वेषु स शूलः कफवातिकः४ कुक्षौ हृन्नाभिमध्ये तु स शूलः कफपैत्तिकः५। दाहज्वरकरो घोरो विज्ञेयो वातपैत्तिकः"। तन्त्रान्तरोक्तमामशूलमाह "अतिमात्रं यदा भुक्तं पावके मृदुताङ्गते। स्थिरीभवत्तु तद्भक्तं वायुरावृत्य तिष्ठति। यदान्नं न गतं पाकं तच्छूलं कुरुते भृशम्। मूर्च्छाध्मानं विदाहञ्च हृत्क्लेशञ्च विलम्बिकम्। कम्पं वान्तिमतीसारं प्रमेहं जनयेदपि। अविपाकोद्भवं शूलमेतमाहुर्मनीषिणः" अविपाकोद्भवम् आमोद्भवमित्यर्थः। अथ शूलस्योपद्रवानाह "वेदनातितृषा मूर्च्छा आनाहो गौरवारुची। कासः श्वासो वमिर्हिक्का शूलस्योपद्रवाः स्मृताः"। अथासाध्यत्वादिकमाह "एकदोषानुगः साध्यः कृच्छ्रसाध्यो द्विदोषजः। सर्वदोषान्वितो घोरस्त्वसाध्यो भूर्युपद्रवः"। अथारिष्टमाह "वेदनातितृषा मूर्च्छा आनाहो गौरवं ज्वरः। भ्रमोऽरुचिः कृशत्वञ्च बलहानिस्तथैव च। उपद्रवा दशैते तु यस्य शूलेषु, नास्ति सः"। अथ शूलस्यैव भेदं परिणामशूलमाह "स्वैर्निदानैः प्रकुपितो वातः सन्निहितो यदा। कफपित्ते समावृत्य शूलाकारो भवेद्बली। भुक्ते जीर्यति यच्छूलं तदेव परिणामजम्"। स्वैर्निदानैरित्यादिना निदानपूर्विका संप्राप्तिरुक्ता भुक्ते जीर्यतीत्यादिना लक्षणम्। समावृत्य व्याप्य। तस्य लक्षणमप्येतत् समासेनाभिधीयते। "आध्मानाटोपविण्मूत्रविबन्धारतिवेपनैः। स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेद्भिषक्। तृष्णादाहारतिस्वेदकट्वम्ललवणोत्तरम्। शूलं शीतशमप्रायं पैत्तिकं लक्षयेद्बुधः। छर्दिहृल्लाससम्मोहस्वल्परुग्दीर्घसन्तति। कटुतिक्तोपशान्तौ च विज्ञेयन्तु कफात्मकम्। संसृष्टलक्षणं बुद्ध्वा द्विदोषं परिकल्पयेत्। त्रिदोषजमसाध्यं स्यात् क्षीणमांसबलानलम्"। अथान्नद्रवाख्यं शूलविशेषमाह "जीर्णे जीर्यति चाप्यन्ने यच्छूलमुपजायते। पथ्यापथ्यप्रयोगेण भोजनाभोजनेन वा। न शमं याति नियमात् सोऽन्नद्रव उदाहृतः। नेदं शूलमसाध्यं चिकित्साभिधानात्"।

अथ शूले पथ्यापथ्ये भावप्र० दर्शिते यथा

"कलायचणगोधूमाः श्यामाकाः कोरदूषकाः। शालमाषाश्च कुलत्थाः कङ्गुयावकाः। दधिमण्डरसं क्षीरं सर्पिर्गव्यं समाहिषम्। वास्तुकं कारवल्ली च कर्कोटकफलानि च। बर्हिणो हरिणास्तद्वा रोहिताद्याः कपिञ्जलाः। पर्त्तिकाद्यापवे पतत्रिणामतामस्मिन्वितवर्द्धैः

दधिशूल्यरसं दध्ना लुप्तः कृतो रसो यस्य तत्क्षीरं दधियुक्तं क्षीरमित्यर्थः। "व्यायामं मैथुनं मद्यं लवणं कटुकं रसम्। वेगरोधं शुचं क्रोधं विदलं शूलवान् त्यजेत्"। स च उपपातकचिह्नं यथोक्तं शाता० कर्मवि०
"जलोदरयकृत्प्लीहशूलरोगव्रणानि च। श्वासाजीर्णज्वरच्छर्दिभ्रममोहगलग्रहाः। रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः"।

शूलक पुंस्त्री० शूल+संज्ञायां कन्। १दुर्विनीताश्वे हेमच०। स्त्रियां ङीष्। स्वार्थे क। २शूलशब्दार्थे।

शूलग्रन्थि पु० शूलाकारः ग्रन्थिरस्य। मालादूर्वायां राजनि०

शूलघातन न० शूलं रोगभेदं घातयति हन-णिच्-ल्यु। मण्डूरे शब्दच०।

शूलघ्न पु० शूलं हन्ति हन-क। तुम्बुरवृक्षे रत्नमा०।

शूलद्विष् पु० ६त०। हिङ्गौ रत्नमाला। [शब्दच०।

शूलधन्वन् पु० शूलं धनुरायुधमस्य अनङ् समा०। शिवे

शूलधर पु० शूलं धारयति धारि-अच् ह्रस्वः। शिवे शब्दच०। भृ-क्विप्। शूलभृदप्यत्र। [स्त्री ङीप् शब्दच०।

शूलधारिन् पु० शूलं धरति धृ-णिनि। १शिवे १दुर्गायां

शूलधृष् पु० शूलेन धर्षति दैत्यान् धृष-क्विप्। १शिवे २दुर्गायां स्त्री। धृज-क्विन्। शूलधृज् तत्रार्थे।

शूलनाशन न० शूलं नाशयति नश-णिच्-ल्यु। सौवर्चलवणे हेमच०। [राजनि०।

शूलपर्णी स्त्री शूलमिव पर्णं यस्याः ङीप्। शूलीतृणे

शूलपाणि पु० शूलं पाणौ यस्य। शिवे शूलहस्तादयोऽप्यत्र।

शूलशत्रु पु० शूलस्य रोगस्य शत्रुः। एरण्डवृक्षे शब्दच०।

शूलहन्त्री स्त्री शूलं रोगं हन्ति हन-तृच् ङीप्। यवान्यां राजनि०।

शूलहृत् पु० शूलं रोगं हरति हृ-क्विप्। हिङ्गुनि त्रिका०।

शूला स्त्री शूलं तदाकारोऽस्त्यस्य शूलं स्वयौवनविक्रयतयाऽस्त्यस्या वा अच्। १दुष्टवधार्थकीलके २वेश्यायाञ्च त्रिका०।

शूलाकृत त्रि० शूलेन विद्धा कृतं पक्वम् शूल+डाच्+कृ-क्त। लौहादिकीलकेन विद्धा पक्वे मांसे (काबाब) अमरः

शूलिक त्रि० शूलं पाकसाधनत्वेनास्त्यस्य ठन्। १शूलाकृते शब्दच० २शशके हेमच० ३शूलयुते त्रि०।

शूलिन् पु० शूलमस्त्यस्य इनि। १शूलरोगयुक्ते २शूलास्त्रधारके त्रि० ३शिवे पु० ४शशके भावप्र०। [हषे शब्दच०।

शूलिम पु० शूलं तदाकारं फलमस्त्यस्य इमन्। भाण्डीर-

शूली स्त्री शूलं पत्राकारे अस्त्यस्य अच् गौरा० ङीष्। शूलाकारपत्रयुते स्वनामख्याते तृणभेदे राजनि०।

शूलोत्खा स्त्री शूलं रोगभेदमुत्खनति उद्+खन-ड। श्यामलतायां शब्दच०।

शूल्य त्रि० शूले संस्कृतं यत्। शूलाकृते मांसे भावप्र० कृतान्नशब्दे तत्पाकादि २१८२ पृ० दृश्यम्।

शूष प्रसवे भ्वा० पर० सक० सेट्। शूषति अशूषीत्।

शृ(सृ)गाल पुंस्त्री० असृजं लाति ला-क पृषो०। (शेयाल) १पशौ अमरः स्त्रियां ङीष्। २दैत्यभेदे मेदि०। ३वासुदेवे ४निष्ठुरे ५खले च पु० सारस्वताभिधानम्। पृषा० शृकाल तत्रार्थे शब्दच०। ६भीरौ अमरादिकोषः। शृगालशब्दमातृकं शिवारुतशब्दे दृश्यम्।

शृगालकण्टक पु० शृगालस्येव इव कण्टको यस्य। (शेयालकाँटा) क्षुपभेदे शब्दच०।

शृगालकोलि पु० शृगाल इव कण्टकितः कोलिः। (शेयाकुल) क्षुपभेदे रत्नमाला। [लाक्षे क्षुपभेदे राजनि०।

शृगालघण्टी स्त्री शृगाल इव कण्टकिनी घण्टी। कोकि-

शृगालजम्बू स्त्री शृगालप्रिया जम्बूरिव। १गोडुम्बे (गोडुम्ब) २कोष्टाफले मेदि०। [राजनि०।

शृगालविन्ना स्त्री शृगालैर्विद्यते विद-क्त। पृश्निपर्ण्यां

शृगालिका स्त्री शृगालस्य भार्या ङीष् स्वार्थे क। १शृगालयोषिति शृगालीव इवार्थे कन्। २भयात् पलायने मेदि०।

शृगाली स्त्री शृगालस्तत्पलायनं सादृश्येनास्त्यस्य अच् ङीप्। १पलायने त्रिका०। २कोकिलाक्षे ३विदार्य्यां राजनि०।

शृङ्खल पु० शृङ्गात् प्राधान्यात् स्खल्यतेऽनेन पृषो०। निगडे २लौहमये ३पादबन्धने च हेमच०। ४कट्याभरणे अमरः ५पुंस्कटीवस्त्रबन्धने मेदि०। तत्रार्थे स्त्रीत्वमपि टाप्।

शृङ्खलक पुंस्त्री० शृङ्खल इव कायति कै-क। १उष्ट्रे राजनि० स्त्रियां जातित्वात् ङीष् स्वार्थे क। २शृङ्खलशब्दार्थे।

शृङ्खलित त्रि० शृङ्खला जाताऽस्य इतच्। बद्धनिगडे [illegible]

शृङ्खली स्त्री शृङ्खलः तदाकारोऽस्त्यस्याः अच् गौरा० ङीष्। १कोकिलाक्षे वृक्षे २पुंस्कटीवस्त्रबन्धने च राजनि०।

शृङ्ग न० शृ-गन् पृषो० मुम् ह्रस्वश्च। १पर्वतोपरिभागे सानौ अमरः। २प्रभुत्वे ३चिह्ने ४जलक्रीडार्थयन्त्रभेदे (पिचकारी) ५पश्वादीनां विषाणे (शिङ्गा) ६उत्कर्षे च मेदि०। ७अग्रे ८तीक्ष्णे ९पद्मे च शब्दर० १०[illegible]-

शृङ्गनिर्मितवाद्यभेदे (शिङ्गा) ११कामोद्रेके सा०द० शृङ्गाररसशब्दे दृश्यम्। १२कूर्चशीर्षकवृक्षे पु० मेदि० १३ऋषिभेदे पु०।

शृङ्गक पु० शृङ्गमिव कायति कै–क। जीवकवृक्षे जटा०।

शृङ्गकन्द पु० शृङ्गमिव कन्दोऽस्य। शृङ्गाटके (पानीफल) राजनि०।

शृङ्गज न० शृङ्गे पर्वताग्रे जायते जन–ड। १अगुरुचन्दने रत्नमा०। २वाणे हेतुवृक्षे पु० शब्दरत्ना०। ३शृङ्गजातमात्रे त्रि०

शृङ्गमूल पु० शृङ्गमिव मूलमस्य। शृङ्गाटके राजनि०।

शृङ्गमोहिन् पु० शृङ्गाय कामोद्रेकाय मोहयति मुह–णिच्–णिनि। चम्पके राजनि०।

शृङ्गला स्त्री शृङ्गं तदाकारफलं लाति ला–क। अजशृङ्ग्यां (गाड़रशिङा) शब्दच०।

शृङ्गवत् पु० शृङ्गं प्राशस्त्येनास्त्यस्य मतुप् मस्य वः। १सीमापर्वतभेदे तन्नामादिभाग० ५।१६ अ० उक्तं यथा "उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयः द्विसहस्रयोजनपृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरं दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति"। २शृङ्गयुते त्रि०।

शृङ्गवेर न० शृङ्गमिव वेरमवयवो यस्य। १आर्द्रके अमरः। २शुण्ठ्यां ३रामचित्रकुटकसमीपस्थपुरे च। स्वार्थे क। आर्द्रके हेमच०। [एरकाङ्के भावप्र०।

शृङ्गवेराभमूलक पु० शृङ्गवेरेण तुल्यं मूलमस्य कप्।

शृङ्गाट पु० शृङ्गं प्राधान्यमटति अट–अण्। १उत्तरस्य पर्वतभेदे २चतुष्पथे ३जलकण्टकिवृक्षे च ४तत्फले न०। "शृङ्गाटकं हिमं स्वादु गुरु वृष्यं कषायकम्। ग्राहि शुक्रानिलश्लेष्मदं पित्तास्रदाहनुत्" भावप्र०। स्वार्थे क। तत्र, चतुष्पथे अलङ्कारोक्ते अस्त्रभेदरूपे गन्धालङ्कारे च। स च पर्वतः कामाख्यादेशस्थः तथोक्तं कालिकापु०८२अ० यथा

"हीवत्याः पूर्वतस्तु शृङ्गाटो नाम पर्वतः। तत्र भर्गस्य देवस्य लिङ्गमेकं प्रतिष्ठितम्। सरित्तु श्रिङ्गा निस्रोता दक्षिणोदधिगामिनी। शृङ्गाटकस्य सततं स्रवन्ती पादतः। दक्षिणं सागरं याति भर्गस्य नियकारिणी"। पक्वमांसभेदे तत्पाकविधिर्यथा "शुष्कमांसं तनूकृत्य कर्त्तितं क्षोदितं जले। लवङ्गं हिङ्गुसहितं चणकार्द्रकसंयुतम्। एलाजीरकधन्याकनिम्बूरससन्वितम्। घृते सगन्धे तद्भृष्टं पूरणं प्रोच्यते बुधैः। शृङ्गाटकं समितया कृतं पूरणपूरितम्। पुनः सर्पिषि सम्भृष्टं मांसं शृङ्गाटकं वदेत्। मांसं शृङ्गाटकं रुच्यं बृंहणं बलकृत् गुरु। वातपित्तहरं वृष्यं कफघ्नं वीर्य्यवर्द्धनम्" भावप्र०।

शृङ्गार पु० शृङ्गं कामोद्रेकमृच्छत्यनेन ऋ–अण्। १रसभेदे अमरः। २लवङ्गे ३सिन्दूरे ४चूर्णे च मेदि०। शृङ्गं कारणत्वेन ऋच्छति अण्। ५कालागुरुणि राजनि० ६आर्द्रके शब्दच०। शृङ्गं प्राधान्यमृच्छत्यनेन अण्। ७भूषणे ८गजभूषणे च। स्वार्थे क। सिन्दूरे "पुंसः स्त्रियां स्त्रियः पुंसि संयोगं प्रति या स्पृहा। स शृङ्गार इति ख्यातः रतिक्रीड़ादिकारणम्" इत्युक्ते स्त्रीपुंसयोरन्योन्यसंयोगं प्रतीच्छाभेदे च रसभेदलक्षणादिकं सा०द० उक्तं यथा

"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः। उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते। परोढां वर्जयित्वात्र वेश्यां चाननुरागिणीम्। आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः। चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्। भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः। त्यक्त्वौग्र्यमरणालस्यजुगुप्सा व्यभिचारिणः। स्थायी भावो रतिः श्यामवर्णोऽयं विष्णुदैवतः"। "शून्यं वासगृहमित्यादि"। अत्र उक्तस्वरूपः पतिरुक्तस्वरूपा च बाला आलम्बनविभावौ। शून्यं वासगृहमुद्दीपनविभावः। चुम्बनमनुभावः। लज्जाहासौ व्यभिचारिणौ। एतैरभिव्यक्तः सहृदयरतिभावः शृङ्गाररूपतां भजते। तद्भेदावाह। विप्रलम्भोऽथ सम्भोग इत्येष द्विविधो मतः"। तत्र विप्रलम्भो विप्रलम्भशब्दे उक्तः सम्भोगस्तु "दर्शनस्पर्शनादीनि निषेवेते विलासिनौ। यत्रानुरक्तावन्योन्यं सम्भोगोऽयमुदाहृतः"। आदिशब्दादन्योन्याधरपानचुम्बनादयः। यथा "शून्यं वासगृहमित्यादि"। "संख्यातुमशक्यतया चुम्बनपरिरम्भणादिबहुभेदात्। अयमेक एव धीरैः कथितः सम्भोगशृङ्गारः। तत्र स्यादृतुषट्कं चन्द्रादित्यौ तथास्तमयः। जलकेलिवनविहारप्रभातमधुपानयामिनीप्रभृतिः। अनुलेपनभूषाद्या वाच्यं शुचि मेध्यमन्यच्च"। तथा च भरतः "यत्किञ्चिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा तत्सर्वं शृङ्गारेणोपमीयते उपयुज्यते"। किन्तु "कथितश्चतुर्विधोऽसावानन्तर्य्यात्तु पूर्वरागादेः"। तदुक्तम् "न विना विप्र-

त्वम्भेन सम्भोगः पुष्टिमश्नुते । कषायिते हि वस्त्रादौ भूयान् रागो विवर्द्धते" ।

शृङ्गारभूषण न० शृङ्गारे तदर्थं भूषणम्। सिन्दूरे हेमच०।

शृङ्गारयोनि स्त्री ६त०। कामदेवे हला०।

शृङ्गारिन् पु० शृङ्गारः उद्दीपकत्वेनास्त्यस्य इनि। १पूगे तत्फलभक्षणे हि कामोद्रेक इति तस्य तथात्वम्। २गजे मेदि०। ३सुवेशे त्रि०। ४माणिक्ये पु० राजनि०।

शृङ्गिक न० शृङ्गं तदाकारोऽस्त्यस्य ठन्। १विषभेदे २अतिविषायां स्त्री शब्दर० [स्त्रियां ङीप्।

शृङ्गिण पु० शृङ्गं युद्धसाधनत्वेनास्त्यस्य इनन्। मेषे हेमच०

शृङ्गिन् पु० शृङ्गमस्त्यस्य इनि। १मेषे २कुलाचलभेदे शृङ्गवच्छब्दे दृश्यम्। ३पर्वतमात्रे ४मुनिभेदे ५वृक्षे च। ६शृङ्गयुक्ते त्रि० मेदि०। ७धेन्वां स्त्री ङीप्। ८ऋषभौषधे ९मल्लिकायां १०ज्योतिष्मत्यां च स्त्री मेदि०। मुनिभेदश्च शमीकर्षिपुत्रः स हि परिक्षितं प्रति तक्षकदंशनशापप्रदात् इति विष्णुपु० स्थितम्।

शृङ्गी स्त्री शृङ्गमस्त्यस्या अच् गौरा० ङीष्। १मद्गुरस्य प्रियायाम् अमरः। पृषो० ह्रस्वः। शृङ्गिरित्यपि तत्रार्थे शब्दर०। २अतिविषायां ३ऋषभौषधौ अमरः। ४कर्कटशृङ्ग्याम् ५स्वर्णे ६विषे च राजनि०। ७भूषणस्वर्णे रत्नकोषः "मद्गुरस्य प्रिया शृङ्गी" इत्यमरे मद्गुरस्य प्रियेति नामद्वयम्। तेन (शिङ्गी) मत्स्यस्यैवेदं नाम इति भरतः।

शृङ्गीकनक न० शृगि-कि वा० सम्प्र० ङीप् शृङ्गी अलङ्कारस्तदर्थं कनकम्। भूषणार्थस्वर्णे अमरः। [मरः।

शृ(सृ)णि स्त्री शृ-सृ वा क्निन् तस्य निः पृषो०। अङ्कुशे अ-

शृत त्रि० शृ-क्त। १पक्वे अमरः २क्वथित जलादौ च "द्रव्यादुत्थापिताच्चोयात् शीतलात् परितापितात्। निःसृतो यो रसः पूतः स शृतः समुदाहृतः" वैद्यकोक्ते ३द्रव्यक्वाथजे रसे पु०।

शृध अपानशब्दे भ्वा० आ० द्युता० लुङि लृटि लृङि च उभ० अक० सेट् क्त्वावेट्। शर्द्धते अशृधत् शर्त्स्यति शर्द्धिष्यते।

शृध छेदने भ्वा० उभ० सक० सेट् क्त्वा वेट्। शर्द्धति ते अशर्द्धीत् अशर्द्धिष्ट।

शृध प्रहणे चु० उभ० सक० सेट्। शर्द्धयति ते अशशर्द्धत् त

शृधु पु० शृध-कु। १बुद्धौ विश्वः। २कुत्सिते ३अपाने संक्षिप्तसा०

शॄ हिंसने क्र्या० प्वा० पर० सक० सेट्। शृणाति अशारीत्। शीर्णः।

शेखर पु० शिखि-गतौ अरन् पृषो०। १शिखायां २मूर्द्धस्थितमाल्ये च अमरः। ३चन्द्रायां स्त्री शब्दर० ङीप्। ४गीताङ्गे ध्रुवभेदे पु० तल्लक्षणं यथा "द्वादशाक्षरपादः स्यात् स चाल्पगुरुकस्तु प्रभोः। द्रावके च रसे वीरे गीयते शेखरो ध्रुवः। लघुर्दुर्भवेद्यत्र स भवेल्लघुशेखरः" संगीतदा०। [शिव०।

शेप पु० शी-पन्। १शेफे शिश्ने शब्दच०। २शयनकर्त्तरि

शेपाल पु० शेपः शयित इवालति अल-अच्। शैवाले शब्दर०

शेफ पु०न०। शी-फन्। १शिश्ने अमरः २शयनकर्त्तरि त्रि०। शुक्रपाते सति शेते शी-असि फुक् च शेफोऽप्यत्र न० "मेढ्रं लिङ्गं शिश्नशेफसोः" अमरः। शेफश्शेफसी शेफ शेपौ शेपश्चेति पञ्चशब्दास्तत्रार्थे तत्र पृषो० साधुतेति भरतः। [ङीप्। शेफालिकायां शब्दमा०।

शेफालि(ली) स्त्री शेफाः शयनशालिनः अलयो यत्र वा

शेफालिका स्त्री शेरते इति शेफाः अलयो यत्र वा कप्। (शिउलि) पुष्पवृक्षे अमरः "शेफालिका कटूष्णा च तिक्ता रूक्षा च वातहृत्। कफाङ्गसन्धिवातघ्नी कृमिवातादिदोषहृत्" राजनि०। [अमरः।

शेमुषी स्त्री शी-विच् शेः मोहस्तं मुष्णाति मुष-क। बुद्धौ

शेल गतौ चालने च भ्वा० पर० सक० सेट्। शेलति अशेलीत्। ऋदित् चङि न ह्रस्वः।

शेलु पु० शेल-उण्। बहुवारवृक्षे अमरः।

शेव पु० शुक्रपाते सति शेते शी-वन्। १पुंलिङ्गे २उन्नते ३अहौ च उणादिकोषः।

शेवधि पु० शेः धनादिमोहस्तस्य अवधिः। "पद्मोऽस्त्रियां महापद्मः शङ्खो मकरकच्छपौ। मुकुन्दकुन्दनीलाश्च निधयो नव शेवधिः" इत्युक्ते नवविधे निधौ अमरटीका।

शेवल न० शी-विच् तथाभूतः सन् वलते वल-अच्। शैवाले (शेवाला) शब्दच०।

शेवाल न० शेते विच् शे-सन् वलते वल-संज्ञायां कर्त्तरि घञ्। १शैवाले शब्दर०। २आकाशमांस्यां स्त्री राजनि०।

शेष पु० शिष-अच्। १अनन्ते सर्पराज सर्पभेदे २बलदेवे च मेदि०। ३अवशेषे अमरः। ४गजे ५उपयुक्तेतरवस्तुनि हलायुधः। ६भगवतो कालसंज्ञमूर्तौ "एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवामला। वासुदेवाभिधाना सा गुणातीता सुनिष्कला। द्वितीया कालसंज्ञा च तामसी शेषसंज्ञिता। निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः" कूर्मपु० ४८अ०। "शेषे षष्ठी" पा०सू० उक्तादन्यः

शेषः" भाष्यादयः। परोद्देशेन प्रवर्त्तमाने उपकारीभूते अस्य लक्षणविषयादि मीमांसासूत्रभाष्यादौ दर्शितं यथा "शेषः परार्थत्वात्" सू० "इह सूत्रे शेषस्य लक्षणम्, तेन च हेतुना शेषः इत्युच्यते, तदुभयमाख्यायते। यः परस्योपकारे वर्त्तते, स शेषः इत्युच्यते, यथा, ये परार्थाः, ते वक्तारो भवन्ति, शेषभूता वयमिह इति। ननु योऽपि प्रधानभूतः सोऽपि कदाचित् परार्थे वर्त्तते, यथा उपाध्यायः प्रधानभूतः शिष्याणां विद्याविनयाधाने वर्त्तते। सत्यं वर्त्तते, यस्तु अत्यन्तं परार्थः, तं वयं शेषः इति ब्रूमः, यथा, गर्भदासः कर्मार्थ एव स्वामिनोऽनुगुणं क्रीयते, वक्ष्यति इत्येव। ननु गर्भदासस्यापि स्वामी संविदधानो गुणभावमायात्। न इति ब्रूमः, आत्मन एवासौ संविदधानो गुणभावं गच्छति, नान्तरीयकत्वात् गर्भदासस्योपकरोति, अनकुर्वन् वा, यस्त्वत्यन्तं परार्थः, तं वयं शेषः इति ब्रूमः। अथ तत्र किं प्रमाणम्?। येषु द्रव्यं चिकीर्ष्यते गुणः तत्र प्रतीयेत इति, तत्र अपूर्वार्थता व्यावर्त्तिता, दृष्टप्रयोजनानाम् आम्नानात्। इह तु सर्वेषामेव शेषाणां लक्षणमुच्यते" शब०भा०। तत्र कस्यापि तत्राह "द्रव्यगुणसंस्कारेषु बादरिः" सू० "बादरिराचार्यः अत्र द्रव्यगुणसंस्कारेष्वेव शेषशब्दः इति मेने, न यागफलपुरुषेषु। द्रव्यं क्रियार्थं, यदि प्रयोजनवती क्रिया, व्यक्तं सा द्रव्येण निर्वर्त्तयितव्या, तस्या निर्वृत्तिर्द्रव्यादृते न भवति इति तन्निर्वृत्तये द्रव्यमेषितव्यं भवति, तस्मात् क्रियार्थं द्रव्यम्। गुणः शक्नोति विशिष्टं द्रव्यं चोदितं लक्षयितुम्, लक्षितेन च तेन प्रयोजनम्, विशिष्टस्य क्रियासाधनत्वात्, तस्मात् सोऽपि द्रव्यद्वारेण क्रियाया उपकरोति इति क्रियार्थ एव। संस्कारो नाम स भवति, यस्मिन् जाते पदार्थो भवति योग्यः कस्यचित् अर्थस्य, तेनापि क्रियायां कर्त्तव्यायां प्रयोजनम् इति सोऽपि परार्थः। तस्मात् द्रव्यगुणसंस्काराः परार्थत्वात् शेषभूताः। न तु यागफलपुरुषाः। यागः तावत् कर्त्तव्यः पुरुषस्य, न हि, तस्मिन् निर्वर्त्तिते किञ्चित् अपरमस्ति कर्त्तव्यम्। स हि पुरुषार्थः, यदन्यत् द्रव्यादि, तत् तदर्थं तस्य शेषभूतम्, स तु न किञ्चिदभिनिर्वर्त्तयितुम् क्रियते। फलमपि न तेन क्रियते, तस्मिन् तु कृते स्वयमेव तत् भवति। तस्मिन् कृते फलमस्य भवति इत्येतावत् गम्यते, नास्य यत्नो यागेन क्रियते फलमिति। तस्मात् यागो न शेषभूतः कस्यचित् अर्थस्य। फलमपि न पुरुषं प्रत्युपदिश्यते, यः स्वर्गं कामयते, स यागं कुर्यादित्येतावत् शब्देनोपदिश्यते, नात्मनः परस्य वा इति, स्वर्गं प्रत्यात्मानमेव स्वर्गकामः इति भवति, तस्मात् पुरुषं प्रति गुणभावेन न श्रूयते स्वर्गः, तस्मात् सोऽपि न शेषभूतः। न चेत् फलयागौ गुणभावेन चोद्येते, कस्य पुरुषः प्रधानभूतो भवति? प्रत्यक्षस्य द्रव्यत्वात् कर्म प्रति गुणभावः। तस्मात् द्रव्यगुणसंस्कारेष्वेव शेषभावं बादरिर्मेने" शब०भा०। "कर्माण्यपि जैमिनिः, फलार्थत्वात्" सू० "जैमिनिस्तु आचार्यः कर्माण्यपि शेषभूतानि मन्यते स्म, न बादरिरिवावधारणामनुमेने, स हि ददर्श, यागः कर्त्तव्यतया चोद्यते, फलकामस्य तु तत्साधनोपायत्वेन इति। एवं श्रुतोऽर्थः परिरक्षितो भविष्यति, अर्थवांश्चोपदेशः। एतमेवार्थं षष्ठेऽध्याये सूत्रैरेव साधयिष्यति। इह तु तत्सिद्धेनैव फलार्थत्वेन शेषभावं यागस्यापादयति च। तस्मात् अनवधारणा द्रव्यगुणसंस्काराः शेषभूताः यागोऽपि शेषभूतः फलम्प्रति" भा०। "फलं च पुरुषार्थत्वात्" सू०। "फलमपि पुरुषं प्रत्युपदिश्यते, यः, स्वर्गो मे भवेत् इत्येवं कामयते, तस्य यागः न तु स्वर्गः, स आत्मानं लभेत इति। आत्मनेपदप्रयोगात्, कर्त्रभिप्राये एतत् भवति, क्रियाफलमनुभवेत् कथं पुरुषः? इति यागः प्रयुज्यते। तस्मात् फलं पुरुषार्थं यागात् श्रूयते नात्मनिर्वृत्त्यर्थम्। तस्मात् शेषभूतम् इति" भा०। "पुरुषश्च कर्मार्थत्वात्" सू०। "पुरुषोऽप्यौदुम्बरीसम्मानादिषु गुणभूतः श्रूयते। तस्मात् अनवधारणा एषा, द्रव्यगुणसंस्कारेषु शेषत्वं बादरिर्मेने इति"। "अथ इदानीमस्मान् भगवान् वृत्तिकारः परिनिश्चिकाय, द्रव्यगुणसंस्कारेष्वेव नियतो यजिम्प्रति शेषभावः, आपेक्षिक इतरेषाम्। यागस्य द्रव्यम्प्रति प्रधानभावः, फलम्प्रति गुणभावः, फलस्य यागम्प्रति प्राधान्यम्, पुरुषम्प्रति गुणता, पुरुषस्य फलम्प्रति प्रधानता, औदुम्बरीसम्मानादि प्रति गुणत्वम् तस्मात् सम्यता अवधारणा, द्रव्यगुणसंस्कारा यागम्प्रति नियमतो गुणभूता एव" भा०। कस्यचित् शेषरक्षणनिषेधो यथा "ऋणशेषं चाग्निशेषं शत्रुशेषं तथैव च। पुनःपुनः प्रवर्द्धन्ते तस्मात् शेषं न कारयेत्" गरुडपु०। "प्रसादाभिजनिर्माल्यदाने शेषेति कीर्त्तितः" विश्वोक्तेः स्वामिना प्रसाददत्ते दमाल्ये स्त्री "तथेति शेषामिव भर्त्तुराज्ञाम्" कुमारः।

शेषरात्रि स्त्री० शेषं रात्रेः एकदेशिस०। रात्रिशेषे शब्दच०

शेषशयन पु० शेषः अनन्तः शयनमस्य। नारायणे तच्छयनप्रकारकालादि कालिकापु० २७अ० उक्तं यथा "अनन्तस्तत्र गत्वा तु यत्र क्षीरोदसागरः। तत्र स्वयं क्रिया युक्तं सुषुप्सन्तं जनार्द्दनम्। तस्योपधानमकरोदनन्तो दक्षिणां फणाम्। उत्तरां पादयोश्चक्रे उपधानं महाबलः। तालवृन्तं तदा चक्रे स शेषः पश्चिमां फणाम्। स्वयन्तु वीजयामास शेषरूपी जनार्द्दनम्। शङ्खं चक्रं नन्दकादिमिषुधी द्वे महाबलः। ऐशान्या फणया चाप स दध्रे गरुडं तदा। गदां पद्मञ्च शार्ङ्गञ्च तथैव विविधायुधम्। यानि चान्यानि तस्याग्नेय्या फणया दधौ। एवं कृत्वा स्वकं कायं शयनीयं तदा हरेः। भूतभव्यजगन्नाथं परापरगतिं हरिम्। दधार शिरसानन्तः स्वयमेव स्वकां तनुम्। एवं ब्रह्मदिनस्यैव प्रमाणेन निशां हरिः। सन्ध्यां च समधिप्राप्य शेते नारायणोऽव्ययः"। मनुना "शर्वरी तस्य तावती" इत्युक्तम्। "यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्। यदा स्वपिति शान्तात्मा तदा सर्वं प्रम्लायति" इत्युक्तेन प्रलयकाल एव तस्य शयनम्।

शैक्ष पु० शिक्षां तन्नामग्रन्थमधीते वेत्ति वा अण्। १शिक्षाग्रन्थाध्यायिनि २तद्वेत्तरि च। वृत्। शिक्षकोऽप्यत्र।

शैखरिक पु० शिखरे प्राचीराग्रभागे भवः ठक्। अपामार्गे अमरः।

शैखरेय पु० शिखरे भवः ढक्। अपामार्गे रत्नकोषः।

शैत्य न० शीतस्य भावः ष्यञ्। शीतलत्वे।

शैथिल्य न० शिथिलस्य भावः ष्यञ्। अदृढे संयोगभेदे।

शैनेय पु० शिनेर्गोत्रापत्यम् ढक्। सात्यकिनाम्नि यादवे।

शैरीय पु० शिरा+ठञ्। नीलझिण्ट्यां रत्नमा०। ढकञ् शैरेयक तत्रार्थे।

शैल न० शिलायां भवः अण्। १शैलेये गन्धद्रव्यभेदे। २तार्क्ष्यशैले मेदि०। ३शिलाजतुनि च राजनि०। शिलाः सन्त्यस्य मत्वा० अण्। ४पर्वते पु० अमरः। [राजनि०।

शैलगन्ध न० शैलस्य शैलजस्येव गन्धोऽस्य। शावरचन्दने

शैलज न० शैले पर्वते जायते जन–ड। १शैलनामख्याते गन्धद्रव्यभेदे रत्नमा०। २गजपिप्पल्यां ३सैंहल्यां ४दुर्गायाञ्च स्त्री राजनि०। [देवे त्रिका०।

शैलधन्वन् पु० शैलं गिरितुल्यं धनुरस्य अनङ् स०। महा·

शैलधर पु० शैलं गोवर्द्धनं धरति धृ–अच्। श्रीकृष्णे धनञ्जयः।

शैलपत्र पु० शैलमिव कठिनं पत्रमस्य। बिल्ववृक्षे राजनि०

शैलभित्ति पु० शैलं भिनत्ति भिद्–क्तिच्। टङ्के पाषाणदारणास्त्रे जटा०। [शैलाधिराजादयोऽप्यत्र।

शैलराज पु० शैलानां नगानां राजा टच् समा०। हिमाचले

शैलराजसुता स्त्री ६त०। हैमवत्यां पार्वत्यां "जाता शैलेन्द्रगेहे सा शैलराजसुता ततः" देवीपु० ४५अ०।

शैलवीज पु० शिलां तत्पर्य्यन्तं दूरं धावति अण् शैलं वीजमस्य। भल्लातके राजनि०।

शैलशिविर न० शैलानां नगानां शिविरमिव। समुद्रे त्रिका०।

शैलसार न० पु० न० शैलस्य सार इव। शिलाजतुनि राजनि०

शैलसुता स्त्री ६त०। १पार्वत्याम् २गङ्गायां च।

शैलाग्र न० शैलस्याग्रम्। पर्वतशृङ्गे त्रिका०। [राजनि०।

शैलाज न० शिलायां जायते जन–ड स्वार्थे अण्। शैलजे

शैलाट पुंस्त्री० शैलं पर्वतमटति अट–अण्। १सिंहे २किराते च स्त्रियां ङीप्। ३शुक्लवर्णकाचे ४देवले च पु० मेदि०।

शैलादि पु० शिलादस्यापत्यम् इञ्। शिवपार्श्वचरे नन्दिनि

शैलालिन् पु० ब०व० शिलालिना मुनिना प्रोक्तं नटसूत्रमधीयते णिनि। शैलूषेषु नटेषु अमरः।

शैलिक्य पु० गर्हितं शीलमस्त्यस्य ठन् शीलिकः स्वार्थे ष्यञ्। सर्वलिङ्गिनि पाषण्डे जटा०।

शैली स्त्री० शीलमेव स्वार्थे ष्यञ् ङीपि यलोपः। १चरित्रे २वृत्तभेदे च त्रिका० "व्याख्यातॄणामियं शैली यत् सामान्येनाभिधाय विशेषेण विवृणोतीति" माधः।

शैलूष पु० शिलूषस्यापत्यम् अण्। १नटे २बिल्ववृक्षे अमरः ३धूर्त्ते ४तालधारके च शब्दर०।

शैलूषिक पु० शैलूषं तद्वृत्तिमन्वेष्टा ठक्। "वृत्त्यन्वेषी नटानाञ्च स तु शैलूषिकः स्मृतः" ब्रह्मपु० उक्ते १नटवृत्त्यन्वेषिणि नटप्रधाने २तत्पत्न्यां स्त्री ङीष्। "नर्त्तकीं शैलूषिकीं चैव रजकीं वेणुजीविनीम्। गत्वा चान्द्रायणं कुर्य्यात् तथा चर्म्मोपजीविनीम्" संवर्त्तः।

शैलेन्द्र पु० शैलः इन्द्र इव। हिमालये। ६त०। शैलेशादयोऽप्यत्र। [राजनि०।

शैलेन्द्रस्थ पु० शैलेन्द्रे हिमालये तिष्ठति स्था–क। भूर्जवृक्षे

शैलेय न० शिलायां भवः ढक्। १शैलजाख्ये गन्धद्रव्यभेदे हेमच०। "शैलेयं शीतलं हृद्यं कफपित्तहरं लघु। कण्डूकुष्ठाश्मरीदाहविषहृद्गुदरक्तहृत्" भावप्र०। २पर्वतजातमात्रे त्रि०। स्त्रियां ङीप्। ३सिंहे ४भ्रमरे

च पुंस्त्री॰ शब्दर॰ स्त्रियां ङीष्। ५शिलातुल्ये शब्दर॰। ६पार्वत्यां स्त्री ङीप्।

शैलोद्भवा स्त्री शैलं पर्वतमुद्दिश्य भवति उद्+भू-अच्। १क्षुद्रपाषाणभेदिनि वृक्षे राजनि॰ २पार्वत्याञ्च।

शैव न॰ शिवमधिकृत्य कृतो ग्रन्थः अण्। वेदव्यासप्रणीते शिवप्रभाववर्णनात्मके १महापुराणभेदे। शिवो देवताऽस्य अण्। २शिवभक्ते त्रि॰। तस्येदमण्। ३शिवसम्बन्धिनि त्रि॰ ४शैवले न॰ शब्दच॰।

शैवञ्च महापुराणं वायुना प्रोक्तत्वात् वायवीयनाम्नाख्यातम् अतएव "अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते। ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा" हेमा॰ व्र॰ विष्णुपु॰"शैवं यद्वायुना प्रोक्तम्" तत्रैव कालिकापु॰ उक्तम्। हेमा॰दा॰ मत्स्यपुराणे तु चतुर्थं वायवीयत्वेन पठित्वा "श्वेतकल्पप्रसङ्गेन धर्मान् वायुरिहाब्रवीत्। तत्र यद्वायवीयं स्याद्रुद्रमाहात्म्यसंयुतम्। चतुर्विंशति-साहस्रं पुराणं तदिहोच्यते। श्रावण्यां श्रावणे मासि गुडधेनुसमन्वितम्। यो दद्याद्दधिसंयुक्तं ब्राह्मणाय कुटुम्बिने। शिवलोके स पूतात्मा कल्पमेकं वसेन्नरः" तथा च शिवमाहात्म्यवेदकत्वाच्छैवमिति तस्य नामान्तरं विष्णुपु॰उक्तम्। वायुना प्रोक्तत्वाच्च वायवीयमिति नामान्तरमिति बोध्यम्। तत्प्रतिपाद्यविषयाश्च नारदीयपु॰ उक्ता यथा "शृणु वत्स! प्रवक्ष्यामि पुराणं वायवीयकम्। यस्मिन् श्रुते लभेद्धाम रुद्रस्य परमात्मनः। चतुर्विंशति-साहस्रं तत्पुराणं प्रकीर्त्तितम्। श्वेतकल्पप्रसङ्गेन धर्मान् यत्राह मारुतः। तद्वायवीयमुदितं भागद्वयसमाचितम्" तत्र पूर्वभागे "सर्गादिलक्षणं यत्र प्रोक्तं विप्र! सविस्तरम्। मन्वन्तरेषु वंशाश्च राज्ञां ये तत्र कीर्त्तिताः। गयासुरस्य हननं विस्तरात् यत्र कीर्त्तितम्। मासानां चात्र माहात्म्यं माघस्योक्तं फलाधिकम्। दानधर्मा राजधर्मा विस्तरेणोदिता स्तथा। भूपातालककुब्व्योमचारिणां तत्र निर्णयः। व्रतादीनां च पूर्व्वोऽयं विभागः समुदाहृतः"। उत्तरभागे "उत्तरे तस्य भागे तु नर्मदातीर्थवर्णनम्। शिवस्य संहिताख्या वै विस्तरेण मुनीश्वर!। यो देवः सर्वदेवानां दुर्विज्ञेयः सनातनः। स तु सर्वात्मना यस्यास्तीरे तिष्ठति सन्ततम्। इदं ब्रह्मा हरिरिदं साक्षादेवं परो हरः। इदं ब्रह्म निराकारं कैवल्यं नर्मदाजलम्। ध्रुवं लोकहितार्थाय शिवेन स्वशरीरतः। शक्तिः कापि सरिद्रूपा रेवेयमवतारिता। ये वसन्त्युत्तरे कूले रुद्रस्यानुचरा हि ते। वसन्ति याम्यतीरे ये लोकं ते यान्ति वैष्णवम्। ओङ्कारेश्वरमारभ्य यावत् पश्चिमसागरम्। सङ्गमाः पञ्च च त्रिंशन्नदीनां पापनाशनाः। दशैकमुत्तरे तीरे त्रयोविंशतिर्दक्षिणे। पञ्चत्रिंशत्तमः प्रोक्तो रेवासागरसङ्गमः। सङ्गमैः सहितान्येवं रेवातीरद्वयेऽपि च। चतुःशतानि तीर्थानि प्रसिद्धानि च सन्ति हि। षष्टितीर्थसहस्राणि षष्टिकोट्यो मुनीश्वर!। सन्ति चान्यानि रेवायास्तीरयुग्मे पदे पदे। संहितेयं महापुण्या शिवस्य परमात्मनः। नर्मदाचरितं यत्र वायुना परिकीर्त्तितम्। लिखित्वेदं पुराणन्तु गुडधेनुसमन्वितम्। श्रावण्यां यो ददेत् भक्त्या ब्राह्मणाय कुटुम्बिने। रुद्रलोके वसेत् सोऽपि यावदिन्द्राश्चतुर्दश। यः श्रावयेद्वा शृणुयात् वायवीयमिदं नरः। नियमेन हविष्याशी स रुद्रो नात्र संशयः"। ५वसुके ६धत्तूरे पु॰ राजनि॰ ७आचारभेदे पु॰ "अष्टाङ्गयोगसंयुक्तो यत्नेहेर्वी विधानतः। यावद्ध्यानं समाधिस्थ तावत् शैवं प्रपद्यते" इ॰ आरभेदतन्त्रम्। तदुपासकभेदाश्च शिवलिङ्गशब्दे वामनपु॰ उक्ता दृश्याः।

शैवल न॰ शी-वलञ्। १पद्मकाष्ठे २शैवाले च पु॰ मेदि॰। "वहतो बहुशैवलक्ष्मताम्" नैषधम्।

शैवलिनी स्त्री शैवलानि सन्त्यस्याः इनि। नद्याम् अमरः

शैवाल न॰ शी-वालञ्। (शेओयाला) जलजाते पदार्थभेदे अमरः। अस्य पृषो॰ दन्त्यादित्वमपि "सैवालशाङ्करलतामधुना बिभर्त्ति" इति कुमारात्।

शैव्य पु॰ शिवेर्गोत्रापत्यम् अञ्। १शिविगोत्रजे राजभेदे "शैव्यश्च नरपुङ्गवः" इति गीता। शिविनोऽधिगतः अञ्। २कोटकमात्रे ३श्रीकृष्णस्य घोटके च त्रिका॰।

शैशव न॰ शिशोर्भावः अण्। शिशुकाले अवस्थाभेदे अमरः

शैशिर पुंस्त्री॰ शिशिर प्रियत्वेनास्त्यस्य अण्। १शग्रामचटके राजनि॰ स्त्रियां ङीष्। शिशिरे भवः ऋत्वण्। २शिशिरजाते त्रि॰। स्वार्थे अण्। ३शिशिरे न॰। "तपस्तपस्यौ शैशिरावृतू" श्रुतिः। [ध्यापनायां सि॰कौ॰।

शैष्योपाध्यायिका स्त्री शिष्योपाध्याययोः कर्म वुञ्। शिष्या-

शो तीक्ष्णीकरणे दि॰प॰सक॰अनिट्। श्यति अशात् अशासीत्।

शोक पु॰ शुच-घञ्। इष्टवियोगजाते दुःखानुगुणे चित्तवृत्तिभेदे अमरः। ल्युट् शोचनमप्यत्र न॰।

शोकनाश पु॰ शोकं नाशयति नश-णिच्-अण्। १अशोकवृक्षे राजनि॰। नश-भावे घञ् ६त॰, २शोकध्वंसे।

शोकहारी स्त्री शोकं हरति हृ-अण् ङीप्। वनवर्वरिकायां राजनि०।

शोकारि पु० ६त०। कदम्बवृक्षे शब्दच०। [क्ष अमरः।

शोचिष्केश पु० शोचिः केशइव यस्य। १वह्नौ २चित्रकवृक्षे

शोचिस् न० शुच-इसि। १प्रभायां २रोचिषि च अमरः।

शोच्य त्रि० शुच-ण्यत्। १शुद्धे २अवरे शब्दच० ३अनुकम्पनीये च। स्वार्थे क। तत्रैव। [इत्येव पाठः साधुः।

शोटीर्य्य न० शुटीरस्य भावः यत्। वीर्य्ये शब्दच०। शौटीर्य्यं

शोठ त्रि० शुठ-आलस्ये स्फोटने वा अच्। १मूर्खे २अलसे मेदि०। ३धूर्त्ते ४नीचे ५व्यसनवति पुंस्त्री० शब्दच०। स्त्रियां ङीष्। [ऋदित् चङि न ह्रस्वः।

शोण गतौ सक० वर्णे अक० भ्वा० पर० सेट्। शोणति अशोणीत्

शोण न० शोण-अच्। १सिन्दूरे २रुधिरे च राजनि०। ३रक्तेऽश्वे ४शोणाकभेदे राजनि०। ५मङ्गले पत्रे ६वह्नौ ७चित्रके ८नदभेदे स च अमरकण्टकदेशगतः पाटलिपुत्रसन्निकृष्टे गङ्गायां मिलितः। ९रक्तवर्णे पु० १०तद्वति त्रि० मेदि०। ११समुद्रभेदे धरणिः।

शोणक पु० शोणइव कायति कै-क। शोणाकवृक्षे अमरः।

शोणझिण्टिका स्त्री कर्म०। १शोणझिण्ट्यां २रक्तवर्णे राजनि०। [न्याम् राजनि०।

शोणझिण्टी स्त्री शोणा झिण्टीव। १कुरवके २कण्टकि

शोणपत्र पु० शोणं पत्रमस्य। १रक्तपुनर्नवायां राजनि०। २रक्तपत्रयुते त्रि०। [२रक्तकुसुमान्विते त्रि०।

शोणपुष्पक पु० शोणं पुष्पमस्य कप्। १कोविदारे राजनि०

शोणपुष्पी स्त्री शोणं पुष्पमस्याः ङीप्। सिन्दूरपुष्प्यां राजनि०

शोणरत्न न० कर्म०। पद्मरागमणौ अमरः। [शब्दमा०।

शोणाक न० शोणं रक्तवर्णमकति अण्। (शोणा) वृक्षभेदे।

शोणित न० शोण-इतच्। १रुधिरे तद्वर्णे २रक्तवर्णे पु० ३तद्वति त्रि० अमरः। ४कुङ्कुमे न० राजनि०।

शोणितचन्दन न० शोणितं रुधिरमिव चन्दनम्। रक्तचन्दने राजनि०। [त्रिका०।

शोणितपुर न० शोणितमिव रक्तं पुरम्। बाणासुरनगरे

शोणोपल पु० कर्म०। माणिक्ये मणौ राजनि०।

शोथ पु० शु-थन्। हस्तपादादेः स्फीततारूपे रोगभेदे तस्य लक्षणादिकं भावप्र० उक्तं यथा

"अथ शोथाधिकारः। तत्र शोथस्य विप्रकृष्टं निदानमाह "शुद्ध्यामयाभक्तकृशाबलानां क्षाराम्लतीक्ष्णोष्णगुरूपसेवनात्। दध्याममृच्छाकविरोधिदुष्टगरोपसृष्टान्ननिषेवणाच्च। अर्शांस्यचेष्टा वपुषोऽत्यशुद्धिर्मर्माभिघातो विषमा प्रसूतिः। मिथ्योपचारः प्रतिकर्मणाञ्च निजस्य हेतुः श्वयथोः प्रदिष्टः"। शुद्धिर्वमनविरेकादिः। आमयाः पाण्डुरोगादयः। अभक्तम् अभोजनम्। आमः अपक्वो मृदस्य रसः। विष्टगरोपसृष्टान्नम् विष्टो यो गरः संयोगजं विषं तेन संसृष्टमन्नम्। वपुषोऽत्यशुद्धिः शोधनार्हस्य वपुषोऽशोधनम्। मर्मोपघातः दोषकृत एव ज्ञेयः। वाह्यहेतुकृतस्तु मर्मोपघात आगन्तुजशोथहेतुरेव। विषमा प्रसूतिः आमगर्भपतनादिका। प्रतिकर्मणां वमनादिपञ्चकर्मणाम् मिथ्योपचारः असम्यक्करणम्। श्वयथोः शोथस्य निजस्य आत्मोत्थस्य सन्निकृष्टस्य हेतुर्धातात्मकस्योक्तः। अथ शोथस्य संप्राप्तिपूर्व्वकं सामान्यं लक्षणमाह "रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् बहिःशिराः। नीत्वा रुद्धगतिस्तैर्हि कुर्य्यात्त्वङ्मांससंश्रयम्। उत्सेधं संहतं शोथं तमाहुर्निचयादतः। सगौरवं स्यादनवस्थितत्वं सोत्सेधमुष्माथ शिरातनुत्वम्। सलोमहर्षश्च विवर्णता च सामान्यलिङ्गं श्वयथोः प्रदिष्टम्"। उत्सेधं उन्नतत्वम्। किंविशिष्टमुत्सेधमतः पूर्वोक्तात् निचयात् रक्तपित्तकफवातानां समुदायात् संहतम् घनम्। तमुत्सेधं शोथमाहुरित्यन्वयः। तत्र शोथस्य किं स्यादित्याकाङ्क्षायामाह। अनवस्थितत्वं स्यात् अनियता स्थितिः स्यादित्यर्थः। चिकित्सां व्यतिरेकेणापि निवृत्तेः। अस्थानवस्थितत्वं सगौरवं स्याद्गौरवमप्यनवस्थितं स्यात्। अथ च सोत्सेधः स्यात्। उष्मतात्वमप्यनवस्थितं स्यादित्यर्थः। वातिकं शोथमाह "चलस्तनुत्वक्परुषोऽरुणोऽसितः प्रसुप्तिहर्षार्त्तियुतोऽनिमित्ततः। प्रशाम्यति प्रोन्नमति प्रपीडितो दिवा बली स्याच्छ्वयथुः समीरणात्"। परुषः खरः। प्रसुप्तिः स्पर्शाज्ञता। हर्षोऽत्र (झिनि झिनी) रोमाञ्चो वा। आर्त्तिः पीडा एतद्युतः। दिवा बली दिवसविषमसमवायारब्धत्वात्। अतएवोक्तम् "श्लेष्मोष्णवमनादौ यः प्रशाम्येत स वातिकः। यस्त्वपरुषवत्त्वः स्याच्छोथो नक्तं प्रशाम्यति"। अथ पैत्तिकमाह "मृदुः सगन्धोऽसितपीतरागवान् भ्रमज्वरस्वेदतृषामदान्वितः। य उष्यते स्पर्शसहोऽक्षिरागवान् स पित्तशोथो भृशदाहपाकवान्"। उष्यते सन्तप्यते। भृशदाहपाकवान् भृशं पाकसंयुक्तः। श्लैष्मिकमाह "गुरुः स्थिरः पाण्डुररोचकान्वितः प्रसेकनिद्रावमिवह्निमान्द्ययुक्। सकृच्छ्र-

जन्मप्रशमो निपीडितो न चाप्युन्नमेद्रात्रिबली कफात्मकः"। द्वन्द्वजमाह "निदानाकृतिसंसर्गात् ज्ञेयः शोथो द्विदोषजः"। सान्निपातिकमाह "सर्वाकृतिः सन्निपाताच्छोथो व्यामिश्रलक्षणः"। व्यामिश्रलक्षण इत्युक्तेः सर्वाकृतिरिति उक्तवातजादिशोथलक्षणलक्षणनियमार्थम्। अथाभिघातजमाह "अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः। हिमानिलोदध्यनिलैर्भल्लातकपिकच्छुजैः। रसैः शूकैश्च संस्पर्शाच्छ्वयथुः स्याद्विसर्पवान्। भृशोष्मा लोहिताभास प्रायशः पित्तलक्षणः"। छेदः खड्गादिना भेदः पाषाणादिना। क्षतं शरादिना क्षारोग्रखादि च। आदिशब्देन लगुडप्रहारादि गृह्यते। भल्लातकैः रसैः कपिकच्छुजैः शूकैः विसर्पवान् प्रसरणशीलः पित्तलक्षणः पैत्तिकशोथलक्षणः। अथ विषजमाह "विषजः सविषप्राणिपरिसर्पणमूत्रणात्। दंष्ट्रादन्तनखाघातादविषप्राणिनामपि। विण्मूत्रशुक्रोपहतमलवद्वस्त्रसङ्करात्। विषवृक्षानिलस्पर्शाद्गरयोगावचूर्णनात्। मृदुश्चलोऽवलम्बी च शीघ्रो दाहरुजाकरः"। परिसर्पणात् शरीरोपरि सञ्चरणात्। दंष्ट्रा हिंस्रपीडिता दन्तावलिः। (चोड़) इति लोके। दन्ताः आस्ये भवाः। अविषप्राणिनामपीत्यनेन दंष्ट्रादन्तनखानां स्वभावादेव सविषत्वं किन्तु सर्पादिविषं मारकं भवति अविषप्राणिनां दंष्ट्रादिविषं शोथव्यथादिकरं भवतीति विशेषः। विण्मूत्रेत्यादि। विड़ाद्युपहतं मलिनञ्च यद्वस्त्रं तथा सङ्करः सम्मार्जनीभिः क्षिप्तो धूल्यादिः तेषां सम्पर्कात्। गरयोगावचूर्णनात् गरः संयोगजं विषं तस्य योगो यस्य तेन वस्तुनाऽवधूननात्। अवलम्बी लम्बमानः। अयमप्यागन्तुजस्तथापि सामान्यागन्तुजशोथापेक्षितत्वातोऽस्य विशिष्टचिकित्साभिधानाय पृथक् पठितः। यत्र स्थिता दोषा यत्र शोथं कुर्वन्ति तदाह "दोषाः श्वयथुमूर्द्ध्वं हि कुर्वन्त्यामाशये स्थिताः। पक्वाशयस्था मध्ये तु वर्चःस्थानगतास्त्वधः। कृत्स्नं देहमनुप्राप्य कुर्युः सर्वसरं तथा"। ऊर्द्ध्वम् उरःप्रभृत्यूर्द्ध्वम्। मध्ये उरःपक्वाशयमध्ये। अधः पक्वाशयादधः। उपद्रवानाह "छर्दिश्वासोऽरुचिस्तृष्णा ज्वरोऽतीसार एव च। सप्तमश्चामदौर्बल्यं शोथकृते उपद्रवाः"। तत्र शोथासाध्यत्वमाह "श्वासः पिपासा छर्दिश्च दौर्बल्यं ज्वर एव च। यस्य चान्ने रुचिर्नास्ति शोथिनं परिवर्जयेत्"। स्वार्थे क। तत्रार्थे शब्दच०।

शोथघ्नी स्त्री शोथं हन्ति हन-टक् ङीप्। १पुनर्नवायाम् अमरः। २शालपर्ण्यां च राजनि०। ३शोथनाशके शोथघ्नमात्रे त्रि०।

शोथजि(हृ)त् पु० शोथं जयति हरति वा जि-हृ-क्विप्। भल्लातके रत्नमा०। [वायां त्रिका०।

शोथवृक्ष पु० शोथे वृक्षः विपरीताचरणशाली। पुनर्न-

शोधन न० शुध-णिच्-ल्युट्। १शोधे २विष्ठायां शब्दच०। ३कासीसे राजनि०। ४मलादिविरेचने ५दोषनिवारणे ६क्षत्रादिनिर्यातने च। शुध-णिच्-ल्यु। ७निम्बुके पु० राजनि०। ८शुद्धिकारके त्रि०। शुध्यतेऽनया करणे ल्युट् ङीप्। ९सम्मार्जन्याम् स्त्री अमरः। १०ताम्रमूलवल्ल्यां ११नील्याञ्च स्त्री ङीप्। १२विहिताविहितमार्गादिविचारणे न० "स्वयं पाकप्रकाशेन समानो नास्ति कश्चन। तत्र यद्यत् कृतं सर्वं तत्फलदं भवेत्। न शास्तिविशारदादिशोधनं स्वयं पर्यन्ते" म०त०। दोषनिवारणञ्च धातुविशेषस्य द्रव्यान्तरेण संयोजनम् "पललौहतपत्राणि हेम्नो वह्नौ प्रतापयेत्। निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके। गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा। एवं हेम्नः परेषाञ्च धातूनां शोधनं भवेत्" इत्यादिप्रकारेण धात्वादीनां दोषनिवारणम्। १३व्रणादेः क्लेदपूयाद्यपहारणे च "व्रणस्य त्वविशुद्धस्य क्वाथः शुद्धिकरः स्मृतः। पटोलनिम्बपत्रस्य सर्वत्रैव प्रयुज्यते। वातिके दशमूलानां क्षीरिणां पैत्तिके व्रणे। आरग्वधादेः कफजे कषायाः शोधनं मतम्"। १४पाण्डुलेख्यादेर्दोषनिवारणे भाषाशब्दे दृश्यम्। १५भाज्याद्वात् भाजकस्य हरणे।

शोधनीवीज न० ६त०। जयपाले राजनि०।

शोधित त्रि० शुध-णिच्-क्त। मलाद्यपसारणेन १कृतसंस्कारे २मार्जिते अमरः।

शोफ पु० शु-फन्। शोथे अमरः। शोथशब्दे दृश्यम्।

शोफघ्नी स्त्री शोफं हन्ति हन-टक् ङीप्। १शालपर्ण्यां २रक्तपुनर्नवायाञ्च राजनि०। [राजनि०।

शोफनाशन पु० शोफं नाशयति नश-णिच्-ल्यु। नीलवृक्षे

शोफहृत् पु० शोफं हरति हृ-क्विप्। भल्लातके भावप्र०।

शोभन न० शोभते शुभ-ल्यु। १पद्मे शब्दमा०। विष्कम्भादिषु २पञ्चमे योगे पु० ज्यो०त०। ३शोभायुक्ते त्रि०। ४सुन्दरे त्रि० ५महे पु० धरणिः।

शोभनक पु० शोभनाय कायति कै-क। शोभाञ्जनवृक्षे शब्दच०

शोभना स्त्री शोभयति वेपनात् शुभ–णिच्–ल्यु । १हरिद्रायां २गोरोचनायाञ्च राजनि० ।

शोभा स्त्री शुभ–अ । १दीप्तौ "या शोभा रूपभोगाद्यैर्यत् स्यादङ्गविभूषणम् । शोभैव कान्तिराख्याता मन्मथाप्यायनोज्ज्वला" उज्ज्वलनमण्युक्तार्थे च २गोपीभेदे ब्रह्मवै०प्र० ६अ० । ३हरिद्रायां ४गोरोचनायां राजनि० ।

शोभाञ्जन पु० शोभायै अनक्ति अन्ज–ल्युट् । (सजना) वृक्षे अमरः "तद्बीजं श्वेतमरिचं मधुशिग्रुः स लोहितः । शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः । दीपनो रोचनो रूक्षः क्षारस्तिक्तो विदाहकृत् । संग्राही शुक्रलो हृद्यः पित्तरक्तप्रकोपनः । चक्षुष्यः कफवातघ्नो विद्रधिश्वयथुक्रिमीन् । मेदोऽपचीविषप्लीहगुल्मगण्डव्रणान् हरेत् । श्वेतः प्रोक्तगुणो ज्ञेयो विशेषात् दाहकृद् भवेत् । प्लीहानं विद्रधिं हन्ति व्रणघ्नः पित्तरक्तहृत् । रक्ताभः प्रोक्तगुणो विशेषाद्दीपनः सरः । शिग्रुवल्कलपत्राणां स्वरसः परमार्तिहृत् । चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम् । अवृष्यं कफवातघ्नं तन्नस्यं तु शिरोऽर्त्तिनुत् । शिग्रुशाकं हिमं स्वादु चक्षुष्यं वातपित्तहृत् । हृद्यं श्लेष्मकृत् स्निग्धं रुच्यं मदक्रिमिप्रणुत् । शिग्रोः पुष्पन्तु कटुकं तीक्ष्णोष्णं स्नायुशोथनुत् । क्रिमिहृत् कफवातघ्नं विद्रधिप्लीहगुल्मजित् । शोभाञ्जनफलं स्वादु कषायं कफपित्तनुत् । शूलकुष्ठक्षयश्वास गुल्महृद् दीपनं परम्" भावप्र० । अधिकं शिग्रुशब्दे दृश्यम् ।

शोली स्त्री शुल–अच् पृषो० ङीष् । वनहरिद्रायां राजनि० ।

शोष पु० शुष–घञ् । १वातादिना रसाद्युपहारेण कठिनताकरणे । शोषयति शुष–णिच्–अच् । २यक्ष्मरोगे मेदि० ।

शोषण न० शुष–ल्युट् । १शोषणेन रसाकर्षणे हेमच० । २शोषणकर्त्तरि च शोषयति शुष–णिच्–ल्यु । "उन्मादनः शोषणश्च तापनः स्तम्भनस्तथा । मारणश्चेति विज्ञेयाः कामस्य पञ्च सायकाः" इत्युक्ते ३कामशरभेदे जटा० । ४शोणाकवृक्षे भावप्र० । ५शुण्ठ्यां राजनि० ।

शोषसम्भव न० सम्भवत्यस्मात् सम्+भू–अप् ६त० । पिप्पलीमूले राजनि० । [राजनि० । २शोषनाशके त्रि० ।

शोषापहा स्त्री शोषमपहन्ति अप+हन–ड । १क्षीतनके

शौक न० शुकानां समूहः अण् । १शुकसमुदाये अमरः । शुकोऽस्त्यत्र अः । स्त्रियां २करणभेदे राजनि० ।

शौकर न० शूकरस्य वराहस्येदम् अण् । १शौकरवे तीर्थभेदे वराहपुराणम् । २शूकरसम्बन्धिनि त्रि० स्त्रियां ङीप् ।

शौकरव न० तीर्थभेदे "परं शौकरवं नाम सर्वसंसारमोक्षणम् । यत्र संस्था च मे देवि ह्युद्धृतासि रसातलात् । यत्र भागीरथी गङ्गा यत्र शौकरवे स्थिता" वराहपु० ।

शौक्तिकेय न० शुक्तिकायां भवम् ढक् । मुक्तायां राजनि० ।

शौक्तेय न० शुक्तौ भवम् ढक् । मुक्तायां राजनि० ।

शौक्ल्य पु० शुक्लस्य भावः ष्यञ् । श्वेततायां श्वेतवर्णे ।

शौच न० शुचेर्भावः अण् । १शुद्धौ पवित्रतायाम् "अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः । स्वधर्मे च व्यवस्थानं शौचमित्यभिधीयते" इति बृहस्पत्युक्ते २धर्मविशेषे च "सर्वेषामेव शौचानामर्थशौचं विशिष्यते । योऽर्थैरशुचिः शौचाच्च सदा वारिणा शुचिः । मृच्छौचं मनःशौचं शौचमिन्द्रियनिग्रहः । सर्वभूतदया शौचं जलशौचञ्च पञ्चमम् । यस्य सत्यञ्च शौचञ्च तस्य स्वर्गो न दुर्लभः" गारुडे ११० अ० ।

मृदादिशौचप्रकारस्तु आ०त० दर्शितो यथा देवलः "धर्मविद्दक्षिणं हस्तमधः शौचे न योजयेत् । तथैव वामहस्तेन नाभेरूर्द्ध्वं न शोधयेत् । प्रकृतिस्थितिरेषा स्यात् कारणादुभयक्रिया" । कारणाद्रोगादेः । ब्रह्माण्डपु० "उद्धृतोदकमादाय मृत्तिकाञ्चैव वाग्यतः । उदङ्मुखो दिवा कुर्य्यात् रात्रौ चेद्दक्षिणामुखः । एकलिङ्गे मृदं दद्यात् मृदन्ते त्रय एव च । दातव्यमुदकं तावद्यावत् स्यात् मृत्तिकाक्षयः" । कुर्य्यात् शौचमिति शेषः । एकलिङ्गे नरस्याशौचोपस्थे अर्द्धप्रसृते गुदे । उद्धृतोदकाभावे करेण जलाशयादुदकग्रहणमाह आदित्यपु० "रश्मिमात्रं जलं त्यक्त्वा कुर्य्यात् शौचमनुद्धृते । पश्चाच्छोधयेत्तीर्थमन्यथा न शुचिर्भवेत्" । यस्मिन् प्रदेशे शौचं कर्त्तव्यं तस्मादरत्निमात्रव्यवहितं जलं तत् स्थानमेव तीर्थं जलसमीपत्वात् । विष्णुपु० "वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा । शौचावशिष्टां गेहाच्च नादद्यात् लेपसम्भवाम् । अन्तःप्राण्यवपन्नाञ्च हलोत्खातां सकर्दमाम्" । मनुदक्षौ "एका लिङ्गे गुदे तिस्रो दश वामकरे तथा । उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता" । उभयोः करयोः । विष्णुपु० "एका लिङ्गे गुदे तिस्रो दश वामकरे तथा । हस्तद्वये च सप्तान्या मृदः शौचोपपादिकाः" । यमः "लिङ्गे त्वेका गुदे तिस्रो वामहस्ते चतुर्दश । ततः पुनरुभाभ्यान्तु दातव्याः सप्त मृत्तिकाः" । प्रैठीनसिः "मृत्तिकां संहृत्य एका

लिङ्गेऽपाने पञ्च एकस्मिन् हस्ते दश उभयोः सप्त दद्यादि। एतासां संख्यानां दशाद्युक्ताधिक्यं गन्धाद्युदासमनुरुध्य व्यवस्थेयम्। वामहस्ते दशदानानन्तरं तत्पृष्ठे षड्दानमाह हारीतः "दश मध्ये च षट् पृष्ठे इति"। शङ्खः "तिस्रस्तु मृत्तिका देयाः कृत्वा नखविशोधनम्। तिस्रस्तु पादयोर्देयाः शुद्धिकामेन नित्यशः"। नखशोधनं तृणादिना नखान्तर्मलशोधनम्, तिस्र इति हस्तयोरिति शेषः। पादप्रक्षालनं कांस्ये न कर्त्तव्यमित्याह विष्णुधर्मोत्तरम् "दर्भैर्न मार्जयेत् पादौ न च कांस्येन धावयेत्"। दक्षः "लिङ्गे तत्र समाख्याता त्रिपर्वी पूर्य्यते यया। अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता। द्वितीया च तृतीया च तदर्द्धार्द्धा प्रकीर्त्तिता"। यदा तु उक्तप्रमाणया मृदा गन्धलेपक्षयो न भवति तदा अधिकयापि कर्त्तव्यम्। "गन्धलेपक्षयकरं शौचं कुर्य्यादतन्द्रितः" इति याज्ञवल्क्यात्। गुदादत्र परिमाणमाह यमः "मृत्तिका तु समुद्दिष्टा त्रिपर्वी पूर्य्यते यया"। त्रिपर्वी तर्जनीमध्यमानामिकानामग्रत्रयम्। मूत्रशौचे तु स्मृतिः "एकां लिङ्गे मृदं दद्यात् वामहस्ते तु मृद्द्वयम्। उभयोर्हस्तयोर्द्वे च मूत्रशौचं प्रकीर्त्तितम्"। ब्रह्मपुराणे "पादयोर्द्वे गृहीत्वा च सम्यक्क्षालितपाणिमान्। द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम्"। पादयोर्द्वे एकैका। इदं मूत्रोत्सर्गे, पुरीषोत्सर्गे तिसृणां विधानात्। दक्षः "यथोदितं दिवा शौचं तदर्द्धं रात्रौ विधीयते। आतुरे तु तदर्द्धं स्यात्तदर्द्धं तु पथि स्मृतम्"। यथोक्तकरणाशक्तविषयमिदं न तु निद्रादिपुरस्कारेणैव वाक्यस्याठ्यार्थतापत्तेः। आपस्तम्बः "पथि पादन्तु विज्ञेयं आर्त्तः कुर्य्याद् यथाबलम्"। एतयोर्विरोध आर्त्तानार्त्ताभ्यां परिहरणीयः। दक्षबौधायनौ "देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्। उपपत्तिमवस्थाञ्च ज्ञात्वा शौचं प्रकल्पयेत्"। ब्रह्मपुराणे "न यावदुपनीयेत द्विजः शूद्रस्तथाङ्गना। गन्धलेपक्षयकरं शौचं तेषां विधीयते। प्रमाणं शौचसंख्या वा न शिष्टैरुपदिश्यते। यावत् शुद्धिं न मन्येत तावत् शौचं समाचरेत्। न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता। प्रायश्चित्तं युज्येत विहितातिक्रमे कृते। शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः"। गन्धलेपक्षये सत्यधिकं न कर्त्तव्यं याज्ञवल्क्यविरोधात्। गन्धलेपाक्षये त्वधिकसंख्ययापि याज्ञवल्क्यवचनमनुपनीतादिपरं वा। व्याघ्रपादः "शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम्। गङ्गातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः। आमृत्योः स्नातकश्चैव भावदुष्टो न शुध्यति"। स्मृतिः "धावन्तश्च प्रमत्तश्च मूत्रोच्चारकृतस्तथा। भुञ्जानमाचमनार्हश्च नास्तिकं नाभिवादयेत्। जन्मप्रभृति यत्किञ्चित् चेतसा धर्म्ममाचरेत्। सर्वं तन्निष्फलं याति एकहस्ताभिवादनात्"। ऋष्यशृङ्गः "यस्मिन् स्थाने कृतं शौचं वारिणा तद्विशोधयेत्। न शुद्धिस्तु भवेत्तस्य मृत्तिकां यो न शोधयेत्"। शौचानन्तरं हारीतः "गोमयेन मृदा वा कमण्डलुं प्रक्षाल्य पूर्ववदुपस्पृश्य आदित्यं सोममग्निं वा वीक्षेत" इति। अत्र मार्जनानन्तरं आलम्भनमन्यत्र तथा दर्शनात्। आचमनानन्तरं सूर्य्यादिदर्शनं यथासम्भवम्"।

शौट गर्वे भ्वा०पर० सक० सेट्। शौटति अशौटीत्। ऋदित् चङि न ह्रस्वः। [त्रि० सि०कौ०।

शौटीर पु० शौट–ईरन्। १त्यागिनि २वीरे च ३गर्वान्विते

शौटीर्य्य न० शौटीरस्य वीरस्य भावः ष्यञ्। १वीर्य्ये २पराक्रमे ३गर्वे च। [शौडति अशौडीत्।

शौड गर्वे भ्वा० पर० सक० सेट् ऋदित् चङि न ह्रस्वः।

शौण्ड त्रि० शुण्डायां सुरायामभिरतः अण्। १मत्ते अमरः। २दक्षे च "सप्तमी शौण्डैः" पा०। ७त०। दानशौण्ड दानदक्षे।

शौण्डिक पु० शुण्डा सुरा पण्यमस्य ठक्। १मद्यविक्रेतरि २जातिभेदे पुंस्त्री अमरः स्त्रियां ङीष्। "ततो गान्धिककन्यायां वैश्यादेव शौण्डिकः" पराशरपद्धतिः।

शौण्डिन् त्रि० शुण्डा सुरैव अण् शौण्डं तत्पण्यमस्त्यस्य इनि। शौण्डिके शब्दर०।

शौण्डी स्त्री शुण्डा करिकरस्तदाकारः अस्त्यस्या अण् गौरा० ङीष्। १चव्ये २गजपिप्पल्याञ्च विश्वः।

शौण्डीर पु० शौण्डा गर्वोऽस्त्यस्य ईरन् स्वार्थे ष्यञ्। गर्वान्विते त्रि० धरणिः।

शौद्र पुंस्त्री शूद्रायां द्विजातिभिरूढायां भवः अण्। दायभागपुत्रमध्ये शूद्राजाते द्विजातिपुत्रभेदे पारशवादौ जटा०। स्त्रियां ङीप्। इदमर्थे अण्। २शूद्रसम्बन्धिनि त्रि०।

शौद्धोदनि पु० शुद्धोदनस्यापत्यम् इञ्। बौद्धमुनिभेदे अमरः

शौधिका स्त्री शोधः शोधनं मलनिरेकस्तस्मै हितः ठक्। रक्तवृक्षौ हेमच०।

शौनक पु० शुनकस्यापत्यम् अण् । मुनिभेदे “नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः” इति भागवतम् १।१।

शौनिक पु० शूना प्राणिवधस्थानं प्रयोजनमस्य ठक् । १मांसविक्रेतरि (कसाइ) हेमच० । २मृगयायां शब्दमा० । ३मृगयाशीले च ।

शौभ न० शोभायै हितम् अण् । १व्योमगामिनि पुरभेदे हरिश्चन्द्रपुरे २देवे पु० त्रिका० । ३गुवाके शब्दमा० ।

शौभाञ्जन पु० शोभाञ्जनएव स्वार्थे अण् । (सजना) वृक्षभेदे द्विरूपकोषः । [शब्दमा० ।

शौभिक त्रि० शोभं व्योमपुरं शिल्पमस्य ठक् । इन्द्रजालिके

शौरि पु० शूरस्य यादवभेदस्य वसुदेवस्य सूर्यस्य वा अपत्यम् इञ् । १विष्णौ २शनैश्चरे च अमरः ।

शौर्य्य न० शूरस्य भावः ष्यञ् । १वीर्य्ये २शक्तौ ३आरभट्यां च मेदि० । [ठक् । शुल्कादानाधिकृते हेमच० ।

शौल्किक पु० शुल्के राजादिदेये करे तदादाने अधिकृतः

शौल्किकेय पु० शुल्किकः देशभेदः तत्र भवः ढक् । विषभेदे अमरः ।

शौल्विक पुंस्त्री० शुल्वः ताम्रं तन्मयपात्रादि पण्यमस्य ठक् । कांस्यकारे (कासारी) जातिभेदे अमरः स्त्रियां ङीष् ।

शौव न० शुनः सङ्घोचः श्वन्+अण् टिलोपः । शुनः सङ्घोचे अन्यत्र न टिलोपः शौवन इत्येव शुनः सम्बन्धिनि संक्षिप्तसा० । [भाविदिनस्थायिनि पदार्थे ।

शौवस्तिक त्रि० श्वः परदिने भवः श्वस्+ठक्-तुट् च ।

शौवापद त्रि० श्वापदस्येदम् अण् । श्वापदसम्बन्धिनि

शौष्कल पु० शुष्कलं शुष्कमांसं पण्यमस्य अण् । १शुष्कमांसविक्रेतरि मेदि० । तद्भक्षणमस्य अण् । २शुष्कमांसभक्षके त्रि० अमरः । [तत् अश्चोतीत् ।

श्चुत क्षरणे भ्वा० पर० सक० सेट् । श्चोतति इरित् अश्चुतत्

श्च्युत क्षरणे भ्वा०पर०अक० आसेचने सक० सेट् । श्च्योतति इरित् अश्च्युतत् अश्च्योतीत् ।

श्च्योत पु० श्च्युत-घञ् । समन्तात् सेचने आघारे अमरः ।

श्मन् न० शेते शी-मनिन् डिच्च । १मुखे २शवे कालिकापु० अदन्तोऽप्यत्र “सर्वे नान्ताः अदन्ता. स्यु”रित्युक्तेः ।

श्मशान न० श्मानः शवाः शेरतेऽत्र शी-आनच् डिच्च । “श्मन् शब्देन शवः प्रोक्तः शानं शयनमुच्यते । निर्वचन्ति श्मशानार्थं मुने ! शब्दार्थकोविदाः । महान्त्यपि च भूतानि प्रलये समुपस्थिते । शेरतेऽत्र शवा भूत्वा श्मशानन्तु ततोऽभवत्” महाभूतलयस्थाने महाश्मशाने १काशग्राम् कालिकापुराणे १० अ० । २शवदाहस्थाने अमरः ।

श्मशानकाली स्त्री श्मशानस्था काली । कालिकाभेदे ।

श्मशानवासिन् पु० श्मशाने वसति वस-णिनि । १महादेवे २वटुकभैरवे च । श्मशानवासकर्त्तरि चण्डालादौ त्रि० ।

श्मश्रु न० श्म मुखं श्रूयते लक्ष्यतेऽनेन श्रु-डु । पुरुषमुखस्थे लोमवृन्दे अमरः । “केशश्मश्रुधारयतामग्र्या भवति सन्ततिः” सुश्रु० ।

श्मश्रुमुखी स्त्री श्मश्रु मुखे यस्याः ङीप् । १पुरुषलक्षणयुक्तायां २पोटाख्यायां स्त्रियां जटा० ।

श्मश्रुल पु० श्मश्रु विद्यतेऽस्य लच् । श्मश्रुयुक्ते [क्षुरकर्मकारके ।

श्मश्रुवर्द्धक पु० श्मश्रु वर्द्धयति छिनत्ति वृध-ण्वुल् । नापिते

श्मील निमेषणे भ्वा०पर०अक०सेट् । श्मीलति अश्मीलीत् ।

श्यान त्रि० श्यै-क्त । सङ्कोचविशेषप्राप्ते घनीभूते “पथश्श्यानकर्दमान्” रघुः ।

श्याम पु० श्यै-मक् । १वृद्धदारकवृक्षे २प्रयागतीर्थस्थे वटे ३कोकिले ४मेघे ५कृष्णवर्णे ६हरिद्वर्णे च । ७तद्वति त्रि० मेदि० । ८धुस्तूरे ९पीलुवृक्षे १०श्यामाके राजनि० । ११मरिचे १२सिन्धुजलवणे च न० मेदि० । १३दमनकवृक्षे १४गन्धतृणे पु० विश्वः ।

ईदृशेऽपि कृष्णश्यामनीलादीनाममरादौ पर्य्यायता तत्र कृष्णवस्तूनि कतिचित् कविकल्पलतायां दर्शितानि यथा “कृष्णानि केशवः शौरिश्चीरं चन्द्राङ्कराहवः । विन्ध्याञ्जनाद्रिवल्मीकशिवनभैरवराक्षसाः । शिवकण्ठघनद्वैपायनरामधनञ्जयाः । शनिः द्रुपदजा काली कालिकोलयमाऽसुराः । केशकच्छलकस्तूरीराजपट्टविदूरथम् । विषकोपकुहूमस्रागुरुपापतमोनिशाः । मसीपङ्कभटाम्भोधिसगनाधूमकोकिलाः । गोलाङ्गूलालगुञ्जास्ये करटः खञ्जनकेकिनोः । शैवलं नालतापिञ्छनीलेन्दीवरवल्लयः । रसावद्गुतहुङ्कारौ कटाक्षोऽलिः कनीनिका । नीली जम्बूफलं तुला काकलव्याकुकीर्त्तदः । भिन्नच्छाया गजाङ्गारखलान्तःकरणादयः” ।

श्यामक न० श्याम+संज्ञायां कन् । १रोहिषतृणे राजनि० । २श्यामाके (शामा) धान्यभेदे पु० हेमच० ।

श्यामकण्ठ पु० श्यामः कण्ठोऽस्य । १मयूरे हेमच० । २शिवे ३नीलकण्ठविहगे च ।

श्यामकन्दा स्त्री श्यामः कन्दोऽस्याः । अतिविषायां राजनि० । [राजनि० ।

श्यामकाण्डा स्त्री श्यामः काण्डोऽस्याः । गण्डदूर्वायां

श्यामग्रन्थि स्त्री श्यामो ग्रन्थिरस्याः। गण्डदूर्वायां राजनि०

श्यामपत्त्र पु० श्यामानि पत्त्राणि यस्य। तमालवृक्षे शब्दच०

श्यामल पु० श्यामवर्णं लाति ला–क। १पिप्पले २कृष्ण-वर्णयुते त्रि० मेदि०। ३अश्वगन्धायां ४कट्भ्यां ५जम्ब्वां ६कस्तूर्य्याञ्च स्त्री राजनि०। ७श्यामवर्णे पु० अमरः।

श्यामलचूडा स्त्री श्यामला चूडाऽस्याः। गुञ्जायां राजनि०

श्यामलता स्त्री कर्म०। १स्वनामख्याते शारिवौषधौ श-ब्दर०। श्यामलस्य भावः तल्। २कृष्णवर्णे ३हरिद्वर्णे च

श्यामलिका स्त्री श्यामलोवर्णोऽस्त्यस्याः ठन्। नील्यामो-षधौ राजनि०।

श्यामलेक्षु पु० कर्म०। (कालला) इक्षुभेदे राजनि०।

श्यामसुन्दर पु० श्यामोऽपि सुन्दरः। श्रीकृष्णे "श्याम-सुन्दर ! ते दास्यः" इति भागवते १०स्क० २२अ०। "ध्यायन्ति योगिनस्तस्य शुद्धं ज्योतिःस्वरूपिणम्। कृष्णपादारविन्दञ्च निर्गुणं प्रकृतेः परम्। वैष्णवास्तञ्च मन्यन्ते तद्भक्ताः सूक्ष्मदर्शिनः। कुतो बभूव तज्ज्योति-रहो तेजस्विनं विना। ज्योतिरभ्यन्तरे नित्यं शरीरं श्यामसुन्दरम्" महाभा० गणपतिख० ४१ अ०।

श्यामा स्त्री श्यै–मक्। १शारिवौषधौ २अप्रसूताङ्गनायां ३प्रियङ्गौ ४यमुनायां ५वागुज्यां ६रजन्यां ७कृष्णत्रिवृति दन्तीव्यां मेदि० ८गुग्गुलौ १०सोमलतायां ११गुन्द्रायां १२कृष्णायाम् १३अम्बिकायां विश्वः। १४गुडूच्यां १५क-स्तूर्य्यां १६वटपत्त्र्यां १७वन्दायां १८नीलपुनर्नवायां १९विप्पल्यां २०हरिद्रायां २१नीलदूर्वायां २२तुलस्यां २३पद्मबीजे २४गवि २५छायायां २६कृष्णशारिवायां २७त्रिवृतायां २८पक्षिभेदे (श्यामा) राजनि०। "शीतकाले भवेदुष्णा ग्रीष्मे च सुखशीतला। तप्तका-ञ्चनवर्णाभा सा स्त्री श्यामेति कीर्त्तिता" इत्युक्तलक्षणे २९स्त्रीविशेषे च। ३०हिमालयसुतायां काल्यां च "ततः सा कालिका देवी योगनिद्रा जगन्मयी। पूर्वत्यक्त-सतीरूपा जन्मार्थं मेनकां ययौ। समयस्यानुरूपेण मेनका जठरे स्थिता। सम्भूय च समुत्पन्ना सा लक्ष्मी-रिव सागरात्। वसन्तसमये देवी नवम्यां मृगयोगतः। अर्द्धरात्रौ समुत्पन्ना गङ्गेव शशिमण्डलात्। तान्तु दृष्ट्वा यथा जातां नीलोत्पलदलासुप्रभाम्। श्यामां सा मेनका देवी मुदमाप्यातिहर्षिता" कालिकापु० ४० अ०।

श्यामाक पु० श्यामेव कायति कै–क। (श्यामा) धान्यभेदे "श्यामाकः शोषणो रूक्षो वातलः कफपित्तहृत्" भावप्र०

श्यामाङ्ग पु० श्यामं हरिद्वर्णमङ्गमस्य। १बुधग्रहे त्रिका०। २कृष्णदेहे त्रि० स्त्रियां ङीष्। "श्यामाङ्गीं विगता-म्बराम्" तन्त्रम्।

श्यामाम्ली स्त्री कर्म०। नीलाम्लीक्षुपे राजनि०।

श्यामिका स्त्री श्याम+स्वा० भाव ठन्। १श्यामत्वे २स्वर्णा-दिमालिन्ये च "हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्या-मिकाऽपि वा" रघु

श्याल पु० श्यै–कालन्। पत्नीभ्रातरि अमरः। स्वार्थे ठक्। श्यालिकोऽप्यत्र। [पत्नीभगिन्याम् शब्दच०।

श्यालिका स्त्री श्यै–कालन् संज्ञायां कन्। अत इत्त्वम्।

श्याव पु० श्यै–वन्। १कृष्णपीतमिश्रवर्णे २तद्वति त्रि०अमरः

श्यावदत् त्रि० श्यावो दन्तो यस्य दत्रादेशः। श्यामवर्ण-दन्तयुक्ते स्त्रियां ङीप्।

श्यावदन्त पु० कर्म०। १स्वभावतः कृष्णवर्णयुक्ते दन्ते ६ब० कप्। २तद्युक्ते त्रि० "सुरापः श्यावदन्तकः" विष्णुस्मृ०

श्येत पु० श्यै–इतन्। १शुक्लवर्णे २तद्वति त्रि० स्त्रियां ङीप् तस्य नश्च। श्येनी। [हारा० स्त्रियां ङीप्।

श्येतकोलक पुंस्त्री० श्वेतः कोल इव। (पुँटि) मत्स्यभेदे

श्येन पुंस्त्री० श्यै–इनन्। १पक्षिभेदे (बाज) अमरः। २पा-ण्डुरवर्णे च ३तद्वति त्रि० मेदि०।

तद्गमनस्य शुभाशुभसूचनं यथा "प्रदक्षिणोऽस्य नरं व्रजन्तो यात्रासु वामेन गताः प्रवेशे। श्येनाः प्रशस्ताः प्रकृतस्वरास्ते शान्ताः प्रदीप्ता विततस्वरास्ते। श्येनो नृपाणां दक्षिणवामपृष्ठभागेषु भाव्यैः स्थितिमादधाति। तिष्ठन् पुरस्तान्निनये करोति युद्धे जयं कन्दरयध्वजस्यः" इति वसन्तराजः। "श्येनेनाभिचरन् यजेत" श्रुतिविहिते ४यागभेदे अभिचारयज्ञे इत्यमरः।

श्येनघण्टा स्त्री श्येनी घण्टेव। दन्तीवृक्षे राजनि०।

श्यै गतौ भ्वा०आ०सक० अनिट्। श्यायते अश्यास्त।

श्यैनम्पाता स्त्री श्येनस्य पातो यत्र अण् मुम् च। मृग-यायाम् अमरः।

श्यो(शो)नाक पु० श्यै–ओना(शो)क। (शोणा) क्षुपभेदे। "श्योनाको दीपनः पाके कटुकस्तुवरो हिमः। पाहौ तिक्तोऽनिलश्लेष्मपित्तकासप्रणाशनः। कटु तस्य फलं बालं रुच्यवातकफापहम्। हृद्यं कषायं मधुरं रोचनं लघु दीपनम्। गुल्मार्शःकृमिहृत् प्रोक्तं गुरुवातप्रको-पणम्" भावप्र०।

श्रक सर्पणे भ्वा०आ०सक० सेट् इदित्। श्रङ्कते अश्रङ्किष्ट।

श्रग गतौ भ्वा० पर० सक० सेट् इदित् । श्रङ्गति अश्रङ्गीत् ।

श्रण दाने भ्वा०पर०सक०सेट् । श्रणति अश्राणीत् अश्रणीत्
मित् घटादि० श्रणयति ।

श्रण दाने चु०उभ०सक० सेट् । श्राणयति ते अशिश्रणत् त ।

श्रत् अव्य० श्रो–डति । श्रद्धायाम् । [अशिश्रथत् त ।

श्रंथ यत्ने अक० प्रतिहर्षे सक० चु०उभ० सेट् । श्रन्थयति ते

श्रथ दौर्बल्ये अ०चु०उ०अक०सेट् । श्रथयति ते अशश्रथत् त ।

श्रथ वधे भ्वा०पर०सक० सेट् । श्रथति अश्रथीत् अश्राथीत् ।

श्रथ बन्धमोक्षे वधे च वा चु० उ० पक्षे भ्वा०पर०सक०सेट् ।
श्राथयति ते श्रथति अशिश्रथत् त अश्रथीत्-अश्राथीत् ।

श्रथ शैथिल्ये अक० तत्करणे सक० भ्वा० आ०सेट् इदित् ।
श्रन्थते अश्रन्थिष्ट ।

श्रथन न० श्रथ–ल्युट् । १वधे २यत्ने ३प्रतिहर्षे च ।

श्रद्धा स्त्री श्रत्–धा–अङ् । १आदरे २शुद्धौ शब्दच० । ३गुरु-वेदान्तवाक्यादिषु विश्वासे वेदान्तसा० ४स्पृहायां ५चित्त-प्रसादे "प्रत्ययो धर्मकार्येषु सा श्रद्धेत्यभिधीयते" इति स्मृत्युक्ते धर्मकार्येषु ६प्रत्यये च अमरः । "प्रत्ययो धर्मकार्येषु तथा श्रद्धेत्युदाहृता । नास्ति ह्यश्रद्दधानस्य धर्मकृत्ये प्रयोजनम्" इति स्मृतिः । सा त्रिविधा यथोक्तं गीतायाम् १७अ० । "त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा । सात्त्विकी राजसी चैव तामसी चेति तां शृणु । सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ! । श्रद्धा-मयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः । यजन्ते सा-त्त्विका देवान् यक्षरक्षांसि राजसाः । प्रेतान् भूतगणां-श्चान्ये यजन्ते तामसा जनाः" । "श्रद्धापूर्वा इमे धर्माः श्रद्धा मध्यान्तसंस्थिता । श्रद्धा नित्या प्रतिष्ठाश्च धर्माः श्रद्धैव कीर्त्तिताः । श्रुतिमात्ररसाः सूक्ष्माः प्रधान-पुरुषेश्वराः । श्रद्धामात्रेण गृह्यन्ते न करेण न चक्षुषा । कायक्लेशैर्न बहुभिस्तथैवार्थस्य राशिभिः । धर्मः संप्रा-प्यते सूक्ष्मः श्रद्धाहीनैः सुरैरपि । श्रद्धाधर्मः परः सूक्ष्मः श्रद्धा ज्ञानं हुतं तपः । श्रद्धा स्वर्गश्च मोक्षश्च श्रद्धा सर्वमिदं जगत् । सर्वस्वं जीवितं वापि दद्या-दश्रद्धया यदि । नाप्नुयात्तत्फलं किञ्चित् श्रद्धादानं ततो भवेत् । एवं श्रद्धान्वयाः सर्वे सर्वधर्माः प्रकी-र्त्तिताः । केशवः श्रद्धया गम्यो ध्येयः पूज्यश्च सर्वदा" वाह्निपु० । देवलः "अर्थानामुदिते पात्रे श्रद्धया प्रति-पादनम् । दानमित्यभिनिर्दिष्टं व्याख्यानन्तस्य वक्ष्यते । उदितं शास्त्रविहितं । देवलेनाप्युक्ता यथा "प्रत्यक्षति स्वानस्थया च यदा श्रद्धेति कीर्त्तिता" । अतएव भग-वद्गीतासु "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतन्तु यत् । असदित्युच्यते पार्थ ! न च तत्प्रेत्य नेह च" । हरिवं० "अश्रोत्रियं श्राद्धमधीतमव्रतं त्वदक्षिणं यज्ञमनृत्विजा हुतम् । अश्रद्धया दत्तमसंस्कृतं हविर्भागाः षडेते तव दैत्यपुङ्गव !" ग०त०। याज्ञवल्क्यः "श्रद्धाविधिसमायुक्तं कर्म यत् क्रियते नृभिः । सुविशुद्धेन भावेन तदानन्त्याय कल्पते" याज्ञियाज्ञवल्क्य "विधिहीनं भवेद्दुष्टं कृत-मश्रद्धया च यत । तद्धरन्त्यसुरास्तस्य मूढस्य दुष्कृतात्मनः"

श्रद्धालु स्त्री श्रद्धा+आलुच् । १स्पृहावत्यां स्त्रियां २श्रद्धायुक्ते त्रि० ।

श्रन्थ ग्रन्थने वधे च वा चु० उभ० पक्षे भ्वा०पर०सक० सेट् ।
श्रन्थयति-ते श्रन्थति अशश्रन्थत् त अश्रन्थीत् । [न्थीत्

श्रन्थ मोचने प्रतिहर्षे च क्र्या०प०सक०सेट् । श्रथ्नाति अश्र-

श्रन्थ पु० श्रन्थ–भावे घञ् । १श्रथने कर्त्तरि अच् । सर्वमो-
चनकर्त्तरि २विष्णौ त्रिका० ।

श्रन्थन न० श्रन्थ–ल्युट् । ग्रन्थने ।

श्रपित त्रि०चु० श्रा–ज्ञ–णिच-पुक् हस्वः । घृतादिमिश्रे पक्वे मांसादौ जटा० ।

श्रम तपसि, आयासे खेदे च अक० भ्वा० शमादि० पर०सेट् उदित् क्त्वा वेट् । श्राम्यति इरित् अश्रमत् अश्रमीत् ।
श्रान्त्वा श्र मित्वा श्रान्तः । [स्वाध्याये च हेमच० ।

श्रम पु० श्रम–घञ् न वृद्धिः । १तपसि २खेदे ३आयासे ४अ-

श्रमण पु० श्रम–युच् । १यतिभेदे २भिक्षाजीविनि त्रि० ।
३जटामांस्यां ४मुण्डीर्य्यां ५शबरीभेदे ६सुदर्शनायां स्त्रियां च स्त्री मेदि० ।

श्रमिन् त्रि० श्रम–इनि । श्रमकर्त्तरि । [इत्येके ।

श्रम्भ प्रमादे भ्वा० आ०अक०सेट् । श्रम्भते अश्रम्भिष्ट । स्रम्भ

श्रय पु० श्रि–अच् । आश्रये । ल्युट् । तत्रैव न० अमरः ।

श्रव पु० श्रूयतेऽनेन श्रु–अप् । १कर्णे २ख्यातौ च भरतः ।

श्रवण न० श्रूयतेऽनेन श्रु–करणे ल्युट् । १कर्णे शब्दग्राह-केन्द्रियभेदे अमरः । भावे ल्युट् । २श्रुतौ ३श्रवन्यादिषु द्वाविंशे ३नक्षत्रे पुंस्त्री० ज्यो०त० क्लीवत्वमपि "श्रवणा-र्कपाते श्रवणं यदि स्यादिति" स्मृतिः । ४मुण्डीरिकायाञ्च स्त्री रत्नमा० ।

श्रवणद्वादशी स्त्री श्रवणेन युक्ता द्वादशी शाक० । "मासि भाद्रपदे शुक्ले द्वादशी श्रवणान्विता" इत्युक्तायां भाद्र-शुक्लद्वादश्याम् । व्रतभेदे हेमाद्रिः ।

श्रवणशीर्षिका स्त्री श्रवणमिव शीर्षमस्याः कप् अत इत्वम्। श्रावणीवृक्षे राजनि०। [असि। २कीर्त्तौ।

श्रवस् न० श्रूयतेऽनेन श्रु—करणे असि। १कर्णे अमरः। कर्मणि

श्रवाय्य पु० श्रु-आय्य। यज्ञियपशौ सि०कौ०। शब्दकल्पद्रुमे श्रवाय्य इति पाठकल्पनं प्रामादिकमेव।

श्रविष्ठा स्त्री श्रूयते श्रु—अप् श्रवः प्रसिद्धिरस्त्यस्याः मतुप् ङीप् अतिशयेन श्रववती इष्ठन् मतुपो लुक्। १धनिष्ठानक्षत्रे अमरः २श्रवणनक्षत्रे च।

श्रविष्ठाज पु० श्रविष्ठायां श्रवणनक्षत्रे जायते जन—ड। बुधग्रहे त्रिका०। भगदैवतशब्दे ४६२१पृ० दृश्यम्।

श्रा-विक्लृत्तौ अदा०पर०अनिट्। श्राति अश्रासीत्।

श्रा पाके अदा०पर०सक०अनिट् घटा०। श्राति अश्रासीत् श्रपयति। [२यवाग्वां स्त्री अमरः।

श्राण त्रि० श्रा—क्त। १घृतादिभिन्ने पक्वे मांसादौ जटा०।

श्राद्ध न० श्रद्धा-हेतुत्वेनास्त्यस्य अण्। "श्रद्धया दीयते यस्मात् श्राद्धं तेन निगद्यते" इत्युक्ते पित्रादिभ्यः श्रद्धया देये १द्रव्ये। अस्त्यर्थे अण्। २श्रद्धायुक्ते त्रि०।

श्राद्धलक्षणं तत्प्रयोजनञ्च गयाश्राद्धादिपद्धतौ हेमाद्रिश्राद्धकल्पानुसारेणास्माभिः प्रदर्शितं यथा

"सम्बोधनपदोपनीतान् पित्रादीन् चतुर्थ्यन्तपदेनोद्दिश्य पुत्रादिभिर्मन्त्रद्वारा श्रद्धयान्नादेर्दानं श्राद्धम्"अथैतन्मनुः श्राद्धशब्दं कर्म प्रोवाचेति" श्राद्धविवेकधृतापस्तम्बवचनेन श्राद्धशब्दस्य कर्मसामान्यवचनतावगमात् "संस्कृतं व्यञ्जनाद्यं च पयोदधिघृतान्वितम्। श्रद्धया दीयते यस्मात् तेन श्राद्धं निगद्यते" इति श्राद्धतत्त्वधृतपुलस्त्यवचनेन श्रद्धाहेतुकदानरूपकर्मविशेषस्य श्राद्धपदार्थतावगमाच्च। श्राद्धमिति शब्दो वाचको यस्य तत्कर्मेत्यर्थ इति श्राद्धविवेकः। तस्मिंश्च कर्मणि यागादाविन्द्रादीनामिव पित्रादेर्देवतात्वं तदुद्देशेन मन्त्रद्वारा द्रव्यत्यागात्। तथा च यागादौ मन्त्राहूता इन्द्रादयः शक्तिमात्रेण तत्तत्स्थले आविर्भूता यजमानत्यक्तद्रव्यदर्शनेन तृप्यन्तस्तेषामभीष्टफलं यथा साधयन्ति तथा श्राद्धेऽपि मन्त्राहूताः पित्रादयः समागताः पुत्रादित्यक्तद्रव्यभोगेन तृप्यन्तो विशिष्टफलप्रदा इत्येव कल्पनीयम्। किन्तु सर्वो हि लोकः सफले कर्मण्येव प्रवर्त्तते नाफले। तत्र यज्ञादौ यथा देवानां फलदातृत्वमेवं श्राद्धदेवानां पित्रादीनां फलदातृत्वे सम्भवत्येव श्राद्धस्य सफलत्वं भवेत्तदेव नोपपद्यते। तथा हि इन्द्रादयो हि देवाश्चेतना विशिष्टज्ञानक्रियाशक्तिमन्तो मन्त्रमात्राहूताः शक्तिविशेषेण यज्ञदेशे आविर्भवितुं शक्नुवन्ति आविर्भूय च यजदत्तद्रव्यदर्शनमात्रेण तृप्यन्तो विशिष्टफलदानाय समर्थाः। नैवं पित्रादयो भवितुमर्हन्ति। ते हि स्वस्वकर्मानुसारेण नानायोनिगततया अतिविप्रकृष्टदेशस्थिताः विशिष्टशक्तिरहिताश्च कथं मन्त्रमात्राहूताः श्राद्धदेशे आगच्छेयुः। आगता वा कुतो न दृश्येयुः देवानामिव तेषामतीन्द्रियभावात् दर्शनमात्रेण तृप्तेरभावाच्च। भोजनेनैव तेषां तृप्तिसम्भवाच्च भोजनमन्तरेण कथं तृप्येयुः। अतृप्ताश्च कुतो वा फलं दद्युः। पश्वादिगता वा कुतो विशिष्टफलप्रदाः स्युः। अपरञ्च इह दत्तस्य चान्नादेरचेतनतया नेतृपुरुषाभावेनान्यत्र गमनासम्भवः। श्राद्धदत्तद्रव्यस्य यथापूर्वमवस्थानाच्च भोक्तृदेशगमनमित्यनुमीयते। एवमिह दत्तेनान्नेनान्यत्र स्थितानां भोगस्तु नैव सम्भवी। पात्रीयब्राह्मणेन श्राद्धान्नस्य भोजनाच्च पित्रादितृप्तिसम्भवः भोगतृप्त्योः सामानाधिकरण्यनियमात्। किञ्च देवयोनिगतानाममृताशिनां मानुषयोग्येनान्नेन कथं तृप्तिः कथं वा पशुयोनिगतानां तृणाहारयोग्यानां तेन तृप्तिः। तेषां पश्वादिभावमापेदुषां फलदातृत्वासम्भवस्तु विशिष्टशक्तेरभावात् सर्वानुभवसिद्धः। एतेन "यथा गोषु प्रनष्टो वै वत्सो विन्दति मातरम्। एवं श्राद्धेऽभ्युद्दिष्टं मन्त्रः प्रापयते पितॄन्। नामगोत्रं पितॄणान्तु प्रापकं हव्यकव्ययोः। नाममन्त्रास्तथोद्देशो भवान्तरगतानपि। प्राणिनः प्रीणयन्त्येते तदाहारत्वमागताः। देवो यदि पिता जातः शुभकर्मानुसारतः। श्राद्धान्नममृतं भूत्वा देवत्वेऽप्यनुगच्छति। दैत्यत्वे भोग्यरूपेण पशुत्वे च तृणं भवेत्। श्राद्धान्नं वायुरूपेण नागत्वेऽप्यनुगच्छति। पानं भवति यक्षत्वे राक्षसत्वे तथामिषम्। दनुजत्वे तथा मांसं प्रेतत्वे रुधिरोदकम्। मनुष्यत्वेऽन्नपानादि नानाभोगरसं तथेति च" हेमाद्रिश्राद्धकल्पादिधृतमार्कण्डेयवचनैरिह दत्तान्नादेरेव मन्त्रशक्त्या विप्रकृष्टदेशनयनं पितृप्राप्तयोनियोग्यामृतादिरूपेण परिणामश्च कल्प्यते इत्यपि न विचारचारु अचेतनानामपि मन्त्राणां चेतनधर्मकल्पनापि तदैव साधीयसी स्यात् यदि दत्तान्नादेरिह यथापूर्वमवस्थितिर्न स्यात् स्याच्च पूर्वरूपान्यथाभावः। तथा च एतन्नादिवचनानां स्तुत्यर्थवादपरतया अपि दृश्यमानत्वाद्बाधिककल्पना। किञ्च पात्र-

ब्राह्मणेन भोगादिना विनष्टस्य वस्तुनः कथं स्थानान्तरनयनं कथं वा तत्तदाहारतारूपेण परिणामः धर्मिण्यसत्येव स्थानान्तरगमनादिसम्भवो न विनष्टत्वात् श्राद्धस्य कथं प्रयोजनवत्त्वमित्येवं स्थिते । उच्यते । ब्राह्मणादिसम्प्रदानक्रियाया इव श्राद्धकर्मण एव स्वजन्यपुण्यद्वारा विशिष्टफलजनकता तत्र च कालान्तरभावितत्तत्फलदानाय तत्कर्माराधितः परमेश्वरस्यैव तत्साधनत्वम् । अतएव भगवद्गीतायाम् "यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान् मयैव विहितान् हि तान्" इति भक्तानां तत्तदिष्टोत्पादनस्य स्वकर्तृकत्वं भगवतोक्तम् । युक्तञ्चैतत् श्रुतिस्मृत्योरीश्वराज्ञारूपतया तत्तदर्थानुष्ठानेन तदाज्ञापरिपालने ईश्वरस्य सम्माननारूपा तुष्टिस्ततश्चाभीष्टलाभः । तथैवोक्तं गीतायाम् "स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु । यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इति । स्वकर्मणा स्वस्ववर्णाश्रमविहितकर्मानुष्ठानेन, तम् परमेश्वरम् अभ्यर्च्य तदाज्ञाप्रतिपालनेन सम्मान्य तत्सम्मानेन च तत्कृतां सिद्धिम् तत्तदभीष्टसिद्धिं लभते इति तदर्थः । अस्मिन् पक्षे च पित्रादीनां श्राद्धान्नादेर्वा न स्थानान्तरगमनकल्पना । अथ वा देवदत्तादिशब्दस्य यथा न केवलं देहमात्रं, न वा जीवमात्रमर्थः किन्तु तत्तद्देहाभिमानी जीव एवार्थः । तथा पित्रादिशब्दस्य उत्पादकदेहाभिमानी केवलं जीवोऽपि नार्थः किन्तु वसुरुद्रादित्यदेवाधिष्ठितस्तादृशजीव एवार्थः, "वसवः पितरो ज्ञेया रुद्रा ज्ञेयाः पितामहाः । प्रपितामहाश्चादित्याः श्रुतिरेषा सनातनी । प्रेतानुद्दिश्य यत् कर्म क्रियते मानुषैरिह । तृप्यन्ति देवतास्तेन न प्रेताः पितरः स्मृताः" । इति श्राद्धकल्पधृतदेवलवचने पित्रादिपदानां पारिभाषिकत्वोक्तेः । प्रेताः मृताः न पितरः न केवलपितृपदाभिधेयाः किन्तु तदधिष्ठितवस्वादय एव पितृपदाभिधेयास्त एव तृप्यन्तीत्यर्थः । अतएव श्राद्धकाले पित्रादीनां तेन तेन रूपेण ध्येयताऽग्रेऽभिधास्यमानोपपद्यते । एवञ्च वस्वादिदेवानामिन्द्रादिवत् विशिष्टशक्तिधामसम्पन्नतया मन्त्रमात्रावाहने यागादाविन्द्रादिवदागमनवस्थपाश्च व्यक्तद्रव्यदर्शनमात्रेण तृप्तिः, "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्तीति" छान्दोग्यवाक्यात् । अतएव भगवद्गीतायाम् "सह यज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् । देवान् भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथेति" प्रजाःकृतयज्ञेन तृप्तानां देवानां यजमानफलदातृत्वम् प्रजाः प्रति प्रजापतिवचनत्वेनोक्तम् । अनेन यज्ञेन देवान् भावयत तर्पयत ते च यज्ञतर्पिता देवाः वः युष्मान् भावयन्तु तर्पयन्त्वित्यर्थः । यज्ञपदञ्च कर्ममात्रोपलक्षणम् । एवञ्च यथा काचित् गर्भिणी सुहृदा दत्तं दोहदं भुञ्जाना स्वयं तृप्यति स्वाश्रयं गर्भञ्च तर्पयन्ती दोहददातारमप्युपकरोति तथा वस्वादयोऽपि श्राद्धान्नदर्शनमात्रतृप्ताः स्वाधिष्ठितपित्रादिपुरुषान् तर्पयन्तः श्राद्धकर्तुरभीष्टदातारो भवन्ति । प्रागुक्तवचनजातेष्वपि मन्त्रयुक्तश्राद्धादेर्देशान्तरनयनकथनस्यापि स्वस्वकर्मानुसारेण पश्वादिभावापन्नपित्रादीनां तदुपभोगयोग्याहारादिवस्तुतृप्तिसम्पादकता तद्दिने भवतीत्येतत्परत्वश्राद्धप्रशंसापरत्वयोः कल्पने न वैयर्थ्यम् । यत्र च काम्यादिमरणेन पित्रादीनां मुक्तत्वम् तत्र वस्वादिमात्रस्यैव तृप्तिर्न विशिष्टस्य, विशेषणस्यासत्त्वे विशेष्यस्यैव विशिष्टकारित्वात् कुण्डलविशिष्टस्य नरस्य कुण्डलापगमेऽपि मनुष्यकर्मकारित्वव्याहतिवत् । तथा च त एव तृप्ता विशिष्टफलं दद्युरिति सिद्धा श्राद्धस्यार्थवत्ता"।

श्राद्धभेदाश्च विश्वामित्राद्युक्ताः प्रा॰वि॰ दर्शिता यथा "नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम् । पार्वणञ्चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमम् । कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम् । यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम्" । एतच्च भविष्यपुराणे विवृतम् । यथा "अहन्यहनि यत् श्राद्धं तन्नित्यमभिधीयते । वैश्वदेवविहीनं तदशक्तावुदकेन तु । एकोद्दिष्टन्तु यत् श्राद्धं तन्नैमित्तिकमुच्यते । तदप्यदैवं कर्त्तव्यमयुग्मानाशयेद्द्विजान् । कामाय तु हितं काम्यमभिप्रेतार्थसिद्धये । पार्वणेन विधानेन तदप्युक्तं खगाधिप ! । वृद्धौ यत् क्रियते श्राद्धं वृद्धिश्राद्धं तदुच्यते । सर्वं प्रदक्षिणं कार्य्यं पूर्वाह्णे तूपवीतिना । गन्धोदकतिलैर्युक्तं कुर्य्यात् पात्रचतुष्टयम् । अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् । ये समाना इति द्वाभ्यामेतज्ज्ञेयं

सपिण्डनम्। नित्येन तुल्यं शेषं स्यादेकोद्दिष्टं स्त्रिया अपि। अमावास्यां यत् क्रियते तत् पार्व्वणमुदाहृतम्। क्रियते पर्व्वणि यत्तत् पार्व्वणमिति च स्थितिः। गोष्ठ्यां यत् क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते। बहूनां विदुषां सम्पत्सुखार्थं पितृतृप्तये। क्रियते शुद्धये यत्तु ब्राह्मणानान्तु भोजनम्। शुद्ध्यर्थमिति तत् प्रोक्तं वैनतेय! मनीषिभिः। निषेककाले होमे च सीमन्तोन्नयने तथा। ज्ञेयं पुंसवने चैव श्राद्धं कर्म्माङ्गमेव च। देवानुद्दिश्य यत् श्राद्धं तद्दैविकमिहोच्यते। हविष्येण विशिष्टेन सप्तम्यादिषु यत्नतः। गच्छन् देशान्तरं यत्तु श्राद्धं कुर्य्यात्तु सर्पिषा। यात्रार्थमिति तत् प्रोक्तं प्रवेशे च न संशयः। शरीरोपचये श्राद्धमर्थोपचय एव च। पुष्ट्यर्थमेतद्विज्ञेयमौपचारिकमुच्यते"।

इह० "नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं तथैव च। पार्व्वणञ्चेति मनुना श्राद्धं पञ्चविधं स्मृतम्"। कूर्म्मपुराणे "अहन्यहनि नित्यं स्यात् काम्यं नैमित्तिकं पुनः। एकोद्दिष्टादि विज्ञेयं वृद्धिश्राद्धन्तु पार्व्वणम्। एतत् पञ्चविधं श्राद्धं मनुना परिकीर्त्तितम्"। स्वरूपतो द्वादशविधत्वेऽपि पञ्चविधविधानोपाधिभेदात् पञ्चविधत्वं गोष्ठीश्राद्धादीनां पार्व्वणकाम्यवृद्धिश्राद्धैरपृथग्विधानात् एतेष्वन्तर्भाव इत्यभिप्रायः। सपिण्डीकरणस्याप्यंशतः पार्व्वणविधानादंशत एकोद्दिष्टविधेरुभयात्मकत्वात् न पृथक्त्वं नित्यपार्व्वणात् काम्यस्य देवताभेदात् पृथग्विधानम्। वस्तुतः प्रपञ्चार्थमेव द्वादशविधत्वम्। युगाद्यादिश्राद्धानामपि सत्त्वात्। यत्तु मत्स्यपुराणे "नित्यं नैमित्तिकं काम्यं त्रिविधं श्राद्धमुच्यते"। इति तत्र नित्यपदमुख्यार्थमेव नैमित्तिकपदमागन्तुकनिमित्तोत्पन्नत्वेन पार्व्वणैकोद्दिष्टयोः परिग्रहार्थम्। काम्यपदं इष्टफलत्वेन तिथिश्राद्धादीनामभ्युदयस्य च सङ्ग्रहार्थमित्यविरोधः। विष्णुना तु नित्यकाम्यरूपतया द्वैविध्यं वक्ष्यते तत्र नित्यपदमावश्यकतया पार्व्वणैकोद्दिष्टयोरपि परिग्रहार्थम्। काम्यपदमनावश्यकार्थं सर्व्वमिदमुपाधिभेदादविरुद्धम्"।

श्राद्धे विहिता देशाः प्रा० वि० दर्शिता यथा तत्र विष्णुः "पुष्करेष्वक्षयं श्राद्धं जपहोमतपांसि च"। "पुष्करे स्नानमात्रस्तु सर्व्वपापेभ्यः पूतो भवति" इत्यभिधाय "एवमन्येषु तीर्थेषु सरित्सरःसु सङ्गमेषु प्रभवेषु पुलिनेषु निकुञ्जेषु प्रस्रवणेषु उपवनेषु गोमयेनोपलिप्तेषु गृहेषु मनोज्ञेषु च" श्राद्ध इत्याह। प्रभवोऽत्र नदीनामुत्पत्तिदेशः सरित्सरःसु सङ्गमेषु चेति प्रस्तुत्य प्रभवेष्वित्यभिधानात्। पुलिनं नदीतोयोत्थितप्रदेशः। निकुञ्जो लतादिवेष्टितप्रदेशः प्रस्रवणं निर्झरः। उपवनं गृहवाटिका मनोज्ञं रमणीयम्। देवलः "श्राद्धस्य पूजितो देशो गया गङ्गा सरस्वती। कुरुक्षेत्रं प्रयागश्च नैमिषं पुष्कराणि च। नदीतटेषु तीर्थेषु शैलेषु पुलिनेषु च। विविक्तेषु च तुष्यन्ति दत्तेनेह पितामहाः"। विविक्तं विजनम्। वृहस्पतिः "काङ्क्षन्ति पितरः पुत्त्रान्नरकापातभीरवः। गयां यास्यति यः कश्चित् सोऽस्मान् सन्तारयिष्यति। करिष्यति वृषोत्सर्गमिष्टापूर्त्तं तथैव च। प्रावृषिष्यति वार्द्धक्ये श्राद्धं दास्यति चान्वहम्। गयायां धर्म्मपृष्ठे च सदसि ब्रह्मणस्तथा। गयाशीर्षेऽक्षयवटे पितॄणां दत्तमक्षयम्। धर्म्मारण्यं धर्म्मपृष्ठं धेनुकारण्यमेव च। दृष्ट्वैतानि पितॄंश्चार्च्य वंश्यान् विंशतिमुद्धरेत्"। गयामुपादाय गयास्थानविशेषोपन्यासोऽधिकफलार्थः। इह श्राद्धदेशत्वेन कथिता नानादेशीयतीर्थविशेषस्वरूपविशेषास्तत्तद्देशनिवासिभ्योऽवगन्तव्याः। अत्र पुष्करेष्वक्षयं श्राद्धमित्यादिविष्णुादिवाक्यैः सामान्यतस्तीर्थप्राप्तिनिमित्तेऽमावास्यादिश्राद्धे च प्राप्ते पुष्करादिदेशाख्यगुणफलश्राद्धविधिः "गोदोहेनापः प्रणयेत् पशुकामस्येति" वत् न तु विशिष्टश्राद्धान्तरविधानं विधिगौरवापत्तेः अगत्या तु "सोमेन यजेतेत्यादौ" तथा। तथा मनुः "शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत्। दक्षिणाप्रवणञ्चैव प्रयत्नेनोपपादयेत्। अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि। विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा"। अत्र चकारविविक्तदक्षिणाप्रवणं यत्नतः शुचित्वादिना उपपादयेत्। विविक्तं विजनं चोक्षेषु मनोज्ञेषु विविक्तेषु वनादिषु। यमः "दक्षिणाप्रवणं स्निग्धं विविक्तं शुभलक्षणम्। शुचिदेशं परीक्ष्यादौ गोमयेनोपलेपयेत्। अगारेषु विविक्तेषु तीर्थेषु च नदीषु च। विविक्तेषु च तुष्यन्ति देशेषु पितरः सदा। पारक्ये भूमिभागे तु पितॄणां निर्व्वपेत्तु यः। तद्भूमिस्वामिपितृभिः श्राद्धकर्म्म विहन्यते। तस्मात् श्राद्धानि देयानि पुण्येष्वायतनेषु च। नदीतीरेषु तीर्थेषु स्वभूमौ तु प्रयत्नतः। उपह्वरनितम्बेषु तथा पर्व्वतसानुषु। गोमयेनोपलिप्तेषु विविक्तेषु गृहेषु च"। स्निग्धं स्तिमितं विविक्तेषु देशेषु स्वभावतो वनादिषु। उपह्वरमत्र पर्व्वतान्तिकम्"।

श्राद्धनिन्दितदेशास्तत्रोक्ता यथा विष्णुः "न म्लेच्छविषये

श्राद्धं कुर्य्यान्न च गच्छेत्तथा । चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते । तं म्लेच्छदेशं जानीयादार्य्यावर्त्तमतः-परम्" । वायुपुराणे "त्रिशङ्कोर्वर्जयेद्देशं सर्वं द्वादशयोजनम् । उत्तरेण महानद्या दक्षिणेन तु कीकटात् । देशस्त्रैशङ्कवो नाम श्राद्धकर्म्मणि गर्हितः । कारस्कराः कलिङ्गाश्च सिन्धोरुत्तरमेव च । प्रनष्टाश्रमधर्म्माश्च देशावर्ज्याः प्रयत्नतः" । कारस्करादेशविशेषाः । कीकटो मगधः । सिन्धुर्नदीविशेषः । स्कन्दपुराणे "परकीयप्रदेशे यस्तु स्वान् पितॄंस्तर्पयेत्सुतः । तद्भूमिस्वामिनस्तस्य हरन्ति पितरो बलात् । स्वभागन्ततस्तेभ्यो दद्यान्मूल्यञ्च जीवताम्" । स्वञ्च इति भूभागमात्रोपलक्षणं "परक्ये भूमिभागे च" इति यमवचनात् स्वभूम्यभावे कथं श्राद्धमित्याह स्वभागमिति श्राद्धीयद्रव्यस्येति शेषः तद्भूमिस्वामिपितृभ्य उद्धृत्य देयं जीवतां स्वामिनां मूल्यं वा देयम् । यमः "अटव्यः पर्वताः पुण्या नद्यस्तीर्थानि यानि च । सर्वाण्यस्वामिकान्याहुर्न हि तेषु परिग्रहः" । स्वाम्यभावे हेतुमाह न हि तेष्विति । परिग्रहो दानविक्रयणादियोग्यविनियोगलक्षणः । तथा "क्लृप्तं कृमियुतं क्लिन्नं संकीर्णानिष्टगन्धकम् । देशञ्चानिष्टशब्दञ्च वर्जयेत् श्राद्धकर्म्मणि" । कृष्टं धूलियुतं क्लिन्नं पक्कणम् अनिष्टगन्धम् उग्राभिगन्धम् अनिष्टशब्दं प्रतिकूलशब्दम्" ।

श्राद्धदेव पु० श्राद्धार्हद्रव्याणां पितॄणां देवः शाक० । १यमे अमरः । २वैवस्वतमनौ हारा० १५अ०।

श्राद्धदेवता स्त्री श्राद्धे देवता तत्कर्म्मद्रव्यस्योद्देश्या । "पितरः श्राद्धदेवता" इति श्रुत्युक्तेषु पितृषु ।

श्राद्धशाक न० श्राद्धयोग्यं शाकम् । कालशाके भावप्र० ।

श्राद्धिक त्रि० श्राद्धे देयं, श्राद्धं दत्तमस्य भक्ष्यत्वेनास्त्यस्य वा ठन् । १श्राद्धदेये भक्ष्ये २श्राद्धदेयद्रव्यभोक्तरि च ।

श्राद्धिन् त्रि० श्राद्धं तदन्नं भक्ष्यत्वेनास्त्यस्य इनि । श्राद्धदेयान्नभोक्तरि सि०कौ० । [श्रमप० । भाव क्त । ४श्रमे न०

श्रान्त त्रि० श्रम-क्त । १श्रमयुक्ते २शान्ते ३जितेन्द्रिये च ।

श्रान्तसंवाह न० श्रान्तस्य श्रमस्य संवाहः दूरीकरणम् । पादसंवाहनादिना श्रमनिवारणे । [मत् त ।

श्राम मन्त्रणे अद०चु० उभ०सक० सेट् । श्रामयति ते अशश्रा-

श्राम पु० श्रम-घञ् । १काले २मण्डपे ३मासे च मेदि० ।

श्रावक पु०त्रि० श्रु-ण्वुल् । १श्रवणकर्त्तरि २बौद्धमुनिशिष्ये मुनिभेदे ३काके पुंस्त्री० त्रिका०।

श्रावण पु० श्रवणेन युक्ता पौर्णमासी श्रावणी सास्मिन् मासे अण् । वैशाखादिषु चतुर्थे श्रावणीयुक्ते चान्द्रे १मासे २तथाभूते पक्षे श्रवणनक्षत्रेण पर्वान्तकाले उदयास्तमन्यात् वार्हस्पत्ये ३वर्षभेदे च । गुरुवर्षशब्दे २६१८ पृ० दृश्यम् उपचारात् कर्कटस्थरविके सौरे ४मासे ५पाषण्डे च मेदि० । श्रवणेन कर्णेन निर्वृत्तः अण् । ६कर्णसाध्ये प्रत्यक्षभेदे श्रवणनक्षत्रेण युक्ता पौर्णमासी अण् ङीप् । ७चान्द्रश्रावणमासीयपौर्णमास्यां स्त्री । सा च (मुण्डिरि) ८वृक्षभेदे राजनि० । ९दण्डोत्पले मेदि० टाप् । १०मुण्डितिकाख्ये भावप्र० ङीप् । "मुण्डितिका कटुः पाके शीतवीर्य्या मधुरा लघुः । मेध्या गण्डापचीकृच्छ्र कृमियोन्यर्त्तिपाण्डुनुत् । श्लीपदारुच्यपस्मारप्लीहमेदोगुदार्त्तिहृत् । महाश्रावणी च तत्तुल्या गुणैरुक्ता महर्षिभिः" भावप्र० ।

श्रावणिक पु० श्रावणी श्रवणनक्षत्रयुक्ता पूर्णिमाऽस्त्यस्मिन् मासे ठन् । १चान्द्रश्रावणमासे अमरः २तथाभूते पक्षे

श्रावस्ती स्त्री श्रु-भिच् पृषो० ङीप् । धर्मपत्तनाख्ये नगरीभेदे त्रिका० ।

श्रि सेवने भ्वा०उभ० सक० सेट् । श्रयति ते अशिश्रियत् त ।

श्रित त्रि० श्रि-क्त । १सेविते २आश्रिते च ।

श्रिष दाहे भ्वा०पर०स० सेट् क्त्वा वेट् । श्रेषति अश्रेषीत् ।

श्री पाके क्र्या०उ०सक०सेट् । श्रीणाति-ते अश्रायीत् अश्रायिष्ट

श्री स्त्री श्रि-क्विप् नि० । १लक्ष्म्यां २लवङ्गे अमरः । ३शोभायां ४वाण्यां ५वेशरचनायां ६सरलद्रवे ७धर्मार्थकामेषु ८सम्पत्तौ ९प्रकारे १०उपकरणे ११बुद्धौ १२विभूतौ मेदि० । १३अधिकारे १४प्रभायां १५कीर्त्तौ धरणिः । १६वृद्धौ १७सिद्धौ शब्दर० १८कमले १९बिल्ववृक्षे २०ऋद्धिनामौषधौ राजनि० "देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम् । सिद्धं सिद्धाधिकारांश्च श्रीपूर्वं समुदीरयेत्" इत्युक्ते देवादीनां २१नामोच्चारणीयोपाधिभेदे च "सिद्धाधिकारान् स्वर्गगामित्वादिना सिद्धोऽधिकारो येषां नराणां तान् सिद्धाधिकारान् । तेन जीवतां श्रीशब्दादित्वं न मृतानामिति" संस्कारत० रघु० । २२रागभेदे पु० । श्रीरागश्च सुन्दरपुरुषाकृतिः हेमन्ते अपराह्णे गेयः । तस्य पञ्च रागिण्यः मालश्रीः मारवी धनाश्रीः वसन्तरागिणी आसावरी संगीतदा०।

पद्मे श्रीयन्त्रावसंख्याभेदाः पद्मशब्दे ४२२०पृ० दृश्याः

श्रीकण्ठ पु० श्रीः शोभा कण्ठेऽस्य । १शिवे अमरः सर्वतः पीतत्व

कण्ठे तत्पार्श्वविषसन्निकर्षे शोभाधिक्यात्तथात्वम् । २हस्तिनापुरस्य उत्तरपश्चिमस्थे कुरुजाङ्गलाख्ये देशे च हेमच०

श्रीकण्ठपदलाञ्छन पु० भवभूतौ शब्दमाला ।

श्रीकन्द स्त्री श्रीः शोभा तया युक्तः कन्दोऽस्याः । वन्ध्याकर्क्कोट्यां राजनि० ।

श्रीकर न०श्रियं शोभां करोति कृ-अच् । १रक्तोत्पले त्रिका० २विष्णौ पु० ३दायनिबन्धभेदकारके पण्डितभेदे च पु० ४शोभाकारके त्रि० । [शब्दच० ।

श्रीकरण न०श्रीयुक्तं क्रियतेऽनेन कृ-करणे ल्युट् । लेखन्यां

श्रीकान्त पु० ६त० । विष्णौ शब्दच० श्रीनाथश्रीपत्यादयोऽप्यत्र । श्रीपतिस्तु भूमिपाले च मेदि० ।

श्रीकारिन् पु०श्रियं करोति कृ-णिनि । जङ्गले महाजने १मृगभेदे राजनि० । २शोभाकारिणि त्रि० स्त्रियां ङीप् ।

श्रीखण्ड न०श्रियः शोभायाः खण्ड इव यत्र । चन्दने त्रिका०

श्रीगर्भ पु० श्रीर्गर्भेऽस्य । १विष्णौ त्रिका० २खड्गे च "श्रीगर्भो विजयश्चैव" इति खड्गनामाष्टकम् ।

श्रीग्रह पु० श्रियः ग्रह इव यत्र । पक्षिणां पानीयशालायां हारा० । [जटा० ।

श्रीघन पु०श्रिया बुद्ध्या घनः । १बुद्धभेदे अमरः । २दध्नि न०

श्रीचक्र न० श्रियाः चक्रं यन्त्रभेदः । "बिन्दुत्रिकोणवसुकोणदशारयुग्मं मन्वस्रनागदलसङ्गतषोडशारम् । वृत्तत्रयञ्च धरणीसदनत्रयञ्च श्रीचक्रमेतदुदितं परदेवतायाः" इति तन्त्रोक्ते त्रिपुरासुन्दरीपूजाङ्गे यन्त्रभेदे । [प्यत्र ।

श्रीज पु० श्रियो जायते जन-ड । कामदेवे श्रीनन्दनादयोऽ

श्रीताल पु० श्रीयुक्तस्तालः शाक० । तालवृक्षतुल्ये वृक्षभेदे राजनि० । [दातरि त्रि० ।

श्रीद पु० श्रियं धनं ददाति दा-क । १कुबेरे अमरः २धन-

श्रीधर पु० श्रियं धरति धृ-अच् । १विष्णौ "अतिशुद्धं हितकरं वनमालाविभूषितम् । श्रीधरं देवि ! विज्ञेयम्" इत्युक्ते २शालग्रामभूर्तिभेदे न० ।

श्रीनिकेतन पु० श्रियं निकेतयति नितरां वासयति नि+कित-णिच्-ल्यु । १विष्णौ शब्दच० ६त० । २श्रीलक्ष्मीनिवासे । [त्रि० ६त० । २श्रिय आलये च ।

श्रीनिवास पु० निवसत्यस्मिन् नि+वस-घञ् ६त० । १विष्णौ

श्रीपञ्चमी स्त्री श्रियः प्रजाङ्गं पञ्चमी शाक० । माघशुक्लपञ्चम्याम् । माघोपक्रमे "चतुर्थी वरदा शुक्ला तत्र गौरी सुपूजिता सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम्" । सरस्वतीपूजादिनेऽनध्यायश्च गौडाचारः । अत्र श्रीपञ्चम्यामारभ्य प्रतिमासं पञ्चम्यां श्रीपञ्चमीव्रतं स्त्रियः कुर्वन्ति तत्प्रमाणं संवत्सरकौमुदीधृतब्रह्मपु० । [हारा० ।

श्रीपथ पु० श्रीयुक्तः पन्थाः अच् समा० शाक० । राजपथे

श्रीपर्ण न० श्रीर्लक्ष्मीः पर्णे दलेऽस्य । १पद्मे श्रीयुक्तं पर्णमस्य । २अग्निमन्थवृक्षे पु० मेदि० ।

श्रीपर्णिका स्त्री श्रीयुक्तं पर्णमस्याः संज्ञायां कन् अत इत्वम् । कट्फलवृक्षे अमरः ।

श्रीपर्णी स्त्री श्रीयुक्तानि पर्णान्यस्याः ङीप् । १गाम्भारीवृक्षे अमरः । २कट्फलवृक्षे मेदि० । ३शाल्मलीवृक्षे ४हठवृक्षे हेमच० । ५अग्निमन्थवृक्षे राजनि० ।

श्रीपिष्ट पु० श्रियै शोभायै पिष्यते पिष-क्त । सरलवृक्षे रामाश्रमः । [२उच्चैःश्रवसि अश्वे त्रिका० ३चन्द्रे च ।

श्रीपुत्त्र पु०६त० । १कामदेवे श्रियः पुत्त्रो भ्राता सहजत्वात् ।

श्रीपुष्प न० श्रीयुक्तं पुष्पम् शाक० । १लवङ्गे राजनि० । २पद्मकाष्ठे रत्नमाला ।

श्रीफल पु० श्रीयुक्तं फलमस्य । १बिल्ववृक्षे अमरः । २राजादन्याञ्च राजनि० । ३नील्यां ४क्षुद्रकारवेल्ल्यां स्त्री राजनि० टाप् । स्वार्थे क अत इत्वम् । ५तत्रार्थे राजनि० । ६धात्र्यामलक्यां मेदि० स्त्री गौरा० ङीष् ।

श्रीभद्रा स्त्री श्रीयुक्तं भद्रमस्याः । भद्रमुस्तके शब्दच० ।

श्रीभागवत न० श्रीमत् भागवतम् शाक० । अष्टादशपुराणेषु मध्ये द्वादशस्कन्धयुक्ते अष्टादशसाहस्रे व्यासप्रणीते पुराणे भागवतशब्दे दृश्यम् । श्रीमद्भागवतमप्यत्र "श्रीमद्भागवते महामुनिकृते" भाग० १.१ । [राजनि० २चन्द्रे च ।

श्रीभ्रातृ पु० श्रियः लक्ष्म्याः भ्राता अनुजत्वात् । १अश्वे

श्रीमत् पु० श्रीरस्त्यस्य मतुप् । १तिलवृक्षे अमरः । २अश्वत्थवृक्षे राजनि० । ३विष्णौ शब्दर० । ४शिवे त्रिका० । ५कुबेरे शब्दच० । ६शोभायुक्ते ७धनिनि च त्रि० स्त्रियां ङीप् । सा च दशाधिकायां कुमारान्ततायां पुनः गाधिकायाम् नारदपञ्चरात्रम् ।

श्रीमलापहा स्त्री श्रिया शोभया मलमपहन्ति अप+हन-ड । धूम्राक्तायां लतायां राजनि० ।

श्रीमस्तक पु०श्रीयुक्तं मस्तकमस्य । रशोने (लसुन) राजनि० ।

श्रीमूर्त्ति स्त्री श्रीपूर्वककथनयोग्या मूर्त्तिः । देवताप्रतिमायां राजनि० । विष्णोर्मूर्त्तिभेदाश्चतुर्विंशति मूर्त्तिशब्दे दृश्याः । श्रीमूर्त्तयश्चाष्टविधाः भाग० ११स्कन्धे दर्शिता यथा "शैली दारुमयी लौही लेप्या लेख्या च सैकती । मनोमयी मणिमयी प्रतिमाष्टविधा मता । चलाचलेति द्वि-

विधा प्रतिष्ठा श्रीशमन्दिरम् । उद्घाटनाह्वने न तः स्थिरायास्तुतवार्चने । वांस्वरायां विकल्पः स्यात् स्व स्थिरुत्वे तु भवेद् द्वयम् । स्वपन त्वविक्षेपायामन्यत्र परिमार्जनम् । गोपालमन्त्रांद्दृतत्वात् तच्छ्रीमूर्त्तिरपेक्षिता । तथापि वैष्णवप्रीत्यै लेख्याः श्रीमूर्त्तयोऽखिलाः" ।

श्रीरङ्गपत्तन न० श्रिया रङ्गस्य पत्तनमिव । दाक्षिणात्ये देशभेदे

श्रीरस पु० श्रिये रसोऽस्य । श्रीवेष्टे गन्धद्रव्ये राजनि० ।

श्रीराम पु० श्रीयुक्तो रामः । दशरथात्मजे भगवदवतारभेदे शब्दच० । [च अमरः ।

श्रील त्रि० श्री+अस्त्यर्थे लच् । १शोभायुक्ते २सम्पदादियुक्ते

श्रीलता स्त्री श्रीयुक्ता लता । महाज्योतिष्मत्यां राजनि० ।

श्रीवत्स पु० वदति मङ्गल्यं वद–स श्रीयुक्तो वत्सः । १विष्णोः वक्षःस्थे महापुरुषलक्षणश्वेतरोमावर्त्तविशेषे । स अस्त्यस्य अच् । २विष्णौ हेमच० । ३सुरङ्गाभेदे त्रिका० ।

श्रीवत्सक पु० श्रीवत्सः चिह्नभेदः तेन कायति कै–क । हृदयस्थश्वेतलोमयुक्ते अश्वभेदे ।

श्रीवत्सभृत् पु० श्रीवत्सं बिभर्त्ति भृ–क्विप् । विष्णौ हेमच०

श्रीवत्सलाञ्छन पु० श्रीवत्सो लाञ्छनं यस्य । विष्णौ अमरः श्रीवत्साङ्कादयोऽप्यत्र । [वराहावतारे त्रिका० ।

श्रीवराह पु० श्रिया युक्तो वराहः । विष्णोर्दशावतारेषु

श्रीवल्ली स्त्री श्रीयुक्ता वल्ली । कण्टकप्रधानवृक्षभेदे राजनि० ।

श्रीवाटी स्त्री श्रिया वाटीव । नागवल्लीभेदे राजनि० ।

श्रीवारक पु० श्रियं वारयति कामयते ण्वुल् । वितावरभाके राजनि० ।

श्रीवास पु० श्रियै वासयति वस–णिच्–अण् । सरलद्रवरसे (टारपिन) । "श्रीवासः सरलः पूतिः मुन्दुरवृक्षस्य निर्यासकम् । विष्णुः परमात्मांशो देवदारु सुरा नदी । सर्वेऽस्मै परमाऽस्त्वश्रीरचोन्ना स्वरनामकाः" राजव० । १तत० । २पद्मे १विष्णौ मेदि० ४शिवे शब्दच० ।

श्रीवासस् न० श्रियै वासयति वस–णिच् असि । सरलद्रवरसे अमरः । [तन्त्रसा० ।

श्रीविद्या स्त्री श्रियै त्रिवर्गाय विद्या । त्रिपुरासुन्दर्यां

श्रीवृक्ष पु० श्रियः शोभायाः वृक्ष इव । १अश्वस्य हृदयस्थे श्वेतरोमावर्त्तभेदे २अश्वत्थवृक्षे हेमच० । श्रीनामकोऽवृक्षः शाक० । ३बिल्ववृक्षे "श्रीवृक्षे बोधयामि त्वाम्" ति० त० ।

श्रीवेष्ट पु० श्रियै वेष्ट्यतेऽसौ वेष्ट–कर्मणि घञ् । सरलवृक्षनिर्यासे (तारपिन) राजनि० । [ऽप्यत्र ।

श्रीश पु० ६तत० । १विष्णौ २श्रीरामे शब्दच० । श्रीपरादयो-

श्रीसंज्ञ न० श्रियः संज्ञा संज्ञाऽस्य । लवङ्गे अमरः । [च ।

श्रीसहोदर पु० ६तत० । १चन्द्रे २उच्चैःश्रवसि अश्वे च २कपूरे

श्रीहस्तिनी स्त्री श्रीयुक्ता हस्तिनीव । (हातिशुँडा) इवभेदे अमरः ।

श्रु गतौ भ्वा० पर० सक० अनिट् । श्रवति अश्रौषीत् ।

श्रु श्रवणे भ्वा० पर० सक० अनिट् । शृणोति अश्रौषीत् । णिचि णिच अशिश्रवत् । णिचि सनि शि(शु)श्रावयिषति ।

श्रु(स्रु)घ्न पु० देशभेदे । [ठञ् । वर्ज्जिकाक्षारे रत्नमा० ।

श्रु(स्रु)घ्निका स्त्री श्रु(स्रु)घ्नः देशभेदः कारणत्वेनाऽस्त्यस्याः

श्रुत न० श्रूयते श्रु–क्त । १शास्त्रे अमरः २अवधाने च "श्रुतान्वितः" इति भट्टिः । ३श्रवणेन गृहीते त्रि० मेदि० ४अवधृते

श्रुतकीर्त्ति स्त्री १कुशध्वजकन्यायां शत्रुघ्नपत्न्याम् । श्रुता विख्याता कीर्त्तिरस्य । २विख्यातयशस्के त्रि० ।

श्रुतदेवी स्त्री श्रुतस्य शास्त्रस्य देवी । सरस्वत्यां हेमच० ।

श्रुतबोध पु० श्रुतमात्रं बोधयति बुध–णिच्–अच् । १कालिदासकृते छन्दोग्रन्थभेदे । २श्रुतमात्रबोधके ग्रन्थे च ।

श्रुतश्रवस् पु० श्रुतं श्रवो यशोऽस्य । शिशुपालपितरि "निर्वर्त्तितेऽरिः क्रियया स श्रुतश्रवसः सुतः" इति माघः ।

श्रुतश्रेणि स्त्री श्रुता विख्याता श्रेणीव । द्रवन्त्यां भावप्र० ।

श्रुतादान न० ६तत० । अश्रुतवादे हारा० ।

श्रुतायुस् सूर्यवंश्ये नृपभेदे "नानागस्त्वाम्बरीषोऽभूत् सिन्धुद्वीपस्ततोऽभवत् । ततः श्रुतायुः पुत्रोऽभूत्" मत्स्यपु० ।

श्रुति स्त्री श्रु–करणादौ क्तिन् । १वेदे वेदस्य वर्णैः श्रूयमाणत्वात् श्रुतित्वम् । २कर्णे कर्णस्य श्रवणहेतुत्वात् तथात्वम् । ३श्रवणेन्द्रियजन्ये ज्ञाने च । चतुर्भागान्वितो त्रिभुजक्षेत्रादौ भुजकोट्योः संयुक्तरेखाभेदे ४रेखाभेदे च लीला० । कर्णस्य शुभाशुभफलं यथा "स्कन्धावलम्बकर्णाः स्युः पापमृत्यवः । निर्मांसचिपिटैर्भोगाः कृपणा कुजकर्णकाः । शङ्कुकर्णाश्च राजानो रोमकर्णाः स्तायुषः । इङ्गलकर्णाश्च राजानो धनिनः परिकीर्त्तिताः" गरुडपु० ६६अ० । ५अवर्णक्रियायां ६वार्त्तायां मेदि० । ७अवणनक्षत्रे शब्दर० । ८षड्जादीनामारम्भकावयवे शब्दभेदे मल्लिना० "प्रथम श्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः । सा श्रुतिः सम्परिज्ञेया स्वरावयवलक्षणेति" । श्रुतिसंख्यानियमश्च तत्र दर्शितः "चतुश्चतुश्चतुश्चैव षड्जमध्यमपञ्चमाः । द्वे द्वे निषादगान्धारौ त्रिस्त्रिऋषभधैवतौ" । तत्रोदाहृ 'नान्दी चाऽऽनन्दा सुषमा च सुमुखी चित्रा विचित्रा धना मातङ्गी

वरसःस्ता मधुकरी मैत्री शिवा माधवी । बाला शार्ङ्गरवी कला कलरवा माला विशाला जया मातेति श्रुतयः पुराणकविभिर्द्वाविंशतिः कीर्त्तिताः”। “श्रुतिस्थाने स्वरान् वक्तुं नाहं शक्तोऽपि तत्त्वतः । जले च सुतरां मार्गो मीनानां नोपलभ्यते । गगने पक्षिणां यद्वत् तद्वत् स्वरगता श्रुतिः । श्रुतिनादस्वरा प्रोक्ता तथाऽन्या च कला मता । यथा तैलगतं सर्पिर्यथा काष्ठगतोऽनलः । ज्ञायतेऽत्रोपदेशेन तथा स्वरगता श्रुतिः । वीणादिस्थश्रुतिस्थानं स्वरस्थानं तु वंशजम्” संगीतदा०। संगीतरत्नाकरे च षड्जादिभेदे अन्यविधाः श्रुतय उक्ता यथा “तीव्रा कुमुद्वती मन्दा छन्दोवत्यस्तु षड्जगाः । दयावती रञ्जनी च रतिका ऋषभे स्थिता । रौद्री क्रोधा च गान्धारे वज्रिका च प्रसारिणी । प्रीतिश्च मार्जनीत्येताः श्रुतयो मध्यमाश्रिताः । क्षितिरक्ता च सन्दीपिन्यालापी चैव पञ्चमे । मदन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः । उग्रा च क्षोभिणीति द्वे निषादे वसतः श्रुती” ।

श्रुतिकट पुंस्त्री० श्रुतिं कर्णं कटति कट—अच् । ३सर्पे तस्य चक्षुःकर्णत्वात् तथात्वम् स्त्रियां ङीष् । २प्रायश्चित्ते ३पापशोधने च पु० मेदि० ।

श्रुतिकटु पु० श्रुतौ श्रवणे कटुः कठोरः । अलङ्कारोक्ते कठोरवर्णविशेषरूपे १काव्यदोषभेदे २कठोरशब्दे च ।

श्रुतिजीविका स्त्री श्रुतिं जीवयति मूलतयानुसरति जीव-ण्वुल् । स्मृतिशास्त्रे शब्दर० ।

श्रुतिधर त्रि० श्रुत्या श्रवणमात्रेण धरति धारयति धृ—अच् । श्रवणमात्रेण धारणायुक्ते ।

श्रुतिमूल न० श्रुतिरेव मूलं धर्मप्रामाण्ये कारणम् । १वेदरूपे धर्मबोधनप्रमाणे हेम० । २स्मृत्यादौ वेदमूलकबोधिते धर्मादौ च हेम० । ३कर्णमूले ।

श्रुतिवर्जित त्रि० श्रुत्या वेदाध्ययनेन कर्णेन्द्रियेण वा वर्जितः १वेदपाठहीने २बधिरे च शब्दा० ।

श्रुतिवेध पु० श्रुतेः कर्णस्य वेधो यत्र । कर्णवेधाख्ये संस्कारभेदे कर्णवेधशब्दे १७१० पृ० दृश्यम् ।

श्रुतिस्फोटा स्त्री श्रुताविव यस्याः स्फोटो यस्याः । कर्णस्फोटालतायां राजनि० ।

श्रुत्यनुप्रास पु० श्रूयते इति श्रुतिः शब्दस्तस्यानुप्रासः । अलङ्कारोक्ते शब्दालङ्कारभेदे अनुप्रासशब्दे १७८पृ० दृश्यम् ।

श्रुत्युक्त त्रि० श्रुतौ वेदे उक्तः विहितः । वेदविहिते धर्मादौ ।

श्रुव इत्यूर्वंते न। १याने अटा०श्रुतिविहितत्वात् तस्य तथात्वम्

श्रु(स्रु)वा स्त्री स्रु(स्रु)च । यज्ञपात्रभेदे राजनि० । कात्या० श्रौ० ।।११२८ अवं दक्षादिनया पुंस्त्वेन बोध्यः “अरत्निमात्रः स्रुवोऽङ्गुष्ठपर्वखातपुष्करः” सू० । “अरत्निः प्रमाणमस्यारत्निमात्रः स्रुवोऽरत्निप्रमाणो भवति अङ्गुष्ठपर्वणो खातमङ्गुष्ठपर्वखातम् अङ्गुष्ठपर्वखातं पुष्करं मुखं यस्यासावङ्गुष्ठपर्वखातपुष्करः पर्वशब्दः सन्धिवाची सन्धिपर्वग्रन्थिः तदुक्तम् “अङ्गुष्ठाङ्गुलिमानं तु यत्र यत्रोपदिश्यते । तत्र तत्र बृहत्पर्वग्रन्थिभिर्मिनुयात् बुधः” । अतोऽङ्गुष्ठस्य बृहत्पर्वग्रन्थिप्रमाणं चतुरस्रं कृत्वा तदेव मण्डलं चतुरस्रं चिकीर्षन् अन्त्युपायेन खातं विधाय तत्प्रमाणं स्रुवस्य पुष्करं नासिकावत् खातं स्यात्” कर्क० । कर्मप्रदीपे कात्या० “खादिरो वाथ पालाशो वितस्तिस्तु स्रुवः स्मृतः । स्रुग्बाहुमात्रा विज्ञेया वृत्तस्तु प्रग्रहस्तयोः । स्रुवाग्रे घ्राणवत् खातं द्व्यङ्गुष्ठपरिमण्डलम्” । [हस्ते राजनि० ।

श्रु(स्रु)वावृक्ष पु० श्रु(स्रु)-वार्थो वृक्षः । (वैंइचि) विकङ्कत-

श्रेढी स्त्री श्रेण्यै राशीकरणाय ढौकते ढौक-ड पृषो० गौरा० ङीष् । भिन्नजातीयद्रव्याणां भिन्नकरणाय लीला० उक्ते गणनाङ्गभेदे ।

श्रेढीव्यवहार पु० श्रेढ्या व्यवहारः । श्रेढीगणनार्थं लीलावत्युक्ते उपायभेदे । [चामरः ।

श्रेणि(णी) स्त्री श्रि-णि वा ङीप् । विच्छेदरहितायां पङ्क्तौ

श्रेयस् न० अतिशयेन प्रशस्यम् इयसुन् श्रादेशः । १धर्मे २मोक्षे अमरः । ३शुभे न० ४अतिप्रशस्ते त्रि० मेदि० स्त्रियां ङीप् । सा च ५हरीतक्यां ६पाठायां ७गजपिप्पल्याम् अमरः ८रास्नायां त्रिका० । ९शुभयुक्ते त्रि० अमरः ।

श्रेष्ठ पु० अतिशयेन प्रशस्यः इष्ठन् श्रादेशः । १कुबेरे २नृपे ३विप्रे शब्दर० ४विष्णौ विष्णुस० ५गोदुग्धे न० त्रिका० ६अत्यन्तशस्ते त्रि० अमरः । ७स्थलपद्मिन्यां स्त्री ८मेदायाञ्च राजनि० ।

श्रेष्ठकाष्ठ पु० श्रेष्ठं काष्ठमस्य । शाकवृक्षे (सेगुन) राजनि० ।

श्रेष्ठाम्ल न० श्रेष्ठमम्लमस्य । वृक्षाम्ले राजनि० ।

श्रेष्ठिन् पु० श्रेष्ठं धनादिकमस्त्यस्य इनि । १शिल्पिवणिजां श्रेष्ठे भरता० “न हि श्रेष्ठिचत्वरे प्रतिवसतीति” मृच्छकटिकटीका । [घटादि० अपयति ।

श्रै स्वेदे भ्वा०प०अक०अनिट् । श्रायति अश्रासीत् । णिच् श्रो

श्रोण संघाते भ्वा० पर० सक० सेट् ऋदित् चङि न ह्रस्वः । श्रोणति अशुश्रोणत् ।

श्रोण पु॰ श्रोण–अच् । १पङ्गौ अमरः । २जाङ्घिके स्त्री ।

श्रोणि(णी) स्त्री श्रोण–इन् वा ङीप् । १कटग्राम् अमरः २पथि शब्दर॰ । [२कटिपार्श्वे ।

श्रोणिफलक न॰ श्रोणिः फलकमिव । १प्रशस्तकटौ हेम॰ ।

श्रोणिसूत्र न॰ श्रोणौ स्थितं सूत्रम् । श्रोणिस्थे खड्गादि बन्धनसूत्रे ।

श्रोतस् न॰ स्रु–असुन् तुट् च । १कर्णे २नदीवेगे अमरः । ३इन्द्रिये हेमच॰ । अत्रार्थे दन्त्यादित्वमित्यन्ये ।

श्रोत्र न॰ श्रूयतेऽनेन श्रु–करणे ष्ट्रन् । १शब्दज्ञानसाधने इन्द्रियभेदे अमरः । २तदाधारे गोलके च कर्णशब्दे १७०६पृ॰ दृश्यम् ।

श्रोत्रिय पु॰ छन्दो वेदमधीते वेत्ति वा छन्दस्+घ श्रोत्रा- देशः । १वेदाध्ययनानुरते अमरः । "एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च । षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्" इत्युक्ते २विप्रभेदे "जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्याभ्यासी भवेद्विप्रः श्रोत्रियस्त्रिभिरुच्यते" मनूक्तलक्षणे ३ब्राह्मणभेदे च ।

श्रौत त्रि॰ श्रुतौ विहितमण् । १वेदविहिते धर्मादौ "श्रौतं कर्म स्वयं कुर्यात्" कात्या॰ स्मृतिः । २गार्हपत्याहवनी- यदक्षिणाग्निषु पु॰ ।

श्रौत न॰ श्रोत्र–स्वार्थे अण् । १कर्णे । श्रोत्रियस्य भावः कर्म वा अण् यलोपः । वैदिकस्य भावे "श्रौत्रार्हन्तीचणै- र्गुणैः" सिद्धान्तकौ॰ ।

श्रौषट् अव्य॰ श्रु–डौषटि । यज्ञादौ हविर्दाने अमरः ।

श्लक सर्पणे भ्वा॰आ॰ सक॰ सेट् इदित् । श्लङ्कते अश्लङ्किष्ट ।

श्लक्ष्ण त्रि॰ श्लिष–क्स्न नि॰ । १अल्पे अमरः २चिक्कणे । संज्ञायां कन् । ३मनोहरे उणा॰ ४पूगे राजनि॰ ।

श्लक्ष्णत्वच् पु॰ श्लक्ष्णा त्वगस्य । अश्मन्तकवृक्षे राजनि॰ ।

श्लग गतौ भ्वा॰ पर॰ सक॰ सेट् इदि॰ । श्लङ्गति अश्लङ्गीत् ।

श्लथ दौर्बल्ये अद॰चु॰उ॰अक॰सेट् । श्लथयति ते अशश्लथत् त

श्लथ पु॰ श्लथ–अच् । १विरलसंयोगे शिथिले जटा॰ २दुर्बले च

श्लाख व्याप्तौ भ्वा॰पर॰ सक॰ सेट् इदित् चाङि न ह्रस्वः । श्लाखति अश्लाखीत् । [न ह्रस्वः । श्लाघते अश्लाघिष्ट ।

श्लाघ आत्मगुणाविष्करणे भ्वा॰ आ॰ अक॰ सेट् ऋदित् चङि

श्लाघा स्त्री श्लाघ–अ । १प्रशंसायां २परिचर्यायाम् ३अभि- लाषे च मेदि॰ । ४निजगुणाविष्करणे ।

श्लाघ्य त्रि॰ श्लाघ–ण्यत् । प्रशस्ये "श्लाघ्यस्त्यागोऽप्यनयो- रिति" देवीमा॰ ।

श्लिकु न॰ श्लिष–कु नेत्त्वम् पृषो॰ । ज्योतिःशास्त्रे उणा॰ ।

श्लिक्यु पु॰ श्लिष–क्यु नेत्त्वम् पृषो॰ । १भृत्ये सि॰कौ॰ २जारे उणादि॰ । [श्लेषीत् ।

श्लिष दाहे भ्वा॰पर॰सक॰सेट् इदित् क्त्वा वेट् । श्लेषति अ॰

श्लिष आलिङ्गने संसर्गे च सक॰ दि॰ अनिट् । श्लिष्यति लृदित् अश्लिषत् । आलिङ्गने तु अश्लिक्षत् ।

श्लिष श्लेषणे चु॰उभ॰सक॰सेट् । श्लेषयति ते अशिश्लेषत् त ।

श्लिष्ट त्रि॰ श्लिष–क्त । १आलिङ्गिते २संसृष्टे ३श्लेषरूपशब्दा- लङ्कारयुक्ते शब्दे च ।

श्लीपद न॰ श्रीयुक्तं वृद्धियुक्तं पदमस्मात् पृषो॰ । (गोद) १रोगभेदे हेम॰ । २तद्रोगयुक्ते त्रि॰ । शिलीपदशब्दे ५१११ पृ॰ दृश्यम् ।

श्लीपदप्रभव पु॰ श्लीपदाय रोगभेदाय प्रभवति प्र+भू–अच् । आम्रवृक्षे शब्दमा॰ । तत्फलसेवने रक्तवृद्ध्याधिक्यात् तद्वृद्धिः ।

श्लीपदापह पु॰ श्लीपदं रोगभेदमपहन्ति अप+हन–ड । पुत्रजीववृक्षे त्रिका॰ । [तद्विपरीतो हि अश्लीलः ।

श्लील त्रि॰ श्रीरस्त्यस्य लच् पृषो॰ रस्य लः । शोभायुक्ते

श्लेष पु॰ श्लिष–घञ् । १संसर्गे अमरः । २दाहे ३आलिङ्गने ४शब्दालङ्कारभेदे च अलङ्कारशब्दे ४०५पृ॰ दृश्यम् ।

श्लेषघ्ना स्त्री श्लेष्माणं हन्ति हन–क टाप् । १मल्लिकायां २केतक्यां च विश्वः । ३ज्योतिष्मत्यां जटा॰ ङीप् । सा च ४मल्लिकायां मेदि॰ ५त्रिकटुनि शब्दच॰ ।

श्लेष्मण पु॰ श्लेष्माऽस्त्यस्य न । कफविशिष्टे अमरः ।

श्लेष्मन् पु॰ श्लिष–मनिन् । कफे अमरः । श्लेष्मस्वरूपादिकं भावप्रकाशाद्युक्तं कफशब्दे १६७६पृ॰ दृश्यम् । तत्प्रकृतिलक्षणम् "गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः । स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः" । तत्कर्माणि यथा "दृढो बन्धः स्थिरत्वञ्च गौरवं वृषता बलम् । क्षमा धृतिरलोभश्च कफकर्माविकारजम्" । श्लेष्म- करद्रव्याणि कफकरशब्दे १६७७पृ॰ दृश्यानि । अन्यानि यथा "भोजनानन्तरं स्नानं जलपानं विना तृषा । तिल- तैलं स्निग्धतैलं स्निग्धमाषकचीद्भवम् । पर्युषितान्नं तक्रञ्च पक्वरम्भाफलं दधि । माषाम्बुशर्करातोयं सु- स्निग्धस्थलसेवनम् । नारिकेलोदकं दधिस्नानं पर्युषितं जलम् । तदस्यापक्वफलं सुपक्वकर्कटीफलम् । स्नात- स्नानञ्च वर्षासु मूलकं सं...गारणम् तथाच ब्रह्मरन्ध्रे च महावीर्यविनाशनम्" । श्लेष्मनाशकद्रव्याणि कफघ्नी- शब्दे १६७७पृ॰ दृश्यानि । अन्यानि च यथा "नक्तिस्वेदं

कटभङ्गं पक्तैवं विशोषकम्। श्लेष्मघ्नं शुष्कनस्यश्च शुष्कपक्वहरीतकी। विड्क्षारकणपथ्या रक्षःशमनपाचनम्। वैश्वानरविडङ्गवारणभाण्डारपाचनकम्। घृतं रोचनाकूलं घृतं शुष्कशर्करम्। मरीचं पिप्पली शुष्कमार्द्रकं जीरकं मधु। द्रव्याण्येतानि गव्यानि। मद्यः श्लेष्महराणि च" सुश्रुते·अष्ट·१६ अ०। [२हस्ते पु० शब्दच०।

श्लेष्मल त्रि० श्लेष्म+अस्त्यर्थे लच्। १कफयुक्ते (बहुवार)

श्लेष्मघ्न पु० श्लेष्माणं हन्ति हन-क। १कट्फलवृक्षे शब्दच० २श्लेष्मनाशके त्रि०। कफघ्नीशब्दे १६७७पृ० दृश्यम्।

श्लेष्मात पु० श्लेष्मणा अतति अत-अच्। श्लेष्मातकवृक्षे शब्दर०

श्लेष्मातक पु० श्लेष्मणा अदेवनजनितकफेन अतति अत-ण्वुल् (बहुवार) बहुवारवृक्षे अमरः "बहुवारस्तु शीतः स्वादुष्णाखो बहुवारकः। शेलुः श्लेष्मातकश्चापि पिच्छिलो भूतवृक्षकः। बहुवारो विषस्फोटव्रणवीसर्पकुष्ठहृत्। मधुरस्तुवरस्तिक्तः केश्यश्च कफपित्तहृत्। फलमामन्तु विष्टम्भि रूक्षं पित्तकफास्रजित्। तत् पक्वं मधुरं स्निग्धं श्लेष्मलं शीतलं गुरु" भावप्र०।

श्लेष्मान्तक पु० श्लेष्मणा स्वसेवनजकफेन अन्तक इव नाशकत्वात् (बहुवार) वृक्षभेदे राजनि०। [श्लोकते अश्लोकिष्ट।

श्लोक सर्दने संघाते च भ्वा०आ०अ०सेट् ऋदित् चङि न ह्रस्वः।

श्लोक पु० श्लोक-अच्। चतुःपदात्मके पद्यविशेषे १पद्यभेदे २यशसि च अमरः "स उत्तमश्लोकगुणानुवादात्" भाग०।।

श्लोण संघाते भ्वा० पर० सक० सेट् ऋदित् चङि न ह्रस्वः। श्लोणति अश्लोणीत्।

श्वःश्रेयस न० श्वः परदिने भाविकाले श्रेयो यस्मात् अच् समा०। १मङ्गले अमरः २शुभे १परमात्मनि च मेदि०। ३कल्याणयुक्ते त्रि०।

श्वक्क गत्यर्थे भ्वा०आ० सक० सेट् इदित्। श्वङ्कते अश्वङ्किष्ट।

श्वच गतौ भ्वा०आ०सक० सेट्। श्वचते अश्वचिष्ट इदिदप्ययम्

श्वठ गतौ संस्कारे च चु०उभ०सक० सेट्। श्वठयति-ते अशिश्वठत् त। इदिदप्ययम् श्वण्ठयति। [ठत् त।

श्वठ दुर्वचने चद० चु० उभ०सक०सेट्। श्वठयति ते अशश्व-

श्वदंष्ट्रक पु० शुनो दंष्ट्रेव कण्टकोऽस्य कप्। गोक्षुरे क्षुपे राजनि०। [अमरः।

श्वदंष्ट्रा स्त्री शुनो दंष्ट्रेव कण्टकावत्त्वात्। गोक्षुरे क्षुपे

श्वधूर्त्त पुंस्त्री निपुणो शुनामपि धूर्त्तः। शृगाले शब्दच० स्त्रियां ङीष्। [२मी।

श्वन् पु० श्वि-कनिन् नि०। कुक्कुरे तस्मात्रिस्त्रियां ङीप्

श्वनिश न० स्त्री शुनां कुक्कुराणां निशा वा ह्रस्वः। कुक्कुरवादृवरात्रौ।

श्वपच पुंस्त्री० श्वानं पचति भोजनाय पच-अच्। श्वपाके जातिभेदे। स च अन्त्यावसायिभेदः "चण्डालो श्वपचः क्षत्ता सूतो वैदेहकस्तथा। मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः। अन्त्यावसायिनामन्नमश्नीयाद्यस्तु कामतः। स तु चान्द्रायणं कुर्यात् तप्तकृच्छ्रमथापि वा" प्रा०त० अङ्गिराः।

श्वपाक पु० श्वानं पचति कर्त्तरि संज्ञायां घञ्। जातिभेदे "क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्यते" मनुः। तद्धर्मश्च चण्डालशब्दे २८४९ पृ० उक्तो दृश्यः।

श्वफल पु० शुनः प्रियं फलमस्य। वीजपूरवृक्षे रत्नमा०।

श्वफल्क पु०। वृष्णिवंश्ये अक्रूरपितरि क्षत्रियभेदे विष्णुपु०

श्वभीरु पु० श्वभ्यो भीरुः। शृगाले शब्दमा०।

श्वभ्र गतौ छिद्रकरणे सक० दौःस्थ्ये अक०चु०उभ० सेट्। श्वभ्रयति ते अशश्वभ्रत् त।

श्वभ्र न० श्वभ्र-अच्। छिद्रे अमरः।

श्वयथु पु० श्वि-वृद्धौ अथुच्। शोथे अमरः।

श्वयीची स्त्री श्वि-ईचि ङीप्। पीडायाम् सि०कौ०।

श्वल वेगे भ्वा०पर०अक०सेट्। श्वलति अश्वालीत्।

श्वल्क भाषणे चु०उ०स०सेट्। श्वल्कयति ते अशश्वल्कत् त।

श्वल्ल वेगे भ्वा०पर० अक० सेट्। श्वल्लति अश्वल्लीत्।

श्ववृत्ति स्त्री शुन इव पराधीना वृत्तिः। दास्ये "सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्" मनुः। "दीनदृष्टिवन्दर्शनस्वामिवर्णननीचक्रियादिधर्मयोगात् श्ववृत्त्याकृति" कुल्लू० "न श्ववृत्त्या कदाचन" मनुः। [जटा०।

श्वव्याघ्र पु० शुनो व्याघ्रः। कुक्कुराकृतौ व्याघ्रभेदे (चिते)

श्वशुर पु० शु आशु अश्नुते आशु+अश-उरच् पृषो०। १पत्युः पितरि २भार्य्यायाः पितरि च अमरः।

श्वशुर्य्य पु० श्वशुरस्यापत्यम् यत्। १देवरे २श्याले च अमरः।

श्वश्रू स्त्री श्वशुरस्य पत्नी ऊङ् उकाराकारलोपश्च। श्वशुरभार्य्यायाम् अमरः। श्वश्रूश्वशुरयोरविश्वासकारणं पराशरपु० उक्तं यथा "एवमुक्ता त्वं चोल्लाय यथा नारी सदा भवेत्। या श्वश्रूभिः समं यथा विश्वासं सत्रजा कांचन। सा च श्वश्रूः कदाचित् स्यात् या श्वश्रूं जीवतीमिच्छेत्"। [अमरः।

श्वस् अव्य० आगामि अहः पृषो० नि०। आगामिनि दिवसे

श्वस जीवने अदा० भ्वा०पर० सक० सेट्। श्वसिति अश-

हीव । "न विश्वसेदविश्वस्ते इत्यादौ" तु नञ्समासात् आदित्वम् निषिद्धा नेट् । श्वसितः श्वस्तः ।

श्वस चर्वे चटा० प० सक० वेदिकोऽयम् । श्वसिति अश्वसीत् ।

श्वसन पु० श्वसित्यनेन श्वस-ल्युट् । १वायौ २मदनवृक्षे च अमरः । भावे ल्युट् । ३निश्वासे न० मेदि० [स्त्रियां ङीप्

श्वसनाशन पुंस्त्री० श्वसनो वायुरशनमस्य । सर्पे हारा० ।

श्वसनेश्वर पु० श्वसनो वायुरीश्वरोऽस्य । अर्जुनवृक्षे शब्दच० ।

श्वसनोत्सुक पुंस्त्री० ७त० । सर्पे शब्दर० स्त्रियां ङीष् ।

श्वसित न० श्वस-क्त । निश्वासे मुखनासिकाभ्यां बहिर्गमनरूपे हृदयस्थप्राणवायुव्यापारे ।

श्वसुन पु० श्वस-उनन् । (कुकरशोङ्का) इति वृक्षे शब्दमा० ।

श्वस्तन त्रि० श्वोभवः श्वस्-ट्युल् तुट् च । भाविदिनस्थायि वस्तुनि स्त्रियां ङीप् ।

श्वस्त्य त्रि० श्वोभवः श्वस्+त्यप् । भाविदिनस्थायिवस्तुनि ।

श्वागणिक पु० श्वगणेन चरति ठञ् । कुक्कुरादिना मृगयाकर्त्तरि व्याधे त्रिका० । [युते ।

श्वादन्त त्रि० श्वन इव दन्तोऽस्य नि० दीर्घः । कुक्कुरतुल्यदन्त-

श्वान पुंस्त्री० श्वैव स्वार्थे अण् न टिलोपः । कुक्कुरे शब्दमा० । तज्जातिस्त्रियां ङीष् । [राजनि० ।

श्वानचिल्लिका स्त्री० श्वान इव चिल्लिका । शुनकचिल्ल्याम्

श्वापद पु० शुन इवापदमस्य अच्समा० । १हिंस्रपशौ हेमच० २व्याघ्रे च शब्दर० ।

श्वाविध् पु० शुना आविध्यते आ-व्यध् क्विप् ६तत० शल्यके (सजारु) अमरः । वा । श्वाविधोऽप्यत्र पु० ।

श्वास पु० श्वस-घञ् । १वायुव्यापारे २रोगभेदे ३हिक्कारोगे वर्णोच्चारणार्थे वाह्यप्रयत्नभेदे च ।

श्वासरोगस्य निदानादि भावप्र० उक्तं यथा "श्वासनिदानमाह यैरेव कारणैर्हिक्का देहिनां सम्प्रवर्त्तते । तैरेव कारणैः श्वासो व्याधिर्घोरः प्रजायते" । श्वासस्य भेदानाह "महोर्द्ध्वच्छिन्नतमकक्षुद्रभेदैस्तु पञ्चधा । भिद्यते स महाव्याधिः श्वास एको विशेषतः" । तस्य पूर्वरूपमाह "प्राग्रूपं तस्य हृत्पीडा शूलमाध्मानमेव च । आनाहो वक्त्रवैरस्यं शङ्खनिस्तोद एव च" । सम्प्राप्तिमाह "यदा स्रोतांसि संरुध्य मारुतः कफपूर्वकः । विष्वग्व्रजति संरुद्धस्तदा श्वासं करोति सः" । विष्वक् व्रजति सर्वतो विमार्गेषु याति संरुद्धः कफानादिना रुद्धमार्गः । महाश्वासस्य लक्षणमाह "उद्धूयमानवातो यः शब्दवत् दुःखितो नरः । उच्चैः श्वसिति संरुद्धो मत्तर्षभ इवानिशम् । प्रनष्टज्ञानविज्ञानस्तथा विभ्रान्तलोचनः । विकृताक्ष्याननो बद्धमूत्रवर्च्चा विशीर्णवाक् । दीनश्च श्वासतस्याश्च दूराद्विज्ञायते भृशम् । महाश्वासोपसृष्टस्तु क्षिप्रमेव विपद्यते" १। उद्धूयमानवातः ऊर्द्ध्वं नीयमानो वातो यस्य सः शब्दवत् सशब्दं यथा स्यात् । मत्तर्षभ इव मत्तवृषभ इव । उच्चैः श्वासतोऽन्वयः । संरुद्धः श्वानतः व्यानाद्युक्त इति वाग्भट । ज्ञानं तत्तदर्थविनिश्चयः । विशीर्णवाक् स्खलितवचनः । दीनः म्लानः । भारतवार्त्तं महाश्वासः । ऊर्द्ध्वश्वासमाह "ऊर्द्ध्वं श्वसिति योऽत्यर्थं न च प्रत्याहरत्यधः । श्लेष्मावृतमुखस्रोताः क्रुद्धगन्धवहार्दितः । ऊर्द्ध्वदृष्टिर्विपश्यंस्तु विभ्रान्ताक्ष इतस्ततः । प्रमुह्यन् वेदनार्त्तश्च शुष्कास्यो रतिपीडितः । ऊर्द्ध्वश्वासे प्रकुपिते ह्यधःश्वासो निरुध्यते । मुह्यतस्ताम्यतश्चोर्द्ध्वश्वासस्तस्य निहन्त्यसून्" २। सर्वेषु श्वासेषु ऊर्द्ध्वश्वासोऽयम् अत्यर्थमिति विशेषः । न च प्रत्याहरत्यधः न श्वासमधः करोति श्लेष्मावृतेत्यादि श्लेष्मावृतं यन्मुखं स्रोतांसि च तैः क्रुद्धो यो गन्धवहस्तेनार्दितः । विपश्यन् इतस्ततो विकृतं यथा स्यादेवं पश्यन् अधःश्वासो निरुध्यते श्वासो नाधः प्रवर्त्तत" इत्यर्थः । मुह्यतो मोहं प्राप्नुवतस्ताम्यतो ग्लानिं प्राप्नुवतश्च ऊर्द्ध्वश्वासः असून् प्राणान् हन्ति । छिन्नश्वासस्यारूप लक्षणमाह "यस्तु श्वसिति विच्छिन्नं सर्वप्राणेन पीडितः । न वा श्वसिति दुःखार्त्तो मर्मच्छेदरुजार्दितः । आनाहस्वेदमूर्च्छार्त्तो दह्यमानेन वस्तिना । विप्लुताक्षः परिक्षीणः श्वसन् रक्तैकलोचनः । विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः । छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून्" ३ । विच्छिन्नं सविच्छेदं सर्वप्राणेन सर्वबलेन मर्मच्छेदरुजार्दितः हृदयशिरश्छेदवेदनयेव पीडितः । दह्यमानेन वस्तिना उपलक्षितः । विप्लुताक्षः अश्रुपूर्णनेत्रः । विचेताः उद्भ्रान्तचित्तः छिन्नश्वासेन विच्छिन्नः यस्तु श्वसिति विच्छिन्नमित्यादिलक्षणयुक्तो यः स नरः छिन्नश्वासेन विच्छिन्नः पीडितो बोद्धव्यः । भारतवार्त्तं छिन्नश्वासः । तमकश्वासमाह "प्रतिलोमं यदा वायुः स्रोतांसि प्रतिपद्यते । ग्रीवां शिरश्च संगृह्य श्लेष्माणं समुदीर्य च । करोति पीनसं तेन कण्ठे घुर्घुरकं तथा । अतीव तीव्रवेगञ्च श्वासं प्राणप्रपीडकम् । प्रताम्यति स वेगेन तृष्यते सन्निरुध्यते । प्रमोहं कासमानश्च स गच्छति मुहुर्मुहुः । श्लेष्मणा मुच्यमानेन

भृशं भवति दुःखितः। तस्यैव च विमोक्षान्ते मुहूर्त्तं लभते सुखम्। तथास्योद्ध्वंसते कण्ठः कृच्छ्राच्छक्नोति भाषितुम्। न चापि निद्रां लभते शयानः श्वासपीड़ितः। पार्श्वे तस्यावगृह्णाति शयानस्य समीरणः। आसीनो लभते सौख्यमुष्णञ्चैवाभिनन्दति। उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमार्त्तिमान्। विशुष्कास्यो मुहुः श्वासो मुहुश्चैवावधम्यते। मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते। स याप्यस्तमकः श्वासः साध्यो वा स्यान्नवोत्थितः"४। संरुह्य अथवा समुदीर्य्य वर्द्धयित्वा। पीनसं नासास्रावं तेन श्लेष्मणा घुर्घुरं घुर्घुरशब्दं प्राणप्रपीड़कम्। प्रताम्यति तमसि प्रविशतीव वेगेन श्वासवेगेन संनिरुध्यते निश्चेष्टो भवतीति चक्रः। संनिरुध्यते श्वास इति जैय्यटः।। श्लेष्मणा मुच्यमानेन सुखं सुखमिव उद्ध्वंसते शोषितो भवति। शयानः शयनमिच्छतास्योऽवगृह्णाति पीडयति उष्णञ्चैवाभिनन्दति इत्यनेन तमको वातकफारब्ध इति बोद्धव्यः। उच्छ्रिताक्षः स्फुनाक्षः। ललाटेन स्विद्यता उपलक्षितः अवधम्यते गलाद्धृदयेव सवगात्रस्वाल्पते। तमकस्यैव पित्तानुबन्धजनितज्वरादियोगेन प्रतमकसंज्ञामाह "ज्वरमूर्च्छापरीतस्य विद्यात् प्रतमकं भिषक्"। तस्यैवापरसंज्ञमाह "उदावर्त्तरजोऽजीर्णक्लिन्नकायनिरोधजः। तमसा वर्द्धतेऽत्यर्थं शीतैश्चाशु प्रशाम्यति। मज्जतस्तमसीवास्य विद्यात् प्रतमकन्तु तम्"। उदावर्त्तो रोगविशेषः रजो धूलिः, अजीर्णमामादिक्लिन्नं विदग्धं कायनिरोधः मलवेगानां निरोधः तस्मादुत्पन्नः। क्षुद्रश्वासमाह "रूक्षायासोद्भवः कोष्ठे क्षुद्रो वात उदीरयन्। क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः। हिनस्ति न च गात्राणि न च दुःखं यथेतरे। न च भोजनपानानां निरुणद्ध्युचितां गतिम्। नेन्द्रियाणां व्यथाञ्चापि काञ्चिदापादयेद्रुजम्। स साध्य उक्तो बलिनः सर्वे चाव्यक्तलक्षणाः"५। क्षुद्रः अल्पनिदानलिङ्गः उदीरयन् ऊर्द्ध्वं गमयन् दुःखः दुःखप्रदः। एवं महाश्वासादयोऽपि। व्यक्तलक्षणाः बलिनः साध्याः। श्वासानां साध्यत्वादि माह "क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते। त्रय श्वासा न सिध्यन्ति तमको दुर्बलस्य च। कामं प्राणहरा रोगा बहवो न तु ते तथा। यथा श्वासश्च हिक्का च हरतः प्राणमाशु वै"। बहवो ज्वरादयः "तथाप्युभा श्वासहिक्के हरतो जीवमाशु ते"।

तेषां निदानकर्मविपाकास्तु शातातप० उक्ता यथा "श्वासरोगो महापापो देहदेहाभिघातकः। कर्मणा येन भवति तन्मे निगदतः शृणु। महोर्द्ध्वच्छिन्नतमकक्षुद्राभेदोऽस्य पञ्चधा। श्वासः संजायते नृणां पृथक् कर्मानुसारतः। यस्तु यज्ञं समारभ्य पशुमांसं निरुध्य च। हन्ति खादन्ति वातश्च महाश्वासेन पच्यते१। पौराणिककथा मध्ये यस्तु वाचान्यथा वदेत्। स ऊर्द्ध्वश्वासमासाद्य दुर्गन्धकरहर्निशम्२। निषिद्धदानग्रहणाच्छिन्नश्वासेन पच्यते३। मर्त्यः शास्त्रार्थनिर्णीतवाक्यं यो दूषयत्यपि। पीड्यते तमकश्वासैः४ क्षुद्रैः पातकस्य विस्तृतः५। एतत्कर्मतो देही नरकेषु विपच्यते। नरकान्ते पुनर्व्याघ्रयोनिं शूकरवायसीम्। पृथक् कर्मवशाद्योनौ गत्वा संप्राप्य तप्यते। मानुषत्वमनुप्राप्य पूर्वोक्तेनोपलक्ष्यते"।

श्वासकास पु० श्वासयुक्तः कासः। श्वासयुक्ते कासरोगे "पिशुनो नरकस्यान्ते जायते श्वासकासवान्। घृतं तेन प्रदातव्यं सहस्रपलसम्मितम्" शाता० कर्म०।

श्वासकुठार पु० श्वासे कुठार इव। श्वासरोगौषधभेदे "रसो गन्धो विषञ्चापि टङ्कणञ्च मनःशिला। एतानि कर्षमात्राणि मरिचञ्चाष्टकर्षकम्। कटुत्रयं कर्षयुक्तं पृथगत्र विनिःक्षिपेत्। एषः श्वासकुठारोऽयं सर्वश्वासनिवारकः" भावप्र०। [धारणव्यापारे प्राणायामे

श्वासधारण न० श्वासः प्राणवायुः ध्रियतेऽनेन। प्राण-

श्वासहेति स्त्री श्वासस्य हेतिरिव। निद्रायां हेमच०।

श्वासारि पु० श्वासस्य रोगभेदस्यारिः नाशकत्वात्। पुष्करमूले राजनि०।

श्वासिन् पु० श्वसिति श्वस—णिच णिनि। वायौ शब्दच०।

श्वि गतौ सक० वृद्धौ अक० भ्वा० पर० यजा० सेट्। श्वयति अशिश्वत्-अश्वत् अश्वयीत्। ह्वित् श्वयथुः शोथिः निष्ठा तस्य नः शूनः। [श्वेतते अश्वितत् अश्वेतिष्ट।

श्वित शुक्लतापादने भ्वा० आ० वृदित् लुङि उभ० अक० सेट्।

श्वित्र न० श्वित—रक्। श्वेतकुष्ठभेदे (धवल) श्वेतरः। तन्निदानादि भावप्र० उक्तं यथा "कुष्ठैकसम्भवं श्वित्रं किलासं चारुणं भवेत्। निर्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम्"। कुष्ठैकसम्भवं कुष्ठेन सह समानो निदानं यस्य तत्। अथ श्वित्रस्य भेदमाह किलासञ्चारुणं भवेत् श्वित्रमेव रक्तमांसाश्रयात्किलासमरुणञ्च भवेदित्यर्थः। ननु कुष्ठात् श्वित्रस्य को भेद

इत्यत आह निर्दिष्टमपरिस्रावीति श्वित्रमपरिस्रावि भवति कुष्ठन्तु स्रावि अथ च त्रिधातूद्भवत्वमप्यस्ति श्वित्रस्य तयोर्वातत्रो रक्तमांसमेदांसि तस्थयोऽधिष्ठानं यस्य तत्। कुष्ठन्तु सान्निपातिकं सर्वधातुगतं भवतीति भेदः। दोषभेदेन वर्णभेदानाह "वातादरुणं पित्तात् ताम्रं कमलपत्रवत्। सदाहं रोमविध्वंसि कफात् श्वेतं घनं गुरु सकण्डूकं क्रमाद्रक्तमांसमेदःसु चादिशेत्। वर्णेनैवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरम्"। अरुणमीषल्लोहितम्। कमलपत्रवदित्यनेन मध्ये श्वेतमन्ते लोहितं बोधयति। घनं पुष्टम्। क्रमाद्रक्तमांसमेदःसु चादिशेत्। तथा च चरकः "अरुणं रक्तगे वाते ताम्रं पित्ते पलाश्रिते। श्वेतं श्लेष्मणि मेदःस्थे श्वित्रं कृच्छ्रं परं परम्" इति। उभयं द्विविधमपि श्वित्रं वर्णेन ईदृगेव। अरुणं ताम्रं श्वेतञ्च दोषभेदात्। द्विविधं दोषजं व्रणजं च। तथा च भोजः "श्वित्रं तु द्विविधं विद्याद्दोषजं व्रणजं तथा" इति। श्वित्रं साध्यमसाध्यञ्चाह "अशुक्लरोमाबहलमसंसृष्टमथो नवम्। अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा"। अबहलं तनु। अन्यच्च "गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम्। वर्जनीयं विशेषेण श्वित्रं सिद्धिमिच्छता"। गुह्यं मेहनम् भगश्च तत्समस्तं पदतलं सुश्रुतेनान्ते जातमिति सामान्यतो निर्दिष्टत्वात्। अप्यचिरन्तनम् नवमपि"।

श्वित्रघ्नी स्त्री श्वित्रं हन्ति हन—टक् ङीप्। पीतपुष्पायाम् (बकुची) शब्दच०।

श्वित्रिन् त्रि० श्वित्रमस्त्यस्य इनि। श्वेतकुष्ठयुक्ते "श्वित्री वस्त्रं श्वा रथं च धौरी कुनखकारकः" याज्ञ०।

श्विद् शुक्लतापादने भ्वा० आत्म० अक० सेट् इदित्। श्विन्दति अश्विन्दीत्।

श्वेत पु० श्वित—अच् घञ् वा। १द्वीपभेदे २पर्वतभेदे ३कपर्दके हेमच०। ४शुक्रग्रहे ५शुभ्राभ्रे शब्दच०। ६शङ्खे राजनि०। ७जीरके जटा०। ८शुक्लवर्णे ९तद्वति त्रि० अमरः स्त्रियां ङीप् तस्य नश्च श्वेनी। १०कलियुगीयशिवावतारविशेषे यथा "वेदव्यासावताराणि द्वापरे कथितानि तु। महादेवावताराणि कलौ शृणुत सुव्रताः॥ आद्ये कलियुगे श्वेतो देवदेवो महाद्युतिः। नाम्ना हिताय विप्राणामभूद्वैवस्वतेऽन्तरे। हिमवच्छिखरे रम्ये छागले पर्वतोत्तमे। तस्य शिष्याः शिखायुक्ता बभूवुरमितप्रभाः। श्वेतः श्वेतशिखश्चैव श्वेतास्यः श्वेतलोहितः। चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः। सुभावो दमनश्चाथ सुहोत्रः कङ्कणस्तथा। लोकाक्षिरथ योगीन्द्रो जैगीषव्यस्तु सप्तमे। अष्टमे दधिवाहः स्यान्नवमे ऋषभः प्रभुः। भृगुस्तु दशमे प्रोक्तस्तस्मादुग्रः परः स्मृतः। द्वादशेऽत्रिः समाख्यातो वाली चाथ त्रयोदशे। चतुर्दशे गौतमस्तु वेदशीर्षा ततः परम्। गोकर्णश्चाभवत्तस्मात् गुहावासः शिखण्ड्यथ। जटामाल्यट्टहासश्च दारुको लाङ्गली क्रमात्। श्वेतस्तथा परः शूली डिण्डी मुण्डी च वै क्रमात्। सहिष्णुः सोमशर्मा च नकुलीशोऽन्तिमे प्रभुः। वैवस्वतेऽन्तरे शम्भोरवतारास्त्रिशूलिनः। अष्टाविंशतिराख्याता ह्यन्ते कलियुगे प्रभोः" कौर्म ५० अ०। श्वेतपर्वतस्य परिमाणादि यथा "उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां मर्यादागिरयः प्रागायताः उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति" भाग० ५।१६। ११राजभेदे वह्निपु०। संज्ञायां कन्। रूप्ये न० राजनि०। कपर्दके पु०। [राजनि०।

श्वेतकण्टकारी स्त्री कर्म०। शुभ्रवर्णकण्टकारिकायाम्

श्वेतकन्दा स्त्री श्वेतः कन्दोऽस्याः। अतिविषायां राजनि०।

श्वेतकिणिही स्त्री कर्म०। गिरिकर्णिकायां क्षुपभेदे राजनि०

श्वेतकुञ्जर पु० कर्म०। १ऐरावतगजे शब्दर०। २श्वेतगजमात्रे च श्वेतगजादयोऽप्यत्र।

श्वेतकुष्ठ पु० कर्म०। शुक्लवर्णे कुष्ठभेदे राजनि०।

श्वेतकेतु पु० कर्म० १वारुणे केतुग्रहभेदे २छान्दोग्यप्रसिद्धे आरुणौ ऋषिभेदे ३बुद्धे त्रिका०।

"श्वेतको नाम दृश्यन्ते वारुणाश्च यत्र ते। कार्त्तिकेतः श्वेतकेतुप्रमाणस्तोयदः। श्वेतकेतुर्यदा दृश्यः श्वेताग्निं वहन् महीम्। तदा मानुषमांसानि भक्षयन्तीह मानुषाः कुर्युश्च जगत् हाहा चक्रं भ्रमते तदा"। अपि च "श्वेतः समस्तं कुर्यात् लोहितस्त्वग्निजं भयम्। धूम्रश्च पीतकः कुर्यात् कृष्णो रोगभयोल्वणम्"। अन्यच्च "वसन्ती पुष्करारण्यं यावद्धन्यात्तथापरान्। देशान् क्वचित् कांश्चिद्रोगदुर्भिक्षैः परिपीडितान्। श्वेताख्यस्तु जटाकारी शङ्खाभो व्योम त्रिभागगः। निवर्त्ततेऽपसव्येन त्रिभागो कुरुते प्रजाः" इति समयामृतधृतवाक्यम्।

श्वेतकेश पु० श्वेतः केश इव यस्य। १रक्तशिग्रौ जटाध०।

२शुक्लवर्णकेशयुते वृद्धे त्रि०। कर्म०। ३शुक्ले केशे पु०।

श्वेतकोल पुंस्त्री०६ब०। शफरमत्स्ये त्रिका०। स्त्रियां ङीष्।

श्वेतखदिर पु० कर्म०। शुक्ले खदिरभेदे।

श्वेतगज पु० कर्म०। १ऐरावते गजे हेमच० २शुभ्रगजे च।

श्वेतगरुत् पु० श्वेतो गरुदस्य। १हंसे अमरः २शुभ्रपक्षयुक्ते त्रि० पृषो० अदन्तोऽप्यत्र। [२५८पृ० दृश्यम्।

श्वेतगुञ्जा स्त्री कर्म०। शुभ्रगुञ्जायां राजनि०। गुञ्जाशब्दे

श्वेतचिल्ली स्त्री कर्म०। शाकभेदे (शादाचिवड़) राजनि०।

श्वेतच्छद पुंस्त्री० श्वेतः छदः पक्षोऽस्य। १हंसे हेमच०। स्त्रियां ङीष्। २शुभ्रपक्षयुक्ते त्रि०।

श्वेतजीरक पु० कर्म०। शुक्लजीरके राजनि०।

श्वेतटङ्कण न० कर्म०। १शुभ्रटङ्कणे २पाकृतीनदीतीरसम्भवे क्षारभेदे राजनि०।

श्वेतदूर्वा स्त्री कर्म०। शुभ्रदूर्वायां राजनि०।

श्वेतद्वीप पु० कर्म०। वैकुण्ठाख्यविष्णुधाम्नि क्षीरोदवेलान्तरस्थे द्वीपभेदे च "क्षीरोदधेरुत्तरतः श्वेतोद्वीपो महाप्रभः। एकान्तिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः" भा० शा० ३३८ अ०।

श्वेतधातु पु० कर्म०। १खटिकायां २शुभ्रवर्णधातुद्रव्ये च।

श्वेतधामन् पु० श्वेतं धाम यस्य। १चन्द्रे २कर्पूरे ३समुद्रफेने च मेदि०। श्वेतधरादयोऽपि। ४कर्पूरे च।

श्वेतनील पु० "वर्णोवर्णेन" पा०स०। १श्वेतकृष्णवर्णे २तद्वति त्रि०। ३मेघे शब्दर०। [२शुभ्रपक्षदन्ताभ्यां युक्ते त्रि०।

श्वेतपत्र पुंस्त्री० श्वेतं पत्रं पक्षोऽस्य। १हंसे स्त्रियां ङीष्

श्वेतपत्ररथ पु० श्वेतपत्रो हंसो रथ इव वाहनं यस्य। चतुर्मुखे ब्रह्मणि शब्दच०।

श्वेतपद्म न० कर्म०। सितकमले राजनि०। [जनि०।

श्वेतपर्णा स्त्री श्वेतं पर्णं यस्याः। वारिपर्ण्यां (पाना) रा-

श्वेतपर्णास पु० कर्म०। शुभ्रतुलस्यां रत्नमाला।

श्वेतपाटला स्त्री कर्म०, शुभ्रपाटलावृक्षे (घादापारुल)जटा०

श्वेतपिङ्गल पुंस्त्री० रङ्गेन श्वेतः जटया पिङ्गलः "वर्णोवर्णेन" पा०स०। १सिंहे त्रिका० स्त्रियां ङीष्। २श्वेतपिङ्गलवर्णे पु० ३तद्युते त्रि०।

श्वेतपिण्डीतक पु० कर्म०। महापिण्डीतकवृक्षे राजनि०।

श्वेतपुष्प पु० श्वेतं पुष्पमस्य। १सिन्दुवारवृक्षे जटा० २शुभ्रवर्णपुष्पयुक्ते त्रि० कर्म०। ३शुभ्रे पुष्पे न०। ४नागदन्त्यां ५कृष्णजीरे स्त्री राजनि०। ६घोषातक्यां स्त्री रत्नमा०। वखाया कप्। ७शुभ्रकरवीरे पु० राजनि०।

श्वेतपुष्पिका स्त्री श्वेतं पुष्पमस्याः कप् अत इत्वम्। १महाशणवृक्षे २पुत्रदात्र्यां च राजनि०।

श्वेतप्रसूनक पु० श्वेतं प्रसूनं यस्य कप्। शाकतरौ राजनि०

श्वेतभण्डा स्त्री कर्म०। श्वेतापराजितायां रत्नमा०।

श्वेतमन्दार पु० कर्म०। शुभ्रमन्दारे राजनि०।

श्वेतमरिच न० कर्म०। १शोभाञ्जनबीजे अमरः २शुभ्रमरिचे च

श्वेतरक्त पु० श्वेतो रक्तः "वर्णो वर्णेनेति" पा०स०। १पाटलवर्णे २तद्वति त्रि० अमरः।

श्वेतरञ्जन न० श्वेतं सिताभं रज्यतेऽनेन रन्ज-ल्युट्। सीसके

श्वेतरथ पु० श्वेतो रथो यस्य। १शुक्रग्रहे शब्दच० कर्म०। २शुभ्रे रथे। [ङीप्। चक्षुष्यायां राजनि०।

श्वेतराजी स्त्री श्वेतेन वर्णेन राजते राज-अच् गौरा०

श्वेतरोचिस् पु० श्वेतं रोचिरस्य। १चन्द्रे २कर्पूरे च हेमच०

श्वेतरोहित पु० "वर्णोवर्णेन" पा०स०। १पाटलवर्णे २तद्वति त्रि० पुंस्येव श्वेतःफलेन रोहितः। ३शुक्लरोहितवृक्षभेदे राजनि०।

श्वेतलोध्र पु० कर्म०। पट्टिकालोध्रे राजनि०।

श्वेतवचा स्त्री श्वेता वचेव। अतिविषायां (आतइच) राजनि० "पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा। हैमवत्युदिता तद्वच्छूलं हन्ति विशेषतः" भावप्र०।

श्वेतवल्कल पु० श्वेतं वल्कलमस्य। १उदुम्बरवृक्षे जटा० २शुभ्रत्वग्युते त्रि०।

श्वेतवाजिन् पु० श्वेतो वाजी यस्य। १चन्द्रे हेमच० २अर्जुने जटा०। श्वेताश्वादयोऽप्यत्र। ३कर्पूरे च।

श्वेतवासस् पु० श्वेतं वासोऽस्य। १सन्न्यासिभेदे २शुक्लवस्त्रयुक्ते त्रि०।

श्वेतवाह् पु० श्वेतेन श्वेताश्वेन उह्यते वह-ण्वि। १इन्द्रे २अर्जुने ३चन्द्रे च। ४कर्पूरे। अत्र अठ श्वेतौहः। हलि तु श्वेतवाः श्वेतोभिरित्यादि।

श्वेतवाहन पु० श्वेतं वाहनं यस्य। १चन्द्रे २इन्द्रे ३अर्जुने च मेदि०। ४कर्पूरे च।

श्वेतवृक्षा स्त्री कर्म०। वनतिक्तायां रत्नमाला।

श्वेतवृक्ष पु० कर्म०। १वरुणवृक्षे राजनि० २शुभ्रवृक्षे च।

श्वेतवृहती स्त्री कर्म०। शुभ्रवर्णक्षुद्रवृहत्यां राजनि०।

श्वेतशिंशपा स्त्री कर्म०। शुभ्रशिंशपायां राजनि०।

श्वेतशिग्रु पु० कर्म०। सितशोभाञ्जने राजनि०।

श्वेतशूक पु० श्वेतः शूकोऽस्य। १यवे राजनि०। २शुभ्रवर्णशूकयुक्ते त्रि०।

श्वेतसुरसा पु० कर्म० । वनशूरणे राजनि० ।

श्वेतसर्प पु० श्वेतः सन् सर्पति सृप–अच् । १वरुणवृक्षे जटा० कर्म० । २शुभ्रभुजगे पुंस्त्री० । स्त्रियां ङीष् ।

श्वेतसर्षप पु० कर्म० । गौरसर्षपे ।

श्वेतसार पु० श्वेतः सारोऽस्य । शुभ्रखदिरे जटा० ।

श्वेतसुरसा स्त्री कर्म० । शुभ्रशेफालिकायाम् अमरः ।

श्वेतस्यन्दा स्त्री श्वेता सती स्यन्दते स्यन्द–अच् । सितापराजितायां राजनि० ।

श्वेतहय पु० श्वेतो हयः । १उच्चैःश्रवसि हये त्रिका० २सितवर्णयुक्ते हये च । ३च०। ४अर्जुने हेमच०। ५इन्द्रे च

श्वेता स्त्री श्वित–अच् । १वराटिकायां २काष्ठपाटलायां ३शङ्खिन्यां मेदि०। ४अतिविषायां रत्नमा०। ५सितापराजितायां ६शुभ्रकण्टकार्य्यां ७पाषाणभेद्यां ८शुभ्रदूर्वायां ९वंशरोचनायां १०शर्करायां ११शिलावल्कल्यां १२श्वेतवृहत्यां च राजनि० ।

श्वेतार्क पु० कर्म० । शुभ्रवर्णपुष्पके अर्कवृक्षे राजनि०।

श्वेतावर पु० श्वेतं वर्णमावृणोति आ+वृ–अच् । सितावरशाके राजनि० ।

श्वेताश्वतर ! वेदशाखाभेदे ।

श्वेतेक्षु पु० कर्म० । शुक्ले इक्षौ राजनि० ।

श्वेतोदर पु० श्वेतमुदरं यस्य । कुबेरे त्रिका० ।

श्वेतौही स्त्री श्वेतोहः पत्नी ङीष् । इन्द्राण्यां शब्दार्थ ।

श्वैत्य न० श्वेतस्य भावः ष्यञ् । शुभ्रवर्णे ।

श्वोवसीयस न०अतिशयेन वसुः प्रशस्तः श्वो वसीयः नि० अच् समा०। १परदिने भाविकार्ये प्रशस्ते मङ्गले २तद्वति त्रि०

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य-सङ्कलिते वाचस्पत्याभिधाने शकारादि शब्दार्थसङ्कलनम् ।

अशुद्धशोधनम् ।

६००० पृष्ठावधि ६०२४ पृष्ठपर्य्यन्तपत्राङ्के ८०० नवशताङ्काधिकतयाः प्रमादात् मुद्रिताः तत्र तत्र पृष्ठेषु नवभिः शतैरूनिता अङ्कसंख्या बोध्याः ।

ष

षकारः मूर्द्धन्यः ऊष्मवर्णभेदः । अस्योच्चारणस्थानं मूर्द्धा अस्योच्चारणे आभ्यन्तरप्रयत्नः विवृतत्वं च यथा "ऊष्माणः शषसहाः" इत्युक्तेः । बाह्यप्रयत्नाश्च विवारश्वासाघोषा महाप्राणश्च । अल्पप्राणवायुप्रधानत्वादस्य अघोषता । अस्य ध्येयस्वरूपं यथा "षकारं शृणु चार्वङ्गि रक्तचन्द्रप्रतीकाशं स्वयंपरमकुण्डली । चतुर्वर्गमयं वर्णं सुधामिश्रितविग्रहम् । पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा । रजःसत्त्वतमोयुक्तं त्रिशक्तिसहितं सदा । त्रिबिन्दुसहितं वर्णमात्मादितत्त्वसंयुतम् । सर्वदेवमयं वर्णं हृदि भावय पार्वति !" कामधेनुतन्त्रम् । एतदधिष्ठातृदेवताध्यानं यथा "चतुर्भुजां चकोराक्षीं चारुचन्द्रनखाञ्चिताम् । शुक्लवर्णां त्रिनयनां वरदाम् सुचिन्तिताम् । रत्नालङ्कारभूषाढ्यां श्वेतमाल्योपशोभिताम् । देवगन्धर्वैरभिवन्द्यां सेवितां मोक्षकाङ्क्षिभिः । एवं ध्यात्वा षकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम् । अस्य वाचकशब्दा यथा "षः श्वेतो वासुदेवश्च पीता प्रज्ञा विनायकः । परमेष्ठी वामबाहुः श्लेष्मा गर्भविमोचनः । लम्बोदरो यमोऽजेशः कामधुक् कालसूदनः । उग्रोद्वहा हरो लज्जा मयूरश्च प्रियः शिवः । कुण्डली जठरः कोपो माता रक्षोविदारिणी । सर्वकण्ठो मध्यभिन्ना सुखात्मा मधुपः शिवाः" वर्णाभिधानम् "षकारः श्वेत आख्यातो मूर्द्धन्यो हयकन्धरः । शिवः सर्वेश्वरो माया च महामायानः सबिन्दुमत्" मन्त्राभिधानम् । मातृकान्यासेऽस्य जठरे न्यासः कार्य्यः । काव्यादौ प्रयोगेऽस्य फलम् खेदः "षः सुखं मधु खेदम्" इ०र०टी० ।

धातुपाठे षादयः षान्तास्तु ये धातवः पठितास्ते षोपदेशाः इन्धवादिस्तु षोपदेशाः इति च निमित्ते पुनः सत्वम् यथा सेधति निषेधति "पञ्चवर्गस्तवर्गश्च" इत्युक्तेः अस्य प्रयोगकाले तस्य तद्विमिश्रटवर्गस्य तवर्गो निर्भवः यथा दुष्टु स्तौति । तुष्टा उष्टौ षष्ठा षा षाति । निमित्ते सति तस्य च टुत्वे च प्रतिष्टौति प्रतिष्ठा निष्ठा निष्णाति । तत्र ष्ठ्यै ष्ठ्वक्ष्वेलाक्षु न वादिमध्ये न ध्यायति ष्वष्कति ष्ठीवतीत्यादौ नेति भेदः । किन्तु सुदासे ष्ठीवधातोरपि षत्वं दाधः ।

ष पु०षो–क पृषो०षत्वम् । १केशे मेदि० २गर्भविमोचने आनवे च ३सर्वे ४श्रेष्ठे एकाक्षरकोषः । ५विज्ञे च त्रि०मेदि०।

षकार पु०ष+स्वरूपे कार । षट्कूपवर्णे कामधेनुतन्त्रे छटा०

षग संवरणे भ्वा० पर० सक० सेट् इदित् शिचि न वृद्धिः । षगति अषगीत् णिच् घटादि षगयति । अषीषगत् त ।

षघ हिंसायां स्वा०पर० सक० सेट् इदित् शिचि न वृद्धिः । षघ्नोति अषघीत् अषीषघत् त । [षचद ज ।

षच सेचने भ्वा० आत्म० सक० सेट् । षचते अषचिष्ट सषे

षष समवाये भ्वा०पर०सक० सेट् । षषति । असषीत्-असाषीत्

षट विभाजने भ्वा०पर०सक०सेट् । षटति असटीत् असाटीत्

षट्कर्मन् न० षट्प्रकारं कर्म० । १तन्त्रोक्तेषु शान्तिवशी-करणस्तम्भनविद्वेषोच्चाटनमारणरूपेषु षट्सु प्रयोगभेदेषु तानि च कर्माणि तन्त्रसारायुक्तानि उच्चाटनशब्दे १०६९ पृ० दृश्यानि | तत्तत्प्रभूतसपक्षाणि च भूतसपक्ष-शब्दे ४६८५।८६ पृ० दृश्यानि । २यजनयाजना-ध्ययनाध्यापनदानप्रतिग्रहरूपेषु द्विजस्य नित्यकर्मसु च । षट् कर्माणि यस्य । ३याजनादिषु निरते द्विजे पु० । ४हठयो-गाङ्गे ६षट्क्रियाभेदे यथोक्तं घेरण्डसं० १अ० । "धौतिर्वस्तिस्तथा नेतिर्नौलिकी त्राटकस्तथा । कपाल-भातिश्चैतानि षट् कर्माणि समाचरेत् । अन्तर्धौ-तिर्दन्तधौतिर्हृद्धौतिर्मूलशोधनम् । धौत्यश्चतुर्विधाः प्रोक्ता घटं (देहं) कुर्वन्ति निर्मलम् । वातसारं वारिसारं वह्निसारं बहिष्कृतम् । घटस्य निर्मलार्थाय अन्तर्धौति-श्चतुर्विधा" । "काकचञ्चुवदास्येन पिबेद्वायुं शनैः शनैः । चालयेदुदरं पश्चाद्वर्त्मना रेचयेच्छनैः । वात-सारं परं गोप्यं देहनिर्मलकारणम् । सर्वरोगक्षयकरं देहानलविवर्द्धनम् । आकण्ठं पूरयेद्वारि वक्त्रेण च पिबेच्छनैः । चालयेदुदरेणैव चोदराद्रेचयेदधः । वारि-सारं परं धौतं देहनिर्मलकारणम् । साधयेत्तं प्रय-त्नेन देवदेहं प्रपद्यते । नाभिग्रन्थिं मेरुपृष्ठे शतवारञ्च कारयेत् । उदरामयजं त्यक्त्वा जाठराग्निं विवर्द्धयेत् । वह्निसारमिदं धौतं योगिनां योगसिद्धिदम् । काकी-चञ्चुं साधयित्वा पूरयेदुदरं मरुत् । धारयेदर्द्धयामन्तु चालयेदधवर्त्मना । इदं धौतं परं गोप्यं न प्रकाश्यं कदाचन । नाभिमग्नजले स्थित्वा शक्तिनाडीं विसर्जयेत् । कराभ्यां क्षालयेन्नाडीं यावन्मलविसर्जनम् । तावत् प्र-क्षाल्य नाडीञ्च उदरे वेशयेत् पुनः । इदं प्रक्षालनं गोप्यं देवानामपि दुर्लभम् । केवलं धौतिमात्रेण देवदेहो भवेद् ध्रुवम् । यामार्द्धधारणात् शक्तिं यावन्न साध-येन्नरः । बहिष्कृतमहाधौतिस्तावन्नैव च जायते । दन्तमूलं जिह्वामूलं रन्ध्रे च कर्णयुग्मयोः । कपाल-रन्ध्रं पञ्चैते दन्तधौतिर्विधीयते" । "खादिरेण रसे-नाथ मृत्तिकाभिश्च शुद्धिभिः । मार्जयेद्दन्तमूलञ्च यावत् किल्विषमाहरेत् । दन्तमूलं परं धौतिर्योगिनां योग-साधने । नित्यं कुर्य्यात् प्रभाते च दन्तरक्षाय योगवित् । स्नानार्थे धारणादियोगेषु योगिनां यतः । अथातः स्वप्रवक्ष्यामि जिह्वाशोधनकारणम् । जरामरणरोगादि नाशयेत् दीर्घलम्बिका । तर्जनीमध्यमानामा अङ्गुलि-त्रययोगतः । वेशयेद्गलमध्ये तु मार्जयेल्लम्बिकामलम् । शनैः शनैर्मार्जयित्वा कफदोषं निवारयेत् । मार्जयेन्नवनी-तेन दोहयेच्च पुनः पुनः । तदग्रं लौहयन्त्रेण कर्ष-यित्वा पुनः पुनः । नित्यं कुर्यात् प्रयत्नेन रवेरुदयके-ऽस्तके । एवं कृते तु नित्ये सा लम्बिका दीर्घतां गता । तर्जन्यङ्गुल्यग्रयोगेन मार्जयेत् कर्णरन्ध्रयोः । नित्यमभ्यास-योगेन नादान्तरप्रकाशनम् । वृद्धाङ्गुष्ठेन दक्षेण मार्ज-येद्भालरन्ध्रकम् । एवमभ्यासयोगेन कफदोषं निवारयेत् नाडी निर्मलतां याति दिव्यदृष्टिः प्रजायते । निद्रान्ते भोजनान्ते च दिवान्ते च दिने दिने । हृद्धौतिं त्रिविधां कुर्यात् दण्डवमनवाससा । रम्भादण्डं हरिद्दण्डं वेत्र-दण्डन्तथैव च । हृन्मध्ये चालयित्वा तु पुनः प्रत्याहरेच्छ-नैः । कफं पित्तं तथा क्लेदं रेचयेदूर्ध्ववर्त्मना । दण्डधौतिविधानेन हृद्रोगं नाशयेद् ध्रुवम्" । हरि-द्दण्डं (वटस्कन्ध?) "भोजनान्ते पिबेद्वारि आकण्ठ-पूरितं सुधीः । ऊर्द्ध्वदृष्टिं क्षणं कृत्वा तज्जलं वमयेत् पुनः । नित्यमभ्यासयोगेन कफपित्तं निवारयेत् । चतुरङ्गुलविस्तारं सूक्ष्मवस्त्रं शनैर्ग्रसेत् । पुनः प्रत्याहरेदेतत् प्रोच्यते धौतकर्मकम् । गुल्मज्वरप्लीह-कुष्ठं कफपित्तं विनश्यति । आरोग्यं बलपुष्टिश्च भवे-त्तस्य दिने दिने । अपानक्रूरता तावद् यावन्मूलं न शो-धयेत् । तस्मात् सर्वप्रयत्नेन मूलशोधनमाचरेत् । पीत-मूलस्य दण्डेन मध्यमाङ्गुलिनापि वा । यत्नेन क्षालयेद् गुह्यं वारिणा च पुनः पुनः । वारयेत् कोष्ठकाठिन्य-मामाजीर्णं निवारयेत् । कारणं कान्तिपुष्ट्योश्च दीपनं वह्निमण्डलम् । जलवस्तिः शुष्कवस्तिर्वस्ती च द्विविधे स्मृतौ । जलवस्तिं जले कुर्यात् शुष्कवस्तिं क्षितौ सदा । नाभिमग्नजले पायुं न्यस्तनालोत्कटासनम् । आकुञ्चनं प्रसारञ्च जलवस्तिं समाचरेत् । प्रमेहञ्च गुदा-वर्त्तं क्रूरवायुं निवारयेत् । भवेत् स्वच्छन्ददेहश्च कामदेवसमो भवेत्" । न्यस्तनालोत्कटासनम् [illegible] दत्त्वा [illegible]मुदरं कुर्य्यादित्यर्थः । "वस्तिं पश्चिमतानेन चालयित्वा शनैः शनैः । अश्विनीमुद्रया पायुमाकु-ञ्चेच्च प्रचारयेत् । एवमभ्यासयोगेन कोष्ठदोषो न विद्यते । वर्द्धयेत् जाठराग्निञ्च आमवातं विनाशयेत् । वितस्ति-[illegible] सूत्रकं नासानाले प्रवेशयेत् । मुखान्निर्गमयेत्

पश्चात् प्रोच्यते नेतिकर्म तत् । साधनान्नेतिकर्मणः खेचरीसिद्धिमाप्नुयात् । कफदोषा विनश्यन्ति दिव्यदृष्टिश्च जायते । आनन्दस्ते ह्यनन्दश्च अभवेदय पार्श्वयोः । चरदामाचिह्नितोऽपि देहामावश्यकम्” । इति नौलिकी “निमेषोन्मेषकं त्यक्त्वा सूक्ष्मलक्ष्यं निरीक्षयेत् । यावदश्रु निपतति त्राटकं प्रोच्यते बुधैः । एवमभ्यासयोगेन शाम्भवी जायते ध्रुवम् । न जायते नेत्ररोगा दिव्यदृष्टिप्रदायकम् । शीत्कृत्य पीत्वा वक्त्रेण नासानालैर्विरेचयेत् । व्युत्क्रमेण व्युत्क्रमेण शीत्क्रमेण विशेषतः । भालभातिं त्रिधा कुर्यात् कफदोषं निवारयेत् । इडया पूरयेद्वायुं रेचयेत् पिङ्गलया पुनः । पिङ्गलया पूरयित्वा पुनश्चन्द्रेण रेचयेत् । पूरकं रेचकं कृत्वा वेगेन न तु धारयेत् । एवमभ्यासयोगेन कफदोषं निवारयेत् । नासाभ्यां जलमाकृष्य वक्त्रेण रेचयेत् पुनः । पायं पायं व्युत्क्रमेण श्लेष्मदोषं निवारयेत् । न जायते वार्द्धकं च ज्वरो नैव प्रजायते” ।

षट्कूटा स्त्री भैरवीभेदे तन्त्रसा० ।

षट्कोण न० षट् कोणा यस्य । १वज्रे राजनि० । तन्त्रोक्ते अन्तःपञ्चे त्रिकोणचतुष्टयरूपे यन्त्रभेदे २ज्योतिषोक्ते लग्नतः षष्ठस्थाने च ज्यो०त० ।

षट्चक्र न० षण्णां चक्राणां समाहारः पात्रादि० । तन्त्रोक्तेषु देहस्थेषु सुषुम्नानाडीमध्यवर्त्तिषु स्थितेषु लिङ्गमूलादिषु षट्सु पद्मेषु चक्रशब्दे २८०८ पृ० दृश्यम् । तद्-धिकृत्य कृतो ग्रन्थः अण् तस्य लुक् । २षट्चक्रप्रति-पादके ग्रन्थभेदे । [१मन्त्रभेदे १तत्संख्यान्विते च ।

षट्चत्वारिंशत् स्त्री षडधिका चत्वारिंशत् । (छेयाल्लिश)

षट्चरण पुंस्त्री० षट् चरणा यस्य । १भ्रमरे हेमा० स्त्रियां ङीप् । षट्पदादयोऽप्यत्र । २यूकायां राजनि० ।

षड निवासे वधे च चुरा० हिंसायां दाने च सक० चुरा०उभ० सेट् । षड्यति ते अषषड्त त । षिषड्यिषति ।

षट्तिलिन् त्रि० षट् तिलाः तिलोद्वर्त्तनादयः सन्त्यस्य इनि "तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः । तिल-भुक् तिलवापी च षट्तिली नावसीदति” इत्युक्ते तिलो-द्वर्त्तनादिकारिणि । [ज्ञानभेदे २तत्संख्यान्विते च ।

षट्त्रिंशत् स्त्री षडधिका त्रिंशत् शाक० । (छत्रिश) १सं-

षट्त्रिंशदुपचार (छत्रिश) देवपूजाङ्गेषूपचारेषु "आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् । मधुपर्काचमनं स्नानं वसनाभरणानि च ।" ... "आवाहनं स्वागतं चार्घ्यं पाद्यं निवेदनम् । अष्टाङ्गनं अर्पितादि लेपनाद्यर्पने तथा । पाद्याभ्यां वासनीयञ्च स्नानीयमधु-पर्कौ । पुनराचमनीयञ्च वस्त्रयज्ञोपवीतके । अलङ्कारो गन्धपुष्पे धूपदीपौ तथैव च । ताम्बूलादिकनैवेद्यं पुष्प-माला तथैव च । अनुलेपञ्च शय्या च चामरव्यजने तथा । आदर्शदर्शनञ्चैव नमस्कारश्च नर्त्तनम् । गीतवाद्ये च दानानि स्तुतिहोमप्रदक्षिणम् । दन्तकाष्ठ-प्रदानञ्च तथा विसर्जनम् । उपचारा इमे प्रोक्ताः षट्त्रिंशत् सुरपूजने" प्रका०त० ।

षट्त्रिंशन्मत न० "मनुर्विष्णुर्यमो दक्षो ह्यङ्गिरोऽत्रिबृह-स्पती । आपस्तम्बसंवर्त्ता च कात्यायनपराशरौ । वशिष्ठ-व्याससंवर्त्तौ हारीतगौतमावपि । प्रचेताः शङ्खलिखितौ याज्ञवल्क्यश्च काश्यपः । शातातपो लोगाक्षिर्जमदग्निः प्रजापतिः । विश्वामित्रपैठीनसी बौधायनपितामहौ । छागलेयश्च जाबालो मरीचिश्च्यवनो भृगुः । ऋष्यशृङ्गो नारदश्च षट्त्रिंशत् स्मृतिकारकाः । एतेषां तु मतं यत् षट्त्रिंशन्मतमुच्यते” इति मलिम्लुचतत्त्वधृतवचने ।

षट्पञ्चाशत् स्त्री षडधिका पञ्चाशत् शाक० । (छाप्पान्न) १तत्संख्यायाम् २तत्संख्यान्विते च ।

षट्पञ्चाशिका स्त्री षट्पञ्चाशत् परिमाणमस्य डिन सं-ज्ञायां कन् । वराहमिहिरात्मजपृथुयशोविरचिते ग्रन्थ-भेदे ।

षट्पदप्रिय पु० ६त० । नागकेशरे शब्दचा० तस्य हि पु-ष्पमधुपत्वात् भ्रमरप्रियत्वम् । [त्रिका० ।

षट्पदातिथि पु० षट्पदः अतिथिरिव यस्य । आम्रवृक्षे

षट्पदानन्दवर्द्धन पु० षट्पदानानन्दं वर्द्धयति वृध-णिच्-ल्यु उप० स० । अशोकवृक्षे राजनि० ।

षट्पदी स्त्री षट् पादा अस्याः पादस्य पादन्तरावादेशः ङीप् च । १यूकायां २भ्रमर्योषिति च । स० द्विगुः । ३षट्-चरणयुक्ते छन्दोभेदे च । ४षट् श्लोकात्मकपद्यसंघाते ।

षट्प्रश्न पु० षट् प्रश्ना यस्य । “षमोऽकिमसतोऽलेख्य सोम-स्यान्वयारणा । षट् प्रश्नास्ते यस्यासौ षट्प्रश्न परिकीर्त्तितः” इत्युक्ते १धर्माधर्माभिज्ञे २योद्धे ३काले त्रिका० ।

षडङ्ग न० षण्णामङ्गानां समाहारः पात्रा० । "अङ्गं पादौ भुजौ मध्यं मस्तकं षडङ्गमुच्यते" इत्युक्ते १देहावयवषट्के अङ्गे समाहारे तन्त्रोक्ते २हृदयाद्यवयवभेदे यत्र हृदयादिषु षट् स्वङ्गेषु मन्त्रवर्णान्न्यस्यन्ति तत्र ; षट् अङ्गानीव यस्य । "शिक्षाकल्पो व्याकरणं निरुक्तं छन्दसां चितिः । ज्योतिषामयनञ्चैव षडङ्गो वेद उच्यते

पु० ३कुङ्गांकुरवपुषे च पु० राजनि० “गोमूत्रं गोमय क्षीरं सर्पिर्दधि च रोचना। षडङ्गमेतन्माङ्गल्यं पठितं सर्वदा गवाम्” मत्स्यपु०। रोचनासहिते ५पञ्चगव्ये न०।

षड़भिज्ञ पु० “दिव्यं चक्षुः श्रोत्रं १ परचित्तज्ञानं २ पूर्वनिवासानुस्मृतिः ३ आत्मज्ञानम् ४ वियद्गतिः ५ कायव्यूहसिद्धिः ६ एतानि षट् अभिज्ञा अभिज्ञायमानानि यस्य। बौद्धभेदे अमरः। [।।२। अर्थपद्धतिः।

षड़वक्त्र न० सप्तवर्णं ज्ञातवर्ति वाद्ये यद्गपालभेदे काव्या०

षड़शीति स्त्री षडधिका अशीतिः शाक०। (छियाशि) १ष संख्यायां २तत्संख्यान्विते च। षड़शीत्याख्यासु मिथुनकन्याधनुर्मीनेषु रवेः संक्रान्तौ च “अयनविषुपदौ षड़शीतमथो विषुवद्विष्णुपदीषड़शीतयः” इति ज्योतिषम्।

षड़शीतिचक्र न० मिथुनकन्याधनुर्मीनराशिस्थरवेः संक्रमे शुभाशुभफलज्ञानार्थं नराकारनराकारे चक्रे। यथा “मुखे चैकं करे वेदाः पादयुग्मे द्वयं द्वयम्। क्रोडे वामस्तथा वेदाः करे सव्येतरेऽपि च। द्वयं द्वयं तथा नेत्रे मस्तके त्रितयं तथा। द्वयञ्चैव तथा गुह्ये षड़शीत्यां क्रमे स्थिते। मुखे दुःखं करे लाभः पादयोर्भ्रमणं हृदि। कान्ता स्याद् बन्धनं वामे करे स्यात् क्रोडभे जयाम्। सम्मानो नेत्रयोश्चैव सम्मानश्च मस्तके। गुह्ये चैव भवेन्मृत्युः षड़शीतिफलस्तुतिः” ज्यो० त०।

षड़शीतिमुख न० षड़शीतेः नक्षत्रसंक्रान्तेर्मुखम्। “तुलादिषड़शीत्यह्नां षड़शीतिमुखं क्रमात्। तच्चतुष्टयमेव स्यात् द्विस्वभावेषु राशिषु” “षड्विंशे धनुषो भागे द्वाविंशेऽनिमिषस्य च। मिथुनेऽष्टादशे भागे कन्यायास्तु चतुर्दशे” इति सूर्यसिद्धान्तोक्ते तत्तद्दिनः षड़शीतिदिनात्मके काले

षड़ष्टक न० ज्यो०त० उक्ते वरकन्ययोः परस्परारम्भदेशया षष्ठाष्टमराशिमध्ये उपयमनाद्दे पृ० दृश्यम्।

षड़ानन पु० षट् आननानि यस्य। कार्त्तिकेये अमरः। षडवदनादयोऽप्यत्र।

षड़ाम्नाय पु० षड्गुणित आम्नायः शाक०। शिववक्त्रविनिर्गते षट्प्रकारे तन्त्रभेदे “अथेदानीं प्रवक्ष्यामि आम्नायषट्कं पृथक्। पूर्वाम्नायो यदा मन्त्रास्तदा प्राच्यां दिशि स्थितः। यदाम्नायोऽह भगवानाचारः परिकीर्त्तितः। एवं वै दक्षिणाम्नायो दक्षिणस्यां दिशि स्थितः। एवं हि पश्चिमाम्नायः पश्चिमायां दिशि स्थितः। एवमेवोत्तराम्नाय उत्तरस्यां दिशि स्थितः। ऊर्ध्वमूर्द्धं गतं देवि। यत् प्रोक्तं तव सन्निधौ। ऊर्द्ध्वाम्नायस्य कथितो देवानामपि दुर्लभः। यदा पाश्चात्त्यं देवि! यत् प्रोक्तं गिरिजे! प्रिये!। अथ आम्नाय दत्तु मे सत्यं सत्यं सुलोचने!। षडाम्नायाश्च कथितास्तेऽस्मिन्क्रमयोगतः। कथितं कथिता ये देवाः कथिताश्च वरानने!। तान्देवांश्च प्रवक्ष्यामि साधकानां हिताय वै। श्रीविद्या भेदसहिता तारा च त्रिपुरा तथा। भुवनेशी चान्नपूर्णा पूर्वाम्नाये प्रकीर्त्तिताः। बगलामुखी च वगिनी कीर्त्तिता धनदा तथा”। वगिनी वाग्भैरवीत्यर्थः “महिषघ्नी महालक्ष्मीर्दक्षिणाम्नायकीर्त्तिताः। महाकरवती विद्या तथा वाग्वादिनी पर। भद्रप्रिया भवानी च पश्चिमाम्नायकीर्त्तिताः। कालिका भेदसहिता तारा भेदैश्च संयुता। मातङ्गी भैरवी छिन्ना तथा धूमावती परा। उत्तराम्नायकथिताः सर्वे मोक्षफलप्रदाः। अनन्तभेदसहिताः साधिका याः प्रकीर्त्तिताः। द्वाविंशत्यक्षरी तारा दक्षिणाम्नायकीर्त्तिता। एकजटा महाभारी महामोक्षप्रदायिनी। तत्परा परमा विद्या न विद्यान्तरगोपिता। परप्रधानमन्त्रास्तु ऊर्द्ध्वाम्नाये प्रकीर्त्तिताः। ऊर्द्ध्वाम्नायो ह्यधश्चैव केवलं मोक्षदो भवेत्। धनार्थिनां मोक्षार्थे आम्नायाश्च प्रकीर्त्तिताः। यथोक्तविधिना भद्रे! ज्ञात्वा फलमवाप्नुयात्। पूर्वाम्नायादिसर्वेषां विधानं शृणु सुन्दरि!। ज्ञात्वा येनाशु लभते फलं यद्यदभीप्सितम्। षट् कर्म फलदा ह्येषां षडाम्नायाः प्रकीर्त्तिताः। उत्तराम्नायो देवेशि। देवानाञ्च फलप्रदः” इति समयाचारतन्त्रे ५पटले। आम्नायभेदेनाचारभेदः उक्तो यथा “पूर्वाम्नायोदितं कर्म पाशवं कथितं प्रिये!। यदुक्तं दक्षिणाम्नाये तदेव पाशवं स्मृतम्। पश्चिमाम्नायजं कर्म पशुवीरसमाश्रितम्। उत्तराम्नायजं कर्म दिव्यवीराश्रितं प्रिये!। दिव्योऽपि वीरभावेन साधयेत् पीठकानने। वीरासनं विना दिव्यः पूजयेत् पीठकानने। ऊर्द्ध्वाम्नायोदितं कर्म दिव्यभावाश्रितं प्रिये!” इति निरुत्तरतन्त्रे १पटले।

षड़ूर्म्मि पु० षट् ऊर्म्मयः बुभुक्षादयोऽत्र। जीवे ऊर्म्मिशब्दे १२८१ पृ०दृश्यम्।

षडूषण न० षट्संख्यम् ऊषणम्। कटुद्रव्यभेदे “पञ्चकोलं समरिचं षडूषणमुदाहृतम्। पञ्चकोलगुणं तत्तु रूक्षमुष्णं विषापहम्” भावप्र०।

षड़्गया स्त्री “गयागङ्गा गयादित्यो गायत्री च गदाधरः।

गया गयाशिरश्चैव षड्गया मुक्तिदायिकाः" वायु० पु० । उक्ते गयागजादिषट्के ।

षड्गव त्रि० षड्भिर्गोभिराकृष्टः शकटः हलो वा शाक० मध्य० समा० । षड्भिर्गोभिराकृष्टे १हलादौ "अष्टागवं धर्म्यहलं षड्गवं जीवितार्थिनाम्" इति स्मृतिः । षण्णां गवां समाहारः अच् समा० । २षट्सु गोषु न० ।

षड्गुण पु० षड्भिः गुणिता गुणाः शाक० । राज्ञां सन्ध्यादिषु षट्सु गुणेषु षाड्गुण्यशब्दे दृश्यम् ।

षड्ग्रन्था स्त्री षट् ग्रन्थयः सन्त्यस्या अच् । १वचायां भावप्र० २शट्यां ३महाकरञ्जे ४श्वेतवचायाञ्च राजनि० ।

षड्ग्रन्थि न० षट् ग्रन्थयोऽस्य । १पिप्पलीमूले वैद्यकम् । २षट्पर्वयुक्ते त्रि० । ३वचायां स्त्री वा ङीप् । संज्ञायां कन् टाप् अत इत्वम् । शट्यां स्त्री अमरः ।

षड्ज पु० षड्भ्यो नासादिस्थानेभ्यो जायते जन–ड । "नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रितः । षड्भ्यः संजायते यस्मात् तस्मात् षड्ज इति स्मृतः" इत्युक्ते स्वरभेदे "षड्जसंवादिनीः केकाः" इति रघुः । "षड्जं रौति मयूरो हि गावो नर्दन्ति चार्षभम् । अजा विरौति गान्धारं क्रौञ्चो नदति मध्यमम्" भरतः ।

षड्दर्शन न० षड्गुणितं दर्शनम् । १आस्तिकमतसिद्धे पूर्वमीमांसावेदान्तसांख्यपातञ्जलन्यायवैशेषिकाख्ये दर्शने शास्त्रभेदे षट्सु २बौद्धदर्शनेषु च ।

षड्दीर्घ पु० षड्भिर्गुणिता दीर्घाः । तन्त्रोक्तेषु आ, ई, ऊ, ऐ, औ, अः इत्येवं रूपेषु षट्सु दीर्घेषु ।

षड्दुर्ग न० षड्गुणितं दुर्गम् । "धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा । नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम्" मनूक्ते दुर्गषट्के ।

षड्धा अव्य० षष्+प्रकारे–धाच् । षट्प्रकारे । [सि०कौ० ।

षड्बिन्दु पु० षड् बिन्दवो यत्र । १कीटभेदे मेदि० । २विष्णौ

षड्भुजा स्त्री षट् भुजा इव यस्याः । (तरमुज) फलवृताभेदे राजनि० । २षड्हस्तयुक्ते त्रि० । ३रौद्रे ज्वरे पु० "त्रीमांस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः" मत्स्य० ।

षड्रस न० षण्णां रसानां समाहारः पात्रा० । "मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा" इत्युक्तेषु "मधुरं लौल्यमित्याहुरिक्ष्वादौ स च लभ्यते । लवणस्तु पटुः प्रोक्तः सैन्धवादौ च दृश्यते । तिक्तस्तु पिचुमन्दादौ व्यक्तमास्वाद्यते रसः । कषायस्तुवरः प्रोक्तः स च पूगीफलादिषु । कटुस्तु तीक्ष्णसंज्ञः स्यात् मरीचादौ स चेष्यते" इत्युक्तप्रकारेषु षट्सु रसेषु । षड्गुणितोरसः । तदर्थे पु० । [सि०कौ० ।

षड्लवण न० षड्गुणितं लवणम् । उद्भिज्जातयुतपञ्चलवणे

षड्वर्ग पु० ६त० । १कामक्रोधलोभमोहमदमात्सर्येषु "व्याजेन षड्वर्गमिव" भट्टिः । "क्षेत्रं होरा च द्रेक्काणो नवांशो द्वादशांशकः । त्रिंशांशकश्च षड्वर्गस्त्र्यादिमप्रा ग्रहपदः" ज्योतिषोक्तेषु क्षेत्रादिषु षट्सु । स च ज्यो०त० उक्तो यथा

"कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीभुवाम् । जीवार्किमार्किजेज्यानां क्षेत्राणि१ स्युरजादयः । विषमर्क्षेषु प्रथमा होराः२ स्यु रविशशिनोः च । द्वितीयाः समभोयुक्तु व्यत्ययादूहयेत् सदा । स्वपञ्चनवमानां ये राशीनामधिपाः । ते द्रेक्काणाधिपा राशौ द्रेक्काणास्त्रय एव हि । मेषकेसरिधनुषां मेषाद्याश्च नवांशकाः४ । मृगकन्यावृषाणाञ्च मृगाद्यास्तु नवांशकाः । तुलामिथुनकुम्भानां तुलाद्याः समुदाहृताः । कर्कवृश्चिकमीनानां कर्कटाद्या नवांशकाः । चराणां प्रथमे चांशे स्थिराणां पञ्चमे तथा । नवमे द्व्यात्मकानाञ्च वर्गोत्तम इति स्मृतः । स्वनवांशस्तु राशीनां वर्गोत्तम इति स्मृतः । सर्वेषां मेषपूर्वाणां स्वाद्या द्वादशांशकाः५ । कुजार्किगुरुज्ञसौम्यानां भागाः पञ्चकञ्च क्रमात् । पञ्चपञ्चाष्टसप्तेषु ज्ञेयमोजःसु राशिषु । त्रिंशांशाद् व्यत्ययादेते युग्मराशिषु कीर्त्तिताः" । अत्राधिकशुभाशुभप्राप्त्या शुभाशुभद इति बोध्यम् ।

षण(न) सम्भक्तौ भ्वा० पर० सक० सेट् षस्य सत्वे णस्य नत्वम् । सनति असनीत् असानीत् । दन्त्यान्तोऽयमित्येके ।

षण(न) दाने तना० उभ० सक० सेट् षस्य सत्वे णस्य नत्वम् उदित् । दन्त्यान्त इत्येके सनोति सनु असनीत्-असानीत् असनिष्ट-असात । सिषणिषति सिषासति इत्येके ।

षण्ड(ण्ढ) पु० सन–ड डस्य नेत्वम् पृषो० षत्वं शत्वं वा । १वृषे अमरः २नपुंसके जटा० । ३पद्मादिसमूहे पु० न० अमरः । [पाठान्तरम् ।

षण्ढ पु० सन–ढ तस्य नेत्वम् पृषो० षः । नपुंसके अमरे

षण्मुख पु० षट् मुखानि यस्य । १कार्त्तिकेये हेमा० षड्मुखायां स्त्री राजनि० टाप् ।

षद् गतौ चु० उभ० सक० सेट् । षादयति ते असीषदत् ।

षद् विशरे अवसन्नीभावे अक० हिंसायां गतौ च सक० तु० प० अनिट् । सीदति लृदित् असदत् । ज्वला० सदः सादः ।

षस्च गतौ भ्वा० पर० सक० सेट् । सश्चति असश्चीत् ।

षन्ज सङ्गे सम्बन्धे च भ्वा०पर०सक०अनिट् । सजति असाङ्क्षीत्
षप समवाये भ्वा०पर०सक०सेट् । सपति असापीत् असपीत् । असीषपत् । [त । सिषमयिषति ।
षम वैकल्ये अद० चु० उभ० अक० सेट् । समयति ते अससमत्
षम्ब संबन्धे भ्वा० पर० सक० सेट् । सम्बति असम्बीत् ।
षर्ज्ज अर्जने भ्वा० पर० सक० सेट् । सर्ज्जति असर्ज्जीत् ।
षर्ब्ब(र्व) गतौ भ्वा०प०सक० सेट् । सर्ब(र्व)ति असर्बीत्(र्वीत्) ।
षर्षपी स्त्री सर्षप+पृषो० । खञ्जनाकृतौ खगभेदे शब्दर० ।
षल गतौ भ्वा० पर०सक०सेट् । सलति असालीत् असीषलत्
षष् त्रि० ब० व० । षो—क्विप् पृषो०। (छय) सङ्ख्याभेदे व्याकरणोक्ते १डतिप्रत्ययान्तकत्यादौ षान्ते नान्ते सङ्ख्यावाचके च २शब्दे च
"ष्णान्ताः षट्" "डति च" पा०। "षड्भ्यो लुक्" पा० "न षट् स्वस्रादिभ्यः" पा० स्त्रियां न ङीप् । "षट् संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम्" अमरः । त्रिष्वित्यधिकारेण त्रिषु समा इति सिद्धे पुनः कथनं त्रिषु समानरूपताप्रतिपादनार्थम् । तथा हि वैयाकरणमते तिङः प्रथमान्तसामानाधिकरण्यनियमात् विशेष्यविशेषणयोः समानलिङ्गत्वे प्राप्ते ततः स्त्रियां टाबादिप्रसक्तौ तन्निषेधः तेन स्त्री पचति इत्यादौ इकारान्तत्वात् न ङीप् । स्त्रियः अपचन् इत्यादौ च न ङीप् । स्त्री अपचत इत्यादौ न टाप् । कुलं पचते इत्यादौ क्लीवत्वेन न ह्रस्वः । अव्ययस्य लिङ्गशून्यत्वेऽपि ह्रस्व टाबादिशून्यत्वार्थं त्रिषु समानरूपोक्तिः । तेन स्वाशब्दस्य नित्यस्त्रीत्वे स्वा पापमित्यादौ न ह्रस्वः । कल्पाद्यपरत्वे उच्चैः संसारपारगतिरित्यादौ न टाप् इति बोध्यम् इत्यन्तस्य कति स्त्रियः इत्यादौ न ङीप् ।
षष्टि स्त्री षड्गुणिता दशतिः नि० । (षाट्) १सङ्ख्याभेदे २तत्सङ्ख्यान्विते च ।
षष्टिक पु० षष्ट्या अहोभिः पच्यते कन् । (षाटिया) १धान्यभेदे अमरः । तस्यार्थं स्त्रीत्वमपि "षष्टिका कालशाकञ्च मूलकं केमुकेतरत्" ति०त० । षष्ट्या क्रीतः कन् । २षष्टिसंख्यातद्रव्यक्रीते त्रि० ।
षष्टिक्य न० षष्टिकधान्यस्य भवनं क्षेत्रम् यत् । षष्टिकधान्योत्पत्तियोग्ये क्षेत्रे अमरः । [तम्बिन् । स्त्रियां ङीप् ।
षष्टितम त्रि० षष्टेः पूरणः तमप् । येन षष्टिसङ्ख्या पूर्य्यते
षष्टिमत्त पु षष्ट्या वर्षैर्मत्तः । षष्टिवर्षवयस्के गजे शब्दमा० तद्वयसि हि तस्य मत्ततायोग्यत्वात् तथात्वम् ।

षष्टिलता स्त्री षष्ट्या लतेव । भ्रमरमार्य्यां राजनि० ।
षष्टिसंवत्सर पु० ब० व० षष्टिगुणिताः संवत्सराः । ज्यो०सिद्धान्तप्रसिद्धेषु १प्रभवादिषु षष्टौ वत्सरेषु । प्रभवादिशब्दे ४७१।४७४ पृ० तदानयनं दृश्यम् । २मारावचादिकेषु षष्टिवर्षेषु गुरुवर्षशब्दे २६२२ पृ० दृश्यम् । षष्ट्यब्दादयोऽप्यत्र ।
षष्टिहायन पु० षष्टिर्हायना वयोऽस्य । १षष्टिवर्षवयस्के गजे षष्टिदिनपच्यो हायनो व्रीहिः शब्द० । २षष्टिकधान्ये च मेदि० । [पूर्य्यते तावत् स्त्रियां ङीप् ।
षष्ठ त्रि० षण्णां पूरणः षष्+डट् थुक् च । येन षट् संख्या
षष्ठक त्रि० षष्ठो भागः कन् । षष्ठे भागे ।
षष्ठांश पु० कर्म० । रक्षणप्रतिरूपतया प्रजाभ्यो राज्ञा उत्पन्नशस्यस्य षष्ठांशरूपे करभेदे ।
षष्ठान्न त्रि० षष्ठे दिवसस्य षष्ठभागे अन्नस्य तद्भोजनस्य कालो यस्य । दिवसस्य षष्ठभागे अन्नभोजनकालयुते पुरुषे ।
षष्ठान्नकाल पु० षष्ठे दिवसे भक्ताशनकालो यत्र । व्रतभेदे ।
षष्ठी स्त्री षण्णां पूरणी डट् थुट् ङीप् । चन्द्रमसः षष्ठकलाह्रासवृद्धिरूपक्रियारूपे १तिथिभेदे स्कन्दभार्य्यारूपे २मातृकाभेदे "मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता । शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी । षष्ठांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्त्तिता । पुत्रपौत्रप्रदात्री च धात्री त्रिजगतां सती । सुन्दरी युवती रम्या सततं भर्त्तुरन्तिके । स्थाने शिशूनां परमा वृद्धरूपा च योगिनी । पूजा द्वादशमासेषु यस्या विश्वेषु सन्ततम् । पूजा च सूतिकागारे पुरा षष्ठदिने शिशोः । एकविंशतिमे चैव पूजा कल्याणहेतुकी । मुनिभिर्नियमिता चैषा नित्या काम्या हृतिः परा । मातृरूपा दयारूपा शश्वद्रक्षणरूपिणी । जले स्थले चान्तरीक्षे शिशूनां स्वप्नगोचरे" ब्रह्म० वै०प्र० १४०। "ब्रह्मणो मानसी कन्या देवसेना सुरेश्वरी । यां मनसा धाता ददौ स्कन्दाय भूमिप । मातृकासु च विख्याता स्कन्दभार्य्या च सुव्रता । विश्वे षष्ठीति विख्याता षष्ठांशात् प्रकृतेर्यतः" ४०अ० । "प्रसन्ना द्वादशे मासि सम्यक् ज्योऽपत्यवृद्धये । सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी । वैशाखे चान्द्रनी षष्ठी ज्यैष्ठे चारण्यसंज्ञिता । आषाढ़े कार्दमी ज्ञेया श्रावणे लुण्ठनी तथा । भाद्रे चपेटी विख्याता दुर्गोत्साहयुजे तथा । नाड़ाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी । पौषे

माघस्तपा च शीतला तपसि स्मृता । गोत्रविषी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता” स्कन्दपु० । षष्ठीविहितकाव्यव्यवस्था तिथितत्त्वे दृश्या ।

षस स्वप्ने अदा०पर०अक०सेट् वैदिकः । षस्ति असासीत् अससीत्

षस्ज गतौ भ्वा०पर०सक०सेट् । सज्जति असज्जीत् । अयमात्मनेपदीत्यन्ये “सचोऽपि पदयासरं न च परेषु संसज्जते” इति प्रयुक्तत्वा ।

षस्त स्वप्ने अदा० स्वपा० पर० अक० सेट् । वैदिकः इदित् । संस्ति असंस्तीत् [ति षहति असीषहत् असहीत् ।

षह क्षमायां वा चु०उभ०पक्षे दि०पर०सक० सेट् । साहयति

षह क्षमायां भ्वा० आ०सक०सेट् । सहते असहिष्ट सहा० । सह साढः । “तीषसहेति” पा० तकारादावर्द्धधातुके वा इट् । सोढा सहिता । सहितव्यः सोढव्यः । क्त । सोढ इत्येव । क्त प्रत्ये निमित्ते सति न सत्वम् परिषोढा इत्येव पक्षे परिषहितेत्यादौ सत्वम् ।

षडसानु पु० षष्-सानु अलुक् च पृषो० सत्वम् । १यज्ञे २मयूरे च संक्षिप्तसारः । [शब्दक०।

षाट् अव्य० सह-णिच्-पृषो० सत्वं टलम् । सम्बोधने शब्दा०

षाडव पु० षडवति अव-अच् स्वार्थे अण् । १गाने २रसे च मेदि० तयोः तत्संज्ञकस्वरादिमत्त्वात् तथात्वम् । ३षट्स्वरमितरागे च “औडवः पञ्चभिः प्रोक्तः षड्भिस्तु षाडवः स्मृतः । सम्पूर्णः सप्तभिश्चैव एवं रागास्त्रिधा मताः” संगीतदर्पणः ।

षाड्गुण्य न० षट् गुणा एव ष्यञ् । राज्ञां सन्धिविग्रहादिषु षट्सु गुणेषु “षाड्गुण्यमुपयुञ्जीत” इति माघः । “षाड्गुण्यमिति यत् प्रोक्तं तन्निबोध युधिष्ठिर ! । सन्धाय नासनञ्चैव यात्रासन्धानमेव च । विगृह्यासनमित्येव यात्रां सम्परिगृह्य च । द्वैधीभावस्तथान्येषां संश्रयोऽथ परस्य च” भा०शा०६९अ० “सन्धानासनं सन्धिं कृत्वाऽवस्थितिः यात्रासन्धाय यानम्२ । विगृह्य वैरं कृत्वावस्थानं विग्रहः३ यात्रा सम्परिगृह्यासनं शत्रोर्भयप्रदर्शनार्थं यानं प्रदर्श्य स्वस्थानेऽवस्थानम्४ द्वैधीभाव उभयत्र सन्धिकरणं५ परस्याऽन्यस्याश्रयात् दुर्गादेराश्रयणाद्वा” नील० ।

“सन्धिञ्च विग्रहं यानमासनादि वदामि ते । बलवद्विग्रहीतेन सन्धिं कुर्य्यादित्याय च । कपाल उपहारश्च सन्तानः सङ्गतस्तथा । उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः । अदृष्टनर आदिष्ट आत्मापि ष उपग्रहः । परिक्रमस्तथा छिन्नस्तथा च परदूषणम् । स्कन्धोपनेयः सन्धिश्च सन्धयः षोडशेरिताः । परस्परोपकारश्च मैत्रः सम्बन्धकस्तथा । उपहारश्च चत्वारस्तेषु मुख्याश्च सन्धयः । बालो वृद्धो दीर्घरोगस्तथा बन्धुबहिष्कृतः । भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा । विरक्तप्रकृतिश्चैव विषयेष्वतिशक्तिमान् । अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः । दैवोपहतकश्चैव दैवनिन्दक एव च । दुर्भिक्षव्यसनोपेतो बलव्यसनसङ्कुलः । स्वदेशस्थो बहुरिपुर्युक्तः कालेन यश्च ह । सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी । एतैः सन्धिं न कुर्वीत विगृह्णीयात्तु केवलम् । परस्परापकारेण पुंसां भवति विग्रहः । आत्मनोऽभ्युदयाकाङ्क्षी पीड्यमानः परेण वा । देशकालबलोपेतः प्रारभेतेह विग्रहम् । राज्यस्त्रीस्थानदेशानां ज्ञानस्य च बलस्य च । अपहारो मदो मानः पीडा वैषयिकी तथा । ज्ञानात्मशक्तिधर्माणां विघातो दैवमेव च । मित्रार्थञ्चापमानश्च तथा बन्धुविनाशनम् । भूतानुग्रहविच्छेदस्तथा मण्डलदूषणम् । एकार्थाभिनिवेशित्वमिति विग्रहयोनयः । सापत्न्यं वास्तुजं स्त्रीजं वाग्जातमपराधजम् । वैरं पञ्चविधं प्रोक्तं साधनं प्रशमं नयेत् । किञ्चित्फलं निष्फलं वा सन्दिग्धफलमेव च । तदात्वे दोषजननमायत्याञ्चैव निष्फलम् । आयत्याञ्च तदात्वे च दोषसञ्जननं तथा । अपरिज्ञातवीर्य्येण परेण स्तोभितोऽपि वा । परार्थं स्त्रीनिमित्तञ्च दीर्घकालं द्विजैः सह । अकालदैवयुक्तेन बलोद्धतसखेन च । तदात्वे फलसंयुक्तमायत्यां फलवर्जितम् । आयत्यां फलसंयुक्तं तदात्वे निष्फलं तथा । इतीमं षोडशविधं न कुर्य्यादेव विग्रहम् । तदात्वायतिसंशुद्धं कर्म राजा सदाचरेत् । हृष्टं पुष्टं बलं मत्वा गृह्णीयाद्विपरीतकम् । मित्रमाक्रन्द आसारो यदा स्युर्दृढभक्तयः । परस्य विपरीतञ्च तदा विग्रहमाचरेत् । विगृह्य सन्धाय तथा सम्भूयाथ प्रसङ्गतः । उपेक्षया च निपुणैर्यानं पञ्चविधं स्मृतम् । परस्परस्य सामर्थ्यविघातादासनं स्मृतम् । अरेश्च विजिगीषोश्च यानवत् पञ्चधा स्मृतम् । बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् । द्वैधीभावेन तिष्ठेत काकाक्षिवदलक्षितः । उभयोरपि सम्पाते सेवेत बलवत्तरम् । यदा द्वावपि नेच्छेतां संश्लेषं जातसंविदौ । तदोपसर्पेत् तच्छत्रुमधिकं वा स्वयं व्रजेत् । उच्छिद्यमानो बलिना निरुपायप्रतिक्रियः । कुलोद्गतं सत्यमार्य्यमासे-

वेन बलोत्कटम्। तद्दर्शनोपासितवता नित्यं तद्भावभाविता। तत्कारितप्रणयिना द्दत्तं संन्यायिषः स्तुतम्” अग्निपु०२१अ०। अधिकं कामन्द० नीतिशास्त्रे दृश्यम्।

षाण्मातुर पु० षण्णां मातृणामपत्यम् अण् उदादेश रपरः। कार्त्तिकेये तस्य कृत्तिकाषट्कं, गङ्गा पृथिवी पार्वती चेति षट् मातरः पुराणेषु प्रसिद्धाः। अग्निकुमारयज्ञे तु तस्य षण्णां कृत्तिकापत्नीनां मातृत्वं दर्शितम्।

षाट्पाल्विक त्रि० षट्पल्वत्वे अधिकृत्य कृतो ग्रन्थः ठञ्। षट्पल्वत्वप्रतिपादके ग्रन्थे सि० कौ०।

षाण्मासिक न० षष्ठे मासि भवः ठञ्। मृतस्य एकाहीन षष्ठमासे कर्त्तव्ये श्राद्धभेदे “आद्यं षाण्मासिके तथेति” स्मृतिः “एकाहन्यूनषण्मासे तस्य विधानम्” ति०त०रघु०।

षाध सिद्धौ स्वा० दि० च पर० अक० अनिट्। साध्नोति साध्यति असात्सीत् सिषाधयिषति। [ति असषाध्वत् त।

षान्त्व सामयुक्तवचनादने चुरा०उभ०सक० सेट्। सान्त्वयति

षि बन्धे स्वा० क्र्या० च उ०सक० अनिट्। सिनोति सिनुते सिनाति सिनीते असैषीत्। असेष्ट। [सात त। सितः

षिच आर्द्रीकरणे तु०मु०उभ०सक०अनिट्। सिञ्चति ते असि-

षिट अनादरे भ्वा० पर०सक० सेट्। सेटति असेटीत्।

षिड्ग पु० षिट–गन् तस्य गत्वम् पृषो०। १विटे (लम्पट) २कामुके हेमच०। [षीत्-असैत्सीत्। सिद्धः।

षिध माङ्गल्ये अक० शासने सक० उदित् सेट्। सेधति असे०

षिध गतौ भ्वा०पर०सक० सेट्। सेधति असेधीत् सेधितः।

षिध सिद्धौ दिवा० पर० अक० अनिट् क्त्वा वेट्। सिध्यति असैत्सीत् सिषिध साधयति। सिषाधयिषति।

आ+राजाज्ञयाऽवरोधे सक०। आसेधः।

उद्+उच्चतायाम् अक०। उत्सेधः।

नि+निवारणे सक०। निषेधः।

परि+निवारणे सक०। परिषेधः।

प्रति+निवारणे सक०। प्रतिषेधः।

वि+आ+विशेषेण निषेधे। व्यासेधः।

वि+प्रति+विरुद्धत्वे व्याघाते। विप्रतिषेधः।

षिभ हिंसने सक० दीप्तौ अक० भ्वा० पर० सेट् क्त्वा वेट्। सिम्भति असिम्भीत्।

षिम हिंसने भ्वा०पर० सक० सेट्। सेमति असेमीत्।

षिल उञ्छ(?)नगस्थसेलात् कणश आदाने तुदा०पर०सक० सेट्। सिलति असेलीत्। [सीव् सूत्रतः सीवनं सेवनम्।

षिव तन्तुसन्तारे दि०प०सक०सेट् क्त्वा वेट्। सीव्यति असे०

षु प्रसवे ऐश्वर्ये च भ्वा० पर० सक० अनिट्। सवति असौषीत्।

षु अभिषवे स्नाने सोमादेः पीड़ने मथने च स्वा० उ० सक०स्नाने अक०अनिट् कुङि पर० सेट्। सुनोति सुनुते असावीत् असोष्ट। सोता

षु गतौ भ्वा०उभ०सक०अनिट्। सवति ते असौषीत् असोष्ट।

षु प्रसवे ऐश्वर्ये च भ्वा०प०सक०अनिट्। सवति असौषीत्।

षु ऐश्वर्ये प्रसवे च अदा० पर० सक० सेट् लिटि नित्येट्। सौति असावीत्-असौषीत्। सुषुविथ।

षु पु० सु–बा० डु पृषो०षत्वम्। गर्भविमोचने एकाक्षरकोषः

षुट्ट अनादरे चु०उभ० सक० सेट्। सुट्टयति ते असुषुट्टत् त।

षुम्भ दीपने अक०हिंसने स०भ्वा०प०सेट्। सुम्भति असुम्भीत्

षुर दीप्तौ अक० ऐश्वर्ये स०तु०प० सेट्। सुरति असोरीत्।

षुह तृप्तौ अक०क्षमायां सक०दि०पर०सेट्। सुह्यति सुषोह असुहत्। [सुषुवे असविष्ट असोष्ट।

षू प्रसवे गर्भविमोचने च अदा० आत्म० सक० वेट्। सूते

षू प्रसवे दि०आ०स०वेट्। सूयते असविष्ट-असोष्ट सोढ़ा सूनः

षू क्षेपे प्रेरणे च तुदा० पर० सक० वेट्। सुवति असावीत्।

षूद निशारणे भ्वा०आ० सक० सेट्। सूदते असूदिष्ट।

षूद मारणे भ्वा० पर० सक० सेट्। सूदति असूदीत्।

षूद क्षरणे अक० प्रतिज्ञायां निरासे च सक० चुरा०उभ० सेट्। सूदयति ते असुषूदत् त। [रिष्ट ईदित् सूर्णः।

षूर स्तम्भे अक० हिंसने स० दि०आ०सेट्। सूर्यते असू०

षूर्क्ष अनादरे भ्वा० पर० सक० सेट्। सूर्क्षति असूर्क्षीत्।

षूर्क्ष्य ईर्ष्यायां भ्वा० पर० सक० सेट्। सूर्क्ष्यति असूर्क्ष्यीत्।

षूष प्रसवे भ्वा० पर० सक० सेट्। सूषति असूषीत्।

षृम्भ हिंसने भ्वा० पर० सक० सेट्। सृम्भति असृम्भीत्।

षृभ हिंसने भ्वा० पर० सक० सेट्। सर्भति असर्भीत्। षृम्भ षृभधातू पाणिनीयगणपाठे मूर्च्छ्यादितया पठितौ। तेन सोपदेशत्वात् षति निमित्ते षत्वम्। कविकल्पद्रुमे तु दन्त्यादितया पठितौ। तेन षति निमित्ते न षत्वम। तन्मतम् अपाणिनीयत्वादुपेक्ष्यम्।

षेक सर्पणे भ्वा० आत्म० सक०सेट् ऋदित् चङि न ह्रस्वः। सेकते असेकीत्। [ह्रस्वः। सेकति असेकीत्।

षेल याचने गतौ च भ्वा० पर० सक० सेट् ऋदित् चङि न

षेव आराधने उपभोगे आश्रये च भ्वा० उभ०सक०सेट् ऋदित् चङि न ह्रस्वः। सेवति सेवते असेवीत् असेविष्ट।

षै क्षये भ्वा० पर० अक० अनिट्। सायति असासीत्।

षो नाशे दि०पर० सक० अनिट्। स्यति असात्-असासीत्।

अव+समाप्तौ अवसाने ज्ञाने सक० अवस्यति।

अधि+अव+ उद्वाहे अक०निश्चय याने सक० अध्यवस्यति । वि+अव+विशेषेण निश्चये सक० उद्यमे अक० व्यवस्यति । अनु+वि+अव ज्ञानज्ञाने अनुव्यवसायः घटमहं जानामीत्यादिरूपः । [षड्दन्तयोग्यवयस्के इत्यादौ ।

षोडत् पु० षट् दन्ता यस्य दन्तस्य दत् षस्य उत्वं दस्य ष्टुत्वम् ।

षोडशन् त्रि० ब०व० षडधिका दश षस्य उत्वं दस्य ष्टुत्वम् । (षोल) १संख्याभेदे २तत्संख्यान्विते च ।

षोडश पु० षोडशानां पूरणः डट् । येन षोडशसंख्या पूर्य्यते १तस्मिन् । चन्द्रमण्डलस्य २षोडशभागरूपकलायां ३तिथिपुराणग्रन्थयोश्च स्त्री ङीप् । "काली तारा महाविद्या षोडशी भुवनेश्वरी" तन्त्रसा० ।

षोडशक न० षोडश परिमाणमस्य कन् । षोडशसंख्याते वस्तुनि "भूम्यासनं जलं वस्त्रं प्रदीपोऽन्नं ततः परम् । ताम्बूलच्छत्रगन्धाश्च माल्यं फलमतः परम् । शय्या च पादुका गावः काञ्चनं रजतं तथा । दानमेतत् षोडशकं प्रेतमुद्दिश्य दीयते" शु०त० उक्तेषु प्रेतोद्देशेन दीयमानेषु २षोडशसु भूम्यादिषु "स्वर्णं रौप्यं तथा ताम्रं कांस्यं गावो गजा हयाः । गृहं भूमिस्तिलो वस्त्रं शय्या सोपानहौ । दातव्यं पितृयज्ञेषु दानं षोडशकं मतम्" इति वायुपुराणोक्तेषु पितृकृत्येषु देयेषु ३स्वर्णादिषु षोडशसु च ।

षोडशभुजा स्त्री षोडश भुजा यस्याः । दुर्गामूर्त्तिभेदे "यदा तु षोडशभुजां महामायां प्रपूजयेत् । दुर्गातन्त्रेण मन्त्रेण विशेषं तत्र वै शृणु । कन्यायां कृष्णपक्षस्य एकादश्यामुपोषितः । द्वादश्यामेकभक्तन्तु नक्तं कुर्य्यात् परेऽहनि । चतुर्दश्यां महामायां बोधयित्वा विधानतः । गीतवादित्रनिर्घोषैर्नानानैवेद्यवेदनैः । अयाचितं बुधः कुर्य्यात् उपवासं परेऽहनि । एवमेव व्रतं कुर्य्यात् यावद्वै नवमी भवेत्" कालिकापु० ५८अ० ।

षोडशमातृका स्त्री ब०व० षोडशसंख्या मातरः स्वार्थे क । "गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः । शान्तिः पुष्टिर्धृतिस्तुष्टिः कुलदेवात्मदेवता" इत्युक्तासु गौर्य्यादिषु षोडशसु मातृकासु ।

षोडशर्त्त्विज् पु० कर्म० । होमादिषु षोडशसु ऋत्विक्षु ते च आश्वलायनसूत्रे ८५ पृ० दर्शिताः । तत्साध्यश्च यागः सोमयागादिः सत्रयागश्च ।

षोडशाङ्ग पु० षोडश द्रव्याणि अङ्गान्यस्य । "गुग्गुलु सरलं दारु पत्रं मलयजमथ वा । ह्रीवेरमगुरुं कुष्ठं गुडं सर्जरसं घनम् । हरीतकीं नखीं लाक्षां जटामांसीञ्च शैलजम् । षोडशाङ्गं विदुर्धूपं दैवे पैत्रे च कर्मणि" इत्युक्ते गुग्गुल्वादिषोडशद्रव्यरचिते धूपे तन्त्रसा० ।

षोडशाङ्घ्रि पु० षोडश अङ्घ्रयश्चरणा यस्य । कर्कटे हेमच० ।

षोडशांशु पु० षोडश अंशवो यस्य । शुक्रग्रहे शब्दमा० । षोडशार्च्चिरप्यत्र ।

षोडशार न० षोडश अराः कोणाकार इव वा यस्य । १षोडशदलयुक्ते कमले तन्त्रोक्ते २यन्त्रभेदे च । तुलादानाद्युक्ते १चक्रभेदे षोडशारचक्रनिर्माणप्रकारस्तु तुलादानादिपद्धतौ विधानपारिजाताद्युक्तोऽस्माभिर्दर्शितो यथा "शुचवेदिमध्ये त्रिहस्तदीर्घविस्तारं चतुरस्रं प्रसाध्य तत्र प्राक्पश्चिमयोर्दक्षिणोत्तरतश्च नव नव रेखाः कृत्वा चतुःषष्टिकोष्ठकं मण्डलं कुर्य्यात् । तत्र च सर्वाणि कोष्ठानि षडङ्गुलदीर्घायामानि सम्पद्यन्ते । तत्र बाह्यासु पङ्क्तिषु चतुर्दिक्षु मध्ये पार्श्वयोः द्वे द्वे कोष्ठे परित्यज्य चत्वारि कोष्ठानि मार्जयित्वा चतुःकोष्ठानामेकतां सम्पाद्य तत्संलग्नोपान्त्यपङ्क्तिषु द्वे द्वे मध्यकोष्ठे पार्श्वयोः त्रीणि त्रीणि कोष्ठानि त्यक्त्वा मार्जयेत्तेन चतुर्दिक्षु षट् षट्कोष्ठात्मकानि चत्वारि द्वाराणि जायन्ते । ततो मध्यस्थानि षोडश कोष्ठानि प्रतिदिशं चत्वारि चत्वारि कोष्ठानि परित्यज्य मार्जयेत् । ततो बाह्यपङ्क्तिषु एकैकं कोणगं कोष्ठमुत्सृज्य कोणकोष्ठद्वारपीठान्तरालवर्त्तीनि पञ्च पञ्च कोष्ठानि प्रतिदिशं मार्जयेत् । तेन मध्यचतुरस्रपीठस्य पादाः भवन्ति । ततः मध्यपीठमारभ्य क्रमशश्चत्वारि वृत्तानि कुर्य्यात् । तत्राद्ये चतुरङ्गुलो द्वितीयेऽष्टाङ्गुलस्तृतीये चतुर्विंशत्यङ्गुलः चतुर्थे च षड्विंशत्यङ्गुलो व्यासः । तत्राद्यं चतुरङ्गुलव्यासकं वृत्तं कर्णिकारूपं पीतेन रजसा पूरयित्वा कर्णिकावधि रेखां सितेन रजसा विदध्यात् । तद्बहिरष्टाङ्गुलव्यासे द्वितीयवृत्ते क्रमेण पीतरक्तासितरजोभिः सम्पादितमध्यमूलाग्राणि षोडश केशराणि कृत्वा केशरावधिरेखां सितेनैव रजसाकुण्ठितां कुर्य्यात् । ततस्तद्बहिश्चतुर्विंशत्यङ्गुलव्यासे तृतीयवृत्ते अष्ट द्विरष्टौ पत्राणि सितरजसा विधाय रक्ताग्राणि कुर्य्यात् । ततो दलान्तरेषु सितेन रजसा रेखां विधाय दलमध्यानि कृष्णेन रजसा पूरयेत् । तद्बहिरेकाङ्गुलान्तरालां बहिर्वृत्तस्य चतुर्थरेखां सितरजसा संपाद्य तृतीयचतुर्थवृत्तद्वयान्तरस्थानेषु

परितोऽष्टस्वाग्रतत्सन्धिषु षोडशभिः पद्मैः षोडशधा विभज्य प्रतिभागं यथाकारान् षोडशारान् श्यामपीतकृष्णश्वेतरजोभिः कल्पयित्वा तन्मध्यं यथायोगं रजोभिः पूरयेत्। तद्बहिः सितपीतारुणश्यामहरिताः पञ्च रेखाः क्रमशो लिखेत्। तद्बहिः पीठक्षेत्रचतुरस्रं यथाशोभं रजोभिरलङ्कृत्य पीठावधिरेखां सितेन रजसा कृत्वा द्वारक्षेत्राणि पूर्वादितः पीतश्वेतश्यामहरितरजोभिः पूरयेत्। तत्र आग्नेयादिकोणस्थकोष्ठचतुष्टयं क्रमेण लोहितहरितश्यामधवलैः पूरयित्वा आग्नेयादिपीठपादचतुष्टयं पद्मकोणात्मकं क्रमात् सितरक्तपीतकृष्णरजोभिः पूरयेत्। ततः सितेन रजसाङ्गुलीस्थितेन बहिश्चतुरस्ररेखां कुर्य्यात्। ततः प्राच्यां वज्रम्, आग्नेय्यां शक्तिं, दक्षिणे दण्डं, नैरृत्यां खड्गं, पश्चिमायां पाशं, वायव्यां ध्वजं, कौबेर्य्यां गदाम्, ऐशान्यां शूलं तद्वामे चक्रं, प्राग्दक्षिणे पद्मञ्च लिखेत्"।

षोड़शिन् पु० षोडश कला विद्यन्तेऽस्य इनि। १सोमे २यज्ञाङ्गे तद्यागसोमरसस्थापनपात्रे च "अतिरात्रे षोडशिनं गृह्णातीति" श्रुतिः "षोडशिनः पात्रं खादिरं चतुरस्रम्" कात्या०श्रौ० १।२ कर्कपद्धतिः।

षोडशोपचार पु० ब० व० षोडशसङ्ख्याता उपचाराः। "आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्। मधुपर्काचमस्नानं वसनाभरणानि च। गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा" इत्युक्तेषु षोडशसु पूजाङ्गद्रव्येषु।

षोढा अव्य० षट् प्रकाराः धाच् षष उत्वं धस्य ढुत्वम्। षट्सु प्रकारेषु।

षोढान्यास पु० षोढा षट्प्रकारो न्यासः। तन्त्रोक्ते षट्प्रकारन्यासभेदे षोढान्यासप्रकारो यथा वीरतन्त्रे 'केवलां मातृकां न्यस्य मातृकां तारसंपुटाम्। मातृकापुटितं तारं न्यसेत् साधकसत्तमः। श्रीबीजपुटितां तान्तु मातृकापुटितं तु तत्। कामेन पुटितां देवीं तत्पुटं काममेव च। शक्त्या च पुटितां देवीं शक्तिञ्च तत्पुटां न्यसेत्। क्लीं इत्यस्य पुनर्न्यस्य। स्मरबीजस्य पूर्ववत्। मूलेन पुटितां देवीं तत्पुटं मन्त्रमेव च। अनुलोमविलोमेन न्यस्य मन्त्रं यथाविधि। मूलेनाष्टशतं कुर्य्यात् व्यापकं तदनन्तरम्"। काशीतारादिषोढान्यासास्तन्त्रसारे दृश्याः। [कीत् घटादि० स्तकयति।

ष्टक प्रतीघाते भ्वा० पर० सक० सेट्। स्तकति अस्ता(स्त)-

ष्टग संवरणे भ्वा०प०सक सेट् एदित् सिचि न वृद्धिः घटा०। स्तगति अस्तगीत्। [नीत् अस्तनीत् स्ता(स्त)नयति।

ष्टन शब्दे भ्वा०पर० सक० सेट् वा घटा०। स्तनति अस्ता-

ष्टभ स्तम्भे अक० स्तम्भने सक० भ्वा० आत्म० सेट् इदित्। स्तम्भते अस्तम्भिष्ट।

ष्टम वैकल्ये चुरा० उ०अ० सेट्। स्तमयति ते अतस्तमत् त

ष्टम् वैकल्ये अक० भ्वा० पर० सेट्। स्तमति अस्तमीत्।

ष्टिघ अभियोगे स्वा०आत्म०सक० सेट्। स्तिघ्नुते अस्तेघिष्ट।

ष्टिप क्षरणे भ्वा०आत्म०अक० सेट् ऋदित् चङि न ह्रस्वः। स्तेपते अस्तेपिष्ट। अतिष्टेपत् त।

ष्टिम आर्द्रे दि०प०अक० सेट्। स्तिम्यति अस्तेमीत् स्तेमनम्

ष्टीम आर्द्रे दि०प०अ०सेट्। स्तीम्यति अस्तीमीत् स्तीमनम्।

ष्टु स्तुतौ अदा०उ० सक०अनिट् सिचि सेट् लिटि नित्येट्। स्तौति स्तवीति स्तुतः स्तुवीतः स्तुते स्तुवीत वि०को० मुग्धबोधमते आर्षात न इट् स्तुते इत्येवेति भेदः। अस्तावीत् अस्तोष्ट। तुष्टाव। तादाद्यार्धधातुके वेट्। स्तोता स्तविता। स्तोष्यति स्तुतः।

ष्टुच प्रसादे अक० भ्वा० आत्म० सेट्। स्तोचते अस्तोचिष्ट।

ष्टुभ स्तम्भे अक० स्तम्भने सक० भ्वा०आत्म० सेट् क्त्वा वेट्। स्तोभते अस्तोभिष्ट। [अतुष्टूपत् त स्तूपः।

ष्टूप उच्छ्राये चुरा० उभ० सक० सेट्। स्तूपयति ते

ष्टूप उच्छ्राये दि०पर०अक०सेट्। स्तूप्यति इरित् अस्तूपत् अस्तूपीत्।

ष्टृक्ष गतौ भ्वा०प०स०सेट्। स्तृक्षति अस्तृक्षीत् तरीतृक्ष्यते

ष्टृह वधे तु०प०सक०वेट्। स्तृहति अस्तर्हीत् अस्तृक्षत्।

ष्टृंह वधे तु०आत्म०सक०वेट्। स्तृंहति अस्तृंहीत् अस्तृङ्क्षत्

ष्टेप क्षरणे भ्वा० आ० अक० सेट् ऋदित् चङि न ह्रस्वः। स्तेपते अस्तेपिष्ट।

ष्टै वेष्टने सक० भ्वा० पर० अनिट्। स्तायति अस्तासीत्।

ष्ट्यै संहतौ ध्वनौ च अक० भ्वा० पर० अनिट्। स्त्यायति। अस्त्यासीत् इत्येके। ष्ट्यायति इत्यन्ये।

ष्ठग संवरणे भ्वा० पर० सक० सेट् घटा० सिचि न वृद्धिः। स्थगति अस्थगीत्।

ष्ठल स्थितौ भ्वा०प०अक० सेट् ज्वला०। स्थलति अस्थालीत्।

ष्ठस निरासे दि०प०स०सेट्। स्थस्यति अस्थासीत् अस्थसीत्।

ष्ठा गतिनिवृत्तौ भ्वा०पर० अक० अनिट्। तिष्ठति अस्थात्।

अधि+आधारतयावस्थितौ सक०।

अनु+करणे अनुष्ठानम्।

अव+अवस्थाने अवस्थाने

उद्+ऊर्द्ध्वचेष्टायां पा॰ आसनादुत्तिष्ठति उत्पत्तौ आ॰ ग्रामादुत्तिष्ठते (उत्पद्यते)।
उप+सेवने सक॰ आ॰ उपतिष्ठते देवम्।
नि+नितरां स्थितौ अक॰ नितष्ठौ मरणे च निष्ठा।
प्र+गमने सक॰ प्रस्थानम्।
प्रति+संस्कारभेदे प्रतिष्ठा।
प्रति+अव+प्रतिपक्षतयाऽवस्थाने आत्म॰ प्रत्यवतिष्ठते।
वि+अव+नियमभेदे आ॰ व्यवतिष्ठते व्यवस्था।
सम+सम्यक् स्थितौ नाशे च संस्था संस्थितः।

ष्ठिव् निरासे (मुखेन श्लेष्मादेर्वमने) भ्वा॰ पर॰ सक॰ सेट्। ष्ठीवति अष्ठेवीत्। ष्ठे(ष्ठी)वनम् उदित् क्त्वा वेट्। अस्यार्थे दिवादित्वमपि ष्ठीव्यति। षोपदेशपर्य्युदासे ष्ठस्व दीर्घमध्ययोर्ग्रहणम्। [ष्ठीवति अष्ठीवीत् ष्ठीवनम्।

ष्ठीव निरासे (श्लेष्मादेर्मुखेन वमने) भ्वा॰ पर॰सक॰सेट्।

ष्ठ्यूत त्रि॰ ष्ठिव-क्त ऊठ्। १निरस्ते २वान्ते च।

ष्णस निरासे दि॰पर॰सक॰ सेट् उदित् क्त्वा वेट् वा घटा॰ लृदित्। ष्णस्यति अष्णसत्। ष्ण(स्न)सयति।

ष्णा शौचे अदा॰ पर॰ अक॰ अनिट्। स्नाति अस्नासीत्।

ष्णिह प्रीतौ दि॰ पर॰ सक॰ वा इट् वेट्। स्निह्यति लृदित् अस्निहत् स्नेहिता स्नेढा-स्नेग्धा। [अशिष्णिहत् त।

ष्णिह स्नेहयुक्तभवने चु॰उभ॰ अक॰ सेट्। स्नेहयति ते।

ष्णु स्तुतौ अदा॰उ॰ सक॰सेट्। स्नौति अस्नावीत् अस्नविष्ट।

ष्णुच सेचने भ्वा॰आ॰सक॰सेट्। स्नोचते अस्नोचिष्ट सुष्णुचे

ष्णुस भक्षे दि॰प॰सक॰ सेट्। स्नुस्यति अस्नोसीत् सुष्णोस।

ष्णुह उद्गारे दि॰पर॰ सक॰ वा इट् वेट्। स्नुह्यति लृदित् अस्नुहत्। स्नोहित स्नोढा।

ष्णै वेष्टे भ्वा॰पर॰सक॰ अनिट्। स्नायति अस्नासीत्। ण्यन्ते इत्येके स्नापयति अस्नापयीत्। स्नु(स्ना)पयति उपसृष्टस्य प्रस्नापयति।

ष्मि ईषद्धास्ये भ्वा॰आ॰अ॰अनिट्। स्मयते अस्मेष्ट सिष्मिये। कर्त्तृजन्ये विस्मये णिचि इत आत् पुक् च आ॰ विस्मापते तदन्यत्र विस्माययतीत्येव।

ष्वक्क गतौ भ्वा॰ आत्म॰ सक॰ सेट्। ष्वक्कते अष्वक्किष्ट।

ष्वद स्वादे छेदने च चु॰ उभ॰ सक॰ सेट्। स्वादयति ते असिष्वदत् त।

ष्वद प्रीतौ वेष्टने च भ्वा॰आ॰सक॰सेट्। स्वदते अस्वदिष्ट।

ष्वन्ज आलिङ्गने भ्वा॰आ॰स॰ अनिट्। स्वजते अस्वङ्क्त।

ष्वप शयने निद्रायाञ्च अदा॰स्वपा॰अ॰वा॰पर॰अक॰ अनिट्। स्वपिति अस्वाप्सीत् सुष्वाप। [यति त असूषुपत् त।

ष्वर्त्त गतौ सक॰ दुःखेन जीवने अक॰ चु॰उ॰ सेट्। स्वर्त्त-

ष्वष्क गतौ भ्वा॰ आत्म॰ सक॰ सेट्। ष्वष्कते अष्वष्किष्ट। षोपदेश पर्य्युदासे ष्वक्कवत् ष्वष्कस्यापि ग्रहणात् ष्वष्कते इत्येवेत्याहुः।

ष्विद मोहे स्नेहे च अक॰ मोचने सक॰भ्वा॰ आ॰ लुङि उ॰ सेट्। स्वेदते अस्विदत् अस्वेदिष्ट। [असिस्विदत्।

ष्विद गात्रप्रक्षरणे अक॰दि॰पर॰ अनिट्। स्विद्यति लृदित्

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य-सङ्कलिते वाचस्पत्याभिधाने षकारादि शब्दार्थसङ्कलनम्।

स

सकार ऊष्मवर्णभेदः तस्योच्चारणस्थानं दन्तमूलं तस्योच्चारणे आभ्यन्तरप्रयत्नः विवृतं जिह्वाग्रेण अर्द्धस्पर्शनेन चोच्चार्य्यमाणत्वात् अर्द्धस्पृष्टम्। बाह्यप्रयत्ना विवारश्वासाघोषाः महाप्राणश्च अस्य ध्येयरूपं यथा "सकारं शृणु चार्वङ्गि! शक्तिबीजं परात्परम्। कोटिविद्युल्लताकारं कुण्डलीत्रयसंयुतम्। पञ्चदेवमयं देवि! पञ्चप्राणात्मकं सदा। रजःसत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा" कामधेनुत॰। तस्याधिष्ठातृदेवतारूपं यथा "शुक्लाम्बरां शुक्लवर्णां द्विभुजां रक्तलोचनाम्। श्वेतचन्दनलिप्ताङ्गीं मुक्ताहारोपशोभिताम्। गन्धर्वगीयमानाञ्च सदानन्दमयीं पराम्। अष्टसिद्धिप्रदां नित्यां भक्तानन्दविवर्द्धिनीम्। एवं ध्यात्वा सकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारत॰ अस्य वाचकशब्दाः "साहंसः सुयशा विष्णुर्ज्ञानीशः चन्द्रसंज्ञकः। जगद्बीजं शक्तिनामा सोऽहं वेशवती भृगुः। प्रकृतिरीश्वरः शुक्रः प्रभा श्वेता कुलोज्ज्वलः। दक्षपादोऽमृतं ब्राह्मी परमात्मा परोऽव्ययः। सुरूपा च शुभेगो गौः कलकण्ठो हकोदरी। प्राणाद्या च परा देवी लक्ष्मीः सोमो हिरण्यपूः। दुर्गोत्तारणसञ्ज्ञो हा जीवो मूर्त्तिर्मनोहरः" वर्णाभिधा॰। मातृकान्यासेऽस्य दक्षपादे न्यास्यता। काव्यादौ प्रयोगे फलं सुखम् "सः सौख्यं हस्तु खेदम्" वृ॰र॰टी॰। षोपदेशधातूनां प्रयोगे दन्त्यादित्वम् "सकारजः षकारश्चेत्युक्तेः सति निमित्ते पुनः षत्वम्।

स पु॰ सो-ड। १विष्णौ एकार्थसंग्रहः। २सर्पे ३ईश्वरे शङ्कर॰ ४विहगे पुंस्त्री॰ एकाक्षरकोषः। समासे पूर्वपदस्य

५सङ्घार्थे ६समासार्थे च यथा सपितृकं सस्नुप इत्यादि । "सोऽन्तगुरुः कथितोऽन्तलघुस्तः" छन्दः० मास्त उक्ते ७अन्तगुरुके आदिलघुद्वयके द्वर्णगणे पु० । सगणोऽप्यत्र ।

संक्षेप पु० सम्+क्षिप-घञ् । भूयसोऽर्थस्याल्पवाक्यादिना-प्रकाशने भरतः । ल्युट् । तत्रार्थे न० । वर्गस्य मः स्थाने झरिपरे वा परसवर्णः पञ्चमवर्णः ।

संक्षोभ पु० सम्+क्षुभ-घञ् । चाञ्चल्ये क्षोभे च वा ङ ।

संग्राहिन् पु० सम्+ग्रह-णिनि । १कुटजवृक्षे राजनि० । २संग्रहकारके ३धारके च । वा ङ् सङ्ग्राहीति रूपम् ।

संघ पु० सम्+हन-ड नि० । १समूहे २जन्तुसमूहे च अमर सङ्घ वा ङ् । सङ्घ इति वा रूपम् ।

संघट्ट पु० सम्+घट्ट-भावे अच् । १अन्योन्यविमर्दे २गठने च "महाभरचसंघट्ट प्रतिज्ञाज्ञानमेव च" ति०त० । ३लतायां स्त्री शब्दच० । ल्युट् । तत्रार्थे न० ।

संघर्ष पु० सम्+घृष-घञ् । १अन्योन्यद्वन्द्वयोगे स्पर्द्धायां २संमर्दने च शब्दर० वा ङ् ।

संज्ञ न० सम्+ज्ञा-क । १पीतकाष्ठे कालीयके गन्धद्रव्ये शब्दच० । सम्+ज्ञा-अङ् । २चेतनायां ३बुद्धौ ४आख्यायां ५हस्ताद्यैरर्थसूचने च स्त्री अमरः । ६गायत्र्यां ७सूर्यपत्न्याञ्च स्त्री मेदि० । वा अ । ८संहतजानुके त्रि० माङ्गाङ्कः ।

संज्ञापन सम्+ज्ञा-णिच्-पुक् मारणे चुरा० ल्युट् । १मारणे अमरः । २ज्ञापने न शब्दः । क्तिन् । संज्ञप्ति-रप्यत्र स्त्री हेमच० वा अ ।

संज्ञासुत पु० संज्ञायाः सूर्यपत्न्याः सुतः । शनैश्चरे ।

संज्ञु त्रि० संहते जानुनी यस्य जानुस्थाने ज्ञुः । संहत-जानुके अमरः । वा अ । [अ ।

संज्वर पु० सम्+ज्वर-अप् । अग्निजाते तापे अमरः वा

संमर्द पु०सम्+मृद-घञ् । अन्योन्यद्वन्द्वसंयोगरूपे संघर्षे वा मः

संय पु० सं+यम्-ड । कङ्काले शब्दमा० । [यमे च ।

संयत त्रि० सम्+यम-क्त । १बद्धे अमरः २कृतयमाद्योगनि-

संयत् स्त्री संयम्यतेऽत्र सम्+यम-आधारे क्विप् तुक् च । १युद्धे अमरः । कर्त्तरि क्विप् । २संयमनकर्त्तरि त्रि० ।

संयत्वर पु० सम्+यम-करप् तुक् च । १जन्तुसमूहे २वाग्यते त्रि० संक्षिप्तसा० ।

संयद्वर पु० ६त० । नियन्तॄणां वरे नृपे उणादि० ।

संयद्वाम पु०वामं संयाति सम्+या-शतृ पृषो०पूर्वनिपातः । छान्दोग्ये "एतं हि सर्वाणि प्रवत संयद्वाम इत्या-चक्षते एतं हि सर्वाणि वामान्यभिसंयन्ति" छान्दोग्योप० ।

संयन्तृ त्रि० संयच्छति सम्+यम-तृच् । नियन्तरि ।

संय(या)म पु० सम्+यम-घञ् वा वृद्धिः । व्रताङ्गतया पूर्व-दिनकर्त्तव्ये १नियमभेदे अमरः २इन्द्रियनिग्रहे ३बन्धने च

संयमन न० सम्+यम-ल्युट् । १बन्धने २व्रतभेदे मेदि० ३चतुःशालके गृहे च भरतः । यम-णिच्-ल्यु । ४यमे पु० "वैवस्वतः संयमनः" श्रुतिः ।

संयमनी स्त्री संयम्यते बध्यतेऽत्र सम्+यम-आधारे ल्युट् । यमाधिकृतपुर्य्याम् मेदि० "अन्येऽपि ये संयमिनः संयमन्यां प्रयान्ति ते" काशीख० ८अ० । यमसभावर्णनं भा०स० ८अ०दृश्यम् । संयमननगरपरत्वे न० "एतत् संयमनं पुण्यमतीवाद्भुतदर्शनम्" भा०व० १६२अ० ।

संयमिन् पु०सम्+यम-णिनि न वृद्धिः । १ऋषिभेदे धरणिः २इन्द्रियसंयमयुते त्रि० गीता ।

संयाव पु० सम्यक् घृतादिभिर्यूयते मिश्रयते गोधूमचूर्णादात्र सम्+यु-आधारे घञ् । "संयावस्तु घृतक्षीरगुडगोधूम-पाकजः" इत्युक्ते घृतादिना पक्वगोधूमचूर्णे शब्दच० ।

संयुज् त्रि० सम्यक् युनक्ति सम्+युज-क्विन् । १गुणाढ्ये त्रिका० २संयुक्ते च । [रिते हल्वर्णे च पा० ।

संयुक्त त्रि० सम्+युज-क्त । १संयोगयुते पदार्थे २अव्यवधान-

संयुग न० संयुज्यतेऽत्र सम्+युज-क न्यङ्क्वा० जस्य गः । युद्धे अमरः । तत्र साधु० खञ् । सांयुगीन रणसाधौ ।

संयुत त्रि० सम्+यु-क्त । संयुक्ते ।

संयोग पु० सम्+युज-घञ् । १मेलने क्रियाजन्ये द्रव्याश्रिते गुणभेदे २सम्बन्धमात्रे च "अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः । कीर्त्तितस्त्रिविधस्त्वेष आद्योऽन्यतर-कर्मजः । तथोभयोः कर्मजन्यो भवेत् संयोगजोऽपरः । आदिमः श्येनशैलादिसंयोगः परिकीर्त्तितः । मेषयोः सन्निपातो यः स द्वितीय उदाहृतः । कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः । तृतीयः स्यात् कर्मजोऽपि द्विधैव परिकीर्त्तितः । अभिघातो नोदनञ्च शब्दहेतुरिहादिमः । शब्दाहेतुर्द्वितीयः स्यात्" भाषा० "उदयात् प्राक् दशम्यास्तु शेषः संयोग उच्यते । उपरिष्टात् प्रवेशस्तु तस्मात् तत् परिवर्जयेत्" ति०त० उक्ते उदयात् प्राक् दशम्याः शेषे च ।

संयोगपृथक्त्व न० संयोगेन फलसम्बन्धभेदेन पृथक्त्वं नानारूपत्वं यत्र । एकस्यैव कर्मणो नित्यानित्यत्वप्रतिपादके मीमांसकोक्ते न्यायभेदे स च तत्त्वबो० दर्शितो यथा

"अग्नीषोमीयपशौ श्रूयते "खादिरे पशुं बध्नाति खादिरं वीर्य्यकामस्य यूपं कुर्वीत"। अत्र पशुबन्धनाय यूपोविहितः स च नित्यत्वेनावश्यकः यागसाधनत्वात् पशुकामनावतश्च अन्योयूपोविहितः स च कामनाधीनत्वादनावश्यकः। अत्र संशयः किं काम्य एव खादिरो नित्येऽपि स्यात् उत एकः खादिरः क्रतुपुरुषोभयार्थः उत काम्य एव खादिरो नित्यस्त्वन्यकाष्ठनिर्म्मित इति। तत्र काम्यनित्यप्रयोगाद्भुता न सम्भवति कामनाधीनत्वेन तस्यानावश्यकत्वात् नित्यस्यावश्यकः नह्येकस्यावश्यकत्वमनावश्यकत्वञ्च सम्भवति विरोधात्। तस्मात् काम्य एव खादिरः नित्यस्त्वन्यकाष्ठनिर्म्मितः। तदुक्तं शास्त्रदीपिकायाम् एतदधिकरणीयोदाहरणान्तरे "दध्ना जुहोति दध्नेन्द्रियकामस्येत्यधिकृत्य"पूर्वाधिकरणन्यायात् काम्यत्वेन श्रुतं दधि। अनित्यार्थमुपादेयमतोऽन्यन्नित्यमिष्यताम्"। अन्यद्द्रव्यान्तरं पूर्वाधिकरणन्यायात् प्रागुक्तोपपन्नन्यायात्। माधवाचार्य्योऽपि "नित्येऽग्निहोत्रे पूर्वाधिकरणन्यायेन दधि न प्रयोक्तव्यं किन्तु अन्यदेव किञ्चित् द्रव्यम्" इत्याह। ननु नित्येऽपि खादिर एव श्रूयते अतो नित्य एकः खादिरः काम्यस्त्वन्यः खादिर इति यूपद्वयं विधीयते अन्यथा नित्ये खादिरत्वाभिधानं व्यर्थं स्यात् तथा च न विरोधः येनैकस्योभयार्थत्वे विरोधमाशङ्क्य समाहितमिति चेन्न खादिरेण वीर्य्यं कुर्य्यादित्यर्थकत्वपर्य्यवसन्नं खादिरत्वाभिधानं व्यर्थमिति तस्मान्नित्ये खादिराविधानात् काम्य एव खादिरः नित्यस्तु काष्ठान्तरीय इति प्राप्ते आह "एकस्य तूभयत्वे संयोगपृथक्त्वम्" सू०। संयोगः सम्बन्धः एकस्य खादिरस्य नित्यत्वकाम्यत्वोभयरूपत्वे संयोगस्य पशुसम्बन्धस्य पृथक्त्वं परस्परनिरपेक्षेण पृथगभिधानं नियामकमिति शेषः। अयमाशयः यदि द्वयोरेकस्य साकाङ्क्षा तदा द्वयोरेकवाक्यता इह तु उभयमेव निराकाङ्क्षं तथा हि नित्यवाक्यं यूपस्य पशुबन्धनसम्बन्धे अलौकिकं किमपि नापेक्षते पशुबन्धनदृष्टफलत्वात् काम्यवाक्यमनुपन्यस्याभिधानाच्च। काम्यवाक्यमपि आम्नायस्यान्यतरं किमपि प्रमाणं नापेक्षते सन्निधानादेवान्यलाभे हि तथा स्यात् पृथक्पृथक् संयोगस्य निरपेक्षेण वाक्यद्वयेनाभिधानात् कामनाभावे च खादिरं दृष्टफलद्वारा क्रतोरुपकरिष्यति पुरुषस्य वीर्य्यमप्यावक्ष्यति। किन्त्वयं विशेषः कामनाभावे तदुपकारेण पुरुषार्थस्याभावेन न कार्य्यं इति। तदुक्तम् "द्वयोरेकस्य साकाङ्क्षा भवेद्यदि तयोस्ततः। प्रकल्प्येतैकवाक्यत्वं निराकाङ्क्षत्वेऽतोभयमिति" तस्मादुभयार्थो खादिरतेति। ननु नित्य एव खादिरोऽस्तु खादिरमित्यादिनाऽस्य प्रशंसार्थं फलश्रुत्यर्थवादोऽस्तु यथा यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोति" इत्यत्रेति किमेकस्योभयार्थत्वाङ्गीकारेणेति चेन्न तत्र जुह्वप्राप्तावपि तन्निष्पादकद्रव्यविशेषस्याभावात् तत्परिच्छायकत्वेनैव स्तुत्यर्थवादस्योचित्यात् न चात्र तथा पूर्ववाक्यत एव खादिरत्वप्राप्तौ पुनः खादिरपदाभ्यासेनान्यस्य वीर्यसामर्थ्यकत्वबोधनेनैकप्रयोजनकत्वात्। एवं दध्ना जुहोति दध्नेन्द्रियकामस्य जुहुयादित्यादावपि उभयार्थता दध्नो बोध्या उभयत्र दध्नः कीर्त्तनात्"।

संयोगविरुद्ध न० संयोगेन विरुद्धम्। द्रव्यान्तरसंयोगेन विरुद्धगुणाश्रये द्रव्यभेदे तच्च राजवल्लभेन दर्शितं यथा "शाकाम्लफलपिण्याककुलत्थलवणाम्लिकैः। करीरदधिमाषैश्च प्रायः क्षीरं विरुध्यते। प्राणहारी तु हारीतो हरिद्राज्वलनैः श्रुतः। हरीतः कानकैर्भृष्टं विषं मायूरमामिषम्। वराहवसया भृष्टा बलाका तु हरत्यसून्। संयुक्ता सैव वारुण्या कुल्माषैश्च विरुध्यते। अविं लशुनपाकेन मत्स्यतैलैः कथां त्यजेत्। मांसैरिक्षुविकारांश्च काञ्जिकैस्तिलशष्कुलीम्। कपोतः सार्षपे भृष्टो हतं कांस्ये दशाहिकम्। विषं घृतसमं क्षौद्रं मधुना नागनाम्नु च। मूलकं माषसूपेन मधुना च न भक्षयेत्। एकत्र सर्वमांसानि विरुध्यन्ते परस्परम्। रक्तव्यथीसर्पदकोदराणां विस्फोटिकोन्मादभगन्दराणाम्। मूर्च्छामदाध्मानगलग्रहाणां पाण्ड्वामयस्याऽऽमविषस्य चैव किलासकुष्ठग्रहणीगदानां शोथातिसारज्वरपीनसानाम्। सन्तानदोषस्य तथैव मृत्योर्विरुद्धमन्नं प्रवदन्ति हेतुम्। विरुद्धाहारजान् रोगान् विनिघ्नन्ति विरेचनम्। वमनं शमनं वापि पूर्वं वा हितसेवनम्"।

संयोजन न० सम्+युज–णिच्–आधारादौ ल्युट्। १मैथुने हारा०। २सम्यग्योजने च। [न्तरेण कृतयोजने पदार्थे

संयोजित त्रि० सम्+युज–णिच्–क्त। कृतमेलने पदार्था-

संरम्भ पु० सम्+रभ–घञ्–मुम् च। १कोपे शब्दर०। २आटोपे त्रिका०। ३उत्साहे मेदि०। ४वेगे च "अहृदिसंरम्भमिभाम्बुवाहम्" इति कुमारः। [चिन्तने च।

संराधन न० सम्+राध–ल्युट्। १सम्यक्सेवने २सम्यक्-

संराव पु० सम्+रु–घञ्। शब्दे अमरः।

संरूढ त्रि॰ सम्+रुह–क्त। १प्ररूढे २जाताङ्कुरे च मेदि॰।

संरोध पु॰ सम्+रुध-घञ्। १रोधने २क्षेपे च मेदि॰।

संलग्न त्रि॰ सम्+लग–क्त। मिलिते।

संलय पु॰ संलीयते इन्द्रियव्यापारोऽत्र सम्+ली-आधारे अच्। १निद्रायां हेमच॰। भावे अच्। २प्रलये च।

संलाप पु॰ सम्+लप-घञ्। १परस्परकथने अमरः। प्रोक्ता अन्योन्याक्तिप्रत्युक्तिभ्यां २भाषणे २रहसि कथने च।

संवत्सर पु॰ संवसन्ति ऋतवोऽत्र सम्+वस–सरन्। १वत्सरे ज्योतिषोक्ते इदादिपञ्चकान्तर्गते २वत्सरभेदे च। इदावत्सरशब्दे ८०६पृ॰ दृश्यम्। [राज्यावधिके तत्प्रवर्त्तितवत्सरे।

संवत् अव्य॰ सम्+वस–क्विप् सलोपे तुक्। विक्रमादित्य-

संवदन न॰ सम्+वद-ल्युट्। १आलोचने २वशीकरणे च मेदि॰। सम्+वन-ल्युट्। संवननमप्यत्र रामाश्रमः।

संवर न॰ सम्+वृ–करणे अप्। १जले। कर्त्तरि अच्। २दैत्यभेदे ३मत्स्यभेदे ४मृगभेदे च पुंस्त्री॰।

संवर्त्त पु॰ सम्यक् वर्त्यते परावर्त्त्यतेऽत्र सम्+वृत-णिच्-आधारे अच्। १प्रलयकाले अमरः। २ऋतिकारकमुनिभेदे ३कर्द्धफलवृक्षे मेदि॰ ४मेघे शब्दच॰ ५मेघनायकभेदे च। "नियुते शाकवर्षे तु चतुर्भिः योजिते क्रमात्। आवर्त्तं विद्धि संवर्त्तं पुष्करं द्रोणमब्दकम्। आवर्त्तो निर्जलो मेघः संवर्त्तश्च बहूदकः। पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः" ज्यो॰त॰।

संवर्त्तक न॰ सम्+वृत–णिच्-ण्वुल्। १बलदेवलाङ्गले २वाडवानले पु॰ हेमच॰। ततः स्वार्थे अच्। ३बलदेवे शब्दर॰। [त्रिका॰।

संवर्त्तकिन् पु॰ संवर्त्तकं लाङ्गलभेदोऽस्त्यस्य इनि। बलरामे

संवर्त्तिका स्त्री सम्यक्वर्त्तिका सम्+वृत–ण्वुल् टापि अत इत्त्वं वा। १दीपादेः शिखायां २पद्मादेः केसरसमीपस्थे दले अमरः ३नवपत्रे मधुसूदनः।

संवर्द्धक त्रि॰ सम्+वृध–णिच्-ण्वुल्। १सम्मानकारिणि हेमच॰ २वृद्धिकारके च।

संवलित त्रि॰ सम्+वल–क्त। मिलिते।

संवसथ पु॰ संविशन्त्यस्मिन् सम्+वस–आधारे अथच्। ग्रामे जनसमूहनिवासस्थाने अमरः।

संवह पु॰ सम्यक् वहति सम्+वह–अच्। सप्तवायुमध्यवर्त्तिनि वायुभेदे आवहशब्दे ७६४पृ॰ दृश्यम्।

संवार पु॰ सम्+वृ–घञ्। शिक्षाग्रन्थोक्ते वर्णोच्चारणार्थे कण्ठनिरोधात्मके बाह्यप्रयत्नभेदे २संगोपने च।

संवास पु॰ संवसत्यत्र सम्+वस-घञ्। १गृहे शब्दच॰। पुरवासिनां पुराद्बहिः सम्भूयोपवेशनाय कृते २स्थाने जटा॰।

संवाह पु॰ संवाहयति सम्+वह–णिच्-अच्। अङ्गसंमर्द्दके भृत्ये जटा॰। ण्वुल्। संवाहक तत्रैव।

संवाहन न॰ सम्+वह–णिच्-ल्युट्। १भारादेर्वाहने २अङ्गसंमर्द्दने च मेदि॰। [प्राप्त्या भयादिना वा जातोत्कण्ठे।

संविग्न त्रि॰ सम्+विज-क्त। १उद्विग्ने इष्टवस्तुलाभाय तद-

संवित्ति स्त्री सम्+विद-क्तिन्। १ज्ञाने शब्दमा॰ २प्रतिपत्तौ ३चेतनायां ४अङ्गीकारे ५बुद्धौ च मेदि॰।

संविद् स्त्री सम्+विद–सम्प॰ क्विप्। १ज्ञाने २प्रतिपत्तौ मेदि॰। ३सम्भाषायां ४बुद्धौ ५क्रियाकारे ६युद्धे ६अङ्गीकारे च अमरः। ७नामनि ८आचारे ९संकेते १०तोषे ११समाधौ च शब्दच॰।

संविदा स्त्री संविद्यतेऽनया सम्+विद–क्विप् टाप्। भङ्गायां (सिद्धि) "संविदासवयोर्मध्ये संविदैव गरीयसी" तन्त्रम्।

संविदित त्रि॰ सम्+विद–क्त। १अङ्गीकृते २सम्यग्ज्ञाते च।

संविद्व्यतिक्रम पु॰ संविदोऽङ्गीकारस्य व्यतिक्रमो यत्र। कृताङ्गीकारस्योल्लङ्घनहेतुके विवादभेदे वीरमि॰तावल्लक्षणं यथा "तस्य स्वरूपं व्यतिरेकमुखेन दर्शयति" नारदः "पाषण्डनैगमादीनां स्थितिः समय उच्यते। समयस्यानपाकर्म तद्विवादपदं स्मृतमिति"। पाषण्डाः वैदिकमार्गद्वेषिणः क्षपणकादयः। नैगमाः सार्थिका वणिज इति मदनरत्ने। नैगमाः वेदप्रामाण्याभ्युपगन्तारः पाशुपतादय इति मिताक्षरायाम्। आदिशब्देन विद्वद्ब्राह्मणसमूहादीनां ग्रहणम्। समयस्यानपाकर्म व्यतिक्रमः संमयापरिपालनमिति यावत् तद्व्यतिक्रमस्थाणं विवादपदमस्तीत्यर्थः। तद्रूपयोग्यार्थमाह बृहस्पतिः "वेदविद्याविदो विप्राः तेषां वृत्तिं प्रकल्पयेत्" इति। याज्ञवल्क्योऽपि "राजा कृत्वा पुरे स्थानं ब्राह्मणान् न्यस्य तत्र तु। त्रैविद्यं वृत्तिमद् ब्रूयात् स्वधर्मः पाल्यतामिति"। ब्राह्मणानां समूहो ब्राह्मण्यम्। "ब्राह्मणमानववाडवाद्यदिति" पा॰ सूत्रेण यत्। विद्या वेदाः तिसृणां विद्यानां समाहारस्त्रिविद्यम्। त्रिविद्यमधीते इति। तेषां वृत्तिं प्रकल्पयेदित्यस्यार्थो बृहस्पतिनैव विवृतः "अनाच्छेद्यकरास्तेभ्यः प्रदद्याद् गृहभूमिकाः। मुक्तभाव्याश्च नृपतिर्लेखयित्वा स्वशासनम्" इति। अनाच्छेद्यकराः अपहृत्यकराः। एतदुक्तं भवति। आगामिन्पतिभिरपाहृत्य-

करा: तेभ्यो भिन्नदकराश्च गृहभूमिकाः प्रदद्यादिति । एवं नियुक्तैर्यत् कर्त्तव्यं तदाह याज्ञवल्क्यः “निजधर्माविरोधेन यस्तु सामयिको भवेत् । सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः” इति । निजधर्माविरोधेन श्रौतस्मार्त्तधर्माविरोधेन सामयिकः समयात्सम्पन्नो यो धर्मो गोप्रचारोदकरक्षणदेवगृहपालनादिरूपः सोऽपि यत्नेन रक्षणीयः । यश्च राज्ञा कृतो निजधर्माविरोधेनैव यः सामयिको धर्मो यावत्पथिकस्याजनस्येयमतदरातिथ-प्रख्ये तरगादयो न प्रख्यापनीया इत्येवंरूपः सोऽपि यत्नेन रक्षणीय इत्यर्थः । बृहस्पतिरपि “नित्यं नैमित्तिकं काम्यं शान्तिकं पौष्टिकं तथा । पौराणां कर्म कुर्य्युस्ते सन्दिग्धे निर्णयं तथेति” । पौराणां पुरवासिनामित्यर्थः । एवं राजनियुक्तसमुदायविशेषस्य कार्य्य-विशेष उक्तः । सर्व्वसमुदायानाञ्च कार्य्यमाह स एव “यावन्ते विपणानाञ्च संहतः समयक्रिया । बाधाकाले तु या कार्य्या धर्मकार्य्ये तथैव च । चाटचौरभये बाधाः सर्व्वसाधारणाः स्मृताः । तत्रोपशमनं कार्य्यं सर्व्वैर्नैकेन केनचिदिति” । गणानामित्यत्र चशब्दः पाषण्डनैग-मादीनां समुच्चयार्थः । ततश्च गणपाषण्डनैगमादीनां समयकरणमन्तरेण यदुपद्रुतो दुःपरिहरः धर्मकार्य्यं च दुःसाध्यन्तदा पारिभाषिकी समयक्रिया सर्व्वैर्मिलितैः कार्य्या । चाटोत्तरः । चाटचौरादिभ्यो भये प्राप्ते तदुपशमनं सर्व्वैः कार्य्यमित्यर्थः । धर्मकार्य्यमपि सम्भूय कार्य्यमित्युक्तं तेनैव “सभाप्रपादेवगृहतडागारामसंस्कृतिः । तथाऽनाथदरिद्राणां संस्कारो यजनक्रिया । कुलायननिरोधश्च कार्य्यमस्माभिरंशतः । यत्रैतल्लिखितं पत्रे धर्म्या सा समयक्रिया । पालनीया समस्तैस्तैः समर्थो विसंवदेत् । सर्व्वस्वहरणं दण्डस्तस्य निर्वासनं पुरादिति” । सभा जनाश्रयः । प्रपा पानीयशालिका । आरामः उपवनम् । संस्कृतिः जीर्णोद्धारः । संस्कार उपनयनादिकः प्रेतदहनादिकश्च । यजनक्रिया सोम-यागादिकर्त्तृभ्यो दानम् । कुलायननिरोधः । कुलायनस्य दुर्भिक्षाद्युपगतपर्य्यन्तस्य धारणम् । कुल्यायननिरोधश्चेति कल्पतरौ पाठः । कुल्यायननिरोधः कुल्यायाः प्रवर्त्तन-मप्रतिबन्धश्च । एवं कृता समयक्रिया न केवलं समुदायि-भिरेव पालनीया अपि तु राज्ञापि इत्याह नारदः “पाषण्डनैगमश्रेणिपूगव्रातगणादिषु । संरक्षेत् समयं राजा दुर्गे जनपदे तथेति” । पाषण्डा वेदोक्तविरु-

धारणव्यतिरिक्ताः सर्व्वे लिङ्गिनः । तेषु विहित-भिक्षाचरणाद्याः सन्ति । नैगमाः सार्थिका वणिक्-प्रभृतयः । तेषु यस्य कस्यचिद्देशहरपुरुषतिरस्कारिणो दण्ड्या इत्येवमादयो बहवः समया विद्यन्ते । अथ वा नैगमाः आप्तप्रणीतत्वेन ये वेदप्रामाण्यमिच्छन्ति पाशु-पतादयः । श्रेणयः एकशिल्पोपजीविनः । ता सदभनयेन श्रेण्या विक्रेयमित्येवमादिकाः समया वर्त्तन्ते । पूगा हस्त्यश्वारोहादयः । व्रातगणयोरर्थमाह कात्यायनः “नानायुधधरा व्राताः समवेतास्तु कीर्त्तिताः । कुलानां हि समूहस्तु गणः सम्परिकीर्त्तितः” इति । पूगे व्राते चास्मत्कृत्य समरे न गन्तव्यमित्ये-वमादयः समया वर्त्तन्ते । गणे तु पञ्चमे दिने पञ्चमे वर्षे वा वर्षवेधः कर्त्तव्य इत्येवमादि समयः समस्ति । गणादीत्यत्रादिशब्देन मठपुरीनिविष्टस्य मठाश्रमादेः परिग्रहः । तत्र गुरुदर्शनाद्यर्थमागता मानभीय इ-त्यादिः समयोऽस्ति । दुर्गे तु धान्यादिकं गृहीत्वा अन्यत्र न तद्विक्रेयमित्यादिरस्ति समयः । जनपदे तु कश्चि-द्विक्रेतव्याकाष्ठकुल्यग्रहणमित्याद्यनेकविधः समयो वर्त्तते । तदेवं समयजातं यथा न भ्रंशति तथा राजा कुर्य्यादित्यर्थः । समूहादिपुरुषविषये विशेषमाह बृहस्पतिः “कोशेन लेख्यक्रियया मध्यस्थैर्वा परस्परम् । विश्वासं कृत्वा यः कुर्य्युः कार्य्याणि समनन्तरम्” इति । कोशेन देवतास्नानोदकपानेन । लेख्यक्रियया समयप-त्रेण । मध्यस्थैः प्रतिभूभिः कार्य्याणि समूहकार्य्याणि । एतदुक्तं भवति । समुदायिभिः परस्परं समयातिक्र-माभावाय कोशादिभिर्विश्वासमुत्पाद्य सामयिककार्य्याणि कर्त्तव्यानीति । कात्यायनोऽपि “समूहानां तु यो धर्म-स्तेन धर्मेण ते सदा । प्रकुर्य्युः सर्व्वकर्म्माणि स्वधर्मेषु व्यवस्थिताः” इति । सामयिकधर्मं निजधर्मानतिक्रमेण स-र्व्वकार्य्याणि समुदायिनः कुर्य्युरित्यर्थः । याज्ञवल्क्योऽपि “निजधर्माविरोधेन यस्तु सामयिको भवेत् । सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः” इति । निजधर्मावि-रोधेनेत्यनेन निजधर्माविरोधी सामयिको धर्मो यथा सन्ध्यावन्दनवेलायां सर्व्वैरेव स्वव्यापारपरिहारेण, राज-भवनं प्रत्यागन्तव्यं यो नायास्यति प्रथमसाहसं दण्ड्यः इति नासौ रक्ष्य इत्यर्थादुक्तम् । कात्यायनोऽपि “अ-विरोधेन धर्मस्य निर्गतं राजशासनम् । तस्यैवाचरणं पूर्व्वं कर्त्तव्यन्तु नृपाज्ञयेति” । धर्मस्य श्रौतस्मार्त्तादि

धर्म्मस्य निर्णितं कृतमित्यर्थः “राज्ञा प्रवर्त्तितान् धर्म्मान् यो नरो नानुपालयेत् । गर्ह्यः स पापो दण्ड्यश्च लोपयन् राजशासनम्” इति । विचित्रबुद्धिभिः समुदायिभिरनेकैरेकमत्येन कार्य्यकरणासम्भवात् द्विताः पञ्च वा कार्य्यचिन्तकाः कर्त्तव्या इत्याह बृहस्पतिः “द्वौ त्रयः पञ्च वा कार्य्याः समूहहितवादिनः । कर्त्तव्यं वचनन्तेषां ग्रामश्रेणिगणादिभिरिति” । कार्य्यचिन्तकेषु हेयोपादेयान्दर्शयति स एव “विद्वेषिणो व्यसनिनः शालीनालसभीरवः । लुब्धातिवृद्धबालाश्च न कार्य्याः कार्य्यचिन्तकाः । शुचयो वेदधर्म्मज्ञाः दक्षा दान्ताः कुलोद्भवाः । सर्व्वकार्य्यप्रवीणाश्च कर्त्तव्यास्तु महत्तमाः” इति । शालीनाः अधृष्टाः कार्य्यचिन्तकाः समुदायकार्य्यसाधकविचारकाः । कार्य्यचिन्तकानामपि समूहहितवादिनां वचनं सर्व्वैः समूहिभिः कार्य्यमित्याह याज्ञवल्क्यः “कर्त्तव्यं वचनं सर्व्वैः समूहहितवादिनाम्” इति । समूहप्रतिकूलस्य प्रथमसाहसं दण्डं इत्याह स एव “यस्तत्र विपरीतः स्यात् स दाप्यः प्रथमं दमम्” इति । प्रथमं पूर्व्वसाहसम् । कात्यायनोऽपि “युक्तियुक्तं वचो हन्याद् वक्ता योऽनवकाशतः । अयुक्तञ्चैव यो ब्रूयात् स दाप्यः पूर्व्वसाहसम्” इति । बृहस्पतिरपि “यस्तु साधारणं हिंस्यात् क्षिपेत्त्रैविद्यमेव वा । संविक्रियां विहन्याच्च स निर्व्वास्यस्ततः पुरात्” इति । साधारणम् समुदायस्याहृत्रं द्रव्यादि द्रव्यम् । हिंस्यात् । दण्डादिः पाद्याद्यपहरणाशयेत् क्षिपेत् वा तिरस्कुर्य्यादित्यर्थः । समूहिनामप्यधर्म्मेण द्वेषादिना कार्य्यकरणे दण्डमाह स एव “बाधां कुर्य्युर्य एकस्य सम्भूता द्वेषसंयुताः । राज्ञा ते विनिवार्य्यास्तु शास्याश्चैवानुबन्धतः” इति । अनुबन्धतः निग्रहतारतम्यानुसारेण । मुख्यानामपराधविशेषे दण्डविशेषमाह याज्ञवल्क्यः “गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेच्च यः । सर्व्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत्” इति । मुख्यदण्डने समूहस्यैवाधिकारः । अतएव कात्यायनः “साहसी भेदकारी च गणद्रव्यविनाशकः । उच्छेद्याः सर्व्व एवैते विख्याप्यैव नृपे भृगुरिति” । नृपे विख्याप्य गणेनोच्छेद्या इत्यर्थः । समूहाशक्तौ तस्य दण्डो राज्ञा विधेयः । अतएव मनुः “यो ग्रामदेशसङ्घानां कृत्वा सत्येन संविदम् । विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् । निगृह्य दापयेच्चैनं समयव्यभिचारिणम् । चतुःसुवर्णान् षण्णिष्कान् शतमानञ्च राजतम् । एवं दण्डविधिं कुर्य्याद्धार्म्मिकः पृथिवीपतिः । ग्रामजातिसमूहेषु समयव्यभिचारिणाम्” इति । एतेषां शतमान-चतुःसुवर्णषण्णिष्कशतमानरूपाणां त्रयाणां दण्डानां जाति-विद्यागुणाद्यपेक्षया व्यवस्था कल्पनीया । यत्तु कश्चिदेतेषां त्रयाणां दण्डानां क्रमेण ब्राह्मणादिचतुर्वर्ण-विषयत्वमित्याह तदज्ञानविजृम्भितम् । एतादृशव्यवस्थायां प्रमाणाभावात् । ब्राह्मणस्य प्रवासनं क्षत्रियादीनाञ्च-चतुःसुवर्णादि दण्ड इत्यस्यानुचितत्वाच्च । मर्म्मोद्घाटकादीनां पुराद्विवासनमेव दण्डं इत्याह बृहस्पतिः “अव-क्तुदः सूचकश्च भेदकृत् साहसी तथा । श्रेणिपूगनृपद्विष्टः क्षिप्रं निर्व्वास्यते ततः” इति । अवक्तुदः मर्म्मोद्घाटकः । सूचकः पिशुनः । पिशुनो खलसूचकावित्यभिधानात् । भेदकृत् समुदायिषु वैमत्यकृत् । समूहस्यान्निर्व्वास्यते समूहेनेति शेषः । न च समूहस्य दण्डकरणेऽनधिकारात् समूहेनेति शेषकरणमयुक्तमिति वक्तव्यम् । पूर्व्वोक्तकात्यायनवचनेन समूहस्यैव मुख्यदण्डनेऽधिकारस्य प्रतिपादितत्वात् “पूगश्रेणिगणाध्यक्षाः पुरदुर्गनिवासिनः । वाग्धिग्दण्डपरित्यागं प्रकुर्य्युः पापकारिणाम् । तैः कृतं यत् स्वधर्म्मेण निग्रहानुग्रहं नृणाम् । तद्राज्ञोऽप्यनुमन्तव्यं निसृष्टार्था हि ते स्मृताः” इति बृहस्पति-वाक्याभिधानाच्च । वाग्दण्डः पापिष्ठोऽसीत्यादि भाषणम् । धिग्दण्डो धिक्त्वामिति भाषणम् । परित्यागोऽसद्व्यवहार्य्यत्वकरणं निर्व्वासनं वा । उभयत्रापि लोके परित्यागशब्दप्रयोगदर्शनात् । एतच्चार्थदण्डादेरुपलक्षणार्थम् । निग्रहानुग्रहमित्येतेन पुनःसाम्येनाभिधानात् निसृष्टार्था अनुज्ञातकार्य्याः । नारदोऽपि “पृथग्गणांश्च ये भिन्द्युस्ते विनेया विशेषतः । आवहेयुर्भयं घोरं व्याधिवत्ते ह्युपेक्षिताः” इति । गणान् श्रेण्यादिरूपान् । बृहस्पतिरपि “तत्र भेदमुपेक्षां वा यः कश्चित् कुरुते नरः । चतुःसुवर्णं षण्णिष्कं तस्य दण्डो विधीयते” इति । सुवर्णचतुष्टयषण्णिष्कयोः शक्त्यादितारतम्यानुसारेण गुणवदगुणवद्विषयकत्वेन वा व्यवस्था मन्तव्या । पाषण्डादिसंघसमूहेषु राज्ञा यथा वर्त्तितव्यन्तदाह नारदः “यो धर्म्मः कर्म्म यच्चैषामुपस्थानविधिश्च यः । यच्चैषां वृत्त्युपादानमनुमन्येत तत्तथेति” । धर्म्मः सत्यवदनादिः । कर्म्म प्रातःपर्य्यन्तभिक्षाटनादिः उपस्थानविधिः समूहकार्य्यार्थं भेर्य्यादिध्वनिमाकर्ण्य मेल-

पादौ भेदनम् । मध्याह्नाभोजनाद् तापयवेनपरि-
पन्थः । यथा धार्मिकाणामित्यर्थः । अन्यदपि राजकार्य-
माह स एव "प्रतिकूलञ्च यद्राज्ञः प्रकृत्या च मतञ्च यत् ।
बाधकञ्च यदर्थानां तत्तेभ्योऽपि निवर्त्तयेत्" इति ।
यद्राज्ञः प्रतिकूलम् "यथा यश्च राजद्विष्टं कुरुते न्यूनधर्म-
विवेचनम् । तत्र प्रयुज्यते राष्ट्रं बलं कोषञ्च नश्यति"
इति । एवञ्च शाविकादिमुद्रविवादे धर्मविवेचनं
च यद्राज्ञ इत्यस्योदाहरणमन्तव्यम् । प्रकृत्या चाभा-
मत एव मतम् अवघातार्थं पानकादिषु ताम्बू-
लभक्षणादिकम् । वह्वर्घाणां बाधकञ्चानन्तायवचौरादि-
संबाधादिकं तत्तेभ्योऽपि निवर्त्तयेत् । यथा ते न कुर्वन्ति
तथा कुर्य्यादित्यर्थः । अन्यदपि निवर्त्त्यमाह स एव
"दोषवत्करणं यत् स्यादनाम्नायप्रकल्पितम् । प्रवृत्तमपि
तद्राजा श्रेयस्कामो निवर्त्तयेत्" । लोभादिदोषवत्करणं
श्रुतिस्मृतिविरुद्धं विधवादौ वेणुग्रामादिकं पाषण्डा-
दिभिः प्रकल्पितम् । तद्वृत्तकालप्रवृत्तमपि राज्ञा निव-
र्त्तनीयमित्यर्थः । त्रैविद्यानां प्रतिपादितं धर्मं श्रेण्या-
दिष्वतिदिशति याज्ञवल्क्यः "श्रेणिनैगमपाषण्डिगणा-
नामप्ययं विधिः । भेदञ्चैषां नृपो रक्षेत् पूर्ववृत्तिं च
पालयेत्" इति । समूहकार्यार्थमागताय यद्राज्ञा समूह-
पूजार्थं दत्तं तद्यदि समूहायासौ न ददाति तदा त-
द्दत्तं एकादशगुणं दाप्य इत्याह स एव "समूहकार्य्य-
प्रयातान् कृतकार्यान् विसर्जयेत् । स दानमानसत्कारैः
पूजयित्वा महीपतिः । समूहकार्यं प्रहितो यल्लभेत
तदर्पयेत् । एकादशगुणं दाप्यो यद्यसौ नार्पयेत् स्वयम्" ।
इति । यल्लभेत समूहसम्मानमार्गमिति शेषः । यतो रा-
जदत्तं सर्वसाधारणमतो यथांशतो विभागं कृत्वा पाद्य
निक्षादिभ्यो वा दातव्यमित्याह बृहस्पतिः "ततो लभ्येत
यत्किञ्चित् सर्वेषामेव तत्समम् । षाण्मासिकं मासिकं वा
विभक्तव्यं यथांशतः । देयं वा निःस्वबालस्त्रीबाला-
तुररोगिषु । सान्तानिकादिषु तथा धर्म एव सनातनः"
इति । एकस्य पुरुषस्य षाण्मासनिर्वाहाय पर्य्याप्तं कुटु-
म्बस्य वैकस्य षाण्मासनिर्वाहाय पर्य्याप्तं, स्वल्पं वा यथां-
शतः स्वांशानुरूपेण विभजनीयमिक्षादिभ्यो वा देय-
मिति तात्पर्य्यार्थः । राजप्रसादलब्धद्रव्यमपि सर्वेषां सम-
मित्याह स एव "यत्तैः प्राप्तं रक्षितं वा गणार्थे वा
ऋणं कृतम् । राजप्रसादलब्धञ्च सर्वेषामेव तत्समम्"
इति । अस्यार्थः । तैः समूहगणार्थं प्रहितैर्गोष्ठीभा-

विवादावधिं क्षेत्रारामादिकं धर्माधिकरणे व्यापना प्रा-
प्तम् । यच्च परैरपह्रियमाणं रक्षितं यच्च समूहप्रयो-
जनार्थमृणमुपात्तं यच्च राजप्रसादलब्धं तत् सर्वं
सर्वेषां समुदायिनां सममिति । गणकृतमृणं सर्वेषां
सममित्यस्य क्वचिदपवादमाह कात्यायनः "गणमुद्दिश्य
यत्किञ्चित् कृत्वर्णं भक्षितं भवेत् । आत्मार्थं विनियुक्तं
वा देयं तैरेव तद्भवेत्" इति । तैः कुल्यैः । ये तु समुदा-
यानुपकारकदत्तभावं प्राप्ताः ये च समुदायद्रोहादिना
ततो बहिर्भूतास्तान् प्रत्याह स एव "गणानां श्रेणि-
वर्गाणां गताः स्युर्येऽपि मध्यताम् । प्राक्तनस्य धनर्णस्य
समांशाः सर्व एवेति । तथैव भोज्यविभाज्यदानधर्मक्रि-
यासु च । समूहस्थोंऽशभागी स्यात् प्रागतीतस्त्वभा-
गभागिति" । [१२रचनायाञ्च ।

संविधान न० सम्+वि+धा—ल्युट् । १उपाये २आयोजने
संविधा स्त्री ४ भादितं विप्र यथा प्रा०व० धातुजस्य उत्तर-
पदलोपः । अतिविधायाम् (आतरच्) शब्दच० ।
संवीक्षण न० सम्यग्वीक्ष्यते अन्विष्यते वा सम्+वि+ईक्ष-भावे
ल्युट् । १सम्यग्दर्शने २इष्टवस्तुनोऽलाभाय अन्वेषणे च ।
संवीत त्रि० सम्+व्येञ्—क्त । १आहते २वद्धे च अमरः ।
सम्+वि+इण-क्त । ३व्याप्ते । [वर्णोच्चारणाभ्यन्तरयत्ने च
संवृत त्रि० सम्+वृ-क्त । १आवृते २कृतगोपने ३संवारूपे
संवेग पु० सम्+विज—घञ् । १भयादिना त्वरायाम् अमरः
२सम्यग् वेगे च । [वृच् । संवेदनाख्यात् स्त्री ।
संवेद पु० सम्+विद—घञ् । ज्ञाने अमरः । स्वार्थे णिच्—
संवेश पु० सम्यक् विशत्यत्र सम्+विश-आधारे घञ् । १नि-
द्रायाम् अमरः । संपूर्वकस्य तस्य निद्रार्थकत्वात्तथात्वम् ।
यथा "संविष्टः कुशशयने निशां निनायेति" रघुः ।
२पीठे हेमच० ३स्त्रीरतिबन्धभेदे मेदि० ।
संवेशन न० सम्+विश-णिच्-ल्युट् । रतिक्रियायां हेमच०
तदुत्तरं हि निद्राधिक्येन तस्या निद्राहेतुत्वात्तथात्वम् ।
संव्यान न० संवीयते सम्+व्येञ्-कर्मणि ल्युट् । १उत्त-
रीयवस्त्रे अमरः । २वस्त्रमात्रे मेदि० ।
संशप्तक पु० सम्यक् शप्तमङ्गीकारो यस्य कप् । प्रतिज्ञाय
संग्रामादनिवर्त्तिनि सैन्ये नारायणीये सैन्यभेदे
च तेषां प्रतिज्ञा यथा "ब्राह्मणांस्तर्पयित्वा च निष्क्र-
न्दित्वा पृथक् पृथक् । गावः वासांसि च पुनः समा-
भाष्य परस्परम् । प्रज्वाल्य कृष्णवर्त्मानमुपगम्य रणे व्र-
तम् । तस्मिन्नग्नौ तदा चक्रुः प्रतिज्ञां दृढनिश्चयाः ।

शृण्वतां सर्वभूतानामुच्चैर्वाचो बभाषिरे । ते च धनञ्जयवधे प्रतिज्ञाश्चापि चक्रिरे । ये वै लोकाश्चानृतिनां ये च वै ब्रह्मघातिनाम् । मद्यपस्य च लोका ये गुरुदाररतस्य च । ब्रह्मस्वहारिणश्चैव राजपिण्डापहारिणः । शरणागतं च त्यजतो याचमानं तथा घ्नतः । अगारदाहिनाञ्चैव ये च गां निघ्नतामपि । अपकारिणाञ्च ये लोका ये च ब्रह्मद्विषामपि । स्वभार्यामृतुकालेषु यो मोहादभिगच्छति । श्राद्धमैथुनिकानाञ्च ये चाप्यात्मापहारिणाम् । न्यासापहारिणां ये च श्रुतं नाशयताञ्च ये । क्लीबेन युध्यमानानां ये च नीचानुसारिणाम् । नास्तिकानाञ्च ये लोका येऽग्निमातृपरित्यजाम् । तानाप्नुयामहे लोकान् ये च पापकृतामपि । यद्यहत्वा वयं युद्धे निवर्त्तेम धनञ्जयम् । तेन चाभ्यर्दितास्त्रासाद्भवेमहि पराङ्मुखाः । यदि त्वसुकरं लोके कर्म कुर्याम संयुगे । इष्टान् लोकान् प्राप्नुयाम वयमद्य न संशयः । एवमुक्त्वा ततो राजंस्तेऽभ्यवर्त्तन्त संयुगे । आह्वयन्तोऽर्जुनं वीराः पितृजुष्टां दिशं प्रति" भा०द्रो० १७अ०।

संशय पु० सम्+शी-अच् । सन्देहे एकस्मिन् धर्मिणि भावाभावयोः, विरुद्धधर्मद्वयस्य वा सन्देहे । यथा पर्वतो वह्निमान्न वा, अयं स्थाणुर्वा पुरुषो वेति । "स संशयो भवेद्या धीरेकत्राभावभावयोः । साधारणादिधर्मस्य ज्ञानं संशयकारणम्" भाषा० "एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशयः इत्यर्थः । साधारणेति । उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम् । यथा उच्चैस्तरत्वं स्थाणुत्वसाधारणं ज्ञात्वा अयं स्थाणुर्न वेति सन्दिग्धे । एवम् असाधारणज्ञानं तत्कारणम् । यथा शब्दत्वं नित्यानित्यव्यावृत्तं शब्दे गृहीत्वा शब्दो नित्यो न वेति सन्दिग्धे । विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकारणम् । शब्दस्याप्रमाणाद्दोषात् निश्चयमात्रजनकत्वस्वाभाव्यात् । किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते । संशयस्तु तत्र मानस एवेति । एवं ज्ञाने प्रामाण्यसंशयात् विषयसंशय इति । एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यम् । किन्तु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति" सि०मु० । "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः" न्यायसू० "समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति स्थाणुपुरुषयोः समानं धर्ममारोहपरिणाहौ पश्यन् पूर्वदृष्टयोश्च तयोर्विशेषं बुभुत्समानः किंस्विदित्यन्यतरन्नावधारयति तदनवधारणं ज्ञानं संशयः समानयोर्धर्मयोरुपलब्धौ विशेषस्यान्यतरस्य नोपलब्धौ इत्येषा बुद्धिरपेक्षा संशयस्य प्रवर्त्तिका वर्त्तते, तेन विशेषापेक्षो विमर्शः संशयः । अनेकधर्मोपपत्तेरिति समानजातीयमसमानजातीयञ्चानेकं तस्यानेकस्य धर्मोपपत्तेर्विशेषस्योभयथा दृष्टत्वात् समानजातीयेभ्योऽसमानजातीयेभ्यश्चार्था विशिष्यन्ते । गन्धवत्त्वात् पृथिवी अबादिभ्यो विशिष्यते गुणकर्मभ्यश्च, अस्ति च शब्दे विभागजत्वं विशेषः, तस्मिन् द्रव्यं गुणः कर्म वेति सन्देहः विशेषस्योभयथा दृष्टत्वात् किं द्रव्यस्य सतो गुणकर्मभ्यो विशेष आहोस्विद्गुणस्य सत इति अथ कर्मणः सत इति विशेषापेक्षा अन्यतमस्य व्यवस्थापकं धर्मं नोपलभे इति बुद्धिरिति । विप्रतिपत्तेरिति व्याहतमेकार्थदर्शनं विप्रतिपत्तिः व्याघातो विरोधोऽसहभाव इति । अस्त्यात्मेत्येकं दर्शनम् नास्त्यात्मेत्यपरम्, न च सद्भावासद्भावौ सहैकत्र सम्भवतः, न चान्यतरसाधको हेतुरुपलभ्यते तत्र तत्त्वानवधारणं संशय इति । उपलब्ध्यव्यवस्थातः सच्चापि उदकमुपलभ्यते तडागादिषु मरीचिषु चाऽविद्यमानमुदकमिति ततः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यते अथासदिति संशयो भवति । अनुपलब्ध्यव्यवस्थातः सच्च नोपलभ्यते मूलकीलकोदकादि, असच्चानुत्पन्नं विरुद्धं वा, ततः क्वचिदनुपलभ्यमाने संशयः किं सन्नोपलभ्यते उतासदिति संशयो भवति विशेषापेक्षा पूर्ववत्, पूर्वः समानोऽनेकश्च धर्मो ज्ञेयस्थः, उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे, एतावता विशेषेण पुनर्वचनम्, समानधर्माधिगमात् समानधर्मोपपत्तेर्विशेषस्मृत्यपेक्षो विमर्श इति, स्थानवतो लक्षणवचनमिति समानम्" वा०भा० "संशय इति लक्ष्यनिर्देशः विमर्श इत्यत्र विशब्दो विरोधार्थः मृशिर्ज्ञानार्थः एकस्मिन् धर्मिणीति पूरणीयं तेन एकधर्मिणि विरोधेन भावाभावप्रकारकं ज्ञानं संशयः तत्र कारणत्वेन विशेषणान्याह समानेत्यादि उपपत्तिर्ज्ञानं तथा च समानस्य विरुद्धकोटिद्वयसाधारणधर्मस्य ज्ञानादित्यर्थः । अनेकधर्मः असाधारणधर्मः तज्ज्ञानादित्यर्थः । तथा च साधारणधर्मवद्धर्मिज्ञानमन्योऽसाधारणधर्मवद्धर्मिज्ञानमन्य इत्यर्थः, विप्रतिपत्तिर्विरुद्धकोटिद्वयोपस्थापकः शब्दस्तस्मादित्यर्थः यद्यपि शब्दस्य न संशायकत्वं तथापि

शब्दात्मकोटिद्वयोपस्थितौ मानसः संशय इति वदन्ति । उपलब्धेश्चानस्य अनुपलब्धेर्व्यतिरेकज्ञानस्य चाऽव्यवस्था सद्विषयकत्वानिश्चायक प्रामाण्यसंशय इति फलितोऽर्थः, अन्ये तु उपलब्ध्यनुपलब्ध्यव्यवस्था प्रामाण्यसंशयः अनुपलब्धिर्विरोधिभ्रमः तदव्यवस्था ततः संशय इत्याहुः । वस्तुतस्तु प्रामाण्यसंशयस्य न संशयहेतुत्वं किं त्वगृहीताप्रामाण्यकज्ञानस्य विरोधितया सति प्रामाण्यसंशये तज्ज्ञानस्याविरोधितया साधारणधर्मदर्शनादित एव संशयोत्पत्तिरिति । उपलब्धीत्यादिकं तादृशस्थले संशयो न भवतीत्येतावन्मात्रपरं चकारो व्याप्यसंशयस्य व्यापकसंशयहेतुत्वं समुच्चिनोतीति वदन्ति. विशेषापेक्षः कोटिस्मरणसापेक्षः । वस्तुतस्तु संशयधारावाहिकत्वं स्यादत आह विशेषेति विशेषं विशेषदर्शनम् अपेक्षते विवक्षतेऽनेन तथा च विशेषदर्शननिवर्त्त्यत्वकथनच्छलेन विशेषादर्शजन्यसंशय इत्युक्तम्" वृत्तिः । स च संशयो द्विविधः यथोक्तम् 'द्विविधः संशयो बहिर्विषयकोऽन्तर्विषयश्च बहिर्विषयकोऽपि दृश्यमानधर्मिकोऽदृश्यमानधर्मिकश्च तत्र दृश्यमानधर्मिको यथा अर्द्धान्धविशिष्टस्य धर्मिणो दर्शनात् अयं स्थाणुः पुरुषो वेति । अदृश्यमानधर्मिको यथा अरण्ये भाटाद्यन्तरिते गोगवयादिविषाणमात्रदर्शनात् अयं गौर्गवयो वेति । वस्तुतस्तत्रापि विषाणधर्मिक एव सन्देहो विषाणमिदं गोरस्त्यस्ति गवयस्यास्ति इति विवक्षामात्रादुद्देश्याभिधानम् । तत् सामान्यं संशयहेतुस्तदनेकम् इदं संशायकम् एकत्र धर्मिणि वा इदं संशयहेतुरित्यत्र प्रथमं विधामाह" उप०वृत्तिः । "इदन्तु बोध्यं संशयस्य प्रत्यक्षरूपः परिपक्वकर्मजत्वात् अत एवोक्तं "परोक्षज्ञानमनाहार्यं निश्चयश्चेति सिद्धान्तादिति" । संशये च उभयप्रकारतानिरूपिता विशेष्यता एकैव । समुच्चये तु विशेष्यताद्वयमिति" गदाधरः ।

संशयसम पु० जात्युत्तरभेदे "सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः" न्यायसू० । "अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् घटवदित्युक्ते हेतौ संशयेन प्रत्यवतिष्ठते सति प्रयत्नानन्तरीयकत्वे अस्त्येवास्य नित्येन सामान्येन साधर्म्यमैन्द्रियकत्वमस्ति च घटेनानित्येन । अतो नित्यानित्यसाधर्म्यादनिवृत्तः संशय इति" वा०भा० ।

संशयस्थ त्रि० संशये तिष्ठति स्था-क । संशययुक्ते ।

संशयात्मन् पु० संशय आत्मनि यस्य । सन्दिग्धान्तःकरणे "संशयात्मा विनश्यतीति" "संशयात्मा निबध्यते" ।

संशयालु त्रि० संशय+मत्वर्थे आलुच् । संशययुक्ते हेमच० ।

संशयितृ त्रि० सम्+शी-तृच् । संशयकर्त्तरि हेमच० ।

संशरण न० संशीर्य्यतेऽनेन सम्+शॄ-करणे ल्युट् । रणारम्भे शब्दमा० । [यत्ने २तद्वति त्रि० मि०को० ।

संशित त्रि० सम्+शो-क्त इत्वम् । १सम्पादितव्रतविषयक-

संशितव्रत त्रि० संशितं सम्यक् सम्पादितं व्रतमनेन । सम्यक्सम्पादितव्रते । [मार्जने च रत्नमा० ।

संशुद्धि स्त्री सम्+शुध-क्तिन् । १सम्यक्शोधने २देहादि-

संस(श्र)त् सम्+स्रु-क्वि-वा बा० डति । कुहके उणादि० ।

संश्यान त्रि० सम्+श्यै-क्त न सम्प्र० । सङ्कुचिते ।

संश्रय पु० सम्+श्रि-भावे अच् । आश्रये ।

संश्रव पु० सम्+श्रु-अप् । अङ्गीकारे अमरः । घञ् । संश्रावोऽप्यत्र पु० ।

संश्रुत त्रि० सम+श्रु-क्त । १अङ्गीकृते अमरः । २सम्यक्श्रुते ।

संश्लिष्ट त्रि० सम्+श्लिष-क्त । १आलिङ्गिते २सम्बद्धे च ।

संश्लेष पु० सम्+श्लिष-घञ् । १आलिङ्गने अमरः २सम्बन्धमात्रे च ।

संसक्त त्रि० सम्+सन्ज-क्त । १मिलिते २संबद्धे ३अव्यवहिते अमरः ४समन्तादविच्छिन्ने च "पान्तेषु संसक्तनमेरुवायुमिति" कुमारः । [सभायां अमरः ।

संसद् स्त्री संसीदन्त्यस्याम् सम्+सद-सम्प्र० आधारे क्विप् ।

संसरण न० सम्+सृ-ल्युट् । अव्याहतनिर्गमनाकारत्वे १संसारे २असंबाधसेनागमने ३घण्टापथे अमरः । ४रणारम्भे मेदि० । ५चङ्क्रमे शब्दच० ।

संसर्ग पु० सम्+सृज-घञ् । १सम्बन्धे विभागानन्तरं "यस्य धनं तस्यैवेति" कृतसमयेन एकत्रावस्थानरूपे २धनसम्बन्धे च प्रायश्चित्तसंसर्गस्य पापभेदे कालभेदेन पातित्यादिलक्षणं प्र०वि० दर्शितं यथा

"तत्र पातकिसंसर्गस्य पापहेतुत्वमाह मनुः "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः । महान्ति पातकान्याहुः संसर्गश्चापि तैः सह" इति । सह तैः सहेति निर्देशात् महापातकिसंसर्गस्यैव पापहेतुत्वं लभ्यते न तु पातकान्तरसंसर्गस्य प्रायश्चित्तमपि महापातकिसंसर्ग एव मनुना दर्शितं यथा मनुः "एषां पापकृतामुक्ता चतुर्णामपि निष्कृतिः । पतितैः सम्प्रयुक्तानामिमाः शृणुत निष्कृतीः । यो येन पतितेनैषां संसर्गं याति मानवः । स तस्यैव व्रतं कुर्यात् तत्संसर्गविशुद्धये" इति

अत्र चतुर्णामित्यनेन ब्रह्महत्यादिमहापातकचतुष्टय-मुपसंहृत्य यो येन पतितेनेत्युक्तं महापातकपरमेव । उच्यते "प्रायश्चित्तीयतां प्राप्य दैवात् पूर्व्वकृतेन वा । न संसर्गं व्रजेत् सद्भिः प्रायश्चित्तेऽकृते द्विजः ॥ एनस्विभिरनिर्णिक्तैर्नार्थं किञ्चित् समाचरेत् । कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचित्" इति मनुना सामान्यतः पापिसंसर्गस्य निषिद्धत्वात् निषिद्धाचरणात् पापोत्पत्तिः पापिसंसर्गे एव दर्शिता प्रायश्चित्तमपि सामान्येन दर्शितम् "यो येन पतितेनैषां संसर्गम्" इति निर्देशात् चतुर्णामिति हिंसाऽभक्ष्यभक्षणस्तेयागम्यागमनाख्यप्रकारचतुष्टयानां न तु ब्रह्महत्यादिविशेषाणां कनीयसामपि हिंसाभक्ष्यभक्षणस्तेयागम्यागमनादीनाम् मनुना पूर्व्वमुक्तत्वात् अपि च संसर्गपापश्रुत्या श्रुतिः उन्नेतव्या पापिसंसर्गी पापी भवतीति सामान्यश्रुतिरेव कल्पनीया लाघवात् दोषाधिकरणन्याय एवात्र जागर्त्ति । विष्णुनापि सामान्येनैवोक्तं "यश्च येन पापात्मना सह संसृजेत् स तस्यैव प्रायश्चित्तं कुर्य्यात्" । गौतमोऽप्याह "ब्रह्महसुरापगुरुतल्पगमातृपितृयोनिसम्बन्धागस्तेनाभक्ष्यभक्षनास्तिकनिन्दितकर्म्माभ्यासपतितात्यागाऽपतितत्यागिनः पतिताः पातकसंयोजकाश्च तैश्चाब्दं समाचरन्" । अत्र पतितात्यागेति सामान्येनैव दर्शयति । तैश्चाब्दं समाचरन्निति द्वितीयसंसर्गिणोऽपि पतितत्वमुक्तम् । नन्वेकपात्रनिवासादिनापि पतितेन संसर्गिणः पतितत्वं स्यात् न संसर्गविशेषाणां निर्देशात् निषिद्धपतितसंसर्गात् पततीति श्रुतिः कल्प्या । के ते संसर्गप्रकारा इत्याह बृहस्पतिः "एकशय्यासनं पङ्क्तिर्भाण्डपक्वान्नमिश्रणम् । याजनाध्यापनं योनिस्तथा च सह भोजनम् । नवधा सङ्करः प्रोक्तो न कर्त्तव्योऽधमैः सह । उत्तमैरुत्तमैर्नित्यं सम्बन्धस्तु समेन वा" एकशय्यासनैकपीठाद्युपवेशनैकपङ्क्तिभोजनपक्वान्नादिधर्म्मान्निभाण्डपक्वान्नमिश्रणाख्याः पञ्च लघुसंसर्गाः । तथा याजनं पतितेन ऋत्विजा यजनं यजमानस्य, पतितयजमानार्त्विज्यकरणमृत्विजश्च । अध्यापनं पतितमाणवकवेदाध्यापनमाचार्य्यस्य, पतिताचार्य्याद्वा वेदाध्ययनं माणवकस्य । योनिः योनिसम्बन्धः स च पतितपुरुषसम्भोगः स्त्रियाः, पतितस्त्रीसम्भोगो वा पुरुषस्य, तथा पतितकन्यापरिणयनं वरस्य, पतितवरपरिणयनं वा कन्यायाः । तथा च मनुः "नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् । ब्राह्मान् यौनांश्च सम्बन्धानाचरेत् ब्राह्मणः सह" । शिष्टकल्पतरुकारादयस्तु पतितवराय कन्यादानं दातुः, पतिताद्दातुरादानं वा कन्याया वरस्य, तत्र व्यवहितयोनिसम्बन्धः, योनिसम्बन्धस्य स्त्रीपुरुषसम्भोगनिष्पाद्यत्वात् नात्र दातृवरयोः साक्षात् योनिसम्बन्धः दानप्रतिग्रहलक्षणोऽप्ययं सम्बन्धो दातृवरदानयोर्योन्यन्तर्भावात् यौन इत्युच्यते प्रायश्चित्तगौरवार्थः । किन्त्वयमनार्षः प्रायश्चित्तविशेषाश्रवणात् चतुष्पादेयस्य पतितजाता कन्या पतितैव वक्ष्यते तत्परिणयनं पतितकन्यापरिणयनमेव नात्र व्यवहितयोनिसम्बन्धः । सह भोजनं स्वस्थाल्यां परस्य वा एकपात्रे भोजनं नोच्छिष्टभोजनम् उच्छिष्टेन सहोच्छिष्टभोजनात् तस्य लघुत्वात् एते चत्वारो गुरुसंसर्गा भवन्ति एवं मिलित्वा नव संसर्गाः । नन्वेवं आलापस्पर्शनिश्वाससहाध्ययनादिकमपि संसर्गान्तरमस्ति तत् कथं नवविधत्वं यथा पराशरः "आसनाच्छयनाद्यानात् भाषणात् सह भोजनात् । संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि" । भाषणमपि अन्योन्यसंभाषणं सहभोजनमेकपङ्क्तिभोजनं लघुसंसर्गसाहचर्य्यात् । तथा देवलः "संलापस्पर्शनिश्वाससहयानासनाशनात् । याजनाध्यापनाद् यौनात् पापं संक्रमते नृणाम्" । सहाशनमेकपङ्क्तिभोजनम् । तथा कात्यायनः "आलापात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात् । सहशय्यासनाध्यायात् पापं संक्रमते नृणाम्" । सहाध्यायः पतितेन ब्रह्मचारिणा सहैकस्माद्गुरोरध्ययनम् । सर्व्वं नवधेत्यत्र प्रकारवाचिना धात्वर्थेन प्रकारान्तरं सूचितम् अन्यथा नवेत्युक्तं स्यात् । तेन तदन्नभोजनतत्संस्पृष्टान्नभोजनतत्प्रतिग्रहादीनामुपसंग्रहः । नन्वनेकवचनेषु पापसंक्रान्तिः श्रूयते पूर्व्वदेहत्यागेन देहान्तरसम्बन्धे संक्रान्तिशब्दस्य रूढत्वात् मूलपापकर्त्तुः पापपरिच्छेदे भूते किमर्थं प्रायश्चित्तानुष्ठानमिति । तथा हारीतः "हन्यादग्रदः पतन्तु पतोऽपतन्तु शोधयेत् । मानुष्य तमोभूतः पतनायैव पतन्ति" । तथा च मनुः "अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणी । गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम्" । मार्ष्टीति शोधयति संक्रामयतीत्यर्थः । तथा व्यासः "दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति । यो यस्यान्नमिहाश्नाति स तस्याश्नाति किल्बिषम्" । अन्य-

किल्बिषम् अश्नाति इत्यनेनापि पापाभावो गम्यते। उच्यते न पूर्वपापकर्त्तुराश्रयत्यागेन आश्रयान्तरसम्बन्धः सम्भवति गुणस्य तद्रूपादर्शनेनायोग्यत्वात् किन्तु तत्तुल्य-व्यक्तिसम्बन्धे गौणोऽयं संक्रान्त्यादिशब्दः। तथा च देवलः "बान्धवोऽपि पृथग् भूत्वा तत्पापं नाप्नुयात् क्वचित्। पृथग्जनोऽपि संयोगात् भजते तुल्यदोषताम्"। तत्पापं तज्जातीयं पापमित्यर्थः। तुल्यदोषतां तत्समानपापतामित्यर्थः। "शुद्धोऽशुद्धन्तु शोधयेदिति" यत्र ब्राह्मणादिसम्पर्क एव पापक्षयहेतुस्तत्र बोद्धव्यम्। तथोशनाः "कृतघ्नकदर्यैर्दर्शनस्पर्शनसम्भाषणानि वर्जयेत्" इत्युक्त्वा "सम्भाषणे ब्राह्मणसम्भाषणमित्यादि"। कृत-घ्नघ्नो यस्मा कृतपापापच्छः। किञ्च यदि पापिष्ठस्या-न्यसंसर्गः पापक्षयहेतुस्तदेतत्प्रायश्चित्तवदिदमपि केनापि मुनिना प्रायश्चित्तरूपतया पठितः स्यात् प्रत्युत निषेध एव श्रूयते यथा मनुः "प्रायश्चित्तीयतां प्राप्य दैवात् पूर्वकृतेन वा। न संसर्गं व्रजेत् सद्भिः प्रायश्चित्तेऽकृते द्विजः" इति। किञ्च "त्रिभिस्त्रिभिस्तेन सोऽब्दान्ते स्वयञ्च पतितो भवेदिति" देवलवचने संसर्गान्मूलपापकर्त्तुरपि पापस्थितिरवगम्यते मूलपापकर्त्ता पतितः स्वयमपि पतति इत्यर्थः। इदानीञ्च कियता कालेन कतमस्य संसर्गस्य पतितसाम्यापादनमिति निरूप्यते। तत्र देवलः "पतितेन सहोषित्वा जानन् संवत्सरं नरः। त्रिभिस्त्रिभिस्तेन सोऽब्दान्ते स्वयञ्च पतितो भवेत्। याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम्। कृत्वा सद्यः पतन्त्येते पतितेन न संशयः"। यानादिलघुसंसर्गैः ज्ञानतः संवत्सरेण पतति, याजनादिभिर्गुरुभिः सद्यः पततीत्यर्थः। तथा बौधायनः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद् यौनात् सद्यो न शयनासनात्"। शयनादिना सद्यःपातनिषेधात् सा-काङ्क्षत्वे संवत्सरेण पततीत्यस्य शयनादिना सम्बन्धः। याजनादिपदं सहभोजनमप्युपलक्षयति। विष्णुः। "आसंवत्सरात् पतति पतितेन सहाचरन्। सह यानासनाभ्यां यौनात् स्रौवात् मौखात् सम्बन्धात् सद्य एव"। यानासनाभ्यामिति लघुसंसर्गोपलक्षणम्। यौनात् इत्यादि एकभोजनोपलक्षणम्। कूर्मपुराणे चायः "अपाङ्क्त्या भवन्ति ते लोके मुक्तस्तत्र एव च। अपाङ्क्तेयास्तैर्भवन्ते यत्र तैः सह संवसेत्। संवत्सरन्तु पतितैः संसर्गं कुरुते तु यः। यानशय्यासनैर्नित्यं जा-नन् वै पतितो भवेत्"। एभिर्वचनैर्याजनादिना सद्यः पातो यानादिना ज्ञानतः संवत्सरेणेत्यवगम्यते। मनु याजनादिना संवत्सरेण पतति न तु यानादिनेत्याह मनुर्विष्णुश्च "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनात् न तु यानासनाशनात्"। या-नासनाशनादुत्पन्नसंयोगसाचर्यादित्यर्थः। तथा पैठीनसिः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्या-पनात् यौनात् नत्वेवं शयनासनात्"। अत्र भवदेवकल्प-तरुकारादयः देवलबौधायनादिवचनैर्याजनादीनां सद्यः पातहेतुत्वावगतेः मनुपैठीनसिवचनयोर्नत्विति मध्यपठि-तस्य पूर्वेण याजनादिना सम्बन्धो न तु परेण यानादिना, याजनाध्यापनात् न तु संवत्सरेण पतति किन्तु यानादिभिरित्याहुः। तदसङ्गतम् मनुमनुवचनविरो-धात् यथा पतितानभिधायाह मनुः "यश्चैतैर्यौन-मौखस्रौवाणां सम्बन्धानामन्यतमेन सह संवत्सरं स-म्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यात्" इत्यात् कुर्यात् एतदेव द्वादशवार्षिकव्रतम् इत्यर्थः। अत्र याजना-दीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते। तथा हा-रीतः "संवत्सरेण पतति पतितेन सहाचरन्। याज-नाध्यापनाद्यौनादेकशय्यैकभोजनात्"। एकभोजनमे-कपात्रे कालभेदेन भोजनं अन्नपानञ्च। तथा बृहस्पतिः "षाण्मासिके तु संयोगे याजनाध्यापनादिना। एक-शयनशय्याभिः प्रायश्चित्तार्द्धमाचरेत्। तथा वत्सरसं-सर्गे योनियुक्ते विशेषतः। पूर्वोक्तेन विधानेन पतित-व्रतमाचरेत्"। अनेन याजनादिना षाण्मासिकसंसर्गे प्रायश्चित्तार्द्धं वदता वत्सरेण सम्पूर्णप्रायश्चित्तमर्थादु-क्तम् उत्तरवचने पुनः स्फुटीकृतम्। योनियुक्तपदेन याज-नादीनामप्युपसंग्रहः। एकशयनशय्यादिरिति पाठो-ऽनादरः शास्त्रानिश्चितत्वात्। जिकमादयस्तु यदि प्रत्येकं विभक्तिनिर्देशात् भोजनं कृत्वा पतति यो-निसम्बन्धं कृत्वा पततीति एवं सम्बन्धोऽभिधीयते तदा कृत्वा पततीति पदयोरन्वयावृत्तितात्पर्यावृ-त्तिभ्याम् आवृत्तौ वाक्यभेदः चत्वारि वाक्यानि स्युः। अतः कृत्वेति पदेन तन्त्रेण याजनादिकर्मचतुष्टयमादाय पततीति सम्बन्धो बोध्यते न वाक्यभेदः संवत्सरपदेन पृथगुपहीतानामपि कृत्वेति पदेन तन्त्रेणोपनयनात्। दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्याग्नेयादियागषट्-कानामिव। अत एकवाक्यानुरोधाद्याजनादीनां तन्त्रेण

समुच्चितोपनीतानां पततीत्यनेन सम्बन्धे बोधिते याज-
नादीनां समुच्चितानां सद्यः पातहेतुत्वं पूर्वोक्तवचना-
दिवचनादेकैकेषां संवत्सरेणैव चलैव संसर्गस्य चतुर्भि-
र्भेदैः संसर्गद्वयेऽपि मौनैर्भोजनद्वारेण पातहेतुत्वमूह-
नीयम् । तत्र चरन्निति पदस्य याजनादिकर्मत्वेऽयुक्तत्वात्
किन्त्वन्विताभिधानबलात् तत्र तदा च निरपेक्षाणामेवा-
न्विताभिधानप्राप्तत्वाद्गुणप्राधिकरणन्यायाच्च तन्त्रता
सत्यपि तन्त्रताभिधाने न समुच्चयः सर्वेभ्यो दर्शपौर्णमा-
साविव्यत्वेव समुच्चयबोधकस्य द्वन्द्वसमासादेरभावात् । न
वा तन्त्रतायां समुच्चयो नियतः गर्गाभोज्यानां चरुद्वय-
प्राजापत्यान् पशूनालभेदित्यत्र व्यभिचारात् पततीति
पाठस्य दोषाऽविशिष्टत्वाच्च कथं पततीति पदावृत्तिः ।
न च सुमन्तुवचने याजनादीनामन्यतमेन वत्सरेण पा-
तावगमाद्योनिसम्बन्धैः सद्यः पात इति कल्पनीयं निर-
पेक्षस्मृतिविरोधात् वक्ष्यमाणप्रकारेण वचनद्वयस्याप्यस्य
सम्भवात् । उच्यते । गुरुलघुभेदेन द्विविधं याजनादिकं
भवति तत्र गुरुणा ज्ञानकृतेन याजनादिना एकैकेन सद्यः
पातः तेनैवाज्ञानकृतेन वारद्वयाभ्यासात् । लघुयाजना-
दावज्ञानकृते वत्सरेण पातः तस्मिन्नेव ज्ञानकृते वत्सरा-
र्द्धेनेति व्यवस्था । तथा हि याजनं योनिसम्बन्धमित्यत्र
देवलवचने पतितेन सहोषित्वा पूर्ववचने । जानन्निति
पदसम्बन्धाज्ज्ञानकृतत्वं दर्शितम् । गुरुत्वं च देवलवचने-
नैव याजनाध्यापनयोरुपसंहाराद्दर्शितम् । यथा देवलः
"आचार्याद्व्रतनियमशुश्रूषादिभिस्त्रयीविद्योपादानमध्य-
यनं तच्च आचारान्वयः प्रक्रमवानयं भक्तिपीवशुश्रूषोप-
पन्नाय शिष्याय प्रदानमध्यापनम् । यजमानोऽध्वर्युपुरो-
हितहोत्रध्वर्युप्रभृतिभिर्ऋत्विग्भिः खदिरपलाशाश्वत्थ-
न्यग्रोधोदुम्बरप्रभृतिभिः समिद्भिः स्रुक्स्रुवोदूखलमुसल-
कुठारखनित्रयूपदारुचमसदर्भप्रावपवित्रपात्रभाजनादिभिर्-
उपकरणैराहारहोमध्वर्युमन्त्रादिभिश्च ऋत्विग्भिः काम्य-
नैमित्तिकानां पश्वादिपूर्वकाणां यथोक्तदक्षिणानां यज्ञानां
समापनं याजनम् एतेन याजनं व्याख्यातम्" । प्रकृतः अ-
नुसरः । अत्र उपनयनपूर्वकमध्यापनं ज्योतिष्टोमादियज्ञानां
याजनं च गुरु, तदङ्गभूताग्न्याधानं परिषद्यजनरूपं गुरु म-
न्त्रहोमादिमात्रत्वात्, कन्यादिना पतितान्यब्राह्मणयाग-
मनं वा ब्राह्मणस्य, तदपेक्षया पतितब्राह्मणीगमन-
पतित शूद्रागमनयोर्लघुत्वात् । सह भोजनं पतिताद्यस्य
पतितेन सहैकपात्रे भोजनं गुरु । उपनयनं विना वेदा-
ध्ययनम्, अष्टाविंशतियाजनं पतितब्राह्मणीगमनं अ-
पतिताद्यस्य पतितेन सहैकपात्रे भोजनं पतितोच्छिष्टभो-
जनं वा पूर्वोक्तयाजनाद्यपेक्षया लघु । देवलवचने ज्ञानतो
गुरुणा याजनादिना संवत्सरेण पतनमिति गम्यते ।
ज्ञानतः सकृत्कृतेन येन पतनं तेनाज्ञानतो वारद्वया-
भ्यासेन । अज्ञानतो वत्सरेण येन पतनं तेन ज्ञानतः
षण्मासैरिति वचनद्वयसामञ्जस्यं तथा च लघुयाज-
नविषये संवर्त्तः "एभिः संसर्गमायाति यः कश्चित्
पापमोहितः । षण्मासानर्द्धमेकं वा प्राजापत्यव्रतं
चरेत्" । कल्पतरुकारव्याख्येव स्मरणः । अतएव कूर्म-
पुराणे "याजनं योनिसम्बन्धं तथैवाध्यापनं द्विजः ।
कृत्वा सद्यःपतेत् जानन् सह भोजनमेव च । अज्ञाना-
द्वा मोहात् कुर्यादध्यापनं द्विजः । संवत्सरेण पतति
सहाध्ययनमेव च" । अत्र पूर्ववचनं गुरुयाजनादिपरं
द्वितीयवचनं लघुयाजनाद्यर्थम् । न च ज्ञानाज्ञानाभ्या-
मेव सद्योवचनसंवत्सरवचनयोः सामञ्जस्यं भविष्यति
किं गुरुलघुव्यवस्थापनेनेति वाच्यं ज्ञानकृतादज्ञानकृत-
स्यार्द्धम् अज्ञानकृतात् ज्ञानकृतस्य द्वैगुण्यं युक्तं यतः
"ज्ञात्वाकामकृते वत्स्याद् द्विगुणं बुद्धिपूर्वके" इति वचनात्
अत्यन्तविप्रकर्षस्यादृष्टत्वात् । देवलेन याजनादिवचनस्य
गुरुयाजनाद्युपसंहृतत्वात्तद्वचने यागाद्युपयाजनाद्य-
पगतेस्तथाद्युक्तैव व्यवस्था । अथ गुरुसंसर्गकालं निरू-
प्याधुना लघुसंसर्गकालो निरूप्यते । तत्र यद्देवलोक्तं
याजनादिभ्यो लघूनां यानासनशयनैकपङ्क्तिभोजनानां
चतुर्णां अधरास्पर्शालापस्पर्शनिश्वासानां मिलित्वा स-
प्तानां ज्ञानतो वत्सरेण पातहेतुत्वमज्ञानतो वत्सरद्वयेनेति
तदेतत्प्रमाणमूलं द्वन्द्वानर्द्दशादेरभावात् । जिकनस्तु
"आसंवत्सरात् पतति पतितेन सहाचरन् । सह याना-
सनाभ्यामिति" विष्णुवचने द्वयोर्निर्देशात् यानास-
नादीनां सप्तानां मध्याद्येन केनचित् संसर्गद्वयेन वत्स-
रेण पात एकैकस्तु वत्सरद्वयेन एभ्योऽपि संलापादि-
संहतात् प्रकृष्टदानादेर्हि गुरुत्वाकालेन साम्यापादकत्वम्
एतच्च ज्ञानतः "जानन् संवत्सरं नर" इति वचनात्
अज्ञानादेतद्द्विगुणकालेनेति । तच्च तयोरपि द्वन्द्वनि-
र्देशात् । यथा मनुः "संवत्सरेण पतति पतितेन सहा-
चरन् । याजनाध्यापनाद्यौनात् न तु यानासनाशनात्" ।
तथा याजनादिना सद्यः पातः अज्ञानादवत्सरेण पातः तथा च
यानादिभिः एभिश्च मिलितैर्यात्रादिभिः । तत्र प

कूर्म्मपुराणे "ब्रह्महा मद्यपस्तेनो गुरुतल्पग एव च। महापातकिनस्त्वेते यश्च तैः सह संवसेत्। संवत्सरन्तु पतितैः संसर्गं कुरुते तु यः। यानशय्यासनैर्नित्यं जानन् वै पतितो भवेत्"। तथा वृहस्पतिः "षाण्मासिके तु संयोगे याजनाध्यापनादिना। एकत्रासनशय्याभिः प्रायश्चित्तार्द्धमाचरेत्"। एकत्रासनशय्यापदेन लघुसंसर्गान्तरं लक्ष्यते अन्यथा बहुवचनानुपपत्तेः। यथा प्रोद्गातॄणां भक्ष्यः फलचमसः इत्यत्र प्रोद्गातृशब्दस्य प्रोद्गातृपरत्वमुक्तम्। यदा त्वेकत्रासनशय्यादिरिति पाठस्तदादिशब्दात् संसर्गान्तरलाभः अयन्त्वपपाठः टीकाऽलिखितत्वात्। उच्यते। यानादीनां लघुसंसर्गाणां समुच्चितानां पातहेतुत्वं द्वन्द्वनिर्देशात् त्रयाणां द्वन्द्वनिर्देशो बहुषु वचनेष्ववगम्यते। अत्र च यानादीनामनियतत्वश्रवणात् बाधनात् एभिस्त्रिभिः लघुसंसर्गैर्वत्सरेण पततीत्येकैव श्रुतिः कल्पनीया सह यानासनाभ्यामित्यत्र सहशब्दादेककालत्वमवगम्यते एककाले चैकपीठाद्युपवेशनं स्पर्शनिश्वासालापलघुतरसंसर्गत्रयनियतमतस्तद्वयोरेव गम्यते एभिस्त्रिभिर्लघुतरसंसर्गैरेको लघुसंसर्गः समानः अतस्तत्रापि लघुसंसर्गत्रयमेव मन्वादिवचनेषु सहशब्दाभावात कालभेदेन सततपतितोपभुक्तासनाद्युपवेशनं ग्राह्यमतस्त्रिभिर्लघुसंसर्गैर्वत्सरेण साम्यम् एतच्च ज्ञानतः "जानन् संवत्सरम्" इति देवलवचनात् अज्ञानतो वत्सरद्वयेन एकैकशो ज्ञानाद्वत्सरत्रयेण अज्ञानात् वत्सरषट्केन संलापादीनाञ्च एकैकयानादिसमानत्वात् ज्ञानतो वत्सरत्रयेण पातः। अज्ञानतो वत्सरषट्केन ज्ञानादेकैकशो वत्सरनवकेन। अज्ञानादेकैकशोऽष्टादशभिर्वत्सरैरित्यर्थः। ननु संलापादीनां कथं यानादिभ्यो लघुत्वम्। उच्यते लघुप्रायश्चित्तश्रवणात् यथोशनाः "कुतपचण्डालैर्दर्शनस्पर्शनसम्भाषणादीनि वर्जयेत् दर्शने ज्योतिषां दर्शनं स्पर्शने हृदयालम्भनं सम्भाषणे ब्राह्मणसम्भाषणमप्यस्पर्शनस्येति"। कुतपचण्डालैः पतितैः पदाटिचिह्नितैः, दर्शनस्तु न संसर्गः प्रकरणेऽपाठात् पतितस्पर्शनमत्र परम्परया ग्राह्यं साक्षात् स्पर्शने स्नानश्रवणात् तथा मनुः "दिवाकीर्त्तिमुदक्याञ्च पतितं सूतिकान्तथा। शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति"। पतितान्नभोजनपतितद्रव्यप्रतिग्रहयोश्च प्रत्येकं ज्ञानतः बहुभिः मासैरज्ञानाद्वर्षैश्च पातित्यजनकत्वं यथा पतितानभिधायाह संवर्त्तः "एभिः संसर्गमायाति यः कश्चित् काममोहितः। षण्मासानर्द्धमेकं वा ब्रह्मकूर्च्चमतश्चरेत्"। न चास्य ज्ञानाज्ञानकृतयोर्नसंसर्गविषयत्वम् अविशेषश्रुतेर्यौनतुल्यत्वादेतयोः तथा च पतितान्नभोजनस्य संवत्सरेण पातहेतुत्वमाह देवलः "संवत्सरेण पतति पतितेन सहाचरन्। भोजनासनशय्यादि कुर्व्वाणः सार्व्वकालिकम्"। भोजनं तदन्नभोजनं सार्व्वकालिकमनवच्छिन्नं भोजने च तथा दर्शनात् प्रतिग्रहेऽपि तथात्वमूहनीयं तयोः समानत्वदर्शनात् साम्ये हेतुमाह वृहस्पतिः "पतितानां गृहं गत्वा भुक्त्वा च प्रतिगृह्य च। मासोपवासं कुर्व्वीत चान्द्रायणमथापि वा"। मासोपवासो ज्ञानाभ्यासे तत्र च पञ्चदश धेनवः। चान्द्रायणमज्ञानाभ्यासे तत्र चार्द्धसप्त धेनवः। गृहं गत्वेति अनेकसंवत्सरेणेति। तथा मनुः "चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति"। तथा रजकादीनभिधायाह यमः "भुक्त्वा चैषां स्त्रियो गत्वा पीत्वापः प्रतिगृह्य च। कृच्छ्रमब्दं चरेज्ज्ञानादज्ञानादैन्दवद्वयम्"। पतितान्नभक्षणप्रायश्चित्तात् पतितस्पृष्टान्नभक्षणप्रायश्चित्तार्द्धेन ह्रासदर्शनादर्द्धहानिः तेन ज्ञानतः पतितस्पृष्टान्नभोजने संवत्सरेण साम्यमज्ञानतो वत्सरद्वयेनेति। तथा प्रचेताः "पतितान्नन्तु यो भुङ्क्ते सप्ताहमुदके वसेत्। पानीयपानतश्चैव कूपवारि पिबेत्त्र्यहम्"। सप्ताहोदकवासे धेनुद्वयं बध्यते एतत् सकृदज्ञानविषयं सकृज्ज्ञानकृतपतितस्पृष्टान्नभक्षणे यमः "भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत्। अर्द्धोच्छिष्टे स्मृतः पादः पाद आचामने तथा"। "अमेध्यपतितचाण्डालपुल्कसरजकावधूतकुष्ठिकुनखिस्पृष्टानि भुक्त्वा कृच्छ्रमाचरेत्"। पातकिस्पृष्टपाकान्नभोजने तु संसर्गस्य किञ्चिद्व्यवधानात् पादहानिः तेन ज्ञानतः सपादवत्सरेणाज्ञानतः सार्द्धवत्सरद्वयेन साम्यम्। पातकिसजातीयपाकान्नभोजने तु ततोऽपि व्यवहितत्वादर्द्धपादहानिः। तेनात्र ज्ञानकृते सार्द्धवत्सरेणाज्ञानतो वत्सरत्रयेण साम्यम्। पतितान्नभक्षणे पतितभिक्षान्नभक्षणस्य चतुर्थभागः एवं पतितपानीयपानेऽपि चाण्डालान्नभक्षणे तथा दर्शनात्। "यथा विष्णुः चाण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत् सिद्धान्नं भुक्त्वा पराकः" इति अपक्वान्नमामान्नम् उत्तरत्र सिद्धान्नदर्शनात् पराके च द्वादशोपवासाः। तथा प्रचेताः "पतितान्नन्तु यो भुङ्क्ते सप्ताहमुदके वसेत्। पानीयपानतश्चैव कूपवारि त्र्यहं

विदेत्। त्रिरात्रोपवासे चतुर्विंशतिपणत्रयं ब्राह्मणं देयम्। एतदेव कुम्भवारिपाने किञ्चिदूनं देयम्। पतितोच्छिष्टभक्षणे तु पतितान्नभक्षणाद्द्विगुणत्वेन पापाधिक्यम्। यथाङ्गिराः "चाण्डालपतितादीनामुच्छिष्टान्नस्य भक्षणे। द्विजः शुध्येत् पराकेण शूद्रः कृच्छ्रेण शुध्यति"। एतत् सकृदज्ञानविषयम्। पराके पञ्च धेनवः। सकृदज्ञानकृतपतितान्नभोजने धेनुद्वयं प्रचेतोवचने व्याख्यातम्। तेन ज्ञानतः पतितोच्छिष्टान्नभक्षणे मासत्रयेण पतितसाम्यम् अज्ञानतो मासषट्केन। उच्छिष्टान्नभक्षणवदुच्छिष्टप्रोञ्छनेऽपि व्यवस्था "उच्छिष्टभोजनश्चैव तथा तस्य च मार्जनम्" इति देवलवचने साहचर्य्यदर्शनादिति। अत्र कृतानेकपातकपुरुषसंसर्गादेकैव पापव्यक्तिरुत्पद्यते न भिन्ना कल्पनागौरवापत्तेः। पुरुषापराधस्य च संसर्गलक्षणस्य निमित्तकारणस्य तद्विशिष्टात्ममनःसंयोगस्याप्यसमवायिकारणस्यैकत्वात्। प्रायश्चित्तन्तु गुरुसंसर्गस्यैव करणीयं गुरुणा प्रायश्चित्तेन लघुनः पापस्य क्षयाभिधानात्। तथानेकमहापातकिपुरुषसंसर्गपापव्यक्तिभेदेऽपि देशकालकर्त्रैक्ये तन्त्रतया एकत्वात्तन्त्रेणैव प्रायश्चित्तम्। जिकनस्तु युगपदनेकब्राह्मणवधवद्युगपदनेकपातकिसंसर्ग एव तन्त्रता। क्रमकृते तु ब्राह्मणवधवदावृत्तिरेव प्रायश्चित्तस्येति तन्न ब्रह्मवधेऽपि क्रमकृते प्रायश्चित्ततन्त्रताया उक्तत्वात्। युगपदनेकब्रह्मवध एव ज्ञानाज्ञानाभ्यां विशिष्टमरणयावज्जीवनतक्षणप्रायश्चित्तभेदेन तन्त्रताऽभावस्य श्रीमहादेवपादैर्दर्शितत्वात्। इह तु तद्वत् प्रायश्चित्तवैषम्ये प्रमाणं नास्ति तथा गुरुतल्पेव महापातकिनोऽपि पातक्यन्तरसंसर्गे पापमुत्पद्यते एव आवृत्तब्रह्मवधवदेतोन समत्वात्। अन्यथा पातकिसहस्राखाद्यभक्षणेऽप्यदोषः स्यात्। तथा प्रतिक्षणं पूर्वपूर्वोत्पन्नपापव्यक्तिसहकृतोत्तरोत्तरसंसर्गान्या एव पापव्यक्तयो महत्य उत्पद्यन्ते पूर्वापूर्वा चोत्पन्नैव विनश्यति वत्सरेणैव मूलपापकर्तृपापसमानवृद्धिरापूर्वव्यक्तिरुत्पद्यते। सा च सम्पूर्णनरकफला वत्सराभ्यन्तरेऽल्पाल्पनरकफलिका अतएव प्रायश्चित्तवाक्यमपेक्षम्। न तु भिन्नभिन्नाः समानाः पापव्यक्तयः समुदायात् सम्पूर्णनरकं फलम्। सम्पूर्णनरकफलस्य ब्रह्मवधादावेकपापव्यक्तिफलत्वदर्शनादिति"। अत्रेदं बोध्यम्। महापातकिसंसर्गस्तु कलौ नापदहत्वं नान्यपातकिसंसर्गस्य यथोक्तं पराशरस्य "कृते सम्भाषणात् पापं त्रेतायाञ्चैव स्पर्शनात्। द्वापरे चान्नमादाय कलौ पतति कर्मणा"। कलौ सम्भाषणादिना न पातित्यं किन्तु कर्तुरेव कर्ममात्रेणैव पातित्यं न संस्पर्शनादिना। "आसनात् गात्रसंस्पर्शादित्यादि" पराशरवचनं महापातकिविषयमिति पराशरभाष्ये माधवाचार्य्य आह स्म।

संसर्गाभाव पु० संसर्गेण सम्बन्धेनावच्छिन्नप्रतियोगिताकोऽभावः। ध्वंसप्रागभावात्यन्ताभावरूपे भेदभिन्ने १अभावे २सम्बन्धाभावे च "प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च। एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते" भाषा०। संसर्गाभावत्वं च अन्योन्याभावभिन्नाभावत्वं तत्र अन्योन्याभावस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावरूपतया तद्भिन्नस्य संसर्गाभावत्वोक्तेः। तादात्म्यातिरिक्तसंसर्गावच्छिन्नप्रतियोगिताकत्वेन संसर्गाभावस्य यौगिकताऽपि। संसर्गप्रतियोगिकाभावत्वं तु न लक्षणं तथात्वे वक्ष्यमाणोक्तं दूषणमापतेत् तथा हि अभावस्य संसर्गप्रतियोगिकत्वे घटादिप्रतियोगिकत्वं बाध्येत द्रव्यगुणकर्मणां समवायिकारणेषु संसर्गस्य समवायसम्बन्धरूपतया तस्य नित्यत्वेन ध्वंसाधारे तत्संसर्गाभावस्यासम्भवात्। समवायावच्छिन्नप्रतियोगिताकत्वेन बोधने तु प्रतियोग्यनुत्पन्नदशायां समवायस्य नित्यत्वेन तद्बुद्धेरसम्भवात्। संसर्गाभावश्च नञादिनिपातेन धातुना च बोध्यते तत्र निपातेन प्रातिपदिकार्थाभावस्य बोधने अनुयोगिनि सप्तम्यपेक्षा यथा गेहे घटो नास्तीति। क्रियारूपसंसर्गाभावस्य धात्वर्थादौ बोधने तु नायं नियमः यथा गगनं न पश्यति न कलञ्जं भक्षयेदित्यादौ तत्र दर्शने गगनकर्मत्वस्य कलञ्जभक्षणस्य बलवदनिष्टसाधनत्वस्य नञा संसर्गाभावस्य बोधनाच्च तत्र सप्तम्यपेक्षेति विवेकः। कथा० सू० इत्युक्तोदाहरणोक्तं यथा।

"नास्ति घटो गेहे इति यतो घटस्य गेहसंसर्गप्रतिषेधः" कथा०सू० "गेहे घटस्य यः संसर्गः संयोगस्तस्य प्रतिषेधः न च यदि कदाचिदपि न घटस्तदात्यन्ताभाव एव भविष्यतः प्रागभावो भूतस्य प्रध्वंसाभावः, तर्हि घटसंसर्गो गेहे नास्तीति प्रतीत्या भवितव्यं भवति चेत् प्रतीत्या भवितव्यमित्यस्य कोऽर्थः यदि तद्विषयया प्रतीत्या भवितव्यमित्यापादनं तदेष्टापत्तिः अथ तदुल्लेखिन्येति तदा गेहे इत्यधिकरणोल्लेखस्यैव संसर्गोल्लेखसामानाधिकरण्यस्यैव धर्मिधर्मभावादिरत्वात् तत्र किं घटसत्तायाः? अप्रत्येति कोऽयंसंशय सप्रत्ययः संपृष्टो वः

त्त्वाद्यः समवेतघटस्य तत्राभावात् न । द्वितीयः संयोगस्य निषेधात् नन्वेवं घटादीनां केवलान्वयित्वप्रसङ्गः तत्सं-योगसमवायान्यतरस्यैव सर्वत्र निषेधादिति चेन्न तदुभय-निषेधस्यैव घटनिषेधात्मकत्वात् तत् किं घटतत्संयोगस्यै-कैकं तत्त्वं येन घटसंयोगनिषेधो घटनिषेधः स्यात् तत् किं घटतत्संयोगसमवायावेकं तत्त्वं येन तद्विधिरेव घटविधिः स्यात् न हि तौ यत्र निषिध्येते तत्र घटान्वयो येन केवलान्वयित्वं तस्य स्यात् तथा च यस्य यो विधि-स्तन्निषेध एव तन्निषेध इति । यद्वा घटस्य समवायितया गेहेऽत्यन्ताभाव एव स एव गेहे घटो नास्तीति प्रतीति-विषयः कपाले संयोगितयैव । एवं सति केवलान्वय्यत्य-न्ताभावप्रतियोगितया घटोऽसन् स्यादिति चेत् भवेदेवं यदि संयोगित्वसमवायित्वाभ्यां सर्वत्रासन् स्यादिति" ।

संसर्गिन् त्रि० सम्+सृज–घिनुण् । १संसर्गयुक्ते विभागा-नन्तरम् (यत्तव धनं तन्ममेति) कृतसमयेन एकत्रावस्था-नरूपसंसर्गयुक्ते २भ्रात्रादौ ३सम्बद्धे च ।

संसार पु० संसरत्यस्मात् सम्+सृ–घञ् । १मिथ्याज्ञानजन्य-संस्काररूपवासनायां २देहारम्भकादृष्टभेदे ३स्थाद्यौपनि-षद्देहपरिग्रहे च आधारे घञ् । ४विश्वे । भावे घञ् । ५संसृतौ । संसारगतिप्रकारः शा०सू०भा० दर्शितो यथा "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणा-भ्याम् सू० "पञ्चाग्निविद्यामाश्रित्य संसारगतिप्रभेदः प्रद-र्श्यते, वैराग्यहेतोस्तस्याम् जुगुप्सितेति चान्ते श्रवणात् । जीवो मुख्यप्राणसचिवः सेन्द्रियः समनस्को विद्याकर्म-पूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहान्तरं प्रतिपद्यते इत्येतदवगतम् । "अथैनमेते प्राणा अभिसमायन्ति" इ-त्येवमादेः "अन्यन्नवतरं कल्याणतरं रूपं कुरुते" इत्ये-वमन्तात् संसारप्रकरणस्थाच्छब्दात्, धर्माधर्मफलोपभोग-सम्भवाच्च । स किं देहबीजैर्भूतसूक्ष्मैरसम्परिष्वक्तो गच्छति आहोस्वित् सम्परिष्वक्त इति चिन्त्यते । किं ता-वत् प्राप्तं असम्परिष्वक्त इति । कुतः करणोपादानवद्भू-तोपादानस्याश्रुतत्वात् । "स एतास्तेजोमात्राः समभ्याद-दानः" इत्यत्र तेजोमात्राशब्देन करणानामुपादानं सङ्की-र्तयति, वाक्यशेषे चक्षुरादिसङ्कीर्तनात् । नैवम् भूतो-पादानसङ्कीर्तनमस्ति । सुलभाश्च सर्वत्र भूतमात्राः, यत्रैव देह आरब्धव्यस्तत्रैव सन्ति । ततश्च तासां नयनं निष्प्रयो-जनं, तस्मादसम्परिष्वक्तो यातीत्येवं प्राप्ते पठत्याचार्यः "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः" इति । तदन्तर-प्रतिपत्तौ देहबीजैर्भूतसूक्ष्मैः सम्परिष्वक्तो रंहति गच्छ-तीत्यवगन्तव्यम् । कुतः प्रश्ननिरूपणाभ्याम् । तथा हि प्रश्नः "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भ-वन्ति" इति । निरूपणञ्च प्रतिवचनं द्युपर्जन्यपृथिवीपुरु-षयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपा आ-हुतीर्दर्शयित्वा "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भ-वन्ति" इति । तस्मादद्भिः परिवेष्टितो जीवो रंहति व्रज-तीति गम्यते" । सां०का० तत्प्रकारो दर्शितो यथा "संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" का० "प्र-त्यक्षं तदेव शरीरं भोगायतनं पुरुषस्य, सतं ह्यमानेन षाट्कौशिकेन शरीरेणेत्यत आह संसरतीति उपात्तमुपात्तं षाट्कौशिकं शरीरं जहाति हायं हायं चोपादत्ते, कस्मात् ? निरुपभोगं यतः षाट्कौशिकं शरीरं विना सूक्ष्मं शरीरं निरुपभोगं, तस्मात् संसरति । ननु धर्मा-धर्मनिमित्तः संसारः न च सूक्ष्मशरीरस्यास्ति तद्योगः, तत्कथं संसरतीत्यत आह भावैरधिवासितं धर्माधर्मज्ञाना-ज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि भावास्तदन्विता बुद्धिः तदन्वितञ्च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा सुरभिचम्पककुसुमसम्पर्कात् वस्त्रं तदामोदवासितं भवति तस्मा-द्भावैरधिवासितत्वात् संसरति । कस्मात् पुनः प्रधान-मिव महाप्रलयेऽपि तच्छरीरं न तिष्ठतीत्यत आह लि-ङ्गम् लयं गच्छतीति लिङ्गं हेतुमत्त्वेन चास्य लिङ्गत्व-मिति भावः । स्यादेतद्बुद्धिरेव साहङ्कारेन्द्रिया कस्मान्न संसरति कृतं सूक्ष्मशरीरेणाप्रामाणिकेनेत्यत आह "चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया । तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्" का० "लिङ्ग-मात् महदादि सूक्ष्मपर्यन्तं, बुद्ध्यादयोलिङ्गं तत् अनाश्रितं न ति-ष्ठति । जन्मप्रायणान्तराले बुद्ध्यादयः प्रत्युत्पन्नशरीर-स्थिताः प्रत्युत्पन्नशरीरमाश्रयन्ते सति बुद्ध्यादित्वात् दृश्यमानशरीरवर्त्तिबुद्ध्यादिवत् । विना विशेषैरिति सूक्ष्मैः शरीरैरित्यर्थः । आगमश्चात्र भवति "अङ्गुष्ठ-मात्रं पुरुषं निश्चकर्ष यमो बलादिति" । अङ्गुष्ठमात्रत्वेन सूक्ष्मतामुपलक्षयति आत्मनो निष्कर्षेण सूक्ष्मस्यैव शरीरं प्रदर्शयति हि पुरुष एव न शरीरे गते" त०कौ० ।

संसारगुरु पु० ६त० । १कामदेवे त्रिका० २जगद्गुरौ च ।

संसारचक्र न० संसारश्चक्रमिव । जन्म-मरणप्रवाहात्मके जीवस्य व्यापारभेदे कुलालचक्रवत् देहग्रहणानन्तरं तस्यो-पभुज्यमानकर्मणो नाशे मरणं तदनन्तरं च जन्मान्तरधा-

रेण देवतिर्य्यगादिभावापत्तिरित्येवं सततगतागतप्रचुरत्वात् संसारस्य चक्रतुल्यत्वात् तथात्वम् । तदेतत् विष्णुपु० संसारचक्रनिरूपणे निरूपितं तत्र दृश्यम् ।

संसारमार्ग पु० ६त० । योनिद्वारे त्रिका० । तत एव हि बहिर्निर्गमने मायासुगमतेति तस्य तथात्वम् ।

संसारिन् त्रि० संसरति अदृष्टवशात् देहभेदमनुगच्छति सम्+सृ-णिनि । शरीराभिमानिनि जीवे ।

संसिद्ध त्रि० सम्यक् स्वभावेन वा सिद्धः सम्+सिध-क्त । १स्वभावसिद्धे २सम्यग्निष्पन्ने च ।

संसिद्धि स्त्री सम्+सिध-क्तिन् । १स्वभावे प्रकृतौ २सम्यग्निष्पत्तौ । सम्यक्सिद्धिर्यत्र । ३मुक्तौ च "कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः" गीता । [४प्रकृतौ शब्दच० ।

संसृति स्त्री सम्+सृ-क्तिन् । १संसारे २प्रवाहे च त्रिका० ।

संसृष्ट पु० सम्+सृज-क्त । विभागानन्तरं मैत्र्यात् पुनः स्वस्वधनेषु मतसंसर्गयुते भ्रात्रादौ "विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः । पितृव्येणाथ वा प्रीत्या स तु संसृष्ट उच्यते" "इहस्वतिपरिगणितव्यतिरिक्तेषु संसर्गितो विशेषो नादरणीयः परिगणनानर्थक्यात्" दायभा० । तदनन्तरविभागस्तत्र दर्शितो यथा "विभक्ताः सह जीवन्तो विभजेरन् पुनर्यदि । समस्तत्र विभागः स्यात् ज्यैष्ठ्यं तत्र न विद्यते" मनुः । "समस्तत्रेति स्वस्वोपार्जितसंसर्गाभिप्रायेण ब्राह्मणक्षत्रिययोस्तु पूर्वक्रमभागानुसारेण भागव्यवस्था बोद्धव्या । पूर्वकृतज्यैष्ठ्यांशनिषेधमात्रपरं हि समवचनम् अतएव वृह० "विभक्ता भ्रातरो ये तु संप्रीत्यैकत्र संस्थिताः । पुनर्विभागकरणे तेषां ज्यैष्ठ्यं न विद्यते" इति ज्यैष्ठांशभागं निषेधति न तु भागसाम्यम्" दायभा० । तत्र भ्रात्रभिप्राये विशेषस्तत्रोक्तो यथा "अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यधनं हरेत् । असंसृष्ट्यपि चादद्यात् संसृष्टो नान्यमातृजः" याज्ञ० अस्यायमर्थः । "संसृष्टी पुनरन्योदर्य्यः प्रथमं हरेत् न पुनरन्योदर्य्यमात्रम् । प्रथमं च हरन् सोदरं बाधित्वैव वा तेन सह वेत्यपेक्षायामाह असंसृष्ट्यपि सोदरो गृह्णीयात् सोदरपदमनुवर्त्तते ("सोदरस्य तु सोदरः" इति वचनात्) । नान्यमातृज एव संसृष्टी गृह्णीयात् संसृष्टपदमेव वा सोदरमभिधत्ते अतएव वृहस्पति० "सोदरो नान्यमातृजः" इति जितेन्द्रियेण लिखितम् । तथा च पूर्वार्द्धस्य संसृष्टीत्यनुवर्त्तते न च केवलमन्योदर्य्य एव संसृष्टी गृह्णीयात् किन्तु संसृष्ट्यपि सोदरो गृह्णीयादित्यर्थः । तेन असंसृष्टिना सोदरेण संसृष्टिना चासोदरेण विभज्य ग्रहीतव्यमतएवाविपर्यस्तं प्रयुक्तवान्" दायभा० । "तस्मात् सोदरासोदरनाम सद्भावे सोदराणामेव । सोदराणामेव मध्ये एकस्य संसृष्टत्वे तस्यैव असंसृष्टसोदरसंसृष्टासोदरसद्भावे च द्वयोरेव सापत्नमातृसद्भावे प्रथमं संसृष्टस्य तदभावे चासंसृष्टासोदरस्येति" दायभा० एवं भ्रातृपुत्रेऽपि । २समनाटिना संघट्टे मेदि० ३संयुक्ते च । भावे क्त । ४सम्पर्के ।

संसृष्टि स्त्री सम्+सृज-क्तिन् । १संसर्गे २अलङ्कारभेदे अलङ्काररशब्दे ४०५पृ० दृश्यम् । ["संसृष्टस्य तु संसृष्टी" याज्ञ० ।

संसृष्टिन् पु० संसृष्टमनेन इष्टा० इनि । संसृष्टभ्रात्रादौ

संस्कर्त्तृ त्रि० सम्+कृ-तृच्-सुट् च । १संस्कारकारके २पाचके च "संस्कर्त्ता चोपहर्त्ता च खादकश्च घातकाः स्मृताः" मनुः ।

संस्कार पु० सम्+कृ-घञ् सुट् च । सतोगुणान्तराधानरूपे १प्रतियत्ने यथा अलङ्कारादेरलङ्कारैः वस्त्रादेश्च उद्दीपनलिप्तामार्जनादयः, दर्पणादेर्निर्म्मलीकरणादिः ब्रीह्यादेश्च यज्ञाङ्गतासम्पादनाय वैदिकमार्गेण प्रोक्षणादिः । स च "संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिषु" कुसुमा० उक्तेः पुरुषस्यैव धर्मः" न्यायमतम् । मीमांसका एव व्रीहयः पुरोडाशाय कल्पन्ते नाप्रोक्षिता इति प्रोक्षणादिजन्यसंस्कारो यज्ञाङ्गपुरोडाशेष्विति द्रव्यधर्मः मीमांसकाः । एवं स्नानाचमनादिजन्याः संस्कारा देहे उत्पद्यमाना अपि तदभिमानिजीवे कल्प्यन्ते इति वेदान्तिनः । २स्मृतिहेतौ अनुभवजन्ये आत्मवृत्तिगुणभेदे ३पृथिव्यादिचतुष्टयस्थे वेगाख्ये गुणे, यथावस्थिततयास्थापनप्रयोजके स्थितिस्थापकाख्ये ४गुणभेदे च

"संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने । मूर्त्तमात्रे तु वेगः स्यात् कर्मजो वेगजः क्वचित् । स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि । अतीन्द्रियः स विज्ञेयः क्वचित् स्पन्देऽपि कारणम् । भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः । उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् । स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते" भाषा० "नित्यः संस्कारो नास्ति वेगस्तु द्विविधः कर्मजवेगजभेदात् तत्र शरादौ नोदनजनितेन कर्मणा वेगो जन्यते तेन च पूर्वकर्मनाशादुत्तरं कर्म एवमुत्तरोत्तरमपि कर्म जायते । वेगं विना कर्मणः कर्मान्तराजनकत्वात् पूर्वकर्मनाशे उत्तरकर्मोत्पत्तिश्च न स्यात् । यत्र वेगवता कपालेन जनिते घटे वेगो जन्यते तत्र

वेगाख्यो वेगः। स्थितिस्थापकसंस्कारस्त्वतीन्द्रियः शाखादीनां परित्यागे यत् पूर्वदेशगमनं तत्र स्थितिस्थापको हेतुः। उपेक्षानात्मकज्ञानजन्येन भावनाख्यसंस्कारो जन्यते स च स्मरणे प्रत्यभिज्ञायां च हेतुः जीववृत्तिरतीन्द्रियश्च स च चरमफलनाश्यः कश्चित् रोगादिनाश्यः कश्चित् कालनाश्यः” सि॰मु॰ अन्ये तु समानविषयकस्मरणमेव संस्कारनाशकम् अतएव “जायते च पुनःपुनःस्मरणाद्दृढतमसंस्कारः” इति दीधितिकृत् कल्पाहुः। संस्कारत्वं तु न जातिरिति चपकादौ व्यवस्थापितम्। ५शास्त्राभ्यासजन्यव्युत्पत्तौ, व्याकरणोक्तादिना शब्दानां ६साधनप्रकारे, विवाहादीनां वैदिककर्महेतुत्वप्रयोजके ७गर्भाधानादौ क्रियाकलापे ८पाके च। विवाहादीनां देहसंस्काराश्च अष्टाचत्वारिंशत् तच्छब्दे ५१॰ ४॰ दर्शिताः। इदानीन्तनानां तु गर्भाधानाद्याविवाहान्ताः दशविधाः प्रसिद्धाः। तेषां च देह दोषनाशकता यथोक्तं हारीतेन “गर्भाधानवदुपेतो ब्रह्मगर्भं संदधाति पुंसवनात् पुंसीकरोति फलस्थापनात् मातापितृजपाप्मानमपोहति रेतोरक्तगर्भोपघातः पञ्चगुणो जातकर्मणा प्रथममपोहति नामकरणेन द्वितीयं प्राशनेन तृतीयं चूडाकरणेन चतुर्थं स्नापनेन पञ्चममेतैरष्टाभिः संस्कारैर्गर्भोपघातात् पूतो भवति”। “स्नापनं समावर्त्तनम्” उपनयनस्य वेदग्रहणार्थत्वम् विवाहस्याग्निसाध्यधर्माचरणार्थत्वमिति विवेकः अतो दशविधाः। “गर्भाधानमृतौ पुंसः सवनं स्पन्दनात् पुरा। षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म च। अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः। षष्ठेऽन्नप्राशनं मासि चूडा कार्य्या यथाकुलम्। एवमेनः शमं याति बीजगर्भसमुद्भवम्” याज्ञ॰। अत्र जातकर्मान्नप्राशनावधिको संस्कारो बीजादिदोषनिवारकतयोक्तौ। गृहनिष्पादनार्थश्च पञ्चविधः भूसंस्कारः वास्तु दर्शितः ते च समूहनमुपलेपनमुल्लेखनं सिक्तोद्धरणमभ्युक्षणमिति। दीक्षणीयतान्त्रिकमन्त्रसंस्काराश्च दशविधाः दीक्षा॰त॰ दर्शिता यथा

शारदायाम् “मन्त्राणां दश कथ्यन्ते संस्काराः सिद्धिदायिनः। जननं जीवनं पश्चात्ताडनं बोधनं तथा। अथाभिषेको विमलीकरणाप्यायने तथा। तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः। मन्त्राणां मातृकायन्त्रादुद्धारो जननं१ स्मृतम्। प्रणवान्तरितान् कृत्वा मन्त्रवर्णान् जपेत् सुधीः। एतज्जीवन२मित्याहुर्मन्त्रतन्त्रविशारदाः। मन्त्रवर्णान् समालिख्य ताडयेच्चन्दनाम्भसा। प्रत्येकं वायुना मन्त्री ताडनं३ तदुदाहृतम्”। वायुना वायुबीजेन “विलिख्यमेन तं मन्त्री प्रसूनैः करवीरजैः। तन्मन्त्राक्षरसंख्यातैर्हन्यात् यान्तेन बोधनम्४”। यान्तेन रकारेणेति “स्वतन्त्रोक्तविधानेन मन्त्री मन्त्रार्णसंख्यया। अश्वत्थपल्लवैर्मन्त्रमभिषिञ्चेद्विशुद्धये। स्वतन्त्रोक्तविधानेन मूर्ध्नि तोयेन दीक्षितः। नमोऽन्तं मन्त्रमुच्चार्य तदन्ते देवताभिधाम्। द्वितीयान्तामहं पश्चादभिषिञ्चाम्यनेन तु। तोयैरञ्जलिसंख्यैर्वाप्यभिषिञ्चेत् समुद्रनि५”। स्वतन्त्रोक्तविधानेन गुरवश्चोपचारोक्तविहिताञ्जलिना इत्यभिहितेन “सञ्चिन्त्य मनसा मन्त्रं ज्योतिर्मन्त्रेण निर्दहेत्। मन्त्रे मलत्रयं मन्त्री विमलीकरणं६ त्विदम्”। मलत्रयं मायिकं कार्मिकं आणवरूपम् “तारव्योमाग्निमनुयुग्दण्डी ज्योतिर्मनुर्मतः”। तारः प्रणवः व्योम हकारः अग्नीरेफः मनुरौकारः तद्युक्तोदण्डोऽनुस्वारः। तेन ओम् ह्रौं इतिमन्त्रः। “कुशोदकेन मन्त्रेण प्रत्यर्णं प्रोक्षणं मनोः”। प्रत्यर्णं प्रत्यक्षरम् “तेन मन्त्रेण विधिवदेतदाप्यायनं७ मतम्। मन्त्रेण वारिणा मन्त्रतर्पणं तर्पणं८ मतम्”। मन्त्रेण मूलमन्त्रेण। “मूलमन्त्रं समुच्चार्य तदन्ते देवताभिधाम्। द्वितीयान्तामहं पश्चात् तर्पयामि नमोऽन्तकम्” इति पुरश्चर्य्यार्णवमेव लिखितमन्त्राधाररूपयन्त्रे। “तारमायारमायोगो मनोर्दीपनं९मुच्यते”। तारः ओम् माया ह्रीं रमा श्रीम् “जप्यमानस्य मन्त्रस्य गोपनं१०त्वप्रकाशनम्। संस्कारा दशसंख्याताः सर्वतन्त्रेषु गोपिताः। यान् कृत्वा सम्प्रदायान् मन्त्री वाञ्छितमश्नुते”।

देवप्रतिष्ठासंस्काराश्च देवताप्रतिष्ठाशब्दे ३७२४५॰ दृश्याः। अन्येऽपि तत्तद्ग्रन्थस्थसंस्कारास्तत्तच्छब्दे दृश्याः।

संस्कारवर्जित त्रि॰ ३त॰। १गर्भाधानादिसंस्कारहीने २शास्त्रादौ व्युत्पत्तिहीने च संस्कारहीनादयोऽप्यत्र।

संस्कृत त्रि॰ सम्+कृ–क्त सुट् च। १कृतसंस्कारे पदार्थे व्याकरणलक्षणाधीनसाधनयुक्ते २शब्दे ३पक्वे ४भूषिते ५शास्त्रभेदे मेदि॰ ६शोभिते जटा॰।

संस्तर पु॰ सम्+स्तृ–अप्। १यज्ञे २शय्यायां हेमच॰ ३पल्लवादिरचितशय्यायां च “नवपल्लवसंस्तरे यथेति” कुमारः

संस्तव पु॰ सम्+स्तु–अप्। १परिचये अमरः २सम्यक्स्तुतौ च

संस्ताव पु॰ संस्तूयतेऽत्र सम्+स्तु–घञ्। यज्ञार्थं संस्तावकविप्राणां वासभूमौ अमरः।

संस्तुत त्रि० सम्+स्तु–क्त । १परिचिते २सम्यक्स्तुते च ।

संस्त्याय पु० सम्+स्त्यै–घञ् । १संघाते २निविडसंयोगरूपे सन्निवेशे अमरः । ३विस्तृतौ ४संस्थाने च मेदि० करणे घञ् । ५गृहे हेमच० ।

संस्थ त्रि० सम्+स्था–क । १अवस्थिते मेदि० २मृते शब्दर० ३चरे पु० मेदि० ४निवासके ५अवस्थिते ६व्यक्तौ ७क्रतुप्रकारभेदे ८समाप्तौ च हेमच०। ६प्रकारे "नैमित्तिकः प्राकृतिको नित्य आत्यन्तिकोऽव्ययः । संस्थेति कविभिः प्रोक्तश्चतुर्धाऽस्य स्वभावतः" इत्युक्ते १०प्रलये च ।

संस्था स्त्री सम्+स्था–अङ् । १न्याय्यपथावस्थितौ अमरः । २स्थितौ ३नाशे मेदि० ४यज्ञभेदे ५व्यवस्थायां ६व्यक्तौ ७आदाय्ये दण्डान्ते च ।

संस्थान न० सम्+स्था–ल्युट् । १चतुष्पथे अमरः । २सन्निवेशे मेदि० ३आकारे ४अवयवारम्भकसंयोगभेदे ५मृतौ ६चिह्ने अजयः । ७सम्यक्स्थितौ च ।

संस्थित त्रि०सम्+स्था–क्त । १मृते अमरः २सम्यक्स्थिते च

संस्पर्शा स्त्री संस्पृश्यते सम्+स्पृश–कर्मणि अच् टाप् । रजनीगन्धाख्ये अमरः ।

संस्फाल पु० सम्यक् स्फालः स्फुरणं यस्य । मेषे त्रिका०।

संस्फुट त्रि० सम्+स्फुट–क । विकसिते शब्दच० ।

संस्फेट न० सम्+स्फुट–आधारे घञ् पृषो० । युद्धे भरतः

संस्फोट पु० सम्+स्फुट–आधारे घञ् । युद्धे अमरः ।

संहत त्रि० सम्+हन–क्त । १दृढसन्धौ अमरः । २मिलिते ३दृढे मेदि० । ४परार्थं मिलिते "संहतपरार्थत्वादिति" सांख्यस०। ४दृढसंयोगयुक्ते ५अत्यन्त हते च । भावे क्त । ६संघाते न० । [जितपार्ष्णिद्वये अमरः ।

संहतल पु० संहतं संक्षमनं करतलं अनि–ला–क । मि-

संहतपुष्पिका स्त्री संहतानि दृढसंयुक्तानि पुष्पाण्यस्याः कप् अत इत्वम् । मिश्रेयायां राजनि० ।

संहतजानु त्रि० संहते जानुनी यस्य । सम्नजानुके अमरः वा कप् । तत्रार्थे ।

संहति स्त्री सम्+हन–क्तिन् । १समूहे अमरः । २सम्यग् हनने च । [१देहे अमरः २संघाते ३वधे च ।

संहनन न० संहन्यते पदार्थः संहन्यते सम्+हन–ल्युट् ।

संहर्ष पु० सम्यक् हर्षः प्रा० सम्+हृष–घञ् वा । १आनन्दे २स्पर्द्धायाम् संघर्षणेन करणं क्रम् । ३वायौ मेदि०।

संहार पु० सम्+हृ–घञ् । १प्रलये हेमच० २नाशे ३संक्षेपे ४नरकभेदे अमरः । ५विसर्जने ६कालिकाभैरवभेदे च,

जटा० । "असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्त एव च । कपाली भीषणश्चैव संहारश्चाष्ट भैरवाः" तन्त्रसा० ।

संहारमुद्रा स्त्री संहाराय विसर्जनाय मुद्रा । तन्त्रोक्ते मुद्राभेदे तल्लक्षणम् "अधोमुखे वामहस्ते ऊर्द्धास्यं दक्षहस्तकम् । क्षिप्त्वाङ्गुलीरङ्गुलीभिः संग्रथ्य परिवर्त्तयेत् । प्रोक्ता संहारमुद्रेयमर्पणे तु प्रशस्यते" पदार्था० धृतवाक्यम् । अर्पणे आत्मनि देवार्पणे" ति०त०।

संहिता स्त्री सम्यक् हितं प्रतिपाद्यं यस्याः । १मन्वादिप्रणीते धर्मशास्त्रे २पुराणे ३इतिहासादौ ४अर्थवादशून्यप्रतिपादके वेदभागे च संहितापाठप्रकारस्तु ति०त० मत्स्यसूक्तोक्तः चण्डीशब्दे २८५० पृ० दर्शितः । "परः सन्निकर्षः संहिता" पा०उक्ते ५पूर्वापरवर्णयोः अत्यन्तसन्निकर्षे तत्र नियमविशेषः स्मर्यते "संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते" । [अमरः ।

संहूति स्त्री सम्+ह्वे-क्तिन् । बहुभिः कृते आह्वाने

संहृत त्रि० सम्+हृ–क्त । १कृतसंहारे २सङ्कुचिते च ।

संहृति स्त्री० सम्+हृ–क्तिन् । संहारे ।

संह्राद पु० सम्+ह्राद–घञ् । शब्दभेदे ।

संह्रादिन् त्रि० सम्+ह्राद–णिनि । शब्दायमाने ।

संह्लाद पु० सम्+ह्लाद–घञ् । आनन्दभेदे ।

सकण्टक पु० सह कण्टकेन सहस्य सः । १करञ्जभेदे (नाटाकरमचा) रत्नमा० । २शैवाले शब्दच०। ३कण्टकयुक्ते त्रि०

सकर्ण त्रि० सह कर्णेन श्रवणेन तद्व्यापारेण वा । १श्रुतियोगे जटा० २कर्णयुक्ते च ।

सकर्म्मक त्रि० सह कर्मणा सहस्य सः कप् । व्याकरणोक्ते कर्मयुक्तक्रियाबोधके धातौ "फलव्यापारयोरेकनिष्ठतायामकर्मकः । धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः" इत्युक्तदिशा धातोः सकर्मकत्वमवसेयम् ।

सकल त्रि० सह कलया अवयवमात्रया चतुर्दश्या कलाभिर्वा सहस्य सः । १सम्पूर्णे २समग्रे अमरः ३कलासहिते च

सकारण त्रि० सह कारणेन । कार्य्ये । [अन्तिके समीपे ।

सबाध पु० बधनं पीडनं बाधः बध–घञ् सह बाधेन ।

सकुरुण्ड पु० सह समानः कुरुण्डेन । रक्तकुरुण्टके राजनि०

सकुल पुं स्त्री० सह समानं कुलमस्य । १नकुलमत्स्ये (शउ) प्रसिद्धे क्लीब् । २समानवंशे त्रि० ।

सकुल्य त्रि० समाने कुले भवः यत् । अशौचनिर्णये स्मार्त्तव्यवहार्ये दशाहाशौचप्रभृतिसमाने "दशाहेन सपिण्डास्तु शुध्यन्ति

प्रेतसूतके। त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति बान्धवाः” इत्यादि। सपिण्डशब्दे दृश्यम्। [अन्ये।

सकृत् अव्य० एक+नि०। १एकवारे अमरः। २विष्ठायां स्त्री

सकृत्प्रज पुंस्त्री० सकृत् एकवारं प्रजायते प्र+जन–ड। १काके अमरः स्त्रियां ङीष्। २एकवारजातापत्ये च।

सकृत्फला स्त्री सकृत् फलति फल–अच्। कदलीवृक्षे राजनि०

सकृद्गर्भ पु० सकृद् गर्भो यस्य। खेसरे राजनि० एकवार गर्भवत्यां स्त्रियां स्त्री।

सकृद्वीर पु० कर्म०। एकवीरवृक्षे राजनि०।

सक्त त्रि० सन्ज–क्त। १आसक्ते २अविरते च हेमच०।

सक्तु पु० सन्ज–तुन् किच्च। भृष्टयवादिचूर्णे (छातु) शब्दच० “सेवाटो सक्तवो देया वारिपूर्णा च गर्गरी” ति०त०।

सक्तुफला(ली) स्त्री सक्तव इव क्षुद्राणि फलान्यस्याः वा ङीप्। शमीवृक्षे अमरः ङीबन्तः तन्मार्थे शब्दर०।

सक्थि न० सन्ज–क्थिन्। १ऊरौ अमरः २शकटावयवभेदे च उणादि०। बहु० स्वाङ्गे अच्-समा०। मृगसक्थ इत्यादि। [इन्द्रियत्वदेहत्वादिधर्मः।

सखण्डोपाधि पु० कर्म०। बहुपदार्थघटिते धर्मे यथा

सखि त्रि० सह समानं ख्यायते ख्या-डिन् नि०। सौहार्द्दयुक्ते अमरः। सखायौ सखा सख्युरित्यादि।

सखी स्त्री सखि+स्त्रीत्वे ङीप्। १सहचर्य्यां हेमच० २वयस्यायाम् अमरः।

सख्य न० सख्युर्भावः यत्। १मित्रतायां २सौहार्दे च।

सगन्ध पु० सह गन्धेन लेशेन वा सहस्य सः। १ज्ञातौ त्रिका० २गन्धयुते त्रि०।

सगर पु० सह गरेण विषेण जातः। १सूर्य्यवंश्ये नृपभेदे “सगरात् सागरोजातः” इति पुराणम्। स च इक्ष्वाकुनामराजतः यादव्यां जातः तत्सपत्न्या गरदानेऽपि स न ममार तत्कथा “तस्या (और्वस्य) आश्रमे च सा गर्भं सुषुवे ज्वलनप्रभम्। व्यजायत महाबाहुर्गरेणैव सह द्विज!। सगरो नाम तेनाभूत् बालकोऽतिमनोहरः” पद्मपु० १९अ०। २विषयुक्ते त्रि०।

सगर्भ पु० सह समानो गर्भोऽस्य। १सहोदरे भ्रातरि शब्दर०। सह गर्भेण। २गर्भयुक्ते मध्यवर्त्तिसूक्ष्मपत्रयुक्ते कुशदूर्वादौ त्रि० स्त्रियां टाप्। [भ्रातरि।

सगर्भ्य पु० समाने गर्भे भवः यत् सहस्य सः। सहोदरे

सगोत्र न० सह समानं गोत्रम् सहस्य सः। १कुले शब्दच० सह समं गोत्रमस्य। २ज्ञातौ त्रि० अमरः।

सग्धि स्त्री अद्-क्तिन् नि० सह ग्धया सहस्य सः। सहभोजने अमरः।

सङ्कट त्रि० सम+कटच् सम्+कट-अच् वा। १अल्पावकाशे स्थाने अमरः। २संबाधे ३दुःखे “नरोमुच्येत सङ्कटादिति” देवीमा०। ४देवीभेदे स्त्री ज्योतिषोक्ते दशाभेदे च स्त्री टाप्। दशाशब्दे ३४८४पृ० दृश्यम्।

सङ्कथा स्त्री सम्+कथ–भावे अ। परस्परकथने हेमच०।

सङ्कटाच पु० सङ्कटं संबाधमचति अच–अण्। धवद्वृक्षे विश्वः

सङ्कर पु० सम्+कॄ–कर्मणि अप्। १सम्मार्जन्यादिभिः क्षिप्ते रजसि अमरः। इतरजातिपुरुषेण इतरजातिस्त्रियां २जाते जातिभेदे। भावे अप्। ३मेलने ४परस्पराभावसामानाधिकरण्ये सत्येकाधिकरणवृत्तित्वे च स च जातिबाधकः। “व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः। रूपहानिरसम्बन्धो जातिबाधकसंग्रहः” सि० मु०। यथा भूतत्वाभाववति मनसि मूर्त्तत्वस्य सत्त्वात् मूर्त्तत्वाभाववति च गगने भूतत्वस्य सत्त्वात् भूम्यादिभूतचतुष्टये चोभयोः सामानाधिकरण्यात् तयोर्न जातित्वम्। वर्णसङ्करजातिश्च नानाविधा दिङ्मात्रमत्रोच्यते “वक्ष्ये सङ्करजात्यादि इत्युपक्रमे “विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां, विशः स्त्रियाम्। जातोऽम्बष्ठस्तु शूद्रायां निषादः पार्शवोऽपि च” इत्यादि गरु० ९६अ०। “स्त्रीषु दुष्टासु वार्ष्णेय! जायते वर्णसङ्करः” गीता। ५अलङ्कारभेदे अलङ्कारशब्दे ४०५पृ० दृश्यम्। ६संसर्गे स्पर्शादिसम्बन्धे चण्डालादिसङ्करे भवनादिदहनादि तत्र च प्रायश्चित्तादि प्रा० वि० उक्तं यथा

“अथ चाण्डालसङ्करप्रायश्चित्तम्। तत्र व्यासः “चाण्डालसङ्करेषु भवनदहनं पूरणं सर्वभाण्डभेदनं दारवाणाम् तक्षणं गङ्गायुक्तिरजतचेलानामद्भिः प्रक्षालनं कांस्यताम्राणामाकरशुद्धिः सौवीरपयोदधितक्राणां परित्यागः शेषरसवस्त्रद्रव्यरक्षणं गोमूत्रयावकाहारो मासं क्षपयेत् बालवृद्धस्त्रीणामर्द्धं प्रायश्चित्तम् आषोडशाद्बालः सप्तत्यूर्द्ध्वं स्थविरः चीर्णे प्रायश्चित्ते ब्राह्मणभोजनं गोयतञ्च दद्यादभावे सर्वस्वम्”। पूरणं पूर्वमृत्तिकाकर्षणेन मृत्तिकान्तरदानम् तक्षणं वास्यादिनांशवियोजनम् भाण्डभेदनं मृण्मयभाण्डभेदनम्। आकरे अग्नौ विन्यस्तैः अग्निसंयोगात्ताम्रादीनामुत्पत्तेः। शेषरसानां लावणादीनां यवादिद्रव्याणां च धान्यानां रक्षणम्। तथा च पराशरः “आकरे तु भवेच्छुद्धिरारकूटे तथा०

हते। अवशीर्णन्तु वस्त्राणां परित्यागस्तु सर्वशः। कुसुम्भगुडकार्पासलवणं सह सर्पिषा। द्वारि कुर्वीत धान्यानि दद्याद्गृहे हुताशनम्। हुताशनज्वालासंस्पृष्टं शुचि तन्मनुरब्रवीत्"। तेन रक्षणं कृतादीनाम् अग्निज्वालापवित्रीकृतानां कर्त्तव्यम्। एतच्च प्रायश्चित्तं सद्यःपातहेतुयोगादिवर्जितैः संसर्गैश्चान्ततो यावता कालेन पातित्यं भवति अज्ञानतश्चाण्डालसंसर्गे सति वेदितव्यम् इति तेन संवत्सरैकचाण्डालसम्बन्धे मासैकगोमूत्रयावकाहारः कर्त्तव्यः। अनेन च द्वादश धेनवो मासोपवासात् पञ्चमभागापकर्षात्। गोशतञ्च दक्षिणा। एतच्च प्रायश्चित्तं ब्राह्मणक्षत्रियविशां तुल्यमेव। तथा चापस्तम्बः "अन्त्यजातिरविज्ञातो निवसेद् यस्य वेश्मनि। स वै ज्ञात्वा तु काले तु कुर्य्यात्तत्र विशोधनम्। चान्द्रायणं पराकं वा द्विजातीनां विशोधनम्। प्राजापत्यन्तु शूद्राणां तथा संसर्गदूषणे। यैस्तत्र भुक्तं पक्वान्नं कृच्छ्रं तेषां विधीयते। तेषामपि च यैर्भुक्तं तदर्द्धं तेषु विद्यते। तेषामपि च यैर्भुक्तं कृच्छ्रपादो विधीयते। कूपैकपानदुष्टानां तथा संसर्गदूषणे। उपवासेन शुद्धिः स्यात् पञ्चगव्येन चैव हि। बालापत्या तथा रोगी गर्भिणी वृद्ध एव यः। तेषां नक्तं प्रदातव्यं बालानां प्रहरद्वयम्। अथ वा क्रियमाणे तु येषामार्त्तिः प्रदृश्यते। शेषं सम्पादयेत्तेषां विपत्तिर्न भवेद् यथा"। तत्र पूर्व्वोक्तकालादल्पकालसङ्करे चान्द्रायणम्। अल्पतरे पराकः। शूद्रस्य प्राजापत्यम्। कूपैकपानदुष्टानामिति एकस्मिन्नेव कूपे द्विजानां चाण्डालादीनां सहजलपानं कुर्वतां संसर्गदुष्टानां सोपवासपञ्चगव्यं विशोधनमित्यर्थः। संवर्त्तः "चाण्डालसङ्करे विप्रः श्वपाके पुक्कशेऽपि वा। गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति। एतदपि अल्पकालसङ्करविषयं मासार्द्धयावकाहाराशक्तौ सार्द्धधेनवः। यमस्तु "अगम्यागमनस्त्रीवधचाण्डालसम्पर्केषु कृच्छ्रत्रयम्"। एतदत्यन्ताल्पकालविषयं कृच्छ्रत्रयाशक्तौ धेनुत्रयम्। तथा "अविज्ञातस्तु चाण्डालो निवसेद् यस्य वेश्मनि। विज्ञाते तूपसंन्यस्य द्विजाः कुर्य्युरनुग्रहम्" इत्युपक्रम्याह पराशरः "दधिसर्पिःपयोमूत्रं यदा गोमूत्रयावकम्। भुञ्जीत सह भृत्यैस्तु त्रिसन्ध्यमवगाहनम्। भावदुष्टं न भुञ्जीत भोक्तव्यं गोरसैर्युतम्। त्रिपलं चाष्टकं चैव पलमेकन्तु सर्पिषः"। तथा च पुनः सह भृत्यैव कुर्य्याद्ब्राह्मणभोजनम्। अत्रतु- दक्षिणां गाञ्च दद्याद्विप्राय दक्षिणाम्"। दधिसर्पिःपयो मूत्रं यदा गोमूत्रयावकं द्वादशाहं भुञ्जीतेत्यर्थः। तत्र परिमाणमतःपाम् यथाशास्त्रम्। चर्म्मकारादीनामविज्ञात सङ्करे तु चाण्डालसङ्करप्रायश्चित्तस्य षष्ठो भागः कर्त्तव्यः चाण्डालस्पर्शप्रायश्चित्तात् चर्म्मकारादिस्पर्शे प्रायश्चित्तस्य षष्ठभागदर्शनात्। यथा आपस्तम्बः "चाण्डालैः श्वपचैः स्पृष्टो विण्मूत्रे च कृते द्विजः। त्रिरात्रं तत्र कुर्वीत भुक्तोच्छिष्टः षडाचरेत्"। चर्म्मकारादिस्पर्शे तु संवर्त्तः "एतैः स्पृष्टस्तथोच्छिष्ट एकरात्रं पयः पिबेत्" देवलः "चाण्डालसंयोगे जातश्चाण्डाल एव स्यात् ब्रह्मघ्नोद्दिष्टं प्रायश्चित्तं वार्षिकं षाण्मासिकं तदर्द्धं वा ब्रह्मवधे। चतस्रो यदुक्तं समासाः षण्मासाम्। अविज्ञातचाण्डालसम्पर्के विद्यमान एव दम्पत्योः संयोगे यो जातो ब्राह्मणः स वार्षिकं ब्रह्महत्याव्रतं प्राजापत्यं वा षाण्मासान् कुर्य्यात् वार्षिकब्रह्महत्याव्रताशक्तौ पञ्चदश धेनवो देयाः। षाण्मासिकब्रह्महत्याव्रताशक्तावर्द्धाः। अस्पृश्यस्पर्शनप्रायश्चित्तमभिहितमिदानीं स्पर्श एव निरूप्यते। किं साक्षात् स्पर्श एव स्पर्शशब्दस्यार्थः उत परम्परास्पर्शोऽपि न प्रथमः परम्परया चाण्डालस्पर्शे स्नानाद्यभावप्रसङ्गात् नापि द्वितीयः संयोगे संयुक्तसंयोगे चैकस्पर्शपदप्रवृत्तिनिमित्ताभावात् आचाराद्विहारेण सर्व्वाणामेव तत्प्रसङ्गात्. किञ्चैवम् "औदुम्बरी सर्व्वा वेष्टयितव्या औदुम्बरीं स्पृष्ट्वोद्गायेत्" इत्यत्र सर्व्ववेष्टनस्पर्शयोरविरोधः स्यात् उपस्पर्शस्यापि स्पर्शशब्दवाच्यत्वात् तथा च विरोधाधिकरणोदाहरणं भाष्यकारस्याप्यसङ्गतं स्यात्। तथा च वृद्धशातातपः "अशुचिं संस्पृशेद् यस्तु एक एव स दुष्यति। तत्स्पृष्टोऽन्यो न दुष्येत सर्व्वद्रव्येष्वयं विधिः"। "तथा संहतानान्तु पात्राणां यद्येकमुपहन्यते। तस्यैव शोधनं प्रोक्तं न तु तत्स्पृष्टानामपि"। उच्यते। सत्यम् उपस्पर्शो यद्यपि न स्पर्शशब्दार्थस्तथाप्यत्र वचनादेकाश्रयविहारकपरम्परास्पर्शोऽपि ग्राह्यः। तथा चापस्तम्बः "एकशाखां समारूढ़श्चाण्डालादिर्यदा भवेत्। ब्राह्मणस्तत्र निवसन् स्नानेन शुचितामियात्"। आदिशब्दादुदक्यादीनां ग्रहणम्। शाखाग्रहणमेकाश्रयस्योपलक्षणार्थं तेनैकपाषाणादेरपि ग्रहणम्। तथा स एव "एकवृक्षं समारूढ़ौ चाण्डालब्राह्मणौ यदि। फलं भक्षयतस्तत्र प्रायश्चित्तं कथं भवेत्। ब्राह्मणस्तु ... स्नानमाचरेत्। क-

चोरो भोषितो भूत्वा पञ्चगव्येन शुध्यति"। तथा च स एव "एकशाखां समारूढः चण्डाल्याद्यैर्नरो यदि। प्रायश्चित्तं त्रिरात्रं स्यात् पञ्चगव्यं विशोधनम्"। अत्र स्वधानवशिष्याभ्यामेकरात्रत्रिरात्रे। स्नानविधयं चेतद्वचनम्। तथा च ब्रह्मपुराणम् "विप्रश्चाण्डालसंस्पृष्टो यत्किञ्चित् चमसतो। अज्ञानात्तु फलं भुङ्क्ते चरेत्त्वाघमर्षणम्"। उपस्पर्शत्वात्। "पादे स्नानमाचमने तथेति" पूर्वोक्तापस्तम्बेन न विरोधः। तथाचापस्तम्बः "मूढः स्वस्तरे वा संस्पृशन् अप्रयतान् प्रयतो मन्येत"। तृणस्तरादौ चाण्डालादिभिः सहावस्थितोऽपि स्पृशन्नपि तान् प्रयतत्वमात्मनो मूढो मन्येत वस्तुतस्तु अशुचिरेवासौ इति पूर्ववाक्योपात्तं स्नानमेव कुर्य्यात् तथा "तृणकाष्ठादिषु निखातेषु च"। संक्रमादौ निखातेषु तृणकाष्ठेषु चाण्डालेन सहावस्थितोऽप्यशुचिरेव तथा "प्रोक्ष्य वास उपयोजयेत्"। न सचेलं स्नानमित्यर्थः। अयमेव विशेषः साक्षात्स्पर्शादस्य। अतोवचनादेकावयविद्वारा परम्परास्पर्शे स्नानादिकमिति। नौकादिषु न दोष इत्याह पराशरः। "रथ्याकर्दमतोयानि नावः पन्थास्तृणानि च। स्पर्शनान्न प्रदुष्यन्ति पक्केष्टकचितानि च"। तृणसमूहः पक्केष्टकचितानि मठादीनि। नन्वेवं याज्ञवल्क्यवचनविरोधः तद् यथा "उदक्याशौचिभिः स्नायात् संस्पृष्टस्तैरुपस्पृशेत्। अब्लिङ्गानि जपेच्चैव गायत्रीं मनसा सकृत्"; अत्र परम्परयोदक्यया अशुचिभिश्च स्पर्शे आचमनमवगम्यते। तथा "शवं तत्स्पृष्टमाङ्गेति" मनुवचने तत्स्पृष्टोऽत्वभिधीयते तदनर्थकं स्यात् चाण्डालादिस्पृष्टस्पृष्टिनोऽपि स्नानाभ्युपगमात् "शवस्पृक्ष्युपस्पर्शे सचेलस्नानाच्छुद्धिरिति" गौतमविरोधः "शवस्पृशं दिवाकीर्त्तिम्" इत्यादि वृहस्पतिवचन "शवस्पृष्टस्पृष्टेत्यादिविष्णुवचनाभ्याञ्च विरोधः स्यात् तच्छब्देन सर्वेषामेव चाण्डालादीनां परामर्शात् एषु सर्वेषु शवस्पृष्टिग्रहणात्। उच्यते। एकशाखां समारूढ इत्याद्यापस्तम्बवचनं वर्त्तमानाशुचिसंसर्गिसंस्पर्शविषयं याज्ञवल्क्यादिवचनन्त्वतीतसंसर्गिसंस्पर्शविषयमित्यविरोधः। अतएव "संस्पृश्याशुचिसंस्पृष्टं तृतीयं वापि मानवः। हस्तौ पादौ च प्रक्षाल्य तोयेनाचम्य शुध्यति" इति देवलवचनमपि वर्त्तमानाशुचिसंसर्गिस्पृष्टो मूलभूताशुच्यपेक्षया तृतीयो भवति तं स्पृष्टा आचमनमात्रं चतुर्थे नेत्यर्थः। अतीतविषये द्वितीयमेव स्पृष्टाचमनमिति व्यवस्थितविकल्पत्वाभिप्रायार्थः। तृतीयस्पर्शे न किञ्चित्। चाण्डालादिस्पर्शविषयञ्चैतत् अतीतान्त्यजस्पर्शविषये तु द्वितीय एव नाचमनम्। तथा च शातातपः "अशुचिं संस्पृशेद् यस्तु एक एव स दुष्यति। तत्स्पृष्टोऽन्योन दुष्येत्तु सर्वद्रव्येष्वयं विधिः"। एतद्वचनाद्यशुचिद्रव्याधिकरणोच्छिष्टस्पर्शविषयमपि। अत्रापि वर्त्तमानान्त्यजसंसर्गिस्पर्शे साक्षात्स्पर्शे द्वाचमनमेवेति सर्वमुपपन्नम्"।

पराशरेणात्र कश्चिद्विशेष उक्तो यथा

"उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथञ्चन। अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात्। मार्जनोपाञ्जनैर्वेश्म प्रोक्षणेन च पुस्तकम्। सम्मार्जनेनाञ्जनेन सेकेनोल्लेखनेन च। दाहेन च भुवः शुद्धिर्वासेनाप्यथ वा गवाम्"। अत्रापि लघुगुरुसंसर्गविषयभेदात् व्यवस्था। "नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम्। ब्राह्मणान्तरितं भोज्यमाकराः सर्व एव हि"।

सङ्करी स्त्री सङ्कीर्य्यते सम्+कॄ—कर्मणि अप् गौरा० ङीष्। नवदूषितकन्यायां मेदि०।

सङ्करीकरण न० सङ्करः क्रियतेऽनेन च्वि+कृ-करणे ल्युट्। पापभेदे तत्स्वरूपप्रायश्चित्तादिकं प्रा०वि० दर्शितं यथा

"अथ सङ्करीकरणापात्रीकरणमलावहप्रायश्चित्तम्। तत्र मनुः "खरोष्ट्राश्वमृगेभानामजाविकवधस्तथा। सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च। निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्। अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम्। कृमिकीटवयोहत्या मद्यानुगतभोजनम्। फलैधःकुसुमस्तेयमधैर्य्यञ्च मलावहम्"। मद्यानुगतभोजनं मद्यपानसमये यदुपस्थापितं फलमूलादि। अधैर्य्यं गीतश्रवणादि "अल्पेऽप्यपचये अत्यन्तवैक्लव्यमिति" कल्पतरुः। "सङ्करापात्रकृत्यासु मासं शोधनमैन्दवम्। मलिनीकरणीये तु तप्तः स्यात् यावकं त्र्यहम्"। तथा विष्णुः "ग्राम्यारण्यानां पशूनां हिंसा सङ्करीकरणम्। सङ्करीकरणं कृत्वा मासमश्नीत यावकम्। कृच्छ्रातिकृच्छ्रमथ वा प्रायश्चित्तन्तु कारयेत्। निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनम्"। असत्यं शूद्रसेवनमित्यपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुध्यति। "शीतकृच्छ्रेण वा भूयो महासान्तपनेन वा"। "पक्षिणां जलचराणाञ्च घातनं कृमिकीटघातनं मद्यानुगतभोजनमिति मलावहानि" "मलिनीकरणीये तु तप्तकृच्छ्रं स-

माचरेत् । कृच्छ्रातिकृच्छ्रमथ वा प्रायश्चित्तं विशोधनम् । अत्र सङ्करीकरणे सकृत्करणे मासयावकम् अभ्यासे कृच्छ्रातिकृच्छ्रम् । अत्यन्ताभ्यासे चान्द्रायणम् । अपात्रीकरणे च सकृत्करणे तप्तकृच्छ्रं चतुरहसाध्यम् । शीतकृच्छ्रो वा शीतकृच्छ्रे तप्तकृच्छ्रेतिकर्त्तव्यतैव किन्तु तदेव द्रव्यमत्र शीतलमिति विशेषः । अभ्यासे तु महासान्तपनम् अत्यन्ताभ्यासे चान्द्रायणम् । मलावहे तु सकृदाचरणे त्र्यहयावकम् अभ्यासे तु तप्तकृच्छ्रम् अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रमिति यथायोग्यमूह्यम् । एषु च तुष्टं यत्र यत्र प्रायश्चित्तविशेषो नोक्तस्तत्रैव एष बोद्धव्यः"।

सङ्कर्षण पु० संकृष्यते गर्भात् गर्भान्तरं नीयतेऽसौ सम्+कृष–युच् । १बलदेवे अमरः । तत्कथा हरिवं० ५८अ० "सप्तमो देवकीगर्भः योऽंशः सौम्यो ममाग्रजः । स संक्रामयितव्यस्ते सप्तमे मासि रोहिणीम् । सङ्कर्षणात्तु गर्भस्य स तु सङ्कर्षणो युवा । भविष्यत्यग्रजो भ्राता मम शीतांशुदर्शनः" निद्रात्मिकां विष्णुमायां प्रति भगवदुक्तिः । भावे ल्युट् । २आकर्षणे ३स्थानान्तरनयने च न० ।

सङ्कलन न० सम्+कल–ल्युट् । १एकत्रीकरणे २योजने (ठिकदेशा) लीला० ३संपृक्ते च ।

योजनं च नानासङ्ख्यास्थचकाङ्कानामेकसङ्ख्यापादकाङ्ककरणं तच्च द्विविधं शुद्धसङ्कलनं भिन्नसङ्कलनञ्च तत्र शुद्धसङ्कलनं तु "कार्य्यः क्रमादुत्क्रमतोऽथ वाङ्कयोगो यथास्थानमथान्तरं वा" लीला० उक्त्या यथास्थानम् एकादिस्थाने एकाद्यङ्कयोग एव दशशतादिस्थाने दशशताद्यङ्कयोगः । भिन्नसङ्कलनञ्च छेदसहिताङ्कयोजनम् । तत्रांशसमवर्णेन तत्रोक्तं यथा "अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवम्" ।

न्यासः २/१ १/५ १/२ समच्छेदे जातम् ४५/१५ ३/१५ ५/१५

"योगोऽन्तरं तुल्यहरांशकानां कल्प्यो हरो रूपमहारराशेः" इत्युक्तदिशा योजने जातम् ५३/१५ एवं प्रभागभागानुबन्धभागापवाहेषु समच्छेदकरणं तत्र द्रष्टव्यम् ।

सङ्कलित त्रि० सम्+कल–क्त । १योजिते २रेखादिना संवृते अमरः । ३संगृहीते च भावे क्त । ४संयोजने न० ।

सङ्कलितैक्य न० कृत० । "सैकपदघ्नपदार्द्धमथैकाद्यङ्कयुतिः किल सङ्कलितैक्यम्" लीला० उक्ते एकाद्यङ्कानां योगे

सङ्कल्प पु० सम्+कॢप–घञ् गुणे रस्य लः । १धर्मोद्देशाय (इदमित्यमेव कार्य्यम्) इत्येवंरूपे मनसोव्यापारभेदे अमरः । २कर्मसाधनाय अभिलापवाक्ये "सङ्कल्पेन विना राजन् ! यत् किञ्चित् कुरुते नरः । फलञ्चाल्पाल्पकं तस्य धर्मस्यार्द्धक्षयो भवेत्" ब्रह्मपु० । धर्मस्य अर्द्धक्षयोक्तेः फलस्याल्पाल्पकत्वमप्यर्द्धपरत्वं युक्तं धर्माधीनत्वात् फलस्य । "आशास्य च शुभं कार्य्यमुद्दिश्य च मनोगतम्" अगस्त्यवचने उक्तम् "मनोगतं शुभफलमाशास्य मनसा सङ्कल्प्य, उद्दिश्य वाचा अभिलप्य, कार्य्यं कर्म्मणा उपपाद्यम्" ति०त०रघु०। "मनसा सङ्कल्पयति वाचा अभिलपति कर्म्मणा चोपपादयति" हारीतः । तत्प्रकारो यथा "शुक्तिशङ्खाश्महस्तैश्च कांस्यरूप्यादिभिस्तथा । सङ्कल्पो नैव कर्त्तव्यो मृण्मयेन कदाचन । गृहीत्वोदुम्बरं पात्रं वारिपूर्णं गुणान्वितम् । दर्भत्रयं साग्रमूलं फलपुष्पतिलान्वितम् । जलाशयारामकूपे सङ्कल्पे पूर्वदिङ्मुखः । साधारणे चोत्तरास्य ऐशान्यां निक्षिपेज्जलम्" भविष्यपु० अत्र केवलहस्तनिषेधस्तु पात्रान्तरसद्भावविषयः एकहस्तपरो वा एका०त०रघु० । मानससङ्कल्पश्च द्विविधः भावाभावविषयभेदात् तत्राद्यः मयैतत्कर्त्तव्यमित्येवंरूपः द्वितीयः मयैतन्न कर्त्तव्यमित्येवं रूपः । तत्र पूजादिसङ्कल्पो भावविषय उपवासादिसङ्कल्पोऽभावविषय इति भेदः । बोध्यम् । "सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः । व्रतानियमधर्माश्च सर्वे सङ्कल्पजाः स्मृताः" एका०त० ।

सङ्कल्पजन्मन् पु० सङ्कल्पात् जन्म यस्य । १कामदेवे हला० सङ्कल्पजादयोऽप्यत्र । सङ्कल्पजातमात्रे यज्ञादौ च त्रि० ।

सङ्कल्पयोनि पु० सङ्कल्पोयोनिरुत्पत्तिकारणं यस्य । कामदेवे "सङ्कल्पयोनेरभिमानभूतमिति" कुमारः ।

सङ्कसुक त्रि० सम्+कस–उकञ् । १अस्थिरे अमरः । २मन्दे सि०कौ० ३दुर्बले उणादि० । ४सङ्कीर्णे ५अपवादशीले च संक्षिप्तसा० ।

सङ्कार पु० सम्+कॄ–कर्मणि वा० घञ् । १सम्मार्ज्जन्यादिक्षिप्तधूल्यादौ शब्दर० । २नवदूषितकन्यायां स्त्री मेदि० गौरा० ङीष् । भावे घञ् । ३अग्निचटत्कारे मेदि० ।

सङ्काश त्रि० सम्यक् काशते काश–अच् । १सदृशे "तरुणादित्यसङ्काशमिति" तन्त्रम् । अत्रार्थे निभादिवदस्य नित्यसमासता । २अन्तिके च विश्वः ।

सङ्किल पु० सम्+किल–क । वह्निदहलकायां त्रिका० ।

सङ्कीर्ण त्रि० सम्+कॄ–क्त । बहुजनसङ्कुलैः निरवकाशे १स्थाने भरतः । २मिश्रितनामाजातीये अमरः ३व्याप्ते ४मिश्रिते ५सङ्कटे अजयः । एकस्मिन्निश्चितयोः एर०

स्वरविजातीययोश्च । ८इतरवर्णेन इतरवर्णस्त्रियां जाते ७जातिभेदे पु०८वर्णसङ्करे अमरः । ९मिश्रितरागे सङ्गीत०

सङ्कीर्त्तन न० सम्+कीर्त्त-ल्युट् । १स्तुतौ २देवादेर्नामोच्चारणे ३गानेन देवगुणाद्यनुकीर्त्तने च "श्रीकृष्णरससङ्कीर्तं वीणाध्वनिसमन्वितम् । कुरु वत्स महाभाग नाल्पैव शृण्वन्तु मुनयः सुराः । गोपीनां वस्त्रहरणं परं रासमहोत्सवम् । ताभिः सार्द्धं जलक्रीड़ां हरेरुत्कीर्त्तनं कुरु । कृष्णसङ्कीर्त्तनस्थाने ये च नृत्यन्ति वैष्णवाः । तेषां पादरजःस्पर्शात् सद्यः पूता वसुन्धरा" नारदपञ्चरात्रम् ।

सङ्कुचित त्रि० सम्+कुच-क्त । १कृतसङ्कोचे २संक्षिप्ते ३अप्रफुल्ले च हेमच० । ४छन्ने राजनि० ।

सङ्कुल न० सम्+कुल-क । १परस्पराराहते "यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता । माता तु मम वन्ध्यैव पुत्रहीनः पितामहः" इत्येवं वाक्ये अमरः । २परस्परहननरूपे युद्धे ३बहुजनादिभिः संबाधेन निरवकाशे स्थाने ४सङ्कीर्णे त्रि० अमरः ।

सङ्केत पु० सम्+कित-घञ् । मनोगतभावव्यञ्जनाय कृते हस्तादिचालनरूपे १व्यापारे (इसारा) त्रिका० । "अस्माच्छब्दादयमर्थोबोध्यः, अयं शब्दः अमुमर्थं बोधयतु वा" इत्येवंशब्दनिष्ठे २अर्थबोधनाशक्तिविशेषे सङ्केतश्च जात्यादिचतुष्के इति वैयाकरणाः ।
"शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः । चातुर्विध्यादमीषान्तु शब्द उक्तश्चतुर्विधः" काव्यादर्शः । "सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च" हरिः "जातिद्रव्यगुणस्पन्दैर्धर्मैः सङ्केतयत्तया । जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः" वैयाकरणमतम् शब्दश० प्र० उक्तम् । "रूढं सङ्केतवत्नाम सैव संज्ञेति कीर्त्यते" शब्दश० शक्तिशब्दे ५०७३ पृ० दृश्यम् । ३प्रियसङ्गमार्थे गुप्तस्थाने च ।

सङ्केतित त्रि० सङ्केतो जातोऽस्य तार० इतच् । सङ्केतयुते वाच्ये अर्थे "साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः" काव्यप० ।

सङ्कोच पु० सम्+कुच-घञ् । बहुविषयकवाक्यस्याल्पविषयकतया १व्यवस्थापने सामान्यशब्दस्य २विशेषपरतायाम् आव्रवि० ३जड़ीभावे ४बोधे ५बन्धे च मेदि० । सम्+कुच-अच् । ६मत्स्यभेदे पुंस्त्री० मेदि० स्त्रियां ङीष् । ७कुङ्कुमे न० अमरः । [तायां रत्नमा० ।

सङ्कोचनी स्त्री सम्+कुच-ल्यु-गौरा० ङीष् । लज्जालुक-

सङ्क्रन्दन पु० सङ्क्रन्दयत्यसुरान् सम्+क्रन्द-णिच्-ल्यु । १इन्द्रे अमरः । भावे ल्युट् । २सम्यक्क्रन्दने न० ।

सङ्क्राम पु० सङ्क्रामत्यनेन सम्+क्रम-घञ् वा वृद्धिः । १जलबन्धनस्थाने (साँको) अमरः "आत्मानं सङ्क्रमं कृत्वेति" स्मृतिः । भावे घञ् । २रव्यादेः राश्यन्तरसञ्चारे धरणिः । "तुटेः सहस्रभागो यः स कालो रविसंक्रमः" ति०त० । ३ एकत्रस्थितवस्तुनः तत्स्थानत्यागेनान्यत्रगमने च । [राश्यन्तरगमने च ।

सङ्क्रमण न० सम्+क्रम-ल्युट् । १सङ्क्रान्तौ २रव्यादीनां

सङ्क्रान्त त्रि० सङ्क्रान्तिरस्यास्ति अच्, सम्+क्रम-क्त वा । १सङ्क्रान्तियुक्ते २सङ्क्रमणकर्त्तरि ३प्राप्ते दायरूपेण भर्त्रादित आगते, स्त्रिया ४प्राप्तधने च । दायभा० मते स्त्रीणां संक्रान्तधने उपभोगमात्रं तन्मरणे स्वपत्न्यादिदायादानां तद्धनम् "भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः" कात्या० वचनात् । मिता० मते स्वदायादानामिति विवेकः ।

संक्रान्ति स्त्री सम्+क्रम-भावे क्तिन् । संक्रमणशब्दार्थे संक्रान्तिपदार्थरविसंक्रान्तिनामभेदफलभेदादि ज्यो० चि० पी०धा० निरूपितं यथा
"घोरा१ऽर्कसंक्रमणसुप्रथितौ हि शूद्रान्, ध्वाङ्क्षी२ विशो, लघुविधौ च चरर्क्षभौमे । चौरान्, महोदरयुता३ न्टपतीन्, समैत्रे मन्दाकिनी४ स्थिरगुरौ सुखयेद्द्विज. मन्दा५ । विप्रांश्च, मिश्रभगणे तु पशूंश्च मिश्रा६ तीक्ष्णार्कजेऽन्त्यजसुखा खलु राक्षसी७ च । क्रमशो दिनस्य न्टपतीन् प्रथमे निहन्ति मध्ये द्विजानपि विशोऽपरके च शूद्रान् । अस्ते निशाप्रहरकेषु पिशाचकादीन्नक्तञ्चरानपि नटान् पशुपालकांश्च । सूर्योदये सकलजिज्जनस्य सौख्यदा" अयनं मकरकर्कटयोर्निक्रमम् । षड़शीत्याननसंज्ञा षष्टियुक्तन्य.भवेत् । तुलाजौ विषुवं, विष्णुपदं सिंहालिगो घटे । संक्रान्तिकालादुभयत्र नाड़िकाः पुण्या मताः षोड़शषोड़शोष्णगोः । निशीथतोऽर्वागपरत्र संक्रमे पूर्वापराह्णान्तिमपूर्वभागकौ । पूर्णे निशीथे यदि संक्रमः स्यात् दिनद्वयं पुण्यमथोदयास्तात् । पूर्वं परस्तादु यदि याम्यसौम्यायने दिने पूर्वपरे तु पुण्ये । सन्ध्या त्रिनाड़ीप्रमितार्कबिम्बादर्द्धोदितास्तादधऊर्द्ध्वमत्र । चेद्याम्यसौम्ये अयने क्रमात्स्तः पुण्यौ तदानीं परपूर्वघस्रौ । याम्यायने विष्णुपदे चाद्याः मध्यास्तु राशयोः । षड़शीत्याननेसौम्ये परा नाड्योऽतिपुण्यदाः" मु० चि० ।

"तत्र ग्रहाणां प्राग्राशितोऽपरराशौ संक्रमणं संक्रान्तिरिति संक्रान्तिलक्षणं सा च द्विविधा मध्यमा स्पष्टा च। षट्कर्मसंस्कृतो मध्यमग्रहो राश्यन्तरं यदा संक्रामति सा मध्यमसंक्रान्तिरुच्यते। यदा तु स्पष्टीकृतसंस्कारविशिष्टो ग्रहो राश्यन्तरं गच्छेत् सा स्पष्टसंक्रान्तिरुच्यते। तत्र मध्यममानस्य स्पष्टीकरणार्थत्वादेव तज्जनितसंस्कारानुपयोगादत्र तत्त्यागेन स्पष्टसंक्रान्तिरेव गृह्यते। सापि द्विविधा सायनांशा निरयनांशा चेति। तत्र यदा सिद्धान्तगणनागतायनांशसंस्कृता ग्रहा राश्यन्तरगमनमुररीकुर्वते सा सायनांशसंक्रान्तिरुच्यते। यदा त्वयनांशसंस्काररहिता ग्रहा राश्यन्तरगास्तदा निरयनांशा संक्रान्तिरुच्यते। तत्रान्यासां चन्द्रादिसंक्रान्तीनान्तु "देवद्व्यङ्कर्त्तवोऽष्टाष्टौ नाड्योऽङ्काः खनृपाः क्रमात्। ज्ञेयाः संक्रमणेऽर्कादेः प्रायोऽर्कस्यातिनिन्दिता" इति वर्ज्यघटीत्वमेव विवाहप्रकरणे वक्ष्यति न तु फलकथने आसां संक्रान्तीनां कश्चिदुपयोगः। सूर्यसंक्रान्तीनान्तु नक्षत्रवारसमयभेदेन ववादिकरणभेदेन च शुभाशुभफलकथनयोग्यता पुण्यकालता संक्रान्तिविशेषे वर्ज्यघटीत्वाधिकभावश्चास्तीत्यतो बहुवक्तव्यत्वात् स्वतन्त्रमेव सूर्यसंक्रान्तिप्रकरणं तत्र प्रथमं नक्षत्रवारभेदेन फलं तावत् सार्द्धवसन्ततिलकयाह। घोरेति अर्कस्य सूर्यस्य संक्रमणं निरयनांशा संक्रान्तिरुग्रसंज्ञकनक्षत्रे रविवारेऽर्कवारे वा स्यात् तदा घोरानाम्नी सा शूद्रान् सुखयेत् सुखिन उत्पादयेत्। अत्रार्कसंक्रमणमिति पदोपादानसामर्थ्यात् सूर्यसंक्रान्तिष्वेवायं विचारो नान्यग्रहसंक्रान्तिष्विति फलितोऽर्थः।

अथ लघुनक्षत्रे विधौ चन्द्रवारे वा सूर्यसंक्रान्तिर्ध्वाङ्क्षीनाम्नी विशो वैश्यान् सुखयेत्। चरर्क्षे चरनक्षत्रे भौमे मङ्गलवारे वा संक्रान्तिर्महोदरयुता महोदरीनाम्नी चोरान् सुखयेत्। मैत्रे बुधे मैत्रसंज्ञकनक्षत्रे वा संक्रान्तिर्मन्दाकिनीनाम्नी नृपतीन् राज्ञः सुखयेत्। ध्रुवनक्षत्रे गुरुवारे वा संक्रान्तिर्मन्दानाम्नी विप्रान् सुखयेत्। मिश्रनक्षत्रे भृगुवारे वा संक्रान्तिर्मिश्रनाम्नी पशून् सुखयेत्। तीक्ष्णनक्षत्रे अर्कजे शनिवारे वा संक्रान्तिः खलु निश्चयेन राक्षसीनाम्नी अन्त्यजांश्चाण्डालान् सुखयतीत्यन्त्यजसुखा स्यादित्यर्थः। यदाह कश्यपः "घोरा ध्वाङ्क्षी महोदर्यौ मन्दा मन्दाकिनी तथा। मिश्रा राक्षसिका सूर्यसंक्रान्तिरर्कवारतः"। वसिष्ठः "घोरोग्रर्क्षे ध्वाङ्क्षी लघुभे चरभे महोदरी मृदुभे। मन्दाकिनी चरर्क्षे मन्दा मिश्रा मिश्रे च राक्षसी तीक्ष्णे"; अत्र छन्दोभङ्गस्त्वार्षः। देवीपुराणे "मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा। क्षिप्रे ध्वाङ्क्षी विजानीयादुग्रे घोरा प्रकीर्त्तिता। चरे महोदरी ज्ञेया क्रूरेष्वेषु राक्षसी। मिश्रिता चैव विज्ञेया मिश्रभेषु संक्रमे" इति। रत्नमालायाम् "उग्रक्षिप्रचरे मित्रध्रुवमिश्राख्यदारुणैः। ऋक्षैः संक्रान्तिरर्कस्य घोराद्या क्रमशो भवेत्"। नारदकश्यपौ "शूद्रतस्करवैश्यद्विजक्ष्माधिपगवां क्रमात्। अनुक्तानाञ्च सर्वेषां घोराद्याः सुखदाः स्मृताः"। अत्रादेवाः ब्राह्मणाः अनुक्तानां चाण्डालादीनाम्। ननूक्तं वक्ष्यमाणं वा शुभाशुभफलं सायनांशसंक्रान्तितः कुतो न विचार्यते इति चेत् उच्यते सायनांशसंक्रान्तेः स्नानदानजपादावेव कार्यं न सर्वत्र यदाह पुलस्त्यः "स्नानदानजपश्राद्धव्रतहोमादिकर्मसु। सुकृतं चलसंक्रान्तावक्षयं पुरुषोऽश्नुते" इति। चलसंक्रान्तिः सायनांशसंक्रान्तिः। अतश्चलसंक्रान्तेः परिगणितस्नानादिकविषयत्वादेव तन्त्रान्तरेषु विवाहादिशुभकर्मसु संक्रान्तिमात्राङ्गीकारे शुभाशुभफलकथनस्य नास्त्युपयोग इति युक्तमुत्पश्यामः। इदं चाग्रे स्पष्टतया निर्णेष्यते"। "अथ दिनरात्रिविभागेन संक्रान्त्यशुभफलमुत्तरायणदक्षिणायनसंज्ञाञ्च सार्द्धवसन्ततिलकयाह। त्र्यंशे इति अत्रार्कसंक्रमणमित्यनुवर्त्तते दिनप्रमाणं त्रिभिर्भक्तं यच्चात्र लब्धं तृतीयांशो भवति तत्र दिनस्य प्रथमत्र्यंशेऽर्कसंक्रमणं नृपतीन् हन्ति मध्ये द्वितीयत्र्यंशे द्विजान् ब्राह्मणान् हन्ति अपरके तृतीयत्र्यंशे वैश्यान् हन्त्येवं सर्वत्र व्याख्येयम्। अस्ते सूर्यास्तसमयेऽर्कसंक्रमणं शूद्रान्। अथ रात्रिसंक्रान्तिफलं तत्र रात्रिप्रथमप्रहरे पिशाचकादीन् आदिशब्देन भूतादीन्। द्वितीयप्रहरे नक्तञ्चरान् राक्षसान्, तृतीयप्रहरे नटान् नर्त्तकान्, चतुर्थप्रहरे पशुपालकान् आभीरान्। सूर्योदयसमयकालेऽर्कसंक्रमणं सकललिङ्गिजनं पाखण्डादिकं हन्तीत्यर्थः "पाखण्डाः सर्वलिङ्गिनः" इत्यभिधानात्। यदाहतुर्नारदकश्यपौ "पूर्वाह्णे नृपतीन् हन्ति विप्रान् मध्यदिने विशः। अपराह्णेऽस्तगे शूद्रान् प्रदोषे च पिशाचकान्। निशि रात्रिचरान्नाट्यकारानपररात्रके। गोचारिणश्च सन्ध्यायां लिङ्गिनं रविसंक्रमः" इति। संक्रान्तेः क्रूरसौम्यवारपरत्वेन फलविशेषमाह शशिनि रविरविज-

सोमवारे संक्रान्तौ दिनकरस्य तन्नाशे । पित्तकफानिलजामयनरपतिकलहस्तुष्टिश्च । बुधगुरुसितचन्द्राह्वे सति संक्रान्तावनामयं नृणाम् । क्षितिपतिनिकरक्षेमं सस्यविवृद्धिर्विधर्मिणां पीडा” । अथ मेषसंक्रान्तौ विशेषमाह कश्यपः “यदा मेषगतः सूर्य्यो भरण्यादिचतुष्टये । सस्यवृद्धिर्भवेत्तत्र दुर्भिक्षमार्द्रादिचतुष्टये । मघादिदशके हानिः क्षेमं चानुक्तभेषु च” । अस्यार्थः । यस्मिन् दिने मेषसंक्रमणं तद्दिने चन्द्रो यदि भरण्यादिनक्षत्रचतुष्टये स्यात् तदा सस्यवृद्धिः एवमन्येऽपि व्याख्येयम् । अथ जन्मनक्षत्रे संक्रान्तिफलं दीपिकायां “यस्य जन्मर्क्षमासाद्य रविसंक्रमणं भवेत् । तन्मासाभ्यन्तरे तस्य रोगः क्लेशो धनक्षयः” इति । तत्र शान्तिकमपि दीपिकायामुक्तम् “तमरसरोरुहपत्रैरञ्जनीसिद्धार्थलोध्रसंयुक्तैः । स्नानं जन्मर्क्षे रविसंक्रान्तौ नृणां शुभदमिति” । अथ संक्रान्तिषु वृष्टौ जातायां फलमुक्तम् वसिष्ठेन “अजकन्याभघटकर्किणि संक्रान्तौ यदि भवेद्वर्षम् । अतुलं क्षेमसुभिक्षं नृपसज्जनगोकुलक्षेमम् । घटचापसिंहमिथुनसंक्रान्तौ यदि भवेद्वर्षम् । आमयडामरभूभृद्युद्धमनर्घं त्वदृष्टिश्च । वृषवृश्चिकतुलमकरे वृष्टिः स्यात् संक्रमे समये । विस्फोटामयतस्करपीडादृष्टिः क्षयानुभयमिति” । अथ सौम्येति मकरकर्कटयोः संक्रान्तिश्चेत् तदा क्रमेण सौम्ययाम्यायनं नियतं कथितं मकरे उत्तरायणं कर्कटे याम्यायनं स्यादित्यर्थः । यदाह नारदः “सौम्ययाम्यायने नूनं भवतो मृगकर्किणि” इति । अथावशिष्टानां दशसंक्रान्तीनां षडशीतिमुखादिकाः संज्ञा अनुष्टभाह षडशीतीति धनुर्मिथुनकन्यामीनेषु संक्रान्तिश्चेत् तदा षडशीतिमुखानाम्नी संक्रान्तिः, तुलामेषयोः संक्रान्तिर्विषुवनाम्नी । सिंहवृषालिकुम्भेषु संक्रान्तिर्विष्णुपदाख्या । उक्तञ्च नारदेन “स्थिरभेष्वर्कसंक्रान्तिर्ज्ञेया विष्णुपदाह्वया । षडशीतिमुखं प्रोक्तं द्विस्वभावेषु राशिषु । तुलाधराजयोर्ज्ञेयं विषुवं सूर्य्यसंक्रमः” । संज्ञाप्रयोजनञ्च “याम्यायने विष्णुपदे चाद्या मध्यास्तुलाजयोः । षडशीत्यानने सौम्ये परा नाड्योऽतिपुण्यदाः” । इति ग्रन्थकृदग्रे वक्ष्यति । अथ मनुः “संक्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः । तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि । रविसंक्रमणे पुण्ये न स्नायाद्यदि मानवः । सप्तजन्मसु रोगी स्याद् दुःखभागी हि जायते” इति शातातपोक्तेः स्नानदानश्राद्धादिकृत्यञ्च संक्रान्तिकालेऽवश्यकर्त्तव्यता प्रतीयते तत्र श्राद्धादेरनेकक्षणसाध्यत्वादनुष्ठानलक्षणप्रामाण्यमापद्येत संक्रान्तिकालस्यातिसूक्ष्मत्वात् तदुक्तम् देवीपुराणे “सुस्थे नरे सुखासीने यावत् स्पन्दति लोचनम् । तस्य त्रिंशत्तमो भागस्तत्परः परिकीर्त्तितः । तत्पराच्छततमो भागस्त्रुटिरित्यभिधीयते । त्रुटेः सहस्रभागो यः स कालो रविसंक्रमः” इति । देवलोऽपि “संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः” इति पिशितेक्षणैः मनुष्यैः । अतो मुख्यकालानुपलब्धौ गौणकालेऽपि कार्य्यं वचनप्रामाण्यात् । स च गौणकालः प्रतिनिधिरित्यतो गौणकालमुपजातिकाच्छन्दः पूर्व्वार्द्धेनाह संक्रान्तीति । गणितमार्गेण यः उष्णगोः सूर्य्यस्य संक्रान्तिकाल आगतस्तत उभयत्र पूर्व्वतः परतश्च षोडश नाड्यः पुण्यसम्पादकत्वात् पुण्या मताः सम्मता सूर्य्यसंक्रान्तिसमयात् पूर्व्वं षोडश पश्चाच्च षोडशघटिकाः पुण्यकाल इति द्वात्रिंशद्घटिका भवन्तीत्यर्थः । तदाह वसिष्ठः “दिनपतिसंक्रमणात् प्राक् षोडश नाड्यश्च पुण्यकालः सः । परतः षोडश नाड्यः सर्व्वत्र स्नानदानकार्य्येषु । ब्रह्मसिद्धान्तेऽपि “संक्रान्तेः प्राक्परतश्च ज्ञेयाः षोडश नाडिकाः । त्रयस्त्रिंशत् संक्रमस्य पुण्याः सर्व्वस्य नाडिकाः” । अनेन “संक्रान्तेः पुण्यकालस्तु षोडशोभयतः कलाः” इति स्मृतिवाक्ये “यैः पूर्व्वतः परतश्चाष्टावष्टौ घटिकाः पुण्यकालं इत्येवं षोडशेति व्याख्यातं तदपाकृतं भवति । किञ्चायमर्थो वासनासिद्धः सूर्य्यसिद्धान्तेऽभिहितः “अर्कमानकलाः षष्ट्या गुणिता भुक्तिभाजिताः । तदर्द्धनाड्यः संक्रान्तेरर्व्वाक् पुण्यं तथा परे” । सिद्धान्तशिरोमणावपि “षष्टिघ्नबिम्बं ग्रहभुक्तिभक्तं संक्रान्तिनाड्योऽखिलधर्म्मकृत्ये । रवेस्तु ताः पुण्यतमा ग्रहः स्वसंक्रान्तिगो मिश्रफलं विधत्ते” । इति वासना चेयं यदि ग्रहस्पष्टगतितुल्यकलाभिरहोरात्रमानरूपाः षष्टिघटिका लभ्यन्ते तदा ग्रहबिम्बकलाभिः किमिति त्रैराशिकेन ग्रहे बिम्बकलानां षष्टिगुणको ग्रहभुक्तिभाजको निष्पन्न इत्यर्थः । एवं सर्व्वग्रहाणामपि संक्रान्तिः स्यात् तदुक्तं सिद्धान्त एव । अत्र तु विस्तरभयादनुपयुक्तत्वाच्च नास्माभिरलेखि । अतएव त्रिंशद् एकत्रिंशत्सार्द्धद्वात्रिंशत्त्रयस्त्रिंशदादिभेदेन स्मृतिषु पुण्यघटिकाभिधानं स्पष्टीकृत्य भेदसंभवाच्चिन्त्यं तदेव सामान्यतः संक्रान्तिषु द्वात्रिंशत् घटिकारूपः पुण्यकालो निर्णीतः । देवीपुराणे तु मन्दादिसंज्ञाभेदात् पुण्यकाल-

विशेष उक्तः "द्विचतुःपञ्चसप्ताष्टनवद्वादश एव च । क्रमेण घटिका ह्येतास्तत् पुण्यं पारमार्थिकम्" इति । अस्यार्थः मन्दायामन्तरालवर्त्ति घटिकाद्वयं मन्दाकिन्याञ्चतस्रो घटिकाः ध्वाङ्क्ष्यां पञ्च, घोरायां सप्त, महोदर्यामष्टौ, राक्षस्यां नव, मिश्रायां दश" प्रागभिहितदेवीपुराणोक्तमन्दादिसंज्ञावाक्यात्यत्नजनितसंज्ञात मन्दादिष्वयं विचारो न वारप्रयुक्तात्ववचनात् एवं संक्रान्तिषु पुण्यकालमभिधाय इदानीं रात्रिसंक्रान्तौ विशेषमुपजात्युत्तरार्द्धेनाह निशीथ इति। निशीथोऽर्द्धरात्रं तस्मात् इशाक् पूर्व्वत्र अपरत्र पश्चाच्च संक्रमे संक्रान्तिकाले सति पूर्व्वापरयोरह्नोः क्रमेणान्तिमपूर्व्वभागौ पुण्यौ स्यातां भागकाविति स्वार्थे कः । यद्यर्द्धरात्रात् प्राक्संक्रान्तिस्तदा पूर्व्वदिनस्योत्तरार्द्धं पुण्यं यद्यर्द्धरात्रादुपरि संक्रान्तिस्तदोत्तरदिनस्य पूर्व्वार्द्धमेव पुण्यमित्यर्थः । उक्तञ्च ब्रह्मसिद्धान्ते "भवनान्तं बिम्बमध्यं रात्र्यर्द्धात् प्रागुपैति चेत् । स्नानदानादि मध्याह्नात् कुर्य्यादूर्द्ध्वं गते दिने । रात्र्यर्द्धादुपरि चेत्तं याति चेदन्यथार्यमा । अह्न्यागामिनि मध्याह्नात् पूर्व्वं स्नानादि पुण्यदम्"। भवनं राशिः बिम्बमध्यं रवेः, चेत्तं राशिः । वृद्धवसिष्ठोऽपि "अर्द्धसंक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितम् । रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः । अर्द्धरात्रादधस्तस्मिन् मध्याह्नस्योपरि क्रिया । ऊर्द्ध्वं संक्रमणे चोर्द्ध्वमुदयात् प्रहरद्वयम्" इति । ननु रात्रौ मेषादिसंक्रान्तौ वा रात्रावपि पुण्यकालसत्त्वात् तदा स्नानादि कुतो न क्रियते यदर्थमयमुद्यम आरब्ध उच्यते "रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः" इति सुमन्तुवाक्याद्रात्रौ स्नानाद्यधिकाराभावात् । यत्तु नैमित्तिकं ग्रहणादिप्रयुक्तं तद्भवत्येव "नैमित्तिकन्तु कुर्वीत स्नानं दानञ्च रात्रिषु" इति सुमन्तुवाक्यशेषात् "अर्द्धरात्रसमये संक्रमणे मकरकर्कयोश्च विशेषमुपजातिकयाह । पूर्व्वे इति "अर्द्धरात्रनिशीथौ द्वौ यामप्रहरौ समौ" इत्यभिधानादर्द्धरात्रो निशीथशब्दवाच्यः तस्मिन्निशीथे पूर्व्वे रात्रिद्वितीयप्रहरान्तिमकलावच्छिन्ने यदि संक्रमः स्यात् तदा प्रागपरं दिनद्वयं पुण्यमुक्तम् । उक्तञ्च वृद्धवसिष्ठेन "पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते रविः । प्राहुः दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटाविति" । ब्रह्मसिद्धान्तेऽपि "यद्यर्द्धरात्र एव स्यात् संपूर्णे संक्रमो रवेः । तदा दिनद्वयं पुण्यं स्नानदानादिकर्म्मसु" । अत्र मुक्त्वा मकरकर्कटावित्युक्तं तत्र मकरकर्कटयोस्तु कथमित्यत आह आद्येति अथानन्तरन्तु याम्यात् सूर्य्योदयात् सूर्य्यास्ताच्च पूर्व्वं परस्ताच्च यदि याम्यसौम्यायने कर्कटमकरसंक्रान्ती भवतस्तदा पूर्व्वपरदिने पुण्ये स्यातां यदि सूर्य्योदयात् पूर्व्वं कर्कटसंक्रमणं स्यात् तदा पूर्व्वदिन एव पुण्यकालो न परदिने । तदाह वृद्धगार्ग्यः "यदास्तमयवेलायां मकरं याति भास्करः प्रदोषे चार्द्धरात्रे वा स्नानं दानं परेऽहनि । अर्द्धरात्रे तदूर्द्ध्वं वा संक्रान्तौ दक्षिणायने । पूर्व्वमेव दिनं ग्राह्यं यावन्नोदयते रविः" इति । अस्तमयवेलाया इति पञ्चम्यन्तं पदं आरभ्य इत्यर्थे । भविष्योत्तरपुराणेऽपि "कार्म्मुकन्तु परित्यज्य झषं संक्रमते रविः । प्रदोषे चार्द्धरात्रे वा कुर्य्यादहनि पूर्व्वतः" इति । प्रदोषलक्षणं स्कन्दपुराणे "त्रिमुहूर्त्तः प्रदोषः स्याद्रवावस्तं गते सति" इति ।

आद्यार्द्धोदयास्तादिति वचनस्याप्ययमर्थः । अर्द्धेति अर्द्धोदितादर्द्धास्ताच्चाध ऊर्द्ध्वं च क्रमात् त्रिघटिकाभिः प्रमिता सन्ध्या सन्ध्याकालः स्यात् अर्द्धोदितार्कबिम्बात् पूर्व्वं त्रिघटीप्रमिता प्रातःसन्ध्या तथार्द्धास्तार्कबिम्बादुपरि त्रिनाडीप्रमिता सायन्सन्ध्येत्यर्थः । तदाह वराहः "अर्द्धास्तमितादुदितात् सूर्य्यादस्पष्टभं नभो यावत् । तावत् सन्ध्याकालश्चिह्नैरेतैः फलं ब्रूयादिति" । तत्प्रमाणमाह नारदः "अर्द्धास्तमनसन्ध्या हि घटिकात्रयसम्मिता । तथैवार्द्धोदयात् प्रातर्घटिकात्रयसम्मिता" इति । स्कान्दपुराणेऽपि "उदयात् प्राक्तनी सन्ध्या घटिकात्रयमुच्यते । सायंसन्ध्या त्रिघटिका अस्तादुपरि भास्वतः" इति । अत्र सन्ध्यालक्षणे अर्द्धास्तमितादुदितवाक्यस्य स्कान्दपुराणीयवाक्यस्य च व्रीहियववद्विकल्पः । अथ सन्ध्यालक्षणप्रयोजनमाह आद्येति । अद्य सन्ध्यायां प्रातःसन्ध्यायां सायंसन्ध्यायां च क्रमाच्चेद् याम्यसौम्ये अयने दक्षिणोत्तरायणे तदानीं परपूर्व्वौ वसौ दिवसौ पुण्यौ याम्यसौम्ये अयने इत्यत्र यदि प्रातःसन्ध्यायां दक्षिणायनप्रवृत्तिस्तदा सूर्य्योदयादनन्तरं सम्पूर्णमहः पुण्यं तथा यदि सायंसन्ध्यायामुत्तरायणप्रवृत्तिस्तदा सूर्य्यास्तात्पूर्व्वं सम्पूर्णमहः पुण्यं स्यादित्यर्थः । यदाह नारदः "सूर्य्योदयसन्ध्यायां यदि याम्यायनं भवेत् । तदोदयादहःपुण्यं पूर्व्वाह्णः पूर्व्वतो यदि । सूर्य्यास्तमनसन्ध्यायां यदि सौम्यायनं भवेत् । तदाहः पुण्यकालः स्यात् परतश्चोत्तरेऽहनि" इति । अत्र यद्युदयप्रातः प्राक्कर्कसंक्रम-

तदा प्रागदिन एव पुण्यकालो नोत्तरदिने । तथा यद्यस्तसन्ध्यामतिक्रम्य मकरसंक्रान्तिस्तदोत्तरदिन एव पुण्यकालो नोत्तरदिने इति निष्कृष्टोऽर्थः । अतो वृद्धगार्ग्यादिवाक्यनारदवाक्ययोः प्रदोषसन्ध्यापदोपादानेन सामान्यविशेषभावोऽवगन्तव्यः । यत्तु हेमाद्रौ स्कान्दपुराणीयं वाक्यम् "धनुर्मीनावतिक्रम्य कन्यां च मिथुनं ततः । पूर्वापरविभागेन रात्रौ संक्रमते यदा । दिनान्ते पञ्च नाड्यस्तु तदा पुण्यतमाः स्मृताः । उदये च तथा पञ्च दैवे पित्र्ये च कर्मणि" इति । तदपि सन्ध्याविषयकमेवेत्याहुरभियुक्ताः । विषुवे तु यथाश्रुतम् एवेति, अन्यदपि सन्ध्यालक्षणप्रयोजनं प्राक्सन्ध्यागर्जित इत्यादिषु वक्ष्यति । ननु नायमयनपुण्यकालोक्त्युद्यमः सफलः शास्त्रान्तरविरुद्धत्वात्तथा हि "अह्नि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितम् । रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः । अर्द्धरात्रादधस्तस्मिन् मध्याह्नस्योपरि क्रिया । ऊर्द्ध्वं संक्रमणे चोर्द्ध्वमुदयात् प्रहरद्वयम् । पूर्णे चेदर्द्धरात्रे च यदा संक्रमते रविः । प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ" इति वृद्धवशिष्ठेनायनव्यतिरिक्तेषु दशसु संक्रमेषु रात्रिगतेषु "यायाः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः" इति कश्यपोक्तसामान्यवाक्याद्रात्रावेवानुष्ठानं प्रसक्तमह्नः संक्रम इत्यादिनाप्येतद्देवानुष्ठानं विहितं तस्यापि पर्युदासः क्रियते मुक्त्वा मकरकर्कटाविति तस्मात् मकरकर्कटयोः संक्रमणे रात्रावेवानुष्ठानं कर्त्तव्यमित्युक्तं भवति अतएवाह याज्ञवल्क्यः "ग्रहदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु । स्नानदानादिकं कार्यं निशि काम्यव्रतेषु च" इति वशिष्ठोऽपि 'सुतजनने संक्रान्तावुपरागे चन्द्रसूर्ययोर्नियतम् । रात्रावपि कर्त्तव्यं स्नानं दानं विशेषतो नृणामिति' सुमन्तुश्च "ग्रहणोद्वाहसंक्रान्तियात्रार्त्तिप्रसवेषु च । श्रवणे चेतिहासस्य रात्रौ दानं प्रशस्यते" इति । एषु वाक्येषु सामान्यवाचिनोऽपि संक्रान्तिपदस्य मकरकर्कटसंक्रान्तिपरत्वमवसीयते यत्तु "रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः" इति निषेधः स संक्रान्त्यन्तरे व्यवतिष्ठते अतएवोक्तं कश्यपेन 'स्नानं दानं ग्रहणवत् सौम्ययाम्यायनद्वये" इति । तस्मादयनसंक्रमे रात्रौ सत्यां तत्रैव स्नानदानाद्यनुष्ठातव्यमिति । अत्राहुः शास्त्रद्वयेन तुल्यबलत्वाद्विकल्पसिद्धौ तत्तद्देशप्रसिद्धशिष्टाचारेण व्यवस्था द्रष्टव्या । तत्र गौर्जरास्तु कश्यपादिवाक्यमभ्युपेत्य रात्रावयनसम्भवे सति रात्रौ एव स्नानदानादिकं कुर्वन्ति । दाक्षिणात्यास्तु वृद्धगार्ग्यादिवाक्यमङ्गीकृत्य दिवस एव स्नानदानादि कुर्वन्तीत्यलमतिप्रसङ्गेन । यदा तु दिने कर्कमकरसंक्रमस्तदा क्रमेण पूर्वोत्तरघटिकानियममाह वृद्धवशिष्ठः "अतीतानागते पुण्ये द्वे उदग्दक्षिणायने । त्रिंशत् कर्कटके नाड्यो मकरे विंशतिः स्मृताः" इति । उत्तरायणमतीतं सत् पुण्यं कर्कटायनमागामि पुण्यं तत्र कर्कटसंक्रान्तेः प्राक्त्रिंशत् घटिकाः पुण्याः मकरे तूत्तरविंशतिर्घटिकाः पुण्या इत्यर्थः । अत्र वाक्ये यद्यपि दिनपदानुपादानं तथापि यदान्तमयवेलायामिति रात्रिपर्वविशेषवाक्यालोचनादिदं दिनपरं प्रतिभाति तदा सति केनापि हेतुना समीपघटीषु श्राद्धाद्यनुष्ठानासम्भवे परमावधित्वेन त्रिंशदादयो घटिका अत्रानुष्ठायन्ते यदा तु प्रतिबन्धस्तदा "यायाः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृता" इति कश्यपोक्तेः समीपघटिकास्वेव श्राद्धादि विधेयं 'सन्निहितपरित्यागे कारणाभावादिति' न्यायविदः । "अथ पूर्वापराः षोडश घटिकाः पुण्या इति पूर्वं सामान्येनोक्तमिदानीं विष्णुपदादिषु संक्रमेषु विशेषमनुष्टुभाह याम्यति । याम्यायने कर्कसंक्रान्तौ तथा विष्णुपदे वृषसिंहवृश्चिककुम्भसंक्रान्तिकाले आद्याः नाड्यः प्रथमाः षोडशघटिकाः अतिपुण्यदाः स्नानदानादावनन्तफलदा ज्ञेयाः अग्रिमास्तु न तथेति निष्कृष्टोऽर्थः । तत्रर्त्तुयोस्तुलामेषयोः मध्या उभयतः षोडश षोडश घटिकाः पुण्याः अथ वा षोडशैव घटिकाः पुण्या । षडशीत्यानने मिथुनकन्याधनुर्मीनसंक्रान्तिषु तथा सौम्ये मकरसंक्रान्तौ संक्रान्तिकालात्परा अग्रिमाः षोडश घटिकाः अतिपुण्यदाः प्रथमास्तु न तथेति निष्कृष्टोऽर्थः । यदाह श्रीपतिः "याम्यायने विष्णुपदे तथाद्यौ दानाद्यनन्तं विषुवे च मध्ये । वदन्त्यतीते षडशीतिवक्त्रे महर्षयः स्वल्वयने च सौम्ये" । तत्र कर्के प्रागेव मकरसंक्रान्तौ पश्चादेव पुण्यकाल इति तु प्राङ्निरणायि । विष्णुपदे तु अग्रिमादिघटीनां पुण्यकाले तरतमभावः "पुण्यायां विष्णुपद्यां च प्राक्पश्चादपि षोडशेति" वृद्धवशिष्ठोक्तेः । विषुवे तु सामान्यनिर्णय एवेति केचित् दीपिकाटीकाकारस्त्वेवमाह "मेषे तुलायां संक्रान्ति मध्य एव संक्रान्तिकालात्पूर्वमष्टौ घटिकाः परतश्चाष्टौ घटिका पुण्या इति"। युक्तं चैतत् । विषुवे च मध्यपदोपादानात् मध्ये षोडश घटिकाः पुण्याः इत्युच्यते तस्मात्

कालात् मध्य इत्यपेक्षायां संक्रान्तिकालादेवेत्यतः पूर्वमष्टौ पश्चाच्चाष्टौ घटिकाः पुण्या इत्यर्थः । यत्तूक्तं वृहस्पतिना "वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश" इति । तुलामेषसंक्रान्तिकालात् प्राक्पश्चाच्च पञ्च पञ्च दण्डाः पुण्या इत्युक्तम् यदप्युक्तम् आद्यन्तसापेक्षत्वात् मध्यमस्य गणितागतपुण्यकालघटिकानां मध्ये त्रिभागः स्थूलदृष्ट्या दशघटिकात्मको भवतीति । "याम्ये सार्द्धद्विका नाड्य" इति कश्यपोक्तेः । षडशीतिमुखेऽप्याद्यापरघटीनां पुण्यकाले तरतमभावः । यत्तु षडशीत्यां व्यतीतायां षष्टिस्तुल्यास्तु नाडिकाः" इति वृद्धवशिष्ठवाक्यं तत् प्रागपरघटीषु प्रतिबन्धवशात् स्नानादेरसम्भवे सत्यन्तिमघटीषु स्नानादिक्रियाभ्यनुज्ञायाः परमावधिकालेयत्तार्थम् । इदं सर्वं दिनसंक्रान्तिविषयं वेदितव्यम् "अह्नि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितम्" इति सामान्यवाक्यस्य सौम्यायने विष्णुपदे इत्यस्य च विशेषवाक्यस्यैकवाक्यता । अतएव "रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः" इति रात्रिपरविशेषस्य सत्त्वाच्च । एवं निर्णीते पुण्यकाले स्नानदानाद्यवश्यं विधेयमिति फलितोऽर्थः । तत्र स्नानदानाद्यकुर्वतश्च प्रत्यवायमाह वशिष्ठः "इति संक्रान्तिविनिर्णयमादिष्टव्यं सदैव दैवज्ञैः । विषुवत्ययने ग्रहणे संक्रान्तौ पुण्यदिवसेऽपि । पितृतर्पणं यो न कुरुते दत्त्वा शापं व्रजति तस्य पिता । आगतगतसमयेऽपि च करोति यः स्नानजपहोमाद्यम् । ऊषरवापितबीजं यद्वत् तद्वच्च निष्फलं भवतीति" । अयने अयनसदृशापरे च संक्रमणे आगतसमये निर्णीते पुण्यकालातिक्रमसमये स्नानादि निष्फलमित्यर्थः । संक्रान्तिषु स्नानदानादेः फलमाह भरद्वाजः "षडशीत्यां तु यद्दानं विषुवद्दितये तथा । दृश्यते सागरस्यान्तस्तस्यान्तो नैव दृश्यते" । वृद्धवशिष्ठोऽपि "अयने कोटिः पुण्यानि सहस्रं विषुवे फलम् । षडशीत्यां सहस्रन्तु फलं विष्णुपदेषु च" इत्यलमतिप्रसङ्गेन । इति सूर्यसङ्क्रान्तिनिर्णयः । अथ नायं केवलं सूर्यसङ्क्रमण एव पुण्यकालः किन्तु चन्द्रादीनां ग्रहाणां नक्षत्रसङ्क्रमे राशिसङ्क्रमे च पुण्यकालो भवति सोऽपि सोपपत्तिकः प्रसङ्गतः प्रोच्यते अस्माभिः यदाह जैमिनिः "नक्षत्रराश्यो रविसङ्क्रमे स्युरर्वाक् परत्रापि रसेन्दुनाड्यः १६ । पुण्यास्तथेन्दोस्त्रिशरापलैर्युक् शुभैकनाडी ११३ मुनिभिः शुभोक्ता । नाड्यश्चतस्रः उपचाः कुजस्य ४।१ बुधस्य तिस्रो मनवः पलानि ३।१४ षष्ट्याब्धिनाड्यः पलसप्तयुक्ता गुरोः ४४।७ शुक्रे सपञ्चाब्धयः ४।१ । द्विनागनाड्यः पलसप्तयुक्ताः ८२।७ शनैश्चरस्याभिहिताः सुपुण्याः । आद्यन्तमध्ये जपदानहोमं कुर्वन्नवाप्नोति सुरेन्द्रधाम" । अस्यार्थः सूर्यस्य नक्षत्रसंक्रमे राशिसंक्रमे च प्राक्परतश्च षोडश घटिकाः पुण्याः एवं चन्द्रस्यैकघटी त्रयोदश पलानि । भौमस्य चतस्रो घटिका एकं पलम् । बुधस्य तिस्रो घटिकाश्चतुर्दश पलानि, गुरोश्चतुश्चत्वारिंशत्घटिकाः सप्त पलानि शुक्रस्य चतस्रो घटिकाः पलमेकं, शनेर्द्व्यशीतिघटिकाः सप्त पलानि चोभयतः पुण्यकाल इत्यर्थः । अत्रोपपत्तिः । "भानोर्गतिः षड्गभागयुताऽर्हिता वा बिम्बं विधोस्त्रिगुणितायुगशैलभक्ता७४ । तिथ्यद्रि७१५हीनशशिभुक्तिरिषुद्वि२५ भक्ता नन्दाश्वि२९ युग्भवति वा विधुबिम्बमेवमिति" सिद्धान्तशिरोमण्युक्तप्रकारेण रविचन्द्रयोर्मानकला आनेयाः "अङ्गाग्नयः सचरणाः कृतवर्जभागयुक्ताद्रयो नव च सत्रिलवेषवश्च । कुमध्यमास्तुकलाः क्षितिजादिकानां त्रिज्याशुकर्णविवरेण पृथग्विनिघ्नाः ।" इति तत्रैवोक्ताः भौमादीनां मानकलास्तत्र क्रमेण मानकलाः । तत्र "घटिघ्नबिम्बं पडभुक्तिभक्तं संक्रान्तिनाड्योऽखिलखेचराणाम् । रवेस्तु ताः पुण्यतमाश्च सर्वसंक्रान्तिगोभिन्नफलं विधत्ते" इति भास्करोक्तदिशा संक्रान्तिनाड्यः स्युः तत्र षड्भुक्तयस्तत्रैवोक्ताः "मन्दाब्भुजगा रवेः शशिगतिः खाङ्काद्रयः स्वाम्नवसुघ्नाङ्कलवाः कुवेद४४विकलाः पातस्य रामाभ्रवाः । वाक्पतेः महीसुपारदशरा राहोर्बुधस्य द्वारदाः पञ्चत्वस्य सितस्य नक्षत्रमिता षष्टी शनेर्दृढं कवे" इति बुधशुक्रयोस्तु संक्रान्तिघटिकानयने सूर्यगतिरेव ग्राह्यः कल्पितशास्त्रगतिसदृशत्वात्तयोः, वासनाभाष्ये हि बुधशुक्रौ तु रवेरासन्नावेव कदाचिदग्रतः कदाचित् पृष्ठतश्चास्यानुचराविव सदा सञ्चरन्तौ दृश्येते । ततस्तयोरपि रविभगणतुल्या एव भगणा इत्युपपन्नमिति भास्करेणाभिहितत्वात् । पञ्चाङ्गानुगतिलक्षीवयोः सौक्ष्म्यफलानयनार्थं वासनासिद्धज्यौतिषैः कल्पिता नेदं पक्षगतम् इत्यादिप्रकारेण साधिताः पुण्यकालघटिकाः सूर्यस्य यथा त्रिंशत् घटिका एवं चन्द्रस्य द्वे घटिके षड्विंशतिपलानि भौमस्य नवघटिकाश्चत्वारिंशत्पलानि बुधस्य षट्घटिकाः विंशतिपलानि गुरोरष्टाशीतिघटिका एवं शुक्रस्य नव घटिका अष्टौ पलानि शनेः षष्ट्यधिकं शतं घटिकाः । पूर्वापरकालौ

मिलित्वा पुण्यकाल इत्यर्थः। अत्र वासना प्रागुक्ता एतदर्थो नाड्यः प्राक्परतश्च पुण्याः। अत्र गणितागतघटीपलेषु लिखितजैमिनिवाक्ये च क्वचित् किञ्चिदल्पभेदो घटिकाभेदश्च स्पष्टगतिस्पष्टगतिवशतः। युक्तं चैतत् आकाशे हि मेघादिना स्पष्टा एव नागा इत्यन्ते न मध्यमाः "दिनद्वयस्पष्टखगान्तरालकालः स्फुटस्तु स्फुटभुक्तिबिम्बैरिति" स्पष्टस्यैव बिम्बसंक्रान्तिघट्यानयनसूचितम् उक्तञ्च केशवार्केण "कुजादिकानामपि बिम्बलिप्ताः षष्ट्याहताः स्वगतेन भक्ताः। नाड्यादिकः संक्रमणान्तरालकालः स्फुटस्तु स्फुटभुक्तिबिम्बैरिति" अपिशब्दात् सूर्यचन्द्रमसोर्ग्रहणं तथा च ति मध्यमाग्रेऽथवा स्पष्टगतिबिम्बयोरुपचयापचयाभ्यां साम्येऽस्तदुघटिकानामप्युपचयापचयावश्यम्भावितमेवापतति तेषां चानियतत्वात्तद्वे उपनिबन्धायोगाज्जैमिनिर्नियतमध्यगत्या सूर्यादीनां पक्षाणां पुण्यकालघटीरानीयोपनिबन्धः कृतः। अत्र मत्कृतं पद्यम् "नाड्यो रामगुणा३३ रवेरथ विधोः षट्दोः पलैर्युग्मद्वयं२।२६ भौमस्याब्धिपलैर्युताग्नव६।४ विदो६।२०युक्ताः पलैः खाश्विभिः। जस्याब्धोऽष्टगजाः८८ गुरोरथ भृगोर्नन्दा९।८ पलैरष्टभिः पुण्याः स्युः स्वल्पाः शने१६ उभयतो राश्यृक्षयोः संक्रमे। अतो यो जैमिनिवाक्ये वाक्योक्तम्: पञ्चषष्टयुक्ता गुरोरितिपाठो माधवादिभिरपाठि तथा हेमाद्रिणापि द्विनागनाड्यः इति पदे नागा अष्टौ द्विराहत्ता नागा द्विनागाः षोडशनाडिकाः शनैश्चरसंक्रान्तौ पुण्यकाल इति यत् व्याख्यातवान् तदुभयमपास्त भवति तथा रामचन्द्राचार्या अपि कालनिर्णयदीपिकायां हेमाद्र्यादिमूलकलसृशं स्वपद्येनोपानिबन्धात् अत्रत्वस्योक्तयोश्येयाः। तस्मात्सर्वपक्षाणां राशिनक्षत्रयोः संक्रान्तिषु पुण्यकालताप्यास्त। भास्करोऽपि "रवेस्तु ताः पुण्यतमाः" इतिवदुन्द्रादिसंक्रान्तिषु नाड्यः पुण्या इत्यद्ध्यत्। अतिशायने तमबिष्ठनाविति पाणिनिवचनात् "पङ्ः स्वसंक्रान्तिगोमित्रफलं विधत्ते" इति। सूर्यादिसंक्रान्तिसाधारण्यं तत्र सकलसंक्रान्तिषु दिनरात्रिविष्णुपदादिभेदेन सूर्यसंक्रमवन्निर्णयोऽध्येयः। एतत्संक्रान्तिमान्यता हि गुर्जरदेशेऽत्यन्तं प्रचलात् सनप्रक्रमेण इति सकलपहसंक्रान्तिनिर्णयः" पी॰धा॰
करणभेदेऽसंक्रान्तिफलं तत्रैव

नारदः "निविष्टो दक्षिणे विष्ट्यां बालवे च दवे गरे। कौलवे शकुनौ भाद्रः किंस्तुघ्ने चोर्द्ध्वसंस्थितः। चतुष्पात्तैतिले नागे सुप्तः क्रान्तिं करोति सः। धान्यार्घवृद्धिषु समं श्रेष्ठं हीनं भवेत्क्रमात्" क्रान्तिं संक्रान्तिम्। रत्नमालायामपि "चतुष्पदे तैतिलनागयोश्च सुप्तो रविः संक्रमणं करोति। विष्ट्यां ववाख्ये च गराह्वये च स बालवाख्ये दक्षिणे निविष्टः। किंस्तुघ्ननाम्नि शकुनावपि कौलवाख्ये चोर्द्ध्वस्थितस्य खलु संक्रमणं रवेः स्यात्। धान्यार्घवृद्धिषु भवेत् क्रमशस्त्वनिष्टमध्येष्टतेति मुनयः प्रवदन्ति पूर्वे" इति।

"संक्रान्तौ पञ्चदशर्क्षं वा जन्मन्युभयपार्श्वयोः। नेष्टमर्यं षट्शुभर्क्षं पर्य्यायाच्च पुनःपुनः। हानिर्वृद्धिः स्थानहानिस्तथा प्राप्तिरिति क्रमात्" नारदेनोक्तम्।
संक्रान्तेर्यन्नक्षत्रं पञ्चदशनक्षत्रं वा यदि जन्मभं भवेदथ वा ताभ्यामुभयपार्श्वगतं जन्मभं भवेत्तदा अनिष्टमेव नक्षत्रत्रयं त्रिविधं ततो नक्षत्रषट्कं शुभं ततस्त्रिकेऽर्थहानिस्ततः षट्के वृद्धिः ततस्त्रिके स्थानहानिस्ततः षट्सु वृद्धिः षट्सु स्थानप्राप्तिरिति। अतएव पठन्ति दाक्षिणात्याः "संक्रान्त्यधरनक्षत्रादुगणयेज्जन्मभावधि। त्रिकं षट्कं त्रिकं षट्कं त्रिकं षट्कमिति क्रमात्। पन्थाभोगो व्यथा वस्त्रं हानिश्च विपुलं धनम्" इति त्रिकं शुभं षट्कमशुभमिति फलितोऽर्थः" पी॰धा॰। अधिकमयनसंक्रान्तिशब्दे ११८९पृ॰दृश्यम्।
स्फुटतया मेषादौ रविसंक्रान्तेर्वारदण्डाद्यानयनप्रकारः ज्यो॰त॰ उक्तो यथा
"नवाष्टशक्र१४८९हीनेन शकाब्दाङ्केन पूरिताः। भूवेदचन्द्रावेदाब्धौ कुरामौ वेदयुग्मके। १।१५।२१।११।२४ अङ्का अहर्दण्डादिस्तु षड्भा लब्धाङ्कैर्मिश्रिताः। दण्डात् साम्नौ त्यजेद्भ च २०।५७ पलाञ्जित्वा ततः पुनः। सप्तावशिष्टा वाराः स्युस्ततो दण्डादिकाः परे। मेषस्य क्रमशो भानोः सिद्धान्तस्फुटसम्मताः। भुजौ षड्भूरागाम्नौ २।१६ २२ काङ्काङ्कातिर्गजावनौ। १।२२।१८ रामचन्द्रोऽग्नियुग्मस्तु ३.१ २१ तर्कोऽङ्कदृक् नवायुगौ। ६ २९ ५९ द्वावङ्कदृग् वेदबाणा २।२९।५४ अब्धिर्वोषशरौ सुराः। ४।५५।३३ षड्नागवेदौ शून्येन्दू ६ ४८ १० एकं शैलभुवौ शराः। १।१७।५। द्वौ षड्भौ तथा काला २।२६।६ अब्धीरामः शरावनौ। ४।३।१५। पञ्चाम्नौ ष्टू तथा रुद्रा ५।५३।११। मेषसंक्रमवारतः। अङ्कैर्योज्या वृषादेस्तु वाराद्याः संक्रमे रवेः"।
राशिभेदे संक्रान्तिनामभेद तत्संक्रमकाले स्वनक्षत्रस्य पुरुषाकृतिसंक्रान्तिचक्रस्थानविशेषस्थितौ फलभेदश्च तत्रोक्तो यथा 'षडशीतिसंक्रान्ती द्वे तुलमद्दक्षिणायने। विषुवती तथा

मेषे गोलमध्ये तथापराः । धनुर्मिथुनकन्यासु मीने च षड़शीतयः । वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी स्मृता । मूर्ध्नि सप्त मुखे त्रीणि हृदये पञ्च विन्यसेत् । त्रितयं हस्तपादेषु महाविषुवभक्रमात् । मस्तके भूपतेः सौख्यं वदने पटुता शुभे । हृदये च धनाध्यक्षोऽर्थप्राप्तिर्दक्षिणे करे । वामे करे महद्दुःखं सुखं पादे च दक्षिणे । भ्रमणं वामपादे च कथितं विषुवत् फलम् । षड्मूर्ध्नि वदने पञ्च चत्वारि हृदये तथा । त्रितयं करपादेषु पयोविषुवतः क्रमात् । मानं मूर्ध्नि मुखे वैरं हृदये सुखसम्भवः । दोःपदार्द्वयोर्भोगस्त्रासश्च वामयोः स्मृतेः” जलविषुवफलम् । “शीर्षे पञ्च मुखे त्रीणि हस्तयोश्च भयं त्रयम् । हृदि पञ्च शशी नाभौ गुदे च पादयोरधः । उत्तरायणभाज्ञेयं स्नानचालस्थितेः फलम् । शीर्षेऽथ नाभौ वदने सुखानि दक्षे करेऽङ्घ्रौ हृदये च सौख्यम् । नाभौ शुभं वामकरेऽर्थनाशो गुह्ये भयं वामपदे प्रवासः उत्तरायणफलम् । “शीर्षे त्रीणि मुखे त्रीणि हृदये पञ्च हस्तयोः । षष्टौ पादद्वयेऽप्यष्टौ दक्षिणायनसंक्रमात् । शीर्षे मानो मुखे विद्या हृदये वित्तसञ्चयः । प्रवासः स्यात् करे वामे भिक्षालाभश्च दक्षिणे । निष्फलं वामपादे च किञ्चिल्लाभश्च दक्षिणे” दक्षिणायनफलम् । “कक्षे संक्रमणं यत्र विष्णुपद्यां मुखे तु तत् । चत्वारि दक्षिणे बाहौ त्रीणि त्रीणि पदद्वये । चत्वारि वामबाहौ च हृदये पञ्च निर्दिशेत् । चक्षुर्द्वयं द्वयं योज्यं मूर्ध्नि द्वे चैककं गुदे” “रोगो भोगस्तथा यानं बन्धनं लाभ एव च । ऐश्वर्यं राजपूजा च अपमृत्युरिति क्रमात्” विष्णुपदीफलम् “मुखे चैकं करे वेदाः पादयुग्मे द्वयं द्वयम् । क्रोड़े बाणास्तथा वेदाः करे सव्येतरेऽपि च । द्वयं द्वयं तथा नेत्रे मस्तके त्रितयं तथा । द्वयञ्चैव तथा गुह्ये षड़शीत्यां स्मृते स्थिते । मुखे दुःखं करे लाभः पादयोर्भ्रमणं हृदि । कान्ता स्याद्बन्धनं वामे हस्ते स्यात् क्रोधभेदनम् । सम्मानो नेत्रयोश्चैव अपमानश्च मस्तके । गुह्ये चैव भवेन्मृत्युः षडशीतिफलश्रुतिः” षडशीतिफलम् । गुरुसंक्रान्तिफलमुक्तं ज्यो० त० यथा “शीर्षे चत्वारि राज्यं जलधिरपि करे दक्षिणे चापि सौख्यं चैकं कण्ठे विभूतिं मदनशरमितं वक्षसि प्रीतिसङ्गम् । पादस्याः षट् च पीड़ा पुनरपि जलधिर्वामहस्ते च मृत्युं नेत्रे त्रीणि प्रदद्युः सुखमथ निजभे वाक्पतेः सङ्क्रमात्” ।

संक्रान्तिपुण्यकालव्यवस्था ति०त० संक्षेपतो दर्शिता यथा “तदयं संक्षेपः । दिनसंक्रमणे कृत्स्नं दिनं पुण्यं षडशीति मुखे” इत्याद्युक्तं पुण्यतरं मन्दामन्दाकिनीत्यादि रूपेण त्रिचत्वरादिघटिकाः पुण्यतमाः । दिनवृत्तोत्तरायणादिविहितविंशतिदण्डादीनां रात्रिप्रविष्टभागस्यापि पुण्यत्वं रात्रिसंक्रमणे तु कलान्यून प्रथमार्द्धगते तद्दिवसीयशेषयामद्वयं पुण्यम् । कालद्वयात्मकमध्यरात्रगते तद्दिवसीयतिथेरभेदे तद्दिवसीयशेषयामद्वयं पुण्यं भेदे तु तद्दिवसीयशेषयामद्वयं परदिवसीयाद्ययामद्वयञ्च पुण्यम् । उभयदिने पुण्यकालेऽपि पूर्वदिनाकरण एव परदिने तद्विहितं कार्य्यम् । तिथिभेदाभेदयोर्दक्षिणायने तद्दिवसीयशेषयामद्वयम् उत्तरायणे तु परदिवसीयाद्ययामद्वयं पुण्यमिति मध्यरात्रीयकलोत्तर शेषार्द्धरात्रसंक्रमणमात्रे तु परदिनाद्ययामद्वयं पुण्यमिति सन्ध्यासंक्रमणे तु दिनदण्डे दिनस्य रात्रिदण्डे रात्रेर्व्यवस्थितिः” । तत्प्रमाणं ति०त० दृश्यम् । संक्रान्तौ कालाशुद्धिदोषादिकं नास्ति यथोक्तं ति०त०स्कान्दे “एकान्ततो मया प्रोक्ताः कालाः संक्रान्तिसंज्ञकाः । नैतेषु विद्यतेऽनिष्टं यतश्चाक्षयसंज्ञिताः । अन्नञ्चापि यद्दत्तं कुपात्रेभ्योऽपि मानवैः । अकालेऽपि हि तत्सर्वं सत्यमक्षयतां व्रजेत्” ।

सङ्ख्य न० संख्यायते परस्परनामोच्चारणं क्रियतेऽत्र सम्+ख्या-घञर्थे क । १युद्धे अमरः । अङ् । २विचारे स्त्री अमरः । एवं ३सम्यग्बुद्धौ राजनि० ४द्व्यादिमते एकत्वद्वित्वादौ गुणभेदे च स्त्री टाप् । एकादिसंख्यावाचकस्य संख्यासंख्येयोभयपरता “द्व्येकयोर्द्विवचनैकवचने” इति पा० महाभाष्ये उक्ता । तेन घटानां पञ्चत्यपि स्यात् “वार्त्ताकुरेका गुणसम्प्रयुक्ता” इत्यादि वैद्यके संख्यापरतया निर्देशोऽपि साधुः । किन्तु संख्यात्व जातावेव शक्तिः संख्यायुक्ते निरूढ़लक्षणेति विवेकः तत्र एकादिदशान्ताः शब्दास्त्रिलिङ्गा विंशत्याद्यास्तु नियतस्त्रीलिङ्गादिकाः । तत्रापि विंशत्यादिशब्दाना बहुत्वसंख्यावाचकत्वेऽपि एकवचनान्ततैव । तदाहृत्ते बहुवचनान्ता अपि पञ्च विंशतयः षट् शतानीत्यादि । तेषां विशेषसंज्ञा लीला० दर्शिता यथा “एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः । अर्बुदमब्जः (शङ्कुः) खर्वनिखर्वौ महापद्मशङ्कवस्तस्मात् । जलधिश्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तराः संज्ञाः संख्याया व्यव-

हारार्थं कृताः पूर्वैः"। ब्रह्माण्डपु० नामान्तराण्युक्तानि यथा "एकं दश शतं चैव सहस्रमयुतं तथा। लक्षं च नियुतञ्चैव कोटिरर्बुदमेव च। वृन्दः खर्वो निखर्वश्च शङ्खपद्मौ च सागरः। अन्त्यं मध्यं परार्द्धञ्च दशवृद्ध्या यथोत्तरम्"। संख्या च गणनव्यवहारे हेतुः यथोक्तं "गणनव्यवहारे तु हेतुः सङ्ख्याभिधीयते। नित्येषु नित्यमेकत्वमनित्येऽनित्यमुच्यते। द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः। अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः। अपेक्षाबुद्धिनाशाच्च तेषां नाशो निरूपितः। अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरुच्यते" भाषा०। पर्य्याप्तिसम्बन्धेनैव अनेकाश्रिता समवायेन तु प्रत्येकाश्रितेति बोध्यम्।

सङ्ख्यात त्रि० सम्+ख्या-क्त। १ज्ञातसङ्ख्ये २गणिते ३सम्यक्ख्याते च तेन रात्रिपर्वस्य समासे अच् सङ्ख्या०। संख्यातरात्रः। [१परिच्छिन्ने अमरः। २संख्यायुक्ते त्रि०।

सङ्ख्यावत् पु० संख्या विचारणाऽस्त्यस्य मतुप् मस्य वः।

सङ्ख्येय त्रि० संख्यायतेऽसौ सम्+ख्या-यत्। १गणनीये २संख्याकरणयोग्ये।

सङ्ग पु० सन्ज-भावे घञ्। १मेलने २सम्बन्धे ३विषयादिरागे च "ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते" गीता।

सङ्गणिका सम्+गण-भावे ण्वुल्। अप्रतिरूपकथायां त्रिका०।

सङ्गत न० सम्+गम-भावे क्त। १सौहार्दे २सङ्गतौ च। कर्त्तरि क्त। ३मिलिते त्रि०। ४सङ्गतियुते ५युक्तिसंसिद्धे अमरः।

सङ्गति स्त्री सम्+गम-क्तिन्। १सङ्गमे २मेलने न्यायोक्ते अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषये "सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा। निर्वाहकैककार्य्यत्वे षोढा सङ्गतिरिष्यते" इत्युक्ते ३प्रसङ्गादौ पदार्थे च।

सङ्गम पु० सम्+गम-घञ् न वृद्धिः। १सङ्गतौ २स्त्रीपुंसयोः संभोगे पु०न० अमरः। ३नद्यादेर्नद्यादिभिर्योगस्थाने च "गङ्गासागरसङ्गमः" इति पुराणम्।

सङ्गर पु० सङ्गीर्य्यते सम्+गॄ-भावादौ अप्। १आपदि २प्रतिज्ञायां ३युद्धे च अमरः। कर्त्तरि अच्। ४क्रियाकारके ५विषे मेदि०। ६शमीवृक्षफले न० मेदि०।

सङ्गव पु० सङ्गता गावो दोहनायात्र काले नि०। "प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु" इति दक्षोक्ते प्रातःकालानन्तरं मुहूर्त्तत्रयात्मके कालभेदे।

सङ्गिन् त्रि० सन्ज-घिनुण्। सङ्गयुक्ते स्त्रियां ङीप्।

सङ्गीत न० सम्+गै-क्त। १दृश्यार्थे नाट्यगीतवाद्यत्रिके हेमच०। २तद्रूपप्रतिपादकग्रन्थे च। कर्मणि क्त। ३सम्यग्गीते त्रि०। सङ्गीतशास्त्राणि च नानाविधानि तत्र मूलग्रन्थकर्त्तारश्चत्वारः भरतहनुमत्सोमेश्वरकल्लिनाथास्तत्र हनूमद्ग्रन्थस्यैव लोकेऽधुना बहुलप्रचारः। तद्ग्रन्थस्य च स्वराध्यायः रागाध्यायः तालाध्यायः नृत्याध्यायः भावाध्यायः कोकाध्यायः हस्ताध्यायश्चेति सप्ताध्यायाः। सङ्गीतसारादौ विस्तरो दृश्यः। [हला०।

सङ्गीति स्त्री सम्+गै-क्तिन्। १सम्यग्गाने २[illegible]

सङ्गीर्ण त्रि० सम्+गॄ-क्त। स्वीकृते अमरः।

सङ्ग्रह पु० सम्+ग्रह-अप्। १सञ्चये २बह्वर्थकवाक्यानामेकत्र सङ्कलने च "विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः। निबन्धो यः समासेन संग्रहं तं विदुर्बुधाः"। ३रक्षणे ४उत्कर्षे ५पाणिग्रहणे ६संक्षेपे मेदि० ७मुष्टौ विश्वः ८स्वीकारे ९महोद्योगे नानार्थरत्नमा०। १०व्याडिप्रणीते व्याकरणग्रन्थभेदे "सङ्ग्रहेऽस्तमुपागते" वाक्यपदीयम्।

सङ्ग्रहणी स्त्री संहिता ग्रहणी। ग्रहणीरोगभेदे।

सङ्ग्राम युद्धे अद०चु०उभ०सक०सेट्। सङ्ग्रामयति ते अससङ्ग्रामत् त। अस्याफलवत्कर्त्तर्य्यपि धा० इत्येके।

सङ्ग्राम पु० सङ्ग्राम-भावे अच्। युद्धे अमरः।

सङ्ग्रामपटह पु० ६त०। रणवाद्यभेदे त्रिका०।

सङ्ग्राह पु० संगृह्यते सम्+ग्रह-कर्म्मणि घञ्। फलकस्य मुष्टिबन्धनस्थाने अमरः।

सङ्ग्राहिन् पु० सम्यक् गृह्णाति मलम् सम्+ग्रह-णिनि। १कुटजवृक्षे राजनि०। २मलावष्टम्भके ३संग्रहकारके च त्रि०। [अमरः। ३संहते त्रि०।

सङ्घ पु० संहरत् सर्वम्। १सजातीयप्राणिसमूहे २समूहे च

सङ्घचारिन् पु० सङ्घीभूय चरति चर-णिनि। १मत्स्ये हेमच०। २सङ्घीभूयचारिणि जन्तुमात्रे त्रि०स्त्रियां ङीप्।

सङ्घजीविन् पु० सङ्घेन जीवति जीव-णिनि। संहोपजीविनि व्रातीने हेमच०। [च।

सङ्घट्ट पु० सम्+घट्ट-भावे अच्। १परस्परसङ्घर्षणे २गठने कर्त्तरि अच्। ३लतायां शब्दर०। ४चालके त्रि०।

सङ्घट्टन न० सम्+घट्ट-ल्युट्। १मेलने २गठने ३रचनायाञ्च। युच्। तत्रैव स्त्री। [हस्ते (गाड़हात) अमरः।

सङ्घतल पु० सङ्घे संहते मिलिते तले यत्र। संयोजितकरद्वये।

सङ्घपुष्पी स्त्री सङ्घानि संहतानि पुष्पाण्यस्याः ङीप्। धातकी पुष्पग्राम् (धाइ फुल) राजनि०।

सङ्घर्ष पु० सम्+घृष-घञ् । १परस्परघर्षणे २स्पर्द्धायां ३सं-मर्दे च शब्दर० ।

सङ्घशस् अव्य० सङ्घ+वीप्सार्थे-शस् । भूरिशः इत्यर्थे ।

सङ्घाटिका स्त्री सङ्घटयति सम्+घट-णिच्-ण्वुल् । १युग्मे २कुट्टन्यां ३जलकण्टके मेदि० । ४घ्राणे विश्वः ।

सङ्घात पु० सम्+हन-घञ् । १समूहे २नरकभेदे अमरः । ३सम्यग्हनने मेदि० ४दृढसंयोगे ५कफे च राजनि० ।

सङ्घातपत्त्रिका स्त्री सङ्घातयुक्तं पत्त्रमस्याः कप् अत इत्त्वम् । शतपुष्पायां राजनि० ।

सचि(ची) स्त्री सच-इन् वा ङीप् । इन्द्राण्यां रामाश्रमः

सचिक्लक पु० सह क्लिन्नेन सहस्य सः कप् नि० । क्लिन्न-नेत्रे (पिचुडियुक्तनेत्रे) शब्दच० ।

सचिव पु० सच-इन् तथा सन् वाति-क । १सहाये २म-न्त्रिणि अमरः २२१पृ० दृश्यम् । ३कृष्णधुस्तूरे राजनि० । [रोगभेदे राजनि० ।

सचिवामय पु० सचिवः सहाय आमयो यस्य । विसर्पे

सचीनन्दन न० ६त० । वैष्णवसम्प्रदायप्रवर्त्तके नवद्वीपाधि-भूते वैष्णवाचार्यभेदे तदाविर्भावश्च "शाके सुनिव्योम-युगेन्दुमाने(१४०७) पुण्ये तिथौ फाल्गुनपौर्णमास्याम् । त्रैलोक्यभाग्योदयपुण्यकीर्त्तिर्देवः सचीनन्दन आवि-रासीत्" चैतन्यचन्द्रोदयः । अस्य कलौ गुप्तभगवदवता-रत्वं वैष्णवामन्यन्ते तत्र न किञ्चित् प्रमाणमुपलभामहे

सचेतन त्रि० सह चेतनया सहस्य सः । विशिष्टज्ञानयुक्ते ।

सचेष्ट पु० सचते सच-अच् तथाभूतः सन् इष्टः । १आम्रे शब्दमा० । सह चेष्टया सहस्य सः । २चेष्टान्विते त्रि० ।

सचारा स्त्री सन् चारो गात्रानुलेपने विस्वग्गतिरस्याः । हरिद्रायां शब्दच० ।

सच्चिदानन्द पु० सन् नित्यः चित् चैतन्यमानन्दः त्रिपद कर्म० । १नित्यज्ञानसुखमये ब्रह्मणि वेदा० । ६ब० । २तद्गुणे ईश्वरादौ त्रि० न्यायमतम् ।

सच्छूद्र पु० कर्म० । गोपनापितादौ शूद्रभेदे "सच्छूद्रो गोपनापिताविति" स्मृतिः । [अमरः ।

सजम्बाल त्रि० सह जम्बालेन सहस्य सः । पङ्कयुक्ते देशे

सजाति पु०समाना जातिरस्य समानस्य सः । सवर्णेन सवर्णाया मूढायाम् उत्पादिते पुत्रे । २तुल्यजातौ त्रि० "सव-र्णेभ्यः सवर्णासु जायन्ते च सजातयः" मिता०स्मृतिः ।

सजातीय त्रि० समानां जातिमर्हति छ समानस्य स । समानधर्मयुक्ते अमरः ।

सजुष् अव्य०सह जुषते क्विप् सहस्य सः । १सहार्थे जुषा-हलादौ र । सजुः उज्ज्वला० । "सजुःकृत्य रतिं वसेदिति" भट्टिः । २प्रीतियुक्ते ३सेवायुक्ते च त्रि०४तापसे संक्षिप्तसा०

सज्ज त्रि०सस्ज-अच् । १उद्युक्ते २संनद्धे अमरः । ३सम्भृते विश्वः ४निश्चते शब्दर० । भावे अच् । ५आयोजने ६वेशे च स्त्री सतोजायते जन-ड । ७साधुजाते त्रि० ।

सज्जन न०सस्ज-णिच्-ल्युट् । १रक्षार्थं सैन्यस्थापने अमरः २घट्टे (घाटी) मेदि० । ३आयोजने । सन् जनः । ४सौ-जन्यवति जने पु० "निजाचारप्रतिष्ठो ये कुर्वन्ति वेदस-म्मतम् । पापाभिलाषरहिताः सज्जनास्ते प्रकीर्त्तिताः" पद्मपु० "कुरु सज्जनरञ्जनमिति" उद्भटः । ५सत्कुलोद्भवे च पु० । सस्ज-णिच्-युच् । ६स्कन्धपादीनामारोहणार्थं गजभूषाकरणादौ स्त्री अमरः ।

सज्जित त्रि०सज्जा जातास्य तार०इतच् सस्ज् णिच्-कर्मणि क्त वा । १कृतवेशे २भूषिते ३संनद्धे च । [देवीपु० ।

सञ्च सञ्चीयतेऽत्र सम्+चि-ड । लेखनार्थे पत्रभेदे (साँच) ।

सञ्चत् त्रि० सम्+चत-क्विप् । प्रतारके सि०कौ० ।

सञ्चय पु०सम्+चि-अच् । १समूहे अमरः । २संग्रहे च । ल्युट् । सञ्चयन । सङ्ग्रहे न० । [सीदतीति"पुराणम्

सञ्चयिन् पु० सम्+चि-इनि । सङ्ग्रहकारके "सञ्चयी नाव-

सञ्च(ञ्चा)र पु० सञ्चरत्यनेन सम्+चर-घञर्थे करणे अ घञ् वा । १सेतौ रत्नमा० २देहे हेमच० । भावे घञ् । ३ग्र-हादेः राश्यन्तरगमने ४सम्यग्गतौ च ।

सञ्चाय्य पु० सञ्चीयतेऽग्निरत्र सम्+चि-ण्यत् नि० । यज्ञभेदे ।

सञ्चारिका स्त्री सञ्चारयति नायकयोर्वार्त्ताम् सम्+चर-णिच्-ण्वुल् । १दूत्याम् अमरः । २कुट्टिन्यां ३युग्मे ४घ्राणे च मेदि० ।

सञ्चारिन् पु० सम्+चर-णिनि । १धूपे त्रिका० २वायौ शब्दच० । अलङ्कारोक्ते शृङ्गारादिरसाद्युतगुणे ३भाव-भेदे च भावभेदश्च व्यभिचारिभावः । "नानाभिनयसम्ब-न्धात् भावयन्ति रसान् यतः । तस्माद्भावा अमी प्रोक्ता स्थायिसञ्चारिसात्त्विकाः" । "व्यक्तः सञ्चारिणा तथेति" सा०द० । ४सञ्चारकारके त्रि० स्त्रियां ङीप् । "सञ्चारिणी दीपशिखेवेति" रघुः । सा च ५हंसपद्याम् राजनि० ।

सञ्चाली स्त्री सञ्चलति सम्+चल-ण गौरा० ङीष् । गु-ञ्जायां युक्तिकल्पतरुः ।

सञ्चिता स्त्री प्रा० स० । मूषिकपर्ण्यां शब्दर० [कर्मभेदे च

सञ्चित त्रि० सम्+चि-क्त । १ए कृते २अनारब्धफलके

सञ्ज पु॰ सम्+जन–ड । चतुर्मुखे १ब्रह्मणि २शिवे च मेदि॰ ३छाग्यां स्त्री त्रिका॰ ।

सञ्जय पु॰ भारतप्रसिद्धे धृतराष्ट्रसारथिभेदे ।

सञ्जवन न॰ सम्+जु–युच् । परस्पराभिमुखतया स्थिते च- तुःशाले गृहे अमरः ।

सञ्जीवन न॰ सम्+जीव–ल्युट् । १चतुःशालगृहे शब्दर॰ । २सम्यक्प्राणधारणे च । संजीवयति सम्+जीव–णिच्- ल्युट् । ३ओषधीभेदे स्त्री ङीप् ।

सट न॰ स्त्री सठ–अच् पृषो॰ ठस्य टः । १व्रतिनां केशसङ्घाते २जटायाम् शब्दर॰ । ३शिखायां ४सिंहादेः केशरे च मेदि॰ "सटच्छटाभिन्नघनेनेति" माघः । [ङीप् ।

सटाङ्क पुंस्त्री॰ सटा अङ्को यस्य । सिंहे शब्दर॰ स्त्रियां

सटि(टी) स्त्री सठ–इन् वा ङीप् पृषो॰ । १शट्यां शब्दरत्ना॰ स्वार्थे क । २गन्धपत्त्रकायां राजनि॰ । सठ–इन् ङीप् । पृषो॰ । सटीत्यन्ये । ठान्तः तन्नार्थे राजनि॰ ।

सट्वा स्त्री सठ–व पृषो॰ । १पक्षिभेदे २वाद्ये संक्षिप्तसा॰ ।

सठ श्वठार्थे गतौ संस्कारे असंस्कारे च चुरा॰ उभ॰ सक॰ सेट् । साठयति ते षोपदेशत्वमेव न्याय्यम् ।

सणसूत्र न॰ शणसूत्र+पृषो॰ । शणसूत्रे रायमुकुटः ।

सण्डिश पु॰ संदंश+पृषो॰ । सन्दंशे (साँड़ाशि) "सण्डिशैरप- कृष्यन्ते नरैर्योऽस्यै सुखात्ततः" मार्कण्डेयपु॰ १४अ॰ ।

सण्डीन न॰ सम्+डी–क्त । पक्षिणां सङ्गत्य गमनरूपे गति- भेदे अमरः ।

सत् त्रि॰अस–शतृ । १सत्ये २साधौ ३पूजिते ४धीरे ५प्रशस्ते ६विद्यमाने च अमरः । स्त्रियां ङीप् । सा च ७पति- व्रतायां स्त्रियां दक्षकन्याभेदे "सती सती योगवि- सृष्टदेहेति" कुमारः । ९गौराङ्गादि हेमच॰ १०ब्रह्मणि न॰ "ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इति गीता । ११आदरे अव्य॰ "सदसती आदरानादरयो- रिति" पाणिनिः उप॰स॰ "सत्कृत्य" सि॰कौ॰ । पतिव्र- तापरत्वे संज्ञात्वात् तस्याभावः त्व "त्वतलोर्गुणवचनस्य" पा॰ न पुंवद्भावः सतीत्वम् "तेन नारद ! नारीणां सतीत्व- मुपजायते" पुराणम् ।

सतत न॰ सम्+तन–क्त समोऽन्त्यलोप । १निरन्तरे २तद्वति त्रि॰ अमरः । ["सतत्वताऽन्यथा प्रथा" वेदा॰प॰ ।

सतत्त्व न॰ सह सदृशं तत्त्वेन । १स्वभावे हेमच॰ २यथार्थे

सतानन्द पु॰ गौतमपुत्रे अहल्यागर्भजे मुनिभेदे शब्दच॰ ।

सतीन पु॰ सतीं नयति नी–ड । १वंशभेदे शब्दच॰ (क्षुद्र मटर) २कलायभेदे भरतः । स्वार्थे क । तत्रैव अमरः ।

सतीर्थ पु॰ समाने तीर्थे गुरौ वसति यत् समानस्य सः । परस्परैकगुरुके छात्रे अमरः । छ्व॰ । निर्थकारोऽप्यय- मत्रार्थे । [व्याडिः । २वंशे धारा॰ ३शायौ रायमु॰ ।

सतील पु॰ सतीं लवयति लष–ड । (क्षुद्रमटर) १कलाये

सतीलक पु॰ सतीं लव कायति कै–क, सह तिलेन तिलचि- ह्नेन कप् पृषो॰ दीर्घः । १वंशे (क्षुद्रमटर) २कलायभेदे च अमरः । [दीर्घः । कलायभेदे (तेवोड़ा) अमरः ।

सतीला स्त्री सह तिलेन तिलचिह्नेन सहस्य सः पृषो॰

सतेर पु॰ सन–एर तान्तादेशः । सतुषे संक्षिप्तसा॰ ।

सत्कदम्ब पु॰ नित्यक॰ । कोविकदम्बे शब्दच॰ ।

सत्कर्तृ पु॰सत्+कृ–तृच् । १विष्णौ विष्णुस॰२सत्कारके त्रि॰ ।

सत्कर्म्मन् न॰ कर्म॰ । वेदादिविहिते यागादौ कर्मणि ।

सत्काञ्चनार पु॰कर्म॰ । रक्तकाञ्चने शब्दच॰ । [स्त्रियां ङीष्

सत्काण्ड पुंस्त्री॰सत्काण्डं शब्दव्यापारोऽस्य । चिल्ले शब्दच॰

सत्कार पु॰ सत्+कृ–घञ् उप॰स॰ । १सम्मानने २पूजने च ।

सत्कार्य्यवाद पु॰ ६त॰ । कार्य्यस्य सत्त्वनिर्णायके वादे कथा- भेदे स च वादः उत्पत्तिशब्दे ११०८पृ॰ दृश्यः ।

सत्कृत त्रि॰ सत्+कृ–क्त । १पूजिते २कृतसम्माने च ।

सत्क्रिया स्त्री सत्+कृ–श । १सत्कारे २सम्मानने ३पूजने च

सत्तम त्रि॰ अतिशयेन सन् तमप् । अतिशयसाधौ अमरः ।

सत्ता स्त्री सतोभावः तल् । १द्रव्यगुणकर्मवृत्तौ २जातिभेदे "द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते" भाषा॰ । जाति- शब्दे ३०९१ पृ॰ दृश्यम् । ३विद्यमानतायाञ्च विद्यमा- नत्वं च कालसम्बन्धः । आत्मधारणानुकूलव्यापार इति शाब्दिकाः "आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते । अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः" हरिः ।

तत्र विद्यमानता च वेदान्तमते त्रिविधा पारमार्थिकी१ ब्रह्मणः त्रैकालिकाबाध्यत्वरूपा व्यावहारिकी१ घटादीनां सा च तत्त्वज्ञाननाश्या प्रातीतिकी१ शुक्तिरजतादेः सा चाधिष्ठानसाक्षात्कारनाश्या । ब्रह्मसत्तयैव सर्वेषां स- त्ताव्यवहारः सदुत्पन्नत्वात् इति वेदान्तिनः ।

सत्त्र न॰ सद–ष्ट्रन् । १स्थाने २यज्ञभेदे ३सदादाने ४आच्छा- दने ५अरण्ये ६कैतवे मेदि॰ ७धने ८गृहे ९दाने १०सु- रषि नानार्थकोषः । सदादानञ्च सदन्नियं सततान्नदानम् । यज्ञभेदश्च द्वादशाहादिकाख्यः ज्योतिष्टोमादिः तथोक्तं कात्या॰श्रौ॰१२।१।४। तत्रभाष्यादौ "द्वादशाहः सत्त्र- महीनश्च सू॰ "सत्त्ररूपः अहीनरूपश्च भवति द्विविधः ।

ञ्चायत उपयन्तीति सत्त्रस्य लिङ्गं यजते इत्यहीनस्य । अत्र विशेषमाह "द्वादशाहमृद्धिकामा उपेयुरिति तथा त्र-योदशरात्रमासीरन्निति सत्त्रलिङ्गम् द्वादशाहेन प्रजाकामं याजयेदित्यहीनलिङ्गम् । अस्याऽकथनप्रयोजनम् सत्त्रे बह्वात्मको धर्मो दातृत्वेन प्रवर्त्तते अहीने चाहीना-त्मकः । "उभयतोऽतिरात्रं सत्त्रमुपरिष्टादहीनस्य" सू० उभयत इत्यादावन्तेऽतिरात्रो यस्य तदुभयतोऽतिरात्रम् उपरिष्टात् अन्तएव । "यजमानाः सर्वे सत्त्रेषु" सू० । कर्त्तारो भवन्ति य ऋत्विजस्ते यजमाना इत्यनेनार्त्वि-जीनान् पदार्थान् सर्वाण्यानूद्य यजमानाः कर्त्तृत्वेन विधीयन्ते । "अदक्षिणानि च स्वामियोगात्" सू० । सत्त्राणि भवन्ति न हि कश्चिदात्मनैवात्मानं परिक्री-णाति । अत्र हि स्वामिन एवार्त्विज्यम् अनुपपन्न-श्चात्मपरिक्रयः "गृहपतिर्याजमानप्रयुक्तत्वात्" सू० याजमानं यत्कर्म तद्गृहपतिः करोति कर्मान्तरे तत्प्र-युक्तत्वात् इतरेषां चाध्वर्य्वादिषु योगात् । "दर्श-नाद्" सू० दृश्यते चायमर्थः तस्माद् यदि बहवो प्रय-च्छेयुरिति । "सर्वे संस्कारान्" सू० यद्यत्संस्कारकं याजमानं यथा वपनादि तत्सर्वे कुर्युः तेन हि यज-माना संस्क्रियन्ते । "दर्शने वचनात्" सू० अन्तु दर्श-नमुक्तम् तद्वचनम् गृहपतये एकस्मै दानमुक्तम् वचनं किमिव न कुर्य्यात् । "अविभवति गृहपत्यन्वारम्भः" सू० न संभवत्यनेककर्तृके पदार्थे वेदस्तरणाग्न्यन्वाधानादौ गृहपतेरन्वारम्भः सर्वैः कर्त्तव्यः । "पदार्थेष्वेकः कृत-त्वात्" सू० यत् पुनः ऋत्विग्भिर्निर्वर्त्त्यमेव कर्म यथा पात्रासादनमाज्यावेक्षणं वा तत्सर्वाश्चैव कर्तृत्वम् कृतत्वात् पदार्थस्य । परार्थे यजमानकर्तृके आज्या-वेक्षणादौ एको गृहपतिः कुतः कृतत्वात् एकेनापि कृतः कृत एव यतः । "अग्निं चेष्टकायाः समारोह्य गृहपति-र्मध्ये मन्थनार्थाय इतरे दक्षिणोत्तराः" सू० समारोह्येति च पूर्वकालतायाम् ल्यबादेशो न समानकर्तृकतायाम् । "गृहपत्याहवनीयेऽङ्गारप्रावहनम्" सू० । "तत्र प्राजा-पत्यः पशुः" सू० । तत्र विहारे प्राजापत्यः पशुर्भवति । पुनर्द्व्याद्याहर्गणे प्राजापत्यस्य नियमः तथा चाश्वमेधे नियमदर्शनं भवति प्राजापत्यमालभेतेति । तत्र साधा-रणीकृते विहारे । "आज्येन पत्नीसंयाजा गृहपति-वर्जम्" सू० । [सार्थे अमरे पाठान्तरम् ।

सत्त्रम् अव्य० सद–त्रल् । १सहार्थे जटा० । २ला । एकाग्र-

सत्त्रशाला स्त्री ६त० । अन्नजलादेर्दानार्थं कल्पिते गृहे हेमच० । [श्रीकृष्णश्वशुरे सत्यभामाजनके राजभेदे ।

सत्त्राजित् पु० सत्त्रेणाजयति लोकान् आ+जि–क्विप् ।

सत्त्रि पु० सद–बा० त्रि । १मेघे २गजे ३जयशीले त्रि० उणादिकोषः । [अमरः २गृहस्थे च ।

सत्त्रिन् पु० सत्त्रं गृहं यज्ञो वा विद्यतेऽस्य इनि । १गृहपतौ

सत्त्व न० सतोभावः त्व । १सांख्यसिद्धे प्रकाशादिसाधने प्रकृत्यवयवे पदार्थे प्रकृतिशब्दे दृश्यम् "सत्त्वं लघु प्रका-शकमिष्टम्" सां०का० । अयं हितकारः पुंसो० एकतकारः । २द्रव्ये ३प्राणेषु ४व्यवसाये ५बले ६स्वभावे ७पिशाचादौ शब्दच० ८चित्ते मेदि० "सत्त्वे तप्यमाने तत्संक्रान्तः पुरुषोऽपि तप्यत इव" पात० भा० । ९रसे १०आयुषि ११धने । १२आत्मनि च शब्दच० १३सत्तारूपे १४जा-तिभेदे १५विद्यमानतायाञ्च द्वितकारः । १६जन्तुषु पु०न० अमरः ।

सत्पत्र न० सत् शोभनं पत्त्रम् । १पद्मस्य नवदले शब्दच० । कर्म० । २सुन्दरदले त्रि० । [विहिताचारे च ।

सत्पथ पु० कर्म० अच्समा० । शोभनमार्गे अमरः २वेदादि०

सत्पुत्र पु० कर्म० । वेदादिविहितकार्य्यकर्त्तरि पुत्रे "पुन्नाम्नो नरकाद् यस्मात्त्रायते पितरं सुतः । मुखसन्दर्शनेनापि तदुत्पत्तौ यतेत सः" इत्युक्त्युक्तनरकतारणाय "ऋणमस्मिन् सन्नयति अमृतत्वञ्च विन्दति । पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम्" इति ऋणशोधा-पनयनाय च यत् पश्येदिति नियमविधानं तदु-क्तपुत्रकार्य्यपुत्रपरम् । सत्पुत्रस्तु मुखदर्शनं विनापि नरकनिस्तारकः । तथा च विष्णुपु० "सत्पुत्रेण तु जा-तेन वेनोऽपि त्रिदिवं ययौ । पुन्नाम्नो नरकात्त्रातः स तेन सुमहात्मना" । ब्रह्मपुराणेऽपि "सत्पुत्रेण भो विप्राः सत्पुत्रेण महात्मना । त्रातः स (वेनः) पुरुष-व्याघ्रः पुन्नाम्नो नरकात्तदा" शु०त० ।

सत्प्रतिग्रह पु० सद्भ्यः प्रतिग्रहः । साधुदत्तधनस्य प्रतिग्रहे "सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः । विभागः सम्प्रयोगश्च सत्प्रतिग्रह एव च इति स्मृतिः ।

सत्प्रतिपक्ष पु० कर्म० । तुल्यविरोधिनि १प्रतियोगिनि २न्याय-योक्ते हेतुदोषे हेत्वाभासभेदे । स च बाधोपस्थिति-समर्थपरामर्शकालीनसाध्यविशिष्टपक्षपरामर्शविषयः । यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते सः । यथा शब्दो-नित्यः श्रावणत्वाच्छब्दत्ववत् । शब्दोऽनित्यः कार्य्यत्वात्

पटवत्। अन्ये तु अनुकूलतर्काभावप्रयोजकसाध्यवत्त्वेनोप-स्थितविशेष इति वदन्ति। साध्याभावव्याप्यवत्पक्षः। साध्यवदन्यत्वव्याप्यवत्पक्षः। पक्षनिष्ठः साध्याभावव्याप्यः पक्षनिष्ठः साध्यवद्वृत्त्यव्याप्यो वा। साध्यवद्वृत्तित्वा-व्याप्यवत्पक्षः। पक्षनिष्ठः साध्यवद्वृत्तित्वाव्याप्यः। पक्षवृत्त्य-भावप्रतियोगित्वव्याप्यवत्साध्यम्। साध्यनिष्ठः पक्षवृ-त्त्यभावप्रतियोगित्वव्याप्यो वा। "विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षिता" भाषा०। तुल्यबलयोरेव सत्प्र-तिपक्षत्वं अतुल्यबलयोः तन्नैकतरत्र तर्कादिबलसत्त्वे तस्यैवान्यतरबाधकतेति बोध्यम्।

सत्फल पु० सन्ति शोभनानि फलान्यस्य। १दाडिमवृक्षे श-ब्दच०। २शुभफलयुते त्रि०।

सत्य न० सत्। हित यत्। १सत्ययुगे २शपथे ३याथार्थ्ये च ४तद्वति त्रि० मेदि०। "यथार्थकथनं यच्च सर्वलोकसुख-प्रदम्। तत् सत्यमिति विज्ञेयमसत्यं तद्विपर्य्ययः" पद्मपु० सर्वलोकसुखप्रदमिति न लक्षणघटकं सत्यस्याप्यप्रियत्वे कथननिषेधात् अतएव मनुनोक्तं "सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्"। ५अश्वत्थवृक्षे ६नान्दी-मुखश्राद्धीयदेवभेदे च पु० "इष्टिश्राद्धे क्रतुर्दक्षः सत्यो ना-न्दीमुखे वसुः" श्रा०त०धृतवचनम्। ७सिद्धान्ते शब्दर०। शपथरूपन्यासपालने दाशो यथा "कृत्वा शपथरूपं यः सत्यं हन्ति न पालयन्। स कृतघ्नः कालसूत्रे वसेदेव चतुर्युगम्। सप्तजन्मसु काकश्च सप्तजन्मसु पेचकः। ततः शूद्रो महाव्याधिः सप्तजन्मस्वतः शुचिः" ब्रह्मवै० प्र० २८अ०। ८परमात्मनि "सत्यं ज्ञानमनन्तं ब्रह्मेति" श्रुतिः। ९श्रीरामे पु० शब्दर०। १०विष्णौ "लोकत्रयेऽप्य-न्तरे विष्णुः सत्यः सत्यधोत्तरैः। सत्यात्मा समभवत् सत्यः स यद्रूपो जनार्दनः" कूर्मपु० ४८अ०। ११तन्मातरि स्त्री। १२तपोलोकादूर्द्धस्थे लोके सत्यलोकशब्दे दृश्यम्। सन्ति पृथिव्यप्तेजांसि च त्यौ वाय्वाकाशौ च समा०द्व० नि०ङ समा० हितकारः। १३भूतपञ्चके "सच्च त्यच्च भूत-पञ्चकं तत् सत्यमित्याचक्षते" श्रुतिः। सत्यत्वञ्च त्रिकाला-बाध्यत्वमिति वेदान्तिनः यथार्थज्ञानविषयत्वं सत्यत्वमिति नैयायिकाः। सन्धिसन्ध्यांशाभ्यां सहितसत्ययुगमानं दैवमानेन १२०० वर्षाः मानुषमानेन १७२८०० वर्षाः।

सत्यङ्कार पु० सत्य+कृ-घञ् नि० मुम्। "मयैतत् क्रेयं केयमित्येवम्" सत्यकरणे सत्यापने (वायनादिदाने) अमरः

सत्यतपस् पु० सत्यं तपोऽस्य। मुनिभेदे तस्य च दुर्वाससो वरेण वेदव्यासरूपेणाविर्भावः तत्कथा वराहपु०।

सत्यधृति पु० शतानन्दपुत्रे ऋषिभेदे मत्स्यपु० ४८अ०।

सत्यनारायण पु० कर्म०। संक्रान्त्यादिषु पूज्ये नारायण-मूर्त्तिभेदे स्कन्दपु० रेवा० ४अ० तत्कथा दृश्या।

सत्यपुर न० सत्ययुक्तं पुरम्। विष्णुलोके।

सत्यफल पु० सत्यं सदातनं फलमस्य। बिल्ववृक्षे राजनि०।

सत्यभामा स्त्री सत्राजितोऽपत्यतायां श्रीकृष्णस्य भार्य्याभेदे शब्दच०।

सत्यभारत पु० वेदव्यासे त्रिका०।

सत्यम् अव्य० सत्+यत्। स्वीकारे।

सत्ययुग न० सत्यप्रधानं युगम् शाक० त०। सत्यप्रचुरे प्रथमे युगे

सत्ययौवन पु० सत्यं यौवनमस्य। विद्याधरे देवयोनिभेदे जटा०

सत्यरत त्रि० ७त०। सत्यवाक्यासक्ते हरिश्चन्द्रनृपपितरि पु० मत्स्यपु० १२अ०।

सत्यलोक पु० सत्यप्रचुरो लोकः। ऊर्द्ध्वस्थसप्तलोकमध्ये सर्वोपरिस्थे तपोलोकादूर्द्धस्थे लोके।

"षड्गुणेन तपोलोकात् सत्यलोको विराजते। अपुन-र्मारका यत्र ब्रह्मलोकाभिधः स्मृतः" विष्णुपु० २अं० ७अ०

सत्यवचस् पु० सत्यं वचोऽस्य। १मुनौ अमरः। २सत्यवचन-युक्ते त्रि०। सत्यवचनादयोऽप्यत्र।

सत्यवत् पु० सत्यं विद्यतेऽस्य मतुप् मस्य वः। १सावित्री-पतौ नृपभेदे भा०व०२९४अ०। २मुनिभेदे च। ३सत्ययुक्ते त्रि० स्त्रियां ङीप्। सा च ४व्यासस्य मातरि शब्दर०। ५नारदपत्न्यां ६ऋचीकमुनिपत्न्यां मेदि० कालिकापु० ८४अ०। [शब्दर०।

सत्यवतीसुत पु० ६त०। मत्स्यगन्धापुत्रे व्यासे मुनिभेदे

सत्यवाच् पु० सत्या वाक् यस्य। १ऋषौ शब्दच०। २काके त्रिका०। तस्य शब्देन हि शुभाशुभनिश्चयेन तस्य तथा-त्वम्। ३सत्यवदनशीले त्रि०। [वक्तरि।

सत्यवादिन् त्रि० सत्यं वदति वद-णिनि। यथार्थवाक्य

सत्यव्रत पु० सत्यं व्रतमस्य। १त्रिशङ्कुनामके राजभेदे म-त्स्यपु० १२अ०। २सत्यतत्परे त्रि०। [२सत्यप्रतिज्ञे त्रि०

सत्यसङ्कर सत्यः सङ्करः प्रतिज्ञा यस्य। १कुबेरे त्रिका०।

सत्यसन्ध त्रि० सत्या सन्धा सन्धानं यस्य। १सत्याभिसन्धौ सत्यसन्धस्य तपपरशपद्धा छान्दोग्ये दर्शितम् २श्रीरामे ४तदनुजे भरते ५जनमेजयनृपे च पु० शब्दर०।

सत्या स्त्री १रामपत्न्यां २व्यासमातरि सत्यवत्यां शब्दर०। ३दुर्गायां ब्रह्मवै०पु० प्र०। ४द्रौपद्यां शब्दच०।

सत्याकृति स्त्री सत्य+डाच्+कृ-क्तिन्। (अवश्यमेतन्मया क्रेयम्) इत्येवं प्रतिज्ञारूपे सत्यकरणे (वायनादेशेया) अमरः।

सत्याग्नि पु० ६त०। अगस्त्यमुनौ शब्दर०। तज्जठरानलस्य समुद्रादिसर्वभक्षणेऽपि अबाधितत्वात् तथात्वम्। [अमरः

सत्यानृत न० सत्यसहितमनृतं यत्र। वणिग्वृत्तौ वाणिज्ये

सत्यापन न० सत्य+णिच्-पुक् च ल्युट्। सत्याकृतौ अमरः युच्। सत्यापनाप्यत्र स्त्री।

सत्योद्य त्रि० सत्यमुद्यं यस्य वद-क्यप्। १सत्यवादिनि शब्दमाला। कर्म०। २सत्यवाक्ये न०।

सत्र सम्बन्धे सन्ततौ च अद०चु०आ०सक०सेट्। सत्रयते अससत्रत। सत्रापयते इत्यन्ये अनेकाच्कत्वात् अग्लोपित्वेन सति निमित्ते न षत्वम्।

सत्र न० सत्र्यते सन्तन्यते सत्र-अच् घञ्। १बहुदनसाध्ये यज्ञभेदे २श्रीकृष्णश्वशुरे नृपभेदे च।

सत्राजित् पु० सत्रेण जयति लोकान् आ+जि-क्विप्। श्रीकृष्णश्वशुरे राजभेदे।

सत्रिजातक न० पक्वमांसभेदे "मांसं बहुघृते भृष्टं सिक्तं चोष्णाम्बुना मुहुः। जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते। तदेव घृतकाढ्यं सुस्निग्धं सत्रिजातकम्" शब्दर०। [अमरः।

सत्वर न० सह त्वरया सहस्य सः। १शीघ्रे २त्वरान्विते त्रि०

सथूत्कार न० सह थूत्कारेण सहस्य सः। अम्बुकृते सनिष्ठेवे कथने। [२दंशयुक्ते त्रि०।

सदंशक पु० सह दंशेन सहस्य सः कप्। १कर्कटके राजनि०

सदंशवदन पुंस्त्री सह दंशेन दंशाकारेण सहस्य सः तथाभूतं वदनमस्य। कङ्कविहगे राजनि० स्त्रियां ङीष्।

सदञ्जन न० कर्म०। पुष्पाञ्जने रीतिजाते अञ्जनभेदे शब्दच०।

सदन न० सीदन्त्यस्मिन्+सद-आधारे ल्युट्। १गृहे अमरः। २जले मेदि०। भावे ल्युट्। ३स्थितौ न०।

सदय पु० सन् अयः कर्म०। १साधुशुभावहविधौ। सह दयया। सहस्य सः। २दयान्विते अमरः।

सदस् स्त्री न०। सीदन्त्यस्याम् सद-असि। सभायाम् अमरः

सदस्य पु० सदसि साधुर्वसति वा यत्। यज्ञादौ न्यूनातिरिक्तताविपर्ययपरिहारार्थं १विधानदर्शिनि अमरः। २सभासदि त्रि० अमरः। [इत्यर्थे अमरः।

सदा अव्य० सर्वस्मिन् काले दाच् सारशः। सर्वस्मिन् काले

सदागति पु० सदा गतिरस्य। १वायौ २सर्वदागतियुक्ते त्रि० ३सूर्ये ४निर्वाणे ५सदाश्वरे मेदिनिकोषकारः।

सदाचार पु० कर्म० ६त० वा "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते। तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः। वर्णानां सान्तरालानां स सदाचार उच्यते" इति मनूक्तदेशप्रचलिते आचारे "साधवः क्षीणदोषाश्च सच्छब्दः साधुवाचकः। तेषामाचरणं यत्तु सदाचारः स उच्यते" इत्युक्ते साधूनां २शुभाचरणे च। सदाचारनिरूपणम् आचारशब्दे ६१२ पृ० दृश्यम्। विप्रस्य चातुराश्रम्यमुक्ता "गार्हस्थ्यं ब्रह्मचर्यञ्च वानप्रस्थं त्रयाश्रमाः। क्षत्रियस्यापि गदिता य आचारो द्विजस्य हि। वैखानसत्वं गार्हस्थ्यमाश्रमद्वितयं विशः। गार्हस्थ्यमुत्तमं त्वेकं शूद्रस्य क्षणदाचर!। स्वानि वर्णाश्रमोक्तानि धर्माणीह न हापयेत्। यो हापयति तस्यासौ परिकुप्यति भास्करः। कुपितः कुलनाशाय देहरोगविवृद्धये। यतते तस्य नरस्य क्षणदाचर!। तस्मात् स्वधर्मं न हि सन्त्यजेत न हापयेच्चापि तथात्मवंशम्। यः सन्त्यजेच्चापि निजं हि धर्मं तस्मै प्रकुप्येत दिवाकरश्च" वामनपु० १४अ०। [२नित्ये त्रि० अमरः स्त्रियां ङीप्।

सदातन पु० सदा भवः सदा+ट्युल् तुट् च। १विष्णौ त्रिका०

सदातोया स्त्री सदा तोयानि पेयानि यस्याम्। १करतोयानद्याम् २एलापर्ण्याञ्च शब्दच०। सदानीराशब्दे दृश्यम्

सदात्मन् त्रि० सन् साधुरात्मा चित्तं यस्य। साधुचित्ते।

सदादान पु० सदा दानं मदजलं त्यागो वा यस्य। १ऐरावते गजे २गणेशे ३गजे मेदि० ४सर्वदात्यागिनि त्रि०।

सदानन्द पु० सदा आनन्दो यस्य। १सदाशिवे २अनवरतानन्दयुक्ते त्रि०।

सदानर्त्त पुंस्त्री० सदा नृत्यति नृत-अच्। १खञ्जनविहगे शब्दच० स्त्रियां ङीष्। २सदा नृत्ययुते त्रि०।

सदानीरा स्त्री सदा नीरं पेयमस्याः। करतोयानद्याम् अमरः। "आषाढे कर्कटे देवी त्र्यहं गङ्गा रजस्वला। सर्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी" इत्युक्तेः तन्नदीजलस्य सदा पेयत्वात् तस्यास्तथात्वम्।

सदापुष्प पु० सदा पुष्पं यस्य। १नारिकेलवृक्षे शब्दमा०। २रक्तार्के स्त्री रत्नमा० ङीप्। ३सदापुष्पयुक्ते त्रि०।

सहाप्रसून पु० सदा प्रसूनमस्य। १रोहितकवृक्षे २अर्कवृक्षे ३कुन्दे च राजनि०।

सदाफल पु० सदा फलमस्य। १नारिकेलवृक्षे २उडुम्बर-

वृक्षे ३स्कन्दफलवृक्षे च मेदि० । ४बिल्वे० जटा० । ५वार्त्ताकुभेदे स्त्री राजनि० टाप् । "सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी । कण्डूकृच्छ्रहरी चैव वार्त्ताकी गुणवत्तमा" राजनि० ।

सदाभद्रा स्त्री सदा भद्रमस्याः ५ब० । गाम्भारीवृक्षे रत्नमा० ।

सदायोगिन् पु० सदा युज्यते युज्–घिनुण् । १विष्णौ त्रिका० २सदायोगयुते त्रि० स्त्रियां ङीप् ।

सदाशिव पु० सदा शिवमस्मात् ५ब० । महादेवे ।

सदुत्तर न० कर्म० । १व्यवहारे प्रतिज्ञापक्षानुसारिण्युत्तरे दृष्टव्य २सम्यगुत्तरे च । ६ब० । ३तद्वति त्रि० ।

सदृक्ष त्रि० समानं दर्शनमस्य दृश+क्स समानस्य सादेशः । तुल्यरूपे अमरः । [तुल्यरूपे अमरः ।

सदृश् त्रि० समानं दर्शनमस्य समान+दृश–क्विप् सादेशः ।

सदृश त्रि० समानं दर्शनमस्य समान+दृश–टक् । तुल्यरूपे स्त्रियां ङीप् । [५ब० । निष्पन्दे त्रिका० ।

सदृशस्पन्दन त्रि० दृश–गतौ क सदृ दृशं गतं स्पन्दनं यस्मात्

सदेश पु० सह देशेन सहस्य सः । १निकटे अमरः २देशान्विते त्रि० ।

सद्धेतु पु० कर्म० । न्यायोक्ते हेत्वाभासदोषरहिते हेतौ । पक्षसत्त्वं१ सपक्षसत्त्वं२ विपक्षासत्त्वं३ अबाधितविषयत्वं४ असत्प्रतिपक्षितत्वं५ इति पञ्चरूपोपपन्नो हेतुः सद्धेतुः "व्याप्त्यादिविशिष्टो हेतुः सः" नीलकण्ठः "प्रमितव्याप्तिपक्षताको हेतुः सः" गदा० । २वृत्तिमद्धेतौ च "अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह" दीधितिः । अत्र सद्धेतौ वृत्तिमति हेतावित्यर्थः गगनादेः संयोगेन वृत्तिमत्त्वाभावात् तत्राव्याप्तिर्न सम्भवतीत्युक्तं सदिति ।

सद्भाव पु० सतोभावः, सन् वा भावः । १विद्यमानत्वे २साधुभावे च "सद्भावमागतः" इति भट्टिः ।

सद्भूत न० असत् सत् भूतम् सत्+च्वि–भू–क्त । १यथार्थे २तद्वति त्रि० हेमच० । [च मेदि० ।

सद्मन् न० सीदत्यस्मिन् सद्–मनिन् । १गृहे अमरः २जले

सद्यःकृत त्रि० सद्यस्तत्क्षणात् कृत कृ–क्त । तत्क्षणकृते ।

सद्यःप्राणकर त्रि० सद्योहठात् प्राणं बलम् आयुर्वृद्धिञ्च करोति कृ–अच् । "सद्योमांसं नवान्नं च बाला स्त्री क्षीरभोजनम् । घृतमुष्णोदकं चैव सद्यःप्राणकराणि षट्" इति चाणक्योक्ते द्रव्यसमूहे

सद्यःप्राणहर त्रि० सद्यः प्राणमायुर्बलं वा हरति हृ–अच् । "शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि । प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट्" इति चाणक्योक्ते शुष्कमांसादिद्रव्यसमूहे । [शब्दच०

सद्यःशोथा स्त्री सद्यः शोथो यस्याः ५ब० । कपिकच्छ्वाम्

सद्यःशौच न० सद्यः शौचमपनेयमशौचम् । १स्मृत्युक्ते शौचनाशके अशौचे ६ब० । २तद्वति शिल्पिकारुप्रभृतियादौ त्रि० । अशौचशब्दे ४८८ पृ० दृश्यम् ।

सद्यस् अव्य० समेऽह्नि नि० । १तत्क्षणे अमरः । २समानदिवसे एकस्मिन् दिने इत्यर्थे च ।

सद्यस्क त्रि० सद्योभवः कन् कल्पा० । सद्योजाते ।

सद्यस्क्री पु० सद्यःक्रीणाति सोमम् यत्र क्री–आधारे क्विप् कल्पा० । सद्यःसोमक्रयसाध्ये यागभेदे "एकरात्रोऽतिरात्रः सद्यःक्रीः प्रक्रीरुक्थ्यः" अथर्व० ११।७।१०। नानायज्ञोक्तौ । भावे क्विप् । २सद्यस्क्रये स्त्री । तया साध्यः अण् । साद्यस्क्र सद्यःसोमक्रयेण एकाहसाध्ये यज्ञभेदे । "साद्यस्क्राश्च षट्" कात्या०श्रौ०२२।२।८। उक्ता यथा "षट् साद्यस्क्राः" सू० "स्वर्गकामपशुकामभ्रातृव्यवतां प्रथमः" सू०।१ साद्यस्क्र स्त्र्यकतुर्भवति ।"दीर्घव्याधिप्रतिष्ठाकामासाद्यकामानां द्वितीयः" सू०। साद्यस्क्रो२ भवति एषामत्राधिकारः । "हीनस्यानुक्रीः" सू० अनुक्रीर्नाम३ साद्यस्क्रः स हीनस्य भवति यः कर्मणा हीन तस्यासौ भवति । "विश्वजिच्छिल्पः" सू० नाम साद्यस्क्रः४ । "श्येनोऽभिचरतः" सू० श्येनो५ नाम साद्यस्क्रः पञ्चमः सोऽभिचरतो भवति । "एकत्रिकः" सू० षष्ठः६ साद्यस्क्रः । तत्र षट् षष्टिशतं दक्षिणा । साद्यःक्रधर्माः व्याख्यास्यन्त इति सूत्रशेषः । दीक्षादि सद्यः सर्वं क्रियते" भाष्यम् तात्पर्यन्तु भाष्ये चोक्तं यथा

अथ साद्यस्क्रा नाम षट् एकाहास्तेषु प्रथमद्वितीययोर्दीक्षाप्रभृत्यवभृथान्तं, सर्वमेकस्मिन्नेवाहन्यनुष्ठेयं तृतीयस्य तु एकस्मिन् दिवसे दीक्षा परस्मिन् दिवसे सोमक्रयाद्यवभृथान्तं, चतुर्थपञ्चमयोरप्येवं यद्वा एका दीक्षा सोमक्रयप्रभृति उपवसथान्तं द्वितीयेऽहनि सुत्येति एवं सूत्रकारमतं पञ्चस्वपि साद्यस्क्रान्वयात् सद्य एव एकस्मिन्नेवाहनि दीक्षाद्यवभृथान्तं कर्त्तव्यमिति मतान्तरम् । एतत्सर्वं साद्यस्क्रेषु वक्ष्यमाणे महाराजे प्रातराहुतिं हुत्वेत्यादिना सूत्रकारेण विस्पष्टमुक्तम् । तत्र प्रथमस्य यदुक्तं सर्वं सद्योऽनुष्ठेयमिति तद्विधिमुदाह 'आदित्याश्चाङ्गिरसश्चादीक्षन्त ते स्वर्गे लोकेऽस्पर्द्धन्त तेऽङ्गिरस आदित्येभ्यः श्वः सुत्यां प्राब्रुवं

न आदित्या एतमपश्यन् सं यद्यः परिक्रीयायास्तद्दक्षिणाकं तारं हत्वा तेन सुत्वा स्वर्गं लोकमायसङ्गीयन्ताङ्गिरसः” ताण्ड्य०ब्रा० १६।१२।१। “यदा आदित्याश्चाङ्गिरसश्च अदीक्षन्त यथाग दीक्षां क्रतवन्तः ते उभे स्वर्गे लोके स्वर्गलोकनिमित्तमस्पर्धन्त वयं प्रथमं गमिष्यामो वयं प्रथमं गमिष्याम इति स्पर्द्धां क्रतवन्तः एवं स्पर्द्धमानास्तेऽङ्गिरस आदित्येभ्यः सुत्यां श्वः परश्वान्दीक्षानन्तरदिने करिष्यमाणं सोमयागं प्राब्रुवन् प्रोक्तवन्तः अथ ते आदित्या एव सद्यस्कामकयज्ञमपश्यन् तं यज्ञं सद्यः एकस्मिन्नेवाहनि परिक्रीय सोमं क्रीत्वा अयास्यमश्विदक्षिणाकं तारं हत्वा स्तावयित्वा समापयन् दीक्षाद्यवभृथान्तं सर्वं कर्म एकस्मिन्नेवाहनि अन्वतिष्ठन्नित्यर्थः। सद्यस्काप्रयन्नन्तरमेव ते स्वर्गलोकमायन् प्राप्नुवन् आङ्गिरसस्तु यदीक्षन्त दीक्षानन्तरदिवसे सुत्येति तेऽन्तरात् तस्मिन् दिने दीक्षाद्यवभृथान्तस्य सर्वस्यानुष्ठानेन सर्गप्राप्त्यभावात् दीक्षितेरादित्यैः सद्योऽनुष्ठानेन स्वर्गमतः दीनाः भूमावेव परित्यक्ता आसन्” भा०।

सद्योजात पु० सद्यो जायते जन–कर्त्तरि क्त। १वत्से ज०रत्न०। २शिवमूर्त्तिभेदे च ३आशुजाते त्रि०।

सद्योभाविन् पु० सद्योभवति भू–णिनि। १वत्से शब्दच०। २आशुजाते त्रि०। स्त्रियां ङीप्।

सद्रु त्रि० सद्–गतौ रु। गन्तरि सि०कौ०।

सद्वृत्त न० वृत–भावे क्त कर्म०। १साधुव्यवहारे जटा० २साधुवर्त्तने। हेम०। ३सच्चरित्रयुते त्रि०। “सद्वृत्तसंसिक्तदृष्टि अधार्द्धमपि मज्जते” इति ति०त०।

सद्वृत्ति स्त्री कर्म०। १सच्चरित्रे २समस्तवाक्यानतुभे पव्ये च सती वृत्तिः यस्य। ३सद्वृत्तियुते त्रि० “सद्वृत्तिः सन्निबन्धनैति” माघ०। [सदने स्त्रियां वा ङीप्।

सधर्म्मन् त्रि०समानो धर्मोऽस्य अनिच् समा० समानस्य सः।

सधर्म्मचारिणी स्त्री सह धर्मं चरति चर–णिनि। सहधर्मचारिण्यां भार्य्यायां शब्दा०।

सधर्म्मिन् त्रि० समानं धर्मं चरति इनि। १तुल्यधर्मचरणकर्त्तरि। स्त्रियां ङीप्। सा च २पत्न्याम् हेमच० [जटा०

सधवा स्त्री सह धवेन भर्त्रा सः। जीवत्पतिकायां स्त्रियां

सधि पु० साधयति साधि–इन् पृषो० ह्रस्वः। वह्नौ त्रिका०।

सधिस् पु० सह–इसिन् सह धश्च। वृषभे सि०कौ०।

सध्रच् त्रि० सह–अञ्चति अञ्च–क्विप् सहस्य सध्रिः। १सहचरे अमरः मतं सध्राचः। स्त्रियां ङीप् सध्रीची

सा च २भार्य्यायां ३सख्यां च हेमच०। [स्फाले शब्दच०।

सन पु० सन–अच्। १घण्टापार्श्वलिहले। २हस्तिकर्ण-

सनक पु० सन–वुन्। ब्रह्मणो मानसपुत्त्र ऋषिभेदे

“भगवद्ध्यानपूतेन मनसाऽन्यांस्ततोऽसृजत्। सनकञ्च सनन्दञ्च सनातनमथात्मभूः। सनत्कुमारञ्च मुनीन् निष्क्रियानूर्द्ध्वरेतसः। तान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः!। तन्नैच्छन्मोक्षधर्म्माणो वासुदेवपरायणाः” भाग० ३।१२ अ० “धर्मस्य भार्य्या हिंसाख्या तस्यां पुत्त्रचतुष्टयम्। सम्प्राप्तं मुनिशार्दूलं योगशास्त्रविचारकम्। ज्येष्ठः सनत्कुमारोऽभूत् द्वितीयश्च सनातनः। तृतीयः सनको नाम चतुर्थश्च सनन्दनः” वामनपु० ५७। ५८अ० उक्ते धर्मपुत्रभेदे। [अव्य० रामाश्रमः।

सनत पु० सन–अति। १चतुर्मुखे ब्रह्मणि त्रिका० २सदेत्यर्थे

सनत्कुमार पु० कृत०। ब्रह्मणः पुत्त्रे मुनिभेदे अमरः। तस्य नित्यकुमारत्वादपि तन्नामता यथोक्तम्

“स्रष्टेः पूर्वञ्च वयसा यथैव पञ्चहायनः। अभूतोऽनुपवीतश्च वेदसन्ध्यादिहीनकः। कथ्यते नग्नं जपति तस्य नारायणो गुरुः। अनन्तबालकत्वञ्च भ्रातृभिस्त्रिभिः सह। वैष्णवानामग्रणीयो ज्ञानिनाश्च गुरोर्गुरुः” ब्रह्मवै० श्रीकृष्णजन्मख० १२९अ०। [स्त्रयुक्ते त्रि०।

सनन्द पु० सह नन्देन। १सनकभ्रातरि मुनिभेदे २आनन्द-

सनपर्णी स्त्री सनस्येव पर्णान्यस्याः ङीप्। शणपर्ण्यां शब्दच०

सनसूत्र न० शणस्य सूत्रमत्वस्य अच् पृषो०। मतान्तरार्थं शणसतते आवे अमरे पाठान्तरम्।

सना अव्य० [?]–नि० दस्य नः। सदेत्यर्थे अमरः।

सनातन त्रि० सदा+भवार्थे ट्यु ट्युल् तुट् च नि० दस्य नः। १सदाभवे नित्ये वस्तुनि अमरः। २निश्चले विष्णुः। स्त्रियां ङीप्। सा च ३दुर्गायां “सर्वकाले सना प्रोक्ता विद्यमाने तनोति च। सर्वत्र सर्वकालेषु विद्यमाना सनातनी” ब्रह्मवै०प्र० ५४अ०। तन्नामनिरुक्तिः। ४सरस्वत्यां ५लक्ष्म्याञ्च शब्दमा०। इयि वे ७विष्णौ ८ब्रह्मणि ९दिव्यमनुष्य ब्रह्मणोमानसपुत्रभेदे १०पितृणामतिथौ च पु० हेमच०।

सनात् पु० सना नित्यमतति अत–क्विप्। विष्णौ विष्णुस०। सदेत्यर्थे अव्य०अमरटीकायां रामाश्रमः। [स्त्रया स्त्री।

सनाथ त्रि० सह नाथेन सहस्य सः। १युक्ते २जीवद्भर्तृक-

सनाभि पु० समाना नाभिर्यस्य। १ज्ञातौ अमरः। तस्य एकदेहोत्पन्नत्वेन तुल्यनाभतया तथात्वम्। २सप्त्ययुक्ते ३स्नेहयुक्ते ४तुल्ये च त्रि० मेदि०।

सनामक पु॰ सना सदा आमयति आम-ण्वुल् । १शोभाञ्जनवृक्षे शब्दच॰ । तस्य पत्राादिभोजनस्य रोगहेतुत्वात्तथात्वम् । सह नाम्ना कप् । २नामयुक्ते त्रि॰ ।

सनि पु॰ सन-भावे इन् । १पूजायां २दाने च सि॰कौ॰ । ३स्नकारपूर्वकनियोगे पुंस्त्री॰ अमरः स्त्रियां वा ङीप् । ४डीनः हस्तिकर्णास्फाले शब्दर॰ ५दिशि स्त्री शब्दमा॰

सनित त्रि॰ सन-बा॰ इत । प्रतियत्ने हेमच॰ ।

सनिष्ठी(ष्ठे)व न॰ सह निष्ठी(ष्ठे)वेन । १सशुकच्युतवारिकणे सथूत्कारे अमरः ।

सनीड त्रि॰ समानं नीडं सह नीडेन वा सादेशः । १निकटस्थे अमरः । २नीडयुक्ते त्रि॰ ।

सन्त पु॰ सन—बा॰ त । सहतले शब्दर॰ ।

सन्तत न॰ सम्+तन—क्त । १सतते निरन्तरे । २नैरन्तर्ययुते त्रि॰ अमरः ३विस्तीर्णे च ।

सन्तति स्त्री सन्तन्यते सम्+तन-क्तिच् । १गोत्रे अमरः । २पुत्रे ३कन्यायाञ्च विश्वः । भावे क्तिन् । ४विस्तारे ५पङ्क्तौ ६अविच्छिन्नधारायाञ्च विश्वः ।

सन्तानश्च दैशिकी कालिकी च । तत्र दैशिकी तैलादीनां, कालिकी ज्ञानसुखादीनाम् । तत्र दैशिकसन्ततित्वं स्वाधिकरणदेशीयनानावच्छेदकवृत्तिधर्मत्वं तच्च मूर्त्तानामेव कालिकसन्ततित्वञ्च नानाकालीनकार्य्यमात्रवृत्तिधर्मत्वम् सुक्तिवादे गङ्गेशः तच्च मूर्त्तामूर्त्तयोरतएव इच्छ तु सन्तानादिसन्तानिर्भवतीति तदुक्तं तत्रैव “देशव्यवृत्तिदुःखत्वं दुःखत्वं वा स्वाश्रयसमानकालीनध्वंसप्रतियोगिवृत्तिकार्य्यमात्रवृत्तिधर्मत्वात् सन्ततित्वादेत्युक्ता सन्ततित्वं च नानाकालीनकार्य्यमात्रवृत्तिधर्मत्वम्” इत्युक्तम् ।

सन्तप्त त्रि॰ सम्+तप—क्त । १अध्वगमनादिना परिश्रान्ते २अग्निनप्ते ३तेन विशुद्धे च “सन्तप्तचामीकरवल्गुवर्ज्जमिति भट्टिः ।

सन्तमस न॰ सन्ततं तमः प्रा॰स॰ अच् समा॰ । १गाढान्धकारे अमरः । २महामोहे च मोहस्य सर्वावरकत्वात् तमस्त्वेन महामोहस्य गाढान्धकाररूपत्वात्तथात्वम् ।

सन्तर्पण न॰ सन्तृप्यतेऽनेन सम्+तृप-करणे ल्युट् । “द्राक्षादाडिमखर्ज्जूरीशर्करामधुसंयुतम् । लाजाचूर्णन्तु भाक्ष्यं यत् तच्च सन्तर्पणं विदुः” राजनि॰ उक्ते द्राक्षादिभिर्युते लाजाचूर्णे खाद्यभेदे । सम्+तृप-णिच् ल्यु । २सम्यक्तर्पके त्रि॰ । [हृद्ये ३अपथ्ये ४निस्तारे च मेदि॰ ।

सन्तान पु॰ सम्+तन-घञ् । १वंशे अन्वये अमरः । २कल्प-

सन्तानिका स्त्री सम्+तन-ण्वुल् टाप् इत्वम् । १क्षीरसरे “सन्तानिका गुरुः शीता वृष्याः पित्तास्रवातजित्” राजव॰ । २मर्कटजाले ३फेने ४क्षुरिकाफले च हारा॰ । [२सम्यक्तापे च ।

सन्ताप पु॰ सम्यक् तापः प्रा॰स॰ । १वह्निजाते तापे अमरः ।

सन्तापन पु॰ सन्तापयति सम्+तप-णिच्-ल्यु । कामदेवस्य १पञ्चशरान्तर्गते शरभेदे त्रिका॰ । २सन्तापकारके त्रि॰ ।

सन्ति स्त्री सन—ति । १दाने २अवसाने च सर्वधो टीका ।

सन्तोष पु॰ सम्+तुष-करणादौ घञ् । १धैर्य्ये २स्वस्थ्यो च हेमच॰ । ३सम्यक्तुष्टौ “सन्तोषमूलं हि सुखम्” मनुः ।

सन्दंश पु॰ सम्+दन्श-अच् । (साँड़ाशी) यन्त्रभेदे हेमच॰ ।

सन्दंशपतित पु॰ सन्दंशे तन्मध्ये पतित इव । मीमांसकोक्ते न्यायभेदे न्यायशब्दे ४१६६ पृ॰ दृश्यम् ।

सन्दर्भ पु॰ सम्+दृभ-घञ् । १रचनायां हला॰ । २ग्रथने ३प्रबन्धे त्रिका॰ “गूढार्थस्य प्रकाशश्च सारोक्तिः श्रेष्ठता गिरा । नानार्थवत्त्वं वेद्यत्वं सन्दर्भः कथ्यते बुधैः” इत्युक्ते ४कथाभेदे ५वक्तृतात्पर्यविशेषे च ।

सन्दान न॰ सम्+दो-करणादौ ल्युट् । १दाम्नि २बन्धने अमरः ३सम्यक्खण्डने च । दा-ल्युट् । ४सम्यग्दाने न॰ ५गजस्याष्ठीवतोरधोभागे पु॰ त्रिका॰ । [राजनि॰ ।

सन्दानिका स्त्री सन्दानं संबन्धनमस्त्यस्य ठन् । विट्खदिरे

सन्दानित त्रि॰सन्दानं जातमस्य तार॰ इतच् । बद्धे अमरः “रजनासन्दानितसवरणे”ति माघविशाभिमितम् ।

सन्दानिनी स्त्री सन्दानं बन्धनं गवामस्त्र बा॰ इनि ङीप् । गोशालायाम् हेमच॰ ।

सन्द्राव पु॰ सम्+द्रु—भावे घञ् । पलायने अमरः ।

सन्दाह पु॰ सम्+दह-करणादौ घञ् । १मुखादिशोषे राजनि॰ । २सम्यग्दाहे च ।

सन्दिग्ध त्रि॰ सम्+दिह्-कर्त्तरि क्त । १सन्देहयुक्ते । कर्मणि क्त । २सन्देहविषये ३अस्पष्टलिप्ते च । भावे क्त । ४सन्देहे ५संलेप च ।

सन्दित त्रि॰ सम्+दो—क्त । बद्धे अमरः ।

सन्दिष्ट न॰ सम्+दिश—भावे क्त । १वाचिकार्थकथने वार्त्तायाम शब्दर॰ । कर्मणि—क्त । २उपदिष्टे त्रि॰ ।

सन्दिहान त्रि॰ सम्+दिह-शानच् । सन्देहयुक्ते जटा॰ ।

सन्दी स्त्री सम्+दो-ड गौरा॰ ङीष् । खट्वायां त्रिका॰ ।

सन्दीप्य पु॰ सन्दीप्यतेऽसौ सम्+दीप—कर्मणि य । मयूरशिखावृक्षे शब्दच॰ ।

सन्देश पु० सम्+दिश–घञ्। वाचिकाख्यकथने वार्त्तायाम् अमरः। “सदृशसन्देशमशालमन्थरः” नैष०।

सन्देशहर पु० सन्देशं हरति अभीष्टस्थानं कथनाय नयति हृ–अच्। १दूते “तवैव सन्देशहरादिति” रघुः। स्त्रियां ङीप्। सन्देशहारकोऽप्यत्र।

सन्देह पु० सम्+दिह–घञ्। १संशयशब्दार्थे अमरः। २अलङ्कारभेदे अलङ्कारशब्दे ४०५पृ०दृश्यम्। सन्देह-विशेषश्च पक्षतेत्याचार्य्याः स च प्रकृतपक्षविशेष्यकसाध्यव-त्तानिश्चयप्रतिबन्धकतानिरूपितप्रतिबध्यताशालिसंशयः।

सन्दोह पु० सम्+दुह–घञ्। १समूहे अमरः। २सम्यग्दोहे कर्म्मणि घञ्। ३दुग्धे च “सन्दोहमाहमेऽहनि” मिता०।

सन्द्राव पु० सम्+द्रु–घञ्। पलायने अमरः।

सन्धा स्त्री सम्+धा–अङ्। १स्थितौ २प्रतिज्ञायां मेदि०। ३सन्धाने शरोत्पादनानुगुणे व्याप.रभेदे शब्दर०। ४अनु-सन्धाने ५सन्ध्यायां वाचस्पतिः।

सन्धान न० सम्+धा–ल्युट्। १शरादिसन्धानानुगुणे व्या-पारे २घोषरसकरणलनात्मके अभिषवे ३अनुसन्धाने ४स-ङ्घट्टने च मेदि०। सन्धाने स्त्रीत्वमपि तत्र ङीप्। सा च ५कुम्भधाचायां शब्दर०। संघट्टनं च योजनम्। “यदङ्गं विच्छिन्नं भवति कृतसन्धानमिव तत्” शकु०। ५काञ्जिके हेमा०। ६मदिरायाम् ७अवदंशे ८सौराष्ट्रे राजनि० ९धनुषि शरस्य योजने च।

सन्धि पु० सम्+धा–कि। १अप्राप्तयोः शत्रुसामन्तयोः मेलनार्थं संमीकरणरूपे व्यापारे

षाड्गुण्यान्तर्गतसन्धिविषयादिकं शुक्रनीतिषदि०उक्तं यथा “बलीयसाऽभियुक्तस्तु नृपोऽनन्यप्रतिक्रियः। आपन्नः सन्धिमन्विच्छेत् कुर्वाणः कालयापनम्। एक एवोप-हारस्तु सन्धिरेष मतो हितः। उपहारस्य भेदास्तु सर्वेऽन्ये मैत्रवर्जिताः। अभियोक्ता बलीयस्त्वादलब्ध्वा न निवर्त्तते। उपहारादृते यस्मात् सन्धिरन्य न विद्यते। शत्रोर्बलानुसारेण उपहारं प्रकल्पयेत्। सेवां वापि च स्वीकुर्य्याद्दद्यात् कन्यां भुवं धनम्। स्वसामन्तांश्च स-न्धीयात् मन्त्राद्यैश्च जयाय वै। सन्धिः कार्य्योऽप्यनार्य्येण संप्राप्योत्पादयेद्धि यः। संघातवान् यथा वेणुर्निबिडैः कण्टकैर्वृतः। न शक्यते समुच्छेत्तुं वेणुः संघातवांस्तथा। सन्धिमतिबले, युद्धं साम्ये, यानन्तु दुर्बले। बलिना सह सन्धाय भवे साधारणे यदि”। “आत्मानं गोपयेत् क्वापि बहुमित्रेषु बुद्धिमान्”। “राजा न गच्छेद्विश्वासं स-न्धितोऽपि हि बुद्धिमान्। अद्रोहसमयं कृत्वा वृत्रमिन्द्रः सदाऽवधीत्”। “सन्धायान्यत्र यात्रायां पार्ष्णिग्राहेण वा सह। सन्धाय गमनं प्रोक्तं तद्विजिगीषोः फलार्थिनः”।

तद्भेदलक्षणादिकं हितोपदेशे न्यरूपि यथा “कपाल उपहारश्च सन्तानः सङ्गतस्तथा। उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः। अदृष्टनर आदिष्ट आत्मादिष्ट उपग्रहः। परिक्रयस्तथोच्छिन्नस्तथा च पर-भूषणः। स्कन्धोपनेयः सन्धिश्च षोडशैते प्रकीर्त्तिताः। इति षोडशकं प्राहुः सन्धिं सन्धिविचक्षणाः। कपाल-सन्धिर्विज्ञेयः केवलं समसन्धितः। सम्प्रदानाद्भवति य उपहार२ स उच्यते। सन्तानसन्धिर्विज्ञेयो दारिकादा-नपूर्वकः। सद्भिस्तु सङ्गतः४ सन्धिर्मैत्रीपूर्व उदाहृतः। यावदायुःप्रमाणस्तु समानार्थप्रयोजनः। सम्पत्तौ वा वि-पत्तौ वा कारणैर्यो न भिद्यते। सङ्गतः सन्धिरेवायं प्रकृष्टत्वात् सुवर्णवत्। तथान्यैः सन्धिकुशलैः काञ्चनः स उदाहृतः। आत्मकार्य्यस्य सिद्धिं तु समुद्दिश्य क्रियेत यः। स उपन्यासकुशलैरुपन्यास५ उदाहृतः। मयास्योप-कृतं पूर्वं ममाप्येष करिष्यति। इति यः क्रियते सन्धिः प्रतीकारः६ स उच्यते। उपकारं करोम्यस्य ममाप्येष करिष्यति। अयं चापि प्रतीकारो रामसुग्रीवयोरिव। एकार्थां सम्यगुद्दिश्य क्रियां यत्र हि गच्छति। सुसंहित-प्रयाणस्तु स च संयोग७ उच्यते। आवयोर्योधमुख्यैस्तु मदर्थः साध्यतामिति। यस्मिन् पणस्तु क्रियते स सन्धिः पुरुषान्तरः८। त्वयैकेन मदीयोऽर्थः संप्रसाध्यस्त्वसाविति। यत्र शत्रुः पणं कुर्यात् सोऽदृष्टपुरुषः९ स्मृतः। यत्र भूम्ये-कदेशेन पणेन रिपुरूर्जितः। सन्धीयते सन्धिविद्भिः आ-दिष्टः१० स उदाहृतः। स्वसैन्येन तु सन्धानमात्मादिष्ट११ उदाहृतः। क्रियते प्राणरक्षार्थं सर्वदानादुपग्रहः१२। कोषांशेनार्द्धकोषेण सर्वकोषेण वा पुनः। शिष्टस्य प्रति-रक्षार्थं परिक्रय१३ उदाहृतः। भुवां सारवतीनां तु दा-नादुच्छिन्न१४ उच्यते। भूम्युत्थफलदानेन सर्वेण परभू-षणः१५। परिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते। स्क-न्धोपनेयं१६ तं प्राहुः सन्धिं सन्धिविचक्षणाः। परस्परो-पकारस्तु मैत्री सम्बन्धकस्तथा। उपहारश्च विज्ञेयाश्चत्वा-रश्चैव सन्धयः। एक एवोपहारस्तु सन्धिरेव मतो मम। उपहारविभिन्नास्तु सर्वे मैत्रविवर्जिताः। अभियोक्ता बलीयस्त्वादलब्ध्वा न निवर्त्तते। उपहारादृते तस्मात् सन्धिरन्यो न विद्यते”।

सन्धिलक्षणादिकं युक्तिकल्पतरौ प्रदर्शितं यथा "पणबन्धो भवेत् सन्धिः स्वयं हीनस्तमाचरेत् । मर्य्यादोल्लङ्घनं नास्ति यदि यत्नोरिति स्थितिः । मर्य्यादोल्लङ्घनं यत्र यत्नो संशयितं भवेत् । न तं संशयितं कुर्य्यादित्युवाच बृहस्पतिः" । षाड्गुण्यशब्दे ५१७८पृ० दृश्यम् ३संयोगे अमरः । ४अस्थिद्वयसंयोगस्थाने ५चौरादिकृत सुरङ्गायां 'सन्धिं कृत्वा तु ये चौर्य्यमिति" स्मृतिः ।६भगे ७सङ्घट्टने ८नाटकाङ्गविशेषे ९सविकाशे मेदि०।१०व्याकरणोक्ते वर्णद्वयजाते ११वर्णविकारभेदे १२भेदे विश्वः । नाटकाङ्गसन्धिश्च "अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति" । एकार्थेन सम्बन्धः सन्धिः । तद्भेदानाह "मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः । इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते" सा०द० । मुखादिलक्षणम् तत्तच्छब्दे दृश्यम् । १३सत्यादियुगानामाद्यन्तयोः कालयोः मन्वन्तरशब्दे दृश्यम् "सकल्पास्ते मनवः कल्पे येऽवाचतुर्दश । कृतप्रमाणः कल्पादौ सन्धिः पञ्चदशः स्मृतः" मनुः । तेन सन्धिसंख्यासहितं सत्ययुगमानम् ४८०० देववर्षाः । "कृतावदसङ्ख्याते सन्धिः प्रोक्तो जलप्लवः । तत्र युगानामादौ सन्धिः अन्ते सन्ध्यंश । मन्वन्तराणामादौ सन्धिः कल्पानामन्ते सन्धिरिति भेदः । १४तिथ्यादेराद्यन्तभागभेदे च उपयमशब्दे १२५८५८ पृ० दृश्यम् ।

सन्धिका स्त्री स्वार्थे क । मद्यसन्धाने शब्दच० ।

सन्धिचौर पु० सन्धिना कृतसुरङ्गया चोरः । सन्धिं कृत्वा चौर्य्यकारके (सिँधेल) शब्दमाला ।

सन्धिजीवक पु० सन्धिना अभिसन्धिना जीवति जीव-ण्वुल् । गार्ह्येन परार्थकारके त्रिका० । [लिते च ।

सन्धित त्रि० सन्धा जाताऽस्य तार० इतच् । १कृतसन्धे २मि-

सन्धिनी स्त्री सन्धा वृषभसंयोगस्तज्जगर्भोऽस्त्यस्याः इनि ङीप् । १वृषभसंयोगेन धृतगर्भायां स्त्रीगव्याम् अमरः । २अकालदुग्धायां गवि मेदि० । तद्दुग्धपाननिषेधः "न पिबेत् सन्धिनीक्षीरम्" स्मृतिः ।

सन्धिपूजा स्त्री सन्धौ अष्टम्याः शेषे नवम्याश्च आद्ये दण्डे पूजा । आश्विनशुक्लाष्टमीनवमीसन्धिकाले विहितपूजायाम् 'अष्टमी नवमीसन्धौ तृतीया खलु कथ्यते । तत्र पूज्या त्वहं पुत्र ! योगिनीगणसंयुता" । ज्योतिषे "अष्टम्यां सन्धियोगे सकलपरिजनैः पूजयेत् सत्यभावैः" । कामरूपीयनिबन्धे स्मृतिसागरे च "अष्टम्याः शेषदण्डश्च नवम्याः पूर्व एव च । अत्र या क्रियते पूजा विज्ञेया सा महाफला" मतृस्मृत्तेऽपि "अष्टमीनवमीयोगो रात्रिभागे विधिष्यते । अर्द्धरात्रे दशगुणं सन्ध्यायां त्रिगुणं भवेत्" । आश्विनाधिकारे "अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता । अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिः" । इति विष्णुधर्म्मोत्तरीयमप्येतद्विषयं न तु महानवमीपूजापरम् । तस्या अल्पुपवासपरदिनविधानेन सप्तमीयद्युग्मानादरात् । ततश्च सप्तमीपूजावन्महाष्टम्यादिकृत्यमपि षष्ठ्यादिकालिकायामेव न तु परदिवसीयखण्डतिथौ किन्तु पूर्व्वोक्तसन्ध्यनुरोधाद्विषादाविव खण्डतिथावपि सन्धिपूजेति । एवञ्च यस्मिन् दिने महाष्टमीपूजा तस्मिन् दिन एव उपवासः । न तु सन्धिपूजादिने अष्टमीत्वेनोपवासविधेः पूर्वसत्त्वात् । एवञ्च पूर्व्वाष्टम्यामष्टमीपूजा तत्परदिने अष्टमीनवम्योः सन्धौ सन्धिपूजा तत्परदिने महानवमीपूजा प्रागुक्तनन्दिकेश्वरपुराणाद्युक्तोदयगामितिथ्यनुरोधात् तत्परदिने दशम्यां विसर्जनं पूजानुरोधेनाधिकदिनलाभात्" ति०त० ।

सन्धिबन्ध पु० सन्धिं बध्नाति संयुनक्ति सम्+बन्ध—अच् । १भूमिचम्पके शब्दच० । तत्पत्रेण हि भग्नसन्धियोजनं वैद्यके प्रसिद्धम् । २स्नायौ सन्ध्यर्थनिबन्धने च ।

सन्धिला स्त्री सन्धिं लाति ला—क । १नद्यां स्वार्थे कन् । २सुरङ्गायां ३मदिरायाञ्च मेदि० ।

सन्धिविग्रहाधिकारिन् पु० सन्धिविग्रहेषु अधिकरोति अधि+कृ—णिनि । नृपाणां सन्धिविग्रहाद्यधिकारिणि मन्त्रिभेदे ।

सन्धिवेला स्त्री सन्धियुक्ता वेला समयः । अहोरात्रसन्धिसमये । सन्ध्याशब्दे दृश्यम् । ततः सन्धिवेलादि० भवार्थे अण् नक्षत्राट्ठञ् । सान्धिवेल तत्र भवे त्रि० ।

सन्धिहारक पु० सन्धिना सुरङ्गया हरति परद्रव्यम् हृ—ण्वुल् । सन्धिचौरे (सिँधेल) हारा० ।

सन्धुक्षित त्रि० सम्+धुक्ष-क्त । उद्दीपिते ।

सन्धेय त्रि० सम्+धा—यत् । १संयोज्ये २मेलनीये ३सन्धिकरणयोग्ये च सन्धेया असन्धेयाश्च हितोप० दर्शिता यथा "सत्यार्य्यौ धार्म्मिकोऽनार्य्यो भ्रातृसङ्घातवान् बली । अनेकयुद्धविजयी सन्धेयाः सप्त कीर्त्तिताः । सत्योऽनुपालयन् सत्यं सन्धितो नैति विक्रियाम् । प्राणनाशेऽपि सुव्यक्तमार्य्यो नायात्यनार्य्यताम् । धार्म्मिकस्याभियुक्तस्य सर्व एव हि युध्यते । प्रजानुरागाद्धर्म्माच्च दुःखच्छेद्यो

हि धार्मिकः। सन्धिः कार्य्योऽसमर्थेनाष्ट विनाशे समुपस्थिते। यथा तस्मात्रयेणान्यः क्रमात् कोपयात्यनम् अतःतत्कृतया वेणुर्निदर्शितः। कण्टकोत्थितः। न तस्याश्मसम्भाव्यं ज्ञातवांस्तथा। बलिनाऽस्य तस्य शत्रोर्ध्वनितं नास्ति निदर्शनम्। प्रतिवातं न हि घनः कदाचिदुपसर्पति। अमदग्नेः सुतस्यैव सर्वः सर्वत्र सर्वदा अनेकयुद्धविजयी प्रतापादेव भुज्यते। अनेकयुद्धविजयी सन्धानं यत्र गच्छति। तत्प्रतापेन तस्याशु वशमायान्ति शत्रवः"। बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः। भीरुको भीरुजनो लुब्धो लुब्धजनस्तथा। विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान्। अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः। दैवोपहतकश्चैव दैवचिन्तक एव च। दुर्भिक्षव्यसनोपेतो बलव्यसनसङ्कुलः। अदेशस्थो बहुरिपुर्युक्तः कालेन यश्च न। सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी। एतैः सन्धिं न कुर्वीत विगृह्णीयात्तु केवलम्। एते विगृह्यमाणा हि क्षिप्रं यान्ति रिपोर्वशम्" वा सन्ध्या सम्यक् ध्यायन्त्यस्यामिति। सन्धौ भवः यत् वा। १ एकस्य पक्षान्तरस्याप्यपरकालयोरवस्थाभेदे दिवारात्रयोः २ मध्यवर्त्तिकाले अह्नः; स च दिवाशेषदण्डसहितरात्रिप्रथमदण्डात्मकः कालः तयोश्चतुर्दण्डात्मकः कालश्च "त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टये। नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" इति दक्षः। "अहोरात्रस्य यः सन्धिः सूर्य्यनक्षत्रवर्जितः। सा च सन्ध्या समाख्याता" इति स्मृतिः। ३ सायाह्ने ४ सन्ध्याकाले उपास्यदेवताभेदे ५ तदुपासनायाम् व्यासः। "सन्ध्यामुपासते ये तु नियतं शंसितव्रताः" इति स्मृतिः "प्रातः सन्ध्यां ततः कृत्वा" "कुर्य्यात् बुध आचरेत्" स्मृतिः। "अनर्हः कर्मणां विप्रः सन्ध्याहीनो यतः स्मृतः"। "एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम्। यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते" छन्दोगप०। "सन्ध्यां नोपास्ते तु यः पूर्वां सादित्याञ्चैव पश्चिमाम्। नोपासीत द्विजः सन्ध्यां स शूद्रोऽवज्ञायः स्मृतः" स्मृता० अत्र सन्ध्यात्रयस्य नित्यत्वाभिधानात् "सर्वकालमुपस्थानं सन्ध्यायाः पार्थिवेष्यते। अन्यत्र सूतकाशौचविभ्रमातुरभीतितः" इति विष्णुपुराणीये सन्ध्याया इत्येकवचनान्तत्वात् धर्मकोषोक्तो यत्नः। एवमेव सन्ध्याशब्दः। सर्वकालं प्रातर्मध्याह्नसायम्प्रकालत्रये। अन्यथा तदुपासनं व्यर्थं स्यात् विभ्रमचित्तविक्षेपः। तेन सूतकादावपि मानसोपासना कार्य्या। अतएव याज्ञवल्क्यः "हृदीक्षो

उपि च सदा द्विजः सन्ध्योपासनतत्परः। ब्रह्महत्यया स न हीयते अन्यजन्मगतोऽपि सन्"। सूतकस्यः नित्यं सन्ध्यादिकं करोत्यपि। यथोचितशौचं यदाऽपीति स्मार्त्ताः। पाद्मे व्याघ्रोऽपीति युक्तम्। सन्ध्यात्रयस्य कालमाह योगियाज्ञवल्क्यः "त्रयाणाञ्चैव देवानां ब्रह्मादीनां समागमः। सन्धिः सर्वसुराणाञ्च तेन सन्ध्या प्रकीर्त्तिता" सन्ध्याद्वयकालस्तु अहोरात्रसन्धिमुहूर्त्तात्मकः। तत्राह दक्षः "अहोरात्रस्य यः सन्धिः सूर्य्यनक्षत्रवर्जितः। सा च सन्ध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः" सूर्य्यनक्षत्रवर्जितः अर्द्धास्तमितार्द्धोदितसूर्य्यमण्डलमदृष्टतारानक्षत्रवर्जितः। तथा च वराहः "अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत्। तेजःपरिहानिमुखा भानोरर्द्धोदयं यावत्"। अत्र आद्यन्तता उक्ता परिमाणमाह दक्षः "रात्र्यन्तकाले नाड्यौ द्वे सन्ध्यादिः काल उच्यते। दर्शनाद्रविरेखायास्तदन्तो मुनिभिः स्मृतः। नाडी दण्डः योगियाज्ञवल्क्यः "ह्रासवृद्धी च सततं दिवारात्र्योर्यथाक्रमम्। सन्ध्या मुहूर्त्तमाख्याता ह्रासवृद्धौ समा स्मृता। अत्रोपासनाया अपि सन्ध्यात्वमाह व्यासः "उपास्ते सन्धिवेलायां निशाया दिवसस्य च। तामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिणः"। उपास्ते यद्वक्ष्यमाणप्राणायामादिकं करोतीत यावत्। तत्काले उपास्यापि देवता सन्ध्या तया च याज्ञवल्क्यः "सन्ध्यौ सन्ध्यामुपासीत नास्तगे नोद्गते रवौ"। उपासनोपक्रममाह संवर्त्तः "प्रातः सन्ध्यां सनक्षत्रामुपासीत यथाविधि। सादित्यां पश्चिमां सन्ध्याम् अर्द्धास्तमितभास्कराम्"। सनक्षत्रामित्यनेन तद्युक्तकाले उपक्रम्य प्रातः सन्ध्यामुपासीत एवमर्द्धास्तमितभास्करामिति सादित्यामित्यनेन तद्युक्तकाले उपक्रम्य उपासीतेत्यर्थः। मध्याह्नसन्ध्याया अष्टममुहूर्त्तं कालमाह स्मृतिः "पूर्वापरे तथा सन्ध्ये सनक्षत्रे प्रकीर्त्तिते। समस्तयोऽपि मध्याह्ने मुहूर्त्ते सप्तमोपरि"। शातातपवचनम् "अरण्ये समित्पाणिः सन्ध्यामुपास्ते नित्यं वाग्यत उत्तरापराभिमुखोऽन्वष्टमदिशमानतः। दर्शनात् अतिक्रान्तायां महाव्याहृतीः सावित्रीं स्वस्त्ययनादि जपेत् एवं प्रातः प्राङ्मुखस्तिष्ठन् आमण्डलदर्शनादिति"। उत्तरापराभिमुखो वायुकोणाभिमुखः कोणं विदिशमिति अन्तर्मनिदर्शमिति। उभयदिङ्मध्यभाग-

मिति याव० व्या०त०। अधिकं गायत्रीशब्दे दृश्यम्। ६युगसन्धिकाले ७नदीभेदे मेदि०। ८प्रज्ञापत्नीभेदे स्त्री। ९चिन्तायां १०संश्रवे ११सीमायां १२सन्धाने १३पुष्पभेदे हेमच० "चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्। तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः। इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु। एकापायेन वर्त्तन्ते सहस्राणि शतानि च" मनुः। चत्वार्याहुरिति चत्वारि वर्षसहस्राणि कृतयुगं कालं मन्वादयो वदन्ति। तस्य तावद्वर्षशतानि सन्ध्या सन्ध्यांशश्च भवति युगस्य पूर्वा सन्ध्या उत्तरश्च सन्ध्यांशः। तदुक्तं विष्णुपुराणे "तत्प्रमाणैः शतैः सन्ध्या पूर्वा तत्राभिधीयते। सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरो हि यः। सन्ध्यासन्ध्यांशयोरन्तर्यः कालो मुनिसत्तम!। युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञितः" एकापायेनेति। त्रीणि सहस्राणि त्रेतायुगं त्रीणि शतानि तस्य सन्ध्या सन्ध्यांशश्च द्वे सहस्रे द्वापरयुगं द्वे शते तस्य सन्ध्या सन्ध्यांशश्च; एकसहस्रं कलियुगमेकशतं तस्य सन्ध्या सन्ध्यांशश्च भवतीत्यर्थः।

१४प्रबोधसम्प्रसादयोः सन्धिभवे स्वप्ने "सन्ध्ये सृष्टिराह हि" शा०सू० "सन्ध्यमिति स्वप्नस्थानमाचष्टे वेदे प्रयोगदर्शनात् 'सन्ध्यं तृतीयं स्वप्नस्थानम्' द्वयोर्लोकस्थानयोः प्रबोधसम्प्रसादस्थानयोः सन्धौ भवतीति सन्ध्यम्" भा०। "तस्मिन् सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यति इदञ्च परलोकस्थानञ्च" रत्नप्र० श्रुतिः सुषुप्तौ सर्वेन्द्रियोपसंहारादेतल्लोकाननुभवे सति वासनामात्रेण इम लोकं स्मरतः कर्मवशात् हृदये मानसं परलोकस्फूर्त्तिरूपः स्वप्नो भवति सोऽयं लोकद्वयसन्धौ भवतीति सन्ध्यः स्वप्नः" रत्नप्र०।

सन्ध्यांश पु० सन्ध्या तत्प्रमाणः सन्ध्ययुगादेरंश। सन्ध्ययुगादेरंशभेदे तत्प्रमाणम् सन्ध्याशब्दे मनूक्तम् दृश्यम् "सन्ध्यासन्ध्यांशयोरन्तं विज्ञेयं तच्चतुर्युग"मिति मनुः।

सन्ध्याचल पु० "सन्ध्यां वशिष्ठः कृतवान् तत्र सन्ध्यादर्शितः। ततः सन्ध्याचलं नाम तस्य गायन्ति देवताः" कालिकापु० ५० अ० निरुक्ते पर्वतभेदे।

सन्ध्यानाटिन् सन्ध्यायां नटति नट-णिनि। शिवे त्रिका०

सन्ध्यापुष्पी स्त्री सन्ध्यायां पुष्पमस्याः ङीप्। जातिपुष्पे राजनि०।

सन्ध्याबल पुंस्त्री० सन्ध्यायाः सन्ध्योपलक्षिते रात्रिकाले बलं यस्य। रात्रौ बलयुक्ते राक्षसे त्रिका० स्त्रियां ङीप्।

सन्ध्याभ्र न० सन्ध्याकालीनमभ्रमिव। १सुवर्णगैरिके राजनि०। २सन्ध्याकालीनमेघे च।

सन्ध्याराग पु० सन्ध्याया इव रागोऽस्य। १सिन्दूरे राजनि०। ६त०। सन्ध्याकालीने २रक्तवर्णे च।

सन्ध्याराम पु० सन्ध्यायां तदाख्यभार्यायां रमते रम-संज्ञायां कर्त्तरि घञ्। चतुर्मुखे ब्रह्मणि शब्दमा०।

सन्न पु० सीदति सद-क्त। १पियालवृक्षे भरतः। २अवसन्ने त्रि० स्वार्थे क। खर्वे भरतः। [२खर्ववृक्षे च।

सन्नकद्रु पु० सन्न एव सन्नकः कर्म०। १पियालवृक्षे अमरः।

सन्नत त्रि० सम्+नम-क्त। १प्रणते २ध्वनियुते च।

सन्नति स्त्री सम्+नम-क्तिन्। १प्रणामे २ध्वनौ मेदि०। ३नम्रतायाञ्च। ४होमभेदे स च आप० ४।२९। एकादिनिरहोमर्मन्त्रैर्विधेय। तैत्तिरीयब्रा० ३।८।१८।५ विहितश्च।

सन्नद्ध त्रि० सम्+नह-क्त। १कृतसन्नाहे धृतवर्मणि २व्यूहरचनेयावस्थिते सैन्यादौ मेदि०। ३आततायिनि रायमु० ४मन्त्रादियुक्ते शब्दर०।

सन्नय पु० सम्+नी-अच्। १समूहे २पृष्ठस्थिते-बले च अमरः

सन्नहन न० सम्+नह-ल्युट्। १वर्मग्रहणे २उद्योगे ३दृढबन्धने च। [हेमच०। भावे घञ्। संबन्धने।

सन्नाह पु० सन्नह्यते सम्+नह-कर्मणि घञ् (साँजोया) वर्मणि

सन्नाह्य पु० सम+नह-ण्यत्। समरोचिते गजे हेमच०;

सन्निकर्ष पु० सम्+नि-कृष-घञ्। १सान्निध्ये हेमच० "यद् व्यसन्निकर्षो हि कर्णाकर्णमपि श्रूयतामिति पुराणम् न्यायमते २धर्मेन्द्रियसम्बन्धे ज्ञानलक्षणासामान्यलक्षणायोगजधर्मविशेषात्मके ३अलौकिकप्रत्यक्षसाधने व्यापारभेदे च। "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षम्" गौ० सू०। सन्निकर्षो द्विविधः लौकिकालौकिकभेदात् लौकिकोऽपि षड्विधः अलौकिकस्तु त्रिविधः यथोक्तं भाषाप० 'सहत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम्। विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः। द्रव्यग्रहस्तु संयोगात्१ संयुक्तसमवायतः२। द्रव्येषु समवेतानां, तथा तत्समवायतः३। तत्रापि समवेतानां, शब्दस्य समवायतः४। तद्वृत्तीनां समवेतसमवायेन५ तु ग्रहः। विशेषणतया६ तद्वदभावानां ग्रहो भवेत्। यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते। प्रत्यक्षं समवायस्य विशेषणतया भवेत्। अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः। सामान्यलक्षणा१ ज्ञानलक्षणा२ योगजस्तथा'' भाषा० "यद्यपि विशेषणता नानाविधा तथाहि भूतलादौ घटाभावः

संयुक्तविशेषणतया गृह्यते संख्यादौ रूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया, शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया, कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया। एवं कत्वावच्छिन्नाभावे खत्वाभावादिकं विशेषणविशेषणतया। एवं घटाभावादौ पटाद्यभावः संयुक्तविशेषणविशेषणतया। एवमन्यदप्यूह्यं तथापि विशेषणतास्वरूपेणैकैव सा गण्यते अन्यथा षोढा सन्निकर्ष इति प्राचां प्रवादो व्याहन्यतेति" सि॰मु॰।

सन्निकर्षण न॰ सम्+नि+कृष-ल्युट्। सन्निधाने अमरः।

सन्निकृष्ट त्रि॰ सम्+नि+कृष-क्त। १निकटस्थे अमरः २इन्द्रियसम्बन्धविषये च। [पस्थिते त्रि॰।

सन्निद्ध न॰ सम्+नि+धा-क्त। १नैकट्ये शब्दार्थचि॰। २समो-

सन्निधान न॰ सम्+नि+धा-ल्युट्। १नैकट्ये सामीप्ये हेमच॰। २आश्रये च।

सन्निधि पु॰ सम्+नि+धा-कि। १सामीप्ये अमरः कर्मणि कि। २इन्द्रियविषये मेदि॰ कर्म॰। ३साधुनिधौ। -त॰। ४सतां निधौ। [२स्मृते च।

सन्निपतित त्रि॰ सम्+नि-पत-क्त। १मिलिते २उपस्थिते

सन्निपात पु॰ सम्+नि+पत-घञ्। १मेलने "सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति" व्या॰ परि॰। २कफादिधातुत्रयस्य वैषम्यरूपत्रिदोषजे ज्वरभेदे ३नाशे ४उपस्थितौ च। ५तालभेदे "एक एव गुरुर्यत्र सन्निपातः स उच्यते" सङ्गीतदा॰।

ज्वरभेदस्य निदानभेदादिकं भावप्र॰ उक्तं यथा "तत्र सन्निपातज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्विकां संप्राप्तिमाह "त्रिदोषजनकैर्वातपित्तश्लेष्मामगेहगाः। वह्निं निरस्य कोष्ठाग्निं रसगा ज्वरकारिणः"। पूर्वरूपमाह "प्राग्रूपाणि त्रिदोषाणां स्युस्त्रिदोषज्वरे लक्षणाम्"। अथ सन्निपातज्वरस्य सामान्यानि लक्षणान्याह "क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजा। सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने। सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः। तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः। परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परा। ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च। शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा। स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः। कृशत्वं नातिगात्राणां सततं कण्ठकूजनम्। कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम्। मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च। चिरात्पाकश्च दोषाणां सन्निपातज्वराकृतिः।" लोचने सास्रावे सास्रुणी कलुषे अस्वच्छे निर्भुग्ने निर्गते कुटिले च कण्ठः शूकैरिवावृतः धान्यादिशूकैरिवावृतः। जिह्वा परिदग्धा परिदग्धेव जायते।" अथवा परिदग्धा इव कृष्णा दृश्यते स्रस्ताङ्गता शिथिलाङ्गता। ष्ठीवनमित्यादि कफसंयुक्तस्य रक्तस्य ष्ठीवनं शिरसो लोठनमितस्ततश्चालनं कृशत्वञ्चातिगात्राणामिति गात्राणाम् अतिशयितं कार्श्यं न व्याधिप्रभावात् सततं निरन्तरं कोठः। "वरटीदष्टसंस्थानं कोठ इत्यभिधीयते" श्यावः कपिशो वर्णः। मूकत्वमवचनत्वमल्पवचनत्वं वा स्रोतसां कर्णनासादीनाम्।

अथ सामान्यसन्निपातज्वरस्य त्रयोदश विशेषानाह "एकोल्वणास्त्रयस्तेषु द्व्युल्वणाश्च तथेति षट्। तुल्योल्वणश्च भवेदेको विज्ञेयः स तु सप्तमः। प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च षट्। सन्निपातज्वरस्यैवं स्युर्विशेषास्त्रयोदश"। तत्र प्रवृद्धवातः मध्यपित्तो हीनकफः १ मध्यवातः प्रवृद्धपित्तो हीनकफः २ हीनवातः प्रवृद्धपित्तो मध्यकफः ३ प्रवृद्धवातः हीनपित्तो मध्यकफः ४ मध्यवातः हीनपित्तः प्रवृद्धकफः ५ हीनवातो मध्यपित्तः प्रवृद्धकफः ६ इति षट्। तेषां नामानि क्रमादाह "विस्फारकश्चाशुकारी कम्पनो बभ्रुसंज्ञकः। शीघ्रकारी तथा भल्गुः सप्तमः कूटपाकलः। संमोहकः पाककश्च याम्यः क्रकच इत्यपि। ततः कर्कटकः प्रोक्तस्ततो वैदारिकाभिधः" तन्त्रान्तरे विस्फारक इत्यत्र विस्फोरक इति पाठः। बभ्रुस्थाने बभ्रुरिति पाठः कुत्रापि बभ्रु इति पाठः भल्गुरित्यत्र फल्गुरिति पाठः याम्य इत्यत्र संग्राम इति पाठः कर्कटक इत्यत्र कर्कोटक इति पाठः। तत्र वातोल्वणस्य लक्षणमाह "श्वासः कासो भ्रमो मूर्च्छा प्रलापो मोहवेपथू। पार्श्वस्य वेदना जृम्भा कषायत्वं मुखस्य च। वातोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। एष विस्फारको[1] नाम्ना सन्निपातः सुदारुणः।" अथ पित्तोल्वणस्य लक्षणमाह "अतिसारो भ्रमो मूर्च्छा मुखपाकस्तथैव च। गात्रे च बिन्दवो रक्ता दाहोऽतीव प्रजायते। पित्तोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। भिषग्भिः सन्निपातोऽयमाशुकारी[2] प्रकीर्तितः"। अथ कफोल्वणस्य लक्षणमाह "जडता गद्गदा वाणी रात्रौ निद्रा भवत्यपि। प्रस्तब्धे नयने चैव मुखस्य

माधुर्य्यमेव च । कफोल्वणस्य चिह्नानि सन्निपातस्य लक्षयेत् । मुनिभिः सन्निपातोऽयमुक्तः कम्पनसंज्ञकः२ । अथ वातपित्तोल्वणस्य लक्षणमाह "वातपित्ताधिकोऽयन्तु सन्निपातः प्रकुप्यति । तस्य ज्वरो मदस्तृष्णा मुखशोषः प्रमीलकः । आध्मानारुचितन्द्राश्च कासश्वासभ्रमश्रमाः । मुनिभिर्बभ्रुनामायं३ सन्निपात उदाहृतः ।" अथ वातश्लेष्मोल्वणस्य लक्षणमाह "वातश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति । तस्य शीतज्वरो मूर्च्छा क्षुत् तृष्णा पार्श्वनिग्रहः । शूलमस्विन्नगात्रस्य तन्द्रा श्वासश्च जायते । असाध्यः सन्निपातोऽयं शीघ्रकारीति५ कथ्यते । नहि जीवत्यहोरात्रमनेनाविष्टविग्रहः ।" "अथ पित्तश्लेष्मोल्वणस्य लक्षणमाह "पित्तश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति । अन्तर्दाहो बहिःशीतं तस्य तृष्णा प्रवर्त्तते । तुद्यते दक्षिणे पार्श्वे उरःशीर्षगलग्रहः । ष्ठीवति श्लेष्मपित्तञ्च कृच्छ्रात् कोठश्च जायते । विड्भेदश्वासहिक्काश्च वर्द्धन्ते सप्रमीलकाः । ऋषिभिर्भल्लुनामायं६ सन्निपात उदाहृतः ।" अथ वातपित्तश्लेष्मोल्वणस्य लक्षणमाह "सर्व्वदोषोल्वणो यस्य सन्निपातः प्रकुप्यति । त्रयाणामपि दोषाणां तस्य रूपाणि लक्षयेत् । व्याधिभ्यो दारुणश्चैव वज्रशस्त्राग्निसन्निभः । केवलोच्छ्वासपरस्तब्धाक्षः स्तब्धोऽङ्गः । त्रिरात्रात् परमेतस्य जन्तोर्हरति जीवितम् । तदवस्थन्तु तं दृष्ट्वा मूढो व्याहरते जनः । धर्षितो राक्षसैर्नूनमथर्व्वाणश्चरन्ति ये । कृत्यया मुष्यते कश्चित् यक्षिणया ग्रहराक्षसैः । पिशाचैर्गुह्यकैश्चैव तथान्यैर्मन्त्रकैः हतम् । कुलदेवार्च्चनाहीनं धर्षितं कुलदेवतैः । नक्षत्रपीड़ामपरे गरकर्म्मेति चापरे । सन्निपातमिमं प्राहुर्भिषजः कूटपालकम्७ ।" अथ प्रवृद्धमध्यहीनवातादिजनितसन्निपातज्वराणां लक्षणान्याह "प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च यः । तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः । प्रलापायाससम्मोहकम्पमूर्च्छाऽरतिभ्रमाः । एकपक्षाभिघातश्च तस्मात् स्यात् विशेषतः । एष संमोहको८ नाम्ना सन्निपातः उदाहृतः ।" रोगास्त एवोक्ताः उक्ता ये ते रोगाः व्यथापवृत्तिनिद्रानाशाविष्टम्भादयो वातजाः दाहतृष्णाम्लतास्वेदादयः पित्तजाः गौरवाग्निमान्द्योत्कासालसिकामुखप्रसेकादयः कफजाः । तत्रापि प्रलापादयः अत्र जातानां विशेषाद्भवन्ति । ननु वातः प्रवृद्धः सज्वरं करिष्यति पित्तन्तु मध्यममिति यावत् तत्कथं ज्वरं करिष्यति यत आह "धातवस्तन्मला दोषाः सुनाशायाऽवस्थितौ । समाः सुखाय विज्ञेया बलायोपचयाय च ।" इति उच्यते । अत्र पित्तं मध्यमपि अप्रकृतमेव यतोऽप्रकृतयोर्वातश्लेष्मणोरपेक्षया मध्यं तेन मध्यकुपितमित्यर्थः । ननु कफक्षीणः स कथं ज्वरं करिष्यति हीनशक्तित्वात् उच्यते दोषाः क्षीणा अपि व्याधीन् कुर्व्वन्त्येव यत आह "वातक्षयेऽल्पचेष्टत्वं मन्दवाक्त्वं विसंज्ञता । पित्तक्षयेऽधिकः श्लेष्मा वह्निर्मन्दः प्रभाक्षयः ।" शिथिलाः सन्धयो मूर्च्छा रौक्ष्यं दाहः कफक्षये" । इत्याशङ्कासिद्धान्तयोः परमार्थ । "मध्यप्रवृद्धहीनैस्तु वातपित्तकफैश्च यः । तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः । मोहप्रलापमूर्च्छाः स्युर्मन्यास्तम्भः शिरोग्रहः । कासः श्वासो भ्रमस्तन्द्रा संज्ञानाशो हृदिव्यथा । खेभ्यो रक्तं विसृजति संरक्ते नयने मता । तत्राप्येते विशेषाः स्युर्मृत्युश्चैव त्रिवासरात् । भिषग्भिः सन्निपातोऽयं कथितः पाकलाभिधः९ । हीनप्रवृद्धमध्यैस्तु वातपित्तकफैश्च यः । तेन रोगास्त एवोक्ता यथारोगबलाश्रयाः । हृदयं दह्यते चास्य यकृत्प्लीहान्त्रफुप्फुसाः । पच्यन्तेऽत्यर्थमूर्द्धाधःपूयशोणितनिर्गमः । शीर्णदन्तश्च मृत्युश्च तत्राप्येतद्विशेषतः । भिषग्भिः सन्निपातोऽयं याम्यो१० नाम्नः प्रकीर्त्तितः । प्रवृद्धहीनमध्यैस्तु वातपित्तकफैश्च यः । तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः । प्रलापायाससंमोहाः कम्पमूर्च्छाऽरतिभ्रमाः । मन्यास्तम्भेन मृत्युः स्यात् तत्राप्येतद्विशेषतः । भिषग्भिः सन्निपातोऽयं क्रकचः११ संप्रकीर्त्तितः । मध्यहीनप्रवृद्धैस्तु वातपित्तकफैश्च यः । तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः । अन्तर्दाहो विशेषोऽत्र न च वक्तुं स शक्यते । रक्तमांसक्षयेणेव लक्ष्यते मुखमण्डलम् । पित्तेनाकर्षितः श्लेष्मा हृदयाच्च प्रसिच्यते । इष्वेवाहतं पार्श्वं तुद्यते बध्यते हृदि । प्रमीलकः श्वासहिक्का वर्द्धते च दिने दिने । जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवावृतः । विसर्गं नाभिजानाति कूजेच्चापि कपोतवत् । अतीव श्लेष्मणा पूर्णः शुष्कवक्त्रोष्ठतालुकः । तन्द्रानिद्रातियोगार्त्तो हतवाग्निहतद्युतिः । न रतिं लभते भिन्नो विपरीतानि चेष्टते । आयम्यते च अङ्गशो रक्तं छर्दति चाल्पशः । एष कर्कटको१२ नाम्ना

सन्निपातः सुदारुणः। हीनमध्यप्रवृद्धैस्तु वातपित्तकफैश्च यः। तेन रोगास्त्रयोक्ता यथादोषबलाश्रयाः। अल्पशूलं कटीतोदो मध्ये दाहो रुजा भ्रमः। भृशं क्लमः शिरोवस्तिमन्याहृदयवापृजः। प्रमीलकः श्वासकासहिक्काजाड्यं विसंज्ञता। प्रथमोद्यमेनन्तु साधयन्ति कदाचन। एतस्मिन् सन्निहन्ते तु कर्णमूले सुदारुणः। पिड़का जायते जन्तोर्यथाकष्टेन जीवति। स वैदारिकसंज्ञो१२ऽयं सन्निपातः सुदारुणः। चिरात्तात् परमेतस्य व्यर्थमौषधकल्पनम्।" तन्त्रान्तरे वातोल्वणादीनां सन्निपातज्वरविशेषाणां त्रयोदशानां शीताङ्गादीनि त्रयोदश नामान्तराणि लक्षणान्तराणि चाह "शीताङ्गस्तिमलोऽङ्गरज्वरगणे तन्द्री प्रलापी ततो रक्तष्ठीवयिता च तत्र गणितः सम्भुग्ननेत्रस्तथा। साभिन्यासकजिह्वकश्च कथितः प्रागसन्धिगोऽप्यान्तको रुग्दाहः सहचित्तविभ्रम इह द्वौ कर्णकण्ठग्रहौ।" तन्द्री तन्द्रिका प्रलापी प्रलापकः रक्तष्ठीवयिता रक्तष्ठीवी संभुग्ननेत्रः भुग्ननेत्रः। अभिन्यासकः अभिन्यासः कर्णकण्ठग्रहौ कर्णग्रहः कर्णिकः कण्ठग्रहः कण्ठकुब्जकः। अथ तेषां प्रत्येकं लक्षणानि "हिमांशुशिशिरशरीरः सन्निपातज्वरो यः श्वसनकसनहिक्कामोहकम्पप्रलापैः। क्लमपवनकफार्त्ता दाहवम्यङ्गपीड़ाः स्वरविकृतिभिरार्त्तः शीतगात्रः१ स उक्तः। तन्द्रातीव ततस्तृषातिसरणं श्वासोऽधिकः कासरुक् सन्तप्तातितनुर्गले श्वयथुना कार्श्यं च कण्डूः कफम्, उष्माणा रसना क्रमः श्रवणयोर्मान्द्यश्च दाहस्तथा यत्र स्यात् स हि तन्द्रिको२ निगदितो दोषत्रयोत्थो ज्वरः। यत्र ज्वरे निखिलदोषनिदानरोष जाते प्रलापबहुधा सहसोत्थिताश्च। कम्पव्यथापतनदाहविसंज्ञताः स्युर्नाम्ना प्रलापक३ इति प्रथितः पृथिव्याम्। निष्ठीवो रुधिरस्य, रक्तसदृशं लक्ष्यं तनौ मण्डलम् लौहित्यं नयने तृषाऽरुचिवमिश्वासातिसारभ्रमाः। आध्मानश्च विसंज्ञता च पतनं हिक्काङ्गपीड़ा भृशम्। रक्तष्ठीविनि४ सन्निपातजनिते लिङ्गं ज्वरे जायते। भृशं नयनवक्रताश्वसनकासतन्द्रा भृशम्। प्रलापमदवेपथुश्रवणहानिमोहास्तथा। पुरो निखिलदोषजे भवति यत्र लिङ्गं ज्वरे पुरातनचिकित्सकैः स इह भुग्ननेत्रो५ मतः। दोषास्तीव्रतरा भवन्ति बलिनः सर्वेऽपि यत्र ज्वरे मोहोऽतीव विचेष्टता विकलता श्वासो भृशं मूकता। दाहश्चिक्कणमाननस्य दहनो मन्दोबलस्य क्षयः सोऽभिन्यास६ इति प्रकीर्त्तितः इह प्राज्ञैर्भिषग्भिः पुरा। त्रिदोषजनिते ज्वरे भवति यत्र जिह्वा भृशम् हता कठिनकण्टकैस्तदनु निर्भरं मूकता। श्रुतिक्षतिबलक्षतिश्वसनकासवह्निप्रयः पुरातनभिषग्वरास्तमिह जिह्वक७मुच्यते। व्यथातिशयिता भवेच्छ्वयथुसंयुता सन्धिषु प्रभूतकफता मुखे विगतनिद्रता कासरुक्। समस्तमिति कीर्त्तितं भवति लक्ष्म यत्र ज्वरे त्रिदोषजनिते बुधैः स हि निगद्यते सन्धिगः८। यस्मिन् लक्षणमेददन्ति सकलैर्दोषैरुदीर्णे ज्वरेऽजस्रं मूर्द्धविधूननं सकसनं सर्वाङ्गपीड़ाधिका। हिक्काश्वाससदाहमोहसहिता देहेऽतिसन्तप्तता वैकल्यञ्च तथा वचांसि मुनिभिः संकीर्त्तितः सोऽन्तकः९। दाहोऽधिको भवति यत्र तृषा च तीव्रा श्वासप्रलापविरुचिभ्रममोहपीड़ाः। मन्याहनुव्यथनकण्ठरुजः श्रमश्च रुग्दाहसंज्ञ१० उदितः त्रिभवो ज्वरोऽयम्। गायति नृत्यति हसति प्रलपति विकृतं निरीक्षते मुह्येत्। सदाहव्यथाभयार्त्तो नरस्तु चित्तभ्रमे११ ज्वरे भवति। दोषत्रयेण जनिता किल कर्णमूले तीव्रा ज्वरे भवति तु श्वयथुर्व्यथा च। कण्ठग्रहो बधिरता श्वसनं प्रलापः प्रस्वेदमोहदहनानि च कर्णिकाख्ये१२। कण्ठः शूकशतावरुद्धवदतिश्वासः प्रलापोऽरुचिदाहो देहरुजा तृषापि च हनुस्तम्भः शिरोऽर्त्तिर्भृशम्। मोहो वेपथुना सहेति सकलं लिङ्गं त्रिदोषज्वरे यत्र स्यात् स हि कण्ठकुब्ज१३ उदितः प्राच्यैश्चिकित्साबुधैः। सन्धिगस्तेषु साध्यः स्यात् तन्द्रिकश्चित्तविभ्रमः। कर्णिको जिह्वकः कण्ठकुब्जः पञ्चापि कष्टतः। रुग्दाहस्त्वन्तकश्च असाध्यस्तेषु भाषितः। रक्तष्ठीवी भुग्ननेत्रः शीतगात्रः प्रलापकः। अभिन्यासोऽन्तकश्चैते षड़साध्याः प्रकीर्त्तिताः।" अथ तन्त्रान्तरे वातोल्वणादीनां सन्निपातज्वरविशेषाणां त्रयोदशानां कुम्भीपाकादीनि त्रयोदश नामान्तराण्याह "कुम्भीपाकः प्रोर्णुनावः प्रलापी ह्यन्तर्दाहो दण्डपातोऽन्तकश्च। एणीदाहश्चाथ हारिद्रसंज्ञो भेदा एते सन्निपातज्वरस्य। अजघोषभूतहासौ यन्त्रापीड़श्च संन्यासः। संशोषी च विशेषास्तस्यैवोक्तास्त्रयोदशान्यत्र"। अथैषां लक्षणानि "घोणाविवरभरद्बहुशोणासितलोहितं सान्द्रम्। विलुठन्मस्तकनाभतः कुम्भीपाकेन१ पीड़ितं विद्यात्। उद्वेष्य यः समङ्गं क्षिपत्यधस्तादितान्तमुच्च-

षिति। तं प्रोर्णुनाव२ मूढं त्रिचिबकष्टं विजानीयात्। स्वेदभ्रमाङ्गभेदाः कम्पोद्वथुर्वमिव्यथा कण्ठे। गात्रञ्च गुर्वतीव प्रलापि३रुग्दाह जायते लिङ्गम्। अन्तर्दाहः शैत्यं बहिः, श्वयथुररतिरपि तथा श्वासः। अङ्गमपि दग्धकल्पं सोऽन्तर्दाहा४र्दितः कथितः। नक्तं दिवा न निद्रामुपैति स्फुरति मूढधीर्नभसः। उत्थाय दण्डपातो५ भ्रमातुरः सर्वतो भ्रमति”। नभसि स्फुरति आकाशात्-किञ्चित् पतीदं करौ प्रसारयतीत्यर्थः। “संपूर्यते शरीरं ग्रन्थिभिरभितस्तथोदरं महता। श्वासातुरस्य सततं विचेतनस्यान्तक।६र्त्तस्य”। परिधावतीव गात्रे रुक्पात्रे भृङ्गपतङ्गचारिगणः। वेपथुमतः सदाङ्ग-स्यैवोदाह७ज्वरार्त्तस्य”। रुक्पात्रे पीडाभाजने गात्रस्य विशेषणमेतत्। “सर्वाङ्गनिपीतमपि नयने सुतरां मल-स्थानोऽप्यधिकम्। दाहेऽतिपीतता बहिरप्य च हारि-द्रक्षोद ज्ञेयः। स्तनकम्पानगन्धः स्तम्बरुजा।वाहिरस्त्र मलरसृष्रः। सन्धिपातादातात्मात्त्रः पुमान् भवति। शब्दादीनधिगच्छति न स्वान्विषयान् यदि-न्द्रियपाशैः। हसति प्रलपति वदथ च सेयो नूतहा-सा१०र्त्तः। येन सुकण्ठ्यं रवेगात् यन्त्रेणेवावपीड्यते गात्रम्। रक्तं पीतञ्च वमेद्दयन्त्रापीड़:११ स विज्ञेयः। अतिसरति वमति कूजति मात्रात्यभितश्चिरं नरः श्वि-र्यति। सन्न्यास।२सन्निपातं प्रसपल्ल पाञ्चिमयज्वलो भवति। मेचकवपुरतिमेचकलोचनयुगलो भवोद्भवगात्। संगोपितस्य१३सित पिड़कामण्डलयुक्तो ज्वरे नरो भवति। नारायण एव भिषक् भेषजमेतेषु जाह्नवीनीरम्। नेद्-व्यहेतुरेको नित्यं मृत्युञ्जयो ध्येयः।” अथासाध्यस्य सन्निपातज्वरस्य लक्षणमाह “सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः। शोथः संजायते तेन कश्चिदेव प्रमुच्यते।” सुदारुणः मारकत्वात् सततेन शोथेन कश्चिदेव प्रमुच्यते कोऽपि जीवितं लभते इत्यर्थः। “सन्निपातज्वरान् कष्टानसाध्यानपरे जगुः। दोषे प्रवृद्धे नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः। सन्निपात ज्वरोऽसाध्यः कष्टसाध्यस्ततोऽन्यथा।” सर्वाणि दाह-शीतादीनि सम्पूर्णानि अन्तरगतानि प्रोक्तानि याव-ल्लक्षणानि यस्य सः। ततोऽन्यथा दोषे पक्वे अग्नौ दीप्ते स्वल्पलक्षणकः कष्टसाध्य इत्यर्थः।

सन्निपातज्वर पु० सन्निपातजो ज्वरः। सन्निपातशब्दोक्ते त्रिदोषजविकारजाते ज्वरे।

सन्निपातनुद् पु० सन्निपातं त्रिदोषजविकारं नुदति नुद-क्विप्। नेपालनिम्बे राजनि०।

सन्निबन्धन न० सम्यक् निबन्धनं प्रा०स०। १बाढासञ्जनस्यवा-क्यानामेकत्र सङ्घटने २तदुपयोगिग्रन्थभेदे च। ७व०। ३सम्यग्निबन्धनयुते त्रि० “सद्वृत्तिः सन्निबन्धनेति” माघः

सन्निभ त्रि० सम्+नि+भा—क। सदृशे जटा०। निभादि-शब्दस्य नित्यसमासता।

सन्निवेश पु० सम्+नि+विश-आधारे घञ्। १पुरादेर्बहिःस्थे विहारार्थे देशे अमरः। भावे घञ्। २सम्यक्स्थितौ।

सन्निहित त्रि० सम्+नि+धा—क्त। १निकटस्थे “सन्निहित बुद्धिरन्तरङ्गम्” न्यायः “या याः सन्निहिता नाड्य-स्तास्ताः पुण्यतमाः स्मृताः” ति०त०। २सम्यक्स्थापिते च। भावे क्त। ३नैकट्ये न०। [त्यागे ३युक्ते ४अर्पिते च।

सन्न्यस्त त्रि० सम्+नि+अस—क्त। १निक्षिप्त २कृतसम्यक्-

सन्न्यास पु० सम्+नि+अस—घञ्। “काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः” गीतोक्ते विहितकर्मणां विधानेन १सम्यक्त्यागे २तदुपयोगिचतुर्थाश्रमे आश्रमशब्दे ८४२ पृ० दृश्यम्। ३चैत्रे मासि क्षत्रियादिकर्त्तव्ये पुराणप्रसिद्धे शिवव्रतभेदे च। “चैत्रे शिवोत्सवं कुर्य्यात् नृत्यगीतमहोत्सवैः। स्नायात् त्रिसन्ध्यं रात्रौ च हविष्याशी जितेन्द्रियः। शिवस्वरूपतां याति शिवप्रीतिकरः परः। क्षत्रियादिषु यो मर्त्त्यो देहं संपीड्य भक्तितः। अश्वमेधफलं तस्य जायते च पदे पदे। सर्वकर्मपरित्यागी शिवोत्सवपरायणः। भक्त्या जागरणं कुर्य्याद्रात्रौ नृत्यकुतूहलैः। नानाविधैर्महावाद्यैर्नृत्यैश्च विविधैरपि। नानावेशधरैर्नृत्यैः प्रीयते शङ्करः प्रभुः। किमन्यच्च भगवति प्रसन्ने नीललोहिते। तस्मात् सर्वप्रयत्नेन तोषणीयो महेश्वरः। शङ्कराद्यं शङ्करीयं दर्शयेत् शिवसन्निधौ। प्रासादबहिरिमं शम्भोरुत्सवं कारयेन्मुदा। उपोष्य कृत्वा संक्रान्तौ व्रतमेतत् समापयेत्” वृहद्धर्मपु० उत्तरख० ४अ०। ५जटामांस्यां शब्दच०।

सन्न्यासिन् पु० सम्+नि+अस—णिनि। १सन्न्यासयुते २चतुर्थाश्रमयुते तेषां धर्मभेदेन नामभेदो यथा

“तीर्थाश्रमवनारण्यगिरिपर्वतसागराः। सरस्वती भारती च पुरीति दश कीर्त्तिताः”। तेषां लक्षणानि यथा “त्रिवेणीसङ्गमे तीर्थे तत्त्वमस्यादिलक्षणे। स्नायात्तत्त्वार्थभावेन तीर्थनामा१ स उच्यते। आश्रमग्रहणे प्रौढ़ आशापाशविवर्जितः। यातायातविनिर्मुक्त एतदा-

ब्रह्मलक्षणम् २। सुरम्ये निर्झरे देशे वने वासं करोति यः। आशापाशविनिर्मुक्तो वननामा३ स उच्यते। अरण्ये संस्थितो नित्यमानन्दे नन्दने वने। त्यक्त्वा सर्वमिदं विश्वमरण्यं लक्षणं४ किल। वासो गिरिवरे नित्यं गीताभ्यासे हि तत्परः। गम्भीराचलबुद्धिश्च गिरिनामा५ स उच्यते। वसेत् पर्वतमूलेषु प्रौढो यो ध्यानधारणात्। सारात्सारं विजानाति पर्वतः६ परिकीर्त्तितः। वसेत् सागरगम्भीरो न च रत्नपरिग्रहः। मर्य्यादाश्च न लङ्घेत सागरः७ परिकीर्त्तितः। स्वरज्ञानवशो नित्यं स्वरवादी कवीश्वरः। संसारसागरे साराभिज्ञो यो हि सरस्वती८। विद्याभारेण सम्पूर्णः सर्वभारं परित्यजेत्। दुःखभारं न जानाति भारती९ परिकीर्त्तिता। ज्ञानतत्त्वेन सम्पूर्णः पूर्णतत्त्वपदे स्थितः। परब्रह्मरतो नित्यं पुरीनामा१० स उच्यते" इति कृष्णशङ्करविजये विद्यारण्यस्वामिधृतम्। २चैत्ये कर्त्तव्यशिवव्रतकर्त्तरि च। [च

सपक्ष पु० समानः पक्षोऽस्य। १तुल्यरूपे २निश्चितसाध्यके पक्षे

सपक्षाकरण न० सह पक्षेण पक्षेण सपक्षः तथा क्रियते सः पक्ष+डाच्+कृ-ल्युट्। पक्षेण सह शरवेधनरूपे अत्यन्तव्यथने। कर्म्मणि क्त। सपक्षाकृतः। तथा पीडिते त्रि०। [अमरः।

सपत्न पु० सह एकार्थे पतति यतते पत—न सहस्य सः। शत्रौ

सपत्नारि पु० सपत्नस्य अरिरिव। (वेडवाश) वंशभेदे शब्दच०।

सपत्नी स्त्री समानः पतिर्यस्याः ङीप् न च। १एकभर्तृकायां स्त्रियाम् २समस्वामिकायां भूम्यादौ च। तत्र सपतिरित्यपि।

सपदि अव्य० सह पद्यते पद—इन् सहस्य सः। तत्क्षणे इत्यर्थे "सपदि मुकुलिताक्षीमिति" कुमारः। [र्य्यति।

सपर पूजायां कण्ड्वादि० पर०सक० सेट्। सपर्य्यति असप-

सपर्य्या स्त्री सपर—यक् अ टाप्। पूजायाम् "सोऽहं सपर्य्याविधिभाजनेनेति" रघुः। [हिते २चतुर्थांशसहिते च।

सपाद त्रि० सह पादेन चरणेन चतुर्थांशेन वा। १पादस-

सपिण्ड त्रि० समानः पिण्डः स्वदेहारम्भकांशभेदः श्राद्धीयपिण्डो वा यस्य समानस्य सः। एकदेहारम्भदेहे ज्ञातिभेदे "असपिण्डा च या मातुरिति" स्मृतिः। ज्ञातीनाञ्च साक्षात् परम्परया अतिपरम्परया वा एकदेहारम्भकत्वात्तथात्वम् मिता०। २दातृत्वभोक्तृत्वैकपिण्डयुते दायभा०। एतच्च दायप्रकरणोपयोगिसापिण्ड्यमिति। सपिण्डता हि विषयभेदेन त्रिविधा अशौचोपयोगिनी विवाहोपयोगिनी दायोपयोगिनी चेति। तत्र समानदेहसम्बन्धे या सपिण्डता साऽशौचप्रकरणार्था विवाहार्था च। श्राद्धे देयपिण्डसम्बन्धात् सपिण्डता तु दायप्रकरणोपयोगिनीति विवेकः। यथोक्तं शु०त० रघुनन्दनेन "मत्स्यपुराणे "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः। पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्"। नन्वेवं भ्रात्रादिभिः सह पिण्डतल्लेपभोक्तृत्वासम्भवात् कथं सपिण्डत्वमिति चेदुच्यते तेषामपि पिण्डलेपयोः सम्बन्धोऽस्ति तथाच बौधायनः "प्रपितामहः पितामहः पिता स्वयं, सोदर्य्या भ्रातरः सवर्णायाः पुत्रः पौत्रः प्रपौत्रो वा एतानविभक्तदायादान् सपिण्डानाचक्षते। विभक्तदायादान् सकुल्यानाचक्षते सत्स्वङ्गजेषु तद्गामी ह्यर्थो भवति" इति अस्यार्थः पित्रादिपिण्डत्रयेषु सपिण्डनेन भोक्तृत्वात् पुत्रादिभिश्च विभक्तपिण्डदानात्। यश्च जीवन् यस्य पिण्डदाता स मृतः सन् सपिण्डनेन तत् पिण्डभोक्ता एवं सति मध्यस्थितः पुरुषः पूर्वेषां जीवन् पिण्डदाता मृतः सन् तत्पिण्डभोक्ताऽपरेषां जीवतां पिण्डसम्प्रदाता आसीत्। मृतश्च तैः सह दौहित्रादिदेयपिण्डभोक्ता अतो येषामयं पिण्डदाता ये चास्य पिण्डभोक्तारस्तेऽविभक्तपिण्डरूपं दायमश्नन्तीति अविभक्तदायादाः सपिण्डा इति। इदञ्च सपिण्डत्वं सकुल्यस्य दायप्रकरणार्थम् अशौचाद्यर्थन्तु पिण्डलेपभुजामपि "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः" इति प्रागुक्तमत्स्यपुराणात्। वक्ष्यमाणकूर्म्मपुराणशङ्खलिखितवचनाच्च। पिण्डे यथा परस्परं भोक्तृत्वं तथा लेपे तुल्यन्यायात्। हारलतायां कूर्म्मपुराणम् "सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते। समानोदकभावस्तु जन्मनाम्नोरवेदने। पिता पितामहश्चैव तथैव प्रपितामहः। लेपभाजश्चतुर्थाद्याः सापिण्ड्यं साप्तपौरुषम्"। लेपभागिभ्यस्त्वूर्द्ध्वं यावज्जन्मनाम्नोरवेदनं यावदमुकनाम्नोऽस्मात् पूर्व्वपुरुषादयं जात इति विशेषः अयमस्मत्कुले जात इति सामान्यतो वा स्मर्य्यते तावत् समानोदकत्वमिति हारलता। अत्र परवचनेनैव सापिण्ड्यसिद्धौ पूर्ववचनपुरुषोक्तिर्जीवत्पितृकत्वादिना अधिकृतेषु पिण्डलेपसम्बन्धेऽपि सपिण्डतानिवृत्तिज्ञापनाय। सर्वदेशीयाचारोऽपि तथा"। "अथ यः खलु पिण्डान् दत्त्वैव मृतः परतयाप्राप्तपितृभावः स कथं सपिण्डः। एकपिण्डदातृत्वभाक्त्व-

स्वरूपसम्बन्धाभावादिति चेत् तद्योग्यतयेति ब्रूमः। योऽन्यतरप्रयोजकस्तु सामान्यशास्त्रविषयत्वम्। ततश्चान्यतिरुद्धप्रपितामहाद्यवधिकाधस्तनानां षसां पुंसां प्रत्येकापेक्षया सप्तानामेकगोत्राणां सार्वाधपरतनानां सप्तानाञ्च सापिण्ड्यं पिण्डलेपयोर्दातृत्वभोक्तृत्वसम्बन्धादिति। स्त्रीणान्तु भर्तृसापिण्ड्येन सापिण्ड्यम् "प्रत्तानां भर्तृसापिण्ड्यमिति" वचनात्। नन्वेवं कन्यायाः कथं सपिण्डतेति चेत् आदिपुराणवचनात् त्रैपुरुषं सापिण्ड्यम्। यथा "सपिण्डता तु कन्यानां सवर्णानां त्रिपौरुषी"। अत्र कन्याबहूनाम् "अप्रत्तानां त्रिपौरुषमिति" वशिष्ठवचनात्। तेन आत्मपञ्चमे वृद्धप्रपितामहे सापिण्ड्यं निवर्त्तते इति प्रतिपादितम्। अत एव कन्यायाः प्रपितामहभ्रात्रा तत्सन्ततिभिः सह सापिण्ड्याभावात् कन्यामरणजननयोस्तेषां सपिण्डाशौचं नास्ति किन्तु समानोदकनिमित्तमेवाशौचमिति एवं तेषामपि जननमरणयोः कन्यानामिति शूलपाणिमहामहोपाध्यायः। यत्तु कूर्मपुराणम् "अप्रत्ता तथा स्त्रीणां सापिण्ड्यं साप्तपौरुषम्। प्रत्तानां भर्तृसापिण्ड्यं प्राह देवः पितामहः" इति रत्नाकरधृतम्। तद्विवाहे पितृपक्षविषयम्। यथा विष्णुपुराणम् "सप्तमीं पितृपक्षाच्च मातृपक्षाच्च पञ्चमीम्। उद्वहेत द्विजो भार्य्यां न्यायेन विधिना नृप!" सप्तमीं पञ्चमीं त्यक्त्वेति शेषः। भर्तृसापिण्ड्यमित्यत्र साप्तपौरुषमित्यनुषज्यते। तेन भर्तृसमानसापिण्ड्यमित्यर्थः। शङ्खलिखितौ "सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी। पिण्डश्चोदकदानञ्च शौचाशौचं तदानुगम्"। गोत्रतः गोत्रैक्ये तेन मातामहकुले कदाचित् षट्पुरुषपर्य्यन्तं पिण्डसम्बन्धेऽपि न सपिण्डता। तान् सप्तपुरुषान् आ समन्तात् पिण्डादिकमनुगच्छतीति तदानुगम्। एतेन "सपिण्डता एकशरीरावयवान्वयेन भवति तथाहि पितुः शरीरावयवान्वयेन पित्रा सह एवं पितामहादिभिरपि पितृद्वारेण तच्छरीरावयवान्वयात्। एवं मातृशरीरावयवान्वयेन मात्रादिभिरिति। एवं पत्या सह पत्न्या एकशरीरारम्भकतया सापिण्ड्यम्। तथाच गर्भोपनिषदि "एतत् षाट्कौषिकं शरीरं त्रीणि पितृतः त्रीणि मातृतः अस्थिस्नायुमज्जानः पितृतः, त्वङ्मांसरुधिराणि मातृतश्चेति" तत्र तत्रावयवान्वयप्रतिपादनात्। निर्वाप्यपिण्डासम्बन्धे तु सापिण्ड्ये भ्रातृपितृव्यादिसापिण्ड्यं न स्यात्।

अतिप्रसङ्गस्तु सप्तान्यतमत्वेन प्रयोगोपाधिना निरसनीयः। यद्येवं मातामहादीनामपि मरणे सपिण्डत्वेन दशाहाशौचं प्राप्नोति, स्यादेतत् यदि मातामहादीनां मरणे "त्रिरात्रं स्यादशौचकम्" इत्यादिविशेषवचनं न स्यात्। यत्र तु विशेषवचनं नास्ति तत्र दशाहमिति मिताक्षरारत्नाकरादिमतमपास्तं लेपभाजश्चतुर्थाद्या इत्यनेकेऽपि सापिण्ड्ये एकशरीरावयवान्वयरूपस्वकपोलरचितादौ निवकाशात् निर्वाप्यपिण्डसम्बन्धेन भ्रात्रादीनां सापिण्ड्यस्य मत्स्यपुराणबौधायनाभ्यां पूर्वमुक्तत्वात् कामधेनुहारलताकल्पतरुपारिजातकारादिभिस्तथैव व्याख्यातत्वाच्च। रेतःशोणितपरिणामरूपत्वादन्यशरीरस्य भवतु वा तथा पत्या सह पत्न्या एकशरीरारम्भकतायाः प्रत्यक्षबाधितत्वात् कथं सापिण्ड्यं प्रमातामहादीनां विशेषवचनाभावात् सपिण्डत्वेन दशाहाद्यशौचप्रसङ्गाच्च मातामहादौ सापिण्ड्यस्य लोकविरुद्धत्वाच्च। भवतु वा तथा शरीरद्वारा सापिण्ड्यं तथापि वचनात् यथासप्तान्तमेतत्त्वं तन्त्वं तथा "गोत्रतः साप्तपौरुषीति" वचनात् गोत्रैक्यमपि प्रागुक्तवचनात् कन्यायास्त्रिपौरुषम् ऊढायाश्च भर्त्तृसापिण्ड्येन सापिण्ड्यमिति चेत् तदेतन्मतेऽपि व्यवस्थायां न क्षतिरिति अतएव सुमन्तुवचनाभिहितं यद्दशमपुरुषपर्य्यन्तमशौचं तत् सप्तमपुरुषाभ्यन्तराशौचान्न्यूनं त्रिरात्रं यथा "ब्राह्मणानामेकपिण्डस्वधानामादशमात्पुरुषविच्छित्तिर्भवति आसप्तमात् उदकविच्छित्तिर्भवति आतृतीयात् स्वधाविच्छित्तिर्भवति" अन्यथा पिण्डशौचक्रियाद्युच्छेदात् ब्रह्महत्यातुल्यो भवति" अस्यार्थः। एका समाना पिण्डस्वधा येषां ते तथा यद्येकोद्दिष्टस्य पिण्डे तु अनुशब्दो न युज्यते इत्यमातुंशब्देनानुशब्दयुक्तमन्त्रो लक्ष्यते अनुयुक्तमन्त्रस्तु "ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा" इति तथा पिण्डस्वधाशब्देन पिण्डसम्बन्धिस्वधाशब्दयुक्तमन्त्रकरणकदेयजलं लक्षितम्। तथा च "ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन्" इत्यनेन पिण्डान् विशेदित्युक्तम्। ततश्च एकपिण्डस्वधानां समानोदकानामित्यर्थः। अतएव मनुः। "जन्मन्येकोदकानान्तु त्रिरात्रात् शुद्धिरिष्यते"। विष्णुपुराणं "मातृपक्षस्य पिण्डेन सम्बद्धाः ये जलेन वा" मातृपक्षस्य मातामहपक्षस्य ये जलेन सम्बद्धाः समानोदका इति श्राद्धविवेकेऽपि व्याख्यातम्। "असम्बन्धा भवेद् या तु

पिण्डेनैवोदकेन वा" इति विवादेऽप्युक्तम् । अत्र पुत्रिकायाः पार्वणे पिण्डोदकयोः सम्बन्धात् कन्यामात्रेऽपि तद्द्वयोरन्वयात् सत्त्वात् । कन्या पिण्डोदकसम्बन्धोच्यते एतदनुसारादपि तस्याः सपिण्डता बोद्धव्या तस्मादेकपिण्डस्वधानामित्यनेन समानोदकभावः समाख्यातः न तु दशमपर्य्यन्तं, पित्राद्विजीवनादिना साविण्ड्यसम्बन्धेऽपि साविण्ड्यं विहितं प्रागुक्तयुक्तेः स्वधेत्यस्य तदनुप्रयुक्तत्वेन वैयर्थ्यापत्तेः । स्वधाधनाधिकारस्तु सन्निहिततराभावे सप्तमपुरुषपर्य्यन्तं सगोत्रस्य स्वधोपलक्षितश्राद्धाधिकारः पुरुषत्रयपर्य्यन्तमिति अत्र स्वधाशब्दो मन्त्रपरः पितृभक्षपरोऽपि । तथा च शुक्लयजुःश्रुतिः "स्वधा वै पितॄणामन्नमिति ।" दशमपुरुषपर्य्यन्तं समानोदकत्वेऽपि न त्रिरात्रं किन्तु पक्षिण्यादि तथाहि उदकक्रियाविषयस्य पारस्करः "सर्वे ज्ञातयो भावयन्ति आसप्तमात्पुरुषाद्वा समानग्रामवासेन यावत् सम्बन्धमनुस्मरेयुर्वा" इति भावयन्ति निष्पादयन्ति अत्र यावत्सम्बन्धमनुस्मरेयुरेकगोत्रजाता वयमिति स्मरणं भवतीत्यनेनैव सर्वेषामुदकदाने प्राप्ते यत् आसप्तमात्पुरुषादित्युक्तं तत्सन्निकर्षतारतम्येनाशौचभेदेऽप्युदककर्मसम्प्राप्त्यर्थमिति । अशौचभेदस्तु सप्तमपर्य्यन्तं सपिण्डत्वाद्दशाहः । ततश्च दशमपुरुषपर्य्यन्तं त्र्यहः । तथा च विष्णुबृहस्पती । "दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके । त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्रजाः ।" ततश्चतुर्दशपुरुषपर्य्यन्तं पक्षिणी ततश्च जन्मनामस्मृतिपर्य्यन्तमेकाहः । तथा च मिताक्षराविवादचिन्तामण्योर्बृहन्मनुः । "सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते । समानोदकभावस्तु निवर्त्तेताचतुर्दशात् । जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते ।" अत्र समानोदकत्वे द्विविधे पूर्वत्र गौतमः "पक्षिणीमसपिण्डे" परत्र हारीतः । "मातामहे त्रिरात्रं स्यादेकाहस्त्वसपिण्डके" इति । अत एव गोत्रजानामहः कृत्स्नमिति आचारवचनं ततः परं सर्वथा समानोदकतानिवृत्तेः । स्नानमात्रमिति "स्नात्वा शुध्यन्ति गोत्रजाः" इति बृहस्पत्युक्तत्वादिति" ।

तथा च गोत्रजो इति पिण्डलेपयोर्दातृत्वभोक्तृत्वान्यतरवत्त्वम् अशौचसापिण्ड्यम् । मात्रातृपरम्परया सप्तमपर्य्यन्तदेहसम्बन्धवत्त्वं विवाहसापिण्ड्यं त्रिपुरुषपर्य्यन्तं देयपिण्डदातृत्वभोक्तृत्वान्यतरवत्त्वं दायप्रकरणे साविण्ड्यमिति विवेकः पिता० मातृपक्ष्या अपि साविण्ड्यं स्वीकृत्य धनाधिकारोऽभिहितः तन्मते समानदेहसम्बन्धयोग्यतयैव साविण्ड्यात् । दायभागमते तु श्राद्धे देयपिण्डदातृत्वभोक्तृत्वाभावात् न तस्याः साविण्ड्यं तद्योग्यत्वेऽपि स्त्रीमात्रस्य विशेषवचनाभावे धनाधिकारपर्य्युदासात् इति विवेकः एवं स्नुषाया अपि ।

सपिण्डीकरण न० सह पिण्डेन सपिण्डः ततः अभूततद्भावे च्वि+कृ-ल्युट् । प्रेतत्वविमोचनाय प्रेतोद्देशेन कर्त्तव्ये पित्रादिपिण्डसमन्वयकरणरूपे श्राद्धभेदे

सपिण्डीकरणप्रकारस्तत्कालादिकं श्रा०त० निरूपितं यथा "अथ सपिण्डीकरणम् । तत्र गोभिलः "पूर्णे संवत्सरे षण्मासे त्रिपक्षे यदहर्वा वृद्धिरापद्येत तदहः चत्वार्युदकपात्राणि सतिलगन्धपुष्पोदकानि पूरयित्वा त्रीणि पितॄणामेकं प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिञ्चति । ये समानाः समनसः पितरो यमराज्ये तेषां लोकाः स्वधा नमो यज्ञो देवेषु कल्पताम् । ये समानाः समनसो जीवा जीवेषु मामकाः । तेषां श्रीर्मयि कल्पतामस्मिन् लोके शतं समाः" इति एतेनैव पिण्डो व्याख्यातः" इति । पूर्णे संवत्सरे इति मुख्यः कल्पः । तदशक्तौ नवमो मासः "संवत्सरान्ते पितृजनं नवममासमपि केचित्" इति पैठीनसिवचनात् । तदशक्तौ षष्ठो मासः । तदशक्तौ त्रिपक्षः तदशक्तौ अशौचापगमे प्रथममासस्य द्वादशभिर्दिनैर्द्वादशमासिकानि श्राद्धानि निर्वर्त्त्य त्रयोदशाहः सपिण्डीकरणकालः शूद्रस्य द्वादशाहो न तु त्रयोदशाह एव "मासिकार्थंवत् द्वादशाहश्राद्धं कृत्वा त्रयोदशेऽह्नि वा तत्कुर्यान्मन्त्रवर्ज्जं हि शूद्राणां द्वादशेऽह्नीति" विष्णुवचनात् । मासिकार्थवदिति मासिकार्थो मासि मासि क्रियमाणश्राद्धप्रयोजनं प्रेताप्यायनादि तद्युक्तं द्वादशाहक्रियमाणश्राद्धमित्यर्थः । यत्र त्वेकादशमासाभ्यन्तरेऽधिमासपातस्तत्र त्रयोदशसु दिनेषु त्रयोदश मासिकानि कृत्वा चतुर्दशेऽह्नि सपिण्डनं कार्य्यमिति "संवत्सराभ्यन्तरे यद्यधिमासो भवति तदा मासिकार्थं दिनमेकं वर्द्धयेत्" इति विष्णुवाक्यात् शूद्रस्य त्रयोदश दिनेषु त्रयोदश मासिकानि त्रयोदशेऽह्नि सपिण्डनं दृष्टपरिकल्पनान्यायात् । एवञ्च वृद्धिमासे न दिनवृद्धिरिति मिश्रोक्तं हेयम् । मलमासे दिनमेकं वर्द्धयेदिति स्मृतेः । श्राद्धाधिक्यमाह ऋष्यशृङ्गः "संवत्सरस्य मध्ये तु यदि स्यादधिमासकः

तदा त्रयोदशे श्राद्धं कार्य्यन्तदधिकं भवेत्”। तथाच मते प्रथमवत्सरेऽपि एव द्वादशमासिकसहितसपिण्डीकरणकालः। “सुख्यं श्राद्धं मासिमासि अपर्य्याप्तावृतुं प्रति। द्वादशाहेन वा कुर्य्यादेकाहे द्वादशाथ वा” इति मरीचिवचनात्। अपर्य्याप्तौ असम्पत्तौ ऋतुमासद्वयम्। अत्र षष्ठे षाण्मासिकदिने पञ्चममासिकं कृत्वा प्रथमषाण्मासिकं कार्य्यं तदाद्युत्कर्षन्यायात्। न तु तत् पूर्वं षाण्मासिकं व्युत्क्रमापत्तेर्न च पञ्चममासिकस्यापि पूर्वदिने कृतनियमाभावात् एवमेव वाचस्पतिमिश्रः। अपकर्षविषयमाह व्यासः “आनन्त्यात् कुलधर्माणां पुंसाञ्चैवायुषः क्षयात्। अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते”। एतच्च द्वादशाहपदं चाशौचान्ततृतीयदिनमात्रपरमिति प्राचीनमैथिलाः, तज्जहत्स्वार्थलक्षणया, अशौचान्तद्वितीयदिनमात्रोपलक्षणमिति श्राद्धप्रदीपश्राद्धचिन्तामणी। तदुभयमप्ययुक्तं “द्वादशाहेन वा कुर्यात्” इति मरीचिवचन “द्वादशाहे श्राद्धं कृत्वा त्रयोदशेऽह्नि वा कुर्यात्” इति विष्णुवचनाभ्यामेकवाक्यतया द्वादशदिनपरत्वात्। कुलधर्माणामिति कुलधर्मज्योतिरागमादिसिद्धानन्तरथाविनाशपरक्रमयोत्पन्नन्ते श्वदेशगमनादिनिमित्तैरशौचापगमे द्वादश दिनानि षोड़शश्राद्धापकर्षकाल इति शूलपाण्युपाध्यायव्याख्यानात् मरीचिनैव “एकाहे द्वादशाथ वेति” सामान्यत एवैकाहविधानाच्च। अतएव एकाहापेक्षया प्राशस्त्याभिधानमपि सङ्गच्छते अतएव प्रथममासस्य एकाह एव द्वादशमासिकसहितसपिण्डीकरणकाल इति श्राद्धविवेकः। अत्र यानि एकाहकर्त्तव्यतया द्वादशमासिकश्राद्धान्युक्तानि तानि शूद्रेणापि आद्यमासिकदिन एव कार्य्याणि तत्राद्यमासिकं कृत्वा तत्परदिने एकादश मासिकानीति ध्येयम्। एवञ्च तेषामपकर्षे, तन्मध्ये तदन्तकाले च कर्त्तव्यतया षण्मासिकद्वयसपिण्डीकरणापकर्षः सिध्यतीति सुधीभिर्भाव्यम्। वद्ध्यर्थो वृद्धिरिति वृद्धिराधास्यमानं पुंसवनादि। आपद्येत आसन्ना भवति तद्दिनेऽपि सपिण्डीकरणम्। तथाहि “प्रागावर्त्तनादह्नः कालं विद्यात्” इति गोभिलगृह्यसूत्रेण पुंसवनादिकर्मणोर्यामद्वयाभ्यन्तरे विधानात् सपिण्डीकरणस्य चापराह्णे विधानात्तयोः कालयोरबाधाय वृद्धिपूर्वदिने अपकर्षः। ननु सपिण्डीकरणस्यापराह्णिकत्वे किं प्रमाणमिति चेत् “अपराह्णे तु पैतृकम्” इत्युत्सर्गवचनम्।

किञ्च “यद्यप्यदन्तकः पूर्वं पैतृपत्ति सदा चरम्। तस्मीन्द्रेश्वरसाधर्म्यात्तच्च चोऽस्य विधीयते” इति छन्दोगपरिशिष्टवचने यथा बहूनामनुरोधात्तच्च त्वेकस्यानुरोधात् पैतृचरः “विरुद्धधर्मसमवाये भूयसां स्यात् सधर्मकत्वम्” इति जैमिनिसूत्रात्। तद्वदत्रापि बहुदैवतान्नपार्वणानुरोधात् “एकोद्दिष्टविधानेन कार्य्यन्तदपि पार्थिव!” इति विष्णुपुराणीयमेकोद्दिष्टांशे तदितिकर्त्तव्यतापरं न तु तत्कालपरम्। तथा च परिशिष्टप्रकाशधृतम् “श्राद्धद्वयमुपक्रम्य कुर्वीत सहपिण्डताम्। तयोः पार्वणवत् पूर्वमेकोद्दिष्टमथापरम्” इति। एवञ्च शुद्धितत्त्वसंवत्सरमत्स्यपन्नकोपाख्यानवत् वृद्धिं निश्चित्य कृतं सपिण्डीकरणं तदानीं विघ्नेन वृद्ध्यभावेऽपि वृद्ध्यारम्भकालान्तरे पूर्णसंवत्सरं वा प्राप्य पितृत्वप्रापकमिति न सपिण्डनान्तरम्। अत्र “श्वःकर्त्तास्मीति निश्चित्य दाता विप्रान्निमन्त्रयेत्।” इतिवच्चिन्त्येति उत्कटकोटिकसम्भावनोपलक्षणं भविष्यन्निमित्तस्य कर्मणः प्रत्यष्टव्यत्वात्। एवञ्च वृद्धिश्राद्धं यदर्थं कृतं तत् कर्म चेत् विघ्नात्तद्दिने न क्रियते तदा दिनान्तरे तत् कर्मणि क्रियमाणे तदङ्गत्वात् पुनर्वृद्धिश्राद्धं कर्त्तव्यमेव। “प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः। तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत्क्रिया”। इति छन्दोगपरिशिष्टेन साङ्गकरणाभिधानात्। हेमाद्रिधृतं “पूर्णसंवत्सरे श्राद्धं षोड़शं परिकीर्त्तितम्। तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते।” अत्र पूर्णसंवत्सरक्रियमाणश्राद्धात् यथोभयनिर्वाहः तथापकृष्टसपिण्डनादप्युभयनिर्वाहाय पूर्णसंवत्सरे श्राद्धदिनान्तरं कार्य्यम्”। तत्रायं विशेषः तत्रोक्तो यथा “एवञ्च पार्वणे प्रागुक्तवचनेन शेषद्रव्येण पिण्डविधानात् तद्विकृतावपि सपिण्डीकरणे तन्नियमात् यद्यपि शेषाभावेऽपि पिण्डनिवृत्तिरायाति तथापि “यथोक्तवस्त्वसम्प्राप्तौ ग्राह्यं तदनुकारि यत्। यवानामिव गोधूमा व्रीहीणामिव शालयः” इति छन्दोगपरिशिष्टवचनात् “मुख्याभावेऽपि प्रतिनिधिः शास्त्रार्थः” इति न्यायाच्च मध्वाद्यभावे गुड़ादिग्रहणवत् द्रव्यान्तरेणापि पिण्डदानं शेषद्रव्यनियमस्तु तत्सम्भावे द्रव्यान्तरत्यागाय। अन्यथा तदङ्गाभावे कर्मवैगुण्यं स्यात्. “सचपिण्डक्रियायाम्” इति मनूक्तेः पिण्डस्य प्रेतपिण्डेन सह मिश्रीकरणं यत्रेति सपिण्डीकरणसमाख्यासिद्धयर्थं कृतः। तत्र

तथाचरणं प्रतिपत्तिरूपकर्म्माङ्ग एव प्रतिपाद्याभावे तन्नि-वृत्तिः पशुयागे “लोहितं निरस्यति रक्षसां भागोऽसि” इत्या-दावुक्ता । अतएव यज्ञवास्तुरूपप्रतिपत्तियागेऽपि यज्ञो दक्ष वदति इति यज्ञवास्तुरूपाख्यानुरोधेनास्तु तत्राप्य-विनाशेऽपि कुशान्तरप्रतिनिधिर्भट्टनारायणेन गोभिलभाष्ये उक्तः “प्राक् स्विष्टकृत आवापः” इति गोभिलसूत्रस्य व्याख्यानेऽपि आवपनं इत्यावापः प्रधानहोमः स तु स्विष्टकृद्धोमात् प्राक् न पश्चादित्यर्थः । एवञ्च मुख्यहोमे व्यस्ते दधि चरुर्नष्टो दुष्टो वा भवति तदान्यः पाच्यः मुख्ये कृते चेच्चरुर्दुष्टो तदाज्येनैव स्विष्टकृद्धोम इति सरला । एतेन येनकेन पिण्डविहृत्तिरिति वाचस्पति-मिश्रोक्तं हेयम् । एतेनार्घ्यदानविधानेन पिण्डमिश्रण-प्रकारो व्याख्यात उक्तः” ।

“पितरि पूर्वं मृते तदपोऽप्यन्तरे पितामहे प्रपितामहे मृते यथा कर्त्तव्यं तथाह छन्दोगपरिशिष्टे कात्यायनः “पितुः सपिण्डनं कृत्वा कुर्य्यान्मासानुमासिकम् । असं-स्कृतेन संस्कार्य्यौ पूर्व्वौ पितृपितामहौ । पितरं तत्र संस्कुर्य्यादिति कात्यायनोऽब्रवीत् । पापिष्ठमपि शुद्धेन शुद्धं पापकृतापि वा । पितामहेन पितरं कुर्य्यादिति विनिश्चयः” । पितुः सपिण्डनं कृत्वा प्रेतीभूतयोरपि पितामहप्रपितामहयोः स्वस्व प्रतिमासविहितं पार्व्वणं पितृपितामहप्रपितामहानां कर्त्तव्यं न तु तयोः सपिण्डीकरणापेक्षा कार्य्या ननु सपिण्डनेनासंस्कृ-ताभ्यां सह पिण्डैः कथं सपिण्डनाख्यसंस्कारस्तस्मात्तदर्थं तयोः सपिण्डीकरणमपकर्षणीयं पितुरेव वा सपिण्डन-मुत्कर्षणीयमित्यत आह असंस्कृतेनेति । उत्कर्षा-पकर्षौ न कार्य्याविव्यनेन वचनेनोक्तं कथमसंस्कृतेन सह संस्कार इत्यत आह पापिष्ठमपीति पापिष्ठमकृतसपिण्डी-करणं शुद्धेन कृतसपिण्डीकरणेन पितामहेन पापकृता अकृतसपिण्डीकरणेनापि शुद्धं कुर्य्यादिति शास्त्रनिश्चयः । अतो वचनबलादेव इति तात्पर्य्यम् । अत्र तु प्रेतीभूत पितामहेन पितुः सपिण्डने पितामहोद्देशेनैव । “अस-पिण्डकृतं प्रेतमुद्दिश्येन तर्पयेत्” इति प्रागुक्तजावाल-वचनात् । एवमन्यत्रापि बोध्यं वृद्धप्रपितामहस्य प्रेतत्वे तेन सह न कार्य्यमिति तात्पर्य्यम् । अथ मातुः स-पिण्डने श्वशुरार्य्यश्वशुरयोः पिण्डौ कुर्य्यात्त्वाद्यौ । तथा च गार्ग्यः “पतिनैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रियाः । सा मृता हि सतेतत्त्वं कुर्य्यात्तदनु पितृन् । श्वशुर-स्थापतो यस्याश्चिरः पश्चादनक्रिया । पुत्रैर्देयेण वा कार्य्या मातुरभ्युदयार्थिभिः” । अन्तरयन्तीत्यर्थे अन्तरय-न्तीति लिङ्गव्यत्ययेन पुंस्त्वमिति हलायुधः । परान्वयं गोभिलश्राद्धसूत्रभाष्यकृतापि लिखितम् । अतएव प्रव्र-जिते पतिते वा पितरि मृतेऽपि न पितामहादिभि-र्मातुः सपिण्डीकरणं किन्तु पितामह्यादिभिरेव । “स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः । एकत्वं सा गता यस्मात् मन्त्राहुतिव्रतैः । तस्मिन् सति सुताः कुर्य्युः पितामह्या सहैव तु” । इत्यत्र तस्मिन् सतीति श्राद्धानर्हभर्तृपलक्षणम् । अतएव “तस्यास्त्वेव तु जीवन्त्यां तस्याः श्वश्र्वेति निश्चयः” इति लघुहारीतेन श्वश्रूजी-वने तस्याः श्वश्र्वोक्तं न तु श्वशुरेणेति कश्चिदप्युक्तम् । एवं पितामह्यादिभिर्मातुः सपिण्डीकरणेऽपि सामगेन “ये चात्र त्वामनुयांश्च त्वमनु तस्यै ते स्वधा” इति मन्त्रो न पाठ्यः मन्त्रलिङ्गविरोधात् अतएव आभ्युदयिके मातृ-पक्षे श्रीदत्तादिभिर्मन्त्रान्तरं लिखितं न तु ये चात्रत्वा-मिति वस्तुतस्तु आभ्युदयिके छन्दोगानां मातृपक्ष एव नास्तीति वक्ष्यते” ।

लघुहारीतः “सपिण्डीकरणान्तानि यानि श्राद्धानि षोडश । पृथङ्नैव सुताः कुर्य्युः पृथग्द्रव्या अपि क्वचित् । प्रेतसंस्कारकर्म्माणि यानि श्राद्धानि षोडश । यथाकालन्तु कार्य्याणि नान्यथा मुच्यते ततः” । पृथग्-द्रव्या अपि विभक्तधना अपि पृथक् न कुर्य्युः सुतरा-मपृथग्धनाः पृथक् न कुर्य्युः किन्त्वपृथक् कुर्य्युः अत्र विशेषयति मरीचिः । “मृते पितरि पुत्रेण क्रिया कार्य्या विधानतः बहवः स्युर्यदा पुत्राः पितुरेकत्र-वासिनः । सर्व्वेषान्तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम् । द्रव्येण चाविभक्तेन सर्व्वैरेव कृतं भवेत्” । पुत्रेणेत्य-विशेषात् सर्व्वेषामधिकारे प्राप्ते ज्येष्ठस्य साक्षात् कर्त्त-व्यतामाह बहव इति । ज्येष्ठेनापि सर्व्वेषां भ्रातॄणां अनुकरणेनैव करणं भवतु इति मतं ज्ञानं कृत्वा विभक्त-त्वे द्रव्यसंश्लेषेण च कृतं कर्म्म सर्व्वैरेव कृतमेव भवेत् । तदाभी द्रव्यासंश्लेषेण च तस्मात् द्रव्यं प्राप्तव्यमिति कृत्वा कर्त्तव्यम् । यदि तेन तत्र न परिशुध्यते तदा स ऋणी भवति प्रत्यवायी च भवतीति । न तु तेन श्राद्धान्तरं कर्त्तव्यमिति श्राद्धविवेकोक्तं युक्तम् । “पृथङ्नैव सुताः कुर्य्यु”रित्यनेन पृथक्करणस्य पर्य्युदस्तत्वादनधिकारात् । यथाकालमिति अशौचान्तद्वितीयादिनद्वादशमासकृतेति-

श्येकादश्यन्यूनषण्मासद्वितीयसंवत्सरेषु । न च विधानसामर्थ्यादेव तत्तत्कालप्राप्तेरनर्थकमिदमिति वाच्यम् तत्तत्कालानां द्वादशाहाद्यपेक्षया प्राधान्यबोधनार्थत्वात् यथा "आनन्त्यात् कुलधर्माणां पुंसाञ्चैवायुषः क्षयात् । अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते" इति व्याघ्रवचनोक्तपक्षस्य इत्यनेन कुलाचारज्योतिःशास्त्रोक्तात्मार्त्तिमरणराष्ट्रोपप्लवादिरूपेण देशादिसमयानुसारादेव सपिण्डीकरणापकर्षे द्वादशाहापेक्षया प्रागुक्तत्रयमासादिनोक्तकालपर्य्यन्तः । अथ वा यथाकालविद्यादेर्यदृच्छया वहिरायद्येतेन्यमेवावश्यकतावसरणादिहृष्टार्थमेवापकर्षो न स्वनावश्यकेऽप्युक्तोद्दशीपकर्षः कार्य्य इति तात्पर्य्यम् । अतएव लघुहारीतेन "सर्व्वैव कार्य्यं यत् कर्म्म वत्सरात् प्रथमाद्दते" इत्यनेन कार्य्यस्यापकर्षोऽभिहिता नास्तीत्युक्तम् यदि स्यादावश्यकवृद्धिनिमित्तेनापकर्षः कृतस्तदा दर्शपूर्त्तादि कार्य्यं वत्सराभ्यन्तरेऽपि कर्त्तव्यमिति श्राद्धविवेकोऽप्येवं यद्यपि गोभिलसूत्रादौ सपिण्डीकरणस्यैवापकर्षः प्रागुक्तस्तथापि सपिण्डीकरणापकर्षे तत्पूर्व्वकर्त्तव्यश्राद्धानामपि तदादिमदन्तन्यायादपकर्षः । "सपिण्डीकरणान्ता तु ज्ञेया प्रेतक्रिया बुधैः" इति शातातपवचने प्रेतक्रियायाः सपिण्डीकरणान्तत्वं प्रतीयते । अत्र वृद्धिनिमित्तं विना सपिण्डनापकर्षे कृते पूर्णसंवत्सरकालं प्राप्य प्रेतत्वपरीहारमाह विष्णुधर्मोत्तरम् "कृते सपिण्डीकरणे नरः संवत्सरात् परम् । प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते" वृद्धिनिमित्तकसपिण्डीकरणापकर्षे कृते तत्क्षणादेव प्रेतत्वपरीहारः तदर्थएवापकर्षात् एवञ्चान्यनिमित्तापकर्षे वृद्धिकालं प्राप्य प्रेतत्वपरीहारः तत्कालस्य पूर्णसंवत्सरकालतुल्यत्वात् । "अर्व्वाक् संवत्सरात् वृद्धौ पूर्णे संवत्सरेऽपि वा । ये सपिण्डीकृताः प्रेता न तेषान्तु पृथक्क्रिया" इति शातातपवचनात्" ।

सपिण्डीकृत त्रि० सह पिण्डैः पित्रादिपिण्डैः सपिण्डः ततः च्वि-कृ-कर्म्मणि क्त । यदुद्देशेन सपिण्डीकरणं श्राद्धं कृतं तस्मिन् मृते जने "ये सपिण्डीकृताः प्रेताः" इति शाता० स्मृतिः ।

[घोषातकीवृक्षे राजनि० ।

सपीतक पु० सह समानः पीतकेन सहस्य सः । राज-

सपीति स्त्री पा-क्तिन् पीतिः पानम् सह एकत्र पीतिः । शाख्यादीनां सह भोजने शब्दर० । [तकीवृक्षे राजनि० ।

सपीतिका स्त्री सह पीतेन कप् अत इत्वम् । हस्तिघोषा-

सप्तक न० सप्तानामवयवम् कन् । १सप्तसङ्ख्यायाम् । सप्त प्रमाणमस्य कन् । २सप्तसङ्ख्यान्विते त्रि० । पूरणे कन् । ३सप्तानां पूरणे च । [कलायाम् अमरः ।

सप्तकी स्त्री सप्तभिः स्वरैरिव कायति शब्दायते कै-क । मे-

सप्तचत्वारिंशत् स्त्री सप्ताधिका चत्वारिंशत् शाक० । (सातचल्लिश) १सङ्ख्यायां २तत्संख्यान्विते च । एवं सप्तपञ्चाशदादयः सप्ताधिकतत्तत्संख्यायां तत्संख्यान्विते च । पूरणे डट् । सप्तचत्वारिंश तत्तत्संख्यापूरणे त्रि० स्त्रियां ङीप् एवं सप्तपञ्चाशदादयोऽपि तत्पूरणे एवं तमप् सप्तचत्वारिंशत्तम तत्पूरणे त्रि० स्त्रियां टाप् ।

सप्तच्छद पु० सप्त सप्त छदाः प्रतिपत्त्रम् यस्य वृत्तौ संख्याशब्दस्य वीप्सार्थता भाष्योक्ता । (छातिम) वृक्षे राजनि० ।

सप्तजिह्व पु० सप्त जिह्वा इव आस्वादसाधनानि अर्च्चिषो यस्य । वह्नौ त्रिका० । "काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा । उग्रा प्रदीप्ता च कपीटयोनेः सप्तैव लीलाः कथिताश्च जिह्वाः" इत्युक्तानां सप्तानामग्निज्वालानामेव तज्जिह्वात्वमुक्तम् । वह्निजिह्वानां वर्णभेदः अवस्थानदिग्भेदश्च शारदातिलके दर्शितो यथा "हिरण्या गगनस्था च पूर्वपार्श्वे दिशि स्थिता । वैदूर्य्यवर्णा कनका प्राच्यां दिशि समाश्रिता । तरुणादित्यसङ्काशा रक्ता जिह्वाग्निसंस्थिता । कृष्णा नीलाभ्रसङ्काशा नैर्ऋत्यां दिशि संस्थिता । अतिरक्ता तथा भाषा वायव्यां दिशि संस्थिता । बहुरूपा तथा ख्याता दक्षिणोत्तरसंस्थिता" ।

सप्तज्वाल पु० सप्त काल्याद्यः ज्वाला यस्य । १वह्नौ हेमच० । २सप्तार्च्चिरादयोऽप्यत्र अमरः । [यज्ञे अमरः ।

सप्ततन्तु सप्तभिः भूरादिभिर्व्याहृतिभिस्तन्यते तन-तुन ।

सप्तति स्त्री सप्तगुणिता दशतिः नि० । (सत्तर) १संख्यायां २तत्संख्यान्विते च । ततःपूरणे डट् । सप्तत तत्संख्यापूरणे त्रि० स्त्रियां ङीप् ।

सप्ततितम त्रि० सप्ततेः पूरणः तमप् । येन सप्ततिसंख्या पूर्य्यते तस्मिन् अर्थे स्त्रियां टाप् ।

सप्तद्वीपा स्त्री सप्त जम्बुप्रभृतयो द्वीपाः यस्याः । जम्बुप्रभृतिसप्तद्वीपयुतायां पृथिव्याम् । जम्बूद्वीपशब्दे ३०४२४० दृश्यम्

सप्तधा अव्य० सप्तन्+प्रकारे धाच् । सप्तप्रकारे ।

सप्तधातु पु० ब०व० सप्तगुणिता धातवः । देहस्थेषु "रसासृङ्मांसमेदोऽस्थिमज्जानः शुक्रसंयुताः । शरीरस्था इमे ज्ञेयाः पण्डितैः सप्त धातवः" इत्युक्तेषु रसादिषु धातुषु राजनि० ।

सप्तन् पु॰ त्रि॰ । सप—तनिन् । (सात) १संख्यान्विते २तत्संख्यायां महाभाष्यम् । [पु॰ द्रष्टव्यम् ।

सप्तनाड़ीचक्र न॰ वृष्टिज्ञानार्थे चक्रभेदे चक्रशब्दे २८११

सप्तनामा स्त्री सप्त नामानि यस्याः डाप् । आदित्यभक्तायाम् राजनि॰ । [राजनि॰ । २सप्तच्छदवृक्षे च ।

सप्तपत्त्र पु॰ सप्त सप्त पत्त्राणि प्रतिपत्त्रं यस्य । १मुद्गरवृक्षे

सप्तपदी स्त्री सप्तानां पदानां समाहारः ङीप् । विवाहकाले मण्डलिकासु गन्तव्येषु सप्तसु पदेषु । तत्प्रकारो भवदेवभट्टोक्तो यथा "ततो जामाता प्रागुदीच्यां गत्वा वधूं सप्तभिर्मन्त्रैः सप्तसु मण्डलिकासु सप्त पदानि नयेत् । वध्वश्च दक्षिणपादं नीत्वा पश्चात् वामपादं मण्डलिकां नयेत् । जामाता च वधूं ब्रूयात् वामेन पादेन दक्षिणं पादमाक्रमयेति" इत्यादि । अस्यैव कर्मणो विवाहनिष्ठाकरत्वमुक्तं मनुना "पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम् । तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे" ।

सप्तपर्ण पु॰ सप्त सप्त पर्णान्यस्य प्रतिपर्वम् । (छातिम) वृक्षे अमरः । "सप्तपर्णो व्रणश्लेष्मवातकुष्ठास्रजन्तुजित् । दीपनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरः स्मृतः" भावप्र॰ तद्गुणा उक्ताः । २लज्जालुलतायां स्त्री टाप् गौरा॰ ङीष् । "द्राक्षादाडिमखर्जूरकदलीनाञ्च शर्करम् । लाक्षाचूर्णं समध्वाज्यं सप्तपर्णमुदाहृतम्" शब्दच॰ उक्ते ३खाद्यभेदे न॰ ।

सप्तपाताल न॰ समाहारद्विगुः पात्रादि । "अतलं वितलञ्चैव नितलञ्च गभस्तिमत् । महातलञ्च सुतलं पातालं सप्त कीर्त्तितम्" इत्युक्तेषु सप्तसु भूमेरधःस्थलोकेषु ।

सप्तप्रकृतिविकृति स्त्री ब॰ ब॰ सप्तसंख्याताः प्रकृतिविकृतयः । सांख्योक्ते महदहङ्कारसहितशब्दाद्यपञ्चभूतहेतुशब्दादितन्मात्रात्मके पदार्थसप्तके "महदाद्याः प्रकृतिविकृतयः सप्त" इति सांख्यकारिका । षोडशकपदार्थहेतुत्वात् प्रकृतित्वम् प्रकृतिकार्य्यत्वाच्च विकृतित्वमेषाम् ।

सप्तभद्र पु॰ सप्तसु स्थानेषु भद्रमस्य । शिरीषवृक्षे शब्दच॰ ।

सप्तम त्रि॰ सप्तानां पूरणः मट् । येन सप्तसंख्या पूर्य्यते तस्मिन्नर्थे स्त्रियां ङीप् । सा च चन्द्रस्य सप्तमकलाया क्रियारूपायां तिथौ च तिथिशब्दे ३२८९पृ॰ दृश्यम् ।

सप्तरक्त पु॰ सप्त रक्तानि प्रशस्तान्यस्य । "पाणिपादतले रक्ते नेत्रान्तरनखानि च । तालुकाधरजिह्वाश्च प्रशस्ता सप्तरक्ता" इत्युक्तस्थानेषु रक्ततायुक्ते जने ।

सप्तर्षि पु॰ ब॰ व॰ । सप्त ऋषयः संज्ञात्वात् कर्म॰ । "मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः । वशिष्ठश्च महाभाग ! सप्तैते ब्रह्मणः सुताः" इत्युक्तेषु सप्तसु ऋषिषु । मन्वन्तरभेदे तेषां नामभेदा ऋषिशब्दे उक्ता १४५१ पृ॰ दृश्याः ।

सप्तर्षिमण्डल त्रि॰ ६त॰ । आकाशे नित्यं ध्रुवनक्षत्रपरिभ्रमके नक्षत्रसप्तकात्मके नक्षत्रमण्डलभेदे "सप्तर्षिमण्डलं तस्मादूर्द्ध्वतो सर्वकोपरीति" पुराणम् तत्रारादि ऋषिशब्दे १४५२ पृ॰ दृश्यम् ।

सप्तला स्त्री सप्तधा लाति ला—क । १नवमालिकायाम् अमरः २चर्मकषायां ३गुञ्जायां ४पाटलायाञ्च मेदि॰ ।

सप्तशती स्त्री सप्तानां शतानां समाहारः । मार्कण्डेयपुराणान्तर्गतसप्तशतमन्त्रसमुदायरूपे देवीमाहात्म्यबोधके त्रयोदशाध्यायात्मके ग्रन्थभेदे तन्मन्त्रविभागः चण्डीशब्दे २८५५ पृ॰ दृश्यः । "मध्ये सप्तशतीं जपेदिति" तन्त्र दर्शितवाक्यम् ।

सप्तशलाक पु॰ सप्त शलाकाकारा रेखा यत्र । ज्योतिषोक्ते विवाहादौ वर्ज्यवेधसूचके सप्तशलाकाकारितचक्रभेदे चक्रशब्दे २८१०पृ॰दृश्यम् । उपयमशब्दे १२६१पृ॰दृश्यम् ।

सप्तशिरा स्त्री सप्त शिरा यस्याः । ताम्बूलवल्ल्यां राजनि॰

सप्तसप्ति पु॰ सप्त सप्तयोऽश्वा यस्य । १सूर्य्ये हेमच॰ २अर्कवृक्षे च । सप्ताश्वादयोऽप्यत्र ।

सप्तसागर पु॰ ब॰ब॰ । सप्तसंख्याताः सागराः । "लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तकाः" इत्युक्तेषु सप्तसु सागरेषु । सप्त घृतादिकल्पिताः सागरा इव देयपदार्थाः यत्र कप् । मत्स्यपुराणोक्ते दाननामख्याते महादानभेदे मत्स्यपु॰ २८६अ॰ तद्विधानं दृश्यम् ।

सप्तांशु पु॰ सप्त अंशवोज्वाला यस्य । सप्तजिह्वशब्दे "कालीकराली चेत्याद्युक्तसप्तज्वालायुते वह्नौ । [वह्नौ जटा॰ ।

सप्तांशुपुङ्गव पु॰ सप्तभिरंशुभिः पुङ्गव इव श्रेष्ठत्वात् । शनि॰

सप्तार्चिस् पु॰ सप्त अर्चींषि यस्य । १वह्नौ अमरः २चित्रकवृक्षे ३शनिग्रहे हेमच॰ । ४क्रूरनेत्रे त्रि॰ मेदि॰ ।

सप्ताश्व पु॰ सप्त अश्वा यस्य । १सूर्य्ये २अर्कवृक्षे अमरः ।

सप्ताश्ववाहन पु॰ सप्त अश्वाः वाहनान्यस्य । १सूर्य्ये २अर्कवृक्षे च "शुचिः सप्ताश्ववाहनः" सूर्य्यस्तवः ।

सप्ति पु॰ सप—ति । अश्वे अमरः ।

सफर पुंस्त्री॰ सप—अरन् पृषो॰ पस्य फः । (पुँटी) मत्स्ये स्त्रीत्वे ङीष् । "अयन्तो चञ्चसफरीविघट्टितोरवः" भाषः अस्य तालव्यादितेत्यन्ये ।

सफल त्रि० सह फलेन सहस्य सः। १सार्थे २फलयुक्ते च शब्दा०।

सबल त्रि० सह बलेन सामर्थ्येन सैन्येन वा सहस्य सः। १सामर्थ्यान्विते २सैन्ययुक्ते ३व्यो०उक्तबलाद्ये "सबलेऽवदपतौ सख्ये राज्याग्नि सुधकीर्त्तयः" नील०ता०।

सब्रह्मचारिन् पु० समानं ब्रह्म वेदपठनकालीनं व्रतं चरति चर-णिनि समानस्य सः। एकगुरुसकाशात् वेदाध्ययनकाले तत्सिमन्धनसमानव्रताचारयुते अमरः।

सभर्त्तृका स्त्री सह भर्त्रा पत्या सहस्य सः कप्। विद्यमानपतिकायां स्त्रियाम् अमरः।

सभा स्त्री सह भान्ति अभीष्टनिश्चयार्थमेकत्र यत्र गृहे। १बहूनां समावेशनस्थाने २तदधिष्ठायिजनसमूहे च अमरः "यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः। राज्ञः प्रतिकृतो विद्वान् ब्राह्मणास्तां सभां विदुः"। विद्वत्संकुतावपि सभापर्य्यायपरिव्यक्तमाह "त्रैविद्यो हैतुकस्तर्क्की निरुक्तो धर्मपाठकः। त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा" मनुः। ३द्यूते ४गृहे मेदि० ५समूहे हेमच०। समूहपरत्वे क्लीब० अ०। दासीसभं नृपसभमित्यादि। व्यवहारदर्शनार्थसभास्थानञ्च वीरमि० दर्शितं यथा बृहस्पतिः "दुर्गमध्ये गृहं कुर्य्याज्जलवृक्षान्वितं पृथक्। प्राग्दिशि प्राङ्मुखीं तस्य लक्षण्यां कल्पयेत् सभाम्। प्रतिमालेख्यदेवैश्च युक्तामग्न्यम्बुना तथा" इति लक्षण्यां वास्तुशास्त्रोक्तलक्षणेन लक्षिताम्। अग्न्यम्बुनेति समाहारद्वन्द्वः। सभाया धर्माधिकरणाख्यं कात्यायन आह "धर्मशास्त्रानुसारेण अर्थशास्त्रविवेचनम्। यत्राधिक्रियते स्थाने धर्माधिकरणं हि तदिति"। तत्र सभ्योपवेशनमाह मनुः "यस्मिन् देशे इत्यादि" प्रागुक्तम् अत्र इत्युपलक्षणम् अधिकानामपि सम्मतत्वात्। तत्र वक्ष्यते। अधिकृतो विद्वान् प्राड्विवाकः अत्र प्रविशेत् सभाम् सभामेव प्रविश्येत्यादिवचनात् सभा मुख्यव्यवहारदर्शनस्थानम्। अन्यान्यमुख्यानि व्यवहारस्थानानि कात्यायनमतस्थानि। "दश स्थानानि वादानां पञ्च चैवाब्रवीद् भृगुः। निर्णयं येन गच्छन्ति विवादं प्राप्य वादिनः। आरण्यास्तु स्वकैः कुर्य्युः सार्थिकाः सार्थिकैस्तथा। सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवासिभिः। उभयानुमतश्चैव स्मृतं स्थानमीप्सितम्। कुलिकाः सार्थमुख्याश्च पुरग्रामनिवासिनः। ग्रामपौरगणश्रेण्यश्चातुर्विद्याश्च वर्गिणः। कुलानि कुलिकाश्चैव नियुक्ता नृपतिस्तथा" इति। स्वकैरारण्यकैः ग्रामेऽपीत्यपिशब्दात् ये ग्रामेऽरण्यादौ च निवसन्ति ते उभयवासिभिर्निर्णयं कुर्य्युः उभयव्यवहाराभिज्ञत्वात्तेषाम्। कुलिकाः कुलश्रेष्ठाः। सार्थो वाणिज्यार्थं ग्रामादौ मिलितो जनसङ्घः तन्मुख्याः सार्थवाहादयः। पुरं मुख्यनगरम् तस्मादर्वाचीनो ग्राम इति पुरग्रामनिवासिनोर्भेदः सार्थकुलिकादीनि पञ्च स्थानानि तानि चारण्यकादीनामेव, ग्रामादीनि दश स्थानानि साधारणानि। ग्रामो ग्रामाकारेणावस्थितो जनः। पौरः पुरवासिनां समूहः "श्रेण्यो रजकाद्यष्टादश हीनजातयः। चातुर्विद्यः आन्वीक्षिक्यादिविद्याचतुष्टयोपेतः वर्गिणो गणप्रभृतयः। राज्ञः सभाप्रवेशस्तत्रैव दर्शितः। तत्र मनुः "व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः। मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम्। तत्रासीनः स्थितो वापि पाणिमुद्यम्य दक्षिणम्। विनीतवेशाभरणः पश्येत् कार्य्याणि कार्य्यिणाम्। प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः। अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक्। धर्मासनमधिष्ठाय संवीताङ्गः समाहितः। प्रणम्य लोकपालेभ्यः कार्य्यदर्शनमारभेत्" इति.

सभाज सेवने दर्शने च सक० प्रीतौ अ०अद०चु० उभ० सेट्। सभाजयति ते असभाजत्-त। अनेकाच्त्वान्न षोपदेशः

सभाजन न०सभाज—भावे ल्युट्। गमनागमनादिकाले सुखानन्दप्रीतिसाधने १आप्रच्छने २पूजने च अमरः।

सभासद् पु०सभायां सीदति—क्विप्। सामाजिके सभ्ये अमरः तल्लक्षणमाह याज्ञ० "श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः। राज्ञा सभासदः कार्य्या रिपौ मित्रे च ये समाः" इति। श्रुतेन मीमांसाव्याकरणादिश्रवणेन वेदाध्ययनेन च सम्पन्नाः। धर्मज्ञाः सत्यवादिनः सत्यवदनशीलाः रिपौ मित्रे च समाः द्वेषरागशून्याः एवंविधा सभासदः सभायां सदसि यथा सीदन्ति तथा दानमानसत्कारैः राज्ञा कर्त्तव्याः सभ्यत्वेन वरीतव्या इत्यर्थः। अतस्तेषामनुपादेयत्वात् स्वाध्यायोऽध्येतव्यो यूपं छिनत्ति पुरोहितस्त्रं प्रकुर्वीतेत्यादिवत् सत्यपि धर्मत्वेऽविवक्षितत्वात् तद्गतैकत्वबहुत्वं विवक्षितम्। तच्च यद्यपि कपिञ्जलन्यायेन त्रित्वमात्रेणापि चरितार्थं तथापि सत्यन्तरोक्तबहुत्वविकल्पपरम्। तथा च बृहस्पतिः "लोकवेदज्ञधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा। यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा" इति। मनुना तु त्रय एवोक्ताः।

“यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रय” इति ।
अत्र त्रिभ्योऽन्यूनाः सप्तभ्योऽधिकाश्च न कार्य्या इत्यत्र
तात्पर्य्यं सङ्ख्यावैषम्यन्तु “भूयोऽल्पविरोधे भूयसां स्यात्
सधर्म्मकत्वमिति न्यायेन विप्रतिपत्तावधिकसङ्ख्यावचनमाद-
रणीयं गुणसाम्ये: । तद्वैषम्ये तु शतमप्यन्धानान्न पश्य-
तीति न्यायेन गुणवत्तरवचनमेवेति प्रदर्शनार्थम् । “यत्तु
चत्वारो धर्म्मज्ञाः पर्षत्त्रैविद्यमेव वा । सा ब्रूते यं स धर्म्मः
स्यादेको वाऽध्यात्मवित्तमः” इति योगीश्वरेण विप्रस-
ङ्ख्यात्वमपि बहुत्वमपि चानादृतम् । तत्तु पूर्वोक्तानां
धर्म्मकारकज्ञापकहेतूनां सन्देहनिर्णयविषयं प्रक्रमात् ।
व्यवहारविषये तु मन्त्रवराणां विप्रसङ्ख्यानामेव सभ्यत्व-
विशेषविधानादित्यवसेयम् । एते च ब्राह्मणा एव ।
मनुबृहस्पतिभ्यां विप्रपदोपदानात् । स तु सभ्यैः
स्थिरैर्युक्तः प्राज्ञैर्मौलैर्द्विजोत्तमैः । धर्म्मशास्त्रार्थकुशलै-
रर्थशास्त्रविशारदैरिति” द्विजोत्तमपदस्य च कात्यायने-
नोपादानात् । नारदेन “राजा तु धार्म्मिकान् सभ्या-
न्नियुञ्ज्यात् सुपरीक्षितान् । व्यवहारधुरां वोढुं ये शक्ताः
पुङ्गवा इव । धर्म्मशास्त्रेषु कुशलाः कुलीनाः सत्यवादिनः ।
समाः शत्रौ च मित्रे च नृपतेः स्युः सभासदः” इति ।
विचार्य्य श्रेणिभिः कार्य्यं कुलैर्यन्न विचारितम् । ग-
णेन श्रेणिविज्ञातं गणाज्ञातं नियुक्तकैः । कुलादिभ्यो-
ऽधिकाः सभ्यास्तेभ्योऽध्यक्षोऽधिकः कृतः । सर्वेषा-
मधिको राजा धर्म्यं यत्नेन निश्चितम् । उत्तमाधम-
मध्यानां विवादानां विचारणात् । उपर्य्युपरि बुद्धी-
नाञ्चरन्तीश्वरबुद्धयः” वर्णभेदोऽनादृतः ।
शुक्रनीतिपरिशिष्टेऽपि तथैवोक्तं यथा
“तद्वर्णजो भवेद्राजा योज्यस्तद्वर्णजः सदा । तद्वर्ण
एव गुणिनः प्रायशः सम्भवन्ति हि । व्यवहारविदः
प्राज्ञा वृत्तशीलगुणान्विताः । रिपौ मित्रे समा ये च
धर्म्मज्ञाः सत्यवादिनः । निरालसा जितक्रोधकामलोभाः
प्रियंवदाः । राज्ञा ते च नियोक्तव्याः स्युः सभ्याः सर्वासु
जातिषु” “राजा तु धार्म्मिकान् सभ्यान् नियुञ्ज्यात् सु-
परीक्षितान् । व्यवहारधुरां वोढुं ये शक्ताः पुङ्गवा
इव । लोकवेदज्ञधर्म्मज्ञाः सप्त पञ्च त्रयोऽपि वा ।
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा । श्रोतारो
वणिजस्तत्र कर्त्तव्याः सुविचक्षणाः । अनियुक्तो नियुक्तो
वा धर्म्मज्ञो वक्तुमर्हति । एकः शास्त्रमधीयानो विन्द्यान्न
कार्य्यनिश्चयम् । तस्मात् बह्वाश्रयः कार्य्यो विवादेषू-
त्तमो नृपैः । स ब्रूते तं स धर्म्मः स्यादेको वाध्यात्म-
वित्तमः । एकहित्मिषद्धीरं व्यवहारानुचिन्तनम् ।
कार्य्यं पृथक् पृथक् सभ्यै राज्ञा श्रोतृतरैः सह ।
अर्थिप्रत्यर्थिनो सभ्यान् लेखकप्रेक्षकांश्च यः । धर्म्मवाक्यै
रञ्जयति स सभास्तारतामियात् । नृपोऽधिकृतसभ्याश्च
स्मृतिगणकलेखकौ । हेमाग्न्यम्बु स्वं पुरुषः साधना-
ङ्गानि वै दश । एतद्दशाङ्गकरणं यस्यामध्यास्य पार्थिवः ।
न्यायान् पश्येत् कृतमतिः सा सभाऽध्वरसन्निभा” ।

सभापति पु० ६त० । सभायाः स्थापके नृपे “सभापतिश्च
नृपतिरेव “दुर्गमध्ये गृहं कुर्य्यादित्यादिना बृहस्पत्या-
दिभिः सभानिर्म्माणतद्व्यवहारेऽस्य सभ्योपवेशनादेश्च
तस्यैव विधानात्” वीरमि० ।

सभास्तार पु० सभां स्तृणाति स्तृ—अण् । १सभ्ये अमरः ।
“अर्थिप्रत्यर्थिनो सभ्यान् लेखकप्रेक्षकांश्च यः । धर्म्म-
वाक्यैरञ्जयति स सभास्तारतामियात्” शुक्रनीतिपरि०
उक्ते २सभ्यभेदे च । [कारके अमरः ।

सभिक पु० सभा द्यूतसभा आश्रयत्वेनास्त्यस्य ठन् । द्यूत-

सभीक पु० सभा द्यूतं प्रयोजनमस्य ईकन् । द्यूतकारे शब्दच०

सभोचित पु० सभा उचिता परिचिता यस्य । १पण्डिते
धनञ्जयः । २सभायोग्ये त्रि० । [२विज्ञे त्रि० जटा०

सभ्य पु० सभायां साधुः यत् । १सामाजिके २द्यूतकारे च

सम् अव्य० षो—बा० कमु । १सम्यगर्थे २प्रकर्षे ३सङ्गतौ ४शोभने
शब्दच० । ५समुच्चये हेमच० ।

सम त्रि० सम—अच् । १समाने तुल्ये २सर्वे अमरः ३साधौ
मेदि० । (योड़) ४युग्मे “समेऽङ्घ्रिते वर्गः” इति लीला०
समतयाख्यातेषु द्वितीयचतुर्थषष्ठादिषु ५राशिषु च ।
अतुल्येऽस्य सर्वनामता । गीतवाद्ययोरेककालभवे गाय-
कहस्तादिचालनरूपे ६तालभेदे न० ७शत्रुमित्रभिन्ने पक्षे
प्रकृत्या० अभेदे तृतीया । समेन याति समं यातीत्यर्थः ।

समक्ष अव्य० अक्ष्णः समीपम् अव्ययी० अच् । १चक्षुःसन्नि-
कर्षे तदस्यास्ति अच् । २प्रत्यक्षविषये त्रि० ।

समकोण त्रि० समः कोणो यस्य । रेखागणितोक्ते सम-
कोणयुक्त त्रिकोणादौ । क्षेत्रशब्दे २१६० पृ० १५अङ्क-
चिह्निते दृश्यम् ।

समकोल पु स्त्री० ६त० । सर्पे त्रिका० स्त्रियां ङीष् ।

समगन्धक पु० समास्तुल्यभागेन निवेशिता गन्धाः गन्धयुक्त-
द्रव्याणि यत्र कप् । कृत्रिमधूपभेदे शब्दमा० ।

समगन्धिक पु० समः सर्वदा तुल्यरूपः गन्धोऽस्त्यस्य ठन् ।

उशीरे (वेणारमूल) राजनि०। [१सकले अमरः २पूर्णे च

समग्र त्रि० समं सकलं यथा स्यात्तथा गृह्यते ग्रह-ड ।

समङ्गा स्त्री समज्यतेऽनया सम्+अन्ज-करणे घञ् टाप् ।
मञ्जिष्ठायाम् अमरः । [तुल्यदर्शके तत्त्वज्ञानिनि ।

समचित्त त्रि० समं सर्वत्र समभावं चित्तं यस्य । सर्वत्र

समज न०समजत्यत्र सम्+अज-आधारे अप् व्यभावः । १वने
मेदि० २समूहे ३पशूनां संघे ४मूर्खवृन्दे च अमरः ।

समज्ञा स्त्री समस्मिन् सर्वत्र ज्ञायतेऽनया ज्ञा-क । कीर्त्तौ
अमरः । [अमरः २कीर्त्तौ च रमानाथः ।

समज्या स्त्री सम्+अज-क्यप् न वीभावः । १सभायाम्

समञ्जस त्रि० सम्यक् अञ्ज औचित्यं यत्र अच् समा०। १उ-
चिते अमरः २युक्ते च । प्रा०स०। ३औचित्ये न०।४स-
माधाने त्रिका० ५अभ्यस्ते अमरः ।

समण्ठ पु० गर्ज्जीरे हारा० । [गुडत्वचे राजनि०।

समत्रय न० समं त्रयं यत्र। समभागयुते हरीतकीनागर-

समदर्शिन् त्रि० समस्मिन् सर्वत्र ब्रह्मभावेनाऽभिन्नतया
पश्यति दृश-णिनि । सर्वत्र समदर्शके तत्त्वज्ञानिनि ।
"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव
श्वपाके च पण्डिताः समदर्शिनः" इति गीता ।

समदृष्टि स्त्री कर्म० । १सर्वत्र तुल्यदर्शने । "दुःखे सुखे च
विप्रेन्द्र । या दृष्टिर्वर्त्तते सदा । तथा शत्रौ च मित्रे
च समदृष्टिश्च या स्मृता" पद्मपु०क्रिया०१६अ० । ६ब० ।
२समदर्शिनि त्रि० ।

समधिक त्रि० सम्यक् अधिकः प्रा० । अत्यन्ताधिके अमरः ।

समनियत त्रि० समेन नियतः । व्यापकत्वे सति व्याप्य त्व-
युते गदा० । समव्याप्तादयोऽप्यत्र ।

समन्त पु०सम्यक् अन्तः, स यत्र वा ।१सम्यगन्ते २सीमायाञ्च

समन्ततस् अव्य० समन्त+तसिल् । सर्वत्र व्याप्तौ अमरः ।

समन्तदुग्धा स्त्री समन्ततो दुग्धमस्याः । स्नुहीवृक्षे अमरः ।

समन्तपञ्चक न० समन्तात् पञ्चकं ह्रदपञ्चकं यत्र । कुरुक्षेत्र
स्थे तीर्थभेदे "त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्त्रियां
प्रभुः । समन्तपञ्चके पञ्च चकार रौधिरान् ह्रदान् । स
तेषु तर्पयामास भृगून् भृगुकुलोद्वहः" भा०व०११७अ०।
"तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च मचक्रुकस्य च ।
एतत् कुरुक्षेत्र समन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते"
भा०व० ८३अ० ।

समन्तभद्र पु० समन्तात् भद्रमस्य । बुद्धे अमरः ।

समन्तभुज् पु०समन्तात् भुङ्क्ते भुज-क्विप् । वह्नौ त्रिका०

समन्तात् अव्य० समन्त+आति । १समन्ततइत्यर्थे शब्दमा० ।
२सर्वत्रव्याप्तौ च ।

समन्वित त्रि० सम+अनु+इण-क्त । सङ्गते ।

समपद न० समं पद यस्मिन् । धन्विनां समपदनिवेशनपू-
र्वके "स्थानानि धन्विनां पञ्च" इत्युपक्रम्य "अन्वर्थं
स्यात् समपदमित्युक्ते अवस्थानभेदे अमरः । २रति-
बन्धभेदे पु० "योषित्पादौ हृदि स्थाप्य कराभ्यां पीड़येत्
स्तनौ । यथेष्टं ताड़येत् योनिं बन्धः समपदः स्मृतः"
रतिमञ्ज० ।

समभिव्याहार पु० सम्+अभि+वि+आ+हृ-घञ् । १सा-
हित्ये २पूर्वापरोभयेः ३शेषशेषिवाचकयोः सहोच्चारणे च
मीमांसकाः । [२सहोच्चरिते । ३अव्यवहिते च ।

समभिव्याहृत त्रि० सम्+अभि+वि+आ+हृ-क्त । १सहिते

समभिहार पु० सम्+अभि+हृ-घञ् । १पौनःपुन्ये क्रिया
सातत्ये २भृशार्थे मेदि० "क्रियासमभिहारेण विरा-
ध्यन्तं सहेत कः" माघः ।

समम् अव्य० सम-अम् । १साहित्ये अमरः । २एकदेशार्थे
"सममेव समाक्रान्तं द्वयं द्विरदगामिना" रघुः

समय पु० सम+इण-अच् । १काले २शपथे ३आचारे
४सिद्धान्ते ५अङ्गीकारे च अमरः । ६क्रियाकारके
७निर्देशे ८सङ्केते ९भाषायां मेदि० १०सम्पदि ११नि-
यमे १२अवसरे हेमच० १३कालविधाने शब्दच० ।
१४नियमबन्धे अस्य शब्दस्येदमभिधेयमित्यभिधानाभिधेय-
नियमबन्धे वात्स्या० १५शास्त्रे च ।

समया अव्य० सम+इण-आ । १निकषे २मध्ये च अमरः ।

समयाकार पु० समयस्य सङ्केतस्याकारः । सङ्केते त्रिका० ।

समयाध्युषित न० समयः अध्युषितो यत्र । सूर्य्यतारा-
रहितकाले "तथा प्रभातसमये नष्टे नक्षत्रमण्डले ।
रविर्यावन्न दृश्येत समयाध्युषितञ्च तत्" कर्म०काल्या० ।
"उदितेऽनुदिते चैव समयाध्युषिते तथा" इति मनुः ।

समयाशुद्धि स्त्री ६त०। कालाशुद्धौ कालाशुद्धिशब्दे दृश्यम्

समर पु० न० सम्+ऋ-आधारे अप् । युद्धे अमरः ।

समरभ रतिबन्धभेदे "जङ्घाद्वयसंयुक्तं कृत्वा योषित्पद-
द्वयम् । स्तनौ धृत्वा रमेत् कामी बन्धः समरभः स्मृतः"
रतिमञ्ज० ।

समरमूर्द्धन् पु० ६त० । समराग्रे ।

समर्चन न० सम्यक् अर्च्चनं प्रा०स० । सम्यक्पूजने ।

समर्ण त्रि० सम्+अर्द-क्त । सम्यक्पीड़िते ।

समर्थ त्रि० सम्+अर्थ-अच् । १शक्ते २हिते च अमरः । सम्यगर्थः प्रा० स० । ३प्रशस्ताभीष्टे पु० । सङ्गतोऽर्थो यस्य प्रा०ब० । "समर्थः पदविधिः" पा० परिभाषिते सङ्गतार्थे समासादौ समासयोग्ये द्वयम् ।

समर्थन न० सम्+अर्थ-ल्युट् । इदमित्थमेवेति निश्चयहेतूपन्यासेन निश्चायकव्यापारभेदे अमरः । युच् । तत्र, अप्र- क्येऽध्यवसाये च स्त्री । [तरि देवादौ अमरः ।

समर्द्धक त्रि० समर्द्धयति सम्+ऋध-ण्वुल् । इष्टफलदा-

समर्य्याद त्रि० सह मर्य्यादया सहस्य सः । १सीमायुते २समीपे पु० मेदि० ।

समल न० सम्यक् मलम् । १विष्ठायां शब्दच० । सह मलेन सहस्य सः । २कलुषे त्रि० त्रिका० । [वतरणसोपाने ।

समवतार पु० समवतीर्य्यतेऽनेन सम्+अव+तॄ-घञ् । जला-

समवर्त्तिन् पु० समं वर्त्तते वृत-णिनि । १यमे धर्मराजे अमरः । २सर्वत्र समभावेन वर्त्तिनि त्रि० ।

समवकार पु० सम्+अव+कृ-आधारे घञ् । नाटकभेदे सा०द० उक्तो यथा

"वृत्तं समवकारे तु ख्यातं देवासुराश्रयम् । सन्धयो निर्विमर्शास्तु त्रयोऽङ्कास्तत्र चादिमे । सन्धी द्वावन्त्ययोस्तद्वदेक एको भवेत् पुनः । नायका द्वादशोदात्ताः प्रख्याता देवदानवाः । फलं पृथक् पृथक् तेषां वीरमुख्योऽखिलो रसः । वृत्तयो मन्दकैशिक्यो नात्र बिन्दुप्रवेशकौ । वीथ्यङ्गानि च तत्र स्युर्यथालाभं त्रयोदश । गायत्र्युष्णिङ्मुखान्यत्र छन्दांसि विविधानि च । त्रिशृङ्गारस्त्रिकपटः कार्य्यश्चायं त्रिविद्रवः । वस्तु द्वादशनाडीभिर्निष्पाद्यं प्रथमाङ्कगम् । द्वितीयेऽङ्के चतसृभिर्द्वाभ्यामङ्के तृतीयके" । नाडिका घटिकाद्वयमुच्यते । बिन्दुप्रवेशकौ च नाटकोक्तावपि नेह विधातव्यौ । तत्र धर्मार्थकामैस्त्रिविधः शृङ्गारः कपटः पुनः । स्वाभाविकः कृत्रिमश्च दैवजो विद्रवः पुनः । अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः" । तत्र शास्त्राविरोधेन कृतो धर्मशृङ्गारः अर्थलाभार्थकल्पितः अर्थशृङ्गारः । प्रहसनशृङ्गारः कामशृङ्गारः । तत्र कामशृङ्गारः प्रथमाङ्क एव । अन्ययोस्तु न नियम इत्याहुः । चेतनाचेतना गजादयः । समवकीर्य्यन्ते बहवोऽर्था अस्मिन्निति समवकारः । यथा समुद्रमन्थनम्" ।

समवाय पु० सम्+अव+अय-अच् । १समूहे अमरः २मेलने न्यायोक्ते नित्यद्रव्यादिषु आत्मादीनां ३संबन्धभेदे च "घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः । तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः" भाषा० "समवायं दर्शयति । घटादीनामिति अवयवावयविनोः जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः, समवायत्वं नित्यसम्बन्धत्वं तत्र प्रमाणन्तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वात् इत्यनुमाने संयोगादिबाधात् समवायसिद्धिः । न च स्वरूपसम्बन्धेन सिद्धसाधनम् अर्थान्तरं वा, अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवात् लाघवादेकसमवायसिद्धिः । न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्गः तत्र रूपसमवायसत्त्वेऽपि रूपाभावात् । न चैवम् अभावस्य वैशिष्ट्यं सम्बन्धान्तरं सिध्येदिति वाच्यं तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात् घटाभावसम्बन्धस्य तत्र सत्त्वात् तस्य नित्यत्वात् अन्यथा देशान्तरेऽपि तत्प्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्त्वात्, मम तु मते घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः । वैशिष्ट्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तवैव गौरवम् इत्थञ्च तत्तत्कालीनतत्तद्भूतलादिकं तत्तदभावानां सम्बन्धः" । अयुतसिद्धयोः सम्बन्धः स इति वैशेषिकाः स च सम्बन्धो नाना नित्यश्चेति नव्यनैयायिकाः प्राभाकराश्चाहुः । समवायश्च प्रत्यक्षः "प्रत्यक्षं समवायस्य विशेषणतया भवेत्" भाषा० । अतीन्द्रियोऽनुमेयश्चेति वैशेषिकाः, स्वरूपस्यैव सम्बन्धत्वोपपत्तेः समवायो न पदार्थान्तरमिति भाट्टाः ।

समवायिजनक न० कारणभेदे "यत् समवेतं कार्य्यं भवति ज्ञेयं तु समवायिजनकं तत्" "समवायिकारणत्वं द्रव्यस्यैव विज्ञेयम्" भाषा० । इदमेव उपादानकारणमिति सांख्यावेदान्तिनश्चाहुः ।

समवायिन् त्रि०समवायोऽस्त्यस्य । समवायसम्बन्धानुयोगिनि यथा घटादीनां कपालादि गुणक्रिययोर्द्रव्यादि च ।

समवेत त्रि० सम्+अव+इण-क्त । १मिलिते २समूहान्विते न्यायोक्तेन समवायसम्बन्धेन ३स्थिते च ।

समशनीय पु०सम्यगशनाय हितं छ । विवाहोत्तरं दम्पत्योः सम्यगशनाय विहिते स्थालीपाके" तद्विधानादि सं० त० गोभिलोक्तं यथा "श्वोभूते वा समशनीयं स्थालीपाकं कुर्वीत" "यदि विवाहे यज्ञादिना महानिशा भूता नदा तत्परदिने सम्यगशनार्थं क्रियते इति सम्यगशनीयं स्थालीपाकं कुर्वीत" रघु० । तद्धोमविधानादि तत्र दृश्यम् ।

समष्टि स्त्री सम्+अश–व्याप्तौ क्तिन् । १सम्यग्व्याप्तौ २समस्ततायाञ्च । कर्त्तरि क्तिच् । ३संघीभूते समस्ते पदार्थे वेदान्तसा० "समष्टिरीशः सर्वेषां स्वात्मतादात्म्यवेदनात् । तदभावात्तदन्ये तु ज्ञायन्ते व्यष्टिसंज्ञया" पञ्चद० ।

समष्ठिल, ष्ठील पु० समं तिष्ठति स्था–इलच् पृषो० षत्वं वा दीर्घः । (गुँड़िया) शाके अमरः ।

समसन न० सम्+अस–ल्युट् । १समासे २संक्षेपे अमरः ।

समसूत्रपातन्याय पु० न्यायभेदे समतया सूत्रस्य पातने यस्य तल्लग्नत्वमेवमुपर्य्यधःस्थितानां पदार्थानां तत्सूत्रसंलग्नैकदेशकालावच्छेदेन सहावस्थानं येन ज्ञाप्यते तादृशे न्याये "परः सन्निकर्षेण उपर्य्यधोभावापन्नसमसूत्रपातन्यायेन राश्योर्बीयवच्छेदेन सहावस्थानरूप." ति०त० रघु० ।

समस्त त्रि० सम्+अस–क्त । १संक्षिप्ते २सकले अमरः । ३व्याकरणोक्ते कृतसमासे शब्दभेदे च ।

समस्थ त्रि० समं तिष्ठति स्था–क । समभावेन तुल्यतया स्थिते

समस्थली स्त्री कर्म० । अन्तर्वेदिदेशे हेमच० ।

समस्या स्त्री समस्यते संक्षिप्यतेऽनया सम्+अस–करणे क्यप् । संक्षेपेण उक्तस्य श्लोकपादादेः परकृतेन स्वकृतेन वा अव येषेण भागान्तरेण संघटनार्थं कृते प्रश्ने अमरः ।

समा स्त्री समयति विक्लवयति भावान् सम–अच्–टाप् । वत्सरे अमरकृतास्य नित्यबहुवचनान्तताक्तोक्ता पाणिनिना तु "समांसमां विजायते" इति सूत्रे एकवचनान्तता निर्दिष्टा ।

समांसमीना स्त्री समां समां विजायते प्रसूते ख नि० अत्र समांसमामित्यत्र कालाधारे द्वितीया । प्रतिवर्षं प्रसूतायां गवि अमरः ।

समाकर्षिन् पु० सम्+आ+कृष–णिनि । १अतिदूरगामिनि गन्धे अमर. । २सम्यगाकर्षणकर्त्तरि त्रि० स्त्रियां ङीप् ।

समाख्या स्त्री समाख्यायतेऽनया सम्+आ+ख्या–अङ् । १कीर्त्तौ अमरः २संज्ञायाञ्च । ३योगेनार्थबोधने "स्थानं क्रमो योगबलं समाख्या" शास्त्रदीपिका ।

समाघात पु० समाहन्यतेऽत्र सम्+आ+हन–आधारे घञ् । १युद्धे अमरः । भावे घञ् । २सम्यगाघाते च ।

समाज पु० सम्+अज–घञ् न वीभावः । पशुभिन्नानां १समूहे अमरः । २सभायां हेमच० ३हस्तिनि नानार्थकोषः ।

समादान न० सम्+आ+दा–भावे ल्युट् । १सम्यगादाने कर्मणि ल्युट् । २बौद्धानां निजकर्मणि मेदि० ।

समाधा स्त्री सम्+आ+धा–अङ् । १निष्पत्तौ २विवादभञ्जने ३पूर्वपक्षस्य सम्यगुत्तरात्तुगुणविशङ्काव्याहतकोटिना सम्यगर्थावधारणे च । ल्युट् । समाधानमप्यत्र न० । तत्र ध्येयवस्तुनि चित्तस्य निरन्तरस्थापनरूपे समाधौ च ।

समाधि पु० सम्+आ+धा–कि । १समाधायां ध्येयवस्तुनि एकाग्रतया मनसःस्थापनरूपे २ध्यानभेदे ३वचनाभावे ४नियमे च अमरः । ध्यानभेदश्च समाधिः यथोक्तं पात० सू० "तत्र प्रत्ययैकतानता ध्यानम्" सू० "तस्मिन् देशे ध्येयालम्बनस्य प्रत्ययस्यैकतानता सदृशप्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम्" भा० "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" सू० "ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात्तदा समाधिरित्युच्यते" भा० "ध्यानसाध्यं समाधिं लक्षयितुं व्याचष्टे ध्यानमेवेति । ध्येयाकारनिर्भासमिति ध्येयाकारस्य निर्भासो न ध्यानाकारस्येति अतएवाह शून्यमिति । ननु शून्यं चेत् कथं ध्येयप्रकाशक इत्यत आह इवेति । अत्रैव हेतुमाह ध्येयस्वभावावेशादिति । अत्रापि पुराणम् "तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् । मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते" इति । ध्येयात् ध्यानस्य भेदकल्पना तद्धीनमित्यर्थः" विवर० ।

एकाग्रतात्मकसमाधिलक्षणं पुराणान्तरोक्तं यथा "नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम् । तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम् । अहंब्रह्मेत्यवस्थानं समाधिरिति गीयते" गारुडे ४४अ० । "द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः । तुष्ये त संयतो युक्तः समाधिः सोऽभिधीयते । ध्येयमेव हि सर्वत्र ध्याता तन्मयतां मतः । पश्यति द्वैतरहितं समाधिः सोऽभिधीयते" २४०अ० । "इमं गुणसमाहारमनात्मत्वेन पश्यतः । अन्तःशीतलता यस्य समाधिरिति कथ्यते" योगवाशिष्ठे उपशमप्रक० । ५अर्थालङ्कारभेदे अलङ्कारशब्दे ४०६ पृ० दृश्यम । ६इन्द्रियनिरोधे शब्दर० । ७काव्यगुणभेदे मेदि० "श्लेषः प्रसादः समता माधुर्यं सुकुमारता । अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥ इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः । एषां विपर्य्ययः प्रायो दृश्यते गौडवर्त्मनि" काव्याद० तद्योरन्तर्भावः सा०द० उक्तो यथा "श्लेषः समाधिरौदार्य्यं प्रसाद इति ये पुनः । गुणाश्चिरन्तनैरुक्ता ओजस्यन्तर्भवन्ति ते" । समाधिरारोहावरोहक्रमरूपः ।

आरोहे षट्कर्णः। अवरोहोऽपकर्णस्तयोः क्रमो वेद-स्थानविहो विन्यासः। यथा "षड्जं जेत्यादि"। अत्र पादत्रये क्रमेण मन्त्रस्य गाढ़ता। चतुर्थपादे तापकर्णः"।

समाघ्रात त्रि॰ सम्+आ+घ्रा–क्त। १सम्यग्घ्राते २सम्यक्चुम्बिते च।

समान त्रि॰ सम्मानयति सम्+अन–अच्। १तुल्ये २साधौ ३एकस्मिन्नित्यर्थे "समानतन्त्रसिद्धः" गौत॰ "यत्समानाधिकरणे" इति चिन्तामणिः। सम्+अन-णिच्। भुक्तान्नादेः समीकरणं नाभिदेशस्थे प्राणादिपञ्चकान्तर्गते ४वायुभेदे पु॰

समानविभक्तिक त्रि॰ समाना विभक्तिर्यस्मात् कप्। स्वप्रकृतिविभक्तिसजातीयविभक्तिके पदे सामान्यस्य प्रथमान्त्वादिना। तेन वेदाः प्रमाणमित्यादौ समानविभक्तिकत्वम्।

समानविषयक त्रि॰ समानो विषयो यस्य कप्। तुल्यरूप-विशेष्यविशेषणताशालिनि ज्ञाने स च समानमिथ्यात्वनिष्ठ-प्रकारतावच्छेद्यविशेष्यताशाली बोधः समानाकारकोऽप्युच्यते।

समानाधिकरण त्रि॰ समानमेकमधिकरणं यस्य। १अधिकरणवृत्तिके स्वाधिकरणवृत्तिमति पदार्थे। २विभिन्नविभक्तिराहित्ये सति अभेदेनैकार्थबोधजनकत्वयुते पदे च लटः शतृशानचावप्रथमासमानाधिकरणे" पा॰ घटोऽपि प्रथमासामानाधिकरण्ये विभिन्नविभक्तिराहित्यादुबोध्यम्। "समानाधिकरणस्तत्पुरुषः कर्मधारयः" पा॰।

समानाशौच न॰ कर्म॰। अवहितकालाभ्यां तुल्ये अशौचे यथा सपिण्डजननाशौचतुल्यं सपिण्डान्तरजननाशौचम् एवं त्रिरात्रादूर्ध्वं व्याप्त्यसहितसपिण्डमरणाशौचतुल्यं तथाविधसपिण्डान्तरमरणाशौचं, जननमरणाशौचयोर्न तुल्यता नापि स्नानापनेयाङ्गास्पृश्यत्वयुक्तपुत्रजननाशौचेन सपिण्डजननाशौचस्य तुल्यता न वा यावदशौचाद्या-दशदिनाश्रितायुक्तमहागुरुमरणाशौचस्य सपिण्डमरणाशौचस्य तुल्यता।

समानोदक पु॰ समानमेकं तर्पणादौ देयमुदकं यस्य। "समानोदकभावस्तु निवर्त्तेता चतुर्दशात्" इत्युक्ते एकादशादिचतुर्दशपुरुषपर्य्यन्ते ज्ञातिभेदे सपिण्डशब्दे दृश्यम्।

समानोदर्य्य पु॰ समाने उदरे भवः यत् वा न सादेशः। १एकोदरजभ्रात्रादौ २भगिन्यां स्त्री अमरः। [सि॰कौ॰।

समाप पु॰ सम्यक् आपोऽत्र अच् समा॰ नि॰। देवयजनस्थाने

समापन न॰ सम्+आप-ल्युट्। १समाप्तौ परमकाल-सम्बन्धे २परिच्छेदे ३वधे च मेदि॰ ४समाधाने त्रिका॰। ५लब्ध धरणिः।

समापन्न त्रि॰ सम्+आ–पद्–क्त। १समाप्ते २प्राप्ते ३क्लिष्टे ४वधे च त्रिका॰। भावे क्त। ५समाप्तौ न॰।

समाप्त त्रि॰ सम्+आप–क्त। १अवसानप्राप्ते २सम्यक्प्राप्ते च

समाप्तपुनरात्तता स्त्री समाप्ते वाक्यसमाप्तौ पुनरात्तता ग्रहणम्। क्रियान्वयेन निवृत्ताकाङ्क्षस्य विशेष्यवाचक-पदस्य विशेषणान्तरान्वयार्थं पुनरुपादानरूपे काव्यदोषभेदे दोषशब्दे ३७६४पृ॰ दृश्यम्।

समाप्ताल पु॰ समाप्नाय अलति पर्य्याप्नोति अल-अच्। पत्यौ संक्षिप्तसा॰। [२प्राप्तौ शब्दच॰।

समाप्ति स्त्री सम्+आप-क्तिन्। १अवसाने २समर्थने मेदि॰।

समायोग पु॰ सम्+आ+युज–घञ्। १संयोगसमवायरूपा-दिसम्बन्धे "रूपादिसमायोगादिति" पुराणम्। २प्रयोजने मेदि॰।

समालम्बिन् पु॰ समालम्बते सम्+आ+लवि-णिनि। १भूतृणे राजनि॰। २समालम्बनकर्त्तरि त्रि॰।

समालम्भ पु॰ सम्+आ+लभ-घञ् मुम् च। कुङ्कुमादिना गात्रलेपने अमरः। ल्युट्। तत्रैवार्थे न॰।

समावर्त्तन न॰ समावर्त्तते गुरुकुलादनेन सम्+आ+वृत–करणे ल्युट्। वेदाध्ययनानन्तरं गार्हस्थ्याय गुरुकुलादागमनहेतुके संस्कारभेदे तद्विधिः संस्कारतत्त्वे गोभिलोक्तो दृश्यः।

समाविष्ट त्रि॰ सम्+आ+विश–क्त। १युक्ते २मनोऽभिनिवेशयुते अभीष्टकर्त्तव्यकर्मणि चित्तैकाग्र्यविशेषयुक्ते च।

समावृत्त पु॰ सम्+आ+वृत–क्त। कृतसमावर्त्तनसंस्कारे "अतःपरं समावृत्तः कुर्य्याद्दारपरिग्रहम्" याज्ञ॰।

समावेश पु॰ सम्+आ+विश–घञ्। १बहूनामर्थानामेकत्र वाक्यादौ व्यवस्थापने २कर्त्तव्येऽभिनिवेशे च।

समावेशित त्रि॰ सम्+आ+विश–णिच्–क्त। कृतसमावेशने

समास पु॰ सम्+अस–घञ्। १संक्षेपे २समर्थने मेदि॰। ३समाहारे ४व्याकरणोक्ते द्व्यादिपदानामेकपदतासम्पादके पदसाधुतार्थके ५संस्कारभेदे च यथा "समर्थः पदविधिः" पा॰ "समर्थः संसृष्टार्थः सङ्गतार्थ इति यावत्। सामर्थ्यञ्च द्विविधम् व्यपेक्षारूपमेकार्थीभावश्च। तत्र स्वार्थपर्य्यवसायिपदानामाकाङ्क्षादिवशात् यः परस्परं सम्बन्धः सा व्यपेक्षा। राज्ञः पुरुषइत्यादौ वाक्ये सत्यामाकाङ्क्षायां यो यो यस्मिन् समीहितो योग्यश्च स तेन तेन सम्बध्यते यथा राज्ञः पुरुषोऽश्वश्च राज्ञो देवदत्तस्य च पुरुषः अश्वस्य राज्ञोऽश्वो धनञ्चेत्यादि। वृत्तौ तु नैवम् वृत्तीना·

नैकार्थीभावात्। एकार्थीभावश्च विशेष्यविशेषणभावापन्नार्थैकोपस्थितिजनकत्वम्। तथा च राजपुरुषादिशब्देन विशिष्टैकार्थबोधकतया न तदेकदेशे ऋद्धादेरन्वयः पुरुषांशे विशेषणतयोपस्थितस्य नाथादिसम्बन्धिता राजादीनाम् जनितान्वयाच्च निराकाङ्क्षतया न देवदत्तादेः स्वामितया प्रकृतादावन्वय इति द्रष्टव्यम्। देवदत्तस्य गुरुकुलमित्यादौ देवदत्तादेस्तु प्रधानीभूतकुलादिनैवान्वयः सम्बन्धस्तूपस्थितगुरुद्वारक एव षष्ठ्यर्थः यथोक्तं हरिणा "समुदायेन सम्बन्धो येषां गुरुकुलादिना। संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह" इति। यद्वा सम्बन्धिशब्दार्थस्य पदार्थैकदेशत्वेऽपि भवत्येव केषाञ्चित् सम्बन्धान्वयः तदुक्तं तेनैव "सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते। वाक्यवत् सा व्यपेक्षापि वृत्तावपि न हीयते"। अतएव वार्त्तिककृता "सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति वक्तव्यमिति" सामान्यतो वृत्तिमतो विशेषणस्य स्वातन्त्र्येण प्रयोगाभावमभिधाय "अगुरुकुलपुत्रादीनां वक्तव्यम्" इत्यनेन गुरुकुलगुरुपुत्रादीनां विशेषणत्वेऽपि पृथक्प्रयोगाय नञा पर्युदासः कृतः। समानाधिकरणविशेषणस्य तु "समानाधिकरणमसमर्थवद्भवतीत्यनेन सर्वथा स्वातन्त्र्येण सामर्थ्याभावात् प्रयोगाभावो भङ्ग्याऽभिहितः। एतन्मूलकमेव प्राचां गाथा "सापेक्षे प्रत्ययो न स्यात् समासो वा कथञ्चन। सापेक्षं तद्विजानीयादसमस्तविशेषणम्। प्रतियोगिपदादन्यत् यदन्यत् कारकादपि। वृत्तिशब्दैकदेशस्य सम्बन्धस्तेन नेष्यते" इति। अयन्तु विशेषः प्रधानस्य सापेक्षत्वेऽपि समास इत्युक्तेः प्रधानस्य वृत्त्युपस्थाप्यविशेष्यस्य राजपुरुषादेः सुन्दरादिविशेषणापेक्षायामपि समासः। समासे चावयवशक्त्यैव तत्तदर्थपदार्थोपस्थित्या विशेष्यविशेषणभावाद्यभ्युपगमे सापेक्षत्वादौ समासाभावादिकं वाचनिकं कल्प्यम् तथाप्यधिककल्पना स्यादतः समुदायशक्तिकल्पनम् यथोक्तं हरिणा "बहूनां वृत्तिधर्माणां वचनैरेव साधने। स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः। चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम्। कर्त्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितमिति"। तथाहि द्वन्द्वादिविग्रहवाक्ये चकारादि प्रयुज्यते समासे तु न तत्र वचनैरेव तन्निषेधः कल्पनीयः समुदायशक्तिपक्षे तु चकारादीनामप्रयोग इत्युक्तन्यायादेव सिद्धम्। नानार्थयोरभेदान्वयः क्लृप्तः स च राजपदादुपस्थापितराजादेः पुरुषे स्वस्वामिभावसम्बन्धेनान्वये परित्यक्तः स्यात्। सम्बन्धलक्षणायान्तु किमपराद्धम् विशिष्टलक्षणया। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमिति नियमश्च क्लृप्तः स च प्राप्तानन्दादौ भज्येत आनन्दकर्त्तृकप्राप्तिकर्मत्वार्थबोधस्योभयसम्मतत्वेन कर्त्तृविहितक्तान्तार्थस्य कर्त्तुर्विशेष्यतौचित्येन प्रकृते तद्वैपरीत्यात् आनन्दसम्बन्ध्यादिलक्षणास्वीकारे समुदायशक्तिपक्ष एव प्रवेशः। तथा प्राप्त आनन्दो यमिति विग्रहे आनन्दादौ अत्यन्तादिविशेषणयोगवत् समासे तद्वारणाय वृत्तस्य न विशेषणयोग इति वाचनिकत्वकल्पनाऽधिका एतन्मते न्यायसिद्धा इत्यादि बहुवक्तव्यापत्तितः समुदाये शक्तिरित्यन्यत्र विस्तरः। वार्त्तिककृता तु अवश्यं कस्यचित् नञ्समासस्यासमर्थसमासस्य गमकस्य साधुत्वं वक्तव्यमित्युक्तत्वात् असूर्यम्पश्येत्यादौ असमर्थेन नञा वाणेन हतमारीचो राम इत्यादौ वाणादेर्विग्रहार्थस्य गमकत्वे सापेक्षत्वेऽपि तदर्थबोधकतयैव समास इति द्रष्टव्यम्" प्रकृतसरला

"पदसम्बन्धो यो विधिः स समर्थाश्रितो बोध्यः" सि॰कौ॰ "पदस्य पदयोः पदानां वा विधिः पदविधिरिति वचनविशेषस्याविवक्षितत्वं द्योतयन्नाह पदसम्बन्धीति। तत्र पदेति किम् वर्णाश्रये कार्य्येऽसमर्थेऽपि यथा स्यात् तथा च तिष्ठतु दधि आनयान्नमित्यत्र दध्यानयेति पदयोः सामर्थ्याभावेऽपि वर्णाश्रयं यणादिकं भवत्येव। सूत्रे समर्थपदं स्वाश्रयिकमिति द्योतयन्नाह समर्थाश्रित इति समर्थेति किं पश्यति कृष्णं श्रितो राममित्यादौ समासो मा भूत् वस्त्रं कृष्णस्य अपत्यं देवदत्तस्येत्यादौ मा भूत् कृष्णशब्दादपत्यार्थकतद्धितः। इयञ्च परिभाषा समासकृत्तद्धितादिवृत्तिमात्रे प्रवर्त्तते इति बोध्यम्" प्रकृतसरला।

स च समासः षड्विधः।

"सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा। सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः" (सुपां सुपा) पदद्वयमपि सुबन्तम्। राजपुरुष इत्यादिः। (सुपां तिङा)। पूर्वपदं सुबन्तमुत्तरं तिङन्तम्। पर्य्यभूषयत्। "गतिमतोदात्तवता तिङापि समासः" इति वार्त्तिकात् समासः। (सुपां नाम्ना) कुम्भकार इत्यादि। "उपपदमतिङि"ति समासः। स च "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेरिति" परिभाषया भवति सुबुत्पत्तेः प्राक्। अतोत्तरपदे सुबुत्पत्तेः प्रागि-

-न्तर्थः। अन्यथा चर्मक्रीतीत्यादौ ङीपानुपपत्तेः।
(सुपां धातुना) उत्तरपदं धातुमात्रं न तिङन्तम्।
कटप्रूः आयतस्तूः। "क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजु-
श्रीणां दीर्घश्चेति" वार्त्तिकात् समासः। "तिङां तिङा"
पिबतखादता। पचतभृज्जतेत्यादि। "आख्यातमाख्या-
तेन क्रियासातत्ये" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्
समासः "तिङां सुबन्तेन" पूर्वपदं तिङन्तमुत्तरं सुबन्तम्।
जहिस्तम्बः। "जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्त्तार-
ञ्चाभिदधातीति" मयूरव्यंसकाद्यन्तर्गणसूत्रात् समासः।
अयं षड्विधोऽपि समासः "सह सुपा" इत्यत्र योगवि-
भागेन भाष्ये व्युत्पादितः स्पष्टः शब्दकौस्तुभादौ। अयं
भाष्यादिसिद्धतद्भेदं व्युत्पाद्य प्राचीनवैयाकरणोक्तविभाग-
स्याव्याप्त्यादिभिस्तल्लक्षणस्य प्रायिकत्वं दर्शयति"।
"समासस्तु चतुर्द्धेति प्रायोवादस्तथाऽपरः। योऽयं पूर्व-
पदार्थादिप्राधान्यविषयः स च। भीतपूर्व्याद् योऽपि
रेखागवयादिवदास्थितः"। चतुर्धा अव्ययीभावतत्पुरुष-
द्वन्द्वबहुव्रीहिभेदात्। अयं प्रायोवादः। भूतपूर्वः
इत्भूः अयतस्तूः वागर्थाविवेत्याद्यसंग्रहात्। तथा पूर्व-
पदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः
सर्वपदार्थप्रधानो द्वन्द्वः। अन्यपदार्थप्रधानो बहुव्रीहि-
रित्यादि लक्षणमपि प्रायिकम्। उन्मत्तगङ्गं सूपप्रति
अर्द्धपिप्पली द्वित्राः कुशपलाशमित्यादौ परस्परव्यभि-
चारात्। तथाहि उन्मत्तगङ्गमित्यव्ययीभावे पूर्वपदार्थ-
प्रधान्याद्बहुव्रीहिलक्षणातिव्याप्तिरव्ययीभावलक्षणाव्या-
प्तिश्च। "अन्यपदार्थे च संज्ञायामिति" पा० समासः।
सूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात् तत्पुरुषलक्ष-
णातिव्याप्तिरव्ययीभावाव्याप्तिश्च। "सुपः प्रतिना मा-
त्रार्थे" पा० समासः। अर्द्धपिप्पलीति तत्पुरुषे पूर्व-
पदार्थप्राधान्यसत्त्वादव्ययीभावातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च
"अर्द्धं नपुंसकमिति" पा० समासः। एवं पूर्वकाय
इत्यादौ द्रष्टव्यम्। द्वित्रा इति बहुव्रीहावुभयपदार्थ-
प्राधान्यात् द्वन्द्वातिव्याप्तिः बहुव्रीह्यव्याप्तिश्च। शयकुशप-
लाशमित्यादिद्वन्द्वे समाहाराख्यपदार्थप्राधान्याद्बहुव्रीह्य-
तिव्याप्तिर्द्वन्द्वाव्याप्तिश्च स्यादिति भावः। सिद्धान्ते त्वव्ययी-
भावाधिकारपठितत्वमव्ययीभावत्वमित्यादि द्रष्टव्यम्।
अनभ्याशवेलामित्याह भीतपूर्व्यादित्यादि। रेखागवया-
दिनिष्ठशक्त्यादेरिवासङ्गपञ्चसप्तत्ववदेतेषामपि न समास-
लक्षणम्। बोधकता तु तद्वदेव स्यादिति भावः" वैया०।

शब्दशक्तिप्रकाशिकायाम् अन्यथा समासलक्षणादिकमुक्तं
यथा "यादृशस्य महावाक्यस्यान्त्यादिर्निजार्थके। यादृ-
शार्थस्य धीहेतुः स समासस्तदर्थकः"। "यादृशमहावाक्यो-
त्तरस्वतन्त्रादिः स्वार्थस्य यादृशार्थावच्छिन्नविषयताशालि-
बोधे हेतुस्तादृशं तद्वाक्यं तथाविधार्थे समासः। पाच-
कादिकन्तु पाककर्त्राद्यर्थकं वाक्यमपि स्वघटकानेकनामक-
र्थतादृशार्थकत्वविरहान्न महावाक्यं प्रकृत्यर्थमात्रावच्छि-
न्नप्रत्ययार्थस्यान्वयबोधं प्रत्ययोग्यत्वं वा प्रकृते वाक्यस्य
महत्त्वं वाच्यं तेन उपकुम्भादौ नाव्याप्तिर्न वा नील-
घटत्वमित्यादौ नीलघटत्वादिभागेऽतिप्रसङ्गः। क्षीर-
पायीत्यादिकन्तु प्रकृत्यर्थावच्छिन्नतदर्थस्यान्वयबोध समर्थो-
ऽपि न प्रकृत्यर्थमात्रावच्छिन्नस्य ततः पानशीलसामान्य-
स्याप्रत्ययात्। राजन्येव पुरुषभावः प्रतीयते न तु राज-
पुरुषस्य भावः तद्धितानां प्रकृत्यर्थेतरान्वितस्वार्थबोधक-
त्वमतो राज्ञः पुरुषेत्यादिभागे न प्रसङ्गः। पाचं पाच-
मित्यादिणमन्तभागस्तु स्वार्थावच्छिन्नस्य धात्वन्तरार्थ-
स्यैवान्वयबोधको न तु त्वादिप्रत्ययार्थस्य प्रस्थायेत्यादौ
समासव्यपदेशोऽप्यवादिशब्दसंस्कारप्रयोजनको गौणः"
विभजते "स चायं षड्विधः कर्मधारयादिप्रभेदतः।
यथोपपदसंज्ञोऽन्यस्तेनासौ सप्तधा मतः। "स चायं
निरुक्तसमासः कर्मधारयद्विगुतत्पुरुषाव्ययीभावबहुव्री-
हिद्वन्द्वभेदात् षड्विधः यच्च कुम्भकारादिरुपपदसंज्ञकः
समासोऽस्ति तेन समं समासः सप्तविधः। शङ्खाकनिश-
नीकामादीनामिव कारादीनामपि शब्दानामुपपदार्था-
न्वितस्यैव स्वार्थस्य बोधकतया तथाविधनामान्तत्वमेव-
चैतस्य समासान्तराद्विशेषः। ननु यदि षड्विधः सप्त-
विधो वा समासस्तदास पञ्चविधत्वोक्तिः प्राचामसङ्गतेत्यत
आहतुपपादयति"। "पूर्वमध्यान्तसर्वान्यपदप्राधान्यतः
पुनः। प्राच्यैः पञ्चविधः प्रोक्तः समासो वामटादिभिः।
"कश्चित् समासः पूर्वपदार्थधर्मिकान्वयबोधजनकतया पूर्व-
पदप्रधान उच्यते यथा प्राप्तजीवार्द्धपिप्पलीपूर्वकायादि-
स्तत्पुरुषः यथा वा उपकुम्भाद्यव्ययीभावः पुरुषसिं-
हादिकर्मधारयश्च। कश्चिन्मध्यपदार्थधर्मिकधीजनकतयैव
मध्यपदप्रधानो यथा पटानधिकरणप्रतियोगिताभावच्छेद-
केत्यादिकस्तत्पुरुषः पटस्य नाधिकरणमित्यादिविग्रहे
मध्यपदार्थस्यैव विशेष्यत्वात् बहुपदे बहुव्रीहिरेवेत्यस्य
तत्पुरुषादेर्बहुनामगर्भत्वाभावे तात्पर्यमित्यपि व्युत्पाद्य-
त्वात्। कश्चिदन्त्यपदार्थधर्मिकधीहेतुत्वादन्त्यपदप्रधानः

यथा राजपुरुषादिस्तत्पुरुषो नीलोत्पलादिकः कर्मधारयो द्विगाद्यादिरव्ययीभावश्च। क्वचित् सर्वपदार्थधर्मिकबुद्धिहेतुत्वात् सर्वपदप्रधानः इतरेतरद्वन्द्वो द्वन्द्वमात्रं वा। क्वचित् समासघटकान्यपदार्थधर्मिकज्ञानजनकत्वादन्यपदार्थप्रधानः यथा बहुव्रीहिः क्वचिद्वाऽव्ययीभावश्च। तदेवं पञ्च भेदानादायैव पञ्चविधत्वं प्राच्यैरुक्तमतो न विरोधः। नित्यानित्यभेदेन समासस्य द्वैविध्यमप्यस्ति तदुक्तं जयादित्येन "विभक्तिमात्रप्रक्षेपाभिज्ञान्तर्गतनामस्य। स्वार्थस्याबोधबोधाभ्यां नित्यानित्यौ समासकाविति।" स्वान्तर्गतनामस्य विभक्तिमात्रप्रक्षेपेण यस्तस्यार्थस्याबोधः स नित्यः समासः यथा कृष्णसर्पनिर्मक्षिकादिः कृष्णः सर्पो मक्षिकाया निः न तु र इत्यादितस्तस्यार्थस्य वैजात्यादेरप्रहात्। यस्त्वर्थस्य च बोधः सोऽनित्यो यथा राजपुरुषपूर्वकायादिः तस्यार्थस्य राज्ञः पुरुषः पूर्वं कायस्येत्यादिवाक्यादपि प्रतीतेः। स्फुरदाणी चलन्नेत्र इत्यादिकः कर्मधारयोऽप्यनित्य एव समासः स्फुरन्ती दाणीत्यादिविग्रहस्य वाक्यादौ स्फुरदादिविधेयत्वबोधाजनकत्वेऽपि स्फुरदभिन्नवाण्यादावेकत्वादिबोधकत्वसाद्यद्वैव तदर्थप्रकाशकत्वात् स्फुरन्ती वाणीत्यादिवाक्यस्यैव तत्र विग्रहत्वसम्भवात्। विग्रह एव समासलभ्यार्थस्य बोधकत्वं तन्त्रं न तु समासे विग्रहार्थस्य। विग्रहलभ्यार्थविशेषसङ्ख्ययोश्च प्रकवैधर्म्येऽपि प्रायशः समासाबोध्यत्वात्। अतएव द्वन्द्व समासे तयोर्ध्रुवकसङ्ख्यावत्समासेऽपि यथा करतीर्थिकगुर्जनः प्रियतिस्रः पुरुष इत्यादौ स्त्रीत्वस्य प्रामनसतिस्रादेयद्वोरुदभिव्यञ्जकयोः सत्त्वात् तथा च उपरि निस्तुषा इत्यत्वमित्यादावेकत्वादि व्यञ्जकाभावादेवात्र एवाव्ययीभावस्य युगपदादौ हित्व एवं युगाद्यादिपदे सेनाङ्गानां बहुत्व एव समाहारद्वन्द्वस्य विधानात्। तदुक्तमभियुक्तैः "सङ्ख्या तु व्यञ्जकाभावादव्यक्ता प्रातरादिवत्। यत्र तु व्यञ्जकं किञ्चित्तत्र सङ्ख्या प्रकाशते। यथोपरि इत्यस्त्वं पूर्वकायोऽर्धपिप्पलीति"। पूर्वादेरर्थस्य च रुद्रैकत्वमन्तर्भाव्यैवावयविना तत्पुरुषस्य प्रत्यक्षत्वात् वरस्त्रिजादौ अग्रे कालादौ चानुक् समासे एवः सङ्ख्यावगमेऽपि न क्षतिः तत्र व्यञ्जकरूपः स्वार्थेऽपि सङ्ख्या न बुध्यते इति समासशक्तिवादिनः प्राचस्तथाः"। अधिकं तत्र दृश्यम्।

समासक्त त्रि० सम्+आ+सन्ज–क्त। १संयुक्ते २आसक्ताशक्ते ३अभिनिविष्टे च।

समासङ्ग पु० सम्+आ+सन्ज–घञ्। १संयोगे २सम्यगभिनिवेशे च।

समासवत् पु० समास+अस्त्यर्थे मतुप् मस्य वः। १व्याकरणोक्तसमासयुक्ते शब्दे २संक्षेपयुक्ते त्रि० ३तन्त्रज्ञे पु० शब्दच०। समासेन तुल्यं वति। ४समासतुल्यक्रियायां अव्य०। [२निकटस्थिते ३प्राप्ते त्रि०।

समासादित त्रि० सम्+आ+सद+णिच्–क्त। १सम्यगाहृते

समासान्त पु० ६त०। व्याकरणोक्तसमासस्य शेषावयवे तत्स्थोत्तरविहितविधिश्च अनित्यः "समासान्तविधिरनित्यः" परिभा०।

समासार्था स्त्री समासेन संक्षेपेणार्थोऽभिहितोयस्याः। १समस्यायाम् अमरः। ६त०। २समासबोध्यार्थे पु०।

समाहार पु० सम्+आ+हृ–घञ्। १समुच्चये अमरः २सङ्क्षेपे यथा वयवभेदे समूहे समाहारे द्वन्द्वे तु द्वित्वत्रित्वादिभेदसमूहस्य बोधात् समूहत्वमेव प्रवृत्तिनिमित्तम्। द्वन्द्वशब्दे १७९२ पृ० द्विगुशब्दे च १८११ पृ० दृश्यम्।

समाहारद्वन्द्व पु० व्या० उक्ते समासभेदे १७९२पृ० दृश्यम्।

समाहारद्विगु पु० व्या० उक्ते समासभेदे द्विगुशब्दे १८११पृ० दृश्यम्।

समाहित त्रि० सम्+आ+धा–क्त। १कृतसमाधौ २आहिते ३प्रतिज्ञाते मेदि० ४निष्पन्ने धरणिः ५शुद्धे शब्दच०। ६कृतसमाधाने। भावे क्त। ७समाधाने न०।

समाहृत त्रि०सम्+आ+हृ–क्त। १संगृहीते २एकत्रस्थीकृते।

समाहृति स्त्री सम्+आ+हृ–क्तिन्। १संक्षेपे २सङ्ग्रहे अमरः। ३समाहारे च।

समाह्वय पु० समाह्वयते सम्+आ+ह्वे–अच् आत्वाभावः। १आह्वाने २प्राणिकरणकद्यूते च "प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः" इति मनुः। ३तदधिकारेण प्रवृत्तविवादभेदे च द्यूतशब्दे १७७४पृ०दृश्यम्।

समाह्वा स्त्री सम–आह्वा यस्याः। १गोजिह्वाख्ये शब्दच० भा०प्र०। २समाख्यायाञ्च। [शब्दर०।

समिक न० सम्–इण–ड संज्ञायां कन्। शेलाख्ये (वसुगा)

समित् स्त्री समीयतेऽत्र सम्+इण्–आधारे क्विप्। युद्धे अमरः

समिता स्त्री सम्+इण्–क्त। १गोधूमचूर्णभेदे "गोधूमा धवला धौताः कुट्टिताः शोषितास्ततः। सम्प्रिष्टास्ता विनिर्मुक्ताश्चाणिताः समिताः स्मृताः" राजनि०। २सङ्गते त्रि०।

समिति स्त्री सम्+इण–आधारे क्तिन्। १सभायाम् अमरः

२युद्धे ३सङ्केते च मेदि०। आर्हतमतसिद्धे प्राणिपीड़ापरिहारेण सम्यगयने हा च पञ्चविधा अर्हत्शब्दे ३८५ पृ० दृश्या। [२आकुतौ शब्दिप्रका० ।

समिथ पु० सम+इण–थक् । १वह्नौ २युद्धे च सि०कौ० ।

समिध् स्त्री समिध्यतेऽनया सम्+इन्ध–करणे क्विप्। १काष्ठे २होमीयकाष्ठभेदे च तल्लक्षणं छन्दोग० "नाङ्गुष्ठादधिका नोना समित् स्थूलतया क्वचित्। न निर्मुक्तत्वचा चैव न सकीटा न पाटिता। प्रादेशान्नाधिका नोना न तथा स्याद्विशाखिका। न सपत्रा न निर्वीर्या होमेषु च विजानता" इति। तत्र निषिद्धलक्षणं यथा "विशीर्णा विदला ह्रस्वा वक्राः स्थूला द्विधाकृताः। कृमिदष्टाश्च दीर्घाश्च समिधो नैव कारयेत्" तत्र दोषो यथा "विशीर्णायुःक्षयं कुर्याद्विदला पुत्रनाशिनी। ह्रस्वा नाशयते पत्नीं वक्रा बन्धुविनाशिनी। कृमिदष्टा रोगकरी विद्वेषकरणी द्विधा। पशून् मारयते दीर्घा स्थूला धर्मविनाशिनी" तन्त्रसा०। [त्रिका०।

समिध पु० समिध्यते सम्+इन्ध–क। १काष्ठे २वह्नौ च

समिन्धन पु० सम्+इन्ध–करणे ल्युट्। १काष्ठे शब्दच०। भावे ल्युट्। २सम्यग्दीप्तौ च।

समीक न० सम–ईकक्। युद्धे अमरः।

समीकरण न०असमः समः क्रियतेऽनेन सम–च्वि+कृ ल्युट्। बीजगणितप्रसिद्धे अज्ञातसंख्यानां यावत्तावदादीनामव्यक्तराशीनां संख्याज्ञानार्थं १प्रक्रियाभेदे २तुल्यत्वसम्पादने च।

समीक्ष न० सम्यगीक्षतेऽनेन घञ्। १सांख्यदर्शने त्रिका०। भावे घञ्। २आलोचने ३सम्यग्ज्ञाने च पु०। स्त्री। समीक्षाप्यत्र। ४तत्त्वे ५बुद्धौ मेदि० ६मीमांसाशास्त्रे ७यत्ने च स्त्री शब्दच०।

समीक्ष्यकारिन् त्रि०समीक्ष्य पर्यालोच्य करोति कृ–णिनि उप०। वस्तुस्वरूपपर्यालोचनपूर्वककार्यकारके।

समीच पु०सम्+इण–चट् चित् दीर्घश्च। १समुद्रे २हरिण्यां स्त्री ङीप् उज्ज्वलद०। ३वन्दनायां स्त्री त्रिका०।

समीचीन त्रि० सम्यगभवः सम्+अन्च–क्विप् ततः स्व समः समिः अकारलोपे पूर्वपददीर्घः। १यथार्थे २साधौ ३सत्ये न० हेमच०। ४सन्ध्युते त्रि०।

समीनिका स्त्री वर्षां प्राप्य प्रसूते च ततः स्वार्थे क। प्रतिवर्षं प्रसूतायां सर्वासमीनायां गवि शब्दच०। [अमरः

समीप त्रि०सङ्गता आपोऽत्र अच् ततः आत ईत्वम्। निकटे

समीर पु० समन्तात् ईरयति नोदयति सम्+ईर–अच। १वायौ अमरः। २समीरवृक्षे राजनि०। पृषो०। समीरोऽप्यत्र राजनि०। [२पवने मेदि०। भावे ल्युट्। सम्यगुक्तौ न०।

समीरण पु० सम्+ईर-ल्यु। १वायौ २मरुवकवृक्षे अमरः

समीरित त्रि० सम्+ईर–क्त। १कथिते २उच्चारिते "यथुसंख्यसमीरिता" कुमारः।

समीहित त्रि०सम्+ईह–क्त। १अभीष्टे २सम्यक्चेष्टिते न०।

समुख त्रि० सह मुखेन मुखव्यापारेण वा सहस्य सादेशः। १वावदूके हेमच०। २वाग्मिनि च।

समुचित त्रि० सम्+उच–क्त। सम्यग् उपयुक्ते समञ्जसे।

समुच्चय पु०सम्+उद्+चि–अच्। १दित्यादीनां राशौ अमरः परस्परनिरपेक्षाणामनेकेषामेकस्मिन् २क्रियादावन्वये च यथा देवदत्तो यज्ञदत्तश्च गच्छतीत्यत्र देवदत्तयज्ञदत्तयोः परस्परसापेक्षतामावेऽपि एकस्मिन् गमने अन्वयः। तद्वाचकश्च प्रायेण चकारः क्वचित् तथाविगब्दोऽपि। ३समाहारे शब्दच०।

समुच्छ्रित त्रि० सम्+उद्+श्रि–क्त। शतपथब्रा० "समुच्छ्रितफलकामानामि"ति विधिस्वरूपे गदाधरः।

समुच्चा(च्चा)र पु० सम्+उद्+चर–अप् घञ् वा। सम्यगुच्चारणे २सम्यक्त्यागे च। [पाटन च।

समुच्छेद पु० सम्+उद्+छिद–घञ्। १विनाशे २समूलोत्

समुच्छ्र(च्छ्रा)य पु० सम्+उद्+श्रि–अच् घञ् वा। १अत्युन्नतौ २विरोधे ३उन्नतौ च मेदि०।

समुच्छ्रित त्रि० सम्+उद्+श्रि–क्त। अत्युन्नते।

समुच्छलित त्रि०सम्यक्+उच्छलितम् सम्+उद्+शल–क्त वा। समन्तात् विकीर्णे (छयेऽपि) "समुच्छलितविभ्रमा गतिः" काव्यप्र०। [युक्ते २अत्युज्जीविते च।

समुच्छ्वसित त्रि० सम्+उद्+श्वस–क्त। १सम्यगुच्छ्वास

समुच्छ्वास पु० सम्+उद्+श्वस–घञ्। उच्छ्वासाधिकाभ्यां प्राणवायोर्व्यापारे। [ग्गमने।

समुज्झित त्रि० सम्+उज्झ–क्त। त्यक्ते अमरः। [१सम्य

समुत्क्रम पु० सम्+उद्+क्रम–घञ् न वृद्धिः। १ऊर्द्ध्वगमने

समुत्क्रोश पुंस्त्री०सम्यम् उत्क्रोशति उच्चैः शब्दायते सम्+उद्+क्रुश–अच्। १कुररविहगे शब्दच० स्त्रियां ङीष्। भावे घञ्। २अत्युच्चैःशब्दे [व्युत्पन्ने २उत्थिते च।

समुत्थ त्रि०सम्यगुत्तिष्ठति सम्+उद्+स्था–क सस्य थः। १स-

समुत्थान न० सम्+उद्+स्था–करणे ल्युट् सस्य थः। १समुद्योगे २उत्थापने ३व्याधिनिर्णये च मेदि०।

समुत्पत्ति स्त्री सम्+उद्+पद–क्तिन् । समुद्भवे ।
समुत्पन्न त्रि॰ सम्+उद्+पद–क्त । समुद्भूते ।
समुत्पाट पु॰ सम्+उद्+च॰पट–अच् । उन्मूलोत्करणे ।
समुत्पाटित त्रि॰ सम्+उद्+णिच्–पट–क्त । उन्मूलिते ।
समुत्पिञ्ज त्रि॰ सम्+उद्+पिञ्ज–अच् । १अत्याकुले हेमच॰ २आकुलसैन्ये पु॰ अमरः ।
समुत्सर्ग पु॰ सम्+उद्+सृज–घञ् । सम्यक्त्यागे ।
समुत्सुक त्रि॰ सम्यगुत्सुकः प्रा॰स॰ । १अत्यन्तोत्सुके इष्टवस्तुलाभाय त्वरान्विते ।
समुत्सृष्ट त्रि॰ सम्+उद्+सृज–क्त । सम्यक्त्यक्ते ।
समुत्सेध पु॰ सम्+उद्+सिध–घञ् । १अत्युन्नतौ २अतिस्फीततायाञ्च । [अमरः ।
समुदक्त त्रि॰ सम्+उद्+अन्च–क्त । कूपादेरुद्धृतजलादौ
समुदय पु॰ सम्+उद्+इण–अच् । १समूहे अमरः २युद्धे ३समुद्गमे मेदि॰ ४दिवसे शब्दर॰ । ज्योतिषोक्ते ५लग्ने न॰ । ६नक्षत्रचक्रस्थे जन्मतारवधिके अष्टादशनक्षत्रे चक्रयष्टौ पृ॰हयग्रम् । अजनः समहे युद्धे पु॰अमरः । पृष्ठस्थसैन्ये अजयः अत्युन्नतौ मेदि॰ ।
समुदागम पु॰ सम्+उद्+आ+गम–घञ् न वृद्धिः । सम्यग्ज्ञाने त्रिका॰ । [त्रिका॰ । २सम्यगाचारे च ।
समुदाचार पु॰ सम्+उद्+आ–चर–घञ् । १अभिप्राये
समुदित त्रि॰ सम्+उद्+इण्–क्त । १प्राप्तसंभूतौ पदार्थे सम+वद–कर्मणि क्त । २सम्यक्कथिते ।
समुदीरण न॰ सम्+उद्+ईर–क्त । सम्यक्कथने ।
समुदीरित पु॰ सम्+उद्+ईर–क्त । सम्यक्कथिते ।
समुद्ग पु॰ सम्+उद्+गम–ड । १सम्पुटके हेमच॰ २अर्धचकारकदार्थे ३उद्गेन सहिते । स्वार्थे क । तत्रैव अमरः
समुद्गम पु॰ सम्+उद्+गम–घञ् न वृद्धिः । १ऊर्द्ध्वगतौ २समुद्भवे च ।
समुद्गीत त्रि॰ सम्+उद्+गै–क्त । उच्चैर्गीते । [थिते च ।
समुद्गीर्ण त्रि॰ सम्+उद्+गॄ–क्त । १वमिते २उत्तोलिते ३क-
समुद्दिष्ट त्रि॰ सम्यक् उद्दिष्टम् उद्+दिश–क्त । सम्यगुद्देशविषये पदार्थे "तत्समुद्दिष्टं कर्मेति" संक्षेपसारः ।
समुद्देश पु॰सम्यक् उद्देशः उद्+दिश–घञ् । सम्यगभिसन्धौ । २सम्यगुद्देशे च यथा "वाक्यपादो जातिसमुद्देशे" मञ्जूषा
समुद्धत त्रि॰ सम्+उद्+हन–क्त । १अत्यन्तप्रगल्भे अत्यन्ताविनीते अमरः २समुद्धीर्णे हेमच॰ ।
समुद्धरण न॰ सम्+उद्+हृ–ल्युट् । १उत्तोलने कूपादेर्जलोत्तोलने २भुक्तान्नस्य वमने ३उन्मूलने च । कर्मणि ल्युट् । ४वान्ते–अन्नादौ ५उन्मूलिते च अमरः ।
समुद्धृत त्रि॰ सम्+उद्+हृ–क्त । १अपनीते २समुत्तोलिते मेदि॰ । ३उत्तोलिते ४उन्मूलिते च ।
समुद्धर्त्तृ त्रि॰ सम्+उद्+हृ–तृच् । १वमनकारिणि २उन्मूलयितरि ३... पङ्के ४हृतद्रव्यस्य पुनरादानकर्त्तरि च
समुद्भव पु॰ सम्+उद्+भू–अप् । समुत्पत्तौ ।
समुद्भूत त्रि॰ सम्+उद्+भू–क्त । समुत्पन्ने ।
समुद्यत त्रि॰ सम्+उद्+यम–क्त । सम्यगुद्यमयुते ।
समुद्यम त्रि॰ सम्+उद्+यम–घञ् न वृद्धिः । सम्यक्प्रयत्ने ।
समुद्र पु॰ सम्+उन्द–क्लेदने रक, सम्+उद्+रा–क वा । १स्वनामख्याते प्रचुरजले सागरे अमरः । सह मुद्रया २मुद्रासहिते त्रि॰ "वभौ मरुत्वान् विकृतः समुद्रः वभौ मरुत्वान् विकृतः समुद्रः" इति भट्टिः । ३गव्यां ४सम्याञ्च स्त्री टाप् राजनि॰ । सागरस्य ब्रह्मणो मेढ्रात् उद्भवः "आस्याद् वाक्, सिन्धवो मेढ्रात्" भाग॰ २।१२अ॰ । स च सप्तविधः "लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः" समुद्रनामनिरुक्तिः तदृद्ध्यादिकारणञ्च मत्स्यपु॰ १२३अ॰ उक्तं यथा "अपाश्चैव समुद्रेकात् समुद्र इति संज्ञितः । उदयतीन्दौ पूर्णे तु समुद्रः पूर्यते सदा । प्रक्षीयमाणे बहुले क्षीयतेऽस्तमिते च वै । आपूर्यमाणो ह्युदधिरात्मनैवापि पूर्यते । ततो वै क्षीयमाणे तु स्वात्मन्येव ह्यपां क्षयः । उदीयन्तेऽग्निसंयोगा दुखास्थापो यथा स्थराम् । तथा स्वतः समुद्रोऽपि वर्द्धते शशिनोदये । अन्यूनानतिरिक्तात्वात् वर्द्धन्त्यापो ह्रसन्ति च । उदयेऽस्तमये चेन्दोः पक्षयोः शुक्लकृष्णयोः । क्षयवृद्धी समुद्रस्य शशिवृद्धिक्षये तथा । दशोत्तराणि पञ्चाहुरङ्गुलानां शतानि च । अपां वृद्धिः क्षयो दृष्ट समुद्राणान्तु पर्वसु" ।
समुद्रकफ पु॰ समुद्रस्य कफ इव । जलधिफेने त्रिका॰ ।
समुद्रकान्ता स्त्री ६त॰ । १पृक्कायां राजनि॰ । २नद्याञ्च शब्दचि॰ समुद्रप्रियादयोऽप्यत्र ।
समुद्रगा स्त्री समुद्रं गच्छति गम–ड । १नद्यां हेमच॰ । "सर्वा नद्यः समुद्रगा" इति पुराणम् । साक्षात् परम्परया वा सर्वासां जलधिगामित्वात् तथात्वम् । साक्षात् समुद्रगा च गङ्गादिः "सर्वा नद्यो रजोयुक्ता वर्जयित्वा समुद्रगाः" इति प्रा॰ त॰ । गङ्गाया एव चतस्रो धाराः सीतालकनन्दाचक्षुर्भद्राख्यतया ख्याताः

जम्बूद्वीपशब्दे १०४४पृ० दर्शिताः । भारतवर्षस्थाः सप्त च गाङ्ग "नदीं पिबन्ति विपुलामित्यादिना "इत्येताश्च महानद्योमित्यन्तेन" भा०भी०उक्ताः २०४६ पृ०दर्शिताः । क्षुद्रनदीनामपि महानद्यामिलितानां समुद्रगामित्वं यथोक्तं माघे "आप्लावयत्याधिमभ्येति महानद्या न गापगा" । [त्रिका० ।

समुद्रगृह न० समुद्र इव प्रचुरजलं गृहम् । जलयन्त्रगेहे

समुद्रचुलुक पु० समुद्रश्चुलुकः गण्डूषजलमितजलमिव अनायासेन पीतत्वाद्यस्य । अगस्त्ये मुनौ त्रिका० ।

समुद्रनवनीत न० समुद्रस्य नवनीतमिव । समुद्रमन्थनोद्भूतसारांशे १अमृते २चन्द्रे च मेदि० ।

समुद्रफल न० ओषधिभेदे "समुद्रनाम प्रथमं पश्चात् फलमुदीरयेत् । समुद्रफलमित्यादि नाम वाच्यं भिषग्वरैः । फलं समुद्रस्य कटूष्णकारि वातापहं भूतनिरोधकारि । त्रिदोषदावानलदोषहारि कफामयभ्रान्तिविरोधकारि" राजनि० तद्गुणाः उक्ताः ।

समुद्रफेन पु० ६त० । समुद्रस्य फेने अमरः "समुद्रफेनश्चक्षुष्यो लेखनः शीतलश्च सः । कषायो विषपित्तघ्नः कर्णरुक्कफहृल्लघुः" भावप्र० तद्गुणा उक्ताः ।

समुद्रमेखला स्त्री समुद्रः मेखलेव वेष्टनाकारत्वात् यस्याः । पृथिव्यां त्रिका० । समुद्ररसनादयोऽप्यत्र ।

समुद्रयान न० यायतेऽनेन या-करणे ल्युट् ६त० । पोते समुद्रतरणसाधने नौकाभेदे वराहपु० ।

समुद्रयात्रा स्त्री ६त० । समुद्रस्य तीर्थत्वेन गमने । तद्विवेकः कलिवर्ज्ये १८०४ पृ० दृश्यम् ।

समुद्ररसना स्त्री समुद्रः रसना इव वेष्टकत्वात् यस्याः । पृथिव्यां हला० ।

समुद्रलवण न० समुद्रजलजातं लवणम् । (करकच)सामुद्रे लवणे राजनि० । "सामुद्रं यत्तु लवणमक्षीवं वशिरं च तत् । सामुद्रं मधुरं पाके सतिक्तं मधुरं गुरु । नात्युष्णं दीपनं भेदि अक्षीवमविदाहि च । श्लेष्मलं वातनुत्तिक्तमरूक्षं नातिशीतलम्" भावप्र० ।

समुद्रवह्नि पु० ६त० । समुद्रस्थे अग्नौ वाडवानले हला० ।

समुद्रवेला स्त्री ६त० । समुद्रस्य कूले ।

समुद्रसुभगा स्त्री ६त० । गङ्गायां राजनि० ।

समुद्रान्त न० समुद्रस्यान्तः पर्यन्तदेशः उत्पत्तिस्थानत्वेनास्त्यस्य अच् समुद्रः अन्तो यस्य वा । १जातीफले शब्दच० २दुरालभायां स्त्री अमरः । ३कार्पास्यां ४पृक्कायां मेदि० ५यवासे स्त्री राजनि० । ६त० । ६समुद्रपर्य्यन्ते त्रि० ।

समुद्राम्बरा स्त्री समुद्रःअम्बरमिव वेष्टनाकारत्वात् यस्याः । पृथिव्यां त्रिका० । सागराम्बरादयोऽप्यत्र ।

समुद्रारु पु० समुद्रमृच्छति ऋ-कर्त्तरिकरणे वा उण् । १कुम्भीरे २सेतुबन्धे ३तिमिङ्गिलमत्स्ये मेदि० । [पटार्थे ।

समुद्रि(द्री)य त्रि० समुद्र+भवार्थे घ छ वा । समुद्रभवे

समुद्वह त्रि० सम्+उद्+वह-अच् । श्रेष्ठे सम्यगुद्वहनकर्त्तरि च । [अमरः ।

समुन्दन न० सम्+उन्द्-ल्युट् । सम्यगार्द्रीभावे (भिजा)

समुन्न न०सम्+उन्द्-क्त । १क्लिन्ने २आर्द्रे अमरः । [पर्य्यायः

समुन्नत त्रि० सम्+उद्+नम-क्त । १अत्युच्चे २शरभभेदे पु०

समुन्नति स्त्री० सम्+उद्+नम-क्तिन् । १उच्चतायाम् "प्रायः पयोधरसमुन्नतिरत्र हेतुः" उद्भटः । २उत्सेधे स्फीततायां जटा० ।

समुन्नद्ध त्रि० सम्+उद्+नह-क्त । १गर्विते २पण्डितम्मन्ये अमरः । ३प्रभौ अजयः । ४समुद्धृते मेदि० ५उत्क्षिप्य बद्धे हेमच० । ६समुद्धृते च । भावे क्त । ७उत्तोलनबन्धने न० । [१उत्क्षेपणे ४समुद्भावने च ।

समुन्नय पु० सम्+उद्+नी-अच् । १ऊर्द्ध्वनयने २सम्यग्नीतौ

समुपचित त्रि० सम्यक् उपचितम् उप+चि-क्त । १समुन्नीकृते २संवर्द्धिते च । [रामाश्रमः ।

समुपजोषम् अव्य० सम्+उप+जुष-अम् । अत्यन्तानन्दे

समुपेयिवस् त्रि० सम्+उप+इण-क्वसु । समीपगते ।

समुपोढ त्रि० सम्+उप+वह-क्त । १वृद्धे २सज्जीते च ।

समुल्लेख पु० सम्+उद्+लिख-घञ् । पादादिना भूम्यादेः खनने ।

समूढ त्रि० सम्+अङ्+वह-वा क्त । १राशीकृते २अनपभ्रष्टे "समूढमस्य पांसुरे" इति ऋग्वेदः । ३भुग्ने ४सद्योजाते मेदि० ५दमिते ६कृतविवाहे धरणिः ७शोधिते जटा० । सह मूढेन । ८मूढसहिते त्रि० ।

समूरु पु०सक्तौ सन्धिहीनत्वात् ऊरुः यस्य । मृगभेदे अमरः पृषो० । समूर तत्रार्थे पुस्त्री० हेमच० स्त्रियां ङीष् ।

समूल त्रि० सह मूलेन । मूलसहिते "समूले कषपदे कषादिभ्यः णमुल् तत्प्रकृतिधातोरनुप्रयोगश्च "समूलकाषं कष." "समूलघातं न्यवधात्" इति च भट्टिः ।

समूह पु० सम+ऊह-घञ् । १समुदये अमरः । समूहत्वञ्च अपेक्षाबुद्धिविषयविषयत्वं त्रित्वादिपर्य्याप्तसंख्याविशेषो वा । २सम्यक् ऊहे तर्के च ।

समूहनी स्त्री समुह्यतेऽनया सम्+ऊह–करणे ल्युट् ङीप्। १सम्मार्जन्यां हेमच०। भावे ल्युट्। २सम्मार्जने परिसमूहनशब्दे ४२५८ पृ० दृश्यम्। ३सम्यगूहकरणे च न०।

समूहालम्बन त्रि० समूहमालम्बते विषयतया आ+लवि-ल्यु। नानाप्रकारतानिरूपितनानाविशेष्यताशालिनि ज्ञाने। तत्र संशये नानाप्रकारतानिरूपिताया एकविशेष्यतायाः सत्त्वात् न समूहालम्बनत्वम्। धवखदिरौ द्वावित्यादौ दण्डी कुण्डी च देवदत्त इत्यादौ वाक्यजनितबोधस्यापि समूहालम्बनत्वं तत्रोभयनिरूपितयोः विशेष्यतयोर्द्वयोरेवाङ्गीकारात् इत्यात्पर्यन्तयमाथशब्दस्य प्रत्येकान्वयनियमेन प्रथमार्थद्वित्वस्य प्रत्येकवृत्तित्वात् तच्च समवायेनैवेति बोध्यम्। अतएव शब्दचिन्तामणौ कर्णिकता धवखदिरपलाशाश्छिनत्तीत्यादौ प्रत्येककर्मताया एव विभिन्नक्रियायामन्वय इत्युक्तम्। अत उक्तस्थले विशेष्यताद्वयम्। धवखदिरौ द्वावित्यादावपि द्वित्वस्य समवायसम्बन्धेन धवादिवृत्तित्वात् विशेष्यताद्वयाङ्गीकारेऽपि नक्षत्यभावात्। तेनैव धवखदिरौ न द्वाविति प्रतीतिवारणसम्भवात्। घटं पटञ्च पश्यतीत्यादौ च दर्शनक्रियायां घटपटयोरन्वयसत्त्वे तु न समूहालम्बनमिति भेदः इत्यादिबोध्यम्। यदि च आत्मघटयोर्नात्मत्वमित्यादि प्रयोगसाधुत्वार्थं पर्याप्तिसम्बन्धेनैव द्वित्वादेर्बोधोऽङ्गीक्रियते तदा तस्य न समूहालम्बनत्वम्।

समूहिन् त्रि० समूहोऽस्त्यस्य इनि सम्+ऊह–णिनि वा। समूहावयवे प्रत्येकवस्तुनि यथा घटपटसमूहान्तर्गता घटः पटश्च समूही। २सम्यक्तर्कयुते त्रि० स्त्रियां ङीप्

समूह्य पु० सम्+ऊह–ण्यत्। १यज्ञियाग्नौ अमरः २सम्यक् तर्क्ये त्रि० ३यज्ञाग्निसंस्कारभेदे सि०कौ०।

समृद्ध त्रि० सम्यक् ऋद्धः ऋध–क्त। १अधिकसम्पत्तियुक्ते अमरः। २अतिवृद्धे च शब्दमा०।

समृद्धि स्त्री सम्यक् ऋद्धिः सम्+ऋध–क्तिन् वा। १अतिसम्पत्तौ अमरः २सम्यग्वृद्धौ च "मधुसमृद्धिसमेधित या मेधया" माघः।

समेत त्रि० सम्+आ–इण क्त। १समागते २सङ्गते च।

समेधित त्रि० सम्+एध+णिच्–क्त। संवर्द्धिते "मधुसमृद्धिसमेधितमेधयवेति" माघः।

समोदक न० समम् अर्द्धभागेन तुल्यमुदकं यत्र। जलाम्बुसंयोगेन मथितदधिजाते १तक्रभेदे हेमच०। सह मोदकेन सहस्य सः। २मोदकसहिते त्रिकाण्डशेषः।

सम्पत्ति स्त्री सम्+पद–क्तिन्। १अतिविभवे अमरः २अनुरूपात्मभावे यस्य यद्रूपता उचिता तस्य तथाभवने च सि०कौ० ३विभूतौ मेदि०।

सम्पद् स्त्री सम्+पद–सम्प० भावे क्विप्। १विभवे २सम्पत्तौ च अमरः। ३गुणोत्कर्षे। करणे क्विप्। ४हारभेदे पु० मेदि०। स्वार्थे क। सम्पद तत्रार्थे न० शब्दमा०।

सम्पन्न त्रि० सम्+पद–क्त। १साधिते २सम्पद्युक्ते च मेदि०

सम्पराय पु० सम्+परा+इण–आधारे अच्। १युद्धे २आपदि ३उत्तरकाले च अमरः।

सम्परायिक न० सम्परायाय आपदे हितम् ठन्। १युद्धे तदर्थे ठञ्। २साम्परायिकमप्यत्र अमरः। [मेदि०।

सम्पर्क पु० सम्+पृच–घञ्। १सम्बन्धे २रतौ ३मेलके च

सम्पर्किन् त्रि० सम्+पृच–घिनुण्। सम्बन्धयुक्ते।

सम्पा स्त्री सम्यक् अतर्कितं पतति पत-ड। विद्युति अमरः।

सम्पाक पु० सम्यक् पाको यस्मात् ५ब०। आरग्वधवृक्षे अमरः तद्भोजने हि भुक्तान्नादेः सम्यक्पाको भवतीति वैद्यके प्रसिद्धम्। २धृष्टे ३तर्कके मेदि० ४लम्पटे ५अल्पे च त्रि० धरणिः।

सम्पात पु० सम्+पत–घञ्। १पक्षिगतिभेदे जटा० २सम्यक्पतने च। ३रेखाद्यादेः सम्पतने च।

सम्पाति पु० सम्+पत–णिच्-इन्। जटायुषो ज्येष्ठभ्रातरि पक्षिभेदे रामा०। स्वार्थे क। तत्रैव। सम्पातिरिव कायति कै–क। सम्पातिक गरुड़ज्येष्ठतनये शब्दमा०।

सम्पुट पु० सम्+पुट–क। १कुङ्कुमकदम्बे अमरः। सम्यक् पुटमिव उभयपार्श्ववर्त्ति यस्य। २एकजातीयपदार्थेन भिन्नजातीयस्य उभयतो व्याप्ते त्रि० "सकामैः सम्पुटोन्मामः" इति तन्त्रम्।

सम्पुटक पु० सम्पुटयति सम्+पुट–अच् स्वार्थे वुन्। समुद्गके मञ्जूषाख्ये (पेटारा) पदार्थविशेषे अमरः।

सम्पूर्ण त्रि०सम्+पूर–क्त। १परिपूर्णे २समग्रे च "आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता। एकादशी हि सम्पूर्णे"ति स्मृत्युक्ते ३एकादशीभेदे स्त्री ति०त०। शुद्धे ४षष्टिदण्डात्मकतिथिमात्रे स्त्री तिथिशब्दे ३२८२ पृ०दृश्यम्।

सम्पृक्त त्रि० सम्+पृच–क्त। १मिश्रिते हेमच० २सम्बद्धे च

सम्प्रणयन न० सम्+प्र+णी–ल्युट्। १सम्यगवच्छिन्नतादेः शोधनाय संस्कारविशेषे २विधाने च। [अमरः।

सम्प्रति अव्य० सम+प्रति+समाहारद्वन्द्वः। इदानीमित्यर्थे

सम्प्रतिपत्ति स्त्री सम्+प्रतिपद्यते -क्तिन्। १प्राप्तकार्यवि-

सत्योत्तरम् "श्रुत्वाभियोगं प्रत्यर्थी यदि तं प्रतिपद्यते। सा तु सम्प्रतिपत्तिः स्यादि"ति स्मृत्युक्ते व्यवहारे उत्तरभेदे च "मिथ्या सम्प्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा। प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः" उत्तरशब्दे १०१६ पृ० दृश्यम्।

सम्प्रदातृ त्रि० सम्+प्र+दा–तृच्। दानकर्त्तरि स्त्रियां ङीप्।

सम्प्रदान न० सम्+प्र+दा–भावे ल्युट्। १सम्यक्प्रदाने। सम्प्रदीयतेऽस्मै ल्युट्। "कर्मणा यमभिप्रैति स सम्प्रदानमिति" पाणिन्युक्ते २दानकर्मोद्देश्ये। तच्च त्रिविधम्। "अनिराकरणात्कर्त्तुस्त्यागाङ्गं कर्मणेप्सितम्। प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्" इत्युक्तेः। तत्र विष्णवे वस्त्रं ददातीत्यादौ अनिराकर्त्तृ सम्प्रदानम्, याचकाय धनं ददातीत्यादौ प्रेरयितृ सम्प्रदानम्, गुरवे धनं ददातीत्यादौ अनुमन्तृ सम्प्रदानम्। गौणमुख्यसाधारणे सम्प्रदाने चतुर्थी पा०। तल्लक्षणं तु शब्दश० प्र० दर्शितं यथा "गत्यादिभिन्ने धात्वर्थे चतुर्थ्या विपदस्थया। यः स्वार्थो बोधनीयस्तत्सम्प्रदानत्वमीरितम्"। "गत्यादिभिन्नो यज्जातीयस्यार्थे यादृशार्थे विपदस्थचतुर्थ्या यः स्वार्थो बोधयितुं शक्यते स तज्जातीयस्य यादृशक्रियायां सम्प्रदानत्वमुच्यते। ब्राह्मणाय दानं धनस्येत्यादौ ददातेः स्वत्वजनकत्यागोऽर्थस्तादृशे च स्वत्वे ब्राह्मणादेः प्रतियोगित्वं निरूपितत्वं वा चतुर्थ्या बोध्यते इति तदेव तत्र सम्प्रदानत्वं ब्राह्मणप्रतियोगिकं ब्राह्मणनिरूपितं वा यद्धनवृत्ति स्वत्वं तज्जनकत्याग इत्येवं तत्र प्रत्ययात् धात्वर्थतावच्छेदकीभूतस्वत्वाख्यफलवत्तया धनादेर्दानकर्मत्वात्। न चैवं पशुकामनया यागकरणदशायां चैत्रः स्वात्मने पशुं ददातीत्यपि प्रयोगापत्तिस्तादृशयागस्य चैत्रीयं यत् पशुनिष्ठं स्वत्वं तज्जनकत्यागत्वादिति वाच्यं स्वत्वध्वंसजनकक्रियापर्य्यवसन्नस्य त्यागस्यैकदेशे स्वत्वध्वंसेऽपि द्वितीयाद्यर्थस्यान्वयेन पश्वादिकर्मकयागे पशुनिष्ठस्य स्वत्वध्वंसस्य जनकत्वविरहादेव तद्वाक्यस्याप्रमाणत्वात्। ग्रामाय गत इत्यादौ विपदस्थचतुर्थ्या धात्वर्थं साध्यमपि कर्मत्वं न गत्यादिभिन्ने चतुर्थ्या बोधनीयम्। संवर्द्धयितुमित्यादि तुमर्थो न विपदस्थयेति न तत्र प्रसक्तिः। सम्प्रदानशब्दस्तु स्वाश्रयगोचरत्यागजन्यस्वत्वस्य प्रतियोगिन्येव शक्त इति स्वत्वप्रतियोगित्वं सम्प्रदानत्वमित्यादिको न प्रयोगः। न च दानस्य स्वत्वहेतुत्वे प्रमाणाभावः। "सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः। विभागः सम्प्रयोगश्च सत्प्रतिग्रह एव च" इत्यादिमन्वादिवचनैस्तस्य स्वत्वहेतुत्वप्रतिपादनादिति वाच्यं ब्राह्मणाय त्यक्तायां गवि गौरियं ब्राह्मणस्य न तु ममेत्यादिसर्वजनीनप्रतीतेरेव तत्र प्रमाणत्वात् "प्रदानं स्वाम्यकारणमिति" वचनाच्च। अतएव विदेशस्थं पात्रमुद्दिश्य त्यक्तधने स्वीकारमन्तरेणैव पात्रस्य मरणसत्त्वे पितृदायत्वेन तद्धनं पुत्रादिभिर्विभज्य गृह्यते अन्यथा तैरिव उदासीनैरपि तद्धनस्यारण्यकुशादेरिवोपादाने यथेष्टनियोगे च प्रत्यवायो न स्यात्। नन्वेवं दानादेव स्वत्वसिद्धेः परवस्तुनि स्वीकारो व्यर्थ इति चेन्न "लब्ध्वा चाष्टगुणं फलम्" इत्यादिस्मृतेः प्रतिग्रहीतृप्रदानस्य फलविशेषं प्रतिहेतुत्वेन तादृशफलसम्पत्त्यर्थमेव प्रतिग्रहस्योपयोगात् "याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यादि" श्रुत्या मानुक्तस्मृत्या च प्रतिग्रहस्यापि स्वत्वहेतुत्वबोधनाच्च स्वत्वजनकव्यापारस्यैवार्जनपदार्थत्वात्। दासाय भक्तं ददाति भृतकाय वेतनं ददातीत्यादावपि स्वत्वजनकत्यागं प्रतिपादयन् ददातिर्मुख्य एव पुण्यजनकन्तु न तादृशं दानमवैधत्वात्। यत्तु स्वीकारजन्यस्य स्वत्वस्य जनकस्त्यागो दानं मनसा पात्रमुद्दिश्य धनत्यागस्तु न दानं किन्तूत्सर्गमात्रं प्रतिग्रहजन्यस्वत्वं प्रति हेतुभूतवैधत्यागस्यैव तथात्वात्, उद्देश्यात् स्वत्वध्वंसमात्रजनकस्त्यागो न तु तत्र स्वत्वजनकत्यागत्वमेव इति केचिदुक्तं तन्न युक्तं लाघवेन स्वत्वजनकत्यागस्यैव ददात्यर्थत्वात्। तिलानस्मै प्रतिग्रह्णाति तुरगमस्मै विक्रीणीते इत्यादौ द्रव्यान्तरग्रहणपूर्वकं दानमेव प्रतिदानं मूल्यग्रहणपूर्वकं दानमेव च विक्रय इति तत्रापि मुख्यमेव सम्प्रदानत्वं चतुर्थ्या बोध्यते तिलादिकञ्च न मूल्यं पणपुराणादेरेव शास्त्रे तथात्वोपदेशात्। अदृष्टार्थं दत्तस्यैव च स्वीकारः प्रतिग्रह इति परेण प्रीतिदत्तस्य विक्रीतस्य वा तिलतुरगादेः स्वीकारो न दोषावहः। मैत्राय रोचते मोदक इत्यत्र चतुर्थ्या धात्वर्थान्वितमाधेयत्वं धातुना च भक्ष्यत्वप्रकारकेच्छोपस्थाप्यते तिष्ठा तु प्रकाशत इत्यादाविव विषयत्वलक्षणं कर्तृत्वं तथा च मैत्रनिष्ठाया भक्ष्यत्वप्रकारकेच्छाया विषयतावान्मोदक इत्याकारकस्तत्र बोधः। गुरवे गां धारयते इत्यत्र इच्छा स्वहावस्थितिर्द्वितीयया तदन्वितं कर्तृत्वं चतुर्थ्या च तद्विशिष्टेच्छान्वितं सम्बन्धित्वमुपस्थाप्यते तेन गोकर्तृकाया गुरुसम्बन्धिस्थितीच्छाया-

स्थितेरनुकूलव्यापारवानित्याकारस्तत्र बोधः ष्ठाधातूत्तरणिचा व्यापारबोधनादिति कालापाः। पाणिनीयास्तु "धारेरुत्तमर्णः" इति सूत्रानुसारेण चैत्राय शतं धारयते इत्यादाविव गुरवे गां धारयते इत्यादावपि ऋणग्रहणं धारणं दत्तस्य चतुर्थ्यर्थः तथाच गुरुदत्तां गां ऋणत्वेन गृह्णातीत्याकारस्तत्र वाक्यार्थः पश्चाच्छोध्यत्वेनाङ्गीकृतस्य गृहीतस्य द्रव्यस्यर्णत्वमित्याहुः। पुत्राय राध्यति पुत्रायेक्षते इत्यादौ दैवनिरूपणं धात्वर्थस्तद्विशिष्टे च दैवे सुबर्थस्य सम्बन्धस्यान्वयस्तेन पुत्रस्य दैवं निरूपयतीत्येवं तत्र बोधः। गुरवे गां प्रतिशृणोति आशृणोतीत्यादौ देयत्वेनाभ्युपगमः शृणोतेरर्थस्तत्र गोर्विशेष्यत्वेन तदेकदेशे च दाने गुरोरुद्देश्यत्वेनान्वयस्तेन गुरूद्देश्यकदानकर्मत्वेन गामभ्युपगच्छतीत्येवं तत्र बोधः। होत्रे प्रतिगृणातीत्यादौ हर्षानुकूलव्यापारजनकं प्रोत्साहनं गृणातेरर्थस्तदेकदेशे च हर्षे होत्रादेरन्वयस्तेन होतृनिष्ठहर्षानुकूलव्यापारवानित्याकारकस्तत्र बोधः। चैत्राय क्रुध्यति कुप्यतीत्यादौ धात्वर्थ उत्कटद्वेषस्तत्र विषयित्वसम्बन्धं सम्प्रदानत्वं चतुर्थ्या बोध्यते तेन च चैत्रविषयकोत्कटद्वेषवानित्याकारकस्तत्र बोधः। पुत्रे कोपो न युज्यते इत्यादौ लदन्तस्य कोपपदस्यैवार्थे पुत्र इत्यस्यान्वयो न तु धात्वर्थे। पटाय यतते इत्यादावपि धात्वर्थकृतौ सुपा पटस्य विषयित्वं बोध्यते तस्योद्देश्यत्वमेव चतुर्थ्यर्थः कथमन्यथा पटेच्छया तन्तुनिर्माणदशायां पटाय यतते इत्यादिकः प्रयोगः इत्यपि वदन्ति। मित्राय द्रुह्यतीत्यत्र द्विष्टाचरणं द्रोहस्तेन मित्रस्य द्विष्टमाचरतीत्यर्थः। शिष्यायेर्ष्यतीत्यत्रानिष्टानुप्रेक्षणमीर्ष्या तथाच शिष्यानिष्टं नोपेक्षत इत्यर्थः। पुत्रायासूयतीत्यत्र असूया गुणद्वेषस्तेन पुत्रस्य गुणं द्वेष्टीत्याकारस्तत्र बोधः। मित्रं द्रुह्यति शिष्यमीर्ष्यति पुत्रमसूयतीत्यपि प्रयोगात् क्रुधादिकर्मणः सम्प्रदानत्वं वैकल्पिकमित्युन्नीयते। कोपपूर्वकस्य द्रोहादेर्द्रुहादिधातुवाच्यत्वे तत्कर्मणः सम्प्रदानत्वं द्रोहादिमात्रस्य तद्वाच्यत्वे तु कर्मत्वमेवेति पुनः कौमाराः। सोपसर्गयोस्तु क्रुधद्रुहोः कर्मणः कर्मत्वमेव न तु सम्प्रदानता अतएव शिष्यस्याभिक्रोद्धा मित्रस्याभिद्रोढेत्यादौ कृद्योगे कर्मणि षष्ठ्येव प्रमाणम्"।

सम्प्रदाय पु० सम्+प्र+दा–भावे घञ्। १गुरुपरम्परागते सदुपदेशे अमरः। उपचारात् २तदुपदेशयुते जने च। ईश्वरस्यैव सर्वसम्प्रदायप्रद्योतकत्वमिति "निर्माणकायमधिष्ठाय सर्वसम्प्रदायप्रद्योतक इति पातञ्जलाः" कुसुमा०। ईश्वरवादे च सर्वज्ञताऽऽशङ्क्य तथैव व्यवस्थापितं यथा "नन्वशरीरात् कथं वेदघटादिशब्दव्यवहारसम्प्रदायः उच्यते सर्गादावदृष्टोपगृहीतभूतभेदाधीनशरीरोत्पत्तावदृष्टवदात्मसंयोगाददृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानाद्विवक्षावच्छिन्नाधीनकलेवरकण्ठताल्वादिक्रियाजन्यसंयोगाद्वेदोत्पत्तिः। एवं कुलालादिशरीरावच्छेदेनादृष्टसहकृतप्रयत्नवदीश्वरसंयोगात्तद्बुद्धीच्छासहितचेष्टोत्पत्तौ सकलघटानुकूलव्यापारो घटोत्पत्तिः। एवं प्रयोज्यप्रयोजकज्ञानाय व्यापाराभिमतशरीरावच्छेदेनापि अदृष्टसहकृतेश्वरज्ञानेच्छाप्रयत्नादेव व्यवहारः, ततस्तदुपयोगिनो बालो व्युत्पद्यते सोऽयं भूतावेशन्यायः। यत्तु यथा चित्यादिना मौनिस्नाकोऽनुमाय पच्यते तथा सर्गान्तरोत्पन्नतत्त्वज्ञानवता भोगार्थं सर्गादावुत्पन्नेन मन्वादिना सर्वज्ञेन, ईश्वराभिप्रायस्य वेदः साक्षात्कृत्यानूद्यते ततोऽध्ययनसम्प्रदायः स एव कायव्यूहं कृत्वा वाग्व्यवहारं करोतीति मतं तन्न प्रतिसर्गादावनन्तसर्वज्ञकल्पनायां गौरवात् तेषामेव क्षित्यादिकर्तृत्वसम्भवेन ईश्वरानुग्रभाङ्ग। एतेन सर्गादौ सर्गान्तरसिद्धयोगिन एव क्षितिकर्त्तारः सन्त्विति निरस्तं सर्गादावनन्तसर्वज्ञसिद्धिश्च किं प्रमाणान्तरात् क्षित्यादिकर्तृपक्षकाद्वा नाद्यस्तदभावात् नान्त्यः अनादिद्व्यणुकादिकार्य्यप्रवाहस्य एककर्तृकत्वानुमानात् लाघवसहकृतादेकस्यैव सर्वज्ञस्य सिद्धेः"।

सम्प्रदायप्रवर्त्तकभेदाश्च पद्मपु० उक्ता यथा "श्रीमन्नारायणो ब्रह्मा नारदो व्यास एव च। श्रीलमध्वः पद्मनाभो नृहरिर्माधवस्तथा। अक्षोभ्यो जयतीर्थश्च ज्ञानसिन्धुर्महानिधिः। विद्यानिधिश्च राजेन्द्रो जयधर्ममुनिस्तथा। पुरुषोत्तमो ब्रह्मण्यो व्यासतीर्थमुनिस्तथा। श्रीमाल्लक्ष्मीपतिः श्रीमान् माधवेन्द्रपुरी तथा। सम्प्रदायविहीना ये मन्त्रास्ते निष्फला मताः। अतः कलौ भविष्यन्ति चत्वारः सम्प्रदायिनः। श्रीमाध्वरुद्रसनका वैष्णवाः क्षितिपावनाः" पद्मपु०। तन्त्रोक्तवैष्णवसम्प्रदाया यथा "श्रीशिव उवाच वैखानसः सामवेदी श्रीराधावल्लभो तथा। गोकुलेशो महेशानि! तथा वृन्दावनी भवेत्। पञ्चरात्रः पञ्चमः स्यात् षष्ठः श्रीवीरवैष्णवः। रामानन्दी हरिव्यासी निम्बार्कश्च महेश्वरि!। ततो भागवतो देवि! दश भेदाः प्रकी

र्त्तिताः। शिखी मुण्डी जटी चैव द्विविधश्चो क्रमेण च। एकदण्डी महेशानि! वीरशैवस्तथैव च। सप्त पाशुपताः प्रोक्ता दशधा वैष्णवा मताः। एतेषां वाचनं देवि! शृणु यत्नेन शाम्भवि!। वेवेष्टि सर्वं संव्याप्य यस्तिष्ठति स वैष्णवः। वैखानसादिदण्डाद्यैर्भूषितः स्मार्त्तवैष्णवः। श्रीराधावल्लभं देवि! शृणु यत्नेन शाम्भवि!। वैष्णवाचारनिरतो विष्णुतन्त्रैकपारगः। अनन्यचेताः शान्तात्मा विष्णुचिन्तापरायणः। श्रीराधावल्लभो देवि! गोकुलेशं शृणु प्रिये!। नानाभूषणसम्पन्नो नानासुगन्धिभूषितः। गवां कुलं पोषयिता केलिकृष्णस्वरूपधृक्। शरीरमर्थं प्राणांश्च संनिवेदतीह यः। अन्तःशक्तिधरो देवि! बहिर्वैष्णवरूपधृक्। मध्वाचारनिरतो लतावेष्टनतत्परः। सम्प्रदायो गोकुलेशः सर्वसिद्धिकरो भुवि। वृन्दावनाख्यं देवेशि! शृणु यत्नेन साम्प्रतम्। विमताशः प्रसन्नात्मा विष्णुभक्तिपरायणः। कामिनीवल्लभपरो वनक्रीडाविनोदधृक्। सौगन्ध्यभूषिततनुः श्लोध्यानैकपरायणः। विष्णुसायुज्यतत्त्वज्ञः प्रोक्तो वृन्दावनी प्रिये!। पाञ्चरात्रो महेशानि तथैव वीरवैष्णवः। पूर्वमेव महेशानि कीर्त्तितः परमेश्वरि!। रामशक्तिरिति विख्याता सः शिवः परिकीर्त्तितः। रामानन्दी शान्तचित्तो प्रसन्नात्मा विचारधृक्। सर्वत्र समरूपा च रामानन्दी प्रकीर्त्तिता। हरिव्यासी महेशानि! यथावदवधारय। पाषण्डहरणासक्तो विष्णुभक्तो जितेन्द्रियः। यमादिनियमैर्युक्तो भक्ताचारपरायणः। स्वोपयोगफलत्यागी परकार्य्यपरायणः। हरिव्यासी महेशानि! शिवभक्तिस्वरूपधृक्। निम्बार्काख्यं सम्प्रदायं शृणु यत्नेन साम्प्रतम्। निम्बार्चनक्रमासक्तः स्वतन्त्रैकपरायणः। बाह्यपूजादिनिरतो नान्यभक्तः प्रसन्नधीः। आर्य्यपक्षान्वितः स्वच्छः स्वच्छन्दाचारतत्परः। स्वतन्त्रः स्मार्त्तविद्वेषी निम्बार्को भगवान् हरिः। अथ भागवतं देवि! कथ्यते शृणु साम्प्रतम्। विष्णुभक्त्यैकनिपुणो विजितात्मा प्रसन्नधीः। स्मार्त्तमार्गान्वितो देवि! तदन्याचारतत्परः। आर्य्यपक्षान्वितो देवि! तथा शुद्धरूपवेषधृक्। शैवद्वेषी तस्य भक्तात् पुनः ध्यानपरायणः। वैष्णवविष्णुतत्त्वज्ञः प्रोक्तो भागवतः शिवे” शक्तिसङ्ग०त०।

सम्प्रधारणा स्त्री सम्+प्र+धृ–णिच्–युच्। युक्तायुक्तत्वविवेचनार्थसमालोचने अमरः।

सम्प्रयोग पु० सम्+प्र+युज–घञ्। १वशादिलाभेच्छया धनादिविनियोगे “विभाग सम्प्रयोगश्च” इति स्मृतिः। २रमणे ३निधुवने ४अन्वये ५अर्थते त्रि० घजयः ६सम्बन्धे ७कार्मणे वशीकरणादौ मेदि० ८इन्द्रियविषयसम्बन्धे च

सम्प्रयोगिन् त्रि० सम्+प्र+युज–घिनुण्। १कामुके २कलाकेलिकारके ३सम्यगलाभार्थं धनादिविनियोजके। ४संप्रयोजके त्रि० मेदि०। [दिव्यम्

सम्प्रसन्न त्रि०। १सम्यक्प्रसन्ने २तुष्टे च शब्दार्थचि०

सम्प्रसाद पु० सम्+प्र+सद–करणे घञ्। १योगादिशास्त्रोक्ते चित्तस्य नैर्मल्यसम्पादके प्रयत्नभेदे। भावे घञ्। २सम्यक्प्रसन्नतायाम्। आधारे घञ्। ३सुषुप्तौ “तदुक्तमेतत् सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानातीति” श्रुतिः। सम्प्रसन्ने च सुषुप्त्यवस्थे उदाहृतम्।

सम्प्रसाधन न० सम्+प्र+साध–णिच् करणे ल्युट्। १कटकादौ भूषणे। भावे ल्युट्। २भूषणक्रियायाम्।

सम्प्रसारण न० सम्+प्र+सृ–णिच्–ल्युट्। १सम्यग्विकारणे व्याकरणोक्ते यवः स्थाने जायमाने २इक्संज्ञके वर्णे च। “इक् यण: सम्प्रसारणम्” पा०।

सम्प्रहार पु० सम्प्रह्रियतेऽत्र सम्+प्र+हृ–आधारे घञ्। १युद्धे अमरः। भावे घञ्। २सम्यक्प्रहरणे ३गमने च मेदि०।

सम्प्राप्ति स्त्री सम्+प्र+आप–क्तिन्। १सम्यक्प्राप्तौ २वैद्यकोक्ते रोगोत्पत्तिभेदे च तल्लक्षणं भावप्र० उक्तं यथा “अथ संप्राप्तेर्लक्षणमाह “यथा दुष्टेन दोषेण यथा चानुविसर्पता। निर्वृत्तिरामयस्यासौ सम्प्राप्तिर्जातिरागतिः”। यथा दुष्टेन दोषेण यथा कारणभेदेन दोषेण यथा चानुविसर्पता अनेकधा दोषाणां विसर्पता मूर्च्छाधस्तिर्यगादिगतिभेदेन तथा च विसर्पता। आमयस्य या उत्पत्तिः असौ सम्प्राप्तिः। शास्त्रव्यवहाराय सम्प्राप्तेः पर्यायानाह जातिरागतिरिति। संप्राप्तेरौपाधिकभेदानाह “सङ्ख्याविकल्पप्राधान्यबलकालविशेषतः। सा भिद्यते यथात्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति”। सङ्ख्यादिकालविशेषान्तेभ्यः सा संप्राप्तिर्भिद्यते भेदवती क्रियते इत्यर्थः। तत्र सङ्ख्यां विवृणोति। यथा ज्वरोऽष्टधा अतीसारः षड्विध इत्यादि विकल्पं विवृणोति। ‘दोषाणां समवेतानां विकल्पोंऽशांशकल्पना” समवेतानां समुदितानां दोषाणाम् अंशांशकल्पनाद्येन तस्याधिकभेदेभोगकल्पना विकल्पः। प्राधान्यं विवृणोति। “स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्”। व्याधेः

स्वातन्त्र्येण प्राधान्यं पारतन्त्र्येणाप्राधान्यञ्च वदेदित्यर्थः। यथा स्वतन्त्रस्य ज्वरस्य प्राधान्यं ज्वराधीनानां श्वासादीनामप्राधान्यम्। बलं विवृणोति "हेत्वादिकात् स्न्याश्रयैर्बलाबलविशेषणम्"। अत्रापि व्याधेरित्यनुवर्त्तते हेत्वादीनां हेतुपूर्वरूपरूपाणाम्। कार्त्स्न्येन साकल्येन अवयवैः एकदेशेन व्याधेर्बलाबलयोर्विशेषणम्। विशेषणं बोध। कालं विवृणोति। "नक्तं दिनर्त्तुभुक्तांशैर्व्याधिकालो यथामलम्" नक्तमव्ययं रात्रिवाचकम्। अतेनैतदुक्तं यश्चिन्नक्तादिरंशो यस्य दोषस्य प्रकोप उक्तोऽस्ति सोऽंशस्तस्य दोषजस्य व्याधेः काल इत्यर्थः। नक्तादेरंशेषु वातादिप्रकोप उक्तो वाग्भटेन "ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः। वयोऽहोरात्रिभुक्तानामन्तमध्यादिगाः क्रमात्" इति" ते वातपित्तकफाः। ऋतुषु वातादिको यथा। "वर्षासु शिशिरे वायुः, पित्तं शरदि चोष्मके। वसन्ते तु कफः कुप्येदेषा प्रकृतिरार्त्तवी। संप्राप्तिर्व्याधीनां ज्ञानाय हेतुः, यथा मिथ्याहारविहारकुपितवाताद्यामाशयगमनरसदूषणकोष्ठाग्निबहिर्निरसनरूपं ज्वरोत्पत्तिप्रकारं बोधयति। तथा व्याधीनां सङ्ख्यादोषांशकल्पना प्राधान्यबलकालांश्च बोधयति।

स(म्प्रे)म्प्रैष पु० सम्+प्र+इष–घञ् वा वृद्धिः। १नियोगे २विधौ हेमच०। विधिशब्दे ४९०७ पृ० दृश्यम्।

सम्प्रोक्षण न० सम्+प्र+उक्ष–ल्युट्। जलादिसेचनेन संस्कारभेदे अभ्युक्षणशब्दे ३१२पृ० दृश्यम्। [स्कारे पदार्थे।

सम्प्रोक्षित त्रि० सम्+प्र+उक्ष–क्त। जलादिसेचनेन कृतसं-

सम्फाल पु० सम्+फल–ज्वला० ण। मेषे हेमच०।

सम्फुल्ल त्रि० सम+फुल्ल–अच्। विकसिते। सम+फल–क्त अत उत्वम्। सम्फुल्त इति लकारमध्योऽपि तत्रैव।

सम्ब सम्बन्धे भ्वा०प०स०सेट्। सम्बति असम्बीत् षोपदेशः साधुः

सम्ब सम्बन्धे चु०उभ०सक०सेट्। सम्बयति ते असमम्बत् त।

सम्ब न०सम्ब–अच्। १कृष्टक्षेत्रस्य प्रतिलोमकर्षणे २जले जटा०

सम्बद्ध त्रि० सम्+बन्ध–क्त। १सम्बन्धिनि। भावे क्त। २सम्यग्बन्धने न०।

सम्बन्ध पु० सम्+बन्ध–घञ्। १संयोगादौ २संसर्गे ३सङ्गतौ अजयः। ४सम्यग्बन्धने ५न्यायमते संसर्गभेदे च। स च सम्बन्धस्त्रिविधः "सम्बन्धस्त्रिविध पुरा विधेन्द्र! जगतीतले। विद्याजाया⋯⋯व प्रीतिजश्च प्रकीर्त्तितः। मैत्रन्तु प्रीतिजं प्रो⋯ स सम्बन्धः सुदुर्लभः" ब्रह्मवै० ब्रह्मख० १०अ०। संसर्गश्च नानाविधः "षष्ठी शेषे" पा०

सूत्राभाष्ये दर्शितस्तत्रावगन्तव्यः। न्यायमते संयोगसमवायादिरूपः। सम्यग् बन्धो यतः। ६युक्ते त्रि०अजयः।

सम्बर न० सम्ब–अरन्। १जले अमरः अयं तालव्यादि रूपः। २बौद्धव्रतभेदे मेदि०। ३संयमे त्रि० ४सेतौ हेमच० ५दैत्यभेदे ६मृगभेदे ७मीनभेदे पुंस्त्री० स्त्रियां ङीप्। ८पर्वतभेदे च पु० शब्दर०। ९जैनमेदे १०जिनमतप्रसिद्धपदार्थभेदे। स च आस्रवनिरोधरूपः गुप्तिसमित्यादिः अर्हत्शब्दे ३८४पृ० तस्योद्देशः ३८५पृ० च तल्लक्षणं दृश्यम्। संवर इत्येव अन्तस्थवमध्यः पाठः तत्रार्थे।

सम्बरारि पु० सम्बरस्य दैत्यविशेषस्य अरिः। कामदेवे अमरः

सम्बरी स्त्री सम्ब–अरन् ङीप्। १मूषिकपर्ण्याम् अमरः। २जलाबर्यांश्च तालव्यादिरयमिति भरतः।

सम्बल न० सम्ब–कलच् सम्यक् बलं यतो वा। १जले शब्दर० २पाथेये पु० न० अमरः तालव्यादि तत्रार्थे भरतः।

स(श)म्बाकृत त्रि०स(श)म्बेन प्रातिलोम्येन कृष्टं क्षेत्रं स(श) म्ब+डाच्–कृ–क्त। १अनुलोमकर्षानन्तरं प्रतिलोमकृष्टे द्विःकृष्टे क्षेत्रादौ अमरः। भावे क्त। २प्रतिलोमकर्षणे न०

सम्बाध न० सम्यक् बाधा यत्र। १नरकभेदे भये शब्दमा०। सम्+बाध–भावे घञ्। २अन्योन्यसंघर्षे पु० ३सङ्कटे ४भगे मेदि०।

सम्बाधन पु० सम्+बाध–ल्यु करणे ल्युट् वा। १द्वारपाले २शूलाग्रे ३मदनद्वारे भगे च मेदि०। भावे ल्युट्। ४सम्यक्पीडने। [त्रि०।

सम्बुद्ध पु० प्रा०स०। १बुद्धावतारे त्रिका०। २सम्यग्बोधाश्रये

सम्बुद्धि स्त्री सम्+बुध–क्तिन् सम्यग्बुद्धिर्यत्र वा। १सम्यग्बोधे २सम्बोधनशब्दार्थे च। [अजयः ४सम्यग्ज्ञाने च

सम्बोध पु० सम्+बुध–घञ्। १क्षेपे २बोधने मेदि०। ३नाशे

सम्बोधन न०सम्+बुध–ल्युट्। १सम्यग्ज्ञाने। बुध–णिच्–युच्। तत्रार्थे स्त्री भरतः। ल्युट्। २सम्यग्ज्ञापने "स्थितस्याभिमुखीभावमात्रं सम्बोधनं विदुः। प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते" इति व्याकरणोक्तेः अन्यतामसक्तस्याभिमुखीकरणाय अभीष्टक्रियासु विनियोगाय ज्ञापनादिरूपे ३व्यापारभेदे न०

"सम्बोधनपदं यच्च तत् क्रियाया विशेषणम्। व्रजानि देवदत्तेत्यादौ निघातोऽत्र तथा सति" हरिः। समानवाक्ये एव निघातस्य (अनुदात्तस्य) विधानात्। व्रजानि देवदत्त इत्यादौ तस्य निघातः। "सम्बोधनान्तं कल्पोक्तः कारकं प्रथमो वात. । धातुसम्बन्धाधिकारविहितमस-

सम्बन्धः । तथा तस्य च भावेन षष्ठी चेत्युदितं द्वयम् । सम्बन्धवाचकस्यास्य क्रियथैवाभ्यर्थताम्" इत्युक्तेस्तस्य क्रियायामेवान्वयः । सम्बोधनार्थे च प्रथमा ।

सम्भली स्त्री सम्यक् भलते सम्+भल-अच् गौरा० ङीष् । कुट्टिन्याम् परपुरुषेण सह अन्यस्त्रिया योजयित्र्याम् अमरः । ताम्बूल्यादि तत्रार्थे भरतः ।

सम्भव पु० सम्+भू-अप् । १उत्पत्तौ २आधेयस्याधारे अनावेशनयोग्यत्वरूपे व्यापारे ३उत्कटकोटिकसन्देहे गदा० । ४सङ्गते । अपादाने अप् । ५हेतौ । कर्त्तरि अच् । ६मेलके त्रि० मेदि० । ७अपाये च अजयः । पौराणिकमतसिद्धे प्रमाणभेदे ८तत्प्रमाणे च तदेतन्मतम् तत्त्वकौमुद्यां प्रदर्श्य "सम्भवस्तु यथा खार्य्यां द्रोणाढकप्रस्थाद्यवगमः सचानुमानमेव खारीत्वं हि द्रोणाद्यविनाभूतं प्रतीतं खार्य्यां द्रोणादिसत्त्वमवगमयतीति" अनुमानान्तर्गततया प्रमाणान्तरत्वं दूषितम् । खारीत्वं खारीपरिमाणं महापरिमाणे स्वावान्तरपरिमाणसमावेशोऽनुभवसिद्धः तथा च खारीपरिमाणं द्रोणादिपरिमाणव्यापकमिति व्यापकस्थित्या व्याप्यस्थितेरावश्यकत्वादनुमानेनैव गतार्थत्वमर्थः । "न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात्" गौ० सू० भाष्ये "सम्भवो नाम अविनाभाविनोऽर्थस्य सत्ताग्रहणम् । यथा द्रोणस्य सत्ताग्रहणात् आढकस्य सत्ताग्रहणम् एवम् आढकस्य सत्ताग्रहणात् प्रस्थादिसत्ताग्रहणम्" उक्तम् । तद्वृत्तौ च "अविनाभाववृत्त्या च सम्बद्धयोः समुदायसमुदायिनोः समुदायेन इतरस्य ग्रहणं सम्भवः तच्चानुमानमेव" इत्युक्तम् ।

सम्भव्य पु० सम्+भू-कर्त्तरि यत् । १कपित्थे शब्दच० २सम्भाविनि त्रि० । [३समूहे ४सामग्र्यां च मेदि० ।

सम्भार पु० सम्+भृ-घञ् । १परिपूर्णतायां त्रिका० २सम्भृतौ

सम्भावन न० सम्+भू-णिच्-ल्युट् । १अर्थालङ्कारभेदे अलङ्कारशब्दे ४०७ पृ० दृश्यम् । २व्याकरणोक्ते क्रियासु योग्यताध्यवसाये २लिङर्थभेदे ३उत्कटकोटिकसंशयरूपे ४ज्ञानभेदे च गदाधरः । युच् । सम्भावनाप्युक्तार्थे स्त्री

सम्भावित त्रि० सम्+भू-णिच्-क्त । सम्भवयुक्ते पदार्थे ।

सम्भाषण न० सम्+भाष-ल्युट् । १सम्यक्कथने २परस्परकथने च ।

सम्भिन्न त्रि० सम्+भिद-क्त । १विदलिते २भेदान्विते ३सम्यग्विकसिते च "करैरिन्दोरलम्बुरित इव सम्भिन्नमुकुलः" इति वेणीसंहारः ।

सम्भूति स्त्री सम्+भू-क्तिन् । १विभवे २ईश्वरस्यैश्वर्य्यभेदे च "सम्भूतिं च उपासते" इति श्रुतिः ।

सम्भूयसमुत्थान न० सम्भूय मिलित्वा सम्युत्तिष्ठन्त्यनेन सम्+उद्+स्था-करणे ल्युट् । १मिलित्वा वणिजां वाणिज्यादिकर्मकरणे २तद्विषयके विवादभेदे च तत्स्वरूपादिकं वीरमि० उक्तं यथा

"अथ सम्भूयसमुत्थानाख्यव्यवहारपदम् । तस्य स्वरूपमाह नारदः "वणिक्प्रभृतयो यत्र कर्म सम्भूय कुर्वते । तत् सम्भूयसमुत्थानं व्यवहारपदं स्मृतम्" इति । वणिक्प्रभृतय इत्यनेन ऋत्विङ्नटनर्त्तककर्षकादीनां ग्रहणम् । यद्यपि फलभूतस्य स्वर्गस्य कर्त्तृगामित्वाभावादात्मनेपदस्यानुपपन्नत्वेन प्रभृतिशब्देन ऋत्विग्ग्रहणमनुचितम् । तथापि आत्मनेपदाऽविवक्षयैवेदमुक्तम्, न ऋत्विङ्मात्रे आत्मनेपदाविवक्षणे अन्यांशे च विवक्षणे वैरूप्यप्रसङ्ग इति वाच्यम् । सम्भूयकर्त्तृत्वमात्रस्य उपलक्षणत्वेनात्मन वास्तवतत्सत्त्वेऽपि तदपेक्षावैयर्थ्यप्रसङ्गाभावात् । न च चिन्तामणिकृता कर्त्रभिप्राय इत्यस्य कर्त्रभिप्रायविषये कर्तृनिष्ठाविषये क्रियाफल इति व्याख्यातत्वादृत्विजामपि सफलं यजमानस्य कर्म भवत्विति चेतनोपरागेच्छा सम्भवत्येवेत्यात्मनेपदविवक्षायामपि का क्षतिरिति वाच्यम् । कर्त्रभिप्राये कर्तृगामिनीत्यस्यैव व्याख्यानस्य महाभाष्याद्यनेकग्रन्थसम्मतत्वेनान्यादृशव्याख्यानस्य महाभाष्यादिविरुद्धत्वात् । अत्र वाणिज्यादिकरणे अधिकारिणो दर्शयति बृहस्पतिः "कुलीनदक्षानलसैः प्राज्ञैर्नाणकवेदिभिः । आयव्ययज्ञैः शुचिभिः शूरैः कुर्यात् सह क्रियाम्" इति । क्रियां कृषिपाशुपाल्यस्तेयवाणिज्यरूपाम् । नाणकविज्ञानं वाणिज्यक्रियायामुपयुज्यते । आयव्ययज्ञानमात्रं कृषिक्रियायाम् । शिल्पिक्रियायां सङ्गीतक्रियायां च प्राज्ञत्वम् । क्रतौ कुलीनत्वप्राज्ञत्वशुचित्वानि । स्तेये तु शूरत्वमात्रमुपयुज्यते । दक्षत्वानलसत्वे सर्वत्रोपयुज्येते । अत एवादक्षादीन्निषेधयति स एव "अशक्तालसरोगार्त्तमन्दभाग्या निराश्रयाः । वाणिज्याद्याः सहैतैस्तु न कर्त्तव्या बुधैः क्रियाः" इति । निराश्रयाः मूलधनरहिताः । ये तु सम्भूय वाणिज्यादिक्रियां कुर्वन्ति ते द्रव्यानुरोधेन लाभादिभाजो भवन्तीत्याह नारदः "समोऽतिरिक्तो हीनो वा तत्रांशो यस्य यादृशः । क्षयव्ययौ तथा वृद्धिस्तस्य तथाविधा" इति । बृहस्पतिरपि

"प्रयोगं कुर्वते ये तु हेमधान्यरसादिना। समन्यूनाधिकैरंशैर्लाभस्तेषां तथाविधः। समो न्यूनोऽधिको वांशो येन क्षिप्तस्तथैव सः। व्ययं दद्यात् कर्म कुर्य्याल्लाभं गृह्णीत चैव हि" इति। यत्र पुनरस्य द्वौ भागावस्यैक इति संवित् कृता तत्र तदनुरोधेन व्ययलाभौ प्रकल्पनीयावित्याह याज्ञवल्क्यः "समवायेन वणिजां लाभार्थं कर्म कुर्वताम्। लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ" इति। सम्भूयकारिणां कर्त्तव्यमाह व्यासः "समक्षमसमक्षं वाऽवञ्चयन्तः परस्परम्। नानापण्यानुसारास्ते प्रकुर्युः क्रयविक्रयौ। समोपयन्तो भाण्डानि दद्युः शुल्कञ्च तेऽध्वनि। अन्यथा द्विगुणं दाप्याः शुल्कस्थानाद्बहिःस्थिताः" इति। नारदोऽपि "भाण्डपिण्डव्ययोद्धारभारसारान्ववेक्षणम्। कुर्य्युस्तेऽव्यभिचारेण समये स्वे व्यवस्थिताः" इति। अथ वा सर्वानुमत्या सर्वेषां कार्य्यमेक एव कुर्य्यात्। अतएव बृहस्पतिः "बहूनां सम्मतो यस्तु दद्यादेको धनं नरः। करणं कारयेद्वापि सर्वैरेव कृतं भवेत्" इति। करणं लेख्यादिकम्। सम्भूयकारिणामितरेतरविवादे निर्णयप्रकारमाह स एव "परीक्षकाः साक्षिणश्च त एवोक्ताः परस्परम्। सन्दिग्धेऽर्थे वञ्चनाया न चेद्विद्वेषसंयुतः" इति। यदा तु विद्वेषसंयुक्तास्तदाप्याह स एव "यः कश्चिद्वञ्चकस्तेषां विज्ञातः क्रयविक्रये। शपथैः सोऽपि शोध्यः स्यात् सर्ववादेष्वयं विधिः" इति। सर्ववादेऽपि वञ्चनरहितवादेऽपि। वञ्चकत्वे सिद्धे सति किं कार्य्यमित्यपेक्षिते आह याज्ञवल्क्यः "जिह्मं त्यजेयुर्निर्लाभम्" इति। जिह्मं वञ्चकमिति लाभं कृत्वा त्यजेयुरन्यैः कुर्य्युरितरे सम्भूयकारिण इत्यर्थः। सम्भूयकारिष्वसमर्थं प्रत्याह स एव "अशक्तोऽन्येन कारयेत्" इति। स्वांशानुरूपं कर्म्मेति शेषः। दैवराजकृतद्रव्यहानिविषये सर्वान् प्रत्याह बृहस्पतिः "द्रव्यहानिर्यदा तत्र दैवराजकृता भवेत्। सर्वेषामेव सा प्रोक्ता कल्पनीया यथांशतः" इति। सम्भूयकारिभिः सर्वैरिति शेषः। अयहानिरिति पाठे अयायेव हानिः अयहानिरपचयार्थमनतिरिक्ता हानिरित्यर्थः। प्रातिस्विकदोषेण द्रव्यनाशे स एवाह "अनिर्दिष्टो वार्य्यमाणः प्रमादाद्यस्तु नाशयेत्। तेनैव तद्भवेद्देयं सर्वेषां समवायिनाम्" इति। अनिर्दिष्टः समवाय्यननुज्ञातः। याज्ञवल्क्योऽपि "प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितम्। स तद्दद्यात्"। पालने त्वाह स एव "विप्लवाद्रक्षिताद्दशमांशभाक्" इति। बृहस्पतिरपि "दैवराजभयाद्यस्तु स्वशक्त्या परिपालयेत्। तस्यांशं दशमं दत्त्वा गृह्णीयुस्तेंऽशतोऽपरम्" इति। तस्य तस्मै दशममंशन्तं समवायिद्रव्यमिति शेषः। प्रतिपालयेत् समाहरेत् स्वशक्त्या प्रत्याहरेदित्यर्थः। नारदोऽपि "दैवतस्करराजाग्निव्यसने समुपस्थिते। यस्तत् स्वशक्त्या रक्षेत तस्यांशो दशमः स्मृतः" इति। यस्तु समवायिद्रव्यं समवायिभिः सह प्रतियाचनादिना न साधयति तस्य लाभहानिरित्याह बृहस्पतिः "समवेतैस्तु यद्दत्तं प्रार्थनीयं तथैव तत्। न याचते च यः कश्चिल्लाभात् स परिहीयते" इति। "याचनग्रहणं येन यत्कर्म स्वांशानुरूपं कर्त्तव्यं तस्याप्युपलक्षणार्थं तेन तत्करणाकरणेऽपि लाभहानिरित्यभ्याहेय वचनात् प्रतिपत्तव्यमिति" स्मृतिचन्द्रिकायाम्। सम्भूयकारिणामृत्विजां कर्त्तव्यमाह मनुः "ऋत्विजः समवेतास्तु यत्र सत्रे निमन्त्रिताः। कुर्य्युर्यथार्हं तत्कर्म गृह्णीयुर्दक्षिणां तथा" इति। अत्र सत्रशब्दो यज्ञमात्रविवक्षया प्रयुक्तो न पुनर्बहुयजमानकर्त्तृकक्रतुविशेषविवक्षया। तत्र यजमानानामेवाध्वर्य्वादिकर्मकारित्वे दक्षिणार्हाणामृत्विजामभावात्। तथा कर्मानुसारेण दक्षिणां गृह्णीयुरित्यर्थः। तथा च स एव "सम्भूय स्वानि कर्म्माणि कुर्वद्भिरिह मानवैः। अनेन कर्म्मयोगेन कर्त्तव्यांशप्रकल्पना" इति। स्वानि कर्म्माणि याजमानव्यतिरिक्तानीति शेषः। इयं चांशकल्पना द्वादशशतं गावो दक्षिणेत्येवं क्रतुसम्बन्धित्वेन विधीयमानायां दक्षिणायामेव न ऋत्विग्विशेषोद्देशेन विहितायां तद्विधायकश्रुतिविरोधापत्तेः अतएवाहतुर्मनुबृहस्पती "रथं हरेद् तथाध्वर्युर्ब्रह्माधाने च वाजिनम्। होता निविहरं चाश्वमुद्गाता चाप्यनः क्रये" इति। निविहरं निविच्छंसनगत्यं वरम्। उद्गातृशब्देनोद्गातृगणाध्यक्षः सुब्रह्मण्यो गृह्यत इति मदनरत्ने। अनः शकटम्। क्रये सोमक्रये। दक्षिणांशकल्पनायाः प्रकारमाहतुः मनुबृहस्पती "सर्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे। तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः" इति। सर्वेषां षोड़शानामृत्विजां मध्ये ये मुख्या गणस्थायाः होतृब्रह्माध्वर्य्यूद्गातारस्तेऽर्द्धिनः उक्तदक्षिणायाः किञ्चिन्न्यूनमर्द्धं ४८ गृह्णीयुः समभागपक्षे वक्ष्यमाणविभागकल्पनाविरोधः स्यात्। अपरे द्वितीय

मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्तदर्द्धिनः४ मुख्यभागार्द्धिनोऽर्द्धं ग्राहिणः, तृतीयिनोऽच्छावाकाग्नीध्रोन्नेतृप्रतिहर्त्तारो मुख्यभागस्य तृतीयांशः३भाजः। पादिनोऽन्त्याः ग्रावस्तोतृपोतृनेष्टृसुब्रह्मण्याख्या मुख्यभागस्य चतुर्थांश१२ग्राहिण इत्यर्थः। मुख्यानां चतुर्णां मिथोविभागश्च समः एवं द्वितीयादीनामपि स,एव विभागः। तथा च गोशतं दक्षिणेति पक्षमाश्रित्य कात्यायनसूत्रम् "द्वादश द्वादश मुख्येभ्यः षट्षट् द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्र इतरेभ्यः" इति। संगृहीतमेतद्बौधायनकारिकायामपि "पञ्चविंशतिधा कृत्वा वर्गीया दक्षिणा क्रमात्। द्वादशैवाथ षट्कं च चतस्रस्त्रय एव चेति" द्वादशाधिकगोशतरूपाया दक्षिणायाः प्रथमश्चत्वारो भागाः कर्त्तव्याः। तत्रैको भागो होतृवर्गस्यापरो भागो ब्रह्मवर्गस्यापरोऽध्वर्युवर्गस्यापर उद्गातृवर्गस्य। पुनरेकैकस्य भागस्य पञ्चविंशतिभागाः कर्त्तव्याः। तेष्वाद्यानां होत्रादीनां द्वादश भागाः, द्वितीयानां षट्, तृतीयानां चत्वारश्चतुर्थानां त्रय इत्यर्थः। पश्वन्यादौ तु विषमविभागानभिधानात् "समं स्यादश्रुतत्वादिति" न्यायेन समत्वेनैव विभाग इति मन्तव्यम्। स्वकीयकर्मकलापांशकर्तृषु कृतानुसारेण भागो देय इत्याह मनुः "ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत्। तस्य कर्मानुरूपेण देयोऽंशः सह कर्तृभिः" इति। सहकर्तृभिः सम्भूयकारिभिरित्यर्थः। यद्वा कर्तृभिः सह देयः दक्षिणाकाले देयो यजमानेनेत्यर्थः। अथ वा कर्म परित्याज्य सह कर्तृभिरित्यर्थः। यदा तु ऋत्विक् दैववशेन दक्षिणादानानन्तरं त्यजति तदाऽवशिष्टं तद्गणवर्त्तिना कर्म अदक्षिणेनान्येन कारयेदित्याह स एव "दक्षिणासु च दत्तासु स्वकर्म परिहापयेत्। कृत्स्नमेव लभेतांशमन्येनैव च कारयत्" इति। कर्ममध्ये ऋत्विङ्मरणे कर्त्तव्यमाह नारदः "ऋत्विजां व्यसनेऽप्येवमन्येन कर्म निस्तरेत्। लभेत दक्षिणादानं स तस्मात् सम्प्रकल्पितम्" इति। अन्येन स्वगणमध्यवर्त्तिनां मध्ये प्रत्यासन्नेन, येन केनचिदन्येन कार्यमाणे त्वध्वर्य्वादिसमाख्याबाधापत्तेरिति ध्येयम्। यत्तु यज्ञपार्श्वतयोर्वचनम् "अथ चेदनुप्राप्ते सवने ऋत्विक् म्रियते तस्य सगोत्रोऽथ शिष्यो वा तत्कार्य्यमनुपूरयेत्"। अथ चेदवाऽऽस्वरतोऽन्यमृत्विजं वृणुयात्" इति। यत्तु वृहस्पतिवचनम्। "एवं क्रियाप्रवृत्तानां यदा कश्चिद्विपद्यते। तद्वस्तुना क्रिया कार्य्या सर्व्वैः सहकारिभिः" इति। तदेकान्तगणरहितर्त्विक्कर्तृकदर्शपौर्णमासादियागविषयमित्यभिहितं स्मृतिचन्द्रिकायाम्। जीवत्येव तु ऋत्विजि यजमानेन ऋत्विगन्तरकरणे कस्य दक्षिणेति मीमांसायामाह यज्ञः "अथ ऋत्विजि वृते पश्चादन्यं वृणुयात् पूर्वाहृतस्यैव दक्षिणा पश्चादाहृतः किञ्चिल्लभते" इति। यदा त्वकारणमृत्विग् याज्यं त्यजति याज्यो वा ऋत्विजं, तदा तयोर्दण्डमाह मनुः "ऋत्विजं यस्त्यजेद्याज्यो याज्यमृत्विक् त्यजेद्यदि। शक्तं कर्मण्यदुष्टञ्च तयोर्दण्डः शतं शतम्" इति। नारदोऽपि "ऋत्विक् च त्रिविधो दृष्टः पूर्वजुष्टः स्वयंकृतः। यदृच्छया च यः कुर्य्यादार्त्विज्यं प्रीतिपूर्वकम्। ऋत्विग्याज्यमदुष्टं यस्त्यजेदनपकारिणम्। अदुष्टञ्चर्त्विजं याज्यो विनेयौ तावुभावपीति"। ये कृषिसाधने स्वसमानास्तैः सह कृषिः कार्य्येत्याह वृहस्पतिः "वाह्यकर्षकवीजाद्यैः क्षेत्रोपकरणेन च। ये समानास्तु तैः सार्द्धं कृषिः कार्य्या विजानता" इति। वाह्याः वाहनादिवाहकाः बलीवर्दाः। कर्षकाः कृष्यर्थं नियुक्ताः पुरुषाः आदिशब्देन कृषिसाधनानामन्येषां ग्रहणम्। सम्भूयकारिणां कर्षकाणां कर्त्तव्यमाह वृहस्पतिः "पर्व्वते नगराभ्यासे तथा राजपथस्य च। ऊषरं मूषकव्याप्तं क्षेत्रं यत्नेन वर्ज्जयेत्" इति। पर्व्वते पर्व्वतसमीपे. कल्पतरुकृता तु विवीत इति पठित्वा विवीतशब्देन पशवाहनार्थं रक्षितः प्रदेश इति व्याख्यातम्। नगराभ्यासे नगरसमीपे। राजपथस्य समीप इति शेषः। एतदुक्तं भवति पशवाद्यावकाशमात्रमपि ऊषरं मूषकव्याप्तञ्च क्षेत्रं वर्ज्जयेदिति। वाह्येष्वपि वर्ज्जनीयानाह स एव "लघ्वाशिनञ्च क्षुद्रञ्च रोगिणं प्रपलायिनम्। काणं खञ्जञ्च नाद्द्याद्वाह्यं प्राज्ञः कृषीवलः" इति। काणः एकाक्षः खञ्जः भग्नचरणः। कृषिदत्तैकस्यैव हानिमाह स एव "वाह्यवीजात्ययाद्यस्य क्षेत्रहानिः प्रजायते। तेनैव सा प्रदातव्या सर्व्वेषां कृषिजीविनामि"ति। सम्भूयकारिणामिति शेषः। वाह्यवीजग्रहणं कृषिसाधनानामुपलक्षणार्थम्। सम्भूयकारिणां शिल्पिनां स्वरूपं दर्शयंस्तेषां लाभविभागेऽंशपरिकल्पनाप्रकारमाह स एव "हिरण्यकुप्यसूत्राणां काष्ठपाषाणचर्म्मणाम्। संस्कर्त्ता तत्कलाभिज्ञः शिल्पी प्रोक्तो मनीषिभिः। हेमकारादयो

यत्र शिल्पं सम्भूय क्रियते । कर्मानुरूपं निर्वेशं लभेरंस्ते यथांशतः” इति । कुप्यं हेमरूप्यव्यतिरिक्तमपुषीसादिकम् । हेमरूप्ये इति प्रस्तुत्य ताभ्यां ‘यदन्यत्कुप्यमित्यमरसिंहेनोक्तत्वात् । निर्वेशो भृतिः । कात्यायनोऽपि “शिक्षकाभिज्ञकुशला आचार्य्यश्चेति शिल्पिनः । एकद्वित्रिचतुर्भागान् हरेयुस्ते यथोत्तरम्” इति । हर्म्यादिनिर्माणां मध्ये मुख्यस्य भागद्वयमाह बृहस्पतिः “हर्म्यं देवगृहं वापि वाटिकोपस्कराणि च । सम्भूय कुर्वतां तेषां प्रमुखो द्व्यंशमर्हति” इति । नर्त्तकेष्वपि मुख्यस्यांशद्वयभागित्वमतिदिशन् विशेषान्तरमाह स एव “नर्त्तकानामेष एव धर्मः सद्भिरुदाहृतः । तालज्ञो लभतेऽध्यर्द्धं गायनास्तु समांशिनः” इति । अध्यर्द्धम् अर्द्धाधिकमेकमंशम् । सम्भूयकारिणाश्चौराणां लाभभागेऽंशपरिकल्पनाप्रकारमाह कात्यायनः “परराष्ट्राद्धनं यत् स्यादाचौरैः स्वाम्याज्ञया हृतम् । राज्ञे दशांशमुद्धृत्य विभजेरन् यथाविधि । चौराणां मुख्यभूतस्तु चतुरोऽंशांस्ततो हरेत् । शूरोऽंशांस्त्रीन् समर्थौ द्वौ शेषास्त्वेकमेव च” इति । एतद्धनं दुर्बलवैरिदेशादाहृतविषयम् प्रबलवैरिदेशादाहृते त्वाह बृहस्पतिः “स्वाम्याज्ञया तु यच्चौरैः परदेशात् समाहृतम् । राज्ञे दत्त्वा तु षड्भागान् भजेयुस्ते यथांशतः ।चतुरोंऽशान् भजेन्मुख्यः शूरस्त्र्यंशमवाप्नुयात् । समर्थस्तु हरेद् द्व्यंशं शेषास्त्वन्ये समांशिनः” इति । समर्थः शक्तः । एतेषां हानिरप्येवमेवेत्याह कात्यायनः “तेषां चेत् प्रसृतानां तु ग्रहणं समवाप्नुयात् । तन्मोक्षणार्थं यद्दत्तं वहेयुस्ते यथांशतः” इति । इयमंशपरिकल्पना ऋत्विग्भिन्नसम्भूयकारिणां समयाभावविषया कृते तु समये तदनुसारेणैव । अतएव तेनैवोक्तम् “वणिजां कर्षकाणाञ्च चौराणां शिल्पिनान्तथा । अनियम्यांशकर्त्तृणां सर्वेषामेव निर्णयः” इति । अनियम्य लाभहान्योः समयेन प्रतिपुरुषमंशमकृत्वेत्यर्थः” ।

सम्भृति स्त्री सम्+भृ-क्तिन् । सम्यक् पोषणे ।

सम्भेद पु० संभिद्यते संश्लिष्यतेऽत्र सम्+भिद्--आधारे घञ् । १नद्योः सङ्गमस्थाने अमरः । भावे घञ् । २सङ्गमे ३सम्यग्भेदने ४स्फुटने ५मिलने मेदि० ६ऐकरूप्ये च “सम्भेदे नान्यतरवैयर्थ्यम्” इति मीमांसायां न्यायः ।

सम्भोग पु० सम्+भुज-घञ् । १सम्यग्भोगे २सुरते ३शिश्नाग्रभेदे मेदि० ४हर्षे शब्दच० ५केलिनागरे जटा० “दर्शनस्पर्शनादीनि निषेवेते विलासिनौ । यत्रानुरक्तावन्योन्यं सम्भोगः स उदाहृतः” इत्युक्तलक्षणे ६शृङ्गारस्यावस्थाभेदे सा०द० ।

सम्भ्रम पु० सम्+भ्रम--घञ् न वृद्धिः । १भयादिजनिते वेगे अमरः । २त्वरायां ३तद्धेतुके ४भये ५आदरे मेदि० । ७अतिशयभ्रमे ७छले अजयः ।

सम्मति स्त्री सम्+मन--क्तिन् । १अनुमतौ २अभिलाषे च मेदि० । ३आत्मज्ञाने अजयः । [३कृष्णयुक्ते त्रि० ।

सम्मद पु० सम्+मद-घञर्थे क । १हर्षे अमरः । कर्त्तरि कच्

सम्मर्द पु० संमृद्यतेऽत्र सम्+मृद्--आधारे घञ् । १युद्धे । भावे घञ् । २अन्योन्यसंघर्षे च ।

सम्मातुर पु० समीच्याः सत्या मातुरपत्यम् अण् उत् रपरः वा० न वृद्धिः । सतीतनये भाद्रमातुरे हेमच० ।

सम्मान पु० सम्+मन-घञ । आदरे । [हृते च ।

सम्मानित स्त्री सम्+मन--णिच्-क्त । १कृतगौरवे २समा-

सम्मार्जन स्त्री सम्+मृज-ल्यु । संशोधने रत्नमा० ।

सम्मार्जनी स्त्री संमृज्यतेऽनया सम्+मृज--करणे ल्युट् ङीप् । धूल्याद्यपसारणार्थे पदार्थे (झाँटा) अमरः । ण्वुल् । सम्मार्जक तदर्थे पु० शब्दर० ।

सम्मित त्रि०सम्+मा-क्त । १सदृशे २तुल्यपरिमाणे च जटा०

सम्मुख त्रि०सङ्गतं मुखं येन प्रा०ब० । अभिमुखागते त्रिका० ।

सम्मुखीन त्रि० सम्मुख पतति ख । अभिमुखे पातिनि ।

सम्मूर्च्छज न० सम्मूर्च्छात् जायते जन-ड । तृणादौ हेमच०

सम्मूर्च्छन न० सम्+मूर्च्छ-ल्युट् । १सम्यग्विस्तारे अमरः । २उन्नतौ ३मोहे च मेदि० । ४सम्यक्मूर्च्छने स्वरभेदे ।

सम्मूर्जनोद्भव पु० सम्मूर्जनादुद्भवति उद्+भू-अच् ५त० । मत्स्ये हेमच० ।

सम्मृष्ट त्रि० सम्+मृज-क्त । १कृतमार्जने अमरः । मक्षिकाद्यपसारणेन २शोधिते अन्नादौ च भरतः ।

सम्मोद पु० सम्+मुद-घञ् । १हर्षे २प्रीतौ च शब्दच० ।

सम्यच् अव्य० सम्+अन्च-क्विप् सम्यादेशः । १शोभने २सङ्गते ३मनोज्ञे च मेदि० । ४सत्यवाक्ये न० भरतः ५त० इति त्रि० भत्ते समीच इत्यादि । स्त्रियां ङीप् समीची ।

सम्राज पु० सम्यक् राजते राज-क्विप् मान्तुस्वारः । कृतराजसूययज्ञे सर्वभूमीश्वरे नृपतौ अमरः ।

सय्यँम पु० सम्+यम-करणे घञ् समो वा परसवर्णोऽनुनासिको यँः पक्षे संयमः । पात०सू० परिभाषिते धारणाध्यानसमाधित्रये “त्रयमेकत्र संयमः” पात०सू० “तदेतस्य

धारणाध्यानसमाधित्रयस्यैकत्र संयमः एकविषयाणि त्रीणि साधनानि संयम इत्युच्यते तदस्य त्रयस्य तान्त्रिकी परिभाषा संयमः इति” भा० ।

सर न० सरति सृ–अच् । १सरोवरे शब्दच० । २जले जटा० । ३लवणे ४वाणे च हेमच० । ५दध्यग्रे दधिमस्तौ रत्नमा० । ६तज्जाते नवनीते च । भावे अप् । ७भेदने ८गमने च । कर्त्तरि अच् । ९सारके १०भेदके राजनि० ।

सरक पुंन० सृ-वुन् । १मद्यपानपात्रे भरतः २मद्यपरिवेषणे ३इक्षुजमद्ये ४तल्लाके ५अविरलपथिकपङ्क्तौ च मेदि० ६गतिशीले त्रि० शब्दर० । [कायाम् अमरः ।

सरघा स्त्री सुरं मद्यभेदं हन्ति हन-ड नि० । मधुमक्षि-

सरङ्ग पुंस्त्री० सृ-अङ्गच् । १चतुष्पाज्जन्तौ २खगे च सं-क्षिप्तसा० स्त्रियां ङीष् ।

सरज न० सरात् जायते जन-ड । नवनीते हारा० ।

सरजस् स्त्री सह रजसा सहस्य सः । १ऋतुमत्यां स्त्रियाम् २रजोयुक्ते त्रि० । अव्ययी० अच् समा० । सरजस ३रजःसाहित्ये अव्य० अमरः ।

सरट पुंस्त्री० सृ-अटन् । कृकलासे (काँकलास) अमरः । स्त्रियां ङीष् । देहे तदारोहणादिफलं यथा “शिरसः प्रपाते च फलं सरटस्य प्ररोहणे । शीर्षे राज्यश्रियोऽवाप्तिर्भाले चैश्वर्यमेव च । कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बन्धुदर्शनम् । नासिकायाञ्च सौगन्ध्यं वक्त्रे मिष्टान्नभोजनम् । कण्ठे चैव प्रियोऽवाप्तिर्भुजयोर्विभवो भवेत् । धनलाभो बाहुमूले करयोर्धनसञ्चयः । स्तनमूले च सौभाग्यं हृदि सौख्यविवर्द्धनम् । पृष्ठे नित्यं मष्टी लाभः पार्श्वयोर्बन्धुदर्शनम् । कटिद्वये वस्त्रलाभो गुह्ये स्त्रीसमागमः । जङ्घे चार्थक्षयो नित्यं गुदे रोगभयं भवेत् । ऊर्वोश्च वाहनावाप्तिर्जानुजङ्घेऽर्थसञ्चयः । वामदक्षिणयोः पदोर्भ्रमणं नियतं भवेत् । शिरसः प्ररोहणे चैव पतने सरटस्य च । अत्याशाश्च फलं चैव तद्वदेव प्रजायते । शिरसः प्ररोहणं रात्रौ सरटस्य प्रपातनम् । निधनायैव भवति व्याधिपीडाविपर्ययौ । पतनानन्तरं चैवारोहणं यदि जायते । पतने फलमुत्सृज्य रोहणेऽप्यत्र फलं भवेत् । आरोहणञ्चोर्द्ध्ववक्त्रे अधोवक्त्रे च पातनम् । भवेदिष्टफलं तस्य तत्फलं जायते ध्रुवम् । सुदृष्टमात्रेण वा सद्यः सचेलं जलमाविशेत् । पञ्चगव्यप्राशनञ्च कुर्य्यादर्कावलोकनम्” दिवाकरः

सरट् पु० सृ-अटि । १वायौ २मेघे उणादिकोषः । ३सरघायां सिद्धान्तकौमुदी । ४कृकलासे अमरटीका ।

सरटि पु० सृ-अटिन् । १वायौ २मेघे च उणादि० ।

सरटु पु० सृ-अटु । कृकलासे उणादिकोषः ।

सरण न० सृ-ल्युट् । १गमने २लोहमले हेमच० । (गन्धभादाल)३लतायां स्त्री अमरः टाप् । ४त्रिवृतायां शब्दमा० ।

सरणि(णी) स्त्री सृ-अनि वा ङीप् । १पथि २पङ्क्तौ मेदि० ३प्रसारण्यां भरतः । ४त्रिवृतायां स्त्री शब्दमा० ।

सरण्ड पु० सृ-अण्डच् । १खगे २कामुके शब्दच० ३धूर्त्ते ४सरटे ५भूषणभेदे मेदि० सर्वत्र जातौ स्त्रियां ङीष् ।

सरण्यु सृ-अन्यु । १वायौ २मेघे ३जले शब्दर० ४वसन्ते ५अग्नौ उणादिकोषः । [न० शब्दमाला ।

सरत् त्रि० सृ-शतृ । १गन्तरि स्त्रियां ङीप् सरन्ती । २सूत्रे

सरत्नि पु० सह रत्निना । रत्निशब्दार्थे अमरटीका ।

सरपत्रिका स्त्री सरे जले पत्रमस्यस्याः ठन् । १पद्मपत्रे २पद्मे च शब्दच० ।

सरमा स्त्री सह रमते रम-अच् । १कुक्कुरयोषिति २देवशुन्यां ३राक्षसीभेदे विभीषणपत्न्याञ्च मेदि० । ४कश्यपर्षिकन्याभेदे “गोलाङ्गूलश्च क्रोरश्च ह्यन्यापत्यं तथैव च । अपत्यं सरमायाश्च गणो वै भ्रमरादयः” वह्निपु० ।

सरयु पुं० सृ-अयु । १वायौ त्रिका० । ऊङ् । २अयोध्यान्तिकवाहिनदीभेदे स्त्री । तदुत्पत्तिः कालिकापु० २१अ० यथा “एवं विवाह्य विधिवत् शौवर्णे मानसाचले । तत्र यत् पतितं तोयं मानसाचलकन्दरे । तत्तोयं सप्तधा भूत्वा मानसाचलकन्दरात् । हेमाद्रेः कन्दरे यातौ सरस्याञ्च पृथक् पृथक्” इत्युपक्रमे “तेनाभूत् सरयूर्नाम्ना नदी पुण्यतमा शुभा” । तस्यां भवः अण् नि० । सारव तत्र भवे त्रि० अमरः ।

सरल पु० सृ-अलच् । १पीतशाले अमरः “सरलो मधुरस्तिक्तः कटुपाकरसो लघुः । स्निग्धोष्णः कर्णकण्ठाक्षिरोगरक्षोहरः स्मृतः । कफानिलस्वेदयूकाभक्ष्मश्चिव्रणापहः” भावप्र० तद्गुणोक्तिः । २धूपकाष्ठभेदे शब्दर० ३उदारे ४ऋजौ च त्रि० मेदि० ५त्रिपुटायां स्त्री अमरः

सरलद्रव पु० ६त० । सरलकाष्ठनिर्यासे (टारपीन) अमरः ।

सरलाङ्ग पु० सरलो द्रवोऽङ्गं साधनं यस्य । श्रीवेष्टे गन्धद्रव्ये राजनि० ।

सरस् न० सृ-असुन् । १जले हट्टः । २सरोवरे अमरः । गौरा० ङीष् । ३सरसीत्यप्यत्र स्त्री अमरः “सरसीः परिशीलितुं मया” नैषधम् ।

सरस न० सह रसेन प्रवेन आस्वादेन च बहुव्री०। १सरोवरे शब्दच० २रसान्विते ३सार्द्रे च त्रि०। "सरसां सरसां परित्यज्य तरुम्" भट्टिः। ४श्वेतनिष्ठतायां स्त्री राजनि०।

सरसम्भत न० सरसिव निर्यासं सम्भतनोति सम्+भ+तन—ड। त्रिकण्टकवृक्षे (तेकाटाशिजु) शब्दच०।

सरसिज न० सरसि जायते जन—ड अलुक् समा०। १पद्मे रायमु० "सरसिजमनुविद्धं शैवलेनापि रम्यम्" शकुन्तला। २सारसखगे पुंस्त्री० स्त्रियां ङीष्। लुकि सरोजमप्यत्र। [स्त्रियां ङीष्।

सरसीक पुंस्त्री० सरस्यां कायति कै—क। सारसखगे शब्दर०

सरसीरुह न० सरस्यां सरोवरे रोहति रुह-क। १पद्मे २सारसखगे च पुंस्त्री० अमरः स्त्रियां ङीष्।

सरस्वत् पु० सरांसि सन्ति अस्य मतुप् मस्य वः। १सरोवरे २सागरे ३नदे ४रसिके त्रि० मेदि० ५नद्यां ६वाण्यां ७गवि ८स्त्रीरत्ने स्त्री मेदि० ङीप्। सा च ९ज्योतिष्मत्यां १०ब्राह्म्यां शब्दर० राजनि०। ११देवीभेदे मेदि०. १२सोमलतायां शब्दच०। १३बुद्धशक्तिभेदे त्रिका० १४दुर्गायाम् "सराः सरणशीलत्वात् गेयाख्ये सप्त कीर्त्तिताः। अति पापप्रदाने वा तेन देवी सरस्वती" देवीपु० ४५ अ० तन्नामनिरुक्तिः। पृषो०। १५वागधिष्ठातृदेव्याम् "आविर्बभूव तत्पश्चात् मुखतः परमात्मनः। एका देवी शुक्लवर्णा वीणापुस्तकधारिणी। वागधिष्ठातृदेवी सा कवीनामिष्टदेवता। शुद्धसत्त्वस्वरूपा च शान्तरूपा सरस्वती" ब्रह्मवै० प्र०ख० १अ०। तत्रैव गणे० ७०अ० "रागाधिष्ठात्री या देवी शास्त्रज्ञानप्रदा सदा। कण्ठकण्ठोद्भवा या च सा च देवी सरस्वती"। "बन्धुजीवस्य पुष्पस्य सरस्वत्यै न दापयेत्" मत्स्यसू०. तत्पूजादिकं तन्त्रसा० दृश्यम्। १६सन्ध्याकाले उपास्यदेवतायां गायत्रीशब्दे २५८२ पृ० दृश्यम्। सरः प्रसरः उत्पत्तिस्थानत्वेनास्त्यस्याः मतुप् मस्य वः ङीप्। १७नदीभेदे सरस्वतीनद्या तत्रोत्पत्तिकथा च "दृष्टासि महाभागे सरसो ब्रह्मणः पुरा। जानन्ति त्वां सरिच्छ्रेष्ठे मुनयः संशितव्रताः" भा० स० ५अ०। तस्याश्च सप्तनामत्वं यथा "राजन्! सप्त सरस्वत्यो याभिर्व्याप्तमिदं जगत्। आहूता बलवद्भिर्हि तत्र तत्र सरस्वती। सुप्रभा१ काञ्चनाक्षी२ च विशाला३ च मनोरमा४। सरस्वती५ ओघवती६ सुरेणु७र्विमलोदका" भा०श० ३८अ०। तासां नामकारणञ्च तत्राध्याये दृश्यम् तस्या माहात्म्यं तत्रैव सारस्वतोपाख्याने दृश्यम्। [पकोषः।

सरा स्त्री सृ—अच्। १प्रसारण्यां राजनि० २निर्झरे हेम०

सराव पु० सरं जलमवति अव-अण्। १जलाधारे मृण्मये पात्रभेदे(सरा) द्विरूपकोषः। सह रावेण। २सशब्दे त्रि०

सरि पुंस्त्री० सृ-इन् स्त्रीत्वपक्षे वा ङीप्। निर्झरे हेमच०।

सरिका स्त्री सरोऽस्त्यस्याः ठन् सृ-वुन् वा। १हिङ्गुपत्रिकायाम् शब्दर०।

सरित् स्त्री सृ—इति। १नद्याम् अमरः २सूत्रे शब्दमा०। "क्रियाकारकरूपत्वात् सरणाच्च सरित्स्मृता" देवीपु० ४५अ० निरुक्तायां २दुर्गायाम्।

सरित्पति पु० ६त०। समुद्रे अमरः। सरिन्नाथादयोऽप्यत्र

सरित्वत् पु० सरित् स्वामित्वेनास्त्यस्य मतुप् मस्य वः तान्तत्वेन पदत्वाभावात् न तस्य दः। समुद्रे।

सरित्सुत पु० ६त०। गङ्गापुत्रे भीष्मे।

सरिताम्पति पु० ६त० अलुक् समा०। १समुद्रे शब्दर०। सरितांनाथादयोऽप्यत्र।

सरिद्वरा स्त्री सरित्सु वरा श्रेष्ठा। गङ्गायाम् हेमच०।

सरिल न० सृ-इलच्। जले अमरटीकायां भरतः।

सरिमन् पु० सृ—इमनिन्। १वायौ २गतौ च उणादि०।

सरिषप पु० सर्षप+पृषो०। सर्षपे त्रिका०।

सरीसृप पुंस्त्री० भृशं सर्पति सृप-यङ्लुक्, अच्। १सर्पे अमरः। २वृश्चिकादौ। ज्योतिषोक्तेषु ३मीनवृश्चिककर्कटराशिषु "वृश्चिकराशिस्तिमिः सरीसृपत्वेन निर्दिष्टः" ज्यो०त०। "मृगपतिवशे तिष्ठन्त्येते विहाय सरीसृपान्" ज्यो०त० बहुवचनात् मीनकर्कटयोर्ग्रहणम्

सरु पु० सृ-उन्। खड्गादिमुष्टौ सारसुन्दरी।

सरूप त्रि० समानं रूपमस्य समानस्य सः। तुल्यरूपे सदृशे जटा०

सरोज न० सरसि जले जायते जन-ड। १पद्मे हेमच०। २सारसखगे पुंस्त्री० स्त्रियां ङीष्। ३सरोजातमात्रे त्रि०।

सरोजन्मन् न० सरसि जले जन्म यस्य। १पद्मे हेमच०। २सारसखगे ३तडागजातमात्रे त्रि०।

सरोजिन् पु० सरोजं विष्णुनाभिपद्मम् उत्पत्तिस्थानत्वेनास्त्यस्य इनि। चतुर्मुखे ब्रह्मणि त्रिका०।

सरोजिनी स्त्री सरोजानां समूहः तच्चिह्नदेशो वा इनि ङीप्। १पद्मसमूहे रत्नमा० २तद्युक्तदेशरूपायां पद्मलतायाम् ३पद्माधारदीर्घिकायाञ्च मेदि०। [स्त्रियां ङीष्।

सरोत्सव पुंस्त्री० सरे जले उत्सवोऽस्य। सारसखगे शब्दर०

सरोरुह्(ह) सरसि रोहति रुह-क्विप् क वा। १पद्मे

हेमच०। कान्तस्तत्रार्थे रत्नमा० २सारसखगे च पुंस्त्री०।

सरोरुहासन पु० सरोरुहं पद्ममासनं यस्य। १चतुर्मुखे ब्रह्मणि हेमच०। तस्य विष्णुनाभिपद्मस्थितत्वात्तथात्वम्। २पद्मोपविष्टमात्रे त्रि०।

सरोवर पु० सरोभिर्जलैर्व्रियतेऽसौ वृ-अप्। तड़ागे शब्दर०। तड़ागशब्दे ३२४०पृ० दृश्यम्। [संक्षिप्तसा०।

सर्क पु० सृ-क तस्य नेत्त्वम्। १वायौ २मनसि ३प्रजापतौ च

सर्ग पु० सृज-घञ्। १स्वभावे २सृष्टौ ३निर्मोके काव्यादेः ४परिच्छेदे "सर्गोऽयमादिर्गतः" इति नैषधम्। ५निश्चये अमरः "यदि सर्ग एष ते" इति रघुः। ६मोक्षे ७उत्साहे मेदि० ८अनुमतौ हेमच०।

सृष्टिरूपः सर्गश्च नवविधः भाग० ३।१०अ० उक्तो यथा "सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः। कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः। आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः। द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः। भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान्। चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः। वैकारिको देवसर्गः पञ्चमो यन्मयं मनः। षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः। षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु। रजोभाजो भगवतो लीलेयं हरिमेधसः। सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषाञ्च यः। वनस्पत्योषधिलतात्वक्सारावीरुधो द्रुमाः। उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः। तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः। अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः। गौरजो महिषः कृष्णः शूकरो गवयो रुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम!। खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा। एते चैकशफाः क्षत्तः! शृणु पञ्चनखान् पशून्। श्वा शृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ। सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः। कङ्कगृध्रवकश्येनभासभल्लूकबर्हिणः। हंससारसचक्राह्वकाकोलूकादयः खगाः। अर्वाक्स्रोतास्तु नवमः क्षत्तरेकविधो नृणाम्। रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः। वैकृतास्त्रय एवैते देवसर्गश्च सत्तम!। वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः। देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः। गन्धर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः। भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः। दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः"।

सर्गबन्ध पु० बन्ध-भावे घञ् सर्गैर्बन्धः ३त० "कृदभिहितभावो द्रव्यवत् प्रकाशते" इति न्यायात् सर्गबन्धस्य कर्मपरता न कर्मणि घञ् तथात्वे महाकाव्यविशेषणतया क्लीवतापत्तेः। महाकाव्ये तल्लक्षणं महाकाव्यशब्देऽनुक्तत्वात् अत्र दर्श्यते सा०द० "सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः। सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः। एकवंशभवा भूपाः कुलजा बहवोऽपि वा। शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते। अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः। इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्। चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत्। आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा। क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्त्तनम्। एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः। नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह। नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते। सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्। सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः। प्रातर्मध्याह्नमृगयाशैलर्त्तुवनसागराः। सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः। रणप्रयाणोपयममन्त्रपुत्रोदयादयः। वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह। कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा। नामास्य सर्गोपादेयकथया सर्गनाम तु"।

सर्ज अर्जने भ्वा०पर०सक०सेट्। सर्जति असर्जीत् सृजिवर्जने सर्जस्यापि वर्जनं तेन षोपदेशत्वाभावाच्च सत्वम्। तत्र प्रमाणाभावात् षोपदेश एव न्याय्यः। [शाके शब्दच०

सर्ज पु० सृज-अच्। १शालवृक्षे अमरः। २तद्रसे (धुना) ३पीत-

सर्जक पु० सृज-ण्वुल्। १पीतशाले अमरः २शालवृक्षे जटा०

सर्जगन्धा स्त्री सर्जस्येव गन्धो यस्याः। रास्नायां रत्नमा०।

सर्जन न० सृज-ल्युट्। १सैन्यपश्चाद्भागे शब्दर० २सृष्टौ च।

सर्जनिर्य्यासक पु० सर्जस्य निर्यास इव कायति कै-क। राले (धुना) राजनि०। [रसे त्रिका०।

सर्जमणि पु० सर्जस्य शालवृक्षस्य मणिरिव। (धुना) सर्ज-

सर्जरस पु० ६त०। शालवृक्षरसे (धुना) अमरः।

सर्जि(र्जी) स्त्री सृज-इन् वा ङीप्। १नदीभेदे २तत्कूलजे सर्जिकाक्षारे (साजिमाटि) रत्नमा०।

सर्जिका स्त्री सृज-ण्वुल् टाप् अत इत्त्वम्। १सर्जिकाक्षारे "पाक्यक्षारो यवक्षारो यावशूको यवाग्रजः। सर्जिकोऽपि स्मृतः क्षारः कापोतः सुखवर्चकः। कथितः सर्जिकाभेदो विशेषज्ञैः सुवर्चिका। यवक्षारो लघुः

स्निग्धः कृच्छ्रघ्नो वह्निदीपनः । निहन्ति शूलं वातामश्लेष्मार्शोगुल्मामयान् । पाण्डुरोगग्रहणीगुल्मप्लीहहृद्रोगामयान् । सर्जिकाल्पगुणा तस्माद्विशेषाद्गुल्मशूलहृत् । सुवर्चिका सर्जिकावद् बोद्धव्या गुणतो जनैः" भावप्र० । २नदीभेदे च जटा० ।

सर्जिकाक्षार स्त्री सर्जिकायाः क्षारः । स्वनामख्याते क्षारभेदे (साजिमाटि) राजनि० ।

सर्जिक्षार पु० ६त० । (साजिमाटि) सर्जिकाक्षारे राजनि० ।

सर्जु पु० सृज—उन् । वणिग्जने मेदि० ।

सर्जू स्त्री सृज-ऊ । १विद्युति मेदि० २अभिसारे शब्दर० ।

सर्ज्य पु० सर्जस्येदं यत् । १सर्जरसे रत्नमा० । सृज-ण्यत् । २सर्जनीये त्रि० ।

सर्प पु० सृप—अच् । १नागकेशरे शब्दा० । २भुजङ्गे पुंस्त्री० अमरः स्त्रियां ङीष् । ३सर्पदैवते अश्लेषानक्षत्रे ज्यो०त० "सर्पणादभवन् सर्पा हीनत्वादहयः स्मृताः" वह्निपु० तन्नामनिरुक्तिः । भावे घञ् । ४गमने सुश्रुतोक्तं तद्भेदादिकम् अहिशब्दे ५८१ पृ० दृश्यम् । तद्दंशने तस्य दंष्ट्राभेदेन विषादिकं च भविष्यपु० उक्तं यथा "दंष्ट्रा शुक्ला च कृष्णा च रक्ता पीता च दक्षिणा । समासेन तु वक्ष्यामि यथा वै वर्णतः स्मृताः । शुक्ला तु ब्राह्मणी ज्ञेया रक्ता तु क्षत्रिया स्मृता । वैश्या तु पीतिका ज्ञेया कृष्णा शूद्रा तु कथ्यते । अतःपरं प्रवक्ष्यामि दंष्ट्राणां विषलक्षणम् । दंष्ट्रायान्तु विषं नास्ति नित्यमेव भुजङ्गमे । दक्षिणं नेत्रमासाद्य विषं सर्पस्य तिष्ठति । क्रुद्धस्यैव सर्पस्य विषं गच्छति मस्तके । मस्तकाद्धमनीं याति ततो नाडीषु तिष्ठति । नाडीभ्यो गच्छते दंष्ट्रे विषं तत्र प्रवर्त्तते । तत्सर्वं कथयिष्यामि यथावदनुपूर्वशः । अष्टभिः कारणैः सर्पो दशते नात्र संशयः । आक्रान्तो दशते पूर्वं द्वितीयं पूर्ववैरिणम् । तृतीयं दशते भीतश्चतुर्थं मददर्पितः । पञ्चमन्तु क्षुधाविष्टः षष्ठश्चैव विषोल्बणः । सप्तमं पुत्ररक्षार्थम् अष्टमं कालचोदितम् । यस्तु सर्पो दशित्वा तु उदरं परिवर्त्तयेत् । वज्रतुण्डाकृतिर्दंष्ट्रा आक्रान्तं तं विनिर्दिशेत् । यस्य सर्पेण दष्टस्य गम्भीरं दृश्यते व्रणम् । वैरदष्टं विजानीयात् कश्यपस्य वचो यथा । एकदंष्ट्रा पदे यस्य व्यक्तं न च कोपितम् । भीतदष्टं विजानीयात् यथोवाच प्रजापतिः । यस्य सर्पेण दष्टस्य रेखा दष्टस्य जायते । मददष्टं विजानीयात् कश्यपस्य वचो यथा । द्वे च दंष्ट्रापदे यस्य दृश्येते च सशोणितम् । क्षुधाविष्टं विजानीयात् यथोवाच प्रजापतिः । द्वे दंष्ट्रे यस्य दृश्येते कश्चिद्रुधिरसंकुले । विषोल्बणं विजानीयाद्दंष्टं तं नात्र संशयः । अपत्यरक्षणार्थाय जानीयान्नात्र संशयः । यस्तु काकपदाकारं त्रिभिर्दन्तैर्विदारितम् । महानाग इति प्रोक्तः कालदष्टं विनिर्दिशेत् । द्विविधं दष्टजातेस्तु लक्षणं समुदाहृतम् । दष्ट दष्टा तु पीतञ्च दष्टोद्धृतं तथैव च । यस्तु सर्पो दशित्वा तु पिबते तु विचक्षणः । दष्टा तु पीतं विज्ञेयं कश्यपस्य वचो यथा । विषभागो तु सर्पस्य त्रिभागस्तत्र संक्रमेत् । उदरं दर्शयेद्यस्तु उद्धृतं तं विनिर्दिशेत् । उद्धृतं विषयोगेन निर्विषः पन्नगो भवेत् । अत्राप्यत्रापि विज्ञेयस्तद्दंष्ट्राभिपीडितः । ग्रीवाभङ्गो भवेत् किञ्चित् सदष्टो विषयोगतः । आर्द्राऽश्लेषामघायाम्यकृत्तिकासु विशेषतः । विशाखासु त्रिपूर्वासु मूलास्वातिशतात्मके । सर्पदष्टा न जीवन्ति विषं पीतञ्च यैस्तथा । शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च । न जीवन्ति नरा दष्टा नक्षत्रे तिथिसंयुते । इतो दंशस्ततः शुद्धोऽव्यन्तरः परिकीर्त्तितः" भविष्यपु० "अतःपरं प्रवक्ष्यामि कालदष्टस्य लक्षणम् । "जिह्वाभङ्गो हृदिशूलं चक्षुर्भ्यां च न पश्यति । दन्ताश्च दग्धकाष्ठाभं पक्वजम्बूफलोपमम् । वैवर्ण्यं चैव दन्तानां श्यामो भवति सर्वतः । सर्वाङ्गेषु शैथिल्यं पुरीषस्य च भेदनम् । भग्नस्कन्धकटिग्रीव अधोदृष्टिरधोमुखः । दह्यते वेपते चैव स्वपते च मुहुर्मुहुः । शस्त्रेण छिद्यमानस्य रुधिरं न प्रवर्त्तते । दण्डेन ताड्यमानस्य दण्डराजी न जायते । दंशे काकपदे सुनीलमसृणत्वञ्जम्बूफलाभं घनम् उच्छूनं रुधिराङ्कुरैकबहुलं लक्ष्माक्षिरोधो भवेत् । हिक्काश्वासगलग्रहश्च सुमहान् वा तृष्णया दृश्यते यं तस्मात् प्रवदन्ति शास्त्रनिपुणास्तं कालदष्टं विदुः । दंशे यस्य च शोफः प्रचलितनडितं मण्डलं वा सुनीलं प्रस्वेदो गात्रभेदः श्वयथुं च नाधरं सानुनासञ्च जल्पेत । दन्तोष्ठाभ्यां नियोसो भवति च हृदयं वक्षिरोधश्च तीव्रो हिक्काश्वासेन दृष्टश्चविपुलमयो दिष्टं तं कालदष्टम् । दन्तैर्दन्तान् स्पृशति शङ्को दृष्टिरायाति खिन्ना स्थूलो दंष्ट्रः स्रवति रुधिरं केकरं चक्षुरेकम् । प्रलापादिदृष्टः श्वसिति सततं सानुनासञ्च भाषेत यद् यद् ब्रूते सकलगदितं कालदष्टं तमाहुः । वेपते वेदनातस्तु रक्तनेत्रश्च जायते । ग्रीवाभङ्गश्च लालाभि

कालदष्टं विनिर्दिशेत् । दर्पणे सलिले वापि आत्मच्छायां न पश्यति । मन्दरश्मिं तथा दीप्तं तेजोहीनं दिवाकरम् । वेपते वेदनातस्तु रक्तनेत्रश्च जायते । स याति निधनं जन्तुः कालदष्टं विनिर्दिशेत् । अष्टम्याञ्च नवम्याञ्च कृष्णपक्षे चतुर्दशीम् । नागपञ्चमीदष्टानां जीवितस्य च संशयः । आर्द्राऽश्लेषामघायाश्च कृत्तिकासु विशेषतः । विशाखासु त्रिपूर्वासु मूलास्वातिशतात्मके । सर्पदष्टा न जीवन्ति विषं पीतञ्च यैस्तथा । शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च । न जीवन्ति नरा दष्टा नक्षत्रे तिथिसंयुते । अष्टोत्तरं मर्मशतं प्राणिनां समुदाहृतम् । तेषां मध्ये तु मर्माणि दश द्वे चापि कीर्त्तिते । शङ्खे नेत्रे भ्रुवोर्मध्ये वस्तिभ्यां वृषणान्तरे । कक्षे स्कन्धे हृदमध्ये तालुके चिबुके गुदे । एषु द्वादशकर्मसु दष्टः शस्त्रेण वा हतः । न जीवन्ति नरा लोके कालदष्टान् विनिर्दिशेत्" । दूतो वा दण्डहस्तो भवति च युगलं पाशहस्तस्तथा वा रक्तं वस्त्रञ्च कृष्णम् ह्यथ शिरसि गतम् चैकवस्त्रश्च दूतः । तैलाभ्यक्तश्च तद्वत् त्वरितगतियुतो मुक्तकेशश्च याति, यः कुर्य्यात् घोरशब्दं करचरणयुगैः प्राप्तकालस्य दूतः । नागोदयं प्रवक्ष्यामि ईश्वरेण तु भाषितम् । ब्रह्मणा तु पुरा सृष्टा महा नागास्त्वनेकशः । अनन्तं भास्करं विद्यात् सोमं विद्यात्तु वासुकिम् । तक्षकं भूमिपुत्रन्तु कर्कोटञ्च बुधं विदुः । पद्मं बृहस्पतिं विद्यान्महापद्मञ्च भार्गवम् । कुलिकः शङ्खपालश्च द्वावेतौ तु शनैश्चरः । पूर्वपादः शङ्खपालो द्वितीयः कुलिकोऽस्य च । नेत्रभागे यमौ दिष्टौ दिनरात्रौ तथैव च । शुक्रसोमौ च मध्याह्ने उदये तु समाहृतम् । प्रायः प्रागन्ते भागे दिवासन्ध्याविदोच्यते । पन्डाच भुञ्जते राजन् ! पथि मृत्युं व्रजत्यधः । अधो गत्वा भवेत् सर्पो निर्विषो नात्र संशयः" भविष्यपु० "आषाढे तथा ज्यैष्ठे प्रमाद्यन्ति भुजङ्गमाः । ततो नागो नागिनी च मैथुनं संप्रपद्यते । चतुरो वार्षिकान् मासान् नागी गर्भं धारयेत् । ततः कार्त्तिकमासे तु अण्डकानि प्रसूयते । अण्डकानान्तु विज्ञेयं द्वे शते द्वे च विंशती । तान्येव भक्षयेत् सा तु भागैकं कृपया त्यजेत् । स्वर्णार्कवर्णनिभात् पुमान् संजायतेऽण्डकात् । तानेव खादते सर्पो अहोरात्राणि विंशतिम् । अर्कोदकवर्णाभात् दीर्घराजीवसन्निभात् । तस्मादुत्पद्यते स्त्री वै अण्डाद् ब्राह्मणसत्तम ! । शिरीषपुष्पवर्णाभादण्डकात्तु नपुंसकम् । ततो भिनत्ति चाण्डानि षण्मासेन तु गौतम ! । ततस्ते प्रीतिसम्बन्धात् स्नेहं बध्नन्ति बालकाः । ततोऽसौ सप्तरात्रेण कृष्णो भवति यत्नतः । आयुःप्रमाणं सर्पाणां शतं विंशोत्तरं स्मृतम् । मृत्युस्त्वष्टविधो ज्ञेयः सर्पाणाञ्च यथाक्रमम् । मयूरात् मानुषाद्वापि चकोराद्वोक्षुरात्तथा । बिडालान्नकुलाच्चैव वराहाद्वृश्चिकात्तथा । एतेभ्यो यदि मुच्येत जीवेद्विंशोत्तरं शतम् । सप्ताहे तु ततः पूर्वं दंष्ट्राणान्तु विरोहणम् । विषस्यागमनं तत्र विज्ञेयं पुनः पुनः । एवं ज्ञात्वा तु तत्त्वेन विषकर्म समारभेत् । एकविंशतिरात्रेण विषं दंष्ट्रासु जायते । नागी पार्श्वसमावर्त्ती बालसर्पस्तु उच्यते । पञ्चविंशतिरात्रस्तु सद्यः प्राणहरो भवेत् । षण्मासाज्जातमात्रस्तु कञ्चुकं वै प्रमुञ्चति । पादानाञ्चापि विज्ञेया द्वे शते द्वे च विंशती । गोलोमसदृशाः पादाः प्रविशन्ति क्रमन्ति च । सन्धीनां चास्य विज्ञेयं द्वे शते विंशती तथा । पांशुल्यश्चापि विज्ञेया द्वे शते विंशतिस्तथा । अकालजाता ये सर्पा निर्विषास्ते प्रकीर्त्तिताः । पञ्चसप्ततिवर्षाणि आयुस्तेषां प्रकीर्त्तितम् । रक्तपीतशुक्लदन्ता आनीला मन्दवेगिनः । एते अल्पायुषो ज्ञेया अल्पाहाराश्च भीरवः । एकस्यास्य भवेद्वक्त्रं द्वे जिह्वे च प्रकीर्त्तिते । दंष्ट्राश्चतस्रो विज्ञेया प्रजापतिवचो यथा । प्रथमा ब्रह्मदैवत्या द्वितीया विष्णुदैवता । तृतीया रुद्रदैवत्या चतुर्थी यमदेवता । हीना प्रमाणतः सा तु वामनेत्रं समाश्रिता । नास्यां मन्त्राः प्रयोक्तव्या नौषधं नैव भेषजम् । वैद्यः पराङ्मुखो याति मृत्युस्तस्या विलेखनात् । चिकित्सा न बुधैः कार्य्या तदन्तं तस्य जीवितम् । मकरीं मासिकीं विद्यात् करालीञ्च द्विमासिकीम् । कालरात्री भवेत् त्रीणि चतुरो यमदूतिका । मकरी शस्त्रकं विद्यात् कराली काकपादिका । ढक्काकृतिः कालरात्री याम्या कूर्म्माकृतिः स्मृता । मकरी वातुला ज्ञेया कराली पैत्तिकी स्मृता । कफात्मिका कालरात्री यमदूती त्रिदोषिका । शुक्ला तु मकरी ज्ञेया कराली रक्तसन्निभा । कालरात्री भवेत् पीता कृष्णा च यमदूतिका" भविष्यपु० । कश्यप उवाच "सविषा दंष्ट्रयोर्मध्ये यमदूती तु चेद्भवेत् । न चिकित्सा बुधैः कार्य्या तं गतासुं विनिर्दिशेत् । प्रहरार्द्धं दिवारात्रौ एकैकं भुञ्जते त्वहिः । एकस्य च समानस्य दिवाय षोडशं

यथा। नागोदये च दष्टो हतो विप्रो विदारितः। कालदष्टं विजानीयात् कश्यपस्य वचो यथा। यस्मात् पतते बिन्दुर्नीलाम्बसलिलोद्भुतः। तस्मात् स्रवते दंष्ट्राविषं सर्पस्य दारुणम्। ज्वालायते तु संपूर्णे देहे संक्रमते विषम्। यावत् संक्रामयेद्बाहुं कुञ्चितं वा प्रसारयेत्। अनेन क्षणमात्रेण विषं गच्छति मस्तके। रुधते विषवेगस्तु शतशोऽथ सहस्रशः। वर्द्धते रक्तमासाद्य ततो वाते शिखी यथा। तैलबिन्दुर्जलं प्राप्य यथा वेगेन वर्द्धते। शिखण्डो चाश्रयं प्राप्य मारुतेन समीरितः। ततस्तावायतं प्राप्य त्वचास्थानं विचेष्टितम्। त्वचायां द्विगुणं विद्याच्छोणितेषु चतुर्गुणम्। पित्ते तु त्रिगुणं याति श्लेष्मे वै षाड्गुणं भवेत्। वायौ त्रिंशद्गुणञ्चैव मज्ज्ञि अष्टगुणं तथा। प्राणे चैकार्णवीभूते सर्वस्रोतो निरोधयेत्। स्नातसा रुध्यमानेन याति साध्यमसाध्यताम्। ततोऽसौ म्रियते जन्तुर्निश्वासोच्छ्वासवर्जितः। निष्क्रान्ते तु ततो जीवे भूते पञ्चत्वमागते। तानि भूतानि गच्छन्ति यस्य यस्य यथालयम्। पृथिव्यापस्तथा तेजो वायुराकाशमेव च। एतेषामेव संघातः शरीरमभिधीयते। पृथिवी पृथिवीं याति आपस्तोयेषु लीयते। तेजो गच्छति चादित्य मारुतो मारुतं व्रजेत्। आकाशञ्चैव चाकाशे सह तेनैव गच्छति। स्वस्थानं ते प्रपद्यन्ते परस्परनियोजिताः। न जीवेदागतः कश्चिदिह जन्मनि सुव्रत!। विज्ञाय न उपेक्षेत त्वरितं तु चिकित्सयेत्। एकमपि विषं लोके द्वितीयञ्चोपपद्यते। यथा चलविषञ्चैव स्थावरन्तु तथैव च। प्रथमे विषवेगे तु रोमहर्षः प्रजायते। द्वितीये विषवेगे तु स्वेदो गात्रेषु जायते। तृतीये विषवेगे तु कम्पो गात्रेषु जायते। चतुर्थे विषवेगे तु श्रोत्रान्तरनिरोधनम्। पञ्चमे विषवेगे तु हिक्का गात्रेषु जायते। षष्ठे तु विषवेगे तु ग्रीवाभङ्गस्तु जायते। सप्तमे विषवेगे तु प्राणेभ्यो विप्रमुच्यते सप्तधातुवहा ह्येते वेनतेयेन भाषिताः। त्वचास्थाने विषप्राप्ते तस्य रूपाणि मे शृणु। चक्षूंषि तिमिरायन्ते यतन्ते च मुहुर्मुहुः। एतानि यस्य चिह्नानि तस्य त्वचगतं विषम्। तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम्। अर्कमूलमपामार्गं प्रियङ्गुं तगरं तथा। एतद्द्रावोद्य दातव्यं ततः सम्पद्यते सुखम् ततस्तस्मिन् कृते विप्र! न निवर्त्तेत चेद्विषम्। त्वचःस्थानं ततो भित्त्वा रक्तस्थानं प्रधावति। विषे च रक्तसंप्राप्ते तस्य रूपाणि मे शृणु। दह्यते मुह्यते चैव शीतलं बहुमन्यते। एतानि यस्य रूपाणि तस्य रक्तं गतं विषम्। तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम्। उशीरं चन्दनं कुष्ठमुत्पलं तगरं तथा। कङ्काकालस्य मूलानि सिन्धुवारस्टगस्य च। हिङ्गुञ्च मरिचञ्चैव पूर्ववेगे तु दापयेत्। वृहती दृश्चिकाली च इन्द्रवारुणिमूलकम्। सर्पगन्धा घृतं चैव द्वितीये परिकीर्त्तितम्। सिन्धुवारं तथा हिङ्गु तृतीये कारयेद्बुधः। नस्यं पानञ्च कुर्वीत अञ्जनं लेपनं तथा। एतेनैवोपचारेण ततः सम्पद्यते सुखम्। रक्तस्थानं ततो गत्वा पित्तस्थानं प्रधावति। पित्तस्थानगते विप्र! विषे रूपाणि मे शृणु। उत्तिष्ठते निपतते दह्यते मुह्यते तथा। गात्रतः पीतता स्याद्दै दिशः पश्यति पीतिकाः। धरन्नाश भवेन्मूर्च्छा न चात्मानं विजानते। विषक्रियां तस्य कुर्यात् यथा सम्पद्यते सुखम्। पिप्पलं मधुकं चैव मधुखण्डघृतं तथा। मधुसारमलाबूञ्च आतिशर्करयालुकाम्। इन्द्रवारुणिमूलञ्च गवां मूत्रेण पेषयेत्। नस्यं तस्य प्रयुञ्जीत पानमालेपमञ्जनम्। एतेनैवोपचारेण ततः सम्पद्यते सुखम्। पित्तस्थानमतिक्रम्य श्लेष्मस्थानञ्च गच्छति। श्लेष्मस्थाने ततः प्राप्ते तस्य रूपाणि मे शृणु। गात्राणि तस्य रुध्यन्ते निश्वासश्च न जायते। लाला च स्रवते तस्य कण्ठो घुरघुरायते। एतानि यस्य रूपाणि श्लेष्मस्थानगतं विषम्। तस्यागदं प्रवक्ष्यामि येन सम्पद्यत सुखम्। त्रिकटुकं कोषातकी लोध्रञ्च मधुसारकम्। एतेषां सप्तभागानि गवां मूत्रेण पेषयेत्। नस्यं पानञ्च कुर्वीत अञ्जनं लेपनं तथा। एतेनैवोपचारेण ततः सम्पद्यते सुखम्। श्लेष्मस्थानमतिक्रम्य वायुस्थानञ्च गच्छति। तत्र रूपाणि वक्ष्यामि वायुस्थानगते विषे। आध्मायते च जठरं यत्नवांश्च न पश्यति। दैहयं कुरुते रूपं दृष्टिभङ्गश्च जायते। एतानि यस्य रूपाणि तस्य वायुगतं विषम्। तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम्। शोणभूलं प्रियाङ्गुश्च रक्ता च गजपिप्पली। हिङ्गुञ्च त्रिंशा शुण्डिकाञ्च कुर्यात्ह्यात्र नस्याञ्जनलेपादीन्। एषोऽगदः सर्वविषाणि हन्यात् स्वयम्भुवा देववरेण सृष्टः। अञ्जनश्चैव नस्यञ्च क्षिप्रं दद्याद्विषान्विते। वायुस्थानं ततो मुक्त्वा मज्जस्थानं प्रधावति। विषे मज्जगते विप्र! तस्य रूपाणि मे शृणु। दृष्टिश्च हीयते तस्य भग्नमङ्गानि मुञ्चति। एतानि यस्य रूपाणि तस्य मज्जगत

द्विज ! तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् । हत मधु शर्कराञ्च उशीरं चन्दनं तथा । एतदालोड्य दातव्यं पानं तस्य च सुव्रत ! ॥ ततः प्रशाम्यते दुःखं ततः सम्पद्यते सुखम् । अथ तस्मिन् हते योगे विषं तस्य निवर्त्तते । दष्टस्थानं ततो गत्वा सर्पस्थानं प्रधावति । विषे च सर्पदंष्ट्रे तु शृणु रूपं यथा भवेत् । निश्चेष्टः पतते भूमौ कर्णाभ्यां बधिरो भवेत् । दारिद्र्या छिद्यमानस्य रोमहर्षो न जायते । दण्डेन हन्यमानस्य दण्डराजी न जायते । शस्त्रेण छिद्यमानस्य रुधिरं न प्रवर्त्तते । केशेषु लुञ्चनानेषु नैव तत्संप्रवेदने । यस्य कर्णौ च पार्ष्णी च हनूपादौ च सन्धयः । शिथिलानि भवन्तीह स गतासुरिति श्रुतिः । एतानि यस्य रूपाणि विपरीतानि गौतम ! । स्वस्थन्तु तं विजानीयात् काश्यपस्य वचो यथा । वैद्यागतस्य न पश्यन्ति ये पश्यन्ति कुशिक्षिताः । विचक्षणास्तु पश्यन्ति मन्त्रौषधिसमन्विताः । तस्यागदं प्रवक्ष्यामि स्वयं रुद्रेण भाषितम् । मयूरपित्तं मार्ज्जारपित्तं नकुलपित्तकम् । सवृक्षमर्क्कटपित्तञ्च धानालोमूलमेव च । कुङ्कुमं भार्गवं कुष्ठं काश्मरी च त्वचं तथा । उत्पलस्य च किञ्जल्कं पद्मस्य कुमुदस्य च । एतानि समभागानि गोमूत्रेण च पेषयेत् । एषोऽगदो यस्य हस्ते दष्टेन म्रियते न वै । कालाहिनापि दष्टोऽपि क्षिप्रं भवति निर्विषः । क्षिप्रमेव प्रदातव्यं दृतसञ्जीवनौषधम् । अञ्जनञ्चैव नस्यञ्च क्षिप्रं दद्यात् विषापहः” गरुडपु० । काश्यप उवाच “अतःपरं प्रवक्ष्यामि नागानां रूपलक्षणम् । सर्पदष्टस्य च तथा सर्वनागाद्द्विजपुङ्गव ! ॥ अथ उरगेण दष्टस्य ऊर्द्ध्वा दृष्टिः प्रजायते । स्त्रिया दष्टस्य च तथा अधोदृष्टिः प्रजायते । नपुंसकेन दष्टस्य पद्ममदः प्रजायते । कृपा दष्टस्य वा साध्या दृष्टिर्विज्वरोत्तम ! । कुमारेणापि दष्टस्य दक्षिणा एव जायते । गुर्विण्या वाय दष्टस्य तथा स्वेदश्च जायते । रोमाङ्कः स्यात् सूतिकया वेपथुश्चापि जायते । पद्मनी प्रपर्वदालौ दिवा सर्पो विनाधिकः । नपुंसकस्तु सन्ध्यायां काश्यपेन तु भाषितम् । वल्मीके तु देवानामुदके गहने वने । कूपस्य वै प्रमत्तस्य पदे सर्पो न दृश्यते । दष्टरूपाण्यजानन् वै कथं वैद्याश्चिकित्सन्ति । चतुर्विधास्तु सर्पोक्ताः पन्नगास्तु महात्मना । दर्वीकरा मण्डलिनो राजिला व्यन्तरास्तथा । दर्वीकरा वातविषा मण्डलाः पैत्तिकाः स्मृताः । श्लेष्मला राजिला ज्ञेया व्यन्तराः सान्निपातिकाः । रक्तं परीक्षयेद्गाढं सर्पाणान्तु पृथक् पृथक् । कृष्णं दर्वीकराणान्तु जायते वातसुल्बणम् । रक्तं घनञ्च बहुशः शोणितं मण्डलिनस्ते । पिच्छिलं राजिले स्वल्पं तद्वद्व्यन्तरके तथा । ज्ञेयाः सर्पास्तु चत्वारः पञ्चमो नोपलभ्यते । ब्राह्मणः क्षत्त्रियो वैश्यः शूद्रश्चैव चतुर्थकः । ब्राह्मणे मधुरं दद्यात् तिक्तं दद्यात्तथोत्तरे । वैश्ये कषायं दद्यात् शूद्रे त्रिफलमेव वा । ब्राह्मणेन तु दष्टस्य दाहो गात्रेषु जायते । मूर्च्छा च प्रबला स्याद्वै न ज्ञानमभिजायते । गद्गदवर्णं मुखस्य स्यान्मन्याग्रहश्च जायते । तस्य कुर्य्यात् प्रतीकारं येन सम्पद्यते सुखम् । अश्वगन्धामपामार्गं सिन्धुवारं सुरालयम् । एतत् सर्पिःसमायुक्तं पानं तस्य दापयेत् । एतेनैवोपचारेण सुखी भवति मानवः । क्षत्त्रियेण तु दष्टस्य कम्पो गात्रेषु जायते । मूर्च्छा मोहस्तथा स्याद्वै न ज्ञानमभिजायते । जायते वेदना तस्य ऊर्द्ध्वञ्चैव निरीक्षते । तस्य कुर्य्यात् प्रतीकारं येन सम्पद्यते सुखम् । अर्कमूलमपामार्गं प्रियङ्गुनत वारुणीम् । एतत् सर्पिःसमायुक्तं पानं तस्य प्रदापयेत् । एतेनैवोपचारेण सुखी भवति मानवः । वैश्येनापि हि दष्टस्य शृणु रूपाणि यानि तु । शोणकोपो ज्वाला च नवोद्भवति वेदना । मूर्च्छा च प्रबला यस्य आत्मानं नाभिनन्दति । तस्य कुर्य्यात् प्रतीकारं येन सम्पद्यते सुखम् । अश्वगन्धां स गोमूत्रां टङ्कचूर्णं सगुग्गुलम् । शिरीषार्कपलाशञ्च श्वेतां च गिरिकर्णिकाम् । गोमूत्रेण समायुक्तं पानं नस्यञ्च दापयेत् । एष वैश्येन दष्टानामगदः परिकीर्त्तितः । शूद्रेणापि हि दष्टस्य शृणु तत्त्वेन गौतम ! । शुष्यते वेपते चैव ज्वरः शीतश्च जायते । अङ्गानि कुलकुलायन्ते शूद्रदष्टस्य लक्षणम् । तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् । पद्मञ्च लोध्रकञ्चैव घोट्रं पद्मस्य केसरम् । मधु मधूकसारञ्च श्वेता च गिरिकर्णिका । एतानि समभागानि पेषयेत् शीतवारिणा । पानलेपाञ्जनं तस्य सुखी भवति मानवः । पूर्वाह्णे चरते विप्रो मध्याह्ने क्षत्त्रियश्चरेत् । अपराह्णे चरेद्वैश्यः शूद्रः सन्ध्यापरो भवेत् । आहारश्चात्र पुष्पाणि ब्राह्मणानां विदुर्बुधाः । मूषिकाः क्षत्त्रियाणाञ्च आहारो द्विजसत्तम ! । वैश्या मण्डूकभक्षाश्च शूद्राः सर्वाशनकथा । अग्रतो दशते विप्रः क्षत्त्रियो दक्षिणेन तु । वामपार्श्वे

सदा वैश्यः पश्चाद्वै शूद्र आदशेत् । मदकाले तु संप्राप्ते पीड्यमाना महाविषाः । अवेलायां दशन्ति वै मैथुनार्त्ता भुजङ्गमाः । पुष्पगन्धाः स्मृता विप्राः क्षत्रियाश्चन्दनावहाः । वैश्याश्च घृतगन्धा वै शूद्राः स्युर्मत्स्यगन्धिनः । वासं तेषां प्रवक्ष्यामि यथावदनुपूर्वशः । नदीकूपतडागेषु गिरिप्रस्रवणेषु च । आरामेषु पवित्रेषु शुचिष्वायतनेषु च । वसन्ति ब्राह्मणाः सर्पा ग्रामद्वारे चतुष्पथे । क्षत्रियो वसते नित्यं तोरणेषु पुरेषु च । गोशालास्वश्वशालासु पल्वलेषु तटेषु च । गोष्ठेषु पथि दृश्येषु विप्र ! वैश्या वसन्ति च । अविविक्तेषु स्थानेषु निर्झरेषु वनेषु च । शून्यागारे श्मशाने च शूद्रा विप्र ! वसन्ति च । श्वेताश्च कपिलाश्चैव ये सर्पास्त्वनलप्रभाः । मनस्विनः सात्त्विका ये ब्राह्मणास्ते बुधैः स्मृताः । रक्तवर्णसुवर्णाभाः प्रवालमणिसन्निभाः । सूर्य्यप्रभास्तथा विप्र ! क्षत्रियास्ते भुजङ्गमाः । नानाविचित्रराजीभिः रतसीवर्णसन्निभाः । काशपुष्पसुवर्णाभा वैश्यास्ते च भुजङ्गमाः । काकोदरनिभाः केचित् ये च अञ्जनसन्निभाः । काकवर्णा धूम्रवर्णास्ते शूद्राः परिकीर्त्तिताः । यस्य सर्पेण दष्टस्य दंशमङ्कुलमन्तरम् । बालदष्टं विजानीयात् कश्यपस्य वचो यथा । यस्य सर्पेण दष्टस्य दंशं द्व्यङ्कुलमन्तरम् । यौवनस्थेन दष्टस्य एतद्भवति लक्षणम् । यस्य सर्पेण दष्टस्य सार्द्धद्व्यङ्कुलमन्तरम् । वृद्धदष्टं विजानीयात् कश्यपस्य वचो यथा" भविष्यपु० । "स्थानाद्यादौ प्रवक्ष्यामि यत्रां दष्टो न जीवति । चितावल्मीकशैलादौ कूपे च विवरे तरोः । दंशे रेखात्रयं यस्य प्रच्छन्नं स न जीवति । षष्ठ्याञ्च कर्कटे मेषे मूलाश्लेषामघादिषु । कक्षाश्रोणिगले सन्धौ शङ्खकर्णोदरादिषु । दन्ती शस्त्रधरो भिक्षुर्नग्नादिः कालदूतकः । वक्त्रे बाह्वोश्च ग्रीवायां पृष्ठे च न हि जीवति । पूर्वं दिनपतिर्भुङ्क्ते ह्यर्द्धयामन्ततो परे । शेषाः ग्रहाः प्रतिदिनं षट्संख्यापरिवर्त्तनैः । नागभोगक्रमो ज्ञेयो रात्रौ बाणविवर्त्तनैः । शेषोऽर्कः फणिपश्चन्द्रस्तक्षको भौम ईरितः । कर्कोटोज्ञो गुरुः पद्मो महापद्मश्च भार्गवः । शङ्खः शनैश्चरो राहुः कुलिकश्चाहयो ग्रहाः । रात्रौ दिवा सुरगुरोर्भोगे ह्यादशरान्तकः । पङ्गोः कालो दिशा राहुः कुलिकेन सह स्थितः । यामार्द्धसन्धिसंस्थः स वेलां कालयतीश्वरेत् । बाण द्विषड्वह्निवाब्धियुगभूरेकभागतः । दिवा षड्वेदनेत्रादि-पञ्चाग्निवसुबाणकैः । पादाङ्गुष्ठे पादपृष्ठे गुल्फे जानुनि लिङ्गके । नाभौ हृदि स्तनतटे कण्ठे नासापुटे दृशोः । कर्णयोश्च भ्रुवोः शङ्खे मस्तके प्रतिपत्क्रमात् । तिष्ठेच्चन्द्रश्च जीवेन पुंसो दक्षिणभागके । कायस्य वामभागे तु स्त्रिया वायुवहक्रमात् । अमवस्त्रहतो मोहो निवर्त्तेत च मर्द्दनात्" गारुडे १९अ० । "आषाढ़ादित्रिमासैः स्याद् गर्भो मासचतुष्टये । अण्डकानां शते द्वे च चत्वारिंशत् प्रसूयते । सर्पा ग्रसन्ति सूतौ तान् विना स्त्रीं, पुंनपुंसकान् । उन्मीलतेऽक्षि सप्ताहात् कृष्णो मासाद्भवेद्वहिः । द्वादशाहात् सुबोधः स्याद्दन्ताः स्युः सूर्य्यदर्शनात् । द्वात्रिंशद्दिनविंशत्या चतस्रस्तेषु दंष्ट्रिकाः । कराली मकरी कालरात्री च यमदूतिका । एतास्ताः सविषा दंष्ट्रा वामदक्षिणपार्श्वगाः । षण्मासान्मुञ्चते कृत्तिं जीवेत् षष्टिसमाद्वयम् । नागाः सूर्य्यादिवारेशाः सप्त उक्ता दिवानिशि । तेषां षट् प्रतिवारेषु कुलिकः सर्वसन्धिषु । शङ्खेन वा महाब्जेन सह तस्योदयोऽथ वा । द्वयोश्चैव नाड़िकयोरन्तरं कुलिकोदयः । दुष्टः सकालः सर्वत्र सर्वदंशे विनिर्द्दिशेत् । कृत्तिका भरणी स्वातिर्मूलं पूर्वत्रयाश्विनी । विशाखार्द्रा मघाश्लेषा चित्रा श्रवणरोहिणी । हस्ता मन्दकुजौ वारौ पञ्चमी चाष्टमी तिथिः । षष्ठी रिक्ता शिवा निन्द्या पञ्चमी च चतुर्दशी । सन्ध्याचतुष्टयं दुष्टं दग्धयोगाश्च राशयः । एकद्विबहवो दंशा दष्टविद्धञ्च खण्डितम् । अदंशमवगुप्तं स्याद्दंशमेवं चतुर्विधम् । त्रयो द्व्येकक्षता दंशा वेदना रुधिरं त्वणाम् । नक्रं द्व्येकाङ्घ्रिकूर्माभा दंशाश्च यमचोदिताः । दाही पिपीलिकास्पर्शी कण्ठशोथरुजान्वितः । सतोदो ग्रन्थितो दंशः सविषो न्यस्तनिर्विषः । देवालये शून्यगृहे वल्मीकोद्यानकोटरे । रथ्या सन्ध्या श्मशाने च शुष्कवृक्षे सिन्धुसङ्गमे । द्वीपे चतुष्पथे सौधे गृहेऽब्जे पर्वताग्रतः । बिलद्वारे जीर्णकूपे जीर्णवेश्मनि कुड्यके । शिग्रुश्लेष्मातकाक्षेषु जम्बूडुम्बरकेषु च । वटे च जीर्णप्राकारे खास्यहृत्कक्षजत्रुणि । तालौ शङ्खे गले मूर्ध्नि चिबुके नाभिपादयोः । दंशोऽशुभः" अग्निपु० । सुश्रुते तद्दंशलक्षणभेदादिर्दर्शितो यथा

"तत्र सर्वेषां सर्पाणां सामान्यत एव दष्टलक्षणं वक्ष्यामः । किं कारणं विषं हि निशितनिस्त्रिंशाशनिहुतवहदेश्यकारि मुहूर्त्तमप्युपेक्षितमातुरमतिपातयति । न चाव-

कायोऽस्ति वाक् समूहमनुसर्वम्। प्रत्येकमपि दष्टलक्षणेऽभिहिते सर्वत्र त्रैविध्यं भवति। तस्मात्त्रैविध्यमेव वक्ष्यामः। एतद्यावदहितमसम्मोहकरञ्च। अपि चात्रैव सर्वसर्पव्यञ्जनावबोधः।

तत्र दर्वीकरविषेण त्वङ्नयननखदशनमूत्रपुरीषदंशकृष्णत्वं रौक्ष्यं शिरसो गौरवं सन्धिवेदना कटीपृष्ठग्रीवादौर्बल्यं जृम्भणं वेपथुः स्वरावसादो घुर्घुरको जडता शुष्कोद्गारः कासश्वासौ हिक्का वायोरूर्ध्वगमनं शूलोद्वेष्टनं तृष्णा लालास्रावः फेनागमनं स्रोतोऽवरोधस्तास्ताश्च वातवेदना भवन्ति।

मण्डलिविषेण त्वगादीनां पीतत्वं शीताभिलाषः परिधूपनं दाहस्तृष्णा मदो मूर्च्छा ज्वरः शोणितागमनमूर्ध्वमधश्च मांसानामवशातनं श्वयथुर्दंशकोथः पीतरूपदर्शनमाशुकोपस्तास्ताश्च पित्तवेदना भवन्ति।

राजिमद्विषेण शुक्लत्वं त्वगादीनां शीतज्वरो रोमहर्षः स्तब्धत्वं गात्राणामादंशशोफः सान्द्रकफप्रसेकश्छर्दिरभीक्ष्णमक्ष्णोः कण्डूः कण्ठे श्वयथुर्घुर्घुरक उच्छ्वासनिरोधस्तमःप्रवेशस्तास्ताश्च कफवेदना भवन्ति।

पुरुषाभिदष्ट ऊर्ध्वं प्रेक्षतेऽधस्तात् स्त्रिया शिराश्चोत्तिष्ठन्ति ललाटे। नपुंसकाभिदष्टस्तिर्य्यक्प्रेक्षी भवति। गर्भिण्या पाण्डुमुखोध्मातश्च। सूतिकया शूलार्त्तो रुधिरं मेहत्युपजिह्विका चास्य भवति। ग्रासार्थिनान्नं काङ्क्षति। वृद्धेन मन्दा वेगाश्च। बालेनाशु मृदवश्च। निर्विषेणाविषलिङ्गम्। अन्धाहिकेनान्धत्वमित्येके। ग्रसनादजगरः शरीरप्राणहरो न विषात्। तत्र सद्यःप्राणहराहिदष्टः पतति शस्त्राशनिहत इव भूमौ स्रस्ताङ्गः स्वपिति।

तत्र सर्वेषां सर्पाणां विषस्य सप्त वेगा भवन्ति। तत्र दर्वीकराणां प्रथमे वेगे विषं शोणितं दूषयति तत् प्रदुष्टं कृष्णतामुपैति तेन कार्ष्ण्यं पिपीलिकापरिसर्पणमिव चाङ्गे भवति। द्वितीये मांसं दूषयति तेनात्यर्थं कृष्णता शोफो ग्रन्थयश्चाङ्गे भवन्ति। तृतीये मेदो दूषयति तेन दंशक्लेदः शिरोगौरवं स्वेदश्चक्षुर्ग्रहणञ्च। चतुर्थे कोष्ठमनुप्रविश्य कफप्रधानान् दोषान् दूषयति। तेन तन्द्राप्रसेकसन्धिविश्लेषा भवन्ति। पञ्चमेऽस्थीन्यनुप्रविशति प्राणमग्निञ्च दूषयति तेन पर्वभेदो हिक्का दाहश्च भवति। षष्ठे मज्जानमनुप्रविशति ग्रहणीञ्चात्यर्थं दूषयति तेन गात्राणां गौरवमतीसारो हृत्पीडा मूर्च्छा च भवति। सप्तमे शुक्रमनुप्रविशति व्यानञ्चात्यर्थं कोपयति कफञ्च सूक्ष्मस्रोतोभ्यः प्रच्यावयति तेन श्लेष्मवर्त्तिप्रादुर्भावः कटीपृष्ठभङ्गः सर्वचेष्टाविघातो लालास्वेदयोरतिप्रवृत्तिरुच्छ्वासनिरोधश्च भवति।

तत्र मण्डलिनां प्रथमे वेगे विषं शोणितं दूषयति तत्तत्प्रदुष्टं पीततामुपैति तत्र परिदाहः पीतावभासता चाङ्गानां भवति। द्वितीये मांसं दूषयति तेनात्यर्थं पीतता परिदाहो दंशे श्वयथुश्च भवति। तृतीये मेदो दूषयति तेन पूर्ववच्चक्षुर्ग्रहणं तृष्णा दंशे क्लेदः स्वेदश्च। चतुर्थे कोष्ठमनुप्रविश्य ज्वरमापादयति पञ्चमे परिदाहं सर्वगात्रेषु करोति। षष्ठसप्तमयोः पूर्ववत्।

राजिमतां प्रथमे वेगे विषं शोणितं दूषयति तत्प्रदुष्टं पाण्डुतामुपैति तेन रोमहर्षः शुक्लावभासश्च पुरुषो भवति। द्वितीये मांसं दूषयति तेन पाण्डुतात्यर्थं जाड्यं शिरःशोफश्च भवति। तृतीये मेदो दूषयति तेन चक्षुर्ग्रहणं स्वेदो घ्राणाक्षिस्रावश्च भवति। चतुर्थे कोष्ठमनुप्रविश्य मन्यास्तम्भं शिरोगौरवं चापादयति। पञ्चमे वाक्सङ्गं शीतज्वरञ्च करोति षष्ठसप्तमयोः पूर्ववदिति।

भवन्ति चात्र। धात्वन्तरेषु याः सप्त कलाः संपरिकीर्त्तिताः। तास्वेकैकामतिक्रम्य वेगं प्रकुरुते विषम्। येनान्तरेण तु कलां कालकल्पं भिनत्ति हि। समीरणेनोह्यमानं तत्तु वेगान्तरं स्मृतम्। शूनाङ्गः प्रथमे वेगे पशुर्ध्यायति दुःखितः। लालास्रावो द्वितीये तु कृष्णाङ्गः पीड्यते हृदि। तृतीये च शिरो दुःखं कण्ठग्रीवञ्च भज्यते। चतुर्थे वेपते मूढः खादन् दन्तान् जहात्यसून्। केचिद्वेगत्रयं प्राहुरन्त्यञ्चैतेषु तद्विदः। ध्यायति प्रथमे वेगे पक्षी सुह्यत्यतः परम्। द्वितीये विह्वलः प्रोक्तस्तृतीये मृत्युमृच्छति। केचिदेकं विहङ्गेषु विषवेगमुशन्ति हि। मार्ज्जारनकुलादीनां विषं नातिप्रवर्त्तते"। "अथातः सर्पदष्टचिकित्सितकल्पं व्याख्यास्यामः। सर्वैरेवादितः सर्पैः शाखादष्टस्य देहिनः। दंशस्योपरि बध्नीयादरिष्टा(ताग)चतुरङ्गुले। प्लोतचर्म्मान्तवल्कानां मृदुनाऽन्यतमेन च। न गच्छति विषं देहमरिष्टाभिर्निवारितम्। दहेद्दंशमथोत्कृत्य यत्र बन्धो न जायते। आचूषणच्छेददाहाः सर्वत्रैव तु पूजिताः। प्रतिपूर्य्य मुखं वस्त्रैर्हितमाचूषणं भवेत्। स दष्टव्योऽथ वा सर्पो लोष्टो वापि हि तत्क्षणम्। अथ मण्डलिना दष्टं न कथञ्चन दाहयेत्। स पित्तविषबाहुल्याद्दंशो दाहाद्विसर्पति। अरिष्टामपि

मन्त्रैश्च बध्नीयान्मन्त्रकोविदः। सा तु रज्ज्वादिभिर्बद्धा विषप्रतिकरी मता। देवब्रह्मर्षिभिः प्रोक्ता मन्त्राः सत्य तपोमयाः। भवन्ति नान्यथा क्षिप्रं विषं हन्युः सुदुस्तरम्। विषं तेजोमयैर्मन्त्रैः सत्यब्रह्मतपोमयैः। यथा निवार्य्यते क्षिप्रं प्रयुक्तैर्न तथौषधैः। मन्त्राणां ग्रहणं कार्य्यं स्त्रीमांसमधुवर्जिना। मिताहारेण शुचिना कुशास्तरणशायिना। गन्धमाल्योपहारैश्च बलिभिश्चापि देवताः। पूजयेन्मन्त्रसिद्ध्यर्थं जपहोमैश्च यत्नतः। मन्त्रस्तु विधिना प्रोक्तः हीना वा स्वरवर्णतः। यस्मान्न सिद्धिमायान्ति तस्माद् योज्योऽगदक्रमः। समन्ततः सिराः दंशाद्विध्येत् कुशलो भिषक्। शाखाग्रे वा ललाटे वा व्यध्यास्ता विसृते विषे। रक्ते निर्ह्रियमाणे तु कृत्स्नं निर्ह्रियते विषम्। तस्माद्विस्रावयेद्रक्तं सा ह्यस्य परमा क्रिया" ।

सर्पकङ्काली स्त्री० सर्पस्येव कङ्कालमङ्गविशेषो यस्याः गौरा० ङीष्। सर्पविषघातिन्यां लतायां शब्दच० ।

सर्पगन्धा स्त्री सर्पं तद्विषं गन्धयति हिनस्ति गन्ध-अच्। विषहारिण्यां लतायां जटा०। [हरीतलतायां रत्नमा०।

सर्पघातिनी स्त्री सर्पं तद्विषं हन्ति हन-णिनि। सर्पविष-

सर्पच्छत्र पुंस्त्री० सर्पस्य छत्रमिवाच्छादकं यस्य। नकुले हेमच० ।

सर्पदंष्ट्र पु० सर्पस्य दंष्ट्रेव पुष्पमस्य। १नागदन्तीवृक्षे शब्दच०। सर्पस्य दंष्ट्रेव स्पर्शने दुःखदत्वात्। २वृश्चिकालीलतायां स्त्री (विछाति) रत्नमा०। [क्रूरां राजनि०।

सर्पदंष्ट्रिका स्त्री सर्पदंष्ट्राऽऽकारोऽस्त्यस्याः ठन्। अजशृ-

सर्पदण्डी स्त्री सर्पं तद्विषं दण्डयति दण्ड-अच्। गोरक्षा-वृक्षे राजनि०। [ङीष्। नागदन्तीवृक्षे राजनि०।

सर्पदन्ती स्त्री सर्पस्य दन्त इव पुष्पमस्त्यस्या अच् गौरा०

सर्पनामा स्त्री सर्पस्य नामास्य वाचकशब्दे। सर्पकङ्कालीभेदे शब्दच० ।

सर्पदमनी स्त्री सर्पान् दमयति अनया दम-णिच्-करणे ल्युट् ङीप्। बन्ध्याकर्कोट्यां राजनि०। [राजनि०।

सर्पपुष्पी स्त्री सर्पः सर्पदन्त इव पुष्पमस्याः। नागदन्त्यां

सर्पफणिज पु० सर्पस्य फणे जायते जन-ड। सर्पफणजात मणौ शब्दमा०।

सर्पभुज् पु० सर्पं भुङ्क्ते भुज-क्विप्। १मयूरे हेमच०। २सर्पभक्षके गरुडादौ च। [अमरः।

सर्पराज पु० सर्पाणां राजा टच् समा०। वासुकौ नागभेदे

सर्पलता स्त्री सर्प इव लता। नागवल्ल्यां ताम्बूल्यां राजनि०

सर्पसत्र न० सर्पेण होम्यद्रव्येण तन्नाशनार्थं वा सत्रम्। जनमेजयानुष्ठिते महाभारतप्रसिद्धे सर्पनाशनार्थे यज्ञभेदे भा०आ० ५१अ०५८अ० तत्कथा दृश्या।

सर्पसहा स्त्री सर्पं सहते सह-अच्। सर्पकङ्कालीलतायां राजनि०। [च।

सर्पहन् पु०सर्पं हन्ति हन-क्विप्। १नकुले हेमच० २गरुडे

सर्पाक्षी स्त्री सर्पस्येवाक्षि पुष्पं यस्याः षच् समा०। १गन्धनाकुल्याम् राजनि०। [२महिषकन्दभेदे च राजनि०।

सर्पाख्य पु० सर्पस्याख्याऽऽख्या यस्य। १नागकेशरे रत्नमा०।

सर्पाङ्गी स्त्री सर्पस्येवाङ्गं यस्याः ङीष्। १सर्पकङ्कालीलतायां रत्नमा०। २सिंहल्यां राजनि०।

सर्पादनी स्त्री सर्पं सर्पविषमत्त्यनया अद-ल्युट् ङीप्। नाकुल्यां राजनि०। [प्रभृतयोऽप्यत्र।

सर्पाराति पु० ६त०। १गरुडे हेमच० २नकुले च सर्पारि-

सर्पावास न० सर्पाणामावासो यत्र। १चन्दनवृक्षे राजनि०। ६त०। २सर्पाणामावासे पु०।

सर्पाशन पुंस्त्री० सर्पमश्नाति अश-ल्युट्। १मयूरे हला०। स्त्रियां ङीप्। २गरुडे पु०।

सर्पिस् न० सृप-इसि। घृते अमरः।

सर्पिणी स्त्री सृप-णिनि ङीप्। १सर्पयोषिति शब्दर०। २क्षुपभेदे राजनि०। ३गमनकर्त्तरि त्रि० स्त्रियां ङीप्।

सर्पेष्ट न० सर्पीणां भुजगीनामिष्टम्। चन्दने रत्नमा०।

सर्पेष्ट न० सर्पाणामिष्टम्। चन्दने जटा० २सर्पाभीष्टे त्रि०।

सर्ब सर्पणे भ्वा०पर०सक० सेट्। सर्बति असर्बीत् अणोपदेशत्वात् न णत्वमित्यन्ये णोपदेश एव न्याय्यः।

सर्व पु० सृ-व तस्य नेत्त्वम्। १शिवे २विष्णौ च विष्णुस०। "असतश्च सतश्चैव सर्वस्य प्रभवाप्ययौ। सर्वस्य सर्वदा ज्ञानात् सर्वमेनं प्रचक्षते" विष्णुपु० तन्नामनिरुक्तिः। तथा च सर्वं ज्ञेयत्वेन उत्पाद्यत्वादिना वाऽस्त्यस्य अच्। ३सम्पूर्णे ४सकले च त्रि० अमरः। असंज्ञायामस्य सर्वनामसंज्ञा तत्कार्य्यं च। सर्वशब्दार्थस्तु स्वार्थान्वयितावच्छेदकधर्मव्यापकताहशधर्मावच्छिन्नान्वयितावच्छेदकावच्छिन्नव्याप्यपर्य्याप्तिकधर्मावच्छिन्नः" गा०श०। "व्यापकत्वावच्छिन्नः दिनकरी। यथा सर्वे घटा रूपवन्त इत्यादौ सर्वपदार्थः। "बुद्धिविषयतावत्त्वावच्छिन्नसमूहत्ववान्" इति शाब्दिका वदन्ति। [२सर्वसोढरि त्रि०।

सर्वसहा स्त्री सर्वं सहते सह-खच् मुम् च। १पृथिव्याम् अमरः

सर्वकर्त्तृ पु० सर्वं करोति कृ-तृच। १चतुर्मुखे ब्रह्मणि शब्दर०। २परमेश्वरे च।

सर्वकर्मीण त्रि० सर्वकर्मभ्योऽलं ख। सर्वकरणसमर्थे पदार्थे "संग्रामे सर्वकर्मीणाविति भट्टिः। [नटे शब्दर०।

सर्वकेशिन् पु० अभिनेयानां सर्वेषामिव केशोऽस्त्यस्य इनि।

सर्वक्षार पु० सर्वः क्षारमयः। (सावान)ख्याते पदार्थे राजनि०

सर्वग न० सर्वं गच्छति गम-ड। १जले २शिवे ३परमेश्वरे पु० मेदि०। ४वायौ ५आत्मनि च पु० शब्दमा०। ६सर्वगामिनि त्रि०। ७प्रियङ्गुवृक्षे स्त्री शब्दच० टाप्।

सर्वगन्ध न० सर्वे गन्धा अत्र। "चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम्। लवङ्गसहितञ्चैव सर्वगन्धं प्रकीर्त्तितम्" भावप्र० उक्ते १गन्धद्रव्यसमूहभेदे। सर्वान् गन्धयति हिनस्ति संहारकाले गन्धत्यच् सर्वगन्धा उत्पाद्यतया सन्त्यस्य वा। २परमेश्वरे सर्वनाशकत्वात् सर्वगन्धहेतुत्वाद्वाऽस्य तथात्वम्।

सर्वग्रन्थि पु० सर्वत्र ग्रन्थिरस्य। १पिप्पलीमूले राजनि०।

सर्वङ्कष पु० सर्वं कषति कष खच् मुमृच। १पापे २सर्वातिरेकिणि त्रि०। [सि०कौ०।

सर्वजनीन त्रि० सर्वजनेषु विदितः ख। सर्वत्र विख्याते

सर्वज्ञ पु० सर्वं जानाति ज्ञा-क। १शिवे २बुद्धे अमरः। ३परमेश्वरे च "यः सर्वज्ञः सर्ववित्" श्रुतिः। ४सर्वज्ञानकर्त्तरि त्रि०। ५दुर्गायां स्त्री "सर्वज्ञा सर्ववेत्तृत्वात्" देवीपु० ४८अ०।

सर्वतःशुभा स्त्री सर्वतः शुभं यस्याः। प्रियङ्गुवृक्षे शब्दच०।

सर्वतस् अव्य० सर्व+तसिल्। समन्तत इत्यर्थे अमरः।

सर्वतिक्ता स्त्री सर्वतः तिक्ता। काकमाच्यां राजनि०।

सर्वतोभद्र पु०न० सर्वतो भद्राणि सुखानि यस्य। १चतुर्द्वारयुक्ते १गृहभेदे प्रतिष्ठादौ पूज्यदेवतानां २मण्डलभेदे सर्वतोभद्रमण्डलशब्दे दृश्यम्। ज्योतिषोक्ते ३शुभाशुभज्ञानार्थे चक्रभेदे चक्रशब्दे २८१५पृ० दृश्यम्। अलङ्कारोक्ते बन्धभेदात्मके ४चित्रकाव्ये च। अलङ्कारशब्दे ४०७ पृ० दृश्यम् सर्वतो भद्रमस्मात्। ५निम्बवृक्षे पु० अमरः। ६गाम्भार्यां ७नटयोषिति च स्त्री मेदि०।

सर्वतोभद्रचक्र न० सर्वतो भद्रं यत्र तादृशं चक्रम्। ज्योतिषोक्ते शुभाशुभज्ञानार्थे चक्रभेदे चक्रशब्दे २८१५ पृ० दृश्यम्। [भेदे अलङ्कारशब्दे ४०७पृ०दृश्यम्।

सर्वतोभद्रबन्ध पु० सर्वतो भद्राकारेण बन्धः। चित्रकाव्य-

सर्वतोभद्रमण्डल न० सर्वतो भद्रनामकं मण्डलम्। शारदातिलकाद्युक्ते प्रतिष्ठादौ—पूज्यदेवतामण्डलभेदे

तल्लेखनप्रकारस्तु हेमाद्रौ स्कान्दे प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशतिम्। खण्डेन्दुश्चत्रिपात् कोणे शृङ्खला पञ्चभिः पदैः। एकादशपदा वल्ली भद्रन्तु नवभिः पदैः। चतुर्विंशत्पदा वापी परिधिर्विंशता पदैः। मध्ये षोडशभिः कोष्ठैः पद्मष्टदलं स्मृतम्। श्वेतेन्दुः शृङ्खला, कृष्णा वल्ली नीलेन पूरयेत्। भद्राश्चाथ सिता वापी परिधिः पीतवर्णकः। बाह्यान्तरदलैः श्वेता कर्णिका पीतवर्णिका। परिध्यावेष्टितं पद्मं बाह्ये सत्त्वरजस्तमः। तन्मध्ये स्थापयेद्देवान् ब्रह्माद्यांश्च सुरासुरानिति। शारदायामन्यथोक्तं यथा "चतुरस्रचतुःकोष्ठे कर्णसूत्रसमन्विते। चतुर्ष्वपि च कोष्ठेषु कोणसूत्रचतुष्टयम्। ततः कोष्ठेषु मत्स्याः सूत्रेषु सूत्राणि पातयेत्। यावत् शतद्वयं मन्त्री षट्पञ्चाशत् पदान्यपि। तावच्चैव विधिना तत्र सूत्राणि पातयेत्। षट्त्रिंशता पदैर्मध्ये लिखेत् पद्मं सुलक्षणम्। बहिःपङ्क्त्या भवेत् पीठं पङ्क्तियुग्मेन वीथिका। द्वारशोभोपशोभास्रान् शिष्टाभ्यां परिकल्पयेत्। शास्त्रोक्तविधिना मन्त्री ततः पद्मं समालिखेत्। पद्मक्षेत्रस्य सन्त्यज्य द्वादशांशं बहिः सुधीः। तन्मध्यं विभजेद्वृत्तैस्त्रिभिः समविभागतः। आद्यं स्यात् कर्णिकास्थानं केशराणां द्वितीयकम्। तृतीयं पद्मपत्राणां स्वक्षांशेन दलाग्रकम्। बाह्यवृत्तान्तरालस्य मानेन विधिना सुधीः। निधाय केशराग्रेषु परितोऽर्द्धनिशाकरान्। लिखित्वा सन्धिसंस्थानि तत्र सूत्राणि पातयेत्। दलाग्राणाञ्च यन्मानं तन्मानाद्वृत्तमालिखेत्। तदन्तरालतन्मध्यसूत्रस्योभयतः सुधीः। आलिखेद्वाह्यहस्तेन दलाग्राणि समन्ततः। दलमूलेषु युगशः केशराणि प्रकल्पयेत्। एतत् साधारणं प्रोक्तं पङ्कजं तन्त्रवेदिभिः। पदानि त्रीणि पादार्थं पीठकोणेषु मार्जयेत्। अवशिष्टैः पदैर्विद्वान् पीठगात्राणि कल्पयेत्। पदानि वीथिसंस्थानि मार्जयेत् पङ्क्तिभेदतः। दिक्षु द्वाराणि रचयेत् द्विचतुःकोष्ठकैस्ततः। पदैस्त्रिभिरथैकेन शोभाः स्युर्द्वारपार्श्वयोः। उपशोभाः स्युरेकेन त्रिभिः कोष्ठैरनन्तरम्। अवशिष्टैः पदैः षड्भिः कोणानां स्याच्चतुष्टयम्। रञ्जयेत् पञ्चभिर्वर्णैर्मण्डलं तन्मनोहरम्। पीतं हरिद्राचूर्णं स्यात् सितं तण्डुलसम्भवम्। कुसुम्भचूर्णमरुणं कृष्णं दग्धपुलाकजम्। बिल्वादिपत्रजं श्याममित्युक्तं वर्णपञ्चकम्। अङ्गुलोत्सेधविस्ताराः सीमारेखाः सिताः

शुभाः। कर्णिकां पीतवर्णेन केसरांश्चारुणेन च। शुक्लवर्णानि पत्राणि तत्सन्धीन् श्यामलेन च। रजसा रञ्जयेन्मन्त्री यद्वा पीतैव कर्णिका। केसराः पीतरक्ताः स्युररुणानि दलान्यपि। सन्धयः कृष्णवर्णाः स्युः सितेनाप्यसितेन वा। रञ्जयेत् पीठभागांश्च पादाः स्युररुणप्रभाः। गात्राणि तस्य शुक्लानि वीथीषु चतसृष्वपि। आलिखेत् कल्पलतिकादलपुष्पफलान्विताः। वर्णैर्नाना विधैश्चित्राः सर्वदृष्टिमनोहराः। द्वाराणि श्वेतवर्णानि शोभा रक्ताः समीरिताः। उपशोभाः पीतवर्णाः कोणान्यसितभानि च। तिस्रो रेखा बहिः कार्य्याः सितरक्तासिताः क्रमात्। मण्डलं सर्वतोभद्रमेतत् साधारणं स्मृतम्"। अपरञ्च "चतुरस्रां भुवं भित्त्वा दिग्भ्यो द्वादशधा सुधीः। पातयेत् तत्र सूत्राणि कोष्ठानां दृश्यते शतम्। चतुश्चत्वारिंशदाढ्यं पश्चात् षट्त्रिंशताम्बुजम्। कोष्ठैः प्रकल्पयेत् पीठं पङ्क्त्या नैवात्र वीथिकाः। द्वारशोभे यथा पूर्वमुपशोभा न दृश्यते। अवशिष्टैः पदैः कुर्य्यात् षड्भिः कोणानि तन्त्रवित्। विदध्यात् पूर्ववत् शेषमेवं वा मण्डलं स्मृतम्"। "चतुरस्रे चतुःषष्टिं पदान्यारचयेत् सुधीः। पदैश्चतुर्भिः पद्मं स्यात मध्ये तत् पूरिताः पुनः। वीथीश्चतस्रः कुर्वीत मण्डलान्तरशालिकाः। दिग्गतेषु चतुष्कोषु पङ्कजानि समालिखेत्। विदिग्गतचतुष्काणि भित्त्वा षोड़शधा सुधीः। मार्जयेत् स्वस्तिकाकारं श्वेतपीतारुणासितैः"। मार्जनमाह राघवभट्टधृतम् "विदिग्गतचतुष्कोणान् भित्त्वा षोड़शधा सुधीः। वज्राग्रादिकोष्ठसिद्धये मध्योर्द्ध्वमपि मार्जयेत्। रजोभिः पूरयेत्तानि स्वस्तिकानि शिवादितः। प्राक् प्रोक्तेनैव मार्गेण शेषमन्यत् समापयेत्। नवनाभमिदं प्रोक्तं मण्डलं सर्वसिद्धिदम्। पञ्चाब्जमण्डलं प्रोक्तमेतत् स्वस्तिकवर्जितम्। दीक्षायां देवपूजायां मण्डलानां चतुष्टयम्। सर्वतन्त्रानुसारेण प्रोक्तं सर्वसमृद्धिदम्"।

सर्वतोमुख न० सर्वतोमुखमस्य। १जले अमरः २आकाशे मेदि० ३शिवे ४ब्रह्मणि ५परमेश्वरे ६आत्मनि च पु० मेदि०। ७ब्राह्मणे शब्दच० ८स्वर्गे ९अग्नौ शब्दमा०। "सर्वतःपाणिपादान्तः सर्वतोऽक्षिशिरोमुखः। विश्वरूपो महानग्निः प्रणीतः सर्वकर्मसु" ति०त० उक्तेः वह्नेस्तथात्वम्। [चितार्थे।

सर्वत्र अव्य० सर्व-त्रल्। सर्वस्मिन् काले देशे सर्वस्यां दिशि

सर्वत्रग पु० सर्वत्र गच्छति गम-ड। १वायौ शब्दच० २सर्वत्रगामिनि त्रि०। [र्वत्र गन्तरि त्रि० स्त्रियां ङीप्।

सर्वत्रगामिन् पु० सर्वत्र गच्छति गम-णिनि। १वायौ २स

सर्वथा अव्य० सर्वप्रकारम् थाल्। १सर्वप्रकारे २अत्यन्ते ३नितिशायां ४हेतौ च शब्दर०।

सर्वदम पु० सर्वान् दमयति दम-णिच्-अण्। सर्वदमने शाकुन्तले भरतनृपे हेमच०।

सर्वदमन पु० सर्वान् दमयति दम-णिच्-ल्यु। १दुष्मन्तपुत्रे भरतनृपे त्रिका०। २सर्वदमनकर्त्तरि त्रि०।

सर्वदर्शिन् पु० सर्वं समभावेन पश्यति दृश-णिनि। १बुद्धे २परमेश्वरे च। ३सकलद्रष्टरि त्रि० स्त्रियां ङीप्।

सर्वदा अव्य०सर्वस्मिन् काले दाच्। सर्वस्मिन् काले इत्यर्थे।

सर्वदुःखक्षय पु० सर्वेषामाध्यात्मिकाधिदैविकाधिभौतिकानां दुःखानां क्षयः। आत्यन्तिकदुःखत्रयनिवृत्तौ मोक्षे हेमच० "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्त पुरुषार्थः" सा० सू० "स्वसमानाधिकरणदुःखासमानकालीनस्य दुःखध्वंसरूपनिवृत्तेरात्यन्तिकत्वम्।

सर्वदेवमुख पु० सर्वेषां देवानां मुखं यत्र। अग्नौ रत्नमा०।

सर्वद्र्यञ्च् त्रि०सर्वमञ्चति पूजयति अन्च-क्विप् अद्र्यागमन नलोपः। सर्वस्य पूजके। भत्वे सर्वद्रीच इत्यादि। गत्यर्थस्य नलोपे सर्वद्र्यच् इत्येव सर्वगामिनि। भत्वे सर्वद्रीच इति भेदः।

सर्वधुरावह त्रि० सर्वेषां धूः अच्समा० सर्वधुरा तां वहति वह-अच्। सर्वभारवाहके वृषादौ अमरः।

सर्वधुरीण त्रि० सर्वां धुरं वहति ख। सकलभारवाहके वृषादौ अमरः।

सर्वनाम पु० सर्वेषां नाम वाचकं संज्ञात्वेऽपि मुग्धा० न णत्वम्। व्याकरणोक्ते कार्यविशेषार्थं कृतसंज्ञायुते सर्वादिशब्दभेदे "सर्वादीनि सर्वनामानि" पा०सर्वनामशब्दार्थस्तु वक्तृबुद्धिविषयतावच्छेदकधर्मोपलक्षितधर्मविशिष्टः।

सर्वपूर्णत्व न० सर्वैः पूर्णत्वम्। सम्भारे सामग्राम् त्रिका०।

सर्वप्रहरणायुध पु० सर्वेषां प्रहरणानि सर्वाणि वा प्रहरणानि आयुधान्यस्य। विष्णौ "सर्वप्रहरणायुधः" विष्णुस० व्युत्पत्तिद्वययोगात् नामद्वयम् तेन नामसङ्ख्यापूर्त्तिः" भा०। [भक्षके त्रि० १वह्नौ पु०।

सर्वभक्षा स्त्री भक्ष-अच् टाप्०। १अजायां हेमच० २सर्व-

सर्वमङ्गला स्त्री सर्वाणि मङ्गलान्यस्याः ५ब०। सर्वाणि मङ्गलानि देयत्वेनास्त्यस्याः अच् वा। दुर्गायाम् अमरः। "सर्वाणि हृदयस्थानि मङ्गलानि शुभानि च। ददाति

चेष्टितान् लोके मा तेन सर्वगस्तत्ना" देवीप० ४५ अ०।

सर्वमय त्रि० सर्वात्मकः मयट्। १सर्वात्मके २परमेश्वरे पु०।

सर्वमूल्य न० ६ त०। कपर्दके त्रिका०।

सर्वमूषक पु० सर्वं मुष्णाति मुष-वुन् पृषो०। काले हेमच०।

सर्वरस पु० सर्वो रसमयः। (धुना) १यावरसे अमरः ७ब०। २वीणादिवाद्ये मेदि०। ३पण्डिते शब्दच०। कर्म०। ४लवणे रसे। सर्वाणि रसयति रस-अण्। ५परमेश्वरे तैत्तिरीयवत् तस्य सर्वत आनन्दमयत्वात् तथात्वम्।

सर्वरसोत्तम पु० सर्वेषु रसेषु उत्तमः। लवणे रसे हेमच०।

सर्वरात्र पु० सर्वा रात्रिः अच् समा०। "रात्राह्नाहाः पुंसीति" पा० पुंस्त्वम्। सकलरात्रौ सि०कौ०। [दिरयम्।

सर्वरी स्त्री सृ-वनिप् ङीप् र च। रात्रौ धरणिः तालव्या-

सर्वर्त्तुपरिवर्त्त पु० सर्वर्तूनां परिवर्त्तो यत्र। वत्सरे जटा०

सर्वला(ली) स्त्री सर्वं लाति ला-क वा गौरा० ङीष्। तोमरास्त्रे अमरः।

सर्वलिङ्गिन् पु० सर्वेषां लिङ्गानि सन्त्यस्य इनि। वेदविरुद्धाचारिणां बौद्धादीनां लिङ्गवत्सु पाषण्डेषु अमरः

सर्वलोह पु० सर्वः लोहमयोऽवयवो यस्य। लोहमये बाणे हेमच०। [गान्धारीवृक्षे जटा०।

सर्ववर्णिका स्त्री सर्वं वर्णयति वर्ण-ण्वुल् अत इत्त्वम्।

सर्वविद् पु० सर्वं वेत्ति विद्-क्विप्। १परमेश्वरे २सर्वज्ञातरि त्रि०।

सर्ववेद पु० सर्वान् वेदान् अधीते उक्था० ठक्। "सर्वादेः सादेश्च लुक् वक्तव्यः" वार्त्ति० तस्य लुक्। १सर्ववेदाध्ययनकर्त्तरि। सर्वं वेत्ति विद्-अच् उप०। २सर्वज्ञे त्रि०।

सर्ववेदस् पु० सर्वाणि धनानि वेदयते लम्भयति याचकाय दक्षिणार्थं ददाति विद-लाभे णिच्-असि। सर्वस्वदक्षिणकविश्वजिद्यागकाद्दियागकर्त्तरि अमरः।

सर्ववेदस न० सर्वं वेदः स्वं इह विद्यमानं धनं नि० अच् समा०। सर्वस्वे स्वत्वे विद्यमाने सर्वधने तच्च विश्वजिद्यागे दक्षिणात्वेन विहितम्। "सहस्र सर्ववेदसं विश्वजितः" कात्या० श्रौ० २२।१।८ सहस्रसर्ववेदसयोर्विश्वजिति विकल्पः। सर्ववेदसपक्षे इदमुच्यते। "ज्येष्ठ पुत्रस्य भूमिशूद्रवर्जं योगाविशेषात् सर्वेषाम्" सू०। "ज्येष्ठपुत्रस्य विभागं दत्त्वा भूमिशूद्रवर्जं ददाति कुत एतत् सर्वमनुष्याणां हि भूम्या योगोऽविशिष्टः धारणचङ्क्रमणद्वारेण शूद्रस्य च शुश्रूषोदनतनेति" कर्क "भूमेस्तावद्धारणशयनासनचङ्क्रमणादिभ्यश्च सर्वेषामविशिष्टः इतः शूद्रो धर्मार्थं सेवां कुरुते स सर्वेषामविशिष्ट एव" सं०प०व्या०। "शूद्रदानं वा दर्शनाविरोधाभ्याम्" सू०। वाशब्दः पक्षव्यावृत्तौ शूद्रस्य दानं च भवति दृश्यते हि शूद्रस्य दानं पुरुषमेधे "सपुरुषं प्राची दिग्घात्रिति" न च विरोधो गर्भदासस्य। तस्माच्छूद्रो दीयत एव अनेन च न्यायेन भूमेरप्येकदेशदानेनैव न विरोधः "परिमाणे स्वत्वविशेषात्" सू०। सर्वस्वपरिमाणे यस्य यावत् स्वं तत्सर्वं दद्यात् सर्वो वेदः सर्ववेदसमिति तेन प्रागपि सहस्रात् सर्ववेदसं भवति एवं प्राप्त आह। सर्वस्वपरिमाणे अपेक्षिते सर्वस्वं यस्य यावद्धनं स्वत्वे पुष्पादि तत्सर्वं देयम् कुतः अविशेषात् न च सर्वस्वं ददातीति (अस्य) वाक्यशेषः श्रुतः येन सहस्राद्यनतिरिक्तं वेति विशेष आश्रीयते। "अधिकं वा प्रकृत्यनुपपत्तात्" सू०। "अधिकं वा सहस्रात् सर्ववेदसं ग्रहीतव्यम्। प्रकृत्य हि सर्ववेदसं इदमेवाहुपक्षं दर्शयति कोऽर्हति मनुष्यः सर्ववेदसं दातुं तस्मात् सहस्रं देयमिति एतच्च सहस्रादधिकं उपपद्यते नेतरथेति एवं तावदत्र (विश्वजिति) सहस्रादधिकं सर्ववेदसमित्युक्तम्" कर्कः। "सर्वस्वप्रतिनिधिर्वा" सू० "दीयते अप्रसिद्धत्वादुच्यते" कर्क० "धेन्वनडुत्भारधान्यपल्यदासमिथुनमहानसारोहणविमितशयनानि" सू०। "धेन्वादीनि दासमिथुनान्तानि प्रसिद्धानि महानसोपयोगिकं द्रव्यं ताम्रचर्वादि महानसशब्देनोच्यते आरोहणं च युग्यं विमितशयने प्रसिद्धे एव। धेनुः प्रसिद्धा अनड्वान् बलीवर्दः सीरं वहन् धान्यं गोधूमादि- पल्य पलादिमानार्हम्। दासमिथुनं दासीकर्मो महानसं ताम्रचर्वादि गृहोपकरणम् आरोहणं युग्यस्य विमित स्तम्भ शयनं खट्वादि एतानि देयानि" कर्कः।

सर्ववेधिन् पु० सर्वेषां वेधो धात्वत्वेनास्त्यस्य इनि। वटे हेमच०। [२सर्ववोधित त्रि०।

सर्वसङ्गत पु० सर्वं सङ्गतमुचितम्। षष्टिकधान्ये शब्दच०

सर्वसंसर्गलवण न० सर्वसंसर्गेण जातं लवणम्। औषरके लवणे राजनि०।

सर्वसन्नहन न० सर्वेषां सन्नहनं युद्धार्थं सज्जीकरणं यत्र। चतुरङ्गसैन्यसज्जीकरणेन युद्धयात्रायाम् अमरः।

सर्वसह पु० सर्वं सहते अच्। १गुग्गुलौ रत्नमा० २सर्वसहिष्णौ त्रि०। [२सकलार्थसाधने त्रि०।

सर्वसिद्धि पु० सर्वेषां सिद्धिरस्मात्। १श्रीफले शब्दच०।

सर्वस्व न० कर्म०। सकलधने सर्ववेदसशब्दे दृश्यम्।

सर्वस्वदक्षिण पु० सर्वस्वं दक्षिणा यत्र । विश्वजिन्नामकयागभेदे सर्ववेदसशब्दे दृश्यम् । [२सकलदक्षिणहेतौ त्रि० ।

सर्वहित न० सर्वेषां हितम् । १मरिचे राजनि० ५व० ।

सर्वाङ्गसुन्दर पु० औषधभेदे "रसगन्धकतुल्यांशौ द्वौ भागौ टङ्कणस्य च । मौक्तिकं विद्रुमं शङ्खमवर्णीय समांशतः । हेमभस्मार्द्धभागञ्च सर्वं खल्ले विधापयेत् । निम्बुद्रवयोगेन पिण्डिकां कारयेद्भिषक् । पश्चात् गजपुटं दद्यात शीतलञ्च समुद्धरेत् । हैमभस्मसमं तीक्ष्णं तीक्ष्णार्द्धं टरदो मतः । एकीकृत्य समस्तानि सूक्ष्मचूर्णानि कारयेत् । ततः पूजां प्रकुर्वीत भक्षयेत् दिवसे शुभे । सर्वाङ्गसुन्दरो ह्येष रोगगजनिकृन्तनः । वातपित्तज्वरे घोरे सन्निपाते सुदारुणे । पाण्डुरोगे मेहे गुल्मे भगन्दरे । निहन्ति शतशान् रोगान् क्षयं चैव विशेषतः । पिप्पलीमधुसंयुक्तं घृतयुक्तमथापि वा । भक्षयेत् पर्णखण्डेन त्रिकटुना चार्द्रकेण वा । गुडूचीरस संयुक्तं प्रमेहे च विशेषतः । रसरत्नाकरप्रोक्तः सिद्धयोगो रसोत्तमः । राजिकाहिङ्गुतैलाम्लं लवणाद्यं विवर्जयेत्" भैषज्यरत्ना० । अत्र हेमभस्मवः सर्वद्रव्यार्द्धत्वमिति मतान्तरम् ।

सर्वाङ्गीण त्रि० सर्वाण्यङ्गानि व्याप्नोति ख । सर्वावयवव्यापके "सर्वाङ्गीणे तदुत्तरे" इति भट्टिः ।

सर्वाणी स्त्री सर्वेभ्य आनयति मोक्षं आ+नी-ड पूर्वपदात् णत्वम् । दुर्गायाम् "सर्वान् मोक्षान् प्रापयति जन्ममृत्युजरादिकम् । चराचरांश्च विश्वस्यान् सर्वाणी तेन कीर्त्तिता" ब्रह्मवै० प्र० ५४अ० तन्निरुक्तिः ।

सर्वानुकारिणी स्त्री सर्वमनुकरोति अनु+कृ-णिनि ङीप् । १शालपर्ण्याम् राजनि० २सकलसदृशे त्रि० स्त्रियां ङीप् ।

सर्वानुभूति स्त्री सर्वेषामनुभूतिर्यत्र । १श्वेतत्रिवृतायाम् अमरः २सर्वज्ञानिनि त्रि० ३जिनभेदे हेमच० ।

सर्वान्नभोजिन् त्रि० सर्वस्यान्नं सर्वाण्यन्नानि वा भुङ्क्ते भुज-णिनि । सर्वान्नभक्षके अमरः । [शालाके अमरः

सर्वान्नीन त्रि० सर्वेषामन्नं सर्वान्नं वा भुङ्क्ते ख । सर्वान्न

सर्वाभिसन्धिन् पु० सर्वत्र व्यापारे अभिसन्धानमस्य इनि । १सकलाभिसन्धिमति जने २धूर्त्तादौ त्रिका० ।

सर्वाभिसार पु० अभिस्रियते अत्र अभि+सृ-भावे घञ् ६त० । चतुरङ्गसैन्यसहायेन युद्धयात्राभेदे ।

सर्वार्थसिद्ध पु० सर्वेषु अर्थेषु सिद्धः । १बुद्धे अमरः हेम० २सकलाभीष्टसिद्धियुते त्रि० ।

सर्वार्थानुसाधिनी स्त्री "धर्मादीन् चिन्तितान् यस्मात् सर्वलोकेषु यच्छति । ततो देवी समाख्याता सा सर्वार्थानुसाधिनी" देवीपु० ४५अ० निरुक्तायां दुर्गायाम् ।

सर्वावसर पु० सर्वेषां कर्मणामवसरोऽपहरणं यत्र । अर्द्धरात्रे त्रिका० । [२सकलावसरयुते त्रि० ।

सर्वास्त्रा स्त्री सर्वाणि अस्त्राणि यस्याः । १देवीभेदे हेमच०

सर्वाह्ण पु० सर्वमहः टच् समा० अह्नादेशः णत्वम् । सकलदिने

सर्वौघ पु० सर्वेषां चतुरङ्गसैन्यानामोघो वृन्दमभिसारे यत्र । आघोभूतसर्वसैन्याभिसारे अमरः कर्म० । २सर्वजलवेगे मेदि०

सर्वौषधि स्त्री कर्म० । "कुष्ठमांसीहरिद्राभिर्वचाशैलेयचन्दनैः । मुराचम्पककर्पूरैर्मुस्तैः सर्वौषधिः स्मृता" इत्युक्ते कुष्ठादिद्रव्यवर्गे राजनि० । हेमाद्रौ छन्दोगपरिशिष्टे "कुष्ठं मांसी हरिद्रे द्वे मुराशैलेयचन्दनम् । वचा चम्पकमुस्ताश्च सर्वौषध्यो दश स्मृताः" ता एवोक्ताः । मन्त्रचन्द्रिकामेता एव सर्वौषधिगणत्वेनोक्ताः ।

सर्वौषधिगण पु० सर्वासामोषधीनां गणः । "मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् । शठीचम्पकमुस्तञ्च सर्वौषधिगणः स्मृतः" मन्त्रच० उक्ते द्रव्यगणे ।

सर्षप पु० सृ-अप सुक् च । (सरिषा) १सस्यभेदे अमरः । "सर्षपस्तु रसे पाके कटुः स्निग्धः सतिक्तकः । तीक्ष्णोष्णः कफवातघ्नो रक्तपित्ताग्निवर्द्धनः । रक्षोहरो जयेत् कण्डूकुष्ठकोष्ठक्रिमिग्रहान् । यथा रक्तस्तथा गौरः किन्तु गौरोऽवरो मतः" तच्छाकगुणाः "कटुकं सार्षपं शाकं बहुमूत्रमलं गुरु । अम्लपाकं विदाहि स्यादुष्णं रूक्षं त्रिदोषकृत् । सक्षारं लवणं तीक्ष्णं स्वादु शाकेषु निन्दितम् । तीक्ष्णाख्यं सार्षपं शाकं वातश्लेष्मापहम् । कण्डूकृमिहरं दद्रुकुष्ठघ्नं रुचिकारकम्" भावप्र० । "जालान्तरगते भानौ यच्चाणु दृश्यते रजः । तैश्चतुर्भिर्भवेल्लिक्षा लिक्षाः षड्भिश्च सर्षपः" मन्वादुक्ते २मानभेदे । ३श्वेतसर्षपिकायां स्त्री त्रिका० ङीष् ।

सर्षपतैल न० सर्षपस्य स्नेहः सर्षप+स्नेहार्थे-तैलच् । सर्षपस्नेहरूपे तैलभेदे "सर्षपतैलं तिक्तं कटुकं वातकफविकारघ्नम् । पित्तास्रदोषदं कृमिकुष्ठघ्नं तिलजवच्चक्षुष्यम्" राजनि० ।

सल न० सल-अच् । जले भरतः ।

सलिल न० सल-इलच् । १जले अमरः । वह्निकल्पे सलिलं जलवैकृतशब्दे २०७१पृ० दृश्यम् । ज्यो०उक्ते २जलाधिदेवताके उत्तराषाढानक्षत्रे नक्षत्राधिपके ३चतुर्थस्थाने च

सलिलकुन्तल पु० सलिलस्य कुन्तल इव। शैवाले त्रिका०।

सलिलज न० सलिले जायते जन-ड। १पद्मे राजनि०। २जलजातमात्रे त्रि०।

सलिलनिलय पु० सलिलं निलयो यस्य। १जलचरे २मीनकर्कटराशौ च "सलिलनिलयाभस्था यस्याः शरीरप्रजातयः" ज्यो०त०।

सलिलराशि पु० ६त०। समुद्रे सलिलनिध्यादयोऽप्यत्र।

सलिलेन्धन पु० सलिलमिन्धनमिव दाह्यं यस्य। वडवानले त्रिका०।

सल्लकी स्त्री शल-वुन् नुम् च पृषो० शस्य सः गौरा० ङीष्। शल्लक्यां गजभक्ष्यायाम् अमरे पाठान्तरम्।

सव पु० सूयते सु-अच्। १यज्ञे अमरः। २सन्ताने मेदि०। अच्। ३सूर्य्ये ४अर्कवृक्षे ५जले न० जटा०।

सवन न० सु-सू-वा ल्युट्। १यज्ञाङ्गे २स्नाने अमरः। सोमनिष्पीडने ३अभिषवे अमरः ५सोमपाने भरतः। ६यज्ञे ७प्रसवे च दमयन्तीसन्ताने। यज्ञियसवनानि च त्रीणि प्रातर्मध्यतृतीयभेदात्। "हवींषि निर्वपत्याग्नेयमैन्द्रं वैश्वदेवं चरुं सवनकालेष्वेकैकम्" कात्या०श्रौ०२४।७।५। सू० "क्रमएतत् आग्नेयं प्रातःसवनम्, ऐन्द्रं माध्यन्दिनसवनम्, वैश्वदेवं तृतीयसवनमित्यर्थवादात्"। "प्रातर्मध्यन्दिनापराह्णेषु एकैकं हविर्निर्वपति" कर्कः।

सवयस् त्रि०समानं वयो यस्य समानस्य सः। वयस्ये अमरः "सवयोभिरन्वितः" इति रघुः।

सवर्ण पु० समानोवर्णो यस्य। १तुल्यरूपे हेमच० २एकजात्याश्रये यथा विप्रस्य विप्रजातिः क्षत्रियस्य क्षत्रियजातिः "तुल्यास्यप्रयत्नं सवर्णमिति" पा० उक्ते स्थानप्रयत्नाभ्यां ३तुल्ये वर्णे च यथा ककारस्य स्थानेन तुल्यो गकारादिः, प्रयत्नसाम्येन तकारस्य चकारादिः, अकारस्य अकारः ककारस्य ककारः। ऋकारस्य वर्ग्यास्तुल्याः वर्णाः। सह वर्णेन। ४वर्णसहिते त्रि०।

सवर्णन न० सवर्ण+करोतौ णिच्-भावे ल्युट्। तुल्यरूपता सम्पादने "अंशसवर्णनं स्यात्" लीला०।

सवहा स्त्री सह वहेन। त्रिवृतायां भरतः।

सवासस् त्रि० सह वाससा। १वस्त्रत्यागविलम्बस्याक्षमे वेगवति "सवासा जलमाप्लवेत्" स्मृतिः।

सविकल्पक न० सह-विकल्पेन कप्। वेदान्तोक्ते ज्ञातृज्ञेयभेदादिकल्पनासहिते १समाधिभेदे न्यायोक्ते एकस्मिन् धर्मिणि धर्मिसंसर्गावगाहिनि २ज्ञानभेदे च पात०उक्ते सम्प्रज्ञाते ३समाधिभेदे असम्प्रज्ञातशब्दे ४७-पृ० दृश्यम्। निर्विकल्पकशब्दे ४१०२पृ० दृश्यम्।

सविकाश त्रि० सह विकाशेन। १प्रफुल्ले विकसिते २असङ्कोचे च "जगन्ति यस्यां सविकाशमासत" माघः।

सविचारा स्त्री पात० उक्ते समापत्तिरूपसमाधिभेदे निर्विचारशब्दे ४१०१ पृ० दृश्यम्।

सवितर्का स्त्री पात० उक्ते समापत्तिरूपसमाधिभेदे "तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः" सू० "तद्यथा गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्यविभागेन विभक्तानामपि ग्रहणं दृष्टं विभज्यमानाश्चान्ये शब्दधर्मा अन्येऽर्थधर्मा अन्ये विज्ञानधर्मा इत्येतेषां विभक्तः पन्थाः, तत्र समापन्नस्य योगिनोयोगवाद्यर्थः समाधिप्रज्ञायां समारूढः स चेत् शब्दज्ञानविकल्पानुविद्ध उपावर्त्तते सा सङ्कीर्णा समापत्तिः सवितर्केत्युच्यते। यदा पुनः शब्दसङ्केतस्मृतिपरिशुद्धौ श्रुतानुमानज्ञानविकल्पशून्यायां समाधिप्रज्ञायां स्वरूपमात्रेणावस्थितोऽर्थस्तत्स्वरूपाकारमात्रतयैवावच्छिद्यते सा च निर्वितर्का समापत्तिः तत् योगिनां परं प्रत्यक्षं, तच्च श्रुतानुमानयोर्बीजं ततः श्रुतानुमाने प्रभवतः। न च श्रुतानुमानज्ञानसहभूतं तद्दर्शनं तस्मादसङ्कीर्णं प्रमाणान्तरेण योगिनो निर्वितर्कसमाधिजं दर्शनमिति" भा०।

सवितृ पु० सू-तृच्। १जगत्स्रष्टरि परमेश्वरे "तत्सवितुर्वरेण्यमि"ति श्रुतिः। २सूर्य्ये ३अर्कवृक्षे अमरः। ४तद्देवताके हस्तनक्षत्रे ज्यो०। ५मातरि स्त्री हेमच० ङीप्। सवितुरिदं च सवित्रिय तत्सम्बन्धिनि त्रि०। स देवताऽस्य अण्। सावित्र तद्देवताकचर्वादौ त्रि० स्त्रियां ङीप्।

सविध त्रि० सह विध्यति विध-क सहस्य सः। १निकटे अमरः "सविधेऽपि न सूक्ष्मसाक्षिणी" नैषधम्। सह विधया। २प्रकारयुते ३विधानयुक्ते च त्रि०।

सविस्मय त्रि० सह विस्मयेन। विस्मयापन्ने हारा०।

सवीज पु० पात० उक्ते समाधिभेदे "ताएव सवीजः समाधिः" सू०"तार्श्चतस्रः समापत्तयो बहिर्वस्तुवीजाः इति समाधिरपि सवीजः तत्र स्थूलेऽर्थे सवितर्का निर्वितर्का सूक्ष्मेऽर्थे सविचारनिर्विचारे इति चतुर्धा परिसंख्यातः समाधिरिति" भा०। [२वीजान्विते धरणिः।

सवेश त्रि० विद्यते वेशोदेशः सह वेशेन। १निकटे अमरः

सव्य त्रि० षू-प्रेरणे यत् । १वामे २दक्षिणे च अमरः । ३प्रतिकूले हेमच० ४विष्णौ शब्दमा० ।

सव्यभिचार पु० सह व्यभिचारेण सहस्य सः । अनैकान्तिके दुष्टहेतुभेदे तल्लक्षणं तु "अनैकान्तिकः सव्यभिचारः" गौ०सू० "व्यभिचार एकत्राव्यवस्था सह व्यभिचारेण वर्त्तते इति सव्यभिचारः निदर्शनं नित्यः शब्दोऽस्पर्शत्वात्" वा०भा० । तच्च साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वम् चिन्ता० । सव्यभिचारचन्द्रोदयेत्यादौ दृश्यम् ।

सव्यसाचिन् पु० सव्येन वामेनापि सचति सन्दधाति बाणं सच-णिनि । अर्जुने हेमच० "उभौ मे दक्षिणौ पाणी गाण्डीवस्य विकर्षणे । तेन देवमनुष्येषु सव्यसाचीति मां विदुः" भा०वि० ४४अ० ।

सव्येष्ठ पु० सव्ये तिष्ठति स्था-क अलुक्स० अम्बष्ठादि० षत्वम् । सारथौ हला० [सारथौ अमरः ।

सव्येष्ठृ पु० सव्ये तिष्ठति स्था-तृन् किच्च अलुक्स० षत्वम् ।

सशस्या स्त्री सह शस्येन । १नागदन्त्यां रत्नमा० २शस्ययुक्ते त्रि० । [त्रि० "न सशस्येषु गर्त्तेष्वि"ति मनुः ।

ससत्वा स्त्री सह सत्वेन । १गर्भवत्यां स्त्रियां २प्राणियुक्ते

स(श)सन न०स(श)स-हिंसने ल्युट् । यज्ञार्थं पशुहनने अमरः

सस्य न०सस-यत् । १वृक्षादीनां फले अमरः २क्षेत्रगते धान्ये च हेमच० "सस्यं क्षेत्रं गतं प्रोक्तम्" स्मृतिः । "सस्यञ्च स्टहमागतम्" चाणक्यः तालव्यादिरयमित्येके । ३शस्त्रे ४गुणे विश्वः ।

सस्यक पु० सस्यमिव कायति कै-क । "सस्यको नारिकेलान्तःसस्याभो मणिखड्गयोः" मेदि० उक्ते १मणिभेदे २खड्गे च ।

सस्यमारिन् पु० सस्यं मारयति मृ-णिच् णिनि । १मूषके राजनि० २सस्यघातके त्रि० । [अमरः ।

सस्यसंवर पु० सस्यं संवृणोति सम्+वृ-अच् । शालवृक्षे

सस्यसंवरण पु० सस्यं संवृणोति सम्+वृ-ल्युट् । अश्वकर्णवृक्षे राजनि० । [२धर्मयुक्ते त्रि० ।

सस्वेदा स्त्री सह स्वेदेन सहस्य सः । १दूषितकन्यायां शब्दर०

सह अव्य० षह-अच् । १साहित्ये अमरः २साकल्ये ३सादृश्ये ४यौगपद्ये ५विद्यमानत्वे ६समृद्धौ ७सम्बन्धे मेदि० । ८सामर्थ्ये शब्दमा० । सहशब्दार्थस्तु समभिव्याहृतक्रियाकालः स्वक्रियाकालीनक्रिया वा । तत्र गौणक्रियान्वयिनि तृतीया । पुत्रेण सहागता पिता ।

सह पु० सहते सह-अच् । १अग्रहायणमासे २भारादिसहिष्णौ त्रि० हेमच० ३गन्धतृणे ४बले पु०न० मेदि० ।

सहकार पु० सह युगपत् किरति सौरभम् दूरात् कृ-अण् । अतिदूरगामिसौरभान्विते १आम्रे अमरः । भावे घञ् । २सहकर्मकरणे पु० ।

सहकारिन् त्रि० सह सम्भूय करोति कार्यं कृ-णिनि । हेतुभेदे स्वभिन्ने स्वकार्यकारके हेतौ । [हृगतौ च

सहगमन न०सह+गम-ल्युट् । १पत्या सहपत्न्या मरणे २स-

सहचर पु० सह चरति चर-अच् । १पीतझिण्ट्यां २नीलझिण्ट्यां च रत्नमा० । ३वयस्ये ४प्रतिबन्धके ५झिण्ट्यां हेमच० । ६सहाये ७अनुचरे त्रि० मेदि० "सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः" कुमारः । स्त्रियां ङीप् ।

सहचरी स्त्री सह चरति चर-ट ङीप् । १पीतझिण्ट्यां २सख्यां जटा० । सह चरति धर्मम् चर-ट ङीप् । धर्मपत्न्यां हेमच० । [चरणद्वन्द्वित्वे ।

सहचार पु० सह+चर-घञ् । सामानाधिकरण्ये तदधि०

सहज पु० सह जायते जन-ड । १सहोदरे अमरः २निसर्गजे स्वभावसिद्धे च "सहजप्राकृतावपि" माघः । ३सहोत्थिते त्रि० मेदि० ज्योतिषोक्ते जन्मलग्नात् ४तृतीयस्थाने । तत्र भ्रातुः शुभादिचिन्तनात्तथात्वम् ।

सहजमित्र न० सहजं स्वभावसिद्धम् मित्रम् । स्वभावतो मित्रे भागिनेयादौ मिता० ।

कतिचित् सहजमित्राणि शुक्रनी०परि० उक्तानि यथा "केचित् स्वभावतोऽमित्रा मित्राणि सन्ति सर्वदा । माता मातृकुलं चैव पिता तत्पितरौ तथा । पितृपितृव्यात्मकन्या पत्नी तत्कुलमेव हि । पितृमात्रात्मभगिनी कन्यका सन्ततिस्तथा । प्रजापालो गुरुश्चैव मित्राणि सदैव तु" । २विद्यादौ च "विद्या शौर्यञ्च दाक्ष्यं च बलं धैर्यञ्च पञ्चमम् । मित्राणि सहजान्याहुर्वर्त्तयन्ति हि तैर्बुधाः" शुक्रनीतिपरिशिष्टम् ।

सहजारि पु० सहजः स्वभावसिद्धः अरिः । सापत्नभ्रातृपितृव्यपुत्रादौ मिता० ।

शुक्रनीतिपरिशिष्टे अन्येऽप्युक्ता यथा "स्वभावतो भवन्त्येतेऽरयो दुर्वृत्त एव च । ऋणकारी पिता शत्रुर्माता स्त्री व्यभिचारिणी । आत्मपितृभ्रातरश्च तत्स्त्रीपुत्राश्च शत्रवः । स्नुषा श्वश्रूः सपत्नी च ननान्दा यातरस्तथा । मूर्खः पुत्रः कुवैद्यश्चारस्तकस्य पतिः प्रभुः । चञ्चलचक्षुः प्रजा शत्रुरदाता धनिकश्च

न्तः । दुष्टानां भूपतिः शत्रुः कुलटानां पतिव्रता । साधुः सज्जनानां शत्रुः स्यात् मूर्खाणां बोधको रिपुः ।

सहखण्डुक न० पक्वमांसभेदे "छागादेर्मांसमस्थ्यादेः कुट्टितं खण्डितं पुनः । शुद्धमांसविधानेन पचेदेतत् सहखण्डुकम्" भावप्र० ।

सहदेव पु० सह दीव्यति दिव–अच् । १माद्रीसुते पाण्डवभेदे मेदि० २बलायां ३दण्डोत्पले ४शारिवौषधौ च स्त्री मेदि० टाप् । ५सर्पाक्ष्यां स्त्री मेदि० ङीष ङीपन्तः । ६पीतदण्डोत्पलायां रत्नमा० ।

सहदेव्यादि पु० "सहदेवी बला चैव शतमूली शतावरी । कुमारी च गुडूची च सिंही व्याघ्री तथैव च" महा० पु० ४८अ० प्रतिष्ठाङ्गदेवस्नानीयद्रव्यगणभेदे ।

सहधर्मिणी स्त्री सह समानो वा धर्मोऽस्त्यस्या इनि । १पत्न्याम् अमरः "सहधर्मं चरेयाताम्" इति मनूक्तेः सहधर्मचारित्वात् "शरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समा" दायभा० उक्तेश्च तस्याः पतिकृतधर्मफलभागित्वाच्च तथात्वम् ।

सहन न० सह–ल्युट् । १क्षमायां तितिक्षायां शीतोष्णादिद्वन्द्वधर्मसहने हेमच० । सह–ल्यु । २सहिष्णौ अमरः ३क्षमाशीले त्रि० मेदि० ।

सहपान न० सह पानम् । एकत्र मद्यादिपाने हेमच० । २सम्भूयपाने अमरः । [त्रिका० ।

सहपांशुकिल पु० सह पांशुभिः किलति किल–क । वयस्ये

सहभाविन् त्रि० सह भवति भू–णिनि । सहाये स्त्रियां ङीप् । [अमरः ।

सहभोजन न० सह एकत्र भोजनम् । एकत्रस्थानेऽशनादौ

सहम न० नील०ता० उक्ते दिवारात्रिभेदेन परस्परं योगवियोगयुतग्रहविशेषेण युतेन लग्नादिनानीते पुण्यादिशुभादिचिह्नस्थाने राशिभेदे तानि च यथायथं तदानयनं तत्फलानि च तत्रोक्तानि यथा

"पुण्यं गुरुर्ज्ञानयशोऽथ मित्रं माहात्म्यमाशा च समर्थता च । भ्राता ततो गौरवराज्यतातमाता सुतो जीवितमम्बु कर्म । मान्द्यं च मन्मथकली परतः क्षमोक्ता शास्त्रं च बन्धनकुम्भ त्यय बन्धकञ्च । मृत्योश्च सहम परदेशधनान्यदाराः स्यादन्यकर्म सवणिक् त्वथ कार्यसिद्धिः । उद्वाहसन्ततिमलापमृत्युप्रीतिर्बलं तनुः । जाड्यव्यापारसंज्ञमे पानीयपतनं रिपुः । शौर्योपाय दारिद्र्यं गुरुतामनुपपाभिधम् । बन्धनं दुहितेतानि पञ्चाशत् सहमानि हि । सूर्येणचन्द्रान्वितमह्नि भागं रवीन्दुयुक्तं निशि पुण्यसंज्ञम्१ । शोध्यं तदन्तर्यदि स्यादन्तरालेऽथ लग्नं न चेत् सैकभमेतदुक्तम् । व्यत्ययमस्मात् गुरुर्२विद्ययोश्च संसाधयन् पुण्यवियुक् सुरेज्यः । दिवा विलोमं निशि पूर्ववत्तु यशोऽभिधं४ तत् सहमं वदन्ति । पुण्यसद्म गुरुसद्मतश्च जात् स्वसयो निशि सिताश्रितं च तत् । सैकतात्तु यदक्करीतितो मित्रनामसहमं५ जगुर्बुधाः । पुण्याल्लोमं शोधयेद्वक्रारोत्या माहात्म्यं६ मन्दक्षमस्याद्विलोमम् । शुक्रं चन्द्रादह्नि नक्तं विलोममाशाख्यं७ स्यादुक्तवच्छेषमूह्यम् । सामर्थ्यं८ मारात्तनुपं विशोध्य नक्तं विलोमं तनुपे कुजे तु । जीवाद्विहीने ९... पुराणत आताहर्निशिहीनात् गुरुतः सदोक्ताः । दिने गुरोश्चन्द्रमपास्य नक्तं रविं क्रमादर्कविधू च देयौ । रीत्योक्तयं गौरव१०मर्कमार्किरपास्य वामं निशि राज्य-ताता११।१२ । माता१२न्दुतोऽपास्य सितं विलोमं नक्तं सुतो१४ऽह्नि निशमिन्दुमीज्यात् । स्याज्जीविताख्यं१५ गुरुमार्कितोऽह्नि वामं निशीदं सममन्वयाम्बु१६ । कर्म१७ समाराद्विधि वामयुक्तं रोगाख्य१८मिन्दुं तनुतः सदैव । स्यान्मन्मथो१९ लग्नपमिन्दुतोऽह्नि वामं निशीन्दुं तनुपं सदाऽऽर्कात् । कलि२० क्षमे२१स्तो गुरुतो विधुज्ञे काले त्रिलोमं निशि पूर्वरीत्या । शास्त्रं२२ दिने सौरिमपास्य जीवात् वामं निशि ज्ञेन युते पुरावत् । दिवानिशं ज्ञाच्छनिं विशोध्य बन्ध्वाख्य२३मेतद्विधि वन्द्यकं२४ स्यात् । वामं दिवैतत् सुत२५रेतमर्कादिन्दं विशोध्योक्तवदार्कियोगात् । देशान्तराख्य२६ नवमाद्विशोध्य धर्मेश्वरं सन्ततमुक्तवत् स्यात् । अह्निशि विलग्नमथ भावाद्विशोध्य पूर्वोक्तवदर्थसद्म२७ । सितादपास्यार्कमथान्यदारा ख्यं२८ सदा प्राग्वदयान्यकर्म२९ । चन्द्राच्छनिं वाममथो निशायां शस्त्रद्वणिज्य३० दिनवस्वकोक्त्या । शनेर्दिवार्कं निशि चन्द्रमार्कं विशोध्य मृत्यौन्दुमलाभ्ययोगात् । स्यात् कार्यसिद्धिः३१ सततं विशोध्य मन्दं सिताद् स्यात्तु विवाहसंज्ञम३२ । गुरोर्बुधं शोध्य भवेत् प्रसूतिः३३ वासं निशीन्दुं शनितो विशोध्य । अथ त्रिपदुक्तदिशा सदैव सन्तापसद्म३४ऽऽरमपास्य शुक्रात् । श्रद्धा३५ सदा प्रोक्तदिशाथ पुण्यं विद्याख्यतः प्राग्वदः पुरोक्त्या । प्रीत्याख्य३६मुक्तं बल३७देह३८दस३९सौ यशस्४० जाड्य सदपास्य भौमात् । शनिं विलोमं

निशि चन्द्रयोगात् व्यापार४१ मारात् शनिमपास्य शस्त्रवत्। पानीयपातः४२ शशिनं विशोध्य सौरेर्विलोमं निशि पूर्ववत् स्यात्। मन्दं कुजात् प्रोह्य रिपु४३र्विलोमं रात्रौ भवेद्भौमविहीनपुण्यात्। शौर्य्यं४४ विलोमं निशि पूर्ववत् स्यादुपाय दुष्टं४५ शनितो विशोध्य। वामं निशि शं तु विशोध्य ज्ञात् शयुग् विलोमं निशि तद्दरिद्रम्४६। सूर्य्योद्धृतः सूर्य्यमपास्य नक्तं चन्द्र तदूनात् गुरुता४७ पुरोक्ता। कर्काङ्गतः शनिं प्रोह्य स्याज्जाड्य४८मन्यथा निशि। पुण्याच्छनिं विशोध्य [illegible] वामं निशि तु बन्धनम्४९। चन्द्र [illegible]तादपास्योक्त तदा कन्याख्य५०सुतावत्। पुण्यमर्कमपास्याथ योगो ह्यग्योऽन्यथा निशि। स्वनाथहीनं सहमं तदंशाः स्वीयोदयघ्ना विहृतास्त्रिशत्याः। तत्सहपाको दिवसैर्हि लब्धैः स्यात् तद्दशायां तदसम्भवे वा। अथैषां फलानि। सौम्याटिसत्पदगतो यदि लग्नदर्शी वीर्य्यान्वितः सहमपो यदि नेत्थतेऽशुभम्। नाथो बली रविशशिश्रितभेशदर्शी पूर्णं तु लग्नपबलस्य विचारणेयम्। सूक्ष्मवर्गौबलेनोनो न षष्ठस्थानमाश्रितः। अबलोऽयं लग्नदर्शी बली स्वल्पेऽस्ति चेत् पदे। स्वस्वामिना शुभखगैः सहितं च दृष्टं स्वामी बली च यदि तत्सहमस्य वृद्धिः। यत्स्वामिना शुभखगैश्च न युक्तदृष्टं तत्सम्भवो न हि भवेदिति चिन्त्यमादौ। अष्टमाधिपतिना युतेक्षित पापदृग्युतमथेत्थशालि तैः। सम्भवेऽपि विलयं प्रयाति तत् तत्र जन्मनि पुरन्ध्रमोक्षतात्। आदौ जन्मनि सर्वेषां सहमानां बलाबलम्। विमृश्यात्र सम्भवो येषां तानि वर्षे विचारयेत्। सबले पुण्यसहमे धर्मसिद्धिर्धनागमः। शुभस्वामीक्षितयुते व्यत्यये व्यत्ययं विदुः। लग्नात् षष्ठाष्टरिप्फस्थं धर्मभाग्यग्रथोस्तरम्। शुभस्वामिदृशा प्राप्ते सुखधर्मादिसम्भवम्। पापयुक् शुभदृष्टं चेदशुभं प्राक् ततः शुभम्। शुभयुक्तं पापदृष्टमादौ शुभमथत् परे। यत्नाव्दे पुण्यसहमे शुभ सोऽव्दः शुभावहः। अनिष्टेऽस्मिन् शुभो नेति पुण्यादौ विचारयेत्। स्मृतौ षष्ठाष्टरिपगस्थेऽव्दे पापदृष्टं युतम्। पुण्यधर्मार्थसौख्यानां पल्यौ दग्धे फलं तथा। सहमान्यखिलानीत्थं स्मृतौ वर्षे च चिन्तयेत्। तान्त्रिकजित्सत्यानां व्ययव्ययादादिशेत् फलम्। यशोऽभिधाने सहमे खलेन युतेक्षिते तद्यशसो विनाशः। पापार्जितस्थानगतोऽस्ति लाभो नष्टोऽपि [illegible] कुत्र-

कीर्त्तिनाशः। कार्य्यसिद्धिसहमं युतं शुभैर्दृष्टमूर्थशिलगं जयप्रदम्। सङ्गरेऽथ शुभपापदृष्टियुक्तः क्रमतो जयः उदीरितो बुधैः। कलिसद्म मित्रखगदृष्टसंयुतं यदि पाषमूथशिलगं कलेर्मतिम्। अथ तत्र सौम्यसहिताथवोक्षिते जयमेति मित्रदृगितः कलिस्थयौ। विवाहसद्माधिपसौम्यदृष्टं युतं शुभैर्मूथशिलं तदाप्तम्। कुर्य्यात्तदा मित्रसमेतदृष्टं कष्टाद्य क्रूरक्षतोष्वरेनैः। आशा तदीशश्च षडष्टरिपफविवर्जितः सौम्ययुतेक्षितश्च। व्याहार्य्यकृतार्थाम्बरवाहनादिलाभः खलेत्थायुतितोऽतिदुःखम्। मान्द्याधिपः पापयुतेक्षितश्च पापः स्वयं रोगकरो विचिन्त्यः। चेदित्थशाली क्षतिपेन मृत्युस्तदा भवेद्धीनबलेऽतिकष्टात्। स्वस्वामिसौम्येत्थशालि मान्द्ये नाथे सवीर्य्येऽष्टषडन्त्यवर्जे। रोगस्तदा नैव भवेद्धिमित्रं युतेक्षित रुगभयमस्ति किञ्चित्। अर्थाख्यं शुभनाथदृष्टसहित द्रव्यागमात् सौख्यदं पापैर्दृष्टयुतं च वित्तविलयं कुर्य्याद्‌यो पापयुक्। सद्‌दृष्टं च शुभेत्थशालसहितं पूर्वं हि तत्रागमं पश्चादर्थसमुद्भवं च सुहृदं व्यत्यासतो व्ययः। रिपुदृष्ट्या रिपोर्भीतस्तस्करादेर्धनक्षयः। मित्रदृष्ट्या मित्रयोगाद्धनमानौ यशः सुखम्। सत्स्वामिदृष्टं युतमात्मजस्य लाभं सुखं यच्छति पुत्रसद्म। पापान्वितं सौम्यखगेत्थशालं प्राग्दुःखदं पुत्रसुखाय पश्चात्। पापान्वितं क्रूरकृतेत्थशाले नाशाय पुत्रस्य गतोऽस्तनीचे। स्मृतौ सुतेशः सहमेश्वरोऽव्दे पुत्रस्य लब्ध्यै शुभमित्रदृष्टः। पितुः पदोक्षितयुतं पतिदृष्टयुक्तं तातस्य यच्छति धनाम्बरमानसौख्यम्। पत्यौ गतोऽस्ति स्मृतौ षष्ठमरोफे नाशः पितुश्चरत्वे परदेशयानात्। शुभेत्थशाले खलखेटयोगे गदप्रकोपः प्रथमे भयान् स्यात्। पश्चात् सुखं विन्दति पूर्णवीर्य्ये नाथे त्वपान्मानयशोभिलाभिः। बन्धनाख्यसहमे युतेक्षितं स्वामिना शुभखगैः सुखाप्तये। राजगौरवयशोऽर्थसम्भवः पापसौम्ययुते पदाकृतिः। शुभाशुभैर्दृष्टयुतं खलैश्चेत् कलत्रशालं धनमाननाशम्। पर्वं विषक्ते चरले शुभेत्थशाले सुखं नोद्धनधान्यलाभम्। कर्मभावमकर्माधिपः शुभैः स्वामिना मूथशिलो बलान्वितः। हेमवाजिगजभूमिलाभदः पापदृष्टियुतितोऽशुभप्रदः। दग्धा वक्राः कर्मवैकल्यदास्ते युक्ताः दृष्टाः शौरिणा ते विशेषात्। राज्यभ्रंशः कोषनाशस्तु राज्ञः कर्मेशो चेत् मन्दराशौ खलेन। अन्देश। गुरुस्थाने विद्या शास्त्रे श्रुतिः स्मृतिः। मांडो

जाड्यं स्वत्वं सैन्यमङ्गं देहो जलं द्युतिः। गुरुता महत्त्वे स्यात् गौरवं मानशालिता। निग्रहानुग्रहविभूराजचिह्नादिलाञ्छनम्। माहात्म्यं मन्त्रगाम्भीर्यं छतिर्बुद्ध्यादिशालिता। सामर्थ्यं देहजा शक्तिः शौर्यं तेजो विनिर्दिशेत्। आर्येष्वोक्ता मतिर्धर्मे श्रद्धा, बन्धः पराश्रयः। पानीयपतनं वृष्टिर्जलेऽवगाह्य मज्जनम्। आधिव्याधी तापमान्द्ये सपिरङ्गं बन्धवः स्मृताः। सत्यानृतं वणिग्वृत्तिराधानं प्रसवः स्मृतः। दासत्वं परकर्मोक्तमन्यत् स्पष्टं स्वनामतः। निरूप्याणि यथायोगं कुलजातिस्वरूपतः। शुभयोगवशात् सौख्यं पत्युर्वैर्यानुसारतः। दारिद्र्यमृतिमान्द्यादिकष्टोक्तौ विपर्ययः। प्रश्नकालेऽपि सकलं विचार्यं प्रष्टुरिच्छया। सर्वेषामुपयोगोऽत्र चित्रं यच्छन्ति यज्वनाः"।

सहमरण न॰ सह मृतेन पत्या सह एकचितारोहणेन मरणम्। मृतपतिचितारोहणेन तत्सहितमरणे शु॰त॰ "अङ्गिराः "मृते भर्त्तरि या नारी समारोहेद्धुताशनम्। साऽरुन्धतीसमाचारा स्वर्गलोके महीयते। तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानवे। तावन्त्यब्दानि सा स्वर्गे भर्त्तारं याऽनुगच्छति। व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्। तद्वद् भर्त्तारमादाय तेनैव सह मोदते। मातृकं पैतृकञ्चैव यत्र कन्या प्रदीयते। पुनाति त्रिकुलं नारी भर्त्तारं याऽनुगच्छति। तत्र सा भर्त्तृपरमा परा परमलालसा। क्रीडते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश"। "ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वापि यो नरः। तं पुनाति च सा नारी इत्याङ्गिरसभाषितम्। साध्वीनामेव नारीणामग्निप्रपतनादृते। नान्यो धर्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित्" "सा नारीत्युपादानात् सहमरणाभावपक्षेऽपि सूचितः नान्यो धर्म इति तु सहमरणस्तुत्यर्थम्। तथाच विष्णुः "मृते भर्त्तरि ब्रह्मचर्यं तदन्वारोहणं वा" इति। ब्रह्मचर्यं मैथुनवर्जनं ताम्बूलादिवर्जनञ्च यथा प्रचेताः "ताम्बूलाभ्यञ्जनञ्चैव कांस्यपात्रे च भोजनम्। यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्" स्मृतिः "एकाहारः सदा कार्यो न द्वितीयः कदाचन। पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम्। गन्धद्रव्यस्य सम्भोगो नैव कार्यस्तथा पुनः। तर्पणं प्रत्यहं कार्यं भर्त्तुः कुशतिलोदकैः"। एतत्तु तर्पणं पुत्रपौत्राद्यभावविषयमिति मदनपारिजातः। "वैशाखे कार्त्तिके माघे विशेषनियमञ्चरेत्। स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः"। तत्र साध्वीमाह हारीतः। "आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा। मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता" इति छन्दोगपरिशिष्टीयमिति कल्पतरुः। साध्वीप्रसादेन लोकधारणमप्याह मत्स्यपु॰ "तस्मात् साध्व्यः स्त्रियः पूज्याः सततं देववज्जनैः। तासां राज्ञ प्रसादेन धार्य्यते च जगत्त्रयम्"। महाभारते "अवमत्य च याः पूर्वं पतिं दुष्टेन चेतसा। वर्त्तन्ते याश्च सततं भर्त्तॄणां प्रतिकूलतः। भर्त्रनुमरणं काले याः कुर्वन्ति तथाविधाः। कामात् क्रोधात् भयात् मोहात् सर्वाः पूता भवन्ति ताः"। अत्र चैहिकब्रह्मवधपातकनिषेधात् जन्मान्तरीयतत्पापवत एव सहमरणेनोद्धारः" शु॰त॰। ब्रह्मपु॰ "देशान्तरमृते पत्यौ साध्वी तत्पादुकाद्वयम्। निधायोरसि संशुद्धा प्रविशेज्जातवेदसम्। ऋग्वेदवादात् साध्वी स्त्री न भवेदात्मघातिनी। त्र्यहाशौचे निवृत्ते तु श्राद्धं प्राप्नोति शाश्वतम्"। ऋग्वेदवादात् "इमा नारीरविधवाः" इत्यादिमन्त्रात्। वृहन्नारदीये "बालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा। रजस्वला राजसुते! नारोहन्ति चितां शुभे!" राजसुते! इति सगरमातुः सम्बोधनम्। बृहस्पतिः "बालसम्वर्द्धनं त्यक्त्वा बाला पत्या न गच्छति। रजस्वला सूतिका च रक्षेद् गर्भञ्च गर्भिणी। एवमन्यतरेद्दु बालसम्वर्द्धनं स्यात्तदा तस्या अप्यधिकारः। व्यासः "दिनैकगम्यदेशस्था साध्वी चेत् कृतनिश्चया। न दहेत् स्वामिनं तस्या यावदागमनं भवेत्। भविष्यपुराणे "तृतीयेऽह्नि उदक्याया मृते भर्त्तरि वै द्विजाः। तस्यानुमरणार्थाय स्थापयेदेकरात्रकम्"। तस्य भर्त्तुः। तथा "एकां चितां समासाद्य भर्त्तारं यानुगच्छति। तद्भर्त्तुर्यः क्रियाकर्त्ता स तस्याश्च क्रियाञ्चरेत्। एतच्च पिण्डदानम्"। "इत्थञ्च अङ्गिरोब्रह्मपुराणवचनालोचनया ब्राह्मण्यादिसकलभार्य्याणां स्वर्गतभर्त्तृगतकलविशेषार्थिनीनां गर्भवतीबालाऽपत्यादिव्यतिरिक्तानां सहमरणानुमरणयोरधिकारः न चात्र योगसिद्धकरणविरोधाच्च सम्बन्धितफलसिद्धिरिति वाच्यम्। योगसिद्धिप्रकरणे हि "यः पुत्रकामो यः पशुकाम" इत्यादिना यज्ञक्रतुनुपक्रम्य "एकस्मै वा कामायान्ये यज्ञक्रतव आह्रियन्ते सर्वेभ्यो दर्शपौर्णमासौ" इत्युक्तं तत्र तत्तद्विधि-

वाक्येषु निरपेक्षफलश्रुतेः कामनाभेदात् कर्त्रैक्यं ततश्च सर्वशब्देन प्रकृतवाचिना निरपेक्षाणामेव पुत्रादिफलानां दर्शपौर्णमासाभ्यां सम्बन्धोऽवगते प्रयोगभेदादेव भवतु तत्र तत्तत्फलसिद्धिः तथाच तदधिकरणसिद्धान्तसूत्रं "योगसिद्धिर्वा अर्थस्योत्पत्त्यसंयोगित्वात् जैमि०। अस्यार्थः वाशब्दः सिद्धान्तद्योतनार्थः सर्वेभ्यो दर्शपौर्णमासाविति वाक्यार्थस्य तत्तत्फलस्य योगेन प्रयोगभेदेन सिद्धिः उत्पत्त्यसंयोगित्वात् सर्वशब्दानुकर्षणीयानां यः पुत्रकामो यः पशुकाम इत्याद्युत्पत्तिवाक्ये फलानां युगपदसम्बन्धात्। न चार्थस्य नानाविधस्य उत्पत्त्यसंयोगित्वात् महेन्द्रादितत्तल्लोकवासादीनां एकदोत्पत्त्यसम्भवादिति व्याख्यानं युक्तमिति वाच्यं तडागोत्सर्गादौ एकस्मात् कर्मणः क्रमिकनानाफलोक्तेः"। "तथेहापि सर्वनामपदाभावादार्थवादिकफलानि समुच्चितान्येव कामनाविषयो लाघवात् आर्थवादिकसमुच्चितनानाफलविषयकविधिरप्येक एव कल्प्यते लाघवात् न हि निमित्तसाधारण्ये बाधकं विना नैमित्तिकानां पर्य्यायता सम्भवति वह्निसामीप्ये दाहप्रकाशयोः पर्य्यायताया अदर्शनात्। तस्मात् सकृदनुष्ठितेन कर्मणा यथैकं फलं निष्पाद्यते तथा बाधकं विना फलान्तरमपि विनिगमकाभावात्। ज्योतिष्टोमादिस्तु प्रतिवर्षावच्छिन्नफलश्रुतेः पृथगनुष्ठानादेव पृथक् फलसिद्धिः अन्यथा भूतसंख्याद्यभिधानं व्यर्थं स्यात्। यत्र तु कर्मफले कालविशेषो नोक्तस्तत्रापि तत्कर्मसम्पादकानुरूपेण कालविशेषो बोध्यः "फलस्य कर्मनिष्पत्तेस्तेषां लोकवत् परिमाणतः फलविशेषः स्यादिति" न्यायात्। तेषां कर्मणां लोकवत् शब्दादिवत्। तथाच भवदेवभट्टाः "एकस्मै वा कामायान्ये यज्ञक्रतव आह्रियन्ते" इति संकीर्त्य "सर्वेभ्योदर्शपौर्णमासाविति" प्रयोगभेदविधानात् भवतु तत्र पृथगनुष्ठानसाध्यत्वं ब्रह्मवधप्रायश्चित्ते तथाभूतपृथगनुष्ठानसाध्यत्वप्रतिपादकवचनाभावात् अनेकफलानाञ्च तन्त्रेण दशहरान्यायेन एककामनाविषयतासम्भवात् तन्त्रत्वम्" इत्याहुः। हरिनाथोपाध्यायास्तु "अपोतृनेगफलान्युद्दिश्यैतानि आर्थवादिकफलानि समुच्चितान्येव कामनाविषयः, पुरुषविशेषणत्वस्य कल्प्यत्वात् तथाच मिलितानामेककामनाविषयत्वकल्पना अग्नीषोमयोरिव देवतात्वे लाघवन्यायस्य विशिष्टत्वात्" इत्याहुः। अथ वा "य एता रात्रीरधीयीत तस्य पितरो घृतकुल्याः मधुकुल्याः वा क्षरन्ते" इत्यत्रापि वैकल्पिकान्वयोऽभ्युपगमे आत्मेष्टनियमभङ्गप्रसङ्गात् लाघवादिकल्पेऽष्टदोषाश्च एकस्य कार्यस्य नियोज्याकाङ्क्षायां सकलार्थवादोपस्थितफलकामो यथैक एव नियोज्यः कल्पतस्तथात्रापीति। अथानुत्पन्नब्रह्महत्यादिपातकायाः सत्पूतत्वरूपफलबाधात् तत्तत्कामनाविरहेणानधिकारः स्यादिति चेत् उक्तयुक्त्या समुच्चितफलसिद्धेरन्यथासिद्धार्थवादबलेन सन्दिग्धपापकामनया एवाधिकारो मङ्गलवत्। सति जन्मान्तरीये तादृशपातके संसर्गादिकृते वा तद्ध्वंसोऽपि जायते असति तु न तथा प्रतियोगिरूपसहकारिविरहात् निर्विघ्नस्य सतमङ्गलवत्" शु०त० रघु०। "समुच्चितफलकर्मणोऽपि प्रत्येकफलकामनया करणे तत्तत्कामनासहकारेण प्रत्येकफलजनकत्वम् विधिस्वरूपे गदा०। [त्रि०।

सहरसा स्त्री सह रसेन। १मुद्गपर्ण्यां शब्दर० २रसान्विते

सहर्ष पु० सह हर्षेण समानो वा हर्षो यत्र। १स्पर्द्धने २हर्षे च त्रिका०। ३हर्षयुक्ते त्रि०।

सहस् न० सह–असि। १बले २ज्योतिषि च शब्दर० ३मार्गशीर्षे मासे पु० अमरः। "सहसा सहसा कृतनेपथ्युरिति" माघः।

सहसा अव्य० सह+सो–डा। १हठादित्यर्थे अमरः। २अकस्मादित्यर्थे शब्दर०। ३हासयुते त्रि० "न सहसा सहसा परिरभ्य तम्" माघः।

सहस्य पु० सहसे बलाय हितः यत्। पौषमासे अमरः।

सहस्र न० समानं हसति हस–र। १दशशतसंख्यायां २बहुसंख्यायां ३तत्संख्यान्विते च हेमच०।

सहस्रसंख्यकाश्च केचित् पदार्थाः कविकल्प० यथा "गङ्गावक्त्रं शेषमूर्द्धा पद्मदलम् रविकरः कार्त्तवीर्य्यबाहुः वेदशाखा शक्रनयनम्"। "तत्र बहुसंख्यत्वे सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्" श्रुतिः। बहुशीर्षादिपरत्वमत्र भाष्यादावुक्तम्। संख्यासंख्येययोः परत्वेऽस्य सर्वदैकवचनत्वम् यथा घटानां सहस्रं सहस्रं घटा इत्यादि आवृत्तौ तु द्वित्वादिकं यथा द्वे सहस्रे त्रीणि सहस्राणीति "चत्वार्य्याहुः सहस्राणि" मनुः।

सहस्रकर पु० सहस्रं कराः किरणा अस्य। १सूर्य्ये सहस्रकिरणादयोऽप्यत्र हला०। २अर्कवृक्षे च।

सहस्रकाण्डा स्त्री सहस्रं बहवः काण्डा यस्याः। श्वेतदूर्वायां राजनि०।

सहस्रदंष्ट्र पुंस्त्री० सहस्रं बहुसंख्या दंष्ट्रा अस्य। पाठीनम

मत्स्ये (बोयाल) अमरः स्त्रियां ङीष् । [मत्स्ये शब्दर०

सहस्रदंष्ट्रिन् पु० सहस्रं दंष्ट्राः सन्त्यस्य इनि । पाठीन-

सहस्रधारा स्त्री सहस्रगुणिता धारा । देवस्नानार्थं बहुच्छिद्रयन्त्रनिःसृतबहुजलादिधारायाम् ।

सहस्रनयन पु० सहस्रं नयनान्यस्य । १इन्द्रे हला० सहस्रनेत्रादयोऽप्यत्र । २पेचके च ।

सहस्रपत्त्र न० सहस्रं बहुसंख्यकानि पत्त्राणि यस्य । १पद्मे अमरः । सहस्रदलादयोऽप्यत्र । २सारसे खगे च ।

सहस्रपाद् पु० सहस्रं बहवः पादा अस्य अन्तलोपः समा० । १विष्णौ २परमेश्वरे च "सहस्राक्षः सहस्रपाद्" पुरुषसूक्तम् ।

सहस्रपाद पु० सहस्रं पादाः किरणाश्चरणा वा सन्त्यस्य अच् । १विष्णौ २सूर्य्ये ३अर्कवृक्षे च । ४कारण्डवखगे पुंस्त्री० मेदि० स्त्रियां ङीष् ।

सहस्रबाहु पु० सहस्रं बाहवोऽस्य । १बाणासुरे "बाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः । सहस्रबाहुवाद्येन ताण्डवेऽतोषयन् शिवम्" भाग०१०।६२अ० । २कार्त्तवीर्यार्जुने । ३विष्णौ च "सहस्रबाहो भव विश्वमूर्त्ते!" गीता०

सहस्रभुज पु० सहस्रं बहवो भुजा अस्य । १विष्णौ २कार्त्तवीर्यार्जुने च । ३महालक्ष्म्यां स्त्री "अष्टादशभुजा पूज्या सा सहस्रभुजा रणे" मार्कण्डेयपु० ।

सहस्रमूर्द्धन् पु० सहस्रं बहवो मूर्द्धानोऽस्य । १विष्णौ पुरुषसूक्तम् २सहस्रशीर्षादयोऽप्यत्र । [लतायां राजनि० ।

सहस्रमूली स्त्री सहस्रं बहूनि मूलान्यस्याः ङीप् । द्रवन्ती-

सहस्रवीर्या स्त्री सहस्रं बहूनि वीर्याण्यस्याः । १दूर्वायाम् अमरः । २महाशतावर्य्याञ्च राजनि० । [भेदे राजनि० ।

सहस्रवेध न० सहस्रं बहवो वेधा यस्य । १चुक्रे २काञ्जिक-

सहस्रवेधिन् न० सहस्रं विध्यति विध-णिनि । १हिङ्गौ २अम्लवेतसे च मेदि० । ३कस्तूर्य्यां पु० राजनि० । ४सहस्रवेधकर्त्तरि त्रि० । [भावप्र० ।

सहस्रा स्त्री सहस्रं पत्राणि सन्त्यस्याः अच् । अम्बष्ठायां

सहस्रांशु पु० सहस्रमंशवो यस्य । १सूर्य्ये २अर्कवृक्षे च अमरः

सहस्रानीक पु० ईश० शतानीकात् जातम् । शतानीकस्य सुते राजभेदे वह्निपु० ।

सहस्राक्ष पु० सहस्रमक्षीणि यस्य षच् समा० । १इन्द्रे २पेचके अमरः । ३विष्णौ पुरुषसू० ४ईश्वरे च ।

सहस्रार न० सहस्रमाराः कोणा यस्य । शिरःस्थिते सुषुम्णानाडीमध्यस्थे सहस्रदलकमले तन्त्रसा० ।

सहस्रिन् पु० सहस्रं सैन्यानि सन्त्यस्य इनि । १सहस्रसैन्ययुक्ते गणादौ अमरः २सहस्रदंष्ट्रपाठीने मत्स्ये च

सहा स्त्री सहते सह-अच् । १मुद्गपर्ण्यां २घृतकुमार्य्याम् अमरः । ३खण्डोत्पलायां ४पृथिव्यां ५नखभेषजे मेदि० । ६शुक्लझिण्ट्याम् ७सर्पकङ्काल्यां शब्दर० ८रास्नायां ९स्वर्णक्षीर्य्यां रत्नमा० १०नारीपुष्पे राजनि० ।

सहाचर पु० सहा शुक्लझिण्टीव आचरति आ+चर-अच् । पीतझिण्ट्यां शब्दर० । [अमरः ।

सहाय पु० सह एति इण-अच् । १सहचरे २अनुकूले

सहायता स्त्री सहायानां समूहः तस्य भावो वा तल् । १साहाय्ये २सहायसमुदाये च अमरः ।

सहार पु० सह एकदैव ऋच्छति दूरं गच्छति सौरभेण ऋ-अण् । १सहकारे आम्रे जटा० । हारोहरणं सह हारेण । २महाप्रलये हारा० । ३हारेण सहिते त्रि० ।

सहारोग्य त्रि० सह आरोग्येण । रोगशून्ये हेमच०

सहासन न० सह आस्यतेऽत्र आस-ल्युट् । एकासने ।

सहित त्रि० सम्यक् हितः समोऽन्त्यलोपः । १सम्यग्हिते सह-क्त वा इट् सह+इतच् वा । २समभिव्याहृते सि० कौ० ३हितेन सहिते च । [सोढ़ाप्यत्र स्त्रियां ङीप् ।

सहितृ त्रि० सह-तृच् वा इट् । सहनशीले । इडभावे

सहित्र न० सह्यतेऽनेन सह-इत्र । सहनसाधने धर्मभेदे ।

सहिष्णु त्रि० सह-इष्णुच् । सहनशीले अमरः ।

सहिष्णुता स्त्री सहिष्णोर्भावः तल् । १क्षमायाम् २शीतोष्णादिविरुद्धधर्मद्वयसहने ।

सहुरि पु० सह-उरि । १सूर्य्ये उणादिकोषः । २अर्कवृक्षे च ।

सहृदय त्रि० सह-हृदयेन । १प्रसन्नचित्ते २काव्यार्थभावनाधीनपरिपक्वबुद्धौ सा०द० "परिष्कुर्वन्त्वर्थान् सहृदयधुरीणाः कतिपये" रसगङ्गाधरः ।

सहृल्लेख पु० हृदयस्य लेखः कालुष्यकरणं हृल्लासः सह हृल्लेखेन । "विचिकित्सा तु हृदये यस्मिन् प्रजायते । सहृल्लेखन्तु विज्ञेयं पुरीषन्तु स्वभावतः" इत्युक्ते दूषितान्ने प्रा०वि० । २हृल्लेखा सहिते मन्त्रे च तन्त्र०

सहोक्ति स्त्री सह उक्तिः । सहकथने १एकोक्तौ सहयज्ञस्योक्तिर्यत्र । २अर्थालङ्कारभेदे अलङ्कारशब्दे ४०७२०८ दृश्यम्

सहोटज पुंन० । सहते आतपादीन् सह-अच् कर्म० । मुनीनां पर्णशालायाम् हारा० ।

सहोढ पु० सह ऊढया । "या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती । वोढुः स गर्भो भवति सहोढ इति चोच्यते" इति मनूक्ते अज्ञातगर्भायाः परिणीतायाः

स्त्रियाः गर्भे । सहोढे गर्भे । जायते जन–ड । सहोढज तज्जाते पुत्रभेदे ।

सहोदर न० सह समानमुदरं यस्य । एकगर्भजाते भ्रातरि जटा० २भगिन्यां स्त्री एकपितृजाते ३भ्रातर्यपि उपचारात् । “देशे देशे कलत्राणि देशे देशे च बान्धवाः । तन्तु देशं न पश्यामि यत्र भ्राता सहोदरः” रामायणे लक्ष्मणविच्छेदे रामेण तस्य भिन्नोदरजातत्वेऽपि तथोक्तम्

सहोर त्रि० सह–ओर । साधौ उणादिकोषः ।

सह्य न० सहायस्य भावः यत् नि० । १साहाय्ये “तत्रार्थे सह्यमकरोत्” पुराणम् । सह भावे यत् । २आरोग्ये ३साम्ये ४माधुर्ये च शब्दर० । कर्मणि यत् । ५सोढव्ये त्रि० ६पुनाख्यदेशसमीपस्थे पर्वतभेदे पु० मेदि० । स च पर्वतः भारतवर्षस्य कुलाचलभेदः “माहेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः । विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः” मार्कण्डेयपु०५७अ० । स च अपरान्तदेशसन्निकृष्टो लवणसमुद्रात् कियद्दूरस्थश्च तदतिक्रमेणैव रघोरपरान्तदेशगमनोक्तेः । “असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता । नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत् । तस्यानीकैर्विसर्पद्भिः अपरान्तजयोद्यतैः । रामास्त्रोत्सारितोऽप्यासीत् सह्यलग्न इवार्णवः” रघु० । तत्पर्वतपादजा नद्यश्च “तापी पयोष्णी निर्विन्ध्या कावेरी प्रमुखा नदी । गोदावरीभीमरथीकृष्णवेण्यादिकास्तथा । सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः” विष्णुपु० । अन्यत्र “गोदावरी भीमरथी कृष्णवेण्यास्तथाऽपरा । तुङ्गभद्रा सुपयोगा सह्यात् कावेर्यथापगाः” मार्कण्डेयपु० ।

सह्यात्मजा स्त्री सह्यस्य आत्मजेव तत्प्रभवत्वात् । कावेर्यां हेमच० । सह्यगर्दे दशरम् ।

सा स्त्री सो–ड । १गौर्य्यां २लक्ष्म्याञ्च शब्दर० ।

सांक्रमिक त्रि० संक्रमे साधुः गुडा० ठञ् । संक्रमसाधने कुष्ठादिरोगे । वा परसवर्णः । सांक्रमिकरोगाश्च भावप्र० दर्शिता यथा “प्रसङ्गाद्गात्रसंस्पर्शान्निःश्वासात् सहभोजनात् । एकशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात् । कण्डूकुष्ठोपदंशाश्च भूतोन्मादव्रणज्वराः (वसन्त) औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम् । म्रियते यदि कुष्ठेन पुनर्जातस्य तद्भवेत् । अतो निन्दिततरोगोऽयं कुष्ठं कष्टं प्रकीर्त्तितम्” । प्रसङ्गोऽत्र मैथुनम् भावप्र० ।

सांख्य न० संख्यायतेऽत्र संख्या सम्यग्ज्ञानं साऽस्त्यत्र अण् । १सम्यग्दर्शने “एषा तेऽभिहिता सांख्ये” इति गीता सङ्ख्या मूलप्रकृत्यादिपदार्थानां गणनात् प्रज्ञाद्यण् । २कपिलप्रणीते दर्शनशास्त्रभेदे परसवर्णे साङ्ख्यमप्युभयत्र ३सांख्योक्तयागे पु० “पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् । प्रोवाचासुरये सांख्य तत्त्वग्रामविनिर्णयम्” भाग० १स्क० ३अ० । “सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते” मात्स्ये १८० ।

सांख्यप्रवचन न० सांख्योक्तमर्थं प्रवक्ति विस्तरेण कथयत्यनेन प्र+वच–करणे ल्युट् । तत्त्वसमासाख्यसूत्रार्थस्य विस्तरेण ज्ञापके १कपिलप्रणीते । २पातञ्जलप्रणीते ग्रन्थभेदे यथोक्तं सांख्यप्र०भा० यथा

“नन्वेवमपि तत्त्वसमासाख्यसूत्रैः सहास्याः षडध्याय्याः पौनरुक्त्यमिति चेत् । नैवम् । सङ्क्षेपविस्तररूपेणोभयोरप्यपौनरुक्त्यात् । अत एवास्याः षडध्याया योगदर्शनस्येव सांख्यप्रवचनसंज्ञा युक्ता । तत्त्वसमासाख्यं हि यत् सङ्क्षिप्तं सांख्यदर्शनं तस्यैव प्रकर्षेणास्यां निर्वचनमिति । विशेषस्त्वयं यत् षडध्याय्यां तत्त्वसमासाख्योक्तार्थविस्तरमात्रं योगदर्शने त्वाभ्यासभ्युपगमवादप्रतिषिद्धस्येश्वरस्य निरूपणेन न्यूनतापरिहारोऽपीति” “संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते । चतुर्विंशति तत्त्वानि तेन सांख्याः प्रकीर्त्तिताः” भा० ।

सांग्रामिक त्रि० संग्रामः प्रयोजनमस्य ठञ् । युद्धसाधने रथादौ । परसवर्णे साङ्ग्रामिक तत्रार्थे ।

सांघातिक त्रि० सङ्घाताय हितम् ठञ् । १सङ्घातकारके षड्नाडीचक्रस्थे २जन्मनक्षत्रावधिषोडशनक्षत्रे च “देहद्रविणबन्धूनां नाशः सांघातिके तथा” इति ज्योतिषम् । परसवर्णे साङ्घातिकमप्युभयत्र ।

सांदृष्टिक न० संदृष्टं प्रत्यक्षदृष्टमनुसरति ठक् । १दृष्टानुसारिन्यायभेदे संदृष्टं दृष्टमात्रं फलमस्य ठण् । २सद्यःफले त्रि० अमरः । परसवर्णे सान्दृष्टिकमप्युभयत्र ।

सांयात्रिक पु० सम्यक् यात्रायै द्वीपान्तरगमनाय अलम् ठञ् । पोतेन वाणिज्यकारके अमरः ।

सांयुगीन त्रि० संयुगे युद्धे साधुः प्रतिजना० खञ् । रणकुशले अमरः । [उट्टादिकोषाङ्कल्ले ।

सांराविण न० सम्+रु–भावे णिनि ततः स्वार्थेऽण् । व्याप्ते

सांवत्सर पु० संवत्सरं तज्ज्ञानोपयोगिशास्त्रं वेत्ति अधीते वा अण् । ज्योतिर्वेत्तरि १गणके अमरः । २वर्षसम्बन्धिनि त्रि० ।

सांवत्सरिक त्रि० संवत्सरे भवः ठञ् । प्रतिवर्षं मृताहकर्त्तव्ये श्राद्धभेदे गोभिलः “अत ऊर्द्धं संवत्सरे संवत्सरे प्रेता·

याश्च दद्यात् यस्मिन्नहनि प्रेतः क्षयादिरि । अत ऊर्द्ध्वं सपिण्डीकरणान्तश्राद्धनिमित्तादाद्यसम्वत्सरादूर्द्ध्वं संवत्सरे सम्वत्सरे प्रतिवर्षं यस्मिन्नहनि मृतस्तस्मिन्नहनि मृताय दद्यात् । व्यासः "प्रतिसंवत्सरञ्चैवमेकोद्दिष्टं मृताहनि" । एतेन सपिण्डीकरणापकर्षे आद्यसंवत्सरेऽपि मृताहे श्राद्धान्तरं कर्त्तव्यमिति मैथिलोक्तं हेयम् । अक्रमाह हेमाद्रिधृतवचनम् "पूर्णे संवत्सरे श्राद्धं षोडशं परिकीर्त्तितम् । तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते" । अत्र पूर्णसंवत्सरे क्रियमाणश्राद्धाद् यथोभयनिर्वाहस्तथापकृष्टसपिण्डीकरणश्राद्धादप्युभयनिर्वाहो न पूर्णसंवत्सरे श्राद्धान्तरम् एव [illegible]श्राद्धेऽप्यूह्यम् । मत्स्यपु० "ततः प्रभृति संक्रान्तावुपरागादिपर्वसु । त्रिपिण्डमाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि" । ततः प्रेतत्वपरिहारात्, त्रिपिण्डं त्रिपुरुषम् । नियमपदस्मृताहशब्दः मृतसम्बन्धिमासपक्षतिथिविशेषपरः । उपपदात्तु कश्चित्तिथिविशेषमात्रपरः । यथा मृताहे प्रतिमासं कुर्य्यादित्यादौ । शङ्खः "सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते । तत्र तत्र त्रयं कुर्य्यात् वर्जयित्वा मृताहनि । अमावास्या क्षयो यस्य प्रेतपक्षेऽथ वा पुनः । सपिण्डीकरणादूर्द्ध्वं तस्योक्तः पार्वणो विधिः" श्रा०त० । अधिकम् एकोद्दिष्टशब्दे १५२१पृ० पार्वणशब्दे ४११८पृ० च दृश्यम् ।

सांवादिक पु० सम्यग्वादायालं ठञ् । १नैयायिके जटा० । सवाददातरि च । [अमरः । २संशयविषये च ।

सांशयिक त्रि० संशयमापन्नः ठञ् । १सन्दिहाने संशययुक्ते

सांसारिक त्रि० संसाराय हितम् तत्र भवो वा ठक् । १संसारभवे २संसारोपयोगिनि वा पदार्थे ।

सांसिद्धिक त्रि० संसिद्धिः स्वभावसिद्धिः तया निर्वृत्तं ठञ् । स्वभावसिद्धे "सांसिद्धिकमुदाहृतम्" भाषाप० ।

साकम् अव्य० सह अकति अक-अम् सादेशः । १साहित्ये २सहार्थे अमरः । तद्योगे गौणक्रियान्वयिनि तृतीया ।

साकल्य न० सकलस्य भावः ष्यञ् । १समुदाये । स्वार्थे ष्यञ् । २सकले होमार्थं मिश्रितेषु तिलादिद्रव्येषु च ।

साकाङ्क्ष त्रि० सहाकाङ्क्षया सहस्य सः । १अभिलाषे शाब्दबोधोपयोग्याकाङ्क्षायुक्ते २पदभेदे च । [२सावयवे च ।

साकार त्रि० सह आकारेण मूर्त्या । १मूर्त्तिविशिष्टे देवादौ

साकुरुण्ड पु० सकुरुण्ड एव स्वार्थे अण् । सकुरुण्डवृक्षे (पन्यिफले इत्ये) राजनि० ।

साकेत न० आकिन्यते आकेतः सहाकेतेन । अयोध्यापुरे अमर० "जनस्य साकेतनिवासिनस्तौ" इति रघुः ।

साक्तुक पु० सक्तवे हितः गुडा० ठञ् । १यवे त्रिका० । सक्तूनां समाहारः तस्येदम् वा ठञ् । २सक्तुसमूहे न० ३तत्सम्बन्धिनि च त्रि० ।

साक्षात् अव्य० सह अक्षति अक्ष-आति सादेशः, सह अक्ष्णा मतात् अत-क्विप वा । १लौकिकप्रत्यक्षे २तुल्ये च अमरः साक्षात्का०कृञि वा उप०समासः । साक्षात्कृत्य कृत्वा वा । ३तद्रूपे चैतन्ये च "यत्साक्षादपरोक्षाद्ब्रह्म" श्रुतिः ।

साक्षात्कार पु० साक्षात्+कृ-घञ् साक्षादि० उप० । लौकिकसन्निकर्षजन्ये प्रत्यक्षे ।

साक्षिन् त्रि० सह-अक्षि अस्य इनि "साक्षाद् द्रष्टरि" पा० इनि वा नि० । १साक्षाद्द्रष्टरि । स्त्रियां ङीप् । २परमेश्वरे पु० "साक्षी चेताः केवलो निर्गुणश्च" श्रुतिः । अयमेव साक्षिचैतन्यत्वेन वेदान्तपरिभाषादौ प्रोक्तोऽनुपदं वक्ष्यते । व्यवहारे साक्षिलक्षणादिकं वीरमि० निरूपितं यथा "तत्र प्रमाणभेदप्रमाणविषयव्यवस्थे क्रियापादप्रस्तावे विविक्ते । अधुना साक्षिप्रमाणस्यावान्तरभेदः प्रस्तूयते । तत्र साक्षिस्वरूपमाह मनुः "समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति" । समक्षदर्शनस्य साक्ष्यहेतुत्वं पाणिनिरपि स्मरति । "साक्षाद् द्रष्टरि संज्ञायामिति" । तत्तु व्युत्पत्तिमात्रमव्यापकत्वात् । श्रुतसाक्ष्यादीनामपि साक्षित्वव्यवहारविषयत्वात् । अतएव श्रवणादित्युपलक्षणं प्रमाणमात्रस्य । विवादविषयप्रमाता साक्षीति विवक्षितम् । साक्षिप्रयोजनमाह नारदः "सन्दिग्धेषु तु कार्य्येषु द्वयोर्विवदमानयोः । दृष्टश्रुतानुभूतत्वात्साक्षिभ्यो व्यक्तिदर्शनम्" इति । दृष्टश्रुताभ्यामनुभूतत्वादित्यर्थः । यद्वा दृष्टत्वात् श्रुतत्वादनुभूतत्वाच्चेत्यर्थः । अनुभूतत्वादित्यनेन च गोवृषभन्यायेन प्रमाणान्तरजन्योऽनुभवो गृह्यते । व्यक्तिदर्शनं विवेकज्ञानम् । कात्यायनः "अर्थिप्रत्यर्थिसान्निध्यादनुभूतन्तु यद्भवेत् । तद्ग्राह्यं साक्षिणो वाक्यमन्यथा न बृहस्पतिः" अर्थिप्रत्यर्थिसान्निध्यादनुभूतमिति मुख्यः कल्पः । तदसान्निध्येऽपि श्रवणादिना साक्ष्यस्य वचनान्तरैरनुमतत्वात् । तच्च साक्षिभेदनिरूपणे व्यक्तीभविष्यति । गौतमः "विप्रतिपत्तौ साक्षिनिमित्ता व्यवस्था" । स च साक्षी प्रथमं द्विविधः कृतोऽकृतश्च । साक्षित्वेनार्थिप्रत्यर्थिभ्यां निरूपतः कृतः । अनिरूपितोऽकृतः । पुनश्च कृतदा

पञ्चविधत्वात्कृतस्य षड्विधत्वादेकादशविधः। यथाह नारदः "एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः। कृतः पञ्चविधस्तेषां षड्विधोऽकृत उच्यते। लिखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च। गूढश्चोत्तरसाक्षी च साक्षी पञ्चविधः कृतः" इति। पञ्चानामपि कात्यायनेन स्वरूपमभिहितम् "अर्थिना स्वयमानीतो यो लेख्ये सन्निवेश्यते। स साक्षी लिखितो नाम स्मारितः पत्रकादृते" इति। स्मारितः पत्रकादृते इत्यपि विवृतं तेनैव "यस्तु कार्य्यप्रसिद्ध्यर्थं दृष्ट्वा कार्य्यं पुनः पुनः। स्मार्य्यते ह्यर्थिना साक्षी स स्मारित इहोच्यते" इहेति दर्शयित्वेत्यन्तर्भावितण्यर्थम्। कार्य्यं व्यवहारपदं दर्शयित्वा प्रमापय्य कार्य्यप्रसिद्ध्यर्थं कालान्तरे व्यवहारनिर्णयसिद्ध्यर्थं पुनः पुनः स्मार्य्यते कार्य्यते च विस्मरणनिरासाय यः स स्मारितो नाम साक्षीत्यर्थः। यस्तु यदृच्छया प्रसङ्गादागतस्त्वमत्र साक्षी भवेति साक्षित्वेन निरूपितः स यदृच्छाभिज्ञः स्मारितस्यास्य च पत्रानारूढत्वेन साम्येऽपि स्वरूपभेदः स्पष्टोऽपि तेनैव विवृतः "प्रयोजनार्थमानीतः प्रसङ्गादागतश्च यः। द्वौ साक्षिणौ त्वलिखितौ पूर्व्वपक्षस्य साधकौ"। गूढमाह "अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम्। यः श्राव्यते स्थितो गूढो गूढसाक्षी स उच्यते" इति। उत्तरसाक्षिस्वरूपमाह "साक्षिणामपि यः साक्ष्यमुपर्य्युपरि भाषते। श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञितः" इति। षड्विधस्याप्यकृतस्य भेदो नारदेनैव दर्शितः "ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम्। कार्य्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः। कुल्याः कुलविवादेषु विज्ञेयास्तेऽपि साक्षिणः"। प्राड्विवाकग्रहणं लेखकसभ्योपलक्षणम् "लेखकः प्राड्विवाकश्च सभ्याश्चैवानुपूर्व्वशः। नृपे पश्यति तत्कार्य्यं साक्षिणः समुदाहृताः" इति वचनात्। बृहस्पतिस्तु लेखितमधिकमादायैतानेव द्वादश साक्षिण आह "लिखितो लेखितो गूढः स्मारितः कुल्यदूतकौ। याहच्छिकोत्तरश्चैव कार्य्यमध्यगतोऽपरः। नृपोऽध्यक्षस्तथा ग्रामः साक्षी द्वादशधा स्मृतः" इति। तल्लक्षणान्यपि कानिचिदसङ्कीर्णानि अलिखितपूर्व्वसंवादीन्याह स एव "प्रभेदमेषां वक्ष्यामि यथावदनुपूर्व्वशः। जातिनामाभिलिखितं येन स्वं पितृनाम च। निवासश्च स विज्ञेयः साक्षी लिखितसंज्ञकः। अर्थिना च क्रियाभेदैस्तस्य कृत्वा स्पष्टादिकम्। प्रत्यक्षं लिख्यते यस्तु लेखितः स उदाहृतः। कुड्यव्यवहितो यस्तु श्राव्यते ह्यर्थिभाषितम्। विनिह्नुते यथाभूतं गूढसाक्षी स कीर्त्तितः। आहूय यः कृतः साक्षी ऋणन्यासक्रियादिके। स्मार्य्यते यो मुहुश्चैव स्मारितः सोऽभिधीयते। विभागदाने विषये ज्ञातिर्यत्रोपदिश्यते। द्वयोः समानो धर्म्मज्ञः स कुल्यः परिकीर्त्तितः। अर्थिप्रत्यर्थिवचनं शृणुयात् प्रेषितस्तु यः। उभयोः सम्मतः साधुर्दूतकः स उदाहृतः। क्रियमाणे च कर्त्तव्ये यः कश्चित् स्वयमागतः। अत्र साक्षी त्वमस्याकल्प्यो(?) याहच्छिकस्तु सः। यस्तु साक्षी दिशं गच्छन् मुमूर्षुर्वा यथाश्रुतम्। अन्यं संश्रावयेदन्तु विद्यादुत्तरसाक्षिणम्। साक्षिणामपि यः साक्ष्यमुपर्य्युपरि भाषते। श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञितः। उभाभ्यां यस्य विश्वस्तं कार्य्यं वापि निवेदितम्। गूढचारी स विज्ञेयः कार्य्यमध्यगतस्तथा। अर्थिप्रत्यर्थिनोर्वाक्यं यच्छ्रुतं भूभृता स्वयम्। स एव तत्र साक्षी स्याद्विसंवादे द्वयोरपि। निर्णीते व्यवहारे तु पुनर्न्यायो यदा भवेत्। अध्यक्षः सभ्यसहितः साक्षी स्यात् तत्र नान्यथा। दूषितं घातितं यत्र सीमायास्तु समन्ततः। अकृतोऽपि भवेत्साक्षी ग्रामस्तत्र न संशयः" इति। लिखितलेखितयोः स्वपरलिखनमात्रभेदादेकादशद्वादशसंख्ययोरविरोधः। सर्व्वं च यथासम्भवं दृष्टश्रुतरूपद्विविधसाक्षिभेदा ज्ञेयाः। क्रियाभेदैर्व्यवहारप्रकारभेदैः, तस्य प्रत्यर्थिनः। स्पष्टादिकमित्यादिशब्दात् यथासम्भवं सर्व्वविवादपदनिदर्शनम्। कुड्यग्रहणं व्यवधायकोपलक्षणम्। विनिह्नुते इति भावे क्तः निह्नवे उद्भाविते इति शेषः। अत्र(?) इत्युक्त इतीतिशब्दाध्याहारः। दिशं देशान्तरमध्यामित्यर्थः। उभाभ्यामर्थिप्रत्यर्थिभ्यां यस्य विश्वस्तं यदीयो विश्वासः कृत इति सम्बन्धसामान्यविवक्षया षष्ठी, भावे क्तं चाभ्युपेत्य व्याख्येयम्। गूढचारी कार्य्यमध्यगतश्चेत्येकस्यैव संज्ञाद्वयमिति द्वादशत्वाविरोधः। दूतग्रहणं लेखकस्यापि प्रदर्शनार्थं "दूतकः घटिकाग्राहादिरिति" बृहस्पतिवचनादुभयपक्षसम्मतकृतसाक्ष्युपलक्षणम्। येन योऽर्थः प्रापितस्तत्र साक्षित्वेन प्रागनिरूपितोऽपि पश्चात् साक्षित्वेन विज्ञायोपन्यस्तः पृष्टश्च सभायां साक्ष्यं दातुमर्हतीति फलितोऽर्थः। इतरथा वेतनादानादिषु लिखिताद्यसम्भवे साक्ष्यभावप्रसङ्गः। इदमेवाभिप्रेत्याह मनुः "यत्रानिबद्धो-

ऽधीयीत शृणुयाद्वापि किञ्चन। पृष्टस्तत्रापि तद्ब्रूयात् यथादृष्टं यथाश्रुतम्"। अनिबद्धोऽक्लृप्तः। कल्पतरुमदनरत्नयोरर्थिक्रिया क्रियाभेदैरिति पठितं तत्रार्थिक्रियाऽर्थिव्यवहारक्रियाभेदैः प्रमाणविशेषैराप्तवाक्यादिभिस्तत्र कृत्वा तत्सम्बन्धितयावधार्य्य ऋणादिके विवादविषये यः प्रत्यक्षं प्रत्यर्थिसमक्षं लेख्यतेऽर्थिनेत्यर्थात् स तत्र लेखितः साक्षीति व्याख्येयम्। कालावधिरपि साक्ष्ये स्मर्य्यते "सुदीर्घेणापि कालेन लिखितः सिद्धिमाप्नुयात्। अज्ञानन्दात्मनो लेख्यम्" कुर्य्यादिति शेषः। अजानन् लिप्यनभिज्ञमात्मानमन्यद्वारा साक्ष्यहमस्मीति लेखयेत्। स द्विविधोऽपि लिखितः साक्षी चिरकालेनापि सिद्धिमविपर्य्ययकृतामाप्नुयादित्यर्थः। कात्यायनः "अथ स्वहस्तेनारूढस्तिष्ठेच्चैकः स एव तु। न चेत् प्रत्यभिजानीयात् तत्स्वहस्तैः प्रसाधयेत्"। नारदः "अष्टमात् वत्सरात् सिद्धिः स्मारितस्येह साक्षिणः। आपञ्चमात् तथा सिद्धिर्यदृच्छोपगतस्य तु। आ तृतीयात् तथा वर्षात् सिद्धिर्गूढस्य साक्षिणः" इति। इदञ्च प्रायवादेन, यतः स एवाह "अथ वा कालनियमो न दृष्टः साक्षिणं प्रति। स्मृत्यपेक्षं हि साक्षित्वमाहुः शास्त्रविदो जनाः। यस्य नोपहता बुद्धिः स्मृतिः श्रोत्रञ्च नित्यशः। सुदीर्घेणापि कालेन स वै साक्षित्वमर्हति"। ते च "साक्षिणः कीदृशाः कार्य्या व्यवहारेष्वसाक्षिणः। तादृशान् संप्रवक्ष्यामि यथा वाच्यमृतञ्च तैः। गृहिणः पुत्त्रिणो मौलाः क्षत्रविट्शूद्रयोनयः। अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि। आप्ताः सर्वेषु वर्णेषु कार्य्याः कार्य्येषु साक्षिणः। सर्वधर्मविदो लुब्धा विपरीतांस्तु वर्जयेत्"। मौलाः प्रख्यातकुलोद्भवा इति कल्पतरुः। मूलं पूर्वपुरुषान्तमाहरन्तीति मौलाः। तदधीत तद्देश्यस्थिति मदनरत्ने। वक्ष्यमाणयाज्ञवल्क्यवचनसंवादात् साक्षित्वे नैव पूर्वपुरुषान्तवेदित्वव्यपेक्षा तदर्थकमौलपदानैक्यप्रसङ्गाच्च कल्पतरुव्याख्यानमेव सम्यक्। रत्नाकरेऽपि "मौलाः कुलीना" इत्येव व्याख्यातम्। मूलं प्रतिष्ठा सा येषामस्ति ते मौलाः अर्थकथनमेतत्। नाडितस्तु मत्वर्थे एव कर्त्तव्यः, यो हि यत्र भवः सोऽपि तत्रास्तीत्यविरुद्धमिति वदन् मेधातिथिरपीदृशमर्थमनुमन्यते। प्रतिष्ठानतस्य साक्षिलक्षणानुपयोगात्। पुत्रादिप्रतिष्ठायाः पदान्तरैरेवोपादानात्। अत्र क्षत्रियादिग्रहणं नार्थान्तरब्राह्मणव्युदासपरं, किन्तु सति सम्भवेऽनेकाध्यापनाग्निहोत्रादिकार्य्यव्यग्रस्य तस्य न साक्षित्व, साक्ष्यन्तरासम्भवे तु तस्यापि साक्षित्वं सम्भवत्येव। अतएव "ब्रूहीति ब्राह्मणं पृच्छेदिति" तस्यापि साक्षित्वेन प्रश्नप्रकारविधिरुपपद्यत इति ध्येयम्। अर्थ्युक्ता अर्थिना मतैते साक्षिणः सन्तीति निर्दिष्टा न तु स्वयमेवागत्य वयमत्र साक्षिणः स्म इति वदन्तः। याज्ञवल्क्यः "तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः। धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः। त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्त्तक्रियापराः। यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः"। त्र्यवरास्त्रिभ्यो न्यूना न भवन्ति परतस्तु यथेष्टं भवन्तीत्यर्थः। जातयो मूर्द्धावसिक्तादयः। वर्णा ब्राह्मणादयः। तथा च मूर्द्धावसिक्तादीनां मूर्द्धावसिक्तादयो ब्राह्मणादयो ब्राह्मणादीनां साक्षित्वेनोपादेयाः। असम्भवे सर्वे सर्वजातीयाः सर्वेषु जातीयेषु वादिप्रतिवादिषु साक्षिणो ग्राह्या इत्यर्थः। व्यासः "धर्मज्ञाः पुत्रिणो मौलाः कुलीनाः सत्यवादिनः। श्रौतस्मार्त्तक्रियायुक्ता विगतद्वेषमत्सराः। श्रोत्रिया नपराधीनाः सूरयश्चाप्रवासिनः। युवानः साक्षिणः कार्य्या ऋणादिषु विजानता" इति। कात्यायनः "प्रख्यातकुलशीलाश्च लोभमोहविवर्जिताः। आप्ताः शिष्टा विबुद्धा ये तेषां वाक्यमसंशयम्। विभाव्यो वादिना यादृक् सदृशैरेव भावयेत्। नोत्कृष्टस्याधमैस्तु साक्षिभिर्भावयेत् सदा" इति। आप्ताः यथार्थवादिनः। विबुद्धा विवादविषयीभूतार्थज्ञानवन्तः शास्त्रार्थज्ञानवन्तश्च "मतिबुद्धिपूजार्थेभ्यश्चेति" पा॰ कर्त्तरि क्तः। आदिकर्मणीति मदनरत्ने। तेषां वाक्यमसंशयं यथा भवति तथा वादिनो विभाव्योऽङ्गीकारयितव्योऽर्थात् प्रतिवादी। तत्र विशेषमाह यादृक् प्रतिवादी तत्सदृशैस्तज्जातीयैरेव भावयेत्। वादिनेत्युपलक्षणम्। वाद्यपि प्रतिवादिना तज्जातीयैरेव विभाव्यः तथा च नारदः "श्रेणीषु श्रेणिपुरुषाः स्वेषु वर्गेषु वर्गिणः। बहिर्वासिषु बाह्याः स्युः स्त्रियः स्त्रीषु च साक्षिणः" इति। पुनरपि "स्त्रीणां साक्ष्यं स्त्रियः कुर्य्युर्द्विजानां सदृशा द्विजाः। शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः"। श्रेणिपुरुषाणां सत्यपि वर्गित्वे पृथङ्निर्देशो गोवृषभन्यायेन। प्रयोजनं चात्राप्यभ्यर्हितत्वबोधनम्। वर्गिणश्च दर्शिताः कात्यायनेन "लिङ्गिनः श्रेणिपूगाश्च वणिग्व्रातास्तथाऽपरे। समूहस्थाश्च ये चान्ये वर्गास्तानब्रवीद् भृगुः।

दासचारणमल्लानां हस्त्यश्वायुधजीविनाम्। प्रत्येकैकसमूहानां नायका वर्गिणः स्मृताः। तेषां वादः स्ववर्गेषु वर्गिणस्तेषु साक्षिणः"। अत्र सर्वत्र न्यूनाधिकविशेषणोपादानञ्च दोषाय अनृतभाषणभीरुत्वसत्यवदनशीलत्वस्य च साक्षित्वप्रयोजकस्योपलक्षणार्थत्वात् तेषाम्। ते च साक्षिणः कियत्सङ्ख्यकाः कार्य्या इत्यपेक्षायामाह बृहस्पतिः "नव सप्त पञ्च वा स्युश्चत्वारस्त्रय एव वा। उभौ वा श्रोत्रियौ ख्यातौ नैकं पृच्छेत कदाचन"। लिखितादिषु स एवाह "लिखितौ द्वौ तथा गूढौ त्रिचतुःपञ्च लेखिताः। यदृच्छाः स्मारिताः कार्य्यास्तथा चोत्तरसाक्षिणः। दूतकः खटिकापाठी कार्य्यमध्यगतस्तथा। एक एव प्रमाणं स्यान्नृपोऽध्यक्षस्तथैव च"। खटिकापाठी लेखकः एक एवेत्येवकारो वाद्यपेक्षया "नैकं पृच्छेत् कदाचन" इत्युक्तेः अनावश्यकत्वार्थो न नियमार्थोऽदृष्टार्थत्वप्रसङ्गात्। त्र्यवराः साक्षिणो ज्ञेया इति योगीश्वरीयमप्येतदभिप्रायकमेव। लिखितादीनामुभयानुमतत्वे प्रामाण्यमेकस्यापीत्याह योगीश्वरः "उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित्"। यद्यपि "श्रौतस्मार्त्तक्रियापरा धर्मप्रधाना" इत्यादिविशेषणोपादानात् त्र्यवराणामपि धर्मज्ञत्वं समानन्तथापि तेषामुभयानुमतौ न भवत्येव साक्षित्वं, इयोरेकस्य चोभयानुमत्यैवेति भेद इति मिताक्षरा। नारदोऽपि "उभयानुमतो यः स्याद्द्वयोर्विवदमानयोः। स साक्ष्येकोऽपि साक्षित्वे प्रष्टव्यः स्यात् स संसदि"। आप्तत्वेन राजादिभिरवधारितोऽप्येकः साक्षीत्याह व्यासः "शुचिक्रियश्च धर्मज्ञः साक्षी यस्त्वनुभूतवाक्। प्रमाणमेकोऽपि भवेत् साहसेषु विशेषतः" इति। अनुभूता यथार्थत्वेन प्रमितचरा वाग्यस्येत्यनुभूतवाक्। कात्यायनः "उभयान्तरस्तु निःक्षेपे साक्ष्यमेकोऽपि वाच्यते। अर्थिना प्रहितः साक्षी भवेदेकोऽपि याचिते"। याचित इति निःक्षेपविशेषणम्। न्यायतोऽन्यादन्यत्रापीति वाचस्पतिः। मदनरत्नकारस्तु याचितं विवाहाद्यर्थं याचितं गृहीतमाभरणादिकं याचितकमिति यादवाह। निःक्षेपविशेषणत्वे याचिते तत्स्वरूपोपन्यासे रहस्यगतसाक्षित्वप्रसङ्गाद्व्याहतान्वयप्रसक्तेश्चोत्तरैव व्याख्या प्रशस्ता। कारुकादिपण्यविवादे तत्सम्मतैकोऽपि साक्षीत्याह स एव "संस्कृतं येन यत्पण्यं तत्तेनैव विभावयेत्। एक एव प्रमाणं स विवादे तत्र कीर्त्तितः"। इदञ्च वङ्गनाम सम्भवे सत्यवादिनोर्द्वयोरेकस्य चानुमतिप्रदर्शनार्थं न नियमार्थम् अदृष्टार्थत्वप्रसङ्गादिति ध्येयम्। पञ्चलक्षणसाक्ष्यसम्भवे प्रतिषेधरहितानां साक्ष्यनुकल्पानां सूचनार्थमसाक्षिणोऽपि स्मृतिषूक्ताः"।

ते च असाक्षिन्शब्दे ५४८ पृ०। दर्शिताः।

साक्षिणो मिथ्याकथने अकथने च दोषो यथा "पृष्टो हि साक्षी यः साक्ष्यं जानन्नप्यन्यथा वदेत्। स पूर्वानात्मनः सप्त कुले हन्यात्तथा परान्। यस्तु कार्य्यार्थतत्त्वज्ञो जानन्नपि न भाषते। सोऽपि तेनैव पापेन लिप्यते नात्र संशयः" भा०आ० "ब्रह्मस्वापहारी च मिथ्यासाक्ष्यप्रदायकः। मित्रद्रोही कृतघ्नश्च उभयाकृष्टपक्षकृत्। एते महापातकिनस्त्वेते लोकेषु निन्दिताः। कालसूत्रे च नरके पतन्ति ब्रह्मणः शतम्" ब्रह्म०वै०गण०ख०४४अ०। "मिथ्यासाक्ष्यं यो ददाति कामात् क्रोधात्तथा भयात्। सभायां पाक्षिकं वक्ति स कृतघ्न इति स्मृतः। मिथ्यासाक्ष्यं पाक्षिकं वा भारते वक्ति यो नरः। यावदिन्द्रसहस्रञ्च सर्पकुण्डे वसेद्ध्रुवम्। सन्ततं वेष्टितैः सर्पैर्भीतश्च भक्षितस्तथा। भुङ्क्ते च सर्पविण्मूत्रं यमदूतेन ताडितः। ततस्ततो भवेत्तत्र भारते सप्तजन्मसु। सप्तजन्मसु मण्डूकः पितृभिः सप्तभिः सह। ततो भवेच्च वृक्षश्च महारण्ये च शाल्मलिः। ततो भवेन्नरो मूकस्ततः शूद्रस्ततः शुचिः" ब्रह्मवै०प्र०७६अ०।

साक्षिणो यथा विवादे कर्तृत्वाद्यभाव एवं जीवसाक्षिणो कर्तृत्वाभावः ईश्वरसाक्षिन्शब्दे १०४८पृ०दृश्यम्। तयोर्वृत्त्यादिप्रकाशकत्वात् तथात्वम् अन्तःकरणमाययोः जडत्वेन विषयावभासकत्वाभावेन चैतन्योपाधित्वमेव न तु विशेषणत्वं विषयावभासकत्वे तदन्वयायोगात्। अत एव स्वस्वोपाधिवृत्तिचित्तवृत्तिसुखादेरवभासकत्वात्यातिप्रसङ्गः इति वेदान्तपरिभाषाप्रत्यक्षपरि० दृश्यम्।

सांख्यसू० भाष्ययोश्चेतनस्य साक्षित्वं समर्थितं यथा "ननु साक्षित्वस्यानित्यत्वात् पुरुषाणां कथं सदैकरूपत्वं तत्राह "साक्षात्सम्बन्धात् साक्षित्वम्" सू० पुरुषस्य यत् साक्षित्वमुक्तं तत् साक्षात्सम्बन्धमात्रात् न तु परिणामत इत्यर्थः। साक्षात्सम्बन्धेन बुद्धिमात्रसाक्षितावगम्यते "साक्षाद्द्रष्टरि संज्ञायाम्" पा० साक्षिशब्दव्युत्पादनात्। साक्षाद्द्रष्टृत्वं चाव्यवधानेन द्रष्टृत्वम्। पुरुषे च साक्षात्सम्बन्धः स्वबुद्धिवृत्तेरेव भवति। अतो बुद्धेरेव साक्षी पुरुषोऽन्येषां तु द्रष्टृमात्रमिति शास्त्रीयो

-विभागः। ज्ञाननियामकज्ञानाकारतास्थानीयः प्रतिबिम्बरूप एव सम्बन्धो न तु संयोगसमवायप्रभृत्यादिरूपः प्रतिपत्तिस्तु वेदितम्। विष्णोः सर्वसाक्षित्वं त्विन्द्रियादिव्यवधानाभावमात्रेण गौणम्। अस्मसम्बन्धात् साक्षित्वमिति पाठे त्वसमवद्बुद्धिः करणत्वसामान्यात्। तथा यथोक्तात् प्रतिबिम्बरूपात् सम्बन्धादित्यर्थः भा०। तत्रैव अन्यत्र "सुषुप्त्याद्यसाक्षित्वम् सुषुप्त्याद्यवस्थात्रयस्य बुद्धिनिष्ठस्य साक्षित्वमेव पुंसीत्यर्थः। तदुक्तम् "जाग्रत् स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः। तासां विलक्षणो जीवः साक्षित्वेन व्यवस्थितः"। इति तासां बुद्धिवृत्तीनां साक्षित्वेन तद्विलक्षणो जाग्रदाद्यवस्थारहितो निर्णीत इत्यर्थः। तत्र जाग्रदवस्थामात्रमिन्द्रियद्वारा बुद्धेर्विषयाकारः परिणामः। स्वप्नावस्था च संस्कारमात्रजन्यस्तादृशः परिणामः। सुषुप्त्यवस्था च द्विविधाऽर्द्ध समप्रलयभेदेन। तत्रार्द्ध बुद्धेर्विषयाकारा वृत्तिर्न भवति। किन्तु सुखदुःखमोहाकारैव बुद्धिवृत्तिर्भवति अन्यथोत्थितस्य सुखमहमस्वाप्समित्यादिरूपसुषुप्तिकालीनसुखादिस्मरणानुपपत्तेः। तदुक्तं व्यासवदेन "सुखद्ःखसम्पत्तिः परिणेयादिति"। समप्रलये तु बुद्धेर्वृत्तिसामान्याभावो मरणादाविव भवति। अन्यथा समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपतेत्यागमिस्मृत्यनुपपत्तेरिति। सा च समप्रसुषुप्तिः स्वभावरूपेति पुरुषस्तत्साक्षी न भवति पुरुषस्य वृत्तिमात्रसाक्षित्वात्। अन्यथा संस्कारादेरपि धर्मस्य साक्षिभास्यतापत्तेः। सुषुप्त्यादिसाक्षित्वं तु तादृशबुद्धिवृत्तीनां प्रकाशनामति वक्ष्यामः"। [वेदान्तप०।

साक्षिभास्य त्रि० ३त०। साक्षिमात्रप्रकाश्ये बुद्धिवृत्त्यादौ

साक्ष्य न० साक्षिणो भावः कर्म वा ष्यञ्। १व्यवहारविषयवृत्तवृत्तान्तकथनरूपे साक्षिकर्मणि २तद्भावे च "समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति" मनुः।

सागर पु० सगरेण निर्वृत्तः अण्। १समुद्रे अमरः २मृगभेदे पुंस्त्री० शब्दच०। ३संख्याभेदे संख्याशब्दे दृश्यम्।

सागरगामिनी स्त्री सागरं गच्छति गम+णिनि न णत्वम्। १नद्यां २स्थूलैलायाञ्च राजनि०।

सागरनेमि स्त्री॰ सागरः नेमिरिव वेष्टनाकारो यस्याः। पृथिव्यां हेमच०। [हेमच०।

सागरमेखला स्त्री सागरो मेखलेव यस्याः। पृथिव्यां

सागरालय पु० सागर आलयो यस्य। वरुणे शब्दच०।

सागरोत्थ न० सागरात् उत्तिष्ठति उद्+स्था क। सामुद्रलवणे राजनि०।

साग्नि(क) पु० सहाग्निना अग्निहोत्रेण वा कप्। १श्रौतस्मार्ताग्नियुक्ते २अग्निहोत्रिणि द्विजे।

साङ्कर्य्य न० सङ्करस्य भावः ष्यञ्। १परस्पराभावसामानाधिकरण्ये सत्येकाधिकरणवृत्तित्वरूपे न्यायोक्ते जातिबाधके दोषभेदे सङ्करशब्दे ५१८१ पृ० दृश्यम् २सङ्करस्य धर्मे च। [सि०कौ०।

साङ्कल त्रि० सङ्कलेन निर्वृत्तः सङ्कला अण्। सङ्कलनजाते

साङ्कृति पु० वैयाघ्रपद्यगोत्रस्य प्रवरे मुनिभेदे "वैयाघ्रपद्यगोत्राय साङ्कृति प्रवराय च" भीष्मतर्पणमन्त्रः।

साङ्ग त्रि० सहाङ्गेन। अङ्गयुक्ते "तस्मात् साङ्गमधीत्यैव" "साङ्गं तत् क्रियते पुनः" इति च स्मृतिः।

साङ्गतिक त्रि० सङ्गत्या निवृत्तः ठक्। सङ्गतिसिद्धे युक्ते।

साचि अव्य० सच-इण्। १वक्रे २तिर्य्यगर्थे च अमरः।

साचिवाटिका स्त्री॰ साचि यथा तथा वटति वट-ण्वुल्। १श्वेतपुनर्णवायां रत्नमा०।

साचीकृत त्रि॰ असाचि साचि क्रियते साचि-कृ-क्त दीर्घः। वक्रीकृते सि०कौ०"साचीकृता चारुतरेण तस्थौ" कुमा०

साट प्रकाशने अद०चु०उ०स०सेट्। साटयति ते असषाटत त

साटोप त्रि०सहाटोपेन सहस्य सः। १सगर्वे २विकटे च।

सात सुखे उपादाने अद० चु० उभ० सक० सेट्। सातयति ते असषातत् त। अयं सौत्र इत्येके। [२नष्टे च।

सात न० सात-अच्। १सुखे भरतः। सन-क्त। २दत्ते

सातला स्त्री सातं सुखं लाति ला क। १चर्मकषायाम् अमरः। २सेहुण्डभेदे राजान०।

सातवाहन पु० शालिवाहनरूपे नृपभेदे शब्दच०। [अमरः।

साति स्त्री सन-क्तिन्। १अवसाने २दान ३तीव्रपीड़ायाञ्च

सातीन(ल)क पु० सतीन(ल)एव स्वार्थे अण्। सतीन(ल) कलाये (मटर) रायमुकुटः।

सात्यकि पु० सत्यकस्य वृष्णिवंश्यभेदस्यापत्यम् इञ्। शिनेर्नप्तरि युयुधाननामख्याते वृष्णिवंश्ये क्षत्रियभेदे त्रिका०।

सात्यवत पु० सत्यवत्यां मत्स्यगन्धायां भवः अण्। १वेदव्यासे त्रिका०। २सत्यवतः सम्बन्धिनि च। [हला०।

सात्यवतेय पु० सत्यवत्या अपत्यम् ढक्। सत्यवतीसुते व्यासे

सात्वत् पु० सातयति सुखयति सात-क्विप् सात् परमेश्वरः स उपास्यतयाऽस्त्यस्य मतुप् मस्य वः। विष्णुभक्ते "भगवान् सात्वतां पतिः" भागवतम्। श्रीधरेण

सत्त्वे च अण् सातः विष्णुरूपाद्वैतेनाश्रयस्य मतुपि असोपस्कोन्दसः इत्युक्तम् ।

सात्त्वत त्रि० सत्त्वमेव सात्त्वं तत्तनोति तन–ड । १विष्णौ त्रिका० यदुवंश्ये अंशुपुत्रे २नृपभेदे "अथांशोः सात्वतो नाम विष्णुभक्तः प्रतापवान्" कूर्मपु० २२ अ० । तद्वंश्ये ३बलरामे हेमच० । "सत्त्वं सत्त्वाश्रयं सत्त्वगुणं सेवेत केशवम् । योऽनन्यत्वेन मनसा सात्त्वतः स उदाहृतः" इत्युक्ते ४विष्णुभक्तभेदे । ५सात्त्वतवंशाधिष्ठितदेशे सोऽभिजनोऽस्य अण् । पित्रादिक्रमेण ६तद्देशवासिनि च त्रिका० । यदुवंश्योत्पन्नत्वेन ७शिशुपालमातरि स्त्री ङीप् । "न दूये सात्त्वतीसूनुः" माघः । सा च नाटकस्य वृत्तिभेदे च । तस्या लक्षणादि सा० द० उक्तं यथा "सात्त्वती बहुला सत्त्वशौर्य्यत्यागदयार्जवैः । सहर्षा क्षुद्रशृङ्गारा विशोका साद्भुता तथा । उत्थापकोऽथ सांघात्यः संलापः परिवर्त्तकः । विशेष इति चत्वारः सात्त्वत्याः परिकीर्त्तिताः । उत्तेजनकरी शत्रोर्वागुत्थापक उच्यते । मन्त्रार्थदैवशक्त्यादेः सांघात्यः सङ्घभेदनम् । संलापः स्याद् गभीरोक्तिर्नानाभावसमाश्रयः । प्रारब्धादन्यकार्य्याणां करणं परिवर्त्तकः" । तल्लोपे एकतरोऽपि । ८जातिभेदे पुंस्त्री० सुधन्वाचार्य्यशब्दे दृश्यम् ।

सात्त्विक पु० सत्त्वात् सत्त्वगुणप्रधानात् विष्णोर्भवति ठञ् । १चतुर्मुखे ब्रह्मणि हेमच० । तस्य विष्णुनाभिकमलजत्वात् तथात्वम् । सत्त्वमेव सात्त्वमस्त्यस्य ठन् । २विष्णौ । सत्त्वगुणेन तत्कार्य्येण मनसा वा निर्वृत्तः ठञ् । ३सत्त्वगुणजाते ४सत्त्वप्रधानमनोविशेषजाते च । ५शृङ्गारादिरसानुगुणे भावभेदे सा० द०

"उक्ताः स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः । तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि । विकाराः सत्त्वसम्भूताः सात्त्विकाः परिकीर्त्तिताः । सत्त्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः । स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः" । एतेषां लक्षणानि तत्तच्छब्दे दृश्यानि । स्त्रीणां यौवने सत्त्वजाते ६अलङ्कारभेदे सा० द० "यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः" । अलङ्कारशब्दे ४०८ पृ० दृश्यम् । ७सत्त्वप्रधाने त्रि० । ८देवीपूजाभेदे स्त्री "शारदी चण्डिकापूजा त्रिविधा परिकीर्त्तिता । सात्त्विकी राजसी चैव तामसी चेति तां शृणु । सात्त्विकी जपयज्ञैश्च नैवेद्यैश्च निरामिषैः" ति० त० । ९भावभेदे पु० "सत्त्वोत्कटे मनसि ये प्रभवन्ति भावास्ते सात्त्विका इति विदुस्तन्निपुणास्तु" भरत० । १०सत्त्वप्रधाने पुराणभेदे "वैष्णवं नारदीयञ्च तथा भागवतं शुभम् । गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने ! । सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै । सात्त्विकेषु पुराणेषु विष्णुमाहात्म्यवर्णनम्" उपपुराणशब्दे दृश्यम् । ११स्मृतिभेदे स्त्री "वाशिष्ठं चैव हारीतं व्यासं पाराशरं तथा । भारद्वाजं काश्यपञ्च सात्त्विक्यो मुक्तिदाः शुभाः" पद्मपु० उत्त० ४१ अ० । १२दुर्गायां स्त्री ङीप् । १३गीतोक्तेषु श्रद्धादिभेदेषु यथायथं त्रि० यथा

"सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ! । श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः । यजन्ते सात्त्विका देवान्" (श्रद्धा) "आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः । यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु" इत्युपक्रमे "आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः । रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः" (आहारः) "अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्त्विकः" (यज्ञः) "श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः । अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते" (कायिकादि त्रिविधं तपः) "दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्त्विकं मतम्" (दानम्) "सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्" (ज्ञानम्) "नियतं सङ्गरहितमरागद्वेषतः कृतम् । अफलप्रेप्सुना कर्म यत्तत् सात्त्विकमुच्यते" (कर्म) "मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः । सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते" (कर्त्ता) "प्रवृत्तिं च निवृत्तिं च कार्य्याकार्य्ये भयाभये । बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ ! सात्त्विकी" (बुद्धिः) "धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ ! सात्त्विकी" (धृतिः) "यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्" (सुखम्) "कार्य्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन ! । सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः" (त्यागः) । तत्र सात्त्विकाहारस्य चित्तशुद्धौ हेतुत्वं छान्दो० उक्तं यथा "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः" । सत्त्वं मनः । "अन्नमयं हि सौम्य ! मनः इत्यादिना" तस्य

अल्पमयत्वस्य तत्रोक्तेस्तथात्वम्। सात्त्विकतायुक्ते सत्त्वप्रधाने १४नङ्गतत्त्वे १५अहङ्कारतत्त्वे च “सात्त्विको राजसश्चैव तामसश्च त्रिधा महान्” सां०प्र० धृतवाक्यम्। “सात्त्विकमेकादशकं प्रवर्त्तते वैकृतादहङ्कारात्” सां०सू० एकादशानां पूरणमेकादशकं मनः षोडशात्मकगणमध्ये सात्त्विकम्। अतश्चाहैकृतात् सात्त्विकाहङ्काराज्जायत, इत्यर्थः। “वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा। अहन्तत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत्। वैकारिकाश्च ये देवा अर्थाभिव्यञ्जनं यतः” सां०प्र०ध० वाक्यम्। १६अध्यवसायादौ च “अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्। सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्” सां०का०। “सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्। भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्” सां०का० “प्रकाशलाघवाभ्यामेकादशक इन्द्रियगणः सात्त्विको वैकृतात् सात्त्विकादहङ्कारात् प्रवर्त्तते” तत्त्वकौ०।

सादनी स्त्री साद्यन्ते रोगा अनया सद–णिच्–करणे ल्युट् ङीप्। कटुक्यां राजनि०।

सादि पु० सद-इण्। १सारथौ हेमच० २योद्धरि उणादि० ३अवसन्ने त्रि० ४वायौ पु० संक्षिप्तसारः।

सादिन् पु० सद-णिनि। १अश्वारोहयोद्धरि अमरः। २गजारोहिणि ३रथारोहिणि च मेदि०। ४अवसन्ने त्रि० स्त्रियां ङीप्।

सादृश्य न० सदृशस्य भावः ष्यञ्। तद्भिन्नत्वे सति तद्गतभूयोधर्मरूपे उपमानधर्मे। तच्च सादृश्यं सप्तपदार्थातिरिक्तः पदार्थ इति मीमांसकाः। तन्मतमुक्तं मुक्तावल्यां “सादृश्यमतिरिक्तः पदार्थ इति मीमांसकाः”। तन्मतञ्च उपमानचिन्तामणौ निराकृतम् उपमानशब्दे १२३५ दृश्यम्। सादृश्यवाचका इवादिनिपाताः सदृशादिशब्दाश्च तत्र इवादिभिः निपातैः सादृश्यस्याभिधाने प्रतियोग्यनुयोगिनोः समानविभक्तिकत्वं, गौरिव गवय चन्द्रमिव हस्यं पश्यतीत्यादि। अन्ये तु गवादिशब्दा एव गोसदृशे लाक्षणिकाः इवादिशब्दास्तथालक्षणायां तात्पर्यग्राहका इत्याहुः। तुल्योपमाभिधनाम्ना तस्याभिधाने प्रतियोगिनि तृतीया षष्ठी च। तुल्योपमाभ्यां योगे तु षष्ठ्येव। सादृश्ये च एकस्य प्रतियोगिताऽन्यस्यानुयोगिता तत्र प्रतियोगिन उपमानत्वमनुयोगिन उपमेयत्वमिति। उपमानोपमेयभावस्य द्वयोः सम्भवेऽपि प्रसिद्धस्यैवोपमानता। तत्र काव्ये केशादिकानां कुत्राविद्ध्यकानतया वर्णनं युक्तं तन्निर्णीतं कविकल्पलतायां यथा “केशाः सर्पालिभृङ्गाल्यः केशपाशस्य चामरः। नीलकण्ठकलापोऽपि, धम्मिल्लस्य विधुन्तुदः। सीमन्तस्य चाध्वदण्डौ ललाटस्याष्टमो विधुः। स्मरश्च, कपोलस्य चन्द्रः स्यात् मुकुरः स्थलो। भ्रुवोः खड्गधनुर्यष्टी रेखापल्लववल्लयः। दृशश्चकोरहरिणमीनेन्दीवरखञ्जनाञ्जनम्। कुसुटं नीलमम्भोजं, श्रुतेर्दोपः सपाशकः। नासायाः शुकः वंशाधोमुखतूणीरचञ्चुरः। तिलप्रसूनदण्डौ चाधरस्य नवपल्लवः। बिम्बीफलं प्रवालं च, दन्तानां मौक्तिकावलिः। कुन्ददाडिमबीजानि हीरकाद्यः शिखरस्य च। ज्योत्स्ना पुष्पाणि पीयूषं, श्वासस्याम्भोजसौरभम्। जिह्वायाश्चोड्डुदले च वाण्या भृङ्गापिकध्वनी। वीणावाद्यं मधु सुधा, मुखस्य चन्द्रमास्तथा। अम्भोजदर्पणौ चापि चिबुके दर्पणाम्रकम्। कण्ठस्य कम्बूरसस्य कुम्भो बाह्वोस्तु वल्लरी। मृणालकदलीशाखापाशाः, पाणितलस्य तु। पल्लवश्चाङ्गुलीनां तु पल्लवोऽम्भोजपत्रकम्। दीपो नवदलं चैव चम्पकं, नखसन्ततेः। रत्नतारेन्दुपुष्पाणि, स्तनयोः कुड्मलौ घटौ। कुम्भिकुम्भौ गिरी चक्रौ बिल्वे, मध्यस्य वेदिका। सिंहमध्यं वज्रमध्यं चोपद्रव्यस्य कथ्यते। उपमानानि रोमाल्याः रेखाशैवालवल्लयः। नीलकान्तमणीधूमलताद्विरदशुण्डकाः। नाभेरम्भोजमावर्त्तौ ह्रदो विवरकूपकौ। त्रिवल्याः वीचिसोपाननिःश्रेण्यो, जघनस्य तु। पुलिनं पीठफलके, नितम्बस्य स्थलं पुनः। पर्वतः पृथिवी स्थूलोपलं वस्तु च यन्महत्। ऊर्वोः कदलिकास्तम्भकरौ करभस्तथा। जङ्घाद्वयस्य तूणश्च पादस्य नवपल्लवः। अम्भोजं च गतेर्हंसखञ्जनद्विरदा गतिः। इमान्यन्यान्यपि स्त्रीणां पुंसामपि समानि तु। पुंसां रूपोपमानानां विशेषः कोऽपि कथ्यते। स्कन्धस्य वाजिवृषभस्कन्धौ बाह्वोरहीश्वरः। सिंहस्कन्धा स्तम्भागलदण्डाश्च, वक्षसः। शिलापट्टकपाटे च प्रमत्तगजनिर्गतेः। यशसः कुन्दचन्द्राद्याः शुभ्रवर्णास्तथा मताः। प्रतापस्याग्निसूर्यौ च वाडवाग्नौ रवेः करः। जपापुष्पादयश्चैव रक्तवर्णपदार्थकाः। पुण्यस्य गौरं चामीकं संस्कारोऽङ्कुर एव च। शुक्लवर्णाः पदार्था ये तेऽप्यत्र परिकीर्त्तिताः। सामर्थ्यस्य मत्तहस्ती पञ्चास्यविक्रमादिकम्। कीर्तेर्लतादिः साध्वीस्तो ज्वाला दीपस्य कीर्तिता। आदेशस्योत्कटैर्व्याघ्रादिर्वेदवाक्यं गुरोर्वचः। शासनस्य शिरोबाध प्रारम्भश्च कीर्त्तितम्। पापस्य

कर्दमोऽकीर्त्तिः कलङ्कः कृष्णवर्णकः। कलङ्कारः केशपाशोद्यतिश्चोपमानकम्। अकीर्त्तेः कृष्णवस्तूनि मालिन्यं तमसां ततिः। कस्तूरिकाया भ्रमरो नीलकान्तमणिर्घनः। सुगन्धिद्रव्यदाहोत्थधूमः कज्जलकं तथा। कृष्णपुष्पप्रभृतयः कामाकीर्त्तिः खलान्तरे। कामिनीरोमराजिवत् कज्जलस्यापि तानि च। कर्पूरस्य तथा चन्द्रः मृगाङ्काकरणस्तथा। यूथिकाकुन्दकुसुमं विरहिगण्डकस्तथा। हिमज्योतिर्विधुः प्रायेण उपमानतया भवि। मनोरथस्य विज्ञेयः फलपुष्पादियुक्तरुः। कविबुद्धिकल्पना स्यादानन्दस्य सुधार्णवः। अनुभवस्य तृप्तिस्तद्वत्, कामिनीदर्शनस्य तु। पतिप्रियतमप्राप्तिर्ब्रह्मसाक्षात्कृतिस्तथा। सुधारसो नित्यसुखसाक्षात्कारस्तथा मतः। पूर्णचन्द्रादिकस्यापि साक्षात्कारः प्रकीर्त्तितः। अमृतस्य तु सत्काव्यं कामिन्यधरपानकम्। ब्रह्मसाक्षात्कृतिस्तद्वत्, विषस्याथ प्रकीर्त्त्यते। साध्वीस्त्रीविरहः पापं मलिनं दुःखदं च यत्। ग्रीष्माग्निः शीतकालीनशीतोदं परिकीर्त्तितम्। व्यभिचारिणी च या नारी सापि तद्वत् प्रकीर्त्तिता। विरहस्याग्निराधिश्च यातना च पयोनिधिः। दुःखदानि च वस्तूनि तप्तानि कथितानि च। पुण्यानां कामिनी चन्द्रः कर्पूरश्च यशस्तथा। चन्द्रश्च प्रमदाश्वक्रमतिशुभ्रश्च यद्भवेत्। यशः पुण्यादिकं वस्तु चोपमानतयेष्यते। सूर्य्यस्य शिवनेत्राग्निः काञ्चनञ्चारुहस्तथा। वाडवाग्निर्जवापुष्पं वसन्तोत्सपलाशकः। पद्मस्य कामिनीवक्त्रं पाटलं रक्तवस्तु च। इन्दीवरस्य कस्तूरी नीलकान्तमणिस्तथा। कामिनीनयनं तद्वत् कैरवस्य तु चन्द्रमाः। कुन्दादिपुष्पमन्यच्च शुभ्रवर्णञ्च यद्भवेत्। रामश्चेन्द्रः कुबेरश्च चन्द्रमा भास्करस्तथा। नलप्रभृतयो ये तु प्रसिद्धाश्चक्रवर्त्तिनः। मेघस्य काली कृष्णश्च नीलपाथोजसंहतिः। इन्दीवरं वनं दाता कृष्णार्थी भ्रमराश्वलो। शरन्मेघस्य चन्द्रादिशुक्लवर्णपदार्थकाः। कन्दर्पस्य नलश्चन्द्र आश्विनौ च पुरूरवाः। दीपस्य चित्रभानुश्च प्रतापः भास्करं तथा। वायोः शीघ्रगवस्तूनि कीर्त्तितानि पुरातनैः। अश्वश्च वायुर्हरिणो मनश्च, ह्लादिनो गिरिः। मेघस्तमालवृक्षश्च तमसाञ्च समुच्चयः। सोमकोशैश्चवाचन्द्रः कैलासैरावतौ मतौ। शिवस्य पीतवत् सर्वं कृष्णस्य सजलो घनः। तमालवृक्षो भ्रमरश्चेन्दीवरकं नभः। नीलकान्तमणिर्नीलपद्मं रामश्च पूर्ववत्। नवदूर्वादलं इन्द्रपद्मकं चाधिकं पुनः। लक्ष्म्यास्तु पार्वती चन्द्रकान्तिः सीता रतिस्तथा। द्रौपदी पद्मकान्तिश्च पुराणैः परिकीर्त्तितः। शरज्ज्योत्स्नाश्चन्द्रकला कैलासाचलकान्तयः। शुक्लवर्णपटादीश्च, विपक्षेषु समुद्रकः। ब्रह्माण्डं पण्डितमनस्तथा नारायणोदरम्। समुद्रस्य च मेघादि वस्तु कृष्णं च यद्भवेत्। विदूरथश्च भारतश्च तथापस्मारिरोगवान्। पुरस्य स्वर्गः कैलासो यत् इहत् स्यात् मनोरमम्। रथस्य पृथ्वी वैकुण्ठपुरी पोतश्च पुष्पकम्। कामिन्यास्तु तड़ित्तारा स्वर्णवर्णा च केतकी। उपमानतया स्वर्णलतापि परिकीर्त्तिता। नायकस्य तु कन्दर्प ऐलचन्द्रौऽश्विनौ तथा। सभायास्तु सुधर्मा स्यात् गङ्गा सूर्य्यस्य मण्डलम्। गण्डकी पर्वतो मेरुरुपमानतया मतः। पण्डितस्य सुराचार्य्य ऋषिः शुक्रः सरस्वती। शीरामस्तु विरहिणः शिशोऽञ्जो दुःखितो जनः। उन्मत्तचन्दनतरुः शिवशेखरचन्द्रमाः। वाड़वाग्नियुताब्धिश्च वल्मीकोऽद्रीन्द्रगेश्वरः। दातुः कर्णः कल्पवृक्षः कामधेनुर्बलीनरः। रोहणोऽब्धिरजदवसौ जैमिनिश्च युधिष्ठिरः। वसन्तर्त्तोर्मतं मद्यमुन्मादो मलयानिलः। यमोऽग्निर्विषसर्पौ च स स्यात् विरहिणं प्रति। ग्रीष्मर्त्तोरग्निर्विरहोऽहिनिश्वासस्तथा पुनः। विरहिणश्च निश्वास उपमानतया मतः। वर्षर्त्तोरञ्जनी व्योम नारायणसमुद्रकाः। शरदः काशपुष्पादिरूपशीतांशुचामराः। ऐरावतगजा ज्ञेया उपमानतया बुधैः। शीतर्त्तोरुपमानं स्यात् राज्यशून्यस्तु भूपतिः। तथापस्माररोगाढ्या विद्वद्भिः परिकीर्त्तितः। शिशिरर्त्तोस्तु गुणिनः समृद्धोऽद्रिधराश्विनौ। राजागमनकालश्च मदनोऽपि मतो विदाम्। सचिवस्योपमानं तु सुराचार्य्यः प्रकीर्त्तितः"।

साधक त्रि० साध—ण्वुल्, सिध—णिच्-ण्वुल् साधादेशः वा। १साधनकर्त्तरि २कारके तन्त्रोक्ते ३मन्त्रादिसिद्धिकारके शिष्ये च "साधकः सिद्धिमाप्नुयात्" इति तन्त्रम्। स्त्रियां टाप् अत इत्त्वम्। साधिका सा च ४दुर्गायां "साधनात् सिद्धिरित्युक्ता साधिका वाऽथ ईश्वरी" देवीपु०४५ अ०। ५जन्मतारादिषु केषु षष्ठपञ्चदशचतुर्विंशनक्षत्रेषु पु० "जन्मसम्पद्विपत् क्षेम प्रत्यरिः साधको वधः। मित्रं परममित्रञ्च जन्मर्क्षात् गणयेत् त्रिधा" ज्यो०त०। ६पतुमापके त्रि०।

साधकतम न० अतिशयेन साधक तमप् "साधकतमं करणम्" पा० परिभाषिते करणे कारकभेदे।

साधन न० सिध–णिच्–साधादेशे यथायथं करणे भावे ल्युट् कर्त्तरि ल्यु वा। १करणरूपे कारकभेदे २मारणे ३मृतसंस्कारे अग्निदाने ४गतौ ५द्रव्ये ६धने ७अर्थदापने दानप्रापणे ८उपकरणे १०इन्द्रियद्वारादियुक्तसामग्र्याम् ११अनुगमने अमरः। १२सैन्ये १३उपाये १४सिद्धौषधे १५मेढ्रे मेदि० १६मैत्रे १७ऊधसि १८मित्रे धरणिः। १९कारके २०प्रमाणे हेमच०। २१व्याप्ये त्रिका०। २२मोचने २३जये अजयः २४ब्रह्मविद्याहेतौ नित्यानित्यवस्तुविवेकवैराग्यशमादिषट्कमोक्षेच्छाचतुष्टये च। युच्। साधनाऽपि उपासनायां निष्पादनायाञ्च स्त्री।

साधनाप्रसिद्धि स्त्री हेत्वदोषभेदे सा च साधने साधनतावच्छेदकधर्माभावरूपा यथा "पर्वतो वह्निमान् काञ्चनधूमादित्यादौ धूमनिष्ठः काञ्चनत्वाभावः साधनाप्रसिद्धिः।

साधर्म्य न० सधर्मस्य समानधर्मस्य भावः ष्यञ्। १स्वकीयसाधारणधर्मरूपे लक्षणे २स्वहुगतधर्मे "यदुक्तं यस्य साधर्म्यम्" भाषा०। समानो धर्मो यस्य तस्य भावः ष्यञ्। ३समानधर्मे यथा पद्ममिव चन्द्रं सुखमित्यादौ सौन्दर्यमुभयोः समानधर्मः।

साधर्म्यसम पु० साधर्म्येण समः। स्थापनाहेतुदूषके जात्युत्तरभेदे "साधर्म्योपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यसमः" गौ० "वादिनाऽन्वयेन व्यतिरेकेण वा साध्ये साधिते प्रतिवादिना साधर्म्यमात्रप्रवृत्तहेतुना तदभावस्यापादनम् यथा शब्दोऽनित्यः कृतकत्वाद् घटवत् व्यतिरेकेण वा व्योमवदित्युपसंहृते नैतदेवं यद्यनित्यघटसाधर्म्यात् नित्याकाशवैधर्म्याद्वाऽनित्यः स्यात् नित्याकाशसाधर्म्यादमूर्त्तत्वात् नित्यः स्यात् विशेषो वा वक्तव्यः" वृत्तिः भाष्ये तु निदर्शनान्तरछक्त्वा व्याख्यातं यथा "क्रियावानात्मा द्रव्यस्य क्रियाहेतुगुणयोगात् द्रव्यं लोष्टः क्रियाहेतुगुणयुक्तः क्रियावान् तथा चात्मा तस्मात् क्रियावानिति एवमुपसंहृते परः साधर्म्येणैव प्रत्यवतिष्ठते। निष्क्रिय आत्मा विभुनो द्रव्यस्य निष्क्रियत्वात् विभु चाकाशं निष्क्रियं च तथा चात्मा तस्मान्निष्क्रिय इति न चास्ति विशेषहेतुः क्रियावत्साधर्म्यात् क्रियावता भवितव्यं न पुनरक्रियसाधर्म्यात् निष्क्रियेणेति विशेषहेत्वभावात् साधर्म्यसमः प्रतिषेधो भवति"।

साधारण त्रि० सह धारणया स्वार्थेऽण्। १सदृशे अमरः। २अनेकसम्बन्धत्वेकस्मिन् ३धने "साधारणं समाश्रित्य यत्किञ्चिद्वाहनादिकम्" स्मृतिः। स्त्रियां गौरा० ङीष्। सा च ४कुञ्चिकायां ४वेश्यादिनायिकायाञ्च "यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः" भाषा० उक्ते ५हेत्वाभासभेदे पु०। यथा वह्निमान् द्रव्यत्वादित्यादौ द्रव्यत्वहेतुः सपक्षे पर्वते विपक्षे ह्रदादौ च वर्त्तते इति साधारणः। स चानैकान्तिकभेदः "आद्यः साधारणस्तु स्यादन्योऽसाधारणो मतः। तथैवानुपसंहारी त्रिधाऽनैकान्तिको मतः" भाषा०।

साधारणधर्म्म पु० कर्म०। "अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः। दमः क्षमार्जवं दानं धर्मं साधारणं विदुः" इत्युक्ते अहिंसादौ सर्ववर्णाश्रमतुल्ये १धर्मे। न्यायाद्युक्ते २संशयहेतौ समानधर्मे च तथाहि रङ्गं रजतं नवेति संशये रङ्गरजतयोः सामान्यधर्मश्चाकचिक्यशुभ्रत्वादिर्हेतुः। ३प्रजासर्जनरूपे जन्तुमात्रधर्मे च "प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थञ्च मानवाः। तस्मात् साधारणो धर्मः श्रुतौ पत्न्या सहोदितः" मनुः। स च धर्मः सर्वेषां जन्तूनां साधारण इति मानवा इत्युपलक्षणम्।

साधारणस्त्री स्त्री कर्म०। वेश्यायां हेमच०। सा च नायिकाभेदः। "अथ नायिका त्रिविधा स्वाऽन्या साधारणस्त्रीति" सा० द० नायिकाशब्दे ४०४२ पृ० तल्लक्षणं दृश्यम। सामान्यस्त्रीप्रभृतयोऽप्यत्र।

साधारणी स्त्री साधयति साधा अरणीव। १कुञ्चिकायां हेमच० साधारणस्तत्वासहे स्त्रीप्रभृती स्त्री ङीष् स्वार्थे ष्यञ्। साधारण्य कुञ्चिकायां न०। भावे ष्यञ्। साधर्म्यधर्मे च।

साधिका स्त्री साधयति शमयति सर्वोपशमम् शम–णिच्–साधादेशः ण्वुल्। १सुषुप्तौ हेमच०। सिध–णिच् ण्वुल्। २कार्य्यसाधिकायां स्त्रियाञ्च।

साधित त्रि० सिध–णिच्–क्त। १दापिते अमरः २प्रमाणादिना उद्भाविते च "साधितात् दशकं शतमि"ति स्मृतिः ३निष्पादिते ४शोधिते च।

साधिदैव त्रि० सह अधिदैवेन स्वार्थे अण् द्विपदवृद्धिः। अधिदैवतासहिते। साधिभूतसाधियज्ञावपि परमेश्वरे।

साधिष्ठ त्रि० अतिशयेन साधुः बाढो वा इष्ठन् साधादेशः टिलोपो वा। १अत्यन्तदृढे अमरः २अतिसाधौ ३अतिशोभने च। ४अत्यायथ्ये मेद० ५न्याय्ये हेमच०।

साधिष्ठान त्रि० सह अधिष्ठानेन । १अधिष्ठिते तन्त्रोक्ते षट्चक्रमध्ये सुषुम्णामध्यस्थे चक्रभेदे न० चक्रशब्दे २८०८ पृ० दृश्यम् ।

साधीयस् त्रि० अतिशयेन साधुः वाढो वा इयसुन् टिलोपः साधादेशो वा । १साधुतरे च २अत्यन्तदृढे अमरः । ३न्याय्ये हेमच० स्त्रियां ङीप् ।

साधु त्रि० साध-उन् । १उत्तमकुलजाते अमरः । २सुन्दरे ३उचिते च । स्त्रियां वा ङीप् । ४मुनौ ५जिने च पु० हेमच० "न प्रहृष्यति सम्माने नापमाने च कुप्यति । न क्रुद्धः परुषं ब्रूयादेतद्धि साधुलक्षणम्" गरुडपु० ६सत्धर्मयुते ६जने ७वार्द्धुषिके ८मनोहरे मेदि० । साधुलक्षणान्तरं यथा "यथालब्धेऽपि सन्तुष्टः समचित्तो जितेन्द्रियः । हरिपादाश्रयो लोके विप्रः साधुरनिन्दकः । निर्वैरः सदयः शान्तो दम्भाहङ्कारवर्जितः । निरपेक्षो मुनिर्वीतरागः साधुरिहोच्यते । लोभमोहमदक्रोधकामादिरहितः सुखी । कृष्णाङ्घ्रिशरणः साधुः सहिष्णुः समदर्शनः" पद्मोत्त०ख० ९९अ० "त्यक्तात्मसुखभोगेच्छाः सर्वसत्त्वसुखैषिणः । भवन्ति परदुःखेन साधवो नित्यदुःखिताः । परदुःखातुरा नित्यं स्वसुखानि महान्त्यपि । नापेक्षन्ते महात्मनः सर्वभूतहिते रताः । परार्थमुद्यताः सन्तः सन्तः किं किं न कुर्वते । तादृगप्यम्बुधेर्वारि जलदैस्तत् प्रदीयते । एक एव सतां मार्गो यदङ्गीकृतपालनम् । दहन्तमकरोत् क्रोडे पावकं यदपांपतिः । आत्मानं पीडयित्वापि साधुः सुखयते परम् । ह्लादयन्नाश्रितान् वृक्षो दुःखञ्च सहते स्वयम्" वह्निपु० ।

९व्याकरणव्यङ्ग्यसाधुताजात्याश्रये शब्दे "असपभ्रंशताऽनादिर्वाऽभ्युदययोग्यता । व्याक्रियाव्यञ्जनीया वा जातिः कापीह साधुता" हरिः । तथा च अपभ्रंशभिन्नत्वमनादित्वम् अभ्युदयसाधनप्रयोगविषयत्वं व्याकरणव्यङ्ग्यजातिर्वा साधुता इति तदर्थः । स च ईश्वरसङ्केताश्रयः शब्द इति नैयायिकाः । तथा च यः शब्दो यस्मिन्नर्थे ईश्वरेण सङ्केतितः स शब्दस्तदर्थे साधुः । वैयाकरणमते यः शब्दः यस्मिन्नर्थे व्याकरणे व्युत्पादितः स शब्दस्तत्र साधुः यथा "कर्मणि द्वितीया" पा० द्वितीया कर्मार्थे साधुः ।

साधुज त्रि० साधौ सत्कुले जायते जन-ड । उत्तमकुलोद्भवे शब्दर० ।

साधुधी स्त्री ६त० । १श्वश्र्वां हारा० । २सुन्दरबुद्धियुते त्रि० । कर्म० । ३साधुबुद्धौ स्त्री । [२उत्तमकुसुमे ।

साधुपुष्प न० साधु पुष्पं यस्य । १स्थलपद्मे शब्दमा० । कर्म० ।

साधुवाह पु० कर्म० । विनीते सुशिक्षिते घोटके हेमच० ।

साधुवाहिन् पु० साधु यथा तथा वहति णिनि । १विनीतेऽश्वे अमरः २सुन्दरवहनकर्त्तरि त्रि० ।

साधुवृक्ष पु० नित्यकर्म० । १कदम्बवृक्षे शब्दमा० । २वरुणवृक्षे राजनि० । ३शोभनवृक्षमात्रे च ।

साध्वृत न० सह आवृतेन सहस्य सः । १आशुपर्ण्ये २मयूरशेफूले ३दर्भवीथ्याश्च अजयः ।

साध्य पु० सिध-णिच्-यत् । "मनोमन्ता तथा प्राणो नरोऽपानश्च वीर्य्यवान् । निर्भयो नरकश्चैव दंशो नारायणो वृषः । प्रभुश्चेति समाख्याताः साध्या द्वादश देवताः" इत्युक्ते द्वादशसंख्यके १गणदेवताभेदे ज्यो० उक्ते विष्कम्भादिषु योगेषु २एकविंशे योगे च । ३साधनीये त्रि० मेदि० । ४अष्टादशविवादेषु प्रमाणादिना उन्नाय्ये पदार्थे "प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम् । निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः" इत्युक्ते व्यवहारे साधनार्हे प्रतिज्ञेये ४पक्षे पु० "ऋणादिषु विवादेषु स्थिरप्रायेषु निश्चितम् । ऊने वाऽभ्यधिके चार्थे प्रोक्ते साध्यं न सिध्यति" कात्या० । ५अनुमित्या साधनीये वह्न्यादौ च यथा वह्निमान् धूमादित्यादौ विधाधर्य्यमितो वह्निः साध्यः । साध्यमस्त्यस्य अर्श आद्यच् । ६साध्यवति पक्षे पु० "साध्यनिर्देशः प्रतिज्ञे"ति गो० सूत्रम् । साध्यवत्तया पक्षनिर्देश इति दीधितिकारः तन्त्रोक्ते ७मन्त्रमात्रे प्राह्यमन्त्रस्य स्वानुकूलताज्ञापके २८८पृ० उक्ते अकथहचक्रस्थे द्वितीयपञ्चमादिकोष्ठस्याद्याक्षरके "सिद्धः साध्यः सुसिद्धोऽरिः क्रमात् ज्ञेया मनीषिभिः" इत्युक्ते ८मन्त्रभेदे । १०देवमात्रे मेदि० । व्याकरणोक्ते लिङ्गसंख्यानन्वयिक्रियाभेदे क्रियाशब्दे २२१७पृ० दृश्यम् । "साध्यरूपा क्रिया तत्र धातुरूपनिबन्धना" हरिः । "साध्यस्य साधनाकाङ्क्षा" हरिः ।

साध्यता स्त्री साध्यस्यानुमितिविधेयस्य भावः तल् । अनुमितिविधेयतारूपे न्यायोक्ते १विषताभेदे । २इच्छाविषयताभेदे च । यथा घटोजायतामित्यत्र घटीया साध्यताख्या विषयता ।

साध्यताघटकसम्बन्ध पु० ६त० । कर्म० । येन सम्बन्धेन साध्यस्य अनुमेयता तादृशे सम्बन्धे यथा पर्वतः संयोगेन वह्निमान् धूमात् इत्यादौ संयोगः ।

साध्यतावच्छेदक पु० साध्यतामवच्छिनत्ति विशेषयति अव+

छिद-ण्वुल् । येन रूपेण सम्बन्धेन वा यस्य साध्यताख्या विषयता । तस्मिन् १सम्बन्धे २धर्मे । यथा वह्निमान् धूमादित्यत्र वह्निः साध्यः तस्य साध्यतां वह्नित्वमवच्छिन-त्तीति वह्नित्वं साध्यतावच्छेदकम् । एवं संयोग-सम्बन्धोऽपि ।

साध्यसम पु० १हेत्वाभासभेदे "साध्याविशिष्टः साध्यत्वात् सा-ध्यसमः" गौ०सू० "द्रव्यं छायेति साध्यम् । गतिमत्त्वा-दिति हेतुः । साध्येनाविशिष्टः साधनीयत्वात् साध्य-समः । अयमप्यसिद्धत्वात् साध्यवत् प्रज्ञापयितव्यः । साध्यं तावदेतत् किं पुरुषवच्छायापि गच्छति ? आहो स्विदावरकद्रव्ये संसर्पत्यावरणसंतानादसंनिधिसंतानोऽयं तेजसो गृह्यत इति ? सर्पता खलु द्रव्येण यो यस्ते-जोभाग आव्रियते तस्य तस्यासंनिधिरेवावच्छिन्नो गृह्यत इति । आवरणं तु प्राप्तिप्रतिषेधः" वात्स्या० २जात्युत्तरभेदे "उभयसाध्यत्वात् साध्यसमः" गौ० सू० "हेत्वाद्यवयवसामर्थ्ययोगी धर्मः साध्यः । तं दृष्टान्ते प्रसजतः साध्यसमः । यदि यथा लोष्टस्तथात्मा प्राप्तस्तर्हि यथात्मा तथा लोष्ट इति । साध्यश्चायमात्मा क्रियावानिति कामं लोष्टोऽपि साध्यः । अथ नैवम् । न तर्हि यथा लोष्टस्तथात्मा" वात्स्या० । तत्र "पक्षदृष्टा-न्तादेः प्रकृतसाध्यतुल्यतापादनम्" गौ० वृ० दृष्टान्तस्य पक्षतुल्यताकथनम् । यथा, आत्मा सक्रियः क्रियाहेतु-गुणवत्त्वादित्यादौ यदि यथा लोष्टस्तथात्मेति त्वयोच्यते तदा यथात्मा तथा लोष्ट इत्यप्यायातम् । तथा च यद्यात्मनि क्रियावत्त्वं साध्यते । तर्हि लोष्टेऽपि तत् साधनीयम् । नेति चेत्तर्हि यथा लोष्टस्तथात्मेति न वाच्यम् । लोष्टस्येव आत्मात्मनश्चो लोष्ट इत्यत्र निया-मकाभावादिति" नीलकण्ठः ।

साध्यसिद्धि स्त्री साध्यस्य सिद्धिः विनिर्णयः । साध्यस्य व-ह्न्यादेः अनुमित्यादिना साधनाधीने १निर्णये २तन्नि-ष्पत्तौ । साध्यस्य प्रतिज्ञेयार्थस्य सिद्धिर्निर्णयो यत्र । व्यव-हारे प्रतिज्ञातार्थस्य प्राड्विवाकादिभिः विनिर्णयरूपे ३व्यवहारपादभेदे च ।

साध्याप्रसिद्धि स्त्री ६त० साध्ये साध्यतावच्छेदकत्वाभावरूपे हेत्वाभासभेदे । यथा पर्वतः काञ्चनमयवह्निमान् धूमा-दित्यादौ वह्निनिष्ठं काञ्चनमयत्वाभावः साध्याप्रसिद्धिः ।

साध्वस न० साधु+अस्यति अस-अच् । भये अमरः ।

साध्वी स्त्री साधु-ङीप् । १मेदायां राजनि० "आज्ञोत्ते उदिता हृष्टे प्रोषिते मलिना कृशा । मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता" उक्तलक्षणायां २स्त्रियां तदर्थे संज्ञात्वात् न पुंवद्भावः । साधुतायुक्ते ३स्त्रीमात्रे च । तदर्थे पुंवद्भाव इति भेदः ।

सानन्द त्रि० सह आनन्देन । १आनन्दसहिते "सानन्दं नन्दिहस्ताहतमुरजरवाहूतकौमारबर्हि" मालतीमा० । २ध्रुवकभेदे "अष्टादशाक्षरैर्युक्तो- यत्रोक्तर्षपदो ध्रुवः । कद्दल्लसंज्ञके ताले सानन्दो वीरके रसे" सङ्गीतदा० । ३गुच्छकरञ्जे पु० राजनि० ।

सानन्दूर पु० तीर्थविशेषे "सानन्दूरेति विख्यातं भूमे ! गुह्यं परं मम । उत्तरे तु समुद्रस्य मलयस्य च दक्षिणे । तत्र तिष्ठामि वसुधे ! उदीर्णो दिशमाश्रितः । प्रतिमा वै मदीयास्ति नात्युच्चा नातिनीचका । आयसीं तां वद-न्त्येके अन्ये ताम्रमयीं तथा । कांस्यां रीतिमयीमन्ये केचित् सीसकनिर्मिताम् । शिलामयीमित्यपरे महा-श्चर्यस्वरूपिणीम्" वराहपु० ।

सानसि पु० सन इण् आगुक् च । सुवर्णे उणादिकोषः ।

सानिका स्त्री सन-ण्वुल् टापि अत इत्त्वम् । वंश्यां शब्दच० ।

सानु पुंन० सन-ञुण् । १पर्वतस्य समभूमिदेशे प्रस्थे अमरः २वने ३वातसमूहे ४पथि ५अग्रे ६कोविदे ७अर्के मेदि० ८पल्लवे च जटा० ।

सानुज न० सानौ जायते जन-ड । १प्रपौण्डरीके राजनि० २तुम्बुरुवृक्षे पु०राजनि० । सह अनुजेन । ३अनुजसहिते त्रि० ।

सानुमत् पु० सानुरस्त्यस्य मतुप् । पर्वते हेमच० ।

सानेयी स्त्री सह आनेयेन स्वरेण सहस्य सः गौरा० ङीष् । वंश्यां शब्दर० । स्वार्थे क ह्रस्वः । सानेयिकाऽप्यत्र ।

सान्तपन न० सन्तापयति सम्+तप-णिच् ल्युट्-स्वार्थेऽण् सन्तपनाय साधु अण्-वा ।

"गोमूत्रं गोमय क्षीरं दधि सर्पिः कुशोदकम् । एक-रात्रोपवासश्च कृच्छ्रं सान्तपनं विदुः" मनूक्ते इत्युक्त-साध्ये व्रतभेदे एकदिने गोमूत्रादिषट्कमात्रपानं परदिने उपवास इति द्व्यहसाध्यताऽस्य ।

सान्तर न० सह अन्तरेण सहस्य सादेशः । १विरले जटा० २व्यवधानसहिते त्रि० । [नसाधने विधानभेदे ।

सान्तानिक त्रि०सन्तानः प्रयोजनमस्य अन्तना० ठक् । सन्ता-

सान्त्व आनुकूल्यकरणे अद० चु० उभ० सक० सेट् । सान्त्व-यति ते असमान्वत् त सान्त्वापयतीत्यन्ये अनेकाच्कत्वात् न षोपदेशः ।

सान्त्व न० सान्त्व–अच्। १अत्यर्थमधुरे २आनुकूल्ये मेदि०। ३योत्यमनःप्रीतिदयाक्ये प्रियवाक्यादिना क्रोधोपशमनरूपे सामनि च अमरः।

सान्त्वन न० सान्त्व–ल्युट्। १आनुकूल्यकरणे प्रियवादादिना क्रोधाद्युपशमने च। युच्। अत्रैव स्त्री।

सान्दीपनि पु० सन्दीपनस्यापत्यम् इञ्। रामकृष्णयोराचार्य्ये अवन्तिपुरवासिनि मुनिभेदे।
"विदिताखिलविज्ञानौ तत्तज्ज्ञानमयावपि। शिष्याचार्य्य क्रमं वीरौ ख्यापयन्तौ यदूत्तमौ। ततः सान्दीपनिं काश्यमवन्तिपुरवासिनम्। अस्त्रार्थं जग्मतुर्वीरौ बलदेव जनार्दनौ" विष्णुपु० ५अंशे २१अ०।

सान्द्र त्रि०सदि-रक् सह अन्द्रेण। १निविड़े अमर' २मृदौ मेदि०। ३स्निग्धे ४मनोज्ञे शब्दर०। ५वने न० मेदि०।

सान्द्रपुष्प पु० सान्द्रं पुष्पमस्य। विभीतकवृक्षे शब्दर०।

सान्द्रस्निग्ध त्रि० सान्द्रं स्निग्धः। १अतिस्निग्धे शब्दर०। २अतिमनोहरे च।

सान्धिक पु० सन्धा सुराद्यावनं शिल्पं वेत्ति ठक्। १शौण्डिके शब्दमा०। सन्धिः प्रयोजनमस्य ठञ्। २सन्धिकर्त्तरि त्रि०। [सन्ध्याकालिके।

सान्ध्य त्रि० सन्ध्यायां भवः सन्धिवेला० अण् न ठञ्।

सान्ध्यकुसुमा स्त्री ६ब०। त्रिसन्धिपुष्पवृक्षे राजनि०।

सान्नाय्य न० सन्नीयते सम्+नी–ण्यत् नि०। मन्त्रादिना संस्कार्य्ये हवादौ अमरः। [कल्पव" आवाहनमन्त्रः।

सान्निध्य न० सन्निधिरेव ष्यञ्। नैकट्ये "सान्निध्यमिह

सान्निपातिक त्रि० सन्निपातात् त्रिदोषविकारात् आगतः तेन निर्वृत्तो वा ठञ्। सन्निपातात्जाते रोगे सन्निपातशब्दे ५२१६ पृ०दृश्यम् "विकारे सन्निपातजे" सुश्रुतः।

सान्यासिक पु०सन्न्यासः प्रयोजनमस्य ठक्। सन्न्यासिनि हेमच०

सापत्न पु० सपत्न एव स्वार्थे अण्। १शत्रौ अमरः; सपत्न्यां भवः तस्या अपत्यं वा यञ्। १सपत्नीपुत्रे। अण्। सापत्नोऽप्युभयत्र।

सापिण्ड्य न० सपिण्डस्य भावः ष्यञ्। दायाशौचरक्षाद्युपयोगिनि ज्ञातिधर्मभेदे "सापिण्ड्यं साप्तपौरुषमि"ति स्मृतिः। सपिण्डशब्दे ५२२० पृ० दृश्यम्।

साप्तपदीन न० सप्तभिः पदैः उच्चारितैर्निर्वृत्तम् खञ्। सख्ये मैत्र्याम् अमरः "साप्तपदीनं सख्यम्" पा०।

साप्तपौरुष त्रि० सप्त पुरुषान् व्याप्नोति अण् उभयपदवृद्धिः। सप्तपुरुषव्यापके।

साफल्य न० सफलस्य भावः ष्यञ्। सामर्थ्ये सम्पूर्णतायाञ्च

साम सान्त्वने अद०चु०उ०स०सेट्। सामयति ते अससामत् त अनेकाच्कत्वात् न मोपदेशः।

सा(षा)म सान्त्वे चु०उभ० सक०सेट्। सामयति अयं मोपदेश एव व्याप्यः दुर्गादासेन दन्त्यादित्वमस्योक्तमप्रमाणम्।

सामक पु० साम–ण्वुल्। ऋणशोध्ये त्रिका०। समकमेव अण्। २वृद्धिरहिते मूलमात्रे ऋणे मिता०।

सामग पु० साम तद्वेदं गायति। सामवेदाध्यायिनि जटा०।

सामगर्भ पु० साम गर्भे यस्य। विष्णौ शब्दर०।

सामग्री स्त्री समग्रस्य भावः ष्यञ् स्त्रीत्वपक्षे ङीष् ङीपि यलोपः। १समस्ततायाम्। स्त्रीत्वाभावपक्षे सामग्र्य तत्रार्थे न०। "प्रायेण सामग्र्यविधौ गुणानाम्" कुमारः। स्वार्थे ष्यञ्। २करणसमूहे ३द्रव्ये च स्त्री।

सामज पुंस्त्री० साम्नो वेदभेदात् जायते जन–ड। १गजे। स्त्रियां ङीष्। तस्य तज्जन्मकथा पालकाव्ये उक्ता तच्च सामयोनिशब्दे दृश्यम्। २सामपाठजे स्वरादौ त्रि०मेदि०

सामञ्जस्य न० समञ्जसस्य भावः ष्यञ्। औचित्ये।

सामन् न० सो–मनिन्। "अग्ने आया हि" इत्यादिके १वेदभेदे तत्रोक्तानृचमधिकृत्य गेये २गानभेदे "अच्छ्यच्छू ढं साम गीयते" छान्दोग्योप०। साम्नो गानरूपत्वं गानशब्दे २५७२पृ० दृश्यम् तद्भेदादिकं वेदगाने ऊहगानादौ सूत्रपन्थे च दृश्यं सामवेदस्य विभागादि चरणव्यूहे दृश्यम्। तच्छाखाभेदाः वेदशब्दे ४९३४ पृ० दृश्याः। राज्ञां "सामभेदस्तथा दानो दण्डश्चेत्युक्ते ३उपायभेदे तस्य विषयादिकं मत्स्यपु० २२१अ० उक्तं यथा
मत्स्य उवाच "सामभेदस्तथा दानो दण्डश्च मनुजेश्वर!। उपेक्षा च तथा माया इन्द्रजालञ्च पार्थिव!। प्रयोगाः कथिताः सप्त तन्मे निगदतः शृणु। द्विविधं कथितं साम तथ्यञ्चातथ्यमेव च। तत्राप्यतथ्यं साधूनामाक्रोशायैव जायते। तत्र साधुः प्रयत्नेन सामसाध्यो नरोत्तम!। महाकुलीना ह्यजवो धर्मनित्या जितेन्द्रियाः। सामसाध्या न चातथ्यन्तेषु साम प्रयोजयेत्। तथ्यं साम च कर्त्तव्यं कुलशीलादिवर्णनम्। तथा तदुपचाराणां कृतानाञ्चैव वर्णनम्। अनयैव तथा युक्त्या कृतज्ञाख्यापनं स्वकम्। एवं साम्ना च कर्त्तव्या वशगाः धर्मतत्पराः। साम्ना यद्यपि रक्षांसि गृह्णन्तीति पराश्रुतिः। तथाप्येतदसाधूनां प्रयुक्तं नोपकारकम्। अतिशङ्कितमित्येवं पुरुषं सामवादिनम्। असाधवो

विजानन्ति तस्मात्तेषु वर्जयेत् । ये शुद्धवंशा ऋजवः प्रणीता धर्मे स्थिताः सत्यपरा विनीताः । ते सामसाध्याः पुरुषाः प्रदिष्टा मानोद्धता ये सततञ्च राजन्”। तत्र मित्रादिसामप्रकारः शुक्रनीतिपरिशिष्टे तत्र विशेषश्चोक्तो यथा

“त्वत्समस्तु मम नास्ति मित्रे साम इदं स्मृतम् । परस्परमनिष्टं न चिन्तनीयं त्वया मया । सुसाहाय्यं च कर्त्तव्यं शत्रौ साम प्रकीर्त्तितम्” । विषयभेदेनोपायभेदावलम्बनं तत्रोक्तं यथा “सर्वोपायैस्तथा कुर्य्यान्नीतिज्ञः पृथिवीपतिः । यथा स्वाभ्यधिका न स्युर्मित्रोदासीनशत्रवः । सामैव प्रथमं श्रेष्ठं दानन्तु तदनन्तरम् । सर्वदा भेदनं शत्रोर्दण्डनं प्राणसंशये । प्रबलेऽरौ सामदाने साम भेदोऽधिके स्मृतौ । भेददण्डौ समे कार्य्यौ दण्डः पूज्यः प्रहीणके । मित्रे च सामदाने स्तो न कचित् भेददण्डने । रिपोः प्रजानां सम्भेदः पीड़नं स्वजयाय वै । रिपुप्रपीड़िताद्यं च साम्ना दानेन संग्रहः । स्वप्रजानां न भेदेन नैव दण्डेन पालनम् । कुर्वीत सामदानाभ्यां सर्वदा यत्नमास्थितः” ।

४शत्रुवशीकरणोपायभेदे ५प्रियवाक्यादिना सान्त्वने च । ५पशुबन्धनरज्ज्वां स्त्री ङीप् ।

सामन्त पु० संश्लिष्टोऽन्तः एकदेशो यस्य समन्तस्तस्येश्वरः अण् । स्वविषयानन्तरवर्त्तिदेशाधिपे १नृपे अमरः । समन्ताद्भवः अण् टिलोपः । २श्रेष्ठप्रजायाम् (मण्डल) “यं परम्परया मौलाः सामन्ताश्च समागतम्” स्मृतिः ।

सामयिक त्रि० समये काले नियमे वा भवः उचितो वा ठञ् । १समयभवे २समयोचिते ३नियमबद्धे च “निजधर्माविरोधेन यस्तु सामयिको भवेत्” स्मृतिः ।

सामयिकाभाव पु० अत्यन्ताभावे त०दी० । केचित्तु, उत्पादविनाशशीलोऽत्यन्ताभावादतिरिक्तोऽयमभाव इत्याहुः ।

सामयोनि पु० साम सामगानं योनिरुत्पत्तिस्थानं यस्य । हस्तिनि, तेषाञ्च सामयोनित्वमुक्तं पालकाप्ये “सूर्य्यस्याण्डकपाले द्वे समानीय प्रजापतिः । हस्ताभ्यां परिगृह्याथ सप्त सामान्यगायत । गायतो ब्रह्मणस्तस्मात् समुत्पेतुर्मतङ्गजाः” इति । ६त० । २चतुर्मुखे ब्रह्मणि स्त्री ।

सामर्थ्य न० समर्थस्य भावः ष्यञ् । १देहजे बले २शक्तौ ३योग्यतायां मेदि० । ४सङ्गतार्थतायाञ्च । समासशब्दे ५२२२ पृ० दृश्यम् । योग्यता च कार्य्यजननयोग्यत्वं यथा परामर्शस्यानुमितियोग्यत्वम् । ५आकाङ्क्षायोग्यत्वादिमत्त्वे गौ० सू० यथा आप्तोक्तत्व वचनस्य । सङ्गतार्थताक्षपं च सामर्थ्यं द्विविधम् व्यपेक्षारूपम् एकार्थीभावश्चेति” वैयाक० । तत्राद्यं राज्ञः पुरुष इत्यादिवाक्ये उपयुज्यते । द्वितीयं राजपुरुष इत्यादि समासे उपयुज्यते”।

सामवायिक पु० समवाये प्रसृतः ठञ् । १मन्त्रिणि हेमच० तस्येदम् ठञ् । २समवायसम्बन्धिनि त्रि० ।

सामाजिक पु० समाजः सभावेशनं प्रयोजनमस्य । १सभ्ये अमरः । २समाजसम्बन्धिनि त्रि० ।

सामानाधिकरण्य न० समानाधिकरणस्य भावः ष्यञ् । १तदधिकरणवृत्तित्व२तद्वदनुयोगिकप्रतियोगिकत्वे सिद्धान्तलक्षणे गदा० यथा वह्निधूमयोः सामानाधिकरण्यम् । स्वावच्छेदकीभूतो यः कालस्तदवच्छिन्ना या स्वविशिष्टनिरूपिता यत्किञ्चिद्वृत्तिनिष्ठाऽऽधेयता सा । यथा यदा शिवाधयिषा नासीत् परं तु सिद्धिरासीत्तदा सिद्धिशिवाधयिषाविरहयोः सामानाधिकरण्यम् । ३अभेदान्वयबोधकत्वे । यथा नीलोघट इत्यादौ नीलपदघटपदयोः सामानाधिकरण्यम् ४धर्मितावच्छेदकयत्किञ्चिद्वृत्तिविषयकत्वे यथा पर्वतो वह्निमान् इत्यादौ यत्किञ्चित्पर्वतव्यक्तिविषयिकानुमितिः सामानाधिकरण्येनानुमितिः ।

सामान्य न० समानस्य भावः ष्यञ् । १सादृश्यप्रयोजकधर्मे यथा मुखं पद्ममिव चन्द्रमिवेत्यादौ सौन्दर्य्यादि । समानमेव स्वार्थे ष्यञ् । द्रव्यगुणकर्मसु तुल्यतया स्थितायां २जातौ भाषा० । जातिशब्दे ३०९२ दृश्यम् ।

सामान्यञ्च द्विविधं सखण्डमखण्डञ्च सामान्यलक्षणाशब्दे दीधित्युक्तिः । “सामान्यं विशेष इति बुद्ध्यपेक्षम्” कणा० । अनुगतधर्मत्वम् सामान्यमिति तल्लक्षणं तेन ३अनुगतधर्मस्वरूपं यथा प्रतियोगितासामान्ये यद्धर्मावच्छिन्नत्वादीति दीधितिः । ४अधिकविषयकत्वे यथा ब्राह्मणाय दधि दीयतां कौण्डिन्याय तक्रम् इत्यादौ दधिदानस्याधिकब्राह्मणविषयकता । सामान्यविषयकशास्त्रञ्च विशेषशास्त्रेण बाध्यते यथा “मा हिंस्यात् सर्वाभूतानीति” हिंसानिषेधः सर्वविषयः “वायव्यं श्वेतमालभेत” इत्यादि विशेषः हिंसाशास्त्रं तेन सामान्यशास्त्रं वैधेतरविषयएव प्रवर्त्तते । ५अर्थालङ्कारभेदे ४०७पृ० दृश्यम् ।

सामान्यच्छल न० छलभेदे “सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना” गौ० सू० “अहो खल्वसौ ब्राह्मणो विद्याचरणसम्पन्न इत्युक्ते कश्चिदाह । सम्भवति हि ब्राह्मणे विद्याचरणसम्पदित्यस्य वचनस्य विघातोऽर्थ-

विकल्पोपपत्त्या सम्भूतार्थकल्पनया क्रियते। यदि ब्राह्मणे विद्याचरणसम्पत् सम्भवति। व्रात्येऽपि सम्भवेत्। व्रात्योऽपि ब्राह्मणः। सोऽप्यस्तु विद्याचरणसम्पन्न इति। सामान्यनिमित्तं छलं सामान्यच्छलमिति" वात्स्या० "सामान्यविशिष्टसम्भवदर्थाभिप्रायेणोक्तस्यातिसामान्ययोगादसम्भवदर्थकत्वकल्पनया दूषणाभिधानम्। यथा ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसम्पदं साधयति इति कल्पयित्वा परो वदति। कुतो ब्राह्मणत्वेन विद्याचरणसम्पत्? व्रात्ये व्यभिचारात्" इत्तिः।

सामान्यतोदृष्ट न० सामान्यतः सामान्यस्य सामान्यात् वा दृष्टं दर्शनम्। १अनुमानभेदे "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टञ्च" गौ०सू० "पूर्ववदिति यत्र कारणेन कार्य्यमनुमीयते यथा मेघोन्नत्या भविष्यति वृष्टिरिति शेषवत्तत् यत्र कार्य्येण कारणमनुमीयते पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वञ्च दृष्ट्वा स्रोतसोऽनुमीयते भूता वृष्टिरिति। सामान्यतो दृष्टम् व्रज्यापूर्वकमन्यत्र दृष्टस्यान्यत्र दर्शनमिति। तथा चादित्यस्य। तस्मादस्त्यप्रत्यक्षाप्यादित्यस्य व्रज्येति" अथ वा यत्राप्रत्यक्षे लिङ्गलिङ्गिनोः सम्बन्धे केनचिदर्थेन लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यते। यथेच्छादिभिरात्मा। इच्छादयो गुणाः, गुणाश्च द्रव्यसंस्थानाः, तद् यदेषां स्थानं स आत्मेति" वात्स्या०। २कार्य्यकारणभिन्नलिङ्गके अनुमानभेदे यथा पृथिवीत्वेन द्रव्यत्वानुमानम्। ३अन्वयव्यतिरेक्यनुमाने च। यथा वह्निमान् धूमादित्यादि उभयव्याप्तिसम्भवेन अन्वोभयानुमानसम्भवात् गौ०सू०वृ०।

सामान्यप्रत्यासत्ति सामान्यं तज्ज्ञानं वा प्रत्यासत्तिः। अलौकिकप्रत्यक्षसन्निकर्षभेदे सामान्यलक्षणाशब्दे दृश्यम्।

सामान्यलक्षणा स्त्री सामान्यं साधारणधर्मः लक्षणं यस्याः। न्यायोक्ते अलौकिकप्रत्यक्षसाधने उपायभेदे सन्निकर्षशब्दे दृश्यम्। यथा एकघटज्ञाने घटत्वरूपसामान्यधर्मज्ञानात् सकलस्य घटत्ववतो ज्ञानम्।

तस्याः प्रत्यासत्तित्वं मणिकृता व्यवस्थापितं यथा "व्याप्तिग्रह इव सामान्यलक्षणाप्रत्यासत्त्या सकलधूमादिविषयकः कथमन्यथा पर्वतीयधूमे व्याप्तिग्रहे तस्मादनुमितिः सा चेन्द्रियसम्बद्धविशेषणतातिरिक्तैव वा तद्विशेष्यकप्रत्यक्षे तदिन्द्रियसन्निकर्षस्य हेतुत्वेनानागतादौ संयोगाद्यभावादिति वदन्ति"।

तस्याः अप्रत्यासत्तित्वमाशङ्क्य सिद्धान्तितं तत्रैव चिन्तामणिकृता "उच्यते यदि सामान्यलक्षणा नास्ति तदानुकूलतर्कादिकं विना धूमादौ व्यभिचारसंशयो न स्यात् प्रसिद्धधूमे वह्निसम्बन्धावगमात् कालान्तरीयदेशान्तरीयधूमस्य मानाभावेनाज्ञानात् सामान्येन तु सकलधूमोपस्थितौ धूमान्तरे विशेषादर्शनेन संशयो युज्यते"।

अत्र दीधितिः "अत्र च सामान्यं लक्षणं स्वरूपं यस्या इत्यर्थे सामान्यमेव प्रत्यासत्तिः सामान्यं लक्षणं निरूपकं यस्या इत्यर्थे तु तज्ज्ञानम्। तत्राद्यमाह सा चेन्द्रियेति इन्द्रियेण सम्बद्धं धूमादि तस्य विशेषणं तद्विशेष्यकज्ञानप्रकारो धूमत्वादिरित्यर्थः। विशेषणतेत्यत्र भावार्थो न विवक्षितः तत्र विशेषणत्वं यस्या इति बहुव्रीहिर्वा सम्बद्धपदस्यैव वा परम्परासम्बन्धसाधारणसम्बन्धविशेष्यकज्ञानप्रकारोऽर्थः, तथाच सैव विशेषणतेत्यर्थः। अत्र च बहिरिन्द्रियस्य लौकिकः सम्बन्धो ज्ञानस्य तदिन्द्रियजन्यत्वस्य नियामकम् एवञ्चाणुत्वेन यत्किञ्चिदणूपस्थितावपि सकलाणुगोचरो मानसो बोध इति वदन्ति एतेन धूलीपटले धूमभ्रमे तत्र च वह्निव्याप्तिग्रहे तत्रापतता धूमत्वेन धूमेषु व्याप्त्यग्रहात् पक्षधर्मतादर्शनाद् अनुमितिर्न स्यात् हेत्वभावेन परामर्शानुत्पादात् किन्तु धर्मिणि दोषवशात् ज्ञानेनाष्टद्रव्यत्वेन स्मरणप्रकारीभवता सामान्येन यत्सामान्येन वा लौकिकसन्निकर्षविलम्बेऽपि चाक्षुषज्ञानापत्तिरिति परास्तम्। सामान्यस्य स्वरूपलक्षणभेदेन द्वैधा स्वरूपे चाक्षुषमेव परम्परया सम्बद्धं प्रत्यासत्तिः येन सम्बन्धेन चेन्द्रियसम्बद्धे सामान्यं ज्ञायते तेन सम्बन्धेनाधिकरणानां प्रत्यासत्तिरिति"।

दीधितिकृता तु स्वमते सामान्यलक्षणायाः प्रत्यासत्तित्वं निराकृतं तत्र दृश्यम्। तच्च विस्तरभयादिह नोक्तम्।

सामान्या स्त्री समानैव स्वार्थे ष्यञ् स्त्रीत्वा० टाप्। साधारणस्त्रियां वेश्यायाम् "धनमात्रसाध्या सकलपुरुषाभिलाषा। सा त्रिधा। अन्यसम्भोगदुःखिता मानवती वक्रोक्तिगर्विता च सापि द्विविधा। प्रेमगर्विता सौन्दर्य्यगर्विता च" रसमञ्जरी। [२निन्द्यायाञ्च अमरः।

सामि अव्य० साम-इन्। १अर्द्धे "सामिघटिता" नैषधम्।

सामिधेनी स्त्री सम्-इन्ध-करणे ल्युट् नि०। अग्निसमिन्धनसाधने १ऋग्भेदे अमरः। २समित्काष्ठे मेदि०। सामिधेनीशब्दनिरुक्तिश्च शत० ब्रा० १।३।५।१ "समिन्धे सामिधेनीभिर्होता तस्मात् सामिधेन्यो नाम"। "इध्मेनाग्नि-

समिन्धनहेतुभूताः सामिधेनीर्विभाषन्ते तासां नाम निर्वक्ति सामधेनीभिः प्रवो वाजा इत्यादिभिर्ऋग्भिः" भा० तात्पर्यः आश्व०श्रौ०।।२।७। "अथ सामिधेन्यः प्रवो वाजा अभिद्यवोऽग्न आयाहि वीतये त्वमग्ने२ ईडेन्यो नमस्यस्तिरोऽस्मि दूतं हृणीमहे४ समिध्यमानो अध्वरे५ समिद्धो अग्न आहुतेति६।७ इ ।

सामीप्य न० समीपस्य भावः स्वार्थे वा ष्यञ् । १नैकट्ये २निकटे च "सामीप्यात्संविषयेव्याप्तेश्चाधारश्चतुर्विधः" मुग्ध० व्याकरणम् । [२समुद्रभवे त्रि०।

सामुद्र न० समुद्रे भवः अण् । (करकच) १लवणे हेमच० ।

सामुद्रक न०समुद्रेणर्षिणा प्रोक्तम् वुञ् । हस्तादिरेखादिना स्त्रीपुरुषशुभाशुभलक्षणज्ञापके समुद्रर्षिकृते १ग्रन्थभेदे "वामभागे तु नारीणां दक्षिणे पुरुषस्य च । निर्दिष्टं लक्षणं तेषां समुद्रेण यथोदितम्" इति सामुद्रकसार० समुद्रधृत" नैष०। सामुद्र स्वार्थे क । २समुद्रलवणे राजनि०

सामुद्रिक त्रि० समुद्रेण प्रोक्तं वेत्त्यधीते वा ठञ् । १स्त्रीपुरुषशुभाशुभलक्षणज्ञापकग्रन्थाध्येतरि २तद्वेत्तरि च ।

साम्परायिक न० सम्परायाय आपदे परलोकाय वा हितम् ठञ् । १युद्धे अमरः २परलोकसाधने त्रि० ।

साम्प्रतम् अव्य०सम्+प्र+तन्-ड । युक्ते । १उचिते २इदानीमित्यर्थे अमरः ।

साम्ब सम्बन्धे चु० उभ०सक० सेट् । साम्बयति ते असाम्बत् त । अयं षोपदेशइत्यन्ये ।   [राजनि० ।

साम्बर न० सम्बरदेशे भवम् अण् । सम्बरदेशोद्भवे लवणे

साम्भवी स्त्री सम्भवः अस्त्यस्य प्रज्ञाद्यण् गौरा० ङीष् । रक्तलोध्रे शब्दच० ।   [धर्मे ।

साम्य न समस्य भावः ष्यञ् । तुल्यत्वप्रयोजके साधारण-

साम्राज्य न सम्राजो भावः ष्यञ् । १सार्वभौमत्वे "भेजे साम्राज्यदीक्षितम् रघुः "सर्वाधिपत्यं राज्यं स्यात् साम्राज्यं दशवर्षके" इत्युक्ते २दशवर्षप्रमाधिपत्ये च

साय पु० सो-घञ्। १दिनान्ते अमरः । २वाणे मेदि० ।

सायंसन्ध्या स्त्री सायम् दिनान्ते सन्ध्या, तत्र सन्ध्यायते सम्+ध्यै-घञर्थे क वा । १दिनान्तसन्ध्यायाम् अमरः । २दिनान्ते उपास्यदेवताभेदे च । भावे अङ् । २तदुपासनायाम् ।

सायक पु० सो-ण्वुल् । १वाणे २खड्गे च अमरः ।

सायकपुङ्खा स्त्री सायकस्य पुङ्खो यस्याः ६ब०। शरपुङ्खे राजनि० ।

सायन्तन त्रि०सायम्भवः सायम्+ट्युल् तुट् च । दिनान्तभवे । स्त्रियां ङीप् । "सायन्तनीं तिथिप्रणयः" इति भट्टिः । "सन्ध्यां सायन्तनीं कुर्यात् द्वादशप्रादिष्वपि प्रिये ! । अकुर्वन्निरयं याति यतो नित्यागमक्रिया" इति योगतन्त्रे १पटले

सायिका स्त्री सो-ण्वुल् टाप् । क्रमस्थितौ शब्दर० ।

सायम् अव्य० सो-अमु । दिनान्ते "सायं सन्ध्याति वर्त्तते" इत्यमरटीका ।

सायाह्न पु०सायोऽह्नः एक०त० टच् समा० अह्नादेशः । १दिनान्ते "सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत्" इत्युक्ते पञ्चधाविभक्तदिनस्य त्रिमुहूर्त्तात्मके पञ्चमे २भागेऽंशे च ।

सायुज्य न० सह युनक्ति-युज-क्विप् सादेशः सयुज् तस्य भावः ष्यञ् । १सहयोगे पञ्चविधमुक्तिमध्ये २एकत्वरूपे मुक्तिभेदे च "सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत । दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" भाग० ३स्क०२६अ०। [इत् त अनेकाच्कत्वात् षोपदेशः

सार दौर्बल्ये अद० चु०उभ०सक० सेट् । सारयति ते असमार०

सार न० सृ-घञ्, सार-अच् वा । १जले २धने ३न्याय्ये त्रि० मेदि०। ४नवनीते न०राजनि०। ५लौहे भावप्र०। ६वने शब्दर० । ७वले ८स्थिरांशे ६मज्जनि पु० अमरः १०सर्वांशारे ११वायौ जटा० । १२रोगे धरणिः १३अतिदृढे १४पाशके पु० शब्दर० १५दध्यग्रे पु० हेमच० १६श्रेष्ठे १७वरे च त्रि० अमरः । १८परमेश्वरे "एवं शिवं ज्ञानमनन्तमच्युतं परात्परं ज्ञानमयं विशेषम् । अद्वैतमव्ययमर्णचन्त्यरूपं सारन्त्वेकं नास्ति सारं ततोऽन्यत् । यस्मादेतज्जायते विश्वमग्र्यं सर्वान् वीजं स्यात् यथावृस्थितञ्च । आकाशवन्मध्यनाकाशं इत्वा यश्चिन्त्यं वै म्रियते तस्य सारम् । अष्टाङ्गयोगैर्यदवाप्नुमिच्छन् योगी पुनर्जन्मरूपं सदैव । निवर्त्तते प्राप्य यदेव लोके तद्धि सारं सारमन्यन्न चास्ति" कालिकापु० २७अ०।

सारक पु० सारयति रेचयति सृ-णिच्-ण्वुल् । १जयपाले राजनि० । २रेचकद्रव्यमात्रे त्रि० ।

सारखदिर पु० कर्म० । विटखदिरे राजनि० ।

सारगन्ध पु० सारः श्रेष्ठोगन्धो यस्य । चन्दने शब्दच० ।

सारघ न० सरघाभिर्निर्वृत्तम् अण् । मधुनि क्षौद्रे जटा० ।

सारङ्ग पु०स्त्री० सृ-अङ्गच् । १चातकखगे अमरः । २हरिणे ३हस्ते मेदि०। ४भृङ्गे ५खगभेदे विश्वः । ६वर्णे ७राजहंसे

८चित्रमृगे ९वाद्यभेदे १०वस्त्रे शब्दर० ११नानावर्णे १२मयूरे १३भ्रमरे।१४चापे १५केशे १६स्वर्णे १७आभरणे १८पद्मे १९शङ्खे २०चन्दने २१कर्पूरे २२पुष्पे २३कोकिले २४मेघे २५सिंहे २६रात्रौ २७भूमौ २८दीप्तौ च नानार्थकोषः। सारमङ्गमस्य शक०। सारङ्गोऽपि चित्रमृगादौ। चित्रवर्णे त्रि०अमरः। सर्वत्र जातौ स्त्रियां ङीष्

सारङ्गिक पु० सारङ्गं मृगं हन्ति ठक्। व्याधे त्रिका०।

सारज न० सारात् दध्यग्रात् जायते जन-ड। नवनीते शब्दच०।

सारण न० सृ-णिच-ल्युट्। १गन्धद्रव्ये धरणिः। २अतीसाररोगे ३रावणसचिवभेदे च हेमच०। ४भद्रबलायां धरणिः ५आम्रातके शब्दच०।

सारणि(णी) स्त्री सृ-णिच्-अनि वा ङीप्। १क्षुद्रनद्यां २प्रसारिण्याम् उणादि० सङ्क्षेपेणाङ्कभेद सूचितग्रहगत्यादिबोधके ज्योतिषग्रन्थभेदे च।

सारण्ड पु० सृ-णिच् बा० अण्ड। सर्पाण्डे उणा०। [ञ्जयः।

सारतरु पु० सारप्रधानः अल्पप्रधानसारः। कदलीवृक्षे धन-

सारथि पु० सृ-अथिण्, सह रथेन सरथः घोटकः तत्र नियुक्तः इञ् वा। रथादिवाहनप्रेरके नियन्तरि अमरः। तल्लक्षणं मात्स्ये १८९ अ० यथा "निमित्तशकुनज्ञो हयशिक्षाविशारदः। हयायुर्वेदतत्त्वज्ञो भूमिभागविशेषवित्। स्वामिभक्तो महोत्साही सर्वेषां च प्रियंवदः। शूरश्च कृतविद्यश्च सारथिः परिकीर्त्तितः"।

सारदा स्त्री सारं ददाति दा-क। १सरस्वत्याम् शब्दर०। "लिखति यदि गृहीत्वा सारदा सर्वकालम्" शिवस्तवः। २सारदातरि त्रि०।

सारद्रुम पु० सारप्रधानो द्रुमः। खदिरवृक्षे राजनि०।

सारपादप पु०सारयति सारः नित्यक०। धामनिवृक्षे रत्नमा०

सारभाण्ड न० कर्म०। १अकृत्रिमपात्रे २स्वेष्टपात्रे च।

सारमिति पु० सारं यथार्थं मिनोत्यनेन मा-करणे क्तिच्। १वेदे हेमच० भावे क्तिन्। २सारज्ञाने स्त्री।

सारमूषिका स्त्री सारे मूषिकेवापहारकत्वात्। देवदालीवृक्षे राजनि०। [१कुक्कुरे० २तद्योषिति स्त्री ङीष्।

सारमेय पुंस्त्री सरमायाः कश्यपपत्न्याः अपत्यम् ढक्।

सारलौह न० लौहेषु सारः राज०। लौहसारे (इस्पात)

सारव त्रि० सरय्वां भवः अण् नि०। सरयूनदीभवे अमरः

सारस न० सरो नियतवसतिरस्य अण्। १पद्मे अमरः २स्त्रीकट्याभरणे च। सरं रवेण याति अण्। ३चन्द्रे ४स्वनामख्याते पक्षिणि पुंस्त्री० स्त्रियां ङीष्। सरस इदम् अण्। ५सरोवरसम्बन्धिनि त्रि०। "नद्यः शैलवराक्रान्ता यत्र संप्लुत्य तिष्ठति। तत्सरोज जलं ज्ञेयं सारसं परिकीर्त्तितम्" भावप्र० उक्ते ६जलभेदे "सारसं सलिलं बल्यं तृष्णाघ्नं मधुरं लघु। रोचनं तुवरं रूक्षं बद्धमूत्रमलं हितम्" तत्रोक्तास्तद्गुणाः।

सारसन न० सारं सनोति सन-अच्। १स्त्रीकट्याभरणे काञ्च्यां कञ्चुकदार्ढ्यार्थं मध्यबन्धे निबद्धे २पट्टिकादौ च अमरः।

सारस्वत पु० सरस्वती देवताऽस्य, सरस्वत्या इदं वा अण्। १बिल्वदण्डे २देशभेदे हेमच०। पञ्चगौडमध्ये ३ब्राह्मणभेदे ४सरस्वतीप्रतिपालितमुनिभेदे ५ब्राह्मदिनकल्पभेदे च "सारस्वतस्य कल्पस्येति" मत्स्यपुराणम् ६सरस्वतीसम्बन्धिनि त्रि० "तस्यां पूर्वाह्णसमये कुर्यात् सारस्वतोत्सवम्" ति०त०। ७सरस्वतीदेवताके च त्रि०। "तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैरिति" स्मृतिः। मुनिभेदजन्मकथा च भा०श०५१अ० "ब्रह्मर्षे! (दधीच!) तव पुत्रोऽयं त्वद्भक्त्या धारितो मया। दृष्ट्वा तेऽप्सरसं रेतो यत् स्कन्नं प्रागवस्युताम्। तत् कुक्षिणा वै ब्रह्मर्षे! त्वद्भक्त्या धृतवत्यहम्" इत्युपक्रमे "तस्मात् सारस्वतः पुत्रो महांस्ते वरवर्णिनि!। तवैव नाम्ना प्रथितः पुत्रस्ते लोकभावनः। सारस्वत इति ख्यातो भविष्यति महातपाः। एष द्वादशवार्षिक्यामनावृष्ट्यां द्विजर्षभान्। सारस्वतो महाभागो वेदानध्यापयिष्यति" इति सरस्वतीं प्रति दधीचोक्तिः तस्य वेदाध्यापनकथा च तत्रैव अध्यायशेषे "अनावृष्टिरनुप्राप्ता राजन्! द्वादशवार्षिकी। तस्यां द्वादशवार्षिक्यामनावृष्टौ महर्षयः। वृत्त्यर्थं प्राद्रवन् राजन्! क्षुधार्त्ताः सर्वतो दिशम्। दिग्भ्यस्तान् प्रद्रुतान् दृष्ट्वा मुनिः सारस्वतस्तदा। गमनाय मतिञ्चक्रे तमुवाच सरस्वती। न गन्तव्यमितः पुत्र! तवाहारमहं सदा। दास्यामि मत्स्यप्रवरानुष्यतामिह भारत!" ततः तद्दत्तमत्स्याहारेण प्राणानधारयत् वेदांश्चाधारयत् अतीतायामनावृष्टौ अभ्यासाभावेन नष्टवेदा अन्ये मुनयस्ततो वेदान् लेभिरे तत्कथा "तस्माद्वेदानवाप्य पुनर्धर्मं प्रचक्रिरे। षष्टिर्मुनिसहस्राणि शिष्यत्वं प्रतिपेदिरे। सारस्वतस्य विप्रर्षेर्वेदस्वाध्यायकारणात्"। देशभेदश्च "मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः। पाञ्चालशाल्वमाण्डव्या कुरुक्षेत्रगजाह्वयम्"

इत्युक्ते मध्यदेशभेदः सोऽभिजनोऽस्य अण्। तद्देशवासिजने। तत्रत्यब्राह्मणभेदश्च "सारस्वताः कान्यकुब्जा गौडमैथिलकोत्कलाः। पञ्च गौडा इति ख्याता विन्ध्यस्योत्तरवासिनः" पुराणान्तरम्।

सारस्वतकल्प पु० कर्म०। १तन्त्रोक्ते सरस्वत्या उपासनार्थके विधानभेदे २तन्नामके ब्रह्मदिने च। कल्पशब्दे १८१६ पृ० दृश्यम्। [शब्दर० २दूर्वायाञ्च शब्दच०।

सारा स्त्री सारयति सृ–णिच्-अच्। १कृष्णत्रिवृतायाम्

साराल पु० सारमाबाति आ+ला-क। तिलवृक्षे शब्दर०।

सारि(री) पुंस्त्री० सृ–इण् स्त्रीत्वपक्षे वा ङीप्। १पाशके "सारीं चरन्तीं सखि! मारयेति" नैषधम्। २पक्षिभेदे च (शालिक) शब्दच०। ङीबन्तः ३सप्तलायां राजनि०

सारिका स्त्री सरति गच्छति सृ–ण्वुल्। पक्षिभेदे(शालिक) अमरः।

सारिणी स्त्री सृ–णिनि। १सहदेवीलतायां २कार्पास्यां ३दुरालभायां ४कपिलशिंशपायां ५प्रसारिण्यां ६रक्तपुनर्नवायाञ्च राजनि०।

सारिवा स्त्री सारिरिव वाति वा–क। (अनन्तमूल)लताभेदे सा च दुग्धगर्भा जम्बुदलपत्रा सुगन्धा च। सा च कृष्णशुक्लभेदात् द्विविधा "सारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु। अग्निमान्द्यारुचिश्वासकासामविषनाशनम्। दोषत्रयास्रप्रदरज्वरातीसारनाशनम्" भावप्र०। [भवः ठक्। विषभेदे अमरः।

सारोष्ट्रिक पु० सारः श्रेष्ठ उष्ट्रो यत्र सारोष्ट्रः देशभेदस्तत्र

सार्थ पु० सृ-थन् स्वार्थे अण्। १समूहे २जन्तुसमूहे अमरः "स जयत्यरिसार्थसार्थकीकृतनामा" नैषधम्। सह अर्थेन वाच्येन वा। ३वणिक्समूहे मेदि०। ४धनिनि त्रि०। अण्। सार्थक। ५अर्थसहिते त्रि० ६शब्दे पु० "सार्थकः स्वार्थबोधकृदिति" शब्दशक्तिप्रकाशिका।

सार्थवाह पु० सार्थं वहति वह–अण्। वणिग्जने अमरः

सार्द्र त्रि० सह आर्द्रेण। आर्द्रतायुक्ते अमरः।

सार्द्धम् अव्य० सह+ऋध–अमु। १साहित्ये अमरः। सह अर्द्धेन। सार्द्ध २अर्द्धयुक्ते त्रि०।

सार्प न० सर्पदेवताऽस्य अण्। अश्लेषानक्षत्रे।

सार्पिष्क त्रि० सर्पिषा संस्कृतम् ठक्। घृतसंस्कृते व्यञ्जनादौ हेमच०। [विदिते।

सार्वजनीन त्रि० सर्वेषु जनेषु विदितः खञ्। सर्वलोक-

सार्वत्रिक त्रि० सर्वत्र भव ठक्। सर्वस्मिन् कालादौ भवे।

सार्वधातुक न० सर्वधातून् व्याप्नोति ठक्। व्याकरणोक्तसर्वधातुप्रकृतिके लट् लोट् लङ् विधिलिङ् इत्याख्यके चतुर्लकारे [इद्धिः। सर्वभूतव्यापके।

सार्वभौतिक त्रि० सर्वाणि भूतानि व्याप्नोति ठञ् द्विपद०

सार्वभौम पु० सर्वस्याः भूमेरीश्वरः सर्वासु भूमिषु विदितो वा अण् द्विपदवृद्धिः। १चक्रवर्त्तिनि नृपे २उत्तरदिक्स्थे गजे च अमरः। ३विदूरथनृपपुत्रे पु० भाग० ६।२८अ०। ४सकलभूमिसम्बन्धे त्रि०।

सार्वलौकिक त्रि० सर्वेषु लोकेषु विदितः ठञ् द्विपदवृद्धिः। सर्वत्रलोकेषु विदिते "स रामः सार्वलौकिकः" भट्टिः।

सार्वविभक्तिक त्रि०सर्वासु विभक्तिषु तदर्थे भवः–ठञ्। सर्वविभक्त्यर्थे विहिते तसिलादौ प्रत्यये पा०।

सार्षप त्रि० सर्षपस्य विकारः अण्। सर्षपविकारतैलादौ "अदुष्टं सार्षपं तैलम्" स्मृतिः।

साल पु० सल-घञ्। १प्राकारे "रसालसालः समदृश्यतामुना" नैषधम्। २स्वनामख्याते वृक्षभेदे "सालस्तु सर्जकार्श्याश्वकर्णकः सस्यसंवरः। अश्वकर्णः कषायः स्यात् व्रणस्वेदकफक्रमीन्। भग्नविद्रधिबाधिर्य्ययोनिकर्णगदान् हरेत्। सर्जकोऽन्योऽजकर्णः स्यात् शालो मरिचपत्रकः। अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति। कफपाण्डुश्रुतिगदान् मेहकुष्ठविषव्रणान्" भावप्र०। एतत्परत्वे तालव्यादिताऽपि। ३प्राकारे मेदि० ४शालमत्स्ये भरतः। ५रालरसे राजनि०।

सालन पु० सालः कारणत्वेनाऽस्त्यस्य पामादित्वात् न। सालनिर्य्यासे (धुना) रत्नमा०।

सालनिर्यास पु० ६त०। सर्जरसे (धुना) रत्नमा०।

सालपर्णी स्त्री सालस्येव पर्णान्यस्याः ङीप्। (शालपानि) वृक्षे शब्दर०।

सालपुष्प न० सालस्येव पुष्पं यस्य। स्थलपद्मे शब्दर०।

सालभञ्जिका स्त्री सालं भनक्ति भञ्ज-ण्वुल्। १काष्ठादिनिर्मिते कृत्रिमक्रीडासाधने पुत्तलिकाभेदे २वेश्यायाञ्च जटा०।

सालरस पु० ६त०। (धुना) राले राजनि०।

सालवेष्ट पु० सालं वेष्टयति वेष्ट-अच्। राले (धुना)राजनि०

सा(शा)ला स्त्री सालः प्राकारोऽस्त्यस्याः अच्। गृहे भरतः

सा(शा)लाहक पुंस्त्री० सालाया वृक इव। कुक्कुरे। स्त्रियां ङीष्। [शब्दर० स्त्रियां ङीष्।

सा(शा)लूर पुंस्त्री० स(श)ल–ऊरच् णिच्च। भेके मण्डूके

सा(शा)लेय पु० सा(शा)लायां भवः ढक्। मधुरिकायाम् अमरः

सालोक्य न० समानो लोकोऽस्य तस्य भावः ष्यञ्। सायुज्यशब्दोक्ते पञ्चविधमुक्तिमध्ये एकलोकसहवासरूपे मुक्तिभेदे।

सा(शा)ल्व पु० ब०व० सोमदेशे। तेषां राजा अण्। तद्देशाधिपे नृपभेदे स च श्रीकृष्णेन हतः भा० व० १४अ० दृश्यम्। [हेमच०।

सा(शा)ल्वहन् पु० साल्वं नृपं हतवान् हन-क्विप्। विष्णौ

सावधान त्रि० सह अवधानेन। १सचेतने सतर्के २मनोभिनिवेशयुक्ते च।

सावन न० सवनं यागाङ्गं स्नानं सोमनिष्पीडनं वा तद्भेदमण्। "अहोरात्रेण चैकेन सावनो दिवसः स्मृतः" ब्रह्मसिद्धान्तोक्ते १अहोरात्रात्मके दिवसे, सवनत्रयस्य अहोरात्रसाध्यत्वादस्य तत्सम्बन्धित्वम्। तस्त्रिंशद्दिवसात्मके २मासभेदे च पु० "चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः" विष्णु ध० "सावने च तथा मासि त्रिंशत्सूर्य्योदयाः स्मृताः" म० त०। "सूतकादिपरिच्छेदो दिनमासाब्दपस्तथा। मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तितः" इति सूर्य्यसिद्धान्तः। सावनमासकृत्यानि च विशेषतः कानिचित् म०त० पितामहेनोक्तानि "दिवाह्रादौ स्मृतः सौरो यज्ञादौ सावनो मतः" "आदिपदेन सप्तस्वतिवृद्धिप्रायश्चित्तायुर्दायाशौचगर्भाधानपुंसवनसीमन्तोन्नयननामकरणान्नप्राशननिष्क्रमणचूडादिग्रहणम्" म० त० रघु०। एषु सावनेन मानेनैव वर्षस्य गणना "सत्राद्युपास्त्यान्यथ सावनेन लोकस्य यत् स्याद्व्यवहारकर्म विष्णु ध० ३वर्षभेदे "सौरेणाब्दस्तु मानेन यदा भवति भार्गव!। सावनेन च मानेन दिनषट्कं प्रपूर्य्यते"। "सौरवर्षे दिनषट्काधिकसावनवर्षो भवतीति रघु०। दिनषट्कमिति प्रायिकम् सौरवर्षे सावनस्य ५ १५।२१ २०।२४ दिनाद्याधिक्यस्यैव सिद्धान्तोक्तेः। ४यज्ञान्ते ५यजमाने ६वरुणे च पु० मेदि०।

सा(शा)वर पु० स(श)रेण निर्वृत्तः अण्। १पापे २अपराधे च विश्वः। ३लोध्रे शब्दच०।

सावर्णि पु० सवर्णायां सूर्य्यपत्न्यां संज्ञायां भवः अण्। सवर्णागर्भजे सूर्य्यजे अष्टमे मनौ इञ्। सावर्णिरप्यत्र "सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः" "सूर्य्याज्जन्म समासाद्य सावर्णिर्भविता मनुः" देवीभा०। "छायासंज्ञासुतो योऽसौ द्वितीयः कथितो मनुः। पूर्वजस्य सवर्णोऽसौ सावर्णस्तेन कथ्यते" देवीभाग० तन्नामनिरुक्तावन्तरसुक्तम् "विवस्वतश्च द्वे भार्य्ये विश्वकर्म्मसुते उभे। संज्ञा छाया च राजेन्द्र! ये प्रागभिहिते तव। तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः। यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु। सावर्णिस्तपती कन्या भार्य्या संवरणस्य या। शनैश्चरस्तृतीयोऽभूत् अश्विनौ वडवात्मजौ। अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः" भाग० ८।१३अ०। कल्पभेदादविरोधः।

सावित्र पु० सविता देवताऽस्य अण्। १विप्रे हेमच०। २शक्तिविशेषे स्त्री ङीप्। "सावित्रीमात्रसारोऽपीति" मनुः। सा च ३सत्यवतोभार्य्यायाम् स्त्री ४सवितृदेवताके चर्वादौ त्रि०। ५यज्ञोपवीते न० शब्दच०। स्वार्थे अण्। ६सूर्य्ये पु० शब्दच०। तस्येदम् अण्। ७महादेवे दशार्णे च पु० मेदि०। ८गर्भे रुद्र० १०ब्रह्मपत्न्यां स्त्री ११दुर्गायां च स्त्री मेदि०। तन्नामनिरुक्तिः देवीपु० ४४अ० "त्रिदशैरर्च्चिता देवी वेदभागेषु पूजिता। मात्ररूपस्वरूपा तु सावित्री तेन सा स्मृता" वह्निपु०। अन्या निरुक्तिः "सर्वलोकप्रसवनात् सविता स तु कीर्त्त्यते। यतस्तद्देवता देवी सावित्रीत्युच्यते ततः। वेदप्रसवनाच्चापि सावित्री प्रोच्यते बुधैः"। ब्रह्मपत्नी च यतस्था "ततः संजपतस्तस्य भित्त्वा देहमकल्मषम्। स्त्रीरूपमर्द्धमकरोदर्द्धं पुरुषरूपवत्। शतरूपा च सा ख्याता सावित्री च निगद्यते। सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप!" मत्स्यपु० ३अ०। गायत्रीशब्दे दृश्यम्।

सावित्रीव्रत न० सावित्रीपूजनमुद्दिश्य कर्त्तव्यं व्रतम्। ज्यैष्ठकृष्णचतुर्दश्यां सावित्रीपूजनार्थे व्रते तद्विधिर्यथा "शिवाऽघोरा तथा प्रेता सावित्री च चतुर्दशी। कुहूयुक्तैव कर्त्तव्या कुह्वा सैव हि पारणम्" ति०त०धृतवचनम् यमः "दत्त्वा जलाञ्जलीन् सप्त कृष्णपक्षे चतुर्दशीम्। धर्मराजं समुद्दिश्य सर्वपापैः प्रमुच्यते"। लिङ्गपुराणे उपवासश्चतुर्दश्यां महापातकनाशकः"। पराशरः "ज्येष्ठे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत्"। तां चतुर्दशीम् "ज्यैष्ठे कृष्णचतुर्दश्यां सावित्रीमर्चयन्ति याः। वटमूले सोपवासा न ता वैधव्यमाप्नुयुः"। राजमार्त्तण्डकृत्यचिन्तामण्योः "ज्यैष्ठे मासि चतुर्दश्यां सावित्रीव्रतमुत्तमम्। अवैधव्याय कुर्वन्ति स्त्रियः श्रद्धासमन्विताः"। व्रतमात्रे तु अनन्ततृतीयाव्रतोक्तमाचरन्ति दृष्टपरिकल्पनान्यायात् तदुक्तं मत्स्यपुराणे "गर्भिणी सूतिका नक्तं कुमारी च रजस्वला। यदाऽशुद्धा तदा·

न्येन कारयेत् क्रियते यदा"। उपवासासमर्थः नक्तं भोजनं कुर्यात् "उपवासे त्वशक्तानां नक्तं भोजनमिष्यते" इति तत्तत्वचनान्तरात्। अशक्ता चेत् पूजां कारयेत्। कायिकस्योपवासादिकं यदा शुद्धया अशुद्धया च स्वयं क्रियते। एवं स्मृतिपरिभाषिकायां वर्द्धमानोपाध्यायाः। नारदः "दिवाभागे त्रयोदश्यां यदा चतुर्दशी भवेत्। तत्र पूज्या महासाध्वी देवी-सत्यवता सह। दिवाभागे दण्डद्वयमात्रसत्त्वेऽपि अतएव प्रदोषे व्रतमाचरन्ति। पूर्वाह्णे तद्विधत्वेऽपि। पराह्णे त्रिसन्ध्यव्यापित्वे पराह्ण एव त्रिसन्ध्यव्यापिनीति वचनात्। यदा तु पूर्वपरयोर्न तथाविधा तदापि पराह्ण एव यथा ज्योतिषे "चतुर्दश्याममावास्या यदा भवति नारद!। उपोष्या पूजनीया सा चतुर्दश्यां विधानतः"। सा सावित्री। ततश्चामावास्यायां सावित्रीव्रतविधानं त्रिरात्रेति वचनस्य तत्परम्। पराशरः "सावित्रीमर्चयित्वा तु यथाचारा परेऽहनि। तत्सावित्र्या नारी चिरभोगान् लभेत सा"।

सावित्रीसूत्र न० सावित्रीदीक्षाकालिकं सूत्रम् शाक०। यज्ञोपवीते पञ्च०।

साश्रुधी स्त्री० साश्रु ध्यायति ध्यै-क्विप् सम्प्र०। श्वश्र्वाम् त्रिका०।

सास्ना स्त्री० सस-न णिच्। गोगलस्थिते लोमसंघातात्मके चर्म्मणि अमरः।

सास्र त्रि० सह अस्रेण। अश्रुसंयुक्ते।

सास्थितास्राव न० सास्थि अस्थियुक्तं तास्रावं यत्र। कर्म्मे त्रिका० तत्र रक्तघटितताम्राव जातत्वात् तथात्वम् साहितास्राव इत्येव पाठः सम्यक् व्यक्तिमीयो रक्तः

साहचर्य्य न० सहचरस्य भावः ष्यञ्। १सहविद्यमानतायाम्, २साहित्ये ३सामानाधिकरण्ये च।

साहस न० सहसा बलेन निर्वृत्तम् अण्। १बलेन कृते चौर्य्यस्त्रीसंग्रहादौ दुष्कर्म्मणि, "सहसा क्रियते कर्म्म यत् तत् साहसमिति स्मृतम्" स्मृतिः। तद्विवृतिः वीरमि० "तत्र साहसमाह नारदः "सहसा क्रियते कर्म्म यत्किञ्चिद्बलदर्पितैः। तत्साहसमिति प्रोक्तं सहो-बलमिहोच्यते" इति। तच्च चातुर्विध्यमाह बृहस्पतिः "मनुष्यमारणं चौर्य्यं परदाराभिमर्शनम्। पारुष्यमुभयञ्चेति साहसं स्याच्चतुर्विधम्" इति। उभय पारुष्यं वाग्दण्डपारुष्ये। तत्र त्रैविध्यमाह नारदः "तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमन्तथा। उत्तमञ्चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक्" इति। एतेषां स्वरूपमाह स एव "फलमूलोदकादीनां क्षेत्रोपकरणस्य च। भङ्गाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतम्। वासःपश्वन्नपानानां गृहोपकरणस्य च। एतेनैव प्रकारेण मध्यमं साहसं स्मृतम्। व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनम्। प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसम्" इति। भङ्गः फलादेः स्वरूपनाशनम्। आक्षेपः आक्रोशः आकृतिरस्कारणमिति यावत्। उपमर्दः स्वरूपावयवेभ्यः पीडनम्। एतेनैव प्रकारेणेत्यर्थः। त्रिविधेऽपि साहसे दण्डमाह नारदः "तस्य दण्डः क्रियापेक्षः प्रथमस्य शतावरः। मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्चशतावरः। उत्तमे साहसे दण्डः सहस्रावर इष्यते। वधः सर्व्वस्वहरणं पुरान्निर्वासनाङ्कने। तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे" इति। ब्राह्मणस्य तु महत्यप्यपराधे शारीरदण्डाभावमाह स एव "अविशेषेण सर्व्वेषामेष दण्डविधिः स्मृतः। वधादृते ब्राह्मणस्य न वधं ब्राह्मणोऽर्हतीति"। यमोऽपि "न शारीरो ब्राह्मणस्य दण्डो भवति कर्हिचित्" इति। महत्यपराधे ब्राह्मणस्य दण्डमाह स एव "विवासं तु बन्धने यदा राजा भक्तं प्रदापयेत्" इति। नारदोऽपि "शिरसो मुण्डनं दण्डस्तस्य निर्वासनं पुरात्। ललाटे चाभिशस्ताङ्कः प्रयाणं गर्द्दभेन च" इति। परद्रव्यापहरणरूपसाहसदण्डं तत्र च दण्डमाह याज्ञवल्क्यः "सामान्यद्रव्यप्रसभहरणात् साहसं स्मृतम्। तन्मूल्याद् द्विगुणो दण्डो निह्नवे तु चतुर्गुणः" इति। बहुभिर्जनैः प्रहरादिकार्यमेव रक्ष्यमाणस्य द्रव्यस्य बलात्कारेण हरणं साहसकर्म्म तोऽयमिति पूर्वार्द्धार्थः। तन्मूल्यादपहृतद्रव्यमूल्यात्। निह्नवे अपलापे। यः साहसं करोति तद्द्विगुणन्दमम्। यस्तु साहसं कृत्वा निह्नुते स चतुर्गुणन्दाप्य इत्युत्तरार्द्धार्थः। साहसिकस्य प्रयोजयितारं प्रत्याह स एव "यः साहसं कारयति स दाप्यो द्विगुणन्दमम्। यश्चैवमुक्त्वाहं दाता कारयेत् स चतुर्गुणम्" इति। द्विगुणन्दमं साहसिकदण्डाद्द्विगुणं दण्डम्। साहसिकविशेषं प्रत्याह स एव "अर्घ्याक्रोशातिक्रमकृद्भ्रातृभार्य्याप्रहारदः। संदिष्टस्याप्रदाता च समुद्रगृहभेदकृत्। सामन्तकुलिकादीनामपकारस्य कारकः। पञ्चाशत्पणिको दण्ड एषामिति विनिश्चयः। स्वच्छन्द

विधवानामी विक्रुष्टेनाभिधावकः। अकारणेन विक्रोष्टा चाण्डालस्पर्शनात् स्पृशन्। शूद्रप्रव्रजितानाञ्च दैवे पित्र्ये च भोजकः। अयुक्तं शपथं कुर्वन् अयोग्यो योग्यकर्मकृत्। वृषक्षुद्रपशूनाञ्च पुंस्त्वस्य प्रतिघातकृत्। साधारणस्यापलापी दासीगर्भविनाशकृत्। पितृपुत्रस्वसृभ्रातृदम्पत्याचार्यशिष्यकाः। एषामपतितान्योन्यत्यागी च शतदण्डभाक्" इति। "अत्रानुक्ते साहसिके पित्रादिबान्धवाः। प्रदद्या राजपुरुषैः सामादिभिरुपक्रमैः। विज्ञेयोऽसाधुसंसर्गाच्चिह्नैर्होढेन वा नरैः। एषोदिता घातकानान्तस्कराणाञ्च भावना। गृहीतः शङ्कया यस्तु न तत्कार्यं प्रपद्यते। शपथेनापमोक्तव्यः सर्ववादेष्वयं विधिः" इति। चिह्नं रक्तलेपादि होढोऽस्य धनादिकम्। घातानन्तरकर्त्तव्यमाह व्यासः "ज्ञात्वा तु घातकं सम्यक् संहृताय यथाक्रमम्। दण्ड्याश्चित्रवधोपायैर्देहे जनपदैर्नृपः" इति। बृहस्पतिः "प्रकाशघातका ये तु तथा चोपांशुघातकाः। ज्ञात्वा सम्यग्धनं हृत्वा हन्तव्या विविधैर्वधैः" इति। अनुत्तमक्षत्रियादिविषयमेतत्। यत आह बौधायनः "क्षत्रियादीनां ब्राह्मणस्य वधे वधः सर्वस्वहरणञ्च तेषामेव तुल्यापकृष्टवधे यथाबलमनुरूपं दण्डञ्च कल्पयेदिति" तेषां क्षत्रियादीनान्तुल्यापकृष्टवधे सजातीयहीनजातीयवधे दण्डं शारीरदण्डम्। एकघातार्थप्रवृत्तानां बहूनान्तो घातुरूपं दण्डमाह कात्यायनः "एकश्चेद्बहुभिर्हन्यात् संरब्धैः पुरुषैर्यदा। मर्मघाती तु यस्तेषां स घातक इति स्मृतः"। यो मर्मघातकः स एव वधापराधदण्डभागित्यर्थः। स एव "आरम्भकृत्सहायश्च दोषभक्तानुदेशकः। आश्रयः शस्त्रदाता च भक्तदायी विकर्मिणाम्। युद्धोपदेशकश्चैव तद्विनाशप्रवर्त्तकः। उपेक्षाकार्ययुक्तश्च दोषवक्तानुमोदकः। अनिषेद्धा क्षमो यः स्यात् सर्वे ते कार्यकारिणः। यथाशक्त्यनुरूपन्तु दण्डमेषां प्रकल्पयेत्" इति। बृहस्पतिरपि "एकस्य बहवो यत्र प्रहरन्ति रुषान्विताः। मर्मप्रहारदो यस्तु घातकः स उदाहृतः। मर्मघाती तु यस्तेषां यथोक्तं दापयेद्दमम्। आरम्भकृत्सहायश्च दोषभागी तदर्द्धतः। क्षतस्याल्पमहत्त्वञ्च मर्मस्थानञ्च यत्नतः। सामर्थ्यञ्चानुबन्धञ्च ज्ञात्वा चिह्नैः प्रसाधयेत्" इति। विषयविशेषे मनुष्यवधकर्त्तुर्दण्डाभावं दोषाभावप्रदर्शनेनाह मनुः "शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते। द्विजातीनाञ्च वर्णानां विप्लवे कालकारिते। आत्मनश्च परित्राणे दक्षिणानाञ्च सङ्गरे। स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति" इति। यत्र देशे काले च धर्मस्तटाकादिरूपो भेदनच्छेदनादिनाऽपरुध्यते तथा शूद्रेतरवर्णसङ्करे परदाराक्रमणादिरूपे राजाभावकालकारिते। तथात्मनः परतः प्राणसंशये। तथा दक्षिणानां सङ्करे गोग्रहणनिमित्तके युद्धे। तथा स्त्रीविप्राभ्युपपत्तौ दुर्बलहिंसानिवारणे। धर्माद्धि तोघ्नन् न दुष्यति यतः। अतस्तत्र द्विजातिभिः अत्रधर्मान्वयरहितैरपि समर्थैः शस्त्रं ग्राह्यमित्यन्वयः। अत्र द्विजातिग्रहणं ब्राह्मणवैश्यविषयम्। प्रजापालनार्थं क्षत्रियस्य वचनान्तरेणैव शस्त्रग्रहणस्य प्राप्तत्वादित्यभिसन्धायैव बौधायन आह "ब्राह्मणार्थे गवार्थे च वर्णानां वापि सङ्करे। गृह्णीयातां विप्रविशौ शस्त्रं धर्मव्यतिक्रमे" इति। यत्तु "परीक्षार्थमपि ब्राह्मण आयुधं नाददीत" इत्यापस्तम्बवचनम्। यच्च बौधायनवचनम् "हास्यार्थमपि ब्राह्मण आयुधं नाददीतेति" तद्द्वयमपि धर्मोपरोधादिभिन्नविषयम्। साहसस्यैव क्रोधलोभकृतत्वमाह बृहस्पतिः "साम्प्रतं साहसस्योक्तं श्रूयतां क्रोधलोभजम्" इति। स्त्रीसंग्रहणाख्यसाहसस्वरूपमाह स एव "अनिच्छन्त्या यत् क्रियते सुप्तोन्मत्तप्रमत्तया। प्रलपन्त्या वा रहसि बलात्कारकृतन्तु तत्" इति। अनिच्छन्त्या परपुरुषेण सहेति शेषः। अनिच्छन्त्या यानि चिह्नानि तस्याः कर्त्तव्यं राजकृत्यं आह संवर्त्तः "नेच्छन्त्या यानि चिह्नानि बलात्कारकृतानि च। परपुंसः प्रसङ्गेषु नारीणान्तानि लक्षतः। नखदन्तक्षतश्यामा सकचग्रहशोभिता। सद्यो निश्वासिता नारी बलात्कारेण दूषिता। ऊर्द्धं विक्रोशयन्ती च रुदन्ती लोकसन्निधौ। तस्य नामवदन्ती च यथाऽहन्तेन दूषिता। सांचेदेशविधैश्चिह्नैर्व्याहतपयोधरा। चिह्नालङ्कारकेशैश्च व्याकुलीकृतलोचना। राज्ञा सभ्यैः सभां नीत्वा स्वयमन्विष्य तत्क्षणात्। यद् ब्रूयात् सहजं तत्र तत् कर्त्तव्यं प्रयत्नतः। विवादे साक्षिणामत्र प्रकुर्वीत परीक्षणम्। प्रार्थनादभियुक्तस्य न दिव्यं दातुमर्हति" इति। अत्र दण्डमाह मनुः "सहसा ब्राह्मणो दण्ड्यो स्त्रियं गुप्तां बलाद्व्रजन्" इति। गुप्तां अनियमेन रक्षिताम्। क्षत्रियादिवर्णविषये दण्डमाह बृहस्पतिः "सहसा

कामयेद् यस्तु धनन्तस्याखिलं हरेत्। उत्कृष्टां निरुद्धमणो भ्रामयेद् गर्द्दभेन तु" इति। कामयेत् परस्त्रियमिच्छेत्। अयमेव दण्डोऽनुलोमप्रतिलोमजात्योः सजातीयपरभार्य्यागमने वेदितव्य इति भटनराख्ये। हीनजातीयपरस्त्रीगमने ब्राह्मणादिष्वेतदर्द्ध परिमितो दण्डः। उत्कृष्टजातीयपरदारगमने अयमेव दण्डो बधसहितः कार्य्य इत्याह स एव "दमोनेयः समायान्तु हीनायामधिकस्ततः। पुंसः कार्य्योऽधिकायान्तु गमने सम्प्रमापणम्" इति। दमः सहसा कामयेदिति वाक्योक्तः। नेयः प्रापणीयः। यत्तु बधमात्राभिधायकं कात्यायनवचनम् "स्त्रीषु कृतोपभोगः स्यात् प्रसह्य पुरुषो यदा। बधे तत्र प्रवर्त्तेत कार्य्यातिक्रमणं हि तत्" इति। तद्विगुणस्य भार्य्यागमने वेदितव्यम्"। सहसा अविवेकेन कृतं कर्म। २अविमृश्यकृतकर्मणि, त्रि०। "तेन साहसमनुष्ठितं पुनः" काव्यप्र० ३साहसमनुसरति अण्। स्मृत्युक्ते ३दण्डविशेषे पु० "साशीतिपणसाहस्रोदण्ड उत्तमसाहसः। तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृतः" स्मृतिः। "पाकयज्ञे तु साहस"इत्युक्ते ४अग्निभेदे च पु०।

साहसिक त्रि० साहसे प्रसृतः ठक्। १मनुष्यमारणाद्यभिरते २चोरे ३पारदारिके ४पारुष्यकारिणि च।

साहस्र न० सहस्राणां समूहः अण्। १सहस्रसमूहे। स्वार्थे अण्। २सहस्रसङ्ख्यायाम् न०। सहस्रं परिमाणमस्य अण्। ३सहस्रसंख्यान्विते त्रि०। ४सहस्रसंख्यकगजसमूहे पु० अमरः।

साहायक न० सहायस्य भावः वुञ्। साहाय्ये।

साहाय्य न० सहायस्य भावः ष्यञ्। सहायतायाम्।

साहित्य न० सहितस्य भावः ष्यञ्। १मेलने २परस्परसापेक्षाणां तुल्यरूपाणामेकक्रियान्वयित्वे श्राद्धवि० ३तुल्यवदेकक्रियान्वयित्वे ४एकक्रियान्वयित्वमात्रे ५बुद्धिविशेषविषयत्वे शब्द०प० ६पद्यात्मके काव्ये च।

साह्य न० सहस्य भावः ष्यञ् सह—ण्यत् वा। १सहत्वे २मेलने धरणिः ३सहनीये त्रि०।

साह्वय पु० सह आह्वयेनाभिधानेन। १अभिधानसहिते "जगाम गजसाह्वयम्" भारतम्। मेषादिप्राणिकरणकद्यूतरूपे समाह्वये च शब्दर०।

सिंह पुंस्त्री० हिन्स—अच् पृषो० "सिंहो वर्णविपर्य्ययात्" इत्युक्तेः वर्णविपर्य्ययः। स्वनामख्याते १पशुभेदे अमरः स्त्रियां ङीष्। पुंस्त्रागशब्दे सिंहमांसगुणा दृश्याः। २रक्तशोभाञ्जने राजनि० ३मेषादितः पञ्चमे राशौ ज्यो० सिंहराशिश्च २१६०० कलात्मकराशिचक्रस्य ७२०० कलोपरि १८०० शतकलात्मकः मघापूर्वफल्गुन्युत्तरफल्गुन्याद्यपादात्मकः। "पुमान् स्थिरोऽग्निर्दिनपित्तरूपपीतोष्णपूर्वेण दृढश्चतुष्पाद्। समोदयो दीर्घरवोऽल्पसङ्गप्रजो हरिः शैलवपोऽथ धूम्रः" नील० ता० तत्स्वभावादि उक्तम्। तस्य स्वामी सूर्य्यः। ४जिनध्वजे हेमच०। ५उत्तरपदस्थः ५श्रेष्ठार्थे अमरः। नरःसिंह इवेति विग्रहे "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" पा० उपमितसमासे नरसिंहादिशब्दात् सिंहतुल्यशौर्य्यादियुक्तो नर इति बोधात् नरस्य श्रेष्ठत्वं द्योत्यते इति बोध्यम्। ६नाद्यां स्त्री राजनि०। ७प्रासादभेदे देवग्टहशब्दे २६८१ पृ० दृश्यम् ८सिंहासनभेदे तच्छब्दे दृश्यम्

सिंहकेलि पु० सिंहस्येव केलिरस्य। मञ्जुघोषे त्रिका०।

सिंहकेशर पु० सिंहस्येव केशरोऽस्य। बकुले त्रिका०।

सिंहतल पु० संहतल+पृषो०। करद्वयमेलनरूपे अञ्जलौ शब्दार्थमः। [राजनि०।

सिंहतुण्ड पु० सिंहस्येव तुण्डः पुष्पमस्य। सेहुण्डवृक्षे

सिंहद्वार न० सिंहचिह्नितं द्वारम् शाक०। पुरप्रवेशनयोग्ये द्वारे हेमच०।

सिंहध्वनि पु० सिंहस्येव ध्वनिः। १सिंहतुल्यनादे सिंहनादादयोऽप्यत्र अमरः। ६त०। २सिंहस्य शब्दे।

सिंहनर्दिका पु० सिंह इव नर्दति नर्द ण्वुल्। (सिङ्गा) वाद्यभेदे शारा०।

सिंहनादिका स्त्री सिंहमपि नादयति नद-णिच्-ण्वुल् १दुरालभायाम् शब्दच०। २सिंहनर्दिकायां शारा०।

सिंहपर्णी स्त्री सिंहस्य पुच्छ इव पर्णमस्याः ङीप्। वासकवृक्षे जटा०।

सिंहपुच्छिका स्त्री सिंहस्य पुच्छ इव पत्त्राग्रमस्याः-कप्, अत इत्वम्। चित्रपर्णिकायां (चुकुलाकुले) वृक्षे रत्नमा०

सिंहपुच्छी स्त्री सिंहस्य पुच्छ इव पुष्पाणि पर्णानि वाऽस्याः ङीष्। १चित्रपर्ण्यां २पृश्निपर्ण्याम् अमरः ३माषपर्ण्याम् रत्नमा०। [पर्ण्याम् राजनि०।

सिंहपुष्पी स्त्री सिंहस्य पुच्छ इव पुष्पाग्रमस्याः ङीप् पृश्नि-

सिंहमुखी स्त्री सिंहस्य मुख मुखमस्येव इव पुष्पमस्याः ङीप्। वासके राजनि०।

सिंहयाना स्त्री सिंहो यानं वाहनं यस्याः। दुर्गायाम् हेमच० सिंहवाहनादयोऽप्यत्र।

सिंहल पु० सिंहोऽस्त्यत्र लच्। देशभेदे। तद्देशप्रभवत्वात् २रङ्गे धातौ हेमच०। ३रीतौ ४त्वचे च न० राजनि०। सिंहलदेशश्च कूर्मविभागशब्दे २१६८ पृ० दक्षिणस्यामुक्तः। [तायां राजनि०।

सिंहलस्था स्त्री सिंहले तिष्ठति स्था—क। सिंहल्यां च

सिंहलास्थान पु० सिंहलं आस्थानं यस्य। तालसदृशे वृक्षभेदे शब्दर०।

सिंहलील पु० रतिबन्धभेदे “लिङ्गोपरि स्थिता नारी भूमौ दत्त्वा पदद्वयम्। हृदये दत्तहस्ता चेत् सिंहलीलः प्रकीर्त्तितः”। लिङ्गोपरि स्थिता नारी कान्तोरुस्थपदद्वया। हृदये दत्तहस्ता चेत् सिंहलीलोऽप्ययंमतः” रतिम०।

सिंहवाहिनी स्त्री सिंहरूपो वाहो विद्यतेऽस्या इनि। दुर्गायाम् “सिंहमारुह्य कल्पान्ते निहतो महिषो यतः। महिषघ्नी ततो देवी तथा वै सिंहवाहिनी” देवीपु० ४५अ०।

सिंहविक्रान्त पुंस्त्री० सिंह इव विक्रान्तः। १अश्वे हारा० स्त्रियां ङीष् २सिंहतुल्यविक्रमे त्रि०। [राजनि०।

सिंहविन्ना स्त्री सिंह इव विन्ना विद-क्त। माषपर्ण्याम्

सिंहसंहनन त्रि० सिंहस्येव संहननमङ्गमस्य। १रम्याङ्गयुक्ते अमरः २सिंहतुल्यदृढाङ्गे च। “सिंहसंहननो युवा” रघुः।

सिंहा(शिङ्खा)न न० शिघि-आनच् पृषो०। १लौहमले अमरः। २नासिकामले (सिकनी) शब्दर०।

सिंहावलोक पु० न्यायभेदे न्यायशब्दे ४१६९ पृ० दृश्यम्।

सिंहासन न० सिंहचिह्नितमासनम्। १राजासनभेदे तल्लक्षणं युक्तिकल्पतरौ दर्शितं यथा

“राज्ञो वरासनं नाम श्रीसिंहासनमुच्यते। शुभे मुहूर्त्ते शुभमासवर्षे सुवारवेलातिथिचन्द्रयोगे। काले निरुत्पातनिरीतिभावे सिंहासनावस्थविधिं वदन्ति। स्थिरराशिस्थिते भानौ चन्द्रे च स्थिरभोदिते। आसनारम्भमिच्छन्ति रहारम्भोऽपि येषु च”। एतेन रहारम्भसिंहासनयोरारम्भ एक एव कालः। तत्र क्रमः “वाणवेदाग्निपक्षाश्च सोपानानि युगैः क्रमात्। चत्वारिंशत्तथा त्रिंशत् विंशतिः षोडशैव च। सिंहान्वितानि ज्ञेयानि चरणानि युगैः क्रमात्। पद्मः शङ्खो गजो हंसः सिंहो भृङ्गो मृगो हयः। अष्टौ सिंहासनानीति नीतिशास्त्रविदो विदुः। आदित्यादिदशाजानां भूपतीनां यथाक्रमम्। राज्ञः स्वहस्तैरष्टाभिरायामपरिणाहयोः। राजपाललमिदं नाम सोपानं पुरतोन्नतम्। तदर्द्धमानं तन्मध्ये राजासनमुदाहृतम्। षड्भिरुन्नतमिदं रम्यं प्रोक्तं कलिमहीभुजाम्। दिगष्टचन्द्रं त्रिकोणः स्यात् ब्रह्मादीनां ब्रह्माश्रयम्”। अथाष्टानां लक्षणानि “गम्भारीकाष्ठघटितः पद्ममालोपचित्रितः। पद्मरागविचित्राङ्गः शुद्धः काञ्चनसंहतः। चरणाग्रे पद्मकोषात् पद्मरागविचित्रिताः। द्विरष्टौ पुत्रिका राजद्वादशाङ्गुलिसम्मिताः। राजासनं चतस्रश्च एवं द्वादशपुत्रिकाः। रत्नैश्च नवभिः कार्य्यं निर्माणं चान्तरान्तरा। रक्तवस्त्रावृतं ह्येतत् पद्मसिंहासनं१ मतम्। अत्रोषित्वा नरपतिः प्रतापमतिविन्दति। महेन्द्रकाष्ठघटितः शङ्खमालोपशोभितः। शुद्धस्फटिकचित्राङ्गः शुद्धरूप्योपशोभितः। चरणाग्रे शङ्खनाभ्यः पुत्रिकाः सप्तविंशतिः। स्थाने स्थाने विधातव्याः शुद्धस्फटिकसंस्कृताः। शुक्लपट्टावृतं ह्येतत् शङ्खसिंहासनं२ मतम्। पनसेनोपघटितो गजमालोपशोभितः। विद्रुमैरपि वैदूर्य्यैः काञ्चनेनापि शोभितः। चरणाग्रे गजशिरःपुच्छादेकैकपुत्रिका। माणिक्यरचितारक्तवस्त्रादिकविभूषणम्। गजसिंहासनं३ नाम साम्राज्यफलदायकम्। शालकाष्ठेन घटितो हंसमालोपशोभितः। पुष्परागैः काञ्चनेन कुरुविन्दैश्च चित्रितः। चरणाग्रे हंसरूपाः पुत्रिकास्त्वेकविंशतिः। गोमेदकोपघटिताः पीतवस्त्रविभूषणम्। हंससिंहासनं४ नाम सर्वानिष्टविनाशनम्। चन्दनेनोपघटितः सिंहमालोपभूषितः। शुद्धहीरकचित्राङ्गः शुद्धकाञ्चननिर्मितः। चरणानां सिंहलेखाः पुत्रिकाश्चैकविंशतिः। मुक्ताशुक्तिभिरन्यैश्च निर्मलैरेव भूषणम्। शुद्धशुक्लावृतं ह्येतत् सिंहसिंहासनं५ मतम्। अत्रोषित्वा नरपतिः कृत्स्नां साधयति क्षितिम्। भृङ्गमालोपसहितं शुद्धचम्पककल्पितम्। शुद्धैर्मरकतैर्युक्तं पादाग्रे पद्मकोषिकाः। द्वात्रिंशतिः पुत्रिकास्तु नीलवस्त्रादिभूषणम्। भृङ्गसिंहासनं६ नाम शत्रुक्षयजयप्रदम्। निम्बकाष्ठेन घटितं मृगमालोपशोभितम्। शुद्धनीलैर्महानीलैः काञ्चनेनापि चित्रितम्। चरणाग्रे मृगशिरश्चत्वारिंशच्च पुत्रिकाः। नीलवस्त्रादियुक्तन्तु मृगसिंहासनं७ मतम्। लक्ष्मीविजयसम्पत्तिर्निश्चयप्रदमुत्तमम्। केशरेणोपघटितं हयमालोपशोभितम्। सैमस्तदश्चैर्भूषयाः पुत्रिकाः पञ्चसप्ततिः। चरणाग्रे हयशिरश्चित्रवस्त्रादिभूषणम्। हयसिंहासनं८ नाम लभ्यो

विजयवर्द्धनम्। इत्येतत् कथितं सारं महासिंहास-नाष्टकम्। यथा भोजेन कथितं यथा चान्यैश्च प-ण्डितैः। एतस्यातिक्रमं दम्भाद् यः कुर्य्यात् पृथिवी पतिः। अचिरादेव कुरुते तस्य मृत्युरतिक्रमम्। परा-सनस्थो यो राजा यो राजा च निरासनः। स परैर्हन्यते सिंहैरिव मत्तगजाधिपः"। चतुरङ्गक्रीड़ायां २जयभेदे चतुरङ्गशब्दे २८६१ पृ० दृश्यम्। ३योगासनभेदे च तल्लक्षणं यथा

"गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत्। दक्षिणे सव्यगुल्फन्तु दक्षगुल्फन्तु सव्यके। हस्तौ च जान्वोः संस्थाप्य स्वाङ्गुलीः संप्रसार्य्य च। व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः। सिंहासनं भवेदे-तत् पूजितं योगिभिः सदा। बन्धत्रयस्य सन्धानं कुरुते चासनोत्तमम्" इति हठप्रदीपः। ४रतिबन्धभेदे पु० "स्वजङ्घाद्वयबाहू च कृत्वा योषापदद्वये। कामी धृत्वा रमेत् कामैः बन्धः सिंहासनो मतः"। इति रतिमञ्जरी ५चक्रभेदे चक्रशब्दे २८१८ पृ० दृश्यम्।

सिंहास्य पु० सिंहस्यास्यमास्यमिवदन्त इव पुष्पं यस्य। वासके अमरः।

सिंहिका स्त्री। काश्यपपत्न्यां राहुमातरि। "कश्यपस्य त्वहिषी तु सिंहिका राहुवास्तुतनयावजीजनत्। पूर्वजो हरिनिकृत्तकन्धरो देवतेरवरजो निपातितः" वास्तु-यागत०। [२वास्तुपुरुषे च।

सिंहिकासुत पु० ६त०। १राहौ सिंहिकापुत्रादयोऽप्यत्र।

सिंही स्त्री० हिनस्ति रोगान् हिन्स–अच् पृषो०। वार्त्ता-क्याम् अमरः २कण्टकारिकायाम् ३वासके मेदि० ४बृ-हत्यां राजनि० ५राहुमातरि विश्वः ६मुद्गपर्ण्याम् सिंह+जातौ ङीष्। ७सिंहयोषिति।

सिंहोलता स्त्री कर्म०। हडल्यां भावप्र०।

सिक सेचने सौत्र० पर० सक० सेट्। सेकति असेकीत्। चर्मदाकात् न षापदेशः।

सिकता स्त्री ब०व०। सिक–अतच् किच्च। वालुकायाम् मेदि०। सिकताः सन्त्यत्र अच् तस्य लुप्। २सिकता-युक्तदेशे स्त्री अमरः। [अमरः।

सिकतामय त्रि० सिकता+मयट्। वालुकामये तटादौ

सिकतावत् त्रि० सिकताः सन्त्यत्र मतुप् मस्य वः। वालु-कायुक्तदेशे अमरः। [भरतः।

सिकतिल त्रि० सिकताः सन्त्यत्र इलच्। वालुकायुक्तदेशे

सिक्थ न० सिच–थक्। १मधूच्छिष्टे (मोम) २नील्याम् हेमच०। स्वार्थे क। तत्रार्थे भक्तपुलाके पासे च पु० मेदि० मधूच्छिष्टे न० अमरः।

सिक्य न० सिक–यत्। (सिके) रज्जुनिर्मिते पदार्थे।

सिच् त्रि० सिच–क्विप्। १सेचनकर्त्तरि कर्मणि क्विप्। २वस्त्रे हेमच०। [त्रिका०।

सिचय पु० सिच–अयन् किच्च। १वस्त्रे हेमच० २जीर्णवस्त्रे

सिञ्चिता स्त्री सिच–इतच् पृषो०। पिप्पल्याम् शब्दच०।

सित न० सो–क्त। १रौप्ये २मूलके राजनि० ३चन्दने रत्नमा० ४शरे ५शुक्लपक्षे ६शुक्लवर्णे च पु० अमरः। ७तद्वति ८समाप्ते ९बद्धे १०ज्ञाते च त्रि०विश्वः। [ङीप्।

सितकण्ठ पुंस्त्री० सितः कण्ठोऽस्य। दात्यूहे खगे स्त्रियां

सितकर पु० सितः करः किरणो यस्य। १चन्द्रे २कर्पूरे च राजनि० सितमयूखादयोऽप्यत्र। [राजनि०।

सितकर्णी स्त्री सितः कर्ण इव पुष्पमस्याः ङीप्। वासके

सितकुञ्जर पु० सितः कुञ्जरोऽस्य। १इन्द्रे कर्म०। २ऐरावतगजे

सितगुञ्जा स्त्री कर्म०। श्वेतगुञ्जायाम् राजनि०। [अमरः

सितच्छत्रा स्त्री सित छत्त्रमिव पुष्पमस्याः। शतपुष्पायाम्

सितच्छद पुंस्त्री० सितश्छदः पक्षो यस्य। १हंसे हेमच० स्त्रियां ङीष्। २श्वेतदूर्वायाम् स्त्री राजनि० टाप्।

सितदर्भ पु० कर्म०। श्वेतकुशे राजनि०।

सितदीप्य पु० दीपयत्यग्निम् दीप–णिच्–कर्त्तरि यत् कर्म०। श्वेतजीरके राजनि०।

सितदूर्वा स्त्री कर्म०। श्वेतदूर्वायाम् रत्नमा०।

सितद्रु पु० कर्म०। १मोरटभेदे रत्नमा० २शुक्लवर्णवृक्षे च।

सितधातु पु० कर्म०। १खटिकायाम् (खड़ी) राजनि० २श्वेत-धातौ रौप्यादौ च।

सितपक्ष पुंस्त्री० सितः पक्षोऽस्य। १हंसे शब्दर० स्त्रियां ङीष्। कर्म०। चन्द्रस्य वृद्धिकारके पञ्चदशतिथ्यात्मके २शुक्ले पक्षे। [हक्षे रत्नमा०।

सितपर्णी स्त्री सितानि पर्णान्यस्याः ङीप्। अर्कपुष्पिका-

सितपाटलिका स्त्री कर्म०। (श्वेतपारुल) वृक्षे राजनि०

सितपुङ्खा स्त्री सितः पुङ्खोऽस्याः। श्वेतशरपुङ्खावृक्षे राजनि०

सितपुष्प न० सितानि पुष्पाण्यस्य। १कैवर्त्तीमुस्तके जटा०। २तगरवृक्षे पु० शब्दर० ३काशे ४श्वेतरोहितवृक्षे च पु० राजनि०। ५श्वेतापराजितायां स्त्री ङीप्। ६मल्लि-कायां स्त्री टाप्। कर्म०। ७श्वेते पुष्पे न०।

सितमरिच न० कर्म०। शुभ्रमरिचे राजनि०।

सितमाष पु० नित्यक० । राजमाषे (बरबटी) हारा० ।
सितरञ्जन पु० सितमपि रञ्जयति रन्ज–णिच्–ल्युट् । १पीतवर्णे हेमच० २तद्वति त्रि० ।
सितवर्षाभू स्त्री वर्षासु भवति भू–क्विप् कर्म० । श्वेतपुनर्नवायाम् राजनि० । [शरपुङ्खाख्ये राजनि० ।
सि(शि)तसायका स्त्री सितः सायको यस्याः ५ब० । शुभ्र
सितशिम्बिक पु० सिता शिम्बिर्यस्य कप् । गोधूमे हेमच०
सितशूक पु० सितः शुभ्रः शूको यस्य । यवे भरतः ।
सितशूरण पु० कर्म० । वनशूरणे (वनओल) राजनि० ।
सितसर्षप पु० कर्म० । गौरसर्षपे राजनि० ।
सितसार(क) पु० सितः सारो निर्यासो यस्य वा कप् । शालिञ्चशाके राजनि० ।
सितसिन्धु स्त्री नित्यक० । गङ्गायां शब्दर० ।
सिता स्त्री सो–क्त । १शर्करायाम् ।
"खण्डन्तु सिकताकृपं सुश्वेतं शर्करा सिता । सिता सुमधुरा रुच्या वातपित्तास्रदाहहृत् । मूर्च्छाच्छर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी" राजव० । २मल्लिकायां शब्दर० ३श्वेतकण्टकारिकायां ४वाकुच्यां ५विदार्य्यां ६श्वेतदूर्वायां ७चन्द्रिकायां ८कुटुम्बिन्यां ९सुरायां १०पिङ्गायां ११मायमाणलतायां १२तेजन्यां राजनि० १३पर्वतजातापराजितायां रत्नमा० ।
सिताखण्ड पु० सिताया इव खण्डः । मधुजातशर्करायाम् "मधुजा शर्करा रूक्षा कफपित्तहरी गुरुः । छर्द्यती-सारतृड्दाहरक्तहृत् तुवरा हिमा । यथा यथाऽस्या नैर्मल्यं मधुरत्वं तथा तथा । स्नेहलाघवशैत्यादि सर-त्वं तथा तथा" भावप्र० ।
सि(शि)ताग्र पु० सि(शि)तमग्रं यस्य । कण्टके हारा० ।
सिताङ्ग पुंस्त्री० सिता सिकता अङ्गो यस्य । वालुकागडे (बेलिया) मत्स्ये हारा० स्त्रियां ङीष् ।
सिताङ्ग पु० सितमङ्गं यस्य । श्वेतरोहिते राजनि० ।
सितादि पु० सिताया आदिः कारणम् । गुडे राजनि० ।
सितापाङ्ग पुंस्त्री० सितमपाङ्गं यस्य । मयूरे त्रिका० स्त्रियां ङीष् । [ऽप्यत्र ।
सिताम्बु न० कर्म० । श्वेतकमले राजनि० सिताम्भोजादयो-
सिताभ पु० सिता आभा यस्य । १कर्पूरे राजनि०ट: २चन्द्रे च ३तक्रे स्त्री राजनि० ।
सिताभ्र पु० अभ्र इव सितः शुभ्रः राज० । कर्पूरे अमरः ।
सिताभ्रक न० अभ्रकमिव सितम् राज० । कर्पूरे राजनि० ।

सिताम्बर पु० सितमम्बरं यस्य । १श्वेतवस्त्रधारिणि व्रतिनि हला० २श्वेतवस्त्रधारिमात्रे त्रि० ।
सितार्जक पु० नित्यकर्म० । श्वेततुलस्याम् राजनि० ।
सितालक पु० आलयति भूषयति अल–णिच्–ण्वुल् नित्य कर्म० । श्वेतमन्दारे राजनि० । [श्वेतदूर्वायाम् रत्नमा०
सितालता स्त्री सिता सती आलतते आ+लत–अच् ।
सितालिकटभी स्त्री ... शुभ्रवर्णेन अलति अल–इन् कर्म० । श्वेतकाम्बोजिकायां राजनि० ।
सितावर पु० सितं श्वेततामावृणोति आ+वृ–अच् (सुसुनि) १शाकभेदे २वाकुच्यां स्त्री राजनि० ङीष् । "चाङ्गेरी-सदृशः पत्रैश्चतुर्दल इतीरितः । शाको जलान्विते देशे चतुष्पत्रीति चोच्यते" भावप्र० । [गङ्गायमुनयोः स्त्री हि०र०
सितासित पु० वर्णेन सितः वस्त्रेणासितः । १बलदेवे राजनि०
सिताह्वय पु० सितमाह्वयते आ+ह्वे–श । १श्वेतशिग्रौ २श्वेत-रोहिते च राजनि० । [त्रि० रायमु०
सिति पु० सो–क्तिच् । १शुक्लवर्णे २कृष्णवर्णे च । ३तद्वति
सितिमन् पु० सितस्य भावः इमनिच् । शुभ्रतायाम् । "सित सितिम्ना सुतरां मुनेर्वपुः" माघः ।
सितिवार पु० सितिं श्वेततां वृणोति वृ–अण् । सुनिषण्णके (सुसुनि) शाके भावप्र० ।
सितिवासस् पु० सिति कृष्णं वासोऽस्य । बलदेवे ।
सितेतर पु० सितादितरः । १शामशालौ २कुलत्थे च ३शुभ्रेतरवर्णे ४तद्वति त्रि० । [वह्नौ हला० ।
सितेतरगति पु० सितेतरा कृष्णा गतिरस्य । कृष्णवर्त्मनि
सितोदर पु० सितमुदरमस्य । कुबेरे हेमच० ।
सितोपल पु० कर्म० । १स्फटिके राजनि० कठिन्यां म० त्रिका० । २शर्करायां स्त्री हेमच० ।
सिद्ध न० सिध–क्त । १सैन्धवलवणे राजनि० अकृत्रिमत्वात्तस्य तथात्वम् २निष्पन्ने ३पक्के ४नित्ये च त्रि० शब्दर० । साधकस्यास्य अच् । ५व्यासादौ मुनौ ६देवयोनिभेदे च पु० अमरः तल्लोकश्च चन्द्रलोकादधःस्थो व्योमस्थितः यथोक्तं सू० सि० "मन्दामारेज्यभूपुत्रसूर्यशुक्रेन्दुजे-न्दवः । परिभ्रमन्त्यधोऽधःस्थाः सिद्धविद्याधरा घनाः" ७भिषिते त्रि० ८विष्कम्भादिषु मध्ये द्वाविंशयोगे ज्यो० ९गुडे १०कृष्णधुस्तूरे पु० राजनि० । ११पक्के त्रि० हेमच० १२व्यापारे पु० शब्दर० ज्योतिषोक्ते १३यो-गिनीदशामध्ये सप्तम्यां दशायां स्त्री । दशाशब्दे ३५०५ पृ० दृश्यम् । तन्त्रोक्ते अकथहचक्रस्थे साधक-

नामाद्याक्षरयुक्तकोष्ठस्याद्याक्षरयुक्ते १४मन्त्रभेदे पु० अकथहशब्दे २८५०दृश्यम् ।१५घञादिशाब्दे क्रियाभेदे स्त्री १६सिद्धियुते मन्त्रे पु० "मन्त्रसिद्धेरुपायश्च गौतमीये "पुनः सोऽनुष्ठितो मन्त्रो यदि सिद्धो न जायते । उपायास्तत्र कर्त्तव्याः सप्त शङ्करभाषिताः । भ्रामणं रोधनं वश्यं पीड़नं पोषशोषणम् । दहनान्तं क्रमात् कुर्य्यात् ततः सिद्धो भवेन्मनुः । भ्रामणं वायुबीजेन यथानुक्रमयोगतः । तन्मन्त्रं यन्त्र आ लिख्य शिल्हकर्पूरकुङ्कुमैः । उशीरचन्दनाभ्यान्तु मन्त्र संपुटितं लिखेत् । क्षीराज्यमधुतोयानां मध्ये तल्लिखितं भवेत् । पूजनाज्जपनाद्धोमात् भ्रामितः सिद्धिदो भवेत् । भ्रामितो यदि नो सिद्धो रोधनं तस्य कारयेत् । सारस्वतेन बीजेन संपुटीकृत्य संजपेत् । एवं रुद्धे भवेत् सिद्धो न चेदेतद्वशीकुरु । अलक्तचन्दनं कुष्ठं हरिद्रामादनं शिला । एतैस्तु मन्त्रमालिख्य भूर्जपत्रे शुभानने । धार्य्यं कण्ठे भवेत् सिद्धः पीड़नं तस्य कारयेत् । अधरोत्तरयोगेन पदानि परिजप्य वै । ध्यायेच्च देवतां तद्वत् अधरोत्तररूपिणीम् । विद्यामादित्यदुग्धेन विलिख्याक्रम्य चाङ्घ्रिणा । तथाभूतेन मन्त्रेण होमः कार्य्यो दिने दिने । पीड़ितो बद्धवाविष्टः सिद्धः स्यादथ पोषयेत् । बालायास्त्रितयं बीजमाद्यन्ते तस्य योजयेत् । गोक्षीरमधुनालिख्य विद्यां पाणौ विभावयेत् । पोषितोऽयं भवेत् सिद्धो न चेत् कुर्वीत शोषणम् । द्वाभ्यान्तु वायुबीजाभ्यां मन्त्रं कुर्य्याद्विदर्भितम् । एषा विद्या गले धार्य्या विलिखित्वा वरानना । शोषितोऽपि न सिद्धः स्यात् दहनीयोऽग्निबीजतः । आग्नेयेन तु बीजेन मन्त्रस्यैकैकमक्षरम् । आद्यन्तमध्यं कहं स्त्र योजयेद्दाहकर्मणि । ब्रह्मवृक्षस्य तैलेन मन्त्रमालिख्य धारयेत् । कण्ठदेशे ततो मन्त्रः सिद्धः स्याच्छङ्करोदितम् । इत्येतत्कथितं सम्यक् केवलं तव भक्तितः । एकेनैव कृतार्थः स्याद् बहुभिः किम्नु सुव्रते !" तन्त्रसारः । [च राजनि० ।

सिद्धक पु० सिद्ध इव इवार्थे कन् । १सिन्धुवारे २शालवृक्षे

सिद्धगङ्गा स्त्री सिद्धालोकस्था गङ्गा शाक० । मन्दाकिन्याम् जटा० । [जले सिद्धतोयादयोऽप्यत्र ।

सिद्धजल न० सिद्धं पक्वं जलमत्र ।१काञ्जिके कर्म०। २पक्वे

सिद्धदेव पु० सिद्धानां पूज्यः देवः । महादेवे शब्दर० ।

सिद्धधातु पु० सिद्धः प्रसिद्धो धातुः । पारदे त्रिका० ।

सिद्धपीठ पुंन० कर्म० । "जातो लक्षत्रयमितो होमो वा कोटिसङ्ख्यकः । महाविद्याजपाः कोट्यः सिद्धपीठः प्रकीर्त्तितः" इति तन्त्रोक्ते १स्थानभेदे पीठशब्दे ४२४२ पृ० दर्शिते २स्थानभेदे च ।

सिद्धपुर न० कर्म० । "लङ्का कुमध्ये यमकोटिरस्याः प्राक्, पश्चिमे रोमकपत्तनञ्च । अधोगतं सिद्धपुरञ्च" सि०शि०उक्ते भूगोलस्थेषु भूवृत्तपादान्तरितदेशस्थेषु चतुर्षु देवनिर्मितेषु पुरेषु मध्ये लङ्काधोभागस्थे पुरभेदे ।

सिद्धपुष्प पु० सिद्धप्रियं पुष्पं यस्य । करवीरवृक्षे राजनि० ।

सिद्धप्रयोजन पु० सिद्धं प्रयोजनं यस्मात् ५ब० । गौरसर्षपे राजनि० । २सिद्धाभीष्टे न० ।

सिद्धमोदक पु० तवराजोद्भवखण्डे राजनि० ।

सिद्धरस पु० सिद्धः प्रसिद्धो रसः । १पारदे अमरः सिद्धो रसोऽत्र । २धातुमात्रे त्रि० मेदि० ।

सिद्धविद्या स्त्री सिद्धा स्वतःसिद्धा विद्या मन्त्रो यस्याः।"काली तारा महाविद्या षोड़शी भुवनेश्वरी । भैरवी छिन्नमस्ता च विद्या धूमावती तथा । वगला सिद्धविद्या च मातङ्गी कमलात्मिका । एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः" इति तन्त्रोक्तासु दशसु काल्यादिषु देवीषु ।

सिद्धसाधन न० सिद्धस्य निश्चितस्य साधनमनुमानम् । १न्यायोक्ते सिषाधयिषाविरहकाले साध्यवत्त्वेन निश्चितस्य पुनरनुमानरूपे दोषे । सिद्धं साधयति ल्यु । २श्वेतसर्षपे पु० राजनि० । सिषाधयिषासत्त्वे तु सिद्धस्यापि अनुमानं भवत्येव "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः" इति वाचस्पत्युक्तेः । तदसत्त्वे तु नानुमितिः "न हि करिणि दृष्टे चित्कारेण तमनुमिमतेऽनुमातारः" इति तस्यैव वचनान्तरात् । सिद्धेश्च यथाऽनुमितिविरोधित्वम् तथा सिद्धिशब्दे वक्ष्यते । संशयपक्षतावादिमते निश्चयेन संशयस्य प्रतिरोधात् पक्षताऽसम्भवेन नानुमितिरिति बोध्यम् । सिद्धसाधनस्य पक्षताविघटकत्वेनाश्रयासिद्धावन्तर्भवतीति नियहरूपानामरमित्यन्ये ।

सिद्धसाध्य पु०अकथहशब्दोक्ते साधकनामाद्याक्षरयुक्तकोष्ठाद्विद्वितीयकोष्ठस्याद्याक्षरयुक्ते तन्त्रोक्ते मन्त्रभेदे अकथहशब्दे दृश्यम् ।

सिद्धसिद्ध पु० तन्त्रोक्ते अकथहशब्दोक्ते साधकनामाद्याक्षरयुक्तकोष्ठस्थिताद्याक्षरयुक्ते मन्त्रभेदे अकथहशब्दे दृश्यम्

सिद्धसिन्धु स्त्री ६त०। गङ्गायाम् त्रिका० सिद्धनद्यादयोऽप्यत्र

सिद्धसुसिद्ध पु० तन्त्रोक्ते मन्त्रभेदे चकथहशब्दे दृश्यम् ।

सिद्धान्त पु० सिद्धः निश्चितोऽन्तो यस्मात् । प्रमाणादुपन्यासेन पूर्वपक्षनिरासके सिद्धपक्षस्य स्थापनरूपे १वाक्यस्तोमे २ज्योतिःशास्त्रभेदे च स च सूर्यसिद्धान्तः सोमसिद्धान्तादिः "त्रुट्यादिप्रलयान्तकालकलनामानप्रभेदः क्रमाच्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः । भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः" सि० शि० । गौ० सूत्रोक्तसिद्धान्तलक्षणभेदो यथा "तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः" सू० । "सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्" सू० । "सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः" सू० । "समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः" सू० । "यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः" सू० । "अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः" सू० ।

"तन्त्रं शास्त्रं तदेवाधिकरणं ज्ञापकतया यस्य, तादृशस्य योऽभ्युपगमस्तस्य समीचीनतयाऽसंशयरूपतया स्थितिस्तथा च शास्त्रितार्थनिश्चयः सिद्धान्तः अत्र चाभ्युपगम्यमानोऽर्थः सिद्धान्त इति भाष्यम् "अभ्युपगमः सिद्धान्त इति वार्त्तिकटीका" न चात्र विरोधः शङ्कनीयः आचार्य्यैः परिहृतत्वात् तथा च सिद्धत्वो निबन्धः अर्थाभ्युपगमयोर्गुणप्रधानभावस्य विवक्षातन्त्रत्वादर्थोऽभ्युपगमोऽभ्युपगम्यमानो वार्थः सिद्धान्तस्तेन सूत्रभाष्यवार्त्तिकटीकासु न विरोधः । अत्र च भाष्यानुसारात् सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसिद्धान्तान्यतमः सिद्धान्त इति सूत्रार्थ इति तु न युक्तं अपिमसूत्रस्यानुत्थानापत्तेः तन्त्रसिद्धान्तत्वेन द्वयमनुगमय्य तन्त्राधिकरणाभ्युपगमान्यतमः सिद्धान्त इति कश्चित् । विभजते । स चतुर्विध इति शेषः सर्वतन्त्रादिसंस्थितीनामर्थान्तरभावात् भेदादित्यर्थः । सर्वतन्त्रसिद्धान्तं कथयति । सर्वतन्त्राविरुद्धः सर्वशास्त्राभ्युपगत इति कश्चित् । वस्तुतो यथाश्रुत एवार्थः अन्यथा तन्त्रेऽधिकृत इत्यस्य वैयर्थ्यापत्तेरतएव च जात्यादेरसदुत्तरत्वमपि सर्वतन्त्रसिद्धान्तः न च तन्त्रेऽधिकृत इति सारार्थं वाच्ये तु न देयमेवेति वाच्यं मनस इन्द्रियत्वस्यापि सर्वतन्त्रसिद्धान्तापत्तेः नव्यास्तु सूत्रस्योपलक्षणपरत्वात् वादिप्रतिवाद्युभयाभ्युपगतः कथानुकूलोऽर्थः स इति वदन्ति । प्रतितन्त्रसिद्धान्तं कथयति । समानशब्द एकार्थको नैकतन्त्रसिद्ध इत्यर्थः स्वतन्त्र सिद्ध इति पर्यवसितोऽर्थः तथा च वादिप्रतिवाद्येकतरमात्राभ्युपगतस्तदेकतरस्य प्रतितन्त्रसिद्धान्त इति फलितार्थः, यथा मीमांसकानां शब्दनित्यत्वम् । अधिकरणसिद्धान्तं कथयति "यस्यार्थस्य सिद्धौ जायमानायामेवान्यस्य प्रकरणस्य प्रस्तुतस्य सिद्धिर्भवति सोऽधिकरणसिद्धान्त इत्यर्थः यथा तत्र द्व्यणुकादिकं पक्षीकृत्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वे साध्यमाने सर्वज्ञत्वमीशस्य, एवं हेतुबलादपि यथा दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिन्द्रियादिव्यतिरिक्ते आत्मनि साधिते इन्द्रियनानात्वं तथा च यदर्थसिद्धिं विना योऽर्थः शब्दादनुमानाद्वा न सिध्यति सोऽधिकरणसिद्धान्त इति । वस्तुतस्तु शाब्दत्वमनुमानत्वं चाविवक्षितं प्रमाणमात्रमपेक्षितम् अतएव प्रत्यक्षेण स्थूलत्वसाधनानन्तरमुक्तमात्मतत्त्वविवेके "सोऽयमधिकरणसिद्धान्तन्यायेन स्थूलत्वसिद्धौ क्षणभङ्गभङ्ग इति" तत्र च वाक्यार्थसिद्धौ तदनुषङ्गी यो यः सोऽधिकरणसिद्धान्त इति वार्त्तिकफक्किकां लिखित्वा येन केनापि प्रमाणेन वाक्यार्थसिद्धौ जन्यमानायां योऽन्यार्थः सिध्यति स तथेत्यर्थः इति व्याख्यातं दीधितिकृता । एवं हेतुरीदृशः पक्षश्च वाक्यार्थ इति टीकावचने च उपलक्षणमेतदित्युक्तं तत्र तत्र विशिष्यैव लक्षणं कार्य्यम् । यत्तु जनकीभूतव्यापकताज्ञाने व्यापककोटावेव विषयः प्रकृतानुमित्या व्यापककोटौ विषयीकृतः शब्दजनकपदार्थज्ञानविषयत्वे सति शाब्दविषयश्चेति द्वयमधिकरणसिद्धान्त इति तत्र इन्द्रियनानात्वादौ भाष्योदाहृतेऽव्याप्तेरिति । अभ्युपगमसिद्धान्तं कथयति । अपरीक्षितस्य साक्षादसूत्रितस्य विशेषपरीक्षणं विशेषधर्मकथनम् । अभ्युपगमादिति ज्ञापकत्वे पञ्चमी अभ्युपगमज्ञापकमित्यर्थः विशेषपरीक्षणाज्ज्ञायते सूत्रकृतोऽभ्युपगतमिदमिति तथा च साक्षादसूत्रिताभ्युपगमोऽभ्युपगमसिद्धान्तः यथा मनस इन्द्रियत्वमिति" वृत्तिः । तथा च सिद्धस्यान्तः संस्थितिः सिद्धान्तः संस्थितिश्च इत्थंभावव्यवस्था । तत्र तन्त्रसंस्थितिस्तन्त्रार्थसंस्थितिः । अधिकरणसंस्थितिरधिकरणानुषक्तार्थसंस्थितिः । अभ्युपगमसंस्थितिरनवधारितार्थपरिग्रहे तद्विशेषपरीक्षणायाभ्युपगमसिद्धान्तः वात्स्या० भाष्ये दृश्यम् । प्रामाणिकत्वेनाभ्युपतोऽर्थः सिद्धान्त इत्यन्ये । मीमांसकोक्ते पञ्चावयवयुक्ताधिकरणाङ्गे ३चरमेऽङ्गे अधिकरणशब्दे १२६ पृ० दृश्यम् ।

सिद्धान्ताचार पु० "आत्मानं देवतां मत्वा यजेद्देवञ्च मानसैः। सदा शुद्धः सदा शान्तः सिद्धान्ताचार उच्यते" तन्त्रोक्ते आचारभेदे।

सिद्धारि पु० तन्त्रोक्ते साधकनामाद्याक्षरयुक्तकोष्ठावधिचतुर्थकोष्ठस्थाद्याक्षरयुक्ते मन्त्रभेदे अकथहशब्दे १८पृ० दृश्यम्।

सिद्धार्थ(क) पु० सिद्धः अर्थो यस्मात् ५ब० वा कप्। १श्वेतसर्षपे अमरः। २वटीवृक्षे च राजनि०। ६ब०। ३प्रसिद्धार्थे त्रि०। "सिद्धार्थं सिद्धसम्बन्धम्" इति प्राञ्चः। ४शाक्यसिंहे पु० मेदि० ५जिनभेदमातरि स्त्री हेमच०।

सिद्धि स्त्री सिध–क्तिन्। १ऋद्धिनामौषधे अमरः। २योगभेदे ३अन्तर्द्धाने ४निष्पत्तौ ५पाके ६पादुकायाम् ७वृद्धौ मेदि० ८मोक्षे हेमच० ९सम्पत्तौ धरणिः १०अणिमाद्यष्टविधैश्वर्ये ११बुद्धौ शब्दच० १२साध्यस्य तथा निश्चये च। १३सांख्योक्ते ऊहादिके सिद्धिहेतुभेदे "ऊहादिभिः सिद्धिः" सां०सू०। "ऊहादिभेदैः सिद्धिरष्टधा भवतीत्यर्थः। इदमपि सूत्रं कारिकया व्याख्यातम्। "ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः। दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः" इति। "अस्या अयमर्थः। आध्यात्मिकादिदुःखत्रयप्रतियोगिकत्वात् त्रयो दुःखविघातास्तु मुख्यसिद्धयः। इतरास्तु तत्साधनत्वाद्गौण्यः सिद्धयः। तत्रोहो यथा उपदेशादिकं विनैव प्राग्भवीयाभ्यासवशात् तत्त्वस्य स्वयमूहनमिति। शब्दस्तु यथा अन्यदीयपाठमाकर्ण्य स्वयं वा शास्त्रमाकलय्य यज्ज्ञानं जायते तदिति। अध्ययनं यथा शिष्याचार्यभावेन शास्त्राध्ययनाज्ज्ञानमिति। सुहृत्प्राप्तिर्यथा। स्वगृहोपदेशार्थं स्वगृहागतात् परमकारुणिकाज्ज्ञानलाभ इति। दानं यथा धनादिदानेन परितोषिताज्ज्ञानलाभ इति। एषु च पूर्वस्त्रिविध ऊहशब्दाध्ययनरूपो मुख्यसिद्धेरङ्कुश आकर्षकः। सुहृत्प्राप्तिदानयोरूहादित्रयापेक्षया अन्यसाधनत्वप्रतिपादनायैदमुक्तम्। कश्चित्त्वेतासामष्टसिद्धीनामङ्कुशो निवारकः पूर्वस्त्रिविधो विपर्ययाशक्तितुष्टिरूपो भवति बन्धकत्वादिति व्याचष्टे तन्न। तस्याभावस्यागन्तुकतया बाधिर्यादिवत् सिद्धिविरोधितालाभेन तस्यैतयोः सिद्धिविरोधित्वासम्भवात्। नन्वूहादिभिरेव कथं सिद्धिरुच्यते मन्त्रतपःसमाध्यादिभिरप्यणिमाद्यष्टसिद्धेः सर्वेषामसिद्धत्वादिति तत्राह" भा०। "नेतरादितरहानेन विना" सू०। "इतरादूहनादिपञ्चकभिन्नात्। तप आदेस्तात्त्विकी न सिद्धिः कुत इतरहानेन विना यतः सा सिद्धिरितरस्य विपर्ययस्य हानं विनैव भवत्यतः संसारापरिपन्थित्वात् सा सिद्ध्याभास एव न तु तात्त्विकी सिद्धिरित्यर्थः। तथा चोक्तं योगसूत्रेण। "ते समाधावुपसर्गा व्युत्थाने सिद्धयः" इति प्र०भाष्यम्।

पात० सू० भाष्ययोश्च एकत्र विषयविशेषे धारणाध्यानसमाधित्रयरूपसंयमविशेषात् कतिचित् सिद्धयो दर्शिताः यथा "परिणामत्रयसंयमादतीतानागतज्ञानम्" सू०। "धर्मलक्षणावस्थापरिणामेषु संयमात् योगिनां भवत्यतीतानागतज्ञानं धारणाध्यानसमाधित्रयमेकत्र संयम उक्तस्तेन परिणामत्रयं साक्षात्क्रियमाणमतीतानागतज्ञानं तेषु सम्पादयति" भा०। "शब्दार्थप्रत्ययानामितरेतराध्यासात् सङ्करस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम्" सू०। "संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्" सू०। "प्रत्ययस्य परचित्तज्ञानम्" सू०। "कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासम्प्रयोगेऽन्तर्द्धानम्" सू०। "सोपक्रमं निरुपक्रमञ्च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा" सू०। "मैत्र्यादिषु बलानि" सू०। "बलेषु हस्तिबलादीनि" सू०। "प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्" सू०। "भुवनज्ञानं सूर्ये संयमात्" सू०। "चन्द्रे ताराव्यूहज्ञानम्" सू०। "ध्रुवे तद्गतिज्ञानम्" सू०। "नाभिचक्रे कायव्यूहज्ञानम्" सू०। "कण्ठकूपे क्षुत्पिपासानिवृत्तिः" सू०। "कूर्मनाड्यां स्थैर्यम्" सू०। "मूर्द्धज्योतिषि सिद्धदर्शनम्" सू०। "प्रातिभाद्वा सर्वम्" सू०। "हृदये चित्तसंवित्" सू०। "सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात् स्वार्थसंयमात् पुरुषज्ञानम्" सू०। "ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते" सू०। "ते समाधावुपसर्गा व्युत्थाने सिद्धयः" सू०। "बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः" सू०। "उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च" सू०। "समानजयाज्ज्वलनम्" सू०। "श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम्" सू०। "कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम्" सू०। "बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः" सू०। "स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः" सू०। "ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्मानभिघातश्च" सू०। "रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत्" सू०। "ग्रहणस्वरूपास्मितान्वय-

र्थवत्त्वसंयमादिन्द्रियजयः" सू०। "ततो मनोजवित्वं विकरणभावः प्रधानजयश्च" सू०। "परिणामत्रयसंयमादतीतानागतज्ञानम्" इत्यादिकैः "ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते" इत्यन्तसूत्रैरुक्तानां सिद्धीनां समाधावुपसर्गत्वं व्युत्थाने सिद्धित्वमाह "ते समाधावुपसर्गा व्युत्थाने सिद्धयः" सू०। ते प्रातिभादयः समाहितचित्तस्योत्पद्यमानाः उपसर्गास्तद्दर्शनप्रत्यनीकत्वात्। व्युत्थितचित्तस्योत्पद्यमानाः सिद्धयः" भा०। एवमन्ये वक्ष्यमाणाः ततोऽणिमादिप्रादुर्भाव इत्यादयोऽपि सिद्धयो व्युत्थानदशायामेव समाधौ तूपसर्गा एव हेतोरविशेषात्। एवमन्या अपि सिद्धयः कैवल्यपादे दर्शिता यथा "जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः" सू०। "देहान्तरिता जन्मना सिद्धिः औषधिभिरसुरभवने रसायनेनेत्येवमादि। मन्त्रैराकाशगमनाणिमादिलाभः तपसा सङ्कल्पसिद्धिः कामरूपी यत्र तत्र कामग इत्येवमादि समाधिजाः सिद्धयो व्याख्याताः" भा०। तासाञ्च यथाऽन्यथापरिणामहेतुत्वं तथा परस्तादेवात्र वर्णितम्।

तन्त्रोक्तमन्त्रसिद्धिलक्षणं च तन्त्रसा० उक्तं यथा "मनोरथानामक्लेशः सिद्धिरुत्तमलक्षणा। मृत्योश्च हरणं तद्वत् देवतादर्शनं तथा। प्रयोगेऽक्लेशतः सिद्धिः सिद्धेस्तु लक्षणं परम्॥ परकायप्रवेशश्च पुरप्रवेशनं तथा। ऊर्द्ध्वोत्क्रमणमेवं हि चराचरपुरे गतिः। खेचरीमेलनं चैव तत्कथाश्रवणादिकम्। भूच्छिद्राणि प्रपश्येत्तु तद्वदुत्तमलक्षणम्। ख्यातिर्वाहनभूषादिलाभः सुचिरजीवनम्। नृपाणां तद्गणानाञ्च वशीकरणमुत्तमम्। सर्वत्र सर्वलोकेषु चमत्कारकरी सुधीः। रोगापहरणं दृष्ट्या विषापहरणं तथा। पाण्डित्यं लभते मन्त्री चतुर्विधमयत्नतः। वैराग्यञ्च मुमुक्षुत्वं त्यागितां सर्ववश्यताम्। अष्टाङ्गयोगाभ्यसनं भोगेच्छापरिवर्जनम्। सर्वभूतेष्वनुकम्पा सार्वज्ञ्यादिगुणोदयः। इत्यादिगुणसम्पत्तिर्मध्यसिद्धेस्तु लक्षणम्। महैश्वर्यं धनित्वं च पुत्रदारादिसम्पदः। अधमाः सिद्धयः प्रोक्ता मन्त्रज्ञानाद्यभूमिका। सिद्धमन्त्रस्तु यः साक्षात् स शिवो नात्र संशयः।

न्यायमते तु अनुमितिविषयीभूतसाध्यवत्तानिश्चयरूपसिद्धिस्तु अन्यानुमितीच्छायां कामिनीजिज्ञासादिवत् अनुमितेः पृथक् प्रतिबन्धिका अनुमित्सा तु उत्तेजिका। "सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते। स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्" भाषा०। सिद्धिश्च पक्षतावच्छेदकसामान्यावगाहिनी पक्षतावच्छेदकावच्छिन्नयत्किञ्चिद्धर्म्यवगाहिनी च तत्तावच्छेदकावच्छेदेनानुमितिं प्रति अवयवावच्छेदेन सिद्धिर्विरोधिनी न सामानाधिकरण्येन सिद्धिः। सामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधीति विवेकः। संशयपक्षतावादिमते पक्षताविघटकत्वेन सिद्धेर्विरोधितेति विशेषः। १४दक्षकन्याभेदे वह्निपु० [सि०।

सिद्धिद पु० सिद्धिं ददाति दा–क। वटुकभैरवे। २सिद्धिदातरि

सिद्धियोग पु० "शुक्रे नन्दा बुधे भद्रा शनौ रिक्ता कुजे जया। गुरौ पूर्णा च संयुक्ता सिद्धियोगः प्रकीर्त्तितः" ज्योतिषोक्ते शुक्रादिवारयुक्तनन्दादितिथौ।

सिद्धिस्थान न० तीर्थभेदे। "अतःपरं प्रवक्ष्यामि सिद्धिस्थानानि यानि तु। यस्मिन्नाराधिता देवी क्षिप्रं भवति सिद्धिदा। कुरुक्षेत्रं गयाक्षेत्रं त्रिकूटं पर्वतं तथा विन्ध्या गङ्गा सरिद्यत्र रेवातीरमथापि वा। पयोष्णी [illegible] अथ वा मल्लकेश्वरे। शङ्करेश्वररामेशे अथवा अमरेश्वरे। वेत्रवत्यास्तटे रम्ये हरिश्चन्द्रे तथा पुरे। वरुणातीरतटे पुण्ये सुगन्धायतनेऽपि वा। स्थानेष्वेषु [illegible] यात् नन्दाद्रे कृतमानसः। भैरवं शूलभेदञ्च चण्डेश्वरं [illegible]कम्। अट्टहासं चक्रोच्छासं कपालं [illegible]कम्। अजाविकं वरोद्भाख्यं स्थानान्येतानि [illegible]" देवीपु०।

सिद्धेश्वरी स्त्री देवीविशेषे। "सिद्धां सिद्धेश्वरीं सिद्धविद्याधरगणैर्युताम्। मन्त्रसिद्धिप्रदां योनिसिद्धिदां लिङ्गशोभनाम्" मुण्डमालात० ११ पटले। "लक्ष्मणेन बलभद्रेण गोपैः कंसजिघांसुभिः। सङ्केतकं कृतं तत्र मन्त्रनिर्धारकम्। तदा सङ्केतकैः सा च सिद्धा देवी प्रतिष्ठिता। सिद्धिप्रदा भोगदा च तेन सिद्धेश्वरी स्मृता। सङ्केतकेश्वरीश्चैव दृष्ट्वा सिद्धिमवाप्नुयात्" इति वाराहपु०।

सिद्धौघ पु० ६त०। तारादेव्याः पूजाङ्गे पूज्ये गुरुभेदे "दिव्यौघाः सिद्धिदा वत्स। सिद्धौघान् शृणु यत्नतः। वसिष्ठः कूर्मनाथश्च मीननाथो महेश्वरः। हरिनाथो, मानवौघान् शृणु वक्ष्यामि तद्गुरून्" तन्त्रसा०।

सिध्म न० सिध–मन् किच्च। किलासरोगे हेमच०।

सिध्मन् न० सिध–मनिन् किच्च। १किलासरोगे अमरः २०५५ पृ० किलासशब्दे दृश्यम्।

सिध्मल त्रि॰ सिध्मन्+अस्त्यर्थे लच्। १किलासरोगवति अमरः। २मीनविकारे स्त्री हेमच॰। [पुष्यनक्षत्रे अमरः

सिध्य पु॰ कार्य्यं साधयति सिध-णिच्-कर्त्तरि यत् नि॰।

सिध्र पु॰ सिध-रक्। १साधौ २वृक्षे च उणा॰।

सिध्रक पु॰ सेधति रोगान् सिध-रक् स्वार्थे क। वृक्षभेदे "वर्नागर्य्योः" पा॰ इत्यादिसूत्रेण सिध्रकशब्दस्य पाणिनिना दीर्घस्य विधानात् पुंस्त्वमेवास्य युक्तम् अमरोक्तं स्त्रीत्वन्त्वपाणिनीयम्। [त्रिका॰।

सिध्रकावण न॰ सिध्रकप्रधानं वनं णत्वम् दीर्घश्च। देवोद्याने

सिन पु॰ सीयते बध्यते सि-क्त ग्रासे तस्य नः। १ग्रासे नस्य बहुत्वात्तथात्वम्। [व्याडिः

सिनी स्त्री सित+ङीप् तस्य नश्च। शुक्लवर्णयुतस्त्रियाम्

सिनीवाली स्त्री सिनीं श्वेतां चन्द्रकलां वलति धारयति वल-अच् ङीप्। १चतुर्दशीयुक्तायाममावास्यायाम् अमरः। कुहूशब्दे २१६२ पृ॰दृश्यम्। २दुर्गायां मेदि॰।

सिन्दु(न्धु)क पु॰ स्यन्दते स्यन्द-उ संप्रसारणञ्च पृषो॰ दस्य वा धः स्वार्थे वा क। सिन्दुवारवृक्षे अमरः (न्धु)मध्यस्तमार्थे शब्दर॰।

सिन्दु(न्धु)वार पु॰ सिन्धुं गजमदं वारयति तिक्तत्वात् वृ-अण्। १(निसिन्दा) वृक्षे अमरः "मुक्ताकलापीकृतसिन्धुवारम्" कुमारः। तस्य च श्वेतपुष्पत्वात् मुक्तातुल्यत्वम्। पृषो॰ न्धुमध्यस्तमार्थे रत्नको॰ २हयोत्तमे त्रिका॰।

सिन्दूर न॰ स्यन्द-ऊरन् संप्रसारणम्। स्वनामख्याते रक्तवर्णे १चूर्णभेदे अमरः २वृक्षभेदे पु॰ मेदि॰। "सीसोपधातुः सिन्दूरं गुणैस्तत् सीसवन्मतम्। संयोगजप्रभावेन तस्याप्यन्ये गुणाः स्मृताः। सिन्दूरमुष्णं वीसर्पकुष्ठकण्डूविषापहम्। भग्नसन्धानजननं व्रणशोधनरोपणम्" "दुग्धाम्लयोगतस्तस्य विशुद्धिर्गदितो बुधैः" भावप्र॰। भर्त्तुरायुर्वृद्धये सधवया तद्धारणस्यावश्यकता यथोक्तं काशीख॰ ४अ॰ "हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा। कूर्पासकञ्च ताम्बूलं माङ्गल्याभरणं शुभम्। केशसंस्कारकबरीकरकर्णविभूषणम्। भर्त्तुरायुष्यमिच्छन्ती दूरयेन्न पतिव्रता"।

सिन्दूरकारण न॰ ६त॰। सीसके हेमच॰।

सिन्दूरतिलक पु॰ स्त्री॰ सिन्दूररूपो तिलकश्चिह्नभेदो यस्य। १हस्तिनि मेदि॰ स्त्रियां ङीष्। २सधवायाम् स्त्री।

सिन्दूरी स्त्री सिन्दूरं तद्वर्णोऽस्त्यस्याः अच् गौरा॰ ङीष्। १रोचन्यां २धातक्याञ्च मेदि॰।

सिन्धु पु॰ स्यन्द-उ संप्रसारणं दस्य धश्च। १समुद्रे अमरः २रक्तचेविलतायां ३नदभेदे मेदि॰ ४गजमदे हेमच॰। ५सिन्धुवारवृक्षे शब्दच॰। ६श्वेतटङ्कणे राजनि॰। ७रागभेदे सङ्गीत॰। ८नद्यां स्त्री मेदि॰ ९नदीभेदे राजनि॰। "शतद्रोर्विपाशायुजः सिन्धुनद्याः सुशीतं लघु स्वादु सर्वामयघ्नम्। जलं निर्मलं दीपनं पाचनञ्च प्रदत्ते बलं बुद्धिमेधायुषञ्च" राजनि॰ तज्जलगुणाः। १०नैर्ऋतीस्थे देशभेदे पु॰ कूर्मविभागशब्दे २१६८पृ॰दृश्यम्। सोऽभिजनोऽस्य तस्य राजा वा अण्। सैन्धव पित्रादिक्रमेण तद्देशवासिनि तद्भूपे च। बहुषु अणो लुक्।

सिन्धुकफ पु॰ सिन्धोः कफ इव। समुद्रफेने शब्दर॰।

सिन्धुकर न॰ सिन्धुदेशे कीर्य्यते क्रियते वा कृ-कृ-वा अप्। श्वेतटङ्कणे राजनि॰। [शब्दर॰।

सिन्धुखेल पु॰ सिन्धुसमीपे खेलति खेल-अच्। सिन्धुदेशे

सिन्धुज न॰ सिन्धुदेशे समुद्रे वा जायते जन-ड। १सैन्धवलवणे अमरः २चन्द्रे ३कर्पूरे पु॰। ४लक्ष्म्यां स्त्री जटा॰ सिन्धुजातादयोऽप्यत्र।

सिन्धुनन्दन पु॰ ६त॰। १चन्द्रे २कर्पूरे त्रिका॰। सिन्धुसुतादयोऽप्यत्र। ३लक्ष्म्यां स्त्री। [शब्दच॰।

सिन्धुपुष्प पु॰ सिन्धौ पुष्प्यति विकाशते पुष्प-अच्। शङ्खे

सिन्धुमन्थज न॰ सिन्धुमन्थात् जायते जन-ड। १सैन्धवलवणे रत्नमा॰ २अमृते च।

सिन्धुर पुंस्त्री॰ सिन्धुर्मदजलमस्यास्ति र। हस्तिनि हेमच॰ स्त्रियां ङीष् "मदान्धसिन्धुरघटा" गङ्गास्तवः।

सिन्धुलवण न॰ सिन्धुदेशजातं लवणम्। सैन्धवलवणे रत्नमा॰

सिन्धुवारित पु॰ सिन्धुः मदजलं वारितस्तिरस्कृतो येन अतितिक्तत्वात्। सिन्धुवारवृक्षे। (निसिन्दा) शब्दर॰।

सिन्धुवेषण पु॰ विष-ल्यु ६त॰। गाम्भारीवृक्षे शब्दच॰।

सिन्धुसङ्गम पु॰ सिन्ध्वोः नद्योः नदीसमुद्रयोर्वा सङ्गमः। १नद्याः नदीसमुद्रयोर्वा मेलने अमरः। स यत्र। २तदाधारदेशे त्रि॰।

सिन्धूद्भव न॰ सिन्धोः उद्भवति उद्+भू-अच् ५त॰। सैन्धवलवणे रत्नमा॰ २समुद्रजातमात्रे त्रि॰। [क्लीबमित्यन्ये।

सिन्धूपल पु॰ सिन्धोरुपल इव। १सैन्धवलवणे हारा॰।

सिप्र पु॰ सप-रक् पृषो॰। १सरोवरभेदे २चन्द्रे त्रिका॰ ३निदाघजले ४घर्मे च पु॰ मेदि॰। ५उज्जयिनीसमीपस्थे नदीभेदे स्त्री मेदि॰ "सिप्रातरङ्गानिलकम्पितासु" रघुः। वर्षिष्ठाकन्यत्योर्विवाहप्रस्तुतजलस्य सिप्रसरसि मेलनात्

शिप्राप्रादुर्भावो यथा "तत्तोयं सप्तधा भूत्वा पतितं मान-सात्सरात् । हेमाद्रेः कन्दरे सानौ सरस्यां च पृथक् पृथक् । तत्तोयं पतितं शिप्रे देवभोग्ये सरोवरे । तेन शिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम्" कालिपु० २२अ० । [नामता ।

सिम पु० सि-मन् किच्च । सर्वस्मिन् इत्यर्थे । तदर्थेऽस्य सर्व-

सिम्बा(म्बि) स्त्री शाम्यति क्षुदनया शम-बन् इत्वं वा पृषो० । (सुँटि) १शिम्बायाम् हिन्द्र्पको० इनन्तः । २नखी-नामगन्धद्रव्ये राजनि० वा ङीप् । ङीबन्तः । ३मुन-ष्याख्यां भावप्र० । [धान्ये कलायादौ भावप्र०।

सि(शि)म्बिजा स्त्री सि(शि)म्बिजायते जन-ड । शमी-

सिर पु० सि-रक् । १पिप्पलीमूले हेमच० । २नाड्याम् ३सम्बुवाहिन्याञ्च स्त्री हेमच० । [सल्लकीवृक्षे भरतः ।

सिल्लकी स्त्री सि-क्विप् ल्लक-अच् गौरा० ङीष् कर्म० ।

सिवर पुंस्त्री० सि-ष्वरच् । गजे जटा० स्त्रियां ङीप् ।

सिहुण्ड पु० सो-कि सिः छेदस्तं हुण्डते कण्टकाहतत्वात् हुडि-अण् । स्नुहीवृक्षे शब्दर० । [स्वार्थे क तत्रैव ।

सिह्ल पु० सिह-लक् पृषो० । तुरुष्काख्ये गन्धद्रव्ये अमरः

सिह्लकी स्त्री सिह-ल्लक पृषो० गौरा० ङीप् । सल्लकी-वृक्षे शब्दर० । [शब्दर० ।

सिह्लभूमि स्त्री सिह्लस्य गन्धद्रव्यस्य भूमिः । सल्लकीवृक्षे

सीक सेचने भ्वा० आ० सक० सेट् । सीकते असीकिष्ट । ऋदित् चङि न ह्रस्वः । पर्युदासेन न वोपदेवः ।

सीक स्पर्शे वा चु० उभ० पक्षे भ्वा० प० सक० सेट् । सीक-यति ते सीकति असीसिकत् त असीकीत् । पर्युदासात् वोपदेवः । [भरतः ।

सीकर पु० सीक्यते सिच्यतेऽनेन सीक-अरन् । जलकणे

सीता स्त्री सि-त पृषो० दीर्घः । १लाङ्गलपद्धतौ अमरः २जनकराजदुहितरि ३भद्राश्ववर्षस्थितगङ्गायाञ्च । "अथ मे कर्षतः क्षेत्रं लाङ्गलादुत्थिता ततः । क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता । भूतलादु-त्थिता सा तु व्यवर्द्धत ममात्मजा" रामा० बाल० "अथ लोकेश्वरी लक्ष्मीर्जनकस्य पुरे स्वतः । शुभक्षेत्रे ह-लोत्खाते तारे चोत्तरफाल्गुने । अयोनिजा पद्मकरा बालार्कशतसन्निभा । सीतामुखे समुत्पन्ना बालभावेन सुन्दरी । सीतामुखोद्भवात् सीता इत्यस्यै नाम चा-करोत्" पद्मपु० । भद्राश्ववर्षनदीभेदश्च स्वर्गगङ्गाया धारा-भेदः जम्बुद्वीपशब्दे ३०४६ पृ० दृश्यः । ४लक्ष्म्याम् ५उमायां ६वस्राधिदेवतायां जालार्कमञ्जरी । ७मदि-रायां राजनि० ।

सीतापति पु० ६त० । श्रीरामे शब्दर० ।

सीतायाःपति पु० ६त० अलुक्समा० । श्रीरामे शब्दर० । "सीतायाः पतये नमः" इति पुराणम् असमस्तत्वे पत्ये इत्येव स्यात् ।

सीत्कार पु० सीदित्यव्यक्तस्य कारः सीत्+कृ-घञ् । अनु-रागजे शब्दे । [शब्दे हेमच० ।

सीत्कृत न० सीत्+कृ-भावे क्त । १सीत्कारे २अनुरागज-

सीत्य न० सीतया लाङ्गलपद्धत्या निर्वृत्तं यत् । १धान्ये हेमच० । सीतामर्हति यत् । २हलकर्षणयोग्ये क्षेत्रादौ त्रि०

सीधु पु० सिध-उ पृषो० । १मद्ये २मद्यभेदे च "इक्षोः पक्वै रसैः सिद्धः सीधुः पक्वरसश्च सः । आमैस्तैरेव यः सीधुः (सेरका) स च शीतरसः स्मृतः । सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् । वातपित्तकरो हृद्यः स्नेहनो रोचनो हरेत् । विबन्धमेदःशोफार्शःशोफोदरकफा-मयान् । तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः" राजनि० । [शब्दर० ।

सीधुगन्ध पु० सीधोरिव गन्धोऽस्य वा न इत्समा० । बकुले

सीधुपुष्प पु० सीधुगन्धयुक्तं पुष्पमस्य । १कदम्बे २बकुले च ३धातक्यां स्त्री राजनि० ङीप् ।

सीधुरस पु० सीधोरिव रस आस्वादोऽस्य । आम्रवृक्षे राजनि०

सीमन्त पु० सीम्नोऽन्तः शक० । १केशान्तर्गतवर्त्माकारे पदार्थे (सिँति) हेमच० २केशरचनाभेदे । "षष्ठेऽष्टमे वा सीमन्त" इत्युक्ते गर्भावधिके षष्ठे अष्टमे वा मासि कर्त्तव्ये ३गर्भ-संस्कारभेदे च सीमन्तोन्नयनशब्दे दृश्यम् ।

सीमन्तक न० सीमन्ते कायति कै-क । १सिन्दूरे राजनि०

सीमन्तिनी स्त्री सीमन्त+अस्त्यर्थे इनि । नार्याम् अमरः ।

सीमन्तोन्नयन न० सीमन्तस्य केशरचनाभेदस्य उन्नयनम् उ-त्तोलनम् । स्वनामख्याते गर्भसंस्कारभेदे ।

तत्कालादि संस्कारत० दर्शितं यथा

"यदि पुंसवनं न कृतं तदा तस्मिन्नेव दिने प्रायश्चित्ता-त्मकमहाव्याहृतिहोमं कृत्वा पुंसवनं कृत्वा सीमन्तोन्न-यनं कार्य्यम् । तथा च नारदः "येषान्तु न कृताः पूर्वं संस्कारविधयः क्रमात् । कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनात् । अविद्यमाने पित्रर्थे स्वांशादुद्धृत्य वा पुनः । अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्वसंस्कृतैः" । क्रमात् भ्रातृणां संस्काराच्चात्र पौर्वापर्य्यक्रमात् भ्रातृ-

क्रमस्तु सोदरविषयः विवाहे तथा दर्शनात्। छन्दोगपरिशिष्टम् "देवतानां विपर्य्यासे जुहोतिषु कथं भवेत्। सर्वं प्रायश्चित्तं कृत्वा क्रमेण जुहुयात् पुनः। संस्कारा अतिपत्येरन् स्वकालाच्च कथञ्चन। हुत्वैतदेव कुर्वीत ये तूपनयनादधः"। एतदित्यनेन सर्वं प्रायश्चित्तमनुकृष्टं तच्च प्रागेव विवृतम्। उभयकरणे तन्त्रेणैव मातृकापूजादि "गणशः क्रियमाणे तु मातृभ्यः पूजनं सकृत्। सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु" इति छन्दोगपरिशिष्टात्। गोभिलः "अथ सीमन्तकरणं प्रथमे गर्भे चतुर्थे मासि षष्ठेऽष्टमे वा"। अथ पुंसवनानन्तरं सीमन्तः केशरचनाविशेषः। वाशब्देनाच चतुर्थादिमासानां तुल्यवद्विकल्पः किन्तु पूर्वः पूर्वः कालः प्रशस्तः "समर्थस्य क्षेपायोगादिति" न्यायात्। ततो नवमासादौ प्रायश्चित्तं कृत्वैव कर्त्तव्यम् प्रथमगर्भ इत्युपादानात् यदि कथञ्चिदकृत एतस्मिन् संस्कारे गर्भनाशे पुनर्गर्भोत्पत्तौ अयं कालनियमो न किन्तु "गर्भस्पन्दने सीमन्तोन्नयनं यावच्च वा प्रसवः" इति शङ्खलिखितोक्तकालो ग्राह्यः। कुत्रचित्त्रागमार्त्तण्डे "या नार्य्यकृतसीमन्ता प्रसूते च कथञ्चन। अङ्के निधाय तं बालं पुनः संस्कारमर्हति"। "षष्ठे मासेऽष्टमेऽप्योव्यकुजदिनकृतां नन्दभद्रे तिथौ च मैत्रे१७ मूले मृगाङ्के५ कर१३ पितृ१ पवने१५ पौष्ण२७विष्णु२२त्रिपुष्के ११।१२।२०। २१।२५।२६। पुष्याश्वादित्य७रौद्रे ६ युवतिहरिझषे दृश्चिके वापि लग्ने चन्द्रे तारानुकूले शुभमपि नियतं स्याच्च सीमन्तकर्म। स्वगान्तरहिते लग्ने नवांशे पुंग्रहस्य च। केचिद्वदन्ति सीमन्तं तथारिक्तेतरे तिथौ"। अथ सीमन्तमूर्द्ध्वं नयत्येति गोभिलोक्तेरस्यान्वर्थता।

सीमन् स्त्री शि-इमनि पृषो० न गुणो दीर्घश्च। १मर्य्यादायाम् अवधौ जटा० २स्थितौ ३क्षेत्रे ४अण्डकोषे मेदि०। "सीम्नि पुष्पञ्जकोहतः" सि०कौ० ५वेलायाञ्च विश्वः।

सीमा स्त्री+सीमन्+वा डाप्। १मर्य्यादायां २ग्रामादेरन्तभागे ३सीमन्शब्दार्थे च।

सीमाविवाद पु० सीमायां विवादः। अष्टादशसु विवादेषु सत्र्ये स्वनामख्याते विवादभेदे

तत्स्वरूपादिकं वीरमि० दर्शितं यथा

"अथ सीमाविवादाख्यव्यवहारपदम् तत्स्वरूपमाह नारदः "सेतुकेदारमर्य्यादाविकृष्टाकृष्टनिश्चयः। क्षेत्राधिकारो यत्र स्याद्विवादः क्षेत्रजस्तु सः"। सेत्वर्थः सेतुर्जलप्रवाहबन्धः। केदारः क्षेत्रम्। मर्य्यादा सीमा। विकृष्टो लाङ्गलप्रहतो देशः अकृष्टस्तद्रहितः एतेषां निश्चयो यत्र विवादे स्यात् स क्षेत्राधिकारः क्षेत्रविषयको विवादः क्षेत्रज उच्यत इति। अयं विवादः षड्विधः तथा च कात्यायनः "आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च। अभोगभुक्तिः सीमा च षड् भूवादस्य हेतवः"। ममैषाधिका भूरस्तीत्युक्तेनेति विवाद आधिक्यविवादः। एतावती भूस्तव नेत्युक्ते ममैतावतीति यो विवादः स न्यूनताविवादः अत्र ममांशोऽस्तीत्युक्ते यो विवादः सोऽस्तित्वविवादः अत्र तवांशो नास्तीत्युक्ते मम विद्यते इत्येवंविधो विवादो नास्तित्वविवादः। सीमाविवाद इति षड्विधो विवाद इत्यर्थः। तत्र सीमा चतुर्विधा। देशसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति। तस्याश्चतुर्विधाया अपि यथासम्भवं पञ्चविधत्वमाह नारदः "ध्वजिनी मत्स्यिनी चैव नैधानी भयवर्जिता। राजशासननीता च सीमा पञ्चविधा स्मृता"। ध्वजिनी वृक्षादिचिह्निता वृक्षाश्च न्यग्रोधादयः। तदाह मनुः "सीमावृक्षांस्तु कुर्वीत न्यग्रोधाश्वत्थकिंशुकान्। शाल्मलीन् सालतालांश्च क्षीरिणश्चैव पादपान्" इति। मत्स्यिनी जलचिह्निता। नैधानी निखाततुषाङ्गारादिलक्षिता। भयवर्जिता अर्थिप्रत्यर्थिपरस्परसम्मतिपत्तिनिर्म्मिता। तथा च व्यासः "ग्रामयोरुभयोः सीम्नि दत्ता यत्र समन्ततः। सर्वौकृता ध्वजाकारा ध्वजिनी सा प्रकीर्त्तिता। सस्पन्दगा बहुजला मत्स्यकूर्मसमन्विता। नित्यप्रवाहिणी यत्र सीमा सा मत्स्यिनी मता। तुषाङ्गारकपालैस्तु कुम्भैरायतनैस्तथा। सीमा प्रचिह्निता कार्य्या नैधानी सा निगद्यते" इति। नित्यप्रवाहिणीत्यनेन कूपवाप्यादीनि प्रकाशचिह्नान्युपलक्ष्यन्ते। तानि च वृहस्पतिना दर्शितानि "वापीकूपतडागानि चैत्यारामसुरालयाः। स्थलं निम्नं नदीस्रोतः शरगुल्मनगादयः। प्रकाशचिह्नान्येतानि सीमायां कारयेत् सदा। निहितानि तथान्यानि यानि भूमिर्न भक्षयेत्। अश्मनोऽस्थीनि गोबालांस्तुषान् भस्मकपालिकाः। करीषमिष्टकाङ्गारशर्करावालुकास्तथा। तानि सन्धिषु सीमाया अप्रकाशानि कारयेत्"। चैत्यं इष्टकादिभिः रचितमञ्चरादिकम्। स्थलम् उन्नतः भूप्रदेशः। निम्नं परिखा। नगा अश्वत्थादयो वृक्षाः। आदिशब्देन

करीषादीनां कार्पासबीजानाञ्च ग्रहणम्। अस्थीनि पशुमनुष्याद्यस्थीनि। तुषाङ्गारकपालैरिति करीषादीनामन्येषां लिङ्गानामप्युपलक्षणम्। तानि निधापयेत् "तत्र योगांस्तु बालानां प्रयत्नेन प्रदर्शयेत्। वार्द्धके च शिशूनां ते दर्शयेयुस्तथैव च। एवं परम्पराज्ञाने सीमाभ्रान्तिर्न जायते" इति। प्रदर्शयेदिदन्तु छान्दसं बहुत्वे एकवचनम्। एतेषां लिङ्गानां कथञ्चिदभावे निश्चयोपायमाह नारदः "निम्नगापहृतोत्सृष्टनष्टचिह्नासु भूमिषु। तत्प्रदेशानुमानैश्च प्रमाणैर्भोगदर्शनैः"। निम्नगाया नद्या अपहृतेन अपहरणेन उत्सृष्टानि स्वस्थानाद्भ्रष्टानि चिह्नानि यासान्तास्तथोक्ताः। प्रमाणैः साक्षिसामन्तादिभिः एवं निरूपितैर्लिङ्गैर्निर्णयं कुर्य्यादित्याह मनुः "एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः। यदि संशय एव स्यात् लिङ्गानामपि दर्शने। साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः"। साक्षिप्रत्ययः साक्षिहेतुकः। लिङ्गाभावपक्षपरिग्रहार्थोऽपिशब्दः ते च साक्षिणः सीमाविषयाः सीमालिङ्गविषया वा। साक्षिषु विशेषमाह बृहस्पतिः "आगमञ्च प्रमाणञ्च भोगकालञ्च नाम च। भूभागलक्षणञ्चैव ये विदुस्तेऽत्र साक्षिणः" प्रमाणमियत्ता। उभयेषामपि साक्षिणामभावे सामन्तवशान्निर्णयं कुर्य्यादित्याह मनुः "साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः। सीमाविनिर्णयं कुर्य्युः प्रयता राजसन्निधौ"। यदा पुनर्लिङ्गानि न सन्ति वर्त्तमानानि वा सन्दिग्धानि तदा निश्चयोपायमाह याज्ञवल्क्यः "सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा। रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः"। सामन्ताः सन्निहितग्रामक्षेत्राद्युपभोक्तारः। समग्रामाश्चत्वारोऽष्टौ इत्यादि प्रकारेण सङ्ग्राह्याः। तथा च कात्यायनः "ग्रामो ग्रामस्य सामन्तः क्षेत्रं क्षेत्रस्य कीर्त्तितम्। गृहं गृहस्य निर्द्दिष्टं समन्तात्परिरभ्य हि"। ग्रामस्य समन्ताच्चतसृषु दिक्षु परिरभ्य सम्बध्य स्थितो ग्रामः सामन्तः क्षेत्रादप्येवं ज्ञेयम्। सामन्तानां यदा रागद्वेषादिना प्रकटदोषसद्भावस्तदा सामन्तसामन्तवशान्निर्णयः कार्य्यः तदाह कात्यायनः "स्वार्थसिद्धौ प्रदुष्टेषु सामन्तेष्वर्थगौरवात्। तत्संसक्तैस्तु कर्त्तव्य उद्धारो नात्र संशयः"। तत्संसक्तैः सामन्तसंसक्तैः। सीमाया उद्धारः सीमायानिर्णय इत्यर्थः। तथा चैतदुक्तं भवति। चतसृषु दिक्षु स्थितसामन्तग्रामादिभ्योऽनन्तरत्वेन तद्बहिःस्थितग्रामादिभोक्तारस्तत्संसक्तास्तत्प्रदर्शितसीमालिङ्गैर्ग्रामादेः सीमान्निर्णयेयुरिति। यदा तु सामन्तसामन्तानामपि प्रकटदोषस्तदा तत्सामन्तैर्निर्णयस्तदाह कात्यायनः "संसक्तसक्तदोषे तु तत्संसक्ताः प्रकीर्त्तिताः" इति। तत्संसक्ताः संसक्तसक्तसंसक्ता इत्यर्थः। एवञ्चैतदुक्तं भवति चतसृषु दिक्षु स्थितसंसक्तग्रामादिभ्योऽनन्तरत्वेन तद्बहिःस्थितग्रामादिभोक्तारः संसक्तास्तैः प्रदर्शितसीमालिङ्गैर्ग्रामादेः सीमान्निर्णयेयुरिति। यदा पुनरेतेषामपि प्रकटदोषत्वन्तदा मौलादिवशान्निर्णयः कार्य्य इत्यप्याह स एव "कर्त्तव्या न प्रदुष्टास्तु राज्ञा धर्मं विजानता। त्यक्त्वा दुष्टांस्तु सामन्तानन्यां मौलादिभिः सह। सम्मिश्र्य कारयेत् सीमामेवं धर्मविदो विदुः"। अन्यान् सामन्तव्यतिरिक्तान् सीमालिङ्गाभिज्ञान् नगरादीनित्यर्थः। नगरादयश्च दर्शिता नारदेन "नगरग्रामगणतोये च वृद्धतमा नराः"। सीमालिङ्गज्ञातार इति शेषः। मौलादिभिः मौलवृद्धोद्धृतैः। सम्मिश्र्य मेलयित्वा। मौलादीनाञ्च लक्षणं दर्शितं कात्यायनेन "ये तत्र पूर्वं सामन्ताः पश्चाद्देशान्तरङ्गताः। तन्मूलत्वात् तु ते मौलाः ऋषिभिः परिकीर्त्तिताः। निष्पाद्यमानं यैर्दृष्टं तत् कार्य्यं त्वगुणान्वितैः। वृद्धा वा यदि वाऽवृद्धास्ते च वृद्धाः प्रकीर्त्तिताः"। त्वगुणान्वितैः पुरुषगुणान्वितैः। वाकारोऽनास्थायां वयोवृद्धत्वाप्रयोजकत्वात्। ये परम्परया कार्य्यज्ञातारस्ते उद्धर्त्तार इत्याशयः। तथा च संसक्तसक्तेषु स्फुटदोषदुष्टेषु पूर्वसामन्ताद्युपेतनागरिकग्राम्यजनश्रेणिवर्गयोरुद्दर्शितैः सम्यक् लिङ्गैः सीमानिर्णयः कार्य्यः। यदा तु प्रतिवादिना सामन्तेषु कश्चिद्दोष उद्भावितः ते च न प्रकटदोषयुक्तास्तदोक्तो विशेषो मनुना "सामन्ताः साधनं पूर्वमनिष्टोक्तौ गुणान्विताः। द्विगुणास्तूत्तरा ज्ञेयास्ततोऽन्ये त्रिगुणा मताः"। अनिष्टोक्तौ प्रतिवादिना गुप्तदोषाभिधाने तत्सामन्तास्ततो द्विगुणग्राह्याः। तत्रापि तथात्वे मौलवृद्धादयः सामन्तत्रिगुणा ग्राह्या इत्यर्थः। साक्ष्यादीनामेतेषां यदा अभावस्तदा त्वाह मनुः "सामन्तानामभावे तु मौलानां सीम्नि साक्षिणाम्। इमानप्यनुयुञ्जीत पुरुषान् वनगोचरान्। व्याधान् शाकुनिकान् गोपान् कैवर्त्तान् मूलखानकान्। व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरान्"। वनगोचराणां मध्ये

सीमासन्निहितदेशकर्षकाणामसत्त्वे विज्ञेयम् । अत एवोक्तं नारदेन "सीमायाञ्च बहिर्ग्रे स्युर्येऽपि तत्कर्मजीविनः । गोपाः शाकुनिका व्याधा ये चान्ये वनगोचराः" इति । अत्र च सर्वत्र स्थावरविवादे सेत्वादिविवादे च सामन्तादयो निर्णायकाः तथा च कात्यायनः "तेषामभावे सामन्ता मौलवृद्धोद्धृतादयः । स्थावरे षट्प्रकारेऽपि कार्य्या नात्र विचारणा । क्षेत्रवास्तुतडागेषु आरामवनसेतुषु । समेतभावात् सामन्तैः कुर्य्यात्तत्र विनिर्णयम् । ग्रामसीमासु च तथा तद्वन्नगरदेशयोः" । तेषां साक्षिणाम् । याज्ञवल्क्योऽपि "आरामायतनग्रामनिपानोद्यानवेश्मसु । एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु" । आयतनं निवेशनं निपानं पानीयस्थानं वर्षाम्बुप्रवाहो वृष्ट्युद्भूत जलप्रवाहः । पुनः कात्यायनोऽपि "क्षेत्रकूपतडागानां केदारारामयोरपि । गृहप्रसादावसथनृपदेवगृहेषु च" । केदारः क्षुद्रसेतुयुक्तः क्षेत्रविशेषः । गोबलीवर्दन्यायेन भिन्नोक्तिः प्रसदः प्रासादः । बृहस्पतिरपि "सर्वत्र स्थावरे वादे विधिरेष प्रकीर्त्तितः" । राज्ञा ग्रामीणानां वादिप्रतिवादिनोश्च समक्षं सामन्तादयः प्रष्टव्याः तैर्यदुक्तं तत्तत्ते लेखनीयमित्याह मनुः "ग्रामीयककुलानान्तु समक्षं सीम्नि साक्षिणः । प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः । ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निर्णयम् । निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः" । सीमाभिप्रायेण सीमलिङ्गानीत्युक्तम् । सीमायां साक्षिणस्तु सीमां ब्रूयुः । तथा च बृहस्पतिः "शपथैः शापिताः स्वैः स्वैर्ब्रूयुः सीमाविनिर्णयम् । दर्शयेयुश्च लिङ्गानि तत्प्रमाणमिति स्थितिः" । स्वैः स्वैः । सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः" इत्यादिनोक्तव्यवस्थानतिक्रमेणेत्यर्थः । यदा तु सीमालिङ्गसाक्षिणः सीमाचिह्नानि दर्शयितुमशक्नुवन्ति केवलं सीमामात्रं जानन्ति तदा ते कथं ब्रूयुरित्याकाङ्क्षायामाह मनुः "शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः । सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसम्" इति । उर्वीं मृदम् । सीमाक्रमणाया इति शेषः । नयेयुरिदं द्वयोर्निरासार्थं बहुवचनन्त्वेकस्य, नारदेन "एकश्चेदुन्नयेत् सीमां सोपवासः समुन्नयेत् । रक्तमाल्याम्बरधरो भूमिमादाय मूर्द्धनि" इति एकस्याभ्यनुज्ञानात् । बृहस्पतिरपि "स्मार्त्तचिह्नैर्विना साधुरेकोऽप्युभयसम्मतः । रक्तमाल्याम्बरधरो मृदमादाय मूर्द्धनि । सत्यव्रतः सोपवासः सीमां तां दर्शयेन्नरः" । स्मार्त्तचिह्नैर्विना सीमायाः ज्ञातॄणां चिह्नानाञ्चासत्त्वे । ननु कथमेकस्य सीमानिर्णायकत्वम् "नैकः समुन्नयेत् सीमां नरः प्रत्ययवानपि । गुरुत्वादस्य कार्य्यस्य क्रियैषा बहुषु स्थिता" इत्येकस्य नारदेन निषेधादिति चेन्नैतत् स उभयानुमतधर्मविद्व्यतिरिक्तविषय इति न काप्यनुपपत्तिः । अयञ्च निर्णयः सीमाक्रमणदिनादारभ्य पक्षत्रयपर्य्यन्तं साक्षिसामन्तादीनां दैविकराजिकोपद्रवाभावे अवसेयः न तु सीमाक्रमणाव्यवहितोत्तरमेव । तथा च कात्यायनः "सीमाचङ्क्रमणे कोशे पादस्पर्शे तथैव च । त्रिपक्षपञ्चसप्ताहं दैवराजिकमिष्यते" । यथासङ्ख्यमिति शेषः । यदा तु साक्ष्यादीनां पक्षत्रयाभ्यन्तरे दैविकराजिकोपद्रवः अन्यथा वा मिथ्यावादित्वनिश्चयस्तदा ते पणशतद्वयं दण्डं प्रत्येकं दाप्याः । तथा च मनुः "यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः । विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम्" । यथोक्तेन शिरोभिस्ते गृहीत्वोर्वीमित्यादिनोक्तप्रकारेण नयन्तो निर्णयं कुर्वन्तः यथाभूतेनार्थेनेति शेषः । द्विशतं पणशतद्वयम् प्रत्येकम् दाप्या इत्यर्थः । सामन्तानां मिथ्यावादित्वे राज्ञा ते मध्यमसाहसेन दण्डेन दण्डनीयाः । तथा चाह याज्ञवल्क्यः "अनृते तु पृथक् दण्ड्या राज्ञा मध्यमसाहसम्" । सामन्ता यद्यनृतं मिथ्याभूतं सीमानिर्णयं कुर्य्युः तदा मध्यमसाहसं कार्षापणानां चत्वारिंशदधिकानि पञ्च शतानि दण्डनीयाः । नारदोऽपि "अथ चेदनृतं ब्रूयुः सामन्ताः सीम्नि निर्णये । सर्वे पृथक् पृथक् दण्ड्या राज्ञा मध्यमसाहसम्" । सामन्तव्यतिरिक्तानां तत्संसक्तादीनां मिथ्यावादित्वे पूर्वसाहसाख्येन दण्डेन प्रत्येकं ते दण्डनीयाः । तथा च नारदः "शेषाश्चेदनृतं ब्रूयुर्नियुक्ता भूमिकर्मणि । प्रत्येकन्तु जघन्यास्ते विनेयाः पूर्वसाहसम्" इति । मौलादीनामनृतवादित्वे तमेव दण्डं स एवाह "मौलवृद्धादयश्चान्ये दण्डनीयाः पृथक् पृथक् । विनेयाः प्रथमेनैव साहसेनानृते स्थिताः" इति । आदिपदग्रहणेन गोपशाकुनिकादिवनगोचराणां ग्रहणम् । दण्डनीयाः मिथ्यावादित्वेन दण्डयितुमर्हाः मौलवृद्धादयः पृथक् पृथक् प्रथमेन साहसेन विनेया दण्ड्या इत्यर्थः ।

यद्यपि सामन्तादीनां साक्ष्यपेक्षया दण्डाल्पत्वमुक्तं तथापि तेषां वाचनिकं दण्डाधिक्यमिति न कोऽपि दोषः। यद्यपि शाकुनिकादयो बहुधा पापरतत्वात् चिह्नप्रदर्शनोपयोगेनान्यथा सिद्धा न साक्षात् सीमानिर्णये उपयुज्यन्ते तथापि वृक्षादिचिह्नप्रदर्शन एव मिथ्याभाषित्वसम्भवात्तदभिप्रायेणैव दण्डविधानम्। लोभादिना भेदेनोक्तौ अनुक्तौ च साक्ष्यादीनां दण्डमाह कात्यायनः "बहूनान्तु गृहीतानां न सर्वे निर्णयं यदि। कुर्य्युर्भयाद् वा लोभाद् वा दाप्यास्तूत्तमसाहसम्"। एवमज्ञानादिना अन्यतरवचने साक्ष्यादीन् दण्डयित्वा पुनः सीमाविचारः प्रवर्त्तयितव्यः तथा च स एवाह "अज्ञानोक्तौ दण्डयित्वा पुनः सीमां विचारयेत्। कीर्त्तिते यदि भेदः स्याद्दण्ड्यास्तूत्तमसाहसम्"। साक्ष्यादीनां सर्वेषाम् अज्ञानोक्तौ भेदेनोक्तौ च पुनर्विचारणं लेख्यप्रमाणेन कर्त्तव्यम्। अतएव शङ्खलिखितावपि "सामन्तविरोधे लेख्यप्रत्ययः" इति। यदा पुनः सामन्तप्रभृतयो ज्ञातारश्चिह्नानि च न सन्ति तदा राजा स्वेच्छया निर्णयं कुर्य्यात् तथा च याज्ञवल्क्यः "अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्त्तिता"। ज्ञातॄणां सामन्तादीनां चिह्नादीनाञ्च वृक्षादीनामभावे राजैव स्वातन्त्र्येण सीमानं प्रवर्त्तयेत्। नारदोऽपि "यदा च न स्युर्ज्ञातारः सीमाया न च लक्षणम्। तदा राजा द्वयोः सीमामुन्नयेदिष्टतः स्वयम्"। इष्टतः इच्छया सार्व्वविभक्तिकस्तसिः। ग्रामद्वयमध्यवर्त्तिनीं विवादास्पदीभूतां भुवं समं प्रविभज्यास्येभ्य उभयोः समर्प्य तन्मध्ये सीमाचिह्नानि कुर्य्यात्। यदा तस्यां भूमावुपकारातिशयो यत्र दृश्यते तदा तस्यैव सा सकला भूर्योजनीया न तूभयत्र। तथा च मनुः "सीमायामविषह्यायां स्वयं राजैव धर्म्मवित्। प्रदिशेद्भूमिमेतेषामुपकारादिति स्थितिः" इति। अविषह्यायां ज्ञातृचिह्नरहितायाम्। प्रदिशेत् प्रवेशयेदित्यर्थः। अयञ्च निर्णयो राज्ञा निर्णयान्तरवदव्यवहितोत्तरमेव न कर्त्तव्यः किन्तु सीमालिङ्गानि यदा आवरकाद्यभावात् स्फुटं दृश्यन्ते तदा कर्त्तव्यः। तथा च मनुः "सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः। ज्यैष्ठे मासि नयेत् सीमां सुप्रकाशेषु सेतुषु"। द्वयोर्ग्रामाधिपयोर्विवादे सीमां प्रति समुत्पन्ने ज्यैष्ठे मासीत्युपलक्षणं मासान्तरेऽपि सेतुष्विति सीमाचिह्नेषु व्यक्तेषु विवादास्पदीभूतां सीमानिर्णयेदित्यर्थः। ग्रामग्रहणं नगरादेरुपलक्षणार्थम्। अतएव कात्यायनः "सामन्ताश्चेत्तु सामन्तैः कुर्य्युः क्षेत्रादिनिर्णयम्। ग्रामसीमादिषु तथा तद्वन्नगरदेशयोः" इति। यदा पुनः ग्रामादीनां सीमात्वेन परिकल्पिता नदी कदाचित् ग्रामान्तरं भित्त्वा प्रवहन्ती दक्षिणभागे स्थितां पूर्व्वं काञ्चिद् भूमिं वामभागनिविष्टां करोति तदा तत्रैकग्रामसम्बन्धिनी भूरन्यस्य राज्ञा योज्यते तत्र निर्णयोपायमाह बृहस्पतिः "अन्यग्रामात् समाहृत्य दत्ताऽन्यस्य यदा मही। महानद्यथ राज्ञा च कथं तत्र विचारणा। नद्योत्सृष्टा राजदत्ता यस्य तस्यैव सा मही। अन्यथा न भवेल्लाभो नराणां राजदैविकः। जयोदयौ जीवनञ्च दैवराजवशान्नृणाम्। तस्मात् सर्व्वेषु कार्य्येषु तत्कृतन्न विचालयेत्"। न च नदीकृतस्य दैवकृतत्वाभावः शङ्कनीयः दैवशब्दस्य भाग्यवाचित्वान्नदीकृतमपि दैवकृतं भवत्येव। तथा चाह स एव "ग्रामयोरुभयोर्यत्र मर्य्यादा कल्पिता नदी। कुरुते दानहरणं भाग्याभाग्यवशान्नृणाम्। एकत्र कूलपातन्तु भूमेरन्यत्र संस्थितिम्। नदी तीरे प्रकुरुते तस्य तान्न विचालयेत्"। तस्य नदीवशात् प्राप्तभूमिकस्य तां प्राप्तां भूमिं न विचालयेत् नान्यथा कुर्य्यात् पूर्व्वस्वामी नापच्छिन्द्यादित्यर्थः। एतदनुप्तसस्यतीरविषयम्। उप्तसस्यविषये पुनः स एवाह "क्षेत्रं सशस्यसतकुञ्च भूमिश्छिन्ना यदा भवेत्। नदीस्रोतःप्रवाहेण पूर्व्वस्वामी लभेत ताम्"। तां सशस्यां भूमिं पूर्व्वस्वामी यावदुत्पन्नस्य शस्यफलप्राप्तिस्तावल्लभेतेत्यर्थः। फलप्राप्तेरूर्द्ध्वं पुनः पूर्व्ववचनविषयसमानता। राजदत्तविषये कश्चित् प्रतिप्रसवमाह स एव "या राज्ञा क्रोधलोभेन छलन्यायेन वा हृता। प्रदत्ताऽन्यस्य तुष्टेन न सा सिद्धिमवाप्नुयात्"। स्वत्वहेतुप्रतिग्रहादिलेख्यविषयमेतत्। स्वत्वहेतुप्रतिग्रहादिप्रमाणाभावे पुनः स एवाह "प्रमाणरहितां भूमिं भुञ्जानो यस्य या हृता। गुणाधिकाय वै दत्ता तस्य तान्न विचालयेत्"। प्रमाणरहितां स्वत्वहेतुप्रतिग्रहादिप्रमाणरहिताम्। गृहादिविषयकं निर्णयमाह स एव "निवेशकालादारभ्य गृहवप्र्यापणादिकम्। येन यावद्यथा भुक्तं तस्य तन्न विचालयेत्"। येन स्वामिना यावत् प्रचारभूम्यादियुक्तं तथा येन पूर्व्वादिदिगभिमुखद्वारादियुक्तत्वादिरूपेणोपभुक्तं तत्तस्य स्वामिनः सकाशान्न विचालयेत् नान्यथा कुर्य्यादित्यर्थः।

अत्र निवेशकालादारभ्येत्यभिधानात्तन्मध्ये कृताया व्यवस्थाया निवर्त्त्यत्वं दर्शितम् । निवेशकालादारभ्य स्थितानि गवाक्षादिकानि प्रातिवेश्मिकाद्यनिष्टकारीण्यपि न निवर्त्त्यन्ते इत्युक्तं तेनैव "वातायनं प्रणालीं च तथा निर्व्यूहवेदिकाम् । चतुःशालां स्यन्दनिकां प्राङ्निविष्टां न चालयेत्" । वातायनं गवाक्षः । प्रणाली पाषाणादिनिर्म्मित जलनिर्गमोपायः । निर्व्यूहो द्वारनिर्गतकाष्ठविशेष इति कल्पतरौ । निर्व्यूहो मत्तवारणः इति स्मृतिचन्द्रिकायाम् । वेदिका रथ्यादिप्रदेश संस्कृतोत्तरा भूमिः । चतसृणां शालानां समाहारः चतुःशालम् । तस्मात् स्यन्दनिका दृष्टिजलनिपातः । कात्यायनोऽपि "मेखलाभ्रमनिष्कासगवाक्षान्नोपरोधयेत् । प्रणालीं मत्तवास्तुञ्च पीडयन् दण्डभाग्भवेत्" । मेखला कुड्यमूलबन्धः । भ्रमो जलनिर्गमः । निष्कासः कुड्यादिभिस्तु निर्गतं काष्ठादिनिर्म्मितमस्पृष्टभूमिकमुपवेशनस्थानम् । नोपरोधयेत् न निरुन्ध्यात् । मत्तवास्तुः वासभूमिः । पूर्व्वमविद्यमानाः परानिष्टकारिण एते न कर्त्तव्या इत्याह स एव "निवेशसमयादूर्द्ध्वं नैते योज्याः कदाचन । दृष्टिपातं प्रणालीञ्च न कुर्य्यात् परवेश्मसु" । दृष्टिपातो गवाक्षः । परवेश्मसु परवेश्माभिमुख्येन । परकुड्यनिकटे पुरीषोत्सर्गादिकमपि न कर्त्तव्यम् तथा च बृहस्पतिः "वर्च्चःस्थानं वह्निचयकुण्डोच्छिष्टाम्बुसेचनम् । अत्यारात् परकुड्यस्य न कर्त्तव्यं कथञ्चन" । वर्च्चःस्थानम् पुरीषोत्सर्गस्थानम् । अत्यारादतिसमीपे अरत्निद्वयपरिमितप्रदेश इत्यर्थः । तथा च कात्यायनः "विण्मूत्रोदकवंशश्च वह्निश्वभ्रनिवेशनम् । अरत्निद्वयमुत्सृज्य परकुड्याद्विनिवेशयेत्" । संसरणमन्धार्थनिर्वचनपुरःसरन्तस्यानिरोद्धव्यत्वमाह बृहस्पतिः "यान्त्यायान्ति जना येन पशवश्चानिवारिताः । तदुच्यते संसरणन्तद्रोद्धव्यन्तु केनचित्" । तथा च सर्व्वजनानिवारितं सरन्त्यस्मिन्निति संसरणनिर्वचनमित्यर्थः । चतुष्पथादयोऽपि न निरोद्धव्याः तथा च नारदः "अवस्करस्थलश्वभ्रस्यन्दनिकादिभिः । चतुष्पथसुरस्थानराजमार्गांश्च रोधयेत्" । अवस्करः पुरीषम् । गृहादिशोधनार्थं पांशुसमूह इति हरिहरादयः । स्थलं वेदिका स्तम्भकुर्त्तः । श्वभ्रो जलनिर्गममार्गः । स्यन्दनिका पटलप्रान्तः । अन्यदपि आदिशब्देन तादृशं ग्राह्यम् । रथ्यामार्गो राजमार्गो न तु चतुष्पथ इति कल्पतरुः । न च चतुष्पथराजमार्गयोरभेद इति शङ्कनीयं तयोर्भेदात् । तथा च कात्यायनः "सर्व्वे जनाः सदा येन प्रयान्ति स चतुष्पथः । अनिषिद्धा, यथाकालं राजमार्गः स उच्यते" । अनिषिद्धा इत्यस्य पूर्व्वेणान्वयः । यत्र राजकीयैरकाले गमनं प्रतिषिध्यते स राजमार्ग इत्यर्थः । क्षेत्रस्य समीपे मध्ये वा यस्य सर्व्वदा मार्गोऽस्ति तत्र निरोधो न कर्त्तव्यः । तथा च शङ्खलिखितौ "मार्गक्षेत्रे पथि विसर्गो राजमार्गे रथस्य परिवर्त्तनमिति" पथिविसर्गः पथोविसर्गः । राजमार्गे यावता प्रदेशेन रथैः परिवर्त्तते तावान् प्रदेशस्त्यक्तव्य इत्यर्थः । संसरणानामवरोधकारिणान्तु दण्डो माषको दाप्यः यथाह बृहस्पतिः "यस्तत्र सङ्करं श्वभ्रं वृक्षारोपणमेव च । कामात् पुरीषं कुर्य्याच्च तस्य दण्डस्तु माषकः" । सङ्करोऽत्र शकटादिसङ्कीर्णता वृक्षापादानं वृतादीनामप्युपलक्षणम् । माषोऽत्र ताम्रिकः, दण्डस्य अपराधानुसारेण कल्पयितुमुचितत्वात् । ये तु राजमार्गे पुरीषोत्सर्गादिकं कुर्व्वते तेषामधिको दण्डः तथा च मनुः "समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि । स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत्" । आपद्गतादिषु तु दण्डो नैवोक्तः "आपद्गतस्तथा वृद्धो गर्भिणी बाल एव च । परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः" । परिभाषणं क्रूरभाषणम् । तडागादौ ततोऽप्यधिको दण्डः । तथा च कात्यायनः "तडागोद्यानतीर्थानि योऽमेध्येन विनाशयेत् । अमेध्यं शोधयित्वा तु दण्डयेत् पूर्व्वसाहसम्" । ये पुनर्म्मलिनवस्त्रप्रक्षालनादिना तीर्थानि दूषयन्ति तस्याप्ययमेव दण्ड इत्याह स एव "दूषयेत् सिद्धतीर्थानि स्थापितानि महात्मभिः । पुण्यानि पावनीयानि प्राप्नुयात् पूर्व्वसाहसम्" । मर्य्यादाप्रभेदनादौ दण्डमाह याज्ञवल्क्यः "मर्य्यादायाः प्रभेदे तु सीमातिक्रमणे तथा । क्षेत्रस्य हरणे दण्डाः अधमोत्तममध्यमाः" । अनेकक्षेत्रव्यवच्छेदिका साधारणी भूमर्य्यादा सीमा तस्याः प्रकर्षेण भेदने नाशातिक्रमणे सीमामतिलङ्घ्य कर्षणे क्षेत्रस्य च भयादिप्रदर्शनेन हरणे यथाक्रमेणाधमोत्तममध्यमसाहसदण्डा वेदितव्याः । यत्तु विष्णुवचनम् "सीमाभेत्तारमुत्तमसाहसं दण्डयित्वा पुनः सीमां कारयेदिति" । तत्र हि सीमामतिलङ्घ्य कर्षतः पुनः सीमाकरणे प्रवृत्तस्य दण्डस्याकरणेऽपि

त्येवं व्याख्येयम्। तेन न पूर्ववचनविरोधः क्षेत्रपहरणं गृहाद्युपलक्षणार्थम्। अज्ञानात् क्षेत्रादिहरणेऽयम् एव यथाह मनुः "गृहं तड़ागमारामं क्षेत्रं वा भीषया हरन्। शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः"। वृद्धमनुः "स्थापितां चैव मर्य्यादामुभयो ग्रामयोस्तथा। अतिक्रामन्ति ये पापास्ते दण्ड्या द्विशतं दमम्"। अपह्रियमाणक्षेत्रादिमूल्यस्ते उत्तमोऽपि दण्डः प्रयोक्तव्यः "वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने। तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसः" इति स्मरणात्। यत्तु शङ्खलिखिताभ्याम् सीमातिक्रमणे दण्डाधिक्यमुक्तम् "सीमाव्यतिक्रमे त्वष्टसहस्रमिति" तत् सम्पूर्णसीमातिक्रमविषयम्। सीमास्थितानूत्पन्नवृक्षादिफलं नैकेन प्राह्यं यथाह कात्यायनः "सीमामध्ये तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः। फलं पुष्पञ्च सामान्यं क्षेत्रस्वामिषु निर्दिशेत्। सामान्यं साधारणं क्षेत्रयोः स्वामिषु क्षेत्रस्वामिषु। तथा चान्यतरेणैव तद्वृक्षीयफलादिग्रहणे तदनुरूपेण दण्ड इति ध्वनितम्। यदा पुनरन्यक्षेत्रे वृक्षादिस्तच्छाखोऽन्यक्षेत्रे शाखाः प्रसृताः तत्र कः स्वामीत्याकाङ्क्षायां स एवाह "अन्य क्षेत्रे तु जातानां शाखा यत्रान्यसंस्थिताः। स्वामिनं तं विजानीयाद् यस्य क्षेत्रे तु संश्रिताः। संश्रिताः प्ररूढाः। परक्षेत्रे प्रार्थनया क्रियमाणं सेतुकूपादिकं क्षेत्रस्वामिना न निषेद्धव्यं तथाह याज्ञवल्क्यः "न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः। परभूमिं हरन् कूपः स्वल्पक्षेत्रो बहूदकः"। अल्पबाधः अल्पपीड़ाकरः कल्याणकारको बहूपकारकः। स्वल्पक्षेत्रः अल्पक्षेत्रवर्त्ती आभ्यां विशेषणाभ्यां यः सेतुः क्षेत्रमध्यवर्त्तितया बहुपीड़ाकरस्तदा दिक्षु समस्थितक्षेत्रवर्त्तितया अल्पोपकारको वा तदा निषेद्धव्य इति दर्शितम्। तत्र नारदोऽपि "परक्षेत्रस्य मध्ये तु सेतुर्न प्रतिषिध्यते। महागुणोऽल्पदोषश्चेद् वृद्धिरिष्टा क्षये सति" क्षये अल्पक्षेत्रक्षये सत्यपि वृद्धिर्यत इष्टा अतो महागुणः स्वक्षेत्रेऽपि उपकारकरोऽल्पदोषश्चेत्तदा न प्रतिषेद्धव्य इत्यर्थः। अन्यक्षेत्रे सेतुकूपादिप्रवर्त्तनं तत्स्वाम्यादनुज्ञां लब्ध्वा कर्त्तव्यमित्याह याज्ञवल्क्यः "स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत्। उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः"। यस्तु क्षेत्रस्वामिनं तद्वंश्यं तदभावे राजानं वा प्रार्थ्य अर्थादानेन वा तत्क्षेत्रे सेत्वादिकं करोति स सेत्वाद्युत्पन्नफलोपभोगं दृष्टमदृष्टं वा न लभते किन्तु तत्स्वाम्येव तल्लभते तदभावे राजा। अतस्तदाज्ञां गृहीत्वा सेत्वादिकं कर्त्तव्यमित्यर्थः। जीर्णानाम् अन्यदीयसेत्वादीनाम् उद्धारोऽपि तत्स्वाम्याद्यनुज्ञां गृहीत्वा कार्य्य इत्याह नारदः "पूर्वप्रवृत्तमुत्सन्नमपृष्ट्वा स्वामिनन्तु यः। सेतुं प्रवर्त्तयेद् यस्तु न स तत्फलभाग्भवेत्। मृते तु स्वामिनि पुनस्तद्वंश्ये वापि मानवे। राजानमामन्त्र्य ततः कुर्य्यात् सेतुप्रवर्त्तनम्। अतोऽन्यथा क्लेशमाप्नोति मृगव्याधनिदर्शनात्"। मृगव्याधदृष्टान्तः स्फुटीकृतस्तेनैव, "इमवस्तस्य नश्यन्ति यो विद्धमनुविध्यति"। तस्य मृगव्याधस्य। कात्यायनोऽपि "अस्वाम्यनुमतेनैव संस्कारं कुरुते तु यः। गृहोद्यानतड़ागानां संस्कर्त्ता लभते न तु। देयं स्वामिनि चायाते तन्निवेद्य नृपे यदि। अथानिवेद्य प्रयुक्तस्तु तद्धृतं लभते व्ययम्"। नृपे अनावेद्य कृतं यत्तड़ागादिसंस्कारार्थं व्ययन्तत् स्वामिनि प्रवासान्तरादागते तेन देयमपि न प्राप्नोति। नृपे निवेद्य संस्करणे तदर्थं व्ययं प्राप्नोति। फलन्तु स्वाम्यनुमत्यलाभे न प्राप्नोतीत्यर्थः। यः परक्षेत्रमहमिदं कृषामीत्यङ्गीकृत्य पश्चाद् न कृषति नाप्यन्येन कर्षयति तं प्रत्याह याज्ञवल्क्यः "फालाहतमपि क्षेत्रं यो न कुर्य्यान्न कारयेत्। स प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत्"। यद्यपि फालाहतं किञ्चिद् हलेन विदारितं शस्यबीजावापयोग्यं न भवति तथाप्यकृष्टक्षेत्रस्य फलं यावत् तत्रोत्पत्तियोग्यं सामन्तादिकल्पितं तावदसौ स्वामिने दापनीयः तच्च पूर्वकर्षकादाच्छिद्याऽपरेण कारयेत्। व्यासोऽपि "क्षेत्रं गृहीत्वा यः कश्चिन्न कुर्य्यान्न कारयेत्। स्वामिने स शदं दाप्यो राज्ञे दण्डञ्च तत्समम्"। शदं क्षेत्रफलम्। तत्समं तदनुरूपमित्यर्थः। स्वामिप्राप्यं क्षेत्रफलमपि कियदित्याकाङ्क्षायां स एवाह "चिरावसन्ने दशमं कृष्यमाणे तथाष्टकम्। सुसंस्कृतेऽपि षष्ठं स्यात् परिकल्प्यं यथास्थिति" इति। चिरावसन्ने चिरकालमकृष्टे क्षेत्रेऽहमिदं कृषामीत्यङ्गीकृत्योपेक्षिते सामन्तैर्यथास्थिति क्षेत्रस्थित्यनुसारेणैतावदत्रोत्पन्नं योग्यमिति परिकल्प्य क्षेत्रस्वामिने तस्य दशमभागं, कृष्यमाणे अचिरावसन्ने स्वीकृत्याप्युपेक्षिते तु अष्टमं भागं सुसंस्कृते तूपेक्षिते षष्ठं भागं दाप्य इत्यर्थः। यस्तु क्षेत्रस्वामिनः

सामर्थ्यवैकल्यादिनाऽर्द्धखिलावस्थां प्राप्ते क्षेत्रे स्वाम्यनिवारितः सन् स्वयमेव तत्कर्षणादिकं करोति तदा स क्षेत्रस्वामिने फलं न दापनीयः। किन्तु तस्य फलं स्वयमेव गृह्णीयादित्याह नारदः “स्वामिके प्रेते नष्टेषु क्षेत्रिकेष्वनिवारितः। क्षेत्रं चेदिकृषेत् कश्चिदश्नुवीत स तत्फलम्”। प्रेता मृताः नष्टाः क्वचिद्गता इति चिरमपरिरक्षिताः। क्षेत्रिकेषु क्षेत्रस्वामिषु तेन क्षेत्रस्वामिना तत्पुत्रादिना वा समागतेनैव विधाय कर्षादिखिलभञ्जनार्थं व्ययं दत्त्वैव स्वीयं क्षेत्रं ग्राह्यमिति स एवाह “विकृष्यमाणे क्षेत्रे तु क्षेत्रिकः पुनरावजेत् खिलोपचारं तत् सर्वं दत्त्वा क्षेत्रमवाप्नुयात्”। अर्द्धखिलाद्यवस्था कदा क्षेत्रस्य भवतीत्याकाङ्क्षायां स एवाह “संवत्सरेणार्द्धखिलमीहितं वत्सरैस्त्रिभिः। पञ्चवर्षावसन्नान्तु क्षेत्रं स्यादटवीसमम्”। कर्षणरहितं संवत्सरेणाऽर्द्धखिलं भवति यत्नसाध्यं भवति वर्षत्रये तु ईहितं खिलं महायत्नसाध्यं भवति। वर्षपञ्चके न ईहितं क्षेत्रम् अटवीतुल्यं स्यात् अतिदुष्कर्षं भवेदित्यर्थः। खिलभञ्जनार्थं व्ययदानासामर्थ्ये क्षेत्रस्वामिनः क्षेत्रफलस्याष्टमो भागः कर्षकेण वर्षाष्टकं स्वामिने देयः अवशिष्टं सर्वं स्वयमेव ग्राह्यम्। क्षेत्रं च वर्षाष्टकानन्तरन्तत्स्वामिने देयम्। तथा च कात्यायनः “अशक्तितो न दद्याच्च खिलार्थं यः कृतो व्ययः। तदष्टभागहीनन्तु कर्षकः फलमाप्नुयात्” इति। “वर्षाष्टकौ स भोक्ता स्यात्परतः स्वामिने तु तत् इति”।

सीर पु० सि–रक् पृषो०। १सूर्य्ये मेदि० २अर्कवृक्षे ३हले च अमरः संज्ञायां कन्। ४शिशुमारे शब्दमा०। [२अमरकल्पे।

सीरध्वज पु० सीरो हलः तच्चिह्नितो ध्वजो यस्य। चन्द्रवंश्ये

सीरपाणि पु० सीरः हलः पाणौ यस्य। बलदेवे अमरः।

सीरिन् पु० सीरो हलोऽस्त्यस्यायुधत्वेन इनि। बलरामे हला०

सीलन्द पु० मत्स्यभेदे (सोलिन्दा) “सीलन्दः श्लेष्मलो वृष्यो विपाके मधुरो गुरुः। वातपित्तहरो हृद्य आमवातकरश्च सः” भावप्र०।

सी(से)वन न० सिव–ल्युट् नि० वा दीर्घः। सीवने तन्तुसन्ताने (सेलाइ) अमरः २लिङ्गमध्यस्थरेखायां स्त्री हेमच० ङीप्।

सीस न० सि–क्विप् पृषो० सो–क कर्म०। (सीसे) धातुभेदे हेमच० नागशब्दे ४००९ पृ० तद्गुणादि दृश्यम्। स्वार्थे क। तत्रार्थे अमरः।

सीहुण्ड पु० सिहुण्ड+पृषो० दीर्घः। स्नुहीवृक्षे राजनि०।

सु अव्य० सु–डु। १पूजायाम् २अतिशये अमरः। ३कष्टे ४अनुमतौ ५समृद्धौ मेदि० ६अनायासे च अनेकार्थको०। पूजायामस्य नोपसर्गत्वम् तेन सुस्तुतमित्यादौ न षत्वम्। अतिशयादौ तु सुषुत इत्यादि। गणरत्नेऽर्थविशेषास्तल्लक्षणेनोदाहृताः यथा “सु प्रशंसानुमतिपूजाभ्यनुकच्छ्रशुभेषु। सुरूपः सुकृतं सुसाधुः सुतप्तः सुदुष्करं सुगन्धः”।

सुकण्टका स्त्री सुष्ठु कण्टकोऽस्याः। घृतकुमार्य्याम् राजनि

सुकण्डु स्त्री सु+कण्डु+यक् डु। कण्डुरोगे (चुलकाना) शब्दर०।

सुकन्द पु० शोभनः कन्दोऽस्य। १कशेरौ राजनि० २शोभनकन्दयुक्ते त्रि० संज्ञायां क। ३पलाण्डौ अमरः। ४वाराहीकन्दे ५धरणीकन्दे राजनि०।

सुकन्दिन् पु० शोभनः हितकरः कन्दोऽस्त्यस्य इनि। शूरणे (ओल) राजनि०। [८१२ अ०।

सुकन्यका स्त्री शर्यातिनृपकन्यायां च्यवनर्षिपत्न्याम् भाग०

सुकरा स्त्री सुखेन क्रियते दुह्यते वा सु+कृ-खल्। १सुशीलायां गवि अमरः २सुखसाध्ये त्रि०।

सुकर्णक पु० सुष्ठु कर्ण इव कन्दोऽस्य कप्। १हस्तिकन्दे राजनि० २शोभनकर्णयुक्ते त्रि०।

सुकर्णिका स्त्री सुष्ठु–कर्णाविव पर्णान्यस्याः कप् अत इत्वम्। मूषिकपर्ण्याम् शब्दर०।

सुकर्णी स्त्री सुष्ठु कर्णाविव पत्राण्यस्याः ङीप्। इन्द्रवारुण्याम् (राखालशशा) राजनि०।

सुकर्म्मन् पु० सुष्ठु कर्म यस्मात् ५ब०। १विष्कम्भादिषु मध्ये सप्तमे योगे ज्यो० २शोभनकर्मयुते त्रि० ३विश्वकर्मणि पु० मेदि०। प्रा०स०। ५शोभने कर्म्मणि न०।

सुकल पु० सुष्ठु कल्यते ख्याप्यतेऽसौ सु+कलि+घञ्। दानत्यागाभ्यामित्यादिना १विख्याते जने अमरः। प्रा०ब०। २सुन्दरमधुराव्यक्तशब्दयुक्ते त्रि०। प्रा०स०। सुन्दरे कलशब्दे पु०।

सुकाण्ड पु० सुष्ठु काण्डोऽस्य। १कारवेल्ले राजनि० २सुन्दरकाण्डयुक्ते त्रि० ३काण्डीरलतायां स्त्री ङीप्। स्वार्थे क अत इत्वम्। तत्रैव।

सुकाण्डिन् पु० सुकाण्ड+अस्त्यर्थे इनि। भ्रमरे राजनि०।

सुकामा स्त्री सुष्ठु काम्यतेऽसौ सु+कम-कर्मणि घञ्। १त्रायमाणालतायाम् राजनि०। २शोभनकामविषये त्रि०।

सुकालुका स्त्री सु+कल–ऊक स्वार्थे क। डोडीक्षुपे राजनि०

सुकाष्ठ न० सुष्ठु काष्ठं यस्य प्रा०ब०।१देवदारुकाष्ठे २काष्ठकदल्याम् ३कटुक्याञ्च स्त्री राजनि०। प्रा०स०। ४शोभने काष्ठे च।

सुकुन्दक पु० सु+कुदि-ण्वुल्। पलाण्डौ शब्दर०।

सुकुन्दन स्त्री० सु+कुदि-ल्यु। वर्वरे राजनि०।

सुकुमारा न० सु+कुमार-अच्। १जातीफले २नवमालिकायाम् ३कदल्यां ४पृक्कायां ५मांसल्याञ्च राजनि०। ६अतिकोमले त्रि०। प्रा० स०। ७सुन्दरकुमारावस्थान्विते त्रि०स्त्रियां ङीष्। ८नवमालिकायां ९पुण्ड्रेक्षौ पु०मेदि० १०वनचम्पके ११वर्वे १२श्यामाके च पु० राजनि०संज्ञायां कन्। सुकुमारक तमालपत्रे न० शालौ पु०राजनि०।

सुकृत् त्रि० सु+कृ-क्विप्। १पुण्यकारके जटा० २धार्मिके जने त्रिका०।

सुकृत न० सु+कृ-क्त। १पुण्ये धर्मे अमरः २शुभे ३सुविहिते त्रि० मेदि०। ४सुकर्मणि न०।

सुकृति स्त्री सु+कृ-क्तिन्। १पुण्ये २मङ्गले ३सत्कर्मणि च

सुकृतिन् त्रि० सुकृतमनेन इना० इनि। १पुण्यशीले अमरः २शुभयुक्ते मेदि०। ३सत्कर्मयुते च स्त्रियां ङीप्।

सुकेसर पु० सुष्ठु केसरो यस्य। बीजपूरे राजनि०।

सुकोली स्त्री प्रा०स०। क्षीरकाकोल्याम् रत्नमा०।

सुकोषक पु० सुष्ठु कोषोऽस्य कप्। कोशाम्रे राजनि०।

सुख सुखसम्पादने अद० चु० उभ० सक० सेट्। सुखयति-ते असुसुखत-त। अनेकाच्कत्वेन न षोपदेशः।

सुख न० सुख-अच्। १पुण्यजन्ये आनन्दे गुणभेदे अमरः २अनुकूलवेदनीये यदनुभवाय चित्तमनुकूलं भवति तस्मिन् अर्थे तच्च आत्मधर्म इति नैयायिकादयः। चित्तधर्म इति साङ्ख्यादयः। सुखयतीति अच्, सुखमस्यास्ति अच् वा। ३सुखकारके ४सुखिनि च त्रि०। ५वरुणपुर्यां स्त्री ६स्वर्गे मेदि०। "यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्" श्रुत्या दुःखासम्भिन्नसुखस्यैव स्वर्गपदार्थत्वेनाभिधानात् तस्य सुखविशेषात्मकत्वात् तथात्वम्। ७वृद्धिनामौषधौ राजनि०। सुखत्वं तु जातिभेदः तल्लक्षणन्तु कार्य्यभावत्वम् अन्येच्छानधीनेच्छाविषयत्वे सति भावत्वमिति यावत् दुःखाभावस्य काम्यत्वेऽपि तस्य भावत्वाभावान्नातिव्याप्तिः। "सुखं तु जगतामेव काम्यं धर्मेण लभ्यते" भाग०। तथाच धर्मोत्पन्नवाजिकारतंत्रत्वप्रयुक्तत्वं तल्लक्षणमिति फलितोऽर्थः। सुखदुःखयोः परस्परभिन्नत्वे कारणादिकं कणा०सू० दृत्योर्दर्शितं यथा "इष्टानिष्टकारणविशेषाद्विरोधाच्च मिथः सुखदुःखयोरर्थान्तरभावः" कणा० सू०। "आत्मगुणानां कारणतोभेदव्युत्पादनं दशमाध्यायार्थः, तत्र "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" इति गौतमीये प्रमेयविभागसूत्रे सुखस्यानभिधानात् दुःखाभिन्नमेव सुखमिति भ्रमनिरासार्थं सुखदुःखयोरेव प्रथमं भेदमाह "सुखदुःखयोर्मिथः परस्परमर्थान्तरभावोभेदो वैजात्यमिति यावत् कुत इत्यत आह इष्टानिष्टकारणविशेषात् इष्टं इष्यमाणं स्रक्चन्दनवनितादि, अनिष्टमनिष्यमाणमहिकण्टकादि, तद्रूपं यत्कारणं तस्य विशेषाद्भेदात् कारणवैजात्याधीनं कार्य्यवैजात्यमावश्यकं यतः, भेदकान्तरमाह विरोधात् सहानवस्थानलक्षणात् नह्येकस्मिन्नात्मन्येकदा सुखदुःखयोरनुभवः चकारादनयोः कार्य्यभेदं भेदकं समुच्चिनोति, तथा हि अनुग्रहाभिष्वङ्गनयनप्रसादादि सुखस्य, दैन्यमुखमालिन्यादि दुःखस्य कार्य्यमिति ततोऽप्यनयोर्भेदः। तदुक्तं प्रशस्ताचार्य्यैः "अनुग्रहलक्षणं सुखं स्रगाद्यभिप्रेतविषयसान्निध्ये सति इष्टोपलब्धीन्द्रियार्थसन्निकर्षादिष्टाद्यपेक्षादात्ममनसोः संयोगाद्धर्माद्यपेक्षादनुग्रहाभिष्वङ्गनयनादिप्रसादजनकमुत्पद्यते तत् सुखम्" इति। तदिदमतीतेषु स्रक्चन्दनादिषु स्मृतिजमनागतेषु सङ्कल्पजम्। गौतमीये सूत्रे सुखापरिगणनं वैराग्याय सुखमपि दुःखत्वेन भावयतो वैराग्यं स्यादेतदर्थमिति" उ०वृ०। "तच्च सुखं चतुर्विधं वैषयिकमाभिमानिकं मानोरथिकम् आभ्यासिकञ्चेति" उप०वृत्तिः। आद्यं विषयेन्द्रियसाक्षात्कारजन्यं, द्वितीयं राजाधिपत्यपाण्डित्ययशोदिजन्यं, तृतीयं विषयध्यानजन्यम् चतुर्थं स्नानादिनमस्कारायामादिजन्यं चावसेयमिति"।

पात० सू० वैषयिकसुखानां परिणामदुःखत्वादिभिः दुःखत्वं व्यवस्थापितं वैराग्यार्थं यथा "परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" सू०। "सर्वस्यायं रागानुविद्धश्चेतनाचेतनसाधनाधीनसुखानुभव इति तत्रास्ति रागजः कर्माशयः तथा च द्वेष्टि दुःखसाधनानि मुह्यति चेति द्वेषमोहकृतोऽप्यस्ति। तथा चोक्तम् "नानुपहत्य भूतान्युपभोगः सम्भवतीति" हिंसाकृतोऽप्यस्ति शारीरः कर्माशय इति विषयसुखं चाविद्येत्युक्तम्। या भोगे-

श्चेन्द्रियाणां तृप्तेरुपशान्तिः तत् सुखं या लौल्यादनुपशान्तिस्तद् दुःखम्। न चेन्द्रियाणां भोगाभ्यासेन वैतृष्ण्यं कर्त्तुं शक्यं कस्माद् यतो भोगाभ्यासमनुविवर्द्धन्ते रागाः कौशलानि चेन्द्रियाणामिति तस्मादनुपायः सुखस्य भोगाभ्यास इति स खल्वयं वृश्चिकविषभीत इवाशीविषेण दष्टो यः सुखार्थी विषयाननुवासितो महति दुःखपङ्के मग्न इति। एषा परिणामदुःखता नाम प्रतिकूला सुखावस्थायामपि योगिनमेव क्लिश्नाति। अथ का तापदुःखता सर्वस्य द्वेषानुविद्धश्चेतनाचेतनसाधनाधीनस्तापानुभव इति। तत्रास्ति द्वेषजः कर्माशयः सुखसाधनानि च प्रार्थयमानः कायेन वाचा मनसा च परिस्पन्दते ततः परमनुगृह्णात्युपहन्ति चेति परानुग्रहपीडाभ्यां धर्माधर्मावुपचिनोति स कर्माशयो लोभान्मोहाच्च भवतीत्येषा तापदुःखतोच्यते। का पुनः संस्कारदुःखता। सुखानुभवात् सुखसंस्काराशयो दुःखानुभवादपि दुःखसंस्काराशय इति एवं कर्मभ्यो विपाकेऽनुभूयमाने सुखे दुःखे वा पुनः कर्माशयप्रचय इति एवमिदमनादिदुःखस्रोतोविप्रसृतं योगिनमेव प्रतिकूलात्मकत्वादुद्वेजयति कस्मात् अक्षिपात्रकल्पो हि विद्वानिति यथोर्णातन्तुरक्षिपात्रे न्यस्तः स्पर्शेन दुःखयति नान्येषु गात्रावयवेषु एवमेतानि दुःखानि अक्षिपात्रकल्पं योगिनमेव क्लिश्नन्ति नेतरम् इतरन्तु स्वकर्मोपहृतं दुःखमुपात्तमुपात्तं त्यजन्तं त्यक्तं त्यक्तमुपाददानम् अनादिवासनाविचित्रया चित्तवृत्त्या समन्ततोऽनुविद्धमिवाविद्यया हातव्य एवाहङ्कारममकारानुपातिनं जातं जातं बाह्याध्यात्मिकोभयनिमित्तास्त्रिपर्वाणस्तापा अनुप्लवन्ते तदेवमनादिदुःखस्रोतसा व्युह्यमानमात्मानं भूतग्रामञ्च दृष्ट्वा योगी सर्वदुःखक्षयकारणं सम्यग्दर्शनं शरणं प्रपद्यत इति गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः। प्रख्याप्रवृत्तिस्थितिरूपा बुद्धिगुणाः परस्परानुग्रहतन्त्रीभूताः शान्तं घोरं मूढं वा प्रत्ययं त्रिगुणमेव प्रारभन्ते चलञ्च गुणवृत्तमिति क्षिप्रपरिणामि चित्तमुक्तं रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्ते सामान्यानि तु अतिशयैः सह प्रवर्त्तन्ते एवमेते गुणा इतरेतराश्रयेणोपार्जितसुखदुःखमोहप्रत्यया इति सर्वे सर्वरूपा भवन्ति गुणप्रधानभावकृतस्त्वेषु विशेष इति तस्मात् दुःखमेव सर्वं विवेकिन” पा०।

“तच्च सुखं नित्यं जन्यञ्चेति वेदान्तिनः। तत्र विषयसंपर्कात् वैषयिकं सुखं जन्यम्, ब्रह्मस्वरूपं सुखं नित्यमिति तदेतन्मतं मुक्तिवादे मणिकृता निराकृतम् यथा

“न च नित्यसुखाभिव्यक्तिर्मुक्तिः। सा हि न नित्या सुखशरीरयोरविशेषापातात् नोत्पाद्या तद्धेतुशरीराद्यभावात् ज्ञानमात्रे सुखमात्रे वा तद्धेतुत्वावधारणात् निःसंसारदशायां तद्धेतुसामान्ये बाधकाभावात्। अतएव मुक्तौ शरीरकल्पना। किं वा तज्जनकं न तावदात्ममनःसंयोगः तस्यादृष्टादिनिरपेक्षस्याजनकत्वात् विषयमात्रापेक्षणे तु संसारदशायामपि तदभिव्यक्तिप्रसङ्गः नापि योगजो धर्मः सहकारी तस्योत्पन्नभावत्वेन विनाशित्वेऽपरस्य निवृत्त्यापत्तेः न च तज्जन्याभिव्यक्तिरनन्ता तस्या अपि तत एव नाशात्। अथ तत्त्वज्ञानात् सवासनमिथ्याज्ञाननाशे दोषाभावेन प्रवृत्त्याद्यभावाद्धर्माधर्मयोरनुत्पादे प्राचीनधर्माधर्मक्षयाद्दुःखसाधनशरीरादिनाश एव तत्र हेतुः अतएव तस्यानन्त्ये नाभिव्यक्तिप्रवाहोऽप्यनन्त इति चेन्न शरीरं विना तदनुत्पत्तेः तस्य तद्धेतुत्वे मानाभावाच्च। न च मोक्षादिप्रवृत्तिरेव मानं दुःखहानार्थितया तदुपपत्तेः। न च नित्ये सुखे मानमस्ति “नित्यं विज्ञानमानन्दम् ब्रह्म” “आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमित्यादि” श्रुतिर्मानमिति चेन्न उपजननापायवतोर्ज्ञानसुखयोरहं जानाम्यहं सुखीति अभिन्नत्वेनानुभूयमानयोर्ब्रह्माभेदबोधने प्रत्यक्षबाधात्। अथ सुखस्य ब्रह्माभेदबोधनादेवायोग्यतयाऽनित्यं सुखं विहाय वाक्यार्थत्वेन नित्यसुखसिद्धिः स्वर्गवत् न तु नित्यसुखे सिद्धे तदभेदबोधनं येनान्योन्याश्रयः, यद्वा नित्यं सुखं बोधयित्वा तदभिन्नं बोध्यते न च वाक्यभेदः वाक्यैकवाक्यत्वादिति चेन्न आत्मनोऽनुभूयमानत्वेन तदभिन्नस्य नित्यसुखस्याप्यनुभवप्रसङ्गात् सुखमात्रस्य स्वगोचरसाक्षात्कारजनकत्वनियमात् तदननुभवे वात्मनोऽप्यनुभवो न स्यात्। अथात्माभिन्नं नित्यसुखमनुभूयत एव सुखत्वं तु तत्र नानुभूयत इति चेन्न सुखानुभवसामग्र्या एव सुखत्वानुभावकत्वात् तस्मादानन्दं ब्रह्मेति मत्वर्थीयाच्प्रत्ययान्तत्वेनानन्दं बोध्यते नाभेदः, अन्यथा नपुंसकत्वानुपपत्तेः। एतेन ब्रह्माद्वैततत्त्वसाक्षात्कारादविद्यानिवृत्तौ विज्ञानसुखात्मकः कैवल आत्मापवर्गे वर्त्तत इति वैदान्तिमतमपास्तम् स्वप्रकाशसुखात्मक-

सुखो नित्यत्वे मुक्तसंसारिणोरविशेषप्रसङ्गात् पुरुषप्रयत्नं विना तस्य स्वत्वादपुरुषार्थत्वाच्च अविद्यानिवृत्तिः प्रयत्नसाध्येति चेत् अविद्या यदि मिथ्याज्ञानमर्थान्तरं वा उभयथापि सुखदुःखाभावसाधनेतरत्वेन तन्निवृत्तेरपुरुषार्थत्वात्” ।

तत्र दुःखाभावस्यैव परमप्रयोजनत्वं न सुखस्येति व्यवस्थापितं यथा

“ननु दुःखाभावो न पुरुषार्थः सुखस्यापि हानिस्तुल्यायव्ययत्वात् न च बहुतरदुःखानुविद्धतया सुखस्यापि प्रेक्षावद्धेयत्वम् आवश्यकत्वेन दुःखस्यैव हेयत्वात् सुखस्य निरुपधीच्छाविषयत्वात् अन्यथा दुःखाननुविद्धतया तथात्वेन पुरुषार्थत्वविरोधादिति चेन्न सुखमनुद्दिश्यापि दुःखभीरूणां दुःखाभावदशायां सुखमस्तीत्युद्दिश्य दुःखाभावार्थं प्रवृत्तेः वैपरीत्यस्यापि सम्भवे सुखस्याप्यपुरुषार्थतापत्तेः अतो दुःखाभावदशायां सुखं नास्तीति ज्ञानं न दुःखाभावार्थिप्रवृत्तिप्रतिबन्धकं तस्मादविवेकिनः सुखमात्रलिप्सवो बहुतरदुःखानुविद्धमपि सुखमुद्दिश्य “शिरोमदीयं यदि यातु यास्विति, तथा परदारेष्वपि प्रवर्त्तमानाः “वरं वृन्दावनेऽरण्ये” इत्यादि वदन्तो नास्याधिकारिणः । ये च विवेकिनोऽस्मिन् संसारापारकान्तारे कियन्ति दुःखदुर्दिनानि कियती सुखखद्योतिका कुपितफणिफणामण्डलच्छायाप्रतिममिदमिति मन्यमानाः सुखमपि हातुमिच्छन्ति तेऽस्याधिकारिणः । न च भोगार्थिनामप्रवृत्तौ पुरुषार्थता हीयते कस्यचिदप्रवृत्तावपि चिकित्सादेः पुरुषार्थत्वात् । अथवा “दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते । न हि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः, पुरुषार्थत्वं सुखवज्ज्ञायमानं नियमात् न च मुक्तिज्ञानं सम्भवतीति न हि दुःखाभावं जानीयामित्युद्दिश्य प्रवृत्तिः किन्तु दुःखं मे मा भूदित्युद्दिश्य अतो दुःखाभाव एव पुरुषार्थः तस्य ज्ञानन्तु स्वकारणाधीनं न तु पुरुषार्थतोपयोगि सुखी स्यामित्युद्दिश्य प्रवर्त्तते न तु सुखं जानीयामिति सुखमेव तथास्तु न तदवगमः तस्याभावग्राहकत्वेनान्यथासिद्धत्वात् गौरवाच्च । किञ्च बहुतरदुःखजर्जरकलेवरा दुःखाभावमुद्दिश्य मरणेऽपि प्रवर्त्तमाना दृश्यन्ते न च मरणे तस्य ज्ञानमस्ति न ते विवेकिन इति चेन्न पुरुषार्थत्वे विवेकानुपयोगात्” । —

तत्र सुखं चित्तधर्मोऽपि अध्यस्ततया प्रतिबिम्बरूपेण वा आत्मनि वर्त्तते इति सांख्या वेदान्तिनश्च । आत्मगुण इति नैयायिकाः । २दुःखाभावे । भारवाहकस्य भारापगमे सुखी संवृत्तोऽहमिति प्रत्ययस्य दुःखाभावविषयत्वोपगमात् ।

सुखङ्करी स्त्री सुखङ्करोति कृ-खच् मुम् च ङीप् । १जीवन्तीवृक्षे राजनि० । २सुखकारके त्रि० ।

सुखङ्कुण पु० कुण क-मुम् । शिवखट्वाङ्गे त्रिका० ।

सुखचार पु० सुख सुखकारकश्चारो यस्य । उत्तमाश्वे शब्दमा० ।

सुखजात त्रि० जात सुखमस्य परनिपातः । जातानन्दे “सुखजातः सुरापीत” भट्टिः ।

सुखद पु० सुखं ददाति दा-क । १विष्णौ विष्णुस० । “विंशत्यक्षरसंयुक्तो ध्रुवः सुखदसंज्ञकः । शृङ्गारवीरयोर्ज्ञेयो गुरुणैकेन मण्डित.” सं०गी०उक्ते २ध्रुवभेदे । ३सुखदातरि त्रि० ४स्वर्गवेश्यायां स्त्री शब्दरत्ना० । ५शमीवृक्षे स्त्री राजनि०

सुखदोह्या स्त्री सुखेन दोह्या दुह-ण्यत् । क्लेशं विना दोहनीयायां गवि हेमच० सुखसंदोह्याप्यत्र ।

सुखभाज् त्रि० सुखं भजते भज-ण्वि । सुखयुक्ते । [राजनि०

सुखमोदा स्त्री सुखः सुखकरो मोदो यस्याः । सल्लकीवृक्षे

सुखरात्रि स्त्री सुखा सुखकरी रात्रिर्यस्याम् । आश्विनामावास्यायाम् दीपान्वितामावास्यायाम् । उल्काशब्दे ११७१ पृ० दृश्यम् ।

सुखरात्रिका स्त्री सुखा रात्रिर्यस्याः ब०कप् । दीपान्वितामावास्यां पूज्यायां लक्ष्म्याम् दीपान्वितामुपक्रम्य “पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका” ज्योतिर्वचनम् । कबभावे सुखरात्रिरप्यत्र “आख्याता भूतले देवि! सुखरात्रि! नमोऽस्तु ते” इति दीपान्वितामावस्यायां लक्ष्मीपूजनमन्त्रः ।

सुखवर्चक पु० सुखं वर्चयति उद्दीपयति वर्च-णिच्-ण्वुल् । सर्जिकाक्षारे (साजिमाटी) अमरः ।

सुखवर्चस् पु० सुखं सुखकरं वर्चो यस्य । सर्जिकाक्षारे (साजिमाटि) राजनि० । [फलप्रधानवृक्षे रत्नमा० ।

सुखवास पु० सुखः सुखकरो वासो गन्धो यस्य । (तरमुज)

सुखवासन पु० सुखं सुखकरं वासनं गन्धो यस्य । सुखवासनगन्धद्रव्ये शब्दर० । [सुखकरावासे ।

सुखाधार पु० सुखानामाधारः । स्वर्गे शब्दर० । कर्म० ।

सुखायत पु० सुखेनायम्यते आ+यम-क्त । विनीताश्वे शब्दमा०

सुखायन पु० सुखेनायतेऽनेन अय-ल्युट् । सुविनीताश्वे शब्दमा०

सुखावह त्रि० सुखमावहति जनयति आ+वह–अच्। सुखजनके।

सुखाश पु० सुखा सुखकरी आशा यस्य। १वरुणे सुखेनाश्यते अश–घञ्। २राजतिनिशे वृक्षे ३सुखभोज्ये त्रि० मेदि० भावे घञ्। सुखभोजने आर्थे च। ४सुखाशने, (शशा) राजतिनिशवृक्षे च पु०। [प्रधाने वृक्षे शब्दच०

सुखाशन पु० सुखेनाश्यते अश–कर्मणि ल्युट्। (शशा) फल·

सुखोत्सव पु०सुखस्योत्सव उत्सवो यस्मात् ५ब०। १पत्यौ त्रिका० कर्म०। २आनन्दकारके उत्सवे पु०।

सुखोदक न० कर्म०। सुखकरे उष्णोदके रत्नमा०।

सुखोर्जिक पु० सुखस्य ऊर्जः वृद्धिरस्मात् ठन्। स्वर्जिकाक्षारे (साजिमाटि) राजनि०। [२सुगमे त्रि०

सुग न० सुष्ठु गच्छति निर्याति गम–ड। १विष्ठायाम् शब्दच०

सुगत पु० सुष्ठु गच्छति जानाति गम–कर्त्तरि–क्त। १बुद्धे अमरः। २सुगतियुते त्रि०।

सुगन्ध पु० सुष्ठु गन्धोऽस्य न इत्। १गन्धद्रव्ये २चक्रीरके रत्नमा० ३नीलोत्पले ४चन्दने राजनि० भावप्र०। ५पन्थिपर्णे ६रक्तशिग्रौ ७गन्धके ८चणके ९भूतृणे च पु० राजनि०। १०सद्गन्धद्रव्ययुक्ते आपणादौ त्रि०। "गन्धस्यैत्वं तदेकान्तग्रहणात्" उक्तेः समवायेनैव गन्धवत्त्वे इत् आपणस्य च गन्धयुक्तद्रव्याधारत्वात् तत्र न इत्" सि०कौ०।

सुगन्धक न० सुष्ठु गन्धोऽस्य कप्। १रक्ततुलस्यां २गन्धके रत्नमा० ३नागरङ्गे त्रिका० ४कर्कोट्याम् राजनि०।

सुगन्धपत्रा स्त्री सुगन्धं पत्रमस्याः। रुद्रजटायाम् राजनि०

सुगन्धभूतृण न० कर्म०। गन्धतृणे राजनि०।

सुगन्धमूला स्त्री सुगन्धं मूलं यस्याः। १स्थलपद्मिन्याम् २रास्नायाञ्च राजनि०।

सुगन्धा स्त्री सुष्ठु गन्धोऽस्त्यस्याः अच्। १रास्नायां अमरः २शट्यां शब्दर० ३वन्ध्याकर्कोट्याम् ४रुद्रजटायां ५नाकुल्यां ६शतपुष्पायां ७नवमालिकायां ८स्वर्णयूथिकायां ९पृक्कायां १०सल्लक्यां गन्धपत्त्राम् ११माधव्यां राजनि० १२वनलतायां १४तुलस्यां १५मातुलुङ्गे च रत्नमा०।

सुगन्धामलक न० सुगन्धैः सर्वौषधिगणैर्युक्तमामलकम्। "सर्वौषधिसमायुक्ताः शुष्कास्त्वामलकत्वचः। यदा तदायं योगः स्यात् सुगन्धामलकाभिधः" राजनि० उक्ते सर्वौषधियुक्ते शुष्के आमलकवल्कले।

सुगन्धि पु० सुष्ठु गन्धः अस्य वा इत् रत्नमा०। १सद्गन्धे सुरभौ अमरः। २सुगन्धयुक्ते अमरः ३एलबालुके ४कशेरौ ५गन्धतृणे ७धान्यके ८पिप्पलीमूले च राजनि०। स्वार्थे क। कह्लारे शब्दर० गौरसर्षपे पुष्करमूले सुरपर्णे उशीरे राजनि०। महायाबौ हेमच०। गन्धके तरस्के च पु० राजनि०।

सुगन्धिकुसुम पु० सुगन्धि कुसुमं यस्य। १पीतकरवीरे राजनि० २सद्गन्धयुक्तपुष्पयुते त्रि० ३पृक्कायां स्त्री जटा० कर्म०। ४सुगन्धीनि पुष्पे न०।

सुगन्धित्रिफला स्त्री त्र्यवयवं त्रिविधावं वा फलं त्रिफलं सुगन्धि त्रिफलमस्त्यस्याः साहचर्येण अच्। जातीफले २पूगफले ३लवङ्गकलिकाफले च राजनि०।

सुगन्धिमूल न० सुगन्धि मूलमस्य। उशीरे (वेना) राजनि०

सुगन्धिमूषिका स्त्री सुगन्धिः विरोधिलक्षणया दुर्गन्धिः मूषिका। छुछुन्दर्यां (छुछ) राजनि०।

सुगहन त्रि० प्रा० स०। १अतिनिविडे कुम्बायां स्त्री रमानाथः।

सुगहनावृति स्त्री कर्म०। यज्ञस्थाने श्वादिदर्शनवारणाय निविडवेष्टने कुम्बायाम् अमरः।

सुगृह पुंस्त्री सुष्ठु गृहं यस्य। १चञ्चुसूचिकखगे (बावुइ) हेमच० स्त्री ङीप् कर्म०। २सुन्दरे गृहे न०।

सुगृहीतनामन् पु० सुगृहीतं प्रातःकाले स्मरणीयं नाम यस्य। प्रातःस्मरणीयनामके पुण्यकीर्त्तौ जने त्रिका०।

सुग्रन्थि पु० सुष्ठु ग्रन्थिर्यस्य। १चोरकद्रव्ये राजनि० २सुन्दरग्रन्थियुते त्रि०।

सुग्रीव पु० सुष्ठु ग्रीवाऽस्य। १श्रीकृष्णाश्वे २सूर्य्यपुत्रे वानरेश्वरे च मेदि०। ३सुन्दरग्रीवायुते त्रि० स्त्रियां ङीप् ४कश्यपस्य पत्नीभेदे गरुडपु०।

सुग्रीवेश पु० ६त०। श्रीरामचन्द्रे शब्दरत्ना०।

सुचक्षुस् पु० सुष्ठु चक्षुरिव फलमस्य। १उदुम्बरे जटा० २शोभनलोचनयुक्ते त्रि० प्रा०ब०। ३शोभने नेत्रे न०।

सुचक्षुका स्त्री सुष्ठु चक्षुरिव शिखा यस्याः कप्। महाचञ्चुशाके राजनि०।

सुचरित्रा स्त्री सुष्ठु चरित्रं यस्याः। पतिव्रतायां स्त्रियाम् अमरः २सच्चरित्रयुते त्रि० प्रा० स०। ३सच्चरित्रे न०।

सुचर्मन् पु० सुष्ठु चर्मेव वल्कलमस्य। १भूर्जवृक्षे राजनि० २सुन्दरचर्मयुते त्रि०। प्रा०ब०। ३सुन्दरे चर्मणि न०।

सुचित्रक पुंस्त्री सुचित्रेण कायति कै–क। सुष्ठु चित्रवर्णो यस्य कप् वा। १मत्स्यरङ्कखगे २चित्रसर्पे च शब्दर० स्त्रियां ङीप्। ३सुचित्रवर्णयुते त्रि० स्त्रियां टाप्। [राजनि०।

सुचित्रबीजा स्त्री सुचित्रं विचित्रं बीजं यस्याः। विडङ्गायां

सुचित्रा स्त्री प्रा०स०। १चिर्भटायां राजनि०।२विचित्रे त्रि०

सुचिर न० प्रा०स०। १अत्यन्तचिरकाले २बहुकाले च ३बहुकालभवे त्रि०। [२बहुकालजीविनि त्रि०।

सुचिरायुस् पु० सुचिरं बहुकालिकमायुर्यस्य। १देवे शब्दर०

सुचेलक पु० प्रा०स०। १सूक्ष्मवस्त्रे अमरः। सुष्ठु चेलोऽस्य कप्।२सूक्ष्मवस्त्रधरे त्रि०। [स०।२सुन्दरे जले न०।

सुजल न० शोभनं जलं यस्मात् ५ब०। १कमले राजनि० प्रा०

सुजल्प पु० "यत्रार्जवात् सगाम्भीर्य्यं सदैन्यं सहचापलम्। सोत्कण्ठञ्च हरिः स्पृष्टः स सुजल्पो निगद्यते" उज्ज्वलमणिपरिलक्षिते वाक्यभेदे

सुजाता स्त्री सु+जन-क्त। १तुवर्य्याम् राजनि० २मनोज्ञे त्रि०

सुजीवन्ती स्त्री प्रा०स०। स्वर्णजीवन्त्याम् राजनि०।

सु(षु)ट्ट अनादरे चु० उ० सक० सेट्। सुट्टयति ते असुसुट्टत् त। वोपदेव एव न्याय्यः।

सुत पुंस्त्री० सु-क्त। १पुत्रे २तनयायां स्त्री अमरः। सा च ३दुरालभायां शब्दच० ४उत्पन्ने ५सम्भवे ६निष्पीडिते च त्रि० ७पार्थिवे पु० मेदि०।

सु(सू)तक न० सु-(सू)-भावे क्त सु(सू)तं जननं तस्मादागतम् कन्। १जननाशौचे २अशौचमात्रे च "सुतके सूतके तथा" "मातुश्च सूतकं तत् स्यात्" इति च स्मृतिः।

सुतजीवक पु० सुतं जीवयति सेवनात् जीव-णिच्-ण्वुल्। पुत्रजीवकवृक्षे राजनि०।

सुतनु(नू) पुंस्त्री० सुष्ठु तनुर्यस्याः वा ऊङ्। १नार्य्याम् राजनि० "सुतनु! सत्यमलङ्करणाय ते" माघः प्रा०ब०। २सुन्दरकाययुते त्रि०। प्रा० स०। ३सुन्दरे काये स्त्री तुखान्तः। ४अत्यन्तसूक्ष्मे त्रि० स्त्रियां वा ङीष्।

सुतपस् पु० सुष्ठु तपति सु+तप-असि। १सूर्य्ये सि०कौ० २अर्कवृक्षे सुष्ठु तपोऽस्य। २मुनौ पु०। ३सुन्दरतपोयुक्ते त्रि०। प्रा०स०। ४सुन्दरे तपसि न०।

सुतपादिका सुताः संहताः पादाः मूलान्यस्याः कप् कापि अत इत्त्वम्। हंसपदीलतायां राजनि०।

सुतराम् अव्य०सु+अतिशयेऽर्थे तरप्-आमु। अवधारितार्थस्य अतिशयौचित्ये "धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः" रघुः। अत्र कातराक्ष्या धेन्वा ईक्ष्यमाणत्वेन दयालुत्वस्य अतिशयौचित्यम्।

सुतर्कारी स्त्री सुतर्कमृच्छति ऋ-अण् ङीप्। देवदालीलतायाम् राजनि०।

सुतर्दन पुंस्त्री० सुष्ठु तर्दति रवेण विरहिणम् सु+तर्द-ल्यु। कोकिले त्रिका० स्त्रियां जातित्वात् ङीष्।

सुतल पु न० सुष्ठु तलं यत्र। १पातालभेदे पातालशब्दे ४२९९ पृ० दृश्यम्। २अट्टालिकाबन्धभेदे पु० मेदि०।

सुतवस्करा स्त्री सुता वस्करा इव बहुत्वात् यस्याः। सप्तपुत्रप्रसविन्याम् स्त्रियां त्रिका०।

सुतश्रेणी स्त्री सुता निष्पीडिता श्रेणीव। १मूषकपर्ण्याम् अमरः हेम०। २पुत्रपङ्क्तौ च।

सुतहिबुकयोग पु० "सुतहिबुकवियद्धिलग्नधर्मेष्वमरगुरुर्यदि दानवार्चितो वा। यदशुभसुपयाति तच्छुभं स्यात्" ज्यो० उक्ते वैवाहिकलग्नात् सुत५हिबुक४टिस्थिते ग्रहभेदरूपे योगे। [३पौत्रे ४दौहित्रे च पु०।

सुतात्मजा स्त्री हेम०। १पौत्र्यां २दौहित्र्याञ्च अमरः

सुतिक्त पु० प्रा०स०। १पर्पटे (क्षेतपापड़ा) राजनि० २अत्यन्ततिक्ते त्रि० ३कोषातक्यां स्त्री राजनि० संज्ञायां कन्। पारिभद्रे जटा० निम्बे भूनिम्बे पु० शब्दमा०।

सुतीक्ष्ण पु० प्रा०स०।१शोभाञ्जनवृक्षे जटा०। २श्वेतशोभाञ्जने राजनि०। ३मुनिभेदे च "सुतीक्ष्णमुनिनिकेतनम्" भट्टिः। ४अत्युग्रे त्रि०।

सुतुङ्ग पु० प्रा०स०। १नारिकेलवृक्षे हारा० ज्योतिषोक्ते ग्रहाणाम् उच्चराशिस्थेषु २अंशभेदेषु च उच्चशब्दे १०५८ पृ० दृश्यम्। २अतिशयोच्चे त्रि०।

सुतेजन पु० सु+तिज-ल्यु। १धन्वनि वृक्षे भावप्र०।

सुतेजस् पु० सुष्ठु तेजोऽस्य। १आदित्यभक्तायाम् राजनि०। २शोभनतेजोयुक्ते त्रि०। ३जैनभेदे पु० हेमच०।

सुतैला स्त्री सुष्ठु तैलं यस्याम् ७ब०। महाज्योतिष्मतीलतायाम् राजनि०। [अमरः। दीर्घादिः तत्रार्थे रत्नः।

सु(सू)त्रामन् पु० सुष्ठु त्रायते सु+त्रै-मनिन् पृषो०। इन्द्रे

सुत्वन् पु० सुनोति स्म सु-भूते क्वनिप्। १कृताभिषेके कृतयज्ञार्थस्नाने अमरः २कृतसोमनिष्पीडने च।

सुद शोभायां तो० प० सक० सेट् इदित्। सुन्दति असुन्दीत्। शोभत्वेन न वोपदेवः। [राजनि०।

सुदग्धिका पु० सुष्ठु दग्धं दाहोऽस्त्यस्य ठन्। दग्धानामवृक्षे

सुदण्ड पु० सुष्ठु दण्डो यस्मात् ५ब०। वेत्रे राजनि०।

सुदण्डिका स्त्री सुदण्डयति रोगान् सु+दण्ड+ण्वुल्। १गोरक्ष्याम्। (गोरक्षचाकुले) राजनि० २सुदण्डयुतायां स्त्रियाञ्च।

सुदत् पु० सुष्ठु दन्तोऽस्य वयसि दत्रादेशः। १शोभनदन्तयुक्तवयस्के गजादौ २युवत्यां स्त्री ङीप्। "सुदती-

जनमञ्जनार्पितैः" नैष॰ । वयोभिन्ने तु सुदन्त इत्येव सुन्दरदन्तयुते गवादौ सि॰ कौ॰ ।

सुदर्भा स्त्री सु+दृभ–कर्मणि घञ् । १इक्षुदर्भातृणे राजनि॰। सुष्ठु दर्भो यत्र । २सुन्दरकुशयुक्ते त्रि॰ ।

सुदर्शन पु॰ सुष्ठु दृश्यते कर्मणि युच् । १विष्णुचक्रे २मेरौ ३जम्बूवृक्षे मेदि॰। (पद्मगुलञ्च) ४लताभेदे स्त्री रत्नमा॰ ५आज्ञायाम् ६ओषधिभेदे च स्त्री ७इन्द्रपुरे न॰ मेदि॰ ८अमरावत्यां विश्वः स्त्री ङीप् । ९जिनभेदे हेमच॰ । सुदर्शनचक्रं च सर्वदेवतेजोभिः शिवेन निर्माय विष्णवे दत्तं यथोक्तं ब्रह्मपु॰उत्तरख॰१४१अ॰। "अथ विष्णुमुखा देवाः स्वतेजांसि ददुस्तदा । तान्यैक्यं वै गतानीशो दृष्ट्वा सद्योऽप्युवाच ह । तेनाकरोन्महादेवः चक्रं वा प्रज्वलत्तमम् । चक्रं सुदर्शनं नाम ज्वालामालातिभीषणम्" । "ततः प्रीतः प्रभुः प्रादात् विष्णवे प्रवरं वरम् । प्रत्यक्षं तेजसं श्रीमान् दिव्यं चक्रं सुदर्शनम्" वामनपु॰७८अ॰

सुदर्शनचूर्ण न॰ चूर्णरूपौषधभेदे

"त्रिफला रजनीयुग्मं कण्टकारीयुगं शठी । त्रिकटु ग्रन्थिकं मूर्वा गुडूची धन्वयासकः । कटुका पर्पटो मुस्तं त्रायमाणा च वालुकम् । निम्बं पुष्करमूलञ्च मधुयष्टी च वत्सकः । यवानीन्द्रयवौ भार्गी शिग्रुवीजं सुराष्ट्रजा । वचा त्वक् पद्मकोशीरचन्दनातिविषा बला । शालिपर्णी पृश्निपर्णी विडङ्गं तगरं तथा । चित्रकं देवकाष्ठञ्च चव्यं पत्रं पटोलजम् । जीवकर्षभकौ चैव लवङ्गं वंशलोचना । पुण्डरीकञ्च काकोली पत्रकं जाति पत्रकम् । तालीशपत्रमेतानि समभागानि चूर्णयेत् । सर्वांशं सर्वचूर्णस्य किरातं प्रक्षिपेत् सुधीः । एतत् सुदर्शनं नाम चूर्णं दोषत्रयापहम् । ज्वरांश्च निखिलान् हन्यान्नात्र कार्या विचारणा । पृथग्द्वन्द्वागन्तुजांश्च धातुस्थान् विषमज्वरान् । सन्निपातोद्भवांश्चापि मानसानपि नाशयेत् । शीतादीनपि दाहादीन् मोहं तन्द्रां भ्रमं तृषाम् । कासं श्वासञ्च पाण्डुञ्च हृद्रोगं कामलां तथा । त्रिकपृष्ठकटीजानुपार्श्वशूलञ्च नाशयेत् । शीताम्बुना पिबेदेतत्सर्वज्वरनिवृत्तये । सुदर्शनं यथा चक्रं दानवानां विनाशनम् । तद्वज्ज्वराणां सर्वेषां चूर्णमेतत् प्रणाशनम्" । पुष्करमूलाभावे कुष्ठमपि दद्यात् । भार्ग्यभावे कण्टकारीमूलम् । सौराष्ट्र्यभावे स्फटिकां दद्यात् । तगरालाभे कुष्ठं देयम् । जीवकर्षभकाभावे विदारीकन्दस्य भागद्वयं दद्यात् । पुण्डरीकं श्वेतकमलम् । काकोल्यभावे अश्वगन्धामूलं दद्यात् । तालीशपत्रकाभावे स्वर्णतालो प्रदीयते" भावप्र॰ ।

सुदल पु॰ सुष्ठु दलान्यस्य । क्षीरमोरटावृक्षे रत्नमा॰ २शाल-पर्ण्यां स्त्री राजनि॰ ।

सुदामन् पु॰ सुष्ठु ददाति दा–मनिन् । १मेघे २पर्वतभेदे (इरावत् पर्वत) मेदि॰। सुदाम्नेकादिक् अण् ङीप् सौदामनी तडिति अमरः।३गोपभेदे ४समुद्रे शब्दर॰५ऐरावते गजे त्रिका॰ पुराणप्रसिद्धे श्रीकृष्णमित्रे ६विप्रभेदे च ७शोभनदातरि त्रि॰ । राजगृहसमीपस्थे ८नदीभेदे स्त्री रामा॰अयो॰७०सर्गः । तत्र वा ङीप् डाप् च । सुदाम्नी सुदामा वा ।

सुदाय पु॰ सुष्ठु दीयते सु+दा–कर्मणि घञ् । १यौतुकपदा-दादिना स्त्रियै देये धने । यौदायिकशब्दे दृश्यम् । सुष्ठु दायो यस्य । २पितृप्रभृतौ धातौ ।

सुदारु पु॰ सुष्ठु दारु यत्र । पारिपात्रपर्वते त्रिका॰ । [रमा

सुदि अव्य॰स्वरा॰सुष्ठु दीव्यति सु+दिव–डि । शुक्लपक्षे मनो-

सुदिन न॰ प्रा॰स॰ ।१प्रशस्तदिवसे । २प्रशस्ते त्रि॰। [सि॰कौ॰

सुदिनाह न॰ सुदिनं प्रशस्तमहः टच्समा॰ । प्रशस्तदिवसे

सुदीर्घधर्मा स्त्री सुदीर्घः अतिविस्तीर्णो धर्मो गुणविशेषो यस्याः केवलत्वाभावादनिच्समा॰ डाप् । अमरपत्न्यां शब्दच॰ सुदीर्घो घर्मो यस्याः । सुदीर्घघर्मेति पाठान्तरे तत्रार्थे । [इत्यम् । वार्त्ताकुभेदे रत्नमा॰ ।

सुदीर्घफलिका स्त्री सुदीर्घं फलं यस्याः कप् कापि अत

सुदीर्घा स्त्री प्रा॰ स॰ । चीनाकर्कट्याम् राजनि॰ ।

सुदूर त्रि॰ प्रा॰स॰। अतिदूरे अमरः ।

सुद्युम्न पु॰ वैवस्वतमनुपुत्रे इलाशब्दे ९२१ पृ॰ दृश्यम् ।

सुधन्वन् त्रि॰ सुष्ठु धनुर्यस्य अनङ्समा॰ । १सुन्दरधनुर्धरे । २मान्धातृवंश्ये नृपभेदे हरिवं॰ १२अ॰ । ३आङ्गिरसे मुनिभेदे भा॰ स॰ ६६अ॰ । ४अनन्ते नागे ५विश्वकर्मणि च पु॰ मेदि॰ ।

सुधन्वाचार्य्य पु॰ "वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च । कारुषश्च विजन्मा च मैत्रः सात्वत एव च" मनूक्ते व्रात्यवैश्यात् सवर्णाजाते जातिभेदे । [पु॰डचा॰ ।

सुधर्मन् स्त्री सु+धृ–मनिन् । १देवसभायाम् २कुटुम्बिनि च

सुधर्मा स्त्री सुष्ठु धर्मो यस्याः अनिच्समा॰वा डाप् । देवसभायाम् अमरः । गौरा॰ङीष् सुधर्मीत्यप्यत्र। अमरटीका

सुधा स्त्री सुष्ठु धीयते पीयते अर्प्यते वा धे धा–वा क । १अमृते अमरः २सेंहुण्डवृक्षे (मनसिज) ३मूर्वायाम्

४स्नुह्यां ५गङ्गायाम् ६इष्टकायां मेदि० ७विद्युति ८रसे ९जले १०धात्र्याम् नानार्थको० ११हरीतक्याम् १२मधुनि शब्दच० १३शालपर्ण्याञ्च राजनि०।

सुधांशु पु० सुधेवाह्लादकाः अंशवोऽस्य। १चन्द्रे २कर्पूरे च अमरः। सुधाकरादयोऽप्यत्र। [वासिते तैले राजनि०।

सुधांशुतैल न० सुधांशुना कर्पूरेण वासितं तैलम्। कर्पूर-

सुधांशुरत्न न० ६त०। मौक्तिके राजनि० तस्य चन्द्रप्रियत्वात्तथात्वम्। मुक्ताशब्दे २७६१ पृ० दृश्यम्।

सुधाङ्ग पु० सुधयाप्यायनमङ्गमस्य। १चन्द्रे त्रिका० २कर्पूरे च

सुधाजीविन् पु० सुधां लेपनद्रव्यमाजीवति आ+जीव-णिनि पलगण्डे लेपके (राज) त्रिका०। [पात्रे च

सुधाधार पु० ६त०। १चन्द्रे शब्दर० २कर्पूरे ३अमृताधार-

सुधानिधि पु० सुधा निधीयतेऽत्र नि+धा-आधारे कि ६त०। १चन्द्रे शब्दर० २कर्पूरे च। [illegible]

सुधापयस् पु० सुधा लेपनद्रव्यमिव शुभ्रं पयो निर्यासोऽस्य।

सुधाभुज् पु० सुधां भुक्तवान् भुज-भूते क्विप्। देवे हेमच०।

सुधाभृ(सू)ति पु० सुधा भ्रियते पुष्यते सूयते वाऽनेन भृ-सू-वा क्तिच्। १यज्ञे २चन्द्रे मेदि० ३कर्पूरे च।

सुधामय न० सुधात्मकं लेपनद्रव्यात्मकं वा प्राचुर्य्ये मयट्। २राजभवने सौधे शब्दर०। अमृतवदाह्लादकवाक्यादौ त्रि० स्त्रियां ङीप्।

सुधामोदक पु० सुधेव मोदयति मुद-णिच्-ण्वुल्। १यवासशर्करायाम् २कर्पूरे च राजनि०।

सुधावर्षिन् पु० सुधां वर्षति वृष-णिनि। १चन्द्रे २कर्पूरे ३ब्रह्मणि च शब्दर० ४बुद्धभेदे त्रिका०।

सुधावास पु० ६त०। १चन्द्रे २कर्पूरे च। सुधाया इव वासो गन्धो यस्याः। त्रपुष्याम् राजनि०।

सुधासिन्धु पु० सुधामयः सिन्धुः। अमृतसमुद्रे राजनि०।

सुधास्रवा स्त्री सुधां स्रवति स्रु-अच्। १रुदन्तीवृक्षे राजनि० २उपजिह्वायाञ्च (आलजिभ) त्रिका०।

सुधाहर पु० सुधां हरति हृ-अच्। गरुडे शब्दर० भा० आ० २२अ० दृश्यम्। सुधाहारकादयोऽप्यत्र। [रायमु०

सुधिति पुंस्त्री० सु+धा-क्तिच् न ह्यादेशः। १कुठारे स्वधितौ

सुधी पु० सुष्ठु धीर्यस्य। १पण्डिते। सुष्ठु धीः प्रा० स०। २सुन्दरबुद्धौ स्त्री। सुष्ठु ध्यायति सु+ध्यै क्विप् नि०। ३सुबुद्धियुक्ते त्रि०। [राजनि०।

सुधूम पु० सुष्ठु धूमः संतापो यस्य। स्वादुनामगन्धद्रव्ये

सुधोद्भव पु० सुधया सह सुधाया वा उद्भवति उद्+भू-अच्।

१धन्वन्तरौ वैद्यराजे समुद्रमन्थने हि तस्य सुधाकमण्डलुसहिततयोपत्तेस्तथात्वम्। २हरितक्यां स्त्री त्रिका० "पपात बिन्दुर्मेदिन्यामिन्द्रस्य पिबतोऽमृतम्। ततो दिव्या समुत्पन्ना सप्तजातिर्हरीतकी" भावप्र० उक्तेस्तस्याः सुधाबिन्दुजातत्वात् तथात्वम्।

सुनन्द न० सुष्ठु नन्दयति सु+नन्द-अच्। १बलरामसुषले शब्दमा० २श्रीकृष्णपार्श्वचरभेदे भाग० १०।८९अ० ३राजगृहभेदे च। ४अत्यानन्दयुक्ते त्रि० शब्दर० ५गोरोचनायाम्, ६उमायाम् स्त्री मेदि० एवम् ७उमासखीभेदे शब्दमा० ८नार्य्याम् विश्वः ९अर्कपत्रीवृक्षे च (इसेरमूल) स्त्री रत्नमा०।

सुनयन पुंस्त्री० सुष्ठु नयने अस्य। १मृगे शब्दच० स्त्रियां जातित्वात् ङीष्। २नार्य्यां स्त्री टाप्। ३शोभननेत्रयुक्ते त्रि० स्त्रियां बह्वच्कत्वात् टाप्। [शब्दच०।

सुनाक्षत पु० सुष्ठु न अक्षतः नञो नलोपाभावः। कर्पूरके

सुनाभ पु० सुष्ठु नाभिरस्य अच्समा०। मैनाकपर्वते त्रिका०।

सुनामद्वादशी स्त्री व्रतभेदे व्रतशब्दे ५०६६ पृ० दृश्यम्।

सुनार पु० सुष्ठु नालमस्य यस्य रः। १सर्पाण्डे शुनीस्तन्ये २कलविङ्के खगे पुंस्त्री० मेदि० स्त्रियां ङीष्।

सुनालक पु० सुष्ठु नालेन कायति कै-क। १वकवृक्षे शब्दच० २सुन्दरनालयुक्ते त्रि०।

सुनासिका स्त्री सुष्ठु नासाऽस्त्यस्य ठन्। १काकनासायाम् राजनि०। प्रा० स०। २सुन्दरनासिकायाम् स्त्री।

सुनासी(शी)र पु० सुष्ठु नासी(शी)रः अग्रगसैन्यं यस्य। इन्द्रे अमरः।

सुनासी(शी)र्य्य पु० सुना(शु)सीरो देवताऽस्य यत्। यज्ञभेदे। छ। सुना(शु)सीरीयोऽप्यत्र। स च चातुर्मास्ययागपर्वभेदः कात्या० श्रौ० ५।११ कण्डिकायामुक्तः। कात्यायनशब्दे १८९० पृ० दृश्यम्। "न वैश्वदेवीये न सुनासीर्य्ये" श्रुतिः। [शाके त्रिका० कप् तत्रैव अमरः।

सुनिषण्ण न० सुष्ठु निषण्णं स्वप्नो यस्मात् ५ब०। (सुसुनि)

सुनिष्टप्त त्रि० सु+निस्+तप-क्त षत्वम्। अत्यन्तोद्दीप्ते

सुनीति स्त्री सुष्ठु नीतिः यस्याः। उत्तानपादस्य पत्नीभेदे १ध्रुवमातरि। २सुन्दरनीतियुक्ते त्रि०। प्रा० स०। ३शोभनायां नीतौ स्त्री। [वंशिप्र०

सुनीथ त्रि० सु+नी-थक्। १धर्मशीले उणादिको० २विप्रे

सुनील न० प्रा० स०। १मणिभेदे (नीलम) २दाडिमे राजनि० ३सुन्दरनीलवर्णे पु०। ४तद्वति त्रि०। ५अ-

तस्याम् ६अपराजितायां ७जरतीवृक्षे च स्त्री राजनि०

सुनीलक पु० सुनील इव कायति कै-क। १नीलभृङ्गराजे २नीलासने ३नीलरत्ने च राजनि०।

सुन्द पु० १दैत्यभेदे उपसुन्दशब्दे १२२७ पृ० दृश्यम्। २वानरभेदे रामा०कि०४७८०। ३राक्षसभेदे रामा०बा०२०स०।

सुन्दर त्रि० सु+उन्द–अरन्–पृषो०। १मनोहरे अमरः स्त्रियां ङीप् सा च २उत्तमस्त्रियां ३त्रिपुरसुन्दर्य्यां देव्याञ्च। ४कामदेवे ५वृक्षभेदे च (सुन्दरि) पु० मेदि० ६योगिनीभेदे स्त्री तन्त्रम् "अयुजोर्य्यदि सौ जगौ, युजोः। सभरा लगौ यदि सुन्दरी तदा" छन्दो० उक्ते ७अर्द्धसमे वृत्तभेदे स्त्री। वृ०र० तु इयं वियोगिनीत्युक्ता।

सुपक्व पु० सुन्दरं पच्यते सु+पच–क्त तस्य वः। १शोभनाम्रे शब्दच०। २सुन्दरपरिपक्वे त्रि०। [पाके द्रव्यमात्रे।

सुपच त्रि० भुक्तं यत् सुखेन पच्यते पच-कर्मणि खल्। लघु-

सुपत्त्र न० सुष्ठु पत्त्रमस्य। १तेजपत्रे शब्दच० २आदित्यपत्रे पु०। ३पद्मिनाडिवृक्षे राजनि० ४सुन्दरपत्त्रयुक्ते त्रि०। ५रुद्रजटायां ६शतावर्य्यां ७पालङ्क्यां ८शम्यां ९शालपर्ण्याञ्च स्त्री राजनि०।

सुपत्त्रक पु० सुष्ठु पत्त्रं पत्रोऽस्य कप्। १शोभाञ्जनवृक्षे २जतुकायां स्त्री राजनि० अत इत्त्वम्।

सुपथ पु० सुष्ठु पन्थाः प्रा०स० वा अच्समा०। १सद्वर्त्मनि २सदाचारे च सुष्ठु पन्था यत्र अच्समा०। ३सुन्दरपथयुक्ते त्रि०।

सुपथिन् पु० प्रा० स० वा समासान्ताभावः। सत्पथे शब्दर० सुपन्थाः। [त्रि०।

सुपथ्या स्त्री प्रा०स०। १श्वेतचिल्लीवृक्षे राजनि० २शोभनपथ्ये

सुपद्मा स्त्री सुष्ठु पद्यते पद-म। १वचायाम् शब्दच०। प्रा०ब०। २पद्मिन्यां स्त्री।

सुपर्ण पु० सुष्ठु पर्णं पत्त्रं पक्षो वा यस्य। १गरुडे अमरः २सुन्दरपर्णयुक्ते त्रि० ३स्वर्णचूड़खगे पुंस्त्री० स्त्रियां ङीष्। ४कृतमालवृक्षे पु०मेदि०५नागकेशरे पु०त्रिका०। कप् सुपर्णक। आरग्वधे वृक्षे सप्तच्छदवृक्षे जटा० गरुडे च हेमच०। शालपर्ण्यां रेणुकायां पलाश्यां स्वर्णजीवन्त्यां वाकुच्यां स्त्री कापि अत इत्त्वम्।

सुपर्णकेतु पु० सुपर्णो गरुड़ः केतुर्यस्य। विष्णौ जटा०।

सुपर्णी स्त्री सुष्ठु पर्णान्यस्याः गौरा०ङीष्। १पद्मिन्यां सुपर्णो गरुड़ोऽस्त्यस्या अच् गौरा०ङीष्। २गरुड़मातरि च मेदि० च मेदि०। प्रा०स०। ५सुन्दरे पर्वणि न०। [राजनि०।

सुपर्णीतनय पु० ६त०। गरुडे जटा०।

सुपर्वन् पु० सुष्ठु पर्व यस्य। १देवे अमरः २वाणे ३वंशे ४धूमे

सुपर्वा स्त्री सुष्ठु पर्व अस्त्यस्याः अच् टाप्। श्वेतदूर्वायाम्

सुपाक्य न० सुपाकाय हितम् यत्। १विड्लवणे राजनि०।

सुपार्श्व पु० सुष्ठु पार्श्वोऽस्य। १प्लक्षवृक्षे (पाकुड) वृक्षभेदे २सम्पातिपुत्त्रे विहगभेदे च राजनि० ३सुन्दरपार्श्वान्विते त्रि०।४मेरोरुत्तरस्थविष्कम्भपर्वते पु०धान्यशैलशब्दे ३८८२ पृ० दृश्यम्। संज्ञायां कन्। १गर्दभाण्डवृक्षे पु० अमरः।

सुपिङ्गला स्त्री प्रा०स०। १ज्योतिष्मत्यां २जीवन्त्याञ्च राजनि०

सुपीत न० प्रा० स०। १गर्जरे (गाँजर) राजनि०। २सुन्दरपीतवर्णे पु० ३तद्वति त्रि०। [राजनि०।

सुपुट पु० सुष्ठु पुटमस्य। १कोलकन्दे २विष्णुकन्दे च

सुपुत्रिका स्त्री सुष्ठु पुत्र इव पक्षः यस्याः कप् अत इत्त्वम्। जतुकायाम् (तेलापोका) राजनि०। [राजनि०।

सुपुष्करा स्त्री सुष्ठु पुष्करमस्याः अच्। स्थलपद्मिन्याम्

सुपुष्प न० प्रा० स०। १लवङ्गकुसुमे शब्दच० २प्रपौण्डरीके ३आहुल्ये ४तूले राजनि० ५स्त्रीणां रजसि च "सुपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो" शङ्कराचार्यः। सुष्ठु पुष्पमस्य कप्। (पालतामान्दार) वृक्षे। पाटलायां स्त्री राजनि० अत इत्त्वम्।

सुपुष्पी स्त्री सुष्ठु पुष्पमस्याः ङीष्। १श्वेतापराजितायां २शतपुष्पायाम् ३मिश्रेयायां ४द्रोणपुष्प्यां ५जीर्णफञ्ज्यां राजनि०। ६कदल्यां शब्दच०।

सुपूर पु० सुष्ठु पूर्य्यते सु+पूर–क। वीजपूरे राजनि०।

सुपूरक पु० सुष्ठु पूरयति पूर–ण्वुल्। वकवृक्षे रत्नमा०।

सुप् स्त्री व्याकरणपरिभाषिते सुप्रभृतौ सुपपर्य्यन्ते प्रत्ययभेदे।

सुप्त न० स्वप–भावे क्त संप्रसारणम्। १निद्रायां २शयने च ३सुसुप्तौ हेमच० कर्त्तरि क्त। ४निद्रिते त्रि०। "क्षुधितस्तृषितः कामी विद्यार्थी कुप्रकारकः। भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत्। मार्जारा अमरः सर्पो राजा वै बालकस्तथा। परश्वाऽपि च मूर्खश्च सप्त सुप्तान्न बोधयेत्" नीतिसारः।

सुप्ताघातक त्रि० ६त०। हिंस्रे त्रिका०।

सुप्तजन पु० सुप्तो जनो यत्र। १अर्द्धरात्रे जटा०। धर्म०। २निद्रिते लोके च।

सुप्ति स्त्री स्वप–क्तिन्। १शयने २निद्रायाम् ३स्वप्ने च "करोति मन्प्रजनदर्शनातिथिम्" नैष०। ४स्पर्शतायां ५विश्रम्भे मेदि०।

सुप्रतिभा स्त्री सष्ठु प्रतिभा यस्याः ५ब०। सुरायाम् प्रा०

श०। १उज्ज्वलायां बुद्धौ। ६ब०। २तद्वति त्रि०।

सुप्रतिष्ठा स्त्री प्रा०स०। १प्रशंसायाम्। ६ब० २तद्वति त्रि०। ३पञ्चाक्षरपादके छन्दोभेदे स्त्री। "प्रतिष्ठान्या सुपूर्विका" वृ०र०। [राजनि०। २प्रशंसिते त्रि०।

सुप्रतिष्ठित पु० सु+प्रति+स्था–क्त सम्यक्स्थिते। १उडुम्बरवृक्षे

सुप्रतीक पु० सुष्ठु प्रतीकं यस्य। ईशानकोणस्थिते दिग्गजे अमरः। २शिवे ३कामे च ४सुन्दराङ्गे त्रि०। प्रा०स०। ४सुन्दरे अङ्गे न०।

सुप्रभा स्त्री सुष्ठु प्रभा यस्याः। १अग्निजिह्वाभेदे तन्त्र० २वाकुच्यां राजनि०। ३सुन्दरदीप्तियुते त्रि०। प्रा० स०। ४शोभनायां दीप्तौ स्त्री ५बुद्धशक्तौ हेमच०। ६सरस्वती-नदीभेदे स्त्री सरस्वतीशब्दे ५२४९ पृ० दृश्यम्।

सुप्रभात न० प्रा० स०। १शुभसूचकप्रातःकाले २तत्र पाठ्य-माङ्गल्यवाक्ये च। [भ्यासपाटवयुक्ते हेमच०।

सुप्रयुक्तशर पु० सुप्रयुक्तः शरो येन। शीघ्रहस्ते बाणमोचना-

सुप्रयोगविशिख पु० सुष्ठु प्रयोगो निक्षेपो यस्य तादृशो विशिखो यस्य। शीघ्रहस्ते बाणमोक्षणशीघ्रताद्युपपाटव-युक्ते भरतः।

सुप्रलाप पु० सु+प्र+लप–घञ्। सुवचने अमरः।

सुप्रसन्न पु० सु+प्र+सद–क्त। १कुवेरे शब्दच०। २अतिप्रसाद-युक्ते त्रि०। संज्ञायां कन्। कृष्णार्जके पु० राजनि०।

सुप्रसरा स्त्री सु+प्र+सृ–अच्। १प्रसारिण्यां लतायाम् राजनि०। २विस्तारयुक्ते त्रि०।

सुप्रसाद पु० सुखेनानायासेन प्रसादो यस्य। १शिवे त्रिका० प्रा०स०। २सुन्दरप्रसन्नतायाम्।

सुफल पु० सुष्ठु फलमस्य। १दाडिमे २बदरे ३मुद्गे ४कर्णि-कारे राजनि०। ५कपित्थे शब्दच० ६सुन्दरफलयुते त्रि०। ७इन्द्रवारुण्यां ८कुष्माण्ड्यां ९कदल्यां १०कपिलद्राक्षायां ११काश्मर्यां च स्त्री राजनि०।

सुफेन न० प्रा० स०। समुद्रफेने राजनि०।

सुबन्ध पु० सुखेन बध्यतेऽसौ बन्ध–घञ्। तिलवृक्षे शब्दच०।

सुभग पु० सुष्ठु भगः माहात्म्यादिः यस्य। १चम्पके २अशोके ३रक्ताम्लाने ४टङ्कणे च राजनि०। ५सुदर्शने ६प्रिये मेदि०। ७शोभनैश्वर्ययुक्ते च त्रि०। ८कैवर्तीमुस्तायां ९शाल-पर्ण्याम् १०हरिद्रायां ११नीलदूर्वायां १२तुलस्यां १३प्रि-यङ्गौ १४कस्तूर्यां १५स्वर्णकदल्यां स्त्री राजनि०। १६पञ्च-वार्षिकायां शब्दर० १७पतिप्रियायां स्त्रियां च स्त्री। सुभगाया अपत्यं ढक् इनङ् च। सौभागिनेय तदपत्ये पुंस्त्री०

सुभगम्भावुक त्रि० असुभगः सुभगो भवति भू–च्व्यर्थे खु-कञ् मुम् च। प्रियम्भविष्णौ सि०कौ०। [अमरः।

सुभगासुत पु० सुभगायाः पतिप्रियायाः सुतः। सौभागिनेये

सुभङ्ग पु० सुखेनानायासेन भज्यते निःसारत्वात् सु+भन्ज-कर्मणि घञ्। नारिकेलवृक्षे जटा०।

सुभट पु० प्रा०स०। सुन्दरयोद्धरि।

सुभद्र पु० सुष्ठु भद्रं यस्मात्। १विष्णौ शब्दमा०। ६ब०। २राजभेदे हेमच० ३शोभनमङ्गलयुते त्रि०। ४श्यामा-लतायाम् स्त्री शब्दच०। ५श्रीकृष्णस्य भगिन्याञ्च स्त्री। कप्। सुभद्रक देवरथे शब्दर० बिल्ववृक्षे च पु०शब्दच०।

सुभद्राणी स्त्री सुभद्रं सुमङ्गलमानयति आ+नी–ड गौरा० ङीष् णत्वम्। त्रायन्तीलतायाम् रत्नमा०।

सुभद्रेश पु० ६त०। अर्जुने हेमच०। सुभद्रापत्यादयोऽप्यत्र।

सुभाञ्जन पु० सुष्ठु भाति भा–क कर्म०। शोभाञ्जनवृक्षे हिरूपकोषः। [प्रचुरान्नयुते देशकालादौ।

सुभिक्ष त्रि० सुखेन लभ्या भिक्षा यत्र पर्य्याप्तान्नत्वात्।

सुभिक्षा स्त्री सुष्ठु भिक्ष्यते याच्यतेऽसौ सु+भिक्ष–अ। धातु-पुष्पिकायाम् (धाँइफुल) अमरः।

सुभीरक पु० सुष्ठु भीः सुभीः तामीरयति विरहिणाम् ईर-ण्वुल्। पलाशवृक्षे हारा०।

सुभूति पु० सुष्ठु भवति सु+भू–क्तिच्। १पक्षिभेदे प्रा०स०। २सुन्दरविभूतौ स्त्री। ६ब०। ३तद्वति त्रि०कप्। ४तिन्तिड़ी-वृक्षे पु० राजनि०। [चक्रवर्त्तिभेदे हेमच०।

सुभूम पु० सुष्ठु भूमिरस्य अच्समा०। कार्त्तवीर्य्ये जिनानां

सुभृश न० सुष्ठु भृशम्। १अतिशये दार्ढ्ये। २तद्वति त्रि०।

सुभ्रु भ्रू) स्त्री सुष्ठु भ्रुर्यस्याः वा ऊङ्। १नार्य्याम् २सु-न्दरभ्रुयुक्ते त्रि०।

सुम न० सुष्ठु मीयतेऽदः सु–मा–घञर्थे क। १पुष्पे भरतः। सु–मक्। २चन्द्रे ३कर्पूरे ४नभसि च पु० उणा०।

सुमङ्गला स्त्री सुष्ठु मङ्गलं यस्याः ५ब०। (माकड़हाता) वृक्षे रत्नमा०। २सुमङ्गलयुक्ते त्रि० स्त्रियां ङीप्। "सु-मङ्गलीरियं वधूः" इति श्रुतिः।

सुमति त्रि०सुष्ठु मतिर्यस्य। १शोभनबुद्धियुते २कल्किमातरि विष्णुयशसः पत्न्यां स्त्री। ३अर्हन्मातरि च स्त्री हेमच०। प्रा०स०। ४सुन्दरायां बुद्धौ स्त्री। [वृक्षे त्रिका०।

सुमदन पु० सुष्ठु मदयति कोकिलान् मद–णिच्–ल्यु। आम्र-

सुमदात्मजा स्त्री सुमद आत्मज इवास्याः। अप्सरःसु त्रिका०

सुमधुर न० प्रा०स०। १अत्यन्तप्रियवाक्ये अमरः २कान्तन-

वाक्ये च। २अतिमधुररसे ३तद्युक्ते त्रि०४जीवशाके पु० राजनि०। [शब्दमा० ३मनोहरे त्रि० शब्दर०।

सुमन पु० सुष्ठु मन्यते मन-अच्।१गोधूमे अमरः।२धुस्तूरे

सुमनःपत्त्रिका स्त्री सुमनसः जात्या इव पत्त्रमस्याः कप् अत इत्वम्। जातीपत्त्रिकायाम् राजनि०।

सुमनःफल पु० सुष्ठु मनो यस्मात् तादृक् फलमस्य। १क-पित्थे शब्दच०। ६त०। २जातीफले न०।

सुमनस् न० सुष्ठु मनो यस्मात् यस्य वा। १पुष्पे अमरः। ब०व०इत्यन्ये "किं सेव्यते सुमनसां मनसापि गन्धः" इति रसगङ्गाधरः। २मालत्यां स्त्री अमरः ३प्रशस्तचित्तयुक्ते त्रि०। प्रा० ब०। ४प्रशान्ते मनसि न०। ६ब०। ५देवे पु०अमरः।६पण्डिते मेदि० ७पूतिकरञ्जे शब्दमा० ८निम्बे ९महाकरञ्जे १०गोधूमे ११शतपत्त्र्यां स्त्री राजनि०।

सुमना स्त्री सुष्ठु मन्यते मन-अच्। मालतीवृक्षे शब्दर०।

सुमनोरजस् न० ६त०। पुष्पधूलौ परागे अमरः।

सुमन्तु पु० सु+मन+तुन्। १अथर्ववेदाध्यायिनि व्यासशिष्ये मुनिभेदे "अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः" भाग०१।४अ०। अतिशयितो मन्तुरपराधोऽस्य।२अत्यन्ताप-राधयुते त्रि०। २दशरथसारथौ रामा०। ३कश्चिद्देवस्य ज्योतिष्यातरि कल्किपु०।

सुमित्रा स्त्री १लक्ष्मणमातरि दशरथपत्नीभेदे। २सुन्दर-मित्रयुक्ते त्रि०। ३यदुभेदे पु० हेमच०। ४सुरथराजपुत्रे नृपभेदे विष्णुपु०। ४अं०२२अ०।

सुमुख पु० सुष्ठु मुखमस्मात् अस्य वा। १शाकभेदे २गणेशे ३नागभेदे ४गरुडपुत्रभेदे च शब्दर०। ६चिताङ्गे ७बर्बरे बनबर्बरिकायाम् राजनि०। ८सुप्रसन्नवदने १०मनोहरे च त्रि०। स्त्रियां ङीप। ११नखक्षतभेदे शब्दर०।

सुमुष्टि पु० सु+मुष-कर्त्तरि क्तिच्। विषमुष्टिक्षुपे राजनि०।

सुमूल पु०सुष्ठु मूलमस्य। १श्वेतशोभाञ्जने राजनि०।२शाल-पर्ण्यां ३पृश्निपर्ण्यां च स्त्री राजनि० टाप्। ४सुन्दर-मूलयुक्ते त्रि०। संज्ञायां कन्। गर्जरे न० राजनि०।

सुमेखल पु० सुष्ठु मेखला यस्मात् ५ब०। १मुञ्जतृणे राजनि० ६ब०। २सुन्दरमेखलान्विते त्रि०।

सुमेधस् स्त्री सुष्ठु मेधा यस्याः ५ब०असिच्समा०। १ज्यो-तिष्मत्यां लतायाम्। ६ब०। २सुन्दरमेधायुक्ते त्रि०मेदि०।

सुमेरु पु० प्रा० स०। १पर्वतभेदे अमरः। जम्बुद्वीपशब्दे ३०४९ पृ० दृश्यम्। २जपमालायामालायाम्नुष्ठिकायाश्च तत्त्वम्।

सुम्भलुण्ठ पु० कर्पूरके शब्दच०। [वासिनि पु० श०च०।

सुम्भ(म्ल) पु० शुम्भ-अच् पृषो०। १देशभेदे शब्दर० २तद्दे-

सुयामुन पु० यमुनाया इदम् सुष्ठु यामुनं प्रियत्वेनास्त्यस्य अच्। १विष्णौ २वत्सराजे ३प्रासादविशेषे ४पर्वतभेदे हेमच०। ४मेघभेदे च मेदि०।

सुयोधन पु० सुखेन युध्यतेऽसौ सु+युध-युच्। धृतराष्ट्र-राजपुत्रभेदे दुर्योधने त्रिका०। [२सूर्ये ३पण्डिते च।

सुर पु० सुष्ठु राति ददात्यभीष्टं सु+रा-क। १देवे अमरः।

सुरकृता स्त्री ३त०। १गुडूच्याम् राजनि० २देवनिर्मिते त्रि०

सुरक्तक पु० सुरक्त इव कायति कै-क। १कोशाम्रे २स्वर्ण-गैरिके च राजनि०।

सुरगुरु पु० ६त०। वृहस्पतौ त्रिका०।

सुरग्रामणी पु० सुराणां ग्रामणीः नेता। इन्द्रे त्रिका०।

सुरङ्ग न० सुष्ठु रङ्गो यस्मात् ५ब०। १हिङ्गुले २पत्तङ्गे (बकमादि)प्रा०स०।३नागरङ्गे ४मत्तभेदे (सिँध) च पु० राजनि०। [राजनि०।

सुरङ्गधातु पु० सुष्ठु रङ्गो रञ्जनं यस्मात् ५ब० कर्म०। गैरिके

सुरङ्गा स्त्री सु-अङ्गच् नि० (सिँध) सन्धौ भूरा०। २कैवर्त्तिकायाम् राजनि०।

सुरङ्गिका स्त्री सुष्ठु रङ्गो रञ्जनं यस्याः ५ब० कप् अत इत्वम्। १मूर्वायाम् राजनि०।

सुरङ्गी स्त्री सुष्ठु रङ्गो यस्याः ५ब० गौरा० ङीष्। १काक-माचायाम् राजनि०। २रक्तशोभाञ्जने रत्नमा०।

सुरज्येष्ठ पु० ७त०। चतुर्मुखे ब्रह्मणि अमरः।

सुरञ्जन पु० सुरञ्जयति सु+रञ्ज-णिच्-ल्यु। गुवाके त्रिका०

सुरत न० सु+रम-भावे क्त। १स्त्रीपुंसयोः सङ्गमरूपे रमण-भेदे मेदि०। सु-रम-कर्त्तरि क्त। २अत्यन्तरते त्रि० ३द-याद्रौ वारसुन्दरी।

सुरतताली स्त्री सुरतं तालयति तल-णिच्-अण् गौरा० ङीष्। १दूत्यां २शिरःस्रजि च मेदि०।

सुरता स्त्री सुराणां समूहः भावो वा तल्।१देवसमूहे २देवत्वे च मेदि०। सु+रम-क्त। ३अत्यन्तरतायां स्त्रियां स्त्री।

सुरताङ्ग पु० सुरतस्याङ्गमस्य। सुरपुन्नागे राजनि०।

सुरतोषक पु०६त०। १कौस्तुभमणौ शब्दर०। २देवतोषके त्रि०

सुरथ पु० सुष्ठु रथोऽस्य। चन्द्रवंश्ये नृपभेदे "सुरथो नाम राजाऽभूत्" देवीमा०। २सुन्दररथयुक्ते त्रि०।

सुरदारु न० सुरप्रियं सरलोऽवयवयुक्तं वा सुसलात् दारु। देवदारुवृक्षे रत्नमा०।

सुरदीर्घिका स्त्री सुराणां दीर्घिकेव । गङ्गायाम् अमरः सुरवाप्यादयोऽप्यत्र ।

सुरदुन्दुभी स्त्री सुराणां दुन्दुभीवाह्लादकत्वात् । तुलस्याम् राजनि० । [राजनि० ।

सुरद्रुम पु० सुरप्रियो द्रुमः । १देवदारुणि २देवनले च

सुरद्विष् पु० सुरान् द्वेष्टि द्विष–क्विप् । १असुरे अमरः २देवद्वेष्टरि त्रि० ।

सुरधनुस् न० ६त० । इन्द्रधनुषि जटाधरः ।

सुरधूप पु० सुरप्रिया धूपः । राले (धुना) राजनि० । [ऽप्यत्र

सुरन(ण)दी स्त्री ६त०ग्ग णत्वम् । गङ्गायां सुरधुन्यादयो-

सुरनन्दा स्त्री नदीभेदे शब्दर० ।

सुरनाल पु० सुरप्रियं नालमस्य । देवनलवृक्षे राजनि० ।

सुरनिम्नगा स्त्री ६त० । गङ्गायाम अमरः ।

सुरनिर्गन्ध न० सुरेषु निर्गन्धम् । पत्रके राजनि० ।

सुरपति पु० ६त० । इन्द्रे अमरः सुरेशादयोऽप्यत्र ।

सुरपथ पु० सुराणां पन्था इव गत्याधारत्वात् अच्समा० । आकाशे हेमच० । [राजनि० ।

सुरपर्ण न० सुरप्रियं पर्णमस्य । सुगन्धिके ओषधिभेदे

सुरपर्णिक पु० सुरप्रियं पर्णं शाक० तदस्त्यस्य ठन् । १सुरपुन्नागे राजनि० २पुन्नागे स्त्री हेमच० । [राजनि०

सुरपर्णी स्त्री सुरप्रियं पर्णं यस्याः ङीप् । पलाशीवृक्षे

सुरपादप पु० ६त० । कल्पवृक्षे सुरवृक्षादयोऽप्यत्र ।

सुरपुन्नाग पु० सुरप्रियः पुन्नागः । पुन्नागभेदे राजनि० ।

सुरपुरी स्त्री ६त० । अमरावत्यां त्रिका० सुरनगर्यादयोऽप्यत्र

सुरप्रिय पु० ६त० । १अगस्त्यवृक्षे राजनि० । २वृहस्पतौ ३इन्द्रे च । ४जात्यां ५स्वर्णकदल्याञ्च स्त्री राजनि० ।

सुरभि न० सु+रभ–इन् । १स्वर्णे २गन्धाश्मनि च शब्दर० ३सुन्दरे ४साधुगन्धे पु०धरणिः ५सुगन्धे अमरः ६चम्पके ७जातीफले ८वसन्ते ऋतौ मेदि० "स सुरभिं सुरभिं सुमनोभरैरिति" माघः । ९शमीवृक्षे १०कदम्बे ११वक-गुग्गुलौ १२गन्धतृणे १३वकुलवृक्षे १४राले राजनि० १५चैत्रे मासि १६प्रसिद्धे धरणिः १७गन्धफले पु० शब्दर०।१८गजकर्यां १९रुद्रजटायां २०मालकाभेदे २१गवि २२सु(शु)रायां स्त्री मेदि० २३वनमालिकायां २४तुल-स्यां २५प्राच्यां स्त्री राजनि० २६पृथिव्यां २७गवां मातरि च स्त्री वा ङीप् ।२८वहलस्वयुक्ते २९मनोहरे त्रि० मेदि० ३०विख्याते ३१धीरे च त्रि० धरणिः । सुरभिश्च कश्यप-पत्नीभेदः । "सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा"

हरिवं० ३अ० कश्यपपत्नीकथने । तस्याश्च हे कन्ये रो-हिणी गन्धर्वी च तथा दुहितरौ राजन् ! सुरभिर्व्यजायत । रोहिण्यां चैव भद्रं तु गन्धर्वी च दन्तजत्वाम् । रोहिण्यां जज्ञिरे गावः गन्धर्व्यां वाजिनः सुराः" भा० आ० ६६अ० तस्याश्च रोहिण्यादिगणोमात्वजन-मात् गोमातृत्वेन । ब्रह्मवै० प्र० ४४अ० । "गवामधिष्ठातृ-देवी गवामाद्या गवां प्रसूः । गवां प्रधाना सुरभी गो-लोके सा समुद्भवा" इति गवाद्युत्पत्तिक्रमम् । सर्वतः स्त्रियां वा ङीप् । [कदल्यां हृक्षे राजनि० ।

सुरभिका स्त्री सुरभि+स्वार्थे क । (चाँपाकला) स्वर्ण-

सुरभित्वच् स्त्री सुरभिः त्वक् यस्याः । स्थूलैलायां राजनि०

सुरभिदारु पु० सुरभि दारु यस्य । सरलवृक्षे राजनि० ।

सुरभिपत्त्रा स्त्री सुरभि पत्त्रमस्याः । १जम्बूवृक्षे २राज-जम्बूवृक्षे च राजनि० । [त्रिनि) शब्दर० ।

सुरभिवल्कल न० सुरभि वल्कलमस्य । १गुडत्वचि (दार-

सुरभिस्रवा स्त्री सुरभिः स्रवो निष्यन्दो यस्याः । शल्लक्यां राजनि० सुरभिस्वाप्यत्र ।

सुरभूरुह पु० सुरप्रियः भूरुहः देवदारुवृक्षे भावप्र० ।

सुरमृत्तिका स्त्री सुरप्रिया मृत्तिका । तुवर्याम् (वर्षब-माटि) राजनि० ।

सुरमेदा स्त्री सुरप्रियो मेदोऽस्याः । महामेदायाम् राजनि०

सुरर्षि पु० सुरप्रियः ऋषिः । नारदादिषु ऋषिषु अमरः । ऋषिशब्दे १४५२पृ० दृश्यम् ।

सुरलता स्त्री सुरप्रिया लता । महाज्योतिष्मत्याम् राजनि० ।

सुरला स्त्री सुरान् लाति सेव्यत्वेन ला–क । १गङ्गायां हारा० । २सुरजाख्ये नदीभेदे शब्दर० ।

सुरलोक पु० सुराणां लोकः वासस्थानादिः ।१स्वर्गे अमरः । सुरभुवनादयोऽप्यत्र । [अमरः ।

सुरवर्त्मन् न० सुराणां वर्त्मेव गत्याधारत्वात् । आकाशे

सुरवल्लभा स्त्री ६त० । श्वेतदूर्वायाम् राजनि० ।

सुरवल्ली स्त्री सुरप्रिया वल्ली । तुलस्याम् राजनि० ।

सुरवैरिन् स्त्री ६त०।१असुरे शब्दर०। २सुरविरोधिनि त्रि० सुररिपुप्रभृतयोऽप्यत्र ।

सुरशत्रु पु० ६त० । असुरे हला० ।

सुरशाखिन् पु० ६त० । कल्पवृक्षे जटा०

सुरश्रेष्ठा स्त्री सुरेषु श्रेष्ठा । ब्राह्म्यां राजनि० ।

सुरस न० सलेन रसति सु+रस–ग्रच्चें कर्मणि क । १गोले २तारो ३गन्धतृणे ४सिन्धुवारे पु० शब्दर० । ५नीचरसे

राजनि० । भा० ब० । ६स्वादौ रसे । ६ब० । ७सुस्वादु-रसयुक्ते त्रि०। ८तुलस्यां पुंस्त्री० । ९रास्नायां १०नाग-मातरि स्त्री मेदि०। ११मिश्रेयायां शब्दच० १२ब्राह्म्यां रत्नमा० १३महाशतावर्य्यां च स्त्री राजनि०। नाग-माता च कश्यपपत्नीभेदः ।"अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा खसा" तत्पत्नीकथने हरिवं० ३अ० । "सुर-सायाः सहस्रन्तु सर्पाणाममितौजसाम् । अनेक-शिरसां तत्र खेचराणां महात्मनाम्" । तत्राध्याये तस्या नागमातृत्वमुक्तम् । "सुरसाऽजनयन्नागान् कद्रुः पुत्रांश्च पन्नगान्" भा० आ० ६६अ० । तेनानेकशिरः नागमातृत्वं सुरसायाः कद्रास्तु सर्पमातृत्वमिति भेदः ।

सुरसाष्ट पु० सुरसाभिरष्टः व्याप्तः अश-व्याप्तौ कर्म्मणि क्त । "निर्गुण्डी तुलसी ब्राह्मी बृहती कण्टकारिका । पुन-र्नवेति मुनिभिः सुरसाष्टः प्रकीर्त्तितः" शब्दचन्द्रिकोक्ते द्रव्यभेदव्याप्ते औषधभेदे [गिणीभेदे तन्त्रसा० ।

सुरसुन्दरी स्त्री सुरप्रिया सुन्दरी । १मेनकाद्यप्सरःसु २यो-

सुरा स्त्री सुर-क सु-रक् वा । १मद्ये २चषके च मेदि० ।

सुरा च मद्यभेदः मद्यशब्दे ४७२६ पृ० दृश्यम् ।

सौत्रामणीशब्दे वैदिकमार्गेण तदभिषवप्रकारादिर्दृश्यः ।

सुराकर पु० सुराया आकरः । मद्योत्पत्तिस्थाने ।

सुराचार्य्य पु० ६त० । बृहस्पतौ अमरः ।

सुराजक सुष्ठु राजते राज-ण्वुल् । १भृङ्गराजे शब्दच० । ६ब० कप् । सुन्दरराजान्विते त्रि० ।

सुराजन् पु० सुष्ठु पूजितो राजा न टच्समा० । १इन्द्रे राजनि० ६ब०। २सुन्दरराजस्वामिके देशे त्रि० ।

सुराजीविन् पु० सुरां सुराक्रयादनमाजीवति आ+जीव णिनि । शौण्डिके हेमच० ।

सुराप त्रि० सुरां पिबति पा-क । १मद्यपानकारके "सु-रापः श्यावदन्तकः" इति याज्ञ०। [दयोऽप्यत्र

सुरापगा स्त्री ६त० । गङ्गायाम् जटा० । सुरतरङ्गिण्या-

सुरापान(ण) न० सुरा पीयतेऽनेन पा-करणे ल्युट् वा णत्वम् । १अवदंशे (चाट्नी) सुरायाः पानं येषां णत्वम् ।२प्राच्यदेशस्थे जने पु०शब्दच०। भावे ल्युट् । ३तत्पाने न० वा णत्वम् । [सुराप्रभागोऽप्यत्र

सुराभाग पु० सुराया भागः ६भागः । सुराकल्के शब्दच०

सुरामण्ड पु० ६त० । सुराया अग्रभागे अमरः ।

सुरारि पु० ६त० । असुरे शब्दर० ।

सुरारिहन्तृ पु० सुराणामरिं हन्ति हन-तृच् । विष्णौ ।

सुरार्ह न० सुरान् देवानर्हति अर्ह-अण् । हरिचन्दने राजनि० ।

सुरालय पु० ६त० । १सुमेरुपर्वते अमरः । २स्वर्गस्थाने च ।

सुराष्ट्र पु० ६ब० । देशभेदे (सुरट) । सोऽभिजनोऽस्य तस्य राजा वा अण् । सौराष्ट्र पित्रादिक्रमेण तद्देशवासिनि जने तन्नृपे च बहुषु अणो लुक् । तत्र भवः अण् । तद्देशभवे त्रि० स्त्रियां ङीप् ।

सुराष्ट्रज न० स्त्री० सुराष्ट्रदेशे जायते जन-ड । १तुवरिका-याममरः २कृष्णमुद्गे राजनि० । ३विषभेदे च पु० शब्दच० । ४तद्देशजातमात्रे त्रि० ।

सुराह्व पु० सुरपूर्विका आह्वा यस्य सुरान् आह्वयति गन्धेन वा आ+ह्वे-क वा । १देवदारुवृक्षे शब्दर० । २मरुवके ३हरिद्रावृक्षे च राजनि० ।

सुरुङ्ग पु० सु+रुज-अङ्गच् पृषो०। १शोभाञ्जनवृक्षे शब्दर०। २सुरङ्गायां (सिँध) स्त्री जटा० ।

सुरुङ्गाहि पु० सुरुङ्गायामहिरिव । सन्धिचौरे शब्दर० ।

सुरूप न० सुन्दरं रूपमस्य । १तूले राजनि०। २सुन्दररूपयुते त्रि० सुरूपाश्च प्रसिद्धतया कतिचित् कविक० उक्ता यथा "सुरूपाश्चैव विख्याता नकुलश्च पुरूरवाः । कामदेवश्च शाम्बश्च विख्याता वाश्विनौ तथा । नलकूबरः सुरूपेषु लोकेषु व मता इमे" ३पण्डिते पु०जटा० । ४शालपर्ण्यां ५भार्ग्याम् च स्त्री राजनि० भा०स० । ६सुन्दरे रूपे न० ।

सुरूहक पु० सु+रुह-कुन् पृषो० । गर्दभाण्डे हेमच० ।

सुरेज्य पु० इज्यते पूज्यते यज-क्यप् ६त० । १बृहस्पतौ २तुलस्यां स्त्री राजनि० ।

सुरेन्द्र पु० सुरेषु इन्द्र ऐश्वर्य्ययुतः । सुरराजे इन्द्रे ।

सुरेन्द्रजित् पु० सुरेन्द्रं जितवान् जि-भूते क्विप् । गरुडे हला० तत्कथा भा० आ० ३२अ० दृश्या ।

सुरेभ न० सु+रेभ-अच् । रङ्गे धातौ (रांग) त्रिका० ।

सुरेवट पु० सुष्ठु रेवटः सु+रेव-अटन् वा । राजपूगे त्रिका०।

सुरेश्वर पु० सुराणामीश्वरः । १रुद्रे जटा० २इन्द्रे च । ३स्वर्गगङ्गायां स्त्री शब्दर० ४दुर्गायाञ्च ङीप् ।

सुरेष्ट पु० ६त० । १शाले वृक्षे २सुरपुन्नागे ३शिवमल्लिकायाम् ४ब्राह्म्यां स्त्री राजनि० ।

सुरोत्तम पु० सुरेषूत्तमः । १सूर्य्ये २देवश्रेष्ठे त्रि० ।

सुरोत्तर पु० सुरेषु तत्पूजनेषूत्तरः श्रेष्ठः । चन्दने शब्दच०।

सुरोद पु० सुरेव उदकमस्य उदादेशः । सुरासमुद्रे जटा० ।

सुलभ त्रि० सुखेन लभ्यते सु+लभ-कर्म्मणि खल् । १अना-

याष्टच्छ्यो ३माषपर्ण्यां ४धूम्रपत्रायाञ्च स्त्री राजनि०।

सुलोचन पुंस्त्री० शुभं लोचनमस्य। १हरिणे राजनि० स्त्रियां ङीष्। २सुन्दरनेत्रयुक्ते त्रि० स्त्रियां बह्वच्कत्वात् टाप्।

सुलोमशा स्त्री सुलोमानि सन्त्यस्याः श। काकजङ्घायां राजनि०। २सुलोमयुक्ते त्रि०।

सुलोमा स्त्री सुष्ठु लोमान्यस्याः डाप्। १ताम्रवल्ल्याम् २मांसच्छदायाञ्च राजनि०।

सुलोहक न० प्रा०स०। पित्तले हेमच०।

सुलोहिता स्त्री प्रा०स०। १अग्निजिह्वाभेदे शब्दमा० २सुरक्तवर्णे पु० ३तद्वति त्रि० स्त्रियां ङीप् तस्य नश्च।

सुवक्त्र पु० सुष्ठु वक्त्रं सेवनात् यस्मात्। १वनबर्बर्य्याम् राजनि०। ६ब०। २सुन्दराननयुक्ते त्रि०। प्रा०स०। ३सुन्दरे मुखे न०

सुवचन न० सु+वच-भावे ल्युट्। १सुप्रलापे शोभनोक्तौ अमरः। उच्यतेऽसौ सु+वच-कर्मणि ल्युट् ङीप्। २शुभसूचन्याम् देवीभेदे स्त्री। [सुन्दरवचने न०।

सुवचस् त्रि० सुष्ठु वचोऽस्य। १वाग्मिनि जटा०। प्रा०स०।

सुवन पु० सु-क्यु। १सूर्य्ये २वह्नौ च उणादिको० प्रा०स०। ३रम्ये वने न०। [क्षारे राजनि०।

सुवर्चक पु० सुष्ठु वर्चयति सु+वर्च-णिच्-ण्वुल्। सर्जिका-

सुवर्चला स्त्री सुष्ठु वर्चयति सु+वर्च-णिच्-कलच्। १सूर्य्यभार्य्यायाम् त्रिका०। २अतस्याम् रत्नमा०। ३आदित्यभक्तायां ४ब्राह्म्याञ्च राजनि०। अच्। सुवर्च देशभेदे पु०

सुवर्च्चिक पु० सुवर्चः देशभेदः अस्त्युत्पत्त्याकरत्वेन ठन्। १सर्जिकाक्षारे २जतुकायां स्त्री राजनि०।

सुवर्च्चिन् पु० सु+वर्च-णिच्-णिनि। सर्जिकाक्षारे राजनि०

सुवर्ण न० सुष्ठु वर्णोऽस्य। १स्वनामख्याते धातुभेदे अमरः २हरिचन्दने मेदि०। ३स्वर्णगैरिके रत्नमा० ४धने हेमच०। ५नागकेसरे राजनि०। "कर्षं सुवर्णस्य सुवर्णसंख्यम्" इत्युक्ते कर्षमिते ६काञ्चने पुं०लीला०। ७यज्ञभेदे ८धुस्तूरे ९कृष्णागुरुणि च पु० राजनि०। सुष्ठु वर्णो रूपमक्षरं वाऽस्य। १०सुरूपे ११सुन्दराक्षरयुक्ते च त्रि०। "न सुवर्णमयी तनुः परं ननु वागपि तावकी तथा" नैष०। १२कर्षपरिमाणे वैद्यक०।

अग्निरेतस् शब्दे ५८ पृ० कनकशब्दे च १६४४ पृ० सुवर्णधातूत्पत्तिगुणादिकं दृश्यम्।

तस्य शोधनमारणप्रकारादिकं भावप्र० उक्तं यथा "तत्र मारणाय शोध्य सुवर्णमाह "दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम्। तारशुल्वोज्झितं स्निग्धं कोमलं गुरु हेम सत्" (सत् उत्तमम्) "छेदे तु कठिनं रूक्षं विवर्णं समलं दलम्। दाहे छेदेऽसितं श्वेतं कषे त्याज्यं स्फुटं लघु। दलं (टीपत) इति लोके स्फुटं यद्घनाहतं स्फुटति। शोधनविधिः "पत्रीकृतपत्राणि हेम्नो वह्नौ प्रतापयेत्। निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके। गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा। एवं हेम्नः परेषाञ्च धातूनां शोधनं भवेत्"। अशुद्धस्य दोषः "बलं सवीर्यं हरते नराणां रोगव्रजं पोषयतीह काये। असौख्यकार्येव सदा सुवर्णमशुद्धमेतन्मरणञ्च कुर्य्यात्। स्वर्णस्य मारणविधिः "स्वर्णस्य द्विगुणं सूतमम्लेन सह मर्दयेत्। तद्गोलकसमं गन्धं निदध्यादधरोत्तरम्"। स्वर्णस्य अतितनूकृतपत्रस्य। गन्धम् गन्धकचूर्णम्। "गोलकञ्च ततो रुद्ध्वा शरावदृढसंपुटे। त्रिंशद्वनोपलैर्दद्यात् पुटान्येवं चतुर्दश। निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः"। रुद्ध्वा सवस्त्रमृत्तिकाचिक्कणकर्पटिकया वनोपलः (गोघठाः इति लोके) निरुत्थं यत् पुनर्न जीवति। अथान्यप्रकारः "काञ्चने गलिते नागं षोडशांशेन निःक्षिपेत्। चूर्णयित्वा तथाम्लेन घृष्ट्वा कृत्वा तु गोलकम्। गोलकेन समं गन्धं दत्त्वा चैवाधरोत्तरम्। शरावसंपुटे धृत्वा पुटेत्त्रिंशद्वनोपलैः। एवं सप्तपुटैर्हेम निरुत्थं भस्म जायते"। अत्रापि पूर्ववद्गन्धः। अन्यच्च "काञ्चनाररसैर्वा समसूतकगन्धयोः। कज्जलीं हेमपत्राणि लेपयेत् समया तया"। समया हेमपत्रसमया "काञ्चनारत्वचः कल्कैर्मूषायुग्मं प्रकल्पयेत्। धृत्वा तत्सम्पुटे गोलं मृन्मूषासम्पुटे च तत्। निधाय सन्धिरोधञ्च कृत्वा संशोष्य गोलकम्। वह्निं खरतरं कुर्य्यादेवं दत्त्वा पुटत्रयम्। निरुत्थं जायते भस्म सर्वकर्मसु योजयेत्। काञ्चनारप्रकारेण लाङ्गली हन्ति काञ्चनम्"। लाङ्गली (कलिहारी) "ज्वालामुखी तथा हन्यात् तथा हन्ति मनःशिला। शिलासिन्दूरयोश्चूर्णं समयोरर्कदुग्धकैः। सप्तधा भावनात् दद्याल्लेपयेच्च पुनः पुनः। ततस्तु गलिते हेम्नि कल्कोऽयं दीयते समः। पुनर्धमेदतितरां यथा कल्को विलीयते। एवं वेलात्रयं दद्यात् कल्कं हेम मृतं भवेत्"। एवं मारितस्य सुवर्णस्य गुणाः "सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनम्। स्वादु तिक्तं च तुवरं पाके च स्वादु पिच्छिलम्। पवित्रं वृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम्। हृद्यमायुष्करं कान्तिवाग्विशुद्धिस्थिरत्वकृत्। विषद्वयक्षयोन्मादत्रिदोष-

अरोगभाजिन्। इदं दयाय कामकाय हितम्। “सुवर्णकुमारितं सर्पं बलं वीर्यञ्च मानवेत्। करोति रोगान्मृत्युञ्च तद्धन्यात् यत्नतस्ततः”

तद्भेदादिकं राजनि॰ उक्तं यथा

“दाहेऽतिरक्तमथ यच्च सितं छिदायां काश्मीरकान्ति च विभाति निकाषपट्टे। स्निग्धञ्च गौरवमुपैति च यत्तुलायां जानीत देवकनकं मृदु रक्तपीतम्। तत्रैकं रसवेधजं तदपरं जातं स्वयंभूमिजं किञ्चान्यद्बहुलोहसङ्करभवं चेति त्रिधा काञ्चनम्। तस्माद्यं किल पीतरक्तमपरं रक्तं ततोऽन्यत् यथा गौराभं तदिति क्रमेण गदितं स्यात् पूर्वपूर्वोत्तमम्”। तत्र रसवेधजस्य करणप्रकारः “आनीय पारदं देवि! स्थापयेत् प्रस्तरोपरि। तस्योपरि जपेन्मन्त्रं सर्वबन्धमयात्मकम्। साष्टसहस्रं देवेशि! प्रजपेत् साधकाग्रणीः। स्वयम्भूपुष्पसंयुक्ते वस्त्रे चाद्ध्यवनिभे। संस्थाप्य पारदं देवि! मृत्पात्रयुगले शिवे!। पुष्पयुक्तेन सूत्रेण बध्नीयात् बहुयत्नतः। मृत्तिकया रजेनैव धान्यस्य परमेश्वरि!। लेपयेद्बहुयत्नेन रौद्रे शुष्काणि कारयेत्। पुनश्च लेपयेद्धीमान् ततो वह्नौ विनिःक्षिपेत्। अष्टमीनवमीरात्रौ क्षिपेच्चैव सुरेश्वरि!। अथ वा परमेशानि! मृत्पात्रे स्थापयेद्रसम्। कस्तूरीरसेन तद्द्रव्यं शोधयेद् बहुयत्नतः। स्तनानारीरसेनैव तथैव शोधनं चरेत्। एवं कृते तु गुटिका यदि स्यात् दृढबन्धना। धुस्तूरस्य समानीय मध्ये शून्यस्य कारयेत्। कृष्णाष्टवसीयोगे तथा हतकुमारिका। एवं कृते वह्नियोगे भस्मनात् जायते ध्रुवम्। भस्मयोगे भवेत् स्वर्णं धनदायाः प्रसादतः। विवर्णं जायते द्रव्यं यदि पूजां न चाचरेत्” मातृकाभेदतन्त्रे ५प॰। मलशोधनबहुरभवस्य करणविधिः गारुडे १८८अ॰। “सुवर्णकरणं वक्ष्ये” इत्युपक्रमे “पीतं धुस्तूरपुष्पञ्च सीसकस्य पयोऽन्वितम्। पाठाधात्र्यम्बुशाखा च मूत्रमावर्त्तनाच्च तत्”। सुवर्णं चाग्नौ दह्यमानं न क्षीयते यथोक्तं याज्ञ॰ “अग्नौ सुवर्णमक्षीणम्”। कर्षमितब्राह्मणस्वामिकसुवर्णहरणं महापातकम्। महापातकनिरूपणे प्रायश्चित्तवि॰॰।

सुवर्णक न॰ सुवर्णमिव कायति कै-क। १पित्तले हेमच॰। सुष्ठु वर्णोऽस्य कप्। २सुन्दरवर्णयुक्ते त्रि॰।

सुवर्णकदली स्त्री सुष्ठु वर्णो यस्याः कर्म॰। स्वर्णवर्णकदल्याम्। (चांपाकला) राजनि॰।

सुवर्णकार पु॰ सुवर्णं सुवर्णमयभूषणादि करोति कृ-अण्। (सेकरा) स्वर्णकारे जातिभेदे ब्रह्मवै॰।

सुवर्णगणित न॰ सुवर्णस्य वर्णादिज्ञानार्थे गणितभेदे तत्प्रकारो लीला॰ उक्तो यथा

“अथ सुवर्णगणिते करणसूत्रं वृत्तम्। सुवर्णवर्णाहतियोगराशौ स्वर्णैक्यभक्ते कनकैक्यवर्णः। वर्णो भवेच्छोधितहेमभक्ते वर्णोद्धृते शोधितहेमसंख्या। उदाहरणानि। विश्वार्करुद्रदशवर्णसुवर्णमाषाः दिग्वेदलोचनयुगप्रमिताः क्रमेण। आवर्त्तितेषु वद तेषु सुवर्णवर्णस्तूर्णं सुवर्णगणितज्ञ! वणिग्! भवेत् कः। ते शोधने यदि च विंशतिरत्र माषाः स्युः षोडशं द्विगुणवर्णमितिस्तदा का। तच्छोधितं भवति षोडशवर्णहेम ते विंशतिः कति भवन्ति तदा तु माषाः।

न्यासः १३ १२ ११ १०
१० ४ २ ४

जाता आवर्त्तिते सुवर्णमितिः १२। एत एव यदि शोधिताः सन्तः षोडशमाषाः भवन्ति तदा वर्णः १५। यदि तदेव शोधितं षोडशवर्णं स्वर्णं भवति तदा पञ्चदशमाषाः भवन्ति। अथ वर्णज्ञानाय करणसूत्रं वृत्तम्। स्वर्णैक्यनिघ्नाद्युतिजातवर्णात् सुवर्णतद्वर्णवधैक्यहीनात्। अज्ञातवर्णाग्निजसंख्ययाप्तमज्ञातवर्णस्य भवेत्प्रमाणम्। उदाहरणम्। दशेशवर्णा वसुनेत्रमाषा अज्ञातवर्णस्य षडेतदैक्ये। जातं शरे द्वादशकं सुवर्णमज्ञातवर्णस्य वद प्रमाणम्।

न्यासः १० ११ -
८ २ ६

अज्ञातवर्णमानम् १५। सुवर्णज्ञानाय करणसूत्रं वृत्तम्। स्वर्णैक्यनिघ्नो युतिजातवर्णः स्वर्णं स्ववर्णैक्यवियोजितश्च। अज्ञेयवर्णोऽग्निजयोगवर्णविश्लेषभक्ता विदिताग्निजं स्यात्। उदाहरणम् “दशेन्द्रवर्णा गुणचन्द्रमाषाः किञ्चिन्मिता षोडशकस्य तेषाम्। जातं युतौ द्वादशकं सुवर्णं कतीह ते षोडशवर्णमाषाः”।

न्यासः १० १४ १६
३ १ -

लब्धं माषमानम् १। सुवर्णज्ञानायान्यत्करणसूत्रं वृत्तम्। साध्येनोनोऽनल्पवर्णो विधेयः साध्यो वर्णः स्वल्पवर्णोनितश्च। इष्टक्षुण्णे शेषके स्वर्णमाने स्यातां स्वल्पानल्पवर्णयोर्वा। उदाहरणम् “हाटकगुटिके

षोडशदशवर्णं तद्युतो यत्र ! जातम् । द्वादशवर्णं
सुवर्णं ब्रूहि तयोः स्वर्णमाने मे ।

न्यासः १६ १०
०

लब्धो वर्णः १२ कल्पितमिष्टम् । ।

अन्ये सुवर्णमाने १६ १०
२ ४

अथवा द्विकेनेष्टेन १६ १०
४ ८

अष्टनेष्टेन वा १६ १०
१ २

सुवर्णगैरिक सुवर्णमिव पीतं गैरिकम् । (स्वर्णगैरिक) गैरिकभेदे राजनि० । "गैरिकं मधुरं पीतं कषायं व्रण-रोपणम् । विस्फोटार्शोऽग्निदाहघ्नं वरं स्वर्णादिकं शुभम्" राजनि० तद्गुणा उक्ताः ।

सुवर्णजीविक पुं स्त्री० सुवर्णं तत्क्रयविक्रयौ जीविका यस्य । सुवर्णवणिजि जातिभेदे स्त्रियां ङीप् । तदुत्पत्ति-र्यथा "गान्धिकः शाङ्खिकश्चैव कांस्यको मणिकारकः । सुवर्णजीविकश्चैव पञ्चैते वणिजः स्मृताः" । "वैश्यात् रजपुत्र्यां जायते मान्धिको वणिक् । गन्धचन्दन-धूपादिक्रयविक्रयकारकः । मान्धिक्यां रजपुत्र्यां संजातः शाङ्खिको वणिक् । यस्तु दृष्ट्वा मुनेः पत्नी शङ्खजीवी प्रकीर्त्तितः । शाङ्खिक्यां गान्धिकाज्जात-स्तात्कांस्योपजीविकः । शाङ्खिकात् कांस्यकन्यायां मणि-कारः प्रजायते । कांस्यकारात्तु माणिक्यां सुवर्णजीविको-ऽभवत्" पराशरजातिमाला । तस्य पतितत्वकारणं ब्रह्मवै० ब्रह्मख० १०अ० उक्तं यथा "कश्चित् वणिग्विशेषश्च संसर्गात् स्वर्णकारिणः । स्वर्णचौर्यादिदोषेण पतितो ब्रह्मशापतः" । [सुत्याम् राजनि० ।

सुवर्णनकुली स्त्री सुवर्णमिव पीता नकुली । महाज्योति-

सुवर्णपुष्प पु० सुवर्णमिव पुष्पमस्य । राजतरणीवृक्षे राजनि०

सुवर्णप्रसर न० सुवर्णस्य प्रसर इव यत्र । एलवालुके वैद्यक० ।

सुवर्णवणिज् पु० सुवर्णस्य वणिक् क्रयविक्रयादिकर्त्ता । जातिभेदे (सोनारवेणे) । स्वर्णवणिक्प्रभृतयोऽप्यत्र । सुवर्णजीविकशब्दे दृश्यम् ।

सुवर्णबिन्दु पु० सुवर्णस्य बिन्दुर्यत्र । विष्णौ हेमच० ।

सुवर्णयूथी स्त्री सुवर्णमिव पीता यूथी । पीतवर्णयूथिकायाम् राजनि० । "यूथिका गणिकाम्बष्ठा सा पीता हेम-पुष्पिका । यूथीयुगं हिमं तिक्तं कटुपाकं वरं लघु-मधुरं तुवरं हृद्यं पित्तघ्नं कफशातनम् । व्रणास्रमुख-दन्ताक्षिशिरोरोगविषापहम्" भावप्र० ।

सुवर्णवर्णा स्त्री सुवर्णस्येव वर्णो यस्याः । १हरिद्रायाम् शब्दच० । २स्वर्णतुल्यवर्णयुक्ते त्रि० । ३विष्णौ पु० विष्णुस० । "तथाप्यध्यात् सर्वमेव सुवर्णमिति श्रुते-स्तथात्वम् । इत० । स्त्रि मूल्यभेदकल्पके ४वर्णे पु० सुवर्णगणितशब्दे दृश्यम् ।

सुवर्णा स्त्री सुष्ठु वर्णो यस्याः । १काकागुरौ च मेदि० । २बाह्यायके शब्दमा० । ३स्वर्णक्षीर्यां ४हरिद्रायाम् राजनि० । ५वाकुचग्याँ स्त्री राजनि० गौ० ङीप् ।

सुवयस् स्त्री सुष्ठु वयोऽस्याः । प्रौढायां स्त्रियाम् राजनि० ।

सुवल्लि(ल्ली) स्त्री प्रा०स० । सोमराजीलतायाम् अमरः ।

सुवसन्त पु० प्रा०स० । चैत्रावल्यां त्रिका० ।

सुवसन्तक पु० सुवसन्तेन कायति कै-क । माधवीलतायां २मदनोत्सवे च मेदि० ।

सुवहा स्त्री सुखेन वह्यते वायुनासौ सु+वह-खल् । १शेफा-लिकायां २रास्नायां ३गोधापद्याम् ४स्वादुपत्र्याम् अमरः ५शल्लक्यां ६वीणायां मेदि० । ७निशताक्षम् शब्दच० । ८हंसपद्यां ९हंसपद्यां १०गन्धनाकुल्यां ११सुवल्यां १२नीलसिन्धुवारे च राजनि० । १३सुखवाह्ये त्रि० मेदि० सम्यग् वहति सु+वह-अच् ।१४सम्यग्वाहके त्रि० हेमच०

सुवास पु० सुष्ठु वासः । १सद्गन्धे २सुखनिवासे च न० हेम० । ३सद्गन्धयुक्ते ४शोभनवासान्विते च त्रि० ।

सुवासिनी स्त्री सुखेन पित्राद्यवियोगेन वसति सु+वस-णिनि ङीप् । चिरण्ट्यां चिरं पितृकुलवासिन्यां स्त्रियाम् अमरः

सुविद् पु० सुष्ठु वेत्ति सु+विद-क्विप् । १पण्डिते । सुष्ठु वि-द्यते लभ्यते सु+विद-लाभे क्विप् । २गुणाढ्यायां स्त्रियां स्त्री रामाश्रमः ।

सुविद पु० सु+विद-क । १कञ्चुकिनि रायमु० २राज्ञि भरतः ।

सुविदत् पु० सुविदं गुणाढ्यां स्त्रियमतति अत-क्विप् । नृपे रायमु० ।

सुविदत्र त्रि० सु+विद कत्रच् । कुटुम्बे उणादि० ।

सुविदल्ल पु० सुविदतं राजानं लाति ला-क । १अन्तःपुरे ततधिकारे कञ्चुकिनि अमरः । सुविदता राज्ञा दीयते ला-क । २अन्तःपुरस्त्रियाम् स्त्री रायमुकुटः ।

सुविनीता स्त्री सु+वि+नी-क्त । १सुशीलायां गवि शब्दच० । २सुविनययुक्ते त्रि० ।

सुवीज पु० सुष्ठु बीजमन्तःस्थो बीजम्-अ । (खस्खस) वृक्षभेदे राजनि० ६ब० । २सुन्दरवीजयुते त्रि० । प्रा० स० । ३सुन्दरे बीजे न० ।

सुवीरक न० सु+वीर-ण्वुल् । सौवीराञ्जने शब्दच० ।

सुवीराम्ल न० सुवीरयति सुवीर्य्यावन्तं करोति सु+वीर-अच् तादृशोऽम्लोऽस्य । काञ्जिके जटा० ।

सुवीर्य्य न० सुष्ठु वीर्य्यं यस्मात् ५ब० । १बदरीफले २वनकार्पास्यां स्त्री शब्दर० । प्रा०स० । ३उत्तमे वीर्य्ये न० ।

सुवृत्त पु० सुष्ठु वृत्तः वर्त्तुलः । १शूरणे (ओल) राजनि० २सुन्दरवृत्तान्विते त्रि० ३शतपत्त्र्यां ४काकल्यां ५द्राक्षायाञ्च स्त्री राजनि० ६सुवर्त्तुले त्रि० ।

सुवेगा स्त्री सुष्ठु वेगो वायुनिःसारणवेगो यस्याः ५ब० । १महाज्योतिष्मत्याम् राजनि० । २उत्तमवेगान्विते त्रि० ।

सुवेल पु० सुगता वेला समुद्रकूलं येन प्रा० ब० । १त्रिकूटपर्वते हेमच० सुष्ठु वेला मर्य्यादा स्थितिः यस्य । २शान्ते ३प्रणते च त्रि० मेदि० ।

सुवेश पु० सुखेन विश्यते उपभुज्यते सु+विश-कर्मणि घञ् । १श्वेतेक्षौ राजनि० प्रा०ब० । २सुन्दरवेशयुक्ते त्रि० ।

सुव्रता स्त्री सुष्ठु व्रतं नियमो यस्याः । १सुखदोह्यायां गवि अमरः । २सुन्दरव्रतयुक्ते त्रि० । ३जिनभेदे पु० हेमच० ।

सुशर्म्मन् पु० शॄ-मनिन् सुष्ठु शर्म सुखं यस्य । १नृपभेदे दशमेऽन्वयपुत्रे भा०आ०१८अ० । २सुन्दरसुखयुते त्रि० । ३तृतीयमनुपुत्रभेदे पु० हरिवं०७अ० । ४कुत्सितब्राह्मणभेदे "सुशर्मा नाम दुर्मेधाः सोमा पापस्तथाऽभवत् । अनाम्नायविदां वंशे विप्राणां क्रूरकर्मणाम्" पाद्मो०ख०८०अ० ।

सुशल्य पु० सुष्ठु दृढं शल्यं यस्मात् ५ब० । खदिरे राजनि० ।

सुशवी स्त्री सु+शव-अच् गौरा० ङीष् । १कारवेल्ले २कृष्णजीरके च भरतः ।

सुशाक न० सुष्ठु शाको यस्मात् ५ब० । १आर्द्रके राजनि० । पाके तत्संयोगे हि शाकस्य सुस्वादुता । सुष्ठु शाको यस्य । २चञ्चुशाके ३तण्डुलीये (नटेशाक) ४भिण्डायां पु० राजनि० ।

सुशिख पु० सुन्दरी शिखा यस्य । १वह्नौ जटा० २चित्रकवृक्षे च । ३शोभनशिखायुक्ते त्रि० ४मयूरशिखायां स्त्री राजनि० । [५तद्वति त्रि० । ६सुषण्णके पु० राजनि० ।

सुशीत न० प्रा०स० । १पीतचन्दने शब्दच० २अतिशीतलस्पर्शे

सुशीतल न० प्रा०स० । १गन्धतृणे रत्नमा० । २अतिशीतगुणयुक्ते त्रि० । [वल्यां स्त्रियां च ।

सुशीता स्त्री प्रा०स० । १शतपत्त्र्याम् राजनि० । २शीतगुण

सुशीम पु० सु+श्यै मक् सम्प्रसारणञ्च १शीतस्पर्शे २तद्वति त्रि० अमरः ।

सुशील पु० सुन्दरं-शीलमस्य । विष्णुपार्षदभेदे राजनि० । २शोभनचरितान्विते त्रि० ३कृष्णाश्वत्थमहिषीभेदे स्त्री पाद्मपु० उत्तरख० ६८अ० । [श्रीयुक्ते त्रि० ।

सुश्रीक स्त्री सुन्दरी श्रीरस्य कप् । १शल्लकीवृक्षे २सुन्दर-

सुश्रुत पु० सुष्ठु श्रुतं सु+श्रु-कर्मणि क्त । १विश्वामित्रस्य पुत्रे चिकित्साशास्त्रकर्त्तरि मुनिभेदे आयुर्वेदशब्दे ७८० पृ० दृश्यम् । २तत्कृतग्रन्थे च । ३सुन्दरश्रुते त्रि० । "देवाकर्ण्यं सुश्रुतेन चरकस्योक्तेन जानेऽखिलम्" नैष० । [च ।

सुश्लिष्ट त्रि० सु+श्लिष-क्त । १सुसंयुक्ते २दृढ़मिलिते । ३सुसङ्गते

सुषम पु० सुन्दरः समः प्रा०स० सुषामा० षत्वम् । । १शोभने समे २परमायां शोभायां स्त्री अमरः ।

सुषवी स्त्री सु+सु-अच् गौरा० ङीष् । १कारवेल्ले अमरः । २क्षुद्रकारवेल्ले राजनि० ३जीरके ४कृष्णजीरके च मेदि० ।

सुषामन् त्रि० सुष्ठु साम यस्य सुषामादि० षत्वम् । सुसान्त्वने स्त्रियां वा डाप् ङीप् च ।

सुषि स्त्री शुष-इन् पृषो० शस्य सः । शुषौ छिद्रे भरतः ।

सुषिर न० शुष-किरच् पृषो० शस्य सः । छिद्रे भरतः ।

सुषीम पु० सुशीम+पृषो० । १शीतलस्पर्शे २तद्वति अमरः । ३मनोज्ञे त्रि० मेदि० ।

सुषुप्त न० सु+स्वप-भावे क्त । "यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तमिति" श्रुत्युक्ते १ज्ञानशून्यावस्थाभेदे । कर्त्तरि क्त २तदवस्थान्विते त्रि०

सुषुप्ति स्त्री सु+स्वप-क्तिन् । पुरीतति नाड्यां मनसः संयोगरूपे १सर्वज्ञानशून्ये जीवावस्थाभेदे वेदान्तोक्ते २सर्वपदार्थशून्ये लये च ।

सुषुम्णा स्त्री सुष्ठु स्त्यव्यक्तं शब्दं म्नायति यत्र म्ना-क । तन्त्रोक्ते मेरुदण्डबाह्यस्थे इडापिङ्गलानाड्योर्मध्यस्थे स्थूले नाड़ीभेदे । "मेरोर्बाह्यप्रदेशे शशिमिहिरशिरे सव्यदक्षे निषण्णे मध्ये नाड़ी सुषुम्णा त्रितयगुणमयी चन्द्रसूर्य्याग्निरूपा" षट्चक्रभेदतन्त्रम् । तस्याः शुभाशुभफलभेदो यथा "क्षणं वामे क्षणं दक्षे यदा वहति मारुतः । सुषुम्णा सा च विज्ञेया सर्वकार्य्यहराऽशुभा । तस्या नाड्यां स्थितो वह्निर्ज्वलति कालवत्स्वयम् । विषमं तं विजानीयात् सर्वकार्य्यविनाशनम् । यदाऽनुक्रमपुटमुल्लङ्घ्य तस्यां नाड्यां द्वयं वहेत् । तदा तस्य विजानीयादशुभं समुपस्थितम्" इति स्वरशास्त्रम् ।

मेरुवाह्ये इड़ा नाड़ी पिङ्गलया समन्विता। सुषुम्णा मातृभागेण ब्रह्मद्वारावधि स्थिता" योगस्वरोदयः।

सुषेण पु० सुष्ठु सेनयति सेनां करोति अच् षत्वम्। १करमर्दके (करमचा) अमरः २वेतसे राजनि० ३चिकित्सके वानरभेदे। ४विष्णौ च मेदि० ५त्रिवृति स्त्री राजनि० ङीप्। स्वार्थे क अत इत्वम्। कृष्णत्रिवृति स्त्री अमरः।

सुषोमा स्त्री नदीभेदे भाग० ५।१९ अ०।

सुष्ठु अव्य० सु+स्था-कु। १प्रशंसायाम् २अतिशये अमरः। ३सत्ये च शब्दरत्ना०।

सुष्म न० सु-मक् सुक् च। रज्ज्वां क्षीरस्वामी।

सुसंस्कृत त्रि० सु+सम्+कृ-क्त सुट् च। १प्रयत्नेन घृतादिनानाद्रव्येण पक्वे व्यञ्जनादौ अमरः २उत्तमसंस्कारयुते त्रि०।

सुसत्या स्त्री जनकराजभार्यायाम् कालिकापु० ३७ अ०।

सुसम्पद् स्त्री प्रा०स०। १सौभाग्ये त्रिका० सुष्ठु सम्पद् यस्य। २सुसम्पदे त्रि०। [सारयुते त्रि०।

सुसार पु० सुष्ठु सारोऽस्य। १रक्तखदिरे राजनि०। २अति-

सुसारवत् न० सुष्ठु सारोऽस्त्यस्य मतुप् मस्य वः। स्फटिके त्रिका०। [कायाम् श० च०।

सुसिकता स्त्री प्रा०स०। शर्करायाम् राजनि०। २उत्तमवालु-

सुस्थ त्रि० सुखेन तिष्ठति सु+स्था-क। १आरोग्येण युक्ते २सुखिनि च।

सुस्ना पु० सु+स्नै-क्विप्। (खेँसारी) शमीधान्यभेदे राजनि० "सुस्ना दूर्वादृशो रूक्षः कषायो विशदो गुरुः" राजनि०।

सुस्नात त्रि०सुष्ठु स्नातः सु+स्नै-क्त। मङ्गलद्रव्येण कृतस्नाने।

सुस्मिता स्त्री सुष्ठु स्मितमस्य। नारीभेदे हेमच०

सुहित त्रि०सु+धा-क्त।१तृप्ते २विहिते च विश्वः। प्रा०स०। ३सुन्दरहिते न०।४व०। ४अग्निजिह्वाभेदे स्त्री जटा०।

सुहृद् पु० सुष्ठु हृदयं यस्य निपातने हृदादेशः। १मित्रे २ज्योतिषोक्ते लग्नाच्चतुर्थस्थाने च। [२सुचित्ते न०।

सुहृदय त्रि०सुष्ठु हृदयं यस्य।१प्रशस्तमनस्के अमरः। प्रा०स०।

सुहृद्बल न० सुहृदेव बलम्। मित्ररूपे सैन्ये।

सुहोत्र पु०। चन्द्रवंशीयवृहदिषुराजपुत्रे। "वृहदिषोश्च दायादः सुहोत्रो नाम धार्मिकः। सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह" हरिवं० २० अ०।

सू स्त्री सू-क्विप्। १सूतौ २प्रसवे ३क्षेपे ४प्रेरणे च।

सूक न० सू-प्रेरणे क्विप संज्ञायां कन्। १उत्पले २वाणे ३वाते च मेदि०।

सूकर पुंस्त्री० सू-इत्यव्यक्तं शब्दं करोति कृ-अच्। १वराहे २कुम्भकारे ३मृगभेदे च शब्दर० स्त्रियां ङीष्। ङीषन्तः ४वराहक्रान्तायां शब्दमा०।

सूक्त न० सु+वच-भावे क्त। १सुन्दरकथने २विशिष्टकार्यप्रतिपादके एकदैवत्ये वेदमन्त्रसमुदाये च यथा श्रीसूक्तं पुरुषसूक्तमित्यादि। तानि च वेदे बहूनि सन्ति तत्र महादानोपयोगीनि कति चित् सूक्तानि तुलादानादिपद्धतौ अस्माभिः उद्धृतानि तानि च तत्र दृश्यानि। "जप्यानि सूक्तानि तथैव चैषाम्" वह्निपुराणम्। ३शारिकायां स्त्री त्रिका०। क्तिन्। सूक्ति सुष्ठूक्तौ स्त्री।

सूक्ष्म न० सूच-मन् सुक् च नेट्। १कैतवे २अध्यात्मपदार्थे मेदि०। ३अर्थालङ्कारभेदे अलङ्कारशब्दे ४०७पृ० दृश्यम्। ४परमाणौ पु० शब्दर०। ५अणुपरिमाणयुते ६अल्पे च त्रि०। [जम्बूवृक्षे रत्नमा०।

सूक्ष्मकणाफला स्त्री सूक्ष्मं कणं फलं यस्याः। मध्यम-

सूक्ष्मतण्डुल पु० सूक्ष्मस्तण्डुलोऽस्य। (खसखस) इति ख्याते १हवे २पिप्पल्यां स्त्री राजनि०। [कुशाग्रीयबुद्धौ।

सूक्ष्मदर्शिन् त्रि० सूक्ष्मं पश्यति दृश-णिनि। अत्यन्तसूक्ष्मबुद्धौ

सूक्ष्मपत्र पु० सूक्ष्मं पत्त्रमस्य। १धान्यके २वनजीरके ३देवसर्षपे ४लघुवदरे ५सुरपर्णे ६लोहितेक्षौ च राजनि०। ७वनवर्वर्यां दवावलक्षणे शब्दर०। कप् अत इत्वम्। सूक्ष्मपत्रिका शतपुष्पायां शतावर्यां लघुब्राह्म्यां दुरालभायाम् आकाशमांस्याश्च स्त्री राजनि०।

सूक्ष्मपिप्पली स्त्री कर्म०। वनपिप्पल्याम् राजनि०।

सूक्ष्मपुष्पी स्त्री सूक्ष्माणि पुष्पाण्यस्याः ङीष्। यवतिक्तायाम् राजनि०। [२भूकर्बुदारे राजनि०।

सूक्ष्मफला स्त्री सूक्ष्मं फलमस्याः। १भूम्यामलक्याम् रत्नमा०

सूक्ष्मवदरी स्त्री कर्म०। भूमिवदर्याम् राजनि०।

सूक्ष्मभूत न० कर्म०। वेदान्तप्रसिद्धे अपञ्चीकृते भूम्यादीनां पञ्चानां भूतानां सूक्ष्मांशभेदे। [मशके राजनि०।

सूक्ष्ममक्षिक पु० सूक्ष्मा मक्षिका तदाकारोऽस्त्यस्य अच्।

सूक्ष्ममूला स्त्री सूक्ष्मं मूलमस्याः। जयन्त्याम् राजनि०।

सूक्ष्मवल्ली स्त्री कर्म०। १ताम्रवल्ल्यां २जतुकायाञ्च राजनि०।

सूक्ष्मवीज पु० सूक्ष्मं वीजमस्य। (खसखस) ख्याते हवे राजनि०।

सूक्ष्मशर्करा स्त्री कर्म०। वालुकायाम् राजनि०।

सूक्ष्मशाख पु० सूक्ष्मा शाखाऽस्य। जलवर्बुरे राजनि०।

सूक्ष्मशालि पु० कर्म०। अणुधान्ये श्यामाकादौ राजनि०।

सूक्ष्मषट्चरण पु० सूक्ष्मः षट्चरण इव । पक्ष्मयूके राजनि०

सूक्ष्मा स्त्री सूच–मन् सुक् च नेट् टाप् । १यूथिकायां शब्दच० । २क्षुद्रैलायां ३करुणयां ४वालुकायाञ्च राजनि० ।

सूक्ष्माङ्ग न० कर्म० । "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" वेदान्तोक्ते भोगसाधने लोकद्वयगामिनि लिङ्गदेहे । सूक्ष्मशरीरादयोऽप्यत्र । सांख्यमते तच्चान्यविधसप्तदशावयवत्वं यथोक्तं सां० का० तत्त्वकौ० । "सूक्ष्मास्तेषां नियता मातापितृजा निवर्त्तन्ते" का० "सूक्ष्मादेहाः परिकल्पिता" तत्त्वकौ० । "परिकल्पिता अनुमिता परलोके कर्मफलभोगः सूक्ष्मदेहं विनाऽनुपपन्नः भोगत्वात् स्थूलदेहारब्धकृष्यादिजनितस्य सस्यस्य स्वदेहेनैव भोगवत् स्वदेहारब्धकर्मादिफलं यत्तत् स्वदेहेनैव भोग्यम् नेतरेण अन्यथा कृतहानाकृताभ्यागमप्रसङ्ग इत्यादितर्कोऽत्रानुसन्धेयः । "पूर्वोत्पन्नमस(स)क्तं नियतं महदादिसूक्ष्मपर्य्यन्तम् । संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" का० । "प्रधानेनादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम् । अस(स)क्तमव्याहतं शिलामप्यनुविशति नियतम् आ आदिसर्गात् आ च महाप्रलयादवतिष्ठते महदादिसूक्ष्मपर्य्यन्तं महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्य्यन्तम् एषां समुदायः सूक्ष्मशरीरं शान्तघोरमूढैरिन्द्रियैरन्वितत्वाद्विशेषः" कौ० ।

सूक्ष्मैला स्त्री कर्म० । क्षुद्रैलायाम् (गुजराटी एलाच्) रत्नमा०

सूच पैशून्ये (अन्वेष्टे) अद० चु० उभ० सक० सेट् । सूचयति ते असूसुचत् त । बहुचकत्वान्न षोपदेशः ।

सूचक त्रि० सूचयति अन्तर्द्दशति सूच–ण्वुल् । १पिशुने अमरः अन्तर्दौष्टवति २बोधके च । ३काके ४कुक्कुरे ५बिडाले पुंस्त्री० मेदि० स्त्रियां ङीप् । ६पिशाचे ७सिद्धभेदे ८बुद्धे शब्दर० । ९नाटकप्रसिद्धे सूत्रधाराख्ये प्रधाननटे १०कथके हेमच० ११सूक्ष्मशालौ पु० राजनि० १२सीवनसाधनद्रव्ये पु० मेदि० ।

सूचन न० सूच-भावे ल्युट् । १हिंसने २ज्ञापने च । युच् । तत्र टाप् पीडायाम् अभिनये च स्त्री विश्वः ।

सूचि(ची) स्त्री सूच–इन् वा ङीप् । १सीवनसाधने अग्रमात्रख्याते लौहमयपदार्थे अमरः २शिखायां ३नृत्यभेदे रत्नको० । [जीविनि (दरजि) शब्दर० ।

सूचिक त्रि० सूचिः तया सीवनं शिल्पमस्यस्य ठन् । सूच्या-

सूचिका स्त्री सूचि+स्वार्थे क । १सूच्याम् । इरिचिरिव कायति कै–क । २हस्तिशुण्डायाम् । सूचिकाधरः ।

सूचिकाधर पुंस्त्री० सूचिकां शुण्डां धरति धृ–अच् । गजे शब्दर० स्त्रियां ङीष् ।

सूचिकाभरण न० वैद्यकोक्ते औषधभेदे तत्पाकादि यथा "विषं पलमितं सूतः शाणकश्चूर्णयेद् द्वयम् । तच्चूर्णं संपुटे कृत्वा काचलिप्तशरावयोः । मुद्रां कृत्वाथ संशोष्य ततश्चुल्ल्यां निवेशयेत् । वह्निं शनैः शनैः कुर्य्यात् प्रहरद्वयसङ्ख्यया । तत उद्घाट्य तन्मुद्रामुपरिस्थशरावकात् । संलग्नो यो भवेद्धूमस्तं गृह्णीयाच्छनैः शनैः । वायुस्पर्शो यथा न स्यात्ततः कूप्यां निवेशयेत् । यावत् सूच्या मुखे लग्नं कूप्या निर्याति भेषजम् । तावन्मात्रो रसो देयो मूर्च्छिते सन्निपातिनि । क्षुरेण प्रच्छिते मूर्ध्नि तत्राङ्गुल्या च घर्षयेत् । रक्तभेषजसम्पर्कात् मूर्च्छितोऽपि हि जीवति । तथैव सर्पदष्टोऽपि मृतावस्थोऽपि जीवति । यदा तापो भवेत्तस्य मधुरं तत्र दीयते" भैषज्यरत्ना० । "विषं पलं रसं शाणं तच्चूर्णं काचलेपिते । मृत्संपुटे च संरुध्य चुल्ल्यां संस्थाप्य पाचयेत् । शनैर्यामद्वयं पश्चात् तं समुद्घाट्य शीतलम् । ऊर्ध्वपात्रगतं धूमं गृह्णीयाऽ[illegible] । यावत् सूच्या मुखे लग्नं कूप्या याबाति भेषजम् । क्षुरेण प्रच्छिते शीर्षे तत्राङ्गुल्या च घर्षयेत् । त्रिदोषे मूर्च्छितो जीवो रक्तभेषजसङ्गमात् । सर्पदष्टो मृतावस्थः सोऽपि जीवति तत्क्षणात् । दद्याच्च मधुरं तोयं सूचिकाभरणे रसे" इति रसप्रदीपः ।

सूचिकामुख पु० सूचिकेव क्रमसूक्ष्मं मुखमस्य । १शङ्खे हारा० । २तत० । ३सूच्याग्रे न० ।

सूचि(ची)क्षेत्र न० सूच्याकारं क्षेत्रम् । लीलावतीप्रसिद्धे सूच्याकारके क्षेत्रभेदे क्षेत्रशब्दे २४०० पृ० दृश्यम् ।

सूचित त्रि० सूच–क्त । १कथिते २बोधिते ३हिंसिते च ।

सूचिपत्त्रक पु० सूचिरिव पत्त्रमस्य कप् । शितावरशाके राजनि० । सूचीदलादयोऽप्यत्र ।

सूचिपुष्प पु० सूच्याकारं पुष्पं पुष्पाग्रं यस्य । केतकवृक्षे जटा० । सूचीपुष्पादयोऽप्यत्र ।

सूचिरोमन् पु० सूचिरिव रोमाऽस्य । वराहे हारा० सूचीरोमन् तत्रार्थे त्रिका० । [वः । गरुडे शब्दर० ।

सूचिवत् पु० सूचिरिव तदाकारचञ्चुरस्त्यस्य मतुप् यवा० मस्य

सूचिवदन पुंस्त्री० सूचिरिव वदनं यस्य । १नकुले स्त्रियां जातित्वात् ङीष् । २मशके पु० राजनि० ।

सूचिशालि पु० कर्म० । सूक्ष्मधान्ये श्यामाकादौ राजनि० ।

सूचीकटाह पु० न्यायभेदे न्यायशब्दे ४१७० पृ० दृश्यम् ।

सूचीपत्त्रा स्त्री सूचीव पत्त्रमस्याः । गण्डदूर्वायाम् राजनि० ।

सूचीमुख सूचीव मुखमस्य । १सितकुशे राजनि० । २हीरके न० हेमच० । ६त० । ३सूच्यामुखे न० ।

सूच्यग्रस्थूलक पु० सूच्यग्रमिव स्थूलः स्वार्थे क । (उलुखड़) तृणभेदे रत्नमा० ।

सूच्यास्य पुंस्त्री० सूचीव आस्यमस्य । १मूषिके हेमच० स्त्रियां योपधत्वात् टाप् । ६त० । २सूच्या अग्रे न० ।

सूच्याह्व पु० सूच्या आह्वा आह्वा यस्य । सितावरके हेमच० ।

सूत पु० सू–प्रसवे प्रेरणे ऐश्वर्य्ये वा क्त । १सूर्य्ये अनेकार्थको० । २अकेहृत्ते ३क्षत्रियजाते ब्राह्मणीगर्भजे वर्णसङ्करभेदे ४त्वष्टरि ५सारथौ ७वन्दिनि मेदि० ७मागधे ८पारदे पुंन० अमरः । ६प्रसूते १०प्रेरिते च त्रि० । ११लोमहर्षणाख्ये पुराणवक्तरि च तदुत्पत्तिकथा

“सवान्ते सूतमनघं नैमिषीया महर्षयः । पुराणसंहितां पुण्यां पप्रच्छुर्लोमहर्षणम् । त्वया सूत ! महाबुद्धे भगवान् ब्रह्मवित्तमः । इतिहासं पुराणार्थं व्यासः सम्यगुपासितः । तस्य ते सर्वरोमाणि वचसा हृषितानि यत् । द्वैपायनस्य भगवांस्ततो वै रोमहर्षणः । भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः । मुनीनां संहितां वक्तुं व्यासः पौराणिकीं पुरा । त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति । संभूतः संहितां वक्तुं स्वांशेन पुरुषोत्तम !” कौर्मे १अ० । “ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति । पृषदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः । वक्ता वेदादिशास्त्राणां त्रिकालामलतत्त्ववित् । तीर्थयात्राप्रसङ्गेन नैमिषारण्यमागमत्” वह्निपु० १अ० ।

जातिभेदसूतोत्पत्तिकथा “हस्ते तु दक्षिणे चक्रं दृष्ट्वा तस्य पितामहः । विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ । तस्य वै जातमात्रस्य यज्ञे पैतामहे शुभे । सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामते ! । तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः । प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ । स्तूयतामेष नृपतिः पृथुर्वैन्यः प्रतापवान्” विष्णुपु० १अंशे १३अ० । “एतस्मिन्नेव काले तु यज्ञे पैतामहे शुभे । सूतः सूत्यां समुत्पन्नः सौत्येऽहनि पुराणवित् । तेषां यज्ञे पुनस्त्वेवमुत्पन्नौ सूतमागधौ । पृथोःस्तवार्थं तौ तत्र समाहूतौ महर्षिभिः । ते ऊचुर्ऋषयः सर्वे स्तूयतामेष पार्थिवः । तैर्नियुक्तोऽस्य कर्माणि पृथोर्यानि महात्मनः । एदुशांस्तानि सर्वाणि आशीर्वादांस्ततः परान् । तयोस्तवान्ते सुप्रीतः पृथुः प्रादात् जनेश्वरः” वह्निपु० । “क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः” । “सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम्” मनुः ।

सूततनय पु० सूतस्य तनयः । भारतप्रसिद्धे राधेये कर्णे हेमच० । सूतपुत्त्रादयोऽप्यत्र । तस्य सूतपालितत्वात्तथात्वम्

सूति स्त्री सू+क्तिन् । १प्रसवे “प्रजाः सूतिमाहृतैः” स्मृतिः सूयते कण्डूते सोमोऽत्र सू–आधारे क्तिन् । २सोमाभिषवभूमौ श्रीधरः ।

सूतिका स्त्री सू–क्त स्वार्थे क अत इत्त्वम् । नवप्रसूतायां स्त्रियाम् “उदक्यां सूतिकां विना” इति स्मृतिः ।

सूतिकागार न० सूतिकाया निवासयोग्यमगारम् । सूतिकागृहे अरिष्टे । सूतिकागृहादयोऽप्यत्र ।

तत्करणप्रवेशमुहूर्त्तादिकं पीयू० उक्तं यथा

“उक्तश्च श्रीपतिना पुनर्वसौ च सूतिकागृहस्य निर्मितिः शुभा । विरञ्चिविष्णुभान्तरे प्रवेशनं हितं भवेत्” इति । विरञ्चिरभिजिन्नक्षत्रम् अन्तरे मध्ये विरञ्चिविष्णुतारयोरित्येव सप्तम्या अधिकरणत्वे बोधिते अन्तरपदोक्तिः स्पष्टार्था । तदेतद्ब्राह्मणव्यतिरिक्तवर्णत्रयविषयम् । यदाह वसिष्ठः “पुनर्वसौ नृपादीनां कर्त्तव्यं सूतिकागृहम् । श्रवणाभिजितोर्मध्ये प्रवेशं तत्र कारयेत्” इति । आवश्यकत्वे तु श्रवणाभिजितोर्मुहूर्त्तं तदुदयो ग्राह्यः वा इत्यर्थः । ब्राह्मणस्य तु प्रागुक्तनक्षत्रेष्वेव सूतिकागृहनिर्माणप्रवेशौ तत्र सूतिकागृहं नैरृत्यां कार्य्यम् । यदाह वृद्धवसिष्ठः “ऐन्द्र्यां तु विक्रमस्थानमाग्नेय्यां पचनालयः । वारुण्यां भोजनगृहं नैरृत्यां सूतिकागृहम् । याम्यायां शयनस्थानं वायव्यां पशुमन्दिरम् । कौवेर्य्यां तु धनस्थानम् ऐशान्यां देवतालयः” इति । स्मृतिभास्करे गर्गः “वारेऽनुकूले राशौ तु दिने दोषविवर्जिते । सानुकूलदिशि प्रोक्तं सूतिकाभवनं बुधैः” इति । कालानियम उक्तो रत्नकोषे “आसन्नप्रसवे मासि कुर्य्याच्चैव विशेषतः । तद्वत् प्रसवकाले स्यादिति शास्त्रेषु निश्चयः” इति । वराहेणात्रानेकनक्षत्राणामभिधानं कृतं यथा “हस्तादित्यशशाङ्कतिष्यपवनप्राज्येशभित्रोत्तराचित्राश्विश्रवणेषु वृश्चिकघटौ हित्वा विरिक्ते तिथौ । शुक्राचार्य्यगभैरवस्य शशिनां वारेऽनुकूले विधौ सद्द्रवैर्भसनि सूतिकागृहविधिः क्षेमङ्करः कीर्त्यते” इति । वेश्मनि चतुर्थस्थाने

सद्भिः शुभग्रहैः। सूतिकागृहप्रवेशे कालविशेषमाह ज्योतिर्विदः "अथातः सम्प्रवक्ष्यामि सूतिकागारवेशनम्। मासे तु नवमे प्राप्ते पूर्वपक्षे शुभे दिने। प्रसूतिसम्भवे काले सद्य एव प्रवेशयेत्" इति। पूर्वपक्षे शुक्लपक्षे नक्षत्रादीन्याह गर्गः "रोहिण्यैन्द्रवपौष्णेषु स्वातीशाक्रयोरपि। पुष्ये पुनर्वसौ हस्तधनिष्ठा सुत्तराहु च" इति। "मैत्रत्वाष्ट्रे तथाश्विन्यां सूतिकागारवेशनम्। सर्वे शुभग्रहाः केन्द्रे पापाश्च त्रिषडायगाः। शुभांशे शुभसंदृष्टौ सूतिकागारवेशनमिति"।

तदाकारमाह भावप्र० "अष्टहस्तायतं चाष्ट चतुर्हस्तविशालकम्। प्राचीद्वारमुदग्द्वारं विदध्यात् सूतिकागृहम्"।

सूतिकारोग पु० कृत०। भावप्र० उक्ते रोगभेदे तन्निदानादि यथा "मिथ्योपचारात् संक्लेशात् विषमाजीर्णभोजनात्। सूतिकायास्तु ये रोगा जायन्ते दारुणाश्च ते"। मिथ्योपचारात् अनुचिताचरणात् प्रवातादिसेवनात्। संक्लेशात् संक्लिश्यन्ते दोषा अनेन इति संक्लेशः दोषजनककर्म तस्मात्। दारुणाः कष्टसाध्याः। के ते व्याधय इत्याकाङ्क्षायामाह "अङ्गमर्दो ज्वरः कासः पिपासा गुरुगात्रता। शोथः शूलातिसारौ च सूतिकारोगलक्षणम्। एतेऽङ्गमर्दादयः प्रायेण सूतिकाया भवन्तः सूतिकारोगत्वेन लक्ष्यन्ते। ज्वरादीनां रोगविशेषाणां निदानविशेषमाह "ज्वरातीसारशोथाश्च शूलानाहबलक्षयाः। तन्द्रारुचिप्रसेकाद्या वातश्लेष्मसमुद्भवाः। कृच्छ्रसाध्या हि ते रोगाः क्षीणमांसबलाश्रिताः। ते सर्वे सूतिकानाम्ना रोगास्ते चाप्युपद्रवाः" सूतिकाभवत्वेन सूतिकानाम्ना ते रोगाः आश्रयाश्रितयोरभेदोपचारात् ते चाप्युपद्रवा इति त एव ज्वरादयः उक्तानां रोगाणामन्यतमं प्रधानीकृत्योपद्रवाश्च"।

सूतिकाषष्ठी स्त्री सूतिकागृहे पूज्या षष्ठी शाक०। सूतिकागारे प्रसवावधि षष्ठे दिवसे पूज्यायां षष्ठीदेव्याम्। यथाह विष्णुधर्मोत्तरे "सूतिकावासनिलया जन्मदा नाम देवताः। तासां यागनिमित्तार्थं शुद्धिर्जन्मनि कीर्त्तिता। षष्ठेऽह्नि रात्रियागन्तु जन्मदानाञ्च कारयेत्। रक्षणीया सदा षष्ठी निशा तत्र विशेषतः। राम! जागरणं कार्य्यं जन्मदानां तथा बलिः"। रामेति सम्बोधनम्। तत्राशौचान्तरदोषोऽपि नास्ति। "अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्त्तुस्तात्कालिकी शुद्धिः पूर्वाशौचे विशुध्यति" इति प्रजापतिवचनात्। पुत्रजन्मेति श्रवणात् पितुरेवाशौचाभावः न तु मातुः कर्त्तुरिति पुंलिङ्गनिर्देशाच्च। कारयेदिति अन्यगोत्रजाभिप्रायेण। तत्रादौ विनायकादिसहितषोडशमातृकापूजनम्। तथा च कृत्यचिन्तामणौ "जागजागरणं कार्य्यं खड्गो धार्य्यः समीपतः। आशाश्च पूजयेद्देवीं गणेशं मातृका गिरिम्"। देवीं षष्ठीम्। गिरिं मन्थानदण्डम्। भोजराजः "गणेशश्चैव नन्दा च पूतना मुखमण्डिका। बिडालिका शकुनिका शुष्कनन्दा च जम्भिका। आचार्य्यका रेवती च पिलिपिच्छा ततः परम्। स्कन्दा च द्वादशैतेऽर्च्याः रक्षार्थं मातृका ग्रहाः" ज्यो०त०। [अमरः।

सूत्थान त्रि० सुष्ठु उत्थानम् उद्योगो यस्य। चतुरे कर्मकुशले

सूत्पर न० सु+उत्+पृ—अप्। सुरासन्धाने शब्दच०।

सूत्या स्त्री सू-क्यप् नि०। १यज्ञाङ्गस्नानभेदे २अभिषवे सोमरसनिष्पीडने च अमरः।

सूत्याशौच न० सूतिनिमित्तकमाशौचम्। जननाशौचे "शावाशौचं न कर्त्तव्यं सूत्याशौचं विधीयते" स्मृतिः।

सूत्र ग्रन्थने वेष्टने च अद०चु०उभ०सक०सेट्। सूत्रयति ते असुसूत्रत् त। बहूच्कत्वात् न षोपदेशः।

सूत्र न० सूत्र-अच्। १वस्त्रसाधने तन्तौ २व्यवस्थायां ३नाटकोपकरणे प्रस्तावे "स्वल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः" इत्युक्ते शास्त्रवाक्यभेदे च।

सूत्रकण्ठ पु० सूत्रं यज्ञसूत्रं तदिव वा कण्ठे यस्य। १विप्रे २कपोते ३खञ्जरीटे च मेदि०। [तत्रार्थे त्रिका०।

सूत्रकोण पु० सूत्रबद्धः कोणोऽस्य। डमरौ हारा० कप्।

सूत्रगण्डिका स्त्री सूत्रं गण्डयति गडि—ण्वुल्। तन्तुवायोपकरणभेदे एषण्यां शब्दमा०।

सूत्रतन्तु पु० सूत्रमेव तन्तुः। सूत्राकारे तन्तौ हेमच०।

सूत्रतर्कुटी स्त्री सूत्रसहिता तर्कुटी। (टेको) पदार्थे जटा०

सूत्रधार पु० सूत्रं नाट्यसाधनं धारयति धृ—णिच्—अण्। नाट्याङ्गसाधनयुक्ते नाटकप्रस्तावके १प्रधाननटे। "नाट्योपकरणादीनि सूत्रमित्यभिधीयते। सूत्रं धारयतीत्यर्थे सूत्रधारो मतो बुधैः" इति तल्लक्षणं "पूर्वरङ्गं विधायैव सूत्रधारो निवर्त्तते" सा० द०। "सूत्रधारेण सहिताः संलापं यत्र कुर्वते" दशरूपकम्। २इन्द्रे ३शिल्पिभेदे (छुतार) च। शिल्पभेदस्तु सूत्रधारश्च शूद्रागर्भे विश्वकर्मणा जातो जातिभेदः ब्रह्मवै०ब्रह्मख०१०अ०।

सूत्रपुष्प पु० सूत्रगर्भं पुष्पं यस्य। कार्पासे त्रिका०।

सूत्रभिद् पु० सूत्रं भिनत्ति सूच्या, भिद–क्विप्। सूच्याजीवे (दरजी) शब्दर०। [शब्दच०।

सूत्रमध्यभू पु० सूत्रमध्यमिव भवति भू–क्विप्। यक्षधूपे

सूत्रयन्त्र न०सूत्रवापनं यन्त्रम् शाक०। (ताँत) सूत्रवापनयन्त्रे शब्दमा०। [हारा०।

सूत्रला स्त्री सूत्रं लाति–ला–क। तर्कुटग्राम् (टेको)

सूत्रवीणा स्त्री सूत्रबद्धा वीणा शाक०। वीणाभेदे हारा०।

सूत्रवेष्टन न० सूत्रं वेष्ट्यतेऽनेन वेष्ट–करणे ल्युट्। तन्तुवायोपकरणभेदे तसरे (तासनी) अमरः।

सूत्रात्मन् पु० सूत्रमिव सर्वानुस्यूत आत्मा स्वरूपं यस्य। समष्ट्युपहितचैतन्ये हिरण्यगर्भे वेदा०सा०। [पत्तिः।

सूत्रामन् पु० इन्द्रे अमरे पाठान्तरम्। सुत्रामन् शब्दे व्युत्

सूत्राली स्त्री ६त०। १सूत्रश्रेणौ २गलमेखलायां हारा०।

सूत्रिन् त्रि० सूत्र+अस्त्यर्थे इनि। १सूत्रविशिष्टे स्त्रियां ङीप्। २काके पु० त्रिका०।

सूद पु० सूदयति पशून् पाकार्थं सूद–अच्। १सूपकारके २व्यञ्जनभेदे सूपे अमरः। ३सारथ्ये ४अपराधे ५लोध्रे ६पापे च अजयः। [च।

सूदन न०सूद–भावे ल्युट्। १हिंसने २निःक्षेपे ३अङ्गीकारे

सूदशाला स्त्री सूदाधिष्ठिता शाला शाक०। पाकशालायाम् पाचकशब्दे ४२४६ पृ० विवरणम्।

सूदाध्यक्ष पु० ६त०। पाकशालाध्यक्षे तल्लक्षणं यथा 'अनाहार्य्यः शुचिर्दक्षश्चिकित्सितविदांवरः। सूदशास्त्रविधिज्ञः सूदाध्यक्षः प्रशस्यते' पाचकशब्दे तल्लक्षणादि ४२८६ पृ० दृश्यम्।

सून न० सू–क्त तस्य नः। १पुष्पे २प्रसवे च। कर्त्तरि–क्त। ३विकसिते त्रि० मेदि० ४जाते च।

सूना स्त्री सू–क्त तस्य नः। १प्राणिवध स्थाने "पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च" मनुः २तनयायां ३गलशुण्डिकायां मेदि० ४मांसविक्रये च संक्षिप्तसा०। [५कन्यायां स्त्री वा ङङ् हेमच०।

सूनु पु० सू–नुक्। १पुत्रे २अनुजे ३सूर्य्ये मेदि० ४अर्कवृक्षे च।

सूनृत न० सुष्ठु नृत्यति अनेन नृ–नृत–घञर्थे क। १सत्ये प्रिये वाक्ये अमरः। २मङ्गले च ३तद्वति त्रि० अमरः।

सूप पु० सुखेन पीयते सु+पा–घञर्थे क पृषो०। (दालि) व्यञ्जनभेदे लताशब्दे २१८१ पृ० दृश्यम्। सुवपति सु+वप–मूलवि० क। २सूपकारे पाचके मेदि०। आधारे च। ३भाण्डे। सूद–करणे क पृषो०। ४शायके शब्दर०।

सूपकार त्रि०सूपं करोति कृ–अण्। पाचके अमरः। पाचकशब्दे ४२८६ पृ० दृश्यम्।

सूपधूपन न० सूपो धूप्यतेऽनेन धूप–करणे ल्युट्। १हिङ्गौ त्रिका० सूपपाके हि हिङ्गुधूपदानं पाकशास्त्रे प्रसिद्धम्

सूपपर्णी स्त्री सूपसाधनस्य मुद्गस्येव पर्णमस्याः ङीप्। मुद्गपर्ण्याम् रत्नमा०।

सूपश्रेष्ठ पु० सूपेषु तत्साधनेषु श्रेष्ठः। मुद्गे राजनि०।

सूपाङ्ग न० सूपस्य तत्सं स्कारकमङ्गमुपकरणम्। हिङ्गौ राजनि०।

सूम न० सू–मक् १आकाशे २क्षीरे मेदि०। ३जले शब्दर०।

सूर पु० सुवति प्रेरयति कर्मणि लोकानुदयेन सू–क्रन्। १सूर्य्ये २अर्कवृक्षे च अमरः। सूर–क। ३पण्डिते ४जिनभेदे पु० हेमच०। "सूर्य्योदयं विना नैव स्नानदानादिका क्रिया" इत्युक्तेस्तदुदयेन लोकानां सर्वकर्मप्रवर्त्तकत्वात्तथात्वम्।

सूरण पु० सूर–ल्युट्। शूरणे (ओल) शब्दरत्ना०। "मकरे मूलकञ्चैव सिंहे चालावुकं तथा। कार्त्तिके (सू)शूरणञ्चैव सद्यो गोमांसभक्षणम्" कर्मलो०।

सूरत त्रि० सु+रम–क्त पृषो०। दयालौ अमरः।

सूरसूत पु० ६त०। अरुणे गरुडाग्रजे सूर्य्यसारथौ अमरः। अनूरुशब्दे १९१ पृ० दृश्यम्।

सूरि पु० सू–क्रिन्। १सूर्य्ये २अर्कवृक्षे ३यादवभेदे ४पण्डिते च अमरः "सदा पश्यन्ति सूरयः" इति श्रुतिः। ४राजसर्षपे स्त्री ङीप् रत्नमा०।

सूरिन् पु० सूर–णिनि। पण्डिते शब्दर०।

सू(षू)र्क्ष (र्क्ष्य) अनादरे भ्वा०पर०सक०सेट्। सूर्क्ष(र्क्ष्य)ति असूर्क्षी(र्क्ष्यी)त् षोपदेश एव न्याय्यः।

सूर्क्ष पु० सूर्क्ष–कर्मणि घञ्। माषे (कलाइ) शब्दर०।

सूर्क्ष(र्क्ष्य)ण न० सूर्क्ष(र्क्ष्य) भावे ल्युट्। अनादरे।

सूर्प पुंन०। शूर्प–पृषो० शस्य सः। १शूर्पशब्दार्थे शब्दर०। २कुम्भपरिमाणे ३द्रोणपरिमाणे च वैद्यकम्।

सूर्पणखा स्त्री शूर्प इव नखा अस्याः पृषो० शस्य सः णत्वम्। रावणभगिन्याम्।

सूर्म्मि स्त्री शूर्मि+पृषो० शस्य सः। शूर्मिशब्दार्थे वा ङीप्।

सूर्य्य पु० सृ–क्यप् नि०। १दिवाकरे २अर्कवृक्षे चअमरः। ३दानवभेदे वह्निपु० ४अर्कपर्णवृक्षे मेदि०।

सूर्य्यग्रहकक्षादिकं खगोलशब्दे २४२५ पृ० दृश्यम्। तस्य प्रकृतिस्वरूपादिकं पर्य्यायश्च० उक्तं यथा

"भानुर्युगान्ताङ्कितदेहयष्टिः श्यामान्वितः पिङ्गलनेत्रकान्तिः। पित्तात्मकोऽयं समगात्रयष्टिः प्रतापयुक् सत्त्वगुणोऽल्परोमा। पञ्चारयुक् सत्तु चितार्थशाक्यः कल्पप्रजो देविकबुद्धियुक्तः"। स च प्राच्या दिशः स्वामी। पुंग्रहः क्षत्रियजातीयः क्षत्रियारः देवमत्तेयश्च। बृहज्जातके तट्टीकायाञ्च सूक्तं दृश्यम्। ग्रहयज्ञशब्दे तन्मन्त्रभेदादिकं दृश्यम्। जन्मकाले लग्नादिस्थस्य तस्य फलं जातकपद्धतावुक्तं यथा

"लग्ने१ सूर्य्ये स्वल्पकेशः प्रचण्डो मानी क्रोधी नेत्रवक् निष्ठुरश्च। शूरोऽत्यन्ताक्षमः कर्कशाङ्गो नीचे निःस्वा भूपजोऽप्यर्थहीनः। धने२ दिनेशे बहुवित्तभृत्यचतुष्पदाढ्योऽपि नरो भवेत् सः। त्रिनष्टशोभाम्बरधो नराणां चौरेकृताशी सुखरोगदुःखी। सहजस्थे सहज३ बलाढ्यो धीविक्रमैर्लोकमनोभिरामः। विनष्टबल्यादरजो नरः स्यात् दुष्टारिपक्षस्य विनाशकश्च। मित्रे मित्रे४बन्धुभवाहनैः स्याद्दीनः सोख्यमानसोत्येव दीनः। तातार्थ्यादेर्नाशकारी नरो वै सेवाकारी भूपतेः कृत्सितस्य। सूनौ५ भानौ सूनुसौख्यसहीना दुर्गारण्यप्राधरेष्वपरक्तः। मेधायुक्तो मन्त्रमाप्तमत्स्वल्पायुर्वै जायते मानवोऽयम्। कृतदगुरुनयतो शत्रुभावं६ प्रपन्ने भवति नरपतिर्वा दण्डनेता धनाढ्यः। प्रबलजठरवह्निर्भूरिकामो गुणी वै बलारिपुसहितः स्यात् पूरुषः कोऽपि रेवम्। भार्य्याभावे७ भास्करे चाभिभूतो भार्य्याभिर्वै हीनकान्तीरगाढ्यः। भूपादुवश्चे पीड़ितोऽमार्गगामी सुखोहीनो मानवः शीलहीनः। निधनगे८ नलिनीदयिते नरा नयनयोर्विकलत्वयुतो भवेत्। तनुधनात्मजजीवितसौख्यभागभिमतेन जनेन वियोजितः। धर्मस्थिते९ धर्मकरे धनेन घनेन युक्तो बहुमित्रपुत्रः। सुरेन्द्रदेवार्चनभक्तिः पितृप्रियो वैरकरः समृद्धः। गगन१०गे गगनस्य मणौ नरो मतिधनात्मजवैभवशौर्य्ययुक्। रतिबलस्तुतकार्य्यसमृद्धिभाग् भवति वाहनवार्न्नरपद्गुणः। प्राप्ति११स्थाने सप्तमप्तौ नरः स्यात् प्राप्त्या वित्तस्याप्य वृद्ध्या समेतः। मन्त्री द्वेष्यः सत्कुलः विरूपो क्रूरो कान्तानिर्जितो वाद्यभृत्यः। व्यये१२ सूर्य्ये नरः काणः पितृद्वेषी वन्ध्योऽविनरः। वन्ध्यापतिर्विहीनाङ्गः कुत्स्व पतितो भवेत्"। मेषादिस्थस्य तस्य फलं जातकशब्दे ३०८८ पृ० दृश्यम्।

सूर्य्यकान्त पु० सूर्य्यस्य कान्तः प्रियः। १स्फटिकमणौ शब्दा०

२सूर्य्यसम्पर्कात् यस्माग्निसम्भवस्तादृशि (आतशी) मणौ च हेमच०।

सूर्य्यकान्ति पु० सूर्य्ये च कान्तिर्यस्य। अतस्यां पुष्पभवानडस्य विशेषे शब्दच०। ६त०। २सूर्य्यस्य दीप्तौ स्त्री।

सूर्य्यकाल पु०। सूर्य्योपलक्षितः कालः शाक०। दिवसे शब्दच०।

सूर्य्यग्रहण न० सूर्य्यस्य राहुणा तदाक्रान्तभूच्छायया चन्द्रेणाक्रमणम्। ज्योतिषोक्ते राहुप्रविष्टभूमिच्छायया सूर्य्यमण्डलस्य आक्रमणरूपे प्रासे सूर्य्यपराद्योऽप्यत्र। उपरागशब्दे १२८५ पृ० दृश्यम्।

सूर्य्यज पु० सूर्य्यात् जायते जन–ड। १शनिग्रहे २यमे ३वैवस्वते मनौ ४सुग्रीववानरे च जटा०। सूर्य्यपुत्रादयोऽप्यत्र। ५यमुनायां स्त्री हेमच०। ६कर्णे पु०।

सूर्य्यपत्र पु० सूर्य्ये इव रक्तं पत्रमस्य। आदित्यपत्रे राजनि०।

सूर्य्यभक्त पु० सूर्य्यस्य भक्त इव प्रियः। १बन्धूकवृक्षे। ६त०। २सूर्य्यभक्तियुते त्रि० मेदि०। [२पुष्पभेदे शब्दच०।

सूर्य्यमणि पु० सूर्य्यप्रियः मणिः। १सूर्य्यकान्तमणौ हेमच०।

सूर्य्यलता स्त्री सूर्य्यभक्ता लता। आदित्यभक्तायाम् राजनि०

सूर्य्यवल्ली स्त्री सूर्य्यतुल्यपुष्पिका वल्ली। अर्कपुष्पिकावृक्षे रत्ना०

सूर्य्यसारथि पु० ६त०। अरुणे गरुड़ाग्रजे शब्दच०। सूर्य्यसूतादयोऽप्यत्र।

सूर्य्या स्त्री सूर्य्यस्य भार्य्या टाप्। १अमानुष्यां संज्ञानाम्न्यां सूर्य्यभार्य्यायाम्। मानुष्यां कुन्त्यान्तु ङीपि। सूरीत्येव।

सूर्य्यालोक पु० ६त०। आतपे रौद्रे राजनि०।

सूर्य्यावर्त्त पु० सूर्य्य इवावर्त्तते आ+वृत–अच्। (हुड़हुड़िया) २क्षुपभेदे (सुवर्च्चिया) ३शाके च रत्नमा०। ३आदित्यभक्तायां स्त्री राजनि०।

सूर्य्याश्मन् पु० सूर्य्यप्रियः अश्मा। सूर्य्यकान्तमणौ हेमच०।

सूर्य्याह्व पु० सूर्य्यमाह्वयते स्पर्द्धते वर्णेन आ+ह्वे–क। १ताम्रे त्रिका०। सूर्य्यस्य आह्वाऽऽह्वायस्य। २अर्कवृक्षे पु० राजनि०। [वस्थायाम् अमरः २तदर्शसंज्ञने च।

सूर्य्येन्दुसङ्गम पु० सूर्य्यस्य इन्दोश्च सङ्गमः कालः। १अमा-

सूर्य्योढ पु० सूर्य्ये ऊढोऽस्तगतो यत्र। १सूर्य्यास्तमयकाले हेमच०। "दिवातिथौ तु विमुखे गते यत् पातकं भवेत्। तदेवाष्टगुणं विद्यात् सूर्य्योढे विमुखे गते" आ० त०। सूर्य्येण सूर्य्यास्तकालेन ऊढः प्रापितः वह–क्त। २तत्कालागतातिथौ "सूर्य्योढस्तु स संप्राप्तो यः सूर्य्येऽस्तं गतेऽतिथिः" हेमच०। [दाचार्य्ये बोपदेवः।

सू गतौ प्रेरणे च तु० उभ० सक० सेट्। सुवति ते पसू

सृ गतौ भ्वादि० पर० सक० अनिट् सरति । असरत् असार्षीत् पर्युदासात् वोपदेवः । “नावानं करिणां सस्रे” च रघुप्रयोगात् आत्म० । [सात् वोपदेवः ।

सृ गतौ जु० वैदिकः पर० सक० सेट् । ससर्त्ति असरत् पर्युदा-

सृक पु० सृ-कक् । १केरवे २वाणे उणा० । ३पद्मे ४वायौ च सि० कौ० ।

सृकण्डु पु० सृ-क्विप् पृषो० कर्म० कण्डुरोगे शब्दर० ।

सृकाल पु० सृ-कालन् कस्य नेत्वम् । शृगाले शब्दच० ।

सृक(न्) न० सृज-कन् कनिन् वा कस्य नेत्वम् । ओष्ठप्रान्तभागे “सृक्वणी परिलेढ़ि च” स्मृतिः । “महासृक्वाय शोभितो नृसिंहवदिति” भाग० कान्ततास्य ।

सृक्वन् न० सृज-क्वनिप् । ओष्ठप्रान्तभागे अमरः । पृषो० । सृक्किन् अप्यत्र अर्थः । सृक्किणी तदर्थे स्त्री राजनि०

सृग पु० सृ-गक् गस्य नेत्वम् । भिन्दिपालास्त्रे अमरः ।

सृगाल पुंस्त्री० सृ-गालन् गस्य नेत्वम् । १जम्बुके (शेयाल) शब्दर० । स्त्रियां ङीप् । २दैत्यभेदे हरिवं० ।

सृज विसर्गे त्यागे दिवा० आत्म० अनिट् सक० । सृज्यते असृष्ट । पर्युदासात् वोपदेवः ।

सृज विसर्गे तु० पर० सक० अनिट् सृजति असाक्षीत् ससर्जिथ ससष्ठ स्रष्टा स्रक्ष्यति । पर्युदासात् वोपदेवः ।

सृजकाचार पु० सृजति वर्णविशेषं सृज-क ततः स्वार्थे क सृजका वर्जिका कर्म० । सर्जिकाक्षारे रत्नमा० ।

सृणि पु० सृ-निक् । १शत्रौ शब्दमा० । २अङ्कुशास्त्रे स्त्री अमरः । तत्र वा ङीप् । सृणीत्यपि ।

सृणि(णी)का स्त्री सृणि+कन् ईकन् वा । लालायाम् अमरः

सृति स्त्री सृ-भावे क्तिन् । १गमने । करणे क्तिन् । २पथि च मेदि० । [संक्षिप्त०।

सृत्वन् पु० सृ-क्वनिप् । १प्रजापतौ उज्ज्वल० । २विसर्पे शब्दर०

सृत्वर त्रि० सृ-क्वरप् । १गमनकर्त्तरि स्त्रियां ङीप् । सा च २मातरि संक्षिप्तसा० ।

सृदर पु० सृ-अरक् दुक् च । सर्पे सि० कौ० ।

सृदाकु पु० सृ-काकु दुक् च । १वायौ २वज्रे ३अग्नौ ४प्रतिसूर्य्यके मेदि० । ५मृगे संक्षिप्त० । नद्यां स्त्री उणा० ।

सृप गतौ भ्वा० पर० सक० अनिट् । सर्पति असृपत् । पर्युदासात् वोपदेवः ।

सृपाट पुंस्त्री० सृप-काटन् । १परिमाणभेदे २रत्नधारायां गोवर्द्धनः । स्त्रियां ङीप् । स्वार्थे क अत इत्वम् । सृपाटिका । चञ्चौ हेमच० ।

सृप्र पु० सृप-रन् । चन्द्रे उणा० । [२गमनशीले त्रि० ।

सृमर पुंस्त्री० सृ-क्मरच् । मृगभेदे अमरः । स्त्रियां ङीष् ।

सृष्ट त्रि० सृज-क्त । १निर्मिते २युक्ते ३निश्चिते ४बहुले मेदि० । ५भूषिते अजयः । ६त्यक्ते च ।

सृष्टि स्त्री सृज-क्तिन् । १निर्माणे २स्वभावे च मेदि० । कर्मणि क्तिन् । ३उत्पद्यमाने “या सृष्टिः स्रष्टुराद्येति” शकुन्तला० ४निर्गुणे शब्दर० ।

ब्रह्माण्डसृष्टिप्रकारः नानापुराणेषूक्तः तत्र मत्स्यपु० उक्तः प्रकारो यथा

“महाप्रलयकालान्त एतदासीत्तमोमयम् । प्रसुप्तमिव चातर्क्यमप्रज्ञातमलक्षणम् । अविज्ञेयमविज्ञातं जगत् स्थास्नु चरिष्णु च । ततः स्वयम्भूरव्यक्तः प्रभवः पुण्यकर्मणाम् । व्यञ्जयन्नेतदखिलं प्रादुरासीत्तमोनुदः । योऽतीन्द्रियः परो व्यक्तादणुर्ज्यायान् सनातनः । नारायण इति ख्यातः स एकः स्वयमुद्बभौ । यः शरीरादभिध्याय सिसृक्षुर्विविधं जगत् । अप एव ससर्जादौ तासु वीजमवासृजत् । तदेवाण्डं समभवद्धेमरूप्यमयं महत् । संवत्सरसहस्रेण सूर्य्यायुतसमप्रभम् । प्रविश्यान्तर्महातेजाः स्वयमेवात्मसम्भवः । प्रभावादपि तद्व्याप्त्या विष्णुत्वमगमत् पुनः । तदन्तर्भगवानेष सूर्य्यः समभवत् पुरा । आदित्यश्चादिभूतत्वात् ब्रह्मा ब्रह्म पठन्नभूत् । दिवं भूमिं समकरोत्तदण्डशकलद्वयम् । स चाकरोद्दिशः सर्वा मध्ये व्योम च शाश्वतम् । जरायुर्मेरुमुख्याश्च शैलास्तस्याभवंस्तदा । यदुल्वं तदभून्मेघस्तडित्सङ्घातमण्डलम् । नद्योऽण्डनाम्नः सम्भूताः पितरो मनवस्तथा । सप्त येऽमी समुद्राश्च तेऽपि चान्तर्जलोद्भवाः । लवणेक्षुसुराद्याश्च नानारत्नसमन्विताः । स सिसृक्षुरभूद्देवः प्रजापतिररिन्दम! । तत्तेजसश्च तत्रैव मार्त्तण्डः समजायत । मृतेऽण्डे जायते यस्मान्मार्त्तण्डस्तेन स स्मृतः । रजोगुणमयं यत्तद्रूपं तस्य महात्मनः । चतुर्मुखः स भगवानभूल्लोकपितामहः । येन सृष्टं जगत् सर्वं सदेवासुरमानुषम् । तमवेहि रजोरूपं महत्सत्त्वमुदाहृतम्”। मनुश्चाच “चतुर्मुखत्वमगमत् कथं लोकपितामहः । कथं तु लोकानसृजत् ब्रह्मा ब्रह्मविदांवरः” । मत्स्य उवाच “तपश्चचार प्रथममराणां पितामहः । आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः । पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् । नित्यं शब्दमयं पुण्यं शतकोटिप्रवि-

स्तरम्। अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः। मीमांसा न्यायविद्याश्च प्रमाणाष्टकसंयुताः। वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसाः। मनसा पूर्वसृष्टा वै जाता यत्तेन मानसाः। मरीचिरभवत् पूर्वं ततोऽत्रिर्भगवान् ऋषिः। अङ्गिराश्चाभवत्पश्चात् पुलस्त्यस्तदनन्तरम्। ततः पुलहनामा वै ततः क्रतुरजायत। प्रचेताश्च ततः पुत्रो वशिष्ठश्चाभवत् पुनः। पुत्रो भृगुरभूत्तद्वन्नारदोऽप्यचिरादभूत्। दशेमान् मानसान् ब्रह्मा मुनीन् पुत्रानजीजनत्। शारीरानथ वक्ष्यामि मातृहीनान् प्रजापतेः। अङ्गुष्ठाद्दक्षिणाद्दक्षः प्रजापतिरजायत। धर्मः स्तनान्तादभवत् हृदयात् कुसुमायुधः। भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भवः। बुद्धेर्मोहः समभवदहङ्कारादभून्मदः। प्रमोदश्चाभवत् कण्ठान्मृत्युर्लोचनतो नृप!। भरतः करमध्यात्तु ब्रह्मसूनुरभूत्तता। एते नव सुता राजन्! कन्या च दशमी पुनः। अङ्गजा इति विख्याता दशमी ब्रह्मणः सुता। मनुरुवाच "बुद्धेर्मोहः समभवदिति यत्परिकीर्त्तितम्। अहङ्कारः स्मृतः क्रोधो बुद्धिर्नाम किमुच्यते"। मत्स्य उवाच "सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम्। साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता। केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः। एतदेव प्रजासृष्टिं करोति विकरोति च। गुणेभ्यः क्षोभमाणेभ्यस्त्रयो देवा विजज्ञिरे। एका मूर्त्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः। सविकारात् प्रधानात्तु महत्तत्त्वं प्रजायते। महानिति यतः ख्यातिर्लोकानां जायते सदा। अहङ्कारश्च महतो जायते मानवर्द्धनः। इन्द्रियाणि ततः पञ्च वक्ष्ये बुद्धिवशानि तु। प्रादुर्भवन्ति चान्यानि तथा कर्मवशानि तु। श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका च यथाक्रमम्। पायूपस्थं हस्तपादं वाक् चेतीन्द्रियसङ्ग्रहः। शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः। उत्सर्गानन्दनादानगत्यालापाश्च तत्क्रियाः। मन एकादशं तेषां कर्मबुद्धिगुणान्वितम्। इन्द्रियावयवाः सूक्ष्मास्तस्य मूर्त्तिं मनीषिणः। श्रयन्ति यस्मात्तन्मात्राः शरीरं तेन संस्मृतम्। शरीरयोगाज्जीवोऽपि शरीरी गद्यते बुधैः। मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया। आकाशं शब्दतन्मात्रादभूच्छब्दगुणात्मकम्। आकाशविकृतेर्वायुः शब्दस्पर्शगुणोऽभवत्। वायोश्च स्पर्शतन्मात्रात्तेजश्चाविरभूत्ततः। त्रिगुणं तद्विकारेण तच्छब्दस्पर्शरूपवत्। तेजोविकाराद्भवद्वारि राजंश्चतुर्गुणम्। रसतन्मात्रसम्भूतं प्रायो रसगुणात्मकम्। भूमिस्तु गन्धतन्मात्रादभूत् पञ्चगुणान्विता। प्रायो गन्धगुणा सा तु बुद्धिरेषा गरीयसी। एभिः सम्पादितं भुङ्क्ते पुरुषः पञ्चविंशकः। ईश्वरेच्छावशः सोऽपि जीवात्मा कथ्यते बुधैः। एवं षड्विंशकं प्रोक्तं शरीरमिह मानवे। सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते। एतत्तत्त्वात्मकं कृत्वा जगद्वेधा अजीजनत्। सावित्रीं लोकसृष्ट्यर्थं हृदि कृत्वा समास्थितः। ततः संजपतस्तस्य भित्त्वा देहमकल्मषम्। स्त्रीरूपमर्द्धमकरोदर्द्धं पुरुषरूपवत्। शतरूपा च सा ख्याता सावित्री च निगद्यते। सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप!। ततः स्वदेहसम्भूतामात्मजामित्यकल्पयत्। दृष्ट्वा तां व्यथितस्तावत्कामबाणार्दितो विभुः। अहो रूपमहो रूपमिति चाह प्रजापतिः। ततो वशिष्ठप्रमुखाः भगिनीमिति चुक्रुशुः। ब्रह्मा न किञ्चिद्ददृशे तन्मुखालोकनादृते। अहो रूपमहो रूपमिति प्राह पुनः पुनः। ततः प्रणामनम्रां तां पुनरेवाभ्यलोकयत्। अथ प्रदक्षिणं चक्रे सा पितुर्वरवर्णिनी। पुत्रेभ्यो लज्जितस्यास्य तद्रूपालोकनेच्छया। आविर्भूतं ततो वक्त्रं दक्षिणं पाण्डुगण्डवत्। विस्मयस्फुरदोष्ठञ्च पाश्चात्यमुदगात्ततः। चतुर्थमभवत्पश्चाद्वामं कामशरातुरम्। ततोऽन्यदभवत्तस्य कामातुरतया तथा। उत्पतन्त्यास्तदाकाशे आलोकनकुतूहलात्। सृष्ट्यर्थं यत् कृतं तेन तपः परमदारुणम्। तत्सर्वं नाशमगमत् स्वसुतोपगमेच्छया। तेनोर्द्ध्वं वक्त्रमभवत्पञ्चमं तस्य धीमतः। आविर्भवज्जटाभिश्च तद्वक्त्रञ्चावृणोत् प्रभुः। ततस्तानब्रवीत् ब्रह्मा पुत्रानात्मसमुद्भवान्। प्रजाः सृजध्वमभितः सदेवासुरमानुषीः। एवमुक्तास्ततः सर्वे ससृजुर्विविधाः प्रजाः। गतेषु तेषु सृष्ट्यर्थं प्रणामावनतामिमाम्। उपयेमे स विश्वात्मा शतरूपामनिन्दिताम्। सम्बभूव तया सार्द्धमतिकामातुरो विभुः। सलज्जां चकमे देवः कमलोदरमन्दिरे। यावदब्दशतं दिव्यं यथान्यः प्राकृतो जनः। ततः कालेन महता तस्याः पुत्रोऽभवन्मनुः। स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम्। स तु तद्रूपसामान्यादधिपूरुष उच्यते। वैराजा यत्र ते जाता बहवः शंसितव्रताः। स्वायम्भुवा महाभागाः सप्त सप्त तथा परे। स्वारोचिषाद्याः सर्वे ते ब्रह्मतुल्यस्वरूपिणः। औत्तमिप्रमुखा-

स्तद्दृढेनात्र बध्नतोऽधुना" । सर्गशब्दे ५२५० पृ० तत्यानयविधानं दृश्यम् । [गर्भदात्रीक्षुपे राजनि० ।

सृष्टिप्रदा स्त्री सृष्टिं तद्धेतुं गर्भं प्रददाति प्र+दा-क ।

सृ(षृ) हिंसायां क्र्या० पा० प० सक० सेट् । सृणाति असारीत् सीर्णः सीर्णिः । बोपदेश एव न्याय्यः ।

सेक गतौ भ्वा० आ० सक० सेट् । सेकते असेकिष्ट षपुं- दाचास बोपदेशः । ऋदित् चङि न ह्रस्वः ।

सेक पु० सिच-घञ् । सेचने जलादिना आर्द्रीकरणे हेमच० ।

सेकपात्र न० सिच्यतेऽनेन सिच-करणे घञ् कर्म० । (सेचनी) सेचनपात्रभेदे अमरः ।

सेकिम न० सेकेन निर्वृत्तम् सेक-वा डिम । मूलके हेमच० ।

सेक्तृ पु० सिञ्चति रेतः सिच-तृच् । १पत्यौ हेमच० । २सेचके त्रि० स्त्रियां ङीप् ।

सेक्त्र न० सिच-करणे ष्ट्रन् । सेकपात्रे शि० को० ।

सेचक पु० सिञ्चति तोयेन पृथिवीम् सिच-ण्वुल् । १मेघे २सेककर्त्तरि त्रि० मेदि० ।

सेचन न० सिच-भावे ल्युट् । १जलादिना आर्द्रीकरणे २क्षरणे । करणे ल्युट् । ३सेचन्यां क्षुद्रसेकपात्र्यां स्त्री ङीप् मेदि० ।

सेटु पु० सिट-उन् । (तरमुज) इति ख्याते त्रिका० ।

सेतु पु० सि-तुन् । १क्षेत्रादेर्जलधारणार्थे (आल) (जाङ्गाल) पदार्थे अमरः । २वरणवृक्षे मेदि० । मन्त्रजपाङ्गे ३प्रणवात्मके मन्त्रे च स्वार्थे क । सेतुक वरणवृक्षे शब्दर० । "सेतुप्रदानादिन्द्रस्य लोकमाप्नोति मानवः" मठादि० त० । सेतुभेदश्च । सीमाविवादशब्दे ५२०० पृ० उक्तः । "सेतुश्च द्विविधः प्रोक्तः खेयो बन्ध्यस्तथाऽपरः । तोयप्रवर्त्तनात् खेयो बन्ध्यस्तु तन्निवर्त्तनात्" नारदः । मन्त्रजपाङ्गसेतुश्च कालिकापु० ५५अ० उक्तो यथा "मन्त्राणां प्रणवः सेतुस्तत्सेतुः प्रणवः स्मृतः । स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्य्यति । नमस्कारो महामन्त्रो देव इत्युच्यते हरेः । द्विजातीनामयं मन्त्रः शूद्राणां सर्वकर्मणि । अकारश्चाप्युकारश्च मकारश्च प्रजापतिः । वेदत्रयात् समुद्धृत्य प्रणवं निर्ममे पुरा । स उदात्तो द्विजातीनां राज्ञां स्यादनुदात्तकः । स्वरितश्चोरुजातानां समथापि तथा चरेत् । चतुर्दशस्वरो योऽसौ सेतुरौकारसंज्ञकः । स चानुस्वारचन्द्राभ्यां शूद्राणां सेतुरुच्यते । निःसेतुकं यथा तोयं क्षणान्निम्नं प्रसर्पति । मन्त्रस्तथैव निःसेतुः क्षणात् क्षरति यज्वनाम् । तस्मात् सर्वेषु मन्त्रेषु चतुर्वर्णा द्विजादयः । प्रार्थयोः सेतुमाधाय जपकर्म समारभेत् । शूद्राणामादिसेतुर्वा द्विसेतुर्वा यथेच्छतः । द्विसेतवः समाख्याता सर्वदैव द्विजातयः" ।

सेतुबन्ध पु० ६त० । लङ्कागमनार्थं श्रीरामेण नलकपिद्वारा कारिते समुद्रोपरि १आलीबन्धे २क्षेत्रादेरालीबन्धे च । "ततोऽब्रवीद्रघुश्रेष्ठं सागरो विनयान्वितः । नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्मणः । सुतो धीमान् समर्थोऽस्मिन् कार्य्ये लब्धवरो हरिः । कीर्त्तिं गायन्तु ते लोकाः सर्वलोकमलापहाम् । इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम् । ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः । नलमाज्ञापयच्छीघ्रं वानरैः सेतुबन्धनात् । ततोऽतिहृष्टः प्लवगेन्द्रयूथपैर्महानगेन्द्रप्रतिमैर्युतो नलः । बबन्ध सेतुं शतयोजनायतं सुविस्तरं पर्वतपादपैर्दृढम्" अध्यात्मरा० २ अ० । "सेतुमारभमाणस्तु तत्र रामेश्वरं शिवम् । सङ्कल्पनियतो गत्वा पुरीं वाराणसीं नरः । आनीय गङ्गासलिलं रामेशमभिषिच्य च । क्षिप्त्वा समुद्रे तद्भारं ब्रह्म प्राप्नोत्यसंशयः । कृतानि प्रथमेनाह्ना योजनानि चतुर्दश । द्वितीयेन तथा चाह्ना योजनानाञ्च विंशतिः । तृतीयेन तथा चाह्ना योजनान्येकविंशतिः । चतुर्थेन तथा चाह्ना द्वाविंशतिः तथा कृतम् । पञ्चमेन त्रयोविंशद् योजनानां समन्ततः । बबन्ध सागरे सेतुं नलो वानरसत्तमः । तेनैव जग्मुः कपयो योजनानां शतं द्रुतम् । असंख्याताः सुवेलाद्रिं रुरुधुः प्लवगोत्तमाः" ब्रह्म० ।

सेतुभेदिन् पु० सेतुं भिनत्ति भिद-णिनि । दन्तीवृक्षे शब्दर० ।

सेतुवृक्ष पु० सेतुनामको वृक्षः । वरणवृक्षे शब्दर० । २सेतूपरिस्थे वृक्षे च ।

सेत्र न० सि-बन्धने ष्ट्रन् । (बेड़ि) निगडे शि० को० ।

सेना स्त्री सि-न, सह इनेन प्रभुणा वा । १सैन्ये अमरः । २जिनानां मातृभेदे हेमच० । [२सेनाया उपकरणे च ।

सेनाङ्ग न० ६त० । १हस्त्यश्वरथपदातिसंघाते अमरः ।

सेनाचर पु० सेनायां चरति चर-ट । सेनानुगामिनि "सेनाचरीभवदिभाननेति" नैष० । [केये २सेनापतौ च अमरः

सेनानी पु० सेनां देवसेनां वा नयति नी-क्विप् । १कार्त्ति-

सेनापति पु० ६त० । १कार्त्तिकेये २सैन्याध्यक्षे च मेदि० । "कुलीनः शीलसम्पन्नो धनुर्वेदविशारदः । हस्तिशिक्षाश्वशिक्षासु कुशलः श्लक्ष्णभाषिता । निमित्ते शकुने ज्ञाता वेत्ता चैव चिकित्सिते । कृतज्ञः कर्मणां शूरस्तथा

क्रोशश्च प्रभुः। व्यूहतत्त्वविधानज्ञः फल्गुसार-विशेषवित्। राज्ञा सेनापतिः कार्यो ब्राह्मणः क्षत्रियोऽथ वा" मत्स्यपु० १८९ अ०।

सेनामुख न० ६त०। १सैन्यांशे संख्याविशेषयुते ह्रस्यश्वादौ हस्तिनः त्रयः रथाः त्रयः अश्वा नव पत्तादयः पञ्चदश एतत्समुदाये अमरः। [भित्ते सैन्ये अमरः।

सेनारक्ष पु० सेनां रक्षति रक्ष–अण्। सेनारक्षाकारके या०

सेफ पु० षि–फ। शेफे पुंसोऽसाधारणचिह्ने जटा०।

सेमन्ती स्त्री सिम-भि गौ० ङीष्। (सेवाँती) पुष्पभेदे।

सेर पु० "पादोनगद्यानकतुल्यटङ्कैर्द्विसप्त७२तुल्यैः कथितोऽत्र सेरः। मणाभिधानं खयुगैः४०श्च सेरैर्धान्यादितौल्येषु तुरुष्कसंज्ञः। १। १छन्दस्त्वे ६२। यस्त्रैर्धटकैश्च सेरस्तैः पञ्चभिः स्यादटिका च ताभिः। मणोऽष्टभिस्त्वाव्यवगौरवाहतताल वंशा निजराजधान्याम्" लीला० उक्ते मानभेदे।

सेराह पुंस्त्री०। श्वेताश्वे हेमच०। स्त्रियां ङीष्।

सेरु त्रि० सि–दन्धने रु। बन्धनकर्त्तरि ग्धा०।

सेलु पु० षि–लु। श्लेष्मातकवृक्षे द्विरूपको०।

सेव न० षेव–कर्मणि घञर्थे क। सेविफले (सेओ) राजनि०

सेवक पु० सीव्यति षिव–ण्वुल्। १सीवनकर्त्तरि (दरजी) षेव–ण्वुल्। २भक्ते ३दासे ४अनुचरे च त्रि० मेदि०।

सेवकालु पु० सेवं सेविफलमिव कायति कै–क कर्म०। निशाभङ्गालये (दुग्धपेया) शब्दच०। [निधौ भरतः।

सेवधि पु० सेवं सेवनं दधाति धा–कि। अहुप्रभृतौ

सेवन न० षिव–षेव–वा ल्युट्। १सूच्यादिना वस्त्रादेर्योजने अमरः। २आश्रयणे ३उपभोगे ४बन्धने ५पूजने ६भजने च मेदि०। सीव्यतेऽनया ल्युट्। ७सूच्यां स्त्री ङीप् हेमच०।

सेवा स्त्री षेव–अ। १भजने २आराधने ३उपभोगे ४आश्रयणे च। सेवापराधाश्च अपराधशब्दे २२२ पृ० दर्शिताः वाराहेऽन्यथोक्ता यथा "कर्मणा मनसा वाचा ये पापकर्मो जनाः। भक्षणं दन्तकाष्ठस्य राजान्नस्य तु भोजनम्। मैथुनं शवसंस्पर्शः पुरीषोत्सर्ग एव च। मूत्रपुरीषस्पर्शनं मोहनं तथा। अभाष्यभाषणं कोपं पिण्याकस्य च भक्षणम्। रक्तनीलवसनश्च विष्णोराराधनम्। पुरीषाद्युपनिर्मुक्तः पतितान्नस्य भक्षणम्। अश्रद्धभक्षणश्चैव नग्नत्वमेव विभीतकम्। श्राद्धान्नं तु परान्नं साधपादस्य वर्षाः। जपन्तं देवतागारे सोपानत्कोपसर्पणम्। तथैव देवपूजायां निषिद्धकुसुमार्चनम्। अनुक्तार्थं च निर्माल्य पूजा श्मोश्मान्धकारयोः। यानं सुराया देवस्य अन्धकारे प्रबोधनम्। आतकर्मार्चने विष्णोरनमस्करणं तथा। अपराधास्त्वयद्भिर्गत श्लोकाख्याता मया धरे। एभिर्दुत्तस्तु पुरुषो विष्णुं नैव प्रपद्यति। दूरस्थो न नमस्कारं कुर्यात् पूजां तु राघवो"।

सेवि न० षेव–कर्मणि इन्। फलभेदे (सेओ) राजनि०।

सेविका स्त्री पक्वान्नभेदे अन्नाद्यशब्दे २१२१ पृ० दृश्यम्।

सेवित त्रि०षेव–क्त। १आराधिते शब्दर०। २आश्रिते ४उपयुक्ते च ५सेविफले न० राजनि०।

सेव्य न० षेव–ण्यत्। १वीरणमूले अमरः। २अश्वत्थे पु० राजनि०। ३विष्णुक्षत्त्रे पु० शब्दर०। ४सेवार्हे त्रि०। ५वन्दाकये स्त्री हेमच०। [राजनि०।

सैंहली स्त्री सिंहले देशे भवा अण् ङीप्। सिंहपिप्पल्याम्

सैंहिक पु० सिंहिकायां भवः ठक्। १राहौ शब्दर०। तस्याः अपत्यम् ठक्। सैंहिकेयोऽप्यत्र अमरः।

सैकत न० सिकताः सन्त्यत्र अण्। बालुकाप्रचुरे नद्यादितटे अमरः। २सिकताप्रचरदेशे त्रि० राजनि०।

सैकतिक पु० सह एकतया सैकत।तदस्यास्ति ठन्। १संन्यस्ते २क्षपणके ३सन्देहजीविनि त्रि० मेदि०। ४मात्र्यामायां ५मङ्गलसूत्रके न० मेदि०। [२सैकतप्रिये त्रि०।

सैकतेष्ट न० सैकतं स्थानमिष्टं यस्य। १आर्द्रके राजनि०।

सैतवाहिनी स्त्री सितायाः शर्करायाः अयम् अण् सैतो मधुररसस्तं वहति वह–णिनि। बाहुदायां नद्याम् अमरः।

सैद्धान्तिक पु० सिद्धान्तं वेत्ति सिद्धान्त+ठक्। सिद्धान्ताभिज्ञे हेमच०। [२तत्कर्मणि च "सैनापत्यमुपेत्य वः" कुमारः।

सैनापत्य न० सेनापतेर्भावः कर्म वा ष्यञ्। १सेनापतिधर्म,

सैनिक पु०। सेनायां समवैति ठक् १सैन्यस्थिते हस्त्यश्वादौ अमरः। प्राणिवधनियुक्ते भा०अ०५ न६ऋ० ति०त०रघु०। वस्तुतस्तु सौनिका इव स्वधितिनैत्यैव तत्र पाठः साधुः २सेनाधर्मान्विते त्रि०।

सैन्धव न० सिन्धुनदीसमीपे देशे भवम् अण्। १लवणभेदे अमरः "सैन्धवं लवणं स्वादु दीपनं पाचनं लघु स्निग्धं हृद्यं हिमं वृष्यं सूक्ष्मं नेत्र्यं त्रिदोषहृत्" भावप्र०। सिन्धोरदूरभवः अण्। २घोटकभेदे पु स्त्री० अमरः तस्य समुद्रसमीपस्थसिन्धुदेशजातत्वादेशस्थाश्वत्वात् तथात्वम्। स्त्रियां ङीष्।

सैन्धवखिल न० सैन्धवमेव खिल्यम् । सैन्धवखिल्यवत्कल्पमे चिदानन्दस्वरूपे परमेश्वरे "स यथा सैन्धवखिल्यकमनन्तरमबाह्यं रसघनम्" शत०ब्रा०१४।७।३।१२ ।

सैन्धी स्त्री तालादिनिर्यासे राजनि० ।

सैन्य पु० सेनायां समवैति ञ्य । १सैनिके हलायुधादौ अमरः । सेनायां समूहः ष्यञ् । २सेनासमुदाये न० ।

सैरन्ध्री स्त्री सीरं हलं धरति धृ-मूल० क मुम् च सीरन्ध्रः तस्यकर्तृत्वेदं शिल्पकर्म ष्यञ् तदस्यास्ति अच् गौरा० ङीष । परगृहस्थे स्वतन्त्रे शिल्पकारिणि स्त्रीभेदे हेमच० पृषो० सैरिन्ध्रीत्यप्यत्र अमरः ।

सैरिक पु० सीरेण लाङ्गलेन खनति भूमिं सीरं वहति वा ठक् । १कर्षके हालिके अमरः । २लाङ्गलवोढरि वृषे (बेलदार गरु) अमरः ।

सैरिभ पुंस्त्री० सीरे हले तद्वहने इभ इव शूरत्वात् शाक० ततः स्वार्थेऽण् । १महिषे अमरः स्त्रियां ङीष् । "सैवे सैरिभमर्दिनीमिह महालक्ष्मीम्" महालक्ष्म्याख्यानम् । २स्वर्गे त्रिका० । [भिण्टग्राम् शब्दर० स्वार्थे क तत्रैव ।

सैरीय पु० सीरस्येदम् अण् सैरं हलाकारमर्हति छ ।

सैरेय पु० सैरं सीराकारमर्हति ढक् । १भिण्टग्राम् शब्दर० ढकञ् । सैरेयकोऽप्यत्र राजनि० ।

सैवाल न० सेवायै मीनादीनामुपभोगाय अलति पर्याप्नोति अच् सेवालं ततः स्वार्थे अण् । शैवाले स्वार्थे क । तत्रैव "या पांशुपात्र रबुद्धिरथवा पुरासीत् सैवालका छुरलतामधुना बिभर्त्ति उद्भटपद्ये सेवात् इत्यादि

सोढ़ त्रि० सह-क्त इडभावः । १क्षान्ते तितिक्षिते अमरः कर्त्तरि क्त । २शीतादिसहनशीले त्रि० । [योद्धे शेर्द० ।

सोढ़ त्रि० सह-तृच् वा इडभावः । १सहनकर्त्तरि २क्षमा-

सोत्कण्ठ त्रि० सह उत्कण्ठया सहस्य सः । औत्सुक्यान्विते अभीष्टलाभेच्छया विलम्बासहिष्णुत्वयुक्ते जटा० ।

सोत्प्रास न० उद्+प्र-अस-घञ् सह उत्प्रासेन सहस्य सः सोल्लुण्ठने अन्यार्थकस्य वाक्यस्य अन्यार्थकत्वकल्पनया तदुत्तरार्थके १वाक्ये २प्रियवाक्ये च शब्दर० । ३अट्टहासेन सहिते त्रि० ।

सोदय त्रि० सह उदयेन प्रादुर्भावेन वृद्ध्या वा सहस्य सः १प्रादुर्भूते २वृद्धि(सुद)युक्ते ३लाभयुक्ते च ऋणं दद्याच्च सोदयम् स्मृतिः । [भ्रातरि २ताद्दशभगिन्यां स्त्री शब्दर०

सोदर पु० समानमुदरं यस्य समानस्य सः । १एकोदरभवे दरजाते भ्रातरि । २तादृशभगिन्यां स्त्री अमरः ।

सोदर्य्य पु० समाने उदरे शयितः यत् सादेशः । १एको-

सोनह न०सु-विच् सवे नह्यते नह घञर्थे क । लशुने शब्दर०

सोन्माद पु० सह उन्मादेन सादेशः । उन्मत्ते उन्मादिगुणे ।

सोपप्लव पु० सह उपप्लवेन सादेशः । समाक्रान्तभूच्छायेन राहुणा योगरूपोपप्लवसहिते १चन्द्रे तथाभूतचन्द्रच्छायायोगयुक्ते २सूर्य्ये च अमरः । ३उपद्रवयुते त्रि० । चन्द्रार्कयोर्ग्रासकारणसुपरागशब्दे प्रायेणोक्तं देवीपुराणोक्तमधिकमत्रोच्यते ।

"ब्रह्मोवाच "यदयं वदते लोको वाक्यमत्र महामते! । तदहं संप्रवक्ष्यामि चन्द्रसूर्योपरागिकम् । यदि सत्यमयं पश्यत्तेजाराशिर्दिवाकरः । तत्कथं गोदरस्थेन राहुणा भस्मसात् कृतः । अथ वा राहुणाक्रम्य निजवक्त्रं प्रवेशितः । तत्कथं दशनैस्तीक्ष्णैः शतधा न विदारितः । विमुक्तश्च पुनर्दृष्टस्तथैवास्य महामण्डलः । न चास्याप-हृतं तेजो न स्थानादपसारितः । यदि वा क्रोधनिष्पीतः कथं दीप्ततरोऽभवत् । तस्मात्तु तेजसां राशौ राहोर्वक्त्रं गमिष्यति । भक्ष्यार्थं सर्वदेवानां सोमः सृष्टः स्वयम्भुवा । तमस्यमस्तमृतश्चापि सम्भृतं सूर्यतेजसा । पिबन्त्यमृतमयं देवाः पितरश्च स्वधाऽमृतम् । त्रयश्च त्रिंशतश्चैव त्रयस्त्रिंशत्सहस्राणि च । त्रयश्च त्रिसहस्राश्च देवाः सोमं पिबन्ति वै । राहोरप्यमृतं भागः पुरा सृष्टं स्वयम्भुवा । तस्मात्तद्राहुरागत्य पातुमिच्छति पर्वसु । उद्धृत्य पार्थिवीं छायामभ्राकारां तमोमयः । पातुमिच्छन् ततश्चेन्दु-माच्छादयति छायया । शुक्ले च चन्द्रमभ्येति कृष्णे दर्शेऽपि भास्करम् । सूर्यमण्डलसंस्थस्तु चन्द्रमेव जिघांसति । तस्मात् पिबति तं राहुस्तनुमध्या विनाशयन् । अविर्हिंसन् यथा पद्मं पिबति भ्रमरो मधु । चन्द्रस्यममृतं तद्वदभेदाद्राहुरश्नुते । चन्द्रकान्तो मणि-र्यद्वत् हिमं चरते आपात् । चरन्नपि न हीयेत तेजसा नैव मुच्यते । यथा सूर्य्यमणिः सूर्य्यादुत्पाद्य पावकं शुभम् । न भवत्यङ्गहीनोऽपि तेजसा नैव मुच्यते । एवं चन्द्रश्च सूर्यश्च छादितावपि राहुणा । स्वतेजसा न मुच्येते नाङ्गहीनौ बभूवतुः । पर्वस्वथ च चन्द्रस्य माणिक्यकनकाकृतिः । शोभो दैवतसंयोगात् छाया-योगाच्च पार्थिवात् । राहोश्च वरनक्षत्रा वै प्रजरेदमृतं शशी । स्तदोह्काले यथाग्निं वत्सं दृष्ट्वा च गौर्यथा । स्वाङ्गादेव क्षरेत् क्षीरं तथेन्दुः क्षरतेऽमृतम् । पितेव सूर्यो देवानां सोमो मातेव लक्ष्यते । यथा मातुःस्तनं

पीत्वा जीवन्ति सर्वजन्तवः । पीत्वाऽमृतं तथा सोमात् तृप्यन्ते सर्वदेवताः । तस्मात् तं सर्वयागेषु तथायं क्षरते शशी । तं क्षरन्तं यथाभागमुपजीवन्ति देवताः । तस्मिन् काले समभ्येति राहुरप्यवकर्षति । सर्वमर्द्धं त्रिभागञ्च पादं पादार्द्धमेव च । आक्रम्य पार्थिवीं छायां यावन्त चन्द्रमण्डलम् । अतः स भागो राहोस्तु देवभागास्तु शेषकाः । तृप्तिं विधाय देवानां राहोः पर्वगतस्य च । चन्द्रो न क्षयमायाति तेजसा नैव युज्यते । तिथिभागाश्च यावन्तः पुनर्न्यर्कं प्रमाणतः । पर्वच्छायास्थितः कालस्तावानेव प्रकीर्त्तितः । अतो राहुमुखः सोमः सोमवृद्धिर्दिवाकरात् । पर्वकाले स्थितिस्त्वेवं विपरीता पुनः पुनः । छतश्छादयते राहुरुभयत्र विभाकरौ । राहुरन्धकसंस्थानः सोममाच्छाद्य तिष्ठति । उद्धृत्य पार्थिवीं छायां भूमिमेव स्वयोत्थितः । चन्द्रस्य यद्ग्रहणं राहुणा भास्करस्य च । तत्रावगुण्ठितं तस्य केवलं श्यामलीकृतम् । कर्दमेन यथा वस्त्रं शुक्लमप्युपहन्यते । एकदेशोऽथ सर्वं वा राहुणा चन्द्रमास्तथा । प्रक्षालितं तदेवेह पुनः शुक्लतरं भवेत् । राहुमुक्तं भवेत्तद्वत् निर्मलं चन्द्रमण्डलम् । राहुणा छादितौ वापि दृष्ट्वा चन्द्रदिवाकरौ । विप्राः शान्तिपरा भूत्वा पुनराप्याययन्ति तम् । एवं न दृश्यते सूर्यचन्द्रमाश्चाप दृश्यते । चक्षुषास्तं न पश्यन्ति मानुषा मांसचक्षुषः । जगतसम्मोहनञ्चैतत् ग्रहणं चन्द्रसूर्ययोः" ।

सोपाधि(क) सह उपाधिना वा कप् बहुव्री० । उपाधियुक्ते प्रतिबाधायया व्यभिचारादौ ।

सोपान न० उप-अन-भावे घञ् सह विद्यमानः उपानः उपरि गतिरनेन । आरोहणसाधने काष्ठादिनिर्मिते (पैठा) प्रभृतौ पदार्थे अमरः ।

सोभाञ्जन पु० शोभाञ्जन+पृषो० । (सजना) वृक्षे भरतः ।

सोम पु० सु-मन् । १चन्द्रे २कर्पूरे अमरः । ३कुबेरे ४यमे ५वायौ ६वसुभेदे ७जले ८सोमलतौषधौ ९वानरे मेदि० १०स्वर्गमरसे हेमच० ११अमृते १२दीधितौ शब्दा० । सह उमया वर्त्तते । १३शिवे १४वानरेन्द्रे सुग्रीवे च ।

सोमश्च ग्रहभेदः तत्कक्षामानादिकं खगोलशब्दे ४२२५ पृ०दृश्यम् । तत्प्रकृत्यादिकं यथा

"चन्द्रः सिताङ्गकमनोज्ञवपुर्वर्त्तुलो परिष्प्रकृत विवेकयुक्तः । कश्चित् कृशः शीतलवाक्ययुक्तः सम्याश्रयो वातकफाभिवाक्यः सर्वार्थचि० । स च वायव्या दिशः वैश्यजातिः श्वेतवर्णः सवसनशरीरो मृदुपरवशौधीशः । ग्रहयज्ञशब्दे तस्य मन्त्रादिकं दृश्यम् । तस्य जन्मकाले मेषादिराशिषु स्थितिभेदे फलभेदः बृहज्जातकोक्तः २०८७ पृ० जातकशब्दे उक्तः । लग्नादिस्थस्य तस्य फलं जातकपद्धतावुक्तं यथा

"चन्द्रे स्वभाजवृषगे तनुगे सुखाढ्यो दारिद्र्यदुःखपवनवाकृतकाले विशेषात् । अन्येषु भेषु तनुगे विकलश्च शूरः प्रोन्मत्तनीचबधिरः क्षयभाग्यवध्यः । कुटुम्बस्थिते वैरवाच्छामधीशे भवेत् पुत्रमित्रार्थसौख्यैः समस्तैः । नरः पूर्णदेहे तु हीने विलोमं स्वतद्वाक् च बोध्यं फलं तादृतस्मात् । द्विजाधिराजे सहजेऽतिलोभः कार्यश्रवान् संग्रहकश्च नीचः । कृपान्वितो भ्रातृजनाश्रयश्च प्रकाशितः स्यात् मनुजोऽतिचिह्नः । पाताल४संस्थे सति शीतरश्मौ जलप्रयाणाभिरतिर्नरः स्यात् । दाताऽपि वहुवाहनवेश्मकाढ्यः सुखी सुखोत्कर्षयुतः सुभूपः । सुते५ सङ्गतस्य सुते प्रभूतो धीमित्रपुत्रैर्बहुभिः समेतः । क्रूरो नरः स्यात् बहुधान्यमित्रस्वपाहनः क्षीणतरः सुखाढ्यः । यस्तो६ष्वगतौ पद्मिनीनां स्थिते ना यम् आर्त्तैः संयुतो दारुणश्च । हाराग्निमान्द्यमल्पकाम्याश्च युक्तोऽनल्पालसः स्यान्न नीरोदराढ्यः । शशिनि यज्ञिनसौ निवीतम७स्थे भवति सुखी मदनातुरः सुदेहः । अतिकृतिरमृदकोऽप्यक्षुब्धो गांधततनौ बहुरोगदैन्यतप्तः । ८मृत्यौ दुर्गमगेऽतिमात्रकरः स्याद्रोजस्विताढ्योऽपि च बन्धनाद्यैः । सुखोपदेहः सति हीनदेहे तस्मिन् भवेदल्पकजीवितश्च । निशाधिनाथे नवमा९गते स्यात् धीपुत्रमित्रद्रविणोपपन्नः । सौभाग्यसौख्यैः तु कलैर्युतः स्यात् कान्तासनेष्टोमतुलो दयावान् । दशम१०धाम्नि सुशीलधाम्नि द्रविणधीयुतैः सहितः शुचिः । भवति कर्मपरोऽपि च सिद्धिभाग् नरवरो न विषादकरो भवेत् । आयं११याते यामिनीनायके ना मिश्रक्षेमद्रव्यपुत्रायुयुक्तः । स्यातः शूरो दारकर्माभिमानी शिष्टैर्भूत्यैर्नाम्नतो बुद्धिमान् स्यात् । शीतांशौ द्वादशे१२द्वेष्यो हीनाङ्गो नेत्ररोगवान् । पतितः परमः क्रूरः परिभूतो नरो भवेत्" ।

सोमलता च ओषधिभेदः सोमवल्लीरूपा ओषधिशब्दे १५६४ पृ० सुश्रुतवाक्ये तल्लक्षणादि दृश्यम् । सोमेन यजेतेत्यादि श्रुत्युक्ते १५यागभेदे पु० । सोमयागेतिकर्त्तव्यतादि कात्या०श्रौ० २५अ० । १०कण्डिकादौ दृश्यम् । कात्यायनशब्दे १८७६पृ० तत्प्रतिनिधिद्रव्यादि दर्शितम् ।

सोमगर्भ पु० सोमस्य तदात्मकामृतरूपसोमस्य गर्भः स्थानम्। विष्णौ त्रिका०।

सोमज न० सोमात् तदाख्यौषधिरसपानात् जायते जन-ड। १दुग्धे हेमच०। २चन्द्रजाते त्रि०। ३बुधे पु०।

सोमतीर्थ न० सोमेन तपस्तप्तं यत्र तीर्थम् शाक०। प्रभासतीर्थे त्रिका०। "यत्र तप्तं तपस्तेन सोमेन सुमहात्मना। पञ्च वर्षसहस्राणि तथैवाङ्गुष्ठकः स्थितः। एकभूतः पुनः पञ्च पञ्च मौनव्रतस्तथा। तथैवैकेन पादेन दश पञ्च च तिष्ठता। एवमुग्रं तपः कृत्वा कान्तिमानभवच्च सः। क्षमापराधात् शुक्लस्य व्याघ्रपाना पातकात्तथा" वराहपु०।

सोमधारा स्त्री सोमस्य धारेव। आकाशे त्रिका०।

सोमप पु० सोमं तद्रसं पिबति पा-क। १यज्ञे सोमरसपानकर्त्तरि २पितृगणभेदे मनु०। पा-क्विप् सोमपाप्यत्र।

सोमपत्र पु० सोमस्य ओषधिविशेषस्येव पत्रमस्य। (उलुखड़) तृणभेदे शब्दच०।

सोमपीति(थि)न् पु० पीतमनेन इनि सोमं पीतौ पृषो० वा तस्य थः। यज्ञे सोमरसपायिनि अमरः। पा-क्विप् सोमपीथाप्यत्र।

सोमबन्धु पु० सोमस्य बन्धुः, सोमो बन्धुरस्य वा। १सूर्ये तदुद्दीपकत्वात् तस्य तथात्वम्। २चन्द्रजे बुधे पु० ज्यो०। ३कुमुदे न०। [वंश्ये क्षत्रिये च ४जिनराजभेदे हेम०।

सोमभू पु० सोमादेव भूरुत्पत्तिस्थानं यस्य। १बुधग्रहे २चन्द्र-

सोमयाग पु० सोमनामको यागः। त्रिवर्षसाध्ये सोमरसपानाङ्गके यागभेदे।
"नारद उवाच "सोमयागविधानञ्च ब्रूहि मां मुनिसत्तम!। कथं तं कारयामास गुरुश्च किं फलं परम्"। नारायण उवाच "ब्रह्महत्याप्रशमनं सोमयागफलं मुने!। यः सोमलतापानं यजमानः करोति च। वर्षमेकं फलं भुङ्क्ते वर्षमेकं जलं सदा। त्रैवार्षिकमिदं यागं सर्वपापप्रणाशनम्। यस्य त्रैवार्षिकं धान्यं निहितं भृत्यवृत्तये। अधिकं वापि विद्येत स सोमं पातुमर्हति। महाराजस्य देवो वा यागं कर्तुं मलं मुने!। न सर्वसाध्यो यज्ञोऽयं बहुधो बहुदक्षिणः" ब्रह्मवै० श्रीकृष्णज० ६० अ०। सोमशब्दे दृश्यम्।

सोमयाजिन् पु० सोमेन यजते यज-णिनि। सोमयागकर्त्तरि। तस्य सौत्रामण्यामधिकारः सौत्रामणीशब्दे दृश्यम्

सोमयोनि न० सोमो योनिरस्य। चन्दनभेदे शब्दच०।

सोमराजी स्त्री सोमेन राजते राज-अच् गौरा० ङीष्। (सोमराज) १ओषधिभेदे। २वाकुच्यां भावप्र०। "अवल्गुजा वाकुची स्यात् सोमराजी सुपर्णिका" इत्युपक्रमे "वाकुची मधुरा तिक्ता कटुपाका रसायनी। विष्टम्भघ्नी हिमा रुच्या सरा श्लेष्मास्रपित्तनुत्। रूक्षा हृद्या श्वासकुष्ठमेहज्वरकृमिप्रणुत्। तत्फलं पित्तलं कुष्ठकफानिलहरं कटु। केश्यं त्वच्यं कृमिश्वासकासशोथामपाण्डुनुत्" भावप्र०। स्वार्थे क। सोमराजिकाप्यत्र। राज-णिनि। सोमराजिन् अप्यत्र पु० अमरः। [राजनि०

सोमलता स्त्री कर्म०। तदाख्यातायां लतायाम्

सोमलतिका स्त्री सोमलतेव इवार्थे कन् अत इत्वम्। १गुडूच्याम् राजनि०। स्वार्थे क। २सोमलतायाञ्च।

सोमवंश पु० सोमस्य वंशः। १चन्द्रवंशे २चन्द्रावधिके गोत्रपरम्पराजाते क्षत्रिये भाग० ९स्कन्धे दृश्यम्।

सोमवल्क पु० सोमस्येव वल्कोऽस्य। १करञ्जे जटा०। २रीठाकरञ्जे राजनि० ३श्वेतखदिरे ४कट्फले च मेदि०।

सोमवल्लिका स्त्री सोमवल्लीव कायति कै-क। सोमराज्याम् अमरः। स्वार्थे क। २सोमलतायाम्। सोमवल्लर्यप्यत्र।

सोमवल्ली स्त्री सोमाख्या लता वल्ली। १गुडूच्याम् अमरः। सोमरूपा वल्ली। २सोमलतायाम् भरतः। ३सोमराज्याम् शब्दर०। ४ब्राह्म्यां ५सुदर्शनायां ६पातालगरुड्यां राजनि०। "सोमवल्ली महागुल्मा यज्ञश्रेष्ठा धनुर्लता। सोमार्हा गुल्मवल्ली च यज्ञवल्ली द्विजप्रिया। सोमक्षीरा च सोमा च यज्ञाङ्गा वसुसंख्यया। सोमवल्ली कटुः शीता मधुरा पित्तदाहहृत्। तृष्णां विशेषात् शमनी पावनी यज्ञसाधनी" राजनि०।

सोमवामिन् पु० सोमं तद्रसं वमति वम-णिनि। सोमरसपानाधिक्ये दुःखेन सोमवमनकर्त्तरि तस्य सौत्रामण्यामधिकारः सौत्रामणीशब्दे दृश्यम्।

सोमवार पु० सोमस्वामिको वारः। चन्द्रस्वामिके दिने।

सोमविक्रयिन् पु० सोमं विक्रीणाति वि+क्री-णिनि। सोमलतायाः विक्रेतरि "पापो हि सोमविक्रयी" आश्व०।

सोमवृक्ष पु० सोम इव वृक्षः। १कट्फलवृक्षे रत्नमा० २श्वेतखदिरे च राजनि०। [राजनि०।

सोमसार पु० सोम इव मुख्यः सारोऽस्य। श्वेतखदिरे

सोमसिद्धान्त पु० सोमकृतः सिद्धान्तः। चन्द्रप्रोक्ते ज्योतिषसिद्धान्तग्रन्थभेदे जटा०। [त्रिका०।

सोमसिन्धु पु० सोमस्यामृतस्य सिन्धुरिव आधारः। विष्णौ

सोमसुत् पु० सोमं सुतवान् सु—भूते क्विप्। यज्ञार्थं कृत-सोमलतानिष्पीड़ने सि० कौ०।

सोमसुता स्त्री ६त०। नर्मदानद्याम् राजनि०। २बुधे पु० सोमोद्भवादयोऽप्यत्र यथायथम् पुंस्त्री०। [साभिषवणे

सोमसुत्वन् पु० सोमं सुतवान् सु—भूते क्वनिप्। कृतसोमा-

सोमसूत्र न० सोमस्य जलस्य सूत्रमिव प्रणाली। १जलनिर्गम प्रणाल्याम् शिवलिङ्गस्य गौरीपट्टस्य २जलनिर्गमस्थाने च "सोमसूत्रं न लङ्घयेत्" तन्त्रम्। [रक्तकैरवे रत्नमा०।

सोमाख्य न० सोमं कृताभेदमाख्याति सोमेन आ+ख्या-क।

सोमातिपूत पु० सोमोऽतिपूतो वान्तो मुखाभिनासिकादिभ्यो येन अति+पू-कर्मणि क्त। कृते सोमरसपाने आधिक्यात् सुखाभिनासिकादिच्छिद्रैः सोमरसवमनकर्त्तरि तस्य सौत्रामण्यामधिकार सौत्रामणीशब्दे दृश्यः।

सोलुण्ठ त्रि० सह उल्लुण्ठेन साधेग्नः। भूमौ पार्श्वपरि-वर्त्तादियुक्ते १अश्वादौ हेमा० २स्तुते निन्दापरतया निन्दाया वा स्तुतिपरतया युक्ते २वाक्ये च।

सोलुण्ठन न सह उल्लुण्ठनेन साधेग्नः। अन्यथास्थितस्य अन्यरूपेण परिवर्त्तनसहिते वाक्ये (स्तुतिपरस्य निन्दा-परता निन्दापरस्य च स्तुतिपरता इत्येवं कल्पके वाक्ये)।

सोष्यन्तीहोम पु० सोष्यन्तीं सूतापन्नामासन्नप्रसवां मत्वा कार्य्य होमः। सोष्यन्त्या आसन्नप्रसवाया हिताय कर्त्तव्ये होमभेदे तत्प्रकारः सं० त० दृश्यः।

सौकर्य्य न० सुकरस्य भावः कर्म वा ष्यञ्। १सुनायास-साध्यत्वे जटा०। २सुकरस्य कर्मणि च।

सौखसुप्तिक त्रि० सुखसुप्तिं सुखेन शयनं पृच्छति ठञ्। प्रातःकाले सुखशयनप्रच्छके वैतालिकादौ हेमच०।

सौखिक त्रि० सुखं प्रयोजनमस्य ठक्। सुखाभिलाषिणि (सौखिन)।

सौख्य न० सुखमेव स्वार्थे ष्यञ्। सुखे हेमच०।

सौगत पु० सुगत-एव अण्। १सुगते बुद्धभेदे हेमच० तद्भेद-मुण। २सुगतसम्बन्धिनि त्रि०। सुगतमतमधीते अण्। ३सुगतमताध्यायिनि त्रि०। [शब्दर०।

सौगन्ध्य न० सुष्ठु गन्धोऽस्य स्वार्थे ष्यञ्। कत्तृणे रामकपूरे

सौगन्धिक न० सुष्ठु गन्धः सुगन्धः सोऽस्त्यस्य ठन् स्वार्थे अण्। १कह्लारे अमरः। २सुगन्धके पु० अमरः। सुगन्धेन व्यवहरति ठक्। (गन्धी) ३सुगन्धव्यवहर्त्तरि त्रिकाण्डशे०। ४पद्मभेदे भा० व० सौगन्धिकाहरणपर्व। [६सुगन्धौ।

सौगन्ध्य न० सुगन्धस्य भावः ष्यञ्। १सौरभ्ये। स्वार्थे ष्यञ्।

सौचिक पु० सूच्या तत्कर्मणा जीवनमुपजीवति ठक्। (दरजी) सीवनकारके अमरः। ठन्। सौचि तत्रार्थे शब्दर०।

सौजन्य न० सुजनस्य भावः ष्यञ्। १सुजनतायां २सद्-व्यवहारे च "सौजन्यजन्यं यशः" मल्लिनाथः।

सौण्डी स्त्री शुण्डा तदाकारोऽस्त्यस्याः अच् ङीप् पृषो० सस्य सः। गजपिप्पल्याम् शब्दच०।

सौत्र पु० पाणिन्यादिभिः सूत्रे एव कर्मविशेषाय पठितः अण्। धात्वादिगणपाठीयभिन्नेषु सूत्रमात्रे कार्य्यभेदार्थं पठितेषु १धातुषु। सूत्रं यज्ञसूत्रमर्हति अण्। २विप्रे हेमच०।

सौत्रामणी स्त्री सुत्रामा इन्द्रो देवताऽस्य अण् लपूर्वत्वात् न टिलोपः णत्वम्। इष्टिभेदे तत्र हि सुराणां विप्रा-णां विहितम्। "सौत्रामण्यां सुरां पिबेत्" स्मृतिः। स च यज्ञः कामकामस्य ब्राह्मणस्यैव कर्त्तव्यः तत्राधि-कारिविशेषः कात्या० श्रौ० १९। १ कं० ४ सू०। "ब्राह्मणस्य सौत्रामण्यं विकामस्य" सू०। "ब्राह्मणग्रहणं क्षत्रियवैश्य-योर्निवृत्त्यर्थम्" कर्कः। "अग्निचित्सोमयाजिसोमातिपूत-सोमवामिनाम्" सू० "एभिश्च निमित्तैः सौत्रामणी भवति। तत्राग्निचित्सोमयाजीति ग्रहणम् अग्निमतः सोम-स्याङ्ग यथा स्यादिति न हि फलवान् निष्फलोऽग्नि-रिति एवं च सत्यग्निमत्सोमयागाङ्गं सौत्रामणी भवति। ननु चानग्निमतोऽपि सोमस्याङ्गत्वेन सौत्रामणी श्रूयते "सोमेनेष्ट्वा सौत्रामण्या यजेतेति नैतदेवम् अग्निं चित्वा सौत्रामण्या यजेतेत्यस्य वाक्यस्याग्निप्रकरणे श्रुतत्वात् तदङ्गता युक्ता यस्य प्रकरणम् तस्यान्यद्विधीय-मानं तदङ्गमेव भवतीति न्यायम्। सोमेनेष्ट्वा सौत्रामण्या यजेतेति सौत्रामणीप्रकरणे पाठः तेन प्रस्तुतविपरिवृत्त्या सोमस्यैव सौत्रामण्यङ्गता भवति न सौत्रामण्याः सो-माङ्गता यथा "वाजपेयेनेष्ट्वा वृहस्पतिसवेन यजेतेति" वाजपेयं प्रकृत्य विधानात् वाजपेयाङ्गता वृहस्पतिसवस्य। तस्मादनग्निमति सोमे सौत्रामणी "सोमेनेष्ट्वा सौत्रा-मण्या यजेतेति किमर्थस्तर्हि पाठः अग्निमत् सोमयाग-वादोऽयमित्यदोषः। यद्यप्यग्निं चित्वेत्यस्यैव विधेरयम् अग्निमता सोमेनेष्ट्वेत्येतदुक्तं भवति। सोमातिपूतसोम-वामिनोश्च सौत्रामणी भवति ब्राह्मणस्यैवेति सो-मातिपूतः सोमवामी च ब्राह्मण एव न हि क्षत्रिय-वैश्ययोरेतद्विशेषणमिति ननु च सोमकार्य्ये तयोरपि न्यग्रोधविधानम् तेन तदाख्यपक्षे वमने च क्रियमाणे न भक्ष न नैतदेवं तादृ नाम कार्य्योपत्त्या भक्षप्राप्तिर्भवति न

चार्यं सोमधर्मः, किं तर्हि तदतिपवने यागान्तरविधानमिति । अग्निचितस्तु अवमन्नस्यापि भवति अग्निसंयोगविधानात् । अग्निचितः तथा सोमयाजिनः तथा सोमातिपूतस्य तथा सोमवामिनः मुखव्यतिरिक्तेभ्यो नासिकाकर्णगुदादिच्छिद्रेभ्यः यस्य सोमः स्रवति स सोमातिपूत इत्युच्यते मुखेन यः सोमं वमति स सोमवामी" सं०व्या०। "राज्ञोऽपरुद्धस्य च सौत्रामणी भवति" सू०। 'दुदरीवर्ष्मयोः यावनो वस्तु आवेति' तद्विधानात् । स्वराज्यात् प्राच्युतस्य राज्ञः स्वराज्यप्राप्त्यर्थम्" कर्कः। "अलब्धयोरपशोः" सू०। "सौत्रामणी भवति पशुयोग्यः सन् यो नात्र पशून् विन्दते सोऽलब्धपशुः" कर्कः ।

तत्र सुरासन्धानप्रकारः तत्रैवोक्तः:

"दक्षिणेन हृत्वा। नग्नहुचूर्णानि कृत्वा तस्य व्रीहिश्यामाकौदनयोः पृथगाचामौ निषिच्य चूर्णैः संसृज्य निदधाति तन्मासरम्" सू०। "दक्षिणेन द्वारेण प्रवेश्याग्न्यगारम् नग्नहुचूर्णादि कृत्वा नग्नहुः किण्व उच्यते तांश्च शष्पादींश्च पिष्ट्वा व्रीहिश्यामाकौदनयोः पृथगाचामौ विनिषिच्य चूर्णैः संसृज्य निदधाति तन्मासरमुच्यते व्रीहिश्यामाकाभ्यां च सुरा निष्पाद्यते सा च यागसाधनम् । तेन सा तद्धर्मैरभिसम्बध्यते अतस्तयोरवहननपूर्वकम् पृथगोदनौ निष्पाद्येते" कर्कः। "नग्नहुचूर्णानि कृत्वा नग्नहुशब्दार्थमाह "अश्वत्वक् त्रिफला चैव शुण्ठी चैव पुनर्नवा । चतुर्जातकसंयुक्ता पिप्पली गजपिप्पली । वंशोऽवका हस्तकला चित्रकं चेन्द्रवारुणी। अश्वगन्धां समुत्पाद्य मूलान्येतानि निर्दिशेत् । धान्यकं च यवानी च जीरकं कृष्णजीरकम् । द्वे हरिद्रे वचा चैव विरूढा व्रीहयो यवाः" इति । अथानन्तरं तानि शष्पादीन्यादाय दक्षिणेन हृत्वाऽग्न्यगारं प्रवेश्य पूर्वं नग्नहुचूर्णानि कृत्वा सर्वाण्योषधानि तूष्णीं पिष्ट्वा तान् शष्पतोक्मलाजान् चूर्णीकृत्य दर्शपूर्णमासधर्मेण पात्रासादनादि व्रीहिश्यामाकचरुनिर्वापग्रहणपूर्वकं फलीकरणान्तं समन्त्रकं कृत्वा बहुतरोदकौ पृथक् पृथक् चरू पक्त्वा अतालस्थानामपरं व्रीहिश्यामाकौदनयोः पृथगाचामौ निषिच्य पृथग्भिन्नयोः पात्रयोरवसिच्य मध्यादतिरिक्तमुष्णोदकमपमाद्य तदुदकं नग्नहुप्रभृतीभिश्चतुर्भिश्चूर्णैः संसृज्य निदधाति स्थापयति तन्मासरम्। तत्र चूर्णसंसृष्टयोराचामयोर्मासरमिति संज्ञा" सं०व्या०। "ओदनौ चूर्णैमासरैः संसृज्य स्वाद्वीं त्वाऽंशु-

ना ते" इति त्रिरात्रं निदधाति" सू०। "चूर्णमासरसंसृष्टावोदनौ "स्वाद्वीं त्वेति" "अंशुना ते इति" मन्त्राभ्यां कुम्भ्यां क्षिपति त्रिरात्रं च त्रिरात्रं निधेया सुरा" कर्कः। "एवमाचामयोश्चूर्णसंसर्गानन्तरमोदनौ चतुर्भिश्चूर्णैः संसृज्य स्वाद्वीं त्वा स्वादुनेति यजु० १९।१ "अंशुना ते यजु०" २०।२७ द्वाभ्यां मन्त्राभ्यामेकस्मिन् महति पात्रे चूर्णसंसृष्टावोदनौ मासराभ्यां च संसृज्य त्रिरात्रं निदधाति सगुप्ते देशे स्थापयति याज्ञिका नैर्ऋतकोणे गर्तं कृत्वा तत्र स्थापयतीति जीर्णः सम्प्रदायः" तिस्रो रात्रीरित्यादिश्रुतेः "एकस्याः पयसा पात्रतनाशिनेन परिषिञ्चति परीतोऽषिञ्चतेति" सू०। सुरां परिषिञ्चति "एकस्यै० परिषिञ्चतीति" वचनात् । अश्विनावुद्दिश्यापाकरणं कस्मात् तत्रापूर्वत्वादप्रधानत्वाच्च पयसः अश्विभ्यामपाकरोमीति गोर्दोहनमात्रमेवेति सम्प्रदायः। अपरे तु पूर्ववदुपाकरणमिच्छन्ति" कर्क। "शष्पचूर्णानि आवपति" सू० "श्वस्त्यात् सुरायाम्" कर्कः। "सारस्वतेन द्वयोः प्रातः" सू०। "प्रातःशब्देन च द्वितीयमहरभिधीयते तत्रापि च रात्रावेवाभिषेकः प्रथमां रात्रिं परिषिञ्चतीति प्रक्रम्य "द्वयोर्दुग्धेन द्वितीयामित्याह द्वितीयाम् रात्रिमिति गम्यते" कर्कः। "प्रातःशब्देन श्वोऽभिधीयते" सं० व्या० "तोक्मचूर्णानि च" सू०। 'आवपति' ऐन्द्रेणोत्तमे तिसृणाम्" सू० "गवां दुग्धे ऐन्द्रेण परिषिञ्चति" कर्कः उत्तमे तृतीयेऽहनि संव्या। "लाजचूर्णानि च" सू० "आवपति अत्र चूर्णानां पयसश्च संस्कारकत्वम् साधनं तु व्रीहिश्यामाकावेव अतस्तयोरेव देवतोद्देशेन ग्रहणम्" कर्कः। यजु० १९अ० वेददीपे तु तदङ्गसुरासन्धानप्रकारः स्पष्टः दर्शितो यथा "अथ सौत्रामणीमन्त्रास्त्रिभिरध्यायैः। ऋद्धिकामस्याग्निचितो मुखेतरच्छिद्रसोमवामिनो मुखेन सोमवामिनो राज्यच्युतस्य पशुकामस्य च सौत्रामणीयागः। अन्तःपात्यस्थाने गोचर्माणि एतानि स्थापयेत् सोमं सुराविक्रयिणः क्लीबाद्वा क्रीत्वा सीसेन शष्पं क्रीत्वा ऊर्णाभिस्तोक्मान् सूत्रेण लाजान् केनचिद् द्रव्येण नग्नहुम् विरूढा व्रीहयः शष्पम् विरूढा यवास्तोक्माः भृष्टव्रीहयो लाजाः अश्वत्वक्त्रिफलाशुण्ठीपुनर्नवाचतुर्जातकपिप्पलीगजपिप्पलीवंशावकाहस्तकलाचित्रकेन्द्रवारुण्यश्वगन्धाधान्यकयवानीजीरकद्वयहरिद्राद्वयवचाविरूढयवव्रीहय एकीकृता नग्नहुः। शष्पतोक्मलाजानग्नहून् दक्षिणद्वारेणाग्निमण्डपं नीत्वा संचूर्ण्य

दर्शपौर्णमासधर्मेण व्रीहिश्यामाकयोश्चरू बध्नुते पश्चात् पशुमालम्भनानन्तरं तयोश्चरोर्निःस्रावसदृशं पृथक्पात्रयोरादाय शष्पादित्रयाणां चूर्णैः संसृज्य स्थापयेत् इदं चूर्णाचामरूपं मासराख्यम्। "ओदनौ चूर्णमासरैः संसृज्य स्वाद्वीं त्वा अंशुनात इति तिसृभिर्निदधाति" का० शृताचामयोश्चूर्णसंसर्गे मासरविनिष्पादनानन्तरमोदनौ व्रीहिश्यामाकचरू अभिचूर्णैः संसृज्य स्वाद्वीं त्वेति मन्त्रेण अंशुना ते इति विंशाध्यायस्थप्रविंशया ऋचा चैकस्मिन् पात्रे चूर्णसंसृष्टावोदनौ मासराभ्यां संसृज्य तिसृभिः शालाकैकतकोणे गर्त्तं कृत्वा तत्र स्थापयेत्। अयमर्थः चरू उद्धास्य द्वयोः पृथगाचामग्रहणम् ततः शष्पतोक्मलाजचूर्णानां पृथक् त्रिधा कृतानां तृतीयांशं द्वेधा कृत्वाचामयोः क्षिपेत् ततो नग्नहुचूर्णं द्वेधा कृत्वैकमर्धं द्विधा विभज्याचामयोः क्षिपेत्। एवं चूर्णसंसृष्टाचामयोर्मासरसंज्ञा। ततः शष्पतोक्मलाज-चूर्णानां द्वितीयं तृतीयांशं द्विधा कृत्वैकैकं भागमोद-नयोः क्षिपेत् नग्नहुचूर्णद्वितीयार्धं द्वेधा कृत्वोदनयोः क्षिपेत तत ओदनावेकपात्रे कृत्वा तत्राचामौ क्षिपेत् ततः "स्वाद्वीं त्वा" "अंशुना ते" इति मन्त्राभ्यां चूर्णमासरैः स-हौदनयोरालावनेन संसर्गः कार्यः ततस्तिसृभिर्निधा-नम् शष्पतोक्मलाजचूर्णतृतीयांशानां प्रतिदिनं सुरायां निवापार्थं रक्षणमिति। एकस्या पयस्यायाः कृतेनाश्वि-नेन परिषिञ्चति परीतो षिञ्चतेति शष्पचूर्णानि आवपति सारस्वतेन द्वयोः प्रातस्तोक्मचूर्णानि ऐन्द्रेणोत्तमे तिसृषु लाजचूर्णानि च। सायं होमान्तेऽश्विभ्या-मुपाकरोमीति करेण गां स्पृष्ट्वा एकां तां दुग्ध्वा तत्-पयसाध्वर्युः सुरां षिञ्चति परीत इति मन्त्रेण। रक्षितं शष्पचूर्णानां तृतीयांशं सुराभाण्डे क्षिपेत्। द्वितीये-ऽह्नि निशान्ते सरस्वत्या उपाकरोमीति गावौ स्पृष्ट्वा दोग्धितेन तयोर्दुग्धेन तेनैव मन्त्रेण सुरां षिञ्चति तोक्म-चूर्णतृतीयांशक्षेपश्च। तृतीयेऽह्नि रात्रौ इन्द्राय सु-त्रामणेऽपाकरोमीति तिस्रो गाः स्पृष्ट्वा ता दुग्ध्वैकीकृत-तत्पयसा सुरां षिञ्चति तेनैव मन्त्रेण तत्र लाजचूर्ण-तृतीयांशक्षेपश्चेति"। (व्याचामोभक्रमतः)

सौदामनी स्त्री सुदामा पर्वतभेदस्तेनैका दिक् तत्प्रान्त-स्थत्वात् अण्। १विद्युति अमरः। सा हि स्फटिक-मयस्य सुदाम्नः पर्वतस्योपरिदेशे जाता। २अप्सरोभेदे च हेमच०। सुदामः ऐरावतस्य गजस्य पत्नी ङीप्। ३ऐरा-वतयोषिति शब्दर०। तत्र ङीपि अतोऽल्लोपे सौदा-म्न्यपि शब्दर०।

सौदायिक न० सुदायात् बन्धुजनात् आगतः ठञ्। "ऊढया कन्यया वापि पत्युः पितृगृहेऽथ वा। भर्तुः स-काशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम्" कात्या० कात्यायनोक्ते स्त्रीधनभेदे "सौदायिकं धनं प्राप्य स्वातन्त्र्यं परिकीर्त्तितम्" स्मृतिः। स्त्रीधनशब्दे दृश्यम्।

सौदास पु० सूर्यवंश्ये कल्माषपादे नृपतौ।

सौध पुंन० सुधया लेपनद्रव्येण रक्तम् अण्। १राजसदनभेदे अमरः। सुधां तद्वर्णमर्हति अण्। २रूप्ये न० ३दुग्धपाषाणे पु० राजनि०। ४सुधासम्बन्धिनि त्रि०।

सौनन्द न० सुनन्द+स्वार्थे अण्। बलदेवमुषले हेमच०।

सौनिक पु० सूना वधस्थानं तदुपलक्षितमांसादि पण्यमस्य ठक्। मांसक्रयविक्रयोपजीविनि व्याधे (कसाइ)। हेमच० वैनिकशब्दे उदा० दृश्यम्।

सौन्दर्य्य न० सुन्दरस्य भावः ष्यञ्। १चारुतायां "अङ्ग-प्रत्यङ्गकानां यः सन्निवेशो यथोचितम्। सुश्लिष्टः सन्धि-बन्धः स्यात् तत्सौन्दर्यमुदाहृतम्" उज्ज्वलमण्युक्ते २अङ्गादीनां सन्निवेशभेदे।

सौपर्ण न० सुपर्णं गरुडं तद्वर्णमर्हति अण्। १मरकतमणौ २शुण्ठ्यां राजनि०। सुपर्णमधिकृत्य कृतो ग्रन्थः अण्। भा०आ० २०अध्यायावधौ २४अध्यायपर्य्यन्ते ३अवान्तर-पर्वभेदे न० ४पातालगरुडीलतायां स्त्री राजनि० ङीप्। तस्येदम् अण् ५गरुडसम्बन्धिनि त्रि०।

सौपर्णेय पु० सुपर्ण्या विनतायाः अपत्यम् ढक्। १गरुडे हेमच० २गायत्र्यादिछन्दःसु "गायत्र्यादीनि छन्दांसि सौपर्णेयानि पाक्षिणः" वह्निपु०।

सौप्तिक त्रि० सुप्तिकाले रात्रौ भवम् ठञ्। १रात्रियुद्धे जटा०। सुप्तानधिकृत्य कृतो ग्रन्थः ठञ्। २महाभार-तान्तर्गते पर्वभेदे।

सौभ न० सुष्ठु सर्वत्र लोके भाति भा-क स्वार्थे अण्। १कामचारिणि पुरे २हरिचन्द्रनृपपुरे जटा०। तस्य राजा अण्। ३राजभेदे स च वासुदेवेन निहतः तत्कथा भा० व० १४अ० अवधि २२अ० पर्य्यन्ते दृश्या।

सौभद्र पु० सुभद्रायां भवः अण्। १सुभद्रापुत्रे अभिमन्यौ गीता। सुभद्राय हितः अण्। २विभीतकवृक्षे शब्दच०।

सौभद्रेय पु० सुभद्राया अपत्यम् ढक्। सुभद्रासुते अभिमन्यौ

सौभरि पु० ऋषिभेदे भाग० १०।१७ अ० ज्ञेयम्।

सौभागिनेय पु॰ सुभगाया अपत्यम् ढक् इनङ् च द्विपद वृद्धिः। १सुभगापुत्रे। २तत्कन्यायां स्त्री ङीप्।

सौभाग्य न॰ सुभगाया भावः ष्यञ् द्विपदवृद्धिः। १पतिप्रियत्वे तदर्थं व्रतं सौभाग्यव्रत व्रतशब्दे ५०९८ पृ॰ दृश्यम्। सुभगायै सुभगाय वा हितं ष्यञ्। २सिन्दूरे ३टङ्कणे च राजनि॰। विष्कम्भादिषु मध्ये ४चतुर्थे योगे पु॰ज्यो॰त॰।

सौभाग्यचिन्तामणि पु॰ औषधभेदे। तल्लक्षणं सारकौ॰उक्तं यथा "सौभाग्यामृतजीरपञ्चलवणव्योषाऽभयाग्नानलानि-चन्द्राभ्रकगुडगन्धकरसानेकीकृतान् भावयेत्। निर्गुण्डी युगभृङ्गराजकरञ्जपाठाभागेपत्रोत्थवत् प्रत्येकं स्वरसेन सिद्धवटिका घ्नन्ति त्रिदोषोदयम्। येषां शीतमतीव देहमखिले स्वेदप्रवाहोत्थितं निद्रा घोरतरा समस्तकरण-व्यामोहमूढं मनः। शूलश्वासबलासकासमर्दितं मूर्च्छा रुचिं तद्ज्वरं तेषां वै परिहृत्य जीवितमसौ सञ्जाति सन्योद्भवात्"। [ऐन्द्रजालिके हारा॰।

सौभिक पु॰ सौभं कामचारिपुरं तद्दृश्यत्वेन शिल्पमस्य ठक्।

सौमनस्य न॰ सुमनसो भावः ष्यञ्। १प्रसन्नचित्तत्वे तस्य हितं अण्। २श्राद्धे दत्तस्य पुष्पस्य प्रसादयुक्तचित्त-साधनत्वे "सौमनस्यमस्तु" श्राद्धमन्त्रः।

सौमनसायनी स्त्री सौमनसमयतेऽनया अय-ल्युट् ङीप् ६त॰। १मालत्याम् २तत्कलिकायाञ्च त्रिका॰।

सौमिकी स्त्री सोमक्रतुदीक्षा प्रयोजनमस्य ठक् ङीप्। सोमयागार्थदीक्षणीयेष्टौ हेमच॰। [लक्ष्मणे शब्दच॰।

सौमित्र(त्रि) पु॰ सुमित्रायां भवः अण् बाह्वादि॰ इञ् वा

सौमेधिक पु॰ सुमेधया निर्वृत्तः ठक्। १सिद्धियुते हारा॰। २शोभनमेधायुते च त्रि॰।

सौम्य त्रि॰ सोमो देवताऽस्य तस्येदं वा ढ्यण्। १सोमदेवताके हविरादौ २तत्सम्बन्धिनि। टित्वात् स्त्रियां ङीप्। सोम इव शाखादित्वात् य स्वार्थे अण्। ३मनोहरे ४प्रियदर्शने ५अनुग्रे च त्रि॰ मेदि॰ ६बुधे पु॰ अमरः। ततः स्वार्थिकाण्प्रत्ययाभावे सोम्योऽप्युभयत्र। "सदेव सोम्येदमग्र आसीत्" इति श्रुतिः। ज्योतिषोक्ते ७शुभ-ग्रहे ८वृषादिसमराशौ च ९उडुम्बरवृक्षे राजनि॰। १०भास्वरे त्रि॰ धरणिः। ११सोमपायिनि विप्रे पु॰शब्दमा॰। अष्टादशद्वीपमध्ये १२द्वीपभेदे पु॰ "गन्धर्वो वरुणः सौम्यः वत्सलः कङ्कु एव च। कुशटश्च कशेरुश्च नागो भट्टारक-स्तथा। चन्द्रेन्द्रभवयोः मद्धयदाङ्कर्भभस्तिमान्। ताम्रकूपश्च कुमारी च तत्र द्वीपा दशाष्टभिः" शब्दमा॰। १३सौम्यकृच्छ्रे व्रतभेदे। "अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रोऽतिकृच्छ्रकः" प्रा॰ त॰। सौम्यकृच्छ्रशब्दे दृश्यम्।

सौम्यकृच्छ्र पु॰ कर्म॰ सोमदेवताके कृच्छ्रसाध्ये व्रतभेदे। "पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम्। एकैकमुप-वासश्च कृच्छ्रः सौम्योऽयमुच्यते" याज्ञ॰। पिण्याकः खलिः आचामः भक्तमण्डः। एष षड्हसाध्यः प्रा॰वि॰।

सौम्यगन्धी स्त्री सौम्यः अनुग्रः गन्धो यस्याः गौरा॰ ङीप्। शतपत्त्र्याम् राजनि॰।

सौम्यग्रह पु॰ कर्म॰। ज्योतिषोक्ते पूर्णचन्द्रपापायुतबुध-गुरुशुक्ररूपे शुभग्रहे "क्षीणेन्द्वर्कसौरारा: पापाः सौम्यास्तथाऽपरे। पापयुक्तो बुधः पापो राहुकेतू च पापकौ" ज्यो॰ त॰। [तथात्वम्।

सौम्यधातु पु॰ कर्म॰। कफे राजनि॰ तस्य सोमजातत्वात्

सौम्या स्त्री सोमो देवताऽस्य ढ्यण् सोम इव शाखा॰ य स्वार्थे अण् वा। १दुर्गायां देवीमा॰। २महेन्द्रवारुण्यां ३रुद्रजटायां ४महाज्योतिष्मत्यां ५मल्लिपत्त्र्यां ६गुञ्जायां ७शालपर्ण्यां ८ब्राह्म्यां ९शठ्यां १०मल्लिकायां च राजनि॰ मृगशिरोनक्षत्रशिरःस्थासु पञ्चतारकासु विश्वः।

सौरे पु॰ सूरस्य इदम् सूरो देवताऽस्य वा अण्। १सूर्य-पुत्रे शनैश्चरे २यमे च। ३सूर्यदेवताके त्रि॰ स्त्रियां ङीप्। सूरेण निर्वृत्तः अण्। एकराशौ तदंशेषु वा सूर्यगतिसाध्ये ४दिनमासादौ त्रि॰। "अध्ययनस्य यज्ञचारकर्म सौरेण मानेन सदाऽभ्यसेत्" ज्यो॰त॰। "विवाहादौ स्मृतः सौरः" इति स्मृतिः। ५उडुम्बरवृक्षे पु॰राजनि॰ ६सूर्यार्पातके त्रि॰ ७गुरुभेदे "गौडाः शाक्ताः सौराः मागधाः कौलाश्च तथा। कोषलाश्च दशा-साथ गुरवः सप्त मध्यमाः" तन्त्रसा॰।

सौरज पु॰ सूरस्येदम् अण् सौर आलोकस्ततो जायते जन-ड। तुम्बुरुवृक्षे राजनि॰।

सौरभ न॰ सुरभेर्भावः अण्। १सुगन्धे सौरभमस्यास्ति अच् सुरभिरस्यास्ति अण् वा। कुङ्कुमे त्रिका॰ २बोले च राजनि॰।

सौरभेय पु॰ सुरभेरपत्यम् ढक्। १गवि स्त्रियां ङीप्। "सौरभेयीभ्य एव च" गोदानमन्त्रः। तस्या इदम् ढक्। २सुरभिसम्बन्धिनि त्रि॰।

सौरसेय पु॰ सुरसाया अपत्यम् ढक्। स्कन्दे शब्दमा॰।

सौराष्ट्र पु॰ सुष्ठु राष्ट्रमस्यास्ति प्रज्ञा॰ अण्। (सुरट) १देश-भेदे कटा॰। सुराष्ट्रे भवः अण्। २सुराष्ट्रदेशभवे त्रि॰

२कुन्दुरुके पु० राजनि० ४कांस्ये न० ५तुवर्य्यां स्त्री राजनि० टाप् । सुगन्धिमृत्तिकाभेदे स्त्री रत्नमा० ङीप् संज्ञायां कन् । सौराष्ट्रकं पञ्चलोहे न० हेमच० ।

सौराष्ट्रिक न० सुराष्ट्रदेशे भवः ठञ् । विषभेदे शब्दर० ।

सौरि पु० सूरस्यापत्यम् इञ् । १शनैश्चरे "सौरिवारेऽमृता-नीति" ज्यो०त०। २यमे ३कर्णे ४सुग्रीवे च पु०।५असन-वृक्षे ६आदित्यभक्तायां राजनि० ।

सौरिक पु० सुराणां देवानामधिवासाय हितः ठञ् । १स्वर्गे स्वार्थे क । २सूर्य्यापत्ये शनैश्चरादौ ।

सौरिरत्न न० सौरिप्रियं रत्नम् शाक० । नीलके मणौ राजनि०

सौरेय पु० सुरायै हितम् ढक् । शुक्लझिण्टयाम् स्वार्थे क तत्रैव । "सौरेयः कुष्ठवातास्रकफकण्डूविषापहः । तिक्तोष्णो मधुरो दन्त्यः सुस्निग्धः केशरञ्जनः" भावप्र० ।

सौल्विक त्रि० शुल्वं ताम्रपात्रादिनिर्माणं शिल्पमस्य ठञ् । ताम्रमयपात्रनिर्माणकर्त्तरि (कांसारि) । वणिग्भेदे

सौव त्रि० स्वस्येदम् स्वरो इदम् अण् अव्ययटिलोपो न वृद्धिः वावपूर्व्वमौत् । १आत्मसम्बन्धिनि २स्वर्गसम्बन्धिनि ।

सौवग्रामिक त्रि० स्वग्रामे भवः ठञ् न वृद्धिः वात्पूर्व्व मौत् । स्वग्रामभवे पदार्थे ।

सौवर्च्चल न० सुवर्च्चलदेशे भवम् अण् । रुचकलवणे अमरः ।

सौवर्णभेदिनी स्त्री सुवर्णस्य विकारः अण् सौवर्णमिव भिनत्ति प्रकाशयते भिद-णिनि । प्रियङ्गौ शब्दमा० ।

सौवस्तिक पु० स्वस्तिकरणे प्रयतः ठञ् न वृद्धिः वात्पूर्व्व मौत् । पुरोहिते हेमच० । [रजके अमरः ।

सौविद पु० सुवेत्ति सु+विद-क स्वार्थेऽण् । अन्तःपुर-

सौविदल्ल पु० वस् विदा न्टपः तं भाति भा-क स्वार्थेऽण् । अन्तःपुररक्षके अमरः ।

सौवीर न० सुष्ठु वीरो यत्र सुवीरो देशभेदः तत्र भवम् अण् । १स्रोतोऽञ्जने २बदरफले "सौवीरन्तु यवैरामैः पक्वैर्वा निस्तुषैः कृतम । गोधूमैरपि सौवीरम्" इत्यु-क्तरूपे ३काञ्जिके अमरः "सौवीरन्तु पवनयोः कफघ्नं भेदि दीपनम् । उदावर्त्ताङ्गमर्द्दास्थिशूलानाहेषु शस्यते" भावप्र० । बदरवृक्षे पु० राजनि० ।

सौवीरसार पुंन० कर्म० । स्रोतोऽञ्जने राजनि० ।

सौवीराञ्जन न० सौवीरात् प्राप्तमञ्जनम् । अञ्जनभेदे अमरः स्वार्थे क । काञ्जिकभेदे न० ।

सौष्ठव न० सुष्ठ भद्रं तस्य भावः ष्यञ् न टिलोपः । अति-शये "स सौष्ठवौदार्य्यविशेषशालिनीम्" किरा० ।

सौहार्द्द न० सुहृदो भावः अण् हृदयस्य हृदादेशः । १स्नेहे २मित्रत्वे हेमच० । ["सौहित्यमाचरेत्" श्रुतिः ।

सौहित्य न० सुहितस्य तृप्तस्य भावः ष्यञ् । तृप्तौ नाति-

सौहृद न० सुहृदो भावः अण् । मित्रत्वे बन्धुतायाम् हेम० ।

स्कद उत्प्लुत्य गतौ अक० उद्धृतौ आप्लावे च सक० भ्वा० आ० सेट् इदित् । स्कन्दते अस्कन्दिष्ट । [स्कन्दत् त ।

स्कन्द समाहारे अद०चु०उभ०सक०सेट् । स्कन्दयति ते अच-

स्कन्द गतौ शोषणे च भ्वा० पर० सक० अनिट् । स्कन्दति इरित् अस्कदत् अस्कान्त्सीत् चस्कन्द । आ+आक्रमणे

स्कन्द पु० स्कन्दते उत्प्लुत्य गच्छति अच् । कार्त्तिकेये अमरः अग्निकुमारशब्दे ५४ पृ० तस्योत्पत्तिरुक्ता । स्कन्दग्रह-स्कन्दापस्मारौ ग्रहशब्दे २७४५ पृ० सुश्रुतोक्तौ दर्शितौ। २नृपतौ जटा० ३देहे त्रिका० ४पारदे राजनि० ५बाल-ग्रहभेदे सुश्रुतः । [४शोषणे च ।

स्कन्दन न० स्कन्द-ल्युट् । १रेचने त्रिका० २क्षरणे ३गतौ

स्कन्दांशक पु० स्कन्दस्यांश इवांशो यस्य कप् । पारदे । तयोः शिववीर्य्यजत्वादेकांशत्वम् ।

स्कन्ध पु० स्कन्द्यते आरुह्यतेऽसौ सुखेन शाखया वा कर्म्मणि घञ् पृषो० । १अंसे (कांध) २वृक्षस्य काण्डे (गुँडि) अमरः । ३नृपे ४युद्धे ५समूहे ६काये ७भद्रादौ ८छन्दो-भेदे मेदि० सौगतमतसिद्धेषु ९विज्ञानादिषु पञ्चस्कन्धेषु "सत्त्वाङ्गस्कन्धपञ्चकम्" माघः १०पथि शब्दर० ११ग्रन्थ-परिच्छेदे च । "स्कन्धेऽष्टमभियुक्तम्" इति भागवत-विशेषणम् । १२व्यूहे हेमच० । [विटङ्किकायां हारा० ।

स्कन्धचाप पु० स्कन्धे चाप इव । वंशादिनिर्मितशिक्याधाने

स्कन्धज पु० स्कन्धात् जायते जन-ड । स्कन्धरूढे शल्लक्यादौ "पर्व्वयोनय इक्ष्वाद्याः स्कन्धजाः शल्लकीमुखाः" हेमच०।

स्कन्धतरु पु० स्कन्धप्रधानः तरुः । नारिकेलवृक्षे राजनि० ।

स्कन्धफल पु० स्कन्धे फलमस्य । १नारिकेलवृक्षे राजनि०। २उडुम्बरवृक्षे च शब्दच० । [शब्दच०।

स्कन्धबन्धना स्त्री स्कन्धे बन्धनमिवास्याः । मधुरिकायाम्

स्कन्धरुह पु० स्कन्धात् रोहति रुह-क । वटवृक्षे राजनि०।

स्कन्धवाह पु० स्कन्धेन वाहयति वह-णिच्-अण् । स्कन्धेन शकटादिवाहके वृषादौ हारा० ण्वुल् । स्कन्धवाहक तत्रैव हेमच० । [शाखायाम् अमरः ।

स्कन्धशाखा स्त्री स्कन्धात् प्रभवति शाखा । वृक्षस्य प्रधान-

स्कन्धशृङ्ग पुंस्त्री० स्कन्धपर्य्यन्तं शृङ्गमस्य । महिषे स्त्रियां ङीष् ।

स्कन्धाग्नि पु॰ स्कन्धजातोऽग्निः । दृढतृकाष्ठजाते वह्नौ जटा॰।

स्कन्धावार पु॰ स्कन्धार्थमावारः आ+वृ-घञ् । युद्धार्थ- उद्युक्तसैन्यानां १स्थापने २तदाधारे कटके च ३राजधान्यां शब्दच॰ । [हेमादौ हेमच॰

स्कन्धिक पु॰ स्कन्धत्वेन वहनमस्त्यस्य ठन् । स्कन्धवाहके

स्कन्धिन् पु॰ स्कन्धत्वेन वहनमस्त्यस्य इनि । स्कन्धेन वा- हके वृषादौ रत्नमा॰ ।

स्कन्न त्रि॰ स्कन्द्-क्त । १च्युते अमरः २गलिते ३क्षरिते ४शुष्के ५गते च । भावे क्त । ६क्षरणे न॰ ।

स्कन्भ प्रतिबाते क्र्या॰ स्वा॰ उ॰ सक॰ सेट् । स्कभ्नाति स्कभ्नीते स्कभ्नोति स्कभ्नुते । अस्कम्भीत् अस्कम्भिष्ट । चस्कम्भ चस्क(भ)म्भे । [म्भिष्ट ।

स्कभ स्तम्भे भ्वा॰ आ॰ सक॰सेट् इदित् । स्कम्भते अस्क-

स्कु उद्धृतौ आप्लावने च क्र्या॰ स्वा॰उ॰सक॰ अनिट् । स्कु- नाति स्कुनीते स्कुनोति स्कुनुते । अस्कौषीत् अस्कोष्ट । चुस्काव चुस्कुवे । [स्कुन्दते अस्कुन्दिष्ट ।

स्कुद आप्लावने उद्धृतौ च भ्वा॰ आ॰ सक॰ सेट् इदित् ।

स्कुन्भ रोधने सौ॰ क्र्या॰ स्वादि॰ कार्य्यभागे प॰ सक॰ सेट् स्कुभ्नाति स्कुभ्नोति । अस्कुम्भीत् । उदित् क्त्वा वेट् ।

स्खद विदारे दि॰ आ॰ सक॰ सेट् । स्खद्यते अस्खदिष्ट घटादि॰ स्खदयति । [स्खलयति स्खालयति ।

स्खल चले भ्वा॰ प॰अक॰सेट् । स्खलति अस्खालीत् वा घटा॰

स्खलन न॰ स्खल-भावे ल्युट् । १चलने २पतने अमरः ।

स्खलित न॰ स्खल-भावे क्त । १कूटयुद्धादौ प्रवृत्त्या वीर- मर्य्यादातः १पतने २स्खलनमात्रे च अमरः । कर्त्तरि क्त । ३चलिते त्रि॰ ।

स्तन मेघशब्दे अद॰ चु॰ उभ॰ सक॰ सेट् । स्तनयति ते अतस्तनत् त । बहुचकत्वात् षोपदेशः ।

स्तन पु॰स्तन-अच् । (माइ) स्त्रीणामङ्गभेदे पयोधरे अमरः । "अरोमशौ स्तनौ पीनौ घनावविषमौ शुभौ" स्तनयोः शुभलक्षणं गारुडे ६६अ॰ । [शब्दे च मेदि॰ ।

स्तनन न॰ स्तन-ल्युट् । १ध्वनिमात्रे २मेघशब्दे ३कुन्थन-

स्तनन्धय पुंस्त्री॰ स्तनं धयति धे-खश् मुम् च । अतिशिशौ धेटष्टित्त्वात् स्त्रियां ङीप् । [अमरः । स्त्रियां टाप् ।

स्तनप पुंस्त्री॰ स्तनं पिबति पा-क । अतिशिशौ बालके

स्तनभर पु॰ ६त॰ । १स्थूलस्तनभारे २तदाभोगे च त्रिका॰।

स्तनयित्नु पु॰ स्तन-इत्नु । १मेघे २मुस्तके अमरः ३मेघशब्दे मेदि॰ ४विद्युति शब्दर॰ । ५मृत्यौ ६रोगे च हेमच॰ ।

स्तनवृन्त पु॰ स्तनस्य वृन्त इवाग्रम् । १स्तनाग्रे चूचुके हेमच॰ स्तनमुखशिखादयोऽप्यत्र हेमच॰ । [च ।

स्तनान्तर न॰ स्तनयोरन्तरम् । १हृदये हेमच॰ २स्तनमध्ये

स्तनाभोग पु॰ ६त॰ । स्तनस्य परिपूर्णतायाम् त्रिका॰ ।

स्तनित न॰ स्तन-भावे क्त । १मेघशब्दे अमरः । २करतादि- शब्दे च । कर्त्तरि-क्त । ३शब्दिते त्रि॰ ।

स्तनितफल पु॰ स्तनिते मेघशब्दे फलति फल-अच् । विक- ङ्कतवृक्षे राजनि॰ ।

स्तन्भ रोधने क्र्या॰ स्वा॰ प॰ सक॰ सेट् उदित् क्त्वा वेट् । स्तभ्नाति स्तभ्नोति इरित् अस्तभत् अस्तम्भीत् । इदित्यन्ये षोपदेश एव न्याय्यः सौत्रोऽयमित्यन्ये तेन न षोपदेशः ।

स्तन्य न॰स्तने भवम् यत् । स्तनजाते दुग्धे हेमच॰। [भूते च

स्तब्ध त्रि॰स्तम्भ-कर्मणि कर्त्तरि वा क्त । १जडीकृते २जडी

स्तब्धरोमन् पु॰ स्तब्धं रोमास्य । १शूकरे अमरः जडीकृत- रोमणि त्रि॰ स्त्रियां वा डाप् ङीप् च ।

स्तम्ब पु॰ स्था-अम्बच् किच्च पृषो॰ । काण्डरहिते भित्रिट- कादौ वृक्षे २तृणगुल्मे ३तृणादेः गुच्छे च अमरः ।

स्तम्बकरि पु॰ स्तम्बं गुच्छं करोति कृ-इन् । व्रीहिधान्ये अमरः । [न्मूलके खनित्रादौ अमरः ।

स्तम्बघन पु॰ स्तम्बो हन्यतेऽनेन हन-क नि॰ । स्तम्बो-

स्तम्बघ्न त्रि॰ स्तम्बो हन्यतेऽनेन हन-घञर्थे क । स्तम्बो- न्मूलके खनित्रादौ अमरः । स्तम्बहननमप्यत्र ।

स्तम्बपुर् स्त्री स्तम्बप्रधाना पूः न समासान्तः । ताम्रलिप्ते पुरभेदे हेमच॰ ।

स्तम्बेरम पुंस्त्री॰ स्तम्बे तृणादीनां काण्डे गुच्छे गुल्मे वा रमते रम-अच् अलुक्स॰। गजे अमरः स्त्रियां ङीष्॰।

स्तम्भ पु॰ स्तम्भ-अच् । (थाम) १स्थूणायाम् अमरः । भावे घञ् । २जाड्यभावे पु॰ ।

स्तम्भन पु॰ स्तम्भयति स्तम्भ-णिच् ल्यु । कन्दर्पस्य पञ्चसु बाणेषु मध्ये १बाणभेदे जटा॰, भावे ल्युट् । २जड़ीकरणे न॰। करणे ल्युट् । षट्कर्मान्तर्गते तन्त्रोक्ते ३अभिचारकर्मभेदे

स्तम्भित त्रि॰ स्तम्भ जाड्ये णिच्-कर्मणि क्त । जड़ीकृते

स्तरिमन् पु॰ स्तॄ-कर्मणि इमनिच् । तल्पे उणा॰ ।

स्तरी स्त्री स्तॄ-कर्मणि ई । धूमे हेमच॰ ।

स्तव पु॰ स्तु-अप् । १प्रशंसायाम् २स्तुतौ च ।

स्तवक पु॰ स्तु-वुन् स्था-अवक पृषो॰ वा । गुच्छे अमरः । २ग्रन्थपरिच्छेदे ३समूहे च मेदि॰ ।

स्तवेय्य पु॰ स्तु-एय्य । इन्द्रे उणा॰ ।

स्तावक त्रि० स्तु-ण्वुल् । स्तुतिकारके प्रशंसाकारके ।

स्तिमित न० स्तिम-भावे क्त । १आर्द्रतायाम् अमरः । २अचाञ्चल्ये च मेदि० कर्त्तरि क्त । ३अचञ्चले ४आर्द्रे च त्रि० ।

स्तिम्भि पु० स्तिम-इन् मुक् च । १समुद्रे २वायौ च उणा० ।

स्तीर्वि पु० स्तॄ-क्विन् न वेरित्त्वम् । १आकाशे २रुधिरे ३तृणजातौ ४अध्वर्य्यौ ५उयसि ६इन्द्रे संक्षिप्तसा० ।

स्तुत पु० स्तु-कर्मणि क्त । स्तुतिकर्मणि अमरः ।

स्तुति स्त्री स्तु-क्तिन् । स्तवे अमरः । [अमरः

स्तुतिपाठक पु० स्तुतिं पठति पठ-ण्वुल् । राजादेर्वन्दिनि

स्तुन्भ रोधने सौ० क्र्या० स्वा० कार्य्यभागी पर० सक० सेट् उदित् क्त्वावेट् । स्तुभ्नोति स्तुभ्नाति । अस्तुम्भीत् । सौत्रत्वादषोपदेश इत्यन्ये ।

स्तुतिव्रत पुं० स्तुतौ व्रतमस्य । स्तुतिपाठके जटा० । २६६८पृ० दृश्यम्

स्तुत्यर्थवाद पु० ६त० । प्रशंसया अर्थवादभेदे अर्थवादशब्दे

स्तुनक पुंस्त्री० स्तु-नकक् । छागे शब्दच० स्त्रियां ङीष् ।

स्तुभ पुंस्त्री० स्तुन्भ-मूल० क । छागे भरतः स्त्रियां ङीष् ।

स्तूप उच्छ्राये अद० चु० अक० उभ० सेट् । स्तूपयति ते अतुस्तूपत् त । बह्वच्कत्वात् अषोपदेश एव । ५१७२ पृष्ठे ष्टूप इति धातुः षोपदेशतया प्रमादात् लिखितः ।

स्तूप पु० स्तु-पक् पृषो० स्तूप-अच् वा । १राशीकृते मृत्तिकादौ २संघाते ३बले ४निष्प्रयोजने च संक्षिप्त० ।

स्तृ विस्तारे स्वा० उ० सक० अनिट् । स्तृणोति स्तृणुते अस्तार्षीत् अस्तृत अस्तरिष्ट । पर्युदासात् षोपदेशः ।

स्तृ प्रीतौ अक० रक्षणे सक० स्वा० प० अनिट् । स्तृणोति अस्तार्षीत् । पर्युदासेन अषोपदेश एव ।

स्तॄ आच्छादने क्र्या० पा० उ० सक० सेट् । स्तृणाति स्तृणीते अस्तारीत् अस्तरिष्ट अस्तरीष्ट अस्तीर्ष्ट । अयं षोपदेश एव न्याय्यः ।

स्तेन चौर्य्ये अद० चु० उभ० सक० सेट् । स्तेनयति-ते अतिस्तेनत्-त । बह्वच्कत्वात् अषोपदेशः ।

स्तेन न० स्तेन-भावे अच् । १चौर्य्ये । कर्त्तरि अच् । २चौरे त्रि० अमरः ।

स्ते(ष्टे)प क्षेपे चु० उभ० सक० सेट् । स्तेपयति-ते अतिष्टिपत्-त अषोपदेशत्वे मूलं चिन्त्यम् ।

स्तेम पु० स्तिम-घञ् । १आर्द्रीभावे २स्नेहे च अमरः ।

स्तेय न० स्तेनस्य भावः यत् नलोपः । १चौर्य्ये अमरः । "प्रत्यक्षं वा परोक्षं वा रात्रौ वा यदि वा दिवा । यत् परद्रव्यहरणं स्तेयं तत्परिकीर्त्तितम्" इत्युक्तेः परद्रव्यापहारः स्तेयं तच्च अष्टादशविवादान्तर्गतविवादपदभेदः तत्स्वरूपादिकं वीरमि० उक्तं चौरशब्दे २९६९ पृष्ठादौ दृश्यम् । [ङीप् ।

स्तेयिन् त्रि० स्तेयमस्त्यस्य इनि । परद्रव्यापहारके स्त्रियां

स्तैन(न्य) न० स्तेनस्य भावः अण्, ष्यञ् वा । १चौर्य्ये परद्रव्यापहरणे । स्तेन एव स्वार्थे ष्यञ् । २चौरे त्रि० भरतः ।

स्तैमित्य न० स्तिमितस्य भावः ष्यञ् । १जाड्ये २स्नेहे ३आर्द्रीभावे च । [२जलबिन्दौ ३अल्पे त्रि० अमरः ।

स्तोक पुंस्त्री० स्तुच-घञ् । १चातके मेदि० स्त्रियां ङीष् ।

स्तोकक पुंस्त्री० स्तोकाय जलबिन्दवे कायति शब्दायते कै-क । चातके अमरः स्त्रियां ङीष् ।

स्तोत्र न० स्तु-ष्ट्रन् । १स्तवे-गुणकर्मादिभिः प्रशंसने अमरः । "द्रव्यस्तोत्रं कर्मस्तोत्रं विधिस्तोत्रं तथैव च । तथैवाभिजनस्तोत्रं स्तोत्रमेतच्चतुर्विधम्" मत्स्यपु० १२२ अ० द्रव्याद्युपाधिकतया स्तवस्य चातुर्विध्यमुक्तम् । २स्तुतिसाधने वाक्ये स्तुतिश्च गुणिनमुपसर्जनीकृत्य तन्निष्ठानां गुणानां प्राधान्येन कथनरूपा ऋग्वेदभाष्ये लक्षिता । यथा यो देवदत्तः स चतुर्वेदाभिज्ञ इत्युक्ते सर्वे जनाः स्तुतिमवगच्छन्ति" यद्यपि ष्टुञ् स्तुतौ धातुः स्तुतावित्येकार्थौ तथापि प्रगीतमन्त्रसाध्यं स्तोत्रम् अप्रगीतमन्त्रसाध्यं शस्त्रमिति तयोर्विवेक इति च तत्रोक्ते प्रगीतमन्त्रसाध्ये ३स्तवने गुणकथने च । शस्त्रशब्दे प्रगीतमन्त्रे इति यदुक्तं तत्र अप्रगीतमन्त्रे इत्येव बोध्यम् । प्रगीतऋग्जातं शस्त्रमिति छ० उ० भाष्य० टीकायामानन्दगिरिणोक्तेः ४प्रगीते ऋग्जाते च ।

स्तोत्रिय त्रि० स्तोत्राय हिते य । स्तोत्रसाधने ऋगादौ "कत्ययमद्यास्मिन् यज्ञे स्तोत्रियाः स्तोष्यन्तीति तिस्र इति कतमास्तास्तिस्र इति पुरोऽनुवाक्या च याज्या शस्यैव च तृतीया इति" छ० उ० । "स्तोत्रिया नाम ऋक्सामसमुदायः" शा० भा० । "स्तोत्रिया नाम गीतिविशिष्टा ऋग्जातयः" शत० ब्रा० १४।६।१।१२ वाक्यव्याख्यायां सायणभाष्यम् । "यथोक्तस्य स्तोत्रं स्तोत्रियां वचं साम वा यजुर्वोऽथवान्यत् कृत्वा यजेत" कात्या० श्रौ० २४।७।२० "एकां स्तोत्रियामेकां ऋचामन्यां कुर्य्यात्" कर्कः ।

स्तोभ पु० स्तुभ-घञ् । १अर्थशून्ये गानादिस्वरपरिपूरणार्थे शब्दभेदे यथा सामवेदे हाउ होइ प्रभृतयः । २हेलने ३स्तम्भने च हेमच० ।

स्तोभलक्षणादिकं गानशब्दे २५७२ पृ० दृश्यम्। तच्च लक्षणं वर्णमात्रस्तोभस्य। वाक्यस्तोभस्य तु नव विधाः भवन्ति तदुक्तं "आशास्तिः स्तुतिसंख्याने प्रलापः परिदेवनम्। प्रैषमन्वेषणञ्चैव सृष्टिराख्यानमेव च" एते तु वाक्यस्तोभाः पदस्तोभाश्च पञ्चदश ग्रन्थेषु दर्शितास्तत एवावगन्तव्याः।

स्तोम श्लाघागुणाविष्करणे अद० चु० उभ० अक० सेट्। स्तोमयति—ते अतुस्तोमत्—त। बहुचकत्वात् न षोपदेशः।

स्तोम पु० स्तोम-अच् स्तु—मन् वा। १समूहे अमरः। २यज्ञे हेमच०। ३स्तवे ४स्तुतिभेदे ५मस्तके ६धने ७शस्त्रे ८लौहाग्रदण्डे च न० ९वक्रे त्रि०। "नाराशंसेन स्तोमेन" यजु० २१।५२ "अयं स्तोमान् पप्रथ" ऋ० १।१४।८

स्त्यान न० स्त्यै—भावे क्त तस्य नः। १स्नेहे २घनत्वे ३संहतौ ४आलस्ये ५प्रतिशब्दे च विश्वः। कर्त्तरि क्त। ६संहतिकारके ७ध्वनिकारके च त्रि०।

स्त्येन पु० स्त्यै—इनच्। १चोरे अमृते च उणा०।

स्त्यै संहतौ ध्वनौ भ्वा० अक० अनिट्। स्त्यायति अस्त्यासीत् पर्य्युदासान्न षोपदेशः।

स्त्री स्त्यै-ड्रट्। योषिति नार्य्याम् अमरः।

तद्भेदादिकं रतिम० उक्तं यथा

"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा। शशो मृगो वृषोऽश्वश्च स्त्रीपुंसोर्जातिलक्षणम्। भवति कमलनेत्रा नासिकाक्षुद्ररन्ध्रा अविरलकुचयुग्मा चारुकेशी कृशाङ्गी। मृदुवचनसुशीला गीतवाद्यानुरक्ता सकलतनुसुवेशा पद्मिनी१पद्मगन्धा। भवति रतिरसज्ञा नातिखर्वा न दीर्घा तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी। घनकठिनकुचाढ्या सुन्दरी बद्धशीला सकलगुणसमेता चित्रिणी२चित्रवक्त्रा। दीर्घातिदीर्घनयना वरसुन्दरी या कामोपभोगरसिका गुणशीलयुक्ता। रेखात्रयेण च विभूषितकण्ठदेशा सम्भोगकेलिरसिका किल शङ्खिनी३ सा। स्थूलाधरा स्थूलनितम्बभागा स्थूलाङ्गुली स्थूलकुचा सुशीला। कामोत्सुका गाढरतिप्रिया या नितम्बखर्वा करिणी४मता सा। शशके पद्मिनी तुष्टा चित्रिणी रमते मृगे। वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हये। पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी। शङ्खिनी क्षारगन्धा च मदगन्धा च हस्तिनी। बाला च तरुणी प्रौढा वृद्धा भवति नायिका। गुणयोगेन रन्तव्या नारी वश्या भवेत् तदा। आ षोडशाद् भवेद् बाला तरुणी त्रिंशका मता। पञ्चपञ्चाशका प्रौढा भवेद्वृद्धा ततः परम्। फलमूलादिभिर्बाला तरुणी रतियोगतः। प्रेमदानादिभिः प्रौढा वृद्धा च दृढताड़नात्। बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी। प्रौढा करोति वृद्धत्वं वृद्धा मरणमादिशेत्। अङ्गुष्ठे चरणे च गुल्फनिलये जानुद्वये वस्तिके नाभौ वक्षसि जङ्घयोर्निगदिता कण्ठे कपोलेऽधरे। नेत्रे कर्णयुगे ललाटफलके मौलौ च वामभ्रुवामूर्द्धचलनक्रमेण कथिता चान्द्री कला पक्षयोः। सीमन्ते नयनेऽधरे च गलके वक्षस्तटे चूचुके नाभौ श्रोणितटे मनोभवगृहे जङ्घातटे गल्फके। गुल्फे पादतले तदङ्गुलितटेऽङ्गुष्ठे च तिष्ठत्यसौ दक्षिणेतरतया समं शशिकला पक्षद्वयोर्योषिताम्। शुक्लपक्षे वसेद्वामे पादाङ्गुलिकनिष्ठके। शुक्लप्रतिपदादौ च कृष्णे चाधः प्रलम्बते। पुंसः सव्ये स्त्रियोऽवामे शुक्ले, कृष्णे विपर्य्ययः। एतानि कामस्थानानि ज्ञेयानि नागरैः सदा। वश्ययुक्ता यदा नारी विपरीतरतिर्भवेत्। अभ्यास्य तु कलास्थानं रन्तव्या कामिनी तदा। नेत्रे कक्षे कपोले च हृदि पार्श्वद्वयेऽपि च। ग्रीवायां नाभिदेशे च कामी चुम्बति कामिनीम्। मुखे जङ्घे नितम्बे च जघने मदनालये। स्तनयुग्मे सदा प्रीतः कामी चुम्बति कामिनीम्। प्रेम्णा स्त्रियं समालिङ्ग्य सीत्कारं मुखचुम्बनम्। कण्ठासक्तं पुनः कृत्वा गाढालिङ्गनमाचरेत्। विहस्य हस्तौ जघनोपविष्टः शीत्कृत्य वक्त्रे च मुदा प्रचुम्ब्य। भगे च लिङ्गं स्तनमर्दनञ्च दत्त्वापि कृत्वा प्ररमेच्च कामी। केतकपत्रवत् कृत्वा नखांस्त्रीन् पञ्च चैव वा। पृष्ठे च जघने योनौ दत्त्वा कामी रमेत् स्त्रियम्। नखरोमाञ्चितं कृत्वा दन्तेनाधरपीड़नम्। ग्रीवामाकृष्य यत्नेन योनौ लिङ्गेन ताड़नम्। लिङ्गप्रवेशनं कृत्वा धृत्वा गाढ़प्रयोगतः। पार्श्वद्वयेन सम्पीड्य निष्ठुरं ताड़येद्भगम्। समालिङ्ग्य स्त्रियं गाढं स्तनयुग्मे च मर्दनम्। योनौ नाभौ च संमर्द्य निष्ठुरं लिङ्गताड़नम्। केशं करेण संगृह्य दृढं सन्ताड़येद्भगम्। वदने चुम्बनं कृत्वा भगं हस्तेन मर्दयेत्। कुचं करेण संमर्द्य पीड़येदधरं दृढम्। रसेन पद्मबन्धेन पद्मिनीरतिमादिशेत्। सीत्कारं चुम्बनं पीड़ा गले हस्ते च चुम्बनम्। क्षणे क्षणे कृते कृत्वा चित्रिणीरति-

काद्दिशेत्। स्त्रीपुंसयोस्तथान्योन्यं भगे लिङ्गे च चुम्बनम्। रमयन्तु तथा गाढं गच्छेयो रतिमादिशेत्। केशं करेण संगृह्य सुदृढं गजबन्धनम्। भगं करेण सन्ताद्य हस्तिनीरतिमादिशेत्। कूर्मपृष्ठं गजस्कन्धं पद्मगन्धं सुगन्धि यत्। अलोमकं सुविस्तीर्णं यस्यैतद् भगमुत्तमम्। शीतलं निम्नमत्युच्चं गोजिह्वासदृशं परम्। इत्युक्तं कामशास्त्रज्ञैर्भगदोषचतुष्टयम्"।
स्त्रीशुभाशुभलक्षणन्तु उपयमशब्दे १२७८पृष्ठादौ दृश्यम्

स्त्रीगवी स्त्री० स्त्री चासौ गौश्च अच्समा०। (गाभि) रोहिण्याम्।

स्त्रीचित्तहारिन् पु० स्त्रियाश्चित्तं हरति हृ-णिनि। १गोभाञ्जने त्रिका०। २स्त्रीमनोहारके त्रि०।

स्त्रीचिह्न न० स्त्रिया असाधारणं चिह्नम्। १योनौ जटा०। २स्त्रिया असाधारणे चिह्ने स्तनादौ ३स्त्रीलक्षणे च।

स्त्रीचौर पु० स्त्रिया चौर इव। कामुके त्रिका०।

स्त्रीजित पु० स्त्रिया जितः जि-क्त। स्त्रैणे। "स्त्रीजितस्पर्शमात्रेण सर्वं पुण्यं प्रणश्यति। न भूमौ पातकी पापात् पापिनां स्त्रीजितात् परः" ब्रह्मवै० ज० ४अ० तस्य निन्दोक्ता।

स्त्रीधन न० ६त०। स्त्रीस्वत्वाश्रये द्रव्यमात्रे इति मिताक्षरादयः। "अध्यग्न्यध्यावाहनिकं भर्तृदायस्तथैव च। भ्रातृदत्तं पितृभ्याञ्च षड्विधं स्त्रीधनं स्मृतम्" नारदपरिगणिते स्त्रीस्वत्वाश्रये धने इति दायभागादयः। स्त्रीधनस्वरूपादिकं मिताक्षरामतानुसारेण वीरमित्रोदये निरूपितं यथा

"अथ स्त्रीधनविभागं वक्तुं तत्स्वरूपं तावन्निरूप्यते तत्र मनुः "अध्यग्न्यध्यावाहनिकं दत्तञ्च प्रीतिकर्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमिति" षड्विधमिति न्यूनसंख्याव्यवच्छेदपरं नाधिक्यनिरासाय। अत एव योगीश्वरेण "पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितम्, इत्याद्यशब्द उपात्तः। विष्णुनापि षडधिकानि स्त्रीधनान्युक्तानि। स यथाह "पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकं बन्धुदत्तं शुल्कमन्वाधेयमिति स्त्रीधनम्" इति। नारदः "अध्यग्न्यध्यावाहनिकं भर्तृदायस्तथैव च। भ्रातृदत्तं पितृभ्याञ्च षड्विधं स्त्रीधनं स्मृतमिति"। षड्विधत्वं मानववदेव व्याख्येयम्। स्त्रीधनशब्दश्चायं यौगिकः स्त्रीस्वामिकधनमिति न तु पारिभाषिकः योगसम्भवे परिभाषाया अन्याय्यत्वात्। अत एव योगीश्वरेण रिक्थक्रयादिसाधारणस्वत्वोपायसंग्रहायाद्यपदं प्रयुक्तम्। ननु च क्वचित् स्त्रीधनत्वनिषेधोऽनुपपन्न एवं सति स्यात्। न हि स्त्रीस्वामिकत्वं तत्र निषेद्धुं शक्यते बाधात्। यथाह कात्यायनः "तत्र सोपधि यद्दत्तं यच्च योगवशेन वा। पित्रा भ्रात्राऽथ वा पत्या न तत् स्त्रीधनमुच्यते इति। उपधिश्छलं प्रतारणमिदं मया दत्तं त्वया धार्य्यमलङ्कारादि नान्यदेति नियमस्तत्पूर्वकं दत्तं सोपधि योगवशेन दायादानां कन्यायै दत्तमिदं तत्कनकं विभाज्यमिति। शिल्पप्राप्तं सख्यादिभ्यः प्रीत्या प्राप्तं तदपि न स्त्रीधनमित्याह स एव "प्राप्तं शिल्पैस्तु यत्किञ्चित् प्रीत्या चैव यदन्यतः। भर्त्तुः स्वाम्यं तदा तत्र शेषन्तु स्त्रीधनं स्मृतम्" इति। पारिभाषिकत्वे भ्रात्रादिदत्तत्वेन प्राप्तं स्त्रीधनं प्रतिषिध्यते। तेनैतद्भिन्नमेव पित्रादिदत्तं शिल्पादिप्राप्तभिन्नं वा स्त्रीधनमिति परिभाष्यते इति चेत्। उच्यते। नात्र स्त्रीधनत्वनिषेधः। किन्तु तत्कार्य्यविभागादि निषेधः। अत एवोत्तरश्लोके तत्र भर्त्तुः स्वाम्यमित्युक्तम्। भर्त्तुस्तद्विनियोगे स्वातन्त्र्यञ्च स्त्रिया इत्यर्थः। प्रथमश्लोके तु स्वास्वत्वनिषेधोऽपि सम्भवति उपधियोगपदयोरुपादानात्। तादृशदाने च स्वत्वाभावस्य प्रसिद्धत्वात्। "योगाधमनविक्रीतं योगदानप्रतिग्रहम्। यत्र चाप्युपधिं पश्येत्तत्सर्वं विनिवर्त्तयेदिति" मनुवचनात् "भार्य्या पुत्त्रश्च दासश्च त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनमित्यपि वचनमस्वातन्त्र्यविषये शिल्पादिप्राप्तपरमेव एकमूलकल्पनालाघवात्। अध्यग्न्यादिस्वरूपञ्च निरूपितं कात्यायनेन "विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ। तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्त्तितम्। यत्पुनर्लभते नारी नीयमाना पितुर्गृहात्। अध्यावाहनिकञ्चाम स्त्रीधनन्तदुदाहृतम्। प्रीत्या दत्तं तु यत्किञ्चिच्छ्वश्र्वा वा श्वशुरेण वा। पादवन्दनिकञ्चैव प्रीतिदत्तं तदुच्यते। विवाहात्परतो यत्तु लब्धं भर्त्तृकुलात् स्त्रिया। अन्वाधेयन्तु तत्प्रोक्तं यल्लब्धं स्वकुलात्तथा। गृहोपस्करवाह्यानां दोह्याभरणकर्म्मणाम्। मूल्यं लब्धन्तु यत्किञ्चिच्छुल्कं परिकीर्त्तितम्। ऊढया कन्यया वापि पत्युः पितृगृहेऽपि वा। भ्रातुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम्"। भर्त्तुः

भोक्तव्यं गोदानमिति यावत्। अननुज्ञातत्यागभोगविषयमेतत्। तदनुज्ञया त्वनापद्यपि न दोषः “स्वयमेवेत्येवकारः स्वापत्यानां व्युदासार्थः। भर्तृव्युदासस्य पतिर्नार्हतीत्यनेनाभिधानात्। भर्तृव्युदासे ततो बहिरङ्गानां भ्रात्रादीनां व्युदासस्यापि दण्डापूपिकया सिद्धत्वात्। अनापदीत्यभिधानादापदि न दोषः। अतएव “पुत्रार्त्तिहरणे चापि स्त्रीधनं भोक्तुमर्हतीति” तस्यैव वाक्यशेषः। पतिरित्यनुषङ्गः। पुत्रग्रहणं कुटुम्बोपलक्षणं तस्यार्त्तिर्भक्ष्याद्यभावनिमित्ता पीड़ा तस्या हरणे। अयञ्चादर्श्यामापद्यपि धनाभावनिमित्ते सङ्कटे स्त्रीधनमननुज्ञातमपि पतिस्तद्ग्रहीतुं भोक्तुमर्हतीत्यर्थः। ननु परधने त्यागभोगयोः स्वाम्यनुज्ञया विना कथमर्हता बाधिताऽनेन बोध्यते। अनुज्ञायान्त्वनापद्यपि न विरोधः। उच्यते। वचनबलात्तादृशविषये व्यये स्वत्वमेव तस्य तस्मात्त्वदोषः। अतएव योगीश्वरोऽपि “दुर्भिक्षे धर्मकार्य्ये च व्याधौ सम्प्रतिरोधके। गृहीतं स्त्रीधनं भर्त्ता नाकामो दातुमर्हति”। धर्मकार्य्ये आवश्यके नित्ये नैमित्तिके च सम्प्रतिरोधके दण्डाद्यर्थं राजावरोधे सति। वाचस्पतिस्तु सम्प्रतिरोधक इति व्याधिविशेषणं कार्य्यानुष्ठानबाधके इति च तदर्थं इत्याह। नाकामो दातुमर्हतीत्यपि दारिद्र्यादिकृतदानासामर्थ्ये दुर्भिक्षादिगृहीतमवश्यं देयमेतावतैव वचनोपपत्तौ सामर्थ्येऽप्यदानमिच्छयेत्यस्य कल्पयितुमनर्हत्वात्। पतिग्रहणादापद्यपि पत्युरेव पत्नीधनग्रहणाधिकारः पतिदानस्येच्छया नान्यस्येति ध्येयम्। भर्त्ता दातुं प्रतिश्रुतं भार्य्यायै तस्मिन् मृते पुत्रादिभिस्तस्यै देयमित्याह स एव “भर्त्ता प्रतिश्रुतं देयमृणवत् स्त्रीधनं सुतैरिति”। सुतग्रहणं पौत्रप्रपौत्रयोरुपलक्षणमृणवदित्यभिधानात्। अनेन स्त्रीधने जीवन्त्यामस्यां सुतानां जन्मना स्वत्वेऽपि नास्ति विभाग इति गम्यते। एवं स्त्रीधनमुक्तम्”। दायभागमतं पारिभाषिकपरत्वपक्ष एव। अनयोर्युक्तायुक्तत्वं सुधीभिर्भाव्यम्। उत्तराधिकारिशब्दे ११०१ पृ० च तद्विभागो दृश्यः।

स्त्रीधव पु० स्त्रियं धुनाति धू–कच्। पुरुषे जटा०।

स्त्रीधर्म्म पु० ६त०। ऋतौ नारीकुसुमविकाशे रजसि हेमच०

स्त्रीधर्म्मिणी स्त्री स्त्रीधर्मोऽस्त्यस्या इनि। रजस्वलायां स्त्रियाम् अमरः।

स्त्रीपण्योपजीविन् पु० स्त्रीरूपेण पण्येन जीवति जीव–णिनि। धनं गृहीत्वा सम्भोगार्थमन्यस्मै स्त्रियं दत्त्वा तल्लब्धधनोपजीविनि।

स्त्रीपुंधर्म्म पु० स्त्रियाः पुंसश्च धर्मः तमधिकृत्य व्यवहारो वा। स्त्रीपुंसयोः यथाशास्त्राचाररूपे धर्मे तद्विषयके अष्टादशसु विवादपदेषु मध्ये विवादपदभेदे स्त्रीपुंसयोगोऽप्यत्र। वीर० तत् स्वरूपं यथा “तत्स्वरूपमाह नारदः “विवाहादिविधिः स्त्रीणां यत्र पुंसाञ्च कीर्त्यते। स्त्रीपुंसयोगसंज्ञं तद्विवादपदमुच्यते” इति। विवाहादिशब्देन स्त्रीपुंधर्मौ गृह्येते। अतएव मनुर्व्यवहारपदोद्देशकाले स्त्रीपुंधर्मौ विभागश्चेत्युद्दिश्य प्रतिज्ञापूर्वकं तेषां निरूपणं चकार “पुरुषस्य स्त्रियाश्चैव धर्म्ये वर्त्मनि तिष्ठतोः। संयोगे विप्रयोगे च धर्मान् वक्ष्यामि शाश्वतान्” इत्यादिना संयोगे अन्योन्यसन्निधाने विप्रयोगे देशतः कालतो वा व्यवधाने। शाश्वतान्नित्यान् अवश्यानुष्ठेयानिति यावत्। के ते धर्मा इत्याकाङ्क्षायामाह स एव “अस्वतन्त्राः स्त्रियः कार्य्याः पुरुषैः स्वैर्दिवानिशम्। विषयेषु च सज्जन्त्यः संस्थाप्या ह्यात्मनो वशे” इत्यादि। पुरुषैः भर्तृपुरुषैः। विषये दण्डहेतुभूतचापल्यादिविषये। नारदोऽपि “स्वातन्त्र्याद्विप्रणश्यन्ति कुले जाता अपि स्त्रियः। अस्वातन्त्र्यमतस्तासां प्रजापतिरकल्पयत्” इति। अतोऽन्यैरपि स्त्रीणामस्वातन्त्र्यं यथा भवति तथा कल्पयितव्यमित्याशयः। पुरुषेण स्त्री व्यभिचाराद्विशेषं रक्षणीया। तथा च हारीतः “एकव्रतसुकस्वभावात् परेन्द्रियोपहतत्वाच्च दुष्टाः कुलसङ्करकारिण्यो भवन्ति जीवति जारजः कुण्डो मृते भर्त्तरि गोलकस्तस्माद्गोपायीत जायायां रक्ष्यमाणायां नाशे कुलनाशः कुलनाशे तन्तुनाशस्तन्तुनाशे देवपितृयज्ञनाशो देवपितृयज्ञनाशे आत्मनाशः आत्मनाशे सर्वनाशः” इति। एकव्रतस्वभावात् स्त्रीणां एकभर्त्तृकेति नियमनाशात्। परेन्द्रियोपहतत्वात् परस्मिन् पुंसि इन्द्रियस्य मनसो रागादिना उपहतत्वात्। कुलसङ्करकारिण्यः सजातिस्वभावानुगत प्रजोत्पादनेन कुलसाङ्कर्य्यकारिण्यः। अतएव शङ्खलिखितौ “यस्मिन् भार्य्योऽर्पितः स्त्रीणामात्मैव तादृशं तमुत्पादयन्तीति”। तन्तुः पुत्रादिसन्ततिः। मनुरपि “सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः। द्वयोर्हि

प्रकाशादिति कल्पतरौ पाठः । अध्यग्न्यादिशब्दास्तु योगरूढ़ास्तादृशस्त्रीधनादावेव प्रयोगात् । गृहोपस्कर-वाह्यादीनां यन्मूल्यं कन्यापित्रादिभ्यो वरादिभ्यः कन्या-भरणरूपेण गृह्यते तच्छुल्कमिति मदनरत्ने व्याख्या-तम् । मिताक्षरायां तु यद्गृहीत्वा कन्या दीयते तच्छुल्कमित्युक्तम् । उभयत्रापि पित्रादीनां कन्याया इदमित्युद्देशो विवक्षितः अन्यथा तत्स्वत्वाभावेन स्त्रीधनत्वव्यपदेशत्वानुपपत्तेः । जीमूतवाहनेन तु कर्म-चारिणि पठित्वा गृहादिकर्मभिः शिल्पिभिस्तत्कर्म-करणे भक्त्यादिपरिरक्षार्थं स्त्रियै यदुत्कोचदानं तच्छु-ल्कं तदेव मूल्यं प्रकृत्यर्थत्वादिति व्याख्यातम् । पुनश्चोक्तम् "यदानेतुं भर्तृगृहे एतच्छुल्कं परिकीर्त्तितमिति" व्यासोक्तं वा । भर्तृगृहगमनार्थमुत्कोचादि यद्दत्तं तच्छुल्कमित्यर्थ इति । तदुभयमपि स्वा-भाविकं भवत्येव तस्या एव दत्तत्वादिति तत्र स्त्री-धनत्वव्यपदेशोऽन्यस्त्रीधनवत् सुगम एव । आधि-वेदनिकं त्वन्तरविवाहकाले पूर्वभार्यायै यद्दीयते । यदाह याज्ञवल्क्यः "अधिविन्नस्त्रियै दद्यादाधि-वेदनिकं समम् । न दत्तं स्त्रीधनं यासां दत्ते त्वर्द्धं प्रकल्पयेत्" इति । पित्रादिभिर्ज्ञातिमात्रैर्यं स्त्रीभ्यो धनदाने विशेषमाह कात्यायनः "पितृमातृपति-भ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै । यथाशक्त्याद्विसा-हस्राद्दातव्यं स्थावरादृते" । स्थावरेतरधनं यथाशक्ति काकिण्यादिपणसहस्रद्वयपर्य्यन्तं देयमित्यर्थः । व्यासोऽपि "द्विसहस्रः परो दायः स्त्रियै देयो धनस्य तु" । आद्वि-सहस्रादिति कात्यायनेन, पर इति च व्यासेनोक्तो-ऽधिकमिति धनिनापि न स्त्रीभ्यो देयमिति दर्शितम् । अयञ्च नियमः प्रतिवत्सरमपकर्षेण देयसो-पानेकवत्सरेषु जीवनार्थं दीयमानमितोऽधिकमपि भवति चेन्न दोषः । जीवनार्थत्वाद्दानस्य तावज्जीवन-दिवाहरणमात्रेण तन्निवर्त्तिवाद्व्यवधानात् । स्त्रीधनेऽपि भर्त्तुरनुमत्यन्तरेण स्त्रीणाम् स्वातन्त्र्यमित्याह मनुः "न निर्हारं स्त्रियः कुर्य्युः कुटुम्बाद्बहुमध्यगात् । स्वकादपि च वित्ताद्धि स्वस्य भर्त्तुरनाज्ञया" इति निर्हारो व्ययः । क्वचित् स्त्रीधने तासां स्वातन्त्र्य-मपि यदाह सौदायिकमधिकृत्य कात्यायनः "सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते । यस्मात्तदानृशंस्यार्थं तैर्दत्तमुपजीवनम् । सौदायिके

सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम् । विक्रये दाने च यथेष्टं स्थावरेष्वपि" । भर्त्तृदत्ते तु स्थाव-रेतरस्यैव स्वातन्त्र्यमित्याह नारदः "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत् । सा यथा काम-मश्नीयाद्दद्याद्वा स्थावरादृते" । स्थावरे भर्त्तृदत्ते स्त्रिया निवासाद्युपभोगमात्रं न दानविक्रयादिकमित्यर्थः । अपुत्रा शयनं भर्त्तुरित्यादि कात्यायनवचोऽपि भर्त्तृ-दत्तस्थावरविषयमित्थं नारदैकवाक्यतयेति केचित् । अस्माभिस्तु पत्नी दुहितर इति व्याख्यानावसरेऽस्य विषयः प्रपञ्चितः । पुरुषाणामपि कस्मिन्नपि स्त्रीधने न स्वातन्त्र्यं स्वाम्याभावादित्याह कात्यायनः "न भर्त्ता नैव च सुतो न पिता भ्रातरो न च । आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः । यदि त्वेकतरो-ऽप्येषां स्त्रीधनं भक्षयेद्बलात् । सवृद्धिकं स दाप्यः स्याद्दण्डञ्चैव समाप्नुयात् । तदेव यद्यनुप्राप्य भक्षयेत् प्रीतिपूर्वकम् । मूल्यमेव तदा दाप्यो यदा स धनवान् भवेत् । अथ चेत् स द्विभार्य्यः स्यान्न च तां भजते पुनः । प्रीत्या विसृष्टमपि चेत् प्रतिदाप्यः स तद्बलात् । ग्रासाच्छादनवासानामुच्छेदो यत्र योषितः । तत्र स्वमा-ददीत स्त्री विभागं रिक्थिनां तथा" । स्त्रिया धनं गृहीत्वा यद्यपरभार्य्यया सह वसत्येनामवमन्यते तदा गृहीतं तद्धनं राज्ञा बलाद्दाप्यः । भक्ताच्छा-दननिवासान् यदि भर्त्ता न ददाति तदा तेऽपि स्त्रिया दत्ताद्याहर्त्तव्यास्तद्योग्यं धनं वा ग्राह्यमिति श्लोकद्वयार्थः । इदमपि तस्या दोषराहित्ये बोध्यं दुष्टा पुनः किमपि स्त्रीधनं न लभते इत्याह स एव "अपकारक्रियायुक्ता निर्लज्जा चार्थना-शिका । व्यभिचाररता या च स्त्रीधनं न तु सा-र्हति" । नार्हतीत्यनेन तया लब्धमप्याक्षिप्य ग्राह्य-मिति सूचितम् । अपकारक्रियायुक्ता सदा भर्त्तृप्रतिकूला-चरणपरा "निर्मर्य्यादार्थनाशिका" इत्यपि पाठः । देवलः "वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत् । भोक्त्री तत् स्वयमेवेदं पतिर्नार्हत्यनापदि । वृथा मोक्षे च भोगे च स्त्रियै दद्यात् सवृद्धिकम्" इति । वृत्ति-र्जीवनार्थं पित्रादिना दत्तमिति स्मृतिचन्द्रिकायाम् । मदनरत्ने तु वर्त्तिरिति पठितम् । वृत्तिर्जीवनार्थं पित्रादिभिर्दत्तमिति व्याख्यातम् । लाभो गौष्ठीदि-प्रीत्यर्थं यल्लभ्यते कुतश्चित् । वृथा व्यापदमन्तरेण ।

कुलयोः शोकमावहेयुररक्षिताः । इमं हि सर्ववर्णानां पश्यन्तो धर्म्ममुत्तमम् । यतन्ते रक्षितुं भार्य्यां भर्त्तारो दुर्ब्बला अपि । स्वां प्रसूतिं चरित्रञ्च कुलमात्मानमेव च । स्वञ्च धर्म्मं प्रयत्नेन जायां रक्षन् हि रक्षति” इति । द्वयोः कुलयोः भर्तृपितृकुलयोः । अनेन कुलद्वयदुःखैरपि रक्ष्या इति शोककथनमुखेन दर्शितम् । अतएव वृहस्पतिः “स्वल्पेभ्योऽपि प्रसङ्गेभ्यो निवार्य्या स्त्री स्वबन्धुभिः । श्वश्र्वादिभिः पालनीया गुरुस्त्रीभिर्दिवानिशम्” । मनुरपि “कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः । मृते भर्त्तरि पुत्त्रस्तु वाच्यो मातुररक्षिता” इति । काले कन्यादानयोग्ये काले । वाच्यो निन्द्यः । अनुपयन् अनुगच्छन् । स एव “पिता रक्षति कौमारे भर्त्ता रक्षति यौवने । पुत्त्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति” । याज्ञवल्क्योऽपि “रक्षेत् कन्यां पिता, विन्नां पतिः, पुत्त्रस्तु वार्द्धके । अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियाः” इति । विन्ना विवाहिता । पतिपुत्त्रविहीनायास्तु रक्षणं पतिपक्षान्तर्गतेन प्रत्यासन्नेन कार्य्यम् । तथा च नारदः “मृते भर्त्तर्य्यपुत्त्रायाः पतिपक्षः प्रभुः स्त्रियः । विनियोगात्मरक्षासु भरणे च स ईश्वरः । परिक्षीणे पतिकुले निर्म्मनुष्ये निराश्रये । तत्सपिण्डेषु वासत्सु पितृपक्षः प्रभुः स्त्रियः” । पितृपक्षस्याप्यभावे स एवाह “पक्षद्वयावसाने तु राजा भर्त्ता स्मृतः स्त्रियः । स तस्या भरणं कुर्य्यान्निगृह्णीयात् पथश्च्युताम्” इति । विनियोगः कर्म्मणि नियोजनम् । भर्त्ता पोषकः स्त्रीस्वभावं दर्शयति दक्षः “जलौकावत् स्त्रियः सर्व्वा भूषणाच्छादनाशनैः । सुहितापि कृता नित्यं पुरुषं ह्यपकर्षति । जलौका रक्तमादत्ते केवलं सा तपस्विनी । इतरा तु धनं वित्तं मांसं वीर्य्यं बलं सुखम् । साशङ्का बालभावे तु यौवनेऽभिमुखी भवेत् । तृणवन्मन्यते नारी वृद्धभावे स्वकं पतिम् । स्वकार्य्ये वर्त्तमाना सा स्नेहाच्च निवारिता । अपथ्या तु भवेत् पश्चाद् यथा व्याधिरुपेक्षितः” इति । सुहिता तृप्ता कृतापीत्यन्वयः । अपकर्षति सततमाक्रामति करोति स्वकार्य्ये स्वेच्छायाम् । अपथ्या अर्थानाहितहेतुभूता । मनुरपि “नैता रूपं प्रतीक्षन्ते नासां वयसि संस्थितिः । सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते ॥ पौंश्चल्याच्चलचित्ताच्च नैःस्नेह्याच्च स्वभावतः । रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्व्वते ॥ शय्यासनमलङ्कारं कामं क्रोधमनार्ज्जवम् । द्रोहभावं कुचर्य्याञ्च स्त्रीभ्यो मनुरकल्पयत् ॥ नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्म्मे व्यवस्थितिः । निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः ॥ तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि । स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः ॥ यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता । तन्मे रेतः पिता वृङ्क्तामित्यस्यैतन्निदर्शनम् ॥ ध्यायत्यनिष्टं यत्किञ्चित् पाणिग्राहस्य चेतसा । तस्यैष व्यभिचारस्य निह्नवः सम्यगुच्यते ॥ एवं स्वभावं ज्ञात्वाऽऽसां प्रजापतिनिसर्गजम् । परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति” इति । निरिन्द्रिया निर्वीर्य्या धैर्य्यप्रज्ञादिरहिता इति यावत् । स्त्रियोऽनृतमिति प्रायशोऽनृतवदनशीलत्वादुच्यन्ते । श्रुतयः श्रुतिवाक्यानि । निगमेषु वेदेषु स्त्रीलक्षणं स्वरूपं तासां श्रुतीनां मध्ये या निष्कृतिरूपा व्यभिचारप्रायश्चित्तरूपास्ताः श्रुतीः शृणुत स्त्रीस्वभावज्ञानार्थमित्यर्थः । महाभारतेऽपि “कुलीना रूपवत्यश्च नाथवत्यश्च योषितः । मर्य्यादासु न तिष्ठन्ति स दोषः स्त्रीषु नारद ! ॥ अनर्थित्वान्मनुष्याणां भयात् परिजनस्य च । मर्य्यादायाममर्य्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु ॥ यौवने वर्त्तमानानां मृष्टाभरणवाससाम् । नारीणां स्वैरवृत्तीनां स्पृहयन्ति कुलस्त्रियः ॥ यदि पुंसां गतिर्ब्रह्मन् ! कथञ्चिन्नोपपद्यते । अन्योन्यस्य प्रवर्त्तन्ते न च तिष्ठन्ति भर्तृषु ॥ अलाभात् पुरुषाणाञ्च भयात् परिजनस्य च । वधबन्धभयाच्चैव स्वयं गुप्ता भवन्ति ताः ॥ नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः । नान्तकः सर्व्वभूतानां न पुंसां वामलोचना ॥ कामानामपि दातारं दातारं मानसान्त्वयोः । रक्षितारं न मृष्यन्ति भर्त्तारं यत्नतः स्त्रियः” इति । श्रीरामायणेऽपि “नैवाङ्गनानां दयितो नापि द्वेष्योऽस्ति कश्चन । सर्व्वमेवावलम्बन्ते लता गहनजा इवेति” । अथ रक्षणप्रकारः । तत्र मनुः “न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम् । एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम्” इति । प्रसह्य आक्रम्य अवरुद्धेति यावत् । यद्यप्यवरोधेन शरीरव्यभिचाररक्षणं शक्यं तथापि मानसव्यभिचाराद्रक्षणमशक्यमित्याशयेन मनुना न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुमित्युक्तम् । न च मानसव्यभिचाराद्रक्षणमनर्थकमन्यजत्वाभावेन गर्भविशुद्धिविघाताभावादिति वक्तव्यम् । यत आह स

एव "यादृशं भजते स्त्री हि सुतं सूते तथाविधम्। तस्मात् प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत् प्रयत्नतः" इति। यादृशं पुरुषमृतुकाले स्त्री मनसा भजते तत्समानशीलं पुत्रं जनयतीति पूर्वार्द्धार्थः। अतएवाहतुः शङ्खलिखितौ "यथान् भावोऽपि तः स्त्रीणामात्मैव तच्छीलं जनयन्तीति"। मानसव्यभिचारादपि स्त्रियं रक्षेदिति शेषः। तथा च मनुना तस्मादित्यादिनोत्तरार्द्धेनायमेवार्थो दर्शितः। परिरक्षणोपायमाह मनुरेव "अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत्। शौचे धर्मे च पक्त्र्यां च पारिणाह्यस्य चेक्षणे" इति। अर्थस्य संग्रहे स्वेन समानीतार्थसंविधाने। व्यये स्वेनोक्तव्यये। शौचे गृहादेः शुद्धकरसंमार्जनोपलेपनादौ। धर्मे अग्निहोत्राद्यनुकूललौकिकव्यापारे। पक्त्र्यां पाकव्यापारे। पारिणाह्यं पीठादि गृहोपकरणं तस्य वेक्षणे विचारणे। निरन्तरगृहव्यापारनियोजनात् पुरुषान्तरचिन्ताराहित्यं यथा भवति भार्यायाः तथा कुर्यादिति तात्पर्यार्थः। बृहस्पतिरपि "आयव्ययेऽर्थसंस्कारे गृहोपस्कररक्षणे। शौचाग्निकार्य्ये संयोज्याः स्त्रीणां शुद्धिरियं स्मृता" इति। एवंविधव्यापारासक्तचित्ततया साध्व्य इति व्यपदिश्यन्ते इत्याह मनुः "आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः" इति। आत्मना गृहव्यापारासक्तेनान्तःकरणेन सुरक्षिताः साध्व्यः। आप्तपुरुषरक्षितास्तु स्त्रियो न सम्यग्रक्षिता इत्याह स एव "अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः" इति। आप्तकारिभिः पुरुषैः गृहे रुद्धा इत्यन्वयः। आप्ताश्च ते कारिणश्चाप्तकारिणः। अरक्षिताः सम्यग्रक्षाविहीना इत्यर्थः। भर्त्तुर्दसंनिष्ठत्वमपि स्त्रीणां रक्षणोपाय इति दर्शयितुं स एवाह "यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि। तादृग्गुणा सा भवति समुद्रेणेव निम्नगा। अक्षमाला वसिष्ठेन संयुक्ताऽधमयोनिजा। शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम्" इति। भार्याया भरणमप्यावश्यकमित्याह स एव "देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः। तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन्"। देवैर्दत्ता देवदत्ता देववशादायातेति यावत्। तां भार्यां स्वयंवरे पतिर्विन्दते। तत्र स्वव्यापाराभावाद्देवदत्तामित्यनेन विवाहलक्षणस्य स्त्रीपुंसयोः सम्बन्धस्य न स्वाधीनत्वं किन्तर्हि दैवकृतत्वमिति दर्शितम्। देवदत्तत्वञ्च "सोमोऽददद्गन्धर्वाय गन्धर्वो ददद्ग्नये। रयिञ्च पुत्रांश्चादादग्निर्मह्यमथो इमाम्" इत्यादिभ्यः श्रुतिवाक्येभ्योऽवगम्यते। तेन देवैर्दत्ताया अभरणेन दातॄणां देवानां द्रोह आपद्येत इत्यर्थवाद इत्युक्तं मदनरत्ने। न च साध्वीमित्यस्य पतिव्रतामित्यर्थपरत्वेन व्यभिचारिण्या भरणमनावश्यकमिति वक्तव्यम्। तस्या अपि कदन्नादिनाऽवश्यभरणीयत्वात्। तथा च नारदः "व्यभिचारे स्त्रिया मौण्ड्यमधःशयनमेव च। कदन्नञ्च कुवासश्च कर्म चावस्करोज्झनम्" इति। स्त्रिया अत्यर्थं व्यभिचारे जाते मुण्डनमधःशयनञ्च कारयेत्। कदन्नं कुवासश्च भरणार्थं दद्यात्। अमेध्यशोधनरूपं कर्म कारयेदित्यर्थः। दोषरहिताया भार्यायाः परित्यागिनं प्रत्याह नारदः "अनुकूलामवाग्दुष्टां दक्षां साध्वीं प्रजावतीम्। त्यजन् भार्यामवस्थाप्यो राज्ञा दण्डेन भूयसा" इति। विष्णुरपि "निर्दोषां परित्यजन् पत्नीमिति" चौरवच्छास्य इत्यनुषङ्गः। निर्दोषां त्यागहेतुभूतदोषरहिताम्। दण्डेन स्थापयितुमशक्ये त्वाह योगीश्वरः "आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम्। त्यजन् दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियः" इति। तृतीयांशमनतृतीयांशम्। राज्ञा भार्याया दाप्यः। अल्पधनः भरणमात्रपर्याप्तं धनं दाप्य इत्यर्थः"।

स्त्रीपुंस पु० द्वि० स्त्री च पुमांश्च अच्समा०। मिलितयोः स्त्रीपुरुषयोः।

स्त्रीपुंसलक्षणा स्त्री स्त्रीपुंसयोर्लक्षणमस्याम्। स्तनश्मश्रुप्रभृतिस्त्रीपुरुषचिह्नधारिण्यां स्त्रियाम् पोटायाम् अमरः

स्त्रीप्रिय पु० ६त०। १आम्रवृक्षे त्रिका०। २नारीप्रियमात्रे त्रि०

स्त्रीमुखप पु० स्त्रीमुखं पाति पा—क। दोहदवृक्षार्थे राजनि०।

स्त्रीरोग पु० ६त०। स्त्रीणां रोगे योनिरोगादौ सुश्रुतः।

स्त्रीलिङ्ग पु० स्त्रिया इव लिङ्गं तत्कार्य्यं यस्य। स्त्रीलिङ्गविहितव्याकरणोक्तसंस्कारयुक्ते शब्दभेदे। ६त० स्त्रीचिह्ने स्तनादौ न०।

स्त्रीवश्य पु० ६त०। स्त्रीवशीभूते।

स्त्रीविधेय पु० ६त०। स्त्रीवशीभूते।

स्त्रीसंग्रहण न० स्त्रियाः संग्रहणं यत्र। परस्त्रीहरणरूपे विवादपदभेदे। तत्स्वरूपादिकं वीरमि० दर्शितं यथा "अथ स्त्रीसंग्रहणाख्यं व्यवहारपदम्। तस्य त्रैविध्यमाह बृहस्पतिः ""पापमूलं संग्रहणं त्रिप्रकारं

निबोधत । बलोपधिकृते द्वे तु तृतीयमनुरागजम्” इति । एतेषां स्वरूपं दर्शयति स एव “अनिच्छन्त्या यत् क्रियते सुप्तोन्मत्तप्रमत्तया । विलपन्त्या वा रहसि बलात्कारकृतन्तु तत् । छद्मना गृहमानीय दत्त्वा वा मदकारणम् । संयोगः क्रियते यत्र तदुपधिकृतं विदुः । अन्योन्यस्यानुरागेण दूतीसंप्रेषणेन वा । कृतं रूपार्थलोभेन ज्ञेयं तदनुरागजम्” इति । अनुरागजसंग्रहस्य त्रिविधत्वं दर्शयति स एव “तत्पुनस्त्रिविधं प्रोक्तं प्रथमं मध्यमोत्तमम्” इति । व्यासोऽपि “संग्रहस्त्रिविधो ज्ञेयः प्रथमो मध्यमस्तथा । उत्तमश्चेति शास्त्रेषु लक्षणं च पृथक् पृथक्” इति । एतेषां स्वरूपमाहतुर्व्यासबृहस्पती “कटाक्षावेक्षणं हास्यं दूतीसंप्रेषणं तथा । स्पर्शो भूषणवस्त्राणां प्रथमः संग्रहः स्मृतः । प्रेषणं गन्धमाल्यानां फलधूपान्नवाससाम् । सम्भाषणञ्च रहसि मध्यमं संग्रहं विदुः । एकशय्यासनं क्रीड़ा चुम्बनालिङ्गनं तथा । एतत् संग्रहणं प्रोक्तमुत्तमं शास्त्रवेदिभिः” इति । स्त्रीसंग्रहणस्य ज्ञानोपायमाह याज्ञवल्क्यः “पुमान् संग्रहणे ग्राह्यः केशाकेशि परस्त्रिया । सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा” इति । परभार्यया सह केशाकेशि क्रीड़नेन सद्यः अभिनवैः कामजैः करजदशनादिक्षतव्रणादिचिह्नैर्द्वयोः सम्प्रतिपत्त्यावयं स्त्रीसंग्रहणवान् इति प्रतिपत्तव्य इत्यर्थः । उपायान्तरमाह स एव “नीवीस्तनप्रावरणसक्थिकेशावमर्शनम् । अदेशकालसम्भाषः सहैकस्यासनेव च” इति । कुर्वाण इति शेषः सक्थि ऊरुः । मनुरपि “स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत् तया । परस्परस्यानुमते सर्वं संग्रहणं स्मृतम्” । यस्तु दर्पादिना मयेयं भुक्तेति वदति सोऽपि तथाविधत्वेन ग्राह्य इत्याहतुर्मनुनारदौ “दर्पाद्वा यदि वा मोहात् श्लाघया वा स्वयं वदेत् । पूर्वं मयेयं भुक्तेति तच्च संग्रहणं स्मृतम्” इति । बलात्कारकृतस्य स्त्रीसंग्रहणस्य साहसान्तर्भूतत्वेन तत्रैव दर्शितत्वादुपधिकृते दण्डमाह बृहस्पतिः “दर्पाद्वा कामयेद्यस्तु तस्य सर्वहरो दमः । अङ्कयित्वा भगाङ्केन पुरान्निर्वासयेत्ततः” इति । सर्वहरः सर्वस्वहरः एतत् सजातीयविषयम् । हीनोत्कृष्टगमने तु क्रमेणार्द्धं धनं सर्वस्वहरणरूपो वधसहितसर्वस्वहरणरूपो वा दण्डोऽवगन्तव्यः । “दमानेयः समायान्त्विति” साहसवादनिरूपण-

दर्शितवचनात् । तत्र वचने पुरुषस्यापकर्षाभावे युक्तो दण्डो न स्त्रिया इति नोक्तस्तस्याः दण्डः, तेन साहसस्त्रीसंग्रहणवत् प्रकृतेऽपि सजातीयापभुक्तायाः सव्यवहार्यायाः प्रायश्चित्ताचरणानन्तरं पुनरपि तेनोपभुक्ताया इति ज्ञातव्यमित्युक्तं मदनरत्ने । अनुरागजत्रिविधसंग्रहणे दण्डमाह स एव “त्रयाणामपि चैतेषां प्रथमो मध्यमोत्तमौ । विनयः कल्पनीयः स्यादधिकोद्र्धिकाधिकः” इति । अधिकः प्रथमसाहसादिभ्योऽधिकः । सम्भोगे दण्डमाह याज्ञवल्क्यः “सजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः । प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्त्तनम्” इति । चतुर्णामपि वर्णानां बलात्कारेण सजातीयपरभार्यागमने साशीतिपणसहस्रो दण्डः । यदा त्वानुलोम्येन हीनजातीयागमनं तदा मध्यमसाहसः, उत्कृष्टजातीयागमने गन्तुर्वधः । तस्याः कर्णादिकर्त्तनमित्यर्थः । एतच्चानुरागजसंग्रहविषयं स्त्रिया अपि दण्डाभिधानात् । बलात्कारोपधिकृतयोस्तु स्त्रिया अनपराधत्वेन दण्डाभावात् । अस्मादेव प्रातिलोम्येन गमने पुरुषस्य वधं विधाय स्त्रियास्तदर्द्धतुल्यकर्णनासादिकर्त्तनविधानात् सजातीयागमने पुरुषस्य यावुक्तावुत्तममध्यमसाहसौ दण्डौ तदर्द्धं स्त्रिया दण्ड इति सूचितम् । अतएव कात्यायनः “सर्वेषु चापराधेषु पुंसो योऽर्थदमस्तथा । तदर्द्धं योषितां दद्युर्वधे पुंसोऽङ्गकर्त्तनम्” । इति । स्त्रिया इति शेषः । यदा पुनः सवर्णामगुप्तां आनुलोम्येन गुप्तां वा व्रजति तदा विशेषमाह मनुः “सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद् व्रजन् । शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः । सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन् । शूद्रायां क्षत्रियविशोः साहस्रन्तु भवेद्दमः” इति । ते क्षत्रियवैश्यौ । एतच्च गुरुसखिभार्यादिव्यतिरिक्तविषयम् । तत्र दण्डान्तरविधानात् । तदाह नारदः “माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा । पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा । दुहिता चार्यभार्या च सगोत्रा शरणागता । राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या । शिश्नस्योत्कर्त्तनात्तत्र नान्यो दण्डो विधीयते” इति । यत्तु प्रातिलोम्येन गमने क्षत्रियादेः पुरुषस्य वध इत्युक्तं योगीश्वरवचने । तदगुप्ताविषयमन्यथाऽर्थदण्डः । तथा च मनुः “उभावपि हि तावेव ब्रा-

ज्ञात्या-गुप्तया सह । विप्रौ तौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना । ब्राह्मणीं यद्यगुप्तान्तु सेवेतां वैश्यपार्थिवौ । वैश्यं पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम्" इति । पञ्चशतस्य पणशतपञ्चकदण्डभाजमित्यर्थः । एवं सहस्रिणमित्यत्रापि । क्षत्रियस्य गुप्तवैश्यागमने वैश्यस्य च गुप्तक्षत्रियागमने क्रमेण पणसहस्रपणशतपञ्चकं तयोर्दण्ड इत्याह स एव "वैश्यश्चेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् । यो ब्राह्मण्यामगुप्तायान्तावुभौ दण्डमर्हतः" इति । शूद्रस्यानुलोमोत्कृष्टस्त्रीगमने लिङ्गच्छेदनसर्वस्वापहरणे गुप्तागमने तु वधसर्वस्वापहारौ । तथा च स एव "शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमाचरन् । अगुप्तमङ्गसर्वस्वो गुप्तं सर्वेण हीयते" इति । अयञ्च वधाद्युपदेशः प्रजापालनाधिकाराद्राज्ञ एव न द्विजातिमात्रस्य । "ब्राह्मणः परीक्षार्थमपि शस्त्रं नाददीतेति" शस्त्रग्रहणस्य निषिद्धत्वात् । यदा तु राज्ञो निवेदने कालविलम्बेन कार्य्यातिपातस्तदा द्विजातिमात्रस्यापि शस्त्रग्रहणेऽधिकारोऽस्त्येव "शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते । नाततायिवधे दोषो हन्तुर्भवति कश्चन । प्रच्छन्नं वा प्रकाशं वा मन्युस्तं मन्युमृच्छति" इति शस्त्रग्रहणाभ्यनुज्ञानात् । परस्त्रिया सह सम्भाषण कर्त्तुर्दण्डमाह मनुः "परस्य पत्न्या पुरुषः सम्भाषां योजयन् रहः । पूर्वमाक्षारितो दोषैः प्राप्नुयात् पूर्वसाहसम्" इति । आक्षारितः अभिशस्तः । दोषैः नानास्त्र्युपभोगवाञ्छाभिः । पापबुद्ध्या यः सम्भाषणं करोति तद्विषयमेतत् । अतएव "यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणात् । न दोषं प्राप्नुयात् किञ्चिन्न हि तस्य व्यतिक्रमः" इति । मनुबृहस्पत्युक्तपूर्वसाहसमध्यमसाहसयोरुत्कृष्टसजातीयासम्भाषणादिविषयत्वेन व्यवस्था परिकल्पनीया । परपुरुषेण सह पित्रादिभिः निषिद्धं सम्भाषणं या करोति सा पणशतं दण्ड्या परस्त्रिया सह पित्रादिभिर्निषिद्धसम्भाषणं यः पुरुषः करोति पणशतद्वयं दण्डनीयः । द्वयोरपि निषिद्धपरस्परसम्भाषणादि कुर्वतोः सम्भोगे यो दण्डः स एव दण्ड इत्याह याज्ञवल्क्यः "स्त्री निषेधे शतं दद्याद्द्विशतन्तु दमं पुमान् । प्रतिषेधे तयोर्दण्डो यथा सङ्ग्रहणे तथा" इति । निषिध्यत इति निषेधः कर्म्मणि हलश्चेति घञ् । चारणादिस्त्रीव्यतिरिक्तविषयमेतत् "नैष चारणदारेषु विधिर्नात्मोपजीविषु । सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च" इति मनुस्मरणात् नटाः आत्मोपजीविनः वेशोपजीविनः । एतेषां दारेषु एष विधिः अभिभाषणादिनिमित्तकदण्डविधिर्न । परनरे नारीः स्वभार्य्याः सज्जयन्ति पुरुषान्तरे संयोजयन्ति प्रच्छन्नीकृत्य चारयन्ति चेत्यर्थः । साधारणस्त्रीगमने दण्डमाह याज्ञवल्क्यः "अवरुद्धासु दासीषु भुजिष्यासु तथैव च । गम्यास्वपि पुमान् दाप्यः पञ्चाशत्पणिकं दमम्" इति । स्वामिना या शुश्रूषार्थं गृहे एव स्थातव्यमित्येवं पुरुषान्तरोपभोगतो निरुद्धास्ताः अवरुद्धाः । पुरुषान्तरेणावरुध्य भुज्यमाना भुजिष्याः या दास्यो भुजिष्या अवरुद्धा वा तासु सर्वपुरुषगम्यास्वपि गमने पञ्चाशत्पणं दण्डः तासामपरपरिगृहीतत्वेन परस्त्रीतुल्यत्वात् । चशब्दाद्वेश्यास्वैरिणीनामपि ग्रहणम् । तास्वपि सर्वपुरुषसाधारणीषु परपरिगृहीतासु गमनेऽयमेव दण्ड इति मन्तव्यम् । एतदेवाभिप्रेत्याह नारदोऽपि "स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च या । गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः । आस्वेव तु भुजिष्यासु दोषः स्यात् परदारवत् । गम्यास्वपि हि नोपेयाद्यत्ताः परपरिग्रहाः" इति । अब्राह्मणीति स्वैरिण्या विशेषणम् । स्वैरिणी स्वतन्त्रा पुंश्चली । निष्कासिनी कुटुम्बान्निर्गतेति मदनरत्ने । स्वाम्यनवरुद्धा दासीति विज्ञानेश्वरमाधवाचार्य्यप्रभृतयः । भुजिष्यास्वास्वेति सम्बन्धः । व्यासोऽपि "परोपरुद्धागमने पञ्चाशत्पणिको दमः । प्रसह्य वेश्यागमने दण्डो दशपणः स्मृतः" इति । प्रसह्य वेतनदानं विना अनवरुद्धासु वेश्यादिषु गम्यत्वाभिधानञ्च पापाभावप्रतिपादनार्थं किन्तु राजदण्डाभावप्रतिपादनार्थम् । "पशुवेश्यादिगमने प्राजापत्यं विधीयते" इत्यादिवचनैः प्रायश्चित्तकरणात् । बलात्कारेण अनवरुद्धदास्यभिगमने दण्डमाह याज्ञवल्क्यः "प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः । बहूनां यद्यकामासौ चतुर्विंशतिकः पृथक्" इति । पुरुषसम्भोगजीविकासु दासीषु स्वैरिण्यादिषु शुल्कदानमन्तरेण बलात्कारेणाभिगच्छतो दशपणो दण्डः । यद्यनिच्छन्तीमेकाम्बलात्कारेण बहवो गच्छन्ति तर्हि प्रत्येकं चतुर्विंशतिपणात्मको दण्ड इत्यर्थः । यदि पुनः सा स्वेच्छया भाटकं गृहीत्वा पश्चान्नेच्छति तदा बलाद्व्रजतामपि बहूनामदोषः यदि

तथा व्याध्याद्यभिभवो न भवेत्। अतएव नारदः "व्याधिता सश्रमा व्यग्रा राजकर्मपरायणा। आमन्त्रिता चेन्नागच्छेददण्ड्या वडवा स्मृता" इति। पारदार्यप्रसङ्गात् कन्यायामपि दण्डमाह याज्ञवल्क्यः "अलङ्कृतां हरन् कन्यामुत्तमं त्वन्यथाऽधमम्। दण्डं दद्यात् सवर्णासु प्रातिलोम्ये वधः स्मृतः" इति। अलङ्कृतां विवाहाभिमुखीं तां सवर्णां कन्यामपहरन् उत्तमसाहसं दण्डनीयः। तदनभिमुखीं हरन् प्रथमसाहसम्। उत्कृष्टवर्णजातां हरतः क्षत्रियादेर्वध इत्यर्थः। आनुलोम्येन सकामाहरणे न दण्डस्तथा च स एव "सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः" इति। कन्यादूषणे दण्डमाह स एव "दूषणे तु करच्छेद उत्तमायां वधः स्मृतः। शतं स्त्रीदूषणे दद्यात् द्वे तु मिथ्याभिशंसने" इति। "पशून् गच्छन् शतं दाप्यो हीनां स्त्रीं गां च मध्यमम्" इति। यद्यकामां कन्यामङ्गुष्ठादिना प्रसह्य दूषयति तदा करच्छेदः। यदा तु अङ्गुलिप्रक्षेपेण तामेव योनिक्षतां कुर्वन् दूषयति तदा विशेषमाह मनुः "अभिषह्य तु यः कन्यां कुर्य्याद्दर्पेण मानवः। तस्याशु कर्त्ये अङ्गुल्यौ दण्डं चार्हति षट्शतम्" इति। सकामदूषणेऽप्याह स एव "सकामां दूषयन् कन्यां नाङ्गुलिच्छेदमर्हति। द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये" इति। यदा कन्या विदग्धा वा कन्यां दूषयति तदाप्याह स एव "कन्यैव कन्यां या कुर्य्यात्तस्याः स्याद्द्विशतो दमः। या तु कन्यां प्रकुर्य्यात् स्त्री सा सद्यो मौण्ड्यमर्हति। अङ्गुल्योरेव वा छेदः खरेणोद्वहनं तथा" इति कुर्य्यात् योनिक्षतवतीमिति शेषः। यदा पुनरुत्कृष्टजातीयां कन्यां सकामामकामां वाभिगच्छति तदा हीनस्य क्षत्रियादेर्वधः। यदा सकामां सवर्णामभिगच्छति तदा शुल्कं गोमिथुनं तत्पित्रे दद्यात्। अनिच्छति तस्मिन् दण्डरूपेण राज्ञे दद्यात्। सवर्णामकामां गच्छतो वध एव। तदाह मनुः "उत्तमां सेवमानस्तु जघन्यो वधमर्हति। शुल्कं दद्यात् सेवमानः समामिच्छेत् पिता यदि। योऽकामां दूषयेत् कन्यां स सद्यो वधमर्हति। सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः" इति। चाण्डाल्यादिगमने दण्डमाह याज्ञवल्क्यः "अन्त्याभिगमने त्वङ्क्यः कुबन्धेन प्रवासयेत्। शूद्रस्तथान्त्य एव स्यादन्त्यस्यार्य्यागमे वधः" इति। अन्त्या चाण्डाली तद्गमने त्रैवर्णिकान् प्रायश्चित्तानभिमुखान् "[illegible] र्यमिति" मनुवचनानुसारेण पणसहस्रं दण्डयित्वा कुत्सितवर्णेन भगाकारेणाङ्कयित्वा स्वराष्ट्रान्निर्वासयेत्। शूद्रः पुनश्चाण्डालीं गच्छंश्चाण्डाल एव। अन्त्य एवेति माधवीये पाठः। चाण्डालस्य तूत्कृष्टजातिस्त्र्यभिगमने वध एवेत्यर्थः। योनिव्यतिरिक्तस्थले गच्छतो दण्डमाह स एव "अयोनौ गच्छतो योषां पुरुषं वाऽभिमेहतः। चतुर्विंशतिको दण्डस्तथा प्रव्रजितागमे" इति। यस्तु योषां मुखादावभिगच्छति पुरुषं वाभिमुखं मेहति तथा प्रव्रजितां वा गच्छति असौ चतुर्विंशतिपणा दण्डनीय इत्यर्थः। स्त्रीकृते संग्रहणे दण्डमाह बृहस्पतिः "गृहमागत्य या नारी प्रलोभ्य स्पर्शनादिना। कामयेत् तत्र सा दण्ड्या नराद्द्विदमः स्मृत" इति वचसा स्वयं प्रलोभ्य गच्छतः पुरुषस्य यो दण्डस्तदर्द्धं दण्ड्या"।

स्त्रीसभ न० स्त्रीणां सभा क्लीवत्वम्। स्त्रीसमाजे।

स्त्रीसेवा स्त्री ६त०। स्त्रीसम्भोगे व्यवायमधर्मेण नारीसेवने

स्त्रीस्वभाव पु० स्त्रिया इव स्वभावो यस्य। १अन्तःपुररक्षके महल्लके शब्दमा० ६त०। २स्त्रीणां शीले च। स्त्रीपुंधर्मशब्दे दृश्यम्।

स्त्रैण न० स्त्रियां इदम् अण् नञ्। १स्त्रीस्वभावे "स्त्रैणेन भीता विकृतिं त्विषिम्णा" भट्टिः। २स्त्रीविषये स्त्रिया अपत्यं स्त्रीणां समूहो वा अण्। ३स्त्र्यपत्ये स्त्रीसमूहे न०।

स्थ त्रि० स्था–क। १स्थितिशीले प्रायेण उत्तरपदस्थत एवास्य प्रयुज्यते यथा पदस्थः मार्गस्थः। २स्थले पु० शब्दर०।

स्थग संवरणे भ्वा० पर० सक० सेट् घटा० मिचि न वृद्धिः। स्थगति अस्थगीत्। षोपदेशत्वमस्य चिन्त्यमूलम्।

स्थग त्रि० स्थग-अच्। धूर्त्ते शब्दर०।

स्थगन न० स्थग-ल्युट्। आच्छादने हेमच०।

स्थगित त्रि० स्थग-क्त। १आवृते २तिरोहिते हेमच०।

स्थगी स्त्री स्थग्यतेऽनया घञर्थे क गौरा० ङीष्। ताम्बूलपात्रे करङ्के हेमच०।

स्थगु न० स्थग-उन्। गडौ (कुज) "तदेव स्थगु यद्दीर्घं रघोणामवायतम्। लक्ष्मणो च मतीता च लेपयिष्यामि ते स्थगु" रामा० बा० ८अ०।

स्थण्डिल न० स्थल-इलच् नुक् लस्य डः। १चत्वरे उच्चत्यवनतिशून्ये समीकृते प्रदेशे अमरः। "निषेदुषी स्थण्डिल एव केवले" कुमारः। २यज्ञार्थं परिष्कृतस्थाने शब्दर०

इहोमार्थं कुण्डप्रतिनिधित्वेन वालुकादिभिः कर्त्तव्ये मण्डलभेदे च "नित्यं नैमित्तिकं कर्म स्थण्डिले वा समाचरेत्। हस्तमात्रं तु तत् कुर्यात् वालुकाभिः समन्ततः" या॰ति॰। "अथ वापि मृदा सुवर्णभासा कर-मात्रं चतुरङ्गुलोच्चमल्पे। हवने विदधीत वाङ्गुलोच्चं वि-बुधः स्थण्डिलमेववेदकोणम् कुण्डोद्यतः। अथ वा कुण्ड करणायक्तौ। तन्त्रान्तरे च "मृदा सुवर्णभासा वाप्यथ वालुकयाऽपि वा। अङ्गुलोन्नतया वेदाङ्गुलोच्चं स्थण्डिलं विदुः। चतुःकोणमुदक्प्राक्प्रवणमल्पाहुतौ शुभम्। प-ञ्चाङ्गुलोच्चमथ वा रम्यं त्र्यङ्गुलमुन्नतम्। तस्मात् सम्यक् परोक्ष्यैव कर्त्तव्यं शुभवेदिकम्। हस्तमात्रं स्थण्डिलं वा संक्षिप्ते होमकर्मणि"। वशिष्ठः "कुण्डमेवंविधं न स्यात् स्थण्डिलं वा समाश्रयेत्" क्रियासारे। तत्करण-प्रकारादि सं॰ त॰ द्रष्टव्यम्।

स्थण्डिलशायिन् पु॰ स्थण्डिले चत्वरे शेते व्रतवशात् शी-णिनि। व्रतार्थं चत्वरे शयितरि अमरः। "स्थण्डिल-शायिनश्च" भट्टिः। [चत्वरे शयितरि शब्दर॰।

स्थण्डिलेशय पु॰ स्थण्डिले शेते अच् अलुक्समा॰। व्रतार्थं

स्थपति पु॰ स्था—क तस्य पतिः। १कञ्चुकिनि मेदि॰ २शिल्पि-भेदे (छुतार) अमरः ३कुबेरे अजयः ४अधीशे ५वृह-स्पतिसवनामकयागकर्त्तरि च अमरः। ६सत्तमे त्रि॰ मेदि॰ तत्र अधीशपरत्वे "निषादस्थपतिर्गावेधुकेऽधिकृतः" कात्या॰ श्रौ॰ १।१।१२ "निषादस्थपतिर्गावेधुके चरावधि-कृतः अधिकारी भवति"। एवं हि श्रूयते "यस्य रुद्रः प्रजाः शमयेत् वास्तुमध्ये रौद्रं गावेधुकम् चरुं निर्व-पेत्" इत्येतामिष्टिं प्रकृत्य श्रुतम् "एतया निषादस्थपतिं याजयेदिति" निषादस्थपतिर्यजेतेत्यर्थः। तत्रायं सन्देहः किमत्र षष्ठीसमासः निषादस्य स्थपतिर्निषादस्थपतिरिति निषादश्चासौ स्थपतिश्च निषादस्थपतिरिति कर्मधारयो वा। तत्र यदि षष्ठीसमासः तदा यो द्विजातिरेव विद्वांश्चिषादानामाधिपत्यं करोति तस्यात्राधिकारः यदि च कर्मधारयः तदा निषाद एव यः स्थपतिस्तस्यात्राधि-कार इति। तत्र त्रैवर्णिकस्यैव समर्थत्वाद्विद्वत्त्वादग्नि-मत्त्वाच्चात्राधिकारो युज्यते अन्त्यजातीयस्य निषादस्या-विद्वत्त्वेनानग्निमत्त्वेन चासमर्थत्वात्, तस्मात् षष्ठीसमास एवायमिति पूर्वपक्षः। सिद्धान्तस्तु कर्मधारयोऽयम् निषादश्चायं स्थपतिश्चेति कुतः? षष्ठीसमासपक्षे निषाद-पद लक्षणाप्रसक्तेः न ह्यत्र षष्ठी श्रूयते यतः सम्बन्धः प्रतीयेत। अतो निषादपदेनैव षष्ठ्यर्थो लक्षणीयः इत-रस्मिंस्तु पक्षे द्वयोरपि पदयोः स्वार्थतैव न लक्षणा तस्मान्निषाद एव स्थपतिरत्राधिकारी श्रुतिबलात् अवि-द्वाननग्निमानपीति सिद्धम्। अपि चात्र निषादस्य दक्षिणा श्रूयेत कूटं दक्षिणा काणो वा गर्दभ इति कूटं हि निषादानामेवोपकारकम् नार्याणामिति" कर्क॰। वृहस्पतिसवकर्त्तरि तु "स्थपतिरित्येनं ब्रूयुः" कात्या॰ श्रौ॰ २२।५।२८ सू॰। "सराजानो ब्राह्मणा यं पुरस्कु-र्वीरन् एतेन यजेत" "वृहस्पतिसवेन" सू॰। राज्ञा सहित ब्राह्मणा यं ब्राह्मणं धर्मस्थापकत्वेन चाङ्गीकुर्वीरन् "एतेन स एतेन यजेत वृहस्पतिसवेन" स॰व्या॰। वृहस्पतिसवकर्त्तृ-वत् ६गोसवकर्त्तर्यपि यथोक्तं "स्थपतिरित्येनं ब्रूयुः" कात्या॰ श्रौ॰ २२।११।११ सू॰। "गोसवयाजिनं जनाः"। राज्ञा सहिता विशः प्रजाः सर्वे पुरुषा यं पुरस्कुर्वीरन् (मुख्यत्वेनाङ्गीकुर्वीरन्" स गोसवेन यजेत २२।११।८कर्क॰ "कारुभेदस्य लक्षणं यथा "वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः। दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्त्तितः"।

स्थपुट त्रि॰ तिष्ठति स्था—क स्थं पुटं यत्र। १विषमोन्नत-प्रदेशे हेमच॰। "स्थपुटगतमपि क्रव्यमव्यग्रमत्तीति" मालतीमा॰। २विषमस्थाने-सञ्चारिणि-जीवे पु॰ त्रिका॰।

स्थल स्थाने भ्वा॰ पर॰ अक॰ सेट् ज्वला॰। स्थलति अस्था-लीत्। ष्ठलधातुनैवायं गतार्थ इत्यन्ये।

स्थल न॰ स्त्री॰ स्थल—अच्। जलशून्ये अकृत्रिमे भूभागे अमरः स्त्रीत्वपक्षे ङीप्। "वनस्थलीर्मर्मरपत्त्रमोक्षाः" कुमारः। २कृत्रिमाकृत्रिमप्रदेशमात्रे ३कृत्रिमभूभागे तु न॰।

स्थलकन्द पु॰ स्थलजः कन्दः। (वनओल) अपाम्यकन्दे रत्नमा॰

स्थलकमल न॰ स्थलजातं कमलम्। स्थलपद्मे भावप्र॰।

स्थलकुमुद पु॰ स्थले कुमुदमस्यस्य सादृश्येन अच्। करवीरे राजनि॰।

स्थलपद्म न॰ स्थलजात पद्म शाक॰। स्वनामख्याते पुष्प-प्रधानवृक्षे त्रि॰ स्थलजं पद्ममिव। २मानके पु॰ रत्नमा॰

स्थलपद्मिनी स्त्री स्थलपद्मानां समूहः तेषां सन्निकृष्टदेशो वा इनि ङीप्। १स्थलपद्मसमूहे २तद्युक्तदेशे च। "ददर्श दूनः स्थलपद्मिनीं नलः" नैष॰।

स्थलमञ्जरी स्त्री स्थलस्य मञ्जरीव। अपामार्गे रत्नमा॰।

स्थलशृङ्गाट पु॰ स्थलजातः शृङ्गाटः शाक॰। १गोक्षुरे रत्नमा॰ तस्य कण्टकावृतत्वात तथात्वम्।

स्थलेरुहा स्त्री स्थले रोहति रुह—क अलुक्स०। १घृतकुमार्य्याम् २दग्धारुहे च राजनि०।

स्थलेशय पु० स्थले शेते शी—अच् अलुक्स०। वराहरुरुप्रभृतौ पशौ राजनि०। २स्थलशायिनि त्रि०।

स्थवि पु० स्था किच् वेर्नित्त्व। १तन्तुवाये उज्ज्वलद०। २स्वर्गे ३जङ्गमे च संक्षिप्त०।

स्थविर न० स्था—किरच् स्थवादेशः। १शैलेये गन्धद्रव्ये राजनि०। २चतुर्मुखे ब्रह्मणि पु० हेमच०। ३अचले ४स्थिरे त्रि० उणा०। ५वृद्धे च त्रि० अमरः। ५महाश्रावणिकायां स्त्री राजनि०।

स्थविष्ठ त्रि० अतिशयेन स्थूलः इष्ठन् यणादिलोपे गुणः। अतिवृद्धे अमरः। ईयसुन् स्थवीयानप्यतिवृद्धे त्रि० स्त्रियां ङीप्।

स्थाणु पु० स्था नु पृषो० णत्वम्। १शिवे २शाखाशून्यवृक्षे च अमरः ३आयुधभेदे पु०नीलक०। ४स्थिरे त्रि० धरणिशिरस्थ स्थाणुशब्दवाच्यत्वे कारणमुक्तं वामनपु०४६अ०। यथा "समुत्तिष्ठन् जलात्तस्मात् प्रजास्ताः सृष्टवानहम्। ततोऽहं ताः प्रजा दृष्ट्वा रहिता एव तेजसा। क्रोधेन महता युक्तो लिङ्गमुत्पाट्य चाक्षिपम्। तत्क्षिप्तं सरसो मध्ये ऊर्द्ध्वमेव यदा स्थितम्। तदाप्रभृति लोकेषु स्थाणुरित्येव विश्रुतम्"।

स्थाणुतीर्थ न० शैवे तीर्थभेदे वामनपु० १२अ०।

स्थाण्डिल पु० स्थण्डिले शयितोऽण्। व्रतार्थं स्थण्डिले शयितरि अमरः।

स्थाण्वाश्रम पुंन० ६त०। हिमाचलस्थिते शिवस्य तपश्चरणाश्रमभेदे "स्थाण्वाश्रमं हैमवतं जगाम" कुमारः।

स्थाण्वीश्वर पु० शिवलिङ्गभेदे "स्थाणुनाम्ना हि लोकेषु पूजनीयो दिवौकसाम्। स्थाण्वीशः स्थितो यस्मात् स्थाण्वीश्वरस्ततः स्मृतः" वामने ४२अ० तन्माहात्म्यादिकम्। तत्र दृश्यम्।

स्थान न० स्था—ल्युट्। १स्थितौ २सादृश्ये ३अवकाशे मेदि० ४सन्निवेशे ५वसतौ हेमच० ६चन्यसन्धौ त्रिका० ७भाजने हला० ८निकटे ९व्याकरणोक्ते प्रसङ्गे आदिश्यमानस्य यणादेः कारणभूते इगादौ। १० नीतिवेदितामुपचयापचयहीने साम्यावस्थाने च अमरः। उपचयापचयौ च षड्वर्गशब्दोक्तस्य क्षयादेरेव भरतः। ११अभिष्व लोकभेदः। स्वस्वधर्मानुष्ठायिनां जनानां लोकविशेषात्मकं स्थानमुक्तं अग्निपुराणे यथा "प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम्। क्षत्रियाणां तथा चैन्द्रं संग्रामेष्वनुवर्त्तिनाम्। गान्धर्वं शूद्रजातीनां परिचर्य्यानुकारिणाम्। अष्टाशीतिसहस्राणां यतीनामूर्द्ध्वरेतसाम्। स्मृतं तेषान्तु यत् स्थानं तदेव गुरुवासिनाम्। सप्तर्षीणान्तु यत् स्थानं स्मृतं तद्वत् वनौकसाम्। प्राजापत्यं गृहस्थानां गृहधर्मानुवर्त्तिनाम्। न्यासिनान्तु परं ब्रह्म योगिनाममृतं स्मृतम्। एकान्तवादिनां ब्रह्मध्यायिनां परमं पदम्। तामिस्रमन्धतामिस्रं महारौरवरौरवम्। असिपत्रवनं घोरं कालसूत्रमवीचिमत्। वेदस्य निन्दकानान्तु यज्ञव्याघातकारिणाम्। स्थानमेतत् समाख्यातं स्वधर्मविनिवर्त्तिनाम्" श्रुतिलिङ्गाधिकरणोक्ते ११क्रमे मीमां०। "स्थानं क्रमो योगबलं समाख्या पार्थसारथिः। १२ज्ञापके निपातस्थानमित्यादि।

स्थानक न० स्वार्थे क।१स्थानशब्दार्थे। स्थाने कं जलमत्र। २आलवाले हेमच०।

स्थानचञ्चला स्त्री स्थाने स्थितापि चञ्चला। १वर्वरीवृक्षे शब्दच०। अल्पवातेन चञ्चलत्वात्तस्यास्तथात्वम्।

स्थानच्युत त्रि० स्थानात् स्वस्थानात् च्युतः। पदच्युते "स्थानस्थितस्य पद्मस्य मित्रे वरुणभास्करौ। स्थानच्युतस्य तस्यैव क्लेदशोषणकारकौ" गरुडपु० ११५ अ०। स्थानभ्रष्टादयोऽप्यत्र। "स्थानस्थिताश्च पूज्यन्ते पूज्यन्ते च पदे स्थिताः। स्थानभ्रष्टा न पूज्यन्ते केशा दन्ता नखा नराः" गरुडपु० ११५अ०।

स्थानाध्यक्ष त्रि० स्थाने अध्यक्षः। स्थानरक्षके हेमच०।

स्थानिक त्रि० स्थानेऽधिकृतः ठक्। स्थानाध्यक्षे हेमच०।

स्थानिन् त्रि० स्थानमस्यास्ति रक्ष्यत्वेन इनि। १स्थानरक्षके स्थानं प्रसङ्गः अस्त्यर्थे इनि। व्याकरणोक्ते आदिश्यमानस्य यणादेः कारणे इगादौ "स्थानिवदादेशोऽनल्विधाविति" पाणिनिः।

स्थानीय न० स्थीयतेऽस्मिन् स्था—आधारे अनीयर्। १नगरे अमरः। स्थानं सादृश्यं वासं वाऽर्हति स्थानच्छस् वा क।२ग्रामयोग्ये देशे ३सदृशे ४स्थानसम्बन्धिनि च त्रि०।

स्थाने अव्य० स्था—ने। १योग्यत्वे २औचित्ये च "स्थाने भवानेकनराधिपः सन्निति" रघुः। ३सत्ये ४सादृश्ये ५कारणार्थे च शब्दर०।

स्थापत्य पु० स्थपतिरेव स्वार्थे ष्यञ्। १अन्तःपुररक्षके कञ्चुकिप्रभृतौ अमरः। तस्य भावः ष्यञ्। २स्थपतिधर्मे न०।

स्थापक त्रि० स्थापयति स्था—णिच्—पुक् ण्वुल्। यथाद० स्थानमुचितं तथा निवेशके। स्थितिस्थापकः।

स्थापन न० स्था-णिच्-पुक् ल्युट् । १आरोपणे २पुंसवनाख्ये गर्भसंस्कारे च मेदि० । ३समाधौ । युच् । स्थापनाप्यत्र स्त्री सा च निवेशने वादे भावपक्षस्य प्रमाणादिना व्यवस्थापने च । [ङीप् । पाठायाम् अमरः ।

स्थापनी स्त्री स्थाप्यतेऽनया स्था-णिच्-पुक् करणे ल्युट्

स्थापित त्रि० स्था-णिच्-पुक् क्त । १निश्चिते २निवेशिते ३न्यस्ते च मेदि० ।

स्थामन् न० स्था-मनिन् । १सामर्थ्ये अमरः २बले च ।

स्थायिन् त्रि० स्था-णिनि । १स्थितिशीले अलङ्कारोक्ते रसानुकूले रत्यादिभावे पु० । "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा । रसतामेति रत्यादिः स्थायी भावः सचेतसाम्" "अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः" । "रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च" सा०द० । एते च क्रमेण शृङ्गारादीनां स्थायिभावाः । [अमरः ।

स्थायुक त्रि० स्था-उकञ् ।१स्थितिशीले २एकग्रामाधिकृते पु०

स्थाल न० स्थलति तिष्ठत्यन्नाद्यत्र आधारे घञ् । (थाल) १अन्नपात्रभेदे । २पाकपात्रे (हाँड़ि) स्त्री अमरः गौरा० ङीष् ।

स्थालीपाक पु० स्थाल्यां पाकः । गव्यदुग्धेन स्थाल्यां कृते १पाकभेदे । स्थाल्यां पच्यतेऽसौ पच-कर्मणि घञ् २चरौ तत्पाकप्रकारः चरुशब्दे दिङ्मात्रमुक्तः गोभिलोक्तप्रकारः सं०त० दर्शितो यथा

तत्र गोभिलः "अथोदूखलमुषले प्रक्षाल्य शूर्पञ्च पश्चादग्नेः प्रागग्रान् कुशानास्तीर्य्य उपसादयति अथ हविर्निर्वपेदिति । व्रीहीन् यवान् वा कांस्येन चरुस्थाल्या वा अमुष्मै त्वा जुष्टं निर्वपामीति देवतानामोद्देशः सकृद्यजुषा द्विस्तूष्णीम् अथ पश्चादवहन्तुमुपक्रमते दक्षिणोत्तराभ्यां पाणिभ्यां त्रिःफलीकृतांस्तण्डुलांस्त्रिर्देवताभ्यः प्रक्षालयेत् द्विर्मनुष्येभ्यः सकृत् पितृभ्य इति । "पवित्रान्तर्हितांस्तण्डुलानावपेत् कुशलशृतमिव स्थालीपाकं श्रापयेत् प्रदक्षिणमुदायुवन् शृतमभिघार्य्योदगुद्वास्य प्रत्यभिघारयेदिति" सू० । अस्यार्थः उपसादयति स्थापयति देवतानामोद्देशं देवतानामोच्चारणं यथा अग्नये त्वा जुष्टं निर्वपामीत्यनेन उदूखलोपरि व्रीह्यादीन् कांस्यादिना सकृन्निर्वपेत् । अत्रामुष्मा इत्यत्र चतुर्थ्यन्तनामोच्चारणम् । अतएव कात्यायनः "असाविति नाम गृह्णाति" । नारायणीयेऽपि "अदः पदं हि यद्रूपं यत्र मन्त्रे हि दृश्यते । साध्याभिधाने तद्रूपं तत्र स्थाने नियोजयेत्" । अतोऽदः पद एव नामोहो न तु विष्णुपाणिजपादाविदमित्यादौ । एवञ्चाग्नये त्वा जुष्टं निर्वपामीति सामगानाम् यजुःप्रयोगो गोभिले निर्वापमात्रश्रुतेः यजुर्वेदिकसमन्त्रकावहणप्रोक्षणे सामगेन न कार्ये । यजुःपरिभाषामाह जैमिनिः "शेषे यजुःशब्दः इति । शेषे समन्त्रभिन्ने मन्त्रजाते । ततश्च यन्मन्त्रजातं प्रश्लिष्टपठितं गानपादभेदरहितं तद्यजुरिति । बहुदैवत्ये च बहुदेवतानामभिः प्रत्येकं निर्वापः । अत्र निर्वापो मन्त्रेणैव होमोऽपि पृथक् । निर्वापपरिमाणन्तु होमसंख्याविशेषस्थित्यनुसारेणेत्याह छन्दोगपरिशिष्टम् "देवतासंख्यया गृह्य निर्वापांश्च पृथक् पृथक् । तूष्णीं द्विरेव गृह्णीयाद्धोमश्चापि पृथक् पृथक् । यावता होमनिर्वृत्तिर्भवेद्वा यत्र कीर्त्तिता । शेषञ्चैव भवेत् किञ्चित्तावन्तं निर्वपेच्चरुम्" । यद्यपि देवतासंख्ययेति वचनं चरुसमशनीययोः इत्युपक्रम्य पठितं तथाप्याकाङ्क्षालाघवेन चरुसामान्यपरमिति । चरुविधौ तु विद्याकरवाजपेयी "यत्र प्रयोजनाभावनिश्चयस्तत्रैव तदुपादानादिलोपः । यत्रानुष्ठानवेलायामेव पुरुषदोषेण प्रयोजनाभावो ज्ञायते तदा प्राक् तन्निश्चयात् शास्त्रप्रापितः पदार्थो नियमापूर्वमात्रार्थमनुष्ठेय" इति । अतएव यदा त्वाक्स्यादिना व्रीह्यादिस्थाने तण्डुला गृहीताः तदापि अवघातादि समाचरन्ति याज्ञिकाः पठन्ति च । "घाते न्यूने तथा छिन्ने साम्नाय्ये मान्त्रिके तथा । यत्र मन्त्राः प्रयोक्तव्या मन्त्रा यत्नार्थसाधकाः" । मान्त्रिके मन्त्रसाध्ये अवघातादौ । न्यूने तत्काले मन्त्रपाठाभावेऽपि यत्नकाले मन्त्राः पाठ्याः । अत्रांस्तु मन्त्रार्थज्ञानस्य नास्त्युपयोगः । चरुस्थालीयपरिमाणमाह छन्दोगपरिशिष्टम् । "तिर्य्यगूर्द्ध्वसमित्मात्रा दृढ़ा नातिबृहन्मुखी । मृण्मय्यौडुम्बरी वापि चरुस्थाली प्रशस्यते" । गर्भप्रस्तारदीर्घाभ्यां प्रादेशप्रमाणी चरुस्थाली औडुम्बरी ताम्रमयी एषा पायसचरावपि न निषिद्धा "पयोगुड़तसारञ्च ताम्रपात्रे न दुष्यति" स्मृतिसागरधृतवचनाच्च । अतएव शारदातिलके "ततश्च संस्कृते वह्नौ गोक्षीरेण चरुं पचेत् । मन्त्रेण क्षालिते पात्रे नवे ताम्रमयादिके" । दक्षिणोत्तराभ्यामिति दक्षिण उत्तर उपरि ययोः पाण्योस्ताभ्यां सुपलं गृहीत्वा इति शेष । त्रिःफलीकृतान्

त्रिधा विहृष्णीकृतान् कण्डनप्रस्फोटनाभ्यामिति शेषः । पवित्रान्तर्हितान् पवित्रम् अन्तर्हितं व्यवहितं येषां तान् । तेन चरुस्थाल्यामुत्तराग्रं पवित्रं निःक्षिप्य तण्डुलान् निक्षिपेत् । कुशलशृतमिवेति कुशलेन पाकनिपुणेन शृतं यथा न दग्धं नातिक्लिन्नं न मन्दपक्वं यथा स्यात्तथा स्थालीपाकं श्रपयेत् । अतएव छन्दोगपरिशिष्टम् । "संगतोष्णा चरुः स्विन्नोऽदग्धोऽकठिनः शुभः । न चातिशिथिलः पाक्यो न च वीतरसो भवेत्" । वीतरसो गलितमण्डः । प्रदक्षिणमुदायुवाचेति प्रदक्षिणावर्त्तं यथा स्यात्तथा मेक्षणेन उद्गीर्णमिश्रयन् । यु मिश्रणे इत्यस्य रूपमेतत् । शृतमित्यभिघार्य्येति स्फुटितम् । चरुमाज्यस्येणाप्लाव्य उदगग्नेरुत्तरस्याम् उत्तार्य्य प्रत्यभिघारयेत् पुनर्घृतेन तथा सेचयेत् । द्वयोत्पनं तु अभिघारद्वयात् पूर्वं ज्वलदङ्गारेण विद्योतनमयमाह छन्दोगपरिशिष्टम् "आघृतमवद्योत्य सुशृतमभिघारयेत् । घृतेन सेचयेत् पश्चात् पुनरेवाभिघारयेत्" । मेक्षणादीन्याह छन्दोगपरिशिष्टम् "इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत् । वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम्" । इध्मार्द्धप्रमाणं प्रादेशद्वयमिध्मस्य प्रमाणं परिकल्पितमिति तदर्द्धम् एवैव दर्वी विशेषस्तु महार्णवे । "दर्वी द्व्यङ्गुलपृथ्वग्रा तुरीयेण तु मेक्षणम् । मुष्टिकोद्धृतवे चापि जायते उदरे तथा । इध्मप्रमाणे भवतः स्रुवं वेष्टनमेव च" । अत्र तिर्य्यगूर्द्ध्वादि वैचक्ष्येण चेत्यन्तेन सर्वकर्माभिधाय भूमिष्ठपरिसमूहनदृत्तविस्तारं कुर्य्यादित्युक्तम्" ।
स्थाल्यां पाकपात्रे पाकः पच्यमानः । १पाकभाजने पच्यमाने । चातुर्मास्यादौ तत्पाने फलं ति० त० दर्शितं "लभते सन्तति दीर्घां स्थालीपाकमथाश्नन्" ।

स्थालीपुलाक पु० स्थाल्याः पुलाकास्तण्डुलाः सन्त्यत्र एकधर्म्मतोज्ञायकत्वेन अच् । मीमांसकोक्ते "स्थालीस्थास्तण्डुला एते सर्वे विक्लित्तिभागिनः । समानाग्निसंयोगभागित्वात् प्रतिपन्नवत्" इत्यनुमानरूपे न्यायभेदे यथा एकस्य पाकदर्शनेन अन्येषां पाकज्ञानम् एवं एकरूपाणां सर्वेषामेकधर्म्माक्रान्तत्वमित्येवंरूपोन्नायकम् ।

स्थालीबिल न० ६त० । स्थाल्याः मूलभागे तदर्हति छ यत् वा । स्थालीबिलीय (ल्य) तण्डुलादौ त्रि० सि० कौ० ।

स्थालीवृक्ष पु० स्थाल्यै-वृक्षः । १अश्वत्थाकारे स्थालीनिर्माणसाधने २वृक्षभेदे । "स्थालीवृक्षो लघुः स्वादुस्तुवरस्तिक्त उष्णकः । कटुपाकरसः ग्राही विषपित्तकफापहृत्" भावप्र०

स्थावर त्रि० स्था-वरच् । १अचले २स्थिर द्रव्यादौ स्थाणौ च अमरः । "स्थावरं जङ्गमञ्चैव यद्यपि स्वदमाङ्गतम्" स्मृतिः । ३पर्वते पु० ४धनुर्गुणे न० त्रिका० । स्थावरवर्गश्च षड्विधः सर्गशब्दे ५२५० पृ० दृश्यः । स्थावरधनं च सम्भवति क्रेतरि सति अपरिहार्याय न विक्रेयं यथोक्तं महानिर्वा०१२उ० "स्थावरं धनमन्यस्मै क्रिते सान्निध्यवर्त्तिनि । योग्ये क्रेतरि विक्रेतुं न क्षमः स्थावराधिपः । सान्निध्यवर्त्तिनां जातिः सवर्णो वा विशिष्यते । तयोरभावे सुहृदो विक्रेतुःस्या गरीयसी । निर्णीतमूल्ये पण्येन स्थावरस्य क्रयोद्यमे । तन्मूल्यचेत् समीपस्थो ददाति क्रेता न चापरः । मूल्यं दातुमशक्तश्चेत् सम्मतो विक्रयेऽपि वा । सन्निधिस्थस्तदाऽन्यस्मै क्रेतुं शक्नोति विक्रये । क्रीतश्चेत् स्थावरं देवि । परोक्षे प्रतिवासिनः । अवगत्यैव तन्मूल्यं दत्त्वाऽसौ प्राप्तुमर्हति । क्रेता तत्र कृताऽरामान् विनिमीति भुनक्ति वा । मूल्यं दत्त्वाऽपि नाप्नोति स्थावरं सन्निधिस्थितः । "स्थावरे विक्रयो नास्ति कुर्य्यादाधिमनुज्ञया" स्मृतिः । स्थावरस्य केवलविक्रयनिषेधात् विक्रयेऽपि कर्त्तव्ये सहिरण्योदकं दत्त्वा दानरूपेण विक्रयः कर्त्तव्य इति" मिता० । "एकोऽपि स्थावरे कुर्य्याद् दानाधमनविक्रयम् आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषतः" स्मृतिः । "संविभागक्रमप्राप्तं पित्र्यं लब्धं स्वशक्तितः : स्थावरं सिद्धिमाप्नोति भुक्त्या, कामिन्वेक्षया" । "सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम् । विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि" कात्या० । "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि च । सा यथाकाममश्नीयात् दद्याद्वा स्थावरादृते" नारदः । "अविभक्तं स्थावरं यत् सर्वेषामेव तद्भवेत् । विभक्तं स्थावरं प्राह्यं नान्योन्यस्य सुतैः कदाचन" यमः । "सर्वेषां तुल्यरूपाणां सोदरासोदराणामिति" श्रीकृष्णः । [राजनि० २स्थावरप्रभृतौ त्रि०]

स्थावरादि पुं० न० स्थावरमादिरवयवो यस्य । १वत्सनाभविषे

स्थाविर न० स्थविरस्य भावः अण् । वृद्धत्वे अमरः । तच्च सप्ततिवर्षोपगमे भवति "आषोडशाद् भवेद्बालस्तरुणस्तत उच्यते । वृद्धः स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परम्" स्मृतिः । [अमरः २अतिवृद्धत्वे च मेदि०]

स्थासक पु० स्था-क-बाहुलकात् वा । १अलङ्कारे २चार्च्चिक्ये

स्थास्नु त्रि० स्था-स्नु । १स्थितिशीले अमरः "अणुरादिवः स्था-

त्स्नुं रिवाचिरप्रभा" भट्टिः। २स्थापिते भरतः। ३दृढे चोपरः

स्थित त्रि० स्था-क्त। १अद्रुततया दण्डायमाने "स्थितायां स्थानमाचरेः" रघुः। २निश्चले ३प्रतिज्ञायुक्ते मेदि०। ४स्थितिशालिनि च।

स्थिति स्त्री स्था-क्तिन्। १मर्यादायां मेदि० २न्याय्यपथावस्थाने अमरः। ३स्थाने च। स्थानभेदे स्थितिनिषेधो यथा "नास्थिभस्मकपालानि न केशान् वा कथञ्चन। तुषाङ्गारकरीषाद्यं नाधितिष्ठेत् कदाचन" कौर्मपु०१५अ०।

स्थितिस्थापक स्थितिं स्थापयति स्था-णिच्-पुक् ण्वुल्। न्यायोक्ते संस्कारविशेषे "संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने" "स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि। अतीन्द्रियोऽसौ विज्ञेयः क्वचित् स्पन्देऽपि कारणम्" भाषाप०।

तल्लक्षणं पृथिवीमात्रसमवेतसंस्कारत्वव्याप्यजातिमत्त्वम्। संस्कारत्वव्याप्यजातित्वं च तद्ग्राह्यधर्मवत्त्वम्। तथा च पूर्वसंयोगजनितसंयोगनाशकत्वे सति पूर्वसंयोगजातीयसंयोगजनकत्वं तत्त्वम्। स च क्रियाविशेषजन्यः क्रियाविशेषजनकः स्वजन्यक्रियानाशको गुणविशेषः। अन्यथाकृतस्य पुनस्तदवस्थतया स्थापकः गुणविशेष इत्यन्ये। यथाऽऽकृष्टशाखादीनां त्यागे पुनस्तथावस्थिततया अवस्थापकः। स च अतीन्द्रियः।

स्थिर पु० स्था-किरच्। १पर्वते २देवे ३वृक्षे ४कार्त्तिकेये शब्दर०। ५शनौ ६मोक्षे मेदि०। ७वृषे राजनि०। ८धववृक्षे भावप्र०। ज्योतिषोक्तेषु ९वृषसिंहवृश्चिककुम्भराशिषु च। १०कठिने ११निश्चले च त्रि०। १२शालपर्ण्यां स्त्री शब्दच० एवं १३काकोल्यां जटा०।१४पृथिव्यां १५शालपर्ण्यां च स्त्री अमरः। पृथिव्याः स्थिरत्वं मतभेदेन अचलशब्दे ८०पृ० दर्शितम्। स्थिरतया च तयोः पदार्थोः कविकल्प०उक्ता यथा "युद्धे प्रधानभटः वाग्ध्येयनः सज्जनमनः। धर्माधर्मौ मनः भोगा सम्पादनभावे तयोर्बन्धुत्वावस्थितत्वात् स्थिरत्वम्।

स्थिरगन्ध पु० स्थिरा गन्धा यस्य। १चम्पकवृक्षे २पाटलायां ३केतक्यां च स्त्री राजनि०।४स्थिरगन्धयुक्ते द्रव्यमात्रे त्रि०

स्थिरच्छद पु० स्थिरच्छदा यस्य। भूर्जपत्रवृक्षे रत्नमा०।

स्थिरच्छाय पु० स्थिरा नियता छाया यस्य। १वृक्षमात्रे शब्दमा०। २छायाप्रधाने वटादौ त्रिका०।

स्थिरजिह्व पु० स्थिरा अचञ्चला जिह्वा यस्य। मत्स्ये हेमच०।

स्थिरजीविता स्त्री स्थिरं जीवितमायुष्यं यस्याः। १शाल्मलीवृक्षे शब्दरत्ना०। २चिरजीविनि त्रि०।

स्थिरतर त्रि० अतिशयेन स्थिरः तरप्। १अत्यन्तस्थिरे अमर० २ईश्वरे पु०।

स्थिरदंष्ट्र पुंस्त्री० स्थिरा दंष्ट्रा यस्य। १सर्पे स्त्रियां ङीष् २वराहाकृतिविष्णौ पु० मेदि० ३ध्वनौ शब्दच०।

स्थिरपत्त्र पु० स्थिराणि पत्त्राण्यस्य। हिन्ताले राजनि०।

स्थिरपुष्प पु० स्थिरं पुष्पमस्य। १चम्पकवृक्षे २बकुलवृक्षे च राजनि०। [वृक्षे राजनि०।

स्थिरपुष्पिन् पु० स्थिरं पुष्पमस्त्यस्य बाहुल्येन इनि। तिलक-

स्थिरमति स्त्री स्थिरा-मतिः। १स्थिरबुद्धौ स्थिरा मतिर्यस्य। २स्थिरबुद्धियुक्ते त्रि०। "अनिकेतः स्थिरमतिः" गीता।

स्थिरयौवन न०पु० स्थिरं यौवनमस्य। १विद्याधरादौ देवयोनिभेदे त्रिका० २चिरस्थायियौवनयुक्ते त्रि०।

स्थिररङ्गा स्त्री स्थिरो रङ्गो रागो यस्याः। नीलायाम् राजनि०। [द्राक्षायाम् राजनि०। २निश्चलरागयुते त्रि०।

स्थिररागा स्त्री स्थिरो रागो रञ्जनं यस्याः। १दारुहरि-

स्थिरसाधनक पु० स्थिरं साधयति ण्वुल् ततः स्वार्थे क। सिन्दुवारवृक्षे राजनि०।

स्थिरसार पु० स्थिरः सारो यस्य। (सेगुन) शाकवृक्षे राजनि०

स्थिराङ्घ्रिप पु० कर्म०। हिन्तालवृक्षे राजनि०।

स्थिरायुस् पु० स्थिरमायुर्यस्य। १शाल्मलिवृक्षे अमरः दीर्घकालस्थायित्वात्तस्य तथात्वम्। २चिरजीविनि त्रि०।

स्थुड वरणे तुदा० कुटा० पर० सक० सेट्। स्थुडति अस्थुडीत् तुस्थोड। वोपदेव एव न्याय्यः।

स्थूणा स्त्री स्था-नक् उदन्तादेशः पृषो०। (खुँटी) १गृहस्तम्भे "स्थूणादर्पणं गृहम्" साहि० २लौहप्रतिमायाञ्च अमरः

स्थूणानिखननन्याय पु०न्यायशब्दोक्ते ४१७पृ०न्यायभेदे।

स्थूर पु० स्था-ऊरन् किच्च। १वृषे संक्षिप्तसा०। २मनुष्ये हि० को०।

स्थूरिन् पु० स्था-ऊरन् किच्च स्थूरो वृषादिस्तद्वाहकः स्थूरोऽस्त्यस्य साहाय्येन इनि। वृषादिवत्पृष्ठेन भारवाहकेऽश्वे खरे च स्थूरस्य भावः अण् स्थौरं तदस्यास्ति इनि स्थौरीत्यपि अमरः।

स्थूल ण्यंहणे अद० चु० उभ० अक० सेट्। स्थूलयति-ते अतस्थूलत्-त। ऋदित्त्वकल्पनाच्च वोपदेवः।

स्थूल त्रि० स्थूल-अच्। १पीवरे (मोटा) अमरः २मूढे ३जडमिदे च त्रि० मेदि०। ४पनसे पु० राजनि०। ५गजपिप्पल्याम् स्त्री शब्दच०। एवं ६एर्वारौ राजनि०। ७महदेलायाम् रत्नमा० स्वार्थे क। पीवरे त्रि०।

संज्ञायां कन् (उलुड़) तृणभेदे पु० रत्नमालाकोषः ।

स्थूलकङ्गु पु० कर्म० । वरकधान्ये (योरधान) राजनि० ।

स्थूलकणा स्त्री कर्म० । १स्थूलजीरके राजनि० ह्रस्व० । २पीनकणयुते त्रि० ।

स्थूलकण्टक पु० स्थूलः कण्टकोऽस्य । जालवर्वुरे राजनि० कप् अत इत्त्वम् । स्थूलकण्टकिका शाल्मलीवृक्षे स्त्री ।

स्थूलकण्टा स्त्री स्थूलः कण्टः कण्टकोऽस्याः । वृहत्याम् राजनि० ।

स्थूलकन्द पु० स्थूलः कन्दोऽस्य । १रक्तलशुने २शूरणे ३हस्तिकन्दे ४मानके च राजनि० ।

स्थूलक्ष्वेड़ पु० स्थूलः क्ष्वेड़ो यत्र । वाणे त्रिका० ।

स्थूलचञ्चु पु० स्थूला चञ्चुरिव शिखाऽस्य । १महाचञ्चुशाके राजनि० २वृहच्चञ्चुयुते त्रि० ।

स्थूलजीरक पु० कर्म० । जीरकभेदे (कालजिरा) भावप्र० ।

स्थूलताल पु० कर्म० । हिन्ताले राजनि० ।

स्थूलत्वचा स्त्री स्थूला त्वचा यस्य । काश्मर्य्याम् राजनि० ।

स्थूलदण्ड पु० स्थूलो दण्डोऽस्य । देवनले राजनि० । स्थूल-नालोऽप्यत्र । [राजनि० ।

स्थूलदर्भ पु० स्थूलं दर्भं दभ्यतेऽनेन दभ-घञ् । मुञ्जे (मुज)

स्थूलदला स्त्री स्थूलानि दलानि यस्याः । घृतकुमार्य्याम् राजनि० ।

स्थूलनास पुंस्त्री० स्थूला नासाऽस्य । १शूकरे हेमच० स्त्रियां ङीष् । २वृहन्नासायुते त्रि० स्त्रियां ङीप् । स्त्रियां टाप् स्थूलनासिकोऽप्यत्र ।

स्थूलपट्ट पु० स्थूलं पट्टं यस्मात् । कार्पासे शब्दर० तदुद्भवपट्टस्य स्थूलत्वात्तथात्वम् । पृषो० स्थूलपट्टाक तत्रार्थे पु० शब्दर० ।

स्थूलपाद पुंस्त्री० स्थूलाः पीनाः पादा अस्य नान्त्यलोपः समा० । १गजे शब्दमा० स्त्रियां ङीप् । ७त० । २श्लीपद-रोगे च ।

स्थूलपुष्प पु० स्थूलं पुष्पं यस्य । १वकवृक्षे २पर्वतजातापराजितायां स्त्री रत्नमा० । ३यवतिक्तायां स्त्री राजनि० ङीप् ।

स्थूलफल पु० स्थूलं फलमस्य । १शाल्मलीवृक्षे राजनि० । २वृहत्फलान्विते त्रि० । ३शणपुष्प्यां स्त्री राजनि० ।

स्थूलभूत न० कर्म० । वेदान्तोक्ते प्रत्येकं पञ्चात्मकतामापन्ने पृथिव्यादौ भूते ।

स्थूलमरिच न० नित्यकर्म० । कक्कोले राजनि० ।

स्थूलमूल न० । ह्रस्व० । चाणक्यमूले राजनि० ।

स्थूललक्ष(क्ष्य) त्रि० स्थूलं लक्षयति दानाय संकल्पते लक्ष-अच् स्थूलं लक्ष्यं वाऽस्य । बहुदातरि अमरः ।

स्थूलवर्म्मकृत् पु० स्थूलं वर्म करोति कृ-क्विप् । ब्राह्मण-यष्टिकायाम् शब्दर० । [२स्थूलवल्कान्विते त्रि० ।

स्थूलवल्कल पु० स्थूलं वल्कलमस्य । १रक्तलोध्रे जटा० ।

स्थूलवृत्तफल पु० स्थूलम् वृत्तमेव फलमस्य । पिण्डीतकवृक्षभेदे (मयना) राजनि० । [राजनि० ।

स्थूलवैदेही स्त्री विदेहे भवा अण् कर्म० । गजपिप्पल्याम्

स्थूलशाटक पु० कर्म० । स्थूलवस्त्रे अमरः स्थूलशाटिका-दयोऽप्यत्र स्त्री जटा० ।

स्थूलशालि पु० कर्म० । महाशालौ राजनि० ।

स्थूलशीर्षिका स्त्री स्थूलं शीर्षं यस्याः कप् अत इत्त्वम् । क्षुद्रपिपीलिकायाम् हेमच० । २वृहन्मस्तकयुते त्रि० ।

स्थूलषट्पद पु० षट्पद इव स्थूलः राज० । वरटायाम्

स्थूलस्कन्ध पु० स्थूलः स्कन्धोऽस्य । लकुचे (मान्दार) राजनि० ।

स्थूलहस्त न० स्थूलः हस्त इवाकारोऽस्य । गजशुण्डे त्रिका०

स्थूलांशा स्त्री स्थूलः अंशोऽवयवोऽस्याः । १गन्धपत्रायाम् राजनि० २स्थूलावयवे त्रि० ।

स्थूलाम्र पु० कर्म० । आम्रभेदे राजाम्रे राजनि० ।

स्थूलास्य पुंस्त्री० स्थूलमास्यं यस्य । १सर्पे शब्दच० स्त्रियां जातित्वेऽपि योपधत्वात् टाप् । २वृहन्मुखयुते त्रि० ।

स्थूलैरण्ड पु० कर्म० । वृहदेरण्डवृक्षे राजनि० ।

स्थूलैला स्त्री कर्म० । वृहदेलायाम् (बड़ एलाइच) राजनि० ।

स्थूलोच्चय पु० स्थूलानामुपलानामुच्चयो यत्र । १गण्डशैले स्थूलस्य गजस्य उच्चयः । २गजमध्यगतौ ३वरण्डे ४अपाकल्ये मेदि० ५गजदन्तमध्ये च शब्दमा० ।

स्थेय पु० स्थीयते विवादनिर्णायकतयाऽसौ स्था-कर्म्मणि यत् । विवादे १संशयनिर्णायके (जुरी) २पुरोहिते च मेदि० ३स्थिरे त्रि० हेमच० ।

स्थेयस् त्रि० अतिशयेन स्थिरः ईयसुन् स्थादेशः । १स्थिरतरे २शाश्वते त्रि० भरतः । स्त्रियां ङीप् । इष्ठन् स्थेष्ठोऽप्यत्र त्रि०

स्थैर्य्य न० स्थिरस्य भावः ष्यञ् । स्थिरतायाम् ।

स्थौणेय(क) पु० स्थूणायां तत्समीपे भवः ढक् ढकञ् वा । सन्धिपर्णमात्रगन्धद्रव्ये (गाँठियाला) अमरः । "स्थौणेयकं वर्हिवर्हं शुकवर्हञ्च कुक्कुरम् । शीर्षं रोमशकं चापि शुकपुष्पं शुकच्छदम् । स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत् । मेधाशुक्रकरं रुच्यं रक्षोऽघ्नं ज्वरजन्तु-जित् । हन्ति कुष्ठास्रकृद्दाहदौर्गन्ध्यतिलकालकान् ।

पत्रिपर्णस्यैव भेदो, भव्यिङ् उर इति नेपालदेशे भवति । निशाचरो धनहरः कितवो गन्धनाशकः । रोचको मधुरस्तिक्तः कटुः पाके कटुर्लघुः । तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफानिलान् । रक्षोऽश्रीस्वेदमेदोऽसृग्ज्वरगन्धविघ्नपान्" भावप्र० ।

स्थौल्य न० स्थूलस्य भावः ष्यञ् । पीवरत्वे ।

स्नपन पु० स्ना-णिच्-पुक् ल्युट् । जलादिनाऽभिषेककरणे

स्नव पु० स्नु-भावे अप् । १स्रवणे २क्षरणे च अमरः ।

स्नसा स्त्री स्नस-निरासे अच् । स्नायौ हेमच० ।

स्नातक पु० स्ना-भावे क्त स्नातं वेदाध्ययनानन्तरं समावर्त्तनाङ्गस्नानं तदस्यास्ति अच्, कर्त्तरि क्त स्वार्थे क वा । वेदाध्ययनानन्तरं गार्हस्थ्याय कृतसमावर्त्तनाङ्गस्नाने गृहस्थभेदे तस्य व्रतं मिता० आचाराध्याये दर्शितं यथा "स्नानादारभ्य ब्राह्मणस्यावश्यं कर्त्तव्यानि विधिप्रतिनिषेधात्मकानि मानससंकल्परूपाणि स्नातकव्रतान्याह "न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः । न विरुद्धप्रसङ्गेन सन्तोषी च भवेत् सदा" याज्ञ० । ब्राह्मणस्य प्रतिग्रहादयोऽर्थप्राप्त्युपाया दर्शिताः । अत्र विशेष उच्यते । स्वाध्यायविरुद्धमर्थमप्रतिषिद्धमपि नेहेत नाभिलषेत् । न यतस्ततो न यतः कुतश्चिदविदिताचारात्, न विरुद्धप्रसङ्गेन विरुद्धोऽयाज्ययाजनादिप्रसङ्गो नृत्यगीतादि विरुद्धं वा तत्र प्रसङ्गश्च विरुद्धप्रसङ्गः तेन नार्थमीहेत इति सम्बध्यते । तत्र चार्हार्थाः प्रत्येकं पर्युदासार्थाः । सर्वत्रापि स्नातकप्रकरणे नञ्शब्दः पर्युदासार्थ एव । किञ्च । "यथालाभेऽपि सन्तोषी परितुष्टो भवेत् । चकारात् संयतश्च "सन्तोषं परमास्थाय सुखार्थी संयतो भवेत्" इति मनुस्मरणात् । कुतस्तर्हि धनमन्विच्छेदित्यत आह" मिता० "राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा । दम्भिहैतुकपाषण्डिबकवृत्तींश्च वर्जयेत्" याज्ञ० । "क्षुधा सीदन् पीड्यमानः स्नातको राज्ञो विदितवृत्तान्तादन्तेवासिनो यज्ञयाजनलक्षणाद्याज्याद्वाऽन्यत्राप्यर्थिजनादीप्सितधनमाददीत । क्षुधा सीदन्नित्यनेन विभागादिप्राप्तगृहोपयोग्यप्रधनो न काञ्चिद्धनमन्विच्छेदिति गम्यते । किञ्च । दम्भिहैतुकादीन् सकलकार्य्येषु लौकिकशास्त्रीयेषु वर्जयेत् । लोकरञ्जनार्थमेव व्रताद्यनुष्ठायी दम्भी । युक्तिबलेन सर्वत्र संशयकारी हैतुकः । वैदिकाद्यपरिगृहीताचारनिरतः पाषण्डः । शठरूपस्य वर्त्मानिवृत्ति बकवृत्तिः । यथाह मनुः "अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च बकवृत्तिरुदाहृतः" इति । प्रतिषिद्धसेविनो विकर्मस्थाः विडालमार्जारस्तस्य स्वभावो व्रतं यस्यासौ वैडालव्रतिकः "धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदाम्भिकः । वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः" इति मनुस्मरणात् । चकाराद्विकर्मस्थवैडालव्रतिकशठान् यथाह मनुः "पाषण्डिनो विकर्मस्थान् वैडालव्रतिकान् शठान् । हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्" इति । शठः सर्वत्र वक्रः । एतैः संसर्गनिषेधादेव स्वयमेवंविधो न भवेदिति गम्यते" मिता० । किञ्च "शुक्लाम्बरधरो नीचकेशश्मश्रुनखः शुचिः । न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः" याज्ञ० "शुक्ले धौते अम्बरे वाससी धारयतीति शुक्लाम्बरधरः । केशाश्च श्मश्रूणि च नखाश्च केशश्मश्रुनखानि नीचं कृत्तं केशश्मश्रुनखं यस्यासौ तथोक्तः शुचिरन्तर्बहिश्च स्नानानुलेपधूपस्रगादिभिः सुगन्धश्च भवेत् । यथाह गौतमः "स्नातको नित्यं शुचिः सुगन्धिः स्नानशीलः" इति । सुगन्धवत्त्वविधानादेव निर्गन्धमाल्यस्य निषेधः । तथा च गोभिलः "नागन्धां स्रजं धारयेदन्यत्र हिरण्यस्रजः" इति । "सदा स्नातक एवम्भूतो भवेत्" एतच्च सति सम्भवे "न जीर्णमलवद्वासा भवेच्च विभवे सतीति" मनुस्मरणात् । न च भार्यादर्शने तस्यां पुरतोऽवस्थितायां भुञ्जीयादवीर्य्यवदपत्योत्पादकत्वात् तथा च श्रुतिः "जायाया अन्ते नाश्नीयादवीर्य्यवदपत्यं भवति" इत्यतस्तया सह भोजनं दूरादेव निरस्तम् । न चैकवासाः । नापि संस्थितः उत्थितः अश्नीयादिति संबध्यते" मिता० । "न संशयं प्रपद्येत नाकस्मादप्रियं वदेत् । नाहितं नानृतं चैव न स्तेनः स्यान्न वार्द्धुषी" याज्ञ० । "कदाचिदपि संशयं प्राणविपत्तिसंशयावहं कर्म न प्रपद्येत न कुर्यात् । यथा व्याघ्रचोराद्युपेतदेशाक्रमणादि । अकस्मान्निष्कारणं किञ्चिदपि परुषमप्रियमुद्वेगकारि वाक्यं न वदेत् । न चाहितमनृतं वा प्रियमपि । चकारादसभ्यं बीभत्सकरवाक्यञ्च न वदेदिति संबध्यते । एतच्च परिहासादिव्यतिरेकेण "गुरुणापि समं हास्यं कर्त्तव्यं कुटिलं विना" इति स्मरणात् । न च स्तेनः अन्यदीयस्यादत्तस्य ग्रहीता स्यात् न वार्द्धुषी स्यात् प्रतिषिद्धवृद्ध्युपजीवी वार्द्धुषी न स्यात्" मिता० । "दाक्षायणी ब्रह्मसूत्री वेणुमान् सकमण्डलुः । कुर्यात् प्रदक्षिणं देवमृद्गोविप्रवनस्पतीन्" याज्ञ० । दाक्षायणं सुवर्णं तदस्यास्तीति दाक्षायणी । ब्रह्मसूत्रं यज्ञोपवीतं यस्या-

स्तीति ब्रह्मचारी वैणवयष्टिमान् कमण्डलुमान् स्यादिति सर्वत्र सम्बन्धनीयम्। अत्र ब्रह्मचारिप्रकरणोक्तस्यापि यज्ञोपवीतस्य पुनर्वचनं द्वितीयप्राप्त्यर्थम्। यथाह वशिष्ठः "स्नातकानां द्वितीयं स्यादन्तर्वासस्तथोत्तरम्। यज्ञोपवीते द्वे यष्टिः सोदकश्च कमण्डलुः" इति। अत्र च दामायणीति सामान्याभिधानेऽपि कुण्डलधारणमेव कार्य्यम् "वैणवीं धारयेद् यष्टिं सोदकञ्च कमण्डलुम्। यज्ञोपवीतं वेदञ्च शुभे रौक्मे च कुण्डले" इति मनुस्मरणात्। देवं देवप्रतिमां मृदमुद्धृताम्। गां ब्राह्मणं वनस्पतिं चाश्वत्थादिकं प्रदक्षिणं कुर्य्यात् एतान् दक्षिणतः कृत्वा व्रजेत्। एवञ्चतुष्पथादीनपि "मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम्। प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन्" इति मनुस्मरणात् मिता०। "न तु मेहेन्नदीच्छायावर्त्मगोष्ठाम्बुभस्मसु। न प्रत्यग्न्यर्कगोसोमसन्ध्याम्बुस्त्रीद्विजन्मनः" याज्ञ०। "नद्यादिषु न मेहेत् न मूत्रपुरीषोत्सर्गं कुर्य्यात्। एवं श्मशानादावपि यथाह मनुः "न गोमयकरीषधान्यकृष्टचितिश्मशानवल्मीकपर्वतपुलिनेषु मेहेत भूताधारत्वादिति"। तथाग्न्यादीन् प्रति वह्न्यादीनामभिमुखं न मेहेत्। नाप्येतान् पश्यन् यथाह गौतमः "न वाय्वग्निविप्रादित्यापोदेवतागाश्च प्रति पश्यन् वा मूत्रपुरीषामेध्यानि कुर्य्यान्न देवताः प्रति पादौ प्रसारयेत्"। एतद्व्यतिरेकेण भूमिमयज्ञियैस्तृणैरन्तर्धाय मूत्रपुरीषे कुर्य्यादिति यथाह वशिष्ठः "परिवेष्टितशिरा भूमिमयज्ञियैस्तृणैरन्तर्धाय मूत्रपुरीषे कुर्य्यादिति" मिता०। "नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनाम्। न च मूत्रं पुरीषं वा नाशुचीराहुतारकाः" याज्ञ०। "नैवार्कमीक्षेतेति यद्यप्यविशेषेणोक्तं तथाप्युदयास्तमयराहुग्रस्तोदकप्रतिबिम्बमध्याह्नवर्त्तिन एवादित्यस्यावेक्षणं निषिध्यते न सर्वदा। यथोक्तं मनुना "नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन। नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम्" इति। उपभोगादन्यत्र नग्नां स्त्रियं नेक्षेत "न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनात्" इत्याश्वलायनः। संसृष्टमैथुनां कृतोपभोगाम्। उपभोगान्ते ह्यनग्नामपि नेक्षेत। चकाराद्भोजनादिकमाचरन्तीञ्च। तथा च मनुः "नाश्नीयाद् भार्य्यया सार्द्धं नैनामीक्षेत चाश्नतीम्। क्षुवतीं जृम्भमाणाञ्च न चासीनां यथासुखम्। नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम्। न पश्येत् प्रसवन्तीं च श्रेयस्कामो द्विजोत्तमः" इति। मूत्रपुरीषे च न पश्येत्। तथा अशुचिः सन् राहुतारकाश्च न पश्येत्। चकारादुदके स्वप्रतिबिम्बम्। "न चोदके निरीक्षेत स्वरूपमिति धारणा" इति वचनात्" मिता०। "अयं मे वज्र इत्येवं सर्वं मन्त्रमुदीरयन्। वर्षत्यप्रावृतो गच्छेत् स्वपेत् प्रत्यक्शिरा न च" याज्ञ०। वर्षति सति अयं मे वज्रः पाप्मानमपहन्त्विति मन्त्रमुच्चारयन् अप्रावृतोऽनाच्छादितो न गच्छेन्न धावेत "न प्रधावेच्च वर्षतीति" प्रतिषेधात्। न च प्रत्यक्शिराः स्वप्यात्। चकाराद्नग्नो न शयीत। एकश्च शून्यगृहे। "न च नग्नः शयीतेति" "नैकः स्वप्यात् शून्यगृहे" इति मनुस्मरणात्" मिता०। "ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सु न निक्षिपेत्। पादौ प्रतापयेन्नाग्नौ न चैनमभिलङ्घयेत्" याज्ञ०। ष्ठीवनमुद्गिरणम्। असृग्रुधिरम्। शकृत् पुरीषं शेषं प्रसिद्धम्। एतान्यप्सु न निक्षिपेत्। नापः पादेन ताडयेत्। एवन्तुषादीनपि। यथाह मनुः "तुषकेशकरीषभस्मास्थिश्लेष्मनखलोमान्यप्सु न निक्षिपेत्। न पादेन पाणिना वा जलमभिहन्यादिति"। अग्नौ च पादौ न प्रतापयेत्। नाप्यग्निं लङ्घयेत्। चकारात् ष्ठीवनादग्नौ न क्षिपेत्। मुखोपधमनादि चाग्नेर्न कुर्य्यात् तथा च मनुः "नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियम्। नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्। न चैनं पादतः कुर्य्यान्न प्राणिबाधमाचरेत्" इति मिता०। "जलं पिबेन्नाञ्जलिना न शयानं प्रबोधयेत्। नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैर्वा न संविशेत्" याज्ञ०। जलमञ्जलिना संहताभ्यां पाणिभ्यां न पिबेत्। जलग्रहणं पेयमात्रोपलक्षणम्। विद्यादिभिरात्मनोऽधिकं शयानं न प्रबोधयेत् नोत्थापयेत् "श्रेयांसं न प्रबोधयेदिति" विशेषात्। अक्षादिभिश्च न क्रीडेत्। धर्मघ्नैः पशुतस्करादिभिः कर्मभिश्च न क्रीडेत्। व्याधितैर्ज्वराद्यभिभूतैरेकत्र न संविशेत् न शयीत" मिता०। "विरुद्धं वर्जयेत् कर्म्म प्रेतधूमं नदीतरम्। केशभस्मतुषाङ्गारकपालेषु च संस्थितम्" याज्ञ०। "जनपदकुलाचारग्रामादिविरुद्धं कर्म वर्जयेत्। प्रेतधूमं बाहुभ्यां नदीतरणञ्च वर्जयेदिति सम्बध्यते। केशादिषु संस्थितिं वर्जयेत्। चकारादस्थिकार्पासादिष्वपि च" मिता०। "नाचक्षीत धयन्तीं गां नाद्वारेण विशेत् क्वचित्। न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्त्तिनः" याज्ञ०। "परस्य क्षीरादि धयन्तीं गां परस्मै नाचक्षीत न च निवारयेत्।

अद्वारेण कापथेन क्वचिदपि नगरे ग्रामे मन्दिरे वा न प्रविशेत्। न कस्यचिद् शास्त्रातिक्रमकारिणो राज्ञः सकाशात् प्रतिगृह्णीयात्" मिता०। "प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः। दुष्टा दशगुणं पूर्व्वात् पूर्व्वादेते यथाक्रमम्" याज्ञ०। प्रतिग्रहेषु साध्येषु सूनादयः पञ्च पूर्व्वस्मात् पूर्व्वस्मात् परःपरो दशगुणं दुष्टाः। सूना प्राणिहिंसा सा यस्यास्तीति सूनी प्राणिहिंसापरः चक्री तैलिकः। ध्वजी सुराविक्रयी। वेश्या पण्यस्त्री। नराधिपः अनन्तरोक्तः" मिता०।

"देवर्त्विक्स्नातकाचार्य्यराज्ञां छायां परस्त्रियाः। नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्त्तनादि च" याज्ञ०। "देवानामृत्विक्स्नातकाचार्य्यराज्ञां परस्त्रियाश्च छायां नाक्रामेत् नाधितिष्ठेत् न लङ्घयेद् बुद्धिपूर्व्वम् यथाह मनुः "देवतानां गुरो राज्ञः स्नातकाचार्य्ययोरपि। नाक्रामेत् कामतश्छायां बभ्रुणो दीक्षितस्य च" इति। बभ्रुणो नकुलवर्णस्य यस्य कस्यचिद्वाऽन्यस्य वा सोमादेर्बभ्रुण इति नपुंसकलिङ्गनिर्द्देशात्। रक्तादीनि च नाधितिष्ठेत्। आदिग्रहणात् स्नानोदकादेर्ग्रहणम् "उद्वर्त्तनमपःस्नानं विण्मूत्रं रक्तमेव च। श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत कामतः" इति मिता०। "विप्राहिक्षत्रियात्मानो नावज्ञेयाः कदाचन। आमृत्योः श्रियमाकाङ्क्षेन्न कञ्चिन्मर्म्मणि स्पृशेत्" याज्ञ०। "विप्रो बहुश्रुतोऽहिः सर्पः क्षत्रियो नृपतिः। एते कदाचिदपि नावमन्तव्याः आत्मा च स्वयं नावमन्तव्यः। आमृत्योर्यावज्जीवं श्रियमिच्छेत् न कञ्चिन्मर्म्मणि स्पृशेत् कस्यचिदपि मर्म्म दुश्चरितं प्रकाशयेत्" मिता०। "दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेत्। श्रुतिस्मृत्युदितं सम्यक् नित्यमाचारमाचरेत्" याज्ञ०। "भोजनाद्युच्छिष्टं विण्मूत्रे पादप्रक्षालनजलञ्च गृहाद् दूरात् समुत्सृजेत्। श्रौतं स्मार्त्तं चाचारं नित्यं सम्यगनुतिष्ठेत्" मिता०। "गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत्। न निन्दाताडने कुर्य्यात् पुत्त्रं शिष्यञ्च ताडयेत्" याज्ञ०। गां ब्राह्मणमग्निमन्नमदनीयं विशेषतः पक्वमशुचिर्न स्पृशेत्। पादेन त्वनुच्छिष्टोऽपि "यदा पुनः प्रमादात् स्पृशति तदाचमनोत्तरकालं मनूक्तं कार्य्यम् "स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्। गात्राणि चैव सर्व्वाणि नाभिं पाणितलेन तु" इति एवं प्राणादीनुपस्पृशेत्। कस्यचिदपि निन्दाताडने न कुर्य्यात्। एतच्चानपकारिणः "अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगन्ततः। दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः" इति। पुत्त्रशिष्यौ शिक्षार्थमेव ताडयेत्। चकाराद् दासादीनपि। ताडनञ्च रज्ज्वादिनोत्तमाङ्गव्यतिरेकेण कार्य्यम् "शिष्यशिष्टिरवधेनाशक्तौ रज्जुवेणुदलाभ्यां तनुभ्यामन्येन घ्नन् राज्ञा शास्यः" इति गौतमवचनात्। "पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन" इति मनुवचनात्" मिता०। "कर्म्मणा मनसा वाचा यत्नाद्धर्म्मं समाचरेत्। अस्वर्ग्यं लोकविद्विष्टं धर्म्ममप्याचरेन्न तु" याज्ञ०। कर्म्मणा कायेन यथाशक्ति धर्म्ममनुतिष्ठेत्। तमेव मनसा ध्यायेत्। वाचा वदेत्। धर्म्मं विहितमपि लोकविद्विष्टं लोकाभिशस्तिजनकं मधुपर्के गोवधादिकं नाचरेत्। यस्मादस्वर्ग्यमग्नीषोमीयवत् स्वर्गसाधनं न भवति" मिता०। "मातृपितृतिथिभ्रातृजामिसम्बन्धिमातुलैः। वृद्धबालातुराचार्य्यवैद्यसंश्रितबान्धवैः। ऋत्विक्पुरोहितापत्यभार्य्यादाससनाभिभिः। विवादं वर्जयित्वा तु सर्व्वाल्लोकाञ्जयेद् गृही" याज्ञ०। माता जननी। पिता जनकः। अतिथिरध्वनीनः। भ्रातरो भिन्नोदरा अपि। जामयो विद्यमानभर्त्तृकाः स्त्रियः। सम्बन्धिनो वैवाह्याः। मातुलो मातृभ्राता। वृद्धः सप्तत्युत्तरवयस्कः। बालः आषोडशाद्वर्षात्। आतुरो रोगी। आचार्य्य उपनेता। वैद्यो विद्वान् भिषग्वा। संश्रित उपजीवी। बान्धवाः पितृपक्षा मातृपक्षाश्च। मातुलस्य पृथगुपादानम् आदरार्थम्। ऋत्विग्याजकः। पुरोहितः शान्त्यादेः कर्त्ता। अपत्यं पुत्त्रादि। भार्य्या सहधर्म्मचारिणी। दासः कर्म्मकरः। सनाभयः सोदराः भ्रातृभ्यः पृथगुपादनं अजामिभगिनीप्राप्त्यर्थम्। एतैः मात्रादिभिः सह वाक्कलहं परित्यज्य सर्व्वान् प्राजापत्यादीन् लोकान् प्राप्नोति"। "पञ्च पिण्डाननुद्धृत्य न स्नायात् परवारिणि। स्नायान्नदीदेवखातह्रदप्रस्रवणेषु च" याज्ञ०। परवारिषु परसम्बन्धिषु सर्व्वस्वत्वोद्देशेन त्यक्तेषु तडागादिषु पञ्चपिण्डाननुद्धृत्य न स्नायात्। अनेनात्मीयोत्सृष्टाभ्यनुज्ञातेषु पिण्डोद्धरणमन्तरेणापि स्नानमभ्यनुज्ञातम्। नद्यादिषु कथं तर्हीत्याह स्नायान्नदीति। साक्षात् परम्परया वा समुद्रगाः स्रवन्त्यो नद्यः। देवखातं देवनिर्म्मितं पुष्करादि। उदकप्रवाहाभिघातकृतजले महानिम्नप्रदेशो ह्रदः। पर्व्वताद्युच्चप्रदेशात् प्रस्रुतम् उदकं प्रस्रवणं एतेषु पञ्चपिण्डोद्धरणेनैव स्नायात्। एतच्च नित्यस्नानविषयम् इति सर्व्व-

"नदीषु देवखातेषु तड़ागेषु सरःसु च । स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च" इति नारदस्मरणात् । शौचाद्यर्थन्तु यथासम्भवं परकीयेष्वपि पिण्डानुद्धरणेऽपि सर्वस्य न निषेधः" मिता० । "परशय्यासनोद्यानगृहयानानि वर्जयेत् । अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि" याज्ञ० । शय्या कशिपुः । आसनं पीठादि । उद्यानमारामयादि । गृहं प्रसिद्धम् । यानं रथादि परसम्बन्धीन्येतान्यदत्तान्यननुज्ञातानि वर्जयेन्नोपभुञ्जीत । अभोज्यान्नान्याह । अग्निहीनस्येति । श्रौतस्मार्त्ताग्न्यधिकाररहितस्य शूद्रस्य प्रतिलोमजस्य वाधिकारवतोऽप्यग्निरहितस्यान्नमनापदि न भुञ्जीत न प्रतिगृह्णीयाच्च । "तस्मात् प्रशस्तानां स्वकर्म्मणा शुद्धजातीनां ब्राह्मणो भुञ्जीत प्रतिगृह्णीयाच्चेति" गौतमवचनात्" मिता० । "कदर्य्यबद्धचौराणां क्लीवरङ्गावतारिणाम् । वैणाभिशस्तवार्द्धुष्यगणिकागणदीक्षिणाम्" याज्ञ० । कदर्य्यो लुब्धः "आत्मानं धर्म्मकृत्यञ्च पुत्त्रदारांश्च पीड़येत् । लोभाद् यः पितरौ भृत्यान् स कदर्य्य इति स्मृतः" इत्युक्तः । बद्धो निगड़ादिना वाचा संनिरुद्धश्च । चौरो ब्राह्मणसुवर्णव्यतिरिक्तपरस्वापहारी । क्लीवो नपुंसकः । रङ्गावतारी नटचारणमल्लादिः । वेणुच्छेदजीवी वैणः । अभिशस्तः पतनीयैः कर्म्मभिरभियुक्तः । वार्द्धुष्यो निषिद्धवृद्ध्युपजीवी । गणिका पण्यस्त्री गणदीक्षी बहुयाजकः । एतेषामन्नं नाश्नीयादित्यनुवर्त्तते" मिता० । "चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम् । क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनाम्" याज्ञ० । "चिकित्सकोऽभिषग्वृत्त्युपजीवी । आतुरो महारोगोपसृष्टः । "वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः । अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्त्तिताः" इति । क्रुद्धः कुपितः । पुंश्चली व्यभिचारिणी । मत्तो विद्यादिना गर्व्वितः । विद्विट् शत्रुः । क्रूरो हृदाभ्यन्तरकोपः । वाक्कायव्यापारेणोद्वेजक उग्रः । पतितो ब्रह्महादिः । व्रात्यः पतितसावित्रीकः । दाम्भिको वञ्चकः । उच्छिष्टभोजी परभुक्तोज्झिताशी । एतेषाञ्चिकित्सकादीनामन्नं नाश्नीयात्" मिता० । "अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम् । शस्त्रविक्रयकर्म्मारतन्तुवायश्ववृत्तिनाम्" याज्ञ० । "अवीरा स्त्री स्वतन्त्रा व्यभिचारमन्तरेणापि । पतिपुत्त्ररहितेत्यन्ये । स्वर्णकारः सुवर्णस्य विकारान्तरकृत् । स्त्रीजितः सर्व्वत्र स्त्रीवशवर्त्ती । ग्रामयाजी ग्रामस्य शान्त्यादिकर्त्ता बहूनामुपनेता च । शस्त्रविक्रयी शस्त्रविक्रयोपजीवी । कर्म्मारो लोहकारः तक्षादिश्च । तन्तुवायः सूचीशिल्पोपजीवी । श्ववृत्तिः जीवनमस्यास्तीति श्ववृत्ती । एतेषामन्नं नाश्नीयात्" मिता० । "नृशंसराजरजककृतघ्नवधजीविनाम् । चैलधावसुराजीवसहोपपतिवेश्मनाम् । पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनाम् । एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा" याज्ञ० । "नृशंसो निर्दयः । राजा भूपतिः । तद्व्यपाश्रयात्पुरोहितश्च । यथाह मनुः "भीतावगीतरुदिताक्रन्दितावघुष्टक्षुधितपरिभुक्तविसितान्नतावभूतराजपुरोहितान्नानि वर्जयेत्" । रजको वस्त्रादीनां नीलादिरागकारकः । कृतघ्न उपकृतस्य हन्ता । वधजीवी प्राणिनां वधेन वर्त्तकः । सुराजीवी मद्यविक्रयजीवी । उपपतिजारः सहोपपतिना वेश्म यस्यासौ सहोपपतिवेश्मा । पिशुनः परदोषस्य ख्यापकः । अनृती मिथ्यावादी । चाक्रिकस्तैलिकः । शाकटिकश्चेत्येके "अभिशस्तपतितचाक्रिकतैलिकः" इति भेदेनाभिधानात् । वन्दिनः स्तावकाः सोमविक्रयी सोमलताया विक्रेता । एतेषामन्नं न भोक्तव्यम् । सर्व्वे चैते कदर्य्यादयो द्विजा एव कदर्य्यत्वादिदोषदुष्टा अभोज्यान्ना इतरेषां प्राप्त्यभावात् प्राप्तिपूर्व्वकत्वाच्च प्रतिषेधस्य । अग्निहीनस्य नान्नमद्यादनापदीत्यत्र शूद्रस्याभोज्यान्नत्वमुक्तम् । तत्र प्रतिप्रसवमाह" मिता० । "शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः । भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्" याज्ञ० । "दासा गर्भदासादयः गोपालो गवां पालकः गवां पालनेन यो जीवति । कुलमित्रं पितृपितामहादिक्रमागतः । अर्द्धसीरी हलपर्य्याय सीरोपलक्षितकृषिफलभागग्राही । नापितः गृहव्यापारकारयिता नापितश्च । यश्च वाङ्मनःकायकर्म्मभिरात्मानं निवेदयति तवाहमिति । एते दासादयः शूद्राणां मध्ये भोज्यान्नाः । चकारात् कुम्भकारश्च । "गोपनापितकुम्भकारकुलमित्रार्द्धिकनिवेदितात्मानो भोज्यान्ना" इति वचनात् ।

स्नातकश्च त्रिविधः व्रतस्नातकः विद्यास्नातकः उभयस्नातकश्चेति भेदात् । तत्र विहितकालपर्य्यन्तं ब्रह्मचर्य्यं कृत्वा वेदमसमाप्यैव व्रतकालोत्तरं कृतसमावर्त्तन आद्यः । विहितकालमध्येऽपि वेदविद्यां लब्ध्वा स्नातो द्वितीयः । विहितकालपर्य्यन्तं ब्रह्मचर्य्यं कृत्वा वेदमुक्त्वा तं लब्ध्वैव तत्कालोत्तरं कृतस्नानस्तृतीयः ।

स्नातकव्रत न० ६त० । स्नानपर्य्यन्ते कृत्ये व्रतभेदे

"अलाभे चैव कन्यायाः स्नातकव्रतमाचरेत्" स्मृतिः ।

स्नान न० स्ना-भावे ल्युट् । १शोधने २अवगाहने ३मज्जने च तच्च मन्त्रादिकारणभेदादष्टविधं आ० त० तत्प्रकारभेदादिकं च दर्शितं यथा

"दक्षः "चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् । तिलपुष्पकुशादीनि स्नानार्थं स्वाकृत्रिमे जले" । कुर्य्यादिति शेषः । तथा च "अस्नात्वा चाप्यहुत्वा च भुङ्क्तेऽदत्त्वा च यो नरः । देवादीनामृणी भूत्वा नरकं प्रतिपद्यते" । "अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चन । लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान् । अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः । स्रवत्येव दिवा-रात्रौ प्रातःस्नानं विशोधनम् । प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टफ ... हि तत् । सर्वमर्हति पूतात्मा प्रातःस्नायी जपादि ... अस्नानाद् यदि वा मोहात् रात्रौ दुश्चरितं कृतं ... स्नानेन तत् सर्वं शोधयन्ति द्विजातयः" । ... अदृष्टं प्रत्यवायपरीहारादि । प्रात ... लः "प्रातः स्नायादरुणकिरणग्रस्तां प्राचीमव ... ष्" इति विष्णूक्तेः । प्रातःस्नाने मध्याह्नस्नानधर्मातिदेशमाह कात्यायनः "यथाहनि तथाप्रातर्नित्यं स्नायादनातुरः । दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत्" । यथा तथेतिकर्त्तव्यतया । सा च "आचरेदुषसि स्नानं तर्पयेद्देवमानुषान्" इति जाबाल्युक्ता । वैदिके कर्मणि वामहस्ते बहुतरकुशान् दक्षिणेन पवित्रं धारयेत् । तथा च छन्दोगपरिशिष्टम् "हस्ताः प्रचरणीयाः स्युः कुशा दीर्घाश्च बर्हिषः । दर्भाः पवित्रमित्युक्तमतः सन्ध्यादिकर्मसु । सव्यः सोपग्रहः कार्य्यो दक्षिणः सपवित्रकः" । प्रचरणीयाः पार्वणपश्वयागादिकर्मानुष्ठानार्हाः । बर्हिषः कुशास्तरणार्थाः । यतस्तत्कर्मसु कुशविशेषा उक्ताः अतः सन्ध्यादिकर्मसु अवस्थाविशेषशून्याः कुशाः पवित्रम् । सोपग्रहः बहुतरकुशयुक्तः सपवित्रको विशिष्टद्विदलयुक्तः । विशेषमाह स एव "अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्" । अनन्तर्गर्भिणं अन्तर्गर्भशून्यम् । तथा च शौनकः "अनन्तर्गर्भिणौ यौ तु कुशौ प्रादेशसम्मितौ । अनखच्छेदिनौ साग्रौ तौ पवित्राभिधायकौ" । "एतदभावे कुशपत्रचतुष्टयं त्रयं वा समुद्रकरधृतवचनात् । तद् यथा "चतुर्भिर्दर्भपत्रैस्तु त्रिभिर्द्वाभ्यामथापि वा । पवित्रं कारयेन्नित्यं प्रशस्तं सर्वकर्मसु" । विद्याकरवाजपेयिधृतम् "पवित्रन्तु द्विजः कुर्य्यात् कुशपत्रद्वयेन वा । पत्रत्रयेण वा कार्य्यं नैकपत्रस्य कुत्रचित्" । एतद्दर्शनात् दर्भाःपवित्रमित्यत्रैकमपि व्याख्येयम् मार्कण्डेयः "सर्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः । श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः । सप्तमीं नवमीञ्चैव पर्वकालञ्च वर्जयेत्" । विष्णुधर्मोत्तरे "त्वराक्रोधौ तथा स्त्रीं दैवकर्मणि पण्डितैः । चतुरापः पयश्चैव ताम्बूलं फलमौषधम् । भक्षयित्वा तु कर्त्तव्याः स्नानदानादिकाः क्रियाः" । भविष्योत्तरे "स्नातस्य वरुणस्तेजो जुह्वतोऽग्निः श्रियं हरेत् । भुञ्जानस्य यमस्त्वायुस्तस्मान्न व्याहरेत् त्रिषु" । स्नातुः स्नानं कुर्वतः । अशुचेरवगाहनानन्तरं स्नानमाह योगियाज्ञवल्क्यः "तूष्णीमेवावगाहेत यदा स्यादशुचिर्नरः । आचम्य तु ततः पश्चात् स्नानं विधिवदाचरेत्" । वामनपुराणम् "नाभिमात्रजले गत्वा कृत्वा केशान् द्विधा द्विजः । निरुध्य कर्णौ नासाञ्च त्रिःकृत्वो मज्जनं ततः" । तत्रैव वृद्धयाज्ञवल्क्यः "स्रोतसां संमुखो मज्जेत् यत्रापः प्रवहन्ति वै । स्थावरेषु महद्देव सूर्यसम्मुख आप्लवेत्" । हारीतः "नातुरो न भुक्त्वा न जीर्णवासा न बहुवासा न नग्नो नाग्नन् नावकण्ठिको नालङ्कृतो नाजस्रं नाज्ञाते जले नाकूले नाशुचौ न प्रभूतजले न नाभेरल्पजले न चत्वरे नोपद्वारे न सन्ध्यायां न निशायां स्नायादिति" । चत्वरे काकादिबलिस्थले इति श्रीदत्तः । उपद्वारे द्वारसमीपे । अत्रैकेन मुनिना नग्नबहुवाससोर्निषेधस्याभिधानात् स्नाने द्विवाससः एवाधिकारः प्रतीयते । एकवस्त्रस्नाने दोषमाह समुद्रकरधृतभविष्ये गौतमः "एकवस्त्रेण यत्स्नानं भुक्त्वा विष्णेन चैव हि । स्नातस्तु न भवेत् शुद्धः श्रिया च परिहीयते" । अतएव "स्नानं तर्पणपर्य्यन्तं कुर्य्यादेकेन वाससा" इति यदि समूलं तदा प्रेततर्पणपरमिति "तत्रैकवस्त्रा स्नात्वा" इत्यादिना एकवस्त्रत्वाभिधानात् "एकेन एकजातीयेन" इति वाचस्पतिमिश्राः । "येन वाससा स्नानं कृतं जलस्थस्तेनैव तर्पणम्" इति कृत्यतत्त्वार्णवः । न च "स्नानशाटीन्तु दातव्या मृदास्तत्रो विशुद्धये । जलमध्ये तु यः कश्चित् द्विजातिश्चीनदुर्बलः । निष्पीडयति वस्त्रं स्नानं तस्य वृथा भवेत्" इति वशिष्ठवचने स्नानशाटीमिति तदुक्तमिति वस्त्रमिति एकवचननिर्देशेन च स्नानेऽप्येकवस्त्रतामिति

वाच्यम् अत्र शिरसश्च इत्यभिधानेनाधोधृतवस्त्रस्यैव कृत्स्नेण प्रक्षालनं नतूत्तरीयस्य एतदर्थमेकवचनम्। अतएव "कृत्स्नेणाधरीयवस्त्र" प्रक्षाल्यं वशिष्ठवचनैकवाक्यतया। इत्याह्निकचिन्तामणिः। "स्नातो नाङ्गानि निर्मृज्यात् स्नानशाट्या न पाणिना" इति विष्णुपुराणीयेनाधरीयवस्त्रेणैव गात्रमार्जनं निषिध्यते। "एतेन निर्मृज्य स्नानवस्त्रमिति"कात्यायनवचने एकत्वमविवक्षितमिति निरस्तम्। अतएव सर्वत्रैकत्वं निर्दिष्टम्। शिष्टानाम् आचारोऽपि तथा इति। "नाजस्रमिति पुनः पुनः स्नाननिषेधः रागप्राप्तस्नानविषयो दृष्टार्थकत्वात्। एकस्मिन् दिने नानातीर्थादिनिमित्तप्राप्तस्नानावृत्तिर्भवत्येव वैधत्वात्। अत्रापि तन्त्रप्रसङ्गयोः सत्त्वे सकृदेवेति। अङ्गः स्नानप्रधानकालमाह दक्षः "चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्। तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले"। विष्णुः "कुशाभावे कुशस्थाने काशं दूर्वां वा दद्यादि"ति निद्राकरधृतम् "तर्जनी रूप्यसंयुक्ता हेमयुक्ता त्वनामिका। रुपैव युक्ता तु दर्भेण कार्य्या विप्रेण सर्वदा"। मत्स्यसूक्ते "प्रक्ताः कनूना दर्भाश्च शुक्लेन चाधिकं फलम्। सव्यः गोदमहः कार्य्यो दक्षिणः सपवित्रकः" इति रोगिणश्चाण्डालादिस्पर्शेऽपि न दोषायेत्याह रत्नाकरे बृहस्पतिः "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च स्पृष्टास्पृष्टं न दुष्यति। आपद्यपि च कष्टायां सद्भये पंङ्क्तौ सदा। मातापित्रोर्गुरोश्चैव निर्देशे वर्त्तने तथा"। स्पृष्टास्पृष्टीत्यव्ययम् क्रियाव्यतिहारे। तद्देति न दुष्यतीत्यर्थः। गारुडे "सर्वतीर्थाभिषेकाद्धि पवित्रं विदुषां वचः। धर्मश्रवणवेलायां विप्रो व्याससमः स्थितः"। तथाविधातुरं प्रति जाबालः "अशिरस्कं भवेत् स्नानं स्नानाशक्तौ तु कर्मिणाम्। आर्द्रेण वाससा वापि दोहकं मार्जनं स्मृतम्" कर्मिणाम् "शिरः स्नातस्तु कुर्वीत दैवं पैत्रमथापि वा" इति मार्कण्डेयपुराणोक्तकर्म चिकीर्षूणां मार्जनमिह प्रोञ्छनं, योगियाज्ञवल्क्यः "असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया। मान्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः। मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसञ्चैव सप्त स्नानं प्रकीर्त्तितम्। "आपो हिष्ठेति" वै मान्त्रं मृदालम्भस्तु पार्थिवम्। आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्। यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते। वारुणञ्चावगाहश्च मानसं विष्णुचिन्तनम्। समस्तं स्नानमुद्दिष्टं मन्त्रस्नानक्रमेण तु। कालदोषादसामर्थ्यात् सर्वं तस्य फलं स्मृतम्"। आपो हिष्ठेति आपो हिष्ठादि ऋक्त्रयमत्र विवक्षितम्। एवञ्च "कालदोषादसामर्थ्यात् न शक्नोति यदाम्भसि। तदा स्नात्वा तु ऋषिभिर्मन्त्रैर्दर्भैस्तु मार्जनम्। यत्र आपस्तु द्रुपदा२ आपो हिष्ठा३ऽघमर्षणम्४। एभिश्चतुर्भिः सर्वग्मन्त्रैः मन्त्रस्नानमुदाहृतम्। इति योगियाज्ञवल्कीयं यन्मन्त्रस्नानान्तरं तत् प्राधान्यख्यापनाय। अतएव पितृदयितायां सन्ध्यातः पूर्वं तल्लिखितम्। मृदालम्भस्तु गङ्गामृत्तिकातिलकरूपः। भस्मना संस्कृतभस्मना इति छन्दोगाह्निकः। अवगाहश्च मन्त्राद्यङ्गशून्यावगाहनमात्रं विवक्षितम् अतो मुख्यावगाहनरूपस्नानानुकल्पत्वमप्युक्तम्। कालदोषोऽतिरात्र्यादिः असामर्थ्यं शरीरापाटवहेतुः अल्पत्वेन सम्पूर्णवारुणस्नानविधिकालायोग्यत्वं वेति। एतन्मूलकं "गेहे चेत्तदमन्त्रवदिति" छन्दोगपरीशिष्टीयं प्रागुक्तम् अन्यथा मूलभूतस्मृत्यन्तरकल्पनापत्तेः सामर्थ्ये तु तत्तत्कालेनापि समन्त्रकस्नानमाह पराशरभाष्ये व्यासः "शीतास्त्वपो निषेव्योष्णा मन्त्रसम्भारसंस्कृताः। गेहेऽपि शस्यते स्नानं तद्धीनमफलं स्मृतम्"। पद्मपुराणम् "नैर्मल्यं भावशुद्धिश्च विना स्नानं न जायते। तस्मान्मनोविशुद्ध्यर्थं स्नानमादौ विधीयते। अनुद्धृतैरुद्धृतैर्वा जलैः स्नानं समाचरेत्। तीर्थं प्रकल्पयेद्विद्वान् मूलमन्त्रेण मन्त्रवित्। नमो नारायणायेति मूलमन्त्र उदाहृतः। दर्भपाणिस्तु विधिना आचान्तः प्रयतः शुचिः। चतुर्हस्तसमायुक्तं चतुरस्रं समन्ततः। प्रकल्प्यावाहयेद्गङ्गां एभिर्मन्त्रैर्विचक्षणः"। काशीख॰ अन्यप्रकारो दर्शितो यथा

"प्रातःस्नानं चरित्वाथ शुद्धे तीर्थे विशेषतः। प्रातःस्नानाद् यतः शुद्ध्येत् कायोऽयं मलिनः सदा। छिद्रितो नवभिश्छिद्रैः स्रवत्येव दिवानिशम्। उत्साहमेधासौभाग्यरूपसम्पत्प्रवर्त्तकम्। मनःप्रसन्नताहेतुः प्रातःस्नानं विशिष्यते। प्रस्वेदलालाद्याक्लिन्नो निद्राधीनो यतो नरः। प्रातःस्नानात्ततोऽर्हः स्यान्मन्त्रस्तोत्रजपादिषु। प्रातः प्रातस्तु यः स्नानं कुर्याते चारुणोदये। प्राजापत्यसमं प्राहुस्तन्महाघविघातकृत्। प्रातःस्नानं हरेत् पापमलक्ष्मीं ग्लानिमेव च। अशुचित्वञ्च दुःस्वप्नं तुष्टिं पुष्टिं प्रयच्छति। नोपसर्पन्ति वै दुष्टाः प्रातःस्नायिजनं क्वचित्। दृष्टादृष्टफलं तस्मात् प्रातः-

स्नानं समाचरेत् । प्रसङ्गतः स्नानविधिं वक्ष्यामि कलशोद्भव ! । विधिस्नानं यतः प्राहुः स्नानाच्छतगुणोत्तरम् । विशुद्धां मृदमादाय बर्हींषि तिलगोमयम् । शुचौ देशे परिस्थाप्य चाचम्य स्नानमाचरेत् । उपपद्दो बद्धशिखो जलमध्ये समाविशेत् । उरुं हि राजेति मन्त्रेण तोयमावर्त्त्य स्थितः । ये ते शतं ततो जप्यात् तोयस्यामन्त्रणाय च । सुमित्रायान इति मन्त्रेण पूर्वं कृत्वा जलाञ्जलिम् । क्षिपेद् द्वेष्यं समुद्दिश्य जपन् दुर्मित्रिया इति । इदं विष्णुरिदं जप्त्वा लिम्पेदङ्गानि मृन्मृदा । मृदैकया शिरः क्षाल्यं द्वाभ्यां नाभेस्तथोपरि । नाभेरधस्तु तिसृभिः पादौ षड्भिर्विशोधयेत् । मज्जेत् प्रशान्ताभिमुख आपो अस्मानिमं जपन् । उदित्ताभ्यः शुचिरिति मन्त्र उन्मज्जने मतः । मानस्तोकमिमं जप्त्वा लिम्पेद्गात्राणि गोमयैः । इमं मे वरुणेत्यादिमन्त्रैः स्नात्वाभिषेचनम् । तत्त्वा यामि तथा त्वन्नः स त्वन्नश्चाप्युदुत्तमम् । धाम्नाधाम्नस्तथामापो मौषधीरिति संजपेत् । यदा दुरन्त्या शुन्धन्तु मेतिमाश्मनेति च । अष्टावेता इमे मन्त्राः प्रोक्ताः स्नानाभिषेचने । प्रणवेन ततो विप्रो महाव्याहृतिभिस्ततः । आत्मानं पावयेद्विद्वान् गायत्र्या च ततः कृती । आपो हि ष्ठेति तिसृभिः प्रत्यृचं पावनं स्मृतम् । एते वै पावना मन्त्रा इदमापोऽङ्घ्रिविश्रुतौ । देवीरापः आपो देवा द्रुपदादिवसंज्ञकः । शन्नो देवी रपो देवीरपाश्च वरमित्यपि । पुनन्त्वेमेति च नव पावमान्यः प्रकीर्त्तिताः । ततोऽघमर्षणं जप्त्वा द्रुपदां च ततो जपेत् । प्राणायामं च विधिवदथ वान्तर्जलं जपेत् । प्रणवं त्रिर्जपेद्वापि विष्णुं वा संस्मरेत् सुधीः । स्नात्वेत्थं वस्त्रमापीड्य गृह्णीयाद्धौतवाससी" ।

स्नानतृण न० स्नानार्थं तृणम् । कुशे शब्दर० ।

स्नानीय त्रि० स्नानाय हितम् छ । स्नानसाधने तैलोद्वर्त्तनादौ

स्नायु स्त्री स्नाति—शुध्यति दोषोऽनया स्ना उण् । शरीरादिबन्धननाडीभेदे तत्स्वरूपसंख्यादि भावप्र० उक्तं यथा "तत्र स्नायोः स्वरूपमाह । मेदसः स्नेहमादाय शिरा स्नायुत्वमाप्नुयात् । शिराणां हि मृदुः पाकः स्नायूनान्तु ततः खरः । स्नायवो बन्धनानि स्युर्देहमांसास्थिमेदसाम् । सन्धीनामपि यतस्तु शिराभ्यः सुदृढाः स्मृताः । नौर्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्युता । भिसेक्षाऽगाधसलिले भवेद्भारसहा भृशम् । एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः । स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः" ; फलकैः काष्ठखण्डैः आस्तीर्णा व्याप्ताः "शतानि नव जायन्ते शरीरे स्नायवो नृणाम् । तासां विवरणं ब्रूमः शिष्याः शृणुत यत्नतः । शाखासु षट्शतानि स्युः कोष्ठे त्रिंशत् शतद्वयम् । ग्रीवायां मूर्द्धदेशे तु स्नायूनां सप्ततिः स्मृताः" । तत्र शाखागताः प्राह । एकैकस्यां पदाङ्गुल्यां षट् षट् तास्त्रिंशत् । तावन्त्य एव तलकूर्चगुल्फेषु । तावन्त्य एव जङ्घायां दश जानुनि । चत्वारिंशदूरौ । दश वङ्क्षणे । एवं सार्द्धशतमेकस्मिन् सक्थिनि भवन्ति । एतेनेतरसक्थि बाहू च व्याख्यातौ । अथ कोष्ठगताः प्राह षष्टिः कट्यां तावन्त्य एव पार्श्वयोः । अशीतिः षट्त्रिंशदुरसि । अथ ग्रीवोर्द्धगताः प्राह षट् त्रिंशद् ग्रीवायाम् । चतुस्त्रिंशन् मूर्ध्नि एवं स्नायूनां नवशतानि भवन्ति" ।

स्नायुरोग पु० ६त० । स्नायुस्थे रोगभेदे तन्निदानादि भावप्र० उक्तं यथा
"तत्र स्नायुरोगस्य विप्रकृष्टं सामान्यलक्षणमाह "शाखासु कुपितो दोषः शोथं कृत्वा विसर्पवत् । भिनत्त्येव तं क्षतं तत्र सोष्मणाशं विशोष्य च । कुर्यात्तन्तुनिभं सूत्रं तत्पिण्डैस्तक्रसक्तुजैः । शनैः शनैः क्षताद्याति छेदात्तत्कोपमावहेत् । तत्पाताच्छोथशान्तिः स्यात् पुनः स्थानान्तरे भवेत् । स्नायुरोग इतिख्यातः क्रियोक्ता तु विसर्पवत् । बाह्वोर्यदि प्रमादेन त्रुट्यते जङ्घयोरपि । सङ्कोचं खञ्जतां चापि छिन्नो नूनं करोत्यसौ" ।

स्नायुर्म्मन् न० नेत्ररोगभेदे "स्थिरं प्रसारिमांसाढ्यं शुष्कं स्नाय्वर्म पञ्चमम्" माधवनिदानम् ।

स्निग्ध त्रि० स्निह–क्त । स्नेहयुक्ते वयस्ये २मसृणे चिक्कणे अमरः । ३रक्तैरण्डे ४सरलद्रुमे च पु० राजनि० ५भक्तमण्डे न० ६मेदायां स्त्री राजनि० ।

स्निग्धतण्डुल पु० ६ब० । षष्टिधान्ये राजनि० । [शब्दर० ।

स्निग्धता स्त्री स्निग्धस्य भावः । १स्नेहे राजनि० २प्रियत्वे च

स्निग्धदारु पु० स्निग्धं दारु काष्ठमस्य । १सरलद्रुमे जटा० २देवदारुद्रुमे च राजनि० ।

स्निग्धपत्रक पु० स्निग्धं पत्रमस्य कप् । १पूतकरञ्जे २गुच्छकरञ्जे ३गजेरटणे च राजनि० ४बदर्यां स्त्री जटा० । ५पालक्यां ६काश्मर्याञ्च स्त्री राजनि० । [च राजनि० ।

स्निग्धपिण्डीतक पु० कर्म० । १मदनवृक्षभेदे २पिण्डीतकवृक्षे

स्निग्धफला स्त्री स्निग्धं फलमस्याः । नाकुल्याम् राजनि० ।

स्निट स्नेहे चु० उभ० सक० सेट् । स्नेटयति—ते असिस्निटत्—

न । इत्यालस्यादित्ययं योपदेश एव न्याय्यः ।

स्नु उ० स्ना+नु आदेशः स्ना-कु वा । १पर्वतस्य समभूभागे अमरः २स्नायौ च । "त्रिष्टुप् मांसात् स्नुतोऽनुष्टुप्" भाग० ३।१२अ० । "स्नुतः स्नायुतः" इति श्रीधरः ।

स्नुक्छद पु० स्नुह्यति स्नुह-क्विप् कुत्वम् स्नुक् छदोऽस्य । चोरकपुष्पीवृक्षे रत्नमा० ।

स्नुत पु० स्नु-क्त । क्षरिते जलादौ अमरः । [शब्दर० ।

स्नुषा स्त्री स्नु-सक् । १पुत्रवध्वाम् अमरः २स्नुहीवृक्षे च

स्नुह(हा) स्त्री स्नुह-क्विप् वा टाप् । स्नुहीवृक्षे अमरः ।

स्नुहि(ही) स्नुह-इन् वा ङीप् । (मनसासिज्) वृक्षे अमरः "स्नुहीविटपसंश्रिताम्" ति०त० देवीपु० ।

स्नेह पु० स्निह-घञ् । १प्रेम्णि अमरः २तैलादिरसभेदे ३न्यायोक्ते गुणभेदे च यद्वशात् दाहानुकूल्यम् । स च गुणः जलस्य चूर्णादिपिण्डीभावहेतुः । "जले मधुरशीतलौ । स्नेहस्तत्र द्रव्यत्वन्तु सांसिद्धिकमुदाहृतम्" भाषा० । "घृतादावपि तदन्तर्वर्त्तिजलस्यैव स्नेहः जलस्य स्नेहसमवायिकारणत्वात् तेन जल एव स्नेह इति मन्तव्यम्" मुक्ता० "स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ । तैलान्तरे तत्प्रकर्षात् दहनस्यानुकूलता" भाषा० "ननु पृथिव्यामपि तैले स्नेह उपलभ्यते न चासौ जलीयः तथा सति दहनप्रातिकूल्यं स्यादत आह तैलान्तरे इति तत्प्रकर्षात् स्नेहप्रकर्षात् । तैले उपलभ्यमानः स्नेहोऽपि जलीय एव तस्य प्रकर्षादग्नेरानुकूल्यम् । अपकृष्टस्नेहं हि जलं वह्निं नाशयतीति भावः" मुक्ता० । ४प्रेमरूपस्नेहस्य वत्सलरसस्य स्थायिभावः स च रसः भरतसम्मतः सा०द० उक्तो यथा "स्फुटं चमत्कारितया वत्सलञ्च रसं विदुः । स्थायी वत्सलता स्नेहः पुत्राद्यालम्बनं मतम् । उद्दीपनानि तच्चेष्टा विद्याशौर्यदयादयः । आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनमीक्षणम् । पुलकानन्दबाष्पाद्या अनुभावाः प्रकीर्तिताः । सञ्चारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः । पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः" । "अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् । परोपकारनिरता मणिदीपा इवोत्तमाः" उद्भ० ।

स्नेहन् पु० स्निह कनिन् नि० गुणारामभेदे उणा० ।

स्नेहन न० स्निह-णिच्-ल्युट् । १तैलादिमर्दने अभ्यङ्गे राजनि० २स्नेहसाधने क्रियाभेदे भा०प्र० तत्प्रकार उक्तो यथा "स्नेहनविधिः "स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा मज्जा । च तं पिबेन्मर्त्यः किञ्चिदभ्युदिते रवौ । स्थावरो जङ्गमश्चैव द्वियोनिः स्नेह उच्यते । तिलतैलं स्थावरेषु जङ्गमेषु घृतं वरम् । द्वाभ्यां त्रिभिश्चतुर्भिर्वा यमकस्त्रिवृतो महान्" । अस्यायमर्थः द्वाभ्यां स्नेहाभ्यां घृततैलाभ्यां यमकाख्यः स्नेहः स्यात् । त्रिभिः स्नेहैः घृततैलवसाख्यैः त्रिवृताख्यः स्यात् । चतुर्भिर्घृततैलवसामज्जाभिर्महान्महास्नेहः स्यादित्यर्थः । "पिबेत् त्र्यहं चतुरहं पञ्चाहं षडहानि वा" । मृदुमध्यक्रूरकोष्ठापेक्षया त्र्यहं चतुरहं पञ्चाहं षडहानि चेति । यदुक्तम् "मृदुकोष्ठस्त्रिरात्रेण स्निग्धः स्नेहोपसेवया । मध्यकोष्ठश्चतुर्भिश्च दिवसैः स्निह्यति ध्रुवम् । पञ्चभिरथ षड्भिर्वा दिनैः क्रूरो विशुद्ध्यति । सप्तरात्रात्परं स्नेहः सात्म्यीभवति सेवितः" । मृदुमध्यक्रूरकोष्ठानां सर्वेषां सप्तरात्रात्परं सात्म्यीभवति वातानुलोम्याग्निदीप्तिकोष्ठशुद्धिमृदुस्निग्धाङ्गतासंहतवचनाङ्गतामलधातुपुष्टिदृढदार्ढ्यनिर्जरताबलवर्णकारो भवति । न तु सात्म्यो वातानुलोम्यादीन् करोति । "दोषकालबलाग्निवयान्यालोक्य योजयेत् । हीनाञ्च मध्यमां ज्येष्ठां मात्रां स्नेहस्य बुद्धिमान् । अमात्रया तथाऽकाले मिथ्याहारविहारतः । स्नेहः करोति शोफार्शस्तन्द्रानिद्राविसंज्ञिताः । देया दीप्ताग्नये मात्रा स्नेहस्यैकपलोन्मिता । मध्यमाय त्रिकर्षा स्याज्जघन्याय द्विकार्षिकी" । मध्यमाय मध्यमाग्नये जघन्याय हीनाग्नये "अथ वा स्नेहमात्राः स्युस्तिस्रोऽन्याः सर्वसम्मताः । अहोरात्रेण महती जीर्यत्यह्नि तु मध्यमा । जीर्यत्यल्पा दिनार्द्धेन सा विज्ञेया सुखावहा" । अयमर्थः याहोरात्रेण जीर्यति सा मात्रा महती । एवं मध्यमा कनिष्ठा च ज्ञेया "महती स्याद्दीपनी च या सर्वदोषे प्रपूजिता । मध्यमा स्नेहनी ज्ञेया बृंहणी भ्रमहारिणी । ज्येष्ठा कुष्ठविषोन्मादग्रहापस्मारनाशिनी" । सुश्रुतः पुनरेवमाह "या मात्रा प्रथमे यामे गते जीर्यति वासरे । सा मात्रा दीपयत्यग्निमल्पदोषे च पूजिता । या मात्रा वासरस्यार्द्धे व्यतीते परिजीर्यति । सा वृष्या बृंहणी च स्यान्मध्यदोषे प्रपूजिता । या मात्रा चरमे यामे स्थिताऽह्नः परिजीर्यति । सा मात्रा स्नेहनी ज्ञेया बहुदोषेषु पूजिता । केवलं पैत्तिके सर्पिर्वातिके लवणान्वितम् । देयं बहुकफे चापि व्योषक्षारसमन्वितम् । रूक्षक्षतविषार्त्तानां वातपित्तविकारिणाम् । हीनमेधस्मृतीनाञ्च सर्पिःपानं प्रश-

हते। अग्निकोष्ठानिलाविष्टाः प्रवृद्धकफमेदसः। पिबेयु स्तैलसात्म्या ये तैलं दार्ढ्यार्थिनश्च ये। व्यायामकर्षिताः शुष्करेतोरक्ता महारुजाः"। क्रूराशयाः क्रूरकोष्ठाः सर्वतः सर्वस्मात् स्नेहात्। "शीतकाले दिवा स्नेहमुष्णकाले पिबेन्निशि। वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा। नस्याभ्यञ्जनगण्डूषमूर्द्धकर्णाक्षितर्पणे। तैलं घृतं वा युञ्जीत दृष्ट्वा दोषबलाबलम्। घृते कोष्णजलं देयं तैले यूषः प्रशस्यते। वसामज्ज्ञे पिबेन्मण्डमनुपानं सुखावहम्। स्नेहद्विषः शिशून् वृद्धान् सुकुमारान् कृशानपि। तृष्णालुकानुष्णकाले सह भक्तेन पाययेत्। सर्पिष्मती बहुतिला यवागूः स्वल्पतण्डुला। सुखोष्णा सेव्यमाना तु सद्यः स्नेहनकारिणी। शर्कराचूर्णसंयुक्ते दोहनस्थे घृते तु गाम्। दुग्ध्वा क्षीरं पिबेद्रूक्षः सद्यः स्नेहनमुत्तमम्। मिथ्याचाराद्बहुत्वाद्वा यस्य स्नेहो न जीर्य्यति। विष्टभ्य वापि जीर्य्येत वारिणोष्णेन वामयेत्। स्नेहस्याजीर्णशङ्कायां पिबेदुष्णोदकं नरः। तदोद्गारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा। स्नेहेन पैत्तिकस्याग्निर्यदा तीक्ष्णतरीकृतः। तदासौ उदीर्य्यते तृष्णा विषमा तस्य पाययेत्। शीतलं पायसं, तेन तृष्णा तस्य प्रशाम्यति। दुर्बलोऽरोचकी स्थूलो मूर्च्छालुर्मेहपीडितः। दत्तवस्तिर्विरिक्तश्च वान्तस्तृष्णाश्रमान्वितः। अकालप्रसवा नारी दुर्दिने च विवर्जयेत्। स्वेदसंशोध्यमद्यस्त्रीव्यायामासक्तचित्तकाः। वृद्धबालकृशा रूक्षाः क्षीणास्राः क्षीणरेतसः। वातार्त्तास्तिमिरार्त्ता ये तेषां स्नेहनमुत्तमम्। वातानुलोम्यं दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम्। मृदुस्निग्धाङ्गता ग्लानिः स्नेहद्वेषोऽथ लाघवम्। विमलेन्द्रियता सम्यक् स्निग्धे रूक्षे विपर्य्ययः। भक्तद्वेषो मुखस्रावो गुदे दाहः प्रवाहिका। तन्द्रातीसारपाण्डुत्वं भयं स्निग्धस्य लक्षणम्। रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य रूक्षणम्। श्यामाकचणकाद्यैश्च तिलपिण्याकसक्तुभिः। दीप्ताग्निः शुद्धकोष्ठश्च पुष्टधातुर्दृढेन्द्रियः। निर्जरो बलवर्णाढ्यः स्नेहसेवी भवेन्नरः। स्नेहे व्यायामसंशीतवेगाघातप्रजागरान्। दिवास्वप्नमभिष्यन्दि रूक्षान्नञ्च विवर्जयेत्"। करणे-ल्युट्। स्नेहसाधने त्रि०। स्त्रियां ङीप्। उदा० अत्रैव दृश्यम्।

स्नेहप्रिय पु० स्नेहः तैलादिः प्रियोऽस्य। प्रदीपे हेमच०।

स्नेहभू स्त्री ६त०। १श्लेष्माख्ये देहस्थे धातुभेदे हेमच० २स्नेहपात्रे च शब्दर०। [शब्दच०।

स्नेहरङ्ग पु० स्नेहेन रज्यते रन्ज-कर्मणि घञ्। तिले

स्नेहवत् त्रि० स्नेहोऽस्त्यस्य मतुप् मस्य वः। १स्नेहयुक्ते स्त्रियां ङीप्। सा च २मेदायां ३स्त्री० राजनि०।

स्नेहविद्ध न० स्नेहेन विद्धम्। देवदारुणि जटा०।

स्नेहवस्ति स्त्री स्नेहपूरिता वस्तिः। तैलादिस्नेहयुतद्रव्यपूरिते अनुवासनाख्ये पदार्थे (पिचकारी) वस्तिशब्दे ४८६४ पृ० दृश्यम्। [६त०। २स्नेहकारणे न०।

स्नेहवीज पु० स्नेहाय वीजमस्य। पियालवृक्षे राजनि०।

स्नेहाश पु० स्नेहमश्नाति अश-अण्। प्रदीपे त्रिका०।

स्नेहिन् पु० स्निह-णिनि। १वयस्ये बन्धौ त्रिका०। २स्नेहयुक्ते त्रि० स्त्रियां ङीप्।

स्नेहु पु० स्निह-उन्। रोगभेदे उणा०को० २चन्द्रे संक्षिप्त०

स्पद ईषत्कम्पे भ्वा० आ० अक० सेट् इदित्। स्पन्दते अस्पन्दिष्ट स्पन्दितम्।

स्पन्द पु० स्पदि-घञ्। १ईषच्चलने ईषत्कम्पे २क्रियाभेदे च। ल्युट्। तत्रार्थे न० नेत्रच्छन्दादौ शुभाशुभविवेचनं मत्स्यपु० २४१ अ० उक्तं यथा

"ब्रूहि मे त्वं निमित्तानि अशुभानि शुभानि च। सर्वधर्मभृतां श्रेष्ठ! त्वं हि सर्वविदुच्यसे" मत्स्य उवाच "अङ्गदक्षिणभागे तु शस्तं प्रस्फुरणं भवेत्। अप्रशस्तं तथा वामे पृष्ठस्य हृदयस्य च"। मनुरुवाच "अङ्गानां स्पन्दनञ्चैव शुभाशुभविचेष्टितम्। तन्मे विस्तरतो ब्रूहि येन स्यान्निर्वृतो भुवि"। मत्स्य उवाच "पृथ्वीलाभो भवेन्मूर्ध्नि ललाटे रविनन्दन!। स्थानं विवृद्धिमायाति भ्रूनसोः प्रियसङ्गमः। भृत्यलब्धिश्चाक्षिदेशे दृगुपान्ते धनागमः। उत्कण्ठोपगमो मध्ये दृष्टे राजन्! विचक्षणैः। दृग्बन्धने सङ्गरे च जयं शीघ्रमवाप्नुयात्। योषिद्भोगोऽपाङ्गदेशे श्रवणान्ते प्रियाश्रुतिः। नासिकायां प्रीतिसौख्यं प्रजाप्तिरधरोष्ठजे। कण्ठे तु भोगलाभः स्याद्भोगवृद्धिरथांसयोः। सुहृत्स्नेहश्च बाहुभ्यां हस्ते चैव धनागमः। पृष्ठे पराजयः सद्योऽजयो वक्षःस्थले भवेत्। कुक्षिभ्यां प्रीतिरुद्दिष्टा स्त्रियाः प्रजननं स्तने। स्थानभ्रंशो नाभिदेशे अन्त्रे चैव धनागमः। जानुसन्धौ जातसन्धिर्बलवद्भिर्भवेन्नृप!। दिवैकदेशनाशोऽथ जङ्घायां रविनन्दन!। उत्तमं स्थानमाप्नोति पद्भ्यां प्रस्फुरणान्नृप!। सलाभञ्चाध्वगमनं भवेत् पादतले नृप!। लाञ्छनं पिटकञ्चैव ज्ञेयं स्फु-

रसवत्तथा। विपर्य्ययेण शिक्षिता सर्वस्त्रीणां फलागमः। दक्षिणेऽपि प्रशस्तोऽङ्गे प्रशस्तं स्याद्विशेषतः। अतोऽन्यथा विद्धिप्रजल्पनात्तु फलस्य गुणस्य च निन्दितस्य। अनिष्टचिह्नोपगमे द्विजानां कार्य्यं सुवर्णेन तु तर्पणं स्यात्"। [स्पर्द्धते अस्पर्द्धिष्ट।

स्पर्द्ध संहर्षे (पराभिभवेच्छायाम्) भ्वा० आत्म० अक० सेट्।

स्पर्द्धा स्त्री स्पर्द्ध–अ। १संहर्षे २पराभिभवेच्छायां ३साम्ये ४क्रमोद्गतौ च मेदि०। [स्पर्शत।

स्पर्श ग्रहणे स्तेये च चु० आ० सक० सेट्। स्पर्शयते अप·

स्पर्श पु० स्पर्श–स्पृश–वा अच् घञ् वा। न्यायोक्ते १त्वगिन्द्रियग्राह्ये गुणभेदे २ग्रहणे "मात्रास्पर्शास्तु कौन्तेय" गीता। ३रोगे ४युद्धे ५गुप्तचरे मेदि० ६उपतप्ते अमरः। ७दायौ पु० ८स्पर्शके त्रि० मेदि०। स्पृश-विच–अच्। ९दाने मेदि० स्पृश्यन्ते वायुना जिह्वाद्याद्य उच्चारणाय घञ्। १०कादिषु मावसानेषु हल्वर्णेषु पु० कादयो मावसानाः स्पर्शः सि० कौ०। "स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः। अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः। काठिन्यादिः क्षितावेव नित्यतादि च पूर्ववत्। एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्। तथापि परमाणौ स्यात् पाको वैशेषिके नये। नैयायिकानान्तु नये द्व्यणुकादावपीष्यते" ‘‘स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः। अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः। काठिन्यादिः क्षितावेव नित्यतादि च पूर्ववत्। एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्। तथापि परमाणौ स्यात् पाको वैशेषिके नये। नैयायिकानान्तु नये द्व्यणुकादावपीष्यते" भाषा०। "उपकारक इति स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः। अनुष्णाशीतेति। पृथिव्या वायोश्च स्पर्शोऽनुष्णाशीतः। जलस्य शीतः। तेजस उष्णः। काठिन्येति। कठिनसुकुमारस्पर्शौ पृथिव्या एवेत्यर्थः। कठिनत्वादिकन्तु न संयोगनिष्ठो जातिविशेषः चक्षुर्ग्राह्यतापत्तेः। पूर्ववदिति। जलतेजोवायुपरमाणूनां स्पर्शा नित्यास्त्र्यणुकादेस्त्वनित्या इत्यर्थः। एतेषामिति। एतेषां रूपरसगन्धस्पर्शानाम्। नान्यत्रेति। पृथिव्या हि रूपरसगन्धस्पर्शपरावृत्तिः पाकसंयोगादुपलभ्यते। न हि शतधापि ध्मायमाने जलादौ रूपादिकं परावर्त्तते। नीरे सौरभमौष्ण्यञ्च अन्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत्। तत्रापि पृथिवीष्वपि सर्व्वे परमाणावेव पाक इति वैशेषिकाः वदन्ति। तेषामयमाशयः। अवयविनाऽवष्टब्धेष्ववयवेषु पाको न सम्भवति। परन्तु वह्निसंयोगेनावयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः। पुनश्च पक्वपरमाणुसंयोगाद् द्व्यणुकादिक्रमेण पुनर्महावयविपर्य्यन्तोत्पत्तिः तेजसामतिशयितवेगवशात् पूर्वव्यूहनाशो झटिति व्यूहान्तरोत्पत्तिश्चेति। अथ द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पन्नस्य रूपादिमत्तेति शिष्यबुद्धिवैशद्याय प्रक्रिया। "तत्र संयोगविभागयोरनपेक्षकारणं कर्म" इति वैशेषिकसूत्रम्। स्वोत्तरोत्पत्तिभावान्तरानपेक्षत्वं तस्यार्थः। अन्यथा कर्मणोऽप्युत्तरसंयोगस्य जनने पूर्वसंयोगनाशापेक्षणादव्याप्तिः स्यादिति। तत्र विभागजविभागानङ्गीकारे नव क्षणाः। तदङ्गीकारेऽपि विभागः किञ्चिदपेक्षो विभागं जनयेत् निरपेक्षस्य तस्य कर्मत्वं स्यात्। तत्र यदि द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात् तदा दश क्षणाः। अथ द्रव्यनाशविशिष्टं कालमवयवं चापेक्ष्य विभागजविभागः स्यात् तदा एकादश क्षणाः। तथा हि वह्निसंयोगात् परमाणौ कर्म। ततः परमाण्वन्तरेण विभागः। तत आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशः१। ततः परमाणौ श्यामादिनाशः२। ततो रक्ताद्युत्पत्तिः३। ततो द्रव्यारम्भानुगुणक्रिया४। ततो विभागः५। ततः पूर्वसंयोगनाशः६। तत आरम्भकसंयोगः७। ततो द्व्यणुकोत्पत्तिः८। ततो रक्ताद्युत्पत्तिः९। ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणक्रियाऽस्त्विति चेत्। न। अग्निसंयुक्ते परमाणौ यत् कर्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च तत्र परमाणौ क्रियान्तराभावात् कर्मवति कर्मानुत्पत्तेः निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुपपत्तेश्च। तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेत् न। पूर्वरूपादिध्वंसस्य रूपान्तरे हेतुत्वात्। इति नव क्षणाः। अथ दश क्षणाः। सा च आरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागस्य जनने इति स्यात्। तथा हि वह्निसंयोगाद् द्व्यणुकारम्भके परमाणौ क्रिया। ततो विभागः। तत आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशविभागजविभागौ१। ततः श्यामनाशपूर्वसंयोगनाशौ२। ततो रक्तोत्पत्त्युत्तरसंयोगौ३। ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः४।

ततोऽदृष्टवदात्मसंयोगात् द्रव्यारम्भानुगुणक्रिया५। ततो विभागः६। ततः पूर्वसंयोगनाशः७। तत आरम्भकसंयोगः८। ततो द्व्यणुकोत्पत्तिः९। ततो रूपाद्युत्पत्तिः१०। अथैकादश क्षणाः। वह्निसंयोगात् परमाणौ कर्म। ततो विभागः१। ततो द्रव्यारम्भकसंयोगनाशः। ततो द्व्यणुकनाशः। विशिष्टं कालमपेक्ष्य विभागजविभागः२। ततः पूर्वसंयोगनाशः३। तत उत्तरसंयोगः४। ततः परमाणुकर्मनाशः५। ततोऽदृष्टवदात्मसंयोगात् द्रव्यारम्भानुगुणक्रिया६। ततो विभागः७। ततः पूर्वसंयोगनाशः८। ततो द्रव्यारम्भकसंयोगः९। ततो द्व्यणुकम्१०। ततो रूपादि११। मध्यमपक्षद्वयेकवाद्यन्तसंयोगाच्च रूपनाशरूपोत्पादौ। तावत्क्षणमेवाग्नेरस्थिरत्वात्। किन्तु यद्युत्पादक्षो नाशकस्तदा नष्टे रूपादावग्निनाशे नीरूप एव परमाणुः स्यात्। नाशकश्चेदुत्पादकस्तदा रक्तोत्पत्तौ तदग्निना रक्तता न स्यात्। एवं परमाण्वन्तरे कर्मचिन्तनात् पञ्चमादिक्षणेऽपि गुणोत्पत्तिः। तथा हि एकस्मिन् परमाणौ कर्म। ततो विभागः। तत आरम्भकसंयोगनाश-परमाण्वन्तरकर्मणी। ततस्तु द्व्यणुकनाशः। परमाण्वन्तरकर्मजश्च विभाग इत्येकः कालः१। ततः श्यामादिनाशः। विभागश्च पूर्वसंयोगनाश इत्येकः कालः२। ततो रक्तोत्पत्तिर्द्रव्यारम्भकसंयोगश्चेत्येकः कालः३। अथ द्व्यणुकोत्पत्तिः४। अथ रक्तोत्पत्तिरिति५ पञ्च क्षणाः। द्रव्यनाशसमकालं परमाण्वन्तरे कर्मचिन्तनात् षट्के गुणोत्पत्तिः। तथा हि परमाणुकर्मणा परमाण्वन्तरविभागः, तत आरम्भकसंयोगनाशः। अथ द्व्यणुकनाशपरमाण्वन्तरकर्मणी१। अथ श्यामनाशः परमाण्वन्तरकर्मजश्च विभागः२। ततो रक्तोत्पत्तिः परमाण्वन्तरे पूर्वसंयोगनाशः३। ततः परमाण्वन्तरसंयोगः४। ततो द्व्यणुकोत्पत्तिः५। अथ रक्तोत्पत्तिरिति६। एवं यत्र नाशक्षणे परमाण्वन्तरे कर्मचिन्तनात् सप्त क्षणाः। रक्तोत्पत्तिसमकाले परमाण्वन्तरे कर्मचिन्तनात् अष्ट क्षणाः" इति। नैयायिकास्त्विति। नैयायिकानां मते द्व्यणुकादौ अवयविन्यपि पाको भवति तेषामयमाशयः। अवयविनां सच्छिद्रत्वाद्वह्नेः सूक्ष्मावयवैरन्तःप्रविष्टैरवयवेष्ववस्थितेष्वपि पाको न विरुध्यते। वैशेषिकमतेऽनन्तावयवनाशकल्पने गौरवम्। किञ्च सोऽयं घट इत्यादिप्रत्यभिज्ञाऽपि उपपद्यते। यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोऽपि स्वीक्रियते" [illegible]

स्पर्शश्च बहुप्रकारतया भा॰ शा॰ ।८। अ॰ उक्तो यथा "वायव्यस्तु गुणः स्पर्शः स्पर्शश्च बहुधा स्मृतः। उष्णः१ शीतः२ सुखो३ दुःखः४ स्निग्धो५ विशदः६ एव च। तथा खरो७ मृदुः८ श्लक्ष्णो९ लघु१०र्गुरुतरो११ऽपि च"। कठिनस्याप्युपलक्षणमिदं यथोक्तं भा॰ आश्व॰ ५० अ॰। "वायोश्चापि गुणः स्पर्शः स्पर्शश्च बहुधा स्मृतः। उष्णः१ शीत२स्सुखो दुःखः३ स्निग्धो४ विशदः५ खरः६ एव च। कठिन७श्चिक्कणः८ श्लक्ष्णः९ पिच्छिलो१० दारुणो११ मृदुः १२। एवं द्वादशविस्तारो वायव्यो गुण एव च"। ४कादिमावसानवर्णोत्पादके आभ्यन्तरप्रयत्ने सि॰ कौ॰।

स्पर्शतन्मात्र न॰ सांख्यमतसिद्धे वाय्वुपादानकारणे स्पर्शमात्रगुणके सूक्ष्मभूतभेदे तन्मात्रशब्दे दृ॰ दृश्यम्।

स्पर्शन न॰ स्पर्श-स्पृश-वा ल्युट्। १स्पर्शने २स्पर्शे च। णिच् ल्युट्। ३दाने च मेदि॰। स्पृश-कर्त्तरि ल्यु। ४वायौ पु॰ अमरः। [लज्जालुवृक्षे शब्दर॰।

स्पर्शलज्जा स्त्री स्पर्शमात्रेण लज्जते सङ्कोचात् लस्ज-अच्।

स्पर्शशुद्धा स्त्री स्पर्शे शुद्धा। अतसूत्याम् शब्दच॰।

स्पर्शा स्त्री स्पर्श स्पृश्यते-कर्मणि घञ्। कुलटायां धरणिः तस्याः सर्वैरङ्गैः स्पृश्यमानत्वात्तथात्वम्। [अच्। स्प॰ टाप्च।

स्पर्शाज्ञता स्त्री त्वक्शून्यताख्ये वातरोगभेदे "स्पृश्यमाना त्वचा या तु शीतोष्णं मृदु कर्कशम्। न जानाति तु वै सा तु त्वक्शून्यत्वेति परिकीर्त्तिता" भावप्र॰।

स्प्रष्टृ त्रि॰ स्पृश-तृच्। १उपतापयितरि स्त्रियां ङीप्। २रोगे पु॰ भरतः। स्पृशतोरम् स्प्रष्टृ तदर्थे त्रि॰।

स्पश ग्रन्थे बाधने च भ्वा॰ उभ॰ सक॰ सेट्। स्पशति-ते अस्पशीत्-अस्पाशीत्। अस्पशिष्ट।

स्पश पु॰ स्पश-अच्। १चरमात्ये २अभिसरे (युद्धे) ३गूढचरे च अमरः "राजनीतिरपस्पशा" माघः।

स्पष्ट त्रि॰ स्पश-क्त नि॰ इड्भावः। १व्यक्ते २स्फुटे अमरः

स्पृ प्रीतौ अक॰ प्रीणने रक्षणे पालने च सक॰ स्वा॰ पर॰ अनिट्। स्पृणोति अस्पार्षीत्।

स्पृक्का स्त्री स्पृश-क्वन् पृषो॰ शस्य कः। पृक्कायाम् भरतः।

स्पृश स्पर्शे तु॰ पर॰ सक॰ अनिट्। स्पृशति अस्प्राक्षीत् अस्पार्क्षीत् अस्पृक्षत्। पस्पर्श।

स्पृशी स्त्री स्पृश-क। १सर्पघातिनीवृक्षे (कङ्कालिका) शब्दर॰ २कण्टकार्यां स्त्री अमर॰ गौरा॰ ङीष्।

स्पृष्ट त्रि॰ स्पृश-क्त। १कृतस्पर्शे। भावे क्त। २स्पर्शे न॰। ३कादिमावसानवर्णोत्पादके आभ्यन्तरप्रयत्ने च॰।

स्पृष्टास्पृष्ट न० स्पृष्टेन वा सम्यक् स्पृष्टम् । परस्परस्पर्शने

स्पृष्टास्पृष्टि न० स्पृश-भावे-क्त कर्मव्यतिहारे द्वन्द्वसमा० पूर्वपददीर्घ । परस्परस्पर्शने "तीर्थ विवाहे यात्रायां संग्रामे देशविप्लवे । नगरग्रामदाहे च स्पृष्टास्पृष्टि र्न दुष्यति । आपद्यपि च कष्टायां ग्रहणे पीडिते तथा । मातापित्रोर्गुरोश्चैव निर्देशवर्त्तने तथा" बृहस्पतिः ।

स्पृष्टि स्त्री स्पृश-क्तिन् । स्पर्शे अमरः । [अपस्पृहत् ।

स्पृह इच्छायां अद०चुरा० उभ० सक० सेट् । स्पृहयति-ते

स्पृहणीय त्रि० स्पृह-अनीयर् । १वाञ्छनीये २श्लाघ्ये च "अतो वतासि स्पृहणीयवीर्यः" कुमारः ।

स्पृहयालु त्रि० स्पृहि-आलुच् । स्पृहाशीले ।

स्पृहा स्त्री स्पृह-अङ् । इच्छायाम् अमरः । "मिथुने स्पृहावती" कुमारः ।

वर्णभेदे विषयभेदे स्पृहौचित्यं यथा

"तपोधनं ब्राह्मणानां तपः सन्ततरक्षया । तपस्या कामधेनुश्च सन्ततं तपसि स्पृहा । ऐश्वर्यं क्षत्रियाणाञ्च वाणिज्ये च तथा विशाम् । शूद्राणां विप्रसेवायां स्पृहा वेदेष्वनिन्दिता । क्षत्रियाणाञ्च तपसि स्पृहातीव प्रशंसिता । ब्राह्मणानां विवादेषु स्पृहातीव विनिन्दिता । क्षत्रियाणां रणो धर्मो रणे भङ्गे च गर्हितः । रणे स्पृहा ब्राह्मणानां लोके वेदे विडम्बना । ब्रह्मवै० ग० ख० ३५ अ० । [मीमेकि० ।

स्पृह्य पु० स्पृह-कर्मणि यत् १मातुलुङ्गवृक्षे शब्दच०२वाञ्छनीये

स्फट विशीर्णतायाम् अक० भ्वा० पर० सेट् । स्फटति अस्फटीत्-अस्फाटीत् । इदित्‌त्वपक्षे स्फण्टति अस्फण्टीत् ।

स्फट पुंस्त्री० स्फट-अच् । सर्पफणायाम् अमरटीका ।

स्फटि(टी) स्त्री स्फट-इन् वा ङीष् । (फट्‌किरी) खनिज्द्रव्यभेदे भावप्र० । स्वार्थे क । तद्गुणाः "स्फटिका तु कषायोष्णा वातपित्तकफव्रणान् । निहन्ति श्वित्रवीसर्पान् योनिसङ्कोचकारिणी" भावप्र० ।

स्फटि(टी),क पु० स्फटि(टीव)रिव कायति कै-क । १खनामख्याते मणौ हेमा० स्वार्थे क वा स्फुरः । २स्फटयां भावप्र० । स्वार्थेऽण् । स्फाटिकमप्यत्र न०शब्दर० । "स्फटिकः समवीर्य्यश्च पित्तदाहार्त्तिदोषनुत् । तस्याक्षमालया जपतां दत्तं कोटिगुणं फलम्" । तत्परीक्षा यथा "यद्गङ्गातोयबिन्दुच्छविविमलतमं निस्तुषं नेत्रहृद्य स्निग्धं शुद्धान्तरालं मधुरमतिहिमं पित्तदाहास्रहारि । पाषाणे यन्निघृष्टं स्फटिकमपि निजां स्वच्छतां नैव जह्यात् तज्जात्यं जात्यं शुभमुपचिनुते यैव "भद्र रत्नम्" राजनि० ।

"उक्तानिबहुमणिवज्रेन्द्रवैदूर्यं स्फटिकादिकम् । स्फटिकं परं शीतं कषायं स्वादु लेखनम् । चक्षुष्यं धारणात्तस्य बाधाबध्नोविनाशनम्" राजवल्लभः । तस्य उत्पत्तिकथादिक यथा "कावेरीविन्ध्ययवनचीननेपालभूमिषु । लाङ्गूली व्यकिरन्मेदो दानवस्य प्रयत्नतः । आकाशशुद्धं तेनात्र उत्पन्नं स्फटिकं ततः । शङ्खशङ्खधवलं किञ्चिद्वर्णान्तरान्वितम् । न तत्तुल्यं हि रत्नानामथ वा पापनाशनम् । संस्कृतं शिल्पिना चैतो मूल्यं किञ्चिल्लभेत्ततः" गारुड़े ७८अ० । तथा "हिमालये सिंहले च विन्ध्याटवितटे तथा । स्फटिकं जायते चैव नानारूपं शुभप्रभम् । हिमाद्रौ चन्द्रसङ्काशं स्फटिकं तत् द्विधा भवेत् । सूर्य्यकान्तञ्च तत्रैकं चन्द्रकान्तं तथाऽपरम् । सूर्य्यांशुस्पर्शमात्रेण वह्निं वमति यत् क्षणात् । सूर्य्यकान्तं तदाख्यातं स्फटिकं रत्नवेदिभिः । पूर्णेन्दुकरसंस्पर्शादमृतं स्रवति क्षणात् । चन्द्रकान्तं तदाख्यातं दुर्लभं तत् कलौ युगे । अशोकपल्लवच्छायं दाडिमीबीजसन्निभम् । विन्ध्याटवीतटे देशे जायते चन्द्रकान्तिकम् । सिंहले जायते लम्बनाकारे गन्धनीलके । पद्मरागभवस्थाने विविध स्फटिकं भवेत् । अत्यन्तनिर्मलं स्वच्छं द्रवतीव जलं शुचि । ज्योतिर्व्वनमाश्लिष्टं शुक्लाज्योतीरसं द्विज ! । तदेव कोलिम्बाकारं राजावर्त्तसमद्युति । चामीकरं तत्तु पाषाणं प्रोक्तं राजमयं शुभम् । मणिरत्नमयं यत्तु प्रोक्तं मन्त्रमयं द्विज !" युक्तिकल्प० ।

स्फटिकाचल पु०स्फटिक इव शुभ्रत्वात् अचलः । १कैलासपर्वते २स्फाटिकमयपर्वते च । स्फटिकाद्रिप्रभृतयोऽप्यत्र

स्फटिकाद्रिभिद्(द्) पु० स्फटिकाद्रिं स्फटिकपर्वतं भिनत्ति साहत्वात् भिद-क्विप् क वा । कर्पूरे राजनि० ।

स्फटिकाभ्र पु० स्फटिकवर्णः अभ्र इव । कर्पूरे राजनि० ।

स्फटिकारि पु० ६त० । (फट्‌किरि) खनिजद्रव्यभेदे तस्य स्फटिकतुल्यशौक्ल्यमत्यास्तथात्वम् रत्नमा० ।

स्फण्ड परिहासे चु० उभ० सक० सेट् इदित् । स्फण्डयति-ते अपस्फण्डत्-त । [रीत् ।

स्फर चले स्फूर्तौ च तुदा० प० अक० सेट् । स्फरति अस्फारीत् ।

स्फरण न० स्फर-भावे ल्युट् । स्फुरणे ।

स्फल चले स्फूर्तौ च तुदा० पर० अक० सेट । स्फलति

स्फाटिकोपल पु० स्फाटकमिव उपलः । स्फाटिके शब्दा० ।

स्फाति स्त्री स्फाय–भावे क्तिन् यलोप । वृद्धौ अमरः ।
स्फाय वृद्धौ भ्वा० आ० अक० सेट् । स्फायते अस्फायि–
अस्फायिष्ट । निष्ठायामनिट् यलोपे ईत् स्फीतः ।
स्फार पु० स्फाय–रक् । १स्वर्णबुद्बुदे २विपुले ३विकटे मेदि०
४प्रचुरे च त्रि० शब्दचि० ।
स्फारण न० स्फुर–णिच्–स्फारादेशः ल्युट् । विकाशने ।
स्फाल पु० स्फल–घञ् । स्फूर्त्तौ । [कट फले शब्दच० ।
स्फिग्घातन पु० स्फिचं घातयति हन–स्वार्थे णिच्–ल्यु ।
स्फिच् स्त्री स्फाय–डिच् । १कटिप्रोथे अमरः उपचारात् तदृस्थे
वातजे २रोगभेदे च । [यति ते अपिस्फिटत् त ।
स्फिट हतौ हिंसे अनादरे च चु० उभ० सक० सेट् । स्फेट-
स्फिर त्रि० स्फा च किरच् । १प्रचुरे अमरः २वृद्धे च ।
स्फीत त्रि० स्फाय–क्त स्फीभावः । १वृद्धे २समृद्धे च ।
स्फुट भेदे चु०उभ०सक०सेट् । स्फोटयति ते अपुस्फुटत् त ।
स्फुट विकाशे भ्वा०प० अक० सेट् । स्फोटति इरित् अस्फुटत्
अस्फोटीत् । [पुस्फोट ।
स्फुट विकाशे तु० कुटा० प०अक०सेट् । स्फुटति अस्फुटीत्
स्फुट विदलने भ्वा० आत्म० अक० सेट् । स्फोटते अस्फो-
टिष्ट । [ते अपुस्फुटत् त ।
स्फुट परीहासे चुरा०उभ०सक०सेट् इदित् । स्फुण्टयति
स्फुट हिंसे चु० उभ० सक०सेट् प्रायेणाङ्पूर्वः । आस्फोट-
यति ते आपुस्फुटत् त । [यपुस्फुटत् त ।
स्फुट विकाशे अद० चु० उभ० सक० सेट् । स्फुटयति ते
स्फुट त्रि०स्फुट–क ।१विकसिते २व्यक्ते मेदि० ३सिते ४शुक्ले
च शब्दर० ।५ज्योतिषोक्तेषु मेषादिराशिषु अंशविशेषस्थि
तेषु सूर्यादिग्रहेषु पु०तेषां कृतसंस्कारादिषु गतौ स्त्री ।
७ततमे छाया द्योतने न० । दर्पणच्छायां स्त्री रागान्वयः
ग्रहाणां स्फुटताकरणप्रयोजनं सि०शि० उक्तं यथा
“यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फल
स्फुटत्वम् । स्यात् प्रोच्यते तेन नभश्चराणां स्फुटक्रिया
दृग्गणितैक्यकृद् या” इत्युपक्रमे स्पष्टाधिकारे प्रपञ्चितं
ग्रहाणां मृदूच्चादिकमुक्तोक्तम् “मृदूच्चेन हीनो ग्रहो
मन्दकेन्द्रं चलोच्चं ग्रहोनं भवेच्छीघ्रकेन्द्रम् । तुला-
जादिकेन्द्रे फलं स्वर्णमेवं मृदु ज्ञेयमस्मार्द्वशोम्यं च शी-
घ्रम् । त्रिभिर्भैः पदं तानि चत्वारि चक्रे क्रमात्
स्यादयुक् युग्मसंज्ञा च तेषाम् । अयुग्मे पदे यातमेष्यं
तु युग्मे भुजो बाहुहीनं त्रिभं कोटिरुक्ता” इत्युक्त्वा
भुजकोटिफलादिकमुक्त्वा । “स्यात् संस्कृतो मध्यफलेन
मध्यो मन्दस्फुटः स्यात्तुचलेन्दुहनम् । विधाय शी-
घ्रेण फलेन चेत् खेटः स्फुटः स्यादसकृत्फलाभ्याम् ।
दलीकृताभ्यां प्रथमं फलाभ्यां ततोऽखिलाभ्यामसकृत्
कुजस्य । स्फुटौ रवीन्दू मृदुनेव वेद्यौ शीघ्राख्यतुङ्गस्य
तयोरभावात्” सि० शि० । आदौ ग्रहस्य मन्दफल-
मानीय तेन संस्कृतो मन्दस्फुटः स्यात् । तं शी-
घ्रोच्चाद्विशोध्य शीघ्रकेन्द्रं कृत्वा ततः शीघ्रफलम् । तेन
संस्कृतो मन्दस्फुटो ग्रहः स्यात् । तस्मात् स्फुटा-
न्मध्योच्चं विशोध्य मन्दमानीय तेन गणितागतो
मध्यसंस्कृतो मन्दस्फुटः स्यात् । तेन पुनश्चलकेन्द्रं
ततश्चलफलं तेन मन्दस्फुटसंस्कृतः स्फुटः स्यात्
एवमसकृत् यावदविशेषः । तत्तु दलीकृताभ्यां प्रथमं
फलाभ्यामित्यादिना कुजस्य विशेष उक्तस्तत्रोपपत्तिरेव
वासना” प्रमिता० । ग्रहाणां तत्रोक्तः स्पष्टगत्यानयन-
प्रकारस्तु खगोलशब्दे २४१२ पृ० दृश्यः ।
स्फुटन न०स्फुट–ल्युट् । १विकशने अमरः २विदलीभावे च ।
स्फुटबन्धनी स्त्री स्फुटं बन्धनं यस्याः गौरा० ङीष् ।
कपोतपद्याम् रत्नमा० ।
स्फुटित त्रि०स्फुट–क्त । १विकसिते हेमच० ।भिन्ने “दग्धे वा
स्फुटितेऽथ वा पुराणम् । ३व्यक्तीकृते ४परिहासिते च
स्फुटि(टी) स्त्री स्फुट इन् वा ङीप् । १पादस्फोटरोगे
(फोड़ा) २कर्कटीफले च (फुट) शब्दर० । [टत् त ।
स्फुट्ट अनादरे चु० उ० सक० सेट् । स्फुट्टयति ते अपुस्फु-
स्फुड् वरणे तु० कु० पर० सक० सेट् । स्फुडति अस्फु-
डीत् पुस्फोड् । [अस्फुण्डिष्ट ।
स्फुण्ड विकाशे भ्वा० आत्म० अक० सेट् इदित् । स्फुण्डते
स्फुण्ड परिहासे चु० उ० सक० सेट् इदित् । स्फुण्डयति ते
अपुस्फुण्डत् त । [शब्दच० ।
स्फुत्कार पु० स्फुदित्यव्यक्तं शब्दं करोति कृ–अच् । अग्नौ
स्फुर स्फूर्त्तौ तु० कुटा० प० अक० सेट् । स्फुरति अस्फु-
रीत् पुस्फोर । “चारु पुस्फोर वक्त्रः” भट्टिः । णिचि
स्फारयति । [२स्फुरणे अमरः ।
स्फुर पु० स्फुर–क । फलके हेमच० । १भावे घञ् ।
स्फुरण न० स्फुर–ल्युट् । ईषत्स्पन्दने अमरः । युच् ।
तत्रैव स्त्री । अङ्गभेदे स्फुरणफलमुक्तं यथा
“अङ्गेऽधनाङ्गस्फुरणस्य सम्यक् प्रत्येकमव्यक्तफलप्रभा
वम् । सर्वत्र यत्रागते स्वदेहाद्युत्पद्यते कर्मविपाक-
वद्भिः । मूर्ध्नि स्फुरत्याशु पृथिव्याप्तिः स्थानप्रवृद्धिश्च

ललाटदेशे। भ्रू घ्राणमध्ये प्रियसङ्गमः स्यात् नासाक्षिमध्ये च महायलाभः। दृगन्तमध्यस्फुरणेऽर्थलाभोत्कण्ठे क्रमाद्विस्फुरिते दृगादौ। जयो दृशाश्च स्फुरणे रणः स्यात् प्रियश्रुतिः स्यात् स्फुरिते च कर्णे। योषित्समृद्धिः स्फुरिते च गण्डे घ्राणे तु सौख्यमतो भवेताम्। भोज्यं स्पृष्टाधरोष्ठयोश्च स्कन्धे गले भोगविवृद्धिलाभौ। स्कन्धो भुजस्येष्टसमागमाय स्पन्दः करस्य द्रविणाप्तिहेतुः। स्पन्दश्च पृष्ठस्य पराजयाय स्पन्दो जयायोरसि मानवानाम्। पार्श्वप्रकम्पे प्रियस्य लाभः कटिप्रकम्पे तु बलप्रमोदौ। नाभिप्रकम्पे निजदेशनाशः धनर्द्धिरस्त्वत्र भुवि प्रकम्पे। दुःखं धनान्तं हृदयस्य कम्पे स्फिक्पायुकम्पेऽपि च वाहनाप्तिः। वरोरुकम्पे वरयोषिदाप्तिर्लिङ्गे सकम्पे तनयस्य जन्म। वस्तौ च कम्पे युवतिप्रसक्तिः दोषश्च कम्पे पुनरूरुदेशे। उरःप्रकम्पे शुभदायलाभः जङ्घानुकम्पे त्वचिरेण सिद्धिः। जङ्घाप्रकम्पे निजदेशनाशः स्थानाप्तिरस्याश्चरणस्य कम्पे। यात्रा तलाभाऽङ्घ्रितलप्रकम्पे पुंसां सदा दक्षिणदेहभागे। स्त्रीणान्तु वामावयवे प्रशस्तः। स्पन्दः फलानि प्रदिशत्यवश्यम्” वसन्तराजशाकुने ३२व०।

स्फुर्च्छ विस्तारणे भ्वा० प० सक० सेट्। स्फूर्च्छति अस्फूर्च्छीत् आदित् स्फूर्च्छितं स्फूर्च्छनम्।

स्फुर्ज वज्रशब्दे भ्वा० प० अक० सेट्। स्फूर्जति अस्फूर्जीत् ह्रित् स्फूर्जथुः। आदित् स्फूर्जितं स्फूर्जनम्।

स्फुर्जथु पु० स्फुर्ज-अथु नि० न दीर्घः। वज्रनिर्घोषे अमरटीका।

स्फुल स्फूर्त्तौ चये च अक० सञ्चये सक० तुदा० कुटा० प० सेट्। स्फुलति अस्फुलीत्। पुस्फोल। [युते त्रि०।

स्फुल न० स्फुल-क। १वस्त्रागारे (ताम्बु) शब्दर०। २स्फूर्त्ति-

स्फुलन न० स्फुल-भावे ल्युट्। स्फुरणे नीलकण्ठः।

स्फुलिङ्ग पुंस्त्री० स्फुल-इङ्गच्, स्फुरन् इतस्ततः सन् लिङ्गति गच्छति यस्मात् लिगि-अच् पृषो० वा। अग्निकणे अमरः।

स्फुलिङ्गिनी स्त्री स्फुलिङ्ग-अस्त्यर्थे इनि। १अग्निजिह्वायाम् जटा०। २स्फुलिङ्गयुक्ते त्रि०।

स्फूर्जक पु० स्फुर्ज-ण्वुल्। तिन्दुकवृक्षे अमरः।

स्फूर्जथु पु० स्फुर्ज-अथु। वज्रपातशब्दे अमरः।

स्फूर्त्ति स्त्री स्फुर्च्छ-स्फुर-वा क्तिन्। १स्फुरणे २विकसने ३प्रतिभायाञ्च रमानाथः।

स्फूर्त्तिमत् पु० स्फूर्त्तिरस्त्यस्य मतुप्। १पाशुपतभेदे शैवभेदे त्रिका०। २प्रतिभायुक्ते ३विकासयुक्ते च त्रि० स्त्रियां ङीप्।

स्फेयस् त्रि० अतिशयेन स्फिरः, प्रचुरः इयसुन् स्फादेशः। अतिप्रचुरे स्त्रियां ङीप्। इष्ठन्। स्फेष्ठोऽप्यत्र त्रि०।

स्फोट पु० स्फुटत्यर्थोऽनेन स्फुट-करणे घञ्। व्याकरणोक्ते वर्णातिरिक्ते पूर्वपूर्ववर्णानुभवसहितचरमवर्णानुभवव्यङ्ग्ये अर्थप्रत्यायके अखण्डे शब्दभेदे स्वार्थे क तथार्थे व्याकरणमते वर्णसमुदायानां नार्थबोधकत्वं किन्तु स्फोटस्यैवेति प्रपञ्चितमस्माभिः शब्दार्थरत्ने यथा

“तत्र वर्णानां प्रत्युच्चारणमन्यथाप्रतीयमानतया अनित्यत्वेन आशुविनाशिनाञ्च तेषां मेलनासम्भवेन तत्समुदायस्यापि सम्बन्धित्वाभावेन प्रत्येकं वर्णेषु शक्तौ व्यभिचारेण च पूर्वपूर्ववर्णानुभवाहितसंस्कारबीजवति अन्त्यवर्णजनितपरिपाकशालिनि हृदये झटिति समुदीयमानस्य स्फोटरूपस्यैव शब्दस्य नित्यतया तत्रैव नित्यसम्बन्धस्य योग्यतया शक्तिमत्त्वमुचितमित्याकरे स्पष्टम्। तथाहि। वर्णा यदि वाचकाः स्युः स्यादेव तेभ्यो व्यस्तेभ्योऽर्थावगतिः। न च तथा। प्रत्येकं शक्तिमत्त्वाभावेन तत्समुदायस्य शक्तिमत्त्वं सुदूरपराहतम्। आशुविनाशिनां वर्णानां मेलनासम्भवेन तत्समुदायस्यासिद्धेः पूर्वपूर्ववर्णानुभवाहितसंस्कारसहितस्य चरमवर्णस्य वाचकत्वन्तु सम्भावितमपि दिनान्तरीयतादृशसंस्कारमादाय वर्त्तमानचरमवर्णमात्रानुभवेन अर्थावगत्यापत्त्या निराकृतम्। अन्त्यवर्णपर्यन्तानामनुभवानन्तरं समुदायानां संस्कारोद्बोधकल्पनया पुनः समुदितवर्णानां चरमवर्णानन्तरोऽर्थावगतिरित्यपि न सङ्गतं आरारामेत्यादावविशेषेण तत्तद्वर्णसंस्कारसद्भावादुभयत्रैकावगत्यानुपपत्तेः। अतोऽवश्यं वर्णातिरिक्तोऽन्त्यवर्णानुभवव्यङ्ग्यः स्फोटनामा शब्दः स्वीकार्यः स्फुटति प्रकाशतेऽर्थोऽनेनेति व्युत्पत्त्या च तस्य सार्थकनामता बोध्या समर्थितश्चैष एव पक्षः पातञ्जलभाष्ये व्यासचरणैः “तदेतेषामर्थसङ्केतेनावच्छिन्नानामुपसंहृतध्वनिक्रमाणां य एको बुद्धिनिर्भासस्तत्पदं वाचकं वाच्यस्य सङ्केत्यते तदेकं पदमेकबुद्धिविषय एकप्रयत्नाक्षिप्तमभागमक्रममवर्णं बौद्धमन्त्यवर्णप्रत्ययोपस्थापितं प्रतीयते” इत्यन्तेन। अत्र अनेकवर्णानां शक्ततावच्छेदकतापेक्षयैकस्यैव जातिरूपस्फोटत्वस्य शक्ततावच्छेदकत्वकल्पने लाघवमपि द्रष्टव्यम्। उक्तञ्च शब्दकौस्तुभे वोपदेवचरणैः “शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्। औपाधिको वा

भेदोऽस्तु वर्णानां तारमन्द्रवदिति"। तथा "इत्योंति य इमं स्फोटं गुप्ते स्रोतं च शून्यदृक्। येन वाक् व्यज्यते यस्य व्यक्तिराकाश आत्मनः" इति मद्भागवतवचने स्फोटात्मकशब्दब्रह्मणस्सामर्थ्यस्तुतोक्त्या स्फोटरूपशब्दोऽर्थोयात इत्यवगम्यम्। हरिवंशेऽपि "अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रयः" इति स्फोटस्य व्यञ्जकवर्णाश्रयत्वमभिहितम्। एतन्मताभिप्रायेणैव "स्फोट इत्याहेति" शारीरकभाष्ये स्फुटव्युत्पादनम् "वर्णा एव तु शब्द इति भगवानुपवर्ष इति" निराकरणन्तू-पवर्षं ग्रहणात् तन्मताभिप्रायेण। "न स्फोटः प्रतीत्यप्रतीतिभ्यामिति" सांख्यसूत्रेऽपि स्फोटखण्डनमुपवर्षमताऽभिप्रायेणेति सर्वं सुस्थम्। स च स्फोटोवर्णपदादिभेदेन अनेकविधो बाहुल्यभयात् न प्रपञ्चितः। तस्य स्फोटस्याभिव्यक्तौ प्राकृतस्य ध्वनेः कारणत्वं चिरचिरतरस्थितौ तु प्राकृतध्वनिजातवैकृतध्वनेरिति विवेकः। तथा च वाक्यपदीये "स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते" इति। "स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते" इति च स्थितिभेदे चिरचिरतरकालस्थितौ ध्वनिस्तु पूर्वस्थितः। तस्य च स्फोटस्य नित्यतया ध्वनिगतह्रस्वदीर्घादिकालस्य तत्रोपचारः। प्रतिपादितश्च तथैव वाक्यपदीये "स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः। स्वभावतस्तु नित्यत्वात् ह्रस्वदीर्घप्लुतादिषु। प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्य्यते"। शब्दस्य स्फोटस्य नित्यतया अभिन्नकालस्य ह्रस्वदीर्घादिषु प्राकृतध्वनेः कालः तारत्वादिधीहेतुरुपचर्य्यते इति तदर्थः। एवञ्च विलम्बितोच्चारणस्थले तत्तद्वर्णानां तद्बोधजनितसंस्काराणां वा बहुक्षणपर्य्यन्तस्थायित्वकल्पनामपेक्ष्य एकस्यैव शब्दस्याभिव्यक्त्यनन्तरं जायमानेन वैकृतेन ध्वनिना बहुकालस्थितिकल्पने लाघवमित्यपि द्रष्टव्यम्। भेरीशब्दादौ च ध्वन्यभिव्यक्त्यनन्तरं जायमानप्राकृतध्वनेर्बहुकालस्थायित्वदर्शनेन अत्रापि तथाकल्पनौचित्यात्। अतएव च महाभाष्ये "एवं तर्हि स्फोटः शब्दो ध्वनिः शब्दगुणः" इत्यादिनाऽभिव्यक्त्युपकारकत्वेन ध्वनेः स्फोटरूपशब्दगुणत्वमभिहितमभिहितञ्च ध्वनेर्ह्रस्वदीर्घत्वेनापि मानम् यथा "ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। ह्रस्वो महांश्च केषाञ्चित् स्वयं नैव स्वभावतः" इति न स्वभावतस्तद्रूपेण स्फोटोलक्ष्यत इत्यर्थः। ध्वनिविकारे च वायुसंयोगविशेषस्य हेतुत्वं तस्य बहुकालस्थायित्वे विलम्बितत्वमल्पकालस्थायित्वे द्रुतत्वमिति विवेकः। एवं बहुविधेषु स्फोटेषु वाक्यस्फोटस्यैव सिद्धान्ते निष्कृष्टतया तस्यैव बोधकत्वं तद्घटकपदानान्तु पदमध्यवर्त्तिवर्णवत् निरर्थकत्वं विशिष्टार्थद्योतनायैव तेषां प्रयोगात्। तथा च "ब्राह्मणार्थो यथा नास्ति कश्चित् ब्राह्मणकम्बले। देवदत्तादयोवाक्ये तथैव स्युर्निरर्थकाः" इति। "पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च। वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चनेति" च वाक्यपदीये पदाद्यसत्त्वं दर्शयति। तथा "वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिरिति" हरिकारिकायां सिद्धान्ते वाक्यस्फोटस्यैव सिद्धिरिति प्रतिपादितम्"। २व्रणभेदे च (फोड़ा) राजनि०।

स्फोटक पु० स्फुट-ण्वुल्। (फोड़ा) १व्रणभेदे हेमच० २विदारके च।

स्फोटन न० स्फुट-ल्युट्। १विदारणे २विकाशने च भरतः

स्फोटनी स्त्री स्फुट्यतेऽनया स्फुट-ल्युट् ङीप्। मणिवेधनकरणे यन्त्रभेदे (भोमरी) हिरूपको०।

स्फोटवीजक पु० स्फोटस्य व्रणभेदस्य वीजम् ततः स्वार्थे क। भल्लातके राजनि०। तत्फलनिर्यासस्पर्शयोगात् व्रणोत्पत्तेर्लोकसिद्धा।

स्फोटायन पु० स्फोट एवायनं अर्थबोधकतयाश्रयणं यस्य। अर्थबोधकत्वेन स्फोटाभ्युपगन्तरि वैयाकरणे मुनिभेदे "अवङ् स्फोटायनस्य" पाणिनिः। [सिद्धा०।

स्फोटिका स्त्री स्फुट-ण्वुल् टापि अत इत्वम्। हापुत्रिकायां

स्फ्य न० स्फाय-यत् नि०। खड्गाकारे यज्ञार्थे काष्ठभेदे ति०त०

स्फ्याश्लिष्टेज्याधिकरण न० अधिकरणभेदे ति० त०

"स्फ्याश्लिष्टेज्याधिकरणस्य स्फ्यस्य खड्गाकारकाष्ठस्य भङ्गात् नैमित्तकेज्यायामिष्टत्वेन प्रकृतिवद्विकृतिरित्यतिदेशेन दर्शात्मकप्रकृतिधर्माणां प्राप्तौ पूर्वदिनप्रातःकालीनं हवनीयदेवतावाहनमपि प्राप्तं तस्य तदानीं न विधीनां नैमित्तिके निमित्तनिश्चयवतोऽधिकारितया प्रकृते स्वाभाविभक्ते स्फ्यपतननिमित्तसंशयेन प्रधानानधिकारित्वाऽङ्गानधिकारात्तदुत्तरदिने च निमित्तनिश्चये तदधिकारसिद्धावपि नावाहनानुष्ठानम् आवाहनस्य पूर्वदिनप्रातःकालनैयत्यादितीज्यायां आवाहनं विनैवानुष्ठानम्"

स्म अव्य० स्मि-ड। १अतीते २पादपूरणे च अमरः।

स्मय पु० स्मि-अच्। १गर्वे २अद्भुतरसस्थायिभावे च मेदि०।

स्मर पु० स्मरति प्रियमनेन स्मृ-करणे अप् । १कामदेवे अमरः । भावे अप् । २स्मरणे । [त्रिका० ।

स्मरकूपक पु० स्मरस्य कूप इव कायति कै-क । कामगृहे

स्मरगृह न० स्मरस्य गृहमिव । १स्त्रीचिह्नभेदे भगे जटा० स्मरमन्दिरादयोऽप्यत्र ।

स्मरचक्र पु० "कृत्वा वामकरेणोर्द्धं स्वपादस्योपरिस्थितम् । इदञ्च रमते कामी स्मरचक्रः प्रकीर्त्तितः" स्मरदीपिकोक्ते रतिबन्धभेदे ।

स्मरण न० स्मृ-ल्युट् । ज्ञातवस्तुनोऽनुभवाधीनसंस्कारजन्ये उद्बोधकसहकारेण जायमाने १ज्ञानभेदे स्मृतिशब्दे दृश्यम् । आध्याने हेमच० । २चिन्तने जटा० । ३अर्थालङ्कारभेदे सा० द० । अलङ्कारशब्दे ४०७ पृ० दृश्यम ।

स्मरदशा स्त्री स्मरकृता दशा । कामिनां स्मरकृतासु अङ्गासौष्ठवादिषु दशसु दशासु ।

"अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशताऽरुचिः । अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छनाः । मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा इह । असौष्ठवं मलापत्तिस्तापस्तु विरहज्वरः । अरुचिर्वस्तुवैराग्यं सर्वत्रारागिताऽधृतिः । अनालम्बनता चापि शून्यता मनसः स्मृता । तन्मय तत्प्रकाशो हि बाह्याभ्यान्तरतस्तथा । रसविच्छेदहेतुत्वात् मरणं नैव वर्ण्यते । वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरतः" इति सा० द० ।

स्मरध्वज न० ६त० । १स्त्रीचिह्ने शब्दर० । २वाद्ये पु० हेमच० ।

स्मरप्रिया स्त्री ६त० । स्मरभार्यायां रतौ जटा० ।

स्मरलेखनी स्त्री स्मरस्य लेखनीव । स्वरेण कामोद्दीपके शारिकाखगे शब्दर० । [याम् राजनि० ।

स्मरवीथिका स्त्री स्मरस्य वीथिकेव प्राप्तिहेतुत्वात् । वेश्या०

स्मरवृद्धि पु० स्मरस्य वृद्धिर्यस्मात् । १कामवृद्धिक्षुपे राजनि० ६त० । २कामवृद्धौ स्त्री । [शब्दर० ।

स्मरस्तम्भ पु० स्मरस्य तद्व्यापारस्य स्तम्भ इव । उपस्थे

स्मरसार्थ्य पु० स्मरः सार्थो यस्य । गर्दभे त्रिका० ।

स्मरहर पु० स्मरं हरति नाशयति हृ-अच् । १महादेवे अमरः । स्मरमर्द्दनादयोऽप्यत्र ।

स्मराङ्कुश पु० स्मरं तत्कार्य्येऽङ्कुश इव उत्तेजकत्वात् । नखे शब्दर० नखाघातेन हि स्त्रीणां स्मरोद्दीपनं प्रसिद्धम् ।

स्मराम्र पु० स्मरप्रिय आम्रः । राजाम्रे राजनि० ।

स्मरासव पु० स्मरोद्दीपक आसव इव । लालायाम् त्रिका० कामिनां तत्पाने हि स्मरोद्दीपनात्तथात्वम् ।

स्मार्त्त त्रि० स्मृतौ विहितः, स्मृतिं वेत्त्यधीते वा अण् । १स्मृतिविहिते दानादौ "अन्योऽपि स्मार्त्तमाचरेत्" इति "स्मार्त्तं वैदिकवत् चरेत्" च स्मृतिः । २स्मृतिशास्त्राभिज्ञे च

स्मि(ष्मि) अनादरे सक० विस्मये अक० चु० आ० सेट् । स्मापयते असिष्मपत । अयं षोपदेश एव । अन्यतो विस्मये स्माययतीत्येव । अयं भ्वादिरपि अनिट् । स्मयते अस्मेष्ट हिंसायां षोपदेशत्वात् षत्वम् । [ते असिष्मिटत् त

स्मिट अनादरे सक० स्नेहे अक० चु० उभ० सेट् । स्मेटयति ।

स्मित न० स्मि-भावे क्त । १ईषद्धास्ये अमरः "मुखं विकसितस्मितम्" मालतीमाधवम् । कर्त्तरि क्त । २विकसिते ३ईषद्धास्यान्विते च त्रि० ।

स्मील निमेषणे भ्वा० पर० सक० सेट् । स्मीलति अस्मीलीत् ।

स्मृ स्मरणे भ्वा० प० अनिट् । स्मरति अस्मार्षीत् सस्मार सुस्मूर्षति । अषोपदेशत्वात् न षत्वम् । एतद्योगे कर्मणि षष्ठी । अयमाध्याने सक० घटा० स्मरयति ।

स्मृत त्रि० स्मृ-क्त । १कृतस्मरणे २स्मृतिविषये च ।

स्मृति स्त्री स्मृ-क्तिन् । अनुभूतवस्तुन उद्बोधकसहकारेण संस्काराधीने १ज्ञानभेदे । स्मर्य्यते वेदधर्मोऽनेन करणे क्तिन् । २धर्मशासनशास्त्रे वेदार्थानुभवजन्ये वेदार्थानुवादके मुनिप्रणीते वाक्यरूपे शास्त्रे । "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्" मनुः ।

ज्ञानभेदस्मृतिरूपलक्षणादिकं पात० सू० भा० विवरणेऽनूक्तम् उक्तं यथा

"अनुभूतविषयाऽसम्प्रमोषः स्मृतिः" सू० । "किं प्रत्ययस्य चित्तं स्मरति । आहोस्वित् विषयस्येति । ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासः तथाजातीयकं संस्कारमारभते स संस्कारः स्वव्यञ्जकाञ्जनं तदाकारमेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति । तत्र ग्रहणाकारपूर्वा बुद्धिः ग्राह्याकारपूर्वा स्मृतिः । सा च द्वयी, भावितस्मर्त्तव्या चाभावितस्मर्त्तव्या च स्वप्ने भावितस्मर्त्तव्या जाग्रत्समये त्वभावितस्मर्त्तव्येति । सर्वाः स्मृतयः प्रमाणविपर्य्ययविकल्पनिद्रास्मृतीनामनुभवात् प्रभवन्ति" भा० । "अनुभूतविषयाऽसम्प्रमोषः स्मृतिः प्रमाणादिभिरनुभूते विषयेऽसम्प्रमोषः अस्तेयः सा स्मृतिः संस्कारमात्रजन्यस्य हि ज्ञानस्य संस्कारकारणानुभवभासितो विषय आत्मीयस्तदधिकविषयपरिग्रहस्तु सम्प्रमोषः स्तेयः कस्मात् चाहयत्रात् । मुष स्तेय इत्यस्मात् सम्प्रमोषपदव्युत्पत्तेः । एतदुक्तं भवति ।

सर्वे प्रमाणादयोऽनधिगतमर्थं सामान्यतः प्रकारतो वाधिगमयन्ति, स्मृतिः पुनर्न पूर्वानुभवमर्यादामतिक्रामति तद्विषया तदूनविषया वा न तु तदधिकविषया सोऽयं वृत्त्यन्तराद्विशेषः स्मृतेरिति। विमृषति किंप्रत्ययेति ग्राह्यप्रवणत्वात् अनुभवस्य स्वानुभवात्तज्जः संस्कारो ग्राह्यमेव आरभतीति। प्रतिभासयति अनुभवनात्मजनितत्वाद्ग्राह्यानुभवमेवेति। विमृशन्त्यापर्यन्त उभयाकारमवधारयति ग्राह्यप्रवणतया प्रकृतोपरक्तः परमार्थतस्तु ग्राह्यग्रहणे एव उभयं तयोराकारं स्वरूपं निर्भासयति प्रकाशयति। स्वव्यञ्जकं कारणमञ्जनमाकारो यस्य स तथोक्तः। स्वकारणाकार इत्यर्थः। व्यञ्जकसदुद्बोधकं तेनाञ्जनं फलाभिमुखीकरणं यस्येति वेत्यर्थः। ननु यदि कारणविचारेण बुद्धिस्मरणयोः सारूप्यं कस्मात्तर्हि भेद इत्यत आह तत्र ग्रहणेति। ग्रहणमुपादानं न च गृहीतस्योपादानं सम्भवति तदनेनानधिगतबाधनं बुद्धेरित्युक्तं ग्रहणाकारो ग्रहणरूपं पूर्वं प्रधानं यस्याः सा तथोक्ता विकल्पितस्वायम् अभेदेऽपि गुणप्रधानभाव इति ग्राह्याकारः पूर्वः प्रथमो यस्याः सा तथोक्ता, इदमेव च ग्राह्याकारस्य ग्राह्यस्य पर्वत्वं वृत्त्यन्तरविषयीकृतत्वमर्थस्य तदनेन-वृत्त्यन्तरविषयीकृतगोचरा स्मृतिरित्युक्तं भवति सोऽयमसम्प्रमोष इति। ननु अस्ति स्मृतेरपि सम्प्रमोषः दर्शयति हि पित्रादेरतीतस्य देशकालान्तरानुभूतस्याननुभूतचरदेशकालान्तरसम्बन्धं स्वप्न इत्यत आह सा च द्वयीति भावितः कल्पितः स्मर्त्तव्यो यया सा तथोक्ता। अभावितोऽकल्पितः पारमार्थिक इति यावत्। नेयं स्मृतिरपि तु विपर्ययस्तस्य लक्षणोपपन्नत्वात् स्मृत्याभासतया तु स्मृतिरुक्ता प्रमाणाभासमिवेति भावः। कस्मात् पुनरन्ते स्मृतेरुपन्यास इत्यत आह। सर्वाः स्मृतय इति अनुभवप्राप्तिपूर्वा वृत्तिः स्मृतिस्तासां स्मृतौ नामान्ते निवेश इत्यर्थः"।

धर्मशास्त्रशब्दे स्मृतिभेदादिकं ३८६१ पृ० दृश्यम्।

स्मृतिहेतु पु० ६त०। १संस्कारे वासनारूपे गुणभेदे जटा०।

स्मेर त्रि० स्मि-रन्। १विकसिते हेमच० २ईषद्धास्यान्विते च संक्षिप्त० "मद्धाजनः स्मेरमुखो भविष्यति" कुमारः।

स्यद पु० स्यन्द-घञर्थे क। वेगे अमरः।

स्यन्द स्रवणे भ्वा० आ० लुङि, लृट्, लृङि च उभ० अक० ऊदित् वेट्। स्यन्दते अस्यन्दिष्ट अस्यदत् अस्यन्दिष्ट अस्यन्त। स्मोपदेशत्वेऽपि विधिवत्वाद्विष्यन्दते इत्यादौ षत्वम्।

स्यन्द पु० स्यन्द-भावे घञ्। द्रवद्रव्यक्षरणे प्रस्रवे।

स्यन्दन न० स्यन्द-भावे ल्युट्। १क्षरणे। "स्यन्दनञ्च गतिविशेषः तद्देशस्य द्रवद्रव्यस्य च संयोगानुकूलो व्यापारः गमनत्वव्याप्यजातिभेदो वा "भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च। तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते" भाषा०। कर्त्तरि ल्यु। २जले न०। ३रथे मेदि०। ४तिनिशवृक्षे च पु० अमरः।

स्यन्दनद्रुम पु० कर्म०। तिनिशवृक्षे शब्दर०।

स्यन्दनारोह पु० स्यन्दनमारोहति युद्धार्थम् आ+रुह अण्। रथारोहेण योद्धरि अमरः। [शाखायां स्त्री अमरः।

स्यन्दनि पु० स्यन्द-अनि। तिनिशवृक्षे रत्नमा० ङीप्।

स्यन्दिन् त्रि० स्यन्द+णिनि। १प्रस्राविणि। २लाक्षायां स्त्री अमरः ङीप्।

स्यन्न त्रि० स्यन्द-क्त। स्रुते जलादौ अमरः।

स्यन्नवीण त्रि० स्यन्ना वीणा यत्र। स्रुते हेमच०।

स्यम ध्वनने भ्वा० पर० अक० सेट् क्वा वेट् फणादि०। स्यमति अस्यमीत् स्येमतुः सस्यमतुः।

स्यम वितर्के चु० उ० सक० सेट्। स्यामयति ते असिस्यमत् त।

स्यम ध्याने अद० चु० उभ० सक० सेट्। स्यमयति असिस्यमत् त।

स्यमन्तक पु० स्यम-झच् संज्ञायां कन्। १श्रीकृष्णस्य हृदयस्थे मणिभेदे हेमच०। २वृक्षभेदे पु० मेदि०। ३सूर्य्यदत्ते सत्राजितो मणिभेदे तत्कथा भाग० १०।५६ अ०। "आसीत् सत्राजितः सूर्य्यो भक्तस्य परमः सखा। प्रीतस्तस्मै मणिं प्रादात् स च तुष्टः स्यमन्तकम्" इति। "दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो!। दुर्भिक्षमार्य्यरिष्टानि सर्पाधिव्याधयोऽशुभाः। न सन्ति मायिनस्तत्र यत्रास्तेऽभ्यर्चितो मणिः" एतदुपाख्यानं स्यमन्तकोपाख्यानं तस्य श्रवणाद्भाद्रचतुर्थीचन्द्रदर्शने श्राव्यम्" ति०त० रघु०।

स्यमीका स्त्री स्यम-ईकक्। १वल्मीके २काले ३मेघे च पु० ४नीलौषधौ स्त्री मेदि०।

स्यूत त्रि० सिव-कर्मणि क्त। १सूच्यादिना ग्रथिते वस्त्रादौ अमरः। २स्यूतरचितपात्रे (थोकड़ी) पु० अमरः। पृषो० ऊत्। स्योतोऽप्यत्र भरतः।

स्यूति स्त्री सिव-भावे क्तिन्। सूच्यादिना वस्त्रादिसीवने।

स्यून पु० सिव-नक्। १सूर्य्ये २किरणे मेदि० ३सूच्यादिस्यूतवस्त्रखण्डनिर्मिते पदार्थे (थुकड़ी) च शब्दर०।

स्यूम न० सिव-मक्। १जले २किरणे संक्षिप्त० किरणे पु० उणा०

स्योन पु० स्यूम+पृषो० । १धौतकटे (धुकड़ी) अमरटी० भरतः २सूर्ये ३किरणे मेदि० । ४सुखे निघण्टुः । ५सुखकरे त्रि० "स्योना पृथिवी नोभवान्तरा" यजु० ३५अ० २१ ।

स्रंसन न० स्रन्स-णिच्-ल्युट् । ऊर्द्ध्वगतस्याधोनयने पतने युच् । स्रंसनाप्यत्र स्त्री । [२पीलुवृक्षे पु० अमरः ।

स्रंसिन् त्रि० स्रन्स-णिनि । १अधःपतनशीले स्त्रियां ङीप्

स्रंसिफल पु० स्रंसि फलमस्य । शिरीषवृक्षे शब्दमा० ।

स्रक गतौ भ्वा० आत्म० सक० सेट् इदित् । स्रङ्कते अस्रङ्किष्ट

स्रग्वत् त्रि० स्रक् माल्यमस्त्यस्य मतुप् मस्य वः कुत्वम् । माल्यवति । विनि । स्रग्वीत्यप्यत्र । उभयत्र स्त्रियां ङीप् ।

स्रज् स्त्री सृज्यते सृज-क्विन् नि०, माल्ये अमरः ।

स्रज्वा स्त्री सृज-वा नेत्वम् नि० । १प्रजापतौ २तन्तुसंघाते ३रज्ज्वाञ्च संक्षिप्तसारः ।

स्रन्स पतने भ्वा० आत्म० लुङि उ० अक० सेट् इदित् क्त्वा वेट् । स्रंसते इरित् अस्रसत् अस्रंसिष्ट । "अस्रंसत करिणां ग्रैवम्" रघुः । [सते अस्रंसिष्ट ।

स्रन्स प्रमादे भ्वा० आ० अक० सेट् इदित् क्त्वा वेट् । स्रं-

स्रम्भ विश्वासे भ्वा० आत्म० इदित् लुङि उ०सक०सेट् उदित् क्त्वा वेट् । स्रम्भते अस्रभत् अस्रम्भिष्ट ।

स्र(स्रा)व पु० स्रु-अप् घञ् वा । १क्षरणे अमरः । कर्त्तरि अच् । २निर्झरे हेमच० । [भावे ल्युट् । १क्षरणे ।

स्रवण न० स्रु-ल्यु । १मूत्रजले राजनि० २घर्मे च शब्दर०

स्रवद्गर्भा स्त्री स्रवन् गर्भो यस्याः । १दैववशात् पतितगर्भायां गवि अमरः । २तथाभूतस्त्रियाञ्च ।

स्रवद्रङ्ग पु० स्रवन् रङ्गो यत्र । पण्यपन्थो (हट्ट) हारा० ।

स्रवन्ती स्त्री स्रु-शतृ ङीप् । १नद्याम् अमरः । २ओषधिभेदे ३गुल्मस्थाने च मेदि० । शतृ । स्रवविशिष्टे त्रि० । स्त्रियां ङीप् ।

स्रवा स्त्री स्रु-अच् । १मूर्वायाम् रायमुकु० २क्षरणयुते त्रि०

स्रष्टृ पु० सृज-तृच् नित्यमम् । १जगत्कर्त्तरि चतुर्मुखे अमरः २शिवे हला० । ३सर्जनकर्त्तरि त्रि० स्त्रियां ङीप् ।

स्रस्त त्रि० स्रन्स-क्त । च्युते पतिते अमरः ।

स्रस्तर पु० स्रन्स-तरच् किच्च । आसने श०र० रघु० ।

स्राक् अव्य० स्रु-डाकु । त्वरिते द्रागित्यर्थे अमरः ।

स्रावक न० स्रावयति स्रु-णिच्-ण्वुल् । १मरिचे शब्दच० २निःस्रावके त्रि० । [असिस्रवीत् ।

स्रिम्भ हिंसे भ्वा० प० सक० सेट् इदित् क्त्वा वेट् । स्रिम्भति

स्रिभ हिंसे भ्वा०प०सक०सेट् इदित् क्त्वा वेट् । स्रेभति अस्रेभीत् ।

स्रिव शोषे अक० दिवा०प० गतौ सक० सेट् उदित् क्त्वा वेट् । स्रीव्यति अस्रेवीत् । [स्रुवत् ।

स्रु गतौ सक० क्षरणे अक० भ्वा० प० अनिट् । स्रवति असु-

स्रुग्दारु न० स्रुचे यज्ञपात्राय दारु यस्य । विकङ्कतवृक्षे जटा० ।

स्रुघ्न पु० १देशभेदे । स उत्पत्तिस्थानत्वेनास्त्यस्याः अच् गौरा० ङीष् । २सर्जिकाक्षारे स्त्री हेमच० ।

स्रुच्(चा) स्त्री स्रु-क्विप् चिट् च वा टाप् । वटपत्राकृतौ विकङ्कतकाष्ठजे बाहुमात्रे यज्ञपात्रभेदे शब्दच० । [स्त्री शब्दच०

स्रुत त्रि० स्रु-क्त । १क्षरिते जलादौ २गते च । ३हिङ्गुपत्र्यां

स्रुव पुंस्त्री० स्रु-क । १खदिरकाष्ठभवे हस्तमिते अग्रखातभेदे यज्ञपात्रभेदे शब्दर० । २सल्लक्याम् ३मूर्वायाञ्च स्त्री मेदि०

स्रुवावृक्ष पु० स्रुवायाः साधनं वृक्षः । विकङ्कतवृक्षे (बँइचि) अमरः ।

स्रू स्त्री स्रु-क्विप् नि० । १यज्ञपात्रभेदे २निर्झरे च हेमच० ।

स्रै पाके भ्वा० पर० अक० अनिट् । स्रायति अस्रासीत् ।

स्रोत न० स्रु-तन् । स्रोतसि वेगेन स्रुतौ जलनिःसरणे भरतः

स्रोतस् न० स्रु-तसि । १वेगेन स्रुतो जलनिःसरणे अमरः । २रेतसि च ऊर्द्ध्वस्रोताः । ३देहस्थच्छिद्रे च ।

स्रोतईश पु० ६त० । समुद्रे हेमच० ।

स्रोतस्वत् त्रि० स्रोतोऽस्त्यस्य मतुप् मस्य वः । १स्रोतोयुक्ते २नद्यां स्त्री अमरः ङीप् । [२स्रोतोयुक्ते त्रि० ।

स्रोतस्विनी स्रोतस्+अस्त्यर्थे विनि ङीप् । १नद्याम्

स्रोतोऽञ्जन न० स्रोतसि यमुनास्रोतो जलसन्निकृष्टसौवीरदेशे भवम् अञ्जनम् । सौवीरदेशजेऽञ्जने अमरः । "वल्मीकशिखराकारं भिन्नं नीलाञ्जनप्रभम् । घृष्टे च गैरिकावर्णं श्रेष्ठं स्रोतोऽञ्जनञ्च तत्" राजनि० । "स्रोतोऽञ्जनं तत्र श्रेष्ठं विशुद्धं सिन्धुसम्भवम् । दृष्टेः कण्डूमलहरं दाहक्लेदरुजापहम् । अक्ष्णो रूपावहञ्चैव सहते मारुतातपौ । नेत्ररोगा न जायन्ते तस्मादञ्जनमाचरेत्" । "अञ्जनं यामुनञ्चापि कापोताञ्जनमित्यपि । तत्र स्रोतोऽञ्जनं कृष्णं सौवीरं श्वेतमीरितम् । स्रोतोऽञ्जनसमं ज्ञेयं सौवीरं तत्तु पाण्डरम् । स्रोतोऽञ्जनं भवेत् स्वादु चक्षुष्यं कफपित्तहृत् । कषायं लेखनं स्निग्धं ग्राहि च्छर्दिविषापहम् । सिध्मक्षयास्रहृत् शीतं सेवनीयं सदा बुधैः । स्रोतोऽञ्जनगुणाः सर्वे सौवीरेऽपि मता बुधैः । किन्तु द्वयोरञ्जनयोः श्रेष्ठं स्रोतोऽञ्जनं स्मृतम्" भावप्र० । [जटा०

स्रोतोवहा स्त्री स्रोतसा वहति सरति वह-अच् । नद्याम्

स्व न० स्वन-ड । १धने अमरः । २आत्मनि ३ज्ञातौ च पु० अमरः । ४आत्मीये त्रि० । आत्मनि आत्मीये चार्थेऽस्य सर्वनामता ।

स्वकम्पन पु० स्वेनैव पराप्रयुज्यमान एव कम्पते कपि-युच् । वायौ शब्दर० ।

स्वकर्म्मन् न० स्वस्य कर्म । स्ववर्णोचिते कर्मणि "स्वकर्मनिरतः [सदा" गीता

स्वकीय त्रि० स्वस्येदम् छ कुक् च । आत्मीये । अत्र नित्यमेव कुक्, अकुक्युक्तप्रयोगस्तु अपाणिनीयः ।

स्वग सर्पणे भ्वा० प० सक० सेट् इदित् । स्वङ्गति अस्वङ्गीत् ।

स्वगत त्रि० स्वस्मिन् मनसि आत्मनि वा गतम् गम-क्त । १मनोगते २आत्मगते च । नाटकाभिनये प्रतिपाद्यपुरुषाश्राव्ये रङ्गभूमिस्थसामाजिकजनश्रवणयोग्ये वाक्ये न०। "अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्" सा०द०।

स्वगुप्ता स्त्री स्वेनैव गुप्ता । १शूकशिम्ब्याम् शब्दर० । २ल-ज्जालुलतायाञ्च राजनि० ।

स्वगृह पुंस्त्री० स्वकृतं गृहं यस्य । १कलिङ्कारखगे जटा० हेम० । २निजमन्दिरे ३निजरायो च क्ली० ।

स्वच्छ त्रि० सुष्ठु अच्छः प्रा० । १अतिनिर्मले कालुष्यरहिते २मुक्तायां ३स्फटिके च पु० राजनि० । ४श्वेतदूर्वायाम् स्त्री राजनि० । ५विमलोपरसे न० ६रोगवियुते त्रि० शब्दर० । ७पक्के-च । [अमरः ।

स्वच्छन्द त्रि० स्वस्य छन्दोऽभिप्रायः स्वच्छन्दः यस्य । स्वाधीने

स्वच्छपत्त्र न० स्वच्छं पत्त्रं यस्य । अभ्रके हेमच० ।

स्वच्छमणि पु० कर्म० । स्फाटिके मणौ राजनि० ।

स्वच्छवालुक न० स्वच्छा वालुकेव यत्र । विमलोपरसे राजनि०

स्वज न० स्वस्मात् देहात् आत्मनो वा जायते । १रुधिरे मेदि० ३पुत्रे पु० ४कन्यायां स्त्री मेदि० । ५आत्मजाते त्रि० ।

स्वजन पु०स्वस्यैव जनो जननमेककुले यस्य । १ज्ञातौ अमरः । हेम० । २आत्मसम्बन्धिजने । [यति-ते अधिस्वठ१-त ।

स्वठ गतौ संस्कारेऽसंस्कारे च चु० उ० सक० सेट् । स्वठ-

स्वतन्त्र त्रि० स्वस्य तन्त्रं वशीकारः मूलत्वे यस्य । १स्वाधीने अपराधीने अमरः । तत्त्वञ्च इतरव्यापारानधीनव्यापारवत्त्वम् । २कर्त्तरि च यद्धि समभिव्याहृतक्रियाकारकान्तराधीनव्यापारवान् इति याज्ञिकाः "स्वतन्त्रः कर्त्ता" पा० कर्तृशब्दे १७१६ पृ० दृश्यम् ।

स्वतस् अव्य० स्व+तसिल् । आत्मतः इत्यर्थे ।

स्वता स्त्री स्वस्य स्वकीयस्य भावः तल् । स्वकीयत्वे "ग्रामः स्वतां यास्यति" मनुटीका ।

स्वतोग्राह्य न० स्वग्राहकसामग्रीग्राह्ये ज्ञानप्रामाण्ये वेदान्तादिमतम "प्रामाण्यं न स्वतोग्राह्यं संशयानुपपत्तितः" भाषा० उक्तेन तत् स्वतोग्राह्यमिति न्यायमतम् ।

स्वत्व न० स्वस्य भावः त्व । द्रव्याणां यथेष्टक्रयविक्रयादिविनियोगार्हत्वे । धर्मभेदे २स्वामित्वे च, तच्च सम्बन्धिभेदेन द्रव्यगतमात्मगतञ्च । स्वत्वपदार्थस्तु दायभा०टीकायां श्रीकृष्णतर्कालङ्कारेण निरूपितो यथा

"स्वत्वञ्च यथेष्टविनियोगार्हत्वेन शास्त्रबोधितत्वमिति प्राञ्चः । अतिरिक्तः पदार्थ इति शिरोमणिः । स्वामित्वञ्च तन्निरूपकत्वं निरूपकतया तदेव वा तच्च द्रव्यगतं गुणगतञ्च द्रव्यस्य दानादिस्तुतेः गौरवं वा इदमुत्सृजेदित्यादौ गौ इत्यादिगुणवाचिशब्दपारिभाषिकनीलत्वादेरुत्सर्गश्रुतेश्च । वस्तुतस्तु आत्मगतमेव स्वामित्वमतिरिक्तः पदार्थः विक्रयदानादीनां तद्बाधकत्वे तद्धेतुत्वे च सम्बन्धाभावात् तदेव निरूपकतया स्वत्वव्यवहारहेतुः विषयतया ज्ञाततावत् । अतएव निबन्धादौ भाविन्यपि स्वत्वम् अन्यथा प्रतिमासं प्रतिवर्षं वा देयत्वेन प्रतिश्रुतस्य धान्यादिरूपस्य भावित्वेन तत्र तदुत्पत्त्यनुपपत्तेरिति चूडामणिसम्मतोऽलोकावतोऽदृष्टविशेषः प्रकीर्णः पन्थाः ।

तच्च स्वत्वं लौकिकमिति मिता० व्यवस्थापितं यथा

"स्वत्वमेव तावन्निरूप्यते किं शास्त्रैकसमधिगम्यं स्वत्वमुत प्रमाणान्तरसमधिगम्यमिति । तत्र शास्त्रैकसमधिगम्यमिति तावद्युक्तं गौतमवचनात् । 'स्वामी ऋक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोरिति' प्रमाणान्तरगम्ये स्वत्वे नेदं वचनम् । तथा स्तेनातिदेशे मनुः "योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम् । याजनाध्यापनेनापि यथा स्तेनस्तथैव सः" इत्यदत्तादायिनः सकाशात् याजनादिकरणेन द्रव्यमर्जयतां दण्डविधानमनुपपन्नं स्यात् स्वत्वस्य लौकिकत्वे । अपि च । लौकिकं चेत् स्वत्वं मम स्वमपहृतमनेनेति न ब्रूयात् अपहर्तुरेव स्वत्वादन्यस्य स्वत्वेनापहृतमिति नापहर्तुः स्वम् । एवं तर्हि सुवर्णरजतादिस्वरूपवदस्य वा स्वमन्यस्य वा स्वमिति संशयो न स्यात् तस्माच्छास्त्रैकसमधिगम्यं स्वत्वमिति । अत्रोच्यते । लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वात् व्रीह्यादिवत् । आहवनीयादीनां हि शास्त्रगम्यानां न लौकिकक्रियासाध-

भवत्विति। नन्वाहवनीयादीनामपि पाकादिसाधनत्व मस्त्येव। नैतत्। न हि तत्राहवनीयादिरूपेण पाकादिसाधनत्वं किं तर्हि प्रत्यक्षादिपरिदृश्यमानाग्न्यादिरूपेण। इह तु सुवर्णादिरूपेण न क्रयादि साधनत्वमपि तु स्वत्वेनैव। न हि यस्य यत्स्वं न भवति तत्तस्य क्रयाद्यर्थक्रियां साधयति। अपि च प्रत्यन्तवासिनामप्यदृष्टशास्त्रव्यवहाराणां स्वत्वव्यवहारो दृश्यते क्रयविक्रयादिदर्शनात्। किञ्च। नियतोपायकं स्वत्वं लोकसिद्धमेवेति न्यायविदो मन्यन्ते। तथा हि लिप्सासूत्रे तृतीयवर्णके द्रव्यार्जननियमानां क्रत्वर्थत्वे स्वत्वमेव न स्यात् स्वत्वस्यालौकिकत्वादिति पूर्वपक्षासम्भवमाशङ्क्य द्रव्यार्जनस्य प्रतिग्रहादिना स्वत्वसाधनत्वं लोकसिद्धमिति पूर्वपक्षः समर्थितो गुरुणा। ननु द्रव्यार्जनस्य क्रत्वर्थत्वे स्वत्वमेव न भवतीति याग एव न संभवतीति। प्रतिषिद्धेनापि अर्जनं स्वत्वं नापादयतीति विप्रतिषिद्धमिति वदता। तथा सिद्धान्तेऽपि स्वत्वस्य लौकिकत्वमङ्गीकृत्यैव विचारप्रयोजनमुक्तम्। अतो नियमातिक्रमः पुरुषस्य न क्रतोरिति। अस्य चायमर्थः। यदा द्रव्यार्जननियमानां क्रत्वर्थत्वं तदा नियमार्जितेनैव द्रव्येण क्रतुसिद्धिः। नियमातिक्रमार्जितेन द्रव्येण न क्रतुसिद्धिरिति न पुरुषस्य नियमातिक्रमदोषः पूर्वपक्षे। सिद्धान्ते तु अर्जननियमस्य पुरुषार्थत्वात्तदतिक्रमेणार्जितेनापि द्रव्येण क्रतुसिद्धिर्भवति। पुरुषस्यैव नियमातिक्रमदोष इति नियमातिक्रमार्जितस्यापि स्वत्वमङ्गीकृतम् अन्यथा क्रतुसिद्ध्यभावात् न चैतावता चौर्यादिप्राप्तस्यापि स्वत्वं स्यादिति मन्तव्यम् लोके तत्र स्वत्वप्रसिद्ध्यभावात् व्यवहारविसंवादाच्च। एवं प्रतिग्रहाद्युपायके स्वत्वे लौकिके स्थिते ब्राह्मणस्य प्रतिग्रहादय उपायाः। क्षत्रियस्य विजितादय उपायाः वैश्यस्य कृष्यादयः शूद्रस्य शुश्रूषादय इत्यसाधारणा नियमाः। ऋक्थादयस्तु सर्वसाधारणाः "स्वामी ऋक्थक्रयसंविभागपरिग्रहाधिगमेष्वित्युक्ताः। तत्राप्रतिबन्धो दायो रिक्थम्। क्रयः प्रसिद्धः। संविभागः सप्रतिबन्धो दायः। परिग्रहोऽनन्यपूर्वस्य जलतृणकाष्ठादेः स्वीकारः। अधिगमो निध्यादेः प्राप्तिः। एतेषु निमित्तेषु सत्सु स्वामी भवति। ज्ञातेषु जायते स्वामी ब्राह्मणस्याधिकं लब्धमिति ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं तदधिकमसाधारणम्। क्षत्रियस्य विजितमित्यत्राधिकमित्यनुवर्तते क्षत्रियस्य विजयदण्डादिलब्धमसाधारणम्। निर्विष्टं वैश्यशूद्रयोरिति। अत्राप्यधिकमित्यनुवर्तते वैश्यस्य कृषिगोरक्षादिलब्धं निर्विष्टं तदसाधारणं शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धं तदसाधारणमेवमनुलोमजानां प्रतिलोमजानाञ्च लोकप्रसिद्धेषु स्वत्वहेतुषु यद्यदसाधारणमुक्तम् "सूतानामश्वसारथ्यम्" इत्यादि तत्तत् सर्वं निर्विष्टशब्देनोच्यते सर्वस्यापि भृतिरूपत्वात् "निर्वेशो भृतिभोगयोरिति" त्रिकाण्डीस्मरणात्। तत्तदसाधारणं वेदितव्यम्। यदपि पत्नीदुहितरश्चेत्यादिस्मरणम्। तत्रापि स्वामिसम्बन्धितया बन्धुषु दायविभागितया प्राप्तेषु लोकप्रसिद्धेऽपि स्वत्वे व्यामोहनिवृत्त्यर्थं स्मरणमिति सर्वमनवद्यम्"।

तत्र स्वत्वं जन्मनैवेति मिताक्षरादयः। पित्रादिमरणादिनैवेति दायभागादयः। तत्रापि बहुदायद्रव्ये स्वत्वमिति मिताक्षरादयः। प्रदेशभेदे इति दायभागादयः। तत्तद्ग्रन्थे विस्तरो दृश्यः [सुष्ठु अदनम्। २सुभक्षणे हेमच०।

स्वदन न० स्वद-भावे ल्युट्। १आस्वादे २लेहने च राजनि०।

स्वधर्म पु० स्वस्य वेदादिविहितो धर्मः। स्वानुरूपे वेदाद्युक्ते आचारादिधर्मे। "यो यस्य विहितो धर्मः स तज्जातिः प्रकीर्त्तितः। तस्मात् स्वधर्मं कुर्वीत द्विजो नित्यमनापदि" नरसिंहपु०। "श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः" गीता।

स्वधा अव्य० स्वद–आ पृषो० दस्य धः। १पितृदेवोद्देशेन हविस्त्यागे अमरः। स्वेन धयति धे–क आप्। २मातृकाभेदे स्त्री "नमः स्वधायै स्वाहायै" इति पितृगाथा। "निपातस्वधायोगे स्थानोद्देश्यपदात् चतुर्थी पितृभ्यः स्वधेत्यादौ पितृउद्देश्यकत्याग इति बोधः। तदर्थस्य विषयतया अत्र दानान्वयी तस्य निपातत्वेन तदर्थस्य भेदान्वयस्य व्युत्पत्तिसिद्धत्वात्। इदमन्नं पित्रे स्वधेत्यादौ पितृउद्देश्यकत्यागविषय इदमन्नमित्यादि बोधः। मातृभेदस्वधा च दक्षकन्या ब्रह्मणो मानसी कन्या च पितृपत्नी। तन्नामोच्चारणे पित्रादिश्राद्धकरणरूपोऽस्या वरो ब्रह्मणा दत्तः। "ब्रह्मा च मानसीं कन्यां ससृजे तां मनोहराम्" "स्वधाभिधानां सुदतीं लक्ष्मीलक्षणसंयुताम्" "पितृभ्यस्तां ददौ ब्रह्मा तुष्टेभ्यस्तुष्टिरूपिणीम्। ब्राह्मणानामुपदेशं चकार गोपनायकः। स्वधान्तं मन्त्रमुच्चार्य पितृभ्यो देहि चेति च। क्रमेण तेन विप्राश्च पित्रे दानं ददुः पुरा" ब्रह्मवै०प्र०

स्वधानामकस्वधाशब्दस्यापि पितृदाने विनियोग इति बोध्यम् ।

स्वधाप्रिय पु० स्वधाभिमतां प्रियः शाक० । १कृष्णतिले शब्दर० २स्वधोपलक्षितश्राद्धादिप्रिये पित्रादौ च । स्वधा प्रिया यस्य । ३पितृलोके स्वधाशब्दे मूलं दृश्यम् । [गणे २देवे च

स्वधाभुज् स्वधेत्यनेन त्यक्तद्रव्यं भुङ्क्ते भुज–क्विप् । १पितृ-

स्वधि(ती)ति स्त्री स्वेन धीयते धा-क्तिच् वा ङीप् । कुठारे परश्वधे अमरः पुंस्त्री० । स्वधितिरप्यत्र ।

स्वन शब्दे भ्वा० पर० अक० सेट् । स्वनति अस्वनीत् अस्वानीत् । फणा० स्वेनतुः सस्वनतुः । अयं भूषणे वा घटा० (स्वा)स्वनयति । [स्वनत्–त ।

स्वन ध्वाने अद० चु० उभ० अक० सेट् । स्वनयति–ते अस-

स्वन पु० स्वन+अप् । शब्दे अमरः ।

स्वनि पु० स्वन+इन् । शब्दे हेमच० ।

स्वनित त्रि० स्वन–कर्त्तरि–क्त । १शब्दिते अमरः । भावे क्त । २शब्दे ३मेघगर्जिते च न० हेमच० ।

स्वनिताह्वय पु० स्वनितमाह्वयते आ+ह्वे श । तण्डुलीयशाके राजनि० । [स्त्रियां ङीष् ।

स्वनोत्साह पुंस्त्री० स्वने उत्साहो यस्य । गण्डके शब्दर०

स्वपन न० स्वप–ल्युट् । १शयने २निद्रायाञ्च शब्दर० ।

स्वपिण्डा स्त्री स्वेनैव पिण्डः पिण्डाकारोऽस्त्यस्याः अच् । पिण्डखर्जूर्य्यास् राजनि० ।

स्वप्न पु० स्वप–भावे नन् । १निद्रायाम् अमरः २शयने ३मानसिकज्ञानभेदे ४दर्शने च मेदि० आर्षे न० । स्वप्नदृष्टपदार्थस्य मायामात्रत्वं शा० सू० भाष्ययोर्व्यवस्थापितं यथा "सन्ध्ये सृष्टिराह हि" सू० ।

"अतिक्रान्ते पादे पञ्चाग्निविद्यामुदाहृत्य जीवस्य संसारगतिप्रभेदः प्रपञ्चितः, इदानीं तस्यैवावस्थाभेदः प्रपञ्च्यते । इदमामनन्ति "स यत्र प्रस्वपिति" इत्युपक्रम्य "न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते" इत्यादि । तत्र संशयः किं प्रबोध इव स्वप्नेऽपि पारमार्थिकी सृष्टिराहोस्विन्मायामयीति । तत्र तावत् प्रतिपद्यते । सन्ध्ये सृष्टिरिति । सन्ध्यमिति स्वप्नस्थानमाचष्टे वेदे प्रयोगदर्शनात् "सन्ध्यं तृतीयं स्वप्नस्थानम्" इति । द्वयोर्लोकस्थानयोः प्रबोधसम्प्रसादस्थानयोर्वा सन्धौ भवतीति सन्ध्यं तस्मिन् सन्ध्ये स्थाने तथ्यरूपैव सृष्टिर्भवितुमर्हति । कुतः, यतः प्रमाणभूता श्रुतिरेवमाह "अथ रथान् रथयोगान् पथः सृजते" इत्यादि । स हि कर्त्तेति चोपसंहारादेवमेवावगम्यते" भा० । "निर्मातारं चैके पुत्रादयश्च" सू० "अपि चैके शाखिनोऽस्मिन्नेव सन्ध्ये स्थाने कामानां निर्मातारमात्मानमामनन्ति "य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः" इति । पुत्रादयश्च तत्र कामा अभिप्रेयन्ते काम्यन्त इति । ननु कामशब्देनेच्छाविशेषा एवोच्येरन्, न, "शतायुषः पुत्रपौत्रान् वृणीष्व" इति प्रकृत्य "अन्ते कामानां त्वा कामभाजं करोमि" इति प्रकृतेषु तत्र पुत्रादिषु कामशब्दस्य प्रयुक्तत्वात् । प्राज्ञं चैनं निर्मातारं प्रकरणवाक्यशेषाभ्यां प्रतीमः । प्राज्ञस्य हीदं प्रकरणम् "अन्यत्र धर्मादन्यत्राधर्मात्" इत्यादि । तद्विषय एव च वाक्यशेषोऽपि–"तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते । तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन" । इति प्राज्ञकर्त्तृका च सृष्टिस्तथ्यरूपा समधिगता यथा जागरिताश्रया तथा स्वप्नाश्रयापि सृष्टिर्भवितुमर्हति । तथा च श्रुतिः "अथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत् पश्यति तानि सुप्तः" इति स्वप्नजागरितयोः समानन्यायतां श्रावयति । तस्मात् तथ्यरूपैव सन्ध्ये सृष्टिरित्येवं प्राप्ते प्रत्याह । "मायामात्रन्तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" सू० । "तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति यदुक्तं सन्ध्ये सृष्टिः पारमार्थिकीति । मायामात्रैव सन्ध्ये सृष्टिर्न परमार्थतोऽप्यस्ति । कुतः कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् । न हि कार्त्स्न्येन परमार्थवस्तुधर्मेणाभिव्यक्तस्वरूपः स्वप्नः । किं पुनरत्र कार्त्स्न्यमभिप्रेतं, देशकालनिमित्तसम्पत्तिरबाधश्च । न हि परमार्थवस्तुविषयाणि देशकालनिमित्तानि अबाधश्च स्वप्ने रथादीनामुचितो देशः सम्भवति, न तावत् संवृते देहदेशे रथादयोऽवकाशं लभेरन् । स्यादेतत्, बहिर्देहात् स्वप्नं द्रक्ष्यति देशान्तरितद्रव्यग्रहणात् । दर्शयति च श्रुतिः बहिर्देहात् स्वप्नं "बहिः कुलायादमृतश्चरित्वा स ईयते अमृतो यत्र कामम्" इति । स्थितिगतिप्रत्ययभेदश्च नानिष्क्रान्ते जन्तौ सामञ्जस्यमश्नुवीतेति । नेत्युच्यते, न हि सुप्तस्य जन्तोः क्षणमात्रेण योजनशतान्तरितं देशं पर्य्येतुं विपर्य्येतुञ्च ततः सामर्थ्यं सम्भाव्यते । क्वचिच्च प्रत्यागमनवर्जितं स्वप्नं श्रावयति "कुरुष्वहं शय्यायां शयानो निद्रयाभिप्लुतः स्वप्ने पञ्चालानभिगतश्चास्मिन् प्रतिबुद्धश्च" इति । देहा-

च्छेदमेयात् पश्चालेष्वेव प्रतिबुध्येत तानप्राप्तमिगन इति कुरुष्वेव तु प्रतिबुध्यते। येन चायं देहेन देशान्तरमनुव्रजन्निव मन्यते तमन्ये पार्श्वस्थाः शयनदेश एव पश्यन्ति। यथाभूतानि चायं देशान्तराणि स्वप्ने पश्यति न तानि तथाभूतान्येव भवन्ति, परिधावंश्चेत् पश्येज्जाग्रद्वस्तुभूतमर्थमाकलयेत्। दर्शयति च श्रुतिः "अन्तरेव देहे स्वप्नं स यत्रैतत् स्वप्नयाचरति" इत्युपक्रम्य "स्वे शरीरे यथाकामं परिवर्त्तते" इति। अतश्च श्रुत्युपपत्तिविरोधाद्बहिःकुलायश्रुतिर्गौणी व्याख्यातव्या बहिरिव कुलायादमृतश्चरित्वा, इति यो हि वसन्नपि शरीरे न तेन प्रयोजनं करोति स बहिरिव शरीराद्भवति इति। स्थितिगतिप्रत्ययभेदोऽप्येवं सति विप्रलम्भ एवाभ्युपगन्तव्यः, कालविसंवादोऽपि च स्वप्ने भवति रजन्यां सुप्तो वासरं भारते वर्षे मन्यते तथा मुहूर्त्तमात्रवर्त्तिनि स्वप्ने कदाचिद्बहून् वर्षपूगानतिवाहयति। निमित्तान्यपि च स्वप्ने न बुद्धये कर्मणे चोचितानि विद्यन्ते, करणोपसंहाराद्धि नास्य रथादिग्रहणाय चक्षुरादीनि सन्ति, रथादिनिर्वर्त्तनेऽपि कुतोऽस्य निमेषमात्रेण सामर्थ्यं दारूणि वा। बाध्यन्ते चैते रथादयः स्वप्नदृष्टाः प्रबोधे, स्वप्न एव चैते सुलभबाधा भवन्ति आद्यन्तयोर्व्यभिचारदर्शनात्, रथोऽयमिति हि कदाचित् स्वप्ने निर्द्धारितः क्षणेन मनुष्यः सम्पद्यते, मनुष्योऽयमिति वा निर्द्धारितः क्षणेन वृक्षः। स्पष्टञ्चाभावं रथादीनां स्वप्ने श्रावयति शास्त्रम् "न तत्र रथा न रथयोगा न पन्थानो भवन्ति" इत्यादि। तस्मान्मायामात्रं स्वप्नदर्शनम्"भा०। "सूचकश्च हि श्रुतेराचक्षते च तद्विदः" सू०। "मायामात्रत्वात् तर्हि न कश्चित् स्वप्ने परमार्थगन्ध इति, नेत्युच्यते। सूचकश्च हि स्वप्नो भवति भविष्यतोः साध्वसाधुनोः। तथा हि श्रूयते "यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने" इति। तथा "पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति" इत्येवमादिभिः स्वप्नैरचिरजीवित्वमावेद्यत इति श्रावयति। आचक्षते च स्वप्नाध्यायविदः "कुञ्जरारोहणादीनि स्वप्ने धन्यानि खरयानादीन्यधन्यानि" इति। मन्त्रदेवताद्रव्यविशेषनिमित्ताश्च केचित् स्वप्नाः सत्यार्थगन्धिनो भवन्तीति मन्यन्ते। तत्रापि भवतु नाम सूच्यमानस्य वस्तुनः सत्यत्वं, सूचकस्य तु स्त्रीदर्शनादेर्भवत्येव वैतथ्यं बाध्यमानत्वादित्यभिप्रायः। तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वम्। यदुक्तमाह हीति तदेवं सति भाक्तं व्याख्यातव्यं यथा लाङ्गलं गवादीनुद्वहतीति निमित्तमात्रत्वादेवमुच्यते न तु प्रत्यक्षमेव लाङ्गलं गवादीनुद्वहति, एवं निमित्तमात्रत्वात् सुप्तो रथादीन् सृजते स हि कर्त्तेति चोच्यते न तु प्रत्यक्षमेव सुप्तो रथादीन् सृजति। निमित्तत्वन्त्वस्य रथादिप्रतिभाननिमित्तमोदत्रासदर्शनात् तन्निमित्तभूतयोः सुकृतदुष्कृतयोः कर्त्तृत्वेनेति वक्तव्यम्। अपि च जागरिते विषयेन्द्रियसंयोगादादित्यादिज्योतिर्व्यतिकराच्चात्मनः स्वयं ज्योतिष्ट्वं दुर्विवेचनमिति तद्विवेचनाय स्वप्न उपन्यस्तः, तत्र यदि रथादिसृष्टिवचनं श्रुत्या नीयेत स्वयं ज्योतिष्ट्वं न निर्णीतं स्यात्। तस्माद्रथाद्यभाववचनश्रुत्या रथादिसृष्टिवचनं भाक्तमिति व्याख्येयम्। एतेन निर्माणश्रवणं व्याख्यातम्। यदप्युक्तम् "प्राज्ञमेनं निर्मातारमामनन्ति" इति, तदप्यसत् श्रुत्यन्तरे स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति" इति जीवव्यापारश्रवणात्। इहापि च "य एष सुप्तेषु जागर्त्ति" इति प्रसिद्धानुवादाज्जीव एवायं कामानां निर्माता सङ्कीर्त्यते, तस्य तु वाक्यशेषेण "तदेव शुक्रन्तद्ब्रह्मेति" जीवभावं व्यावर्त्य ब्रह्मभाव उपदिश्यते, "तत्त्वमसि" इत्यादिवदिति न ब्रह्मप्रकरणत्वं विरुध्यते। न चास्माभिः स्वप्नेऽपि प्राज्ञव्यापारः प्रतिषिध्यते, तस्य सर्वेश्वरत्वात् सर्वास्वप्यवस्थास्वधिष्ठातृत्वोपपत्तेः। पारमार्थिकस्तु नायं सन्ध्याश्रयः सर्गो वियदादिसर्गवदित्येतावत् प्रतिपाद्यते। न च वियदादिसर्गस्याप्यात्यन्तिकं सत्यत्वमस्ति, प्रतिपादितं हि "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यत्र समस्तस्य मायामात्रत्वम्। प्राक् च ब्रह्मात्मदर्शनात् वियदादिप्रपञ्चो व्यवस्थितरूपो भवति, सन्ध्याश्रयस्तु प्रपञ्चः प्रतिदिनं बाध्यत इत्यतो वैशेषिकं सन्ध्यस्य मायामात्रत्वमुदितम्" भा०। "पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" सू०। "यद्यपि स्यात् परस्यैव तावदात्मनोऽंशो जीवोऽग्नेरिव विस्फुलिङ्गः। तत्रैवं सति यथाऽग्निविस्फुलिङ्गयोः समाने दहनप्रकाशनशक्ती भवतः एवं जीवेश्वरयोरपि ज्ञानैश्वर्यशक्ती, ततश्च जीवस्यैश्वर्यवशात् साङ्कल्पिकी स्वप्ने रथादिसृष्टिर्भविष्यतीति, अत्रोच्यते। सत्यपि जीवेश्वरयोरंशांशिभावे प्रत्यक्षमेव जीवेश्वरविपरीतधर्मत्वं, किं पुनर्जी-

वस्येश्वरसमानधर्मत्वं नास्त्येव न नास्तीति, विद्यमानमपि तु तत् तिरोहितं, अविद्यादिव्यवधानात् । तत् पुनस्तिरोहितं सत् परमेश्वरमभिध्यायतो यतमानस्य जन्तोर्विधूतध्वान्तस्य तिमिरतिरस्कृतस्येव दृक्शक्तिरौषधवीर्यादीश्वरप्रसादात् संसिद्धस्य कस्यचिदेवाविर्भवति न स्वभावत एव सर्वेषां जन्तूनां, कुतस्ततो हि ईश्वराद्धेतोरस्य जीवस्य बन्धमोक्षौ भवतः, ईश्वरस्य स्वरूपापरिज्ञानाद् बन्धः तत्स्वरूपपरिज्ञानात्तु मोक्षः । तथा च श्रुतिः "ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः" । तस्याभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः" इत्येवमाद्या" भा० ।

"देहयोगाद् वा सोऽपि" सू०। "कस्मात् पुनर्जीवः परमात्मांश एव सन् तिरस्कृतज्ञानैश्वर्यो भवति युक्तन्तु ज्ञानैश्वर्ययोरतिरस्कृतत्वं विस्फुलिङ्गस्येव दहनप्रकाशयोरिति । उच्यते सत्यमेवैतत्, सोऽपि तु जीवस्य ज्ञानैश्वर्यतिरोभावो देहयोगाद्देहेन्द्रियमनोबुद्धिविषयवेदनादियोगाद्भवति । अस्ति चात्रोपमा यथाग्नेर्दहनप्रकाशनसम्पन्नस्याप्यरणिगतस्य दहनप्रकाशने तिरोभवतः, यथा वा भस्मनाच्छन्नस्य, एवमविद्याप्रत्युपस्थापितनामरूपकृतदेहाद्युपाधियोगात् तदविवेकभ्रमकृतो जीवस्य ज्ञानैश्वर्यतिरोभावः । वाशब्दो जीवेश्वरयोरन्यत्वाशङ्काव्यावृत्त्यर्थः । नन्वन्य एव जीव ईश्वरादस्तु तिरस्कृतज्ञानैश्वर्यत्वात् किं देहयोगकल्पनया । नेत्युच्यते, न ह्यन्यत्वं जीवस्येश्वरादुपपद्यते "सेयं देवतैक्षत" इत्युपक्रम्य "अनेन जीवेनात्मनानुप्रविश्य" इत्यात्मशब्देन जीवस्य परामर्शात् । "तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इति च जीवस्योपदिशतीश्वरात्मत्वम्, अतोऽनन्य एवेश्वरात् जीवः सन् देहयोगात् तिरोहितज्ञानैश्वर्यो भवति, अतश्च न साङ्कल्पिकी जीवस्य स्वप्ने रथादिसृष्टिर्घटते ! यदि च साङ्कल्पिकी स्वप्ने सृष्टिः स्यात् नैवानिष्टं कश्चित् स्वप्नं पश्येत् । न हि कश्चिदनिष्टं सङ्कल्पयते । यत् पुनरुक्तं जागरितदेशश्रुतिः स्वप्नस्य सत्यत्वं ख्यापयतीति न तत्साम्यवचनं सत्यत्वाभिप्रायं स्वयंज्योतिष्ट्वविरोधात्, श्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वात्, जागरितप्रभववासनानिर्मितत्वात् तु स्वप्नस्य तत्तुल्यनिर्भासत्वाभिप्रायं तत् । तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वम्" ।

स्वप्नभेदस्य शुभाशुभसूचकत्वं नानापुराणेषूक्तं तत्र दिङ्मात्रं मत्स्यपुराणे २४२ अध्याये उक्तमत्र प्रदर्श्यते यथा "इदानीं कथयिष्यामि निमित्तं स्वप्नदर्शने । नाभिं विनान्यगात्रेषु तृणवृक्षसमुद्भवः । चूर्णनं मूर्ध्नि कांस्यानां मुण्डनं नग्नता तथा । मलिनाम्बरधारित्वमभ्यङ्गः पङ्कदिग्धता । उच्चात् प्रपतनञ्चैव दोलारोहणमेव च । अर्जनं पङ्कलोहानां हयानामपि मारणम् । रक्तपुष्पद्रुमाणाञ्च मण्डलस्य तथैव च । वराहर्क्षखरोष्ट्राणां तथा च रोहणक्रिया । भक्षणं पक्षिमांसानां तैलस्य कृशरस्य च । नर्त्तनं हसनञ्चैव विवाहो गीतमेव च । तन्त्रीवाद्यविहीनानां वाद्यानामभिवादनम् । स्रोतोऽवगाहगमनं स्नानं गोमयवारिणा । पङ्कोदकेन च तथा महीतोयेन चाप्यथ । मातुः प्रवेशो जठरे चितारोहणमेव च । शक्रध्वजाभिपतनं पतनं शशिसूर्ययोः । दिव्यान्तरिक्षभौमानामुत्पातानाञ्च दर्शनम् । देवद्विजातिभूपालगुरूणां क्रोध एव च । आलिङ्गनं कुमारीणां पुरुषाणाञ्च मैथुनम् । हानिश्चैव स्वगात्राणां विरेकवमनक्रिया । दक्षिणाशाभिगमनं व्याधिनाभिभवस्तथा । फलापहानिश्च तथा पुष्पहानिस्तथैव च । गृहाणाञ्चैव पातश्च गृहसम्मार्जनन्तथा । क्रीडा पिशाचक्रव्यादवानरर्क्षनरैरपि । परादभिभवश्चैव तस्माच्च व्यसनोद्भवः । काषायवस्त्रधारित्वं तद्वत् स्त्रीक्रीडनन्तथा । स्नेहपानावगाहौ च रक्तमाल्यानुलेपनम् । एवमादीनि चान्यानि दुःस्वप्नानि विनिर्दिशेत् । एषां सङ्कथनं धन्यं भूयः प्रस्वपनं तथा । कल्कस्नानं तिलैर्होमो ब्राह्मणानाञ्च पूजनम् । स्तुतिश्च वासुदेवस्य तथा तस्यैव पूजनम् । नागेन्द्रमोक्षश्रवणं ज्ञेयं दुःस्वप्ननाशनम् । स्वप्नास्तु प्रथमे यामे संवत्सरविपाकिनः । षड्भिर्मासैर्द्वितीये तु त्रिभिर्मासैस्तृतीयके । चतुर्थे मासमात्रेण पश्यतो नात्र संशयः । अरुणोदयवेलायां दशाहेन फलं भवेत् । एकस्यां यदि वा रात्रौ शुभं वा यदि वा शुभम् । पश्चाद् दृष्टस्तु यस्तत्र तस्य पाकं विनिर्दिशेत् । तस्माच्छोभनके स्वप्ने पश्चात् स्वप्नं न पश्यति । शैलप्रासादनागाश्ववृषभारोहणं हितम् । द्रुमाणां श्वेतपुष्पाणां गमने च तथा द्विज ! । द्रुमतृणोद्भवो नाभौ तथैव बहुबाहुता । तथैव बहुशीर्षत्वं फलितोद्भव एव च । सुशुक्लमाल्यधारित्वं सुशुक्लाम्बरधारिता । चन्द्रार्कताराग्रहणं परिमार्जनमेव च । शक्रध्वजालिङ्गनञ्च तदुच्छ्रायक्रिया तथा । भूम्यम्बुधीनां ग्रसनं शत्रूणाञ्च

वधक्रिया। जयो विवादे द्यूते च संग्रामे च तथा द्विज!। भक्षणञ्चाद्र्रमांसानां मत्स्यानां पायसस्य च। दर्शनं रुधिरस्यापि स्नानं वा रुधिरेण च। सुरारुधिरमद्यानां पानं क्षीरस्य चाथ वा। अन्त्रैर्वा वेष्टनं भूमौ निर्मलं गमनं तथा। सुखेन दोहनं शस्तं महिषीणां तथा गवाम्। सिंहीनां हस्तिनीनाञ्च वड़वानां तथैव च। प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा शुभः। अम्भसा त्वभिषेकस्तु गवां शृङ्गाश्रितेन वा। चन्द्राद् भ्रष्टेन वा राजन्! ज्ञेयो राज्यप्रदो हि सः। राज्याभिषेकश्च तथाच्छेदनं शिरसस्तथा। मरणं वह्निदाहश्च वह्निदाहो गृहादिषु। लब्धिश्च राज्यलिङ्गानां तन्त्रीवाद्याभिवादनम्। तथोदकानां तरणं तथा विषमलङ्घनम्। हस्तिनीवड़वानाञ्च गवाञ्च प्रसवो गृहे। आरोहणमथाश्वानां रोदनञ्च तथाशुभम्। वरस्त्रीणां तथा लाभस्तथालिङ्गनमेव च। निगड़ैर्बन्धनं धन्यं तथा विष्ठानुलेपनम्। जीवतां भूमिपालानां सुहृदामपि दर्शनम्। दर्शनं देवतानाञ्च विमलानां तथाम्भसाम्। शुभान्यथैतानि नरस्तु दृष्ट्वा प्राप्नोत्ययत्नाद् ध्रुवमर्थलाभम्। स्वप्नानि वै धर्मभृतां वरिष्ठ! व्याधेर्विमोक्षञ्च तथातुरोऽपि” आग्ने॰ न॰।

स्वप्नकृत् न॰ स्वप्नं निद्रां करोति कृ-क्विप्। (सुषनि) शाके शब्दच॰।

स्वप्नज् त्रि॰ स्वप-नजिङ्। शयनशीले अमरः।

स्वभाव पु॰ स्वस्य भावः। १निसर्गे अजन्ये स्वतःसिद्धे भावे च अमरः। “वहिर्हेत्वनपेक्षी तु स्वभावोऽथ प्रकीर्त्तितः। निसर्गश्च स्वभावश्च इत्येष भवति द्विधा। निसर्गः सुदृढ़ाभ्यासजन्यः संस्कार उच्यते। अजन्यस्तु स्वतः सिद्धः स्वरूपो भाव उच्यते” उज्ज्वलद॰।

स्वभावोक्ति स्त्री स्वभावस्योक्तिरत्र। १अर्थालङ्कारभेदे अलङ्कारशब्दे ४०८ पृ॰ दृश्यम् ६त॰। २स्वभावस्य कथने।

स्वभू पु॰ स्वेनैव भवति भू-क्विप्। १ब्रह्मणि मेदि॰ २विष्णौ अमरः। ३शिवे ४ईश्वरे ५कामे च।

स्वयंवर पु॰ स्वयमात्मना वरो वरणम्। कन्ययात्मनैव स्वपतेर्वरणे “सदसि स्वयंवरः” नैष॰। स्वयं वृणुते पतिम्। वृ-अच्। आत्मनैव पतिवरणकर्त्र्यां १कन्यकायां स्त्री।

स्वयंहारिका स्त्री ब्रह्मणो मानसकन्यापुत्रस्य दुःसहस्य निर्माष्ट्या भार्यायास्तत्पन्ने कन्याभेदे मार्कण्डेयपु॰। तत्र कन्याश्चाष्टौ नियोजिकाद्याः तासां कर्माणि तत्रोक्तानि तत्र “एतासां कर्म वक्ष्यामि तथान्यगृहजनपद यत्”इत्युपक्रमे “धान्यं खलात् गृहात् गोष्ठात् पयःसर्पिस्तथा परा। सन्दं वृद्धिवद्द्रव्यमपहन्ति च कन्यका। सा स्वयंहारिकेत्युक्ता सदान्तर्धानतत्परा” इति तस्याः कर्मोक्तम्।

स्वयङ्कृत पु॰ स्वयमात्मना कृतः। १कृत्रिमे पुत्रे “माता पितृविहीनस्तु कृत्रिमः स्यात् स्वयंकृता”स्मृतिः। २आत्मकृते त्रि॰। “पूर्वजुष्टः स्वयंकृतः” (पुरोहितः) स्मृतिः।

स्वयङ्गुप्ता स्त्री स्वयमात्मनैव गुप्ता। शूकशिम्ब्याम् शब्दच॰।

स्वयन्दत्त पु॰ स्वयमात्मनैव न तु पितृमातृभ्यां दत्तः उपनतः दत्तात्मके पुत्रभेदे “दत्तात्मा तु स्वयन्दत्तः” याज्ञ॰। “दत्तात्मा तु पुत्रो मातापितृविहीनस्ताभ्यां विसृष्टो वा तवाहं पुत्रो भवामीति स्वयंदत्त उपनतः” मिता॰।

स्वयम् अव्य॰ सु+अय-अमु। आत्मनेत्यर्थे अमरः।

स्वयम्भु पु॰ स्वयम्+भू-डु। ब्रह्मणि द्विरूप॰। [राजनि॰।

स्वयम्भुवा पु॰ स्वःमात्मति भू-मूलवि॰ क। धूम्रपत्त्रायाम्

स्वयम्भू पु॰ स्वयं भवति भू-क्विप्। १चतुर्मुखे ब्रह्मणि अमरः। २बुद्धे च। ३काले शब्दर॰ ४कामदेवे ५विष्णौ ६शिवे च। ७मापपर्ण्यां अर्जिङ्गन्याम् राजनि॰। ८जिनभेदे हेमच॰। १०परमेश्वरे “ततः स्वयम्भूर्भगवान्” मनुः। [अमस्वरत-त।

स्वर आक्षेपे अद॰ चुरा॰ उभ॰ सक॰ सेट्। स्वरयति-ते

स्वर् अव्य॰ स्वृ-विच्। १स्वर्गे अमरः “यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम्” इत्युक्ते दुःखासंभिन्ने २सुखसन्ताने ३परलोके ४आकाशे ५शोभने च शब्दच॰। दुःखासंभिन्नत्वं च स्वावच्छेदकशरीरासमवच्छिन्नत्वं तेन दुःखासमानकालीने सुखे नातिव्याप्तिः।

स्वर पु॰ स्वर-अच् स्वृ-अप् वा। १उदात्तानुदात्तस्वरितरूपे वर्णोच्चारणयत्नभेदे तादृशस्वरवत्त्वाच्च २व्यञ्जनभिन्नवर्णेषु अकारादिषु शिक्षा। तन्त्रोक्ते ३प्राणादिवायोर्व्यापारभेदे ३काकादिकृते वर्णोच्चारणध्वनिविशेषे ४निषादादिषु तन्त्रीकण्ठोत्थेषु गानजध्वनिषु च अमरः। “उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः” शिक्षा॰ अकारादीनां स्वयंराजमानत्वात् स्वरवत्त्वाच्च स्वरपदाभिधेयता, “अचः स्वयं विराजन्ते हलस्तु परगामिनः” इत्युक्तेः “उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः। ह्रस्वो दीर्घः प्लुतश्चेति कालतो नियमा अचि” शिक्षोक्तेश्च। निषादादिस्वराणां प्राणिभेदस्वरतुल्यता नारदेनोक्ता यथा “षड्जं रौति मयूरो हि हंसो नर्दति चार्षभम्। अजा

विरौति गान्धारं क्रौञ्चो नदति मध्यमम्। पुष्पसाधारणे काले कोकिलो रौति पञ्चमम्। अश्वश्च धैवतं रौति निषादं रौति कुञ्जरः” इति। “अश्वस्तु धैवतं सोऽपि मत्तः पञ्चमसंज्ञकम्। निषादन्तु गजो गर्जत्युन्मदोऽसौ वृषध्वमम्” इति। भरतोऽप्याह “षड्जञ्च पञ्चमञ्चेति मयूरो नदति द्विधा। अश्वाद्या धैवतादींश्च प्राहुर्मत्ताश्च पञ्चमम्” इति। निषादादिशब्दनिरुक्तिश्च “निषीदन्ति स्वरा अस्मिन्निषादस्तेन हेतुना। अशेषसन्धिविषयं स हि व्याप्यावतिष्ठते”। “वायुः समुद्गतो नाभेः कण्ठशीर्षसमुद्गतः। नदत्यृषभवद् यस्मात्तेनैष ऋषभः स्मृतः” “वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः। नानागन्धवहः पुण्यो गान्धारस्तेन हेतुना। “नासां कण्ठमुरस्तालुजिह्वां दन्तांश्च संश्रितः। षड्भ्यः सं-जायते यस्मात्तस्मात् षड्ज इति स्मृतः”। “तद्वदेवोत्थितो वायुरुरःकण्ठसमाहतः। नाभिप्राप्तो महानादो मध्यमस्तेन स स्मृतः”। “अभिसन्धयते यस्मात् स्वरांस्तेनेष धैवतः। स तु तावत् प्रधानत्वात् ललाटे व्यवतिष्ठते”। “वायुः समुद्गतो नाभेरुरोहृत्-कण्ठमूर्द्धसु। विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उ-च्यते”। “स स्वरो यः श्रुतिस्थाने स्वरन् हृद्वरञ्जकः। षड्ज ऋषभगान्धारा मध्यमः पञ्चमस्तथा। धैवतश्च निषादश्च स्वराः सप्त प्रकीर्त्तिताः” भरतः।

वाद्यादिस्वराश्च चक्रशब्दे २८११ पृ० दृश्याः।

स्वरघ्न पु० स्वरं हन्ति हन-क। गलरोगभेदे “अथातो गलरोगोपक्रमे” “यस्ताम्यमानः श्वसिति प्रसक्तं भिन्नस्वरः शुष्क-विमुक्तकण्ठः। कफोपदुष्टेष्वनिलायनेषु ज्ञेयः सरोगः श्वसनात् स्वरघ्नः”। ताम्यमानः तमः पश्यन् शुष्को विमु-क्तोऽस्वाधीनकण्ठो यस्य सः अस्वाधीनता भक्तं गिलितुम-शक्यत्वात् अनिलायनेषु वातवर्त्मसु श्वसनाद्वातात्” भावप्र०

स्वरचक्र न० स्वरोदयोक्ते चक्रभेदे चक्रशब्दे २८१०पृ० दृश्यम्।

स्वरपत्तन न० स्वराणां निषादादीनां गानध्वनिविशेषाणां पत्तनमाश्रयः। सामवेदे त्रिका०।

स्वरभङ्ग पु० स्वरस्य कण्ठध्वनिभेदस्य भङ्गो यस्मात्। रोग-भेदे स्वरभेदोऽप्यत्र तल्लक्षणादि सुश्रु० उक्तं यथा “अथातः स्वरभेदप्रतिषेधमध्यायं व्याख्यास्यामः। अत्यु-च्चभाषणविषाध्ययनाभिघातशीतादिभिः प्रकुपिताः पव-नादयस्तु। ते शब्दवाहिधमनीषु गताः प्रतिष्ठां हन्युः स्वरं भवति चापि हि षड्विधः सः। वातेन कृष्णनय-नाननमूत्रवर्चा भिन्नं शनैर्वदति गर्दभवत्स्वरश्च। पित्तेन पीतवदनाक्षिपुरीषमूत्रो ब्रूयाद्गलेन च विदाहसमन्वि-तेन। श्लेष्मात्मकेन सततं कफरुद्धकण्ठो मन्दं शनैर्वदति वापि दिवा विशेषात्। सर्वात्मके भवति सर्वविकारसम्पद-व्यक्तता च वचसस्तमसाध्यमाहुः। धूप्येत वाक्क्षयकृते क्षयमाप्नुयाच्च वागेष चापि हतवाक् परिवर्जनीयः। अन्तर्गतस्वरमनुच्चपद चिरेण मेदोऽन्वयाद्वदति दिग्धग-लोष्ठतालुः। क्षीणस्य वृद्धस्य कृशस्य चापि चिरोत्थितो यश्च सहोपजातः। मेदस्विनः सर्वसमुद्भवश्च स्वरामयो यो न स सिद्धिमेति। स्निग्धात् स्वरातुरनरानपकृष्टदोषान् संयोजयेद्वमनरेचनवस्तिभिश्च। नस्यावपीडमुखधावन-धूमलेहैः सम्पादयेच्च विविधैः कवलग्रहैश्च”।

स्वरमण्डलिका स्वराणां मण्डलमस्त्यस्य ठन्। वीणायाम् हेम०। २स्वरसमूहे।

स्वरलासिका स्त्री स्वरैः निषादादिभिः लसति नृत्यतीव लस-ण्वुल्। १वीणायां २वंशयन्त्रे च शब्दर०।

स्वरस पु० स्वेन स्वभावेन रसः आस्वाद्यः। १शिलापिष्टकल्कभेदे शब्दर० २काथभेदे च। “सद्यः कुमादार्द्रद्रव्याहृत्त-यन्त्रादिपीडनात्। यो रसस्त्वभिनिर्याति स्वरसः सः प्रकीर्त्तितः” वैद्यक०। स्वस्य रसः रागः। ३स्वाभि-प्राये ४स्वतात्पर्ये ४वाक्यादौ रचनाभङ्गीभेदे च।

स्वरसन्धि पु० स्वरनिमित्तकः सन्धिः। व्याकरणोक्ते स्वर-निमित्तके दीर्घादौ कार्य्ये। [शब्दे २५६४ पृ० दृश्यम्।

स्वरसामन् पु० गवामयनयज्ञीयषष्ठमासीयदिनभेदे गवामयन-

स्वरा स्त्री ब्रह्मणः प्रथमपत्न्यां पद्मपु०।

स्वरापगा स्त्री स्वः स्वर्गस्थापगा। गङ्गायाम् हेमच०। स्वर्गा-पगादयोऽप्यत्र।

स्वरालु पु० स्वराय अलति पर्य्याप्नोति अल-उण्। वचायां शब्दच० तत्सेवने हि स्वरस्योत्तेजनात्तस्यास्तथात्वम्।

स्वराज् पु० स्वेनैव राजते राज-क्विप्। ईश्वरे “अर्थेष्वभिज्ञः स्वराडिति” भागवतम् १।१।१।

स्वरित पु० स्वरो जातोऽस्य इतच्। १जातस्वरे २उदात्ता-नुदात्तसमाहाररूपे स्वरभेदे पा० “उच्चैरुदात्तः” “नीचैरनुदात्तः”। “समाहारः स्वरितः” पा० “उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्” सि० कौ०। “तस्यादित उदात्तम-र्द्धह्रस्वम्” पा० “ह्रस्वग्रहणमतन्त्रम् स्वरितस्यादितो-ऽर्द्धमुदात्तम्बोध्यम् उत्तरार्द्धन्तु परिशेषादनुदात्तम्। तस्य

चोदात्तस्वरितपरत्वे श्रवणं स्पष्टम्" सि॰कौ॰। स्वरिताः शब्दाश्च पाणिनिना फिट्सूत्रेण च अनुशिष्टा यथा। "तित् स्वरितम्" पा॰ तकारेत् प्रत्ययः स्वरितः स्यात्। "बिल्वतिष्ययोः स्वरितो वा" फिट्सू॰ १पादः। "अनयोरन्तः स्वरितो वा पक्षे उदात्तः" सि॰ कौ॰। "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य" पा॰ "उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यात्। अभ्यभि हि। स्वरितस्य यणः। खलप्व्याशा। अत्र स्वरितस्य त्रैपादिकत्वेनासिद्धत्वाच्छेषनिघातो न" सि॰कौ॰ "स्वरितो वाऽनुदात्ते पदादौ" पा॰ "अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा स्यात्। पक्षे पूर्वसूत्रेणोदात्तः। वीदं ज्योतिर्हृदये। अस्य श्लोको दिवीयते। व्यवस्थितविभाषात्वादिकारयोः स्वरितः दीर्घप्रवेशे तूदात्तः। किञ्च एङः पदान्तादिति पूर्वरूपे स्वरित एव। तेऽवदन्। सोऽयमागात्। उक्तञ्च प्रातिशाख्ये "इकारयोश्च प्रश्लेषे क्षैप्राभिनिहतेषु चेति" सि॰कौ॰। "उदात्तादनुदात्तस्य स्वरितः" पा॰ "उदात्तात् परस्यानुदात्तस्य स्वरितः स्यात्। अग्निमीळे। अस्याप्यसिद्धत्वाच्छेषनिघातो न। "तमीशानासः" सि॰कौ॰। "नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्" पा॰ उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात्। गार्ग्यादिमते तु स्यादेव। प्र य आरुः। क वोऽश्वाः २। का ३ शीभ्यः" सि॰कौ॰। "न्यङ्स्वरौ स्वरितौ" फि॰ "एतौ स्वरितौ"। न्यङ्ङुत्तानः। व्यचक्षयत् स्वः" सि॰कौ॰। "न्यर्बुदव्यल्कशयोरादिः" फि॰। स्वरितः स्यात्। "तिल्यशिक्यकाश्मर्यधान्यकन्याराजन्यामनुष्याणामन्तः" फि॰। स्वरितः स्यात्। "तिलानां भवनं क्षेत्रं तिल्यम्। यतोऽनाव इति प्राप्ते" सि॰कौ॰। "बिल्वभक्ष्यवीर्याणि छन्दसि" फि॰४र्थपादः। "अन्तस्वरितानि" सि॰कौ॰। "स्वरितेनाधिकारः" पा॰ "स्वरितत्वयुक्तशब्दस्वरूपमधिकृतं बोध्यम्" सि॰कौ॰ "स्वरितेनेति इत्थंभावे तृतीया स्वरितत्वज्ञाप्योऽधिकार इत्यर्थः स्वरितत्वञ्च दोषविशेषजन्यमज्झल्साधारणाम्श्रयम् प्रतिक्रियमाणपदघटकाज्झाश्रितं वा बोध्यम्। तच्चानुनासिकत्ववत् प्रतिज्ञयैव निर्णीयते अधिकारश्च कियद्दूरमित्यत्राऽनति बाधके व्याख्यानमेव शरणम्" शब्देन्दु॰। "स्वरितञितः आत्मनेपदं कर्त्रभिप्राये क्रियाफले" पा॰ स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्त्रभिप्राये क्रियाफले" सि॰ कौ॰। स्वर–क्त। ४स्वरयुक्ते त्रि॰।

स्वरु पु॰ स्वृ-उ। १वज्रे अमरः २यूपखण्डे ३वाणे ४यज्ञे मेदि॰। ५सूर्यकिरणे ६वृश्चिकभेदे च उणा॰।

स्वरुचि त्रि॰ स्वस्यैव रुचिः प्रवर्त्तिका स्वकार्ये यस्य। १स्वतन्त्रे हेमच॰ ६त॰। २स्वस्याभिलाषे स्त्री।

स्वरूप न॰ स्वस्य रूपम्। १स्वभावे अमरः। स्वमेव रूपम्। २स्वात्मके पदार्थे। स्वं यथ स्वं रूपयति रूप-अण्। ३यथास्वरूपाभिज्ञे पण्डिते पु॰ अमरः। स्वेन स्वभावेनैव रूपमस्य। ४मनोज्ञे त्रि॰ अमरः।

स्वरूपसंबन्ध पु॰ स्वरूपं सम्बन्धः स्वरूपयोर्वा सम्बन्धः। न्यायोक्ते स्वात्मके सम्बन्धे षट्पदार्थातिरिक्ते पदार्थभेदे यथा प्रतियोगित्वम् विषयत्वमित्यादि।

स्वरोदय पु॰ स्वरेणोदयो शुभादिज्ञापकतया यत्र। स्वरस्य श्वासविशेषस्य शुभाशुभत्वज्ञानसाधने तन्त्रशास्त्रभेदे शब्दार्थे २८१० पृ॰दृश्यम्।

स्वर्ग पु॰ स्वरिति गीयते गै-क सु+ऋज-घञ् वा। १दुःखासम्भिन्ने सुखे २देवानामावासस्थाने च अमरः। स्वर्गकारणस्वरूपादिकं भा॰ व॰ २६॰ अ॰ उक्तं यथा "उपरिष्टाच्च स्वर्लोको योऽयं स्वरिति संज्ञितः। ऊर्द्ध्वगः सत्पथः शश्वद्देवयानचरो मुने!। नातप्ततपसः पुंसो नामहायज्ञयाजिनः। नानृता नास्तिकाश्चैव तत्र गच्छन्ति मुद्गल!। धर्मात्मानो जितात्मानः शान्ता दान्ता विमत्सराः। दानधर्मरताः लोका शूराश्चाहवलक्षणाः। तत्र गच्छन्ति धर्माग्र्यं कृत्वा शमदमात्मकम्। लोकान् पुण्यकृतान् ब्रह्मन्! सद्भिराचरितान्नृभिः। देवाः साध्यास्तथा विश्वे तथैव च महर्षयः। यामा धामाश्च मौद्गल्य! गन्धर्वाप्सरसस्तथा। एषां देवनिकायानां पृथक् पृथगनेकशः। भास्वन्तः कामसम्पन्ना लोकास्तेजोमयाः शुभाः। त्रयस्त्रिंशत्सहस्राणि योजनानि हिरण्मयः। मेरुः पर्वतराड् यत्र दिव्योद्यानानि मुद्गल!। नन्दनादीनि पुण्यानि विहाराः पुण्यकर्मणाम्। न क्षुत्पिपासे न ग्लानिर्न शीतोष्णे भयं तथा। बीभत्समशुभं वाऽपि तत्र किञ्चिन्न विद्यते। मनोज्ञाः सर्वतो गन्धाः सुखस्पर्शाश्च सर्वशः। शब्दाः श्रुतिमनोग्राह्याः सर्वतस्तत्र वै मुने!। न शोको न जरा तत्र नायासपरिदेवने। ईदृशः स मुने! लोकः स्वकर्मफलहेतुकः। सुकृतैस्तत्र पुरुषाः सम्भवन्त्यात्मकर्मभिः। तैजसानि शरीराणि भवन्त्यत्रोपपद्यताम्। कर्मजान्येव मौद्गल्य! न मातृपितृजान्युत। न संस्वेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव

च। तेषां न च रजो वस्त्रं बाधते तत्र वै मुने!। न म्लायन्ति स्रजस्तेषां दिव्यगन्धा मनोरमाः। संयुज्यन्ते विमानैश्च ब्रह्मन्नेवंविधैश्च ते। ईर्ष्याशोकक्लमापेता मोहमात्सर्य्यवर्जिताः। सुखं स्वर्गजितस्तत्र वर्त्तयन्ते महामुने!। तेषां तथाविधानान्तु लोकानां मुनिपुङ्गव!। उपर्य्युपरि लोकस्य लोका दिव्या गुणान्विताः। पुरस्ताद् ब्रह्मणास्तत्र लोकास्तेजोमयाः शुभाः। यत्र यान्त्यृषयो ब्रह्मन्! पूताः स्वैः कर्मभिः शुभैः। ऋभवो नाम तत्रान्ये देवानामपि देवताः। तेषां लोकाः परतरे यान् यजन्तीह देवताः। स्वयम्प्रभास्ते भास्वन्तो लोकाः कामदुघाः परे। न तेषां स्त्रीकृतस्तापो न लोकैश्वर्य्यमत्सरः। न वर्त्तयन्त्याहुतिभिस्ते नाप्यमृतभोजनाः। तथा दिव्यशरीरास्ते न च विग्रहमूर्त्तयः। न सुखे सुखकामास्ते देवदेवाः सनातनाः। न कल्पपरिवर्त्तेषु परिवर्त्तन्ति ते तथा। जरा मृत्युः कुतस्तेषां हर्षः प्रीतिसुखं न च। न दुःखं न सुखञ्चापि रागद्वेषौ कुतो मुने!। देवानामपि मौद्गल्य! काङ्क्षिता सा गतिः परा। दुष्प्रापा परमा सिद्धिरगम्या कामगोचरैः। त्रयस्त्रिंशदिमे देवा येषां लोका मनीषिभिः। गम्यन्ते नियमैः श्रेष्ठैर्दानैर्वा विधिपूर्वकैः। सेयं दानकृता व्युष्टिरनुप्राप्ता सुखं त्वया। तां भुङ्क्ष्व सुकृतैर्लब्धां तपसा द्योतितप्रभः। एतत् स्वर्गसुखं विप्र! लोका नानाविधास्तथा। गुणाः स्वर्गस्य प्रोक्तास्ते दोषानपि निबोध मे। कृतस्य कर्मणस्तत्र भुज्यते यत् फलं दिवि। न चान्यत् क्रियते कर्म मूलच्छेदेन भुज्यते। सोऽत्र दोषो मम मतस्तस्यान्ते पतनञ्च यत्। सुखव्याप्तमनस्कानां पतनं यच्च मुद्गल!। असन्तोषः परीतापो दृष्ट्वा दीप्ततराः श्रियः। यद्भवत्यवरे स्थाने स्थितानां तत् सुदुष्करम्। संज्ञा मोहश्च पतताम् रजसा च प्रधर्षणम्। प्रम्लानेषु च माल्येषु ततः पिपतिषोर्भयम्। आब्रह्मभवनादेते दोषा मौद्गल्य! दारुणाः। नाकलोके सुकृतिनां गुणास्त्वयुतशो नृणाम्। अयं त्वन्यो गुणः श्रेष्ठश्च्युतानां स्वर्गतो मुने!। शुभानुशययोगेन मनुष्येषूपजायते। तत्रापि स महाभागः सुखभागभिजायते। न चेत् सम्बुध्यते तत्र गच्छत्यधमतां ततः। इह यत् क्रियते कर्म तत् परत्रोपभुज्यते। कर्मभूमिरियं ब्रह्मन्! फलभूमिरसौ मता”। स च लोको भूरादिषु ऊर्द्ध्वस्तृतीयः।

स्वर्गङ्गा स्त्री ६त०। मन्दाकिन्यां गङ्गाशब्दे दृश्यम्।

स्वर्गनाथ पु० ६त०। इन्द्रे स्वर्गपत्यादयोऽप्यत्र हेमच०।

स्वर्गवधू स्त्री ६त०। अप्सरःसु हेमच०।

स्वर्गाचल पु० स्वर्गलोकस्याऽचलः। सुमेरुपर्वते स्वर्गगिर्य्यादयोऽप्यत्र हेमच०।

स्वर्गिन् पु० स्वर्गोऽस्त्यस्य भोग्यत्वेन इनि। १देवे त्रि० २देवलोकगामिनि च त्रि० स्वर्गगामित्वसूचकगुणभेदा गरुडपु०उक्ता यथा “समाभूतेषु संवादः परलोकं प्रति क्रिया। सतां परहिताः योक्तिर्वेदप्रामाण्यदर्शनम्। गुरुदेवर्षिपूजा च वैरत्वं साधुसङ्गमः। सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः”।

स्वर्गौकस् पु० स्वर्गं ओको यस्य। देवे शब्दमा०।

स्वर्जिक पु० सु+अर्ज–घञ् ततः अस्त्यर्थे ठन्। सर्जिकाक्षारे राजनि० २यवक्षारे स्त्री भावप्र०।

“कथितः स्वर्जिकाभेदः विशेषज्ञैः सुवर्चिका। यवक्षारो लघुः स्निग्धः सुसूक्ष्मो वह्निदीपनः। निहन्ति शूलं वातामश्लेष्मश्वासगलामयान्। स्वर्जिकाल्पगुणा तस्मात् विशेषात् गुल्मशूलहृत्” भावप्र०। कर्म०स्वर्जिकाक्षारोऽपि तत्रार्थे राजनि० णिनि स्वर्जिन् तत्रार्थे राजनि०।

स्वर्ण न० सुष्ठु अर्णो वर्णो यस्य। १काञ्चने २धुस्तूरे अमरः ३नागकेशरे ४गौरवर्णशाके च राजनि०। सुवर्णशब्दे दृश्यम्। [राजनि०। ६त० २सुवर्णस्य लेशे पु०।

स्वर्णकण न० स्वर्णमिव पीतत्वात् कणोऽस्य। १कणगुग्गुलौ

स्वर्णकदली स्त्री स्वर्णमिव कदली (चाँपाकला)कदलीभेदे।

स्वर्णकाय पु० स्वर्णमिव पीतत्वात् कायोऽस्य। १गरुडे हेमच०। २स्वर्णवर्णदेहयुते त्रि०।

स्वर्णकार पु० स्वर्णं स्वर्णमयमलङ्कारादि करोति कृ-अण्। (सेकरा) जातिभेदे। “विश्वकर्मा तु शूद्रायां वीर्य्याधानं चकार सः। ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः। मालाकारः कर्मकारः शङ्खकारः कुविन्दकः। कुम्भकारः कंसकारः षडेते शिल्पिनां वराः। सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च। पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्कराः। स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम! बभूव सद्यः पतितो ब्रह्मशापेन कर्मणा” ब्रह्मवै० ब्र०ख० १०अ०। “तैलचौरस्तैलकीटो मूर्ध्नि कीटाश्रजन्मकम्। ततो भवेत् स्वर्णकारो जन्मैकं दुःखमानसः” ब्रह्मवै०जन्मख०८५अ०। तज्जातिवाचकम्।

स्वर्णकृत् पु० स्वर्णं तन्मयभूषादिकं करोति कृ-क्विप्। स्वर्णकारे शब्दमा०।

स्वर्णकेतकी स्त्री स्वर्णमिव पीतत्वात् केतकी। पीतकेतक्याम् राजनि०। तत्पुष्पादिगुणाः "केतकीकुसुमं वर्ण्यं केशदौर्गन्ध्यनाशनम्। हेमाभं मदनोन्मादवर्द्धनं सौख्यकारि च। तस्याः स्तनोऽतिशिशिरः कटुः पित्तकफापहः। रसायनकरो वर्ण्यो देहदार्ढ्यकरः परः" राजनि०।

स्वर्णक्षीरी स्त्री स्वर्णमिव पीतत्वात् क्षीरं निर्यासो यस्याः गौरा० ङीष्। ओषधिभेदे सा च हिमालये जायते। "हेमवर्णा रसस्तस्या हिमवद्भूमिसम्भवा। सा नागजिह्विकाकारा तन्मूलं वाणिजौषधम्। स्वर्णक्षीरी हिमा तिक्ता क्रिमिपित्तकफापहा। मूत्रकृच्छ्राश्मरी शोथदाहज्वरहरा परा" राजनि०।

स्वर्णगैरिक न० स्वर्णमिव पीतं गैरिकम्। (वर्णकमाटि) पदार्थभेदे राजनि०।

स्वर्णग्रीवा स्त्री नदीभेदे। "या निःसृता पूर्वभागात् तस्मात् गिरिवरात् (नाटकशैलात्) नदी। स्वर्णग्रीवेति विख्याता सा गङ्गासदृशीफले" कालिकापु० ८२ अ०।

स्वर्णचूड़ पुंस्त्री० स्वर्णमिव पीतत्वात् चूड़ा यस्य। चाषपक्षिणि जटा० स्त्रियां ङीष्। [जातमाले त्रि०।

स्वर्णज न० स्वर्णात् जायते जन-ड। १वङ्गे हेमच० २स्वर्ण-

स्वर्णजीवन्ती स्त्री० स्वर्णमिव पीतत्वात् जीवन्ती। पीतपुष्पजीवन्त्याम् राजनि०।

स्वर्णदी स्त्री स्वर्णं द्यति अपसारयति तुल्यवर्णत्वात् दो-क गौरा०ङीष्। १वृश्चिकाल्याम् राजनि०। ६त०। नलम्। २गङ्गायाम् अमरः। [२चित्रकटक्षे च त्रिका०।

स्वर्णदीधिति पु० स्वर्णमिव भास्वरा दीधितिरस्य। १अग्नौ,

स्वर्णद्रु पु० स्वर्णमिव पुष्पे पीतो द्रुः। आरग्वधे राजनि०।

स्वर्णपक्ष पु० स्वर्णमिव पीतः पक्षोऽस्य। गरुड़े त्रिका०।

स्वर्णपाटक पु० स्वर्णं पाटयति पट-णिच्-ण्वुल्। टङ्कणे (सोहागा) शब्दर०।

स्वर्णपुष्प पु० स्वर्णमिव पीतं पुष्पमस्य। १चम्पके २आरग्वधे पुंस्त्री० राजनि० स्त्रीत्वे ङीप। सा च ३स्वर्णकेतक्याम् राजनि०। ४सातलायाम् ५कलिकार्यां स्त्री राजनि० टाप्। [सुवर्णकदल्याम् राजनि०।

स्वर्णफला स्त्री स्वर्णमिव पीतं फलमस्याः। (चांपाकला)

स्वर्णवणिज् पु० ६त०। सुवर्णवणिजि जातिभेदे।

स्वर्णभृङ्गार पु० स्वर्णमिव स्वर्णमयो वा भृङ्गारः। १पीतभृङ्गराजे राजनि०। २स्वर्णमयकलसभेदे च।

स्वर्णमाक्षिक न० स्वर्णमिव पीतं माक्षिकम्। स्वनामख्याते उपधातुभेदे "किञ्चित् सुवर्णसाहित्यात् स्वर्णमाक्षिकमीरितम्। उपधातुः सुवर्णस्य किञ्चित्स्वर्णगुणान्वितम्। तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम्। किन्तु तस्यानुकल्पत्वात् किञ्चिद्धीनगुणास्ततः। न केवलं स्वर्णगुणा वर्त्तन्ते स्वर्णमाक्षिके। द्रव्यान्तरस्य संसर्गात् सन्त्यन्येऽपि गुणास्ततः। सुवर्णमाक्षिकं स्वादु तिक्तं वृष्यं रसायनम्। चक्षुष्यं वस्तिरुक्कण्ठपाण्डुमेहविषोदरम्। अर्शःशोथं विषं कण्डुं त्रिदोषमपि नाशयेत्"। अशुद्धस्वर्णमाक्षिकस्य दोषमाह "मन्दानलत्वं बलहानिमुग्रां विष्टम्भितां नेत्रगदान् सकुष्ठान्। मालां तथैव व्रणपूर्विकाञ्च कुर्य्यादशुद्धं खलु माक्षिकञ्च"। तद्दोषशान्त्यर्थं शोधनमाह "माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च। मातुलुङ्गद्रवैर्वाथ जम्बीरस्य द्रवैः पचेत्। चालयेल्लोहजे पात्रे यावत् पात्रं सुलोहितम्। भवेत्ततस्तु संशुद्धं स्वर्णमाक्षिकमीरितम्"। तन्मारणं यथा "कुलत्थस्य कषायेण ष्टद्वा तैलेन वा पुटेत्। तक्रेणैवाजमूत्रेण म्रियते स्वर्णमाक्षिकम्" भावप्र०।

स्वर्णयूथी स्त्री स्वर्णमिव पीता यूथी। पीतयूथिकायाम् शब्दच०

स्वर्णलता स्त्री स्वर्णमिव पीता लता। ज्योतिष्मत्यां राजनि०

स्वर्णवर्णा स्त्री स्वर्णमिव वर्णोऽवयवस्याः। १हरिद्रायाम् राजनि०। २सुवर्णवर्णे त्रि० ३हेमसूत्रतापके वर्णे च।

स्वर्णवल्कल पु० स्वर्णमिव पीतं वल्कलमस्य। श्योनाकवृक्षे शब्दच०।

स्वर्णवल्ली स्त्री स्वर्णमिव पीता वल्ली। लताभेदे "स्वर्णवल्ली रक्तफला काकायुः काकवल्ल्यपि। शिरःपीड़ा त्रिदोषघ्नी दुग्धदात्री तु सा मता" राजनि०।

स्वर्णशेफालिका स्त्री स्वर्णमिव पीता शेफालिका। १पीतशेफालिकायाम्। २आरग्वधे राजनि०।

स्वर्णाङ्ग पु० स्वर्णमिवाङ्गं पुष्पं यस्य। १आरग्वधे राजनि० २पीतवर्णदेहयुते त्रि० स्त्रियां ङीष्।

स्वर्णारि पु० ६त०। गन्धके तस्य स्वर्णमारकत्वात्तथात्वम्।

स्वर्णुली स्त्री स्वर्णं तद्वर्णं लीयते पुष्पेऽत्र ली-आधारे क्विप् पृषो०। स्वर्णुली हेमपुष्पी च स्वर्णपुष्पाध्वजा तथा। सा कषाया कटुः शीता व्रणहा परिकीर्त्तिता" राजनि० उक्ते लताभेदे। [यति ते अस्वर्त्तत् त।

स्वर्त्त गतौ सक० दुःखेन जीवने अक० चु० उ० सेट्। स्वर्त्त-

स्वर्द प्रीतौ अक० प्रीणने लेहने च सक० भ्वा० आत्म० सेट्।

स्वर्हते अर्थ्यार्हे च । [गोमेदमणौ राजनि० ।

स्वर्भानव पु० स्वर्भानो राहोः प्रियः अण् नि० नादिवृद्धिः ।

स्वर्भानु पु० स्वः स्वर्गे भानुर्दीप्तिरस्य । राहौ अमरः । तस्य भूमिच्छायारूपतया भूमिस्थैर्भानुमत्त्वेनादर्शनात् दिवि दीप्तिमत्त्वात्तथात्वम् । [कोके शब्दच० ।

स्वर्लोक पु० स्वरेव लोकः भुवनम् । १स्वर्गे हेम० । २स्वर्गस्थे

स्वर्वापी स्त्री स्व० स्वर्गस्य वापीव । १गङ्गायाम् हेमच० ।

स्वर्वेश्या स्त्री स्वः स्वर्गस्य वेश्या । मेनकाद्यप्सरस्सु अमरः ।

स्वर्वैद्य पु० द्विव० । स्वः स्वर्गस्य वैद्यौ । अश्विनीकुमारयोः अमरः । आयुर्वेदशब्दे ७७९पृ० दृश्यम् ।

स्वर्लीन पु० दानवभेदे वह्निपु० ।

स्वल्प त्रि० सुष्ठु अल्पम् प्रा० स० । अत्यल्पे क्षुद्रे ।

स्वल्पकेशरिन् पु० स्वल्पः केशरो नित्यमस्त्यस्य इनि । कोविदारवृक्षे राजनि० ।

स्वल्पकेशिन् त्रि० स्वल्पः केशो नित्यमस्त्यस्य । १अत्यल्पकेशयुते स्त्रियां ङीप् ।२पिशाचभेदे पु० शब्दच० । [रत्नमा०

स्वल्पपत्रक पु० स्वल्पं पत्रमस्य कप् । गौरशाके मधूकभेदे

स्वल्पफला स्त्री स्वल्पं फलं यस्याः । हपुषाभेदे राजनि० ।

स्ववासिनी स्त्री स्वस्मिन् पित्रालये वसति वस–णिनि ङीप् । चिरं पितृगृहवासिन्यामूढायामनूढायां वा स्त्रियाम् । सुवासिनीत्यस्य स्थाने अमरे पाठान्तरम् ।

स्ववीज पु० स्वमेव वीजं यस्य । १आत्मनि शब्दर० । २पुत्रे ३कन्यायां स्त्री हेम० । ४निजकारणे न० ५स्वस्य वीर्य्ये च न० ।

स्वसृ स्त्री सु+अस–ऋन् । भगिन्याम् अमरः ।

स्वस्क गतौ भ्वा० आ० सक० सेट् । स्वस्कते अस्वस्किष्ट ।

स्वस्ति अव्य० सु–अस–क्तिच्, अस्तीति विभक्तिप्रतिरूपकम् अव्ययं प्रादि०वा । १क्षेमे २आशिषि ३पुण्यादौ अमरः ४अङ्गीकारसूचने च । एतद्योगे क्षेमादिसम्बन्धार्थे चतुर्थी ।

स्वस्तिक पुन० । स्वस्ति शुभाय हितम् ठन् । "स्वस्तिकं प्राङ्मुखं यत् स्याद्वलिन्द्रानुगतं भवेत् । तत्पार्श्वानुगतौ चान्यौ तत्पर्य्यन्तगतोऽपरः" इत्युक्तलक्षणे गृहभेदे वास्तुः । २सितावरशाके पु० राजनि० ३आसनभेदे तल्लक्षणम् आसनशब्दे ८८६ पृ० दृश्यम् । ४तण्डुलचूर्णनिर्म्मिते त्रिकोणाकारे द्रव्यभेदे च "घृतं स्वस्तिकसिन्दूरम्" इत्यधिवासनद्रव्यज्ञापकवाक्यम् ५चतुष्पथे पु० मेदि० । ६जिनध्वजभेदे हेमच० । ७रततालिके विटः

स्वस्तिमुख पु० स्वस्ति सुखे मुखे आदौ वा यस्य । १लेख्ये पत्रादौ २विप्रे पु० ३स्वस्तिवादिनि त्रि० मेदि० ।

स्वस्तिवाचन न० स्वस्ति शुभस्य विप्रद्वारा वाचनम् । कर्म्मारम्भे विघ्नोपशान्तये ब्राह्मणद्वारा कर्त्तव्यकर्म्मणां शुभतावाचने । "संपूज्य गन्धपुष्पाद्यैर्ब्राह्मणान् स्वस्ति वाचयेत् । धर्म्ये कर्म्मणि माङ्गल्ये संग्रमेऽद्भुतदर्शने" व्यासः ।

स्वस्तिवाचनिक त्रि० स्वस्तिवाचनाय हितं तत आगतम् तत्र भवं वा ठञ् । १स्वस्तिवाचनसाधने २तदुक्तिवाक्ये ३तत्सम्बन्धिनि च ।

स्वस्त्ययन न० स्वस्ति शुभस्यायनं लाभो यस्मात् । शुभार्थं क्रियमाणे वेदादिविहिते ग्रहयागादौ ।

स्वस्थ त्रि० स्वः परलोके तिष्ठति स्वेन स्वभावेन सुखेन, वा तिष्ठति स्था–क वा विसर्गलोपः । स्वभावस्थे २स्वर्गस्थिते ३विनायासेन सुखेनावस्थिते च । "स्वस्था भवन्तु मयि जीवति धार्त्तराष्ट्राः" वेणीसं० ।

स्वस्रीय पु० स्वसुरपत्यम् छ । १भागिनेये अमरः २भागिनेय्यां स्त्री टाप् ।

स्वागत न० सुखेन आगतम् सु+आ+गम्–भावे क्त । १सुखेनागमने "स्वागतं स्वानधीकारान्" कुमारः तद्वति त्रि० । २कुशले ३कुशलप्रश्ने हारा० ।

स्वागतञ्च षोडशोपचारमध्ये द्वितीयोपचारः आसनं स्वागतं पाद्यमित्यादि । उपचारशब्दे दृश्यम् ।

स्वाङ्गिक पु० स्वाङ्गमर्हति ठक् । १मृदङ्गे २तद्वादके शब्दर० ।

स्वाच्छन्द्य न० स्वच्छन्दस्य भावः ष्यञ् । १स्वाधीनत्वे २स्वास्थ्ये च ।

स्वातन्त्र्य न० स्वतन्त्रस्य भावः ष्यञ् । १स्वाधीनत्वे २पराऽनधीनत्वे । व्या० उक्ते इतरव्यापारानधीनव्यापारवत्त्वरूपे कर्त्तृत्वे कर्तृशब्दे १७१६ पृ० दृश्यम् ।

स्वाति(ती) पुंस्त्री० स्वेनैव अतति अत–इन् स्त्रीत्वपक्षे वा ङीप् । १अश्विन्यादिषु पञ्चदशे नक्षत्रे अमरः "चित्रा-स्वातिः श्रवणा अक्लीवे" लि०त० उक्तेरुभयलिङ्गताऽस्य । २सूर्य्यपत्नीभेदे स्त्री त्रिका० ३खड्गे धरणिः ।

स्वातिनक्षत्राधिष्ठातृदेवयोगताराखरूपादिकम् नक्षत्रशब्दे ४९७ पृ० दृश्यम् ।

स्वातियोग पु० आषाढशुक्लपक्षे कस्यां तिथौ माघकृष्णपक्षप्रभृति तिथौ च स्वातिनक्षत्रस्थचन्द्रस्य शुभफलादिज्ञापके योगभेदे यथोक्तं वृ० सं० २५अ०

"यद्रोहिणीयोगफलं तदेव स्वातावषाढासहिते च चन्द्रे ।

च चन्द्रे । स्वातावुक्तो मिखिलं विचिन्त्य योऽस्मिन् विशे- षमहं प्रवक्ष्ये । स्वातौ निशांशे प्रथमेऽभिवृष्टे शस्यानि सर्वाण्युपयान्ति वृद्धिम् । भागे द्वितीये तिलमुद्गमाषा ग्रैष्मं तृतीयेऽस्ति न शारदानि । वृष्टेऽह्नि भागे प्रथमे सुवृष्टि- स्तद्द्वितीये तु सकीटसर्पा । वृष्टिस्तु मध्यापरभागवृष्टे निश्छिद्रवृष्टिर्द्युनिशं प्रवृष्टे । अभयुत्तरेण तारा चि त्रायाः कीर्त्यते ह्यपांवत्सः । तस्मात्तस्मिन् चन्द्रे स्वाते- र्योगः शिवो भवति । सप्तम्यां स्वातियोगे यदि पतति हिमं माघमासान्धकारे वायुर्वा चण्डवेगः सजलजल- धरो वापि गर्जत्यजस्रम् । विद्युन्मालाकुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं विज्ञेया प्रावृडेषा मुदित- जनपदा सर्वशस्यैरुपेता । तथैव फाल्गुने चैत्रे वैशा- खस्याषितेऽपि वा । स्वातियोगं विजानीयादाषाढे च विशेषतः" । [सेट् । स्वादते आस्वादित ।

स्वाद प्रीतौ भ्वा० प्रीणने लेहने च सक० भ्वा० आ०

स्वाद पु० स्वद-स्वाद-वा घञ् । १रसानुभवे २प्रीतौ ३प्रीणने ४लेहने च । ल्युट् । स्वादनमप्यत्र न० । रसानुभवप्रकारः सा० द० उक्तो यथा

"न जायते तदास्वादो विना रत्यादिवासनाम्" वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः । तत्र यदि आद्या न स्यात्तदा श्रोत्रियजरन्मीमांसकादीनामपि स स्यात् । यदि द्वितीया न स्यात् यद्रागिणामपि केषाञ्चिद्रससंबोधो न दृश्यते तन्न स्यात् । उक्तञ्च धर्म- दत्तेन "सवासनानां सभ्यानां रसस्यास्वादनं भवेत् । निर्वासनास्तु रङ्गान्तःकाष्ठकुड्याश्मसन्निभाः" ।

स्वादिष्ठ त्रि० अतिशयेन स्वादुः । इष्ठन् डित् । अतिमधुरे ईःसुन् । स्वादीयस् तदर्थे त्रि० स्त्रियां ङीप् ।

स्वादु पु० स्वद-उण् । १मधुररसे हेमच० २गुडे त्रिका० ३जीवकौषधौ जटा० । ४इष्टे ५मधुरे ६मनोज्ञे च त्रि० मेदि० स्त्रियां वा ङीप् । सा च ७द्राक्षायां अमरः ८अगुरुसारे गन्धद्रव्ये पु० राजनि० ।

स्वादुकण्टक पु० स्वादु कण्टकोऽस्य । विकङ्कतवृक्षे राजनि०

स्वादुकन्दा स्त्री स्वादुः कन्दोऽस्याः । विदार्याम् राजनि० ।

स्वादुका स्त्री स्वादुना मधुररसेन कायति कै-क । नाग- दन्त्याम् राजनि० । [१मधुरे भागे ।

स्वादुखण्ड पु० स्वादुः मिष्टः खण्डोऽस्य । गुडे शब्दर० कर्द० ।

स्वादुगन्धा स्त्री स्वादुरिष्टगन्धोऽस्याः । १रक्तशोभाञ्जने रत्नमा० । २भूमिकुष्माण्डाम् जटा० ।

स्वादुपर्णी स्त्री स्वादूनि पर्णान्यस्याः ङीप् । दुग्धिकायाम् राजनि० ।

स्वादुपाका स्त्री स्वादुः पाकोऽस्याः । काकमाच्याम् राजनि०

स्वादुपिण्डा स्त्री स्वादुः पिण्डः पिण्डाकारफलमस्याः । पिण्डखर्जूर्याम् राजनि० ।

स्वादुफला स्त्री स्वादु फलमस्याः । १बदरीफले शब्दर० कर्द० । २मिष्टे फले न० । ३कोलौ स्त्री शब्दर० टाप् ।

स्वादुमज्जन् पु० स्वादुः मज्जा यस्य । पर्वतजे पीलौ जटा०

स्वादुमांसी स्त्री स्वादु मांसमिव फलमस्याः गौरा० ङीष् । काकोल्याम् राजनि० ।

स्वादुमूल न० स्वादु मूलमस्य । गर्जरे (गाजर) राजनि० ।

स्वादुरसा स्त्री स्वादुः रसो यस्याः । १काकोल्याम् अमरः २मदिरायाम् हेमच० ३शतावर्यां ४द्राक्षायाम् ५आम्रा- तके च शब्दर० ।

स्वादुलता स्त्री स्वाद्वी लता । विदार्याम् राजनि० ।

स्वादुपुष्प पु० स्वादु पुष्पं यस्य । कटभ्यां राजनि० ।

स्वादूदक पु० स्वादु उदकं यस्य । समुद्रभेदे सि० शि० ।

स्वाद्वम्ल पु० स्वादुः अम्लः । दाडिमे त्रिका०

स्वाधिष्ठान न० लिङ्गमूलस्थे सुषुम्नान्तर्गते षड्दलपद्मभेदे । "षड्दले वैद्युतनिभे स्वाधिष्ठानेऽमलत्विषि । बभमैर्यरलै- र्युक्ते वर्णैः षड्भिश्च सुव्रत !" तन्त्रसा० । "सिन्दूरपूर- रुचिरारुणपद्ममन्यत्सौषुम्नमध्यघटितं ध्वजमूलदेशे । अङ्गच्छदैः परिवृतं तडिदाभवर्णैर्बाद्यैः सबिन्दुलसितैश्च पुरन्दरान्तैः (लान्तैः) । तस्यान्तरे प्रविलसद्विशदप्रकाशम- म्भोजमण्डलमथो वरुणस्य तस्य । अर्द्धेन्दुरूपलसितं शर- दिन्दुशुभ्रं वङ्कारबीजममलं मकराधिरूढम् । तस्याङ्कदेश- कलितो हरिरेव पायान्नीलप्रकाशरुचिरश्रियमादधानः । पीताम्बरः प्रथमयौवनगर्वधारी श्रीवत्सकौस्तुभधरो धृतवेदबाहुः । अत्रैव भाति सततं खलु राकिणी सा नीलाम्बुजद्युतिसहोदरकान्तिशोभा । नानायुधोद्यतकरै- र्लसिताङ्गलक्ष्मीर्दिव्याम्बराभरणभूषितमत्तचित्ता । स्वाधि- ष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद्यो मनोज्ञं स्वाहङ्का- राद्यदोषादिकसकलरिपुः क्षीयते तत्क्षणेन" पूर्णानन्द- षट्चक्रम् ।

स्वाधीन त्रि० स्वस्याधीनः । स्वायत्ते स्वतन्त्रे ।

स्वाधीनपतिका स्त्री स्वाधीनः पतिर्यस्याः कप् । नायि- काभेदे स्वाधीनभर्तृकापर्यायोऽप्यत्र ।

"कान्तो रतगुणाकृष्टो न जहाति यदन्तिकम् । वि-

चित्रविभ्रमा मत्ता सा स्यात् स्वाधीनभर्त्तृका” सा०द० । सा च पञ्चधा “मुग्धा मध्या प्रौढ़ा स्वकीया सामान्या चेति” रसमञ्जरी ।

स्वाध्याय पु० स्वः स्वकीयत्वेन विहितः अध्यायः द्विजानाम्, अधि+इङ–कर्म्मणि घञ् । १द्विजैः पाठ्ये वेदभागभेदे “स्वाध्यायोऽध्येतव्यः” इति श्रुतिः । सु+आ+अधि इङ भावे घञ् । २अवश्यपाठ्यवेदाध्ययने “स्वाध्यायो जप इत्युक्तो वेदाध्ययनकर्म्मणीति” स्मृतिः ।

स्वान्त न० स्वन–क्त । १मनसि अमरः २गह्वरे मेदि० ३ध्वनिते त्रि० । [४सम्यगुन्नतायां च मेदि० ।

स्वाप पु० स्वप–घञ् । निद्रायाम् अमरः । २शयने ३अज्ञाने

स्वापतेय न० स्वपतेरागतः ढञ् । धने अमरः ।

स्वाभाविक त्रि० स्वभावादागतः ठञ् । स्वभावसिद्धे स्त्रियां ङीप् (स्वाभाविकी” स्वच्छतेत्युद्भटः) ।

स्वामिन् पु० स्व+अस्त्यर्थे मिनि दीर्घः । १भर्त्तरि पत्यौ धरणिः । २कार्त्तिकेये मेदि० । ३राजनि अमरः । ४विभौ ५हरे ६हरौ च शब्दर० । ७वात्स्यायनमुनौ त्रिका० । ८अधिपतौ त्रि० अमरः । ९जैनभेदे पु० हेमच० । १०परिव्राजकोपाधिभेदे पु० । तस्य भावः त्व स्वामित्व स्वत्वनिरूपिते क्रयाद्यधीने आत्मवृत्तौ पदार्थभेदे स्वत्वशब्दे दृश्यम् ।

स्वामिपालविवाद पु० स्वामी च पालो च तयोर्विवादः विवादभेदे तत्स्वरूपादिकं वीरमि० उक्तं यथा “अथ स्वामिपालविवादाख्यव्यवहारपदम् । तत्र मनुरभिधानप्रतिज्ञां करोति । “पशुषु स्वामिनां चैव पालानाञ्च व्यतिक्रमे । विवादं संप्रवक्ष्यामि यथावद्धर्म्मतत्त्वतः” इति । स्वामिपालयोः प्रतिदिनकृत्यमाह नारदः “उपानयेद्गा गोपाय प्रत्यहं रजनीक्षये । चीर्णाः पीताश्च ता गोपः सायाह्ने प्रत्युपानयेद्” इति । चीर्णा तृणादिकं भक्षितवतीः । पीताः पीतवतीः । स्वामिना प्रातर्यावत्यः समर्पितास्तावत्यो गोपालेन सायं प्रत्यर्पणीया इत्यर्थः । गोग्रहणं पशुमात्रोपलक्षणार्थम् । तथा च याज्ञवल्क्यः “यथार्पितान् पशून् गोपः सायं प्रत्यर्पयेत् तथा” इति । गवादिपरिपालकस्य भृतिपरिमाणमाह नारदः “गवां शताद्वत्सतरी धेनुः स्याद् द्विशताद् भृतिः । प्रतिसंवत्सरं गोपे सन्दोहश्चाष्टमेऽहनि” इति । प्रतिसंवत्सरं संवत्सरे संवत्सरे गोशतपरिपालने वत्सतरी द्विहायनी गौर्भृतिः, द्विशतपरिपालने धेनुर्दोग्ध्री सवत्सेति यावत् । अष्टमे दिवसे सन्दोहः सर्वासां गवां सन्दोहश्च भृतित्वेन कल्पनीय इत्यर्थः । वृहस्पतिरपि “तथा धेनुभृतः क्षीरं लभेताष्टमेऽहनि” इति । धेनुभृतः धेन्वाभृतः द्विशतपालक इत्यर्थः । तथा च सन्दोहो धेन्वा समुन्नीयते न वत्सतर्य्येति मदनरत्ने । कल्पतरौ तु धेनुभृतो गोपाल इति व्याख्यातत्वेन वत्सतर्य्यापि समुन्नीयत इति गम्यते । गोग्रहणं महिष्यादीनामुपलक्षणम् । न्यूनाधिकपरिपालने तु तदनुसारेण भृतिकल्पना द्रष्टव्या । इयञ्च वत्सतर्य्यादिभृतिकल्पना परिभाषितभृत्यभावविषया । परिभाषिते तु परिभाषानतिक्रमेणैव देया । मनुस्तु प्रकारान्तरेण भृतिपरिमाणमाह “गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम् । गोस्वाम्यनुमतो भृत्यः सा स्यात् पालेऽभृते भृतिः” इति । दशानां गोगर्भीणां मध्ये वरामुत्कृष्टां स्वामिनामनुमत्या तत्क्षीरभृतो भृत्यो गोपः दशगोगर्भीपालनकृद् गृह्णीयाद् भृत्यर्थम् । सैषा भृतिः पूर्वं द्रव्यान्तरेणाभृते ज्ञेया । यस्तु द्रव्यान्तरेण भृतः तत्र तदेव भृतिरित्यर्थः । यस्तु भृतिं गृहीत्वा पशून्मारयेत् विनाशयति वा तं प्रत्याह याज्ञवल्क्यः “प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः” इति । प्रमादग्रहणं पशुपालकदोषोपलक्षणार्थम् मनुना प्रमादनाशः स्पष्टीकृतः “नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतम् । हीनं पुरुषकारेण प्रदद्यात् पाल एव तु” इति । श्वहतम् शुना हतम् । विषमे दुर्गमप्रदेशे । पुरुषकारः पुरुषप्रयत्नः । तत् पुरुषप्रयत्नेन हीनं मरणादिकं प्राप्तं तद्दातव्यमित्यर्थः । पुरुषकारश्च वृहस्पतिना दर्शितः “कृमिचोरव्याघ्रभयाद्दरीश्वभ्राच्च पालयेत् । व्यायच्छेच्छक्तितः क्रोशेत् स्वामिने वा निवेदयेत्” इति । व्यायच्छेत् व्यसनाभावाय यतेतेत्यर्थः । चौरैर्बलात्कारेणापहृते न दाप्य इत्याह मनुः “विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति । यदि देशे च काले च स्वामिनः स्वस्य शंसति” इति । विघुष्य डक्कादिभिर्घोषं कृत्वा । देशे स्वाम्यवस्थानदेशे । काले अपहरणकालाव्यवहितकाले । विषयविशेषे पशुपालस्य दण्डमाह व्यासः “गृहीतमूल्यो गोपालस्तांस्त्यक्त्वा निर्जने वने । ग्रामचारी भवेद्वाध्यः शलाकी च वनेचरः” इति । शलाकी नापित इति कल्पतरौ । पुरुषेण प्रयत्नाकरणे दण्डमाह नारदः “स्वाम्ये कोऽव्यसनं गोपो व्यायच्छेत् तत्र शक्तितः । अशक्तस्तूर्णमागम्य स्वामिने च निवेदयेत्” । अव्यायच्छन्नविक्रोशन् स्वामिने चा-

निवेदयन्। वोढुमर्हति गोपस्तं विनयञ्चैव राजनि” इति। तद्रूपादिकम्। पशूनां दैवात् मरणे पालकस्य दोषाभावज्ञानोपायमाह व्यासः “मृतेषु च विशुद्धः स्यात् बालशृङ्गादिदर्शनात्”। आदिशब्देन कर्णादीनां ग्रहणम्। तथा च मनुः “कर्णौ चर्म च बालांश्च वस्तिं स्नायुञ्च रोचनाम्। पशुषु स्वामिनां दद्यान्मृतेष्वङ्गानि दर्शयेत्” इति। अङ्कादि दर्शयेदिति क्वचित् पाठः। अङ्कः शृङ्गकर्णादिकृतचिह्नम्। आदिशब्दः साक्षिसंग्रहार्थः। पशुषु मृतेष्वङ्कादिकं स्वामिने दर्शयेत्। रोचनादिकं यत्प्रयोजनं तत् तस्मै दद्याच्चेत्यर्थः। नष्टगवादिदानञ्च तत्स्वामिने मूल्यद्वारेण ज्ञातव्यम्। अतएव विष्णुः “दिवा पशूनां वृकाद्युपघाते पाले त्वनायति पालकदोषो विनष्टपशूनां मूल्यं स्वामिने दद्यादिति”। अनायति अनागच्छति। विनष्टद्रव्यप्रमाणमाह याज्ञवल्क्यः “पालदोषविनाशे तु पाले दण्डो विधीयते। अर्द्धत्रयोदशपणः स्वामिनो द्रव्यमेव च” इति। अर्द्धत्रयोदशपणः अर्द्धरहितत्रयोदशपणः। सार्द्धद्वादशपण इति यावत्। उत्तरपदलोपी कर्मधारयः। यत्तु केनचिदर्द्धाधिकत्रयोदशपणो दण्ड इति व्याख्यातं तत् सार्द्धद्विमात्रादिषु अर्द्धत्रिमात्रादि महाभाष्यकारशब्दप्रयोगदर्शनादुपेक्ष्यम्। पालदोषमाह मनुः “अजाविके तु संरुद्धे वृकैः पाले त्वनायति। यां प्रसह्य वृको हन्यात् पाले तत् किल्विषं भवेत्” इति। अनायति उपद्रवनिवारणाय अनागच्छतीत्यर्थः। याम् अजाविकजातीयाम्। सुगमस्थलस्यविषयमेतत्। दुर्गमस्थलस्यविषये त्वाह स एव “तासाञ्चेदवरुद्धानां चरन्तीनां मिथो वने। यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्विषी” इति। अवरुद्धानां पालकेन स्थापितानामित्यर्थः। गवादिप्रचारणार्थं भूमिमाह याज्ञवल्क्यः “ग्रामेच्छया गोप्रचारो भूमीराजवशेन वा”। ग्रामेच्छया ग्रामीणजनवशेन राजेच्छया वा। गोप्रचारो गवां तृणादिभक्षणार्थं कियानपि भूभागोऽकृष्टः परिकल्पनीय इत्यर्थः। गवां स्थानाशनसौकर्य्याय ग्रामक्षेत्रयोरन्तरमाह स एव “धनुःशतपरीणाहो ग्रामक्षेत्रान्तरं भवेत्। द्विशते खर्वटस्य स्यान्नगरस्य चतुःशतम्” इति। परीणाहशब्देनात्र सर्वासु दिक्षु चतुष्प्रगव्यस्थलं गृह्यते। एतादृशं धनुःशतं परिमितं ग्रामक्षेत्रयोरन्तरं कार्य्यम्। खर्वटस्य शतद्वयपरिमितमि-

त्यर्थः। खर्वटः अनेककारुकृषीवलयुक्तो ग्राम इति मदनरत्ने। माधवाचार्य्यैस्तु प्रचुरकण्टकप्रान्तो ग्राम इति व्याख्यातम्। तत्र शस्योत्पत्तेः प्रागेवावरणं कार्य्यमित्याह कात्यायनः “अजातश्चैव शस्येषु कुर्य्यादावरणं महत्। दुःखेन विनिवार्य्यन्ते लब्धस्वादरसा मृगाः” इति। एवं पशुनिवारणार्थं कृतेऽप्यावरणे तमतिक्रम्य पशुभिः शस्यादिविनाशे कृते कर्त्तव्यमाह मनुः “पथिक्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः। स पालः शतदण्डार्हो विपालं वारयेत् पशुम्” इति। पथिक्षेत्रे मार्गसमीपे क्षेत्रे। ग्रामान्तीये ग्रामसमीपवर्त्तिनि। सपालः पशुः पणशतदण्डार्हः तत्पशुपालः पणशतं दण्डनीय इत्यर्थः। अयञ्च दण्डः पशुपालने समर्थेन सता पशावनिवार्य्यमाणे वेदितव्यः। अतएव नारदः “उत्क्रम्य तु वृतिं यः स्याच्छस्यघातो गवादिभिः। पालः शास्यो भवेत् तत्र न चेच्छक्तो निवारयेत्” इति। आवरणाभावेनापरिहार्य्ये शस्योपघातेऽपि न पालस्य दण्डः। तथा च मनुः “तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि। न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम्” इति। अनेनावृतक्षेत्रशस्योपघाते पशुरक्षिणां दण्ड इत्यर्थादुक्तं भवति। अदीर्घकालप्रचारविषयमेतत्। दीर्घकालप्रचारे तु अपरिवृतेऽपि पशुपालो दण्डार्हो भवति। अतएवाल्पकालप्रचारे दोषाभावं दर्शयति विष्णुः “पथि ग्रामविवीतान्ते न दोषोऽल्पकालमिति”। पशुविशेषे दण्डपरिमाणमाह याज्ञवल्क्यः “माषानष्टौ तु महिषी शस्यघातस्य कारिणी। दण्डनीया तदर्द्धं तु गौस्तदर्द्धमजाविकम्। भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः। सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम्” इति। परशस्यघातकारिण्या महिष्याः स्वामी अष्टौ माषान् दण्ड्यः। गोः स्वामी चतुरः। छागस्वामी मेषस्वामी च द्वौ। एतेषां पशूनां शस्यभक्षणादारभ्य तत्रैव उपविष्टानां स्वामी यथोक्तदण्डाद्द्विगुणं दाप्यः। विवीतस्थतृणाद्युपघातेऽपि शस्योपघातवद्दण्डनीयः। खरस्वाम्युष्ट्रस्वामी च महिषीस्वामिवद्दण्डनीयः। अत्र पशुस्वामिनो दण्ड इत्यभिधातव्ये महिष्यादिग्रहणं प्रतिपशुदण्डप्राप्त्यर्थम्। भक्षयित्वोपविष्टवत्सादिविषये यथोक्ताच्चतुर्गुणो दण्डः। तथा च स्मृत्यन्तरम् “वसतां द्विगुणः प्रोक्तः सवत्सानां चतुर्गुणः” इति। अत्रापराधानुसारेण दण्डनार्थं ताम्रिकमाषो ग्राह्यो न पुनः

गौरवर्णो राजतो वेति स्मृतिचन्द्रिकायाम् । तान्त्रिकमाषस्य कर्षपरिभाषितस्य षोड़शो भागो भवति । अयमेव "पणस्य पञ्च चापि प्रकीर्त्तिताः" इति याज्ञवल्क्योक्तपञ्चसुवर्णपरिमितत्वपक्षे पणचतुर्थांशस्य विंशतिमाषात्मककार्षापणस्य "माषो विंशतिमोभागः पणस्य परिकीर्त्तितः" इति नारदोक्तो विंशो भागोऽपि भवति । एतेन स्मृतिचन्द्रिकायाम् अपराधानुसारेण दण्डनार्थं माषो "विंशतिमो भागः पणस्य परिकीर्त्तित" इति नारदोक्तो माषः कैश्चित् कोलन इत्येकीयमतत्वेनोपन्यस्य "चतुर्मा र्ह्मरजोमूला मनुनाऽस्मदुदाहृता । कार्षापणान्ता सा दिव्ये नियोक्तव्या विनये तथा" इति वृहस्पतिवचनविरोधेन दूषितं तदुभयथाप्यर्थभेदाभावेन विरोधाभावान्निरस्तं मन्तव्यम् । यत्तु, मनुनोक्तम् "सपादं पणमर्हतीति" तत् स्वामिनो मतिपूर्वं पशुव्यतिक्रमविषयम् । याज्ञवल्क्यवचनन्त्वबुद्धिपूर्वविषयमिति न तयोर्विरोधः । यत्तु "पणस्य पादौ द्वौ गान्तु द्विगुणं महिषीं तथा । तथाजाविकवत्सानां पादो दण्डः प्रकीर्त्तित" इति स्मृत्यन्तरं तद्भक्षयित्वोपविष्टगवादिविषयम् । यत् पुनर्नारदेनाभिहितम् "माषकान् दापयेद् दण्डं द्वौ माषौ महिषीं तथा । तथाजाविकवत्सानां दण्डः स्यादर्द्धमाषिकः" इति । तन्तु-कर्षमात्रभक्षणविषयम् अतएवाहतुः शङ्खलिखितौ । "रात्रौ चरन्ती गोः पञ्चमाषं दिवा कोन्मुक्तौ माषं पादे त्वदण्डमिति" । पादे त्वदण्ड इत्यस्यायमर्थः । व्याघ्रचौरादिभिः परवश्येषु कस्यचिन्मात्रभक्षणे कथञ्चित् क्षते पालकस्य स्वामिनो वा स्वल्पोऽपि दण्डो नास्तीति । आतुरपशुविषये वक्ष्यमाणनाशेऽप्येवमेव दण्डाभावप्रतिपादनमुखेनाह नारदः "राजदण्डगृहीतो वा वज्राशनिहतोऽपि वा । अथ सर्पेण दष्टो वा वृक्षाद्वा पतितो भवेत् । व्याघ्रादिभिर्हतो वापि व्याधिभिर्वाप्युपद्रुतः । न तत्र दोषः पालस्य न च दोषोऽस्ति गोमिनाम्" इति । गोमिनां गोस्वामिनाम् । आतुराणामनिवार्यत्वादित्यभिप्रायः । अनातुराणामपि केषाञ्चित् पशूनां दण्डाभावमाह स एव "गोः प्रसूता दशाहात्तु महोक्षा वाजिकुञ्जराः । न निवार्याः प्रयत्नेन तेषां स्वामी न दण्डभाग्" इति । दशदिनपर्य्यन्तं प्रसूताया निरोद्धुमशक्यत्वान्न स्वामी दण्डभाक् । महोक्षस्य सर्वासाञ्च गर्भाधानार्थं सृष्टा वन्धनायोगात् तत्स्वामी न दण्डभाक् । वाजिकुञ्जराणां स्वामिनोऽदण्डभागित्वे हेतुमाहोशनाः "अदण्ड्या हस्तिनो ह्यश्वा प्रजापाला हि ते स्मृताः" स्वामिपदञ्च पालकस्याप्युपलक्षणार्थम् । यदाह मनुः "अनिर्दशाहां गां सूतां वृषान् देवपशूंस्तथा । सपालान् वा विपालान् वा अदण्ड्यान्मनुरब्रवीत्" इति । वृषाः महोक्षाः । यद्वा वृषोत्सर्गविधानेनोत्सृष्टाः । देवपशवः देवालयेषु देवोपभोगार्थं स्थापिताः पशवः । याज्ञवल्क्योऽपि "महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः । पालो येषाञ्च ते मोच्या दैवराजपरिप्लुताः" । अनिर्दशाहा आगन्तुकः स यूथात्परिभ्रष्टः सन् देशान्तरात् समागतः । येषां पालो नास्ति तेऽपि दैवराजोपहृताः शस्यादिनाशकारिणो न दण्ड्या इत्यर्थः । आदिशब्देन हतवत्सादीनां ग्रहणम् । अतएवोशनाः "अदण्ड्या हतवत्सा च संज्ञा रोगवती तथा । अदण्ड्याः काणकूटाश्च वृषाश्च कृतलक्षणाः । अदण्ड्यागन्तुका गौश्च सूतिका चाभिसारिणी" इति । कूटः एकशृङ्गः । कृतलक्षणः प्रतप्तायसेन कृतचिह्नः । अभिसारिणी स्वयूथात् प्रच्युता पुनः स्वयूथगामिनी । परशस्यविनाशे न केवलं पशुस्वामी दण्डनीयः सदमपि दापनीय इत्याह वृहस्पतिः "शस्यावियारयेद्गास्तु चीर्णे दोषो द्वयोर्भवेत् । स्वामी सदमं दाप्यः पालस्ताड़नमर्हति" इति । सदञ्च दमञ्च सदमम् । अमूलशस्यनाशविषयमेतत् । अतएव नारदः "समूलशस्यनाशे तु तत्स्वामी प्राप्नुयात् सदम् । वधेन गोर्योऽत्र च दण्डं स्वामिनि पातयेत्" इति । तत्स्वामी शस्यस्वामी सदं प्राप्नुयात् । पशुस्वामिनः सकाशादिति शेषः । वधोऽत्र कशादिना ताड़नम् । न प्राणच्छेदः । पालस्ताड़नमर्हतीति वचनात् । सदश्च सामन्तादिभिः परिकल्पितो देयः । अतएव स एवाह "गोभिस्तु भक्षितं शस्यं यो नरः प्रतियाचते । सामन्तानुमतं देयं धान्यं यत्तत्र वापितम्" इति । यत्तु प्रतियाचननिषेधनम् "गोभिर्विनाशितं धान्यं यो नरः प्रतियाचते । पितरस्तस्य नाश्नन्ति न चापि त्रिदिवौकसः" । इत्युशनोवचनन्तद् ग्रामादिसमीपस्थनावृतक्षेत्रविषयमिति माधवाचार्य्याः । श्राद्धकालादौ गोभक्षितविषयमिति मदनरत्नकृतः । सर्वासाङ्गवामुत्सवे श्राद्धदिवसे चादण्ड्यत्वमाह स एव "अदण्ड्या गोत्सवे गावः श्राद्धकाले तथैव च" इति । गोभिः श्राद्धकालादौ भुक्तमतिश्रेयस्करमित्याशयेनाह । व्यासः "आक्रम्य च द्विजैर्भुक्तं परिक्लिष्टञ्च बान्धवैः । गाभिश्च नरशार्दूल !

वाजपेयादिभिर्यजेत्” इति एतत्पदस्तुपसंहरति मनुः “एतद्विधानमातिष्ठेद्धार्मिकः पृथिवीपतिः। स्वामिनाञ्च पशूनाञ्च पालानाञ्च व्यतिक्रमे”।

स्वायम्भुव पु॰ स्वयंभुवोऽपत्यम्, तस्येदम् वा अण् “ओरो- र्दिति वक्तव्ये ओर्गुण इत्युक्त्या संज्ञापूर्वकविधेरनित्य- त्वज्ञापनान्न गुणः अवङ्। १स्वयम्भूपुत्रे मनौ २स्वयम्भू- सम्बन्धिनि त्रि॰ “धाम स्वायम्भुवं ययुः” कुमारः। स्त्रियां ङीप्। सा च ३ब्राह्म्याम्। “भार्गवी नार- दीया च वार्हस्पत्याङ्गिरस्यपि। स्वायम्भुवस्य शास्त्रस्य चतस्रः संहिता मताः” इति तदुक्तधर्मशास्त्रसंहिता- चतुष्टयम्। तदुत्पत्त्यादिकं यथा

“ततः कालेन महता तस्याः पुत्रोऽभवन् मनुः। स्वाय- म्भुव इति ख्यातः स विराडिति नः श्रुतम्। तद्रूपगुण- सामान्यादधिपूरुष उच्यते। वैराजा यत्र ते जाता बहवः शंसितव्रताः। स्वायम्भुवाः महाभागाः सप्त सप्त तथापरे। स्वारोचिषाद्या ते सर्वे ब्रह्मतुल्यस्वरूपिणः। औत्तमिप्रमुखास्तद्वद् येषान्त्वं सप्तमोऽधुना” मत्स्यपु॰ ४अ॰। “ऋषींस्तेषां प्रवक्ष्यामि पुत्रान् देवगणांस्तथा। मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः। पुलस्त्यश्च वशि- ष्ठश्च सप्तैते ब्रह्मणः सुताः। उत्तरस्यां दिशि तथा राजन्! सप्तर्षयः स्थिताः। यामा नाम तथा देवास्त्वासन् स्वायम्भुवेऽन्तरे। आग्नीध्रश्चाग्निबाहुश्च मेधा मेधातिथि- र्वसुः। ज्योतिष्मान् द्युतिमान् हव्यः स नः पुत्र एव च मनोः स्वायम्भुवस्यैते दश पुत्रा महौजसः। एतत्ते प्रथमं राजन्! मन्वन्तरमुदाहृतम्” हरिवं॰७अ॰।

स्वाराज् पु॰ स्व स्वर्गे राजते राज-क्विप्। इन्द्रे अमरः।

स्वाराज्य न॰स्वराजः भावः ष्यञ्। ब्रह्मत्वे स्वाराज्यसिद्धिः।

स्वारोचिष पु॰ द्वितीये मनौ। “ऊर्जो वशिष्ठपुत्रश्च स्तम्बः काश्यप एव च। प्राणो बृहस्पतिश्चैव दत्तो निश्च्यवन- स्तथा। एते महर्षयस्तात! वायुप्रोक्ता महाव्रताः। देवाश्च तुषिता नाम स्मृताः स्वारोचिषेऽन्तरे। हविघ्नः सुकृतिर्ज्योतिरापो मूर्त्तिरयस्मयः। प्रथितश्च नभस्यश्च नभ ऊर्जस्तथैव च। स्वारोचिषस्य पुत्रास्ते मनोस्तात महात्मनः। कीर्त्तिताः पृथिवीपाल! महावीर्यपराक्रमाः। द्वितीयमेतं कथितं तव मन्वन्तरं मया” हरिवं॰७अ॰।

स्वार्थ पु॰ स्वस्य अर्थः प्रयोजनम् अभिधेयो वा। १स्वप्रयो- जने २स्वाभिधेये च “स्वार्थकः स्वार्थबोधकइति” शब्दश॰

स्वार्थिक त्रि॰ स्वार्थे विहितः ठण्। स्वार्थविहिते व्याकर- णोक्ते प्रत्यये। “स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवच- नान्यनुवर्त्तन्ते” महाभाष्यं यथा बहुगुडो द्राक्षा “क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते” महाभाष्यम्। देवता अपकृष्टगुडका गुडकोर इत्यादि।

स्वास्थ्य न॰स्वस्थस्य भावः ष्यञ्। १आरोग्ये २सन्तोषे अमरः।

स्वाहा अव्य॰ सु+आ+ह्वे-डा। १देवोद्देशेन हविस्त्यागे अमरः। २अग्निभार्य्यायां स्त्री “स्वाहयेव हविर्भुजम्” रघुः। ३मातृकाभेदे च स्त्री “नमः स्वधायै स्वाहायै” इति पितृगाथा। “प्रकृतेः कलया चैव सर्वशक्तिस्वरूपिणी। बभूव दाहिका शक्तिरग्नेः स्वाहा स्वकामिनी। ईषद्- मध्यःस्मेरवक्त्रा प्रभाच्छादनकारिणी। त्वमग्नेर्दाहिका शक्तिर्भवपत्नी च सुन्दरी। दग्धुं न शक्तस्त्वहते हुताशश्च त्वया विना। त्वन्नामोच्चार्य्य मन्त्रान्ते यो दास्यति हविर्नरः। सुरेभ्यस्तत्प्राप्नुवन्ति सुराः स्वानन्द- पूर्वकम्। अग्नेः सम्पत्स्वरूपा च श्रीरूपा सा गृहे- श्वरी। देवानां पूजिता शश्वत् नरादीनां भवाम्बिके!” ब्रह्मवै॰ प्र॰ १७अ॰। ४दुर्गाशक्तिभेदे “दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते” दुर्गापूजामन्त्रः।

स्वाहाप्रिय पु॰ ६त॰। अग्नौ हला॰स्वाहापत्यादयोऽप्यत्र।

स्वाहाभुज् पु॰स्वाहेतिमन्त्रेण त्यक्तद्रव्यं भुङ्क्ते भुज-क्विप्। देवे अमरः। [च मेदि॰

स्विद् अव्य॰ स्विद-क्विप्। १प्रश्ने २वितर्के अमरः ३पादपूरणे

स्विन्न त्रि॰ स्विद-क्त। १घर्मयुक्ते २स्वेदान्विते च ३पक्वे “स्विन्नमन्नमुदाहृतम्” स्मृतिः। [अङ्गीकारे।

स्वीकार पु॰ अस्वस्य स्वस्य कारः करणं स्व+च्वि+कृ-घञ्।

स्वीय त्रि॰ स्वस्येदम् छ अपाणिनीयैरत्र न कुगिति मन्यते। १निजसम्बन्धिनि २नायिकाभेदे स्त्री नायिकाशब्दे दृश्यम्। [आदित् स्वूर्णः स्वूर्ष्णिम्।

स्वुर्छ विस्मृतौ भ्वा॰ प॰ सक॰ सेट्। स्वूर्छति अस्वूर्छीत्

स्वृ शब्दे अक॰ उपतापे सक॰ भ्वा॰ प॰ वेट्। स्वरति अस्वा- रीत् अस्वार्षीत्।

स्वॄ हिंसने क्र्या॰ प॰सक॰सेट्। स्वृणाति अस्वारीत्।

ष्वष्क गतौ भ्वादि॰ आत्म॰सक॰सेट्. ऋदित् चङि न ह्रस्वः। ष्वष्कते अष्वष्किष्ट।

स्वेच्छा स्त्री ६त॰। स्वाभिलाषे हेमच॰। [धीनमृत्युयुक्ते त्रि॰।

स्वेच्छामृत्यु पु॰स्वेच्छया मृत्युर्यस्य। १भीष्मे त्रिका॰ २स्वेच्छा-

स्वेद पु॰ स्विद-भावे घञ्। १पाकभेदे (सेका) २घर्मे गात्रादितो जलादेः निस्यन्दने। णिच् भावे अच्।

चर्म्मनिस्रावश्च तत्प्रकारादिकं चरकेणाभिहितं यथा “अतः स्वेदाः प्रवक्ष्यन्ते यैर्यथावत् प्रयोजिताः । स्वेदसाध्याः प्रशाम्यन्ति गदा वातकफात्मकाः । स्नेहपूर्वं प्रयुक्तेन स्वेदेनावजितेऽनिले । पुरीषमूत्ररेतांसि न सज्जन्ति कथञ्चन । शुष्काण्यपि हि काष्ठानि स्नेहस्वेदोपपादनैः । नमयन्ति यथान्यायं किं पुनर्जीवतो नरान् । रोगर्त्तुव्याधितापेक्षो नात्युष्णोऽतिमृदुर्न च । द्रव्यवान् कल्पितो देशे स्वेदः कार्य्यकरो मतः । व्याधौ शीते शरीरे च महान् स्वेदो महाबले । दुर्बले दुर्बलः स्वेदो मध्यमे मध्यमो हितः । वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते । स्निग्धरूक्षस्तथा स्निग्धो रूक्षश्चाप्युपकल्पितः । आमाशयगते वाते कफे पक्वाशयाश्रिते । रूक्षपूर्वो हितः स्वेदः स्नेहपूर्वस्तथैव च । वृषणौ हृदयं दृष्टी स्वेदयेन् मृदुनैव वा । मध्यमं वङ्क्षणौ शेषमङ्गावयवमिष्टतः । सुशुद्धैर्नक्तकैः पिण्ड्या गोधूमानामथापि वा । पद्मोत्पलपलाशैर्वा स्वेद्यः संवृत्य चक्षुषी । मुक्तावलीभिः शीताभिः शीतलैर्भाजनैरपि । जलार्द्रैर्जलजैर्हस्तैः स्विद्यतो हृदयं स्पृशेत् । शीतशूलव्युपरमे स्तम्भगौरवनिग्रहे । सञ्जाते मार्दवे स्वेदे स्वेदनाद्विरतिर्मता । पित्तप्रकोपो मूर्च्छा च शरीरसदनं तृषा । दाहः स्वेदाङ्गदौर्बल्यमतिस्विन्नस्य लक्षणम् । उक्तस्तस्याशितीये यो ग्रैष्मिकः सर्वशो विधिः । सोऽतिस्विन्नस्य कर्त्तव्यो मधुरः स्निग्धशीतलः । कषायमद्यनित्यानां गर्भिण्या रक्तपित्तिनाम् । पित्तिनां सातिसाराणां रूक्षाणां मधुमेहिनाम् । विदग्धभ्रष्टब्रध्नानां विषमद्यविकारिणाम् । श्रान्तानां नष्टसंज्ञानां स्थूलानां पित्तमेहिनाम् । तृष्यतां क्षुधितानाञ्च क्रुद्धानां शोचतामपि । कामल्युदरिणाञ्चैव क्षतानामाढ्यरोगिणाम् । दुर्बलातिविशुष्काणामुपक्षीणौजसां तथा । भिषक् तैमिरिकाणाञ्च न स्वेदमवतारयेत् । प्रतिश्याये च कासे च हिक्काश्वासेष्वलाघवे । कर्णमन्याशिरःशूले स्वरभेदे गलग्रहे । अर्द्दितैकाङ्गसर्वाङ्गपक्षाघाते विनामके । कोष्ठानाहविबन्धेषु शुक्राघाते विजृम्भके । पार्श्वपृष्ठकटीकुक्षिसंग्रहे गृध्रसीषु च । मूत्रकृच्छ्रे महत्त्वे च मुष्कयोरङ्गमर्द्दके । पादजानूरुजङ्घार्त्तिसंग्रहे श्वयथावपि । खल्लीष्वामेषु शीते च वेपथौ वातकण्टके । सङ्कोचायामशूलेषु स्तम्भगौरवसुप्तिषु । सर्वाङ्गेषु विकारेषु स्वेदनं हितमुच्यते । तिलमाषकुलत्थाम्लघृततैलामिषौदनैः । पायसैः कृशरैर्मांसैः पिण्डस्वेदं प्रयोजयेत् । गोखरोष्ट्रवराहाश्वशकृद्भिः सतुषैर्यवैः । सिकतापांशुपाषाणकरीषायसपूटकैः । श्लैष्मिकान् स्वेदयेत् पूर्व्वैर्वातिकान् समुपाचरेत् । द्रव्याण्येतानि शस्यन्ते यथास्वं प्रस्तरेष्वपि । भूगृहेषु च जेन्ताकेष्णगर्भगृहेषु च । विधूमाङ्गारतप्तेष्वभ्यक्तः स्विद्यति ना सुखम् । ग्राम्यानूपौदकं मांसं पयोवस्तशिरस्तथा । वराहमध्यपित्तासृक् स्नेहवत्तिलतण्डुलान् । इत्येतानि समुत्क्वाथ्य नाडीस्वेदं प्रयोजयेत् । देशकालविभागज्ञो युक्त्यपेक्षो भिषक्तमः । वारुणामृतकैरण्डशिग्रुमूलकसर्षपैः । वासावंशकरञ्जार्कपत्रैरश्मन्तकस्य च । शोभाञ्जनकशैरीयमालतीसुरसार्जकैः । पत्रैरुत्क्वाथ्य सलिलं नाडीस्वेदं प्रयोजयेत् । भूतीकपञ्चमूलाभ्यां सुरया दधिमस्तुना । पत्रैरम्लैश्च सस्नेहैर्नाडीस्वेदं प्रयोजयेत् । अतएव च निर्यूहाः प्रयोज्या जलकोष्ठके । स्वेदनार्थं घृतक्षीरतैलकोष्ठांश्च कारयेत् । गोधूमशकलैश्चूर्णैर्यवानामम्लसंयुतैः । सस्नेहकिण्वलवणैरुपनाहः प्रशस्यते । गन्धैः सुरायाः किट्टेन जीवन्त्या शतपुष्पया । उमया कुष्ठतैलाभ्यां युक्तया चोपनाहयेत् । चर्म्मभिश्चोपनद्धव्यः सलोमभिरपूतिभिः । उष्णवीर्य्यैरलाभे तु कौशेयाविकशाटकैः । रात्रौ बद्धं दिवा मुञ्चेन्मुञ्चेद्रात्रौ दिवाकृतम् । विदाहपरिहारार्थं स्यात् प्रकर्षस्तु शीतले । सङ्करः१ प्रस्तरो२ नाडी३ परिषेको४ऽवगाहनम्५ । जेन्ताको६ऽश्मघनः७ कर्षूः८ कुटी९ भूः१० कुम्भिकैव११ च । कूपो१२ होलाक१३ इत्येते स्वेदयन्ति त्रयोदश । तान् यथावत् प्रवक्ष्यामि सर्व्वानेवानुपूर्व्वशः” इति । तत्र वस्त्रान्तरितैरवस्त्रान्तरितैर्वा पिण्डैर्यथोक्तैरुपस्वेदनं सङ्करस्वेद१ इति विद्यात् । शूकशमीधान्यपुलाकानां वेशवारपायसकृशरोत्कारिकादीनां वा प्रस्तरे कौशेयाविकोत्तरप्रच्छदे पञ्चाङ्गुलोरुबूकार्कपत्रप्रच्छदे वा स्वभ्यक्तसर्व्वगात्रस्य शयानस्योपरि स्वेदनं प्रस्तरस्वेद२ इति विद्यात् । स्वेदनद्रव्याणां पुनर्मूलफलपत्रभङ्गादीनां मृगशकुनपिशितशिरस्पदादीनामुष्णस्वभावानां वा यथार्हमम्ललवणस्नेहोपसंहितानां मूत्रक्षीरादीनां वा कुम्भ्यां बाष्पमनुद्वमन्त्यामुत्क्वथितानां नाड्या शरैषीकावंशदलकरञ्जार्कपत्रान्यतमकृतया गजाग्रहस्तसंस्थानया व्यामदीर्घया व्यामार्द्धदीर्घया वा व्यामचतुर्भागाष्टभागमूलाग्रपरिणाहस्रोतसा सर्व्वतो वातहरपत्रसंवृतच्छिद्रया द्विस्त्रिर्वा विना-

मितया वातहरसिद्धस्नेहाभ्यक्तगात्रो वाष्पमुपहरेत्। वाष्पो ह्यनूर्द्ध्वगामी विहतचण्डवेगस्त्वचमविदहन् सुखं स्वेदयतीति नाडीस्वेदः ३। वातिकोत्तरवातिकानां पुनर्मूलादीनामुत्क्वाथैः सुखोष्णैः कुम्भीर्वर्षुकाः प्रनाडीर्वा पूरयित्वा यथार्हसिद्धस्नेहाभ्यक्तगात्रं वस्त्रावच्छन्नं परिषेचयेदिति परिषेकः ४। वातहरोत्क्वाथक्षीरतैलघृतपिशितरसोष्णसलिलकोष्ठकावगाहस्तु यथोक्त एवावगाहः" ५। "अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत इत्यादि"। (जेन्ताकशब्दे ३१४४ पृ० अस्य लक्षणाद्युक्तप्रायम् ६।)
"शयानस्य प्रमाणेन घनामश्ममयीं शिलाम्। तापयित्वा मारुतघ्नैर्दारुभिः सम्प्रदीपितैः। व्यपोह्य सर्वानङ्गारान् प्रोक्ष्य चैवोष्णवारिणा। तां शिलामथ कुर्वीत कौषेयाविकसंस्तराम्। तस्यां स्वभ्यक्तसर्वाङ्गः शयानः स्विद्यते सुखम्। रौरवाजिनकौषेयप्रावाराद्यैः सुसंवृतः। इत्युक्तोऽश्मघनस्वेदः ७। कर्षूस्वेदः प्रवक्ष्यते। खानयेच्छयनस्याधः कर्षूं स्थानविभागवित्। दीप्तैरधूमैरङ्गारैस्तां कर्षूं पूरयेत् ततः। तस्यामुपरि शय्यायां स्वपन् स्विद्यति ना सुखम् ८। अनत्युत्सेधविस्तारां वृत्ताकारामलोचनाम्। घनभित्तिं कुटीं कृत्वा कुष्ठाद्यैः सम्प्रलेपयेत्। कुटीमध्ये भिषक् शय्यां स्वास्तीर्णाञ्चोपकल्पयेत्। प्रावाराजिनकौषेयकुथकम्बलगोलकैः। हसन्तिकाभिरङ्गारपूर्णाभिस्तां च सर्वशः। परिवार्यान्तरारोहेदभ्यक्तः स्विद्यते सुखम् ९। य एवाश्मघनस्वेदविधिर्भूमौ स एव तु। प्रशस्तायां निवातायां समायामुपदिश्यते १०। कुम्भीं वातहरक्वाथपूर्णां भूमौ निखातयेत्। अर्द्धभागं त्रिभागं वा शयनं तत्र चोपरि। स्थापयेदासनं वापि नातिसान्द्रपरिच्छदम्। अथ कुम्भ्यां सुसन्तप्तान् प्रक्षिपेदयसो गुडान्। पाषाणान् वोष्मणा तेन तत्स्थः स्विद्यति ना सुखम् ११। सुसंवृताङ्गः स्वभ्यक्तः स्नेहैरनिलनाशनैः। कूपं शयनविस्तारं द्विगुणं चापि वेधतः। देशे निवाते शस्ते च कुर्यादन्तः सुमार्जितम्। हस्त्यश्वगोखरोष्ट्राणां करीषैर्दग्धपूरिते। स्ववच्छन्नः सुसंस्तीर्णेऽभ्यक्तः स्विद्यति ना सुखम् १२। धीतीकां तु करीषाणां यथोक्तानां प्रदीपयेत्। शयनान्तःप्रमाणेन शय्यामुपरि तत्र च। सुदग्धायां विधूमायां यथोक्तामुपकल्पयेत्। स्ववच्छन्नः स्वपंस्तत्राभ्यक्तः स्विद्यति ना सुखम्। होलाकस्वेदः १३ इत्येष सुखः प्रोक्तो महर्षिणेति"। इति त्रयोदशविधः स्वेदोऽग्निगुणसंश्रयः। व्यायाम उष्णसदनं गुरुप्रावरणं क्षुधा। बहुपानं भयक्रोधावुपनाहाहवातपाः। स्वेदयन्ति दशैतानि नरमग्निगुणादृते। इत्युक्तो द्विविधः स्वेदः संयुक्तोऽग्निगुणैर्न च। एकाङ्गसर्वाङ्गगतः स्निग्धो रूक्षस्तथैव च। इत्येतत् त्रिविधं द्वन्द्वं स्वेदमुद्दिश्य कीर्त्तितम्। स्निग्धः स्वेदैरुपक्रम्यः स्विन्नः पथ्याशनो भवेत्। तदहः स्विन्नगात्रस्तु व्यायामं वर्जयेन्नरः" इति। तत्र श्लोकाः "स्वेदो यथा कार्य्यकरो हितो येभ्यश्च यद्विधः। यत्र देशे यथायोग्यो देशो रक्ष्यश्च यो यथा। स्विन्नातिस्विन्नरूपाणि तथातिस्विन्नभेषजम्। अस्वेद्याः स्वेदयोग्याश्च स्वेदद्रव्याणि कल्पना। त्रयोदशविधः स्वेदो विना दशविधोऽग्निना। सङ्ग्रहेण च षट्स्वेदाः स्वेदाध्याये निदर्शिताः। स्वेदाधिकारे यद्वाच्यमुक्तमेतन्महर्षिणा। शिष्यैस्तु प्रतिपत्तव्यमुपदेष्टा पुनर्वसुरिति"।

स्वेदज पु० स्वेदाज्जायते जन-ड। १स्वेदजाते दंशादिजन्तौ अमरः २स्वेदजातमात्रे त्रि०।
"संस्वेदजा विकाराश्च यथा येभ्यो भवन्ति च। मानुषस्वेदमलजा मक्षिकाद्या भवन्ति च। नवमेदप्रक्लिन्नाश्च पिपीलिकगणादयः। संस्वेदजास्तु विज्ञेया दंशगोपशुजन्तवः। सामिदुग्ध्या मांसदुर्गेभ्यः फलेभ्यश्चैव जन्तवः। जायन्ते क्रिमयो विप्राः! काष्ठेभ्यो घुणकादयः। तथा शुक्रविकारेभ्यः पूतिकाः प्रभवन्ति च। संस्वेदजाश्च जायन्ते वृश्चिकाः शुष्कगोमयात्। गोभ्यो हि महिषेभ्यश्च मानुषेभ्यश्च जन्तवः। मत्स्यादिभ्यश्च विविधा अन्तःकुक्षौ विशेषतः। अथान्यानि च सूक्ष्माणि सूक्ष्मयूकास्तथैव च। गोभ्योऽश्वेभ्यस्तथा चैव अष्टापदकिनीनकाः। मक्षिकाणां विकाराश्च घृतदुग्धोदककर्दमैः। शरावति विकाराश्च करीषेभ्यो भवन्ति हि। एवमादिरसंख्यातो गणः संस्वेदजो मया। सर्वेषामभिहितो ह्येष प्राक्कर्मवशगः स्मृतः" वह्निपु०।

स्वेदन न० स्विद-णिच्-ल्युट्। गलादितो घर्म्मादेर्निःसारणव्यापारे (घामरा)। स्वेदशब्दे दृश्यम्।

स्वेदनी स्त्री स्विद्यते पच्यतेऽनया स्विद-ल्युट्। लौहपात्रभेदे (ताओया) अमरः। संज्ञायां कन् टापि ह्रस्वः स्वेदनिका कन्दुरूपे पात्रे हेमच० भर्ज्जनपात्रे शब्दमा०।

स्वैर न० स्वस्य ईरम् ईर-अच् वृद्धिः। १स्वेच्छायाम् २तद्वति ३मन्दे च त्रि० मेदि०।

स्वैरिन् त्रि० स्वेनैव ईरयितुं शीलमस्य ईर-णिनि वृद्धिः। १स्वेच्छाचारिणि स्वतन्त्रे। २व्यभिचारिण्यां स्त्रियां स्त्री

ङीप्। स्वपरपुरुषचतुष्कगामिन्यां स्त्रियां च। "नातश्चतुर्थं प्रसवमापत्स्वपि वदन्त्युत। अतःपरं स्वैरिणी स्यात् बन्धकी पञ्चमे भवेत्" भा० आ० १२२अ०।

स्वोपार्जित त्रि० स्वेन उपार्जितम्। स्वयमर्जिते धनादौ। तस्य विभागो दायभागे दर्शितो यथा "सम्प्रति विभाज्यमविभाज्यञ्चोच्यते। तत्र कात्यायनः "पैतामहञ्च पित्र्यञ्च यच्चान्यत् स्वयमर्जितम्। दायादानां विभागे तु सर्वमेतद्विभज्यते"। "यच्चान्यदिति चकारः स्वयमित्यनेन संबध्यते स्वयमार्जितमिति चकाराद्यन्यस्यापि तदर्जनं साधारणधनद्वारेणेत्यर्थः। अनुपघातोपात्तमविभाज्यमाह तत्र मनुविष्णू "अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत्। स्वयमीहितलब्धं तन्नाकामो दातुमर्हति"। पितृद्रव्योपघाताभावेन द्रव्यद्वारेण नेतरेषां व्यापारः, श्रमेणेत्यनेन शारीरोऽपि व्यापारो नेतरेषामिति अर्जकस्यैव तदसाधारणं स्वयमीहितलब्धं तदिति हेतुत्वेनोपन्यासात्। तथा च व्यासः "अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति, यद्धनम्। दायादेभ्यो न तद्दद्याद्विद्यालब्धन्तु यद्भवेत्"। स्वशक्तिमात्रेण यत् प्राप्तमिति सामान्येनाभिधानात् सर्वमेवंविधं स्वीयमसाधारणं द्रव्यम्। स्वशक्तिप्राप्तस्यापि विद्याधनस्य समाधिकविद्यैः साधारणत्वात् न्यूनविद्याविद्यनिराकरणार्थं विद्यालब्धपदम्। तथा याज्ञवल्क्यः "पितृद्रव्याविरोधेन यदन्यत् स्वयमर्जितम्। मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेत्"। मैत्रादिग्रहणं प्रदर्शनार्थं, एवमादिषु प्रायेणानुपघातसम्भवात्। तथा मनुः "विद्याधनन्तु यद्यस्य तत्तस्यैव धनं भवेत्। मैत्रमौद्वाहिकञ्चैव माधुपर्किकमेव च"। तथा व्यासः "विद्याप्राप्तं शौर्य्यधनं यच्च सौदायिकं भवेत्। विभागकाले तत्तस्य नान्वेष्टव्यं स्वरिक्थिभिः"। पितृपितृव्यादिभ्यः सुदायसम्बन्धिभ्यः प्रसादादिना लब्धं सौदायिकम्। तथा नारदः "शौर्य्यभार्य्याधने, हित्वा, यच्च विद्याधनं भवेत् त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः"। भार्य्याप्राप्तिकाले लब्धं भार्य्याधनम् औद्वाहिकमित्यर्थः, एतानि वर्जयित्वा अन्यद्विभजेदित्यनुवर्त्तते वाक्यान्तरीयम्। तदेवमादिभिः शौर्य्यादिधनत्वमविभाज्यत्वे कारणं नोच्यते शौर्य्याद्यर्जितस्यापि विभागश्रुतेः। तथा च व्यासः "साधारणं समाश्रित्य यत् किञ्चिद्वाहनायुधम्। शौर्य्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः। तस्य भागद्वयं देयं शेषास्तु समभागिनः"। साधारणद्रव्योपार्जितस्य धनस्य विभागं वदति। तथा नारदः "कुटुम्बं बिभृयाद् भ्रातुर्यो विद्यामधिगच्छतः। भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्"। बिभृयादित्येकवचननिर्देशात् यदि विद्यामभ्यस्यतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययशरीरायासाभ्यां संवर्द्धयति तदा तद्विद्योपार्जितधने तस्याप्यधिकारः। तथा "वैद्योऽवैद्याय नाकामो दद्यादंशं स्वतो धनात्। पितृद्रव्यं समाश्रित्य न चेत्तेन तदर्जितम्"। एतत्पदं साधारणधनपरं तदनाश्रित्यार्जितं वैद्योऽविद्याय अनिच्छन् न दद्यात् वैद्याय विदुषे पुनः साधारणमन्तरेणाप्यर्जितं दद्यादेव। तथा च गौतमः "स्वयमर्जितमवैद्येभ्यो वैद्यः कामं न दद्यात्"। असाधारणधनशरीरव्यापारार्जितं स्वयमर्जितं अविद्वद्भ्यो दातुमनिच्छन् न दद्यात् विद्वद्भ्यः पुनर्दद्यादेव। एतच्च विद्याधनमात्रविषयम्। तदाह कात्यायनः "नाविद्यानान्तु वैद्येन देयं विद्याधनं क्वचित्। समविद्याधिकानान्तु देयं वैद्येन तद्धनम्"। तन्त्रोच्चरितविद्यापदम् उभाभ्यां समाधिकपदाभ्यां संबध्यते तेन समविद्याधिकविद्यानां दातव्यं न्यूनविद्याविद्ययोः पुनरनधिकारः। "तदेवमादिवचनैर्विद्याशौर्य्यादिधनेष्वपि साधारणधनोपघातानुपघाताभ्यां विभागाविभागयोरवगमात् तस्यैव प्रयोजकत्वात् तत्पदवत्येव श्रुतिः कल्पनीया. उपघातार्जितं विभजेदिति, न पुनः शौर्य्यादिपदवत्यपि, अवश्यकल्पनीयसामान्यश्रुतिकल्पनयैवोपपत्तेः। श्लोकाकाधिकरणन्यायस्यायमेव विषयः। यद्वा न्यायप्राप्त एवायमर्थः, यद्येनार्जितं तत् तस्मिन् जीवति तस्यैव, असति विशेषवचने, यत्र पुनः साधारणधनमात्रेणैकस्य व्यापारोऽपरस्य धनशरीराभ्यां तत्रैकस्यैको भागोऽपरस्य भागद्वयं न्यायावगतमेव सिद्धम्। एतेन चैतदपि सिध्यति, यत् साधारणधनोपघाते सति यत्र यावतोंऽशस्य स्वल्पस्य महतो वोपघातः, तत्र तदनुसारेण भागकल्पना कार्य्या। किञ्च कात्यायनवचनम् "विभक्ताः पितृवित्ताच्चेदेकत्र प्रतिवासिनः। विभजेयुः पुनर्द्व्यंशं स लभेतोदयो यतः"।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये सकारादिशब्दार्थसङ्कलनम्।

ह

हकारः व्यञ्जनेषु ऊष्मवर्णभेदः। कण्ठ्योऽयं वर्णः। "हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्" शिक्षोक्तेः पञ्चमादिवर्णसंयोगे उरस्योऽयं वर्णश्च। तदुच्चारणे चाभ्यन्तरप्रयत्नः जिह्वाग्रेण कण्ठस्थानस्य अर्द्धस्पर्शः। "अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलस्तथेति" शिक्षोक्तेः। वाह्यप्रयत्नास्तु घोषसंवारनादा महाप्राणश्च। अस्य ध्येयरूपं कामधेनुतन्त्रोक्तं यथा "हकारं शृणु चार्वङ्गि! चतुर्वर्गप्रदायकम्। कुण्डलीद्वयसंयुक्तं रक्तविद्युल्लतोपमम्। रजःसत्त्वतमोयुक्तं पञ्चदेवमयं सदा। पञ्चप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा। त्रिबिन्दुसहितं वर्णं हृदि भावय पार्वति!"। अस्याधिष्ठातृदेवताध्यानमुक्तं वर्णोद्धारतन्त्रे यथा "करीषभूषिताङ्गीं साट्टहासां दिगम्बराम्। अस्थिमाल्यामष्टभुजां वरदामम्बुजेक्षणाम्। नागेन्द्रहारभूषाढ्यां जटामुकुटमण्डिताम्। सर्वसिद्धिप्रदां नित्यां धर्मकामार्थमोक्षदाम्। एवं ध्यात्वा हकारन्तु तन्मन्त्रं दशधा जपेत्"। मातृकान्यासेऽस्य दक्षपार्श्वे न्यस्यता। काव्यादौ प्रथमप्रयोगे खेदःफलं वृ०र०टीकायामुक्तं यथा 'सः सौख्यं हस्तु खेदम् विनयमपि च लं क्षः समृद्धिं करोति"। अकारादिवर्णानां प्रयोगे फलादिकं यत्र भवति तत्रैवोक्तं यथा "पद्यादौ गद्यवक्त्रे वर्णेषु च सकले प्राकृतादौ समोऽयम्" इति। एतेषां फलाधारनिरूपणमप्याकारे "नायको वर्ण्यते यत्र फलं तस्य समादिशेत्। अन्यथा तु कृते काव्ये कर्तुरीशस्य तद्भवेत् फलम्"तस्य प्रतिप्रसवो यथा "देवता वर्ण्यते यत्र कापि काव्ये कवीश्वरैः। मित्रामित्रविचारो वा न तत्र फलकल्पना। देवतावाचकाः शब्दा ये च भद्रादिवाचकाः। ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा"।

अस्य वाचकशब्दास्तन्त्रोक्ता यथा "हः शिवो गगनं हंसो नागलोकोऽम्बिकापतिः। नकुलीशो जगत्प्राणः प्राणेशः कपिलामलः। परमात्मा तथा जीवः वराकः शान्तिदोऽङ्कुशः। मतोऽभयोऽरुणःस्थाणुः कूटकूपनिवारकाः। लक्ष्मीर्हरिहरः शम्भुः प्राणश्चन्द्रललाटजः। सकोपशारण. स्मूली चैतन्यं पादपूरणम्। महाकालीः परं नादो मेघनादो विमर्दनः। विश्वदुर्गा प्रिया शैवी मेघश्यामः महेश्वरः। दक्षपादः सदा शम्भुः शङ्खाभो वा सामगवल्लभम्" वर्णाभिधानम्। "शुक्रश्चाथ हकारोऽङ्कुशः प्राणः शान्तः शिवो वियत्। अजपा नकुलीशश्च हंसः शून्यञ्च डाकिनी। अनन्तो नकुली जीवः परमात्मा ललाटजः" इति बीजवर्णाभिधानम्। "हकारो नकुलीशोऽपि हंसः प्राणोऽङ्कुशः प्रिये। महेशो नकुली चैव वराको गगनं रविः। लिङ्गं तु नीलमहाशून्यः प्राणश परमेश्वरि!" रुद्रयामले ८पटले।

ह अव्य० हा-ड। १पादपूरणे अमरः २सम्बोधने ३नियोगे ४क्षेपे ५निग्रहे ६निन्दायां मेदि० ७प्रसिद्धौ च। ८शिवे पु० ९जले १०शून्ये १२आकाशे १३रक्ते १४स्वर्गे १५धारणे पु० मेदि०। १६पापहरणे १८चन्द्रे शब्दर० १९सकोपवारणे २०शुष्के च एकाक्षरकोषः।

हंस पुंस्त्री० हस–अच्–पृषो० वर्णागमः। स्वनामख्याते १पक्षिभेदे अमरः स्त्रियां ङीष् २निर्लोभनृपे ३विष्णौ ४सूर्ये ५परमात्मनि "हंसं तनौ सन्निहितं चरन्तम्" नैष०। ६मत्सरे ७यतिभेदे ८मन्त्रभेदे ९देहस्थवायुभेदे १०अश्वभेदे मेदि० ११गुरौ १२पर्वते शब्दर०। १३शिवे अमरः १४रूपान्तरे १५श्वेते हेमच०। १६विशुद्धे अमरः। १७अजपामन्त्ररूपे वर्णे च "हंकारेण बहिर्याति सकारेण विशेत् पुनः। हंसेति सतत मन्त्रं जीवो जपति सर्वदा" इति तन्त्रम्। अजपाशब्दे ८८ पृ० दृश्यम्।

हंसजातस्य भेदाः तन्मांसगुणाश्च यथा "हंसाः सितच्छदाः स्निग्धा मधुरा गुरवो हिमाः। वातघ्ना वृष्यदाश्चापि बलशुक्रकरा मताः" भावप्र० तदण्डगुणाः "हंसडिम्बं परं वल्यं हृद्यं वातनाशनम्। पाके लघुतरं प्रोक्तं सर्वामयविनाशनम्" राजनि०। अस्य दर्शनादेः शुभाशुभत्वं वसन्तराजशाकुने उक्तं यथा "काष्ठासु सर्वास्वपि दर्शनेन हंसस्य शब्दस्य च सर्वसिद्धिः। नाशानि हंसस्य पदप्रयोगे यस्य प्रयान्ति नाशं दुरितानि तस्य। चौरैः समं दर्शनमात्रमस्य निर्धारितोऽयं भयं तृतीये। युद्धं चतुर्थे नृपतिप्रसादः स्यात् पञ्चमे हंसरवे नराणाम्"। यतिभेदहंसलक्षणं परमहंसशब्दे ४२२७ पृ० दृश्यम्। प्राणस्य हंसपदार्थत्वे हेतुरुक्तः पदार्थादर्शे "उच्छ्वासे चैव निश्वासे च हंस इत्यक्षरद्वयम्। तस्मात् प्राणस्तु हंसाख्य आत्माकारेण संस्थितः। नाभेरुच्छ्वासनिश्वासात् हृदयाग्रे व्यवस्थितः"।

हंसक पु० हंस इव कायति कै–क। १पादकटके नूपुरादौ

अमरः । संज्ञायां कन् । २राजहंसे शब्दच० । स्वार्थे क । ३हंसशब्दार्थे "वपुर्विवर्णं पुर्यन्त ततात्रो हंसकः स्मृतः" संगीतदा० उक्ते ४तालभेदे ।

हंसकीलक पु० "नारी पाददयं कृत्वा कान्तस्योरुयुगोपरि । कटिमान्दोलयेत् यत्र बन्धोऽयं हंसकीलकः" स्मरदीपिकोक्ते रतिबन्धभेदे । [भाविन्यां स्त्रियां त्रिका० ।

हंसगद्गदा स्त्री हंसस्येव गद्गदः स्वरो यस्याः । मधुर

हंसगामिनी स्त्री हंस इव मन्दं गच्छति गम–णिनि । १हंसतुल्यमन्दगामिन्यां स्त्रियाम् । हंसेन गच्छति णिनि ङीप् । २ब्रह्माण्याम् । ३हंसेन गन्तरि त्रि० ।

हंसदाहन न० हंस इव श्वेतं सुरभित्वात् दाहनमस्य । अगुरुचन्दने शब्दच० ।

हंसनादिनी स्त्री "गजेन्द्रगमना तन्वी कोकिलालापसंयुता । नितम्बे गुर्विणी या स्यात् सा स्मृता हंसनादिनी" इत्युक्तलक्षणायां नाय्याम् शब्दमाला ।

हंसपदी स्त्री हंसस्येव पादाः मूलान्यस्याः पाद्भावे स्त्रियां ङीपि पद्भावः । गोधापदीलतायाम् राजनि० । [शब्दा०

हंसपाद न० हंसस्य पादः तद्वर्णोऽस्त्यस्य अच् । हिङ्गुले

हंसपादिका स्त्री हंसस्येव पादाः मूलान्यस्य कप् कापि अत इत्वम् । हंसपदीलतायां राजनि० ।

हंसपादी स्त्री हंसस्येव पादा मूलानि सन्त्यस्याः अच् गौरा० ङीष् । हंसपदीलतायां रत्नमा० ।

हंसमाला स्त्री ६त० । पङ्क्त्याकारेण स्थिते १हंससमूहे २कादम्बे हंसे च शब्दच० । [भाषपर्ण्याम् राजनि० ।

हंसमाषा स्त्री हंसा विशुद्धः माषः तदाकारः पर्णेऽस्याः ।

हंसरथ पु० हंसः रथो वाहनं यस्य । १चतुर्मुखे ब्रह्मणि त्रिका० हंसवाहनादयोऽप्यत्र । [उपधातौ राजनि० ।

हंसलोमश न० हंस इव लोमशं लोमयुक्तम् । कासीसे

हंसलोहक न० हंस इव लोहकम् । पित्तले धातौ हेमच०

हंसवती स्त्री हंसतुल्याकारः मूले अस्त्यस्याः मतुप् मस्य वः ङीप् । २हंसपद्याम् जटा० । ३हंसयुक्ते त्रि० ।

हंसवीज न० हंसस्य वीजकम् । हंसाण्डे राजनि० ।

हंसाङ्घ्रि पु० हंसस्याङ्घ्रिरिव लोहितत्वात् । हिङ्गुले ।

हंसारूढ पु० हंसमारूढः आ+रुह–क्त । १ब्रह्मणि २तच्छक्त्यां ब्रह्माण्यां स्त्री हंसाधिरूढ उभयत्र वरुणस्त्री स्त्रा । [हेमच०

हंसाभिख्य न० हंसस्येवाभिख्या शुभ्रत्वात् यस्य । रूप्ये

हंसी स्त्री हंसस्य भार्या ङीप् । १हंसयोषिति शब्दर० हा-।हंसकपादके २छन्दोभेदे च 'भौ गो नागसारा गो वसुभुजगयतिरिह भवति हंसी' छन्दो० । २हंसजातिस्त्रियाम् ।

हंसोदक न० । "नादेयं नवमृद्घटेषु निहितं सम्यक्तमपोऽंशुभिः यामिन्यां निविडमिन्दुकिरणैश्चन्द्रांशुनान्दोलितम् । एलाद्यैः परिवासितं समधुरं पित्तोष्णदाहे विषे मूर्च्छारक्तमदात्ययेषु च हितं शंसन्ति हंसोदकम्" राजनि० उक्ते जलभेदे ।

हंहो अव्य० हंसमव्यक्तं जहाति हा–डो । १सम्बोधने "हंहो चिन्मयचित्तचन्द्रमणयः" चन्द्रालोकः । २दर्पे ३दम्भे ४प्रश्ने च शब्दर० ।

हक्क पु० हक् इत्यव्यक्तं कायति कै–क । गजसमाह्वाने जटा०

हञ्जे(ञ्जा) अव्य० हमित्यव्यक्तं जप्यतेऽत्र जप–ड वा वा । नाट्योक्तौ नटाभिनेयकृते चेटीसम्बोधने अमरः टीकायां स्वत्वार्थे भरतः हादन्तोऽप्यव्ययम् वसन्तराजः ।

हञ्जि पु० हमित्यव्यक्तं जयति जि–डि । क्षुधायां जटा० ।

हञ्जिका स्त्री हञ्जौ क्षुधायां जायते गच्छति के स्वार्थे कर्मणि क । भार्ग्यां भावप्र० क्षुधाहेतुत्वात्तस्यास्तथात्वम् ।

हट दीप्तौ भ्वा० प० अक० सेट् । हटति अहटीत्–अहाटीत्

हटपर्णी न० हटं दीप्तं पिपर्ति पृ० ड० नि । शैवाले शब्दर० ।

हट्ट पु० हट–ट टस्य नेत्वम् । क्रयविक्रयस्थाने (हाट) अमरः । "प्रतिहट्टपथे घरट्टजादिति" नैष० ।

हट्टचौरक पु० हट्टे प्रकाशिते स्थाने एव चौरः स्वार्थे क । (हाटचोर) चौरभेदे शब्दर० ।

हट्टविलासिनी स्त्री हट्टं विलासयति वि+लस–णिच्–णिनि ङीप् । १गन्धद्रव्यभेदे अमरः । २हरिद्रायाम् भावप्र० । [हठति । अहाठीत्–अहठीत् ।

हठ बलात्कारे सक०बलात्कारे प्लुतौ च अक०भ्वा० पर०सेट् ।

हठ पु० हठ–अच् । बलात्कारे अमरः २प्रसह्यार्थे मेदि० ।

हठपर्णी स्त्री हठते प्लवते हठ–अच् हठं प्लवमानं पर्णं यस्याः ङीप् । १शैवाले त्रिका० २कुम्भिकायाम् ।

हठयोग पु० हठेन बलात्कारेण योगः । प्राणायामादिक्रियाभ्यासजे राजयोगं विनैव परमात्मसाक्षात्काररूपे चित्तवृत्तिरोधात्मके योगे ।

योगश्च द्विविधः हठयोगः राजयोगश्च । तत्र हठयोगः क्रियाविशेषसाध्यः हठदीपिकादावुक्तप्रकारः । राजयोगस्तु भावनाविशेषसाध्यः पातञ्जलादावुक्तः । स च पतञ्जलिशब्दे ४२०३पृ० दर्शितः । हठयोगोऽत्र सङ्क्षेपतोऽभिधीयते तत्साधनप्रसंगादिः उभययोगयोरपि परस्परसापेक्षतया

एककार्य्यकरत्वम्। "हठं विना सिध्यति राजयोगो नर्त्ते हठाच्चापि न राजयोगः। तदाभ्यसेत् पूर्वमतश्चनिष्पत्त्यन्तं हठं सद्गुरुतोऽभिलभ्यम्। अभ्यासेन विना हठेन सुचिरं साङ्गस्य योगस्य वा योगी याति न राजयोगपदवीं मध्येऽन्तरायैर्युताम्। हठो वा तदथः सहक् च यमकैर्योगेऽस्ततन्त्रः क्रियायुक्तः सिद्धिमुपैति यास्तण्ठनाम्ना योगसिद्धिर्भवेत्। यो नास्तिकोऽभ्यासविहीन उपायचर्च्चप्रियो वै बहुभाषितो यः। अपथ्यशीलोऽमितभुग्दरिद्रो न योगसिद्धिं लभते कदाचित्। योगस्य बीजं परमं क्रियैव क्रियैव योगस्य फलप्रदात्री। सङ्केतविद्योगगुरोः प्रलब्धा सुधीरतो योगपरस्य नान्यत्। स्यात् सङ्कः सिद्धतीर्थैर्यदि सुकृतवशात् प्राग्भवाभ्यासजोऽयं यद्द्वारा पश्चिमेन त्वरितमिह फलं दृश्यते क्वापि लोके। तत्सर्वं नान्यनाड्या चिरमपि परिगतेनानिलेनेष्यतेऽदस्तस्मादभ्यास एव त्वरितशुभदायोगतस्तीर्थलभ्यात्। अहर्निशकष्टात्मनि यान्तवाहसम्पादनार्थं मनसः प्रयत्नः। अभ्यास एवं चिरकालः सेवितः सत्कारवान् स्याद्दृढभूमिरेव। जितो भवति मारुतोऽभ्यसनभूरिदार्ढ्यान्ततः क्रमात्तु रभिवर्द्धते सततकुम्भकाभ्यासतः। गतं हुतभुजोद्धतामयनमेति पाकं सुखं रसादिकसधातवः स्फुरतु याति देहो बलम्। महाभ्यासबन्धो बलात् सङ्कलस्य तदा जारणं स्याच्च दोषा अशेषाः। विशुष्यन्ति विषमूलरोगादयो वै न्नृणां कोटिजन्मार्जितव्याधयश्च। नाडीविशुद्धिर्हठसिद्धिलक्षणं विना ह्यपायो चिरकुम्भसंस्थितिः। गुरूक्तमार्गेण युक्तं विशेषतो ध्रुतेऽनिले सुषुम्णा कुरुतेऽग्निदीपनम्। प्रत्याहारात् प्राग्जिताऽक्षोऽवशिष्टयोगीन्द्रोऽसौ चालयेत् कुण्डलीं स्वाम्। सिद्धपाणाभ्यासतश्चालिताऽसावत्युद्ध्वैर्द्धिक् ब्रह्मरन्ध्रान्तरे स्यात्" हठस०।

योगदेशभेदास्तत्रैव "सुविषये शुभधार्म्मिकभूपतेर्बहुसुभिक्षवतीतभये शुचौ। सुकृतशालिनि भाविनि येभवेर्मनसि योगविधौ मतिमाश्रयेत्। अतिनिगूढपदं मठकोज्झितं वहिनतापविवर्जितमन्तरा। उपरवद्दृढसुप्रददोज्झितं विगतमन्मथगोव्रतं मठम्। वसुधीकवसुपवसुमयवर्जनमन्त्राभ्यासोज्झितं निमतनर्म्मयं विलम्बतु। वाताभिघातरहितं मतभूतदन्ता योगाङ्गमेवमवकाश्य मठो विधेयः। बहुःस्वापप्रस्तुन्नं इनाम्नमवरमत। एवाभिमाठका पञ्चे लोकस्य हठयोगिनाः" हठप्रदीपिका। "स्वल्पद्वार-

मरन्ध्रगर्त्तविवरं नात्युच्चनीचायतं सम्यग्गोमयसान्द्रलिप्तमयनं निःशेषजन्तूज्झितम्। बाह्ये मण्डपकूपवेदिरुचिरं प्राकारसंवेष्टितं प्रोक्तं योगमठस्य लक्षणमिदं सिद्धैर्हठाभ्यासिभिः" हठप्रदीपिका। "द्वारं स्मृत योगमठस्य हस्तं व्यायामतस्तत्त्वतरसमार्य्यम्। विस्तारतश्चापि रवीन्द्रभूपाङ्कुलं सुरम्यं रमणीयमध्यम्। निवातभूमन्दिरसुभात्दीपाद्यं मारुतदोषशोषि। विशोध्य नाडीमलसङ्कुलं दृग्विकासं हृदि सुस्थिरे च" हठसं०।

तदोचितकालः "एकाह्ने वाऽथ द्विकालं त्रिकालं प्रातर्यामं मध्यरात्रे भजेत। यामे रात्रेः पश्चिमे पूर्व एव पूर्वाह्णे वाह्नश्च मध्ये प्रदोषे" हठस०।

निषिद्धावस्थादि "न भीते नात्युष्णे श्रमविकलदेहे न हि तथा क्षुधायामाध्माने विकलवपुषाऽचेतमसा वा। अजीर्णेऽन्ते हारे न च विहितवान्तावतिसृते प्रभुक्तौ व्याकुलहृदि न युक्तोऽनिलधृतिः। चिन्ताकुलो भूलफलप्रदूषितोऽभ्यासं न योगस्य कदापि कुर्य्यात्। कार्य्यातिसक्तो रतिकार्य्यतत्परो नानेकरोगाधियुतो जनान्ते। रथ्यान्तरे सिन्धुपरिष्टान्तरे चिरन्तने जीर्णचैत्यदेशे। योगं विदध्यान्न कदापि साधकः सुदोर्मनस्कादि भवेत कृतेऽस्य। अनादृत्य यः साधको दैवदत्तो प्रयुञ्जीत योगं हि दोषास्तु तस्य। प्रकुप्यन्ति देहेऽन्तराया इवोग्रे जडत्व मूकत्वबाधिर्य्यतुल्याः। स्मृतिक्षया जड़ता च निमूकता बधिरतान्धमहादहनज्वराः। कुविषयेऽसमये परियुञ्जतो वपुषि योगमयी नव दोषकाः" हठस०।

वर्ज्यमानदोषाः "कामोभय सप्रमणीव लोभः प्राग्योगदोषानतिकोपयुक्तान्। विहाय युक्तः सुसमाहितात्मा युञ्जीत योगं मनसा स्थिरेण" हठस०।

तद्दोषजयोपायाः "निद्रां सत्त्वनिषेवणेन दलयेद्भ्रान्त्या च मिश्रोदरे रक्षेद् दोषरुषो दया स्मृतिदृशौ चित्तेन चेतोगिरौ। रक्षेत् सन्निधिना प्रमादतस्त्रासं तदंशं धिया बहुलस्य जयेत् काममिति वै सो योगदोषान् जयेत्" हठसं०।

वर्ज्यसेव्ये "अत्याहारः प्रयासश्च प्रजल्पो नियमाग्रहः। जनसङ्गश्च लौल्यं च षड्भिर्योगो विनश्यति। "उत्साहात् साहसाद्धैर्य्यात् तत्त्वज्ञानाश्च निश्चयात्। जनसङ्गपरित्यागात् षड्भिर्योगः प्रसिध्यति। अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं क्षमा धृतिः। दयार्जवं मिताहारः शौचं चैव यमा दश। तपः सन्तोष आस्तिक्यं दानमीश्वरपूज-

नम्। सिद्धान्तश्रवणञ्चैव ह्रीर्मतिश्च तपोहुतम्" हठप्र०।

आहारः "आहारशुद्धौ सत्त्वशुद्धिरिति श्रुतेः मिताहारस्य योगाङ्गत्वात् योगाङ्गाहारो यथा "न जीवनं देहभृतश्च जन्मिनामन्नेऽन्नपानं न सर्वैर्विना वनम्। योगे तद्वै सर्वाजिद्ववपटं भक्ताज्यदुग्धं मितमत्र सेवयेत्। न कन्दमूलानि गुरूणि शीतोष्णान्यत्र पानानि बलप्रदानि। सत्त्वप्रदायुर्बलवह्निदानि पूतानि च तानि हितानि योगे। हठप्रदीपकादिभिः सुपथ्यवर्ग ईरितः। सुनाडिशोधनादतु भजेतं पुरा शुभम्" हठम०। स च वर्गो यथा "गोधूमशालियवषाष्टिकशोभनान्नं क्षीराज्यखण्डनवनीतसितामधूनि। शुण्ठीपटोलफलकानि च पञ्चशाकं मुद्गादि चाल्पमुदकं च यमीन्द्रपथ्यम्। क्षीरपर्णी च जीवन्ती मत्स्याक्षी च पुनर्नवा। मेघनादो च पञ्चैते शाकवर्गः प्रकीर्त्तितः। मिष्टं सुमधुरं स्निग्धं पथ्यं धातुप्रपोषणम्। मनोऽभिलषितं योग्यं योगी भोजनमाचरेत्" सुखं घृतं क्षीरमिति द्वयं स्यात् नाड़ीविशुद्धावथ मूलबन्धे। ओजो बलं त्वग्निमतीव धत्ते मत्त्व स्वतोऽन्तःस्थितनाड़िशुद्धिः" हठस०। "कन्दं च शाकादिकमूलभक्ष्यं विहाय दध्यन्नमपाय तिक्तम्। ततो दलक्षीरमपूरितोदरं यमी च गोधूमविकारमाचरेत्" हठस०। अन्यान्तरे "पीत्वा क्षीरं पयोमिश्रं योगी बलमवाप्नुयात्। सितांशयुक् च पक्वं च हितं क्षीरं न केवलम्। गोघृते च हविष्यान्नं भुक्त्वाभ्यासं समाचरेत्। एवं वाढं भजेदन्नादमेऽपि मलशोधनम्।

हठभक्ष्यवर्गः "सक्तुश्च देवधुवरीजयूषः क्वाथो भृगं सुकथिता च·न्द्रा। क्षीरोषधाद्याऽथवा हितात्मा हविष्यभक्तं यतिनिस्वपथ्यम्। आवश्यके सैन्धवमल्पतक्रं मटार्द्रकं केऽपि वदन्ति भक्षे। आम्राजलक्तुः ससिताज्यदुग्धं पयोऽथ वा केवलमग्निपक्वम्" हठस०।

वर्ज्याहारः "स्निग्धं भृगं वाऽभृगमेव रूक्षं क्षीरमभूताच्च मिष्टोदस्त्रजेद्यः। दध्ना च तक्रेण हलाकटत्वमन्नं च भक्ष्याम्यभपथ्यमुक्तम्।। पुंस्त्वापहाः स्युरपका अपथ्या सादाश्च वल्ला कफपित्तदोषाः। सितादियोगः कथितस्तु नेषां यत्र विकारो हि च कथितेन। अन्यत्र मिष्टाशनतो न योगः स्यात् साधकस्याल्पबलस्य नूनम्। योगानुगुण्येन ततोऽस्त्वमग्निः प्रतोषिताऽत्यन्तरा न भूरिः" हठस० "कट्वम्लतीक्ष्णलवणोष्णहरीतशाकं सौवीरतैलतिलसर्षपमद्यमत्स्यम्। आजादिमांसदधितक्रकुलत्थकोलपिण्याकहिङ्गुलशुनाद्यमपथ्यमाहुः। भोजनमहितं विद्यात् पुनरुष्णीकृतं तथा रूक्षम्। अतिलवणादिकयुक्तं कदशनशाकोत्कटं वर्ज्यम्" हठप्र०।

वर्ज्यानि "वर्जयेद्दुर्जनप्रीतिं वह्निस्त्रीपथसेवनम्। प्रातःस्नानोपवासादिकायक्लेशादिकं तथा" हठप्र०।

"भद्रां गभीरपानं सततरतिमहाहारमपानिवृत्त्यवेद्या स्त्रालोकः सुगीतं सततमतिकलं हेमरूप्याम्बराणि। नृत्यं राज्ये च सङ्गः कुसुममलयजे सम्पदः ज्योतिषाद्यं ताम्बूलं चेति सर्वं विषयसुखमथासुरामकं वर्ज्यमेतत्। नित्यस्नानाग्नी व्रतं शौचशक्तिध्यानं ध्येयं मन्त्रजाप्यं च दानम्। गेहारामाद्यास्तथा कल्पना वै धर्मा एते योगविघ्नः प्रदिष्टाः" हठस०।

आहारमानम् "स्थाल्याजिसूक्ष्मादिकमुष्टिकद्वयं प्राक् प्राणपूर्णोदरकेऽशनस्य। ह्रासो विधेयो ह्यतु साधकेन दुग्धाद्यभावे क्रमकुम्भवृद्ध्या" हठस०। अत्र श्वासक्रमेण स्वल्पाहारः प्राणायामे विधेयः। यथोक्तं सनातनसिद्धान्ते "अभावे शालिदुग्धादिभोजनं मुष्टिकद्वयम्। ततो ह्रासः शनैः कुर्यात् प्राणे पूर्णे तथोदरे" अस्यार्थः अभावे घृतदुग्धयोरभावे मितभोजने कुम्भकवृद्धिक्रमानुरूपः मन्दमन्दमशनह्रासः उचितः। न हि प्रथममभ्यासे यथा यथा कुम्भकवृद्धिर्भवति तथा तथा कुम्भकपूर्णोदरत्वात् कुम्भजाग्निना क्रमजितवायुवेगतया जिताग्निर्भवति तथा तथाऽशनह्रासः। साधकस्य योगानुसारेणाङ्कुरः आरोग्यशीलसुखसाहसलौल्यप्रभृतिकरश्च भवति न प्रथमम्" हठस०। अन्यत्र "आहारं क्षपयेद्योगी कृष्णपक्षे कलाक्रमात्। शुक्लपक्षे यथा चन्द्रस्तथा कुम्भोऽस्य वर्द्धते"। योगसारसमुच्चये। "ततो येन केनाप्युपायेन पितं सदाभ्यासिना पालनीयं प्रयत्नात्। विशुद्धो हि यश्चेतनन्द्योत एषः शुभो ज्ञानवर्द्धस्वरूपः प्रकाशी। सूर्यप्रवेशे पवनेऽशनं सच्चन्द्रप्रवेशे शयनाम्बुपानम्। इत्यादि चान्यत् सुधिया विचार्य्य पथ्यानि योगाभ्यसने हितानि"।

योगनिषेधावस्थादि "मलाः सङ्गाः पूतिगन्धाश्च किञ्चित् सबक् चोदरे गौरवं चालसत्वम्। यदैतद्भवेद्वै विपक्षे साधकेन तदा प्राणरोधोऽपि तस्मिन्न कार्य्यः" हठस०।

योगारम्भकालः "वसन्तेताः सान्द्रमा विशुष्का अपश्रवाः पक्षमन्नादयोऽपि। अभ्यासिनां प्राणनिरोध एव तदा विधेयः शुभयोगसिद्धेः" हठस०।

नित्यकर्म व्याकर्त्तव्ये। "न ताडयेन्नो करणं निपीड़येत् भृशं मिताशी मितनिद्रमोक्तिः। प्रातःशिरःस्नानमथो न रोचयेदारुढ़योगोऽपि कदापि योगी। आवश्यके तुष्णजलैर्विधेयं स्नानं न कार्य्यं हिमवारिणा तत्। स्नानं प्रगेऽनिष्टमिदन्तु कण्ठस्नानं स्मृतं सूरिभिः मध्यमेऽह्नि। व्यायाममातपसेवं भृशशैत्यदेशगमनमनुपानमतिविषमं चष्टैव। निद्रां दिवा निशि च जागरणं च चिन्तां क्लेशावहं यदखिलं तदिहापि जह्यात्। यत् स्वस्यान्यस्य दुःखावहमपि न भजेत् तद्गिरा मानसेन कायेनापीषदन्ने नेह न हि वनितायाश्च सेवां विदध्यात्। हिंसां द्वेषं तथाकृतिमशनमति प्राणिपीड़ां वियोगं भिन्नाभिन्नत्वबुद्धिं ह्यनशनमसतां सङ्गतिं संत्यजेच्च। व्यायामतश्चास्य ततोऽङ्गमर्दनं कुर्य्याद्द्वरिष्ठोत्तरसाधकस्य। स्यादङ्गमर्दनेन तथा स्फुटत्वं वायोर्जयो देहलघोः समाप्तिः। पानाशने कर्म सुखावहं यद्दुयोगस्य विघ्नो न हि तेन किञ्चित्। देयं तदेकं परमार्य्यवर्य्यैर्हेयं मनःक्लेशकरं कदाचित्। अभ्यासिना भूमिगृहे मठे वा न तैलदीपः प्रविधेय ईक्षणे। यस्मिन् ज्वलत्यत्र स सूक्ष्मतो द्राक् प्राणो विमार्गं द्रवतोऽयमु त्यजेत्"। अतो योगमठे घृतदीप एवोपयुज्यते" हठस०। "उत्थाय ब्राह्मकाले रहसि च परितः साधकः प्राणरोधस्याभ्यासं प्रातरर्द्धस्मितघटिकमथो पीठमुद्रादि कुर्य्यात्। व्यायामं चानु सार्द्धप्रहरयुगलकान्तं ततः पथ्यमल्पं भुञ्जीयादन्ततोऽस्मात् स्ववचनविदाद्युज्झितं चाज्यदुग्धम्। प्राणायाममथाचरेत् प्रथमके याम निशः साधको यामैकं शयनं भजेदनुततो प्राणावरोधं श्रयेत्। शौचाद्यं घटशोधनादिकमथो यामे निशायां श्रयेत्तुर्य्ये नाडिविशोधनं त्वतिदृढोऽभ्यासस्तु प्राणसाधकः। मध्ये मध्ये चित्तविश्रान्तिहेतोः साम्यं यत्नत संभजेदासनस्थः। अभ्यासान्तेऽभ्यासिना स्वल्पमल्पं संभालप्यं भूरिवारं सुरुच्यम्। मध्ये मध्ये चारणं मेरुचालनमभ्यासादौ संभजेताविशङ्कः। सर्वाङ्गीणा नाडिका दोषपूर्णा याभ्यां स्फुटाः सुमन्दमध्यमास्ताः" हठस०। (आभ्यां चारणमेरुचालनाभ्यां दोषा दुष्टास्तरसमलाः)

गजकरणी "हृद्‌ त्राटकाभ्यामतः कूर्मवायोर्जये मूलबन्धे। चापानसिद्धिः। जये स्यादुदानस्य जालन्धरेण समानस्य चालेन च प्राणवायोः। अतो गजकरण्येषा समानोदानयोर्जयम्। पक्वाशयगताजीर्णनाहाद्यखिलशोधिनी। कोष्ठघ्नकण्ठसंरुद्धामांपित्तकफबाधनी। आसं बलं हृतप्रसादं वह्निदीप्तं महद्यशम्। धत्ते लाघवमङ्गेषु प्राणस्य सुखवाहिताम्। हृत्कण्ठकोष्ठसंशुद्धा शूलाजीर्णादिरोगहृत्। छन्ति गजकरण्येषा नाभेरूर्ध्वमधोगतान्। पक्वापक्वान् रोगहेतून् बहिः प्रक्षाल्य पातयेत्। कोष्ठगुदादागलान्तं गलान्तं क्षालयेत् भृशम्। याभ्यां विशुद्धकोष्ठो यः सप्राणापानयोर्गतिम्। सूक्ष्मां देहसञ्चरितां लूतिकागतिवत्सुधीः वेत्तीपिकासमां चित्ते कोष्ठान्तः परिसर्पतोः। नाड़ीसञ्चारविज्ञानमनयोः सकलं यथा। जानाति साधकः शुद्धो नाडीसंस्थानसंविदम्। (एवं धौत्यामपि नाव्यूर्गमङ्गं ज्ञेयम्) "महाचक्रमादौ विरुध्यात् सम्यग् भजेद्बन्धमुद्रामथो खेचरीं च। ततो वारिपानं प्रकुर्य्यात् सुधांशोः सुधां साधयेयां प्रयागे सुनिष्ठ। विना ग्रन्थिभेदं विना चक्रभेदं विना ब्रह्मरन्ध्रप्रवेशं जितस्य। खगस्यात्मना कायसिद्धिं विनास्ते न सिद्धिर्न योगो न शून्यत्वलाभः" हठस०।

आसनफलम् "संप्राप्तशीलभावो यमनियमाभ्यामयं योगः। प्राणायामासनकैरङ्कुरवान् साधकस्य भवेत्। स्यादासने स्थैर्य्यमरोगिताङ्गे सुलाघवं दुःखसुखोष्णशीतैः। द्वन्द्वैर्जितोऽसिद्धाभिभूयते नाऽनन्ते समापत्तिरतो यमाभ्याम्। साधनत्रयमिदं महज्जये प्रोदितं प्रमितजन्धिरिष्टदा। शक्तिचालनमथ साधनद्वयम् नाभिवायुघटितनाडिचालनम्"। नियमैश्च यमैर्विषाणि रोगाः प्रविनश्यन्ति सुसंयतस्य पीठैः। चिरकालपदान्तरा असाध्याः यमिनः साधुजितासनस्य पुंसः" हठस०। (यमाभ्यां यमनियमाभ्याम्)

कुक्कुटासनम् "संस्थाप्य पद्मासनमत्र सम्यक् करौ तु जानूरुयुगान्तरे दृढम्। निवेश्य संस्थाप्य तले धरायां व्योमस्थ उच्चं स्थिति कुक्कुटासनम्" हठस०।

उत्तानकूर्मकम् "कुक्कुटासनबन्धस्थो दोर्भ्यां संबध्य कन्धरे। भवेत् कूर्मवदुत्तान एतदुत्तानकूर्मकम्" हठप्र०।

धनुरासनम् "पादाङ्गुष्ठौ पाणियुग्मेन धृत्वा कर्णाबध्याकर्षयेत् स्वस्य यत्नात्। कुर्य्याच्चापाकर्षणं प्रोक्तमेतद्धाऽऽलस्यम् टोर्माजसाड़िशुद्धै" हठस०।

मत्स्येन्द्रासनम् "वामोरुमूलार्पितदक्षपादं जान्वोर्वहिर्वेष्टितवामदोष्णा। प्रगृह्य तिष्ठेत परिवर्त्तिताङ्गो मत्स्येन्द्रनाम्नोदितमासनं स्यात्। मत्स्येन्द्रपीठे जठरं प्रदीप्तं प्रचण्डरुग्मण्डलखण्डनास्त्र। अभ्यासतः कुण्डलिनीप्रबोधं दत्ते स्थिरत्वं हि ददाति पुंसाम्" हठस०।

— पश्चिमतानासनम् "प्रसार्य्य पादौ भुवि दण्डरूपौ दोर्भ्यां च पादाग्रद्वितयं गृहीत्वा । जानूपरि न्यस्तललाटदेशोऽभ्यसेदिदं पश्चिमतानमाहुः । इति पश्चिमतानमासनाग्र्यं पवनं पश्चिमवाहिनं करोति । उदयं जठरानलस्य कुर्य्यात् उदरे कार्श्यमरोगतां च पुंसाम्" हठप्र० ।

मयूरासनम् "धरामवष्टभ्य करद्वयेन तत्कूर्परे स्थापितनाभिपार्श्वः । उच्चासने दण्डवदुत्थितः स्यात् मायूरमेतत् प्रवदन्ति पीठम् । हरति सकलरोगानाशु गुल्मोदरादीनभिभवति च दोषानासनं वै मयूरम् । बहुकदशनभुक्तं भस्म कुर्य्यादशेषं जनयति जठराग्निं जारयेत् कालकूटम्" हठप्र० ।

शवासनम् "उत्तानशववद्भूमौ शयनं तु शवासनम् । शवासनं श्रान्तिहरं चित्तविश्रान्तिकारकम्" हठप्र० ।

सिंहासनम् "गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् । दक्षिणे सव्यगुल्फं तु दक्षगुल्फं तु सव्यके । हस्तौ तु जान्वोः संस्थाप्य स्वाङ्गुलीः संप्रसार्य्य च । व्यात्तवक्त्रो निरीक्षेत नासाग्रे न्यस्तलोचनः । सिंहासनं भवेदेतत् पूजितं योगिभिः सदा । बन्धत्रयस्य सन्धानं कुरुते चासनोत्तमम्" हठप्र० ।

भद्रासनम् आसनशब्दे ८८६पृ० द्रष्टव्यम् तत्फलम् "भद्रं कफक्लेशसमीरहारि" हठस० ।

कूर्मासनम् "गुल्फद्वयेनापरिपीड्य पायुं जानुद्वयं भूमितले निधाय । कूर्मासनं स्यादिति योगिवर्य्यैरशेषवातामयहारि चोक्तम्" हठस० ।

मत्स्यासनम् "स्थित्वा समं परविशे नतवक्रगोवीरुन्नतोऽधःस्वकरकूर्परको विधाय । वक्षोऽञ्चितवत्तुन्नतदुत्तमाङ्गमथ कल्पयेदुपरि प्रकामम् । उत्तान एव चिबुकं हृदयेऽप्य तिष्ठन् कुर्वन् समीरणनिरोधनमेकचित्तः । काये दृढोदर जरेति च भूरिदाहोऽधोवायुनिःसृतिहरेति तदा क्रमेण । संशोधनीयमिदमासनमार्य्यधीभिर्मन्दं विनाशयति घोरतरज्वरार्त्तिम् । सन्दीपने हुतवहस्य च बल्करोति सन्तं प्रभुक्तपरिपाचनमासनं स्यात्" हठस० ।

वृश्चिकासनम् "धरामवष्टभ्य करद्वयेनोरः पार्श्वयोः स्थापितस्वकूर्परः । दृश्यैव पुच्छप्रतिमाङ्घ्रिपार्ष्णी कृत्वाऽस्य शीर्षे चिबुकं विधाय । यमेति सन्निर्भत साधकस्तत् विषापह्नं वृश्चिकसंज्ञमासनम्" हठस० ।

मूलबन्धासनम् "वामाङ्घ्रिणापार्ष्णि च तद्दक्षकैर्गुदाननान्तरं भूरि निपीड्य साधकः । अथा विधायाग्रपदं स्वगुल्फोऽधो दक्षपादं खलु वामजानुनि । विन्यस्य बद्ध्वा गलकेऽनुजानुन्नरं समं स्थापितसर्वगात्रः । महाप्रयत्नस्थगिताशु रन्ध्रचेता भ्रूमध्यदृग् दीर्घगम्भृतोरुः । इदं मूलबन्धासनं योगसिद्धिप्रदं दीपनं जाठराग्नेरतीव । भृशं शक्तिसन्दीपनं मूत्रवीर्य्यादिदोषप्रहग्रहामयानां विनाशि । समवाहनमाशु मारुतस्य विदधात्यूर्द्ध्वगतिं जयं च सिद्धेः । विहिते किल विष्टरेऽत्र पायौ महती वह्निशिखा सदोपयाति । भुजगी परिजागराद्यवस्था विबुधेष्वूर्द्ध्वगतिस्तथापानवायोः" हठस० ।

गोमुखासनम् "सव्ये कृत्वा दक्षगुल्फं तु पृष्ठे पार्श्वे यत्र स्थाप्यते सन्निवेश्य । दत्त्वा वामं गुल्फकं पृष्ठपार्श्वे तत् पीठं स्यात् गोमुखं गोमुखाभम् । अपानसिद्धिं विदधाति मूलबन्धाग्निहन्त्येव भगन्दरार्शः । धौत्याश्च नौलेर्वितनोति सिद्धिं सुसाधकस्यासनमेतदग्र्यम्" हठस० ।

कुब्जिकासनम् "किञ्चित् तिर्य्यक् सव्यमास्थाय जानुमूर्द्धं कृत्वा संपरावर्त्तितेन । कृत्वा मूले पादमाधाय तिष्ठेदेतत् पीठं कुब्जिकं वक्रकारि" हठस० ।

पार्श्वोपधानासनम् "समानभूमौ शयनं विधायोत्तानौ करौ पार्श्वयुगान्तराले । पृष्ठे मिथः साधु निबध्य यत्र पार्श्वोपधानासनमुक्तमुत्तमैः" हठस० ।

उत्कटासनम् "पुनः स्फिचोः स्थीयत ऊर्द्ध्वजानुर्यत्रासने पादतलद्वयोपरि । स्फिग्भ्यां मनागुत्कटकं धरित्रीमस्पृश्य पीठं स्फुटमुत्कटाख्यम्" हठस० ।

पद्मासनम् "वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम् । अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकयेदेतद्व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते" हठप्र० ।

प्राणायामाङ्गपद्मासनम् "उत्तानौ चरणौ विधाय विधिवत् सक्थ्योः स्थितौ योगिरुत्तानौ स्वकरौ विधाय च मिथो अङ्के समाकृष्य च । नासाग्रे दृशमाविधाय चिबुकं चोत्तब्ध वक्षस्यतं मूले साधु सरक्ष्ययाऽभिकलयेदेतत् सरोजस्य सत् । अपानमुत्थाप्य शनैः स्वशक्तितः प्राणं समाकृष्य च कुम्भकं चरेत् । धृत्वा यथ शक्त्यनुरेचयेत् क्रमैर्वायुं गदघ्नं तु तमब्जासनम् । समस्तदाहज्वरदाहमोहपित्तामयघ्नं सकलं सुखावहम् । प्राणः समोऽभिवहति चलेन मुनेरनुष्ठानविधौ सरोरुहे" हठस० ।

करसंपुटपद्मासनम् "कृत्वा संपुटितौ करौ दृढतरं बद्ध्वा तु पद्मासनम् गाढं वक्षसि संविधाय चिबुकं ध्यानञ्च

तद्भेदयेत् । वारंवारमपानमूर्द्ध्वमनिलं प्रोत्सारयन् पूरयन् मुञ्चन् प्राणमुपैति बोधमतुलं शक्तिप्रभावादतः" हठयोगः ।

सिद्धासनम् "योनिस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं विन्यसेन्मेढ्रे पादमथैकमेव हृदये धृत्वा समं विग्रहम् । स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्येद्भ्रुवोरन्तरं चैतन्मोक्षकपाटभेदजनकं सिद्धासनं प्रोच्यते" पवनयोगसं० ।

वीरासनभद्रासनस्वस्तिकासनानि आसनशब्दे ८८६ पृ० द्रष्टव्यानि

सुखासनम् "येन केन प्रकारेण सुखं स्थैर्यं च जायते । तत् सुखासनमित्युक्तमशक्तस्तत् समाश्रयेत्" सूतसंहिता । इदमेव "स्थिरसुखमासनमिति" पात० सूत्रितम् ।

षट्कर्मक्रमः "अथासने दृढो योगी वशी हितमिताशनः । गुरूपदेशमार्गेण प्राणायामं समभ्यसेत् । यावद्वायुः स्थितो देहे तावज्जीवितमुच्यते । मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत् । चले वाते चलं चित्तं निश्चले निश्चलं तथा । योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत् । मलाकुलासु नाडीषु मारुतो नैव मध्यगः । कथं स्यादुन्मनीभावः कार्यसिद्धिः कथं भवेत् । शुद्धिमेति यदा सर्वं नाडीचक्रमलाकुलम् । तदैव जायते योगी प्राणसंग्रहणे क्षमः" इत्युपक्रमे "यदा तु नाडीशुद्धिः स्यात्तदा चिह्नानि बाह्यतः । कायस्य कृशता कान्तिस्तथा जायेत निश्चितम् । यथेष्टं धारणं वायोरनलस्य च दीपनम् । नादाभिव्यक्तिरारोग्यं जायते नाडिशोधनात् । मेदश्लेष्मादिकाधिक्ये षट्कर्माणि समाचरेत् । अन्यथा नाचरेत्तानि दोषाणां समभावतः । धौती वस्ती तथा नेती त्राटकं नौलिकं तथा । कपालभाती चैतानि षट्कर्माणि प्रचक्षते । कर्मषट्कमिदं गोप्यं घटशोधनकारकम् । विचित्रगुणसन्धायि पूज्यते योगिपुङ्गवैः" हठप्र० ।

धौती "चतुरङ्गुलविस्तारं हस्तपञ्चदशायतम् । गुरूपदिष्टमार्गेण सिक्तं वस्त्रं शनैर्ग्रसेत् । पुनः प्रत्याहरेच्चैतदुदितं धौतिकर्म तत् । कासश्वासप्लीहकुष्ठं कफरोगाश्च विंशतिः । धौतीकर्मप्रभावेण शुध्यन्त्येव न संशयः" हठप्र० "त्र्यंशद्वोःप्रमितं च पञ्चदशदोर्मानं च विस्तारतस्त्र्यर्ध-रङ्गुलविस्तृतं सुमृदुलं सिक्तं सुवस्त्रं ततः । स्थित्वा गोमुखविष्टरे सुगमकैरेतत् ग्रसेत् साधको मन्दं चानु निनिर्हरेत् कफगदग्रासेषु धौती हिता" हठस० ।

वस्ती "नाभिदघ्ने जले पायुन्यस्तनालोत्कटासनः । आधारात् कुञ्चनं कुर्यात् क्षालनं वस्तिकर्म तत् । गुल्मप्लीहोदरं चापि वातपित्तकफोद्भवम् । वस्तिकर्मप्रभावेण क्षीयन्ते सकलामयाः । धात्विन्द्रियान्तःकरणप्रसादं दद्याच्च कान्तिं दहनप्रदीप्तिम् । अशेषदोषोपचयं निहन्यात् अभ्यस्यमानं जलवस्तिकर्म" हठप्र० ।

"जलं पायुविन्यस्तनालस्य मार्गात् जले नाभिदघ्ने समाकृष्य चाम्बुम् । चलन्नुत्कटे विष्टरेऽपानकोषात् जलं याति तन्देऽम्बुना वस्तिकर्म" (नालं वंशादिसूक्ष्मरन्ध्रनालिका) । उत्कटासनविष्टरे परिगतः प्रोत्थाय सुस्यगतं पायुद्वारविकाशकोषविधिना वायुं समाकर्षयेत् । आपूर्य हृतिवत् तुन्दमभितो नौल्या प्रचाल्यानिलं कृत्वाऽधोमलसं सृजेत् सततं योगी बहिःकोषगम् । अत्र वस्तिकर्मणि गोमुखमेव प्रशस्तमनुभूतमिति सङ्केतः । अत्र सर्वकोष्ठमलानां कोष्ठाक्षालनपूर्वकत्वेन बहिःकृतिर्यथा भवति । तदुपायसङ्केतेन वस्तिकर्म कर्त्तव्यम् । पूर्वोक्तविधिना गोमुखे चोत्कटासने स्थित्वाऽपानद्वारोर्ध्वमन्तर्जलं किञ्चिदुद्गृह्णीत् । तदूर्ध्वं स्वस्तिकासने स्थित्वा समाकृष्य नाभेरुपरि हृदयान्तं कर्त्तव्यम् । पुनरुत्कटासनेन जलं गृहीत्वा प्राग्वन्नाभौ विधेयं स्वस्तिकेन स्थैर्यं विधेयम् । एवं वस्तौ स्वस्तिकेन चैवं सर्वं कोष्ठं जलपूर्णं कृत्वाऽभितः कोष्ठं विभ्राम्यान्त्रसन्धिगतमन्नादिकोनपक्वापक्वसङ्ग्रथनमलादि गृहीत्वा पश्चाद्बहिस्त्यागं कुर्यात् क्रमेण न त्वरयेत् । तदाऽनेन विधिना कोष्ठः प्रक्षालितसकलमलोऽपास्तदोषो भवति" हठस० ।

नेती "सूत्रं वितस्ति सुस्निग्धं नासानाले प्रवेशयेत् । मुखान्निर्गमयेत् सा हि नेती सिद्धैर्निगद्यते । कपालशोधनी चैव दिव्यदृष्टिप्रदायिनी । जत्रूर्द्ध्वजातरोगौघं नेतिराशु निहन्ति च" हठप्र० ।

"आखुपुच्छसदृशं सुनिर्मलं षड्वितस्तिमितसूत्रमुत्तमम् । संप्रवेश्य लघु नासिकाबिले वक्त्रतो रहसि निर्गमयेच्च तत् । नेतीति कर्मोदितमेतदार्यैर्जत्रूर्ध्वजाताखिलरोगहारि । कपालसंशोधनकारि कार्यं दिवाकरं दिव्यदृशश्च धत्ते" हठस० ।

त्राटकम् "निरीक्षेत् निश्चलदृशा सूक्ष्मलक्ष्यं समाहितः । अश्रुसंपातपर्य्यन्तमाचार्यैस्त्राटकं स्मृतम् । मोचनं नेत्ररोगाणां तन्द्रादीनां कपाटकम् । यत्नतस्त्राटकं गोप्यं यथा हाटकपेटकम्" हठप्र० । अस्य फलान्तरं हठस० उक्तं

यथा "सिद्धेऽस्मिन् नासिकाग्रे चपलहततनुरुक्कगनात् साधकः स्याद् भ्रूमध्यं च क्रमेणाक्रमयति सततभ्यासतः खेचरीत्वम्। दिव्यां दृष्टिञ्च धत्ते जनयति यमिनो योगसिद्धिर्विशिष्टां मूर्द्धस्थाम्भोरुहे वै पवनहृदययोरक्रमेणानुलोम्यम्" प्रकारान्तरं यथा "प्रातः समुत्थाय सुखासने गतः समभ्यसेत् त्राटकमेव एव। प्रसार्य्य दृष्टिं ननु लक्ष्यमीक्षेत समुज्ज्वलं तत् रहसीतचित्तः। अभ्यासतोऽस्मात् स्थिरतां समन्ततः समीरनेत्रे इति लक्ष्यदीक्षा। विधाय किञ्चित् समये निमीलने संहृत्य पश्चात् भ्रुकुटिं प्रसार्य्य। पश्येत् परोनिमममेकधीः खं पश्चात्तु यावत् पुरतोऽर्कबिम्बम्। समभ्यसेत्तावदिमां क्रियां चेत् सुनिर्मला दृष्टिरनेन वै स्यात्" हठस०।

नौलीकर्म तच्च द्विविधं बाह्यमान्तरं च तत्र बाह्यं यथा "सव्यापसव्यं मधु नालिकाभिर्व्यावर्त्त्य वेगैः कतटौ युगः कौ। कृत्वा भ्रमं मध्यमतः आनतांसस्तुन्दस्य नालौस्थितिर्नौलीहि तं" हठम०। "अमन्दावर्त्तवेगेन तुन्दं सव्यापसव्यतः। नतांसो भ्रामयेदेष नौलीयोगः प्रचक्ष्यते। मन्दाग्निसन्दीपनपाचनाग्निसन्धानमानन्दकरी सदैव। अशेषदोषामयशोषणी च हठक्रियाऽसौ जयतीह नौली" हठप्र०। आभ्यन्तरमुक्तं हठरत्नावल्यां यथा "इडयावर्त्त्य वेगेन तथा पिङ्गलया पुनः। उभाभ्यां भ्रामयेदेषा ह्यान्तरा कीर्त्तिता मया"।

कपालभाती "लोहकारस्य भस्त्रावत् कुर्य्यात् सव्यापसव्यतः। कपालभाती विख्याता कफामयविशोधिनी" हठप्र०। "भस्त्रोहकारधमनीश्च संपूर्य्यैकं नासिकापुटमरं सुविरेचयस्व। योगी द्वितीयमिति भस्त्रिकयेव शश्वत् सव्यापसव्यपरिचालनमत्र कार्य्यम्" हठस०।

चक्रीकर्म "सुस्निग्धं मसृणेन वा सुदृविधा मध्याङ्गुलीयुग्मकं सार्द्रं लूनखं प्रसार्य्य शनकैः वायुं हृदन्ते क्रियात्। ऊर्द्ध्वं सर्वमिहाभितोऽस्य नलकाद्यं भ्रामयेदन्तरे यावत् पायुविकाश उद्भवति संप्रोक्तेति चक्री बुधैः। कृत्वेति चक्रीविधिमादरेण प्रक्षालयेत्तद्द्वयं ततो दृढम्। आमादिदोषान्तमिति प्रकुर्य्यात् यथा गुदास्यं श्लथविश्लथं भवेत्। तथाङ्गुलीनां त्रिचतुःक्रमेण संस्थापयेत् पायुविकाशनार्थं। नलान्तगाढ़ाहतिदुर्बलान्तः स्यान्मूलचक्रस्य विकाशनं च" हठस०। "पायुवक्त्रं प्रसार्य्यान्तरङ्गुल्या भ्रामयेत् भ्रमम्। यावद् गुदविकाशः स्यात् चक्रीकर्म निगद्यते। शूलगुल्मप्लीहरोगो नश्यत्यत्र न संशयः। मलशुद्धिर्दीपनं च जायते चक्रकर्म्मणि" हठरत्नावली।

गिलिकर्म "षड्घण्टिकामस्तकयोः पिधानमथो सबली कथितोर्ध्वजिह्वा। तदग्रकं तर्जनीमध्यमाभ्यां संमर्दयेद् सो सुखदाकलय। गिलीति कर्मोदितमार्य्यवर्य्यैः सन्धिप्रलीनामकफैकहारि" हठस०।

गजकरणीकर्म "उदरगतपदार्थानुद्वमेदेव नित्यं पवनगमनमार्गात्कण्ठनालप्रवेशात्। क्रमपरिचयवश्यो वायुमार्गो भवेद्धै गजकरणिमतीव प्राहुरार्य्या हठज्ञाः। (अपानवायोरूर्द्ध्वकरणात्। पवनोर्द्ध्वकर्षणेन वा। पवनाकर्षणेन यद्भुक्तं वस्तु तदुद्वमेत्। कण्ठनालप्रवेशात्। कण्ठे नालस्य प्रवेश एव कण्ठनालस्य प्रवेशस्तस्मात्। तदा क्रमपरिचयक्रमेण वस्तुपरिचयः स्यादित्यर्थः) हठप्र०। "प्राक् स्थित्वोत्कटिकेश्वर समततनुर्नौल्यानलोत्थापनं कृत्वाऽपानमनूर्ध्वमीरणवशात् गन्त्रीं विधायोद्वमेत्। यत् प्राग्भक्षितमन्नपानमथ वा नालप्रवेशाद्वृतं तत् पश्चाद्गतं वमेदनुविधिः प्रोक्तो हठज्ञैरिह। आसने गोमुखे स्थित्वा हस्तौ भूमौ करौ दृढम्। नत्वा ऊर्ध्वं वायुमापूर्य नानादुत्थाप्य चाचरेत्। वक्त्रमेवं विहिते दंष्ट्रान्तसंयुतः। एवं गजकरण्युक्ता भक्तोद्वमनक्रियेति"। वायुकर्षस्य अपानेन सह प्राणस्य सकाममूर्ध्वीकर्षणस्य। नालोत्थानसमकालं कुर्य्यादिति भावः। अस्यार्थः उत्कटासने स्थित्वा चङ्घ्रियुगलं बद्धसंधि जानुद्वयोपरि स्थाप्यानु तस्याधोमुखः आनमत्कटिपृष्ठ आस्थिताङ्गीनालोत्थानं कृत्वाऽनु पश्चाद्वायुमूर्ध्वं विधाय सादरवेगैरशितमुद्वमेत्। यदि कदाचिन्नोर्ध्वनिर्गतं याति तदोत्थायानमत्कटिपृष्ठो जानुद्वयं तिष्ठन् दोर्भ्यां धृत्वा पश्चादुद्वमेत्" हठस०।

गण्डुप्रक्षालनम् "नासापुटेन सलिलं परिपीय वक्त्रमार्गेण तद्बहिरहो कलयेत् सुधीरः। पीत्वैककेन पुटकेन च नासिकाया अन्येन वारि शनकैर्बहिरुद्वमेद्वा। गण्डूप्रक्षालनमिदं कफपित्तहरं परम्" हठस०।

वायुसाधनम् "इदानीं रोगहानार्थं कर्त्तव्यं वायुसाधनम्। येन संसारचक्रेऽस्मिन् रोगहीनो भवेद् ध्रुवम्"। शिवसंहिता "राजदन्तयुगलान्तमस्मिन् संनिधाय रसनां तदन्तिके द्विक (काक) चञ्चुपुटमारुतं पिबेत् प्राणसंयमनमेतदुत्तमम्"। "जिह्वां कृत्वाऽन्याकुलस्तालुमूले दन्तैर्दन्तान् गाढ़मापीड्य मन्त्री। मन्दं मन्दं यः पिबेद् गन्धवाहं सोऽसौ पूरः साधकान्तः सर्वज्ञः" त्रिपुरा-

सारसमुच्चये । एतदभ्यासप्रकारः "नलिकावदधरौ काकं विधाय पूरयेत् तथा । श्वसनं कुम्भयेत्साध्यं रेचयेत् काकचञ्चुकम्" कुम्भकपद्धतिः । "द्विज(काक)चञ्चुवदास्येन वायुं परिपूर्य्यातु निरोधयेद्धि वायुम् । रसनामुपरिमुखं विधायामृतधारां पिबतीह यः सुखी सः । अस्तु रेचयेद् घ्राणरन्ध्रद्वयेन कृता शीतली काकचञ्चुरस्य एषः । सद्गुरुयोगप्रवीणोऽस्य मर्त्यो भवेदेव संसाधनात् मुक्तिभाग् द्राक्" कुम्भकपद्धतिः । आसने स्थिरीभूते प्राणायामं कुर्य्यात् तत्प्रकारः प्राणायामशब्दे ४५१९ पृ० उक्तप्रायः अधिकमत्रोच्यते ।

"मात्राप्रमाणयुक्तात् प्राणायामोऽयमोङ्कारात् । तेभ्यः प्राणापानावूर्ध्वमधः संनिरुध्य यत्नेन । प्राणायामे पद्मपीठे स्वदक्षाङ्गुष्ठेनादौ संनिरुध्येन्दुनाडीम् । वायुं नासिकायाः शनैर्नातियुक्त्या व्यायम्योर्ध्वं पूरयेत् कोटरान्ते । यथा स्वशक्त्या खलु धारयित्वा नाड्या ततः पिङ्गलया विरेचयेत् । निरोधहीनं विपरीतमस्य हृदास्थिरे प्राणायामं सुनिश्चरेत् । येन त्यजेत् तेन निरोधहीनं धृत्वा पुरान्येन विरेचयेत् शनैः । यान्त्येवमभ्यासरतस्य पुंसः स्थितिं स्वकल्पे चरवित्तहृतयः । यथायुक्त्या कृत्वा वाङ्कं पूरयेदुदरं शनैः । यथायुक्त्याधृतं पश्चाद्रेचयेदविरोधतः" । हठयोगे "प्राणं चेदिडया पिबेन्नियमितं भूयोऽन्यया रेचयेत् । पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेद्वामया । सूर्य्याचन्द्रमसोरनेन विधिनाऽभ्यासं सदा तन्वतां शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः" हठप्र० ।

"तत्र भूतशुद्धिप्राणायामं कृत्वा तदन्तेऽभ्यासार्थमुक्तसंख्यासहितकुम्भकयथाशक्तिप्रणवजपध्यानाभ्यां सार्द्धमावत्य कुर्य्यात् गोवधपातकपातकसहितपापपुञ्जनिरासनद्वारा अनाहतनाडीमतमानसकामक्रोधादिमलशुद्धये सप्तोक्तपञ्चकालसेवापूर्वकं विधानात् शारीरनाडीमलशुद्धिः षण्मासं विधेया" हठप्र० । समाननिबद्धान्ते "निरालम्बमनाभूत्वा प्राणायामं समभ्यसेत् । शनैः शतपर्य्यन्तं चतुर्वारं समभ्यसेत् । प्रातःकाले मध्याह्ने सायं रात्रौ विशेषतः । यामयामं यदा पूर्णं भवेदभ्यासयोगतः । एकवारं प्रकुर्वीत तदा योगीन्द्रजन्मम् । षडशीतिश्च सतैकश्च प्राणायामाश्च नित्यशः । षण्मासाभ्यन्तरेणैव शुद्धा नाडीगणास्तथा । ततो हविक्षमेणैव प्रणवेन च धीरधीः । सङ्क्रान्ते घुटिका कार्य्या मृण्मयी चातिशोभना । ततो नाडीगणः शुध्येत् वरं भवति लक्षणम् । चन्द्रं पिबति सूर्य्यश्च सूर्य्यं चन्द्रमसा पिबेत् । अयं हि कालाभावेन जीवेदा चन्द्रतारकम्" । तदङ्गासनमुक्तं सर्व्वानन्दतन्त्रे "चतुरस्रं द्विहस्तञ्च उच्चं चतुरङ्गुलम् । चेलोपरि च कम्बलादि आसनं सर्वसौख्यदम्" ।

नाडीशुद्धेस्तदङ्गता "नाडीविशुद्ध्याखिलरोगमलो यदा तदा समर्थोऽनिलधारणे चिरम् । स्यात् कोष्ठगस्तच्चमलोपकर्दमलयेऽग्निरिद्धः स तनौ रुजां शान्तिः । सिद्धासनादजपन्थिं भित्त्वोर्ध्वं अर्पिताऽग्निना । सुनेस्तदा प्राणयुगाद्धृदयान्तेऽनाहतध्वनिः । नाडीमध्यमलक्षयेऽल्पशयनं मूत्रं विड्हीनमः पुंसः स्वल्पमरोगता न क्षमयो बाधा न धर्मोरतिः । दुर्गन्धानिलपित्तशान्तिरमलः कायो भवेत् सुन्दरस्तावत्कालमयं कुभाजनियमश्चाह भजेदल्पभुक् । योगारम्भाद्युक्तं हि नाडीशुद्धिर्देहे शीघ्रमाद्यं यथाङ्गं । यावत् सिद्धेन हठाङ्गं न हठं तावद्योगः साधकस्य व्यलीकः । नाडीविशुद्धेर्मरुतो जयः स्यात् जितेऽनिले याति मनः स्वयं लयम् । क्षीणे मनस्यस्तमिते हि कार्य्ये ज्ञानप्रकाशः स्वसुपैति निर्मले । पूर्वं विधानाड्डीविशुद्धितः स्यादारम्भकाले हठसिद्धिचिह्नम् । क्रमेण कम्पादिजिताऽनिलाद्रूपं हि मनोन्तरमभ्युदेति । स्वगर्भकायामविनिर्गतांशा सुनिश्चितारम्भ उदेति सिद्धिभूः । सन्नाडिशुद्धेः परिणाम एषः संप्राप्यते सद्गुरुणा विना नो" हठप्र० ।

प्राणायामलक्षणं मार्कण्डेयपु० "शृणुष्व च महीपाल प्राणायामस्य लक्षणम् । कुर्वतश्च यदा योगं यादृग्विहितमासनम् । पद्मं सिद्धासनं वापि तथा स्वस्तिकमासनम् । आस्थाय योगी युञ्जीत कृत्वा च प्रणवं हृदि । समः समासनो भूत्वा संहृत्य चरणावुभौ । संवृतास्यस्तथैवोरू सम्यग्विष्टभ्य चाग्रतः । संपश्यन् नासिकाग्रं स्वं दिशश्चानवलोकयन् । इत्थं योगी यताहारः प्राणायामपरायणः" । "यथा तोयार्थिनस्तोयं यन्त्रनालादिभिः शनैः । आपिबेयुस्तथा वायुं पिबेद्योगी जितश्रमः । प्राक् तु सेव्यमानास्तु सिंहशार्दूलकुञ्जराः । यथा यान्ति तथा प्राणो वश्यो भवति योगिनः । विश्वस्तं यथेच्छातो नागं नयति हस्तिपः । तथैव योगी स्वच्छन्दं प्राणं नयति शोधितम् । यथा हि साधितः सिंहो मृगान् हन्ति न मानवान् । तद्वन्निरुद्धः पवनः किल्बिषं न नृणां तनुम् । तस्माद्युक्तः सदा

योगी प्राणायामपरः भवेत्” इति योगचन्द्रिकायाम् । “प्राणायामादिकः षड्भिः कुर्य्यादिवसपर्वणे । चत्वारिंशच्च मध्याह्ने सन्ध्यायां विंशतिर्भवेत् । अर्द्धरात्रे विंशतिः स्यादेवं प्राणविनिग्रहः” इति । “इड्या वायुमाकृष्य पूरयित्वोदरस्थितम् । शनैः षोडशमात्राभिरकारं तत्र संस्मरेत् । पूरितं धारयेत् पश्चाच्चतुःषष्ट्या तु मात्रया । उकारमूर्त्तिमत्रापि संस्मरन् प्रणवं जपेत् । यावद्वा शक्यते तावद्धारयन् जपसंस्थितः । पूरितं रेचयेत् पश्चात् मकारेणानिलं बुधः । शनैः पिङ्गलया विप्र ! द्वात्रिंशन्मात्रया पुनः । प्राणायामो भवेदेष ततश्चैवं समभ्यसेत् । प्रस्वेदजनको यस्तु प्राणायामेषु सोऽधमः । कम्पनं मध्यमं विद्यादुत्थानं चोत्तमं तथा । पूर्वं पूर्वं प्रकुर्वीत यावदुत्तमसम्भवः । उत्तमे तु कुम्भिते प्राणायामे सुखी भवेत् । प्राणो वशति तेनैव देहस्यान्तस्ततोऽधिकः । देहो विलयते तेन ततासनपरिग्रहः” । योगसारावल्याम् । “सर्वपूरैरनिलकुम्भैः स हि नाडीषु विशोधितासु । अनाहताख्यो बहुभिः प्रकारैरन्तः प्रवर्त्तेत सदा निनादः” इति । “अभ्यासकाले प्राणनादे कृत्वा मनः स्थिरम् । निर्मलं साधकः कुम्भकाभ्यासमाचरेत् । ध्यायेन्मूले कर्णिकान्तः कुण्डलीरूपमीश्वरम् । नादासंक्रमणं यान्ति शिवध्याने लयक्रमात् । मूर्त्तिध्यानानन्तरोत्ते नादान्ते प्रलीयते । यथा यथा मनः शुद्धं लीयते ध्याननादयोः । तथा तथा वायुजयः सिद्धिकृत् कुम्भ उच्यते । ओङ्कारामिति ध्यायन्नादानुक्रमात्मसु चिः । इदमस्य परः गोप्यं योगसिद्धिप्रदा-प्यथात् । यावच्च श्रूयते नादस्तावच्छिन्नमिदं चलम् । नादं नाम मनो ध्याने विना यत्नं हि युज्यते । घण्टाकिङ्किणिनादाद्याः शब्दं यान्ति साधके । घटादघटिकाद्यं स्यात् कम्पो जल्पनमेव च । आनन्दः स्यात् सदाभ्यासादारम्भे कुम्भकात्मना । शुष्के नाडीमले दग्धे हृत्करे च यात्मना । सर्वस्य तत्पदोर्द्ध्वे शब्दप्राप्तिलयोद्गमे । अपाने ऊर्द्ध्वं क्रमशः प्राणेनाकर्षिते यदा । मूलाग्रधिरोर्द्ध्वेऽपाने जाठराग्नौ बलम् । अयं ततोऽपि मारुताहतानलशिखाधराकुलम् । ज्वलन्ति शिराभ्यः बहुलनादस्वनैः । तदाग्निमारुतसक्त वायोर्विकासबलम् । पतन् स्वत्वाधिष्ठानाद्याः स्थितिचक्रविभेदने । अभ्यासात् ध्यानसमाधिं कुर्य्यात् योगोऽपानमारुतम् । पङ्क्त्यां स्वसुषुम्नाद्वारविद्ध-तया । सुषुम्नान्तरगतसुषुम्नायाः स्वके पदम् । त्रिकोणं दहनस्थानं तदधः स्थितिरन्वतः । अभ्यासेन स्थितायां प्राणेनोर्द्ध्वं प्रदीयते । पूर्वाभ्यां निरावृतं सर्वाभीष्टप्रदमम् । अभ्यासेन सुमतिर्नेत्रं स्थितिपद्मान्तरे । स्थित्वाऽऽरम्भेदध्यनं कुर्य्यात् सद्गुरूपदिष्टम् । विधिपद्मप्रभेदेन सर्वा आरम्भद्वयः । तावत्काले साधकस्य योगोक्तनियमपालकः । आधिष्ठानं विभिद्योर्द्ध्वे-अपानः प्रगतः स्वयम् । तिर्य्यग्गतेन प्राणेन निरावरणे अर्ज्जुनः । अधः स्थितः सम्भवति त्रिकोणं वह्निमण्डलम् । ध्यातो भस्त्रेव दहनो दृढाभ्यासो सुनोदितः । क्रमेण दीप्तो भवति सुषुम्नास्यमलं च्युति । कुण्डलीं तापयन्त्येव चालितां प्राणवायुना । उत्कर्षप्राणायामेन प्रदीप्ताग्निचालनात् । ततः परिचयावस्था गन्धबोधकरी भवेत् । दीप्तोनलोऽपानजाड्यं भित्त्वा दहति वेदनम् । प्रकाशावरणे जाड्ये दग्धेऽस्मिन् क्रमशो मलाः । प्राणाग्निः स तदा सत्वप्रकाशक उपाधिकः । तथा योगाग्निना दग्धा देहो योगिवरस्य हि । न दृश्यते योगिदेहो देवैरपि महाबलः । इच्छारूपस्तदा योगिदेहः स्यादजरामरः । सुषुम्नाचक्रभेदया प्राणापानौ प्रभेदाता । तदा केवलकुम्भः स्यात् नेत्रे लोकविदिक्षु । भक्त्वा रुधिरं यद्गुरुनादाकर्षेद्ध्रुवम् । प्रह्लादनी तथा धात्रून् सततोऽभ्यासयोगतः । तदा सद्यः पुष्करोद्यानदाः सुयान्ति पुरुके स दोषाः क्षुत्पिपासाद्याः सर्वे नश्यन्ति योगिनः” । हठप०

प्राणायामकालमानम “अथ प्रमाणमेतेषां रहस्यमपि कथ्यते चतुर्द्वादशभिः क्रमादादयाः पलैस्त्रयः । ततः षष्टचतुःपलैरष्टादशोन्मितः । परस्ततस्त्रयाणां-प्रणीप्रहेतवः रेचितः । निसर्गाद्द्वादशगुणाः प्रत्याहारस्ततः परम्” हठप० ।

निसर्गप्राणायामकालः कुम्भकपद्धतौ “पञ्चगुर्वक्षरैर्युक्तः कालः पलमितो हि यः । निसर्गतः कुम्भकोऽयमतोऽर्द्धं रेचकः स्मृतः । अर्द्धः पूरक इत्युक्तो मात्राकुम्भविग्रहैः । पञ्चविंशतिभिः प्रोक्तः पलैर्द्वादशमात्रिकः” । अयमेव नाडीशोधनीऽभ्यासप्राणायामः । “पञ्चषड्गुर्द्धितीयस्तु सपादोद्गुधिकोन्मितः । ततीय इति निर्दिष्टो दन्तात्रेयमतं यथा” । तदयं संक्षेपः “कनिष्ठे प्राणायामे एकस्मिन् कालमानं चत्वारि पलानि भवन्ति तद् द्वादशप्राणायामे सर्वकालमानं ४८ पलानि अथो प्रथम · द्वारः षट्

सन्ध्याकालः। एवं द्वितीये मध्यमेरौ कालमानमष्टौ ८ पलानि तदा द्वादशभिः ९६ पलानि। अत्र सर्वकालः ११२६ घटिकादि मध्यमेरौ कालः। तीव्रमेरौ कालमानं १२ पलादि तदा द्वादशभिः १४४ पलानि २।२४घट्यादि एवमुत्तमोत्तमो वायुजयकालो ज्ञेयः" हठप्र०। तत्र अधमसाधके स्वेदातिरिक्तकम्पाद्यभावः। उत्तमसाधके यमादिगुणसम्पत्तौ कामसंकल्पाद्यपाये कम्पासनोत्थानादिचिह्नमपि" हठप्र०। "तदा विध्वस्तपापस्य भवेदारम्भसम्भवः। चिह्नानि योगिनो देहे दृश्यन्ते नाडिशुद्धितः" इत्युपक्रमे "स्वेदोऽयं स भवेत् स्वेदोऽङ्गे मुनेः प्रथमोद्यमे। यदा संजायते स्वेदो मर्दनं कारयेत्तदा विभूत्या सह मिश्रेण स्वमजाताम्बुनाऽमुना। कलेवरं विग्रहाद्द्युतिर्दृढो भवति योगिनः। दृढता लघुता चैव स्यात् स्वमजाम्बुमर्दनात्। कम्पो द्वितीये भवति दार्दुरी मध्यमे तत"। (दार्दुरी दर्दुरो भेकस्तस्येव प्लुत्य प्लुत्य गतिः)। ततोऽधिकतराभ्यासाद् गगने साधको हि सः। योगी पद्मासनस्थोऽपि भुवमुत्सृज्य वर्त्तते। वायुसिद्धिस्तदा ज्ञेया संसारध्वान्तनाशिनी" कुम्भकपद्धतौ "एवं नाड्याविवेकेन चतुःकालेन विंशतिम्। कुम्भकान् यदि कुर्वीत नाडी शुद्धा स्वल्पकालतः। पीयूषमध्यादिनाकोभं नाभौ रविमण्डलम्। मूर्ध्नि नाड्या हते कुम्भे ध्यात्वा शुध्यन्ति नाडिकाः। चन्द्रेण पित्तदोषघ्नामितरेषां परेण तु। नाडीशुद्धा तथा भूयात् सर्वथैव न संशयः। नादस्फुटि वपुःकार्श्यमारोग्यं वह्निदीपनम्। नैर्मल्यमक्षुण्णं चैतदत्र नादो बिन्दुर्जयः। हिमप्रतिमदृष्टानां नाडीनां मलशोधनम्। यथेष्टं धारणं वायोरविकाराभाव एव च" हठप्र०।

मात्राकुम्भकः "मात्राः षोडश पूरे स्युश्चतुःषष्टिस्तु कुम्भके। द्वात्रिंशद्रेचके प्रोक्ताः मात्राकुम्भः समीरितः। मात्राकुम्भो हृदन्तः शोधकः संप्रकीर्त्तितः। स्वाधिष्ठानानुगश्चायं स्रवनोऽमृतसेचनः। दाहनो नाभिसंस्थानो मात्राकुम्भः प्रकीर्त्तितः। मूलाधारे ततश्चायं कठिनीकारको मतः। पुनः कण्ठानुगो यश्च व्यूहनः स्यात् स तापकः। ब्रह्मस्थाने नियोगेन मुक्तिदः परिकीर्त्तितः। अयमाशयः। प्राभ्यसे स्थानावलोकनचिन्तनाभ्यां मनसा दृष्ट्या नाद... नाभ्यन्तरादिकमूलमध्यहृदयकण्ठादिनिर्दिष्टशरीरान्तर्गतप्रदेशेषु स्थानात् स्थानान्तरं साधकेन कुम्भकस्य वायोर्यथानयनं स्थापनं च पुनस्ततः उत्थितस्य वायोः प्रदेशान्तरे नयनमिति चेतसाऽस्य प्राणस्य चालनं कर्त्तव्यं गुरूपदेशेनेति मात्राकुम्भः। सूर्येण हृदि कुम्भनात् तदूर्ध्वं स्थितानां नाडीनां शोषणं भवति। एवं नाभौ सर्वशिरामूलत्वात् सूर्यमण्डलपदत्वात् अन्नस्य पाकात् शोषणं नाडिगतमलदाहः। एवं स्वाधिष्ठाने स्थितौ तस्य सोमपानचन्द्रपदत्वात् अमृतरसप्लावनतत्पार्थिवांशतमोऽपायद्वारा प्लावनो भवति। कठिनीकरणं मृदुतापिधानं देहेन्द्रियेषु" हठप्र०।

मात्रामानम् "प्रदक्षिणीकृत्य जानु नातिद्रुतविलम्बितम्। अङ्गुलीस्फोटितो मात्रा छोटिकाकरणाद् भवेत्"।

"मात्रा नवविधा प्रोक्ता योगिभिस्तत्त्वदर्शिभिः। निमेषोन्मेषणं मात्रा कालो लघ्वक्षरोऽथवा। गोदोहतृषपानेषु केशपटारवोऽथवा। चतस्रो ध्वनिमात्राः स्युस्ताश्च ज्ञेयाः शनैः शनैः। देशकालानुसारेण प्राज्ञा योगीश्वराः पुरा। पूरकुम्भकरेचेषु निसर्गजनितश्च यः। कालः स मात्रासंज्ञः स्यात् सर्वमात्राः क्रमादिमाः। अनया इति तत्रैव महामात्राः पुरोदिताः। जानु प्रदक्षिणीकृत्य त्रिवारं छोटिकामनु। करणात् ह्रस्वमात्रैषा मध्यैषा बहुभिरीरिता। जान्वोः प्रदक्षिणीकृतिर्नश्वरात्मनो वरेति" हठप्र०।

उत्तमस्य प्राणायामकालः "सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह। त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते" गीता। अयं पादत्रयेण उत्तमस्य योगाङ्गत्वे च योगिभिः कार्य्यः। तादृशमन्त्रद्वयस्य त्रिरावृत्तौ पलत्रयं भवतीति तस्य कुम्भकालसंख्याबोधकत्वं बोध्यम्। योगदीपिकायाम्" हठप्र०।

प्राणलक्षणम् "समस्तेन्द्रियवर्गस्य प्राणो वायुः प्रकीर्त्तितः। तज्जयादिन्द्रियाण्येव विजितानि भवन्ति हि। अतः प्राणमनःस्पन्दयोः सहभावित्वात् प्राणनिग्रहे मनो निरुद्ध्यते" हठप्र। योगवासिष्ठे "बाह्याभ्यन्तरस्पन्दशून्यजो वातजोऽथवा। न यस्य विद्यते तस्य दूरस्थौ विकल्पयो। अयं भावः प्राणायामोपायोपेतस्य इतरस्मादल्पः श्वासप्रश्वासो भवति यथा खननच्छेदनादिषु व्यापृयमाणस्य पर्वतभाराहृतः शीघ्रं धावतो वा श्वासवेगो यावान् भवति न तावान् स्थितस्यासीनस्य वा भवति। यथा दुष्टैरश्वैर्युक्तो रथः स रथ्या कापि नीयते स च भारवर्गेण दृढाकृष्यमाणः स्वमार्गं पुनर्धार्य्यते तथेन्द्रियैरविनादिनरितस्ता नीयः

मानं चित्तं प्राणरुच्चो दृढधारितायां मात्मतत्त्वे धार्य्यते इत्येवं चित्तविकारप्राणचयौ प्रकृतेऽभिप्रेतौ" हठप्र० ।

अभ्यासक्रमः "प्रथमे दिवसे कार्य्यं कुम्भकानां चतुष्टयम् । प्रत्येकं दशसंख्याकं द्वितीये पञ्चभिः सह । विंशतिं च तृतीयेऽह्नि पञ्चवृद्ध्या दिने दिने" योगदीपिका ।

प्राणायामफलं हठयोगे गोरक्षनाथः । "द्वाराणां नवकं निरुध्य मरुतं पीत्वामृतं धारितं नीत्वाकाशमपानवह्निसहितं शक्त्या समुच्चालितम् । आत्मध्यानयुतो ह्यनेन विधिना विन्यस्य मूर्ध्नि ध्रुवं यावत्तिष्ठति तावदेव महतां सङ्गेन संयुज्यते" ।

प्राणायामप्रकारः "प्राणायामं ततः कुर्य्यान्नित्यं सात्त्विकया धिया । यथा सुषुम्नानाडीस्था मलाः शोषं प्रयान्ति च । बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत् । धारयित्वा यथाशक्ति भूयः सूर्य्येण रेचयेत् । प्राणं सूर्य्येण चाकृष्य पूरयेदुदरं शनैः । विधिवत् कुम्भकं कृत्वा पुनश्चन्द्रेण रेचयेत् । येन त्यजेत् तेन पीत्वा धारयेत् निरोधतः । रेचयेच्च ततोऽन्येन शनैः पवनवेगतः । प्राणं चेदिडया पिबेन्नियमितं भूयोऽन्यया रेचयेत् पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेद्वामया । सूर्य्याचन्द्रमसोरनेन विधिना बिम्बद्वयं ध्यायतां शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्द्ध्वतः । प्रातर्मध्यन्दिने सायमर्द्धरात्रे च कुम्भकान् । शनैरशीतिपर्य्यन्तं चतुर्वारं समभ्यसेत् । इडयापि च पाङ्गभिः पवनं कुरु षट्दशदन्तरगम् । तत्र पिङ्गलया शनकैः शनकैः दशभिर्द्वाभिर्द्वाभिर्द्व्यधिकैः । अधमे जायते स्वेदः कम्पो भवति मध्यमे । उत्तिष्ठत्युत्तमे प्राणो बद्धे पद्मासने हठे । ततोऽधिकतराभ्यासाद् भवतः स्वेदकम्पनौ । ततोऽधिकतराभ्यासाद् दार्दुरी जायते ध्रुवम् । यथैव दर्दुरो गच्छेदुत्प्लुत्योत्प्लुत्य भूतले । पद्मासनस्थितो योगी तथा गच्छति भूतले । अनेन स्वेदजातेन गात्रमर्दनमाचरेत् । दृढता लघुता चापि तेन गात्रस्य जायते । अभ्यासकाले प्रथमे शस्तं क्षीराज्यभोजनम् । ततोऽभ्यासे दृढीभूते न तादृङ् नियमग्रहः । यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैः शनैः । तथैव सेवितो वायुरन्यथा हन्ति साधकम् । प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत् । अयुक्ताभ्यासयोगेन सर्वरोगसमुद्भवः । हिक्का कासस्तथा श्वासः शिरःकर्णाक्षिवेदनाः । भवन्ति विविधा रोगाः पवनस्य प्रकोपनात् । युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तञ्च पूरयेत्" हठप्रदीपिकायाम् ।

प्राणायामाभ्यासफलम् "एवमासनबन्धस्थो योगीन्द्रो विगतश्रमः । अभ्यसेन्नाडिशुद्धिं च मुद्रादिपवनक्रियाम्" हठप्र० । "क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथं भवेत् । क्रियैव कारणं सिद्धेः सत्यमेतन्न संशयः । न शास्त्रपाठमात्रेण योगसिद्धिः प्रजायते । प्राणायामैरेव सर्वे प्रशुष्यन्ति मलाशयाः । प्राणायामात्तु केषाञ्चिदन्यत् कर्म न सम्मतम् । षट्कर्मयोगमाप्नोति पवनाभ्यासतत्परः । अभूवन्नन्तकभयात्तस्मात्पवनमभ्यसेत् । ब्रह्मादयोऽपि त्रिदशाः पवनाभ्यासतत्पराः । सर्वसिद्धिं गताः सर्वे तस्मात् पवनमभ्यसेत् । यावद्बद्धो मरुद्देहे तावत् चित्तं निराकुलम् । यावद्दृष्टिर्भ्रुवोर्मध्ये तावत्कालभयं कुतः । विधिवत् प्राणसंयामैर्नाडीचक्रे विशोधिते । सुषुम्णावदनं भित्त्वा सुखाद्विशति मारुतः । मारुते मध्यसञ्चारे मनःस्थैर्य्यं प्रजायते । यो मनःसुस्थिरीभावः सैवावस्था मनोन्मनी । तत्सिद्धये विधानज्ञाश्चित्रान् कुर्वन्ति कुम्भकान् । विचित्रकुम्भकाभ्यासाद् विचित्रां सिद्धिमाप्नुयात् । सूर्य्यभेदनमुज्जायी तथा शीत्कारः शीतली । भस्त्रिका भ्रामरी मूर्च्छा केवलश्चाष्टकुम्भकाः । पूरकान्ते तु कर्त्तव्यो बन्धो जालन्धराभिधः । कुम्भकान्ते रेचकादौ कर्त्तव्यस्तूड्डियानकः । अधस्तात् कुञ्चनेनैव कण्ठसङ्कोचने कृते । मध्यपश्चिमतानेन स्यात् प्राणो मध्यनाडिगः । अपानमूर्द्ध्वमुत्थाप्य प्राणं कण्ठादधो नयेत् । योगी जराविनिर्मुक्तः षोडशे वयसा भवेत्" हठप्र० ।

सूर्य्यभेदनम् "आसनं सुखदेवं बद्ध्वा सहा समन्ततः । दक्षनाड्या समाकृष्य बहिःस्थं पवनं शनैः । आकेशादानखाग्राच्च निरोधावधि कुम्भकम् । ततः शनैः सव्यनाड्या रेचयेत् पवनं पुनः । कपालशोधनं वातदोषघ्नं कृमिनाशनम् । पुनः पुनरिदं कुर्य्यात् सूर्य्यभेदनमुत्तमम्" हठ० ।

उज्जायी "मुखं संयम्य नाडीभ्यामाकृष्य पवनं शनैः । यथा लगति कण्ठात्तु हृदयावधि सस्वनम् । पूर्ववत् कुम्भकं कृत्वा रेचयेदिडया ततः । श्लेष्मदोषहरं कण्ठे देहानलविवर्द्धनम् । नाडीजलोदरधातुगतदोषविनाशनम् । गच्छता तिष्ठता कार्य्यमुज्जाय्याख्यं तु कुम्भकम्" हठप्र० ।

अथ शीत्कारः "कुम्भं कुर्य्यात् सदा वक्त्रे घ्राणेनैव विसर्जयेत् । एवमभ्यासयोगेन कामदेवो द्वितीयकः ।

योगिनीचक्रसामान्यसृष्टिसंहारकारकः । न क्षुधा न तृषा निद्रा नैवालस्यं प्रजायते । भवेत् स्वच्छन्ददेहस्तु सर्व्वोपद्रववर्जितः । अनेन विधिना सत्यं योगीन्द्रो भूमिमण्डले । स भवेत् सर्व्वसिद्धीनां भाजनं नात्र संशयः । नासिकामूलरन्ध्रेण यः प्राणं सततं पिबेत् । स भवेत् सर्व्वसिद्धीनां भाजनं नात्र संशयः । रसनातालुमूलेन यः प्राणं सततं पिबेत् । अब्दार्द्धेन भवेत्तस्य सर्व्वरोगपरिक्षयः” हठप्र० ।

शीतलीकुम्भकः “जिह्वया वायुमाकृष्य पूर्व्ववत् कुम्भसाधनम् । शनैस्तु घ्राणरन्ध्राभ्यां रेचयेदनिलं सुधीः । गुल्मप्लीहोदरं चापि ज्वरपित्तं क्षुधां तृषाम् । एताश्च शीतली नाम कुम्भकोऽयं निहन्ति च” हठप्र० ।

भस्त्रिका “ऊर्व्वोरुपरि संस्थाप्य उभे पादतले तथा । पद्मासनं भवेत् सम्यक् सर्व्वपापप्रणाशनम् । सम्यक् पद्मासनं बद्ध्वा समग्रीवोदरः सुधीः । मुखं संयम्य यत्नेन प्राणं घ्राणेन रेचयेत् । यथा लगति हृत्कण्ठे कपालावधि पूरयेत् । वेगेन पूरयेत् सम्यक् हृत्पद्मावधि मारुतम् । पुनर्विरेचयेत् तद्वत् पूरयित्वा पुनः पुनः । यथैव लौहकाराणां भस्त्रा वेगेन चाल्यते । तथैव स्वशरीरस्थं चालयेत् पवनं बलात् । यदा श्रमो भवेद्देहे तदा सूर्य्येण तेजयेत् । यथोदरे भवेत् पूर्णं पवनेन यथा लघुः । धारयेन्नासिकामध्ये तर्ज्जनीभ्यां तथा दृढम् । कुम्भकं पूर्व्ववत् कृत्वा रेचयेदिडयाऽनिलम् । वातपित्तश्लेष्महरं शरीराग्निविवर्द्धनम् । कुण्डलीबोधनं कुम्भे रोगघ्नं सुखदं शुभम् । ब्रह्मनाडीमुखे संस्थकपाटार्गलनाशनम् । सम्यग्भस्त्रा समुद्भूता ग्रन्थित्रयविभेदिका । विशेषेणैव कर्त्तव्यं भस्त्राख्यं कुम्भकं त्विदम्” हठप्र० ।

भ्रामरीकुम्भकम् “वेगोद्घोषं पूरकं भृङ्गनादं भृङ्गीनादं रेचकं मन्दमन्दम् । योगीन्द्राणां नित्यमभ्यासयोगाच्चित्ते जाता काचिदानन्दलीला” हठप्र० ।

मूर्च्छाकुम्भकः “पूरकान्ते गाढतरं बद्ध्वा जालन्धरं शनैः । रेचयेत् मूर्च्छनाख्योऽयं मनोमूर्च्छासुखप्रदा । अन्तःप्रवर्त्तिताधारमारुतापूरितोदरः । साक्षात्पयस्यगाधेऽपि प्लवेत् पद्मपत्रवत्” हठप्र० ।

संहितकुम्भकः “प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः । सहितः केवलश्चेति कुम्भको द्विविधो मतः । रेचकं पूरकं कुर्य्यात् स वै संहितकुम्भकः । यावत् केवलसिद्धिः स्यात् तावत् संहितमभ्यसेत्” हठप्र० ।

केवलकुम्भकः “रेचकं पूरकं त्यक्त्वा सुखाद्वायुनिरोधनम् । प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः । केवले कुम्भके सिद्धे रेचपूरकवर्ज्जिते । न तस्य दुर्लभं किञ्चित् त्रिषु लोकेषु विद्यते । शक्तः केवलकुम्भेन यथेष्टं वायुधारणम् । राजयोगपदं चैव लभते नात्र संशयः । आहारः क्षीयते योगे कृष्णपक्षे यथा शशी । शुक्लपक्षे यथा चन्द्रस्तथा शशोऽस्ततोपमः । हठं विना राजयोगो राजयोगं विना हठः । न सिध्यति ततो युग्ममानिष्पत्तेः समभ्यसेत् । कुम्भकप्राणरोधान्ते कुर्य्याच्चित्तं निराश्रयम् । एवमभ्यासयोगेन राजयोगपदं व्रजेत् । कुम्भकात् कुण्डलीबोधः कुण्डलीबोधतो भवेत् । अनर्गला सुषुम्णा च हठसिद्धिश्च जायते । वपुःकृशत्वं वदने प्रसन्नता नादस्फुटत्वं नयने सुनिर्म्मले । आरोग्यता बिन्दुजयोऽग्निदीपनं नाडीविशुद्धिर्हठयोगलक्षणम्” हठप्र० ।

उपदेशः “सशैलवनधात्रीणां यथाधारोऽहिनायकः । सर्व्वेषां योगतन्त्राणां तथाधारो हि कुण्डली । सुप्ता गुरुप्रसादेन बोधिता सुखदा भवेत् । तथा सर्व्वाणि पद्मानि भिद्यन्ते ग्रन्थयस्तथा । प्राणस्य शून्यपदवी तथा राजपथायते । तथा चित्तं निरालम्बं तथा कालस्य वञ्चनम् । सुषुम्णा शून्यपदवी ब्रह्मरन्ध्रं महापथम् । श्मशानं शाम्भवी मध्यमार्गश्चेत्येकवाचकाः । तस्मात् सर्व्वप्रयत्नेन प्रबोधयितुमीश्वरीम् । ब्रह्मद्वारमुखे सुप्तां मुद्राभ्यासेन बोधयेत्” हठप्र० ।

दशमुद्रोद्देशः “महामुद्रा१ महाबन्धो२ महावेधश्च३ खेचरी४ । उड्डियानं५ मूलबन्धो६ बन्धो जालन्धराभिधः७ । करणी विपरीताख्या८ वज्रोली९ शक्तिचालनम्१० । इदं हि मुद्रादशकं जरामरणनाशनम् । आदिनाथोदितं सर्व्वमष्टैश्वर्य्यप्रदायकम् । वल्लभं सर्व्वसिद्धानां दुर्लभं मरुतामपि । गोपनीयं प्रयत्नेन यथा रत्नकरण्डकम् । कस्यचित् नैव वक्तव्यं कुलस्त्रीसुरतं यथा । वज्रोली त्वमरोली च सहजोली त्रिधा मता । एतेषां लक्षणं वक्ष्ये कर्त्तव्यञ्च विशेषतः” ।

महामुद्रा १ “पादमूलेन वामेन योनिं संपीड्य दक्षिणम् । पादं प्रसारितं धृत्वा कराभ्यां धारयेद्दृढम् । कण्ठे बन्धं समारोप्य धारयेद्वायुमूर्द्ध्वनि । यथा दण्डहतः सर्पो दण्डाकारः प्रजायते । ऋज्वी भूत्वा तथा शक्तिः कुण्डली सहसा भवेत् । तदासौ मरणावस्थां हरते द्विपुटा-

स्थिता । ततः शनैः शनैरेव रेचयेन्न च वेगतः । इदं खलु महामुद्रा महासिद्धैः प्रदर्श्यते । महाक्लेशादयो दोषाः क्षीयन्ते मरणादयः । महामुद्राञ्च तेनैव वदन्ति विबुधोत्तमाः । चन्द्राङ्गे च समभ्यस्य सूर्य्याङ्गे पुनरभ्यसेत् । यावत्तुल्या भवेत् संख्या ततो मुद्रां विसर्जयेत् । न हि पथ्यमपथ्यं वा रसाः सर्व्वेऽपि नीरसाः । अपि भुक्तं विषं घोरं पीयूषमिव जीर्य्यति । क्षयकुष्ठगुदावर्त्तगुल्माजीर्णपुरोगमाः । दोषाः सर्व्वे क्षयं यान्ति महामुद्रां च योऽभ्यसेत् । कथितेयं महामुद्रा महासिद्धिकरी नृणाम् । गोपनीया प्रयत्नेन न देया यस्य कस्यचित्” हठप्र० ।

महाबन्धः २ “पार्ष्णिं वामस्य पादस्य योनिस्थाने नियोजयेत् । वामोरूपरि संस्थाप्य दक्षिणं चरणं तथा । पूरयित्वा ततो वायुं हृदये चिबुकं दृढम् । निष्पीड्य योनिमाकुञ्च्य मनोमध्ये नियोजयेत् । धारयित्वा यथाशक्ति रेचयेदनिलं शनैः । सव्याङ्गे पूर्व्वमभ्यस्य दक्षाङ्गे पुनरभ्यसेत् । मतान्तरे तु केषाञ्चित् कण्ठबन्धं विवर्जयेत् । राजदन्तस्थजिह्वायां बन्धः शस्तो भवेदिति । अयं खलु महाबन्धो महासिद्धिप्रदायकः । कालपाशमहाबन्धविमोचनविचक्षणः । अयं च सर्व्वनाड़ीनामूर्द्ध्वगमनरोधकः । त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः । रूपलावण्यसम्पन्ना यथा स्त्री पुरुषं विना । महामुद्रामहाबन्धौ निःफलौ वेधवर्जितौ” हठप्र० ।

महावेधः ३ “महाबन्धे स्थितो योगी कृत्वा पूरकमेकधीः । वायूनां गतिमावृत्य निभृतं कण्ठमुद्रया । समहस्तयुगो भूमौ स्फिचौ सन्ताड़येत् शनैः । पुटद्वयं समाक्रम्य वायुः स्फुरति मध्यगः । सोमसूर्य्याग्निसम्बन्धाज्जायते च मृतिक्षयः । मृतावस्था समुत्पन्ना ततो मृत्युभयं कुतः । महावेधोऽयमभ्यासान्महासिद्धिप्रदायकः । वलीपलितनिर्मुक्तैः सेव्यते साधकोत्तमैः । एतत् त्रयं महामुद्रा जरामृत्युविनाशिनी । वह्निवृद्धिकरञ्चैवमणिमादिगुणप्रदम् । अष्टधा क्रियते चैव यामे यामे दिने दिने । पुण्यसम्भारसन्धायि पापौघभिदुरं सदा । सम्यक् शिक्षावतामेव स्वल्पं प्रथमसाधनम् । वह्निस्त्रीपथसेवानामादौ वर्ज्जनमाचरेत्” हठप्र० ।

खेचरी ४ “छेदनचालनदोहैः जिह्वां क्रमेण वर्द्धयेत्तावत् । यावद्भ्रूमध्यं स्पृशति तदा च खेचरीसिद्धिः । स्नुहीपत्रनिभं शस्त्रं सुतीक्ष्णं स्निग्धनिर्म्मलम् । समादाय ततस्तेन रोममात्रं समुच्छिन्देत् । ततः सैन्धवपथ्यादिचूर्णं ताभ्यां प्रघर्षयेत् । पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिन्देत् । एवं क्रमेण षण्मासं नित्ययुक्तः समाचरेत् । षण्मासाद्रसनामूलनाड़ीबन्धो विनश्यति । अथ वागीश्वरीधाम शिरोवस्त्रेण वेष्टयेत् । शनैरुत्कर्षयेद्योगी कालवेलाविधानवित् । शनैश्चिरगतं दैर्घ्यं विस्तारे चतुरङ्गुलम् । मृदुलं धवलं प्रोक्तं वेष्टिताम्बरलक्षणम् । पुनः षण्मासमात्रेण पुनः सङ्घर्षणात् प्रिये ! । भ्रूमध्यावधि वर्द्धेत तिर्य्यक् कर्णबिलावधि । अधस्तात् चिबुकं मूलं प्रयाति क्रमचारिता । केशादूर्द्ध्वं क्रामति तिर्य्यक् शङ्खावधि प्रिये ! । पुनः संवत्सराद्देवि ! द्वितीया चैव लीलया । ब्रह्मरन्ध्रान्तमावृत्य तिष्ठत्यमरवन्दिते ! । स्वतालुमूलं सङ्गृह्य सप्तवासरमात्रेण । स्वगुरूक्तप्रकारेण मलं सर्व्वं विशोधयेत् । वज्रतुल्येन सङ्गृह्य जिह्वां तत्र निवेशयेत् । शनैः शनैर्मस्तकाच्च महावज्रकपाटभित् । पूर्व्ववीर्य्ययुतां विद्यां व्याख्यातामतिदुर्लभाम् । अस्याः षड़ङ्गं प्रकुर्व्वीत तया षट्चक्रभिन्नया । खे निरस्तसकलक्रियाक्रमा चिन्तयन्ति शाश्वतोदरे । सा शिवत्वसमवायकारिणी खेचरी च भवखेदहारिणी । क्रमेणैव प्रकर्त्तव्याऽभ्यासेन वरवर्णिनि ! । युगपद्यतते तस्य शरीरं विलयं व्रजेत् । तस्मात् शनैः शनैः कार्य्योऽभ्यासो युगवत् प्रिये ! । एवं वर्षत्रयं कृत्वा ब्रह्मद्वारं विशेद्ध्रुवम् । षट्चक्राणि विभिद्य शक्तिभुजगीं प्रोत्थाप्य मूलस्थितां भित्त्वा ग्रन्थिपुटं च पश्चिमशिराप्राकाररूपं महत् । नीत्वा प्राणमतः शिरोविवरमलं निर्मथ्य चित्तेन तत् लिङ्गं यः पिबतीन्दुमण्डलगलत् मुक्तः स साक्षात् शिवः” । “तीक्ष्णकं हरते व्याधिं कटुकं कुष्ठनाशनम् । घृतस्वादूपमं चैवामरत्वं लभते ध्रुवम् । मधुस्वादूपमं चैव शालिमुद्गादिकं बहु । लड्डुखण्डकपानानि पक्वान्नानि ह्यनेकशः । दिव्यकल्पं क्रोड़ेदिन्य सुतृप्तो जायते ध्रुवम् । तन्मयत्वमवाप्नोति कोषकारीव कीटकः । कपालकुहरे जिह्वा प्रविष्टा विपरीतगा । भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी । काकचञ्चुविधानेन शीतलं सलिलं पिबेत् । प्राणापानप्रयोगे च योगी भवति निर्जरः । कलां पराङ्मुखीं कृत्वा त्रिपथे परिवर्त्तयेत् । सा भवेत् खेचरी मुद्रा व्योमचक्रं तदुच्यते । रसनामूर्द्ध्वगां कृत्वा क्षणार्द्धं यदि तिष्ठति । विषैर्विमुच्यते योगी व्याधिमृत्युजरादिभिः । न रोगो

मरणं तस्य न निद्रा न क्षुधा तृषा । न च मूर्च्छा भवेत् तस्य यो मुद्रां वेत्ति खेचरीम् । पीड्यते न स रोगेण न लिप्यते च कर्मणा । बध्यते न च कालेन यो मुद्रां वेत्ति खेचरीम् । चित्तं चरति खे यस्मात् जिह्वा चरति खे गता । तेनेयं खेचरीमुद्रा सर्वसिद्धैर्नमस्कृता । खेचर्या मुद्रितं येन विवरं लम्बिकोर्द्ध्वतः । तस्य नाक्षरते बिन्दुः कामिन्यालिङ्गितस्य च । चलितोऽपि यदा बिन्दुः संप्राप्तश्च हुताशनम् । व्रजत्यूर्द्ध्वं हठशक्त्या निरुद्धो योनिमुद्रया । कपालकुहरे जिह्वा कालसन्धानसद्रूया । तस्मादिदं प्रकुर्वीत नित्ययुक्तः समाहितः । नित्यं सोमकलापूर्णं शरीरं यस्य योगिनः । तक्षकेणापि दष्टस्य विषं तस्य न सर्पति । ऊर्द्ध्वजिह्वास्थिरो भूत्वा सोमपानं करोति यः । मासार्द्धेन न सन्देहो मृत्युं जयति योगवित् । इन्धनानि यथा वह्निस्तैलवर्त्तिं च दीपकः । तत्षोडशकलापूर्णं देही देहं न मुञ्चति । रसनां वेशयेदूर्द्ध्वं पिबेत्तत् क्षरितं जलम् । गोमांसं भक्षयेन्नित्यं पिबेदमरवारुणीम् । कुलीनं तमहं मन्ये इतरे कुलघातकाः । गोशब्देनोदिता जिह्वा तत्प्रवेशो हि तालुनि । गोमांसभक्षणं तत्तु महापातकनाशनम् । जिह्वाप्रवेशसंभूतवह्निनोत्पादितः खलु । चन्द्रात्स्रवति यः सारः स स्यादमरवारुणी । नाभिदेशे भवत्येव भास्करो दहनात्मकः । अमृतात्मा स्थिरो नित्यं तालुमध्ये तु चन्द्रमाः । वर्षत्यधोमुखश्चन्द्रो ग्रसेदूर्द्ध्वमुखो रविः । ज्ञातव्यं करणं तत्र येन पीयूषमाप्यते । मूर्द्ध्नः षोडशपत्रपद्मगलितं प्राणादवाप्तं हठात् ऊर्द्ध्वास्यो रसनां नियम्य विवरे शक्तिं परां चिन्तयेत् । उत्कल्लोलकलाजलं च विमलं धारामयं यः पिबेत् निर्दोषः स मृणालकोमलवपुर्योगी चिरञ्जीवति । पर्वतो यदि लम्बिकाग्रमनिशं जिह्वारसस्यन्दिनी सक्षारा कटुकाम्लदुग्धसदृशं मध्वाज्यतुल्यं तथा । व्याधीनां हरणं जरान्तकरणं शस्त्रागमोदीरणम् तस्य स्यादमरत्वमष्टगुणितं सिद्धाङ्गनाकर्षणम् । सुस्थितं प्राणजनकपद्मस्रोतःसमन्वितः । तिष्ठति खेचरीमुद्रा तस्मिन् शून्ये निरञ्जने । यत्प्रलयं चापि गतं सुस्थितं मेरुमूर्द्धतः । तस्मिंस्तत्त्वं प्रवदति सुधीस्तन्मुखं निम्नगानां चन्द्रात्सारः स्रवति च सुधा तेन मृत्युर्नराणाम् । तं बध्नीयात् सुकरणमथो नान्यथा कायसिद्धिः इष्टा सैषा मुनिविदिता खेचरी योगिवृन्दैः । एकं सृष्टिमयं बीजमेका मुद्रा च खेचरी । एको देवो निरा-

ब्रह्म एकावस्था मनोन्मनी" हठसङ्केते नामास्थाने ।

उड्डीयानम् ५ "इति वज्रासने पादौ कराभ्यां धारयेद् दृढम् । गुल्फदेशसमीपे च कन्दं तत्र निपीडयेत् । पश्चिमा तानमुदरे कुर्य्याच्च चिबुकं हृदि । शनैः शनैर्यथा प्राणः कन्दसन्धिं निगच्छति" । "उड्डीयानाख्ये बन्धेन वायुः प्रोड्डीयते ब्रह्मनाड्यां यतोऽसौ । उड्डीयानाख्यः कृतो बन्ध आद्यैः शैवस्तस्मात् योगिभिः सिद्धसेव्यः । अविश्रान्तः प्राणवायुः सदैव यस्मादुड्डीनं हठं संविधत्ते । उड्डीयानं स्यात्ततस्तत्र बन्धं धीरो नित्यं साधकः संविधत्ते" हठस० ।

मूलबन्धः ६ "गुदं पार्ष्ण्या तु संपीड्य बलादाकुञ्चयेत् तथा । वारंवारं यथा चोर्द्ध्वं समायाति समीरणः । प्राणापानौ नादबिन्दू मूलबन्धेन चैकताम् । गत्वा योगसंसिद्धिं कुरुतो नात्र संशयः । अपानप्राणयोरैक्यं क्षयो मूत्रपुरीषयोः । युवा भवति वृद्धोऽपि सततं मूलबन्धनात्" हठप्र० । "पादमूलेन संपीड्य गुदमार्गं सुयन्त्रितः । बलादपानमाकृष्य क्रमादूर्द्ध्वं सुचारयेत् । कथितोऽयं मूलबन्धो जरामरणनाशनः" । "ऐक्यं प्राणापानयोर्मूत्रमूषक्षयाद्युवकः स्यात् वयःस्थोऽपि मूलात् । भित्त्वा द्वारं याति ऊर्द्ध्वं ह्यपाने ह्यग्नेः । ज्वाला वायुनेद्धा शिखोष्मा । ततो वह्न्यपानौ हृदि प्राणमुष्णं ततोऽन्ते प्रदीप्तस्तदा देहगोऽग्निः । घटे तेन निद्रस्य सा निद्रिता स्यात् प्रतप्ता समन्तात् क्षणेनैव शक्तिः । परिचये सहतो मनसः स्थितौ झटिति दण्डहतेव भुजङ्गमी । शयनमुत्सृजति क्षुधिता तृषा कवलयत्यधरानिलमूर्द्ध्वगम् । बिलं प्रविष्टे पवने ऋजुत्वं व्रजेत् सुषुम्णान्तसमीरणानुगा । शक्तिस्ततो योगिभिरेव नित्यं श्रीमूलबन्धोऽभ्यसनीय आदरात्" हठस० ।

जालन्धरबन्धः ७ "खेचरी चित्तपीयूषप्रवाहपरिबन्धिनी । जालन्धरोऽमृतप्रवाहपरिरोधकः । आकुञ्च्य कण्ठं हृदये निदध्यात् किञ्चित् स जालन्धरबन्ध एषः । अयं करोत्यव्ययमर्कवह्नौ पतत्सुधाया वपुषोऽमरत्वम् । बध्नाति यत् कण्ठशिरासमूहं नाधस्ततो याति नभःसरज्जलम् । जालन्धरस्तेन मतः प्रसिद्धैः स्यात् कण्ठदुःखौघविनाशहेतुः" । "न्यस्यां कण्ठसङ्कोचनेनैव नाड्यां द्वयोः स्तम्भयेत्तेन मध्यस्थचक्रम् । इदं षोडशारं च नान्त्रोल्लामायु गते चालितवायोः सुधापानसक्तौ । अमृतमर्कहिमगुः स्रवेण नाभिस्थितदहनः संपिबन् ज्वलत्यजस्रम् । नि-

स्थितकमलतलात् तं तदमृतं पिबति पाति वपुश्चैव धत्ते’ विपरीतकरणीं "यत्किञ्चित् स्रवते चन्द्रादमृतं दिव्यरूपिणः। तत्सर्वं ग्रसते सूर्य्यस्तेन पिण्डो विनश्यति। तस्मादस्ति करणं दिव्यं सूर्य्यस्य मुखवञ्चनम्। गुरूपदेशतो ज्ञेयं न तु शास्त्रार्थकोटिभिः। ऊर्द्ध्वं पादोऽप्यधो मस्तकः स्यात् क्षणं वासरेऽस्यादिमेऽभ्यासतः साधयेत्। एवमभ्यासतो याममात्रं यदा मृत्युजित् स्याज्जराजिच्च षण्मासतः। आरोप्य भूमाविति मस्तकं यो याममात्रं तिष्ठति चोर्द्ध्वपादः। विध्युक्तसंस्थसमीरवेगो मासत्रयात् स्यादिह तदाऽमरः सः। ऊर्द्ध्वं सोमकलाजलं सुविमलं कण्ठस्थलादूर्द्ध्वतो नासान्ते सुषिरे नयेच्च गगनद्वारं ततः सर्वतः। ऊर्द्ध्वास्यो भुवि सन्निपत्य नितरामुत्तानपादः पिबेदेवं यः कुरुते जितेन्द्रियचयो नैवास्ति तस्य क्षयः। नित्याभ्यासाद्यस्य हि जठराग्निर्वृद्धिमायाति। आहारोऽतस्तस्य सम्पाद्यः साधकाय भूरिशः। जितेन्द्रियो यतश्चित्तवृत्त्या प्राणावरोधेन सततचिन्तनः विनिवृत्तोऽङ्गीकृतयुगस्तु तूर्णं योगं भजन्नेव तदाऽमरो भवेत्। वलितं पलितं चास्य षण्मासाच्चैव दृश्यते। याममात्राभ्यासतोऽयं कालजित् स्यादिति क्रमः" हठप०।

लम्बिका हठसङ्केते प्रसङ्गादत्र लम्बिकादिविधिर्दर्शितः तत्रादौ जिह्वालम्बनाय विधिर्यथा
"तालुमूलगतां यत्नात् जिह्वयाक्रम्य घण्टिकाम्। ऊर्द्ध्वरन्ध्रगते वायौ प्राणस्पन्दो निरुध्यते" तत्करणप्रकारादि "सन्दुहन्वर्द्धयेत्तालुमूलं रसनाशिरामूलसूत्रैश्च सम्प्राङ्मेतैः। शिरासिन्धुलीयैः सहैवार्द्रवीनैर्मलं सर्वमाशोधयेत् तत्सहस्रम्" हठप०।

छेदनम् "सकण्टकाग्नी स्नुहीदलपत्रनिभं सुतीक्ष्णं भ्रमतीक्ष्णधारम्। अङ्गुष्ठपर्वार्द्धसुविस्तृतं तदर्द्धेन्दुतुल्यं विमलं सुदृढम्। दण्डस्तु कार्य्योऽस्य षडङ्गुलोऽपि सुदृढष्टेन च रोमसास्यम्। सद्भिर्गतोऽनुसन्धितवस्त्रहेतोर्म्यं गभागमंश्यस्य कुरुसिरोऽस्याः। अधोऽर्द्धतन्तूरसरक्तमासो बन्धः कलाया थमिताभनाड्याः। मध्ये गतस्योड्डपीठतोऽस्य छिदेत् यत्नाधोपरि नित्यमेव। संछेदनात् प्राणनुयोक्तपूर्णमावर्त्तयेज्ज्ञो रसनातलस्थम्। सटीदयं गाढमिति मितारं संछेदनादूर्द्ध्वमतन्त्रमाचरेत्। संछेदकर्मान्तरमन्ततन्त्रः सञ्चालनं दोहनमाविदध्यात्। अङ्गुलिभ्यां तदगतचित्तरश्मिः कार्य्यः पटीतोऽक्रमणाच्च भेदे। दीर्घं वितस्तिप्रमितं च विस्तृतं वेदाङ्गुलं स्यान्मृदुलं सितञ्च। सूक्ष्मं कलावेष्टनवस्त्रखण्डं प्रोक्तं पुरा वै रसनाभिचालने। आदौ च तेनैव कलां सुयुक्त्या संवेष्ट्य चाङ्गुष्ठकतर्जनीभ्याम्। दोर्भ्यां सदाकर्षणचालने समभ्यासमाश्रित्य बहिर्विदध्यात्। एवं दृढाभ्यासत एव जिह्वा लम्बा भवेद् मृदुला सुचञ्चला। आकर्षणेनैव वदेत किञ्चित् सुसाधकः सुस्थिर एकचित्तः" हठप०।
"जिह्वां समाविश्य मधूपलम्बचूर्णेन सञ्चालनदोहने सदा। कार्य्यो रसज्ञा विधिनेति शीघ्रं स्यात् खेचरी साधकपुङ्गवस्य। संछेदसञ्चालनदोहनानां षण्मासमभ्यासयुतः सदैव। नंग्येत् कलामूलशिरोपबन्धो नासाग्रमूले रसना स्पृशेत् क्षम्। छिन्नं कलामूलमनं यदाखिलं छिन्द्यात् क्रमेणात्र शनैस्तदान्ते। सिद्धे निकीनाद्रूपवर्ष्ये द्वे वृत्त्या सदा छेदनयुक्तितो बुधः। यदा लम्बिका कर्षणे च रसज्ञा स्पृशेत् नासिकाग्रं तदा साधकस्य। अवं लम्बिकाकर्षणाऽत्र क्रमेण कला प्रत्यहं छिन्नमूलेति दैर्घ्यम्" हठप०।
"छेदनचालनदोहैः क्रमशः कलां वर्द्धयेत्तावत्। सा यावद्भ्रूमध्यं विशति तदा खेचरीसिद्धिः। एवं कृतेऽथ रसना प्रयात्यतुभ्रूलतान्तविलम्। तिर्य्यक् कर्णावधि हि चिबुकावधिः सा क्षयं याति। अभ्यास इति वच नयनत्र कृतस्तदा रसज्ञेयम्। ब्रह्मद्वारं प्रविशति भित्त्वा भ्रूमध्यमूर्द्ध्वं गता" हठप०।

वज्रोली ९ "प्राणपानाध्वनोर्द्ध्वं समाकुञ्चनं सुन्दरं सुन्दरी साभ्यसेत् पूरुषः। याति वज्रोलिकासिद्धिमन्यूनां कायसिद्धेः सह बिन्दुसिद्धिर्यथा। सलाकया धातुगयान्तरोत्थया कनीनिकान्तः परिकल्पयास्यकम्। रन्ध्रे स्वलिङ्गस्य शनैः प्रवेशनाभ्यासक्रमाद्वायुगतं तदाचरेत्"। अस्यार्थः आदौ मूत्रशोधनेन दुष्पूतिकथितोऽस्य लेपरहितोऽज्झितं विशुद्धसाधनं विधाय ततस्तदल्पविमलत्वाभ्यान्तरं द्वादशाङ्गुलां कनीनिकाप्रसमां सरलां विशुद्धसीसकस्य पक्तां शलाकां शनैर्लघुहस्तेन लिङ्गद्वारे क्रमेण समाहितः सततं विधाय तया तद्द्वारं वायुगतागतक्षमं गुदापान इव कृत्वा प्रथमाभ्यासे पार्श्वनिहितक्षीराकर्षमूर्ध्वानिलाकर्षणविधिना स्तोक स्तोकं मन्दमूर्द्ध्वमाचरेत्" हठप०।
"इति क्रमाभ्यासदृढत्वा क्षीरपाने भवाच्युतः। ह्रदे तु कामिनीयोनिपुष्पाकर्षणमभ्यसेत्। स्थानात् संचलितं बिन्दुमूर्द्ध्वमाकर्षयेदिति। अभ्यसेत् साधकः सम्यक् सा-

हत स्थिरपदं भवेत्। यत्नतः शस्तनालेन फूत्कारं वज्रकन्दरे। शनैः शनैः प्रकुर्वीत वायुसञ्चारकारणात्" स्वात्मारामयः। "सीसकाकुम्भमानां तु प्रकुर्यात् सच नालिकाम्। सूक्ष्माग्रमूलां तां लिङ्गमुखे दत्त्वाथ तन्मुखम्। धृत्वा फूत्कारमन्तःस्थाः कुर्यात् वारं मुहुर्मुहुः। प्रत्यहं तेन विहितं लिङ्गद्वारं क्रमाद्भवेत्। ततो नाल्याऽनया तोयमल्पं फूत्कारतोऽन्तरे। लिङ्गरन्ध्रेण गृह्णीयात् क्रमवृद्ध्या सुसाधकः। लिङ्गच्छिद्रेऽथ विहिते क्षीराकर्षं ततो भजेत्" वज्रकन्दरे लिङ्गद्वारे। "अपानमाकृष्य ततो बलेनोर्ध्वं दुग्धमाकर्षविधिक्रमेण। समभ्यसेन्निश्चलमल्पमल्पं भगे पतद्बिन्दुमथोर्ध्वमाहरेत्" हठप्र०।

तद्भेदः सहजोली "अथ हि कुसुमितायां पद्मवृत्तं स्वभूमिं क्रमश उपरि कुर्यात् कुञ्चितात् लिङ्गनालात्। निज उपगतबिन्दुं सन्निबध्यानुकुर्यात् सुरतरसनिमग्नो लिङ्गसञ्चालनानि। बिन्दुः पाण्डुर एव चन्द्र उदितः सूर्यो भवेदार्त्तवं सिन्दूरप्रतिमं रवेः पदगतं शुक्रं शशिस्थानके। ऐक्यं साधनयोः सवर्णमपि न्यूनं नो जायतेऽतो रतिरन्योन्यं नवधूरते निजमहिम्नैक्यं द्वयोर्विपच्चे। अभ्यासपाटवतया विदधाति योषिदेवं सुकर्षपरिकर्षणतः सुबिन्दुम्। यद्यार्त्तवं समभिरक्षति योगिनी सा वज्रोलिकेऽखिलसिद्धिपदं प्रयाति। यत्नीरजो बिन्दुरयं महेशो द्वयोः सुयोगात् परिलभ्यतेऽखिलम्। वीर्यं निजम् धार्यवशेनयोगमात्रैकं हि वज्रोल्युदिता ऋद्धिसिद्धिदा। सहजोली त्वमरोली वज्रोल्या भेदतो मताः। बिन्दुं देहे रक्षयेद् येन च तेन प्रकारेण। वज्रोली नियमानन्तर नरवधूनां स्वाङ्गलेपनात् संदग्धगोमयोत्थदाम्बु हतवा भूत्वा सुखं संस्थितः। सैषोक्ता सहजोलिका सुरतैराद्यैर्दिनाद्यैः शुभा वज्रोलीति यथा करोति नियतं योगेऽतिभुक्तेऽमृतम्। आकृष्योर्ध्वं मूत्रमल्पाल्पकं तद्वारंवारं संहरेन्मूत्रनाशात्। आकृष्योर्ध्वं वायुना यो हठेन नित्यं धत्ते बिन्दुसिद्धिं स याति। इति षण्मासाभ्यासनाद् गुरुणोक्तपथेन सन्ततं योगी। शान्तिं गतः संभोगेन तस्य बिन्दुः क्षयं व्रजति" हठप्र०।

शक्तिचालनम्१० "कुटिलाङ्गी कुण्डलिनी भुजङ्गी शक्तिरीश्वरी। कुटिलारुन्धती देवीशब्दाः पर्यायवाचकाः। कन्दोर्ध्वं कुण्डली शक्तिरष्टधा कुण्डलाकृतिः। ब्रह्मद्वारमुखं नित्यं मुखेनाच्छाद्य तिष्ठति। येन मार्गेण गन्तव्यं ब्रह्मस्थानं निरामयम्। मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी। उद्घाटयेत् कपाटं तु यथा कुञ्चिकया हठात्। कुण्डलिन्या तथा योगी मोक्षद्वारं विभेदयेत्। कन्दोर्ध्वं कुण्डलीशक्तिः सुप्ता मोक्षाय योगिनाम्। बन्धनाय च मूढानां यस्तां वेत्ति स योगवित्। सप्तद्वीपशैलानामाधारः शेषकुण्डली। सर्वेषां योगतन्त्राणामाधारः कुण्डली तथा। कुण्डली कुटिलाकारा सर्पवत् परिकीर्त्तिता। सा शक्तिश्चालिता येन स मुक्तो नात्र संशयः। गङ्गायमुनयोर्मध्ये बालरण्डां तपस्विनीम्। बलात्कारेण गृह्णीयात् तद्विष्णोः परमं पदम्। इडा भगवती गङ्गा पिङ्गला यमुना नदी। इडापिङ्गलयोर्मध्ये बालरण्डा सरस्वती। पुच्छे प्रगृह्य भुजगीं सुप्तामुद्बोधयेच्च ताम्। निद्रां विहाय सा शक्तिरूर्द्धमुत्तिष्ठते हठात्। परिस्थिता चैव फणावती सा प्रातश्च सायं प्रहरार्द्धमात्रम्। प्रपूर्य सूर्यात् परिधानयुक्त्या प्रगृह्य नित्यं परिचालिता सा। वितस्तिप्रमितं दीर्घं विस्तारं चतुरङ्गुलम्। मृदुलं धवलं प्रोक्तं वेष्टनाम्बरलक्षणम्। वज्रासनस्थितो योगी चालयित्वा तु कुण्डलीम्" हठप्र०।

तदङ्गसूर्य्यभेदनम् सूर्य्योदनन्तरं भस्त्रा कुण्डलीमाशु बोधयेत्। भानोराकुञ्चनं कुर्यात् कुण्डलीं चालयेत्ततः। मृत्युवक्त्रगतस्यापि तस्य मृत्युभयं कुतः। नाभ्यादलितमार्गवाहिपवनात् प्राणोऽतिदीर्घीकृतः सन्त्रान्तः परिपूरितामृततनुः प्राग्धर्षितकामसक्ता। भिन्दन् कालविषादिशङ्कभयान् शूरत्वमङ्गोगणान् तत्कार्यं कुर्वते पुनर्नवतरं जीर्णं ह्यनङ्गस्मरात्। कुण्डलीं चालयित्वा तु कुर्याद्भस्त्रां विशेषतः। एवमभ्यासतो नित्यं यमिनः शङ्कते यमः। सदाभ्यसेत् सूर्य्यभेदमुज्जायीं चापि शीतलीम्। एवमभ्यासयुक्तस्य यमस्तु यमिनः कुतः। मुहूर्त्तद्वयपर्य्यन्तं निर्भयं चालनादसौ। ऊर्द्धमाकृष्यते किञ्चित् सुषुम्नागतकुण्डली। मुहूर्त्तद्वयपर्य्यन्तं निर्भयं चालनादसौ। ब्रह्मचर्य्यरतस्यैव नित्यं हितमिताशनैः" हठप्र०।

समाधिक्रमः "अथेदानीं प्रवक्ष्यामि समाधिक्रममुत्तमम्। मृत्युघ्नं च सुखोपायं ब्रह्मानन्दकरं परम्। सलिले सैन्धवं यद्वत् साम्यं भजति योगतः। तथात्ममनसोरैक्यं समाधिः सोऽभिधीयते। राजयोगस्य माहात्म्यं को वा जानाति तत्त्वतः। ज्ञानान्मुक्तिः स्थितिः सिद्धिः गुरुवाक्येन लभ्यते। दुर्लभो विषयत्यागो

दुर्लभं तत्त्वदर्शनम् । दुर्लभा सहजावस्था सद्गुरोः करुणां विना । विविधैरासनैः कुम्भैर्व्विचित्रकरणैरपि । प्रबुद्धायां महाशक्तौ प्राणः शून्ये विलीयते । उत्पन्नशक्तिबोधस्य त्यक्तनिःशेषकर्म्मणः । योगिनः सहजावस्था स्वयमेव प्रजायते । सुषुम्णावाहिनि प्राणे शून्ये विशति मानसे । तदा समस्तकर्म्माणि निर्म्मूलयति कर्म्मवित् । अमरो निर्म्मलः शून्यं जगदेतच्चराचरम् । चित्ते समत्वमापन्ने वायुं व्रजति मध्यमे । एषाऽमरोली वज्रोली सहजोली मताऽपि च । ज्ञानं कुतो मनसि जीवति देवि ! तावत् प्राणोऽपि जीवति मनो म्रियते न तावत् । प्राणमनोद्वयमिदं विलयं प्रयाति मोक्षं स गच्छति नरो न कथञ्चिदन्यः । एतस्य मनसश्चैव चञ्चलत्वस्वभावतः । एषो बद्धो मनो बद्धं किं न सिध्यति भूतले । मूर्च्छितो हरते व्याधिं मृतो जीवयति स्वयम् । बद्धः खेचरतां धत्ते एषो वायुश्च भैरवि ! । इन्द्रियाणां मनो नाथो मनोनाथश्च मारुतः । मारुतस्य लयो नाथः स लयो नादमाश्रितः । अयमेव तु मोक्षाख्यो मास्तु वापि मतान्तरे । मनःप्राणलयो नादसंलीनत्वे प्रवर्त्तते । प्रनष्टोच्छ्वासनिःश्वासप्रध्वस्तविषयग्रहः । निश्चेष्टा निर्व्विकाराश्च लयं यान्ति च योगिनः । उच्छिन्नसर्व्वसङ्कल्पो निःशेषाशेषचेष्टितः । स्वावगम्यो लयः कोऽपि मनोवाचामगोचरः । यत्र दृष्टिर्लयस्तत्र भूतेन्द्रियसनातनी । सा शक्तिः सर्व्वभूतानां दृष्टिर्लक्ष्ये न सङ्गता । वेदशास्त्रपुराणानि सामान्यगणिका इव । एकैव शाम्भवी मुद्रा सर्व्वतन्त्रेषु गोपिता । अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्ज्जिता । एषा तु शाम्भवी मुद्रा सर्व्वतन्त्रेषु गोपिता । अन्तर्लक्ष्यविलीनचित्तपवनो योगी यदा वर्त्तते दृष्ट्या निश्चलतारया बहिर्दृष्टो पश्यन्न पश्यत्यपि । मुद्रेयं खलु शाम्भवी भवति सा लब्धा प्रसादाद्गुरोः शून्याशून्यविवर्ज्जितं स्फुरति यत्तत्त्वं पदं शाम्भवम् । अर्द्धोद्घाटितलोचनः स्थिरमना नासाग्रदत्तेक्षणः । चन्द्रार्कावपि लीनतामुपनयन्निष्पन्दभावान्तरे । ज्योतीरूपमशेषबाह्यरहितं देदीप्यमानं परम् तत्त्वं तत्पदमेव वस्तु परमं वाच्यं किमत्राधिकम् । शाम्भव्याः खेचर्य्याश्च अवस्थाधामभेदतः । तारे ज्योतिषि संयोज्य किञ्चिदुन्नमयेद् भ्रुवौ । पूर्व्वयोगस्य मार्गोऽयमुन्मनीकारकः क्षणात् । केचिदागमजालेन कापथमिव सङ्कुलाः । केचित्तर्केण मुह्यन्ति नैव जानन्ति तारकम् । तालाकाद्युद्गतिनीवशिखरे मेरुमूले तदन्तःतत्त्वं चैतद्वदन्ति सुधीः सन्मुखं निम्नगानाम् । चन्द्रात् सारः स्रवति वपुषस्तेन मृत्युर्नराणां बध्नीयात् सुकरणमथो नान्यथा कायसिद्धिः । दिवा न पूजयेल्लिङ्गं रात्रौ नैव प्रपूजयेत् । सततं पूजयेल्लिङ्गं दिवारात्रौ च पूजयेत् । सुषिरं ज्ञानजनकं पञ्चस्रोतःसमन्वितम् । तिष्ठते खेचरी मुद्रा तस्मिन् स्थाने न संशयः । चित्तं चरति खे यस्माज्जिह्वा चरति खे गता । तेनैव खेचरी नाम मुद्रा सिद्धैर्नमस्कृता । इडापिङ्गलयोर्योगे शून्ये चैवानिलं ग्रसेत् । तिष्ठते खेचरी मुद्रा तत्र सत्यं पुनः पुनः । सूर्य्याचन्द्रमसोर्म्मध्ये निरालम्बे तले पुनः । संस्थिता व्योमचक्रे या सा मुद्रा नाम खेचरी । सा सद्योदिता धारा साक्षाच्च शिववल्लभा । पूरयेत्तु ततः दिव्यं सुषुम्णापश्चिमे मुखे । पुरस्ताच्चैव पूर्य्येत निश्चिता खेचरी भवेत् । अभ्यसेत् खेचरीमुद्रामुन्मनी वा प्रजायते । अभ्यसेत् खेचरीं तावद्यावत् स्याद्योगनिद्रितः । सम्प्राप्तयोगनिद्रस्य कालो नास्ति कदाचन । भ्रुवोर्म्मध्ये शिवस्थानं मनस्तत्र विलीयते । ज्ञातव्यं तत्पदं तुर्य्यं तत्र कालो न विद्यते । चन्द्रसूर्य्यद्वयोर्म्मध्ये मुद्रां दद्याच्च खेचरीम् । निरालम्बे महाशून्ये व्योमचक्रे व्यवस्थिताम् । निरालम्बं मनः कृत्वा न किञ्चिदपि चिन्तयेत् । सबाह्याभ्यन्तरे व्योम्नि घटवत् तिष्ठति ध्रुवम् । बाह्यवायुर्यथा लीनः स्वस्य मध्ये न संशयः । स्वस्थानं गच्छति प्राणः स्थिरीभूते पवने तथा । एवमभ्यस्यमानस्य वायुमार्गे दिवानिशम् । अभ्यासाज्जीर्य्यते वायुर्मनस्तत्रैव लीयते । अमृतैः प्लावयेद्देहमापादतलमस्तकम् । सिध्यते च महायोगी महाबलपराक्रमः । शक्तिमध्ये मनः कृत्वा मनः शक्तेस्तु मध्यगम् । मनसा मन आलोक्य धारयेत् परमं पदम् । खमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु । आत्मानं खमयं कृत्वा न किञ्चिदपि चिन्तयेत् । बाह्यचिन्ता न कर्त्तव्या तथैवान्तरचिन्तनम् । सर्व्वचिन्तां परित्यज्य न किञ्चिदपि चिन्तयेत् । सङ्कल्पमात्रकलनाच्च जगत् समग्रं सङ्कल्पमात्रकलनाच्च मनोविलीनम् । सङ्कल्पमात्रमिदमुत्सृज निर्व्विकल्पमाश्रित्य निश्चयमवाप्नुहि शान्तिम् । कर्पूरमनले यद्वत् सैन्धवं सलिले यथा । तथा सन्धीयमानं च मनस्तत्त्वे विलीयते । ज्ञेयं सर्व्वप्रतीतञ्च ज्ञानञ्च मन उच्यते । ज्ञानं ज्ञेयं मनश्चैव नान्यः पन्था द्वितीयकः । मनो

दृश्यमिदं सर्वं यत्किञ्चित् सचराचरम्। मनसोह्युन्मनीभावे द्वैतभावः प्रशाम्यति। ज्ञेयवस्तुपरित्यागाद्विलयं याति मानसम्। मानसे विलयं याते कैवल्यमपि कल्पते। लयो लय इति प्राहुः कीदृशं लयलक्षणम्। अपुनर्वासनोत्थानाल्लयो विषयविस्मृतिः। एवं नानाविधोपायाः सम्यक्स्वानुभवान्विताः। समाधिमार्गाः कथिताः पूर्वाचार्य्यैर्महात्मभिः। सुषुम्णायै कुण्डलिन्यै सुधायै चन्द्रजन्मने। मनोन्मन्यै नमस्तुभ्यं महाशक्त्यै चिदात्मने। अशक्यतत्त्वबोधानां मूढानामपि सम्मतम्। प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते" हठप्र०।

नादानुसन्धानप्रशंसा "श्रीआदिनाथेन सपादकोटिलयप्रकाराः कथिता जयन्ति। नादानुसन्धानकमेकमेव मन्यामहे मुख्यतमं लयानाम्। मुक्तासने स्थितो योगी मुद्रां सन्धाय शाम्भवीम्। शृणुयाद्दक्षिणे कर्णे नादमेकान्तके सुधीः। काष्ठे प्रवर्त्तितो वह्निः काष्ठेन सह शाम्यति। नादे प्रवर्त्तितं चित्तं नादेन सह लीयते। श्रवणपुटनयनघ्राणानिरोधनेनैव कर्त्तव्यः। सुषुम्णामार्गेण स्फुटममलः श्रूयते नादः" हठप्र०।

'आरम्भश्च घटश्चैव तथा परिचयस्तथा। निष्पत्तिश्चेति योगेषु स्यादवस्थाचतुष्टयम्। विस्मृत्य सकलं बाह्यं नादे दुग्धाम्बुवन्मनः। एकीभूयाथ सहसा चिदाकाशे विलीयते। उदासीनपरो भूत्वा सदाभ्यासेन संयमी। उन्मनीकारकं सद्यो नादमेवावधारयेत्"। यत्र काले चौपटी वा खटी वा पश्चाद्धारि गोपथे वा पथे वा मध्ये भिक्षाहन्दनारण्यकन्दं पाणौ हस्तोकर्परं भोज्यपात्रम्। सर्वचिन्तां परित्यज्य सर्वकाले च सर्वदा। नादमेवानुसन्धत्ते नादे चित्तं विलीयते" हठप्र०।

आरम्भावस्था "ब्रह्मग्रन्थेर्भवेद्भेदो ह्यानन्दः शून्यसम्भवः। विचित्रक्वणको देहे श्रूयतेऽनाहतो ध्वनिः। सम्पूर्णहृदये शून्ये आरम्भो योगवान् भवेत्" हठप्र०।

घटावस्था "द्वितीयायां घटीकृत्य वायुर्भवति मध्यमः। दृढासनो भवेद्योगी ज्ञानी देवसमस्तदा। विष्णुग्रन्थेस्ततो भेदात् परमानन्दसूचकः। अतिशून्यविमर्दश्च भेरीशब्दस्तदा भवेत्" हठप्र०

परिचयावस्था "तृतीयायां [illegible] जायते मर्द्दलध्वनिः। महाशून्यं तदा [illegible] सर्वसिद्धिसमाश्रयम्। चित्तानन्दं ततो जित्वा [illegible] सहजानन्दसम्भवः। दोषदुःखक्षुधानिद्राजराव्याधिविवर्जितः। रुद्रग्रन्थिं ततो भित्त्वा सर्वपीठगतोऽनिलः" हठ०।

निष्पत्त्यवस्था "निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत्। एकीभूतं तदा चित्तं राजयोगाभिधानकम्। सृष्टिसंहारकर्त्तासौ योगीश्वरसमो भवेत्। अस्तु वा मास्तु वा मुक्तिरत्रैवाखण्डितं सुखम्। लयोद्भवमिदं सौख्यं राजयोगादवाप्यते। राजयोगपदं प्राप्तुं सुखोपायश्च चेतसाम्। हठं विना राजयोगो राजयोगं विना हठः। सद्यः प्रत्ययसन्धायी जायते नादजो लयः" हठप्र०।

नादानुसन्धानं तत्फलञ्च "नादानुसन्धानसमाधिभाजां योगीश्वराणां हृदये प्रवृद्धम्। आनन्दमेकं वचसामगम्यं जानाति तत्त्वं गुरुनाथ एव। कर्णौ पिधाय हस्ताभ्यां यं शृणोति ध्वनिं मुनिः। तत्र चित्तं स्थिरीकुर्य्याद्यावत् स्थिरपदं व्रजेत्। सर्वचिन्तां परित्यज्य सावधानेन चेतसा। नादमेवानुसन्धत्ते योगसाम्राज्यमिच्छता। मकरन्दं पिबन् भृङ्गो गन्धान्नापेक्षते यथा। नादासक्तं तथा चित्तं विषयान्न हि काङ्क्षति। नादग्रहणतश्चित्तमन्तरङ्गभुजङ्गमः। विस्मृत्य सर्वमेकाग्रं कुत्रचिन्न हि धावति। मनोमत्तगजेन्द्रस्य विषयोद्यानचारिणः। नियामनसमर्थोऽयं निनादो निशिताङ्कुशः। नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते। अन्तरङ्गकुरङ्गस्य रोधे व्याधायतेऽपि च। अन्तरङ्गस्य यमिनो वाजिनः परिघायते। नादोपास्तिरतो नित्यमवधार्य्यापि योगिनः। अभ्यस्यमानो नादोऽयं बाह्यमावर्त्तयेद् ध्वनिम्। पक्षाद्विक्षेपमखिलं जित्वा योगी सुखी भवेत्। श्रूयते प्रथमाभ्यासे नादो नानाविधो महान्। वर्द्धमाने ततोऽभ्यासे श्रूयते सूक्ष्मसूक्ष्मतः। आदौ जलधिजीमूतभेरीनिर्झरनिस्वनः। मध्ये मर्द्दलशङ्खोत्थघण्टाकाहलजास्तथा। अन्ते तु किङ्किणीवंशवीणाभ्रमरनिस्वनः। इति नानाविधो नादः श्रूयते देहमध्यतः। महति श्रूयमाणेऽपि मेघभेर्य्यादिके ध्वनौ। तत्र सूक्ष्मतरं ध्यानं नादमेव परामृशेत्। यत्र कुत्रापि वा नादे लगति प्रथमं मनः। तत्रैव सुस्थिरीभूय तेन सार्द्धं विलीयते। घण्टादिनादसक्तस्य स्तब्धान्तःकरणस्य तु। अनाहतस्य शब्दस्य तत्र शब्दस्य यो ध्वनिः। ध्वनेरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मनः। तन्मनो विलयं याति तद्विष्णोः परमं पदम्। तावदाकाशसङ्कल्पो यावच्छब्दः प्रवर्त्तते। निःशब्दं तत्परं ब्रह्म परमात्मा समीर्यते। यत् किञ्चि-

सामरूपेण श्रूयते शक्तिरेव सा। यस्तत्रान्तो निराकारः स एव परमेश्वरः। नादः शक्तिरिति प्रोक्तं नादान्तं सदाशिवः। लयस्थाने विलीने च सोऽमन्यं वा अविपद्यते। नादोपासनात् मनसावस्थाना ते तु मनोन्मनी। सशब्दं कथितं व्योम्नि निःशब्दं ब्रह्म कथ्यते। यदा नादानुसन्धानात् संक्षीणाः सर्ववासनाः। निरञ्जने विलीयन्ते निश्चितं भावतात्मनः। नादकोटिसहस्राणि बिन्दुकोटिशतानि च। सर्वं तत्र लयं यान्ति यत्र देवो निरञ्जनः" हठप्र०।

हठयोगफलम् ईश्वरगौरीसंवादे "यदा परिचये शक्तिश्चितोर्ध्वमुपैति सम। षट्चक्राणि क्रमाद्भित्त्वा तदा सूर्योऽणमादशः। पुरा ग्रन्थित्रयं भित्त्वा यात्यूर्ध्वं मरुतो रयी। स्फुटन्ति ग्रन्थयः शीघ्रं ग्रन्थयो योगिनस्तदा। वायुस्तदैव सर्वाङ्गे लीनो भवति सङ्गतः। धीरैः केवलकुम्भः स कथ्यते सर्वसिद्धिदः। मूलाधारं यदाऽपानो भित्त्वोर्ध्वं याति वेगतः। तदातीतानागतज्ञो योगी भवति सत्त्वधीः। स्थितं भित्त्वाऽङ्गगाऽपानक्षोभिता स्याद्यदोरगी। तदा नादोत्पत्तिरत्र जायते योगिनो हृदि। मद्रनादोत्पत्तिस्तु मणिपूरभिदा भवेत्। अनाहतविभेदेन घण्टाध्वनिरुदीरितः। विशुद्धचक्रभेदेन यन्त्रनादः प्रजायते। यदा त्वाज्ञाचक्रभेदस्तदोपैति मनोलयम्। सहस्रदलकमलं वायुना शक्तिरावजेत्। यदा तदा मुनिस्तिष्ठेदाकल्पं सहस्रेऽव्ययम्"। पवनयोगसंग्रहे "महामुद्रां समभ्यस्य महाबन्धमतः परम्। महावेधञ्च नियत प्रकुर्य्याच्छक्तिचालनम्। आसनं सुदृढं बद्ध्वा मूलबन्धं विधाय च। उड्डीयानं तथा बन्धं ततो जालन्धराभिधम्"। "अभ्यसेदिति सम्बन्धः।

"प्राणे सुषुम्णां सम्प्राप्ते नादोऽन्तः श्रूयतेऽष्टधा। घण्टादुन्दुभिशङ्खाब्धिवीणावेणवादितादिवत्। तमूलपात्तकिङ्किणीतालरवोपमम्। ब्रह्मनाडीं गते प्राणे विश्वरूपं प्रकाशते। यथाच विश्वरूपाचार्य्यैः "यदा संक्षीयते प्राणो मानसं च प्रलीयते। तदा समरसत्वं यत्समाधिः सोऽभिधीयते। मनःस्थैर्य्यात् स्थिरो वायुस्ततो बिन्दुः स्थिरो भवेत्। बिन्दुस्थैर्य्योदयात् सत्यं पिण्डस्थैर्य्यं प्रजायते"। एषा निष्पत्तिदशा साधकस्य राजयोगारम्भ इति तथा च हठप्रदीपिकायाम् "प्रनष्टोच्छ्वासनिःश्वासः प्रध्वस्तविषदज्वरः। निश्चेष्टो निर्विकारश्च लयो जयति योगिनः। तथा चोक्तं ग्रन्थान्तरे "शुक्ले मते तु वायोः सङ्कोचिरस्खलिता ततः। अधोगतिं निरुद्ध्यास्य भवत्यूर्ध्वमुखस्ततः। अपानस्तूर्ध्वगो भूत्वा वह्निना सह गच्छति। प्राणस्थानं ततो वह्निः प्राणापानौ च सत्वरम्। मिलित्वा कुण्डलीं नीत्वा प्रसुप्तां कुण्डलीं पुनः। प्रवह्य विंशतिस्थानं सुषुम्णा ब्रह्मग्रन्थिकम्। ब्रह्मग्रन्थिं ततो भित्त्वा रजोगुणसमुद्भवम्। सुषुम्णा वदनस्याथ प्रयात्यूर्ध्वञ्च सत्वरम्। विष्णुग्रन्थिं प्रयात्युच्चैः सत्त्वजं हृदि संस्थितम्। वेगेन महता गच्छेद्रुद्रग्रन्थिं विभिद्य सा। ऊर्ध्वं गच्छति यस्मात्तु रुद्रग्रन्थिस्तमोमयः। तत ऊर्ध्वं सुषुम्णाया याति शीतांशुमण्डलम्। व्याकुलाख्यं तु तच्चक्रं दलैः षोडशभिर्युतम्। तत्र शीतांशुसम्भूतं द्रावं शोषयतेऽनिशम्। चलिता प्राणवेगेन रक्तपित्तरवेर्हतम्" हठप्र०।

"योगिनः कालवञ्चनोपायो यथा "ज्ञात्वा कालं निजं योगी लयस्थानं समाश्रितः। युञ्जीत योगं कालस्य वञ्चनाय यथाक्रमम्। बद्धसिद्धासने देहं पूरयेत् प्राणवायुना। कृत्वा दृढस्थिरं बुद्ध्या दश द्वाराणि रोधयेत्। बद्ध्वा च खेचरीं मुद्रां योगयायाश्च जलन्धरीम्। अपाने मूलबन्धञ्च उड्डियानं तथोदरे। उत्थाप्य भुजगीं शक्तिं मूलाधाराम्बुज स्थिताम्। सुषुम्णान्तर्गतां षट्चक्राणां भेदिनीं शिवाम्। जीवं हृदाश्रयं नीत्वा शान्तीं बुद्धिमनोयुताम्। सहस्रदलमध्यस्थिते लीनां सुधारयेत्। ततः सुधाकरोद्भूतममृतं तेन मूलतः। विद्युत्तीं सकलं देहं प्लावयन्तीं विचिन्तयेत्। तया सार्द्धं ततो योगी शिवैकात्मतां व्रजेत्। परानन्दमयो भूत्वा चिद्वृत्तिमपि संत्यजेत्। ततोऽव्यक्तमनाभासमहभावविवर्जितम्। सर्वाङ्गकलनाहीनं कथं कालो निहन्ति तम्। स एव कालः सर्वेषः सर्वो नास्त्यतःपरः। कः केन हन्यते तत्र म्रियते नापि कश्चन। ततो व्यतीते समये कालस्य भ्रान्तिरूपिणि। योगी सुप्तोत्थित इव प्रतिबोधे प्रबोधितः। एवं सिद्धो भवेद्योगी वञ्चयित्वा विधानतः। कालं कलितसंसारघोररूपेणाद्भुतं हि तम्। ततस्त्रिभुवने योगी विचरत्येष एव सः। पश्यन् संसारवैचित्र्यं स्वेच्छया निरहङ्कृतिः" हठप्र०।

हठालु पु० हठः सुवमानः आलुरिव। कुम्भिकायाम् (पाना) शब्दच०। [धरणिः।

हठी स्त्री हठ-अच् गौरा० ङीष्। वारिपर्ण्याम् (पाना)

हडि पु० हठ-इन् पृषो०। पशुमारणसाधने काष्ठयन्त्रभेदे (हाड़काठ) शब्दर०। [शब्दमा० स्त्रियां ङीप्।

हडिक पुस्त्री० हठ-इकन् पृषो०। नीचजातिभेदे (हाड़ि)

हड्ड न० हठ-ड डस्य नेत्त्वम् पृषो०। अस्थ्नि (हाड)। संज्ञायां कन्। नीचजातिभेदे (हाड़ि) शब्दमा०। इन् हड्डिरप्यत्र। [शब्दच०।

हड्डज न० हड्डात् जायते जन-ड। अस्थिसारे मज्जायां

हड्डिक पु० हडिक-स्वार्थे क। (हाड़ि) जातिभेदे स्त्रियां जातित्वात् ङीष्। स च यथा "सद्यश्चाण्डालकन्यायां लेटशीर्य्येण शौनक!। बभूवतुस्तौ द्वौ पुत्रौ हड्डिकः शौण्डिकस्तथा" ब्रह्मवै० ब्र०ख० १०अ०।

हण्डा स्त्री हन-ड। डस्य नेत्त्वम्। १हङ्कति मृत्पात्रभेदे (हाँड़ा) नाट्योक्तौ नीचसम्बोधने अव्य०। हञ्जावत् ह्यावन्तोऽपि शेषार्थे स्त्री भरतः।

हण्डिका स्त्री क्षुद्रा हण्डा कन्। क्षुद्रे मृत्पात्रे (हाँड़ि)।

हण्डिकासुत पु० हण्डिकायाः सुत इव। क्षुद्रे मृण्मये हण्डिकाकारे (हाँड़ि) त्रिका०। [अमरः।

हण्डे अव्य० हन-डे डस्य नेत्त्वम्। नाट्योक्तौ नीचसम्बोधने

हत त्रि० हन-क्त। १नाशिते २प्रतिहते ३प्रतिबद्धे ४आशारहिते अमरः ५गुणिते च। भावे क्त। ६हनने ७गमने न०।

हतक त्रि० हत इव नष्टप्रायत्वात् कन्। नष्टप्राये (मड़ा)।

हताश त्रि० हता आशा यस्य। १आशाशून्ये २निर्दये ३पिशुने च मेदि० ४वन्ध्ये शब्दर०।

हति स्त्री हन-भावे क्तिन्। १हनने २मारणे ३व्याघाते ४अपकर्षे ५गुणने च।

हत्नु पु० हन-क्नु। १व्याधौ २शस्त्रे च उणा०।

हत्या स्त्री हन-भावे क्यप्। १मारणे वधे प्राणवियोगानुकूलव्यापारे "ब्रह्महत्या सुरापानम्" स्मृतिः २हनने च।

हथ त्रि० हन-क्थ। विषण्णे उणादि०।

हद विष्ठोत्सर्गे भ्वा० आ० अक० अनिट्। हदते अहत्त।

हद्दा स्त्री ताजकोक्ते पञ्चवर्गीबलानयनोपयोगिनि पञ्चभेदस्वामिकराशिभेदस्थांशभेदे यथाह नील०ता०

"मेषेऽङ्गतर्काष्टशरेषुभागा जीवास्फुजिज्ज्ञारशनैश्चराणाम्। वृषेऽष्टषड्नागशरानलांशाः शुक्रज्ञजीवार्किकुजेशहद्दाः। युग्मे षडङ्गाष्टनगाङ्गभागाः सौम्यास्फुजिज्जीवकुजार्किहद्दाः। कर्केऽद्रितर्काङ्गनगाब्धिभागाः कुजास्फुजिज्ज्ञेज्यशनैश्चराणाम्। सिंहेऽङ्गभूताद्रिरसाङ्गभागा देवेज्यशुक्रार्किबुधारहद्दाः। स्त्रियां नगाशाब्धिनगाब्धिभागाः सौम्योशनोजीवकुजार्किनाथाः। तुले रसाष्टाद्रिनगाब्धिभागाः कोणज्ञजीवास्फुजिदारनाथाः। कीटे नगाब्ध्यष्टशराङ्गभागाः भौमास्फुजिज्ज्ञेज्यशनैश्चराणाम्। चापे रवीशाम्बुधिपञ्चवेदा जीवास्फुजिज्ज्ञारशनैश्चराणाम्। मृगे नगाद्र्यष्टयुगाब्धितीनां सौम्ये ज्यशुक्रार्किकुजेशहद्दाः। कुम्भे नगाङ्गाद्रिशरेषुभागाः ज्ञशुक्रजीवारशनैश्चराणाम्। मीनेऽर्कवेदानलनन्दपक्षाः सितेज्यसौम्यारशनैश्चराणाम्। त्रिंशत्क्रमे विंशतिरुक्षभे स्वे हद्देऽत्र ५ पञ्चाष्टगवां द्रिकाणे"।

हन वधे गतौ च अदा० प०सक० अनिट्। हन्ति प्रणिहन्ति प्रहण्व (एवः) जहि अवधीत्। जघान कर्मणि अघानि अवधि। णिच् घातयति जिघांसति जघंन्यते" "कुशं हन्ति कुशाःदरि" इत्यादावालङ्कारिकाः गतौ निहतार्थतामाहुः।

अभि+आघातभेदे केनचित् पदार्थेन संयोगभेदे अभिघातः।

अव+तुषाद्यपसरणार्थव्यापारभेदे व्रीहीनवहन्ति। [घातः।

आ+केनचित् पदार्थेन संयोगानुकूलव्यापारे आहन्ति आत्माङ्गकर्मणि अकर्मकत्वे च आत्म० यथा आहते।

प्रति आ+प्रत्याघाते प्रतिबन्धे प्रत्याहन्ति। [व्याघातः

वि+आ परस्परेण विरोधे विशेषेण ताडिते च व्याहन्ति

उद्+ऊर्ध्वं गतौ उत्तोल्य हनने च।

उप+उद्+आरम्भे उपोद्घातः आरम्भार्थः उक्तिभेदः।

नि+निशेषेण हनने स्वरान्तरघातेन उदात्तस्वरसम्पादने च

निर्+निःशेषेण हनने वज्रादिशब्दे च। "निर्घाते भूमिचलने मनुः।

परा+प्रतिबन्धे निरोधे।

प्रति+प्रतिरोधे प्रतिकूलगतौ च। [घ्नन्ति योधाः।

वि+अति+परस्परहनने व्यतिहारेऽपि न आत्म०। व्यति-

सम्+सम्यक् हनने समूहभावे अक०।

हन् अव्य० हन-भावे क्विप्। १कुत्सोक्तौ २अनुनये च मेदि०। कर्त्तरि क्विप्। ३हननकर्त्तरि त्रि० वृत्रहा ब्रह्महा।

हन त्रि० हन कर्त्तरि अच्। हननकर्त्तरि सि० कौ०।

हनन न० हन-भावे ल्युट् "स्यात् प्राणवियोगफलव्यापारो हननं स्मृतम्" इत्युक्ते १व्यापारभेदे २गुणने च। [रत्नमा०।

हनील पु० हन-इन् ङीप् हन्यां लीयते ली-ड। केतकीवृक्षे

हनु(नू) पुंस्त्री० हन-उन् स्त्रीत्वे वा-ऊङ्। १कपोलद्वयोपरिस्थे मुखभागभेदे २हट्टविलासिन्यां स्त्री अमरः।

— ३रोगे ४अस्त्रभेदे ५मृतौ च स्त्री जटाधरकोषः।

हनुग्रह पु० हनुजाते रोगभेदे तन्निदानादि "जिह्वानिर्लेखनाच्छुष्कभक्षणादभिघाततः। कुपितो हनुमूलस्थः स्रंसयित्वाऽनिलो हनुम्। करोति विवृतास्यत्वमथवा संवृतास्यताम्। हनुग्रहः स तेन स्यात् कृच्छ्राच्चर्वणभाषणम्"। स्रंसयित्वा अधःकृत्वा विवृतास्यत्वं व्यात्तमुखत्वम्। निर्लेखनं कर्षणम् शुष्कं चणकादि संवृतास्यत्वं दन्तलग्नताम्" भावप्र० हनुस्तम्भोऽप्यत्र।

हनु(नू)मत् पु० हनु(नू)+अस्त्यर्थे मतुप्। रामस्य अनुचरे अञ्जनागर्भजाते पवनतनये वानरभेदे त्रिका०।

हनूष पुंस्त्री० हन-ऊषन्। राक्षसे त्रिका० स्त्रियां ङीष्।

हन्त अव्य० हन-त। १हर्षे २अनुकम्पायां ३विषादे अमरः। ४वाक्यारम्भे ५आप्तौ ६वादे ७सम्भ्रमे शब्दच०। ८खेदे मेदि० ९अन्तकल्पने च अजयपालः।

हन्तकार पु० हन्तेत्यस्य कारः करणं उच्चारणम् वा कृ-घञ्। १अतिथये अन्नदाने २हन्तशब्दप्रयोगे च।

हन्त्र पु० हन-त्रन्। १रक्ष्यौ २हवे च।

हन्तृ त्रि० हन-तृच्। १हननकर्त्तरि २सततहननानुशीलवति च स्त्रियां ङीप्। "महिषासुरहन्त्र्याश्च प्रतिष्ठा दक्षिणायने" देवप्र०त०।

हन्न त्रि० हद-क्त। कृतपुरीषोत्सर्गे अमरः।

हपुषा स्त्री हेति पुष्यति पुष-क। मरीचफलवद्बीजफलवर्णवस्तुनि वणिग्द्रव्यविशेषे। पृषो० षस्य सः तत्रार्थे। "हपुषा हपुषा विश्वा पराऽन्यत्वफला स्मृता। मत्स्यगन्धा प्लीहहन्त्री विषघ्नी ध्वाङ्क्षनाशिनी। हपुषा दीपनी तिक्ता कटूष्णा तुवरा गुरुः। पित्तोदरसमीरार्शो ग्रहणीगुल्मशूलहृत्। पराप्येतद्गुणा प्रोक्ता रूपभेदो द्वयोरपि" भावप्र०।

हम् अव्य० हा-डमु। १रुषोक्तौ २अनुनये च मेदि०।

हम्मा(म्भा) स्त्री हम्+मा-हम्म-अच् वा। गवां ध्वनौ त्रिका० पृषो०। हम्भाप्यत्र हेमच०।

हम्म गतौ भ्वा० प० सक० सेट्। हम्मति। अहम्मीत्।

हय गतौ सक० क्लान्तौ अक० भ्वा० प० सेट्। हयति अहयीत्।

हय पुंस्त्री० हय-हि-वा अच्। १घोटके अमरः स्त्रियां योपधत्वेऽपि हयगवयेत्यादिना ङीष्। अश्वशब्दे दृश्यम्। तत्र वर्ण्यपदार्थाः कविक० उक्ता यथा "श्रीमत्त्वं वेगशोभत्व तथा शुभवर्णास्थितिः। खुरोत्थातरणौ हयं जातिर्गतिश्चित्रता"। तस्य चतुर्णाद्युक्तं शकुनराजप्राकृते यथा "हेषारवं मुञ्चति वामतायः यस्य वातिर्दक्षिणपादघाते। कण्डूयते दक्षिणमङ्गभागं तुरङ्गः स पदं ददाति"

हयकातरा स्त्री हयः कातरो यस्याः ५त०। अश्वकातराख्यवृक्षे "कातरा हयपर्यायैः कातरान्तैः प्रकीर्त्तिता। अश्वकातरिका तिक्ता वातघ्नी दीपनी परा" राजनि०।

हयगन्ध पु० हयस्येव गन्धोऽस्य। १काचलवणे २अश्वगन्धायाम् ३अजमोदायाञ्च स्त्री राजनि०।

हयग्रीव पु० हयस्येव दीर्घा ग्रीवाऽस्य। १विष्णोरवतारभेदे २दैत्यभेदे च "हयग्रीवेण युयुधे तत्र देवो जगत्पतिः। हयग्रीवं यत्र हत्वा मणिकूटं तथागमत्" कालिपु० ८२अ०। ३दुर्गायां स्त्री तन्मूर्त्तिलक्षणं अश्वग्रीवशब्दे ५१४पृ० दृश्यम्। ४राजर्षिभेदे "यद्वृत्तं पूर्वराजर्षेर्हयग्रीवस्य पाण्डव!" भा० शा० २४अ०।

हयग्रीवहन् पु० हयग्रीवाख्यं दैत्यं हतवान् हन-क्विप्। विष्णौ हेमच०।

हयङ्कष पु० हयमुच्चैःश्रवसं कषति कष-खच्। १मातलौ इन्द्रसारथौ त्रिका०। २अश्वचालके च।

हयन न० हि-गतौ करणे ल्युट्। कर्णीरथे अमरः।

हयपुच्छी स्त्री हयस्य पुच्छाकारोऽस्त्यस्याः अच् गौरा० ङीष्। माषपर्ण्याम् अमरः।

हयप्रिय पु० ६त०। १यवे हेमच०। २अश्वगन्धायां ३खर्जूर्य्याञ्च स्त्री राजनि० ४अश्वरक्षके त्रि०। हयेष्टादयोऽप्यत्र।

हयमार पु० हयं मारयति निर्वेषणात् मृ-णिच्-अण्। करवीरे राजनि० ण्वुल्। तत्रैव अमरः। [शब्दच०]

हयमारण पु० हयं मारयति मृ-णिच्-ल्यु। अश्वत्थे

हयवाहन पु० हयो वाहनमस्य। सूर्य्यपुत्रे रेवन्ते हेमच०। २अश्ववाहनयुक्ते त्रि०। ६त०। ३अश्वस्य चालने न०।

हयवाहनसङ्कर पु० हयस्य वाहनं चालनं संकिरति सम्+कॄ-अच्। रक्तकाञ्चने शब्दच०।

हयशाला स्त्री ६त०। अश्वशालायां तन्निर्माणप्रकारादि मत्स्यपु० अ० उक्त यथा "गवां स्थानं तथैवात्र तुरगाणां तथैव च। उत्तराभिमुखी श्रेणी तुरगाणां विधीयते। दक्षिणाभिमुखी वाथ परिशिष्टास्तु गर्हिताः। तुरङ्गास्तु तथा धार्य्याः प्रदीपैः सार्वरात्रिकैः। कुक्कुटान् वानरांश्चैव मर्कटांश्च नराधिप!। धारयेदश्वशालायां सवत्सां धेनुमेव च। अजाश्च धार्य्या यत्नेन

वरगाथां स्थितैर्विप्रा । गीतवाद्यादिघोषाढ्य नवपुरी-
मध्ये निर्गमम् । अस्तं याते न कुर्वीत देवदेवे दिवाकरे ।
अधिकमश्वगाथाशब्दे ५२४ पृ० अश्वशब्दे च दृश्यम् ।

हयशीर्ष पु० हयस्येव शीर्षमस्य । १विष्णुमूर्त्तिभेदे हयशीर्ष-
पञ्चरात्रे तत्पूजादिकं दृश्यम । २याज्ञप्यामूर्त्तिभेदे
याज्ञप्याशब्दे ६००१ पृ० दृश्यम् ।

हया स्त्री हयः हयगन्धोऽस्त्यस्याः अच् । अश्वगन्धायाम्
राजनि० । घोटक्यां च हयीत्येव ।

हयाध्यक्ष पु० हयेषु तद्रक्षणेषु अध्यक्षः । अश्वरक्षाधिकृते

हयानन्द पु० हयमानन्दयति आ+नन्द-णिच्-अण् ।
मुद्गे राजनि० ।

हयारि पु० ६त० । करवीरे रत्नमा० ।

हयाशना स्त्री हयैरश्यते अश-ल्युट् । शल्लकीवृक्षे शब्दच०

हयोत्तम पु० हयेषु उत्तमः । अश्वश्रेष्ठे आजानेयेऽश्वे त्रिका०

हर पु० हृ-अच् । १रुद्रे अमरः २अग्नौ ३गर्दभे ४विभाजके
च "अन्योन्यहाराभिहतौ हरांशाविति" लीला० ।
हृ-भावे अप् । ५हरणे ६विभाजने च ।

हरगौरी स्त्री हरदेहार्द्धं हरा गौरी शा०त० । अर्द्धनारी-
श्वररूपे १शिवपार्वत्योर्मूर्त्तिभेदे तल्लक्षणम् । २७०१ पृ०
दृश्यम् । द्वन्द्व० । २शिवपार्वत्योः द्वि० व० ।

हरचूडामणि पु० हरस्य चूडामणिरिव । चन्द्रे ।

हरण न० हृ-भावे ल्युट् । १स्थानान्तरकरणे २विभाजने च
कर्मणि ल्युट् । ३यौतुकादौ देये धने भा० आ० हरणा-
हरणपर्व २२१अ० । ४भुजे मेदि० ।

हरतेजस् न० ६त० । १पारदे राजनि० २शिववीर्य्ये च ।
हरवालादयोऽप्यत्र । [गङ्गायां हेमच० ।

हरशेखरा स्त्री हरस्य शेखरमाश्रयत्वेनास्त्यस्याः अच् ।

हरि पु० हृ-इन् । १विष्णौ २सिंहे ३सर्पे ४वानरे ५भेके
६शुकखगे अमरः । ७इन्द्रे ८सूर्य्ये ९वायौ १०अश्वे
११यमे १२हरे १३ब्रह्मणि १४किरणे जम्बुद्वीपस्य
१५वर्षभेदे १६चन्द्रे च मेदि० १७मयूरे १८कोकिले
१९हंसे २०वह्नौ शब्दर० । भर्त्तृहरिनामके वाक्यपदीय
ग्रन्थकारके २१पण्डिते त्रिका० । २२पिङ्गलवर्णे २३हरि-
द्वर्णे हेमच० २४तद्वति त्रि० । "हरिं विदित्वा हरि-
भिश्च वाजिभिः" रघु । २५पीते अनेकार्थको० ।

हरिक पु० हरि+संज्ञायां कन् । पीतहरिद्वर्णाश्वे हेमच०

हरिकेलीय पु० हरिकेलिमर्हति छ । वङ्गदेशे हेमच० ।

हरिकेश पु० हरिः पिङ्गलः केशोऽस्य । १शिवे २शिवभक्त-
यक्षभेदे च । स एव तत्प्रसादात् काश्यां दण्डपाणित्व-
मापन्नवान् इति काशीखण्डे ३२अ० स्थितम् । मत्स्यपु०
१५८अ० दृश्यम् । [राम अपराजितायां राजनि० ।

हरिक्रान्ता स्त्री हरिस्तद्वर्णः क्रान्तो येन । विष्णुक्रान्ता०

हरिगृह न० ६त० हरेर्विष्णुमूर्त्तेर्गृहम् । १हरिमूर्त्तिगृहे
२एकचक्रपुरीभेदे च त्रिका० ।

हरिचन्दन न० हरेरिन्द्रस्य प्रियं चन्दनम् चन्दयति
चदि-ल्यु ६त० वा । १देवतरुभेदे अमरः । हरेर्विष्णोः
प्रियं चन्दनम् । २श्वेतचन्दने ३गोशीर्षनामके मलयैक-
देशजाते चन्दनभेदे ४ज्योत्स्नायां ५कुङ्कुमे मेदि० ।
६पद्मकेशरे हला० ७चन्द्रातपे च श०चन्द्र० । "हरिच-
न्दनन्तु दिव्यं हिमं तदिह दुर्लभं मनुजैः । पित्ताटोप-
विलोपिश्रमदुःखशोषशमनाद्यमेतदुक्तं" राजनि० । "हृष्टं
च तुलसीकाष्ठं कर्पूरागुरुयोगतः । अथ वा केश-
रैर्योज्यं हरिचन्दनमुच्यते" पद्मपु० पा० ख० १२अ०
उक्ते द्रव्यसंयुक्तद्रव्यगणे च ।

हरिण पुंस्त्री० हृ-इनन् । स्वनामख्याते १पशौ अमरः
स्त्रियां ङीष् । २शिवे ३विष्णौ ४हंसे ५शुक्लवर्णे ६पाण्डु-
वर्णे च । ७तद्वति त्रि० अमरः । "हरिणः शीतलो बद्ध-
विण्मूत्रो दीपनो लघुः । रसे पाके च मधुरः सुगन्धिः
सन्निपातहा" राजव० तन्मांसगुणाः । "हरिणश्चापि
विज्ञेयः पञ्चभेदोऽत्र भैरव । ऋष्यः खड्गो रुरुश्चैव
पृषतश्च मृगस्तथा । एते बलिप्रदानेषु चर्मदाने च
कीर्त्तिताः" कालिकापु० ६६अ० । [शब्दर० ।

हरिणनर्त्तक पु० हरिण इव नृत्यति नृत-ण्वुल् । किन्नरे

हरिणहृदय पु० हरिणस्येव भीतं हृदयमस्य । भीरौ शब्दर०

हरिणाक्षी स्त्री हरिणस्येवाक्षि यस्याः ५त० ६त० वा षच्
समा० ङीष् । १इक्षुविलासिनीनामगन्धद्रव्ये शब्दच० ।
२हरिणतुल्यनेत्रयुते त्रि० स्त्रियां ङीष् । "हरिणाक्षि !
कटाक्षेण आत्मानमवलोकय" इत्युद्भटः ।

हरिणाङ्क पु० हरिणः शशनामको मृगोऽङ्कश्चिह्नम् अङ्के
क्रोडे वा अस्य । १चन्द्रे शब्दर० २कर्पूरे च ।

हरिणी स्त्री हरितवर्णा स्त्री ङीप् तस्य नः । १हरितव-
र्णायां स्त्रियां मेदि० २स्वर्णप्रतिमायाम् अमरः । ३स्वर्ण-
यूथ्यां ४मञ्जिष्ठायां राजनि० । ५तरुण्यां ६वरस्त्रियां
शब्दर० "वसुयुगहयैर्म्नौ न्सौ म्लौ गो यदा हरिणी
तदा" वृ० र० उक्तलक्षणके ७सप्तदशाक्षरपादके छन्दो-
भेदे हरिणस्य स्त्री ङीष् । ८मृग्याञ्च ९[illegible] ।

"चरतः किल दुश्चरं तपः तृणबिन्दोः परिशङ्कितः पुरा। प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुराङ्गनाम्" रघुः।

हरित् पु० हृ-इति। १नीलपीतमिश्रितवर्णे (पाताटङ्ग पलाशवर्णे च अमरः २तद्वति त्रि०। ३सूर्य्याश्वे त्रिका० ४मुद्गे हेमच०। ५सिंहे ६सूर्य्ये ७विष्णौ च पु० ८दिशि स्त्री अमरः। ९हरिद्रायां राजनि० १०तृणे न० मेदि०।

हरित्पर्ण न० हरित् पर्णमस्य। मूलके राजनि०।

हरित पु० हृ-इतच्। १सिंहे २मन्थानतृणे राजनि० ३हरिद्वर्णे ४तद्वति त्रि० अमरः स्त्रियां ङीप् तस्य नश्च। ५दूर्वायां मेदि० ६जयन्त्यां ७हरिद्रायां ८कपिलद्राक्षायां ९पाच्यां १०नीलदूर्वायाञ्च स्त्री राजनि० टाप्। ११स्थौणेयके न० राजनि०। [शाके न० राजनि०

हरितक न० हरितेन वर्णेन कायति प्रकाशते कै-क।

हरितपत्रिका स्त्री हरितं पत्रं यस्याः कप् कापि अत इत्वम्। पाच्यां राजनि०।

हरितशाक पु० हरितं शाकमस्य। शोभाञ्जने राजनि०।

हरिताल न० हरिः वर्णस्य पीतवर्णस्य तालः प्रतिष्ठा यत्र। १पीतवर्णे उपधातुभेदे "च हरितालसमानवर्णगुणः" माघः। २पीतवर्णपक्षिभेदे पुंस्त्री० राजनि०। स्त्रियां ङीष्। स्वार्थे क। हरितालक न० अमरः।
"हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम्। तयोराद्यं गुणैः श्रेष्ठं ततो हीनगुणं परम्। स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत्। पत्राख्यं तालकं विद्याद् गुणाढ्यं तद्रसायनम्। निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं तथा गुरु। स्त्रीपुष्पहारकं स्वल्पगुणं तत् पिण्डतालकम्। हरति च हरितालं चारुतां देहजाताम् सृजति च बहुतापानङ्गसङ्गोपपीडाम्। वितरति कफवातौ कुष्ठरोगं विदध्यादिदमशितमशुद्धम् मारितञ्चाप्यसम्यक्"। "तालकं कणशः कृत्वा तच्चूर्णं काञ्जिके पचेत्। दोलायन्त्रेण यामैकं ततः कूष्माण्डजद्रवैः। तिलतैले पचेद् यामं यामञ्च त्रिफलाजले। एवं यन्त्रे चतुर्यामं पक्वं शुध्यति तालकम्"। अथ तालस्य मारणविधिः "सदलं तालकं शुद्धं पौनर्नवरसेन तु। खल्वे विमर्दयेदेकं दिनं पश्चाद्विशोषयेत्। ततः पुनर्नवाक्षारैः स्थाल्यामर्द्धं प्रपूरयेत्। तत्र तच्चालकं कृत्वा पुनस्तेनैव पूरयेत्। आकण्ठं पिठरं तस्य पिधानं धारयेन्मुखे। स्थालीं चुल्यां समारोप्य क्रमाद्वह्निं विवर्द्धयेत्। दिनान्यन्तरशून्यानि पञ्च वह्निं प्रदापयेत्। एवं तन्म्रियते तालं मात्रा तस्यैकरक्तिका। अनुपानान्यनेकानि यथायोग्यं प्रयोजयेत्"। एवं शोधितस्य मारितस्य तालकस्य गुणाः। "हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम्। कण्डूकुष्ठास्यरोगास्रकफपित्तकचव्रणान्"। "तालकं हरते रोगान् कुष्ठमृत्युज्वरापहम्। शोधितं कुरुते कान्तिं वीर्यवृद्धिं तथायुषम्" भावप्र०।
हरितालकमांसगुणाः "हरितालोऽल्पविट्कः स्यात् कषायो मधुरो लघुः। रक्तपित्तप्रशमनस्तृषाघ्नो वातकोपनः" राजनि०।

हरितालिका स्त्री हरेस्तालो हस्ततालो यस्यां कप् अत इत्वम्। १भौरभाद्रशुक्लचतुर्थ्याम् हरितवर्णाय अलति पर्य्याप्नोति अल-ण्वुल्। २दूर्वायाम् त्रिका०। अण् ङीप्। हरिताली दूर्वायाम् सा च आकाशरेखायां मेदि० अङ्कनतायाम् हरितालिकायाञ्च।
"भाद्रे मासि सिते पक्षे वसुदेवतसंयुता। हरितालो चतुर्थी स्यात् सर्वोपोषितदा सदा। भाद्रे मासि सिते पक्षे चतुर्थ्यां स्त्रीभियोगतः। ददाति विल्वपं चरं ददन्ध्रो न संशयः। करविलानलम्वेषु हरौ सूर्ये चतुर्थिका। हरिताली समाख्याता सर्व्वपापोपपीतदा सदा" राजमार्त्तण्डः

हरिताश्म न० हरितवर्णाश्म अश्मेव वा अश्मसार(फिरोजा) १मणिभेदे २त्ये (तुँत) उपधातुभेदे च राजनि०।

हरिदर्भ पु० हरिद्वर्णो दर्भः हरिद्वर्णे कुशे अमरः।

हरिदश्व पु० हरिद्वर्णोऽश्वो यस्य। १सूर्य्ये २अर्कवृक्षे च अमरः।

हरिदेव पु० हरिर्देवोऽधिष्ठाता यस्य। श्रवणानक्षत्रे।

हरिद्गर्भ पु० हरिद्वर्णो गर्भो यस्य। हरिद्वर्णे कुशे राजनि०।
"दर्भौ द्वौ च गुणे तुल्यौ तथापि च सितोऽधिकः। यदि श्वेतकुशाभावस्तत्परं योजयेद्भिषक्" राजनि०। "दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम्। मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक् प्रदरास्रजित्" भावप्र०। तन्मूलगुणाः 'कुशमूलं हिमं वृष्यं मधुरं पित्तनाशनम्। रक्तज्वरतृषाश्वासकामलादोषशोषहृत्" राजनि०।

हरिद्रव पु० हरिवर्णः पिङ्गलवर्णो द्रव द्रव। नागकेशररजसि त्रि०।

हरिद्रा स्त्री हरिं पीतवर्णं द्रवति द्रु-गतौ ड। अनामख्याते ओषधिभेदे।

"हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत्। वर्ण्या त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा"। (वनहरिद्रा) "अरण्यहरिद्राकन्दः कुष्ठवातास्रनाशनः"। (कर्पूरहरिद्रा) "दार्वी भेदाम्रगन्धा च सुरभिर्दारुदारु च। कर्पूरा पद्मपत्रा स्यात् सुरभिः सुरनायिका। आम्रगन्धिहरिद्रा या सा शीता वातला मता। पित्तहृन्मधुरा तिक्ता सर्वकण्डूविनाशिनी" भावप्र०।

हरिद्रागणेश पु० हरिद्रावर्णयुक्तो गणेशः। पीतवर्णे गणेशभेदे तन्त्रसारः। [स्त्रियां ङीप्।

हरिद्राङ्ग पुंस्त्री० हरिद्रेव अङ्गमस्य। हरितालखगे शब्दच०

हरिद्राभ पु० हरिद्रेव आभाति आ+भा-क। १पीतशाले (पियाशाल) २कर्बुरके ३पीतवर्णे च। ४तद्वति त्रि० अमरः।

हरिद्राराग त्रि० हरिद्राया इव रागः रञ्जनमनुरागः। अस्थिरानुरागे शोङ्करे। "अचमात्मानुरागश्च हरिद्राराग उच्यते" हला०।

हरिद्रु पु० हरिः हरिद्वर्णो दलादिद्वारा द्रुः। १तुम्बाले हेमच०। २दारुहरिद्रायाञ्च अमरः। [तीर्थभेदे

हरिद्वार न० हरेस्तत्प्राप्तेः द्वारं सेवनात्। स्वनामख्याते

हरिनामन् न० हरेर्नाम तदाख्यानं वा। १विष्णुनामनि २तदाख्याने च हरेरिव नामास्य। ३मुद्गे पु० त्रिका०।

हरिनेत्र न० हरेर्नेत्रमिव। १श्वेतपद्मे राजनि०। ६त०। २विष्णोर्लोचने। हरेः सिंहस्येव नेत्रमस्य दीर्घत्वात्। ३पेचके पुंस्त्री० त्रिका० स्त्रियां ङीष्।

हरिन्मणि पु० हरिद्वर्णो मणिः। मरकते मणौ अमरः।

हरिन्मुद्ग पु० हरिद्वर्णो मुद्गः। शरदि पक्के मुद्गे राजनि०।

हरिप्रिय न० हरेर्विष्णोः प्रियम्। १कालीयके चन्दने शब्दच०। २उशीरे राजनि०। ३कदम्बे पु० शब्दच०। ४पीतभृङ्गराजे ५विष्णुकन्दे ६करवीरे ७शङ्खे दन्तवृक्षे पु० राजनि०। ९शिवे १०बालुके च पु०। ११लक्ष्म्यां स्त्री १२तुलस्यां १३पृथिव्यां १४द्वादश्यां तिथौ च स्त्री। १५हरिवल्लभे त्रि०। [शब्दर०।

हरिबालुक न० हरेर्विष्णोः प्रिया वालुकास्य। एलवालुके

हरिभक्त त्रि० हरौ विष्णौ भक्तः। १विष्णुभक्तियुते "सर्वजीवेषु यो विष्णुं भावयेत् समभावतः। हरौ करोति भक्तिञ्च हरिभक्तः स च स्मृतः" ब्रह्मपु० ३१ अ० उक्ते २सर्वत्रसमदृष्टिपूर्वकहरिसेवके पु०। [शब्दर०।

हरिभद्र न० हरिं भद्रयति सन्तर्पयति अच्। हरिद्वालुके

हरिभुज् पु० हरिं भेकं भुङ्क्ते भुज-क्विप्। सर्पे शब्दच०।

हरिमन्थ पु० मथ्यते मन्थः हरिर्मन्थं एकदेशो यस्य। १चणके राजनि० तस्य बहुमन्थनेऽपि पीतत्वानपायात्तथात्वम्। हरिं सर्पं मथ्नाति मन्थ-अच्। २गणिकारिकायाम् शब्दच०। ३देशभेदे पु० भरतः। [१चणके भरतः।

हरिमन्थक पु० हरिः पीतो मन्थ एकदेशो यस्य कप्।

हरिमन्थज पु० हरिमन्थे देशभेदे जायते जन-ड। चणके अमरः। २कृष्णमुद्गे च हेमच०। [हेमच०।

हरिय पु० हारं हरिवर्णं याति या-क। पीतवर्णाश्व टके

हरिलोचन पुंस्त्री० हरेरिव लोचनमस्य। १कर्कटे (कँकड़ा) त्रिका०। २पेचके।

हरिवंश पु० ६त०। १विष्णुवंशे हरेर्वंशो वर्ण्यतेऽनेनास्मिन् वा अच्। महाभारतान्तर्गते खिलरूपे व्यासकृते २ग्रन्थभेदे। तत्प्रतिपाद्यविषयाश्च हरिवं० २२५ अ० उक्ता यथा "हरिवंशेऽत्र वृत्तान्ताः कीर्त्यन्ते क्रमशोदिताः। तत्रादावादिसर्गस्तु भूतसर्गस्ततः परः। पृथोर्वैन्यस्य चाख्यानं मनूनां कीर्त्तनं तथा। वैवस्वतकुलोत्पत्तिस्तु धुन्धुमारकथा तथा। गालवोत्पत्तिरत्र त्रिशङ्कोश्चाप्यत्र कीर्त्तनम्। पितृकल्पस्तथोत्पत्तिः सोमस्य च बुधस्य च। अमावसोरन्वयस्य कीर्त्तनं कीर्त्तिवर्द्धनम्। द्युतिमतोऽस्य मतश्च प्रथमः धन्वन्तरिकथा। दिवोदासप्रतिष्ठा च त्रिशङ्कोः चरितस्य च। ययातिचरितञ्चैव पुरुवंशस्य कीर्त्तनम्। कीर्त्तनं वृष्णिवंशस्य स्यमन्तकमणेस्तथा। संक्षेपात् कीर्त्तिता विष्णोः प्रादुर्भावास्ततः परम्। तारकामययुद्धस्य कालनेमेश्च वर्णनम्। योगनिद्राक्षयस्य च विष्णोर्नारदस्य भेषणः। पृथिव्याश्च देवानामंशावतरणं तथा। ततो नारददाक्षस्य सप्तगर्भविधिस्तथा। आद्योक्तः पुनः कृष्णस्योत्पत्तिः प्रपंचतः। गोव्रजे गमनं विष्णोः शकटस्य निवर्त्तनम्। पूतनायाः वधो भङ्गो यमलार्जुनयोरपि। वृकसंदर्शनञ्चैव वृन्दावननिवेशनम्। कालियो दमनञ्चापि यमुनाह्रददर्शनम्। कालियस्यापि दमनं धेनुकस्य वधस्तथा। प्रलम्बस्य वधश्चैव शरद्वर्णनमेव च। गिरियज्ञप्रवर्त्तनं गोवर्द्धनविधारणम्। गोविन्दस्याभिषेकश्च गोपीभिः क्रीडनं तथा। अरिष्टस्य च वाक्यानि केशिनो निधनं तथा। अक्रूरागमनञ्चैव नागलोकस्य दर्शनम्। धनुर्भङ्गस्य कथनं कुवलयापीडसंहारः चाणूरान्ध्रनिपातनम्। कंसस्य निधनञ्चापि विलापः कंसयोषिताम्। उग्रसेना-

मिषेकश्च द्वादशाब्दासनं तथा। मथुरागतिर्बलकृष्णा- दयोक्ता रामकृष्णयोः। मथुरावासोपरोधो जरासन्ध- निवर्त्तनम्। विकद्रुवाक्यं रामस्य दर्शनं भाषणं तथा। गोमन्तारोहणञ्चापि जरासन्धगतिस्तथा। गोमन्तस्य गिरेर्दाहः करवीरपुरे गतिः। सृगालस्य वधस्तत्र मथु- रागमनं ततः। यमुनाकर्षणञ्चैव मथुरापक्रमस्तथा। मुचुकुन्देन वधः कालयवनस्य प्रकीर्त्तितः। निर्माणं द्वार- वत्यास्तु रुक्मिणीहरणं तथा। विवाहश्चैव रुक्मिण्या रुक्मिणो निधनं तथा। बलदेवाह्निकं पुण्यं बलमाहा- त्म्यमेव च। नरकस्य वधः पारिजातस्य हरणं तथा। निकुम्भस्य वधाख्यानं प्रपञ्चेनैव कीर्त्तितम्। प्रभावत्याश्च हरणं वज्रनाभवधस्तथा। द्वारवत्या विशेषेण पुनर्नि- र्माणकीर्त्तनम्। द्वारवत्यां प्रवेशश्च समावाप्य प्रवेशनम्। नारदस्य च वाक्यानि हरिवंशानुकीर्त्तनम्। षट्पुरस्य महाख्यानमन्धकस्य निबर्हणम्। समुद्रयात्रा कृष्णस्य जलक्रीडाकुतूहलम्। तथा भैमप्रवीराणां भानुयान- प्रवर्त्तनम्। ततश्चाप्युग्रयागन्धर्वसुताहरणं हरेः। भानोश्च दुहितुर्भानुमत्या हरणकीर्त्तनम्। अन्धकस्य वधश्चैव धन्योपाख्यानमेव च। वासुदेवस्य माहात्म्यं बाणयुद्धं प्रपञ्चितम्। भविष्यं पुष्करञ्चैव प्रपञ्चेनैव कीर्त्तितम्। वाराहं नारसिंहञ्च वामनं बहुविस्तरम्। कैलासयात्रा कृष्णस्य पौण्ड्रकस्य वधस्ततः। हंसस्य डिम्भकस्यैव वधश्चैव प्रकीर्त्तितः। त्रिपुरस्य संहार इति वृत्तान्तसंग्रहः। कथितो व्यासपादैश्च सर्वपापप्रणाशनः। वृत्तान्तं शृणुयाद्यस्तु सायं प्रातः समाहितः। स याति वैष्णवं धाम सत्यकामः कुरूद्वह!। धन्यं यशस्य- मायुष्यं भुक्तिमुक्तिफलप्रदम्"।

हरिवल्लभा स्त्री। १जयायां २तुलस्यां राजनि० ३लक्ष्म्याञ्च।

हरिवात् पु० हरिणा घोटकेन वेगवता वाति गच्छति वा-क्विप्। इन्द्रे हलायुधः।

हरिवर्ष न० हरिनामकं वर्षम्। जम्बुद्वीपस्य नववर्षमध्ये वर्षभेदे त्रिका०।

"एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयोऽयुतयोजनोत्सेधा हरि- वर्षकिम्पुरुषभारतानां यथासंख्यम्" भाग० ५स्क०१६अ०।

हरिवासर न० हरिप्रियं वासरम्। १एकादशीदिवसे २द्वा- दशीप्रथमपादे च। "यत्समाश्रित्य पापानि तिष्ठन्ति हरिवासरे" इति। "द्वादश्याः प्रथमः पादो हरि- वासरसंज्ञकः" इति च एकादशीतत्त्वे विष्णुधर्मो०।

हरिवाहन पु० हरिं वाहयति स्थानान्तरं नयति वह+ णिच् ल्यु। १गरुडे हारा०। ६त०। २हरिवाहनमप्यत्र न०।

हरिवीज न० हरेर्बीजमुत्पत्तिकारणत्वेनास्त्यस्य अच्। हरि- ताले "हरितालं हरेर्बीजं बल्लग्रावीजं मनःशिला" इति वैद्यकम्।

हरिशयन न० हरेः शयनं निद्रा। १विष्णुनिद्रायाम्। हरेः शयनं यत्र। २तदुपलक्षिते काले। स च "मैत्राद्यपादे स्वपितीह विष्णुः" इत्युपक्रम्य "प्रबुध्यते मासचतुष्टयेन" इत्यन्तेन दर्शितः आषाढस्य शुक्लद्वादश्यन्तर्भिकार्त्तिकशुक्ल- द्वादशीपर्य्यन्तरूपो मासचतुष्टयात्मकः। उत्थानैकादशी- शब्दे १०७पृ० दृश्यम्।

हरिश्चन्द्र पु० हरिः चन्द्र इव यस्मै रुट्। सूर्य्यवंश्ये त्रिशङ्कुपुत्रे नृपभेदे। ऋषिभिन्ने तु न रुट्। हरि- चन्द्र एव।

हरिश्चन्द्रपुर न० ६त०। सौभनगरे त्रिका०।

हरिषेण पु० जिनचक्रवर्त्तिभेदे हेमच०। हरिसुतोऽप्यत्र।

हरिसङ्कीर्त्तन न० हरेर्हरिनाम्नः सङ्कीर्त्तनं कथनम्। श्रीविष्णुनामीयोद्धारणे "सकलं निष्फलं राजन्! हरि- सङ्कीर्त्तनं विना" इति कर्म्मलोचनम्।

हरिहय पु० हरितवर्णाः हरिवर्णा वा हयो यस्य। इन्द्रे अमरः "हरिं विदित्वा हरिभिश्च वाजिभिः" इति रघौ तस्य हरिवर्णतुरगवत्त्वम्।

हरिहर पु० हरियुक्तो हरः। हरिहरयोः संश्लिष्टाङ्ग- देहतया स्थिते मूर्त्तिभेदे देवप्रतिमाशब्दे १७०१ तन्मूर्त्ति- लक्षणं दृश्यम्। द्व०। २शिवनारायणयोः द्वि० व०।

हरिहरक्षेत्र न० हरिहरयोः प्रियं क्षेत्रम्। गङ्गागण्डकी- सङ्गमान्तिकदेशस्थे पाटलिपुत्रादुत्तरस्यां दिशि स्थिते तीर्थभेदे।

हरिहरात्मक पु० १गरुडे २शिववृषे च शब्दर०।

हरीतकी स्त्री० हरिं पीतवर्णं फलद्वारा इता प्राप्ता इण- क्त संज्ञायां कन् गौरा० ङीष्। १स्वनामख्याते वृक्षे तस्याः फलम् अण् तस्य लुप्। २हरीतकीफले स्त्री अमरः। "कदाचित् कुपिता माता नोदरस्था हरीतकी" इति वैद्यकम्। [illegible]तकीशब्दे २६६२ पृ० दृश्यम्।

हरेणु स्त्री हृ-एनु। १रेणुकानामगन्धद्रव्ये अमरः। २कुल- स्त्रियां। ३सतीने (मटर) पु० मेदि०। स्वार्थे क तत्रैव।

हर्त्तृ त्रि० हृ-तृच्। १हरणकारिणि २चौरे ३सूर्य्ये च पु०

हर्मन् न० हृ+मनिन् । जृम्भणे (हाइतोला) शब्दरत्नावली ।

हर्मित त्रि० हर्मन्+तार० इतच् । १जातजृम्भणे शब्दर० २दग्धे ३क्षिप्ते च मेदि० ।

हर्म्य न० हृ-यत् मुट् च । १इष्टकाकाष्ठादिरचिते धनिनां गृहभेदे अमरः "रम्यं हर्म्यतलम्" इति प्रबोध० ।

हर्य्य कान्तौ अक० गतौ सक० भ्वा० पर० सेट् । हर्य्यति अह- र्य्यीत् । [अमरः । स्त्रियां ङीष् २कुबेरे च जटा० ।

हर्य्यक्ष पुंस्त्री० हरि पिङ्गलमक्षि यस्य अच्समा० । १सिंहे

हर्य्यश्व पु० हरिनामा हरिवर्णो वाऽश्वोऽस्य । इन्द्रे ।

हर्ष पु० हृष-घञ् । १सुखे अमरः २इष्टाधिगमजन्यानन्दे । ३कन्दर्पपितरि "पुत्रस्य कथाच । कन्दर्पो हर्षतनयो योऽसौ कामो निगद्यते । स शङ्करेण संदग्धो ह्यनङ्ग- त्वमुपागतः" । वामनपु० ६अ० । ४कलियुगीयनृपभेदे हर्ष- चरिते तत्कथा दृश्या । [शब्दमा० ।

हर्षक त्रि० हृष-णिच् ण्वुल् । १हर्षकारके । २पर्वतविशेषे

हर्षण पु० हर्षयति अभीष्टदानात् हृष-णिच्-ल्यु । १वि- ष्कम्भादिमध्ये चतुर्दशे योगे ज्यो० । २हर्षकारके त्रि० । ३नेत्ररोगभेदे ४श्राद्धभेदे ५श्राद्धदेवभेदे पु० शब्दच० । हृष-भावे ल्युट् । ६हर्षे न० ।

हर्षपद न० ६त० । ज्यो० ताजकोक्ते ग्रहविशेषस्य लग्नादिस्थानभेदे । यथोक्तम् "नन्दत्रिषड्लग्नभवखपुत्र- व्यया इलाद्वर्षपदं क्रमोक्तम् । त्रिभं त्रिभं स्वस्वभतः क्रमेण स्त्रीणां नृणां रात्रिदिनेषु तेषु" । हर्षस्थाना- दयोऽप्यत्र । "न हर्षस्थानमाश्रितः" नीलक० ।

हर्षमाण पु० हृष-ताच्छील्ये चानश् । हृष्टचित्ते अमरः ।

हर्षयित्नु पु० हृष-णिच्-इत्नु । १पुत्रे २स्वर्णे न० मेदि० । ३हर्षयोगे त्रि० । [२हर्षकारके त्रि० ।

हर्षिणी स्त्री हृष-णिच्-णिनि ङीप् । १विजयायाम्

हर्षित त्रि० हर्षो जातोऽस्य इतच् । १जातानन्दे । २हर्ष- स्थानगते ग्रहे च ।

हर्षुल पुंस्त्री० हृष+उलच् । १मृगे स्त्रियां ङीप् । २कामुके त्रि० सि० कौ० । ३हर्षयोगे त्रि० । [वादि० हलः फालः

हल विलेखे भ्वा० पर० सक० सेट् । हलति अहालीत् ज्व-

हल न० हल्यते कृष्यतेऽनेन हल-घञर्थे करणे क । लाङ्गले अमरः । कृषिशब्दे २१८८पृ० दृश्यम् ।

हलदी स्त्री हल-यत-हलन्तं कनकमपि दारयति शोधयति दॄ-क गौरा० ङीष् । हरिद्रायाम् राजनि० ।

हलधर पु० हलं धरति आयुधत्वेन कर्षणसाधनत्वेन वा । धृ-अच् । १बलरामे शब्दर० । २कर्षके त्रि० "उन्मूलिता हलधरेण पदा स्खलतैः" उद्भटः ।

हलभूति स्त्री हलेन हलसाध्या भूतिः । कृषिवृत्तौ शब्दर० ।

हलभृत् पु० हलं बिभर्त्ति भृ-क्विप् । १बलदेवे त्रिकाण्ड० २लाङ्गलधारके च । [३कर्षिकार्य्ये च ।

हलभृति पु० ... १मुनिभेदे त्रिका० । २हलस्य धारणे

हला अव्य० हेति लीयते ला-क । नाट्योक्तौ १सखीसम्बो- धने अमरः । २सख्यां जटा० ३पृथिव्यां स्त्री ४जले च स्त्री अजयपालः ।

हलायुध पु० हलेन आयुध्यति आ+युध क । १बलदेवे अमरः २ब्राह्मणसर्वस्वादिग्रन्थकारके विद्वद्भेदे च ।

हलाह पुंस्त्री० । चित्रिताश्वे हेमच० स्त्रियां ङीष् ।

हलाहल न० हलेनेव आहलति विलिखति आ+हल-अच् । १विषभेदे २ब्रह्मसर्पे ३अञ्जनायां मेदि० । ४बुद्धभेदे त्रिका० ।

हलि पु० हल-इन् । वृहद्धले शब्दर० ।

हलिन् पु० हलोऽस्त्यस्यायुधत्वेन कर्षसाधनत्वेन वा इनि । १बलरामे अमरः २कर्षके त्रि० । हलस्य आकारो विद्यते यस्या ङीप् हलिनी (विषलाङ्गला) ३लाङ्गली- वृक्षे रत्नमा० इनि । हलानां समूहः ङीप् ४हल- समूहे स्त्री । [राजनि० ।

हलिप्रिय पु० ६त० । १कदम्बवृक्षे अमरः । २मदिरायां स्त्री

हली स्त्री हल-इन् ङीप् । कलिकारीवृक्षे राजनि० ।

हलीन पु० हलाय हितः ख । शाकवृक्षे (सेगुन) शब्दच० ।

हली(म)सक पु० पाण्डुरोगभेदे "यदा तु पाण्डोर्वर्णः स्याद्- हरित श्यावपीतकः । बलोत्साहक्षयस्तन्द्रामन्दाग्नित्वं मृदुज्वरः । स्त्रीष्वहर्षोऽङ्गमर्दश्च श्वासतृष्णारुचिभ्रमाः । हली(म)सकं तदा तस्य विद्यादनिलपित्ततः" भावप्र० ।

हलीषा स्त्री हलस्य ईषा शक० । लाङ्गलदण्डे ।

हल्य त्रि० हलं हलकर्षणमर्हति तस्येदं वा यत् । १हलकर्ष- णयोग्ये क्षेत्रादौ अमरः । २हलसम्बन्धिनि च । हलानां समूहः यत् । ३हलसमूहे स्त्री अमरः । [illegible]

हल्ल विकासे भ्वा० पर० अक० सेट् भानुदीक्षितः । हल्लति

हल्लक न० हल्ल-ण्वुल् भानुदीक्षितः । हल-सम्प०भावे क्विप् हलं याति या-क । संज्ञायां कन् वा । रक्तकह्लारे (छेला) अमरः ।

हल्लीष न० हल्-क्विप् लष-अच् पृषो० कर्म० । स्त्रीणां मण्डलिकाकारनृत्ये । मतः स्वार्थे क । तत्रैव । "मण्डलेन तु यन्नृत्यं स्त्रीणां हल्लीषकन्तु तत् हेमच०

२रासक्रीड़ायाञ्च तल्लक्षणं यथा “पुष्पं सुरत्नं मकरन्दं वितस्तिमात्रोन्नतं कौ विनिखन्य मद्दकम्। आक्रम्य पद्भ्यामितरेतरन्तु हस्तौ भ्रमोऽयं खलु रासगोष्ठी” हरिवं०टी०नीलकण्ठः। [३होमे ४आह्वाने च अमरः।

हव पु० हु–अप् ह्वे–अप् संप्र० पृषो० वा। १यज्ञे २आज्ञायां

हवन न० हु–भावे ल्युट्। होमे देवाद्युद्देशेन मन्त्रपूर्वकं वह्नौ हविःप्रक्षेपे शब्दच०। [शब्दा०

हवनी स्त्री हूयतेऽस्यां हु–आधारे ल्युट् ङीप्। यज्ञकुण्डे

हवनीय त्रि० हु–कर्मणि अनीयर्। होमीयद्रव्ये।

हवा अव्य० ह च वा च द्वन्द्व०। प्रसिद्धार्थे।

हविरशन पु० हविरश्नाति अश–ल्यु। १वह्नौ हेमच०। २चित्रकवृक्षे च। भावे ल्युट्। ३घृतभोजने न०। [राजनि०

हविर्गन्धा स्त्री हविषो गन्धो यस्याः। शम्यां (शाँइ)

हविर्गेह न० हविषो गेहम्। यज्ञमण्डपपश्चिमदेशस्थे हवनीयद्रव्यस्थापनार्थे गेहभेदे हेमच०। [कारीषके रत्नमा०।

हविर्मन्थ पु० हविषे मथ्यतेऽसौ मन्थ–कर्मणि घञ्। गणि०

हविष्य न० हविषे हितम् यत्। १घृते हेमच०। २तत्तुल्ये हैमन्तिकादावन्ने च “चेरुर्हविष्यं भुञ्जानाः” भाग० १०। “नारिकेलफलञ्चैव कदलीं लवलीं तथा। आम्रमामलकञ्चैव पनसञ्च हरीतकीम्। व्रतान्तरप्रशस्तञ्च हविष्यं मन्यते बुधाः” ति० त० ब्रह्मसंहिता।

हविष्यान्न न० कर्म०। “हैमन्तिकं सिताऽस्विन्नं धान्यं मुद्गास्तिला यवाः। कलायकङ्गुनीवारा वास्तूकं हिलमोचिका। षष्टिका कालशाकञ्च मूलकं केमुकेतरत्। लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी। पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी। तिन्तिड़ी जीरकञ्चैव नागरङ्गञ्च पिप्पली। कदली लवली धात्री फलान्यगुड़मैक्षवम्। अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते” इत्युक्ते व्रतादौ भक्ष्यद्रव्यभेदे।

हविस् न० हूयते हु–कर्मणि असुन्। १घृते अमरः २हवनीयद्रव्यमात्रे च “वपाया मेदसो हविषोऽनुब्रूहीति” श्रुतिः। “सम्पन्नानि पयः सोमो मांसं यच्चानुपस्कृतम्। अक्षारलवणञ्चैव प्रकृत्या हविरुच्यते” स्मा० त० ३जले ४द्रव्यभेदे। भावे असुन्। ५होमे।

हव्य न० हु–कर्मणि यत्। १देवयोग्यान्ने अमरः। २हवनीयद्रव्ये त्रि०। भावे यत्। ३होमे न०।

हव्यपाक पु० हव्याय होमाय पाको यत्र। होमार्थं दुग्धपक्वादिहविर्विशिष्टे सिद्धे अन्ने चरौ अमरः।

हव्यवाह पु० हव्यं वहति देवान् वह–अण्। १अग्नौ रत्नमा०। २चित्रकवृक्षे च। [अमरः। २चित्रकवृक्षे च।

हव्यवाहन पु० हव्यं वाहयति वह–णिच्–ल्यु। १वह्नौ

हव्याश पु० हव्यमश्नाति अश–अण्। १वह्नौ शब्दर० २चित्रकवृक्षे। ल्यु। हव्याशनोऽप्यत्रार्थे पु० हेमच०।

हस हासे भ्वा० प० अक० सेट् एदित् णिचि न ह्रस्वः। हसति अहसीत्। दोषदर्शनपूर्वकहासे तु सकर्मकः “स्थितावहस्येव पुरं मघोनः” इति भट्टिः। [अमरः।

ह(हा)स पु० हस–अप् घञ् वा। हासे मुखविकाशनभेदे

हसन न० हस–भावे ल्युट्। प्रीत्यामुखकपोलादिविकाशने हासे

हसन्ती स्त्री हस–झ ङीप्। अङ्गारधानिकायां अमरः। २मल्लिकाभेदे ३शाकिनीभेदे च मेदि०। हस–शतृ–ङीप्। हसत् ४हासिनि त्रि० स्त्रियाम् ङीप्।

हसित न० हस–भावे क्त। १हास्ये कर्त्तरि क्त। २कृतहासे ३विकसिते च त्रि०। हास्यशब्दे दृश्यम्।

हस्त पु० हस–तन् न इट्। १देहावयवभेदे (हात) अमरः। २चतुर्विंशत्यङ्गुलपरिमाणे “सप्तोदरैरङ्गुलपर्वसंख्यैर्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः” लीला०। ३हस्तिशुण्डे च। ४अश्विन्यादिषु त्रयोदशे नक्षत्रे पुंस्त्री० मेदि० अश्लेषाशब्दे पु० दृश्यम्। “आश्वी हस्तयोर्मे” इति पुराणम्। “पुष्या हस्ता तथा स्वातिः” ज्यो०। केशपाशात् परः। ५समूहे। केशहस्तः।

“हस्तदत्ताश्च ये स्नेहा लवणव्यञ्जनानि च। दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते तु किल्बिषम्। तस्मादन्तरितं कृत्वा पर्णेनाथ तृणेन वा। प्रदद्यात् न तु हस्तेन नायसेन कदाचन” स्मा० त०। [इक्षौ राजनि०।

हस्तजोड़ि पु० हस्तं जुड़ति जुड़ इन्। (हातजोड़ा)

हस्तपुच्छ न० ६त०। हस्तावयवभेदे (हातेर पोँछा)। त्रिका०

हस्तवारण न० ६त०। मारणोद्यतस्य निवारणे अमरः।

हस्तबिम्ब न० हस्तस्य बिम्बं यत्र। स्नानकेऽचन्दनादिना देहविलेपनविशेषे हेमच०। [स्त्री

हस्तलिपि स्त्री हस्तस्य तत्कर्मणः लिपिर्यतः। लेखने

हस्तसूत्र न० हस्तस्य सूत्रमिव। वलये हेमच०।

हस्तामलक न० हस्तस्थितमामलकम् आमलक्याः फलं तदिव वा। १करावस्थितामलकफले तद्वत् २अनायासलभ्ये पदार्थे च। करामलकादयोऽप्यत्र। ३वेदान्तप्रसिद्धग्रन्थभेदे च।

हस्तिक न० हस्तिनां समूहः कन्। हस्तिसमूहे शब्दर०।

हस्तिकन्द पु॰ हस्ती तत्पदमिव कन्दोऽस्य । स्वनामख्याते कन्दभेदे (हातिकाँटा) राजनि॰ ।

हस्तिकरञ्ज पु॰ हस्तीव महान् करञ्जः । महाकरञ्जे राजनि॰

हस्तिकर्ण पु॰ हस्तिनः कर्ण इव पर्णमस्य अच् । १एरण्ड-वृक्षे २पलाशभेदे ३गन्धद्रव्यभेदे मेदि॰ । ४हस्तिकन्दे ५रक्तैरण्डे च राजनि॰ । स्वार्थे क तत्रार्थे । ६त॰ । ६गजस्य कर्णे । [अमरः ।

हस्तिकर्णदल पु॰ हस्तिनः कर्ण इव दलमस्य । पलाशभेदे

हस्तिकोलि पु॰ हस्तीव कोलिः । बदरीभेदे रत्नमा॰ ।

हस्तिघोषा स्त्री हस्तीव वृहती घोषा । वृहद्घोषायाम् भटनपालः । [घोषायाम् रत्नमा॰।

हस्तिघोषातकी स्त्री हस्तीव वृहती घोषातकी । हस्ति-

हस्तिचारिणी स्त्री हस्तीव चरति चर-णिनि ङीप् । महाकरञ्जे राजनि॰ ।

हस्तिदन्त पु॰ ६त॰ । १करिदन्ते । तदाकारोऽस्त्यस्य अच् । २मूलके न॰ राजनि॰। तत्रार्थे पु॰ शब्दर॰। ३गृहभित्ति-निखातार्थे काष्ठनिर्मितकीलिकाकारे पदार्थे नागदन्ता-दयोऽप्यत्र । [कर्कटीभेदे राजनि॰ ।

हस्तिदन्तफला स्त्री हस्तिदन्त इव फलमस्याः । एर्वारौ

हस्तिन् पु॰ हस्तः शुण्डादण्डोऽस्त्यस्य । १गजे २चन्द्रवंश्ये नृपभेदे च ।
"बृहत्क्षत्रस्यापि दायादो हस्ती नाम बभूव ह । तेनेदं निर्मितं पूर्वं पुरेव हस्तिनापुरम् । हस्तिनश्चैव दायादा स्त्रयः परमधार्मिकाः । अजमीढो द्विमीढश्च पुरुमीढ-स्तथैव च" हरिवं॰ २० अ॰ ।

हस्तिनख पु॰ हस्तिनो नख इव हस्तिना न खन्यते नञ्+खन-ड वा । १पुरद्वारस्थे मृत्कूटे अमरः । २दुर्गद्वाराव-रोधनार्थं निम्नोन्नते खातोद्धृते मृद्राशौ च भरतः ।

हस्तिनापुर न॰ हस्तिना तदाख्येन नृपेण निर्मितं तद्धनत्वात् पुरम् अलुक्स॰ । (दिल्ली) पुरभेदे ।

हस्तिनी स्त्री हस्तिनः योषा ङीप् । १करिण्याम् गजयो-षिति चतुर्विधस्त्रीमध्ये २स्त्रीविशेषे तल्लक्षणं यथा "स्थूलाधरा स्थूलनितम्बभागा स्थूलाङ्गुली स्थूलकुचा सुशीला । कामोत्सुका गाढरतिप्रिया च नितम्बखर्वा खलु हस्तिनी स्यात्" "ह्रये तुष्टा च हस्तिनी" रति-मञ्जरी । ३हट्टविलासिन्यां शब्दच॰। [स्वार्थे क तत्रैव।

हस्तिप पु॰ हस्तिनं पाति पा-क । हस्त्यारोहे अमरः ।

हस्तिपर्ण पु॰ हस्ती तत्कर्ण इव पर्णमस्य । हस्तिकन्दवृक्षे राजनि॰ । [इत्यन्ये । राजकोशातक्यां न राजनि॰ ।

हस्तिपर्णिका स्त्री हस्ती तत्कर्ण इव पर्णमस्याः कप् अत

हस्तिपर्णी स्त्री हस्ती तत्कर्ण इव पर्णमस्या ङीप् । १मोर-टालतायां रत्नमा॰ । २कर्कटशृङ्ग्यां राजनि॰ ।

हस्तिमद पु॰ ६त॰ । १करिकरनिःसृतमदजले । स इव । २गन्धद्रव्यभेदे च राजनि॰ ।

हस्तिमल्ल पु॰ हस्तिषु मल्लः । १ऐरावतगजे । २गणेशे ३शङ्खे ४नागे च मेदि॰ । [राजनि॰।

हस्तिरोहणक पु॰ हस्तीव रोहते ल्यु स्वार्थे क । महाकरञ्जे

हस्तिलोध्रक पु॰ हस्तीव लोध्रः स्वार्थे क । लोध्रभेदे राजनि॰

हस्तिविषाणी स्त्री हस्तिविषाणं गजदन्तस्तदाकारः मध्य-भागः (थोड़) यस्याः गौरा॰ ङीष् । कदल्याम् राजनि॰।

हस्तिशुण्डा(ण्डी) स्त्री हस्तिशुण्डस्तदाकारोऽस्त्यस्याः अच् वा गौरा॰ ङीष् । (हातिशुँड़ा) वृक्षे राजनि॰ ।

हस्तिश्यामाक पु॰ हस्तीव स्थूलः श्यामाकः । स्थूल-श्यामाके राजनि॰ । [कृत्य कृत्वा वा ।

हस्ते अव्य॰ हस्त+ए । १पाणौ इत्यर्थे २स्वीकारे च हस्ते-

हस्त्य त्रि॰ हस्तेन गृहीतः दत्तः कृतो वा यत् । १हस्तगृहीते २पाणिदत्ते ३पाणिकृते सि॰ कौ॰ ।

हस्त्यध्यक्ष पु॰ ७त॰ । गजाध्यक्षे गजरक्षणादौ नियुक्ते "हस्तिशिक्षाविधानाज्ञो वन्यजातिविशारदः । क्लेशक्षम-स्तथा राज्ञो गजाध्यक्षः प्रशस्यते" मत्स्यपु॰ १८९अ॰ ।

हस्त्यारोह पु॰ हस्तिनमारोहति आ+रुह अण् । हस्ति-पके अमरः ।

हस्न त्रि॰ हस-कर्मणि र । मूर्खे उणा॰ । [शब्दच॰ ।

हहल अव्य॰ हेति हलति । हालाहले स्थावरविषभेदे

हहा पु॰ हेति शब्दं जहाति हा-क्विप् । गन्धर्वभेदे शब्दमा॰

हा त्यागे जु॰ प॰ स॰ अनिट् । जहाति जहति जहि अहासीत् हीयते ओदित् निष्ठातस्य नः हीनः हानिः ।

हा गतौ जु॰ आ॰ स॰ अनिट् ओदित् निष्ठातस्य नः । जि-हीते अहासिष्ट जहे हानम् ।

हा अव्य॰ हा-का । १विषादे २शोके ३पीड़ायाम् अमरः ४कुत्सायाञ्च मेदि॰ । हाशब्दस्य निन्दापरत्वे तद्योगे षष्ठ्यर्थे द्वितीया "हा चौरं कैतवाढ्यम्" वोपदेवः । निन्दनीयपरत्वे न,"हा पितः ! क्वासि वैदेहि!" भट्टिः ।

हाङ्गर पुंस्त्री हा विषादाय पीड़ायै वा अङ्गं राति रा-क । स्वनामख्याते जलजन्तुभेदे शब्दच॰ स्त्रियां ङीष् ।

हाटक न॰ हट-ण्वुल् । १देशभेदे २तत्रत्ये स्वर्णे तत्राप-

नामके क्षुपे च अमरकोषः। ४स्वर्णनिर्मिते त्रिलिङ्गः।

हाटकेश्वर पु० गोदावरीतीरस्थे शिवलिङ्गभेदे यथा "एतस्मिन्नन्तरे प्राप्ताः सर्वे एवर्षिपार्थिवाः। द्रष्टुं त्रैलोक्यभर्त्तारं त्र्यम्बकं हाटकेश्वरम्। ततः कपिवरः प्राप्तो घृताच्या सह सुन्दरि!। स्नात्वा गोदावरीतीर्थे ददृशुर्हाटकेश्वरम्" वामनपु० ६२अ०।

हात न० हा-करणे क्त। वेतने त्रि० को०। पृषो०। हान्त। मरणे उणादि०। [कारक" भट्टिः।

हान न० हा-भावे ल्युट्। परित्यागे "हिमहानलता न लता

हानि स्त्री हा-क्तिन् तस्य निः। १क्षतौ २अपचये च जटा०।

हापुत्री स्त्री हा इति रवः पुत्राय यस्याः ङीप्। पक्षिभेदे हारा०। स्वार्थे क ह्रस्वः। तत्रार्थे त्रिका०।

हायन पु० अम्बु जहाति हा-ल्यु-नि०। १व्रीहौ भावं जहाति हा-ल्यु-नि०। २वत्सरे पुंस्त्री० अमरः। ३वह्निशिखायां स्त्री मेदि०।

हार पु० हृ-कर्मणि घञ्। १मुक्तामालाभेदे अमरः "हारो नारोपितः कण्ठे" इति सीतावाक्यम्। २युद्धे मेदि०। हरतीति कर्त्तरि घञ् ण वा। ३भाजके "अन्योन्यहाराभिहतौ हरांशौ" इति लीला०।

हाफिका स्त्री जृम्भायां (हाइतोला) हारा०।

हारक पु० हृ-ण्वुल्। १चौरे २कितवे ३गद्यभेदे ४विज्ञानभेदे मेदि०। ५शाखोटवृक्षे शब्दच०। ६भाजकाङ्के च। ७हरणकर्त्तरि त्रि०। [कपिलद्राक्षायाम् राजनि०

हारहारा स्त्री हार इव हरति आह्लादनात् हृ-अच्।

हारहूरा स्त्री हू-क्विप् हूः हार इव हुवं राति रा-क। १द्राक्षायाम् हला०। २मद्ये पु० मेदि०।

हारावली स्त्री हार इवावली। मुक्तावल्यां "शृङ्गारहारावली" इति गङ्गादासः। २पुरुषोत्तमकृते कोषभेदे च।

हारि(री) स्त्री हृ-णिच्-इन् वा ङीप्। १द्यूतादिभङ्गे २तत्पराजये ३पथिकसङ्घे च मेदि०। ङीबन्तः ४मुक्तायां स्त्री शब्दमा०। [कोकिले मेदि० स्त्रियां ङीप्।

हारिकण्ठ पुंस्त्री० हारी मनोहरः कण्ठध्वनिरूपो यस्य।

हारित पुंस्त्री० हृ-णिच्-क्त। हारीते पक्षिभेदे जटा० स्त्रियां ङीप्। हारित स्वार्थे अण्। हारिद्रवर्णे तु०।

हारितक न० हारितेन हरिद्वर्णेन कायति कै-क। शाके शब्दर०

हारिद्र पु० हरिद्रया रक्तः अण्। १कदम्बभेदे तत्पुष्पस्य तथात्वात् तथात्वम्। २हरिद्रया रक्ते त्रि० मेदि०।

हारिन् त्रि० हारोऽस्त्यस्य इनि हृ-णिनि वा। १हारके २हारशिष्टे ३मनोहारिणि च। "हारीणवकानां हारीण्यवकानाम्" भट्टिः। स्त्रियां ङीप्।

हारिल पुंस्त्री० हृ-णिच् इलच्। स्वनामख्याते खगभेदे राजनि० स्त्रियां जातित्वात् ङीष्।

हारीत पु० हृ-णिच्बा०-ईतच्। स्मृतिकर्त्तरि मुनिभेदे १ २पक्षिभेदे ३कितवे च मेदि०। स्वार्थे क। हारीतके (हरेल) राजनि०।

हार्द न० हृदयस्य कर्म युवा० अण् हृदादेशः। १स्नेहे २प्रेमणि अमरः। हृदि भवः विदितो वा अण्। ३हृदयस्थे ४हृदयवेद्ये च त्रि० हार्दविद्या शा०भा०।

हार्य्य पु० ह्रियतेऽसौ हृ-ण्यत्। १विभीतकवृक्षे २हरणीये त्रि० मेदि०।

हाल पु० हलोऽस्त्यस्य अण् हल एव वा अण्। १बलरामे त्रिका०। २हले च मेदि०। ३शालिवाहननृपे हेमच०।

हालक पु० हाल+संज्ञायां कन्। पीतहरितवर्णाश्वे हेमच०।

हालहल(हालाहल) न० हलाहल पृषो०। हालाहलविषे शब्दर०

हाला स्त्री हल-घञ्। १मद्ये अमरः २तालरसजे (ताड़ि) मद्ये च राजनि०।

हालाहल पुंन० हालेव हलति हल-अच्। १स्थावरविषभेदे शब्दर०। २कीटभेदे च पु० राजनि०। ३मद्ये स्त्री तत्र ङीप् राजनि०। "गोस्तनाभफला गुच्छास्तालपत्रच्छदस्तथा। तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः। असौ हालाहलो ज्ञेयः किष्किन्धायां हिमालये। दक्षिणाब्धितटे देशे कोङ्कणेऽपि च जायते" भावप्र०।

हालिक त्रि० हलेन खनति हलः प्रहरणमस्य तस्येदं वा ठक् ठञ् वा। १कर्षके २हलेन योद्धरि ३हलसम्बन्धिनि च अमरः।

हालिनी स्त्री हल-णिनि ङीप्। स्थूलपल्ल्यां हेमच०।

हाली स्त्री हल-इण् ङीप्। कनिष्ठायां श्यालिकायाम् हेमच०।

हालु पु० हल-उण्। दन्ते त्रिका०।

हाव पु० ह्वे-भावे घञ् नि० सम्प्र०ह्वे-करणे घञ्। १आह्वाने २स्त्रीणां शृङ्गारभावजे चेष्टाभेदे च अमरः। "भ्रुवानोऽनेन कुर्वन्ते नारीभिर्मदनाकुले। अतो निरुच्यते हावस्ते विलासादयो मताः" भरतधृतवाक्यम्। "ग्रीवारेचकसंयुक्तो भ्रूनेत्रादिविकासकृत्। भावादीषत्प्रकाशो यः स हाव इति कथ्यते" उज्ज्वलदर्पणः।

हास पु० हस-भावे घञ्। हास्यस्थायिभावके रसभेदे तत्स्वरूपं

सा० द० "विकृताकारवाग्वेशचेष्टादेः कुहकाद्भवेत् । हासो हास्यस्थायिभावः श्वेतः प्रमथदैवतः । विकृताकारवाक्चेष्टं यदालोक्य हसेज्जनः । तदत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम् । अनुभावोऽक्षिसङ्कोचवदनस्मेरतादिकः । निद्रालस्यावहित्याद्या अत्र स्युर्व्यभिचारिणः" ।

हासस् पु० हस-णिच् असुन् । चन्द्रे वेदनि० ।

हासिका स्त्री हस-भावे ण्वुल् । हास्ये हेमच० ।

हास्तिक न० हस्तिनां समूहः वुञ् । १हस्तिसमूहे अमरः । हस्तिनमारोहति ठक् । २हस्त्यारोहे ।

हास्तिन न० हस्तिना नृपेण निर्वृत्तम् नगरम् अण् संयोगपरत्वादिनो नटिलोपः । हस्तिनापुरे त्रिका० । हस्तिना इदं हस्तिनः परिमाणं वा अण् । २हस्तिसम्बन्धिनि ३हस्तिपरिमाणे च त्रि० ।

हास्य न० हस-ण्यत् । १हासे हसने अमरः २अलङ्कारोक्ते रसभेदे च । "अकम्प्यं हसितं श्रेष्ठं मौक्तिकाभमपापहम् । अवज्ञहसितं दुष्येत् तत् सोन्मादस्य नैकधा" गारुडे ६६ अ० ।

"ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च नीचानामपहसितं तथाऽतिहसितञ्च षड्भेदाः"। "ईषद्विकासि नयनं स्मितं स्यात् स्पन्दिताधरम् । किञ्चित् लक्ष्यद्विजं तत्र हसितं कथितं बुधैः । मधुरस्वरं विहसितमांसशिरःकम्पमवहसितम् । अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितम्" सा० द० ।

हाहा पु० हेति शब्दं जहाति क्विप् । १देवगन्धर्वभेदे अमरः । असुन् हाहस् शब्दोऽपि तत्रार्थे भरतः । हा-द्वित्वम् २विस्मयशब्दे ३शोकशब्दे च अव्य० मेदि० ।

हाहाकार पु० हाहा इत्यस्य कारः कृ-भावे घञ् । १युद्धशब्दे २शोकध्वनौ च । [त्रिकाण्ड ।

हि वर्द्धने गतौ च स्वा० पर० सक० अनिट् । हिनोति अहैषीत्

हि अव्य० हा-हि-वा डि । १हेतौ २अवधारणे अमरः । ३विशेषे ४प्रश्ने ५सम्भ्रमे ६हेत्वपदेशे ७असूयायां च मेदि० ८पादपूरणे ९शोके च शब्दर० ,

हिंसक पु० हिन्स-ण्वुल् । १व्याघ्रादौ हिंस्रे पशौ २शत्रौ च ३आथर्वणे विप्रे ४हिंसाकारके त्रि० शब्दर० ।

"भोक्तानुमन्ता संस्कर्त्ता क्रयिविक्रयिहिंसकाः । उपहर्त्ता घातयिता हिंसकाश्चाष्टधा मताः" काशीख० ।

हिंसा स्त्री हिन्स-अ । १वधे मेदि० । २चौर्यादिकर्मणि च अमरः । "हिंसा चैव न कर्त्तव्या वैधहिंसा तु राजसी । ब्राह्मणैः सा न कर्त्तव्या यतस्ते सात्त्विका मताः" इति स्मृतिः । वैधहिंसाशब्दे ४९७५ पृ० दृश्यम् ।

हिंसारु पु० हिन्स-आरु । व्याघ्रे त्रिका० ।

हिंसालु पु० हिंसा+अस्त्यर्थे आलु । १हिंसाशीले उणा० । २कुक्कुरे पु० हारा० ।

हिंसीर पु० हिंसा-ईरन् । १व्याघ्रे २खगे च उणा० ।

हिंस्र त्रि० हिन्स-र । १हिंसाशीले अमरः । २घोरे ३भये ४भीमसेने ५हरे पु० उणा० । ६मांस्यां ७काकादन्यां ८जटामांस्याम् ९एलवालुकायां १०गवेधुकायां ११शिरायाम् १२नाड्यां च स्त्री शब्दच० । [अहिक्किष्ट ।

हिक्क कूजने भ्वा० उ० अ० सेट् । हिक्कति ते अहिक्कीत्

हिक्क हिंसायां चु० वा० सक० सेट् । हिक्कयते अजिहिक्कत ।

हिक्का स्त्री हिगिति शब्दं करोतीति पृषो० । रोगभेदे (हेचकी) अमरः ।

तन्निदानादिकं भावप्र० उक्तं यथा

"अथ हिक्काधिकारः । तत्र हिक्कायाः विप्रकृष्टं निदानमाह "विदाहिगुरुविष्टम्भिरूक्षाभिष्यन्दिभोजनैः । शीतपानाशनस्नानरजोधूमातपाऽनिलैः । व्यायामकर्मभाराध्ववेगाघातापतर्पणैः । हिक्का श्वासश्च कासश्च नृणां समुपजायते" । अपतर्पणमनशनादि । संप्राप्तिमाह "वायुः कफेनानुगतः पञ्च हिक्काः करोति हि । अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा" । सामान्यलक्षणमाह "मुहुर्मुहुर्वायुरुदेति सस्वनः यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन् । सघोषवानाशु हिनस्त्यसून्यतस्ततस्तु हिक्केत्यभिधीयते बुधैः"। वायुरत्रोदानः प्राणो बोद्धव्यः । उदेति ऊर्द्धं याति । सस्वनः शब्दवान् । ऊर्द्धगमनं विशिनष्टि यकृदित्यादि प्लिह इति शब्दोऽप्यस्ति दीर्घत्वविकल्पात् । मुखादिति ल्यब्लोपे पञ्चमी तेन यकृत्प्लीहान्त्राणि मुखमानीय आक्षिपन् निःसारयन् इवेत्यर्थः । वायुः घोषवान् घोषोऽत्र कफः तद्वान् वायुः कफेनानुगत इति सम्प्राप्तिः । हिनस्तीति हिक्का पृषोदरादित्वाद्रूपसिद्धिः हिगिति शब्दं करोतीति वा । पूर्वरूपमाह "कण्ठोरसोर्गुरुत्वञ्च वदनस्य कषायता । हिक्कानां पूर्वरूपाणि कुक्षेराटोप एव च" । वदनस्य कषायता वातात् । अन्नजालक्षणमाह "पानान्नैरतिसंयुक्तैः सहसा पीडितोऽनिलः । हिक्कयत्यूर्द्ध्वगो भूत्वा तां विद्यादन्नजां भिषक्" अनिलः प्राणो वायुः । यमलाहिक्कामाह "चिरेण यम-

लैर्वेगैर्या हिक्का समप्रवर्त्तते । कम्पयन्ती शिरोग्रीवां यमलां तां विनिर्दिशेत्”। क्षुद्रामाह “विकृष्टकालैर्या वेगैर्मन्दैः समभिवर्त्तते । क्षुद्रिका नाम सा हिक्का जत्रुमूलं प्रधावति” । विकृष्टकालैः चिरेण । जत्रुः कण्ठोरसोः सन्धिः । गम्भीरामाह “नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी । अनेकोपद्रववती गम्भीरा नाम सा स्मृता” । अनेकोपद्रववती तृष्णाज्वरादियुक्ता । महतीमाह “मर्म्माणि पीड़यन्तीव सततं या प्रवर्त्तते । महाहिक्केति सा ज्ञेया सर्वगात्रप्रकम्पिनी” । मर्म्माणि वस्तिहृदयशिरःप्रभृतीनि । असाध्यत्वमाह “आयम्यते हिक्कितो यस्य देहो दृष्टिश्चोर्द्ध्वं ताम्यते निम्नमेव । क्षीणोऽन्नद्विट् क्षौति यश्चातिमात्रं तौ द्वौ चान्त्यौ वर्जयेद्धिक्कमानौ । आयम्यते विस्तार्य्यत इव तौ द्वाविति आयम्यत इत्यादिना निन्यमेवेत्यन्तेनैको हिक्कमानः । क्षीण इत्यादिनाऽतिमात्रमित्यन्तेनापरः । तौ द्वौ अन्त्यौ च गम्भीरया महतीहिक्कया हिक्कमानौ वर्जयेत् । अपरञ्च “अतिसञ्चितदोषस्य भक्तच्छेदकृशस्य च । व्याधिभिः क्षीणदेहस्य वृद्धस्यातिव्यवायिनः । आसाञ्चान्यतमा हिक्का हन्त्याशु जीवितम् । यमिका च प्रलापार्त्तिमोहतृष्णासमन्विता” । साध्यत्वमाह “अक्षीणस्याप्यदीनस्य स्थिरधात्विन्द्रियस्य च । तस्य साधयितुं शक्या यमिका हन्त्यतोऽन्यथा” ।

हिङ्गु न० हिमं गच्छति गम-डु नि० । (हिङ्) रामठदेशोद्भवे वृक्षे अमरः यस्य निर्य्यासो हिङ्गुद्रव्यम् ।
“हिङ्गूष्णं पाचनं रुच्यं तीक्ष्णं वातबलासहृत् । रसे पाके च कटुकं स्निग्धञ्च वह्निदीपनम् । शूलगुल्मोदरानाहकृमिघ्नं पित्तवर्द्धनम्” भावप्र० । “हिङ्गु तीक्ष्णं कटुरसं गुल्मामार्त्तिविबन्धनुत् । कफघ्नं पाचनं स्निग्धं दीपनं कफवातजित्” राजनि० २वंशपत्रे भावप्र०

हिङ्गुनाड़िका स्त्री हिङ्गुन नाड़ी इव नाड़ी यस्याः कप् । नाडीहिङ्गौ राजनि० ।

हिङ्गुनिर्य्यास पु० हिङ्गुन इव निर्य्यासोऽस्य । १निम्बवृक्षे अमरः द्रव० । २हिङ्गुवृक्षनिर्य्यासे च (हिङ्) ।

हिङ्गुपत्र पु० हिङ्गुन इव पत्त्रमस्य । १इङ्गुदीवृक्षे राजनि० (हिङ्पात) २वृक्षभेदे स्त्री ङीप् भरतः ।

हिङ्गुपर्णी स्त्री हिङ्गुन इव पर्णमस्याः गौरा० ङीष् । वंशपत्रनाम रत्नमाला ।

हिङ्गुल पुंन० हिङ्गु तद्वर्णं लाति ला-क । रक्तवर्णे वर्णकद्रव्यभेदे अमरः २वार्त्ताक्यां ३हंसपाद्यां स्त्री ङीप् वर्णकभेदे तस्य शोधनादिकं भावप्र० उक्तं यथा “मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम् । सप्त वारान् प्रयत्नेन शुद्धिमायाति निश्चितम्” । एवं शोधितस्य हिङ्गुलस्य गुणाः । “तिक्तं कषायं कटु हिङ्गुलं स्यान्नेत्रामयघ्नं कफपित्तहारि । हृल्लासकुष्ठज्वरकामलांश्च प्लीहामवातौ च गरं निहन्ति” । अथ हिङ्गुलात्सूताकर्षणविधिः “निम्बूरसैर्निम्बपत्ररसैर्वा याममात्रकम् । दृढ्वा दरदमूर्द्ध्वन्तु पातयेत् सूतयुक्तिवत् । ततो दिव्यरसं शुद्धं ग्राह्यं तत्र सुधीरतः । शुद्धमेव हितं सूतं सर्वकर्मसु योजयेत्”। तल्लक्षणं दरदशब्दे ३४७१पृ० दृश्यम् । स्वनामख्याते ४देशभेदे स्त्री (हिङ्लाज) “ब्रह्मरन्ध्रं हिङ्गुलायां देवता भीमलोचना । कोटवी सा महामाया त्रिगुणा या दिगम्बरी” पीठमा० ।

हिङ्गुलु पुंन० हिङ्गु तद्वर्णं लाति ला-डु । (हिङ्गुल) वर्णकद्रव्ये अमरः ।

हिङ्गुसिराटिका स्त्री हिङ्गुन इव सिरा पत्रसिरामटति अट-ण्वुल् अत इत्वम् । वंशपत्रनाम रत्नमा० ।

हिङ्गूल न० हिङ्गु+ल+पृषो० । मधुरमूले (आलु) शब्दच० ।

हिज्ज पु० हिनोति हि-क्विप् तथा सन् जायते जन-ड कर्म० । हिज्जलवृक्षे शब्दर० । [भेदे (हिजल) जटा०

हिज्जल पु० हि-क्विप् हि हितकारि जलं यस्य । वृक्ष-

हिञ्जीर पु० हस्तिपादबन्धे हेमच० । [र्थेऽपि विकल्पः ।

हिड गतौ अनादरे भ्वा० आ० सक० सेट् इदित् । हिण्डते

हिडिम्ब पु० राक्षसभेदे स च हि भीमेन हतः २तद्भगिन्यां स्त्री

हिडिम्बजित् हिडिम्बं राक्षसभेदं जितवान् जि-क्विप् । भीमसेने हिडिम्बमल्लप्रभृतयोऽप्यत्र । [भार० आ० ।

हिडिम्बापति पु० ६त० । १हनुमति शब्दर० २भीमसेने

हिण्डन न० हिडि-ल्युट् । १भ्रमणे २रमणे मेदि० ३शेखने च विश्वः । [चार्थे हारा०

हिण्डिक पु० हिडि-इन् हिण्डिं कायति कै-क । उप्ता०

हिण्डि(ण्डी)र पु० हिडि-इरन् ईरन् वा । १समुद्रफेने अमरः । २वार्त्ताकौ ३पुरुषे मेदि० ४रुचके च उज्ज्वा० ।

हिण्डी स्त्री हिडि-इन् ङीप् । दुर्गायां त्रिका० ।

हिण्डीप्रियतम पु० ६त० । शिवे शब्दर० हिण्डीपत्यादयोऽप्यत्र । [४मङ्गले च ।

हित त्रि० धा-क्त हि-क्त वा । १गते २पथ्ये ३इष्टसाधने

हितक पु० हित+स्वार्थे क । शिशौ राजनि० ।

हितकारिन् त्रि॰ हितं करोति कृ-णिनि । शुभकारके । [कारिणि स्त्रियां ङीप् ।

हितप्रणी पु॰ हितं प्रणयति प्र+णी क्विप् । चारे शब्दर॰ ।

हितावली स्त्री हितम् आवलयति आ+वल-इन् ङीप् । ओषधिभेदे अमरः ।

हितैषिन् त्रि॰ हितमिच्छति इष-णिनि । हितेच्छौ

हितोपदेश पु॰ हितस्य इष्टसाधनस्य उपदेशः । १हितस्य उपदेशे विष्णुशर्मकृते २नीतिग्रन्थभेदे च ।

हिन्ताल पु॰ हीनः तालो यस्मात् पृषो॰ । (हेँताल) वृक्षे अमरः "हिन्तालो मधुराम्लश्च कफकृत् पित्तदाहहृत् । श्रमतृष्णापहारी च शिशिरो वातदोषकृत्" राजनि॰ ।

हिन्दोल पु॰ हिन्दोल+घञ् पृषो॰ । १श्रावणशुक्लपक्षविहिते दोलनयन्त्रे च भगवतो दोलनरूपे २उत्सवभेदे ३रागभेदे च सङ्गीतदा॰ । ४दोलायां स्त्री आर्षं च । यानभेदे जटा॰ ।

हिन्दु पु॰ हीनं दूषयति दुष+डु पृषो॰ । जातिभेदे । "पश्चिमाम्नायमन्त्रास्तु प्रोक्ताः पारस्यभाषया । अष्टोत्तरशताशीतिर्येषां संसाधनात् कलौ । पञ्च खानाः सप्त मीरा नव शाहा महाबलाः । हिन्दुधर्मप्रलोप्तारो जायन्ते चक्रवर्त्तिनः । हीनञ्च दूषयत्येव हिन्दुरित्युच्यते प्रिये ! । पूर्वाम्नाये नवशतं षडशीतिः प्रकीर्त्तिताः । फिरिङ्गभाषया मन्त्रास्तेषां संसाधनात् कलौ । अधिपा मण्डलानाञ्च संग्रामेष्वपराजिताः । इंरेजा नवषट् पञ्च लण्ड्रजाश्चापि भाविनः" मेरुतन्त्रे २३प्र॰ । अप्रमाणमिदम् ।

हिम न॰ हि-मक् । १प्रालेयच्युते जलकणे २शीतस्पर्शे ३तद्वति त्रि॰ अमरः । ४सूक्ष्मैलायां ५रेणुकायां ६भद्रमुस्तायाम् ७नागरमुस्तायां ८पृक्कायां ९चम्पिकायां च स्त्री राजनि॰ । १०अग्रहायणपौषमासात्मके ऋतुभेदे ११चन्दनवृक्षे पु॰ हेमच॰ १२कर्पूरे पु॰ राजनि॰ ।

हिमक पु॰ हिमेन कायति कै-क । विकङ्कतवृक्षे राजनि॰ ।

हिमकर पु॰ हिमः करः किरणो यस्य हिमं करोति निषेवणात् कृ-अच् वा । १चन्द्रे २कर्पूरे च राजनि॰ । हिमकिरणादयोऽप्यत्र ।

हिमकूट पु॰ हिमस्य कूटं यत्र । १शिशिरर्त्तौ राजनि॰ हिमप्रचुर कूटस्य । २हिमगिरौ हिमालयपर्वते ।

हिमगिरि पु॰ हिममयो गिरिः हिमप्रधानो वा गिरिः । हिमालयपर्वते हिमपर्वतादयोऽप्यत्र ।

हिमज पु॰ हिमात् हिमालयात् जायते जन-ड । १मैनाकपर्वते । २पार्वत्यां ३शठ्यां स्त्री मेदि॰ । हिमे हिमकाले जायते जन-ड । ४क्षीरिण्यां लतायां स्त्री राजनि॰ ।

हिमझटि पु॰ झटि इन् ६त॰ । कुज्झटौ हारा॰ ।

हिमतैल पु॰ हिमवीर्य्यं तैलम् । कर्पूरजाते तैले राजनि॰ ।

हिमदुग्धा स्त्री हिमवीर्य्यकरं दुग्धमस्याः । क्षीरिण्याम् राजनि॰ ।

हिमदुर्दिन न॰ हिमहेतुकं दुर्दिनम् शाक॰ । हिमपातेन दुःखकरे दिने कुज्झटिकायुक्तदिने त्रिका॰ । [राजनि॰

हिमद्रुम पु॰ हिमप्रधाने जायमानः द्रुमः । निम्बवृक्षे

हिमप्रस्थ पु॰ हिमः शीतलः प्रस्थो यस्य । हिमालयपर्वते हेमच॰ । [राजनि॰ ।

हिमबालुक पु॰ हिममयी बालुकेव अंशो यस्य । कर्पूरे

हिमबालुका स्त्री हिमस्य बालुकेव । कर्पूरे अमरः ।

हिमवत् पु॰ हिमानि प्राचुर्य्येण सन्त्यस्य मतुप् मस्य वः । हिमालयपर्वते हेमच॰ ।

हिमवत्सुत पु॰ ६त॰ । १मैनाकपर्वते २गङ्गायाम् ३उमायाञ्च स्त्री । "गङ्गा हिमवतो जज्ञे सर्वलोकैकपावनी । स योगाग्निवशाद्देवी लेभे पुत्रीं महेश्वरीम्" देवीपु॰ १२अ॰ ।

हिमशर्करा पु॰ हिमप्रधाना शर्करा शा॰त॰ । यावनाले राजनि॰ ।

हिमशैल पु॰ हिमप्रधानः शैलः । हिमालये ।

हिमशैलजा स्त्री हिमशैलाज्जायते जन-ड । १उमायां शब्दर॰ २गङ्गायाम् । [(बरफ) पदार्थे च अमरः ।

हिमसंहति स्त्री ६त॰ । १हिमसमूहे २हिमेन जलघनीभूते

हिमहासक पु॰ हिमं ह्रसति शीतवीर्य्यत्वात् ह्रस-ण्वुल् । हिन्तालवृक्षे जटा॰ । [राजनि॰ ।

हिमांशु पु॰ हिमा अंशवोऽस्य । १चन्द्रे अमरः २कर्पूरे च

हिमांशुभिख्य न॰ हिमांशोरिवाभिख्या शोभा यस्य । रौप्ये हेमच॰ । तस्य अतिशुभ्रत्वात् तथात्वम् ।

हिमागम पु॰ हिमस्यागमो यत्र । हेमन्ते अग्रहायणपौषमासात्मके ऋतौ राजनि॰ ।

हिमाद्रिजा स्त्री हिमाद्रौ हेमाद्रेर्वा जायते जन-ड । १क्षीरिण्यां राजनि॰ । २पार्वत्यां ३गङ्गायाञ्च ।

हिमाद्रितनया स्त्री ६त॰ । १दुर्गायां २गङ्गायाञ्च हिमाद्रिसुतादयोऽप्यत्र । ३मैनाके पु॰ ।

हिमानी स्त्री हिमानां संहतिः हिम+ङीप् आनुक् च । हिमसमूहे अमरः "आगता यत जरेव हिमानी" उद्भट ।

हिमाराति पु॰ ६त॰ । १सूर्य्ये २वह्नौ मेदि॰ ३अर्कवृक्षे ४चित्रकवृक्षे च ।

हिमालय पु० हिमानामालयः। १हिमवत्पर्वते शब्दा०। हिमप्रधान आलया यस्य। २शुक्लमन्दिरे शब्दच०। ३भूम्यामलक्याञ्च स्त्री राजनि०। स च नगः भारतवर्षस्य सीमापर्वतः। जम्बुद्वीपशब्दे दृश्यम्। [राजनि०।

हिमाज न० हिमकाले अपसु-जायते जन-ड। उत्पले

हिमावती स्त्री हिमं हिमवीर्य्यं विद्यतेऽस्य सेवने मतुप् मस्य वः संज्ञायां दीर्घः। स्वर्णक्षीर्य्याम् अमरः।

हिमाश्रया स्त्री हिमं हिमवीर्य्यमाश्रयति आ+श्रि—अच्। यष्टिजीवन्त्याम् राजनि०। कपिकच्छ्वाम् राजनि०।

हिमोत्तरा स्त्री हिममुत्तरं यस्याः सेवने शीतवीर्य्यकरत्वात्।

हिमोत्पन्ना स्त्री हिमे उत्पन्ना। यावनाल्यां राजनि०।

हिमोद्भवा स्त्री हिमे तत्प्रधानस्थाने उद्भवति उद्-भू-अच्। शट्याम् राजनि०। [मेदि०।

हिरण न० हृ-ल्युट् नि०। १रेतसि २स्वर्णे ३वराटके च

हिरण्मय त्रि० हिरण्यात्मकम् मयट् नि०। १हिरण्यात्मके स्त्रियां ङीप्। "हिरण्मयी शालवतेव जङ्गमा" भट्टिः। जम्बुद्वीपे नववर्षमध्ये २वर्षभेदे न० शब्दा०। "उत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजन पृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरं दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति" भाग० ५।१६अ०।

हिरण्य न० हिरणमेव स्वार्थे यत्। १सुवर्णे २धुस्तूरे अमरः। ३रेतसि शब्दर०। ४द्रव्ये ५वराटके ६अक्षये ७मानभेदे दशकुध्ये मेदि० हेमचं १०धने च।

हिरण्यकशिपु पु० दैत्यविशेषे। स च कश्यपात् दित्यां जातः "दितिः पुत्रद्वयं लेभे कश्यपादिति नः श्रुतम्। हिरण्याक्षश्च इत्येकं हिरण्यकशिपुस्तथा" "हिरण्यकशिपुर्दैत्यश्चचार परमं तपः। ततो वर्षसहस्राणि निराहारो ह्यधःशिराः। तं ब्रह्मा छन्दयामास दैत्यं तुष्टः वरेण तु। सर्वोमरत्वं वव्रे स शस्त्रास्त्रैर्न दिवा निशम्। अहं सर्वं विनिर्जित्य सर्वदेवत्वमास्थितः। अणिमादिगुणैश्वर्य्यमेव मे दीयतां वरः। तेनैवमुक्तो ब्रह्मा तु तस्मै दत्त्वा यथेप्सितम्। दत्त्वा चास्य सभां दिव्यां तत्रैवान्तरधीयत। हिरण्यकशिपुर्दैत्यः श्लोकैर्गीतः पुरातनः। राजा हिरण्यकशिपुर्दैत्यो यां यां निषेवते। तस्यां तस्यां नमश्चक्रुर्देवता ऋषिभिः सह। तत्प्रसादो दैत्योऽभूत् हिरण्यकशिपुः पुरा। स्वयमग्निश्च चन्द्रश्च वायुरिन्द्रो जलं स्वयम्। भूत्वा चकार राज्यं स मन्वन्तरचतुर्दश। तत्रासीत् नरसिंहस्तु सत्युर्विष्णुः पुरा किल। नखैस्तेन विनिर्भिन्नो मार्द्रशुष्का नखाः स्मृताः" वह्निपु०।

हिरण्यकशिपुहन् पु० हन-क्विप् हृत०। विष्णौ।

हिरण्यकामधेनु स्त्री विधानेन हिरण्यरचिता कामधेनुः। तुलादिषोडशमहादानमध्ये दानार्थं हिरण्येन कल्पितायाम् १धेनौ उपचारात् २तद्दाने च। तद्दानविधिः "अथातः संप्रवक्ष्यामि कामधेनुविधिं परम्। सर्वकामप्रदं नृणां महापातकनाशनम्। लोकेशावाहनं तद्वद्धोमः कार्य्योऽधिवासनम्। तुलापुरुषवत् कुर्य्यात् कुण्डमण्डपवेदिकाः। स्वल्पेप्येकाग्निमत् कुर्य्यात् गुरुरेव समाहितः"। कुण्डमण्डपवेदिका इत्युपलक्षणम्। इह हि देवतावाहनहोमाधिवासादिपूजामाल्यवाचनगुरुऋत्विग्वरणमधुपर्कदानवेदिकोपरिचक्रोल्लेखनपञ्चवर्णवितानतोरणपताकादिकं सर्वं मत्स्यपुराणोक्ततुलापुरुषदानविहितं वेदितव्यम्। स्वल्पेप्येकाग्निमदिति, एकाग्निमत्करणं व्याख्यातम्। "काञ्चनस्यातिशुद्धस्य धेनुं वत्सञ्च कारयेत्। उत्तमा पलसाहस्रैस्तदर्द्धेन तु मध्यमा। कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता। शक्तितस्त्रिपलादूर्द्ध्वमशक्तोऽपीह कारयेत्"। अत्र यद्यपि वत्सपरिमाणमनुक्तं तथापि कामधेनुविधानवत् तत्प्रकारस्य चतुर्थांशेन वत्सः कल्पनीयः। समस्तधेनुपरिमितद्रव्यनिष्कृत्यवत्सनिर्माणस्याप्रिदर्शनादिच्छापि धेनुदानतारविशेषात् तदैव निर्णीयते। तथा च गुडधेन्वादिषु "तच्चतुर्थांशेन वत्सः स्यादिति" तत्र तत्र वक्ष्यते। "वेद्यां कृष्णाजिनं न्यस्य गुडप्रस्थसमन्वितम्। न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम्। कुम्भाष्टकसमोपेतां नानाफलसमन्विताम्"। कल्पतरुदाने, प्रस्थो व्याख्यातः। "महारत्नानि पद्मरागप्रभृतीनि, "वस्त्रं दद्यें तु विन्यसेदिति" क्वचित्पाठः, नानाफलानि गोगजवाजिस्वीर पुरुषप्रभृतीनि सौवर्णानि कल्पतरुदानोक्तानि। "तथाष्टादश धान्यानि समन्तात् परिकल्पयेत्। इक्षुदण्डाष्टकं तद्वन्नानाफलसमन्वितम्। भाजनं चासनं तद्वत् ताम्रदोहनकं तथा"। अष्टादश धान्यानि परिभाषायां द्रष्टव्यानि नानाफलानि मातुलिङ्गादीनि। "कौशेयवस्त्रद्वयसम्प्रयुक्तां दीपातपत्राभरणाभिरामाम्। सचामरां कुण्डलिनीं सघण्टां मालिकापादुकरौप्यपादाम्।

रत्नैश्च सर्वैः परितोऽभिजुष्टां हरिद्रया पुष्पफलैरनेकैः। स्रजाजिकुसुमस्रगर्कराभिः वितानकं चोपरि पञ्चवर्णम्। स्नातस्ततो मङ्गलवेदघोषैः प्रदक्षिणीकृत्य सपुष्पहस्तः। आवाहयेत् ताङ्कृषेतमन्त्रैः द्विजाय दद्यादथ दर्भपाणिः" हेमा॰ दा॰मत्स्यपु॰। [हेमच॰।

हिरण्यकोष पु॰ हिरण्यस्य कोष इव। कृताकृतस्वर्णरौप्ये

हिरण्यगर्भ पु॰ हिरण्यं स्वर्णमयाण्डं गर्भं उत्पत्तिस्थानमस्य। १चतुर्मुखे ब्रह्मणि तस्य हैमाण्डप्रभवत्वात्तथात्वम् "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः" मनूक्तेः। तुलादिषोडशमहादानमध्ये दानार्थं स्वर्णादिना कल्पिते २हिरण्यगर्भाख्ये पात्रे ३उपचारात्तद्दाने ४शालग्राममूर्त्तिभेदे च शालग्रामशब्दे दृश्यम्। तस्य दानविधिः हेमा॰दा॰मत्स्यपु॰ "अथातः संप्रवक्ष्यामि महादानमनुत्तमम्। हेम्ना हिरण्यगर्भाख्यं महापातकनाशनम्। पुण्यं दिनमथासाद्य तुलापुरुषदानवत्। ऋत्विग्मण्डपसम्भारभूषणाच्छादनादिकम्। कुर्यादुपोषितस्तद्वल्लोकेशावाहनं बुधः। पुण्याहवाचनं कृत्वा तद्वत् कृत्वाधिवासनम्"। अत्र देवताबलिहोमाद्यधिवासनादिपूजाब्राह्मणवाचनपुरुषऋत्विग्वरणमधुपर्कदानकुण्डमण्डपवेदिसम्भारहोमाधिवासनादिकं हिरण्यगर्भादिषोडशमहादानप्रकृतिभूतं मत्स्यपुराणोक्ततुलापुरुषदानविहितं वेदितव्यम्। "ब्राह्मणैरानयेत् कुण्डं तपनीयमयं शुभम्। द्वासप्तत्यङ्गुलोच्छ्रायं हेमपङ्कजगर्भवत्। त्रिभागहीनविस्तारं प्रशस्तं मुरजाकृति"। कुण्डमिति, हिरण्यगर्भाख्यं पात्रं, तपनीयमयं, स्वर्णमयं हेमपङ्कजम् तदेव नाभिवत्प्राख्यं, त्रिभागहीनविस्तारमिति, अष्टाचत्वारिंशदङ्गुलविस्तारमित्यर्थः। मुरजाकृति, मृदङ्गाकृति। आज्यक्षीराभिपूरितमिति क्वचित्पाठः। तत्र घृतक्षीरे तुल्यपरिमाणे, यद्यपि चातिपूरितमित्युच्यते तथापि यजमानप्रवेशेन यथा तन्न बहिरुच्छलति तथा पूरणीयम्। "दशान्त्राणि सरत्नानि दात्रं स्वर्णं तथैव च। हेमनालं सपिटकं बहिरादित्यसंयुतम्। तथैवावरणं नाभेरुपवीतञ्च काञ्चनम्। पार्श्वतः स्थापयेत् तद्वद्धेमदण्डं कमण्डलुम्"। दशान्त्राणि, दशखण्डानि, अभ्राणीति क्वचित्पाठः। तानि काञ्चनानि अभ्राकारतया, अभ्राणीति। अभ्रं खनित्रमिति केचित्, रत्नानि पञ्च प्रसिद्धानि, सपिटकं, मञ्जूषान्वितं बहिरिति। हेमकुण्डाद् बाह्यप्रदेशे पार्श्वतः स्थापयेदित्यनेन सम्बन्धः। वह्निभास्करसंयुतमिति च पाठान्तरम् "वह्निभास्करयोर्लक्ष्म ब्रह्माण्डदाने वक्ष्यते। वह्निमाप्यपसंयुतमिति, वा पाठ तदा आप्यपः वरुणः"। तल्लक्षणमपि तत्रैव, नाभेरावरणमिति, नाभ्यावरणार्थं सौवर्णं वस्त्रं दाम्नादीन्यपि सुवर्णमयान्येव कार्य्याणि। "पद्माकारं पिधानं स्यात् समन्तादङ्गुलाधिकम्। मुक्तावलीसमोपेतं पद्मरागदलान्वितम्। तिलद्रोणोपरिगतं वेदीमध्ये ततोऽर्चयेत्"। द्रोणः परिभाषायां व्याख्यातः। इह खलु हिरण्यगर्भनिर्माणसुवर्णपरिमाणस्यानाम्नानात् यावता यजमानस्य प्रवेशावारणोपयिकं कुण्डं भवति तावता घटनीयं, तच्च वेदिकामध्ये लिखितचक्रस्योपरि तिलद्रोणं निधाय तदुपरि संस्थाप्य पूजयेत्। अथ तुलापुरुषदानवदधिवासनदिनादन्येद्युर्ब्राह्मणवाचनं विधाय पूर्णाहुतिप्रभृतिकर्मशेषसमाप्तिं कुर्य्यात्। ततश्च कुण्डसमीपवर्त्तिकलशजलैः पूर्ववदभिषेकः, तदुच्यते। "ततो मङ्गलशब्देन ब्रह्मणापरवेण च। सर्वौषध्युदकस्नानं स्नापितो वेदपुङ्गवैः"। सर्वौषध्यः, व्याख्याताः, "शुक्लमाल्याम्बरधरः सर्वाभरणभूषितः। इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः। नमो हिरण्यगर्भाय हिरण्यकवचाय च। सप्तलोकसुराध्यक्ष! जगद्धात्रे नमो नमः। भूर्लोकप्रमुखा लोकास्तव गर्भे व्यवस्थिताः। ब्रह्मादयस्तथा देवा नमस्ते विश्वधारिणे। नमस्ते भुवनाधार! नमस्ते भुवनाश्रय!। नमो हिरण्यगर्भाय गर्भे यस्य पितामहः। यतस्त्वमेव भूतात्मा भूते भूते व्यवस्थितः। तस्मात् मामुद्धराशेषदुःखसंसारसागरात्। एवमामन्त्र्य तन्मध्यमाविश्यास्ते उदङ्मुखः। मुष्टिभ्यां परिसंगृह्य धर्मराजचतुर्मुखौ। जानुमध्ये शिरः कृत्वा तिष्ठेदुच्छ्वासपञ्चकम्"। धर्मराजोऽत्र सुवर्णमयः, तल्लक्षणञ्च तुलापुरुषेऽभिहितं चतुर्मुखोऽपि सौवर्णः, तल्लक्षणं ब्रह्माण्डदाने वक्ष्यते। तत्र दक्षिणमुष्टौ धर्मराजः, वाममुष्टौ चतुर्मुख इति। "गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा। कुर्य्युर्हिरण्यगर्भस्य ततस्ते द्विजपुङ्गवाः"। अनवलोकनमप्यत्र विज्ञेयं, एतेषु, गर्भाधानादिषु वक्ष्यमाणेषु जातकर्मादिषु, मन्त्रयुक्तमनुष्ठानमात्रमाचरणीयम् "गीतमङ्गलघोषेण गुरुं सन्तोषयेत् ततः। जातकर्मादिकाः कुर्य्यात् क्रियाः षोडश चापराः"। ताश्चाभिधीयन्ते। जातकर्म१ नामकरणं२ निष्क्रमणं३ अन्नप्राशनं४ चूडाकर्म५ उपनयनं६ प्राजापत्यम्७ ऐन्द्रं

आग्नेयं दिशि योज्यं१०इति,चत्वारिंश वेदव्यासानि मोदानां॥ वेयःन्यासस्वेति दाद्र,पूर्वोक्तवत् दत्तु भवेषु मोडशकम्। “कृत्वा दद्यात् गुरवे दत्त्वा मन्त्रमेव जपेत्। नमो हिरण्यगर्भाय विश्वगर्भाय ते नमः। चराचरस्य जगतो गृहभूताय वै नमः। एन्त्रोऽयं जनितः पूर्वं मत्त्यं धर्मा-द्विजोत्तमः। त्वद्गर्भसम्भवादेष दिव्यदेहो भवाम्यहम्। चतुर्भिः कलशैर्भूयस्ततस्ते द्विजपुङ्गवाः। स्नानं कुर्युः प्रसन्नाश्च सर्वाभरणभूषिताः”। कलशैः कुण्डसमीप-स्थितैरेव, स्नानं कुर्युः यजमानस्येति शेषः “देवस्येति मन्त्रेण स्थितस्य कनकासने। अद्य जातस्य तेऽङ्गानि अभिषेक्ष्यामहे वयम्। दिव्येनानेन वपुषा चिरञ्जीव सुखी भव। ततो हिरण्यगर्भं तं तेभ्यो दद्याद्विचक्षणः”।

हिरण्यनाभ पु० हिरण्यं नाभौ यस्य बहुव्रा०। मैनाक-पर्वते हेमच०।

हिरण्मय हिरण्यस्य विकारः तदात्मकं वा मयट् वेदे निपा-तनात् मलोपः। १हिरण्यात्मके २स्वर्णविकारे च “हिर-ण्मयेन सविता रथेना” यजु०। ३३४० सूर्यमन्त्रः “अथ य एष हिरण्मयः पुरुषो दृश्यते” छान्दो० उ०।

हिरण्यरेतस् पु० हिरण्यं रेतो यस्य। १वह्नौ २चित्रक-वृक्षे च अमरः। अग्निरेतस्शब्दे दृश्यम्। ३सूर्ये मेदि० ४अर्कवृक्षे ५शिवे जटा०।

वह्नेस्तदाख्याकारणं यथा “यत्पीतं वीतिहोत्रेण वीर्यं शम्भोः पिनाकिना। तेनाक्रान्तोऽभवत् ब्रह्मन्! मन्दतेजा हुताशनः”। ‘हुताशनोऽपि च भयाद् यत्र तत्र परि-भ्रमन्। पश्चात् सर्वकर्माणि स्वध्यासौ हव्यभुक् ततः। मांसमस्थीनि रक्तानि मेदोमज्जत्वचस्तथा। रोमाणि चाक्षिकेशाद्याः सर्वे जाता हिरण्मयाः। हिरण्य-रेता लोकेऽस्मिन् विख्यातः पावकस्ततः”वामनपु०५४अ०।

हिरण्यवर्णा स्त्री हिरण्यस्येव वर्णो यस्याः।१नदीभेदे हेमच० २हेमतुल्यवर्णयुते त्रि०“हिरण्यवर्णां हरिणीम्” श्रीसू०

हिरण्यवाह(हु) हिरण्यं वाहयति प्रापयति भक्तान् हिरण्यवर्णौ बाहू इव वा यस्य। १महादेवे २शोणे नदभेदे च अमरः।

हिरण्याक्ष पु० कश्यपस्य पुत्रे दैत्यभेदे। हिरण्यकशिपुशब्दे दृश्यम्। स च वराहरूपेण विष्णुना हतः। “हतो हिरण्यकशिपुः हरिणा सिंहरूपिणा। हिरण्याक्षो धरोद्धारे बिभ्रता शौकरं वपुः” भाग० ७ स्क०।

हिरण्याश्व पु० हिरण्यनिर्मितोऽश्वः। तदादिषोडशमहा-दानमध्ये दानार्थे स्वर्णादिना १कल्पितेऽश्वे २तद्दाने च। “अथातः संप्रवक्ष्यामि हिरण्याश्वविधिं परम्। यस्य प्र-दानाद्भुवनमनन्तफलमश्नुते। पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम्। लोकेशावाहनं कुर्यात् तुलापुरुष-दानवत्। ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम्। स्वल्पेऽप्येकाग्निवत् कुर्याद्गुडधेनुवत् बुधः” अत्रादि-शब्देन देवतावाहनहोमतुलादिपुजनगुरुऋत्विग्वरण-मधुपर्कदानवेदिकापरिवेष्टनलेखनवितानतोरणकाधि-वासनादि मत्स्यपुराणोक्ततुलापुरुषदानविहितं संगृह्यते, स्वल्पेऽप्येकाग्निवदिति, व्याख्यातं “स्थापयेद्वेदिमध्ये तु कृष्णाजिनतिलोपरि” कृष्णाजिननिहितद्रोणपरिमित-तिलोपरीति विज्ञेयम्। ‘कौशेयवस्त्रसंवीतं कारयेद्धे-मवाजिनम्। शक्तितस्त्रिपलादूर्द्ध्वमासहस्रपलाद् बुधः। पादुकोपानहच्छत्रचामरासनभाजनैः। पूर्णकुम्भाष्टको-पेतं माल्यपुष्पफलसंयुतम्। शय्यां सोपस्करां तद्वत् समार्त्त-वस्त्रसंयुतम्”। शय्योपस्करा विविधास्तरणोपधानवस्त्र-फलपुष्पकुङ्कुमकर्पूरागुरुचन्दनताम्बूलदर्पणकज्जलिकाचा-मरव्यजनासनपतद्ग्रहच्छत्रपात्रासिस्रुक्तोपानद्युगल-ताम्रघटिकादिजलपात्रदीपिकावितानादयः। मार्त्तवस्त्र-संयुतामिति,उपर्याच्छादनवस्त्रं सोत्तरीयं कुर्यादित्यर्थः। स्वर्णलक्षणसङ्ग्रह ब्रह्माण्डदाने “ततः सर्वौषधि-स्नानस्नापितो वेदपुङ्गवैः। इममुच्चारयेन्मन्त्रं गृहीत-कुसुमाञ्जलिः”। इहापि पूर्वेद्युरधिवासनं विधाय द्वितीयदिवसे पूर्ववत् पुण्याहवाचनादिपूर्णाहुतिपर्य्यन्तं कर्म, गुरुः समापयेत्। अथ सर्वौषधिजलस्नातः शुक्ला-म्बरो यजमानस्त्रिःप्रदक्षिणीकृत्य वक्ष्यमाणमन्त्रमुदी-रयेत्। “नमस्ते सर्वदेवेश! वेदाहरणलम्पट!। वाजिरू-पेण मामस्मात् पाहि संसारसागरात्। त्वमेव सप्तधा भूत्वा छन्दोरूपेण भास्करम्। यस्मात् भ्रामयसे लो-कानतः पाहि सनातन!। एवमुच्चार्य्य गुरवे तमश्वं विनिवेदयेत्। दत्त्वा पापक्षयाद्भानोर्लोकमभ्येति शाश्व-तम्। गोभिर्विभवतः सर्वानृत्विजश्चाभिपूजयेत्। सर्व-धान्योपकरणं गुरवे विनिवेदयेत्। सर्वं शय्यादिकं दत्त्वा भुञ्जीतातैलमेव हि। पुराणश्रवणं तद्वत् कार-येद्गीतनर्त्तनादत्त”। दानवाक्यञ्च पूर्ववदनुसन्धेयम्, अनु-कूटांशयोः सुवर्णं दक्षिणेति, शयार्थञ्च सुवर्णदक्षिणा, विभवतः स्वविभवानुसारेण सर्वान् सदस्यादीनृत्विजश्च गोभिः पूजयेत्, सर्वधान्योपकरणमिति विनियोगात्

पूर्वं धान्यासादनं गम्यते, गुरवे निवेदयेदिति, स्वल्पद्रव्यदाने आचार्य्यायैव अर्द्धं प्रदाय ऋत्विग्भ्यो यथाशक्ति सुवर्णादि दद्यात्। सहस्रपलादिद्रव्यदाने तु प्रकृतिवद्व्यवस्था, स्वल्पतरेष्वेकाग्निविधानेऽपि द्रष्टव्यम्" हेमा॰दा॰

हिरण्याश्वरथ पु॰ हिरण्येन निर्मितः अश्वः तद्युक्तरथः। तुलादिषोड़शमहादानमध्ये दानार्थं स्वर्णादिना १कल्पिते सुवर्णमयाश्वयुक्तरथे २तद्दाने न॰। तद्विधिर्यथा "अथातः संप्रवक्ष्यामि महादानमनुत्तमम्। हिरण्याश्वरथं नाम महापातकनाशनम्। पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम्। लोकेशावाहनं कुर्य्यात् तुलापुरुषदानवत्। ऋत्विग्मण्डपसम्भारभूषणाच्छादनादिकम्"। तुलापुरुषदानवदिति, मत्स्यपुराणोक्ततुलापुरुषदानवदेदितव्यम्, आदिशब्दस्यापि पूर्ववदेव व्याख्या "कृष्णाजिने तिलान् कृत्वा काञ्चनं कारयेद्रथम्। अष्टाश्वं चतुरश्वं वा चतुश्चक्रं सकूवरम्। इन्द्रनीलेन कुम्भेन ध्वजरूपेण संयुतम्। लोकपालाष्टकोपेतं पद्मरागदलान्वितम्"। अत्र तिलानां रथस्य च परिमाणापेक्षायां पुरुषेच्छया नियमः प्रकृतौ परिमाणाश्रवणात्. केचित् तु सन्निधानात् हेमहस्तिरथादिदानस्थितं तिलानां द्रोणपरिमाणत्वमिह वदन्ति। कूवरं युगाधारकाष्ठम्। ध्वजो दण्डः, स च रथस्य सौवर्णत्वात् सौवर्ण एव तथा चोपरिस्थितेन इन्द्रनीलमणिमयेन कलशेन युक्तः कर्त्तव्यः। लोकपालाष्टकमुक्तं ब्रह्माण्डदाने, "चत्वारः पूर्णकलशा धान्यान्यष्टौ तथैव तु। कौशेयवस्त्रसंयुक्तमुपरिष्टाद्वितानकम्। माल्येक्षुफलसंयुक्तं पुरुषेण समन्वितम्। यो यद्भक्तः पुमान् कुर्य्यात् स तद्रूपाधिवासनम्"। वितानमत्र पञ्चवर्णं, पुरुष इष्टदेवताकारः सौवर्णरथे स्थापनीयः। वस्त्रोपानत्पादुकाश्च। "गोभिर्विभवतः सार्द्धं दद्याच्च शयनासनम्। आभरणादूर्ध्वं शक्तितः कारयेद्बुधः"। भारः पलसहस्रद्वयम्, एतच्च सुवर्णमानं ध्वजपुरुषलोकपालाश्वचक्ररथरूपसहितस्य वेदितव्यम्। "अष्टभीरथसंयुक्तं चतुर्भिरथ वाजिभिः। द्वाभ्यामथ युतं दद्याद्धेमसिंहध्वजान्वितम्"। हैमेन सिंहाङ्कितेन युक्तमिति अष्टाश्वपक्षे, चतुरश्वपक्षे च इन्द्रनीलमयकुम्भो ध्वजे कार्य्यः, अश्वद्वयपक्षे हेमसिंह इति व्यवस्था। "चक्ररक्षावुभौ तस्य तुरगस्थावथाश्विनौ। पुण्यं कालं ततः प्राप्य पूर्ववत् स्थापितो द्विजैः। शुक्लमाल्याम्बरो दद्यादिमं मन्त्रमुदीरयेत्"। हेमा॰ दा॰ मत्स्यपुराणीयम्।

हिरुक् अव्य॰ हि—बा॰ उकिक् रुट् च। १वर्जने २त्यागे मनो॰ २विनार्थे ३मध्यार्थे ४सामीप्ये च अमरः। ५अधमे शब्दच॰

हिल हावकरणे तु॰प॰सक॰सेट्। हिलति अहेलीत्।

हिलमोचि(ची) स्त्री हिल—क मुच—इन् कर्म॰ वा ङीप् (हेलेञ्चा) शाके शब्दर॰ स्वार्थे क तत्रैव शब्दच॰। "शोथं कुष्ठं कफं पित्तं हरते हिलमोचिका" भावप्र॰।

हिल्ल पुंस्त्री॰ हिल बक्। शरारिखगे शब्दच॰। स्त्रियां ङीष्

हिल्लोल दोलने अद॰चु॰उभ॰सक॰ सेट्। हिल्लोलयति ते अजिहिल्लोलत् त।

हिल्लोल पु॰ हिल्लोल—अच्। १तरङ्गे "हृदि कृत्वा स्त्रियः पादौ कराभ्यां धारयेत् कटौ। यथेष्टं ताड़येद्योनिं बन्धो हिल्लोलसंज्ञकः" रतिम॰ उक्ते २रतिबन्धभेदे। घञ्। ३दोलने।

हिल्वला स्त्री इल्वला+पृषो॰। मृगशिरानक्षत्रशिरोदेशस्थे पञ्चतारात्मके मृगव्याधे शब्दर॰। [न्वीत्।

हिव प्रीणने भ्वा॰ प॰ सक॰ सेट् इदित्। हिन्वति अहि-

हिवुक न॰ हिवि—उकन् नि॰। लग्नाच्चतुर्थे स्थाने ज्यो॰।

हिस बधे वा चु॰ उ॰ पक्षे रुधा॰ प॰ सक॰ सेट् इदित्। हिनस्ति हिंसयति ते अहिंसीत् अजिहिंसत् त।

ही अव्य॰ हि—डी। १विस्मये अमरः। २दुःखे ३विषादे ४हेतौ मेदि॰। ५योगे च शब्दर॰।

हीन त्रि॰ परि॰ हा—क्त तस्य नः ईत्वम्। १ऊने २निन्द्ये अमरः। ३अधमे त्रि॰। व्यवहारे ४प्रतिवादिभेदे पु॰ जटा॰ "अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः। आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः" नारदः।

हीनवादिन् पु॰ कर्म॰। "पूर्ववादं परित्यज्य योऽन्यमालम्बते पुनः। वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः" इत्युक्ते व्यवहारे १वादिभेदे। २मूके हेमच॰।

हीनाङ्ग त्रि॰ हीनमङ्गं यस्य। स्वभावतो न्यूनाङ्गयुक्ते "हीनाङ्गं विकलाङ्गं च" इति स्मृतिः। स्त्रियां वा ङीप् सा च। २क्षुद्रपिप्पल्यां हेमच॰। [ताल] भरतः।

हीन्ताल पु॰ हीनस्तालो यस्मात् पृषो॰। हिन्तालवृक्षे (हें·

हीर न॰ हृ—क नि॰। १वज्रे २हीरके च। २शिवे ३सर्पे पु॰ हेमच॰ ४हारे ५सिंहे च पु॰ ६लक्ष्म्यां ७तैलाम्बुके स्त्री मेदि॰। ८पिपीलिकायां हेमच॰ ९काश्मीर्य्यां च स्त्री राजनि॰ स्वार्थे क। हीरक (हीरा) मणिभेदे शब्दार्थ॰। वज्रशब्दे ४८४१ पृ॰ दृश्यम्।

हीराङ्ग पु० हीर इव दृढमङ्गमस्य । इन्द्रस्य वज्रे शब्दमा० ।

हील न० ही-विस्मयं लाति ला-क । शुक्रे धातौ हेमच० ।

हीलुक न० हिल-उक पृषो० । गौडीमद्ये शब्दच० ।

हीही अव्य० ही+द्वित्वम् । १विस्मये २हास्ये च मेदि० ।

हु होमे अदने च जु० प० सक० अनिट् । जुहोति अहौषीत् जुहाव । प्रीणने च । "जुहुधीह पावकम्" किरा० ।

हुं(हूं)कार पु० हु(हूं)मित्यव्यक्तशब्दस्य कारः कृ-घञ् । हुमित्यव्यक्तस्य प्रतिषेधसूचकशब्दस्योच्चारणे । "मौनव्रतं महाकष्टं हु(हूं)ङ्कारेणापि नश्यति" इति पुराणम् दीर्घमध्योऽपि ।

हुड राशीकरणे सक० मज्जने संघाते च अक० तु० कु० प० सेट् । हुडति अहुडीत् जुहोड ऋदित् चङि न ह्रस्वः ।

हुड राशीकरणे भ्वा० आ० सक० सेट् इदित् । हुण्डते अहुण्डिष्ट । [होडते अहोडिष्ट ।

हुड गतौ भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः

हुड पु० हुड-क । १मेषे हेमच० । चौरनिवारणार्थं भूमौ निखाते २लौहकीलके च ३सैनाश्रयस्थाने ४रथोपरि विष्मूत्रत्यागार्थस्थानभेदे च "पुरी समन्ताद्विहिता सपताका सतोरणा । सयन्त्रा सहुडा चैव सचक्रग्रहणा तथा" भा० व० १५अ० । "यन्त्राणि योधनयाः हुडास्तदाश्रयस्थानानि भाषायां (बुरुज)संज्ञानि । अन्ये तु विष्मूत्रोत्सर्जनस्थानभेदानि हुडा इत्याहुः । उदाहरन्ति च । "कश्चित्तु हुडस्थानानि रथस्योपरि सूरिभिः विष्मूत्रत्यागरक्षार्थकराटिसर्वं उद्यतः" इति नीलक० ।

हुडुक्क पु० कु० हुड-वा० उक्क । १वाद्यभेदे २दात्यूहखगे ३मदमत्ते मेदि० (हुडुका) इति ख्याते ४कपाटदण्डे शब्दर० ।

हुडुत् न० कृ० हुड-उति । १वृषशब्दे २अव्यक्ते शब्दे काशीख० ।

हुडुम्ब पु० कु० हुड-उम्ब । भटपिष्टे शब्दमा० ।

हुण्ड पुंस्त्री० हुडि-अच् । १व्याघ्रे २ग्राम्यशूकरे ३राक्षसे च स्त्रियां ङीष् । ४मूर्खे त्रि० । अमरः । भावे क्त । २होमे न० ।

हुत त्रि० हु-क्त । देवोद्देशेन मन्त्रद्वाराऽग्नौ प्रक्षिप्ते घृतादौ

हुतभुज् पु० हुतं मन्त्रेण प्रक्षिप्तं घृतादि भुङ्क्ते भुज-क्विप् । १अग्नौ २चित्रकवृक्षे च अमरः ।

हुतवह पु० हुतं घृतादिकं वहति प्रापयति देवान् प्रीत्यर्थम् वह-अच् । १अग्नौ हेमच० २चित्रकवृक्षे च अमरः ।

हुताश पु० हुतमश्नाति अश-अण् । १वह्नौ शब्दर० २चित्रकवृक्षे च । ल्यु हुताशनोऽप्यत्र । स च कर्मविशेषविहितवह्नौ च । "कोटिहोमे हुताशनः" ति० त० ।

हुताशनी स्त्री हुताशनस्तद्दीपनमस्त्यस्या अच् गौ० ङीष् । फाल्गुनपूर्णिमायां होलाकाशब्दे दृश्यम् ।

हुम् अव्य० हु-डुमि । १स्मरणे २प्रश्ने ३अनुज्ञायां च ४निवारणे मेदि० । "गुरुं हुङ्कृत्य तुङ्कृत्येति" स्मृतिः ।

हुर्छ कौटिल्ये भ्वा० प० सक० सेट् । हूर्छति अहूर्छीत् मुखपाठत्वात् क्विपि छलोपे हूः हुरौ हुर इत्यादि ।

हुल हतौ संवरणे च भ्वा० प० सक० सेट् । होलति अहोलीत् ज्वला० हुलः होलः ।

हुलहुली स्त्री हुल-क आभीक्ष्ण्ये द्वित्वम् गौरा० ङीष् । स्त्रीणां मङ्गलध्वनिभेदे (उलुउलु) त्रिका० ।

हुहु(हू) ह्वे-डु नि० । गन्धर्वभेदे पृषो० हूहूरित्यप्यत्र ।

हूङ्कार पु० हूम्+कृ-घञ् । अवज्ञाद्योतके शब्दभेदे "हूङ्कारेणैव तं भस्म सा चकाराम्बिका ततः" देवीमा० ।

हूड गतौ भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः । हूडते अहूडिष्ट ।

हूत त्रि० ह्वे-क्त संप्रसारणम् । आहूते कृताह्वाने ।

हूति स्त्री ह्वे-क्तिन् संप्रसारणम् । आह्वाने अमरः ।

हून पु० ह्वे-नक् सम्प्रसारणं च । १म्लेच्छजातिभेदे २तद्वासस्थानभेदे च "हूनवक्षःस्थलीयेव मान्धदेशे सदाचन" ज्यो० । ३तत्र प्रचलिते स्वर्णमुद्राभेदे इत्यन्ये । "सपादश्च हरन्ते तु हूनो यस्य इत्यपि । कोवणाचार्य्यो वाणिजवाग्व्याचारदर्शितः । अन्ये तु विराट शबर पुलिन्दाद्यास्तु तद्भिदा" जटाध० ।

हूम् अव्य० हु-बा० डुमि । १प्रश्ने २वितर्के अमरः ३सम्मतौ ४क्रोधे ५भये निन्दायाम् अवज्ञायाञ्च चक्रवर्त्ती ।

हूर्च्छन न० हुर्छ-ल्युट् । कौटिल्ये । [कोष ।

हूरव पुंस्त्री० हू इति रवो यस्य । शृगाले हेमच० स्त्रियां

हूहु(हू) पु० गन्धर्वविशेषे शब्दर० ।

हृ हरणे भ्वा० उ० द्वि० अनिट् । हरति ते अहार्षीत् अहृत जहार जह्रे हरिष्यति ते । णिचि कर्मणि यकारादि । ह्रियते अहारि अहारिषाताम् अहृषाताम् जिहीर्षति ते

अनु+सदृशीकरणे आ० अनुहरते पैतृकमश्वः ।

अप+दूरीकरणे अपहरति अपसारयतीत्यर्थः चौर्य्ये च ।

अभि+आभिमुख्येन हरणे ।

सम्+अभि+प्र+नः पुनयोन सम्पादने ।

अभि+अव भोजने अभ्यवहरति भुङ्क्ते इत्यर्थः ।

सम्+अभि+वि+आ+नैकटयसम्बन्धसम्पादने ।

अव+दूरीकरणे सैन्यावहारः ।

वि+अव विवादे शयनभोजनादिना संसर्गे उपभोगे च।
आ+भोजने आहारः। नानास्थानस्थितानामेकत्रसङ्कलने च
अधि+आ+तर्के अन्यत्रश्रुतपदस्यान्वयार्थमाकर्षणे च।
अभि+आ+आभिमुख्येनाहरणे।
उद्+आ+दृष्टान्ततयोपन्यासे कथने च।
प्रति+उद्+आ–प्रतिरूपतया उपन्यासे।
परि+आ+परित आहरणे [विषयेभ्यो मनसो निवारणे च
प्रति+आ+तन्त्रेण पठितानामेकैकस्य ग्रहणे प्रत्याहारः
वि+आ–कथने शब्दोत्पादकव्यापारे।
सम्+आ–संग्रहे नानास्थानस्थितानामेकत्रोपन्यासे संघाते च
उद्+उत्तोलने उत्क्षेपणे च।
अभि+उद्+आभिमुख्येन उद्धरणे। अभितो वा उत्क्षेपणे।
प्रति+उद्+प्रतिकूलतया प्रातिकूल्येन वा उद्धरणे।
उप+सामीप्येन आनतीकरणार्थं दाने उपढौकने।
प्रति+उप+प्रतिरूपतया उपढौकने।
नि+नितरां हरणे हिंसनिह्नवयोः च।
निस्+(र)बहिष्करणे अपधारणे च।
परि+दोषादिनिवारणे।
प्र+ताडने निघाते।
प्रति+प्र+प्रतिरूपतया ताडने।
प्रति+प्रत्यवहरणे प्रतिरूपतया हरणे च।
वि+देशविशेषेषु गत्यादिना सन्तोषकरणार्थव्यापारे विहारः।
वि+अति परस्परमेकजातीयक्रियाकरणे आ०।
सम्+मारणे नाशने च। [योजने यथा गुणोपसंहारः,
उप+सम्+प्रकरणपठितस्य समापने अन्यत्र पठितस्यान्यत्र
हृ बलात्कारहरणे जु०पर०सक०अनिट् वैदिकः। जहर्त्ति
अजाहर्षीत्। [दयस्थिते त्रि०।
हृच्छय पु० हृदि शेते शी–अच्। १कामदेवे हला०। २हृ-
हृच्छूल न० ६त०। शूलरोगभेदे वैद्यकम्।
हृणी लज्जायां कण्ड्वा०आत्म०अक०सेट्। हृणीयते अहृ-
णीयिष्ट “हृणीयते वीरवती न भूमिः” भट्टिः।
हृणीया स्त्री हृणीय-भावे अ। निन्दायाम् अमरः।
हृत(द्) त्रि० हृ-क्विप् तुक् च। १हारिणि। पृषो०तस्य दः,
हृदयस्य हृदादेशो वा। २हृदये ३मानसे च न० अमरः।
हृत्कम्प पु० ६त०। भयादिहेतुके हृदयकम्पे।
हृत त्रि० हृ–क्त। १अपहृते २स्थानान्तरं गमिते च ३विभक्ते
हृदय न०हृ–कयन् दुक् च।१मनसि २वक्षसि च मिता०। हृद्
एति इण-अच्। परमपुरुषे “हृदयं तस्माद्धृदयम्”का०उ०।

हृदयग्रन्थि पु० हृदयस्य ग्रन्थिरिव। अविद्याजन्यबन्धरूपे
संसारबन्धे “भिद्यते हृदयग्रन्थिः” इति भागवतम्।
हृदयङ्गम त्रि० हृदयं गच्छति गम–खच् मुम् च।१युक्तियुक्ते
२मनोहरे त्रि० अमरः “हृदयङ्गममूर्त्तिस्वम्” भट्टिः।
हृदयस्थान न०हृदयस्य मनसः स्थानम् हृदयरूपं वा स्थानम्
वक्षःस्थले हेमच०। [इनि। हृदयिन् तत्रार्थे जटा०
हृदयिक त्रि० हृदयं प्रशस्तं मनोऽस्त्यस्य ठन्। प्रशस्तचित्ते
हृदयेश पु० ६त०। १भर्त्तरि २भार्य्यायां स्त्री हेमच०।
हृदावर्त्त पु० हृदिस्थ आवर्त्तः। अश्वस्य हृदयस्थे आव-
र्त्ताकारे रोमावलीभेदे त्रिका०। [हरिवं०३८अ०।
हृदिक पु० स्वयम्भोजात्मजे कृतवर्म्मपितरि यादवभेदे
हृदिकात्मज पु० ६त०। कृतवर्म्मणि यादवे।
हृदिस्पृश् त्रि० हृदि हृदये स्पृश्यतेऽसौ कर्म्मणि क्विन्
अलुक्स०। १हृद्ये मनोज्ञे। कर्त्तरि क्विन्। २मर्म्म-
स्पृशि दुःखदे च। [क्रमेण तद्देशवासिनि सि० कौ०।
हृद्गोल पु०पर्वतभेदे सोऽभिजनोऽस्य छ। हृद्गोलीय पित्रादि-
हृद्ग्रन्थ पु० हृद् ग्रथ्नाति ग्रन्थ–अण्। हृद्ग्रहे राजनि०
हृद्य न० हृदि स्पृश्यते मनोज्ञत्वात् हृद्+यत्। १गुडत्वचि
(दारचिनि) शब्दर०। २मनोज्ञे त्रि०अमरः। ३दधिजना-
मोषधौ स्त्री। ४वशकरमन्त्रभेदे पु० मेदि०।
हृद्यगन्ध न०हृद्यो गन्धोऽस्य। सुद्रजीरके हेमच०। २बिल्व-
वृक्षे पु० जटा०। ३भाल्यां स्त्री राजनि०। इत्यमा०।
हृद्यगन्धोत्यपि ४सुद्रजीरके न० राजनि०।
हृद्रोग पु० ६त०। हृदयस्य रोगभेदे हृदामयोऽप्यत्र।
भावप्र० तस्य निदानादि तल्लक्षणं चोक्तं यथा
“हृद्रोगस्य विप्रकृष्टनिदानमाह “अत्युष्णगुर्व्वम्ल
कषायतिक्तश्रमाभिघाताध्यशनप्रसङ्गैः। संचिन्तनैर्वेगवि-
धारणैश्च हृदामयः पञ्चविधः प्रदिष्टः”। प्रसङ्गः
सततं सेवा। संचिन्तनम् अतिचिन्ता राजभयादि-
जमिति। हृदामयः स च पञ्चविधः वातिकः पैत्तिकः
श्लैष्मिकः सान्निपातिकः क्रिमिजश्चेति। तस्य संप्राप्ति-
पूर्व्वकं लक्षणमाह। “दूषयित्वा रसं दोषा विगुणा
हृदयङ्गताः। हृदि बाधां प्रकुर्वन्ति हृद्रोगन्तं प्रचक्षते”।
विगुणाः दुष्टाः बाधां दोषभेदेन नानाविधां व्यथाम्।
मङ्कुवत्पीडामिति गणदासः। वातिकं हृद्रोगमाह
“आयम्यते मारुतजे हृदयन्तुद्यते तथा। निर्मथ्यते
दीर्य्यते च स्फोट्यते पाट्यतेऽपि वा”। मारुतजे हृद्रोग
इति शेषः। आयम्यते व्यथया विस्तार्य्यते इव। तु-

-द्यते सूचीभिरिव विध्यते। निर्मथ्यते मथनेनेव दीर्यते करपत्रेणेव द्विधाक्रियत इव। स्फोट्यते अपनेयेव पाट्यते कुठारेण बहुधाक्रियत इव। अथ पैत्तिकमाह "तृष्णोष्मदाहचोषाः स्युः पैत्तिके हृदये क्लमः। धूमायनञ्च मूर्च्छा च स्वेदः शोषो मुखस्य च"। तृष्णा शीतगात्रस्येव शीतवाताभिलाषहेतुः किञ्चिद्वैरूप्यम्। दाहः पार्श्वस्थेन वह्निनेव दुःखहेतुर्गात्रस्य सन्तापः। चोषः चूषणेनेव पीड़ा। हृदये क्लमः हृदयाकुलत्वं ग्लानिर्वाटित्वर्थः। धूमायनम् कण्ठाद्धूमनिर्गमः। क्लेदः किञ्चिद्दुर्गन्धः घटित इव। श्लैष्मिकमाह "गौरवं कफसंस्रावोऽरुचिस्तम्भोऽग्निमार्दवम्। माधुर्य्यमपि चास्यस्य बलासावतते हृदि"। बलासावतते हृदि कुपितकफव्याप्ते गौरवं हृदयस्य। स्तम्भो जड़ता। माधुर्य्यं जलप्लुतमिव माधुर्य्यं मुखे। त्रिदोषजमाह "विद्यात्त्रिदोषमप्येवं सर्वलिङ्गस्तदामयम्"। क्रिमिजमाह क्रिमयो जायन्ते अस्मिन्निति क्रिमिज इति निरुक्तिः। तस्य विप्रकृष्टनिदानपूर्विकां सम्प्राप्तिमाह "त्रिदोषजे तु हृद्रोगे यो दुरात्मा निषेवते। तिलक्षीरगुड़ादींश्च ग्रन्थिस्तस्योपजायते। मर्म्मैकदेशे संक्लेदं रसश्चाप्युपगच्छति। संक्लेदात् क्रिमयश्चास्य भवन्त्युपहतात्मनः"। मर्म्मैकदेशे हृदयैकदेशे संक्लेदं घटितत्वं रस उपगच्छति। संक्लेदात् रसस्य घटितत्वात् उपहतात्मनः तिलाद्यहिताहारिणः। तस्य लक्षणमाह "उत्क्लेदः ष्ठीवनन्तोदः शूलं हृल्लासकस्तमः। अरुचिः श्यावनेत्रत्वं शोषश्च क्रिमिजे भवेत्"। उत्क्लेदः वमनमिवोपस्थितम्। शोषो वक्त्रस्य। हृद्रोगस्योपद्रवानाह "क्लमः सादो भ्रमः शोषो ज्ञेयास्तेषामुपद्रवाः। क्रिमिजे तु क्रिमीणां ये श्लैष्मिकाणां हि ते मताः"। क्लमः पिपासाख्यानस्य सादः शोषः। शोषो मुखस्य। तेषां हृद्रोगाणां, क्रिमिजे तु हृद्रोगे श्लैष्मिकाणां क्रिमीणाम् ये उपद्रवा हृल्लासात् ज्वरणान्ता। विपाकादयस्ते मताः" २कुम्भराशौ युक्तिदीपिका।

हृद्रोगवैरिन् पु० ६त०। अर्जुनवृक्षे शब्दर०।

हृद्गटक पु० ६त०। हृदयस्य विभाजके जठरे शब्दर०।

हृल्लास पु० हृदयस्य लासो यत्र हृदादेशः। हिक्कारोगे हेमच०। तेन हि हृदयस्य स्फूर्त्तिरिव भवति।

हृल्लेख पु० हृदयं लिखति स्पृशति लिख–अ हृदादेशः। १ज्ञाने राजनि०, २तर्के त्रिका०। ३तन्त्रोक्ते मन्त्रभेदे च।

४कौतुकस्थे स्त्री हेमा०। [उदित् हृषित्वा हृष्ट्वा हृष्टः।

हृष चित्तोल्लासे भ्वा० पर० अक० सेट्। हर्षति अहर्षीत्।

हृष हर्षे चित्तोल्लासे दि० प० अ० सेट्। हृष्यति इरित् अहृषत् अहर्षीत् जीव हृष्टोऽस्मि। [हर्षति अहर्षीत्।

हृष मिथ्याकरणे भ्वा० पर० सक० सेट् उदित् क्त्वा वेट्।

हृषित त्रि० हृष–क्त वा० इट्। १प्रीते २विस्मिते ३प्रहते ४जातरोमाञ्चे च मेदि०। [अमरः।

हृषीक न० हृष–ईकन्। विषयग्राहके चक्षुरादौ इन्द्रिये

हृषीकेश पु० ६त०। विष्णौ अमरः। अन्तर्यामितया तस्य सर्वनियन्तृत्वात् सर्वेन्द्रियप्रवर्त्तकत्वात्तथात्वम्।

हृष्ट त्रि० हृष–क्त। १प्रीते २जातहर्षे अमरः। ३जातरोमाञ्चे ४विस्मिते च मेदि०।

हृष्टमानस त्रि० हृष्टं प्रीतं मानसमस्य। हृष्टचित्ते शब्दर०

हृष्टरोमन् त्रि० हृष्टमिव जाताङ्कुरं रोम यस्य। जातरोमाञ्चे पुलकिते त्रिका०। [धरणिः।

हृष्टि स्त्री हृष–क्तिन्। १आनन्दे २हर्षे ३ज्ञाने च

हे अव्य० हा–डे। १सम्बोधने २आह्वाने ३असूयादौ च मेदि०

हेक्का स्त्री हिक्का+पृषो०। हिक्कारोगे हेमच०।

हेठ विबाधे भ्वा० प० सक० सेट्। हेठति अहेठीत्।

हेठ भूतौ उत्पत्तौ च अक० पवित्रीकरणे सक० क्र्या० प० सेट्। हेठति अहेठीत्। [हेठते अहेठिष्ट।

हेठ बाधने भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः।

हेठ पु० हेठ–घञ्। १बाधायाम् २विघाते च मेदि०।

हेड अनादरे भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः। हेडते अहेडिष्ट।

हेड वेष्टने भ्वा० प० सक० सेट् घटा०। हेडति अहेडीत्।

हेड़ावुक्क पु० अश्वविक्रयकारके त्रिका०।

हेति स्त्री हन–करणे क्तिन् नि०। १अस्त्रे २वह्निशिखायां ३सूर्य्यकिरणे अमरः। ४तेजोमात्रे भरतः ५साधने च श्रीधरः।

हेतु पु० हि–तुन्। १कारणे अमरः २अनुमितिसाधने व्याप्ये ३फले च। हेतुत्वञ्च उत्पादकज्ञापकान्यतरत्वम्। यतो घटो जायते इत्यादौ उत्पादकत्वं पर्वतो वह्निमान् धूमादित्यादौ ज्ञापकत्वं तत्र ज्ञापकमेव लिङ्गशब्देन व्यवह्रियते। ४न्यायावयवभेदे तत्र लिङ्गप्रतिपादकतृतीयान्तपञ्चम्यन्तपदत्वात् तत्त्वञ्च अनुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्याविषयकशाब्दधीजनकतृतीयविभक्तिमत्पदत्वम्। हेतु

त्वन्यूनतिप्राटकविभक्तिमन्न्यायावयवत्वं वा। उदाहरणप्रयोजकाकाङ्क्षाजनकज्ञानजनकन्यायावयवत्वं वा। साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा। प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्तिमद्वाक्यत्वं वा" चिन्तामणिः। ४अलङ्कारभेदे अलङ्कारशब्दे ४०८ पृ० दृश्यम्।

हेतुता स्त्री हेतोर्भावः तल्। १हेतुत्वे कार्य्याव्यवहितपूर्व्वक्षणे नियतकार्य्याधिकरणवृत्तित्वरूपे कारणत्वे २प्रकृतिविशेषे च "हेतुतावसरस्तथा" इति प्राञ्चः।

हेतुमत् त्रि० हेतुरस्त्यस्य मतुप्। कार्य्ये स्त्रियां ङीप्।

हेत्वपह्नुति अलङ्कारभेदे अलङ्कारशब्दे ४०८ पृ० दृश्यम्।

हेत्वन्तर गौतमोक्ते निग्रहस्थानभेदे। "अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम्" गौ०सू० तल्लक्षणमुक्तं "परोक्तदूषणोद्दिधीर्षया तत्रैव हेतौ पूर्व्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टवचनम्। यथा शब्दोऽनित्यो बाह्येन्द्रियप्रत्यक्षत्वादित्युक्ते सामान्ये नैकान्तिकत्वेन च प्रत्युक्ते सामान्यवत्त्वे सतीति विशेषणम्। प्राञ्चस्तु, हेतौ विशेषणदान एव हेत्वन्तरमित्याहुः" गौ०वृ०.

हेत्वसिद्धि स्त्री असिद्धिभेदे स्वरूपासिद्धिरूपहेत्वाभासभेदे

हेत्वाभास पु० हेतुरिव आभासते आ+भास-अच्, हेतोर्वा आभासः आ+भास-घञ्। न्यायोक्ते १दुष्टे हेतौ २हेतुदोषे च। स च दोषः पञ्चविधः व्यभिचारः विरुद्धता असिद्धिः सत्प्रतिपक्षता बाधश्च। तादृशदोषेषु सत्सु अनुमितिर्नोदेति। यत्र हि ज्ञानमनुमितिप्रतिबन्धकं स हेत्वाभासः। अत्र हेतुनाभासा इति व्युत्पत्त्या हेत्वाभासपदस्य हेतुदोषपरत्वम्। तल्लक्षणञ्च हेत्वाभासत्वम् तच्च अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्। तद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वम्। ज्ञायमानं सत् यदनुमितिप्रतिबन्धकं तत्त्वम्। यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्तानुत्तरमनुमितावनाहार्य्यज्ञानस्याने वा पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्टहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेकस्तत्त्वम्।" केचित्तु, यादृशपक्षकयादृशसाध्यकयादृशहेतौ यावन्तो दोषाः सम्भवन्ति तावदन्यान्यत्वमिति प्राहुः" दीधि०। "हेतुलक्षणाभावादहेतवो हेतुसामान्याद्धेतुवदाभासमानाः" वात्स्या० "पक्षरूपोपपन्नत्वाभावे सति तद्रूपेण भासमानः" गौ० वृ०। "पक्षधर्मत्वादीनां पञ्चानां रूपाणां मध्ये एकेनापि रूपेण हीनो हेतुः। सोऽपि कतिपयहेतुरूपयोगाद्धेतुवदाभासमानः" त० भा०। असाधको हेतुत्वेनाभिमतः। यथा वायुर्गन्धवान् स्नेहादित्यादौ स्नेहो हेत्वाभासः। स च हेत्वाभासः। पञ्चधा सव्यभिचारः। विरुद्धः। प्रकरणसमः। साध्यसमः अतीतकालः" गौ० सू० पर्य्यायान्तरेण हेत्वाभासः पञ्चधा "असिद्धः विरुद्धः। अनैकान्तिकः। प्रकरणसमः। कालात्ययापदिष्टः। पर्य्यायान्तरेणापि हेत्वाभासः पञ्चधा। सव्यभिचारः। विरुद्धः। असिद्धः। सत्प्रतिपक्षितः बाधितः इति।

हेम न० हि-मन्। १स्वर्णे २धुस्तूरे अमरः ३नागकेशरे राजनि०। ४माषकपरिमाणे च पु०चिन्ता० ५कृष्णवर्णाश्वे। ६बुधग्रहे च पु० ज्यो०।

हेमकन्दल पु० हेमवर्णं कन्दं लाति ला-क। प्रवाले हेमच०

हेमकान्ति स्त्री हेम्न इव कान्तिरस्याः। दारुहरिद्रायाम् राजनि०। २स्वर्णतुल्यद्युतियुक्ते त्रि०। हेत०। ३स्वर्णस्य दीप्तौ स्त्री।

हेमकार पु० हेम तन्मयं भूषणं करोति कृ-अण्। स्वर्णकारे वर्णसङ्करजातिभेदे (सेकरा)। [राजनि०।

हेमकिञ्जल्क न० हेमेव पीतं किञ्जल्कं यस्य। नागकेशरे

हेमकूट पु० हेममयः कूटो यस्य। किंपुरुषवर्षस्थे हिमालयादुत्तरस्थे पर्वतभेदे अमरः। [राजनि०।

हेमकेतकी स्त्री हेमेव पीता केतकी। स्वर्णकेतक्याम्

हेमकेलि पु० १अग्नौ शब्दच०। २चित्रकवृक्षे च [राजनि०

हेमक्षीरी स्त्री हेम इव पीतं क्षीरं यस्याः। स्वर्णक्षीर्य्याम्

हेमगन्धिनी स्त्री हेम्नः नागकेशरस्येव गन्धोऽस्त्यस्याः इनि ङीप्। रेणुकाख्ये गन्धद्रव्ये रत्नमा०।

हेमगिरि पु० हेममयो गिरिः। १सुमेरुपर्वते २नैरृतस्थे देशभेदे वृ०स० कूर्म्मविभागशब्दे २१६८ पृ० दृश्यम्।

हेमगौर पु० हेमेव गौरः पीतः पुष्पेण। १अशोकवृक्षे राजनि० २स्वर्णतुल्यपीते त्रि०। [त्रकवृक्षे च

हेमज्वाल पु० हेमेव ज्वाला यस्य। १अग्नौ शब्दमा०। २चि-

हेमतार न० हेम तारयति उत्कृष्टं करोति तॄ-णिच्-अण्। तुत्थे हेमच०।

हेमदुग्धक पु० हेमवर्णं दुग्धं निर्यासोऽस्य कप्। १उदुम्बरे वृक्षे अमरः। २स्वर्णक्षीर्य्यां स्त्री जटा० कव

भावे तत्रार्थे स्त्री अटा॰टाप्। ङीप् राजनि॰।

हेमदुग्धिन् पु॰ हेमवर्णं दुग्धं निर्यासोऽस्त्यस्य इनि। उडुम्बरे वृक्षे शब्दर॰ [केशरे राजनि॰ ४हिमे च माधवः

हेमन् न॰ हि–मनिन्। १स्वर्णे धातौ २धुस्तूरे अमरः ३नाग-

हेमन्त पुं न॰। हि–झच् मुट् च। अग्रहायणपौषमासात्मके ऋतौ कालभेदे अमरः। कपित्थे शब्दच॰।

हेमन्तनाथ पु॰ हेमन्ते नाथ्यते याच्यते नाथ–कर्मणि घञ्।

हेमपुष्प न॰ हेमेव पीतं पुष्पमस्य। १अशोकवृक्षे २जवापुष्पे च मेदि॰। ३चम्पकवृक्षे पु॰ अप्। तत्र वाच्ये च शब्दच॰

हेमपुष्पी स्त्री हेमेव पीतं पुष्पमस्याः ङीप्। १मञ्जिष्ठायाम् शब्दर॰। २स्वर्णजीवन्त्याम् ३इन्द्रवारुण्याम् ४मुसल्याम् ५कण्टकार्य्याञ्च राजनि॰। संज्ञायां कन् ह्रस्वः। स्वर्ण-यूथिकायाम् स्त्री। [(चापावता) राजनि॰।

हेमफला स्त्री हेमेव पीतं पक्वफलमस्याः। स्वर्णकदल्याम्

हेममालिन् पु॰ हेमेव किरणानां मालास्त्यस्य इनि। १सूर्य्ये त्रि॰ त॰। २अर्कवृक्षे च [राजनि॰।

हेमयूथिका स्त्री हेमेव पीता यूथिका। स्वर्णयूथिकायाम्

हेमरागिणी स्त्री हेम्न इव रागोऽस्त्यस्याः इनि ङीप्। हरिद्रायाम् त्रिका॰।

हेमल पु॰ हेम तद्रूपं निर्मलस्वर्णमध्यात्, तद्वर्णं वा लाति ला–क। १कलादे स्वर्णकारे २कषपाषाणे ३कृकलासे पुंस्त्री॰ मेदि॰ स्त्रियां ङीष्।

हेमलता स्त्री हेमेव पीता लता। स्वर्णजीवन्त्याम् राजनि॰।

हेमवल न॰ हेम्ना वलते शोभते वल–अच्। मौक्तिके राजनि॰ हिमवलमित्यपि पाठान्तरं तत्रार्थे हिमतुल्य-शुभ्रत्वात्तथात्वम्।

हेमशृङ्ग पु॰ हेमेव शुचिः शृङ्गोऽस्य। विष्णौ त्रिका॰।

हेमशिखा स्त्री हेमेव पीता शिखा यस्याः। स्वर्णक्षीर्य्याम् शब्दर॰। [वत्से शब्दच॰।

हेमसार न॰ हेम सारयति निर्मलीकरोति सृ–णिच्–अण्।

हेमहस्तिरथ पु॰ हेमनिर्मितहस्तियुक्तो रथः। तुलापुरु-षादिषोडशमहादानमध्ये दानार्थं॰कल्पिते १स्वर्णमय-हस्तियुक्ते हेममयरथे २तद्दाने न॰। तद्विधिः हेमा॰दा॰ "अथातः संप्रवक्ष्यामि हेमहस्तिरथं शुभम्। यस्य प्रदानाद्भुवनं वैष्णवं याति मानवः। पुण्यां तिथिमथा-साद्य तुलापुरुषदानवत्। विप्रवाचनकं कुर्य्याल्लोकेशावा-हनं बुधः। ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादि-कम्। अत्राप्युपोषितस्तद्वद् ब्राह्मणैः सह भोजनम्" इत्याद्यादिशब्देन देयकालद्विजादिसर्वमत्रुक्तं मत्-स्यपुराणोक्ततुलापुरुषवत्त्वतं वेदितव्यम्। उपोषित इति, उपवासासक्तौ नक्तमपि वेदितव्यम्। "कुर्य्यात् पुष्प-रथाकारं काञ्चनं मणिमण्डितम्। वलभीभिर्विचित्रा-भिश्चतुश्चक्रसमन्वितम्। लोकपालाष्टकोपेतं शिवार्कब्रह्म-संयुतम्। मध्ये नारायणोपेतं लक्ष्मीपुष्टिसमन्वितम्"। पुष्परथः, क्रीडार्थो रथः, स च चतुष्काकारैर्वलभ्याच्छा-दितो भवति वलभ्यो लोकपालाश्रयाः। लोकपालब्रह्म-शिवार्कत्वमत्रुक्तं ब्रह्माण्डदाने। मध्यशब्दः पूर्वापराभ्यां सम्बध्यते, शिवादीनामपि स्थानापेक्षायास्तेनैव निवृत्तेः। नारायणादिलक्षणं पञ्चरात्रात् "नारायणश्चतु-र्बाहुः शङ्खं चक्रं तयोत्तरे। दक्षिणे तु महापद्मं नीलाञ्जीमूतसन्निभे। वामे श्रीर्दक्षिणे हस्ता पुष्टिः पद्म-करा परा" इति। "कृष्णाजिने तिलद्रोणं कृत्वा संस्थापयेद्रथम्। तथाष्टादश धान्यानि भाजनासनच-न्दनैः। दीपिकोपानहच्छत्रपादुकादर्पणान्वितम्। ध्वजे तु गरुडं कुर्य्यात् कूवराग्रे विनायकम्। नानाफल-समायुक्तं उपरिष्टाद्वितानकम्। कौशेयं पञ्चवर्णं च अम्लानकुसुमान्वितम्। चतुर्भिः कलशैः सार्द्धं गोभि-रष्टाभिरन्वितम्। चतुर्भिर्हेममातङ्गैर्मुक्तादामविभू-षितैः। अन्वपतः करिष्वाथ युक्तं कृत्वा निवेदयेत्। कुर्य्यात् पञ्चपलादूर्द्ध्वमाभारादपि शक्तितः"। ध्वजे तु गरुडं कुर्य्यादित्यादि, ध्वजो दण्डः। गरुडलक्ष-णमुक्तं नारदीये "उपेन्द्रस्याग्रतः पक्षी गुडाकेशः कृताञ्जलिः। अध्यजानुनतो भूमौ भुजौ च फणिभू-षितः। पक्षिजङ्घो नरग्रीवस्तुङ्गनासो नराकृतिः। द्विभुजः पक्षयुक्तश्च कर्त्तव्यो विनतासुतः"। अथ विना-यकस्य "चतुर्भुजस्त्रिनेत्रश्च कर्त्तव्योऽस्य गजाननः। नागयज्ञोपवीतश्च शशाङ्ककृतशेखरः। दन्तं दक्षकरे दद्या-द्द्वितीये चाक्षसूत्रकम्। तृतीये परशुं दद्याच्चतुर्थे मोदकं तथा"। उपर्य्यधोहस्तयोर्दन्तादि, देयमिति, कू-वरो व्याख्यातः। अम्लानकुसुमं, पुष्पविशेषः रूढ-यौगिकमपहरतीतिन्यायात् महासहेति प्रसिद्धमेव गृह्यते। भारो व्याख्यातः। ध्वजगतदेवताश्च पञ्चपला-दिपरिमितेन रथवृत्ततत्सुवर्णेनैव निष्पादनीयाः एवं सम्भारानुपकल्प्य पूर्ववदधिवासनं विधाय वरादिवसे पुण्याहवाचनादि सकलं कर्मकाण्डं समाप्य सर्वौषधि-जलेन साध्वी यजमानस्य स्नापनं कुर्य्यात्। "ततो मङ्गल

यज्ञेन स्थापितो वेदपुङ्गवैः । त्रिःप्रदक्षिणमावृत्य हृष्टो-त्फुल्लकृताञ्जलिः । इममुच्चारयेन्मन्त्रं ब्राह्मणेभ्यो निवेदयेत् । नमो नमः शङ्करपद्मजार्कलोकेशविद्याधरवासुदेवैः । त्वं सेव्यसे देव ! पुराण ! यस्मात्तेजोमय स्यन्दन ! पाहि यस्मात् । यत् तत्पदं गुह्यतमं मुरारेरानन्दहेतुर्गुणरूपमुक्तः । यागेशमानसदयोमुनयः समाधौ पश्यन्ति तत्त्वमसि नाथ ! रथोऽधिरूढ़ ! यस्मात्त्वमेव भवसागरसंस्थितानामानन्दभाण्डभृतमध्वरपानपात्रम् । तस्मादघौघशमनेन कुरु प्रसादं चामीकरेभरथसाधनसम्प्रदानात्" । मन्त्रेणानेन प्रणम्य यथाशक्ति सुवर्णदक्षिणामुपकल्प्य पूर्ववत् प्रयोगमुच्चार्य तं गजरथं प्रत्यक्षगजाभ्यां संयुतं ब्राह्मणेभ्यः प्रतिपादयेत्, आचार्याय दोनामर्द्धं चतुर्भागादिव्यवस्था तदनुज्ञया चान्येभ्योऽपि दानं, दीनानाथपूरणं चेति, प्रमाणविवदाचरणीयं ततः पुण्याहवाचने कृते यजमानो वेदिसमीपं गत्वा देवतापूजां विदध्यात् । आचार्यस्तु आहूतदेवान् विसर्जयेत्" ।

हेमाङ्ग पु० हेमेव पीतमङ्गं यस्य । १गरुडे २सिंहे ३सुमेरौ ४ब्रह्मणि च मेदि० । ५चम्पकवृक्षे शब्दर० । ६विष्णौ च विष्णु स० ७स्वर्णवर्णाङ्गयुक्ते त्रि० । कर्म० । हेमवत्त्वेऽङ्गे न० ।

हेमाद्रि पु० हेममयोऽद्रिः । १सुमेरौ पर्वते अमरः । चतुर्वर्गचिन्तामणिमुक्ताफलादिग्रन्थकारके २विद्वद्भेदे ।

हेमाद्रिजरण पु० हेमाद्रौ जीर्यति जॄ-ल्यु । स्वर्णगोधायाम् रत्नमा० । हेममारणयोग्ये त्रि० ।

हेमाह्व पु० हेम तद्वर्णमाह्वयते स्पर्द्धते स्ववर्णेन आ+ह्वे-क । १वनचम्पके राजनि० । हेम्न आह्वा आख्या यस्य । २धुस्तूरे ३नागकेशरे च अमरः ४स्वर्णजीवन्त्यां स्त्री राजनि० ।

हेय त्रि० हा-यत् । त्याज्ये "हेयं दुःखमनागतम्" पात०सू० ।

हेर न० हि-रन् । १हरिद्रायाम् २मुकुटभेदे च ।

हेरम्ब पु० हे शिवे रम्बति रबि-अच् अलुक्समा० । १गणेशे अमरः २महिषे ३शौर्य्यगर्विते त्रि० मेदि० ४बुद्धभेदे पु० त्रिका० ।

हेरम्बजननी स्त्री ६त० । दुर्गायाम् शब्दर० ।

हेरम्बहट्ट पु० दक्षिणस्थे देशभेदे शब्दर० ।

हेरिक पु० हि-इक रुट् च । चरे हेमच० ।

हेरुक पु० हि-उक रुट् च । १बुद्धभेदे २महाकालगणे मेदि० ३कामाख्यापीठस्थे शिवलिङ्गभेदे "शिवाङ्कस्य तत्रास्ति शिलायां हेरुकाह्वयम् । नदीदक्षिणपूर्वायां नायकं तन्तु पूजयेत्" कालिकापु० ८१ अ० ।

हेलञ्जी स्त्री हिल-घञ् हेलं चिनोति चि-ड पृषो० गौरा० ङीष् । हिलमोचिकायाम् शब्दच० ।

हेलन न० हिल-ल्युट् । अवज्ञायाम् शब्दर० ।

हेला स्त्री हेड-अनादरे भावे अ डस्य लः । १अनादरे स्त्रीणां शृङ्गारभावजे "प्रौढेच्छा याऽतिरूढ़ानां नारीणां सुरतोत्सवे । शृङ्गारशास्त्रतत्त्वज्ञैः हेला सा परिकीर्तिता" इत्युक्ता २चेष्टाविशेषे । "देहात्मकं भवेत् सत्त्वं सत्त्वात् भावः समुत्थितः । भावात् समुत्थितो हावो हावात् हेला समुत्थिता" हाव एव भवेद्धेला व्यक्तं शृङ्गारसूचकः" उज्ज्वल० ३ज्योत्स्नायाञ्च ।

हेलावुक पु० अश्वविक्रयोपजीविनि हारा० ।

हेलि पु० हिल-इन् । १सूर्ये २अर्कवृक्षे च ३अवज्ञायां हलडचन्द्रः ४सूर्ये ज्यो०त०ध्वनि हेलिन् सूर्ये ज्यो० ।

हेष अव्यक्ते शब्दे भ्वा०आ० अ० सेट् ऋदित् चङि न ह्रस्वः । हेषते अजिहेषत् ।

हेषा स्त्री हेष-भावे अ । घोटकानां शब्दे अमरः ।

हेषिन् पु० हेष-णिनि । अश्वे त्रिका० ।

हेहे अव्य० हे च हे च द्व० । १सम्बोधने २आह्वाने मेदि० ।

है अव्य० हा-कै । १सम्बोधने २आह्वाने च मेदि० ।

हैतुक त्रि० हेतौ प्रसृतः ठच् । हेतुवादरते अयुक्तिकवाक्यवादिनि "त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः" पर्षद्गणने मनुः ।

हैम त्रि० हिमे भवम् अण् । १हिमजातमात्रे २प्रातःकालीनहिमजाते जले न० राजनि० । ३भूनिम्बे पु० राजनि० । हेम्नो विकारः अण् टिलोपः । ४स्वर्णविकारे ५स्वर्णमयपदार्थे च त्रि० ।

हैमन पु० हेमन्त एव हेमन्ते भवो वा अण् तलोपः । १हेमन्ते काले शब्दर० । २तत्र जाते त्रि० । हेम्न इदम् अण् न टिलोपः । स्वर्णसम्बन्धिनि त्रि० स्त्रियां ङीप् ।

हैमन्तिक त्रि० हेमन्ते काले भवः ठञ् । हेमन्तकालभवे शालिधान्यभेदे (आमनधान) "हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः" हविष्याणोक्तौ ति०त० ।

हैमल पु० हिमल एव स्वार्थे अण् । हेमन्ते ऋतौ शब्दर० ।

हैमवत न० हिमवतोऽदूरभवो देशः तस्येदं वा अण् । १भारतवर्षस्य वर्षभेदे त्रिका० "एतद्धैमवतं वर्षं भारती यत्र सन्ततिः" विष्णु पु० । २हिमालयसम्बन्धिनि त्रि० ३जनपदभेदे पु० हेमच० । तस्यापत्यं तत्र भवो वा अण् । ५पार्वत्यां ६हरीतक्यां अमरः स्त्री ङीप् । ७स्वर्णक्षीर्य्यां

ष्ट्रतवच्यायाञ्च स्त्री मेदि०ङीप दूगष्कायां १०रेणुकायां स्त्री धरणिः ङीप्। [सर्वपूचिकायां शब्दर०।

हैमा(मी) स्त्री हेम तदर्थोऽस्त्यस्य अच् वा ङीप्।

हैयङ्गवीन न० ह्योगोदोहाद् भवम् ह्यस्+गो+ख नि०। १नवनीते रत्नमा०, पूर्वदिनदुग्धोद्भूते २घृते च अमरः।

हैरिक पु० हि-र हेरः तत्र प्रसृतः ठक्। चौरे धरणिः।

हैहय पु० पश्चिमस्थे देशविशेषे वृ०सं० कूर्मविभाग २१६८ पृ० दृश्यम् तेषां राजा अण्। २हैहयेश्वरे कार्त्तवीर्य्ये हेमच० पृषा० हैहेय तत्रार्थे शब्दर०।

हो अव्य० ह्वे-डो नि०। १सम्बोधने २आह्वाने च मेदि०।

होड गतौ अनादरे च भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः। होडते अजुहोडिह।

होड पु० होड-अच् हुड-घञ् वा। १समुद्रगामिनौकाभेदे (हुडि़) त्रिका० २चौर्य्यचक्रे च मिता०।

होतृ पु० हु-तृच्। १ऋग्वेदाभिज्ञे अमरः। २होमकर्त्तरि त्रि० स्त्रियां ङीप्। "या हविर्या च होत्री" शकुन्तला

होत्र न० हु-ष्ट्रन्। १होमे हेमच०। २हविषि घृतादौ च त्रिका० ३स्तुतौ स्त्री टाप्।

होत्रीय न०. होत्राय हितम् होत्रिदं वा छ। १हविर्गृहे हेमच०। २होत्रसम्बन्धिनि त्रि०।

होम पु०हु-मन्। देवतोद्देशेन वह्नौ मन्त्रद्वारा घृतादित्याग-रूपे हवने नित्यं त्वहस्तवर्त्तव्येषु पञ्चसु यज्ञेषु मध्ये ५२देवयज्ञे अमरः। २आशौचविप्रपाशौ आशौचापभागस्य मन्त्रे च दाने च भ्वा० त०।

होमकुण्ड पुन० होमार्थं कुण्डम्। होमार्थे कुण्डे त्रिका०

होमधान्य न० होमोपयुक्तं धान्यम्। १तिले २यवे च राजनि० ।

होमधूम पु० होमजः धूमः। होमाग्निजाते धूमे च भव०

होमभस्मन् न० होमजं भस्म। हुतद्रव्यजाते भस्मनि हेमच०

होमाग्नि पु० ६त०। यज्ञियाग्नौ हेमच०।

होमि पु० हु-इन् मुट् च। १अग्नौ २घृते च मेदि० ३जले शब्दर०। ४चित्रकवृक्षे।

होमिन् पु० होमोऽस्त्यस्य इनि। होमकर्त्तरि। [राजनि०

होम्य त्रि० होमाय हितम् यत्। होमोपयुक्ते घृतादौ

होरा स्त्री हु-रन्। ज्योतिषोक्ते १लग्ने २राश्यर्द्धभागे ३होराशास्त्रप्रतिपादकशास्त्रभेदे ४रेखायाञ्च मेदि०।

"विषमर्क्षेषु प्रथमा होराः सूर्य्यस्य ततोऽपि चन्द्रस्य। द्वितीयाः शशिनो युग्मे व्यत्ययाद्गणयेत् सदा" ज्यो० त०।

"चतुर्विंशतितमेनाभिरहोरात्रं प्रपद्यते। पश्चिमादर्द्ध-रात्रादि होराणां विद्यते क्रमः" वह्निपु०।

होलक पु० हु-क्विप् जकति जक-अच् कर्म०। "अर्द्धपक्वे शमीधान्ये तृणभृष्टे च होलकः" इत्युक्ते द्रव्यादिना अर्द्धपक्वे शमीधान्ये "होलकोऽस्पानिलो मेदःकफ-दोषश्रमापहः। भवेद् यो होलको यस्य स च तत्तद्-गुणो भवेत्" भावप्र०।

होलाक पु० खेदुर्विशेषाद्व्यापारभेदे चरकः तत्र दोलाक इत्यत्र होलाक पाठान्तरम्।

होलाका स्त्री हु-क्विप् तं वाति वा-क संज्ञायां कन्। १वसन्तोत्सवभेदे उपचारात् तत्काले फाल्गुनपौर्ण-मास्याञ्च १०पृषो० होली होलिका होलकाऽप्यत्र। होलाकाविधिश्च आचारमात्र इति माधवादयः। पुराणादिप्रसिद्धः शास्त्रमूलोऽयम् आचार इति हेमाद्रि-निर्णयसिन्धुप्रभृतयः। तद्विधिकालो नि०सि० उक्तो यथा "फाल्गुनपौर्णमासी होलिका सा च सायाह्नव्यापिनी ग्राह्या" "सायाह्ने होलिकां कुर्य्यात् पूर्वाह्णे क्रीडनं गवामिति" वचनादिति निर्णयामृते उक्तम्। ज्योतिर्नि-बन्धे तु "प्रतिपद्भूतभद्रासु यार्चिता होलिका दिवा। संवत्सरञ्च तद्राष्ट्रं पुरं दहति साद्भुतम्। प्रदोषव्यापिनी ग्राह्या पूर्णिमा फाल्गुनी सदा। तस्यां भद्रामुखं त्यक्त्वा पूज्या होला निशामुखे" इति नारदवचनात् प्रदोष-व्यापिनीत्युक्तम्। हेमाद्रौ मदनरत्ने च भविष्ये "अस्यां निशागमे पार्थ! संरक्ष्याः शिशवो०गृहे। गोमयेनोप-लिप्ते च सचतुष्के गृहाङ्गणे" इत्यादिना तत्रैव तद्वि-धानोक्तं। तेनेयं पूर्वविद्धा "श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम्" इति बृहद्यमवचनाञ्चैवर्त्तोक्तेश्च। दिनद्वये प्रदोषव्याप्तौ परैव पूर्वदिने भद्रासत्त्वात् तत्र च होलिकानिषेधात् तदुक्तं निर्णयामृते मदनरत्ने च पुरःसरवचने "भ-द्रायां दीपिता होली राष्ट्रभङ्गं करोति वै। नगरस्य च नैवेष्टा तस्मात् तां परिवर्जयेत्"। तथा "भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी"। तथा "दिनार्धात् पर-तोऽपि स्यात् फाल्गुनी पूर्णिमा यदि। रात्रौ भद्रा-वसाने तु होलिका दीप्यते तदा" इति। यदा तु पूर्वदिने चतुर्दशी प्रदोषव्यापिनी परदिने च सूर्य्यास्तात् सायाह्नात् प्रागेव पूर्णिमा समाप्यते तदा पूर्वदिने संपूर्ण

रात्रौ भद्रासत्त्वात् तत्र च तन्निषेधात् परेऽहनि प्रतिपद्येव कुर्य्यात्। "सार्द्धयामत्रयं वा स्याद् द्वितीयदिवसे यदा। प्रतिपद्वर्द्धमाना तु तदा सा होलिका स्मृता" इति भविष्यवचनादिति निर्णयामृतकारः। मदनरत्नेऽप्येवम्। यत्तु "वह्नौ वह्निं परित्यजेदिति" भविष्यम्। वह्नौ होलिकायां वह्निं प्रतिपदं वर्जयेदित्यर्थः तदुक्तभिन्नविषयमिति तत्रैवोक्तम्। अन्ये तु तस्यां भद्रामुखं त्यक्त्वा कार्य्या। "प्रदोषव्यापिनी चेत् स्याद् यदा पूर्व्वदिने तथा। भद्रामुखं वर्जयित्वा होलिकायाः प्रदीपनम्" इति नारदवचनात्। "निशागमे प्रपूज्यन्त होलिका सर्व्वदा बुधैः। न दिवा पूजयेद्धोलां पूजिता दुःखदा भवेत्" इति दिवोदासीयवचनात्। "यामत्रयोर्द्ध्वयुक्ता चेत् प्रतिपत्तु भवेत्तिथिः। भद्रामुख परित्यज्य कार्य्या होला मनीषिभिः" इति विद्याविनोदेऽभिधानाच्च। भद्रामुखं विहाय पूर्व्वदिन एव कार्य्येत्याहुः। भद्रामुखन्तु "नाद्यास्तु पञ्च वदनं गजकास्तथैके" इति रत्नमालोक्तं ज्ञेयम्। शिष्टाचारोऽप्येवमेव। अत्र चेच्चन्द्रग्रहणं तदा ततोऽर्वाङ्निशि भद्रावर्ज्जं पौर्णमास्यां होलिकादीपनम् अथ परेऽह्नि ग्रस्तोदयस्तदा पूर्व्वदिने भद्रावर्ज्जं रात्रौ चतुर्थयामे विष्टिपुच्छे वा होलिका कार्य्या। ग्रहोत्तरं प्रतिपत्सत्त्वात् तत्पूर्व्वञ्च दिवा होलानिषेधादिति दिवोदासचन्द्रप्रकाशौ। वस्तुतस्तु परदिने प्रदोषे पौर्णमासीसत्त्वे कर्म्मकालस्पर्शे चतुर्थयामादिगौणकालग्रहणे मानाभावाद्भद्राभावाच्च ग्रहणकाल एव होला कार्य्या। न च "सर्व्वेषामेव वर्णानां सूतकं राहुदर्शने। स्नात्वा कर्म्माणि कुर्व्वीत शृतमन्नं विवर्जयेदिति" निषेधात् कथं सूतके होलेति वाच्यम् तस्योत्तराङ्गत्वात्। पूजामन्त्रस्तु "असृक्पाभयसन्त्रस्तैः कृता त्वं होलि! बालिशैः। अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव" इति। यत्तु वार्त्तिककारैर्होलिका आचारप्राप्तेत्युक्तम्। तत्र हेमाद्र्याद्युदाहृतभविष्यवचनान्यसिद्धानि कृत्वा चिन्ता ज्ञेया आर्त्त्यधिकरणवत्। हुताशनी मलमासे न भवति" नि॰ सि॰।

होलाकाधिकरण न॰ जैमि॰ प्रथमस्य द्वितीयपादे दर्शिते न्यायभेदे तच्च तत्त्वबोधिन्याम संक्षिप्य दर्शितं यथा "होलाका प्राच्याभिमानिभिरनुष्ठीयते होलाका च वसन्तोत्सवविशेषः हुताशनीतिप्रसिद्धः। एवमाह्नीनेबुकादिकं दाक्षिणात्यैः, आह्नीनेबुकं कुलक्रमागतं करञ्जकादिस्थावरदेवतापूजादिकं तद्देशप्रसिद्धम्। उद्वृषभयज्ञादिकमुदीच्यैः क्रियते उद्वृषभयज्ञश्च ज्यैष्ठ्यां पौर्णमास्यां बलीवर्द्दानभ्यर्च्य धारयन्ति यत् सः तद्देशप्रसिद्धः एवं हारीताद्युक्तस्मृतयोऽपि काश्चित् कस्मिंश्चिद्देशविशेषे दृश्यन्ते एतदुक्तकर्माणि तत्तच्छाखीकर्त्तृकाणीत्येषां मूलभूताः श्रुतयः कल्पनीयाः। तत्र किं प्राच्यैर्होलाका कर्त्तव्येत्यादिरूपा प्राच्यादिपदघटिता व्यवस्थितविषया उत होलाका कर्त्तव्या इति तत्तत्पदाघटिता सामान्यविषया इति संशयः तत्र प्राच्यादिपदघटितैव कल्प्या देशविशेषाणामाचारदर्शनात् लिङ्गव्यवस्थया हि लिङ्ग्यनुमीयते यथा यत्र धूमोऽवगतस्तत्रैव वह्निरनुमीयते नान्यत्र तथा च सूत्रम् "अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात्" अस्यार्थः। अनुमानव्यवस्थानात् धूमादिव्यवस्थया वह्न्याद्यनुमानव्यवस्थादर्शनात् तत्संयुक्तं प्राच्यादिपदघटितम् अनुमेयश्रुतिवाक्यं प्रमाणं स्यादिति प्राप्ते राद्धान्तायोक्तम् "विशेषाभावमात्रेण प्रसिध्येत् सर्वधर्मता। विशेषणात् व्यवस्था स्यात् तच्च नेहोपपद्यते"। अस्यार्थः विशेषाभावमात्रेण हारीतस्मृतिगोभिलसूत्रादौ शाखाविशेषप्रतिपादकपदाभावेन तत्तत्स्मृत्युक्तस्य सर्वधर्मता सर्वसाधारणी कर्त्तव्यता प्रसिध्येत्। तथा हि छन्दोगोऽपि गोभिलादिः स्वशिष्यानध्यापयामास तेऽप्यन्यान् छन्दोगानेवमन्यत्रापि स्मृत्यन्तादिकमुक्तमूलाम् अतस्तत्तच्छाखिनस्तत्तच्छाखोक्तमाचरन्ति इति स्मृतिवाक्यानुसारिणी श्रुतिः कल्पनीया। आचारे त्वाह विशेषणात् प्राच्यादीनां विशेषव्यवहारदर्शनेनानुमेयश्रुतौ प्राच्यादिविशेषणपदान्तर्भावात् व्यवस्था स्यात् प्राच्यादीनामेव तदाचरणमिति विधानव्यवस्था स्यात् तच्च नेहोपपद्यते। अयम्भावः सर्वाचरितेष्वनुगतम् अनाचरितव्यस्य व्यावृत्तम् आकृतिव्यक्तिगुणादिकं किञ्चित् विशेषणं न सम्भवति यदुपादाय होलाकाद्यधिकरणं स्यात्। न च प्राचीभवत्वादिरूपप्राच्यादिपदसमाख्या तथेति वाच्यं तद्देशभवानामपि केषाञ्चिदनाचरणात् चिरविनिर्गतस्य तत्तद्देशीयस्य पुत्रपौत्राणां समाख्यायामसत्यामपि होलाका कर्त्तव्येति सामान्यश्रुत्यैवोपपत्तौ प्राच्यादिपदघटितश्रुतिकल्पनमन्याय्यं गौरवात् न चाप्राच्यानामननुष्ठानार्थं प्राच्यादिपदवती कल्पनीया अनाचरणरूपस्याननुष्ठानस्याश्रुतिकल्पकत्वात् तस्येच्छाविरहेणैव सम्भवात्। न हि यदि श्रुतिविहितं स्यात् तदा अप्राच्यैरपि आ-

दुषितं स्यादिति तर्कयितुं शक्यते होलाकाया नित्यत्वे मानाभावेन काम्यत्वात् । न हि सर्वमेव श्रुतिविहितं काम्यं सर्वैः सङ्कल्प्य अनुष्ठीयते न चैकस्य कर्त्तुर्विधानमन्यस्य तन्निषेधयति येनाप्राच्यानां निषिद्धाचरणेनानिष्टजन-कताज्ञापनार्थं तत्पदमर्थवत् स्यात् । अत्र च शास्त्रदीपि-काधिकरणमालादायमागमश्चेतिषु प्राच्यानामिति पाठः । प्राच्याश्चात्र शास्त्रीयाः ते च सुमेरुलङ्कयोर्मध्ये या रेखा ज्योतिः शास्त्रादौ प्रसिद्धा तस्याः पूर्वदेशीयाः प्राच्याः न तु गौड़देशावधिकपूर्वदेशीयाः । तस्याः पश्चिम-देशीयाश्च पाश्चात्त्याः । एतेन प्रतीच्यानां तदाचरणमिति स्वदेशाभिप्रायेणैव गौड़ीयेनोदीच्येन लिखितं तस्येयं गौड़ीयानामेव श्रुतिकल्पनम् अप्रत्यक्षवेदानां तथा चाव्यवस्थितश्रुतिकल्पना स्यात् न चायमपि दोषः विशेष-कल्पने भविष्यति तथा सति पार्थसारथिमिश्रादिभि-र्मैवमृभिरयमप्युद्भावितः स्यात् न चैवम् । तस्माज्ज्योति-रादिशास्त्रप्रसिद्धप्राच्यादिमादायैवेयमाग्रहेति" ।

हो अव्य० हु-डो नि० । १सम्बोधने २आह्वाने च मेदि० ।

होड़ अनादरे गतौ च भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः । होडते अजुहोडत् ।

हौत्र त्रि० होतुरिदम् उद्गा० अण् । तस्य भावः कर्म वा युवा० अण् वा । १होतृसम्बन्धिनि २तत्कर्मादौ न० ।

ह्नु चौर्य्ये अदा० आ० सक० अनिट् । ह्नुते अह्नोष्ट ।

ह्मल चलने भ्वा० प० सक० सेट् । ह्मलति अह्मालीत् । घटा० । प्रह्मलयति अनुपसर्गस्य वा ह्रस्वः ।

ह्यस् अव्य० गतेऽहनि नि० । गतदिवसे अमरः ।

ह्यस्तन त्रि० ह्यस्+भवार्थे ट्युल् तुट् च । गतदिवसभवे त्यप । ह्यस्त्योऽप्यत्र त्रि० । [वृद्धिः । ह्रगति अह्रगीत् ।

ह्रग संवरणे भ्वा० पर० सक० सेट् घटा० एदित् क्षिचि न

ह्रद पु० ह्राद-अच् नि० । १अगाधजलाशये अमरः । २किरणे शब्दार्थमः । "ह्रदाम्बु वह्निजननं मधुरं कफवातहारि पथ्यम्" राजनि० तज्जलगुणा उक्ताः ।

ह्रदिनी स्त्री ह्रदोऽस्त्यस्याम् इनि । नद्याम् अमरः ।

ह्रप भाषणे चु० उ० सक० सेट् । ह्रापयति ते अजिह्रपत् त ।

ह्रस रवे भ्वा० प० सक० सेट् । ह्रसति अह्रसीत् अह्रासीत्

ह्रसिमन् पु० ह्रस्वस्य भावः इमनिच् ह्रसादेशः । ह्रस्वतायाम्

ह्रसिष्ठ त्रि० अतिशयेन ह्रस्वः इष्ठन् ह्रसादेशः । अतिह्रस्वे

ह्रसीयस् त्रि० अतिशयेन ह्रस्वः ईयसुन् ह्रसादेशः । अति-ह्रस्वे । स्त्रियां ङीप् ।

ह्रस्व न० ह्रस-वन् । १परिमाणभेदे २तद्वति ३खर्वे च त्रि० अमरः । एकमात्राकालोच्चार्ये ४लघुस्वरे पु० राजनि० । ५क्षुद्रपर्ण्यां ६नागबलायां भूमिजम्बूवृक्षे स्त्री राजनि० ।

ह्रस्वकुश पु० नित्यकर्म० । श्वेतकुशे राजनि० ।

ह्रस्वगर्भ पु० ह्रस्वो गर्भो यस्य । कुशे रत्नमा० ।

ह्रस्वगवेधुका स्त्री नि० कर्म० । नागबलायाम् अमरः ।

ह्रस्वजम्बू स्त्री कर्म० । क्षुद्रजम्बूवृक्षे रत्नमा० ।

ह्रस्वदर्भ पु० नित्यकर्म० । श्वेतकुशे राजनि० । [क्याम् राजनि०

ह्रस्वदा स्त्री ह्रस्वैरपि दीयते छिद्यते दो-खण्डने क । गन्ध-

ह्रस्वपत्रक पु० ह्रस्वं पत्रमस्य कप् । १गिरिजमधूके (मौल) २अश्वत्थ्याम् स्त्री राजनि० कापि अत इत्त्वम् ।

ह्रस्वफला स्त्री ह्रस्वं फलमस्याः । भूमिजम्बूवृक्षे राजनि०

ह्रस्वमूल पु० ह्रस्वं मूलमस्य । रक्तेक्षौ राजनि० । [अमरः ।

ह्रस्वशाखाशिफ पु० ह्रस्वा शाखा शिफा च यस्य । क्षुपे

ह्रस्वाग्नि पु० ह्रस्वः अग्निरस्मात् ५ब० । अर्कवृक्षे शब्दच० ।

ह्रस्वाङ्ग पु० ह्रस्वमङ्गमस्मात् ५ब० । १जीवकौषधे अमरः । ६ब० । वामने २खर्वे त्रि० । कर्म० । ह्रस्वे अङ्गे न० ।

ह्राद शब्दे भ्वा० आ० अक० सेट् । ह्रादते अह्रादिष्ट ।

ह्राद पु० ह्राद-भावे घञ् । १शब्दे हेमच० अच् । २शब्द-कारके त्रि० ३हिरण्यकशिपुपुत्रभेदे पु० पुराणम् ।

ह्रादिनी स्त्री ह्राद-णिनि ङीप् । १विद्युति २वज्रे अमरः ३नद्याम् राजनि० ४शल्लक्याम् शब्दर० ५ह्रादशीले त्रि०

ह्रास पु० ह्रस-घञ् । १शब्दे त्रि० २अपचये च ।

ह्रिणी लज्जायाम् कण्ड्वा० आ० अक० सेट् । ह्रिणीयते अह्रिणीयिष्ट ।

ह्रिणीया स्त्री ह्रिणी-यक् भावे अ । लज्जायाम् अमरः । पृषो० ह्रियणी इत्यपि तत्रार्थे भरतः । [ह्रेपयति ते ।

ह्री लज्जायां जु० प० अक० अनिट् । जिह्रेति अह्रैषीत् । णिचि

ह्री स्त्री ह्री-सम्प० भावे क्विप् । लज्जायाम् अमरः ।

ह्रीका स्त्री ह्री-कन् । १त्रासे उणा० २लज्जायां पि०कौ वा टस्य कः तत्रार्थे ।

ह्रीकु त्रि० ह्री-कु कुक् च । १लज्जिते । २मज्जने ४जतुनि ५त्रपुणि च उणा० । वा रस्य लः । [च्छीत् ।

ह्रीच्छ लज्जायाम् भ्वा० प० अक० सेट् । ह्रीच्छति अह्री-

ह्रीजित त्रि० ३त० । लज्जाशीले जटा० ।

ह्री(त)ण त्रि० ह्री-क्त वा तस्य नः । लज्जिते अमरः ।

ह्रीवेर(ल) न० ह्रिये लज्जायै वेरमङ्गमस्य क्षुद्रत्वात् पृषो० वा रस्य लः (बाला) क्षुपभेदे पृषो० । ह्रीवेर तत्रार्थे रस्य

वः ह्रीवेर तदर्थे अमरटीकायामाह स्म भरतः ।

ह्रुड गतौ भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः । ह्रोडते अह्रोडिष्ट । [ह्रूडति अह्रूडिष्ट

ह्रूड गतौ भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः ।

ह्रेप गतौ भ्वा० आ० सक० सेट् । ऋदित् चङि न ह्रस्वः । ह्रेपते अह्रेपिष्ट ।

ह्रेष अव्यक्तशब्दे अक० सर्पणे सक० भ्वा० आ० सेट् ऋदित् चङि न ह्रस्वः । ह्रेषते अह्रेषिष्ट ।

ह्रेषा स्त्री ह्रेष–भावे अ । अश्वशब्दे अमरः ।

ह्रौड गतौ भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः । ह्रौडते अह्रौडिष्ट । [ह्रस्व. । ह्लगति अह्लगीत् ।

ह्लग संवरणे भ्वा० प० सक० सेट् घटा० ऋदित् णिचि न

ह्लप भाषणे चु० उ० द्विक० सेट् । ह्लापयति ते अजिह्लपत् त ।

ह्लस रवे भ्वा० प० अ० सेट् । ह्लसति अह्लसीत् अह्लासीत् ।

ह्लाद शब्दे भ्वा० आत्म० अक० मोदने सक० सेट् ईदित् निष्ठायामनिट् । ह्लादते अह्लादिष्ट । ह्लादः ।

आ+आनन्दे अक० आह्लादः ।

ह्लादिनी स्त्री ह्लाद–णिनि ङीप् । १विद्युति २वज्रे, अमर[illegible] ३ईश्वरशक्तिभेदे च श्रीधरः ४ह्लादविशिष्टे स्त्रि०

ह्लल चलने भ्वा० प० अक० सेट् । ह्ललति अह्लालीत् । घटा० प्रह्ललयति अनुपसर्गस्य वा ह्रस्वः ह्ललयति ह्लालयति ।

ह्वान न० ह्वे-ल्युट् । आह्वाने । [जह्वरतुः ।

ह्वृ कौटिल्यकरणे भ्वा० प० सक० अनिट् । ह्वरति अह्वार्षीत् ।

ह्वे स्पर्द्धायां शब्दे च अक० आह्वानार्थे सक० भ्वा० उभ० यजा० अनिट् । ह्वयति अह्वत्–अह्वत अह्वास्त सम्प्र० जुहाव आहूतः आहूतिः ।

आ+स्पर्द्धायाम् आत्म० शत्रुमाह्वयते । शिवम् ।

ओं तत्सत् ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते
वाचस्पत्ये हकारादिशब्दार्थसङ्कलनम् ।

ग्रन्थकर्तृवंशादि ।

राढीयश्रेणीविख्यातके जिडियामिकः किल । यशोहरप्रदेशस्थसारलावसथे स्थितः ॥
सार्वभौमोपाधियुक्तः कमलाकान्तसंज्ञकः । सच्छ्रोत्रियः क्षितौ ख्यातो वात्स्यवंशावतंसकः ॥
मुकुन्दरामनामासीत् तदन्वयसमुद्भवः । तत्प्रदेशस्थवैचण्डीग्रामवासी स्वकार्य्यतः ॥
तर्कसिद्धान्तोपनामा रामरामस्तदात्मजः । सदा शिवशिवेत्युक्त्या प्राप्तः शिवशिवाभिधाम् ॥
नानाविद्याधरत्वेन प्राप विद्याधराह्वयम् । भागीरथीतीरवासी भवबन्धजिहीर्षया ॥
वर्द्धमानप्रदेशस्थाम्बिकाग्रामेऽवसच्चिरम् । अन्ते काशीं समासाद्य पञ्चत्वं प्राप्य मुक्तिभाक् ॥
अम्बिकावासकालेऽस्य जातौ वंशधरौ सुतौ । तर्कपञ्चाननोपाधिर्दुर्गादासस्तु मध्यमः ॥
सार्वभौमोपाधियुतः कनीयांस्तु तदात्मजः । कालिदासाभिधो नानाशास्त्रविद्याविशारदः ॥
तस्याहं प्रथमः पुत्रस्तारानाथाह्वयो द्विजः । तर्कवाचस्पत्युपाधिं गुरुतो लब्धवान् स्वतः ॥
नगरे कलिकाताख्ये गवर्णमेण्टनिवेशिते । संस्कृतपाठशालाख्ये मठे पूर्वमधीतवान् ॥
काश्यादिनानास्थानेषु लब्धविद्यस्ततः क्रमात् । तत्रैव पाठशालायां तदध्यक्षेण पूर्वतः
पाणिन्यादिव्याकरणपाठनार्थे नियोजितः । पश्चात् दर्शनशास्त्रस्याध्यापनार्थापि योजितः ॥
प्रायस्त्रिंशद्वत्सरान्तं तत्कर्मानुष्ठितं मया । सिद्धान्तकौमुदीव्याख्या सरलाख्या तदा कृता ॥
तदैव तत्त्वकौमुद्या व्याख्याऽपि यत्नतः कृता । सिद्धान्तबिन्दुसारोऽपि शब्दस्तोममहानिधिः ॥

आशुबोधं व्याकरणं शब्दार्थरत्ननामकः। धातुरूपादर्शनामा ग्रन्थोऽपि रचितो मया॥
गायत्र्यर्थो विनिर्णीतः गयाश्राद्धादिपद्धतिः। वादो बहुविवाहस्य तुलादानादिपद्धतिः॥
राजप्रशस्ती रचिता कादम्बर्य्याश्च टिप्पनी। वेणीसंहारमुख्येषु विवृतिर्नाटकेषु च॥
एते ग्रन्था विनिर्माय मुद्रिता बहुयत्नतः। गवर्नमेण्टानुकूल्यञ्च क्वचिदेषु च मुद्रणे॥
तत्पदापसृतेनापि गवर्नमेण्टप्रकाल्पताम् अर्द्धवृत्तिं समासाद्य वाचस्पत्यं समापितम्॥
मुद्रणे व्ययबाहुल्यात् गवर्नमेण्टे निवेदिते। तद्दत्तव्ययसाहाय्यं लब्ध्वेदं मुद्रितं मया
अष्टादशभिरानायि वर्षैः पूर्तिं मयाधुना। शब्दरत्नमयः कोषो मोषदोषविवर्जितः।
नानाधातुरव्ययाढ्यो नानार्थोऽयं विराजताम्। वाचस्पत्याभिधो नानाशास्त्रार्थानां प्रदर्शकः॥
वाचस्पत्युपनाम्नाथ श्रीतारानाथशर्म्मणा। निरमायि प्रयत्नेन मुद्रायन्त्रैश्च मुद्रितः॥
बाणशून्यदन्तिचन्द्रविमिते शकवत्सरे। सौरपौषे षोड़शांशे मुद्रा तस्य समापिता॥
यदत्र स्खलितं किञ्चित् प्रमादेन भ्रमेण वा। तत्सर्वं शोधयन्त्वार्य्याः कस्य न स्खलितं मनः।
बहुच्छिद्रं परित्यज्य गुणलेशजिघृक्षया। परिगृह्णन्त्वदो विज्ञा ऋजवो दम्भवर्जिताः॥

एतस्य मुद्रणविधौ परिशोधनार्थे यत्ने कृतेऽपि बहुले भ्रमतः मादात्।
दृष्टेर्विकारवशतो यदशुद्धमस्ति संशोधयन्तु सुधियो नतियाचितास्तत्॥

अनुद्बोधाद्विस्मृता ये शब्दाः केचित् प्रमादतः। परिशिष्टे प्रकाश्यास्ते इत्याशा पूरको विभुः॥
ये शब्दाम्बुधिपारमापुरमलप्रज्ञातरीवैभवात् तानुद्दिश्य नमस्क्रियैव सततं तेभ्यो न चैषा क्रिया।
ये शास्त्रेऽकृतबुद्धयो निजधिया व्युत्पित्सवो मानवाः नानाकोषनिरीक्षणे श्रमभियस्तेभ्यो ममैषा क्रिया।
पदानुशासने रतं मुनित्रयं हृदा नतम्। तदस्य भूमिमण्डले करोतु सुप्रचारणम्॥ शिवम्

ओं तत्सत्।

इति कलिकातास्थगवर्नमेण्टसंस्कृतपाठशालीयदर्शनव्याकरणाध्यापकवर श्रीतारानाथतर्कवाचस्पति-
भट्टाचार्य्येण विरचितं वाचस्पत्याभिधमभिधानं समाप्तम्।

१८०५ शालिवाहन वत्सरे, १९४० विक्रमादित्यसंवत्सरे, १८८४ खृष्टाब्दे
कलिकातानगरे मुद्रितमभूत्।

Skylark Printers
K 2/8 MODEL TOWN DELHI - 9

PK
925
T37
v.6

Tarkavachaspati, Taranatha
Vācaspatyam

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY